शब्दकल्पद्रुमः।

अर्थात्

एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्रव्याख्यान-काव्यालङ्कार-छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सुप्रशस्तपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन सपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

तृतीयः काण्डः।

व्यञ्जनवर्णः। प—म।

कलिकाता राजधान्यां

रामनारायण-यन्त्रे मुद्रितः। ७१ नं पाथुरियाघाट-ष्ट्रीट् स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८१३

PRINTED BY K P BASU, RAMNARAYAN PRESS, AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU 71, PATHURIAGHATA STREET CALCUTTA

To be had at the Sabdakalpadruma Office, No 71 Pathuriaghata Street, Calcutta and at the Baptist Mission Press No 24 Lower Circular Road, Calcutta Price for Subscribers in India, Re 1 and Countries out of India 3s for each number

शब्दकल्पद्रुमः ।

तृतीयकाण्डम् ।

प, पकारः । स तु पवर्गस्य प्रथमो व्यञ्जनस्यैकविंशतितमो वर्णः । अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (तथा च शिक्षायाम् ।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू" ॥
अस्योच्चारणे आभ्यन्तरप्रयत्नः । ओष्ठेन सह जिह्वाग्रस्य स्पर्शः ॥) तत्पर्य्यायः । लोहितः २ पार्श्वः ३ शूरः ४ । इति रुद्रयामले वर्णाभिधानम् ॥ अस्य तत्त्वं यथा,—
"अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम् ।
चतुर्व्वर्गप्रदं वर्णं शरच्चन्द्रसमप्रभम् ॥
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली ।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा ॥
त्रिगुणावहितं वर्णमात्मादितत्त्वसंयुतम् ।
महामोक्षप्रदं वर्णं हृदि भावय पार्व्वति ।" ॥
इति कामधेनुतन्त्रे ५ पटलः ॥
(वङ्गभाषायां) अस्य लेखनक्रमो यथा,—
"कुञ्चिता वामरेखायाः कोणाद्दक्षिणतोऽपरा ।
कुञ्चिता सापि विज्ञेया मात्रा वामोन्नता तथा ॥
शम्भुब्रह्मा भगवती क्रमशस्तासु तिष्ठति" ॥
इति वर्णोद्धारतन्त्रम् ॥
अस्योत्पत्तिप्रकारो यथा,—
"ऋटुरेफषकाराश्च मूर्द्धगो दन्तगस्तथा ।
लृतवर्गलसाश्चोष्ठ्यानुपूपध्मानसंज्ञकाः" ॥
इति प्रपञ्चसारः ॥ तस्य ध्यानं यथा,—
"विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम् ।
रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम् ॥
मणिरत्नादिकेयूरहारभूषितविग्रहाम् ।
चतुर्व्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम् ॥
एवं ध्यात्वा पकारन्तु तन्मन्त्रं दशधा जपेत्" ॥
इति वर्णोद्धारतन्त्रम् ॥*॥ तस्य नामानि यथा ।
"पः पूःप्रियतमा तीक्ष्णा लोहितः पञ्चमो रमा ।
गुह्यकर्त्ता निधिः शेषः कालरात्रिः सुवाहिता ॥
तपनः पालनः पाता पद्मरेणुर्निरञ्जनः ।
सावित्री पालिनी पानं वीरतन्त्रो धनुर्द्धरः ॥
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः ।
उड्डीशं जयिनी कुम्भोऽलसं रेखा च मोहकः ॥
मूला द्वितीयमिन्द्राणी लोकाक्षी मन आत्मनः" ॥
इति नानातन्त्रशास्त्रम् ॥
(अनुबन्धविशेषः । यथा कविकल्पद्रुमे ।
'नः स्वादिः पो मुचादिर्भः शमादिर्म्मो णिचीश्वमोः' ।
तेन सुच ऌ श प चौ मोच इत्यस्य लटि सुच्चति ॥)

पः, पुं, (पातयति वेगेन वृक्षादीन् । पत् + कर्त्तरि डः । अन्तर्णिच् ।) पवनः । (पतति वृक्षात् । पत् + कर्त्तरि डः ।) पर्णम् । (पीयते इति ।) पानम् । पाता । इत्येकाक्षरकोषः ॥
(यथा, मनुः । २ । १३९ ।
"राजस्नातकयोश्चैव स्नातको नृपमानभाक्" ॥)

पक्कणः, पुं क्लीं, (पचति श्वादिनिकृष्टमांसमिति । पच + क्विप् । पक् शवरः तस्य कणः कलहशब्दः कोलाहलशब्दो वा यत्र ।) शवरालयः । इत्यमरः ॥ २ । २ । २० ॥ (यदुक्तम् ।
"मध्येविन्ध्याटवि पुरा पक्कणस्थजनाग्रणीः ।
पल्लीपतिरभूदुग्रः पिङ्गाक्ष इति विश्रुतः" ॥)

पत्तपौडः, पुं, वृक्षविशेषः । पखौड़ा इति हिन्दी भाषा । तत्पर्य्यायः । पञ्चदलः २ वर्द्धनः ३ पञ्चरचकः ४ । अस्य गुणाः । हृष्टाङ्गनविषौ शस्तत्वम् । कटुत्वम् । शीर्षज्वरापहत्वञ्च । इति राजनिर्घण्टः ॥

पक्ता, [ऋ] त्रि, (पचतीति । पच पाके + "ण्वुल्तृचौ" । ३ । १ । १३३ । इति तृच् ।) पाककर्त्ता ।
(यथा अथर्व्ववेदे । १० । ६ । ७ ।
"ये ते देवि । शमितारः पक्तारो ये च ते जनाः" ॥)
अग्नौ पुं । यथा । आग्नेये २ अध्यायः ॥*
"अन्नस्रष्टा च पक्ता च पचभोक्ता पुनः नमः" ॥

पक्तिः, स्त्री, (पच्यते परिणम्यते इति । भावे क्तिन् ।) गौरवम् । पाकः । इति मेदिनी ॥
(यथा, मनुः । ३ । ६७ ।
"वैवाहिकेऽग्नौ कुर्व्वीत गृह्यं कर्म्म यथाविधि ।
पञ्चयज्ञविधानञ्च पक्तिञ्चान्वाहिकीं गृही" ॥)

पक्तिशूलं, क्ली, (पक्तौ भुक्तस्यान्नादिकस्य परिणामे जायते यत् शूलं रोगविशेषः ।) परिणामशूलम् । तत्पर्य्यायः । पाकजम् २ परिणामजम् ३ । इति राजनिर्घण्टः ॥

पक्त्रं, क्ली, (पच्यतेऽनेन । पच् "गृधृवीपचिवचीति" । उणां ४ । १६६ । इति त्रः ।) गार्हपत्याग्निः । इत्युणादिकोषः ॥

पक्त्रिमं, त्रि, (पाकेन निर्वृत्तम् । डु पच पाक + "ड्वितः क्त्रिः" । ३ । ३ । ८८ । इति क्त्रिः । "क्त्रेर्म्मम् नित्यम्" । इति मम् ।) पाकिमम् । पाकाज्जातम् । इति त्रिकाण्डशेषः ॥

पक्वं क्ली, (पच्यते स्म । पच + क्त । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) सिद्धतण्डुलादि । तत्र पाकस्य विधिनिषेधादिर्यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अन्याशाभिमुखे पक्त्वा अनृतान्नं निबोध च ।
पूर्व्वमुखो धर्म्मकामः शोकहानिश्च दक्षिणे ॥
श्रीकामश्चोत्तरमुखो पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्त्वा दरिद्रो जायते नरः" ॥*॥
"यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्त्वा चतुर्हानिर्म्मणौ भवति वै क्षयम् ।
स्वर्णपात्रे तु यत् पक्वं अमृतं तदपि स्मृतम्" ॥*॥
"पितृभ्यां पक्वमन्नञ्च पितृव्येण यशस्विनि ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
मातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं शोणितं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत्" ॥*॥
"उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्द्देन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत् ।
गर्हितान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत् ॥
अप्रजा या तु वनिता नाश्नीयादेव तद्गृहे" ॥
"शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कलिकण्टकस्यैव वज्रावारणकस्य च ।
भेरण्डशाल्मलेश्चापि पक्वान्नं गर्हितं स्मृतम् ॥*॥"

"यद्वा मृण्मयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासं पक्षं तथाष्टौ च तत् पात्रं विस्तरेद्बुधौ" ॥*
"धनुःपाके तथा सिंहे मिथुने वा वरानने ।
यः कुर्य्याद्भोजनं देवि । कल्पकोटिं विशुध्यति" ॥*॥
"एकदा तु जलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत्" ॥
इति ॥ * ॥
"मोदकं कन्दपक्वञ्च शयाद्यं घृतसंयुतम् ।
पुनः पुनर्भोजनं च पुनरन्नं न दुष्यति" ॥
इति च मत्स्यसूक्ते महातन्त्रे ४२ पटलः ॥

पक्वं, त्रि, (पच्यते स्म यत् इति । पच + कर्म्मणि क्तः । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) परिणतम् । पाका इति भाषा ॥ (यथा, मनुः । ६ । १७ ।
"अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा" ॥)
निर्द्धाशम् । सुदृढमिति यावत् । यथा परिणता बुद्धिः । विनाशोन्मुखम् । प्रत्यासन्नविनाशम् । अतिपक्वयष्टिनष्टशस्यलाटौ निष्पक्वं काथितञ्च । चौराध्यपयसा पाके घृतम् । ईषत्पक्वं आपक्वम् । इत्यमरभरतौ ॥ (भावे क्तः । पाकः । परिणामः ॥)

पक्वकृत्, पुं, (पक्वं करोति वदनान्वितस्थलं परिणमयति निष्पिष्टपत्रत्वगादिभिरिति । कृ + क्विप् ततस्तुक् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (पक्वं करोति पचत्यन्नादिकमित्यर्थः ।) पाककर्त्तरि त्रि ॥

पक्वरसः, पुं, (पक्वस्य गुडान्नादेः रसः ।) मद्यम् । इति शब्दरत्नावली ॥

पक्ववारि, क्ली, (पक्वस्यान्नादेर्वारि यद्वा, पक्वं वारि स्विन्नसलिलमिति यावत् ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥ पक्ववारि इत्यपि पाठः । पक्वजलञ्च ॥

पक्वान्नं, त्रि, (पक्वमन्नम् ।) कृतपाकतण्डुलादि । यथा,
"आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" ।
इति तिथितत्त्वम् ॥
("यती च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ" ।
इति सदाचारः ॥)

पक्वाशयः, पुं, (पक्वस्य आमादेराशयः आधानम् । यद्वा पक्वं आमादिकं आशेतेऽत्र । पक्व + आ + शीङ् + आधारे + अप् ।) नाभ्यधोभागः । इति राजनिर्घण्टः ॥
"पक्वाशयस्त्वधो नाभेरूर्द्ध्वमामाशयः स्मृतः" ।
इति वैद्यकम् ॥

पक्ष, क परिग्रहे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट ।) क, पक्षयति । इति दुर्गादासः ॥

पक्ष, त् क परिग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) पक्षयति पक्षापयति । इति दुर्गादासः ॥

पक्षः, पुं, (पक्ष्यते परिगृह्यते देवपितृकार्य्यार्थ यः । यद्वा, पच्यते चन्द्रस्य पञ्चदशानां कलानामापूरणं क्षयो वा येन । पक्ष + घञ् । यद्वा, पचतीति इति । पच स्तुत्यादौ "ऋषिपच्योरकौच" । उणां ३ । ६८ । इति सः कत्वान्तादेशः ।) पञ्चदशाहोरात्राः । स च द्विविधः । शुक्लपक्षः पूर्व्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः । तद्भेदेन व्यवस्था यथा ।
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः" ॥
अत्रामावास्यावर्त्तितिथिक्षयवृद्धिभ्यां न व्यवस्था किन्तु रव्युदयास्तमयसम्बन्धात् शुक्लकृष्णपक्षाभ्यां व्यवस्था सा च युग्माद्यनाश्रिततिथिकर्म्मपरा सामान्यविशेषन्यायात्" । इति तिथ्यादितत्त्वम् ॥
पक्षिणामवयवविशेषः । पाखा इति भाषा । तत्पर्य्यायः । गरुत् २ छदः ३ पत्रम् ४ पतत्रम् ५ तनूरुहम् ६ ॥ शरपक्षः । तीरेर पाखा इति भाषा । तत्पर्य्यायः । वाजः २ । सहायः । कचात् परे समूहार्थः । यथा केशपक्षः । इत्यमरः ॥ (महाकालः शिवः । कालोपाधिभेदात् पक्षस्य तथात्वम् । यथा महाभारते । १३ । शिवसहस्रनामकीर्त्तने । १७ । १३८ ।
"ऋतुः संवत्सरो मासः पक्षः संख्या समापनः" ॥)
पार्श्वः । गृहम् । साध्यम् । (सन्दिग्धसाध्यवान् पदार्थः । यथा, भाषापरिच्छेदे । ७० । ७१ ।
"सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥)
विरोधः । बलम् । (यथा, पञ्चतन्त्रे । ३ । ६६ ।
"यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः ।
गुप्तैश्चरैर्नृपो वेत्ति न स दुर्गतिमाप्नुयात्" ॥)
सखा । चुल्लीरन्ध्रम् । राजकुञ्जरः । इति मेदिनी ॥
विहगः । वलयम् । शुद्धः । इति शब्दरत्नावली ॥
वर्गः । (सजातीयवृन्दम् । यथा, गोः रामायणे । २ । १८ । १३ ।
"भरतस्यापि वा पक्षं यो गृह्णीयाद्विचेतनः ।
तं पापमहमद्यैव प्रेषयामि यमक्षयम्" ॥)
पिच्छम् । देहाङ्गम् । इति हेमचन्द्रः ॥

पक्षः, [स्] क्ली, (पचतीति । "पचिवचिभ्यां सुट् च" । उणां । ४ । २१९ । इति असुन् सुट् च ।) गरुत् । यथा । पक्षसी च स्मृतौ पक्षौ । इति भरतधृतशुभाङ्कः ॥

पक्षकः, पुं, (पक्ष इव प्रतिकृतिः । "इवे प्रतिकृतौ" । ५ । ३ । ९६ । इति कन् ।) पक्षद्वारम् । पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खडकीद्वार इति भाषा । पार्श्वमात्रम् । इति मेदिनी ॥ सहायः । इति शब्दरत्नावली ॥

पक्षघातः } पुं, (पक्षस्य देहार्द्धस्य घातं विनाशं यस्मात् यत्र वा ।) स्वनामख्यात-
पक्षाघातः } वातरोगविशेषः । तल्लक्षणादि यथा,—
"गृहीत्वार्द्धं तनो वायुः शिराः स्नायुर्विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोक्षयन् ॥
कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः ।
एकाङ्गवातं तं केचिदन्ये पक्षवधं विदुः" ॥
अर्द्धं अर्द्धनारीश्वरवत् । पक्षं बाहुपार्श्वोरुजङ्घादिभागम् । अन्यतमं वामं दक्षिणं वा । विमोक्षयन् शिथिलीकुर्व्वन् । अकर्म्मण्यः कर्म्मासमर्थः । विचेतनः ईषत्स्पर्शादिज्ञानयुक्तः ॥*॥
अस्य साध्यासाध्यज्ञानायमाह ।
"दाहसन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्विते ।
शैत्यशोथगुरुत्वानि तस्मिन्नेव कफान्विते" ॥
दाहो बाह्यः । सन्तापः आभ्यन्तरः । एतच्च लक्षणमन्यत्रापि वातव्याधौ बोद्धव्यम् । सामान्यतो वायाविति निर्दिष्टत्वात् ॥ * ॥
पक्षाघातस्य साध्यत्वादिकमाह ।
"शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम्" ॥
शुद्धः केवलः । अन्येन पित्तेन कफेन वा । क्षयहेतुकं क्षयो धातुक्षयः । तत्कुपितं वातनिमित्तकम् ॥ * ॥ अपरमसाध्यलक्षणमाह ।
"गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ।
पक्षाघातं परिहरेत् वेदनारहितो यदि" ॥
वेदनारहितो यदीति भिन्नमसाध्यलक्षणम् ॥*॥
अथ तस्य चिकित्सा ।
"माषात्मगुप्तावातारिवाट्यालकजटाश्रृतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ।
माषिकं हिङ्गुसिन्धूत्थं जरणाद्यास्तु शाणिकाः" ॥
इति माषादिक्वाथः ॥ १ ॥
"ग्रन्थिकाग्निकशाशुण्ठीरास्नासैन्धवकल्कितम् ।
माषक्वाथशृतं तैलं पक्षाघातं व्यपोहति" ॥
इति ग्रन्थिकादितैलम् ॥ २ ॥
"माषात्मगुप्तानिर्गुण्डीरुबूक
रास्नाशताह्वालवणैः सपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं शृतं हन्ति हि पक्षघातम्" ॥
इति माषादितैलम् ॥३॥ इति भावप्रकाशः ॥०॥
पक्षाघातस्तु जन्मान्तरीयमहापातककृपणपापचिह्नविशेषः । यथा,—
"पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ॥
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकासा अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवा गदाः" ॥*॥
तत्प्रायश्चित्तं यथा,—
"लक्षमुच्चावचं पुष्पं प्रदद्यात् केशवार्च्चने ।
दद्यात् द्विजसहस्राय मिष्टान्नं द्विजभोजने" ॥
इति मलमासतत्त्वम् ॥ किञ्च ।
"कुनखी श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वा उद्धरेयातां तद्दन्तनखाविति । अत्र द्वादशरात्रपराकरूपम् । तत्र पञ्च धेनवः । न तु प्राजापत्यं तद्दाहकर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात् । अत्र बहूनामेकधर्म्मागामिति वचनादाकाङ्क्षितत्वात् कुष्ठादीनामपि प्रायश्चित्तम् । अत एव प्रायश्चित्तविवेकेऽप्युक्तम् । एवं दद्रुकर्म्मादिष्वप्यूह्यम्" । इति शुद्धितत्त्वम् ॥

पक्षचरः, पुं, (पक्षे शुक्लपक्षे चरतीति । चर + टः ।) चन्द्रः । पृथक्चारिगजः । इति मेदिनी ॥

पक्षजः, पुं, (पक्षे शुक्लपक्षे जायते इति । पक्ष + जन् + डः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

पक्षजन्मा, [न्] पुं, (पक्षे शुक्लपक्षे जन्म उत्पत्ति-

येस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ पक्ष-जाते त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्साविरह-विशिष्टसिद्ध्यभावः । इयमनुमितिकारणम् । तच्च पर्व्वते वह्न्यनुमितौ अनुमित्साविरहविशिष्ट-पर्व्वतधर्म्मिकवह्निनिश्चयाभावः । यथा,—

"सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥
इति भाषापरिच्छेदे । ७१ ॥

पक्षतिः, स्त्री, (पक्षस्य मूलम् । "पक्षात्तिः" । ५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं तिथितत्त्वे ।
"पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः" ॥) पक्षमूलम् । इत्यमरः । ३ । ३ । ७२ ॥ डानक इति भाषा ॥

पक्षद्वारं, क्ली, (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्व-द्वारम् । इत्यमरः । २ । २ । १४ ॥ खडकीद्वार इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । धृ + अच् ।) चन्द्रः । इति जटाधरः ॥ पक्षधारण-कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्याय्यसाहाय्ये पातः अभि-निवेशः । स्नेहसम्बन्धाद्यनुरोधेन एकस्मिन्नेव वर्गे आनुकूल्यप्रयोगचिकीर्षितभावः ।) अन्याय्य-साहाय्यकरणम् । (यथा रामायणे ७ । १०६ । ५७ ।
"कच्चिद्विवदतोऽर्थेषु बलिनो दुर्ब्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥) गणताकरणम् । यथा । "ईश्वरत्वविषये विपक्षितां पक्षपातकरणं न कारणम्" । इत्युत्तर-मीमांसायां संक्षेपशारीरम् ॥ (पक्षाणां गरुतां पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं "पक्षपातः पतङ्गानाम्" । इति विजयरक्षित. ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—
"न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिता
ऽनवलम्बे किमु मादृशेऽपि सा" ॥
इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य इति पक्षपाती खगस्तस्य भावः । पक्षपातनञ्च ॥)

पक्षपालि., पु, (पक्षस्य गृहस्य पालिरिव ।) खड्-किका । इति शब्दरत्नावली । खड़कीद्वार इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य पक्ष एव वा भागः ।) हस्तिपार्श्वभागः । इत्यमरः ।२।८।४० ॥

पक्षमूलं, क्ली, (पक्षस्य मूलम् ।) पक्षतिः । इत्य-मरः । २ । ५ । ३६ । डानक इति भाषा ॥

पक्षवाहनः, पु, (पक्षौ वाहनमिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षसुन्दरः, पुं, (पक्षे देहाङ्गे कुसुमे सुन्दरः ।) लोध्रः । इति हारावली ॥

पक्षान्तः, पुं, (पक्षस्य अन्तो यत्र काले ।) अमा-वस्या । पूर्णिमा । तत्पर्य्यायः । पञ्चदशी २ । इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविश्लेषः ३ पर्व्व ४ । इति राजनिर्घण्टः ॥ पक्षावसरः ५ । इति शब्दरत्नावली ॥ (अस्मिन् यात्रा निष्फला भवति । यदुक्तं ज्योतिस्तत्त्वे ।
'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्' ॥)

पक्षालुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अस्त्यर्थे आलुच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावसरः, पु, (पक्षस्यावसरोऽपसरणं यत्र काले ।) पूर्णिमा । अमावस्या । इति शब्द-रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्व्वापरदिने विद्येते यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥ यथा, शुद्धितत्त्वे ।
"द्वावह्नावेकरात्रिश्च पक्षिणीत्यभिधीयते" ॥
पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।) विहङ्गी । शाकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य पानार्थजलस्य शालिका शाला ।) [illegible]ताल-वालम् । पक्षिजलपानस्थानम् । इति भूरि-प्रयोगः ॥

पक्षिलः, पुं, (पक्षयति तत्त्वज्ञानं परिगृह्णातीति । पक्ष + काशादित्वात् इलच् ।) वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-वान् ॥)

पक्षिशाला, स्त्री (पक्षिणां शाला गृहम् ।) नीडम् । तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः पु, (पक्षी सिंह इव । उपमितसमासः । यद्वा, पक्षिषु सिंहः श्रेष्ठः । "सिंहशार्द्दूल-नागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्ते-स्तथात्वम् ।) गरुडः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पु, (पक्षिणां स्वामी प्रभुः ।) गरुडः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः कङ्कादीनां पत्राणि सन्त्यस्य । "अत इनिठनौ" । ५ । २ । ११५ । इति इनिः ।) वाणः । इति धरणिः ॥

पक्षी, [न्] पु स्त्री, पक्षौ विद्येते यस्य । (पक्ष + इनिः ।) विहङ्गमः ॥ पाखी इति चिडिया इति च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३ विहगः ४ विहङ्गमः ५ विहायाः ६ शकुन्तिः ७ शकुनिः ८ शकुन्तः ९ शकुनः १० द्विजः ११ पतत्री १२ पत्री १३ पतगः १४ पतन् १५ पत्ररथः १६ अण्डजः १७ नगौकाः १८ वाजी १९ विकिरः २० विः २१ विष्किरः २२ पतत्रिः २३ नीडोद्भवः २४ गरुत्मान् २५ पित्सन् २६ नभसङ्गमः २७ । इत्यमरः ।२।५।३४॥ नाडीचरणः २८ कण्ठाग्निः २९ पतङ्गः ३० अगौकाः ३१ वसुभृत् ३२ कुरवः ३३ मरकः ३४ । इति शब्दरत्नावली ॥ पिपतिषुः ३५ पत्रवाहः ३६ द्रुगः ३७ । इति राजनिर्घण्टः ॥*॥ गुरुभक्ष्यबहुभक्ष्य-स्थूलकायपक्षिणां पूर्व्वाङ्गस्य श्रेष्ठत्वं यथा,—
"गुरुभक्ष्या बहुभुजो ये चोपचितमेदसः ।
एकदेहेऽपि पूर्व्वाङ्गं मृगाणां पक्षिणां परम्" ॥*॥
पक्षिणामङ्गादीनामुत्तरोत्तरं गुरुत्वं यथा,—
"सर्व्वेषाञ्च शिरःस्कन्धक्रोडचर्म्मयकृद्गुदम् ।
पादपुच्छान्तमस्तिष्कमुष्कक्रोडाः समेहनाः ।
धातवः शोणिताद्याश्च गुरवः स्युः परस्परम्" ॥
अस्याङ्गगुणाः ।
"मत्स्यकूर्म्मखगाण्डानि स्वादुवाजीकराणि च ।
कटुपाकानि रुच्यानि वातश्लेष्महराणि च" ॥
इति राजवल्लभः ॥ * ॥ तेषामुत्पत्तिर्यथा,—
"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिसत्तमौ ॥
सम्पातिर्जनयत् गृध्रान् काकाः पुत्रा जटायुषः ।
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ॥
धृतराष्ट्री गरुत्मांस्तु शुभ्यां जज्ञे च षट् सुतान् ।
त्रिशिरश्च सुनेत्रश्च सुमुखं सुरसस्तथा ॥
सुरूपश्च सुपर्व्वाणं तेषां पुत्रा अनन्तकाः ।
चतुर्द्दशसहस्राणि क्रूराणां पन्नगाशिनाम् ॥
सप्तद्वीपेष्विमे सन्ति गारुडास्ते महाबलाः ।
भासीपुत्रास्तथा भासा उलूकाः काककुक्कुटाः ॥
मयूराः कलविङ्काश्च कपोतो चैव तित्तिरौ ।
क्रौञ्च्यां वाध्रीणसा आसन् कुररा सारसा बकाः ॥
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भामिनी ।
चक्रवाकांश्च विहगान् सर्व्वनानौदकान् द्विजान् ॥
अन्यानपि द्विजान् जज्ञे पुत्रपौत्राननन्तकान्" ॥
इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः । यथा, महाभारते १३ । शिवनामकीर्त्तने । १७।६६ ।
"पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः" ॥)

पक्ष्णुः त्रि पाककर्त्ता । पच + "स्नाम्नास्थाक्षि-पचपरिम्रुजः स्नुः" । इति स्नुप्रत्ययनिष्पन्न. । इति मुग्धबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली (पक्ष्यते परिगृह्यते आतपतापा-दिकमनेन । पक्ष + करणे मनिन् ।) अक्षिलोम । नेत्रच्छदरोम । (यथा, भागवते । ३ । १ । ३६ ।
"यमावुतस्वित् तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव" ॥)
किञ्जल्कः । केशरः । तन्त्वादेरणीयान् । सूत्राद्ये-रल्पभागः । इत्यमरभरतौ ॥ गरुत् । पक्षः । इत्यमरमाला ॥

पङ्कः, पु, क्ली (पच्यते व्याप्यते क्रियते वाऽनेन । पच् + घञ् कुत्वं च ।) कर्द्दमः । पाँक इति भाषा । (यथा, हितोपदेशे । १ । ६२ ।
"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संमृतो यथा" ॥
पच्यते व्यक्तीक्रियते दुःखमनेन । पचि विस्तारे व्यक्तीकरणे च । पचधातोरिदित्वात् नुम् । "हल-श्चेति" । ३ । ३ । १२१ । करणे घञ् ततो घित्वात् चस्य कुत्वम् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा अम्बाष्टके । ६ । "पङ्का-करे वपुषि कङ्कादिरक्तपुषि कङ्कादिपक्षिविषयं त्वं कामनामयसि किं कारणं हृदय । पङ्कारि-

भेदि गिरिणाम् ॥") पूर्व्वस्य गुणाः । पित्तास्रदाहनाशित्वम् । भग्नसन्धिहितत्वम् । हिमत्वञ्च । इति राजवल्लभः ॥ शोथघ्नत्वम् । सरत्वञ्च । इति भावप्रकाशः ॥

पङ्ककर्व्वटः, पुं, (पङ्केषु कर्व्वटो मनोहरः ।) जलयुक्तपङ्कम् । यथा, —
"चुलुकी घननम्राले दलाढ्ये पङ्ककर्व्वटः" ।
इति त्रिकाण्डशेषः ॥

पङ्ककीरः, पुं, (पङ्कप्रियः कीरः पक्षिविशेषः ।) कोयष्टिपक्षी । इति त्रिकाण्डशेषः ॥ (कादाखोँचा इति भाषा ॥)

पङ्कक्रीडः, पुं, (पङ्के पङ्केन वा क्रीडति य. । पङ्क + क्रीड + अच् ।) शूकरः । इति कश्चित् । कर्द्दमखेलके, त्रि ॥

पङ्कगडकः, पुं, (पङ्के स्थितो गडकः ।) मत्स्यविशेषः । पाँकाल इति भाषा । तत्पर्य्यायः । शकी २ । इति त्रिकाण्डशेषः ॥

पङ्कगतिः, स्त्री, (पङ्के गतिरस्य ।) पङ्कगडकमत्स्यः । इति शब्दमाला ॥

पङ्कग्राहः, पुं, (पङ्कस्थितो ग्राहः जलजन्तुभेदः ।) मकरः । इति हारावली ॥

पङ्कजं, क्ली (पङ्के पङ्कात् वा जायते इति । पङ्क + जन + कर्त्तरि + डः ।) पद्मम् । इति राजनिर्घण्टः ॥ (यथा रघुः । ३ । ८ ।
" तिरस्करार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोषयोः श्रियम्" ॥
अयं हि योगरूढशब्दः । यदुक्तम् ।
"रूढा गवादयः प्रोक्ता यौगिकाः पाचकादयः ।
योगरूढाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः" ॥)

पङ्कजन्म, [न्] क्ली (पङ्के जन्म यस्य ।) पद्मम् । इति त्रिकाण्डशेषः ॥

पङ्कजिनी, स्त्री, (पङ्कजानि सन्त्यस्याम् । "पुष्करादिभ्यो देशे" । ५ । २ । १३५ । इति इनिः ।) पद्माकरः ।
(यथा, मार्कण्डेये । ७५ । २४ ।
"तस्यर्त्तस्य तु या कान्तिर्जाता पङ्कजिनीसरः" ॥)
पद्मसमूहः । इति रत्नमाला हेमचन्द्रश्च ॥

पङ्कणः, पुं, (पङ्के मांसादिनिमित्तके पापाचारकर्म्मणि कणः कलङ्को यस्य सः । पृषोदरादित्वात् साधुः ।) पक्कणः । शवरालयः । इति शब्दरत्नावली ॥

पङ्कप्रभा, स्त्री, (पङ्कस्य प्रभा प्रकाशो यस्याम् ।) कर्द्दमयुक्तनरकविशेषः । इति हेमचन्द्रः ॥

पङ्कमण्डूकः, पुं, (पङ्के मण्डूक इव) शम्बूकः । इति हारावली ॥

पङ्करुट्, [ह्] क्ली, (पङ्के रोहतीति । पङ्क + रुह + क्विप् ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्करुहं, क्ली, (पङ्के रोहतीति । पङ्क + रुह् + "इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति कः ।) पद्मम । इति राजनिर्घण्टः ॥

पङ्कवासः, पुं, (पङ्के वासो यस्य सः ।) कर्कटः । इति राजनिर्घण्टः ॥ (मत्स्यादयोऽप्यत्र ॥)

पङ्कशुक्तिः, स्त्री, (पङ्के स्थिता या शुक्तिः ।) दुर्नामा । इति हारावली ॥ झिनुक इति भाषा ॥

पङ्कशूरणः, पुं, (पङ्के शूरण इव ।) शालूकः । इति त्रिकाण्डशेषः ॥

पङ्कारः, पुं, (पङ्कमृच्छति पङ्कं प्राप्य वर्द्धते इति यावत् । पङ्क + ऋ + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शैवलः । सेतुः । सोपानम् । जलकुब्जकः । इति मेदिनी ॥

पङ्किलः त्रि, (पङ्कोऽस्त्यस्मिन् । "लोमादिपामादिपिच्छादिभ्यः शनेलचः" । ५ । २ । १०० । इति इलच् ।) सकर्द्दमः । तत्पर्य्यायः । सजम्बालः २ । इत्यमरः । २ । १ । १० ॥ पङ्कयुक्तः ३ । इति शब्दरत्नावली ॥ कर्द्दमान्वितः ४ । इति जटाधरः ॥ (लक्षणया व्याप्तार्थेऽपि । यथा महाभारते ८ पर्व्वणि । "मांसमज्जास्थिपङ्किला मही" ॥)

पङ्केजं, क्ली, (पङ्के जायते इति । "सप्तम्यां जनेर्डः" । ३ । २ । ९७ । इति डः । "तत्पुरुषे कृति" । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इति त्रिकाण्डशेषः ॥

पङ्केरुहं, क्ली, (पङ्के रोहतीति । पङ्क + रुह + "इगुपधेति" । ३ । १ । १३५ । इति कः । "तत्पुरुषे कृति बहुलम" । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इत्यमरः ॥ १ । १० । ४० ॥ (यथा, भागवते । ७ । १५ । ६८ ।
"यत्पादपङ्केरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून्" ॥) सारसपक्षिणि, पुं ॥

पङ्क्तिः, स्त्री, (पच्यते व्यक्तीक्रियते श्रेणीविशेषेणेति यावत् । पचि + व्यक्तीकरणे + भावे + क्तिन् । इदित्वान्नुम । यद्वा, पञ्चयति विस्तारयति जातिसंस्थानविशेषमिति । पचि + विस्तारे + कर्त्तरि + क्तिच ।) सजातीयसंस्थानविशेषः । श्रेणि इति पाँति इति च भाषा । तत्पर्य्यायः । वीथी २ आलिः ३ आवलिः ४ श्रेणी ५ । इत्यमरः । २ । ४ । ४ ॥ वीथिः ६ आली ७ आवली ८ पङ्क्ती ९ श्रेणिः १० । इति भरतः ॥ धारणिः ११ सन्ततिः १२ । इति जटाधरः ॥ विस्रोली १३ मालिः १४ माली १५ वीथिका १६ । इति शब्दरत्नावली ॥
(यथा, मार्कण्डेये । ७३ । ३९ ।
'विलोक्या विशदा चैषा फलपङ्क्तिः सुभीषणा' ॥)
पञ्चाक्षरपादच्छन्दोविशेषः । तस्य लक्षणं यथा ।
"भ्गौगिति पङ्क्तिः" ॥१॥ उदाहरणं यथा, —
"कृष्णसनाथा तर्णकपङ्क्तिः ।
यामुनकच्छे चारु चचार" ॥
इति छन्दोमञ्जरी ॥ (पङ्क्तिच्छन्दस उत्पत्तिस्थानं यथा, भागवते । ३ । १२ । ४६ ।
"मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्" ॥
पञ्चकद्वयं परिमाणमस्य इति । "पङ्क्तिविंशतित्रिंशदिति" । ५ । १ । ५९ । निपातनात् प्रकृतेः पञ्चन्शब्दस्य टिलोपः तिप्रत्ययश्च ।) दशाक्षरपादच्छन्दः । दशसंख्या । इति मेदिनी ॥ (यथा, रघुः । १२ । ९९ ।
"तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम्" ॥)
पृथिवी । इति शब्दमाला ॥ गौरवम् । पाकः इति हेमचन्द्रः ॥ * ॥
अथ पङ्क्तिसाङ्कर्य्यदोषाः यथा, —
"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥
एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापने योनिस्तथैव सह भोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणां ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्" ॥ * ॥
पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा, —
"एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम् ।
भस्मना कृतमर्य्यादा न तेषां सङ्करो भवेत् ॥
अग्निना भस्मना चैव षड्भिः पङ्क्तिर्विभिद्यते'
इति कूर्म्मे १५ अध्यायः ॥

पङ्क्तिग्रीवः, पुं, (पङ्क्तिः दशसङ्ख्यका ग्रीवा यस्य ।) रावणः । इति शब्दरत्नावली ॥

पङ्क्तिचरः, पुं, (पङ्क्त्या श्रेणीबद्धः सन् चरतीति । पङ्क्ति + चर् + टः ।) कुररपक्षी । इति राजनिर्घण्टः ॥

पङ्क्तिदूषकः, पुं, (श्राद्धकाले भोजनार्थमुपविष्टानां व्रतस्नातानां ब्राह्मणानां पङ्क्तिं श्रेणीं दूषयति यः । पङ्क्ति + दुष + कर्त्तरि ण्वुल् ।) अपाङ्क्तेयः । श्राद्धभोजनानर्हब्राह्मणः । यथा, —
"अपाङ्क्तेयास्तु ये राजन् ! कीर्त्तयिष्यामि तान् शृणु ।
कितवः भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ।
अगारदाही गरदः कुण्डाशी सोमविक्रयी ॥
सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ॥
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ।
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः ॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ।
श्वभिश्च यः परिक्रामेत यः शुना दष्ट एव च ।
परिवित्तिस्तु यश्च स्याद्दुश्चर्म्मा गुरुतल्पगः ।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ॥
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मत
रक्षांसि गच्छते हव्यं यदेषान्तु प्रदीयते" ॥ *
"श्राद्धे भुक्त्वा महाराज । दुश्चर्म्मा गुरुतल्पग
श्राद्धं नाशयते तस्य पितरोऽपि न भुञ्जते ॥
सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप ।
भिषजे शोणितसमं नष्टं देवलके तथा ॥
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ।
वाणिज्यके दत्तं नेह नामुत्र तद्भवेत् ॥
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ।
ये तु धर्म्मव्यपेतेषु चारित्रापगतेषु च ॥
हव्यं कव्यं प्रयच्छन्ति तेषां तत् परिनश्यति ।
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ॥
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ।

एतान्विद्धि महाबाहो अपाङ्क्तेयान् द्विजाधमान्।
शूद्राणामुपदेशञ्च ये कुर्व्वन्त्यल्पबुद्धयः ॥
षष्टिं काणः शतं षण्ढः श्वित्री यावत् प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ।॥
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
असूयते च यद्दत्तं यच्च श्रद्धाविवर्ज्जितम् ।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन ॥"*॥
"तस्मात् परिवृते दद्यात्तिलांश्चान्वे विकीरयेत् ।
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च ॥
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ।
अपाङ्क्तेयागतः पङ्क्त्या भुञ्जानो नतु पश्यति।
तावत् फलाद्भ्रंशयति दातारं तस्य वाऽनिशम॥"
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः ॥

पङ्क्तिपावनः, पुं, (पङ्क्तिं श्राद्धोपलक्षे भोजनायोपविष्टानां वेदविद्याविशारदानां ब्राह्मणानां श्रेणीं पुनाति पावयति वा स्वोपवेशनेनेति । पङ्क्ति+पावि+ल्युः ।) श्रेणिपवित्रकर्त्ता । श्राद्धभोजनार्हब्राह्मणः । यथा,—
"इमे हि मनुजश्रेष्ठ। विज्ञेयाः पङ्क्तिपावनाः ।
विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः ।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दश पूरुषः ॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः ॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ।
मखेषु च समस्तेषु भवन्त्यवभृथप्लुताः ॥
अक्रोधना ह्यचपलाः क्षान्ता दान्ता जितेन्द्रियाः।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान् निमन्त्रयेत् ॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः ॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥
उपपन्ना गुरुकुले सत्यवादी सहस्रदः ।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च ।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः॥
ऋत्विगनुपाध्यायः स चेद्यासनं व्रजेत् ।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्व्विवर्ज्जितः ।
न च स्यात् पतितो राजन्। पङ्क्तिपावन उच्यते॥"
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः ॥
(पञ्चाग्निरप्ययम्। यथाह हारीतः ।
"पवनः पावनश्चेता यस्य पञ्चाग्नयो गृहे ।
सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः॥")

पङ्क्तिरथः, पुं, (पङ्क्तिषु दशसु दिक्षु गतो रथो यस्य ।) दशरथराजः । इति शब्दरत्नावली ॥ तथा च ।
"अयोध्यायां महाराजः पुरा पङ्क्तिरथो बली ।
तस्यात्मजो रामचन्द्रः सर्व्वभूपशिरोमणिः ॥"
इति पाद्मे पातालखण्डम् ॥ (तथा, रघुः।८।७४।
"नृपतेः प्रतिषिद्धमेव तत्
कृतवान् पङ्क्तिरथो विलङ्घ्य यत् ॥")

पङ्क्तिबीजः, पु, (पङ्क्तिभूतानि बीजानि यस्य सः ।) वर्व्वूरवृक्षः । इति राजनिर्घण्टः ॥

पङ्गुः, पुं, (खञ्जति गतिवैकल्यं प्राप्नोतीति । खजि गतिवैकल्ये । "बाहुलकात् कुः । खजयोः पगौ नुमागमश्च।" उणां। १।३७। इति पगौ नुमागमश्च । अस्य कक्षाया अत्युच्चतया बहुकालेन राशिभागादिभोगात् मन्दगतित्वादस्य तथात्वम् ।) शनैश्चरः । इति शब्दमाला ॥ (परिव्राट् । यथोक्तं चिन्तामणौ ।
"भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च ।
योजनान्न परं याति सर्व्वथा पङ्गुरेव सः ॥")

पङ्गुः, त्रि, (खजि गतिवैकल्ये । बाहुलकात् कुः । खस्य पत्वं जस्य गादेशः नुम् च । उणां १।३७।) जङ्घावैकल्येन चलनाक्षमः । तत्पर्य्यायः । श्रोणः २ । इत्यमरः।२।६।४८॥ जङ्घाहीनः३। इति शब्दरत्नावली ॥ (यथा, महाभारते ७।५।१२५।
"कच्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान् ।
पितेव पासि धर्म्मज्ञ । तथा प्रव्रजितानपि ॥"
यानहरणेनैव लोकः पङ्गुर्भवति । यथा, मार्कण्डेये । १५।३१ ।
"पुष्पापहृद्दरिद्रश्च पङ्गुर्यानापहृन्नरः ॥")
अस्य लक्षणं खञ्जशब्दे द्रष्टव्यम् ॥

पङ्गुलः, पुं, सितकाचाभघोटकः । इति हेमचन्द्रः ॥

पङ्गुल्यहारिणी, स्त्री, (सेवनेन पङ्गुत्वं पङ्गुत्वं हरति या । पङ्गुल+हृ+णिनि+ङीप् ।) शिम्बीक्षुपः । इति राजनिर्घण्टः ॥

पच, इ क ततौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) ततिरिह विस्तारवचनम् । इ क, पञ्चयति धीरो ग्रन्थार्थम् । इति दुर्गादासः ॥ (यथा, गीतगोविन्दे । १० । १३ ।
"व्यथयति वृथा मौनं तन्वि । प्रपञ्चय पञ्चमम् ।
तरुणि । मधुरालापैस्तापं विनोदय दृष्टिभिः ॥")

पच, इ ङ व्यक्तीकारे । (भ्वां आत्मं-सकं-सेट ।) इ, कर्म्मणि पञ्च्यते । ङ, पञ्चते स्वगुणं भिक्षुकः । इति दुर्गादासः ॥

पच, ङ औ व्यक्तीकारे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) औ, पक्ता । ङ, पचते स्वगुणं भिक्षुकः । इति दुर्गादासः ॥

पच, ङ् ञ औ ष पाके । इति कविकल्पद्रुमः ॥ (भ्वां उभं-द्विकं-अनिट् ।) पाको विक्लित्यनुकूलव्यापारः । ङु, पक्त्रिमम् । ञ, पचति पचते तण्डुलानोदनं लोकः । औ, पक्ता । ष, पचा । इति दुर्गादासः ॥

पचः, त्रि, पचति यः । (पच्+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।"३।१।१३४। इति अच् ।) पाककर्त्ता । इति व्याकरणम् ॥ स्वार्थे कनि पचकश्च ॥

पचतः पुं, (पचतीति । "भृमृदृशियजिपर्व्विपच्यमितमिनमिहर्य्योऽतच्।" उणां।३।११०। इति अतच् ।) सूर्य्यः । अग्निः । इन्द्रः । इत्युणादिकोषः ॥ (परिपक्वे, त्रि । यथा, ऋग्वेदे । १ । ६१ । ७ । "पचतं सहीयान् विध्यद्वराहं तिरो अद्रिमस्ता ॥")

पचतिकल्पं क्ली, (ईषदूनं पचतीति तिङन्तात् कल्पप् ।) ईषदूनस्य पाकस्य कर्त्ता । इति व्याकरणम् ॥

पचत्पुटः, पुं, (पचत् पुटमस्य ।) सूर्य्यमणिवृक्षः । इति शब्दचन्द्रिका ॥

पचन्, [त्] त्रि, (पचति यः । "लटः शतृशानचा-"३।२।१२४। इति शतृप्रत्ययः ।) पाककर्त्ता । इति व्याकरणम् ॥

पचनं, क्ली, (पच्यते इति । पच्+भावे ल्युट् ।) पाकः । (यथा, भागवते । ३ । २६ । ४० ।
"द्योतनं पचनं पानमदनं हिममर्द्दनम् ॥"
पच्यतेऽनेन इति पचेः करणे ल्युट् । पाकसाधनम् । यथा, ऋग्वेदे । १ । १६२ । ६ । "ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्त्तिर्न इन्वतु ॥")

पचनः, पुं, (पचत्यसौ इति । पच्+कर्त्तरि ल्युः ।) अग्निः । इति शब्दचन्द्रिका ॥ पाककर्त्तरि, त्रि ॥

पचनी, स्त्री, (भुक्तमजीर्णादिकं पच्यतेऽनया । पच् - करणे ल्युट् स्त्रियां ङीप् ।) वनबीजपूरकः । इति राजनिर्घण्टः ॥

पचन्ती, स्त्री (ओदनादीन् पचति या । पच्+शतृ । स्त्रियां ङीप् ।) पाककर्त्री । इति व्याकरणम् ॥

पचमानः, त्रि, (पचतेऽसौ इति । "लटः शतृशानचौ" । ३ । २ । १२४ । इति शानच् ।) पाककर्त्ता । इति व्याकरणम् ॥ (पु, वह्निः ॥)

पचम्पचा, स्त्री, (पचं पचं पचति । पचेः खश् ततो मुम् । स्त्रियां टाप् ।) दारुहरिद्रा । इत्यमरः । २ । ४ । १०२ ॥

पचा, स्त्री, (पच्यते इति पचेः षित्वादङ् ततष्टाप् ।) पाकः । इत्यमरः । ३ । २ । ८ ॥ (पचत्यसौ इति पचाद्यच् स्त्रियां टाप् । पाककर्त्री ॥)

पचिः, पु, (पचतीति । पच्+"सर्व्वधातुभ्यः इन् ।" उणां । ४ । ११७ । इति इन् ।) अग्निः । इति त्रिकाण्डशेषः ॥ पचनम् । इति संक्षिप्तसारव्याकरणम् ॥

पचेलिमः, पु, (पचत्यसौ इति । "पच एलिमच् ।" उणां । ४ । ३७ । इति एलिमच् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः ॥ कर्त्तरनायासेन स्वयं पक्वे, त्रि । (स्वयमेव पच्यते पचः कर्म्मकर्त्तरि केलिमप्रत्ययः ।) यथा, पचेलिमास्तण्डुलाः । इति मुग्धबोधव्याकरणम् ॥ (यथा च

मनौ । ४ । १७२ । श्लोकस्य टीकायां कुल्लूकभट्टः । "यथा भूमिरुप्तबीजमात्रा तदैव प्ररूढपर्व्वलिमफलब्रीहिस्तवकसमुज्ज्वलिता न भवति ॥")

पचेलुकः, पु, (पचत्योदनादीन् । पचो बाहुलकादेलुकः ।) सूदः । पाचकः । इति त्रिकाण्डशेषः ॥

पच्छः, [स्] अ, (वीप्सार्थे पादं पादमिति पद्भावः ततः शस् ।) पादं पादम् । इति संक्षिप्तसार व्याकरणम् ॥

पच्यमानः, त्रि, (पच्यतेऽसौ इति । पच + कर्म्मणि शानच् ।) वर्त्तमानपचनकर्म्मनाश्रयः । वर्त्तमानपाकविशिष्टतण्डुलादि । इति व्याकरणम् ॥

पज, इ रोधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट्-इदित् ।) रोध आवरणम् । पञ्जरः । सौत्रधातुरयम् । इति दुर्गादासः ॥

पज्जः, पु, (पद्भ्यां जातः । पद् + जन् + कर्त्तरि डः ।) शूद्रः । इति हेमचन्द्रः ॥ (शूद्रस्य पद्जातत्वमुक्तं श्रुतौ यथा,—

"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यत् वैश्यः पद्भ्यां शूद्रो अजायत ॥")

पज्झटिका, स्त्री, छन्दोविशेषः । तल्लक्षणं यथा,

"प्रतिपदयमकितषोडशमात्रा
नवमगुरुत्वविभूषितगात्रा ।
पज्झटिका पुनरत्र विवेकः
क्वापि न मध्यगुरुर्गण एकः ॥"

उदाहरणं यथा,—

"नवलवतंसामिलितस्कन्ध-
स्खलदुरुपज्झटिकाकटिबन्धः ।
मौलिचपलशिखिचन्द्रकवृन्दः
कालियशिरसि ननर्त्त मुकुन्दः ॥"

इति छन्दोमञ्जर्य्यां मात्रावृत्ताख्यः ५ स्तवकः ॥ (तथा च भगवच्छङ्कराचार्य्यकृतमोहमुद्गरे ४ ।

"मा कुरु धनजनयौवनगर्व्वम्
हरति निमेषात् कालः सर्व्वम् ।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा ॥"४॥)

पादघटिका । इति छन्दोमञ्जरीटीका ॥

पञ्च, [न्] त्रि, संख्याविशेषः । पाँच इति भाषा । बहुवचनान्तोऽयम् । इत्युणादिकोषः ॥ (यथा, मनुः । ११ । १६५ ।

"पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥")

तद्वाचकानि यथा । पाण्डवः १ शिवास्यम् २ इन्द्रियम् ३ स्वर्गः ४ अनलाग्निः ५ महापापम् ६ महाभूतम् ७ महाकायम् ८ मन्मथबाणः ९ पुराणलक्षणम् १० अङ्गम् ११ प्राणः १२ वर्गः १३ इन्द्रियार्थः १४ बाणः १५ । इति कविकल्पलता ॥ पञ्चसंख्याविशिष्टे, त्रि । यदुक्तम् । "संख्या संख्येये ह्यादश त्रिषु ।" इत्यमरः । ३ । ६ । ८३ ॥

पञ्चकं, त्रि, (पञ्चैव इति स्वार्थे कन् ।) पञ्च । यथा, भाषापरिच्छेदे । ३३ । "संख्यादि पञ्चकं कालदिशोः शब्दश्च ते च खे ।" इति ॥ (पञ्च संख्यापरिमाणमस्य । "तदस्य परिमाणम् ।" ५ । १ । ५७ । इत्यनुवृत्तौ "संख्यायाः संज्ञा संघसूत्राध्ययनेषु ।" ५ । १ । ५८ । इति पञ्चसंख्यापरिमितमिति संघार्थे कन् प्रत्ययः । धनिकादि पञ्चगत्यम् । यथाह चिन्तामणिः ।

"अग्निचौरभयं रोगो राजपीडा धनक्षतिः ।
संग्रहे तृणकाष्ठानां कृते वस्त्रादिपञ्चके ॥"

पञ्चभिः क्रीतम् । "संख्याया अतिशदन्तायाः कन् ।" ५ । १ । २२ । इति कन् । पञ्चभिः क्रीते द्रव्यविशेषे ॥)

पञ्चकपालः, पुं, पञ्चसु कपालेषु संस्कृतः पुरोडाशः । ("संस्कृतं भक्षाः ।" ४।२।१६ । इत्यण् ततो "द्विगोर्लुगनपत्ये ।" ४ । १ । ८८ । इत्यणो लुक ।) स तु यज्ञविशेषः । यथा । "परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति ।" इत्यादि यजुर्वेदीयश्रुतिः ॥ (पञ्चानां कपालानां समाहारः । परनिपातः ।) कपालपञ्चके, क्ली ॥

पञ्चकर्म्म, [न्] क्ली, (पञ्चानां कर्म्मणां समाहारः ।) पञ्चप्रकारशारीरिकचिकित्साविशेषः । यथा,—

"वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
पञ्चकर्म्मेदमन्यच्च क्षार उत्क्षेपणादिकम् ॥"

इति शब्दचन्द्रिका ॥ (भाषापरिच्छेदोक्तानि पञ्चकर्म्माणि । यथा तत्रैव ६ ।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥")

पञ्चकषायः, पु (पञ्चविधः कषायः । अथवा पञ्चानां वृक्षाणां कषायः उत्कलरसः । क्वचित्त्वयं बहुवचनान्तोऽपि दृश्यते । तत्र तु पञ्च च ते कषायाश्चेति एवमेव ।) महाज्ञानीयपञ्चप्रकारकषायद्रव्यम् । यथा,—

"जम्बुशाल्मलिवाट्यालं बकुलं बदरं तथा ।
कषायाः पञ्च विज्ञेया देयाः प्रीतिकराः शुभाः ॥"

इति दुर्गोत्सवपद्धतिः ॥

पञ्चकृत्यः, पु, (पञ्च विस्तृतं कृत्यं शाखापल्लवादिकं यत्र ।) पक्तपीत्वृक्षः । इति राजनिर्घण्टः ॥ (क्ली, पञ्च प्रपञ्चितं कृत्यं कार्य्यं सृष्ट्यादिकम् । सृष्टिस्थितिध्वंसविधानानुग्रहात्मकं कार्य्यम् इति भावः । यथाह चिन्तामणिः ।

"यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वद्भासते तं नुमः शिवम् ॥")

पञ्चकोलं, क्ली पाचनविशेषः । यथा,

"पञ्चकोलं कणामूलं कणाचव्याग्निनागरैः ।"

इति शब्दचन्द्रिका ॥ अस्य गुणाः ।

"पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम् ।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् ।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम् ॥"

इति भावप्रकाशः ॥ अपि च ।

"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"

इति चक्रपाणिदत्तः ॥ (पञ्चकोलघृतमुक्तं चरके चिकित्सितस्थाने १८ अध्याये ।

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
सक्षारैरर्द्धपलिकैर्द्विः प्रस्थं सर्पिषः पचेत् ॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च ।
दधिमण्डानकोपेतं तत्सर्पिर्जठरापहम् ।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत् ॥")

पञ्चकोषाः, पु, (पञ्च च ते कोषाश्चेति ।) कोषा इवात्माच्छादकत्वेन कोषाः । ते च पञ्चविधाः । यथा । अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोषः १ ॥ पञ्चकर्म्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोषः २ ॥ पञ्चज्ञानेन्द्रियसहितं मनः मनोमयकोषः ३ ॥ पञ्चज्ञानेन्द्रियसहिता बुद्धिः विज्ञानमयकोषः ४ ॥ अहङ्कारात्मकोऽविद्यात्मको वा आनन्दमयकोषः ५ ॥ इति शिवगीतामतम् ॥ * ॥ अपि च ।

"पितृभुक्तान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते ।
देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः ॥"

इत्यन्नमयकोषः १ ॥

"पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्त्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्ज्जनात् ॥"

इति प्राणमयकोषः २ ॥

"अहन्तां ममतां देहे गृहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥

इति मनोमयकोषः ३ ॥

"लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥"

इति विज्ञानमयकोषः ४ ॥

"काचिदन्तर्मुखावृत्तिरानन्दप्रतिबिम्बभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम् ॥"

इत्यानन्दमयकोषः ५ ॥ इति पञ्चदशी ॥

पञ्चक्षारगणः, पु, (पञ्चानां क्षाराणां गणः ।) क्षारपञ्चकम् । पञ्चलवणम् । यथा,—

"क्षारैस्तु पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः ।
काचसैन्धवसामुद्रविट्सौवर्च्चलकैः समैः ॥
स्यात् पञ्चलवणं तच्च मल्लोपेतं षडाह्वयम् ॥"

इति राजनिर्घण्टः ॥

पञ्चखट्वं, क्ली स्त्री, (पञ्चानां खट्वानां समाहारः ।) पञ्चखट्वाः समाहृताः । इति व्याकरणम् ॥

पञ्चगणयोगः, पु, (पञ्चानां गणो यत्र स एव योगः ।) त्रिफला गन्धा वृहती पृश्निपर्णी निदिग्धिका श्वदंष्ट्रा एता मिलिताः । इति राजनिर्घण्टः ॥

पञ्चगव, क्ली स्त्री, पञ्चानां गवां समाहारः । (समासे टच् ।) पञ्चगावः समाहृताः । इति व्याकरणम् ॥

पञ्चगवधनः, त्रि, पञ्च गावो धनं यस्य । इति मुग्धबोधव्याकरणम् ॥

पञ्चगव्यं, क्ली, (गोर्विकारः गव्यम् । पञ्चगुणितं गव्यम् ।) गोसम्बन्धिपञ्चप्रकारद्रव्यम् । (यथा मनुः । ११ । १६५ ।

"भक्ष्यभोज्यापहरणे यानशय्यासनस्य च ।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥")

मस्तु गोमयगोमूत्रदुग्धदधिघृतरूपम् । यथा,—
"पञ्चगव्यं दधिक्षीरघृतगोमूत्रगोमयैः ।" इति
शब्दचन्द्रिका ॥ * ॥ तत्परिमाणं यथा,—
"पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतञ्च पलमात्रं स्यात् गोमयं तोलकत्रयम् ॥
दधि प्रसृतमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथवा पञ्चगव्यानां समानो भाग इष्यते ॥"
इति गौतमीयतन्त्रम् ॥ * ॥ अपि च ।
"गोशकृद्द्विगुणं मूत्रं पयः स्याच्चतुर्गुणम् ।
घृतं तद्द्विगुणं प्रोक्तं पञ्चगव्ये तथा दधि ॥" * ॥
तस्य पानफलं यथा,—
"पञ्चगव्येन पूतस्तु वाजिमेधफलं लभेत् ।
गव्यन्तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥
सौम्ये मुहूर्त्ते संयुक्ते पञ्चगव्यन्तु यः पिबेत् ।
यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ॥"
गव्यानां देवप्रीतिकरत्वं यथा,—
"दध्ना हि त्रिदशाः सर्व्वे क्षीरेण च महेश्वरः ।
घृतेन पावको नित्यं पायसेन पितामहः ॥
मधुदत्तेन प्रीयन्ते वर्षाणाञ्च त्रयोदश ।
तां दत्त्वा चैव पीत्वा च प्रेतो मेध्यस्तु जायते ॥"
इति वराहपुराणम् ॥ * ॥
तस्य विशेषो यथा,—
"पयः काञ्चनवर्णाया श्वेतवर्णाश्च गोमयम् ।
गोमूत्रं ताम्रवर्णाया नीलवर्णाभवं घृतम् ॥
दधि स्यात् कृष्णवर्णाया दर्भोदकसमायुतम् ।
गोमूत्रमाषकाण्यष्टौ गोमयस्य चतुष्टयम् ॥
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश उच्यते ।
घृतस्य माषकाः पञ्च पञ्चगव्यं मलापहम् ॥"
इति गारुडे प्रायश्चित्तप्रकरणम् ॥

पञ्चगुः, त्रि, पञ्चभिर्गोभिः क्रीतः । इति मुग्धबोधव्याकरणं द्विगुसमासः ॥

पञ्चगुप्तः, पुं, (पञ्चानामिन्द्रियाणां चापल्यं गुप्तं यत्र । यद्वा पञ्चानां पदार्थानां गुप्तः गोपनं यत्र ।) चार्व्वाकदर्शनम् । (करौ चरणौ शिरश्चेति पञ्चाङ्गानि गुप्तानि अस्य ।) कच्छपः । इति मेदिनी ॥

पञ्चगुप्तिरसा, स्त्री, (पञ्चधा गुप्तौ रसोऽस्याः ।) स्पृक्का । इति राजनिर्घण्टः ॥

पञ्चचामरं, क्ली, षोडशाक्षरपादकच्छन्दोविशेषः । यथा, -
"प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥"
इति छन्दोमञ्जरी ॥४॥ (अस्योदाहरणमाह तत्रैव ।
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ॥
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥")

पञ्चचीरः, पुं, (पञ्च चीराण्यस्य । बौद्धधर्म्मावलम्बि-जिनभेदः । पञ्च चीराणि स्वरभेदा अस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

पञ्चचूडा, स्त्री, (पञ्चसङ्ख्याकाः चूडाः शिरोरत्नानि यस्याः ।) अप्सरोविशेषः । इति पुराणम् ॥ (यथा, रामायणे । ६ । ८२ । ७१ ।
"उर्व्वशी मेनका रम्भा पञ्चचूडा तिलोत्तमा ।
उपानृत्यंस्तु काकुत्स्थं प्रहृष्टा रक्षसो वधात् ॥")

पञ्चजनः, पुं, (पञ्चभिर्भूतैर्जन्यतेऽसौ । पञ्च + जन् + कर्म्मणि घञ् । "जनिवध्योश्च" ।७।३।३५। इति न वृद्धिः ।) पुरुषः । इत्यमरः । २ । ६ । १ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३५५ ।
"सद्भावश्राद्धिका देवस्तेन श्रीशब्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन् निवेशिताः ॥")
दैत्यविशेषः । स च संह्रादस्य कृतौ पत्न्यां जातः । (यथा, श्रीभागवते । ६ । १८ । १४ ।
"संह्रादस्य कृतिर्भार्य्याऽसूत पञ्चजनं ततः ॥"
अपरो दैत्यभेदः । श्रीकृष्णेन एनं हत्वा सान्दीपनिमुनये अस्य मृतं पुत्रं गुरुदक्षिणास्वरूपं ददौ । यथा, भागवते । ३ । ३ । २ ।
"सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य सविस्तरम् ।
तस्मै प्रादात् वरं पुत्रं मृतं पञ्चजनोदरात् ॥")
अस्यास्थ्ना पाञ्चजन्यनामा शङ्खो जातः । स च श्रीकृष्णस्य । यथा, -
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥"
इत्यादि श्रीभगवद्गीतायाम् । १ । १५ ॥ (प्रजापतिः । यथा, भागवते । ६ । ४ । ५१ ।
"एषा पञ्चजनस्याङ्ग ! दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश ! प्रतिगृह्यताम् ॥"
सगरराजपुत्रः । यथा, हरिवंशे । १५ । ६ ।
"केशिन्यसूत सगरादसमञ्जसमात्मजम् ।
राजा पञ्चजनो नाम बभूव स महाबलः ॥"
गन्धर्व्वाः पितरो देवा असुरा रक्षांसि पञ्चजनपदवाच्यानि भवन्ति । इति निरुक्तम् ॥)

पञ्चजनी, स्त्री, पञ्चानां जनानां समाहारः ततो ङीप् । इति व्याकरणम् ॥ (विश्वरूपकन्या । यथा, भागवते । ५ । ७ । १ । "तत्रानुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥")

पञ्चजनीनः, पुं, (पञ्चसु जनेषु साधुः । दिक्सङ्ख्ये संज्ञायामिति समासः । पञ्चजने हितम् । पञ्चजनादुपसङ्ख्यानमिति खः । पा । ५ । १ । ९ । वार्त्तिकं ।) भण्डः । इति हलायुधः ॥ पञ्चजनसम्बन्धिनि पञ्चजन्याः प्रभौ च त्रि ॥

पञ्चज्ञानः, पुं, (पञ्चानां पदार्थानां ज्ञानमस्य ।) बुद्धः । इति हेमचन्द्रः ॥

पञ्चतक्षं, क्ली क्ली, पञ्चानां तक्ष्णां समाहारः । इति व्याकरणम् ॥

पञ्चतत्त्वं, क्ली, (पञ्चानां तत्त्वानां समाहारः ।) पञ्चभूतम् । इति स्वरोदयः ॥ पञ्चमकारः । मद्यमांसमत्स्यमुद्रामैथुनरूपम् । यथा, -
"मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ॥
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥"
इति कैवल्यतन्त्रे प्रथमपटलः ॥ वैष्णवानां यथा,—
"तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः ।
गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि ! ॥
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने ! ।
तत्रादौ श्रीगुरोस्तत्त्वं कथयिष्यामि पार्व्वति ! ॥
सतैलं वर्त्तिकायुक्तं देहस्थं ब्रह्मतेजसम् ।
गुरुणा मन्त्रदानेन तत्स्वच्छं दीपितं भवेत् ॥
देवतायाः शरीरं हि मन्त्रादुत्पद्यते ध्रुवम् ।
अत एव हि तस्यात्मा देवरूपो न संशयः ॥
ईश्वरस्य तु यद्वीर्य्यं तदेव अक्षयात्मकम् ।
तेन वर्णात्मकं देहं जन्तोरेव न संशयः ॥
मन्त्रवर्णाः सर्व्ववर्णमयास्ते परमेश्वरि ! ।
वर्णतत्त्वमिदं देवि ! सर्व्वस्वं मम यद्भवेत् ॥
स्वयं देवो न चान्योऽस्ति निर्म्मलो देवरूपकः ।
सर्व्वत्र देवतां ध्यायेत् हृत्पङ्कजमलतादिषु ॥
ध्यानेन लभते सर्व्वं ध्यानेन विष्णुरूपकः ।
ध्यानेन सिद्धिमाप्नोति विना ध्यानं न सिध्यति ॥
इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि ! ।
यज्ज्ञानादमरत्वञ्च विष्णुरूपी भवेन्नरः ॥
ते नरा नहि गच्छन्ति कदाचिद्यममन्दिरम् ॥"
इति निर्व्वाणतन्त्रे १२ पटलः ॥

पञ्चतपाः, [स्] त्रि, (अग्न्यादिभिः पञ्चभिस्तेजःपदार्थैस्तपति यः । पञ्च - तप + असुन् ।) अग्निचतुष्टयसूर्य्यपञ्चकसाधनयोगविशिष्टः । यथा,
"तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥"
इति माघे । २ । ५१ ॥

पञ्चतयं, त्रि, (पञ्च अवयवा यस्य । अवयवे तयप् ।) पञ्चावयवम् । इति व्याकरणम् ॥

पञ्चतन्मात्रं, क्ली, (पञ्चगुणितं शब्दादिभूतसूक्ष्मात्मकं तन्मात्रम् ।) तामसाहङ्कारोत्पन्नमहाभूतोपादानकारणशब्दस्पर्शरूपरसगन्धाः । तद्व्यवहारोऽपि च । इति सांख्यभाष्यम् ॥

पञ्चता, स्त्री, (पञ्चानां भूतानां भावः । पाञ्चभौतिकस्य शरीरस्य पञ्चधाभावे आरम्भकाणां भूतानां तत्तद्भावापत्तौ सत्यां औपचारिकत्वात् ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ (यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं तत्कृतं जानता ते ।
नरहर उपनीतः पञ्चतां पञ्चविंश ! ॥")
देहारम्भकाणां पृथिव्यादिपञ्चमहाभूतानां स्वांशसंक्रमणात् पृथक्त्वम् । इति भरतः ॥ पञ्चभावः । इति मेदिनी ॥ (यथा, मनुः । ८ । १५१ ।
"धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् ॥")

पञ्चतिक्तं, क्ली, (पञ्चगुणितं तिक्तम् ।) तिक्तद्रव्यपञ्चकम् । यथा । निम्बामृतावृषपटोलनिदिग्धिका । इत्यादि चक्रपाणिदत्तः ॥

पञ्चतीर्थी स्त्री (पञ्चानां तीर्थानां समाहारः । ङीप् ।) तीर्थपञ्चकम् । यथा । "विषुवद्दिवसं प्राप्य पञ्चतीर्थीविधानतः ।" इति तिथितत्त्वम् । पञ्चतीर्थान्याह । (तानि च भिन्नदेशे भिन्नरूपाणि, तत्र काश्यांस्थानि । यथा, काशीखण्डे । १० । ३८—४० ।
"ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत ।
तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ॥")

पुरुषोत्तमस्थानि यथा,—
“मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥”
इति तीर्थतत्त्वम् ॥ * ॥ अपि च । नाना-
स्थानस्थानि यथा,—
“पृथिव्यां यानि तीर्थानि सर्व्वाण्येवाभिषेचनात् ।
तत्पञ्चतीर्थस्नानेन समं नास्त्यत्र संशयः ॥
एकादश्याञ्च विश्रान्तौ द्वादश्यां शौकरे तथा ।
त्रयोदश्यां नैमिषे च प्रयागे च चतुर्द्दशी ॥
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते ।
कालिन्दीषु नरः स्नात्वा सर्व्वं पापं व्यपोहति ॥”
इति वराहपुराणम् ॥

पञ्चत्वं, क्ली, (पञ्चानां क्षित्यादिभूतानां भावः ।)
मरणम् । पञ्चानां भावः । इति हेमचन्द्रः ॥
(“पञ्चधासम्भृतः कायो यदि पञ्चत्वमागतः ।
पञ्चभिः स्वगुणैरेतैस्तत्र का परिवेदना” ॥
तथा, भागवते । १ । १५ । ४१ ।
“त्यागावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ॥”)

पञ्चदशः, त्रि, पञ्चदशानां पूरणः । (पूरणे डट् ।
पञ्चाधिका दश यत्र वा ।) पोनेर इत्यादि
भाषा । तत्संख्यामात्रवाचित्वे नित्यबहुवच-
नान्तोऽयम् । इति व्याकरणम् ॥ तद्वाचकशब्दः ।
(यथा, अथर्व्ववेदे । ११ । १ । १९ । “पितामहाः
पितरः प्रजोपप्रजाः पञ्चदशास्ते अस्मि ॥”)
तिथिः । इति कविकल्पलता ॥

पञ्चदशी, स्त्री, (पञ्चदशानां पूरणी । डट् ।
ङीप् ।) पूर्णिमा । अमावास्या । इति
मेदिनी ॥ (यथाह याज्ञवल्क्यः । १ । १४६ ।
“पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥”
(पञ्चदशप्रकरणानि सन्त्यस्याम् ।) श्रीमद्भारती-
तीर्थविद्यारण्यमुनीश्वरकृतो वेदान्तग्रन्थविशेषः ॥

पञ्चदीर्घं, क्ली, (शरीरस्य स्मृतिशास्त्रोक्तलक्ष-
णकपञ्चस्थलं दीर्घं यत्र अवयवेषु दीर्घलक्ष-
णकमित्यर्थः ।) शरीरपञ्चावयवलक्षणविशेषः ।
यथा,—
“बाहू नेत्रद्वयं कुक्षिर्द्वे तु नासे तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥”
इति सामुद्रकम् ॥

पञ्चधा, व्य, (पञ्चन् + “संख्याया विधार्थे धा ।”
५ । ३ । ४२ । इति धा ।) पञ्चप्रकारम् । इति
व्याकरणम् ॥ (यथा, भागवते । ८ । १९ । ३७ ।
“धर्म्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥”)

पञ्चनखः, पुं, (पञ्च नखा यस्य ।) हस्ती । कूर्म्मः ।
इति हेमचन्द्रः ॥ व्याघ्रः । इति राजनिर्घण्टः ॥*॥
भक्षणीयपञ्चनखा यथा,—
“शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः ॥”
इति स्मृतिः ॥
(तथाच याज्ञवल्क्यः । १ । १७७ ।
“भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः ।
शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥”)
“पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः ।
कौशल्याज शशादीनां तेषां नैकोऽप्यहं कपिः ॥”
इति भट्टिः । ६ । १३१ ॥

पञ्चनदः, पुं, (पञ्च पञ्चसङ्ख्याकाः नद्यः सन्त्यत्र ।
समासे टच् ।) पञ्चनदीयुक्तदेशविशेषः ।
पञ्जाब इति पारस्यभाषा । तस्य नामान्तरम् ।
वाह्लीकः मद्रदेशश्च । ता नद्यो यथा । शतद्रुः
१ विपाशा २ इरावती ३ चन्द्रभागा ४ वितस्ता
५ । इति पुराणम् ॥
(यथा, राजतरङ्गिण्याम् । ४ । २४८ ।
“रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसङ्गमैः ॥”)
पञ्चानां नदीनां समाहारे क्ली ॥ (यथा,
रामायणे । ३ । ४३ । २१ ।
“ततः पञ्चनदं क्लान्तं विचेतव्यं समन्ततः ॥”
तच्च काशीस्थनदीपञ्चकरूपं तीर्थम् । यथा,
काशीखण्डे । ५९ । ११३—११६ ।
“किरणाधूतपापे च तस्मिन् धर्म्मनदे शुभे ।
स्रवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभद्रवे ॥
ततो भागीरथी प्राप्ता तेन दिलीपिना सह ।
भागीरथी समायाता यमुना च सरस्वती ॥
किरणाधूतपापा च पुण्यतोया सरस्वती ।
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्त्तिताः ।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥”
तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७६ ।
“अथ पञ्चनदं गत्वा नियतो नियताशनः ।
पञ्चयज्ञानवाप्नोति क्रमशो येऽनुकीर्त्तिताः ॥”
असुरभेदः । यथा, हरिवंशे । १२० । ८८ ।
“हत्वा पञ्चनदं नाम नरकस्य महासुरम् ॥”)

पञ्चनिम्बं, क्ली, (पञ्चानां स्वीयपुष्पमूलादि
रूपाणां निम्बानां समाहारः ।) निम्बवृक्षस्य
पत्रत्वक्पुष्पफलमूलानि । इति राजनिर्घण्टः ॥
“पञ्चनिम्बन्तु तत्पुष्पमूलवल्कफलच्छदैः ॥”
इति शब्दचन्द्रिका ॥

पञ्चनी, स्त्री, (पञ्चानि प्रपञ्चानि पाशक्रीडा-
नियमो यत्र । पचि विस्तारे + ल्युट् स्त्रियां
ङीप् ।) शारिफलकम् । इति शब्दरत्नावली ॥
(पाशार छक इति भाषा ॥)

पञ्चनीराजनं, क्ली पञ्चानां नीराजनानां समा-
हारः । पञ्चप्रकारारात्रिकम् । इति कालोत्तर-
तन्त्रम् ॥ अस्य विवरणं नीराजनशब्दे द्रष्टव्यम् ॥

पञ्चपक्षी, [न्] पु, (अकारादि-ओकारान्ताः
अ इ उ ए ओ रूपाः पञ्चस्वराः पक्षिणः पक्षि-
स्वरूपा यत्र ।) पारिभाषिकपक्षिपञ्चकद्वारा
त्रिकालबोधकशास्त्रग्रन्थः । यथा,—
“प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम् ।
भविष्यदर्थबोधाय पप्रच्छ गिरिजा मुदा ॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः ।
त्रिकालज्ञानबोधार्थं पञ्चपक्षी प्रदर्श्यते ॥
अनेन शास्त्रसारेण लोकैः कालत्रयं प्रति ।
बलाबलानि दृश्यन्ते सर्व्वकार्य्येषु निश्चितः ॥
आगतं प्रच्छकं दृष्ट्वा दैवज्ञः सावधानतः ।
यद्यत् करोति कर्म्माणि तस्मात् सर्व्वं विचारयेत् ॥
ऊर्द्ध्वावलोकने जीवश्चाधोदृष्टौ तु मूलकम् ।
समदृष्टौ भवेद्धातुरेताश्चिन्ताप्रभेदतः ॥”
तत्र ।
“ललाटे पुत्त्रचिन्ता स्यात् कामचिन्ता च कण्ठके ।
बाह्वोर्वस्तुचिन्ता च व्याधिचिन्ता तथोदरे ॥
कटौ विच्छेदचिन्ता च शत्रुचिन्ता च गुह्यके ।
दुःखचिन्ता भवेत् पादे एते चिन्ताप्रभेदकाः ॥”*॥
अपरञ्च ।
“अक्षरं पक्षिभुक्तञ्च दिग्दैवतदिनानि च ।
कालं वर्णं बलं मित्रं धातुमूलादिकं क्रमात् ॥
आरूढप्रश्नलग्नेभ्यः प्रथमाक्षरतोऽपि वा ।
प्रच्छकस्य वचः श्रुत्वा शास्त्रो वर्णः स्वरस्तथा ॥*॥
स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते ।
पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः ॥”*॥
“अकारादिओकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः
शुक्लार्थे कल्पयेद्रूपं स्वरास्ते पक्षिरूपिणः ॥
अकारः श्येन आख्यात इकारः पिङ्गलस्तथा ।
उकारो वायसश्चैव एकारस्ताम्रशेखरः ।
ओकारो नीलकण्ठश्च स्वरास्ते पक्षिसंज्ञकाः ॥
अकारः पूर्व्वदिग्भागे इकारश्चैव दक्षिणे ।
उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा ॥
शेषस्थानेषु सर्व्वेषु ओकारस्तु प्रकीर्त्तितः ।
शकुनानां क्रियाशक्त्या दाने युद्धे जयाजयौ ॥
प्राक्श्येनः पिङ्गला याम्ये पश्चिमे काक उच्यते ।
उत्तरे ताम्रचूडश्च कलापी मध्यगः स्मृतः ॥
ऊष्माणाक्षरैर्हीनान् ककारादींस्तु विन्यसेत् ।
अकारादिषु ह्यन्तांस्तानेकैकं षट् परिक्रमात् ॥
अस्वरे ककहा वर्णा धभवाश्च भवन्ति हि ।
खजढा नमशा वर्णा इकारे परिकीर्त्तिताः ।
गझताः पयषा वर्णा उस्वरे स्युर्यथाक्रमम् ॥
घटथाः फरसा एते वर्णा एस्वरमाश्रिताः ।
चठदा बलङा वर्णा ओस्वरे परिकीर्त्तिताः ॥*॥
प्रथमे रविभौमौ च द्वितीये चन्द्रचन्द्रजौ ।
तृतीये जीववारश्च चतुर्थे भृगुवासरः ॥
पञ्चमे मन्दवारश्च पक्षिणां क्रमशो लिखेत् ।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्
अकारे मेषसिंहालि: इः कन्यायुग्मकर्कटाः ।
उकारे चापमीनौ च एकारे च तुलावृषौ ॥
ओकारे मृगकुम्भौ च एव राशिश्च संलिखेत् ।
स्वराधः स्थापयेत् खेटान् राशौ यो यस्य नायकः ।
अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ।
पञ्च पञ्च इकारादावेवमन्त्यं स्वरोदये ॥ * ॥
प्रथमे चाश्विनी पूर्व्वं पञ्चनक्षत्रमुच्यते ।
अतः क्रमात् द्विषट् चैव पञ्च पञ्च च तारकाः ॥*
स्वराणाञ्च क्रमेणैव देवताः परिकीर्त्तिताः ।
ईश्वरः पवनश्चैव इन्द्राकाशः सदाशिवः ॥ * ॥
प्राच्यां पृथ्वी गुरुश्चैव याम्यां शुक्रो जलं तथा ।
अङ्गारकः पश्चिमेऽग्निर्बुधो वायुस्तथोत्तरे ॥
सूर्य्यपुत्रस्तथाकाशे ऊर्द्ध्वमेवं लिखेत्ततः ।
क्षितौ ब्रह्मा जले विष्णुस्तथा वह्नौ हुताशने ॥
ईश्वरः पवने चैव तथाकाशे सदाशिवः ।
भूतो मयूरः कुलजः कुक्कुटो धर्म्ममानकः ॥

बलिभुक्श्येनकौ ख्यातौ भविष्यन्तौ सुनिश्चितम् ।
श्येनो हिरण्यवर्णश्च पिङ्गलः शुक्लवर्णकः ॥
काको रक्तोऽसितश्चित्रः कुक्कुटः श्यामलः शिखी ।
काको बलीयान् सर्व्वेभ्यस्तस्मात् श्येनो हि दुर्ब्बलः ॥
कुक्कुटो दुर्ब्बलस्ताभ्यां पिङ्गलस्तेभ्य ऊनकः ।
सर्व्वेभ्यो दुर्ब्बलः पक्षी नीलकण्ठो न संशयः ॥
बली मयूरात् कुजस्तु ताम्रचूडस्तयोर्ब्बली ।
एतेभ्यो बलवान् श्येनश्चतुर्णां वायसो बली ॥ * ॥
मित्रं मयूरः श्येनस्य मयूरस्य च पिङ्गलः ।
ताम्रचूडस्य सुहृदौ मयूरपिङ्गलौ तथा ॥
वायसस्यापि मित्रं स्यात् शिखी भवति सर्व्वदा ।
सुहृदौ पिङ्गलश्येनौ मयूरारुणशेखरौ ॥ * ॥
काककुक्कुटश्येनाश्च पिङ्गलस्य च विद्विषः ।
मयूरस्य रिपू नित्यं सर्व्वदा श्येनवायसौ ॥
भवतः श्येनकाकौ द्वौ ताम्रचूडस्य विद्विषौ ।
काकस्य शत्रवो नित्यं पिङ्गलश्येनकुक्कुटाः ॥ * ॥
ऊर्द्ध्वदृष्टिर्भवेत् जीवो ह्यधोदृष्टिस्तु मूलकम् ।
समदृष्टिर्भवेद्धातुरेते चिन्ताप्रभेदकाः ॥ * ॥
श्येनो मूलं तथा कुजो जीवो धातुश्च वायसः ।
कुक्कुटो मूलजीवौ च मूलधातू शिखण्ड्यपि ॥ * ॥
श्येनो नरो वधूः कुजः पुरुषो वायसस्तथा ।
कुक्कुटः स्त्री पुमांश्चैव शिखी नपुंसकस्तथा ॥ * ॥
श्येनकुजौ द्विजश्रेष्ठौ महीपालस्तु वायसः ।
ताम्रचूडो वणिक् शूद्रो नीलकण्ठस्तथान्त्यजः ॥ * ॥
चतुष्पात् पिङ्गलो ज्ञेयो द्विपदौ श्येनवायसौ ।
ताम्रचूडो नखी शृङ्गी शिखण्डी पक्षिजीवकः ॥ * ॥
श्येनो मुखं कण्ठबाहू कुजो वक्षस्तु वायसः ।
कुक्कुटः पृष्ठभागः स्यात् शिखी पादयुगं क्रमात् ॥ *
श्येना भूम्यां धनं ज्ञेयं पिङ्गलो जलपङ्कयुक् ।
वायसस्तृणमध्यान्ते कुक्कुटो भस्मनावृतम् ॥
श्येनः शिखी गृहानर्थं बन्धुस्थानेषु निश्चितम् ।
स्वग्रामे श्येनकुजौ तु वायसो बन्धुमाप्नुयात् ॥
कुक्कुटः परदेशे च परग्रामे तथा शिखी ।
कुजस्तु दशहस्ते च त्वर्द्धक्रोशे तु कुक्कुटः ॥
द्विक्रोशे तु तथा काकः श्येनः क्रोशे तु पूर्व्वतः ।
मयूरो योजने चेति तथैव दूरनिश्चयः ॥ * ॥
भुक्तौ च मासो गमने च पक्षो
राज्ये दिनानि त्वयनन्तु सुप्ते ।
मृते च वर्षं शकुनस्य चर्य्या
कालप्रमाणं मुनयो वदन्ति ॥
शुक्रे चन्द्रे गुल्मवल्ली लताकन्दौ बुधे तथा ।
पत्रं गुरौ फलं सूर्य्ये मूलञ्च रविजे कुजे ॥ * ॥
शुक्रे चन्द्रे भवेद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमेव च ॥
भौमे ताम्रं शनौ लौहं राह्वावस्थीनि कीर्त्तयेत् ।
एतेषां धातुभेदश्च वाराणामुदयक्रमात् ॥ * ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदस्थानमिष्टकानिलयो बुधे ॥
दग्धस्थानं कुजे प्रोक्तं शनौ राहौ च वाह्यभूः ।
अमीभिश्चिह्नके स्थाने नष्टभूमिं विलोकयेत् ॥ * ॥
रवौ भौमे च भेरुण्डो मयूरो वायसः शनौ ।
पादायुधः शिखी शुक्रे काककुजौ गुरौ तथा ॥
कुजकुक्कुटाविन्दुज्ञौ क्रमोऽयं शुक्लकृष्णयोः ।
यस्य वारस्य यः पक्षी तदादिं गणयेद्बुधः ॥
दिनपक्षी कार्य्यरूपी प्रश्नपक्षी फलप्रदः ।
दिनेषु शुक्लपक्षे यत् कृष्णे रात्रिषु तत्तथा ॥
कृष्णे दिनेषु यद्यत्तत् शुक्ले रात्रिषु योजयेत् ।
बालः कुमारस्तरुणो वृद्धो मृत इति क्रमात् ॥
घटिका षट् षड़ेव हि फलमेषामुदीरितम् ।
किञ्चिल्लाभकरो बालः कुमारश्चार्द्धलाभदः ॥
तरुणो राज्यदो वृद्धो हानिदो मृत्युदो मृतः ।
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
एकान्तरे भवेत् कृष्णे शुक्ले स्यात् क्रमशो विदुः ।
पक्षिणां क्रमशो ज्ञात्वा फलं ब्रूयात् यथा तथा ॥
गणयेत् पञ्चपक्ष्यादौ जातभूतगणाद्यपि ॥”
शुक्लपक्षे ॥ * ॥ ततः कृष्णपक्षे ।
“भोजनं मरणञ्चैव निद्रा राज्यं तथैव च ।
गमनं पञ्चपक्षाणां कृष्णपक्षे क्रमो दिवा ॥ * ॥
राज्यं सुभिक्षमक्षोभं नष्टलाभं सदा जयम् ।
रोगमुक्तं महालाभं पक्षिणां भुक्तिलक्षणम् ॥ * ॥
अनायासेन वृष्टिः स्यादष्टधनसञ्चयः ।
भूलाभो रोगनाशश्च यात्रासिद्धौ रणे जयः ॥
दूरादागमनं योगः प्रयाणे पक्षिलक्षणम् ।
राज्योदये यदि प्रश्नो लाभार्थे स्वल्पलाभदः ॥
रुजानां चिररोगः स्यात् याने हानिः क्षयो रणे ।
पुरग्रामप्रवेशश्च गमनं कलहं तथा ।
मनश्चञ्चलमारोग्यं गमनेषु विचारयेत् ॥ * ।
राज्यलाभो जयं सौख्यमक्षोभं रोगनाशनम् ।
सुभिक्षं बहुवृष्टिश्च पक्षिणां राज्यलक्षणम् ॥ * ॥
यात्राहानिरनावृष्टिः कार्य्यहानिरदर्शनम् ।
व्याधिश्च दीर्घरोगश्च पक्षिणां सुप्तिलक्षणम् ॥
अपमृत्युभयञ्चैव सर्व्वकार्य्यविनाशनम् ।
एतदेव फलं ब्रूयात् पक्षिणां मृत्युलक्षणम् ॥ * ॥
श्येने भोक्तरि काकस्तु पान्थो राजा भुजङ्गभुक् ।
स्वप्नावस्थां गतः कुजः परासुस्ताम्रशेखरः ॥ * ॥
काके भोक्तरि केकी तु पान्थः स्यात् पिङ्गलो नृपः ।
ताम्रचूडस्तथा स्वापी श्येनः कालवशं गतः ॥ * ॥
मयूरे भोक्तरि तथा कुजो यात्रावशं गतः ।
महीपः कुक्कुटः श्येनः स्वापी काको वशं गतः ॥
कुजे भोक्तरि पान्थस्तु कुक्कुटः श्येनको नृपः ।
काको निद्रावशं यातो मयूरो मरणं गतः ॥ * ॥
कुक्कुटे भोक्तरि श्येनः पान्थो राजा तु वायसः ।
शिखी निद्रावशं यातः पिङ्गलः कालमाप्नुयात् ॥”
इति कृष्णपक्षस्य दिवाक्रमः शुक्लपक्षस्य रात्रिक्रमश्च ॥ स्वरोऽपि यथा । अगुमोदिते । उक्कोदितेन । ओमित्यवायुः । इत्येव जुहो । एवमुक्तोऽसि ॥ * ॥
“श्येने भोक्तरि कुजः स्यात् पान्थः काको महीपतिः ।
ताम्रचूडो निद्रितश्च शिखी कालवशं गतः ॥ * ॥
मयूरे भोक्तरि श्येनः पान्थः कुजो महीपतिः ।
स्वप्नावस्थां गतः काकस्ताम्रचूडो मृतस्तथा ॥ * ॥
कुक्कुटे भोक्तरि शिखी सदा गमनमाप्नुयात् ।
श्येनो महीपतिः कुजः स्वापी काको मृतिं गतः ॥ * ॥
काके भोक्तरि यात्रायां ताम्रचूड़ः शिखी नृपः ।
निद्रायां रमते श्येनः कुजः कालवशं गतः ॥ * ॥
कुजे भोक्तरि यात्रायां वायसः कुक्कुटो नृपः ।
नीलकण्ठस्तथा स्वापी श्येनो मृत्युवशं गतः ॥”
इति शुक्लपक्षस्य दिवाक्रमः कृष्णपक्षस्य रात्रिक्रमश्च ॥ * ॥ स्वरोऽपि यथा । अहिपुरेभोः । गोकरिपुरे । एकोनरिपुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः ॥ * ॥
“इत्युक्तं पक्षिणां कार्य्यं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावद्गर्ज्जन्ति शास्त्राणि शकुनानामनेकशः ।
यावन्न श्रूयते पक्षिशकुनं शङ्करोदितम् ॥”
इति श्रीमहादेवविरचितं पञ्चपक्षिशाकुनं समाप्तम् ॥

पञ्चपर्णिका, स्त्री, (पञ्च पञ्च पर्णान्यस्याः । ततः कप् कापि अतः इत्वम् ।) गोरक्षीक्षुपः । इति राजनिर्घण्टः ॥

पञ्चपल्लवं, क्ली, (पञ्चानां पल्लवानां समाहारः ।) आम्रादिपत्रपञ्चकम् । यथा,—
“आम्रजम्बुकपित्थानां बीजपूरकविल्वयोः ।
गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम् ॥”
इति शब्दचन्द्रिका ॥
वैदिककर्म्मणि घटोपरिदेयपञ्चपल्लवं यथा,— आम्राश्वत्थवटपर्क्कटीयज्ञोडुम्बराणि । तान्त्रिक-कर्म्मणि पञ्चपल्लव यथा,—
“पनसाम्रं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमुक्तञ्च मुनिभिस्तन्त्रवेदिभिः ॥”
इति तन्त्रसारः ॥

पञ्चपात्रं, क्ली, पञ्चानां पात्राणां समाहारः । इति व्याकरणम् ॥ पञ्चपात्रकरणकपार्व्वणविधिकश्राद्धम् । तत्तु अन्वष्टकाश्राद्धम् । अमावस्यामृतप्रेतपक्षमृतसाम्वत्सरिकं सपिण्डीकरणञ्च । इति लोकप्रसिद्धम् ॥

पञ्चपित्तं, क्ली, (पञ्चविधं पित्तम् ।) पित्तपञ्चकम् । यथा,—
“वराहच्छागमहिषमत्स्यमायूरपित्तकम् ।
पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु ॥”
इति वैद्यकम् ॥

पञ्चप्रदीपः, पुं, (पञ्चसंख्यकाः प्रदीपा यत्र ।) पञ्चदीपयुक्तारात्रिकम् । यथा,—
“कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः ।
हरेः पञ्चप्रदीपेन बहुशो भक्तितत्परः ॥”
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

पञ्चप्रासादः, पुं, (प्रसीदन्ति मनांसि अत्र । प्र + सद् । अधिकरणे घञ् । “उपसर्गस्य दीर्घत्वं क्विपघञादौ क्वचिद्भवेत् ।” इति वचनात् दीर्घः । पञ्चचूडान्वितः प्रासादः । मध्यपदलोपिकर्म्मधारयः ।) देवगृहविशेषः । पञ्चरत्न इति ख्यातः । यथा,—
“पर्कटर्काचनं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो व्रजेद्दिवम् ॥”
इत्यग्निपुराणम् ॥

पञ्चबन्धः, पुं (पञ्चमः बन्धः भागो यत्र ।) नष्टद्रव्यस्य पञ्चमांशदण्डः । यथा,—
"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते ॥"
आगमेन विक्रयक्रयादिना । उपभोगेन च मदीयमिदं द्रव्यं तत्रैवं नष्टमपहृतं वेत्यपि । भाव्यं साधनीयं तेन स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते । पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो माणिकेन राज्ञे देयः ।
इति मिताक्षरा ॥

पञ्चभद्रः, पुं, (पञ्चसु अङ्गभेदेषु भद्रः शुभः पुष्पितत्वात् ।) पञ्चस्थानेषु पुष्पितोऽश्वविशेषः । यथा,—
"पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ॥"
इति हेमचन्द्रः ॥ पाचनविशेषः । यथा,—
"छिन्नोद्भवापर्पटवारिवाह-
भूनिम्बशुण्ठीजनितः कषायः ।
समीरपित्तज्वरजर्ज्जराणां
करोति भद्रं खलु पञ्चभद्रः ॥"
इति शार्ङ्गधरः ॥

पञ्चभूतं, क्ली, पञ्चानां भूतानां क्षित्यप्तेजोमरुद्व्योम्नां समाहारः । (केचित्तु संज्ञाप्रयुक्तत्वात् पञ्च च तानि भूतानि चेति कर्म्मधारयसमासमाहुस्तत्र तु एकवचनमचिन्तनीयम् ।)
अस्योत्पत्तिर्यथा ।
"अभूत्तस्मादहङ्कारस्त्रिविधः सृष्टिभेदतः ।
वैकारिकादहङ्काराद्देवा वैकारिका दश ॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।
तैजसादिन्द्रियाण्यासंस्तन्मात्रा क्रमयोगतः ।
भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे ॥"
इति शारदायां प्रथमपटलः ॥ * ॥
"सोऽहङ्कारस्त्रिभेदः स्यात् सत्त्वादिगुणयोगतः ।
वैकारः सात्त्विको नाम तैजसो राजसः स्मृतः ॥
भूतादिस्तामसस्तेषु पृथक्तत्त्वाद्यवान्तरम् ।
वैकारिकाद्दिगाद्याश्च चन्द्रान्ताद्या दश स्मृताः ॥
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः ।
यत्तापरं मनस्तत्त्वं सङ्कल्पविकल्पकम् ॥
तैजसादेव तन्मात्रमिन्द्रियाणि तथा दश ।
भूतादेः पञ्चतन्मात्राण्यासन् भूतमतः परम् ॥"
इति राघवभट्टधृतम् ॥ * ॥
"शब्दादेशात्स्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्वह्निरेते रसाच्च ।
अम्भांस्येतैर्गन्धतो भूधराद्या
भूताः पञ्च स्युर्गुणोनाः क्रमेण ॥"
इति प्रपञ्चसारे प्रथमपटलः ॥ * ॥
"आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः ।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही ॥"
(तथा च श्रुतिः ।
"तस्मादेतस्मादाकाशः सम्भूतः । आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत ॥"
एतच्छ्रुत्यवलम्बनेन मनुनाप्युक्तम् । १ । २० । यथा,—
"आद्याद्यस्य गुणन्त्वेषामवाप्नोति परःपरः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥"
अत्र कुल्लूकभट्टः ।
"आद्याद्यस्याकाशादेर्गुणं शब्दादिकं वाय्वादिः परः परः प्राप्नोति । एतदेव स्पष्टयति यो यः इति येषां मध्ये यो यो यावतां पूरणो यावतिथः वतोरिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुणः इत्येवमादिर्मन्वादिभिः स्मृतः । एतेनैतदुक्तं भवति । आकाशस्य शब्दो गुणः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगन्धा इति ॥")
तस्य लयप्रकारो यथा, -
"मही संलीयते तोये तोयं संलीयते रवौ ।
रविः संलीयते वायौ वायुर्नभसि लीयते ।
पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वे तत्त्वं विलीयते ॥"
इति ब्रह्मज्ञानतन्त्रनिर्व्वाणतन्त्रे ॥ * ॥
तदुद्भवास्थ्यादि यथा,—
"अस्थिमांसनखाश्चैव नाडी त्वक् चेति पञ्चमः ।
पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च ।
तोयपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
हासो निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च ।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
धारणं चालनं क्षेपः सङ्कोचः प्रसरस्तथा ।
वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
कामक्रोधस्तथा लोभस्तथा मोहश्च पञ्चमः ।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥"
इति ब्रह्मज्ञानतन्त्रे प्रथमपटलः ॥ * ॥
पञ्चभूतनक्षत्राणि यथा, —
"धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा ।
अभिजिच्चोत्तराषाढा पृथ्वीतत्त्वमुदाहृतम् ॥
पूर्व्वाषाढा तथाश्लेषा मूलार्द्रा चैव रोहिणी ।
उत्तरभाद्रपदा तोयं आपस्तत्त्वशुभोदयम् ॥
भरणी कृत्तिका पुष्या मघा पूर्व्वा च फल्गुनी ।
पूर्व्वभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये ॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्व्वसुः ।
अश्विनी मृगशीर्षा च वायुतत्त्वमुदाहृतम् ॥"
इति स्वरोदयः ॥

पञ्चमं, क्ली, मैथुनम् । यथा,—
"भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ।
तस्य नाम भवेद्देवि पञ्चमं परिकीर्त्तितम् ॥"
इति समयाचारतन्त्रे द्वितीयपटलः ॥

पञ्चमः, त्रि, पञ्चानां पूरणः । (पूरणे डट् ततः 'नान्तादिति मट् ।) पाँच इत्यादि भाषा । इति मेदिनी ॥ (यथा, मनुः । ८ । १२५ ।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥")
रुचिरः । दक्षः । इति हेमचन्द्रः ॥

पञ्चमः, पुं, पञ्चानां स्वराणां पूरणः । तन्त्रीकण्ठोत्थितस्वरविशेषः । इत्यमरः ॥ स तु षड्जादिसप्तस्वराणां पञ्चमः स्वरः । तस्योत्पत्तिर्यथा,—
"वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ॥"
इति तट्टीकायां भरतः ॥ अपि च ।
"प्राणोऽपानः समानश्च उदानो व्यान एव च ।
एतेषां समवायेन जायते पञ्चमः स्वरः ॥"
इति सङ्गीतदामोदरः ॥ अस्य जातिः औडव पञ्चस्वरमिलित इति यावत् । अस्य कूटतान विंशत्यधिकशतम् १२० प्रत्येकताने चत्वारिंश ४० । समुदायेन चतुःसहस्राष्टशतानि ४८०० तानाः भवन्ति । अस्योच्चारणजातिः पिकः । उच्चारणस्थानं उरः गलः शिरश्च । व्याकरणमते अधरः । अयं विप्रवर्णः । इति शु मानविवेकलक्षणम् ॥ अस्य रूपं इन्द्रकु तुल्यम् । वर्णः श्यामः । स्थानं क्रौञ्चद्वीपम् । देवता महादेवः । वारो बृहस्पतिः । सम स्त्रिंशत्पलाधिकाष्टौ घटिकाः । श्रुत चत्वारः क्षितिः रक्ता सन्दीपनी आलापि च । मूर्च्छनास्तिस्रः यमली निर्म्मली कोमल च । इति नादपुराणम् ॥ * ॥ रागभेदः । इ मेदिनी ॥ अयं कल्लिनाथमते सोमेश्वरमते षड्रागाणां मध्ये तृतीयरागः । सोमेश्वरम अस्य गानसमयः शरदृतुः प्रातःकालश्च । कल्लिनाथमते अस्य रागिण्यः षट् । यथा, त्रिवे १ स्तम्भतीर्था २ आभीरी ३ ककुभ् ४ वरा ५ सावीरी ६ । सोमेश्वरमते तु विभासा भूपाली २ कार्णाटी ३ बड़हंसिका ४ मालश्री ५ पटमञ्जरी ६ । अस्मिन् रागे गान्धार स्वरस्तीव्रः । ऋषभपञ्चमौ स्वरौ लुप्तौ । षड्ज स्वरः ग्रहांशन्यासाः । स च हनुमन्मते भरत मते च भैरवरागस्याष्टमपुत्रः । इति सङ्गीत शास्त्रम् ॥

पञ्चमकारं, क्ली, (पञ्चसंख्यकं मकारं तत्त्वं यत्र । म मांसमित्यादिषु आदौ मकारस्थितत्वात्तथात्वम् ।) मकारपञ्चकम् । पञ्चतत्त्वम् । तत्तु मुद्रामैथु मद्यमांसमत्स्यरूपम् । यथा,---
"मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ।
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥"
इति गुप्तसाधनतन्त्रे ७ पटलः ॥ * ॥
"मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि ।
स्त्रीभिः सार्द्धं महासाधुरर्च्चयेज्जगदम्बिकाम् ॥
अन्यथा च महानिन्दा गीयते पण्डितैः सुरैः ।
कायेन मनसा वाचा तस्मात्तत्त्वपरो भवेत् ॥"
इति कामाख्यातन्त्रे ५ पटलः ॥ * ॥
"या सुरा सर्व्वकार्य्येषु कथिता भुवि मुक्तिदा
तस्या नाम भवेद्देवि ! तीर्थं पानं सुदुर्लभम् ॥
शुद्धायां भक्ष्ययोग्यानां यन्मांसं देवनिर्म्मितम् ।
वेदमन्त्रेण विधिवत् प्रोक्ता सा शुद्धिरुत्तमा ॥
भक्ष्ययोग्याश्च कथिता ये ये मत्स्या वरानने ।
ते रहस्ये मया प्रोक्ता मीनाः सिद्धिप्रदायकाः

पृथुकास्तण्डुला भ्रष्टा गोधूमचणकादय: ।
तस्य नाम भवेद्देवि । मुद्रा मुक्तिप्रदायिनी ॥
भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ।।
तस्य नाम भवेद्देवि । पञ्चमं परिकीर्त्तितम् ॥
प्रथमन्तु भवेन्मद्यं मांसञ्चैव द्वितीयकम् ।
मत्स्यञ्चैव तृतीयं स्यान्मुद्रा चैव चतुर्थिका ॥
पञ्चमं पञ्चमं विद्यात् पञ्च ते नामत: स्मृता: ॥"
इति समयाचारतन्त्रे २ पटल: ॥ * ॥

अथ मद्यादिव्युत्पत्ति: ।
"मायामलादिशमनान्मोक्षमार्गनिरूपणात् ।
अष्टदु:खादिविरहान्मद्यमिति परिकीर्त्तितम् ॥
माङ्गल्यजननाद्देवि । संविदानन्ददानत: ।
सर्व्वदेवप्रियत्वाच्च मांस इत्यभिधीयते ॥
पञ्चमं देवि । सर्व्वेषु मम प्राणप्रियं भवेत् ।
पञ्चमेन विना देवि । चण्डीमन्त्रं कथं जपेत् ॥
यदि पञ्चमकारेषु भ्रान्तिर्येन कुरुते प्रिये ।।
तस्य सिद्धि: कथं देवि । चण्डीमन्त्रं कथं जपेत् ॥
आनन्दं परमं ब्रह्म मकारास्तस्य सूचका: ॥"
इति कुलार्णवतन्त्रे पञ्चमखण्डे १७ उल्लास: ॥*॥
तेषां शोधनादिकं बाहुल्यभिया लोकमोह-भयाच्च नोक्तम् ॥

पञ्चमहायज्ञा:, पुं, (पञ्चविधा महायज्ञा: ।) गृहस्थकर्त्तव्यपञ्चप्रकारनित्यकर्म्माणि । यथा,—
"पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलि: ।
एतै: पञ्च महायज्ञा ब्रह्मयज्ञादिनामकै: ॥"
इत्यमर: । २ । ७ । १४ ॥
(तथा च मनु: । ३ । ६८-७० ।
"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्कर: ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभि: ।
पञ्चक्लृप्ता महायज्ञा: प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञ: पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥")

पञ्चमार:, पुं, (पञ्चसु इन्द्रियेषु म्रियन्ते आसक्तो भवतीति । पञ्च + मृ + कर्त्तरि घञ् ।) बल-देवपुत्त्र: । इति शब्दमाला ॥

पञ्चमास्य:, पुं, (पञ्चमो राग: स्वरो वा आस्ये यस्य । "कोकिल: पञ्चमं वदेत् ।" इत्युक्तेरस्य तथात्वम् ।) कोकिल: । इति शब्दरत्नावली ॥

पञ्चमी, स्त्री, (पञ्चानां पाण्डवानां इयम् । अथवा पञ्च पतीन् मिनोति सेवार्थं हार्दिभिर्बध्नाति या । पञ्च + मी + क्विप । मीधातुरत्र बन्धार्थ: ।) पाण्डवपत्नी । द्रौपदी । इति मेदिनी ॥ (पञ्चानां पूरणी डट् ततो मट् स्त्रियां ङीप् ।) शारि-शृङ्खला । पाशार छक् इति भाषा । इति भूरि-प्रयोग: ॥ * ॥ तिथिविशेष: । सा च चन्द्रस्य पञ्चमकलाक्रियारूपा तदुपलक्षितकालश्च । पञ्जिकाकारसङ्केतेन शुक्लपक्षे ५ कृष्णपक्षे २० एतदङ्कबोधिता ॥ * ॥ अथ पञ्चमीव्यवस्था । सा च चतुर्थीयुता ग्राह्या युग्मात् ।
"पञ्चमी च प्रकर्त्तव्या चतुर्थ्या सहिता विभो ।॥"
इति स्कन्दपुराणाच्च ॥ * ॥

अथ नागपञ्चमी । यथा,—देवीपुराणे ।
"शुभे जगद्देवि ज्ञात्वा पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसा देवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवै: सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥"
देवैरिति सहार्थे तृतीया । तथा,—
"देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागाननन्ताद्यान्महोरगान् ।
क्षीरं सर्पिस्तु नैवेद्यं देयं सर्व्वविषापहम् ॥"
एवं गारुडे तथैव नागानाह ।
"अनन्तं वासुकिं पद्मं शङ्खं कम्बलमेव च ।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम् ॥
कालीयं तक्षकञ्चैव पिङ्गलं मासि मासि च ।
यजेत्तानसिते नागान् दष्टमुक्तो दिवं व्रजेत् ॥"
पुराणान्तरेऽपि ।
"अनन्तो वासुकि: पद्मो महापद्मोऽथ तक्षक: ।
कुलिक: कर्कट: शङ्खो ह्यष्टौ नागा: प्रकीर्त्तिता: ॥"
पुराणान्तरेऽपि ।
"शेष: पद्मो महापद्म: कुलीर: शङ्खपालक: ।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रक: ।
ऐरावतो धृतराष्ट्र: कर्कोटकधनञ्जयौ ॥"
अथ च ।
"योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नम: ॥"
इत्यनेन ओंकारपूर्व्वेण मत्स्यपुराणोक्तेनानन्तं पूजयेत् । रत्नाकरे ।
"पिचुमर्द्दस्य पत्राणि स्थापयेद्भवनोदरे ।
स्वयञ्चापि तदश्नीयाद्ब्राह्मणांश्चैव भोजयेत् ॥"*॥
अथ श्रीपञ्चमी । भविष्योत्तरे । माघशुक्लपक्ष-मधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी प्रपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
सम्वत्सरप्रदीपे ।
"पञ्चम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभि: ।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्तत: ॥
माघे मासि सिते पक्षे पञ्चमी या श्रिय: प्रिया ।
तस्या: पूर्व्वाह्ण एवेह कार्य्य: सारस्वतोत्सव: ॥"
इत्युपादानात् श्रिय: स्वरसत्वात् । तथा च आह्नि: ।
"लक्ष्मीसरस्वतीधीत्रिवर्गसम्पद्विभूतिशोभासु ।
उपकरणवेशरचनाविधासु च श्रीरिति प्रथिता ॥"
ध्यानं यथा,—
"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्ति:
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्री:
सकलविभवसिद्ध्यै पातु वाग्देवता न: ॥"
इति शारदोक्तं ध्यायेत् । पाद्यादिभि: पूजयित्वा ।
"भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नम: ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥"
स्वाहेति ब्रह्मपुराणीयेन त्रि: पूजयेत् । मत्स्य-सूक्ते । बन्धुजीवक द्रोणञ्च सरस्वत्यै न दापयेत् । सरस्वतीं संपूज्य,—
"यथा न देवो भगवान् ब्रह्मा लोकपितामह:
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदा: शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत
न विहीनं त्वया देवि । तथा मे सन्तु सिद्धय: ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टि: प्रभा धृति: ।
एताभि: पाहि तनुभिरष्टाभिर्म्मां सरस्वति ।॥'
इति मत्स्यपुराणीयै: प्रार्थयेत् ॥ * ॥

अथ पञ्चमीव्रतम् ।
तच्च शुद्धकाले माघशुक्लपञ्चम्यामारभ्य षड्वर्ष-पर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां कार्य्यम् । यथा,—
"क्षीरोदे च पुरा सुप्तं लक्ष्मीसमन्वितं हरिम् ।
प्रणम्य परिपप्रच्छ नारदो मुनिसत्तम: ॥
नारद उवाच ।
केनोपायेन देवेश । नारीणाञ्च सुखं भवेत् ।
सौभाग्यमतुलं याति तन्मे त्वं वक्तुमर्हसि ॥
श्रुत्वा तद्वचनं देवो नारदस्य महात्मन: ।
संप्रेक्ष्य कमलां सद्य: प्राह देवि शुभानने ।॥
इङ्गितं पत्युरालोक्य पद्मपत्राक्षवल्लभा ।
वल्लभं तं पुरस्कृत्य प्रीता प्रत्युवाच ह ॥
देव्युवाच ।
अस्ति श्रीपञ्चमीनाम व्रतं परमदुर्लभम् ।
यत् कृत्वा प्राप्यते लोकै: सुखं सौभाग्यमुत्तमम् ॥
तत्र मां पूजयेद्भक्त्या माधवञ्च प्रयत्नत: ।
गन्धै: पुष्पैश्च वस्त्रैश्च धूपैर्नानाविधै: फलै: ॥
श्रद्धया पूजयेद्भक्त्या माघादौ पञ्चमीदिने ।
इमां ब्रह्मपुराणोक्तां या करोति च पञ्चमीम् ॥
लक्ष्मीसमा भवेन्नारी इह लोके परत्र च ।
विधानं शृणु धर्म्मज्ञ । यादृशी पञ्चमी मम ॥
वर्षाणि षट् प्रकर्त्तव्या परमप्रीतिमानसा ।
शुद्धकाले तु संप्राप्ते पञ्चमी या शुभा भवेत् ॥
तस्यामारभ्य कर्त्तव्यं व्रतं पापप्रणाशनम् ।
स्वयं यतात्मा भूत्वा च आरभेद्व्रतमुत्तमम् ॥
आद्यद्वयमलवर्णेन हविष्येण द्वयं तथा ।
फलैनैकन्तु कर्त्तव्यमुपवासै: प्रतिष्ठयेत् ॥
प्रतिष्ठाया विधिरयं काञ्चनस्य श्रियं हरिम् ।
ब्राह्मणञ्च सपत्नीकं पूर्व्वेद्यु रधिवासयेत् ॥
पञ्चम्यामृत्विजं विप्रमाचार्य्यञ्च द्विजोत्तमम् ।
पूजा च विविधा कार्य्या मूलमन्त्रेण भक्तित: ॥
होमञ्च तिललाजानां घृतं कुर्य्यात् पृथक् पृथक् ।
नैवेद्यं विविधं कुर्य्यात् लड्डुकं पूपमुत्तमम् ॥
आसनं पाद्यमर्घ्यञ्च तथाचाचमनीयकम् ।
वासो यज्ञोपवीतञ्च गन्धपुष्पफलं तथा ॥
छत्रं धूप: प्रदीपश्च ताम्बूलं फलमेव च ।
गौ: शय्या कम्बलञ्चैव हिरण्यं रजतं तथा ॥
ब्राह्मणेभ्य: प्रदेयानि दक्षिणासंयुतानि च ।
यथोक्तेन विधानेन या कुर्य्यात् पञ्चमीव्रतम् ॥
आसप्तकुलमुद्धृत्य विष्णुलोकमवाप्नुयात् ।
शचीव पुरुहूतस्य रतीव मदनस्य च ॥
शङ्करस्य यथा गौरी तथा भवति सा शुभा ।
मासि मासि सिते पक्षे पञ्चमी या प्रकीर्त्तिता ॥
तस्यां पूज्या सदा देवी भक्तित: कमलोद्भवा ।
लक्ष्मीसमा भवेन्नारी षट्पञ्चमीव्रतेन वै ॥

युक्तानि सारदारुनिर्म्मितानि पञ्च लाङ्गलकानि यस्मिन् ।) महादानभेदः । यथा —

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥
पुण्यां तिथिं समासाद्य युगादिग्रहणादिकम् ।
भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम् ॥
कर्व्वटं खेटकञ्चापि ग्रामं वा शस्यशालिनम् ।
निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः ॥
सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः ।
सर्व्वोपकरणैर्युक्तानन्यान् पञ्च च काञ्चनान् ॥
वृषलक्षणसंयुक्तान् दशैव तु धुरन्धरान् ।
सुवर्णशृङ्गाभरणान् मुक्तालाङ्गूलभूषितान् ॥
रौप्यपादाग्रतिलकान् रक्तकौशेयभूषणान् ।
स्रग्दामचन्दनयुतान् शालायामधिवासयेत् ॥
पर्ज्जन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेत् चरुम् ।
एकस्मिन्नेव कुण्डे तु गुरुरग्निन्निवेदयेत् ॥
पालाशाः समिधस्तद्वदाज्यं कृष्णतिलांस्तथा ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ततो मङ्गलशब्देन युक्तमाल्याम्बरो बुधः ।
आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुलीयकैः ॥
कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत् ।
शय्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीम् ॥
तथाष्टादश धान्यानि समन्तादधिवासयेत् ।
ततः प्रदक्षिणं कृत्वा गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रमथ सर्व्वं निवेदयेत् ।
यस्माद्देवगणाः सर्व्वे स्थावराणि चराणि च ॥
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवेऽस्तु मे ।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोड़शीम् ॥
दानान्यन्यानि मे भक्तिर्धर्म्मे एव दृढ़ा भवेत् ।
दण्डेन सप्तहस्तेन त्रिंशद्दण्डानि वर्त्तनम् ॥
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः ।
मानेनानेन यो दद्यात् निवर्त्तनशतं बुधः ॥
विधिनानेन तस्याशु क्षीयते पापसंहतिः ।
तदर्द्धमथवा दद्यादपि गोचर्म्ममात्रकम् ।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥
यावन्ति लाङ्गलकमार्गमुखानि भूमे-
स्तासां पतिर्द्दिहतुरङ्गजरोमकाणि ।
तावन्ति शङ्करपुरे वर्षाणि तिष्ठ-
द्भूमिप्रदानमथ यः कुरुते मनुष्यः ॥
गन्धर्व्वकिन्नरसुरासुरसिद्धसंघै-
राधूतचामरमुपैत्य महाह्वमानम् ।
सम्पूज्यते पितृपितामहबन्धुयुक्तः
शम्भोः पुरं व्रजति चामरनायकः सन् ॥
इन्द्रत्वमप्यधिगतं क्षयमभ्युपैति
गोभूमिलाङ्गलधुरन्धरसंप्रदानात् ।
तस्मादघौघपटलक्षयकारिभूमे-
र्दानं विधेयमिति भूतिभवाभवाय ॥"
इति मात्स्ये २५७ अध्यायः ॥

पञ्चलोहं, क्ली, (पञ्चं विस्तीर्णं लोहम् ।) सौराष्ट्रकलोहम् । इति हेमचन्द्रः ॥ (पञ्चगुणितं लोहम् । सुवर्णरजतताम्रसीसकरङ्गाणि ॥)

पञ्चलोहकं, क्ली, पञ्चानां लोहकानां धातूनां समाहारः ।) तद्यथा । सुवर्णरजतताम्ररङ्गनागानि । इति राजनिर्घण्टः ॥

पञ्चवक्त्रः, पुं, (पञ्च वक्त्राणि यस्य ।) शिवः । ("विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥" इति शिवध्यानम् ॥) अस्य मन्त्रा यथा,—

"समस्तानां स्वराणान्तु दीर्घाः शेषाः सबिन्दुकाः ।
क्ष-टवर्गकशून्याः सार्द्धचन्द्रा उपान्ते नाभिसंस्थिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
क्रमात् सम्पत्सन्दोहमादगौरवसंज्ञकाः ॥
प्रासादन्तु भवेत् शेषं पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं समुदितं कृत्वा पञ्चभिर्व्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ॥
सम्पदादिषु मन्त्रेषु प्रासादन्तु प्रशस्यते ।
शम्भोः प्रसादनेनैव यस्मादुक्तस्तु मन्त्रकः ॥
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्मन्त्रः सम्पद उच्यते ।
मनःप्रपरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्माद्रो गुरुत्वाद्गौरवाह्वयः ।
एतद्वाक्यं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरं यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
स्वयन्तेनैव मन्त्रेण आराधयतमीश्वरम् ॥ * ॥
ध्यानञ्च शृणु वक्ष्यामि सम्यग्वेतालभैरवौ ।
पञ्चवक्त्रं महाकायं जटाजूटविभूषितम् ॥
चारुचन्द्रकलायुक्तं मूर्द्धि व्यालौघसंगतम् ।
बाहुभिर्द्दशभिर्युक्तं व्याघ्रचर्म्माम्बराम्बरम् ॥
कालकूटधरं कण्ठे नागहारोपशोभितम् ।
कौटीरबन्धनं बाहुभूषणञ्च भुजङ्गमाः ॥
विभूतिं सर्व्वगात्रेषु ज्योत्स्नार्पितस्वरोचितम् ।
भूतिसंलिप्तसर्व्वाङ्गमेकैकत्र त्रिभिस्त्रिभिः ॥
नेत्रैस्तु पञ्चदशभिर्ज्योतिश्चन्द्रविभूषितम् ।
वृषभोपरि संस्थन्तु गजकृत्तिपरिच्छदम् ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
ततपुरुषं यथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातं भवेद्वक्त्रं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
नीलवर्णमघोरन्तु दंष्ट्राभीतिविवर्द्धनम् ।
रक्तं ततपुरुषं देवं दिव्यमूर्त्तिं मनोहरम् ॥
श्यामलञ्च तथेशानं सर्व्वदेव शिवात्मकम् ।
चिन्तयेत् पश्चिमे त्वाद्यं द्वितीयञ्च तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे ततपुरुषन्तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेद्भक्तितत्परः ॥
शक्तित्रिशूलखट्वाङ्गवरदाभयदं शिवम् ।
दक्षिणेष्वथ हस्तेषु वामेष्वपि ततः शृणु ॥
अक्षसूत्रं बीजपूरं भुजगं डमरूत्पलम् ।
अष्टैश्वर्य्यसमायुक्तं ध्यायेत्तु कृहतं शिवम् ॥"
इति कालिकापुराणे ५० अध्यायः ॥ * ॥

पञ्चमुखरुद्राक्षः । यथा स्कान्दे,—

"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथितत्त्वम् ॥

(पञ्चं विस्तृतं वक्त्रं वदनं यस्य । इति विग्रहे । सिंहः ॥)

पञ्चवटः, पुं, (पञ्चो विस्तीर्णो वटः ।) उरस्कटः । तत्पर्य्यायः । ज्योटिङ्गः २ महाव्रती ३ बालयज्ञोपवीतकम् ४ । इति त्रिकाण्डशेषः ॥ (पञ्चसंख्यका वटा अश्वत्थविल्ववटधात्र्यशोकरूपा वृक्षा यस्मिन् । पञ्चवटीवनम् । यथा रामायणे । १ । ३ । १३ ।

"समागमं विराधेन वासं पञ्चवटे तथा ॥")

पञ्चवटी, स्त्री, (पञ्चानां वटानां समाहारः । तद्धितार्थेति ततपुरुषः संख्यापूर्व्वो द्विगुरिति द्विगुसंज्ञायां "द्विगोः" ।४।१।२१। इति ङीप् । द्विगुरेकवचनमिति एकवचनम् ।) पञ्चप्रकारवृक्षविशेषः । यथा,—

"अश्वत्थविल्ववृक्षञ्च वटधात्र्यशोककम् ।
वटीपञ्चकमित्युक्तं स्थापयेत पञ्चदिक्षु च ॥
अश्वत्थं स्थापयेत प्राचि विल्वमुत्तरभागतः ।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा ॥
अशोकं वह्निदिकस्थाप्यं तपस्यार्थं सुरेश्वरि ।
मध्ये वेदीं चतुर्हस्तां सुन्दरीं सुमनोहराम् ॥
प्रतिष्ठां कारयेत्तस्याः पञ्चवर्षान्तरं शिवे ।।
अनन्तफलदात्री सा तपस्याफलदायिनी ॥ * ॥
इयं पञ्चवटी प्रोक्ता वृहतपञ्चवटीं शृणु ।
विल्ववृक्षं मध्यभागे चतुर्दिक्षु चतुष्टयम् ॥
वटवृक्षं चतुष्कोणे वेदसंख्यं प्ररोपयेत् ।
अशोकं वर्त्तुलाकारं पञ्चविंशतिसम्मितम् ॥
दिग्विदिक्ष्वामलकीश्चैव एकैकं परमेश्वरि ।
अश्वत्थञ्च चतुर्दिक्षु वृहतपञ्चवटी भवेत् ॥
यः करोति महेशानि साक्षादिन्द्रसमो भवेत् ।
इह लोके मर्त्त्यसिद्धिः परे च परमा गतिः ॥"
इति हेमाद्रीयव्रतखण्डधृतस्कन्दपुराणवचनानि ॥

(स्वनामख्यातः प्रदेशविशेषः । यथा, रामायणे । १ । १ । ४५ ।

"देशः पञ्चवटीनाम तत्र वासं स कल्पयत् ॥")

पञ्चवल्कलं, क्ली, (पञ्चानां वल्कलानां समाहारः ।) वल्कलपञ्चकम् । यथा,—

"न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
सर्व्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते ॥"

अपि च ।

"न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलपीतनाः ।
क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम् ॥"
इति शब्दचन्द्रिका ॥

अस्य गुणाः ।

"पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चलक्षणम् ।
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ॥"
इति राजनिर्घण्टः ॥

पञ्चवाणः, पुं, (पञ्च वाणाः शरा यस्य सः ।) कामदेवः । इति हेमचन्द्रः ॥ पञ्चानां वाणानां समाहारे क्ली । (कामस्य पञ्च वाणा यथा,—

"द्रवणं शोषणं वाणं तापनं मोहनाभिधम् ।

उन्मादनश्च कामस्य वाणाः पञ्च प्रकीर्त्तिताः ॥”
पञ्चपुष्पवाणा यथा,—
“अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चवाणस्य सायकाः ॥”)
पञ्चवाणविशिष्टे त्रि ॥

पञ्चशरः, पुं, (पञ्च शरा यस्य सः ।) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ अस्य पञ्च शराणि यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्याये ।
“सम्मोहनं समुद्वेगवीजं स्तम्भनकारणम् ।
उन्मत्तवीजं ज्वलनं शश्वच्चेतनहारकम् ॥”
अपि च ।
“सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च वाणाः प्रकीर्त्तिताः ॥”
पञ्च इन्द्रियार्थाः शरा अस्येत्यन्ये । इति भरतः ॥
(यथा, कुमारे । ७ । ९२ ।
“शापावसाने प्रतिपन्नमूर्त्ते-
र्ययाचिरे पञ्चशरस्य सेवाम् ॥”)

पञ्चशस्यं, क्ली, (पञ्चानां शस्यानां समाहारः ।) शस्यपञ्चकम् । तद्यथा धान्यमुद्गतिलयवश्वेतसर्षप-रूपम् । सर्षपस्थाने माषोऽपि । इति दुर्गोत्सवपद्धतिः ॥

पञ्चशाखः, पुं, (पञ्च शाखा इवाङ्गुलयो यस्य ।) हस्तः । इत्यमरः । २ । ६ । ८१ ॥ पञ्चानां शाखानां समाहारे क्ली । पञ्चशाखाविशिष्टे त्रि ॥

पञ्चशिखः, पुं, (पञ्चा विस्तीर्णा शिखा केशरादिर्यस्य ।) सिंहः । इति हेमचन्द्रः ॥ धर्म्मस्य हिंसाभार्य्यायां जातो मुनिविशेषः । यथा,—
“धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्त्रचतुष्टयम् ।
सम्प्राप्तं मुनिशार्द्दूल । योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः ।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवक्तारमपरं कपिलं वोढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम् ॥”
इति वामने ५० अध्यायः ॥
(अस्य अन्यप्रकारेणपत्तिर्नामनिरुक्तिश्च उक्ता महाभारते । १२ । २१८ । ६—१६ ।
“तत्र पञ्चशिखो नाम कापिलेयो महामुनिः ।
परिधावन् महीं कृत्स्नां जगाम मिथिलामथ ॥
सर्व्वसन्न्यासधर्म्माणां तत्त्वज्ञानविनिश्चये ।
सुपर्य्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः ॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु ।
शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम् ॥
यमाहुः कापिलं सांख्याः परमर्षिं प्रजापतिम् ।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम् ॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् ।
पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम् ॥
यत्र चासीनमागम्य कापिलं मण्डलं महत् ।
पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ॥
इष्टसत्रेण संसृष्टो भूयश्च तपसासुरिः ।
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः ॥
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ।
आसुरिर्म्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् ॥
तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः ॥
ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी ।
तस्याः पुत्त्रत्वमागम्य स्त्रियाः स पिबति स्तनौ ॥
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम् ।
एतन्मे भगवानाह कापिलेयस्य सम्भवम् ॥
तस्य तत् कापिलेयत्वं सर्व्ववित्त्वमनुत्तमम् ॥
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमम् ।
उपेत्य शतमाचार्य्यान्मोहयामास हेतुभिः ॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् ।
उत्सृज्य शतमाचार्य्यान् पृष्ठतोऽनुजगाम तम् ॥
पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः ॥”
गायत्रीस्वरूपायां शक्त्यां स्त्री । यथा, देवीभागवते । १२ । ६ । १०५ ।
“प्राणप्रिया पञ्चशिखा पन्नगोपरिशायिनी ॥”)

पञ्चसूरणः, पु, (पञ्च सूरणा यत्र ।) पञ्चप्रकारसूरणः । तद्यथा । अत्यम्लपर्णी काण्डीरः मालाकन्दः सूरणः श्वेतसूरणश्च । तथाहि ।
“अत्यम्लपर्णीकाण्डीरमालाकन्दद्विसूरणैः ।
कल्पो भवति योगोऽयं पञ्चसूरणसंज्ञकः ॥”
इति राजनिर्घण्टः ॥

पञ्चशैरीषकं, क्ली, (शिरीषवृक्षस्य इदम् शैरीषकम् । पञ्चसंख्यकं शैरीषकम् ।) शिरीषवृक्षस्य कुसुममूलफलपत्रत्वचः । इति राजनिर्घण्टः ॥

पञ्चषाः, त्रि, पञ्च वा षड्वा परिमाणं येषां ते । बहुवचनान्तोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ॥

पञ्चसिद्धौषधिः, पुं, (पञ्च सिद्धा औषधयो यस्मिन् ।) पञ्चप्रकारौषधिविशेषः । यथा,—
“तैलकन्दसुधाकन्दक्रोडकन्दरुदन्तिकाः ।
सर्पनेत्रयुताः पञ्चसिद्धौषधिकसंज्ञकाः ॥”
इति राजनिर्घण्टः ॥

पञ्चसुगन्धकं, क्ली, (पञ्च सुगन्धा यत्र । ततः कप् ।) पञ्चप्रकारसुगन्धिद्रव्यम् । यथा, —
“कुसुमानि लवङ्गस्य तथा कक्कोलकाह्वयोः ।
जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम् ॥”
इति शब्दचन्द्रिका ॥
अपि च ।
“कर्पूरकक्कोललवङ्गपुष्प-
गुवाकजातीफलपञ्चकेन ।
समांशभागेन च योजितेन
मनोहरं पञ्चसुगन्धकं स्यात् ॥”
इति राजनिर्घण्टः ॥

पञ्चसूना, स्त्री, (पञ्चगुणिता सूना प्राणिवधस्थानम् ।) पञ्चप्रकारप्राणिवधस्थानम् । यथा,—
“पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च वध्यते याश्च वाहयन् ॥”
इति शुद्धितत्त्वम् ॥
तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति तस्य प्रायश्चित्तं वैश्वदेवः । यथा,—
“लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवन्तु कुर्व्वीत पञ्चसूनापनुत्तये ॥”
इति आह्निकतत्त्वधृतशातातपवचनम् ॥
अशौचकालोत्पन्नपञ्चसूनादिजन्यपापस्य दानादिनाशकत्वं यथा,—
“दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवित् ।
दानञ्च विधिना देयमशुभात्तारकं हि तत् ॥”
इति शुद्धितत्त्वधृतसम्वर्त्तवचनम् ॥

पञ्चस्वरा, स्त्री, (पञ्च स्वरा यत्र ।) प्रजापतिदासवैद्यकर्तृशम्भुरिष्टमाहेश्वरमिश्रेश्वरस्त्रीपुंनपुंसकज्ञानसुखदुःखरिष्टच्छेदादियोगफलशुभाशुभज्ञाननिर्णय इति सप्ताध्यायात्मकज्योतिर्ग्रन्थविशेषः यथा । तत्रैव ।
“पञ्चस्वराभिधानञ्च ग्रन्थं निदानसम्मतम् ।
किञ्चिद्दृष्ट्वा शास्त्रञ्च स्वल्पं वक्ष्यामि शाश्वतम् ॥”

पञ्चस्वरोदयः, पुं, (पञ्चानां स्वराणामुदयो यत्र ।) ज्योतिःशास्त्रविशेषः । यथा,—
“कालं वक्ष्यामि संसिद्ध्यै रुद्र पञ्चस्वरोदयात् ।
राजा माजा उदासा च पीडा मृत्युस्तथैव च ॥
आ इ उ ए ओ स्वराश्च लिखेत पञ्चाग्निकोष्ठकं ।
ऊर्द्ध्वतिर्य्यग्गतै रखैः षड्वह्निक्रममागतैः ॥
तिथौ एकादिकोष्ठेषु नयो राजाथ माजया ।
उदासा पीडा मृत्युश्च कुजः सोमसुतः क्रमात् ॥
गुरुशुक्रशनैश्चररविचन्द्रा यथोदितम् ।
रेवत्यादिशिवान्ताश्च नक्षत्राश्च प्रथमाः कलाः ॥
पञ्चपञ्चान्यत्र भानि चैत्राद्य उदयस्तथा ।
द्वादशाख्या द्वयो मासा नाम्न आद्याक्षरं तथा ॥
कला लिङ्गश्च या तिष्ठेत पञ्चमस्तस्य वै स्मृतिः ।
लग्ना तिथिस्तथा वारनक्षत्रं माममेव च ॥
मामोदयस्य पूर्व्वश्च तथा भवति नान्यथा ॥”
इति गरुडपुराणम् ॥

पञ्चाग्नि, क्ली, पञ्चानामग्नीनां समाहारः । अस्य विवरणं पञ्चतपाशब्दे द्रष्टव्यम् ॥ शरीरस्थपञ्चाग्नयो यथा,—
“उदरे गार्हपत्याग्निर्मध्यदेशे तु दक्षिणः ।
आस्ये आहवनीयोऽग्निश्च सत्यः पर्व्वा च मूर्द्धनि ।
यः पञ्चाग्नीनिमान् वेद आहिताग्निः स उच्यते ॥”
इति गरुडपुराणम् ॥
(पञ्चाग्नयो गृहे यस्य । इति विग्रहे वाच्यलिङ्गत्वम् । यथा मनुः । ३ । १८५ ।
“त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥”)

पञ्चाङ्गं, क्ली, पञ्चानां अङ्गानां एकवृक्षस्य त्वक्पत्रपुष्पमूलफलानां समाहारः । यथा,—
“त्वक्पत्रकुसुमं मूलं फलमेकस्य शाखिनः ।
एकत्र मिलितञ्चैतत् पञ्चाङ्गमिति संज्ञितम् ॥”
इति राजनिर्घण्टः ॥
पुरश्चरणविशेषः । यथा —
“जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥”
इति तन्त्रसारः ॥
वारतिथिनक्षत्रयोगकरणात्मकपञ्जिका । यथा,—

"तिथिर्वारश्च नक्षत्रं योगः करणमेव च ।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत्" ॥
इति ज्योतिषम् ॥

पञ्चाङ्गः, पुं, (पञ्चाङ्गानि यस्य ।) कमठः । इति शब्दमाला ॥ अश्वविशेषः । तत्पर्य्यायः । पञ्चभद्रः२ पुष्पितरङ्गमः३ । इति शब्दरत्नावली ॥ प्रणामविशेषः । यथा,—
"बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥"
इति तन्त्रसारः ॥
(राजनयः । यदुक्तम् ।
"सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते ॥")

पञ्चाङ्गगुप्तः, पुं, (पञ्चसंख्यकानि अङ्गानि गुप्तानि यस्य ।) कच्छपः । इति त्रिकाण्डशेषः ॥

पञ्चाङ्गुलः, पुं, (पञ्च अङ्गुलय इव पर्णानि यस्य ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ । पञ्चाङ्गुलपरिमाणयुक्ते त्रि ॥

पञ्चाङ्गुलिः, त्रि, पञ्चाङ्गुलयो यस्य सः । इति व्याकरणम् ॥

पञ्चाङ्गुली, स्त्री, तन्त्राकाक्षुपः । इति राजनिर्घण्टः ॥

पञ्चातपा, स्त्री, (पञ्चभिरग्निसूर्य्यैरातप्यते इति । आङ्+तप्+अच् । ततः टाप् ।) तपस्याविशेषः । यथा —
"सर्व्वा पञ्चातपाचिन्त्या शाम्भवी शाम्भवो जपः ।
यज्ञियैर्दारुभिः शुष्कैश्चतुर्द्दिक्षु चतुष्कृतम् ॥
वह्निसंस्थापनं ग्रीष्मे तीव्रांशुस्तत्र पञ्चमः ।
हस्तान्तरे चतुर्व्वह्नीन् कृत्वा वैश्वानरेरिता ॥
तन्मध्यस्था सूर्य्यबिम्बं वीक्षन्ती बद्धलांशुका ।"
इति कालिकापुराणे ४२ अध्यायः ॥

पञ्चाननः, पु, (पञ्च आननानि यस्य ।) शिवः । (पञ्चं विस्तृतं आननं यस्य ।) सिंहः । इति मेदिनी ॥ व्याघ्रः । इति शब्दरत्नावली ॥ (ज्योतिषोक्तसिंहराशिः । यथाह स्मृतिः ।
"पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥"
रुद्राक्षविशेषः । तद्धारणे महच्छुभं भवति ॥)

पञ्चामरा:, स्त्री, (पञ्च अमराः । संज्ञात्वात्कर्म्मधारयः ।) पञ्चप्रकारामरलतादि । यथा,—
"एका तु अमरा दूर्व्वा तस्या ग्रन्थिं समानयेत् ।
अन्या तु विजया देवी सिद्धिरूपा सरस्वती ॥
अन्या तु विल्वपत्रस्था शिवसन्तोषकारिणी ।
अन्या तु योगसिद्ध्यर्थं निर्गुण्डी चामरा लता ॥
अन्या तु कालतुलसी श्रीविष्णोः प्रियतोषिणी ।
एताः पञ्चामरा ज्ञेया योगसाधनकर्म्मणि ॥"
इति रुद्रयामलोत्तरखण्डे ३६ पटलः ॥

पञ्चामृतं, स्त्री, (पञ्चानाममृतानां समाहारः । शर्करादुग्धघृतदधिमधुघटितम् । यथा,—
"दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु ।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥"
गर्भवतीभ्यस्त्स्नानस्य दिनं यथा,—
"रेवत्यश्विपुनर्व्वसुद्वयमृगस्वात्यनुराधामघा-
हस्तासूत्तरफल्गुनीषु भृगुजे जीवार्कवारे तथा ।
लग्ने चौड्पशोभनेषु नियतं सन्त्यज्य रिक्ता तिथिं
देयं मासि च पञ्चमेषु करणे पञ्चामृतं योषिताम् ॥"
इति ज्योतिस्तत्त्वम् ॥

पञ्चामृतयोगः, पुं, (पञ्चानाममृतानां गुडुच्यादीनां योगः ।) गुडूचीगोक्षुरमुषलीमुण्डिकाशतावरीणां संयोगः । यदुक्तं राजनिर्घण्टे ।
"गुडूची गोक्षुरश्चैव मुषली मुण्डिका तथा ।
शतावरीति पञ्चानां योगः पञ्चामृताभिधः ॥"

पञ्चाम्नाय,, पुं, (पञ्चसंख्यकः आम्नायः ।) शिवस्य पञ्चवक्त्रविनिर्गततन्त्रशास्त्रविशेषः । यथा,—
"पूर्व्वाम्नायः पूर्व्वमुखः पश्चिमः पश्चिमामुखः ।
दक्षिणो दक्षिणस्तद्वदुत्तरश्चोत्तरः परः ॥
निरुत्तरं तथा चोर्द्ध्वं सिद्धान्तागमरूपिणम् ।
ऊर्द्ध्वाम्नायपरिज्ञानं नाल्पस्य तपसः फलम् ॥"
अन्यच्च ।
"पूर्व्वाम्नायः शब्दरूपो दक्षिणः कर्म्मरूपकः ।
पश्चिमः प्रश्नरूपः स्यादुत्तरश्चोत्तरस्तथा ॥
ऊर्द्ध्वाम्नायस्तत्त्वबोधः कैवल्यानुभवात्मकः ॥"
इत्यादि । इति भैरवतन्त्रम् ॥
मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः ।"
इति कुलार्णवतन्त्रम् ॥ * ॥
"विभाव्य मुखपञ्चं हि शिवस्य वरवर्णिनि ।
सद्योजातं वामदेवमघोरस्य ततः परम् ॥
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातस्य वै शुक्लं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरस्य सम्यं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवि । दिव्यमूर्त्तिं मनोहरम् ॥
श्यामलस्य तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयस्य तथोत्तरे ॥
अघोरं दक्षिणे देव पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ज्ञेयं चिन्तयेद्भक्तितत्परः ॥"
इति निर्व्वाणतन्त्रे ६ पटलः ॥ * ॥
अन्यत् षडाम्नायशब्दे द्रष्टव्यम् ॥

पञ्चाम्रं, क्ली, (अमन्ति रसानि प्राप्नुवन्तीति । अम गत्यादिषु + "अमितम्योर्दीर्घश्च ।" उणां ३ । १६ । इति रक् दीर्घश्चापधायाः इति आम्रा वृक्षाः । पञ्चानां आम्राणामश्वत्थादिवृक्षाणां समाहारः ।) वृक्षविशेषाणां समाहारः । यथा,—
"अश्वत्थमेकं पिचुमर्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः ।
द्वे द्वे तथा दाडिममातुलुङ्गे
पञ्चाम्रवापी नरकं न याति ॥"
इति वराहपुराणम् ॥
अपि च ।
"अश्वत्थ एकः पिचुमर्द एको
द्वौ चम्पकौ त्रीणि च केशराणि ।
सप्ताथ ताला नव नारिकेलाः
पञ्चाम्ररोपी नरकं न याति ॥"
इति तिथितत्त्वम् ॥

पञ्चाम्लं, क्ली, (पञ्चानामम्लानां कोलादीनां समाहारः ।) अम्लपञ्चकम् । यथा,—
"कोलदाडिमवृक्षाम्लैरम्लवेतससंयुतैः ।
चतुरम्लञ्च पञ्चाम्लं मातुलुङ्गसमन्वितम् ॥"
इति शब्दचन्द्रिका ॥

पञ्चारी, स्त्री, (पञ्चपञ्चसंख्याम् ऋच्छतीति । ऋ गतौ "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) शारिफलकम् । इति शब्दमाला ॥ (पाषार छक इति भाषा ॥)

पञ्चार्चिः, [स्] पुं, (पञ्च अर्चींषि यस्य सः ।) बुधग्रहः । इति त्रिकाण्डशेषः ॥

पञ्चालः पुं (पचि विस्तारवचने + "तमिविशिविडिमृणिकुलीति ।" उणां १ । ११७ । इति कालन् ।) देशविशेषः । इत्यमरादिकोषः ॥ तस्य व्युत्पत्तिर्यथा । "हर्य्यश्वाच्च मुद्गलसृञ्जयबृहदिषुयवीनरकाम्पिल्यसंज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः ।" इति विष्णुपुराणे ४ अंशे १६ अध्यायः ॥ (अस्य स्थितिनिर्णय उक्तस्तन्त्रशास्त्रे यथा,—
"कुरुक्षेत्रात् पश्चिमेषु तथा चोत्तरभागतः ।
इन्द्रप्रस्थान्महेशानि । दशयोजनकद्वये ।
पञ्चालदेशो देवेशि । सौन्दर्य्यगर्व्वभूषितः ॥")

पञ्चालाः, पु, (पञ्चालाः क्षत्रियास्तेषां निवासो जनपदः । निवासेऽणो जनपदे लुप् ।) नीवृद्विशेषः । बहुवचनान्तोऽयम् । इति मेदिनी ॥

पञ्चालिका, स्त्री, (पञ्चभिर्वर्णैरलति इति । आ+अल् भूषणे + अच् । टाप् स्वार्थे कन् इत्वञ्च ।) पुत्तली । इत्यमरटीकायां भरतः ॥

पञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलति । आ + अल् भूषणे + अच् । गौरादित्वात् ङीष् ।) वस्त्रादिकृतपुत्तिका । कानिर पुतुल इति भाषा ॥ गीतविशेषः । इति मेदिनी ॥ पाचाली इति भाषा ॥ (पञ्चारी रस्य लत्वे सिद्धम् ।) शारिफलकम् । इति त्रिकाण्डशेषः ॥ छक इति भाषा ॥

पञ्चावटं, क्ली, (पञ्च विस्तृतमुरःस्थलं आवटति वेष्टते इति । आ+वट्+अच् ।) उरस्कटम् । वालोपवीतम् । इति हारावली ॥ (पञ्चानां वटानां वटादिवृक्षाणां समाहारः । निपातनात् साधुः । पञ्चवटी । यथा, गोः रामायणे । ३ । २० । ३८ ।
"विवेश पञ्चावटमुग्रसेवितम्
रिपून् दिधक्षुः शलभानिवाग्निभुक् ॥")

पञ्चावस्थः, पुं, (पञ्चसु भूतेषु अवस्था यस्य । तस्य देहारम्भकस्वस्वकारणेषु लयत्वात्तथात्वम् ॥ शवः । इति त्रिकाण्डशेषः ॥ पञ्चावस्थायुक्ते त्रि ॥

पञ्चाशत्, त्रि, (पञ्चदशतः परिमाणमस्य ।) "पङ्क्तिविंशतित्रिंशदिति ।" ५ । १ । ५६ । निपातनात् साधुः ।) संख्याविशेषः । इति ज्योतिषम् ॥ पञ्चाश इति भाषा ॥ (यथा, श्रुतिपञ्चाशति ।५।१।

"पञ्चाशल्लिपिभिः पुरा भगवति । त्वया यदङ्गी कृतं तत्राहं सफलोऽधुनापि विमतिस्त्वत्पादपद्म-स्मृतेः ॥")

पञ्चास्यः, पुं, (पञ्चं विस्तृतं आस्यं यस्य ।) सिंहः । इत्यमरः । २ । ५ । १० ॥ (पञ्चानि आस्यानि यस्य । शिवः ॥ पञ्चमुखविशिष्टे, त्रि । यथा, गोः रामायणे । ५ । ७४ । ७३ ।
"लब्धितेयं विशालाक्षी मया शोकपरायणा ।
आदायैतां न जानीषे पञ्चास्यामिव भोगि-नीम् ॥")

पञ्चीकरणं, क्ली, पञ्चभूतानां भागविशेषेण मिश्री-करणम् । यथा । "पञ्चीकरणन्तु आकाशादि-पञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम् ।
द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात पञ्च पञ्च ते ॥ इति ॥
अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात् । पञ्चानां पञ्चा-त्मकत्वे समानेऽपि तेषु च वैशिष्ट्यात्तु तद्वादस्त-द्वाद इति न्यायेन आकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते । वायौ शब्द-स्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्द-स्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरस-गन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवः स्वर्महर्जनस्तपः सत्यमित्येतन्नामकानामु-पर्य्युपरि विद्यमानानां अतलवितलसुतलरसा तलतलातलमहातलपातालनामकानां अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गत-चतुर्व्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्ति भवति ॥" इति वेदान्तसारः । ३६-४२ ॥

पञ्चेन्द्रियं, क्ली, पञ्चानां ज्ञानेन्द्रियाणां समाहारः । यथा । "श्रोत्रत्वङ्नेत्ररसनघ्राणं पञ्चेन्द्रियाणि च ।" इति शब्दचन्द्रिका ॥ पञ्चकर्म्मेन्द्रियञ्च ॥

पञ्चेषुः, पुं, (पञ्च इषवो यस्य ।) कामदेवः । इति हलायुधः ॥

पञ्चोपविषं, क्ली, (पञ्चसंख्यकं उपविषम् ।) उप विषपञ्चकम् । यथा, राजनिर्घण्टे ।
"स्नुह्यर्ककरवीराणि लाङ्गली विषमुष्टिका ।
एतान्युपविषाण्याहुः पञ्च पाण्डित्यशालिनः ॥"

पञ्चोष्माणः, पु, (पञ्च उष्माणः ।) आहारपाचक-शरीरस्थपञ्चाग्नयः । यथा, सारकौमुद्याम् ।
"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥"

पञ्जरं, क्ली, (पञ्ज्यते रुध्यते उदरयन्त्रमनेन । पजि-रोधे + अरन् ।) कायास्थिच्छन्दम् । शरीरास्थि-पञ्जरम् । (यथा, पञ्चदशी । ६ । १७३ ।
"देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिभ्रमणं भवेत् ॥"
पञ्ज्यते रुध्यते पक्ष्यादिरत्र ।) पक्ष्यादिबन्धगृहम् । इत्यमरभरतौ । पिंजरा इति भाषा । तत्-पर्य्यायः । शालारम् २ । इति जटाधरः ॥ (यथा, हेः रामायणे । २ । ६५ । ५ ।
"तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः ।
शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥")

पञ्जरः, पुं, (पञ्ज्यते रुध्यते आत्मा यस्मिन् । पजि-रोधे + अरन् ।) शरीरम् । इति त्रिकाण्ड शेषः ॥ (यथा, हठयोगदीपिकायाम् । ४ ।१८।
"द्वासप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वेव निरर्थकाः ॥"
"पञ्जरे पञ्जरवक्रास्थिभिर्बद्धे शरीरे ।" इति तट्टीका ॥) देहास्थिसमूहः । तत्पर्य्यायः । कङ्कालः २ देहबन्धास्थि ३ । इति जटाधरः ॥ कलियुगम् । गवां नीराजनाविधिः । इति सार-स्वताभिधानम् ॥

पञ्जराखेटः, पु, (पञ्जरेणेव यन्त्रेण आखेटो मृगया यस्मात् ।) मत्स्यमारणोपाययन्त्रम । पोलो इति भाषा । तत्पर्य्यायः । प्लवः २ पलवः ३ । इति त्रिकाण्डशेषः ॥ [राजनिर्घण्टः ॥

पञ्जलः, पु, (पञ्ज + अलच ।) कोलकन्दः । इति

पञ्जिः, स्त्री, (पञ्ज + इन् ।) सूत्रनालिका । इति शब्दमाला । पाँइज इति भाषा । पञ्जिका च ॥

पञ्जिका, स्त्री, (पञ्जि + स्वार्थे कन् टाप् ।) तूलना लिका । इति हारावली ॥ पाँइज इति भाषा ॥ टीकाविशेषः । यथाह हेमचन्द्रः ।
"टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका ॥"
आयसन्धानी । इति त्रिकाण्डशेषः ॥ पञ्चाङ्गम् । पाँजि इति भाषा । तच्छ्रवणफलं यथा,—
"वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गाया योगः सागरसङ्गमः ।
करणं सर्व्वतीर्थानि श्रूयते दिनपञ्जिका ॥"
इति देवशाः ॥
अपि च ज्योतिस्तत्त्वे वराहवचनम् ।
"दुःस्वप्ननाशको वारो नक्षत्रं पापनाशनम् ।
तिथिरायुष्करी प्रोक्ता योगो बुद्धिविवर्द्धकः ॥
चन्द्रः करोति सौभाग्यमंशकः शुभदायकः ।
करणात्लभते लक्ष्मीं यः शृणोति दिने दिने ॥"
निःशेषपदव्याख्याश्री । तिथिवारादिज्ञापिका । आयव्ययलिखनार्था च । इत्यमरटीकायां भरतः ॥

पञ्जिकारकः, पुं, (पञ्जिं करोतीति । कृ + ण्वुल् ।) कायस्थजातिः । यथाह जटाधरः ।
"अथ कायस्थः करणः पञ्जिकारकः ॥"
(अस्य पञ्जिकरणकथा कायस्थशब्दे द्रष्टव्यम् ॥)
पञ्जिकाकारश्च ॥

पञ्जी, स्त्री, (पञ्जि + वा ङीप् ।) पञ्जिः । नालिका । इति शब्दमाला ॥ पञ्जिका । पाँजि इति भाषा । यथोक्तं दैवज्ञैः ।
"दैवज्ञवक्त्रेण शृणोति पञ्जीं
शत्रुक्षयं याति शशीव कृष्णे ॥"
ग्रन्थविशेषः । यथाह ध्रुवानन्दमिश्रः ।
"प्रणम्य विश्वेश्वरपादमादौ
सरस्वतीं तां कुलदेवताञ्च ।
शिशुप्रबोधाय कुलस्य पञ्जी
विविच्यते श्रीयुतमिश्रकेण ॥"

पञ्जीकरः, पुं, (पञ्जीं पञ्जिकां करोतीति । कृ + टः ।) कायस्थः । यथा । "कायस्थे कूटकृत्-पञ्जीकरौ ।" इति त्रिकाण्डशेषः ॥

पट, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं सेट ।) पटति । इति दुर्गादासः ॥

पट, क त्विषि । इति कविकल्पद्रुमः ॥ (चुरां-परं अकं-सेट ।) क, पाटयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

पट, न क वेष्टने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट ।) ग्रन्थने । इत्यन्ये । पट-यति मालां मालिकः । इति दुर्गादासः ॥

पटं, क्ली, (पटतीति । पट् । पचाद्यच् ।) छदिः । चालम । इति पटलशब्दटीकायां भरतः ॥

पटः, पुं, क्ली, (पटयत्यनेन । पट वेष्टने घञर्थे कः ।) शोभनवस्त्रम् । तत्पर्य्यायः । सुचेलकः २ । इत्यमरः ।२।६।११६॥ (यथा, पञ्चदशी ।६ ।२ ।
"यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्य्यामिसूत्राणि विराट् चात्मा तथेर्य्यते ॥")
चित्रपटः । इति मेदिनी ॥ तस्य लक्षणं यथा,—
"पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः ।
ग्रन्थिकेशविहीने तु अजीर्णे समतन्तुके ॥
अस्फाटिते अच्छिद्रे तु स्थलेनैव समालिखेत् ।
योगिनी रूपिणी कार्य्या जयाद्यैः परिवारिता ॥
हस्वेन च भवेद्धृद्धो व्याधिते व्याधितो भवेत् ।
कुरूपेण कुरूपस्तु सर्व्वेण तु न पूज्यते ॥
लेखकस्य तु यद्रूपं चित्रे भवति तादृशम ॥"
इति देवीपुराणम् ॥

पटः, पुं, पियालवृक्षः । इति मेदिनी ॥ पुरस्कृतः । इति विश्वः ॥

पटकः, पुं, (पटेन छदनेन कायति प्रकाशते इति । कै + कः ।) शिविरम् । इति शब्दमाला ॥

पटकारः, पुं, (पटं शोभनवस्त्रं चित्रं वा करोति यः । पट् + कृ + अण् ।) तन्तुवायः । चित्रकरः ॥

पटकुटी, स्त्री, (पटस्य पटनिर्म्मिता वा कुटी ।) वस्त्रवेश्म । ताँबु इति भाषा । तत्पर्य्यायः । कणिका २ गुणालयनिका ३ । इति हेमचन्द्रः ॥

पटच्चरं, क्ली, (भूतपूर्व्वं पटत् । भूतपूर्व्वं चरट् । यद्वा पटदित्यव्यक्तं शब्दं चरतीति । पटत् + चर + अच् ।) जीर्णवस्त्रम् । इत्यमरः ।२।६।११५॥ (पच्यते आविश्यते इति । पट + बाहुलकात् अत् । पटदिव चरति यः । चर् + अच् ।) चौरे पुं इत्यमरटीकायां रमानाथः ॥

पटमण्डपः, पुं, (पटानां वस्त्राणां मण्डपः ।) पट-कुटी । इति शब्दचन्द्रिका ॥

पटमयं, क्ली, (पट + मयट् ।) वस्त्रगृहम् । यथा,—
"पटवापः पटमयं दूष्यं वस्त्रगृहं स्थलम् ॥"
इति त्रिकाण्डशेषः ॥
शाटी । यथा, शब्दरत्नावल्याम् ।
"पटवासः पटमयं शाटी शाटक इत्यपि ॥"

पटरक:, पुं, (पटर । स्वार्थे कन् ।) गुन्द्रवृक्ष: । इति राजनिर्घण्ट: ॥

पटलं, क्ली, (पटं विस्तृतं लाति । पट+ला+ "आतोऽनुपसर्गे" ।३।२।३। क: । यद्वा पटतीति । पट+"तृषादिभ्यश्चित् ।" उणां ।१।१०८। इति कलच् ।) छदि: । चाल इति भाषा । नेत्ररोग: । इत्यमर: ।३।३।२००॥ पिटक: । परिच्छद: । तिलक: । (यथा, कलाविलासे । १ । २५ ।
"अस्तमिते दिवसकरे तिमिरभरद्विरदसंसक्ता ।
सिन्दूरपटलपाटलकान्तिरिवाशे बभौ सन्ध्या ॥")
समूहे क्ली क्ली । इति मेदिनी ॥ (यथा, भागवते । ३ । १४ । २६ ।
"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं बिभित्सव: ।
निरस्तसाम्यातिशयोऽपि यत् स्वयं
पिशाचचर्य्यामचरत् गति: सताम् ॥")
दृष्टेरावरकम् । चक्षुर परदा इति भाषा । यथाह माधवकर: ।
"प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थित: ।
अव्यक्तानि स रूपाणि कदाचिदथ पश्यति ॥"
दृष्ट्यां चत्वारि पटलानि । रसरक्ताश्रयं बाह्यं द्वितीयं मांससंश्रयं तृतीयं मेद:संश्रितं चतुर्थं कालकास्थिसंश्रितम् । तथा च सुश्रुत: ।
"तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् ।
मेदस्तृतीयं पटलमाश्रितं त्वस्थि चापरम् ।
पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते ॥"
इति । अत्र तेज:शब्देन रक्तं जलशब्देन रसो व्याख्यात: । तेषु पटलेषु बाह्यादिभेदेनाधिष्ठानविशेषप्रभावात् दोषाणां लिङ्गविशेषमाह प्रथमे पटले इत्यादि । प्रथमे पटले सर्व्वाभ्यन्तरं न तु बाह्यं । इति विजयरक्षित: ॥

पटल:, पु, क्ली, (पाट्यते दीप्यते य: । पट्+कलच् ।) ग्रन्थ: । वृन्द: । इति शब्दरत्नावली ॥ वृन्दस्थाने वृन्तोऽपि पाठ: ॥

पटलप्रान्तं, क्ली, (पटलस्य छदिस: प्रान्तम् ।) गृहचालिकान्तभाग: । छाँच इति भाषा । तत्पर्य्याय: । वलीकम् २ नीव्रम् ३ । इत्यमर: । २ । २ । १४ ॥

पटली, स्त्री, (पटल+ङीष् ।) छदि: । इति भरत-हेमचन्द्रौ ॥ चाल इति भाषा ॥

पटवाप:, पु, (पट उप्यते प्रादुर्य्येण दीयते यत्र । पट+वप+घञ् ।) वस्त्रगृहम । इति त्रिकाण्डशेष: ॥

पटवास:, पुं, (पटस्य पटैर्निर्म्मितो वा वास: गृहम ।) वस्त्रगृहम् । शाटी । इति शब्दरत्नावली ॥

पटवासक:, पु, पटो वास्यतेऽनेनेति घञि पटवास: तत: स्वार्थे कन । पटवासचूर्णम् । तत्पर्य्याय: । पिष्टात: २ । पिष्टेन कुङ्कुमचूर्णादिना अततीति पिष्टात: पचाद्यच् । इत्यमरभरतौ ॥

पटहं, क्ली पु, (पटेन हन्यते इति । पट+हन्+ड ।) पटत्शब्दं जहाति पटह: ड: निपातनात् तलोप: । इति भरत: ॥ आनकवाद्यम् । इत्यमर: । १ । ७ । ६ ॥

पटह:, पुं, (पट इत्यस्फुटं शब्दं जहाति त्यजतीति । पट+हा+ड ।) पाटयति गमयति योधान् युद्धाय उत्साहवर्द्धकत्वात् पट गतौ णिच् आप्नोति अच् । इति भरत: ॥ युद्धे वाद्यमानढक्का । तत्पर्य्याय: । आडम्बर: २ । इत्यमर: । २ । ८ । १०८ ॥ समारम्भ: । हिंसनम् । इति शब्दरत्नावली ॥

पटाक:, पुं, (पटति गच्छतीति । पट्+निपातनात् आक: ।) पक्षिविशेष: । इत्युणादिकोष: ॥

पटाका, स्त्री, (पटाक+टाप् ।) पताका । इति शब्दरत्नावली ॥

पटालुका, स्त्री, (पट इव अलतीति । पट्+बाहुलकात् उक: तत्तष्टाप् ।) जलौका । इति त्रिकाण्डशेष: ॥

पटि:, स्त्री, (पट+इन् ।) पटभेद: । वागुलि: । कुम्भिकादम: । इति मेदिनी ॥

पटिका, स्त्री, (पटि+स्वार्थे कन् तत: टाप् ।) पटि: । वस्त्रम् । यथा, लीलावती । [चि-
"विस्तारे त्रिकरा: कराष्टकमिता दैर्घ्ये विचित्राश्च चेद्
रूपैरुत्कटपट्टसूत्रपटिका अष्टौ लभन्ते शतम् ।
दैर्घ्ये सार्द्धकरत्रया परपटी हस्तार्द्धविस्तारिणी
तादृक् किं लभते द्रुतं वद वणिक् वाणिज्यकं वेत्सि चेत् ॥"

पटिष्ठ:, त्रि, (अयमेषामतिशयेन पटु: । पट+"अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् ।) अतिशयपटु: । इति व्याकरणम् ॥

पटी, स्त्री, (पट+इन् । वा ङीप् ।) वस्त्रभेद: । इति शब्दरत्नावली । यवनिका । इति त्रिकाण्डशेष: ॥

पटीयान्, [स्] त्रि, (अयमेषामतिशयेन पटु: । पटु+"द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् ।) अतिशयपटु: । इति व्याकरणम् ॥

पटीरं, क्ली, (पटतीति । पट गतौ । "शॄ पॄ कटि-पटिशौटिभ्य ईरन् ।" उणां । ४ । ३० । इति ईरन् ।) तितउ: । मूलकम् । मूलकम् । केदार: । वारिद: । वेणुसार: । वानिक: । चन्दनम् । इति शब्दरत्नावली ॥ खदिरम् । उदरम् । कन्दर्प: । हरणीयम् । इति संक्षिप्तसारोणादिवृत्ति: ॥

पटु, क्ली, (पाटयति । पट गतौ णयन्त: । "फलिपाटीति ।" उणां । १ । १८ । इति उ: पटादेशश्च ।) छत्रा । लवणम् । इति मेदिनी ॥ पांशुलवणम् । इति रत्नमाला ॥

पटु:, पुं, (पाटयतीति । पट्+णिच्+"फलि-पाटीति ।" उणां । १ । १८ । इति उ: पटादेशश्च ।) पटोल: । इत्यमर: । २ । ४ । १५५ ॥ पटोलपत्रम । इति विश्व: ॥ काण्डीरलता । कारवेल्ल । चोरक: । इति राजनिर्घण्ट: ॥

पटु:, त्रि, (पाटयतीति । पट गतौ । णयन्त: । "फलिपाटीति ।" उणां । १ । १८ । इति उ: पटादेशश्च ।) दक्ष: । (यथा, रघु: । ६ । ४६ ।
"अनुभवन् नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे
भुजलतां जडतामबलाजन: ॥")
नीरोग: । चतुर: । इति मेदिनी ॥ (मधुर: । यथा, रघु: । ६ । ७३ ।
"कुम्भपूरणभव: पटुरुच्चै-
रुच्चचार निनदोऽम्भसि तस्या: ॥")
तीक्ष्ण: । स्फुट: । इति हेमचन्द्र: ॥ निष्ठुर: । इति जटाधर: ॥ धूर्त्त: । इति त्रिकाण्डशेष: ॥

पटुक:, पुं, (पटु+स्वार्थे कन् ।) पटोल: । इति शब्दरत्नावली ॥

पटुकल्प:, त्रि, ईषदून: पटु: । (पटु+कल्पप् ।) इति व्याकरणम् ॥

पटुजातीय:, त्रि, पटुप्रकार: । (पटु+जातीयर् ।) इति व्याकरणम् ॥

पटुतृणकं, क्ली, (पटु लवणं तत्प्रचुरं तृणम् । तत: कन् ।) लवणतृणम् । इति राजनिर्घण्ट: ॥

पटुपत्रिका, स्त्री, (पटु पत्रमस्या: कप् । टापि अत इत्वम् ।) क्षुद्रचञ्चुप: । इति राजनिर्घण्ट: ॥

पटुपर्णिका, स्त्री, (पटु पर्णमस्या: । कप् टाप् अत इत्वञ्च ।) क्षीरिणीवृक्ष: । इति राजनिर्घण्ट: ॥

पटुपर्णी, स्त्री, (पटुपर्ण+"पाककर्णपर्णपुष्प-फलेति ।" ४।१।६४। इति ङीष् ।) स्वर्णक्षीरी । इत्यमर: । २ । ४ । १३८ ॥

पटरूप:, त्रि, (प्रशस्त: पटु: । पटु+रूपप ।) अतिशयपटु: । इति व्याकरणम ॥

पटोटजं, क्ली, (पटस्य छदिस: उटे तृणादौ जायते यत् । "सप्तम्यां जनेर्ड: ।" ३।२।९७। इति ड: ।) छत्राक: । इति शब्दरत्नावली ॥

पटोलं, क्ली, (पट गतौ+"कपिगडिगण्डीति ।" उणां ।१।६७। इति ओलच् ।) वस्त्रभेद: । इति मेदिनी ॥ तत्तु गुर्ज्जरदेशीयविचित्रपट्टवस्त्रम् ॥

पटोल:, पुं, (पटति बहुगुणान् प्राप्नोतीति । पट-गतौ+"कपिगडिगण्डीति ।" उणां १ । ६७ । इति ओलच् ।) स्वनामप्रसिद्धलतिकाफलम् । पलवल् इति हिन्दी भाषा ॥ (यथा, पञ्चतन्त्रे १ । ४०६ ।
"मान्त्रेव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्य: ।
पित्तं यदि शर्करया शाम्यति कोऽर्थ: पटोलेन ॥")
तत्पर्य्याय: । कुलकम् २ तिक्तक: ३ पटु: ४ । इत्यमर: । २।४।१५५ ॥ कर्कशच्छद: ५ कुलज: ६ वाजिमान् ७ लताफल: ८ राजफल: ९ वर-तिक्त: १० अमृताफल: ११ । इति रत्नमाला ॥ कटुफल: १२ कटुक: १३ कर्कशच्छद: १४ राजनामा १५ अमृतफल: १६ पाण्डु: १७ पाण्डुफल: १८ बीजगर्भ: १९ नागफल: २० कुष्ठारि: २१ कासमर्द्दन: २२ पञ्जर: २३ आजीफल: २४ ज्योत्स्नी २५ कच्छुघ्नी २६ । अस्य गुणा: । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारकत्वम् । पित्तबलाशकफकण्डूतिकुष्ठाढ्यज्वरदाहार्त्तिनाशित्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।

पाचनत्वम्। हृद्यत्वम्। वृष्यत्वम्। लघुत्वम्। अग्निदीपनत्वम्। स्निग्धत्वम्। कासदोषत्रय-क्रिमिनाशित्वञ्च। तस्य मूलादिगुणा:।
"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्।
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुन:॥
दोषत्रयहरं प्रोक्तं तद्वत्तिक्ता पटोलिका॥"
इति भावप्रकाश:॥
अपि च राजवल्लभ:।
"पटोलं कफपित्तास्रग्ज्वरकुष्ठव्रणापहम्।
विसर्पनयनव्याधित्रिदोषगरनाशिनी।
पटोलफलकर्षे ति किञ्चिद्गुणान्तरावुभौ॥"

पटोलक:, पुं, (पटोल इव कायति प्रकाशते इति कै+क:।) शुक्ति:। इति शब्दमाला॥

पटोलिका, स्त्री, (पटोल+कन्+टाप्+अत इत्वञ्च।) फलविशेष:। झिङ्गा इति भाषा। घोषलि इति ख्याता। इति केचित्। इति भरत:॥ तत्पर्य्याय:। ज्योत्स्नी २ जाली ३। इत्यमर:।२।४।११८॥ ज्योत्स्ना ४। इति स्वामी॥

पटोली, स्त्री, (पटोल+जातित्वात् ङीष्।) ज्योत्स्नी। इति मेदिनी॥ (झिङ्गा इति भाषा॥ यथा, गारुडे १६८ अध्याये।
"पटोलीमूलकाभ्याञ्च वासकेन च नाशयेत्॥")

पट्टं, क्ली, (पट् गतौ+क्त:। नेट्।) नगरम्। इति शब्दरत्नावली॥

पट्ट:, पुं, (पट्+क्त:। नेट्।) पेषणपाषाण:। शिल इति भाषा॥ (यथा, रघु:।१८।१७।
"तस्याभवत् सूनुरुदारशील:
शिल: शिलापट्टविशालवक्षा:॥")
व्रणादीनां बन्धनम्। पटी इति भाषा॥ चतुष्पथ:। चौमाता रास्ता इति भाषा॥ राजादि-शासनान्तरम्। पाट्टा इति भाषा॥ (यथा, मार्कण्डेये।३६।८।
"तदास्मान् पुत्र। निष्कृष्य महत्तादङ्गुलीयकान्।
वाचयन्ती शासनं पट्टे स्वप्नाक्षरनिवेशितम्॥")
पीठ:। इति मेदिनी॥ पिंडि इति भाषा॥ फलक:। इति त्रिकाण्डशेष:॥ ढाल इति भाषा॥ उष्णीषादि:। इति स्वामी॥ पाग इत्यादि भाषा॥ उत्तरीयादि:। इति सुभूति:॥ एक पाट्टा इति भाषा॥ (यथा, भट्टि:।१०।६०।
"गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम्॥")
कौषेय:। इति मुकुट:॥ पाट् रेशम् इति च भाषा। लोहितकौषेयमुष्णीषादि। इति भरत:॥ राङ्गा रेशमी पाग इत्यादि भाषा॥ (नृपादीनां किरीटविशेषस्वरूपपट्टलक्षणं बृहत्-संहितायां ४९ अध्याये उक्तम्। तद्यथा,—
"विस्तरशो निर्दिष्टं पट्टानां लक्षणं यदाचार्य्यै:।
तत् संक्षेप: क्रियते मयात्र सकलार्थसम्पन्न:॥
पट्ट: शुभदो राज्ञां मध्येऽष्टावङ्गुलानि विस्तीर्ण:।
सप्तनरेन्द्रमहिष्या: षड्युवराजस्य निर्दिष्ट:॥
चतुरङ्गुलविस्तार: पट्ट: सेनापतेर्भवति मध्ये।
द्वे च प्रसादपट्ट: पञ्च ते कीर्त्तिता: पट्टा:॥
सर्व्वे द्विगुणायामा मध्यादर्द्धेन पार्श्वविस्तीर्णा:।
सर्व्वे च शुद्धकाञ्चनविनिर्म्मिता: श्रेयसो वृद्ध्यै॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिव-
महिष्यो:।
एकशिख: सैन्यपते: प्रसादपट्टो विना शिखया॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
वृद्धिजयौ भूमिपतेस्तथा प्रजानाञ्च सुखसम्पत्॥
जीवितराज्यविनाशं करोति मध्ये व्रण:
समुत्पन्न:।
मध्ये स्फुटितस्त्याज्यो विघ्नकर: पार्श्वयो: स्फुटित:॥
अशुभनिमित्तोत्पत्तौ शास्त्रज्ञ: शान्तिमादिशे-
द्राज्ञ:।
शस्तनिमित्त: पट्टो नृपराष्ट्रविवृद्धये भवति॥")

पट्टक:, पुं, पट्ट एव इत्यर्थे स्वार्थे कन्। पट्ट:॥

पट्टजं, क्ली, (पट्टात् कौषेयात् जायते इति। पट्ट+जन्+ड।) वस्त्रभेद:। पट्टवस्त्रम्। इति जटाधर:॥ (यथा, महाभारते।२।५०।२३।
"और्णाञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा।
कुटीकृतं तथैवात्र कमलाभं सहस्रश:॥")

पट्टदेवी, स्त्री, (पट्टा सिंहासनार्हा देवी।) महादेवी। इति राजनिर्घण्ट:॥ पाटराणी इति भाषा॥

पट्टनं, क्ली, (पटन्ति गच्छन्ति वणिजो यत्र। पट गतौ+बाहुलकात् तनन्।) पत्तनम्। इति द्विरूप-कोष:॥

पट्टनी, स्त्री, (पट्टन+गौरादित्वात् ङीष्।) पत्तनम्। इति द्विरूपकोष:॥

पट्टरङ्गं, क्ली, (पट्टं वस्त्रं रज्यतेऽनेन। पट्ट+रञ्ज+घञ्।) पत्तरङ्गम्। इति राजनिर्घण्ट:॥ वकम् इति भाषा॥

पट्टरञ्जनकं, क्ली, (पट्टानां वस्त्राणां रञ्जनम्। तत: कन्।) पत्तरङ्गम्। इति राजनिर्घण्ट:॥

पट्टशाकं, क्ली पु, (पट्टस्य पट्टवृक्षस्य शाकम्।) नालिताशाकम्। इति शब्दमाला भावप्रकाशश्च॥ अस्य गुणा: नाडीचशब्दे द्रष्टव्या:॥

पट्टार्हा, स्त्री, (पट्टे नृपासने अर्हा योग्या।) महादेवी। इति राजनिर्घण्ट:॥ पाटराणी इति भाषा॥

पट्टिका, स्त्री, (पट्टिरिव कायति प्रकाशते इति। पट्टि+कै+क:। स्त्रियां टाप।) पट्टिकाख्य-लोध्र:। इत्यमरटीकायां वाचस्पति:॥ (पुन: पट्ट:। ह्रस्वार्थे कन्। स्त्रियां टाप् इत्वञ्च। वितस्तिविस्तारं वस्त्रम्। इति चिन्तामणि:॥ पट्ट:। पाटा इति भाषा। यथा, नैषधे।१६।६१।
"सर्व्वं विस्तृत्य दैवात् स्तुति-
मुषसि गतां घोषयन् यो घसंज्ञां
प्राक् संस्कारेण सम्प्रत्यपि धुवति
शिर: पट्टिकापाठनेन॥")

पट्टिकाख्य:, पु, (पट्टिका आख्या यस्य।) रक्त-लोध्र:। पाटियालोध इति भाषा। तत्पर्य्याय:। क्रमुक: २ पट्टी ३ लाक्षाप्रसादन: ४। इत्यमर:।२।४।४१॥

पट्टिकालोध्र:, पुं, (पट्टिका एव लोध्र:।) रक्त-लोध्र:। पाटिया लोध इति भाषा। तत्पर्य्याय:। क्रमुक: २ वल्कलोध्र: ३ बृहद्दल: ४ जीर्णबुध्न: ५ बृहद्वल्क: ६ शीर्णपत्र: ७ अक्षिभेषज: ८ शावर: ९ श्वेतलोध्र: १० गालव: ११ बृहत्त्वच: १२ पट्टी १३ लाक्षाप्रसाद: १४ वल्क: १५। इति राजनिर्घण्ट:॥ स्थूलवल्कल: १६ जीर्णपत्र: १७ बृहत्पत्र: १८। इति भावप्रकाश:॥ लोध्रद्वय-गुणा:। कषायत्वम्। शीतत्वम्। वातकफास्र-विषनाशित्वम्। चक्षुष्यत्वम्। तत्र वल्कलोध्रको-विशिष्ट:। इति राजनिर्घण्ट:॥ ग्राहित्वम्। लघुत्वम्। पित्तरक्तपित्तातीसारशोथनाशित्वञ्च। इति भावप्रकाश:॥

पट्टिल:, पु, (पट्टो विद्यतेऽस्य। पट्ट+अस्त्यर्थे इलच्।) पूतिकरञ्ज:। इति जटाधर:॥

पट्टिलोध्र:, पु, (पट्टिरेव लोध्र:।) पट्टिकालोध्र:। इति शब्दरत्नावली॥

पट्टिलोध्रक:, पु, (पट्टिलोध्र+स्वार्थे कन्।) पट्टिका-लोध्र:। इति शब्दरत्नावली॥

पट्टिश:, } पुं, (पट् गतौ+बाहुलकात् टिश(स)
पट्टिस: } च।) अस्त्रविशेष:। यथा,—
"परशु: पट्टिसो नाम स एव च परश्वध:॥"
इत्यमरटीकायां भरत:॥
(यथा, भागवते।८।१०।३६।
"भुशुण्डिभिश्चक्रगदार्ष्टिपट्टिशै:
शक्त्युल्मुकै: प्रासपरश्वधैरपि।
निस्त्रिंशभल्लै: परिघै: समुद्गरै:
सभिन्दिपालैश्च शिरांसि चिच्छिदु:॥")

पट्टी, स्त्री, (पट्टि+वा ङीप्।) पट्टिकालोध्र:। इति राजनिर्घण्ट:॥ ललाटभूषा। इति विश्व:॥ तलसारकम्। अश्ववक्ष:स्थलबन्धनरज्जु:। इति शब्दमाला॥

पट्टी, [न्] पुं, (पट्टोऽस्यास्तीति। इनि:।) रक्त-लोध्र:। इति स्वामी॥ इत्यमरटीकायां भरत:॥

पट्टोलिका, स्त्री (पट्टं पट्टाख्यं उलति प्राप्नोतीति। उल गतौ+ण्वुल् टापि इत्वम्।) कल्पकीला। थवस्थापत्रं इति केचित्। पाट्टा। इति च केचित्। इति त्रिकाण्डशेष:॥

पठ, वाचि। इति कविकल्पद्रुम:॥ (भ्वा-परं-सकं-सेट।) पठति श्लोकं धीर:। इति दुर्गादास:॥

पठनं, क्ली, (पठ+भावे ल्युट्।) वाचनम्। पडन् इति भाषा। यथा, मार्कण्डेये।९२।१८।
"भूतप्रेतपिशाचानां पठनादेव नाशनम्॥"

पठमञ्जरी, स्त्री, श्रीरागस्य चतुर्थरागिणी। तस्या न्यासांशग्रहा: पञ्चम:। गानसमयस्तु एकप्रहर-दिवसोत्तरम्। इति सङ्गीतदर्पण:॥ लक्षणं यथा, सङ्गीतदामोदरे।
"वियोगिनी कान्तवितीर्णपुष्पां
स्रजं वहन्ती वपुषातिमुग्धा।
आश्वास्यमाना प्रियया च सख्या
विधूसराङ्गी पठमञ्जरीयम्॥"

पठसमञ्जरी, स्त्री, रागिणीविशेष:। इति हलायुध:॥

पणिः, स्त्री, (पठ् + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति इन् ।) पठनम् । पाठः । इति शब्दरत्नावली ॥

पठितः, त्रि, (पठ् + क्त ।) वाचितः । कृतपाठः । अधीतः । उच्चरितः । यथा, हास्यार्णवे ।
"मया न पठिता चरकौ त्वया नापि चिकित्सितम् ।
अकस्मान्नगरोपान्ते कथं ध्रमायते चिता ॥"

पठितव्यं, त्रि, (पठ + "तव्यत्तव्यानीयरः ।" ३ । १ । ९६ । इति तव्य ।) पठनीयम् । पाठ्यम् । यथा, मार्कण्डेये देवीमाहात्म्ये । ८२ । ६ ।
"तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥"

पड, इ क संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क पण्डयति । संहतौ राशीकरणम् । इति दुर्गादासः ॥

पड, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट । इदित ।) ङ, पण्डते । ङ, पण्डते । इति दुर्गादासः ॥

पण, ङ व्यवहृतौ । स्तुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट ।) व्यवहृतौ व्यवहारे । ङ, पणते । पणायति पणायते आयान्तत्वाद्भय-पदमिति वोपदेवः । प्राणानामपणिष्टासौ अत्र कर्म्मणि षष्ठी । स्तुतौ तु पणायति पणायते विष्णुं धीरः । अरे तु द्वयोरर्थयोरेव आयस्याप्राप्तिपक्षे आत्मनेपदमेव । अपणिष्ट पेणे पणिता पणिषीष्ट पणिष्यते अपणिष्यत् । इति दुर्गादासः ॥

पणः, पु, (पण्यतेऽनेन । पण व्यवहारे + "नित्यं पणः परिमाणे ।" ३ । ३ । ६६ । इति अप् ।) कार्षिकताम्रिकः । स तु पञ्चगण्डकमाषकारब्ध-ताम्रकर्षकृतव्यवहारद्रव्यम् । पूर्ब्बं हि ताम्रर्णिकायाः कपर्द्दक एको मूल्यमिति अशीतिवराटमूल्यः । लोके तु पञ्चाशत् कार्षापणवत् पणव्यपदेशो मूल्य एव । निर्ब्बिंशः । भृतिः । (पणो मूल्यत्वेनास्त्यस्मिन् । पण + "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ।) द्यूतम् । ग्लहः । आड् इति खेल इति वाजि इति च भाषा । (यथा, आर्य्यासप्तशती । ३५४ ।
"प्रतिभूः शुको विपक्षे दण्डः शृङ्गारसंकथा गुरुगु ।
पुरुषायितं पणस्तद्वाले परिभाव्यतां दायः ॥"
पण्यते व्यवह्रियते इति । "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः ।) मूल्यम् । धनम् । इत्यमरभरतौ ॥ कार्षापणः । (यथा, मनुः । ८ । २२४ ।
"यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥")
क्रयशलाकादिका । व्यवहारः । इति मेदिनी ॥ विंशतिगण्डकः । इति हेमचन्द्रः ॥ शौण्डिकः । इति जटाधरः ॥ गृहम् । इति शब्दमाला ॥ (पणते अधिकारिभेदेन सुखभोगादिकं व्यवहरति साधकस्य सुकृत्यनुसारेण वैकुण्ठवासादिफलं प्रददातीत्यर्थः । पचाद्यच् । यद्वा, पण्यते स्तूयते यः । पण स्तुतौ "पुंसीति संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । विष्णुः । यथा, महाभारते । १३ । १४९ । ११५ ।
"ऊर्द्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥")

पणग्रन्थिः, पुं, (पणस्य विक्रयादेर्ग्रन्थिर्यत्र ।) हट्टः । इति शब्दरत्नावली ॥

पणनं, क्ली, (पण व्यवहारे + भावे ल्युट् ।) विक्रयः । इति शब्दरत्नावली ॥

पणफरं, क्ली, लग्नात् द्वितीयपञ्चमाष्टमैकादश-लग्नाः । यथा, ज्योतिस्तत्त्वे ।
"पणफरं द्वितीयाष्टपञ्चमैकादशं विदः ॥"

पणवः, पुं, (पणं स्तुतिं वातीति । पण + वा + कः ।) गायनपटहः । (यथा, गीतायाम् । १ । १३ ।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥")
प्रणव इति केचित् । इत्यमरभरतौ ॥

पणवा, स्त्री, (पणव + टाप् ।) पणवः । यथा —
"पणवः पणवा च स्यात् प्रणवोऽप्यत्र वर्त्तते ॥"
इति भरतद्विरूपकोषः ॥

पणसः, पुं, (पणायते इति । पण + "अत्यविचमीति ।" उणां । ३ । ११७ । इति असच् ।) पण्यद्रव्यम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पणाङ्गना, स्त्री, (पणेन धनेन लभ्या अङ्गना । धनेन वश्यत्वात् तथात्वम् ।) वेश्या । इति हेमचन्द्रः ॥

पणाया, स्त्री, (पणाय्यते व्यवह्रियते इति । पण व्यवहारे स्तुतौ च + स्वार्थे आय + ततो भावे अप् । ततष्टाप् ।) क्रयविक्रयव्यवहारः । इति जटाधरः ॥ (स्तुतिः । द्यूतम् । इति धात्वर्थ-लब्धोऽर्थः ॥)

पणायितः, त्रि, (पणाय्यते स्म इति । पण व्यवहारे स्तुतौ च । "आयादय आर्धधातुके वा ।" ३ । १ । ३१ । इति स्वार्थे आयस्ततः क्तः ।) स्तुतः । इत्यमरः । ३ । २ । १०९ ॥ (व्यवहृतम् । क्रीतम् । विक्रीतम् । इति धात्वर्थ-लब्धोऽर्थः ॥)

पणास्थि, क्ली, (पणस्य पणाय वा यदस्थि ।) कपर्द्दकम् । वराटकः । इति त्रिकाण्डशेषः ॥

पणास्थिकं, क्ली, (पणास्थि + स्वार्थे कन् ।) वराटकः । इति हेमचन्द्रः ॥

पणितं, त्रि, (पण्यते स्म इति । पण + क्त । अया-भावपक्षे सिद्धम् ।) स्तुतम् । इत्यमरः ।३।२।१०९॥ व्यवहृतम् । इति पणधात्वर्थदर्शनात् ॥ (ग्लहः, क्ली । वाजि इति भाषा । यथा, महाभारते १ । सौपर्णे । २७ । ४ ।
"ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम ।
जग्मतुः परया प्रीत्या परं पारं महोदधेः ॥")

पणितव्यं, त्रि, (पण्यते इति । पण ङ व्यवहारे स्तुतौ च । "तव्यत्तव्यानीयरः ।" ३ । १ । ९६ । इति तव्य ।) विक्रेयद्रव्यम् । इत्यमरः । २ । ९ । ८२ ॥ स्तोतव्यम् । व्यवहार्य्यम् । इति पणधात्वर्थ-दर्शनात् ॥

पण्डः, पुं, (पण्डते निष्फलत्वं प्राप्नोतीति । पडि गतौ + पचाद्यच् । यद्वा पण ङ व्यवहारे । "अमन्तात् डः ।" उणां । १ । ११३ । इति डः ।) क्लीवम् । नपुंसकम् । इत्यमरः । २ । ६ । ३९ ॥ निष्फले, त्रि, ॥

पण्डा, स्त्री, (पण ङ व्यवहारे । "अमन्तात् डः ।" उणां । १ । ११३ । इति डः । ततष्टाप् ।) बुद्धिः । इति मेदिनी ॥ तत्त्वानुगा बुद्धिः । इति हेमचन्द्रः ॥

पण्डापूर्ब्बं, क्ली, (पण्डं निष्फलं अपूर्ब्बं अदृष्टम् ।) फलाजनकादृष्टम् । तद्विशिष्टे त्रि । यथा,
"यदपि पण्डापूर्ब्बं फलमिति तदपि न कामनाभावे अकरणापत्तेस्तौल्यात् ।" इति सिद्धान्त-मुक्तावली ॥

पण्डितः, पुं, (पण्डा वेदोज्ज्वला तत्त्वविषयिणी वा बुद्धिः । सा जाता अस्य । "तदस्य संजातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् । यद्वा, पण्ड्यते तत्त्वज्ञानं प्राप्यतेऽस्मात् । गत्यर्थेति क्तः ।) शास्त्रज्ञः । अस्य लक्षणं यथा,—
("निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अ-नास्तिकः श्रद्दधान एतत् पण्डितलक्षणम् ॥"
इति चिन्तामणिः ॥)
"पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥"
इति महाभारते वनपर्व्व ॥
अपि च श्रीभगवद्गीतायाम् । ५ । १७ ।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥"
तत्पर्य्यायः । विद्वान् २ विपश्चित३ दोषज्ञः४ सन्५ सुधीः ६ कोविदः ७ बुधः ८ धीरः ९ मनीषी१० ज्ञः११ प्राज्ञः१२ संख्यावान्१३ कविः१४ धीमान् १५ सूरिः १६ कृती १७ कृष्टिः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२ । इत्यमरः । २ । ७ । ५-६ ॥ विशारदः २३ । कवी २४ सूरी २५ । इति भरतः ॥ विदग्धः २६ दूरदृक् २७ वेदी २८ वृद्धः २९ बुद्धः ३० विधानगः ३१ प्रज्ञिलः ३२ ज्ञानिः ३३ । इति शब्दरत्नावली ॥ विज्ञः ३४ मेधावी ३५ । इति राजनिर्घण्टः ॥ सिह्लकः । इति मेदिनी ॥ (सर्व्वज्ञत्वात् महादेवः । यथा, महाभारते । १३ । १७ । १२४ ।
"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः ॥")

पण्डितम्मन्यः, त्रि, (आत्मानं पण्डितम्मन्यते यः सः । "आत्ममाने खश्च ।" ३ । २ । ८३ । इति खश् ।) पण्डिताभिमानी । इति व्याकरणम् ॥

पण्डितमानी, [न्] त्रि, (आत्मानं पण्डितं मन्यते इति । मन । णिनिः ।) पण्डिताभिमानी । यथा
"मूर्खाः पण्डितमानिनः ।" इति प्राचीनाः ॥

पण्यं, त्रि, (पण्यते इति । पण ङ व्यवहारे स्तुतौ च । "अवद्यपण्यवर्य्या गर्ह्येति ।" ३ । १ । १०१ । निपातनात् साधु ।) पणितव्यम् । विक्रेयद्रव्यम् । इत्यमरः । २ । ९ । ८२ । (यथा, रामायणे । २ । ४८ । ४ ।
"न चाक्रुश्यन् न चामोदन् वणिजो न प्रसारयन् ।

न चाप्योभत्त पण्यानि नापचत् गृहमेधिनः ॥”) व्यवहार्य्यम् । स्तोतव्यम् । इति पणधात्वर्थदर्शनात् ॥ (क्ली, पण्यते व्यवह्रियतेऽत्र । पण + यत् । विपणिः । यथा, मनुः । ५ । १२९ ।
“नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् ॥”
“पण्यं पण्यवीथिकायाम् ।” इति कुल्लूकभट्टः ॥)

पण्यवीथिका, स्त्री, (पण्यानां विक्रेयद्रव्याणां वीथिका गृहम् ।) विपणिः । इत्यमरः ।२।२।२॥ पण्यविक्रयशाला । इति हलायुधः ॥ हट्टः । इत्यन्ये ॥ विक्रयार्थप्रसारितनानाद्रव्याणां वणिग्वीथी । वाणिज्याविष्टी इति वाजार इति च ख्यातः । इति केचित् । हट्टमण्डपः । इति केचित् । हट्टमध्यस्थपण्यविक्रयवीथी । इति केचित् । इति तट्टीकायां भरतः ॥
“आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम् ॥”
इति शाश्वतः ॥

पण्यवीथी, स्त्री, (पण्यानां वीथी विक्रयगृहम् ।) क्रयविक्रयस्थानम् । इति शब्दमाला ॥

पण्यशाला, स्त्री, (पण्यानां विक्रेयद्रव्याणां शाला गृहम् ।) हट्टः । इति हेमचन्द्रः ॥ विक्रयगृहञ्च ॥

पण्यस्त्री, स्त्री, (पण्या मूल्येन लभ्या या स्त्री । यद्वा पण्ये हट्टादिस्थले स्थिता स्त्री ।) वेश्या । इति कोषान्तरम् ॥

पण्या, स्त्री, (पण्यते स्तूयते रोगघ्नत्वात् । पण ङ व्यवहारे स्तुतौ च + कर्म्मणि यत् ततष्टाप् ।) पिण्या । इति द्विरूपकोषः ॥

पण्याङ्गना, स्त्री, (पण्या पणेन मूल्येन लभ्या या अङ्गना ।) वेश्या । इति हेमचन्द्रः ॥

पण्याजीवः, पुं, (पण्यैः क्रयविक्रयद्रव्यैराजीवति प्राणिति । आ + जीव + कः ।) क्रयविक्रयिकः । वणिक् । इत्यमरः । २ । ९ । ७८ ॥

पण्याजीवकं, क्ली, (पण्यैः क्रयविक्रयद्रव्यैराजीवति तिष्ठतीति । पण्याजीवस्ततः स्वार्थे कन् । अभिधानात् क्लीवत्वम् । यद्वा, पण्याजीवैर्वणिग्भिः कायति शब्दायते इति । कै + कः ।) हट्टः । इति त्रिकाण्डशेषः ॥ पण्यजीवकमित्यपि पाठः ॥

पण्यान्धा, स्त्री, (पण्यं अन्धयति स्वगुणेन या । अन्ध + अच् ।) कङ्गुनीविशेषः । तत्पर्य्यायः । कङ्गुनीपत्रा २ पण्यधा ३ पणधा ४ । अस्या गुणाः । समवीर्य्यत्वम् । तिक्तत्वम् । क्षारत्वम् । धारकत्वम् । तत्कालशस्त्रघातव्रणसंरोपणत्वञ्च ।
दीर्घा मध्या तथा ह्रस्वा पण्यान्धा त्रिविधा स्मृता । रसवीर्य्यविपाकेषु मध्यमा गुणदायिका ॥”
इति राजनिर्घण्टः ॥
पण्यन्धा इत्यपि पाठः ॥

पत् [द्] पुं, (पद्यते गच्छत्यनेन । पदौ ङ गतौ + करणे क्विप् ।) पादः । इत्यमरः । २ ।६ ।७१॥ (यथा, मनुः । ४ । २०७ ।
“मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदास्पृष्टञ्च कामतः ॥”
केचित्तु पादशब्दस्य पद् इत्यादेशो भवतीति वदन्ति । अन्येस्तु न मन्यन्ते अतः “पदादयः पृथक्शब्दा इत्येके ।” इति मुग्धबोधे वोपदेवेनोक्तम् ॥)

पत, ऌ ज गतौ । ऐश्ये । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) ऌ, अपतत् । ज, पातः पतः । गतिरिह पतनम् । पतति पत्रं वृक्षात् । इति दुर्गादासः ॥

पत, त क गतौ । ऐश्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-अकं-सेट् ।) ऐश्यमिश्वरीभावः । गतिरिह पतनम् । पतयति पत्रं वृक्षात् । इति दुर्गादासः ॥

पत, य ङ ऐश्ये । इति कविकल्पद्रुमः ॥ (दिवा-आत्मं-अकं-सेट् ।) य ङ, पत्यते । ऐश्यमैश्वर्य्यमिश्वरीभावः । इति दुर्गादासः ॥

पतं, त्रि, (पततीति । पत् + अच् ।) पुष्पम् । इति जटाधरः ॥ (पतनकर्त्तरि च, त्रि ॥)

पतगः, पुं, (पत उत्पतितः सन् गच्छति । यद्वा पतेन पक्षेण गच्छतीति । गम् + डः ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, मनुः ।७।२३।
“देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥”)

पतङ्गं, क्ली, (पत् ऌ गतैश्वर्य्ययोः । बाहुलकात् अङ्गच् ।) सूतम् । पारदम् । इति मेदिनी ॥ चन्दनभेदः । इति शब्दचन्द्रिका ॥

पतङ्गः, पुं, (पतति गच्छतीति । “पतेरङ्गच् पक्षिणि ।” उणां । १ । ११८ । इति अङ्गच् ।) पक्षी । (यथा, मार्कण्डेये । १० । ८९ ।
“ततः सर्व्वेषु निर्माणं पापी निर्य्यकत्वमभ्युत ।
कृमिकीटपतङ्गेषु श्वापदे मशकादिषु ॥”)
सूर्य्यः । (यथा, माघे । १ । १२ ।
“पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत ॥”
“कथं पतङ्गः सूर्य्यः । खगत्वसामान्योपचारात् । ‘पतङ्गः शलभे सूर्य्ये पतङ्गः पक्षिणि स्मृतः ॥’ इति कोषान्तरम् ॥” इत्युज्ज्वलदत्तः ॥)
शलभः । इत्यमरः । ३ । ३ । २० ॥ शालिप्रभेदः । इति मेदिनी ॥ जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

पतङ्गमः, पुं, (पत उत्पतितः सन् गच्छतीति । गम् । खच् । मुम् च ।) पक्षी । इति व्याकरणम् ॥ (शलभः । यथा, भागवते । ७ । ८ ।२४।
“अलक्षितोऽग्नौ पतितः पतङ्गमो
यथा नृसिंहौजसि सोऽसुरस्तदा ॥”)

पतङ्गिका स्त्री, (पतङ्ग + स्वल्पार्थे संज्ञायां वा कन् । स्त्रियां टाप् अत इत्वञ्च ।) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पुत्तिका २ । इत्यमरः । २ । ५ । २७ ॥ (यथा, महाभारते । १ । १०८ । १० ।
“पतङ्गिकानां पुच्छेषु त्वयेषीका प्रवेशिता ।
कर्म्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन ॥”)

पतञ्चिका, स्त्री, (पतनमभिगतं शत्रुमित्यर्थः चिकयति पीडयति स्वारोपितशरेणेति यावत् । पृषोदरात् साधुः ।) धनुर्ज्या । इति शब्दरत्नावली ॥

पतञ्जलिः, पुं, (पतः पतन् वा अञ्जलिः नमस्कार्य्यतया यस्मिन् । शकन्ध्वादित्वात् साधुः ।) मुनिविशेषः । स तु पातञ्जलदर्शनपाणिनिटीकामहाभाष्यादिग्रन्थकर्त्ता । तत्पर्य्यायः । गोनर्दीयः २ । इति हेमचन्द्रः ॥ चूर्णिकृत् ३ भाष्यकारः ४ । इति त्रिकाण्डशेषः ॥ वररुचिः ५ । इति शब्दरत्नावली ॥ (केषाञ्चिन्मते योगसूत्रकारकपतञ्जलेर्भाष्यकृत् पतञ्जलिर्भिन्न एव । अनयोरभेदनान्तु निर्दिशन्ति पाश्चात्याः ॥ पातञ्जलयोगशास्त्रन्तु पादचतुष्टयात्मकं तत्र प्रथमे पादे “अथ योगानुशासनम् ।” इति योगशास्त्रारम्भप्रतिज्ञां विधाय “योगश्चित्तवृत्तिनिरोधः ।” इत्यादिना योगलक्षणमुक्त्वा सप्रपञ्चसमाधिनिर्द्देशं कृतवान् भगवान् पतञ्जलिः । द्वितीये तु “तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ।” इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च वहिरङ्गाणि साधनानि च निरदिशत् । तृतीये “देशबन्धश्चित्तस्य धारणा ।” इत्यादिना धारणाध्यानसमाधित्रयरूपमन्तरङ्गं संयमपदवाच्यं तत्र अवान्तरफलं विभूतिजातञ्च उपदिदेश । चतुर्थ पादे तु “जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः ।” इत्यादिना ससिद्धिपञ्चकं मुख्यं प्रयोजनं कैवल्यं प्रधानादीनि पञ्चविंशतितत्त्वानि क्लेशकर्म्मविपाकाशयैरसंस्पृष्टं पुरुषं स्वेच्छया निर्म्माणकायमधिष्ठाय लौकिकादिसम्प्रदायप्रवर्त्तकं संसारदहने दग्धानां जीवानां निस्तारकञ्च उपदिष्टवान् ॥)

पतत्त्रं, क्ली, (पतन्तं त्रायते इति । पतत् + त्रै + कः ।) पक्षः । पाखा इति भाषा । इत्यमरः । २ ।५।३६। (यथा, भागवते ।८।११।३४।
“येन मे पूर्व्वमद्रीणां पक्षच्छेदः प्रजात्यये ।
कृतो निविशतां भारैः पतत्त्रैः पततां भुवि ॥”
(त्रं) पत ऌ गतौ । “अमिनक्षियजिवधिपतिभ्योऽत्रन् ।” उणां । ३ । १०५ । इति अत्रन् । वाहनम् । इत्युज्ज्वलदत्तः ॥)

पतत्त्री, [न्] पुं, (पतत्त्रं पक्षो विद्यतेऽस्य । पतत्त्र + इनिः ।) पक्षी । इत्यमरः ।२।५।३३॥ (यथा, कुमारे । ५ । ४ ।
“पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्त्रिणः ॥”)

पतत्रिः, पुं, (पतति उत्पततीति । “पतेरत्रिन् ।” उणां । ४ । ६८ । इति अत्रिन् ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥

पतद्ग्रहः, पुं, (पतत् मुखादिभ्यः स्खलत् जलादि गृह्णातीति । पतत् + ग्रह + अच् ।) प्रतिग्राहः । इत्यमरः । २ । ३ । १३९ ॥ पिकदानी इति भाषा ॥

पतद्भीरुः, पुं, (पतन् पक्षी भीरुर्यस्मात् ।) श्येनः । इति शब्दरत्नावली ॥

पतन् [त्] पुं, (पततीति । पत् + शतृ ।) पक्षी । (यथा, महाभारते । २ । ३८ । २८ ।
“नक्षत्राणां मुखं चन्द्र आदित्यस्तेजसां मुखम् ।

पलपताकी यथा,—
"प्रतिदण्डं पलान्येषां ज्ञात्वा वाच्यं कचिच्छुभम् ॥
रवौ च वेदा वसवः सुधांशौ
कुजे च बाणाः शशिजे तथाङ्काः ।
शुक्रस्य तुर्दिक् च बृहस्पतौ स्या-
द्राहौ तुरङ्गा भृगुजे च रुद्राः ॥"
बालस्य शुभाशुभफलं यथा,—
"अशुभे दण्डसंयोगे सर्व्वत्र पुण्यवर्जिते ।
बालस्य मरणं शीघ्रं यदि पापैः समन्वितम् ॥
अशुभग्रहदण्डे तु सर्व्वत्र पापवर्ज्जिते ।
बालस्य कुशलं सर्व्वं शुभैर्यदि समन्वितम् ॥
अशुभो दण्डनाथो हि वेधर्क्षसेन लभ्यते ।
मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत् ॥
पापस्य दण्डमात्रे तु तद्योगवेधवर्जिते ।
बालस्य कुशलं तत्र शुभैर्यदि समन्वितम् ॥"
इति ज्योतिषतत्त्वे पताकीवेधः ॥
(स्त्रियां ङीष् । सेना । यथा, रघुः । ४ । ८२ ।
"न प्रसेहे स रुद्धार्कमधारावर्षदुर्द्दिनम् ।
रथवर्त्म रजोऽप्यस्य कुत एव पताकिनीम् ॥")
पतिः, पुं, (पाति रक्षतीति । पा ल रक्षणे + डतिः ।)
मूलम् । गतिः । इति विश्वः ॥ पाणिग्रहीता ।
भातार इति भाषा । तत्पर्य्यायः । धवः २
प्रियः ३ भर्त्ता ४ । इत्यमरः । २ । ६ । ३५ ॥
कान्तः ५ प्राणनाथः ६ गुरुः ७ हृदयेशः ८
जीवितेशः ९ जामाता १० सुखोत्सवः ११
नर्म्मकीलः १२ रतगुरुः १३ स्वामी १४ रमणः
१५ । इति शब्दरत्नावली ॥ वरः १६ परिणेता
१७ गृही १८ । इति राजनिर्घण्टः ॥ तस्य लक्ष-
णम् । विधिवत्पाणिग्राहकः । अनुकूलदक्षिण-
धृष्टशठभेदात् पतिश्चतुर्द्धा । सार्व्वकालिकपरा-
ङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनु-
कूलः । १ । सकलनायिकाविषयसमसहजानु-
रागो दक्षिणः । २ । भूयो निःशङ्कः कृतदोषो-
ऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो
धृष्टः । ३ । कामिनीविषयकपटपटुः शठः । ४ ।
इति रसमञ्जरी ॥ * ॥ पतिसेवादिफलं यथा,
"कथं मे सुव्रते । साध्वि । निद्राभङ्गः कृतस्त्वया ।
व्यर्थं व्रतादिकं तस्या या भर्त्तुरपकारिणी ॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् ।
भर्त्तुरप्रियकारिण्याः सर्व्वं भवति निष्फलम् ॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् ॥
सर्व्वदानं सर्व्वयज्ञः सर्व्वतीर्थनिषेवणम् ।
सर्व्वं व्रतं तपः सर्व्वमुपवासादिकञ्च यत् ॥
सर्व्वधर्म्मश्च सत्यञ्च सर्व्वदेवप्रपूजनम् ।
तत् सर्व्वं स्वामिसेवायाः कलां नार्हन्ति
षोड़शीम् ॥
सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः शतम् ॥
विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् ।
असत्कुलप्रजाता या तत्फलं श्रूयतां सति । ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्त्रविवर्ज्जिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४३ अध्यायः ॥*॥
अपि च ।
"स्वकान्तश्च परो बन्धुरिह लोके परत्र च ।
नहि कान्तात् परः श्रेयान् कुलस्त्रीणां परो गुरुः ॥
देवपूजा व्रतं दानं तपश्चानशनं जपः ।
स्नानञ्च सर्व्वतीर्थेषु दीक्षा सर्व्वमखेषु च ॥
प्रादक्षिण्यं पृथिव्याश्च ब्राह्मणातिथिसेवनम् ।
सर्व्वाणि पतिसेवायाः कलां नार्हन्ति षोड़शीम् ॥
किमतः पतिभक्तायाः अभक्तायाश्च भारते ।
यया दुःखी सुखारम्भे साकाङ्क्षः प्रथमो भवेत् ॥
पतिसेवापरो धर्म्मो नहि स्त्रीणां श्रुतौ श्रुतम् ।
स्वप्ने ज्ञाने च सततं कान्तं नारायणाधिकम् ।
दृष्ट्वा तच्चरणाम्भोजं सेवां नित्यं करिष्यसि ॥
परिहासेन कोपेन भ्रमेणावज्ञया सुते ।
कटूक्तिं स्वामिनः साक्षात् परोक्षान्न करिष्यसि ॥
स्त्रिया वाग्योनिदुष्टाया कामतो भारते भुवि ।
प्रायश्चित्तं श्रुता नास्ति नरकं ब्रह्मणः शतम् ॥
सर्व्वधर्म्मपरीता या कटूक्तिं कुरुते पतिम् ।
शतजन्मकृतं पुण्यं तस्या नश्यति निश्चितम् ॥
दत्त्वा कन्यां बोधयित्वा जगाम मुनिपुङ्गवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७४ अध्यायः ॥
अपि च ।
"या स्त्री भर्त्तुरसौभाग्या सा सर्व्वभाग्या च सर्व्वतः ।
शयने भोजने तस्या न सुखं जीवनं वृथा ॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत् किं पुत्त्रे धने रूपे सम्पत्सु वा वनेऽथवा ॥
यच्छक्तिर्नास्ति कान्ते च सर्व्वप्रियतमे परे ।
सा शुचिर्धर्म्महीना च सर्व्वकर्म्मविवर्ज्जिता ॥
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च ।
सर्व्वस्माच्च परः स्वामी न गुरुः स्वामिनः परः ॥
पिता माता सुतो भ्राता किञ्चिद्दत्त्वा मितं धनम् ।
सर्व्वस्वदाता स्वामी च महानां योषितां सुराः ॥
कश्चिदेव हि जानाति महासाध्वी च स्वामिनम् ।
अतिमहद्वंशजाता च सुशीला कुलपालिका ॥
असद्वंशप्रसूता या दुःशीला धर्म्मवर्ज्जिता ।
सुखदुष्टा योनिदुष्टा पतिं निन्दति कोपतः ॥
या स्त्री देहि सर्व्वपरं पतिं विष्णुसमं गुरुम् ।
कुम्भीपाके पचति सा यावदिन्द्राश्चतुर्द्दश ॥
व्रतञ्चानशनं दानं सर्व्वं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनायाः भस्मीभूतं निरर्थकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५७ अध्यायः ॥
अपि च ।
"साध्व्याः सद्वंशजायाश्च शतपुत्राधिकः पतिः ।
असद्वंशप्रसूता या दुःशीला ज्ञानवर्ज्जिता ॥
स्वामिनं मन्यते नासौ पित्रोर्हीनेन कुत्सिता ।
कुत्सितं पतितं मूढं दरिद्रं रोगिणं जड़म् ॥
कुलजा विष्णुतुल्यञ्च कान्तं पश्यति सन्ततम् ॥
हुताशनो वा सूर्य्यो वा सर्व्वतेजस्विनां परः ।
पतिव्रतातेजसश्च कलां नार्हन्ति षोड़शीम् ॥
महादानानि पुण्यानि व्रतान्यनशनानि च ।
तपांसि पतिसेवायाः कलां नार्हन्ति षोड़शीम् ॥
पुत्त्रो वापि पिता वापि बान्धवो वा सहोदरः ।
योषितां कुलजातानां न कश्चित् स्वामिनः समः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ४४ अध्यायः ॥*॥
पतिदक्षिणादि यथा —
"निरूपितश्च वेदेषु स्वशब्दो धनवाचकः ।
तदयस्यास्तीति स स्वामी वेदज्ञ । शृणु मद्वचः ॥
तस्य दाता सदा स्वामी न च स्वं स्वामिनो भवेत् ।
अहो यवस्था भवतां वेदज्ञानमबोधताम् ॥
धर्म्म उवाच ।
पत्नीं विना न स्वं साध्वि । स्वामिनं दातुमक्षमम् ।
दम्पती ध्रुवमेकाङ्गौ तयोर्द्दाता न द्वौ समौ ॥
निरूपिता पुण्यकं च व्रते स्वामी च दक्षिणा ।
श्रुतौ श्रुतो यः स्वधर्म्मो विपरीतो ह्यधर्म्मकः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः ॥
पतिः, त्रि, (पाति रक्षति पालयतीति वा । "पाते-
र्डतिः ।" उणां । ४ । ५७ । इति डतिः ।)
अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३
ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८
परिवृढः ९ अधिपः १० । इत्यमरः । ३ । १ । १० । ११ ॥
(यथा, मनुः । ७ । ११५ ।
"ग्रामस्याधिपतिं कुर्य्यात दशग्रामपतिं तथा ।
विंशतीशं शतेशञ्च सहस्रपतिमेव च ॥")
पतिंवरा, स्त्री, (पतिं वृणोति या सा । वृ ञ वरणे +
खच् । "संज्ञायां भृतॄवृजीति ।" ३ । २ । ४६ ।
इति मुम ।) स्वयंवरा । स्वेच्छया पत्यन्वेषिणी ।
(यथा, रघौ । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कॢप्तविवाहवेशा ॥")
कृष्णजीरकः । इति शब्दचन्द्रिका ॥
पतिघ्नी, स्त्री, (पतिं हन्ति इति । "लक्षणे जाया-
पत्योष्टक् ।" ३ । २ । ५२ । इति टक् ततो ङीप् ।)
पतिनाशकहस्तरेखाविशेषः । यथा, "लक्षणे
जायापतिभ्याम् । जायाघ्नो हस्तः । पतिघ्नी पाणि-
रेखा ।" इति संक्षिप्तसारव्याकरणम् ॥ स्वामिहन्त्री ।
(विवाहात् प्राक् चत्वारिंशत् पिण्डाष्टकस्य कुमार्य्यै
परीक्षार्थं दाने तदा श्मशानजातमृत्पिण्डस्य
ग्रहणे कुमार्य्यास्तस्याः पतिहननरूपफलं यथा,
आश्वलायनगृह्यसूत्रे १ । ५ । ६ । "अष्टौ पिण्डान्
कृत्वा पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषामेकं
गृहाणेति ।" इति नियोजिता कुमारी यदि
श्मशानादाहृतं मृदं गृह्णाति तदा पतिघ्नीति
तां विद्यात् ॥)
पतितः, त्रि, (पतति भ्रष्टो भवति स्वधर्म्मात् शास्त्र-
विहितकर्म्मणः सदाचारादिभ्यो वा यः । पत् +
कर्त्तरि क्तः ।) चलितः । गलितः । पतनाश्रयः ।
पड़ा इति भाषा । तत्पर्य्यायः । प्रस्कन्नः २ ।
इति हेमचन्द्रः ॥ पातित्यविशिष्टः । स्वधर्म्मच्युतः ।
तस्य लक्षणं यथा, मार्कण्डेयपुराणे ।
"स्वधर्म्मं यः समुत्सृज्य परधर्म्मं समाश्रयेत् ।
अनापदि स विद्वद्भिः पतितः परिकीर्त्तितः ॥"

पातित्यकारणं यथा, मात्स्ये २०१ अध्याये ।
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
पतिता यथा,—
"गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः ।
क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ।
कुशिल्पजीविनश्चैव शूनालङ्कारकारिणः ॥"
तथा,—
"ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥"
तेषां दाहादिनिषेधो यथा,—
"पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ॥"
इति शुद्धितत्त्वे ब्रह्मपुराणम् ॥ * ॥
तेषां संसर्गनिषेधो यथा, वराहपुराणे ।
"आसनशयनाद्येन भोजनात् कथनादिषु ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥"
प्रायश्चित्तेतरवैदिककर्म्मानधिकारी सन् नरक-
भागी । यथा —
"पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम् ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥
याजनाध्यापनाद्यौनात् न तु यानाशनासनात् ।
यो येन पतितेनैव संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये ॥"
तेषामुदककार्य्यं यथा —
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ ॥
दासीघटमयं पूर्णं पर्य्यस्येत् प्रेतवत् सदा ।
अहोरात्रमुपासीरन् नाशौचं बान्धवैः सह ॥
निवर्त्तयेरंस्तस्मात्तु सम्भाषणसहासनम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
अत्याज्या पतिता यथा, मत्स्यपुराणे ।
"पतिता गुरवस्त्याज्या न तु माता कदाचन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥"
द्वादशवार्षिकव्रतनाश्यपापयुक्तः । तस्य और्द्ध-
देहिकविधिर्यथा, "पूर्व्वोक्तश्चात्मघाती दाहा-
शौचादिनिषेधस्तदानीमेव । वत्सरान्ते तु सर्व्व-
मौर्द्धदेहिकं कुर्य्यात् ॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्ध्वं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्धदेहिकम् ॥"
इति हेमाद्रौ षट्त्रिंशन्मतात् ॥
एवं म्लेच्छीकृतानामपि । गयाश्राद्धमपि कार्य्यम् ।
"आत्महा च कृतघ्नश्च गोघाती पञ्चपातकी ।
सर्व्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥"
इत्यग्निपुराणात् ॥ * ॥
एवं श्राद्धेऽपि ।
"क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वात् गयाकूपे स्वबन्धुभिः ॥
मार्त्तण्डपादमूले वा श्राद्धं हरिहरौ स्मरन् ॥"
स्वर्यपदं इत्यर्थः ॥ * ॥ तत्र वर्षमध्ये कृत्यमुक्त-
मपरार्के वायुपुराणे ।

"शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरम् ।
द्वादशाहानि वा कुर्य्यात् शुक्ले च प्रथमेऽहनि ॥"
छागलेयः ।
"नारायणवलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥"
व्यासः ।
"नारायणं समुद्दिश्य शिवं वा यत् प्रदीयते ।
तस्य शुद्धिकरं कर्म्म तद्भवेन्नैतदन्यथा ॥"
स चात्मघातादिप्रायश्चित्तं कृत्वा कार्य्यः । तदुक्तं
हेमाद्रौ षट्त्रिंशन्मते ।
"कृत्वा चान्द्रायणं पूर्व्वं क्रिया कार्य्या यथाविधि ।
नारायणवलिः कार्य्यो लोकगर्हाभयात् नरैः ॥
पिण्डोदकक्रिया: पश्चात् कुर्य्यात् सर्व्वादिकञ्च यत् ।
एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा ॥"
दिवोदासीये वृद्धशातातपस्तु इत्याह ।
"पतिते च मृते शुद्ध्यै प्राजापत्यांस्तु षोडश ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥"
इदं प्रायश्चित्तार्हपित्रादिविषयम् ।
"इन्द्रियैरपरित्यक्ता ये च मूढा विषादिनः ।
घातयन्ति स्वमात्मानं चाण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यथाश्राद्धं प्रतन्वन्ति विधानामप्रतिष्ठितम् ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे ॥"
इति हेमाद्रौ तेनैवोक्तः ॥ * ॥
तत्रैव वौधायनोऽपि । नारायणवलिं व्याख्या-
स्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मण-
हतानाञ्च द्वादशवर्षाणि त्रीणि वा वारिमरणं
यत्र यस्य तत्र तत्र कुर्व्वीतेति ॥ * ॥ गृह्यपरि-
शिष्टे तु चण्डालादित्याद्युक्ता,—
"दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तन्तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयम् ॥"
इत्युक्तम् ॥ * ॥ मदनरत्ने ।
"ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा
कुर्व्वीतेति ॥" * ॥ मदनरत्ने ब्राह्मे ।
"प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः ।
चण्डालैर्ब्राह्मणैर्म्लेच्छैर्निहतो यश्च कुत्रचित् ॥
तस्य दाहादिकं कार्य्यं यस्मान्न पतितस्तु सः ।
चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान् पञ्चदश कृत्वा तु विधिना दहेत् ।
बुद्धिपूर्व्वमृतानान्तु त्रिंशत्कृच्छ्रं समाचरेत् ॥"
इत्युक्तम् । स्मृतिरत्नावल्यां तद्द्विगुणं प्रायश्चित्तं
कृत्वा अब्दात् सर्व्वं कार्य्यं इत्युक्तम् ।
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यात् दहनादि यथोदितम् ।
कृत्वा नारायणवलिमनित्यत्वात्तदायुषः ॥" इति ॥
इदञ्चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन
समुच्चितं कार्य्यम् । अतएव वौधायनेनोक्तम् ।
द्वादशवर्षाणि त्रीणि वेति । मदनपारिजाते
स्मृत्यर्थसारे च ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं
कृत्वा नारायणवलिः कार्य्य इत्युक्तम् । एवं म्लेच्छी-
कृतानामपि ॥ * ॥ यत्तु कश्चिदाह । पुत्र-

कृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः ।
आत्मघाते तु वचनादस्तु । महापातके तु कथं
स्यादिति । स स्वयमेव आत्मवधप्रायश्चित्तस्य
जातिवधनिमित्तेन समुच्चयं वदन् हृदयशून्य
एव । नहि जातिवधनिमित्तं पुत्रैः कार्य्यमिति
वचनमस्ति पुत्रकर्त्तृकसर्व्वप्रायश्चित्तादिविप्लवा-
पत्तेः । प्रागुक्तवौधायनवचनाच्चेति दिक् । इदं
प्रायश्चित्तार्हाणामेव । प्रायश्चित्तानर्हाणान्तु पति-
तोदकमात्रं कार्य्यमिति केचित् । मदनपारि-
जातादिस्वरसोऽप्येवम् । वस्तुतस्तु तदर्हानर्हयो-
र्व्वचनेऽनुपादानात् अविशेषात् तत्रापि नारा-
यणवलिर्गयाश्राद्धञ्चेति युक्तम् ॥ * ॥ पतितोदक-
विधिस्तु मित्राद्यतिरिक्तविषय इत्यपरे । स यथा ।
हेमाद्रौ ब्राह्मे ।
"पतितस्य तु कारुण्यात् यस्तृप्तिं कर्त्तुमिच्छति ।
स हि दासीं समाहूय सर्व्वशो दत्तवेतनाम् ॥
अशुद्धघटहस्तान्तां यथाशक्तं ब्रवीत्यपि ।
हे दासि । गच्छ मूल्येन तिलानानय सत्वरम् ॥
तोयपूर्णं घटञ्चेमं सतिलं दक्षिणामुखी ।
उपविष्टा तु वामेन चरणेन ततः क्षिप ॥
कौर्म्मेयः पातकिसंज्ञो त्वं पिवेति मुहुर्व्वद ।
निशाम्य तस्य वाक्यं सा लब्धमूल्या करोति तत् ॥
एवं कृते भवेत्तृप्तिः पतितानां न चान्यथा ॥"
इति ।
इदञ्च मृताहे कार्य्यम् । पतितस्य दासी मृताह्नि
पदा घटमपवर्ज्जयेदेतावतायमुपचरितो भव-
तीति मदनरत्ने विशेषोक्तिः । इदञ्चात्मत्यागि-
विषयम् । आत्मत्यागिनः पतितास्तेनाशौचोदक-
भाजः स्युरित्युपक्रम्य विधिना एतस्याभिधाना-
दिति गौडाः । उपलक्षणत्वात् सर्व्वेषामिति तु
युक्तम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥

पतिवत्नी, स्त्री, (पतिर्विद्यते यस्याः । पति +
मतुप् । "अन्तर्वत्पतिवतोर्नुक् ।" ४ । १ । ३२ ।
इति निपातनात् वत्वं नुगागमश्च । ततः ।
"ऋन्नेभ्यो ङीप् ।" ४ । १ । ५ । इति ङीप् ।)
सभर्तृका । सधवा । इत्यमरः । २ । ६ । १२ ॥
(यथा, रघुः । १५ । ३५ ।
"इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विसूनवः ॥")

पतिव्रता, स्त्री, (पतिर्व्रतमिव धर्म्मार्थकामेषु काय-
वाक्मनोभिः सदोपास्योऽस्याः ।) स्वाम्यनु-
रक्ता । तत्पर्य्यायः । सुचरित्रा २ सती ३
साध्वी ४ । इत्यमरः । ३ । ६ । ६ ॥ एकपत्नी ५ ।
इति शब्दरत्नावली ॥ तस्या लक्षणं यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"
इति शुद्धितत्त्वम् ॥ * ॥
तस्या माहात्म्यं यथा,—
नारद उवाच ।
"कर्म्मणा केन राजेन्द्र । तपसा वा तपोधन । ।
उत्तमाञ्च गतिं याति कृष्णावासः प्रशंस मे ॥
एवमुक्तस्तु धर्म्मात्मा नारदं नाब्रवीत्तदा ।

यम उवाच ।
न तस्या नियमो विप्र । तपो नैव च सुव्रत ।।
उपवासो न दानञ्च न दमो वा महामते ॥
यादृशी तु भवेद्विप्र । शृणु तत्त्वं समासतः ।
प्रसुप्ते वा प्रस्वपिति विबुद्धे जाग्रति स्वयम् ॥
भुङ्क्ते तु भोजिते विप्र । सा मृत्युञ्जयति ध्रुवम् ।
मौने मौना भवेद्यथा तु स्थिते तिष्ठति या स्वयम् ।
सा मृत्युञ्जयते विप्र । नान्यत् पश्यामि किञ्चन ॥
एकदृष्टिरेकमना भर्त्तुर्वचनकारिणी ।
तस्या बिभीमहे सर्व्वे ये तथान्ये तपोधन ।॥
देवानामपि सा साध्वी पूज्या परमशोभना ।
भर्त्रा वाभिहिता वापि प्रणत्याख्यायिनी भवेत् ॥
वर्त्तमानापि विप्रेन्द्र । प्रत्याख्यानापि सा यदा ।
तदैव तं संश्रयति पतिं नान्यं कदाचन ॥
भर्त्तुर्म्मृत्युमुखं ब्रह्मन् । या पश्यति वराङ्गना ।
एवं याति भवेन्नित्यं भर्त्तुः प्रियहिते रता ॥
अनुविष्टेन भावेन भर्त्तारमनुगच्छति ।
सा तु मृत्युमुखद्वारं न गच्छेद्ब्रह्मसम्भव ।॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
एवं शुश्रूषते या तु सा मां विजयते सदा ।
पतिव्रता तु या साध्वी तस्याहं कृताञ्जलिः ॥
भर्त्तारमनुध्यायन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती मृत्युद्वारं न पश्यति ॥
गीतवादित्रनृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येत मृत्युद्वारं न पश्यति ॥
स्नायन्ती तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यञ्च मनसा ध्यायेत् कदाचिदपि सुव्रता ॥
देवता अर्च्चयन्ती वा भोजयन्त्यथ वा द्विजान् ।
पतिं न त्यजते चित्तात् मृत्युद्वारं न पश्यति ॥
भानौ चानुदिते या तु उत्थाय च तपोधन ।।
गृहं मार्जयते नित्यं मृत्युद्वारं न पश्यति ॥
चक्षुर्देहः स्वभावश्च यस्या नित्यं सुसंवृतम् ।
शौचाचारसमायुक्ता सापि मृत्युं न पश्यति ॥
भर्त्तुर्मुखं प्रपश्यन्ती भर्त्तुश्चित्तानुसारिणी ।
वर्त्तते च हिते भर्त्तुर्मृत्युद्वारं न पश्यति ॥
एवं कीर्त्तिमतां लोके दृश्यन्ते दिवि देवताः ।
मानुषाणाञ्च भार्य्या वै तत्र देशे तु दृश्यते ॥
कथितेव पुरा विप्र । आदित्येन पतिव्रता ।
मया तस्मात्तु विप्रर्षे । यथावृत्तं यथाश्रुतम् ॥
गुह्यमेतत्ततो दृष्ट्वा पूजयामि पतिव्रताम् ॥”
इति पाद्मे पतिव्रताचरितम् ॥ * ॥
पतिव्रताधर्म्मो यथा,—
“पतिव्रतानां यद्धर्म्मं तन्निबोध व्रजेश्वर ।।
नित्यं भर्त्तुर्नतमुकया तत्पादोदकमीप्सितम् ।
भक्तिभावेन सततं भोक्तव्यं तदनुज्ञया ॥
व्रतं तपस्यां देवार्च्चां परित्यज्य प्रयत्नतः ।
कुर्य्याच्चरणसेवाञ्च स्तवनं परितोषणम् ॥
तदाज्ञारहितं कर्म्म न कुर्य्याद्दूरतः सती ।
नारायणात् परं कान्तं ध्यायते सततं सती ॥
परपुंसां पुरश्चैव सुवेशं पुरुषं परम् ।
यात्रामहोत्सवं नित्यं नर्त्तकं गायनं व्रज ।
परक्रीडाञ्च सततं नहि पश्यति सुव्रता ॥
यद्भक्ष्यं स्वामिनां नित्यं तद्देवमपि योषिताम् ।
नहि त्यजेत् तत्सङ्गं क्षणमेव च सुव्रता ॥
उत्तरे नोत्तरं दद्यात् स्वामिनश्च पतिव्रता ।
न कोपं कुरुते शुद्धा ताड़नाद्यपि कोपतः ॥
क्षुधितं भोजयेत् कान्तं दद्यात् पानञ्च तोयदे ।
न बोधयेत्तं निद्रालुं प्रेरयत्येव कर्म्मसु ॥
पुत्त्राणाञ्च शतगुणं स्नेहं कुर्य्यात् पतिं सती ।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं कुलयोषितः ॥
शुभं दृष्ट्वा सुधातुल्यं कान्तं पश्यति सुन्दरी ।
सस्मितं वदनं कृत्वा भक्तिभावेन यत्नतः ॥
पुरुषाणां सहस्रञ्च सती स्त्री च समुद्धरेत् ।
पतिः पतिव्रतानाञ्च मुच्यते सर्व्वपातकात् ॥
नास्ति तेषां कर्म्मभोगः सतीनां व्रततेजसा ।
तया सार्द्धञ्च निष्कर्म्मी मोदते हरिमन्दिरे ॥
पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि ।
तेजश्च सर्व्वदेवानां मुनीनाञ्च सतीषु च ॥
तपस्विनां तपः सर्व्वं व्रतिनां यत् फलं व्रज ।
दाने फलं यदाहुर्णां तत् सर्व्वं तासु सन्ततम् ॥
स्वयं नारायणः शम्भुर्विधि सा जगतामपि ।
सुराः सर्व्वे समुनयो भीतास्ताभ्याञ्च सन्ततम् ॥
सतीनां पादरजसा सद्यः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥
त्रैलोक्यं भस्मसात् कर्त्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥
सतीनाञ्च पतिः साध्वीपुत्त्रो निःशङ्क एव च ।
नहि तस्य भयं किञ्चिद्देवेभ्यश्च यमादपि ॥
शतजन्मपुण्यवतां गेहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता तथा ॥
सती स्त्री प्रातरुत्थाय त्यक्त्वा च रात्रिवाससम् ।
भर्त्तारञ्च नमस्कृत्य करोति स्तवनं मुदा ॥
गृहकार्य्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुक्लपुष्पञ्च भक्तितः पूजयेत् पतिम् ॥
स्नापयित्वा सुपूतेन जलेन निर्म्मलेन च ।
तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥
आसने वासयित्वा च दत्त्वा भाले च चन्दनम् ।
सर्व्वाङ्गलेपनं कृत्वा दत्त्वा माल्यं गलेऽपि च ॥
सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ।
संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥
‘ओं नमः कान्ताय शान्ताय सर्व्वदेवाश्रयाय
स्वाहा ॥’
इत्यनेनैव मन्त्रेण दत्त्वा पुष्पञ्च चन्दनम् ।
पाद्यार्घ्यधूपदीपांश्च वस्त्रं नैवेद्यमुत्तमम् ॥
जलं सुवासितं शुद्धं ताम्बूलञ्च सुसंस्कृतम् ।
दत्त्वा स्तोत्रञ्च प्रपठेत् यत् कृतं माधवेन च ॥
ओं नमः कान्ताय शान्ताय च शिवचन्द्रस्वरूपिणे ।
नमः शान्ताय दान्ताय सर्व्वदेवाश्रयाय च ॥
नमो ब्रह्मस्वरूपाय सतीप्राणपराय च ।
नमस्याय च पूज्याय हृदाधाराय ते नमः ॥
पञ्चप्राणाधिदेवाय चक्षुषस्तारकाय च ।
ज्ञानाधाराय पत्नीनां परमानन्दरूपिणे ॥
पतिर्ब्रह्मा पतिर्विष्णुः पतिरेव महेश्वरः ।
पतिश्च निर्गुणाधारो ब्रह्मरूप । नमोऽस्तु ते ॥
क्षमस्व भगवन् । दोषं ज्ञानाज्ञानकृतञ्च यत् ।
पत्नीबन्धो । दयासिन्धो । दासीदोषं क्षमस्व च ॥
इदं स्तोत्रं महापुण्यं सृष्ट्यादौ पद्मया कृतम् ।
सरस्वत्या च धरया गङ्गया च पुरा व्रज ॥
सावित्र्या च कृतं पूर्व्वं ब्रह्मणे चापि नित्यशः ।
पार्व्वत्या च कृतं भक्त्या कैलासे शङ्कराय च ॥
मुनीनाञ्च सुराणाञ्च पत्नीभिश्च कृतं पुरा ।
पतिव्रतानां सर्व्वासां स्तोत्रमेतत् शुभावहम् ॥
इदं स्तोत्रं महापुण्यं या शृणोति पतिव्रता ।
नरोऽन्यो वापि नारी वा लभते सर्व्ववाञ्छितम् ॥
अपुत्त्रो लभते पुत्त्रं निर्धनो लभते धनम् ।
रोगी च मुच्यते रोगात् बद्धो मुच्येत बन्धनात् ॥
पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ।
फलञ्च सर्व्वतपसां व्रतानाञ्च व्रजेश्वर ।॥
इदं स्तुत्वा नमस्कृत्य भुङ्क्ते सा तदनुज्ञया ।
उक्तः पतिव्रताधर्म्मो गृहिणां श्रूयतां व्रज ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥ * ॥
पतिव्रतानामानि यथा,—
सूर्य्यस्य सुवर्च्चला १ शक्रस्य शची २ वशिष्ठस्य अरुन्धती ३ चन्द्रस्य रोहिणी ४ अगस्त्यस्य लोपामुद्रा ५ च्यवनस्य सुकन्या ६ सत्यवतः सावित्री ७ कपिलस्य श्रीमती ८ सौदासस्य मदयन्ती ९ सगरस्य केशिनी १० नलस्य दमयन्ती ११ रामस्य सीता १२ शिवस्य सती १३ नारायणस्य लक्ष्मीः १४ ब्रह्मणः सावित्री १५ रावणस्य मन्दोदरी १६ । इति पुराणान्तरम् ॥
(गायत्रीस्वरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ९६ ।
“पतिव्रता पवित्राङ्गी पञ्चहासपरायणा ।
प्रज्ञावती सुता पौत्री पुत्त्रपूज्या पयस्विनी ॥”)

पतेरः, पुं स्त्री, (पतति गच्छतीति । पत्लृ गतौ + “पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ।” उणां १।५९। इति कर्त्तरि एरक् ।) पक्षी । गन्तरि त्रि । इत्युणादिकोषः ॥

पतेरः, पुं, (पतत्यस्मिन्निति । “पति कठीति ।” उणां १।५९। इति अधिकरणे एरक् ।) आढ़कः । गर्त्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पतङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । पृषोदरात् साधु ।) रक्तचन्दनम् । इति शब्दरत्नावली ॥ वृक्षविशेषः । बकम् इति भाषा । तत्पर्य्यायः । पत्राङ्गम् २ रक्तकाष्ठम् ३ सुरङ्गदम् ४ पत्राढ्यम् ५ पट्टरङ्गम ६ भार्य्यावृक्षः ७ रक्तकः ८ लोहितम् ९ रङ्गकाष्ठम् १० रोगकाष्ठम् ११ कुचन्दनम् १२ पट्टरञ्जनकम् १३ सुरङ्गम् १४ । अस्य गुणाः । कटुत्वम् । रूक्षत्वम् । अम्लत्वम् । शीतलत्वम् । गौल्यत्वम् । वातपित्तज्वरविस्फोटोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
“पतङ्गन्तु रक्तसारं सुरङ्गं रञ्जनं तथा ।
पटरञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम् ॥
पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् ।
हरिचन्दनवज्ज्ञेयं विशेषाद्दाहनाशनम् ॥”

पत्तनं, क्ली, (पतन्ति गच्छन्ति जना यस्मिन्। पत ऌ गतौ + "वीपतिभ्यां तनन्।" उणां ३।१५०। इति तनन्।) नगरम्। इत्यमरः। २।२।१०॥ (यथा, भागवते। १।६।११।
"पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान्।
खेटखर्व्वटघोषांश्च ददर्श पत्तनानि च॥")
महती पुरी। इति श्रीधरस्वामी॥ मृदङ्गः। इति हारावली॥

पत्तनवणिक्, [ज्] पुं, (पत्तनस्य नगरस्य वणिक्।) नगरवणिक्। तत्पर्य्यायः। स्वाध्यायी २। इति त्रिकाण्डशेषः॥

पत्तिः, पुं, (पद्यते विपक्षसेनां प्रति पदभ्यां गच्छतीति। पद्यौ ड गतौ + "पदिप्रथिभ्यां नित्।" उणां ४।१८०। इति तिः स च नित्।) पदातिकः। इत्यमरः। २।८।६६। (यथा, रघुः। ७।३७।
"पत्तिः पदातिं रथिनं रथेश-
स्तुरङ्गसादी तुरगाधिरूढम्।
यन्ता गजस्याभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम्॥" * ॥
पद्यते विपक्षं प्राप्नोतीति। पद् + तिन्।) वीरः। इति विश्वः॥

पत्तिः, स्त्री, (पत ऌ गतौ + भावे क्तिन्।) गतिः। (पद्यते विपक्षो यया। पद। करणे क्तिन्।) सेनाविशेषः। यदुक्तं अमरे। २।८।८०।
"एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका॥"

पत्तिसंहतिः, स्त्री, (पत्तीनां पदातीनां संहतिः।) पदातिसमूहः। तत्पर्य्यायः। पादातम् २। इत्यमरः। २।८।६७॥

पत्तूरः, पुं, (पत गतौ + बाहुलकात् ऊरः। निपातनात् तस्य द्वित्वम्।) शालिञ्चशाकः। इति त्रिकाण्डशेषः॥ पत्तङ्गि, क्ली। इति भावप्रकाशः॥

पत्नी, स्त्री (पत्युर्यज्ञसम्बन्धो यया। "पत्युर्नो यज्ञसंयोगे।" ४।१।३३। इति नकारादेशः ङीप् च।) वेदविधानेनोढा। अन्यत्रोपचारात्। पत्या उद्वाहविधिमन्त्रादिना ऊढा। इति भरतः॥ तत्पर्य्यायः। पाणिगृहीती २ द्वितीया ३ सहधर्म्मिणी ४ भार्य्या ५ जाया ६ दाराः ७ सधर्म्मिणी ८ धर्म्मचारिणी ९ दाराः १० गृहिणी ११। इति शब्दरत्नावली॥ सहचरी १२ गृहः १३ क्षेत्रम् १४ वधूः १५ जनी १६ परिग्रहः १७ ऊढा १८ कलत्रम् १९। इति हेमचन्द्रः॥ (पत्नीगुणेनैव हि पुरुषाः सुखिनो भवन्ति। यस्य पत्नी वशानुगा स भूस्थोऽपि स्वर्गस्थः। गृहाश्रमतुल्यं किञ्चिदपि नास्ति यदि तत्र हितकामा पत्नी वर्त्तते। सपत्नीक एव सर्व्वधर्म्मकरणार्हः। यदुक्तं दक्षसंहितायाम्।
"पत्नीमूलं गृहं पुंसां यदि च्छन्दानुवर्त्तिनी।
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा॥
तया धर्म्मार्थकामानां त्रिवर्गफलमश्नुते।
प्राकाम्ये वर्त्तमाना तु स्नेहान्नतु निवारिता॥
अवश्या सा भवेत् पश्चात् यथा व्याधिरुपेक्षितः।
अनुकूला न वाग्दुष्टा दक्षा साध्वी प्रियंवदा॥
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी।
अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि॥
प्रतिकूलकलत्रस्य नरको नात्र संशयः।
स्वर्गेऽपि दुर्लभं ह्येतदनुरागं परस्परम्॥
रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम्॥
गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम्।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी॥
दुःखदान्या सदा खिन्ना चित्तभेदात् परस्परम्।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः॥
योषित् सर्व्वा जलौकेव भूषणाच्छादनाशनैः।
सुभृत्यापि कृता नित्यं पुरुषं ह्यपकर्षति॥
जलौका रक्तमादत्ते केवलं सा तपस्विनी।
इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम्॥
सशङ्का बालभावे तु यौवने विमुखी भवेत्।
तृणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम्॥
अनुकूला न वाग्दुष्टा दक्षा साध्वी पतिव्रता।
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः॥
या हृष्टमनसा नित्यं स्थानमानविचक्षणा।
भर्त्तुः प्रीतिकरी नित्यं सा पत्नी हीतरा ज्वरा॥")

पत्न्याटः, पुं, (अटति सुखं विहरति अत्र इति आटो गृहम्। ततः पत्न्या आटः।) पत्नीगृहम्। यदुक्तं त्रिकाण्डशेषे।
"वासागारं भोगगृहं कन्यापत्न्याटनिष्कुटाः॥"

प(त्र)त्रं, क्ली, (पतति वृक्षात्। पत ऌ गतौ। "सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४।१५८। इति ष्ट्रन्।) वृक्षावयवविशेषः। पाता इति भाषा। तत्पर्य्यायः। पलाशम् २ छदनम् ३ दलम् ४ पर्णम् ५ छदः ६। इत्यमरः। २।४।१४॥ पात्रम् ७ छादनम् ८ बर्हम् ९ बर्हणम् १० पत्रकम् ११। इति शब्दरत्नावली॥ १ ॥ विशेषपत्रविशेषदानफलं यथा नारसिंहे ५२ अध्याये।
"पत्राण्यपि सपुष्पाणि हरेः प्रीतिकराणि च।
प्रवक्ष्यामि नृपश्रेष्ठ। शृणुष्व गदतो मम॥
अपामार्गपत्रं प्रथमं तस्माद्भृङ्गारकं परम्।
तस्मात्तु खादिरं श्रेष्ठं ततश्च शमिपत्रकम्॥
दूर्व्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्।
पत्रं तस्माद्दमनकं ततो विल्वस्य पत्रकम्॥
विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्।
एतेषाञ्च यथालब्धैः पत्रैर्यो ऽर्च्चयेद्धरिम्॥
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥"
देवीप्रीतिकरपत्राणि यथा, —
"अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्।
ततोऽपि गन्धिनीपत्रं वलाहकमतः परम्॥
तस्मात् खदिरपत्रन्तु वञ्जुलस्तवकस्तथा।
आम्रन्तु वकपुष्पन्तु जम्बुपत्रं ततः परम्॥
वीजपूरस्य पत्रन्तु ततोऽपि कुशपत्रकम्।
दूर्व्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्॥
पत्रमामलकं तस्माद्दामपत्रमतः परम्।
सर्व्वतो विल्वपत्रन्तु देव्याः प्रीतिकरं मतम्॥"
इति कालिकापुराणे ६८ अध्यायः॥ * ॥
तेजपत्रम्। तत्पर्य्यायः। तमालपत्रम् १ पत्रकम् २ छदनम् ३ दलम् ४ पालाशम् ५ अंशुकम् ६ वासः ७ तापसम् ८ सुकुमारकम् ९ वस्त्रम् १० तमालकम् ११ रामम् १२ गोपनम् १३ वसनम् १४ तमालम् १५ सुरभिगन्धम् १६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातविषवस्तिकण्डूतिदोषनाशित्वम्। मुखमस्तकशोधनत्वञ्च। इति राजनिर्घण्टः॥ अपि च। भावप्रकाशे।
"पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान्॥"
(पत्यते स्थानात् स्थानान्तरं अनेन। पत + "दाम्नी-शसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।" ३।२।१८२। इति करणे ष्ट्रन्।) वाहनम्। शरपक्षः। पक्षिपक्षः। इति मेदिनी॥ * ॥ (पत्यते पात्यते शास्त्रबोधायवर्णनिचयोऽनेन। पत् + करणे ष्ट्रन्। अस्त्रनिवन्तत्वात् तथात्वम्।) (लिखनाधारः। पात् इति भाषा। यथा, ज्योतिस्तत्त्वे।
"षाण्मासिके तु समये भ्रान्तिः संजायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा॥"
धातुमयपत्राकृतिद्रव्यम्। पतर् इति तवक् इति च भाषा। यथा, तुलापुरुषदाने दानसागरे।
"सुवर्णपत्राभरणा च कार्य्या
सुलोहपार्श्वद्वयशृङ्खलाभिः॥" * ॥
(पात्यते स्थानात् स्थानान्तरं समाचारोऽनेन।) पत्री। लिपिः। तस्य रचनं यथा
"सुवर्णरूप्यरङ्गाद्यै रञ्जयेत पत्रमुत्तमम्।
सामान्योत्तममध्यानां पत्ररञ्जनमीरितम्॥" * ॥
अथ पत्रप्रमाणम्।
"षडङ्गुलाधिकं हस्तं पत्रमुत्तममीरितम्।
मध्यमं हस्तमात्रं स्यात् सामान्यं सुषिहस्तकम्॥"
अथ पत्रभङ्गप्रकारः।
"पत्रन्तु त्रिगुणीकृत्य ऊर्द्ध्वे तु द्विगुणं त्यजेत्।
शेषभागे लिखेद्वर्णान् गद्यपद्यादिसंयुतान्॥" * ।
अथ पत्रस्य रचनक्रमः।
"राजलेखकमाहूय नृपो ब्रूयात् प्रयत्नतः।
पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम्॥
पण्डितद्वयमानीय लेखको रहसि स्थितः।
यथायोग्यानुसारेण पत्रं कुर्य्यात्ततोऽग्रमम्॥
दिनद्वयं त्रयं वापि विचार्य्य पण्डितेन वै।
स्वभावार्त्तद्वयणं ज्ञात्वा विलिखेत् पत्रपुस्तके॥
सामान्यपत्रं संलिख्य रहसि श्रावयेन्नृपम्।
नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः॥" * ॥
अथ लेखनप्रकारः।
"अङ्कुशं प्रथमं दद्यात् मङ्गलार्थं विचक्षणः।
मध्ये बिन्दुसमायुक्तमधः समाङ्कसंयुतम्॥ ५ ॥
तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम्।
ततः श्रीशब्दरूपाणि पदन्यासक्रमं लिखेत्॥
भाषया संस्कृतेनैव कुशलं विलिखेत् सुधीः।
ततः शुभाशुभां वार्त्तां संस्कृतैः प्राकृतैस्तथा॥
ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत्।
कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम्॥
पत्रशेषपशोकञ्च अङ्कमासादिसंयुतम्।

सर्व्वेषामेव पत्रेषु लिखनञ्चैवमीरितम् ॥
सर्व्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत्तु यः ।
स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि ॥
एवं शास्त्रक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम् ॥
शास्त्रसन्दर्भमज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं दुर्यशो महदाप्नुयात् ॥" * ॥

अथ पत्रनयनक्रमः ।

"राजपत्रं नयेन्मूर्द्ध्नि ललाटे पात्रमन्त्रिणाम् ।
गुरुपत्रं नयेन्मूर्द्ध्नि ब्राह्मणानान्तथैव च ॥
यतिसन्न्यासिनाञ्चैव स्वामिनश्च तथैव च ।
सादरेणैव यत्नेन तथा मूर्द्धनि धारयेत् ॥
भार्य्यापुत्त्रस्य मित्रस्य हृदये धारयेत् सुधीः ।
प्रवीणाणां कण्ठदेशे पत्रधारणमीरितम् ॥
एतेषाञ्चैव पत्राणामुक्तं धारणलक्षणम् ।
अन्येषामपि पत्राणां नियमो नात्र दर्शितः ॥"

अथ पत्रपठनप्रकारः ।

"पत्रं धृत्वा नमस्कृत्य पूर्व्वाग्रं स्थापयेत् सुधीः ।
दक्षिणाग्रेण सदसि नृपाग्रे राजलेखकः ॥
पत्रं चिन्तय सदसि दिवाग्रे मनसा पठेत् ।
स्फुटं पश्चात् प्रवक्तव्यमक्षोभो राजलेखकः ॥
रहसि श्रावयेत् पत्रं शुभं वा यदि वाशुभम् ।
पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः ॥
रहस्य-पत्रं रहसि नृपाग्रे श्रावयेद्द्विजः ।
अशुभं नैव सदसि शुभं पत्रं नृपाज्ञया ॥
एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजोत्तमः ।
नृपतेः सन्निधौ स्थित्वा नृपाज्ञामनुवर्त्तते ॥"

अथ पत्रचिह्नानि ।

"ऊर्द्ध्वे षडङ्गुलं त्यक्त्वा वर्त्तुलं चन्द्रबिम्बवत् ।
कस्तूरीकुङ्कुमैः कुर्य्याद्राजपत्रं सुचिह्नितम् ॥
मन्त्रिणां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः ।
गुरूणां चन्दनेनैव सिन्दूरेणैव स्वामिनः ॥
भार्य्यायाश्चाप्यलक्तेन चन्दनैः पितृपुत्त्रयोः ।
सन्न्यासिनां चन्दनेन यतीनां कुङ्कुमेन च ॥
रक्तचन्दनपङ्केन भृत्यस्य समुदीरितम् ।
शोणितेनैव शत्रूणां पत्रचिह्नं प्रकल्पयेत् ॥
एतेषाञ्चैव सर्व्वेषां यथायोग्यानुसारतः ।
पत्रस्योर्द्ध्वे तु मतिमान् कुर्य्यात् चिह्नं मनोरमम् ॥"

अथ राजपत्रस्य कोणच्छेदनप्रकारः ।

'दक्षिणे पत्रकोणस्य अधस्तात् छेदयेत् सुधीः ।
एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि ॥"

अथ राजपत्रादेः पदन्यासः ।

'महाराजाधिराजश्च दानशौण्डं तथैव च ।
तथा सच्चरितं योग्यं कल्पवृक्षादिकं न्यसेत् ॥
यथायोग्यानुसारेण तथैव गुणभेदतः ।
राजपत्रेषु सर्व्वेषु पदन्यासक्रमं विदुः ॥"

अथ मन्त्रिपत्रस्य ।

प्रवरं गुणभेदेन तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत प्राज्ञो मन्त्रिपत्रे पदक्रमम् ॥"

अथ पण्डितस्य ।

संख्यावद्वन्दितपदं शास्त्रार्थनिपुणादिकम् ।
पण्डितानाञ्च पत्रेषु विलिखेद्वै पदक्रमम् ॥"

पत्रं

अथ गुरुपत्रस्य ।

"सांख्यसिद्धान्तनिपुणं सनमस्कारकं पदम् ।
विन्यस्य विलिखेत प्राज्ञो गुरुपत्रपदक्रमम् ॥"

अथ स्वामिपत्रस्य ।

"प्रवर्य्यं सनमस्कारं प्राणप्रियादिकं पदम् ।
विन्यस्य विलिखेद्धीमान् स्वामिपत्रपदक्रमम् ॥"

अथ भार्य्यापत्रस्य ।

"प्राणप्रियापदं साध्वीं तथा सच्चरितादिकम् ।
भार्य्यापत्रं लिखेदविद्वान् पदक्रममनुत्तमम् ॥"

अथ पुत्त्रस्य ।

"प्राणपुत्त्रपदं तद्वत्तथा सच्चरितादिकम् ।
आशीर्व्वचनसंयुक्तं पुत्त्रपत्रपदक्रमम् ॥"

अथ पितृपत्रस्य ।

"प्रभुवर्य्यं नमस्कारं तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् पुत्त्रः पितृपत्रपदक्रमम् ॥"

अथ सन्न्यासियतिपत्रस्य ।

"सर्व्ववाञ्छाविनिर्मुक्तं सर्व्वशास्त्रार्थपारगम् ।
सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम् ॥"

सामान्यस्य ।

"सामान्यभृत्यशत्रूणां विनियोग्यामुकं प्रति ।
शास्त्रावर्णितपदं ह्यागतुल्यादिकं तथा ॥
एतेषामेव पत्रेषु यथायोग्यानुसारतः ।
विन्यस्य विलिखेत प्राज्ञः पदक्रममनुत्तमम् ॥"

श्रीशब्दविन्याससंख्या यथा,—
"षड् गुरोः स्वामिनः पञ्च द्वे भृत्ये चतुरो रिपौ ।
श्रीशब्दानां त्रयं मित्रे एकैकं पुत्त्रभार्य्ययोः ॥" * ॥

अथ राज्ञः प्रशस्तिः ।

स्वस्तिगीर्व्वाणसमयचण्डारत्नराजिराजितसुस्मित-चन्द्रचूडचरणारविन्दवृन्दचन्द्रिकामकरन्दास्वाद-चतुरचञ्चरीकेश्वरविषमसमरसञ्चरत्प्रबलतर-तुरगखुरपुटपटलदलितभूपृष्ठोत्थितद्वयिष्ठधूलि-धाराधूसरितसकलहरिदन्तरप्रचण्डभुजदण्ड-भ्राजमानखरतरासिविद्रावितप्रत्यर्थिपृथ्वीपति-सार्थप्रार्थितानुकम्पासुधासम्पातावतारविद्वद्दा-रिद्र्यविद्रावणद्रविणराशिविश्राणनसमुपार्ज्जिता-र्ज्जितयशोमरालावलिकवलितवलितधौतविसाञ्चित-यशोम्बरालजालभूपालकुलतिलकश्रीयुतमहा-राजाधिराजेषु ॥ १ ॥

स्वस्तिप्रचण्डदोर्द्दण्डखण्डखण्डितारिमण्डल मुण्डाम्बुजमुक्तावलीमण्डितसंग्रामाङ्गनरङ्गमा-णानेकवारणवाचादिकायकाण्डवक्रतरनक्रचक्र चंक्रमणदुर्गनिक्रमणीयापगापतिप्रभृतयशश्चन्द्र-चान्द्रकाद्योतविद्योतिताखिलजगन्मण्डलविविध-द्रविणार्पणसन्तोषितसुरिसमूहस्तूयमानावदात-कीर्त्तिनर्त्तकीनर्त्तनलीलालितपर्ल्लवितसौरभरीणो-द्भूयादिशया जनसविलासगायमानगुणश्रवणा-नन्दोलितखलस्यजनकुण्डलपरितःपर्य्यवितप्रताप-तपनोत्तापितारातिनिर्गतिसमध्यासितनिकुञ्जकुञ्ज-प्रस्तुतसौन्दर्य्यगाथाप्रमुदितश्रीमन्नारायणचरण-किङ्करश्रीयुतमहाराजदानशौण्डेषु ॥ २ ॥ * ॥

अथ मन्त्रिप्रशस्तिः ।

स्वस्तिश्रीमत्समस्तसामन्तसेवकनिर्व्वाहकेषु। कोषगोष्ठविषयबलगजवाजिरथपरिवारहर्ष-हेतुनीतिसेतुरक्षणनिपुणेषु। अस्मद्विश्वासैक-निकेतनेषु श्रीश्रीमन्त्रिप्रवरेषु आशीराशिनिवे-दनकोऽयं वर्णभृतोऽत्रत्यं भद्रमावेदयन् तत्रत्यं भद्रमथाहतमनुदिनमनुदाणं पृच्छति स्म ॥ * ॥

अथ गुरुप्रशस्तिः ।

स्वस्तिश्रीनारायणपदपाथोरुहनिःसरन्मक-रन्दमधुपायमानमानसेषु । विविधविद्याविद्योति-ताखिलगुणगणालङ्कृतवदवेदाङ्गपारगस्वाश्रमो-चिताचारसम्पन्नपरमहंसपरिव्राजकाचार्य्यसेव्य-मानश्रीगोविन्दस्वरूपगुरुचरणारविन्देषु कोटि-शः प्रणामाः ॥ * ॥

अथ भार्य्यायाः स्वामिप्रशस्तिः ।

स्वस्तिश्रीमद्द्दामप्रेमहेमभूषितासदादिभक्त-जनेषु । कर्णयोरधिष्ठानेषु । नेत्रयोरधिदेवतेषु । कामस्य परिणामेषु । चतुर्व्वर्गप्रदायकेषु । ममा-परूपेषु । श्रीमत्स्वामिचरणारविन्देषु । गोविन्द इवेन्दिरायाः शङ्कर इव गिरिजायाः महेन्द्र इव पुलोमजायाः प्रतिदिनं वर्द्धमाना समाराधना प्रणामपूर्व्वमास्ताम् ॥ * ॥

अथ भर्त्तुर्भार्य्याप्रशस्तिः ।

स्वस्तिश्रीसततममस्तप्रेमपारलावण्यकर्त्री प्रिय-तमायां नेत्रयुगस्य कनीनिकायामिव चन्द्रस्य चन्द्रिकायामिव कमलाकरस्य कमलिन्यामिव पथिकस्य छायायामिव तृषातुरस्य शीतलामृत-धारायामिव मम सप्रेम निवेदयन्ती पत्री शुभाशीराशीर्निवेदयत् सर्व्वदा ॥ * ॥

अथ पुत्त्रस्य पितरं प्रति प्रशस्तिः ।

स्वस्तिश्रीमदभिनवयशस्वदचित्तचिन्तितस्वी-यानुराग।नुरञ्जितानुगृहीतस्वगृह्यपर्याय । द्विज-चरणसरोज-रञ्जितपरागसंरक्षास्मदादिभाल-स्थलविशालभाग्यसम्भावुकेषु । श्रीयुतपितृचरण-सरोरुहेषु । अकिञ्चनकरकिङ्करस्य मम बह्व-करसम्पुटस्यावनीपृष्ठलग्नाः साष्टाङ्गप्रणतयः सहस्रसजस विज्ञाप्यञ्च ॥ * ॥

अथ पितुः पुत्त्रं प्रति प्रशस्तिः ।

स्वस्तिश्रीविश्वेश्वरचरणसरोरुहानुग्रहसमा-सादितानिनततानवद्यविद्याविलासपीयषपर-म्परापरभावुकानुपमसाधुरीधुरीणविविधगुणा-लङ्कृतनिजवंशावतंससकलविश्वासनिधाननिज-कुलपवित्रीकृतात्मप्रायेषु । श्रीयुतशुद्धाचारपरि-पूरितपुत्त्रेषु शुभाशिषां राशयः सन्तु विज्ञा-प्यञ्च ॥ * ॥

अथ सन्न्यासियतिप्रशस्तिः ।

स्वस्तिश्रीमत्परमहंसपरिव्राजकाचार्य्यकरण-निपुणतापराद्ध्येषु । विषमविषयदोषदर्शन-दूषितप्रपञ्चरचनाविभावेषु । वेदवेदान्तसांख्य-सिद्धान्तबद्धदेवप्रकृतिपुरुषविवेकज्ञानशीलेषु । संख्यावन्मुख्यवन्दितचरणारविन्दस्वाश्रमोचिता-चारपरिपालनपवित्रीकृतधरित्रीतलेषु । सकल-भूदेव पूजित श्रीयुत गोस्वामि-चरणारविन्देषु ।

समावनीसंलग्नाः साष्टाङ्गप्रणामसहस्रमजस्रं ओं नमो नारायणायेति मन्त्रेणाकलितमस्तु ॥ * ॥

अथ भृत्यप्रशस्तिः ।

१ स्वस्तिभगवच्चरणपरायणसकलदर्विणाधिराजकगोमहिष्यादिप्रतिपालकनिखिलवंशानुसेवकवर्णंवदामुकभृत्यं प्रति ॥ * ॥

अथारिप्रशस्तिः ।

स्वस्तिसमराङ्गनभग्नप्रतिभटयशःपरिपूरितसकलसामन्तराजधानीविजृम्भितवीरशब्दावघोषितनिजवंशानुरञ्चकसततपरित्रस्तशरणागतामुकं प्रति ॥ * ॥

अथ विवेकिनां प्रशस्तिः ।

स्वस्तिश्रीभगवत्पदपङ्कजपूजनोपचितपुण्यपुञ्जपवित्रीकृतान्तःकरणादिविलासिनीविभ्रमहर्म्यिकलिलाक्षीमालाकलायशोऽम्बुवर्न्धिनिरवधिवसुविश्राणनाधरीकृतसुरपुरभूमीरुहेषु ।

स्वस्तिश्रीमत्परमेश्वरपादपाथोरुहास्वादचतुरचित्तचञ्चरीकभूवृन्दारकवृन्दावनजनितामितयशःपटीरपङ्कपटलालङ्कृतदिगङ्गनागणस्तनतटप्रबलप्रतापौर्व्वखर्व्वीकृतप्रत्यर्थिसार्थगर्व्वाकूपारपारेषु ।" इति वररुचिकृतपत्रकौमुदी ॥

पत्रकं, क्ली, (पत्रमेव । पत्र + स्वार्थे कन् ।) शाकस्य पत्रम् । पत्रावली । इति शब्दरत्नावली । तेजपत्रम् । अस्य गुणः । कफवायुशोफश्लेष्मारुचिनाशित्वम् । इति राजवल्लभः । शालिञ्चशाके पुं । इति रत्नमाला ॥

पत्रकाहला, स्त्री, (पत्रकाणां आहला शब्दः ।) पिञ्छोला । पत्रशब्दः । इति हारावली ॥

पत्रकृच्छ्रः, पुं, (पत्रैः पत्रक्वाथैः साध्यः कृच्छ्रोव्रतविशेषः ।) पर्णकृच्छ्रव्रतम् । यथा,—

"पर्णोदुम्बरराजीवविल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः ॥"

इति याज्ञवल्क्यः ॥

"पलाशोदुम्बरारविन्द श्रीवृक्ष-पर्णानामेकैकेन क्वथितमुदकं प्रत्यहं पिबेत् कुशोदकञ्च एकस्मिन्नहनीति पञ्चाहसाध्यः पर्णकृच्छ्रः ।" इति मिताक्षरा ॥

पत्रगुप्तः, पुं, (पत्राणि गुप्तानि यस्य ।) त्रिकण्टः । इति शब्दचन्द्रिका । तेकाँटा सिज् इति भाषा ॥

पत्रघना, स्त्री (पत्रमेव घनं यस्याः । पत्रबाहुल्यात्तथात्वम् ।) सातलावृक्षः । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, (पत्रमञ्च्यतेऽनेन । अञ्च + करणे घञ् । यद्वा पत्रवत् अङ्गं यस्य । शकन्ध्वादित्वात् साधु ।) पत्राङ्गम् । रक्तचन्दनम् । इति शब्दरत्नावली ।

पत्रझङ्कारः, पुं, (पत्रेषु झङ्कारस्तद्वत् शब्दो यस्य ।) पुरीटिः । इति त्रिकाण्डशेषः । रायभाटी इति भाषा ॥

पत्रणा, स्त्री, (अण प्राणे + अप अणः । लक्ष्यं प्रतिगमनाय । पत्रैः अणो जीवनमिव यत्र ।) शरपत्ररचना । यथाह हारावली ।

"शराणां पत्ररचना पत्रणा परिकीर्त्तिता ॥"

पत्रतण्डुली, स्त्री, (पत्रेषु तण्डुलवत् विद्यतेऽस्याः । अर्श-आदित्वादच् । गौरादित्वात् ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः ॥

पत्रतरुः, पुं, (पत्रप्रधानस्तरुः । शाकपार्थिववत् समासः ।) दुर्गखदिरः । इति राजनिर्घण्टः ॥

पत्रदारकः, पुं (पत्रवत् दारयति तृणाणि इति । दृ + णिच् + ण्वुल ।) क्रकचः । इति त्रिकाण्डशेषः । करात इति भाषा ॥

पत्रनाडिका, स्त्री, (पत्रस्य नाड़िका ।) पत्रशिरा । इति जटाधरः ॥

पत्रपरशुः, पुं, (पत्रे धातुनिर्म्मितपत्राकारे परशुरिव । तच्छेदकत्वात्तथात्वम् ।) स्वर्णकारादीनां स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । व्रश्चनः २ । इत्यमरः । २।१०।३३॥ पत्रपर्शुः ३ । इति शब्दरत्नावली ॥

पत्रपा, स्त्री, (अपत्रपणमिति । अप + त्रप् + अच् । निपातनात् अकारलोपः ।) अपत्रपा । लज्जा । इति शब्दरत्नावली ॥

पत्रपालः, पुं, (पत्रवत् पल्यते प्राप्यतेऽसौ । पत्र + पल गतौ + घञ् ।) आयता छुरिका । इति हेमचन्द्रः । ३ । ४४८ ॥

पत्रपाली, स्त्री, (पत्रवत् पालिरग्रभागो यस्याः।ङीप्। कर्त्तरी । इति हलायुधः ॥ काँची इति भाषा ।

पत्रपाश्या, स्त्री (पाशानां समूहः पाश्या । पत्रमिव पाश्या ।) स्वर्णादिरचितललाटाभरणम् । इत्यमरः । २।६।१०३ ॥ टीका इति भाषा ॥

पत्रपिशाचिका, स्त्री, (पत्रैः पत्रेण वा पिशाचीव । इवार्थे कन् ।) जलत्रा । टोका इति भाषा । तत्पर्य्यायः । खर्परः २ वारित्रा ३ महत्खोलम् ४ । इति त्रिकाण्डशेषः ॥ मस्तके पलाशपत्रबन्धनम । यदुक्तं

"बन्धः पलाशपत्राणां शीर्षे पत्रपिशाचिका ॥"

इति हारावली॥

पत्रपुष्पः, पुं, (पत्रं पुष्पमिव यस्य ।) रक्ततुलसी । इति शब्दचन्द्रिका ॥

पत्रपुष्पकः, पुं, (पत्रपुष्प इव कायते प्रकाशते इति । कै + कः ।) भूर्ज्जपत्रम् । इति शब्दमाला ॥

पत्रपुष्पा, स्त्री (पत्रपुष्प + स्त्रियां टाप् ।) तुलसी । इति शब्दमाला ॥ क्षुद्रपत्रतुलसी । इति रत्नमाला ॥

पत्रबन्धः, पुं, (पत्राणां बन्धो बन्धनं यस्मिन् । पुष्परचनाकाले हि पत्राणां ग्रन्थनं स्यादतस्तथात्वम् ।), पुष्परचना । यथा, शब्दरत्नावल्याम् ।

"रचना च परिस्पन्दः पत्रबन्ध इति त्रयम् ।
पत्रभङ्गप्रसूनादिरचनायां निगद्यते ॥"

पत्रबालः, पुं, (पत्रवत् बल्यते धौयतेऽस्मिन् । बल रक्षणे + अधिकरणे घञ । अग्रभागे पत्राकृतेस्तथात्वम् ।) तुलाधटः । इति त्रिकाण्डशेषः । दाड इति भाषा ॥

पत्रभङ्गः, पुं, (पत्राणां लिखितपत्राकृतीनां भङ्गो विच्छित्तता यत्र ।) स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । तत्पर्य्यायः । पत्रलेखा २ पत्रवल्ली ३ पत्रलता ४ पत्राङ्गुली ५ । इति हेमचन्द्रः ॥ पत्राङ्गुलिः ६ पत्रभङ्गी ७ पत्रकम् ८ पत्रभङ्गिः ९ पत्रावली १० । इति शब्दरत्नावली ॥

पत्रभङ्गी, स्त्री, (पत्रभङ्ग + गौरादित्वात् ङीष् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥

पत्रयौवनं, क्ली, (पत्राणां यौवनं यत्र ।) पल्लवम् । नूतनपत्रम् । यथा, जटाधरः ।

"नवोद्गते किशलयं किशलं पत्रयौवनम् ॥"

पत्ररथः, पुं,स्त्री, (पत्रं पक्षो रथो यानमिव यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, भागवते । १ । ६ । १३ ।

"चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियम् ।
नलवेणुशरस्तम्बकुशकीचकगह्वरम् ॥")

पत्रलं, क्ली, द्रप्सम् । अघनदधि । इति हेमचन्द्रः ॥

पत्रलेखा, स्त्री, (पत्राणां कस्तूरिकादिरचितपत्राकृतीनां लेखा रचना ।) पत्रभङ्गः । इत्यमरः ॥ २ । ६ । १२२ ॥ (यथा, रघुः ६ । ७२ ।

"महेन्द्रमास्थाय महोक्षरूपं
यः संयति प्राप्तपिनाकलीलः ।
चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥")

पत्रवल्ली, स्त्री, (पत्राणां रचितपत्राकृतीनां वल्लीलतेव ।) पत्रभङ्गः । इति हेमचन्द्रः ।३।३१९॥ (यथा, माघे । ८ । ५९ ।

"गण्डेषु स्फुटरचनाजपत्रवल्ली
पर्य्याप्तं पयसि विभूषणं बधूनाम् ॥")

रुद्रजटा । पलाशी लता । इति राजनिर्घण्टः ॥ पर्णलता च ॥

पत्रवाहः, पुं, (पत्रेण पक्षच्छदेन उह्यते इति । वह + घञ् ।) बाणः । इति जटाधरः ॥ (पत्रं लिपिं वहतीति । वह + अण् ।) लिपिवाहके त्रि ॥

पत्रशाकः, पुं, (पत्रप्रधानः शाकः । शाकपार्थिववत समासः ।) षड्विधशाकान्तर्गतपत्रात्मकशाकः यथाह राजवल्लभः ।

"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥"

पत्रशिरा, स्त्री, (पत्रस्य शिरेव ।) पत्रभङ्गः । तत्पर्य्यायः । माढ़िः २ । इति हारावली ॥ पर्णनाड़ी च ॥

पत्रश्रेणी, स्त्री, (पत्राणां श्रेणीव ।) द्रवन्ती । इति राजनिर्घण्टः ॥ पर्णपंक्तिश्च ॥

पत्रश्रेष्ठः, पुं, (पत्रं श्रेष्ठं यस्य ।) विल्वः । इति राजनिर्घण्टः ॥

पत्रसूचिः, पुं, (पत्राणां सूचिरिव ।) कण्टकम् । इति त्रिकाण्डशेषः ॥

पत्रहिमं, क्ली, (पत्रेषु हिमं यस्मिन् दिने ।) हिमदुर्द्दिनम् । इति त्रिकाण्डशेषः ॥

पत्राख्यं, क्ली, (पत्रमेव आख्या यस्य ।) तेजपत्रम् । इति शब्दचन्द्रिका ॥ तालीशपत्रम् । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, (पत्रमिव अङ्गं यस्य। यद्वा पत्रेषु अङ्गतीति। अगि गतौ+अच्।) रक्तचन्दनम्। रक्तचन्दनसदृशकाष्ठविशेषः। वकम् इति भाषा। इत्यमरः। २। ६। १३२॥ भूर्ज्जम्। पद्मकम्। इति मेदिनी॥

पत्राङ्गुलिः, स्त्री, (पत्रं अङ्गुलिरिव यत्र। यद्वा अङ्गुलिभिर्लिखितं रचितं पत्रं पत्राङ्गुलिरत्र इति परनिपातत्वात्तथात्वम्।) पत्रभङ्गः। स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली। इत्यमरः। २। ६। १२२॥

पत्राञ्जनं, क्ली, (पत्रं लेखनपत्रमज्यतेऽनेन। पत्र+अञ्ज+करणे ल्युट्।) मसी। इति शब्दरत्नावली॥

पत्राढ्यं, क्ली, (पत्रैराढ्यम्।) पिप्पलीमूलम्। पर्व्वततृणम्। इति राजनिर्घण्टः॥

पत्राम्लं, क्ली, पत्तङ्गम्। इति राजनिर्घण्टः॥

पत्रालुः, पुं, (पत्र+अस्त्यर्थे आलुः।) कासालुः। इक्षुदर्भा। इति राजनिर्घण्टः॥

पत्रावलिः, स्त्री, (पत्राणां पत्राकृतीनां आवलिः पङ्क्तिरिव रचना यस्याः।) गैरिकम्। इति शब्दचन्द्रिका॥ (पत्राणां आवलिः श्रेणी राजिर्वा।) पत्रश्रेणी च॥

पत्रावली, स्त्री, (पत्रावलि+वा ङीप्।) पत्रभङ्गः। इति शब्दरत्नावली॥ नवदुर्गासम्प्रदानकमधुमिश्रितयवचूर्णयुक्तनवाश्वत्थपत्राणि। यथा,—

"अमायां निशि संधि तु पत्रे चाश्वत्थसंज्ञके।
क्रमात् पत्रावली देयं मधुना यवचूर्णकम्॥"
इति कैवल्यतन्त्रम्॥

देवादिसन्निधौ सन्दिग्धवस्तुनोरेकतरावधारणार्थकशाक्यबालकोत्तोलिततत्तत्सन्देहकोटिलिखितपत्रसमूहश्च॥

पत्रिका, स्त्री, (पत्री एव। स्वार्थे कन् ततो ह्रस्वः।) पत्री। लिपिः। यथा, ज्योतिषे।

"आदित्यादिग्रहाः सर्व्वे नक्षत्राणि च राशयः।
दीर्घमायुः प्रकुर्व्वन्तु यस्येयं जन्मपत्रिका॥"

(प्रशस्तपत्रं विद्यते यस्याः। पत्र+विद्यमानार्थे ठन्।) कदल्यादिनवपत्रिका। यथा, दुर्गोत्सवपद्धतौ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका॥")

पत्रिकाख्यः, पुं, (पत्रिका आख्या यस्य।) कर्पूरभेदः। इति राजनिर्घण्टः॥ पत्रिकानामके त्रि॥

पत्रिणी, स्त्री, (पत्राणि सन्त्यस्याः। पत्र+इनिः। स्त्रियां ङीप्।) पल्लवः। इति शब्दचन्द्रिका॥

पत्री, [न्] पुं, (पत्रं पक्षो विद्यतेऽस्य। पत्र+इनिः।) वाणः। (यथा, रघुः। ११। ८४।

"शंस किं गतिमनेन पत्रिणा
हन्मि लोकसुत ते मखार्ज्जितम्॥")

पक्षी। इत्यमरः। ३। ३। १०५॥ (यथा, रघुः ११। २६।

"तं चुरप्रशकलीकृतं कृती
पत्रिणां व्यभजदाश्रमाद्बहिः॥")

श्येनः। (यथा, नैषधे। १६। १२।

"नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्रिणामिह विहरणैः श्येनम्पातां रवेरवधारयन्॥"
"पत्रिणां श्येनाख्यपक्षिरूपाणाम्।" इति तट्टीकायां नारायणः॥ पत्राणि छदानि सन्त्यस्य। अत इनिः।) वृक्षः। रथी। पर्व्वतः। इति मेदिनी॥ तालः। श्वेतकिणिही। गङ्गापत्री। पाची। इति राजनिर्घण्टः॥ पत्रविशिष्टे, त्रि॥

पत्री, स्त्री, (पत्र+स्त्रियां ङीप्।) लिपिः। पत्रम्। यथा, जातके।

"श्रीमत्पङ्कजिनीपतिः कुमुदिनीप्राणेश्वरो भूभवः
शाशाङ्किः सुरराजवन्दितपदो दैत्येन्द्रमन्त्री शनिः।
स्वर्भानुः शिखिनां गणो गणपतिर्ब्रह्मेशलक्ष्मीधरास्त्वां रक्षन्तु सदैव यस्य विमला पत्री मया लिख्यते॥"

पत्रोपस्करः, पुं, (पत्रमेव उपस्करः उपकरणं यस्य।) कासमर्द्दः। इति हारावली॥

पत्रोर्णं, क्ली, (पत्रजा ऊर्णा साधनत्वेनास्त्यस्य। "अर्श आदिभ्योऽच्।" ५।२।१२७। इति अच्।) वटलकुचादिपत्रेषु क्रिमिभिरूर्णायाः कृतत्वात् पत्रसम्बन्धिनी ऊर्णा अत्रेति। इति भरतः॥ धौतकौषेयम्। इत्यमरः। २। ६। ११३॥ (यथा, महाभारते। १३। १११। १०३।

"पत्रोर्णं चोरयित्वा तु कृकरत्वं नियच्छति॥")

पत्रोर्णः, पुं, (पत्रेषु ऊर्णा यस्य।) श्योणाकवृक्षः। इत्यमरः। २। ४। ५६॥

पत्सलं, क्ली, (पतति गच्छति अस्मिन्। पत ऌ गतौ+"पते रश्च लः।" उणा। ३। ७४। इति सरन् रस्य लश्च।) पन्थाः। इत्युणादिवृत्तिः॥

पथ, इ क गत्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्। इदित्।) इ क, पन्थयति। इति दुर्गादासः॥

पथ, ग ज गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। ज्वलादिः।) ग, अपथीत्। ज, पाथः पथः। इति दुर्गादासः॥

पथः, पुं, (पथति गच्छति अत्र। पथ गतौ+घञर्थे अधिकरणे कः।) पन्थाः। इति त्रिकाण्डशेषः॥

पथन्, [त्] पुं, पथः। इत्यमरटीका॥ (पथति गच्छति। पथ गतौ+शतृ।) गमनकर्त्ता च॥

पथिकः, त्रि, पन्थानं गच्छति यः। (पथिन्+"पथः ष्कन्।" ५। १। ७५। इति ष्कन् षो ङीषर्थः।) पथगन्ता। (यथा, गौः रामायणे। १। ५। १०।

"नानापथिकदूतैश्च वणिग्भिश्चोपशोभिताम्।
दैवतायतनैश्चैव विमानैरिव शोभिताम्॥")

तत्पर्य्यायः। अध्वनीनः २ अध्वगः ३ अध्वन्यः ४ पान्थः ५। इत्यमरः। २। ८। १७॥ गन्तुः ६ यातुः ७ पथकः ८ यात्रिकः ९ यात्रकः १०। इति शब्दरत्नावली॥ पथिलः ११। इत्युणादिकोषः॥

पथिकसन्ततिः, स्त्री, (पथिकानां सन्ततिः समूहः।) पथिकसङ्घः। तत्पर्य्यायः। हारिः २। इति त्रिकाण्डशेषः॥ पथिकसंहतिः ३। इति हारावली॥

पथिका, स्त्री, (पथिक+टाप्।) कपिलद्राक्षा। इति राजनिर्घण्टः॥

पथिद्रुमः, पुं, (पथि प्रशस्तगुणो द्रुमः। बहुगुणवत्त्वात्तथात्वम्।) खदिरवृक्षः। इति जटाधरः॥ श्वेतखदिरः। इति राजनिर्घण्टः॥

पथिलः, त्रि, (पथति गच्छतीति। पथ गतौ+"मिथिलादयश्च।" उणां। १। ५८। इति निपातनात् साधुः।) पथिकः। इत्युणादिकोषः॥

पथिवाहकः, त्रि, (पन्थानं वाहयतीति। वह+णिच्+ण्वुल्।) शाकुनिकः। निष्ठुरः। इति शब्दमाला॥ भारवाहकश्च॥

पथ्यं, त्रि, (पथिन्+"धर्म्मपथ्यर्थन्यायादनपेते।" ४। ४। ९२। इति यत्।) चिकित्सादौ हितकारकम्। तत्पर्य्यायः। करणम् २ हितम् ३। इति शब्दचन्द्रिका॥ आत्मीयम् ४ आयुष्यम् ५। सैन्धवे क्ली। इति राजनिर्घण्टः॥

पथ्यः, पुं, (पथि साधुः। दिगादित्वात् यत् इनो-लोपः।) हरीतकीवृक्षः। यथा,—

शिवायां वनतिक्तः स्यात् पथ्यः सुन्दरमालकौ।"
इति शब्दमाला॥

पथ्यशाकः, पुं, (पथ्यं हितकरं शाकं यस्य।) तण्डुलीयशाकः। इति राजनिर्घण्टः॥

पथ्या, स्त्री, (पथ्य+टाप्।) हरीतकी। (यथा, हठयोगदीपिकायाम्। ३। ३५।

"ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत्।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत्॥")

चिर्भटः। चिर्भिटा॥ वन्ध्या कर्कोटकी। इति राजनिर्घण्टः॥ (संसाररोगस्य पथ्यस्वरूपत्वात् गङ्गापि पथ्यस्वरूपा। यथा, काशीखण्डे २९। ११२।

"पद्मनाभपदार्घ्येण प्रसृता पद्ममालिनी।
परर्द्धिदा पुष्टिकरी पथ्या पूर्त्तिः प्रभावती॥")

पथ्यादिगुग्गुलुः, पुं, (पथ्या आदिर्यस्य तथाविधो गुग्गुलुः।) औषधविशेषः। यथा,—

"पथ्या विभीतामलकीफलानां
शतं क्रमेण द्विगुणाभिवृद्धम्।
प्रस्थेन युक्तञ्च पलङ्कषाणां
द्रोणे जले संस्थितमेकरात्रम्॥
अर्द्धावशेषं क्वथितं कषायं
भाण्डे पचेत्तत् पुनरेव लौहे।
अग्नौ निवद्धे रवतार्य्य दद्यात्
द्रव्याणि संचूर्ण्य पलार्द्धकानि॥
विडङ्गदन्तीत्रिफलागुडूची-
कृष्णात्रिवृन्नागरकोषणानि।
यथेष्टचेष्टस्य नरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि॥
निषेव्यमानो विनिहन्ति रोगान्
सगृध्रसीं नूतनखञ्जताञ्च।
प्लीहानमुग्रं जठरार्त्तिगुल्मं
पाण्डुत्वकण्डुत्वविवातरक्तम्॥

पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विषघ्नः ।
भग्नस्य सन्धानकरो विशेषा-
द्रोगेषु शस्तः सकलेषु तज्ज्ञैः ॥"
इति भावप्रकाशः ॥

पथ्यापथ्यं, क्ली, (पथ्यं रोगिणां हितकरं अपथ्यं अशुभकरं द्वयोः समाहारः ।) रोगाणां हिताहितकारकद्रव्याणि ।

तत्र तरुणज्वरे पथ्यं यथा ।

वमनम् । लङ्घनम् । कालोऽष्णाहः । यवागुः । स्वेदनम् । कटुतिक्तरसौ । एतानि पाचनानि ॥*॥

नवज्वरे अपथ्यं यथा ।

स्नानम् । विरेकः । सुरतम् । कषायः । व्यायामः । अभ्यञ्जनम् । दिवानिद्रा । दुग्धम् । घृतम् । वैदलम् । आमिषम् । तक्रम् । सुरा । स्वादुगुरुद्रवद्रव्याणि । अन्नम् । प्रवातः । भ्रमणम् । कोपः ॥*॥

मध्यज्वरे पथ्यं यथा ।

पुरातनषष्टिकः । पुरातनशालिः । वार्त्ताकुः । शोभाञ्जनम् । कारवेल्लः । वेत्राग्रम् । आषाढ़फलम् । पटोलम् । कर्कोटकम् । मूलकपोतिका । मुद्गमसूरचणककुलत्थमकुष्ठकानां यूषः । पाठा । अम्लता । वास्तूकम् । तण्डुलीयः । जीवन्ती । काकमाची । सुपक्वानि द्राक्षाकपित्थदाड़िमवैकङ्कतफलानि । लघूनि सात्म्यानि च भेषजानि ॥ * ॥

अथ पुराणज्वरे पथ्यम् ।

विरेचनम् । छर्द्दनम् । अञ्जनम् । नस्यम् । धूमः । अनुवासनम् । सिराव्यधः । संशमनम् । प्रदेहः । अभ्यङ्गः । अवगाहः । शिशिरोपचारः । एणः । कुलिङ्गः । हरिणः । मयूरः । लावः । शशः । तित्तिरिः । कुक्कुटः । क्रौञ्चः । कुरङ्गः । पृषतः । चकोरः । कपिञ्जल. । वर्त्तकः । कालपुच्छः । गोक्षीरम् । अजाक्षीरम् । गोघृतम् । अजाघृतम् । हरीतकी । पर्व्वतनिर्झराम्भः । एरण्डतैलम् । सितचन्दनम् । ज्योत्स्ना । प्रियालिङ्गनम् ॥ * ॥

व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणं तथा ।
ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत् ॥*॥

अथातिसाररोगे पथ्यम् ।

वमनम् । लङ्घनम् । निद्रा । पुराणाः शालिषष्टिकाः । विलेपी । लाजमण्डः । मसूरतुवरीशशैणलावहरिणकपिञ्जलभवयूषः । सर्व्वे क्षुद्रमत्स्याः । शृङ्गी । खुड्डीशः । मधुगालिका । तैलम् । छागघृतक्षीरे । गोर्दधितक्रे । गवाजयोर्दधिजं पयोजं वा नवनीतम् । नवरम्भापुष्पम् । नवरम्भाफलम् । क्षौद्रम् । जम्बुफलम् । भव्यम् । महार्द्रकम् । निम्बम् । शालुकम् । विकङ्कतम् । कपित्थम् । वकुलम् । विल्वम् । तिन्दुकम् । दाड़िमद्वयम् । तिलकम् । कच्चटदलम् । चाङ्गेरी । विजया । अरुणा । जातीफलम् । अहिफेनम् । जीरकः । गिरिमल्लिका । कुस्तुम्बुरु । महानिम्बम् । सकलकषायरसः । दीपनानि लघून्यन्नपानानि । नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंशास्थिमूले पृष्ठेण अर्द्धचन्द्रवद्दाहः ॥ * ॥

अतीसारे अपथ्यं यथा ।

स्वेदः । अञ्जनम् । रुधिरमोक्षणम् । अम्बुपानम् । स्नानम् । व्यवायः । जागरणम् । धूमः । नस्यम् । अभ्यञ्जनम् । सकलवेगधारणम् । रूक्षाणि । असात्म्यमशनम् । विरुद्धान्नम् । गोधूमः । माषः । यवः । वास्तूकम् । काकमाची । निष्पावः । कन्दः । मधुशिग्रुः । रसालम् । पूगम् । कुष्माण्डम् । तुम्बी । वदरम् । गुर्व्वन्नम् । गुरुपानम् । ताम्बूलम् । इक्षुः । गुड़ः । मद्यम् । उपोदिका । द्राक्षा । अम्लवेतसफलम् । लशुनम् । धात्री । दुष्टाम्बु । मस्तु । गृहवारि । नारिकेलम् । स्नेहनम् । मृगमदः । अखिलपत्रशाकम् । क्षारः । सर्व्वाणि सराणि । पुनर्नवा । दूर्व्वावकम् । लवणम् । अम्लम् ॥ * ॥

अथ ग्रहणीरोगे पथ्यम् ।

निद्रा । छर्द्दनम् । लङ्घनम् । पुरातनशालयः । पुरातनषष्टिकाः । लाजमण्डः । मसूरतुवरीमुद्गभवयूषः । निःशेषोद्धृतसारगव्यदधि । गवां छाग्या वा पयोजं नवनीतम् । छागघृतपयोदधीनि । तिलतैलम् । सुरा । माध्विकम् । शालूकम् । वकुलम् । दाड़िमयुगम् । नव्यं भव्यम् । रम्भापुष्पम् । रम्भाफलम् । तरुणविल्वम् । शृङ्गाटकम् । चाङ्गेरी । विजया । कपित्थम् । कुटजम् । अजाजी । कशेरुः । तक्रम् । कच्चटपल्लवम् । तिलकम् । जातीफलम् । जाम्बवम् । धन्याकम् । तिन्दुकम् । महानिम्बम् । अरुणा । अफेनम् । क्रथान । लावशशैणतित्तिरिमांसयूषः । सर्व्वे क्षुद्रमत्स्याः । खुड्डीशः । मधरालिकामत्स्यः । खलिशः । सकलकषायरसः । नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंशास्थिमूले प्रज्वलितायसार्द्धचन्द्रवद्दाहः ॥*॥

ग्रहण्यामपथ्यं यथा ।

रक्तस्रुतिः । जागरः । अम्बुपानम् । स्नानम् । स्त्री । वेगाविधारणम् । नस्यम् । अञ्जनम् । स्वेदनम् । धूमपानम् । श्रमः । विरुद्धाशनम् । आतपः । गोधूमः । निष्पावः । कलायः । माषः । यवः । आर्द्रकम् । छत्रकम् । राजमाषः । उपोदिका । वास्तूकः । काकमाची । कुष्माण्डः । तुम्बी । मधुशिग्रुः । कन्दः । ताम्बूलम् । इक्षुः । वदरम् । रसालम् । दूर्व्वाककम् । पूगफलम् । रसोनम् । धान्याम्लम् । सौवीरम् । तुषोदकम् । दुग्धम् । गुड़ः । मस्तु । नारिकेलम् । पुनर्नवा । वार्हतम् । वैणवम् । सर्व्वाणि पत्रशाकानि । दुष्टाम्बु । गोमूत्रम् । मृगनाभिः । क्षारम् । समस्तानि सराणि । द्राक्षा । अम्लम् । लवणरसः । गुर्व्वन्नम् । गुरुपानम् । सर्व्वे पूपाः ॥ * ॥

अथार्शसि पथ्यम् ।

विरेचनम् । लेपनम् । असृमोक्षः । क्षारः । अग्निकर्म्म । शस्त्रकर्म्म । पुरातनलोहितशालयः । पुरातनषष्टिकाः । यवाः । कुलत्थाः । गोधाखुगजोष्ट्रकूर्म्माविकालिङ्गाजखरौतुकीशतरक्षुश्वासृगालकाकानां मांसानि । स्वल्पमांसाः प्रसहाः । पटोलम् । पत्तूरः । रसोनकम् । वह्निः । पुनर्नवा । सूरणः । वास्तूकम् । जीवन्तिका । दन्तशठः । सुरा । त्रुटिः । वयःस्था । नवनीतम् । तक्रम् । कक्कोलम् । धात्री । वचकम् । कपित्थम् । औष्ट्रमूत्राण्यपयांसि । भल्लातकम् । सर्षपतैलम् । गोमूत्रम् । सौवीरम् । तुषोदकम् । वातापहान्नपानम् । अग्निवर्द्धकान्नपानम् ॥ * ॥

अर्शसि अपथ्यं यथा ।

आनूपमामिषम् । मत्स्यः । पिण्याकः । दधि । पिष्टकम् । माषः । करीरम् । निष्पावः । विल्वम् । तुम्बी । उपोदिका । पक्वान्नम् । सर्व्वशालूकम् । विष्टम्भीनि । गुरूणि । आतपः । जलपानम् । वमनम् । वस्तिकर्म्म । नदीनां सलिलम् । विरुद्धानि सर्व्वाणि । पूर्व्वदिग्भववायुः । वेगरोधः । स्त्रियः । पृष्ठयानम् । उत्कटकासनम् । यथास्वं दोषलं द्रव्यम् । रक्तपित्तिनां यद्यत् पथ्यापथ्यं तत्तदपि रक्तार्शोरोगिणां विशेषतो विद्यात् ॥ * ॥

अथाग्निमान्द्याजीर्णादौ पथ्यम् ।

श्लैष्मिके पूर्व्वं वमनम् । पैत्तिके मृदुरेचनम् । वातिके स्वेदनम् । यथावस्थं हितवस्तूनि । नानाप्रकारव्यायामः । दीपनानि । लघूनि । बहुकालसमुत्पन्ना मुद्गलोहितशालयः । विलेपी । लाजमण्डः । मुद्गभवमण्डः । सुरा । एणः । वर्त्ती । शशः । लावः । सर्व्वक्षुद्रमत्स्यः । शालिञ्चशाकम् । वेत्राग्रम् । वास्तूकम् । बालमूलम् । लशुनम् । वृद्धकुष्माण्डम् । नवीनकदलीफलम् । शोभाञ्जनम् । पटोलम् । वार्त्ताकुः । जलदाम्बु । कर्कोटकम । कारवेल्लम् । वार्हतम् । महार्द्रकम् । प्रसारणी । काकमाची । चाङ्गेरी । सुनिषण्णकम् । धात्रीफलम् । मातुलुङ्गम् । दाड़िमम् । यवः । पर्पटः । अम्लवेतसम् । जम्बीरम् । नागरङ्गम् । माध्विकम् । नवनीतम् । घृतम् । तक्रम् । सौवीरकम् । तुषोदकम् । धान्याम्लम् । कटुतैलम् । रामठम् । लवणार्द्रकम् । यमानी । मरिचम् । मेथी । धान्यकम् । जीरकम् । दधि । ताम्बूलम् । तप्तसलिलम् । कटुरसः । तिक्तरसः ॥ * ॥

अग्निमान्द्याजीर्णादौ अपथ्यं यथा ।

विरेचनम् । विण्मूत्रवायूनां वेगधारणम् । अतिरिक्ताशनम् । अध्यशनम् । जागरणम् । विषमाशनम् । रक्तस्रुतिः । शमीधान्यम् । मत्स्यः । मांसम् । उपोदिका । जलपानम् । पिष्टकम् ।

जाम्बवम् । सर्व्वशालूकम् । कूर्चिका । मोरट: । क्षीरम् । किलाट: । प्रपानकम् । तालास्थिशस्यम् । बालतालम् । खर्ज्जूरम् । दुष्टवारि । विरुद्धपानाशनम् । असात्म्यपानाशनम् । विष्टम्भीनि । गुरूणि ।

फलवर्त्तिं वमिं स्वेदं लङ्घनं चापतर्पणम् ।
विशेषादलसे कुर्य्याद्विसूच्यामतिसारवत् ॥ * ॥

अथ क्रिमिरोगे पथ्यम् ।

आस्थापनम् । कायविरेचनम् । शिरोविरेचनम् । धूम: । कफघ्नानि द्रव्याणि । शरीरमार्ज्जना । पुरातनवेणवरक्तशालय: । पटोलम् । वेत्राग्रम् । रसोनम् । वास्तूकम । हुताश: । मन्दारदलम् । सर्षपा: । नवीनमोचम् । हस्तीफलम् । तिक्तानि नालीचदलानि । मौषिकमांसम् । विडङ्गम । पिचुमर्द्दपल्लवम् । पथ्या । तिलतैलम् । सर्षपतैलम् । सौवीरम् । शुक्तम् । तुषोदकम् । मद्य । पर्पलिमतालम् । अरुष्करम् । गोमूत्रम् । ताम्बूलम । सुरा । म्टगाञ्जनम् । औष्ट्रमूत्राण्यपयांसि । रामठम् । क्षार: । अजमोदा । खदिर: । वत्सकम् । जम्बीरनीरम् । सुपर्वी । यमानिका । सुराङ्गा । गुर्वसिंशपोद्भवक्षार: । तिक्तकटुकषायरसा: ॥ * ॥

क्रिमिरोगे अपथ्यं यथा ।

छर्द्दि: । तद्वेगविधारणम् । विरुद्धपानाशनम् । दिवानिद्रा । द्रवद्रव्यम् । पिष्टान्नम् । अजीर्णभोजनम् । घृतम् । माष: । दधि । पत्रशाकम् । मांसम् । पय: । अम्ल: । मधुररस: ॥ * ॥

अथ पाण्डुरोगे पथ्यम् ।

छर्द्दि: । विरेचनम् । पुरातनयवगोधूमशालय: । मुद्गाढ़कीमसूराणां यूष: । जाङ्गलजरस: । पटोलम् । वृद्धकुष्माण्डम् । तरुणकदलीफलम । जीवन्ती । क्षुर: । मत्स्याक्षी । गुडूची । तण्डुलीयकम् । पुनर्नवा । द्रोणपुष्पी । वार्त्ताकु: । लशुनद्वयम । पक्वाम्रम् । अभया । विम्बी । शिङ्गी मत्स्य: । गोमूत्रम् । धात्री । तक्रम् । घृतम् । तैलम । सौवीरकम् । तुषोदकम् । नवनीतम् । गन्धसार: । हरिद्रा । नागकेशरम् । यवक्षार: । लौहभस्म । कषायद्रव्यम् । कुङ्कुमम् । चरणयो: सन्धौ नाभेर्द्व्यङ्गुलादध: मस्तके हस्तयोर्मूले स्तनकक्षयोर्मध्ये च दाह: । यथादोषमिदं पथ्यं पाण्डुरोगवतां भवेत् ॥ * ॥

पाण्डुरोगे अपथ्यं यथा ।

रक्तस्रुति: । धूमपानम । वमि: । वेगधारणम् । स्वेदनम् । मैथुनम् । शिम्बी । पत्रशाकानि । रामठम् । माष: । अम्बुपानम् । पिण्याक: । ताम्बूलम् । सर्षप: । सुरा । म्टद्भक्षणम् । दिवास्वप्न: । तीक्ष्णानि । लवणानि । सिन्धुविन्ध्याद्रिजातनदीनां जलम् । सर्व्वाण्यम्लानि । दुष्टाम्भ: । विरुद्धाशनानि । गुर्व्वन्नम् । विदाहीनि ॥ * ॥

अथ रक्तपित्ते पथ्यम् ।

अधोगमे छर्द्दनम् । ऊर्द्ध्वनिर्गमे विरेचनम् । उभयत्र लङ्घनम् । पुरातना: षष्टिकशालिकोद्रव-प्रियङ्गुनीवारयवप्रशातिका: । मुद्ग: । मसूर: । चणक: । तुवरी । मुकुष्टक: । चिङ्गट: । वर्म्मिमत्स्य: । शश: । कपोत: । हरिण: । एण: । लाव: । शराति: । पारावत: । वर्त्तक: । वक: । उरभ्र: । कालपुच्छ: । कपिञ्जल: । कषायवर्ग: । गोदुग्धघृतम् । अजादुग्धघृतम् । महिषीघृतम् । पनसम् । पियालम । रम्भाफलम् । कर्कटम् । तण्डुलीय: । पटोलम । वेत्राग्रम् । मधार्द्रकम् । पुराणकुष्माण्डफलम् । पक्वतालम् । तद्बीजजलम् । वासा । म्टणालिनी । विल्वम् । दाडिमम् । खर्ज्जूरम् । धात्री । मिषि: । नारिकेलम् । कशेरु । शृङ्गाटकम् । पौष्करम् । कपित्थम् । शालूकम् । परूषकम । भूनिम्बशाकम् । पिचुमर्द्दपत्रम् । तुम्बी । कलिङ्गम् । लाजशक्तव: । द्राक्षा । सिता । माक्षिकम् । सैन्धवम् । शीतोदकम । औद्भिदवारि । सेक: । अवगाह: । शतधौतसर्पि: । अभ्यङ्ग: । शिशिरप्रदेह: । हिमानिल: । चन्दनम् । इन्दुपादा: । मनोऽनुकूलविचित्रकथा । धारागृहम् । सुशीतं भूमिगृहम् । वैदूर्य्यमुक्तामणीनां धारणम् । रम्भोत्पलाम्भोरुहपत्राणां शय्या । क्षौमाम्बरम् । सुशीतोपवनम् । प्रियङ्गु: । चन्दनरूषितानां वराङ्गनानामालिङ्गनम् । पद्माकरसरितह्रदचन्द्रोदयाहिमवद्दरीसुशीतलगिरिनिर्झराणामालिङ्गनम् । स्तुतिप्रशस्तकीर्त्तनम् । प्रवीणनीरम् । हिमवालुका ॥ * ॥

रक्तपित्ते अपथ्यं यथा ।

व्यायाम: । अध्वनिषेवणम् । रविकर: । तीक्ष्णानि कर्म्माणि । क्षोभ: । वेगधारणम् । चपलता । हस्त्यश्वयानानि । स्वेद: । असृक्स्रुति: । धूमपानम् । सुरत: । क्रोध: । कुलत्थ: । गुड: । वार्त्ताकु: । तिल: । माष: । सर्षप: । दधि । क्षार: । कौपपय: । ताम्बूलम् । नलदाम्बु । मद्यम् । लशुनम् । शिम्बी । विरुद्धाशनम् । कटु । अम्लम् । लवणम् । विदाहिद्रव्यम् ॥ * ॥

अथ राजयक्ष्मणि पथ्यम् ।

घृतपक्वमरिचजीरकमांसकलायान्वितानि जरस: । दोषाधिकस्य वलिनोऽपि म्टदुशुद्धि: । गोधूम: । मुद्ग: । चणक: । अरुणशालय: । छागानि मांसनवनीतपयोघृतानि । क्रव्यादमांसम । जाङ्गलजा रसा: । मार्गिण्डचर्क्राकरणपरिशोषितसुचूर्णितपक्वपललं लेह्यम् । रागा: । काम्बलिक: । षाड़व: । वेशवार: । शशाङ्ककिरण: । मधुररस: । मोचपनसाम्राणां पक्वफलानि । धात्री । खर्ज्जूरम् । पौष्करम् । परूषकम् । नारिकेलम् । शोभाञ्जनम् । वकुलम् । नवतालशस्यम् । द्राक्षा । मिषि: । माणिमन्थम् । सिंहास्यपत्रम् । अजागोमहिषीघृतम् । छागाश्रय: । छागावस्करमूत्रलेप: । मत्स्यण्डिका । शिखरिणी । मदिरा । रसाला । कर्पूरम् । म्टगमद: । सितचन्दनम् । अभ्यञ्जनानि । सुरभीण्यनुलेपनानि । स्नानम् । वेशरचनम् । अवगाहनम् । हर्म्यम् । स्रज: । स्मरकथा । म्टदुगन्धवाह: । गीतानि । लास्यम् । चन्द्ररश्मि: । विपञ्ची । म्टगदृशां सन्दर्शनम् । हेमचूर्णम् । मुक्तामणिप्रचूरभूषणधारणम् । होम: । प्रदानम् । अमरपूजा । द्विजपूजा । सुधान्नपानम् ॥ * ॥

राजयक्ष्मणि अपथ्यं यथा ।

विरेचनम् । वेगधारणम् । श्रम: । स्त्री । स्वेद: । अञ्जनम् । प्रजागर: । साहसकर्म्मसेवा । रूक्षान्नपानम् । विषमाशनम् । ताम्बूलम् । कालिङ्गम् । कुलत्थम् । माष: । रसोनम् । वंशाङ्कुर: । रामठम् । अम्लम् । तिक्तम् । कषाय: । सर्व्वकटु । पत्रशाक: । क्षार: । विरुद्धाशनम् । शिम्बी । कर्कोटकम् । विदाहिद्रव्यम् । लवणकठिल्लकम् ॥ * ॥

अथ कासे पथ्यम् ।

स्वेद: । विरेचनम् । छर्द्दि: । धूमपानम् । समाशनम् । शालि: । षष्टिक: । गोधूम: । श्यामाक: । यव: । कोद्रव: । आत्मगुप्ता । माषमुद्गकुलत्थानां रसा: । ग्राम्योदकम् । अनूपधन्वदेशभवविविधमांसानि । सुरा । पुरातनसर्पि: । छागदुग्धम् । छागघृतम् । वास्तूकम् । वायसीशाकम् । वार्त्ताकु: । बालमूलकम् । कण्टकारी । कासमर्द्द: । जीवन्ती । सुनिषण्णकम् । द्राक्षा । विम्बी । मातुलुङ्गम् । पौष्करम् । वासक: । त्रुटि: । गोमूत्रम् । लशुनम् । पथ्या । योषम् । उष्णोदकम् । मधु । लाजा: । दिवसनिद्रा । लघून्यन्नानि ॥ * ॥

कासे अपथ्यं यथा ।

वस्ति: । नस्यम् । अरुड्मोक्ष: । व्यायाम: । दन्तघर्षणम् । आतप: । दुष्टपवन: । रज: । मार्गनिषेवणम । विष्टम्भीनि । विदाहीनि । विविधरूक्षाणि । शुक्रक्षवोद्गारकासवमिवेगविधारणम् । मत्स्य: । कन्द: । सर्षप: । तुम्बी । उपोदिका । दुष्टाम्बु । दुष्टान्नपानम् । विरुद्धाशनम् । गुरुशीतान्नपानम ॥ * ॥

अथ श्वासे पथ्यम् ।

विरेचनम् । स्वेदनम् । धूमपानम् । प्रच्छर्द्दनम् । दिवास्वपनम् । पुरातना: षष्टिकरक्तशालिकुलत्थगोधूमयवा: । शश: । अहिभुक् । तित्तिरि: । लाव: । दक्ष: । शुकादय: । धन्वम्टगा: । धन्वपक्षिण: । पुरातनसर्पि: । अजादुग्धघृतम् । सुरा । मधु । निदिग्धिका । वास्तूकम् । तण्डुलीय: । जीवन्तिका । मूलकपोतिका । पटोलम् । वार्त्ताकु: । रसोनम् । पथ्या । जम्बीरम् । विम्बीफलम् । मातुलुङ्गम् । द्राक्षा । त्रुटि: । पौष्करम् । उष्णवारि । कटुत्रयम् । गोमूत्रम् । कफानिलघ्नान्यन्नपानभेषजानि । वक्ष:प्रदेशात् पार्श्वयुग्मे करस्थयोर्मध्यमयोर्द्वयो: कण्ठकूपे च प्रदीप्तलौहेन दाह: ॥ * ॥

श्वासे अपथ्यं यथा ।

मूत्रोद्गारच्छर्द्दिहिक्काकासानां रोध: । नस्यम् ।

गोजलम्। आर्द्रकम्। कटूनि। तिक्तानि। दीपनानि ॥ * ॥

आमवाते अपथ्यम्।

दधि। मत्स्य:। गुड:। क्षीरम्। उपोदिका। माष:। पिष्टकम्। दुष्टनीरम्। पूर्व्ववात:। विरुद्धाशनम्। असात्म्यम्। वेगरोध:। जागर:। विषमाशनम् ॥ * ॥

अथ शूले पथ्यम्।

छर्द्दि:। स्वेद:। लङ्घनम्। पायुवर्त्ति:। वस्ति:। निद्रा। रेचनम्। पाचनम्। अब्दोतपन्ना: शालय:। वाशनक:। तप्तनीरम्। जाङ्गलानां रस:। पटोलम्। शोभाञ्जनम्। कारवेल्लम्। वार्त्ताकु:। मत्स्याण्डम्। द्राक्षा। कपित्थम्। रुचकम्। पियालम्। शालिञ्चपत्राणि। वास्तूकम्। सामुद्रम्। सौवर्च्चलम्। हिङ्गु। विश्वम्। विड़म्। शलाका। लशुनम्। लवङ्गम्। एरण्डतैलम्। सुरभीजलम्। तप्ताम्बु। जम्बीररस:। कुष्ठम्। लघूनि। चाररसानि ॥ * ॥

शूले अपथ्यम्।

विरुद्धान्नपानम्। जागर:। विषमाशनम्। रूक्षतिक्तकषायाणि। शीतलानि। गुरूणि। व्यायाम:। मैथुनम्। मद्यम्। वैदलम्। लवणम्। कटु। वेगरोध:। शोक:। क्रोध: ॥ * ॥

अधोदावर्त्तानाहयो: पथ्यम्।

नारिकेलपुष्पमिश्रितशीतलोदकपानम्। स्नेहस्वेद:। विरेक:। वस्ति:। फलवर्त्ति:। अभ्यङ्ग:। यव:। हरविमुत्तमारुत:। ग्राम्योदकम्। आनूपरस:। मधुतैलम्। वारुणी। बालमूलकम्। सम्पाक:। त्रिवृत्। तिल:। सुधादलम्। घृताङ्गवेरम्। मातुलुङ्गम्। यवक्षार:। हरीतकी। लवङ्गम्। रामठम्। द्राक्षा। गोमूत्रम्। लवणानि। अधोवातसमुत्थे तु। स्नेह:। स्वेद:। वर्त्ति:। वस्ति:। समीरणहरान्नपानम्। तथा पुरीषजे। वस्ति:। स्वेद:। अभ्यङ्ग:। अवगाहनम्। फलवर्त्ति:। विड्भेदान्नपानम्। मूत्रवेगसमुत्पन्ने। त्रिविधं वस्तिकर्म्म। स्वेद:। अभ्यङ्ग:। अवगाह:। सर्पिषावपीडनम्। उद्गारोत्थे स्निग्धाम्लविधि:। कासजे कासविधि:। क्षवजे। स्वेदनम्। धूम:। औत्तरभक्तिकघृतम्। नस्यप्रवर्त्तननस्यम्। ऊर्द्ध्वजत्रुकाभ्यङ्ग:। तृष्णोत्थे शीतान्नपानम्। जृम्भोत्थे वातजित्क्रिया। निद्राविघातोत्थिते क्षीरम्। स्वप्नसंवाहनम्। बुभुक्षोत्थे स्निग्धाल्पोष्णलघुभोजनम्। वास्यजे वास्पसंमोक्ष:। स्वप्न:। मद्यम्। प्रियकथा। श्रमश्वाससमुत्पन्ने विश्राम:। वातहारिद्रव्यम्। शुक्रोत्थे वस्ति:। अभ्यङ्ग:। अवगाह:। चरणायुध:। शालि:। मदिरा। क्षीरम्। यौवनगर्व्वितप्रिया। छर्द्द्युत्थे लङ्घनम्। धूम:। रुक्षा प्रच्छर्द्दनम्। श्रम:। रूक्षान्नपानम्। विरेक:। रक्तमोक्षणम् ॥ * ॥

उदावर्त्तानाहयोरपथ्यम्।

वमनम्। वेगरोध.। शमीधान्यम्। कोद्रव:। शालीचशाकम्। शालूकम्। जाम्बवम्। कर्कटीफलम्। पिण्याकम्। सर्व्वमालुकम्। करीर:। पिष्टवैकृतम्। विष्टम्भीनि। विरुद्धानि। कषायाणि। गुरूणि ॥ * ॥

अथ गुल्मे पथ्यम्।

स्नेहस्वेद:। विरेक:। वस्ति:। बाहुसिराव्यध:। लङ्घनम्। वर्त्ति:। अभ्यङ्ग:। स्नेह:। पक्के तु पाटनम्। सञ्जनसरससुतपन्नकलायरक्तशालय:। खड:। कुलत्थयूष:। धन्वमांसरस:। सुरा। गवाजयो: पय:। मृद्वीका। परूषकम्। खर्ज्जूरम्। दाडिमम्। धात्री। नागरङ्गम्। अम्लवेतसम्। तक्रम्। एरण्डतैलम्। लशुनम्। बालमूलकम्। पत्तूर:। वास्तूकम्। शिग्रु। यवक्षार:। हरीतकी। रामठम्। मातुलुङ्गम्। त्र्यूषणम्। सुरभीजलम्। स्निग्धोष्णदीपनलघुदीपनान्नानि। वातानुलोमनम् ॥ * ॥

गुल्मे अपथ्यम्।

सर्व्वं वातकारि। विरुद्धान्नम्। वल्लूरम्। मूलकम्। मत्स्य:। मधुरफलम्। शुष्कशाकम्। शमीधान्यम्। विष्टम्भीनि। गुरूणि। अधोवातशकृन्मूत्रश्रमश्वासाश्रुधारणम्। वमनम्। जलपानम् ॥ * ॥

अथ हृद्रोगे पथ्यम्।

स्वेद:। विरेक:। वमनम्। लङ्घनम्। वस्ति:। विलपी। पुरातनरक्तशालय:। जाङ्गलमृगपक्षियूषा:। मुद्गकुलत्थरसा:। रागा:। खडा:। काम्बलिका:। षाडवा:। भयम्। पटोलम्। कदलीफलम्। पुराणकुष्माण्डम्। रसालम्। दाडिमम्। सम्पाकशाकम्। नवमूलकम्। एरण्डतैलम्। गगनाम्बु। सैन्धवम्। द्राक्षा। तक्रम्। पुरातनगुड:। शुण्ठी। यमानी। लशुनम्। हरीतकी। कुष्ठम्। कुस्तुम्बरु। लवणम्। आर्द्रकम्। सौवीरम्। शुक्तम्। मधु। वारुणीरस:। कस्तूरिका। चन्दनम्। प्रपानकम्। ताम्बूलम् ॥ * ॥

हृद्रोगे अपथ्यम्।

तृट्छर्द्दिमूत्रानिलशुक्रकासोद्गारश्रमश्वासविड्श्रूणां वेगधारणम्। सह्याद्रिविन्ध्याद्रिनदीनां जलम्। मेषीपय:। दुष्टजलम्। कषाय:। विरूढम्। उष्णम्। गुरु। तिक्त:। अम्ल:। चिरञ्जनपत्रोत्थशाकानि। क्षार:। मधूकम्। दन्तकाष्ठम्। रक्तस्रुति: ॥ * ॥

अथ मूत्रकृच्छ्रे पथ्यम्।

वातोद्भवे अभ्यङ्ग:। निरूह:। वस्ति:। स्नेह:। अवगाह:। उत्तरवस्ति:। सेक:। पैत्ते अवगाह:। शिशिरप्रदेह:। ग्रैष्मो विधि:। वस्तिविधि:। विरेक:। श्लैष्मोद्भवे स्वेद:। विरेक:। वस्ति:। क्षार:। यवान्नम्। तीक्ष्णम्। उष्णम्। त्रिदोषजे अभ्यङ्गपुर:सराणि त्रिमलोदितानि सर्व्वाण्यपि। यथा यथा दोषमयं गद:। पुरातनलोहितशालि:। गोमहिषक्रमपयोदधीनि। धन्वामिषम्। मुद्गरस:। सिता। पुराणकुष्माण्डफलम्। पटोलम्। महार्द्रकम्। गोक्षुरक:। कुमारी। गुवाकखर्ज्जूरनारिकेलतालाङ्कुरमज्जा। शिरीषि। पथ्या। तालास्थिमज्जा। त्रपुषम्। त्रुटि:। शीतपानम्। शीतापानम्। प्रणीरनीरम्। हिमवालुका ॥ * ॥

मूत्रकृच्छ्रे अपथ्यम्।

मद्यम्। श्रम:। निधुवनम्। गजवाजियानम्। सर्व्वं विरुद्धाशनम्। विषमाशनम्। ताम्बूलम्। मत्स्य:। लवणम्। आर्द्रकम्। तैलभृष्टम्। पिण्याकम्। हिङ्गु। तिल:। सर्षप:। वेगरोध:। माष:। करीर:। अतितीक्ष्णम्। विदाहि। रूक्षम्। अम्ल: ॥ * ॥

अथ मूत्राघाते पथ्यम्।

अभ्यञ्जनम्। स्नेह:। विरेक:। वस्ति:। स्वेद:। अवगाह:। उत्तरवस्ति:। पुरातनलोहितशालि:। धन्वभवमांसम्। मद्यम्। तक्रम्। पय:। दधि। माषयूष:। पुराणकुष्माण्डफलम्। पटोलम्। महार्द्रकम्। तालफलास्थिमज्जा। हरीतकी। कोमलनारिकेलम्। गुवाकखर्ज्जूरनारिकेलतालाङ्कुरमज्जा मस्तकानि ॥ * ॥

मूत्राघाते अपथ्यम्।

सर्व्वाणि विरुद्धानि। व्यायाम:। मार्ग:। शीतलम्। रूक्षम्। विदाहि। विष्टम्भि। व्यवाय:। वेगधारणम्। करीरम्। वमनम् ॥ * ॥

अथाश्मर्य्यां पथ्यम्।

वस्ति:। विरेक:। वमनम्। लङ्घनम्। स्वेद:। अवगाह:। वारिसेचनम्। यवा:। कुलत्था:। प्रपुराणशालय:। मद्यम्। धन्वाकजसम्भवरस:। पुराणकुष्माण्डफलम्। कर्प्पूरकम्। गोकण्टक:। वारुणशाकम्। आर्द्रकम्। पाषाणभेदी। यवशूक:। रेणु:। छिन्ना। अश्मनां समाकर्षणम् ॥

अश्मर्य्यां अपथ्यम्।

मूत्रस्य शुक्रस्य च वेगधारणम्। अम्ल:। विष्टम्भि। रूक्षम्। गुर्व्वन्नपानम्। विरुद्धपानाशनम् ॥ * ॥

अथ प्रमेहे पथ्यम्।

पूर्व्वं लङ्घनम्। वमनम्। विरेचनम्। प्रोद्वर्त्तनम्। शमनम्। दीपनम्। नीवार:। कङ्गु:। यव:। वेणव:। कोरदूष:। श्यामाक:। जूर्ण:। कुरुविन्द:। मुकुन्दक:। गोधूम:। शालि:। कलम:। पुरातनकुलत्थ:। मुद्गाढकीचणकयूषरसा:। तिला:। लाजा:। पुरातनसुरा। मधु। वाशनक:। तक्रम्। रासभजलम्। महिषीजलम्। कफ:। जाङ्गला: कपोतशशतित्तिरिलावबर्हिभृङ्गराजवर्तकशुकादय:। शोभाञ्जनम्। कुलकम्। कटिल्लकम्। कर्कोटकम्। तलकम्। वार्त्ताकम्। चोड़स्वरम्। लशुनम्। नवीनमोचम्। पत्तूरम्। गोक्षुरकम्। मेषिकमर्मशाकम्। मन्दारपत्रम्। अरुष्ता। त्रिफला। कपित्थम्। जम्बु:। कशेरु। कमलोत्पलकन्दबीजम्। खर्ज्जूरलाङ्गलिकतालतरूणां मस्तकम्। योपम्। तिन्दुकफलम्। खदिर:। कलिङ्ग:।

तिक्तः। कषायः। हस्त्यश्ववाहनम्। अतिभ्रमणम्। रविकिरणाः। व्यायामः॥ * ॥

प्रमेहे अपथ्यम्।

मूत्रवेगः। धूमपानम्। स्वेदः। रक्तमोक्षणम्। सदाशनम्। दिवानिद्रा। नवान्नम्। दधि। आनूपमांसम्। निष्पावम्। पिष्टान्नम्। मैथुनम्। सौवीरकम्। सुरा। शुक्तम्। तैलम्। क्षीरम्। घृतम्। गुडः। तुम्बी। तालास्थिमज्जा। विरुद्धाशनम्। कुष्माण्डम्। इक्षुः। दुष्टाम्बु। स्वादु। अम्लः। लवणम्। अभिष्यन्दि॥ * ॥

अथ मेदसि पथ्यम्।

चिन्ता। श्रमः। जागरणम्। व्यवायः। प्रोद्वर्त्तनम्। लङ्घनम्। आतपः। हस्त्यश्वयानम्। भ्रमणम्। विरेकः। प्रच्छर्दनम्। अपतर्पणम्। पुरातना वेणवकोरदूषश्यामाकनीवारप्रियङ्गु जूर्णाः। यवः। कुलत्थः। चणकः। मसूरः। मुद्गः। तुवरी। मधु। लाजाः। कटुतिक्तकषायाणि। तक्रम्। सुरा। चिङ्गटमत्स्यः। दग्धवार्त्ताकुः। फलत्रयम्। यवासकम्। शिरीषलोध्रहरीतकीनां चूर्णेन गात्रविलेपनम्। कटुत्रयम्। सर्षपतैलम्। एला। सर्व्वाणि रूक्षाणि। सुरूक्षतैलम्। पत्रशाकः। अगुरुलेपनम्। प्रतप्तनीराणि। शिलाजतूनि। भोजनात् प्राक् वारिपानम्॥ * ॥

मेदसि अपथ्यम्।

स्नानम्। रसायनम्। शालिः। गोधूमः। सुखशीलता। क्षीरम्। इक्षुविकृतिः। माषः। सौहित्यम्। स्वेदनानि। मत्स्यः। मांसम्। दिवानिद्रा। स्रक्। गन्धः। मधुराणि। समग्रभोजनस्य पश्चात् जलपानम्। अतिमात्रोपचिते विशेषादुद्वर्त्तनक्रिया॥ * ॥

अथोदररोगे पथ्यम्।

विरेचनम्। लङ्घनम्। अब्दसम्भवकुलत्थमुद्गारुणशालियवाः। जाङ्गलमृगपक्षिणः। सिता। सुरा। माक्षिकम्। सीधुः। माध्वीकम्। षाडवः। तक्रम्। रसोनम्। रुबुतैलम्। आर्द्रकम्। शालिञ्चशाकम्। कुलकम्। कठिल्लकम्। पुनर्नवा। शिग्रुफलम्। हरीतकी। ताम्बूलम्। एला। यवशूकम्। आयसम्। अजागवोष्ट्रीमहिषीणां पयः मूत्रञ्च। लघूनि। तिक्तानि। दीपनानि। वस्त्रेण सम्वेष्टनम्। अग्निकर्म। विषप्रयोगः। विशेषतः शोफसमुद्भवे वामे अग्रवाहौ धमनीव्यधः। वृद्धाक्ष्ये उदकार्त्ते चतोत्थिते नाभेरधः यथाविधिशस्त्रविधिः। समीरणार्त्ते आदितः घृतपानम्। अभ्यञ्जनम्। अनुवासनम्॥ * ॥

उदररोगे अपथ्यम्।

सन्धुक्षणम्। धूमपानम्। जलपानम्। सिराव्यधः। छर्दिः। यानम्। दिवानिद्रा। व्यायामः। पिष्टविकृतम्। औदकानूपमांसम्। पत्रशाकम्। तिलः। उष्णानि। विदाहीनि। लवणाशनम्। शमीधान्यम्। विरुद्धान्नम्। दुष्टनीरम्। गुरूणि।

महेन्द्रगिरिजातानां नदीनां जलम्। विदाहीनि। छिद्रसमुद्भवे विशेषतः स्वेदः॥ * ॥

अथ शोथे पथ्यम्।

संशोधनम्। लङ्घनम्। अस्रमोक्षः। स्वेदः। प्रलेपः। परिषेचनम्। पुरातनशालियवकुलत्थमुद्गाः। गोधा। शल्लकः। भुजङ्गभुक्तित्तिरिताम्रचडलावादयो जाङ्गलविष्किराः। कूर्म्मः। मद्गुरी। प्रपुराणसर्पिः। तक्रम्। सुरा। माक्षिकम्। आसवः। निष्पावः। कठिल्लकम्। रक्तशिग्रु। रसोनम्। कर्कोटकम्। मानमूलम्। सुवर्चला। गञ्जनकः। पटोलम्। वेत्राग्रम्। वाडिङ्गनम्। मूलकम्। पुनर्नवा। चित्रकम्। पारिभद्रः। श्रीपर्णम्। निम्बः। गुग्गुलवम्। सरलतैलम्। कटुका। हरिद्रा। हरीतकी। क्षारनिषेवणम्। भल्लातकम्। गुग्गुलुः। आयसम्। कटूनि। तिक्तानि। दीपनानि। गोऽजामहिषीभवमूत्राणि। कस्तूरिका। शिलाजतु। पाण्डुरोगोक्तवह्निकर्म॥ * ॥

शोथे अपथ्यम्।

नवसमलिलम्। वेगरोधः। विरुद्धपानाशनम्। विषमाशनम्। स्वप्नजागरणम्। ग्राम्यजानूपपिशितलवणम्। शुष्कशाकम्। नवान्नम्। गौड़म्। पिष्टान्नम्। दधि। मधुरम्। विज्जलम्। मद्यम्। अम्लम्। धानाः। वल्लूरम्। गुरु। असात्म्यम्। विदाहि। अरात्रौ स्वप्नः। मैथुनम्॥ * ॥

अथ वृद्धिब्रध्नाधिकारे पथ्यम्।

संशोधनम्। वस्तिः। अस्रविमोक्षः। स्वेदः। प्रलेपः। अरुणशालयः। एरण्डतैलम्। सुरभीजलम्। धन्वामिषम्। शिग्रुफलम्। पटोलम्। पुनर्नवा। गोक्षुरः। अग्निमन्थः। ताम्बूलम्। पथ्या। सरला। रसोनम्। वाडिङ्गनम्। गृञ्जनकम्। मर्द्दनानि। कौम्भं घृतम्। तप्तजलम्। तक्रम्। आमवातापहमक्षिकाणि चान्नपानम्। पुराणसुरा। अर्द्धेन्दुवदर्द्धचन्द्रयोर्द्दाहः। आमाशये वार्त्तशिराव्यधः॥ * ॥

ब्रध्नवृद्धावपथ्यम्।

विरुद्धपानान्नम्। असात्म्यसेवा। संक्षोभणम्। हस्तिप्रष्ठयादियानम्। आनूपमांसानि। दधीनि। माषाः। दुग्धानि। पिष्टान्नम्। उपोदिका। गुरूणि। शुक्रोत्थितवेगरोधः॥ * ॥

अथ गलगण्डादौ पथ्यम्।

छर्दिः। विरेचनम्। नस्यम्। स्वेदः। धूमः। शिराव्यधः। अग्निकर्म। क्षारयोगः। प्रलेपः। लङ्घनम्। पुराणघृतपानम्। जीर्णलोहितशालयः। यवाः। मुद्गाः। पटोलम्। रक्तशिग्रु कठिल्लकम्। शालिञ्चशाकम्। वेत्राग्रम्। रूक्षाणि। कटूनि। सर्व्वाणि दीपनानि। गुग्गुलुः। शिलाजतु। विशेषतः जिह्वातलस्थसिराद्वयच्छेदः। मणिबन्धोर्द्ध्वे अङ्गुलान्तरास्तिस्रो रेखाः कार्य्याः। गलगण्डगण्डमालापचीग्रन्थ्यर्बुदातुरे यथादोषं यथावस्थं एतत् सर्व्वं पथ्यम्॥ * ॥

गलगण्डे अपथ्यम्।

सर्व्वक्षीरेक्षुविकृतिः। आनूपमांसम्। पिष्टान्नम्। अम्लम्। मधुरम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ श्लीपदे पथ्यम्।

प्रच्छर्द्दनम्। लङ्घनम्। अस्रमोक्षः। स्वेदः। विरेकः। परिलेपनम्। पुरातनषष्टिकशालयः। यवाः। कुलत्थाः। लशुनम्। पटोलम्। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लम्। पुनर्नवा। मूलकम्। पूतिका। एरण्डतैलम्। सुरभीजलम्। कटूनि। तिक्तानि। दीपनानि। वातोद्भवे गुल्फोपरिष्टात् चतुरङ्गुले सिराव्यधः। पैत्तिके गुल्फतले शिराव्यधः। कफजे अङ्गुष्ठमूले सिराव्यधः॥ * ॥

श्लीपदे अपथ्यम्।

पिष्टान्नम्। दुग्धविकृतम्। गुडः। आनूपमांसम्। स्वादुरसः। पारिपात्रसह्यविन्ध्यनदीजलम्। पिच्छिलम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ विद्रधौ पथ्यम्।

आमावस्थे रेचनलेपस्वेदास्रमोक्षणानि। जीर्णश्यामाककलमौ। कुलत्थः। लशुनम्। रक्तशिग्रु। निष्पावः। कारवेल्लः। पुनर्नवा। श्रीपर्णी। चित्रकम्। क्षौद्रम्। शोथोक्तानि सर्व्वाणि। पक्वावस्थे शस्त्रकर्म्म। पुराणरक्तशालिः। घृतम्। तैलम्। मुद्गरसः। विलेपी। धन्वजरसाः। शालिञ्चशाकम्। कदलम्। पटोलम्। हिमवालुका। चन्दनम्। तप्ताम्बु। शीताम्बु। व्रणोदितं सर्व्वम्॥ * ॥

विद्रधावपथ्यम्।

आमावस्थे शोथोक्तान्यपथ्यानि। पक्वावस्थे व्रणोक्तान्यपथ्यानि॥ * ॥

अथ व्रणशोथव्रणसद्योव्रणनाड़ीव्रणेषु पथ्यम्।

विम्लापनम्। रक्तमुक्तिः। उपनाहः। विपाटनम्। शोधनम्। रोपणम्। पुराणसितशालयः। यवः। षष्टिकः। गोधूमः। जाङ्गलमृगपक्षिणः। विलेपी। लाजमण्डः। कटुतैलम्। घृतम्। मधु। तैलम्। मसूरम्। तुवरी। मुद्गयूषः। शर्करा। आषाढ़फलम्। वार्त्ताकुः। कर्कोटकम्। पटोलम्। कारवेल्लम्। निम्बपत्रम्। वेत्राग्रम्। बालमूलकम्। सुनिषण्णकम्। शालिञ्चशाकम्। तण्डुलीयः। वास्तूकम्। त्रिफला। पनसम्। मोचम्। दाडिमम्। कट्फलम्। जीवन्ती। सैन्धवम्। द्राक्षा। स्वादुतिक्तकषायाः। स्निग्धोष्णद्रवोत्तरान्नम्। रक्षणम्। शमनम्। दाहः। स्वेदनम्। बन्धनक्रिया। व्रणावचूर्णनम्। लेपः। धूपनम्। पत्रधारणम्। उशीरम्। वालव्यजनम्। चन्दनम्। तिललेपनम्। तप्तशीताम्बु। कर्पूरम्। पक्वतः परा वैकृताः॥ * ॥

व्रणशोथव्रणसद्योव्रणनाड़ीव्रणेषु अपथ्यम्।

नवधान्यम्। तिलः। कलायः। माषः। कुलत्थः।

ज्वरः। हिमाम्बुः। विविधक्षीरेक्षुविकाराः। अन्नानि। पत्रशाकम्। अजाङ्गलमांसम्। असात्म्यमन्नम्। विदाहि। विष्टम्भि। गुरूणि। कटु। अम्लम्। शीतम्। लवणम्। व्यवायः। आयासः। उच्चैः परिभाषणम्। प्रियासमालोकनम्। अह्नि निद्रा। प्रजागरम्। नितान्तचंक्रमणम्। यथास्थितं प्राणधिरोपणम्। नस्यम्। ताम्बूलम्। अजीर्णता। प्रचण्डवातः। आतपः। धूमः। तृषा। रजः। भयम्। क्रोधः। वमिः। प्रस्वेदः। शोकः। विरुद्धाशनम्। अम्बुपानम्। तीक्ष्णम्। उष्णम्। रूक्षम्। विषघ्नम्। कण्डूयनम्। काञ्चनखादितोदः। निरन्नभावः। विषमोपचारः॥ * ॥

अथ भग्ने पथ्यम्।

शीताम्बु। चन्दनम्। पद्मप्रदेहः। बन्धनक्रिया। शालिः। प्रियङ्गुः। गोधूमः। मुद्गसतीलयोर्यूषः। नवनीतम्। घृतम्। क्षीरम्। तैलम्। मांसरसः। मधु। पटोलम्। लशुनम्। शिग्रु। पत्तूरम्। बालमूलकम्। द्राक्षा। धात्री। वज्रवल्ली। लाक्षा। बृंहणम्॥ * ॥

भग्ने अपथ्यम्।

लवणम्। कटुकम्। क्षारः। अम्लः। मैथुनम्। आतपः। व्यायामः। रूक्षान्नम्॥ * ॥

अथ भगन्दरे पथ्यम्।

आमे संशोधनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पक्वे यथाविधिशस्त्रवह्निक्षारकर्म्माणि। सर्षपः। शालिः। मुद्गः। विलेपी। जाङ्गलरसः। पटोलम्। शिग्रु। वेत्राग्रम्। पत्तूरम्। बालमूलकम्। तिलसर्षपयोस्तैलम्। तिक्तवर्गः। घृतम्। मधु॥ * ॥

भगन्दरे अपथ्यम्।

विरुद्धान्यन्नपानानि। विषमाशनम्। आतपः। व्यायामः। मैथुनम्। युद्धम्। पृष्ठयानम्। गुरूणि। रूढव्रणोऽपि नरः संवत्सरं एतत् सर्व्वं परिहरेत्॥ * ॥

अथोपदंशे पथ्यम्।

छर्द्दिः। विरेकः। ध्वजमध्यनाडीवेधः। जलौका। परिषातनम्। सेकः। प्रलेपः। यवः। शालयः। धन्वामिषम्। मुद्गरसः। घृतम्। कठिल्लकम्। शिग्रुफलम्। पटोलम्। शालिञ्चशाकम्। नवमूलकम्। तिक्तम्। कषायम्। मधु। कूपवारि। तैलम्॥ * ॥

उपदंशे अपथ्यम्।

दिवानिद्रा। मूत्रवेगः। गुर्व्वन्नम्। मैथुनम्। गुडः। आयासः। अम्लम्। तक्रम्॥ * ॥

अथ शूकदोषे पथ्यम्।

लेपः। विरेकः। अस्रङ्मोक्षः। सर्पिःपानम्। शालिः। यवः। जाङ्गलमांसम्। मुद्गयूषः। कठिल्लकम्। पटोलम्। शिग्रु। कर्कोटम्। पत्तूरम्। बालमूलकम्। वेत्राग्रम्। आषाढ़फलम्। दाड़िमम्। सैन्धवम्। वचा। कूपोदकम्। गन्धसारः। कस्तूरी। हिमवालुका। तक्रम्। कषायम्। तैलम्॥ * ॥

शूकदोषे अपथ्यम्।

मूत्रवेगः। दिवानिद्रा। व्यायामः। मैथुनम्। गुडः। विदाहि। गुरुद्रव्यम्। तक्रम्॥ * ॥

अथ कुष्ठरोगे पथ्यम्।

पक्षात् पक्षात् छर्द्दनम्। मासात् मासाद्विरेचनम्। त्र्यहात् त्र्यहात् नस्यम्। षष्ठे षष्ठे मासि असृङ्मोक्षणम्। सर्पिर्लेपः। पुराणाः यवगोधूमशालिमुद्गाढकीमसूराः। माक्षिकम्। जाङ्गलामिषम्। आषाढ़फलम्। वेत्राग्रम्। पटोलम्। बृहतीफलम्। काकमाची। निम्बपत्रम्। लशुनम्। हिलमोचिका। पुनर्नवा। मेषशृङ्गम्। चक्रमर्द्ददलम्। भल्लातकम्। पक्वतालम्। खदिरः। चित्रकः। वरा। जातीफलम्। नागपुष्पम्। कुङ्कुमम्। प्रसन्नच्छविः। कोषातकी। करञ्जोमातिलसर्षपनिम्बकुटजीभवतैलम्। लघूनि अन्नानि। सरलदेवदारुशिंशपागुरुसम्भवस्नेहः। गोखरोष्ट्राश्वमहिषीणां मूत्राणि। कस्तूरिका। गन्धसारः। तिक्तानि। क्षारकर्म्म॥ * ॥

कुष्ठरोगे अपथ्यम्।

पापकर्म्म। कृतघ्नभावः। गुरुनिन्दा। गुरुधर्षणम्। विरुद्धपानाशनम्। दिवानिद्रा। चण्डांशुतापः। विषमाशनम्। स्वेदः। रतम्। वेगरोधः। इक्षुः। व्यायामः। अम्लम्। तिलः। माषः। द्रवगुरुनवान्नानां भोजनम्। विदाहि। विष्टम्भि। मूलकम्। सह्याद्रिविन्ध्याद्रिसमुद्भवनदीजलम्। आनूपमांसम्। दधि। दुग्धम्। मद्यम्। गुड़ः॥ * ॥

अथ शीतपित्तोदर्द्दकोठरोगेषु पथ्यम्।

छर्द्दिः। विरेचनम्। लेपः। अस्रङ्मोक्षः। पुराणशालिः। जाङ्गलामिषमुद्गकुलत्थानां यूषः। कर्कोटकम्। कारवेल्लम्। शिग्रु। मूलकपोतिका। शालिञ्चशाकम्। वेत्राग्रम्। दाड़िमम्। त्रिफला। मधु। कटुतैलम्। तप्तनीरम्। पित्तश्लेष्महरद्रव्यम्। सर्व्वकटुतिक्तकषायाणि॥ * ॥

शीतपित्तादावपथ्यम्।

विविधक्षीरेक्षुविकाराः। मत्स्याः। उदकानूपभवामिषम्। नवीनमद्यम्। वमिवेगरोधः। प्राग्दक्षिणाशापवनः। अह्नि निद्रा। स्नानम्। विरुद्धाशनम्। आतपः। स्निग्धम्। अम्लम्। मधुरम्। कषायः। गुर्व्वन्नपानानि॥ * ॥

अथाम्लपित्ते पथ्यम्।

ऊर्द्धगे पूर्व्वं वमनम्। अधोगे पूर्व्वं विरेचनम्। पश्चाल्लङ्घनम्। निरूहः। शालिः। यवः। गोधूमः। मुद्गः। जाङ्गलजरसः। तप्तशीतजलानि। शर्करा। मधु। शक्तुः। कर्कोटकम्। कारवल्लम्। पटोलम्। हिलमोचिका। वेत्राग्रम्। वृद्धकुष्माण्डम्। रम्भापुष्पम्। वास्तूकम्। कपित्थम्। दाड़िमम्। धात्री। तिक्तानि। कफपित्तहरपानान्नम्॥ * ॥

अम्लपित्ते अपथ्यम्।

नवान्नम्। विरुद्धद्रव्यम्। पित्तकोपकरद्रव्यम्। वेगरोधः। तिलः। माषः। कुलत्थः। तैलभक्षणम्। अविदुग्धम्। धान्याम्लम्। लवणम्। अम्लम्। कटु। गुर्व्वन्नम्। दधि। मत्स्याः॥ * ॥

अथ विसर्पे पथ्यम्।

विरेकः। वमनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पुराणा यवगोधूमकङ्गुषष्टिकशालयः। मुद्गः। मसूरः। चणकः। तुवरी। जाङ्गलजरसः। नवनीतम्। घृतम्। द्राक्षा। दाड़िमम्। कारवेल्लकम्। वेत्राग्रम्। कुलकम्। धात्री। खदिरः। नागकेशरम्। लाक्षा। शिरीषः। कर्पूरम्। चन्दनम्। तिललेपनम्। ह्रीवेरकम्। मुस्तकम्। सकलानि तिक्तानि॥

विसर्पे अपथ्यम्।

व्यायामः। अह्नि शयनम्। सुरतम्। प्रवातः। क्रोधः। शोकः। वमनम्। वेगः। अञ्जनम्। शाकम्। विरुद्धाशनम्। दधि। कूर्च्चिका। सौवीरकादि। अनेकविधकिलाटः। गुर्व्वन्नपानम्। लशुनम्। कुलत्थः। माषः। तिलः। सकलमजाङ्गलमांसम्। स्वेदः। विदाहि। लवणम्। अम्लम्। कटु। मद्यम्। अर्कप्रभा॥ * ॥

अथ विस्फोटे पथ्यम्।

विरेचनम्। छर्द्दनम्। लेपः। लङ्घनम्। पुरातनषष्टिकशालयः। यवः। मुद्गः। मसूरः। चणकः। मुकुष्ठकः। धन्वामिषम्। गव्यघृतम्। कठिल्लकम्। वेत्राग्रम्। आषाढ़फलम्। पटोलम्। ज्योतिष्मती। निम्बदलम्। चन्दनम्। तैलम्। सिताभ्रः। तिललेपः। लङ्घनम्। बालम्॥ * ॥

विस्फोटे अपथ्यम्।

स्वेदः। व्यवायः। व्यायामः। क्रोधः। गुर्व्वन्नम्। आतपः। वमिवेगः। पत्रशाकम्। प्रवातः। दिवास्वप्नः। ग्राम्योदकम्। आनूपमांसम्। विरुद्धान्यन्नपानानि। तिलः। माषः। कुलत्थः। लवणाम्लकटूनि। विदाहि। रूक्षम्। उष्णम्॥ * ॥

अथ मसूर्य्यां पथ्यम्।

पूर्व्वं लङ्घनवान्तिरेचनशिरावेधाः। शस्ताश्चोज्ज्वलजीर्णषष्टिकशालयः। चणकः। मुद्गः। मसूरः। यवः। कपोतचटकदात्यूहक्रौञ्चजीवञ्जीवशुकादयः पक्षिणः। मद्गुरः। काठिल्लम्। आषाढ़कम्। कर्कोटम्। कदलम्। शिग्रु। रुचकम्। द्राक्षा। दाड़िमम्। मेध्यबृंहणान्नपानम्। कौलम्। माषरसः। अन्त्योः स्वेदविधौ गवेधुमधुकोड्डतप्तशीतोदकम्। शाल्बकोदरकोषनीरम्। कर्पूरचूर्णम्। पक्वे मुद्गरसः। जाङ्गलरसः। शालिञ्चशाकम्। घृतम्। निर्गुण्डीजलम्। यथाधूपविहितो धूपः। शुष्कगोमयभस्मगुण्ठनम्। शुष्के शिलापिष्टयोः पिचुमर्द्दपत्रनिशयोरालेपः। शेषे व्रणोक्तक्रिया॥ * ॥

मदात्ययेऽपथ्यम् ।

रतम् । स्वेदः । श्रमः । तैलम् । गुर्व्वन्नम् । क्रोधः । आतपः । दुष्टाम्बु । दुष्टपवनः । विरुद्धाशनम् । निष्पावः । आनूपशाकम् । लवणम् । विषमाशनम् । कटु । अम्लम् । वेगरोधः ॥ * ॥

अथ क्षुद्ररोगे पथ्यापथ्यम् । यथा,—

क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु ।
दोषान् दूष्यानवस्थाञ्च निरीक्ष्य मतिमान् भिषक् ।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः ।
यथादोषं यथादूष्यं यथाहञ्च कल्पयेत् ॥ * ॥

अथ मुखरोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । गण्डूषः । प्रतिसारणम् । कवलः । अस्त्रकस्रुतिः । नस्यम् । धूमः । शस्त्राग्निकर्म्मणी । तृणधान्यम् । यवः । मुद्गः । कुलत्थः । जाङ्गलरसः । तप्तशोष्ठी । कारवेल्लम् । पटोलम् । बालमूलकम् । कर्पूरनीरम् । ताम्बूलम् । तप्ताम्बु । खदिरः । घृतम् । कटु । तिक्तम् ॥ * ॥

मुखरोगे अपथ्यम् ।

दन्तकाष्ठम् । स्नानम् ॥ अम्लम् । मत्स्यः । आनूपामिषम् । दधि । क्षीरम् । गुड़ः । माषम् । रूक्षान्नम् । कठिनाशनम् । अधोमुखशयनम् । गुरु । अभिष्यन्दकारि । दिवानिद्रा ॥ * ॥

अथ कर्णरोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । नस्यम् । धूमः । सिराव्यधः । गोधूमः । शालिः । मुद्गः । यवः । घृतहविः । लावः । मयूरः । हरिणः । तित्तिरिः । वनकुक्कुटः । पटोलम् । शिग्रु । वार्त्ताकुः । सुनिषण्णम् । कठिल्लकम् । रसायनद्रव्यम् । ब्रह्मचर्य्यम् । अभाषणम् ॥ * ॥

कर्णरोगे अपथ्यम् ।

विरुद्धान्नपानम् । वेगरोधः । प्रजल्पनम् । दन्तकाष्ठम् । शिरःस्नानम् । व्यवायः । श्लेष्मलम् । गुरु । कण्डूयनम् । तुषारः ॥ * ॥

अथ नासारोगे पथ्यम् ।

निर्व्वातनिलयस्थितिः । प्रगाढ़ोष्णीषधारणम् । गण्डूषः । लङ्घनम् । नस्यम् । धूमः । छर्द्दिः । सिराव्यधः । कटुचूर्णं नासारन्ध्रे निःक्षिप्य क्षिः प्रवेशनम् । स्वेदः । स्नेहः । शिरोऽभ्यङ्गः । पुराणा यवशालयः । कुलत्थमुद्गयोर्यूषः । ग्राम्यजाङ्गलजा रसाः । वार्त्ताकुः । कुलकम् । शिग्रु । कर्कोटः । बालमूलकम् । लशुनम् । दधि । तप्ताम्बु । वारुणी । कटुत्रयम् । कटु । अम्लम् । लवणम् । स्निग्धम् । उष्णम् । लघुभोजनम् ॥ * ॥

नासारोगे अपथ्यम् ।

विरुद्धान्नम् । दिवास्वप्नः । अभिष्यन्दि । गुरूणि । स्नानम् । क्रोधः । शकृन्मूत्रवाष्पाणां वेगधारणम् । शोकः । द्रवम् । भूशय्या ॥ * ॥

अथ नेत्ररोगे पथ्यम् ।

आश्च्योतनम् । लङ्घनम् । अञ्जनम् । स्वेदः । विरेकः । प्रतिसारणम् । प्रपूरणम् । नस्यम् । असृङ्मोक्षः । शस्त्रक्रिया । लेपनम् । आज्यपानम् । सेकः । मनोनिर्वृतिः । अङ्घ्रिपूजा । मुद्गः । यवः । लोहितशालिः । लावः । मयूरः । वनकुक्कुटः । कूर्म्मः । कुलिङ्गः । कपिञ्जलः । कौर्म्मं हविः । वन्यकुलत्थयूषः । पेया । विलेपी । लशुनम् । पटोलम् । वार्त्ताकुः । कर्कोटकः । कारवेल्लम् । नवीनमोचम् । नवमूलकम् । पुनर्नवा । मार्कवः । काकमाची । पत्तूरशाकम् । कुमारिका । द्राक्षा । कुस्तुम्बुरु । माक्षिकमन्थम् । लोध्रम् । वरा । क्षौद्रम् । उपानहौ । नारीपयः । चन्दनम् । इन्दुखण्डम् । तिक्तम् । लघु ॥

नेत्ररोगे अपथ्यम् ।

क्रोधः । शोकः । मैथुनम् । अश्रुवायुविण्मूत्रनिद्रावमीनां वेगरोधः । सूक्ष्मेक्षणम् । दन्तविघर्षणम् । स्नानम् । निशाभोजनम् । आतपः । प्रजल्पनम् । छर्द्दनम् । अम्बुपानम् । मधूकपुष्पम् । दधि । पत्रशाकम् । कठिल्लम् । पिण्याकः । विरूढ़कम् । मत्स्यः । सुरा । अजाङ्गलमांसम् । ताम्बूलम् । अम्लम् । लवणम् । विदाहि । तीक्ष्णम् । कटु । उष्णम् । गुर्व्वन्नपानम् ॥ * ॥

अथ शिरोरोगे पथ्यम् ।

स्वेदः । नस्यम् । धूमपानम् । विरेकः । लेपः । छर्द्दिः । लङ्घनम् । शीर्षवस्तिः । रक्तमुक्तिः । वह्निकर्म्म । उपनाहः । जीर्णसर्पिः । शालिः । षष्टिकः । यूषः । दुग्धम् । धन्वमांसम् । पटोलम् । शिग्रु । द्राक्षा । वास्तूकम् । कारवेल्लम । आम्रम् । धात्री । दाड़िमम् । मातुलुङ्गम् । तैलम् । तक्रम् । काञ्जिकम् । नारिकेलम् । पथ्या । कुष्ठम् । भृङ्गराजः । कुमारी । मुस्तः । उशीरम् । चन्द्रिका । गन्धसारः । कर्पूरम् ॥ * ॥

शिरोरोगे अपथ्यम् ।

क्षवजृम्भमूत्रवाष्पनिद्राविष्ठानां वेगधारणम् । अञ्जनम् । दुष्टनीरम् । विरुद्धान्नम् । सह्यविन्ध्यसरिज्जलम् । दन्तकाष्ठम् । दिवानिद्रा ॥ * ॥

अथ स्त्रीरोगे पथ्यापथ्यम् ।

यत्पथ्यं यदपथ्यञ्च रक्तपित्तेषु कीर्त्तितम् ।
प्रदरेषु यथादोषं तत्तन्नारी भजेत्त्यजेत् ॥
वातव्याधिमतां पथ्यमपथ्यञ्च यदीरितम् ।
योनिव्यापत्सु सर्व्वासु तद्विद्याञ्च यथामलम् ॥ * ॥

अथ गर्भिणीपथ्यम् ।

शालिः । षष्टिकः । मुद्गः । गोधूमः । लाजशक्तुः । नवनीतम् । घृतम् । क्षीरम् । रसाला । मधु । शर्करा । पनसम् । कदलम् । धात्री । द्राक्षा । अम्लम् । स्वादु । शीतलम् । कस्तूरी । चन्दनम् । माला । कर्पूरम् । अनुलेपनम् । चन्द्रिका । स्नानम् । अभ्यङ्गः । मृदुशय्या । हिमानिलः । सन्तर्पणम् । प्रियवाक् । मनोरमविहारः । प्रियङ्कराम्नपानम् ॥ * ॥

गर्भिण्या अपथ्यम् ।

स्वेदनम् । वमनम् । क्षारः । कलहः । विषमाशनम् । असात्म्यम् । नक्तसञ्चारः । चौर्य्यम् । अप्रियदर्शनम् । अतिव्यवायः । आयासः । भारः । गुरुप्रावरणम् । अकालजागरणं स्वप्नञ्च । कठिनोत्कटकासनम् । शोकः । क्रोधः । भयम् । उद्वेगः । श्रद्धा । वेगविधारणम् । उपवासः । अध्वगमनम् । तीक्ष्णोष्णगुरुविष्टम्भिभोजनम् । रक्तम् । निरशनम् । श्वभ्रकूपेक्षणम् । मद्यम् । आमिषम् । उत्तानशयनम् । स्त्रीणामनीप्सितम् ॥ * ॥

अष्टममासमारभ्य गर्भिण्या अपथ्यं यथा,—

तथा रक्तस्रुतिं शुद्धिं वस्तिमायासतोऽष्टमात् ।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा ॥
भजेन्न नित्यं तिक्ताम्लकटूष्णकषायकान् ।
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः ॥
पित्तलैः खलती पिङ्गः श्वित्री पङ्गः कफात्मभिः ।
अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः ॥ * ॥

अथ प्रसूतायाः पथ्यम् ।

लङ्घनम् । मृदुस्वेदः । गर्भकोष्ठविशोधनम् । अभ्यञ्जनम् । तैलपानम् । कटुतिक्तोष्णसेवनम् । दीपनम् । पाचनम् । मद्यम् । पुराणषष्टिशालयः । कुलत्थः । लशुनम् । शिग्रु । वार्त्ताकुः । बालमूलकम् । पटोलम् । मातुलुङ्गम् । ताम्बूलम् । दाड़िमद्वयम् । श्लेष्मानिलघ्नानि । सप्ताहात् परं किञ्चित् वृंहणम् । द्वादशाहात् परं आमिषम् । सार्द्धमासात् परं आहारादियन्त्रणात्यागः ॥ * ॥

प्रसूताया अपथ्यम् ।

श्रमः । नस्यम् । रक्तमुक्तिः । मैथुनम् । विषमाशनम् । विरुद्धान्नम् । वेगरोधः । असात्म्यम् । अतिभोजनम् । दिवानिद्रा । अभिष्यन्दि । विष्टम्भि गुरुभोजनम् ॥
सूतिकाख्येषु रोगेषु वातश्लेष्मोचितानि च ।
तत्तद्रोगानुकूल्येन पथ्यापथ्यानि निर्द्दिशेत् ॥ * ॥

अथ बालरोगे पथ्यापथ्यम् ।

नृणां ज्वरादिषु यत् पथ्यापथ्यं बालानामौचित्यात् तद्विधेयम् । मन्दाग्नौ यत् पथ्यापथ्यं बालानां पारिगर्भिके तद्विधेयम् । आगन्तुकोन्मादिनां यत् पथ्यापथ्यं बालानां ग्रहरोगिणां तद्योज्यम् ॥ * ॥

अथ विषरोगे पथ्यम् ।

अरिष्टाबन्धनम् । मन्त्रक्रिया । छर्द्दिः । विरेचनम् । रूषणम् । शोणिताकृष्टिः । परिषेकः । अवगाहनम् । हृदयावरणम् । नस्यम् । अञ्जनम् । प्रतिसारणम् । उत्कर्त्तनम् । प्रधमनम् । प्रलेपः । वह्निकर्म्म । उपधानम् । प्रतिविषम् ॥ धूपः । संज्ञाप्रबोधनम् । शालिः । षष्टिकः । कोरदूषः । प्रियङ्गुः । मुद्गः । हरेणुः । तैलम् । सर्पिः । शिखितित्तिरिलावैणगोधाखुश्वाविदामिषम् । वार्त्ताकुः । कुलकम् । धात्री । निष्पावः । तण्डुलीयः । मण्डूकपर्णी । जीवन्ती । सुनिषण्णम् ।

उपोदिका। कालशाकम्। लशुनम्। दाडिमम्। विकङ्कतम्। प्राचीनामलकम्। पथ्या। कपित्थम्। नागकेशरम्। गोच्छागखरक्षीराणि। तक्रम्। शीताम्बु। शर्करा। अविदाहीन्यन्नानि। सैन्धवम्। मधु। कुङ्कुमम्। पश्चिमोत्तरवातः। हरिद्रा। सितचन्दनम्। मस्तम्। शिरीषः। कस्तूरी। तिक्तानि। मधुराणि। हेमचूर्णम्॥ * ॥

विषरोगे अपथ्यम्।

क्रोधः। विरुद्धाशनम्। अध्यशनम्। व्यवायः। ताम्बूलम्। आयासः। प्रवातः। सर्व्वाम्लम्। सर्व्वलवणम्। नानाविधसंस्वेदनम्। निद्रा। भयम्। धर्मविधिः। क्षुधा॥ * ॥

अथ रोगसङ्करे पथ्यम्।

एषां गदानां यदि सङ्करः स्या-
त्तत्र प्रयत्नेन भिषङ्मनीषी।
उक्तेषु पथ्येषु विरोधि यद्य-
त्ततत् प्रयुञ्जीत चिकित्सितेषु ॥*॥

रोगसङ्करे अपथ्यम्।

अपथ्यानि च सर्व्वाणि तत्तद्रोगोचितानि च। रुग्बलाबलविद्वैद्यो वर्ज्जयेद्व्याधिसङ्करे॥ * ॥

अथ वातिकरोगे पथ्यम्।

अभ्यङ्गः। परिमर्द्दनम्। शमनम्। संशोधनम्। बृंहणम्। स्नेहः। स्वेदनम्। आसना। शयनम्। संवाहनम्। वस्तिः। नस्यम्। प्रावरणम्। समीरणपरित्यागः। अवगाहः। शिरोवस्तिः। विमर्दनम्। दिवाकरकरः। स्नानम्। विस्नापनम्। तैलद्रोणी। सरसता। गाढोपनाहः। सुरा। भूशय्या। सुखशीलता। स्वाद्वम्ला रसाः। मज्जा। तैलम्। वसा। घृतम्। नवमाषः। कुलत्थः। तिलः। गोधूमः। मुद्गः। कलमः। शालिः। षष्टिकः। पेया। धान्यजलम्। पयः। क्षीरः। मस्तुः। सुखोष्णोदकम्। गोमूत्रम्। नलदाम्बु। दधि। पयःपेटी। यवः। कूर्च्चिका। आनूपाः रुरुखड्गिकोलमहिषाः। ग्राम्याः। धन्वोद्भवाः सर्पिष्टककवाकुतित्तिरिकुलिङ्गाः। कुम्भीरः। तिमिङ्गिलः। मकरः। गण्डूपदः। कच्छपः। रोहितमत्स्यः। वर्म्मिः। मद्गुरः। सिलिन्धः। गरङ्गः। शृङ्गी। इल्लिशः। प्रोष्ठी। गर्गरः। पर्व्वतः। अन्ये जलजन्तवः। वार्त्ताकुः। कुलकम्। शिग्रु। लशुनम्। द्राक्षा। आम्रम्। आम्रातकम्। धात्री। दाडिमम्। अम्लवेतसफलम्। कोलम्। कपित्थम्। शिवा। पक्वतालम्। बकुलम्। गोकण्टकः। वास्तुकम्। मुस्राणी। नागिका। सरसा। मन्दारपत्रम्। ताम्बूलम्। सितशर्करा। लवणः। लोध्रः। तुरुष्कः। अगुरु। श्रीवासः। सुरदारु। गुग्गुलुः। ग्रन्थिकः। कुङ्कुमम्। स्निग्धोष्णविधिः। सवर्णितं हेम रजतं सीसकञ्च। जात्युत्पाटलमल्लिकापुष्पाणां विशाला माला॥ * ॥

पथ्याप

वातिकरोगे अपथ्यम्।

चिन्ता। जागरणम्। असृङ्मोक्षः। वमिः। लङ्घनम्। व्यायामः। गजवाजिवाहनविधिः। सन्धारणम्। मैथुनम्। आघातः। अपतर्पणम्। प्रपतनम्। धातुक्षयः। क्षोभणम्। शोकः। चंक्रमणम्। विरुद्धाशनम्। सम्यक्भुक्तक्रमः। वृद्धत्वम्। जलदागमः। रजनीशेषः। अपराह्णः। भयम्। रूक्षाद्यल्पकषायतिक्तकटुकक्षारातिशीतानामशनम्। तृणधान्यम्। उद्दिका। आढकी। कङ्गुः। उद्दालः। मुकुष्टकः। कोद्रवः। यवः। श्यामाकः। जूर्णाह्वयः। शिम्बी। जम्बु। राजमाषः। चणकः। मुद्गः। कुलत्थः। बिसम्। शालूकम्। क्रमुकम्। कशेरु। तलकम्। कठिल्लकम्। तिन्दुकम्। कर्कोटम्। नवतालशस्यम्। तालास्थिमज्जा। नदीतडागजलम्। करका। निष्पावबीजम्। पिण्याकः। शिशिराम्बु। रासभपयः। पत्रशाकम्। त्रिवृत्। भूनिम्बम्। कटुका। करीरम्। अखिलशुष्कामिषम्। माक्षिकम्। धूमः। बहुमरुत्। रजः। परिभवः। खट्वा॥ * ॥

अथ पैत्तिके पथ्यम्।

सर्पिःपानविधिः। विरेचनम्। असृङ्मोक्षः। सितशालिः। गोधूमः। आढकिः। धान्यकम्। चणकः। मुद्गः। मसूरः। यवः। पर्युषितमण्डः। पयः। पयःपेटी। वरा। माक्षिकम्। लाजाः। धन्वरसः। घृतानि। सिता। शीतोदकम्। उद्भिदः। कर्कोटम्। कदलम्। कण्टकिफलम्। वेत्राग्रम्। आषाढकम्। मृद्वीका। कोमलकुलकम्। कुष्माण्डम्। इर्व्वारुः। तुम्बी। पर्पटकः। अल्पमारिषदलम्। कठिल्लकम्। दाडिमम्। धात्री। कोमलतालशस्यम्। अभया। खर्जूरम्। औडुम्बरम्। बिम्बम्। कषायः। तिक्तः। मधुरः। मधूकम्। वरी। कांस्यम्। अयः। रजतम्। हेम। कटुका। निम्बः। त्रिवृत्। चन्दनम्। हर्म्म्यम्। भूमिगृहम्। सुशीतलवनम्। धारागृहम्। चन्द्रिका। रम्भाम्भोरुहनवपत्रशयनम्। शीताः प्रदेहाः। भूशय्या। मणिः। प्रदोषसमयः। गीतम्। प्रियालिङ्गनम्। स्नानम्। मित्रसमागमः। प्रियकथा। मन्दानिलः। अभ्युक्षणम्। वादित्रश्रवणम्। मनोरमतरभावाः। सुतास्येक्षणम्। पुन्नागोत्पलपाटलाकुसुमकह्लारपुष्पाणि। कर्पूरम्। प्रनीरनीरम्। शीतक्रिया॥ * ॥

पैत्तिके अपथ्यम्।

धूमः। स्वेदनम्। आतपः। निधुवनम्। सन्धारणम्। क्रोधः। क्षारः। अध्वा। गजवाजिवाहनविधिः। तीक्ष्णकर्म्म। व्यायामः। अन्नविदाहकारिसमयः। ग्रीष्मः। विरुद्धाशनम्। मध्याह्नः। जलदात्ययः। रजनीमध्यम्। मध्यवयः। व्रीहिः। वेणुफलम्। तिलः। लशुनम्। माषः। कुलत्थः। गुडः। निष्पावः। मदिरा। अतसी। प्रद्यीजलम्। धान्याम्लम्। उष्णोदकम्।

पथ्याप

जम्बीरम्। नलदाम्बु। हिङ्गु। लकुचम्। मूलम्। भल्लातकम्। ताम्बूलम्। दधि। सर्षपः। बदरम्। तैलाशनम्। तिन्तिडी। कटु। अम्लम्। लवणम्। विदाहि॥ * ॥

अथ श्लैष्मिके पथ्यम्।

छर्दिः। लङ्घनम्। अञ्जनम्। निधुवनम्। प्रोद्वर्त्तनम्। स्वेदनम्। चिन्ता। जागरणम्। श्रमः। अतिगमनम्। दृढ् वेगधारणम्। गण्डूषः। प्रतिसारणम्। प्रधमनम्। हस्त्यश्वयानम्। धूमः। प्रावरणम्। नियुद्धम्। अतिसंक्षोभः। नस्यम्। भयम्। रूक्षोष्णविधिः। पुरातनशालिः। षष्टिका। निष्पावः। तृणधान्यम्। चणकः। मुद्गः। कुलत्थरसः। क्षारः। सर्षपतैलम्। उष्णजलम्। धन्वामिषम्। राजिका। वेत्राग्रम्। कुलकम्। कठिल्लकम्। वार्त्ताकुः। औडुम्बरम्। कर्कोटम्। लशुनम्। मोचकुसुमम्। शक्राशनम्। सूरणः। निम्बम्। मूलकपोतिका। वरुणः। तिक्ता। त्रिवृत्। माक्षिकम्। ताम्बूलम्। नलदाम्बु। जीर्णमदिरा। क्षौमम्। वरा। गोजलम्। लाजाः। सुभृष्टतण्डुलभवम्। तिक्तम्। सुखोष्णालयः। कांस्यम्। अयः। अञ्जनम्। मौक्तिकम्। कटुः। कषायरसः॥ * ॥

श्लैष्मिके अपथ्यम्।

स्नेहः। अभ्यञ्जनम्। आसनम्। अह्नि शयनम्। स्नानम्। विरुद्धाशनम्। पूर्व्वाह्णः। शिशिरः। वसन्तसमयः। रात्र्यादिः। आद्यवयः। भुक्तमात्रसमयः। अन्नपानकरणम्। माषः। नवतण्डुलः। मत्स्यः। मांसम्। इक्षुविकृतिः। दुग्धविकृतिः। तालास्थिमज्जा। द्रवः। पेया। भयम्। उपोदिका। पनसम्। छत्राकम्। आषाढकम्। खर्ज्जूरम्। अनुलेपनम्। पयःपेटी। पयः। पायसः। स्वादु। अम्लम्। लवणम्। गुरूणि। तुहिनम्। सन्तर्पणम्॥ * ॥

अथ वसन्तर्त्तौ पथ्यम्।

वमनम्। व्यवायः। व्यायामः। भेदः। भ्रमणम्। अग्निसेवा। कटुः। तिक्तः। विदाहि। तीक्ष्णम्। कषायः। मर्व्वोदनम्॥ * ॥

वसन्तर्त्तावपथ्यम्।

दिवानिद्रा। सन्तर्पणम्। आलस्यम्। सुधांशुसेवा। पिण्डालुकम्। स्वादु। गुरूदकान्नम्। पिष्टम्। दधि। क्षीरम्। घृतम्॥ * ॥

अथ ग्रीष्मर्त्तौ पथ्यम्।

चन्दनम्। शीतवातः। छाया। अम्बु। कचाशयनम्। प्रस्तनम्। सद्यःपयोभावितशीतभक्तम्। विशिष्टद्रव्यम्। प्रियभोजनम्॥ * ॥

ग्रीष्मर्त्तावपथ्यम्।

कटु। तिक्तम्। उष्णम्। क्षारम्। अम्लम्। रौद्रम्। भ्रमणम्। अग्निसेवा। उन्निद्रता। भास्करतप्ततोयस्नानम्। अतिपानम्। दधि। तक्रम्। तैलम्॥ * ॥

अथ वर्षासु पथ्यम् ।

लवणम् । अम्लम् । मिष्टम् । क्षारम् । प्रियम् । स्निग्धम् । गुरु । उष्णम् । बल्यम् । अभ्यङ्गः । उद्वर्त्तनम् । अग्निसेवा । तप्ताम्बुपानम् । दधि ॥

वर्षास्वपथ्यम् ।

पूर्व्वपवनः । वृष्टिः । घर्म्मः । हिमः । श्रमः । नदीनीरम् । दिवास्वप्नः । रूक्षम् । नित्यमैथुनम् ॥ * ॥

शरदि पथ्यम् ।

शीतरसाम्बुपानम् । तरुच्छाया । चन्दनम् । इन्दुसेवा । सिता । मुद्गः । मधुरम् । गव्यदुग्धम् । इक्षुः । शाल्योदनम् ॥ * ॥

शरद्यपथ्यम् ।

लवणम् । अम्लम् । तीक्ष्णम् । कटु । पिष्टम् । अतसी । विदाहि । सुरा । नालम् । दधि । तक्रम् । तैलम् । क्रोधः । उपवासः । आतपः । मैथुनम् ॥ * ॥

अथ हिमर्त्तौ पथ्यम् ।

तप्तजलम् । उपवाहः । पयः । अन्नम् । पानम् । घृतम् । स्त्रीसेवा । वह्निसेवा । गुरूणि । यथेष्टभुक्तम् ॥ * ॥

हिमर्त्तावपथ्यम् ।

दिवानिद्रा । कुभोजनम् । अभोजनम् । लङ्घनम् । पुरातनान्नम् । लघुपाकि । शैत्यम् । वार्य्योदनम् । शीतजलावगाहः ॥ * ॥

शिशिरे पथ्यम् ।

स्त्री । वह्निसेवा । मत्स्यः । अजमांसम् । दधि । दुग्धम् । सर्पिः ॥ * ॥

शिशिरेऽपथ्यम् ।

तीक्ष्णोष्णकट्वम्लकषायतिक्तानि । सामुद्रकम् । आर्द्रभोजनम् । दिवानिद्रा । चन्दनम् । चन्द्रसेवा । शीतजलस्नानादि ॥ * ॥

माघे विशेषो यथा ।

माघे च शीतद्रवमिश्रपिष्ट

कन्दः कटल्ला गुरुशालिभक्तम् ।

इति षड्तुपथ्यापथ्याधिकारः ॥ * ॥

आगन्तुकज्वराणां पथ्यापथ्यं ज्वराधिकारे न लिखितमतोऽत्र लिख्यते ।

"अभिघातसमुत्थाने पानाभ्यङ्गौ च सर्पिषः ।
चन्दनं व्रणजे चापि वातघ्नमांसपिकिन्तसितम् ॥
ओषधीगन्धविषजे विषपित्तप्रसाधनम् ।
अभिचाराभिशापोत्थे जपहोमादिभेषजम् ॥
उत्पातग्रहपीडोत्थे दानस्वस्त्ययनादयः ।
क्रोधोत्थिते पित्तहरं कामजं कामजित्क्रिया ॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया ।
आश्वासनेष्टलाभो हर्षदायीनि यानि च ॥
विशेषतः पुनश्चात्र कामक्रोधसमुत्थिते ।
भयशोकसमुद्भूते कामक्रोधोक्तमौषधम् ॥
भूताभिषङ्गजे भूतबन्धावेशनताडनम् ।
मनःक्षोभसमुत्पन्ने मनसः सान्त्वनानि च ॥
इत्यागन्तुज्वरे पूर्व्वैर्भिषग्भिः पथ्यमिष्यते ।
विशेषोऽत्र मरालस्य पाठनं श्रवणं श्रुतेः ॥

देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम् ।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः ॥
साधूनां दर्शनं सत्यं रक्षौषधिविधारणम् ।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत् ॥"

आगन्तुकज्वरे अपथ्यम् ।

"अधिवासनकर्म्माणि रक्तसक्चन्दनधारणम् ।
वमिवेगं दन्तकाष्ठमसात्म्यमपि भोजनम् ॥
विरुद्धान्यन्नपानानि विदाहीनि गुरूणि च ।
दुष्टाम्बुक्षारमत्स्यानि मञ्जकं विरूढकम् ॥
नलदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम् ।
आर्द्रीमतस्यश्च पिण्याकं क्वाथं पिष्टविलेपनम् ॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्जयेत्
इति पथ्यापथ्यविनिश्चयः समाप्तः ॥

पद, स्थैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अकं-सेट् ।) पदति । इति दुर्गादासः ॥

पद, न क ङ गतौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा-आत्म-सकं-सेट् ।) क ङ, पदयते । इति दुर्गादासः ॥

पद, य ङ औ गत्याम् । इति कविकल्पद्रुमः ॥ (दिवा-आत्म-सकं-अनिट् ।) य ङ, पद्यते । औ, पत्ता । इति दुर्गादासः ॥

पदं, क्ली, (पद + 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।' ३ । १ । १३४ । इति अच् ।) व्यवसायः । त्राणम् । स्थानम् । (यथा, मनुः । १२ । १२५ ।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥")
चिह्नम् । पादः । वस्तु । इत्यमरः । ३ । ३ । ६३ ॥ शब्दः । वाक्यम् । प्रदेशः । पादचिह्नम् । श्लोकपादः । (यथा, रामायणे । १ । २ । १८ ।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥")
किरणे पुं । इति मेदिनी ॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।"
इति साहित्यदर्पणे । २ । ४ ॥

श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णे राजते वापि पाषाणनिर्म्मितमपि ।
पादयोरङ्कितं कृत्वा पूजाञ्चैव समाचरेत् ॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्त्यजः ।
तत्र नम्रजनस्योग्रसंसारच्छेदनाय सः ॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः ।
ध्यातृचित्तद्विरेफाणां लोभमायाति शोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारणम् ।
भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्व्वणि ।
तथा वामाङ्गुष्ठमूले पाञ्चजन्यस्य लक्षणम् ।
सर्व्वविद्याप्रकाशाय धत्ते च भगवानजः ॥"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥

पदकः, पुं, पदं वेत्ति यः ("क्रमादिभ्यो वुन् ।" ४ । २ । ६१ । इति वुन् ।) पदज्ञाता । इति व्याकरणम् ॥ (यथा, राजतरङ्गिण्याम् । ५ । ४६ ।
"रामनाम्नमुपाध्यायं व्यातव्याकरणश्रमम् ।
व्याख्यातपदकश्चक्रे स तस्मिन् सुरमन्दिरे ॥")
स्वनामख्यातकण्ठभूषणञ्च । देवपदचिह्नादियुक्तत्वात् ॥ (पदमेव इति स्वार्थे के कृते, क्ली । पदम् । यथा, महाभारते अनुशासनपर्व्वणि ।
"इतःप्रभृति यातव्यं पदकं पदकं शनैः ॥")

पदगः, पुं, (पदाभ्यां गच्छतीति । गम लृगतौ + "अन्येभ्योऽपि ।" इति डः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥ पद्भ्यां गमनकर्त्तरि त्रि ॥

पदन्यासः, पु, (पदस्य गोपदस्येव न्यासो यत्र ।) गोक्षुरः । इति शब्दचन्द्रिका ॥ पदस्य विन्यासः । यथा, रसमञ्जरी ।
"पदन्यासो गेहाद्बहिरहिफणारोहणसमः
स्वगेहादन्यत् स्याद्भुवनमपरद्वीपतुलितम् ।
वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥"
(तन्त्रोक्तान्नपूर्णामन्त्रस्यपदानां तत्तदङ्गेषु न्यासः । यदुक्तं तन्त्रसारज्ञानार्णवे ।
"एकमेकं पुनश्चैकं पुनरेकं द्वयन्ततः ।
चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्व्वति ! ॥
पदान्येतानि देवेशि ! नवद्वारेषु विन्यसेत् ।
मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने ! ॥
गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत् ॥")

पदभञ्जनं, क्ली, (विभक्तियुक्तानां पदानां भञ्जनं विश्लेषो यत्र । यद्वा, पदानि भज्यन्तेऽनेन । भञ्ज + करणे ल्युट् ।) निरुक्तम् । गूढार्थशब्दव्याख्या । इति हेमचन्द्रः ॥

पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका ।) पञ्जिका । टिप्पनी । इति हेमचन्द्रः ॥

पदमाला, स्त्री, (पदानां माला विस्तृतिर्य्यस्याम् ।) मोहनशीला विद्या । यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम् ।
याचयामि सुरेशानसुमादेहार्द्धधारिणम् ॥"
इति देवीपुराणे ६ अध्यायः ॥

अस्या विवरणं तत्रैव द्रष्टव्यम् । पदश्रेणीं च ॥

पदविः, स्त्री, (पद्यते गम्यतेऽनया । पद गतौ + "पद्यटिभ्यामविः ।" इति अविः ।) पद्धतिः । पन्थाः । इत्यमरः । २ । १ । १५ ॥

पदवी, स्त्री, (पदवि + "कृदिकारान्तादक्तिनः ।" इति पक्षे ङीष् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, रघुः । ७ । ७ ।
"उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान ॥"
पद्धतिः । यथा, तत्रैव । ३ । ५० ।
"अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥"
पदम् । यथा, पञ्चतन्त्रे । १ । २५८ । "अथ तेन सिंहाय अमात्यपदवी प्रदत्ता व्याघ्राय शय्यापालत्वमिति ॥")

पदष्ठीवं, क्ली, (पादौ च अष्ठीवन्तौ च तयोः समाहारः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति

निपातनात् सिद्धम् ।) युगपदुपस्थितचरण-
जानुनी । इति व्याकरणम् ॥
पदाङ्कः पुं (पदस्य अङ्कश्चिह्नम् ।) क्रमाङ्कः । पाद-
चिह्नम् । यथा,—
"शाके शायकवेदषोडशमिते श्रीकृष्णशर्म्मार्पित-
श्रानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
चक्रे लब्धपदाङ्कदूतमतुलं प्रीतिप्रदं श्रृण्वतां
धीरः श्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात् ॥
इति पदाङ्कदूतकाव्यम् ॥
पदाङ्गी, स्त्री, (हंसस्य पदमिव अङ्गं यस्याः । स्त्रियां
ङीष् ।) हंसपदी इति राजनिर्घण्टः ॥
पदाजिः, पुं, (पादाभ्यामजतीति । अज गतौ +
"पादे च ।" उणां । ४।१३१ । इति पादे चोप
पदे अजेरिण् । "पादस्य पदाज्यातिगोप-
हतेषु ।" ६।३।५२ । इति पदादेशः । बहुल-
वचनात् अजेर्व्यभावः ।) पदातिकः । इत्य-
मरः । २ । ८ । ६६ ॥
पदातः, पुं, (पदाभ्यामततीति । पद् + अत् + अच् ।)
पादातिकः । इति शब्दरत्नावली ॥
पदातिः, पुं, (पादाभ्यामतति गच्छतीति "पादे
च ।" उणां ४।१३१ । इति पाद् + अति + इण् ।
"पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ ।
इति पदादेशः ।) पदातिकः । पैयादा इति
भाषा । तत्पर्य्यायः । पत्तिः २ पत्तगः ३ पादा-
तिकः ४ पदाजिः ५ पद्गः ६ पदिकः ७ । इत्य-
मरः । २ । ८ । ६६ ॥ पदातिकः ८ पादात् ९
पादाविकः १० पदात् ११ पायिकः १२ शव-
रालिः १३ । इति शब्दरत्नावली ॥ (यथा,
महाभारते । १ । १३९ । ३१ ।
"गजानश्वान् रथांश्चैव पातयामास पाण्डवः ।
पदातींश्च रथांश्चैव न्यवधीदर्ज्जुनाग्रजः ॥")
पदातिकः, पुं, (पदाति + स्वार्थे कन् ।) पदातिः ।
इति शब्दरत्नावली ॥
पदारः, पुं, (पदं ऋच्छति प्राप्नोतीति । ऋ + अण् ।)
पादधूलिः । पादालिन्दः । इति मेदिनी ॥
पदार्थः, पुं, पदानां घटपटादीनां अर्थोऽभिधेयः ।
तत्पर्य्यायः । भावः २ धर्म्मः ३ तत्त्वम् ४ सत्त्वम्
५ वस्तु ६ । इति जटाधरः ॥ * ॥ (पदार्था हि
दर्शनमतभेदेन नानाविधाः । तत्र वैशेषिकाणां
मते ।) सप्त पदार्थाः । यथा,—
"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः ॥"
"सप्तानामपि साधर्म्म्यं ज्ञेयत्वादिकमिष्यते ।
द्रव्यादयः पञ्च भावा अनेके समवायिनः ॥
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥"
इति भाषापरिच्छेदे । २, १४ ॥
"एते पदार्था वैशेषिकप्रसिद्धाः । नैयायिकाना-
मप्यविरुद्धाः ।" इति सिद्धान्तमुक्तावली ॥ गौत
मोक्तषोडशपदार्थास्तु न्यायशब्दे द्रष्टव्याः ॥
(कापिलमते प्रकृत्यादयः पञ्चविंशतिः । पातञ्जल-
मते तु ईश्वरेण सह षड्विंशतिः । वेदान्तमते
आत्मानात्मभेदात् द्विविधः । तत्र आत्मापि
द्विविधः ईश्वरजीवाद्युपाधिभेदात् । एतावपि
विद्याविद्याभेदेन द्विविधौ । केवलमविद्योप-
हितत्वाद्भेदव्यवहारः । अनात्मापि कारण-
सूक्ष्मस्थूलभेदात् त्रिविधः इति ॥)
पदासनं, क्ली, (पदः पादस्य वा आसनम् ।) पाद-
पीठम् । इति हेमचन्द्रः ॥ पा राखा टुल् ।
इति भाषा ॥
पदिकः, पुं, (पादेन चरतीति । पाद + "पर्पादिभ्यः
ष्ठन् ।" ४।४।१० । इति ष्ठन् । ततः पदादेशश्च ।)
पदातिः । इत्यमरः । २ । ८ । ६७ ॥
पद्गः, पुं (पद्भ्यां गच्छतीति । पत् + गम् + अन्ये-
ष्वपीति डः ।) पदातिकः । इत्यमरः ।२।८।६७॥
पद्धतिः, } स्त्री, (पद्भ्यां हन्ति गच्छतीति । हन
पद्धती, } गतौ + क्तिन् । "हिमकाषिहतिषु
च ।" ६।३।५४ । इति पद्भावः । "कृदिकारादक्तिनः ।"
४।१।४५ । इति वा ङीष् ।) वर्त्म । (यथा, रघुः
३।४६ ।
"पथः श्रुतेर्दर्शयितार ईश्वराः
मलीमसामाददते न पद्धतिम् ॥")
पंक्तिः । इति मेदिनी ॥ ग्रन्थार्थबोधकग्रन्थः ।
इति हेमचन्द्रः ॥ पदवी । सा च घोषवसु-
मित्रादिरूपा । यथा । "षष्ठेऽन्नप्राशनं मासि
यद्वेष्टं मङ्गलं कुले इति मनुवचनात् चूडाकार्य्या
यथाकुलमिति याज्ञवल्क्यवचनात् देशानु-
शिष्टं कुलधर्म्ममुख्यं सगोत्रधर्म्मं नहि संत्यजेच्च
इति वामनपुराणाच्च संस्कारमात्रे कुलधर्म्मानु-
रोधेन कालान्तरे मङ्गलविशेषाचरणवत्
शूद्राणां नामकरणे वसुघोषादिरूपपद्धतियुक्त-
नामत्वञ्च बोध्यम् । एवमेव कुल्लूकभट्टः ।" इत्यु-
द्वाहतत्त्वम् ॥
पद्धिमं, क्ली, (पादस्य हिमम् । "हिमकाषिहतिषु
च ।" ६।३।५४ । इति पद्भावः ।) पदस्य शीत-
लता । इति संक्षिप्तसारव्याकरणम् ॥
पद्मं, क्ली पु, (पद्यते इति । पद गतौ + "अर्त्तिस्तु-
सुहुस्रिति ।" उणां । १ । १३९ । इति मन् ।
यद्वा, पद्मा लक्ष्मीरस्त्यस्मिन् । "अर्श आदि-
भ्योऽच् ।" ५।२।१२७ । इति अच् ।) स्वनाम-
ख्यातपुष्पविशेषः । तत्पर्य्यायः । नलिनम् २
अरविन्दम् ३ महोत्पलम् ४ सहस्रपत्रम् ५
कमलम् ६ शतपत्रम् ७ कुशेशयम् ८ पङ्केरु-
हम् ९ तामरसम् १० सारसम् ११ सरसी-
रुहम् १२ बिसप्रसूनम् १३ राजीवम् १४ पुष्क
रम् १५ अम्भोरुहम् १६ । इत्यमरः । १ । १० ।
३९-४० ॥ पङ्कजम् १७ अम्भोजम् १८ अम्बु-
जम् १९ सरसिजम् २० श्रीवासम् २१ श्रीपर्णम्
२२ इन्दिरालयम् २३ जलजातम् २४ अब्जम् २५
कञ्जम् २६ नलम् २७ नालीकम् २८ नालिकम्
२९ वनजम् ३० अम्बुजानम् ३१ पुटकम् ३२
खजः ३३ । इति शब्दरत्नावली ॥ अस्य गुणाः ।
कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्त-
कफास्रनाशित्वञ्च । इति राजवल्लभः ॥ अव-
शिष्टम् कमलशब्दे द्रष्टव्यम् ॥ * ॥ पद्मकम् ।
तच्च गजस्य मुखादिस्थो बिन्दुसमूहः । व्यूह-
विशेषः । (यथा, मनुः ७ । १८८ ।
"यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्" ॥)
निधिभेदः । (यथा, महाभारते ।२।१०।३६ ।
"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ।
सर्व्वान्निधीन् प्रगृह्याथ उपास्ते वै धनेश्वरम्" ॥)
संख्यान्तरम् । तच्च दशार्बुदम् । (यथा, महा-
भारते ।
"अयुतम् प्रयुतञ्चैव पद्मम् खर्वमथार्बुदम्" ॥)
दशशतञ्च इति मेदिनी ॥ पद्मकाष्ठौषधिः । इति
धरणिः ॥ पुष्करमूलम् । सीसकम् । इति राज-
निर्घण्टः (कल्पविशेषः । यथा, मार्कण्डेये ४७।३॥
"पद्मावसाने प्रलये निशासुप्तोत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत" ॥)
शरीरस्थषट्पद्मानि यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे कामबीजन्तु कलशान्तीन्दुनादकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्बाह्ये हेमवर्णाभम् व स-वर्णचतुर्द्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥१॥
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥२॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम् ॥३॥
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ॥
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥४॥
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम् ॥५॥
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् ।
आज्ञा संक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ॥६॥
कैलासाख्यं तदूर्द्ध्वे तु बोधनीन्तु तदूर्द्ध्वतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ! ।
सहस्राराम्बुजं बिन्दुस्थानं तदूर्द्ध्वमीरितम् ॥"
इति तन्त्रसारः ॥
पद्मः, पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तु
स्रिति ।" उणां । १।१३९ । इति मन् ।) दाश-
रथिः । नागविशेषः । इति धरणिः ॥ (यथा,
महाभारते ।२।९।८ ।
"स्वस्त्यश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥"

पद्मोत्तरात्मजः । स तु द्वादशजिनचक्रवर्त्त्यन्तर्गतचक्रवर्त्तिविशेषः । बलदेवः । इति हेमचन्द्रः । षोडशरतिबन्धान्तर्गतप्रथमबन्धः । यथा,—
"हस्ताभ्याञ्च समालिङ्ग्य नारी पद्मासनोपरि ।
रमेद्गाढ़ं समाकृष्य बन्धोऽयं पद्मसंज्ञकः ॥"
इति रतिमञ्जरी ॥

पद्मकं, क्ली, (पद्ममिव कायतीति । पद्म + कै + कः । पद्मप्रतिकृतिरक्तवर्णत्वात् तथात्वम् ।) बिन्दुजालम् । गजस्य मुखादिस्थो बिन्दुसमूहः । इत्यमरभरतौ ॥ (यथा, कुमारे । १ । ७ श्लोकटीकायां मल्लिनाथः । "अतएव कुञ्जरस्य ये बिन्दवः काये वयोविशेषभाविनः पद्मकाख्याः ।) पद्मकाष्ठम् । इति मेदिनीधरण्यौ ॥ (यथा गारुड़े १९८ अध्याये ।
"कर्पूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम् ।
प्रस्वेदमलदौर्गन्ध्यकण्डुकुष्ठहरं परम् ॥"
अस्य गुणा यथा, भावप्रकाशे ।
"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥")
कुष्ठम् । इति राजनिर्घण्टः ॥

पद्मकन्दः, पुं, (पद्मस्य कन्दः ।) कमलकन्दः । तत्पर्य्यायः । शालूकम् २ पद्ममूलम् ३ कटाक्षयम् ४ शालुकम् ५ जलालूकम् ६ । अस्य गुणाः । कटुत्वम् । विष्टम्भित्वम् । रूक्षत्वम् । रुच्यत्वम् । कषायत्वम् । कफपित्तकाशतृष्णादाहविनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पद्मादिकन्दः शालूकं करहाटञ्च कथ्यते ।
मृणालमूलं भिसाण्डं जलालूकञ्च कथ्यते ॥
शालूकं शीतलं वृष्यं पित्तदाहास्रनुद्गुरु ।
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ॥
संग्राहि मधुरं रूक्षं भिसाण्डमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥

पद्मकाष्ठं क्ली (पद्ममिव गन्धवत् काष्ठम् ।) ओषधिविशेषः । तत्पर्य्यायः । पद्मकम् २ पीतकम् ३ पीतम् ४ मालयम् ५ शीतलम् ६ हिमम् ७ शुभम् ८ केदारजम् ९ रक्तम् १० पाटलापुष्पसन्निभम् ११ पद्मगन्धम् १२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । रक्तपित्तविनाशित्वम् । मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटशान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
"पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥"
इति भावप्रकाशः ॥

पद्मकी [न्,] पुं, (पद्मकं बिन्दुजालमस्त्यस्य । इनिः ।) भूर्ज्जवृक्षः । इति शब्दमाला ॥

पद्मकेशरः, पुं क्ली, (पद्मस्य केशरः ।) किञ्जल्कः । इति राजनिर्घण्टः ॥ (यथा, इन्द्रजालसंग्रहे ।
"गोक्षीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ॥")

पद्मगन्धं, पद्मगन्धि, त्रि, (पद्मस्येव गन्धोऽस्य । "उपमानाच्च ।" ५।४।१३६ । इति इत् । मुग्धबोधमते तु वातूपमानादित्युक्तेर्विभाषा ।) पद्मस्येव गन्धो यस्य तत् । इति मुग्धबोधव्याकरणम् ॥

पद्मगर्भः, पुं, (पद्मं गर्भः कुक्षिरिव यस्य । विष्णुनाभिकमलजातत्वात् तथात्वम् ।) ब्रह्मा । इति शब्दरत्नावली ॥ (पद्मस्य हृदयस्थपद्मस्य गर्भे आसनत्वेन कल्पितो यस्य उपासकैरितिशेषः । विष्णुः । यथा, महाभारते । १३।१४९।५१ ।
"पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥"
"पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः ।"
इति भाष्यम् ॥
शिवः । यथा, तत्रैव १३।१७।१३७ ।
"पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥")

पद्मचारिणी, स्त्री (पद्ममिव चरतीति । चर + णिनिः स्त्रियां ङीप् ॥) उत्तरापथभवस्वनामख्यातक्षुपविशेषः । (स्थलकमलिनी इति ख्याता ॥) तत्पर्य्यायः । अव्यथा २ अतिचरा ३ पद्मा ४ चारटी ५ । इत्यमरः । २ । ४ १४६ ॥ अस्याः पर्य्यायान्तरं गुणाश्च स्थलपद्मिनीशब्दे द्रष्टव्याः ॥

पद्मतन्तुः, पुं, (पद्मस्य तन्तुः ।) मृणालम् । इति राजनिर्घण्टः ॥

पद्मदर्शनः, पु, (पद्मस्येव दर्शनमस्य ।) श्रीवासः । इति शब्दचन्द्रिका ॥ लोवान् इति भाषा ॥

पद्मनाभः, पु,(पद्मं नाभौ यस्य । "अच्प्रत्यन्वयपूर्व्वात् सामलोम्नः ।" ५ । ४ । ७५ । इत्यत्र "अच्" इति योगविभागादच् । ब्रह्मोत्पत्तिकारणीभूतपद्मस्य नाभिजातत्वादस्य तथात्वम् ।) विष्णुः । इत्यमरः । १ । १ । १० ॥ (यथा महाभारते । १३ । १४९ । १९ ॥
"अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥")
शयनं तस्य स्मरणीयत्वं यथा,—
"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम् ॥"
इत्यादि हृहन्नन्दिकेश्वरपुराणम् ॥
(हृदयपद्मस्यनाभौ नाभेरीषदुपरिभागे प्रकाशनात् महादेवः । यथा, महाभारते । १३ । १७ । १०५ ।
"पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥"
पद्ममिव वर्त्तुलाकृतिः नाभिर्यस्य । धृतराष्ट्रपुत्त्राणामन्यतमः । यथा, महाभारते ।१।६७।९५ ।
"ऊर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ॥"
नागविशेषः । यथा, तत्रैव । १२ । ३५५ । ४ ।
"कृताधिवासो धर्म्मात्मा तत्र चक्षुःश्रवा महान् ।
पद्मनाभो महानाभः पद्म इत्येव विश्रुतः ॥")
भाविजिनविशेषः । इति हेमचन्द्रः ॥ (स्तम्भनास्त्रविशेषः । यथा, गो: रामायणे १ ।३१।७।
"पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः ॥")

पद्मनाभिः, पु, (पद्मं नाभौ यस्य । अजिति योगविभागस्य असार्व्वत्रिकत्वात् न अच् ।) पद्मनाभः । इति द्विरूपकोषः ॥

पद्मनालं, क्ली, (पद्मस्य नालम् ।) मृणालम् । यथा,
"कर्णिका पद्मनालन्तु मृणालं तन्तुलं बिसम् ॥"
इति हेमचन्द्रः । ४ । २३१ ॥

पद्मपत्रं, क्ली, (पद्मस्य पत्रमिव । पद्मपर्णसादृश्यादस्य तथात्वम् ।) पुष्करमूलम् । इत्यमरः । २ । ४ । १४५ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये । "शैवलपद्मकपद्मपत्रप्रभृतिभिः ॥"* ॥ पद्मस्य पत्रम् ।) कमलदलम् ॥ (यथा, हठयोगदीपिकायाम् । २ । ७० ।
"अन्तः प्रवर्त्तितोदारमारुतापूरितोदरः ।
पयस्यगाधेऽपि सुखात् प्लवते पद्मपत्रवत् ॥")

पद्मपर्णं, क्ली, (पद्मस्य पर्णं पत्रम् ।) पद्मपत्रम् । पुष्करमूलम् । इत्यमरटीका ॥

पद्मपलाशलोचनः, पु, (पद्मस्य पलाशे पत्रे इव लोचने यस्य । पद्मपुष्पदलाकारचक्षुर्विशिष्टत्वात्तथात्वम् ।) विष्णुः । । यथा,—
"नान्यं ततः पद्मपलाशलोचनाद्-
दुःखच्छिदन्तं मृगयामि कञ्चन ।
यो मृग्यते हस्तगृहीतपद्मया-
श्रियेतरैरङ्ग । विमृग्यमाणया ॥"
इति श्रीभागवते ४ स्कन्धः ॥

पद्मपाणिः, पुं, (पद्मं पाणौ यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ बुद्धः । सूर्य्यः । इति त्रिकाण्डशेषः ॥ (पद्महस्तके त्रि ॥)

पद्मपुष्पः, पु, (पद्ममिव पुष्पमस्य ।) कर्णिकारवृक्षः । पिकाङ्गपक्षी । इति शब्दचन्द्रिका ॥

पद्मप्रभः, पुं, (पद्मस्येव प्रभा दीप्तिर्यस्य ।) चतुर्विंशतिमिताऽर्हदन्तर्गतषष्ठार्हन् । इति हेमचन्द्रः ॥ पद्मतुल्यप्रभायुक्ते त्रि ॥

पद्मप्रिया, स्त्री, (पद्मानि प्रियाणि यस्याः ।) जरत्कारुमुनिपत्नी । मनसादेवी । इति शब्दरत्नावली ॥ (गायत्त्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ९४ ।
"पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ॥")

पद्मबन्धः, पुं, (पद्मस्येव बन्धो रचना यस्य ।) चित्रकाव्यविशेषः । शब्दालङ्कारप्रभेदः । यथा,
"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।"
अस्य च तथाविधसन्निवेशवशेन चमत्कारविधायिनामपि वर्णानां तथाविधश्रोत्राकाश-समवायविशेषवशेन च चमत्कारविधायिभिर्वर्णैरभेदेनोपचारत्वाच्छब्दालङ्कारत्वम् । उदाहरणं यथा साहित्यदर्पणे ॥
"मारमा सुषमा चारु रुचा मार वधूत्तमा ।
मात्तधूर्त्तमावासा सा वामा मेऽस्तु मा रमा ॥"
अत्र पद्मदलेषु वर्णविन्यासक्रमः ॥

मा
रमा
धूत्त

पद्मबन्धुः, पुं (पद्मस्य कमलस्य बन्धुः । सूर्य्योदये पद्मस्य प्रकाशनतया तथात्वम् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (पद्मेन बध्यते रुध्यते असौ निशायां मधुलोभात् इति भावः । बन्ध + उन् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पद्मभूः पुं, (पद्मं विष्णुनाभिभवकमलं भूरुत्पत्तिस्थानं यस्य । (यद्वा, पद्मात् भवतीति । भू + क्विप् ।) ब्रह्मा । इति हलायुधः ॥ (अस्योत्पत्तिकथा यथा भागवते । ३ । ८ । ९ ।
"परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्ते ऽन्यन्न किञ्चन ॥
तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज ! स्वयम्भूश्चतुराननः ॥")

पद्ममुखी, स्त्री, (पद्मस्य मुखमिव मुखं उत्पत्तिप्रारम्भो यस्याः । स्त्रियां ङीप् ।) दुरालभा । इति शब्दचन्द्रिका ॥ (पद्मस्य मुखमिव मुखं वदनं यस्य ।) पद्मसदृशमुखविशिष्टे त्रि ॥

पद्मयोनिः, पुं (पद्मं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य ।) ब्रह्मा । यथा —
"अस्माच्च कारणाद्ब्रह्मन् ! पुत्त्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो मत्प्रियार्थं जगन्मय ॥"
इति कौर्म्मे ९ अध्यायः ॥

पद्मरागः, पुं, (पद्मस्येव रागो यस्य ।) रक्तवर्णमणिविशेषः । माणिक इति भाषा । तस्य पर्य्यायः । शोणरत्नम् २ । लोहितकः ३ । इत्यमरः । २ । ९ । ९२ ॥ लोहितम् ४ । कुरुविन्दकम् ५ । इति शब्दरत्नावली ॥ (बृहत्संहितायां ८२ अध्याये अस्य परीक्षादिकं यथा, --
"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः ।
सौगन्धिकजा भ्रमराञ्जनाब्जजम्बूरसद्युतयः ॥
कुरुविन्दभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च ॥
स्निग्धः प्रभानुलेपी स्वच्छोऽर्च्चिष्मान् गुरुः सुसंस्थानः ।
अन्तःप्रभोऽतिरागो मणिरत्नगुणाः समस्तानाम् ॥
कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः ।
दुर्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः ॥
भ्रमरशिखिकण्ठवर्णो
दीपशिखासप्रभो भुजङ्गानाम् ।
भवति मणिः किल मूर्द्धनि योऽनर्घेयः स विज्ञेयः ॥
यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देवः
शत्रूंश्च नाशयति तस्य मणेः प्रभावात् ॥
षड्विंशतिः सहस्राण्येकस्य मणेः पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य ॥
अर्द्धपलस्य द्वादशकर्षस्यैकस्य षट् सहस्राणि ।
यच्चाष्टमाषकधृतं तस्य सहस्रत्रयं मूल्यम् ॥
माषकचतुष्टयं दशशतक्रय
द्वौ तु पञ्चशतमूल्यौ ॥
परिकल्प्यमन्तराले
मूल्यं हीनाधिकगुणानाम् ॥
वर्णन्यूनस्यार्द्धं तेजोहीनस्य मूल्यमष्टांशः ।
अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम् ॥
आधूम्रं व्रणबहुलं स्वल्पगुणञ्चाप्नुयाद्द्विशतभागम् ।
इति पद्मरागमूल्यं पूर्व्वाचार्य्यैः समुद्दिष्टम् ॥")
राजनिर्घण्टोक्तपर्य्यायगुणौ माणिक्यशब्दे द्रष्टव्यौ तस्य वर्णो यथा, --
"सिंहलं तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं कालपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमस्तु सौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूतं निकृष्टं तुम्बुरोद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ॥*॥
तथा च ।
बन्धूकगुञ्जासकलेन्द्रगोप-
जवासनासृक्कसमानवर्णशोभाः ।
भ्राजिष्णवो दाडिमबीजवर्णा-
स्तथापरे किंशुकपुष्पभासः ॥
सिन्दूरपद्मोत्पलकुङ्कुमानां
लाक्षारसस्यापि समानवर्णाः ।
सान्द्रे निरागं प्रभया स्वयैव
भान्ति स्वलग्नाः स्फुटमध्यशोभाः ॥
भानोश्च भासामनुवेधयोग
मासाद्य रश्मिप्रकरेण दूरम् ।
पार्श्वानि सर्व्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥
कुसुम्भनीलीव्यतिमिश्ररागा
प्रत्यग्ररक्ताम्बरतुल्यभासः ।
तथापरे रक्तकण्टकारी-
पुष्पत्विषो हिङ्गुलकत्विषोऽन्ये ॥
चकोरपुंस्कोकिलसारसानां
नेत्रावभासाश्च भवन्ति केचित् ।
अन्ये पुनः निर्विषयीभूतानां
तुल्यत्विषः कोकनदोदराभाः ॥
प्रभावकान्तिद्युतिगुरुत्वयोगैः
प्रायः समानाः स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासः
सौगन्धिकाख्या मणयो भवन्ति ॥
यो मन्दराजः कुरुविन्दजेषु
स एव जातः स्फटिकोद्भवेषु ।
निरर्च्चिषोऽन्तर्बहुलीभवन्ति
प्रभाववन्तोऽपि न तत्समानाः ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्फुटार्च्चिषः ॥
वर्णानयायिनस्तेषामन्धदेशे तथापरे ।
न जायन्ते तु ये केचित् मूल्यलेशमवाप्नुयुः ॥
तथैव स्फाटिकोत्थानां देशे तुम्बुरसंज्ञके ।
सधर्म्माणः प्रजायन्ते स्वल्पमूल्या हि ते स्मृताः ॥"

अथ जात्यादि ।
"माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् ।
ब्राह्मणक्षत्रियवैश्याश्च शूद्रश्चाथ यथाक्रमम् ॥
रक्तश्वेतो भवेद्विप्रश्चारक्तस्तु क्षत्रियः ।
रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथान्त्यजः ।
पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः ।
सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्त्यजः ॥
शशपद्मसमाकारः खदिराङ्गारसप्रभः ।
पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्व्वदा ॥
गुञ्जासिन्दूरबन्धूकनागरङ्गसमप्रभः ।
दाडिमीकुसुमाभासः कुरुविन्दस्तु बाहुजः ॥
हिङ्गुलाभाशोकपुष्पाभमीषत्पीतलोहितम् ।
जवालाक्षारसप्रायं वैश्यं सौगन्धिकं विदुः ॥
आरक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः ।
मांसखण्डसमाभासो ह्यन्त्यजः पापनाशनः ॥"
मांसखण्डस्तु नीलगन्धिः संज्ञा ॥ * ॥

अथ दोषाः ।
"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः ।
द्विच्छायश्च द्विरूपश्च सभेदः कर्करस्तथा ॥
अशोभनं कोकिलश्च जलं धूम्राभिधश्च वै ।
गुणाश्चत्वार आख्याताश्छायाः षोडश कीर्त्तिताः ॥
छायास्तु पूर्व्वोक्ता एव ।
"छायाद्वितयसम्बन्धाद्द्विच्छायं बन्धुनाशनम् ।
द्विरूपं द्विपदन्तेन माणिक्येन पराभवः ॥
सभेदो भिन्नमित्युक्तं शस्त्रघातविधायकः ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत् ॥
दुग्धेनेव समालिप्तमशनीपुटमुच्यते ।
अशोभनं समुद्दिष्टं माणिक्यं बहुदुःखकृत् ॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत् ॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥
तथा, --
"शोभाद्वितयवन्तो ये मणयः क्षतिकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे मृत्युः स्यात् कर्करेण धननाशकृत् ।
दुग्धेनेव समालिप्तः पुटके यस्तु सम्भवेत् ॥
दुःखकृत् स समाख्यातो न नृपे रञ्जनीयकः ।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता ॥
तेषाञ्च बहुभेदाः स्युस्ते न धार्य्याः कदाचन ॥"

अथ गुणाः ।
"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ॥"
तथा च ।
"वर्णाधिक्यं गुरुत्वञ्च स्निग्धता समता च्छता ।
अर्च्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः ॥"*॥
फलम् ।
"ये कर्कराच्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समाननो जातिगुणैः समस्तैः ॥
दोषोपसृष्टं मणिमप्रबोधाद्-
बिभर्त्ति यः कश्चन कश्चिदेकम् ।

तं बन्धुदु:खाय सबन्धुवित्त-
नाशादयो दोषगणा भजन्ते ॥
सपत्नमध्येऽपि कृताधिवासं
प्रमादवृत्तावपि वर्त्तमानम् ।
न पद्मरागस्य महागुणस्य
भर्त्तारमापत् समुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समुग्रैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥” * ॥

अस्य परीक्षा यथा,—
“बालार्ककरसंस्पर्शात् यः शिखां लोहितां वमेत् ।
रञ्जयेदाश्रमं वापि स महागुण उच्यते ॥
दुग्धे शतगुणे क्षिप्तो रञ्जयेदयः समन्ततः ।
वमेत् शिखां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः ।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
मनोरथप्रशमनाः सर्व्वसम्पत्तिदायकाः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्दृश्यते दूराज्ज्वलदग्निसमच्छविः ।
वराकान्तिः स विज्ञेयः सर्व्वसम्पत्तिकारकः ॥
पञ्च सप्त नव विंशति रागाः
क्षिप्त एव सकलः खलु वर्णः ।
वर्णयद्भमति वा करजाल-
मुत्तरोत्तरमहागुणिनस्ते ॥
नीलं रसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विशतप्रमाणम् ।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः ॥” * ॥

परिमाणम् ।

“गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
कर्कोलफलाकारो द्वादशाष्टाब्धिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
वदरीफलतुल्यो यः स्वरदिक्सुमाषक ।
तथा धात्रीफलाच्चिंशद्विंशतिद्वादशमाषकः ॥
तथाम्रफलतुल्यो यो वह्निपक्षैकमाषकः ।
नाम्बलफलमानो यश्चतुस्त्रिद्विकतोलकः ॥
बिल्वीफलसमाकारो वसुषड्दशतोलकः ।
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात् ॥
केचिच्चाकरजाः सन्ति जातीनां प्रतिरूपकाः ।
विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत् ॥
कलसपुरोद्भवसिंहलतुम्बुरुदेशोत्थमुक्तमालायाः ।
श्रीपर्णिकाश्च सदृशा विजातयः पद्मरागाणाम् ॥
तुषोपसर्गात् कलषाभिधान-
माताम्रभावादपि तुम्बुरुत्थम् ।
काष्ण्यात्तथा सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात् ।
श्रीपर्णकं दीप्तिनिराकृतत्वा-
द्विजातिलिङ्गाश्रय एष भेदः ॥”

यथा च ।
“स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाणामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रमृष्टः प्रजहाति दीप्तिम् ।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
सम्प्राप्य चोत्क्षेपपथानुवृत्तिं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ॥
प्राप्यापि रत्नाकरजां स्वजातिं
लघुत्वहुत्वेन गुणेन विद्वान् ॥
अप्रमाणयति मन्देहे शिलायां परिवर्त्तयेत् ।
घृष्टो योऽत्यन्तशोभावान् गरिमाणं न मुञ्चति ।
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः ॥
स्वजातकं समुत्थेन विलिखेद्वा परस्परम् ।
वज्रं वा कुरुविन्दं वा विमुच्यान्यौन्यकेनचित् ।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
जातस्य सर्व्वेऽपि मणेर्न जातु
विजातयः कान्तिसमानवर्णाः ।
तथापि नानाकरणार्थमेव
भेदप्रकारः परमः प्रदिष्टः ॥
गुणोपपन्नेन सहावबद्धो
मणिस्तु धार्य्यो विगुणेन जात्यः ।
न कौस्तुभेनापि सहावबद्धं
विद्वान् विजातिं बिभृयात् कदाचित् ॥
चण्डाल एकोऽपि यथा द्विजातीन्
समेत्य भूरीनपहन्त्ययत्नात् ।
तथा मणीन् भूरिगुणोपपन्नान्
शक्नोति विद्रावयितुं विजातः ॥” * ॥

अथ मूल्यम् ।

बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम् ।
तत्र कान्तिविभागेन छायाभागं विनिर्द्दिशेत् ॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुत्थापितगौरवस्य ।
तत्पद्मरागस्य गुणान्वितस्य
स्यान्माषकाख्या तुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथाशुद्धे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्यचतुर्थांशहीनं स्यात् सुगन्धिके ॥
यावन्मूल्यं समाख्यातं वज्रवर्णे च सूरिभिः ।
तावन्मूल्यचतुर्थांशं लभ्यते शुद्धमाणिके ॥
पद्मरागः परं यस्तु धत्ते लाक्षारसप्रभः ।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षत्रयघृतो मणिः ।
द्वाविंशतिं सहस्राणां तस्य मूल्यं विनिर्द्दिशेत् ॥
एकोनो नयने यस्तु जवाकुसुमसन्निभः ।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्द्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतोऽन्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठाटकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्याद्याश्चतुर्था ये प्रकीर्त्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्या सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्याद्रोगशोकभयत्रयम् ॥”

इति युक्तिकल्पतरौ पद्मरागपरीक्षा ॥

पद्मलाञ्छनः, पुं, (पद्ममेव लाञ्छनं पद्माकारलक्षणं चिह्नमितियावत् यस्य ।) ब्रह्मा । सूर्य्यः । कुवेरः । राजा । इति मेदिनी ॥ (बुद्धविशेषः । इति शब्दचिन्तामणिः ॥)

पद्मलाञ्छना, स्त्री, (पद्मं लाञ्छनं यस्याः ।) तारा । लक्ष्मीः । सरस्वती । इति मेदिनी ॥

पद्मवर्णकं, क्ली, (पद्मस्येव वर्णोऽस्य । कप् ।) पुष्करमूलम् । इति जटाधरः ॥ पद्मतुल्यवर्णयुक्ते त्रि ॥

पद्मवासा, स्त्री, (पद्मं वासो यस्याः ।) लक्ष्मीः । इति हेमचन्द्रः ॥

पद्मबीजं, क्ली, (पद्मस्य बीजम् ।) कमलबीजम् । तत्पर्य्यायः । पद्माक्षम् २ गालोड्यम् ३ कन्दली ४ भेण्डा ५ क्रौञ्चादनी ६ क्रौञ्चा ७ श्यामा ८ पद्मपर्कटी ९ । अस्य गुणाः । कटुत्वम् । स्वादुत्वम् । पित्तच्छर्द्दिदाहास्रशोषनाशित्वम् । पाचनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

“पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् ॥
कफवातकरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥”

इति भावप्रकाशः ॥

(पद्मबीजमालाजपेनाशु साधकः सिद्धिमाप्नुयात् । इति तन्त्रशास्त्रे प्रसिद्धिः ॥ तदुक्तं यथा —
“भक्त्या यो जपते नित्यं पद्मबीजैः सुरेशि ! ।
अचिराल्लभते सिद्धिं सत्यं सत्यं न संशयः ॥”)

पद्मबीजाभं, क्ली, (पद्मबीजस्य आभा इव आभा यस्य । पद्मबीजवत् आभातीति वा । आ + भा + कः ।) मखान्नम् । इति राजनिर्घण्टः । माखाना इति भाषा ॥

पद्मा, स्त्री, (पद्मं वासस्थानत्वेनास्त्यस्याः । “अर्श आदिभ्योऽच् ।” ५।२।१२७। इति अच टाप् च ।) लक्ष्मीः । (यथा, रघुः । ४ । ५ ।
‘छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥”)
लवङ्गम् । पद्मचारिणी । इत्यमरः ॥ (पद्यते इति । “अर्त्तिस्तुस्विति ।” उणां । १ । १४० । इति मन् टाप् च ।) पन्नगी । मा त् मनसा । फञ्जिका । इति मेदिनीशब्दरत्नावल्यौ ॥ कृत्साह्वमाता । इति हेमचन्द्रः ॥ कुसुम्भपुष्पम् । इति रत्नमाला ॥ बृहद्रथराजकन्या कल्किदेवेन विवाहिता । यथा, कल्किपुराणे १० अध्यायः ॥
“हरेरागमनं श्रुत्वा सहर्षोऽभूद्बृहद्रथः ।
परीधमा ब्राह्मणैश्च पात्रैर्मित्रैः सुमङ्गलैः ॥
वाद्यताण्डवगीतैश्च पूजायोजनपाणिभिः ।
जगामानयितुं कल्किं साह्लं निजजनैः प्रभुः ॥
ततो जलाशयाभ्यासं गत्वा विशायशःसुतम् ।
मणिवेदिकमासीनं भुवनैकगतिं पतिम् ॥
ददर्श पुरतो राजा रूपशीलगुणाकरम् ।
साश्रुः सपुलकः शीघ्रं दृष्ट्वा साधु नमस्यन् ॥
ज्ञानागोचरमेतन्मे नवागमनमीश्वर । ।
यथा माल्धात्पुत्रस्य यद्गनार्थेन कानने ॥
इत्युक्त्वा तं पूजयित्वा समानीय निजाश्रमे ।
हर्म्यप्रासादसंबाधे स्थापयित्वा ददौ सुताम् ॥
पद्मां पद्मविशालाक्षीं पद्मनेत्राय पद्मिनीम् ।
पद्मजादेशितः पद्मनाभायादाद्यथा श्रियम् ॥
कल्किर्लब्ध्वा प्रियां भार्य्यां सिंहले साधु सत्कृतः ।
समुवास विशेषज्ञः समीक्ष्य द्वीपमुत्तमम् ॥”

पद्माकरः, पुं, (पद्मस्य आकरः ।) पद्मजनकजलाशयः । तत्पर्य्यायः । तडागः २ कासारः ३ सरसी ४ सरः ५ । इत्यमरः । १ । १० । २८ ॥ सरोजिनी ६ । इति जटाधरः ॥ सरोवरः ७ तडाकः ८ तटाकः ९ सरसम् १० सरम् ११ सरकम् १२ । इति शब्दरत्नावली ॥ पद्म सदैवागाधे महाजलाशये सपद्मे योग्यतया नियुङ्क्ते च । पद्मेव सरोमात्रे । इति पञ्जिकाकोङ्ककटादयोऽपि । पद्माकरादिद्वयं सपद्मागाधजलाशये । कासारादित्रयं कृत्रिमपद्माकरे । इति स्वाम्यादयः । पद्माकरादिद्वयं पद्मयुक्तजलाशयमात्रे । कासारादित्रयं सरोवरमात्रे । इत्यन्ये । पद्मानामाकर उत्पत्तिस्थानं पद्माकरः क्वचित पद्मशून्येऽपि योग्यतयेति सुभूतिः । इति भरतः ॥

पद्माक्षं, क्ली, (पद्मस्य अक्षीव । समासे षच् ।) पद्मबीजम् । इति हारावली ॥ (पद्मे इव पद्मयुगलवत् अक्षिणी यस्य ।) पद्मतुल्याक्षे त्रि ॥

पद्माटः, पुं, (पद्मं पद्मसादृश्यं अटति गच्छति पत्रेणेति अट गतौ + “कर्म्मण्यण् ।” ३ । २ । १ । इति अण् ।) चक्रमर्द्दः । इत्यमरः । २ । ४ । १४७ ॥

पद्मालया, स्त्री, (पद्ममेव आलयो वासस्थानं यस्याः ।) लक्ष्मीः । लवङ्गम् । इत्यमरः ॥ (लक्ष्मीस्वरूपत्वात् गङ्गापि । यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने । २९ । १०५ ।
“पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥”)

पद्मावती, स्त्री, (पद्म + अस्त्यर्थे मतुप् मस्य वत्वम् । संज्ञायां दीर्घः ।) मनसादेवी । नदीविशेषः । पद्मा इति ख्याता । इति शब्दरत्नावली ॥ पद्मचारिणी । इति जटाधरः ॥ जयदेवपत्नी । यथा,—
“जयति पद्मावतीरमणजयदेव-
कविभारतीभणितमतिशातनम् ।”
इति गीतगोविन्दः ॥

पद्मावतीप्रियः, पुं, (पद्मावत्याः प्रियः स्वामी ।) जरत्कारुमुनिः । इति शब्दरत्नावली ॥ जयदेवश्च ॥

पद्मासनं क्ली, (पद्ममिव पद्माकारेण बद्धमित्यर्थः । आसनम् ।) योगासनविशेषः । यथा,—
“वामोरूपरि दक्षिणं नियमतः संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां धृतम् ।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये
देतद्व्याधिविकारनाशनकरं पद्मासनं प्रोच्यते ॥”
अन्यदत्रापि ।
“वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा-
ऽन्योरूपरि तस्य बन्धनविधौ धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते ॥”
इति गोरक्षसंहिता ॥
(मत्स्येन्द्रनाथाभिमतं पद्मासनं यथा, हठयोगदीपिकायाम । १ । ४४-४७ ।
“वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्र-
मालोकयेदेतद्व्याधिविनाशकारि यमिनां
पद्मासनं प्रोच्यते ॥
उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥
नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया ।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः ॥
इदं पद्मासनं प्रोक्तं सर्व्वव्याधिविनाशनम् ।
दुर्लभं येन केनापि धीमता लभ्यते भुवि ॥”)
पूजार्थं धातुमयपद्माकारासनञ्च ।
(रतिविषयकपद्मासनम् यथा, रतिमञ्जर्य्याम ४०
“पद्मासनो नागपादो लतावेष्टोऽर्द्धसंपुटः ॥”
तल्लक्षणं यथा, तत्रैव ४२ ।
“हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि ।
रमेद्गाढं समाकृष्य बन्धोऽयं पद्मसंज्ञकः ॥”)

पद्मासनः, पुं, (पद्मं विष्णुनाभिकमलं आसनं यस्य ।) ब्रह्मा । कमलासनः । इत्यमरदर्शनात ॥

पद्माह्वा, स्त्री, (पद्मस्य आह्वा आख्या यस्याः ।) पद्मचारिणी । इति राजनिर्घण्टः ।

पद्मिनी, स्त्री, (पद्मानि सन्त्यस्याम् । पुष्करादित्वादिनिः ।) पद्मयुक्तदेशः । पद्मसमूहः । पद्मलता । इति भरतः ॥ तत्पर्य्यायः । नलिनी २ बिसिनी ३ । इत्यमरः । १।१०।३९ ॥ मृणालिनी ४ कमलिनी ५ पुटकिनी ६ पङ्कजिनी ७ सरोजिनी ८ । इति माधवः ॥ नालिकिनी ९ नालीकिनी १० अरविन्दिनी ११ । इति कोषान्तरम् ॥ अम्भोजिनी १२ पुष्करिणी १३ जम्बालिनी १४ । इति शब्दरत्नावली ॥ अब्जिनी १५ । तस्या लक्षणं यथा,—
“मृणालदलोत्फुल्लफलैः समुदिता पुनः ।
पद्मिनी प्रोच्यते प्राज्ञैर्बिसिन्यादिश्च सा स्मृता ॥”
तस्या गुणाः ।
“पद्मिनी मधुरा तिक्ता कषाया शिशिरा परा ।
पित्तक्रिमिशोषवान्तिभ्रान्तिसन्तापदोषहृत् ॥”
इति राजनिर्घण्टः ॥ * ॥
(पद्मं पद्मगन्धोऽस्त्यस्याः पद्मस्य गन्ध इव गन्धो विद्यते शरीरे यस्या इति तात्पर्य्यार्थः अत्र तु पद्मगन्धयोस्तादात्म्यमङ्गीकृत्यैव समासः कल्पितः ।) चतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः । तस्या लक्षणं यथा,—
“भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी ।
मृदुवचनसुशीला नृत्यगीतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥”
इति रतिमञ्जरी । ४ ॥ * ॥
(अस्या रतिप्रकारः यदुक्तः तत्रैव । २८ ।
“कुचं करेण संमर्द्य पीडयेदधरं दृढम् ।
रमणं पद्मबन्धेन पद्मिनीरतिमादिशेत् ॥”)
सरोवरम् । पद्मम् । इति विश्वः ॥ (यथा, कुमारे । ३ । ७६ ।
“सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः ॥”)
मृणालम् । इति शब्दमाला ॥ हस्तिनी । इति धरणिः ॥

पद्मिनीकण्टकः, पुं, (पद्मिनीकण्टक इव आकृतिर्विद्यतेऽस्य ।) क्षुद्ररोगविशेषः । पद्मकाँटा इति भाषा । तल्लक्षणं यथा,—
“कण्टकैराचितं वृत्तं कण्डूमत्पाण्डुमण्डलम् ।
पद्मिनी कण्टकप्रख्यैस्तदाख्यं कफवातजम् ॥”
आचितं व्याप्तम् । पद्मिनीकण्टकप्रख्यैः पद्मिनीनालकण्टकसदृशैः । तदाख्यं पद्मिनीकण्टकनामकम् ॥ * ॥
तच्चिकित्सा यथा,—
“पद्मिनीकण्टके रोगे छर्द्दयेन्निम्बवारिणा ।
तेनैव सिद्धं सक्षौद्रं सर्पिः पातुं प्रदापयेत् ॥
निम्बारग्वधकल्केन्वा मुहुरुद्वर्त्तनं हितम् ।
चतुर्गुणेन निम्बोत्थपत्रक्वाथेन गोघृतम् ॥
पर्यस्ततस्तु निम्बस्य क्षतमालस्य पत्रजैः ।
कल्कैर्भूयः पचेत् सिद्धं तत् पिबेत् पलसंमितम् ॥

पद्मिनीकण्टकाद्रोगान्मुक्तो भवति नान्यथा ॥"
इति निम्बादिघृतम् । इति भावप्रकाशः ॥

पद्मिनीकान्तः, पुं, (पद्मिन्याः कान्तः । पद्मपुष्प-प्रकाशकत्वादस्य तथात्वम् ।) सूर्य्यः । इति जटाधरः ॥

पद्मिनीवल्लभः, पुं, (पद्मिन्या नलिन्या वल्लभः प्रियः । पद्मिनी वल्लभाऽस्येति वा ।) सूर्य्यः । इति शब्द-रत्नावली ॥

पद्मी, [न्] पुं, (पद्मं बिन्दुजालकमस्त्यस्य । पद्म + इनिः ।) हस्ती । इत्यमरः । २ । ८ । ३५ ॥
(यथा, महाभारते । १२ । २८ । ६६ ।
"सर्व्वा रथगताः कन्या रथाः सर्व्वे चतुर्युजः ।
शतं शतं रथे नागाः पद्मिनो हेममालिनः ॥"
नाभिकमले हस्ते वा पद्ममस्यास्तीति । विष्णुः ।
यथा, महाभारते । १३ । १४९ । ५० ।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।" ...
"अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ।
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥")

पद्मेशयः, पुं, (पद्मे शेते इति । शीङ् ल शयने + "अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् । "शयवासवासिष्विति ।" ६ । ३ । १८ । इत्यलुक् ।) विष्णुः । इति हेमचन्द्रः ॥

पद्मोत्तरः, पुं, (पद्मादुत्तरः वर्णेन श्रेष्ठः ।) कुसुम्भः । इति राजनिर्घण्टः ॥

पद्मोत्तरात्मजः, पुं, (पद्मोत्तरस्य आत्मजः पुत्त्रः ।) जिनचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥

पद्मोद्भवः, पुं, (पद्मं उद्भव उत्पत्तिस्थानं यद्वा पद्म पद्मात् वा उद्भवो यस्य ।) ब्रह्मा । अक्लेशोनिरित्य-मरटीकायां भरतः ॥ (यथा, महाभारते । १३।१।१४ ।
"ततः पद्मोद्भवो राजन् । देवदेवः पितामहः ।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम् ॥")

पद्मोद्भवा, स्त्री, (पद्मं पद्मात् वा उद्भवो यस्याः ।) मनसा देवी । यथास्याः पौराणिकध्यानम् ।
"कान्त्या काञ्चनसन्निभां सुवदनां पद्मासनां शोभनां
नागेन्द्रैः कृतशेखरां विषहरां पद्मोद्भवां जाङ्गु-लीम् ॥"

पद्यं, क्ली, (पदं चरणमर्हतीति । पद + यत् ।) कविकृतिः । श्लोकः । इत्यमरः । ३ । ५ । ३१ ॥
तस्य लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥"
(तत्तु अन्वयगतिवशात् मुक्तकयुग्मकसन्दानितक-कलापककुलकभेदात् पञ्चविधम् । यदुक्तं साहित्य-दर्पणे । ६ । ३०७ ।
"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥"
"तदूर्द्ध्वं कुलकं स्मृतम् ।" इति क्वचित् पाठः ॥)
शार्क्षम् । इति जटाधरः ॥ ("पदमस्मिन् दृश्यम् ।" ४ । ४ । ८७ । इति यत् । नाति-शुष्ककर्द्दमः । इति सिद्धान्तकौमुदी ॥)

पद्यः, पुं, (पद्भ्यां जातः । पद + यत् ।) शूद्रः । इति मेदिनी ॥ (यदुक्तं यजुषि ।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥")

पद्या, स्त्री, (पादाय हिता । शरीरावयवात् यत् । "पद्यत्यतदर्थे ।" ६ । ३ । ५३ । इति पद्भावः ।) सरणिः । इति विश्वः ॥ पन्थाः । इत्य-मरः । २ । १ । १५ ॥ (यथा, ऋग्वेदे । २।३१।२ ।
"यदूत्राव्रः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥" पादौ विध्यन्ति पद्याः शर्करा । इति सिद्धान्तकौमुदी । "विध्यत्यध-नुषा ।" ४ । ४ । ८३ । इति यत् । "पद्यत्य-तदर्थे ।" ६।३।५३ । इति पदादेशः ॥)

पद्रः, पुं, (पद्यतेऽस्मिन्निति । पद गतौ । "स्फायि-तञ्चीति ।" उणां । २ । १३ । इति रक् ।) ग्रामः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ग्रामपथः । इत्युणादिकोषः ॥ भूर्लोकः । देश-भेदः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पद्वः, पुं, (पद्यते गम्यतेऽस्मिन्ननेन वा । पद गतौ । "सर्व्वनिघृष्वरिष्वेति ।" उणां । १ । १५३ । इति निपातनात् सिद्धम् ।) भूर्लोकः । रथः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पन्थाः । इत्युणादि-कोषः ॥

पद्वा, [न्] पुं, (पद्यते गम्यते यत्र । पद गतौ + "स्नामदिपद्यर्त्तीति ।" उणां । ४ । ११२ । इति वनिप् ।) पन्थाः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पन ङ ईडे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, स्तुतिः । पनायति पनायते विष्णुं धीरः । आयान्तत्वादभयपदमिति गोप-देवः । अन्ये तु आयस्याप्राप्तिपक्षे आत्मनेपद-मेव । ङ, अपनिष्ट पेने पनिता पनिषीष्ट पनि-ष्यते अपनिष्यत । इति दुर्गादासः ॥

पनसः, पुं, (पनाय्यते स्तूयतेऽनेन देवः मनुष्यादि-र्वेति । यद्वा पनायन्ति स्तौति सर्व्वोपयन्तो लभ्यः देवमनुष्यादीन् इति । पन स्तुतौ "अर्त्तिकमिभ्रमीति ।" उणां । ३ । ११७ । इति असच् ।) फलवृक्षविशेषः । काटाल इति भाषा ॥ (यथा भागवते । ८ । २ । १० ।
"वनैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥")
तत्पर्य्यायः । कण्टकिफलः २ । इत्यमरः । २।४।६१ ॥ महासर्ज्जः ३ फलिनः ४ फलवृक्षकः ५ स्थूलः ६ कण्टफलः ७ मूलफलदः ८ अपुष्प-फलदः ९ पूतफलः १० चम्पकोषः ११ चम्पालुः १२ कण्टकीफलः १३ रसालः १४ स्वर्गफलः १५ पानसः १६ । इति शब्दरत्नावली ॥ अस्य फल-गुणाः । मधुरत्वम् । सुपिच्छिलत्वम् । गुरुत्वम् । हृद्यत्वम् । बलवीर्य्यवृद्धिदत्वम् । श्रमदाह-विशोषनाशित्वम् । रुचिकारित्वम् । ग्राहित्वम् । परमदुर्ज्जरत्वञ्च । तद्बीजगुणाः । ईषत्कषाय-त्वम् । मधुरत्वम् । वातलत्वम् । गुरुत्वम् । रुच्यत्वम् । तत्फलविकारत्वगदोषनाशित्वञ्च ।
"बालन्तु नीरसं हृद्यं मध्यं पक्वन्तु दीपनम् ।
रुचिदं लवणाभ्यक्तं पनसस्य फलं स्मृतम् ॥"
इति राजनिर्घण्टः ॥ * ॥
"पनसः कण्टकिफलः फलाढ्योऽतिबृहत्फलः ।
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ॥
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतव्रणान् ॥
आमन्तदेव विष्टम्भि वातलं तुवरं गुरु ।
दाहकृन्मधुरं बल्यं कफमेदोविवर्द्धनम् ॥
पनसोद्भूतबीजानि वृष्याणि मधुराणि च ।
गुरूणि बद्धवर्च्चांसि सृष्टमूत्राणि संवदेत् ॥
अन्यच्च ।
"मज्जा पनसजो वृष्यो वातपित्तकफापहः ।
विशेषात् पनसं वर्ज्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥
अल्पं पनसयाकाय फलं कदलसम्भवम् ॥"
इति भावप्रकाशः ॥ * ॥
"कण्टाफलं सुमधुरं बृंहणं स्निग्धशीतलम् ।
दुर्ज्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम् ॥
तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम् ।
छर्द्दिघ्नं न च चक्षुष्यं वृष्यञ्च वातपित्तनुत् ॥
कण्टाफलमपक्वन्तु कषायं स्वादु वातलम् ।
रक्तपित्तहरं स्वादु तत्फलास्थ्यपि तद्गुणम् ॥"
इति राजवल्लभः ॥

पनसतालिका, स्त्री, (पनसं दीर्घत्वेन स्तुत्यं यत्तालम् । तद्वत् फलमस्त्यस्याः । ठन् ।) कण्टकि-फलम् । इति शब्दमाला ॥

पनसिका, स्त्री, (पनसवत् कण्टकमयाकृतिर्विद्यते यस्याः । पनस + ठन् ।) क्षुद्ररोगविशेषः । स च कर्णमध्यजातव्रणः । तल्लक्षणं यथा,
"कर्णस्याभ्यन्तरे जातां पिडकामुग्रवेदनाम् ।
स्थिरां पनसिकां तान्तु विद्याद्वातकफोत्थिताम् ॥"
तच्चिकित्सा यथा
"भिषक् पनसिकां पूर्व्वं स्वेदयित्वा विलेपयेत् ।
कल्कैर्मनःशिलाकुष्ठनिशातालकदारुजैः ॥
पक्वां विज्ञाय तां भित्त्वा व्रणवत् समुपाचरेत् ॥"
इति भावप्रकाशः ॥

पन्थाः, [इन्] पुं, पतन्ति यान्त्यनेन । (पत ऌ गतौ + "पतस्थ च ।" उणां । ४ । १२ । इति इनिः थश्चान्तादेशः ।) रथ्या । रास्ता इति भाषा ॥ (यथा, मनुः । ४ । ४५ ।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ॥")
तत्पर्य्यायः । अयनम् २ वर्त्म ३ मार्गः ४ अध्वा ५ पदवी ६ सृतिः ७ सरणिः ८ पद्धतिः ९ पद्या १० वर्त्तनी ११ एकपदी १२ । इत्यमरः । २।१।१५ ॥ पथः १३ पदविः १४ पदवी १५ सरणी १६ शरणिः १७ पद्धती १८ वर्त्तनिः १९ । इति भरतः ॥ शरणी २० वाटः २१ धर्म्मवर्त्तनम् २२ मायः २३ विवधः २४ वीवधः २५ । इति शब्द-रत्नावली ॥ * ॥

तस्य लक्षणम् ।
"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु नः कृतः ।
विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दश विस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्मिताः ।

त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरथ्यका ॥
जङ्घापथश्चतुष्पात्स्यात्त्रिपात्स्याद् गृहाङ्गणम् ।
अर्द्धपादश्चार्द्धपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परीवारः पादमात्रः समन्ततः ॥”
इति देवीपुराणे गोपुरद्वारलक्षणाध्यायः ॥ * ॥
चतुष्पथलक्षणादि यथा, —
“एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथन्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥”
इति नीलतन्त्रम् ॥ * ॥

पथगमनगुणाः ।
“अध्वा मेदःकफस्थौल्यसौकुमार्य्यविनाशनः ।
यत्तु चङ्क्रमणं नातिदेहपीडाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियशोधनम् ॥”
इति राजवल्लभः ॥ * ॥
ब्राह्मणादिभ्यः पथावकाशो देयो यथा, —
“पन्था देयो ब्राह्मणाय स्त्रियै राज्ञे ह्यचक्षुषे ।
वृद्धाय भारभुग्नाय गर्भिण्यै दुर्बलाय च ॥”
इति कौर्म्मे उपविभागे ११ अध्यायः ॥ * ॥
गोपथदानफलं यथा, —
“गोमार्गस्य तथा कर्त्ता गोलोके क्रीडते चिरम् ।”
इति प्रतिष्ठातत्त्वे हयशीर्षपञ्चरात्रम् ॥ * ॥
श्रुत्याचारादावुपचारो यथा, —
“तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥”
इति महाभारते । ३ । ३१२ । ११७ । धर्म्मवकप्रश्ने
युधिष्ठिरोक्तरम् ॥ * ॥ नरकविशेषः । यत्राटाट्यते । इति मनौ ४ अध्यायः ॥

पन्नं, त्रि, (पद्यते स्म । पद गतौ + “गत्यर्थेति ।” ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) च्युतम् । गलितम् ।
इत्यमरः । ३ । १ । १०४ ॥

पन्नः, पुं, (पन स्तुतौ + “कृवृजृ षिद्रुपनीति ।” उणां । ३ । १० । इति नः स च नित् ।) अधः-गमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पन्नगः, पुं, (पन्नं अधोगमनं पतितं वा गच्छतीति । गम लृ गतौ + “सर्व्वत्र पन्नयोरुपसंख्यानम् ।” ३ । २ । ४८ । इत्यस्य वार्त्ति इति डः । पद्भ्यां न गच्छतीति वा विग्रहः ।) सर्पः ।
इत्यमरः । १ । ८ । ८ ॥ (यथा, विष्णुपुराणे । १ । १७ । ७ ।
“पानासक्तं महात्मानं हिरण्यकशिपु तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्धगन्धर्व्वपन्नगाः ॥”)
ओषधीभेदः । पद्मकाष्ठम । इति मेदिनी ॥

पन्नगकेशरः, पुं, (पन्नगवत् केशरो यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥

पन्नगाशनः, पुं, (पन्नगं सर्पं अश्नातीति । अश ग भोजने । ल्युः । पन्नगः अशनं भक्ष्यो यस्येति वा ।) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥

पन्नगी, स्त्री, (पन्नग + जातौ ङीष् ।) पन्नगपत्नी । (यथा, भागवते । ३ । १६ । ११ ।
“तां स आपततीं वीक्ष्य भगवान् समवस्थितः ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥”)
मनसा देवी । यथा, तिथितत्त्वे ।
“पञ्चम्याममितं पञ्चे समुत्तिष्ठति पन्नगी ॥”
सर्पिणीक्षुपः । इति राजनिर्घण्टः ॥

पन्नद्धा, स्त्री, (पदि नद्धा बद्धा ।) चर्म्मपादुका ।
इति हेमचन्द्रः ॥

पन्नद्धी, स्त्री, (पदोस्तरण्योर्नद्धी ।) चर्म्मपादुका ।
इति त्रिकाण्डशेषः ॥

पपिः, पुं, (पाति लोकम् । पिबति वा । पा + “आदृगमहनजनः किकिनौ लिट् च ।” ३ । २ । १७१ । इति किः द्वित्वञ्च ।) चन्द्रः । पानकर्त्तरि त्रि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, ऋग्वेदे । ६ । २३ । ४ । “पपिः सोमं ददिर्गाः ॥”)

पपीः, पुं, (पाति लोकम् । पा रक्षणे + “यापोः कित् द्वे च ।” उणां । ३ । १५६ । इति ईक् द्वित्वञ्च ।) सूर्य्यः । चन्द्रः । इत्युणादिकोषः ॥

पपुः, पुं, (पाति रक्षतीति । “कुर्भ्रश्चेति ।” उणां । १ । २३ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च ।) पालकः । धात्री स्त्री । इत्युणादिकोषः ॥

पपरा, स्त्री, गन्धद्रव्यविशेषः । पपुंकी इति ख्याता ।
अस्यानुलेपनगुणः । पप्पापहारीरचोज्वरनाशित्वम् । इति राजवल्लभः ॥

पम्पा, स्त्री, (पाति रक्षति महर्ष्यादीन् स्वीयपवित्रसलिलदानादिभिरिति शेषः । पा पालने । “खष्प-शिल्प-शष्प-वाष्प-रूप-पम्पा तल्पाः ।” उणां । ३ । २८ । इति निपातनात् ह्रस्वत्वं मुडागमत्वं च साधुः ।) ओड्रदेशस्थनदीविशेषः ।
इत्युणादिकोषः ॥ (यथा रघुः । १३ । ३० ।
“दूरावतीर्णा पिबतीव खेदा-
दमूनि पम्पासलिलानि दृष्टिः ॥”
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥)

पम्ब, गतौ । (भ्वां-परं-सकं-सेट ।) ओष्ठ्यवर्गशेषोपधः । पम्बति । इति दुर्गादासः ॥

पय, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्मंसकं सेट ।) ङ, पयते । इति दुर्गादासः ॥

पयः [स्] क्ली, (पयते पीयते वा पय गतौ पी ङ पाने वा + “सर्व्वधातुभ्योऽसुन् ।” उणां । ४ । १८८ । इत्यसुन् ।) जलम् । (यथा, रघुः । १ । ६७ ।
“पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ॥”)
दुग्धम् । इति मेदिनी ॥ (यथा, मनुः । ३ । ८२ ।
“कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्व्वापि पितृभ्यः प्रीतिमावहन् ॥”)

पयःकन्दा, स्त्री (पयः कन्दे यस्याः ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

पयःफेनी, स्त्री, (पयो दुग्धमिव फेनमस्याः । गौरादित्वात् ङीष् ।) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥

पयश्चयः, पुं, (पयसां चयः समूहः ।) जलसमूहः ।
तत्पर्य्यायः । पृगः२ वीणः ३ । इति जटाधरः ॥

पयस्यं, त्रि, (पयसो विकारस्तत्र हितं वा । पयस् + “गोपयसोर्यत् ।” ४ । ३ । १६० । इति यत् ।) पयोविकारः । घृतदध्यादि । इत्यमरः । २ । ९ । ५१ ॥ पयोहितम् । इति मेदिनी ॥

पयस्यः, पुं, (पयः पिबतीति ।) विड़ालः । इति शब्दचन्द्रिका ॥

पयस्या, स्त्री (पयस्य + टाप् ।) दुग्धिका । क्षीरकाकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्कपुष्पिका । इति रत्नमाला ॥ कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥ आमिक्षा । इति हेमचन्द्रः ॥

पयस्वलः, पुं (पयोऽस्त्यस्य । पयस् + “अन्येभ्योऽपीति ।” वलच् ।) छागः । इति राजनिर्घण्टः ॥

पयस्विनी, स्त्री, (पयो विद्यतेऽस्याः । “अस्मायामेधास्रजो विनिः ।” ५ । २ । १२१ । इति विनिः ततो ङीष् ।) नदी । (प्रशस्तजलवत्त्वात्तथा पुण्यसलिलत्वाद् गङ्गा । यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने । २९ । १०६ ।
“परापरफलप्राप्तिः पावनी च पयस्विनी ॥”)
धेनुः । (यथा, रघुः । २ । २१ ।
“प्रदक्षिणीकृत्य पयस्विनीन्तां
सुदक्षिणा साक्षतपात्रहस्ता ॥”)
रात्रिः । इति मेदिनी ॥ काकोली । क्षीरकाकोली । दुग्धफेनी । क्षीरविदारी । छागी ।
इति राजनिर्घण्टः ॥ जीवन्ती इति भावप्रकाशः ॥
(गायत्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ९६ ।
“प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥”)

पयोगड़ः, पुं, (पयसो गड इव ।) घनोपलः ।
द्वीपः । इति शब्दमाला ॥

पयोघनः, पुं, (पयोभिर्घनः सान्द्रः ।) घनोपलः ।
इति हारावली ॥

पयोजन्मा [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।)
मेघः । इति शब्दमाला ॥

पयोधरः, पुं, (धरतीति धरः । धृ + अच् । पयसो दुग्धस्य जलस्य वा धरः ।) स्त्रीस्तनः ।
(यथा, रघुः । १४ । २२ ।
“षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥”)
मेघः । इत्यमरः । ३ । ३ । १६३ ॥ कोषकारः ।
नारिकेलम् । कशेरु । इति मेदिनी ॥

पयोधाः, [स्] पुं, (पयो जलं दधातीति । डु धाञ् धारणे + “पयसि च ।” उणां । ४ । २२९ ।
इति असिः ।) समुद्रः । जलाधारः । इत्युणादिकोषः ॥

पयोधिः, पुं, (पयांसि धीयन्तेऽस्मिन् । डु धा ञ् + “कर्म्मण्यधिकरणे च ।” ३ । ३ । ९३ । इति किः ।) समुद्रः । इति राजनिर्घण्टः ॥

पयोधिकं, क्ली, (पयोधौ समुद्रे कायति प्रकाशते इति । कै + कः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥

पयोनिधिः, पुं, (पयांसि निधीयन्तेऽस्मिन् । धा धारणे + अधिकरणे किः ।) समुद्रः । यथा,—
"न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता ।"
इति नैषधे । ४ । ५० ॥ (पय इव शुक्लाः सत्त्वगुणाः निधीयन्तेऽत्र इति विग्रहे । शिवः । यथा, महाभारते । १३ । १७ । ८७ ।
"लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ॥")

पयोरः, पुं, (पयो जलं रातीति । रा + कः ।) खदिरः । इति शब्दचन्द्रिका ॥

पयोलता, स्त्री, (पयः क्षीरं तेनाढ्या लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

पयोव्रतः, पुं, (पयोमात्रपानसाध्यो व्रतः ।) पयोमात्रपानरूपव्रतविशेषः । यथा,—
"पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा ॥"
इति मात्स्ये १५७ अध्यायः ॥ * ॥
द्वादशाहसाध्यविष्णुव्रतविशेषः । यथा,—
कश्यप उवाच ।
"एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्च्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥
सिनीवाल्यां मृदालिप्य स्नायात् क्रोडविदीर्णया ।
यदि लभ्येत वै स्रोतस्येतन्मन्त्रमुदीरयेत् ॥
त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ।
उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥
निर्व्वर्त्तितात्मनियमो देवमर्च्चेत् समाहितः ।
अर्च्चायां स्थण्डिले सूर्य्ये जले वह्नौ गुरावपि ॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्व्वभूतनिवासाय वासुदेवाय साक्षिणे ॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्व्वविद्याधिपतये भूतानां पतये नमः ॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्य्यशरीराय नमस्ते योगहेतवे ॥
नमस्त आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥
त्वं सर्व्ववरदः पुंसां वरेण्य वरदर्षभ ।
अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥
अन्ववर्त्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ।
स्पृहयन्त इवामोदं भगवान्मे प्रसीदताम् ॥
एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम् ।
अर्च्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥
अर्च्चित्वा गन्धमाल्याद्यैः पयसा स्नापयेद्विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥
गन्धधूपादिभिश्चार्च्चेद्द्वादशाक्षरविद्यया ।
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥
ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ।
निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वयम् ॥
दत्त्वाचमनमर्च्चित्वा ताम्बूलञ्च निवेदयेत् ।
जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ।
कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ॥
द्व्यवरान् भोजयेद्विप्रान् पायसेन यथोचितम् ।
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ॥
ब्रह्मचार्य्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ।
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥
पयसा स्नापयित्वार्च्चेद्यावद्व्रतसमापनम् ।
पयोभक्षो व्रतमिदं चरेद्विष्ण्वर्च्चनादृतः ॥
पूर्व्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ।
एवन्त्वहरहः कुर्य्याद्द्वादशाहं पयोव्रतम् ॥
हरेराराधनं होममर्हणं द्विजतर्पणम् ।
प्रतिपद्दिनमारभ्य यावत् शुक्लत्रयोदशीम् ॥
ब्रह्मचर्य्यमधःस्वप्नं स्नानं त्रिसवनञ्चरेत् ।
वर्ज्जयेदसदालापं भोगानुच्चावचांस्तथा ॥
अहिंस्रः सर्व्वभूतानां वासुदेवपरायणः ।
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ॥
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ।
पूजाञ्च महतीं कुर्य्याद्वित्तशाठ्यविवर्ज्जितः ॥
चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ।
सूक्तेन तेन पुरुषं यजेत सुसमाहितः ॥
नैवेद्यञ्चातिगुणवद्दद्यात् पुरुषतुष्टिदम् ।
आचार्य्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः ॥
तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ।
भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते ॥
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ।
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः ॥
अन्नाद्येनाश्वपाकांश्च प्रीणयेत् समुपागतान् ।
भुक्तवत्स्वथ सर्व्वेषु दीनान्धकृपणेषु च ॥
विष्णोस्तत् प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः ।
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचनैः ॥
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।
एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥
पितामहेनाभिहितं मया ते समुदाहृतम् ।
त्वञ्चानेन महाभागे । सम्यक् चीर्णेन केशवम् ॥
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ।
अयं वै सर्व्वयज्ञाख्यः सर्व्वव्रतमिति स्मृतम् ॥
तपःसारमिदं भद्रे दानञ्चेश्वरतर्पणम् ।
त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ।
तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥
भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥"
इति श्रीभागवते ८ स्कन्धे १६ अध्यायः ॥

पयोष्णिजाता, स्त्री, (पयोष्णी नाम्नी नदी जाता अस्याः । पृषोदरात् साधुः ।) सरस्वती नदी । इति राजनिर्घण्टः ॥

पयोष्णी, स्त्री, (पयः सलिलं उष्णं उष्णगुणं वा ऽस्याः ।) नदीविशेषः । सा विन्ध्याचलदक्षिणे प्रसिद्धा । अस्या जलगुणाः ।
"पयोष्णीसलिलं रुच्यं पवित्रं पापनाशनम् ।
सर्व्वामयहरं सौख्यबलकान्तिप्रदं लघु ॥"
इति राजनिर्घण्टः ॥

परं, क्ली, (पृ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) केवलम् । इति मेदिनी ॥ मोक्षः । यथा । कैवल्यममृतं परम् । इति मुक्तिपर्य्याये रत्नावली ॥ (ब्रह्म ब्रह्मा च । यदुक्तं श्रुतौ ।
"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । २० ।
"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम् ॥"
ब्रह्मण आयुः । यथा, मार्कण्डेये । ४६ । ४२ ।
"एवन्तु ब्रह्मणो वर्षमेकं वर्षशतञ्च तत ।
शतं हि तस्य वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्भिस्तथावर्षैः परार्द्धमिति कीर्त्यते ॥")

परं, [म्] व्य, नियोगः । क्षेपः । इति मेदिनी ॥

परः, पुं, (पृ + अप् ।) शत्रुः । इत्यमरः ॥ (यथा, रघुः । ७ । ६७ ।
"इतः परानर्भकहार्य्यशस्त्रान्
वैदर्भि । पश्यानुमता मयासि ॥")
ब्रह्मण आयुः । यथा,—
"कालसंख्यां समासेन पूर्व्वार्द्धद्वयकल्पनाम् ।
स एव स्यात् परः कालस्तदन्ते प्रतिसृज्यते ॥
निजेन तस्य मानेन चायुर्व्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
अपि च ।
"त्रीणि कल्पशतानि स्युस्तथा षष्टिर्द्विजोत्तमाः ।
ब्रह्मणः कथितं वर्षं पराख्यं तच्च तत् परम् ॥"
इति कौर्म्मे ५ अध्यायः ॥
(शिवः । यथा, तत्रैव । १३ । १७ । ६७ ।
"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः ॥")

परः, त्रि, श्रेष्ठः । (यथा, आर्य्यासप्तशत्याम् । ३५५ ।
"परमोहनाय मुक्ता निष्करुणे
तरुणि । तव कटाक्षोऽयम् ।
विशिख इव कलितकर्णः
प्रविशति हृदयं निःसरति ॥")
अरिः । दूरः । अन्यः । उत्तरः । इति मेदिनी ॥ * ॥
न्यायमते द्रव्यगुणकर्म्मवृत्तिसत्ता । इयं व्यापकजातिः । यथा,—
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥"
इति भाषापरिच्छेदे । ८—९ ॥ * ॥
परान्नादिभक्षणादेः श्रीनाशकत्वं यथा,—
"परान्नञ्च परस्वञ्च परशय्या परस्त्रियः ।
परवेश्मनि वासश्च शक्रादपि हरेच्छ्रियम् ॥"
इति गरुडपुराणम् ॥ * ॥
श्रेष्ठवाचकपरशब्दप्रयोगाः । यथा,—
"अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥

अज्ञानतिमिरान्धस्य ज्ञानदीपेन चक्षुषा ।
यः सत्यार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसंवत्सरं लभेत ।
मन्त्रज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापट्यात् स महापातकी शिव ! ॥
नास्ति वेदात् परं शास्त्रं न हि कृष्णात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीपरम् ॥
क्षमावती भूपरा न पुत्रादस्ति परः प्रियः ।
न च दैवात् परः शक्तो व्रतं नैकादशीं विना ॥
शालग्रामात् परो यन्त्रो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वत्याः परा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥”
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

परःशतं, त्रि, शतात् परम् । शताधिकसंख्या । इत्यमरः । ३ । १ । ६४ ॥

परःश्वः, [स्] व्य, श्वो दिनात् परमह्नः परःश्वः परः सहस्रवत् पारस्करादित्वात् सुट् परःश्व इति मधुः । सुटं नेच्छन्त्यन्ये परश्व इत्याहुः । अतिक्रान्ते पूर्व्वतरे दिने परश्वो जात इति प्रयोगो गौणः तत्र परश्व तत् श्वस्तनि कर्म्मधारयः । इति भरतः ॥ श्वः पराह्नः । इत्यमरः । ३ । ४ । २२ ॥ परशु । इति भाषा ॥

परःसहस्रं, त्रि, सहस्रात् परम् । सहस्राधिकसंख्या । इत्यमरटीका ॥

परकीयं, त्रि, (परस्येदम् । “गहादिभ्यश्च ।” ४ । २ । १३८ । इति छः । “कुग्जनस्य परस्य च ।” इति कुक ।) परसम्बन्धि । (यथा, मनुः ।४।२०१ ।
“परकीयनिपानेषु न स्नायाच्च कदाचन ॥”)

परकीया, स्त्री, (परकीय + टाप् ।) नायिकाभेदः । अस्या लक्षणं यथा । अप्रकटपरपुरुषानुरागा । सा च द्विविधा । परोढा १ कन्यका च २ । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा ॥ * ॥
परोढा यथा,—
“अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः
समीरोऽयं वेलादरविलसदेलापरिमलः ।
इयं प्रावृड्धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि ! किमपि कर्त्तुं त्वरयते ॥” * ॥
गुप्ताविदग्धालक्षिताकुलटानुशयानामुदिताप्रभेदानां परकीयायां एवान्तर्भावः । गुप्ता त्रिविधा । वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वर्त्तमानसुरतगोपना च ३ ।
त्रिविधा यथा,—
“श्वश्रूः क्रुध्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यातरस्तस्मिन् किन्तु न मन्दिरे सखि ! पुनः स्वापो विधेयो मया ।
आखोराक्रमणाय कोणकुहरादुत्फालमातन्वती मार्ज्जारी नखरैः खरैः क्षतवती कां कां न मे दुर्द्दशाम् ॥” * ॥

विदग्धा द्विविधा । वाग्विदग्धा १ क्रियाविदग्धा चेति २ । प्रथमा,—
“निविडतमतमालमल्लिवल्ली-
विचकिलराजिविराजितोपकण्ठे ।
पथिकसमुचितस्तवाद्य तीव्रे
सवितरि तत्र सरित्तटे निवासः ॥”
द्वितीया यथा, —
“दासाय भवनगाथे वदरीमपनेतुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥” * ॥
लक्षिता यथा,—
“यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात् ।
यद्भवतु तद्भवतु वा विफलस्तव गोपनायासः ॥” * ॥
कुलटा यथा,—
“एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाद्वलमुद्वमन्ति न लजन्त्येते पुनर्नायकान् ।
त्रैलोक्ये तरवः फलानि सुवते नैवारभन्ते जनान्
धातः ! कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ॥”
अपि च ।
“पृथ्वी तावत्त्रिकोणा विपुलनदनदीग्रावकद्धं तदद्ध्रं
तस्यामेवास्ति शैलो विपिनमपि तथा क्षेत्रकासारकूपाः ।
लोकानामङ्गनारी शिशुरपि जरसः कोऽपि रोगी विवेकी
मिथ्यावादी समायं मुखरसुखवरः पुंश्चली पुंश्चलीति ॥” * ॥
अनुशयाना त्रिविधा ।
वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तृगमनानुमानेन प्रत्येकं उदाहरणानि ।
“समुपागतवति चैत्रे निपतति पत्रे लवङ्गलतिकायाः ।
सुदृशः कपोलपाली शिव शिव तालीदलद्युतिं लेभे ॥” * ॥
“निद्रालुकेकिमिथुनानि कपोतपोत-
व्याधूततनमहीरुहपल्लवानि ।
तत्रापि तन्वि ! न वनानि कियन्ति सन्ति
खिद्यस्व न प्रियतमस्य गृहं प्रयाहि ॥
कर्णकल्पितरसालमञ्जरी-
पिञ्जरीकृतकपोलमण्डलः ।
विच्युतस्नयनवारिधारया
राधया मधुरिपुर्निरीक्ष्यते ॥” * ॥
मुदिता यथा,—
“गोष्ठेषु तिष्ठति पतिर्वधिरा ननन्दा
नेत्रद्वयस्य न च पाटवमस्ति यातुः ।
इत्थं निगद्य सुतनुः कुचकुम्भसीम्नि
रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥” * ॥
कन्यका यथा,—
‘किञ्चित्कुञ्चितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं
प्रान्तभ्रान्तविलोचनद्युतिभुजा पर्य्यस्तकर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्व्वाणा नृपकन्यका सुललितं सख्याजमालोकते ॥”
इति रतिमञ्जरी ॥

परक्षेत्रं, क्ली, (परस्य क्षेत्रं पत्न्यादि ।) परपत्नी । (यथा, मनुः । ३ । १७५ ।
“तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥”)
परशरीरम् । परभूमिः । यथा,—
“वृषापैहि परक्षेत्रादायाति क्षेत्ररक्षकः ।”
इति चन्द्रालोकः ॥
(तथा च मनुः । ८ । ३४१ ।
“द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥”)

परग्रन्थिः, पुं, (परेण ग्रन्थिर्यत्र ।) पर्व्वावधिः । अङ्गुलिपर्व्व । इति हारावली ॥

परच्छन्दः, त्रि, (परस्य छन्दो यत्र ।) पराधीनः । इति हेमचन्द्रः ॥

परच्छिद्रं, क्ली, (परस्य छिद्रम् ।) परदोषः । यथा,
“नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यति ॥”
इति गरुड़पुराणम् ॥

परजातः, त्रि, (परेण जातः । परपुष्टत्वात्तथात्वम् ।) परैधितः । औदासीन्येन परपुष्टः । परपोषितत्वात् । परस्माज्जातः । इत्यमरभरतौ ॥ अन्येनोत्पन्नश्च ॥ (कोकिले पुं । एष हि काकेन पुष्टो भवतीति प्रसिद्धिः ॥)

परजितः, त्रि, (परेण जितः ।) परपुष्टः । शत्रुणा पराजितः । इति केचित् ॥

परञ्जः, पुं, (परं जयतीति । जि जये + बाहुलकात् डः ।) तैलयन्त्रम् । क्षुरिकाफलः । फेनः । इति मेदिनी ॥

परञ्जनः, पु, (परायाः पश्चिमस्या दिशो जनः स्वामी । निपातनात् साधुः ।) वरुणः । इति हेमचन्द्रः ॥

परञ्जयः, पुं, (परां पश्चिमां दिशं जयति स्वामित्वेन । जि + अच् । सर्व्वनाम्नः वृत्तौ पुवद्भावः सुम् च ।) वरुणः । इति त्रिकाण्डशेषः ॥ शत्रुजयकर्त्ता । परान् जयतीति खप्रत्ययनिष्पन्नः ॥

परतन्त्रः, त्रि, (परस्तन्त्रं प्रधानं यस्य ।) पराधीनः । इत्यमरः ॥ (यथा, महाभारते । १३।१।१५ ।
“परतन्त्रं कथं हेतुमात्मानमनुपश्यसि ।
कर्म्मणां हि महाभाग ! सूक्ष्मं ह्येतदतीन्द्रियम् ॥”
परस्य तन्त्रं इति विग्रहे क्ली । परकीयशास्त्रम् । परं श्रेष्ठं तन्त्रमिति विग्रहे । उत्कृष्टशास्त्रम् । उत्तमपरिच्छदम् ॥)

परत्रभीरुः, त्रि, (परत्र परलोकान्तरघटनाविषये भीरुः ।) धार्म्मिकः । परकालभयशीलः । यथा,—

"परत्रभीरु धर्म्मिष्ठमुदयुक्तं क्रोधवर्ज्जितम् ॥"
इति मिताक्षरायां कात्यायनः ॥

परत्वं, क्ली परस्य भावः । परता । न्यायमते तद्-
द्विविधम् । दैशिकम् १ । तत्तु बहुतरमूर्त्त-
संयोगज्ञानजन्यगुणः । कालिकम् २ तच्च बहु-
तरकालान्तरितत्वज्ञानजन्यगुणः । एतद्द्वयं
मूर्त्तपदार्थगुणः । दैशिकपरत्वस्यासमवायि
कारणं दिक्शरीरसंयोगः । कालपरत्वस्यासम-
वायिकारणं कालपिण्डसंयोगः । ते अपेक्षा-
बुद्धिजन्ये । तन्नाशनाश्ये च । यथा,—
"परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् ।
दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥
परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी तु संयोगः कालपिण्डयोः ॥
अपेक्षा बुद्धिनाशाच्च नाशस्तेषां निरूपितः ।"
इति भाषापरिच्छेदः ॥

परदारः, (परस्य दाराः ।) परभार्य्या । तद्गमने
दोषो यथा, कर्म्मलोचनम् ॥
"परदाररताश्चैव परद्रव्यहराश्च ये ।
अधोऽधो नरके यान्ति पीड्यन्ते यमकिङ्करैः ॥"
"ब्राह्मणः क्षत्त्रियो वैश्यो यो रतः परयोषिति ।
याति तस्यापूजितस्य रुष्टा लक्ष्मीर्गृहादपि ॥
इहातिनिन्द्यः सर्व्वत्र नाधिकारी स्वकर्म्मसु ।
परत्रैवान्धकूपे च यावदर्कशतं वसेत् ॥
अपि च ।
"किन्तज्जपेन तपसा मौनेन च व्रतेन च ।
सुरार्च्चनेन तीर्थेन स्त्रीभिर्यस्य मनो हृतम् ॥
सर्व्वमायाकरण्डञ्च धर्म्ममार्गार्गलं नृणाम् ।
व्यवधानञ्च तपसां दोषाणामाश्रमं परम् ॥
कर्म्मबन्धनिबद्धानां निगडं कठिनं सुत ॥
प्रदीपरूपं कीटानां मीनानां वडिशं यथा ॥
विषकुम्भं दुग्धमुखमारम्भे मधुरोपमम् ।
परिणामे दुःखबीजं सोपानं नरकस्य च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३० । ६१
अध्यायः ॥ * ॥
"यस्तु पाणिगृहीतीं तां हित्वान्यां योषितं व्रजेत् ।
अगम्यागमनं तद्धि सद्यो नरककारणम् ॥
नित्यं नैमित्तिकं काम्यं यागयोग्यव्रतादिकम् ।
क्षेत्रतीर्थाटनं तस्मिन् वासो धर्म्मक्रियादिकम् ॥
स्वाध्यायादि तपो दैवं पैत्रं कर्म्म वरानने ॥
यात्येतन्निष्फलं सर्व्वं परस्त्रीगमनान्नृणाम् ॥
परदाराभिगमनात् कोटि एकादशीव्रतम् ।
अपरं किन्तु वक्तव्यं निष्फलं निरयं स्थितिः ॥
सत्यं सत्यं पुनः सत्यं सत्यमेव ब्रवीमि ते ।
परयोनौ पतन् बिन्दुः कोटिपूजां विनाशयेत् ॥"
इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥ * ॥
अपि च ।
"त्याज्यं धर्म्मान्वितैर्नित्यं परदारोपसेवनम् ।
नयन्ति परदारा हि नरकानेकविंशतिम् ॥
सर्व्वेषामेव वर्णानामेष धर्म्मो ध्रुवोऽव्यक ॥
एवं पुरा सुरपते । देवर्षिरसितोऽव्ययः ।
प्राह धर्म्मव्यवस्थानं खगेन्द्रायारुणाय हि ।
तस्मात् सुदूरतो वर्ज्जेत् परदारान् विचक्षणः ।
नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥"
इति वामने ६३ अध्यायः ॥

परदुःखं, क्ली, (परेषां दुःखम् ।) अन्यजनपीडा ।
यथा,—
"त्यक्तात्मसुखभोगेच्छाः सर्व्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥"
इत्यग्निपुराणम् ॥

परद्वेषी, [न्] त्रि, (परेभ्यो द्वेष्टीति । पर । द्विष्
+ णिनिः ।) विदूषकः । परद्वेष्टा । इति शब्द-
माला ॥

परध्यानं, क्ली, (परं श्रेष्ठं ध्यानम् ।) ध्यान-
विशेषः । यथा, —
"ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ॥
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥"
इति गरुड़पुराणम् ॥
(परस्य ब्रह्मणोध्यानं यद्वा परं ब्रह्मविषयकं
ध्यानमिति । ब्रह्मचिन्तनम् ॥ परेषां ध्यानमिति-
विग्रहे । परानिष्टचिन्तनम् ॥)

परन्तपः, त्रि, (परान् शत्रून् तापयतीति । तप
सन्तापे "द्विषतपरयोस्तापेः ।" ३ । २ । ३९ ।
इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ ।
इति उपधाया ह्रस्वस्ततो मुम् ।) परतापी ।
(यथा, भट्टिः । १ । १ ।
"अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ॥")
(जितेन्द्रियः । इति चिन्तामणिः ॥ तामस-
मनोः पुत्त्रभेदः । यथा, हरिवंशे । ७ । २४ ।
"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोशनः ।
तपोरतिरकल्माषस्तन्वीधन्वी परन्तपः ।
तामसस्य मनोरेते दशपुत्त्रा महाबलाः ॥"
नृपविशेषः । असौ हि मगधेश्वरः । यदुक्तं
रघौ । ६ । २१ ।
"असौ शरण्यः शरणोन्मुखाना-
मगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा ॥")

परपदं, क्ली, (परं श्रेष्ठं पदम् ।) श्रेष्ठस्थानम् ।
मुक्तिः । यथा,--
"कल्याणानां निदानं कलिमलमथनं जीवनं
सज्जनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थि-
तस्य ।"
इति महानाटकम् ॥
(परस्य परेषां वा पदं स्थानमितिविग्रहे-
पराश्रयम् ॥)

परपाकनिवृत्तः पुं, (परार्थात् पाकात् निवृत्तः ।)
परोद्देश्यकपाकरहितः । पञ्चयज्ञाकर्त्ता । यथा,-
"गृहीत्वाग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्त्तितः ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपाकरतः, पुं, (परस्य पाके रतः ।) परपाक-
रुचिः । प्रातः पञ्चयज्ञान्निर्व्वर्त्त्य परान्नभोजी ।
यथा,—मिताक्षरायां प्रायश्चित्ताध्याये ।
"पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥" * ॥
परपाकनिवृत्तपरपाकरतयोरन्नभोजने दोषो
यथा,—
"परपाकनिवृत्तस्य परपाकरतस्य च ।
अपचस्य च भुक्तान्नं द्विजश्चान्द्रायणञ्चरेत् ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपिण्डादः, त्रि, (परस्य पिण्डं अन्नादिकं अत्तीति ।
अद् लौ भक्षणे + "कर्म्मण्यण् ।" ३ ।२।१। इति
अण ।) परान्नोपजीवी । इत्यमरः ।३।१।२० ॥

परपुरुषः, पुं, (परः श्रेष्ठः पुरुषः ।) विष्णुः । इति
त्रिकाण्डशेषः ॥ (परोऽन्यः पुरुषः ।) अन्यपुमान् ।
उपनायकः । यथा, —
"राजन् जीवावधानं कुरु शृणु निभृतं प्रेय-
सीनां कुचेष्टा
रक्ता ते कीर्त्तिकान्ता जगदटनपरा विश्वभोग्या
परा श्रीः ।
या वा पाणौ गृहीता विधिवदसिलता शुद्ध-
धारेति मत्वा
सोत्कण्ठं सापि नित्यं परपुरुषशतं मारभावा
दुपैति ॥"
इति कर्णाटराजस्तुति कालिदासः ॥

परपुष्टः, पुं, (परेण काकेन पुष्टः पालितः । डिम्ब-
स्फोटनाक्षमया कोकिलया हि नीडस्थं
काकडिम्बमपसार्य्य स्वडिम्बं तत्र स्थापितं काकश्च
निजडिम्बबुद्ध्या तत्परिपाल्यते इति प्रसिद्धेरस्य
तथात्वम् ।) कोकिलः । इति मेदिनी ॥ परेण
पोषिते त्रि । इति धरणिः ॥

परपुष्टमहोत्सवः, पुं, (परपुष्टानां कोकिलानां
महोत्सवो यत्र । आम्रमुकुलोद्गमे हि कोकि-
लानां आनन्दो जायते ।) आम्रः । इति शब्द-
माला ॥

परपुष्टा, स्त्री, (परेण परपुरुषेण पुष्टा पालिता ।)
वेश्या । इति मेदिनी ॥ पराश्रया । इति शब्द-
चन्द्रिका ॥ परसाड़ा इति भाषा ॥

परपूर्व्वा, स्त्री, परोऽन्यः पूर्व्वो भर्त्ता यस्याः सा
पत्यन्तरग्रहणात् प्रागन्येन गृहीतासीदित्यर्थः ।
अस्या लक्षणं यथा, मानवे ५ अध्यायः ॥
"पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
अस्याः प्रकारो यथा,—
"परपूर्व्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥"
इति मिताक्षरायां नारदः ॥

परप्रतिनप्ता, [ऋ] } पु, (प्रतिनप्तुः परः
परप्रपौत्रः } अनन्तरः ।) वृद्धप्रपौत्रः । इति हेमचन्द्रः ॥

परभागः, पुं, (परस्य श्रेष्ठस्य भागः ।) गुणोत्कर्षः । इति हेमचन्द्रः ॥ (यथा, रघुः । ५ । ७० ॥
"आभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदशनार्च्चिरिव त्वदीयम् ॥")
सुसम्पत् । इति त्रिकाण्डशेषः ॥ शेषांशश्च ॥

परभुक्ता, स्त्री, (परेण परपुरुषेण भुक्ता ।) अन्यपुरुषसम्भोगविशिष्टा । यथा,—
"परभुक्तां कान्तां यो भुङ्क्ते स नराधमः ।
स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
न सा दैवे न सा पैत्र्ये पाकार्हा पापसंयुता ।
तस्या आलिङ्गनं भर्त्ता भवश्रीस्तेजसा हतः ॥
देवताः पितरस्तस्य हव्यदानं च तर्पणम् ।
सुखिनो न भवन्त्यवमित्याह कमलोद्भवः ॥
तस्माद्यत्नेन भार्य्याश्च रक्षणं कुरुते सुधीः ।
अन्यथा पापिनीभर्त्ता निश्चितं नरकं व्रजेत ॥
पदे पदे सावधानः कान्तां रक्षति पण्डितः ।
न प्रतीतिस्त्यक्तौ योषा दोषागाराश्च कण्टिका ॥
कलत्रं पाकपात्रञ्च सदा रक्षितुमर्हति ।
परस्पर्शादशुद्धाश्च शुद्धा स्वस्पर्शने सदा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः ॥ * ॥
अन्येन भक्षिते त्रि ॥

परभृत्, पु, (परान् कोकिलान् बिभर्त्तीति । डु भृञ्‌ धारणपोषणयोः + क्विप् । परैर्भ्रियते इति केचित् ।) काकः । इत्यमरः । २ । ५ । २० ॥ (परजनपोषके, त्रि । यथा, भागवते । २ । २ । ५ ।
"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")

परभृतः, पु, (परेण काकेन भृतः पुष्टः ।) कोकिलः । इत्यमरः । २ । ५ । १९ ॥ (यथा, मृच्छकटीये ।
"परभृत इव नीडे रक्षितो वायसीभिः ॥"
स्त्रियां टाप् । यथा, रघौ । ८ । ४७ ।
"परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः ॥"
तथाच कुमारे । ६ । २ ।
"एतयर्ध्वरिवाभ्यासे मधौ परभृतोन्मुखी ॥"
अत्र मल्लिनाथः । "परभृतया कोकिलया उन्मुखी सुस्वरा । परभृतेति क्रियाशब्दविवक्षायां 'जातेरस्त्री' इति ङीप् प्रत्ययो न भवति । अथवा भरणं भृत् सम्पदादित्वात् क्विप् । परैः भृत् यस्यास्तया परभृता इति व्यासेन व्याख्यातम् । परमप्रकाशकारस्तु परैः भ्रियते इति कर्म्मणि क्विपमाह ॥") परपोषित त्रि ॥

परम्, व्य, (पॄ पूर्त्तौ । अम् ।) नियोगः । क्षेपः । इति मेदिनी ॥ पश्चात् ॥ (किन्त्वर्थे । यथा पञ्चतन्त्रे ।
"तेषां सर्व्वे शास्त्रपारगाः परं बुद्धिरहिताः ॥"
अधिकम् । यथा, रघुः । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ॥"
अनन्तरम् । यथा, तत्रैव । १ । ६६ ।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ॥")

परम, व्य, अनुज्ञा । इति मेदिनी ॥ हाँ इति भाषा । तथा च । ओमेवं परमं मते । इत्यमरः । ३ । ४ । १२ ॥ त्रीणि मते अनुमतौ । ओं कुरु ओमित्युक्तवतः । एवं वाढं एवं यदाह भगवान् । परमन्ते आवसं ममेदं परमम् । अयं प्रकारेऽपि । इति भरतः ॥

परमः, त्रि, (परं उत्कृष्टं मातीति । "आतोऽनुपसर्गे कः ।" ३ । २ । ४ । इति कः ।) परः । उत्कृष्टः । इति मेदिनी ॥ (यथा, मनुः । ९ । ३१९ ।
"सर्व्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥")
प्रधानम् । (यथा, मनुः । ६ । ९६ ।
"एवं संन्यस्य कर्म्माणि स्वकार्य्यपरमोऽस्पृहः ॥")
आद्यः । ओङ्कारः । इति विश्वः ॥ (यथा, कुमारे । ६ । ३५ ।
"ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् ॥")
अग्रसरः । इति हेमचन्द्रः ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ५१ ।
मन्त्रवित् परमोमन्त्रः सर्व्वभावकरो हरः ॥")

परमगतिः, स्त्री, (परमा गतिः ।) मुक्तिः । मोक्षः । इति त्रि । यथा । गुणातीतोऽपीशस्त्रिगुणसहितवक्त्राचरमयस्त्रिमूर्त्तिर्यः सृष्टिस्थितिविलयकर्म्माणि कुरुते । कृपापारावारः परमगतिरेव त्रिजगतां नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥ इति मङ्गलवादः ॥ तस्या लक्षणं यथा,—
"यां विप्राः सत्तः शान्ता विशुद्धा ज्ञाननिश्चयाः ।
गतिं गच्छन्ति सन्तुष्टास्तामाहुः परमां गतिम् ॥"
इति महाभारते मोक्षधर्म्मः ॥

परमगवः, पु, स्त्री, परमश्चासौ गौश्चेति श्रेष्ठगौः ।

परमपदः, पु क्ली, (पद्यते ज्ञानिभिः प्राप्यते इति पदम् । ततः कर्म्मधारयः ।) श्रेष्ठस्थानम् । परदेवताचरणः । यथा । स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम् । स गन्धर्व्वश्रेणीपतिरपि कवित्वामृतनदीनदीनः पर्य्यन्ते परमपदलीनः प्रभवति ॥ इति कर्पूराख्यस्तोत्रम् ॥

परमब्रह्मन्, [न्] क्ली, (परमं ब्रह्म ।) परमेश्वरः । नारायणः । यथा ।

सत्यतपा उवाच ।
"यदेतत् परमं ब्रह्म त्वया प्रोक्तं महामुने ।।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः ॥
अनामगोत्ररहितममूर्त्तं मूर्त्तिवर्ज्जितम् ।
कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्ज्जितम् ॥
तस्य संज्ञां कथय येन जानाम्यहं गुरो ।॥"

दुर्व्वासा उवाच ।
"यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते ।
स देवः पुण्डरीकाक्षः स्वयं नारायणः परः ॥
स यज्ञैर्विविधैरिष्टैर्दानैर्नैव सत्तम ।।
प्राप्यते परमो देवः स्वयं नारायणो हरिः ॥"
इति वराहपुराणम् ॥

परमर्षिः, पुं, (परमश्चासौ ऋषिश्चेति ।) तस्य व्युत्पत्तिर्यथा,—
"ऋषिरित्येष गतौ धातुर्विद्यासत्यतपःश्रुतैः ।
एष सन्निचयो यस्मात् ब्रह्मणश्च ततस्त्वृषिः ॥
विश्रुतिसमकालन्तु बुद्ध्या व्यक्तिरृषिस्त्वयम् ।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः ॥
गत्यर्थादृषतेर्धातोर्नामानि वृत्तिकारणम् ।
यस्मादेष स्वयं भूतस्तस्माच्च ऋषिता मता ॥"
इति मात्स्ये १२० अध्यायः ॥
भेलादिऋषिविशेषः । इति त्रिकाण्डशेषः ॥ (वेदव्यासो हि परमर्षिः । यथा, महाभारते । १ । १ । १७ ।
"द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा ॥")

परमस्वधर्म्मा, [न्] त्रि, परमस्वो धर्म्मो यस्य । इति कर्म्मधारयपूर्व्वपदबहुव्रीहौ सिद्धान्तकौमुदी ॥

परमहंसः, पुं, (परमः श्रेष्ठः हंसः सोऽहं आत्मा यस्य ।) सन्न्यासिविशेषः । अस्य लक्षणं यथा । जातरूपधरो निर्द्वन्द्वो निराग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले भैक्षमाचरन् लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतवासी निष्प्रयत्नो निर्म्ममः शुक्लध्यानपरायणः अध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनाय सन्न्यासेन देहत्यागं करोति यः स एव परमहंसो नामेति जीवन्मुक्तिविवेकः ॥ (अयं हि चतुर्व्विधावधूतेषु श्रेष्ठः । यदुक्तं महानिर्व्वाणतन्त्रे ।
"चतुर्णामवधूतानां तुरीयो हंस उच्यते ।
त्रयोऽन्ये भोगयोगाढ्या मुक्ताः सर्व्वे शिवोपमाः ॥"
परमहंसेन हि यज्ञोपवीतादिचिह्नानि परित्यज्य कौपीनादिकं धारणीयम् । यदुक्तं सूतसंहितायां ज्ञानयोगे ।
"परमहंसस्त्रिदण्डञ्च रज्जुं गोबालमिश्रितम् ।
शिक्यं जलपवित्रञ्च पवित्रञ्च कमण्डलुम् ॥
पक्षिणीमजिनं सूचीं खनित्रं खनित्रीं कृपाणिकाम् ।
शिखां यज्ञोपवीतञ्च नित्यकर्म्म परित्यजेत् ॥
कौपीनं छादनं वस्त्रं कन्थां शीतनिवारिकाम् ।
योगपट्टं बहिर्वस्त्रं पादुकां छत्रमद्भुतम् ॥
अक्षमालाञ्च गृह्णीयात् वैणवं दण्डमव्रणम् ।
अग्निरित्यादिभिर्मन्त्रैः कुर्य्यादुद्धूलनं सदा ॥
आमिति च त्रिभिः प्रोक्थ परमहंसस्त्रिपुण्ड्रकम् ॥"
अविदुषा परमहंसेन एकदण्डेन भाव्यम् । विदुषा तु दण्डादिकं किमपि न धारणीयम् ॥ यदुक्तं निर्णयसिन्धौ । "परमहंसस्यैकदण्ड एव सोऽप्यविदुषः । विदुषान्तु सोऽपि नास्ति । न दण्डं न शिखां नाच्छादनं धरति परमहंसः ॥" परमहंसास्तु केवलं प्रणवजपतत्परा एव भवन्ति । यदुक्तं सूतसंहितायाम् ।
"प्रणवाद्यास्त्रयोवेदाः प्रणवे पर्य्यवस्थिताः ।
तस्मात् प्रणवमेवैकं परमहंसः सदा जपेत् ॥
विविक्तदेशमाश्रित्य सुखासीनः समाहितः ।
यथाशक्ति समाधिस्थो भवेत् हंसाश्रिणां वरः ॥"
परमहंसास्तु "तत्त्वमसि" इत्यादि महावाक्यान

लम्बनेन आत्मज्ञानानुशीलिनो भवन्ति "सोऽहं" "शिवोऽहं" इत्यादि वदन्तस्तत्त्वज्ञानावलम्बनस्य परिचयं प्रयच्छन्ति च। एषामध्यक्षो हि स्वामीत्याख्यया प्रसिद्धः। एते हि तीर्थभ्रमणनिपुणास्तीर्थस्थानस्थाश्च। मृतस्य परमहंसस्य शरीरं भूमौ निखातत्वम्। यदुक्तं वायुसंहितायाम्।

"मृते न दहनं कार्य्यं परमहंसस्य सर्व्वदा।
कर्त्तव्यं खननं तस्य नाशौचं नोदकक्रिया॥"

परमहंसस्तु दण्डिपरमहंसावधूतपरमहंसभेदेन द्विविधः। ये तु दण्डं परित्यज्य पारमहंस्यव्रतावलम्बनं कुर्व्वन्ति ते दण्डिपरमहंसाः। ये चावधूतदत्तात्रेयेण परमहंसास्ते एवावधूतपरमहंसाः। परं सर्व्वे एव प्रणवोपासकाः इति॥ * ॥

शुक्लयजुर्व्वेदगत उपनिषद्विशेषः। इति मुक्तिकोपनिषत्॥)

परमाणुः, पुं, (परमः सर्व्वचरमकोऽणुः।) पृथिव्यादिभूतचतुष्टयानां द्व्यणुकानामवयवः। स च नित्यः निरवयवः ततः किमपि सूक्ष्मं नास्ति। यथा, —

"नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥"

पारिमाण्डल्यनामकतत्परिमाणन्तु न कस्यापि कारणम्। यथा,

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

जलादिपरमाणुरूपस्य नित्यत्वम्। पार्थिवपरमाणुरूपस्यानित्यत्वम्। पार्थिवपरमाणुरूपस्यानित्यत्वम्। यथा, भाषापरिच्छेदे॥

"जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।"

तैरेव परमाणुभिरादावुपादानैर्द्व्यणुकत्रसरेण्वादिक्रमेण स्थूलक्षितिजलतेजोमरुतः सृजति परमेश्वरः। यथा आयोजनं परमाणुकर्म्म तथा च सर्गाद्यकालीनं द्व्यणुकारम्भकपरमाणुकर्म्म प्रयत्नजन्यं प्रयत्नवदात्मसंयोगजन्यं वा कर्म्मत्वात् अस्मदादिशरीरकर्म्मवत् इति कुसुमाञ्जलिः॥ प्रलयेऽतिस्थूलस्थूलनाशानन्तरं परमाणुक्रियाविभागपूर्व्वसंयोगनाशादिक्रमेण द्व्यणुकनाशात्तिष्ठन्ति परमाणव एवेति। यथा, —

"शोधूयमानास्तिष्ठन्ति प्रलये परमाणवः।"

इति प्राचीनकारिका॥

तस्य महत्त्वाभावादतीन्द्रियत्वम्। यथा। महत्त्वं षड्विधे हेतुरिति भाषापरिच्छेदः॥ * ॥

कालविशेषः। यथा, श्रीभागवते ३।११।४-५॥

"स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतो विशेषभुग् यस्तु कालः स परमो महान्॥
अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्॥"

अस्यार्थः। एतदेव प्रपञ्चयति स इत्यादिना। सतः प्रपञ्चस्य परमाणुतां परमाण्ववस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैवाविशेषं धाकल्यं यो भुङ्क्ते स परममहान्। अयमर्थः ग्रहर्क्षताराचक्रस्थ इत्यादिना यत् सूर्य्यपर्य्यटनं वक्ष्यति तत्र सूर्य्यो यावता परमाण्वंशमतिक्रामति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्व्वं भुवनकोषमतिक्रामति स परममहान् संवत्सरात्मकः तस्यैवाहरात्रयुगमन्वन्तरादिक्रमेण द्विपरार्द्धान्तत्वमिति। तथा च पञ्चमे सूर्य्यगत्यैव कालादिविभागं वक्ष्यति।५। इदानीं द्व्यणुकादिलक्षणपूर्व्वकं मध्यमकालावस्थां कथयति द्वौ परमाणू अणुः स्यात् त्रयोऽणवस्त्रसरेणुः स तु प्रत्यक्ष इत्याह जालार्केति गवाक्षप्रविष्टार्करश्मिष्ववगतः कोऽसौ योऽतिलघुत्वेन खमेवानुपतन् अगात् गतः। न गामिति पाठे खमेवानुपतन्नवगतः न तु गां पृथ्वीम्। इति श्रीधरस्वामी॥

परमाण्वङ्गकः, पुं, (परमाणुरङ्गं यस्य। कप्।) विष्णुः। इति शब्दमाला॥

परमात्मा, [न्] पुं, (परमः केवलः आत्मा। परं ब्रह्म। तत्पर्य्यायः। आपोज्योतिः २ चिदात्मा ३। यथा,

"परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः।
कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

(विष्णुः। यथा, महाभारते। १३। १४९।१५।

"पूतात्मा परमात्मा च मुक्तानां परमा गतिः॥"

महादेवः। यथा, तत्रैव। १३। १७। १३७।

"प्रीतात्मा परमात्मा च प्रयतात्मा प्रधानधृक्॥")

परमाद्वैतः, पुं, (परमः अद्वैतः द्वैतवर्ज्जितः।) विष्णुः। यथा, —

"नमस्ते ज्ञानसद्भाव नमस्ते ज्ञानदायक।
नमस्ते परमाद्वैत नमस्ते पुरुषोत्तम।॥"

इति गरुड़पुराणम्॥

परमान्नं, क्ली, देवपित्रन्नत्वात् परममुत्कृष्टमन्नम्। परमाणामुत्कृष्टानां देवादीनामन्नमिति वा। इति भरतः॥ तत्पर्य्यायः। पायसः २। इत्यमरः। २। ७। २४॥ क्षीरिका ३। तस्य पाकप्रकारो यथा, —

"शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत्।
ते सिद्धाः क्षीरिका ख्याता सा सिताज्ययुतोत्तमा॥"

अस्य गुणाः।

"क्षीरिका दुर्ज्जरा बल्या धातुपुष्टिप्रदा गुरुः।
विष्टम्भिनी हरेत् पित्तरक्तपित्ताग्निमारुतान्॥"

इति भावप्रकाशः॥

परमायुः, [स्] क्ली, (परमं आयुः।) जीवितकालः। यथा, —

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह।
परमायुरिदं प्रोक्तं नराणां करिणामिह॥
अब्दा द्वात्रिंशदश्वानां शुनां द्वादशवत्सराः।
पञ्चविंशतिवर्षाणि खरस्य करभस्य च॥
चतुर्व्विंशतिरब्दानां वृषस्य महिषस्य च।
छागसूकरवस्तादिपशूनां षड्दशान्विताः॥"

इति शब्दमाला॥ * ॥

अथायुरानयनम्।

"अज्ञानादायुषः सर्व्वं विफलं कीर्त्तितञ्च यत्।
तस्मादानयनं तस्य स्फुटार्थमभिधीयते॥
नीचोनितस्य खेटस्य भागस्तुङ्गगुणो भवेत्।
चेष्टा केन्द्रन्तु चेत् षड्भाद्धिकं चक्रशोधितम्॥
नान्यथा तस्य भागादि चेष्टा गुणक उच्यते।
गुणश्चेत् षष्टि६०तो न्यूनं तदा द्वाशं समानलः ३०॥
एवं तुङ्गगुणश्चेष्टा गुणो यत् स्यात् तयोर्वधात्।
मूलं कलादिकं तत् स्याद्गुणकस्फुट उच्यते॥
अथाश्रयगुणं वक्ष्ये क्षेत्रादिसप्तवर्गजम्।
वर्गे क्षेत्रादिके स्वर्क्षे ग्राह्यस्त्रिंशत्३० कलागुणः॥
अधिमित्रगृहे तत्त्वम् २५ मित्रे विंशतिरीरिताः ... २१। ४०।
समे पञ्चदश ग्राह्याः शत्रौ स्वत्र्यंशकोरगाः८।२०
पञ्चाद्यरौ५ तदैक्यं यत् क्षेत्रोत्थगुणयुक् पुनः।
स्वर्क्षे वर्गोत्तमे स्वांशे स्वत्र्यंशे स्यादयं गुणः॥
अधीष्टर्क्षे युगांशोनस्त्र्यंशोनो मित्रदेशनि।
समे द्व्यंशो रिपौ त्र्यंशो युगांशस्त्वतिशत्रुभे॥
एव स्यादाश्रयगुणो विशेषो यः स उच्यते।
स्वत्र्यंशकः स्वांशको वा वर्गोत्तमगतोऽपि वा॥
यदि स्यादधिमित्रर्क्षे तदा तत्राश्रये गुणे।
गजनेत्र समुद्राक्षी २८।३४ कलाद्यं मिश्रयेद्बुधः।
एवं मित्रगृहे तद्वद्रूपस्त्रिंशद्भिर्मिश्रयेत् १।३०।
शत्रुक्षेत्रे तु षड्लिप्तां कुनेत्रविकलां त्यजेत्॥६।२१
अधिशत्रुगृहे वाणस्त्र्यब्धी ५। ४३ लिप्तादिकं त्यजेत्।
आश्रयस्य गुणस्यास्य वधः स्फुटगुणस्य यः॥
तन्मूलं कर्म्मयोग्यः स्याद्गुण आयुर्व्विधौ स्मृतः।
खेटानाञ्च ततो भागाः खाब्धि ४० शिष्टाः कलीकृताः॥
पुनः शून्यरसा ६० भक्ताः क्रमात् स्यादायुषः पलम्।
जन्मलग्नं ग्रहेणोनं न्यूनं चक्रार्द्धतो यदि॥
तत्कला स्यात्तदाहारो नायं षड्भाधिके विधिः।
खखवह्न्या १८०० खखाङ्केन ६०० गुणितं पलमायुषः॥
क्रमतः पापसौम्यानां हाराशं शोधनं भवेत्।
खखवह्न्यूनषड्रसहारो हारदलं क्रमात्॥
आयुः पलघ्नं शून्याभ्रं हृत्वाप्तं शोधनं तदा।
आयुःपलं शोधनोनमेव चक्रार्द्धशोधनम्॥
चक्रार्द्धशोधने त्वेकराशौ द्व्यादिग्रहे सति।
एकस्याधिकवीर्य्यस्य हानिं सत्यः प्रभाषते॥
आयुःपलं हृतं स्वीयैर्गुणैर्द्योग्यैः कलादिभिः।
यथाप्तम् ६० तत् पुनः सूर्य्यरूपसाशाः १२००० समादयः।
तनोरायुः पलं सूर्य्यैः सहस्राशाः समादयः।
कैलग्नं चन्द्रद्वयोन्या राशितुल्याः समास्तथा॥
द्वादशाहतभागाद्यैर्दिनाद्यैश्चापि संयुताः।
एवं सूर्य्यादिलग्नानामंशायुः प्रस्फुटं भवेत्॥
सूक्ष्मान्तरितखेटस्य कला आयुःपलं भवेत्।
तद्वत् षड्भः कलान्यूनं तदा तां द्विगुणाच्युतम्॥

अथवा ।

"सुनीचान्तरितः खेटः सवक्रभः सकलीकृतः ।
आयुःफलमिदं प्राक्चैर्य्यं पैत्राद्दिकचये ॥
अंशयोगं शत्रुभस्यस्य विनारमायुषः फलम् ।
अस्तगस्य द्विभागोनं हित्वा शुक्रशनैश्चरौ ॥
वक्रस्य यदि खेटस्य चांशार्द्धहानिसम्भवः ।
अधिकैका तदा हानिः कर्त्तव्यात्र विपश्चिता ॥
चक्रार्द्धशोधनं कार्य्यं पूर्व्ववत् सति सम्भवे ।
एवमायुःफलं पैत्रे जीवः प्रोक्ते निसर्गजे ॥
पैत्रं यथागतं सौरैर्भागैर्व्विंशांशवर्ज्जितम् ।
चन्द्रस्य वेदभागाढ्यं भगौ२०र्व्विंशांशसंयुतम् ॥
कुजगुर्व्वोः४र्युगांशोनं शस्यार्द्धं नतशरांशयुक् ।
आयुःफलं निसर्गाख्ये रविकयोर्यथागतम् ॥
दशांशोनदलं शस्य जीवस्य विदशांशकम् ।
दशांशं भूमिपुत्त्रस्य विंशत्यंशं निशापतेः ॥
दशाप्तं श्रुतिभिर्भक्तं शनेरायुःफलं भवेत् ।
जीवोक्तं सप्तभागोनं सर्व्वेषामायुषः फलम् ॥
आयुः फलस्य खाभ्राष्टदिग्भागेन १०८०० समायुतम् ।
इत्थमायुःफलं खाष्टदशाप्तम् १०८० स्यात समादिकम् ॥
पैत्रनैसर्ग्यजीवोक्तैः भवेदायुः खगाम्निनाम् ।"

अथवा ।

"रवेरायुःफलं चाप्तं विनखांशं दिनादिकम् ।
पैत्रमायुर्भवेदिन्दोर्व्वाणघ्नम्५ द्वादशो१२ हृतम् ।
कुजगुर्व्वो४र्युगे नाप्तं बुधस्य पञ्चभिर्हृतम् ।
कवः शैल७हृतं विंशत्याप्तं २० सौरेर्गुणोद्धृतम् ।
विधोरायुःफलं लब्धं खरसैः स्याद्दिनादिकम् ॥
निसर्गे शशिपुत्त्रस्य३ रामघ्नं खयमोद्धृतम् ।
रविकयोर्गुणैनाप्तं कुजस्य खगुणोद्धृतम् ॥
गुरोश्छिन्नं खचन्द्राप्तं१० शनेस्तर्कै ६ शतोलितम् ॥"

अथवा ।

"आयुःफलमिनादीनां खाब्धिषगाग ८६४० भागयुक् ।
छिन्नं समाप्तमायुः स्याद्दिनाद्यं जीवभाषितम् ॥
विराशिलग्नविकला खखखार्क१२००० हृतानतौ ।
तदंशकसमं ज्ञेयमायुः पैत्रादिकत्रयं ॥
अंशतुल्यं तनोरायुर्व्वदन्ति बहवो बुधाः ।
केचिद्राशिसमं केचित्तस्य यस्याधिपो बली ॥
लग्नस्फुटस्य लिप्ताभिर्हन्यादायुर्द्युचारिणाम् ।
प्रत्येकं चन्द्रलिप्ताभि २१६००० र्भजेद्वर्षाधिकं भवेत् ॥
अनेन क्षीणस्वस्वायुर्लग्ने पापग्रहे सति ।
दृष्टे तु सौम्यखेटेन तस्यार्द्धेन तदा वियुक् ॥
व्याख्यानमुत्पलस्यैव दृष्टज्जातकभाषितम् ।
केचित् प्राहुर्लग्नराशिं त्यक्त्वा लिप्तादिका क्रिया ।
अन्ये लग्नस्थपापस्य भावोत्थफलताड़ितम् ।
पुरापं शोध्यमायुर्यत् तत्षष्ठ्याप्तं विशोधयेत् ॥
तत्रापि लग्ने पापौ चेत् बलिष्ठस्य फलेन तत् ।
साम्ये पुष्टफलेनैव क्रिया कार्य्या विचक्षणैः ॥
पापेऽपि लग्ने लग्नेशे न कर्त्तव्या त्वियं क्रिया ।
अंशायुषि न कार्य्यैवं हानिः प्राज्ञैः कथञ्चन ॥
लग्नस्य वीर्य्यादंशोत्थं पैत्रं भानोर्ब्बलाधिकात् ।
निसर्गोऽयं विधोर्व्वीर्य्यादायुः साध्यं विचक्षणैः ॥
त्रयश्चेद्बलहीनाः स्युर्जीवोक्तं साधयेत्तदा ।
लग्ने दोर्लग्नभान्वोश्च सूर्य्येन्द्वोः समवीर्य्ययोः ॥
तदायुषो यदैक्यार्द्धं तदुक्तं श्रीधरादिभिः ।
नात्र चमावनादायुः पृथक्शून्यनगांशकैः ॥
साष्टसूर्य्यांशकै१२८र्हीनं सौरं वर्षादिकं भवेत् ॥
पथ्याशिनः सधर्म्मा ये सच्छीलाढ्या जितेन्द्रियाः ।
गुरुदेवद्विजे भक्तास्तेषामेवायुरीरितम् ॥
ये पापा लुब्धकृपणा देवब्राह्मणनिन्दकाः ।
बन्धुगुर्व्वङ्गनासक्तास्तेषां मृत्युरकालजः ॥"

इति जीवनदायामायुर्दायाध्यायः ॥

परमायुषः, पु, (परमं आयुर्यस्य । पृषोदरादित्वादच् । दीर्घकालजीवित्वादस्य तथात्वम् ।) असनवृक्षः । इति शब्दचन्द्रिका ॥

परमार्थः, पुं, (परमः श्रेष्ठः अर्थः ।) उत्कृष्टवस्तु । यथार्थः । यथा,—
"प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥"
इति माण्डूक्यवार्त्तिकम् ॥
(तथा च कुमारे । ५ । ७५ ।
"उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ॥"
परमः मुख्यः अर्थः प्रयोजनमिति विग्रहे । मोक्षः । सुखम् । सुखभोगः दुःखाभावः ॥ इति न्यायदर्शनम् ॥)

परमार्हतः, पु, (परमः अर्हन् देवता उपास्यतया अस्त्यस्य । परमार्हन् + अण् ।) जैनराजर्षिविशेषः । इति हेमचन्द्रः ॥

परमृत्युः, पु परेभ्यो मृत्युरस्य । (रोगादिना मृत्योरभावात् अस्य तथात्वम् ।) काकः । इति त्रिकाण्डशेषः ॥

परमेश्वरः, पुं, (परमश्चासौ ईश्वरश्चेति ।) शिवः । इति हलायुधः ॥ (यथा, महालिङ्गार्च्चनतन्त्रे शिवशतनाम प्रकरणे,—
"सहस्रारे महापद्मे त्रिकोणनिलयान्तरे ।
विन्दुरूपे महेशानि । परमेश्वर ईरितः ॥")
विष्णुः । यथा,—
"इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ।
द्वादशारं तथा चक्रं यन्नाभिद्विभुजं तथा ॥
त्रियहस्त्वेकमूर्त्तिश्च तथोक्तः परमेश्वरः ।"
इति वामने ५८ अध्यायः ॥
(स्त्रियां ङीप् । दुर्गा । यथा,—
देवीभागवते । ७ । ३० । ७० ।
"देवकी मथुरायान्तु पाताले परमेश्वरी ॥")

परमेष्ठिनी, स्त्री (परमेष्ठिन् + ङीप ।) ब्राह्मी । इति राजनिर्घण्टः ॥ वामनहाटी इति भाषा ॥ परमेष्ठिनः शक्तिश्च ॥

परमेष्ठी, [न्] पुं, (परमे व्योम्नि चिदाकाशे ब्रह्मपदे वा तिष्ठतीति । स्थागति निष्ठती "परमे कित् ।" उणां । ४ । १० । इति इनिः स च कित् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् "स्थास्थिन् स्थृणाम् । इति षत्वम् । परमे स्थानेऽनाहतलक्षणे तिष्ठतीति कुल्लूकभट्टः ॥) ब्रह्मा । इत्यमरः । १ । १ । १६ । (यथा, मनुः । १।८० ।
"मन्वन्तराण्यसंख्यानि सर्गः संहार एव च ।
क्रीड़न्निवैतत् कुरुते परमेष्ठी पुनः पुनः ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
महादेवः । यथा, महाभारते । ३ । ३७ । ५८ ।
"क्रियतां दर्शने यत्नो देवस्य परमेष्ठिनः ।
दर्शनात्तस्य कौन्तेय । संसिद्धः सर्व्वमेष्यसि ॥")
जिनः । इति हेमचन्द्रः ॥ शालग्रामविशेषः । यथा —
"परमेष्ठी च शुक्लाभः पद्मचक्रसमन्वितः ।
चिन्नाकृतिस्तथा पृष्ठे शुषिरश्चातिपुष्कलम् ॥
परमेष्ठी लोहिताभश्चक्रमेकं तथा युतम् ।
विम्बाकृतिस्तथा रेखा शुषिरश्चातिपुष्कलम् ॥"
इति ब्रह्मपुराणम् ॥
"परमेष्ठी च शुक्लाभश्चक्रपद्मसमन्वितः ।
स वर्त्तुलस्तथा पीतः पृष्ठे च शुषिरं ध्रुवम् ॥"
इति पुराणसंग्रहः ॥
"परमेष्ठी तु रक्ताभश्चक्रपद्मसमन्वितः ।
द्विधाकृतस्तथा पृष्ठे शुषिरश्चापि वर्त्तुलम् ॥
पीतवर्णयुतो वापि भुक्तिमुक्तिवरप्रदः ॥"
इति वैश्वानरसंहिता ॥ * ॥
गुरुविशेषः । यथा,—
"आदौ सर्व्वत्र देवेशि । मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"
इति वृहन्नीलतन्त्रे २ पटलः ॥
मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठिगुरुस्त्वहम् ॥"
इति तन्त्रान्तरम् ॥
(अजमीढ़पुत्त्रः । यथा, महाभारते । १।९४।३१ ।
"अजमीढ़ो वरस्तेषां तस्मिन् वंशः प्रतिष्ठितः ।
षट् पुत्त्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु भारत ।
ऋक्षं धूमिन्यथो नीलो दुष्मन्तपरमेष्ठिनौ ॥"
परमस्थानस्थिते वाच्यलिङ्गः । यथा, मार्कण्डेये । ७६ । २ ।
"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ।")

परम्परः, पुं, (परं पिपर्त्तीति । पॄलि पूर्त्तौ + अच् । "तत्पुरुषे कृतीति" अलुक् ।) प्रपौत्रादिः । मृगभेदः । इति हेमचन्द्रः ॥ प्रपौत्रतनयः । इति मेदिनी ॥

परम्परा, स्त्री, अन्वयः । (यथा कुमारे । ६।४९ ।
"गगनादवतीर्णा सा यथा वृद्धपुरःसरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥")
सन्तानः । वधः । हिंसा । इति हेमचन्द्रः ॥ परीपाटी । अनुक्रमः । इति शब्दरत्नावली ॥ यथा,
"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

एवं परम्पराप्राप्तं तथा राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ! ॥"
इति श्रीभगवद्गीतायां ४ अध्यायः ॥

परम्पराकं, क्ली, (परम्परया कायति प्रकाशते इति । कै+कः । परम्पराख्यापितपशुहननात् तथात्वम् ।) यज्ञार्थपशुहननम् । तत्पर्य्यायः । शमनम् २ प्रोक्षणम् ३ । इत्यमरः । २।७।२६ ॥ घातनम् ४ वधः ५ । इति शब्दरत्नावली ॥

परम्परीणं, त्रि, (परांश्च परतरांश्च अनुभवति । "परोवरपरम्परेति ।" ५ । २ । १० । इति खः । प्रकृतेः परम्परभावो निपात्यते ।) परम्पराप्राप्तम् । यथा, भट्टिः । ५ । १५ ।
"लक्ष्मीं परम्परीणां त्वं पुत्त्रपौत्त्रीणतां नय ॥"

परवः, पुं, (पिपर्त्ति देहादिकं पूरयतीति । पॄ + बाहुलकात् अवः ।) केशराजः । इति त्रिकाण्डशेषः ॥

परलोकः, पुं, (परो लोकः ।) लोकान्तरम् । तच्च स्वर्गादि । यथा,—
"समन्यानात्मभूयिष्ठमात्मैवैमत्यमेत्य यम् ।
लोके प्रयाति मन्यानं परलोकेन तं कुतः ॥"
इति नैषधम् ॥

परलोकगमः, पुं, (परलोके लोकान्तरे गमो गमनं यस्मात् ।) मृत्युः । इति हेमचन्द्रः ॥

परवशः, त्रि, (परस्य परेषां वा वशः वशीभूतः ।) अन्यवशीभूतः । तत्पर्य्यायः । परायत्तः २ पराधीनः ३ परच्छन्दः ४ परवान् ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १५६ ।
"यद्यत् परवशं कर्म्म तत्तद् यत्नेन वर्ज्जयेत् ।
यद्यदात्मवशन्तु स्यात्तत्तत् सेवेत यत्नतः ॥")

परवाणिः, पुं, (परं धर्म्मं वाणयति प्रकाशयति । वण शब्दे + णिच् + इन् । धातूनामनेकार्थत्वादत्र प्रकाशार्थः ।) धर्म्माध्यक्षः । वत्सरः । इति मेदिनी ॥ (परं शत्रुं सर्पमित्यर्थः वाणयतीति ।) कार्त्तिकेयवाहनो मयूरः । इति शब्दमाला ॥

परवान्, [त्] त्रि, (परः स्वामी अस्त्यस्य । "तदस्यास्त्यस्मिन्निति ।" ५ । २ । ९४ । इति मतुप् मस्य वः ।) पराधीनः । इत्यमरः ।३।१।१६ (यथा, रघौ । २ । ५६ ।
"भवानमीदं परवानवैति
महान् हि यत्नस्तव देवदारौ ॥")

परव्रतः, पुं, (परं व्रतमस्य ।) धृतराष्ट्रः । इति शब्दरत्नावली ॥

परशं, क्ली, (स्पृशतीति । पृषोदरादित्वात् साधुः । अस्य स्पर्शनात् अपरस्य धातोः स्वर्णत्वं जायते अतोऽस्य तथात्वम् ।) रत्नविशेषः । यथा,—
"मुक्तामाणिक्यपरशमणिरत्नाकरान्वितम् ।
हलाशुभ्रहरिद्रक्तमणिराजिविराजितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

परशव्यं, त्रि, परशवे हितम् । तस्मै हितादावुगवादिभ्यो यत् । इति संक्षिप्तसारसूत्रम् ॥ (पौ उगवादिभ्यो यत् । परशुहितम् । इति व्याकरणम् ॥)

परशुः, पुं, (परान् शत्रून् शृणाति हिनस्त्यनेनेति । शॄ हिंसायाम् + "आङ्परयोः खनिशॄभ्यां डिच्च ।" उणां । १ । ३४ । इति कुः स च डित् ।) अस्त्रविशेषः । टाङ्गी इति भाषा ॥ तत्पर्य्यायः । पर्शुः २ परश्वधः ३ परश्वधः ४ स्वधितिः ५ कुठारः ६ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८८ । १४ ।
"ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवीबाणौघैरपातयत भूतले ॥")

परशुधरः, पुं, (धरतीति धरः । धृ + अच् । ततः परशोर्धरः ।) गणेशः । इति हलायुधः ॥ (परशुरामः । परशुशस्त्रप्रधानत्वादस्य तथात्वम् ॥)

परशुरामः, पुं, (परशुना कुठाराख्यशस्त्रेण रामः रमणं यस्य । परशुशस्त्रबलेनैव दुष्टक्षत्त्रियवंशध्यान् निहत्यात्मानं रमयति इति तान् पर्य्यायार्थः ।) भगवतः षोडशावतारः । यथा,—
"अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्त्रामकरोन्महीम् ॥"
इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥
तत्पर्य्यायः । जामदग्न्यः २ परशुरामः ३ परशुरामकः ४ भार्गवः ५ भृगुपतिः ६ भृगुनाथः पतिः ७ । इति शब्दरत्नावली ॥ अस्योत्पत्त्यादिकं यथा —
मार्कण्डेय उवाच ।
"अथ काले व्यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्त्रान् चतुरो वेदसम्मतान् ॥
रुमण्वन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधायाशु शक्रादौः सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदाच न ॥
अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्त्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ।
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदांश्च सर्व्वशः ।
स्वतातात् कृतकृत्योऽभूद्वेदविद्याविशारदः ॥"
इति कालिकापुराणे ८५ अध्यायः ॥
अवशिष्टं पाद्मोत्तरखण्डे ५० अध्याये द्रष्टव्यम् ॥ (अयमेव पितुरादेशात् परशुना स्वमातुः शिरश्चिच्छेद ततः प्रसन्नात् पितुर्व्वरं लब्ध्वा मातरं पुनर्जीवयामास । यदुक्तं महाभारते । ३ । ११६ । ५—१८ ।
"फलाहारेषु सर्व्वेषु गतेष्वथ सुतेषु वै ।
रेणुका स्नातुमगमत् कदाचिन्नियतव्रता ॥
सा तु चित्ररथं नाम मार्त्तिकावतकं नृपम् ।
ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ॥
क्रीडन्तं सलिले दृष्ट्वा सभार्य्यं पद्ममालिनम् ।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ॥
व्यभिचाराच्च सा तस्मात् क्लिन्नाम्भसि विचेतना ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्त्ता न्वबुध्यत ॥
स (जमदग्निः) तां दृष्ट्वा च्युतां धैर्य्यात् ब्राह्म्या लक्ष्म्या विवर्ज्जिताम् ।
धिक्शब्देन महातेजा गर्हयामास वीर्य्यवान् ॥
ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्व्विश्वावसुस्तथा ॥
तानानुपूर्व्व्या भगवान् वधे मातुरचोदयत् ।
न च ते जातसम्मोहाः किञ्चिदूचुर्व्विचेतसः ॥
ततः शशाप तान् क्रोधात्ते शप्ताश्चेतनां जहुः ।
मृगपक्षिसधर्म्माणः क्षिप्रमासन् जडोपमाः ॥
ततो रामोऽभ्ययात् पश्चादाश्रमं परवीरहा ।
तमुवाच महाबाहुं जमदग्निर्म्महातपाः ॥
जहीमां मातरं पापां मा च पुत्त्र व्यथां कृथाः ।
तत आदाय परशुं रामो मातुः शिरोऽहरत् ॥
ततस्तस्य महाराज ! जमदग्नेर्म्महात्मनः ।
कोपोऽभ्यगच्छत् सहसा प्रसन्नश्चाब्रवीदिदम् ॥
ममेदं वचनात्तात ! कृतं ते कर्म्म दुष्करम् ।
वृणीष्व कामान् धर्म्मज्ञ ! यावतो वाञ्छसे हृदा ॥
स वव्रे मातुरुत्थानमस्मृतिञ्च वधस्य वै ।
पापेन तेन चास्पर्शं भ्रातॄणां प्रकृतिन्तथा ॥
अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ! ।
ददौ च सर्व्वान् कामांस्तान् जमदग्निर्म्महातपाः ॥"
अयं पुनर्बलदर्पितं आश्रमात् वत्सस्यापहारिणं कार्त्तवीर्य्यार्ज्जुनं हतवान् । अनेन जातामर्षास्तस्यार्ज्जुनस्य सुतास्ततःप्रभृति कालं प्रतीक्षमाणाः कदाचित् रामविरहितमाश्रममागत्य तस्य पितरं जमदग्निं निजघ्नुः । रामस्तु अस्मात् पितृवधामर्षात् त्रिःसप्तकृत्वः पृथिवीं निःक्षत्त्रियामकरोत् । ततो गच्छति काले दाशरथिना रामेण हृतगर्व्वो दक्षिणाशां गत्वा महेन्द्रे गिरौ उग्रेण तपसा कालं यापयति ॥)

परश्वः, [स्] व्य, श्वः परदिनम् । आगामिदिनात् परदिनम् । इत्यमरः । ३ । ४ । २२ ॥ अस्य टीका परश्वःशब्दे द्रष्टव्या । गतदिनात् पूर्व्वदिनम् । पर्शु इति भाषा ॥ यथा,—
"परश्वश्च महाभाग ! स्नातुं गङ्गाह्रदं गता ।
अवतीर्णा विकृष्टास्मि ग्रहनागेन केनचित् ॥"
इति मार्कण्डेयपुराणे अवीक्षिच्चरितम् ॥

परश्वधः, पुं, (पर + श्वि + अन्येभ्योऽपीति डः । ततः परश्वं दधातीति । "आतोऽनुपेति" ३ । २ । ३ । इति कः ।) कुठारः । इत्यमरः । २ । ८ । ९२ ॥ (यथा, रघौ । ६ । ४२ ।
धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्त्रसाराम् ॥")

परसंज्ञकः, पुं, (परा श्रेष्ठा संज्ञा अस्य । ततः कप् ।) आत्मा । इति शब्दरत्नावली ॥

परस्परं, त्रि, ("सर्व्वनाम्नो द्वे वाच्ये समासवच्च बहुलम् ।" वार्त्ति असमासवद्भावे पूर्व्वपदस्य सुपः सुर्व्वक्तव्यः । कस्कादित्वात् विसर्ज्जनीयस्य सः ।) अन्योन्यम् । इतरेतरम् । यथा,—
"वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः ।

परश्वरां विजयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥”

इति भट्टिः । २ । ५ ॥

परस्मैपदं, क्ली, (परस्मै परार्थं परबोधकं पदम् ।) लकारादेशानां प्रत्येकं पूर्व्वनवविभक्तयः । यथा, “लडादिषु पूर्व्वे नव परस्मैपदं परे नव आत्मने-पदं परिभाष्यन्ते । इति संक्षिप्तसारव्याकरणम् ॥ (ताश्च पाणिनिमते । तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥) वोपदेवेनास्य पसंज्ञा कृता । यथा । “नवद्यः पमे भितोऽन्य-ङ्क्ङ्युर्थे ।” इति मुग्धबोधव्याकरणम् ॥

परश्वधः, पु, (परश्वध+निपातनात् सत्वम् ।) परश्वधः । कुठारः । इत्यमरटीकायां राय-मुकुटः ॥

परा, व्य, विमोक्षः । प्राधान्यम् । प्रातिलोम्यम् । धर्षणम् । आभिमुख्यम् । भृशार्थम् । विक्रमः । गतिः । वधः । इति मेदिनी ॥ * ॥ उपसर्ग-विशेषः । अस्यार्थः । भङ्गः । अनादरः । प्रत्या-वृत्तिः । न्यग्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परा, स्त्री, (पॄ+अच्+ततः टाप् ।) वन्ध्या-कर्कोटकी । इति राजनिर्घण्टः ॥ (अस्याः गुणा यथा,—
“वन्ध्याकर्कोटकी लघ्वी कफशुद्व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नाभिरूपमूलाधारात् प्रथमोदितनादस्वरूप-वर्णः । यथा,—
“मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः ॥”
इत्यलङ्कारकौस्तुभे प्रथमकिरणः ॥
(पूरयति सागरं भक्तमनोरथञ्चेति व्युत्पत्त्या गङ्गा । यथा, काशीखण्डे । २९ । १०६ ।
“परानन्दा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥”
गायत्री । यथा, देवीभागवते । १२ । ६ । ९० ।
“पार्व्वती परमोदारा परब्रह्मात्मिका परा ॥”)

पराकः, पुं, (परं अत्यन्तं अकं दुःखं उपवासादि-जन्यशारीरिकादिक्लेशो यत्र यस्माद्वा ।) व्रत-विशेषः । खड्गः । इति मेदिनी ॥ क्षुद्रः । रोगविशेषः । जन्तुविशेषः । इति विश्वः ॥ * ॥ पराकव्रतमाह मनुः । ११ । २१५ ।
“यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥”
पराके पञ्च धेनवः पराकस्य प्राजापत्यपञ्चक-तुल्यत्वात् । यथा अङ्गिराः ।
“षड्भिर्व्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति ।
मासि मासि पराकेण त्रिभिर्व्वर्षैर्व्यपोहति ॥”
अत्र षड्भिर्व्वर्षैः साशीतिशतप्राजापत्यानि पूर्व्वमुक्तानि तथा प्रतिमासैकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत् पराकाः । ततश्च षट्त्रिंशत् पराकाशीत्युत्तरप्राजापत्य-शतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वं षट्त्रिंशतश्च पञ्चगुणमशीत्युत्तरशतं

भवतीति । अतः प्राजापत्यपञ्चकतुल्यः पराकः । इति प्रायश्चित्ततत्त्वम् ॥ * ॥
“द्वादशाहोपवासेन पराकः सर्व्वपापहा ॥”
इति गरुडपुराणे प्रायश्चित्तप्रकरणम् ॥

पराक, [च] त्रि, परा अञ्चतीति । (परा+अञ्च+क्विप् ।) प्रतिलोमगमनाश्रयः ॥

पराक्पुष्पी, स्त्री, (पराक् पुष्पं यस्याः ।) अपा-मार्गः । इति राजनिर्घण्टः ॥ (अपामार्गशब्दे-ऽस्या विवृतिरुक्ता ॥)

पराक्रमः, पुं, पराक्रम्यतेऽनेन । (क्रम+“हलश्च ।” ३ । ३ । १२१ । इति घञ् । “नोदात्तोप-देशस्य ।” ७ । ३ । ३४ । इति न वृद्धिः ।) तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ शक्तिः ९ प्राणः १० । इत्यमरः । २ । ८ । १०२ ॥ मह्नः ११ ऊर्ज्जः १२ सामर्थ्यम् १३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये देवीमाहात्म्ये । ९२ । १३ ।
“पराक्रमञ्च युद्धेषु जायते निर्भयः पुमान् ॥”) विक्रमः ॥ (यथा, मार्कण्डेये । २० । २५ ।
“यस्य मित्रगुणान् मित्राण्यमित्राश्च पराक्रमम् ।
कथयन्ति सदा सत्सु पुत्त्रवांस्तेन वै पिता ॥”)
उद्योगः । इति मेदिनी ॥ निष्क्रान्तिः । इति शब्दरत्नावली ॥ (विष्णुः । यथा, महा-भारते । १३ । १४९ । ४४ ।
“औषधं जगतः सेतुः सत्यधर्म्मा पराक्रमः ॥”)

परागः, पुं, (परागच्छतीति । गम+अन्येभ्यो-ऽपीति डः ।) पुष्परेणुः । तत्पर्य्यायः । सुमनो-रजः २ कौसुमरेणुः ३ । इत्यमरः । २ । ४ । १७ ॥ पुष्परेणुः ४ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५०६ ॥
“लिप्तं न मुखं नाङ्गं न पक्षतौ न चरणौ पराग-स्पृष्टेव नलिन्या विदग्धमधुपेन मधु पीतम् ॥”) धूलिः ॥ (यथा, रघुः । ४ । ३० ।
“प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुस्कन्धेव सा चमूः ॥”) स्नानीयद्रव्यम् ॥ गिरिप्रभेदः ॥ [गेमा । विख्यातिः ॥ उपरागः ॥ चन्दनम् । इति मेदिनी ॥ स्वच्छन्द-गमनम् । इति शब्दरत्नावली ॥

पराङ्गदः, पुं, (परं अङ्गं कामोन्मत्तौ शिवलं ददातीति । दा+कः ।) शिवः । इति शब्द-माला ॥

पराङ्गवः, पुं, (पराङ्गं जलदृश्या प्रचुरशरीरं वाति प्राप्नोतीति । वा+कः ।) समुद्रः । इति त्रिकाण्डशेषः ॥

पराङ्मुखः, त्रि, (पराक् प्रतिलोमगामि मुखं यस्य ।) विमुखः । तत्पर्य्यायः । पराचीनः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, मनुः । १० । ११९ ।
“स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ॥” तन्त्रोक्तमन्त्रविशेषे, पुं । यथा, तन्त्रसारे ।
“कामबीजं मुखे माया शिरस्यङ्कुशमेव च ।
असौ पराङ्मुखः प्रोक्तो मध्ये तु बिन्दुलाञ्छितः ॥”)

पराचितः, त्रि, (परेण आचितः पालितः ।) परपुष्टः । परद्वारा प्रतिपालितः । तत्पर्य्यायः । परिस्कन्दः २ परजातः ३ परैधितः ४ । इत्य-मरः । ३ । १ । ०१८ ॥ परिष्कन्दः ५ । इति भरतः ॥

पराचीनः, त्रि, (पराञ्चति अनभिमुखीभवतीति । अञ्चु+“ऋत्विग्दधृक् ।” ३ । २ । ५९ । इति क्विन् ततः स्वार्थे “विभाषाञ्चेरदिक् स्त्रियाम् ।” ५ । ४ । ८ । इति खः ।) पराङ्मुखः । इत्य-मरः । ३ । १ । ३३ ॥ (यथा, भागवते । ३ । ३० । २८ ।
“ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्म्मिणा ॥”)

पराजयः, पुं, (परा+जि+अच् ।) रणे भङ्गः । इत्यमरः । २ । ८ । १११ ॥ (अत्र रणे इत्युप-लक्षणं वस्तुतस्तु विवादादावपीति बोद्धव्यम् ।) तत्पर्य्यायः । भङ्गः २ हारिः ३ हारिः ४ परा-भवः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ७ । १९९ ।
“अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥”)

पराजितः, त्रि, (परा+जि+कर्म्मणि क्तः ।) कृतपराजयः । हारितः । तत्पर्य्यायः । परा-भूतः २ विजितः ३ निर्जितः ४ जितः ५ । इति शब्दरत्नावली ॥ “इदं वाच्यमिदमवाच्यमेवं सति पराजितो भवतीति इमानि खलु पदानि भिषग्-वादमार्गज्ञानार्थमधिगम्यानि भवन्ति ।” इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

पराञ्जः, पुं, (परान् अनक्तीति । अञ्ज व्याप्तौ+अच् ।) तैलयन्त्रः । फेनः । छुरिकादलम् । इति शब्दरत्नावली ॥

परात्परः, पुं, परात् श्रेष्ठादपि परः श्रेष्ठः । स च श्रीकृष्णः । यथा,—
“देवाः कालस्य कालोऽहं विधातुर्विधिरेव च ।
संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

परात्प्रियः, पुं, (परादपि प्रियः ।) तृणविशेषः । इति शब्दचन्द्रिका । उलु इति भाषा ॥

परादनः, पुं, (परस्तृतकं अदनं यस्य यद्वा परान् शत्रून् अत्ति भक्षयति नाशयतीत्यर्थः आदयति विनाशयति स्वारोहितं संग्रामे इति वा अद् लुः क्विप् ल्युर्वा ।) पारसीघोटकः । इति त्रिकाण्डशेषः ॥

पराधीनः, त्रि, (परस्य परेषां वा अधीनः ।) परवशः । तत्पर्य्यायः । परतन्त्रः २ परवान् ३ नाथवान् । इत्यमरः । ३ । १ । १६ ॥ तस्य जीवन्मृतत्वं यथा,—
“स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते मृताः ॥”
इति गरुडपुराणे ११३ अध्यायः ॥

परानसा, स्त्री, चिकित्सा । इति शब्दचन्द्रिका ॥

परान्नं, क्ली, (परस्य अन्नम् ।) आत्मस्वामिकभक्त-पिष्टकादि ॥ परकर्तृकात्मस्वपरकाल्प्रयमाणम् । परस्यूदान्नम् । तस्य त्याज्यत्वं यथा,—

"परान्नं परवासञ्च नित्यं धर्म्मरतस्त्यजेत् ।"

इति स्मृतिः ॥

संयमदिने तस्य त्याज्यत्वं यथा —

"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।

शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"*॥

पारणदिने तस्य त्याज्यत्वं यथा,—

"अभ्यङ्गञ्च परान्नञ्च तैलं निर्म्माल्यलङ्घनम् ।

तुलसीचयनं द्यूतं पुनर्भोजनमेव वा ॥

वस्त्रपीड़ां तथा क्षारं द्वादश्यां वर्ज्जयेद्बुधः ॥"*॥

तद्भोक्तुर्यागादिविफलत्वं यथा,—

"परपाकेन पुष्टस्य द्विजस्य गृहमेधिनः ।

इष्टं दत्तं तपोऽधीतं यस्यान्नं तस्य तद्भवेत् ॥"*॥

तद्भुक्ता पुत्त्रोत्पादने दोषो यथा,—

"यस्यान्नेन तु भुक्तेन भार्य्यां समधिगच्छति ।

यस्यान्नं तस्य ते पुत्त्रा अन्नाद्रेतः प्रवर्त्तते ॥"*॥

ब्राह्मणादिस्वामिकान्नभोजने दोषो यथा,—

"ब्राह्मणान्नेन दारिद्र्यं क्षत्त्रियान्नेन प्रेष्यताम् ।

वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेर्नरकं व्रजेत् ॥"

इत्येकादशीतत्त्वम् ॥*॥

परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा,—

"षोड़शांशं स लभते यः परान्नेन गच्छति ।

अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥"

इति प्रायश्चित्ततत्त्वम् ॥*॥

महागुरुनिपाते तस्य त्याज्यत्वं यथा,—

"अन्यश्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम् ।

वर्ज्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः ॥"

इति शुद्धितत्त्वम् ॥*॥

तन्त्रोक्तमन्त्रसिद्धिहानिर्यथा,—

"जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।

मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने ! ॥"

इति तन्त्रम् ॥*॥

तद्भोजने प्रतिप्रसवो यथा,—

"गुर्व्वन्नं मातुलान्नं वा श्वशुरान्नं तथैव च ।

पितुः पुत्त्रस्य चैवान्नं न परान्नमिति स्मृतिः ॥"

इत्येकादशीतत्त्वम् ॥

परान्नः, त्रि, (परान्नं नित्यमस्त्यस्य । "अर्श आदिभ्योऽच्।" ५ । २ । १२७ । इति अच् ।) परान्नोपजीवी । तत्पर्य्यायः । परपिण्डादः २ । इत्यमरः । ३ । १ । २० ॥

परापं, त्रि (परागता आपो यस्मात् । "अवर्णान्ताद्वा ।" ६ । ३ । ९७ । इत्यस्य वार्त्ति इत्यनेन पक्षे अप ईद्भावः ।) पक्षे ईत्वे परेपम् । इति सिद्धान्तकौमुदी ॥

परापरं, क्ली (परमापिपर्त्ति । आ + पृ + अच् ।) परूषकम् । इति भावप्रकाशः ॥ (अस्य विवरणं परूष शब्दे द्रष्टव्यम् ॥ परञ्चापरञ्च द्वयोः समाहारः ।) परमपरञ्च ॥ (यथा, विष्णुपुराणे । १ । ६ । २७ ।

"एताश्च सहयज्ञेन प्रजानां कारणं परम् ।

परापरविदः प्राज्ञास्ततो यज्ञान् वितन्वते ॥")

परापरगुरुः, पुं, (परमादपि परः श्रेष्ठः परापरः । पृषोदरादित्वात् साधुः ततः कर्म्मधारयः ।) गुरुविशेषः । स तु भगवती । (यथा,—

"आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः ।

परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"

इति इन्द्रजालतन्त्रे २ पटलः ॥

(तन्त्रान्तरे च यथा,—

"मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।

परापरगुरुस्त्वं हि परमेष्ठिगुरुस्त्वहम् ॥")

पराभवः, पुं, (पराभूयते इति पराभवनमित्यर्थः । परा + भू + भावे अप् ।) तिरस्कारः । (यथा, मार्कण्डेये । १८ । १८ ।

"सत्यासक्तोऽहमच्छिद्रो नचैवाहं जितेन्द्रियः ।

कथमिच्छथ मत्तोऽपि देवाः शत्रुपराभवम् ॥")

अस्य पर्य्यायः । न्यक्कारः २ तिरस्क्रिया ३ परिभावः ४ विप्रकारः ५ परिभवः ६ अभिभवः ७ अत्याकारः ८ निकारः ९ । इति हेमचन्द्रः ॥ विनाशः । इति मेदिनी ॥

पराभूतः, त्रि, (पराभूयते स्म । परा + भू + क्त ।) पराजितः । इत्यमरः । २ । ८ । ११२ ॥

परामर्शः, पु (परामृश्यते इति । परामर्शनमित्यर्थः । परा + मृश् + भावे घञ् ।) युक्तिः । विवेचनम् । तत्पर्य्यायः । वितर्कः २ उन्नयनम् ३ विमर्शनम् ४ अध्याहारः ५ तर्कः ६ ऊहः ७ । इति हेमचन्द्रः ॥ तर्कशास्त्रे तु व्याप्तिविशिष्टपक्षधर्म्मताज्ञानम् । यथा, -

"व्याप्यस्य पक्षधर्म्मत्वधीः परामर्श उच्यते ॥"

इति भाषापरिच्छेदः ॥

अस्यार्थः "व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम् । तत्र व्याप्यः पक्ष इति ज्ञानं पक्षो व्याप्यवान् इति ज्ञानं वा ।" इति सिद्धान्तमुक्तावली ॥ स चानुमितव्यापारः । यथा,—

"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत ॥"

इति भाषापरिच्छेदः ॥

अस्यार्थः । "अनुमायामनुमितौ व्याप्तिज्ञानं कारणं परामर्शो व्यापारः । तथा हि । येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित् पर्व्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य पुरुषस्य भवति पश्चाच्च वह्निव्याप्यधूमवान् पर्व्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते ।" इति सिद्धान्तमुक्तावली ॥

परान्तं, क्ली (परमन्तं वारि यस्मात् ।) वर्षणम् । इति त्रिकाण्डशेषः ॥ (परमन्तं अमरणधर्म्मकं ब्रह्मात्मभूतं यस्य । इति विग्रहे वाच्यलिङ्गः । यथा, मुण्डकोपनिषदि । ३ । २ । ६ ।

"वेदान्तविज्ञानसुनिश्चितार्थाः

सन्यासयोगात् यतयः शुद्धसत्त्वाः ।

ते ब्रह्मलोकेषु परान्तकाले

परामृताः परिमुच्यन्ति सर्व्वे ॥")

परामृष्टः, त्रि, (परामृश्यते स्म । परा + मृश् + कर्म्मणि क्तः ।) सम्बन्धः । सम्बन्धयुक्तः । यथा,—

"क्लेशकर्म्मविपाकाशयैरपरामृष्टः । इति कुसुमाञ्जलिकारिकाव्याख्याने रामभद्रः ॥ तत्परामर्शः । विवेचितः ॥

परायणं, त्रि, आसक्तवचनम् । इत्यमरः । ३ । ७ । २ ॥ परं केवलमयनमासक्तिस्थानमिति परायणम् । यथा धर्म्मपरायणो धर्म्मासक्तः । इति भरतः ॥ आश्रयः । (यथा, मनुः । ४ । १० ।

"वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ॥"

तत्परम् । अभीष्टम् । इति मेदिनी ॥ (नित्यप्रतिष्ठा । यथा, रामायणे । २ । ४८ । १७ ।

"पादच्छायासुखं भर्त्तुस्तादृशस्य महात्मनः ।

स हि नाथोजनस्यास्य स गतिः स परायणम् ॥"

"परायणं शाश्वतप्रतिष्ठा ।" इति रामानुजः ॥)

परायत्तं, त्रि, (परस्य परेषां वा आयत्तम् ।) पराधीनम् । यथा,—

"तन्त्रायत्तवशाधीनच्छन्दवन्तः परात्मपरे ॥"

इति हेमचन्द्रः ॥

परारि, व (पूर्व्वतरे वत्सरे इत्यर्थे "सद्यः परुत्परारीति ।" ५ । ३ । २२ । इति पूर्व्वतरस्य परभावः आरि च संवत्सरे ।) पूर्व्वतरवत्सरः । गतत्तृतीयवर्षः । इत्यमरभरतौ ॥ (परस्य आरिः । परशत्रौ त्रि ॥

परारित्नः, त्रि, (परारि भवः । "चिरपरुतपरारिभ्यस्त्नो वक्तव्यः ।" ४ । ३ । २३ । इत्यस्य वार्त्ति इत्यनेन त्नः ।) पूर्व्वतरवत्सरसम्बन्धी । इति व्याकरणम् ॥

परारुः, पु, (पराऋच्छतीति । परा + ऋ + उन ।) कारवेल्लः । इति त्रिकाण्डशेषः ॥ (कारवेल्लशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

परारुकः, पुं, (पराऋच्छतीति । परा + ऋ + उकः ।) प्रस्तरः । इति त्रिकाण्डशेषः ॥

परार्द्धं क्ली,(परार्द्धं गति सर्व्वोत्कृष्टतया वर्त्तते इति । ऋध्यद्दर वृद्धौ + अच् ।) दशगुणसंख्या । लक्षलक्षकोटिः । १००,०००,०००,०००,०००,०० इदं चरमसंख्या अष्टादशाङ्कपर्य्यन्तम् । इति हेमचन्द्रः ज्योतिषञ्च ॥ (यथा, नैषधे । ३ । ९० ।

"यदि त्रिलोकीगणनापरा स्यात्

तस्याः समाप्तिर्यदि नायुषः स्यात् ।

पारे परार्द्धं गणितं यदि स्यात्

गणेयनिःशेषगुणोऽपि स स्यात् ॥")

ब्रह्मण आयुषोऽर्द्धम् । यथा,—

"निजेन तस्य मानेन आयुर्व्वर्षशतं स्मृतम् ।

तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"

इति कौर्म्मे ५ अध्यायः ॥

(तथा, मार्कण्डेये । ४६ । ४२—४३ ।

"शतं हि तस्य (ब्रह्मणः) वर्षाणां परमित्यभिधीयते ।

पञ्चाशद्भिस्तथावर्षैः परार्द्धमिति कीर्त्त्यते ॥

एवमस्य परार्द्धन्तु व्यतीतं द्विजसत्तम ।।

यस्यान्तेऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः ॥")

परार्द्ध्यः त्रि, (परार्द्धं परार्द्धसंख्यावत् प्रधानत्वमर्हतीति । परार्द्ध + यत् यद्वा परस्मिन्नर्द्धे भवः । "परावराधमोत्तमपूर्व्वाच्च ।" ४ । ३ । ५ । इति

यत् ।) प्रधानः । श्रेष्ठः । इत्यमरः ।३।१।५८।
(यथा, रघुः । १० । ६४ ।
"ताभ्यस्तथाविधान् स्वप्नान् श्रुत्वा प्रीतो हि पार्थिवः ।
मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")

परावनं, क्ली, (परावनतीति । परा + अव + बाहुलकात् अनच् ।) परूषकम् । इति राजनिर्घण्टः ॥

परावर्त्तः, पुं, (परा वर्त्त्यते इति । परा + वृत् + अप ।) परिवर्त्तः । विनिमयः । इति हेमचन्द्रः ॥

परावहः, पु, (परा वहतीति । वह् + अच् ।) सप्तवायुस्कन्धान्तर्गतसप्तमवायुः । स तु परिवहवायोरूर्द्ध्वस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।
"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")

पराविद्धः, पु, (परा + व्यध + क्तः ।) कुवेरः । इति शब्दमाला ॥

परावेदी, स्त्री, (परमुत्कर्षमाविन्दतीति । विद् + अण् । स्त्रियां ङीप् ।) बृहती । इति केचित् ॥

पराशरः, पु, (अस्य निरुक्तिरुक्ता यथा, महाभारते । १ । १७६ । ३ ।
"परासुः स यतस्तेन वशिष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"
"पराशीर्णाशासनमवस्थानं येन स पराशरः ।
आङ्पूर्व्वाच्छ्यातेर्डरन् ।" इति नीलकण्ठः ॥)
व्यासपिता । शक्तिमुनिपुत्त्रः । यथा -
"सुतं त्वजनयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम ॥"
इत्यग्निपुराणम् ॥
(अयं हि द्वादशाध्यायात्मिकां धर्म्मसंहितां कृतवान् । सा च कलिकर्त्तव्यधर्म्मविषया । यदुक्तं तत्रैव ।
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
तत्र संहितायां १मे अध्याये युगभेदं धर्म्मभेदादिकथनम् । २अः आचारधर्म्मगृहधर्म्मादिकथनम् । ३अः अशौचव्यवस्था आत्मघातनादिदोषाः । ४अः प्रायश्चित्तमतान्त्येष्टिक्रियाकुशपुत्तलिकादिकथनम् । ५अः प्राणिदष्टप्रायश्चित्तव्यवस्था । ६ अः प्राणिवधप्रायश्चित्तकथनम् । ७अः द्रव्यशुद्ध्यादि । ८अः गोवधादिप्रायश्चित्तम् । ९अः गोवधापवादादि । १०अः अगम्यागमनादिप्रायश्चित्तम् । ११अः अमेध्यभक्षणादि प्रायश्चित्तम् । १२अः प्रायश्चित्ताङ्गस्नानभेदादि ॥ * ॥
अयं खलु मत्स्यगन्धायां सत्यवत्यां वेदव्यासमुत्पादितवान् । तद्वृत्तविवरणमुक्तं यथा देवीभागवते । २ स्कन्धे । २अध्याये द्रष्टव्यम् ॥
परान् आशृणाति हिनस्तीति । शॄ गि हिंसे + अच् ।" नागभेदः । यथा, महाभारते । १ । ५७ । १८ । "वराहको वीरणकः सुचित्रश्चित्रवेगिकः । पराशरस्तरुणको मणिस्कन्धस्तथारुणिः ॥")

पाराशरी, [न्] पुं, पराशरेण प्रोक्तं भिक्षुसूत्रं पाराशरं तद्विद्यतेऽस्याध्ययनायेति णः इन् च । पराशरीति कृस्वादित्व । इत्यमरटीकायां भरतः ॥ पाराशरी । चतुर्थाश्रमी ॥

पराश्रया, स्त्री, (पर आश्रयो यस्याः ।) वृक्षोपरिजातलताविशेषः । परगाछा इति भाषा । तत्पर्य्यायः । वन्दा २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ वशिनी ६ पुत्त्रिणी ७ वन्द्या ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)

परासनं, क्ली, (परा + अस् + भावे ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥

परासुः, त्रि, (परागताः प्रस्थिता असवः प्राणा यस्य ।) मृतः । इत्यमरः । २ । ८ । ११७ ॥
(यथा, रघौ । ९ । ७८ ।
"तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥"
परासुपरीक्षा वैद्यके यथा,—
"तस्य चेत परिदृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिगुदरपार्श्व-पृष्ठपिण्डिका-पाणिग्रीवा-ताल्वोष्ठललाटं स्विन्नं शीतं प्रस्तब्धं दारुणं शीतमांसशोणितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिदृश्यमानानि पृथक्त्वेन गुल्फजानुवङ्क्षण-गुदवृषण-मेढ्रनाभ्यंशस्तनमणिकहनुपर्शुका नासिका कर्णाक्षिभ्रूशङ्खादीनि स्रस्तानि व्यस्तानि च्युतानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात ।"
"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेत्कर्णौ परिदृश्यमानेन न स्पन्देयातां परासुरिति विद्यात् । तस्य चेद्दन्ताः प्रतिकीर्णाः श्वेता जातशर्कराः स्युः परासुरिति विद्यात । तस्य चेत् पक्ष्माणि जटाबद्धानि स्युः परासुरिति विद्यात । तस्य चेच्चक्षुषी प्रकृतिहीने विकृतियुक्ते अत्युत्पिण्डिते अतिप्रविष्टे अतिजिह्मे अतिविषमे अतिप्रस्रुते अतिविमुक्तबन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषातिप्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके हीनदृष्टिके व्यस्तदृष्टिके नकुलान्धे कपोतान्धे अङ्गारवर्णे कृष्णनीलपीतश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनाभिसंप्लुते वा स्यातां परासुरिति विद्यात् । तथास्य केशलोमान्यायच्छेत् । तस्य चेत् केशलोमान्यायस्यमानानि प्रशुच्येरन् न वेदयेत् परासुरिति विद्यात् ।
तस्य चेदुदरं शिराः प्रदृश्येरन् । श्यावताम्रनील-हारिद्रशुक्ला वा स्युः परासुरिति विद्यात् । तस्य चेन्नखा वीतमांसशोणिताः पक्वजाम्बरवर्णाः स्युः परासुरिति विद्यात् ।
अथास्याङ्गुलीरायच्छेत्तस्य चेदङ्गुलय आयस्यमाना न चेत् स्फुटेयुः परासुरिति विद्यात् ॥"
इति चरकेणेन्द्रियस्थाने चतुर्थेऽध्याय उक्तम् ॥
"वाताष्ठीला तु हृदये यस्योर्द्ध्वमनुयायिनी ।
रुजान्नविद्वेषकरी स परासुरसंशयम् ॥"
इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)

परासुता, स्त्री, (परासोर्मृतस्य भावः । परासु + तल् स्त्रियां टाप् ।) मृतत्वम् । निद्रापरवशता । इति पुराणम् ॥

परास्कन्दी, [न्] पुं (परान् आस्कन्दितुं शीलमस्य । आ + स्कन्द । णिनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

परास्तं, त्रि (परास्यते स्म । परा + अस् + क्तः ।) निरस्तम् । पराजितम् । यथा —
"श्रीर्गिरास्तु वरमस्तु पुनर्मा-
स्वीकृतैव परवागपरास्ता ॥"
इति नैषधे ५ सर्गः ॥

पराह्णः, पुं, (परमुत्तरवर्त्ति अहः । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) परदिनम् । यथा । पूर्व्वाह्णे तद्विधत्वेऽपि पराह्णे त्रिसन्ध्याव्यापित्वे पराह्ण एव । इति सावित्रीव्रते तिथितत्त्वम् ॥

पराह्णः, पु, (परश्च तदहश्चेति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । ततः नस्य णः ।) अपराह्णः । विकालः । (केषाञ्चिन्मते अयं पराह्णोऽपि ॥)

परि, व्य, सर्व्वतोभावः । वर्ज्जनम् । व्याधिः । शेषः । इत्थम्भूतः । आख्यानम् । भागः । वीप्सा । आलिङ्गनम् । लक्षणम् । दोषाख्यानम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी ॥ उपरमः । शोकः । इति हेमचन्द्रः ॥ सन्तोषभाषणम् । इति शब्दरत्नावली ॥ उपसर्गविशेषः । अस्यार्थः । सर्व्वतोभावः । अतिशयः । वीप्सा । इत्थम्भावः । चिह्नम् । भागः । त्यागः । नियमः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परिकथा, स्त्री, (परितः कथा ।) वाङ्मयभेदः । यथा,
"अथ वाङ्मयभेदाः स्युः खण्डकथा कथा ।
आख्यायिका परिकथा कलापकविशेषकौ ॥"
इति त्रिकाण्डशेषः ॥

परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥

परिकरः, पुं, (परिकीर्य्यते इति । कॄ विक्षेपे + "ॠदोरप् ।" ३ । ३ । ५७ । इति अप् । यद्वा परिक्रियतेऽनेनेति पुंसीति घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः । ३ । ३ । १६५ ॥ समारम्भः । वृन्दः । इति शब्दरत्नावली ॥ प्रगाढगात्रिकाबन्धः । (यथा, मार्कण्डेये । १६ । २५ ।
"गाढं परिकरं बद्ध्वा शुल्कमादाय चाधिकम् ।
स्कन्धे भर्त्तारमादाय जगाम मृदुगामिनी ॥")
विवेकः । इति विश्वः । सहकारी । यथा,—

"परिकर: सहकारी स च व्याप्तिपक्षधर्म्मत्वादि:।"
इति सामान्यनिरुक्तौ जगदीश: ॥
(अलङ्कारविशेष:। यथा, साहित्यदर्पणे।१०।७५।
"उक्तिर्विशेषणै: साभिप्रायै: परिकरो मत: ॥"
उदाहरणं यथा तत्रैव। "अङ्गराज। सेनापते। द्रोणोपहासिन्। कर्ण। रक्षैनं भीमाद्दु:शासनम् ॥")

परिकर्त्ता, [ऋ] पुं, (परिकरोतीति। परि+कृ+तृच्।) अनूढ़ज्येष्ठे कनिष्ठविवाहस्य याजक:। इत्युद्वाहतत्त्वम् ॥

परिकर्म्म, [न्] क्ली, (परिक्रियते इति। परि+कृ+मनिन्।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कार:। इति भरत: ॥ स्नानोद्वर्त्तनादि। इति स्वामी ॥ शरीरसंस्कारमात्रम्। इत्यन्ये ॥ तत्पर्य्याय:। अङ्गसंस्कार: १। इत्यमर:।२।६।१२१ ॥ प्रतिकर्म्म ३। इति शब्दरत्नावली ॥ (यथा कुमारे। ४। १९।
"विबुधैरसि यस्य दारुणै:
असमाप्ते परिकर्म्मणि स्मृत:।
तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे ॥")

परिकर्म्मा, [न्] पुं, (परित: कर्म्म यस्य।) परिचारक:। सेवक:। इति रत्नमाला ॥

परिकर्म्मी, [न्] त्रि, (परिकर्म्म विद्यतेऽस्य। परिकर्म्म+इनि:।) परिकर्म्मा। इति हेमचन्द्र: ॥

परिकाङ्क्षित:, त्रि, (परित्यक्तं काङ्क्षितं अभिलाषो येन।) तपस्वी। इति शब्दरत्नावली ॥

परिकूटं, क्ली, (परि सर्व्वतो भूषितं कूटम्।) पुरद्वारकूटकम्। तत्पर्य्याय:। हस्तिनख: २ नगरद्वारकूटकम् ३। इति हेमचन्द्र: ॥

परिक्रम:, पुं, (परिक्रमणम्। क्रमु पादविक्षेपे+भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति उपधाया न वृद्धि:।) क्रीड़ार्थं पद्भ्यां गमनम्। तत्पर्य्याय:। विहार: २। इत्यमर:। ३।२।१९ ॥ प्रदक्षिणम्। यथा,—
वराह उवाच।
"इयं भद्रे। महापुण्यं पृथिव्यां सर्व्वतो दिशम्।
परिक्रम्य यथाध्यानं प्रमाणगणितं शुभम् ॥
भूम्या: परिक्रमे सम्यक् प्रमाणं योजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा ॥
ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च।
जाम्बवता सपुत्रेण रावणेन हनूमता ॥
एतैरनेकधा देवै: ससागरवना मही।
क्रमिता वालिना चैव वायुमण्डलरेखया ॥
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वदेवेन्द्रै: पञ्चभि: पाण्डुनन्दनै: ॥
योगसिद्धैस्तथा कौशिकमार्कण्डेयसुतैरपि।
क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जना: ॥
अप्यसत्त्वबलोपेतै: प्राणिभिश्चाल्पबुद्धिभि:।
गन्तुमपि न शक्यन्ते गमनस्य च का कथा ॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत्।
प्राप्यते चाधिकं तस्मान्मथुराया: परिक्रमे ॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभि:।
कर्त्तव्या मथुरां प्राप्य नरै: सम्यक् प्रदक्षिणा ॥"
इति वराहपुराणम् ॥

परिक्रमसह:, पुं, (परिक्रमं विहारं सहते इति। सह+पचाद्यच्।) छागल:। इति त्रिकाण्डशेष: ॥

परिक्रिया, स्त्री, (परिकरणम्। परि+कृ+शप्। "रिङ् शयग्लिङ्क्षु।" ७।४।२८। इति रिङ्।) परिखाजलादिना वेष्टनम्। तत्पर्य्याय:। परिसर्य्य: २। इत्यमर:। ३।२।२० ॥ (एकाहयागविशेष:। यदुक्तं आश्वलायनश्रौते।९।५।१२।
"सद्यस्क्रिया अनुक्रिया परिक्रिया वा स्वर्गकाम: ॥" "परिक्रियाप्येकाहा भवति एतासामन्यतमेन स्वर्गकामो यजेत ॥" इति नारायणी ॥)

परिक्षित्, पु, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन। परि+क्षि+क्विप्। कलिशासनकर्तृत्वादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। तथा चोक्तं महाभारते। १०। १६। २—३ ॥
"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वन:।
उपप्लव्ये गतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत् ॥
परिक्षीणेषु कुरुषु पुत्त्रस्तव भविष्यति।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ॥")
अभिमन्युपुत्त्र:। तत्पर्य्याय:। परीक्षित १ पारिक्षीत: ३ परिक्षित: ४। इति शब्दरत्नावली ॥ (अयं पुनर्युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तराया गर्भाज्जात:। अयमेव गर्भस्थ: क्रुद्धाश्वत्थामप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवत: कृष्णस्य प्रभावात् जीवितं लब्धवान्। अयमेव वृषरूपिणं धर्म्मं निगृह्णन्तं कलिं प्रशशास। ततो गच्छति काले एकदाऽसौ मृगया विहरन् क्षुधातृट्पीड़ित: मौनव्रतावलम्बिन: शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासञ्जयामास। अनेनापराधेनेमं राजनं शमीकस्य पुत्त्र: शृङ्गी नामा तपस्वी इत: सप्तमेऽहनि तक्षकदष्टोऽयं मृतो भविष्यतीत्यभिशप्तवान्। एतदाकर्ण्याथं गङ्गातीरे मुनिप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोचयन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च। इत्येतत्कथा महाभारते विस्तरतो द्रष्टव्या ॥)
(कुरुपुत्त्रविशेष:। यथा, हरिवंशे। ३२। ९०।
"कुरोस्तु पुत्त्राश्चत्वार: सुधन्वा सुधनुस्तथा।
परिक्षित्तु महाबाहु: प्रवरश्चारिमेजय: ॥"
अविक्षित्-पुत्त्र:। यथा, महाभारते।१।९४।५०।
"अविक्षित: परिक्षित्तु शबलाश्वश्च वीर्य्यवान् ॥")

परिक्षिप्तं, त्रि, (परित: क्षिप्यते स्म इति। क्षिप्+क्त।) परिखादिना वेष्टितम्। तत्पर्य्याय:। निवृतम् २। इत्यमर:। ३।१।८८ ॥ सर्व्वतोभावेन क्षेपयुक्तश्च ॥

परिखा स्त्री, (परित: खन्यते इति। खन्+"अन्येष्वपीति।" ३। २। १०१। ड:।) राजधान्यादिवेष्टनखातम्। इति भरत: ॥ गड़खाइ इति खाना इति च यस्या: प्रसिद्धि:। तत्पर्य्याय: ॥ खेयम्। इत्यमर:। १। १०। २९ ॥ (यथा, मनु:। ७। १९६।
"भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥")
तस्या मानं यथा,—
"प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम्।
परित: शिविराणाञ्च गम्भीरं दशहस्तकम् ॥"
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्याय: ॥

परिख्यात:, त्रि, परिसर्व्वतोभावेन ख्यात: प्रथित:। इति परिपूर्व्वख्याधातो: कर्म्मणि क्तप्रत्ययनिष्पन्न: ॥ विख्यात: ॥

परिगणित:, त्रि, (परिसर्व्वतोभावेन गण्यते स्म। परि+गण+क्त।) सर्व्वतोभावेन गणनायुक्त:। यथा। "परिगणितव्यतिरिक्तेषु संसर्गज्ञानविशेषो नादरणीय: परिगणनानर्थक्यात्।" इति जीमूतवाहन: ॥

परिगत:, त्रि, (परि+गम्+क्त।) प्राप्त:। विस्मृत:। ज्ञात:। चेष्टित:। इति मेदिनी ॥ गत:। इति हेमचन्द्र: ॥ वेष्टित:। यथा,—
"अथ सवल्कदुकूलकुथादिभि:
परिगतोज्ज्वलदुद्धतबालधि:।"
इति भट्टिकाव्ये। १०। १ ॥

परिगृह्या, स्त्री, (परि सर्व्वतोभावेन गृह्यते या परि+ग्रह+कर्म्मणि क्यप्।) नारी। इति शब्दचन्द्रिका ॥

परिग्रह:, पु, (परिग्रहणमिति। परि+ग्रह+"ग्रह वृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) प्रतिग्रह:। (यथा, पञ्चतन्त्रे। ४। ७।
"कण्ठाश्लेषपरिग्रहे शिथिलता यस्मादराद्बन्धसे तत्ते धूर्त्त। हृदि स्थिता प्रियतमा काचिन्ममेवापरा ॥")
सैन्यपश्चाद्भाग:। पत्नी। भार्य्या। (यथा रघु:। ८। १४।
"समनुकम्प्य सपत्नपरिग्रहा-
ननलकानलकानवमां पुरीम् ॥")
परिजन:। परिवार:। आदानम्। (यथा रघु:। ९। ४६।
"अनुभवन्नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया।
अनयदासनरज्जुपरिग्रहे
भुजलतां जलतामबलाजन: ॥")
स्वीकार:। (यथा, रघु:। १८। ३८।

"लोकेन भावी पितुरेव तुल्यः
सम्भावितो मौलिपरिग्रहात् सः ॥")

मूलम् । कन्दः । शापः । शपथः । इत्यमरभरतौ ॥ राहुवक्त्रस्थभास्करः । इत्यजयः ॥ (पुत्त्रदारादि-भर्त्तव्यपरिमाणम् । यथा, मनुः । १० । १२४ ।

"प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद् यथार्हतः ।
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥"

परिगृह्यतेऽनेनेति विग्रहे हस्तः ॥ विष्णुः । यथा, महाभारते । १३ । १४९ । ५८ ।

"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"

"शरणार्थिभिः परितो गृह्यते सर्व्वगतत्वात् परितो ज्ञायत इति वा । पुष्पादिभिर्भक्तैरर्च्चितं परिगृह्णाति इति वा परिग्रहः ॥" इति शाङ्कर भाष्यम् ॥ साधनम् । यथा, रघुः । ३ । ३१ ।

"अजिनदण्डभृतं कुशमेखलां
यतगिरं मृगशृङ्गपरिग्रहाम् ॥"

"मृगशृङ्गं परिग्रहः कण्डूयनसाधनं यस्यास्ताम् ॥"
इति तट्टीकायां मल्लिनाथः ॥)

परिग्राहः, पुं, (परि + ग्रह + "परौ यज्ञे ।" ३ । ३ । ४७ । इति घञ् ।) यज्ञवेदिविशेषः । इति केचित् ॥

परिघः, पुं, (परि हन्यतेऽनेनेति । परि + हन् + "परौ घः ।" ३ । ३ । ८४ । इति अप् घादेशश्च ।) लोहबद्धलगुडः । लोहमय-लगुडः लोहमुखलगुडः । तत्पर्य्यायः । परि घातनः २ । इत्यमरः । २ । ८ । ९१ ॥ परि घातकः ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ६ । ६७ । २४ ।

"बाहूनामुत्तमाङ्गानां कार्म्मुकाणाञ्च भारत ।
गदानां परिघाणाञ्च हस्तानाञ्चोरुभिः सह ॥")

परिघातः । परितो हननम् । इत्यमरभरतौ ॥ विष्कम्भादिसप्तविंशतियोगान्तर्गत ऊनविंशति योगः । (यथा, ज्योतिषे ।

"वज्रोऽष्टकं च व्यतीपातो वरीयान् परिघस्तथा ॥"

अस्य अर्द्धांशं परित्यज्य शुभं कर्म्म कुर्य्यात् । यदुक्तं तत्रैव ।

"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ॥")

अथ परिघयोगजातफलम् ।

"उत्पत्तिकाले परिघो यदि स्या-
न्नरस्तदा वंशकुठारकल्पः ।
असत्यसाक्षी क्षमया विहीनः
स्वल्पाशुभोक्ता विजितारिपक्षः ॥"
इति कोष्ठीप्रदीपः ॥

अर्गलः । इति मेदिनी ॥ मुद्गरः । शूलः । इत्यजयः ॥ कलसः । काचघटः । गोपुरम् । सद्म । इति शब्दरत्नावली ॥ ॥ * ॥ (कार्त्तिकानुचर-विशेषः । यथा, महाभारते । ९ । ४५ । ३३ ।

"परिघञ्च वटश्चैव भीमश्च सुमहाबलम् ।
दहतिं दहनश्चैव प्रचण्डौ वीर्य्यसम्मतौ ॥
अंशोऽप्यनुचरान् पञ्च ददौ स्कन्दाय धीमते ॥"

चण्डालविशेषः । यथा, महाभारते । १२ । १३८ । ११४ ।

"लम्बकर्णो महावक्त्रो मलिनो घोरदर्शनः ।
परिघो नाम चण्डालः शस्त्रपाणिरदृश्यत ॥")

परिघातः, पुं, (परिहन्यतेऽनेन । परि + हन् + घञ् । "हनस्तोऽचिण्णलोः ।" इति तः ।) अस्त्रम् । हननम् । इति धरणिः ॥

परिघातनः, पुं, (परितो घातनं यस्मात् ।) परिघा-स्त्रम् । इत्यमरः । २ । ८ । ९१ ॥ सर्व्वतो-भावेन हनने क्ली ॥

परिघोषः, पुं, (परितो घोषो यस्मिन् ।) मेघ-शब्दः । शब्दः । अवाच्यः । इति मेदिनी ॥

परिचयः, पुं, (परि समन्तात् चयनं बोधो ज्ञान-मित्यर्थः । परि + चि + अप् ।) विशेषेण ज्ञानम् । चेना इति भाषा । तत्पर्य्यायः । संस्तवः २ । इत्यमरः ।३।२।२३ ॥ प्रणयः ३ । इति भरतः ॥ (यथा, माघे । ७ । ६१ ।

"न परिचयो मलिनात्मनां प्रधानम् ॥"

अभ्यासः । यथा, माघे । २ । ७५ ।

"हेतुः परिचयस्थैर्य्ये वक्तुर्गुणनिकेव सा ॥"

नादस्य अवस्थाविशेषः । यथा, हठयोगदीपि-कायाम् । ४ । ६९ ।

"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥")

परिचरः, पुं, (परितश्चरतीति । परि + चर + पचाद्यच् ।) युद्धकाले परप्रहारात् रथरक्षकः । प्रजासामन्तव्यवस्थापनकारी । इति केचित् ॥ सेनायां राज्ञो दण्डनायकः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । परिधिस्थः २ । इत्य मरः । २ । ८ । ६२ ॥ सहायः ३ । इति रत्न-माला ॥ (परिचर्य्याकारकः । यथा वैद्यके,—

"उपचारज्ञता दाक्ष्यमनुरागश्च भर्त्तरि ।
शौचञ्चेति चतुर्थोऽयं गुणः परिचरे जने ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥

"स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)

परिचरणकर्म्म, [न्] क्ली, (परिचरणं सेवैव कर्म्म ।) परिचर्य्या । तद्वैदिकपर्य्यायाः । इर ज्यति १ विधेम २ सपर्य्यति ३ नमस्यति ४ दुर स्यति ५ ऋध्नोति ६ ऋणद्धि ७ ऋच्छति ८ सपति ९ विवासति १० । इति दश परिचरण-कर्म्माणः । इति वेदनिघण्टौ ३ अध्याये ॥

परिचर्य्या, स्त्री, (परिचर्य्यते परिचरणमित्यर्थः । परि + चर + "परिचर्य्यापरिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिं इति शो यक् च निपात्यते ।) सेवा । (यथा, देवीभागवते । १ । ४ । ११ ।

"अथवा वार्द्धके प्राप्ते परिचर्य्यां करिष्यति ।
पुत्त्रः परमधर्म्मिष्ठः पुण्यार्थं कलविङ्कयोः ॥")

तत्पर्य्यायः । वरिवस्या २ शुश्रूषा ३ उपा-सनम् ४ । इत्यमरः ।२ । ७ । ३५ ॥ परिसर्य्या ५ उपासना ६ उपास्तिः ७ । इति भरतः ॥ शुश्रू षणा ८ । इति शब्दरत्नावली ॥

परिचाय्यः, पुं, (परिचीयते इति । चिञ् चिञाम् + "अग्नौ परिचाय्योपचाय्यसमूह्याः ।" ३ । १ । १३१ । इत्यनेन साधुः ।) यज्ञाग्निः । तत्पर्य्यायः । समूह्यः २ उपचाय्यः ३ । इत्यमरः । २ । ७ । २० ॥ (अग्निरिह न वह्निः किन्त्वग्न्याधारणार्थस्थल-विशेषः । इति सिद्धान्तकौमुदी ॥)

परिचारकः, त्रि, (परिचरतीति । परि + चर + ण्वुल् ।) सेवकः । चाकर इति भाषा ॥ (यथा, मनुः । ७ । २१७ ।

"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥")

तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ दासः ५ गोप्यकः ६ चेटकः ७ नियोज्यः ८ किङ्करः ९ प्रेष्यः १० भुजिष्यः ११ । इत्य-मरः । २ । १० । १७ ॥ डिङ्गरः १२ चेटः १३ गोप्यः १४ पराचितः १५ परिष्कन्दः १६ परि-कर्म्मी १७ । इति हेमचन्द्रः । ३ । २४ ॥

परिचार्य्यः, त्रि, परिचर्य्यतेऽसौ इति । परि + चर + कर्म्मणि ण्यत् । सेव्यः ॥

परिचितः, त्रि, (परि + चि + कर्म्मणि क्तः ।) परिचयविशिष्टः । ज्ञातः । यथा,—

"त्यक्तव्येयं चिरपरिचिता जन्मभूमीति बुद्ध्या
मा खिद्यस्व त्रिभुवनजनत्राणहेतोः क्रमाङ्क ! ।
किन्न श्लाघ्यं भवति महतां चेत् परस्योपकारी ।
वाराणस्या सुचिरपि गतो दक्षिणाशामगस्त्यः ॥"
इति पदाङ्कदूतः ॥

परिचेयं, त्रि, परि पूर्व्वचिधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥ परिचययोग्यम् । परिचयनीयम् । परिचेतव्यम् ॥

परिच्छदः, पुं, (परिच्छाद्यतेऽनेनेति । परि + छद + णिच् + "पुंसि संज्ञायाम् ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४।९६ । इति उपधाह्रस्वः ।) परिवारः । इति हेम-चन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । ६७३ ।

"सहधर्म्मचारिणी मम परिच्छदः सुतनु । नेह
सन्देहः ।
न तु सुखयति तुहिनदिनच्छत्त्रच्छायेव सञ्जन्तौ ॥")

हस्त्यश्ववस्त्रकम्बलाद्युपकरणम् । यथा,—

"परिच्छदं नृपार्हेऽर्थे परिवर्होऽव्ययाः परे ॥"
इत्यस्य टीकायां भरतः ॥

(यथा, रघुः । १ । १९ ।

"सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता ॥")

आच्छादनम् । यथा,—

"पयःफेननिभा शय्या दान्ता रुक्मपरिच्छदा ।"
इति श्रीभागवतम् ॥

परिच्छन्दः, पुं, (परिच्छन्द्यतेऽनेन । परि + छदि संवरणे + घञ् ।) परिच्छदः । इति हला-युधः ॥

परिच्छन्नः, त्रि, परिपूर्व्वच्छदधातोः कर्त्तरि कर्म्मणि च क्तप्रत्ययनिष्पन्नः ॥ परिच्छदविशिष्टः । सर्व्वतो-भावेनाच्छादितः । संवृतः ॥

परिच्छिन्नः, त्रि, (परि+छिद्+कर्म्मणि क्तः ।) परिच्छेदविशिष्टः । अवधिप्राप्तः । यथा,—
"परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ।"
इति महिम्नः स्तोत्रम् ॥
सर्व्वतोभावेन छेदविशिष्टश्च ॥

परिच्छेदः, पुं, (परि+छिद्+भावे करणादौ च घञ् ।) ग्रन्थविच्छेदः । यथा, त्रिकाण्डशेषे ॥
"सर्गवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ॥
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः ॥"
(तत्र काव्ये सर्गः । कोषे वर्गः । अलङ्कारे परिच्छेदोच्छ्वासौ । कथायामुद्घातः । पुराणसंहितादौ अध्यायः । नाटके अङ्कः । तन्त्रे पटलः । ब्राह्मणे काण्डम् । संगीते प्रकरणम् । इतिहासे पर्व्व । भाष्ये आह्निकम् । एवमन्येऽपि पादतरङ्गस्तवकप्रपाठकस्कन्धमञ्जरीलहरीशाखादयो ग्रन्थसन्धयो ग्रन्थभेदे यथायथं ज्ञेयाः ॥*॥)
सीमा । अवधिः । यथा, मालतीमाधवे ।
"परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते ॥"

परिजनः, पुं, (परिगतो जनः ।) परिवारः । पोष्यवर्गः । यथा, महिम्नः स्तोत्रे ।
"यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥"
नियतसन्निधिवर्त्तिपरिचारकः । यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥"
"परिजनः नियतसन्निधिवर्त्तिपरिचारकः ।"
इत्यस्य श्लोकस्य व्याख्यायां गोपीरमणतर्कपञ्चाननः ॥

परिजल्पितं, क्ली, (परि+जल्प+भावे क्तः ।) दशाङ्गचित्रजल्पान्तर्गतद्वितीयजल्पनम् । यथा,
"प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात् ।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥"
इत्युज्ज्वलनीलमणिः ॥

परिज्मा, [न्] पुं, (परिजायते इति । परि+जन्+मन् । निपातनात् साधुः ।) चन्द्रः । अग्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्य्यजतीति । अजेः परिपूर्व्वस्य श्वन्नुक्षन्नित्यादिना मन्प्रत्ययोऽकारलोपः आद्युदात्तत्वञ्च निपात्यते । परिगन्ता । इति वेदभाष्यम् ॥)

परिज्वा, [न्] पुं, (परि+ज्ञु सौत्रधातुः+"श्वन्नुक्षन् पूषन्निति ।" उणां । १ । १५८ । इति कनिन् । इदन्तु उज्ज्वलदत्तमतम् ।) इन्द्रः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

परिडीनकं, क्ली, (परि+डी+क्तः । ततः स्वार्थे कन् ।) पक्षिगतिविशेषः । यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।"
इति जटाधरः ॥
(तथाच महाभारते । ८ । ४१ । २७ ।
"अतिडीनं महाडीनं खडीनं परिडीनकम् ॥")

परिणतं, त्रि, (परिणमति स्म । परि+नम्+क्तः ।) पक्वम् । इत्यमरः । ३ । १ । ६६ ॥ तिर्य्यग्घातिगजः । इति हेमचन्द्रः ॥ (यथा, माघे । ४ । २६ ।
"सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्त्ति ॥")
सर्व्वतोभावेन नतश्च ॥

परिणयः, पुं, (परिणयनम् । परि+नी+अप् ।) विवाहः । इत्यमरः । २ । ७ । ५७ ॥

परिणामः, पुं, (परिणमनम् । परि+नम्+घञ् ।) विकारः । प्रकृतेरन्यथाभावः । यथा । सुखस्य विकारः क्रोधरक्तता । केचित्तु । प्रकृतिध्वंसजन्यविकारः । यथा काष्ठस्य विकारो भस्म । स्वर्णपिण्डस्य घटः । इत्यमरभरतौ ॥ चरमः । शेषः । यथा,—
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥"
इति भारवौ । २ । ४ ॥
(निदानभेदेन यथा,—
"असात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामभेदात्त्रिविधो वा ॥" "परिणामोऽयोगादियुक्ता ऋतुस्वभावजा शीतादयः । अधर्म्मस्य च रोगहेतोरत्रैवान्तर्भाव इति भट्टारहरिचन्द्रः ॥" इति माधवकरकृतरुग्विनिश्चयस्य पञ्चनिदानव्याख्याने विजयेनोक्तम् ॥
"कालस्य परिणामेन जरामृत्युनिमित्तजाः ।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
अर्थालङ्कारभेदः । तल्लक्षणं यथा,—
"परिणामः क्रियार्थश्चेद्विषयी विषयात्मना ॥")

परिणामदर्शी, [न्] त्रि, (परिणामं चरमं पश्यतीति । दृश्+णिनि ।) चरमकालप्रेक्षी । पश्चाद्दर्शी । विषयादेः शेषद्रष्टा । इति भारतम् ॥

परिणामशूलः, पुं, (परिणामे चरमावस्थायां शूलं यस्य । यद्वा परिणामे भुक्तान्नादेः परिपाके उत्पद्यते शूलं यस्मात् ।) रोगविशेषः । तस्योत्पत्तिर्यथा,—
"स्वैर्निदानैः प्रकुपितो वायुः सन्निहितो यदा ।
कफपित्ते समावृत्य शूलकारी भवेद्बली ॥"
तस्य लक्षणं यथा,—
"भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ।
तस्य लक्षणमप्येतत् समासेनाभिधीयते ॥"
वातिकस्य तस्य लक्षणं यथा,—
"आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ॥"
पैत्तिकस्य तस्य लक्षणं यथा,—
"तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम् ।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक् ॥"
श्लैष्मिकस्य तस्य लक्षणं यथा,—
"छर्द्दिहृल्लाससम्मोहं स्वल्परुग्दीर्घसन्तति ।
कटुतिक्तोपशान्तौ च तद्विज्ञेयं कफात्मकम् ॥"
त्रिदोषजस्य तस्य लक्षणं यथा,—
"संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् ।
त्रिदोषजमसाध्यन्तु क्षीणमांसबलानलम् ॥"
इति माधवकरः ।
तस्यौषधं यथा, गरुडपुराणे ।
"लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा ।
मधुना खादितं रुद्र ! परिणामाख्यशूलनुत् ॥"
(चिकित्सास्य यथा,—
"वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते ।
वस्तयश्च हिताः शूले परिणामसमुद्भवे ॥
विड़ङ्गतण्डुलव्योषं त्रिवृद्दन्तीसचित्रकम् ।
सर्व्वाण्येतानि संहृत्य सूक्ष्मचूर्णानि कारयेत् ॥
गुड़ेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थितः ।
उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम् ॥
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥
नागरगुड़तिलकल्कं पयसा संसाध्य यः पुमानद्यात ।
उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण ॥"
"तिलनागरपथ्यानां भागं शम्बूकभस्मनाम् ।
द्विभागगुड़संयुक्तं गुडीं कृत्वाक्षभागिकाम् ॥
शीताम्बुपानं पूर्व्वाह्णे भक्षयेत् क्षीरभोजनः ।
सायाह्ने रसकं पीत्वा नरो मुच्येत दुर्जयात् ॥
परिणामसमुत्थाच्च शूलाच्चिरभवादपि ।
शम्बूकजं त्र्यूषणञ्च पञ्चैव लवणानि च ॥
समांशां गुडिकां कृत्वा कलम्बीकरसेन वा ।
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम् ॥
शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥
यः पिबति सप्तरात्रं शम्बूकानां कलायय़ूषेण ।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम् ॥
लौहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा ।
परिणामशूलं शमयेत्तज्जलं वा प्रयोजितम् ॥
सामुद्रं सैन्धवं क्षारो रुचकं रौमकं विड़म् ।
दन्ती लौहरजः किट्टं त्रिवृत्सूरणकं समम् ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णाजीर्णे तु भुञ्जीत मांसादिघृतसाधनम् ।
नाभिशूलं शीर्षशूलं यकृद्गुल्मकृतञ्च यत् ॥
विद्रध्यष्ठीलिकं हन्ति कफवातोद्भवन्तथा ।
शूलानामपि सर्व्वेषामौषधं नास्ति तत् परम् ॥
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम् ॥"
इति समुद्राद्यं चूर्णम् ॥ * ॥
"सपिप्पलीगुड़ं सर्पिः पचेत् क्षीरे चतुर्गुणे ।
विनिहन्त्यम्लपित्तञ्च शूलञ्च परिणामजम् ॥"
इति गुड़पिप्पलीघृतम् ॥ * ॥
"क्वाथेन कल्केन च पिप्पलीनां
सिद्धं घृतं माक्षिकसंप्रयुक्तम् ।

क्षीरानुपानं विनिहन्त्यवश्यं
मूलं प्रवृद्धं परिणामसंज्ञम् ॥"

इति पिप्पलीघृतम् ॥ * ॥

"मण्डूरं शोधितं चूर्णीं लौहजां वा गुडेन तु ।
भक्षयन्मुच्यते शूलात् परिणामसमुद्भवात ॥
संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम् ।
शतावरीरसस्याष्टौ दध्नस्तु पयसस्तथा ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः ।
विपचेत् सर्व्वमेकैध्यं यावत् पिण्डत्वमागतम् ॥
सिद्धन्तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा ।
वातात्मकं पित्तभवं शूलञ्च परिणामजम् ॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः ॥"

इति शतावरीमण्डूरम् ॥ * ॥

इति वैद्यकचक्रपाणिसंग्रहे शूलाधिकारे ॥
"अजीर्णान्नरसः प्रोक्तो द्वयामः परिणामजः ।"
"जीर्णेऽन्ने च भवेद्यस्तु स ज्ञेयः परिणामजः ॥"
"लङ्घनं वमनञ्चैव विरेकश्चानुवासनम् ॥
निरूहो वस्ति कर्म्माणि परिणामे त्रिदोषजे ।
चित्रकं त्रिवृता दन्ती विडङ्गं कटुकत्रयम् ॥
समं चूर्णं गुडेनाथ कारयेन्मोदकान् सुधीः ।
भक्षयेत् प्रातरुत्थाय पश्चादुष्णोदकं पिबेत् ॥
परिणामोद्भवं शूलं हन्ति शीघ्रं नरस्य च ।
यवानीहिङ्गु सिन्धूत्थक्षारं सौवर्च्चलाभया ।
सुरामण्डेन पातव्या परिणामे त्रिदोषजे ॥
हिङ्ग्वम्लवेतसाजमोदहवुषा पथ्यायवानी शठी
जातीपिप्पलीदाडिमवृक्षौतिन्तीडिकचव्याग्नि-
कम् ।
तस्मादम्लसुवर्च्चला च यवजक्षारं तथा सर्ज्जिका
सिन्धूत्थं विडपूर्व्वकं समकृतं स्याद्वीजपूरे रसं ॥
संभाव्यं सुवृतात्वनेन गुड़िका चाक्षप्रमाणा तथा
कष्टो वातविकारिणां प्रदहतः शूलार्शसः
शोषकान् ॥"
"एष हिङ्ग्वादिको नाम सर्व्वशूलार्त्तिनाशनः ।
सर्व्ववातविकारघ्नः सर्व्वक्षयनिवारणः ।
परिणामोद्भवं शूलं वारयत्याश्वसंशयम् ॥"
इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥

परिणायः, पुं, (परितो वामदक्षिणतो नयनम् । परि+नी+"परिण्योर्नीणोद्यूताभ्रेषयोः ।" ३ । ३ । ३७ । इति घञ् ।) शारीणां समन्तान्नयनम् । इत्यमरः । २ । १० । ४६ ॥ परेरितो दीर्घत्वे परीणायश्च । इति भरतः ॥

परिणाहः, पुं, (परिणह्यतेऽनेन इति । परि+नह+घञ् ।) विस्तारः । तत्पर्य्यायः । विशालता २ । इत्यमरः । २ । ६ । ११४ ॥ ओसार इति चौड़ा इति च भाषा ॥ (यथा, महाभारते । ६ । ७ । २२ ।
"अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ।
परिणाहस्तु वृक्षस्य फलानां रसभेदिनाम् ॥")

परिणेता, [ऋ] पु, (परिणयतीति । परि+नी+तृच् ।) वोढ़ा । भर्त्ता २ । इति राजनिर्घण्टः ॥ (यथा,—
"क्षितौ दक्षयतो दक्षगान् परिनेतुः प्रसूतये ।
अथ्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः ॥"
इति रघुः । १ । २५ ।)

परितः, [स्] व्य, (परि+"पर्य्यभिभ्याञ्च ।" ५ । ३ । ९ । इति तसिल् ।) सर्व्वतः । चतुर्दिगभियाम्नौ । इत्यमरः । ३ । ४ । १३ ॥ (यथा, रघुः । ६ । ९ ।
"पुरोपकण्ठो पवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे ॥")

परितापः, पुं, (परिसर्व्वतोभावेन तप्यतेऽनेन । परि+तप्+घञ् ।) दुःखम् । (यथा, भागवते । ७ । ८ । ५० ।
"स तु जनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंश ॥")
नरकान्तरम् । इति मेदिनी ॥ शोकः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ७७ । २५ ।
"एतया तत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना ।
व्याहृतेऽप्यभिषेके मे परितापो न विद्यते ॥")
भयम् । कम्पः । इति विश्वः ॥ अत्युष्णता च ॥ (यथा, मार्कण्डेये । १५ । ४९ ।
"परितापश्च गात्रेभ्यः पीड़ाबाधाश्च तत्क्षणः ।
अपहन्ति नरव्याघ्र । दयां कुरु महीपते । ॥")

परितुष्टः, त्रि, (परि+तुष्+क्तः ।) परितोषयुक्तः । सन्तुष्टः । यथा,—
"यत् प्रार्थ्यते त्वया भूप । त्वया च कुलनन्दन ॥
मत्तस्तत् प्राप्यतां सर्व्वं परितुष्टा ददामि तत् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ९३ । १० ॥

परितोषः, पुं, (परितोषणमिति । परि+तुष्+घञ् ।) सर्व्वतोभावेन तुष्टिः । सन्तोषः । यथा,—
"त्वामुदर । साधुमन्ये शाके-
रपि यदसि लब्धपरितोषम् ।
हतहृदयं ह्यधिकाधिक-
वाञ्छाशतदुर्भरं न पुनः ॥"
इति शान्तिशतके ॥

परित्यागः, पुं ,(परित्यजनमिति । परि+त्यज्+घञ् ।) सर्व्वतोभावेन वर्ज्जनम् । तत्पर्य्यायः । क्षेपणम् २ । इति त्रिकाण्डशेषः ॥ * ॥
"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥"
इति मत्स्यसूक्तम् ॥

परित्राणं, क्ली, (परित्रायते इति । परि+त्रै+ल्युट् ।) मारणोद्यतस्य निवारणम् । तत्पर्य्यायः । पर्य्याप्तिः २ हस्तवारणम् ३ । इत्यमरः । ३ । २ । ५ ॥ रक्षणम् । यथा,—
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"
इति श्रीभगवद्गीतायाम् । ४ । ८ ॥

परिदानं, क्ली, (परिदीयते इति । परि+दा+भावे ल्युट् ।) परीवर्त्तः । विनिमयः । इत्यमरः । २ । ९ । ८० ॥

परिदायी, [न्] पुं, (परित्यज्य शास्त्रधर्म्मं ददातीति । परि+दा+णिनिः ।) अनूढ्ज्येष्ठे तत्कनिष्ठाय कन्यादाता । "यथा हारीतः । ज्येष्ठेऽनिर्व्विष्टे कनीयान् निर्व्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकस्ते सर्व्वे पतिताः ।" इत्युद्वाहतत्त्वम् ॥

परिदेवनं, क्ली, (परि+दिव+ल्युट् ।) अनुशोचनोक्तिः । विलापः । इत्यमरः । १ । ६ । १६ ॥ (यथा, महाभारते । १ । २ । १४६ ।
"परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ ।
आश्वासनञ्च सत्यस्य दुःखार्त्तायाः प्रकीर्त्ति-
तम् ॥")

परिदेवना, स्त्री, (परिदेवयतीति । परि+दिवि+'ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । ततष्टाप् ।) शोकनिमित्तो विलापः । यथा,—
"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥"
इति श्रीभगवद्गीताद्वितीयाध्यायश्लोकव्याख्याने श्रीधरस्वामी ॥ अपि च ।
"न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च ।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक । ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
अयाचितो मया लब्धस्तत्प्रेषितः पुनः कृतः ।
यत्रागतस्तत्र गतस्तत्र का परिदेवना ॥
एकवृक्षे यदा रात्रौ नानापक्षिसमागमः ।
प्रभाते दश दिशो यान्ति तत्र का परिदेवना ॥
एकसार्थप्रयातानां सर्व्वेषान्तत्र गामिनाम् ।
यद्येकस्त्वरितो याति का तत्र परिदेवना ॥"
इति गरुड़पुराणे १११ अध्यायः ॥

परिधानं, क्ली, (परिधीयते यत् । परि+धा+कर्म्मणि ल्युट् ।) परिधेयवस्त्रम् । तत्पर्य्यायः । अन्तरीयम् २ उपसंव्यानम् ३ अधोंऽशुकम् ४ । इत्यमरः । २ । ६ । ११७ ॥ (यथा, पञ्चतन्त्रे । ५ । २३ ।
"वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥")

परिधायः, पुं, (परिधीयतेऽत्र । परि+धा+घञ् ।) जनस्थानम् । परिच्छदः । नितम्बः । इति मेदिनी ॥ (जनस्थानमित्यत्र जलस्थानमिति केचित् ॥)

परिधिः, पुं, (परिधीयतेऽनेन । परि+धा+"उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः ।) परिवेशः । चन्द्रसूर्य्यसमीपमण्डलम् । (यथा, रघुः । ८ । ३० ।
"अनृपत्वमुपेयिवान् बभौ
परिधिर्मुक्त इवोष्णदीधितिः ॥")
यज्ञियतरुशाखा । यज्ञियतरोः पलाशादेर्यज्ञपशुबन्धनार्थं या शाखा निखायते तस्याम् । इत्यमरभरतौ ॥ (यथाह आपस्तम्बः । "खादिरं पालाशं वैकविंशतिदारुकमिध्मं करोति त्रयः

परिधय: मालाग्रकाकका: खादिरौदुम्बरविल्व-रोहितकविकङ्कतानां ये वा यज्ञिया वृक्षा आर्द्रा: शुष्करसालप्तका: ॥" इति ॥ * ॥) भूगोलादेर्वेष्टनम्। यथा,—

"यासिभनन्दाभिहते विभक्ते
खवाणसूर्य्यैः परिधिस्तु सूक्ष्म: ॥"
इति लीलावती ॥

(क्ली, परिधीयते यदिति। परि+धा+कर्म्मणि कि:। परिधेयवस्त्रम्। यथा, भागवते। ८। ७। १७।

"मेघश्याम: कनकपरिधि: कर्णविद्योतविद्यु-न्मूर्द्ध्नि भ्राजद्विलुलितकच: स्रग्धरो रक्तनेत्र: ॥"
"कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य" इति तट्टीका ॥)

परिधिस्थ:, पुं, (परिधौ तिष्ठतीति। परिधि+स्था+क: ।) परिचर:। इत्यमर: ।२।८।६२॥ युद्धकाले परप्रहारात् रथरक्षके। प्रजा-सामन्तव्यवस्थापनकारिणीति केचित्। सेनायां गाणो दण्डनायक:। इत्यन्ये। इति भरत: ॥

परिधेयं, त्रि, (परिधातुं शक्यम्। परि+धा+"अचो यत्।" ३।१।९७। इति यत "ईद्यति।" ६।४।६५। इति आत ईत् ततो गुण:।) परिधानीयम्। परिधातव्यम्। परिधानोपयुक्तवस्त्रादि। यथा,—

"न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्तेन-इष्टार्थत्वापत्ते:।" इति विवादचिन्तामणि: ॥

परिपणं, क्ली, (परिपण्यते व्यवह्रियतेऽनेन। परि+पण+"पुंसि संज्ञायां घ: प्रायेण।" ३।३।११८। इति घ:।) मूलधनम्। इत्य-मर:। ३।९।८०। पुंजि इति भाषा ॥

परिपन्थक:, पुं, (परिपन्थयति दोषादिकं प्राप्नो-तीति। परि+पथि क गतौ+ण्वुल्।) शत्रु:। इति हेमचन्द्र:। ३। ३९३॥ (यथा, महा-भारते। १०। १६। ३१।

"हतो दुर्य्योधन: पापो राज्यस्य परिपन्थक:॥")

परिपन्थी, [न्] त्रि, (परिसर्व्वतो भावेन दोषा-ख्यानं पन्थयितुं शीलमस्य। परि+पन्थ+णिनि:।) शत्रु:। इत्यमर:। २। ८। ११। (यथा, गीतायाम्। ३। ३४।

"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥"

प्रतिकूलाचारी। यथाह कश्चित्।

"अपराधिनि चेत् क्रोध: क्रोधे क्रोध: कथं नहि।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि ॥")

परिपाक:, पुं, (परिपच्यते इति। परि+पच्+घञ्।) परिपक्वता। यथा, भावप्रकाशे।

"इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्य: परिपाकमेति।"

नैपुण्यम्। यथा,—

"बौध्य तस्य विनये परिपाकं
माकशासनपदं स्पृहतोऽपि।"
इति नैषधचरितम् ॥

परिपाकिनी, स्त्री, (परिपाक: परिपाकशक्ति-विद्यतेऽस्या:। परिपाक+इनि+ङीप्।) त्रिवृता। इति शब्दचन्द्रिका ॥

परिपाटि:, स्त्री, (परिपाटनम्। परि+पट्+स्वार्थे णिच्+अच इ:। यद्वा परि भागे भागेन पाटि: पाटनं गतिर्यस्याम्।) परिपाटी-विशिष्ट:। तत्पर्य्याय:। आनुपूर्व्वी २ आवृत् ३ अनुक्रम: ४ पर्य्याय: ५। इत्यमर: ।३।७।३७॥ आनुपूर्व्यम् ६ परिपाटी ७। इति भरत: ॥ आनुपूर्व्यम् ८ आनुपूर्व्वकम् ९। इति टीका-न्तरम् ॥ क्रम: १०। इति जटाधरशब्दरत्ना-वल्यौ ॥

परिपिष्टकं, क्ली, (परि+पिष्+क्त+संज्ञायां कन्।) सीसकम्। इति राजनिर्घण्ट: ॥

परिपुष्करा, स्त्री, (परित: पुष्करं सुखं यस्या:।) गोडुम्बा। इति शब्दचन्द्रिका ॥ राजगोमक् इति भाषा ॥

परिपूतं, क्ली, (परि+पू+क्त:।) अपास्ततुष धान्यम्। यथा, मनु:।

"परिपूतेषु धान्येषु शाकमूलफलेषु च।
निरन्वये शतं दण्ड: सान्वयेऽर्द्धशतं दम: ॥"

त्रि, सर्व्वतोभावेन पवित्रम् ॥ (यथा,माघे ।२।१६।

"घर्णयन् मदिरास्वादमदपाटलितद्युती।
रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥")

परिपूर्णता, स्त्री, (परिपूर्णस्य भाव:। परिपूर्ण+"तस्य भावस्त्वतलौ।" ५।१।११९। इति तल् तत: "त्वान्तं क्लीवमन्तलन्तं स्त्रियाम्।" इति वार्त्तिकोक्तत्वात् स्त्रियां टाप्।) परिपूर्णत्वम्। सम्पूर्णता। तत्पर्य्याय:। आभोग:२। इत्य-मर:। २। ६। १३७॥

परिपूर्णत्वं, क्ली, (परिपूर्णस्य भाव:। "तस्य भावस्त्वतलौ।" ५।१।११९। इति त्व। तत: क्लीवत्वम्।) परिपूर्णता। सम्पूर्णत्वम्। इति जटाधर: ॥ (यथा,—

"दृश्यते परिपूर्णत्वं मुखचन्द्रस्य ते सखि।
न जाने कञ्चकोरं हि विधाता पालयिष्यति ॥"
इत्युद्भट: ॥)

परिपेलं, क्ली, (परिपेलति म्दुतां गच्छतीति। पेल गतौ+अच्।) परिपेलवम्। कैवर्त्ती-मुस्तकम्। इति शब्दमाला ॥ तन्मान्तरे यथा,—

"परिपेलं प्लवं वन्यं तत्कुटन्नटसंज्ञकम्।
जायते मुस्तकाकारं शैवालकुलसश्रये ॥"
इत्यमरटीकायां भरत: ॥

परिपेलवं, क्ली, (परि सर्व्वत: पेलवं म्दुता यस्य।) कैवर्त्तीमुस्तकम्। इत्यमर:। २। ४। १३१॥ (अत्यन्तकोमले, त्रि। यथा, ऋतुसंहारे ।
६४। ७।

"स्फीतमध्यपरिपेलवं फलं
ग्रीष्ममध्यचिरकालसम्भवम् ॥"

गुणादयोऽस्य कैवर्त्तीमुस्तकशब्दे ज्ञेया: ॥)

परिप्लवं, त्रि, (परिप्लवते इति। प्लु+अच्।) चञ्च-लम्। इत्यमर:। ३। १। ३५।

(यथा, माघे। १४। ६८।

"मत्तकुञ्जाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुष:।
गच्छत: स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षयम् ॥"

पुं, राज्ञ: सुखीनलस्य पुत्र:। यथा, भागवते। ९। २२। ४२।

"सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनल:।
परिप्लव: सुतस्तस्मान्मेधावी सुनयात्मज: ॥")

परिप्लुत:, त्रि, (परि+प्लु+क्त:।) जलादिप्लावित:। यथा, मार्कण्डेये देवीमाहात्म्ये १ अध्याय: ॥

"आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता ॥"

परिप्लुता, स्त्री, (परि+प्लु+क्त:। स्त्रियां टाप्।) मदिरा। इति हेमचन्द्र:। ३। ५६६॥ ग्राम्य-धर्म्मे (मैथुने) वेदनावती योनि:। यथा,—

"परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशम्।"
इति योनिव्यापन्निदाने माधवकर: ॥

("पित्तलाया नृसंवासे क्षवथूद्गारधारणात्।
पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रिया: ॥
शूनस्पर्शाक्षमासार्त्तिर्नीलपीतमसृक् स्रवेत्।
श्रोणीवङ्क्षणपृष्ठार्त्तिज्वरार्त्ताया: परिप्लुता ॥"
इति चरके चिकित्सास्थाने त्रिंशोऽध्याये ॥)

आप्लुते त्रि ॥

परिबर्ह:, पुं, (परिबर्ह्यतेऽनेन। बर्ह प्राधान्ये+घञ्।) परिच्छद:। हस्त्यश्वछत्रचामरादि। नृपार्होऽर्थ:। राजयोग्यद्रव्यं सितच्छत्रादि। नृपार्हं सितच्छत्रादि अर्थो धनमिति केचित्। इत्यमरभरतौ ॥ (यथा,—

"निवेश्य गङ्गामनु तां महानदीं
चमूं विधानै: परिबर्हशोभिनीम्।
उवास रामस्य तदा महात्मनो
विचिन्तमानो भरतो निवर्त्तनम् ॥"
इति रामायणे। २। ८३। २६।)

परिभव:, पुं, (परि+भू+अप्।) अनादर:। इत्यमर:। १। ७। २२॥ (यथा, रघु: ।१२।३७।

"फलमस्योपहासस्य सद्य: प्राप्स्यसि पश्य माम्।
म्दग्या: परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥")

परिभाव:, पुं, (परि+भू+"परौ भुवोऽवज्ञाने।" ३।३।५५। इति घञ्।) परिभव:। इत्य-मर:। १। ७। २२॥

परिभाषणं, क्ली, (परि+भाष+ल्युट्।) सनिन्द उपालम्भ:। इत्यमर:। १। ६। १४॥ उपालम्भो दुर्व्वाद:। निन्दया सह वर्त्तमानो य उपा-लम्भस्तत्र सनिन्दे परिभाषणम्। उपालम्भो गुणाविष्करणेन स्तुतिपूर्व्वकोऽपि भवति। यथा महाकुलस्य भवत: किमिदमुचितं भवति। अत्र तु सस्तुतौ न परिभाषणम्। टीकान्तरे-ऽपि बन्धुलस्य तवागम्यागमनं योग्यमिति निन्दापूर्व्व:। महाकुलस्य तव कथं विप्रवध:। इति स्तुतिपूर्व्वश्च उपालम्भ:। इति भरत: ॥ * ॥ नियम:। इति मेदिनी ॥ आलाप:। इति विश्व: ॥

परिभाषा, स्त्री, (परि + भाष् + अच् । ततष्टाप् । परिष्कृतं भाषणम् । पदार्थविवेचकाचार्य्याणां युक्तियुक्ता वाक् । इति काव्यप्रकाशटीकायां चण्डीदासः ॥ तत्पर्य्यायः । प्रश्रयः २ शैली ३ सङ्केतः ४ समयकारः ५ । इति त्रिकाण्डशेषः ॥ (सूत्रलक्षणविशेषः । सूत्रं षड्विधम् । यथा,—

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥")

"ग्रन्थस्य संक्षेपनिर्व्वाहार्थसङ्केतविशेषः । यथा चपोदित्यादि ।" इति मुग्धबोधटीकायां दुर्गादासः ॥ यथा माघे । १६ । ८० ।

"न खलु प्रतिहन्यते कुतश्चित्
परिभाषेव गरीयसी यदाज्ञा ॥"

("अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिकाः ।
परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः ॥"
इति वैद्यकपरिभाषाया लक्षणम् ॥
"प्रथमं परिभाषा स्यात्तद्व्याख्यानकन्तथा ।"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥)

परिभूतं, त्रि, (परिभूयते स्म । परि + भू + क्तः ।) अनादृतम् । तत्पर्य्यायः । अवगणितम् २ अवमतम् ३ अवज्ञातम् ४ अवमानितम् ५ । इत्यमरः । ३ । १ । १०६ । अभिभूतम् ६ । इति जटाधरः ॥ अप्रस्तुतम् ७ । इति शब्दरत्नावली ॥ (यथा, सारावल्यां विंशाध्याये ।

"परिभूतं सुखरहितं कुलटापुत्त्रमतिपापरतञ्च ।
जनयति नवमपतिः क्षितिसुतदृष्टो भवि शूरम् ॥")

परिभ्रमः, पुं, (परि + भ्रम् + अच् ।) सर्व्वतोभ्रमणम् । परिपूर्व्वभ्रमधातोर्भावे अल्प्रत्ययनिष्पन्नः ॥

परिमण्डलं, त्रि, (परि सर्व्वतो मण्डलम् ।) वर्त्तुलम् । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । २२ । १६ ।

"लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्त्यरं द्विसहस्रयोजनानि स भुङ्क्ते ॥" परमाणुपरिमाणम् । परिमाणविशिष्टः परमाणुः । इति वैशेषिकसूत्रविवृतिः ॥ शब्दोऽयं न्यग्रोधशब्देन युक्तः अर्थान्तरं प्रकाशयति । पु, पुरुषविशेषः । तस्य लक्षणं यथा, मात्स्ये ११८ अध्याये ।

"न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते ।
व्यामेन उच्छ्रयो यस्य अध ऊर्द्ध्वञ्च देहिनः ।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः ॥"

स्त्री, लक्षणान्वितरमणीविशेषः । यथा, शब्दरत्नावल्याम् ।

"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये क्षीणा भवेद् या च न्यग्रोधपरिमण्डला ॥"

पर्व्वतविशेषः । यथा महाभारते ६ । ६ । ११ ।

"परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः ।
आदित्यतरुणाभासो विधूम इव पावकः ॥")

परिमलः, पुं, (परिमलते सुगन्धिपार्थिवकणां धरतीति । मल ऋ धारणे + अच् । "स्थितावेव गन्धः ।" इति न्यायादस्य तथात्वम् ।) विमर्द्दनम् । कुङ्कुमादिमर्द्दनम् । विमर्द्दोत्थजनमनोहरगन्धः । सुरतादिविमर्द्दोत्थविलेपनकुङ्कुमादिगन्धः । इत्यमरभरतौ ॥ सुरभिमाल्यगन्धादिधारणोत्पन्नो हृद्यो गन्धः । इति स्वामी ॥ (यथा, कलाविलासे । १ । ५ ।

"रतिलुलितललितललनाश्रमजललववाहिनो
मृदुर्येन ।
शयकेशकुसुमपरिमलवासितदेहा वहन्त्यनिलाः ॥")

तत्पर्य्यायः । आमोदः २ गन्धः ३ सौरभ्यम् ४ सौरभम् ५ । इति राजनिर्घण्टः ॥ पण्डितसमूहः । इति शब्दरत्नावली ॥

परिमाणं, क्ली, परिमीयतेऽनेन । (परि + मा + करणे ल्युट् ।) परिमितव्यवहारासाधारणकारणम् । इति सिद्धान्तमुक्तावली ॥ माप इति भाषा । (यथा, मनुः । ८ । १३३ ।

"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ॥")

तत्पर्य्यायप्रकारा यथा,—

"यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ।
सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले ॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ।
आचितं दशभाराः स्युः शाकटो भार आचितः ॥
कार्षापणः कार्षिकश्च ताम्रिके कार्षिके पणः ।
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।"
इत्यमरः । २ । ९ । ८५—८९ ॥ * ॥

न्यायमतं तद्यथा,—

"परिमाणं भवेन्मानव्यवहारस्य कारणम् ।
अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ॥
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ।
संख्यातः परिमाणाच्च प्रचयादपि जायते ॥
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ।
परिमाणं घटादौ तु परिमाणजमुच्यते ॥
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ।
परिमाणन्तूलकादौ नाशस्त्वाश्रयनाशतः ॥"
इति भाषापरिच्छेदे । ११०—११३ ॥

(परिमाणं निरूपयति । परिमाणमिति । परिमितव्यवहारासाधारणं कारणं परिमाणमित्यर्थः । तच्चतुर्व्विधं अणु महद्दीर्घं ह्रस्वञ्च इदं चातुर्व्विध्यं प्रत्यक्षसिद्धं तत्राणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे च समनियते तत्परिमाणं नित्यमित्यत्रपरिमाणमित्यनुषज्यते जायते इत्यत्रापि परिमाणमित्यनुवर्त्तते । अनित्यमिति पूर्व्वेणान्वितं तेथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यञ्चेत्यर्थः । तत्र संख्याजन्यमुदाहरति द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टं त्रसरेणुपरिमाणन्तु न सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः । परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजं कपालादि परिमाणजन्यम् । प्रचयजन्यमुदाहरन् प्रचयं निर्व्वक्ति प्रचय इति अथात्र प्रचयस्य नष्टावयवविनाशः कथं परिमाणनाशकः अस्तत्वावयविनि त्रिचतुरपरमाणुविश्लेषे तद्रूपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् । परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च द्व्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्य अपलपितुमशक्यत्वात् शरीरादाववयवोपचये असमवायिकारणनाशस्यावश्यकत्वादवयवविनाशः आवश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम् । अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत न च पूर्व्वतन्तव एव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभ्यमिति वाच्यम् मूर्त्तयोः समानदेशताविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलभ्य बाधितत्वाच्च पूर्व्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात् ॥" इति सिद्धान्तमुक्तावली ॥)

परिमार्ग्यं, त्रि, (परि + मृज् + ण्यत् । "चजोः कु घिण्यतोः ।" ७ । ३ । ५२ । इति जस्यगः । "मृजेर्वृद्धिः ।" ७ । २ । ११४ । इति वृद्धिः ।) परिमार्ज्यम् । परिशोधनीयम् ॥

परिमार्जनं, क्ली, (परि + मृज् + ल्युट् ततो वृद्धिः ।) खाद्यभेदः । मधुमस्तकम् । यथा, शब्दचन्द्रिका ।

"मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च ये ।
मधुमस्तकमुद्दिष्टं तस्याख्या परिमार्ज्जनम् ॥"

परिशोधनञ्च ॥

परिमितं, त्रि, (परि + मा + क्तः । परितो मितं वा ।) युक्तम् । इति त्रिकाण्डशेषः ॥ परिमाणविशिष्टम् । यथा, उद्भटः ।

"द्रविणं परिमितमधिक-
र्थायिनं जनमाकुलौ कुरुते ।
क्षीणाञ्चलमिव पीन-
स्तनजघनायाः कुलीनायाः ॥"

परिमृज्यं, त्रि, (परि + मृज् + "मृजेर्विभाषा ।" ३ । १ । ११३ । इति क्यप् ।) परिमार्ग्यम् । इति व्याकरणम् ॥

परिमेयं, त्रि, (परिमीयते इति । परि + मा + "अचो यत् ।" ३ । १ । ९७ । इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति ईत् ततो गुणः ।) परि-

भाववििशिष्टम् । परिमातव्यम् । परिमाणीयम् । (यथा, रघुः । १ । ३७ ।
"माभूदाश्रमपीडेति परिमेयपुरःसरौ ।
अनुभावविशेषात्तु सेनापरिगताविव ॥")

परिमोक्षः, पुं, (परितो मोक्षः परित्यागः ।) मलत्यागः । यथा, श्रीभागवते २ । ६ । १० ।
"पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ।
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतम् ॥"
"परिमोक्षस्य मलत्यागस्य । पायुरिन्द्रियं गुदं स्थानम् । निर्ऋतेरलक्ष्म्याः ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ परित्राणम् । यथा, विष्णुधर्म्मोत्तरे ।
"सर्व्वाशुभानां परिमोक्षकारि
संपूजनं देववरस्य विष्णोः ।"
इति तिथ्यादितत्त्वम् ॥
(विमुक्तिः । यथा, महाभारते । १ । २ । १६० ।
"कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात् ॥")

परिमोषी, [न्] त्रि, (परिमुष्णातीति । परि + मुष् + णिनिः ।) परिमोषणशीलः । चौरः । (इति हेमचन्द्रः । ३ । ४६ ॥)

परिरम्भः, पुं, (परिरभ्यते इति । परि + रभि + घञ् । "रभेरशब्लिटोः ।" ७ । १ । ६३ । इति नुम् ।) आलिङ्गनम् । इत्यमरः । ३ । २ । ३० ॥ (यथा, गीतगोविन्दे । ५ । ७ ।
"ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥")

परिवत्सरः, पु, वत्सरः । इति जटाधरः ॥ वत्सरविशेषः । यथा, मलमासतत्त्वे ।
"शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः ।
सम्परीदानुपूर्व्वाश्च तयोदापूर्व्वका मताः ॥"
"परिपूर्व्वे तथादानं यवानाञ्च द्विजोत्तमाः ॥"
इति विष्णुधर्म्मोत्तरम् ॥

परिवर्ज्जनं, क्ली, (परिवर्ज्यते परित्यज्यते प्राणोऽनेन । परि + वृज् + णिच् + ल्युट् ।) मारणम् । इत्यमरः । २।८।११४ ॥ (भावे ल्युट् ।) परित्यागः । यथा, उद्भटः ।
"गोप्यो न दोषो मथुराङ्गनानां
धर्म्मस्य कृष्णस्य हि रीतिरेषा ।
विपर्य्ययो येन कृतः स्वपित्रो-
स्तस्योपपत्नीपरिवर्ज्जनं किम् ॥"
परिवर्ज्जनीया यथा, कौर्म्मे उपरिभागे १५ अः ।
"एकशय्यासनं पंक्तिभाण्डपक्वान्नमिश्रणम् ।
याजनाध्ययने योनिस्तथैव सहभोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत् ॥"
"यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः कश्चित्तं देशं परिवर्ज्जयेत् ॥"
इति चाणक्यम् ॥
"आक्षणां वालिशं क्षत्रमयोद्धारं विशं जडम् ।
शूद्रमक्षरसंयुक्तं दूरतः परिवर्ज्जयेत् ॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥"
इति गरुडपुराणे ११३ अध्यायः ॥
("यस्य वै भाषमाणस्य रुजत्यूर्द्ध्वमुरोभृशम् ।
अन्नञ्च च्यवते भुक्तं स्थितञ्चापि न जीर्य्यति ॥
बलञ्च हीयते यस्य तृष्णा चाभिप्रवर्द्धते ।
जायते हृदि शूलञ्च तं भिषक् परिवर्ज्जयेत् ॥"
इति चरकेणेन्द्रियस्थाने षष्ठेऽध्याय उक्तम् ॥)

परिवर्त्तः, पुं, (परिवर्त्तनमिति । परि + वृत् । भावे घञ् ।) विनिमयः । (यथा, रामायणे । २ । १०५ । २५ ।
"हृष्यन्त्यृतुमुखं दृष्ट्वा नवं नवमिवागतम् ।
ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंक्षयः ॥")
कूर्म्मराजः । अपवर्त्तनम् । इति मेदिनी ॥ युगान्तः । इति हेमचन्द्रः ॥ ग्रन्थविच्छेदः । इति जटाधरः ॥ मृत्युपुत्त्रस्य दुःसहस्यौरसेन कलिकन्यानिर्म्मार्ष्टिगर्भजाताष्टपुत्त्रान्तर्गततृतीयपुत्त्रः । (यथा, मार्कण्डेये । ५१ । ७ ।
"अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः ।
दन्ताकृष्टिस्तथोक्तिश्च परिवर्त्तस्तथापरः ॥"
तन्नामनिरुक्तिर्यथा तत्रैव १४ श्लोके ।
"अन्यगर्भे परान् गर्भान् सदैव परिवर्त्तयन् ।
रतिमाप्नोति वाक्यञ्च विवक्षोरन्यदेव यत् ॥
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः ।
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्व्वीत तत्त्ववित् ॥")
तस्य पत्त्रयोः कर्म्मादि यथा —
"परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज ।
तौ तु वृक्षाद्रिपरिखाप्राकाराम्भोधिसंश्रयौ ॥
गुर्व्विण्याः परिवर्त्तन्तौ कुरुतः पादपादिषु ।
क्रोष्टकं । परिवर्त्तः स्याद्गर्भस्यान्योदरागतः ॥
न वृक्षञ्चैव नैवाद्रिं न प्राकारं पयोनिधिम् ।
परिखां न समाक्रामेदबला गर्भधारिणी ॥"
इति मार्कण्डेयपुराणे । ५१ । ६२—६४ ॥

परिवर्त्तनं, क्ली (परि + वृत + ल्युट ।) परिवर्त्तः । तत्पर्य्यायः । परिदानम् २ विनिमयः ३ नैमेयः ४ व्यतिहारः ५ परावर्त्तः ६ वैमेयः ७ विमयः ८ । इति हेमचन्द्रः ॥ (यथा, रघुः । १६ । १३ ।
"अङ्कसङ्कपरिवर्त्तनोचिते
तस्य निन्यतुरशून्यतामुभे ।
वल्लकी च हृदयङ्गमस्वना
वल्गुवागपि च वामलोचना ॥")

परिवर्त्तिका, स्त्री, मेढ्रजातक्षुद्ररोगविशेषः । तल्लक्षणमाह ।
"मर्द्दनात् पीडनाद्वापि तथैवाप्यभिघाततः ।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन् ॥
तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते ।
सवेदनं सदाहञ्च पाकञ्च व्रजति क्वचित् ॥
मणेरधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते ।
मारुतागन्तुसम्भूतां विन्द्यात्तां परिवर्त्तिकाम् ।
सकण्डुः कठिना वापि सैव श्लेष्मसमन्विता ॥"
अस्यां वातजायामपि पित्तानुबन्धो बोद्धव्यो दाहपाकभावात् । कोषः चर्म्मकोषः ॥ * ॥
अथ तस्याश्चिकित्सा ।
"परिवृत्तं घृताभ्यक्तं सुस्विन्नमुपनाहयेत् ।
त्रिरात्रं पञ्चरात्रं वा वातघ्नैः शाल्वणादिभिः ॥
ततोऽभ्यज्य शनैश्चर्म्म पाटयेत् पीडयेन्मणिम् ।
प्रविष्टे चर्म्मणि मणौ स्वेदयेदुपनाहयेत् ॥
दद्याद्वातहरान् वस्तीन् स्निग्धान्यन्नानि भोजयेत् ।"
इति भावप्रकाशः ।

परिवसथः, पुं, (परितो वसन्त्यत्र । परि + वस - उपसर्गे वसेरिति अथच् ।) ग्रामः । इति हेमचन्द्रः ४ । २७ ॥

परिवहः, पुं, (परि सर्व्वतोभावेन वहतीति । परि + वह् + अच् ।) सप्तवायन्तर्गतषष्ठवायुः । स तु सुवहवायोरुपरिस्थितः । (यथा, सिद्धान्तशिरोमणौ ।
"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्यादुद्वहस्तदनुसंवहसंज्ञकश्च ।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकाऽस्मात्
वाह्यः परावह इमे पवनाः प्रसिद्धाः ॥")

परिवादः, पुं, (परिसर्व्वतो दोषोत्कीर्त्तनेन वादः कथनम् । परि + वद् + भावे घञ् ।) अपवादः । (यथा, महानिर्व्वाणतन्त्रे । १ । ४२ ।
"नीचसंसर्गनिरताः परवित्तापहारकाः ।
परनिन्दापरद्रोह-परिवादपराः खलाः ॥") * ॥ परि + वद् + णिच् + करणे घञ् ।) वीणावादनवस्तु । इति मेदिनी ॥

परिवादकः, त्रि, (परिवदतीति । परि + वद् + ण्वुल ।) परिवादकर्त्ता । इति व्याकरणम् ॥

परिवादिनी, स्त्री, (परिवदति स्वरानिति । परि + वद् + "सुप्यजातौ णिनिस्ताच्छील्ये ।" ३ । २ । ७८ । इति णिनिः स्त्रियां ङीप् ।) सप्ततन्त्रीयुक्तवीणा । इत्यमरः ॥ (यथा, माघे । ६ । ६ ।
"कलतया वचसः परिवादिनी
स्वरजिता रजितावशमाययुः ॥")
परिवादविशिष्टा च ॥

परिवादी, [न्] त्रि, (परिवदतीति परिवदितुं शीलमस्य वा । परि + वद् + शीलार्थे कर्म्मणि णिनिः ।) परिवादकर्त्ता । (यथा महाभारते । ७ । ७१ । २६ ।
"साधूनस्यतां ये च ये चापि परिवादिनाम् ॥"
परिवादो निन्दा विद्यतेऽस्य ।) परिवादविशिष्टः । इति परिवादशब्दादस्त्यर्थे इनिः ॥

परिवापः, पु (परिसर्व्वत उप्यते इति । परि + वप + घञ् ।) पर्य्युप्तिः । वपनम् । जलस्थानम् । परिच्छदः । इति मेदिनी । पे २५ ॥

परिवापनं, क्ली, (परि + वप् + णिच + ल्युट । मुण्डनम् । इति हेमचन्द्रः ॥

परिवापितं, त्रि, (परिवाप्यते स्म । परि + वप + णिच् + क्त ।) मुण्डितम् । इत्यमरः ।३।१।८५ ॥

परिवारः, पुं (परिव्रियतेऽनेन । परि + वृ + करणे घञ् ।) परिजनः । (यथा, रघुः । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।

विवेश मञ्चान्तरराजमार्गं
पतिंवरा कॢप्तविवाहवेषा ॥”)
खड्गकोषः। परिच्छदः। इति मेदिनी। रे। २८० ॥

परिवाहः, पुं, (पर्य्यस्यते त्यजादिकं येन। परि + वह् + घञ्।) परीवाहः। जलोच्छ्वासः। इत्य-मरटीकायां रमानाथः॥ (यथा, रघुः। ८।७४।
“स विवेश पुरीं तया विना
क्षणदापायशशाङ्कदर्शनः।
परिवाहमिवावलोकयन्
स्वशुचः पौरवधूमुखाश्रुषु॥”)

परिविन्नः, पुं, (परि + विद् + क्तः।) परिवित्तिः। यथा, उद्वाहतत्त्वे।
“ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्व्वे पतिताः॥”

परिवित्तिः, पुं, (परिवर्ज्जनं विन्दति लभते इति। परि + विद् + क्तिच्।) परिविन्नज्येष्ठः। कृत-विवाहस्यानूढज्येष्ठभ्राता। इत्यमरः।२।७।५६॥ (यथा, मनुः। ३। १७१।
“दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥”)

परिविन्दत्, [त्] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति अग्न्याधानभार्य्यादिकं लभते इति। विद् + शतृ।) परिवेदनकर्त्ता। यथा,—
“देशान्तरस्थक्लीवैकवृषणानसहोदरान्।
वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान्।
अतिवृद्धानभार्य्यांश्च कृषिसक्तान् नृपस्य च॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति॥”
इत्युद्वाहतत्त्वे छन्दोगपरिशिष्टम्॥

परिविष्णु, क्ली, सर्व्वतो विष्णुः। विष्णु विष्णुं परि इत्यव्ययीभावसमासे दुर्गादासः॥

परिवृंहितं, त्रि, वृहिधातोः कर्म्मणि क्तः। (ततः परितो वृंहितमिति।) सर्व्वतोभावेन दीप्ति-विशिष्टम्। सर्व्वतोभावेन करिगर्ज्जितम्। सर्व्वतोभावेन वृद्धिविशिष्टम्। सर्व्वतोभावेन ध्वनिविशिष्टम्॥

परिवृढः, त्रि, (परिसर्व्वतोभावेन वृंहति वर्द्धते इति। वृहि वृद्धौ + कर्त्तरि क्तः। निपातनात् हकारलोपो निष्ठातस्य ढत्वञ्च।) अधिपः। प्रभुः। इत्यमरः। ३। १। ११॥
(यथा, राजतरङ्गिण्याम्। ३। २८०।
“जगत्परिवृढः प्रौढप्रीतिस्तं स फलार्थिनम्।
कृत्वा प्रादुष्कृतवपुस्ततो भूयोऽप्यभाषत॥”)

परिवृत', त्रि, (परिसर्व्वतोभावेन वृतः।) व्याप्तः। वेष्टितः। यथा,—
“व्यवहारान् नृपः पश्येत् सभ्यैः परिवृतोऽन्वहम्।”
इति मिताक्षरा॥

परिवृत्तिः, प, (परिवर्ज्जने वर्त्तते इति। परि + वृत् + क्तिच्।) परिवित्तिः। इति हड्डः॥ (परि + वृत् + भावे क्तिन्। परिवर्त्तनम्। यथा, महाभारते। १४। १८। २९।
“तस्य कालपरीमाणमकरोत् स पितामहः।
भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव च॥”
अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। १०५।
“परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्॥”
क्रमेणोदाहरणं यथा,—
“दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः॥”
अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन॥)

परिवृंहितं, त्रि, सर्व्वतोभावेन वृंहितविशिष्टम्। सर्व्वतोभावेनोद्यमविशिष्टम्। इति वृहधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नम्॥

परिवेत्ता, [ऋ] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति भार्य्यामग्न्यादिकं वा लभते इति। विद लाभे + “ण्वुल्तृचौ।” ३। १। १३३। इति तृच्।) अनूढज्येष्ठे कृतविवाहकनिष्ठः। इत्युद्-वाहतत्त्वम्॥ (यथा, मनुः। ३। १७१।
“दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥”)

परिवेदनं, क्ली, (परि + विद् + ल्युट्।) विवाहः। अग्न्याधानम्। यथा,—
“क्लीवे देशान्तरगते पतिते भिक्षुकेऽपि वा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने॥”
इत्युद्वाहतत्त्वे शातातपः॥
सर्व्वतोभावेन ज्ञानम्। (यथा, महाभारते। १४। १६। १२।
“स हि धर्म्मः सुपर्य्याप्तो ब्रह्मणः परिवेदने।
न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः॥”)
सर्व्वतोभावेन विचारणम्। सर्व्वतोभावेन विद्य-मानत्वम्। सर्व्वतोभावेन लाभः॥

परिवेदिनी, क्ली, (परिवेदोऽस्त्यस्यामिति। इति ङीप् च।) परिवित्तिः क्ली। इति हेमचन्द्रः॥

परिवेदनीया, क्ली, (परिविद्यते या। परि + विद् + अनीयर्।) अनूढज्येष्ठे तत्कनिष्ठेन विवा-हिता कन्या। अस्य प्रमाणं परिदायिशब्दे द्रष्टव्यम्॥

परिवेशः, पुं, (परितो विशतीति। परि + विश + घञ्।) वेष्टनम्। परिधिः। इति मेदिनी।शे।३७॥
“वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः।
मालाभा व्योम्नि तन्वते परिवेशः प्रकीर्त्तितः॥”
इति भरतधृतसाहसाङ्कः॥

परिवेषः, पुं, (परितो विष्यते व्याप्यतेऽनेन। विषिरौ व्यापने + घञ्।) परिधिः। परिधिः। (वृहत्संहितायाम् ३४ अध्याये तल्लक्षणादिक-मुक्तम्। तद्यथा,—
“सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डली-भूताः।
नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः॥
ते रक्तनीलपाण्डुरकापोताभाभ्रशबलहरि-शुक्लाः।
इन्द्रयमवरुणनिरृतिश्वसनपितामहाग्नि-कृताः॥
धनदः करोति मेचकमन्योन्यगुणाश्रयेण चाप्यन्ये।
प्रविलीयते मुहुर्मुहुरल्पफलः सोऽपि वायुकृतः॥
चाषशिखिरजततैलक्षीरजलाभः स्वकाल-सम्भूतः।
अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः॥
सकलगगनानुचारी नैकाभः क्षतजसन्निभो रूक्षः।
असकलशकटशरासनशृङ्गाटकवत्स्थितः पापः॥
शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे।
हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि॥
वर्णेनैकेन यदा बहुलः स्निग्धः क्षुराभ्रकाकीर्णः।
स्वर्त्तौ सद्यो वर्षं करोति पीतश्च दीप्तार्कः॥
दीप्तविहङ्गमृगरुतः कलुषः सन्ध्यात्रयोत्थितो-ऽतिमहान्।
भयकृत्तडिदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण॥
प्रतिदिनमर्कहिमांश्वोरहर्निशं रक्तयोर्नरेन्द्रवधः।
परिविष्टयोरभीक्ष्णं लग्नास्तनभःस्थयोस्तद्वत्॥
सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोप-करः।
त्रिप्रभृतिशस्त्रकोपं युवराजभयं नगररोधम्॥
वृष्टिस्त्र्यहेण मासेन विग्रहो वा ग्रहेन्दुभनिरोधे।
होरागजन्माधिपयोर्जन्मर्क्षे वाशुभो राज्ञः॥
परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाश-करः।
जनयति च वातवृष्टिं स्थावरकृषिकृन्निहन्ता च॥
भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्र-भयम्।
जीवे परिवेषगते पुरोहितामात्यनृपपीडा॥
मन्त्रिस्थावरलेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च।
शुक्रे यायिक्षत्रियराज्ञां पीडा प्रियं चान्नम्॥
क्षुदनलमृत्युनराधिपशस्त्रेभ्यो जायते भयं केतौ।
परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयञ्च॥
युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयो-र्ग्रहयोः।
दिवसकृतः शशिनो वा क्षुदवृष्टिभयं त्रिषु प्रोक्तम्॥
याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं मृत्योः।
प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु॥
तारायहस्य कुर्य्यात् पृथगेव समुत्थितो नरेन्द्र-वधम्।
नक्षत्राणामथवा यदि केतोर्नोदयो भवति॥
विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः।
श्रेणीपुरकोषाणां पञ्चम्यादिष्वशुभकारी॥
युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोष-करः।
पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम्॥
नरपतिपत्नीपीडां परिवेषोऽभ्युत्थितश्चतुर्द्दश्याम्।

कुर्य्यात्तु पश्चदृष्टा पीडां मनुजाधिपस्यैव ॥
नागरकाणामभ्यन्तरस्थिता यायिनाञ्च वाह्यस्था ।
परिवेषमध्यरेखा विज्ञेया कन्दसाराणाम् ॥
रक्तः श्यामो रूक्षश्च भवति येषां पराजय-
स्तेषाम् ।
स्निग्धः श्वेतो द्युतिमान् येषां भागो जय-
स्तेषाम् ॥")

परिवेषणम् । इति हेमचन्द्रः ॥

परिवेषकः, पु, (परिवेषयतीति । परि + विष् + ण्वुल् ।) परिवेष्टा । परिवेषणकर्त्ता । तस्य लक्षणं यथा,—

"स्नातश्चन्दनचर्च्चितः सुवसनः स्रग्वी प्रसन्नाननः
स्पष्टात्मा सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः ।
स्वामिस्नेहपरः स्वकार्य्यनिपुणः प्रौढो वदान्यः शुचि-
र्विप्रो वा परिवेषकस्तु कुलजश्चान्योऽपि वा
भूपतेः ॥"
इति पाकराजेश्वरः ॥

परिवेषणं, क्ली, (परि + विष् + णिच् + ल्युट् ।) वेष्टनम् । भोजनार्थं भोजनपात्रे अन्नादिदानम् । अथ श्राद्धे परिवेषणं मनुः ।

"पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम् ।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥
अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं पूरितं पात्रमिति शेषः । उपनिक्षिपेत् परिवेषणार्थम् । तथा च पाकस्थाल्या आकृष्य प्रथमं भोजनपात्रे न देयं किन्तु स्थाल्यादिकं पाणिभ्यां पात्रसमीपे भूमौ संस्थाप्य पश्चात् पाणिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषयेत । उभाभ्यामपि हस्ताभ्यामाकृष्य परिवेषयेदिति मत्स्यपुराणात् । यत्तु श्राद्धे परिवेषणन्तु दक्षिणपाणिमात्रेणाङ्गानभिधानादिति मैथिलोक्तं तन्न । एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेदित्यादिपुराणीयेन एकपाणिदत्तशूद्रादत्तभक्षणनिषेधेन तन्मात्रपरिवेषणस्यापि निषिद्धत्वात् पाणिभ्यामपि पात्रान्तरितं कृत्वा देयम् ।
हस्तदत्तास्तु ये स्नेहा लवणं व्यञ्जनानि च ।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते च किल्बिषम् ॥
तस्मादन्तरितं देयं पर्णेनाथ तृणेन वा ।
प्रदद्यान्न तु हस्तेन नायसेन कदाचन ॥
इति वशिष्ठवचनेन सामान्यतोऽभिधानात् । पितृभक्तितरङ्गिण्यामप्येवम् । मनुः ।
गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु ।
विन्यसेत् प्रयतः सम्यग् भूमावेव समाहितः ॥
आमिषं पानपात्रञ्च भोक्तुर्दक्षिणतो न्यसेत् ।
भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ॥
हृद्यानि चैव मांसानि पानानि सुरभीणि च ।
उपनीय च तत् सर्व्वं शनकैः सुसमाहितः ॥
परिवेषयेत् प्रयतो गुणान् सर्व्वान् प्रचोदयन् ।
गुणान् उपकरणानि भूमावेव न तु व्यञ्जनादिपात्राणि अन्नादि पात्रोपरि निक्षिपेत् ।" इति श्राद्धतत्त्वम् ॥

परिवेषिका, स्त्री, (परिवेषयति या । परि + विष् + ण्वुल् । स्त्रियां टाप् अत इत्वञ्च ।) परिवेषणकर्त्री । तस्या लक्षणं यथा,—

"स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभमुखी नयनाभिरामा ।
बिम्बाधरा शिरसि बद्धसुगन्धिपुष्पा
मन्दस्मिता विनिभृता परिवेषिका स्यात् ॥"
इति पाकराजेश्वरः ॥

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टितम् । तत्पर्य्यायः । परिक्षिप्तम् २ वलयितम् ३ निवृतम् ४ परिष्कृतम् ५ परीतम् ६ । इति हेमचन्द्रः ॥

परिव्याधः, पु, (परि सर्व्वतोभावेन विध्यतीति । परि + व्यध् + ताडने + "श्याद्व्यधेति ।" ३ । १ । १४१ । इति णः ।) अम्बुवेतसः । द्रुमोत्पलः । इत्यमरः । २ । ४ । ३०, ६० ॥

परिव्रज्या, स्त्री, (परि + व्रज + भावे क्यप् । स्त्रियां टाप् ।) तपस्या । इति हेमचन्द्रः । १ । ८१ । (इतस्ततो भ्रमणम् । यथा, मनुः । १० । ५२ ।
"वासांसि मृतचैलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥"
"लौहवलयादि चालङ्करणं सर्व्वदा च भ्रमणशीलत्वम् ॥" इति कुल्लूकभट्टः ॥)

परिव्राजः, पु, (परित्यज्य सर्व्वान् विषयभोगान् गृहाश्रमाद् व्रजतीति । परि + व्रज + संज्ञायां कर्त्तरि घञ् ।) परिव्राट् । इत्यमरटीकायां रमानाथः ॥

परिव्राजकः, पु, (परिव्राज + स्वार्थे कन् । परिव्रजतीति । परि + व्रज + ण्वुल् वा ।) परिव्राट् ॥ (यथा, गोः रामायणे । ३ । ५५ । २ ।
"स परिव्राजकच्छद्मा महाकायो विशेषधृक् ।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः ॥")

परिव्राजिः, स्त्री, (परि + व्रज + णिच् + इन् ।) आवर्णी । इति राजनिर्घण्टः ॥ गुलकुडी इति भाषा ॥ (आवर्णीशब्देऽस्या विशेषो ज्ञेयः ॥)

परिव्राट् [ज्] परिव्राड्, पु, (परित्यज्य सर्व्वं विषयभोगं गृहस्थाश्रमाद् व्रजति गच्छतीति । परि + व्रज + क्विप् दीर्घश्च ।) चतुर्थाश्रमी । तत्पर्य्यायः । भिक्षुः २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ । इत्यमरः । २ । ७ । ४२ ॥ सन्न्यासी ६ श्रमणः ७ । इति जटाधरः ॥ परिव्राजकः ८ पराशरी ९ व्रजकः १० । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा, गरुडपुराणे ।
"सर्व्वारम्भपरित्यागो भैक्ष्याशनं वृक्षमूलता ।
निष्परिग्रहताद्रोहसमता सर्व्वजन्तुषु ॥
प्रियाप्रियपरिष्वङ्गे सुखदुःखाविकारिता ।
सबाह्याभ्यन्तरं शौचं सुखदुःखाविकारिता ॥
सर्व्वेन्द्रियसमाहारो धारणा ध्याननित्यता ।
भावसंशुद्धिरित्येष परिव्राड्धर्म्म उच्यते ॥"

परिशङ्कनीयः, त्रि, (परिशङ्क्यते इति । परि + शङ्क + अनीयर् ।) सर्व्वतोभावेन शङ्काविषयः । यथा,
"शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीय-
माराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥"
इत्युद्भटः ॥

परिशिष्टं, क्ली, (परितः शिष्टः । शिष + क्तः ।) परिशेषविशिष्टम् । अवशिष्टार्थबोधकग्रन्थः । इति हेमचन्द्रः । २ । १७१ ॥ (यथा, छान्दोगपरिशिष्टम् । गृह्यपरिशिष्टमित्यादि ॥)

परिशुष्कं, क्ली, (परितः शुष्कम् । शुष + क्तः ।) मांसव्यञ्जनभेदः । यथा,—
"मांसं बहुघृतैर्भृष्टं सिक्तञ्चैवाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥"
इति शब्दचन्द्रिका ॥
सर्व्वतोनीरसे त्रि ॥ (यथा, गोः रामायणे । २ । ५६ । ५ ।
"उपतप्तोदका नद्यः पल्वलानि सरांसि च ।
परिशुष्कपलाशानि वनान्युपवनानि च

परिशोधः, पु, (परि + शुध + भावे घञ् ।) परिशोधनम् । सर्व्वतोभावेन शुद्धिः ॥

परिशोषः, पु, (परि + शुष + भावे घञ् ।) सर्व्वतोभावेन शुष्कता । यथा, गोः रामायणे । ४ । १५ । ३४ ।
"वायुकर्परिपीतास्तुर्विपरिम्लानपङ्कजः ।
तडाग इव कालेन परिशोषं गमिष्यति ॥")

परिश्रमः, पु, (परि + श्रम + घञ् । न वृद्धिः ।) परिश्रान्तिः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ प्रयासः ५ आयासः ६ व्यायामः ७ । इति हेमचन्द्रः । २ । २३३ ॥ (यथा, रघुः । १ । ५८ ।
"तमातिथ्यक्रियाशान्त-रथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥")

परिश्रयः, पुं, (परिश्रयत्यस्मिन् इति । परि + श्रि + "एरच् ।" ३ । ३ । ५६ । इति अच् ।) सभा । (भावे अच् ।) आश्रयः । इति मेदिनी । ये । १२२ ॥

परिश्रान्तः, त्रि (परि + श्रम + कर्त्तरि क्तः ।) सर्व्वतोभावेन श्रान्तियुक्तः । (यथा, महाभारते । १ । ४६ । २६ ।
"परिश्रान्तो वयःस्थश्च षष्टिवर्षो जरान्वितः ।
क्षुधितः स महारण्ये दृष्टो मुनिसत्तमम् ॥"
स्त्री । गायत्रीस्वरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ६३ ।
"पावनी पादसहिता पेशला पवनाशिनी ।
प्रजापतिः परिश्रान्ता पर्व्वतस्तनमण्डला ॥")

परिश्रुतः, त्रि, (परि + श्रु + क्तः ।) सर्व्वतोभावेन श्रवणविशिष्टः ॥

परिश्लेषः, पु, (परि + श्लिष + भावे घञ् ।) आश्लेषः ॥

परिषत्, [द्] स्त्री, (परितः सीदन्त्यस्याम् । परि + सद् + अधिकरणे क्विप् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) सभा । इत्यमरः । २ । ७ । १५ ॥ (यथा, गोः रामायणे । २ । १३ । १६ ।

"याहृशी परिषत् सेति। तत्कार्यं तथाविधः। ध्रुवमद्यैव राजा मां यौवराज्येऽभिषेक्ष्यति॥"
परिषच्च खलु द्विविधा, ज्ञानवती मूढ़परिषच्च, सैव द्विविधा सती त्रिविधा पुनरनेन कारण-विभागेन सुहृत्परिषत्, उदासीनपरिषत्, प्रति-निविष्टपरिषच्चेति। तत्र प्रतिनिविष्टायां परि-षदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नायां मूढ़ायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते। मूढ़ायान्तु सुहृत्परिषदि उदा-सीनायां वा ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणाप्यदीप्तयशसा महाजनविद्विष्टेन सह जल्पो विधीयते। तद्विधेन च सह कथयता आविद्धदीर्घसूत्रसङ्कुलैर्वाक्य-दण्डकैः कथयितव्यम्। अतिहृष्टं मुहुर्मुहुरुप-हसता परं रूपयता च परिषदमाकारैर्ब्रुव-तश्चास्य वाक्यावकाशो न देयः। कष्टशब्दञ्च ब्रुवता वक्तव्यो नोच्यते इति। अथवा पुनर्हीना ते प्रतिज्ञेति पुनश्चाहूयमानः प्रतिवक्तव्यः। परि-संवत्सरोभव शिक्षस्व तावत्। पर्याप्तमेतावत्ते। सकृदपि हि परिक्षेपिकं निहतं निहतमाहु-रिति। नास्य योगः कर्त्तव्यः कथञ्चिदप्येवं श्रेयसा सह विग्रहं प्रशंसन्ति कुशलाः। प्रत्य-वरेण तु सह समानाभिमतेन वा विगृह्य जल्पता सुहृत्परिषदि कथयितव्यम्। अथवाप्यु-दासीनपरिषदि अवधानश्रवणज्ञानविज्ञानोप-धारणवचनशक्तिसम्पन्नायां कथयता चाव-हितेन परस्य साद्गुण्यदोषबलमवेक्षितव्यम्। समवेक्ष्य च यत्रैनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेत् अनाविष्कृतमयोगं कुर्वन्। यत्र त्वेनमवरं मन्येत तत्रैवैनमाशु निगृह्णीयात्।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)
परिषत्त्वं यथा, प्रायश्चित्तविवेके।
"एकविंशतिसंख्याकैर्मीमांसान्यायपारगैः।
वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत्॥"

परिषदः, पुं, (परितः सीदतीति। परि + सद् + अच्। "सदिरप्रतेः।" ८।३।६६। इति षत्वम्।) पारिषदः। अनुचरः। इति भरत-कृतद्विरूपकोषः॥

परिषद्यः, पुं, (परिषदमर्हतीति। परिषद् + यत्।) परिषद्वलः। इति भरतकृतद्विरूपकोषः॥

परिषद्वलः, पुं, (परिषदस्यास्तीति। परिषद् + "रजःकृष्यासुतिपरिषदो वलच्।" ५।२।११२। इति वलच्।) सभासदः। पारिषदः। इति शब्दरत्नावली॥ (यथा भट्टिः। ४।१०।
"आसीनयाज्ञदीप्राज्ञः सुतनः परिपूजयन्।
परिषद्वलान्महाब्रह्मराट् नैकटिकाश्रमान्॥")

परिष्कन्दः, त्रि, (परिष्कन्दतीति। परि + स्कन्दिर् गतिशोषणयोः + पचाद्यच्। "परेश्च।" ८।३।७४। इति षत्वम्।) परिस्कन्दः। पर-पुष्टः। इत्यमरटीकायां रमानाथः॥

परिष्कण्णः, त्रि, (परि + स्कन्द + क्तः। दस्य तस्य च नः। "परेश्च।" ८।३।७४। इति षत्वं णत्वञ्च।) परिस्कन्दः। इत्यमरटीकायां राय-मुकुटः॥

परिष्कारः, पुं, (परिष्क्रियतेऽनेन। परि + कृ + "सम्परिभ्यां करोतौ भूषणे।" ६।१।१३७। इति सुट्। "परिनिर्वीति।" ८।३।७०। इति षत्वम्।) अलङ्कारः। इत्यमरः। २।६।१०१॥ संस्कारः। शुद्धिः॥

परिष्कृतः, त्रि, (परिष्क्रियते स्म इति। परि + कृ + क्तः। "सम्परिभ्यामिति।" सुट्। "परि-निर्वीति।" ८।३।७०। इति षत्वञ्च।) भूषितः। अलङ्कृतः। इत्यमरः। २।६।१००॥ वेष्टितः। इति हेमचन्द्रः॥ आहितसंस्कारः। इति वैदिकाष्टटीकायां भरतः॥

परिष्कृतभूमिः, स्त्री, वेदिः। परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञप्रासादाय चाहितसंस्कारा भूमिः। इत्यमरभरतौ॥

परिष्कोमः, पुं, (परितः स्कूयते नानावर्णवत्त्वादिति। स्कु + मन्। ततः षत्वम्। केचित्तु "परेःस्कोति प्रति अनुपसर्गत्वात् न षः।" इत्युक्त्वा परि-स्कोम इति कल्पयन्ति।) परिस्कोमः। इत्यमर-टीकायां स्वामी॥

परिष्वङ्गः, पुं, (परिष्वञ्जनम्। परि + स्वञ्ज + घञ्। "परिनिर्वीति।" ८।३।७०। इति षत्वम्।) आलिङ्गनम्। इत्यमरः। ३।२।३०॥ (यथा, गौः रामायणे। १।४।८८।
"अङ्गदप्रमुखानाञ्च हरीणां रामदर्शनम्।
हनुमतः परिष्वङ्गो राघवेण महात्मना॥")

परिसभ्यः, पुं, सर्व्वतोभावेन सभायां साधुः इत्यर्थे यत् प्रत्ययः॥ परिषद्यः। सभासदः॥

परिसरः, पुं, (परिसरन्त्यत्र। परि + सृ + "पुंसीति।" ३।३।११८। इति घः।) पर्य्यन्तभूः। नदी-नगरपर्व्वतादेरुपान्तभूमिः। इत्यमरभरतौ॥ (यथा, मेघदूते। ६६।
"मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥")
मृत्युः। विधिः। इति मेदिनी। रे। ७१॥

परिसर्पः, पुं, (परि समन्तात् सर्पणम्। परि + सृप + घञ्।) परिक्रिया। परिजनादिना वेष्टनम्। समन्तात् सर्पणम्। इत्यमरभरतौ॥ (सर्पविशेषः। यथा, सुश्रुते कल्पस्थाने ४ अध्याये। तत्र दर्व्वीकराः। "गवेधुक् परि-सर्पः खण्डफणः ककुदः पद्मो महापद्मः॥" इति। कुष्ठविशेषः। यथा, तत्रैव निदानस्थाने ५म अध्याये। "ददकुष्ठान्यपि स्थूलारुष्कं महा-कुष्ठमेककुष्ठमर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्च्चिका किटिभं पामा रकसा चेति॥")

परिसर्य्या, स्त्री, (परिसरणमिति। सृ गतौ + "परि-चर्य्या परिसर्य्येति।" ३।३।१०१। इत्यस्य वार्त्तिके इति निपातनात् सिद्धम्।) परीसारः। सर्व्वतोगमनम्। भूमौ सर्व्वतोभ्रमणम्। इति सर्व्वस्वम्॥ अन्तमरणम्। इति केचित्। इत्य-मरभरतौ॥

परिस्कन्दः, पुं, (परिस्कन्दतीति। परि + स्कन्द + अच्। "परेश्च।" ८।३।७४। इति पक्षे षत्वाभावः।) परपुष्टः। परेण प्रतिपालितः। इत्यमरः। २।१०।१८॥

परिस्कन्नः, पुं, (परि + स्कन्द + क्त। "परेश्च।" ८।३।७४। इति पक्षे षत्वाभावः।) परि-स्कन्दः। इत्यमरटीकायां रायमुकुटः॥

परिस्तोमः, पुं, (परि स्तूयते प्रशस्यते नानावर्ण-वत्त्वात्। परि + स्तु + "अर्त्तिस्तुस्विति।" मन्। यद्वा परिगतः स्तोमोऽत्र वर्णस्तोमत्वात्।) गजपृष्ठस्थचित्रकम्बलः। इत्यमरः। २।८।४२॥ हातीर पिठेर झुल इति भाषा॥

परिस्पन्दः, पुं, (परि + स्पन्द + अधिकरणे घञ्।) कुसुमप्रकाण्डैः पत्रावल्यादिभिश्च रचना। इत्य-मरः। २।६।१३७॥ परिकरः। परिवारः। इति हेमचन्द्रः। ३।३७६॥ (भावे + घञ्।) सर्व्वतोभावेन स्पन्दनञ्च॥ (मर्द्दनम्। यथा, महाभारते। १।१५४।८।
"अद्यैनं हनिष्यामि प्रेक्षन्त्यास्ते सुमध्यमे।
नायं प्रतिबलो भीरु! राक्षसापसदो मम।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः॥")

परिस्पन्दनं, क्ली, (परि सर्व्वतोभावेन स्पन्द्यते इति। परि + स्पन्द + ल्युट्।) सर्व्वतोभावेन कम्प-नम्। यथा। कोऽपि परिस्पन्दनसाधनसाध्यः। यथा गमनादिः। कोऽप्यपरिस्पन्दनसाधनसाध्यः। यथा अवस्थानादिः। इति गोयीचन्द्रः॥

परिस्पन्दमानः, त्रि, (परिस्पन्दते इति। परि + स्पन्द + शानच्।) सर्व्वतोभावेन कम्पमानः। यथा। "अनवरतपरिस्पन्दमाना परिमित-पवनादिपरमाणुचेतनसंयोगसन्तानान्तःपाति-पक्षीनामविरतमेवोपरमात्।" इति सामान्य-लक्षणायां शिरोमणिः॥

परिस्यन्दः, पुं, (परि + स्यन्द + भावे घञ्। अप्राणिकर्तृकत्वे वा षत्वम्।) परिस्पन्दः। इत्य-मरटीकायां भरतः॥

परिस्रुत्, स्त्री, (परिस्रवतीति। परि + स्रु + क्विप् तुक् च।) वरुणात्मजा। मदिरा। इत्यमरः। २।१०।३६॥ (यथा, अथर्व्ववेदे।३।१२।७।
"एमां परिस्रुतः कुम्भ आदधः कलशैरगुः॥"
सर्व्वतोभावेन क्षरिते त्रि। यथा, ऋग्वेदे। ८।३६।१०।
"त्वामापः परिस्रुतः परियन्ति स्वसेतवो नभस्वा-मन्यके समे॥")

परिस्रुतः, त्रि, (परितः स्रवते स्म। स्रु सवणे + "गत्यर्थेति।" ३।४।७२। इति क्तः।) सव युक्तः। सर्व्वतोभावेन क्षरितः। इति मेदिनी। ते। २०६॥ (वारुणीप्रकृत्यस्या विकृतिर्ज्ञातव्या। यथा, यजुर्वेदे। २।३४।
"ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परि-स्रुतम्॥")

परिस्रुता, स्त्री, (परितः स्रवते स्मेति। परि + स्रु + क्तः। स्त्रियां टाप्। अन्नादिभ्यः क्षरणेन जात

त्वात् तथात्वम् ।) वारुणी । मदिरा इति मेदिनी । ते । २०६ ॥

परिहारः, पुं, (परिह्रियतेऽनेनेति । परि + हृ + घञ् ।) अवज्ञा । अनादरः । इति शब्दरत्नावली ॥ ("परिहारो नाम तस्यैव दोषवचनस्य परिहरणं यथा नित्यमात्मनि शरीरस्थे जीवलिङ्गान्युपलभ्यन्ते तस्य चापगमान्नोपलभ्यन्ते तस्मादन्यः शरीरादात्मा नित्यः शरीरास्त्विति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ त्यागः । परिवर्ज्जनम् । यथा, राजतरङ्गिण्याम् । ४ । ६१६ ।

"दुर्व्वृत्तस्य प्रभोरन्यत परिहारात् न भेषजम् ॥"

गोपनम् । यथा, शकुन्तलायां १ म अङ्के ।

"कथमिदानीमात्मानं निवेदयामि कथं वा आत्मनः परिहारं करोमि ॥" विजितद्रव्यादिकम् । यथा, मनुः । ७ । २०१ ।

"जित्वा सम्पूजयेत् देवान् ब्राह्मणांश्चैव धार्म्मिकान् ।

प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च ॥"

स्थानविशेषः । यथा, मनुः । ८ । २३७ ।

"धनुःशतं परीहारो ग्रामस्य स्यात् समन्ततः ॥"

अत्र कुल्लूकभट्टः । "चतुर्हस्तो धनुः शम्या यष्टिक्षेपा वा प्रक्षेपो ग्रामसमीपे सर्व्वासु दिक्षु चत्वारि हस्तशतानि त्रीन् वा यष्टिप्रक्षेपान् यावत् पशुप्रचारार्थं शस्यवपनादिसंरोध परिहारः कार्य्यः ॥")

परिहार्य्यः, पुं, (परि + हृ + ण्यत् ।) पारिहार्य्यः । वलयः । इति भरतद्विरूपकोषः ॥ परिहरणीये त्रि ॥ (यथा, शकुन्तलायाम् १ मे अङ्के ।

"न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते ॥")

परिहासः, पुं, (परि + हस + भावे घञ् ।) परिहसनम् । ठाट्टा इति भाषा । परीहासः । यथा । "परिहासः केलिमुखः केलिर्द्दवनर्म्मणी ।" इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । क्रीडः २ द्रवना ३ । इति शब्दरत्नावली ॥ वक्रोरा ४ । इति जटाधरः ॥ (यथा, शकुन्तलायाम् २ ये अङ्के ।

"परिहासविजल्पितं सखे । परमार्थेन न गृह्यतां वचः ॥")

परीक्षकः, त्रि, (परि + ईक्ष + ण्वुल् ।) निरूपकः । (यथा, पञ्चतन्त्रे । १ । ८४ ।

"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")

तत्पर्य्यायः । कारणिकः २ । इत्यमरः । ३ । १ । ७ ॥ परीक्षते अवधारयति प्रमाणेन । यथा, वह्निना परीक्षकः स्वर्णस्य स्वर्णकारः । कारणैर्हेतुभिश्चरति कारणिकः इति भरतः ॥

परीक्षणं, क्ली, (परि + ईक्ष + ल्युट् ।) परीक्षा । राज्ञा धर्म्मकामार्थभयैरमात्यादेर्भावितत्त्वनिरूपणम् । इति भरतः ॥ यथा,—

"भेदोपजापावुपधा धर्म्माद्यैर्यत् परीक्षणम् ।" इत्यमरः । २ । ८ । २१ ॥

सर्व्वतोभावेन दर्शनञ्च ॥

परीक्षा, स्त्री, (परित ईक्ष्यतेऽनया । परि + ईक्ष + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । ततष्टाप् ।) दिव्यम् । अथ दिव्यानि । तत्र बृहस्पतिः ।

"धटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
षष्ठञ्च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"

अथ किमर्थं दिव्यम् ।

तत्र मानुषप्रमाणानिर्णयस्यापि निर्णायकं यद्दिव्यमिति लोकप्रसिद्धम् । एतद्द्वयमपि शपथानामस्ति तथापि कालान्तरनिर्णायकत्वेन तेषां भेदात् । अपिना मानुषप्रमाणसत्त्वेऽपि यत्र धटादीनामङ्गीकारस्तत्रापि तद्भवति इति सूचितम् । अतएव लिखितसाक्षिभुक्तिलक्षणत्रिविधमानुषप्रमाणभिन्नप्रमाणं यत्तद्दिव्यं प्रमाणं तत प्रमाणं न भावैकगोचरं किन्तु भावाभावविशेषेण गोचरयतीति । तत्र महाभियोगेषु दिव्यान्याह याज्ञवल्क्यः ।

"तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥"

विशुद्धये सन्दिग्धार्थस्य सन्देहनिवृत्तये । महाभियोगेषु महापातकादिगुरुतराभियोगेषु । शीर्षकस्थ इति शीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः । तेन दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदण्डभागीत्यर्थः । महाभियोगान् स्पष्टयति कालिकापुराणम् ।

"परदाराभिशापे च चौर्य्यागम्यागमेषु च ।
महापातकशस्तेषु स्याद्दिव्यं नृपसाहसे ॥
प्रतिपत्तौ विवादे च परस्य स्थापने कृते ।
तत्रैव स्थापयेद्दिव्यं शिरःपश्चं महीपतिः ॥
परदाराभिशापे च बध्वो यत्र वादिनः ।
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् ॥"

पितामहः ।

"शिरःस्थायिविहीनानि दिव्यानि परिवर्ज्जयेत् ।
चत्वारि तु धटादीनि कोषश्चैवाशिराः स्मृतः ॥"

महाभियोगेतरेऽपि कोषमाह स्मृतिः । कोषमल्पे च दापयेत् । याज्ञवल्क्येनाभियोक्तृवादिनः शिरोवर्त्तित्वाभिधानादभियोज्यस्य दिव्यकर्त्तृत्वं प्रतिपादितम् । यत्तमाह कात्यायनः ।

"न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥"

प्रत्यर्थिस्वीकारेणार्थिनोऽपि दिव्यमाह याज्ञवल्क्यः ।

"रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ।
विनापि शीर्षकात् कुर्य्यान्नृपद्रोहेऽथ पातके ॥"

इतरोऽभियुक्तः शिरः शारीरदण्डमर्थदण्डं वा वर्त्तयेत् स्वीकुर्य्यात् । बृहस्पतिः ।

"स्नेहात् क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः ।
विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचित् ॥"

भेदः सत्यादपरीत्यम् । यत्तु कात्यायनवचनम् ।

"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु ।
लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः ॥"

इति तद्गुणान्वितसाक्षिसत्त्वे । यथा व्यासः ।

"सङ्गिसत्त्वोपधिबलात् प्रदत्तं वा विधानतः ।
विसंवदेद्दिव्यमपि न तु साक्षी गुणान्वितः ॥"

अतएव नारदः ।

"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ॥"

एनं विपर्य्ययमागमर्थं अर्द्दयेत पीडयेत । निर्द्धारयेदिति यावत् ॥ * ॥ शपथानाह नारदः ।

"सत्यवाहनशस्त्राणि गोबीजकनकानि च ।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥
स्पृशेच्छिरांसि पुत्त्राणां दाराणां सुहृदान्तथा ।
अभियोगेषु सर्व्वेषु कोषपानमथापि वा ॥
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणात् ॥"

बृहस्पतिः ।

"यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः ।
अयथोक्तप्रदत्तन्तु न शक्तं साध्यसाधने ॥
अदेशकालदत्तानि बहिर्वादिकृतानि च ।
व्यभिचारं सदा त्वेवं कुर्व्वन्तीह न संशयः ॥"

बहिर्वादिकृतमभियोक्तारं विना कृतम् । एतच्च प्रायिकं आत्मशुद्धिपराणामभियोक्तारं विनापि दिव्यविधानात् ।

तथा च नारदः ।

"राजभिः शङ्कितानाञ्च निर्द्दिष्टानाञ्च दस्युभिः ।
आत्मशुद्धिपराणाञ्च देयं दिव्यं शिरो विना ॥ * ॥

अथ दिव्यदेशाः । कात्यायनः ।

"इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् ।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे ।
अतोऽन्येषु च कार्य्येषु सभामध्ये विदुर्बुधाः ॥"

इन्द्रस्थाने इन्द्रध्वजस्थाने ॥ * ॥

अथ दिव्यकालाः । पितामहः ।

"चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव हि ।
एते साधारणा मासा दिव्यानामविरोधिन ॥
धटः सर्व्वर्त्तुकः प्रोक्तो वाते वाति [illegible] ।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः ।
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ।
कोषस्तु सर्व्वदा देयस्तुला स्यात् साच्चकालिकीति ।

मिताक्षरायां नारदः ।

"न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् ।
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृप ॥"

नारदः ।

"पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानं परिकीर्त्तितम् ।
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन ।
शीते हेमन्तशिशिरवर्षासु । उष्णकाले ग्रीष्मशरदोः । वर्षासु विषनिषेधस्तत्तद्यातानिरिक्त [illegible] वर्ष चतुर्थवा सात्रा इति वक्ष्यमाणनारदवचना[illegible] तण्डुलादीनान्तु विशेषानभिधानात् साचका[illegible]-

त्वम् । अत्र विषे विशेषतो वर्णनिषेधात् वक्ष्य-
माणवचने सिंहस्थगुरावेव परीक्षामात्रनिषे-
धाच्च दिव्यान्तरं सिंहस्थगुरावपि कुर्वीत ।
अनोयाम्ययने हरौ सुप्ते सर्वकर्माणि वर्जयेत्
इत्यस्य न विषयः । ज्योतिषे ।
"सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा ।
मलमासे न कर्तव्या परीक्षा जयकाङ्क्षिणा ॥
रविशुद्धौ गुरौ चैव न शुक्रेऽस्तङ्गते तथा ।
सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः ॥
नष्टचन्द्रे न चन्द्रे शस्ता प्रायश्चित्तपरीक्षणे ।
न परीक्षा विरुद्धस्य भूमिभौमदिने तथा ॥
रविशुक्रौ गुरौ चैवमत्र प्रशस्यत इति स्थितः ॥
तथा च दीपिकायाम् ।
"नो शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममासे-
ऽष्टमेन्दौ
षष्ठौ मासे मलाख्ये कुजशनिदिवसे जन्म-
ताराम् चाथ ।
नाडीनक्षत्रहीने गुरुरविरजनीनाथतारा-
विशुद्धौ
प्रातः कार्या परीक्षा द्विजगुरुगणांशोदये
प्रशस्ते ॥" * ॥

पितामहः ।
"प्रत्यक्षं दापयेद्दिव्यं राजा वाधिकृतोऽपि वा ।
ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च ॥"
ब्राह्मणानां प्रकृतीनाञ्च प्रत्यक्षं दिव्यं दापये-
दित्यन्वयः । प्रकृतयस्तु ।
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेति
अमरसिंहोक्ताः ॥ * ॥
अथ दिव्यविशेषाधिकारिणः । नारदः ।
"ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्वेषान्तु तुला स्मृता ॥"

"सन्ततानां भृशार्त्तानां व्याधितानां तपस्विनाम् ।
स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्मस्त्वपेक्षितः ॥"
इति स्त्र्यादीनां दिव्यं निषिद्धं तत्तुलेतरविषयक-
मिति शूलपाणिः ॥ मिताक्षरायान्तु ।
स्त्र्यादिस्वर्णादौ स्त्रीणां दिव्यमिति कृत्वा
अन्यतरः कुर्यादिति विकल्पनिर्धारणेनैतत्सर्वं
भवति । अल्पेऽप्यभियोगेषु स्त्र्यादीनामभि-
योक्तृत्वे अभियोक्तुरेव दिव्यं राजद्रोहाभियोगे
त्वन्येऽपि अभियोक्तुरेव दिव्यं परस्पराभि-
योगे तु विकल्पः तत्रापि तुलैवेति नियम्यते ।
तथा महापातकादिशङ्काभियोगे तु स्त्र्यादीना
तुलैव । यथा याज्ञवल्क्यः ।
"तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ॥"
स्त्रीमात्रं जातिवयोऽवस्थाविशेषानादरेण बाल-
शब्दोऽपि षोडशवर्षपर्यन्तानां विशेषानादरेण वृद्धो-
ऽशीतिपारगः । एतच्च वचनं सर्वदिव्यसाधा-

रणेषु मार्गशिरश्चैत्रवैशाखेषु स्त्र्यादीनां सर्व-
दिव्यसमवधानविधाने नियमार्थं कतयार्थवत् । न
च सर्वकालं स्त्रीणां तुलैवेति ।
"स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम् ।
धटकोषादिभिस्तासामन्तस्तत्त्वं विचारयेत् ॥"
इति विषसलिलवर्जितधटकोषादिभिः शुद्धि-
विधानात् । एवं बालादिष्वपि योजनीयम् ।
तथा ब्राह्मणादीनामपि न सार्वकालिकस्तुलादि-
नियमः ।
"सर्वेषामेव वर्णानां कोषाच्छुद्धिर्विधीयते ।
सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विना ॥"
इति पितामहस्मरणात् ।
तस्मात् साधारणे काले बहुदिव्यसमवधाने
तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु
तत्तत्कालविहितं सर्वेषाम् । तथा हि वर्षा
स्वग्निरेव सर्वेषां हेमन्तशिशिरयोस्तु कचिया
दीनां त्रयाणां अग्निविषयोर्विकल्पः ब्राह्मणस्य
तु अग्निरेव न कदाचिद्विषं ब्राह्मणस्य विषं
विनेति निषेधात् । ग्रीष्मशरदोस्तु सलिलमेव ।
येषां कुष्ठादीनाम्तु विशेषेणाम्न्यादिनिषेधः ।
"कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेदिति वच
नात्तेषामग्न्यादिकालेऽपि साधारणं तुलाद्येव
दिव्यं भवति । यथा । तोयमग्निर्विषञ्चैव दातव्यं
बलिनां नृणामिति स्मरणात् । दुर्बलानामपि
सर्वथा विषनिषेधात् ततकालानतिक्रमेण जाति-
वयोऽवस्थाश्रितानि दिव्यानि देयानि । अत्र च
यस्य यानि विशेषसामान्यपर्य्युदस्तेतरविहितानि
तानि मुख्यकल्पानुकल्परूपाणि बोद्धव्यानि ।
यथा ब्राह्मणस्य घटो मुख्यः कोषस्त्वनुकल्पः । ।
जलाग्नी आपत्कल्पौ प्रागुक्तनारदवचने प्र-
कारश्रुतेर्मुख्यकल्पादित्वं न तु प्रशस्ततमादित्व-
मिति । एवञ्चापि व्यवयोक्तपदसन्तु न प्रश्न-
साध्यसाधनं इति प्रागुक्तं बोध्यम् । स्मृतिः ।
"अत्यल्पाभियुक्तानां धटादीनि विनिर्द्दिशेत् ।
तण्डुलश्चैव कोषश्च शङ्कास्वेव न संशयः ॥"
अत्यल्पेऽपि निश्चयः । शिरोवर्त्तितेति केचित् ।
इति व्यवहारदीपिका ॥ कात्यायनः ।
"अस्पृश्याधमदासानां म्लेच्छानां पापकारिणाम् ।
प्रतिलोमप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशेत ॥"
तत्प्रसिद्धानि सर्पघटादीनि । तथा,—
देशकालाविरोधेन यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्य्यये ॥"
अन्येन प्रतिनिधिना हारयेत् कारयेत् । विप-
र्य्यये अभियुक्तस्यासामर्थ्ये ।
अतएव महापातक्यादीनामन्यद्वारा दिव्यमाह
स एव ।
"मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रमदानाञ्च मन्त्रयोगक्रियावताम् ।
वर्णसङ्करजातानां पापाभ्यासप्रवर्तिनाम् ॥

एतेष्वेवाभियोगेषु निन्द्येष्वेव प्रयत्नतः ।
इत्याद्यभिधाय ।
दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः ।
एतैरेव प्रयुक्तानां साधूनां दिव्यमर्हति ॥"
कात्यायनः ।
"न लौहशिल्पिनामग्निं सलिलं नाम्बुसेविनाम् ।
तण्डुलैर्न नियुञ्जीत व्रतिनं मुखरोगिणम् ॥"
नारदः ।
"क्लीवातुरान् सत्त्वहीनान् मत्तितापार्दितान्नरान् ।
बालवृद्धातुरादींश्च परीक्षेत घटे सदा ॥
नार्त्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम् ।
श्वित्रान्धकुनखादीनां नाग्निकर्म विधीयते ॥"
न मज्जनं स्त्रीबालयोर्धर्मशास्त्रविशारदैः ।
निरुत्साहान् व्याधिकृशानार्त्तांस्तोये निमज्ज-
येत् ॥
न चापि हारयेदग्निं न विषेण विशोधयेत् ॥
यत्,—
स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेदिति
पितामहवचनं तल्लिखितसामन्तादिसत्त्वे दिव्य-
निषेधकम् । यदपि अलेख्यसाक्षिके दिव्यं
व्यवहारे विनिर्द्दिशेदिति स्मृतेर्विवादान्तरेऽपि
लेख्यादिसत्त्वे दिव्यानादरस्तथापि क्षणदादानादि
विवादे साक्ष्युपन्यासे कृतेऽपि प्रत्यर्थी यदि
दृढाङ्गीकारेण दिव्यमङ्गीकरोति तदा दिव्यमपि
भवति साक्षिणां दोषसम्भवाद्दिव्यस्य तु निर्दो-
षत्वेन वस्तुतत्त्वविषयत्वात् तत्सन्त्यागस्त्वाच्च धर्मस्य ।
यथाह नारदः ।
"तत्र सत्ये स्थितो धर्म्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषन्तु न लेख्यन्तु प्रयोजयेत ॥"
स्थावरविवादे तु प्रत्यर्थिना दृढाङ्गीकारेण
दिव्यावलम्बने कृते सामन्तादिदृष्टप्रमाणसद्भावे-
ऽपि दिव्यं ग्राह्यमिति विकल्पनिवारणाय
स्थावरेष्वित्यादि पितामहवचनं नात्यन्तिकदिव्य
निराकरणाय लिखितान्द्यभावे स्थावरादि
निर्णयाप्रसक्तेः ॥ * ॥
अथ द्रव्यसंख्यया दिव्यविशेषाः । विष्णुः
अथ समयक्रियाराजद्रोहसाहसेषु यथाकाम
निःक्षेपस्तेयेष्वर्थप्रमाणादिति । समयो दिव
राजद्रोहादिषु यथाकामं राजेच्छानुरोधाद्दिव
निःक्षेपादिषु तु धनप्रमाणतारतम्यादित्यर्थः
बृहस्पतिः ।
"संख्या रश्मिरजोमूला मनुना समुदाहृता ।
कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा
विषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्द्धे देयो घटः सदा ॥
चतुःशताभियोगे तु दातव्यस्तप्तमाषकः ।
त्रिशते तण्डुला देयाः कोषश्चैव तदर्द्धके ॥
शते हृतेऽपहृते च दातव्यं धर्मशोधनम् ।
गोचौरस्य प्रदातव्यं सभ्यैः फालं प्रयत्नतः ॥
एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता
चतुर्गुणोत्तमानान्तु कल्पनीया परीक्षकैः ॥"
रश्मिरजः ।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥”
इति मनूक्तम् ॥
“कार्षापणान्ता पणान्ता कार्षापणः पण इति पर्य्यायदर्शनात् । विनये दण्डे । एवञ्च सहस्र इत्यादौ पण इति शेषं उपक्रमात् निकृष्टानां जातिकर्म्मगुणैः । नासहस्राद्धरेदग्निं न तुलां न विषन्तथेति याज्ञवल्क्यवचनं मध्यमोत्तमविषयत्वेन हृष्ट्यतिवचनैकवाक्यत्वादविरुद्धम् ।
“सहस्रेषु घटं दद्यात् सहस्रार्द्धे तथायसम् ।
अर्द्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतम् ॥”
इति वचनं यत्राल्पापराधे पातित्यं तद्विषयमिति । एतत् सर्व्वं स्तेयसाहसविषयम् । अपह्नवे तु कात्यायनः ।
“दत्तस्यापह्नवो यत्र प्रमाणं तत्र कारयेत् ।
स्तेयसाहसयोर्द्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत् ॥
सर्व्वद्रव्यप्रमाणन्तु ज्ञात्वा हेम प्रकल्पयेत् ।
हेमप्रमाणयुक्तन्तु तदा दिव्यं प्रदापयेत् ॥
ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतम् ।
अशीतेश्च विनाशे तु दद्याच्चैव हुताशनम् ॥
षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम् ।
विंशद्दशविनाशे तु कोषपानं विधीयते ॥
पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुलाः ।
ततोऽर्द्धार्द्धविनाशे तु स्पृशेत् पुत्रादिमस्तकान् ॥
ततोऽर्द्धार्द्धविनाशे तु लौकिक्यश्च क्रियाः स्मृताः ।
एवं विचारयन्राजा धर्म्मार्थाभ्यां न हीयते ॥”
सुवर्णानां पञ्च कृष्णलको माषस्ते सुवर्णस्तु षोड़श इत्युक्ताशीतिरक्तिकापरिमितहेम्नां नाशे अपह्नवे वा दशाधिकस्य पञ्चाधिकस्य वा विंशस्य नाशे कोषपानमित्यर्थः । तण्डुलाः पुनश्चौर्य्याभिशङ्कायामेव न तु साहसादौ । चौर्य्ये च तण्डुला देया नान्यत्रेति विनिश्चय इति पितामहस्मृतेः । तत्प्रमाणन्तु महाचौर्य्याभिशङ्कायाम् ।
महाचौर्य्याभियुक्तानां तत्प्रमाणो विधीयते ।
इति स्मृतेः ॥
व्यवहारमातृकायाम् ।
“समत्वं साक्षिणां यत्र दिव्यैस्तमपि शोधयेत् ।
प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु ॥
दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः ॥”
इति दिव्यतत्त्वम् ॥ * ॥
घटादिनवविधपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥
(“बुद्धिः पश्यति या भावान् बहुकारणयोगजान् ।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया ॥
एषा परीक्षा नास्त्यन्या यया सर्व्वं परीक्ष्यते ।
परीक्ष्यं सदसच्चैव तया चास्ति पुनर्भवः ॥”
इति चरके सूत्रस्थाने एकादशेऽध्याये ॥
“तत्र चेद्भिषगभिषग्वा भिषजं पृच्छेद्वमनविरेचनास्थापनानुवासन-शिरोविरेचनानि प्रयोक्तुकामेन भिषजा कतिविधया परीक्षया कतिविधं परीक्ष्यं कश्चात्र परीक्षाविशेषः कथञ्च परीक्षितव्यं किंप्रयोजना च परीक्षा क्व च वमनादीनां प्रवृत्तिः क्व च निवृत्तिः प्रवृत्तिनिवृत्तिलक्षण-संयोगे च किं नैष्ठिकं कानि च वमनादीनां भेषजद्रव्याणि उपयोगं गच्छन्तीति । स एवं पृष्टो यदि मोहयितुमिच्छेत् ब्रूयादेनं बहुविधा परीक्षा तथा परीक्ष्यविधिभेदः कतमेन विधिभेदप्रकृत्यन्तरेण परीक्ष्याभिन्नभेदाग्रं भवान् पृच्छत्याख्यायमानं नेदानीं भवतोऽन्येन वा विधिभेदप्रकृत्यन्तरेण परीक्ष्यस्य भिन्नस्याभिलषितमर्थं श्रोतुमहमन्येन परीक्षा विधिभेदप्रकृत्यन्तरेण परीक्ष्यं भिन्नार्थमात्रयाण इच्छां पूरयेयमिति ।
द्विविधा परीक्षा ज्ञानवतां प्रत्यक्षमनुमानञ्च एतत्तु द्वयमुपदेशश्च परीक्षात्रयमेवमेषा द्विविधा परीक्षा त्रिविधा वा सहोपदेशेन ।
दशविधं परीक्ष्यं कारणादि यदुक्तमग्रे तदिह भिषगादिषु संसार्य्य सन्दर्शयिष्यामः इह कार्य्यप्राप्तेः कारणं भिषक्करणं पुनर्भेषजं कार्य्ययोनिर्धातुवैषम्यं कार्यं धातुसाम्यं कार्य्यफलं सुखावाप्तिः अनुबन्ध आयुः देशो भूमिरातुरश्च कालः संवत्सरश्चातुरावस्था च प्रवृत्तिः प्रतिकर्म्मसमारम्भः उपायो भिषगादीनां सौष्ठवमभिविधानञ्च सम्यगिष्टाध्यक्षोपायस्य विषयः पूर्व्वेणैवोपायविशेषेण व्याख्यात इति कारणादीनि दश दशसु भिषगादिषु संसार्य्य सन्दर्शितानि तथैवानुपूर्व्व्या एतद्दशविधपरीक्ष्यमुक्तम् ।
तस्य यो यो विशेषो यथा यथा च परीक्षितव्यः स स तथा तथा व्याख्यास्यते कारणं भिषगित्युक्तमग्रे तस्य परीक्षा भिषङ्नाम यो भिषज्यति यः सूत्रार्थप्रयोगकुशलः यस्य चायुः सर्व्वथा विदितम् । यथावत् सर्व्वधातुसाम्यं चिकीर्षन्नात्मानमेवादितः परीक्षेत गुणेषु गुणतः कार्य्याभिनिर्वृत्तिं पश्यन् कच्चिदहमस्य कार्य्यस्याभिनिर्वर्त्तने समर्थो नवेति ।” इति चरके विमानस्थाने ऽष्टमेऽध्याये ॥)

परीक्षित, पु, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन । परि + क्षि वधे + क्विप् । कलिशासनादस्य तथात्वम् । यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति । क्षि श् ऐश्वर्य्ये + क्विप् “उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचिद्भवेत् ।” इति वाक्यात् उपसर्गस्य दीर्घत्वम् । अस्य निरुक्तिरुक्ता महाभारते । १ । ९५ । ८४ ।
“स भगवता वासुदेवेनासंजातबलवीर्य्यपराक्रमोऽकालजातोऽस्त्राग्निना दग्धस्तेजसा स्वेन संजीवितः । संजीवयित्वा चैनमुवाच, । परिक्षीणे कुले जातो भवत्वयं परीक्षिन्नामेति ।”) अभिमन्युपुत्रः । स युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत् । यथा,—
“अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतः सकलसुरासुरवन्दितचरणयुगलस्य आत्मेच्छया कारणमानुषरूपधारिणोऽनुभावात् पुनर्जीवितमवाप्य परीक्षिज्जज्ञे । योऽयं साम्प्रतमेतद्भूमण्डलमखण्डितायति धर्म्मेण पालयति ।” इति विष्णुपुराणे ४ अंशे २० अध्यायः ॥
“विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षितः ॥
प्रयास्यन्ति यदा चैते पूर्व्वाषाढ़ां महर्षयः ।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे ॥”
इति तत्रैव २४ अः । ३८ — ४० ॥
(अनश्वपुत्त्रः । यथा, महाभारते । १ ।९५।४० ।
“अनश्वा खलु मागधीमुपयेमे अमृतां नाम तस्यामस्य जज्ञे परीक्षित् ॥”)

परीक्षितः, पुं, (परिक्षीणे कुरुकुले क्षियति स ईष्टे स इति । परि + क्षि + क्तः । उपसर्गस्य दीर्घत्वम् ।) अभिमन्युपुत्त्रः । (यथा, देवीभागवते । २ । ७ । ६ ।
“परिक्षीणेषु वंशेषु जातो यस्मात् वरः सुतः ।
तस्मात् परीक्षितो नाम विख्यातः पृथिवीतले ॥” * ॥
परीक्षा सञ्जाता अस्य । परीक्षा इतच् । कृतपरीक्षे त्रि । यथा, गोः रामायणे । ७।४३।६।
“स हि राजगुणैर्युक्तो युवराजः परीक्षितः ॥”)

परीणायः, पुं, (परितो नयनम् । परि + नी + घञ् । “उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचिद्भवेत् ।” इति पाक्षिको दीर्घः ।) परिणायः । शारीणां समन्तान्नयनम् । इत्यमरटीकायां भरतः ॥

परीतं, त्रि, (परि + इ + क्तः ।) परिवेष्टितम् । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । ११० । ७ ।
“ततः कामपरीताङ्गी सकृत्प्रचलमानसा ।
व्रीड़माना स्रजं कुन्ती राज्ञः स्कन्धे समासजत् ॥”)

परीतत्, त्रि, (परि + तन + क्विप् + “नहिवृतिवृषिव्यधीति ।” ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः ।) सर्व्वतोभावेन विस्तृतम् । इति मुग्धबोधव्याकरणम् ॥

परीभावः, पुं, (परिभाव्यते इति । परि + भावि + घञ् वैकल्पिकदीर्घश्च ।) परिभावः । अनादरः । इत्यमरटीकायां भरतः ॥

परीरं, क्ली, (पूर्य्यतेऽनेनेति । पॄ + “कॄशॄपॄकटीति ।” उणां ४ । ३० । इति ईरन् ।) फलम् । इत्युणादिकोषः ॥

परीरम्भः, पु, (परिरभ्यते इति । परि + रभ + घञ् भावे वैकल्पिकदीर्घत्वम् ।) परिरम्भः । आलिङ्गनम् । इति भरतद्विरूपकोषः ॥

परीवर्त्तः, पुं, (परि + वृत् + घञ् । “उपसर्गस्य घञीति ।” ६ । ३ । १२२ । इति दीर्घः ।) परिवर्त्तनम् । तत्पर्य्यायः । प्रतिदानम् २ नैमेयः ३ निमयः ४ । इत्यमरः । २ । ९ । ८० ॥ परिवर्त्तः ५ वैमेयः ६ विनिमयः ७ परिदानम् ८ । इति शब्दरत्नावली ॥ कूर्म्मराजः । इति जटाधरः ॥

परीवादः पुं, (परि+वद्+भावे घञ्। "उपसर्गस्य घञीति।" ६।३।१२२। इति दीर्घः।) दोषोल्लापः। तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ जुगुप्सनम् १० आक्षेपः ११ अवर्णः १२ निर्वादः १३ अपक्रोशः १४ भर्त्सनम् १५ उपक्रोशः १६ अपवादः १७ अववादः १८। इति शब्दरत्नावली॥ (यथा,
"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः।
तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो नहि भवति कन्यां गतवतः॥")
वीणादिवादनम्। येन काष्ठविशेषादिना वीणादिर्वाद्यते सः। इति जटाधरः।

परीवारः, पु, (परिव्रियतेऽनेनेति। परि+वृ+घञ्। उपसर्गस्य दीर्घः।) खड्गकोषः। जङ्गमः। (यथा, रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः।
क्रव्यादगणपरीवारश्चिताग्निरिव जङ्गमः॥")
परिच्छदः। इत्यमरः। ३। ३। १६८॥
परीवार. परिजने खड्गकोषे परिच्छदे।
इत्यनेकत्र दर्शनात्। जङ्गमो जङ्गमविशेषः परिजन इत्यर्थः। खड्गकोषोऽसिवायकः मेयाम् इति ख्यातः। परिच्छदः शोभाजनकमुपकरणं छत्रचामरादिः सभ्यजनादिश्च एष परीवारः। इति तट्टीकायां भरतः॥

परीवाहः, पुं, (परितो वहत्यनेनेति। परि+वह+"हलश्च।" ३। ३। १२१। इति घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) जलोच्छ्वासः। इत्यमरः। १।१०।१०॥ (अत्र जलशब्द उपलक्षणमात्रं ज्ञेयम्। द्रवद्रव्यस्य प्रवाहेऽप्यस्यार्थो बोद्धव्यः। यथा च महाभारते। ७। ९८। १३।
"रुधिरस्य परीवाहान् पूरयित्वा सरांसि च॥"
परित उह्यते इति।) राजयोग्यवस्तु। इति मेदिनी॥ हे, ३३॥

परीष्टिः, स्त्री, (परि+इष्+"परे र्वा।" ३।३। १०७। इत्यस्य वार्त्तिं इति पक्षे क्तिन्।) अन्वेषणा। इत्यमरः। २। ७। ३२॥ परिचर्य्या। प्राकाम्यम्। इति मेदिनी। टे, ४९॥

परीसारः, पु, (परिसरणम्। परि+सृ+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) परिसर्य्या। सर्व्वतोगमनम्। इत्यमरः। ३। २। २१॥

परीहारः, पुं, (परिहरणम्। परि+हृञ् हरणे+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) अवज्ञा। इति शब्दरत्नावली॥

परीहासः, पु, (परि+हस+घञ्। उपसर्गस्य दीर्घः।) परीहसनम्। (यथा, मार्कण्डेये।३४।८४।
"परीवादं न कुर्व्वीत परीहासञ्च पुत्रक।॥")
तत्पर्य्यायः। द्रवः २ केलिः ३ क्रीड़ा ४ लीला ५ नर्म्म ६। इत्यमरः। १। ७। ३२॥ परिहासः ७ केलिमुखम् ८ देवनम् ९। इति त्रिकाण्डशेषः॥

परुः, पुं, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकादुः।) समुद्रः। स्वर्गलोकः। ग्रन्थिः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः॥

परुः, [स्] क्ली, (पॄ+"अर्त्तिपॄवपियजितनीति।" उणां। २। ११८। इति उस्।) ग्रन्थिः। इत्यमरः। २। ४। १६२॥ (यथा, वाजसनेयसंहितायाम्।१३।२०।
"काण्डात् काण्डात् प्ररोहन्ती परुषः (सः) [परुषस्परि॥")

परुत्, अ, (पूर्व्वस्मिन् वत्सरे इति। "सद्यः परुदिति।" ५। ३। २२। इति पूर्व्वस्य परभावः उत् च।) गतवत्सरः। इत्यमरः। २।४।२०॥

परुत्नः, त्रि, (परुत् गतवत्सरे भवः। परुत्+"चिरपरुत्परारिभ्यस्त्नो वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिं इति त्नः।) इति व्याकरणम्॥

परुद्वारः, पुं, (परुः समुद्रः पर्व्वतो वा द्वारमिव यस्य।) घोटकः। इति शब्दमाला॥

परुषं, क्ली, (पिपर्त्ति अलं बुद्धिं करोतीति। पॄ+"पॄनहिकलिभ्य उषच्।" उणां। ४। ७५। इति उषच्।) निष्ठुरवाक्यम्। इत्यमरः। १। ६। १९॥ (परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषमिति वदन्ति॥ यथा, रामायणे। १। १ ८२।
"तामुवाच ततो रामः परुषं जनसंसदि।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती॥")
नीलझिण्टी। इति शब्दचन्द्रिका॥ परुषफलम्। इति भावप्रकाशः॥ (नीलझिण्टीशब्देऽस्य गुणादयो ज्ञातव्याः॥)

परुषं, त्रि, (पिपर्त्तीति। पॄ लि पूर्त्तौ+"पॄनहिकलिभ्य उषच्।" उणां। ४। ७५। इति उषच्।) कर्व्वुरः। (यथा, बृहत्संहितायाम्। ३। ३९।
"असितविचित्रनीलपरुषो जनघातकरः।
खगमृगभैरवखररुतैश्च निशाद्युमुखे॥")
रूक्षः। (यथा, रामायणे। १। ५८।१०।
"अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः।
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः॥")
निष्ठुरोक्तिः। इति मेदिनी। षे,४०॥ (मलिनः। यथा, आर्य्यासप्तशत्याम्। ४७९।
"भस्मपरुषेऽपि गिरिशे स्नेहमयी त्वमुचितेन
सुभगासि।"
"भस्ममलिनेऽपि गिरिशे।" इति तट्टीका॥)

परुषोक्तिकः, त्रि, (परुषमेव उक्तिर्यस्य। ततः स्वार्थे कन् कप् वा।) निष्ठुरवक्ता। इति जटाधरः॥

परूषं, क्ली (पॄ+ऊषन्।) फलवृक्षभेदः। परुषफल इति वङ्गभाषा। फरूसा इति फालसे इति च हिन्दीभाषा। तत्पर्य्यायः। परूषकम् २ नागदन्तोपमम् ३। इति रत्नमाला॥ परुषम् ४ अल्पास्थि ५ परापरम् ६। इति भावप्रकाशः॥ नीलचर्म्म ७ गिरिपीलु ८ परावतम् ९ नीलमण्डलम् १० परुः ११। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। कफार्त्तिवातनाशित्वञ्च। तदामफलगुणाः। पित्तदत्वम् उष्णत्वञ्च। तत्पक्वफलगुणाः। मधुरत्वम्। रुचिप्रदत्वम्। पित्तशोफहरत्वम्। तर्पणत्वञ्च। इति राजनिर्घण्टः॥
"परूषकं कषायाम्लमामं पित्तकरं लघु।
तत् पक्वं मधुरं पाके शीतं विष्टम्भि बृंहणम्॥
हृद्यं हृत्पित्तदाहास्रज्वरक्षयसमीरहृत्॥"
इति भावप्रकाशः॥
("परूषकैट्यंकपीलुकानां
पियालसिंह्नी करमर्द्दकानाम्।
फलानि चैतानि निहन्ति पित्तं
हन्याच्च सर्व्वातुरसन्धिवातम्॥"
इति हारीते प्रथमस्थाने दशमेऽध्याये॥)

परूषकं, क्ली, (परूष+स्वार्थे कन्।) परूषम्। इति राजनिर्घण्टः॥ (अस्य पर्य्याया यथा,—
"परूषकं परूषं स्यात् कथितं नागदन्तोपमम्।"
इति वैद्यकरत्नमालायाम्॥
यथास्य गुणाः चरके सूत्रस्थाने २७ अध्याये।
"अम्लं परूषकं द्राक्षा वदर्य्यारुकाणि च।
पित्तश्लेष्मप्रकोपीनि कर्कन्धुलकुचान्यपि॥"
"अत्यम्लमीषन्मधुरं कषायानुरसं लघु।
वातघ्नं पित्तजननमामं विद्यात् परूषकम्॥
तदेव पक्वं मधुरं वातपित्तनिवर्हणम्।
विपाके मधुरं शीतं रक्तपित्तप्रसादनम्॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्याये॥)

परेतः, त्रि, (परं लोकमितः।) मृतः। इत्यमरः। २। ८। ११७॥ (यथा, कुमारे।५।६८
"अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु॥")
भूतान्तरं पुं,। इति मेदिनी। ते, १२६॥

परेतराट्, [ज्] पुं, (परेतेषु मृतेषु राजते इति राज् ऋ श दीप्तौ+"सत्सूद्विषेति।"३।२।६१ इति क्विप्। यद्वा, परेतानां प्रेतानां राट्। प्रेतराजः। यमः। इत्यमरः। १। १। ६१॥

परेद्यवि, अ, परस्मिन्नहनि। ("सद्यःपरुदिति।" ५। ३। २२। इति निपातनात् साधुः।) परदिनम्। इति मुग्धबोधव्याकरणम्॥ यथा,—
"परेद्यवद्यपूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्।
वृद्धिचर्यां मुनीन्द्राणां प्रियम्भावुकतामगात्॥"
इति भट्टिः। ४। १३॥

परेद्युः, [स्] अ, (पर+एद्युस्।) परदिनम्। इति मुग्धबोधव्याकरणम्॥

परेपं, त्रि, परा गता आपो यत्र। ("द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७। इत्यस्य वार्त्तिं "अवर्णान्ताद्वा।" इति ईत्। परापम्।) इति सिद्धान्तकौमुदी॥

परेष्टुका, स्त्री, (परैरिष्यते इति। इष+बाहुलकात् तु। स्वार्थे कन्। स्त्रियां टाप्।) बहुसूतिः बहुप्रसूता गौः। इत्यमरः। २। ९। ७०॥

परेधितः, त्रि, (परैरेधितः सम्बर्द्धितः ।) कौदा-सीन्येन परपुष्टः । परेण संवर्द्धितः । तत्पर्य्यायः । पराचितः २ परिस्कन्दः ३ परजातः ४ । इत्यमरः । ३ । १० । १८ ॥ कोकिले पुं । इति शब्द-माला ॥

परोक्षं, क्ली, (अक्ष्णोः परम् ।) अप्रत्यक्षम् । असा-क्षात् । यथा, चाणक्यशतके ।

"परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥"

(परोक्षं परोक्षत्वमित्यर्थः विद्यतेऽस्य । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) तद्विशिष्टे त्रि ॥ (श्रुत्याप्तजन्यादिज्ञानविशेषः । यथा, पञ्चदश्याम् । ७ । ३१ ।

"अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्त्तया ॥")

परोक्षः, पुं, (परोक्षमस्यास्तीति । श्रुत्याप्तवाक्य-श्रवणजन्यदार्ढ्यात्तद्वेत्तीति बोध्यम् ।) तपस्वी । इति शब्दमाला ॥ ययातिपुत्रस्याणोः पुत्रविशेषः । यथा, भागवते । ९ । २३ । १ ।

"अणोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ॥")

परोपकारः, पुं, (परेषामुपकारः ।) परेषा-मुपकृतिः । अन्यसम्बन्धिहितम् । यथा,—

"एष मे प्रवरो भाति शुद्धधर्म्मप्रदो विधिः ।
परोपकारणादन्यत् सर्व्वमव्यं कृतं बुधैः ॥
परोपकारिभिर्दत्ता स्वप्राणा ऋषिभिः पुरा ।
अस्थिः प्रेतोपकारः स्यात् किन्न लब्धं मया पुनः ॥
दधीचिना पुरा गीतः श्लोकश्च श्रूयते भुवि ।
सर्व्वधर्म्ममयः सारः सर्व्वधर्म्मज्ञसम्मतः ॥
परोपकारः कर्त्तव्यः प्राणैः कण्ठगतैरपि ।
परोपकारजं पुण्यं तुल्यं क्रतुशतैरपि ॥"

इति पद्मोत्तरखण्डे २२ अध्यायः ॥

परोवरीणः, त्रि, परांश्चावरांश्चानुभवति । ("परो-वरपरम्परपुत्रपौत्रमनुभवति ।" ५ । २ । १० । इति ।) अवरस्योत्वं निपात्यते । श्रेष्ठाश्रेष्ठ-युक्तः । इति सिद्धान्तकौमुदी ॥

परोष्णी, स्त्री, (परः शत्रुरुष्णो यस्याः ।) तैल-पायिका । इत्यमरः । २ । ५ । २६ ॥ (काश्मीर-देशस्थनदीविशेषः । यथा, राजतरङ्गिण्याम् । ८ । २००७ ।

"कोष्ठकोमलकोष्ठाद्यैर्मितैर्युक्तोऽपि सादिभिः ।
तीर्त्वा परोष्णीं तत्सेनां निर्म्ममाथाप्रमा-
थिनीम् ॥")

पर्कटिः, } स्त्री, (पृच् धी च् सम्पर्के + बाहु-
पर्कटी, } लकादटिः ।"बह्वादिभ्यश्च ।"४।१।४५ इति वा ङीष् ।) प्लक्षवृक्षः । इत्यमरटीकायां भरतः ॥ पाकुड़ इति भाषा ॥ (यथा, हितोप देशे । "अस्ति तत्र महान् पर्कटीवृक्षः ॥") तस्य गुणाः भावप्रकाशे ।

"प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।
दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ॥"

पर्कटी, [न्] पु, वृक्षविशेषः । पाकुड़ इति भाषा ॥ तत्पर्य्यायः । प्लक्षः २ जटी ३ । इत्य-मरः । २ । ४ । ३२ ॥ कमण्डलुतरुः ४ । इति रत्नमाला ॥ कपीतनः ५ चीरी ६ सुपार्श्वः ७ कमण्डलुः ८ शृङ्गी ९ अवरोहः १० शाखी ११ गर्द्दभाण्डः १२ पीतनः १३ दृढ़प्ररोहः १४ प्लक्षकः १५ प्लवङ्गः १६ महाबलः १७ । अस्य गुणाः कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । विशेषतो ह्रस्वप्लक्षस्यैते गुणाः । इति राजनिर्घण्टः ॥

पर्ज्जनी, स्त्री, (परं स्वास्थ्यं जनयतीति । पर् + जन + णिच् । "कर्म्मण्यण् ।" ३।२।१। इत्यण् । स्त्रियां ङीप् ।) दारुहरिद्रा । इत्यमरः।२।४।१०२॥

पर्ज्जन्यः, पुं, (पर्षति सिञ्चति वृष्टिं ददातीति । पृषु सेचने + "पर्ज्जन्यः ।" उणां । ३ । १०३ । इति निपातनात् षकारस्य जकारत्वे साधुः ।) इन्द्रः । (यथा, ऋग्वेदे ।६।५२।१६ । [सुष्टुतिं नः ॥"]

"अग्नीपर्ज्जन्याववतं धियं मेऽस्मिन् हवे सुहवा शब्दायमानमेघः । इत्यमरः । ३ । ३ । १४६ ॥ मेघशब्दः । इति विश्वः ॥ अगर्ज्जन्नपि मेघः । इति भरतः ॥ यथा, श्रीभगवद्गीतायाम् ।

"यज्ञाद्भवति पर्ज्जन्यः पर्ज्जन्यादन्नसम्भवः ॥"

(कश्यपपत्न्या मुनेः पुत्रविशेषः । स तु गन्धर्व्व-विशेषः । यथा, महाभारते । १ । ६५ । ४४ ।

"तथा शालिशिरा राजन् । पर्ज्जन्यश्च चतुर्द्दश ।
कलिः पञ्चदशस्तेषां नारदश्चैव षोडशः ॥"

पर्ज्जन्य इव सर्व्वकामप्रदानात् विष्णुः । यथा, महाभारते । १३ । १४९ । १०० ।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पावनोऽनिलः॥"
"पर्ज्जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वान् कामानभिवर्षतीति पर्ज्जन्यः ।" इति शाङ्कर-भाष्यम् ॥)

पर्ज्जन्या, स्त्री, (पर्ज्जन्य + टाप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

पर्ण, तु क हारित्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां परं-सकं-सेट् ।) हरित् पीत-वर्णस्तस्य भावः हारित्यम् । पर्णयति पर्णा-पयति चम्पकम् । इति दुर्गादासः ॥

पर्णं, क्ली, (पिपर्त्तीति । पॄ + "धापॄवस्यज्यतिभ्यो नः ।" उणां । ३ । ६ । इति नः । यद्वा, पर्णयतीति । पर्ण त् क हारित्ये + अच् ।) पत्रम् । इत्यमरः । २ । ४ । १४ ॥ (यथा, कुमारे । ५ । २८ ।

"स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥")

ताम्बूलम् । यथा, राजनिर्घण्टे ।

"अनिधाय मुखे पर्णं पूगं खादयते नरः ।
मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥
ताम्बूलधारिलक्षणं यथा,—
"अनाहार्य्योऽथ्रशंसश्च दृढ़भक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥"

इति मात्स्ये १८६ अध्यायः ॥

(पिपर्त्ति पालयति गगनपातादिति । पॄ + न । पक्षः । यथा, महाभारते । १ । ३३ । २४ ।

"तद्गुत्वरमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
दृष्टानि सर्व्वभूतानि नाम चक्रुर्गरुत्मतः ।
सुरूपं पत्रमालक्ष्य तस्य पर्णमनुत्तमम् ॥")

पर्णः, पुं, (पिपर्त्तीति । पॄ पालने + "धापॄवस्यज्यतिभ्यो नः । उणां । ३ । ६ । इति नः । पलाशवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (यथा, ऋग्वेदे । १० । ९७ । ५ ।

"अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥")

पर्णकारः, पुं, (पर्णं ताम्बूलम् । करोति उत्पादय-तीति । पर्ण + कृ + अण् ।) वारजीवी । बारुइ इति भाषा ॥ इति केचित् ॥

पर्णकृच्छ्रः, पुं, (पर्णैः साध्यं कृच्छ्रं व्रतं यत्र । पत्रकृच्छ्रव्रतम् । यथा, याज्ञवल्क्ये । ३।३१६ ।

"पर्णोडुम्बरराजीवविल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः ॥"

पर्णखण्डः, पुं, (पर्णमेव खण्डो यस्य । पुष्पादि-हीनत्वात्तथात्वम् ।) वनस्पतिः । इति शब्द-चन्द्रिका ॥ (पर्णस्य ताम्बुलस्य खण्डः ।) ताम्बूले-कांशश्च ॥

पर्णचोरकः, पुं, (पर्णं चोरयतीति । पर्ण + चोरि + ण्वुल् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

पर्णध्वत्, [स्] त्रि, पर्ण + ध्वनृस् + कर्त्तरि क्विप् । पत्रध्वंसकर्त्ता । इति व्याकरणम् ॥

पर्णनरः, पुं, (पर्णैः पलाशपत्रैर्निर्म्मितो नरः नरा कारः पुत्तलकः।) पित्रादिशवास्थ्यलाभे दाहार्थ-तत्प्रतिनिधीभूतशरपलाशपत्ररचितोर्णातन्तु वेष्टितयवपिष्टलिप्तनराकारपुत्तलकः । यथा,

"आश्वलायनगृह्यपरिशिष्टम् । अस्थिनाशे पलाश-वृन्तानां त्रीणि षष्टिशतानि पुरुषप्रतिकृतिं कृत्वा, अशीत्यर्द्धन्तु शिरसि ग्रीवायां दश योजयेत् ।
'उरसि त्रिंशतं दद्यात् विंशतिं जठरे तथा ॥
बाहुभ्याञ्च शतं दद्यात् दद्यादङ्गुलिभिर्दश ।
द्वादशार्द्धं वृषणयोरष्टार्द्धं शिश्न एव च ॥
ऊरुभ्यान्तु शतं दद्यात् त्रिंशतं जानुजङ्घयोः ।
पादाङ्गुलीषु च दश एतत् प्रेतस्य लक्षणम् ॥
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ॥'
आदिपुराणम् ।
'तदलाभे पलाशोत्थैः पत्रैः कार्य्यः पुमानपि ।
शतैस्त्रिभिस्तथा षष्ट्या शरपत्रैर्विधानतः ॥'
तदलाभे अस्थ्यलाभे । अत्र पलाशपत्रशरपत्रयोः तुल्यत्वेनोपादानात् आश्वलायनसूत्रेऽपि प्रति-कृतौ शरपत्रस्य लाभः । अनाचारादृयोग्यत्वाच्च शरपत्रैः पुत्तलकं कृत्वा शिरप्रभृतिषु पलाश-पत्राणि देयानि । ततो वेष्टनं ऊर्णासूत्रेण लेपनं यवपिष्टेनेति । अशौचाभ्यन्तरदाहे शवदाहेन-शुद्धिः । तदुत्तरपर्णनरदाहे तु त्रिरात्रम् । एव पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदित्यादि पुरा-णात् । यज्ञपार्श्वः ।
'पुनश्चेदुपलभ्येरन् तदस्थीनि कदाचन ।
तदलाभे पलाशस्य सम्भवे हि पुनः क्रिया ॥'

हि यस्मात्तल्लाभे अस्थ्यामप्राप्तौ पलाशस्य तत्-
कृतपुत्तलकस्य दाहक्रिया । पुनरपि सम्भवे
अस्थिलाभे पुनरपि अस्थिदाहक्रिया विहिता
तस्मात् दर्शे पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाह-
क्रियाशौचे कर्त्तव्ये न पुनः पिण्डादिदानं वक्ष्य-
माणयुक्तेः । विष्णुः ।
"त्रिपक्षे तु गते पर्णनरं दहनादनघिकः ।
त्रिपक्षाभ्यन्तरे राजन्नेव पर्णनरं दहेत ॥
तद्दहमर्शो प्राप्य दर्शे वापि विचक्षणः ॥"
दहेदिति शेषः । अस्यार्थः । अशौचाभ्यन्तरे
यदि पर्णनरदाहं न कुर्य्यात्तदा मरणादिना-
वधित्रिपक्षाभ्यन्तरे दाहः कार्य्य इत्यर्थः । इति
हरिदासतर्काचार्य्याः ॥ यादवभट्टोऽप्येवम् । एव
कालोऽपि ईदृश एव ।
'पर्णनरं दहेन्नैव विना दर्शं कदाचन ।
अस्थामलाभे दर्शे तु ततः पर्णनरं दहेदिति ।'
दीपकलिकायां सुमन्तुवचनात् दर्शे पर्णनर-
दाहः । दर्शमित्यत्राष्टमीमिति क्वचित् पाठः ।
अत्राष्टमी कृष्णा पितृकर्म्मणि कृष्णपक्षस्य
प्राशस्त्योक्तेः ।" इति शुद्धितत्त्वम् ॥

पर्णभेदिनी, स्त्री, (पर्णानि भिनत्तीति । पर्ण + भिद् + णिनिः स्त्रियांङीप् ।) प्रियङ्गुः । इति राजनिर्घण्टः ॥

पर्णभोजनः, पुं, (पर्णान्येव भोजनं यस्य । पर्णानि भुङ्क्ते इति वा । भुज + कर्त्तरि ल्युः ।) छागलः । इति शब्दरत्नावली ॥

पर्णमाचालः, पु, (पर्णमाचालयतीति । पर्ण + आ + चल + णिच् + अण् । निपातनात् विभक्तिलोपाभावः । बाहुलकात् सुम् वा ।) कर्म्मरङ्गवृक्षः । इति शब्दमाला ॥

पर्णमृगः, पुं, (पर्णचरो मृगः पशुः ।) मृगगणविशेषः । यथा,—
"वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्म्महर्षिभिः ॥
वनौका वानरो वृक्षमार्ज्जारो वृक्षविड़ालः ।
वृक्षमर्कटिका रुषी इति लोके । एतेषां
मांसगुणाः । [छिनाः ।
"वृष्याः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणो
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥"
इति भावप्रकाशः ॥

पर्णलता, स्त्री, (पर्णप्रधाना लता ।) नागवल्ली । इति राजनिर्घण्टः ॥

पर्णवल्ली, स्त्री, (पर्णप्रधाना वल्ली ।) पलाशी लता । इति राजनिर्घण्टः ॥

पर्णशाला, स्त्री, (पर्णैः पत्रादिभिः रचिता शाला । मध्यपदलोपिसमास. ।) मुनीनां पत्ररचितगृहम् । तत्पर्य्यायः । उटजम् २ । इत्यमरः । २ । २ । ६ ॥ पर्णाटजम् ३ । इति शब्दरत्नावली ॥ पर्णवती शाला । पर्णप्रधाना शाला वा । इति भरतः ॥ (यथा, रघुः । १ । ६५ ।
"निर्द्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तद्विष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥"
मध्यदेशस्थग्रामविशेषः । यथा महाभारते । १३ । ६८ । ३ ।
"मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह ।
गङ्गायमुनयोर्मध्ये यामुनस्य गिरेरधः ॥
पर्णशालेति विख्यातो रमणीयो नराधिप । ॥")

पर्णसिः, पुं, (पॄ पूर्त्तौ + "सानसिवर्णसिपर्णसीति ।" उणां । ४ । १०७ । इति असिकुक् च ।) पद्मम् । इत्युणादिकोषः ॥ जलगृहम् । जलटुङ्गी इति भाषा ॥ इति सिद्धान्तकौमुदीसुणादिवृत्तिः ॥ शाकम् । आभरणक्रिया । इति संक्षिप्तसारोणादिवृत्तिः ॥

पर्णाशनः, पुं, (पर्णं अश्नाति भक्षयतीति । अश + ल्युः । पर्णानामशनः ।) मेघः । इति शब्दमाला ॥

पर्णासः, पुं, (पर्णैरसति दीप्यते शोभते इति यावत् । अस दीप्तौ + अच् ।) तुलसी । इत्यमरः । २ । ४ । ७८ ॥

पर्णिनी, स्त्री, (पर्णानि सन्त्यस्याः । पर्ण + इनिः ।) माषपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे ६० अध्याये ।
"वह्निकरजनीकुल पर्णिनीशारिवान्वयैः ॥"
अप्सरोविशेषः । यथा, हरिवंशे । १२८ । ३८ ।
"मेनकामहजन्या च पर्णिनी पुञ्जिकास्थला ॥")

पर्णी, [न्] पुं, (पर्णानि सन्त्यस्य । पर्ण + इनिः ।) वृक्षः । इति हेमचन्द्रः । ४ । १८० ॥

पर्णोटजं, क्ली, (पर्णनिर्म्मितं उटजम् ।) पर्णशाला । इति शब्दरत्नावली ॥

पर्द्द, ङ अपानोत्सर्गे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अकं-सेट् ।) ङ, पर्द्दते वृद्धः । इति दुर्गादासः ॥

पर्द्दः, पुं, (पॄ + बाहुलकात् दः ।) केशसमूहः इत्युणादिकोषः ॥ (पर्द्द अपानोत्सर्गे + अच् ।) अपानोत्सर्गश्च ॥

पर्द्दनं, क्ली, (पर्द्द + ल्युट् ।) अपानोत्सर्गः । इति हेमचन्द्रः । ६ । ३६ ॥ पाद इति भाषा ॥

पर्पं, क्ली, (पॄ पालनादौ + "खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ।" उणां । ३ । २८ । इति निपातनात् सिद्धम् ।) नवतृणम् । गृहम् । इत्युणादिकोषः ॥ खञ्जवाह्यशकटम् । इति सिद्धान्तकौमुदीसुणादिवृत्तिः ॥

पर्पटः, पु, (पर्प + अटन् ।) वृक्षविशेषः । क्षेतपापड़ा इति वङ्गभाषा । दवनपापर इति हिन्दीभाषा । तत्पर्य्यायः । वित्यहिः २ तिक्तः ३ । इति रत्नमाला ॥ चरकः ४ रेणुः ५ कृष्णारिः ६ वरकः ७ अरकः ८ शीतः ९ शीतप्रियः १० पांशुः ११ कल्पाङ्गः १२ कर्म्मकण्टकः १३ कृशशाखः १४ प्रगन्धः १५ सुतिक्तः १६ रक्तपुष्पकः १७ पित्तारिः १८ कटुपत्रः १९ वक्रः २० । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । पित्तश्लेष्मज्वररक्तदाहारुचिग्लानिमदभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥
"पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः ।
कथितः पांशुपर्य्यायस्तथा कवचनामकः ॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् ।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥"
इति भावप्रकाशः ॥ * ॥
पिष्टकभेदः । पापर इति भाषा ॥ तस्य गुणाः । लघुत्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥
"धर्म्मरीरचिता हिङ्गुहरिद्रालवणैर्युताः ।
जीरकक्षारिकाभ्याञ्च तत्र कृता च वेल्लिताः ॥
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः ॥
मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः ।
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः ॥
स्नेहे भृष्टास्तु ते सर्व्वे भवेयुर्मध्यमा गुणे ॥"
इति भावप्रकाशे पूर्व्वखण्डे द्वितीयभागे ॥

पर्पटद्रुमः, क, (पर्पट एव द्रुमः ।) कुम्भीवृक्षः । इति राजनिर्घण्टः ॥

पर्पटी, स्त्री, (पर्पट + ङीष् ।) सौराष्ट्रमृत्तिका । इति रत्नमाला ॥ पिष्टकभेदः । इत्युणादिकोषः ॥ उत्तरदेशभवसुगन्धिद्रव्यम् । पपरोति प्रसिद्धम् । पद्मावतीति च । तत्पर्य्यायः । रञ्जनी २ कृष्णा ३ जतुका ४ जननी ५ जनी ६ जतुकृष्णा ७ संस्पर्शा ८ जतुकृत् ९ चक्रवर्त्तिनी १० । अस्या गुणाः । तुवरत्वम् । तिक्तत्वम् । शिशिरत्वम् । वर्ण्यत्वम् । लघुत्वम् । विषव्रणकण्डूकफपित्तास्रकुष्ठनाशित्वञ्च । इति भावप्रकाशः ॥

पर्परीकः, पुं, (पिपर्त्तीति । पृ + "पॄभृकां दे रुकचाभ्यासस्य ।" उणां । ४।१९ । इति ईकन् द्वित्वं अभ्यासस्य रुगागमश्च ।) सूर्य्यः । इत्युणादिकोषः ॥ वह्निः । इति त्रिकाण्डशेषः । जलाशयः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पर्यिकः, पुं स्त्री, पर्य्येण गच्छतीति । (पर्य + ठन् । खञ्जः । इति सिद्धान्तकौमुदी ॥

पर्व्व, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।)

पर्य्यङ्कः, पुं, (परितोऽङ्क्यते इति । परि + अकि-लक्षणे + घञ् ।) खट्वा । पालङ्क इति भाषा ॥ इत्यमरः । २ । ६ । १३८ ॥ तत्पर्य्यायः । (मञ्चः मञ्चकः ३ पल्यङ्कः ४ । इति हेमचन्द्रः । ३।३४७ ॥) पर्य्यस्तिका ५ परिकरः ६ अवसक्थिका ७) इति च तत्रैव । ३ । ३४३ ॥ (यथा, महाभारते । ३ । २४६ । ८ ।
"अथोपविष्टं राजानं पर्य्यङ्के ज्वलनप्रभे ।
उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये ।
उपगम्याब्रवीत् कर्णो दुर्योधनमिदं तदा ॥"
योगपट्टः । यथा, कुमारे । ३ । ४५ ।
पर्य्यङ्कबन्धस्थिरपूर्व्वकायं
मृज्वायतं सन्नमितोभयांसम् ॥")

पर्य्यङ्कपादिका, स्त्री, (पर्य्यङ्कस्येव पादोऽस्याः । ठन् टाप् च ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

पर्य्यङ्कबन्धनं, क्ली, (पर्य्यङ्कवत् दृढबन्धनम् ।) वस्त्रादिना पृष्ठजानुजङ्घाबन्धनम् । फाङ्बाधा इति भाषा ॥ यथा,—

"पादप्रसारणञ्चापि तथा पर्य्यङ्कबन्धनम् ॥"
इत्यपराधगणनायां हरिभक्तिविलासः ॥

पर्य्यटनं, क्ली, (परितोऽटनं भ्रमणम् । परि+अट+भावे ल्युट् ।) सर्व्वतोभावेनाटनम् । पुनः पुनर्गमनम् । भ्रमणम् । तत्पर्य्यायः । ब्रज्या २ अटाट्या ३ । इत्यमरः । २ । ७ । ३६ ॥ (यथा, भागवते । ६ । ७ । १८ ।
"भूमेः पर्य्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः ॥")

पर्य्यनुयोगः, पुं, (परितोऽनुयोगः पृच्छा । परि+अनु+युज्+भावे घञ् ।) जिज्ञासा । इति हलायुधः ॥ ("एतेनास्यापि पर्य्यनुयोगस्यानवकाशः ।" इति दायभागः ॥)

पर्य्यन्तः, पुं, (परितोऽन्तम् । प्रादिसमासः ।) शेषसीमा । इति दुर्गादासः ॥ (यथा, पञ्चतन्त्रे । १ । १४१ ।
"पर्य्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि ।
न कथञ्चित् महीपस्य चित्तान्तः केनचित्
क्वचित् ॥"
समीपम् । यथा, हरिवंशे । १२२ । ५३ ।
"पर्य्यन्तदेशं वरसंन देवी
लिलेप सा लोहितचन्दनेन ॥"
पार्श्वः । यथा, रघौ । १८ । ४३ ।
"पर्य्यन्तसञ्चारितचामरस्य
कपोललोलोभयकाकपक्षात् ।
तस्याननादुच्चरितो विवादः
चस्खाल वेलास्वपि नार्णवानाम् ॥")

पर्य्यन्तभूः, स्त्री, (पर्य्यन्तस्य शेषसीमाया भूः पृथिवी ।) नदीनगरपर्व्वतादेरुपान्तभूमिः । तत्पर्य्यायः । परिसरः २ । इत्यमरः ।२।१।१४॥

पर्य्यन्तिका, स्त्री, (परितः सर्व्वतो भावेन अन्तिका गुणादीनां नाशिका।) गुणभ्रंशः । इति हारावली । २१० ॥

पर्य्यन्यः, पुं, (पर्जन्य+पृषोदरादित्वात् साधुः ।) इन्द्रः । शब्दायमानमेघः । मेघशब्दः । इत्युणादिकोषः ॥ (यथा, गोः रामायणे ।६।३१।३२।
"ततो दुन्दुभिनिर्घोषः पर्य्यन्यनिनदोपमः ॥")

पर्य्ययः, पुं, (परि क्रमशः अयो गमनम् ।) क्रमोल्लङ्घनम् । (परि शास्त्रलोकाचारमर्य्यादां परित्यज्य अयो गमनमुल्लङ्घनमित्यर्थः ।) अतिक्रमः । शास्त्रतो लोकव्यवहाराच्च प्राप्तस्यार्थस्य परित्यागः । तत्पर्य्यायः । अतिपातः २ उपात्ययः ३ । इत्यमरभरत॥ विपर्य्ययः ४ अत्ययः ५ । अतिपतनम् ६ व्यत्ययः ७ अतिक्रमः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते ।२।४८।१२।
"अन्नाद्याच्छादये चाहं यथा कुपुरुषस्तथा ।
अमर्षं धारये चोग्रं प्रतीक्षन् कालपर्य्ययम् ॥")

पर्य्ययणं, क्ली, (परितोऽयते गच्छत्यनेन । परि+अय+ल्युट् ।) अश्वसज्जा । इति शब्दमाला ॥ जिन् इति भाषा ॥

पर्य्यवस्था, स्त्री, (परितोऽवस्थानम् । परि+अव+स्था+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इत्यङ् ।) विरोधनम् । इत्यमरः । ३ । २ ।२१॥

पर्य्यवस्थाता, [ऋ] त्रि, (पर्य्यवतिष्ठते इति । परि+अव+स्था+तृच् ।) पर्य्यवस्थाकर्त्ता । विरोधी । इति हलायुधः ॥ (यथा, किरातार्ज्जुनीये । ११ । १३ ।
"अन्तकः पर्य्यवस्थाता जन्मिनः सन्ततापदः ।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥")

पर्य्यवस्थानं, क्ली, (परितोऽवतिष्ठतेऽनेन । परि+अव+स्था+करणे ल्युट् ।) विरोधः । इति जटाधरः ॥ सर्व्वतोभावेनावस्थितिश्च ॥

पर्य्यस्तः, त्रि, (परितोऽस्तः क्षिप्तः । अस् इर क्षेपे+क्तः ।) पतितः । हतः । इति मेदिनी । ते, १२१ ॥ (सर्व्वतः प्रसृतः । विस्तृतः । यथा, हरिवंशे । १५६ । २० ।
"पर्य्यस्तां पृथिवीं हृतस्तां साध्वीं सरथकुञ्ज-[राम् ॥")

पर्य्यस्तिका, स्त्री, (परितः अस्यते क्षिप्यते शरीरमत्र । परि+अस क्षेपे+अधिकरणे क्तिन् । ततः स्वार्थे कन् ।) खट्वा । इति हेमचन्द्रः । ३ । ३४३ ॥

पर्य्याणं, क्ली, (परितो याति गच्छत्यनेनेति । परि+या+ल्युट् । पृषोदरादित्वात् साधुः । अश्वपल्ययनम् । इति हेमचन्द्रः । ४ । ३१८॥ (यथा, बृहत्संहितायाम् । ६३ । ६ ।
"आरोहणमन्यवाजिनां
पर्य्याणादियुतस्य वाजिनः ।
उपवाह्य तुरङ्गमस्य वा
कल्यस्यैव विपन्नशोभना ॥")

पर्य्याप्तं, क्ली, (परि+आप्+भावे क्तः ।) यथेष्टम् । तृप्तिः । शक्तिः । निवारणम् । इति मेदिनी । ते, १२७ ॥ त्रि, प्राप्तः ॥ (शक्तिसम्पन्नः । यथा, भगवद्गीतायाम् । १ । १० ।
"पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम् ।"
"पर्य्याप्तं समर्थं भाति इति ।" श्रीधरस्वामी ॥)

पर्य्याप्तिः, स्त्री, (परि+आप+क्तिन् ।) परित्राणम् । मरणोद्यतस्य निवारणम् । इत्यमरभरतौ ॥ प्रकाशः । प्राप्तिः । इति शब्दरत्नावली ॥ (तृप्तिः । यथा, कथासरित्सागरे । २६ । १६६ ।
"नास्ति व्यसनिनां वत्स । भुवि पर्य्याप्तये धनम् ॥"
शक्तिः । यथा, तत्रैव । २६ । ४७ ।
"प्रविष्टः सोऽप्यपश्यत्तां तत्र नेत्रोत्सवप्रदाम् ।
धातुरद्भुतनिर्म्माणपर्य्याप्तिमिव रूपिणीम् ॥")
स्वरूपसम्बन्धविशेषः । स च सर्व्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः । पदार्थभेदेन नाना । यथा । पर्य्याप्तिश्चायमेको घट इमौ द्वौ इत्यादि प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः ।, इति दीधितिः ॥ समवायेन गुणे गुणस्यासत्त्वेऽपि चत्वारो गुणा इत्यादि प्रतीत्या गुणादिषु संख्यादिमत्त्वनियामकोऽपि तादृशसम्बन्धः। इति सामान्याभावे जगदीशः ॥ द्वितीयव्युत्पत्तिवादे गदाधरभट्टाचार्य्यश्च ॥

पर्य्यायः, पु, (परि+इण गतौ+"परावनुपात्यय इणः ।" ३ । ३ । ३८ । इति घञ् । क्रमप्राप्तस्यानतिपातोऽनुपात्ययः ।) पर्य्ययणम् । क्रमः । (यथा, कुमारे । २ । ३६ ।
"पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥")
तत्पर्य्यायः । आनुपूर्व्वी २ आवृत् ३ परिपाटी ४ अनुक्रमः ५ । इत्यमरः । २ । ७ । ३७ ॥ आनुपूर्व्यम् ६ आनुपूर्व्वम् ७ आनुपूर्व्वकम् ८ परिपाटिः ९ । इति भरतादयः ॥ प्रकारः । अवसरः । इति मेदिनी । ये, ८९ ॥ निर्म्माणम् । द्रव्यधर्म्मः । इति हेमचन्द्रः ॥ ६ । १३९ । क्रमे णैकार्थवाचकाः शब्दाः पर्य्यायाः । इति विजयरक्षितः ॥ सम्पर्कविशेषः । येन सह यत्सम्पर्कः सम्बन्धस्तेन सह तत्पर्य्यायः । यथा,—
"समानं कुलभावञ्च दानादानन्तथैव च ।
तयोर्व्वंशसमानं हि पर्य्यायश्च प्रचक्षते ॥"
इति कुलदीपिका ॥
(अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे १० । १०४ ।
"क्वचिदेकमनेकस्मिन्ननेकञ्चैकगं क्रमात् ।
भवति क्रियते वा चेत् तदा पर्य्याय इष्यते ॥"
उदाहरणं क्रमेण यथा,—
"स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः ॥
विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः ।
वृककाकशिवास्तत्र धावन्त्यरिपुरे तव ॥
विम्बोष्ठरागाद्धराम्निवर्त्तित-
स्तनाङ्गरागादरुणाच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥
ययोरारोपितस्तारो हारस्तेऽरिवधूजनैः ।
निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुबिन्दवः ॥
अत्र च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च । क्वचिदाधेयमपि । यथा, 'स्थिताःक्षणं पक्ष्मसु' इत्यत्र उदबिन्दवः पक्ष्मादावसंहतरूप आधारे क्रमेणाभवन् । 'विचरन्ति' इत्यत्राधेयभूता वृकादयः संहतरूपारिपुरे क्रमेणाभवन् । एवमन्यत् । अत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालङ्काराद्भेदः । विनिमयाभावात् परिवृत्तेः ॥")

पर्य्यायशयनं, क्ली, (पर्य्यायेण क्रमेण शयनम् ।) प्रहरिकादीनां क्रमेण शयनम् । तत्पर्य्यायः । उपशायः २ विशायः ३ । इत्यमरभरतौ ॥

पर्य्यासः, पु, (पर्य्यस्यते इति । परि+असु+घञ् ।) पतनम् । हननम् । इति पर्य्यस्तशब्दार्थदर्शनात् ॥ (परिवर्त्तः । यथा, मार्कण्डेयपुराणे । ५४ । २ ।
"महाभूतप्रमाणञ्च लोकालोकन्तथैव च ।
पर्य्यासं परिमाणञ्च गतिश्चन्द्रार्कयोरपि ॥")

पर्य्युदञ्चनं, क्ली, (पर्य्युदच्यते इति । परि+उत्+अञ्च+"कृत्यल्युटो बहुलम् ।" ३ । ३ । ११३ । इति ल्युट् ।) ऋणम् । इत्यमरः । २ । ९ । ३ ॥

पर्य्युदस्तः, त्रि, (पर्य्युदस्यते इति । परि + उत् + अस + क्तः ।) पर्य्युदासविशिष्टः । विध्यन्वयि-भेदात्मकनञर्थयुक्तः । यथा । यद्यपि पर्य्युदस्त-रात्र्यादिषु श्राद्धादिकरणे विधेरौदासीन्यान्न फलं न वा प्रत्यवाय इति सिद्धान्तः ॥ इति मल-मासतत्त्वम् ॥ (परित उत्क्षिप्ते त्रि ॥)

पर्य्युदासः, पुं, परि सर्व्वतोभावेन उदास्यते विधि यत्र सः । (परि + उत् + अस् + घञ् ।) तस्य लक्षणम् श्राद्धविवेके ।

“सामान्यशास्त्रप्राप्तनिषेधस्यैव पर्य्युदासत्वम् ॥”

अपि च मलमासतत्त्वे ।

“प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥”

अस्योदाहरणम् । अमावस्यायां पितृभ्यो दद्यात् रात्रौ श्राद्धं न कुर्व्वीत । अत्र श्राद्धकरणे रात्रिः पर्य्युदासः ॥ (यथा च साहित्यदर्पणे । ७ । ३ ।

“कुशोपात्तानमन्त्रस्तौ भेजे धर्म्ममनातुरः ।
अगृध्नुरादद सोऽर्थानसक्तः सुखमन्वभूत ॥

अत्रात्रस्ततामन्त्रात्मगोपनार्थ्यवविधेयमिति नञः पर्य्युदासतया गुणाभावो युक्तः ॥”)

पर्य्युषितं, त्रि, (परित्यज्य स्वकालमुषितम् । वस + क्तः ।) दुष्टम् । वासि इति भाषा । तस्या-भक्षणीयत्वं यथा,—

“भक्तं पर्य्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ।
उदक्यास्पृष्टसंस्पृष्टं पर्य्यायान्नञ्च वर्ज्जयेत ॥”

इति गरुड़पुराणम् ॥

“यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥”

इति भगवद्गीता ॥ * ॥

तस्य भक्ष्यत्वं यथा,—

“मन्त्राभिमन्त्रितं शस्तं न च पर्य्युषितं नृप ।
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥
तद्वद्दारिकेभ्यश्च गुड़पक्वेभ्य एव च ॥”

इत्याह्निकतत्त्वम् ॥

तुलसीयुक्तपुष्पे पर्य्युषितदोषाभावो यथा,—

“तुलसीलग्नपुष्पाणि पद्मं गङ्गोदकं कुशाः ।
न पर्य्युषितदोषोऽत्र छिन्नभिन्नं न दुष्यति ॥”

इति पुराणम् ॥

पर्य्युषितभोजी, [न्] त्रि, (पर्य्युषितं दुष्टं भुङ्क्ते इति । भुज + णिनिः ।) दुष्टद्रव्यभोक्ता । इति कलापव्याकरणम् ॥

पर्य्येषणा, स्त्री, (इष + युच् + टाप् । ततः परित एषणा ।) अन्वेषणा । इत्यमरः । २ । ७ । ३० ॥ तर्कादिना यथाशास्त्रितधर्म्माद्यन्वेषणे । अन्वे-षणमात्रेऽपि । इति भरतः ॥ (क्ली, अन्वे-षणम् । यथा, महाभारते । ३ । २६ । १८ ।

“आश्चर्य्यस्येव मेधावी बुद्धिपर्य्येषणाच्चरेत् ॥”)

पर्व्व, गतौ । (भ्वा-परं-सकं-सेट् ।) पर्व्वति । इति दुर्गादासः ॥

पर्व्व, पूर्त्तौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) पर्व्वति पयसा कुम्भं घटी । इति दुर्गादासः ॥

पर्व्व, [न्] क्ली, (पर्व्वतीति । पर्व्व गतौ + बाहु-लकात् कनिन् । यद्वा, पिपर्त्तीति । पॄ + “स्ना-मदिपद्यर्त्तिपॄशकिभ्यो वनिप् ।” उणा । ४ । ११२ । इति वनिप् ।) महः । ग्रन्थिः । (यथा, भागवते । ५ । २१ । १७ । “तथा बालखिल्या ऋषयोऽङ्गुष्ठपर्व्वमात्राः षष्टिसहस्राणि पुरतः सूर्य्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥”) प्रस्तावः । लक्षणान्तरम् । दर्शप्रतिपदोः सन्धिः । (पूर्णिमाप्रतिपदोःसन्धिश्च । यथा, साहित्यदर्पणे ।

“अकालजलदावली किरतु नाम मुक्तावली-रपर्व्वणि विधुन्तुदस्तुदतु नाम शीतद्युतिम् ॥”)

विषुवत्प्रभृति । इति मेदिनी । ने, ८८ ॥ ग्रन्थ-विच्छेदः । इति त्रिकाण्डशेषः ॥ (यथा, महा-भारते अष्टादशपर्व्वाणि । तानि उक्तानि यथा तट्टीकायाम् ।

“आदिः सभावनविराटमथोद्यमञ्च
भीष्मो गुरू रविजमद्रकसौप्तिकञ्च ।
स्त्रीपर्व्व शान्तिरनुशासनमश्वमेध-
श्चाश्रमो मुषलयानदिवावरोहः ॥”)

क्षणः । इति शब्दचन्द्रिका ॥ (भङ्गी । यथा, रघुवंशे । १६ । ४६ ।

दिने दिने शैवलवन्त्यधस्तात्
सोपानपर्व्वाणि विमुञ्चदम्भः ॥”)

पञ्चपर्व्वाणि यथा । विष्णुपुराणम् ।

“चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र । रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥”

पर्व्वसु कर्त्तव्याकर्त्तव्यानि यथा । ब्रह्मपुराणे ।

“नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्व्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत् ॥”

पराशरभाष्ये कूर्म्मपुराणम् ।

“अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥”

पैठीनसिः । न पर्व्वसु तैलं क्षौरं मांसमभ्यु-पेयात् नामावस्यायां हरितमपि छिन्द्यात् । इति तिथ्यादितत्त्वम् ॥

पर्व्वकं, क्ली, (पर्व्वणा ग्रन्थिना कायतीति । कै + कः ।) जानुपर्व्व । इति शब्दचन्द्रिका ॥ आँटु इति भाषा ॥

पर्व्वकारी, [न्] पुं, (पर्व्व करोतीति । पर्व्व + कृ + णिनिः ।) धनादिलोभेनापर्व्वसु अमावास्याक्रिया-प्रवर्त्तकः । यथा, विष्णुपुराणे तृतीयांशे ६ अः ।

“द्रव्यो माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥”

पर्व्वगामी, [न्] पुं, (पर्व्वसु चतुर्द्दश्यष्टम्यादिषु गच्छति स्त्रियमिति । पर्व्व + गम + णिनिः ।) पर्व्वसु स्त्रीगामी । इति पूर्व्वोक्तश्लोके पर्व्व-कारीत्यत्र पर्व्वगामीति पाठद्वैधे स्वामी ॥

पर्व्वतः, पुं, (पर्व्वति पूरयतीति । पर्व्व पूरणे + “भृमृदृशियजिपर्व्विति ।” उणा । ३ । ११० । इति अतच् ।) यद्वा, पर्व्वाणि भागाः सन्त्यत्र । पाहाड़ इति भाषा ॥ तत्पर्य्यायः । महीध्रः २ शिखरी ३ क्ष्माभृत् ४ अहार्य्यः ५ धरः ६ अद्रिः ७ गोत्रः ८ गिरिः ९ ग्रावा १० अचलः ११ शैलः १२ शिलोच्चयः १३ । इत्य-मरः । २ । ३ । १ ॥ स्थावरः १४ सानुमान् १५ पृथुशेखरः १६ धरणीकीलकः १७ कुट्टारः १८ जीमूतः १९ धातुभृत् २० भूधरः २१ स्थिरः २२ कुलीरः २३ कटकी २४ शृङ्गी २५ निर्झरी २६ अगः २७ नगः २८ दन्ती २९ । इति शब्द-रत्नावली ॥ धरणीध्रः ३० भूभृत् ३१ क्षिति-भृत् ३२ अवनीधरः ३३ कुधरः ३४ धराधरः ३५ प्रस्थवान् ३६ वृष्णवान् ३७ । इति राज-निर्घण्टः ॥ * ॥ सुमेरोः पूर्व्वे पर्व्वता यथा,—

“शीतान्तश्चक्रमुञ्जश्च कुलीरोऽन्यश्च कङ्कवान् ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥
सुबिन्दुर्मन्दरो वेणुः सुमेघो निमिषस्तथा ।
देवशैलस्य पूर्व्वेण मन्दरस्य महाचलाः ॥” * ॥

सुमेरोर्दक्षिणे पर्व्वता यथा,—

“त्रिकूटः शिखराद्रिश्च कलिङ्गोऽथ पतङ्गकः ।
रुचकः सानुमांश्चैव ताम्रकोऽथ विशाखवान् ॥
श्वेतोदरः समलश्च वसुधारश्च रत्नवान् ।
एकशृङ्गो महाशैलो गजशैलः पिशाचकः ॥
पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥”

सुमेरोः पश्चिमे पर्व्वता यथा,—

“सुवक्षुः शिशिरश्चैव वैदूर्य्यः पिङ्गलस्तथा ।
पिञ्जरोऽथ तथा भद्रः सुरसः कपिलो मधुः ॥
अञ्जनः कुक्कुटः कृष्णः पाण्डुरश्चाचलोत्तमः ।
सहस्रशिखरश्चाद्रिः पारिपात्रः स शृङ्गवान् ॥
पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः शृणुष्वातस्तथो-
त्तरान् ॥”

सुमेरोरुत्तरे पर्व्वता यथा,—

“शङ्खकूटोऽथ ऋषभो हंसनाभो तथाचलौ ।
कपिलेन्द्रस्तथा शैलः सानुमान्नील एव च ॥
शतशृङ्गः स्वर्णशृङ्गः तुषारो मेघपर्व्वतः ।
विराजाख्यो वराहाद्रिर्मयूरो रुचिरस्तथा ॥
इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः ॥”

इति मार्कण्डेयपुराणम् ॥ * ॥

सप्तकुलपर्व्वतादि यथा,—

“सप्त यस्मिन् महापर्व्वा विस्तृताः कुलपर्व्वताः ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ॥
विन्ध्यश्च पारिपात्रश्च इत्येते कुलपर्व्वताः ।
तेषां सहस्रशश्चान्ये पर्व्वतास्तु समीपतः ॥
अविज्ञाताः पर्व्ववन्तो विपुलाश्चित्रसानवः ।
अन्ये तेभ्योऽपरिज्ञाता ह्रस्वाः स्वल्पोपजीविनः ।
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः ॥’

इति मात्स्ये ९५ अध्यायः ॥ * ॥

विंशतिः श्रेष्ठपर्व्वता यथा,—

“हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः ।
श्वेतश्च शृङ्गवान् मेरुर्माल्यवान् गन्धमादनः ॥

महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारिपात्रश्च कैलासो मन्दरस्तथा ॥
लोकालोको महाश्चैव तथैवोत्तरमानसः ।
एते विंशतिर्विख्याताः पर्व्वतास्तेषु वै वराः ॥"
जम्बुद्वीपवर्षविभाजकपर्व्वता यथा,—
"लङ्कादेशाद्धिमगिरिरुदक् हेमकूटश्च तस्मा-
त्तस्मात्तस्मान्निषध इति ते सिन्धुपर्य्यन्तदैर्घ्याः ।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छ्वेतनीला
वर्षाण्येषां भुवि च गदितान्यन्तरे द्रोणिदेशान् ॥"
इति सिद्धान्तशिरोमणिः ॥ * ॥
पर्व्वतानां पक्षोत्पत्तिर्यथा,—
"ततोऽन्दयो जातपक्षा विष्णोश्चैव तु मायया ।
प्रस्थिता मेदिनीं त्यक्त्वा यथापूर्व्वं निवेशिताः ॥
तत स्थानमसुराणान्तु धात्रादिष्टं जलार्णवे ।
प्रतीच्यां पर्व्वताः सर्व्वे निमग्नाश्च यथा गजाः ॥
तत्रासुरेभ्यः शंसन्ति आधिपत्यं सुराश्रयम् ।
तच्छ्रुत्वैवासुराः सर्व्वे चक्रुरुद्योगमुत्तमम् ॥ * ॥"
युद्धजयानन्तरं तेषां पक्षोच्छेदो यथा,—
"धरण्यान्तु गिरीन् स्थाप्य स्वेषु स्थानेषु गोःपतिः ।
चिच्छेद पविना पक्षान् सर्व्वेषां भुवि चारिणाम् ॥
एकः सपक्षो मैनाकः सुरैस्तत्समयं कृतः ॥"
इत्यग्निपुराणम् ॥ * ॥
पर्व्वतानां स्थावरजङ्गमरूपे यथा,—
"नद्यश्च पर्व्वताः सर्व्वे द्विरूपास्तु स्वभावतः ।
तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्तीनामथ कम्बूनां तथैवान्तर्गता तनुः ॥
वहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्याय्यते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्याय्यते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ॥
जगतःस्थित्यै पुरा विष्णुः कल्पयामास यत्नतः ।
तोयहानौ नदी दुःखमाप्नोति सततं द्विजाः ॥
विशीर्णे स्थावरे दुःखं जायते गिरिकायगम् ॥"
इति कालिकापुराणे २२ अध्यायः ॥ * ॥
अतः परं पर्व्वतेषु देवानामवकाशा वर्ण्यन्ते ।
तत्र योऽसौ शान्ताख्यः पर्व्वतस्तस्योपरि महे-
न्द्रस्य क्रीडास्थानं तत्र देवराजस्य पारिजातक-
वनम् । तस्य पूर्व्वपार्श्वे कुञ्जरो नाम गिरिः
तस्योपरि दानवानामष्टौ पुराणि च । तथा
वज्रकेतुपर्व्वते राक्षसानामनेकानि पुराणि ते च
नाम्ना नीलकाः कामरूपिणः महानीले च
शैलेन्द्रे पुराणि पञ्चदशसहस्राणि किन्नराणां
ख्यातानि तत्र देवदत्तचन्द्रादयो राजानः पञ्च-
दश किन्नराणां गर्व्विताः तानि सौवर्णानि विल-
प्रवेशनानि च पुराणि चन्द्रोदये च पर्व्वतवरे
नागानामधिवासः ते च विलप्रवेशसंवितेषु
वैनतेयविषयावर्त्तिनो व्यवस्थितानुरागे च दान-
वेन्द्रा व्यवस्थिता वेणुवत्यपि विद्याधरपुरत्रयं
त्रिंशद्योजनशतविस्तीर्णमेकैकं तावदायतं
उलूकरोमसममहावेत्रादयश्च राजानो विद्या-
धराणाञ्च एकैके च शैलराजनि स्वयमेव गरुडो
व्यवस्थितः । कुञ्जरे तु पर्व्वतवरे नित्यं पशुपतिः
स्थितः वृषभाङ्को महादेवः शङ्करो योगिनां
प्रभुः अनेकगणभूतकोटिसहस्रपरिवारो भग-
वानादिपुरुषो व्यवस्थितः । वसुधारे चायुष्मतां
वसूनाञ्च समावासः वसुधाररत्नधारयोर्मूर्द्ध्नि
अष्टौ सप्त च संख्यया पुराणि वसुसप्तर्षीणाञ्च ।
एकशृङ्गे च पर्व्वतोत्तमे प्रजापतेः स्थानं चतु-
र्व्वक्त्रस्य ब्रह्मणः । गजपर्व्वते च महाभूतपरि-
वृता स्वयमेव भगवती तिष्ठति । वसुधारे च
पर्व्वतवरे मुनिसिद्धविद्याधराणामायतनं चतु-
रशीत्यपरपुर्य्यो महाप्राकारतोरणाः तत्र
चानेकपञ्चता नाम गन्धर्व्वा युद्धशालिनो वसन्ति
तेषाञ्चाधिपतिर्देवो राजराजैकपिङ्गलः । सुर-
राक्षसाः पञ्चकूटे दानवाः शतशृङ्गे यक्षाणां
पुरशतम् । शर्भेदकस्य पश्चिमेन देवदानवसिद्धा-
दीनां पुराणि तस्य गिरेर्मूर्द्ध्नि महती सोमशिला
तिष्ठति तस्याञ्च पर्व्वणि पर्व्वणि सोमः स्वयमेवा-
वतरति । तस्यैवोत्तरपार्श्वे त्रिकूटं नाम तत्र
ब्रह्मा तिष्ठति कश्चित्तत्र च वह्न्यायतनं तत्र
मूर्त्तिमान् वह्निरुपास्यते देवैः । उत्तरे च शृङ्गाद्रौ
पर्व्वतवरे देवतानामायतनानि पूर्व्वेण नारा-
यणस्यायतनं मध्ये ब्रह्मणः शङ्करस्य च पश्चिमे
तत्र यक्षादीनां कानिचित् पुराणि । तस्य
चोत्तरतीरे जातुकमहापर्व्वते त्रिंशद्योजन-
मण्डलं नन्दनं नाम सरस्तत्र नन्दो नाम नाग-
राजो वसति शतशीर्षप्रपञ्चक इति । इत्येतेऽष्टौ
देवपर्व्वता विज्ञेयाः तेनानुक्रमेण हेमरजतरत्न-
वैदूर्य्यमनःशिलादिवर्णाः । इयञ्च पृथ्वी लक्ष-
कोटिशतानेकसंख्याता पूर्णा तेषु च सिद्धविद्या-
धराणां निलयाः । तद्यथा मेरोः पार्श्वतः
केशरवलयालवालं सिद्धलोकेति कीर्त्तितं इयञ्च
पृथ्वी पद्माकारेण व्यवस्थिता एष सर्व्वपुराणेषु
क्रमः सामान्यः प्रतिपाद्यते । इति वराहपुरा-
णम् ॥ * ॥ हिमालयादिपर्व्वतवासिनो यथा,—
"रक्षःपिशाचा यक्षाश्च सर्व्वे हैमवतास्तु ते ।
हेमकूटे तु गन्धर्व्वा विज्ञेयाश्चाप्सरोगणाः ॥
सर्व्वे नागाश्च निषधे शेषवासुकितक्षकाः ।
महामेरौ त्रयस्त्रिंशत् क्रीडन्ते याज्ञिकाः सुराः ॥
नीले तु वैदूर्य्यमये सिद्धा ब्रह्मर्षयोऽवसन् ।
दैत्यानां दानवानाञ्च श्वेतपर्व्वत उच्यते ॥
शृङ्गवान् पर्व्वतश्रेष्ठः पितॄणां प्रतिसञ्चरः ।
इत्येतानि मयोक्तानि नव वर्षाणि भागशः ॥"
इति मात्स्ये ६५ अध्यायः ॥ * ॥
अथ पर्व्वतनदीजलगुणाः ।
"हिमवत्प्रभवा याश्च जलं तास्वमृतोपमम् ।
पारिपात्रभवा याश्च विन्ध्यपर्व्वप्रभवाश्च याः ॥
शिरोहृद्रोगकुष्ठानां ता हेतुः श्लीपदस्य च ।
चन्द्रार्ककरसंस्पृष्टं वायुनास्फालितं मुहुः ॥
पर्व्वतोपरि यद्वारि समं पीतं रन्द्रेण तत् ।
तस्यागुणगणमुद्दिष्टं शैलप्रस्रवणोद्भवम् ॥
लेखनं दीपनं रूक्षं किञ्चिद्वातप्रकोपणम् ॥"
इति राजवल्लभः ॥ * ॥
पर्व्वते वर्णनीयानि यथा,—
"शैले मेघौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥"
इति कविकल्पलता ॥ * ।
अथ कैलासपर्व्वतवर्णनम् ।
"मध्ये हिमवतः पृष्ठे कैलासो नाम पर्व्वतः ।
तस्मिन्निधिपतिः श्रीमान् कुवेरः सह राक्षसैः ॥
अप्सरःमहितो राजा मोदते ह्यलकाधिपः ।
कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ॥
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ।
तस्मात प्रभवते दिव्या नदी मन्दाकिनी शुभा ॥
दिव्यञ्च चन्दनन्तत्र तस्यास्तीरे महद्वनम् ।
प्रागुत्तरेण कैलासं दिव्यं सौगन्धिकं गिरिम् ॥
सर्व्वधातुमयं दिव्यं शबलं पर्व्वतं प्रति ।
चन्द्रप्रभो नाम गिरिः सुशुभ्रं रत्नसन्निभः ॥
तत्समीपे सरो दिव्यमच्छोदन्नाम विश्रुतम् ।
तस्मात प्रभवते दिव्या नदी ह्यच्छोदका शुभा ॥
तस्यास्तीरे वनं दिव्यं महच्चैत्ररथं शुभम् ।
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ॥
यक्षसेनापतिः क्रूरैर्गुह्यकैः परिवारितः ।
पुण्या मन्दाकिनी चैव नदी ह्यच्छोदका शुभा ॥
महीमण्डलमध्ये तु प्रविष्टा तु महोदधिम् ।
कैलासाद्दक्षिणप्राच्यां शिवं सर्व्वौषधिं गिरिम् ।
मनःशिलामयं दिव्यं शबलं पर्व्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्य्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत सरः ॥
तस्मात् प्रभवते पुण्यो लौहित्यश्च नदो महान् ।
देवारण्यं विशोकञ्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो बली ।
सौम्यः स धार्म्मिकैश्चैव गुह्यकैः परिवारितः ॥ * ॥
कैलासात पश्चिमोदीच्यां ककुद्मानोषधीगिरिः ॥
ककुद्मति च रुद्रस्य चोत्पत्तिश्च ककुद्मिनः ।
तदञ्जनं त्रैककुदं शैलं त्रिककुदं प्रति ॥
सर्व्वधातुमयस्तत्र सुमहद्वैद्युतो गिरिः ।
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ।
तस्यास्तीरे वनं दिव्यं वैभ्राजन्नाम विश्रुतम् ॥
कुवेरानुचरस्तस्मिन् प्रहेतितनयो बली ।
नाम्ना वै ब्रह्मधामेति राक्षसोऽनन्तविक्रमः ॥ * ॥
कैलासात् पश्चिमामाशां दिव्यः सर्व्वौषधिर्गिरिः ।
अरुणः पर्व्वतश्रेष्ठो रुक्मधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्व्वतो हेमसन्निभः ।
शातकौम्भमयैर्दिव्यैः शिलाजालैः समन्ततः ॥
शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन् ।
शृङ्गवान् सुमहद्दिव्यो दुर्गशैलो महोच्छ्रितः ॥
तस्मिन् गिरौ निवसति गिरीशो धूम्रलोहितः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनबालुकम् ॥
तस्य पादात् प्रभवति शैलोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा ॥
सा चक्षुःशीतयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।

अभ्युत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम् ।
गौरञ्च पर्व्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनबालुकम् ।
रम्यं विन्दुसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ।
दिवं यास्यन्ति मे पूर्व्वे गङ्गातोयपरिप्लुताः ॥
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥”

इति मात्स्ये १०१ अध्यायः ॥

अथ दशधा कृत्रिमपर्व्वतदानम् ।

“प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ।
गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः ।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः ।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः ।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो देया यथाशास्त्रं विजानता ।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम् ।
प्रागुदक्प्रवणञ्चैव प्राङ्मुखं वा विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान् ।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः ।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ।

मेरुर्महाव्रीहिमयस्तु मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात् ।
पूर्व्वेण मुक्ताफलवज्रयुक्तो
याम्येन गोमेदकपुष्परागैः ॥
गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः ।
श्रीखण्डखण्डैरभितः प्रवाल-
लतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माथ विष्णुर्भगवान् मुरारि
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात् ।
मूर्द्धन्यवस्थानममत्सरेण
कार्य्यन्त्वनेकं च पुनर्द्विजौघाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतः स्यात् ।
तथेक्षुवंशावृतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण पीतानि च दक्षिणेन ।
वासांसि पश्चादथ कर्व्वुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्यान्महेन्द्रप्रमुखांस्तथाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण ।
नानाफलाली च समन्ततः स्या-
न्मनोरमं माल्यविलेपनञ्च ॥

वितानकञ्चोपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितं वा ।
इत्थं निवेश्यामरशैलमग्र्य-
मतस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्द्दिशञ्च
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचिह्नम् ।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरारुणोदसरसाथ वनेन चैव
रौप्येण शक्तिघटितेन विराजमानम् ।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजो वा ॥
हैमेन यक्षपतिना घृतमानसेन
वस्त्रैश्च राजतवनेन च संयुतः स्यात् ।
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे ।
संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि ताम्रमयं सुवस्त्रम् ॥
पुष्पैश्च हेमवटपादपशेखरन्त-
माकारयेत् कनकधेनुविराजमानम् ।
माक्षीकभद्रसरसा च वनेन तद्व-
द्रौप्येण भास्वरवता च युतं विधाय ॥
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः ।
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यस्तिलैर्यवघृतेन समित्कुशैश्च ॥
रात्रौ च जागरमनुद्धतगीततूर्य्य-
रावाहनञ्च कथयामि शिलोच्चयानाम् ।
त्वं सर्व्वदेवगणधामनिधे ! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत ! नाशयाशु ॥
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीजस्त्वं नः पाहि सनातन ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादशून्यममरैर्नारीभिश्च शिरस्तव ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चैत्ररथेन त्वं भद्राश्वे च विराजसे ।
शोभसे मन्दर ! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्ववनशोभावानतः कीर्त्तिर्दृढास्तु मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ।
हिरण्मयश्च शिखरस्तस्मात् पुष्टिर्ध्रुवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरक्षयास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।

स्नात्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ॥
विष्कम्भान् पर्व्वतान् दद्यादृत्विग्भ्यः क्रमशो मुने ॥
गावो देयाश्चतुर्व्विंशदथवा दश नारद ! ॥
शक्तितः सप्त चाष्टौ वा पञ्च दद्यादशक्तिमान् ।
एकापि गुरवे देया कपिलाथ पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्कराः स्मृताः ।
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
स्वमन्त्रेणैव सर्व्वेषु होमः शैलेषु पठ्यते ।
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ॥
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ।
दानकाले च ये मन्त्राः पर्व्वतेषु च यत् फलम् ॥
अन्नं ब्रह्म यतः प्रोक्तमन्नं प्राणाः प्रकीर्त्तिताः ।
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः ।
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ।
मन्वन्तरशतं साग्रं देवलोके महीयते ॥
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजितः ।
विमानेन दिवः पृष्ठमायाति सुरसेवितम् ॥
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥१॥
अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम् ॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतरून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्चात्र निवेशयेत् ।
कुर्य्याज्जागरमत्रापि दानमन्त्रं निबोधत ॥
सौभाग्यरससंभूतो यतोऽयं लवणो रसः ।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम ! ॥
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतो यस्मादारोग्यवर्द्धनः ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥२॥
अतः परं प्रवक्ष्यामि गुड़पर्व्वतमुत्तमम् ।
यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितः ॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्म्मतः ।
त्रिभिर्भारैः कनिष्ठः स्यात् तदर्द्धेनाल्पवित्तवान् ॥
तद्वदामन्त्रणं पूजां हेमवृक्षसुरार्च्चनम् ।
विष्कम्भपर्व्वतांस्तद्वत् सरांसि वनदेवताः ॥
होमजागरणन्तद्वत् लोकपालाधिवासनम् ।
धान्यपर्व्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत् ॥
यथा देवेषु विश्वात्मा प्रवरोऽयं जनार्द्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥
प्रणवः सर्व्वमन्त्राणां नारीणां पार्व्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात् परां लक्ष्मीं गुड़पर्व्वत ! देहि वै ।

यस्मात् सौभाग्यदायिन्या भ्राता त्वं गुडपर्व्वत ! ॥
निवासश्चापि हि पार्व्वत्यास्तस्मान्मां पाहि सर्व्वदा ।
अनेन विधिना यस्तु दद्याद्गुडमयं गिरिम् ॥
पूज्यमानः सगन्धर्व्वैर्गौरीलोके महीयते ।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः ॥ ३ ॥
अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रदानाद्भुवनं वैरिञ्चं याति मानवः ॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ।
तदर्द्धेनाधमस्तद्वदल्पवित्तोऽपि शक्तितः ॥
दद्यादेकपलादूर्द्ध्वं यथाशक्त्या विमत्सरः ।
धान्यपर्व्वतवत् सर्व्वं विदध्यान्मुनिपुङ्गव ! ॥
विष्कम्भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत् ।
नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः ॥
यस्मादनन्तफलदस्तस्मात् पाहि शिलोच्चय ! ।
यस्मादग्नेरपत्यं त्वं तस्माद्गतं जगत्पते ! ॥
हेमपर्व्वतरूपेण तस्मात् पाहि नगोत्तम ! ।
अनेन विधिना यस्तु दद्यात् कनकपर्व्वतम् ॥
स याति परमं ब्रह्मलोकमानन्दकारकम् ।
तत्र कल्पशतन्तिष्ठेत्ततो याति परां गतिम् ॥ ४ ॥
अतः परं प्रवक्ष्यामि तिलशैलं विधानतः ।
यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥
उत्तमो दशभिर्द्रोणैः पञ्चभिर्मध्यमो मतः ।
त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्त्तितः ॥
पूर्व्ववच्चापरं सर्व्वं विष्कम्भपर्व्वतादिकम् ।
दानमन्त्रं प्रवक्ष्यामि यथावन्मुनिसत्तम ! ॥
यस्मान्मधुवधे विष्णोर्देहात् स्वेदसमुद्भवाः ।
तिलाः कुशाश्च समिधस्तस्माच्छान्त्यै भवन्त्विह ॥
हव्यकव्येषु यस्माच्च तिला एवाभिरक्षणम् ।
भवादुद्धर शैलेन्द्र ! तिलाचल ! नमोऽस्तु ते ॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम् ।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम् ॥
दीर्घायुष्ट्वमवाप्नोति पुत्त्रपौत्त्रैश्च मानवः ।
पितृभिर्द्देवगन्धर्व्वैः पूज्यमानो दिवं व्रजेत् ॥ ५ ॥
अथातः संप्रवक्ष्यामि कार्पासाचलमुत्तमम् ।
यत्प्रदानान्नरो नित्यमाप्नोति परमं पदम् ॥
कार्पासपर्व्वतस्त्वत्र विंशद्भारैरिहोत्तमः ।
दशभिर्म्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्म्मतः ॥
भारेणाल्पधनो दद्याद्वित्तशाठ्येन वर्ज्जितः ।
धान्यपर्व्वतवत् सर्व्वमासाद्य मुनिपुङ्गव ! ॥
प्रभातायान्तु शर्व्वर्य्यां दद्यादिदमुदीरयेत् ।
त्वमेवावरणं यस्माल्लोकानामिह सर्व्वदा ॥
कार्पासाद्रे नमस्तस्मादघौघध्वंसनो भव ।
इति कार्पासशैलेन्द्रं यो दद्यात् शर्व्वसन्निधौ ॥
रुद्रलोके वसेत् कल्पं ततो राजा भवेदिह ॥*। ६ ।
अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ।
तेजोऽमृतमयं दिव्यं महापातकनाशनम् ॥
विंशत्या घृतकुम्भानामुत्तमः स्याद्घृताचलः ।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्ववरः स्मृतः ॥
अल्पवित्तोऽपि कुर्व्वीत द्वाभ्यामिह विधानतः ।
विष्कम्भान् पर्व्वतांस्तद्वच्चतुर्भागेन कल्पयेत् ॥
शालितण्डुलपात्राणि कुम्भोपरि निवेशयेत् ।
कारयेत् संहतानुच्चान् यथाशोभं विधानतः ॥
वेष्टयेत् शुक्लवासोभिरिक्षुदण्डफलादिकैः ।
धान्यपर्व्वतवत् सर्व्वं विधानमिह पठ्यते ॥
अधिवासनपूर्व्वन्तु तद्वद्धोमसुरार्च्चनम् ।
प्रभातायान्तु शर्व्वर्य्यां गुरवे च निवेदयेत् ॥
विष्कम्भपर्व्वतांस्तद्वदृत्विग्भ्यः शान्तमानसः ।
संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसोः ॥
तस्माद्घृतार्च्चिर्व्विश्वात्मा प्रीयतामत्र शङ्करः ।
यस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम् ॥
घृतपर्व्वतरूपेण तस्मात्त्वं पाहि भूधर ! ।
अनेन विधिना दद्याद्घृताचलमनुत्तमम् ॥
महापातकयुक्तोऽपि लोकमायाति शाङ्करम् ।
हंससारसयुक्तेन किङ्किणीजालमालिना ॥
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः ।
विहरेत् पितृभिः सार्द्धं यावदाभूतसंप्लवम् ॥ ७ ॥
अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चशतिकस्त्रिशतेरवरः स्मृतः ।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्व्वेण वज्रगोमेदैर्द्दक्षिणेनेन्द्रनीलकैः ।
पुष्परागयुतैः कार्य्यो विद्वद्भिर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विपुलोऽचलः ।
पद्मरागैः ससौवर्णैरुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तद्वदावाहनं कृत्वा वृक्षान् देवांश्च काञ्चनान् ॥
पूजयेद् पुष्पपानीयैः प्रभाते चाथ पूर्व्ववत् ।
पूर्व्ववद्गुरु-ऋत्विग्भ्यः फलमन्त्रानुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः ।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल ! ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरेः ।
सदानन्दप्रदानेन तस्मान्नः पाहि पर्व्वत ! ॥
अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत् कल्पशतं साग्रं वसच्चेह नराधिप ! ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्वज्रहतो यथा ॥ ८ ॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम ! ॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः ।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः ॥
अशक्तो विंशतेरूर्द्ध्वं कारयेत् शक्तितः सदा ।
विष्कम्भपर्व्वतांस्तद्वत्तुरीयांशेन कल्पयेत् ॥
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानतः ।
कलधौतमयांस्तत्र लोकेशान् रचयेद्बुधः ॥
ब्रह्मविष्ण्वर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मयः ।
राजतं स्याद्यदन्येषां सर्व्वन्तदिह काञ्चनम् ॥
शेषञ्च पूर्व्ववत् कुर्य्याद्धोमजागरणादिकम् ।
प्रदद्यात्तं प्रभाते तु गुरवे रौप्यपर्व्वतम् ॥
विष्कम्भशैलानृत्विग्भ्यः पूज्यवस्त्रविभूषणैः ।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्व्विमत्सरः ॥
पितॄणां वल्लभं यस्माद्विष्णोर्व्वा शङ्करस्य च ।
रजतं पाहि तस्मान्नः शोकसंसारसागरात् ।
इत्थं निवेश्य यो दद्याद्रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥
सोमलोके स गन्धर्व्वैः किन्नराप्सरसाङ्गणैः ।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम् ॥ ९ ॥
अथातः संप्रवक्ष्यामि शर्कराशैलमुत्तमम् ।
यस्य प्रदानाद्विष्ण्वर्करुद्रास्तुष्यन्ति सर्व्वदा ॥
अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः ।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः ॥
सार्द्धभारेण शैलन्तु यः कुर्य्यात् स्वल्पवित्तवान् ।
विष्कम्भपर्व्वतान् कुर्य्यात्तुरीयांशेन मानवः ॥
धान्यपर्व्वतवत् सर्व्वमासाद्य मेरुसंयुतम् ।
मेरोरुपरि तद्वच्च स्थाप्यं हेमतरुत्रयम् ॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः ।
एतद्वृक्षत्रयं मूर्द्ध्नि सर्व्वेष्वपि निवेशयेत् ॥
हरिचन्दनसन्तानौ पूर्व्वपश्चिमभागयोः ।
निवेश्यौ सर्व्वशैलेषु विशेषाच्छर्कराचले ॥
मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत् ।
गन्धमादनशृङ्गेषु धनदः स्यादुदङ्मुखः ॥
प्राङ्मुखो वेदमूर्त्तिश्च हंसः स्याद्विपुलाचले ।
हैमी सुपार्श्वसुरभी दक्षिणाभिमुखी भवेत् ॥
धान्यपर्व्वतवत् सर्व्वमावाहनमखादिकम् ।
कृत्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ।
ऋत्विग्भ्यश्च नरः शैलानिमान्मन्त्रानुदीरयेत् ॥
सौभाग्यामृतसारोऽयं परमः शर्करायुतः ।
तत् सदानन्दकारी त्वं भव शैलेन्द्र ! सर्व्वदा ॥
अमृतं पिबतां ये तु निपेतुर्भुवि शीकराः ।
देवानान्तत्समुत्थोऽयं पाहि नः शर्कराचल ! ॥
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ।
तन्मयोऽसि महाशैल ! पाहि संसारसागरात् ॥
यो दद्यात् शर्कराशैलमनेन विधिना नरः ।
सर्व्वपापविनिर्म्मुक्तः प्रयाति शिवमन्दिरम् ॥
चन्द्रादित्यप्रतीकाशमधिरुह्यानुजीविभिः ।
सहैव यानमातिष्ठेत् स तु विष्णुप्रचोदितः ॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसम्पन्नो यावज्जन्मार्ब्बुदत्रयम् ॥
भोजनं शक्तितः कुर्य्यात् सर्व्वशैलेष्वमत्सरः ।
सर्व्वत्राक्षारलवणमश्नीयात्तदनुज्ञया ।
पर्व्वतोपस्करान् सर्व्वान् प्रापयेत् ब्राह्मणा-
लयम् ॥ १० ॥

इति मात्स्ये ७७ अध्यायः ॥

देवर्षिविशेषः । यथा,—
"कश्यपान्नारदश्चैव पर्व्वतोऽरुन्धती तथा ॥"
इत्यग्निपुराणम् ॥
(यथाच, महाभारते । ३ । ६३ । २५ ।
"लोमशस्योपसंगृह्य पादौ द्वैपायनस्य च ।
नारदस्य च राजेन्द्र ! देवर्षेः पर्व्वतस्य च ॥")
मत्स्यविशेषः । पाव्दा इति भाषा । अस्य गुणाः । वायुनाशित्वम् । स्निग्धत्वम् । बलशुक्रकारित्वञ्च । इति राजवल्लभः ॥ वृक्षः । शाकभेदः । इति मेदिनी । ते, १२६ ॥ (सन्न्यासिविशेषः । स तु शङ्कराचार्य्यशिष्यस्य मण्डनमिश्रस्य

शिरश्विशेषः। यथा, प्राचतोषिण्यां अवधूतप्रकरणे।

"वसन् पर्व्वतमूलेषु प्रौढ़ो यो ध्यानधारणात्।
सारात्सारं विजानाति पर्व्वतः परिकीर्त्तितः॥")

पर्व्वतकाकः, पुं, (पर्व्वते जातः काकः। प्रायशः पर्व्वतजातत्वात्तथात्वम्।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३। ८८॥

पर्व्वतजा, स्त्री, (पर्व्वताज्जायते या। पर्व्वत+जन्+"पञ्चम्यामजातौ।" ३। २। ६८। इति डः।) नदी। इति हेमचन्द्रः। ४। १४६॥ (हिमगिरिजातत्वात् गौरी।) गिरिभववस्तुनि त्रि॥

पर्व्वततृणं, क्ली, (पर्व्वतभवं तृणम्। शाकपार्थिववत् समासः।) तृणभेदः। सव इति हिन्दी भाषा। तत्पर्य्यायः। तृणाढ्यम् २ पत्राढ्यम् ३ पशुप्रियम् ४। अस्य गुणाः। बलपुष्टिकरत्वम्। पशूनां सर्व्वदा प्रियत्वञ्च। इति राजनिर्घण्टः॥

पर्व्वतमोचा, स्त्री, (पर्व्वतोद्भवा मोचा कदली-अर्थः।) गिरिकदली। इति राजनिर्घण्टः॥

पर्व्वतराजः, पुं, (पर्व्वतानां राजा। "राजाहः-सखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) हिमालयगिरिः। अस्य प्रमाणं वक्ष्यमाणग्रन्थे द्रष्टव्यम्॥

पर्व्वतराजपुत्त्री, स्त्री, (पर्व्वतराजस्य हिमालयस्य पुत्त्री।) दुर्गा। यथा, तिथ्यादितत्त्वधृतवचनम्।

"शुक्लपक्षात् पञ्चयुते दशाहे
मूलर्क्षयुक्ता सितसप्तमी या।
आरभ्य तस्यां दशमीञ्च यावत्
प्रपूजयेत् पर्व्वतराजपुत्त्रीम्॥"

इति तिथ्यादितत्त्वम्॥

पर्व्वतवासिनी, स्त्री, (पर्व्वते वसतीति। पर्व्वत+वस+णिनि+ङीप्।) आकाशमांसी। इति राजनिर्घण्टः॥ गायत्त्री। यथा,—

"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!।
ब्रह्मयोनिसमुत्पन्ने। गच्छ देवि। यथासुखम्॥"

इति यजुर्व्वेदीयगायत्त्रीविसर्ज्जनमन्त्रः।

काली। यथा, श्यामापूजायां विसर्ज्जनमन्त्रः॥

"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!।
ब्रह्मयोनिसमुत्पन्ने गच्छ देवि। ममान्तरम्॥"

पर्व्वताधारा, स्त्री, (पर्व्वतः आधारो यस्याः। अष्टकुलाचलैः पृथिवी ध्रियते इति पुराणप्रसिद्धेस्तथात्वम्।) पृथिवी। इति हेमचन्द्रः। ४। ३॥

पर्व्वतारिः, पुं, (पर्व्वतानामरिः शत्रुः। पर्व्वतपक्षच्छेदनादस्य तथात्वम्।) इन्द्रः। इति शब्दरत्नावली॥

पर्व्वताशयः, पुं, (पर्व्वते आशेते इति। आ+शीङ् शयने+अच्।) मेघः। इति शब्दचन्द्रिका॥

पर्व्वताश्रयः, पुं, (पर्व्वत आश्रयो वासस्थानं यस्य।) शरभः। इति राजनिर्घण्टः॥ पर्व्वतवासिनि त्रि॥

पर्व्वतीयः, त्रि, (पर्व्वते भवः। पर्व्वत+"विभाषा मनुष्ये।" ४। २। १४४। इति छः।) पर्व्वतसम्बन्धी। पर्व्वतभवः। पाहाड़िया इति भाषा। पर्व्वतशब्दात् भवार्थे ईयप्रत्ययनियमः। (मनुष्ये तु पार्व्वतीयः। इति सिद्धान्तकौमुदी॥ यथा, रघुः। ४। ७१।

"तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गणैरभूत्।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम्॥")

पर्व्वतोर्म्मिः, पुं, मत्स्यविशेषः। इति कश्चिन् भूरिप्रयोगे प्रमादलिखनं, पर्व्वतोवर्म्मिरिति मत्स्यद्वयबोधकपाठः साधुः॥

पर्व्वधिः, पुं, (पर्व्वणि अमावस्यापूर्णिमयोः ह्रासवृद्धिं दधातीति। पर्व्व+धा+किः।) चन्द्रः। इति त्रिकाण्डशेषः॥

पर्व्वपुष्पी, स्त्री, (पर्व्वसु ग्रन्थिषु पुष्पं यस्याः। स्त्रियां ङीष्।) रामदूतीवृक्षः। नागदन्ती। इति शब्दचन्द्रिका रत्नमाला च॥

पर्व्वपूर्णता, स्त्री, (पर्व्वणः पूर्णता।) सम्भारः। आयोजनम्। इति भूरिप्रयोगः॥ पर्व्वणः पूर्णत्वञ्च॥

पर्व्वमूला, स्त्री, (पर्व्वणि पर्व्वणि मूलं यस्याः। यद्वा, पर्व्व ग्रन्थिरेव मूलं यस्याः।) श्वेता। इति राजनिर्घण्टः॥

पर्व्वयोनिः, पुं, (पर्व्व ग्रन्थिरेव योनिस्तदुत्पत्तिकारणं यस्य।) इक्ष्वादि। इति हेमचन्द्रः। ४। २६६॥

पर्व्वरीणं, क्ली, पर्व्व। इति शब्दरत्नावली॥

पर्व्वरीणः, पुं, पर्णशुष्करसः। गर्व्वः। मारुतः। पर्णशिरा। द्यूतकम्। द्यूतकम्बलः। पत्रचूर्णरसः। इति शब्दरत्नावली॥ पर्णरीण इति मेदिन्यां पाठः॥

पर्व्वरुट् [ह्], पुं, (पर्व्वसु ग्रन्थिषु रोहतीति। रुह+क्विप्।) दाड़िमः। इति त्रिकाण्डशेषः॥

पर्व्ववल्ली, स्त्री, (पर्व्वप्रधाना ग्रन्थिबहुला वल्ली लता।) मालादूर्व्वा। इति राजनिर्घण्टः॥

पर्व्वसन्धिः, पुं, (पर्व्वणोः सन्धिः) प्रतिपत्पञ्चदश्योरन्तरम्। इत्यमरः। १। ४। ७॥ "प्रतिपत्पञ्चदश्योर्य्यन्मध्यं स पर्व्वसन्धिः। किंवा स सन्धिः पर्व्वैकदेशः। पञ्चदशानां पूरणी पञ्चदशी संख्याया डट्। डिति टः टिड्ढाणञिति ङीप्। पञ्चदशीशब्देन पूर्णिमामावास्ययोर्द्वयोर्ग्रहणम्। अतएव पौर्णमास्या अमावास्या वा शेषसार्द्धदण्डचतुष्टयं प्रतिपदश्च प्रथमसार्द्धदण्डचतुष्टयं पर्व्वसन्धिरिति वृद्धाः। सैंहिकेयो यदा राहुर्ग्रसते पर्व्वसन्धिषु इति यमः॥ पर्व्वणोः सन्धिः पर्व्वसन्धिः पृधातोर्व्वनिपि पर्व्वपूरणे इत्यस्य नाम्नीत्यनि वा पर्व्व। प्रतिपत्पञ्चदश्योस्तु सन्धिः पर्व्वाथ दिक् ककुबिति स्वामी॥ दर्शप्रतिपदोः सन्धौ ग्रन्थिप्रक्रान्तयोरपि। पर्व्वशब्दो हि विषुवत्प्रभृतिष्वपि दृश्यते॥ इति रत्नः।" इति भरतः॥

पर्व्वितः, पुं, (पर्व्व ग्रन्थिर्जातमस्य। पर्व्व+इतच्।) पर्व्वतमत्स्यः। इति शब्दरत्नावली॥

पर्शुः, पुं, (परं शत्रुं शृणातीति। शृ हिंसे+"आङ्परयोः खनिशृभ्यां डिच्च।" उणां। १। ३४। इति कुः स च डित्। पृषोदरादित्वात् ढलोपः। यद्वा, स्पृशतीति शब्दूनिति। स्पृश संस्पर्शे+"स्पृशेः श्वण् शुनौ पृ च।" उणां ५। २७। इति शुन् धातोश्च पृ-आदेशः।) परशुः। इति हेमचन्द्रः। ३। ४५०॥ (यथा, रामायणे। ३। २८। २४।

"भिन्दिपालान् सुतीक्ष्णांश्च प्रासांश्च महोपलान्।
प्रासान् पाशांस्तथा पर्शून् कुन्तांश्च कुणपांस्तथा॥")

पर्शुका, स्त्री, (पर्शुरिव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्। स्त्रियां टाप्।) पार्श्वास्थि। इत्यमरः। २। ६। ६९॥

पर्शुपाणिः, पुं, (पर्शुः परशुः पाणौ यस्य।) गणेशः। इति हेमचन्द्रः। २। १२१॥ (परशुरामः। इति व्युत्पत्तिलब्धोऽर्थः॥)

पर्शुरामः, पुं, (पर्शुधारी रामः। शाकपार्थिवादिवत् समासः। परशुना सह जातत्वादस्य तथात्वम्। यदुक्तं कालिकापुराणे ७८ अध्याये।

"भारावतरणार्थाय जातः परशुना सह।
सहजः परशुस्तस्य न जहाति कदाचन॥")

परशुरामः। इति शब्दरत्नावली॥

पर्श्वधः, पुं, (परश्वं दधातीति। परश्व+धा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। पृषोदरात् साधुः।) कुठारः। इति जटाधरः॥

पर्ष, ङ स्नेहे। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-अकं-सेट्।) रेफोपधः। स्नेह इह आर्द्रीभावः। ङ, पर्षते पयसा पटः। अर्षे इति चतुर्भुजः। अर्षते पयसि। इति दुर्गादासः॥

पर्षत्, [द्] स्त्री, (परिषीदन्त्यस्याम्। परि+सद्+"सत्सूद्विषेति।" ३। २। ६१। इति क्विप्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्। बाहुलकात् इकारलोपः। यद्वा "शॄदृभसोऽदिः।" उणां १। १२९। इति बहुलवचनात् पर्ष स्नेहने इत्यस्मादपि अदिः।) सभा इत्युणादिकोषः॥ (यथा, याज्ञवल्क्ये। १। ९।

"चत्वारो वेदधर्म्मज्ञाः पर्षत्त्रैविद्यमेव वा।
सा ब्रूते यं स धर्म्मः स्यादेको वाध्यात्मवित्तमः॥")

पर्षद्वलः, त्रि, (पर्षत् सभा विद्यते यस्य। पर्षत्+"रजःकृषीति।" ५। २। ११२। इति वलच्।) पारिषदः। इति शब्दरत्नावली॥ (यथा, भट्टिः। ४। १२।

"शालीनवाग्लदीप्ताक्षः सुलक्षः परिपूजयन्।
पर्षद्वलान् महाब्रह्मैराट नैकटिकाश्रमान्॥")

पल, क रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पालयति। वृक्षवत् वेदसिद्धेऽ दीर्घोऽपि पाठः। कातुवत्धागा मिदनुबन्धवत् भेरनियतां बोधयति। तेन पालति पलति इत्यपि सिद्धम्। इति दुर्गादासः॥

पल, ज गतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) ज, पालः पलः। इति दुर्गादासः।

पलं, क्ली, (पलतीति। पल+अच्।) आमिषम्। कर्षचतुष्टयम्। इत्यमरः ।३।३।२०१॥२।९।८६॥ तत्तु शास्त्रे तोलकचतुष्टयम्। वैद्यके अष्ट-तोलकम्। लौकिके षाडरक्तिद्विमाषकतोलक-त्रितयम्। तत्पर्य्यायः। मुष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ विल्वम् ५ षोड़शिकाम्रम् ६। इति वैद्यकपरिभाषा॥ यथा, तिथ्यादितत्त्वे।

"पलन्तु लौकिकैर्मानैः षाडरक्तिद्विमाषकम्
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम्॥"

विघटिका। इति राजनिर्घण्टः॥ सा तु घटिकाषष्टिभागैकभागः। षष्टिविपलञ्च। पल-द्वयोः प्रमाणन्तु।

"दशगुर्व्वक्षरोच्चारकालः प्राणः षडात्मकैः।
तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते॥"

तेन च।

"मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे स्वाप्सीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
क्षुत्क्षामः प्राटं चेतश्चेतो राहुः क्रूरः प्राद्या-
त्तस्माद्धान्ते हर्म्म्यस्यान्ते शय्याकान्ते कर्त्तव्या
अश्लोकपाठात् पलं षष्टिपाठाद्दण्डः। इति ज्योतिस्तत्त्वम्॥

पलः, पुं, (पलतीति। पल्+अच्।) पलालः। इति हेमचन्द्रः। ४। २४८॥ (यथा, महा-भारते। ३। २३३। ११।

"पक्वाच्च शौकाच्च महाशनाश्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्ज्याः॥")

पलक्या, स्त्री, (पलकं मांसं तद्वृद्धये हितम्। पलक+यत्। स्त्रियां टाप्।) पालङ्कशाकः। इति राजनिर्घण्टः॥

पलगण्डः, पुं, (पलं मांसं मृत्तत् गण्डति भित्तौ मृदादिना लिम्पतीति। गण्ड+अच्।) लेपकः। इत्यमरः। २। १०। ६॥ राज इति भाषा॥

पलङ्कटः, त्रि, (पलं मांसं कटति आकुञ्चितं करोतीति। पल+कट+बाहुलकात् खच् मुम् च।) भयशीलः। भीरुः। इति त्रिकाण्डशेषः॥

पलङ्करः, पुं, (पलं मांसं करोतीति। पल+कृ +अच्। "तत्पुरुषे कृतीति।" ६।३।१४। इति द्वितीयाया: अलुक्।) पित्तम्। इति त्रिकाण्ड-शेषः॥

पलङ्कषः, पुं, (पलं कषतीति। कष हिंसायाम्+ अच्। "तत्पुरुषे कृतीति।" ६। ३। १४। इति द्वितीयाया अलुक्।) राक्षसः। इति मेदिनी। षे, ५३॥ कणगुग्गुलुः। इति राजनिर्घण्टः॥

पलङ्कषा, स्त्री, (पलङ्कष्+टाप्।) गोक्षुरकः। रास्ना। गुग्गुलुः। किंशुकः। मुण्डीरी। लाक्षा। इति मेदिनी॥ क्षुद्रगोक्षुरकः। महा-श्रावणी। (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।

"अजाजोचर्म्मरोमाणि वचाकुष्ठं पलङ्कषा॥")

मक्षिका। इति राजनिर्घण्टः॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य।) द्रोण-काकः। इति राजनिर्घण्टः॥ मांसाशिनि, त्रि॥

पलभा, स्त्री, (पलस्य भा छविर्यत्र।) मेषसंक्रमणा-दर्व्वाक् सपादाष्टदिने मध्याह्ने द्वादशाङ्गुल-शङ्कुना छाया। तत्पर्य्यायः। पलविभा २ विषुवत्प्रभा ३। यथा, ग्रहलाघवे।

"मेषादिगे सायनभागसूर्य्ये
दिनार्द्धजा भा पलभा भवेत् सा॥"

पलभयोद्भूतचरखण्डकैः क्रमोत्क्रमस्थैर्हीनान्वितै र्लङ्कोदयैः स्वदेशीयोदया भवन्ति। अन्यत्स्पष्टा-धिकारेऽपि चरसंस्कृता ग्रहाः स्पष्टा भवन्तीति प्रयोजनम्॥ यथा, सिद्धान्तशिरोमणौ

"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनलवोत्थदिनैर्-
वह्निनम्
मकरकर्कटसंक्रमतोऽयनं द्युदलभा विषुवद्दिवसे-
ऽक्षभा॥"
"एवं विषुवती छाया स्वदेशे या दिनार्द्धजा।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥"

इति सूर्य्यसिद्धान्तः॥

"अजतुलादिगतस्य रवेर्द्दिने
द्युदलभार्कमिताङ्गुलशङ्कुना।
पलविभाय— ॥"

इति वृहद्वशिष्ठसिद्धान्तः॥

पललं, क्ली, (पलति पल्यतेऽनेन वा। पल गतौ +"वृषादिभ्यश्चित्।" उणां १। १०८। इति कलच्।) मांसम्। इत्यमरः ।२।६।६३॥ (यथा, गारुड़े। १८१ अध्याये।

"मार्ज्जारपललं विष्ठा हरितालञ्च भावितम्।
छागमूत्रेण संपिष्टो मूषिको मूषिकान् हरेत्॥")

पङ्कम्। (यथा, गोः रामायणे ।५।८७।२६।

"शोषपङ्कनिमग्नं त्वामयशःपललाप्लुतम्।
सर्व्वथा मानुषो रामस्त्वामन्तमुपनेष्यति॥")

तिलचूर्णम्। इति मेदिनी। ले, १०४।

"पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिष्टकः।
पललं मधुरं वृष्यं पित्तास्रबलपुष्टिदम्॥"

इति राजनिर्घण्टः॥

सैन्धवतिलचूर्णम्। तिलकुटा इति भाषा। यथा, वैद्यके।

"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम्।
पललं मलकृद्वृष्यं वातघ्नं कफपित्तकृत्॥
वृंहणं गुरु वृष्यञ्च स्निग्धं मूत्रनिवर्त्तकम्॥"

पललः, पुं, (पलतीति। पल गतौ+"वृषादिभ्य-श्चित्।" उणां। १। १०८। इति कलच्। यद्वा, पलं मांसं लातीति। ला+कः।) राक्षसः। इति मेदिनी। ले, १०४॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव।) पित्तम्। इति हारावली। १४१॥

पललाशयः, पुं, (पलले आशेते इति। आ+ शीङ् शयने+अच्।) गण्डरोगः। इति शब्द-रत्नावली।

पलवः, पुं, (पलं पलायनं वाति हिनस्ति नाशय-तीति। पल+वा ल गमनहिंसयोः+"आतो-ऽनुपसर्गे कः।" ३।२।३। इति कः।) मत्स्य-धारणोपायः। पोलो इति भाषा। तत्पर्य्यायः। प्लवः २ मत्स्यराखेटः ३। इति त्रिकाण्डशेषः॥

पलाग्निः, पुं, (पलस्य मांसस्य अग्निः। मांस-पाकशक्तिवत्तयास्य तथात्वम्।) पित्तम्। इति हारावली। १४१॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य।) शिशुमारः। इति हारावली। ७७॥

पलाण्डुः, पुं, (पलस्य मांसस्य अण्डमिवाचर-तीति। "मृगय्वादयश्च।" उणां १।३८। इति कुप्रत्ययात् साधुः।) मूलविशेषः। पेयाज् इति भाषा। तत्पर्य्यायः। सुकन्दकः २। इत्य-मरः ।२।४।१४७॥ लोहितकन्दः ३। इति रत्नमाला॥ तीक्ष्णकन्दः ४ उष्णः ५ मुख-दूषणः ६ शूद्रप्रियः ७ कृमिघ्नः ८ दीपनः ९ मुखगन्धकः १० बहुपत्रः ११ विश्वगन्धः १२ रोचनः १३ पलाण्डुः १४ सुकुन्दकः १५। इति शब्दरत्नावली॥ अस्य गुणाः। कटुत्वम्। बल्यत्वम्। कफपित्तवान्तिदोषनाशित्वम्। गुरुत्वम्। वृष्यत्वम्। रोचनत्वम्। स्निग्धत्वञ्च। इति राजनिर्घण्टः॥ यथा, भावप्रकाशे।

"पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः।
पलाण्डुस्तु गुणैर्ज्ञेयो रसोनसदृशो गुणैः॥
स्वादुपाकरसोऽनुष्णः कफकृन्नातिपित्तलः।
हरते केवलं वातं बलवीर्य्यकरो गुरुः॥"

पलाण्डुभक्षणे दोषो यथा,—

"पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम्।
लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेके याज्ञवल्क्यः॥

पलादः, पुं स्त्री, (पलं मांसमत्तीति। अद भक्षणे+"कर्म्मण्यण्।" ३। २। १ इत्यण्।) राक्षसः। इति जटाधरः॥ (मांसभक्षके, त्रि॥)

पलादनः, पुं स्त्री, (पलं मांसमत्तीति। पल+ अद+ल्युः।) राक्षसः। इति हेमचन्द्रः॥ मांस-भक्षणशीले, त्रि॥

पलान्नं, क्ली, (पलं मांसं तेन सह पक्वं अन्नम्। शाकपार्थिवादिवत् समासः।) मांसादि-युक्तसिद्धभक्तम्। पोलाओ इति भाषा। तस्य पाकप्रकारो द्रव्याणि च यथा। छागमांसं १ शरावः। घृतं ।० शरावपादः। त्वचं ३ माषकम्। लवङ्गं ३ माषकम्। एला ३ माषकम्। तण्डुलं १ शरावः। मरिचं २ तोलकम्। तेजपत्रं २ तोलकम्। कुङ्कुमं १ माषकम्। आर्द्रकं २ तोलकम्। लवणं ६ तोलकम्। धन्याकं २ तोलकम्। द्राक्षा ।० शरावपादार्द्धम्। छागमांसं सूक्ष्मं चोरयित्वा शुष्कप्रलेहपाककरणानन्तरं पात्रान्तरे तेज-पत्रोपरि अर्द्धाखण्डगन्धद्रव्येण सह प्रथमं सज्जीकर्त्तव्यम्। ततस्तण्डुलं जलेनार्द्धसिद्धं कृत्वा मण्डगालनपूर्व्वकमर्द्धाखण्डगन्धद्रव्येण सह तन्मांसोपरि सज्जीकर्त्तव्यम्। एवं प्रकारेण वारं वारं सज्जीकृत्य तदुपरि अवशिष्टघृत-

दीपयोग दग्धद्वयं तमाङ्गारोपरि रचेत्। इति पाकराजेश्वरः॥ * ॥ अथ मांसस्थाने मत्स्यादिकं गन्धद्रव्यं च दधियोगः एतत्परिमाणस्याधिकञ्च नैवितुमर्हतीति॥

पलापः, पुं, (पलं मांसं आप्यते प्राप्यते बाहुल्येन अत्र। पल+आप्+घञ्।) कण्ठपाशकः। हस्तिकपोलः। इति शब्दमाला॥

पलायनं, क्ली, (पलाय्यते इति। पलाय+भावे ल्युट्।) भयादिना स्थानान्तरगमनम्। पालान इति पीठ देशेण इति च भाषा॥ (यथा, रघुः।१६।३१।

"मित्र लक्ष्यमपदिश्य पार्श्वतः
प्रस्थितं समनवस्थितं प्रियाः।
विद्य हे शठ! पलायनच्छला-
न्यञ्जसेति रुरुधुः कचग्रहैः॥")

तत्पर्य्यायः। अपयानम् २ संद्रावः ३ द्रवः ४ विद्रवः ५ उपक्रमः ६ संद्रावः ७ उद्द्रावः ८ प्रद्रावः ९। इति हेमचन्द्रः।३।४६६॥ निद्रावः १० उद्भवः ११ सम्भ्रमः १२ द्रावः १३ द्रुतालिका १४ अपक्रमः १५ चंक्रमः १६। इति शब्दरत्नावली॥

पलायितः, त्रि, (पलाय+क्तः।) पलायनविशिष्टः। तत्पर्य्यायः। नष्टः २ गृहीतदिक् ३ तिरोहितः ४। इति हेमचन्द्रः॥

पलालः, पुं क्ली, (पलति शस्यशून्यत्वं प्राप्नोतीति। पल+"तमिविशिविडीति।" उणां १।११७। इति कालन्। यद्वा, पलं अलतीति। अल+"कर्म्मण्यण्।" ३।२।१। इति अण्।) निष्फलकाण्डः। शस्यशून्यधान्यनालः। इत्यमरः।२।९।२२॥ पोयाल इति भाषा॥ (यथा, मनुः।५।१२२।

"प्रोक्षणात् तृणकाष्ठञ्च पलालञ्चैव शुध्यति॥")

स्त्री, स्कन्दस्य मातृविशेषः। यथा, महाभारते।३।१२७।१०।

"काकी च हलिमा चैव मालिनी बृंहिला तथा।
आर्य्या पलाला वैमित्रा सप्तैताः शिशुमातरः॥")

पलालदोहदः, पुं, (पलालं दोहदं यस्य।) आम्रवृक्षः। इति शब्दमाला॥

पलाशं, क्ली, (पलं गतिं कम्पनमित्यर्थः। अश्नुते व्याप्नोतीति। पल+अश+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) पत्रम्। इत्यमरः।२।४।१४॥ (यथा, महाभारते।३।३५।२५।

"हरन्तकाल इवानूपे शाखापुष्पपलाशवान्॥"

पलाशस्य पलाशवृक्षस्य इदम्। पलाशपुष्पादि। यथा कुमारे।३।२९।

"बालेन्दुवक्राण्यविकाशभावात्
बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्॥")

पलाशः, पुं, (पलाशानि पर्णानि सन्त्यस्य। "अर्श आदिभ्योऽच्।"५।२।१२७। इत्यच्।) स्वनामख्यातवृक्षः। स तु ब्रह्मणः स्वरूपः। यथा,—

सूत उवाच।

"अश्वत्थरूपी भगवान् विष्णुरेव न संशयः।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक्॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम्॥

ऋषय ऊचुः।

कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ! संशयोऽत्र महान् हि नः॥

सूत उवाच।

पार्व्वतीशिवयोर्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशकम्पमाना तदा रुषा॥

पार्व्वत्युवाच।

क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम्।
तस्मात्तत्सुखभ्रंशाद्यूयं वृक्षत्वमाप्स्यथ॥

सूत उवाच।

एवं सा पार्व्वती देवी अशपत् कुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः॥

तत्पर्य्यायः। किंशुकः २ पर्णः ३ वातपोथः ४। इत्यमरः।२।४।२९॥ याज्ञिकः ५ त्रिपर्णः ६ वक्रपुष्पः ७ पूतद्रुः ८ ब्रह्मवृक्षकः ९ ब्रह्मोपनेता १० काष्ठद्रुः ११। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। क्रिमिदोषविनाशित्वञ्च॥ तद्बीजगुणाः। पामकण्डूतिदद्रुत्वग्दोषनाशित्वम्॥ तत्पुष्पगुणाः। उष्णत्वम्। कफकुष्ठनाशित्वञ्च॥ तत्पुष्पं चतुर्विधं यथा, राजनिर्घण्टे।

"रक्तः पीतः सितो नीलः कुसुमैस्तु विभाव्यते।
किंशुकैर्गुणसाम्योऽपि सितो विद्यावदः स्मृतः॥"

"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित्।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित्॥
भग्नसन्धानकृद्दोषग्रहण्यर्शःक्रिमीन् हरेत्।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम्॥
वातलं कफपित्तास्रकृच्छ्रजिद्ग्राहि शीतलम्।
तृड्दाहशमनं वातरक्तकुष्ठहरं परम्॥
फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम्।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत्॥"

इति भावप्रकाशः॥

पलाशभेदा। यथा,—

"तद्भेदे स्यात् किंशुलुकः किंशलो हस्तिकर्णकः॥"

इति शब्दरत्नावली॥

(पलाशस्य फलपुष्पादौ क्ली॥) शटी। (पलं मांसं अश्नातीति। पल+अश्+अण्। यद्वा, पले मांसे आशा यस्य।) राक्षसः। इति मेदिनी। शे, २४॥ हरितः। मगधदेशः। इति शब्दरत्नावली॥

पलाशः, त्रि, (पलवद्धरिद्वर्णेन अश्नुते व्याप्यते इति। अश+घञ्।) हरिद्वर्णविशिष्टः। इति मेदिनी। शे, २४॥ निर्दयः। इति धरणिः॥

पलाशकः, पुं, (पलाश+संज्ञायां कन्।) शटी। इति जटाधरः॥ पलाशवृक्षः। इति शब्दरत्नावली॥

पलाशपर्णी, स्त्री, (पलाशस्य पर्णमिव पर्णमस्याः। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राजनिर्घण्टः॥

पलाशाख्यः, पुं, (पलाशस्य आख्या आख्या यस्य। यद्वा, पलाशं पलाशगन्धमाख्यातीति। आ+ख्या+क।) नाडीहिङ्गु। इति राजनिर्घण्टः॥

पलाशाम्ला, स्त्री, (पलाशं अम्लं यस्याः। यद्वा, पलाशानां पत्राणां अम्लो गन्धवान् यस्याः।) गन्धपत्रा। इति राजनिर्घण्टः॥

पलाशी, [न्] पुं, (पलाशं विद्यतेऽस्य। पलाश+इनिः।) वृक्षः। इत्यमरः।२।४।५॥ (पलं मांसं अश्नातीति। अश+णिनिः।) राक्षसः। इति मेदिनी। ने, १६३॥ क्षीरिवृक्षः। इति रत्नमाला॥ (पत्रविशिष्टे वाच्यलिङ्गः। यथा,—

"ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत्॥
अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम्।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः॥"

इति महाभारते।१।४३।९—१०॥

स्त्री, नदीविशेषः। इयन्तु शुक्तिमत्पर्व्वतसम्भूता। यथा, मार्कण्डेये।५७।३०।

"कृपा पलाशिनी चैव शुक्तिमत्प्रभवा स्मृता॥")

पलाशी, स्त्री, (पलाश+गौरादित्वात् ङीष्।) लाक्षा। लताविशेषः। तत्पर्य्यायः। पत्रवल्ली २ पर्णवल्ली ३ पलाशिका ४ सुपर्णी ५ सुपर्णी ६ दीर्घवल्ली ७ विषादनी ८ अम्लपत्री ९ दीर्घपत्री १० रसाढ्या ११ अम्लिका १२ अम्लातकी १३ काञ्जिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। मुखदोषारोचकनाशित्वम्। पथ्यत्वम्। पित्तकोपकारित्वञ्च। इति राजनिर्घण्टः॥

पलिक्नी, स्त्री, (पलितमस्या अस्तीति। "अर्श आदिभ्योऽच्।" इत्यच्। "असितपलितयोर्न।" वार्त्ति। "छन्दसि क्नमेके।" इत्येकोक्तेर्भाषायामपि तस्य क्न इत्यादेशो भवति। ततो गान्तत्वात् ङीप्।) वृद्धा। इत्यमरः।२।६।१२॥ बालगर्भिणी गौः। इति हेमचन्द्रः॥

पलिघः, पुं, (परिहन्यतेऽनेनेति। परि+हन+"परौ घः।"८।२।२२। इति अप् घादेशश्च। ततः "परेश्च घाङ्कयोः।"८।२।२२। इति रस्य लः।) काचकलसः। घटः। प्राकारः। गोपुरम्। इति मेदिनी। घे, ६॥

पलितं, क्ली, (पलि+भावे क्तः। यद्वा, पलनमिति। पल+"पलेरितजादेश्च पः।" उणां। ५।३४। इति इतच् पस्य पलम्।) जरया केशादौ शौक्ल्यम्। केशपाकः। इत्यमरः।२।६।४१॥ (यथा, मनुः।६।२।

"गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥")

तस्य निदानं यथाह माधवकरः।
"क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः।
पित्तञ्च केशान् पचति पलितं तेन जायते॥"
तच्चिकित्सा यथा,—
"लौहचूर्णस्य कर्षन्तु दशाहं घृतमञ्जनः।
धात्रीफलद्वयं पथ्ये द्वे तथैकं विभीतकम्॥
पिष्ट्वा लोहमये भाण्डे स्थापयेन्निशि वासयेत्।
लेपोऽयमचिराद्धन्ति पलितं नेह संशयः॥
दशाहं पञ्चकर्षाणि।
काश्मर्य्या मूलमादौ सहचरकुसुमं केतकस्यापि
मूलं
लौहं चूर्णं सभृङ्गं त्रिफलपलयुतं तैलमेभिः
पचेद्युः।
कृत्वा लोहस्य भाण्डे क्षितितलनिहितं स्थापये-
न्मासमेकं
केशाः काशप्रकाशा अपि मधुपनिभा अस्य
योगाद्भवन्ति॥
त्रिफला नीलिकापत्रं भृङ्गराजोऽयसो रजः।
अवीमूत्रेण संपिष्टं लेपात् कृष्णीकरं परम्॥"
इति भावप्रकाशे मध्यखण्डे क्षुद्ररोगाधिकारे॥
शैलजम्। तापः। कर्द्दमः। इति मेदिनी। ते,
१२२॥ (पल गतौ+"लोष्टपलितौ।" उणां। ३।
९२। इति क्तप्रत्ययेन निपातनात् सिद्धम्।)
केशपाशः। इति हेमचन्द्रः उज्ज्वलदत्तश्च॥

पलितः, पु, (फलति वृद्धावस्थायां केशशौक्ला-
दिकं प्राप्नोतीति। फल+"फलेरितजादेश्च पः।"
उणां। ५। ३४। इति इतच् फस्य च पः।)
वृद्धः। इति जटाधरः॥

पलिता, स्त्री, (पलित+टाप्।) वृद्धा। इति
जटाधरः॥

पल्यङ्कः, पुं, (परितोऽङ्क्यतेऽत्र इति। परि+अकि
लक्षणे+घञ्। "परेश्च घाङ्कयोः।" ८।२।२२।
इति रस्य लः।) पर्य्यङ्कः। इत्यमरः। २। ७।
१३८॥ (यथा, रामायणे। २। ३२। ६।
"पल्यङ्कमग्र्यास्तरणं नानारत्नविभूषितम्।
तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि॥")

पल्ययनं, क्ली, (परितः अयति गच्छति अनेन।
परि+अय गतौ+करणे ल्युट्। रस्य लत्वम्।)
पर्य्याणम्। इति हेमचन्द्रः। ४।३१८॥ घोड़ार
जिन् इति भाषा॥

पल्युल, त् क लवनपूत्योः। इति कविकल्पद्रुमः।
(अदन्तचुरां-परं-सकं-सेट्।) यकारयुक्तैक-
लकारमध्यः ह्रस्वमध्यश्च। लूनिश्छेदः। पूतिः
पवित्रीकरणम्। अपपल्युलत् तृणं लोकः।
पल्युलयति जलं गङ्गा। इति दुर्गादासः॥

पल्यूल, त् क लवनपूत्योः। इति कविकल्पद्रुमः॥
(अदन्तचुरां-परं-सकं सेट्।) यकारयुक्तैक-
लकारमध्यः दीर्घमध्यश्च। लूनिश्छेदः। पूतिः
पवित्रीकरणम्। अपपल्यूलत् तृणं लोकः।
पल्यूलयति जलं गङ्गा। इति दुर्गादासः॥

पल्ल, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-
सेट्।) पल्लति। इति दुर्गादासः॥

पल्लः, पुं, (पल्लति शस्यादिप्राचुर्य्यं गच्छतीति।
पल्ल+पचाद्यच्।) स्थूलकुसूलकम्। इति
मेदिनी। ले, ३०॥ पालुइ इति मराट इति
च भाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने
१३ अध्याये।
"सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत्॥")

पल्लवः, पुं, क्ली, (पल्यते इति पल्। पल+क्विप्।
लूयते इति लवः। लू+"ऋदोरप्।" ३।३।५७।
इति अप्। ततः पल् चासौ लवश्चेति।)
नवपत्रादियुक्तशाखाग्रपर्व्व। इति भरतः॥ नव-
पत्रस्तवकः। "इति मधुः॥ पर्व्वपत्रादिसंघाते
शाखायाः पल्लवो मतः।" इति कोषान्तरम्॥
(यथा, रघुः। ९। ३३।
"अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा।
अमदयत् सहकारलता मनः
सकलिकाकलिकामजितामपि॥")
तत्पर्य्यायः। किसलयम् २। इत्यमरः। २।
४। १४॥ प्रवालम् ३ नवपत्रम् ४। इति राज-
निर्घण्टः॥ वलम् ५ किसलम् ६ किशलम् ७
किशलयम् ८ विटपः ९। इति शब्दरत्नावली॥
पत्रयौवनम् १०। इति जटाधरः॥ विस्तरः।
वलम्। शृङ्गार। अलक्तरागः। इति विश्व-
मेदिन्यौ॥ वलमित्यत्र वनमिति क्वचित् पाठः॥
वलयः। चापलः। इति शब्दरत्नावली॥ (देश-
विशेषः। तद्देशवासिषु पु भूम्नि। यथा, मार्क-
ण्डेये। ५७। ३६।
"अपरान्ताश्च शूद्राश्च पल्लवाश्चर्म्मखण्डिकाः।
गान्धारा गवलाश्चैव सिन्धुसौवीरमद्रकाः॥")

पल्लवकः, पु, (पल्लवेन शृङ्गारेण कायतीति।
पल्लव+कै+कः।) वेश्यापतिः। (पल्लव इव
कायतीति।) मत्स्यविशेषः। इति हलायुधः॥
(पल्लवः किसलयैः कायतीति। अशोकवृक्षः।
इति कश्चित्॥)

पल्लवद्रः, पुं, (पल्लवप्रधानो द्रुर्वृक्षः।) अशोक-
वृक्षः। इति राजनिर्घण्टः॥

पल्लवाधारः, पुं, (पल्लवस्य आधारः।) शाखा।
इति शब्दचन्द्रिका॥

पल्लविकः, त्रि, (पल्लवः शृङ्गाररसोऽस्यस्यास्मिन्
वा। पल्लव+ठन्।) कामुकः। इति हेमचन्द्रः।
२। २४५॥

पल्लवितं, क्ली, (पल्लवोऽलक्तरागः सञ्जातोऽस्य।
तारकादिभ्य इतच्।) लाक्षारक्तः। इति
मेदिनी। ते, २०४॥

पल्लवितः, त्रि, (पल्लवः सञ्जातोऽस्य। पल्लव+
इतच्।) सपल्लवः। पल्लवयुक्तः। ततम्। विस्तृ-
तम्। इति मेदिनी। ते, २०४॥

पल्लवी, [न्] पु, (पल्लवाः सन्त्यस्य। पल्लव+इनिः।)
वृक्षः। इति शब्दमाला॥ (पल्लवविशिष्टे, त्रि।
यथा, कुमारे। ३। ५४।
"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव॥")

पल्लिः, स्त्री, (पल्लतीति। पल्ल+"सर्व्वधातुभ्य
इन्।" इति इन्।) ग्रामकः। कुटी। इति
हेमचन्द्रः॥ कुटीसमुदायः। ग्रामः। इत्यन्ये॥
गृहमिति भट्टः॥ कुटीग्रामकयोः पल्लीति
शाश्वतः॥ स्थानमिति स्वामी॥ पतन्ति भरणेन
भ्रमणेन च जीवन्तीति क्विपि पतो गावः ते
लीयन्तेऽत्र पल्लिः नाम्नीति ङिः पाणिन्यादीति
ङीपि पल्ली च गोपपल्लीप्रभृति च। इत्याभीर-
पल्लिशब्दटीकायां भरतः॥ (गृहगोधिका।
इति हेमचन्द्रे पल्लीशब्ददर्शनात्॥)

पल्लिका, स्त्री, (पल्लि+स्वार्थे कन् ततष्टाप्।)
गृहगोधिका। इति राजनिर्घण्टः॥

पल्लिवाहः, पुं, (पल्लिं कुटीं वाहयति निर्वाहय-
तीति। पल्लि+वह+णिच+अण्।) तृण-
भेदः। यथाह राजनिर्घण्टः।
"पल्लिवाहो दीर्घतृणः सुपत्रस्ताम्रवर्णकः।
अदृढ़ः शाकपत्रादिः पशूनामबलप्रदः॥"

पल्ली, स्त्री, (पल्लि+"कृदिकारादक्तिनः।" वा
ङीष्।) स्वल्पग्रामः। (यथा, कथासरित्-
सागरे। १०। १३५।
"इतस्त्वं गच्छ मत्पल्लीं जाने सा तत्र ते गता।
अहं तत्रैव चेष्यामि दास्याम्यसिमिमञ्च ते॥")
कुटी। इति विश्वमेदिन्यौ॥ नगरभेदः। स तु
दक्षिणदेशे प्रसिद्धः त्रिचनापल्ल्यादिः। इति
शब्दरत्नावली॥ क्षुद्रजन्तुविशेषः। टिक्टिकी
इति भाषा। तत्पर्य्यायः। मुषली २ गृहगोधा
३ विशम्बरा ४ ज्येष्ठा ५ कुड्यमत्स्यः ६ पल्लिका
७ गृहगोधिका ८। इति राजनिर्घण्टः॥ गृह-
गोलिका ९ माणिक्या १० भित्तिका ११ गृहो-
लिका १२। इति हेमचन्द्रः। ४। ३६३॥
अवशिष्टं ज्येष्ठीशब्दे द्रष्टव्यम्॥ (अस्याः पतन-
फलमुक्तं यथा, ज्योतिषशास्त्रे।
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणहृदिस्था सर्व्वसौख्यं ददाति॥")

पल्वलं, क्ली, पुं, (पलति गच्छति पिबत्यस्मिन् वा।
पल गतौ पा पाने वा+"सानसिवर्णसिपर्ण-
सीति।" उणां। ४। १०७। इति निपातनात्
वलच् प्रत्ययेन सिद्धम्।) अल्पसरः। इत्य-
मरः। १। १०। २८॥ (यथा, महाभारते।
७। ५१। ६।
"पल्वलानि च सर्व्वाणि सर्व्वे चैव तृणोपला।
स्थावरं जङ्गमञ्चैव निःशेषं कुरुते जगत्॥")
तस्य लक्षणं यथा,—
"अल्पं सरः पल्वलं स्याद्यत्र चन्द्रगते रवौ।
न तिष्ठति जलं किञ्चित्तत्रत्यं वारि पाल्वलम्॥
तज्जलगुणाः।
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत्॥"
इति भावप्रकाशः॥
"पाल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परम्॥"
इति राजवल्लभः॥

पवं, क्ली, (पूयतेऽनेन । पूञ् शोधि+"ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) गोमयम् । इति शब्दचन्द्रिका ॥ (गोमयशब्दे विवरणमस्य ज्ञातव्यम् ॥)

पवः, पु, (पवनमिति । पूञ् शोधने+भावे अप् । यद्वा, पुनातीति । पू+अच् ।) निष्पावः । स च धान्यादीनां निर्बुषीकरणम् । शाल्यादेः शोधनं बहुलीकरणम् । इत्यमरभरतौ ॥ (पू+करणे अप् । यद्वा पुनातीति कर्त्तरि अच् ।) वायुः । इति शब्दचन्द्रिका ॥

पवनं, क्ली, (पूयते अग्निसंयोगेन यस्मिन् । पू+आधारे ल्युट् ।) कुम्भकारस्य आमघटादिपाकस्थानम् । पोयान् इति भाषा । इति मेदिनी । ने, ८४ ॥ (यथा,—

"यः कुम्भकारपवनोपरिपङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै ॥")
इत्युद्भटः ॥)

पयनमिति प्रमादपाठः । जलम् । इति शब्दमाला ॥ प्रयते त्रि । इति शब्दरत्नावली । (भावे ल्युट् ।) पवित्रीकरणञ्च ॥

पवनः, पुं, (पुनातीति । पू+बहुलमन्यत्रापीति युच् ।) निष्पावः । वायुः । इति मेदिनी । ने, ८४ ॥ (यथा, गीतायाम् । १० । ३१ ।
"पवनः पवतामस्मि रामः शस्त्रभृतामहम् ॥")
अष्टौ वाह्यपवना यथा, सिद्धान्तशिरोमणौ ।
"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्यादुद्वहस्तदनु संवहसंज्ञकश्च ।
अन्यः परोऽपि सुवहः परिपूर्व्वकोऽस्मा-
द्वाह्यः परावह इमे पवनाः प्रसिद्धाः ॥"
सप्त पवनाधिपा यथा, ज्योतिस्तत्त्वे ।
"शाकः शराब्धिसंयुक्तो मुनिभिर्भागहारितः ।
आवहादिक्रमेणैव सप्त वाताः प्रकीर्त्तिताः ॥
आवहः प्रवहश्चैव सम्वहो निवहस्तथा ।
उद्वहो विवहो वायुः सप्त वाताः प्रकीर्त्तिताः ॥"
अन्यद्वायुशब्दे द्रष्टव्यम् ॥ (प्राणवायुः । यथा, हठयोगदीपिकायाम् । ३ । ७५ ।
"अनेनैव विधानेन प्रयाति पवनो लयम् ।
ततो न जायते मृत्युर्ज्जरारोगादिकं तथा ॥"
उत्तममनुपुत्त्रविशेषः । यथा, भागवते ।८।१।२३।
"तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ।
पवनः सृञ्जयो यज्ञहोत्राद्यास्तनसुता नृप । ॥")

पवनविजयः, पु, (पवनं श्वासवायुं विजयतेऽनेन । वि+जि+करणे अप । यद्वा, पवनस्य विजयो यत्र ।) शुभाशुभसूचकश्वासवायुजयोपायकग्रन्थविशेषः । यथा—

सूत उवाच ।
"हरेः श्रुत्वा हरो गौरी देहस्थं ज्ञानमब्रवीत ।
कुजो वह्नी रविः पृथ्वी शौरिरापः प्रकीर्त्तिताः ॥
वायुसंस्थास्थितो राहुर्दक्षरन्ध्रावभासकः ।
गुरुः शुक्रस्तथा सौम्यश्चन्द्रश्चैव चतुर्थकः ॥
वामनाड्यास्तु मध्यस्थान् कारयेदात्मनस्तथा ।
यदाचार इडायुक्तस्तदा कर्म्म समाचरेत् ॥
स्थानसेवां तथा ध्यानं वाणिज्यं राजदर्शनम् ।
अन्यानि शुभकर्म्माणि कारयेत प्रयत्नतः ॥
दक्षनाडीप्रवाहे तु शनिर्भौमश्च सैंहिकः ।
इनश्चैव तथापीव पापानामुदयो भवेत् ॥
शुभाशुभविवेको हि ज्ञायते तु स्वरोदयात् ।
देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः ॥
नाभेरधस्ताद्यः कन्दो अङ्कुरास्तत्र निर्गताः ।
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः ॥
चक्रवच्च स्थितास्तासु सर्व्वाः प्राणहराः स्मृताः ।
तासां मध्ये त्रयः श्रेष्ठा वामदक्षिणमध्यमाः ॥
वामा सोमात्मिका प्रोक्ता दक्षिणा रविसन्निभा ।
मध्यमा च भवेदग्निः फलतो कालरूपिणी ॥
वामा स्वमृतरूपा च जगदाप्यायने स्थिता ।
दक्षिणा रौद्रभागेन जगच्छोषयते सदा ॥
द्वयोर्वाहे तु मृत्युः स्यात् सर्व्वकार्य्यविनाशिनी ।
निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता ॥
कारयेत् क्रूरकर्म्माणि प्राणे पिङ्गलसंस्थिते ।
इडाचारे तथा सौम्यं चन्द्रसूर्य्यगतस्तथा ॥
यात्रायां सर्व्वकार्य्येषु विषापहरणे इडा ।
भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका ॥
उच्चाटमारणाद्येषु कर्म्मस्वेतेषु पिङ्गला ।
मैथुने चैव संग्रामे भोजने सिद्धिदायिका ॥
शोभनेषु च कार्य्येषु यात्रायां विषकर्म्मणि ।
शान्तिमुक्त्यर्थसिद्धौ च इडा योज्या नराधिपैः ॥
द्वाभ्याञ्चैव प्रवाहे च क्रूरसौम्यविवर्ज्जने ।
विषुवन्तीन्तु जानीयात् संस्मरेत्तु विचक्षणः ॥
सौम्यादिशुभकार्य्येषु लाभादिजयजीविते ।
गमनागमने चैव वामा सर्व्वत्र पूजिता ।
युद्धादिभोजने घाते स्त्रीणाञ्चैव तु सङ्गमे ।
प्रशस्ता दक्षिणा नाडी प्रवेशे क्षुद्रकर्म्मणि ॥
शुभाशुभानि कार्य्याणि लाभालाभौ जयाजयौ ।
जीवाजीवाय यत् पृच्छेत् सिध्यति च मध्यमा ॥
वामाचारेऽथवा दक्षे प्रत्यये यत्र नायकः ।
तत्रस्थः पृच्छते यस्तु तत्र सिद्धिर्न संशयः ॥
वैकुन्ठो वामदेवस्तु यदा वहति चात्मनि ।
तत्र भागे स्थितः पृच्छेत सिद्धिर्भवति निष्फला ॥
वामे वा दक्षिणे वापि यत्र संक्रमते शिरा ।
घोरं घोराणि कर्म्माणि सौम्ये वै मध्यमानि च ॥
प्रस्थितं भागतो हंसं द्वाभ्यां वै सर्व्ववाहिनि ।
तदा मृत्युं विजानीयाद्योगी योगविशारदः ॥
यत्र यत्र स्थितः पृच्छेद्वामदक्षिणसंमुख. ।
तत्र तत्र समं दिश्याद्वातस्योदयनं सदा ॥
अग्रतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा ।
वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा ॥
जीवो जीवति जीवेन यच्छून्यं तत्र स्वरो भवेत् ।
यत्किञ्चित् कार्य्यमुद्दिश्य जयादिशुभलक्षणम् ॥
तत् सर्व्वं पूर्णनाड्यान्तु जायते निर्व्विकल्पकम् ।
अन्यनाड्यादिपर्य्यन्तपञ्चत्रयमुदाहृतम् ॥
यावत् षष्ठीन्तु पृच्छायां पूर्णायां प्रथमो जयेत् ।
रिक्तायान्तु द्वितीयन्तु कथयेत्तद्विशाङ्कितः ॥
वामाचारः समं वायुर्जायते कर्म्मसिद्धिदम् ।
प्रवृत्ते दक्षिणे मार्गे विषमे विषमाक्षरम् ॥
अन्यत्र वामवाहे तु नाम वै विषमाक्षरम् ।
तदासौ जयमाप्नोति योधः संग्राममध्यतः ॥
दक्षवातप्रवाहे तु यदि नाम समाक्षरम् ।
जायते नात्र सन्देहो नाडीमध्ये तु लक्षयेत् ॥
पिङ्गलान्तर्गते प्राणे समानीयाहवञ्जयेत् ।
यावन्नाड्योदयं चारस्तां दिशं यावदाजयेत् ।
न जातु जयते सोऽपि नात्र कार्य्या विचारणा ॥
अथ संग्राममध्ये तु यत्र नाडी सदा वहेत् ।
सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्द्दिशेत् ॥
जातचारे जयं विद्यात्मृतके मृतमादिशेत् ।
जयं पराजयञ्चैव यो जानाति स पण्डितः ॥
वामे वा दक्षिणे वापि यत्र सञ्चरते शिरा ।
कृत्वा तत्पदमादौ तु यात्रां नयति शोभनाम् ॥
शशिसूर्य्यप्रवाहे तु सति युद्धं समाचरेत् ।
तत्रस्थः पृच्छते यस्तु स साधुर्जयति ध्रुवम् ॥
यां दिशं वहते वायुस्तां दिशं यावदाजयेत् ।
जयते नात्र सन्देह इन्द्रो यद्यग्रतः स्थितः ॥
मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः ।
चरस्थिरद्विमार्गे तास्ताडयेत् ताडयः क्रमात् ॥
निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः ।
पृच्छकस्य वचः श्रुत्वा चघटाकारेण लक्षयेत् ॥
वामे वा दक्षिणे वापि पञ्चतत्त्वस्थितः शिवे ।
ऊर्द्ध्वेऽग्निरध आपश्च तिर्य्यक्संस्थः प्रभञ्जनः ।
मध्ये तु पृथिवी ज्ञेया नभः सर्व्वत्र सर्व्वदा ॥
ऊर्द्ध्वे मृत्युरधः शान्तिस्तिर्य्यक् चोच्चाटयेत् सुधीः ।
मध्ये स्तम्भं विजानीयान्मोक्षः सर्व्वत्र सर्व्वगे ॥"
इति गारुडे पवनविजयादि ६७ अध्यायः ॥

पवनव्याधिः, पुं, (पवनः वायुरोग एव व्याधिरस्य ।) उद्धवः । श्रीकृष्णस्य सखा । इति त्रिकाण्डशेषः ॥ (यथा,—
"विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम् ।
प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम् ॥"
इति माघे । २ । १५ ॥
पवनात् प्रकुपितवायोरुद्भवो व्याधिः ।) वायुरोगश्च ॥

पवनात्मजः, पुं, (पवनस्य आत्मजः पुत्त्रः ।) हनूमान् । इति शब्दरत्नावली ॥ (पवनस्य वायोरात्मजः । "वायोरग्निः ।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम् ।) हव्यवाहनः । इति मत्स्यपुराणम् ॥ (भीमसेनः । इति महाभारतम् ॥ यथा, राजतरङ्गिण्याम् ।८।२८६० ।
"वाहिनीरुद्धमार्गौ तौ पदवीमनुसस्रतुः ।
मार्गे धनञ्जयस्येव शैनेयपवनात्मजौ ॥")

पवनालः, पु, (पवनाय निष्पावाय अलति पर्य्याप्नोतीति । अल पर्य्याप्तौ+अच् ।) धान्यविशेषः । देधान इति पोगरी इति च भाषा । तत्पर्य्यायः । देवधान्यम् २ चूर्णाङ्कः ३ कुहुलः ४ कुलत्थः ५ बीजपुष्पः ६ पुष्पगन्धः ७ । अस्य गुणाः । हितत्वम् । स्वादुत्वम् । लोहितत्वम् । श्लेष्मपित्तनाशित्वम् । अदृष्यत्वम् । तुवरत्वम् । रूक्षत्वम् । क्लेदकारित्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥

पवनाशः, पुं, (पवनं वायुं अश्नाति भक्षयतीति। अश भोजने+"कर्म्मण्यण्।" ३।२।१। इति अण्।) सर्पः। इति हलायुधः॥

पवनाशनः, पुं, (पवनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इत्यमरः। १।८।८॥

पवनाशनाशः, पुं, (पवनाशस्य सर्पस्य नाशो यस्मात्। यद्वा, पवनाशनं सर्पमश्नातीति। अश्+अण्।) गरुड़ः। इति हलायुधः॥ मयूरः। यथा, उत्तरचौरपञ्चाशिकायाम्।

"स्वयोनिभक्षध्वजसम्भवानां
श्रुत्वा निनादं गिरिगह्वरेषु।
तमोऽरिविम्बप्रतिविम्बधारी
ररास कान्ते। पवनाशनाशः॥"

पवनेष्टः, पुं, (पवने वायुरोगे इष्टः।) महानिम्बः। इति रत्नमाला॥ (महानिम्बशब्देऽस्य गुणादिकं ज्ञेयम्॥)

पवनोत्मुज, क्ली, पक्वणम्। इति शब्दचन्द्रिका॥

पवमानः, पुं, (पवते शोधयतीति। पूङ् शोधने+"पूङ्यजोः शानच्।" ३।२।१।८। इति शानच्। "आने मुक्।" ७।२।८२। इति मुमागमः।) वायुः। इत्यमरः। १।१।६६॥ (यथा, रघुः।८।६।

"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव।
स पुरस्कृतमध्यमक्रमो
नमयामास नृपाननुद्धरन्॥"

अग्नेः स्वाहायां जातः पुत्रः। यथा, मार्कण्डेये। ५२।२७-२८॥

"योऽसावग्निरभीमानी ब्रह्मणस्तनयोऽग्रजः।
तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज॥
पावकं पवमानञ्च शुचिञ्चापि जलाशिनम्।
तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च॥")

निर्मथ्याग्निः। स च गार्हपत्याग्निः। यथा,—

"अथ यः पवमानस्तु निर्म्मथ्योऽग्निः स उच्यते।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः॥"
इति मात्स्ये ४८ अध्यायः॥

पवमानात्मजः, पुं, (पवमानस्य वायोरात्मजः। "वायोरग्निः।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम्। यद्वा, पवमानस्य अग्निविशेषस्य आत्मजः।) हव्यवाहनः। यथा,—

"पवमानात्मजो ह्यग्निर्हव्यवाहन उच्यते॥"
इति मात्स्ये ४८ अध्यायः॥

पवाका, स्त्री, (पुनातीति। पूञ् ञ शोधने+"बलाकादयश्च।" उणां ४।१४। इति आक-प्रत्ययेन निपातनात् साधुः।) वात्या। चक्रवातः। इत्युणादिकोषः॥

पविः, पुं, (पुनातीति। पूञ शोधने+"अच इः।" उणां ४।१३८। इति इः।) वज्रम्। इत्यमरः। १।१।५०॥

पवितः, त्रि, (पूयते स्म। पूङ् शोधे+क्तः। "पूङश्च।" ७।२।५१। इति इट्। "पूङः क्त्वा च।" १।२।२२। इति न कित्त्वम्।) पूतः। इति मुग्धबोधव्याकरणम्॥ मरीचे, क्ली। इति राजनिर्घण्टः॥

पविता [तृ], त्रि, (पुनातीति। पू+तृच्।) पवित्रताकारकः। यथा, नैषधे।

"तनुश्रिया यस्य हतं स मन्मथः
कुलश्रिया यः पविताऽस्मदन्वयम्॥"

पवित्रं, क्ली, (पूयतेऽनेनेति। पू+"पुवः संज्ञायाम्।" ३।२।१८५। इति इत्रः।) वर्षणम्। कुशम्। (यथा, मनुः।२।७५।

"प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः॥")

ताम्रम्। पयः। इति मेदिनी। रे, १७७॥ घर्षणम्। इति विश्वः॥ अर्घोपकरणम्। इति हेमचन्द्रः॥ यज्ञोपवीतम्। इति त्रिकाण्डशेषः॥ घृतम्। मधु। इति राजनिर्घण्टः॥ पार्व्वणश्राद्धादावर्घार्थं होमादावाज्यसंस्कारादार्थञ्च साग्रनिर्गर्भकुशान्तरवेष्टितप्रादेशमात्रकुशपत्रद्वयम्। यथा,—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥"
इति आह्निकतत्त्वम्॥

(विष्णुः। यथा, महाभारते। १३।१४९।२०।

"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम्॥"

महादेवः। यथा तत्रैव। १३।१७।३५।

"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः॥")

पवित्रः, त्रि, (पू+इत्र।) व्रतादिना शुद्धः। (यथा, गीतायाम्। ४।३८।

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते॥")

तत्पर्य्यायः। प्रयतः २ पूतः ३। एतत्त्रयं प्राणिविषयमात्रम्। शुचिः ४ शुद्धः ५ पवित्रितः ६। इति शब्दरत्नावली॥ पुण्यः ७ पावनः ८। इति जटाधरः॥ (पूयतेऽनेन। पूञ्+"पुवः संज्ञायाम्।"३।२।१८५। इति इत्रः।) शुद्धद्रव्यम्। तत्पर्य्यायः। पूतम् २ मेध्यम् ३। एतत्त्रयं अप्राणिद्रव्यविषयम्। इति ब्रह्मवर्गे विशेष्यनिघ्ने च अमरभरतौ॥ शुद्धम् ४ शुचि ५ पुण्यम् ६ पूतिवत् ७। इति जटाधरः॥ (यथा,—

"बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्।
एतत्तु नवद्वनगुणपरम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पवित्रः, पुं (पुनातीति। पू+कर्त्तरि इत्रः।) तिलवृक्षः। पुत्त्रजीववृक्षः। इति राजनिर्घण्टः॥ (तिलपुत्त्रजीवशब्दयोरस्य विवृतिर्ज्ञेया॥) कार्त्तिकेयस्य नामान्तरम्। यथा, महाभारते। ३।२३१।६।

"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः॥")

पवित्रकं, क्ली, (पवित्र+कन्। यद्वा, पवित्रे पयसि कायतीति। कै+कः।) जालम्। इति शब्दरत्नावली॥ शणसूत्रजालम्। इत्यमरः। १।१०।१६॥ क्षत्त्रियस्य यज्ञोपवीतम्। यथा,

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"
इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्यमरटीकायां भरतः॥

पवित्रकः, पुं, (पवित्र+स्वार्थे कन्।) कुशः। दमनकः। अश्वत्थः। उडुम्बरः। इति राजनिर्घण्टः॥

पवित्रधान्यं, क्ली, (पवित्रं धान्यम्। नित्यकर्म्मधारयः।) यवः। इति राजनिर्घण्टः॥ (यवशब्देऽस्य गुणादयो वक्तव्याः॥)

पवित्रा, स्त्री, (पवित्र+टाप्।) तुलसी। इति शब्दमाला॥ नदीभेदः। इति हेमचन्द्रः॥ हरिद्रा। अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

पवित्रारोपणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोपणं प्रदानं यत्र।) श्रीकृष्णसम्प्रदानकोपवीतदानरूपोत्सवविशेषः। यथा —

"श्रावणस्य सिते पक्षे द्वादश्यां वैष्णवैर्मुदा।
कर्त्तव्यः कृष्णदेवस्य पवित्रारोपणोत्सवः॥"

अथ तन्नित्यता बहुचपरिशिष्टे।

"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
हरिश्च प्रीतिमाप्नोति यः पवित्रं समाचरेत्॥
विधिना शास्त्रदृष्टेन यो न कुर्य्यात् पवित्रकम्।
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम्॥"

योगसारे च पवित्रोत्पत्त्युपाख्यानेन नागराजं पवित्रं प्रति श्रीकृष्णेन वरदानम्। यथा,—

"ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया।
जपहोमादिकं तेषां फलं त्वामेतु निश्चयात्॥"

विष्णुरहस्ये।

"न करोति विधानेन पवित्रारोपणन्तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः॥"

अथ पवित्रारोपणमाहात्म्यम्।

तत्र बौधायनः।

"यावन्तस्तन्तवः पवित्रस्य तावत् स्वर्गे महीयते।
आयुरारोग्यमैश्वर्य्यं विपुलं तस्य वर्द्धते॥"

महासंहितायाम्।

सम्वत्सरेण या पूजा कृता वै मन्त्रिणा द्विज।
प[illegible]ात् पूर्णा स्यादित्याह भगवान् हरिः॥

विष्णुरहस्ये।

पवित्रारोपणं विष्णोर्भुवि मुक्तिप्रदायकम्।
स्वर्गोपकीर्त्तिप्रदं पुण्यं सुखसम्पत्तिवर्द्धनम्॥
पुण्यानान्तु यथा पुण्यं सर्व्वपापहरन्तु वै।
पवित्रारोपणं तस्मात् पवित्रं परमं स्मृतम्॥
सम्वत्सरं नरो भक्त्या समभ्यर्च्य जनार्द्दनम्।
यत् फलं समवाप्नोति पवित्रारोपणेन तत्॥

किञ्च।

पावयत्येनमो नित्यं त्रायते भवबन्धनात्।
पवित्रं तेन विख्यातं ब्राह्मं तेजोऽभिधीयते॥
विष्ण्वाख्यया तु विख्यातं तदा लोके विधीयते।
स एव छत्ररूपेण यज्ञेशः कर्म्मणां प्रभुः॥
तदेव त्रिगुणीसूत्रं ततं नारायणाख्यया।
त्रिदेवात्मा त्रिवेदात्मा चराचरः प्रणवः स्मृतः॥"

अथ पवित्रारोपणविधिः।

"सौवर्णं राजतैस्ताम्रैः क्षौमैः सूत्रैस्तु पाद्मकैः।
कार्पासैर्वा पवित्राण्युच्यते काशैः कुशैरपि॥

तत्र कार्पासिकं सूत्रं ब्राह्मण्योकर्त्तितं शुभम् ।
आनीय त्रिगुणीकृत्य पुनस्त्रिगुणयेत् कृती ॥
पञ्चगव्येन तत् प्रोक्ष्य प्रक्षाल्य शुचिनाम्बुना ।
मूलेनाष्टोत्तरशतं मन्त्रेणाथाभिमन्त्रयेत ॥
श्रीणि साष्टशतेनास्य तस्याष्टैनास्य चाष्ठत: ।
जानुनाभिदशानि पवित्राण्याचरेत प्रभो: ॥
षट्त्रिंशद्ग्रन्थयस्तेषामादौ कार्य्यास्तु मध्यमे ।
चतुर्विंशतिरन्त्ये च द्वादशग्रन्थयो बुधै: ॥
अङ्गुष्ठपर्व्वमात्रन्तु कुर्य्याद्ग्रन्थिमथोत्तमे ।
तदर्द्धं मध्यमे कुर्य्यात्तदर्द्धञ्च कनीयसि ॥
ग्रन्थीन् कुर्व्वीत सर्व्वत्र सुवृत्तान् सुमनोहरान् ।
न वै विषमसंख्याकान् ग्रन्थीन् कुर्व्वीत कुत्रचित् ॥
अष्टोत्तरसहस्रेण ततसूत्रस्य पवित्रकम् ।
अष्टोत्तरशतं ग्रन्थिं वनमालाख्यमाचरेत् ॥
आरभ्य मुकुटं या तु सूत्रैर्विरचिता शुभा ।
आपादलम्बिनी माला वनमाला प्रकीर्त्तिता ॥
कुर्य्याद्गन्धपवित्रञ्च सूत्रैर्द्वादशभि: शुभै: ।
अरत्निप्रमितं तच्च द्वादशग्रन्थिकं कृती ॥
पवित्राणि परीवारदेवतानां समाचरेत् ।
सूत्रैस्त्रिगुणसंख्याकै: कलासंख्याकसंख्यकै: ॥
तेषु ग्रन्थीन् यथाशोभं बद्ध्वा वह्नेर्गुणैरपि ।
सप्तविंशतिभि: सूत्रै: षड्‌विंशतिभिरात्मन: ॥
यथासम्भवमन्येषां पवित्राणि च कारयेत् ।
सम्पादयेच्च सर्व्वाणि शोभनान्येव यत्नत: ॥
तथा चोक्तम् ।
विशोभसूत्रदानेन कर्त्तु: स्यादशुभं फलम् ।
पवित्रं परया भक्त्या तस्मात् कुर्व्वीत शोभनम् ॥
रञ्जयित्वाथ काश्मीरागुरुगोरोचनादिना ।
वर्ज्जणाच्छाद्य पटलै स्थापयेत्तानि वैष्णव ॥”
इति पवित्रविनिर्म्माणम् ॥ * ॥
“कृत्वा कृत्यं दशम्याञ्च पवित्रारोपणाय हि ।
कृष्णं विज्ञाप्य तत्रादिं यथा प्राग्लिखितं नयेत ॥
एकादश्यां प्रभाते च नित्यकृत्यं समाप्य हि ।
देवालयमुपस्कृत्य मण्डलं रचयेत् शुभम् ॥
कृत्वा कृष्णस्य नित्यार्च्चां पवित्रारोपणाय काम् ।
पूजां विशेषत: कृत्वा कृष्णं विज्ञापयेदिदम् ॥
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ! ।
मयैतत् क्रियते देव ! भवत्तुष्ट्यै पवित्रकम ॥
न मे विघ्नो भवत्वत्र कुरु नाथ ! दयां मयि ।
सर्व्वथा सर्व्वदा विष्णो ! मम त्वं परमा गति: ॥
देवस्य सर्व्वतो न्यस्येद्गन्धकाष्ठं जलं कुशान् ।
मृत्तिकाञ्च हरिद्राञ्च कुङ्कुमं रोचनानि च ॥
उपानहौ सितं छत्रं चामरं व्यजनं तथा ।
यवा श्रीह्यादिधान्यानि यथास्थानं पृथक् पृथक् ॥
कुम्भं शुद्धाम्बुनापूर्य्य सर्व्वतोभद्रमण्डले ।
देवाग्रतो निधायास्मिन् पवित्राण्यधिवासयेत् ॥
अथ पवित्राधिवासनम् ।
“भगवत्पुरतस्तानि पटमध्यानि पूजयन् ।
आदावावाहयेन्मन्त्रयुजा तन्मनुना बुध: ॥
तन्मन्त्रश्चायम् ।
ओँ सांवत्सरस्य यागस्य पवित्रीकरणाय भो: ।
विष्णुलोकात् पवित्राद्य आगच्छेह नमोऽस्तु ते ॥
तेष्वावाह्य यथास्थानं ब्रह्माद्या देवतास्तत: ।
तत्तन्मन्त्रै: सन्निधाप्याथ गन्धादिनार्च्चयेत् ॥
तत्र तत्र ता देवताश्चोक्ता: ।
ब्रह्मविष्णुमहादेवाश्चित्रसूत्रोद्देवता: स्मृता: ।
प्रणव: सोमवह्नी च ब्रह्मा नाग: शशी रवि: ॥
शिवश्च विश्वदेवाश्च नवसूत्राधिदेवता: ।
क्रिया च पौरुषी वीरा चतुर्थी चापराजिता ॥
जया च विजया चैव मुक्तिदा च सदाशिवा ।
मनोमयी तु नवमी दशमी सर्व्वतोमुखी ।
ग्रन्थीनां देवतास्त्वेतास्तास्तत्र विनिवेशयेत् ॥
तन्मन्त्राश्चैते ।
ओँ सर्व्वाभरणचित्राङ्ग ! सर्व्वदेवनमस्कृत ! ।
लावण्यरूपविश्वात्मन् ! ज्येष्ठसूत्रं समाश्रय ॥
ओँ सर्व्वलक्ष्मीकर ! श्रीश ! सर्व्वज्ञानरसात्मक ! ।
निश्चलरूपविश्वात्मन् ! मध्यसूत्रं समाश्रय ॥
ओँ अतिवेगमरुद्योने ! पुरुषात्मन् ! दिवस्पते ! ।
कनीयो हे प्रभो ! देव ! तेजसा सूत्रमाश्रय ॥
यत्र मन्त्रो न वर्त्तेत तन्नाम्नैव तत्र च ।
नमोऽन्तं सचतुर्थ्यैकमस्त्वं प्राग्लिखनाम्नसु: ॥ * ॥
अथ कृष्णकराम्भोजे पट्टसूत्रेण निर्म्मितम् ।
वितस्तिमात्रं बध्नीयात् डोरकं मङ्गलात्मकम् ॥
तत्र मन्त्र: ।
ओँ संवत्सरकृतार्च्चाया: सम्पूर्णफलदायि यत् ।
पवित्रीकरणायेतत् कौतुकं धरते मम: ॥
ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुध: ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥
आमन्त्रितोऽसि देवेश ! सार्द्धं देवगणेश्वरै: ।
मन्त्रेशैर्लोकपालैश्च सहित: परिवारकै: ॥
आगच्छ भगवन्नीश ! विधिसंपूर्त्तिकारक ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥
ततश्च ।
विष्णुतेजोद्भवं रम्यं सर्व्वपातकनाशनम् ।
सर्व्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥
अनेन मनुना विद्वान् मूलसंपुटितेन हि ।
दद्यात् गन्धपवित्रं तच्छ्रीकृष्णचरणाब्जयो: ॥
नीराज्य देवं स्तुत्वा च दत्त्वा पुष्पाञ्जलिं तत: ।
तत्पवित्राणि तत्कुम्भमप्यस्त्रमनुनाथवा ॥
नृसिंहमनुना रक्षेत् कवचेनावगुण्ठयेत् ।
गीतनृत्यादिना कुर्य्याद्विधिवज्जागरं निशि ॥”
अथ पवित्रार्पणम् ।
“प्रात:कृत्यानि निर्व्वृत्य नित्यपूजां विधाय च ।
विशेषतोऽर्च्चयेद्देवं पवित्राणि च पूजयेत ॥
महावादित्रघोषेण नामसंकीर्त्तनोत्सवै: ।
मूलसंपुटितेनैव पवित्राण्यर्पयेत् क्रमात ॥
वक्ष्यमाणेन मन्त्रेण भक्त्या कृष्णाय वैष्णव: ।
पूजां कृत्वा परीवारदेवानां तान्यथार्पयेत् ॥
अर्पणमन्त्र: ।
कृष्ण ! कृष्ण ! नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव ! त्वत्प्रसादाज्जनार्द्दन ! ॥
महापूजां तत: कृत्वा स्तुत्वा नत्वार्थयेत् प्रभुम् ।
वनमालां यथा देव ! कौस्तुभं सततं हृदि ॥
तद्वत् पवित्रतन्तूंश्च पूजाञ्च हृदये वह ।
जानताजानता वापि न कृतं यत्तवार्च्चनम् ॥
केनचिद्विघ्नदोषेण परिपूर्णन्तदस्तु मे ॥
अथाग्निं विधिनाभ्यर्च्च्य पवित्रं तस्य चार्पयेत् ।
कृष्णे निवेदयेत्मन्त्रयेण इत्यादिना कृतम् ॥
गुरुञ्च श्रद्धया संपूज्य पवित्रं गुरवेऽर्पयेत् ।
वैष्णवेभ्य: पवित्राणि दत्त्वैकं धारयेत् स्वयम् ॥
संपूज्य वैष्णवान् विप्रान् श्रद्धया सम्भोज्य बन्धुभि: ।
समं महाप्रसादान्नं सुखं भुञ्जीत वैष्णव: ॥”
अथ पवित्रविसर्ज्जनविधि: । तन्त्रे ।
“मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।
देवं तं सूत्रसन्दर्भं देशकालानुसारत: ॥
प्रत्यहं स्नानकर्म्मादि सूत्राण्यस्याथ कारयेत् ।
अभिषिच्याथ तोयेन पुनर्देवे निवेदयेत् ॥
तथान्ते देवमभ्यर्च्च्य विशेषात पुष्पचन्दनै: ।
नैवेद्यं विविधं दत्त्वा तत: सूत्रं विसर्ज्जयेत् ॥
ओँ सांवत्सरीं शुभां पूजां सम्पाद्य विधिवन्मम ।
व्रजेदानीं पवित्र ! त्वं विष्णुलोकं विसर्ज्जितम् ॥
यावद्देवे पवित्राणि तावत्तिष्ठेत् समाहित: ।
ब्रह्मचारी हविष्याशी देवपूजापरायण: ॥
तत्फलञ्चोक्तं बौधायनेन ।
एवं य: कुरुते विद्वान् वर्षे वर्षे न संशय: ।
स याति परमं स्थानं यत्र देवो गुकेशरी ॥”
अथ तत्र मुख्यगौणकालनिर्णय: ।
“मुख्यकालस्य चैवास्य विघ्नतोपगमे सति ।
भाद्रादावपि कर्त्तव्यं पवित्रारोपणं प्रभो: ॥
तथा च विष्णुरहस्ये ।
श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
सिंहस्थे वा रवौ कार्य्यं कन्यायाञ्च गतेऽथवा ।
तस्यामेव तिथौ सम्यक् तुलासंस्थे कथञ्चन ॥
मन्त्रतन्त्रप्रकाशे च ।
कर्कटञ्च गते सूर्य्ये तथा सिंहगतेऽपि वा ।
द्वादश्यां शुक्लपक्षस्य हरेर्दद्यात् पवित्रकम् ॥
अथ चेद्विघ्नपातेन मुख्यकालो न लभ्यते ।
कन्यागतेऽपि कुर्व्वीत यावन्नोत्तिष्ठते हरि: ॥”
इति हरिभक्तिविलास: ॥

पवित्रारोहणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोहणं सम्प्रदानं यत्र ।) पवित्रारोपणम् । यथा,—
“आषाढशुक्लपक्षस्य याष्टमी श्रावणस्य च ।
पवित्रारोहणं कुर्य्याद्देव्या: प्रीतिकरं परम् ॥
दुर्गातन्त्रेण मन्त्रेण दुर्गाबीजेन भैरव ! ।
वैष्णवीतन्त्रमन्त्रेण पवित्रारोहणञ्चरेत ॥
विशेषात् श्रावणादेव देव्या: कुर्य्यात् पवित्रकम् ।
सर्व्वेषामपि देवानां पवित्रारोहणञ्चरेत् ॥
आषाढे श्रावणे वापि संवत्सरफलप्रदम् ।
प्रतिपद्धनदस्योक्ता पवित्रारोहणे तिथि: ॥
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा तिथि: ॥
तृतीया भवभाविन्याश्चतुर्थी तत्सुतस्य च ॥
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ।

सप्तमी भास्करस्योक्ता दुर्गायाश्च तथाष्टमी ॥
मातृणां नवमी प्रोक्ता वासुकेर्दशमी स्मृता ।
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ॥
त्रयोदशी त्वनङ्गस्य मम चैव चतुर्द्दशी ।
ब्रह्मणो दिक्पतीनाञ्च पौर्णमासी तिथिर्मता ॥
पवित्रारोहणं यो वै देवानां न समाचरेत् ।
तस्य सांवत्सरीपूजाफलं हरति केशवः ॥
तस्माद्यत्नेन कर्त्तव्यं पवित्रारोहणं परम् ।
कृते बहुफलप्राप्तिस्तत्पूजा सफला भवेत् ॥
पवित्रं येन सूत्रेण यथा कार्य्यं विजानता ।
तत् शृणुष्व प्रमाणञ्च रचनासु च भैरव । ॥
प्रथमं दर्भसूत्रञ्च पट्टसूत्रं ततः परम् ।
ततः क्षौमं सुपुण्यं स्यात् कार्पासकमतः परम् ॥
पट्टसूत्रं तथान्येन पवित्राणि न कारयेत् ।
पवित्राणि विचित्राणि कर्त्तव्याणि प्रयत्नतः ॥
गन्धमाल्यैः सुरभिभिरर्च्चितानि यथोदितम् ॥
कन्या च कर्त्तयेत् सूत्रं प्रमदा वा पतिव्रता ॥
विधवा शाधुशीला च दुःशीला न हि कर्त्तयेत् ।
यत् सूचिभिन्नं दग्धञ्च भस्मधूमाभिगुण्ठितम् ॥
तद्वर्ज्जयेत यत्नेन सूत्रमस्मिन् पवित्रके ।
उपयुक्तञ्चाखुदष्टं मत्स्यरक्तादिदूषितम् ॥
मलिनं नीलरक्तञ्च यत्नेन परिवर्ज्जयेत् ।
सूत्रैः पवित्रं कुर्व्वीत कनिष्ठोत्तममध्यमम् ॥
कनिष्ठकं पवित्रन्तु सप्तविंशतितन्तुभिः ।
मर्त्त्यलोके यशःकीर्त्तिसुखसौभाग्यवर्द्धनम् ॥
चतुःपञ्चाशता प्रोक्तं तन्तूनां मध्यमं परम् ।
दिव्यभोगावहं पुण्यं स्वर्गसौख्यप्रदायकम् ॥
उत्तमञ्चैव तन्तूनामष्टोत्तरशतेन वै ।
तद्दत्त्वा तु महादेव्यै शिवसायुज्यमाप्नुयात् ॥
उत्तमं वासुदेवाय दद्याद्यदि पवित्रकम् ।
तदा याति हरेर्लोकं साधको नात्र संशयः ॥
अष्टोत्तरसहस्रन्तु रत्नमालेति गीयते ।
पवित्रन्तु महादेव्या भुक्तिमुक्तिप्रदायकम् ॥
रत्नमालान्तु यो दद्यान्महादेव्यै पवित्रकम् ।
कल्पकोटिसहस्राणि स्वर्गे स्थित्वा शिवो भवेत् ॥
एतत्तु नागहाराख्यं शङ्करस्य पवित्रकम् ।
अष्टोत्तरसहस्रेण तन्तूनां सुमनोहरम् ॥
यः प्रयच्छति मह्यन्तु स यावान् तन्तुसञ्चयः ।
तावत्कल्पसहस्राणि मम लोके प्रमोदते ॥
अष्टोत्तरसहस्रेण वनमाला हरेः स्मृता ।
तन्तूनां तस्य दानेन विष्णुसायुज्यमाप्नुयात् ॥
यत् कनिष्ठं पवित्रन्तु नाभिमात्रं भवेत्तु तत् ।
द्वादशग्रन्थिसंयुक्तमात्ममानेन योजयेत् ॥
ऊरुप्रमाणं मध्यं स्यात् ग्रन्थीनां तत्र योजयेत् ।
चतुर्विंशतिमप्यस्य मालामात्मन एव च ॥
पवित्रमुत्तमं प्रोक्तं जानुमात्रञ्च भैरव ! ।
षट्त्रिंशत्तु ग्रन्थीनां योजयेदात्ममानतः ॥
शतमष्टोत्तरं कार्य्यं ग्रन्थीनां स्वविधानतः ।
नागहाराख्यं तद्वदर्द्धेषु च विधानतः ॥
पवित्रं क्रियते येन सूत्रेण ग्रन्थयः पुनः ।
तदन्यवर्णसूत्रेण कर्त्तव्या लक्षणान्विताः ॥
ग्रन्थिन्तु सप्तभिः कुर्य्याद्वेष्टनैस्तु कनिष्ठके ।
द्विगुणैर्मध्यमे कुर्य्यात्त्रिगुणैरुत्तमे तथा ॥
अधिवास्य पवित्राणि पूर्व्वस्मिन् दिवसे पुनः ।
मन्त्रन्यासं पवित्रेषु कुर्य्यात्तत्र परेऽहनि ॥
दुर्गाबीजेन मन्त्रेण मन्त्रन्यासं द्विजश्चरेत् ।
वैष्णवीतन्त्रमन्त्रेण कुर्य्युरन्ये च भैरव । ॥
प्रतिग्रन्थि स्वयं कुर्य्यान्मन्त्रन्यासं विचक्षणः ॥
अङ्गुष्ठाग्रेण जप्यन्तु मालायामिह भैरव । ।
यावन्तो ग्रन्थयस्तत्र तावन्त्येव च संन्यसेत् ।
मन्त्राणि तस्य तेन स्यात् देवाङ्गोपाङ्गयोजनम् ॥
दुर्गातन्त्रेण मन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
एकत्र न्यस्य सकलं यज्ञपात्रे पवित्रकम् ॥
तस्मिन्निधाय पुष्पाणि गन्धादि च सुशोभनम् ॥
तत्त्वन्यासं ततः कुर्य्यादङ्गुल्यग्रेण भैरव । ॥
विष्णोस्तु मूलमन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
इदं विष्णुरिति प्रोक्तं मन्त्रन्यासे द्विजस्य हि ॥
शूद्राणां मन्त्रविन्यासे मन्त्रो वै द्वादशाक्षरः ।
प्रासादेन तु मन्त्रेण मन्त्रन्यासो मम स्मृतः ॥
अनेन मन्त्रन्यासन्तु दानस्थानेन कारयेत् ।
कुङ्कुमोशीरकर्पूरैश्चन्दनादिविलेपनैः ॥
पवित्राणि विलिप्याथ तत्त्वन्यासन्तु योजयेत् ।
सम्पूज्य विधिवद्देवीं मण्डले प्रयतो नरः ॥
वैष्णवीतन्त्रमन्त्रेण दुर्गामन्त्रेण भैरव । ।
दुर्गाबीजेन दद्यात्तु देव्या मूर्द्ध्नि पवित्रकम् ॥
यस्य देवस्य या पूजा तस्य तस्यैव मण्डलम् ।
यस्य यस्य तु यो मन्त्रो यथाध्यानादिपूजनम् ॥
तं देवं तेन भावेन पूजयित्वा प्रयत्नतः ।
तस्यैव बीजमन्त्राभ्यां मूर्द्ध्नि दद्यात् पवित्रकम् ॥
पवित्रं समवे दद्याद्देवेभ्यश्च पवित्रकम् ।
सर्व्वेषामेव वेदानां सम्पूर्णार्थञ्च भैरव । ॥
अग्निर्ब्रह्मा भवानी च गजवक्त्रो महोरगः ।
स्कन्दो भानुर्मातृगणो दिक्पालाश्च नव ग्रहाः ॥
एषां घटेषु प्रत्येकं पूजयित्वा यथाविधि ।
मूर्द्ध्नि पवित्रमेकैकं दद्यादेभ्यः समाहितः ॥
पञ्चगव्यचरुं कृत्वा देव्यै दत्त्वाहुतित्रयम् ।
तेनैव वह्नये दत्त्वा शम्भवे च यथाविधि ॥
आज्यैरष्टोत्तरशतं तिलैराज्यैस्तथैव च ।
अष्टोत्तरशतं दद्यान्महादेव्यै च साधकः ॥
एवमेवं विधानेन विष्ण्वादीनाञ्च वैष्णवः ।
पवित्रारोपणं कुर्य्याद्धर्म्मकामार्थसिद्धये ॥
नैवेद्यैर्विविधैः पेयैर्वटपिष्टकमोदकैः ।
कुष्माण्डैर्नारिकेलैश्च खर्ज्जूरैः पनसैस्तथा ॥
आम्रदाडिमकर्क्कारुद्राक्षादिविविधैः फलैः ।
भक्ष्यभोज्यादिभिः सर्व्वैर्मद्यैर्मांसैस्तथोदनैः ॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैश्च सुमनोहरैः ।
वासोभिर्भूषणैश्चैव भवानीं साधको यजेत् ॥
नटनर्त्तकसंघैश्च वेश्याभिरपि भैरव । ।
नृत्यगीतैः समुदितो जागरं कारयेन्निशि ॥
भोजयेद्ब्राह्मणांश्चापि ज्ञातीनपि द्विजोत्तमैः ।
पवित्रारोहणे दत्ते दक्षिणामुपदापयेत् ॥
हिरण्यं गां तिलं वासो घृतं वा शाकमेव वा ।
इमं मन्त्रं ततः पश्चात् साधकः समुदीरयेत् ॥
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु परमेश्वरि । ॥
ततो विसर्ज्जयेद्देवीं पूर्व्वाभिः प्रतिपत्तिभिः ।
एवं कृते पवित्राणां दाने देव्या यथाविधि ॥
संवत्सरस्य या पूजा सम्पूर्णा वत्स । जायते ।
कल्पकोटिशतं यावद्देवीगेहे वसेन्नरः ।
अत्रापि सुखसौभाग्यसम्पद्भिरतुला भवेत् ॥”

इति कालिकापुराणे ५८ अध्यायः ॥

गरुड़पुराणे ४२ । ४३ अध्याययोरप्येतद्द्रष्टव्यम् ॥

पवित्रितः, त्रि, पवित्रमस्य जातं इत्यर्थे तारकादित्वात् इतच्प्रत्ययनिष्पन्नः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ पूतः ४ शुचिः ५ शुद्धः ६ । इति शब्दरत्नावली ॥

पश, क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पाशयति । इति दुर्गादासः ॥

पश, ञ बाधे । ग्रन्थे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ञ, पशति, पशते । बाधो विहतिः । ग्रन्थो ग्रन्थनम् । ग्रन्थस्थाने स्पर्शनं पठन्ति केचित् । इति दुर्गादासः ॥

पश, त् क अनुपसर्गाद्बन्धबाधयोः । स्पर्शगत्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) तालव्योपधः । पशयति । अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते । बाधो-विहतिः । इति दुर्गादासः ॥

पशव्यं, त्रि, (पशोरिदं पशवे हितं वा । पशु+यत् ।) पशुसम्बन्धि । इति संक्षिप्तसारव्याकरणम् ॥ (पशुहितकरम् । यथा, याज्ञवल्क्ये । १ । ३२१ ।
"रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ॥")

पशुः, पुं, (अविशेषेण सर्व्वं पश्यतीति । दृशिरौ प्रेक्षणे+"अर्ज्जिदृशिकम्यमिपंसीति ।" उणां । १ । २८ । इति कुः पशादेशश्च ।) अस्या व्युत्पत्तिर्यथा, "पशयन्ति पश्यन्ति पार्श्वस्थाभ्यां हिताहितम् ।" इति भरतः ॥ जन्तुविशेषः । तस्य लक्षणम् । लोमवल्लाङ्गूलवत्त्वम् । इति भाषारत्ने कणादः ॥ तद्भेदा यथा । सिंहः १ व्याघ्रः २ तरक्षुः ३ वराहः ४ कपिः ५ भल्लूकः ६ खड्गी ७ महिषः ८ शृगालः ९ विड़ालः १० गोधा ११ श्वावित् १२ हरिणः १३ कृष्णसारः १४ रुरुः १५ न्यङ्कुः १६ रङ्कुः १७ शम्बरः १८ रौहिषः १९ गोकर्णः २० पृषतः २१ एणः २२ ऋश्यः २३ रोहितः २४ चमरः २५ गन्धर्व्वः २६ शरभः २७ रामः २८ सृमरः २९ गवयः ३० शशः ३१ खट्टाशः ३२ गौः ३३ उष्ट्रः ३४ छागः ३५ मेषः ३६ खरः ३७ हस्ती ३८ अश्वः ३९ । इत्यमरः ॥ * ॥ (यथा,
"पशुः पशूनां दौर्ब्बल्यात् कश्चिन्मध्ये वृकायते ।
समत्वं वृकमासाद्य प्रकृतिं भजते पशुः ॥
तद्वदज्ञो ज्ञमध्यस्थः कश्चिन्मौखर्य्यसाधनः ।
स्थापयत्याप्तमात्मानमाप्तन्त्वासाद्य भिद्यते ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥)
तत्र ग्राम्यारण्यभेदेन चतुर्द्दशविधाः पशवो यथा,

"गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। महिषवानरऋक्षसरी-सृपरुरुपृषतमृगाश्चेति सप्तारण्याः पशवः॥"

इति दुर्गोत्सवतत्त्वे पैठीनसिः॥ * ॥ वैद्यके भूशयजाङ्गलभेदेन स द्विविधः। तत्र विलशायित्वात् भूशया नकुलगोधादयः। तेषां मांसगुणाः।

"प्रसहा भूशयानपवारिजा वारिचारिणः।
गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः॥
स्थलजा जाङ्गलाः प्रोक्ता मृगा जङ्गलचारिणः।
जाङ्गला हरिणच्छागादयः। तेषां मांसगुणाः।
लघवः शीतमधुराः सकषाया हिता नृणाम्॥
तेषामवयवादीनां गुणः।
गृहमध्या बहुभुजो ये चोपचितमेदसः।
एकदेहेऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम्॥
सर्व्वेषाञ्च शिरःस्कन्धक्रोडचर्म्मयकृद्गुदम्।
पादपुच्छान्त्रमस्तिष्कमुष्कक्रोडाः समेहनाः।
धातवः शोणिताद्याश्च गुरवः स्युः परस्परम्॥"

इति राजवल्लभः॥ * ॥

("तत्र गजगवयमहिषरुरुचमरसृमररोहित-वराहखड्गिगोकर्णकालपुच्छ-कोन्द्रन्यङ्कुरण्य-गवयप्रभृतयः कूलचराः पशवः।" एषां गुणा यथा,—

"वातपित्तहरा वृष्या मधुरा रसपाकयोः।
शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥

"उष्ट्रा गजा वाजिनश्च महिषाः सौरभाजकाः।
खरसूकरमेषाश्च श्वा च मार्ज्जारमूषकाः।
इत्येते पशवो ज्ञेया ग्रामवासनिवासिनः॥"

इति हारीते प्रथमस्थाने एकादशेऽध्याये॥)

छागादौ पशुपदप्रयोगमाह यज्ञपार्श्वः।

"उष्ट्रो वा यदि वा मेषश्छागो वा यदि वा हयः।
पशुस्थाने नियुक्तानां पशुशब्दोऽभिधीयते॥"

इति बलिदानप्रकरणे तिथितत्त्वम्॥ * ॥

अवैधपशुहनने दोषो यथा,—

"वसेत् स नरके घोरे दिनानि पशुरोमभिः।
सम्मितानि दुराचारो यो हन्त्यविधिना पशून्॥"

इति गारुडे ९५ अध्यायः॥ * ॥

पश्वधिष्ठात्री देवता यथा,—

"सिंहे वसति दुर्गा च शरभे च प्रजापतिः।
एणे च वसते वायुर्मेषे चैव च चन्द्रमाः॥
नलभागे च शशके कृष्णसारे हरिः स्वयम्।
शतक्रतुर्गजे एष गवये भुवनानि च॥
शशके मङ्गलाद्यष्टौ गजे विनायकेश्वरः।
अश्वे तु द्वादशादित्या आख्याः सर्व्वदेवताः॥
ब्रह्मा तु चामरे चैव छागले तु तथानलः।
एतस्मात् कारणाद्देवि पूज्या वन्द्याः प्रयत्नतः॥"

इति मत्स्यसूक्ततन्त्रे ३८ पटलः॥ * ॥

प्रमथः। देवः। प्राणिमात्रम्। इति शब्द-रत्नावली॥ छागलः। यज्ञः। संसारिणामात्मा। इति धरणिः॥ यज्ञोडुम्बरः। इति शब्द-चन्द्रिका॥ * ॥ * ॥ साधकानां भावत्रयाणां प्रथमो भावः। तस्य निर्णयो यथा, षष्ठपटले।

"पशुभावस्थितानां नाथ। देवतां शृणु विस्तरात्।
दुर्गापूजां विष्णुपूजां शिवपूजाञ्च नित्यशः॥
अवश्यं हि यः करोति स पशुरुत्तमः स्मृतः।
केवलं शिवपूजाञ्च यः करोति च साधकः॥
पशूनां मध्यतः श्रीमान् शिवया सह चोत्तमः।
केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः॥
भूतानां देवतानाञ्च सेवां कुर्व्वन्ति सर्व्वदा।
पशूनामधमाः प्रोक्ता नरकस्था न संशयः॥
त्वत्सेवां मम सेवाञ्च ब्रह्मविष्ण्वादिसेवनम्।
कृत्वान्यसर्व्वभूतानां नायिकानां महाप्रभो। ॥
यक्षिणीनां भूतिनीनां ततः सेवां शुभप्रदाम्।
यः पशुर्ब्रह्मकृष्णादिसेवाञ्च कुरुते सदा॥
तथा श्रीतारकब्रह्मसेवां ये वा नरोत्तमाः।
तेषामसाध्या भूतादिदेवता सर्व्वकामहा॥
वर्ज्जयेत् पशुमार्गेण विष्णुसेवापरो जनः॥"

द्वितीयपटले।

"नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्।
देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्॥
गुरोराज्ञापालनञ्च देवतानित्यपूजनम्।
पशुभावस्थितो मर्त्त्यो महासिद्धिं लभेद्ध्रुवम्॥"

षष्ठपटले।

"पुनर्भावं पशोरेव शृणुष्वादरपूर्व्वकम्।
अकस्मात् सिद्धिमाप्नोति पशुर्नारायणोपमः॥
वैकुण्ठनगरं याति चतुर्भुजकलेवरः।
शङ्खचक्रगदापद्महस्तो गरुडवाहनः॥
महाधर्म्मस्वरूपोऽसौ महाविद्याप्रसादतः।
पशुभाव महाभावं भावानां सिद्धिदं परम्॥
आदौ भावं पशोः कृत्वा पश्चात् कुर्य्यादवश्यकम्।
वीरभाव महाभाव सर्व्वभावोत्तमोत्तमम्।
तत्पश्चादतिसौन्दर्य्यं दिव्यभाव महाफलम्॥"

इति रुद्रयामले उत्तरखण्डम्॥ * ॥

तस्य कालो यथा, —

"आदौ दशमदण्डेन पशुभावमथापि वा॥"

इति तत्रैव।

"जन्ममात्रं पशुभाव वर्षषोडशकावधि॥"

इति वामकेश्वरे ५१ पटलः॥ * ॥

पशुभावकर्त्तव्याकर्त्तव्यगर्भतद्भावनिन्दामाह।

"पशुभावरता ये च केवलं पशुरूपिणः।
रात्रौ यन्त्रञ्च मन्त्रञ्च न स्पृशेत् न जपेत् क्वचित्॥
संशयो बलिदाने च तन्त्रे च संशयः सदा।
मन्त्रे चाक्षरबुद्धिश्च अविश्वासो गुरौ सदा॥
प्रतिमासु शिलाबुद्धिर्भेदको देवते पुनः।
निरामिषेण देवेशि। देवतायाः प्रपूजनम्॥
अज्ञानेन सदा स्नानं प्रत्यहं दन्तधावनम्।
सर्व्वथा चैव निन्दास्तु यः कुर्य्याच्च महेश्वरि।।
स एव पशुभावेन अधमः परिकीर्त्तितः॥"

इति रुद्रयामले उत्तरखण्डे ६ पटलः॥ * ॥

"रात्रौ नैव यजेद्देवीं सन्ध्यायां वा पराह्णके।
ऋतुकालं विना देवि। रमणं परिवर्ज्जयेत्॥
मांसादिकं महेशानि। त्यजेत् पञ्चसु पर्व्वसु।
यदन्यद्वेदविहितं कुर्य्यान्नियमतत्परः॥"

इति नित्यातन्त्रे १ पटलः॥ * ॥

पशूनां व्रतभङ्गप्रायश्चित्तं यथा,—

"पशूनां व्रतभङ्गादौ विधिं प्रथमतः शृणु।
व्रतभङ्गे नित्यभङ्गे नित्यपूजादिकर्म्मणि।
सहस्रं प्रजपेन्मन्त्री व्रतदोषोपशान्तये॥"

इति रुद्रयामले उत्तरखण्डे २ पटलः॥

पशु, व्य, (दृश्यते इति। दृश + "अव्ययीभावाच्च" इति।" उणां ।१।२८। इति भावे कुः पशि-आदेशश्च।) दर्शनम्। इति मेदिनी। शे, १०॥

पशुक्रिया, स्त्री, (पशोरिव क्रिया कार्य्यम्।) मैथुनम्। इति हेमचन्द्रः। ३।२०१॥ (पशुना छागादिजन्तुना क्रिया इति विग्रहे छागादि पशुबलिदानकार्य्यम्। यथा, हरिवंशे।५७।५२।

"कृतानुयात्रा भूतैस्त्वं नित्यं मांसबलिप्रिया।
तिथौ नवम्यां पूजाञ्च प्राप्स्यसे सपशुक्रियाम्॥")

पशुगायत्री, स्त्री, (पशुकर्णजप्या गायत्री। बलिदानीयपशुकर्णजप्यमन्त्रविशेषः। यथा,— पशुकर्णे पशुगायत्रीं जपेत्। सा यथा। "पशुपाशाय विद्महे शिरश्छेदाय धीमहि तन्नः पशुः प्रचोदयात्।" इति दुर्गोत्सवप्रयोगः॥

पशुपतिः, पुं, (पशूनां स्थावरजङ्गमानां पतिः।) शिवः। इत्यमरः। १। १। ३२॥ (यथा महाभारते। १३। १७। १३४।

"ऊर्द्ध्वगात्मा पशुपतिर्व्वातरंहा मनोजवः॥"

तस्य निरुक्तिर्यथा चिन्तामणिधृतवचने,—

"ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्त्तिताः
तेषां पतिर्महादेवः स्मृतः पशुपतिः श्रुतौ॥")

अपरा निरुक्तिर्यथा, वराहपुराणे।

"अहञ्च सर्व्वविद्यानां पतिराद्यः सनातनः।
अहं वै पतिभावेन पशुमध्ये व्यवस्थितः।
अतः पशुपतिर्नाम त्वं लोके ख्यातिमेष्यसि॥"

अयं यजमानमूर्त्तिः। यथा। पशुपतये यजमानमूर्त्तये नमः। इत्यष्टमूर्त्तिपूजायां भविष्यपुराणम्॥ (महादेवो हि नेपाले पीठस्थाने पशुपतिरित्याख्यया विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवस्य शतनामस्तोत्रे,—

"नेपाले च पशुपतिः केदारे परमेश्वरः॥")

पशुपल्वलं, क्ली, (पशुप्रियं पल्वलं क्षुद्रजलाशयः उत्पत्तिस्थानत्वेनास्त्यस्य। अच। पशुप्रियपल्वलमिवेति केचित्।) कैवर्त्तीमुस्तकम्। इति शब्दचन्द्रिका॥

पशुपाशकः, पुं, (पशूनामिव पाशो बन्धनं यत्र ततः कप्।) रतिबन्धविशेषः। यथा,—

"स्त्रियमानतपूर्व्वाङ्गीं स्वपादान्तःपदद्वयम्।
ऊर्द्ध्वांशेन रमेत् कामी बन्धोऽयं पशुपाशकः॥"

इति रतिमञ्जरी॥

पशुप्रेरणं, क्ली, (पशूनां प्रेरणम्।) गवादीनां चालनम्। तत्पर्य्यायः। उदजः २। इत्यमरः। ३। २। ३८॥

पशुमोहनिका, स्त्री, (मुह्यतेऽनया। मुह + ल्युट्। स्वार्थे कन् टापि अत इत्वम्। ततः पशूनां मोहनिका।) कटुकी लता। इति राजनिर्घण्टः॥ (कट्वीशब्देऽस्या विशेषो ज्ञेयः॥)

पशुरज्जुः, स्त्री, पशूनामश्वादीनां बन्धनाय रज्जुः। तत्पर्य्यायः। दामनी २। इत्यमरः। २।६।७३॥ बन्धनी ३। इति शब्दरत्नावली॥

पशुराजः, पुं, (पशूनां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति समासान्तटच्।) सिंहः। इति शब्दचन्द्रिका॥

पशुहरीतकी, स्त्री, (पशूनां हरीतकीव हितकारित्वात्।) आम्रातकफलम्। इति त्रिकाण्डशेषः॥

पश्चात्, व्य, (अपरस्मिन् अपरस्मात् अपरो वा वसति आगतो रमणीयं वा। "पश्चात्।" ५।३।३२। इति अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातेर्विषये।) प्रतीची। चरमम्। इत्यमरः। ३।३।२४२॥ (यथा, रघुः।४।३०।
"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः॥")
अधिकारः। इति मेदिनी। ते, ३१॥

पश्चात्तापः, पुं, (पश्चात् अयतोऽकार्य्ये कृते चरमे तापः।) अनुशोचनम्। चरमे शोकः। पस्तान इति भाषा। तत्पर्य्यायः। अनुतापः २ विप्रतीसारः ३। इत्यमरः। १।७।२५॥ (यथा, रामायणे। ३।५१।३६।
"उक्त्वेति परुषं वाक्यं पश्चात्तापसमन्वितः॥"
केचित्तु पश्चात् ताप इति पदद्वयमिच्छन्ति॥)

पश्चार्द्धः, त्रि, (अपरश्चासावर्द्धश्च इति। "अपरस्यार्द्धे पश्चभावो वक्तव्यः।" २।१।५८। इत्यस्य वार्त्तिं इति पश्चभावः।) शेषार्द्धः। अपरार्द्धः। यथा, शकुन्तलायाम्। १ अङ्के।
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम्॥"

पश्चिमं, त्रि, (पश्चाद्भवम् "अग्रादिपश्चात् डिमच्।" ४।३।२३। इत्यस्य वार्त्तिं इति डिमच्।) पश्चाद्भवम्। इत्यमरः। ३।१।८१॥ (यथा, रघुः। १७।८।
"तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः।
स्मरन्तः पश्चिमामाज्ञां भर्त्तुः संग्रामयायिनः॥")

पश्चिमा, स्त्री, (पश्चिम+टाप्।) अस्ताचलावच्छिन्नदिक्। तत्पर्य्यायः। प्रतीची२ वारुणी३ प्रत्यक् ४। तद्दिग्भववायुगुणाः।
"पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः।
सद्यः प्राणहरो दुष्टः शोषकारी शरीरिणाम्॥"
इति राजनिर्घण्टः॥
अपिच। राजवल्लभः।
"पश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः।
कषायः शोषणः स्वर्य्यो रोचनो विशदो लघुः॥
अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः।
सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत्॥
व्रणसंरोपणस्त्वच्यो दाहशोषहरापहः॥"
तद्दिगधिपतिर्वरुणः। यथा, अमरे। १।३।१।
"इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत्।
कुवेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्
तद्दिक्पतयो मिथुन तुलाकुम्भराशयश्च। यथा,
"प्रागादिककुभान्नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिरावृत्तिपरिभ्रमात्॥"
इति ज्योतिस्तत्त्वम्॥

पश्य, व्य, प्रशंसा। विस्मयः। इति शब्दरत्नावली॥ (पश्यतीति व्युत्पत्त्या "पाघ्राध्माधेट्दृशः शः।" ३।१।१३७। इति शप्रत्ययेन पश्यो वाच्यलिङ्गः। दर्शकः। यथा, मुण्डकोपनिषदि। ३।१।३।
"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥")

पश्यतिकर्म्मा, [न्] पुं, (पश्यतिर्दर्शनमेव कर्म्म यस्य।) दर्शनकर्म्मा। तद्वैदिकपर्य्यायाः। चिक्यात् १ चाकनत् २ आचष्ट ३ चष्टे ४ विचष्टे ५ विचर्षणिः ६ विश्वचर्षणिः ७ अवचाकशत् ८। इत्यष्टौ पश्यतिकर्म्माणः। इति वेदनिघण्टौ ३ अध्यायः॥

पश्यतोहरः, त्रि, (पश्यन्तं जनमनादृत्य हरतीति। हृञ् हरणे+अच्। "षष्ठी चानादरे।" २।३।३८। इति अनादरे षष्ठी। "वागदिक्पश्यद्भ्यो युक्तिदण्डहरेषु।" ६।३।२१। इत्यस्य वार्त्तिं इति षष्ठ्या अलुक्।) चौरः। यथा, हेमचन्द्रे। ३।४६।
"यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः॥"

पश्यन् [त्], त्रि, (पश्यतीति। दृशिरौ प्रेक्षणे+"लटः शतृशानचाविति।" ३।२।१२४। इति शतृ।) ईक्षणकर्त्ता। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ९२।२६।
"इत्युक्ता सा भगवती चण्डिका चण्डविक्रमा।
पश्यतामेव देवानां तत्रैवान्तरधीयत॥")

पश्यन्ती, स्त्री, (पश्यति या दृश्+शतृ+ङीप्। ततः "शप्श्यनोर्नित्यम्।"७।१।८१। इति नुम्।) मूलाधारोत्थितहृदयगतनादरूपवर्णः। यथा,—
"मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः॥"
इत्यलङ्कारकौस्तुभः॥
(यथाच,—
"वैखरीशक्तिनिष्पत्तिर्मध्यमा श्रुतिगोचरा।
द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी॥"
इति मल्लिनाथधृतवाक्यम्॥
ईक्षणकर्त्री। इति व्याकरणम्॥)

पश्वाचारः, पु, (पशूनां तन्त्रोक्ताधिकारिविशेषाणामाचारः।) आचारविशेषः। यथा,—
"वेदोक्तेन यजेद्देवीं कामसङ्कल्पपूर्व्वकम्।
स एव वैदिकाचारः पश्वाचारः स उच्यते॥"
इत्याचारभेदतन्त्रम्॥

पष, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पाषयति। तालव्यान्त एवायमिति बहवः। दन्त्यान्त इति केचित्। मूर्द्धन्यान्तपाठस्तु कस्यचिदनुरोधात्। इति दुर्गादासः॥

पष, ञ बाधे। ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, पषति पषते। बाधो विहतिः। ग्रन्थो ग्रन्थनम्। ग्रन्थनस्थाने स्पर्शनं केचित् पठन्ति। इति दुर्गादासः॥

पष, त् क अनुपसर्गाद्बन्धबाधयोः। स्पर्शगत्योः। इति कविकल्पद्रुमः॥ (अदन्तचुरां परं सकं-सेट्।) मूर्द्धन्योपधः। क, पषयति। अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते। बाधो विहतिः। इति दुर्गादासः॥

पस, इ क नाशे। इति कविकल्पद्रुमः। (चुरां परं सकं-सेट्।) नाश इह नष्टीकरणम्। इ क, पंसयति पापं गङ्गा। इति दुर्गादासः॥

पस, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं सेट्।) क पासयति। पृथक्पाठादयं न ञित्। अन्यथा पस कि ञ इत्यनेनैव सिद्धे पृथक्पाठोऽनर्थकः स्यात्। इति दुर्गादासः॥

पस, ञ बाधे। ग्रन्थे। इति कविकल्पद्रुमः। (भ्वां उभं-सकं-सेट्।) ञ, पसति पसते। इति दुर्गादासः॥

पस्त्यं, क्ली, (अपस्त्यायन्ति सङ्घीभूय तिष्ठन्ति जीवा यत्र। अप+स्त्यै सङ्घातशब्दयोः+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। उपसर्गस्याकारलोपो निपातनात्।) गृहम्। इति हेमचन्द्रः। ४।५६॥ (यथा, ऋग्वेदे। १०।९६।११।
"प्र पस्त्यमसुर हर्य्यतं गोराविष्कृधि हरये [सूर्य्याय॥")

पह्लवः, पु, श्मश्रुधारिम्लेच्छजातिविशेषः। तस्य विवरणं यथा, हरिवंशे। १४।१५—१९।
"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलाः सर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्त्रियास्तात। धर्म्मस्तेषां निराकृतः।
वशिष्ठवचनाद्राजन्। सगरेण महात्मना॥"
(क्वचित पह्नवः पाठोऽपि दृश्यते। यथा, रामायणे। १।५५।१८।
"तस्या हुम्भारवोत्सृष्टाः पह्नवाः शतशो नृप।
नाशयन् बलं सर्व्वं विश्वामित्रस्य पश्यतः॥")

पह्निका स्त्री, वारिपर्णी। इति शब्दमाला॥

पा, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अस्यैव पिबादेशः। पिबति पयः पान्थः। इति दुर्गादासः॥

पा, ल रक्षणे। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) ल, पाति। इति दुर्गादासः॥

पाः, त्रि, (पिबतीति । पा पाने + क्विप् ।) पानकर्त्ता ॥ (पाति रक्षतीति । पा रक्षणे + क्विप् ।) रक्षककर्त्ता । ("विश्वं पातीति विश्वपाः ।" इति मुग्धबोधव्याकरणम् ॥)

पांशवः, पुं, (पांशोर्लवणविशेषस्य विकारः । पांशु + अण् ।) लवणविशेषः । पांशा लोन इति भाषा ॥ तत्पर्य्यायः । रोमकम् २ औद्भिज्जम् ३ वसुकम् ४ वसुपांशुः ५ ऊषरजम् ६ औषरम् ७ ऐरिणम् ८ औत्थम् ९ सद्यम् १० । अस्य गुणाः । तीक्ष्णत्वम् । अत्युष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । पित्तकोपकरत्वञ्च । इति राजनिर्घण्टः ॥

"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम् ॥"
इति भावप्रकाशः ॥

पांशुः, पुं, (पंशयति नाशयति आत्मानमिति । पशि नाशने + "अर्ज्जिदृशिकमीति ।" उणां । १ । २८ । इति कुः दीर्घश्च ।) धूलिः । इत्यमरः । २ । ८ । ९८ ॥ (यथा, मनुः । ४ । १०२ ।
"कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥")
शुष्कार्द्धचिरसञ्चितगोमयः । सार इति भाषा ॥ इति मेदिनी । शे, ११ ॥ पर्पटः । कर्पूरविशेषः । इति राजनिर्घण्टः ॥ (दन्त्यसकारान्तोऽपि दृश्यते ॥)

पांशुकासीसं, क्ली, (पांशुरिव कासीसम् ।) कासीसम् । इति राजनिर्घण्टः ॥

पांशुकुली, स्त्री, (पांशुना कोलति आकुलीभवतीति । कुल + कः । ततः स्त्रियां ङीष् ।) राजमार्गः । यथा ।"रथ्या पांशुकुली भवेत् ।" इति हारावली । ११० ॥

पांशुकूलं, क्ली, (पांशोः कूलमिव ।) अनामपत्रोलिका । यथा, त्रिकाण्डशेषे ।
"शासनं धर्म्मकीलः स्यात्प्रकृतिः शूद्रशासनम् ।
पत्रोलिका कल्पकीला पांशुकूलं न कस्यचित् ॥"

पांशुचत्वरः, पुं, (पांशुभिश्चत्वर इव ।) घनोपलः । इति शब्दमाला ॥

पांशुचन्दनः, पुं, (पांशुश्चिताभस्मरजश्चन्दनमिव यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥

पांशुचामरः, पुं, (पांशुर्धूलिश्चामर इव यस्य ।) पटवासः । इति जटाधरः ॥ तांबु इति भाषा ॥ (पांशौ दूर्वा चामर इव यस्य ।) दूर्वाचिततटी भूमिः । वर्ह्यापकः । प्रशंसा । पुरोटिः । धूलिगुच्छकः । इति मेदिनी । रे, ३०५ ॥

पांशुजं, क्ली, (पांशोर्जायते इति । पांशु + जन् + डः ।) पांशुलवणम् । पांशा लोन इति भाषा ॥ तत्पर्य्यायः । ऊषम् २ औद्भिदम् ३ पाक्यम् ४ लवणम् ५ पटु ६ । इति रत्नमाला ॥ अस्य गुणाः । भेदकत्वम् । पाचनत्वम् । पित्तकारित्वम् । इति राजवल्लभः ॥

पांशुपत्रं, क्ली, (पांशुः कर्पूर इव सुगन्धि पत्रमस्य ।) वास्तुकम् । इति शब्दमाला ॥

पांशुमर्द्दनः, पुं, (मृद्यतेऽनेनेति । मृद् + ल्युट् । मर्द्दनः । ततः पांशुः मर्द्दनो यत्र । यद्वा पांशोर्मर्द्दनं यत्र ।) केदारः । इति त्रिकाण्डशेषः ॥

पांशुरः, पुं, (पांशुं चिरसञ्चितगोमयादिकसत्पत्तित्वेन रातीति । पांशु + रा + कः ।) दंशकः । डाँश इति भाषा ॥ पीठसर्पी । खञ्जः । इति हारावली । १२३ ॥ (पांशुरस्यास्तीति । "नगपांशुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्ति इति रः । पांशुविशिष्टे, त्रि ॥ यथा, ऋग्वेदे । १ । २२ । १७ ।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांशु(सु)रे ॥")

पांशुरागिणी, स्त्री, (पांशुरागो विद्यतेऽस्याः । इनिः स्त्रियां ङीप् च ।) महामेदा । इति राजनिर्घण्टः ॥

पांशुलः, पुं, (पांशुर्विद्यतेऽस्य । पांशु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) हरः । पापी । इति शब्दरत्नावली ॥ पुंश्चलः । शम्भोः खट्वाङ्गम् । इति मेदिनी । ले, १०८ ॥ पूतिकः । काँटाकरञ्ज इति भाषा ॥ इति शब्दचन्द्रिका ॥ पांशुयुक्ते त्रि । इति धरणिः ॥ (पांशुर्दोषः पापञ्च तद्युक्ते च त्रि । यथा, रघुः । २२ ।
"तस्याः खुरन्यासपवित्रपांशु-
मपांशुलानां धुरि कीर्त्तनीया ।
मार्गं मनुष्येश्वरधर्म्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥")

पांशुला, स्त्री, (पांशुल + टाप् ।) कुलटा । भूमिः । इति शब्दरत्नावली ॥ केतकी । रजस्वला । इति राजनिर्घण्टः ॥

पांसनः, त्रि, (पंसयति गुणादिकं नाशयतीति । पसि + ल्युः । बाहुलकात् दीर्घः ।) दूषकः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १५४ । ३३ ॥
"निराबाधास्त्वयि हते मया राक्षसपांसन ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥")

पांसुः, पुं, (पंसयतीति । पसि नाशने + "अर्ज्जिदृशिकमीति ।" उणां । १ । २८ । इति कुर्दीर्घश्च ।) धूलिः । (यथा, रामायणे । २ । ८० । ६ ।
"अपरे पूरयन् कूपान् पांसुभिः श्वभ्रमायतम् ।
निम्नभागांस्तथैवाशु समांश्चक्रुः समन्ततः ॥")
चिरसञ्चितगोमयम् । इत्युणादिकोषः भरतश्च ॥ सार इति भाषा ॥

पाकः, पुं, (पच् + भावे घञ् ।) पचनम् । क्लेदनम् । तत्पर्य्यायः । पचा २ । इत्यमरः । ३ । २ । ८ ॥ रन्धनम् । स तु सप्तप्रकारो यथा,—
"भर्ज्जनं तलनं स्वेदः पचनं क्वथनं तथा ।
तान्दूरं पुटपाकश्च पाकः सप्तविधो मतः ॥"
भर्ज्जनं केवलपात्रे । तलनं स्नेहद्रव्ये । स्वेदनं अम्बूष्मणि । पचनं जले । क्वथनं सिद्धद्रवरसग्रहणे । तान्दूरं द्वारबहुलताप्रयत्ने । पुटपाकः अधोर्द्धाग्नितापे ज्ञेयः । इति पाकराजेश्वरः ॥

स्थालीभाण्डगताद्योदनपरीपाको व्यापारनिचयः पाकः । इति स्मृतिः ॥ * ॥ पाकभाण्डस्य त्याज्यत्वं यथा,—
"नित्यं नूतनभाण्डेन कर्त्तव्यः पाक एव च ।
अथवा पक्षपर्य्यन्तं ततस्त्याज्यं मनीषिभिः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
पाककाले शूद्रायामिषदाननिषेधो यथा,—
"शूद्रायामिषं यो दद्यात् पाककाले विशेषतः ।
शूद्रापक्वं भवेदन्नं ब्राह्मणः शूद्रतामियात् ॥"
इति कर्म्मलोचनम् ॥ * ॥
एकोद्दिष्टश्राद्धे तस्य नियमो यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहःसमुपोषणम् ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
तस्य विधिर्यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अवागाशाभिमुखे पक्वमन्नं तामसं विजानता ।
पूर्व्वामुखो धर्म्मकामः शोकहानिश्च दक्षिणे ॥
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः ॥
यदा तु आयसे पात्रे पक्वमन्नानि वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्वा चतुर्हानिर्मणौ भवति वै चयम् ॥
पितृभ्यां पक्वमन्नञ्च पितृयोगा यशस्विनि ! ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
भ्रातृकेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं शोणितं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वन्तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥
उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्द्देन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत् ।
गर्हितान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत् ।
अग्रजा या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कलिपञ्चानकस्यैव वच्चावारणकस्य च ।
भेरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥
यदा मृण्मयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासं पक्षे तथाष्टौ च तत्पाकं विसृजेत् गृही ॥
धनुः पाके तथा सिंहे मिथुने वा वरानने ! ।
यः कुर्य्याद्भोजनं देवि । कृच्छ्रेणैव विशुध्यति ॥
एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"
इति मत्स्यसूक्ते ४२ पटलः ॥ * ॥
परिणतिः । (यथा, मार्कण्डेये । ७० । ३४ ।
"स्वकर्म्मफलपाकेन भर्त्तुस्तस्य महात्मनः ।
वियोजिताहं तद्धेतुरयमासीन् निशाचरः ॥"
पिबति स्तन्यादिकं इति । पा पाने + "इण्भीकापाशल्यतिमर्च्चिभ्यः कन् ।" उणां । ३ । ४३ । इति कन् ।) शिशुः । जरया केशस्य शौक्ल्यम् । स्थाल्यादि । इति मेदिनी । के, २८ ॥

पेचक:। राढादि। भङ्ग:। भीति:। इति शब्द-
रत्नावली ॥ दैत्य:। इति हेमचन्द्र:। २।९८॥
(यथा, भागवते। ७।२।४।
"भो भो दानवदैतेया! द्विमूर्द्धन्! त्र्यक्ष! शम्बर!।
शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!॥"
पिबतीति। पा+"इणभीकापेति।" उणां
३।४३। इति कन्।) पानकर्त्तरि त्रि॥

पाकलघ्या:, पुं, (पाके लघ्यं फले यस्य।) लघ्य-
फलपाक:। मागी आमला। इति शब्द-
चन्द्रिका॥

पाकलघ्यफल:, पुं, (पाके लघ्यं फलं यस्य।)
पाकलघ्या:। इति शब्दमाला॥

पाकजं, क्ली, (पाकात् जायते इति। पाक+
जन्+ड।) काचलवणम्। परिणामशूलम्।
इति राजनिर्घण्ट:॥ (पाकजाते त्रि। यथा,
भाषापरिच्छेदे। ३६।
"स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकज:॥")

पाकपुटी, स्त्री, (पाकाय पुटी।) कुम्भशाला।
इति हेमचन्द्र:।४।६६६॥ पोयान् इति भाषा॥

पाकफल:, पुं, (पाकलघ्यं फलमस्य।) फलपाक:।
इति शब्दचन्द्रिका॥ मागी आमला इति
भाषा॥

पाकभाण्डं, क्ली, (पाकाय पाकस्य वा भाण्डम्।)
पाकपात्रम्। यथा,—
"यस्य यस्य तु वर्णस्य यद्यत् स्यात्
पश्चिमन्त्वह:।
स तत्र गृहशुद्धिञ्च वस्त्रशुद्धिं करोत्यपि॥
पश्चिमन्त्वह: अशौचान्तादिनम्। गृहशुद्धिं प्रा-
क्तनपाकभाण्डत्यागोल्लेपनमार्जनादिना।" इति शुद्धि-
तत्त्वम्॥

पाकमत्स्य:, पुं, (पाक: पाकयुक्तो मत्स्यो यत्र।)
मत्स्यव्यञ्जनम्। तत्पर्य्याय:। मत्स्यलम् २।
इति शब्दचन्द्रिका॥ (समुद्रजातमत्स्य-
विशेष:। यथा, सुश्रुते सूत्रस्थाने। ४६
अध्याये। "तिमितिमिङ्गिलकुलिशपाकमत्स्य-
निरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहा-
मीनराजीवप्रभृतय: सामुद्रा:॥" कीटविशेष:।
यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"पद्मकीटा दुन्दुभिको मकर: शतपादक:।
पञ्चालक: पाकमत्स्य: कृष्णतुण्डोऽथ गर्द्दभी॥")

पाकयज्ञ:, पु, (पाकसाध्यो यज्ञ:। शाकपार्थिव-
वत् समास:।) वृषोत्सर्गगृहप्रतिष्ठादीनां
होम:। चरुहोमाङ्गककर्म्म। यथा,—
"प्रायश्चित्तं विधुश्चैव पाकयज्ञे तु साहस:॥"
इति तिथितत्त्वम्॥
(ब्रह्मयज्ञादन्ये पञ्चमहायज्ञान्तर्गता वैश्वदेव
होमबलिकर्म्मनित्यश्राद्धातिथिभोजनात्मका-
श्चत्वार: पाकयज्ञा:। यथा, मनु:। २। ८६।
"ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विता:।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम्॥"
अष्टकाद्योऽपि पाकयज्ञा:। यथा, तत्रैव।
२। १४३।
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्।
य: करोति वृतो यस्य स तस्यर्त्विगिहोच्यते॥"
"अष्टकादीन् पाकयज्ञान्।" इति तट्टीकायां
कुल्लुकभट्ट:॥)

पाकयज्ञिक:, पुं, (पाकयज्ञं करोतीति। पाकयज्ञ
+ठञ्।) पाकयज्ञकर्म्मा। (पाकयज्ञस्य व्याख्यान
स्तत्र भवो वा। "क्रतुयज्ञेभ्यश्च।" ४।३।
६८। इति ठञ्। पाकयज्ञव्याख्यानग्रन्थ:।
पाकयज्ञभवश्च। इति व्याकरणम्॥)

पाकरञ्जनं, क्ली, (पाकं पच्यमानं रञ्जयतीति।
रञ्ज+णिच्+ल्यु:।) तेजपत्रम्। इति शब्द-
चन्द्रिका॥

पाकलं, क्ली, (पाकं लातीति। ला+"आतो-
ऽनुपसर्गे क:।"३।२।३। इति क:।) कुष्ठौ-
षधि:। इत्यमर:। २।४।१२६॥

पाकल:, पुं, (पाक+ला+क:।) कुञ्जरज्वर:।
इति मेदिनी। ले, १०८॥ बोधनद्रव्यम्।
अनिल:। अनल:। इति विश्व:॥ व्रणादि-
कारिणि, त्रि॥

पाकलि:, स्त्री, (पाक+ला+इन्।) वृक्ष-
विशेष:। इति रत्नमाला। रोहिणीति केचित्॥

पाकली, स्त्री, (पाकलि+ङीष्।) कर्कटी। इति
शब्दमाला॥

पाकशाला, स्त्री, (पाकस्य शाला गृहम्।)
रन्धनगृहम्। तत्पर्य्याय:। रसवती २। इति
जटाधर:॥ पाकस्थानम् ३ महानसम् ४। इत्य-
मर:। २।६।२७॥ अग्निकोणे तस्या:
कर्त्तव्यता। यथा,—
"प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्।
शयनं याम्यदिग्भागे नैरृत्यां शस्त्रमन्दिरम्॥
प्रतीच्यां भोजनगृहं वायुभागे सभागृहम्।
भाण्डारसदनं सौम्ये त्वैशान्यां देवतालयम्॥"
इति मुहूर्त्तचिन्तामणिटीकायां
पीयूषधारायां कश्यपवचनम्॥

पाकशासन:, पुं, (शास्तीति। शास+ल्यु:। तत:
पाकस्य तन्नाम्नया प्रसिद्धस्य असुरस्य शासन:
शास्ता।) इन्द्र:। इत्यमर:। १।१।४४॥ तन्नाम
कारणं यथा, वामनपुराणे।
"पाकं जघान तीक्ष्णाग्रैर्म्मार्गणै: कङ्कवाससै:।
तत्र नाम विभुर्लेभे शासनत्वाच्छरैर्दृढै:।
पाकशासनतां शक्र: सर्व्वामरपतिर्व्विभु:॥"

पाकशासनि:, पु, (पाकशासनस्यापत्यम्। "अत
इञ्।" ४।१।९५। इति इञ्।) इन्द्रपुत्त्र:।
जयन्त:। इत्यमर:। १।१।४९॥ (अर्ज्जुन:।
यथा, महाभारते। १। १३७। ८।
"सोऽब्रवीन्मेघगम्भीरस्वरेण वदताम्बर:।
भ्राता भ्रातरमज्ञातं सावित्र: पाकशासनिम्॥")

पाकशुक्ला, स्त्री, (पाके परिणामे शुक्ला।) खड़ी।
यथा, शब्दचन्द्रिकायाम्।
"पाकशुक्ला शिलाधातु: कठिनी कक्खटी खड़ी॥"

पाकस्थानं, क्ली, (पाकस्य स्थानम्।) महानसम्।
इत्यमर:। २।६।२७॥

पाका, स्त्री, (पाक+अजादित्वात् टाप्।)
बालिका। इति जटाधर:॥

पाकारि:, पुं, (पाकं ऋच्छतीति। ऋ गतौ+
इन्।) श्वेतकाञ्चनम्। इति रत्नमाला॥

पाकिमं, त्रि, (पाकेन निर्वृत्तम्। पाक+भाव-
प्रत्ययन्तादिमप्।) पक्त्रिमम्। पाकेन निष्प-
न्नम्। इति त्रिकाण्डशेष:॥ (यथा, सुश्रुते।
सूत्रस्थाने। ४६ अध्याये।
"भेदोघ्न: पाकिम: क्षारो मूत्रवस्तिविशोधन:॥")

पाकुक:, पुं, (पचतीति। पच पाके+"पचि-
नश्योर्णुकन्कनुमौ च।" उणां। २।३०।
इति णुकन् कादेशश्च।) सूपकार:। इत्यु-
णादिकोष:॥

पाक्यं, क्ली, (पच्यतेऽनेन। पच्+"ऋहलोर्ण्यत्।"
३।१।१२४। इति ण्यत्। "चजो: कुघिण्यतो:।"
७।३।५२। इति कुत्वम्।) विड्लवणम्।
इत्यमर:। २।९।४२॥ पांशुलवणम्। इति
रत्नमाला॥ (यथा, सुश्रुते।१।४२।
"सैन्धवसौवर्च्चलविडपाक्यरोमकसामुद्रकपक्त्रिम-
यवक्षारोषप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन
लवणो वर्ग:॥" पचनीये, त्रि। यथा, चक्रपाणि-
संग्रहे ज्वराधिकारे पित्तज्वरचिकित्सायाम्।
"अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥")

पाक्य:, पु, (पच्+ण्यत् कुत्वञ्च।) यवक्षार:।
इत्यमर:। २।९।१०९॥

पाक्षायण:, त्रि, (पक्षस्यायं पक्षे भव: पक्षेण
निर्वृत्त इति वा। पक्ष+"वुञ्छण्कठजिल।"
४।२।८०। इति फक्।) पक्षसम्बन्धी। पक्षे
भव। इति सिद्धान्तकौमुदी॥

पाक्षिक:, त्रि, (पक्षे तिष्ठतीति। पक्ष+ठक्।)
पक्षपाती। यथा,—
"स को राजा न शास्ता य: प्रजावध्यश्च [पाक्षिक:॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्याय:॥
(पक्षिणो हन्तीति। "पक्षिमत्स्यमृगान् हन्ति।"
४।४।३५। इति ठक्।) पक्षिघातक:॥
(पक्षे पक्षान्तरे भवतीति। पक्षकालभव:॥
पक्षेण निर्वृत्त इति। पक्ष+ठञ्। पक्षसाध्य:।
इति व्युत्पत्तिलभ्योऽर्थ:॥)

पाखण्ड:, पु, (पातीति। पा+क्विप्। पास्त्रयी-
धर्म्मस्तं खण्डयतीति। खडि भेदने+पचा
द्यच्। यदुक्तम्।
"पालनाच्च त्रयीधर्म्म: पाशब्देन निगद्यते।
तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना।
नानाव्रतधरा नानावेशा: पाखण्डिनो मता:॥")
पाषण्ड:। इत्यमरटीकायां भानुदीक्षित:॥

पागल:, पु, (पा रक्षणं तस्मात् गलति आत्म-
रक्षणात् विच्युतो भवतीति। गल्+अच्।)
उन्मत्त:। वातुल:। यथा,—
"पागलायाङ्गहीनाय चान्धाय बधिराय च।
जड़ाय चैव मूर्खाय क्लीवतुल्याय पापिने।
ब्रह्महत्यां लभेत् सोऽपि य: स्वकन्यां ददाति च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्याय:॥

पाचकं, क्ली, (पचतीति । पच् + ण्वुल् । पित्त-रसेन भुक्तद्रव्यपचनादस्य तथात्वम् ।) पित्त-विशेषः । यथा,—

"पाचकं भ्राजकञ्चैव रञ्जकालोचकं तथा ।
साधकञ्चैव पञ्चैति पित्तनामान्यनुक्रमात् ॥"

इति शब्दचन्द्रिका ॥

पाचकादीनां स्थानान्याह ।

"अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात् ॥"

अथ तेषां कर्म्माण्याह ।

"पाचकं पचते भुक्तं शोषाग्निबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥"

इति भावप्रकाशः ॥

("पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥
त्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम् ।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥"

इति वाभटे सूत्रस्थाने द्वादशाध्याये ॥)

पाचकः, पु, (पचतीति । पच् + ण्वुल् ।) अग्निः । इति हलायुधः ॥ ("तच्चादृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्व्विधमन्नपानं पचति विरेचयति च रसदोषमूत्रपुरीषाणि तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणानुग्रहं करोति तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा ।" इति सुश्रुते सूत्रस्थाने एकविंशेऽध्याये ॥) त्रि, सूपकारः । पाककर्त्ता । यथा,—

"शुचिशीलगुणोपेतः शास्त्रज्ञो मिष्टपाचकः ।
शूरश्च कठिनश्चैव सूपकारः स उच्यते ॥"

इति चाणक्यम् ॥

अन्नादिपाककारकौषधादिश्च ॥

पाचनं, क्ली, (पाच्यतेऽनेनेति । पच् + णिच् + करणे ल्युट् ।) प्रायश्चित्तम् । इति मेदिनी । ने, ६० ॥ दोषपाचकक्वाथौषधम् । तस्य दान-कालः । यथा, सारकौमुद्याम् ।

"ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितम् ।
सप्ताहात् परतोऽस्तब्धे सामे स्यात् पाचनं ज्वरे ॥"

सर्व्वेषां पाचनद्रव्याणां परिमाणं यथा,—

"दशरक्तिकमाषेण गृहीत्वा तोलकद्वयम् ।
दत्त्वाम्भः षोड़शगुणं ग्राह्यं पादावशेषितम् ॥"

इति परिभाषा ॥

अथ सर्व्वज्वरे पाचनम् ।

"नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम् ॥"

इति नागरादि ॥ १ ॥

अथ वातिकज्वरे ।

"विल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिकज्वरे ॥"

इति विल्वादिपञ्चमूली ॥२ ॥

"पाचनं पिप्पलीमूलगुडूची विश्वकोऽथवा ॥"

इति पिप्पलीमूलादि ॥ ३ ॥

"किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः ।
सस्थिराकलसीविल्वैः क्वाथो वातज्वरापहः ॥"

इति किरातादि ॥ ४ ॥

"रास्ना वृषादनी दारु सरलं सैलवालुकम् ।
कषायः शर्कराक्षौद्रयुक्तो वातज्वरापहः ॥"

इति रास्नादि ॥ ५ ॥

"विल्वादिपञ्चमूली च गुड़ूच्यामलकं तथा ।
कुस्तुम्बुरुसमो ह्येष कषायो वातिके ज्वरे ॥"

इति विल्वादिपञ्चमूल्यादि ॥ ६ ॥

"पिप्पलीशारिवाद्राक्षाशतपुष्पाहरेणुभिः ।
कृतः कषायः सगुड़ो हन्यात् पवनजं ज्वरम् ॥"

इति पिप्पल्यादि ॥ ७ ॥

"गुड़ूची शारिवा द्राक्षा शतपुष्पा पुनर्नवा ।
सगुड़ोऽयं कषायः स्याद्वातज्वरविनाशनः ॥"

इति गुड़ूच्यादि ॥ ८ ॥

"द्राक्षागुड़ूचीकाश्मर्य्यत्रायमाणाः सशारिवाः ।
निःक्वाथ्य सगुड़ं क्वाथं पिवेद्वातज्वरापहम् ॥"

इति द्राक्षादि ॥ ९ ॥ * ॥

अथ पैत्तिकज्वरे ।

"कलिङ्गं कट्फलं मुस्तं पाठातिक्तकरोहिणी ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"

इति कलिङ्गादि ॥ १० ॥

"सक्षौद्रं पाचनं पैत्ते तिक्ताब्देन्द्रयवैः कृतम् ॥"

इति तिक्तादि ॥ ११ ॥

"लोध्रोत्पलामृतापद्मशारिवाणां सशर्करः ।
क्वाथः पित्तज्वरं हन्यादथवा पर्पटोद्भवः ॥"

इति लोध्रादि ॥ १२ ॥ १३ ॥

"पटोलयवनिःक्वाथो मधुना मधुरीकृतः ।
तीव्रपित्तज्वरामर्द्दी पानात्तृड्दाहनाशनः ॥"

इति यवपटोलम् ॥ १४ ॥

"दुरालभापर्पटकप्रियङ्गु-
भूनिम्बवासाकटुरोहिणीनाम् ।
जलं पिवेच्छर्करयावगाढ़ं
तृष्णास्रपित्तज्वरदाहयुक्तः ॥"

इति दुरालभादि ॥१५॥

"त्रायमाणा च मधुकं पिप्पलीमूलमेव च ।
किराततिक्तकं मुस्तं मधुकं सविभीतकम् ॥
सशर्करं पीतमेतत् पित्तज्वरनिवर्हणम् ॥"

इति त्रायमाणादि ॥ १६ ॥

"मृद्वीका मधुकं निम्बं कटुकारोहिणीसमाः ।
अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम् ॥"

इति मृद्वीकादि ॥ १७ ॥

"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः ॥"

इति पर्पटकादि ॥ १८ ॥

"विश्वाम्बुपर्पटोशीरघनचन्दनसाधितम् ।
दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहनुत् ॥"

इति विश्वादि ॥ १९ ॥

"पर्पटामृतधात्रीणां क्वाथः पित्तज्वरं जयेत् ॥"

इति पर्पटादि ॥ २० ॥

"द्राक्षारग्वधयोश्चापि ॥ २१ ॥ काश्मर्य्यस्याथवा पुनः ॥ २२ ॥

द्राक्षाभयापर्पटकाब्दतिक्ता-
क्वाथं ससंपाकफलं विदध्यात् ।
प्रलापमूर्च्छाभ्रमदाहशोष-
तृष्णान्विते पित्तभवे ज्वरे तु ॥"

इति द्राक्षादि ॥ २३ ॥

"शृषितं धन्याकजलं प्रातः पीतं सशर्करं पुंसाम् ।
अन्तर्दाहं शमयत्यचिराद्दुरम्नरूढ़मपि ॥"२४॥

अथ कफज्वरे ।

"मातुलुङ्गशिफाविश्वब्रह्मीग्रन्थिकसंयुतम् ।
कफज्वरेऽम्बु सक्षारं पाचनं वा कणादिकम् ॥"

इति मातुलुङ्गादि ॥ २५ ॥

"कटुकं चित्रकं निम्बं हरिद्रेऽतिविषे वचाम् ।
कुष्ठमिन्द्रयवं मूर्व्वां पटोलञ्चापि साधितम् ॥
पिवेन्मरिचसंयुक्तं सक्षौद्रं श्लैष्मिके ज्वरे ॥"

इति कटुकादि ॥ २६ ॥

"निम्बविश्वामृतादारुशटीभूनिम्बपौष्करम् ।
पिप्पल्यौ बृहती चेति क्वाथो हन्ति कफज्वरम् ॥"

इति निम्बादि ॥ २७ ॥

"सिन्धुवारदलक्वाथं शोषणं कफजे ज्वरे ।
जङ्घयोश्च बले क्षीणे कर्णे वा पिहिते पिवेत् ॥"

इति सिन्धुवारादि ॥ २८ ॥

"आमलक्यभया कृष्णा चित्रकश्चेत्ययं गणः ।
सर्व्वज्वरकफातङ्कभेदी दीपनपाचनः ॥"

इति आमलक्यादि ॥ २९ ॥

"त्रिफलापटोलवासाच्छिन्नरुहातिक्तरोहिणी-
षड्ग्रन्थाः ॥"

इति त्रिफलादि ॥ ३० ॥

"मधुनाश्लेष्मसमुत्थे दशमूली वासकस्य वा
क्वाथः ॥"३१ ॥

"मुस्तं वत्सकबीजानि त्रिफला कटुरोहिणी ।
परूषकाणि च क्वाथः कफज्वरविनाशनः ॥"

इति मुस्तादि ॥ ३२ ॥ * ॥

अथ वातपैत्तिकज्वरे ।

"संसृष्टदोषेषु हितं संसृष्टमथ पाचनम् ॥
विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः ।
कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम् ॥"

इति नवाङ्गम् ॥ ३३ ॥

"त्रिफलाशाल्मलीरास्नाराजवृक्षाट-रूषकैः ।
शृतमम्बु हरेत्तूर्णं वातपित्तोद्भवं ज्वरम् ॥"

इति त्रिफलादि ॥ ३४ ॥

"किराततिक्तकं मुस्तं द्राक्षामामलकीं शटीम् ।
निष्क्वाथ्य पित्तानिलजे क्वथितं सगुड़ं पिवेत् ॥"

इति किराततिक्तकादि ॥ ३५ ॥

"निदिग्धिकाबलारास्नात्रायमाणामृतायुतैः ।
मसूरविदलैः क्वाथो वातपित्तज्वरं जयेत् ॥"

इति निदिग्धिकादि ॥ ३६ ॥

"गुड़ूची पर्पटं मुस्तं किरातं विश्वभेषजम् ।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥"

इति पञ्चभद्रम् ॥ ३७ ॥

"मधुकं शारिवे द्राक्षा मधूकं चन्दनोत्पलम् ।
काश्मरी पद्मकं लोध्रं त्रिफलां पद्मकेशरम् ॥
परूषकं मृणालञ्च न्यसेदुत्तमवारिणि ।

मधुलाजसितायुक्तं तत् पीतं युचितं निशि ॥
वातपित्तज्वरदाहं तृष्णामूर्च्छावमिभ्रमान् ।
शमयेद्रक्तपित्तञ्च जीमूतानिव मारुतः ॥"
इति मधुकादि ॥ ३८ ॥ * ॥

अथ पित्तश्लैष्मिकज्वरे ।

"पटोलं चन्दनं मूर्व्वातिक्तापाठामृतागणः ।
पित्तश्लेष्मानिलच्छर्द्दिज्वरकण्डूविषापहः ॥"
इति पटोलादि ॥ ३९ ॥

"गुडूचीनिम्बधन्याकं पद्मकं रक्तचन्दनम् ।
एष सर्व्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ॥
हृल्लासारोचकच्छर्द्दिपिपासादाहनाशनः ॥"
इति गुडूच्यादि ॥ ४० ॥

"किरातं नागरं मुस्तं गुडूचीञ्च कफाधिके ।
पाठोदीच्यमृणालैस्तु सह पित्ताधिके पिबेत् ॥"
इति चातुर्भद्रकपाठासप्तकौ ॥ ४१ ॥ ४२ ॥

"गुडूची चन्दनं पद्मं नागरेन्द्रयवासकम् ।
अभयारग्वधोशीरं पाठा धान्याब्दरोहिणी ॥
कषायं पाययेदेतत पिप्पलीचूर्णसंयुतम् ।
पित्तश्लेष्महरं तन्द्रापिपासादाहनाशनम् ॥
विण्मूत्रानिलविष्टम्भत्रिदोषप्रभवस्य च ।
गुडूच्यादिगणो ह्येष पाचनो दीपनः परः ॥"
इति गुडूच्यादिगणः ॥ ४३ ॥

"कण्टकार्य्यमृताभार्गी नागरेन्द्रयवासकम् ।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी ॥
कषायं पाययेदेतत पित्तश्लेष्मज्वरापहम् ।
दाहतृष्णारुचिच्छर्द्दिकासहृत्पार्श्वशूलनुत् ॥"
इति कण्टकार्य्यादि ॥ ४४ ॥

"सपत्रपुष्पवासाया रसः सौद्रसितायुतः ।
कफपित्तज्वरं हन्ति सासपित्तं सकामलम् ॥"
इति वासादि ॥ ४५ ॥

"पटोलं पिचुमर्द्दञ्च त्रिफला मधुकं बला ।
साधितोऽयं कषायः स्यात् पित्तश्लेष्मभवे ज्वरे ॥"
इति पटोलादि ॥ ४६ ॥

"गुडूचीन्द्रयवारिष्टं पटोलं कटुरोहिणी ।
नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् ॥
अमृताष्टक इत्येष पित्तश्लेष्मज्वरापहः ।
हृल्लासारोचकच्छर्द्दितृष्णादाहनिवारणः ॥"
इति अमृताष्टकम् ॥ ४७ ॥

"पटोलयवधान्याकमधुकामलकचन्दनम् ।"
पैत्तिके श्लेष्मपित्तोत्थे ज्वरतृटच्छर्द्दिदाहनुत् ॥"
इति पटोलादि ॥ ४८ ॥

क्षुद्रामृताभ्यां सह नागरेण
सपुष्करञ्चेति किराततिक्तम् ।
पिबेत् कषायं त्विह पञ्चतिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम् ॥"
इति क्षुद्रादि ॥ ४९ ॥

इति पित्तश्लैष्मिकज्वराधिकारः ॥ * ॥

अथ वातश्लैष्मिकज्वरे ।

"दीपनं कफविच्छेदि वातपित्तानुलोमनम् ।
ज्वरघ्नं पाचनं भेदि शृतं धान्यपटोलयोः ॥"
इति धान्यपटोलम् ॥ ५० ॥

"मुस्तनागरभूनिम्बं त्रयमेतत्सिकाधिकम् ।

पाचनं

कफवातप्रशमनं पाचनं ज्वरनाशनम् ॥" ५१ ॥

पिप्पली पिप्पलीमूलं चव्यं चित्रकनागरम् ।
दीपनीयः शृतो वर्गः कफानिलगदापहः ॥"
इति पञ्चकोलम् ॥ ५२ ॥

"पिप्पलीभिः शृतं तोयमनभिष्यन्दि दीपनम् ।
वातश्लेष्मविकारघ्नं शीघ्रज्वरविनाशनम् ॥"
इति पिप्पलीक्वाथः ॥ ५३ ॥

"आरग्वधग्रन्थिकमुस्ततिक्ता-
हरीतकीभिः क्वथितः कषायः ।
सामे सशूले कफवातयुक्ते
ज्वरे हितो दीपनपाचनश्च ॥"
इति आरग्वधादि ॥ ५४ ॥

"क्षुद्रामृतानागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"
इति क्षुद्रादि ॥ ५५ ॥

"दशमूलीरसः पेयः कणायुक्तः कफानिले ।
अविपाकेऽतितन्द्रायां पार्श्वरुक्श्वासकासके ॥"
इति दशमूलम् ॥ ५६ ॥

"मुस्तं पर्पटकं शुण्ठी गुडूची सदुरालभा ।
कफवातारुचिच्छर्द्दिदाहश्वासज्वरापहा ॥"
इति मुस्तादि ॥ ५७ ॥

"दारुपर्पटभार्ग्यब्दवचाधन्याककट्फलैः ।
साभयाविश्वपूतीकैः क्वाथो हिङ्गुमधूत्कटः ॥
कफवातज्वरे पीतो हिक्काश्वासगलग्रहान् ।
कासशोषप्रसेकांश्च हन्यात् तरुमिवाशनिः ॥"
इति दार्व्वादि ॥ ५८ ॥ * ॥

अथ त्रिदोषजज्वरे ।

"पञ्चमूलीकिरातादिगणो योज्यस्त्रिदोषजे ।
पित्तोत्कटे च मधुना कणया च कफोत्कटे ॥"
इति चतुर्भद्रपञ्चमूलम् ॥ ५९ ॥

"बिल्वश्योणाकगाम्भारीपाटलागणिकारिकाः ।
दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥"
इति बृहत्पञ्चमूली ॥ ६० ॥

"शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ।
वातपित्तज्वरहरं कनीयः पञ्चमूलकम् ॥"
इति स्वल्पपञ्चमूली ॥ ६१ ॥

"[illegible]भयं दशमूलञ्च सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ।
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"
इति दशमूलम् ॥ ६२ ॥

"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः ॥"
इति चतुर्द्दशाङ्गम् ॥ ६३ ॥

"दशमूलं शटी शृङ्गी पौष्करं सदुरालभम् ।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृल्लासपार्श्वार्त्तिश्वासहिक्कावमीहरः ॥"
इति वातश्लेष्महरोऽष्टादशाङ्गः ॥ ६४ ॥

पाचनं

"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रबीजधनिकेभकणाकषायः ।
तन्द्रीप्रलापकसनारुचिदाहमोह-
श्वासादियुक्तमखिलं ज्वरमाशु हन्ति ॥"
इति अष्टादशाङ्गम् ॥ ६५ ॥

"मुस्तपर्पटकोशीरदेवदारुमहौषधम् ।
त्रिफला धन्वयासश्च नीली कम्पिल्लकं त्रिवृत ॥
किराततिक्तकं पाठा बला कटुकरोहिणी ।
मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते ॥
अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत् ।
पित्तोत्तरे सन्निपाते हितञ्चोक्तं मनीषिभिः ॥
मन्यास्तम्भ उरोघात उरःपार्श्वशिरोग्रहे ॥
६६ ॥

द्राक्षामृता शटी शृङ्गी मुस्तकं रक्तचन्दनम ।
नागरं कटुकं पाठा भूनिम्बं सदुरालभम् ॥
उशीरं पद्मकं धान्यं बालकं कण्टकारिका ।
पुष्करं पिचुमर्द्दञ्च दशाष्टाङ्गमिदं शुभम् ॥
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥"
इति अपराष्टादशाङ्गम् ॥ ६७ ॥

"शटी पुष्करमूलञ्च याशी शृङ्गी दुरालभा ।
गुडूची नागरं पाठा किरातं कटुरोहिणी ॥
एष शट्यादिको वर्गः सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्त्तिश्वासे तन्द्रासु शस्यते ॥"
इति शट्यादि ॥ ६८ ॥

"बृहत्यौ पुष्करं भार्गी शटी शृङ्गी दुरालभा ।
वत्सकस्य च बीजानि पटोलं कटुरोहिणी ॥
बृहत्यादिगणः प्रोक्तः सन्निपातज्वरापहः ।
कासादिषु च सर्व्वेषु हितः सोपद्रवेषु च ॥"
इति बृहत्यादिगणः ॥ ६९ ॥

"भार्गी पुष्करमूलञ्च रास्नाबिल्वयमानिकाः ।
नाग[illegible] दशमूलञ्च पिप्पलीश्चाम्बु साधयेत् ॥
सन्निपातज्वरे देयं हृत्पार्श्वानाहशूलिनाम् ।
कासश्वासाग्निमान्द्यञ्च तन्द्राञ्च विनिवर्त्तयेत् ॥"
इति भार्ग्यादि ॥ ७० ॥

"द्विपञ्चमूली षड्ग्रन्था विश्वशृङ्गनखीद्वयम ।
कफवातहरः क्वाथः सन्निपातहरः परः ॥"
इति द्विपञ्चमूल्यादि ॥ ७१ ॥

"कारवीपुष्करैरण्डत्रायन्तीनागरामृताः ।
दशमूलीशटीशृङ्गीयासभार्गीपुनर्नवाः ॥
तुल्या मूत्रेण निष्क्वाथ्य पीतश्चेतोविशोधनः ।
अभिन्यासं ज्वरं घोरमाशु घ्नन्ति समुद्धतम् ॥"
इति दशमूल्यादि ॥ ७२ ॥

"मातुलुङ्गाश्मभिद्बिल्वयाशीपाठोरुबूकजः ।
क्वाथो लवणमूत्राढ्योऽभिन्यासानाहशूलनुत् ॥"
इति मातुलुङ्गादि ॥ ७३ ॥

"कण्ठरोधकफश्वासहिक्कासंन्यासपीडितः ।
मातुलुङ्गार्द्रकरसं दशमूलाम्भसा पिबेत् ॥"
इति मातुलुङ्गार्द्रकरसयुक्तदशमूलम् ॥ ७४ ॥

"वचाब्दत्रिफलातिक्तापटोलारिष्टदासकैः ।
भूनिम्बामृतयासैश्च त्रिदोषज्वरनुत् जलम् ॥"
इति वचादि ॥ ७५ ॥

"त्रिवृद्विशालात्रिफलाक[illegible]रग्वधैः कृतः ।

सतारो भेदन: क्वाथ: पेय: सर्व्वज्वरापह: ॥"

इति त्रिवृतादि ॥ ७६ ॥

अथ जीर्णज्वरे ।

"निदिग्धिकानागरकामृतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्द्दितपीनसेषु ॥
हन्त्यामयं प्राय: सार्थं तेनायमिष्यते ॥"

इति निदिग्धादि ॥ ७७ ॥

"पिप्पलीचूर्णसंयुक्त: क्वाथश्छिन्नरुहोद्भव: ।
जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा ॥
कामाजीर्णारुचिश्वासहृत् पाण्डुक्रिमिरोगनुत्
॥ ७८ ॥

इति जीर्णज्वराधिकार: ॥ * ॥

अथ सन्ततादिज्वरे ।

"मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकम् ।
छिन्नोद्भवा पटोलञ्च क्वाथं समधुशर्करम् ॥
ज्वरं पञ्चविधं हन्यात् सन्ततादं सुदारुणम् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥
आमं विपाचयत्याशु निरामं शमयत्यपि ॥"

इति मधुकादम् ॥ ७९ ॥

"कलिङ्गका: पटोलस्य पत्रं कटुकरोहिणी ॥ ८० ॥
पटोलं शारिवामुस्तं पाठा कटुकरोहिणी ॥ ८ ॥
निम्बं पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ ॥
॥ ८२ ॥
किरातिक्तममृता चन्दनं विश्वभेषजम् ॥ ८३ ॥
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापना: ।
कषाया: शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
गुडूचीमुस्तधात्रीणां कषायंवा समाक्षिकम् ॥
मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्वाथ: ।
पीत: सकणाचूर्ण: समधुर्व्विषमज्वरं हन्ति ॥"

इति मुस्तादि ॥ ८५ ॥ * ॥

अथ तृतीयकज्वरे ।

"म ं:षधामृतामुस्तचन्दनोशीरधान्यकै: ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजित: ॥"

इति महौषधादि ॥ ८६ ॥

अथ चातुर्थकज्वरे ।

"रामाधात्रीस्थिरादारुपथ्यानागरसाधित: ।
सितामधुयुत: क्वाथश्चातुर्थकनिवारण: ॥" ८७ ॥

इति ज्वराधिकार: ॥ * ॥

अथ ज्वरातीसारे ।

"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकामृता: ।
जयन्त्याममतीसारं सज्वरं समहौषधा: ॥"

इति पाठादि ॥ ८८ ॥

"नागरातिविषामुस्तभूनिम्बामृतवत्सकै: ।
सर्व्वज्वरहर: क्वाथ: सर्व्वातीसारनाशन: ॥"

इति नागरादि ॥ ८९ ॥

"ह्रीवेरातिविषामुस्तविल्वधान्यकनागरै: ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ॥
सरक्तं हन्त्यतीसारं सज्वरं वाथ विज्वरम् ॥"

इति ह्रीवेरादि ॥ ९० ॥

"गुडूच्यतिविषाधान्यशुण्ठीविल्वाब्दबालकै: ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकै: ॥
कषाय: शीतल: पेयो ज्वरातीसारशान्तये ।
हृल्लासारोचकच्छर्द्दिपिपासादाहनाशन: ॥"

इति हृहद्गुडूच्यादि ॥ ९१ ॥

"उशीरं बालकं मुस्तं धन्याकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं विल्वं दीपनपाचनम् ॥
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विज्वरम् ॥"

इति उशीरादि ॥ ९२ ॥

"पञ्चमूलीबलाविल्वगुडूचीमुस्तनागरै: ।
पाठाभूनिम्बह्रीवेरकुटजत्वक्फलै: शृतम् ॥
हन्ति सर्व्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रव श्वासं कासं हन्यात् सुदारुणम् ॥"

इति पञ्चमूल्यादि ॥ ९३ ॥

"कलिङ्गातिविषाशुण्ठीकिराताम्बुयवासकम् ।
ज्वरातिसारसन्तापं नाशयेदविकल्पत: ॥"

इति कलिङ्गादि ॥ ९४ ॥

"वत्सकस्य फलं दारु रोहिणी गजपिप्पली ॥"

इति वत्सकादि ॥ ९५ ॥

"श्वदंष्ट्रा पिप्पलीधान्यं विल्वं पाठायमानिका॥"

इति श्वदंष्ट्रादि ॥ ९६ ॥

"द्वावप्येतौ सिद्धियोगौ श्लोकार्द्धनाभिभाषितौ ।
ज्वरातीसारशमनौ विशेषाद्दाहनाशनौ ॥
नागराम्रतभूनिम्बविल्वबालकवत्सकै: ।
समुस्तातिविषोशीरैर्ज्वरातीसारनुज्जलम् ॥"

इति नागरादि ॥ ९७ ॥

"मुस्तकविल्वातिविषापाठाभूनिम्ब-
वत्सकै: क्वाथ: ।
मकरन्दगर्भयुक्तो ज्वरातिसारौ जयेद्घोरौ ॥"

इति मुस्तकादि ॥ ९८ ॥

"घनजलपाठातिविषापथ्योतूपलधान्य-
रोहिणीविश्वै: ।
सेन्द्रयवै: शृतमम्भ: सातीसारं ज्वरं जयति ॥"

इति घनादि ॥ ९९ ॥

"दशमूलीकषायेण विश्वमक्षसमं पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"

इति दशमूलशुण्ठी ॥ १०० ॥

"किराताब्दामृताविश्वचन्दनोदीच्यवत्सकै: ।
शोथातीसारशमनं विशेषात् ज्वरनाशनम् ॥"

इति किरातादि ॥ १०१ ॥

इति ज्वरातीसाराधिकार: ॥ * ॥

अथातीसारे ।

"धान्यकं नागरं मुस्तं बालकं विल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥"

इति धान्यपञ्चकम् ॥ १०२ ॥

"इदं धान्यचतुष्कं स्यात् पैत्ते शुण्ठीं विना पुन: ॥"

इति धान्यचतुष्कम् ॥ १०३ ॥

"कपित्थदाडिमजम्बुशृङ्गाटकपत्रविल्वह्रीबेरम् ।
जलधरनागरसहितं गङ्गामपि वेगिनीं रुन्ध्यात्॥

इति कपित्थादि ॥ १०४ ॥

"किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् ।

पिबेत् पित्तातिसारघ्नं सक्षौद्रं वेदनापहम् ॥"

इति किराततिक्तकादि ॥ १०५ ॥

"कुटजत्वक्फलं मुस्तं क्वाथयित्वा जलं पिबेत् ।
अतीसारं जयेदाशु शर्करामधुयोजितम् ॥"

इति कुटजादि ॥ १०६ ॥

"विल्वचूताास्थिनिर्यूह: पीत: सक्षौद्रशर्कर: ।
निहन्याच्छर्द्द्यतीसारं वैश्वानर इवाहुतिम् ॥"

इति विल्वादिक्वाथ: ॥ १०७ ॥

"पटोलयवधन्याकक्वाथ: पेय: सुशीतल: ।
शर्करामधुसंमिश्रश्छर्द्द्यतीसारनाशन: ॥"

इति पटोलादिक्वाथ: ॥ १०८ ॥

"कुटजं दाडिमं मुस्तं धातकी विल्वबालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ॥
सामे सशूले रक्ते च पिच्छास्रावे च शस्यते ।
कुटजादिरिति ख्यात: सर्व्वातीसारनाशन: ॥"

इति कुटजादि ॥ १०९ ॥

"समङ्गातिविषा मुस्तं विल्वं ह्रीवेरधातकी ।
कुटजत्वक् फलं विश्वं क्वाथ: सर्व्वातिसारनुत्॥"

इति समङ्गादि ॥ ११० ॥

"कुटजत्वकृतक्वाथो घनीभूत: सुशीतल: ।
लोहितोऽतिविषायुक्त: सर्व्वातीसारनाशन: ॥"

इति कुटजक्वाथ: ॥ १११ ॥

"सवत्सक: सातिविष: सविल्व:
सोदीच्यमुस्तश्च शृत: कषाय: ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ॥"

इति वत्सकादि ॥ ११२ ॥

"कषायो मधुना पीतस्त्वचो दाडिमवत्सकात् ।
सद्यो जयेदतीसारं सरक्तं दुर्निवारणम् ॥"

इति कुटजदाडिमम् ॥ ११३ ॥ * ॥

अथ ग्रहण्याम् ।

"ग्रहणीमाश्रितं दोषमतीसारवदाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
नागरातिविषामुस्तक्वाथ: स्यादामपाचन: ॥"

इति नागरादि ॥ ११४ ॥ * ॥

अथाग्निमान्द्ये ।

"त्रिफलाभयागुडूचीनां कषायेण षडूषणम् ।
पिबेत् श्लेष्मणि मन्देऽग्नौ त्वक्पत्रसुरभीकृतम् ।
पञ्चकोलं समरिचं षडूषणमुदाहृतम् ॥"

इति षडूषणत्रिफलादि ॥ ११५ ॥ * ॥

अथामाजीर्णे ।

"धान्यनागरसंसिद्धं तोयं दद्याद्विचक्षण: ।
आमाजीर्णप्रशमनं दीपनं वस्तिशोधनम् ॥"

इति धान्यशुण्ठी ॥ ११६ ॥ * ॥

अथ पाण्डुरोगे ।

"फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बज: ।
क्वाथ: क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥"

इति फलत्रिकादि ॥ ११७ ॥ * ॥

अथ रक्तपित्ते ।

"जलं खर्ज्जूरमृद्वीकामधुकै: सपरूषकै: ।
शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम् ॥"

इति खर्ज्जूरादिजलम् ॥ ११८ ॥ * ॥

अथ राजयक्ष्मणि ।

"धन्याकपिप्पलीविश्वदशमूलीजलं पिबेत् ।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥"

इति धन्याकादि ॥ ११६ ॥

"अश्वगन्धामृताभीरुदशमूलीबलावृषा: ।
पुष्करातिविषे घ्नन्ति क्षयं क्षीररसाशिन: ॥"

इति अश्वगन्धादि ॥ १२० ॥

'दशमूलबलारास्नापुष्करसुरदारुनागरै: क्वथितम् ।
पेयं पार्श्वांसशिरोरुक्क्षतकासादिशान्तये
सलिलम् ॥"

इति दशमूलादि ॥ १२१ ॥

इति राजयक्ष्माधिकार: ॥ * ॥

अथ कासे ।

"पञ्चमूलीकृत: क्वाथ: पिप्पलीचूर्णसंयुत: ।
रसान्नमश्नतो नित्यं वातकासमुदस्यति ॥"

इति पिप्पलीचूर्णयुक्तपञ्चमूली ॥ १२२ ॥

"पौष्करं कट्फलं भार्गी पिप्पलीविश्वसाधितम् ।
पिबेत् क्वाथं कफोद्रिक्ते कासे श्वासे च हृद्ग्रहे ॥"

इति पौष्करादि ॥ १२३ ॥

"पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत् ॥"

इति पिप्पलीचूर्णयुक्तदशमूली ॥ १२४ ॥

"कट्फलं कत्तृणं भार्गी मुस्तं धान्यं वचाभया ।
शृङ्गी पर्पटकं शुण्ठी सुराह्वञ्च जले शृतम् ॥
मधुहिङ्गुयुतं पेयं कासे वातकफात्मके ।
कण्ठरोगे मुखे शूले श्वासहिक्काज्वरेषु च ॥"

इति कट्फलादि ॥ १२५ ॥

"कण्टकारीकृत: क्वाथ: सकृष्ण: सर्व्वकासहा ॥'

इति कण्टकारीक्वाथ: ॥ १२६ ॥

इति कासाधिकार: ॥ * ॥

अथ हिक्कायाम् ।

"अमृतानागरफञ्जीव्याघ्रीपर्णाशसाधितक्वाथ: ।
पीत: सकणाचूर्ण: कासश्वासौ जयत्याशु ॥'

इति अमृतादि ॥ १२७ ॥

"दशमूलीकषायस्तु पुष्करेणावचूर्णित: ।
कासश्वासप्रशमन: पार्श्वहृच्छूलनाशन: ॥"

इति कुष्ठचूर्णयुक्तदशमूली ॥ १२८ ॥

"कुलत्थनागरव्याघ्रीवासाभि: क्वथितं जलम् ।
पानं पुष्करसंयुक्तं हिक्काश्वासनिवारणम् ॥"

इति कुलत्थादि ॥ १२९ ॥

"शृङ्गीमहौषधकणाघनपौष्कराणां
चूर्णं शटीमरिचशर्करया विमिश्रम् ।
क्वाथेन पीतममृताद्यपञ्चमूल्या:
श्वासं त्र्यहेण विनिहन्त्यतिदोषमुग्रम् ॥"

इति शृङ्ग्यादि ॥ १३० ॥

इति हिक्काश्वासाधिकार: ॥ * ॥

अथ छर्द्याम् ।

"कषायो भृष्टमुद्गस्य सलाजमधुशर्कर: ।
निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥"

इति भृष्टमुद्गकषाय: ॥ १३१ ॥

"गुडूचीत्रिफलारिष्टपटोलै: क्वथितं पिबेत् ।
क्षौद्रयुक्तं निहन्त्याशु छर्दिं पित्ताम्लसम्भवाम् ॥'

इति गुडूच्यादि ॥ १३२ ॥

"क्वाथ: पर्पटज: पीत: सक्षौद्रश्छर्दिनाशन: ॥"

इति पर्पटक्वाथ: ॥ १३३ ॥

"कृतं गुडूच्या विधिवत् कषायं हिमसंज्ञितम् ।
निश्छर्द्यपि भवेत् पथ्यं माक्षिकेण समायुतम् ॥
द्रव्यादापोथितात्तोये प्रतप्ते निशि संस्थितात् ।
कषायो योऽभिनिर्याति स शीत: समुदाहृत: ॥"

इति गुडूचीशीतकषाय: ॥ १३४ ॥

"श्रीफलस्य गुडूच्या वा कषायो मधुसंयुत: ।
पेयश्छर्दिचये शीतो दूर्व्वा वा तण्डुलाम्बुना ॥"

इति विल्वमूलगुडूचीकषायौ ॥ १३५ ॥

"जम्ब्वाम्रपल्लवगवेधुकधान्यसेव्य-
ह्रीवेरवारि पिबतो मधुनाल्पमल्पम् ।
छर्दि: प्रयाति शमनं त्रिसुगन्धियुक्ता
लीढा निहन्ति मधुनाथ दुरालभा वा ॥"

इति जम्ब्वादिवारि ॥ १३६ ॥

इति छर्द्यधिकार: ॥ * ॥

अथ मूर्च्छायाम् ।

"महौषधामृताक्षौद्रं पौष्करं ग्रन्थिकोद्भवम् ।
पिबेत् कणायुतं क्वाथं मूर्च्छायेषु गदेषु च ॥"

इति महौषधादि ॥ १३७ ॥

"पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ॥"

इति दुरालभाक्वाथ: ॥ १३८ ॥

इति मूर्च्छाधिकार: ॥ * ॥

अथोन्मादे ।

"दशमूलाम्बु सघृतं युक्तं मांसरसेन वा ।
ससिद्धार्थकचूर्णं वा पुराणं वैककं घृतम् ॥"

इति घृतादियुक्तदशमूलम् ॥ १३९ ॥ * ॥

अथापस्मारे ।

"हृतकम्पोऽसितरुजा यस्य स्वेदो हस्तादि-
शीतता ।
दशमूलीजलं तस्य कल्याणाख्यञ्च योजयेत् ॥"

इति दशमूलीकल्याणघृतौ ॥ १४० ॥ * ॥

अथ वातरोगे ।

"पञ्चमूलीकृत: क्वाथो दशमूलीकृतोऽथवा ।
रूक्ष: स्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते ॥"

इति पञ्चमूली दशमूलीक्वाथौ ॥ १४१ ॥

"अर्दिते नवनीतेन खादन्माषेण्डरीं नर: ।
क्षीरमांसरसैर्भुक्त्वा दशमूली जलं पिबेत् ॥"

इति दशमूली ॥ १४२ ॥

"माषबलाशूकशिम्बीकत्तृणरास्नाश्वगन्धो-
रुबूकाणाम् ।
क्वाथो नस्यनिपीतो रामठलवणान्वित: कोष्ण: ॥
अपहरति पक्षवातं मन्यास्तम्भं सकर्ण-
नादरुजम् ।
दुर्ज्जयमर्दितवातं सप्ताहाज्जयति चावश्यम् ॥"

इति माषबलादि ॥ १४३ ॥

"दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नस्यं विश्वच्यामववाहुके ॥"

इति दशमूल्यादि ॥ १४४ ॥

"माषात्मगुप्तैरण्डवाट्यालकभृतं पिबेत् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥"

इति माषादि ॥ १४५ ॥

"वातघ्ने दशमूल्या च नरं कुब्जमुपाचरेत् ॥"

इति वातघ्नगणदशमूलीकषायौ ॥ १४६ ॥

"दशमूली बला रास्ना गुडूची विश्वभेषजम् ।
पिबेदेरण्डतैलेन गृध्रसीखञ्जपङ्गुषु ॥"

इति एरण्डतैलयुक्तदशमूल्यादि ॥ १४७ ॥

"शेफालिकादलक्वाथो मृद्वग्निपरिसाधित: ।
दुर्व्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत् ॥"

इति शेफालीक्वाथ: ॥ १४८ ॥

"पञ्चमूलीकषायन्तु वपुतैलविमिश्रितम् ।
चित्रतैलेनाथवा युक्तं गृध्रसीगुल्मशूलनुत् ॥"

इति एरण्डतैलयुक्तपञ्चमूली ॥ १४९ ॥

"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कटीशूलेषु सर्व्वेषु तैलमेरण्डसम्भवम् ॥"

इति एरण्डतैलयुक्तदशमूलीशुण्ठीक्वाथौ ॥ १५० ॥

"गुग्गुलुं क्रोष्टुशीर्षे तु गुडूची त्रिफलाम्भसा ।
क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम् ॥"

इति गुग्गुलुयुक्तगुडूचीत्रिफलाक्वाथ: ॥ १५१ ॥

इति वातव्याध्यधिकार: ॥ * ॥

अथ वातरक्ते ।

"अमृतानागरधन्याककर्षत्रयेण पाचनकं सिद्धम् ।
जयति सरक्तं वातं सामं कुष्ठान्यशेषाणि ॥"

इति अमृतादि ॥ १५२ ॥

"वत्सादन्युद्भव: क्वाथ: पीतो गुग्गुलुसंयुत: ।
समीरणसमायुक्तं शोणितं संप्रधावयेत् ॥"

इति वत्सादनीक्वाथ: ॥ १५३ ॥

"वासागुडूचीचतुरङ्गुलाना-
मेरण्डतैलेन पिबेत् कषायम् ।
क्रमेण सर्व्वाङ्गजमप्यशेषं
जयेदसृग्वातभवं विकारम् ॥"

इति वासादि ॥ १५४ ॥

"लीढ्वा मुण्डितिकाचूर्णं मधुसर्पि:समन्वितम् ।
छिन्नाक्वाथं पिबन् हन्ति वातरक्तं सुदुस्तरम् ॥"

इति गुडूचीक्वाथ: ॥ १५५ ॥

"निशोऽथवा पञ्चगुडेन पथ्या
जग्ध्वा पिबेच्छिन्नरुहाकषायम् ।
सवातरक्तं शमयत्युदीर्ण-
माजानुसंस्फुटं निहन्त्यवश्यम् ॥"

इति गुडूचीकषाय: ॥ १५६ ॥

इति वातरक्ताधिकार: ॥ * ॥

अथोरुस्तम्भे ।

"शिलाजतु गुग्गुलुं वा पिप्पलीमथ नागरम् ।
ऊरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा ॥"

इति शिलाजत्वादियुक्तदशमूली ॥ १५७ ॥

"भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवा ।
पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिवारणा: ॥"

इति भल्लातकादि ॥ १५८ ॥

"पिप्पली पीप्पलीमूलं भल्लातक्वाथ एव वा ।
कल्को वा समधुर्देय ऊरुस्तम्भविनाशन: ॥"

इति पिप्पल्यादि ॥ १५९ ॥

इत्यूरुस्तम्भाधिकार: ॥ * ॥

अथामवाते ।

"शटीशुण्ठ्यभया चोग्रा देवाह्वातिविषामृता: ।

कषायमामवातस्य पाचनं रूक्षभोजनम् ॥"

इति शठ्यादि ॥ १६० ॥

"शुण्ठी विश्वौषधं कल्कं वर्षाभूक्वाथसंयुतम् ।
समशाच्च पिबेज्जन्तुरामवातविपाचनम् ॥"

इति पुनर्नवाक्वाथः ॥ १६१ ॥

"दशमूलाम्लतैरण्डरास्नानागरदारुभिः ।
क्वाथोरुबूकतैलेन सामं हन्त्यनिलं गुरुम् ॥"

इति रास्नादशमूलम् ॥ १६२ ॥

"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कुक्षिवस्तिकटीशूले तैलमेरण्डसम्भवम् ॥"

इति एरण्डतैलयुक्तदशमूलशुण्ठीक्वाथौ ॥१६३॥

"रास्नां गुडूचीमेरण्डं देवदारु महौषधम् ।
पिबेत् सर्व्वाङ्गवाते च सामे सन्ध्यस्थिमज्जगे ॥"

इति रास्नापञ्चकम् ॥ १६४ ॥

"रास्नामृतानागरधन्वदेवदारु-
त्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥"

इति रास्नासप्तकम् ॥ १६५ ॥

"शुण्ठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः ।
सामे वाते कटीशूले पाचनो रुक्प्रणाशनः ॥"

इति गोक्षुरशुण्ठी ॥ १६६ ॥

"आमवाते कणायुक्तं दशमूलीजलं पिबेत् ॥"

इति कणायुक्तदशमूली ॥ १६७ ॥

इत्यामवाताधिकारः ॥ * ॥

अथ शूले ।

"बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ।
सहिङ्गु लवणं पीतं सद्यो वातरुजापहम् ॥"

इति बलादि ॥ १६८ ॥

"विश्वमेरण्डजं मूलं क्वाथं पीत्वा जलं पिबेत् ।
हिङ्गुसौवर्च्चलोपेतं सद्यः शूलनिवारणम् ॥"

इति विश्वादि ॥ १६९ ॥

"हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्च्चलेन वा ।
विश्वैरण्डयवक्वाथः सद्यः शूलनिवारणः ॥"

इति हिङ्गुपुष्करमूलयुक्तविश्वैरण्डयवक्वाथः ॥ १७० ॥

"तद्वद्रुबुयवक्वाथो हिङ्गुसौवर्च्चलान्वितः ॥"

इति रुबुवादि ॥ १७१ ॥

"बृहत्यौ गोक्षुरैरण्डकुशकाशेक्षुवालिकाः ।
पीताः पित्तभवं शूलं सद्यो हन्ति सुदारुणम् ॥"

इति बृहत्यादि ॥ १७२ ॥

"शतावरीसयष्ट्याह्ववाट्यालकुशगोक्षुरैः ।
शृतशीतं पिबत्तोयं सगुडक्षौद्रशर्करम् ॥
पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम् ॥"

इति शतावर्य्यादि ॥ १७३ ॥

"त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः शृतम् ।
पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये ॥"

इति त्रिफलादि ॥ १७४ ॥

"तैलमेरण्डजं वापि मधुकक्वाथसंयुतम् ।
शूलं पित्तोद्भवं हन्याद्गुल्मं पैत्तिकमेव च ॥"

इति मधुकक्वाथः ॥ १७५ ॥

"त्रिफलारग्वधक्वाथं सक्षौद्रं शर्करान्वितम् ।

पाचनं

पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणम् ॥"

इति त्रिफलारग्वधक्वाथः ॥ १७६ ॥

"बिल्वमूलमथैरण्डं चित्रकं विश्वभेषजम् ।
हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥"

इति बिल्वमूलादि ॥ १७७ ॥

"सक्षारं वा पिबेत् क्वाथं बिल्वादेः कफशूलवान्॥"

इति बिल्वादिक्वाथः ॥ १७८ ॥

"मातुलुङ्गरसो वापि शिग्रुक्वाथस्तथापरः ।
सक्षारो मधुना पीतः पार्श्वहृद्बस्तिशूलनुत् ॥"

इति शिग्रुक्वाथः ॥ १७९ ॥

"आमशूले क्रिया कार्य्या कफशूल-
विनाशिनी ।
सर्व्वमामहरं सर्व्वं यदन्यदग्निवर्द्धनम् ॥
पटोलत्रिफलारिष्टक्वाथं समधुकं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहशूलोपशान्तये ॥"

इति पटोलादि ॥ १८० ॥

"विश्वोरुबूकदशमूलयवाम्भसा तु
हिङ्ग्वादिहिङ्गुलवणत्रयपुष्कराणाम् ।
चूर्णं पिबेद्धृदयपार्श्वकटीग्रहाम
पक्वाशयांशभ्रृशरुग्ज्वरगुल्मशूली ॥"

इति विश्वादि ॥ १८१ ॥

"क्वाथेन चूर्णपानं यत्तत्र क्वाथप्रधानता ।
प्रवर्त्तते न तेनात्र चूर्णापेक्षी चतुर्द्रवः ॥
चूर्णं समं रुचकहिङ्गुमहौषधानां
शुण्ठ्यम्बुना कफसमीरणपित्तजेषु ।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु
पेयं तथा यवरसेन तु विड्विबन्धे ॥" १८२ ॥

"समं शुण्ठ्यम्बुनैवैव योजना क्रियते बुधैः ।
तेनाल्पमानमेवात्र हिङ्गु संपरिदीयते ॥"

इति रुचकादि ॥ १८३ ॥

"हिङ्गु सौवर्च्चलं पथ्या विडसैन्धवतुम्बुरु ।
पौष्करञ्च पिबेच्चूर्णं दशमूलयवाम्भसा ॥
पार्श्वहृत्कटिपृष्ठांशशूले तन्त्रापतानके ।
शोथश्लेष्मश्वासके च कर्णरोगे च शस्यते ॥"

इति हिङ्ग्वादिचूर्णयुक्तदशमूलीयक्वाथः ॥१८४॥

"एरण्डविश्वबृहतीद्वयमातुलुङ्ग-
पाषाणभिद्विकटमूलकृतः कषायः ।
सक्षारहिङ्गुलवणो रुबुतैलमिश्रः
श्रोण्यंसमेढ्रहृदयस्तनरुक्सु यः ॥"

इति एरण्डसप्तकः ॥ १८५ ॥

"एरण्डफलमूलानि बृहतीद्वयगोक्षुरम् ।
पर्णिन्यः सहदेवा च सिंहपुच्छीक्षुवालिका ॥
तुल्यैरेतैः शृतं तोयं यवक्षारयुतं पिबेत् ।
पृथग्दोषभवं शूलं हन्यात् सर्व्वभवन्तथा ॥"

इति एरण्डद्वादशकः ॥ १८६ ॥

इति शूलाधिकारः ॥ * ॥

अथोदावर्त्ते ।

"श्यामा दन्ती द्रवन्ती त्वक महाश्यामा स्नुही
त्रिवृत् ।
सप्तला शङ्खिनी श्वेता राजवृक्षः सतिल्वकः ॥
कम्पिल्लकः करञ्जश्च हेमक्षीरीत्ययं गणः ।
सर्पिस्तैलरजःक्वाथकल्केष्वन्यतमेन च ॥

पाचनं

उदावर्त्तोदराणाहविषगुल्मादिनाशनः ॥"

इति प्रत्येकं श्यामादिगणक्वाथः ॥ १८७ ॥

इत्युदावर्त्ताधिकारः । आनाहोऽपि ॥ * ॥

अथ हृद्रोगे ।

"वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम् ।
द्विपञ्चमूलीक्वाथेन सस्नेहलवणेन च ॥"

इति स्नेहलवणयुक्तदशमूली ॥ १८८ ॥

"नागरं वा पिबेदुष्णं कषायञ्चाग्निवर्द्धनम् ।
कासश्वासानिलहरं शूलहृद्रोगनाशनम् ॥"

इति नागरक्वाथः ॥ १८९ ॥

"वचानिम्बकषायाभ्यां वान्तं हृदि कफोत्थिते ।
वातहृद्रोगहृच्चूर्णं पिप्पल्यादिञ्च पाचयेत् ॥"

इति वचानिम्बकषायौ ॥ १९० ॥

"हिङ्गुग्रगन्धाविडविश्वकृष्णा-
कुष्ठाभयाचित्रकयावशूकम् ।
पिबेत् ससौवर्च्चलपुष्कराढ्यं
यवाम्भसा शूलहृदामयघ्नम् ॥"

इति हिङ्ग्वादिचूर्णयुक्तयवक्वाथः ॥ १९१ ॥

"दशमूलकषायन्तु लवणक्षारसंयुतम् ।
कासं श्वासञ्च हृद्रोगं गुल्मशूलञ्च नाशयेत् ॥"

इति लवणक्षारयुक्तदशमूली ॥ १९२ ॥

इति हृद्रोगाधिकारः ॥ * ॥

अथ मूत्रकृच्छ्रे ।

"अमृता नागरं धात्री वाजिगन्धा त्रिकण्टकम् ।
प्रपिबेद्वातरोगार्त्तः सशूलो मूत्रकृच्छ्रवान् ॥"

इति अमृतादि ॥ १९३ ॥

"कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवम् ।
पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम् ॥"

इति तृणपञ्चमूलम् ॥ १९४ ॥

"एतत् सिद्धं पयः पीत्वा मेढ्रगं हन्ति शोणितम् ॥
शतावरीकाशकुशश्वदंष्ट्रा-
विदारिशालीक्षुकशेरुकाणाम् ।
क्वाथं सुशीतं मधुशर्कराक्तं
पिबन् जयेत् पैत्तिकमूत्रकृच्छ्रम् ॥"

इति शतावर्य्यादि ॥ १९५ ॥

"हरीतकीगोक्षुरराजवृक्ष
पाषाणभिद्धन्वयवासकानाम् ।
क्वाथं पिबेन्माक्षिकसंप्रयुक्तं
कृच्छ्रे सदाहे सरुजे विबन्धे ॥"

इति हरीतक्यादि ॥ १९६ ॥

"श्वदंष्ट्रा विश्वतोयं वा कफकृच्छ्रविनाशनम् ॥"

इति श्वदंष्ट्राविश्वकषायौ ॥ १९७ ॥

"बृहतीधावनीपाठायष्टीमधुकपिङ्गलाः ।
पाचनीयो बृहत्यादिः कृच्छ्रदोषत्रयापहः ॥"

१९८ ॥

"क्वाथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत् ।
मूत्रकृच्छ्रं शकृज्जञ्च पीतः शीघ्रं निवारयेत् ॥"

इति यवक्षारयुक्तगोक्षुरबीजक्वाथः ॥ १९९ ॥

"क्रिया हिता स्याच्छरशर्करायां
या मूत्रकृच्छ्रे कफमारुतोत्थ ।
यन्मूत्रकृच्छ्रे विहितन्तु पैत्ते
तत् कारयेच्छोणितमूत्रकृच्छ्रे ॥

त्रिकण्टकारग्वधदर्भकाश-
दुरालभापर्वतभेदपथ्याः ।
निघ्नन्ति पीता मधुनाश्मरीञ्च
संप्राप्तमृत्योरपि मूत्रकृच्छ्रम् ॥"

इति त्रिकण्टकादि ॥ २०० ॥

"कषायोऽतिबलामूलसाधितोऽशेषकृच्छ्रजित् ॥"

इति अतिबलाकषायः ॥ २०१ ॥

इति मूत्रकृच्छ्राधिकारः ॥ * ॥

अथ मूत्राघाते ।

"मूत्राघातान् यथादोषं मूत्रकृच्छ्रहरैर्जयेत् ।
पिबेच्छिलाजतुक्वाथे गणे वीरतरादिके ॥"

इति शिलाजतुयुक्तवीरतरादिक्वाथः ॥२०२॥

" इमं दुरालभाया वा कषायं वासकस्य वा ॥"

इति दुरालभारवासाकषायौ ॥ २०३ ॥

इति मूत्राघाताधिकारः ॥ * ॥

अथाश्मर्य्याम् ।

"वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारगुडं दत्त्वा क्वाथयित्वा पिबेद्धिताम् ॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ॥"

इति वरुणत्वगादि ॥ २०४ ॥

"वीरतरः सहचरौ दर्भो वृक्षादनी नलः ।
गुन्द्रा काशकुशावश्मभेदमोरटटुण्टुकाः ॥
कुरुण्टकोऽथ वशिरो वसुकः साग्निमन्थकः ।
इन्दीवरी श्वदंष्ट्रा च तथा कापोतवक्त्रकः ॥
वीरतरादिरित्येष गणो वातविकारनुत् ।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः ॥"

इति वीरतरादिगणक्वाथः ॥२०५॥

"शुण्ठ्यग्निमन्थपाषाणशिग्रुवरुणगोक्षुरैः ।
अभयारग्वधफलैः क्वाथं कुर्य्याद्विचक्षणः ॥
रामठक्षारलवणचूर्णं दत्त्वा पिबेन्नरः ।
अश्मरीमूत्रकृच्छ्रघ्नं पाचनं दीपनं परम ॥
हन्यात कोष्ठाश्रितं वातं कट्यूरुगुह्यमेढ्रगम् ॥"

इति शुण्ठ्यादि ॥ २०६ ॥

"वरुणत्वककषायन्तु पीतन्तु गुडसंयुतम् ।
अश्मरीं पातयत्याशु वस्तिशूलविनाशनम् ॥"

इति वरुणक्वाथः ॥ २०७ ॥

"पिबेद्वरुणमूलत्वकक्वाथं तत्कल्कसंयुतम् ॥"

इति वरुणकल्कयुक्तवरुणत्वककषायः ॥२०८॥

"क्वाथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिपातनः ॥"

इति शिग्रुक्वाथः ॥ २०९ ॥

"नागरवरुणकगोक्षुरपाषाणभित्कपोतवङ्कजः
क्वाथः ।
गुडयावशूकमिश्रः पीतो हन्त्यश्मरीमुग्राम् ॥"

इति नागरादि ॥ २१० ॥

"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः ।
कषायः क्षारसंयुक्तः शर्कराञ्च भिनत्त्यपि ॥"

इति वरुणत्वगादि ॥ २११ ॥

"श्वदंष्ट्रैरण्डपत्राणि नागरं वरुणत्वचम् ।
एतत्क्वाथवरं प्रातः पिबेदश्मरिभेदनम् ॥"

इति श्वदंष्ट्रादि ॥ २१२ ॥

"एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रावृषकोरुवकैः ।
क्वाथं पिबेदश्मजतुप्रगाढं
सशर्करे साश्मरिमूत्रकृच्छ्रे ॥"

इति एलादि ॥२१३॥

"शुक्राश्मर्य्यान्तु सामान्यो विधिरश्मरिनाशनः ॥"

इत्यश्मरीशर्कराधिकारः ॥*॥

अथ मेहे ।

"दूर्व्वाकशेरुपूतीककुम्भीकशैवलम् ।
जले निःक्वथितं पीतं शुक्रमेहहरं परम् ॥"

इति दूर्व्वादि ॥ २१४ ॥

"त्रिफलारग्वधद्राक्षाकषायो मधुना युतः ।
पीतो निहन्ति फेनाख्यं प्रमेहं नियतं नृणाम् ॥"

इति त्रिफलादि ॥ २१५ ॥

"लोध्राभयाकट्फलमुस्तकानां
विडङ्गपाठार्ज्जुनधन्वनानाम् ।
कदम्बशालार्ज्जुनदीप्यकानां
विडङ्गदार्वीधवशल्लकानाम् ॥
चत्वार एते मधुना कषायाः
कफप्रमेहेषु निषेवणीयाः ॥
अश्वत्थाश्वतरङ्कुल्या न्यग्रोधादेः फलत्रयात् ।
सजिङ्गिरक्तसाराच्च क्वाथाः पञ्च समाक्षिकाः ॥
नीलहारिद्रमञ्जिष्ठान क्षारमाञ्जिष्ठसाक्षयाम् ।
मेहान् हन्युः क्रमादेते सक्षौद्रो रक्तमेह
जित ॥
क्वाथः खर्ज्जूरकाश्मर्य्यतिन्दुकास्थ्यमृताकृतः ॥"

इति खर्ज्जूरादि ॥ २१६ ॥

"लोध्रार्ज्जुनोशीरकुचन्दनानाम २१७
अरिष्टसश्रामलकाभयानाम् । २१८ ।
धात्र्यर्ज्जुनारिष्टकवत्समकाना २१९
नीलोत्पलैलातिनिशार्ज्जुनानाम् ॥ २२० ॥
चत्वार एते विहिताः कषायाः
पित्तप्रमेहे मधुसंप्रयुक्ताः ॥"

इति कषायचतुष्टयम् ॥ २२१ ॥

"छिन्नावह्निकषायेण पाठाकुटजरामठम् ।
तिक्तां कुष्ठञ्च सञ्चूर्ण्य सर्पिर्मेहे पिबेन्नरः ॥"

इति छिन्नावह्निकषायः ॥ २२२ ॥

"कदरखदिरपूगक्वाथं क्षौद्रान्वये पिबेत ॥"

इति कदरादि ॥ २२३ ॥

"अग्निमन्थकषायन्तु वसामेहे प्रयोजयेत ॥"

इति अग्निमन्थकषायः ॥२२४॥

"पाठाशिरीषदुस्पर्शमूर्व्वाः किंशुकतिन्दुकौ ।
कपित्थानां भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥"

इति पाठादि ॥ २२५ ॥

"कषायस्त्रिफलादारुमुस्तकैरथवा कृतः ॥"

इति त्रिफलादि ॥ २२६ ॥

"फलत्रिकं दारु निशां विशालां
मुस्तञ्च निष्क्वाथ्य निशांशकल्कम् ।
पिबेत कषायं मधुसंप्रयुक्तं
सर्व्वप्रमेहेषु समुत्थितेषु ॥"

इति फलत्रिकादि ॥ २२७ ॥

"कटङ्कटेरीमधुकत्रिफलाचित्रकैः समैः ।
सिद्धः कषायः पातव्यः प्रमेहाणां विनाशनः ॥"

इति कटङ्कटेर्य्यादि ॥ २२८ ॥

"त्रिफलादारुदार्व्व्यब्दक्वाथः क्षौद्रेण मेहहा ॥"

इति त्रिफलादि ॥ २२९ ॥

"कुटजासनदार्व्व्यब्दफलत्रयभवोऽथवा ॥"

इति कुटजादि ॥ २३० ॥

इति प्रमेहाधिकारः ॥ * ॥

अथोदरे ।

"पयसा सत्रिवृत्कल्केनोरुवूकशृतेन वा ।
सप्तलाशङ्खिनीक्वाथयमाणाभ्यां शृतेनारग्वधेन वा ॥"

इति त्रिवृत्कल्कयुक्तारग्वधक्वाथैरण्डक्वाथौ ॥
२३१ ॥

"सन्निपातोदरे सर्व्वां यथोक्तां कारयेत् क्रियाम् ।
पीतः प्लीहोदरं हन्यात पिप्पलीमरिचान्वितः ॥
अम्लवेतससंयुक्तः शिग्रुक्वाथः ससैन्धवः ॥"

इति शिग्रुक्वाथः ॥ २३२ ॥

"दशमूलदारुनागरच्छिन्नरुहापुनर्नवाक्वाथः ।
जयति जलोदरशोथश्लीपदगलगण्डवात-
रोगांश्च ॥"

इति दशमूलादि ॥ २३३ ॥

"हरीतकीनागरदेवदारु
पुनर्नवाच्छिन्नरुहाकषायः ।
सगुग्गुलुर्मूत्रयुतश्च पेयः
शोथोदराणां प्रवरः प्रयोगः ॥"

इति हरीतक्यादि ॥ २३४ ॥

"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्त्रिफलारसो वा ।
निहन्ति वातोदरशोथशूलं
क्वाथः समूत्रो दशमूलजश्च ॥"

इति एरण्डतैलेन गोमूत्रेण वा युक्ता दशमूला ॥
२३५ ॥

"पुनर्नवानिम्बपटोलशुण्ठी-
तिक्तामृतादार्व्वभयाकषायः ।
सर्व्वाङ्गशोथोदरकासशूल-
श्वासान्वितं पाण्डुगदं निहन्ति ॥"

इति पुनर्नवाष्टकम् ॥ २३६ ॥

"पुनर्नवादार्व्वभयागुडूचीं
पिबेत समूत्रां महिषाक्षयुक्ताम् ।
त्वग्दोषशोथोदरपाण्डुरोग
स्थौल्यप्रसेकोर्द्ध्वकफामयेषु ॥"

इति पुनर्नवाचतुष्कम् ॥ २३७ ॥

इति उदराधिकारः ॥ * ॥

अथ शोथे ।

"शुण्ठीपुनर्नवैरण्डपञ्चमूलशृतं जलम् ।
वातिके श्वयथौ शस्तं पानाहारपरिग्रहे ॥"

इति शुण्ठ्यादि ॥ २३८ ॥

"दशमूलं सर्व्वथा च शस्तं वाते विशेषतः ॥"

इति दशमूलम् ॥ २३९ ॥

"क्षीराशनः पित्तकृतेऽथ शोथे
त्रिवृद्गुडूचीत्रिफलाकषायम् ।
पिबेन्नवां मूत्रविमिश्रितं वा
फलत्रिकाचूर्णमथाक्षमात्रम् ॥"

इति त्रिवृतादि ॥ २४० ॥

"अभया दारु मधुकं तिक्ता दन्ती सपिप्पली ।

पाचनं
पाचनं

पटोलं चन्दनं दार्व्वीं त्रायमाणेन्द्रवारुणी ॥
एषां क्वाथः ससर्पिष्कः श्वयथुज्वरदाहहा ।
तीसर्पतृष्णाशस्त्रापसन्निपातविषापहः ॥"
इति अभयादि ॥ २४१ ॥

"पुनर्नवाविश्वत्रिवृद्गुडूची-
सम्याकपथ्यामरदारुकल्कम् ।
शोथे कफोत्थे महिषीजलस्त्र-
युक्तं पिबेद्वा सलिलं तथैषाम् ॥"
इति पुनर्नवाष्टकम् ॥ २४२ ॥

"पुनर्नवादारुसुण्ठीक्वाथे मत्रेऽथ केवले ।
दशमूलजले वापि गुग्गुलुः शोथनाशनः ॥"
इति गुग्गुलुयुक्तपुनर्नवादिदशमूलक्वाथौ ॥ २४३ ॥

"सिंहास्यामृतभण्टाकीक्वाथं कृत्वा समाक्षिकम् ।
पीत्वा शोथं जयेज्जन्तुः कासं श्वासं ज्वरं
वमिम् ॥"
इति सिंहास्यादि ॥ २४४ ॥

"भूनिम्बविश्वकल्कं जग्धा पेयः पुनर्नवाक्वाथः ।
अपहरति नियतमाशु शोथं सर्व्वाङ्गगं नृणाम् ॥"
इति पुनर्नवाक्वाथः ॥ २४५ ॥
इति शोथाधिकारः ॥ * ॥

अथान्त्रवृद्धौ ।
"पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ।
पाने वस्तौ कटुतैलं पेयं वा दशमूलाम्भसा ॥"
इति कटुतैलयुक्तदशमूलम् ॥ २४६ ॥

"रास्नायष्ट्यमृतैरण्डबलागोक्षुरसाधितः ।
क्वाथोऽन्त्रवृद्धिं हन्त्याशु कटुतैलेन मिश्रितः ॥"
इति रास्नादि ॥ २४७ ॥
इति अन्त्रवृद्ध्यधिकारः ॥ * ॥

अथ विद्रधौ ।
"पुनर्नवादारुविश्वदशमूलाभयाम्भसा ।
गुग्गुलुं कटुतैलं वा पिबेन्मारुतविद्रधौ ॥"
इति पुनर्नवादि ॥ २४८ ॥

"पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयुतम् ॥"
इति त्रिवृत्कल्कयुक्तत्रिफलाक्वाथः ॥ २४९ ॥

"दशमूलीकषायेण सस्नेहेनरसेन वा ।
शोथं व्रणं वा कोष्णेन सशूलं परिषेचयेत् ॥"
इति दशमूलीकषायः ॥ २५० ॥

"क्वाथो वरुणत्वगेरण्डश्वदंष्ट्राश्मभिदा कृतः ।
सहिङ्गुसैन्धवः पीतः कोष्ठस्थं नाशयेद्द्रुतम् ॥"
इति वरुणत्वगादिक्वाथः ॥ २५१ ॥ * ॥

अथोपदंशे ।
"पटोलनिम्बत्रिफलागुडूची-
क्वाथं पिबेद्वा खदिरासनाभ्याम् ।
सगुग्गुलु वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः ॥"
इति पटोलादि ॥ २५२ ॥

"त्रिफलायाः कषायेण भृङ्गराजरसेन वा ।
व्रणप्रक्षालनं कुर्य्यादुपदंशप्रशान्तये ॥"
इति त्रिफलाक्वाथः ॥ २५३ ॥

"जयाजात्यश्वमारार्कसम्याकानां दलैः पृथक् ।
कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत् ॥"
इति जयादिक्वाथः ॥ २५४ ॥ * ॥

अथ भग्ने ।
"न्यग्रोधादिकषायन्तु सुशीतं परिषेचने ॥"
इति न्यग्रोधादि ॥ २५५ ॥ * ॥

अथ कुष्ठे ।
"त्रिफलापटोलरजनीमञ्जिष्ठारोहिणीवचा
निम्बैः ।
एष कषायोऽभ्यस्तो निहन्ति कफपित्तजं
कुष्ठम् ॥"
इति नवकषायः ॥ २५६ ॥

"पटोलखदिरारिष्टत्रिफलाकृष्णवेत्रजम् ।
तिक्ताशनः पिबेत् क्वाथं कुष्ठी कुष्ठं व्यपोहति ॥"
इति पटोलादि ॥ २५७ ॥

"धात्रीखदिरयोः क्वाथं पीत्वा वल्गुजसंयुतम् ।
शङ्खेन्दुधवलं श्वित्रं तूर्णं हन्ति न संशयः ॥"
इति धात्रीखदिरक्वाथः ॥ २५८ ॥ * ॥

अथ शीतपित्ते ।
"उदर्द्दे वमनं कार्य्यं पटोलारिष्टवारिणा ॥"
इति पटोलारिष्टजलम् ॥ २५९ ॥ * ॥

अथाम्लपित्ते ।
"निस्तुषयवदृषधात्रीक्वाथस्त्रिसुगन्धियुतः पीतः ।
अपनयति चाम्लपित्तं यदि भुङ्क्ते मुद्गयूषेण ॥"
इति निस्तुषयवादि ॥ २६० ॥

"कफपित्तवमीकण्डूज्वरविस्फोटदाहहा ।
पाचनो दीपनः क्वाथः शृङ्गवेरपटोलयोः ॥"
इति शृङ्गवेरपटोलक्वाथः ॥ २६१ ॥

"पटोलं नागरं धान्यं क्वाथयित्वा जलं पिबेत् ।
कण्डूपामार्त्तिशूलघ्नं कफपित्ताग्निमान्द्यजित् ॥"
इति पटोलादि ॥ २६२ ॥

"पटोलविश्वामृतरोहिणीकृतं
जलं पिबेत् पित्तकफोच्छ्रये च ।
शूलभ्रमारोचकवह्निमान्द्य-
कासज्वरच्छर्द्दिनिवारणन्तत् ॥"
इति पटोलादि ॥ २६३ ॥

"यवकृष्णापटोलानां क्वाथं क्षौद्रयुतं पिबेत् ।
नाशयेदम्लपित्तञ्च अरुचिञ्च वमिन्तथा ॥"
इति यवादि ॥ २६४ ॥

"वासामृतापर्पटकभूनिम्बनिम्बमार्कवैः ।
त्रिफलाकुलकैः क्वाथः सक्षौद्रश्चाम्लपित्तहा ॥"
इति दशाङ्गम् ॥ २६५ ॥

"फलत्रिकं पटोलञ्च तिक्ताक्वाथः सितायुतः ।
पीतः शीतकमध्वक्तो ज्वरच्छर्द्द्यम्लपित्तजित् ॥"
इति फलत्रिकादि ॥ २६६ ॥

"पटोलधन्याकमहौषधाब्दैः
कृतः कषायो विनिहन्ति शीघ्रम् ।
मन्दानलं पित्तबलासदाह-
च्छर्द्दिज्वरामानिलशूलरोगान् ॥"
इति पटोलादि ॥ २६७ ॥

"छिन्नोद्भवानिम्बपटोलपत्रं
फलत्रयं सुक्वथितं सुशीतम् ।
क्षौद्रान्वितं पीतमशेषकल्पं
सुदारुणं हन्ति तदम्लपित्तम् ॥"
इति छिन्नोद्भवादि ॥ २६८ ॥

"पटोलत्रिफलानिम्बशृतं मधुयुतं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहशूलोपशान्तये ॥"
इति पटोलादि ॥ २६९ ॥

"सिंहास्यामृतभण्टाकीक्वाथं कृत्वा समाक्षिकम् ।
अम्लपित्तं जयेज्जन्तुः कासं श्वासं ज्वरं वमिम् ॥"
इति सिंहास्यादि ॥ २७० ॥
इति अम्लपित्ताधिकारः ॥ * ॥

अथ विसर्पे ।
"हृत्यवर्ज्जं प्रयोक्तव्यं पञ्चमूलचतुष्टयम् ॥"
इति पञ्चमूलचयम् ॥ २७१ ॥

"मुस्तारिष्टपटोलानां क्वाथः सर्व्वविसर्पनुत् ॥"
इति मुस्तादि ॥ २७२ ॥

"धात्रीपटोलमुद्गानामथवा घृतसंयुतः ॥"
इति धात्र्यादि ॥ २७३ ॥

"अमृतवृषपटोलं निम्बपत्रैरुपेतं
त्रिफलखदिरसारं व्याधिघातञ्च तुल्यम् ।
क्वथितमिदमशेषं गुग्गुलोर्भागयुक्तं
जयति विषविसर्पान् कुष्ठमष्टादशाख्यम् ॥"
इति नवकषायः ॥ २७४ ॥

"अमृतवृषपटोलं मुस्तकं सप्तपर्णं
खदिरमसितवेत्रं निम्बपत्रं हरिद्रे ।
विविधविषविसर्पान् कुष्ठविस्फोटकण्डू-
रपनयति मसूरीं शीतपित्तं ज्वरञ्च ॥"
इति अमृतादि ॥ २७५ ॥

"पटोलामृतभूनिम्बवासकारिष्टपर्पटैः ।
खदिराब्दयुतैः क्वाथो विस्फोटाशिज्वरापहः ॥"
इति पटोलादि ॥ २७६ ॥

"पटोलत्रिफलारिष्टगुडूचीमुस्तचन्दनैः ।
समूर्व्वा रोहिणी पाठा रजनी सदुरालभा ॥
कषायं पाययेदेतत पित्तश्लेष्मज्वरापहम् ।
कण्डूत्वग्दोषविस्फोटविषवीसर्पनाशनम् ॥"
इति पटोलादि ॥ २७७ ॥

"भूनिम्बवासाकटुकापटोल-
फलत्रिकाचन्दननिम्बसिद्धः ।
विसर्पदाहज्वरवक्त्रशोष-
विस्फोटतृष्णावमिनुत् कषायः ॥"
इति भूनिम्बादि ॥ २७८ ॥

"सकफे पित्तयुक्ते तु त्रिफलां योजयेन्नरः ।
दुरालभां पर्पटकं पटोलं कटुकान्तथा ।
कोष्णं गुग्गुलुसंयुक्तं पिबेद्वा खदिराष्टकम् ॥"
इति दुरालभादि ॥ २७९ ॥

"कुण्डली पिचुमर्दाम्बु खदिरेन्द्रयवाम्बु वा ।
विस्फोटान्नाशयत्याशु वायुर्जलधरानिव ॥"
इति कुण्डल्यादि ॥ २८० ॥ * ॥

अथ मसूर्य्याम् ।
"दुरालभां पर्पटकं भूनिम्बं कटुरोहिणीम् ।
श्लेष्मिकायां पित्तजायां वा पानं निःक्वाथ्य दापयेत् ॥"
इति दुरालभादि ॥ २८१ ॥

"निम्बं पर्पटकं पाठां पटोलं कटुरोहिणीम् ।
वासां दुरालभां धात्रीमुशीरं चन्दनद्वयम् ॥
एष निम्बादिकः क्वाथः पीतः शर्करया युतः ।
हन्ति त्रिदोषमसूरीं चयवीसर्पसम्भवाम् ॥

उत्थिता प्रविशेद्‌ध्या तु पुनस्तां वाम्यतो नयेत् ॥”

इति निम्बादि ॥ २८२ ॥

“पटोलकुण्डलीमुस्तावृषधन्वयवासकैः ।
भूनिम्बनिम्बकटुकापर्पटैश्च शृतं जलम् ॥
मसूरीं शमयेदामां पक्वाञ्चैव विशोषयेत् ।
नातः परतरं किञ्चिद्विस्फोटज्वरशान्तये ॥”

इति पटोलादि ॥ २८३ ॥

“पटोलमूलारुणतण्डुलीयकं
पिबेद्धरिद्रामलकल्कसंयुतम् ।
मसूरिविस्फोटविदाहशान्तये
तदेव पित्तास्रवमिज्वरापहम् ॥”

इति पटोलादि ॥ २८४ ॥

“पटोलमूलारुणतण्डुलीयकं
तथैव धात्रीखदिरेण संयुतम् ।
पिबेज्जलं सुक्वथितं सुशीतं
मसूरिकारोगविनाशनं परम् ॥”

इति पटोलमूलादि ॥ २८५ ॥

“खदिरत्रिफलारिष्टपटोलामृतवासकैः ।
क्वाथोऽष्टकाङ्गो जयति रोमान्तीश्च मसूरिकाम् ॥
वीसर्पकुष्ठविस्फोटकण्ड्वादीनपि पानतः ॥”

इति खदिराष्टकम् ॥ २८६ ॥

“अमृतादिकषायस्तु जयेत् पित्तकफात्मिका: ॥”

इति अमृतादि ॥ २८७ ॥

“जातीपत्रं समञ्जिष्ठं दार्व्वीं पूगफलं शमीम् ।
धात्रीफलं समधुकं क्वथितं मधुसंयुतम् ॥
मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते ॥”

इति जातीपत्रादि ॥ २८८ ॥

“अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना ॥”

इति गवेधुमधुकक्वाथः ॥ २८९ ॥

“वेदनादाहशान्त्यर्थं स्वरागाच्च विशुद्धये ।
सगुग्गुलुं वराक्वाथं युञ्ज्याद्वा खदिराष्टकम् ॥”

इति वराक्वाथखदिराष्टकौ ॥ २९० ॥

“निम्बातिमुक्तकाशोकप्लक्षवेतसपल्लवैः ।
निशापर्य्युषितः क्वाथो मसूरीभयनाशनः ॥”

इति निम्बादि ॥ २९१ ॥ इति मसूर्य्यधिकारः ॥ * ॥

अथ मुखरोगे ।

“बृहतीभूमिकदम्बककण्टकार्य्याः क्वाथः ।
गण्डूषतैलयुक्तः कृमिदन्तस्य वेदनाशमनः ॥”

इति बृहत्यादि ॥ २९२ ॥

“क्वाथपानन्तु दार्व्वीत्वङ्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा पेयो माक्षिकसंयुतः ॥”

इति दार्व्वादिहरीतकीकषायौ ॥ २९३ ॥

“कटुकातिविषादारुपाठामुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥”

इति कटुकादि ॥ २९४ ॥ * ॥

मुखपाके ।

“जातीपत्रामृताद्राक्षायासदार्व्वीफलत्रिकैः ।
क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत् ॥”

इति जातीपत्रादि ॥ २९५ ॥

“पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवाः ।
पञ्चपल्लवकः श्रेष्ठः कषायो मुखधावने ॥”

इति पटोलादि ॥ २९६ ॥

“पञ्चवल्कलकषायो वा त्रिफलाक्वाथ एव वा ।
मुखपाकेषु सक्षौद्रः प्रयोज्यो मुखधावने ॥”

इति पञ्चवल्कत्रिफलाकषायौ ॥ २९७ ॥

“स्वरसः क्वथितो दार्व्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा ॥”

इति दार्व्वीक्वाथः ॥ २९८ ॥

“सप्तच्छदोशीरपटोलमुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥”

इति सप्तच्छदयष्ट्याह्वादिकषायौ ॥ २९९ ॥

“पटोलशुण्ठीत्रिफलाविशाला-
त्रायन्तितिक्ताद्विनिशामृतानाम् ।
पीतः कषायो मधुना निहन्ति
मुखे स्थितस्तस्य गदानशेषान् ॥”

इति पटोलादि ॥ ३०० ॥

“क्वथितास्त्रिफलापाठामृद्वीकाजातिपल्लवाः ।
निषेव्या भक्षणीया वा त्रिफला मुखपाकहा ॥”

इति त्रिफलादि ॥ ३०१ ॥

इति मुखरोगाधिकारः ॥ * ॥

अथ प्रदरे ।

“दार्व्वीरसाञ्जनवृषाब्दकिरातबिल्व-
भल्लातकैरवकृतो मधुना कषायः ।
पीतो जयत्यतिबलं प्रदरं सशूलं
पीतासितारुणविलोहितनीललक्षणाम् ॥”

इति दार्व्वादि ॥ ३०२ ॥ * ॥

अथ योनिव्यापदि ।

“गुडूचीत्रिफलादन्तीक्वाथैश्च परिषेचनम् ॥”

इति गुडूचीत्रिफलादन्तीक्वाथाः ॥ ३०३ ॥

अथ गर्भिण्याम् ।

“चन्दनं शारिवालोध्रमृद्वीकाशर्कराऽन्वितम् ।
एष क्वाथः प्रदातव्यो गर्भिण्या ज्वरशान्तये ॥”

इति चन्दनादि ॥ ३०४ ॥

“ह्रीवेरारलुरक्तचन्दनबलाधन्याकवत्सादनी-
मुस्तोशीरयवासपर्पटविषाक्वाथं पिबेद्गर्भिणी ।
नानावर्णरुजातिसारकगदे गर्भाश्रिते वा ज्वरे
योगोऽयं मुनिभिः पुरा निगदितः सूत्यामये-
षूत्तमः ॥”

इति बृहद्ध्रीवेरादि ॥ ३०५ ॥ * ॥

अथ स्तनरोगे ।

“हरिद्रादिं वचादिं वा प्रपिबेत् स्तन्यशुद्धये ॥”

इति हरिद्रादिवचादिक्वाथौ ॥ ३०६ ॥

“तत्र वातात्मके स्तन्ये दशमूलीजलं पिबेत् ॥”

इति दशमूलक्वाथः ॥ ३०७ ॥

“पित्तदुष्टेऽमृताभीरुपटोलं निम्बचन्दनम् ।
धात्री कुमारश्च पिबेत् क्वाथयित्वा सशारिवम् ॥”

इति अमृतादि ॥ ३०८ ॥

“कफे वा त्रिफलापथ्यभूनिम्बकटुरोहिणी ॥”

इति त्रिफलादि ॥ ३०९ ॥

“धात्री स्तन्यविशुद्ध्यर्थं मुद्गाष्टकरसाशना ।
भार्गीदारुवचापाठाः पिबेत् सातिविषाः शृताः ॥”

इति भार्ग्यादि ॥ ३१० ॥

“सघृतं त्रिफलाक्वाथं स्तनरोगहरं पिबेत् ॥”

इति सघृतत्रिफलाक्वाथः ॥ ३११ ॥ * ॥

अथ सूतिकारोगे ।

“अमृतानागरसहचरभद्रोत्कटपञ्च-मूलजलद-
जलम् ॥
शृतशीतं मधुयुतं निवारयति सूतिकातङ्कम् ॥”

इति सूतिकादशमूलम् ॥ ३१२ ॥

“सहचरपुष्करवेतसमूलं वैकङ्कतदारुकुलत्थ-
समम् ।
जलमत्र ससैन्धवहिङ्गुयुतं सद्यो ज्वरसूतिक-
शूलहरम् ॥”

इति सहचरादि ॥ ३१३ ॥

“दशमूलीकृतः क्वाथः सद्यः सूतीरुजापहः ॥”

इति दशमूली ॥ ३१४ ॥ * ॥

अथ मक्कलशूले ।

“सूताया हृच्छिरोवस्तिशूलं मक्कल्लसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा ॥
पिप्पल्यादिगणक्वाथं पिबेद्वा लवणान्वितम् ॥”

इति पिप्पल्यादिगणक्वाथः ॥ ३१५ ॥

इति स्त्रीरोगाधिकारः ॥ * ॥

अथ बालरोगे ।

“भैषज्यं पूर्व्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
कार्य्यन्तदेव बालानां मात्रा तस्य कनीयसी ॥
हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः ।
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ॥”

इति हरिद्रादि ॥ ३१६ ॥

“बिल्वञ्च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥”

इति बिल्वादिक्वाथः ॥ ३१७ ॥

“समङ्गाधातकीलोध्रशारिवाभिः शृतं जलम् ।
दुर्व्वारेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥”

इति समङ्गादि ॥ ३१८ ॥

“नागरातिविषामुस्तबालकेन्द्रयवैः शृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥”

इति नागरादि ॥ ३१९ ॥

“बिल्वमूलकषायेण लाजाश्चैव सशर्कराः ।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशिनीः ॥”

इति सशर्करलाजयुक्तबिल्वमूलकषायः ॥ ३२० ॥

“पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
व्रणविस्फोटवीसर्पज्वराणां शान्तये शिशुः ॥”

इति पटोलादि ॥ ३२१ ॥ * ॥

अथ विषे ।

“कटभ्यर्ज्जुनशैरीयशेलुक्षीरिद्रुमत्वचः ।
कषायकल्कचूर्णाः स्युः कीटलूताव्रणापहाः ॥”

इति कटभ्यादि ॥ ३२२ ॥ इति चक्रपाणिदत्तः ॥

पाचनं, त्रि, पाचयिता । इति मेदिनी । ने, ६१ ॥

अथ किञ्चिद्द्रव्याणां विशिष्ट पाचनद्रव्यमाह ।

“अलं पनसपाकाय फलं कदलसम्भवम् ।
कदलस्य तु पाकाय बुधैरभिहितं घृतम् ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ॥

नारिकेलफलताम्रबीजयोः
पाचकं सपदि तण्डुलं विदुः ।
क्षीरमाशु सहकारपाचनं
क्षारमम्लमपि हरीतकी हिता ॥
मधूकमालूरकपारुतानां
परूषखर्ज्जूरकपित्थकानाम् ।
पाकाय पेयं पिप्पलवीजं
ह्लेनापि तक्रेऽपि तदेव देयम् ॥
खर्ज्जूरशृङ्गाटकयोः प्रशस्तं
विश्वौषधं कुत्र च भद्रमुस्तम् ।
यव्याङ्गमोचद्रफलेषु शीतं
शस्तं तथा वार्य्यपितं प्रणीतम् ॥
तण्डुलेषु पयसः पयो हितं
दीप्यकम्तु चिपिटे कणायुतम् ।
यष्टिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गीर्य्यते ॥"
सुमनेषु गोधमेषु । गीर्य्यते कथ्यते ।
गोधूममाषहरिमन्थसतीलमुद्ग-
पाको भवेत् भ्रटिति मातुलपुत्रकेण ।
खण्डञ्च खण्डयति माषभवञ्च जीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णम् ॥
मातुलपुत्रकः धुस्तूरफलम् ॥
कङ्गुश्यामाकनीवाराः कुलत्थश्चाविलम्बितम् ।
दध्नो जलेन जीर्य्यन्ति वैदलाः काञ्जिकेन तु ॥
पिष्टान्नं शीतलं वारि क्षणात् सैन्धवं पचेत् ।
माषखण्डौ निम्बफलं पायसं मुद्गयूषकैः ॥
वटी वेशवारावम्बवड्डेन फेनी-
श्चमं पर्पटः शिग्रुवीजेन याति ।
कणाम्बुयुक्तो लड्डुकापूपशृङ्गा-
विपाको भवेच्छुष्कमांसमण्डयोश्च ॥
शेमवार: वेमर इति लोके । तद्यथा,—
सुहीं निशाहिङ्गुलवङ्गकेला-
धन्याकजीरार्द्रकनागराणि ।
सम्बीयगं सैन्धवपर्णमत्र
यथोचितं संस्कृतय प्रणीतमिति ॥
शृङ्गा शृङ्गकः पानकविशेषः । मण्डः माण्ड इति
लोके ।
किमत्र चित्रं बहुमत्स्यमांस-
भोजी सुखी काञ्जिकपानतः स्यात् ।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति ॥
आममामलके भोज्ये नष्टोऽपि पिशितं हितम् ।
कूर्ममांसं यकृत्शाकञ्चाशु पाकमुपैति हि ॥
कपोतपारावतलावकमट-
तित्तिरलानां पिशितानि भुक्त्वा ।
कामस्य फलं पारपाय पिबे-
सुखी भवन्ति चक्षुषी हि दृष्टम् ॥
तयानां यवलशाकं ।
शाकानि सर्वाण्यपि यान्ति पाकं
क्षारेण सद्यस्तिलनालजेन ।
सर्षपमूलकसिद्धार्थकवास्तुकानां
शाकानामारनालपितेन पाकः ।
चचूक चेचु इति लोके । गायत्री खदिरः ॥
पलाण्डुकाकेमुककारवेल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम् ।
उपोदिकालाबुपटोलकानां
सिद्धार्थको मेघरवस्य पक्ता ॥
मेघरवः चवराई इति लोके ।
विपच्यते शूरणकं गुडेन
तथालुकं तण्डुलनीरकेण ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कशेरुपाकः किल नागरेण ॥
लवणस्तण्डुलतोयात सर्पिर्जम्बीरकादम्लात् ।
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिका-
सैलम् ॥
क्षीरं जीर्य्यति तक्रेण तद्गव्यं कोषामण्डकात् ।
माहिषं माणिमन्थेन शङ्खचूर्णेन तद्दधि ॥
मण्डकः माण्डे इति लोके ।
रसाला जीर्य्यति योषात् खण्डं नागरभक्षणात् ।
सिता नागरमुस्तेन तथेक्षुस्वादकारसात् ॥
जरामिरा गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं मुनिभिः प्रणीतम् ।
उष्णेन शीतं शिशिरेण चोष्णं
जीर्णं भवेत् क्षारगणस्तथाम्लैः ॥
इरा मदिरा ।
तप्तं तप्तं हेम वा तारमथो
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तत्र नीरं भद्रमुस्तं विशेषात् ॥
तत्र तोयाजीर्णे । इति भावप्रकाशे जठ-
राग्निविकाराजीर्णविसूचिकालसकविलम्बिका-
चिकित्सा ॥
पाचनः, पुं, (पाचयतीति । पच् + णिच + "नन्दि-
ग्रहीति ।" ३।१।१३४ । इति ल्युः ।) अग्निः ।
इति मेदिनी । ने, ६० ॥ अम्लरसः । इति हेम-
चन्द्रः । ६ । २४ ॥ रक्तैरण्डः । इति राज-
निर्घण्टः ॥
पाचनकः, पुं, (पाच्यतेऽनेनेति । पच + णिच +
करणे ल्युट । ततः संज्ञायां कन् ।) टङ्कणः ।
इति हेमचन्द्रः । ४ । १० ॥
पाचनी, स्त्री, (पाच्यते भुक्तद्रव्यादिकं यया । पच +
णिच् + ल्युट । स्त्रियां ङीप ।) हरीतकी ।
इति मेदिनी । ने, ६१ ॥ (पाचयतीति युतपत्या
परिपाचके वाच्यलिङ्गः । यथा, भावप्रकाशे
पूर्व्वखण्डे १ भागे ।
"वटपत्री स्रग निक्ता कटुका दीपनी लघुः ।
कृष्णाणा पाचनी कासश्वासज्वरकफानिलान् ॥")
पाचलं, क्ली, (पाचयतीति । पच + णिच् +
बाहुलकात् कलन् । यद्वा, पाचं पाचनं
लातीति । ला + कः ।) पाचनम् । इति
मेदिनी । ले, १०६ ॥
पाचलः, पुं (पाचयतीति । पच् + णिच् + बाहुल-
कात् कलन् ।) पाचकः । अग्निः । राधन-
द्रव्यम् । वायुः । इति शब्दरत्नावली ॥
पाची, स्त्री, (पाचयति स्वपत्ररसादिप्रलेपादिना
परिपक्वयति व्रणानिति । पच + णिच् + "सर्व्व-
धातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।
"कृदिकारादक्तिनः ।" ४ । १ । ४५ । इत्यस्य
वार्त्तिकोक्त्या ङीष् ।) लताविशेषः । पाचि इति
पचि इति च हिन्दी भाषा । तत्पर्य्यायः । मर-
कतपत्री २ हरितलता ३ हरितपत्रिका ४
पत्री ५ सुरभिः ६ मालारिष्टा ७ गारुत्मत-
पत्रिका ८ । अस्या गुणाः । कटुत्वम् । तिक्त-
त्वम् । उष्णत्वम् । कषायत्वम् । वातदोषग्रह-
भूतविकारनाशित्वम् । त्वग्दोषप्रशमनत्वम् ।
व्रणेषु हितत्वञ्च । इति राजनिर्घण्टः ॥
पाजः, [स्] क्ली, (पाति रक्षतीति पात्यनेनेति
वा । पा रक्षणे + "पातेर्बले जुट् च ।" उणां
४ । २०२ । इति असुन् जुडागमश्च ।) बलम् ।
इत्युणादिकोषः ॥ (यथा ऋग्वेदे ।८।४६।२५।
"आ नो वायो महे तने याहि मखाय पाजसे ॥")
पाञ्चकपालः, त्रि, (पञ्चकपालस्यायमिति । "तस्ये-
दम् ।" ४ । ३ । १२० । इत्यण् ।) पञ्चकपाल-
यागसम्बन्धी ॥ इति व्याकरणम् ॥
पाञ्चजन्यः, पुं, (पञ्चजने दैत्यविशेषे भवः । "पञ्च-
जनादुपसंख्यानम् ।" ४ । ३ । ५८ । इत्यस्य
वार्त्तिकोक्त्या ण्यः ।) विष्णुशङ्खः । इत्यमरः ।
१ । १ । २६ ॥ "पञ्चजनो नाम दैत्यः समुद्रे तिमि-
रूप आसीत् तदस्थिजत्वात् ।" इति भरतः ॥
(यथा, गीतायाम् । १ । १५ ।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥"
अस्य विवरणम् यथा, हरिवंशे ।९८।१५—१७।
"समुद्रः प्रत्युवाचेदं दैत्यः पञ्चजनो महान् ।
तिमिरूपेण तं बाल ग्रस्तवानिति माधव ! ॥
स पञ्चजनमासाद्य जघान पुरुषोत्तमः ।
न चाससाद तं बालं गुरुपुत्त्रं तदाच्युतः ॥
स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्द्दनः ।
यः स देवमनुष्येषु पाञ्चजन्य इति श्रुतः ॥"
पञ्चभिः काश्यपवशिष्ठप्राणाङ्गिरसच्यवनैर्जनै-
र्निर्वृत्तः । इति व्यञ् ।) अग्निः । इति मेदिनी ।
ये, १२२ ॥ (यथा, महाभारते ।३।२१९।१-५।
"काश्यपो ह्यथ वाशिष्ठः प्राणश्च प्राणपुत्त्रकः ।
अग्निराङ्गिरसश्चैव च्यवनस्त्रिसुवर्च्चकः ॥
अचरत स तपस्तीव्रं पुत्त्रार्थं बहुवार्षिकम् ।
पुत्त्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम् ॥
महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ ।
जज्ञे तेजो महार्च्चिष्मान् पञ्चवर्णः प्रभावनः ॥
समिद्धोऽग्निः शिरस्तस्य बाहू सूर्य्यनिभौ तथा ।
त्वङ्नेत्रे च सुवर्णाभे कृष्णे जङ्घे च भारत ! ॥
पञ्चवर्णः स तपसा कृतस्तैः पञ्चभिर्जनैः ।
पाञ्चजन्यः श्रुतो देवः पञ्चवंशकरस्तु सः ॥"
हारीतमुनिवंशीयस्य दीर्घतुण्डः पुत्त्रः । इति
स्कन्दपुराणे सह्याद्रिखण्डम् । १ । ३१ । ६२ ॥)
पाञ्चजन्यधरः, पुं, (पाञ्चजन्यं तदाख्यया प्रसिद्धं शङ्खं
धरतीति । धृ + अच् ।) विष्णुः । इति हारावली ॥

पाञ्चलिका, स्त्री, (पञ्चाली + स्वार्थे अण् । ततः कन् ततष्टापि अत इत्वञ्च ।) पञ्चालिका । इति भरतद्विरूपकोषः ॥

पाञ्चशब्दिकं, क्ली, (पञ्चभिः शब्दैर्निर्वृत्तम् । "तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) पञ्चप्रकारवाद्यम् । यथा, स्कान्दे रेवाखण्डे ।
"अङ्गजं चर्म्मजञ्चैव तन्त्रजं कांस्यजं तथा ।
फुत्कारजञ्चेति मुनिभिः कथितं पाञ्चशब्दिकम् ॥"

पाञ्चार्थिकः, पुं, (पञ्चार्थाः सन्त्यत्र । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) पाशुपतः । यथा,—
"पाञ्चार्थिकः पाशुपतश्चिद्रूपः स्फटिमाश्रितः ॥"
इति त्रिकाण्डशेषः ॥

पाञ्चालं, क्ली, (पञ्चाल एव । पञ्चाल + स्वार्थे अण् ।) शास्त्रम् । यथा,—
"पितृहूर्नृपपुर्य्या द्वार्द्दक्षिणेन पुरञ्जनः ।
राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥
इति श्रीभागवते ।४। पुरञ्जनोपाख्याने ।२५।५०॥
"पञ्चानां विषयाणामन्यतोऽनवगतानां प्रकाशनायालमिति पञ्चालं शास्त्रम् ।" इति ।
"प्रवृत्तञ्च निवृत्तञ्च शास्त्रं पञ्चालसंज्ञकम् ।"
इति च तट्टीकायां श्रीधरस्वामी ॥
अत्र पञ्चालमिति पाठः किन्तु स्वार्थे अण्प्रत्यये पाञ्चालमपि भवति ॥

पाञ्चालः, त्रि, (पञ्चाले तदाख्यया प्रसिद्धे प्रदेशे भवः । "तत्र भवः ।" ४ । ३ । ५३ । इत्यण् ।) पञ्चालदेशोद्भवः ॥

पाञ्चालः, पु, (पञ्चभिः प्रधानाभिर्नदीभिरलति पर्य्याप्नोतीति पञ्चालः । ततः स्वार्थे अण् ।) देशविशेषः । स तु द्रुपदराजनगरम् । अधुना फरक्काबाद इति ख्यातः ॥ (यथा, महाभारते । १ । १३८ । ३ ।
"पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि ।
पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा ॥"
तद्देशवासिषु पु भूम्नि ।) यथा, —
"पाञ्चालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः ।"
इत्यादि विराटपर्व्व ॥
(ब्रह्मदत्तस्य सहचरविशेषः । यथा, हरिवंशे । २३ । २२ ।
"पाञ्चालकण्डरीकाभ्यां तस्य सख्यमभूत्तदा ॥")

पाञ्चालिका, स्त्री, (पाञ्चाली + स्वार्थे कन् । ततो ह्रस्वश्च ।) वस्त्रदन्तादिकृतपुत्तलिका । तत्पर्य्यायः । पुत्रिका २ । इत्यमरः ॥ पञ्चालिका ३ । इति भरतः ॥ शालभञ्जी ४ । इति हेमचन्द्रः ॥ पाञ्चाली ५ शालभञ्जिका ६ । इति जटाधरः ॥ (रीतिविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ९ । ५ ।
"——————————वर्णैः शेषैः पुनर्द्वयोः ।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥")

पाञ्चाली, स्त्री, (पञ्चभिर्वर्गैरलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पाञ्चालिका । (यथा, देवीभागवते । ४ । १९ । ४ ।
"यन्मायया मोहितश्चाहं सदावर्त्ते परात्मनः ।
परवान् दारुपाञ्चाली मायिकस्य यथा वशे ॥")
(पाञ्चाले भवा । पाञ्चाल + अण् । स्त्रियां ङीप् ।) पाण्डवपत्नी । तत्पर्य्यायः । कृष्णा २ पाण्डुशर्म्मिला ३ पार्षती ४ द्रौपदी ५ याज्ञसेनी ६ वेदिजा ७ । इति जटाधरः ॥ सैरन्ध्री ८ नित्ययौवना ९ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १६८ । ४१ ।
"कुमारी चापि पाञ्चाली वेदीमध्यात् समुत्थिता ॥"
अस्य जन्मादिविवरणं द्रौपदीशब्दे द्रष्टव्यम् ॥ रीतिविशेषः । पाञ्चालानां प्रियत्वादेतस्यास्तथात्वम् । यथा, साहित्यदर्पणे । ९ । २ ।
"वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।"
एतल्लक्षणं यदाह भोजः ।
"समस्तपञ्चषपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ॥")

पाट्, व्य, (पाटयति कार्य्यान्तरप्रेरणात् प्रबन्धकार्य्यं छेदयतीति । पट + णिच् + क्विप् ।) सम्बोधनम् । इत्यमरः । ३ । ४ । ७ ॥

पाटकः, पु, (पाटयति दीप्यतीति । पाटि + ण्वुल् ।) महाकिष्कुः । कटकान्तरम् । वाद्यम् । अक्षादिचालनम् । कूलद्वयापचयः । रोधः । इति मेदिनी ॥ ग्रामैकदेशः । इति हेमचन्द्रः ॥ (पाटयति छिनत्तीति । छेदके । भेदके, त्रि । यथा हरिवंशे । १७१ । १४ ।
"अहं तमो घनीभूतमहमेव च पाटकः ॥")

पाटच्चरः, पु, (पाटयन् छिन्दन् चरतीति । चर + पचाद्यच् । पृषोदरादित्वात् साधुः ।) चौरः । इत्यमरः ॥ (यथा, प्रद्युम्नविजये । ७ अङ्के ।
"मल्लिन् । कुलिङ्गसाहसिकत्वं किलैतस्य पापपाटच्चरस्य ॥")

पाटनं, क्ली, (पट + णिच् + भावे ल्युट् ।) छेदनम् । यथा,—
"अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पाटने कर्णशृङ्गाणां मासार्द्धन्तु यवान् पिबेत् ॥"
इति प्रायश्चित्ततत्त्वे यमः ॥

पाटलं, क्ली (पाटलां वर्णमस्यास्तीति । पाटल + अर्श आदित्वादच् ।) पाटलीपुष्पम् । इत्यमरः ॥ [illegible]मिति केचित् ॥ (यथा, भागवते । [illegible] । [illegible] । [illegible] ।
"पाटलाशोकबकुलैः कुन्दैः कुरुबकैरपि ॥"
पाटलमिति केचित् ॥)

पाटलः, पु ([illegible]तीति । पट + णिच् + वृषादित्वात् कलच् ।) श्वेतरक्तवर्णः । गोलापी[illegible] इति भाषा । [illegible] । इत्यमरः ॥ अस्य गुणाः । [illegible]लत्वम् । [illegible]त्वम् । त्रिदोषकारित्वञ्च । इति राजवल्लभः ॥ तद्वर्णयुक्ते त्रि ॥ (यथा, रघौ । २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥")

पाटलद्रुमः, पु, (पाटलस्य पाटलपुष्पस्य द्रुमो वृक्षः । यद्वा, पाटलो द्रुमः इति नित्यकर्म्मधारयः ।) पुन्नागवृक्षः । इति राजनिर्घण्टः ॥

पाटला, स्त्री, (पाटलो वर्णोऽस्त्यस्याः । पाटलवर्णत्वादेवास्यास्तथात्वम् ।) दुर्गा । यथा,—
"अपर्णानेकवर्णा च पाटला पाटलावती ॥"
इति तन्त्रसारे तस्याः शतनामस्तोत्रम् ॥
पुष्पवृक्षविशेषः । पारुल इति भाषा ॥ तत्पर्य्यायः । पाटलिः २ अमोघा ३ काचस्थाली ४ फलेरुहा ५ कृष्णवृन्ता ६ कुबेराक्षी ७ । इत्यमरः ॥ ताम्रपुष्पी ८ कुम्भिका ९ सुपुष्पिका १० वसन्तदूती ११ स्थाली १२ स्थिरगन्धा १३ अम्बुवासी १४ कालवृन्ती १५ । इति राजनिर्घण्टः ॥ मधुदूती १६ कालास्थली १७ अलिवल्लभा १८ । इति भावप्रकाशः ॥ कामदूती १९ कुम्भी २० तोयाधिवासिनी २१ । इति रत्नमाला ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातशोफाध्मानवमिश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥ तुवरत्वम् । अनुष्णत्वम् । दोषत्रयारुचिहिक्कातृष्णानाशित्वञ्च ॥ तत्पुष्पगुणाः । कषायत्वम् । मधुरत्वम् । हिमत्वम् । हृद्यत्वम् । कफास्रनाशित्वञ्च । तत्फलगुणाः । पित्तातिसारदाहनाशित्वम् । हिक्कास्रपित्तकारित्वञ्च । इति भावप्रकाशः ॥ * ॥ तदुत्पत्तिर्यथा,—
"गते ब्रह्मणि सर्व्वेऽपि तपः संहृत्य तं तदा ।
लिङ्गं चित्रवने ह्यद्य प्रतिष्ठाप्य चचार ह ॥
विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाध्मातदृशा हरः ।
स्मरमालोकयामास शिखाग्राच्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् पादादारभ्य कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदासीन्मुष्टिबन्धस्तु रुक्मपृष्ठो महाप्रभः ।
स चम्पकतरुर्जातः सुगन्धाढ्यो गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्वज्रभूषितम् ।
तज्जातं केशराराणां बकुलं नामतो नग ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविभूषिता ।"
इति वामने ६ अध्यायः ॥
रक्तलोध्रः । इति शब्दचन्द्रिका ॥

पाटलापुष्पसन्निभं, क्ली, (पाटलापुष्पस्य सन्निभं सदृशं यत्र ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

पाटलिः, स्त्री, (पाटि + "पाटेर्डलिः" इति डलिः । पाटिं दीप्तिं लातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ ।) इति कः । पाटलिपुष्पाणां आलिपुञ्जाकुलत्वात्तस्यास्तथात्वम् ।) पाटलापुष्पवृक्षः । इत्यमरः ।

(यथा, महाभारते । ७ । ७२ । १५ ।
"तन्तु पाटलिपुष्पाणां समवर्णा हयोत्तमाः ।
वहमाना यराजन्त मत्स्यस्यामित्रघातिनः ॥")

पाटलिपुत्त्रं, क्ली, (पाटलिः पुत्त्र इव यस्य । बहु-पाटलिवृक्षोत्पत्तिस्थानत्वेनास्य तथात्वम् ।) नगरविशेषः । पाटना इति ख्यातः । तत्पर्य्यायः । कुसुमपुरम् २ । इति हेमचन्द्रः । ४ । ४२ ॥ पुष्पपुरम् ३ पाटलिपुत्त्रकम् ४ । इति त्रिकाण्ड-शेषः ॥ (इदन्तु गङ्गातीरस्थम् । यथा हितोप-देशे । "अस्ति भागीरथीतीरे पाटलीपुत्त्रनाम-धेयं नगरम् ।"
इदमेव पुरा मगधानां राजधानी आसीत् । अत्रत्यसुदर्शननाम्नो भूपतेः पुत्त्राणां नीति-विद्याधिगमाय विद्वत्कुलचूडामणिना विष्णु-शर्म्मणा पञ्चतन्त्रहितोपदेशादयो ग्रन्था विर-चिताः ॥)

पाटली, स्त्री, (पाटं दीप्तिं लातीति । ला + कः । स्त्रियां ङीष् ।) कटभीवृक्षः । मुष्ककवृक्षः । इति राजनिर्घण्टः ॥ (यथा, इन्द्रजाले १ अध्याये ।
"पुष्ये रुद्रजटामूलं मुखस्थं कारयेद्बुधः ।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम् ।
तथैव पाटलीमूलं ताम्बूलेन तु वश्यकृत् ॥")

पाटव, क्ली, (पटोर्भावः कर्म्म वा । पटु + "इग-न्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) पटुता । यथा । "पाटवं संस्कृतोक्तिषु ।" इति हितोपदेशः ॥ (दार्ढ्यम् । यथा, पञ्चतन्त्रे ।४।६४।
"विच्छिद्यते कदाचित् धीः कर्म्मणा भोग-दायिना ।
पुनः समाहिता सा स्यात् तदेवाभ्यासपाट-वात् ॥")
आरोग्यम् । इति राजनिर्घण्टः ॥ (पटो-श्छात्राः पाटवाः । इति सिद्धान्तकौमुदी ॥)

पाटविकः, त्रि, (पाटवं पटुत्वमस्त्यस्य । पाटव + ठन् ।) पटुः । धूर्त्तः । इति त्रिकाण्डशेषः ॥

पाटह्लिका, स्त्री, (पाटहं पटहावयवः सदृशा-कृतिरस्त्यस्याः । पाटह + ठन् । ढक्कावाद्या-कृतिसदृशत्वादेवास्यास्तथात्वम् ।) गुञ्जा । इति हारावली । १४५ ॥

पाटितं, त्रि, (पाट्यते स्म इति । पट + णिच् + क्तः ।) कृतपाटनम् । तत्पर्य्यायः । दारितम् २ भिन्नम् ३ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । २ । १६ ।
"पाटितमसृ बहुविदारितं वेदनावच्च ॥")

पाटी, स्त्री, (पाटयतीति । पाटि + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् । स्त्रियां ङीष ।) बलाक्षुपः । इति राजनिर्घण्टः ॥ परि पाटी । अनुक्रमः । यथा, "पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटाम् ।" इत्यादि लीलावती ॥

पाटीरः, पु, पटीरः । इति विश्वः । (यथा, मुकुन्दमालायाम् । ३२ ।
"लाटीनेत्रपुटीपयोधरघटीरेवातटीद्रुष्कुटी
पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते ।
गोविन्देति जनार्द्दनेति जगतां नाथेति कृष्णेति च
व्याहारैः समयस्तदेकमनसां पुंसामतिक्रामति ॥")

पाट्यं, क्ली, (पट्टस्य इदम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) पट्टशाकम् । यथा,—
"पाट्यशाकन्तु मधुरं दुर्जरं गुरुपाकि च ॥"
इति राजवल्लभः ॥
(पाटि + यत् । पाटनीये । छेद्ये, त्रि ॥)

पाठः, पुं, (पठनमिति । पठ + भावे घञ् ।) विधिना वेदस्याभ्यसनम् । (पठ + णिच् + भावे घञ् ।) शिष्याणामध्यापनम् । तत्पर्य्यायः । महायज्ञः २ ब्रह्मयज्ञः ३ पठनम् ४ पाठना ५ पाठनम् ६ अध्ययनम् ७ अध्यापनम् ८ अध्या-पना ९ अभ्यसनम् १० । इत्यमरभरतौ ॥ निपाठः ११ निपठः १२ । इति सङ्कीर्णवर्गे अमरः ॥ * ॥ माहात्म्यादिपाठे तु ॐ नारा-यणाय नमः ॐ नराय नमः ॐ नरोत्तमाय नमः ॐ देव्यै नमः ॐ सरस्वत्यै नमः ॐ व्यासाय नमः । इति नत्वा पाठ्यम् ।
"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥"
इति विधेः ॥
एवञ्च भागवतीयसूतोक्तौ उदीरयेत् इत्यस्य स्वयन्तथा उदीरयन्नन्यान् पौराणिकानुपशिक्ष-यतीति श्रीधरस्वामिव्याख्यानमनुशासनविरुद्धम् । चैवेति भारतपाठाच्चकारेण व्यासो लब्धः । भागवते चैवेत्यत्र व्यास इति साक्षाल्लिखितम् । जयपदार्थमाह ब्रह्मचारिकाण्डे भविष्यपुराणम् ॥
"अष्टादशपुराणानि रामस्य चरितन्तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत । ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ॥"
कार्ष्णं कृष्णद्वैपायनप्रणीतम् ।
"सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"
जयत्यनेन संसारमिति जयस्तत्तद्ग्रन्थः । एव-ञ्चार्थानवलोकनात् आचाराद्वा स्तोत्रादावेष श्लोकः पठ्यते । मनुस्मृतौ वाराहीतन्त्रे च ।
"प्रणवञ्चादौ जप्त्वा च स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥
सर्व्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ।
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ॥
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम् ।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः ॥
हस्तसंस्थापनादेव यस्मादल्पफलं भवेत् ।
स्वयञ्च लिखितं यत्तु कृतिना लिखितञ्च यत् ॥
अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ।
ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः ॥
स्तोत्रं न दृश्यते यत्र प्रणवन्यासमाचरेत् ।
सङ्कल्पितं स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः ॥
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते विरामे मध्ये तु अध्यायादिं पठेन्नरः ॥"
ततश्च मार्कण्डेयपुराणीयदेवीमाहात्म्यस्यादौ ऋषिच्छन्दादिकं पठेत् । तद्यथा । प्रथम-चरितस्य ब्रह्मा ऋषिर्महाकाली देवता गायत्री छन्दो नन्दा शक्ती रक्तदन्तिकाबीजमग्निस्तत्त्वं महाकालीप्रीत्यर्थं जपे विनियोगः । मध्यम चरितस्य विष्णुरृषिर्म्महालक्ष्मीर्द्देवतानुष्टुप छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं सूर्य्यस्तत्त्वं महालक्ष्मीप्रीत्यर्थं जपे विनियोगः । उत्तरचरि-तस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरीबीजं वायुस्तत्त्वं सरस्वती-प्रीत्यर्थं जपे विनियोगः ॥ नैयतकालिककल्प-तरौ भविष्यपुराणम् ॥
"इतिहासपुराणानि श्रुत्वा भक्त्या महीपते ।
मुच्यते सर्व्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् । वाचकान्नरकं व्रजेत् ॥"
तथा ।
"देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः ।
ग्रन्थिञ्च शिथिलं कुर्य्याद्वाचकः कुरुनन्दन ॥
पुनर्ब्बध्नीत तत् सूत्रं न मुक्ता धारयेत् क्वचित् ।
हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः ॥
दत्त्वा तु वाचकायेह श्रुतस्याप्नोति यत् फलम् ।'
कांस्योपदोहनाः कांस्यक्रोडाः ।
"वाचकः पूजितो येन प्रसन्नस्तस्य देवताः ॥"
तथा ।
"ज्ञात्वा सर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः ।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम् ॥"
तथा ।
"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदन्तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थञ्चार्पयेन्नृप ॥
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते ॥"
तथा ।
"सप्तस्वरसमायुक्तं काले काले विशाम्पते ।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
पाठस्याष्टादशदोषा यथा,—
"शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् ।
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ॥
काकस्वरं शिरसितं तथा स्थानविवर्ज्जितम् ।
व्याकुलं तालहीनञ्च पाठदोषाश्चतुर्द्दश ॥
संगीतं शिरसः कम्पमल्पकण्ठमनर्थकम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अध्ययनक्रमो यथा,—
"आचम्य प्रयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्ष्यमाणो गुरोर्मुखम् ॥"
अध्यापनक्रमो यथा,—
"अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ।
प्राक् कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥

कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्व्ववत् ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीयीताप्यथ्ययनं नित्यं ब्राह्मण्याद्धीयतेऽन्यथा ॥"
इति कौर्म्मे उपविभागे १३ अध्यायः ॥ * ॥
पाठनिषेधकालो यथा । यद्यप्यहोरात्रेऽनध्यायो न ग्रहोपरागमात्रविषयः ।
"नाहं नकीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ।"
इति मनुवचनेन सामान्यतो निषेधात् ॥
एष त्र्यहानध्यायो ग्रस्तास्तविषय इति मिताक्षरा अन्यत्र त्वहोरात्रमनध्यायो याज्ञवल्क्यात् । यथा,—
"सन्ध्यागर्ज्जितनिर्घातभूकम्पोल्कानिपातने ।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्ता वा श्राद्धिकं प्रतिगृह्य च ॥"
द्युनिशमहोरात्रम् । चैत्राश्वयुमार्गशीर्षाणामादिप्रतिपदो नित्याः इति ब्रह्मचारिकाण्डधृतहारीतवचने एतासामनध्याये नित्यत्वाभिधानादन्यासां काम्यत्वम् । आदिप्रतिपदः शुक्लप्रतिपदः ॥
"या च यौधिष्ठिरी सेना गाङ्गेयशरताडिता ।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता ॥"
इति व्यासवचनमपि तावन्मात्रपरम् ॥ * ॥
गौतमोक्ताकालिकानध्याया यथा,—
आकालिकनिर्घातभूकम्पराहुदर्शनोल्का इति आकालिका इति । निमित्तकालमारभ्य परेद्युर्यावत् स एव कालस्तावदकालिकास्तत्र भवाः ॥
तथा,—
"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥" * ॥
उल्कादिषु प्रतिप्रसवमाह मनुः ।
'वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥"
पराशरभाष्ये कूर्म्मपुराणम् ।
"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥"
नारदः ।
"अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु ॥"*॥
सन्ध्यागर्ज्जने शास्त्रचिन्तानिन्दामाह स्मृत्यर्थसारे दुर्व्वासाः ।
"सन्ध्यायां गर्ज्जिते मेघे शास्त्रचिन्तां करोति यः ।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम् ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सज्योतिः स्यादनध्याय इत्याह भगवान् मनुः ॥"
इति मनुवचनं वर्षाविषयम् ॥*॥
अष्टम्यादिषु विशेषमाह हेमाद्रिधृतापस्तम्बः ।
"उदयास्तमिते वापि मुहूर्त्तत्रयगामि यत् ।
तद्दिनं तदहोरात्रमनध्यायविदो विदुः ॥
केचिदाहुः क्वचिद्देशे यावत्तु दिननाडिकाः ।
तावदेव त्वनध्यायो न तन्मिश्रे दिनान्तरे ॥"
तद्दिनं तां तिथिं प्राप्येत्यर्थः । दिनान्तरे तिथ्यन्तरे । अत्र पूर्व्ववचनस्तत्त्वमीमांसाध्यायिभिः परिगृहीतम् । परवचनन्तु अन्यग्रन्थपरम् । यत्तु निर्णयामृतधृतम् ।
"प्रतिपत्प्रथमाचैव कलामात्रेण चाष्टमी ।
दिनं दूषयते सर्व्वं सुरा गव्यघटं यथा ॥"
तद्दूषयत इत्यभिधानात् पूर्व्ववर्णितामात्रेण सर्व्वदिनदूषणाय । राजमार्त्तण्डे ।
"प्रे कौ चै चा द्वितीयाख्याः प्रेतपक्षे गते तु या ।
या तु कोजागरे जाते चैत्रावल्याः परेऽपि या ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
सर्व्वास्वेतास्वनध्यायः पुराणैः परिकीर्त्तितः ॥"
इति तिथ्यादितत्त्वम् ॥

पाठकः, त्रि, (पाठयति अध्यापयतीति । पठ + णिच् + ण्वुल् ।) उपाध्यायः । इति हेमचन्द्रः । १ । ७८ ॥ (यथा, महाभारते ।३।३१३।१०५।
"पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥")
धर्म्मभाणकः । इति त्रिकाण्डशेषः ॥ (पठतीति । पठ + ण्वुल् । वाचकः । अध्येता ।
"चर्व्वणं गिलनञ्चापि कासितं श्वासितन्तथा ।
नीचोच्चञ्चैव गम्भीरं वर्ज्जयेन् पाठकः सुधीः ॥"
इति हारीते प्रथमस्थाने प्रथमेऽध्याये ॥)

पाठभूः, स्त्री, (पाठस्य भूर्भूमिः स्थानमित्यर्थः ।) ब्रह्मारण्यम् । वेदादिपाठस्थानम् । इति त्रिकाण्डशेषः ॥

पाठमञ्जरी, स्त्री, (मञ्जु सुन्दरं यथा तथा रायति शब्दायते इति । मञ्जु + रै + कः । स्त्रियां ङीप् । पृषोदरादित्वात् लोपः । ततः पाठस्य मञ्जरी शाखिकेव ।) शारी पक्षिणी । इति शब्दमाला ॥

पाठशाला, स्त्री, अध्ययनगृहम् । पाठस्य अध्ययनस्य शाला गृहम् । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥

पाठशालिनी, स्त्री, (पाठेन शालते श्लाघते इति । शाल + णिनिः + ङीप् ।) शारी पक्षिणी । इति शब्दमाला ॥

पाठा, स्त्री, (पठ्यते बहुगुणवत्तया कथ्यते इति । पठ + कर्म्मणि घञ् । अजादित्वात् टाप् ।) लताविशेषः । आकनादि इति भाषा । तत्पर्य्यायः । अम्बष्ठा २ अम्बष्ठिका ३ प्राचीना ४ पापचेलिका ५ यूथिका ६ स्थापनी ७ श्रेयसी ८ विद्धकर्णिका ९ एकाष्ठीला १० कुचेली ११ दीपनी १२ वनतिक्तिका १३ तिक्तपुष्पा १४ वृहत्तिक्ता १५ शिशिरा १६ वृकी १७ मालती १८ वरा १९ देवी २० वृत्तपर्णी २१ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातपित्तज्वरपित्तदाहातीसारशूलनाशित्वम् । भग्नसन्धानकारित्वञ्च । इति वैद्यकम् ॥ * ॥
"अम्बष्ठा बालिका बाला शठाम्बा बालिकाम्बिका ।
अम्बा च माचिका चैव दृढ़वल्का मयूरिका ॥
गन्धपर्णी चित्रपुष्पी श्रेयसी सुखवाचिका ।
छिन्नपत्री भूरिमल्लिर्विज्ञेया षोडशाह्वया ॥
अम्बष्ठा सकषायाम्ला कफकण्ठरुजापहा ।
वातामयबलासघ्नी रुचिकृद्दीपनी परा ॥"
इति राजनिर्घण्टः ॥
"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्द्दिकुष्ठातीसारहृद्रुजः ॥
दाहकण्डूविषश्वासकृमिगुल्मगलव्रणान् ॥"
इति भावप्रकाशः ॥

पाठिका, स्त्री, (पाठा + स्वार्थे कन् । टापि अत इत्वञ्च ।) पाठा । इति भावप्रकाशः ॥

पाठी, [न्] पु, (पाठेव आकृतिर्विद्यते यस्य । पाठा + इनिः ।) चित्रकवृक्षः । इत्यमरः ॥ (पाठोऽस्यस्येति । "अत इनिठनौ ।"५।२।११५। इति इनिः ।) पाठविशिष्टः ॥ (कर्म्मोपपदेनास्य प्रमाणं यथा, मार्कण्डेये । ९८ । २६ ।
"वन्दिनामथ सूतानां विटानां लास्यपाठिनाम् ॥")

पाठीकुटः, पुं, (पाठीं कुटतीति । कुट + "इगुपधज्ञेति ।" ३ । १।१३५ । इति कः ।) चित्रकवृक्षः । इति राजनिर्घण्टः ॥

पाठीनः, पुं, (पाठिं पृष्ठं नमयतीति । पाठि + नम + णिच् + "अन्येभ्योऽपीति ।"डः ।"अन्येषामपि दृश्यते ।" ६ । ३ । १३७ । इति दीर्घः ।) मत्स्यविशेषः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इत्यमरः ॥ सहस्रदंष्ट्री ३ बोदालः ४ वदालकः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ५ । १६ ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥")
अस्य गुणाः । श्लेष्मलत्वम् । स्निग्धत्वम् । मधुरत्वम् । कषायत्वम् । बल्यत्वम् । वृष्यत्वम् । पाके कटुत्वम् । रोचनत्वम् । वातपित्तजित्त्वञ्च । इति राजवल्लभः ॥ (यथा च ।
"पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः ।
दूषयेद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
पाठकः । गुग्गुलुद्रुमः । इति मेदिनी । ने, ८९ ॥

पाठ्यं, त्रि, (पठ्यते इति । पठ + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) पठनीयम् । पठितव्यम् । यथा,—
"तिष्ठ रे तिष्ठ कण्ठोष्ठं कुण्ठयामि हठादहम् ।
अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥"
इति नैषधे १७ सर्गः ॥

पाणः, पु, (पण्यते व्यवह्रियतेऽनेनेति । पण + करणे घञ् ।) पाणिः । इति शब्दचन्द्रिका ॥ (पण + भावे घञ् । पणनम् । समयः । यथा, महाभारते । २ । ५७ । ८ ।
"दीव्यामहे पार्थिव । मा विशङ्कां
कुरुष्व पाणञ्च चिरञ्च मा कृथाः ॥")

पाणिः, स्त्री, (पणायन्ते व्यवहरन्त्यनयेति । पण + "अशिपणाय्यो रुडायलुकौ च ।" उणां ४ । १३२ । इति इण् आयप्रत्ययस्य लुक् च ।) पण्यवीथी । हट्टः । इत्युणादिकोषः ॥

पाणिः, पुं, (पणायन्ते व्यवहरन्त्यनेन । पण ङ व्यवहारे + "अशिपणाय्यो रुडायलुकौ च ।" उणां ४ । १३२ । इति इण् आयप्रत्ययस्य लुक् च ।) स च मणिबन्धावध्यङ्गुलिपर्य्यन्तभागः । स तु गर्भस्थबालकस्य मासद्वयेन भवति ॥ इति सुखबोधः ॥ तत्पर्य्याय. । पञ्चशाखः २ शयः ३ समः ४ हस्तः ५ करः ६ । इत्यमरभरतौ ॥ भुजः ७ । इति जटाधरः ॥ कुलिः ८ । इति शब्दरत्नावली ॥ भुजादलः ९ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । २ । १६ ।
"मृगनाभिसुगन्धां तां कृत्वा कान्तां मनोरमाम् ।
जग्राह दक्षिणे पाणौ मुनिर्म्मन्मथपीडितः ॥")
कुलिकटच्चः । इति रत्नमाला ॥ कुलियाकड़ा इति भाषा ॥

पाणिकच्छपिका, स्त्री, (कच्छपः कूर्म्मस्तदाकारो ऽस्त्यस्याः । कच्छप + ठन् । टापि अत इत्वञ्च । पाणिभ्यां कृता कच्छपिका कूर्म्माकृतिमुद्रा ।) कूर्म्ममुद्रा । यथा,—
"पाणिकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः ॥
पूजितं तेन पुष्पेण देवत्वं स्वस्य जायते ॥"
कूर्म्ममन्त्रो यथा,—
"द्वितीयं वैष्णवीतन्त्रं बीजं बिन्दिन्दुसंयुतम् ।
षडक्षरो परिचरं कूर्म्मबीजं प्रकीर्त्तितम् ॥"
इति कालिकापुराणे ५६ अध्यायः ॥

पाणिगृहीती, स्त्री, (पाणिर्गृहीतो यस्याः । "पाणिगृहीती भार्य्यायाम् ।" ४ । १ । ५२ । इत्यस्य वार्त्तिकोक्त्या ङीष् ।) विधानेनोढा । इत्यमरः । २ । ६ । ५ ॥

पाणिग्रहणं, क्ली, (पाणेर्ग्रहणं यत्र ।) विवाहः । इति हेमचन्द्रः । ३ । १८२ ॥ (यथा, रघुः । ७ । २९ ।
"इति स्वसुर्भोजकुलप्रदीपः
सम्पाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः ॥")

पाणिघः, पु, (पाणिं पाणिना वा हन्तीति । हन + "पाणिघताडघौ शिल्पिनि ।" ३ । २ । ५५ । इति टक् टिलोपो घत्वञ्च निपात्यते ।) पाणिवादः । पाणिना मृदङ्गादिवादकः । पाणिं वा हन्ति यः । यः पाणिनैव मृदङ्गादिवाद्यमुत्पादयति तत्र । यः पाणिना मृदङ्गमिव पाणिं वादयति तत्र च । इत्यमरभरतौ ॥

पाणिघातः, पुं, (पाणिना हन्तीति । हन + अशिल्पित्वात् अण् ।) पाणितडकः । इति सिद्धान्तकौमुदी ॥ (हन + भावे घञ् । पाणिना घातो हननमिति । पाणिहननम् ॥)

पाणिजः, पुं, (पाणौ जायते इति । पाणि + जन + "सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) नखः । इति हलायुधः ॥

पाणितलं, क्ली, (पाणितलमिव परिमाणमस्येति । अच् ।) कर्षपरिमाणम् । तोलकद्वयम् । इति वैद्यकपरिभाषा ॥ (पर्य्यायोऽस्य यथा,—
"कोलद्वयञ्च कर्षः स्यात् स प्रोक्तः पाणिमानिका ।
अक्षं पिचुःपाणितलं किञ्चित् पाणिश्च तिन्दुकम् ॥
बिडालपदकञ्चैव सुवर्णं कवलग्रहः ।
उदुम्बरञ्च पर्य्यायैः कर्ष एव निगद्यते ॥"
इति शार्ङ्गधरे पूर्ब्बखण्डे प्रथमेऽध्याये ॥
पर्य्यायान्तरं यथा,—
"विद्यादौ दंष्ट्रणौ कर्षं सुवर्णञ्चाक्षमेव च ।
बिडालपदकन्तञ्च पिचुम्पाणितलन्तथा ॥
तिन्दुकञ्च विजानीयात् कवडग्रहमेव च ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥
पाणेस्तलम् ।) हस्ताधोभागः ॥ (यथा, मनौ । ४ । १४३ ।
"स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् ।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु ॥")

पाणिनः, पु, (पणिनो मुनेर्गोत्रापत्यम् । पणिन् + अण् । "गाथिविदथिकेशिगणिपणिनश्च ।" ६ । ४ । १६५ । इति न टिलोपः ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥

पाणिनिः, पुं, (पणिनो मुनेर्युवापत्यम् । पणिन् + इञ् । न टिलोपः ।) मुनिविशेषः । तत्पर्य्याय. । आहिक. २ दाक्षीपुत्रः ३ शालङ्की ४ पाणिनः ५ शालातुरीयः ६ । इति त्रिकाण्डशेषः ॥ * ॥ (अयं हि पणिन्-वंशसम्भूतः प्रसिद्धो व्याकरणकर्त्ता । अस्य माता दाक्षी इत्याख्यया विश्रुता । यथा, पातञ्जलकारिकायाम् । १ । १ । २० ।
"सर्व्वे सर्व्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ॥"
तथाच शिक्षायाम् । ५६ ।
"शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥"
अस्य शालातुरीय इत्याख्यापि दृश्यते । यथा, अभिधानचिन्तामणौ । ३ । ५१५ ।
"————————अथ पाणिनौ ।
शालातुरीयदाक्षेयौ————————॥"
"गान्धारप्रदेशविशेषशलातुरग्रामजातत्वादेवास्य तथा नाम ।" इति चिन्तामणिटीका ॥ परे तु शलातुरग्रामोऽस्य जन्मस्थानमिति न स्वीकुर्व्वन्ति । यतः शलातुरोऽभिजनोऽस्य इति व्युत्पत्त्या शालातुरशब्देन शलातुरदेशोद्भवे जने एवार्थो नावगम्यते । अष्टाध्यायीसूत्रपाठस्य "तूदीशलातुरवर्म्मतीकूचवारात् ढक्छण्ढञ्यकः ।" ४ । ३ । ९४ । सूत्रात् अभिजनार्थे एव छण्प्रत्ययः । वृत्तिकारभट्टोजीदीक्षितेन तु "अभिजनश्च ।" ४ । ३ । ९० । इति सूत्रे "यत्र स्वयं वसति स निवासः । यत्र पूर्व्वैरुषितं सोऽभिजनः ।" इत्यभिजनशब्दस्यार्थः प्रदर्शितः । अतः स्पष्टः शलातुरप्रदेशः पाणिनेः पूर्व्वपुरुषाणां वासस्थानमित्येवावगम्यते नतु तस्येति ।

पुरा किल कात्यायननामा मुनिः सप्तलक्षश्लोकात्मकं बृहत्कथाभिधानं ग्रन्थं विरच्य काणभूतये श्रावयामास । सोमदेवभट्टस्तु ततः सारांशं समुद्धृत्य कथासरित्सागर इत्याख्यया प्रसिद्धं ग्रन्थं निर्म्मितवान् तस्मादेषाख्यायिका समधिगम्यते । यथा, तत्रैव । ४ । २०—९५ ।
"अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत ॥
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्य्यया ।
अगच्छत् तपसे खिन्नो विद्याकामो हिमालयम् ॥
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्व्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ॥
ततश्चागत्य मामेव वादायाह्वयते स्म सः ।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्तवासराः ॥
अष्टमेऽह्नि मया तस्मिन् जिते तत्समनन्तरम् ।
नभःस्थेन महाघोरो हुङ्कारः शम्भुना कृतः ॥
तेन प्रनष्टमैन्द्रन्तदस्मद्व्याकरणं भुवि ।
जिताः पाणिनिना सर्व्वे मूर्खीभूता वयं पुनः ॥
अथ संजातनिर्व्वेदः स्वगृहस्थितये धनम् ।
हस्ते हिरण्यदत्तस्य विधाय वणिजो निजम् ॥
उक्त्वा तच्चोपकोशायै गतवानस्मि शङ्करम् ।
तपोभिराराधयितुं निराहारो हिमाचलम् ॥"
*　　*　　*　　*
"अत्रान्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः ।
आराधितो मया देवो वरदः पार्व्वतीपतिः ॥
तदेव तेन शास्त्रं मे पाणिनीयं प्रकाशितम् ।
तदिच्छानुग्रहादेव मया पूर्णीकृतञ्च तत् ॥"
*　　*　　*　　*
"वर्षोऽथ मन्मुखादिच्छत् श्रोतुं व्याकरणं नवम् ।
ततः प्रकाशितं स्वामिकुमारेणैव तस्य तत् ॥
ततो व्याडीन्द्रदत्ताभ्यां विज्ञप्तो दक्षिणां प्रति ।
गुरुर्वर्षोऽब्रवीत् स्वर्णकोटिर्मे दीयतामिति ॥
अङ्गीकृत्य गुरोर्वाक्यं तौ च मामित्यवोचताम् ।
एहि राज्ञः सखे । नन्दात् याचितुं गुरुदक्षिणाम
गच्छामो नान्यतोऽस्माभिरियत् काञ्चनमाप्यते ।
नवाधिकाया नवतेः कोटीनामधिपो हि सः ॥"
इत्युपाख्यानेन पाणिनिः कात्यायनस्य राज्ञो नन्दस्य च समसामयिक इत्यवायाति । परं कात्यायनपाणिन्योः शब्दशास्त्रपाठेन पाणिनिः कात्यायनात् पूर्व्वतन इत्यनायासेनैव विज्ञायते । यतः कात्यायन एव पाणिनिकृतव्याकरणस्य वार्त्तिककारः । स च स्वकृतग्रन्थे विदुषां वरं पाणिनिं आचार्य्यत्वेन स्वीकृतवान् । [६ । ४ । १०४ । सूत्रस्य वार्त्तिं ।] पाणिनिस्तु स्वीयव्याकरणे पूर्व्वतनानां बहूनां विदुषां नामोल्लेखं कृतवान् परं कुत्रापि कात्यायनस्य नाम नाभिहितवानतः स्पष्टतोऽवगम्यते पाणिनिः कात्यायनात् वृद्धतर इति ।

अनेन महात्मना पाणिना रचितं व्याकरणं पाणिनीयाष्टकमित्याख्यया प्रसिद्धम् । कात्यन

ह्वाख्य वार्त्तिकं विधाय तीव्रसमालोचनां चकार । परं पतञ्जलिः सूत्रपाठस्य वार्त्तिकस्य च महाभाष्यं विधाय सर्व्वतः प्रमादपरिशून्योऽयं पाणिनीयाष्टाध्यायीग्रन्थ इति प्रदर्शयन् कात्यायनतीव्रदर्पः रराणैव समादरणीयं ग्रन्थमुत्तमम् । अष्टाध्यायीप्रारम्भे तु चतुर्द्दशसूत्राणि सन्ति तानि तु प्रत्याहारसूत्राणि ।
अष्टाध्यायीसूत्रपाठे, आपिशलिः ।६।१।९२। गालवः ।६।३।६१। चाक्रवर्म्मणः ।६।१।१३०। स्फोटायनः ।६।१।१२३। काश्यपः ।८।४।६७। गार्ग्यः ।८।४।६७। भारद्वाजः ।७।२।६३। सेनकः ५।४।११२। शाकटायनः ।३।४।१११। शाकल्यः ।१।१।१६। एतेषां पूर्व्वतनवैयाकरणानां नामानि सन्ति । अत्र ३९९६ संख्यकानि सूत्राणि विद्यन्ते ।
काश्मीरराजस्य जयापीडस्य राजत्वसमये पाणिनिव्याकरणं वार्त्तिकेन महाभाष्येण च सह विशेषविद्यार्थिसुधीवरविद्वज्जनशिक्षार्थं प्रचलितमासीत् । यथा, राजतरङ्गिण्याम् । ४ । ६३८—६४० ।
"नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः ।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥
भाष्यव्याख्यावधौ श्लोकैर्व्वैलच्यगयहतैः कृतः ।
सोऽयं तस्य विपर्य्यासो बुधैरिव विवर्णितः ॥
कृतविप्रोपसर्गस्य भूतनिष्ठाविधायिनः ।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥"
कात्यायनकृतवार्त्तिकात् पतञ्जलिकृतमहाभाष्याच्च अन्या अपि अष्टाध्यायीसूत्रपाठस्य उल्लिखितमहाभाष्यस्य च बह्वयष्टीकाः सन्ति बाहुल्यभिया तासां नामानि न प्रदत्तानि ॥*॥)

पाणिनीयं, त्रि, (पाणिनिना प्रोक्तं उपदिष्टं वा । पाणिनि + "वृद्धाच्छः ।" ४ । २ । ११४ । इति छः ।) पाणिनिना कृतं ग्रन्थादि । इति मुग्धबोधव्याकरणम् ॥

पाणिन्धमः, त्रि, (पाणिं धमतीति । ध्मा शब्दाग्निसंयोगयोः + "उग्रम्पश्येरम्मदपाणिन्धमाश्च ।" ३ । २ । ३७ । इति खश् मुम् च ।) हस्तकर्म्मताकाग्निसंयोगकर्त्ता । एवं शब्दकर्त्ता च । इति मुग्धबोधव्याकरणम् ॥ ("पाणयो ध्मायन्ते ऽस्मिन्निति पाणिन्धमोऽध्वा । अन्धकारावृत इत्यर्थः । तत्र हि सर्पाद्यपनोदनाय पाणयः शब्दान्ते ।" इति सिद्धान्तकौमुदी ॥)

पाणिन्धयः, त्रि, (पाणिभ्यां धयति पिबतीति । धेट पाने + "नाडीमुष्टीस्तनकरमुष्टिपाणिनासिकात् ध्मश्च ।" इति सूत्रात् खश्प्रत्ययेन साधुः ।) पाणिद्वारा पानकर्त्ता । इति मुग्धबोधव्याकरणम् ॥

पाणिपादं, क्ली, पाणिश्च पादश्च द्वयोः समाहारः । पाणिपादयोः समाहारः । इति व्याकरणम् ॥

पाणिपीडनं, क्ली, (पाणेः पीडनं ग्रहणं यत्र ।) पाणिग्रहणम् । विवाहः । इत्यमरः ॥ (पाणिभ्यां पीडनमिति विग्रहे क्रोधादिना हस्तमर्द्दनम् ॥)

पाणिभुक्, [ज्] पुं, (पाणिनैव भुज्यते दीयतेऽनेन पर्व्वादिहव्यं यद्वा, पाणिरिव भुज्यते यस्मादिस्यते व्यवह्रियते इति । भुज + क्विप् ।) उडुम्बरवृक्षः । इति शब्दचन्द्रिका ॥ (पाणिना भुङ्क्ते इति । भुज + क्विप् ।) पाणिकरणकभोक्तरि, त्रि ॥

पाणिमर्द्दः, पु, (पाणिं मृद्नातीति । पाणि + मृद + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) करमर्द्दकः । इति राजनिर्घण्टः ॥

पाणिमुक्तं, क्ली, (पाणिभ्यां मुक्तं परित्यक्तम् ।) अस्त्रम् । इति हलायुधः ॥

पाणिरुहः, पुं, (पाणौ रोहतीति । रुह + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) नखः । इति राजनिर्घण्टः ॥

पाणिवादः, त्रि, (पाणिं पाणिना वा वादयतीति । वद + णिच् + अण् ।) पाणिघः । मृदङ्गादिवादकः । इत्यमरः ॥ (पाणिना वाद्यते इति । वद + णिच् + कर्म्मणि घञ् । मृदङ्गादौ, क्ली । यथा, रामायणे । २ । ६५ । ४ ।
"अपदानान्युदाहृत्य पाणिवादाश्ववादयन् ॥")

पाणिवादकः, त्रि, (पाणिं पाणिना वा वादयतीति । वद + णिच् + ण्वुल् ।) पाणिवादः । इति हेमचन्द्रः । ३ । ५८६ ॥ (यथा, रामायणे । २ । ६५ । ४ ।
"ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः ।
अपदानान्युदाहृत्य पाणिवादान्यवादयन् ॥")

पाणिसर्ग्या, स्त्री, (पाणिभ्यां सृज्यतेऽसौ । सृज विसर्गे + "पाणौ सृजेर्ण्यत् वाच्यः ।" इति ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) रज्जुः । इति मुग्धबोधव्याकरणम् ॥

पाणीतलं, क्ली, (पाणितलं निपातनात् दीर्घः ।) तोलकद्वयम् । यथा,—
"विडालपदकर्षौ च पाणीतलमुदुम्बरम् ॥"
इति शब्दमाला ॥

पाणीकरणं, क्ली, (पाणौ क्रियतेऽनेनास्मिन् वा । कृ + ल्युट् । सप्तम्याः अलुक् ।) विवाहः । इति जटाधरः ॥

पाण्डरं, क्ली, (पाण्डरो वर्णोऽस्यास्तीति । अच् ।) कुन्दपुष्पम् । गैरिकम् । इति शब्दचन्द्रिका ॥

पाण्डरः पु, (पाण्डरः शुक्लवर्णोऽस्यास्तीति । अच् ।) मरुवकवृक्षः । (पडि + अर + दीर्घश्च ।) श्वेतवर्णः । (पर्व्वतविशेषः । स तु मेरोः पश्चिमे वर्त्तते । यथा, मार्कण्डेये । ५५ । १० ।
"अञ्जनः कुक्कुटः कृष्णः पाण्डरश्चाचलोत्तमः ॥"
"पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः————————॥"
ऐरावतकुलोत्पन्ननागविशेषः । यथा, महाभारते । १ । ५७ । ११—१२ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ॥
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥"
पक्षिविशेषः । यथा, ज्योतिस्तत्त्वधृतवचनम् ।
"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ।
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ॥") •
तद्वर्णविशिष्टे, त्रि । इत्युणादिकोषः ॥ (यथा, हरिवंशे । ८२ । ५० ।
"असिताम्बरसंवीतं पाण्डरं पाण्डरासनम् ॥")

पाण्डरपुष्पिका, स्त्री, (पाण्डरं शुक्लवर्णं पुष्पमस्याः । कप् । ततः टापि अत इत्वम् ।) शीतलावृक्षः । इति शब्दचन्द्रिका ॥

पाण्डवः, पु, (पाण्डोर्नामाख्यया प्रसिद्धस्य राज्ञोऽपत्यम् । पाण्डु + "ओरञ् ।" ४ । २ । ७१ । इत्यञ् ।) पाण्डुनन्दनः । पञ्चपाण्डवोत्पत्तिर्यथा,—
वैशम्पायन उवाच ।
"संवत्सरधृते गर्भे गान्धार्य्या जनमेजय ।
आह्वयामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम् ॥
सा बलिं त्वरिता देवी धर्म्मायोपजहार ह ।
जजाप मन्त्रं विधिवद्दत्तं दुर्व्वाससा पुरा ॥
संगम्य सा तु धर्म्मेण योगमूर्त्तिधरेण ह ।
लेभे पुत्त्रं वरारोहा सर्व्वप्राणिहितं वरम् ॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे ।
दिवामध्यगते सूर्य्ये तिथौ पुण्येऽभिपूजिते ॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् ।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी ॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः ।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति ॥
युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः ।
यशसा तेजसा चैव वृत्तेन च समन्वितः ॥१॥*॥
धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत् ।
प्राहुः क्षात्त्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु ॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा ।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः ॥
तमप्यतिबलं जातं वागुवाचाशरीरिणी ।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत । ॥
इदमत्यद्भुतञ्चासीज्जातमात्रे वृकोदरे ।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत् ॥
कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल ।
नान्वबुध्यत तं सुप्तमुत्सङ्गे स्वे वृकोदरम् ॥
वज्रसंहननः सोऽथ कुमारो न्यपतद्गिरौ ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता ॥
तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः ।
यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम । ॥
दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप । ॥२॥*॥
जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत् ।
कथन्नु मे वरः पुत्त्रो लोकश्रेष्ठो भवेदिति ॥
दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः ।
तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते ॥
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम् ।
अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः ॥
तं तोषयित्वा तपसा पुत्त्रं लप्स्ये महाबलम् ।
यं दास्यति स मे पुत्त्रं स गरीयान् भविष्यति ॥

कर्म्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः ।
ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः ॥
दिदेश कुन्त्याः कौरव्यो व्रतं सांवत्सरं शुभम् ।
आत्मना च महाबाहुरेकपादस्थितोऽभवत् ॥
उग्रं स तप आस्थाय परमेण समाधिना ।
आरिराधयिषुर्देवं त्रिदशानां तमीश्वरम् ॥
सूर्य्येण सह धर्म्मात्मा पर्य्यवर्त्तत भारत ! ।
तन्तु कालेन महता वासवः प्रत्यपद्यत ॥
शक्र उवाच ।
पुत्त्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् ।
ब्राह्मणानां गवाञ्चैव सुहृदाञ्चार्थसाधकम् ॥
दुर्हृदां शोकजननं सर्व्वबान्धवनन्दनम् ।
सुतं तेऽग्र्यं प्रदास्यामि सर्व्वामित्रविनाशनम् ॥
इत्युक्तः कौरवो राजा वासवेन महात्मना ।
उवाच कुन्तीं धर्म्मात्मा देवराजवचः स्मरन् ॥
उदर्कस्तव कल्याणि ! तुष्टो देवगणेश्वरः ।
दातुमिच्छति मे पुत्त्रं यथासङ्कल्पितं हृदा ॥
अतिमानुषकर्म्माणं यशस्विनमरिन्दमम् ।
नीतिमन्तं महात्मानमादित्यसमतेजसम् ॥
दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् ।
पुत्त्रं जनय सुश्रोणि ! धाम क्षत्त्रियतेजसाम् ॥
लब्धः प्रसादो देवेन्द्रात् तमाह्वय शुभानने ! ॥
एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्ज्जुनम् ॥
जातमात्रे कुमारे तु वागुवाचाशरीरिणी ।
महागम्भीरनिर्घोषा नभो नादयती तदा ॥
शृण्वतां सर्व्वभूतानां तेषाञ्चाश्रमवासिनाम् ।
कुन्तीमाभाष्य विस्पष्टमुवाचेदं शुचिस्मिताम् ॥
कार्त्तवीर्य्यसमः कुन्ति ! शिवितुल्यपराक्रमः ।
एष शक्र इवाजेयो यशस्ते प्रथयिष्यति ॥
अदित्या विष्णुना प्रीतिर्यथाभूदभिवर्द्धिता ।
तथा विष्णुसमः प्रीतिम्बर्द्धयिष्यति ते सुतः ॥
एष मद्रान् वशे कृत्वा कुरूंश्च सह सोमकैः ।
चेदिकाशिकरूषांश्च कुरुलक्ष्मीं वहिष्यति ॥
एतस्य भुजवीर्य्येण खाण्डवे हव्यवाहनः ।
मेदसा सर्व्वभूतानां तृप्तिं यास्यति वै पराम् ॥
ग्रामणीश्च महीपालानेष जित्वा महाबलः ।
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति ॥
जामदग्न्यसमः कुन्ति ! वायुवेगपराक्रमः ।
एष वीर्य्यवतां श्रेष्ठो भविष्यति महायशाः ॥
तथा दिव्यानि चास्त्राणि निखिलेनाहरिष्यति ।
विप्रनष्टां श्रियञ्चायमाहर्त्ता पुरुषर्षभः ॥
एतामत्यद्भुतां वाचं कुन्ती शुश्राव भारत ! ।
वाचमुच्चरितामुच्चैस्तां निशम्य तपस्विनाम् ॥
बभूव परमो हर्षः शतशृङ्गनिवासिनाम् ।
तथा देवरथानाञ्च सेन्द्राणाञ्च दिवौकसाम् ॥
आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ।
उदतिष्ठन्महाघोषः पुष्पवृष्टिभिरावृतः ॥”३॥*॥
वैशम्पायन उवाच ।
“कुन्तीपुत्त्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥
न मेऽस्ति त्वयि सन्तापो विगुणेऽपि परन्तप ।
नावरत्वे वरार्हायाः स्थित्वा चानघ ! नित्यदा ॥
गान्धार्य्याञ्चैव नृपते ! जातं पुत्त्रशतन्तथा ।
श्रुत्वा न मे तथा दुःखमभवत् कुरुनन्दन ! ॥
इदन्तु मे महद्दुःखं तुल्यतायामपुत्त्रता ।
दिष्ट्या त्विदानीं भर्त्तुर्मे कुन्त्यामप्यस्ति सन्ततिः ॥
यदि त्वपत्यसन्तानं कुन्तिराजसुता मयि ।
कुर्य्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥
संस्तम्भो मे सपत्नीत्वात् वक्तुं कुन्तिसुतां प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥
पाण्डुरुवाच ।
ममाप्येष सदा माद्रि ! हृद्यर्थः परिवर्त्तते ।
न तु त्वां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥
तव त्विदं मतं मत्वा प्रयतिष्याम्यतः परम् ।
मन्ये ध्रुवं मयोक्ता सा वचनं प्रतिपत्स्यते ॥
वैशम्पायन उवाच ।
ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् ।
कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥
मम चापिण्डनाशाय पूर्व्वेषामपि चात्मनः ।
मत्प्रियार्थञ्च कल्याणि ! कुरु कल्याणमुत्तमम् ।
यशसोऽर्थाय चैव त्वं कुरु कर्म्म सुदुष्करम् ॥
एवमुक्ताब्रवीन्माद्रीं सकृच्चिन्तय दैवतम् ।
तस्मात्ते भवितापत्यमनुरूपमसंशयम् ॥
ततो माद्री विचार्य्यैवं जगाम मनसाश्विनौ ।
तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ॥
नकुलं सहदेवञ्च रूपेणाप्रतिमौ भुवि ।
तथैव तावपि यमौ वागुवाचाशरीरिणी ॥
रूपसत्त्वगुणोपेतावेतावत्यश्विनावपि ।
भासतस्तेजसात्यर्थं रूपद्रविणसम्पदा ॥
नामानि चक्रिरे तेषां शतशृङ्गनिवासिनः ।
भक्त्या च कर्म्मणा चैव तथाशीर्भिर्विशाम्पते ॥
ज्येष्ठं युधिष्ठिरेत्येव भीमसेनेति मध्यमम् ।
अर्ज्जुनेति तृतीयञ्च कुन्तीपुत्त्रानकल्पयन् ॥
पूर्व्वजं नकुलेत्येवं सहदेवेति चापरम् ।
माद्रीपुत्त्रावकथयंस्ते विप्राः प्रीतमानसाः ॥”
इति महाभारते १ । १२३—१२४ ॥

तेषां पुत्त्रा यथा,—
“प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार्ज्जुनात् ।
शतानीकः श्रुतकर्म्मा द्रौपद्याः पञ्च विक्रमात् ॥”
तेषां भार्य्या यथा, गारुडे १३९ अध्याये ।
“यौधेयी च हिडिम्बा च काशी चैव सुभद्रिका ।
विजया वै वेणुमती पञ्चभ्यस्तु सुताः क्रमात् ॥
देवकी घटोत्कचश्च अभिमन्युश्च सर्व्वशः ।
च्यहोत्रो निरमित्रश्च परिक्षिदभिमन्युजः ॥”

पाण्डवेयः, त्रि, (पाण्डोरियं इत्यण् ङीप् च पाण्डवी कुन्ती माद्री च तयोरपत्यम् इति । ढक् ।) पाण्डोरपत्यम् । इति मुग्धबोधव्याकरणम् ॥ (युधिष्ठिरप्रभृतयः पञ्च भ्रातरः । यथा, महाभारते । १ । २०३ । १५ ।
“यावन्नायाति वार्ष्णेयः कर्षन् यादववाहिनीम् ।
राज्यार्थे पाण्डवेयानां पाञ्चाल्यसदनं प्रति ॥”
अभिमन्युपुत्त्रो नरपतिः परीक्षित् । यथा, भागवते । १ । ४ । ७ ।
“कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ।
संवादः समभूत्तात ! यत्रैषा सात्वती श्रुतिः ॥”)

पाण्डवाभीलः, पुं, (अभीः अभयं लातीति । ला + कः । पाण्डवोऽभीलो यस्मात् । पाण्डवानामभियमभयं लातीति वा ।) कृष्णः । इति त्रिकाण्डशेषः ॥

पाण्डवायनः, पुं, (पाण्डवानामयनं रक्षणं यस्मात् ।) कृष्णः । इति हेमचन्द्रः । २ । १३१ ॥

पाण्डित्यं, क्ली, (पण्डितस्य भावः कर्म्म वा । इति “वर्णदृढादिभ्यः ष्यञ् च ।” ५ । १ । १२३ । इति ष्यञ् ।) पण्डितधर्म्मकर्म्मणी । यथा,—
“रसज्ञा पाण्डित्यच्छिदुरयशिशामक्षमभरान् ॥”
इति मुरारिः ॥
(यथा, च महाभारते । ५ । ३१ । २ ।
“उत बालाय पाण्डित्यं पण्डितायोत बालताम् ।
ददाति सर्व्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ॥”)

पाण्डुः, पु, (पडि गतौ + “मृगय्वादयश्च ।” उणां । १ । ३८ । इति कुप्रत्ययः निपातनात् धातोर्दीर्घश्च ।) पाण्डुरफलीक्षुपः । पटोलः । इति राजनिर्घण्टः ॥ शुक्लपीतमिश्रितवर्णः । तत्पर्य्यायः । हरिणः २ । पाण्डुरः ३ । इत्यमरः ॥ पाण्डरः ४ । इति हट्टः ॥
“सितपीतसमायुक्तः पाण्डुवर्णः प्रकीर्त्तितः ॥”
इति सुभूतिः ॥
भेदोऽपि दृश्यते यथा,—
“पाण्डुरस्तु रक्तपीतभागी प्रत्यूषचन्द्रवत् ।
पाण्डुस्तु पीतभागार्द्धः केतकीधूलिसन्निभः ॥”
इति भरतः ॥
तद्वति, त्रि । इत्यमरः ॥ (यथा रघुः । ३ । २ ।
“शरीरसादादसमग्रभूषणा
मुखेन सालक्ष्यत लोध्रपाण्डुना ॥”
नृपतिविशेषः । स तु शन्तनुपुत्त्रविचित्रवीर्य्यस्य क्षेत्रे व्यासाज्जातः । (यथा, महाभारते । १ । ११८ । ५ ।
“राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते ।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम् ॥”
अस्य देहपाण्डुताकारणं नामनिरुक्त्यादिकं च यथा, महाभारते । १ । १०६ । १५-१८ ।
“अम्बालिकामथाभ्यागादृषिं दृष्ट्वा च सापि तम् ।
विवर्णा पाण्डुसङ्काशा समपद्यत भारत ! ।
तां भीतां पाण्डुसङ्काशां विषण्णां प्रेक्ष्य भारत ! ॥
व्यासः सत्यवतीपुत्त्र इदं वचनमब्रवीत् ।
यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह ॥
अस्मादेष सुतस्ते वै पाण्डुरेव भविष्यति ।
नाम चास्यैतदेवेह भविष्यति शुभानने ! ॥”)
बाणभेदः । श्वेतहस्ती । सितवर्णः । रोगविशेषः । इति शब्दरत्नावली ॥ * ॥
पाण्डुरोगनिदानम् । यथा,—
“पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।
चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥
व्यायाममम्लं लवणानि मद्यं
मृदं दिवास्वप्नमतीवतीक्ष्णम् ।

निविष्टमाशस्य समेत्य रक्तं
दोषास्त्वचं पाण्डुरतां नयन्ति ॥ * ॥
तस्य पूर्व्वरूपाणि यथा,—
त्वक्स्फोटनष्ठीवनगात्रसाद-
मृद्भक्षणप्रेक्षणकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको
भविष्यतस्तस्य पुरःसराणि ॥ * ॥
वातिकस्य तस्य लक्षणं यथा,—
त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता ।
वातपाण्ड्वामये कम्पतोदानाहभ्रमादयः ॥ * ॥
पैत्तिकस्य लक्षणं यथा,—
पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥
श्लैष्मिकस्य लक्षणं यथा,—
कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ * ॥
त्रिदोषजस्य लक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्द्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥
मृज्जस्य संप्राप्तिर्यथा,—
मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ।
कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥
कोपयेन्मृदमादींश्च रौक्ष्याद्भुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ * ।
मृत्तिकाभक्षणजन्यपाण्डुलक्षणं यथा,—
मृद्भक्षणाद्भवेत् पाण्डुस्तन्द्रालस्यनिपीडितः ।
सकासश्वासशूलार्त्तःसदारुचिसमन्वितः ॥
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
क्रिमिकोष्ठोऽतिसार्य्येत मलं सासृककफान्वितम् ।
तस्य असाध्यलक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्द्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥
पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ॥
बद्धाल्पविट् सहरितं सकफं योऽतिसार्य्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्द्दिमूर्च्छातृषान्वितः ॥
स नास्त्यसृक्क्षयाद्यश्च पाण्डुः श्वेतत्वमाप्नुयात् ।
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥
अन्तेषु शूनं परिहीणमध्यं
म्लानं तथान्तेषु च मध्यशूनम् ।
गुदे च शेफस्यथ मुष्कयोश्च
शूनं प्रताम्यन्तमसंज्ञकल्पम् ॥
विवर्ज्जयेत् पाण्डुकिनं यशोऽर्थी
तथातिसारज्वरपीडितञ्च ॥"
इति माधवकरः ॥
(यथा च,—
"पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः ।
तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम् ॥
धमनीर्दश सम्प्राप्य व्याप्नुवत् सकलां तनुम् ।
श्लेष्मत्वग्रक्तमांसानि प्रदूष्यान्तरमाश्रितम् ॥
त्वङ्मांसयोस्तत् कुरुते त्वचि वर्णान् पृथग्-
विधान् ।
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम्
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम् ॥
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥
ततोऽल्परक्तमेदस्को निःसारः स्यात् श्लथेन्द्रियः ।
मृद्यमानैरिवाङ्गैर्ना द्रवता हृदये न च ॥
शूनाक्षिकूटसदनः कोपनः ष्ठीवनोऽल्पवाक् ।
अन्नद्विट् शिशिरद्वेषी शीर्णरोमा हतानलः ॥
सन्नसक्थो ज्वरी श्वासी कर्णक्ष्वेडी भ्रमी श्रमी ।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि ।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता ॥
सादः श्रमोऽनिलात्तत्र गात्ररुक्तोदकम्पनम् ।
कृष्णरूक्षारुणशिरानखविण्मूत्रनेत्रता ॥
शोफानाहास्यवैरस्यविट्शोषाः पार्श्वमूर्द्धरुक् ।
पित्ताद्धरितपीताभसिरादित्वं ज्वरस्तमः ॥
तृट्स्वेदमूर्च्छाशीतेच्छादौर्गन्ध्यं कटुवक्त्रता ।
वर्चोभेदोऽम्लको दाहः कफात् शुक्लसिरादिता ॥
तन्द्रालवणवक्त्रत्वं रोमहर्षः स्वरक्षय ।
कासः छर्द्दिश्च निचयान्मिश्रलिङ्गोऽतिदुःसहः ॥
तत्कषायानिलं पित्तमूषरा मधुरा कफम् ।
दूषयित्वा रसादींश्च रौक्ष्याद्भुक्तं विरूक्ष्य च ॥
स्रोतांस्यपक्वैवापूर्य्य कुर्य्याद्रुद्ध्वा च पूर्व्ववत् ।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥
पुरीषं क्रिमिमत् मुञ्चेद्भिन्नं सासृक्कफं नरः ॥"
इति वाभटे निदानस्थाने । १३ । १—१३ ॥)
तस्यौषधं यथा —
"लौहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ॥"
इति गारुडे १८० अध्यायः ॥
अपि च ।
"सप्तरात्रं गवां मूत्रे भावितं वायसो रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ १ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुडमश्नतः ।
पाण्डुरोगः क्षयं याति पक्तिशूलञ्च दारुणम् ॥ २
अयोमलं सुसन्तप्तं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं लीढ्वा पाण्डुरोगी सुखी भवेत् ॥ ३ ॥
पुनर्नवात्रिवृद्व्योषविडङ्गं दारु चित्रकम् ।
कुष्ठं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥
कटुका पिप्पलीमूलं मुस्तं शृङ्गी च कारवी ।
यमानी कट्फलञ्चेति पृथक्पलमितं मतम् ॥"०॥
इति भावप्रकाशः ॥ * ॥
(अस्य सकारणलक्षणचिकित्सादीनि यथा -
"शृणु पुत्त्र । प्रवक्ष्यामि पाण्डुरोगं महागदम् ।
पञ्चैव पाण्डुरोगास्ते सम्भवन्तीह मानुषे ॥
वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ।
पञ्चमो लक्षणः प्रोक्तो वक्ष्ये चैषान्तु सम्भवम् ॥
दीर्घाध्वना पीडितो वा ज्वरेण
रक्तस्रावो पीडितो वा व्रणेन ।
चिन्तायासाद्रोधनाद्वै मनुष्यं
चायं पाण्डुर्जायते सेवते यः ॥
क्षारश्वाम्लं कल्यमैरेयसेवा
अव्यायामान्मैथुनातिश्रमेण ।
निद्रानाशो नातिनिद्रा दिवापि
योगैश्चैतैर्मृत्तिकाभक्षणेन ॥
अतिशिथिलशरीरे रोगसम्पीडिते वा
लवणकटुकषाया सेवनाम्लेन मृद्भिः ।
अतिसुरतमजस्रं सेवनातिक्रमेण
नयति रुधिरशोषं तेन वै पाण्डुरोगम् ॥
तेनाक्षिकूटे श्वयथुः शरीरे
पाण्डुत्वमायाति सपीतमूत्रः ।
निष्ठीवनं त्वक् प्रविदीर्य्यते च
संजायते तस्य पुरःसराणि ॥
तोदः परुषत्वशिरोगुरुत्वं
त्वङ्मूत्रनेत्रे नखकालिमा स्यात् ।
वातात्मकं तन्मनुजस्य विद्धि
लिङ्गैरुपेतोऽनिलपाण्डुरोगः ॥
आमत्वपीतत्वकरो हि लोके
त्रिभर्त्ति शोषं कटुकास्यता च ।
मन्दज्वरो वै भ्रमशोषमोहः
पीतच्छविः पीतभवो हि पाण्डुः ॥
तन्द्रानुताशोफकफेन युक्तः
आलस्यकस्वेदगुरुत्वमेव ।
संजायते तस्य कफात्मकोऽसौ
नरस्य पाण्डुत्वभवो विकारः ॥
तन्द्रालस्यं श्वयथुवमथू काशहृल्लासशोषा
विड्भेदः स्यात् परुषनयनं मन्दज्वरो वै क्षुधार्त्तः ।
मोहस्तृष्णाक्लमसमथ मनुजस्याशु पश्येत् सुदूरं
त्याज्यो वैद्यैर्निपुणमतिभिः सन्निपातोत्थपाण्डुः ॥
मृत्तिकाभक्षणेनाथ शृणु पुत्त्र । गदो महान् ।
पाण्डुरोगो गरिष्ठोऽपि भवेद्धातुक्षयङ्करः ॥
मृद्भक्षणाच्चैव मलं प्रकोप्य
स्रोतांसि रुन्धन्ति च मृत्तिकायाः ।
तेनैव मात्रक् परिवर्त्तयन्ति
न तर्पयन्ते वपुषं रसेन ॥
क्षारात् कषायान्मधुरस्य पानात्
स कोपयत्याशु नरस्य सन्तता ।
श्लेष्मप्रकोपान्मधुरान् करोति
सन्तता न जघ्ना हितकारिणी स्यात् ॥
विक्षतिमुपगतास्ते मारुताद्यास्त्रयस्तु
बलवदनरुचीनां नाशयन्त्याशु दोषाः ।
भवति विकलमेव पाण्डुरोगे शरीरं
भवति जठरपाको रोग आशुप्रवीण ॥'
गोमूत्रमध्ये मतिमान् स्नापयेत् सप्तरात्रि-
कम् ।
[illegible]स्मात् चूर्णन्तु मधुना देयं पाण्ड्वामयापहम् ॥
[illegible]त्र्यषणं त्रिफला मुस्ता विडङ्गं चित्रकं
समम् ।
[illegible]ागमेकं लौहचूर्णमिन्दुदाह्ने विभावयेत् ॥
सप्ताहमथ लौहखल्व्यितं
पुनरपि भृय प्रवरं स्यात् ।
शीलितन्तु मधुनापि घृतेन
पाण्डुरोगहृदयामयापहम् ॥

कामलार्शो हलीमकहारि
कथितं सुमतिभिश्च पण्डितैः ॥
इति लौहचूर्णवटकम् ॥ * ॥
त्र्यूषणं त्रिफलया सह चित्रकं
मेघचव्यसुरदारुसमाक्षिकम् ।
ग्रन्थिकञ्च शिखिभृङ्गराजकं
योजयेत् पलिकभागिकानिमान् ॥
चूर्णिताद्द्विगुणमेव योजयेत्
लौहचूर्णमपि कज्जलप्रभम् ।
अष्टभागसममूत्रकल्पितं
पाचितं एतरभवहरप्रदम् ।
सेवयेद्बलमुपक्रमं तथा
तक्रसंयुतमिदं हाक्तिशोभनम् ।
नाशयेच्च कफकामलान् क्रिमीन्
पाण्डुकुष्ठगुदजान् हलीमकम् ॥
इति मण्डूरवटकम् ॥"* ॥
पथ्यापथ्यान्यस्य यथा —
"गोधूमशालियवषष्टिकमुद्गकानां
श्यामाढकीघृतयुतं सपयःसतक्रम् ।
गाङ्गेवबास्तुकमथो शतपुष्पवर्त्ता
पथ्यं हितं निगदितं मनुजस्य पाण्डौ ॥
शाल्यन्नमुद्गगोधूममसूराश्चाढकी यवाः ।
जाङ्गलानि च मांसानि भोजने च प्रशस्यते ॥
तिक्तानि रूक्षाणि कषायकाणि
तीव्राणि दाहीन्यपि काञ्जिकानि ।
सुराम्लसौवीरकबीजपूरान्
तैलानि वर्ज्याणि च पाण्डुरोगे ॥"
इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥*॥
अस्य चिकित्सान्तरं यथा,—
"पाण्ड्वामयी पिबेत् सर्पिरादौ कल्याणकाह्वयम् ।
पञ्चगव्यं महातिक्तं घृतं वारग्वधादिना ॥
दाडिमात् कुडवो धान्यात् कुडवार्द्धं पलं पलम् ।
चित्रकात् शृङ्गवेराच्च पिप्पल्यर्द्धपलञ्च तैः ॥
काङ्कतैर्विंशतिपलं घृतस्य सलिलाढके ।
सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफार्त्तिनुत् ।
दीपनं श्वासकासघ्नं मूढवातानुलोमनम् ॥
दुःखप्रसवविनीनाञ्च वन्ध्यानाञ्च प्रशस्यते ।
संहितं वामयेत्तीक्ष्णैः पुनः स्निग्धञ्च शोधयेत् ।
पयसा मूत्रयुक्तेन बहुशः केवलेन वा ॥
दन्तीफलरसं कोष्णं काश्मर्य्याञ्जलिमासुतम् ।
द्राक्षाञ्जलिं वा मृदितं तत् पिबेत् पाण्डुरोग-
जित् ॥
मूत्रेण पिष्टां पथ्यां वा तत्सिद्धं वा फलत्रयम् ।
स्वर्णक्षीरी त्रिवृच्छ्यामा भद्रदारु महौषधम् ॥
गोमूत्राञ्जलिना पिष्टं घृतं तेनैव वा पिबेत् ।
साधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम् ॥
मूत्रे स्थितं वा सप्ताहं पयसा यो रजः पिबेत् ।
जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा ॥
शुद्धश्चोभयतो लिह्यात् पथ्यां मधुघृतद्रुताम् ।
विशालां कटुकां मुस्तां कुष्ठं दारुकलिङ्गकः ॥
द्वाविंशाद्विपिचुर्मूर्व्वा कर्षांशाद्धूणप्रिया ।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात्ततो मधु ॥
पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम् ।
गुल्मानाहामवातांश्च रक्तपित्तञ्च नाशयेत् ॥
वासागुडूचीत्रिफला कट्वीभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्ति पाण्डुपित्तास्रकामलाः ॥"
"गुडनागरमण्डूरतिलांशाश्चानतः समान् ।
पिप्पलीद्विगुणान् दद्यात् गुटिका पाण्डुरोगिणे ॥
साप्यं दार्व्वीत्वचं चव्यं ग्रन्थिकं देवदारु
व्योषादि नरकचैतच्चूर्णयेद्द्विगुणं ततः ।
मण्डूरञ्चाञ्जननिभं सर्व्वतोऽष्टगुणेऽथ तत्
पृथग्विपक्के गोमूत्रे वटकीकरणक्षमे ।
प्रक्षिप्य वटकान् कुर्य्यात तान् खादेत्तक्रभो... ..॥
एते मण्डूरवटकाः प्राणदाः पाण्डुरोगिणाम् ।
कुष्ठान्यजरकं शोफमूरुस्तम्भमरोचकम् ॥
अर्शांसि कामलां मेहान् प्लीहानं शमयन्ति च ।
ताप्याद्रिजतुरौप्यायोमलाः पञ्चपलाः पृथक् ॥
चित्रकत्रिफला व्योषविडङ्गैः पालिकैः सह ।
शर्कराष्टपलोन्मिश्राश्चूर्णिता मधुना द्रुताः ॥
पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम् ।
कुष्ठान्यजरकं मेहं शोफं श्वासमरोचकम् ॥
विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च ।
कौटजत्रिफलानिम्बपटोलघननागरैः ॥
भावितानि दशाहानि रसैर्द्वित्रिगुणानि वा ।
शिलाजतुपलान्यष्टौ तावती सितशर्करा ॥
त्वक्क्षीरी पिप्पली धात्री कर्कटाख्याः पलो-
न्मिताः ।
निर्दग्धाः फलमूलाभ्यां पलं युक्ता त्रिजातकम् ॥
मधुत्रिपलसंयुक्तं कुर्य्यादक्षसमान् गुडान् ।
दाडिमाम्बुपयःपक्षिरसतोयसुरासवान् ॥
तान् भक्षयित्वानुपिबेन्निरन्नो भुक्त एव वा ।
पाण्डुकुष्ठज्वरप्लीहतमकार्शो भगन्दरम् ॥
हृन्मूत्रपूतीशुक्राग्निदोषशोषगरोदरम् ।
कासासृग्दरपित्तास्क् शोफगुल्मगलामयान् ॥
मेहवर्ध्मभ्रमान् हन्युः सर्व्वदोषहराः शिवाः ॥"
इति वाभटे चिकित्सास्थाने षोडशेऽध्याये ॥*॥
"व्यवायमम्लं लवणानि मद्यं
मृदं दिवास्वप्नमतीवतीक्ष्णम् ।
निषेवमाणस्य प्रदूष्य रक्तं
कुर्व्वन्ति दोषास्त्वचि पाण्डुभावम् ॥
पाण्ड्वामयोऽष्टार्द्धविधः प्रदिष्टः
पृथक्समस्तैर्युगपच्च दोषैः ।
सर्व्वेषु चैवेष्विह पाण्डुभावो
यतोऽधिकोऽतः खलु पाण्डुरोगः ॥"
"कृष्णेक्षणं कृष्णसिरावनद्धं
तद्वर्णविण्मूत्रनखाननञ्च ।
वातेन पाण्डुं मनुजं व्यवस्ये-
द्युक्तं तथान्यैस्तदुपद्रवैश्च ॥
पीतेक्षणं पीतसिरावनद्धं
तद्वर्णविण्मूत्रनखाननञ्च ।
पित्तेन पाण्डुं मनुजं व्यवस्येद्-
युक्तं तथान्यैस्तदुपद्रवैश्च ॥
शुक्लेक्षणं शुक्लसिरावनद्धं
तद्वर्णविण्मूत्रनखाननञ्च ।
कफेन पाण्डुं मनुजं व्यवस्येद्
युक्तं तथान्यैस्तदुपद्रवैश्च ॥
सर्व्वात्मके सर्व्वमिदं व्यवस्येद्
वक्ष्यामि लिङ्गान्यथ कामलायाः ॥"
चिकित्सान्तरं यथा,—
"साध्यन्तु पाण्ड्वामयिनं समीक्ष्य
स्निग्धं घृतेनोर्द्ध्वमधश्च शुद्धम् ॥
सम्पादयेत् क्षौद्रघृतप्रगाढै
र्हरीतकीचूर्णयुतैः प्रयोगैः ।
पिबेद्घृतं वा रजनीविपक्वं
यत्त्रैफलं तैल्वकमेव वापि ॥
विरेचनद्रव्यकृतं पिबेद्वा
योगांश्च वैरेचनिकान् घृतेन ॥"
"उभे बृहत्यौ रजनी शुकाख्या
शुकाह्विनीचापि सकाकमाचीम् ।
आदारिबिल्वौ सकदम्बपुष्प्यौ
विपाच्य सर्पिर्विपचेत् कषाये ॥
तत् पाण्डुतां हन्त्युपयुज्यमानं
क्षीरेण वा मार्गधिका यथाग्निः ।
हितञ्च यष्टीमधुकं कषायं
चूर्णं समं वा मधुनावलिह्यात् ॥
गोमूत्रयुक्तं त्रिफलादनानां
दद्यादयस्तर्णमनल्पकालम् ।
प्रवालमुक्ताञ्जनशङ्खचूर्णं
लिह्यात्तथा काञ्चनगैरिकोत्थम् ॥
व्याजं शलाका कुडवप्रमाणं
विडं हरिद्रा लवणोत्तमञ्च ।
पृथक् पलांशानि समग्रमेत-
च्चूर्णं हिताशी मधुनावलिह्यात्
मण्डूरलोहाग्निविडङ्गपथ्या
व्योषांशकः सर्व्वसमाननाप्यः ।
सञ्चामुतोऽयं मधुनावलेहः
पाण्ड्वामयं हन्त्यचिरेण घोरम् ॥"
इत्युत्तरतन्त्रे चतुश्चत्वारिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥*॥ चिकित्सार्थमस्य वटिकौषधं यथा
"लौहचूर्णं निशायुग्मं त्रिफला कटुरोहिणी ।
प्रलिह्यान्मधुसर्पिर्भ्यां कामला पाण्डुरोगनुत् ॥"
इति निशालौहम् ॥
"शुद्धसूतं तथा गन्धं मृतहेमाभ्रगुग्गुलु ।
जैपालबीजं तुल्यञ्च घृतेन गुडकीकृतम् ॥
भक्षयेद्बदराभान्तु शोथपाण्डुप्रशान्तये ।
पञ्चाननवटी ख्याता अनुपानञ्च पूर्ववत् ॥"
इति पञ्चाननवटी ॥
"पलं सूतं पलं गन्धं वह्निपथ्या पलं पलम् ।
सूक्ष्मैलापत्रकानाञ्च प्रतिसार्द्धपलं क्षिपेत् ॥
त्र्यूषणं पिप्पलीमूलं विषञ्चापि पलं पलम् ।
नागकेशरतः कर्षमेरण्डस्य पलन्तथा ॥
पुरातनगुडेनैव तुल्येनैव विमिश्रयेत् ।
मर्द्दयेत् कनकद्रावैरेकैकं वा घृतान्वितम् ॥
गुडेन बदराकाभान् कारयेद्गुटिकां शिशोः ।
पाण्डुरोगहरः सोऽयं रसः कामेश्वरः स्वयम् ॥"
इति 'कामेश्वरो रस' ॥

इति वैद्यकरसेन्द्रसारसंग्रहे पाण्डुरोगाधिकारे ॥ * ॥ * ॥)

पाण्डुः, स्त्री, (पडि + कुः । निपातनात् दीर्घत्वम् ।) माषपर्णी । इति शब्दचन्द्रिका ॥ माषाणी इति भाषा ॥ पाण्डुवर्णस्त्री । इति मुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं, (पाण्डु + संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराना । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पु, (पाण्डुवर्णानि कण्टकान्यस्येति ।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकम्बलः, पु, (पाण्डुवर्णः कम्बलः नित्यकर्म्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी । ले, १७० ॥ पाण्डुवर्णकम्बलः । इति भरतः ॥

पाण्डुकम्बली, [न्] पु, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल + "पाण्डुकम्बलादिनिः ।" ४ । २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलाच्छन्नरथः । इत्यमरः । २ । ८ । ५४ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पु, (पाण्डुवर्णस्तरुरिति कर्म्मधारयः ।) धववृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पु, (पाण्डुवर्णो नाग इव । यद्वा, नागि इव पाण्डुरिति राजदन्तादिवत् समासः ।) पुन्नागवृक्षः । इति शब्दारत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतसर्षपश्च ॥

पाण्डुपत्री, स्त्री, (पाण्डु पत्रमस्या इति जातित्वात् ङीप् ।) रेणुका । इति राजनिघण्टः ॥ (पर्य्यायोऽस्या यथा, —

"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुतः । अलक्षणः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पु, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) चिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरत्र इति । "कृष्णोदक्पाण्डुसंख्यापूर्ब्बाया भूमेरजिष्यते ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा, —

"पाण्डुदक् कृष्णतो भूमिः पाण्डुदक् कृष्ण-
मृत्तिका ॥"

इति हेमचन्द्रः ॥

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुर्मृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पु, (पाण्डुरस्यास्तीति । पाण्डु + "नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १७ ॥

(यथा, भागवते । ८ । ८ । ३ ।

"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः स्पृहाञ्चक्रे नेन्द्र ईश्वरशिक्षया ॥")

कामलारोगः । इति शब्दरत्नावली ॥ श्वित्ररोगे, क्ली । इति हलायुधः ॥

पाण्डुरङ्गः, पु, (पाण्डुराणि अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिश्लेष्मपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पु, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिका पुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि, (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं अस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूमरा ३ वृत्तबीजका ४ भूरिपलितदा ५ पाण्डुफली ६ । अस्या गुणाः । शिशिरत्वम् । गौल्यत्वम् । कफकासदोषपित्तमूत्राघातनाशित्वम् । बल्यत्वम् । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरस्त्यस्या इति ततष्टाप् च ।) माषपर्णी । इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पु, (पाण्डुरं पाण्डुरत्वं आ सम्यकरूपेण गच्छतीति । गम + डः । यद्वा, पाण्डुः रागोऽस्येति ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते त्रि ॥

पाण्डुरेक्षुः, पु, (पाण्डुरः श्वेतवर्ण इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पु, (पाण्डुर्लेखः ।) पाण्डुलिपि । मुसविदा इति पारस्यभाषा ॥ यथाह व्यासः ।

"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत ॥
फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानीवाङ्गान्यस्यस्याः ।) माषपर्णी ॥ इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री (पाण्डु लोम यस्याः ।) माषपर्णी । इति जटाधरः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ॥

पाण्डुशर्करा, स्त्री, (पाण्डुः शर्करा इव यस्यां रोगावस्थायामित्यर्थः ।) रोगविशेषः । यथा, गारुडे १८२ अध्याये ।

"पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम् ।
साधितं छागदुग्धेन पीतं शर्करयान्वितम् ॥
हरेच्च अनिरोधञ्च हरेद्वै पाण्डुशर्कराम् ॥"

पाण्डुशर्म्मिला, स्त्री, द्रौपदी । इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः पुं वर्णसङ्करविशेषः । स तु चाण्डालाद्वैदेह्यां जातः ॥ (अस्योत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।

"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥"
"वैदेह्यां चण्डालात् पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसौपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १३ । ४८ । २६ ।
"चण्डालात् पाण्डुसौपाकस्त्वक्सारव्यवहार-
वान् ॥")

पाण्यः, त्रि, (पण व्यवहारस्तुत्योः + ण्यत् ।) स्तुत्यः । स्तवनीयः । ("पण्या गौः व्यवहर्त्तव्येत्यर्थः । पाण्यमन्यत् स्तुत्यर्हमित्यर्थः ।" इति "सिद्धान्तकौमुद्याम् । ३ । १ । १०१ । इत्यस्य सूत्रस्य वृत्तौ व्याख्यातम् ॥)

पातः, पु, (पत + घञ् ।) पतनम् । (यथा महाभारते । ३ । १३३ । २६ ।

"वहेव इव संयत्ते श्येनपाते दिवौकसाम् ।
कस्तयोर्गर्भमाधत्ते गर्भं सुषुवतुश्च कम् ॥")

जाते, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ छादयतीति । पत + णिच् + अच् ।) राहुः । यथा —

"नाडिन्स्तद्दर्शनैर्हेनककृताः
षट्कयतः ... रक्तनफलमांशाः ।
स्व भुवे ... दिनोपनिपातौ
राहुमानस्य कोऽपि नरैव ॥"

इति सिद्धान्तशिरोमणिः ॥

पातकं क्ली, (पातयति अधो गमयति दुष्क्रियाकारिणमिति । पत + णिच् + ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ एनः ६ पाप्मा ७ किल्विषम् ८ कलुषम् ९ किण्वम् १० कल्मषम् ११ वृजिनम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तत्तु नवविधं यथा । अतिपातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ सङ्करीकरणम् ५ अपात्रीकरणम् ६ जातिभ्रंशकरम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःकृतानि दशविधपापानि यथा, —

"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥'

इति तिथ्यादितत्त्वम् ।

पातङ्गिः, पु, (पतङ्गस्य सूर्य्यस्यापत्यमिति । पतङ्ग + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) शनैश्चरः । इति शब्दरत्नावली ॥

पातञ्जलं, क्ली, (पतञ्जलिना स्वनामविख्यातमहर्षिणा प्रणीतं प्रोक्तं वा इति अण्।) पतञ्जलिमुनिप्रणीतपादचतुष्टयात्मकयोगकाण्डनिरूपकदर्शनशास्त्रविशेषः॥ तत्र प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भं प्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योगलक्षणमभिधाय समाधिं सप्रपञ्चं निरदिक्षद्भगवान् पतञ्जलिः॥१॥ द्वितीये तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गाणि साधनानि॥२॥ तृतीये। देशबन्धश्चित्तस्य धारणेत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं संयमपदवाच्यं तत्रावान्तरफलं विभूतिजातम्॥३॥ चतुर्थे जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इत्यादिना सिद्धिप्रपञ्चनपुरःसरं परमं प्रयोजनं कैवल्यम्॥४॥ प्रधानादीनि पञ्चविंशतितत्त्वानि साङ्ख्योक्तान्येवात्रापि। षड्विंशस्तु परमेश्वरोऽधिकः। इति सर्व्वदर्शनसंग्रहः॥

पातनं, क्ली, (पत + णिच् + भावे ल्युट्।) अधोनयनम्। यथा "ऊर्द्धाधस्तिर्य्यक्पातनादिभी रसस्य नानाविधा शुद्धिरुक्ता।" इति रत्नावली॥

पाता, [ऋ] त्रि, (पाति रक्षतीति। पा रक्षणे + तृच्।) रक्षिता। यथा, —

"महारक्षः संहर्त्ता पातुः पाता परात्परः।

समाहूयायं संहर्त्ता नाम्ना तेन हरः स्मृतः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः॥

गन्धर्व्वः। इति शब्दचन्द्रिका॥ वायुः इति भाषा॥

पातालं, क्ली, (पतन्त्यस्मिन् दुष्क्रियावन्त इति। पत + "पतिचण्डिभ्यामालञ्।" उणां। १। ११६। इति आलञ्। पादस्य तले वर्त्तते इति पृषोदरात् साधुरित्येके।) विवरम्। वडवानलः। इति मेदिनी॥ लग्नाच्चतुर्थस्थानम्। यथा —

"पातालं हिबुकञ्चैव सुहृद्बन्धुचतुर्थकम्॥"

इति ज्योतिस्तत्त्वम्॥

स्वनामख्यातभुवनविशेषः। तत्पर्य्यायः। अधोभुवनम् २ बलिसद्म ३ रसातलम् ४ नागलोकः ५। इत्यमरः॥ अधः ६ उरगस्थानम् ७॥ * ॥ सप्तपातालानि यथा, —

"अतलं वितलञ्चैव वितलञ्च गभस्तिमत्।

तलं सुतलपातालं पातालानि तु सप्त वै॥"

इति शब्दरत्नावली॥

शेष उवाच।

"कथयामि महाभाग। पातालस्य विनिर्णयम्।

क्रमादेव निबोधेतत् सावधानो द्विजर्षभ।॥

पातालानि च सप्तैव मुनयः संप्रचक्षते।

अतलं वितलञ्चैव सुतलञ्च तलातलम्॥

महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्।

ततः पातालमित्येव सप्त पातालसंज्ञकाः॥

एते स्वर्गाधिकसुखा बिलस्वर्गाः प्रकीर्त्तिताः।

सम्भुक्तभवनोद्यानविहाराक्रीडचत्वराः॥

या च सा मेदिनी ब्रह्मन्। धत्ते स्थावरजङ्गमान्।

अधस्तस्या यदतलं योजनायुततो द्विज।॥

मयपुत्त्रो महामायो वसत्यत्र महासुरः।

येन सृष्टाः पुरा माया षडङ्कवतिः किल॥१॥

तदधो वितलं नाम योजनानां ततोऽयुते।

हरो विहरते तत्र भगवान् हाटकेश्वरः॥

सुपार्श्वदैर्भूतगणैर्भवान्या च सह प्रभुः।

प्रवृत्ता च सरित् तत्र हाटकी नाम विश्रुता॥२॥

अधः सुतलमित्येतत् योजनानां ततोऽयुते।

तत्रोदारश्रवाः पुण्यश्लोको वैरोचनिर्ब्बलिः॥३॥

तलातलं ततोऽधस्तात् सुतलाद्योजनायुते।

मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्म्महान्।

निवसत्यत्र सुचिरं मायानां परमाश्रयः॥४॥

महातले ततोऽधस्ताद्योजनानामथायुते।

सर्पाणां काद्रवेयाणां गणः क्रोधवशाह्वयः॥

गरुडात् सर्व्वदा भीतः सकुटुम्बः सुहृद्वृतः।

निवसत्यनभिज्ञानः पक्षिराजेन गह्वरे॥५॥

रसातले ततोऽधस्ताद्योजनानामथायुते।

निवसन्ति दानवाश्च शक्राज्ञीता निरन्तरम्॥६॥

पाताले तु ततोऽधस्ताद्योजनानां द्विजायुते।

नागलोकेश्वराः शूरा निवसन्ति महाबलाः॥"७

इति पाद्मे पातालखण्डे १। २। ३ अध्यायाः॥ * ॥

अपि च अग्निपुराणे।

"अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।

महातलं रसातलं पातालं सप्तमं स्मृतम्॥

रुक्मभौमं शिलाभौमं पातालं नीलमृत्तिकम्।

रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि॥

पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।

सुषिरं तानि कथ्यन्ते भुवनानि चतुर्द्दश॥

अष्टाविंशतिविख्यातास्ततो नरककोटयः।

नरकाणामधस्तात्तु धमः कालाग्निसम्भवः॥

तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान्।

तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्॥" * ॥

अन्यच्च।

"दशसाहस्रमेकैकं पातालं मुनिसत्तम।।

अतलं वितलञ्चैव नितलञ्च गभस्तिमत्॥

महाख्यं सुतलञ्चाग्र्यं पातालञ्चापि सप्तमम्।

कृष्णाशुक्लारुणापीताशर्कराशैलकाञ्चनाः॥

भूमयो यत्र मैत्रेय। वरप्रासादशोभिताः।

तेषु दानवदैतेयजातयः शतसंघशः॥

निवसन्ति महाभागा अहयश्च महामुने।।

स्वर्लोकादपि रम्याणि पातालानीति नारद।॥

दिवाकररश्मयो यत्र प्रभां तन्वन्ति नातपम्।

शशिनश्च न शीताय निशि द्योताय केवलम्॥

पातालानामधश्चास्ते विष्णोर्या तामसी तनुः।

शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः॥

योऽनन्तः पठ्यते सिद्धैर्द्देवदेवर्षिपूजितः।

यस्येयं सकला पृथ्वी फणामणिशिखारुणा।

आस्ते कुसुममालेव कस्तद्वीर्य्यं वदिष्यति॥

यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः।

तदा चलति भूरेषा साद्रितोयाब्धिकानना॥"

इति विष्णुपुराणे। २। ५ अध्यायः॥

पातालः, पुं, (पतति जारणार्थं पारदादिकं यत्र। पत + आलञ्।) औषधपाकार्थयन्त्रविशेषः। इति शब्दचन्द्रिका॥ तत्प्रकारो यथा, वैद्यके।

"ऊर्द्धभाण्डतले वह्निर्मध्ये तु रससंग्रहः।

पातालयन्त्रमेतद्धि शोधयेत् सूतकादिकम्॥"

पातालगरुडी, स्त्री, (पातालाख्या गरुडी।) लताविशेषः। छिउडा इति हिन्दीभाषा॥ तत्पर्य्यायः। वत्सादनी २ सोमवल्ली तिक्ताङ्गा ४ मेचकाभिधा ५ तार्क्षी ६ सौपर्णी ७ गारुडी ८ दीर्घकाण्डा ९ दृढकाण्डा १० महाबला ११ दीर्घवल्ली १२ दृढलता १३। अस्या गुणाः। मधुरत्वम्। पित्तदाहास्रदोषविषदोषनाशित्वम्। वृष्यत्वम्। सन्तर्पणत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

अपि च।

"छिलिहिण्टो महामूलः पातालगरुडाह्वयः।

छिलिहिण्टः परं वृष्यः कफघ्नः पवनापहः॥"

इति भावप्रकाशः॥

पातालनिलयः, पु, (पाताले पातालं वा निलयो यस्य।) दैत्यः। इति हलायुधः॥ सर्पः। इति राजनिर्घण्टः॥

पातालौकाः, [स्] पु, (पातालमोकः स्थानमस्येति।) दैत्यः। इति हेमचन्द्रः॥ पातालवासिनि, त्रि॥

पातिः, पु, (पाति रक्षतीति। पा + "पातेरतिः।" उणां। ५। ५। इति अतिप्रत्ययः।) प्रभुः। स्वामी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पातिकः, पु, (पातः पतनं जले निमज्जनोन्मज्जनमेवास्त्यस्येति। पात + ठन्।) शिशुमारः। इति शब्दमाला॥

पातिली, स्त्री, (पातिः सम्पातिः पक्षिविशेषः तदर्थं लीयते ऽत्र। ली + ड्रः। ङीष् च।) वागुरा। (पातिः स्वामी लीयतेऽस्याम्।) नारी। मृत्पात्रभेदः। इति मेदिनी॥ पातिल् इति भाषा॥

पातुकः, त्रि, (पत + "लषपतपदस्थेति।" ३। २। १५४। इति उकञ्।) पतयालुः। पतनशीलः। इत्यमरः॥ (यथा, महाभारते। १२। ९१। ४२।

"यमो राजा धार्म्मिकाणां मान्धातः परमेश्वरः।

संयच्छन् भवति प्राणानसंयच्छंस्तु पातकः॥")

प्रपाते जलहस्तिनि च पुं। इति मेदिनी॥

पात्रः, त्रि, (नानागुणालङ्कृतो जनः।

"अपात्रः पात्रतां याति यत्र पात्रो न विद्यते॥"

इत्युणादिवृत्तिकृदुज्ज्वलदत्तः॥

तथा च महाभारते। १३। ६६। २२।

"शुभे पात्रे ये गुणा गोप्रदाने

तावान् दोषो ब्राह्मणस्वापहारे॥")

पाधातोष्ट्रप्रत्ययनिष्पन्नत्वादेकतकारवानयम्॥

पात्रं, क्ली, पाति रक्षति क्रियामाधेयं वा। पिबन्त्यनेनेति वा। पा रक्षणे पा पाने वा + "सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४। १५८। इति ष्ट्रन्।)

आधेयधारणवस्तु। तत्पर्य्यायः। अमत्रम् २ भाजनम् ३। इत्यमरः।२।९।३३॥ भाण्डम् ४ कोषः ५ कोषः ६ पात्री ७ कोषी ८ कोषी ९ कोषिका १० कोषिका ११। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। २। ४०।
"सकलगुणगणानामेकपात्रं पवित्र-
मखिलभुवनमातुर्नाट्यवद्दुर्यद्विचित्रम्॥")
योग्यम्। स्रुवादि। राजमन्त्री। तीरद्वयान्तरम्। इति मेदिनी॥ पातार इति भाषा॥ पर्णम्। नाट्यानुकर्त्ता। इति हेमचन्द्रः॥ आढ़कपरिमाणम्। इति वैद्यकपरिभाषा॥*॥ (यथा चरके कल्पस्थाने १२ अध्याये।
"————————चतुः प्रस्थमथाढ़कम्।
पात्रं तदेव विज्ञेयं————————॥")
पात्राणां विधिर्यथा,—
"हेमपात्रेण सर्व्वाणि लभते पैति नाम्मुने।।
अर्घ्यं दत्त्वा तु रौप्येण आयूराज्यसुतान् लभेत्॥
ताम्रपात्रेण सौभाग्यं धर्म्मं ज्ञानमयसम्भवे,।
वार्क्षपात्राणि रम्याणि नैष्ठिकादिषु कारयेत्॥
शैलानि क्रूरजातीनां रक्तानि सर्व्वकामिनाम्।
धातुसमानि पात्राणि नृपराष्ट्रविवृद्धये॥
त्रपुसीसकलौहानि अन्त्यजादिषु कारयेत्।
विवाहयज्ञश्राद्धेषु प्रतिष्ठासु विशेषतः॥
पात्राणाञ्चादरः कार्य्यः पात्राण्येवोत्तमानि च।
पात्रेषु पृथिवी दुग्धा सुधा पात्रेषु धार्य्यते॥
देवाः सोमः क्रतुर्यज्ञः पात्राण्येव विदुर्बुधाः।
बलिहोमक्रियादीनि विना पात्रैर्न सिध्यति॥
तस्माद्यज्ञाङ्गमेवातः पात्रञ्चाग्र्यं महामुने।॥"
तत्परिमाणादिर्यथा,—
"षट्त्रिंशदङ्गुलं पात्रञ्चोत्तमं परिकीर्त्तितम्।
मध्यमं तत्त्रिभागेन भागं कन्यसमीरितम्॥
त्र्यङ्गुलप्रमाणन्तु तत् पात्रं कारयेत् क्वचित्।
नानाविचित्ररूपाणि पौण्डरीकाकृतीनि च॥
शङ्खनीलोत्पलाकारपात्राणि परिकल्पयेत्।
रत्नादिरचितान् कुर्य्यात् कार्ष्णोत्पलसुसंस्थितान्॥
यथाशोभं यथालाभं तथा पात्राणि कारयेत्।
विना पात्रेण यः कुर्य्यात् प्रतिष्ठायाञ्चिकीं
क्रियाम्।
विफला भवते सर्व्वा वाहनादिधनापहा॥"
इति देवीपुराणम्॥*॥
भोजनपात्राणि भोजनशब्दे द्रष्टव्यानि॥

पात्रटः, पुं, (पाता इव पिबन्निव वा अटतीति। अट्+अच्।) कर्पटकः। कृशे, त्रि। इति शब्दरत्नावली॥

पात्रटीरः, पु, (पातेव रक्षन्निव पिबन्निव वा अटतीति। अट+बाहुलकात् ईरन्।) युक्तव्यापारमन्त्री। लौहपात्रम्। कांस्यपात्रम्। रजतपात्रम्। सिंहाणम्। पावकः। इति शब्दमाला मेदिनी च॥ रे, २८१। पिङ्गाशः। वायसः। कङ्कः। इति शब्दरत्नावली॥

पात्रपालः, पु, (पात्रं पालयतीति। पाल+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) तुला-घटः। इति जटाधरः॥ पातस्रोयार इति भाषा॥

पात्रसंस्कारः, पुं, (संस्क्रियते इति। सम्+कृ+घञ्। पात्रस्य संस्कारः शुद्धिः।) भाजनशुद्धिः। पुरोटिः। इति शब्दचन्द्रिका॥ रायभाटी इति भाषा॥

पात्री, स्त्री, (पा+ष्ट्रन्। षित्वात् ङीष्।) पात्रम्। इति त्रिलिङ्गसंग्रहे अमरः। ३।५।४२॥ (यथा, पाद्मे सृष्टिखण्डे तड़ागविधिप्रकरणे।
"पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम्।
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः॥")

पात्रीयं, क्ली, (पात्रे साधु। पात्र+बाहुलकात् छः।) यज्ञपात्रम्। इति त्रिकाण्डशेषः॥

पात्रीरः, पु, (पात्रेऽरं राति पात्रीं रातीति वा। रा+कः।) यज्ञद्रव्यम्। इति भूरिप्रयोगः॥

पात्रेसमितः, त्रि, (पात्रे भोजनसमये एव समितः सङ्गतः।) भोजनादन्यत्र यो न मिलितः सः। भोजनस्यैव दत्तः। यथा,—
"स पात्रेसमितोऽन्यत्र भोजनान्मिलितो न यः॥"
इति त्रिकाण्डशेषः॥
पापविशेषः। यथा —
"निधाय हृदये पापं यः परं शंसति स्वयम्।
स पात्रेसमितोऽथ स्यात्॥" इति शब्दमाला॥

पात्रोपकरणं, क्ली (पात्रस्य पात्राणां वा उपकरणम् उपभूषणम्।) उपभूषणम्। यथा,—
"रीतिवर्णादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्ज्जन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादिपात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्यादयस्तात्तदुपभूषणम्॥"
इति कालिकापुराणे ६८ अध्यायः॥

पात्त्रं, क्ली, (पततीति। पत+क्विप्। पतं अधः-पतन्तं जनं त्रायते। त्रै+कः। ततः स्वार्थे प्रज्ञाद्यण् निम्बेऽस्य निरुक्तिश्च दर्शनीया।) पापित्राता। यथा, भविष्यपुराणे।
"सर्व्वेषामेव पात्राणां परं पात्त्रं महेश्वरः।
पतन्तं त्रायते यस्माद्दीनवरकार्णवान्॥"
महेश्वर इति प्रदर्शकं हेतोरविशेषात्।
तथा नन्दिपुराणम्।
"पात्राण्याध्यात्मिका मुख्या विशुद्धाश्चाग्निहो-
त्रिणः।
देवताश्च तथा मुख्या गोदानं त्वेतदुत्तमम्॥"
इति प्रायश्चित्ततत्त्वम्॥

पात्त्रता, स्त्री, (पात्त्रस्य भावः।) पात्त्रत्वम्। विद्यातपस्याचारयुक्तता। यथा,—
"न विद्यया केवलया तपसा वापि पात्त्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्त्रं प्रचक्ष्यते॥"
इति शुद्धितत्त्वम्॥

पाथं, क्ली, जलम। इति मेदिनी। थे, ६॥

पाथः, पु, (पातीति। पा+थुट् निपातनात्।) सूर्य्यः। अग्निः। इति मेदिनी। थे, ६॥

पाथः, [स्] क्ली, (पाति रक्षति जीवानिति। पा+"उदके थट च।" उणा। ४।२०४। इति असुन् थुट् च। "पातेरेवोदके वाच्येऽसुन् तस्य थुडागम इत्युज्ज्वलदत्तः।) जलम्। इत्यमरः॥ (यथा, काशीखण्डे। ८६। ४६।
"स्वरमन्तापशमनी स्वनिः पीयूषपाथसाम्॥")

पाथिः, [स्] पुं, (पिबति नद्यादिजलमाकर्षतीति। "पिबतेस्थुक् च।" उणां। २।११५। इति इसिन् थुगागमश्च।) समुद्रः। इत्युणादिकोषः॥ चक्षुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (पीयते इति। पा+इसिन् थुगागमश्च।) कीलाले, क्ली। इत्युणादिकोषः॥

पाथेयं, क्ली, (पथि साधुरिति। "पथ्यतिथिवसतिस्वपतेढञ्।" ४।४।१०४। इति ढञ्।) पथि यथितद्रव्यम्। इति हेमचन्द्रः॥ पथखरच इति भाषा॥ तत्पर्य्यायः। शम्बलम् २। इत्यमरः॥ सम्बलम् ३। इति भरतः॥ (यथा, देवीभागवते। ३।२५।१२।
"लुण्ठिता तस्करैर्मार्गे वस्त्रमात्रा तथा-कृता।
पाथेयञ्च हृतं सर्व्वं बालपुत्त्रा निराश्रया॥")
कन्याराशिः। यथा,—
"क्रियतावुरिजितुमकुलीरलेयपाथेययककौ-
पीख्याः।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभञ्चेत्यम्॥"
इति ज्योतिस्तत्त्वम्॥

पाथोजं, क्ली, (पाथसि जले जायते इति। जन+डः।) कमलम्। इति राजनिर्घण्टः॥ (यथा, नैषधे। १६। ७७।
"अमतिशिथिलैर्गुम्भाग्रैन प्रगल्भबलाः खलु
प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः॥"
कमलशब्दे विवरणं सविस्तरं ज्ञेयम्॥)

पाथोदः, पु, (पाथो जलं ददातीति। दा+कः।) मेघः। इति त्रिकाण्डशेषः॥

पाथोधरः, पु, (धरति धारयतीति वा। धृ+अच्। पाथसो धरः। पाथो धारयतीति। धारि+अच् ह्रस्व इत्येके।) मेघः। इति हलायुध.॥ (यथा, राजतरङ्गिण्याम्। ३। २४०।
"अन्तर्ये सततं लुठन्ति गगिनाक्रान्तेव पाथोधरै-
रार्त्तानापतितास्तरङ्गवलयैरालिङ्ग्य गृह्णन्सौ॥")

पाथोधिः, पु, (पाथांसि धीयन्तेऽत्र। धा+कि।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ३। ६८।
"वशीकृतेयं पृथिवी कृतज्ञा भवदनुग्रहात।
जेतुं द्वीपान् कथ्यताम्नु युक्तिः पाथोधिलङ्घने॥")

पाथोनिधिः, पु, (पाथांसि जलानि निधीयन्तेऽस्मिन् इति। नि+धा+कि।) समुद्रः। इति शब्दरत्नावली॥

पाद, पु, (पद+णिच्+क्विप्।) पादः। इति जटाधरः॥

पादः, पु, (पद+करणे घञ्।) पद्यते गम्यते अनेन। पा इति भाषा। स तु गर्भस्थबालकस्य मासद्वयेन भवति। यथा —
"मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः॥"
इति भागवतीयतृतीयस्कन्धः॥

तत्पर्य्यायः । पत् २ अङ्घ्रिः ३ चरणः ४ । इत्यमरः ॥ अंह्रिः ५ । इति शब्दरत्नावली ॥ * ॥ श्लोकीयमयचतुर्थांशः । श्लोकचतुर्थांशः । यथा, पादाश्लोपे सत्येव पूर्य्यते । इह ककुपाद एव गृह्यते । इति वामनः ॥ अविशेषात श्लोकपादो ऽपि । इत्यपरे । इति सिद्धान्तकौमुदी ॥ * ॥ पादद्वारा पादाक्रमणादिनिषेधो यथा —

"पादेन नाक्रमेत् पादमुच्छिष्टं नैव लङ्घयेत् ।
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ॥"
इति कर्म्मलोचनम् ॥ * ॥

पादचालनादिनिषेधो यथा,—

"न पादचालनं कुर्य्यात् पादेन वा कदाचन ।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः ॥
नातिप्रसारयेद्देव ब्राह्मणान् गामथापि वा ।
वाय्वग्निनृपविप्राणां सूर्य्यं वा शशिनं प्रति ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥

पादेन्द्रियस्याध्यात्मत्वं तस्मिन्नधिभूतमधिदैवतञ्च यथा, महाभारते आश्वमेधिकपर्व्वणि ४२ अध्याये ।

"अतः परं प्रवक्ष्यामि सर्व्वं विविधमिन्द्रियम् ।
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ॥
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥"

तुर्य्यः । इत्यमरः । तुरीयांशः । चतुर्थभागः । शैलप्रत्यन्तपर्व्वतः । महादिसमीपे क्षुद्रपर्व्वतः । (यथा, हरिवंशे ६४ । २० ।

"उभयोर्विन्ध्यसह्ययोः पादे नगर्य्यौ महापुरम् ॥")

मयूखः । किरणः । इति मेदिनी ॥ (शिवः । यथा, महाभारते । १३ । १७ । १२४ ।

"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः ॥"

चिकित्सापादचतुष्टयं यथा,—

"वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति च सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥

"कारणं षोडशगुणं सिद्धौ पादचतुष्टयम् ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥

अस्य शुभलक्षणं यथा,—

"अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ च निगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥"

अशुभलक्षणञ्च यथा,—

"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ॥")

पादकटकः, पुं, (पादस्य कटक इवेति ।) नूपुरः । रवमूल्यहंसाकृतिचरणभूषणम् । बेंक मल इति भाषा । तत्पर्य्यायः । हंसकः २ । इत्यमरभरतौ ॥

पादकृच्छ्रः, पुं, व्रतविशेषः । यथा,—

"एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकृच्छ्र उदाहृतः ॥"
इति गारुडे १०३ अध्यायः ॥

पादगण्डिरः, पुं, (गच्छति चर्य्यते पूयरक्तादि यस्मात् यत्र वा पादे इत्यर्थः । गड + किरच् इति गण्डिरः पदः ततो राजदन्तादिवत् परनिपातनात् साधुः । गण्डीर इति पाठोऽपि दृश्यते तत्र गड + ईरन्प्रत्ययेन साधुरिति ।) श्लीपदम् । इति त्रिकाण्डशेषः ॥ गोद इति भाषा ॥ (श्लीपदशब्देऽस्य विवृतिर्विज्ञेया ॥)

पादग्रहणं, क्ली, (पादयोर्ग्रहणम् इति । ग्रह + भावे ल्युट् ।) अभिवादनम् । पादस्पर्शपूर्व्वकप्रणामः । इत्यमरः ॥ तन्निषेधो यथा, "समिद्वार्य्युदकुम्भपुष्पान्नहस्तो नाभिवादयेत् यच्चान्यदप्येवं युक्तम् ।" इति बौधायनः ॥

"जपयज्ञजलस्थञ्च समित्पुष्पकुशानलान् ।
दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेत् ॥"
इति लघुहारीतः ॥

न पुष्पाक्षतपाणिर्नाशुचिर्न जपन् न देवपितृकार्य्यं कुर्व्वन् । अभिवादयेदित्युशनःशङ्खलिखितौ ॥ * ॥ तद्विधिः ।

"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥" * ॥

तत्प्रकारः ।

"अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥
नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च ॥
भोः शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः ॥"
इति मनुः । २ । १२०—१२४ ॥

पादचतुरः, पुं, (पादे पदव्यापारे गमनादौ चतुरः ।) छागः । सैकतम् । पिप्पलः । करकः । मरुदीपकमवक्ता । इति मेदिनी । रे, ३०४ ॥

पादचारी, [न्] पुं, (पद्भ्यां चरतीति । चर गतौ + णिनिः) पदातिः । इति हेमचन्द्रः । ३ । ४६२ ॥ पद्भ्यां गमनशीले, त्रि ॥ (यथा, भागवते । ६ । १२ । ३६ ।

"गिरिराट् पादचारीव पद्भ्यां निर्ज्जरयन् महीम् ।
जग्रास स समासाद्य वज्रिणं सहवाहनम् ॥")

पादजः, पुं, (पद्भ्यां जायते इति । जन + डः । "पद्भ्यां शूद्रोऽजायत ।" इति श्रुतेर्ब्रह्मणः पद्भ्यां जातत्वात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । ६३ ।

"न विप्रा न च राजानो न वैश्या न च पादजाः ॥"

पादोद्भवमात्रे, त्रि ॥)

पादत्राणं, क्ली, (पादयोस्त्राणं यस्मात् ।) पादुका इति जटाधरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अध्याये । "अधनस्त्वबान्धवो वा पादत्राणातपत्रविरहितो भैक्ष्याशी ग्रामैकरात्रावासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत् ॥" शीतकृतूपचारेऽस्य व्यवहारो यथा,—

"उष्णस्वभावैर्लघुभिः प्रावृतः शयनं भजेत् ।
युक्त्यार्ककिरणान् स्वेदं पादत्राणञ्च सर्व्वदा ॥")

पादपः, पुं, (पादेन मूलेन पिबति रसानिति । पा + कः ।) वृक्षः । इत्यमरः ॥ (यथा, हितोपदेशे । १ । ६३ ।

"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥"

पादौ पाति रक्षतीति । पा + रक्षणे + कः ।) पादपीठः । इति मेदिनी । पे, ७१ ॥

पादपरुहा, स्त्री, (पादपे वृक्षे रोहतीति । रुह + कः ।) वन्दाकः । इति राजनिर्घण्टः ॥

पादपा, स्त्री, (पादौ पाति रक्षतीति । पा + कः + टाप् ।) पादुका । इति मेदिनी । पे,२१ ॥

पादपाशः, पुं, (पादस्य पाशः ।) अश्वपादरज्जुः । तत्पर्य्यायः । दामाञ्चनम् २ । इति हेमचन्द्रः । ४ । ३४५ ॥

पादपाशी, स्त्री, (पादपाश + स्त्रियां गौरादित्वात् ङीष् ।) खड्डुका । खेडुया इति भाषा ॥ शृङ्खला । शिकली इति भाषा ॥ इति मेदिनी ॥

पादपीठं, क्ली, (पादस्य पीठम् ।) पादस्थापनासनम् । पा राखा टुल इति भाषा ॥ तत्पर्य्यायः । पदासनम् २ । इति हेमचन्द्रः । ३ । ३५२ ॥ (यथा, रघुः । १७ । २८ ।

"वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥")

पादपीठिका, स्त्री, (पादपीठं साधनत्वेनास्त्यस्या इति । पादपीठ + ठन् ।) नापितादिशिल्पम् । यथा,—

"नापितादिकशिल्पे तु कारिका पादपीठिका ॥"
इति शब्दमाला ॥

पादप्रक्षालनं, स्त्री, (पादयोः प्रक्षालनम् ।) चरणधौतम् । पा धोओया इति भाषा ॥ अस्य गुणाः । मेधाजनकत्वम् । पवित्रत्वम् । आयुष्यत्वम् । अलक्ष्मीकलिनाशकत्वञ्च । इति राजवल्लभः ॥ (यथा च,—
"पादप्रक्षालनं पादमलरोगश्रमापहम् ।
चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम् ॥"
इति चिकित्सितस्थाने चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पादप्रधारणं, स्त्री, (पादौ प्रधार्य्येते कण्टकादिभ्यो रक्ष्येतेऽनेनेति । प्र + धृ + णिच् + ल्युट् ।) पादुका । इति केचित् ॥

पादप्रहारः, पु (पादस्य पादेन वा प्रहारः ।) पदाघातः । लाति इति भाषा ॥ यथा । "नायिकापादप्रहारादिना नायकस्य कोपादिवर्णनम् ।" इति काव्यप्रकाशे सप्तमोल्लासः ॥ (यथा च साहित्यदर्पणे । १० । ४६ ।
"दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि । नात्र दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यद्भिद्यते मृदु पदं ननु सा व्यथा मे ॥")

पादबन्धनं, स्त्री, (पादयोर्गोमहिष्यादीनामित्यर्थः । यद्बन्धनम् ।) गोमहिष्यादिबन्धनम् । इति जटाधरः ॥ यादवशब्दटीकायां भरतश्च ॥ (बध्यतेऽनेनेति । बन्ध + करणे ल्युट् । पादयोर्बन्धनं तत्साधनवस्तु । गोमहिष्यादीनां पादबन्धनद्रव्यम् । यथा, हेमचन्द्रः । ४ । ३२१ ।
"स तु घण्टालकः काष्ठमयैः स्यात् पादबन्धनैः ॥")
चरणोद्दानञ्च ॥

पादमूलं, स्त्री, (पादयोर्मूलम् ।) चरणाधोभागः । यथा, हेमचन्द्रः ।
"पादमूलं गोहिरं स्यात् पार्ष्णिस्तु घुटयोरधः ॥"
(यथा, रामायणे । २ । ७८ । २५ ।
"सा पादमूले कैकेय्या मन्थरा निपपात ह ॥"
प्रत्यन्तपर्व्वताधोभागः । यथा, कथासरित्सागरे । १ । ७७ ।
"मर्त्यौ भ्रमन्तौ हिमवत्पादमूलमवापतुः ॥")

पादरक्षणं, स्त्री, (पादयो रक्षणं यस्मात् ।) पादुका । इति हेमचन्द्रः । ३ । ५७८ ॥

पादरज्जुः, स्त्री (पादबन्धनार्था रज्जुः ।) हस्तिपादबन्धनरज्जुः । तत्पर्य्यायः । पारी २ । इति जटाधरः ॥ चरणबन्धनदाममात्रञ्च ॥

पादरथी, स्त्री, (पादस्य रथी क्षुद्रो रथ इव ।) पादुका । इति त्रिकाण्डशेषः ॥

पादरोहणः, पु, (पादैर्मूलैः रोहतीति । रुह + ल्युः ।) वटवृक्षः । इति राजनिर्घण्टः ॥

पादवल्मीकः, पुं, (पादे वल्मीक इव ।) श्लीपदम् । इति हेमचन्द्रः । ३ । १२६ ॥ (श्लीपदरोगशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पादविकः, पु (पदवीं धावतीति । पदवी + "माथोत्तरपदपदव्यनुपदं धावति ।" ४ । ४ । ३७ । इति ठक् ।) पथिकः । इति सिद्धान्तकौमुदी ॥

पादविरजाः, [स्] स्त्री, (पादौ विरजसौ धूलिविहीनौ यस्याः ।) पादुका । इति हारावली । ७४ ॥

पादशः, [स्] अ पादं पादम् । पादशब्दात् वीप्सायां शस्प्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥ (यथा, मनुः । १ । ८३ ।
"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥")

पादशैलः, पु, (पादः महाद्रिसमीपस्थः क्षुद्रपर्व्वतः स एव शैलः ।) प्रत्यन्तपर्व्वतः । इति शब्दरत्नावली ॥

पादशोथः, पु (पादोद्भवः शोथः । शाकपार्थिवादिवत् समासः ।) पादगतशोफः । यथा,—
"अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयम् ॥"
इति माधवकरः ॥
(यथा च हारीते चिकित्सितस्थाने २६ अः ॥
"शोथो भवेच्च विकलेन्द्रियरोममार्गः
क्षीणे बले वपुषि चाम्लकटूष्णसेवया ।
शैत्यात्तथा विषदर्पिच्छलसेवनेन
रूक्षाभिघातपतनेन च धारणाद्वा ॥
आमाशये गतिरतोऽपि नरस्य यस्य
अन्ते प्रधावति ततोऽपि च दोष एषः ।
करोति पाणिचरणे च पृथक् प्रवृत्तो
द्वन्द्व न वा भवति शोथविकारचारः ॥
नरस्य चान्तःप्रभवाश्च शोथाः
साध्या भवेयुर्वनिता मुखेषु ।
असाध्यकाः सर्व्वशरीरगाश्च
पादे स्त्रिया वा वदने नरस्य ॥")

पादस्फोटः, पु, (पादस्य स्फोटः । पादं स्फोटयतीति वा । स्फुट् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) रोगविशेषः । तत्पर्य्यायः । विपादिका २ । इत्यमरः ॥ स्फुटी ३ स्फुटिः ४ पादस्फोटिः ५ । इति शब्दरत्नावली ॥ स तु एकादशक्षुद्रकुष्ठान्तर्गतत्रतीयकुष्ठम् । यथा,—
"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत् । इति माधवकरः ॥ अस्य चिकित्सा कुष्ठशब्दे द्रष्टव्या ॥

पादहारकः, त्रि, पादाभ्यां ह्रियतेऽसौ । पादशब्दात् निपातनात् कर्म्मणि णकप्रत्ययान्तः । इति मुग्धबोधव्याकरणम् ॥ ("कृत्यल्युटो बहुलम् ।" ३।३।११३ । इति कर्म्मणि ण्वुल । इति सिद्धान्तकौमुदी ।) चरणद्वारा हरणकर्त्ता ॥

पादाग्रं, स्त्री, (पादयोरग्रम् ।) चरणाग्रभागः । तत्पर्य्यायः । प्रपदम् २ । इत्यमरः ॥

पादाङ्गदं, स्त्री, (पादस्य अङ्गदमिव ।) नूपुरम् । इत्यमरः ॥

पादात्, पु, (पादाभ्यामतति गच्छतीति । अत + क्विप् ।) पादातिः । इति शब्दरत्नावली ॥ (पादाभ्यामत्तीति । अद् + क्विप् । इत्यः । इति युत्पत्तिलब्धोऽर्थः ॥)

पादातं, स्त्री, (पदातीनां समूहः । पदाति + "भिक्षादिभ्योऽण् । ४ । २ । ३८ । इत्यण् ।) पत्तिसंहतिः । पदातिसमूहः । इत्यमरः ॥ (यथा, महाभारते । १२ । ६६ । ८ ।
"सादिनामन्तरे स्थाप्यं पादातमपि दंशितम् ॥")

पादातः, पु, (पादाभ्यामततीति । अत + अच् ।) पादातिः । यथा,—
"पदातिपत्तिपादातपादातिकपदाजयः ॥"
इत्यमरमाला ॥
(यथा, महाभारते । २ । ५१ । ४३ ।
"अयुतं त्रीणि पद्मानि गजारोहाः ससादिनः ।
रथानामर्व्वुदं चापि पादाता बहवस्तथा ॥")

पादातिः, पु, (पादाभ्यामततीति । अत + इन् ।) पदातिः । इति हेमचन्द्रः ॥

पादातिकः, पु, (पादातिरेव । पादाति + स्वार्थे कन् ।) पदातिः । इति हेमचन्द्रः । ३ । १६७ ॥

पादारकः, पु, (पाद इव ऋच्छतीति । ऋ + ण्वुल् ।) पोलिन्दः । इति त्रिकाण्डशेषः ॥

पादालिन्दी, स्त्री,(पाद इव अलिन्दो यत्र । गौरादित्वात् ङीष् ।) नौका । इति हारावली ।५६।

पादावर्त्तः, पुं, (पाद इव आवर्त्तते इति । आ + वृत + अच् ।) अरघट्टकः । इति हेमचन्द्रः । ४ । १५६ ॥ रहट इति हिन्दीभाषा ॥

पादाविकः, पु, (अव रक्षणे + भावे घञ् । पादेन अवः रक्षणम् । तत्र पादावे पादेन शरीरादिरक्षणे नियुक्तः । पादाव + "तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) पदातिः । इति शब्दरत्नावली ॥

पादी, [न्] पु, पादोऽस्त्यस्येति । पाद + इनिः ।) पादविशिष्टजलजन्तुगणः । अस्य गणना गुणाश्च यथा, भावप्रकाशे ।
"कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः ॥"
चतुर्थांशभागी । यथा, मनुः । ८ । २१० ।
"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे ।
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥"

पादुकः, त्रि, (पद्यते गच्छतीति । पद + "लषपतपदेति ।" ३ । २ । १५४ । इति उकञ् ।) गमनशीलः । पदधातोः कर्त्तरि उकप्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

पादुका, स्त्री, (पादूरेव । पादू + स्वार्थे कन् ततो ह्रस्वः ।) चर्म्मादिनिर्म्मितपादाच्छादनम् । जुता इति भाषा ॥ तत्पर्य्यायः । पादूः २ उपानत् ३ । इत्यमरः ॥ पन्नद्धा ४ पादरक्षिका ५ प्राणहिता ६ । इति हेमचन्द्रः ॥ पन्नद्धी ७ पादरथी ८ । इति त्रिकाण्डशेषः ॥ कौषी ९ । इति शब्दरत्नावली ॥ * ॥ तस्या धारणविधिर्यथा,—
"वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥"
इति ज्योतिस्तत्त्वम् ॥

अस्या धारणगुणाः ।
"पादप्रधारणं वृष्यमोजस्यं चक्षुषोर्हितम् ।
सुखप्रचारमायुष्यं बल्यं पादरुजापहम् ॥" * ॥
अस्या अधारणे दोषा यथा,—
"पादाभ्यामनुपानद्भ्यां वृथा चंक्रमणं सदा ।
अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिकृत् ॥"
इति राजवल्लभः ॥ * ॥
तस्या दानफलं यथा,—
"दरिद्रायागताय विप्राय यः प्रयच्छत्युपानहौ ।
न तस्य मानसो दाहः कदाचिदपि जायते ॥
यानश्चाश्वतरीयुक्तं तस्य हैममयं शुभम् ।
उपतिष्ठति विप्रर्षे सर्व्वरत्नविभूषितम् ॥
दानमत्र यथोत्पन्नं तत्ते वक्ष्यामि पार्थिव ।
शृणुष्वैकमना भूप । लोके सर्व्वसुखप्रदम् ॥
जमदग्निर्मुनिः पूर्व्वं तपःस्वाध्यायकर्षितः ।
बाणखड्गधरो धन्वी बभूव सततोद्यतः ॥
धनुर्व्वेदं तथा वेदं सर्व्वास्त्रपारगोऽभवत् ।
क्षिपन् वाणांस्तथा ग्रामं भार्य्ययानुगतो हि सः ॥
कदा निदाघकाले तु क्षिपन् वाणान् सहस्रशः ।
तस्थौ स्थाणुरिवासन्नः प्रनिलक्षं महामुनि ॥
निदाघतीव्रसन्तापाद्गच्छन्त्याः सततं भयात् ।
भर्त्तुः केशास्तथा यान्त्यास्तस्याश्छायते रविः ॥
क्षुत्तृष्णाश्रमसन्तार्त्ता तथा यातुं न साशकत् ।
सुतापादशिरोविभ्रष्टा रेणुका च तपस्विनी ॥
तां दृष्ट्वा स मुनिः प्राह भार्य्यां किन्ते भवेच्चिरम् ।
कोपार्त्तमाह भर्त्तारं न कोपं कर्त्तुमर्हसि ॥
निदाघतीव्रसन्तापात् भस्मपादा क्षयार्द्दिता ।
रश्मिमद्रश्मिभिः स्पृष्टा न शशाकाह मार्गि-
तुम् ॥
इत्युक्ते स क्रुधाविष्टः प्राह सन्धाय कार्म्मुकं ।
एवमेकं मां न जानाति सूर्य्यो विभ्रंशमीयिवान् ॥
यः सन्तपति मे भार्य्यां साध्वीं धर्म्मपरायणाम् ।
साध्वसाधु अजानन् वै फलमाप्नोतु तस्य हि ॥
इत्युक्त्वा स्थानमास्थाय अर्कविभ्रंशहेतवे ।
प्रतीक्ष्य हि सुघोरेण शरकल्पधरो मुनिः ॥
तं विज्ञाय मुनिं धर्म्यो द्विजोऽभूद्रविरब्रवीत् ।
किमालोकयसे सूर्य्यं पुनः पुनरतीव हि ॥
सुत्राणाञ्चितपाणिस्त्वं कथयस्वाखिलं मुने ।
इत्युक्तः स तमाहेदं पातयिष्याम्यहं रविम् ॥
द्विजस्तु तमुवाचाथ मुने चित्रं विभाति मे ।
मातुरङ्कगतो यद्वद्वालश्चन्द्रं जिघृक्षति ॥
योजनानां सहस्राणि निमेषाद्याति यो द्रुतम् ।
विप्र । मुक्तेन वाणेन तं कथं पातयिष्यसि ॥
तच्छ्रुत्वा यमदग्निस्तं प्राह शृणु द्विजोत्तम ।
पातयिष्याम्यहं यद्वदिमं सूर्य्यं नभःस्थलात् ॥
स्थिरचरो यदा सूर्य्यो मर्त्त्यलोके त्वनन्दितः ।
मध्याह्ने स्थिरतामेति सर्व्वलोकान्दर्शिवान् ॥
तत्काले सुमहत्तस्य भविष्यति दिवाकरः ।
तत्र तं पातयिष्यामि पश्यतस्ते द्विजोत्तम ॥
तच्छ्रुत्वा महसोद्दीप्तस्तस्य प्रत्यक्षतां ययौ ।
सूर्य्यस्तं क्षमयामास दत्त्वा छत्रमुपानहौ ॥
ततःप्रभृति तच्छत्रं द्विजानां परिगीयते ।
दत्तं तैर्धार्य्यतेऽन्येषां क्षत्त्रियाणां द्विजोत्तम ॥
यो ददाति द्विजेभ्यस्तु तृतीयायामुपानहौ ।
वैशाखे शुक्लपक्षे तु सच्छत्रं कनकान्वितम् ॥
न तस्य मानसो दाहो मर्त्यलोकेऽभिजायते ।
सर्व्वव्याधिविनिर्मुक्तः श्रियं पुत्त्रांश्च विन्दति ॥
कालादिह यदा याति मम लोके द्विजोत्तम ।
यानं वाश्वतरीयुक्तं सर्व्वहेममयं शुभम् ॥
दिव्याङ्गनाभिराकीर्णं सर्व्वरत्नविभूषितम् ।
उपतिष्ठति विप्रेन्द्र । सर्व्वकामफलप्रदम् ॥"
इत्यग्निपुराणम् ॥ * ॥
विष्णुगृहे सपादुकगमने दोषो यथा,—
वराह उवाच ।
"वहन्नुपानहौ मह्यं यस्तु मामुपचाक्रमेत् ।
चर्म्मकारस्तु जायेत वर्षाणान्तु त्रयोदश ॥
तत्र जन्मपरिभ्रष्टः शूकरो जायते पुनः ।
शूकरात्तु परिभ्रष्टः श्वा च तत्रैव जायते ॥
ततः श्वत्वात् परिभ्रष्टो मानुषश्चैव जायते ।
मद्भक्तश्च विनीतश्च अपराधविवर्ज्जितः ॥
मुक्त्वा तु सर्व्वसंसारं मम लोकाय गच्छति ॥
य एतेन विधानेन वसुधे । कर्म्म कारयेत् ।
न स लिप्यति पापेन एवमेतन्न संशयः ॥"
इति वराहपुराणे उपानहापराधप्रायश्चित्तम् ॥
अथ देवतापादुकानिर्म्माणपूजनविधिः । यथा,—
"मणिरत्नमयी कार्य्या हैमरूप्यमयी पि वा ।
चन्दनेनापि कर्त्तव्या पादुकाप्रतिमापि वा ॥
श्रीपर्णी श्रीद्रुमा चापि देवदारुमयी पि वा ।
सङ्कुला च सा कार्य्या पादुकं पूजयेत् सदा ॥"
इति देवीपुराणम् ॥ * ॥
गुरुपादुकास्तोत्रं यथा,—
"ब्रह्मरन्ध्रसरसीरुहोदरे
नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
द्वादशार्णसरसीरुहं भजे ॥ १ ॥
तस्य कन्दलितकर्णिकापुटे
कॢप्तरेखमकथादिरेखया ।
कोणलक्षितहलक्षमण्डली-
भावलक्ष्यमवलालयं भजे ॥ २ ॥
तत्पुटे पटुतडित्कडारिम-
स्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपु-
र्बिन्दुनादमणिपीठमण्डलम् ॥ ३ ॥
ऊर्द्ध्वमस्य हुतभुक्शिखात्रयं
तद्विलासपरिबृंहणास्पदम् ।
विश्वघस्मरमहोच्चिदोत्कटं
व्यामृशामि युगमादिहंसयोः ॥ ४ ॥
तत्र नाथचरणारविन्दयोः
कुङ्कुमासवझरीमरन्दयोः ।
द्वन्द्वमिन्दुमकरन्दशीतलं
मानसं स्मरति मङ्गलास्पदम् ॥ ५ ॥
पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलोपेतं प्रपञ्चे चातिदुर्लभम् ॥"
इति रुद्रयामलः ॥

पादुकाकारः, पुं, (पादुकां करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति हलायुधः ॥

पादुकाकृत्, पुं, (पादुकां करोतीति । कृ + क्विप् ।) चर्म्मकारः । इति हेमचन्द्रः । ३ । ५७८ ॥

पादूः, स्त्री, (पद्यते गम्यते सुखेन ययेति । पद + "णितकशिपद्यर्त्तेः ।" उणां १ । ८१ । इति ऊः स च णित् ।) पादुका । इत्यमरः ॥

पादूकृत्, पुं, (पादू पादुकां करोतीति । कृ + क्विप् । तुक् ।) चर्म्मकारः । इत्यमरः ॥

पादोदकं, क्ली, (पादप्रक्षालनजातं उदकम् । शाकपार्थिवादिवत् समासः ।) चरणधौतजलम् । चरणामृतम् । यथा,—
"हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलं पिबेच्च ।
योऽश्नाति नित्यं प्रयतो मुरारेः
प्राप्नोति सुप्रेमयुतां स भक्तिम् ॥
हत्यां हन्ति यदङ्घ्रिसङ्गतुलसीस्तेयञ्च पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनासङ्गमम् ।
भक्ताधीनमतिः स्थितिर्हरिजने तत्सङ्गतिः सज्जला
शालग्रामशिलादिमूर्त्तिमहितो जानन्ति कं वै हरे ॥"
इति पाद्मोत्तरखण्डे १०० अध्याय. ॥ * ॥
अथ श्रीचरणोदकाभिषेकमाहात्म्यं पद्मपुराणे ।
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
शालग्रामशिलातोयैर्योऽभिषेकं समाचरेत् ॥
गङ्गागोदावरीरेवानद्यो मुक्तिप्रदास्तु याः ।
निवसन्ति सतीर्थास्ताः शालग्रामशिलाजले ॥
कोटितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
तीर्थं यदि भवेत् पुण्यं शालग्रामशिलोद्भवम् ॥"
तत्रैव गौतमाम्बरीषसंवादे ।
"येषां धानानि गात्राणि हरेः पादोदकेन वै ।
अम्बरीष । कुले तेषां दासोऽस्मि वशगः सदा ॥
राजन्नेतानि तावच्च तीर्थानि भुवनत्रये ।
यावन्न प्राप्यते तोयं शालग्रामाभिषेकजम् ॥"
स्कान्दे कार्त्तिकमाहात्म्ये ।
"गृहेऽपि वसतस्तस्य गङ्गास्नानं दिने दिने ।
शालग्रामशिलातोयैर्योऽभिषिञ्चति मानवः ॥"
तत्रैवान्यत्र ।
"यानि कानि च तीर्थानि ब्रह्माद्या देवता-
स्तथा ।
विष्णुपादोदकस्यैते कलां नार्हन्ति षोडशीम् ॥
शालग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः स्नानतोयेन ब्रह्महत्या निवर्त्तते ॥"
किञ्च ।
"स वै चावभृतस्नातः स च गङ्गाजलाप्लुतः ।
विष्णुपादोदकं कृत्वा मूर्द्धि यः स्नाति मानवः ॥"
श्रीनृसिंहपुराणे ।
"गङ्गाप्रयागगयनैमिषपुष्कराणि
पुण्यानि यानि कुरुजाङ्गलयामुनानि ।

कालेन तीर्थसलिलानि पुनन्ति पापं
पादोदकं भगवतः प्रपुनाति सद्यः ॥”
स्मृतौ च ।
“त्रिरात्रिफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगाश्च पक्षस्य मासस्य सरितां पतिः ॥
षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी ।
पादोदकं भगवतो द्वादशाब्दफलप्रदम् ॥”
तन्निन्दा च गरुडपुराणे ।
“जलञ्च येषां तुलसीविमिश्रितं
पादोदकं चक्रशिलासमुद्भवम् ।
नित्यं त्रिसन्ध्यं स्रवते न गात्रं
खगेन्द्र ! ते धर्म्मबहिष्कृता नराः ॥”
अथ श्रीचरणोदकपानमाहात्म्यम् । पाद्मे गौत-
माम्बरीषसंवादे ।
“हरेः स्नानावशेषन्तु जलं यस्योदरे स्थितम् ।
अम्बरीष ! प्रणम्योच्चैः पादपांशुः प्रगृह्यताम् ॥”
तत्रैव देवदूतविकुण्डलसंवादे ।
“ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु सेवितैः किं प्रयोजनम् ॥
कोटितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
नित्यं यदि पिबेत् पुण्यं शालग्रामशिलाजलम् ॥
शालग्रामशिलातोयं यः पिबेद्विन्दुना समम् ।
मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाङ्नरः ॥”
किञ्च ।
“दहन्ति नरकान् सर्व्वान् गर्भवासञ्च दारुणम् ।
पीतं यैस्तु सदा नित्यं शालग्रामशिलाजलम् ॥”
तत्रैव श्रीयमधूम्रकेतुसंवादे ।
“शालग्रामशिलातोयं विन्दुमात्रं तु यः पिबेत् ।
सर्व्वपापैः प्रमुच्येत मुक्तिमार्गे कृतोद्यमः ॥”
तत्रैव पुलस्त्यभगीरथसंवादे ।
“पादोदकस्य माहात्म्यं भगीरथ ! वदामि ते ।
पावनं सर्व्वतीर्थेभ्यो हत्याकोटिविनाशनम् ॥
धृते शिरसि पीते च सर्व्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तन्तु पापानां कलौ पादोदकं हरेः ॥”
किञ्च ।
“त्रिभिः सारस्वतं तोयं सप्ताहेन तु नार्म्मदम् ।
सद्यः पुनाति गाङ्गेय दर्शनादेव यामुनम् ॥
पुनन्त्येतानि तोयानि स्नानदर्शनकीर्त्तनैः ।
पुनाति स्मरणादेव कलौ पादोदकं हरेः ॥
अर्च्चितैः कोटिभिर्लिङ्गैर्नित्यं यत् क्रियते फलम् ।
तत् फलं शतसाहस्रं पीतैः पादोदकैर्हरेः ॥
अशुचिर्वा दुराचारो महापातकसंयुतः ।
स्पृष्ट्वा पादोदकं विष्णोः सदा शुद्ध्यति मानवः ॥
पापकोटियुतो यस्तु मृत्युकाले शिरे मुखे ।
देहे पादोदकं यस्य न प्रयाति यमालयम् ॥
न दानं न हविर्येषां स्वाध्यायो न सुरार्च्चनम् ।
तेऽपि पादोदकं पीत्वा प्रयान्ति परमां गतिम् ॥
विशाखाऋक्षसंयुक्ता वैशाखी किं करिष्यति ।
पिण्डारके महातीर्थं उज्जयिन्यां भगीरथ ! ॥
माघमासे प्रयागे तु स्नानं वै किं करिष्यति ।
प्रयागं सततं तस्य यस्य पादोदकं हरेः ॥
कार्त्तिके कार्त्तिकीयोगे किं करिष्यति पुष्करे ।
नित्यन्तु पुष्करं तस्य यस्य पादोदकं हरेः ॥
प्रबोधवासरे प्राप्ते मथुरायाञ्च तस्य किम् ।
नित्यञ्च यामुनं स्नानं यस्य पादोदकं हरेः ॥
काश्यामुत्तरवाहिन्यां गङ्गायान्तु मृतस्य किम् ।
यस्य पादोदकं विष्णोर्मुखे चैवावतिष्ठते ॥”
किञ्च ।
“हित्वा पादोदकं विष्णोर्योऽन्यतीर्थानि गच्छति ।
अनर्घ्यरत्नमुत्सृज्य लोष्ट्रं वाञ्छति दुर्म्मतिः ॥
कुरुक्षेत्रसमो देशो विष्णुपादोदकं मतः ।
पतेद् यत्राक्षयं पुण्यं नित्यं भवति तद्गृहे ॥
गयापिण्डसमं पुण्यं पुत्त्राणामपि जायते ।
पादोदकेन देवस्य ये कुर्य्युः पितृतर्पणम् ॥
नासुराणां भयं तस्य प्रेतजन्यं न राक्षसम् ।
न रोगस्य भयं चैव नास्ति विघ्नकृतं भयम् ॥
न दुष्टा नैव घोराश्चाप्यपरोत्थभयं नहि ।
ग्रहाः पीडां न कुर्व्वन्ति वैरा नश्यन्ति दारुणाः ॥
किं तस्य तीर्थगमने देवर्षीणाञ्च दर्शने ।
यस्य पादोदकं मूर्द्ध्नि शालग्रामशिलोद्भवम् ॥
प्रीतो भवति मार्त्तण्डः प्रीतो भवति केशवः ।
ब्रह्मा भवति सुप्रीतः प्रीतो भवति शङ्करः ॥
पादोदकस्य माहात्म्यं यः पठेत् केशवाग्रतः ।
स याति परमं स्थानं यत्र देवो जनार्द्दनः ॥”
ब्रह्माण्डपुराणे श्रीब्रह्मनारदसंवादे ।
“प्रायश्चित्तं यदि प्राप्तं कृच्छ्रं वा त्वघमर्षणम् ।
सोऽपि पादोदकं पीत्वा शुद्धिं प्राप्नोति तत्क्षणात् ॥
अशौच नैव विद्येत सूतके मृतकेऽपि च ।
येषां पादोदकं मूर्द्ध्नि प्राशनं ये प्रकुर्व्वते ॥
अन्तकालेऽपि यस्येह दीयते पादयोर्जलम् ।
सोऽपि सद्गतिमाप्नोति सदाचारैर्बहिष्कृतः ॥
अपेयं पिबते यस्तु भुङ्क्ते यच्चाप्यभोजनम् ।
अगम्यागमना ये वै पापाचाराश्च ये नराः ।
तेऽपि पूज्या भवन्त्याशु सद्यः पादाम्बुसेवनात् ॥”
किञ्च ।
“अपवित्रं यदन्नं स्यात् पानीयं चापि पापिनाम् ।
भुक्त्वा पीत्वा विशुद्धः स्यात् पीत्वा पादोदकं
हरे. ॥
तप्तकृच्छ्रात् पञ्चगव्यात् महाकृच्छ्रादिविंशतेः ।
चान्द्रायणात् पादकृच्छ्रात् पराकादपि सुव्रत ।
कायशुद्धिर्भवेदाशु पीत्वा पादोदकं हरेः ॥
अगुरुं कुङ्कुमं चापि कर्पूरं चानुलेपनम् ।
विष्णुपादाम्बुसंलग्नं तद्वै पावनपावनम् ॥
दृष्टिपूतन्तु यत्तोयं विष्णुना प्रभविष्णुना ।
तद्धि पापहरं पुत्त्र ! किं पुनः पादयोर्जलम् ॥
एतदर्थमहं पुत्त्र ! शिरसा विष्णुतत्परः ।
धारयामि पिबाम्यद्य माहात्म्यं विदितं मम ॥
प्रियस्त्वमग्रजः पुत्त्र त्वदर्थं गदितं मया ।
रहस्यं मे त्वनर्हस्य न वक्तव्यं कदाचन ॥
धारयस्व सदा मूर्द्ध्नि प्राशनं कुरु नित्यशः ॥
जन्ममृत्युजराद्ःखैर्मोक्षं यास्यसि पुत्त्रक ! ॥”
विष्णुधर्म्मोत्तरे ।
“सद्यः फलप्रदं पुण्यं सर्व्वपापविनाशनम् ।
सर्व्वमङ्गलमङ्गल्यं सर्व्वदुःखविनाशनम् ।
दुःस्वप्ननाशनं पुण्यं विष्णुपादोदकं शुभम् ॥
सर्व्वोपद्रवहन्तारं सर्व्वव्याधिविनाशनम् ।
सर्व्वोत्पातप्रशमनं सर्व्वतापनिवारणम् ॥
सर्व्वकल्याणसुखदं सर्व्वकामफलप्रदम् ।
सर्व्वसिद्धिप्रदं धन्यं सर्व्वधर्म्मविवर्द्धनम् ॥
सर्व्वशत्रुप्रशमनं सर्व्वभोगप्रदायकम् ।
सर्व्वतीर्थस्य फलदं मूर्द्ध्नि पादाम्बुधारणम् ॥
प्रयागस्य प्रभासस्य पुष्करस्य च सेवने ।
पृथूदकस्य तीर्थस्य ब्राह्मणो लभते फलम् ॥
चक्रतीर्थे फलं यादृक् तादृक् पादाम्बुधारणात् ॥
सरस्वत्यां गयायाञ्च गत्वा यत् प्राप्नुयात् फलम् ।
तत् फलं लभते श्रेष्ठं मूर्द्ध्नि पादाम्बुधारणात् ॥”
स्कान्दे ।
“पादोदकस्य माहात्म्यं देवो जानाति शङ्करः ।
विष्णुपादच्युता गङ्गा शिरसा येन धारिता ॥
स्थानं नैवास्ति पापस्य देहिनां देहमध्यतः ।
सबाह्याभ्यन्तरं यस्य व्याप्तं पादोदकेन वै ॥
पादोदं विष्णुनैवेद्यमुदरे यस्य तिष्ठति ।
नाश्रयं लभते पापं स्वयमेव विनश्यति ॥
महापापग्रहग्रस्तो व्याप्तो रोगशतैरपि ।
हरेः पादोदकं पीत्वा मुच्यते नात्र संशयः ॥
शिरसा तिष्ठते येषां नित्यं पादोदकं हरेः ।
किं करिष्यन्ति ते लोके तीर्थकोटिमनोरथैः ॥
अयमेव परो धर्म्म इदमेव परं तपः ।
इदमेव परं तीर्थं विष्णुपादाम्बु यत् पिबेत् ॥”
तत्रैव शिवोमासंवादे ।
“विलयं यान्ति पापानि पीते पादोदके हरेः ।
किं पुनर्विष्णुपादोदं शालग्रामशिलाप्लुतम् ॥
विशेषेण हरेत् पापं ब्रह्महत्यादिकं प्रिये ॥
पीते पादोदके विष्णोर्यदि प्राणैर्विमुच्यते ।
हत्वा यमभटान् सर्व्वान् वैष्णव लोकमाप्नुयात् ॥
तत्रैव शिवकार्त्तिकेयसंवादे शालग्रामशिला-
माहात्म्ये ।
“छिन्नस्तेन महासेन ! गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैश्च तीर्थैश्च पीत्वा पादोदकं शुचिः ॥
बृहन्नारदीये लुब्धकोपाख्यानारम्भे ।
हरिपादोदकं यस्तु क्षणमात्रञ्च धारयेत् ।
स स्नातः सर्व्वतीर्थेषु विष्णोः प्रियतरस्तथा ॥
अकालमृत्युशमनं सर्व्वव्याधिविनाशनम् ।
सर्व्वदुःखोपशमनं हरिपादोदकं शुभम् ॥”
तत्रैव तदुपाख्यानान्ते ।
“हरिपादोदकस्पर्शाल्लुब्धको वीतकल्मषः ।
दिव्यं विमानमारुह्य मुनिमेनमथाब्रवीत् ॥
हरिपादोदकं यस्मान्मयि त्वं क्षिप्तवान् मुने ।
प्रापितोऽस्मि त्वया तस्मात्तद्विष्णोः परमं पदम् ॥”
हरिभक्तिसुधोदये ।
“पादं पूर्व्वं किल सृष्टा गङ्गाभूत् सर्व्वमोचदा ।
विष्णोः सदस्तु तत्पर्श्व पादाम्बु कथमीर्य्यते ॥

तापत्रयानलो योऽसौ न शाम्येत् सकलाब्धिभिः ।
द्रुतं शाम्यति सोऽल्पेन श्रीमद्विष्णुपदाम्बुना ॥
अथाब्जाभिख्यकवचं भवाग्निस्तम्भनौषधम् ।
सर्व्वाङ्गैः सर्व्वथा धार्य्यं पाद्यं शुचिषदः सदा ॥
अमृतत्वावहं नित्यं विष्णुपादाम्बु यः पिबेत् ।
स पिबत्यमृतं नित्यं मासे मासे तु देवताः ॥
माहात्म्यमियदित्यस्य यो वक्ता सोऽपि निर्भयः ।
न त्वनर्घ्यमयोर्मूल्यं कलयन्नघमश्नुते ॥”
अन्यत्रापि ।
“स ब्रह्मचारी स व्रती आश्रमी च सदा शुचिः ।
विष्णुपादोदकं यस्य मुखे शिरसि विग्रहे ॥
जन्मप्रभृतिपापानां प्रायश्चित्तं यदीच्छति ।
शालग्रामशिलावारि पापहारि निषेव्यताम् ॥”
अतएव तत्रोद्दिष्टगापचराख्ये श्रीब्रह्मोक्तम् ।
“पीठप्रक्षालनादुदकं पृथगादाय पुत्रक ! ।
सिञ्चयेन्मूर्द्ध्नि भक्तानां सर्व्वतीर्थमयं हि तत् ॥”
इति ।
“पादोदकस्य माहात्म्यं विख्यातं सर्व्वशास्त्रतः ।
तत्किन्तु शक्नुयात् को हि सिन्धवोऽम्भ गणयन्नपि ॥
विशेषतश्च पादोदं तुलसीदलसंयुतम् ।
शङ्खे कृत्वा वैष्णवेभ्यो दत्त्वा प्राग्वत् पिबेत्स्वयम् ॥”
अथ शङ्खकृतपादोदकमाहात्म्यं स्कान्दे ब्रह्म-नारदसंवादे ।
“कृत्वा पादोदकं शङ्खे वैष्णवानां महात्मनाम् ।
यो दद्यात्तुलसीमिश्रं चान्द्रायणफलं लभेत् ॥
गृहीत्वा कृष्णपादाम्बु शङ्खे कृत्वा तु वैष्णवः ।
यो वहेत् शिरसा नित्यं स मुनिस्तापसोत्तमः ॥”
पाद्मे देवदूतविकुण्डलसंवादे ।
“शालग्रामशिलातोयं यदि शङ्खभृतं पिबेत् ।
हत्याकोटिविनाशं तु कुरुते नात्र संशयः ॥”
अगस्त्यसंहितायाञ्च ।
“शालग्रामशिलातोयं तुलसीदलवासितम् ।
ये पिबन्ति पुनस्तेषां स्तन्यपानं न विद्यते ॥
श्रीविष्णोर्वैष्णवानाञ्च पावनञ्चरणोदकम् ।
सर्व्वतीर्थमयं पीत्वा कुर्य्यादाचमनं न हि ॥”
तदुक्तं स्कान्दे श्रीशिवेन ।
“विष्णोः पादोदकं पीत्वा पश्चादशुचिशङ्कया ।
आचामति च यो मोहाद्ब्रह्महा स निगद्यते ॥”
श्रुतिश्च । “भगवान् पवित्रो भगवत्पादौ पवित्रौ पादोदकं पवित्रं न तत्पान आचमनीयं यथा हि सोम इति ।” सौपर्णे च ।
“विष्णुपादोदकं पीत्वा भक्तपादोदकं तथा ।
य आचामति संमोहात् ब्रह्महा स निगद्यते ॥”
इति श्रीहरिभक्तिविलासः ॥

पाद्यं, क्ली, (पादार्थमुदकम् । पाद + “पादार्घा-भ्याञ्च ।” ५ । ४ । २५ । इति यत् ।) पादाय वारि । पादप्रक्षालनार्थजलम् । इत्यमरः ॥ तत-लक्षणं यथा,—
“पादात्रेजनजलग्रहणं पात्रमद्भुतम् ।
लौहजं वा मृदोजातं हैमं राजतमेव वा ॥
ताम्रमश्मजमपि वा यावचेमं मतामिति ॥”
इति वैखानसग्रन्थः ॥
“षडङ्गुलं प्रविस्तारमुन्सेधश्चतुरङ्गुलम् ।
ओष्ठमेकाङ्गुलं कुर्य्यान्नासिकां चतुरङ्गुलाम् ॥
पृष्ठे पादसमायुक्तं चतुरङ्गुलमायतः ।
पाद्यपात्रमिति ख्यातं सर्व्वदेवप्रपूजने ॥”
इति सिद्धान्तशेखरः ॥

पानं, क्ली, (पा पाने + भावे ल्युट् ।) पीतिः । द्रवद्रव्यस्य गलाधःकरणम् । (यथा, हितोपदेशे ।
“पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ॥”)
भाजनम् । (पाल रक्षणे + भावे ल्युट् ।) रक्ष-णम् । इति मेदिनी ॥ (पीयते खगादिभि-र्यत्र । पा + अधिकरणे ल्युट् । कुल्या । इति हेमचन्द्रः । ४ । १५५ ॥ पीयते यदिति । कर्म्मणि ल्युट् । जलम् । इति व्युत्पत्तिलब्धोऽर्थः ॥ * ॥ पाति रक्षतीति । पा + ल्युः । रक्षाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ४ ।
“व्रतानि पानो अमृतस्य चारुणा
उभे तृपचा अनु पश्यते विशौ ॥”
पायनम् । अस्त्रशस्त्राणां तीक्ष्णाग्रतासम्पा-दनव्यापारभेदः । पान् इति भाषा ॥ यदुक्तं बृहत्संहितायाम् ।
“वडवोष्ट्रकरेणुदुग्धपानं
यदि पानेन समीहतेऽर्थसिद्धिम् ।
झषपित्तमृगाश्व वस्तदुग्धैः
करिहस्तच्छिदये सतालगर्भैः ॥
आर्कं पयोहुडुविषाणमसीसमेतं
पारावताखुशकृता च युतं प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥
क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत् ।
सम्यक् शितं चाश्मनि नैति भङ्गं
न चान्यलौहेष्वपि तस्य कौण्ठ्यम् ॥”
तथाच शुक्रनीत्याम् ।
“इदमौशनसञ्च शस्त्रपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम् ।
हविषा गुणवत् सुताभिलिप्सोः
सलिलेनाक्षयमिच्छतश्च वित्तम् ॥”)

पानः, पुं, (पीयते यस्मादिति । पा + अपादाने ल्युट् ।) शौण्डिकः । इति जटाधरः ॥ निःश्वासः । इति हेमचन्द्रः । ६ । ४ ॥

पानकं, क्ली, (पानाय कायतीति । कै + कः ।) पानद्रव्यविशेषः । तत्प्रकारो यथा, “यथोक्त-परिमितशर्कराजम्बूरसयुक्तोऽथवाम्लाम्लयुक्तः पक्वरसः । इति पाकराजेश्वरः ॥ (यथा, सुश्रुते । १ । ४६ ।
“पानीयं पानकं मद्यं मृन्मयेषु प्रदापयेत् ॥”
क्वचित् पुंस्यपि दृश्यते । यथा, तत्रैव । १ । ३६ ।
“एभिर्लेपान् कषायांश्च तैलं सर्पींषि पान-कान् ॥”
तत्राम्रफलपानकम् । यथा,—
“आम्रमामं जलस्विन्नं मर्द्दितं दृढपाणिना ।
सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् ॥
प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्म्मितम् ।
सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ॥
अपक्वाम्ररसोद्भूतपानकं वातनाशनम् ।
कफपित्तकरं किञ्चित् प्रत्यहं यदि सेवितम् ॥”
पक्वाम्रस्य तु ।
“सुपक्वमाम्रस्य फलं सुमुष्टिना
सम्मर्द्दितं शर्करया समन्वितम् ।
एलालवङ्गार्द्रकवासवासितं
वर्णान्वितं कस्य न रोचकं भवेत् ॥
पानकं चाम्रसम्भूतं स्वादम्लं गुरुपित्तजित् ।
सुहृद्यं श्लेष्मलहृद्यं वर्ण्यं वृष्यं रुचिप्रदम् ॥”
अम्लिकाफलपानकं यथा,—
“अम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृढम् ।
शर्करा मरिचोन्मिश्रं लवङ्गेन्दुसुवासितम् ॥
अम्लिकाफलसम्भूतं पानकं वातनाशनम् ।
पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधनम् ॥”
निम्बुफलपानकं यथा,—
“भागैकनिम्बुजं तोयं षड्भागं शर्करोदकम् ।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥
निम्बूफलभवं पानमत्यम्लं वातनाशनम् ।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥”
धान्याकपानकं यथा,—
“शिलायां साधुसम्पिष्टं धान्याकं वस्त्रगालितम् ।
शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम् ॥
नवीने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥
जम्बुवाः पानकं यथा,—
“जम्बूफलं स्थूलतरं सुपक्वं
सम्मर्द्दितं शर्करयाम्बुनालम् ।
सुवासितं वेल्लजभृङ्गपत्रै
रुचिं विधत्ते विरुचौ जनानाम् ॥
जम्बूफलभवं रुच्यं पानकं कफनाशनम् ।
कषायं वातकृत् स्तोकं स्वाद्वम्लं ग्राहकं परम् ॥”
वीजपूरपानकम् ।
“मातुलुङ्गरसे योज्यं त्रिगुणं शार्करं जलम् ।
कर्पूरमरिचोन्मिश्रं पानकं स्यादिदं वरम् ॥
मातुलुङ्गभवं पानं शूलानाहविनाशनम् ।
श्वासे कासेऽरुचौ वातविड्बन्धेषु च पूजितम् ॥”
हेमकिरणन्तु ।
“शर्करानारिकेलञ्च वीजपूररसप्लुतम् ।
पटपूतं भवेद्धेमकिरणं नामपानकम् ॥
पानकं हेमकिरणं रुच्यं हृद्यं बलप्रदम् ।
सुस्निग्धं वातकृच्छ्रघ्नं किञ्चित् कफकरं गुरु ॥”
करमर्द्दपानकं यथा,—
“लवङ्गार्द्रकसंयुक्तं सुपिष्टं वारिणा युतम् ।
करमर्द्दं करेमर्द्यं समभागसितान्वितम् ॥
वातच्छर्द्दिहरं भव्यं हृद्यमत्यम्लतरं स्मृतम् ।
रक्तपित्तकरञ्चोष्णमाकण्ठं कारमर्द्दितम् ॥”
नारङ्गपानकं यथा,—
“सुपक्वनारङ्गफलं निपीड़ितं
संयोजितं शर्करयाति शुभ्रया ।
सहार्द्रकं चेन्दुकणेन वासितं
पानेच्छया केन न संस्तुतं चणम् ॥

नारङ्गफलसम्भूतं पानकं वातनाशनम् ।
मधुरं विशदं रुच्यं सुस्निग्धं पित्तकृद्दृढम् ॥”
चारस्य तु ।
“चारद्रुमफलजं सशर्करं
मर्दितं शिशिरवारिणा दृढम् ।
ऐलमार्द्रकयुतेन सुवासं
भक्तसिक्थमिलितं लवङ्गासम् ॥
चारस्य फलजं पानं गुरु हृद्यं रुचिप्रदम् ।
कफपित्तहरं श्लेष्मं हृद्यं मधुरपाकि च ॥
परूषजीरपुत्रादिद्राक्षादाड़िमजं तथा ।
एकैकं सम्भवं भिन्नं पानकं क्रियते बुधैः ॥
एवमन्यस्य पुष्पस्य फलस्यान्यस्य वा तथा ।
शर्करामरिचोन्मिश्रं हृद्यं स्यात् पानकं वरम् ॥
सर्व्वं हि पानकं कार्य्यं सुधिया सुष्ठु यत्नतः ।
गुणा द्रव्यानुसारेण ज्ञातव्याः पानकेषु च ॥”
यथास्य गुणाः,—
“श्रमक्षुत्तृट्क्लमहरं पानकं प्रीणनं गुरु ।
विष्टम्भि मूत्रलं हृद्यं यथाद्रव्यगुणञ्च तत् ॥”
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
“गौड़मम्लमनम्लं वा पानकं गुरु मूत्रलम् ।
तदेव खण्डमृद्वीकाशर्करासहितं पुनः ॥
साम्लं सतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययम् ।
“प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खडान् यूषांश्च पेयांश्च सद्यो पार्श्वे प्रदापयेत् ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥”

पानगोष्ठिका, स्त्री, (पानस्य पानाय वा गोष्ठिका।) यत्र सम्भूय पीयते। मद्यपानचक्रम्। तत्पर्य्यायः। आपानम् २। इत्यमरः।२।१०।४३॥ चक्रानुष्ठानं यथा श्यामारहस्यधृतम्। चक्राकारेण पंक्त्याकारेण वा भिन्नभिन्नासने स्वशक्तियुक्तश्चेत् युग्मयुग्मक्रमेण पद्मासनेनोपविश्य सामयिकललाटे चन्दनं दत्त्वा शिवशक्तिबुद्ध्या पुष्पञ्च दद्यात्। ततो यदि गुरुस्तत्र तिष्ठति तदादौ गन्धादिना तं पूजयित्वा तत्पात्रे पुष्पं दत्त्वा शुद्धिसहितं तस्मै समर्प्य प्रणमेत्। गुरोरभावे तत्र पात्रं जले क्षिपेत्। ततः शक्तिपात्रं शुद्धिसहितं शक्त्यै दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात् परामृतं शुद्धिसहितं दद्यात्। ततः सामयिकोऽपि भक्त्या हस्तद्वयेन संगृह्य तदुपरि मूलमन्त्रमष्टधा जप्त्वा पूर्व्ववदानन्दभैरवं भैरवीञ्च सन्तर्प्य गुरून् देवताश्च सन्तर्पयेत्। स्वस्वकल्पोक्तविधिना भूतशुद्धिं कुर्य्यात्। ततश्चक्रनायकस्तैः सह पात्रवन्दनं कुर्य्यात्। यथा,

“श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं
क्षेत्राधीश्वरयोगिनीसुरगणैः सिद्धैः समाराधि-
तम् ।
आनन्दार्णवकं महात्मकमिदं साक्षात्त्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥”

इत्यभिमन्त्र्य वामहस्तेन पात्रमुत्तोल्य अन्योन्यवन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकेश्वराणामाज्ञां गृह्णीयात्। ते कुरुष्वेति ब्रूयुः। ततो मूलाधारात् कुण्डलिनीं इष्टदेवतास्वरूपां आजिह्वान्तां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्ताभ्यां पात्रं धृत्वा मूलमुच्चरन् कुण्डलिनीमुखे देवीं तर्पयेत्। एतदुक्तमुद्याकरपद्धत्याम्।

“कृत्वा मन्त्रतनुं स्मरेत् गुरुपदं देवीं बलां चिन्मयीं
पश्चात् वारचयं सदासवकृतं दीपैर्य्युतं कज्जलैः।
पुष्पादिष्वभिमन्त्रितञ्च निविड़ं सम्मोहकध्वंसकं
ये सञ्चिन्त्य पिबन्ति यान्ति खलु ते भुक्तिञ्च
मुक्तिं पराम् ॥”

तन्त्रान्तरे च ।
“सिन्दूरतिलकं भाले पाणौ च मदिरासवम् ।
कृत्वा पिबेद्गुरुं ध्यायंस्तथा देवीञ्च चिन्मयीम्॥”

ततः पात्रमाधारोपरि संस्थाप्य पुनस्तेन क्रमेण परामृतं गृहीत्वा पात्रवन्दनं कुर्य्यात्। यथा,—

“मद्यं मीनरसावहं यदि मया दत्तञ्च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजदृशा तस्यै समावेदितम् ।
वामे स्वात्मविशुद्धिशुद्धिकमलं पाणौ विधायात्मकं
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्द्धनम् ॥”

ततः पूर्व्ववत् पात्रं स्वीकृत्य अन्यत् पात्रवन्दनं कुर्य्यात्। यथा,—

“सर्व्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम् ।
ध्यातं देवगणैः परं मुनिगणैर्म्मोक्षार्थिभिः
सर्व्वदा
वन्दे पात्रमहं तृतीयमधुना चात्मावबोधक्षमम्॥”

तृतीयपात्राभिवन्दनं कृत्वान्यत् पात्रवन्दनं कुर्य्यात्। यथा,—

“हैमं मीनरसावहं हरिहरब्रह्मादिभिः सेवितं
मुद्रामैथुनधर्म्मकर्म्मनिरतं चाराम्बुजतत्त्वाश्र-
यम् ।
आचार्य्याष्टकसिद्धिभैरवकलामासेन संशोधितं
पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः॥”

इति चतुर्थपात्रवन्दनं कृत्वान्यत्पात्रवन्दनं कुर्य्यात्। यथा,—

“आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्-
दन्तिनः ।
सोऽहञ्चैव विभावयन् प्रतिदिनं तारागणै रचितो
ऽप्यादित्यप्रमुखैः सुरासुरगणैराशाकरैः
किङ्करैः ॥”

इति पञ्चमपात्रं स्वीकुर्य्यात्। ततो यावद्दृष्ट्यादिकं न चलति तावत् पानादिकं कार्य्यम्। अथास्य प्रमाणं यथा रुद्रयामले ।

“साधकेभ्यश्च शक्तिभ्यो दद्यान्निर्म्माल्यचन्दनम् ।
सामयिकैः समं कुर्य्याद्देवि । पानादिभक्षणम् ॥”

अन्यत्रापि ।
“निविष्टश्चक्ररूपेण पंक्त्याकारेण वा यथा ।
शक्तियुक्तो वसेद्वापि युग्मयुग्मविधानतः ।
शिवशक्तिधिया सर्व्वं चक्रमध्ये समर्पयेत् ॥”

तन्त्रान्तरे च ।
“ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत् ।
गुरवे च निवेद्याथ शक्त्यै दत्त्वा स्वयं हरेत् ॥”
भावचूड़ामणौ च ।
“साक्षाद्यदि गुरुर्न स्यात्तदा तोये विसर्ज्जयेत्॥”
एतत् सर्व्वं कलीतरपरम् ।
“दिव्यवीरमयो भावः कलौ नास्ति कदाचन ॥”
इति कालीविलासवचनात् ॥

पानपात्रं, क्ली, (पानस्य पेयमद्यादेः पात्रम् ।) मद्यपानपात्रम् । मद्यपानस्य भाजनम् । तत्पर्य्यायः । चषकः २ सरकः ३ अनुतर्षणम् ४ । इत्यमरः ॥ पूर्व्वद्वयं मद्यपानपात्रे शेषद्वयं मद्यपरिवेशनपात्रे । इति भरतः ॥ चषकम् ५ अनुतर्षः ६ पारी ७ पारीकम् ८ । इति शब्दरत्नावली ॥ * ॥ (यथा, मार्कण्डेये ।८२।२१ ।
“ददावशून्यं सुरया पानपात्रं धनाधिपः ॥”)
अथ पानपात्रपरिमाणादि यथा कुलसारे ।
“नयनाग्निबाणसंख्यकर्षैस्तु परमेश्वरि । ।
पात्रं प्रकर्त्तव्यमित्युक्तं कुलसाधने ॥
इतोऽप्यधिकपात्रन्तु न कर्त्तव्यञ्च साधकैः ॥”
कर्षं तौलिकतोलकमित्यर्थः । तदुक्तं कुलोड्डीशे ।
“गुञ्जादादश माषः स्यात्तदष्टौ कर्ष उच्यते ॥’
अर्थोत्तरतन्त्रे ।
“अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् ।
कुरुष्वेत्यभ्यनुज्ञातो गुरुणा वा कुलीनकैः ॥
गृह्णीयाच्च स्वयं सिद्धो बद्धपद्मासनः सुधीः ॥”
कुलार्णवे ।
“एकासने निविष्टा ये भुञ्जीरंश्चैव भाजने ।
एकपात्रे पिबेद्द्रव्यं ते यान्ति नरकाधमे ॥”
एकपात्रमिति सर्व्वैर्म्मिलित्वा नैकपात्रे पिबेत् ।
न तु प्रतिवारं द्रव्यपाने भिन्नभिन्नपात्रं कार्य्यं
अननुष्ठानलक्षणापत्तेः सम्प्रदायविरोधाच्च ॥

पानवणिक्, [ज्] पुं, (पानाय पेयसुरादेर्विक्रयार्थं वणिक् पानस्य वणिक् वा ।) शौण्डिकः । इति हेमचन्द्रः ॥

पानभाजनं, क्ली, (पानाय पानस्य वा भाजनपात्रम् ।) पानपात्रम् । तत्पर्य्यायः । कंसः २ । इत्यमरः । २ । ६ । ३२ ॥ “काम्यतेऽसौ कंसः कमुकङ्कुशिहि नाम्नीति सः दन्त्यान्तः । स्वार्थे ण्यः कांस्यञ्च । स्वर्णरजतादिनिर्म्मिते पात्रमात्रेऽपि कंसः । ‘कंसः स्यात् तैजसे द्रव्ये पानपात्रेऽपि कांस्यवत् ।’ इति शाश्वतः ॥
‘पात्रान्तरे पानपात्रे कांस्यं कंसे च तैजसे ।
इति रभसः ॥
पीयते पानं मद्यादि तस्य भाजनं पानभाजनम् ।” इति भरतः ॥

पानसं, क्ली, (पनसस्य इदं पनसफले भव तत्फलस्य विकार इति वा अण् ।) पनसभवमद्यम् । इति जटाधरः ॥ पनससम्बन्धिनि, त्रि ॥

पानात्ययः, पु, (पानाद्धेतोः जातो योऽत्ययः रोगविशेषः ।) मदात्ययरोगः । इति राजनिर्घण्टः ॥

पानिलं, क्ली, (पानमाधारत्वेनास्त्यत्र इति इलच् ।) पानपात्रम् । इति शब्दचन्द्रिका ॥

पानीयं, क्ली, (पीयते इति । पा + अनीयर् ।) जलम् । इत्यमरः । १ । १० । ४ ॥ पातव्ये त्रि-

नीये च त्रि ॥ पानार्हद्रव्यविशेषः । पाना इति वङ्गभाषा । शरवत् इति पारस्यभाषा । तत्र अम्लिकापानीयं पित्तवमिनाशकम् । मिष्टदाडिमीपानीयं प्रतिश्यायकाशनाशकम् । अम्लदाडिमीपानीयं उदरविकारं धारकं क्षुधावृद्धिकारकञ्च । निम्बपानीयं छर्द्दिश्वासपित्तज्वरनिवारकं सकलाहारपाचकञ्च । नागरङ्गपानीयं कासपित्तविनाशकं अन्तःकरणप्रशस्य जनकञ्च । सेवचन्दनपानीयं बलकारकं उन्माद मूर्च्छारोगशान्तिकारकं रतिशक्तिवर्द्धकं उदरविकारापकारकञ्च । इति पाकराजेश्वरः ॥ (अन्यत् पानकशब्दे द्रष्टव्यम् ॥ * ॥) जलदानविधिर्यथा,—

यम उवाच ।

“दानन्ते कथितं विप्र । मम लोके तु दुर्लभम् ।
पानीयं सन्ततन्तस्माद्दानश्चं सुखमिच्छता ॥
अनोऽर्द्ध कारयेत कूपं वापीं वा बहुपल्वलम् ।
बहुलोकाकुले देशे सर्व्वसत्त्वोपजीवितम् ॥”

इत्यग्निपुराणम् ॥

तद्दानानन्तरं पाठ्यमन्त्रो यथा —

“पानीयं प्राणिनः प्राणाः पानीयं पावनं महत् ।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥”

इति स्मृतिः ॥

तत्पर्य्यायः ।

“पानीयजीवनवनामृतपुष्कराम्भः-
पाथोऽम्बुशम्बरपयःसलिलोदकानि ।
आपः कवारघनकन्धजलानि नीरं
कीलालवारिकमलानि विषार्णसी च ॥
भुवनं दहनारातिर्वाक्तोयं सर्व्वतोमुखम् ।
क्षीरं घनरसं निम्नगं मेघप्रसवो रसः ॥”

अस्य साधारणगुणाः ।

“पानीयं मधुरं हिमञ्च रुचिदं तृष्णाविशोषापहं
मोहभ्रान्तिमपाकरोति कुरुते भुक्तान्नपक्तिं
पराम् ।
निद्रालस्यनिरासनं विषहरं श्रान्तातिसन्तर्पणं
नृणां धीबलवीर्य्यवृद्धिजननं नष्टाङ्गपुष्टिप्रदम् ॥”
सद्यो दृष्टाम्बु भूमिस्थं कलुषं दोषदायकम् ।
चिरस्थितं लघु स्वच्छं पथ्यं स्वादु सुखावहम् ॥”
देशभूमिविशेषजलगुणाः ।
“जातं ताम्रम्हदस्तदेव सलिलं वातादिदोषप्रदं
देशाच्चाश्मकरञ्च दुर्जरतरं दोषावहं धूसरात् ।
वातघ्नञ्च शिलाशिरोत्थममलं पथ्यं लघु स्वादुकं
श्रेष्ठं श्यामम्हदस्त्रिदोषशमनं सर्व्वामयघ्नं
जलम् ॥”

इति राजनिर्घण्टः ॥

“पिच्छिलं क्रमिलं क्लिन्नं पर्णशैवालकर्द्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धि न हितं जलम् ॥
चन्द्रार्ककरसंजुष्टं वायुना स्फालितं मुहुः ।
पर्व्वतोपरि यद्वारि समं पौरन्दरेण तत् ॥
तस्यानुगुणसुहिष्टं शैलप्रस्रवणोद्भवम् ।
कथनं दीपनं हृद्यं किञ्चिद्वातप्रकोपणम् ॥”

इति राजवल्लभः ॥

पानीयनकुलः, पुं, (पानीये जले नकुल इव ।) उद्रः । उद्बिडाल इति भाषा । यथा,—
“उद्रस्तु जलमार्जारः पानीयनकुलो वसी ॥”

इति हेमचन्द्रः ॥

पानीयपृष्ठजः, पुं, (पानीयपृष्ठे जलोपरि जायते इति । जन + डः ।) कुम्भी । इति रत्नमाला ॥ पाना इति भाषा ॥

पानीयफलं, क्ली, (पानीयजातं फलमिति मध्यपदलोपी समासः ।) मखान्नम् । इति भावप्रकाशः ॥ माखाना इति भाषा ।

पानीयमूलकं, क्ली, (पानीयमेव मूलमस्य । ततः कप ।) सोमराजी । इति शब्दचन्द्रिका ॥

पानीयवर्णिका, स्त्री, (पानीयं वर्णयति प्रकाशयतीति । वर्णि + ण्वुल् । टाप् अत इत्वञ्च ।) वालुका । इति राजनिर्घण्टः ॥

पानीयशालिका, स्त्री, (पानीयस्य जलस्य वितरणार्थं शालिका शालागृहमित्यर्थः ।) जलावस्थानगृहम् । पानिशाला इति जलछत्र इति च भाषा । तत्पर्य्यायः । प्रपा २ । इत्यमरः ॥ तत्कर्तृफलं यथा, —
“कूपारामप्रपाकारी तथा वृक्षादिरोपकः ।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम् ॥”

इत्युदाहृतत्त्वे यमः ॥

पानीयामलकं, क्ली, (पानीयमामलकं पानीयाख्यं आमलकं वा ।) प्राचीनामलकम् । पानि आमला इति भाषा । अस्य गुणाः । दोषत्रयज्वरनाशित्वम् । इति भावप्रकाशः ॥ सुखशुद्धिमलबद्धकारित्वम् । अम्लत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥

पानीयालुः, पु, (पानीयसम्भूत आलुः ।) कन्दविशेषः । पनियालु इति हिन्दीभाषा । तत्पर्य्यायः । जलालुः २ क्षुपालुः ३ वालुकः ४ । अस्य गुणः । त्रिदोषनाशित्वम् । सन्तर्पणकारित्वञ्च । इति राजनिर्घण्टः ॥

पानीयाश्ना, स्त्री, (पानीयं जलं अश्नातीति । अश ग भोजने + बाहुलकात् नः ततष्टाप ।) वल्वजा । इति राजनिर्घण्टः ॥

पान्थः, त्रि, (पथि कुशलः पन्थानं नित्यं गच्छतीति वा । “पथो ण नित्यम् ।” ५ । १ । ७६ । पथः पन्थ च इत्यनेन पन्थादेशे कृते णः । पथिकः । इत्यमरः । २ । ८ । १७ ॥ (यथा, हरिवंशे । ४२ । २ ।
“यथा निदाघसमये सूर्य्यांशुपरिपीडितः ।
पान्थो याति जलं दृष्ट्वा त्वरितं तत्पिपा-
सया ॥”)

पापं, क्ली, (पाति रक्षति अस्मादात्मानमिति । पा + “पानीविषिभ्यः पः ।” उणां । ३ ।२३ । इति प. ।) अधर्म्मम् । दुरदृष्टम् । तत्पर्य्यायः । पङ्कम् १ पाप्मा २ पापम् ३ किल्बिषम् ४ कल्मषम् ५ कलुषम् ६ वृजिनम् ७ एनः ८ अघम् ९ अंहः १० दुरितम् ११ दुष्कृतम् १२ । इत्यमरः ॥ पातकम् १३ तूस्तम् १४ कल्कम् १५ शल्यम् १६ पापकम् १७ । इति शब्दरत्नावली ॥ (निषिद्धकर्म्मानुष्ठानविहितकर्म्माननुष्ठानाभ्यां पापोत्पत्तिं सविशेषमाह श्रीसदाशिवः ।
“अनुष्ठानं निषिद्धस्य त्यागो विहितकर्म्मणः ।
कृणां जनयतः पापं क्लेशशोकामयप्रदम् ॥
स्वानिष्टमात्रजननात् परानिष्टोपपादनात् ।
तदेव पापं द्विविधं जानीहि कुलनायिके । ॥
परानिष्टकरात् पापात् मुच्यते राजशासनात् ।
अन्यस्मान्मुच्यते मर्त्त्यः प्रायश्चित्तसमाधिना ॥
प्रायश्चित्तमथवा दण्डैर्न पूता ये कृतांहसः ।
नरकान् न निवर्त्तन्ते इहामुत्र विगर्हिताः ॥”

इति श्रीमहानिर्व्वाणतन्त्रे ॥)

तद्दशविधं यथा,—
“प्राणाभिपातनं स्तैन्यं परदारमथापि च ।
त्रीणि पापानि कायेन सर्व्वतः परिवर्ज्जयेत् ॥
असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा ।
चत्वारि वाचा राजेन्द्र । न जल्पेन्न चिन्तयेत् ॥
अनभिध्या परस्वेषु सर्व्वसत्त्वेषु सौहृदम् ।
कर्म्मणां फलमस्तीति त्रिविधं मनसा चरेत् ॥”

इति शान्तिपर्व्वणि दानधर्म्मः ॥

स्मृत्युक्तान्येतानि पातकशब्दे लिखितानि ॥ * ॥
पापस्य पुरुषत्रयानुवर्त्तित्वं यथा,—
“नाधर्म्मश्चरितो राजन् । सद्यः फलति गौरिव ।
शनैरावर्त्तमानस्तु मूलान्यपि निकृन्तति ॥
यदि नात्मनि मित्रेषु न चेत् पुत्रेषु नप्तृषु ।
पापमाचरितं कर्म्म त्रिवर्गमनुवर्त्तते ॥
फलत्येव ध्रुवं पापं गुरुभुक्तमिवोदरे ॥”

इति मात्स्ये ३८ अध्यायः ॥ * ॥

तीर्थस्य पापनाशकत्वं तत्र कृतपापस्य वज्रलेपत्वञ्च । यथा,—
“अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति ।
तीर्थे तु यत् कृतं पापं वज्रलेपो भविष्यति ॥
मथुरायां कृतं पापं तत्रैव च विनश्यति ।
एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥”

इति वाराहे मथुरामाहात्म्यम् ॥ * ॥

शेषपापलक्षणं यथा,—
“अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम् ।
कर्णं देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितृणाञ्च द्विजश्रेष्ठ । सर्व्ववर्णेषु चैकतः ।
ॐकारादिनिवृत्तिश्च पापकार्य्यकृतिश्च या ॥
हत्यादिकं महापापं त्वगम्यागमनं तथा ।
घृतादिविक्रयं घोरं चाण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम् ।
ईर्षाविष्टं वाक्यदुष्टं निष्ठुरत्वं षडम्बरम् ॥
ढाकित्वं तालवादित्वं नाम्ना वाचाप्यधर्म्मिणः ।
मारणत्वमधार्म्मिक्यं नरकावहमुच्यते ॥
एतैः पापैस्तु संयुक्तः पच्यते यदि शङ्करः ॥”

इति वामने ५८ अध्यायः ॥

साङ्कर्य्यनामकपापानि यथा,—
“एकशय्याशनं पंक्तिभाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापने योनिस्तथैव सहभोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।

एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
"आलापाद्गात्रसंस्पर्शात् संवासात् सहभोजनात् ।
आसनाच्छयनाद्यानात् पापं संक्रमते नृणाम् ॥
आसनादेकशय्याया भोजनात् पंक्तिसङ्करात् ।
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥"
इति गारुडे नीतिसारे ११२ अध्यायः ॥
राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा,—
"राजा राष्ट्रकृतात् पापात् पापी भवति कैहरे ।
तथैव राज्ञः पापेन तद्राष्ट्रस्थास्तु ये जनाः ॥
वर्णाश्रमादयः सर्व्वे पापिनो नात्र संशयः ।
भार्य्याद्दोदुष्कृती स्वामी तज्जिनात् स्वामिनोऽबला ॥
तथा देशिकपापात्तु शिष्यः स्यात् पातकी सदा ।
शिष्याद्धि पापिनो नित्यं गुरुर्भवति दुष्कृती ॥
पातकी यजमानः स्यात् पापिनोऽङ्ग । पुरोधसः ।
पुरोहितस्तथा पापी यजमानाद्दृसो ध्रुवम् ॥"
अदत्तपुण्यपापभागित्वं यथा,—
"अदत्तानि च पुण्यानि पापानि च यथा प्रिये ।।
प्राप्याणि कर्म्मणा येन तद्यथावन्निशामय ॥
देशग्रामकुलानि स्युर्भागभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्त्ता फलभुक् पुण्यपापयोः ॥
अकृतेऽपि च संसर्गे व्यवस्थेयमुदाहृता ।
संसर्गात् पुण्यपापानि यथा यान्ति निबोध तत् ॥
एकत्र मैथुनाद्यानादेकपात्रस्थभोजनात् ।
फलार्द्धं प्राप्नुयान्मर्त्त्यो यथावत पुण्यपापयोः ॥
स्पर्शनाद्भाषणाद्वापि परस्य स्तवनादपि ।
दशांशं पुण्यपापानां नित्यं प्राप्नोति मानवः ॥
दर्शनश्रवणाभ्याञ्च मनोध्यानात्तथैव च ।
परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥
परस्य निन्दापैशुन्यं धिक्कारञ्च करोति यः ।
तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥
कुर्व्वतः पुण्यकर्म्माणि सेवां यः कुरुते परः ।
पत्नी भृत्योऽथ शिष्यो वा सजातीयोऽपि मानवः ।
तस्य सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥
एकपंक्तिस्तितो यस्तु लङ्घयन् परिवेशयेत् ।
तस्य पापशतांशन्तु लभते परिवेशकः ॥
स्नानसन्ध्यादिकं कुर्व्वन् संस्पृष्टा प्रभाषते ।
स पुण्यकर्म्मषष्ठांशं दद्यात्तस्मै सुनिश्चितम् ॥
धर्म्मोद्देशेन यो द्रव्यं परं याचयते नरः ।
तत् पुण्यं कर्म्मजं तस्य धनं दत्त्वाप्नुयात् फलम् ॥
अपहृत्य परद्रव्यं पुण्यकर्म्म करोति यः ।
कर्म्मकृत् पापभोक्ता च धनिनस्तद्भवेत् फलम् ॥
नापहृत्य ऋणं यस्तु परस्य म्रियते नरः ।
धनी तत् पुण्यमाप्नोति स्वधनस्यानुरूपतः ॥
बुद्धिदश्चानुमन्ता च यश्चोपकरणप्रदः ।
बलदश्चापि षष्ठांशं प्राप्नुयात् पुण्यपापयोः ॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ।
शिष्याद्गुरुः स्त्रिया भर्त्ता पिता पुत्त्रात्तथैव च ।
स्वपतेरपि पुण्यस्य भार्य्यार्द्धं समवाप्नुयात् ॥
परहस्तेन दानादि कुर्व्वतः पुण्यकर्म्मणः ।
विना भृतकशिष्याभ्यां कर्त्ता षष्ठांशमाहरेत् ।
आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥
श्रीकृष्ण उवाच ।
इत्थं ह्यदत्तान्यपि पुण्यपापा-
न्यायान्ति नित्यं परसञ्चितानि ।
श्रुत्वा च चाख्यानमिदं समग्रं
पुराभवं पुण्यमतिप्रियञ्च ॥"
इति पाद्मोत्तरखण्डे । ७२।१५७ अध्यायः ॥
क्षुद्रजन्तुप्रभृतीनां वधे पापं तत्प्रायश्चित्तञ्च यथा,—
"वधे च क्षुद्रजन्तूनां हिंसकानाञ्च पक्षिनः ।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते ॥
अहिंसकानां क्षुद्राणां वधे शतगुणं ध्रुवम् ।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना ॥
वधे विशिष्टजन्तूनां पश्वादीनाञ्च कामतः ।
ततः शतगुणं पापं निश्चितं मनुरब्रवीत् ॥
नराणां म्लेच्छजातीनां वधे शतगुणं ततः ॥
म्लेच्छानाञ्च शतानाञ्च यत् पापं लभते वधे ।
सच्छूद्रैकस्य च वधे तत् पापं लभते पुमान् ॥
सच्छूद्राणां शतानाञ्च यत् पापं लभते वधे ।
तत् पापं लभते नूनं गोवधेनैव निश्चितम् ॥
गवां दशगुणं पापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥" * ॥
पापिदर्शनजन्यपापं यथा,—
"पापं यद्दर्शने तात । कथयामि निशामय ।
दुःस्वप्नं पापबीजञ्च केवलं विघ्नकारणम् ॥
गोघ्नञ्च ब्रह्मघ्नं वापि कृतघ्नं कुटिलं तथा ।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥
मिथ्यासाक्ष्यप्रदातारं पश्चातिथ्यविवञ्चकम् ।
ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥
अश्वत्थघातिनं दुष्टं शिवविष्णुविनिन्दकम् ।
अदीक्षितमनाचारं सन्ध्याहीनं द्विजन्तथा ॥
देवलं वृषवाहञ्च शूद्राणां सूपकारकम् ।
शववाही च शूद्राणां शूद्रश्राद्धान्नभोजिनम् ॥
अवीरां छिन्ननासाञ्च देवब्राह्मणनिन्दकम् ।
पतिभक्तिविहीनाञ्च विष्णुभक्तिविहीनकम् ॥
शूद्राणां विधवाञ्चैव चण्डालं व्यभिचारिणीम् ।
शश्वत् कोपयुतं दुष्टन्त्वाग्रस्तञ्च जारजम् ॥
चौरं मिथ्यावादिनञ्च शरणागतघातिनम् ।
मांसापहारिणञ्चैव ब्राह्मणं वृषलीपतिम् ॥
ब्राह्मणीगामिनं शूद्रं द्विजं वार्द्धुषिकन्तथा ।
अगम्यागामिनं दुष्टं चतुर्व्वर्णं नराधमम् ॥
मातासपत्नी माता च श्वश्रूश्च भगिनी सुता ।
गुरुपत्नी पुत्त्रपत्नी सोदरस्य प्रिया सती ॥
मातृष्वसा पितृष्वसा भागिनेयप्रिया तथा ।
मातुलानी नवोढ़ा च पितृव्यस्त्री रजस्वला ॥
पितृमातृप्रसूश्चैव चागम्याष्टादश स्मृताः ।
कीर्त्तिताः सामवेदे च परिपाल्याः सतां व्रज ! ॥
एतान् दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां लभेन्नरः ।
तस्माद्दैवादिमान् दृष्ट्वा सूर्य्यं दृष्ट्वा हरिं स्मरेत् ॥
कामतो यदि पश्यन्ति तत्तुल्यास्ते भवन्ति वै ।
तस्मात् सन्तो न पश्यन्ति पापभीता व्रजेश्वर । ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७।७८ अध्यायः ॥
(अनिष्टम् । वधः । इति राजागुरुः ॥ यथा, रामायणे । २ । ८ । ३२ ।
"तस्मात् न लक्ष्मणो रामः पापं किञ्चित् करिष्यति ।
रामस्तु भरते पापं कुर्य्यादेव न संशयः ॥"
तद्वति, त्रि । इत्यमरः ॥ यथा, महाभारते । १ । ६० । १६ ।
"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव । ॥")

पापकं, क्ली, (पापमेव । स्वार्थे कन् ।) पापम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ७४ । २७ ।
"मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥"
पापेन कायतीति । कै + कः । पापवति, त्रि । यथा, महाभारते । १ । ७४ । २६ ।
"एकोऽहमस्मीति च मन्यसे त्वं
न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्म्मणः पापकस्य
यस्यान्तिके त्वं वृजिनं करोषि ॥")

पापकृत्, त्रि, (पापं कृतवानिति । पाप + कृ + "सुकर्म्मपापमन्त्रपुण्येषु कृञः ।" ३ । २ । ८९ । इति क्विप् ।) पापकर्त्ता । यथा,—
"ख्यापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापाद्दानेन च दमेन च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा च महाभारते । १ । ६० । १६ ।
"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ॥")

पापग्रहः, पुं, (पापोऽशुभकारी ग्रहः ।) अर्क्कीनचन्द्रः । कुजः । राहुः । शनिः । एतैर्युक्तो बुधः । रविः । यथा, ज्योतिःसारसंग्रहे ।
"अर्क्कोनेन्दुः कुजो राहुः शनिस्तैर्युत इन्दुजः ।
रविः पापा भवन्त्येते शुभास्त्वन्ये प्रकीर्त्तिताः ॥"

पापघ्नः, पुं, (पापं हन्तीति । पाप + हन + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) तिलः । इति राजनिर्घण्टः ॥ पापनाशके, त्रि इति मुग्धबोधव्याकरणम् ॥

पापचेलिका, स्त्री, (पापमशुभं चेलति गच्छतीति । चेल + ण्वुल् + टाप् । कापि अत इत्वञ्च ।) पाठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

पापचेली, स्त्री, (पापं चेलतीति । चेल + अच + गौरादित्वात् ङीष् ।) पाठा । इत्यमरः । २।४।८५ ॥

पापनापितः, पुं, (पापो नापितः ।) धूर्त्तनापितः इति संक्षिप्तसारव्याकरणम् ॥

पापपतिः पुं, (पापोत्पादकः पतिः ।) उपपतिः ।
इति त्रिकाण्डशेषः ॥

पापपुरुषः पु, (पापः पापमयः पुरुषः ।) पापमयाङ्गनरः । यथा,—
"वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गि पदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ।
खड्गचर्म्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत् ॥"
इति भूतशुद्धिप्रकरणे तन्त्रसारः ॥ * ॥
"सृष्ट्यादौ पुरुषश्रेष्ठः संसारं सचराचरम् ।
सर्व्वेषां दमनार्थाय सृष्टवान् पापपुरुषम् ॥
द्विजातिहत्यामूर्द्धानं मदिरापानलोचनम् ।
सुवर्णस्तेयवदनं गुरुतल्पगतिश्रुतिम् ॥
स्त्रीहत्यानासिकञ्चैव गोहत्यादोर्बाहुकम् ।
न्यासापहरणग्रीव भ्रूणहत्यागलन्तथा ॥
परस्त्रीगतिवृक्षालं सुहृल्लोकवधोदरम् ।
शरणापन्नहत्यादिनाभिं गर्व्वकथाकटिम् ॥
गुरुनिन्दासक्थिभागं कन्याविक्रयशेफसम् ।
विश्वासवाक्यकथनपायुं पितृवधाङ्घ्रिकम् ॥
उपपातकरोमाणं महाकायं भयङ्करम् ।
कृष्णवर्णं पिङ्गनेत्रं स्वाश्रयात्यन्तदुःखदम् ॥"
इति पाद्मे क्रियायोगसारे २१ अध्यायः ॥

पापमुक्तः, त्रि, पापान्मुक्तः । निष्पापः । इति संक्षिप्तसारव्याकरणम् ॥ स च यथा,—
"यः समः सर्व्वभूतेषु जितात्मा शान्तमानसः ।
स पापेभ्यो विमुच्येत ज्ञानवान् स च वेदवित् ॥
गुणागुणपरिज्ञाता ह्यनयस्य नयस्य च ।
ध्यानेनैव ह्यसंमूढः स पापेभ्यः प्रमुच्यते ॥
स्वदेहे परदेहे च समदुःखेन नित्यशः ।
विचारज्ञो भवेद्यस्तु स मुच्येतैनसो ध्रुवम् ॥
अहिंसः सर्व्वभूतेषु तृष्णाक्रोधविवर्ज्जितः ।
शुभन्यासः सदा यश्च स पापेभ्यः प्रमुच्यते ॥
प्राणायामैश्च निरुद्ध्य अधःसन्धारणानि च ।
यवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते ॥
निराशीः सर्व्वतस्त्विष्टेष्विन्द्रियार्थेषु न लोलुपः ।
परीतात्मा त्यजन् प्राणान् सर्व्वपापात् प्रमुच्यते ॥
श्रद्दधानो जितक्रोधः परद्रव्यविवर्ज्जितः ।
अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते ॥
गुरुशुश्रूषया युक्तो ह्यहिंसानिरतश्च यः ।
नृदश्च नृदर्शीलश्च स पापेभ्यः प्रमुच्यते ॥
प्रशस्तानि च यः कुर्य्यादप्रशस्तानि वर्ज्जयेत् ।
योऽभिगच्छति तीर्थानि विशुद्धेनान्तरात्मना ।
पापादुपरतो नित्यं स पापेभ्यः प्रमुच्यते ॥
उत्थाय ब्राह्मणं गच्छेन्नरो भक्त्या समन्वितः ।
अभिगम्य प्रयत्नेन स पापेभ्यः प्रमुच्यते ॥"
इति वराहपुराणम् ॥

पापरोगः, पु, (पापोद्भवो रोगः ।) मसूरीरोगः । इति शब्दरत्नावली ॥ (यथा मनुः ।५।१६४।
"व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥"
यत्पापजन्यो यद्रोगो भवति तत् सर्व्वं कर्म्मविपाकशब्दे द्रष्टव्यम् ॥)

पापर्द्धिः, स्त्री, (पापानां ऋद्धिः वृद्धिर्यत्र ।) मृगया । इति हेमचन्द्रः । ३ । ५९१ ॥ (यथा, पञ्चतन्त्रे । २ । ७८ ।
"अस्ति कस्मिंश्चिद्वनोद्देशे कश्चित् पुलिन्दः ।
स च पापर्द्धिं कर्त्तुं वनं प्रस्थितः ॥")

पापलं, क्ली, परिमाणविशेषः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पापं लातीति । ला + कः ।) पापग्राहके, त्रि ॥

पापशमनी, स्त्री, (पापं शम्यतेऽनयेति । शम + णिच् + करणे ल्युट् । स्त्रियां ङीप् ।) शमी वृक्षः । इति राजनिर्घण्टः ॥ पातकनाशिका च ॥

पापात्मा, [न्] पु, (पापः पापविशिष्ट आत्मा यस्य । पापे अधर्म्मे आत्मा बुद्धिर्यस्येति वा ।) पापी । यथा,—
"पापात्मनां शृणु गतिं विस्तरेण वदाम्यहम् ।
षडशीतिसहस्राणि योजनानि दुरात्मनाम् ॥
प्रोक्तो मार्गस्य विस्तारः सर्व्वदुःखान्वितस्य च ।
क्वचित्क्वचित् ज्वलद्वह्निः सन्तप्तः कर्द्दमः क्वचित् ।
क्वचित् क्वचित् द्विजश्रेष्ठ । सन्तप्तं ताम्रबालुकम् ॥
क्वचित् क्वचित्तीक्ष्णशिलाः क्वचित्तप्तशिलास्तथा ॥
क्वचित् क्वचिच्छस्त्रवृष्टिः क्वचिदङ्गारवर्षणम् ।
कुत्रचिद्वह्निवृष्टिश्च कुत्रचित् पङ्कवर्षणम् ॥
उष्णाम्बुवर्षणं क्वापि क्वचित् पाषाणवर्षणम् ।
ज्वलदग्निरिव क्वापि सन्तप्तो वाति मारुतः ॥
गभीरा अन्धकूपाश्च तृणावृतमुखा द्विज ।
क्वापि कण्टकवृक्षाश्च नाराचसमकण्टकाः ॥
पाषाणश्रेणयः क्वापि दुरारोहाः सपन्नगाः ।
क्वचिद्गाढान्धकाराश्च क्वचित् शोणितकन्दराः ॥
क्वचिद्दीरणवृक्षाश्च क्वचित् काष्ठाः क्वचिच्छराः ।
क्वचित् क्वचित् शर्कराश्च लोष्टवश्च क्वचित् क्वचित् ॥
क्वचिदस्थ्नां राशयश्च दुर्गन्धा मांसराशयः ।
क्वचित् कण्टकराशिश्च शैवालानि क्वचित् क्वचित् ॥
कीलका वलयः क्वापि क्वचिद्व्याघ्रास्तथा शिवाः ।
खड्गिनः करिणः क्वापि क्वचिद्धस्ता भयङ्कराः ॥
एवं बहुविधक्लेशे छायाजलविवर्ज्जिते ।
तस्मिन्मार्गे द्विजश्रेष्ठ । पापिनो यान्ति दुःखिताः ॥
नग्ना विमुक्तकेशाश्च प्रेताकारभयङ्कराः ।
गच्छन्ति पापिनस्तत्र शुष्ककण्ठोष्ठतालुकाः ॥"
इति क्रियायोगसारे २२ अध्यायः ॥

पापान्तं, क्ली, (पापं अन्तयतीति । अन्त + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) तीर्थविशेषः । तस्य नामान्तरम् पृथूदकं अनुकीर्णञ्च । यथा,—
"पृथूदके महातीर्थे त्वनुकीर्णेति नामतः ।
जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतस्ततः ॥
कृष्यमाणे तदा राष्ट्रे प्रवृत्ते यज्ञकर्म्मणि ।
अक्षीयत ततो राष्ट्रं नृपतेर्दुष्कृतेन वै ॥
ततः स चिन्तयामास ब्राह्मणस्य विचेष्टितम् ।
पुरोहितेन संयुक्तो रत्नान्यादाय सर्व्वशः ॥
प्रसादनार्थं विप्रस्य अनुकीर्णं ययौ तदा ।
प्रसादितः स राज्ञा च तुष्टः प्रोवाच तं नृपम् ।
ब्राह्मणा नावमन्तव्याः पुरुषेण विजानता ।
ब्राह्मणश्चेदवज्ञातो नश्येत्त्रिपुरुषं कुलम् ॥
एवमुक्त्वा स नृपतिमाप्येन पयसा पुनः ।
उत्थापयामास ततस्तस्य राष्ट्रो हिते स्थितः ।
तस्मिंस्तीर्थे तु यः स्नाति श्रद्दधानो जितेन्द्रियः ।
स प्राप्नोति नरो नित्यं मनसा चिन्तितं फलम् ।
तत्तु तीर्थं सुविख्यातं पापान्तं नाम नामतः ।
यस्येह यजमानस्य मधु सुस्राव वै नदी ॥
तस्मिन् स्नातोऽथ भक्त्या च मुच्यते सर्व्वपातकैः ।
फलं प्राप्नोति यज्ञस्य अश्वमेधस्य मानवः ॥
पापान्तमिति विख्यातं तीर्थं पुण्यतमं द्विजाः ॥"
इति वामनपुराणे ३८ अध्यायः ॥

पापी, [न्] पु, (पापमस्यास्तीति । इनिः ।) पापयुक्तः । यथा,—
"रुधिरौघप्लुताः केचित् केचित् कर्द्दमभूषिताः
केचित् केचित् कृशाङ्गाश्च पथि गच्छन्ति पापिनः ॥
क्रन्दन्तो व्यथया केचित् सवद्धवास्याकुलेक्षणाः ।
शोचन्तः स्वानि कर्म्माणि केचिद्गच्छन्ति पापिनः ।
कस्यचिच्चर्म्मपाशस्य बन्धनं पापिनो गले ।
कङ्काले कस्यचिद्बन्धः कस्यचिच्च भुजद्वये ॥
कस्यचिन्नासिकारन्ध्रे निर्द्दयैर्यमकिङ्करैः ।
अङ्कुशाग्रं विनिक्षिप्य क्रोधेनाकृष्यते द्विज ॥
घ्राणे सूचिसमुत्कीर्णे पाशं दत्त्वा दृढं रुषा ।
आकृष्यते यमप्रेष्यैः केषाञ्चित् सञ्चितैनसाम् ॥
शिक्यस्थान् गुरुपाषाणान् वहन्तः केऽपि स्कन्धके ।
आयोभारांश्च शिरसा व्रजन्ति पथि पापिनः ॥
कांश्चिद्गृहीत्वा केशेषु कांश्चित् कर्णेषु पापिनः
कांश्चिद्गुल्फेषु पादेषु नयन्ति यमकिङ्कराः ॥
ग्रीवासु पापिनः कांश्चित् करप्रहरणैर्दृढैः ।
क्षिप्रा क्षिप्रा यमप्रेष्या नयन्ति यममन्दिरम् ।
यान्त्यधःशिरसः केचिदूर्द्ध्वपादास्तथा परे ।
गच्छन्ति वायुभिः केचिदेकपादाश्च केचन ॥
इत्येवं विलक्षाकारा आर्त्तरावविराविणः ।
यमदूतैस्ताड्यमानाः पापिनोऽपि च तत्पथि ॥"
इति पाद्मे क्रियायोगसारे २२ अध्यायः ॥

पाप्मा, [न्] पु, (पा + "नामन् सीमन्निति ।" उणां ।४।१५० । इति मनिन् । पुगागमे निपातनात् साधुः ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, मनुः । ६ । ८५ ।
"अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥")

पाम, [न्] स्त्री, (पा + मनिन् ।) विचर्च्चिका इत्यमरः । २ । ६ । ५३ ॥ (यथा, माधवकर.
"सूक्ष्मा बह्व्यः पीडकाः स्राववत्यः
पामेत्युक्ताः कण्डुमत्यः सदाहाः ॥")

पामघ्नः, पु, (पाम हन्तीति । हन् + टक् ।) गन्धकः । इति जटाधरः ॥

पामघ्नी, स्त्री, (पाम हन्तीति । हन्+टक् । टित्वात् ङीप् ।) कटुका । इति राजनिर्घण्टः ॥

पामनः, त्रि, (पामास्त्यस्य इति । "लोमादि पामादिपिच्छादिभ्यः शनेलचः ।" ५ । २।१०० । इत्यस्य वार्त्तिकोक्त्या "पामादिभ्यो नः ।" इति नः ।) पामरोगविशिष्टः । तत्पर्य्यायः । कच्छुरः २ । इति हेमचन्द्रः ॥

पामरः, त्रि, (पाम पापादिदौरात्म्यमस्त्यस्येति । पामन्+"अश्मादिभ्यो रः ।" ४ । २ । ८० । इत्यस्य वार्त्तिकोक्त्या रः । ततो न लोपे साधुः ।) खलः । नीचः । इति मेदिनी । रे, १८२ ॥ (यथा, राजतरङ्गिण्याम् । १ । ३७८ ।
"दूरात् पामरकृतस्तैः श्रुतिपथप्राप्तैः प्रवृद्धस्वभू दृष्टो निर्झरवारिभिः सहमनाः श्वभ्रे निमज्ज-न्निव ॥"
मूर्खः । इति हेमचन्द्रः ॥

पामरोद्धारा, स्त्री, (पामरं उद्धरतीति । उत्+हृ+अण् । ततो अजादित्वात् टाप् ।) गुडूची । इति शब्दचन्द्रिका ॥

पामा, [न्] स्त्री, (पामन्+"मनः ।" ४ । १ । ११ । इति न ङीप् ।) कच्छूः । इत्यमरः । २ । ६ । ५३ ॥ पाँचड़ा इति भाषा ॥ अस्या औषधं यथा,—
"हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम् ।
अयं लेपो हन्ति दद्रुं पामानं वै गरं तथा ॥"
अपि च ।
"माहिषं नवनीतञ्च सिन्दूरञ्च मरीचकम् ।
पामा विलेपिना नश्येत् बहुलापि वृषध्वज ।॥"
अन्यच्च ।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ॥
विशाला करवीरञ्च अर्कक्षीरं सकृत् पलम् ।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् ॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च ।
अभ्यङ्गेन प्रणश्यन्ति कौमलत्वञ्च जायते ॥
प्रसूतान्यपि श्वित्राणि तैलेमानेन म्रक्षयेत् ।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणाद्भवेत् ॥"
इति गारुडे १६४ । १६८ अध्याययोः ॥

पामारिः, पु, (पामाया अरिर्नाशकः ।) गन्धकः । इति हेमचन्द्रः ॥

पायसः, पुं क्ली, श्रीवासः ॥ टारपिन् इति भाषा । पयसा संस्कृतः । (पयसो विकार इत्यण् ।) परमान्नम् । इत्यमरमेदिनीकरौ । अस्य पाक-प्रकारो गुणाश्च ।
"अतप्ततण्डुलो धौतः परिभृष्टो घृतेन च ।
खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत् ॥
पायसः कफकृद्बल्यो विष्टम्भी मधुरो गुरुः ॥"
तस्य पित्राद्युद्देशेन गङ्गाम्भसि निःक्षेपे फलं यथा,-
"पितृनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम् ।
गुड़सर्पिस्तिलैः सार्द्धं गङ्गाम्भसि विनिःक्षिपेत् ॥
तृप्ता भवन्ति पितरस्तस्य वर्षशतं हरे ।।
यच्छन्ति विविधान् कामान् परितुष्टाः पिता-महाः ॥"
इति स्कान्दे काशीखण्डे २७ अध्यायः ॥
चन्द्रप्रभपायसो यथा,—
"भृष्टक्षीरचतुर्जातश्चन्द्रकान्तः सुरोचनः ॥"
इति राजवल्लभः ॥
पयोविकारे, त्रि । यथा,—
"कन्दुपक्वानि तैलेन पायसं दधि शक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥"
इति तिथितत्त्वे वराहपुराणम् ॥

पायिकः, पुं, पदातिकः । इति शब्दरत्नावली ॥

पायुः, पुं, (पाति रक्षति शरीरं मलनिःसारणे-नेति । यद्वा, पिबति वस्त्यौषधमनेनेति । पा+"कृवापाजीति ।" उणां १ । १ । इत्युण् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) मलद्वारम् । स तु गर्भस्थस्य सप्त-भिर्मासैर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । अपानम् २ गुदम् ३ च्युतिः ४ अधोमर्म्म ५ शकृद्द्वारम् ६ त्रिवलीकम् ७ वलिः ८ । इति हेमचन्द्रः । ३ । २७६ ॥ (यथा, पञ्चदश्याम् । १ । २१ ।
"रजोऽंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥")
तस्याध्यात्मादि यथा,—
"अवाग्गतिरपानश्च पायुरध्यात्ममुच्यते ।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
(स्वनामख्यातो भरद्वाजपुत्त्रः । यथा, ऋग्वेदे । ६ । ४७ । २४ । "अश्वथः पायवेऽदात् ॥"
"पायवे भरद्वाजपुत्त्रायैतत्संज्ञायास्मद्भ्राते चाश्वथोऽश्ववानेतत्संज्ञः प्रस्तोकोऽदात् दत्त-वान् ।" इति तद्भाष्ये सायनः ॥ पालके, त्रि । यथा, ऋग्वेदे । २ । १ । ७ ।
"त्वं पायुर्दमे यस्तेऽविधत् ॥")

पाय्यं, क्ली, (मीयतेऽनेनेति । मा माने+"पाय्य-सान्नाय्येति ।" ३ । १ । १२९ । इति निपातनात् ण्यत्प्रत्ययादेः पत्वं युगागमश्च ।) परिमाणम् । इत्यमरः । २ । ६ । ८५ ॥ पानम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ जलम् । निन्दनीये, त्रि । इति विश्वः ॥ (पा पाने+णिच्+ण्यत् । पाययितव्ये । यथा, सुश्रुते । १ । १६ ।
"घृतञ्च पाय्यः स नरः सुजीर्णे
स्निग्धो विरेच्यः स यथोपदेशम् ॥")

पार, त क कर्म्मसमाप्तौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं सेट् ।) अपपारत् । इति दुर्गादासः ॥

पारं, क्ली, (पारयतीति । पार+पचाद्यच् ।) परतीरम् । नदीलङ्घनाद्नन्तरतीरम् । इत्य-मरः । १ । १० । ८ ॥ (यथा, सङ्गीतदर्पणे ।
"नादाब्धेस्तु परं पारं न जानाति सरस्वती ।
अद्यापि मज्जनभयात् तुम्बीं वहति वक्षसि ॥")

पारः, पुं, (पूर्य्यतेऽनेनेति । पृ+घञ् ।) पारदः इत्यमरटीकायां सारसुन्दरी ॥ प्रान्तभागे, पु क्ली । इति मेदिनी । रे, ५६ ॥

पारकः, त्रि, (पृ पूर्त्तौ पालने प्रीतौ व्यायामे च+ण्वुल् ।) पूर्त्तिकारकः । पालनकारकः । प्रीति-कारकः । व्यायामकारकः । एष्वर्थेषु प्रधानोः कर्त्तरि णकप्रत्ययनिष्पन्नः ॥

पारक्, [ज्] पुं, (पारयतीति । पार कर्म्म-समाप्तौ+णिच्+"पारेरजिः ।" उणां ? । १३५ । इति अजिः । णिलोपः ।) सुवर्णम् । इत्युणादिकोषः ॥

पारक्यं, क्ली, (परस्मै लोकाय हितम् । पर+ष्यञ् कुक् च ।) परलोकहितकर्म्म । यथा,-
"पादेन तस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान ।
अर्द्धेन चात्मभरणं नित्यनैमित्तिकन्तथा ॥
पादस्यार्द्धार्द्धमर्थस्य मूलभूतं विवर्द्धयेत ।
एवमाचरतः पुंसो ह्यर्थः साफल्यमृच्छति ॥"
इति मार्कण्डेयपुराणम् ॥
(परस्य इदमिति । परकीये, त्रि । यथा मनुः । १० । ९७ ।
"वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठित ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥")

पारगः, त्रि, (पारं गच्छतीति । पार+गम+"अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः ।" ३ । २ । ४८ । इति डः ।) पारगामी । तत्पर्य्यायः । कर्म्मठः २ । इति शब्दमाला ॥ (यथा महा-भारते । ४ । १४ । २१ ।
"उदतिष्ठन्मुदा स्तनो नाव लब्ध्वेव पारगः ॥"
तथा च तत्रैव । १ । १४० । १६ ।
"पारगश्च धनुर्युद्धे बभूवाथ धनञ्जयः ॥")

पारगतः, पु, (शास्त्रादेः अविद्याया वा पारं गतः ।) जिनः । इति हेमचन्द्रः ॥ पारगे त्रि ॥

पारजायिकः, पु, (परजायां गच्छतीति । पर-जाया+टक् ।) पारदारिकः । (यथा, महा-भारते । १२ । ९७ । १८ ।
"वाक्शूरो दण्डपरुषो यश्च स्यात् पारजायिक ।
यः परस्वमथादद्यात् त्याज्या नस्ताहृशा इति ॥")

पारटीटः, पुं, प्रस्तरः । इति त्रिकाण्डशेषः ॥

पारणः, पु (पारयतीति । पार+णिच्+ल्युः ।) मेघः । इति शब्दमाला ॥

पारणं, क्ली, (पार+भावे ल्युट् ।) उपवास-व्रतान्तरदिवसकर्त्तव्यप्राथमिकभोजनम् । वि-रणमस्य पारणाशब्दे द्रष्टव्यम् ॥

पारणा, स्त्री,(पार+युच्+टाप् ।) उपवासव्रता-नन्तरदिवसकर्त्तव्यप्राथमिकभोजनम् । यथा —
"पारणं पावनं पुंसां सर्व्वपापप्रणाशनम् ।
उपवासाङ्गभूतञ्च फलदं शुद्धिकारणम् ॥
सर्व्वेष्वेवोपवासेषु दिवापारणमिष्यते ।
अन्यथा फलहानिः स्यादृते धारणपारणम् ॥
न रात्रौ पारणं कुर्य्यादृते वै रोहिणीव्रतात् ।
निशायां पारणं कुर्य्याद्वर्ज्जयित्वा महानिशाम् ।
पूर्व्वाह्णे पारणं शस्तं कृत्वा विप्र ! सुरार्च्चनम् ।

मर्च्चयां सम्मतं कुर्य्यादेते वै रोहिणीव्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

अथ श्रीकृष्णजन्माष्टमीव्रतपारणकालः ।
"अष्टम्यामथ रोहिण्यां न कुर्य्यात्पारणं क्वचित् ।
हन्यात् पुराकृतं कर्म्म उपवासार्जितं फलम् ॥
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात्तिथिभान्ते च पारणम् ॥"
अत्रोभयवियोगे पारणमुक्तम् । "यदा सार्द्ध-प्रहरनिशाभ्यन्तरे एकस्यैव वियोगस्तदैकतर-वियोगेऽपि पारणम् ॥ तथा च नारदीये ।
"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥
सांयोगिके व्रते प्राप्ते यद्यप्येको वियुज्यते ।
तत्रैव पारणं कुर्य्यादेवं वेदविदो विदुः ॥
यद्येकस्यापि सार्द्धप्रहरनिशाभ्यन्तरे न वियोग-स्तदा तयोरवियोगेऽपि प्रातरुत्सवान्ते पार-णम् । तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् । इत्युक्तत्वात् ॥ * ॥ महाष्टम्युपवास-पारणं मत्स्यमांसोपहारेण कर्त्तव्यम् । यथा,—
"अष्टम्यां समुपोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥
तेनैव विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा ॥"
स्त्रियास्तु पशुमांसभक्षणनिन्दया न तेन पारणं किन्तु मत्स्येन । अष्टम्युपवासपारणे रविवारादौ मांसनिषेधः । एवं मांसाशनत्यागकृतनियमेन नियोगादिष्वपि मांसं वर्ज्जनीयम् ॥ * ॥

अथ श्रीरामनवमीव्रतपारणकालः ।
"नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥"

अथैकादशीव्रतपारणकालः ।
"मन्त्रं जपित्वा हरये निवेद्योपोषणं व्रती ।
द्वादश्यां पारणं कुर्य्याद्वर्ज्जयित्वा त्रयोदशीम् ॥"
द्वादशीलङ्घने दोषमाह नारदीयम् ।
"महाहानिकरी ह्येषा द्वादशी लङ्घिता
नृणाम् ॥"
विष्णुधर्म्मोत्तरे ।
"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः ॥"

अथ श्रवणद्वादश्युपवासपारणकालः ।
"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल श्रवणं वर्द्धते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥"
तिथिक्षयेण एकादशीक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः ॥ * ॥ अथ शिवरात्र्युपवास-पारणकालः ।
"जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते ।
कृतोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥"
तिथ्यन्ते पारणन्तु जयन्तीमात्रपरम् । अत्र चतुर्द्दश्यामेव तत् ।
"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतान्ते पारणे कृते ॥" * ॥
पारणदिने वर्ज्यानि यथा, ब्रह्माण्डपुराणम् ।
"कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
शिलापिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्ज्जयेन्नित्यं सर्व्वपापैः प्रमुच्यते ॥"
स्मृतिसन्तोषे ।
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरयोर्ग्रहणम् । इति तिथ्यादि-तत्त्वम् ॥

पारतः, पुं, (विविधव्याधिसङ्कटादिभ्यः पारं तनोतीति । तन + अन्येभ्योऽपीति डः ।) पारदः । इति हेमचन्द्रः । ९ । ११६ ॥

पारतन्त्र्यं, क्ली, (परतन्त्रस्य भावः । परतन्त्र + ष्यञ् ।) परतन्त्रता । पराधीनत्वम् । अस्वाय-त्तता । यथा, माधवकरः ।
"दोषाणां समवेतानां विकल्पेऽंशांशकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादि-शेत् ॥"

पारत्रिकं, त्रि, (परत्र भवम् । परत्र + ठक् ।) पारलौकिकम् । परत्र भवमित्यर्थे ष्णिकप्रत्यय-निष्पन्नम् ॥

पारदः, पुं, (जरामरणसङ्कटादिभ्यः पारं ददा-तीति । दा + कः ।) धातुविशेषः । पारा इति भाषा । तत्पर्य्यायः । रसराजः २ रसनाथः ३ महारसः ४ रसः ५ महातेजः ६ रसलोहः ७ रसोत्तमः ८ सूतराट् ९ चपलः १० जैत्रः ११ शिववीजम् १२ शिवः १३ अमृतम् १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० रसधातुः २१ अचि-न्त्यजः २२ खेचरः २३ अमरः २४ देहदः २५ मृत्युनाशकः २६ सूतः २७ स्कन्दः २८ स्कन्दां-शकः २९ देवः ३० दिव्यरसः ३१ रसायनश्रेष्ठः ३२ यशोदः ३३ । इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ । इति शब्दरत्ना-वली ॥ हरवीजम् ३७ रजस्वलः ३८ । इति हेमचन्द्रः ॥ शिववीर्य्यम् ३९ शिवाह्वयः ४० । इति भावप्रकाशः ॥ अस्य गुणाः । क्रमिकुष्ठ-नाशित्वम् । चक्षुष्यत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥ अस्य भस्म पूर्णवीर्य्यं मासत्रय-पर्य्यन्तं तिष्ठति । इति परिभाषा ॥ * ॥ अपि च ।
"पारदः सकलरोगनाशकः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितो
देहलोहवरसिद्धिकारकः ॥
मूर्च्छितो हरति व्याधीन् बद्धः खेचरसिद्धिदः ।
सर्व्वसिद्धिकरो लीनो निरुत्थो देहसिद्धिदः ॥
विविधव्याधिभयोदयमरणजरासङ्कटेऽपि
मर्त्त्येभ्यः ।
पारं ददाति यस्मात्तस्मादयं पारदः कथितः ॥"
इति राजनिर्घण्टः ॥
तस्योत्पत्तिलक्षणे यथा,—
"शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ॥
अत्र भेदेन विज्ञेयं शिववीर्य्यं चतुर्व्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥
ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ॥
धातुवादे तु तत् पीतं खे गतौ कृष्णमेव च ॥
पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ।
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ॥
सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठनुत् ।
स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्द्दनः ।
रञ्जितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥
मूर्च्छित्वा हरति रुजं बन्धनमनुभूय खे गतिं
कुरुते ।
अजरीकरोति हि मृतः कोऽन्यः करुणाकरः
सूतात् ॥"
रसामृते ।
"यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"
तस्य दोषा यथा,—
"मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ मुनीश्वरैः ॥
मलेन मूर्च्छा मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्या-
च्चाञ्चल्यतो वीर्य्यहृतिश्च पुंसाम् ॥
वङ्गेन कुष्ठं भुजगेन षण्ढो
भवेदतोऽसौ परिशोधनीयः ॥
वह्निर्व्विषं मलश्चेति मुख्या दोषास्त्रयो रसे ।
एते कुर्व्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥
अन्येऽपि दोषाः कथिता भिषग्भिः पारदे यदि ।
तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥
संस्कारहीनं खलु सूतराजं
यः सेवते तस्य करोति बाधाम् ।
देहस्य नाशं विदधाति नूनं
कष्टांश्च रोगान् जनयेन्नराणाम् ॥"
मारितस्य मूर्च्छितस्य तस्य गुणाः ।
"पारदः कृमिकुष्ठघ्नो जयदो दृष्टिदः सरः ।
मृत्युहृच्च महावीर्य्यो योगवाही जराहरः ॥
स्मृत्योजोरूपदो वृष्यो दृष्टिशक्त्यनुवर्द्धनः ।
षट्कत्वनाशनः शूरः खेचरः सिद्धिदः परः ॥
पारदः सकलरोगहा स्मृतः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तित-
स्तेन तद्गुणगणैर्व्विराजते ॥" * ॥
अथ रसस्य शोधनविधिः । तत्र स्वेदनम् ।
"नानाधान्यैर्यथा प्राप्तैस्तुषवर्जैर्जलान्वितैः ।
मृद्भाण्डं पूरितं रक्षेद्यावदम्लत्वमाप्नुयात् ॥
तन्मध्ये भृङ्गराणमण्डूकी विष्णुक्रान्ता पुनर्नवा ।

मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी ॥
त्रिफला गिरिकर्णी च हंसपादी च चित्रकः ।
समूलं कुट्टयित्वा तु यथालाभं विनिःक्षिपेत् ॥
पूर्व्वोक्तभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम् ।
स्वेदनादिषु सर्व्वत्र रसराजस्य योजयेत् ॥”
विष्णुक्रान्ता गिरिकर्णी च अपराजितैव श्वेत-नीलपुष्पभेदात् । अत्यम्लमारनालं वा तदभावे प्रयोजयेत् । तदभावे धान्याम्लाभावे ।
“त्र्यूषणं लवणं राजी रजनी त्रिफलार्द्रकम् ।
महाबला नागबला मेघनादः पुनर्नवा ॥
मेषशृङ्गी चित्रकञ्च नवसारं समं समम् ।
एतत् समस्तं व्यस्तं वा पूर्व्वाम्लेनैव पेषयेत् ॥
प्रलिम्पेत्तेन कल्केन वस्त्रमङ्गुलमात्रकम् ।
तन्मध्ये निःक्षिपेत् सूतं बद्ध्वा तत्त्रिदिनं पचेत् ॥
दोलायन्त्रेऽम्लसंयुक्ते जायते स्वेदितो रसः ॥”
मेघनादः चवराइ शाकविशेषः । मेषशृङ्गी मेढ़ा-शृङ्गी । तदलाभे कर्कटशृङ्गी ग्राह्या । नवसारं नौसादर । अन्यच्च ।
“मूलकानलसिन्धूत्थत्र्यूषणार्द्रकराजिकाः ।
रसस्य षोडशांशेन द्रव्यं युञ्ज्यात पृथक् पृथक् ॥
द्रव्येष्वयुक्तमानेषु मतं मानमिदं बुधैः ।
पटावृतेषु चैतेषु सूतं प्रक्षिप्य काञ्जिके ॥
स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान् ।
स्वेदात्तीव्रो भवेत् सूतो मर्द्दनाच्च सुनिर्म्मलः ॥”
मूलकं मुरइ । अनलश्चित्रकम् । त्र्यूषणं त्रिकटु । राजिका राइ ॥ * ॥ अथ मर्द्दनम् ।
“इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः ।
दध्ना गुडेन सिन्धूत्थराजिकागृहधूमकैः ॥”
अन्यच्च ।

“कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥” * ॥

अथ मूर्च्छनम् ।
“त्र्यूषणं त्रिफलावन्ध्याकन्दैः क्षुद्राद्वयान्वितैः ।
चित्रकोर्णानिशाक्षारकन्यार्ककनकद्रवैः ॥
सूतं कृतेन यत्नेन वारान् सप्ताभिमूर्च्छयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥”
वन्ध्याकन्दः बाँझखखसाकन्दः । क्षुद्राद्वयं छोटी-कटैया बड़ीकटैया । ऊर्णा ऊर्णामेषका । निशा हरिद्रा । क्षारः यवक्षारः । कन्या कुमारिका । अर्कः अर्कपत्ररसः । कनकः धुस्तूरपत्ररसः ॥ * ॥
अथोर्द्ध्वपातनम् ।
“मयूरग्रीवताप्याभ्यां नष्टपिष्टीकृतस्य च ।
यन्त्रे विद्याधरे कुर्य्याद्रसेन्द्रस्योर्द्ध्वपातनम् ॥
सूतः स्यादूर्द्ध्वपातेन सर्व्वदोषविवर्ज्जितः ॥”
मयूरग्रीवा तुतिया । ताप्यः स्वर्णमाक्षी । नष्ट-पिष्टीकृतस्य कुमारिकाद्रवयोगेन तावन्मर्द्दनं कर्त्तव्यं यावत् पारदः पृथङ् न दृश्यते इत्यर्थः । विद्याधरयन्त्रे डमरुयन्त्रे ॥ * ॥
अथाधःपातनम् ।
“त्रिफलाशिग्रुशिखिभिर्लवणासुरिसंयुतैः ।
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध्वभाजनम् ॥
ततो दीप्तैरधःपातमुपलैस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुद्ध्यति ॥
स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत् ।
तदा कार्य्याणि कुरुते प्रयोज्यः सर्व्वकर्म्मसु ॥”
अथ मुख्यदोषहरशोधनविधिः ।
“गृहकन्या हरति मलं त्रिफलाग्निं चित्रको विषं हन्ति ।
तस्मादेभिर्मिश्रैर्वारान् संमर्द्दयेत् सप्त ॥” * ॥
अथ सर्व्वदोषहरः संक्षिप्तः शोधनविधिः ।

“कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥

एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
वह्न्यौषधीकषायेण स्वेदितः स बली भवेत् ॥
सर्पाक्षीचिञ्चिकावन्ध्याभृङ्गाब्दैः स्वेदितो बली ।
ततः स पारकद्रावैः स्विन्नः स्यादतिदीप्तिमान् ॥”
सर्पाक्षी नागफणी । चिञ्चिका अम्लिली । वन्ध्या बाँझखखसा । भृङ्गः भृङ्गराजः । अब्दो मुस्ता । पावकः चित्रकः ॥ * ॥
अथ रसस्य मारणविधिः ।
“धूमसारं रसं तारीं गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताञ्च मृद्वस्त्रमुद्रया ।
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं वालुकापूरैर्भृत्वा च कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तमूर्द्ध्वगं गन्धकं त्यजेत् ॥
अधःस्थञ्च मृतं सूतं गृह्णीयात्तन्त मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥” * ॥
अथान्यप्रकारः ।
“अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ।
तत् संपुटे क्षिपेत् सूतं मलपूदुग्धमिश्रितम् ॥”
मलपूः काष्ठोदुम्बरिका ।
“द्रोणपुष्पीप्रसूनानि विडङ्गमरिमेदकः ।
एतच्चूर्णमधश्चोर्द्ध्वं दत्त्वा मुद्रां प्रदीपयेत् ॥
तद्गोलमाधमेत् सम्यक् मृन्मूषासंपुटे सुधीः ।
मुद्रां दत्त्वा शोषयित्वा ततो गजपुटे पचेत् ॥
एकेनैव पुटेनैव सूतकं भस्म जायते ।
तत् प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥”
अथान्यप्रकारः ।
“काष्ठोडुम्बरिकादुग्धे रसं किञ्चिद्विमर्द्दयेत् ।
तद्दुग्धघृष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत ॥
क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां प्रदीपयेत् ।
धृत्वा तद्गोलकं प्राज्ञो मृन्मूषासंपुटेऽधिके ॥
पचेद्गजपुटे तेन सूतकं याति भस्मताम् ॥”
अन्यः प्रकारः ।
“नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः ।
मृन्मूषासंपुटे पक्वः सूतो यात्येव भस्मताम् ॥”
इति भावप्रकाशे पूर्व्वखण्डे २ भागे ॥
अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
“पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये । ।
अतएव महेशानि । शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिवबीजं हि ताडनं नहि कारयेत् ।
ताडनाद्वित्तनाशः स्यात्ताड़नाद्वित्तहीनता ॥
ताडनाद्रोगयुक्तत्वं ताडनान्मरणं भवेत् ।
द्वादशं पार्थिवं लिङ्गमुपचारैश्च षोडशैः ।
पट्टादिसूत्रनिर्म्माणरचितं शुक्लमेव वा ॥
पुरुषस्य यथायोग्यं युग्मवस्त्रं निवेदयेत् ॥
भोगयोग्यं प्रदातव्यं मधुपर्कं कुलेश्वरि । ।
अलङ्कारं यथाशक्ति दद्यात् कल्याणहेतवे ॥
पूजयेद्बहुयत्नेन विल्वपत्रेण पार्व्वति । ।
षोडशोक्तेन विधिना प्रत्येकेनायुतं जपेत् ॥
आदौ पञ्चाक्षरं मन्त्रमष्टोत्तरशतं जपेत् ।
पूजान्ते प्रजपेत् पश्चात् प्रासादाख्यं महामनुम् ॥
दक्षिणान्तं समाचर्य्य हविष्याशी जितेन्द्रियः ।
ताम्बूलञ्च तथा मत्स्यं वर्जयेन्न कदाचन ।
अस्मिंस्तन्त्रे हविष्यान्नं ताम्बूलं मीनमुत्तमम् ॥
होमयेत् परमेशानि । दशांशं वा शतांशकम् ।
होमस्य दक्षिणा कार्य्या तदा विघ्नैर्न लिप्यते ॥
ततः परस्मिन् दिवसे पारदं आनयेत् सुधीः ।
तस्योपरि जपेन्मन्त्रं सर्व्वबन्धं नवात्मकम् ॥
व्योमबीजं शिवाग्नेश्च वर्णाद्यं विन्दुमस्तकम् ।
वायुबीजं चेन्दुयुतं त्रितयं त्र्यम्बकं प्रिये । ॥
इमं मन्त्रं महेशानि । प्रजपेदौषधोपरि ॥
पारदं प्रजपेन्मन्त्रमष्टोत्तरशतं यदि ।
तदैवौषधयोगेन बद्धो भवति नान्यथा ॥
ततः परस्मिन् दिवसे शृणु यत् प्राणवल्लभे । ।
वरयेत् सर्व्वकर्त्तारं यथोक्तविभवावधि ॥
सुवर्णं चम्पकाकारं कर्णयुग्मे निवेशयेत् ।
चतुष्कोणयुतं स्वर्णं ग्रीवायां सुमनोहरम् ॥
हस्तद्वये महेशानि । दद्याद्वलययुग्मकम् ।
वलयं शुक्लवर्णञ्च अङ्गुरीयं तथैव च ॥
ऊर्म्मीं दद्यात् पीतवर्णां क्षौमवस्त्रयुगं शिवे । ।
एवं कृत्वा महेशानि । शिवरूपं विचिन्तयेत् ॥
अथातः संप्रवक्ष्यामि विधानं शृणु पार्व्वति । ।
प्रस्तरे चैव संस्थाप्य भिण्टीपत्ररसेन च ।
शणेन समालोड्य कुर्य्यात् कर्द्दमवत् प्रिये । ॥
निर्म्माणयोग्यं तद्द्रव्यं यदि स्यात् सुरसुन्दरि । ।
तदा निर्म्माय तल्लिङ्गं पुनर्दृढतरञ्चरेत् ॥
खपुष्पसंयुते वस्त्रे अङ्गारे च करीषके ।
किञ्चिदुष्णं प्रकर्त्तव्यं यतो दृढ़तरं भवेत् ॥”
इति मातृकाभेदतन्त्रे ८ पटलः ॥ * ॥
सगरराजकृतमुक्तकेशम्लेच्छजातिविशेषः ॥
(यथा, महाभारते । २ । ५१ । १३ ।
“कैराता दरदा दर्व्वाः शूरा वैयमकास्तथा ।
औदुम्बरा दुर्व्विभागा पारदाः सह वाह्लिकैः ॥”)
अस्य विवरणं पह्लवशब्दे द्रष्टव्यम् ॥
पारदक्षः, पु, देशविशेषः । इति शब्दरत्ना-वली । स तु ओड्रदेशैकभाग … कैश्चित् ॥

पारदारिकः, पुं, (परेषां अन्येषां दारान् गच्छतीति। परदार+"गच्छतौ परदारादिभ्यः।" ४।४।१। इत्यस्य वार्त्तिकोक्त्या ठक्।) पारजायिकः। परदाररतः। (यथा, महाभारते।२।३१।७५।
"तत्र माहिष्मतीवासी भगवान् हव्यवाहनः।
श्रूयते हि गृहीतो वै पुरस्तात् पारदारिकः॥")
"पुण्यकाण्डजयडिण्डिमायितं
यत्र गोनमककङ्ककामिनः।
पारदारिकविलाससाहसं
देवभर्त्तुरुदटङ्कि भित्तिषु॥"
इति च नैषधे १८ सर्गः॥

अस्य दोषा यथा,—
"यः परस्त्रीषु निरतस्तस्य श्रीर्वा कुतो यशः।
स च निन्द्यः पापयुक्तः शश्वत् सर्व्वसभासु च॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे २१ अध्यायः॥

पारदार्य्यं, क्ली, (परदारा दारा यस्य स परदारस्तस्य कर्म्मेति ष्यञ्।) परदारगमनम्। यथा,
"भृताद्ध्ययनादानं भृतकाध्यापनन्तथा।
पारदार्य्यं पारिवित्त्यं वार्द्धुष्यं लवणक्रिया॥"
इत्युपपातकगणने याज्ञवल्क्यः॥

पारदेश्यः, त्रि, प्रोषितः। पारदेशिकः। पथिकः। परदेशं गत इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नः॥ (परदेशे भव इति ष्यञ्। परदेशजातः। यथा, याज्ञवल्क्ये।२।२५५।
"स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम्।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी॥")

पारमहंस्यं, त्रि, (परमहंसैर्गम्यत्वात् परमहंसस्य भावः परमहंसेन श्रेयं यत् प्राप्यमिति वा। परमहंस+ष्यञ्।) परमहंससम्बन्धि। यथा,
"श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्म्यमाविष्कृतं
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"
इति श्रीमद्भागवते।१२।१३।१८॥
"पारमहंस्यं परमहंसैः प्राप्यम्।" इति तट्टीकायां श्रीधरस्वामी॥ (परब्रह्मधाम। यथा, भागवते।१।१८।२२।
"यत्रानुरक्ताः सहसैव धीरा
व्यपोह्य देहादिषु सङ्गमूढम्।
व्रजन्ति तत्पारमहंस्यमन्त्यं
यस्मिन्नहिंसोपशमः स्वधर्म्मः॥"
प्रत्यङ्निष्ठारूपम्। यथा, तत्रैव।२।४।१३।
"पुंसां पुनः पारमहंस्य आश्रमे॥
व्यवस्थितानामनुमृग्यदाशुषे॥"
ज्ञानस्वरूपम्। यथा, तत्रैव।४।२१।४१।
"न वै तथा चेतनया बहिष्कृते
हुताशने पारमहंस्यपर्य्यगुः॥")

पारमार्थिकः, त्रि, (परमार्थाय परमपुरुषार्थाय हित इति। ठक्।) परमार्थयुक्तः। यथा,—
"गतानुगतिको लोको न लोकः पारमार्थिकः॥"
इति पुराणम्॥
सत्यम्। यथा,—
"त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च।
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम्॥"
इति तिथ्यादितत्त्वम्॥
(यथार्थः। यथा, मनौ ९। १९ श्लोकटीकायां कुल्लूकभट्टः। "तेषां प्रकाशाप्रकाशतस्कराणां स्वकर्म्मणि चौर्य्यादौ ये पारमार्थिका दोषा इति।" परस्पराविभक्तः। यथा, भागवते। ३।२८।१।
"लक्षणं महदादीनां प्रकृतेः पुरुषस्य च।
स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम्॥"
"पारमार्थिकं परस्पराविभक्तमित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥)

पारम्पर्य्यं, क्ली, (परम्पराया आगतम्। तत आगत इत्यण्। चतुर्वर्णादित्वात् ष्यञ्। परम्परा+स्वार्थे ष्यञ् वा।) आम्नायः। कुलक्रमः। इति हेमचन्द्रः॥ तथा च।
"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृशः॥"
इति विवादभङ्गार्णवः॥
परम्पराया भावश्च॥ (यथा, महाभारते। ६।११७।२९।
"निवृत्तेषु च सैन्येषु पारम्पर्य्येण सर्व्वशः।
विमुक्तकवचाः सर्व्वे भीष्ममीयुर्नराधिपाः॥")

पारम्पर्य्योपदेशः, पुं, (पारम्पर्य्येण गुरुपरम्परया प्राप्त उपदेशः।) उपदेशपरम्परा। तत्पर्य्यायः। ऐतिह्यम् २ इतिह ३। इत्यमरः। २।७।१२॥ परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ्: पारम्पर्य्येणोपदेशः पारम्पर्य्योपदेशः तत्र इतिहशब्दोऽव्ययः। यथा। इतिह वृद्धैरुक्तं इह वटे यक्षः प्रतिवसतीति। इति एव रूपं हन्ति गच्छति इतिह हनजनादिति डः। इतिह शब्दात् स्वार्थे ष्ण्य ऐतिह्यम्। इति भरतः॥

पारलौकिकः, त्रि, (परलोके भवः परलोकाय हित इति वा। परलोक+ठञ्। "अनुशतिकादीनाञ्च।" ७।३।२०। इति शिकादुभयपदस्यैव वृद्धिः।) परलोकसम्बन्धी। यथा,—
"दानपात्रमधमर्णमिहैक-
ग्राहि कोटिगुणितं दिवि दायि।
साधुरेति सुकृतैर्यदि कर्त्तुं
पारलौकिककुसीदमसीदन्॥"
इति नैषधे।५।९२॥
(तथा च महाभारते।१३।१११।१६।
"तस्मान्न्यायागतैरर्थैर्धर्म्मं सेवेत पण्डितः।
धर्म्म एको मनुष्याणां सहायः पारलौकिकः॥")

पारवतः, पुं, पारावतः। इति द्विरूपकोषः॥

पारशवः, पुं, शूद्रायां विप्रतनयः। इत्यमरः। ३। ४।२०९॥ स तु निषादजातिः। यथा,—
"ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारशव उच्यते॥
शूद्रकन्यायामूढायां निषाद उत्पद्यते यतः संज्ञान्तरेण पारशवश्चोच्यते। तस्योपनयनसंस्कारनिषेधमाह।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः॥
स जीवन्नेव शवतुल्यः।" इति मनुकुल्लूकभट्टौ॥
परशौतनयः। (परशुरेव स्वार्थे अण्।) शस्त्रम्। तत्तु लौहम्। इति मेदिनी। वे,६०॥
परशुजाते, त्रि॥

पारशीकः, पुं, पारसीकः। इत्यमरटीकायां रमानाथः॥

पारश्वधः, पुं, (परश्वधेन युध्यतेऽसौ परश्वधः प्रहरणमस्येति वा। परश्वध+"तदस्येति।" अण्।) परश्वधधारी। पारश्वधिकः। इति हेमचन्द्रः॥

पारश्वधिकः, पुं, (परश्वधः प्रहरणमस्य। "परश्वधाट्ठञ् च।" ४।४।५८। इति ठञ्।) परशुहेतिकः। कुठारधारी। तत्पर्य्यायः। पारश्वधः २ परश्वधायुधः ३। इति हेमचन्द्रः॥

पारसिकः, पुं, पारसीकः। इति शब्दरत्नावली॥

पारसी, स्त्री, पारस्यभाषा। पारसदेशभवविद्यादि। तदारम्भदिनं यथा,—
"ज्येष्ठाश्विषामघापूर्व्वारेवतीभरणीहये।
विशाखार्द्रोत्तराषाढशतभे पापवासरे॥
लग्ने स्थिरे सचन्द्रे च पारसीमारवीं पठेत्॥"
इति गणपतिमुहूर्त्तः॥

पारसीकः, पुं, पारसीकदेशोद्भवघोटकः। तत्पर्य्यायः। वानायुजः २। इति केचिदित्यमरटीकायां भरतः॥ पराह्नः ३ आवट्टजः ४। इति त्रिकाण्डशेषः॥ (यथा, अश्ववैद्यके।६।८।
"पारसीकास्ताजिकाभाः कोङ्कणाः केचिदुन्नताः॥")
देशविशेषः। तत्पर्य्यायः। पारसिकः २। इति शब्दरत्नावली॥ तद्देशोद्भवे, त्रि॥ (यथा रघुः।४।६०।
"पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना॥")

पारस्त्रैणेयः, त्रि (परस्त्रिया जातः। "कल्याण्यादीनामिनङ्।" ४।१।१२६। इति ढक् इनङादेशश्च। तत उभयपदवृद्धिः।) परस्त्रियाः सुतः। इत्यमरः।२।६।२४॥

पारा, स्त्री, (पारोऽस्त्यस्या इत्यच् ततष्टाप्।) नदीविशेषः। सा तु पारियात्रपर्व्वतोद्भवा इति मेदिनी। रे,५६॥ (यथा, मात्स्ये।११३।२४।
"पारा चर्म्मण्वती रूपा विदुषा वेणुमत्यपि॥")

पारापतः, पुं, (पारे गिरिनद्यादिपरपारे यद्वा पारादप्यापतति लोभादिति। पत+अच्।) पारावतः। इत्यमरटीकायां रमानाथः॥

पारापारः, पुं (पारश्चापारश्चास्त्यस्येति। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) पारावारः। इति द्विरूपकोषः॥

पारायणं, क्ली, साकल्यवचनम्। इत्यमरः।३ ७।२॥ "पारं समाप्तिं अयते गच्छति प्राप्नोति पारायणं नन्द्यादित्वादनः। आविष्टलिङ्गत्वात् भिन्नलिङ्गेन सामानाधिकरण्येऽपि क्लीवत्वं पारायणम्। यथा धातुपारायणम्। रत्न

पारायणं नाम तच्चेति मम मैथिलीति भङ्गिः।"
इति भरतः॥ (पारमयनं समाप्तिं प्राप्नुवन्ति येनेति। अय + ल्युट् करणे इत्येके।) पुराण-पाठः। (यथा देवीभागवते। ३।२६।१७।
"वरयेद्ब्राह्मणं शान्तं पारायणज्ञते तदा॥")
तत्र श्रीभागवतपाठानुक्रमो यथा, —

श्रीपार्व्वत्युवाच।

"स्कन्धैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं प्रभो।।
शुकस्तच्छ्रावयामास महाराजं परीक्षितम्॥
सप्ताहेनेति भगवन्। श्रूयते तत्र तत्र ह।
तस्यानुक्रममिच्छामि श्रोतुं तत्फलमेव च॥

सदाशिव उवाच।

साधु पृष्टम्महाभागे। लोके यत् प्रचरिष्यति।
पारायणमिति ख्यातं सद्यो मुक्तिप्रदं नृणाम्॥
शुकस्योक्तिक्रमेणैव पठेद्भागवतन्तु यः।
श्रावयेच्छृणुयाद्वापि तस्यानन्तं फलं भवेत्॥
स्नातनित्यक्रियः प्रातः कुशहस्तः कुशासनः।
देवद्विजगुरून्नत्वा ध्यात्वा विष्णुं सनातनम्॥
द्वैपायनं नमस्कृत्य शुकदेवञ्च भक्तितः।
हिरण्याक्षवधं यावत् प्रथमेऽहनि कीर्त्तयेत्॥
चरितं भरतस्यापि द्वितीयेऽथ तृतीयके।
मथनञ्चाम्बुनस्यापि यत्र कूर्म्मः स्वयं हरिः॥
चतुर्थदिवसे चैव दशमे हरिजन्म च।
पञ्चमे तु पठेद्विद्वान् रुक्मिण्या हरणावधि॥
षष्ठे चोद्धवसंवादं सप्तमे तु समापयेत्।
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन॥
कृते विरामे मध्ये तु अध्यायादिं पठेत् पुनः।
पठेदर्थं बुध्यमानः श्रावयेद्वैष्णवोत्तमं।॥
श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्भक्तितत्परः.
अध्याये स्वर्णमाषैकं तथा दद्याच्च दक्षिणाम्
समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत्।
कुर्य्याच्च वैष्णव होमं सात्वतान् भोजयेत्ततः॥
एव यः कुरुते देवि। पाठं भागवतस्य तु।
श्रवणं श्रावणं वापि स दृष्टां गतिमाप्नुयात्।
एतत् पारायणं नाम सर्व्वकामफलप्रदम्॥
पाठकाले तु त्रिदशा मुनयश्च तपोधनाः।
पार्षदाश्च तथा विष्णोः सान्निध्यं तत्र कुर्व्वते॥
एतत्ते कथितं देवि। पारायणविधानकम्।
विष्णुप्रीतिकरं पुण्यं किम्भूयः श्रोतुमिच्छसि॥"
इति पाद्मे पातालखण्डे पारायणमाहात्म्ये ७१ अध्याय.॥ * ॥ अपिच।

कुमारा ऊचु.।

"अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम्।
सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः॥
दैवज्ञन्तु समाहूय मुहूर्त्तं पृच्छ यत्नतः।
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्॥
नभस्य आश्विनोर्ज्जौ च मार्गशीर्षः शुचिर्नभाः।
एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः॥
मासानां निर्णये यानि तानि त्याज्यानि सर्व्वथा।
सहायाश्च न एवात्र कर्त्तव्याः सोद्यमाश्च ये॥
देशे देशे तथा चेयं वार्त्ता प्रेष्या प्रयत्नतः।
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः।
स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत्॥
देशे देशे विरक्ता ये वैष्णवाः कीर्त्तनोत्सुकाः।
तेष्वेव पत्रं प्रेष्यञ्च तल्लेखनमितीरितम्॥
सतां समाजो भविता सप्तरात्रं सुदुर्लभः।
अपूर्व्वरसरूपैव कथा चात्र भविष्यति॥
श्रीभागवतपीयूषकथासु रसलम्पटाः।
भवन्तश्च तदा शीघ्रमायान्तु प्रेमतत्पराः॥
नावकाशः कदाचिच्चेद्दिनमात्रं तथापि वा।
सर्व्वथा गमनं कार्य्यं क्षणोऽत्रैव सुदुर्लभः॥
एवमाकारणं तेषां कर्त्तव्यं विनयेन च।
आगन्तुकानां सर्व्वेषां वासस्थानानि कल्पयेत्॥
तीर्थे चैव वने चापि गृहे वा श्रवणं स्मृतम्।
विशाला वसुधा यत्र कर्त्तव्यं तत्कथास्थलम्॥
शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम्।
गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत्॥
अर्व्वाक् पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत्।
कर्त्तव्यं मण्डपं प्रोच्चैः कदलीखण्डमण्डितम्॥
फलपुष्पदलैर्विष्वक् वितानेन विराजितम्।
चतुर्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः॥
ऊर्द्ध्वं सप्तैव लोकाश्च कल्पनीयाः सुविस्तरम्।
तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबुध्य च॥
पूर्व्वं तेषामासनानि कर्त्तव्यानि यथोत्तरम्।
वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत्॥
उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा।
प्राङ्मुखोऽथ भवेद्वक्ता श्रोता चोदङ्मुखस्तदा॥
अथवा पूर्व्वदिक् ज्ञेया पूज्यपूजकमध्यतः।
श्रोतॄणामागमः प्रोक्तो देशकालादिकोविदैः॥
विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिमान्।
दृष्टान्तकुशलो धीरो वक्ता कार्य्योऽतिनिःस्पृहः॥
अनेकधर्म्मविभ्रान्ताः स्त्रैणाः पाषण्डवादिनः।
शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः।
वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः॥
पण्डितः संशयच्छेत्ता लोकबोधनतत्परः॥
वक्त्रा क्षौरं प्रकर्त्तव्यं दिनादर्व्वाक् व्रताप्तये।
अरुणोदयेऽसौ निर्व्वर्त्य शौचं स्नानं समाचरेत्॥
मण्डलञ्च प्रकर्त्तव्यं तत्र स्थाप्यो हरिस्तथा।
कृष्णमुद्दिश्य मन्त्रेण चरेत पूजाविधिं क्रमात्।
प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत॥
संसारसागरे मग्नं दीनं मां करुणानिधे।।
कर्म्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात्॥
श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः।
कर्त्तव्या विधिना प्रीत्या धूपदीपसमन्विता॥
ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत्।
स्तुतिः प्रसन्नचित्तेन कर्त्तव्या केवलं तदा॥
श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि।
स्वीकृतोऽसि मया नाथ। मुक्त्यर्थं भवसागरे॥
मनोरथो मदीयोऽयं सफलः सर्व्वथा त्वया।
निर्विघ्नेनैव कर्त्तव्यो दासोऽहं तव केशव।॥
एवं दीनं वचः प्रोक्त्वा वक्तारञ्च [illegible]यन।
संभूष्य वस्त्रभूषाभिः पूजान्ते तञ्च संस्तवेत्॥
शुकरूपप्रबोधज्ञः सर्व्वशास्त्रविशारद.।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय॥
तदग्रे नियमः पश्चात् कर्त्तव्यः श्रेयसे मुदा।
सप्तरात्रं यथाशक्त्या धारणीयः स एव हि॥
वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये।
कर्त्तव्यं तैर्हरेर्जप्यं द्वादशाक्षरविद्यया॥
ब्राह्मणान् वैष्णवान् चान्यान् तथा कीर्त्तन कारिणः।
नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत्॥
लोकवित्तधनागारपुत्रचिन्तां व्युदस्य यः।
कथाचित्तः शुद्धमतिः स लभेत फलमुत्तमम्॥
आसूर्य्योदयमारभ्य सार्द्धत्रिप्रहरान्तकम्।
वाचनीया कथा सम्यक् धीरकण्ठं सुधीमता॥
कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयम्।
तत्कथामनुकार्य्यं वै कीर्त्तनं वैष्णवैस्तदा॥
मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः।
हविष्यान्नेन कर्त्तव्यो ह्येकवारं कथार्थिना॥
उपोष्य सप्तरात्रं वा शक्तिश्चेत् शृणुयात्तदा।
घृतपानं पयःपानं कृत्वा वा शृणुयात् सुखम्
फलाहारेण वा श्राव्यमेकभक्तेन वा पुनः।
सुखसाध्यं भवेद्यत्तु कर्त्तव्यं श्रवणाय तत्॥
भोजनन्तु वरं मन्ये कथाश्रवणकारकम्।
नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि॥
सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद।।
विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे॥
ब्रह्मचर्य्यमधःसुप्तिः पत्रावल्याञ्च भोजनम्।
कथासमाप्तौ भक्तिञ्च कुर्य्यान्नित्यं कथाव्रती॥
द्विदलं मधु तैलञ्च गरिष्ठान्नन्तथैव च।
भावदुष्टं पर्य्युषितं जह्यान्नित्यं कथाव्रती॥
वृन्ताकञ्च कलिङ्गञ्च दग्धमन्नं मसूरिकाम्।
निष्पावमामिषाद्यञ्च वर्ज्जयेत् कथाव्रती॥
पलाण्डुं लशुनं हिङ्गुं मूलकं गृञ्जनन्तथा।
नालिकामूलकुष्माण्डं नैवाद्याच्च कथाव्रती॥
देववैष्णवविप्राणां गुरुगोव्रतिनान्तथा।
स्त्रीराजमहतां निन्दां वर्ज्जयेच्च कथाव्रती॥
कामं क्रोधं मदं मानं मत्सरं लोभमेव च।
दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती॥
रजस्वलान्त्यजम्लेच्छपतितव्रातकैस्तथा।
द्विजद्विड्वेदवाह्यैश्च न वदेद्यः कथाव्रती॥
सत्यं शौचं दयां मौनं मार्ज्जनं विनयन्तथा।
उदारं मानसं तद्वत् कुर्य्यादेव कथाव्रती॥
दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्म्मवान्।
अनपत्यो मोक्षकामः शृणुयात्तु कथामिमाम्॥
अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका।
स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः॥
एतेन विधिना दत्तं तदक्षयतरं भवेत्।
अत्युत्तमा दिना सप्त कोटियज्ञफलप्रदा॥
एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत्।
तज्जन्माष्टमीव्रतवत् कर्त्तव्यं फलकाङ्क्षिभिः॥
अकिञ्चनेषु भक्तेषु प्रायो नोद्यापनाग्रहः।
श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः॥
एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तदा।
पुस्तकस्य च वक्तुश्च पूजा कार्य्यातिभक्तितः॥

प्रसादस्तुलसीमाला श्रोतृभ्यश्चाथ दीयताम् ।
मृदङ्गतालललितं कीर्त्तनं कीर्त्यतां ततः ॥
जयशब्दो नमःशब्दः शङ्खशब्दश्च शीयताम् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नञ्च दीयताम् ॥
विरक्तश्चेद्भवेत् श्रोता गीता वाच्या परेऽहनि ।
गृहस्थश्चेत्तदा होमः कर्त्तव्यः कर्म्मशान्तये ॥
प्रतिश्लोकञ्च जुहुयाद्विधिना दशमस्य च ।
पायसं दधि सर्पिश्च तिलादिसमधूमंयुतम् ॥
अथवा हवनं कुर्य्याद्गायत्र्या सुसमाहितः ।
तन्मयत्वात् पुराणस्य परमस्यास्य तत्त्वतः ॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥
दोषयोः प्रशमार्थञ्च पठेन्नामसहस्रकम् ।
तेन स्यात् सफलं सर्व्वं नास्त्यस्मादधिकं यतः ॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः ।
दद्यात् सुवर्णं धेनुञ्च व्रतपूर्णत्वसिद्धये ॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ।
तत्रास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरम् ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥
आचार्य्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ।
एवं कृते विधाने च सर्व्वपापनिवारणे ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥
धर्म्मार्थकाममोक्षाणां साधनं नात्र संशयः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥
श्रीमद्भागवतेनैव भक्तिमुक्तिः प्रकाशिता ॥"
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये ६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण+"पारायणतुरायणेति ।" ५ । १ । ७२ । इति ठञ् ।) पाठकः । छात्रः । इति सिद्धान्तकौमुदी ॥

पारावकः, पुं, (पृ पूर्त्तौ+घञ् । पारं पूर्त्तिं कक्षतीति । कक गतौ+उकञ् ।) प्रस्तरः । इति शब्दरत्नावली ॥

पारावतः, पुं, (पारे गिरिदुर्गनद्यादिपरपारे आपततीति । पार+आ+पत+अच् । पृषोदरादित्वात् पस्य वः । उड्डीयने सुदक्षत्वादेवास्य तथात्वम् । यद्वा, परावद्दूरदेशस्तस्मिन् अन्तरीक्षादिदूरदेशे भवः उड्डीयमानः सन् स्थित इत्यर्थः । परावत्+अण् ।) पक्षिविशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः । छेदकण्ठः २ कपोतः ३ रक्तलोचनः ४ । इति रभसः ॥ पारापतः ५ कलरवः ६ अरुणलोचनः ७ मदनकाकुरवः ८ कामी ९ रक्तदृक् १० मदनमोहनः ११ कण्ठीरवः १२ गृहकपोतकः १३ ॥ (यथा,—
"सिंहो बली द्विरदकुञ्जरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः ॥"
इत्युद्भटः ॥)
अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तास्रदाहनाशित्वम् । बल्यत्वम् । वीर्य्यवृद्धिदातृत्वम् । इति राजनिर्घण्टः ॥ रसे पाके स्वादुत्वम् । कषायत्वम् । विशदत्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
"पारावतोऽन्यो वनदेशी कासको घुलघुलारवः ।
पारावताङ्घ्रिपिच्छश्च स्थेयो गलरवश्च सः ॥"
इति राजनिर्घण्टः ॥
मर्कटः । तिन्दुकः । इति मेदिनी । ते, २१२ ॥ गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥"
अम्लवर्गाणामन्यतमः । यथा, सुश्रुते । १ । ४२ ।
"दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्द्दबदरकोलप्राचीनामलकतिन्तिडीककोशाम्रभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठतक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥" * ॥ परात् शत्रोरहङ्कारात् अवति रक्षतीति । अव रक्षणे+शतृ । ततः पारावते इदमिति । तस्येदमित्यण् । दत्तात्रेयस्य गुरुः । इति चिन्तामणिः ॥)

पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीष् । पद्भावः ।) पारावताङ्घ्रिः । गयाफट्की इति भाषा ॥ इति रत्नमाला ॥ काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ९ अध्याये ।
"पारावतपदीदन्तीवाकुचीकेशराह्वयैः ।
काण्टकार्य्या च तत् पक्वं घृतं कुष्ठिषु योजयेत् ॥")

पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिर्मूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥

पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पश्चात्प्रदेशो यस्य ।) वनदेशीयपारावतः । इति राजनिर्घण्टः ॥

पारावती, स्त्री, (पारावतस्येव ध्वनिरस्त्यस्या इति । अच् । ततो ङीष् ।) गोपगीतम् । नदीभेदः । (यथा, हारीते प्रथमस्थाने ७ अध्याये ।
"तथा चर्म्मण्वती वेत्रवती पारावती तथा ॥")
लवलीफलम् । इति मेदिनी । ते, २१० ॥

पारावारं, क्ली, (पारं नद्यादिपरपारं आवृणोतीति । आ+वृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८१ ॥

पारावारः पुं, (पारावारं तटद्वयं पारं अवारञ्च वा अस्त्यस्येति । अच् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ५ । ५६ ।
"यदल्पं कीलालं कलयितुमशक्तः स तु नरः
कथं पारावाराकलनचतुरः स्याद्गतमतिः ॥")

पारावारीणः, त्रि, (पारावारं गच्छतीति । पारावार+"राष्ट्रावारपाराद्घखौ ।" ४ । २ । ९३ । इत्यत्र "अवारपारात्यन्तानुकामं गामी" इत्यत्र "अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् ।" इति वार्त्तिकोक्त्या खः ।) पारावारे गच्छति यः । पारावारशब्दात् गौणप्रत्ययनिष्पन्नः ॥

पाराशरं, क्ली, (पराशरेण कृतमिति । पराशर+अण् ।) पराशरोक्तभिक्षुसूत्रम् । इति पाराशरिशब्दटीकायां भरतः ॥ (उपपुराणविशेषः । इति पुराणम् ॥ घृतविशेषः । यथाह चक्रदत्तः ।
"यष्टीबलागुडूच्यल्पपञ्चमूलीतुलां पचेत् ।
शूर्पेऽपामष्टभागस्थे तत्र पात्रे पचेद्घृतम् ॥
धात्रीविदारीक्षुरसे त्रिपात्रे पयसोऽम्भसे ।
सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम् ॥")

पाराशरः, पुं, (पराशरस्यापत्यं पुमान् । पराशर+"ऋष्यन्धकेति ।" ४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशरकृतस्मृतिसंहिताविशेषः । यथा,—
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
अस्य विशेषविवरणन्तु पराशरशब्दे द्रष्टव्यम् ॥) पराशरसम्बन्धिनि, त्रि ॥

पाराशरकल्पिकः, पुं, (पाराशरः पराशरकृतः कल्पस्तं वेत्त्यधीते वा । "विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् ।" ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥

पाराशरिः, पुं, (पराशरस्यापत्यम् । "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) वेदव्यासः । इति भूरिप्रयोगः ॥

पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुमधीते इति । पाराशर्य्य+"पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।" ४ । ३ । ११० । इति णिनिः ।) मस्करी । चतुर्थाश्रमी । पराशरेण प्रोक्तं भिक्षुसूत्रं इत्यर्थे णो पाराशर तद्विद्वितेऽस्याध्ययनायेति नैकाजादिति इन् । इत्यमरभरतौ ॥

पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर+"गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ४ । ३२ ।
"पाराशर्य्य ! महाभाग । यत्त्वं पृच्छसि मामिह ॥")

पारिकाङ्क्षी, [न्] पुं, (पारमत्रास्तीति । इनिः । पारि ब्रह्मज्ञानं तत् काङ्क्षतीति । काङ्क्ष+णिनिः ।) तपस्वी । इत्यमरः । २ । ७ । ४२ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिजातः, पुं, (पारमस्यास्तीति पारी समुद्रस्तस्मात् जातः । समुद्रमन्थनकाले तद्गर्भजातत्वात् तथात्वम् । पारिणोऽद्रेर्जातः इति कश्चित् ।) पारिभद्रवृक्षः । सुरतरुः । इति मेदिनी । ते, २११ ॥ (समुद्रमन्थनकालेऽस्योत्पत्तिकथा यथा, भागवते । ८ । ८ । ६ ।

"ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥")
अस्योत्पत्तिहरणे यथा,—
"अदित्यानुज्ञतानुज्ञो देवराजो जनार्द्दनम् ।
यथावत् पूजयामास बहुमानपुरःसरम् ॥
ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् ।
देवोद्यानानि सर्व्वाणि नन्दनादीनि सत्तम ! ॥
ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
शैत्याह्लादकरं दिव्यं बालपल्लवशोभिनम् ॥
मथ्यमानेऽमृते जातं जातरूपमयत्वचम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ! ।
कस्मान्न द्वारकामेष नीयते कृष्ण ! पादपः ॥
इत्युक्तः स प्रहस्यैनं पारिजातं गरुत्मति ।
आरोपयामास हरिस्तमूचुर्वनचारिणः ॥
भोः शची देवराजस्य महिषी तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ।
शचीविभूषणार्थाय देवैरमृतमन्थने ।
उत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि ॥
अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥
तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ! ।
विपाककटु यत् कर्म्म न तच्छंसन्ति पण्डिताः ॥
इत्युक्ते तैरुवाचैतान् सत्यभामातिकोपिनी ।
का शची पारिजातस्य कोऽयं शक्रः सुरा-
धिपः ॥
सामान्यः सर्व्वलोकानां यद्येषोऽमृतमन्थने ।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥
यथा सुधा यथैवेन्दुर्यथा श्रीर्वनरक्षिणः ! ।
सामान्यः सर्व्वलोकस्य पारिजातस्तथा तरुः ॥
भर्त्तृबाहुमहागर्व्वा रुणद्ध्येनं यथा शची ।
तत् कथ्यतामलं चान्त्या सत्या हारयति द्रुमम् ॥
कथ्यतां वै द्रुतं गत्वा पौलम्यां वचनं मम ।
सत्यभामा वदत्येतदिति गर्व्वोद्धताक्षरम् ॥
यदि त्वं दयिता भर्त्तुर्यदि वश्यः पतिस्तव ।
मद्भर्त्तुर्हरतो वृक्षं तत् कारय निवारणम् ॥
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् ।
पारिजातं तथाप्येनं मानुषी हारयामि ते ॥
श्रीपराशर उवाच ।
इत्युक्ता रक्षिणो गत्वा शच्या प्रोचुर्यथोदितम् ।
शची चोत्साहयामास त्रिदशाधिपम् ॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिः ।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज ! ॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः ।
बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते ॥
ततो निरीक्ष्य गोविन्दो नागराजोपरिस्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
मुमोच च शरव्रातं सहस्रायुतसम्मितम् ॥
छिन्नेष्वशेषबाणेषु शस्त्रेष्वस्त्रेषु सत्वरम् ।
जग्राह वासवो वज्रं कृष्णश्चक्रं सुदर्शनम् ॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम ! ।
वज्रचक्रधरौ दृष्ट्वा देवराजजनार्द्दनौ ॥
क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान् हरिः ।
न मुमोच तथा चक्रं शक्र ! तिष्ठेति चाब्रवीत् ।
प्रनष्टवज्रं देवेशं गरुडक्षतवाहनम् ।
सत्यभामाब्रवीद्वीरं पलायनपरायणम् ॥
त्रैलोक्येश्वर ! नो युक्तं शचीभर्त्तुः पलायनम् ।
पारिजातस्रगाभोगा त्वामुपस्थास्यते शची ॥
श्रीपराशर उवाच ।
इत्युक्तो वै निववृते देवराजस्तया द्विज ! ।
प्राह चैनामलं चण्डि ! सख्युः खेदातिविस्तरैः ॥
न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीडा जायते विश्वरूपिणा ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्मादुयतश्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीडा कथं भवति देवि ! निराकृतस्य ॥
संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ! ॥
देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते ! ।
क्षन्तव्यं भवतैवैतदपराधं कृतं मया ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
गृहीतोऽयं मया शक्र ! सत्या वचनकारणात् ॥
श्रीशक्र उवाच ।
विमोहयसि मामीश ! मर्त्त्योऽहमिति किं वदन् ।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्त्यलोके त्वया मुक्ते नायं वै स्थास्यते भुवि ॥
तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ! ॥
अवतीर्य्याथ गरुडात् सत्यभामासहायवान् ।
निष्कुटे स्थापयामास पारिजातं महातरुम् ॥
यमभ्येत्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
वास्यते यस्य पुष्पाणां गन्धेनोर्व्वी त्रियोजना ॥
ततस्ते यादवाः सर्व्वे देहबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्व्वन्तो मुखदर्शनम् ॥"
इति विष्णुपुराणे पञ्चमेंऽशे पारिजातहरणे
३० । ३१ अध्यायौ ॥ (ऐरावतकुलजातनाग-
विशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ॥"
ऋषिविशेषः । यथा तत्रैव । २ । ५ । ११ ।
"पारिजातेन राजेन्द्र ! रैवतेन च धीमता ।
सुमुखेन च सौम्येन देवर्षिरमितद्युतिः ॥"
तन्त्रशास्त्रविशेषः । यथा आगमतत्त्वविलासे ।
"भुवनेश्वरीं पारिजातं प्रयोगसारसुत्तमम् ॥")

पारिजातकः, पु, पारिणोऽद्रेर्जातः पारिजातः
स्वार्थे कः । पारे जातो विष्णुपद्याः पारि-
जातेति शब्दितः ।' इत्यागमः ॥ देवतरुः । तत्-
पर्य्यायः । मन्दारः २ । इत्यमरः । २ । ४ । २६ ॥
पारिभद्रवृक्षः । पालितामादार इति भाषा ॥
"पारि पारं प्राप्तं जातं जन्म यस्य । 'पारिभद्रे
तु मन्दारुर्मन्दारः पारिजातकः ।' इति हड्ड-
चन्द्रः ॥" इत्यमरटीकायां भरतः ॥

पारिणाय्यं, त्रि (परिणये विवाहकाले लब्धम् ।
परिणय + ष्यञ् ।) परिणयलब्धं धनादिकम् ।
यथा,—
"मातुः पारिणाय्यं स्त्रियो विभजेरन् ॥"
इति दायभागधृतवशिष्ठवचनम् ॥

पारिणाह्यं, त्रि, (परिणाहमर्हतीति । परिणाह
+ ष्यञ् ।) गृहोपकरणशय्यासनकुण्डकटा-
हादि । यथा, मनुः । ९ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥"
"पारिणाह्यस्य गृहोपकरणस्य शय्यासनकुण्ड-
कटाहादेरवेक्षणे स्त्रीं नियोजयेत् ॥" इति
तट्टीकायां कुल्लूकभट्टः ॥

पारितथ्या, स्त्री, (परितस्तथ्याभूता परितथा ।
तत स्वार्थे ष्यञ् ।) सीमन्तिकास्थितस्वर्णादि-
रचितपट्टिका । सिंथी इति भाषा ॥ तत्-
पर्य्यायः । बालपाश्या २ । इत्यमरः । २ । ६ । १०३ ॥

पारितोषिकं, त्रि (परितोषेण लब्धं परितोषा-
दागतं वा । परितोष + शैषिकष्ठक् ।) आनन्द-
करम् । परितोषजनकद्रव्यम् । यथा,—
"ममापि चन्द्रशेखर-शरासनारोपणप्रथमवा-
दिनः पारितोषिकं धारयसि ।" इति मुरारिः ॥

पारिन्द्रः, पुं, (पारीन्द्र + पृषोदरादित्वात् ह्रस्वः ।)
सिंहः । इति हेमचन्द्रः । ४ । ३५० ॥

पारिपन्थिकः, पु, (परिपन्थं पन्थानं वर्ज्जयित्वा
व्याप्य वा तिष्ठति परिपन्थं हन्तीति वा । "परि
पन्थञ्च तिष्ठति ।" ४ । ४ । ३६ । इति ठक् ।)
चौरः । इति हेमचन्द्रः । ३ । ४५ ॥

पारिपाट्यं, स्त्री, (परिपाटी + ष्यञ् ।) परि-
पाट्या भावः । परिपाटीशब्दात भावे ष्यञ्प्रत्ययः ॥

पारियात्रः, पु, पर्व्वतविशेषः । तत्पर्य्यायः । पारि-
यात्रः २ । इति शब्दरत्नावली ॥ स तु विन्ध्यस्य
पश्चिमे मालवदेशस्य सीमापर्व्वतः ॥ (अयं
हि भारतस्यास्य वर्षस्य कुलपर्व्वतानामन्यतमः ।
यथा, मार्कण्डेये । ५७ । ११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः ॥"
अस्मादुद्भूतनद्यो यथा, तत्रैव । ५७ । १९—२० ।
"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेण्वा सानन्दिनी चैव सदानीरा मही तथा ।
पारा चर्म्मण्वती नपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः
स्मृताः ॥")

पारियात्रिकः पु, (पारियात्र + स्वार्थे कन् ।)
पारियात्रपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥

पारिपार्श्विकः, पु, (परिपार्श्वे वर्त्तते इति ।
परिपार्श्व + "परिमुखञ्च ।" ४ । ४ । २८ ।
इति चकारात् ठक् ।) तत्पर्य्यायः पार्श्वस्थः ।
इति हेमचन्द्रः ॥ त्रि, पार्श्ववर्त्ती । यथा, अमर-
कोषे । १ । ३ । ३१ ।
"माठरः पिङ्गलो दण्डश्चण्डांशोः पारि-
पार्श्विकाः ॥"

पारिप्लवं, त्रि, (परि+प्लु+अच् । ततः प्रज्ञाद्यण् ।) चञ्चलम् । इत्यमरः ।३।१।७५॥ (यथा, रघुः । ३ । ११ ।

"तयोपचाराञ्जलिखिन्नहस्तया

ननन्द पारिप्लवनेत्रया नृपः ॥")

आकुलः । इति मेदिनी । वे,६० ॥ (क्ली, तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । १२ ।

"ततः पारिप्लव गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।

अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत ॥"

पुं, जलपक्षी । इति रामानुजः ॥ यथा, रामायणे । ४ । ७७ । २३ ।

"पारिप्लवशतैर्जुष्टा बर्हिक्रौञ्चविनादिता ।

रमणीया नदी सौम्या मुनिसङ्घनिषेविता ॥"

पञ्चममन्वन्तरीयप्रकृतिविशेष. । यथा, हरिवंशे । ७ । २७ ।

"देवाश्चाभूतरजसस्तथा प्रकृतयोऽपरे ।

पारिप्लवश्च रैभ्यश्च मनोरन्तरमुच्यते ॥")

पारिभद्रः, पु, (परितो भद्रमस्मात् । परिभद्रस्ततः प्रज्ञाद्यण् ।) वृक्षविशेषः । पालितामादार इति भाषा ॥ तत्पर्य्यायः । निम्बतरुः २ मन्दारः३ पारिजातकः ४ । इत्यमरः ।२।४।२६॥ रक्तकुसुमः५ कृमिघ्नः६ बहुपुष्पः७ रक्तकेसरः८ । इति राजनिर्घण्टः ॥ अस्य गुणाः । अनिलश्लेष्मशोथमेदःकृमिनाशित्वम् । अस्य पुष्पगुणाः । पित्तरोगकर्णव्याधिनाशित्वम् । इति भावप्रकाशः ॥ देवदारु । इति मेदिनी ॥ सरलवृक्षः । इति शब्दचन्द्रिका ॥ (यज्ञवाहस्य पुत्त्रविशेषः । शाल्मलद्वीपस्य वर्षविशेषः । यथा, भागवते । ५ । २० । ९ ।

"तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञवाहः स्वसुतेभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् । सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमभिज्ञानमिति ॥")

पारिभद्रकः, पु, (पारिभद्र एव । स्वार्थे कन् ।) देवदारुवृक्षः । इत्यमरः ॥ (यथा, महाभारते । १ । १२५ । ३ ।

"पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ॥")

निम्बवृक्षः । कुष्ठौषधे क्ली । इति राजनिर्घण्टः ॥

पारिभाव्यं, क्ली, (परिभवाय रोगादिनाशाय हितम् । परिभव+ष्यञ् ।) कुष्ठौषधम् । इत्यमरः ।२।४।१२६ ॥ परिभुवो भावः । जामिनी इति भाषा ॥ यथा,—

"साक्षित्वं पारिभाव्यञ्च दानं ग्रहणमेव च ।

विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"

इति दायभागः ॥

पारिभाषिकं, क्ली, (परिभाषात आगतम् । परिभाषा+ठञ् ।) परिभाषयार्थबोधकं पदम् । यथा । तत्राधुनिकसङ्केतः परिभाषा तया अर्थबोधकं पदं पारिभाषिकम् । यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम् । इति शक्तिवादे गदाधरः ॥

पारिमाण्डल्यं, क्ली, (परिमण्डलस्य परमाणोर्भावः । परिमण्डल+ष्यञ् ।) परमाणुपरिमाणम् । यथा, भाषापरिच्छेदे । १५ ।

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥"

पारिमुखिकः, त्रि, (परिमुखं वर्त्तते इति । "परिमुखञ्च ।" ४ । ४ । २९ । इति ठक् ।) परिमुखेण तिष्ठति यः । सम्मुखवर्त्ती । परिमुखशब्दात् णिकप्रत्ययनिष्पन्नः ॥

पारियात्रः, पुं, (परितो यात्रया दृश्यते । "शेषे ।" ४।२।९२ । इत्यण् ।) पारिपात्रपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, गोलाध्याये । ३ । ४२ ।

"माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः

सह्यः सविन्ध्य इह सप्तकुलाचलाख्याः ॥")

पारियात्रिकः, पु, (पारियात्र एव । स्वार्थे ठक् ।) पारियात्रः । इति हेमचन्द्रः । ४ । ९७ ॥

पारियानिकः, पु, (परियानं प्रयोजनमस्य । परियान+ठञ् ।) अध्वरथः । इति हेमचन्द्रः । ३ । ४१६ ॥ परियातिकोऽपि पाठः ॥

पारिरक्षकः, पु, (परिरक्षति आत्मानमिति । परि+रक्ष+ण्वुल् । ततः प्रज्ञाद्यण् ।) मस्करी । तापसः । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिशः, पुं, वृक्षविशेषः । पलाशपिपुल इति गजहण्ड इति च भाषा ॥ तत्पर्य्यायः । फलीशः २ कपिचूतः ३ कमण्डलुः ४ गर्द्दभाण्डः ५ कन्दरालः ६ कपीतनः ७ सुपार्श्वकः ८ । अस्य गुणाः । दुर्जरत्वम् । स्निग्धत्वम् । कृमिशुक्रकफप्रदत्वम् । फले अम्लत्वम् । मूले मधुरत्वम् । कषायत्वम् । स्वादुमज्जकत्वञ्च । इति भावप्रकाशः ॥

पारिषदः, पु, परिषदि तिष्ठति यः । (परिषदि साधुः । परिषदो ण्यः इत्यत्र योगविभागात् णः ।) सभास्थः । तत्पर्य्यायः । सभ्यः २ सभास्तारः ३ सभासत् ४ परिषद्वलः ५ पर्षद्वलः ६ पारिषद्यः ७ पार्षदः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । १० । ३२ ।

"शङ्कुकर्णमुखाः सर्व्वे दिव्याः पारिषदास्तथा ॥"

परिषद इदम् । "पत्त्राध्वर्य्युपरिषदश्च ।" ४ । ३ । १२३ । इति अञ् ।) परिषत्सम्बन्धिनि, त्रि ॥

पारिषद्यः, पु, (परिषदं समवैति । "परिषदो ण्यः ।" ४ । ४ । ४४ । इति ण्यः ।) पारिषदः । इति शब्दरत्नावली ॥

पारिहारिकः, त्रि, (परिहारे साधुः । परिहार+ठञ् ।) परिहारकर्त्ता । परिहारं करोति यः इत्यर्थे णिकप्रत्ययनिष्पन्नः ॥

पारिहार्य्यः, पु, (परिह्रियते इति । परि+हृ+ण्यत् । ततः प्रज्ञाद्यण् ।) वलयः । इत्यमरः ॥ परिहारत्वे, क्ली ॥

पारिहास्यं, क्ली, (परिहास+ष्यञ् ।) परिहासस्य भावः । परिहासद्वारा कृतम् । यथा, श्रीभागवते । ६ । अजामिलोपाख्याने ।२।१४।

"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।

वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"

"नन्वयं पुत्त्रनामाग्रहीत् न भगवन्नाम तत्राहुः । साङ्केत्यं पुत्त्रादौ सङ्केतितम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थं कृतम् । हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति तट्टीकायां श्रीधरस्वामी ॥

पारी, स्त्री, (पारयत्यनयेति । पॄ पूर्त्तौ+णिच्+घञ् । ततो ङीष् ।) पूरः । जलसमूहः । कर्करी । हस्तिपादरज्जुः । इति मेदिनी । रे,५६॥ पात्री । परागः । इति विश्वः ॥ (पीयतेऽत्रेति । पा+क्विप् । तद्राातीति । रा+कः । ङीष् ।) पानपात्रम् । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ३७३ ।

"कर्पूरपारीपतितं मौरेयमिव हारितम् ॥")

दोहनपात्रम् । इति जटाधरः ॥

पारीक्षितः, पुं, परीक्षितराजः । इति शब्दरत्नावली ॥ जनमेजयः । परीक्षितोऽपत्यं इत्यर्थे ष्णप्रत्ययनिष्पन्नः ॥ (यथा, देवीभागवते । २ । ११ । १२ ।

"ततः सुवर्णवर्म्माख्यो राजा काशीपतिः किल ।

वपुष्टमां शुभां कन्यां ददौ पारीक्षिताय च ॥")

पारीणः, त्रि, (पारं गामीति । पार+"अवारपारात्यन्तानुकामं गामी ।" ५ । २ । ११ । इति खः ।) पारगमनकर्त्ता । पारं गच्छति इत्यर्थे खीनप्रत्ययनिष्पन्नः ॥ (यथा, भट्टिः । २ । ४६ ।

"त्रिवर्गपारीणमसौ भवन्त-

मध्यासयन्नासनमेकमिन्द्रः ॥")

पारीन्द्रः, पु, (पृ पालने+कर्म्मणि इन् । पारिः पशुस्तस्य इन्द्रः ।) सिंहः । अजगरसर्पः । इति हेमचन्द्रः ॥

पारीरणः, पु, (पार्य्यां जलपूरे रणं यस्य ।) कमठः । दण्डः । पटशाटकः । इति विश्वः ॥

पारुः, पु, (पिबति रसानिति । पा+"बाहुलकात् पिबतेश्च । ४ । १०१ । इत्यत्र उज्ज्वलदत्तोक्त्या रुः ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥

पारुष्यं, क्ली, (परुषस्य भावः । परुष+ष्यञ् ।) अप्रियभाषणम् । तत्पर्य्यायः । अभिवादः २ इत्यमरः । १ । ६ । १४ ॥ तत्तु चतुर्व्विधवाङ्मयपापान्तर्गतपापविशेषः । यथा,—

"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।

असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥"

इति तिथ्यादितत्त्वम् ॥

परुषत्वम् । दुर्व्वाक्यम् । इति मेदिनी । ये, ६४ । इन्द्रस्य वनम् । इति विश्वः ॥ अगुरु । इति शब्दचन्द्रिका ॥

पारुष्यः, पु, (परुषस्य भावः पारुष्यं दुर्व्वाक्य तदिव नीतिवाक्यमस्ति अस्यास्मिन् वा इत्यच् । बृहस्पतिः । इति मेदिनी । ये, ६४ ।

पारेरकः, पु, (वध्यादेः पारमीर्त्ते गच्छतीति । ईर्+ण्वुल् ।) खड्गः । इति शब्दमाला ॥

पार्घटं, क्ली, (पादे घटते इति अच् । ततः पृषोदरादित्वात् साधुः ।) पांशु । इति हारावली । १६२ ॥

पार्थः, पुं, पृथिवीपालः । (पृथाया अपत्यं पुमान् । शिवादित्वादण् ।) पृथापुत्त्रः । (यथा, महाभारते । ३ । २३५ । १ ।
"सरस्तदासाद्य वनञ्च पुण्यं
ततः परं किमकुर्व्वन्त पार्थाः ॥"
अर्ज्जुनः । यथा, भगवद्गीतायाम् । १ । २५ ।
"उवाच पार्थ । पश्यैतान् समवेतान् कुरूनिति ॥")
अर्ज्जुनवृक्षः । इति शब्दचन्द्रिका ॥

पार्थक्यं, क्ली, (पृथक् + भावे ष्यञ् ।) पृथक्त्वम् । पृथक् इत्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ ("घटप्रदीपवद् व्यञ्ज्यव्यञ्जकयोः पार्थक्यमेव ॥" इति साहित्यदर्पणम् ॥)

पार्थव, क्ली, (पृथोर्भावः । पृथु + अण् ।) पृथुता । पृथोर्भावः इति भावार्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (पृथुनामा राजा तस्येदमित्यण् । पृथुराजसम्बन्धिनि, त्रि । यथा, भागवते ।१ । ३ । १४ ।
"ऋषिभिर्याचितो भेजे नवमं पार्थवं वपुः ॥")

पार्थिव, क्ली, (पृथिव्या विकारः पृथिव्यां भवमिति वा अञ् ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

पार्थिवः, पुं, (पृथिव्या ईश्वरः ।) पृथिवी + "तस्येश्वरः ।" ५ । १ । ४२ । इति अञ् ।) राजा । इत्यमरः ॥ (यथा, मनुः । २ । १३९ ।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।
राजस्नातकयोश्चैव स्नातको नृपमानभाक् ॥"
वत्सरविशेषः । यथा,—
"बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने ।
सौराष्ट्रलाटदेशे च पार्थिवे नात्र संशयः ॥"
इति चिन्तामणिधृतवचनम् ॥
पृथिव्या अयं इत्यण् ।). शरावः । इति त्रिकाण्डशेषः ॥ (पृथिव्या विकार इति । "सर्व्वभूमिपृथिवीभ्यामणञौ ।"५। १ ।४१। इत्यञ् ।) पृथिवीविकृतौ, त्रि । इति मेदिनी ॥ (यथा भागवते । १ । २ । २४ ।
"पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ॥"
पृथिव्या निमित्तं संयोग उत्पातो वा ॥
पृथिवीसम्बन्धिनि, त्रि । यदुक्तम् ।
"मधुमत् पार्थिवं रजः ॥")

पार्थिवी, स्त्री, (पृथिव्यां भवा । "दित्यादित्येति ।" ४ । १ । ८५ । इत्यस्य सूत्रस्य वार्त्तिके "पृथिव्या ञाञौ ।" इत्युक्तेरञ् । ततो ङीप् ।) सीता । इति मेदिनी । वे, ४३ ॥

पार्परः, पुं, यमः । इति जटाधरः ॥

पार्व्वणः, पुं, (पर्व्वणि ग्रहणयोग्यः इत्यण् ।) मृगविशेषः । इति शब्दचन्द्रिका ॥ (पर्व्वणि क्रियते यत् तत् ।) अमावस्यापर्व्वसामान्ययोः कर्त्तव्यश्राद्धम् । यथा,—
"अमावस्यां यत् क्रियते तत् पार्व्वणमुदाहृतम् ।
क्रियते पर्व्वणि वा यत्तत् पार्व्वणमुदाहृतम् ॥"
इति भविष्यपुराणम् ॥
पर्व्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्व्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनयौगिकत्वेन पार्व्वणत्वप्राप्तौ अमावास्यायां पृथगभिधानं तदमावास्याश्राद्धस्य रूढित्वार्थं तेन पार्व्वणेन विधानेनेत्यादौ यौगिकनानावयवशक्त्यपेक्षया एकस्याः समुदायशक्तेर्लघुत्वात् अमावास्यापार्व्वणातिदेशो लभ्यते न तु पूपाष्टकादिपार्व्वणधर्म्मातिदेशः ।" इति श्राद्धतत्त्वम् ॥ * ॥ सामगानां तस्य प्रयोगो यथा,—
"विप्रामन्त्रणा श्राद्धकर्त्तौ सुखार्थं क्रमसूचनम् ।
श्राद्धपूर्व्वदिने मांसस्त्रीत्यागश्चैकभोजनम् ॥
श्राद्धाहे दन्तकाष्ठस्य त्यागः स्नानं तथोषसि ।
याम्यास्यत्वं पादशौचे वाक्यर्था विष्णुचिन्तनम् ॥
तस्मै पूजा स्वधादानं परभूस्वामिनेऽथवा ।
तत्र पितृभ्यश्चाग्रदानं रक्षार्दीपकुशद्विजाः ॥
श्राद्धानुज्ञा च गायत्री देवताभ्य इति त्रिधा ।
स्वस्त्यलप्रोक्षणं रक्षाजलस्थापनमेकतः ॥
पूर्व्वं विप्रकरे तोयं कुशासनमनन्तरम् ।
दक्षिणे देवविप्रस्य पितृविप्रस्य वामतः ॥
आवाहनार्घ्यं न्युब्जञ्च ततो गन्धादिपञ्चकम् ।
ऐशानीक्रमतो रेखा प्रागग्रा देवमण्डले ॥
नैरृतीक्रमतो रेखा दक्षाग्रा पितृमण्डले ।
पात्राणां तेषु विन्यासो होमप्रश्नोऽग्निहोमकः ॥
हुतशेषप्रदानञ्च पात्रालम्भोऽन्नवेशनम् ।
इदमित्यङ्गुलेः क्षेपस्तृणौ देवे यवस्य च ॥
पित्र्ये मन्त्रेण निःक्षेपस्तिलस्यापहता इति ।
मधुनोऽन्ने च निःक्षेपो गायत्र्यास्त्रिर्ज्जपस्ततः ॥
मधुवाता तृचा चैव मधुशब्दत्रयेण च ।
अन्नाभिमन्त्रणं तस्य ह्यानं जलनिवेदनम् ॥
गायत्र्यादित्रिकजपोऽप्यन्नहीनजपस्तथा ।
द्विजाभावेऽपि तृप्त्यर्थं गायत्र्यादित्रिकस्य च ॥
पुण्याख्यानस्य च जपः सतिलप्रोक्षिते कुशे ।
अग्निदग्धेतिमन्त्राभ्यां सतिलान्ननिवेदनम् ॥
हस्तक्षालस्याचमनं हरिस्मृतिर्जलस्य च ।
पित्रादिक्रमतो दानं गायत्र्यादिजपः पुनः ॥
शेषान्नपिण्डयोः प्रश्नो निहन्मीति च मण्डले ।
अपहतानिहन्मिभ्यां रेखायुग्मं पितृक्रमात् ॥
आस्तरो देवतेत्यस्य जप आवाहनं तिलैः ।
अवनेजनदानञ्च मधुवाता मधुत्रयम् ॥
अत्रानमो पिण्डदानं दर्भलेपापघर्षणम् ।
आचमनं स्मृतिर्व्विष्णोः पात्रक्षालावनेजनम् ॥
अत्रेत्यादिजपो वामावर्त्तनोदङ्मुखस्ततः ।
आवृत्यामीजपश्चैव न्यासत्यागोऽञ्जलिस्ततः ॥
नम इत्यादिकजपो वासोदानञ्च पूजनम् ।
वसन्तात जपश्चैव द्विजाग्रभूमिसेचनम् ॥
देवादिब्राह्मणे दानं जलान्नित्रितयस्य च ।
शिवा इत्यादिनाक्षय्यमघोरा गोत्रमित्यपि ॥
सपवित्रकुशाः पिण्डे स्वधावाचनमर्ज्जनम् ।
न्युब्जोत्थानं पितुः पश्चे दक्षिणादानमग्रतः ॥
विश्वेदेवाश्च दातारो देवतेतिजपस्त्रिधा ।
विसर्ज्जनं वाज इति आमावेति प्रदक्षिणम् ॥
अन्नादेः प्रतिपत्तिश्च वामदेव्यजपस्त्रिधा ।
दीपप्रच्छादनं हस्तक्षालमाचमने तथा ॥
अच्छिद्रवाचनं विष्णुस्मरणं शेषभोजनम् ।
उपवासदिने श्राद्धं मांसनराशिताशते ॥
तद्दिने मैथुनत्यागः श्राद्धकृच्छ्राद्धभोजिनोः ॥" * ॥
यजुषां विशेषो यथा,—
"आस्तरो देवताभ्यश्च तिलपुष्पजलैस्ततः ।
अवनेजनपिण्डौ च हस्तालेपापघर्षणम् ॥
हस्तक्षालस्याचमनं विष्णोः संस्मरणाय वै ।
अत्रेत्यादिजपो वामावर्त्तनोदङ्मुखस्ततः ॥
आवृत्यामीजपश्चैव न्यासः प्रत्यवनेजनम् ।
नीवीविस्रंसनञ्चैव तथैवाचमनद्वयम् ॥
नमो वः पितरः शुष्मायेत्यादिकषडञ्जलिः ।
ऋतुनत्यर्थमेवायं वासः पिण्डप्रपूजनम् ॥
देवादिब्राह्मणे दानं जलादित्रितयस्य च ।
शिवा इत्यादिनाक्षय्यमघोरा गोत्रमित्यपि ॥
दातारोऽन्नञ्चनश्चैव एताः सत्याशिषोऽत्विति ।
सपवित्रकुशाः पिण्डे स्वधावाचनमर्ज्जनम् ॥
आघ्राणञ्चैव पिण्डानां तेषामुत्तोलनन्ततः ।
न्युब्जोत्थानं पितुः पश्चे दक्षिणादानमग्रतः ॥
विश्वेदेवाश्च प्रीयन्तां दैवे वा जलमित्यपि ।
विसर्ज्जनं वाज इति आमावेति प्रदक्षिणम् ॥
अन्यत् सर्व्वं समानम् ।" इति श्राद्धप्रयोगतत्त्वम् ॥

पार्व्वतः, पुं, (पर्व्वते भवः । "विभाषा मनुष्ये ।" ४।२।१४४। इति पक्षे अण् ।) महानिम्बः । इति रत्नमाला ॥ घोडानिम् इति भाषा ॥ (अश्वविशेषः । यथा, महाभारते । १ । १३६ । २० ।
"भीमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः ॥")
पर्व्वतसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । १ । ६० । १० ।
"यावत् पृथिव्यां विहितं गवाश्वं
सहारण्यैः पशुभिः पार्व्वतैश्च ॥")

पार्व्वती, स्त्री, (पर्व्वतो हिमाचलस्तस्य तदधिष्ठातृदेवस्येति भावः अपत्यमिति । अण् ङीप् च ।) दुर्गा । इत्यमरः ॥ तस्या व्युत्पत्तिर्यथा,—
"तिथिभेदे कल्पभेदे पर्व्वभेदप्रभेदतः ।
ख्यातौ तेषु च विख्याता पार्व्वती तेन कीर्त्तिता ॥
महोत्सवविशेषश्च पर्व्वन्निति प्रकीर्त्तितम् ।
तस्याधिदेवी या सा पार्व्वती परिकीर्त्तिता ॥
पर्व्वतस्य सुता देवी साविर्भूता च पर्व्वते ।
पर्व्वताधिष्ठातृदेवी पार्व्वती तेन कीर्त्तिता ॥"
इति प्रकृतिखण्डे दुर्गोपाख्याने ५४ अध्यायः ॥
शल्लकी । गोपालपुत्त्रिका । इति मेदिनी ॥ द्रौपदी । जीवनी । इति विश्वः ॥ सौराष्ट्री । मृत्तिका । इति रत्नमाला ॥ क्षुद्रपाषाणभेदा । धातकी । सैंहली । इति राजनिर्घण्टः ॥

पार्व्वतीनन्दन, पुं, (पार्व्वत्या नन्दनः ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४२ ॥

पार्व्वतीयकुमार, पुं, (पार्व्वतीयः पार्व्वतीजातः कुमारः ।) पार्व्वतीपुत्त्रः । यथा,—
"स्वामिशाखविशाखाश्च नैगमेयस्तथैव च ।
पार्व्वत्याः कुमाराश्च चत्वारः परिकीर्त्तिताः ॥"
इत्यग्निपुराणम् ॥

पार्व्वतेयं, क्ली, (पर्व्वते भवम् । पर्व्वत+ढक् ।) सौवीराञ्जनम् । इति शब्दचन्द्रिका ॥

पार्व्वतेय:, पु, (पर्व्वते भवः । पर्व्वत+ढक् ।) सूर्य्यावर्त्तवृक्षः । इति रत्नमाला ॥ हुलहुलिया इति भाषा । पर्व्वतजाते त्रि ॥

पार्श्वः, पु, (पर्शुना आयुधेन जीवतीति । पर्शु + "पर्श्वादियौधेयादिभ्यामणञौ ।" ५ । ३ । ११७ । इति अण ।) पर्शुधारियोद्धा । पर्शुना युध्यते इत्यर्थे ण्यप्रत्ययनिष्पन्नः ॥

पार्श्वं, क्ली, पु, (स्पृश्यते इति । स्पृश + "स्पृशेः श्वण्शुनौ पृ च ।" उणां ५ । २७ । इति श्वण् पृ-आदेशश्च ।) कक्षाधोभागः । इत्यमरः ।२।६। ७८ ॥ पाश इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ३६ अध्याये ।
"तिर्य्यक् प्रणिहिते नेत्रे तथा पार्श्वावपीडिते ॥"
यथा, शकुन्तलायाम् १ अङ्के ।
"न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथ-
जवात् ॥")

पार्श्वं, क्ली, (स्पृश + श्वण् धातोः पृ-आदेशश्च ।) चक्रोपान्तम् । (पर्शूनां समूहः । अण् ।) पर्शुगणः । पार्श्वास्थिसमूहः । इति मेदिनी ॥ (अनृजुरुपायः । इति सिद्धान्तकौमुदी ॥)

पार्श्वः, पु, जिनः । (अयमेव जैनागमोक्तत्रयो-विंशतीर्थङ्करः । अस्य पिता विश्वसेनः माता च ब्राह्मी । यदुक्तं पार्श्वनाथचरित्रे । १० । ७१ ।
"श्रीलश्रीपार्श्वतीर्थेशो विश्वसेननृपालये ।
ब्राह्मीगर्भे जगन्नाथोऽवतरिष्यति सुक्षणे ॥"
तथा च तत्रैव । ११ । ३८ ।
"विश्वसेनपतेर्ब्राह्मा: सद्गर्भेऽवतरिष्यति ।
श्रीपार्श्वनाथ एवाद्यतीर्थकर्त्ता जगद्गुरुः ॥"
हेमचन्द्राचार्य्यादिमते तु अस्य पितृनाम अश्व-सेनः मातृनाम वामा ॥ * ॥
अस्य जन्मकालादिर्यथा तत्रैव । ११ ।४५—४६, ८६—८७ ।
"वैशाखकृष्णपक्षस्य द्वितीयायां तिथावथ ।
विशाखर्क्षे शुभमासे सुमुहूर्त्ते सुरेश्वरः ॥
अवतीर्णो दिवश्च्युत्वा भुक्त्वा भोगान् सुनिर्म्मले ।
राज्ञ्या गर्भे निरौपम्ये शुद्धस्फाटिकसन्निभे ॥"
"नामे मासि संपूर्णे पौषे मासि शुभोदयात् ।
कृष्णपक्षेऽनिले योगे शुभे एकादशीतिथौ ॥
शुभलग्नमुहूर्त्तादौ सुखुवेऽतिसुखेन सा ।
सती देवकुमारीभिः सेव्या तीर्थङ्करं सुतम् ॥"
बाल्यकाले एवास्य वैराग्योत्पत्तिर्जाता । ततोऽसौ संसारासक्तिं तुच्छीकृत्य गृहादिकं विहाय वनं प्रस्थितवान् । एतत्प्रचलितमतं यथा, तत्रैव । १४ । ७८-८० ।
"मिथ्यात्वेनाविरत्या च प्रमादेन कषायतः ।
दुष्टयोगेन मूढानां महापापं प्रजायते ॥
पञ्चाग्निसाधनेनैव पृथिव्याद्यङ्गिराशयः ।
म्रियते षड्विधः सत्त्वस्तेषु तत्तापतो भृशम् ।
जीवघातेन घोराघं तस्य पाकेन दुर्गतिः ।
जायते च महद्दुःखं तापसानां दुरात्मनाम् ॥
ज्ञानहीनो वपुःक्लेशो वृथा पापास्रवाङ्गिणाम् ।
दयां विना तपो धर्म्मः सर्व्वमस्ति निरर्थकम् ॥
तुषखण्डनयोगेन लभ्यन्ते तण्डुला यथा ।
न तथा ज्ञानकष्टेन मोक्षमार्गादयः क्वचित् ॥
यथाम्बुमथनान्नैवोत्पद्यते जातुचिद्घृतम् ।
तथा हिंसाकरेणैव तपसाच सुखादि च ॥
अज्ञानाधर्म्मयोगात्था स्वर्णा गोशृङ्गाच्च पयो न हि ।
जायते जातु धर्म्मो वा सुखं पञ्चाग्निसाधनात् ॥
दावभीत्या यथान्धो धावन्नपि म्रियते यथा ।
कुर्व्वन्नपि तपो ज्ञानी मज्जत्येव भवार्णवे ॥
हेयाहेयविचारश्च पुण्यपापं हिताहितम् ।
देवादेवं भवं मोक्षं स्वास्रवं सम्वरं शुभम् ॥
निर्ज्जरां तत्त्वविज्ञानं गुरुं चक्रगुरुं शुभम् ।
कुशास्त्रं वेत्ति नाज्ञानी जात्यन्ध इव दन्तिनम् ॥
अतो जैनमतं तथ्यं धर्म्मजीवदयावहम् ।
तपोनाथं गृहाण त्वं त्यक्त्वमिथ्या दुराग्रहम् ॥
नैग्रन्थतपसा मोक्षः सुखं वाचामगोचरम् ।
अज्ञानं तपसा दुःखं भ्रमणञ्च भवाटवौ ॥
भवन्नस्नेहेन तथ्यं ते हितञ्च धर्म्मसाधनम् ।
वचः प्रोक्तं मयेति त्वां हीच्छता शुभमञ्जसा ॥"
तत्प्रचलितानुप्रेक्षादिमतं तत्रैव १५ अध्याये विशेषतो द्रष्टव्यम् ॥ * ॥
जैनशास्त्रोक्ततत्त्वादीनि यथा, तत्रैव २० अध्याये ।
"शृणु तत्त्वं गणाधीश । सार्द्धं द्वादशभिर्गणैः ।
तत्त्वादीनि प्रवक्ष्येऽहं स्वैकचित्तेन संप्रति ॥
जीवादिसत्पदार्थानां याथार्थ्यं तत्त्वमिष्यते ।
सम्यग् जैनागमे तत्त्वं विद्धि नान्यत् कुशासने ॥
जीवाजीवास्रवबन्धः स्वम्वरो निर्ज्जरा शिवः ।
इत्युक्तानि जिनाधीशैः सप्त तत्त्वानि चागमे ॥
संसारिमुक्तभेदेन द्विधा जीवा भवन्त्यहो ।
मुक्ता भेदविनिष्क्रान्ता अनन्तगुणभाजनाः ॥
भव्याभव्यप्रभेदेन द्विधा संसारिणोऽङ्गिनः ।
त्रसस्थावरभेदेन वा मुक्तिभव गामिनः ॥
एकाद्या विकलाद्याः पञ्चाक्षाश्चेति ते मताः ।
देवनारकतिर्य्यग्नृभेदा इति चतुर्व्विधाः ॥
एकद्वित्रिचतुःपञ्चेन्द्रियैर्हीनाः पञ्चधा ।
पृथ्व्यप्तेजोमरुद्वृक्षत्रसभेदात् षडङ्गिनः ॥
संज्ञिनोऽसंज्ञिनोह्यद्याद्याश्च हि चतु-
रिन्द्रियाः ।
एकाद्या वादराः सूक्ष्माः सप्तधेत्यङ्गिराशयः ॥
पर्य्याप्तेतरभेदेन ताः सप्त जीवयोनयः ।
गुणिता अखिला जीवसमासाः स्युश्चतुर्द्दश ॥
अष्टधा धातवो वादरसूक्ष्मेण चतुर्व्विधा ।
नित्येतरनिकोता हि विकलत्रयदेहिनः ॥
संज्ञिनोऽसंज्ञिनः सुप्रतिष्ठिताः अप्रतिष्ठिताः ।
इति संसारिणो जीवभेदा एकोनविंशतिः ॥
ते पर्य्याप्तेतरालब्धिपर्य्याप्तैर्गुणिता भुवि ।
सर्व्वे जीवसमासाः सप्तपञ्चाशत्प्रमा मताः ॥
स्थावराश्च द्विचत्वारिंशद्भेदाः सुरनारकाः ।
द्विधापञ्चाक्षतिर्य्यञ्चश्चतुर्व्विंशत्प्रमाः स्मृताः ॥
नवधा मानवाश्चैव नवधा विकलाङ्गिनः ।
इति जीवसमासाः स्युरष्टानवतिसंख्यकाः ॥
पृथ्व्यप्तेजःसमीरा अष्टधा वादरसूक्ष्मताः ।
नित्येतरनिकोताश्चतुर्द्धा वादरसूक्ष्मतः ॥
निकोतसहितास्तद्रहिताः प्रत्येककायिनः ।
एकत्र मेलिता एते सर्व्वे भेदाश्चतुर्द्दश ॥
एकाद्या गुणितास्ते द्विचत्वारिंशत्प्रमाः स्फुटम् ।
पर्य्याप्तकेतरालब्धिपर्य्याप्तैः स्युर्जिनागमे ॥
द्विप्रकाराः सुराः स्युः पर्य्याप्तापर्य्याप्तभेदतः ।
तथा च नारको ज्ञेयो द्विधा दुःखाब्धिमध्यगः ॥
जलस्थलनभश्चारिणः संज्ञासंज्ञिभेदतः ।
षड्विधा गर्भजा जीवाः पञ्चेन्द्रियसमाह्वयाः ॥
भोगभूमिभवा जीवा द्विधा स्थलखगामिनः ।
ते सर्व्वे मेलिता अष्टभेदाश्च गुणिताः पुनः ॥
पर्य्याप्तेतरभेदाभ्यां षोडशैव भवन्त्यपि ।
संज्ञासंज्ञित्वभेदाभ्यां जलस्थलखचारिणः ॥
षड्वासम्मूर्च्छनास्ते पर्य्याप्तियुक्तास्तथेतराः ।
भवन्त्यलब्धिपर्य्याप्तकाः प्रत्येकं किलाङ्गिनः ॥
कृता एकत्र ते सर्व्वे भेदा अष्टादशप्रमाः ।
गर्भसम्मूर्च्छिताः सर्व्वे स्युश्चतुर्व्विंशदङ्गिनः ॥
आर्य्यम्लेच्छभवा भोगकुभोगभूमिजा नराः ।
अष्टभेदा मता वै पर्य्याप्तापर्य्याप्तभेदतः ॥
सम्मूर्च्छिनो मनुष्या अलब्धिपर्य्याप्तसंज्ञकाः ।
इति विश्वे भवन्त्यत्र नव भेदा नृयोनिजाः ॥
पर्य्याप्तादित्रिभेदेन गुणिता विकलाङ्गिनः ।
नवधा श्रीजिनैः प्रोक्ता ज्ञानतन्त्रेश्वरागमे ॥
अष्टानवतिरेते जीवसमासा विचक्षणैः ।
विज्ञेया यत्नतस्तेषां दया कार्य्या सुमुक्षुभिः ॥
भूतोदकाग्निवाताख्या नित्येतरनिकोतकाः ।
सप्तसप्तपृथग्लक्षाश्च वनस्पतयो दश ॥
द्वित्रितुर्य्येन्द्रिया द्वौ द्वौ लक्षौ देवाश्च नारकाः ।
पशवो हि चतुर्लक्षाश्चतुर्द्दशनृजातयः ॥
चतुरशीतिलक्षा इमा जीवजातयोऽखिलाः ।
रक्षणीया प्रयत्नेन ज्ञात्वा दक्षैः स्वमुक्तये ॥
कोटीकोटैकानवनवतिलक्षाश्च कोटयः ।
सत्पञ्चाशन्सहस्रा इत्यखिलाङ्गिकुलान्यपि ॥
जीवितः प्राणनादौ हि जीविष्यति पुनः सदा ।
जीवत्ययं ततस्तज्ज्ञैर्जीवद्रव्यं किलोच्यते ॥
अक्षजाः पञ्च च प्राणा मनोवाक्कायतस्त्रयः ।
आयुरुच्छ्वासनिश्वासौ दशेति संज्ञिनां मताः ॥
असंज्ञिनां नवस्युस्ते विनाच्च मनसाखिलाः ।
चतुरेन्द्रियजीवानां ह्यष्टौ कर्णौ विना स्मृताः ॥
त्रीन्द्रियाणां विना चक्षुः सप्त प्राणाः प्रकीर्त्तिताः ।
द्वीन्द्रियाणां हि षट्प्राणाः कथिता नासिकां
विना ॥
मुखवाग्भ्यां विनैकाद्यानां प्राणाः स्युश्चतुः-
प्रमाः ।
यथायोग्यमपर्य्याप्तानां ज्ञेयास्ते जिनागमे ॥
आहाराङ्गेन्द्रियोच्छ्वासनिश्वासवाक्यचेतसः ।
षड्वा पर्य्याप्तयश्चेति विज्ञेया संज्ञिदेहिनाम् ॥
विकला संज्ञिनां पञ्चपर्य्याप्तयो मनो विना ।
चतुःपर्य्याप्तयो ज्ञेया एकाद्यानां वचो विना ॥
निश्चयेन भवेत् केवलज्ञानदृक्मयोऽसुमान् ।

अनन्तसुखवीर्याद्यासिद्धसादृश्य एव हि ॥
व्यवहारेण मत्यादिविभावगुणसंयुतः ।
नेत्रादिदर्शनैर्युक्तः प्राणी कर्म्मकृतैः कलौ ॥
मूर्त्तपुद्गलसंयोगान्मूर्त्तो गौणव्यवहारतः ।
अमूर्त्तो निष्कलः शुद्धो ज्ञानमूर्त्तिश्च निश्चयात् ॥
व्यवहारे नयेनाशुद्धस्वरूपस्य चात्मना ।
कर्म्मणो कर्म्मणां कर्त्ता भोक्ता तत्फलमञ्जसा ॥
उपचारन्दधानाख्या नयेन प्राणभृद्भुवि ।
कटवस्त्रगृहादीनां कर्त्ता च शिल्पिकर्म्मणाम् ॥
अशुद्धनिश्चयेनाङ्गी कर्त्ता च भावकर्म्मणाम् ।
रागद्वेषमदोन्मादशोकादिविषयात्मनाम् ॥
शाश्वतस्वजनान्मृत्युः प्रादुर्भावाद्यसम्भवः ।
द्रव्यरूपेण नित्यत्वं चतुर्गतिषु देहिनाम् ॥
जायतेऽतो गणाधीशैरुत्पादव्यय एव च ।
ध्रौव्यभावोऽत्र संप्रोक्तः सर्व्वेषां व्यवहारतः ॥
कायप्रमाण आत्मायं पर्य्यायनयतः क्वचित् ।
युक्तः प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥
विना सप्तसमुद्घातैर्निश्चयेन भवेन पुनः ।
कर्म्मोत्पन्नाङ्गहीनाङ्गी ह्यसंख्यातप्रदेशमः ॥
वेदनाख्यः कषायाख्यो विकुर्व्वणसमाह्वयः ।
मारणान्तिकसंज्ञस्तैजसाहारकसंज्ञकौ ॥
केवलाख्यः समुद्घाताः सप्तेति श्रीजिनैर्मताः ।
केवल्यतैजसाहारायोगिनां स्युः परेऽङ्गिनाम् ॥
पुण्यपापफलानां हि विविधानां चतुर्गतौ ॥
शर्म्माशर्म्मकराणां प्राणी भोक्ता व्यवहारतः ॥
स्वस्वरूपस्य कर्त्ता शुद्धनिश्चयनयादसौ ।
जन्मम्रत्युजरातीतो न कर्त्ता बन्धमोक्षयोः ॥
अतोऽत्रात्माप्यसौ ध्येयो निर्व्विकल्पपदाश्रितैः ।
गुणैः सिद्धेन सादृश्यो ज्ञानमूर्त्तिरमूर्त्तिमान् ॥
यथाग्निकणिकेनात्र दह्यन्ते काष्ठराशयः ।
अनन्तकर्म्मकाष्ठानि तथाध्यानलवाग्निना ॥
दन्तभग्नो यथा नागो दंष्ट्राभग्नोत्तमो हरिः ।
स्वकार्य्ये च तथा ध्यानहीनः कर्म्मारिघातने ॥
चिन्तामणिश्च रत्नानां कल्पवृक्षोऽत्र शाखिनाम् ।
त्रिदशानां यथा शक्रो नृणां मध्ये परो जिनः ॥
आत्मतत्त्वञ्च तत्त्वानां पदार्थानां तथा महान् ।
स्वकीयात्मपदार्थो द्रव्याणां स्वद्रव्य एव हि ॥
इति मत्वा स्वसंसिद्ध्यै मनः कृत्वातिनिश्चलम् ।
विषयेभ्यो विनिष्क्रान्तं संवेगादिगुणाङ्कितम् ॥
सर्व्वद्रव्यबहिर्भूतोऽप्यनन्तगुणसागरः ।
सर्व्वावस्थासु सर्व्वत्र स्वात्मा ध्येयो मुमुक्षुभिः ।
इत्यात्मतत्त्वमाख्याय तीर्थनाथो गणान् प्रति ।
मार्गणादिकमाख्यातुं प्रारेभे मार्गसिद्धये ॥
गतिरिन्द्रियकायौ हि योगवेदकषायकः ।
ज्ञानसंयमदृग्लेश्याभव्यसम्यक्त्वसंज्ञिनः ॥
आहारं मार्गणाश्चेति चतुर्दश निरूपिताः ।
जिनैस्तासु बुधैर्मृग्यो जीवतत्त्वो महाचिदे ॥
मिथ्याशासादनौ मिश्रो विरताख्यश्चतुर्थकः ।
देशविरताख्यः प्रमत्तोऽप्रमत्तसंज्ञकः ॥
अपूर्व्वकरणो नाम्ना निवृत्तिकरणाभिधः ।
द्विसूक्ष्मसाम्परायोपशान्तक्षीणकषायकाः ॥
सयोग्ययोगिनामानौ सद्गुणाश्रयणादिमे ।
चतुर्दश जिनैः प्रोक्ता गुणस्थानगुणाकराः ॥
मुक्तेः सोपानमाला एते भव्यानां जिनोदिताः ।
अभव्यानां किलैको मिथ्यागुणस्थानशाश्वतः ॥
हीनाधिकगुणैर्युक्ता अन्येष्वस्तेषु धीयुतैः ।
गुणानां स्थानकेष्वङ्गिनः परीक्ष्य गुणाग्रजैः ॥
इत्यादिवाक्सुधापूरैराप्लाव्य निखिलां सभाम् ।
अजीवतत्त्वमाख्यातुं पुनरारब्धवान् प्रभुः ॥
पुद्गलो बहुधा धर्म्मोऽधर्म्म आकाश एव हि ।
कालश्चेति जिनैः प्रोक्तो जीवद्रव्योऽत्र पञ्चधा ॥
पूरणाद्गलनाद्दक्षैः पुद्गलोऽयं निरूपितः ।
सतोऽनेकविधः सार्थनामकः कर्म्मदेहकृत् ॥
अष्टौ स्पर्शा रसाः पञ्च वर्णाः पञ्च गन्धौ द्विधा ।
इति विंशतिरस्यैव गुणाः प्रोक्ता द्विधात्मकाः ॥
शुद्धाणोर्ये गुणाः शुद्धा मताः स्वाभाविकाश्च ते ।
गुणाः स्कन्धेषु ये शुद्धा विभवाख्या हि ते बुधैः ॥
अणुस्कन्धविभेदेन पुद्गलस्य द्विधा स्थितिः ।
स्निग्धरूक्षमयाणूनां सङ्घातः स्कन्ध उच्यते ॥
अणवः कार्य्यलिङ्गाः स्युरन्त्रैकैकतयाखिलाः ।
नित्या द्रव्यार्थिकेनानित्याः पर्य्यायार्थिकेन च ॥
सूक्ष्मसूक्ष्मास्तथा सूक्ष्माः सूक्ष्मस्थूलाभिधाः परे ।
स्थूलसूक्ष्मात्मकाः स्थूलाः स्थूलस्थूलाश्च पुद्गलाः ॥
एकोऽणुः सूक्ष्मसूक्ष्मः स्यादृष्टो नयनैर्नृणाम् ।
सूक्ष्मास्तेऽपि मताः सद्भिर्ये कर्म्ममयपुद्गलाः ॥
रसनस्पर्शनघ्राणश्रोत्रैर्ये यान्ति पुद्गलाः ।
व्यक्ततां ते समुद्दिष्टाः सूक्ष्मस्थूला जिनागमे ॥
स्थूलसूक्ष्मा जिनैर्ज्ञेयाश्छायाज्योत्स्नातपादयः ।
जलज्वालादयः स्थूला उच्यन्ते पुद्गला बुधैः ॥
भूकायाद्रिविमानाद्याः स्थूलस्थूलपुद्गलाः ।
षड्भेदा इति तीर्थेशैः पुद्गला हि निरूपिताः ॥
शब्दो बन्धस्तथा सूक्ष्मः स्थूलः संस्थानसंज्ञकः ।
भेदस्तमस्तथाच्छायाद्युद्योतातपादयः ॥
एते पुद्गलपर्य्याया विभावाख्या मता जिनैः ।
स्वाभाविकाश्च पर्य्याया अणुरूपाः पृथक् पृथक् ॥
शरीरवाङ्मनःप्राणापानदुःखसुखादिकान् ।
कुर्व्वन्ति पुद्गला जीवानां मृत्युजीवितादिकान् ॥
जीवपुद्गलयोः साह्यकर्त्ता जिनैर्मतो गतौ ।
अमूर्त्तो निष्क्रियो धर्म्मो मत्स्यानाञ्च यथा जलम् ।
सहकारी मतो धर्म्मः स्थितौ पुद्गलजीवयोः ।
अमूर्त्तो निष्क्रियो नित्यो यथा च्छायाध्वगामिनाम् ॥
लोकालोकविभेदेन द्विधाकाशश्च मूर्त्तिमान् ।
अवकाशप्रदः सर्व्वद्रव्याणां निष्क्रियोऽव्ययः ॥
पदार्था यत्र लोक्यन्ते लोकाकाशो मतो हि सः ।
तस्माद्बहिरनन्तोऽप्यलोकाकाशोऽस्ति केवलः ॥
धर्म्माधर्म्मैकजीवाना लोकाकाशस्य सन्ति च ।
असंख्याताः प्रदेशा हि पुद्गलानामनेकधा ॥
निश्चयव्यवहारेण द्विधा कालोऽतिनिष्क्रियः ।
द्रव्याणां सहकारी परिणतौ वर्त्तिवर्ज्जितः ॥
समयादिमयः कालो व्यवहारोऽत्र लक्ष्यते ।
गोदोहादिक्रियाद्यैः परत्वापरत्वयोगतः ॥
भिन्नाभिन्नाणवो येऽत्र लोकाकाशे सुसंस्थिताः ।
राशयश्चैव रत्नानां स कालो निश्चयाभिधः ॥
एकत्र सह जीवेन षड्द्रव्या मुनिभिः स्मृताः ।
ते कालेन विना ज्ञेयाः पञ्चास्तिकायसंज्ञकः ॥
पुद्गलौघो य आयाति कर्म्मरूपोऽत्र रागिणः ।
द्रव्यभावविभेदेन द्विधा स आस्रवो भवेत् ॥
रागद्वेषादियुक्तेन परिणामेन येन हि ।
आस्रवत्यत्र कर्म्माणि स स्याद्भावास्रवोऽ-ङ्गिनाम् ॥
मिथ्यात्वपञ्चकं द्वादशधा विरतयोऽशुभाः ।
प्रमादा हि त्रयश्चैव योगाः पञ्चदशात्मकाः ॥
सर्व्वदुःखाकरीभूताः कषायाः पञ्चविंशतिः ।
एतेऽत्र प्रत्यया ज्ञेया भावास्रवनिबन्धनाः ॥
आयाति कर्म्मरूपेण पुद्गलौघोऽत्र योगिनः ।
द्रव्यास्रवः स विज्ञेयोऽप्यनन्तभवकारकः ॥
ध्यानाद्यैरास्रवो रुद्धो यैस्ते स्युर्मुक्तिवल्लभाः ।
अन्यथा विफलक्लेशास्तपोदृत्तादितः सताम् ॥
संश्लेषो जीवकर्म्मणोर्यः सम्बन्धो द्विधा मतः ।
भावद्रव्यप्रभेदेन विश्वाशर्म्माकरोऽशुभः ॥
बध्यन्ते येन भावेन रागादिदूषितेन हि ।
कर्म्माणि भावबन्धोऽत्र सोऽनन्तसंसृतिप्रदः ॥
प्रकृतिस्थितिबन्धानुभागप्रदेशतोऽङ्गिनाम् ।
चतुर्धा बन्ध आम्नातोऽत्रानेकविक्रियाकरः ॥
प्रकृतिः स्वभावः स्याच्च स्थितिः कालावधारणम् ।
रसतुल्योऽनुभागः प्रदेशो जीवप्रदेशयुक् ॥
सप्रकृतिप्रदेशाख्यौ बन्धौ च योगतो सताम् ।
स्थित्यनुभागबन्धौ कषायैर्भवनिबन्धनौ ॥
यथा बन्धनबन्धो लभते दुःखमनेकशः ।
कर्म्मशृङ्खलबद्धोऽङ्गी तथा श्वभ्रादिदुर्गतौ ॥
सर्व्वास्रवनिरोधो यो ध्यानाद्यैर्द्रव्यभावतः ।
स द्विधा संवरः प्रोक्तः स्वर्गमुक्त्यादिकारकः ॥
चैतन्यपरिणामो य एकीभूतो निजात्मकः ।
निर्व्विकल्पमयो ज्ञेयो भावसंवर एव सः ।
त्रयोदशविधं वृत्तं परो धर्म्मो दशात्मकः ।
द्विषड्भेदा अनुप्रेक्षाः परीषहजयोऽखिलः ॥
पञ्चधा संयमो ध्यानश्रुताध्यायसंयमादयः ।
भवन्त्यमी सतां सर्व्वे भावसंवरकारणम् ।
निरोधः क्रियते योऽत्र कर्म्मणां यत्नतो बुधैः ।
सद्द्रव्यसंवरः प्रोक्तोऽप्यनन्तगुणसागरः ॥
संवरेण स्वयं वृत्य दत्तेऽत्रालिङ्गनं सदा ।
सतां स्वर्गोऽपि मुक्तिश्रीर्नान्यथा क्लेशकोटिभिः ॥
प्राक्तनः कर्म्मबन्धो यः कालेन तपसाथवा ।
क्षीयते निर्ज्जरा सा च विपाकेन द्वता द्विधा ॥
कर्म्मपाकेन या जाता सविपाकाखिलात्मनाम् ।
सा यथाजनिता हेया परकर्म्मनिबन्धनाः ॥
संवरेण समं यात्र निर्ज्जरा क्रियते बुधैः ।
तपोभिः साविपाका प्रादेयानेकसुखाकरा ॥
निर्ज्जराकर्म्मणामत्र जायतेऽपि यथा यथा ।
आयाति निकटं मुक्तिस्तनकारिणां तथा तथा ॥
अत्यन्तं योऽत्र विश्लेषः कर्म्मात्मनो स्वयोगिनाम् ।
काललब्ध्या स मोक्षः स्यात् द्रव्यभावाद्द्विधात्मकः ॥
क्षये हेतुर्व्वरो यः परिणामोऽखिलकर्म्मणाम् ।

भावमोक्षः स विज्ञेयः कर्म्ममोक्षनहेतुकृत् ॥
समस्तकर्म्मदेहाद्यैरात्मा जायते पृथक् ।
तदैव द्रव्यमोक्षः स्यादनन्तगुणदायकः ॥
व्यापारमस्तकाब्जं यथा बद्धो बन्धनैर्दृढैः ।
मोचनाल्लभते सौख्यं तथा मुक्तौ विधेः क्षयात् ॥
तस्मात् कर्म्मातिगो जीव ऊर्द्ध्वगत्येरण्डबीजवत् ।
समयेन व्रजेदूर्द्ध्वं यावल्लोकाग्रमस्तकम् ॥
ततेर्वाप्यानिराबाधः सोऽग्रे गमनवर्ज्जितः ।
सिद्धो धर्म्मोऽस्ति कायाभावादनन्तसुखा-
श्रितः ॥
तत्र भुङ्क्ते निराबाधं स्वात्मजं विषयातिगम् ।
उत्कृष्टमव्ययं तं स सिद्धः शुद्धो महान् सुखम् ॥
अक्षातीतं निरौपम्यं शाश्वतं सुखमव्ययम् ।
अनन्तं परमं ह्यन्यद्रव्यानपेक्षमेव हि ॥
यद्देवमनुजैः सर्व्वैः सुखं त्रैलोक्यगोचरम् ।
भुक्तं तस्मादनन्तं तज्जायते परमेष्ठिनाम् ॥
एकेन समयेनैव भुञ्जानानां गुणाष्टकैः ।
सिद्धानामशरीराणां सर्व्वोत्कृष्टं व्ययच्युतम् ॥
इति विविधविभागैः सप्ततत्त्वानि सूक्ष्मे
दृगवगमसुबीजानि प्रकृष्ट्याप्तवान् यः ।
परसुरमपि भव्यानाञ्चकार स्वबीजे-
रनन्तपरमतुल्यैर्भेऽत्र दद्यात् स्वशक्तिम् ॥
पार्श्वः सर्व्वसुखाकरोऽसुखहरः पार्श्वं श्रिता
धर्म्मिणः
पार्श्वेनाशु समाप्यतेऽमरपदं पार्श्वाय मूर्द्ध्ना नमः ।
पार्श्वान्नास्ति हितङ्करो भवभृतां पार्श्वस्य मुक्तिः
प्रिया
पार्श्वे चित्तमहं दधेऽखिलचिदे मां पार्श्व ! पार्श्वं
नय ॥"
इति श्रीपार्श्वनाथचरित्रे २० सर्गः ॥*॥)

सन्निकृष्टे, त्रि । इति हेमचन्द्रः ॥

पार्श्वकः, त्रि, (ऋजुरुपायः पार्श्वं तेन अन्विच्छति अर्थानिति । "पार्श्वेनान्विच्छति ।" ५ । २ । ७५ । इति कन् ।) शाठ्येन विभवान्वेषी । यथा, —
"कुसृत्या विभवान्वेषी पार्श्वकः सन्धिजीवकः ।"
इति हेमचन्द्रः ॥
स्वार्थे के पार्श्वार्थोऽपि । (यथा, याज्ञवल्क्ये । ३ । ८६ ।
"तन्मध्ये हे ललाटाक्षिगण्डे नासाघनास्थिका ।
पार्श्वकास्थालकैः सार्द्धमर्च्चदैश्च द्विसप्तति ॥")

पार्श्वतः, [स्] व्य, (पार्श्व + "आद्यादिभ्य उपसंख्यानम् ।" ५ । ४ । ४४ । इत्यस्य वार्त्तिकोक्त्या तसिः ।) पार्श्वात् । पार्श्वे । इत्यादि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, रघुः । १६ । ३१ ।
"मित्रकृत्यमपदिश्य पार्श्वतः
प्रस्थितं तमनवस्थितं प्रियाः ॥")

पार्श्वतीयः त्रि, (पार्श्वतो भवः । पार्श्व + "मुखपार्श्वतसोर्लोपश्च ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या छः ।) पार्श्वसम्बन्धी । पार्श्वतो भवः । इति सिद्धान्तकौमुदी ॥

पार्श्वपरिवर्त्तनं, क्ली, (पार्श्वस्य पार्श्वेन वा परिवर्त्तनम् ।) कटिदानम् । कर्णिकापरिवृत्तिः । पाशफेराण इति भाषा । श्रीहरेः पार्श्वपरिवर्त्तनोत्सवो यथा,—
"भाद्रस्य शुक्लैकादश्यां शयनोत्सववत् प्रभोः ।
कटिदानोत्सवं कुर्य्याद्वैष्णवैः सह वैष्णवः ॥"
तथा च भविष्योत्तरे ।
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटिदानं भवेद्विष्णोर्म्महापातकनाशनम् ॥
जलाशयान्तिकं नीत्वा संपूज्याभ्यर्च्च्य च प्रभुम् ।
कर्णिकापरिवृत्तिञ्च दक्षिणाङ्गे प्रकल्पयेत् ॥"
अस्य व्याख्या । शयनोत्सववत् कथञ्चिद्विशेषमनुवादपूर्व्वकं लिखति । जलेति त्रिभिः कर्णिकायाः कक्षाः परिवृत्तिं दक्षिणाङ्गे प्रकल्पयेदिति पूर्व्वं वामाङ्गेन सुप्तस्याधुना दक्षिणाङ्गेन शाययेदित्यर्थः । तत्कालविशेषश्च पूर्व्वमेव निर्णीतोऽस्ति । अभ्यर्थनामन्त्रः ।
"देवदेव ! जगन्नाथ योगिगम्य ! निरञ्जन ! ।
कटिदानं कुरुष्वाद्य मासि भाद्रपदे शुभे ॥
महापूजां ततः कृत्वा वैष्णवान् परितोष्य च ।
देवं स्वमन्दिरं नीत्वा यथापूर्व्वं निवेशयेत् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

पार्श्वपिप्पलं, क्ली, (पार्श्वं पिप्पलमिव ।) हरीतकीविशेषः । इति भावप्रकाशः ॥ गजहड इति हिन्दीभाषा ॥

पार्श्वभागः पु, (पार्श्वस्य भागः ।) पक्षभागः । हस्त्यादेः पार्श्वदेशः । इत्यमरः । २ । ८ । ४० ॥

पार्श्वशूलः, पु क्ली, (पार्श्वे जातः शूलः ।) शूलरोगविशेषः । तस्यौषधम् । यथा,—
"शतपुष्पा देवदारु शालपर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ॥
पानं नस्यं तथाभ्यङ्गं तैलमेतत् प्रदापयेत् ।
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥"
इति गारुडे १८६ अध्यायः ॥
(अस्य सम्प्राप्तिपूर्व्वकलक्षणचिकित्सितानि यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये ।
"रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः ।
स संरुद्धः करोत्याशु मानं गुडगुडायनम् ॥
सूचीभिरिव निस्तोदः कृच्छ्रोच्छ्वासी तदा नरः ।
नान्नं वाञ्छति नो निद्रामुपैत्यर्त्तिनिपीड़ितः ॥
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ।
तत्र पुष्करमूलानि हिङ्गुसौवर्च्चलं विड़म् ॥
सैन्धवं तुम्बुरुं पथ्यां चूर्णं कृत्वा तु पाययेत् ।
पार्श्वहृद्वस्तिशूलेषु यवक्वाथेन संयुतम् ॥
सर्पिःशोफोदरोक्तं वा घृतं वा हिङ्गुसंयुतम् ।
बीजपूरकसारं वा पयसा सह साधितम् ॥
एरण्डतैलमथवा मद्यमस्तुपयोरसैः ।
अजयञ्चापि पयसा जाङ्गलेन रसेन वा ॥"

पार्श्वस्थः, पु (पार्श्वे तिष्ठतीति । पार्श्व + स्था + क. ।) पार्श्वस्थितनटः । इति हेमचन्द्रः ॥ समीपस्थिते, त्रि ॥ (यथा, महाभारते । ६ । २०० । १४८ ।
"यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्द्दनः ॥")

पार्श्वास्थि, क्ली, (पार्श्वस्य अस्थि ।) शरीरपार्श्वस्थितास्थि । पाँजरा इति भाषा । तत्पर्य्यायः । पर्शुका १ । इत्यमरः । २ । ६ । ६९ ॥

पार्श्विकं, त्रि, (पार्श्व + ठक् ।) पार्श्वस्येदम् । पार्श्वजातम् । पार्श्वशब्दात् ष्णिकप्रत्ययनिष्पन्नम् ॥

पार्श्वैकादशी, स्त्री, (पार्श्वसम्बन्धिनी हरेः पार्श्वपरिवर्त्तनजन्या एकादशी ।) भाद्रशुक्लैकादशी । तद्विवरणं पार्श्वपरिवर्त्तनशब्दे द्रष्टव्यम् ॥

पार्श्वोदरप्रियः, पु, (पार्श्वमुदरञ्च ताभ्यां प्रीणाति भोक्तारमिति । प्री + कः ।) कर्कटः । इति हेमचन्द्रः । ४ । ४१८ ॥

पार्षती, स्त्री, (पृषतस्यापत्यमिति । पृषत + अण् + स्त्रियां ङीप् ।) द्रौपदी । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ३ । ८५ ।
"युधिष्ठिरं भोजयित्वा शेषमश्नाति पार्षती ।
द्रौपद्यां भुज्यमानायां तदन्नं क्षयमेति च ॥")

पार्षदः, त्रि, (पारिषद + पृषोदरादित्वात् साधुः । यद्वा, पर्षदि साधुः पर्षदो ण्यः इत्यत्र योगविभागात् ण्य इति कश्चित् ।) पारिषदः । इति शब्दरत्नावली ॥ (यथा, भागवते । ३ । १६ । २ ।
"एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥")

पार्षद्यः, त्रि, (पर्षदि साधुः । पर्षद् + "पर्षदो ण्यः ।" इति ण्यः ।) पार्षदः । इति भरतः ॥

पार्ष्णिः, पु स्त्री (पृष्यते भूम्यादिकमनेनेति । पृष + "घृणिपृश्निपार्ष्णिचूर्णिभूर्णि ।" उणां ४ । ५२ । इति निप्रत्ययेन निपातनात् साधुः ।) गुल्फस्याधोभागः । पादग्रन्थ्यधरः । इत्यमरः । २ । ६ । ७२ ॥ गोड़मुड़ा इति गोड़ालि इति च भाषा । स तु गर्भस्थस्य मासद्वयेन भवति । इति सुखबोधः ॥ (यथा, कुमारे । १ । ११ ।
"उद्वेजयत्यङ्गुलिपार्ष्णिभागान्
मार्गे शिलीभूतहिमेऽपि यत्र ॥")
सैन्यपृष्ठम् । इति मेदिनी । णे, २० ॥ (यथा, हरिवंशे । ९५ । ३७ ।
"उशना तस्य जग्राह पार्ष्णिमाङ्गिरसस्तदा ॥")
पृष्ठम् । इति हलायुधः ॥ जिगीषा । यथा,—
"सैन्यपृष्ठे पुमान् पार्ष्णिः पश्चात्पदजिगीषयोः ॥"
इति रत्नकोषः ॥

पार्ष्णिः, स्त्री, उन्मदस्त्री । इति मेदिनी । णे, २० ॥ कुन्ती । इति धरणिः ॥

पार्ष्णिग्राहः, पु, (पार्ष्णिं सैन्यपृष्ठं गृह्णातीति । ग्रह + अण् ।) पृष्ठतः शत्रुः । शत्रुजयोद्यतस्य विजिगीषोस्तत्शत्रुपक्षपातेन पार्ष्णिं पश्चात् पदं गृह्णाति याति यः । इत्यमरभरतौ ॥ (यथा, मनुः । ७ । २०७ ।
"पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ॥")

पार्ष्णित्रं, क्ली, (पार्ष्णिं त्रायते इति । त्रै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पश्चाद्रक्षकसेना । इति सिद्धान्तकौमुदी ॥

पाल, क रक्षे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) क, पालयति। ह्रस्ववर्त्तेर्वेद्गिति दीर्घिणोऽपि पाठः। कानुबन्धानामिदनुबन्धवत् णेरनित्यत्वं बोधयति। तेन पालति पलति इत्यपि सिद्धम्। इति दुर्गादासः॥

पालः, पु, (पालयतीव निष्ठीवनादिकमिति। पालि+अच्।) पतद्ग्रहः। इति हेमचन्द्रः॥ पिकदान् इति भाषा॥ पालके, त्रि। यथा,—
"दिवावक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥"
इति मनुः॥

पालकः, पु, (पालयतीति। पालि+ण्वुल्।) घोटकरक्षकः। तत्पर्य्यायः। अश्वरक्षः १ वल्लभः २। इति जटाधरः॥ चित्रकवृक्षः। इति राजनिर्घण्टः॥ पालनकर्त्तरि, त्रि। यथा, प्रायश्चित्ततत्त्वे।
"गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत्। मक्षिकाभिर्न नरके मक्षिकाभिः स भक्ष्यते॥"

पालकाप्यः, पुं, मुनिविशेषः। तत्पर्य्यायः। करेणुभूः २। इति हेमचन्द्रः॥ धन्वन्तरिः। इति त्रिकाण्डशेषः॥

पालघ्नः, पु, (पालं क्षेत्रं हन्तीति। हन+टक्।) छत्रा। इत्यमरः। २। ४। १६७॥

पालङ्कः, पु, (पाल रक्षणे+सम्पदादित्वात् क्विप्। तत्र अङ्कति इति। अङ्क+घञ्।) शल्लकी। शाकभेदः। पालङ् इति भाषा। श्राजिपक्षी। इति मेदिनी। के, ११७॥ बाज इति भाषा॥

पालङ्की, स्त्री, (पालङ्क+गौरादित्वात् ङीष्।) कुन्दुरुनामगन्धद्रव्यम्। इत्यमरः। २।४।१२१॥ शाकभेदः। पालङ इति भाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"यथादोषशाकैर्वास्तुकतण्डुलीयकजीवन्त्युपोदिकाश्ववलावालमूलकपालङ्क्यमरिचुच्चुकलायवल्लीभिरन्यैर्वा॥") अस्या गुणाः। कफपित्तवातविष्टम्भनाशित्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥

पालङ्क्यं, क्ली, (पालङ्क। स्वार्थे ष्यञ्।) शाकभेदः। पालङ् इति भाषा॥ तत्पर्य्यायः। पलक्या २ मधुरा ३ सुरपत्रिका ४ सुपत्रा ५ स्निग्धपत्रा ६ ग्रामीणा ७ ग्राम्यवल्लभा ८। अस्य गुणाः। ईषत् कटुत्वम्। मधुरत्वम्। पथ्यत्वम्। शीतलत्वम्। रक्तपित्तहरत्वम्। ग्राहित्वम्। परमतर्पणत्वञ्च। इति राजनिर्घण्टः॥

पालङ्क्या, स्त्री, (पालङ्क्य+स्त्रियां अजादित्वात् टाप्।) कुन्दुरुः। इत्यमरः॥ कुन्दरुखोटी इति भाषा। पालङ्क्यशाकः। तत्पर्य्यायः। वास्तुकाकारा २ छुरिका ३ चीरितच्छदा ४। (यथा, सुश्रुते। १। ४२।
"प्रायशः कुरवककोविदारकजीवन्तीचिल्लीपालङ्क्यासुनिषण्णकप्रभृतीनि नीवारादयो मुद्गादयश्च समासेन कषायो वर्गः॥") अस्या

गुणाः। वातवत्त्वम्। शीतत्वम्। श्लेष्मलत्वम्। भेदनत्वम्। गुरुत्वम्। विष्टम्भित्वम्। मदश्वासपित्तरक्तविषापहत्वञ्च। इति भावप्रकाशः॥

पालनं, क्ली, (पाल्यतेऽनेनेति। पालि+"करणाधिकरणयोश्च।" ३। ३। ११७। इति ल्युट्।) सद्यःप्रसूताया गोः क्षीरम्। इति शब्दचन्द्रिका॥ (पाल रक्षणे+भावे ल्युट्।) रक्षणम्। यथा, "अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्म्मः॥" इति मिताक्षरा॥

पालाशं, क्ली, (पलाशस्येदमिति। अण्।) तमालपत्रम्। इति राजनिर्घण्टः॥ तेजपात इति भाषा॥ (यथा, वाभटे गुल्मचिकित्सितायाम्।
"पालाशं दहनाज्जीनं प्रतिजयापामार्गकुष्माण्डकम्॥")

पालाशः, पुं, (पलाशस्य वर्ण इव वर्णोऽस्त्यस्येति। अण्।) हरिद्वर्णः। (यथा, हरिवंशे हितायाम्। ८३। ४।
"पालाशतास्त्रासितकर्ब्बुराणाम्॥")
तद्वर्णविशिष्टे पलाशवृक्षसम्बन्धिनि च, त्रि। इत्यमरः॥ (यथा, मनुः। २। ४५।
"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वटखादिरौ॥")

पालाशषण्डः, पुं, (पालाशानां पलाशवृक्षाणां षण्डो यत्र।) मगधदेशः। इति शब्दरत्नावली॥ पलाशसमूहश्च॥

पालिः, स्त्री, (पल्यते पाल्यते इति। पल पालने+"वाहुलकात् प्रलनिपलतिभ्याश्च।" ४। १२८। इत्युणादिसूत्रेण इण्।) कर्णलतायम्। (यथा,
"यस्य पालिद्वयमपि कर्णस्य न भवेदिह।
कर्णपीठं समे मध्ये तस्य विद्धा विवर्द्धयेत्॥
वाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत्।
आभ्यन्तरायां दीर्घायां वाह्यसन्धिरुदाहृतः॥
एकैव तु भवेत् पालिः स्थूला पृथ्वी स्थिरा च
या।
तां द्विधा पाटयित्वा तु छित्वा चोपरि सन्धयेत्॥
गण्डादुत्पाद्य मांसेन सानुबन्धेन जीवता।
कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित्॥"
"कर्णपाल्यामयान्नॄणां पुनर्वक्ष्यामि सुश्रुत।।
कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः॥
द्विधा वाप्यथ संसृष्टाः कुर्व्वन्ति विविधा रुजः।
विस्फोटः स्तब्धता शोफः पाल्यां दोषे तु वातिके॥
दाहविस्फोटजननं शोफः पाकश्च पैत्तिके।
कण्डूः सश्वयथुः स्तम्भो गुरुत्वञ्च कफात्मके॥
यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितम्।
स्वेदाभ्यङ्गपरीषेकैः प्रलेपासृग्विमोक्षणैः॥
मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा।
य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति॥
अत ऊर्द्ध्वं नामलिङ्गैर्वक्ष्ये पाल्यामुपद्रवान्।
उत्पाटकश्चोत्पुटकः श्यावः कण्डुयुतो भृशम्॥
अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा।
स्रावी च दाहवांश्चैव तेषां क्रमशः क्रियाम्॥
अपामार्गः सर्ज्जरसः पाटलालकुचत्वचौ।
उत्पाटके प्रलेपः स्यात् तैलमेभिश्च पाचयेत्॥
शम्याकशिग्रुपूतीकगोधामेदोऽथ तद्वसा।
वाराहं गव्यमेषं पित्तं सर्पिश्च संहरेत॥
लेपमुत्पुटके दद्यात्तैलमेभिश्च साधितम्।
गौरीं सुगन्धां श्यामामनन्तां तण्डुलीयकम्॥
श्यावे प्रलेपनं दद्यात्तैलमेभिश्च साधितम्।
पाठां रसाञ्जनं क्षौद्रं तथा स्यादुष्णकाञ्जिकम्॥
दद्यात्लेपं सकण्डूके तैलमेभिश्च साधितम्।
ग्रन्थिभूतस्य देयं स्यादिदं तैलं विजानता॥
मधुकं क्षीरकाकोलीं जीवकाद्यैर्विपाचितम्।
गोधावराहसर्पाणां वसाः स्युः सतद्दहः॥
प्रलेपनमिदं दद्यादवमिथ्यावमन्थके।
प्रपौण्डरीकं मधुकं समङ्गां धवमेव च॥
तैलमेभिश्च सम्यक् प्रदद्यात् कण्डूमतः क्रियाम्।
सहदेवा विश्वदेवा अजाक्षीरं ससैन्धवम्॥
एतैरालेपनं दद्यात् तैलमेभिश्च साधितम्।
ग्रन्थिकं गुटिकां पूर्व्वं स्रावयित्वापाटयेत्॥
ततः सैन्धवचूर्णेन घृष्ट्वा लेपं प्रदापयेत्।
लिखित्वा तत् सुतं घृष्ट्वा चूर्णैं रोध्रस्य जम्बुले॥
क्षीरेण प्रतिसार्य्यैनं शुद्धं संरोपयेत्ततः।
मधुपर्णीं मधूकञ्च मधुकं मधुना सह॥
लेपः स्राविणि दातव्यस्तैलमेभिश्च साधितम्।
पञ्चवल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः॥
जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत्॥"
इति सुश्रुते सूत्रस्थाने षोडशोऽध्याये॥)

अश्रिः। पङ्क्तिः। (यथा, गीतगोविन्दे। ११। २०।
"विपुलपुलकपालिः स्फीतसीत्कारमन्तर्जनितजडिमकाकुव्याकुलं व्याहरन्ती॥")
अङ्कभेदः। कच्छादिदेशः। इति मेदिनी। ले ३०॥ यूका। जातश्मश्रुस्त्री। प्रान्तः। (यथा, गीतगोविन्दे। ३। १३।
"भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
वाणा गुणः श्रवणपालिरिति स्मरेण।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्ज्जितजगन्ति किमर्पितानि॥")
सेतुः। कल्पितभोजनम्। प्रशंसा। उत्सङ्गः। प्रस्थः। इति हेमचन्द्रः॥

पालिका, स्त्री (पालिरेव। स्वार्थे कन् टाप् च।) अश्रिः। इति शब्दरत्नावली॥ कर्णपत्रम्। इति शब्दचन्द्रिका। दध्यादिक्षेपणी। तत्पर्य्यायः। कुन्तलिका २। इति हारावली॥

पालितः, त्रि, (पाल+क्त।) रक्षितः। यथा,—
"चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी। ययौ विहायसा राजन् द्वारकां कृष्णपालिताम्॥"
इति श्रीभागवतीयदशमस्कन्धे ६२ अध्यायः॥
कायस्थस्य पद्धतिविशेषः॥

पालिन्दः, पु, (पालयतीति। पालि। वाहुलकात् किन्दच्।) कुन्दुरुकः। इति राजनिर्घण्टः॥

पालिन्दी, स्त्री, (पालिन्द+गौरादित्वात् ङीष्।) श्यामालता। इति रत्नमाला॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये।

"कृष्णपित्तघ्नश्यामा पालिन्दीतल्लीयके: ॥")
पालिन्धी । त्रिवृता । इति हिकृपकोषः ॥
(अस्याः पर्य्यायो यथा,—
"त्रिवृत् श्यामार्द्धचन्द्रा च पालिन्दी च सुषे-
णिका ।
मसूरविदलाकोलके शका कालमेषिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पालिन्धी, स्त्री, श्यामात्रिवृता । इत्यमरः ।२।४।१०८॥
पाली, स्त्री, (पालि+कृदिकारादिति वा ङीष् ।)
यूका । सख्मश्रुयोषित । इति मेदिनी । ले, ३० ।
श्रेणी । इति शब्दरत्नावली ॥ स्थाली । इति
शब्दचन्द्रिका ॥
पावकः, पुं, (पुनातीति । पू ञ शि शोधे+ण्वुल् ।)
अग्निः । इत्यमरः ।१।१।५७ ॥ (यथा, काशी-
खण्डे ६ अध्याये ।
"अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित् ।
पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः ॥")
वैद्युताग्निः । यथा,—
"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः ।
निर्म्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः ॥
यश्चासौ तपते सूर्य्यः शुचिरग्निस्त्वसौ स्मृतः ॥"
इति कौर्म्मे १२ अध्यायः ॥
स च ब्रह्मणो मानसपुत्त्रादभिमानिनामकाग्नेः
स्वाहायां जातः । यथा,—
"योऽसावग्निरभीमानी स्मृतः स्वायम्भुवेऽन्तरे ।
ब्रह्मणो मानसः पुत्त्रस्तस्मात् स्वाहा व्यजीजनत॥
पावकं पवमानञ्च शुचिरग्निश्च यः स्मृतः ॥"
इति मार्कण्डेये ४८ अध्यायः ॥
सदाचारः । वह्निमन्थः । (अस्य पर्य्यायो यथा,
"तेजोमन्थो हविर्मन्थो ज्योतिष्कः पावकोऽरणिः ।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
चित्रकः । भल्लातकः । विडङ्गः । इति मेदिनी ।
के, ११८॥ शोधयितृनरः । इति हेमचन्द्रः ॥ रक्त-
चित्रकः । कुसुम्भः । इति राजनिर्घण्टः ॥ (पवित्र-
कारके, त्रि । यथा, ऋग्वेदे । ३ । ३१ । २० ।
"मिहः पावकाः प्रतता अभूवन् ॥")
पावकारणिः, पु, (पावकाय वह्न्युत्पादनार्थं
अरणिरिव ।) अग्निमन्थः । इति शब्दमाला ॥
पावकिः, (पावकस्यापत्यम् । पावक+इञ् ।)
कार्त्तिकेयः । यथा,—
"कथं तं कृत्तिकापुत्त्रमुक्तवान् तं सुरं गुरुम् ।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः ॥"
इति वराहपुराणम् ॥
पावनं, क्ली, (पावयत्यनेनेति । पू+णिच्+ल्युट ।)
जलम् । कृच्छ्रम् । इति मेदिनी । ने, ६० ॥ गोम-
यम् ॥ इति शब्दचन्द्रिका ॥ रुद्राक्षम् । कुष्ठम् ।
इति राजनिर्घण्टः ॥ चित्रकम् । अध्यासः ।
प्रायश्चित्तम् । इति विश्वः ॥ (शुद्धिः । यथा
मनुः । ११ । १७८ ।
"या येन पुनः प्रदुष्येत्तु सद्योमोपयन्त्रिता ।
कृच्छ्रं चान्द्रायणञ्चैव तदस्याः पावनं स्मृतम् ॥")
पावनः, पुं, (पावयतीति । पू+णिच्+ल्युः ।)
व्यासः । पावकः । इति मेदिनी । ने, ६० ॥
(यथा, ३।१८५। मनुश्लोकटीकायां कुल्लूकभट्टः ।
"पावनः सर्व्वोऽग्निर्यः शीतापनोदनाद्यर्थं बहुषु
देशेष्वपि विधीयते ॥") सिह्लकः । इति विश्वः ॥
पीतभृङ्गराजः । इति राजनिर्घण्टः ॥ (विष्णुः ।
यथा, महाभारते । १३ । १४९ । ४५ ।
"भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥"
"पावयतीति पावनः । भीषास्माद्वातः पवत
इति श्रुतेः ।" इति शाङ्करभाष्यम् ॥) सिद्धः ।
पवित्रे पावयितरि च, त्रि । इति हेमचन्द्रः ॥
(यथा, रघुः । १६ । ५३ ।
"स त्वनेकवनितासखोऽपि सन्
पावनीमनवलोक्य सन्ततिम् ।
वैद्ययत्नपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥")
पावनध्वनिः, पुं, (पावनः पवित्रजनको ध्वनि-
र्यस्य ।) शङ्खः । इति राजनिर्घण्टः ॥ (पावनो
ध्वनिरिति विग्रहे ।) पवित्रशब्दः ॥
पावनी, स्त्री, (पावयत्यनयेति । पू+णिच्+
ल्युट+ङीप् ।) हरीतकी । इति विश्वः ॥
तुलसी । गौः । इति राजनिर्घण्टः । गङ्गा ।
यथा, शङ्कराचार्य्यकृतगङ्गाष्टके ।
"ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लि-
मुल्लासयन्ती
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्
स्खलन्ती ।
क्षोणीपृष्ठे लुठन्ती दुरितचयचमूनिर्भरं भर्त्-
सयन्ती
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः
पुनातु ॥"
(इयन्तु गङ्गाया अंशविशेषः । यथा, मात्स्ये ।
१२० । ३६—४१ ।
"ततो विसर्ज्जयामास संरुद्धां स्वेन तेजसा ।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः ।
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गायाः ॥
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव तु ।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ।
तस्माद् भागीरथी सा वै प्रविष्टा दक्षिणो-
दधिम् ॥"
शाकद्वीपस्य नदीविशेषः । यथा, मत्स्यपुराणे ।
१२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥")
पाशः, पु, (पश्यते बध्यतेऽनेनेति । पश+घञ् ।)
शस्त्रभेदः । इति शब्दरत्नावली ॥ (वैशम्पा-
यनधनुर्व्वेदोक्तपाशलक्षणं यथा,—
"पाशः सूक्ष्मावयवो लौहधातुस्त्रिकोणवान् ।
प्रादेशपरिधिः सीसगुलिकाभरणान्वितः ॥"
आग्नेयधनुर्व्वेदोक्तलक्षणं यथा,—
"दशहस्तो भवेत् पाशो वृत्तः करमुखस्तथा ।
गुणकार्पाससुञ्जानामर्कस्नायवचर्म्मणाम् ॥
अन्येषां सुदृढानाञ्च सुकृतं परिवेष्टितम् ।
तथा त्रिंशत्समं पाशं बुधः कुर्य्यात् सुवर्त्तितम्॥"
अस्य क्रियादिकं यथा,—
"कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै सदा ।
वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः ॥
कुण्डलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि ।
क्षिपेत्—————————— ॥"
"वल्गिते च प्लुते चैव तथा प्रव्रजितेषु च ।
समयोगविधिं ज्ञात्वा प्रयुञ्जीत सुशिक्षितः ॥
विजित्वा तु यथान्यायं ततो बन्धं समाचरेत् ।
कट्यां बद्धा ततः खड्गं वामपार्श्वावलम्बितम् ॥
दृढं विगृह्य वामेन निष्कर्षेद्दक्षिणेन च ॥"
अन्यच्च ।
"परावृत्तमपावृत्तं गृहीतं लघुसंज्ञितम् ।
ऊर्द्ध्वक्षिप्तमधःक्षिप्तं सन्धारितविधारितम् ॥
श्येनपातं गजपातं ग्राहग्राह्यं तथैव च ।
एवमेकादशविधा ज्ञेयाः पाशविधारणाः ॥"
वैशम्पायनोक्तक्रिया यथा,—
"प्रसारणं वेष्टनञ्च कर्त्तनञ्चेति ते त्रयः ।
योगाः पाशाश्रिता लोके पाशाः क्षुद्रसमा-
श्रिताः ॥"
अन्यच्च ।
"ऋज्वायतं विशालञ्च तिर्य्यक्भ्रामितमेव च ।
पञ्च कर्म्मविनिर्द्दिष्टं व्यस्ते पाशे महात्मभिः ॥")
कर्णान्ते समूहार्थः । (यथा, माघे । ७ । ६२ ।
"स्तनशिरसिजपाशपातभारा-
दिव नितरां नतिमङ्गिरंसभागैः ॥")
कर्णान्ते शोभनार्थः । छात्राद्यन्ते निन्दार्थः ।
पक्ष्यादिबन्धनरज्ज्वादि । इति विश्वः ॥ (यथा,
महाभारते । ५ । ६४ । १ ।
"शकुनीनामिहार्थाय पाशं भूमावयोजयत् ।
कश्चिच्छाकुनिकस्तात पूर्व्वेषामिति शुश्रुम ॥"
योगविशेषः । यथा, ज्योतिषे ।
"यदा राशिपञ्चके सर्व्वग्रहा भवन्ति तदा
पाशाख्ययोगो भवति ॥" पारिभाषिकपाशो
यथा, कुलार्णवे १ उल्लासे ।
"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी ।
कुलं शीलं तथा जातिरष्टौ पाशाः प्रकी-
र्त्तिताः ॥"
स्वप्नेऽस्य दर्शनफलं यथा,—
"कार्पासभस्मास्थिकपालशूलं
चक्रञ्च पाशन्त्वथवा प्रपश्येत् ।
तस्यापदं रोगधनक्षयं वा
रोगी मृतिं वा तनुतेऽतिकष्टम् ॥"
इति हारीते द्वितीये स्थाने द्वितीयेऽध्याये ॥)
पाशकः, पु, (पाशयति पीडयतीति । पश+णिच्
+ण्वुल् ।) द्यूतविशेषः । पाशा इति भाषा ।
तत्पर्य्यायः । अक्षः २ देवनः ३ । इत्यमरः ।
२ । १० । ४५ ॥ सारिः ४ शारिः ५ सारः ६
शारः ७ पाशः ८ । इति शब्दरत्नावली ॥

पाशपाणिः, पुं, (पाशः पाणौ यस्य ।) वरुणः । इति हलायुधः ॥

पाशवपालनं, क्ली, (पाशवं पशुसंघं पालयतीति । पालि + ल्युः ।) घासः । इति शब्दचन्द्रिका ॥

पाशितः, त्रि, (पाश + क्त ।) पाशयुक्तः । बद्धः । इति धरणिः ॥

पाशी, [न्] पुं, (पाशोऽस्यास्तीति । पाश + इनिः ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ८ ।
"यदि शक्रं यमं वापि कुवेरमपि पाशिनम् ॥")
व्याधः । इति मेदिनी । ने, ६१ ॥ यमः । इति कश्चित् ॥ पाशधरे, त्रि । इति विश्वः ॥

पाशीकृतः, त्रि, पाशबद्धः । अभूततद्भावे च्वि-प्रत्ययनिष्पन्नः ॥

पाशुपतः, पुं, (पशुपतिर्देवतास्येति । "सास्य देवता ।" ४ । २ । २४ । इति अण् ।) वकपुष्पम् । (अस्य पर्य्यायो यथा, भावप्रकाशे ।१।१।
"शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ॥")
पशुपत्यधिदैवतः । तद्भक्तः । इति मेदिनी । ते, २११ ॥ (क्ली, तन्त्रशास्त्रविशेषः । यथा, कूर्म्मपुराणे १४ अध्याये ।
"एवं सम्बोधितो रुद्रो माधवेन मुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"
अथर्व्ववेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।
"सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम् ॥")

पाशुपतव्रतं, क्ली, (पाशुपतं पशुपतिसम्बन्धि व्रतम् ।) पशुपतिव्रतविशेषः । यथा,—
"यथा पशुपतिर्नित्यं हत्वा सर्व्वमिदं जगत् ।
न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् ॥
इहजन्मकृतं पापं पूर्व्वजन्मकृतञ्च यत् ।
व्रतं पाशुपतं नाम कृत्वा हन्ति द्विजोत्तम । ॥
द्वादश्यामेकभक्ताशी त्रयोदश्यामयाचितम् ।
चतुर्द्दश्यां तथा नक्तमुपवासं परेऽहनि ॥
गोवृषञ्चैव हैरण्यं रौप्यं ताम्रमयन्तथा ।
सौवर्णं कारयेत् पत्रं गुञ्जाशीत्या पृथक् पृथक् ॥
तत्रैवोल्लिखयेन्मूर्त्तिं शिवायाश्च शिवस्य च ।
तत्प्रमाणं वृषं कुर्य्याद्रौप्यं हेम्नश्चतुर्गुणैः ॥
रौप्याद्दशगुणं ताम्रं तदर्द्धं वापि कारयेत् ।
ताम्रपत्रे समारोप्य वस्त्रोत्तमयुतन्तथा ॥
त्रयोदश्यामेकभक्तं रिक्तायां नक्तमाचरेत् ।
कुर्य्यादयाचितं दर्शे पादकृच्छ्रव्रतञ्चरेत् ॥
गन्धपुष्पैः सुनैवेद्यैर्व्वस्त्राभरणदीपकैः ।
गङ्गाधरं समभ्यर्च्य प्रार्थयेत् प्रवरं वरम् ॥
गङ्गाधर । महादेव । सर्व्वलोकचराचर । ।
जहि मे सर्व्वपापानि पूजितस्त्वञ्च शङ्कर ! ॥
शङ्कराय नमस्तुभ्यं सर्व्वपापहराय च ।
यथा यमं न पश्यामि तथा मे कुरु शङ्कर । ॥
यममार्गं यथा शम्भो । न पश्यामि कदाचन ।
संपूजितो मया भक्त्या तथा मे कुरु शङ्कर ! ॥
गङ्गाधर । धराधीश । परात्पर वरप्रद ! ।
श्रीकण्ठ । नीलकण्ठश्च उमाकान्त । नमोऽस्तु ते ॥
संपूज्यैवंविधानेन प्रतिपद्युदिते रवौ ।
हैरण्यादीन् गोवृषांश्च ब्राह्मणेभ्यो निवेदयेत् ॥
यथा त्वं सर्व्वगः सर्व्वः सर्व्ववासस्तु सर्व्वहृत् ।
न लिप्यसे विकुर्व्वाणस्तथा मां कुरु शङ्कर । ॥
एवं स्तुत्वा नमस्कृत्य वृषादींश्च यथोदितान् ।
गुर्व्वादिभ्यो द्विजेभ्यश्च शङ्करः प्रीयतामिति ॥
एवं व्रतमिदं कृत्वा वृषं दद्याद्द्विजातये ।
यममार्गं महाघोरं न पश्यति कदाचन ॥
यः करोति व्रतेनैव सर्व्वपापप्रणाशनम् ।
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ॥
ब्रह्महत्यादिभिः पापैरगम्यागमनादिभिः ।
मुच्यते पातकेभ्योऽथ ह्यभक्ष्यापेयजैः पुमान् ॥
यः करोति महाभाग । दानं सर्व्वसुखावहम् ।
हत्वा पापान्यशेषाणि स्वर्गलोकं स गच्छति ॥"
इति वह्निपुराणे पाशुपतव्रतदानाध्यायः ॥
(यथा च शिवपुराणे वायुसंहितायां पूर्व्वभागे २८ अध्याये ।

ऋषय ऊचुः ।

"भगवन् । श्रोतुमिच्छामो व्रतं पाशुपतं परम् ।
ब्रह्मादयोऽपि यत् कृत्वा सर्व्वे पाशुपताः स्मृताः ॥

वायुरुवाच ।

रहस्यं वः प्रवक्ष्यामि सर्व्वपापनिकृन्तनम् ।
व्रतं पाशुपतं श्रौतमथर्व्वशिरसि श्रुतम् ॥
कालश्चैत्रापौर्णमासी देशः शिवपरिग्रहः ।
क्षेत्रारामाद्यरण्यो वा प्रशस्तः शुभलक्षणः ॥
तत्र पूर्व्वं त्रयोदश्यां सुस्नातः सुकृताह्निकः ।
अनुज्ञाप्य स्वमाचार्य्यं संपूज्य प्रणिपत्य च ॥
पूजां वैशेषिकीं कृत्वा शुक्लाम्बरधरः स्वयम् ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपन ॥
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च ।
प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः ॥
ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनवर्त्मना ।
व्रतमेतत् करोमीति भवेत् संकल्प्य दीक्षितः ॥
यावच्छरीरपातं वा द्वादशाब्दमथापि वा ।
तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ॥
तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा ।
दिनद्वादशकं वाथ दिनषट्कमथापि वा ॥
तदर्द्धं दिनमेकं वा व्रतसंकल्पनावधि ।
अग्निमाधाय विधिवद्विरजा होमकारणात् ॥
हुत्वाज्येन समिद्भिश्च चरुणा च यथाक्रमम् ।
पूर्णाद्याः पुनरो भूयस्तत्वानां शुद्धिमुद्दिशन् ॥
जुहुयान्मूलमन्त्रेण तैरेव समिदादिभिः ।
तत्वान्येतानि मद्देहे शुध्यन्तामित्यनुस्मरन् ॥
पञ्च भूतानि तन्मात्राः पञ्च कर्म्मेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्च पञ्च विभागशः ॥
त्वगादिधातवः सप्त पञ्च प्राणादिवायवः ।
मनोबुद्धिरहंख्यातिर्गुणाः प्रकृतिपूरुषौ ॥
रागो विद्या कला चैव नियतिः काल एव च ।
माया च शुद्धविद्या च महेश्वरसदाशिवौ ॥
शक्तिश्च शिवतत्वञ्च तत्वानि क्रमशो विदुः ।
मन्त्रैस्तु विरजैर्हुत्वा होतासौ विरजो भवेत् ॥
अथ गोमयमादाय पिण्डीकृत्याभिमन्त्र्य च ।
न्यस्याग्नौ तच्च संरक्ष्य दिने तस्मिन् हविष्य-भुक् ॥
प्रभाते तु चतुर्द्दश्यां कृत्वा सर्व्वं पुरोदितम् ।
दिने तस्मिन्निराहारः कालशेषं समापयेत् ॥
प्रातःपर्व्वणि चाप्येव कृत्वा होमावसानतः ।
उपसंहृत्य रुद्राग्निं गृह्णीयाद्भस्म यत्नतः ॥
ततस्तु जटिलो मुण्डः शिखैकजट एव वा ।
भूत्वा स्नात्वा पुनर्वीतलज्जश्चेत् स्याद्दिगम्बरः ॥
अन्यः काषायवसनश्चर्म्मचीराम्बरोऽथवा ।
एकाम्बरो वल्कली वा भवेद्दण्डी च मेखली ॥
प्रक्षाल्य चरणौ पश्चाद्द्विराचम्यात्मनस्तनुम् ।
संकलीकृत्य तद्भस्म विरजानलसम्भवम् ॥
अग्निरित्याभिर्मन्त्रैः षड्भिराथर्व्वणैः क्रमात् ।
विमृज्याङ्गानि मूर्द्धादिचरणान्तञ्च संस्पृशेत् ॥
ततस्तेन क्रमेणैव समुद्धृत्य च भस्मना ।
सर्व्वाङ्गोद्धूलनं कुर्य्यात् प्रणवेन शिवेन वा ॥
ततस्त्रिपुण्ड्रं रचयेत्त्रियायुषसमाह्वयम् ।
शिवभावं समागम्य शिवयोगं समाचरेत् ॥
कुर्य्यात्त्रिसन्ध्यमप्येवमेतत् पाशुपतं व्रतम् ।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः ॥
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतम् ।
कर्णिकाकेसरोपेतमासनं परिकल्पयेत् ॥
विभवे तदभावे तु रक्तं सितमथापि वा ।
पद्मं तस्याप्यभावे तु केवलं भावनामयम् ॥
तत्पद्मकर्णिकामध्ये कृत्वा लिङ्गं कनीयसम् ।
स्फाटिकं पीठिकोपेतं पूजयेद्वि ततःक्रमात् ॥
प्रतिष्ठाप्य विधानेन तल्लिङ्गं कृतशोधनम् ।
परिकल्प्यासनं मूर्त्तिं पञ्चवक्त्रप्रकारतः ॥
पञ्चगव्यादिभिः पुण्यैर्यथाविभवविस्तरैः ।
स्नापयेत् कलशैः पूर्णैः सहस्रादिषु सम्भवैः ॥
गन्धद्रव्यैः सकर्पूरैश्चन्दनाद्यैः सकुङ्कुमैः ।
सवेदिकं समालिप्य लिङ्गं भूषणभूषितम् ॥
बिल्वपत्रैश्च पद्मैश्च रक्तश्वेतैस्तथोत्पलैः ।
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सुगन्धिभिः ॥
पुण्यैश्च शतपत्रैश्च चित्रैर्दूर्व्वाक्षतादिभिः ।
समभ्यर्च्य यथालाभं महापूजाविधानतः ॥
धूपं दीपं तथा चार्घ्यं नैवेद्यञ्च समादिशेत् ।
निवेदयित्वा विभवे कल्याणञ्च समाचरेत् ॥
इष्टानि च विशिष्टानि न्यायेनोपार्ज्जितानि च ।
सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः ॥
श्रीपत्रोत्पलपद्मानां संख्या साहस्रिकी मता ।
प्रत्येकमपरा संख्या शतमष्टोत्तरं द्विजाः ॥
तत्रापि च विशेषेण न त्यजेद्बिल्वपत्रकम् ।
हैममेकं परं प्राहुः पद्मं पद्मसहस्रकात् ॥
नीलोत्पलादिष्वप्येतत्समानं बिल्वपत्रकैः ।
पुष्पान्तराणां नियमाद्यथालाभं निवेदयेत् ॥
अष्टाङ्गमर्घ्यमुत्कृष्टं धूपालेपौ विशेषतः ।
कृष्णागुरुमघोराख्ये वक्त्रे सद्ये मनःशिलाम् ॥
चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे ।
ईशाने भसितं केचिदालेपनमितीदृशम् ॥

न धूप इति मन्यन्ते धूपान्तरविधानतः ।
सिताग्गुरुमघोराख्ये मुखे कृष्णागुरुं पुनः ॥
पौरुषे गुग्गुलुं सद्ये सौम्ये सौगन्धिकं मुखे ।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषतः ॥
शर्करामधुकर्पूरकपिलाघृतसंयुतम् ।
चन्दनागुरुकाष्ठाद्यं सामान्यं संप्रचक्षते ॥
कर्पूरवर्त्तिराज्याढ्या देया दीपावली ततः ।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमतःपरम् ॥
प्रथमावरणे पूज्यौ क्रमाद्विघ्नेशषण्मुखौ ।
ब्रह्माङ्गानि ततश्चैव प्रथमावरणेऽर्च्चिते ॥
द्वितीयावरणे पूज्या विघ्नेशाश्चक्रवर्त्तिनः ।
तृतीयावरणे पूज्या भवाद्याश्चाष्टमूर्त्तयः ॥
महादेवादयस्तत्र तथैकादशमूर्त्तयः ।
चतुर्थावरणे पूज्याः सर्व्व एव गणेश्वराः ॥
बहिरेव तु पद्मस्य पञ्चमावरणे क्रमात् ।
दश दिक्पतयः पूज्याः सास्त्राः सानुचरास्तथा ॥
ब्रह्मणो मानसाः पुत्राः सर्व्वेऽपि ज्योतिषाङ्गणाः ।
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः ॥
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ।
योगिनो मुख्यतः सर्व्वे पञ्चमे मातरस्तथा ॥
क्षेत्रपालश्च सगणः सर्व्वं चैतच्चराचरम् ।
अथावरणपूजान्ते सम्पूज्य परमेश्वरम् ॥
साज्यं सव्यञ्जनं हृद्यं हविर्भक्त्या निवेदयेत् ।
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ॥
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः ।
नीराजनान्ते विस्तीर्णां पूजाशेषं समापयेत् ॥
चषकस्थालशृङ्गारश्च शयनीये समर्पयेत ।
आढ्यं रूपोचितं हृद्यं तत्सर्व्वमनुरूपतः ॥
कृत्वा च कारयित्वा च हुत्वा च प्रतिपूजनम् ।
स्तोत्रं अघोरकं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ॥
प्रदक्षिणां प्रणामञ्च कृत्वात्मानं समर्च्चयेत् ।
ततः पुरस्ताद्देवस्य गुरुविद्ये च पूजयेत ॥
दत्त्वार्घ्यमष्टौ पुष्पाणि देवमुद्वास्य लिङ्गतः ।
अग्नेश्चाग्निं सुसंरक्ष्य उद्वास्य च तमप्युत ॥
प्रत्यहं जन इत्येवं कुर्य्यात्सर्व्वं पुरोदितम् ।
ततस्तत्साम्बुजं लिङ्गं सर्व्वोपकरणान्वितम् ॥
समर्पयेत् स्वगुरवे स्थापयेद्वा शिवालये ।
संपूज्य च गुरून्नन्यान् व्रतिनश्च विशेषतः ॥
भक्तान् द्विजांश्च शक्तश्चेद्दीनानाथांश्च तोषयेत ।
स्वयं चानशनप्रायः फलमूलाशनोऽथवा ॥
पयोव्रतो वा भिक्षाशी भवेदेकाशनस्तथा ।
नक्तं युक्ताशनो नित्यं भूशय्यानिरतः शुचिः ॥
भस्मशायी तृणे शायी चीराजिनधरोऽथवा ।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥
अर्कवारे तथार्द्रायां पञ्चदश्याञ्च पक्षयोः ।
अष्टम्याञ्च चतुर्द्दश्यां शक्तस्तूपवसेदपि ॥
पातकपतितोदक्यासूतिकान्त्यजपूर्व्वकान् ।
वर्ज्जयेत्सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमादानदयासत्याहिंसाशील: सदा भवेत् ।
सन्तुष्टश्च प्रशान्तश्च तपोध्यानरतः सदा ॥
कुर्य्यात्त्रिषवणस्नानं भस्मस्नानमथापि वा ।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥
बहुनात्र किमुक्तेन नाचरेदशिवं व्रती ।
प्रमादात्तु तथाचारे निरूप्य गुरुलाघवम् ॥
उचितां निष्कृतिं कुर्य्यात् पूजाहोमजपादिभिः ।
आसमाप्तेर्व्रतस्यैवमाचरेन्न प्रमादतः ॥
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा ।
सामान्यमेतत् कथितं व्रतस्यास्य समासतः ॥
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमम् ।
वैशाखे वज्रलिङ्गन्तु ज्यैष्ठे मारकतं शुभम् ॥
आषाढे मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम् ।
मासे भाद्रपदे चैव पद्मरागमयं परम् ॥
आश्वयुज्याञ्च विधिवद्गोमेदकमयं शुभम् ।
कार्त्तिक्यां वै द्रुमं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥
पुष्परागमयं पौषे माघे द्युमणिजं तथा ।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्व्यत्ययोऽथवा ॥
सर्व्वमासेषु रत्नानामलाभे हैममेव वा ।
हैमाभावे राजतं वा ताम्रं शैलजमेव वा ॥
मृण्मयं वा यथालाभं क्षाणिकं चान्यदेव वा ।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ॥
व्रतावसानसमये समाचरितनैत्यकः ।
कृत्वा वैशेषिकीं पूजां हुत्वा चैव यथा पुरा ॥
संपूज्य च सदाचार्य्यं व्रतिनश्च विशेषतः ।
देशिकेनाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ॥
दर्भासनो दर्भपाणिः प्राणापानौ नियम्य च ।
जपित्वा शक्तितो मूलं ध्यात्वा साम्बं त्रियम्बकम् ॥
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः ।
समुत्सृजामि भगवन् । व्रतमेतत्त्वदाज्ञया ॥
इत्युक्त्वा लिङ्गमूलन्तु दर्भानुत्तरतस्त्यजेत् ।
ततो दण्डजटाचीरमेखलाद्यपि चोत्सृजेत् ॥
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत् ।
यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः ॥
व्रतमेतत् प्रकुर्व्वीत स तु वै नैष्ठिकः स्मृतः ।
सोऽत्याश्रमी च विज्ञेयो महापाशुपतस्तथा ॥
स एव तपसां श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्यो मुमुक्षुषु ॥
यतिर्यो नैष्ठिको जातस्तमाहुर्नैष्ठिकोत्तमम् ।
योऽन्वहं द्वादशाहं वा व्रतमेतत् समाचरेत् ॥
सोऽपि नैष्ठिकतुल्यः स्यात्तीव्रव्रतसमन्वयात् ।
घृताक्तो यश्चरेदेतद्व्रतं व्रतपरायणः ॥
द्वित्र्येकदिवसं वापि स च कश्चन नैष्ठिकः ।
कृत्यमित्येव निष्कामो यश्चरेद् व्रतमुत्तमम् ॥
शिवार्पितात्मा सततं न तेन सदृशः क्वचित् ।
भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः ॥
पापैर्विमुच्यते सद्यो मुच्यते नात्र संशयः ।
रुद्राग्नेर्यत्परं वीर्य्यं तद्भस्म परिकीर्त्तितम् ॥
तस्मात्सर्व्वेषु कालेषु वीर्य्यवान् भस्मसंयुतः ।
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ॥
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ।
भस्मना दिग्धसर्व्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ॥
भस्मशायी च पुरुषो भस्मनिष्ठ इति स्मृतः ।
भूतप्रेतपिशाचाश्च रोगाश्चातीव दुःसहाः ।
भस्मनिष्ठस्य सान्निध्याद्विद्रवन्ति न संशयः ॥
भासनाद्भसितं प्रोक्तं भस्म कल्मषभक्षणात् ।
भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी परम् ॥
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम् ।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः ॥
परमास्त्रञ्च शैवानां भस्मैतत्पारमेश्वरम् ।
धौम्याग्रजस्य तपसि व्यापदो यन्निवारिताः ॥
तस्मात्सर्व्वप्रयत्नेन कृत्वा पाशुपतं व्रतम् ।
धनवद्भस्म संगृह्य भस्मस्नानरतो भवेत् ॥”
इति श्रीशिवपुराणे वायुसंहितायां पूर्व्वभागे एकोनत्रिंशोऽध्यायः ॥ * ॥)

पाशुपतास्त्रं, क्ली, (पाशुपतं पशुपतिसम्बन्धि अस्त्रम् ।) पशुपतेः शूलास्त्रम् । तस्य स्वरूपं यथा,—
“गजाननोऽपि सञ्चिन्त्य यत्तत् पाशुपतं परम् ।
महारूपं महाकायं युगान्ताग्निसमप्रभम् ॥
पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
सौम्यं घोरं सुघोरास्यमूर्द्ध्वकेशं भयोत्कटम् ॥
जटाभारेन्दुगङ्गाहिध्रियमाणं शिवाङ्गजम् ।
वेणुवीणाशङ्खघण्टं डमरुकारावसंकुलम् ॥
शिवारावं भयात्रासि शववायससेवितम् ।
उल्कादग्धज्वलज्ज्वालं गोनाशकृतभूषणम् ॥
ललज्जिह्वलनागेन्द्रं गजचर्म्मार्द्रवाससम् ।
केकरं तर्ज्जमानन्तु शूलखट्वाङ्गधारिणम् ॥
ग्रसमानं समिदं त्रैलोक्यं सचराचरम् ।
पुरतो विघ्ननाशस्य लेलिहानं व्यवस्थितम् ॥”
इति देवीपुराणम् ॥

पाशुपाल्यं, क्ली, (पशुपालस्य भावः कर्म्म वा । पशुपाल+ष्यञ् ।) वैश्यवृत्तिः । पशून् गोमहिष्यादीन् पालयति पशुपालः ढात् षण् । पशुपालस्य भावः कर्म्म वा इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये ।२८।६।
“दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥”)

पाश्चात्यः, त्रि, (पश्चात्+“दक्षिणापश्चात्पुरसस्त्यक् ।” ४ । २ । ९८ । इति त्यक् ।) पश्चाद्भवः । (यथा, देवीभागवते । १ । १७ । ६६ ।
“पाश्चात्यं यामिनीयामं ध्यानमेवान्वपद्यत ।
स्नात्वा प्रातः क्रियाः कृत्वा पुनरास्ते समाहितः ॥”)
पश्चिमदेशजातः । इति मुग्धबोधव्याकरणम् ॥
(यथा, महाभारते । १ । १२१ । ११ ।
“स विजित्य गृहीत्वा च भूपतीन् राजसत्तमः ।
प्राच्योदीच्यान् पाश्चात्यान् दाक्षिणात्यानकालयत ॥”)

पाश्चात्याकरसम्भव, क्ली, (पाश्चात्ये पश्चिमदिग्भवे आकरे सम्भव उत्पत्तिर्यस्य ।) साम्भरीलवणम् । तत्पर्य्यायः । रोमकम् २ रामलवणम् ३ । इति रत्नमाला ॥

पाश्या, स्त्री, (पाशानां समूहः । पाश+“पाशादिभ्यो यः ।” ४ । २ । ४९ । इति यः ।) पाशसमूहः । इत्यमरः । ३ । २ । ४३ ॥

पाषकः, पु, (पषति बध्नातीव चरणौ । पष बन्धे+ण्वुल् ।) पादाभरणविशेषः । पाशुली इति भाषा ॥ यथा,—
“रत्नपाषकषट्कैश्च विराजितपदाङ्गुलैः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

पाषण्डः, पुं, (पापं सनोति दर्शनसंसर्गादिना ददातीति । षणु ञ दाने + अमन्तात् डः । पृषोदरादित्वात् साधुः । यद्वा, पाति रक्षति दुष्कृतेभ्य इति । पा + क्विप् । पा वेदधर्म्मस्तं षण्डयति खण्डयतीति । यदुक्तम् ।
"पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते ।
तं ष(ख)ण्डयन्ति ते यस्मात् पाषण्डास्तेन हेतुना ॥
नानाव्रतधरा नानावेशाः पाषण्डिनो मताः ॥")
वेदविरुद्धाचारवान् सर्व्ववर्णचिह्नधारी । बौद्धक्षपणकादिः । इति भरतः ॥ तत्पर्य्यायः । सर्व्वलिङ्गी २ । इत्यमरः ।२।७।४५ ॥ कौलिकः ३ पाषण्डिकः ४ । इति शब्दरत्नावली ॥ * ॥ पाषण्डादिसम्भाषणे दोषो यथा,—
"तस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत् ।
विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षितः ॥
क्रियाहानिर्गृहे यस्य मासमेकं प्रजायते ।
तस्यावलोकनात् सूर्य्यं पश्येत मतिमान् नरः ॥
किं पुनर्य्यैस्तु सन्त्यक्ता त्रयी सर्व्वात्मना द्विज ।
पाषण्डभोजिभिः पापैर्व्वेदवादविरोधिभिः ॥
पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत ॥
दूरापास्तस्तु संसर्गः सहास्या वापि पापिभिः ।
पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्ज्जयेत ॥
एते नग्नास्तवाख्याता दृष्ट्या श्राद्धोपघातकाः ।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति ॥
एते पाषण्डिनामानो ह्येनान्न आलपेद्बुधः ।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम् ॥
पुंसां जटाधरणमौण्ड्यवतां वृथैव
मोघाशिनामखिलशौचनिराकृतानाम् ।
तोयप्रदानपितृपिण्डबहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ * ॥
पाषण्डादीनां लक्षणं यथा,—
"भ्रष्टः स्वधर्म्मात् पाषण्डो विकर्म्मस्थो निषिद्धकृत् ।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ॥
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम् ॥
तद्वान् वैडालव्रतिकः ॥
प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् ।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः ॥
सन्देहकृद्धेतुभिर्यः सत्कर्म्मसु स हैतुकः ।
अर्व्वाग्दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ॥
शठो मिथ्याविनीतश्च वकव्रतिरुदाहृतः ॥" इति ।
एतट्टीकायां स्वामी ॥ * ॥ अपि च ।
सदाशिव उवाच ।
"येऽन्यदेव परत्वेन वदन्त्यज्ञानमोहिताः ।
नारायणाज्जगद्वन्द्यं ते वै पाषण्डिनस्तथा ॥
कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः ।
ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः ।
अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा ॥
शङ्खचक्रोर्द्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः ।
रहिता ये द्विजा देवि । ते वै पाषण्डिनो मताः ॥
श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः ।
स पाषण्डीति विज्ञेयः सर्व्वलोकेषु गर्हितः ॥
समस्तयज्ञभोक्तारं विष्णुं ब्रह्मण्यदैवतम् ।
उद्दिश्य देवताश्चैव जुहोति च ददाति च ।
स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्म्मसु ॥
स्वातन्त्र्यात् क्रियते यैस्तु कर्म्म वेदोदितं महत् ।
विना वै भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः ॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा ॥
अनास्था क्रियते यैस्तु मनोवाक्कायकर्म्मभिः ।
वासुदेवं न जानाति स पाषण्डी भवेद् द्विजः ॥
हरेर्नामैकमन्त्राभ्यां लोकाः सद्भिर्विवर्ज्जिताः ।
यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः ॥
वर्णानां गुरवो नित्यं शिवे यद्यप्यवैष्णवाः ।
भगवद्धर्म्मरहिता वैष्णवादिविनिन्दकाः ॥
रजस्तमोमया जीवहिंसका जीवभक्षकाः ।
असत्प्रतिग्रहरता देवला ग्रामयाजकाः ॥
भ्रष्टाचारास्तथा व्रात्या नानाविबुधपूजकाः ।
देवतोच्छिष्टश्राद्धादिभोजिनः शूद्रवत्क्रियाः ॥
विविधानन्तकर्म्मरता भक्षणाद्यविचारिणः ।
लोभमोहमदक्रोधकामाहङ्कारिणः सदा ॥
एवंविधाः पारदारिकाद्या येऽत्र शुभानने ।
अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः ॥
वर्णाश्रमाद्या ये मर्त्त्याः स्वस्वधर्म्मविवर्ज्जिताः ।
ते वै पाषण्डिनो देवि । नारायणबहिर्म्मुखाः ॥
सर्व्वाशिनो द्विजा येऽपि सर्व्वविक्रयिणस्तथा ।
षड्वेदाचाररहितास्ते वै पाषण्डिनो मताः ॥
ये त्वसद्भक्ष्यपानादिरता लोका निरन्तरम् ।
शिवे । पाषण्डिनो ज्ञेया इह ते नात्र संशयः ॥
विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः ।
अश्वत्थतुलसीतीर्थक्षेत्रादिषु महागुरौ ॥
लक्ष्मीसरस्वतीगङ्गायमुनासु वरानने ।
स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः ॥
रुद्राक्षेन्द्राक्षभद्राक्षस्फाटिकाक्षादिधारिणः ।
जटिला भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये ॥
असिजीवी मसीजीवी धावकः पाचकस्तथा ।
एते पाषण्डिनो विप्रा मादकद्रव्यभोजिनः ॥
देवि । कामादयो भक्ता अनन्यशरणास्तु ये ।
पाषण्डसङ्गं न कुर्य्युस्तद्गेहे पानभोजने ॥
यदि दैववशाल्लोभान्मोहात्तस्यान्नभोजनम् ।
तत्स्पर्शं जलपानञ्च चक्रुस्तत्सङ्गमादिकम् ॥
तत्पानभोजनालापसङ्गालिङ्गनतोऽचिरात् ।
पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा ॥
किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः ।
असदाचरणाश्चेत् स्युस्तदा पाषण्डिनः स्मृताः ॥
एतद्भोजनपानादिकर्म्मभिर्वैष्णवा जनाः ।
पाषण्डिनस्तथा स्युश्चैव जटाभस्मादिधारिणः ॥"
इति पाद्मोत्तरखण्डे पाषण्डाचरणं नाम ४८ अ. ॥
तस्य त्याज्यत्व यथा,
"त्यज पाषण्डसंसर्गं सङ्गं भज सतां सदा ।
कामं क्रोधञ्च लोभञ्च मोहञ्च मदमत्सरौ ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥ * ॥
तस्य राष्ट्राद्बहिष्कर्त्तव्यता यथा,—
"कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान् ।
विकर्म्मस्थान् शौण्डिकांश्च क्षिप्रं निर्व्वासयेत पुरात् ॥
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः ।
विकर्म्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥"
इति मानवे ६ अध्यायः ॥
अपि च ।
"आक्रुष्टांश्च तथा लुब्धान् दृष्टार्थांस्तत्त्वभाषिणः ।
पाषण्डिनस्तापसादीन् परराष्ट्रेषु योजयेत् ॥"
इति युक्तिकल्पतरुः ॥

पाषण्डकः, पुं, (पाषण्ड एव । स्वार्थे कन् ।) पाषण्डः । इति शब्दरत्नावली ॥

पाषण्डी, [न्] पु, (पां त्रयीधर्म्मं षण्डयतीति । पा + षण्ड + णिनिः ।) पाषण्डः । इति जटाधरः ॥ (यथा, मनुः । ४ । ३० ।
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥")

पाषाणः, पुं, (पषति पीडयत्यनेनेति । पष पीडने + बाहुलकात् आनच् । "पषेर्णिच्च ।" २ । ६० । इत्युज्ज्वलदत्तोक्त्या स च णित ।) प्रस्तरः । तत्पर्य्यायः । ग्रावः २ उपलः ३ अश्मा ४ शिला ५ दृषत् ६ । इत्यमरः । २।३।४ ॥ दृशत् ७ । इति भरतः ॥ प्रस्तरः ८ पारावुकः ९ पारटीटः १० मत्सरुः ११ काचकः १२ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ४ । २१ । ५४ ।
"गतेऽथ नारदे कंसः समाहूयाथ बालकम् ।
पाषाणे पोथयामास सुखं प्राप च मन्दधीः ॥"
पाषाणादिनिर्म्मितत्वात् देवताप्रतिमादि । यथा आर्य्यासप्तशत्याम् । ३८६ ।
"पूजां विना प्रतिष्ठां नास्ति न मर्म्म विना प्रतिष्ठा च ।
तदुभयविप्रतिपन्नः पश्यतु गीर्व्वाणपाषाणम् ॥")

पाषाणगर्द्दभः, पु, हनुसन्धिजक्षुद्ररोगविशेषः । तल्लक्षणमाह ।
"वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः ।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्द्दभः ॥"
स्थिरः कठिनः ॥ * ॥ तच्चिकित्सा यथा,—
"पाषाणगर्द्दभं पूर्ब्बं स्वेदयेत् कुशलो भिषक् ।
ततः पत्तमिकाशोफैः कल्ककैर्वा प्रलेपयेत् ॥
वातश्लेष्महरैरन्यैः कल्कैरन्यैश्च लेपयेत् ।
परिपाकगतं भित्वा व्रणवत्तमुपाचरेत् ॥
जलौकाभिर्हृते रक्ते स प्रशाम्यति निश्चयम् ।
एतत्स्थलेषु च हुषु प्रोक्तं लिखितं ततः ॥"
इति भावप्रकाशः ॥

पाषाणचतुर्द्दशी, स्त्री, (पाषाणसाध्या पाषाणवत्पिष्टकभोजनसाध्या चतुर्द्दशी ।) वृश्चिकराशिस्थरविकशुक्लपक्षीयचतुर्द्दशी । यथा, भविष्ये ।

"वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्द्दशी ।
तस्यामाराधयेद्गौरीं नक्तं पाषाणभोजनैः ॥
पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः ।"
इति तिथ्यादितत्त्वम् ॥

पाषाणदारकः, पुं, (दारयति विदारयतीति । दृ + णिच् + ण्वुल् । पाषाणस्य दारकः ।) टङ्कः । इति हेमचन्द्रः । ३ । ५८३ ॥

पाषाणदारणः, पु, (दारयतीति । दृ + णिच् + ल्युः । पाषाणस्य दारणो विदारकः ।) टङ्कः । इत्यमरः । २ । १० । ३४ ॥

पाषाणभेदनः, पुं, (पाषाणं अश्मरीं भिनत्तीति । भिद् + ल्युः ।) वृक्षविशेषः । पाथरकुचो इति भाषा । तत्पर्य्यायः । अश्मघ्नः २ शिलाभेदः ३ अश्मभेदकः ४ श्वेता ५ उपलभेदी ६ पत्रभित् ७ शिलागर्भजः ८ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । मेहकृच्छ्रदाहमूत्रकृच्छ्राश्मरीनाशित्वम् । शीतलत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पाषाणभेदकोऽश्मघ्नो गिरिभिच्छिन्नयोजनी ।
अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः ॥
भेत्ता हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः ।
योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च ॥"
इति भावप्रकाशः ॥

पाषाणभेदी, [न्] पुं, (पाषाणं अश्मरीं भिनत्तीति । भिद् + णिनिः ।) वृक्षविशेषः । पाथरचुर इति भाषा । तत्पर्य्यायः । अश्मभेदः २ शिलाभेदः ३ अश्मभित् ४ । इति रत्नमाला ॥ (अश्मभेदशब्दे ज्ञातव्यमस्य विवरणम् ॥)

पाषाणी, स्त्री, (पाषाण + अल्पार्थे ङीष् ।) क्षुद्रपाषाणः । स तु परिमापकविशेषः । वाटखारा इति भाषा । तत्पर्य्यायः । दृषत्करा २ । इति शब्दचन्द्रिका ॥

पाहनः, पु, (पाति रक्षति दुष्कृतेभ्य इति । पा + क्विप् । पां अर्थाधर्म्मं हन्ति गच्छतीति । हन् गतौ + डः । पाहं ब्रह्माणं अनतीति । अच् ।) ब्रह्मदारुवृक्षः । इति शब्दचन्द्रिका ॥

पि, श गतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) श, पियति । इति दुर्गादासः ॥

पिकः पुं, (अपि कायति शब्दायते इति । अपि + कै + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । अपेरकारलोपः ।) कोकिलः । इत्यमरः ॥ २ । ५ । १६ । (यथा,—
"पिक । विधुस्तव हन्ति समं तमस्त्वमपि चन्द्रविरोधिकुहूरवः ।
इति तयोरनिशं हि विरोधिना कथमहो समता मम तापने ॥"
इत्युद्भटः ॥)

पिकप्रिया, स्त्री, (पिकानां प्रिया ।) महाजम्बूः । इति राजनिर्घण्टः ॥

पिकबन्धुः, पु, (पिकानां बन्धुरिव ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥

पिकरागः, पुं, (पिकानां रागोऽनुरागो यत्र ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

पिकवल्लभः, पुं, (पिकानां वल्लभः ।) आम्रवृक्षः । इति भावप्रकाशः ॥ (गुणाश्चास्य आम्रशब्दे ज्ञातव्याः ॥)

पिकाक्षः, पु, (पिकस्य अक्षि लोचनं तद्वत् वर्णो यस्य । समासे षच् ।) रोचनी । इति शब्दचन्द्रिका ॥

पिकाङ्गः, पुं, (पिकस्याङ्गमिव अङ्गं यस्य ।) पक्षिविशेषः । इति शब्दचन्द्रिका ॥

पिकानन्दः, पुं, (पिकानामानन्दो यस्मिन् ।) वसन्तकालः । इति राजनिर्घण्टः ॥

पिकी, स्त्री, (पिक + स्त्रियां ङीष् ।) कोकिला । इति राजनिर्घण्टः ॥

पिकेक्षणा, स्त्री, (पिकस्य ईक्षणं लोचनं तद्वत् वर्णो यस्याः ।) कोकिलाक्षः । इति राजनिर्घण्टः ॥ कोकिलचक्षुस्तुल्यचक्षुर्युक्ता च ॥

पिक्कः, पुं, (पिक् इत्यव्यक्तशब्देन कायति शब्दायते इति । कै + कः । पिक इव कायतीति । पृषोदरादित्वात् साधुरित्येके ।) हस्तिशावकः । इति शब्दमाला ॥

पिङ्गं, क्ली, (पिङ्गतीति । पिजि वर्णे + अच् । न्यङ्क्वादित्वात् कुत्वम् ।) बालकः । इति मेदिनी । गे १७ ॥ हरितालम् । इति राजनिर्घण्ट, ॥

पिङ्गः, पुं, (पिजि वर्णे + अच् । कुत्वञ्च ।) पिङ्गलवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १६ ॥ (यथा, महाभारते । १ । १२३ । ३२ ।
"पद्मपत्राननः पिङ्गस्तेजसा प्रज्वलन्निव ॥")
मूषकः । इति राजनिर्घण्टः ॥

पिङ्गकपिशा, स्त्री, (पिङ्गा कपिशा च । वर्णौ वर्णेनेति समासः ।) तैलपायिका । इति हेमचन्द्रः । ४ । २७३ ॥

पिङ्गचक्षुः, [स्] पुं, (पिङ्गे चक्षुषी यस्य ।) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१८ ॥

पिङ्गजटः, पुं (पिङ्गा पिङ्गलवर्णा जटा यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११३ ॥

पिङ्गलं, क्ली, (पिङ्गं लातीति । ला + कः ।) रीतिः । इति राजनिर्घण्टः ॥

पिङ्गलः, पुं, (पिङ्गो वर्णोऽस्यास्तीति । पिङ्ग + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) नीलपीतमिश्रितवर्णः । तत्पर्य्यायः । कडारः २ कपिलः ३ पिङ्गः ४ पिशङ्गः ५ कद्रुः ६ । तद्वति, त्रि । इत्यमरः । १ । ५ । १६ ॥ केचित् द्वयं द्वयं पर्य्यायमाहुः । अत्र नीलपीतः कपिलः । रोचनाभः पिशङ्गः । कनकपिङ्गलः कद्रुः । इति सुभूतिः ॥
"पिशङ्गो रोचना भासः कद्रुः कनकपिङ्गलः ॥"
इति नाममाला ॥
"पिङ्गदीपशिखाभः स्यात् पिशङ्गः पद्मधूलिवत् ।
पीतनीलहरिद्रक्तः कडारस्तृणवह्निवत् ॥
अयस्कान्तिरक्तः पीताङ्गः कपिलो रोचनाच्छविः ॥
इत्यत्र भेदोऽपि दृश्यते । अल्पभेदत्वादिहासौ नादृतः ।" इति तट्टीकायां भरतः ॥ * ॥ नागभेदः । (यथा, महाभारते । १ । ३५ । ६ ।
"निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा ॥")
रुद्रः । चण्डांशुपारिपार्श्विकः । निधिभेदः । कपिः । अग्निः । इति मेदिनी । ले, ११३ ॥ मुनिविशेषः । (यथा महाभारते ।१।५३।६।
"ब्रह्माभवत् शार्ङ्गरवो अध्वर्युश्चापि पिङ्गलः ॥")
नकुलः । स्थावरविषविशेषः । इति हेमचन्द्रः । ४ । १६५ ॥ क्षुद्रोलूकः । इति राजनिर्घण्टः ॥ (यक्षविशेषः । यथा महाभारते ।३।२३०।५१।
"पिङ्गलो नाम यक्षेन्द्रो लोकस्यानन्ददायकः ॥"
पर्व्वतविशेषः । इति ब्रह्माण्डपुराणम् ॥) प्रभवादिषष्टिवर्षान्तर्गतैकपञ्चाशत्तमवर्षः । यथा,
"देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि । दुर्भिक्षं नर्म्मदातटे ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥ पिङ्गलाचार्य्यकृतच्छन्दोग्रन्थविशेषः । यथा,—
"जो विविहमत्तसायरपारं पत्तो विविमलमइ
हेलम् ।
पढमं भासतरण्डो णाओसो पिङ्गलो जयइ ॥"
अस्य व्याख्या ।
"अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये ग्रन्थकृत् करोति । विविधा नानाप्रकारकविन्यासविशिष्टा मात्रा यत्र तद्विविधमात्रं छन्दःकदम्बं तदेव सागरः अनिर्दगमत्वात भाषा एव तरण्डो नौर्यस्य । प्राकृते ह्रस्वता तेन भाषयैव छन्दःशास्त्रमुक्तवानित्यवगम्यते । केचित्तु लघुगुरुरूपा या विविधा मात्रा सैव सागरः तत्पारं प्राप्तः अपिरवधारणे । विमलया मत्या हेला यत्र तद्यथा स्यात् निर्म्मलबुद्ध्या हेलयैव पारं गत इत्यर्थः । प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमित्यवगम्यते । अर्थान्तरमप्यनेनैव व्यज्यते यो विविधमात्राभिः सागरपारं प्राप्तः वि. पक्षी अर्थाद्गरुडः तस्य विमलमतौ हेला यत्र तत् यथा स्यात भाषा अनुनयवाक् सैव नौर्यस्य ईदृशो नागो जयति । एवं हि श्रयते भोक्तुमुद्यतं गरुडं दृष्ट्वा सकौशलं सविनयं तमुवाच भो गरुड ममेदं कौशलं पश्य यन्नैकवारलिखितं मया लिख्यते तदा मां भक्ष इत्युक्ता सागरतीरं गडविंशत्यक्षरपर्य्यन्तं प्रस्तारं प्रदर्श्य समुद्रं प्रविवेश गरुडोऽपि वञ्चनां गुरुत्वेन तत्र मत्वा तद्देशाद्विरराम एतादृशी बुद्धिगौरवं यस्य अतएव जयति उत्कर्षेण वर्त्तते तं प्रति प्रणतोऽस्मीति व्यज्यते अथवा गाथायां भगणोपन्यासो मङ्गलार्थः प्रथमं भत्वोदारीनयोर्भगणजगणयोर्गोऽनुचितोऽपि कथमित्यवहितैर्भाव्यम् ।" इति पिङ्गलग्रन्थस्तट्टीका च ॥

पिङ्गललोहं, क्ली, (पिङ्गलं लोहमिति नित्यकर्म्मधारयः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पिङ्गला, स्त्री, (पिङ्गल + टाप् ।) वामनाख्यदक्षिणदिग्गजस्य स्त्री । इत्यमरः । १ । ३ । ४ ॥ कुमुदस्य करिणी । वेश्याविशेषः । इति मेदिनी । ले, ११३ ॥ तस्या उपाख्यानं यथा,—

"पिङ्गला नाम वेश्यासीद्विदेहनगरे पुरा ।
तस्या मे शिक्षितं किञ्चिन्निबोध नृपनन्दन ॥
सा स्वैरिण्येकदा कान्तं सङ्केत उपनेष्यती ।
अभूत् काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥
मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ ।
तान् शुल्कदान् वित्तवतः कान्तान् मेनेऽर्थ-
कामुका ॥
आगतेष्वपयातेषु सा सङ्केतोपजीविनी ।
अप्यन्यो वित्तवान् कोऽपि मामुपैष्यति भूरिदः ॥
एवं दुराशया ध्वस्तनिद्रा द्वार्यवलम्बिनी ।
निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥
तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः ।
निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥
तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ।
निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ।
न ह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति ॥
पिङ्गलोवाच ।
अहो मे मोहविततिं पश्यताविजितात्मनः ।
या कान्तादसतः कामं कामये येन बालिशा ॥
सन्तं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयाधिशोक-
मोहप्रदं तुच्छमहं भजेऽज्ञा ॥
अहो मयात्मा परितापितो वृथा
साङ्केत्यवृत्त्यातिविगर्ह्यवार्त्तया ।
स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्
क्रीतेन वित्तं रतिमात्मनेच्छती ॥
यदस्थिभिर्निर्मितवंशवंश्य-
स्थूणं त्वचा रोमनखैः पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्-
विण्मूत्रपूर्णं मदुपैति कान्या ॥
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ।
यान्यमिच्छन्त्यसत्यस्मादात्मदात् काममच्युतात् ॥
सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।
तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥
कियत् प्रियन्ते व्यभजन् कामा ये कामदा नराः ।
आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ॥
नूनं मे भगवान् प्रीतो विष्णुः केनापि कर्म्मणा ।
निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥
मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः ।
येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥
तेनोपकृतमादाय शिरसा ग्राम्यसङ्गताः ।
त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरम् ॥
सन्तुष्टा श्रद्दधत्येतद्यथालाभेन जीवती ।
विहराम्यमुनैवाहमात्मना रमणेन वै ॥
संसारकूपे पतितं विषयैर्मुषितेक्षणम् ।
ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधी-
श्वरः ॥
आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात् ।
अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥
श्रीब्राह्मण उवाच ।
एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम् ।
छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
यथा सञ्छिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥"
इति श्रीभागवते ११ स्कन्धे श्रीभगवदुद्धव-
संवादे अष्टमेऽध्याये ।२२—४३ ॥ * ॥
कर्णिका । नाडीविशेषः । इति हेमचन्द्रः ॥
पक्षिभेदः । राजरीतिः । इति राजनिर्घण्टः ॥
शिंशपावृक्षः । इति रत्नमाला ॥ * ॥
अथ पिङ्गलादिनाडीनिरूपणम् ।
"दक्षिणांशः स्मृतः सूर्य्यो वामभागो निशाकरः ।
नाडीर्दश विद्धलाम् मुख्याश्चैताः प्रकीर्त्तिताः ॥
इडा वामे तयोर्मध्ये सुषुम्णा पिङ्गला परे ।
मध्या तास्वपि नाडी स्यादग्नीषोमस्वरूपिणी ॥"
"अर्च्चिता वामवृक्काधःस्था धनुर्वक्रा वामनासा-
पर्य्यन्तं गता एवं पिङ्गला दक्षिणावृक्काधःस्था
धनुर्वक्रा दक्षिणनासान्तं गता पृष्ठवंशान्तर्गता
सुषुम्णा इत्यर्थः ।" इति सारदातिलकम् ॥
"नाडीनां संवहो देवि । कन्दयोनिः खगाण्डवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः ।"
कन्दस्य पद्मस्य योनिरुत्पत्तिस्थानं शालकमिति
यावत् ।
"प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्णा च तृतीयिका ॥
गान्धारी हस्तिजिह्वा च पृषा चैव यशस्विनी ।
अलम्बुषा कुहूश्चैव शङ्खिनी च दश स्मृताः ॥
एवं नाडीमयं चक्रं विज्ञेयं शक्तिदक्षक ।
इडायाः पिङ्गलायाश्च मध्ये या सा सुषुम्-
णिका ॥
इयञ्च त्रिगुणा ज्ञेया ब्रह्मविष्णुशिवात्मिका ।
रजोगुणा च वज्राख्या चित्रिणी सत्वसंयुता ॥
तमोगुणा ब्रह्मनाडी कार्य्यभेदक्रमेण च ॥
इति निरुत्तरतन्त्रे प्रथमपटलः ॥
इडापिङ्गलयोः स्वरूपं यथा —
"इडा च शुक्लचन्द्राभा तस्या वामे व्यवस्थिता ।
पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता ॥"
इति योगार्णवः ॥
"इडायां संश्रितश्चन्द्रः पिङ्गलायां दिवाकरः ॥"
इति तन्त्रान्तरम् ॥

पिङ्गलिका, स्त्री, (पिङ्गलो वर्णोऽस्त्यस्या इति । पिङ्गल+ठन् ।) बलाका । इति जटाधरः ॥ (कीटविशेषः । यथा, सुश्रुते । ५ । ८ ।
"मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेति षट् ताभिर्दष्टस्य दाहशोफौ भवतः ॥")

पिङ्गसारः, पु, (पिङ्गः सारो यस्य ।) हरितालम् । इति राजनिर्घण्टः ॥ (अस्य गुणादिविवरणमस्य ज्ञातव्यः ॥)

पिङ्गस्फटिकः, पु, (पिङ्गः पिङ्गलवर्णः स्फटिकः इति नित्यकर्म्मधारयः ।) गोमेदमणिः । इति राजनिर्घण्टः ॥

पिङ्गा, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति । अच् टाप् च ।) गोरोचना । हिङ्गुः । नालिका । चण्डिका । इति मेदिनी । गे, ११ ॥ हरिद्रा । इति शब्दचन्द्रिका ॥ वंशरोचना । इति राजनिर्घण्टः ॥ (स्वनामख्याता तपस्विनी । अस्या आश्रमस्तु तीर्थस्थानत्वेन प्रसिद्धः । यथा, महाभारते । ३ । ८२ । ५५ ।
"पिङ्गातीर्थ उपस्पृश्य ब्रह्मचारी नराधिप ।
कपिलानां नरव्याघ्र । शतस्य फलमश्नुते ॥"
तथा च तत्रैव । १३ । २५ । ५३ ।
"उज्जानक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे ।
पिङ्गायाश्चाश्रमे स्नात्वा सर्व्वपापैः प्रमुच्यते ॥")

पिङ्गाक्षः, पु, (पिङ्गे अक्षिणी यस्य । षच् समासे ।) शिवः । इति त्रिकाण्डशेषः ॥ (कुम्भीरः । पिङ्गचक्षु शब्ददर्शनात् ॥ द्रोणपुत्रखगविशेषः । यथा मार्कण्डेये । १ । २१ ।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा ।
द्रोणपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः शास्त्रचिन्तकाः ॥"
पिङ्गलनेत्रे, त्रि । यथा, तत्रैव । ८८ । ४५ ।
"नमस्तेऽस्तु । पिङ्गाक्ष । नमस्तेऽस्तु हुता-
शन ।")

पिङ्गाशः, पु, (पिङ्गं वर्णमश्नुते इति । अश+अण् ।) पल्लीपतिः । मत्स्यभेदः । पाङ्गाश इति भाषा ॥ जात्यस्वर्णम्, क्ली । इति मेदिनी । शे, २५ ॥

पिङ्गाशी, स्त्री, (पिङ्ग वर्णमश्नुते इति । अश+अण् । स्त्रियां ङीप् ।) नीलिका । इति मेदिनी । शे, २५ ॥

पिङ्गास्यः, पु, (पिङ्गमास्यं वदनं यस्य ।) पिङ्गाशमत्स्यः । इति शब्दरत्नावली ॥

पिङ्गी, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति । अच् । ततो गौरादित्वात् ङीष् ।) शमीवृक्षः । इति मेदिनी । गे, १२ ॥

पिङ्गेक्षणः, पु, (पिङ्गानि पिङ्गलवर्णानि ईक्षणानि यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥ (कुम्भीरः । पिङ्गचक्षुःशब्ददर्शनात् ॥ पिङ्गलनेत्रे, त्रि ॥)

पिचण्डः, पु, (अपिचण्ड्यतेऽनेनेति । अपि+चडि कोपे+घञ् । अपेरल्लोपः ।) पश्ववयवः । उदरम् । इति हेमचन्द्रः । ३ । २६८ ॥

पिचण्डिल, त्रि, (अतिशयितं पिचण्डमुदरमस्य । पिचण्ड+तुन्दादित्वात् इलच् ।) तुन्दिलः । इति हेमचन्द्रः । ३ । ११४ ॥ (यथा, काशीखण्डे । ८१ । १०२ ।
"स्वाहाकारैर्वषट्कारैः सुरा जाताः पिच-
ण्डिलाः ।
रक्षिता गिरयस्तेन सद्ग्राम। पदे पदे ॥")

पिचव्यः, पु, (पिचवे तूलाय साधुः । पिचु+यत् ।) कार्पासः । इति हेमचन्द्रः । ४ । २१५ ॥

पिचिण्डः, पु, उदरम् । इत्यमरः । २ । ६ । ७७ ॥
तस्य लक्षणं यथा,—
"भागाद्याः सम्भजठरा निःस्वाः स्युर्घटसन्निभाः ।
सर्पोदरा दरिद्राः स्युः ——   —— ॥"
इति गारुडे ६३ अध्यायः ॥
पश्वोरवयवः । इति मेदिनी । डे, ३२ ।

पिचिण्डिका, स्त्री, (पिचिण्ड इव पिण्डाकृतिरस्त्यस्येति । पिचिण्ड + ठन् ।) पिण्डिका । इति हेमचन्द्रः । ३ । २७९ ॥ पायर डिम् इति भाषा ॥

पिचिण्डिलः, पु, (अतिशयितः पिचिण्ड उदरमस्य । पिचिण्ड + तुन्दादित्वात् इलच् ।) वृहदुदरयुक्तः । इत्यमरः । २ । ६ । ४४ ॥ तत्पर्य्यायः । पिचण्डिलः २ वृहत्कुक्षिः ३ तुन्दी ४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७ उदरिलः ८ । इति हेमचन्द्रः । ३ । ११४ ॥ (यथा, काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादे ।

"पिचिण्डिलैः श्यामवक्त्रैर्मेघगम्भीरनिस्वनैः ॥")

पिचुः, पु, (पचतीति । पिच मर्द्दने + मृगय्वादित्वात् कुः ।) कार्पासतूलः । इत्यमरः । २ । ६ । १०६ ॥ (यथा, सुश्रुते । ४ । ६ ।

"अग्रौ चास्य शलाकयोनपीड्य पिचुवक्त्रयोरन्यतरेण प्रच्छाद्य क्षारं पातयेत् ॥") कुष्ठभेदः । कर्षः । असुरविशेषः । इति मेदिनी । चे ७ ॥ भैरवः । शस्यभेदः । इति विश्वः ॥ (चिकित्सोपयोगिपञ्चकर्म्मान्तर्गतक्रियाविशेषः । यथा, —

"कामिन्यां पूनियोन्याञ्च कर्त्तव्यः स्वेदनो विधिः । क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत् ॥

शल्लकीजिङ्गिनीजम्बुधवत्वक्पञ्चवल्कलैः । कषायैः साधितैः स्नेहः पिचुः स्यादिशुनापहः ॥"

इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापच्चिकित्सायाम् ॥)

पिचुकः, पु, (पिचुरिव कायतीति । कै + कः ।) मदनवृक्षः । इति रत्नमाला ॥ मयना इति भाषा ॥

पिचुतूलं, क्ली, (पिचोस्तूलम् ।) तूलः । इति त्रिकाण्डशेषः ॥

पिचुमन्दः, पु, (पिचुं कुष्ठविशेषं मन्दयति नाशयतीति । मन्द + अण ।) निम्बवृक्षः । इति हेमचन्द्रः । ४ । २०५ ॥ (यथा, आर्य्यासप्तशत्याम् । ३४९ ।

"पश्यानुरूपमिन्दिन्दिरेण माकन्दशेखरो मुखरः ।
अपि च पिचुमन्दमुकुले मौकुलिकुलमाकुलं मिलति ॥")

पिचुमर्द्दः, पु, (पिचुं कुष्ठविशेषं मर्द्दयति मृद्नातीति वा । मृद + अण ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ यथा, देवीभागवते । ३ । १० । १२ ।

"असतामुपकाराय दुर्ज्जनानां विभूतयः ।
पिचुमर्द्दः फलाढ्योऽपि काकैरेवोपभुज्यते ॥"

पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"कैटर्य्यः पिचुमर्द्दश्च निम्बोऽरिष्टो वरत्वचा ।
दर्द्दुघ्नो हिङ्गुनिर्य्यासः सर्व्वतोभद्र इत्यपि ॥")

पिचुलः, पु, (पिचु लातीति । ला + कः ।) झावुकः । इज्जलः । जलवायसः । इति मेदिनी । ले, ११२ ॥ तूलः । इत्यमरटीकायां सारसुन्दरी ॥

पिच्छ क छेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पिच्छयति । इति दुर्गादासः ॥

पिच्चटं, क्ली, (पिच्चयतीति । पिच्च छेदने + अटन् ।) सीसकम् । रङ्गम् । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"रङ्गं वङ्गञ्च कस्तीरं स्वदङ्गं पूत्र पिच्चटम् ॥")

नेत्ररोगे, पु । इति मेदिनी । टे, ५० ॥

पिच्छ, श बाधे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, पिच्छती पिच्छन्ती । बाधो विहतिः । इति दुर्गादासः ॥

पिच्छं, क्ली, (पिच्छतीति । पिच्छ + अच् ।) मयूरपुच्छम् । तत्पर्य्यायः । शिखण्डः २ वर्हम् ३ । इत्यमरः । २ । ५ । ३१ ॥ शिखिपुच्छम् ४ शिखण्डकम् ५ । इति शब्दरत्नावली ॥ (यथा, अनर्घराघवे । ६ । ६५ ।

"तस्याखिलभौमस्य ध्वजदण्डस्य लाञ्छनम् ।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत् ॥")

चूडा । इति मेदिनी । छे, ५ ॥

पिच्छः, पु, (पिच्छतीति । पिच्छ + अच् ।) लाङ्गूलम् । इति मेदिनी । छे, ५ ॥

पिच्छलदला, स्त्री, (पिच्छलं दलं पत्रं यस्याः ।) वदरीवृक्षः । इति त्रिकाण्डशेषः ॥

पिच्छवाणः, पु, (पिच्छं वाण इव यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

पिच्छा, स्त्री, (पिच्छ + अजादित्वात् टाप् ।) शाल्मलीवेष्टः । इत्यमरः । २ । ४ । ४७ ॥ (अस्याः पर्य्यायो यथा, —

"निर्य्यासः शाल्मलेः पिच्छा शाल्मली वेष्टकोऽपि च ।
मोचास्रावो मोचरसो मोचनिर्य्यास इत्यपि ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पूगः । छटा । कोषः । मोचा । भक्तसम्भतमण्डम् । पङ्क्तिः । अश्वपदामयः । इति मेदिनी । छे, ४ ॥ पालिका । फणिलाला । इति हारावली । २३० ॥ शिंशपावृक्षः । इति शब्दचन्द्रिका ॥

पिच्छिका, स्त्री, (पिच्छं मयूरवर्हं अस्त्यस्येति । पिच्छ + ठन् ।) चामरविशेषः । यथा । "पिच्छिकां भ्रामयित्वा बहुविधं हास्यं कृत्वा पणमङ्गं दत्त्वा चरणे इदं अलिं अपिणा कुणमत्त ।" इति रत्नावलीनाटके ४ अङ्कः ॥

पिच्छितिका, स्त्री शिंशपा । इति शब्दचन्द्रिका ॥ (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यम् ॥)

पिच्छिलं, त्रि, (पिच्छा भक्तसम्भतमण्डं अस्त्यस्येति । पिच्छादित्वात् इलच् ।) भक्तमण्डयुक्तम् । इति रायमुकुटः ॥ सरसव्यञ्जनादि । इति भरतः ॥ सूपादि । इति रमानाथः ॥ स्निग्धसूपादि । इति भानुदीक्षितः ॥ मण्डयुक्तभक्तम् । जलयुक्तव्यञ्जनम् । इति नीलकण्ठः ॥ तत्पर्य्यायः । विजिलम् २ । इत्यमरः । २ । ९ । ४६ ॥ विजयिनम् ३ विजिनम् ४ विज्जलम् ५ इज्जलम् ६ लालसीकम् ७ । इति वाचस्पतिः ॥ (यथा छन्दोमञ्जर्य्याम् ।

"तरुणं सर्षपशाकं नवौदनानि पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥")

पिच्छयुक्तः ॥ (स्निग्धसरसपदार्थविशेषः । पेचल इति भाषा ॥ यथा, साहित्यदर्पणे १० । ५५ ।

"काले वारिधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले ! नहि नहि सखि ! पिच्छिलः पन्थाः ॥")

पिच्छिलः, पु (पिच्छं चूडास्त्यस्येति । पिच्छादित्वात् इलच् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः ॥

पिच्छिलकः, पु, (पिच्छिलः सन् कायतीति । कै + कः ।) धन्वनवृक्षः । इति राजनिर्घण्टः ॥

पिच्छिलच्छदा, स्त्री, (पिच्छिलश्छदो यस्याः ।) उपोदकी । इति राजनिर्घण्टः ॥

पिच्छिलत्वक्, [च्] पु, (पिच्छिला त्वग् यस्य ।) नागरङ्गवृक्षः । इति त्रिकाण्डशेषः ॥ धन्वनवृक्षः । इति रत्नमाला ॥

पिच्छिलसारः, पु, (पिच्छिलः सारो यस्य ।) मोचरसः । इति राजनिर्घण्टः ॥

पिच्छिला, स्त्री, (पिच्छा + इलच् । ततष्टाप् ।) पोतिका । शिंशपा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"पिङ्गला पिच्छिला धीरा कृष्णसारा च शिंशपा ॥")

शाल्मलिः । (अस्याः पर्य्यायो यथा, —

"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सिन्धुभेदः । इति मेदिनी । ले ११५ । कोकिलाक्षः । वृश्चिकाक्षुपः । शल्लीतृणम् । अतसी । इति राजनिर्घण्टः ॥ कर्च्चुः । इति शब्दचन्द्रिका ॥

पिज, इ क भासहिंसार्थे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सकं च सेट् ।) इ क, पिञ्जयति । भाः दीप्तिः । षड्वार्थौ निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

पिज, इ ल ङ वर्णपूजयोः । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-अकं सकं च-सेट् ।) इ, पिञ्जते । ल ङ, पिङ्क्ते । इति दुर्गादासः ॥

पिञ्जं, क्ली, (पिञ्ज बले + भावे घञ् ।) बलम् । व्याकुले, त्रि । इति मेदिनी । जे, १३ ॥

पिञ्जः, पु (पिञ्ज वधे + भावे घञ् ।) वधः । इत्यमरः । २ । ८ । ११५ कर्पूरभेदः । इति राजनिर्घण्टः ॥

पिञ्जटः, पु, (पिञ्जयति नेत्रं दूषयतीति । पिजि + अटन् ।) नेत्रमलम् । पिँचुटि इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।

"दूषीका दूषिका दूषिः पिञ्जटापिञ्जटावपि ॥"

पिञ्जनं, क्ली, (पिञ्जयतीनेनेति । पिजि स्फोटने + करणे ल्युट् ।) कार्पासस्फोटनधनुः । तत्पर्याय: । विहननम् २ तूलस्फोटनकार्मुकम् ३ । इति हेमचन्द्रः । ३ । ५ । ६ ॥

पिञ्जरं, क्ली, (पिजि दीप्तौ वर्णे वा + बाहुलकात् अरः । इत्युज्ज्वलदत्तः । ३ । १३१ ।) हरितालम् । इत्यमरः । २ । ६ । १०३ ॥ स्वर्णम् । इति मेदिनी । रे, १८५ ॥ नागकेशरम् । इति राजनिर्घण्टः ॥ पद्मादिकिञ्जल्कम् । कायास्थि कन्दम् । इत्यमरटीकायां रामाश्रमः ॥

पिञ्जरः, पुं, (पिजि + अरः ।) अश्वभेदः । पीतरक्तवर्णः । इति हेमचन्द्रः ॥ (सुमेरुपश्चिमपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५।६।
"पिञ्जरोऽथ महाभद्रः सुरसः कपिलो मधुः ॥")
पीते, त्रि । इति मेदिनी । रे, १८५ ॥ (यथा, आर्य्यासप्तशत्याम् । ३६९ ।
"प्रियया कुङ्कुमपिञ्जरपाणिद्वययोजनाङ्कितं वासः ।
प्रहितं मां याचन्नाञ्जलिसहस्रकिरणाय ग्रिस्यति ॥")

पिञ्जरकं, क्ली, (पिञ्जरमेव । स्वार्थे कन् ।) हरितालम् । इति राजनिर्घण्टः ॥ (पुं, नागविशेषः । यथा, महाभारते । १ । ३५ । ६ ।
"नागस्तथा पिञ्जरक एलापत्त्रोऽथ वामनः ॥")

पिञ्जलं, क्ली, (पिजि हिंसायां वर्णे च + कलच् ।) कुशपत्रम् । हरितालम् । इति धरणि. ॥

पिञ्जलः, पु, (पिजि + कलच् ।) अत्यन्तव्याकुलसैन्यादिः । इत्यमरः । २ । ८ । ६६ ॥

पिञ्जली, स्त्री, (पिञ्जल + स्त्रियां ङीष् ।) कुशाग्रवर्द्धितप्रादेशमात्रसाग्रकुशपत्रद्वयम् । अस्या नामान्तरं पवित्रम् । यथा —
"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम् ॥"
इति कर्म्मलोचनपरिशिष्टम् ॥

पिञ्जा, स्त्री, (पिञ्जति स्फोटयति इति । पिञ्ज + गुरोश्चेत्यः । ततष्टाप् ।) तूलम् । हरिद्रा । इति त्रिकाण्डशेषः ॥ हर्डी । हड्डा इति भाषा ॥ यथा, शब्दमालायाम् । [च ॥"
"पीतफला: सिंहला स्यात्कर्डी पिञ्जा हटापि

पिञ्जानं, क्ली, स्वर्णम् । इति राजनिर्घण्टः ॥

पिञ्जिका, स्त्री, (पिञ्जयतीति । पिजि + ण्वुल् । टापि अत इत्वम् ।) तूलनालिका । इति त्रिकाण्डशेषः ॥ पाँइज इति भाषा ॥

पिञ्जूलं, क्ली, (पिञ्जयतीति । पिजि + "खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणां ४ । ९० । इति ऊलच् ।) वर्त्तिका । इत्युणादिकोषः ॥

पिञ्जूषः, पु, (पिञ्जयति हिनस्ति कर्णौ इति । पिजि + बाहुलकात् ऊषन् ।) कर्णमलम् । इति हेमचन्द्रः । ३ । २३६ ॥

पिञ्जेट, पु (पिञ्जट । पृषोदरादित्वात् साधुः ।) नेत्रमलम् । इति शब्दरत्नावली ॥

पिञ्जोला, स्त्री (पिञ्जयतीति । पिजि + बाहुलकात् ओलच् ।) पत्रकाहला । पत्रशब्दः । इति हारावली । २०७ ॥

पिट, संहतौ । ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकं च-सेट् ।) पेटति जनः किञ्चित् राशीकरोति शब्दायते वा । इति दुर्गादासः ॥

पिटं, क्ली, (पेटति संहतो भवतीति । पिट + कः ।) चालः । इति त्रिकाण्डशेषः ॥

पिटः, पु, (पेटति द्रव्यान्तरैः संहतो भवतीति । पिट संहतौ + कः ।) पेटः । इति धरणिः ॥ पेटारा इति भाषा ॥

पिटकः पु, क्ली, (पेटतीति । पिट + क्वुन् ।) वंशवेत्रादिमयसमुद्गकः । पेटारी इति पेटा इति पेंड़ा इति च ख्यातः । तत्पर्य्यायः । पेटकः २ पेडा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ आद्यौ स्वल्पपेटिकायाम् । इति स्वामी ॥ पेटः५ पेटिका ६ नरिः ७ तरी८ मञ्जूषा९ पेड़िका१० । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ५० । ८६ ।
"कुद्दालदात्रपिटकास्तद्वत् स्थाल्यादिभाजनम् ॥")
विस्फोटे, त्रि । इति मेदिनी । कं, १२० ॥ (देहस्थानभेदेन जातस्यास्य शुभाशुभसूचकत्वम् । यथा, बृहत्संहितायाम् । ५२ । १ - १० ।
"सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका ये ।
ते क्रमशः प्रोक्तफला वर्णानामग्रजातीनाम् ॥
सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्द्धि सौभाग्यमारात्
दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलताञ्च ।
तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रव्रज्यां शङ्खदेशेऽश्रुजलनिपतनस्थानगाश्चाति चिन्ताम् ॥
घ्राणागण्डे वसनसुतदावोष्ठयोरन्नलाभं
कुर्य्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे ।
हन्वोरेवं गलकृतपदा भूषणान्नप्रपानं
श्रोत्रे तद्भूषणगणमपि ज्ञानमात्मस्वरूपम् ॥
शिरःसन्धिग्रीवाहृदयकुचपार्श्वोरसि गता
अधोघातं घातं सुततनयलाभं शुचमपि ।
प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्-
विनाशं कक्षोत्था विदधति धनानां बहु सुखम् ॥
दुःखशत्रुनिचयस्य निघातं
पृष्ठबाहुयुगला रचयन्ति ।
संयमञ्च मणिबन्धनजाता
भूषणादमुपबाहुयुगोत्थाः ॥
धनाप्तिं सौभाग्यं शुचमपि कराङ्गुल्युदरगाः
सुपानान्नं नाभौ तदध इह चौरैर्धनहृतानम् ।
धनं धान्यं बस्तौ युवतिमथ मेढ्रे सुतनयान्
धनं सौभाग्यं वा गुदवृषणजाता विदधति ॥

जघोर्याननाङ्गनालाभ जान्वोः शत्रुजनात् क्षतिम् ।
शस्त्रेण जङ्घयोर्गुल्फेऽध्वबन्धक्लेशप्रदायिनः ॥
स्फिक्पार्ष्णिपादजाता
धननाशागम्यगमनमध्वानम् ।
बन्धनमङ्गुलिनिचये
ऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम् ॥
उत्पातगण्डपिटका
दक्षिणतो वामतस्त्वभीघाताः ।
धन्या भवन्ति पुंसां
तद्विपरीतास्तु नारीणाम् ॥
इति पिटकविभागः प्रोक्त आ मस्तकीयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः ।
भवति मशकलक्ष्मावर्त्तजन्मापि तद्वन्-
निगदितफलकारि प्राणिनां देहसंस्थम् ॥")

पिटक्काशः, पु, पर्व्वतोर्म्मिमत्स्यः । इति भरिप्रयोगः ॥

पिटङ्काकी, स्त्री, इन्द्रवारुणी । इति रत्नमाला ॥

पिटाकः, पु, मुनिविशेषः । इत्युणादिकोषः ॥

पिट्टकं, क्ली (किट्टकं पृषोदरादित्वात् कस्य पः ।) दन्तकिट्टकम् । इति शब्दरत्नावली ॥

पिठ, क्लिशि । वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-वधे सकं-सेट् ।) ओष्ठ्यवर्गाद्यादिः । पेठति । पिपिठतुः । क्लिशि दुःखानुभवे । इति दुर्गादासः ॥

पिठरं, क्ली, (पिठं राती ति । रा + कः ।) मुस्ता । मन्थानदण्डः । इति मेदिनी । रे, १८४ ॥

पिठरः पु, (पिठ्यते क्लिश्यतेऽनेनेति । पिठ + करन् ।) गृहभेदः ॥ तत्पर्य्यायः । कुण्डः २ उखा ३ । इति त्रिकाण्डशेषः ॥ (यथा आर्य्यासप्तशत्याम् । ५५२ । [शान्ति ॥"
"विद्युज्ज्वालावलयितजलधरपिठरोदराद्धिनिस्याली । इत्यमरः । २ । ६ । ३१ ॥ (यथा महाभारते । ३ । ३ । ७२ ।
"गृहाण पिठरं ताम्रं मया दत्तं नराधिप ।
यावत् वर्त्स्यति पाञ्चाली पात्रेणानेन सुव्रत ॥"
अग्निविशेषः । यथा, हरिवंशे । १७८ । ३५ ।
"पिठरः पतगः स्वर्गस्वागाधो भ्राज एव च ।
स्वधाकाराश्रयो पश्च अयुगर्थ्येऽपि चामय ॥"
दानवविशेषः । यथा, महाभारते । २ । ६ । १२ ।
"घटोदरो महापार्श्वः क्रथनः पिठरस्तथा ॥")

पिठरी, स्त्री, (पिठर + स्त्रियां ङीष् ।) स्थाली । इत्यमरटीकायां रायमुकुटः ॥

पिड, इ क संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इ क, पिण्डयति । संहतिः राशीकरणम् । इति दुर्गादासः ॥

पिड, इ ङ संहतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । सकं इति केचित् ।) इ पिण्डते । ङ, पिण्डते । इति दुर्गादासः ॥

पिडक, पु, (पीडयतीति । पीड + क्वुन् । निपातनात् साधुः ।) स्फोटक: । इति हेमचन्द्रः । ३ । १३० ॥

ततोऽवनेजनन्दद्यात् संस्मरन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः सिक्तं तत्रैव हि ।
दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः ॥
फलमूलगुडक्षीरतिलमिश्रन्तु कल्पयेत् ।
अर्घ्यैः पुष्पैस्तथा दीपैर्धूपैस्तोयैः सुशीतलैः ॥
ऊर्णातन्तुमयैः शुक्लैर्वासोभिः पिण्डमर्चयेत् ।
प्रयाति यावदाकाशं पिण्डाद्वाष्पमयी शिखा ॥
तावत्तु संमुखस्तिष्ठेत् सर्व्वं तोये ततः क्षिपेत् ।
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ॥
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ।
त्र्यहाशौचे प्रदातव्याः प्रथमे त्वेक एव हि ॥
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि ।
एकस्तोयाञ्जलिश्चैवं पात्रमेकञ्च दीयते ॥
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ॥
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
येन स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ॥
तोयपात्राणि तावन्ति संयुक्तानि जलादिभिः ॥"
इति शुद्धितत्त्वम् ॥ * ॥

गयायामात्मपिण्डदानप्रमाणं यथा,—
"स्वकर्म्मधर्म्मयोगेन धनसुत्पाद्य बहु ।
उपार्ज्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥
पिण्डनिर्व्वपणं तत्र प्रेतानामनुपूर्व्वशः ।
चकार स्वपितृणाञ्च दायादानामनन्तरम् ॥
आत्मनश्च महाबुद्धिर्मध्यावेद्यां तिलैर्विना ।
पिण्डनिर्व्वपणं चक्रे तथाऽन्येषाञ्च गोत्रिणाम् ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥"
इति वामने ७६ अध्यायः ॥

पिण्डकं, क्ली, (पिण्ड इव कायतीति । कै + कः ।) बोलम् । पिण्डमूलम् । इति राजनिर्घण्टः ॥ (गोलः । यथा, सुश्रुते शारीरस्थाने ३ अध्याये । "तृतीये (मासि) हस्तपादशिरसां पञ्च पिण्डकानि निर्वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति ॥")

पिण्डकः, पुं, (पिण्ड इव कायतीति । कै + कः ।) सिह्लनामगन्धद्रव्यम् । इत्यमरः । २ । ६ । १२८ ॥ (बोलः । अस्य पर्य्यायो यथा, —
"विद्वान् गोलः पिण्डकश्च पिण्डोबोलो रसोरसः ॥"
इति वैद्यकरत्नमालायाम् ॥) पिशाचः । इति त्रिकाण्डशेषः ॥ पिण्डालुः । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"पिण्डको वातलः श्लेष्मी ग्राही रुच्यो महा-
गुरुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ पिण्ड + स्वार्थे कन् । कवलः । यथा, हरिवंशे । भविष्यपर्व्वणि । १० । २१ ।
"पयःपानं तथा कुर्व्वन् भक्षयन् दधिपिण्ड-
कम् ॥")

पिण्डकन्दः, पुं, (पिण्डाकारः कन्दः ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (पिण्डालुशब्देऽस्य विशेषो ज्ञातव्यः ॥)

पिण्डखर्ज्जूरः पुं, (पिण्डवत् खर्ज्जूरः ।) स्वनामख्यातखर्ज्जूरः । तत्पर्य्यायः । राजजम्बूः २ पिण्डी ३ । इति जटाधरः ॥

पिण्डखर्ज्जूरी, स्त्री, (पिण्डखर्ज्जूर + स्त्रियां ङीष् ।) पिण्डखर्ज्जूरः । तत्पर्य्यायः । दीप्या २ स्वपिण्डा ३ मधुरस्रवा ४ फलपुष्पा ५ स्वादुपिण्डा ६ हयभक्षा ७ पिण्डखर्ज्जूरिका ८ । अस्या गुणाः । शैत्यत्वम् । हिमत्वम् । पित्तदाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता ॥
जायते पश्चिमे देशे सा छोहारेति कीर्त्त्यते ।
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम् ॥
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् ।
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
महद्भिश्च गुणैरेभ्यः स्वल्पखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥"
अथ पिण्डखर्ज्जूरीभेदः ।
"सुलेमानी तु मृदुला दलहीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छास्रपित्तहृत् ॥"
इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

पिण्डगोसः, पु, (पिण्डवत् संहतो गोसः ।) गन्धरसः । इत्यमरटीकायां रमानाथः ॥

पिण्डतैलकः, पुं, (पिण्डवत् तैलं यस्य । कप् ।) तुरुष्कः । इति राजनिर्घण्टः ॥

पिण्डदः, पुं, (पिण्डं ददातीति । दा + कः ।) पिण्डदानकर्त्ता । यथा,—
"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥"
इति शुद्धितत्त्वम् ॥

अपि च ।
"गाङ्गेनेह परां सिद्धिं प्राप्स्यन्ते वारिणा नराः ।
पैशाः पश्चात् क्रियाः कार्य्याः सर्व्वाश्चैवौर्द्ध-
देहिकाः ॥
क्रियां करोति यः पूर्व्वां पितॄणां यश्च पिण्डदः ।
प्रायश्चित्तमचीर्णं तत् प्रायश्चित्ती भवेत्तु सः ॥"
इत्यग्निपुराणम् ॥

पिण्डपदं, क्ली, (पिण्डस्य संहतस्य पदम् ।) अङ्कविशेषः । यथा,—
"रूपाष्टकैर्विनिहतो भवनस्य बन्धः
कर्त्तुः स्वन्दनमिह युग्मशरैकनिघ्नम् ।
एकीकृतं रसनिशाकरयुग्मभुक्त-
शेषं ततो भवति पिण्डपदं गृहस्य ॥
रूपाष्टकैरेकाशीत्या विनिहतः पूरितः भवनस्य बन्धः दीर्घप्रस्तारमिलितहस्ताः स्वन्दनं तत्संख्यानं युग्मशरैकनिघ्नं द्विपञ्चाशदुत्तरशतपूरितं एकीकृतं पूर्व्वाङ्केण मिलितं रसनिशाकरयुग्मभुक्तशेषं षोडशाधिकद्विशतहृतावशिष्टं तत् संख्यानं पिण्डपदसंज्ञं गृहस्य भवति ॥"
इति ज्योतिस्तत्त्वम् ॥

पिण्डपादः, पु, (पिण्ड इव पादो यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

पिण्डपुष्पं, क्ली, (पिण्ड इव पुष्पं पुष्पगुच्छो यस्य ।) अशोकपुष्पम् । (क्वचित् पुं । यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) जवापुष्पम् । पद्मपुष्पम् । इति मेदिनी । पे, २७ ॥ तगरपुष्पम् । इति शब्दरत्नावली ॥

पिण्डपुष्पकः, पुं, (पिण्डपुष्पमिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वास्तूकम् । इति शब्दमाला ॥ (वास्तूकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

पिण्डफला, स्त्री, (पिण्ड इव फलं यस्याः ।) कटुतुम्बी । इति जटाधरः ॥ (यथा,—
"छिन्नस्य विस्रापनमेव कुर्य्या-
दङ्कुललोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकजङ्घी
काकादनीतापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥"
इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

पिण्डबीजकः, पु, (पिण्डवत् बीजानि यस्य । कप् ।) कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (कर्णिकारशब्दे विवृतिरस्य ज्ञातव्या ॥)

पिण्डमुस्ता, स्त्री, (पिण्डवत् स्थूला मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

पिण्डमूलं, क्ली, (पिण्डमिव मूलमस्य ।) गर्जरम् । मूलकभेदः । तत्पर्य्यायः । गजाण्डम् २ पिण्डकम् ३ पिण्डमूलकम् ४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पिण्डलः, पुं, (पिडि संहतौ + बाहुलकात् कलच् ।) सेतुः । इति हारावली । १२६ ॥

पिण्डसः, पु, (पिण्डेन परदत्तग्रासेन सनोति जीवतीति । सन + डः ।) भिक्षाशी । भिक्षोपजीवी । इति शब्दमाला ॥

पिण्डा, स्त्री, (पिण्ड + टाप् ।) पिण्डायसम् । कस्तूरीभेदः । सा कुलत्थिकातः कियत्स्थूला । इति राजनिर्घण्टः ॥ वंशपत्री । इति भावप्रकाशः ॥

पिण्डातः पु, (पिण्ड इव अतति साहृश्यमनुकरोतीति । अत + अच् ।) सिह्लकः । इति रत्नमाला ॥

पिण्डाभ्रं क्ली, (पिण्डवत् आभ्रं मेघजलसम्बन्धिद्रव्यम् ।) घनोपलः । इति शब्दमाला ॥

पिण्डायसं, क्ली, (पिण्डं संहतमायसम् ।) तीक्ष्णायसम् । इति राजनिर्घण्टः ॥

पिण्डारं, क्ली, (पिण्डं संहतन्त्वच्छतीति । ऋ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) फल-

शाकविशेष:। पिण्डारा इति हिन्दीभाषा। अस्य गुणा:। शीतलत्वम्। बल्यत्वम्। पित्तनाशित्वम्। रुचिकारित्वम्। पाके लघुत्वम्। विशेषेण विषशान्तिकरत्वञ्च। इति भावप्रकाश:॥

पिण्डार:, पुं, (पिण्डं कृच्छ्रमीति। ऋ + अण्।) क्षपणक:। गोप:। महिषीरक्षक:। द्रुमभेद:। इति मेदिनी। रे, १८५॥ विकङ्कतवृक्ष:। इति राजनिर्घण्ट:॥

पिण्डालु:, पुं, (पिण्डवत् स्थूल आलु:।) कन्दगुडूची। कन्दभेद:। पेंड़ालु इति हिन्दीभाषा। गुवडि आलु इति वङ्गभाषा। तत्पर्य्याय:। ग्रन्थिल: २ पिण्डकन्द: ३ ग्रन्थि: ४ रोमश: ५ रोमकन्द: ६ रोमालु: ७ ताम्बूलपत्र: ८ नालाकन्द: ९ पिण्डक: १०। अस्य गुणा:। मधुरत्वम्। शीतत्वम्। मूत्रकृच्छ्रदाहशोषप्रमेहनाशित्वम्। वृष्यत्वम्। सन्तर्पणत्वम्। गुरुत्वञ्च। इति राजनिर्घण्ट:॥

पिण्डालुकं, क्ली, (पिण्डालुरिव प्रतिकृति:। इवार्थे कन्।) आलुविशेष:। गोल आलु इति गुड आलु इति गुवडि आलु इति च भाषा। अस्य गुणा:। कफहरत्वम्। गुरुत्वम्। वातप्रकोपनत्वञ्च। इति राजवल्लभ:॥ (यथा, सुश्रुते। १। ४६।
"विदारीकन्दशतावरीविसमृणालशृङ्गाटककशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकशङ्खालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि॥")

पिण्डाह्वा, स्त्री, (पिण्डां कस्तूरीविशेषमाह्वयते स्पर्द्धते स्वगन्धेनेति। ह्वे + क:।) नाडीहिङ्गु। इति राजनिर्घण्ट:॥

पिण्डि:, स्त्री, (पिडि संहतौ + इन्।) पिण्डिका। इत्यमरटीकायां रमानाथ:॥

पिण्डिका, स्त्री, (पिण्डन्ते संहतानि भवन्ति पिण्ड्यन्ते राशीक्रियन्ते वा अराणि यस्याम्। पिण्ड + घञ्। गौरादित्वात् ङीष्। तत: कन्। ह्रस्वश्च।) रथनाभि:। इत्यमर:। २। ८। ५६॥ सा रथचक्रमध्ये मण्डलाकारा यस्यां सर्व्वाणि काष्ठान्यासज्यन्ते। इति रायमुकुट:॥ (पिण्डम्। यथा, हारीते प्रथमस्थाने सप्तमेऽध्याये।
"कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वर:।
शुद्धकर्म्मा स तलज्ञ: श्वेतशाल्योदनस्य वा॥
पिण्डिका तत्र संक्षिप्ता नान्यथा भाति सा पुन:॥")
पिचिण्डिका। सा जानुनोऽधोमांसलप्रदेश:। इति हेमचन्द्र:॥ पायेर डिम् इति भाषा॥ (यथा, चरके सूत्रस्थाने ७ अध्याये।
"पक्वाशयशिर:शूलं वातवर्च्चो विरोधनम्।
पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्याद्विधारिते॥")
श्वेतास्नि:। इति राजनिर्घण्ट:॥ पीठ:। यथा,
सूत उवाच।
"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्व्वश:।
पीठोच्छ्रायं यथावच्च भागान् षोड़श कारयेत्॥
भूमावेक: प्रविष्ट: स्याच्चतुर्भिर्जगती मता।
वृत्तो भागस्तथैक: स्यात् वृत्तपट्टस्य भागत:॥
भागैस्त्रिभिस्तथा कण्ठं कण्ठपट्टस्तु भागत:।
भागेन वृत्तपट्टस्तु शेषभागेन पट्टिका॥
प्रविष्टं भागमेकैकं जगती यावदेव तु।
निर्गमस्तु पुरस्तस्या यावद्वै विशेषपट्टिका:॥
पीठिकानान्तु सर्व्वासामेतत् सामान्यलक्षणम्।
नि:शेषाद्देवताभेदात् वक्ष्यामि द्विजसत्तमा:॥
स्थण्डिला वाथ वापी च यक्षी वेदी च मण्डला।
पूर्णचन्द्रा च वज्री च पद्मा वार्द्धशशिस्तथा॥
त्रिकोणा दशमी तासां संस्थानञ्च निबोधत।
स्थण्डिला चतुरस्रा तु वर्जिता मेखलादिभि:॥
वापी द्विमेखला ज्ञेया यक्षी चैव त्रिमेखला।
चतुरस्रायता वेदी न तां लिङ्गेषु योजयेत्॥
मण्डला वर्त्तुला या तु मेखलाभिर्गुणप्रिया।
रिक्ता द्विमेखला मध्ये पूर्णचन्द्रा तु सा भवेत्॥
मेखलात्रयसंयुक्ता षडस्रा वज्रिका भवेत्।
षोडशास्रा भवेत् पद्मा किञ्चिद्ध्रस्वा च मूलत:॥
तथैव धनुराकारा सार्द्धचन्द्रा प्रशस्यते।
त्रिशूलसदृशा तद्वत् त्रिकोणानूर्द्धतो मता॥
प्रागुदक्प्रवणा तद्वत्प्रशस्ता लक्षणान्विता।
परिवेषस्त्रिभागेन निर्द्देशस्तत्र कारयेत्॥
विस्तारस्तत्प्रमाणन्तु मूले चाग्रे तदूर्द्धत:।
जलवाहश्च कर्त्तव्यस्त्रिभागेन सुशोभन:॥
लिङ्गस्यार्द्धत्रिभागेन स्थौल्येन समधिष्ठिता।
मेखला तु त्रिभागेन खातं वै तत्प्रमाणत:॥
अथवा पादहीनन्तु शोभनं कारयेत् सदा।
उत्तरस्यं प्रमाणन्तु प्रमाणादधिकं भवेत्॥
स्थण्डिलायामथारोग्यं धनधान्यञ्च पुष्कलम्।
गोप्रदा तु भवेत् यक्षी वेदी सम्पत्प्रदा भवेत्॥
मण्डलायां भवेत् कीर्त्तिर्वरदा पूर्णचन्द्रिका।
आयु:प्रदा भवेद्वज्री पद्मा सौभाग्यदायिनी॥
पुत्त्रप्रदार्द्धचन्द्रा स्यात् त्रिकोणा शत्रुनाशिनी।
देवस्य यजनार्थन्तु पिण्डिका दश कीर्त्तिता:॥
शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीन्तथा।
दारुजे दारुजां कुर्य्यान्मिश्रे मिश्रान्तथैव च॥
नान्ययोनिस्तु कर्त्तव्या सदा शुभफलेप्सुभि:॥
अर्च्चायामसमं दैर्घ्यं लिङ्गायामसमं तथा।
यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत्॥
एवमेतत् समाख्यातं समासात् पीठलक्षणम्॥"
इति मत्स्यपुराणे पीठिकानुकीर्त्तनं २३६ अ:॥
(लिङ्गपीठम्। गौरीपट्ट:। यथा, काशीखण्डे वायुसंहितायामुत्तरखण्डे। ७८। ६।
"लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्येन शोधयेत्॥")

पिण्डितं, त्रि, (पिडि + क्त:।) गणितम्। घनम्। इति विश्वमेदिन्यौ॥ (संहत:। यथा, वायुपुराणे।
"अर्च्चिष्मान् पिण्डितशिख: सर्पि: काञ्चनसन्निभ:।
स्निग्ध: प्रदक्षिणश्चैव वह्नि: स्यात् कार्य्यसिद्धये॥")
गुणितम्। इति हेमचन्द्र:॥ तुरुष्के, पु। इति राजनिर्घण्ट:॥

पिण्डिल:, पु, (पिण्डवद्गात्रमिरस्यस्येति। पिण्ड + इलच्।) सेतु:। इति त्रिकाण्डशेष:॥ गणक:। इत्युणादिकोष:॥

पिण्डिला, स्त्री, (पिण्डिल + टाप्।) गोडुम्बा। इति शब्दचन्द्रिका॥

पिण्डी, [न्] त्रि, (पिण्डोऽस्यास्तीति। इनि:।) शरीरी। यथा,—
"यथा सूर्य्यं विना भूमिर्गृहं दीपविवर्ज्जितम्।
लिङ्गहीनो यथा पिण्डी जयश्रीस्त्वां विना तथा॥".
इति जैमिनिभारते आश्वमेधिकपर्व्वणि ६८ अध्याये॥

पिण्डी, स्त्री, (पिण्डाकारोऽस्त्यस्या इति। अच्। ततो ङीष्।) पिण्डीतगर:। अलाबू:। खर्ज्जूरविशेष:। इति मेदिनी। डे, २०॥ श्राद्धनिरूपणार्थकोपन्यास:। इति धरणि:॥ (पिण्ड + कृदिकारादिति वा ङीष्।) पिण्डिका। इत्यमरटीकायां रायमुकुट:॥ पिण्डम्। यथा,—
"नीताय तुरगायास्तु भक्तपिण्डीं सुगन्धिनीम्।
दद्यात् पुरोहितस्तत्र संमन्त्र्य शान्तिमन्त्रकै:॥"
इति कालिकापुराणे ८६ अध्याय:॥

पिण्डीतक:, पुं, (पिण्डीं खण्डपिण्डं तनोतीति। तन + अन्येभ्योऽपीति ड:। तत: संज्ञायां कन्।) मदनवृक्ष:। इत्यमर:।२।४।५२॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"मदन: श्वसनोराटो गोल: पिण्डीतक: फलम्।
छर्द्दनो विषपुष्पा च करहाटस्तु शल्यक:॥"
यथा च।
"पिण्डीतकस्य तु वराहविभाविनस्य
मूलेषु कन्दशकलेषु च सीवकेषु।
तैलं कृतं गतिमपोहति शीघ्रमेतत्
कर्णेषु चामरवरायुधसाह्वयेषु॥"
इति सुश्रुते चिकित्सितस्थाने सप्तदशेऽध्याये॥)
तगर:। पविजम्भक:। इति विश्व:॥

पिण्डीतगर:, पुं, (पिण्ड्या पुष्पावच्छेदे खण्डपिण्डेन उपलक्षितस्तगर:।) तगरविशेष:। तत्पर्य्याय:। कफवर्द्धन: २। इति त्रिकाण्डशेष:॥

पिण्डीतगरक:, पु, (पिण्डीतगर + स्वार्थे संज्ञायां वा कन्।) तगरम्। इति राजनिर्घण्ट:॥

पिण्डीतरु:, पुं, (पिण्ड्या उपलक्षितस्तरु:।) महापिण्डीतरु:। इति राजनिर्घण्ट:॥

पिण्डीपुष्प:, पु, (पिण्डीवत् पुष्पं पुष्पस्तवको यस्य।) अशोकवृक्ष:। इति राजनिर्घण्ट:॥ (अशोकशब्देऽस्य विशेषो ज्ञेय:॥)

पिण्डीर:, पु, (पिण्डीवत् पिण्डाकाराणीत्यर्थ: फलानि ईरयतीति। ईर + णिच् + अण्।) दाडिमवृक्ष:। इति त्रिकाण्डशेष:॥ हिण्डीर:। इत्यमरटीकायां रायमुकुट:॥ नीरसे, त्रि। इति हारावली। १६६॥

पिण्डीशूर:, पुं, (पिण्ड्यां पिण्डव्यापारे भोजने एव शूर: अतिनिपुण: नान्यत्र कार्य्यादाविति भाव:।) स्वगेहमात्रे वसन् परद्वेषी। तत्पर्य्याय:। गेहेनर्दी २ गेहेशूर: ३। इति हेमचन्द्र:।३।४१॥ (यथा, भट्टौ। ५। ८५।
"राक्षसान् वटुयक्षेषु पिण्डीशूरान्निरस्तवान्।
यद्यसौ कूपमाण्डूकि। तवैतावति क: क्षय:॥")

पिण्डोलि:, स्त्री, भुक्तावसन्नभित:। इति हेमचन्द्र:। ३। ६१॥

पिण्या, स्त्री, पण्यते स्तूयते रोगहन्तृत्वात् पण्या पण इ यवस्तुतौ स्तुतौ महर्षिभ्याम्: तथाजीयथा इति य: निपातनादत् इत्। पण्येति पठति स्वामी। इति भरत:॥ ज्योतिष्मती॥ इत्यमर:॥ (ज्योतिष्मतीशब्देऽस्या विवृतिर्विज्ञेया॥)

पिण्याक:, पुं, क्ली, (पिनष्टीति। पिषृ संचूर्णने +"पिनाकादयश्च।" उणा। ४। १५। इति आकप्रत्ययेन निपातनात् साधु:।) तिलकल्क:। (अस्य गुणा: यथा,—

"पिण्याको ग्लपनो रूक्षो विष्टम्भी दृष्टिदूषण:॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥

यथा, महाभारते। १२। १६७। ३६।

"नवनीतं यथा दध्नस्तथा कामोऽर्थधर्मत:।
श्रेयस्तैलं हि पिण्याकात् घृतं श्रेय उदश्वित:॥")

अस्य भक्षणे दोषो यथा,—

"पिण्याकं भक्षयित्वा तु यो वै मामुपसर्पति।
तस्य वै श्रृणु सुश्रोणि। प्रायश्चित्तं सुशोभनम्॥
उलकी दशवर्षाणि कच्छपस्तु समाश्रय:।
जायते मानवस्तत्र मम कर्म्मपरायण:॥"

इति वराहपुराणम्॥

हिङ्गु। वाह्लीकम्। सिह्लक:। इति मेदिनी॥ (सरलरस:। अस्य पर्य्यायो यथा,—

"तैलपर्णी दधित्याख्य: पिण्याको रक्तशीर्षक:।
वेष्टो रसाढ्य: श्रीवास: श्रीपिष्टसरलद्रवौ॥"

इति वैद्यकरत्नमालायाम्॥)

पितरौ, पुं, जनकजनयित्र्यौ। माता च पिता चेति विग्रहे विकल्पादेकशेषे पितराविति प्राञ्च:। इति भरत:॥ तत्पर्य्याय:। मातापितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४। इत्यमर:। २। ६। ३७॥ (यथा, रघु:।१।१।

"जगत: पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")

तयोरभक्त्या पालने दोषो यथा,—

"पितृमातृगुरूंश्चापि भक्तिहीनेन पालयेत्।
वाचा च ताडयेन्नित्यं स्वामिनं कुलटा च या॥
सा लभन्तीति विख्याता पापिनां भारते नर:।
वह्निकुण्डं महाघोरं स च सा च प्रयाति च॥
तत्र वह्नौ वसत्येव यावच्चन्द्रदिवाकरौ।
ततो भवेज्जलौका च जन्म सप्त तत: शुचि:॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्याय:॥

पिता, [ऋ] पुं, पाति रक्षत्यपत्यं य:। (पा रक्षणे + "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।" उणा।२।९६। इति तृच्प्रत्ययेन निपातनात् साधु:।) उत्पादक:। बाप् इति भाषा। तत्पर्य्याय:। तात: २ जनक: ३। इत्यमर:।२।६।२८॥ प्रसविता ४ वप्ता ५ जनयिता ६ गुरु: ७ जन्मद: ८ जन्य: ९ जनिता १०। इति शब्दरत्नावली॥ बीजी ११ वप्र: १२। इति हेमचन्द्र:॥ *॥ तस्य मान्यत्वं तद्यथा च यथा,—

"मान्य: पूज्यश्च सर्व्वेभ्य: सर्व्वेषां जनको भवेत्।
अहो यस्य प्रसादेन सर्व्वान् पश्यति मानव:॥
जनको जन्मदाता च रक्षणाच्च पिता नृणाम्।
तातो विस्तीर्णकरणात् कलया स प्रजापति:॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्याय:॥

स च गुरु:। यथा,—

"उपाध्याय: पिता ज्येष्ठो भ्राता चैव महीपति:।
मातुल: श्वशुरस्त्राता मातामहपितामहौ॥
बन्धुर्ज्येष्ठपितृव्यश्च पुंस्येते गुरव: स्मृता:॥"

इति कौर्म्मे उपविभागे ११ अध्याय:॥

(ज्येष्ठपितृव्यार्थे पितृशब्दप्रयोगो यथा, महाभारते। ६। ५३। ३।

"गवल्गण स्वयं तुष्टे पिता देवव्रतस्तव॥")

स हि महागुरु:। यथा, "महागुरुत्वाच्च विष्णु:। त्रय: पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति॥" इति शुद्धितत्त्वम्॥

कामासक्तस्य पितुर्व्वचनमग्राह्यं यथा,—

"पितुर्व्वचो हि मा कार्षी: कामवासक्तचेतस:।
आत्मानमभिषिञ्चस्व तदर्थं चाप्रियो मयि॥"

इत्याग्नेये श्रीरामं प्रति कौशल्यावाक्यम्॥

तस्य पुत्रकृतधर्म्माधर्म्मभागित्वं यथा,—

"य: पिता स तु पुत्रोऽयमिति वै वैदिकी श्रुति:।
निगद्यते पुराणे तु तां श्रृणुष्व यथातथम्॥
न्यग्रोधस्य सुशाखाया: प्ररोहास्तु गता भुवि।
प्ररोहात्तूपपद्यन्ते मूलभं प्राप्य तथा सुता:॥
तद्विधात्तूपपद्यन्ते तथान्ये ते च तादृशा:।
तेभ्यश्चान्ये प्ररोहन्ति व्रीहिभ्योऽपि यथा तथा॥
एव पुत्रै: कृतो धर्म्मस्तथाधर्म्मश्च भूपते।
पिता संलिप्यते तेन मा च त्वं संशयं कृथा:॥
न प्रक्षिणी नराणान्तु बीजनाशो भवेदिह।
सर्व्वथा प्रांसते लोके बीजात् पुन: समुच्छ्रय:॥"

इत्याग्नेये पापनाशनदृष्टदानाध्याय:॥ *॥

तस्मिन् जीवति वाक्कोल्लिलकनिषेधो यथा,—

"न वाक्कोल्लिलकं कुर्य्यात् यस्य जीवन् पिता स्थित:।
तथा ज्येष्ठ: सोदरश्च यस्य जीवति स तथा॥"

इति वृहद्धर्म्मपुराणम्॥ *॥

उत्पादकापिक्षपेक्षया मन्त्रदातृपितुर्गुरुतरत्वं यथा, तन्त्रसारे।

"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मद: पिता।
तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम्॥"

पञ्च पितरो यथा, चाणक्ये।

"अन्नदाता भयत्राता यस्य कन्या विवाहिता।
जनयिता चोपनेता च पञ्चैते पितर: स्मृता:॥"

सप्त पितरो यथा,—

"कन्यादातान्नदाता च ज्ञानदाताभयप्रद:।
जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितर: स्मृता:॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्याय:॥

एकत्रिंशत्पितृगणा यथा,—

"विश्वो विश्वभुगाराध्यो धर्म्मो धन्य: शुभानन:।
भूमिदो भूमिकृद्भूति: पितृणां ये गणा नव॥
कल्याण: कल्यद: कल्पतर: कल्पतराश्रय:।
कल्पताहेतुरनघ: षडिमे ते गणा: स्मृता:॥
वरो वरेण्यो वरदो भूतिद: पुष्टिदस्तथा।
विश्वपाता तथा धाता सप्तैते च गणा: स्मृता:॥
महान् महात्मा महितो महिमावान्महाबल:।
गणा: पञ्च तथैवैते पितृणां पापनाशना:॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिद:।
पितृणां कथ्यते चैतत्तथा गणचतुष्टयम्॥
एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत।
ते मेऽत्र तृप्तास्तुष्यन्तु दिशन्तु च सदा हितम्॥"

इति गारुडे पितृस्तोत्रे ८९ अध्याय:॥

(पितृणां स्तुतिपूर्ब्बकं नामसंख्यादिकथनम् यथा मार्कण्डेये। ९६। १३—४८।

रुचिरुवाच।

"नमस्येऽहं पितॄन् श्राद्धे ये वसन्त्यधिदेवता:।
देवैरपि हि तर्प्यन्ते ये च श्राद्धे स्वधोत्तरै:॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभि:।
श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभि:॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धा: सन्तर्पयन्ति यान्।
श्राद्धेषु दिव्यै: सकलैरुपहारैरनुत्तमै:॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैरपि।
तन्मयत्वेन वाञ्छद्भिऋर्द्धिमात्यन्तिकीं पराम्॥
नमस्येऽहं पितॄन् मर्त्त्यैरर्च्यन्ते भुवि ये सदा।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्तिप्रदायिन:॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिन:॥
नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभि:।
वन्यै: श्राद्धैर्यताहारैस्तपोनिर्धूतकिल्बिषै:॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतचारिभि:।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभि:॥
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान्।
कव्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान्॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा।
स्वकर्म्माभिरतैर्नित्यं पुष्पधूपान्नवारिभि:॥
नमस्येऽहं पितॄन् श्राद्धैर्ये शूद्रैरपि भक्तित:।
सन्तर्प्यन्ते जगत्यत्र नाम्ना ख्याता: सुकालिन:॥
नमस्येऽहं पितॄन् श्राद्धे: पाताले ये महासुरै:।
सन्तर्प्यन्ते स्वधाहारास्त्यक्तदम्भमदै: सदा॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले।
भोगैरशेषैर्विधिवन्नागै: कामानभीप्सुभि:॥
नमस्येऽहं पितॄन् श्राद्धै: सर्पै: सन्तर्पितान् सदा।
तत्रैव विधिवन्मन्त्रभोगसम्पत्समन्वितै:॥

पितॄन्नमस्ये निवसन्ति साक्षात्
ये देवलोके च तथान्तरीक्षे।
महीतले ये च सुरादिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतम्॥
पितॄन्नमस्ये परमात्मभूता
ये वै विमाने निवसन्ति मूर्त्ता:।
यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वरा: क्लेशविमुक्तिहेतून्॥
पितॄन्नमस्ये दिवि ये च मूर्त्ता:
स्वधाभुज: काम्यफलाभिसन्धौ।
प्रदानशक्ता: सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु॥

तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
सुतान् पशून् स्वानि बलं गृहाणि ॥
सोमस्य ये रश्मिषु येऽर्कविम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमितो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ॥
ये खड्गिमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दिव्यमनोहरैश्च ।
कालेन शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव तेषाममरार्च्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धान्नभोज्येषु मया कृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तृप्तिम् ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।
तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्णाशयन्त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता वर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे
दिशम् ।
तथा वर्हिषदः पान्तु याम्यां ये पितरः स्मृताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ॥
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ।
कल्याणः कल्पता कर्त्ता कल्यः कल्पतराश्रयः ॥
कल्पताहेतुरनघः षडिमे ते गणाः स्मृताः ।
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा ॥
विश्वपाता तथा धाता सप्तैवैते तथा गणाः ।
महान्महात्मा महितो महिमावान्महाबलः ॥
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ।
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः ॥
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ।
एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत् ॥
ते मेऽनुतृप्तास्तुष्यन्तु यच्छन्तु च सदा हितम् ॥”
शिवः । यथा, महाभारते ।१३ । १७ ।२४१ ।
“सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥”)

पितामहः, पुं, (पितुः पितेति । “पितृव्यमातुल-
मातामहपितामहाः ।” ४ । २ । ३६ । इत्यत्र
“मातृपितृभ्यां पितरि डामहच् ।” इति वार्त्ति-
कोक्त्या डामहच् । ब्रह्मणि तु पितुः पिता जनक-
स्यापि जनकः । पितॄणां मरीच्यादीनां पितृ-
गणानां पिता वा ।) ब्रह्मा । (यथा, महा-
भारते । १ । १ । ३२ ।
“यस्मात् पितामहो यज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥”
शिवः । यथा, महाभारते । १३ । १७ । १४१ ।
“सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥”)
पितृपिता । इत्यमरः । २।६ । ३३ ॥ ठाकुरदादा
इति भाषा ॥ अस्य पर्य्यायः । आर्य्यकः २ ।
इति शब्दमाला ॥ (यथा, मनौ । ३ । २२१ ।
“पिता यस्य तु वृत्तः स्याद् जीवेद्वापि पितामहः ।
पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम् ॥”)

पितामही, स्त्री, (पितुर्मातेति । पितृव्यमातुलेत्यत्र
“मातृपितृभ्यां पितरि डामहच् ।” इति डाम-
हच । ततः “मातरि षिच्चेति ।” षित्कार्य्यं ततः
षित्वात् ङीप् ।) पितामहपत्नी । इति जटा-
धरः ॥ ठाकुरमा इति भाषा ॥ (यथा, कौर्म्मे
उपविभागे ११ अध्याये ।
“मातामही मातुलानी तथा मातुश्च सोदरा ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ॥”)
पौत्त्रैः पितामहधनविभागकरणे पितामह्यै
मातृवद्भागो देयः । यथा,—
“असुताश्च पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः ।
पितामह्यश्च सर्व्वास्ता मातृतुल्याः प्रकीर्त्तिताः ॥”
इति दायभागे व्यासः ॥

पितृकं, त्रि, (पितुः सम्बन्धि पितुरागतं वेति ।
पितृ + कन् । यद्वा, पैतृक + पृषोदरादित्वात्
साधुः ।) पितृसम्बन्धि । यथा,—
“पैत्रञ्च पितृकञ्चापि पित्र्यञ्च पितुरागतम् ॥”
इति शब्दमाला ॥

पितृकाननं, क्ली, (पितॄणां काननमिव ।) श्मशा-
नम् । इति जटाधरः ॥ (यथा, महानिर्व्वाण-
तन्त्रे । १० । ७८ ।
“पञ्चवर्षाधिकान् मर्त्त्यान् दाहयेत् पितृकानने ।
भर्त्रा सह कुलेशानि ! न दहेत् कुलकामिनीम् ॥”)

पितृगृहं, क्ली, (पितॄणां गृहम् ।) श्मशानम् ।
इति हेमचन्द्रः ॥ (पितुर्गृहम् ।) पितृ-
वेश्म च ॥

पितृतर्पणं, क्ली, (तृप्यन्तेऽनेनेति । तृप् + करणे
ल्युट् । पितॄणां तर्पणमिति । यद्वा, तृप + भावे
ल्युट् । पितॄणां तर्पणं तृप्तिर्यस्मात् ।) पितृ-
तीर्थम् । तत्तु तर्ज्जन्यङ्गुष्ठयोर्मध्यम् । इति शब्द-
चन्द्रिका ॥ निवापः । इति हेमचन्द्रः ॥ तिलः ।
इति राजनिर्घण्टः ॥ पितृतीर्थेन पितृदेशक-
जलदानम् । तस्यानुष्ठानं तर्पणशब्दे द्रष्टव्यम् ॥
पितॄणां तृप्तिमात्रञ्च ॥

पितृतिथिः, स्त्री, (पितृप्रिया तिथिरिति मध्य-
लोपी समासः ।) अमावास्या । यथा,—
“अमावास्यादिनं योऽस्तु तस्यां कुशतिलोदकैः ।
तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथा ॥”
इति वाराहे पितृसर्गस्थितिवर्णनम् ॥

पितृतीर्थं, क्ली, (पितृप्रियं तीर्थम् ।) गया । इति
जटाधरः ॥ (गयादि-२२२ पितृवल्लभतीर्थानि
मत्स्यपुराणे श्राद्धकल्पे २२ अध्याये उक्तानि ।
यथा, –
“तीर्थानि कानि शस्तानि पितॄणां वल्लभानि च ।
नामतस्तानि वक्ष्यामि संक्षेपेण द्विजोत्तमाः ॥
पितृतीर्थं गया नाम सर्व्वतीर्थवरं शुभम् ॥
यत्रास्ते देवदेवेशः स्वयमेव पितामहः ।
तत्रैषा पितृभिर्गीता गाथा भागमभीप्सुभिः ॥
एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
तथा वाराणसी पुण्या पितॄणां वल्लभा सदा ।
तत्राविमुक्तसान्निध्यं भुक्तिमुक्तिफलप्रदम् ॥
पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम् ।
पितृतीर्थं प्रयागन्तु सर्व्वकामफलप्रदम् ॥
वटेश्वरस्तु भगवान् माधवेन समन्वितः ।
योगनिद्राशयस्तद्वत् सदा वसति केशवः ॥
दशाश्वमेधिकं पुण्यं गङ्गाद्वारं तथैव च ।
नन्दाथ ललिता तद्वत्तीर्थं मायापुरी शुभा ॥
तथा मित्रपदं नाम ततः केदारमुत्तमम् ।
गङ्गासागरमित्याहुः सर्व्वतीर्थमयं शुभम् ॥
तीर्थं ब्रह्मसरस्तद्वच्छतद्रुसलिले ह्रदे ।
तीर्थन्तु नैमिषं नाम सर्व्वतीर्थफलप्रदम् ॥
गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः ।
तथा यज्ञवराहस्तु देवदेवश्च शूलभृत ॥
यत्र तत्काञ्चनं द्वारमष्टादशभुजो हरः ।
नेमिस्तु हरिचक्रस्य शीर्णा यत्राभवत् पुरा ॥
तद्देतन्नैमिषारण्यं सर्व्वतीर्थनिषेवितम् ।
देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् ॥
यः प्रयाति स पूतात्मा नारायणपदं व्रजेत् ।
कृतशौचं महापुण्यं सर्व्वपापनिषूदनम् ॥
यत्रास्ते नारसिंहस्तु स्वयमेव जनार्द्दनः ।
तीर्थमिक्षुमती नाम पितॄणां वल्लभं सदा ॥
सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा ।
कुरुक्षेत्रं महापुण्यं सर्व्वतीर्थसमन्वितम् ॥
तथा च सरयूः पुण्या सर्व्वदेवनमस्कृता ।
इरावती नदी तद्वत पितृतीर्थाधिवासिनी ॥
यमुना देविका काली चन्द्रभागा दृषद्वती ।
नदी वेणुमती पुण्या परा वेत्रवती तथा ॥

पितॄणां वल्लभा ह्येता: श्राद्धे कोटिगुणा मता:
अश्वमार्गं महापुण्यं यत्र मार्गो हि लक्ष्यते ॥
अद्यापि पितृतीर्थं तत् सर्व्वकामफलप्रदम् ।
नीलकुण्डमिति ख्यातं पितृतीर्थं द्विजोत्तमा: ! ।
तथा रुद्रसर: पुण्यं सरो मानसमेव च ।
मन्दाकिनी तथाच्छोदा विपाशाथ सरस्वती ॥
पूर्व्वमित्रपदन्तद्वद्वैद्यनाथं महाफलम् ।
शिप्रा नदी महाकालस्तथा कालञ्जरं शुभम् ॥
वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महाफलम् ।
भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च ॥
गयापिण्डप्रदानेन समान्याहुर्महर्षय: ।
एतानि पितृतीर्थानि सर्व्वपापहराणि च ॥
स्मरणादपि लोकानां किमु श्राद्धकृतां नृणाम् ।
ओङ्कारं पितृतीर्थञ्च कावेरी कपिलोदकम् ॥
सम्भेदश्चण्डवेगायास्तथैवामरकण्टकम् ।
कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥
शुक्रतीर्थञ्च विख्यातं तीर्थं सोमेश्वरं परम् ।
सर्व्वव्याधिहरं पुण्यं शतकोटिफलाधिकम् ॥
श्राद्धे दाने तथा होमे स्वाध्याये जलसन्निधौ ।
कायावरोहणं नाम तथा चर्म्मण्वती नदी ॥
गोमती वरुणा तद्वत्तीर्थमौशनसं परम् ।
भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम् ॥
तीर्थं वैनायकं नाम भद्रेश्वरमत: परम् ।
तथा पापहरं नाम पुण्याथ तपती नदी ॥
मूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा ।
महाबोधि: पाटला च नागतीर्थमवन्तिका ॥
तथा वेणा नदी पुण्या महाशालं तथैव च ।
महारुद्रं महालिङ्गं दशार्णा च नदी शुभा ॥
शतरुद्रा शताह्वा च तथा विश्वपदं परम् ।
अङ्गारवाहिका तद्वन्नदौ तौ शोणघर्घरौ ॥
कालिका च नदी पुण्या वितस्ता च नदी तथा ।
एतानि पितृतीर्थानि शस्यन्ते स्नानदानयो: ॥
श्राद्धमेतेषु यद्दत्तन्तदनन्तफलं स्मृतम् ।
द्रोणी वाटनदी धारासरित् क्षीरनदी तथा ॥
गोकर्णं गजकर्णञ्च तथा च पुरुषोत्तम: ।
द्वारका कृष्णतीर्थञ्च तथार्ब्बुदसरस्वती ॥
नदी मणिमती नाम तथा च गिरिकर्णिका ।
धूतपापं तथा तीर्थं समुद्रो दक्षिणस्तथा ॥
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
तीर्थं मेघकरं नाम स्वयमेव जनार्द्दन: ॥
यत्र शार्ङ्गधरो विष्णुर्मेखलायामवस्थित: ।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा ॥
तथा सामलनाथश्च महाशालनदी तथा ।
चक्रवाकं चर्म्मकोटं तथा जन्मेश्वरं महत् ॥
अर्ज्जुनं त्रिपुरं चैव सिद्धेश्वरमत: परम् ।
श्रीशैलं शाङ्करं तीर्थं नारसिंहमत:परम् ॥
महेन्द्रञ्च तथा पुण्यमथ श्रीरङ्गसंज्ञितम् ।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम् ॥
दर्शनादपि चैतानि सद्य: पापहराणि वै ।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित् ॥
भीमेश्वरं कृष्णवेणा कावेरी कुड्मला नदी ।
नदी गोदावरी नाम त्रिसन्ध्या तीर्थमुत्तमम् ॥
तीर्थं त्रैयम्बकं नाम सर्व्वतीर्थनमस्कृतम् ।
यत्रास्ते भगवानीश: स्वयमेव त्रिलोचन: ॥
श्राद्धमेतेषु सर्व्वेषु कोटिकोटिगुणं भवेत् ।
स्मरणादपि पापानि नश्यन्ति शतधा द्विजा: ॥
श्रीपर्णी ताम्रपर्णी च जयातीर्थमनुत्तमम् ।
तथा मत्स्यनदी पुण्या शिवधारं तथैव च ॥
भद्रतीर्थञ्च विख्यातं पम्पातीर्थञ्च शाश्वतम् ।
पुण्यं रामेश्वरं तद्वदेलापुरमलं परम् ॥
अङ्गभूतञ्च विख्यातमानन्दकमलं बुधम् ।
आम्रातकेश्वरं तद्वदेकाम्रकमत: परम् ॥
गोवर्द्धनं हरिश्चन्द्रं कृपुचन्द्रं पृथूदकम् ।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी ॥
रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गम: ।
इन्द्रकीलं महानादन्तथा च प्रियमेलकम् ॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु ।
एतेषु सर्व्वदेवानां सान्निध्यं दृश्यते यत: ॥
दानमेतेषु सर्व्वेषु दत्तं कोटिशताधिकम् ।
बाहुदा च नदी पुण्या तथा सिद्धवनं शुभम् ॥
तीर्थं पाशुपतं नाम नदी पार्व्वतिका शुभा ।
श्राद्धमेतेषु सर्व्वेषु दत्तं कोटिशतोत्तरम् ॥
तथैव पितृतीर्थन्तु यत्र गोदावरी नदी ।
युतालिङ्गसहस्रेण सर्व्वान्तरजलावहा ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम् ।
प्रतीकस्य भयाद्भिन्नं यत्र गोदावरी नदी ॥
तत्तीर्थं हव्यकव्यानामप्सरोयुगसंज्ञितम् ।
श्राद्धाग्निकार्य्यदानेषु तथा कोटिशताधिकम् ॥
तथा सहस्रलिङ्गञ्च राघवेश्वरमुत्तमम् ।
सेन्द्रफेना नदी पुण्या यत्रेन्द्र: पतित: पुरा ॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान् ।
तत्र दत्तं नरै: श्राद्धमनन्तफलदं भवेत् ॥
तीर्थन्तु पुष्करं नाम शालग्रामं तथैव च ।
सोमपानञ्च विख्यातं यत्र वैश्वानरालयम् ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च ।
मलन्दरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥
वैदर्भा वाथ वैरा च पयोष्णी प्राङ्मुखा परा ।
कावेरी चोत्तरा पुण्या तथा जालन्धरो गिरि: ॥
एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
लोहदण्डं तथा तीर्थं चित्रकूटस्तथैव च ॥
विन्ध्ययोगश्च गङ्गायास्तथा नदीतटं शुभम् ।
कुब्जाम्रन्तु तथा तीर्थं उर्व्वशीपुलिनं तथा ॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम् ।
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥
अट्टहासं तथा तीर्थं गौतमेश्वरमेव च ।
तथा वशिष्ठं तीर्थन्तु हारितं तु तत: परम् ॥
ब्रह्मावर्त्तं कुशावर्त्तं हयतीर्थं तथैव च ।
पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च ॥
घण्टेश्वरं बिल्वकञ्च नीलपर्व्वतमेव च ।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥
अश्वतीर्थञ्च विख्यातमनन्तं श्राद्धदानयो: ।
तीर्थं वेदशिरो नाम नदी ओघवती नदी ॥
तीर्थं वसुप्रदं नाम छागलाण्डं तथैव च ।
एतेषु श्राद्धदातार: प्रयान्ति परमं पदम् ॥
तथा च बदरीतीर्थं गणतीर्थं तथैव च ।
जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च ॥
श्रीपतेश्च तथा तीर्थं तीर्थं रैवतकं तथा ।
तथैव शारदातीर्थं भद्रकालेश्वरं तथा ॥
वैकुण्ठतीर्थञ्च परं भीमेश्वरमथापि वा ।
एतेषु श्राद्धदातार: प्रयान्ति परमां गतिम् ॥
तीर्थं मातृगृहं नाम करवीरपुरं तथा ।
कुशेश्वरञ्च विख्यातं गौरीशिखरमेव च ॥
नकुलेशस्य तीर्थञ्च कर्द्दमालं तथैव च ।
दण्डिपुण्यकरं तद्वत् पुण्डरीकपुरं तथा ॥
सप्त गोदावरीतीर्थं सर्व्वतीर्थेश्वरेश्वरम् ।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभि: ॥
एष तूद्देशत: प्रोक्तस्तीर्थानां संग्रहो मया ।
वागीशोऽपि न शक्नोति विस्तरात् किमु ।

मानुष: ॥

सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रह: ।
वर्णाश्रमाणां गेहेऽपि तीर्थन्तु समुदाहृतम् ॥
एतत्तीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थे श्राद्धं समाच-
रेत ॥”*॥)

तर्ज्जन्यङ्गुष्ठयोर्मध्यम् । इत्यमर: ॥
“अन्तराङ्गुष्ठदेशिन्यो: पितॄणां तीर्थमुत्तमम् ॥”
इति कौर्म्मे उपविभागे ११ अध्याय: ॥

पितृदानं, क्ली, (पितरि पित्रे वा दानम् ।) पित्राद्यु-
द्देशेनान्नवस्त्रादिदानम् । पितृपदं स्वतोपलक्षणं
तेन मात्रादेरपि ग्रहणम् । तत्पर्य्याय: ।
निवाप: २ । इत्यमर: । २।७।३१ ॥ निवपनम् ३
पितृदानकम् ४ । इति शब्दरत्नावली ॥

पितृदानकं, क्ली, (पितृदान + स्वार्थे कन् ।)
पित्रुद्देश्यकदानम् । इति शब्दरत्नावली ॥

पितृपक्ष:, पु (पितृप्रिय: पक्ष: ।) गौणाश्विन-
कृष्णपक्ष: । स तु प्रेतपक्ष: । तत्र श्राद्धफलं
यथा, हेमाद्रिमाधवसग्रहार्थानीगरखण्डम् ।
“आषाढ्या: पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नर: कुर्य्यादेकस्मिन्नपि वासरे ।
तस्य संवत्सरं यावत्तृप्ता: स्यु: पितरो ध्रुवम् ॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तम: पितृपक्ष: स्यादन्यत्रैव तु पञ्चम: ॥”
इति मलमासतत्त्वम् ॥

पितृपति:, पुं, (पितॄणां पति: ।) यम: । इत्य-
मर: ।१।१।६१ ॥ (यथा, मार्कण्डेये ।१०४।३७
“त्वं ब्रह्मा हरिरजसंज्ञितस्त्वमिन्द्रो
वित्तेश: पितृपतिरम्बुपति: समीर: ।
सोमोऽग्निर्गगनमहीधरोऽब्धिसंघ:
किं स्तव्यं तव सकलात्मरूपधाम्न: ॥”)

पितृपिता, [ऋ] पु, (पितु: पिता ।) पितामह: ।
इत्यमर: । २ । ६ । ३३ ॥

पितृप्रसू: स्त्री, (पितॄणां प्रसूरिव । पितृस्तो
सन्ध्यायां निर्गतिद्ग्र(?)ज्ञत्वादस्या: प्रसूतुल्यापाल
कतया तथात्वम् ।) सन्ध्या । इत्यमर: ।१।८।३॥
(यथा, आर्य्यासप्तशत्याम् । ५०१ ।
“रजनीरियमुपनतु पितृप्रसू प्रथममुपतस्थे ।

रञ्जयति स्वयमिन्दुं कुनायकं दृष्टवतीव ॥”
पितुः प्रसूर्जनयित्री ।) पितामही ॥

पितृप्रियः, पुं, (पितॄणां प्रियः ।) भृङ्गराजः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)

पितृबन्धुः, पुं, (पितुर्बन्धुः ।) पितामहभगिनीपुत्त्रः । पितामहीभगिनीपुत्त्रः । पितुर्मातुलपुत्त्रः । इत्युद्वाहतत्त्वम् ॥

पितृबान्धवः, पुं, (पितुर्बान्धवः ।) पितृबन्धुः । यथा, उद्वाहतत्त्वे ।
“पितुः पितुःस्वसुः पुत्त्राः पितुर्मातुःस्वसुः सुताः ।
पितुर्मातुलपुत्त्राश्च विज्ञेयाः पितृबान्धवाः ॥”

पितृभोजनः, पुं, (पितृभिर्भुज्यते इति । भुज + कर्म्मणि ल्युट् । पितृदेश्यकदानेऽस्य प्रशस्ततया तथात्वम् ।) माषः । इति राजनिर्घण्टः ॥ (भुज + भावे ल्युट् । पितॄणां भोजनमिति ।) पितॄणां भक्षणं, क्ली ॥

पितृभ्राता, [ऋ] पुं, (पितुर्भ्राता ।) पितृव्यः । इत्यमरः । २ । ६ । ३१ ॥

पितृयज्ञः, पुं, (पितृभ्यः पितॄनुद्दिश्येत्यर्थः यो यज्ञः ।) तर्पणम् । यथा, मनुः । ३ । ७० ।
“अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥”

पितृलोकः, पुं, (पितॄणां लोकः ।) पितॄणां भुवनम् । (यथा, महाभारते । १ । ६२ । १० ।
“कथञ्च नकुलः सेनाः पाण्डवः कृष्णसारथिः ।
अस्माल्लोकोऽनयत् सर्व्वाः पितृलोकं धनञ्जयः ॥”)
अस्य विवरणं यथा,—
मार्कण्डेय उवाच ।
“सर्व्वेषामेव देवानामाद्यो नारायणो गुरुः ।
तस्माद्ब्रह्मा समुत्पन्नः सोऽपि सप्तासृजन्मुनीन् ॥
मां यजस्वेति तेनोक्तास्तदा ते परमेष्ठिनः ।
आत्मनात्मानमेवाग्रे अयजन्त इति श्रुतिः ॥
तेषां वै ब्रह्मजातानां महावैकारिकर्म्मणाम् ।
अपशब्दाभिशापेन महानंध कृतो यतः ।
प्रभ्रष्टज्ञानिनः सर्व्वे भविष्यथ न संशयः ॥
एवं शप्तास्ततस्तेऽपि ब्रह्मणात्मसमुद्भवाः ।
सद्योवंशकरान् पुत्त्रानुत्पाद्य त्रिदिवं ययुः ॥
ततस्तेषु प्रयातेषु त्रिदिवं ब्रह्मवादिषु ।
तत्पुत्त्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥
ते च वैमानिकाः सर्व्वे ब्रह्मणः सप्त मानसाः ।
तत्पिण्डदानसन्तोषं प्रपश्यन्तो व्यवस्थिताः ॥
गौरमुख उवाच ।
ये च ते पितरो ब्रह्मन् स्वश्च कालं समासते ।
कियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः ॥
मार्कण्डेय उवाच ।
प्रवर्त्तन्ते वराः केचिद्देवानां सोमवर्द्धनाः ।
ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥
चत्वारो मूर्त्तिमन्तो वै त्रयस्त्वन्ये अमूर्त्तयः ।
तेषां लोकनिसर्गञ्च कीर्त्तयिष्यामि तच्छृणु ॥
प्रभावञ्च महर्षे त्वं विस्तरेण निबोध मे ।
धर्म्ममूर्त्तिधरास्तेषां त्रयोऽन्ये परमा गणाः ॥
तेषां नामानि लोकांश्च कीर्त्तयिष्यामि तच्छृणु ॥
लोकाः सन्तानकामाय यत्र तिष्ठन्ति भास्वराः ।
अमूर्त्तयः पितृगणास्ते वै पुत्त्राः प्रजापतेः ॥
विराजस्य प्रजाः श्रेष्ठास्ते वैराजा इति स्मृताः ।
देवानां पितरस्ते हि तान् यजन्तीह देवताः ॥
एते वै लोकविभ्रष्टा लोकान् प्राप्य सनातनान् ।
पुनर्युगशतान्तेषु जायन्ते ब्रह्मवादिनः ॥
ते प्राप्य तां स्मृतिं भूयः सिद्धिं योगमनुत्तमम् ।
चिन्त्य योगगतिं शुद्धां पुनरावृत्तिदुर्लभा ॥
एतेऽस्मिन् पितरः श्राद्धे योगिनां योगवर्द्धनाः ।
आप्यायितास्तु ते पूर्व्वं येऽपि योगबले रताः ॥
तस्मात् श्राद्धानि देयानि योगिनां योगसत्तमैः ।
एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥
एते त एकतनवो वर्त्तन्ते द्विजसत्तमाः ।
भूर्लोकवासिनो याज्या भुवर्लोकनिवासिनः ॥
स्वर्गलोका मरीच्याद्यास्तेषां याज्या महर्गताः ।
कल्पवासिकसंज्ञानां तेषामपि जने स्थिताः ॥
सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः ।
तेषां सत्यगताः प्रोक्ता इत्येषा पितृसन्ततिः ॥
सप्तधा सप्तलोकेषु आदिमन्वन्तरक्रिया ।
अन्येषां वसवः साध्या रुद्रादित्याश्विनाविति ॥
अग्रतः सर्व्ववर्णानां साधारण्येन संस्थिताः ।
ऋषयश्च तदुत्पन्ना इति सप्तविधा गणाः ॥
तेषां कन्यास्तु संजाता महती पितृसन्ततिः ।
अग्निष्वात्ताश्च मारीचा वैराजा बर्हिसंज्ञिताः ॥
सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः ।
तेऽपि याज्यास्त्रिभिर्वर्णैः शूद्रेण पृथक् कृतम् ॥
वर्णत्रयाभ्यनुज्ञातः शूद्रः सर्व्वान् पितॄन् यजेत् ।
न तु तस्य पृथक् सन्ति पितरः शूद्रजातयः ॥
मुक्तचेतनका ब्रह्मन् । न दृश्यन्ते पितृष्वपि ।
विशेषशास्त्रदृष्ट्या तु पुराणानाञ्च दर्शनात् ॥
एव ऋषिस्तुतेः शास्त्रैर्ज्ञात्वा याजकसम्भवान् ।
स्वयं दृष्ट्वा स्मृतिर्लब्धा पुत्त्राणां ब्रह्मणा ततः ॥
परं निर्व्वाणमापन्नास्तेऽपि ज्ञानिन एव च ।
वैश्यादीनां कश्यपाद्या वर्णानां वसवादयः ॥
अविशेषेण विज्ञेया गन्धर्व्वाद्या अपि ध्रुवम् ।
एष ते पैतृकः सर्गः उद्देशेन महामुने ॥
कथितो नान्त एवास्य वर्षकोट्या हि दृश्यते ॥”
इति वाराहे श्राद्धकल्पः ॥ * ॥
अपि च ।
“पितॄणां सम्भवं राजन् । कथ्यमानं निबोध मे ।
पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥
एकाग्रमानसः सर्व्वास्तन्मात्रा मनसो बहिः ।
कृत्वा परमकं ब्रह्म ध्यायन् सर्व्वेषु रूपकैः ॥
तस्यात्मनि तदा योगं गतस्य परमेष्ठिनः ।
तन्मात्रा निर्ययुर्देहाद्धूमवर्णकृतत्विषः ॥
पिबाम इति भाषन्तः सुरां सोममितोऽसकृत् ।
ऊर्द्ध्वं जिगमिषन्तो वै अधःसंस्थास्तपस्विनः ॥
तान् दृष्ट्वा सहसा ब्रह्मा तिर्य्यक्संस्थांस्तदोन्मुखान् ।
भवन्तः पितरः सन्तु सर्व्वेषां गृहमेधिनाम् ॥
ऊर्द्ध्ववक्त्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ॥
इत्युक्ता तु तदा ब्रह्मा तेषां पन्थानमाकरोत् ।
दक्षिणायनसंज्ञन्तु पितॄणान्तु पितामहः ॥
तूर्णीं ससर्ज भूतानि तमूचुः पितरस्ततः ।
तृप्तिं नो देहि भगवन् यया विन्दामहे सुखम् ॥
ब्रह्मोवाच ।
अमावास्यादिनं वोऽस्तु तस्यां कुशतिलोदकैः ।
तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथा ॥
तिला देयास्तथैतस्यामुपोष्य पितृभक्तितः ।
परमं तस्य सन्तुष्टाः परं यच्छत मा चिरम् ॥”
इति वाराहे पितृसर्गस्थितिवर्णनम् ॥ * ॥
पितृश्राद्धविशेषे देवताविशेषाः पितृगणाश्च यथा
“क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः ।
रोचकश्चाद्रवाश्चैव तथा चान्यः पुरूरवाः ॥
विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिताः ।
विश्वदेवौ क्रतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ॥
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके ।
नवान्नालम्भने देवौ कामकालौ सदैव हि ॥
अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ ।
पुरूरवाश्चाद्रवाश्च विश्वदेवौ च पर्व्वणि ॥
सुभास्वरा बर्हिषदो ह्यग्निष्वात्तास्तथैव च ।
आज्यपाश्चोपहूताश्च क्रव्यादाश्च सुकालिनः ।
एते पितृगणाः सप्त पौराणाः केचिदेव हि ॥”
इत्यग्निपुराणम् ॥ * ॥
अग्निष्वात्तादेरुत्पत्तिर्यथा,—
“ततो निगृह्येन्द्रियकं विकारं चतुराननः ।
जिघृक्षुरपि तत्याज तां सन्ध्यां कामरूपिणीम् ॥
तच्छरीरात्तु घर्म्माम्भो यत् पपात द्विजोत्तमाः ।
अग्निष्वात्ता बर्हिषदो जाताः पितृगणास्ततः ॥
भिन्नाञ्जननिभाः सर्व्वे फुल्लराजीवलोचनाः ।
नितान्तसंयताः पुण्याः संसारविमुखाः परे ॥
सहस्राणां चतुःषष्टिरग्निष्वात्ताः प्रकीर्त्तिताः ।
षडशीतिसहस्राणि तथा बर्हिषदो द्विजाः ॥”
इति कालिकापुराणे २ अध्यायः ॥ * ॥
तेषां तर्पणविधिर्यथा,—
“अपसव्यं ततः कृत्वा सव्यं जानु च भूतले ।
अग्निष्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् ॥
सुकालिनो बर्हिषदस्तथा चैवाज्यपान् पुनः ।
तर्पयेत्तु पितॄन् भक्त्या सतिलोदकचन्दनैः ॥
दर्भपाणिस्तु विधिवत् प्रेतांस्तांस्तर्पयेत्ततः ।
पित्रादीन्नामगोत्रेण तथा मातामहानपि ।
सन्तर्प्य विधिवद्भक्त्या इमं मन्त्रमुदीरयेत् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिलां यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥”
इति मात्स्ये स्नानविधौ ८४ अध्यायः ॥

पितृवनं, क्ली, (पितॄणां वनमिव ।) श्मशानम् । इत्यमरः । २ । ८ । ११८ ॥ (यथा, महाभारते । ११ । ४ । १५ ।
“सर्व्वे पितृवनं प्राप्ता स्वपन्ति विगतज्वराः ।
निर्म्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥”)

पितृवनेचरः, पुं, (पितृवने श्मशाने चरतीति । चर + “चरेष्टः ।” ३ । २ । १६ । इति टः । अलुक्समासः ।) शिवः । इति केचित् ॥

पितृवसतिः, स्त्री, (पितॄणां वसतिर्यत्र ।) शवशयनस्थानम् । श्मशानम् । इत्यमरटीकायां रमानाथः ॥

पितृव्यः, पुं, (पितुर्भ्राता । "पितृव्यमातुलमातामहपितामहाः ।" ४ । २ । ३६ । इत्यत्र "पितुर्भ्रातरि व्यत् ।" इति वार्त्तिकोक्त्या व्यत्-प्रत्ययः ।) पितृभ्राता । इत्यमरः । २ । ६ । ३१ ॥ अपि च ।
"पितृव्यो जनकभ्राता ज्येष्ठतातोऽग्रजो यदि ।
पितुः कनिष्ठभ्राता तु खुल्लतातोऽभिधीयते ॥"
इति शब्दरत्नावली ॥

पितृष्वसा [ऋ] स्त्री, (पितुः स्वसा भगिनी । "मातृपितृभ्यां स्वसा ।" ८ । ३ । ८४ । इति षत्वम् ।) पितुर्भगिनी । पिसी इति भाषा । यथा,
"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥

पितृष्वस्रीयः, त्रि, पितृष्वसुरपत्यम् । (पितृष्वसृ + छः ।) पितृभागिनेयः । इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १११ । २ ।
"पितृष्वस्रीयाय सुतामनपत्याय भारत ! ।
अग्र्यामग्रे प्रतिज्ञाय स्वस्यापत्यं स सत्यवाक् ॥")

पितृसन्निभः, पुं, (सम्यङ्निभातीति सन्निभस्तुल्यः । पितुः सन्निभः ।) पितृतुल्यः । तत्पर्य्यायः । मनोजवः २ मनोजवसः ३ । इत्यमरभरतौ ॥

पितृसूः, स्त्री, (सूते इति सूर्जननी । पितॄणां सूर्जननीव । पितृकृत्ये सन्ध्यागामिन्यास्तिथेर्ग्राह्यत्वात् जननीवत् पालकत्वेनैव तथात्वम् ।) सन्ध्या । इति शब्दमाला । (पितरं सूते इति । क्विप् । पितामही । इति व्युत्पत्तिलब्धोऽर्थः ॥)

पितृहूः, पुं, (पितॄनाह्वयत्यनेनेति । पितृ + ह्वे + करणे क्विप् ।) दक्षिणकर्णः । यथा, श्रीभागवते । ४ । २५ । ५० ।
"पितृहूर्नृपपुर्य्या द्वार्दक्षिणेन पुरञ्जन ! ॥"
"शास्त्रं च प्रथमं श्रोतव्यं कर्म्मकाण्डं इत्येतावता सामान्येन प्रवृत्तसंज्ञकस्य कर्म्मकाण्डस्य दक्षिणकर्णेन अवगमिष्यते । ततस्तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते । तदनेन प्रकारेण पितॄणामाह्वानमनेन भवति पितृहूर्दक्षिणः कर्णः । एवं तद्वैपरीत्येन उत्तरकर्णो देवहूः । तथा च व्याख्यास्यति ।
पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ।
प्रवृत्तञ्च निवृत्तञ्च शास्त्रं पञ्चालसंज्ञितम् ॥"
इति तट्टीकायां श्रीधरस्वामी ॥

पित्तं, क्ली, (अपिधीयते प्रकृतावस्थया रक्ष्यते विकृतावस्थया नाश्यते वा शरीरं येनेति । अपि + धे ट पालने, दो अ खण्डने वा + क्तः । "अच उपसर्गात्तः ।" ७ । ४ । ४७ । इति तादेशः । अपेरल्लोपः ।) शरीरस्थधातुविशेषः । तत्पर्य्यायः । मायुः २ । इत्यमरः । २ । ६ । ६२ ॥ पलज्वलः ३ । इति शब्दरत्नावली ॥ तेजः ४ तिक्तधातुः ५ उष्मा ६ अग्निः ७ अनलः ८ । (यथा, महाभारते । ६ । ८१ । ३१ ।
"अभिमन्योस्ततस्तैस्तु घोरं युद्धमवर्त्तत ।
शरीरस्य यथा राजन् ! वातपित्तकफैस्त्रिभिः ॥")
अस्य गुणाः ।
"पित्तञ्च तिक्ताम्लरसञ्च सारकं
तृष्णं द्रवं तीक्ष्णमिदं मधौ बहु ।
वर्षान्तकाले भृशमर्द्धरात्रे
मध्यन्दिने तप्यदिने च कुप्यति ॥"
इति राजनिर्घण्टः ॥ * ॥
अपिच ।
"सर्व्वं पित्तमपस्मारकुष्ठदद्रुव्रणापहम् ।
चक्षुष्यं कटुतीक्ष्णोष्णमुन्मादक्रिमिनाशनम् ॥"
इति राजवल्लभः ॥ * ॥
पित्तस्य स्वरूपमाह ।
"पित्तमुष्णं द्रवं पीतं नीलं सत्वगुणोत्तरम् ।
सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः ॥"
पीतं निरामम् । नील सामम् । एकं पित्तं तावत्त्वामस्थानकर्म्मभेदैः पञ्चविधम् ॥ * ॥
तेषां पित्तानां नामान्याह ।
"पाचकं रञ्जकञ्चापि साधकालोचके तथा ।
भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः ॥" * ॥
अथ पाचकादीनां स्थानान्याह ।
"अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात् ॥" * ॥
अथ तेषां कर्म्माण्याह ।
"पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥"
पाचकं पित्तमामपक्वाशयमध्यस्थं षड्विधमाहारं भोज्यं भक्ष्यं चर्व्यं लेह्यं चूष्यं पेयं पचति दोषरसमूत्रपुरीषाणि पृथक् करोति च । तत्रस्थमाशयस्थमेवात्मशक्त्या रसरञ्जनहृदयस्थकफतमोऽपनोदनरूपचक्षूरूपप्रभाप्रकाशनाभ्यङ्गलेपादिपाचनाद्यग्निकर्म्मणा शेषाणां पित्तस्थानानामनुग्रहं करोति । शेषाण्यपि पित्तस्थानानि यकृत्प्लीहादीनि भागेन गत्वा तत्र तत्र रसरञ्जनादिकर्म्मभिरुपकरोतीत्यर्थः । कथम्भूतं पाचकं पित्तं शेषाग्निबलवर्द्धनं शेषा अग्नयः पृथिव्यादिमहाभूतगताः सप्तधातुगताश्च । यत उक्तं चरकेण ।
"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।"
इति ।
उष्माणोऽग्नयः । यत उक्तं वाग्भटे ।
"दोषधातुमलादीनामुष्मेत्यात्रेयशासनम् ।" इति ।
दोषधातुमलादीनामुष्मैवाग्निरित्यर्थः । रसादिधातुगताश्च सप्त तेषां बलवर्द्धनम् । यथा गृहे स्थापितानि रत्नानि खद्योतवद्दूरभास्वराणि तान्यपि दीपज्योतिषा दूरप्रकाशकानि भवन्ति । तथा अग्न्याशयस्थपाचकाग्नितेजसा सर्व्वे अग्नयो बलवन्तो भवन्ति । तथा च वाग्भटः ।
"अन्नस्य पक्ता सर्व्वेषां पक्तॄणामधिको मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥"
इति ॥
ननु पित्तादन्योऽग्निराहोस्वित् पित्तमेवाग्निरिति सन्देहः । उच्यते पित्तस्योष्णादिगुणद्वाराहारपाचनरञ्जनदर्शनादिकर्म्मणश्च न खलु पित्तव्यतिरेकेणान्योऽग्निः । तस्मादग्निरूपस्यैव पित्तस्य स्थानभेदात् पाचकरञ्जकसाधकालोचकभ्राजकसंज्ञाः । तथा च वाग्भटे ।
"पाचकं तिलमानं स्यात् काठिन्यान्नास्य दीपता ।
अनुग्रहात्यविकृतं पित्तं पाकोष्मदर्शनैः ॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्य्यतनुमार्द्दवैः ।
पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम् ॥
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ।
त्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम् ॥
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ।
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ॥
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥"
ननु यदि पित्ताग्न्योरभेदस्तदा कथं घृतं पित्तस्य शमनमग्नेर्दीपनमिति । तथा मत्स्याः पित्तं कुर्व्वन्ति न च तेऽग्निदीप्तिकरा इति । तथा पित्ताधिक्यात्तीक्ष्णोऽग्निरित्यपि कथं स्यात् । तथा समदोषः समाग्निश्चेत्यपि वक्तुं न युज्यते । तथा द्रव स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथेति । अत्रोच्यते । पित्तमग्नेः सततमधिष्ठानम् । तथा चोक्तं तन्त्रान्तरे ।
"अग्निर्भिन्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा ।
द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा ॥
तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स शक्तिमान् ।
स सञ्चरति कुक्षिस्थः सर्व्वतो धमनीमुखैः ॥
स कायाग्निः स कायोष्मा स पक्ता स च जीवनम् ।
अनन्यगतिरित्येव देहे कायाग्निरुच्यते ॥"
अन्यच्च ।
"वामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम् ।
तन्मध्ये मण्डलं सौर्य्यं तन्मध्येऽग्निर्व्यवस्थितः ॥
जरायुमात्रप्रच्छन्नः काचकोषस्थदीपवत् ॥"
तथा च मधुकोषे । "द्रवतेजःसमुदायात्मकस्य पित्तस्य तेजोभागोऽग्निरिति । तेन पित्तमप्यग्निवत् मन्यते । अग्निसापितायोगोलकवत् ।" परमार्थतस्तु अग्निः पित्ताद्भिन्न एवेति सिद्धान्तः । अतएवाह रसप्रदीपे ।
"जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः ।
सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥
नाभौ मध्ये शरीरस्य विशेषात् सोममण्डलम् ।
सोममण्डलमध्यस्थं विद्यात् सूर्य्यस्य मण्डलम् ॥
प्रदीपवत्तत्र गुणी स्थितो मध्ये हुताशनः ।
सूर्य्यो दिवि यथा तिष्ठंस्तेजोयुक्तैर्गभस्तिभिः ॥
विशोषयति सर्व्वाणि पल्वलानि सरांसि च ॥
तद्वच्छरीरिणां भुक्तं त्वनलो नाभिमाश्रितः ।
मयूखैः पचते क्षिप्रं नानाव्यञ्जनसंस्कृतम् ।
स्थूलकायेषु सर्व्वेषु यवमात्रप्रमाणतः ।
ह्रस्वकायेषु सर्व्वेषु तिलमात्रप्रमाणतः ॥
कृमिकीटपतङ्गेषु चाणुमात्रोऽवतिष्ठते ॥" इति ।
पुनः प्रकृतमनुसरन्ति ।

"रञ्जकं नाम यत् पित्तं तद्रसं शोणितं नयेत् ।
यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम् ॥"
धृतिं मेधाम् ।
"यदालोचकसंज्ञं तद्रूपग्रहणकारणम् ।
भ्राजकं कान्तिकारि स्यात्लेपाभ्यङ्गादिपाच-
कम् ॥

पित्तप्रकृतिको यथा,—
"पित्तप्रकृतिको यादृक् तादृशोऽथ निगद्यते ।
अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ॥
बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति ।
श्यामकेशः क्षमी स्थूलो बहुवीर्य्यो महाबलः ॥
पित्तं वह्निर्वाह्निजं वा तदस्मात्
पित्तोद्रिक्तस्तीव्रतृष्णो बुभुक्षुः ।
गौरोष्णाङ्गस्ताम्रहस्तोऽङ्घ्रिवक्त्रः
शूरो मानी पिङ्गकेशोऽल्परोमा ॥"
पित्तप्रकृतिकस्त्वंशा यथा,—
"शार्द्दूलकपिमार्जारयक्षोलूकाश्च पैत्तिकाः ॥"
पित्तस्योपशमहेतुमाह ।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजन-
ज्योत्स्नाभूगृहयन्त्रवारिजलदस्त्रीगात्रसंस्पर्श-
नम् ।
सर्पिःक्षीरविरेकसेककरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं
नयेत् ॥"
अथ पित्तप्रकोपकारणानि ।
"कट्वम्ललवणविदाहितीक्ष्णोष्णक्रोधोपवासातप-
स्त्रीसंभोगतृषाक्षुधाभिहननव्यायाममद्यादिभिः ।
भुक्ते जीर्य्यति भोजने च शरदि ग्रीष्मे तथा
प्राणिनां
मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत् ॥
इति भावप्रकाशे पूर्व्वखण्डे २ भागे ॥
(यथा च ।
"अत्युष्णरूक्षाम्लकटुप्रदाहैः
शोषैः सुरासेवनतानिघर्म्मैः ।
क्रोधादपि स्वेदनं च श्रमाय
अभोजने याति कोपश्च पित्तम् ॥
कुलत्थशाढकीयवमूलेषु शिग्रु
तिलान्नसौराजिकाशाककन्दैः ।
निशाजागरे योधने च श्रमे वा
घनान्ते शरत्सु प्रकोपः प्रदिष्टः ।
अशं वासरे मध्यगेऽर्के निशीथे
ऽसुजीर्य्यत्प्रभुक्ते प्रकोपः प्रदिष्टः ॥"
इति हारीते प्रथमस्थाने पञ्चमेऽध्याये ॥)
स तु ज्वरजनकमन्दाग्निजनकः ।
"मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः ।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥ * ॥
(यथा च ।
पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥
त्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम् ।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।
बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥
साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम् ।
दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजना-
त्वचः ॥"
इति वाभटे सूत्रस्थाने द्वादशेऽध्याये ॥
"पित्तविकाराश्चत्वारिंशदत ऊर्द्ध्वं व्याख्यास्यन्ते ।
तद्यथा, ओषश्च प्लोषश्च दाहश्च दवथुश्च धूमक-
श्चाम्लकश्च विदाहश्च अन्तर्दाहश्चांसदाहश्चो-
ष्माधिक्यञ्चातिस्वेदश्चाङ्गगन्धश्चाङ्गावयवदरणञ्च
शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च मांस-
दाहश्च त्वङ्मांसदरणञ्च रक्तकोठाश्च रक्त-
विस्फोटाश्च रक्तपित्तञ्च रक्तमण्डलानि च
हरितत्वञ्च हारिद्रत्वञ्च नीलिका च कक्षा च
कामला च तिक्तास्यता च पूतिमुखता च तृष्णाया
आधिक्यञ्चातृप्तिश्चास्यपाकश्च गलपाकश्चाक्षि-
पाकश्च गुदपाकश्च मेढ्रपाकश्च जीवादानञ्च
तमःप्रवेशश्च हरितहारिद्रमूत्रनेत्रवर्चस्त्वञ्चेति
चत्वारिंशत् पित्तविकाराः । पित्तविकाराणाम-
परिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति ।
सर्व्वेष्वपि खल्वेतेषु पित्तविकारेष्वन्येषु चानु-
क्तेषु पित्तस्येदमात्मरूपमपरिणामिकर्म्मणश्च
स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्त-
सन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः ।
तद्यथा,—
औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्ला-
रुणवर्ज्जो गन्धश्च विस्रो रसौ च कटुकाम्लौ
पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्म्मणः स्वल-
क्षणमिदमस्य भवति । तं तं शरीरावयवमा-
विशतो दाहौष्ण्यपाकस्वेदक्लेदकोथस्रावरागाः ।
यथास्वञ्च गन्धवर्णरसाभिनिर्व्वर्त्तनं पित्तस्य
कर्म्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत् ।
तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत । स्नेह
विरेकप्रदेहपरिषेकाभ्यङ्गावगाहादिभिः पित्त-
हरैर्मात्रां कालञ्च प्रमाणीकृत्य विरेचनन्तु
सर्व्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः ।
तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैका-
रिकं पित्तमूलञ्चापकर्षति । तत्रावजिते पित्ते-
ऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्ति-
मापद्यन्ते । यथाग्नौ व्यपोढे केवलमग्निगृहञ्च
शीतं भवति तद्वत् ॥" इति चरके सूत्रस्थाने
विंशेऽध्याये ॥ * ॥
"पित्तमुष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकञ्च । तस्यौ-
ष्ण्यात् पित्तला भवन्त्युष्णासहाः सुकुमारा-
वदातगात्राः प्रभूतपिप्लुव्यङ्गतिलकपिडकाः क्षुत्-
पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः
प्रायो मृद्वल्पकपिलश्मश्रुलोमकेशाश्च । तैक्ष्ण्या-
त्तीक्ष्णपराक्रमाः तीक्ष्णाग्नयः प्रभूताशनपानाः
क्लेशासहिष्णवो दन्दशूका द्रवत्वात् शिथिल-
मृदुसन्धिमांसाः प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च
विस्रत्वात् प्रभूतपूतिवक्षःकक्षास्यशिरःशरीर-
गन्धाः कट्वम्लत्वादल्पशुक्रव्यवायापत्याः । त एवं
गुणयोगात् पित्तला मध्यबला मध्यायुषो ज्ञान-
विज्ञानवित्तोपकरणवन्तश्च ।" इति चरके
विमानस्थानेऽष्टमेऽध्याये ॥)
पित्तघ्नी, स्त्री, (पित्तं हन्तीति । हन + "अमनुष्य-
कर्त्तृके च ।" ३ । २ । ५३ । इति टक् । ततो
ङीप् ।) गुडूची । इति शब्दचन्द्रिका ॥
(पित्तनाशके, त्रि । यथा, भावप्रकाशे । १ । १ ।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ॥")
पित्तज्वरः, पु, (पित्तनिमित्तको ज्वरः ।) पैत्तिक
ज्वरः । यथा,—
"विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमत्रदोषान् ॥"
इति राजनिर्घण्टः ॥
अस्य लक्षणं ज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ पित्तज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधा-
पयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदा-
रोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घन-
विधाने विशेषमाह सुश्रुतः । पैत्तिके दशरात्रेण
ज्वरे युञ्जीत भेषजमिति । दशरात्रेण लङ्घन-
वता यतितेनेत्यर्थः । किन्तद्भेषजं तदाह ।
"तिक्तामुस्तायवैः पाठाकट्फलाभ्यां सहोदकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिक्वाथः ॥
"पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ।
प्रियङ्गुश्च कृतः क्वाथ एष शर्करया युतः ॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिक्वाथः ॥
"द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः क्वाथः एष पित्तज्वरापहः ॥
मुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिक्वाथः ॥
"पटोलमथ धन्याकं मधुकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णाञ्चातिप्रमाथिनीम् ॥"
इति पटोलादिक्वाथः ॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुडूच्यादिक्वाथः ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ॥
ह्रीवेरचन्दनोशीरघनपर्पटसाधितम् ।
दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहनुत् ॥"
इति ह्रीवेरादिक्वाथः ॥
"भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवाम्बुदाः ।
वालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः ॥
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिक्वाथः ॥

"द्राक्षाचन्दनपद्मानि मुस्ता तिक्तामृतापि च ।
धात्री बालमुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधुकं कुलकं वापि किरातो धान्यकं तथा ॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्द्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः ॥"

इति महाद्राक्षादिक्वाथः ॥

"ससितो निशि पर्य्युषितः प्रातर्धन्याकतण्डुल-
क्वाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"

इति धन्याकक्वाथः ॥

"अमृतायाः हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा कासरक्तपित्तज्वरान् जयेत् ॥"

इति अमृतावासाक्वाथौ ॥

"गुडूची भूमिनिम्बश्च बालं वीरणमूलकम् ।
लघुमुस्तं त्रिदृक्षार्णी द्राक्षा वासा च पर्प्पटः ॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम् ।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥"

इति गुडूच्यादिक्वाथः ॥

"पलाशस्य बदर्य्या वा निम्बस्य मृदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥

उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥

पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहा ।
कासाल्पकपित्तवीसर्पश्वासान् हन्ति वमीनपि ॥"
तैलघृतक्षौद्रैरित्यत्र न समुच्चयः तेन केवलेन
क्षौद्रेणापि लिह्यात ।
"काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ शीतकसुस्विन्नशीतलीकृतवाससा ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाड़िमबीजैर्वा धन्याकल्केन च क्वचित् ॥"

इति कवलः ॥ धन्यात्र धान्याकम् ॥ * ॥

अथान्नमाह ।

"दाहवम्यर्दितं क्षामं निरन्नं तृषयान्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजशक्तुरूपतर्पणम् । सन्तर्पण-
स्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ।
"मुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे ॥
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले ।
मलयोदकसंसिक्ते सुप्यात् पित्तज्वरी नरः ॥

हारावलीचन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम् ।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥

आह्लादकास्य विज्ञाय तास्त्री रमयेत् पुनः ।
हितञ्च भोजयेदन्नं न हितं सुरतं महत् ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥

इति पित्तज्वराधिकारः ।" इति भावप्रकाशे
मध्यखण्डे प्रथमभागः ॥ * ॥
पित्तश्लेष्मज्वरनाशकौषधं यथा,—
"गुडूचीपद्मकारिष्टधन्याकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥"

इति गारुडे १८८ अध्यायः ॥

(अस्य सलक्षणचिकित्सितान्यपराणि यथा,—
"मूर्च्छा दाहो भ्रममदतृषावेगतीव्रत्वोऽतिसार-
स्तन्द्रालस्यं प्रलपनवमिः पाकनास्योष्ठवक्त्रे ।
स्वेदः श्वासो भवति कटुकं तिक्तता क्षुधा वा
एतैर्लिङ्गैर्भवति मनुजे पैत्तिको वै ज्वरस्तु ॥

रोध्रोत्पलामृतलता कमलं सिताढ्यं
तत्सारिवासहितमेव हि पाचनेषु ।
निःक्वाथ्य पानमति चाशु निहन्ति पित्तं
पित्तज्वरप्रशमनं प्रकरोति पुंसाम् ॥

क्वथितं तण्डुलपयसा शक्राह्वकटुरोहिणीसहि-
तम् ।
क्वाथं यष्टीमधुना विनाशनं पित्तज्वराणान्तु ।

दुरालभावासकपर्पटानां
प्रियङ्गुनिम्बैः कटुरोहिणीनाम् ।
किराततिक्तं क्वथितं कषायं
सशर्कराढ्यं क्वथितञ्च पाचनम् ॥
सदाहपित्तज्वरमाशु हन्ति
तृष्णाभ्रमं शोषविकारयुक्तम् ।
एकोऽपि वै पर्पटको वरिष्ठः
पित्तज्वराणां शमनाय योग्यः ।
तस्मात् पुनर्नागरवालकाढ्यः
सिंहो यथा कङ्कटके प्रवृत्तः ॥

नागरोशीरमुस्ता च चन्दनं कटुरोहिणी ।
धान्यकानां क्वाथ एव पित्तज्वरविनाशनः ॥
अमृतापर्पटीधात्री क्वाथः पित्तज्वरं हरेत् ।
सितारग्वधयोर्वापि काश्मर्य्याश्चाथ वा पुनः ॥
द्राक्षापर्पटकं तिक्ता पथ्यारग्वधमुस्तकैः ।
क्वाथस्तृड्भ्रमदाहयुक्तपित्तज्वापहः ॥

विदारिका रोध्रदधित्थकानां
स्यान्मातुलुङ्गस्य च दाडिमानाम् ।
यथानुलाभेन च मूलपत्रं
निहन्ति तृड्दाहसमूर्च्छनञ्च ॥

उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम् ।
नाभौ निधाय धाराम्बुशीतदाहनिवारणम् ॥
रम्यारामाकुचभरनमितालिङ्गनं चैष्टसङ्गं
व्यायामं मुनिवरगदितं शीतलं सेवन स्यात् ।
शुभ्राम्भोजं मलयजसलिलासिक्तसंशीतवासो
मुक्ताहारो विशदसतुहिनं कौमुदी या सुखाय ॥
एभिर्हन्ति द्रुततरमिभं मानुषाणान्तु पित्तं
दाहं शोषं क्लममपि तथा तृड्भ्रमं मूर्च्छनञ्च ।
एतैर्योगैर्भवति नितरां पित्तदाहस्य शान्ति
र्योग्या चैव प्रभवति सदा सत्क्रिया शीमताञ्च ॥
यदि जिह्वा गलतालुशोषो वै मनुजस्य च ।
केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम् ।
पेष्यमाणं तालुलेपः सद्यः पित्ततृषापहः ॥"

इति पित्तज्वरचिकित्सा ॥ * ॥

पित्तद्रावी, [न्] पुं, (पित्तं द्रावयतीति । द्रु +
णिच् + णिनिः ।) मधुरजम्बीरः । इति राज-
निर्घण्टः ॥

पित्तरक्तं, क्ली, (पित्तसंसृष्टं रक्तमिति मध्यपद-
लोपी समासः ।) रोगविशेषः । तत्पर्य्यायः ।
रक्तपित्तम् २ पित्तास्रम् ३ पित्तशोणितम् ४ ।
इति राजनिर्घण्टः ॥ अस्य विवरणं रक्तपित्त-
शब्दे द्रष्टव्यम् ॥

पित्तलं, क्ली, (पित्तं तद्वर्णं लातीति । ला + कः ।)
धातुविशेषः । पितल इति भाषा ॥ (यथा,
वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
"पित्तलञ्च तथा कांस्यं ताम्रवज्जारयेद्भिषक् ।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम् ॥")
तत्पर्य्यायः । आरकूटम् २ रीतिः ३ पतिकाष्ठे-
रम् ४ ब्रह्मदारु ५ । इति जटाधरः ॥ रीती
६ । इति शब्दरत्नावली ॥ मिश्रम् ७ । इति
रत्नमाला ॥ आरः ८ राजरीतिः ९ ब्रह्मरीतिः
१० कपिला ११ पिङ्गला १२ । इति भाव-
प्रकाशः ॥ क्षुद्रसुवर्णः १३ सिंहलम् १४ पिङ्ग-
लकम् १५ पीतलकम् १६ लोहितकम् १७
पिङ्गललोहम् १८ पीतकम् १९ । रीतिका-
युगलगुणाः । तिक्तत्वम् । शीतलत्वम् । रसे
लवणत्वम् । शोधनत्वम् । पाण्डुवातक्रिमिप्लीह-
पित्तनाशित्वञ्च ।
"गुरुा स्निग्धा मृदुः शीता सुरङ्गा सूत्रपत्रिणी ।
हेमोपमा शुभा स्वच्छा जात्या रीतिः प्रकी-
र्त्तिता ॥"

इति राजनिर्घण्टः ॥

"रीतिरप्युपधातुः स्यात् ताम्रस्य यसदस्य च ।
पित्तलस्य गुणा ज्ञेया स्वयोनिसदृशा जनैः ॥
संयोगस्य प्रभावेण तस्यान्येऽपि गुणाः स्मृताः ।
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं क्रिमिघ्नं नातिलेखनम् ॥"

इति भावप्रकाशः ॥ * ॥

भूर्जपत्रम् । इति शब्दमाला ॥ (बाहुल्येन
पित्तमस्यास्तीति । पित्त + "सिध्मादिभ्यश्च ।"
५ । २ । ९७ । इति लच् ।) पित्तयुक्ते, त्रि ।
इति मेदिनी । ले, ११४ ॥ (पित्तवृद्धिकरे च ।
यथा, सुश्रुते सूत्रस्थाने । ४५ अध्याये ।
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु ॥"
यथा च माधवकरकृतरुग्विनिश्चयसंग्रहे पाण्ड्वधि-
कारे ।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥")

पित्तला, स्त्री, (पित्तल + टाप् ।) तोयपिप्पली ।
इति मेदिनी । ले, ११४ ॥

पित्तारिः, पु, (पित्तानामरिर्नाशकः ।) पर्प्पटः ।
लाक्षा । वर्व्वरम् । इति राजनिर्घण्टः ॥

पित्र्यं, क्ली, (पितरो देवता अस्येति । पितृ + "वाय-
्वृतुपित्रुषसो यत् ।" ४ । २ । ३१ । इति यत् ।
"रीङृतः ।" ७ । ४ । २७ । इति रीङादेशश्च ।
पितृदेवताकदानीयत्वादस्य तथात्वम् ।) मधु ।

इति राजनिर्घण्टः ॥ पितृतीर्थम् । तत्तु तर्ज्जन्यङ्गुष्ठान्तः । इति हेमचन्द्रः । ३ । ५०४ ॥ (पितुरिदं पितुरागतं वेति । पितृ+"पितुर्यत् ।" ४ । ३ । ७६ । इति यत् । ततो रीङादेशः ।) पितृसम्बन्धिनि, त्रि । यथा,—
"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरन्तथा ॥"
इति दायभागः ॥
(पितृप्रियत्वात् श्राद्धार्हे च त्रि । यथा, सुश्रुते । २ । ४६ ।
"कषायं खड्गपिशितं कषायमनिलापहम् ।
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ॥")
पित्र्यः, पुं, (पितुस्तुल्य इति । बाहुलकात् यत् । ततो रीङादेशः ।) ज्येष्ठभ्राता । इति हेमचन्द्रः । ३ । २१५ ॥ (पितॄणां प्रिय इति यत् ।) माषः । इति शब्दमाला ॥
पित्र्या, स्त्री, (पितरो देवता अस्या इति । पितृ+ यत् । पितृदेवतत्वादेव तथात्वम् ।) मघानक्षत्रम् । इति हेमचन्द्रः । २ । २५ ॥ पौर्णमासी । इति शब्दमाला ॥
पित्सत्, [त्] पुं, (पतितुमिच्छतीति । पत् + सन् + "सनि मीमाघुरभलभशकपतपदामच इस् ।" ७ । ४ । ५४ । इति इस् । अभ्यासस्य लोपश्च । ततः पित्सन्+ शतृ ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥ प्रतिपत्तौ पतनेच्छौ च त्रि । इति विश्वः ॥
पित्सलं, क्ली, (पतत्यत्रेति । पत+ "सलः पतेरादेशा ।" २ । ७६२ । इति उणादिकोषधृतसूत्रात् अधिकरणे सलः । अकारस्य इत्त्व ।) पन्थाः । इत्युणादिकोषः । ० । २६० ॥
पिधानं, क्ली (अपि+धा+ल्युट् । अपेरल्लोपः ।) छादनम् । इत्यमरः । १ । ३ । १३ ॥ (यथा, आर्य्यासप्तशत्याम् । ४८९ ।
"युगपज्जघनोरःस्तनपिधानमधुरे । त्रपाखिन्नाङ्गसुखि ।।
लोलाक्षि । नैष पवनो विरमति तव वसनपरिवर्त्तौ ॥")
उदचनम् । इति हेमचन्द्रः । ४ । ६० ॥
पिनद्धः, त्रि, (अपि नह्यते स्मेति । अपि+नह+ क्तः । अपेरल्लोपः ।) परिहितवस्त्रादि । तत्पर्य्यायः । आमुक्तः २ प्रतिमुक्तः ३ अपिनद्धः ४ । इत्यमरः । २ । ८ । ६५ ॥ (आच्छादितः । यथा, भागवते । ११ । ८ । ३३ ।
"यदस्थिभिर्निर्म्मितवंशवंश्य-
स्थूणं त्वचा रोमनखैः पिनद्धम् ॥")
पिनाकः, पुं क्ली, (पाति रक्षति पनायते स्तूयते वा । पाल रक्षणे, पन स्तुतौ वा + "पिनाकादयश्च ।" उणा ४।१५ । इति आकप्रत्ययेन निपातनात् साधुः ।) शिवधनुः । तत्पर्य्यायः । अजगवम् २ । (यथा, महाभारते । ६ । ६० । १८ ।
"पिनाकमिव रुद्रस्य क्रुद्धस्याभिघ्नतः पशून् ॥")
शूलम् । इत्यमरः । १ । १ । ३७ ॥ शूलमपि शाङ्करमित्येके केचित । इति भरतः ॥ पांशुवर्षणम् । इति मेदिनी । के, ११६ ॥
पिनाकी, [न्] पुं, (पिनाकोऽस्त्यस्येति । इनिः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, हरिवंशे । ३५ । ७० ।
"ज्ञात्वा च निश्चयं सर्व्वे पलायनपरायणाः ।
विहाय मथुरां रम्यां मानयन्तः पिनाकिनम् ॥"
रुद्रभेदः । यथा, मात्स्ये । ५ । २९—३० ।
"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥")
पिन्यासं, क्ली, (अपिगतो विन्यासो यक्षगन्धत्वात् न्यासो यस्य । अपेरल्लोपः ।) हिङ्गु । इति जटाधरः ॥
पिपतिषत्, [त्] त्रि, (पतितुमिच्छतीति । पत + सन् । ततः शतृ ।) पतनेच्छुः । विहङ्गमे, पुं । इति मेदिनी । ते, २३१ ॥
पिपतिषुः, पुं, (पतितुमिच्छतीति । पत+सन् । पिपतिष+"सनाशंसभिक्ष उः ।" ३।२।१६८ । इति उः ।) पक्षी । इति राजनिर्घण्टः ॥ (पतनेच्छौ, त्रि ॥)
पिपासा, स्त्री, (पातुमिच्छेति । पा+सन्+अः । ततष्टाप् ।) पानेच्छा । तत्पर्य्यायः । तृष्णा २ तर्षः ३ उपलासिका ४ तृट् ५ तृषा ६ उदन्या ७ । इति हेमचन्द्रः । ३ । ५८ ॥ (यथा, सुश्रुते सूत्रस्थाने १ अध्याये । "स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः ॥")
पिपासितः, त्रि, (पिपासा जातास्येति । पिपासा + इतच् ।) पिपासायुक्तः । तृषितः । इति हलायुधः ॥ (यथा, मनौ । ८ । ९३ ।
"नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः ।
अन्धः शत्रुकुलं गच्छेद् यः साक्ष्यमनृतं वदेत् ॥")
पिपासुः, त्रि, (पातुमिच्छुः । पा+सन्+उः ।) पानेच्छुः । तत्पर्य्यायः । तृषितः २ तृष्णक् ३ । इति हेमचन्द्रः । ३ । ५७ ॥ (यथा, महाभारते । ३ । ८२३ । २५ ।
"भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे ।
पिपासवो ययुर्देवाः शतक्रतुपुरोगमाः ॥")
पिपीतकः, पुं, ब्राह्मणविशेषः । अस्य प्रमाणं पिपीतकीशब्दे द्रष्टव्यम् ॥
पिपीतकी, स्त्री, (पिपीतको ब्राह्मणविशेषः प्रवर्त्तकतयास्त्यस्येति । अच् । गौरादित्वात् ङीष् ।) वैशाखशुक्लद्वादशी । तत्र कर्त्तव्यव्रतं यथा,—
शतानीक उवाच ।
"जलदानस्य माहात्म्यं यत्त्वया परिकीर्त्तितम् ।
तदहं श्रोतुमिच्छामि पिपीतकीकथां शुभाम् ॥
पुरा केन कृतञ्चैतत् केन चैतत् प्रकाशितम् ।
कथं पिपीतकीनाम विधानञ्चैव कीदृशम् ॥
तत् सर्व्वं ब्रूहि देवर्षे । यदि तुष्टो मयि प्रभो । ॥
नारद उवाच ।
शृणु राजन् ! प्रवक्ष्यामि द्वादशीं तां पिपीतकीम् ।
यां कृत्वा यमलोकाद्वै प्राप्यते वैष्णवं पदम् ॥
पिपीतक इति ख्यातो ब्राह्मणः संशितव्रतः ।
तपःस्वाध्यायनिरतः सर्व्वप्राणिहिते रतः ॥
शान्तो दान्तः क्षमायुक्तो बलिहोमपरायणः ।
निवसन् निर्जनेऽरण्ये बहून् कालान् द्विजोत्तमः ॥
चिरं कृत्वा तपोऽरण्ये काले मृत्युमुपेयिवान् ॥
ततः कालेन कियता यमदूतैर्महाबलैः ।
नीयमानः स विप्रेन्द्रो यमलोकं भयावहम् ॥
ददर्श बहुशस्तत्र नरान्निरयसंस्थितान् ॥
असिपत्राद्यनेकेषु कुम्भीपाकेषु संस्थितान् ।
क्षतार्त्तरावांस्तान् दृष्ट्वा विषादमगमद्द्विजः ।
क्षुत्पिपासाकुलो भूत्वा प्रेतराजवशं गतः ॥
बहून् वस्त्रावृतान् कुम्भान् ददर्शातिमनोहरान् ।
प्रदेशानीप्सितांस्तत्र प्रासादैरुपशोभितान् ॥
गीतवाद्यादिनृत्यैश्च सेव्यमानः समन्ततः ।
क्वचित् प्रहरमाणांश्च किङ्करैर्यमशासनैः ॥
नीयमानांस्ततः प्रेतान् वध्यमानान् स्वकर्म्मभिः ।
शोकसन्तापसंयुक्तान् तृषया परिपीड़ितः ॥
संपश्यमानो राजेन्द्र ! ययाचे किङ्करान् जलम् ।
बहुशो याच्यमानैश्च किङ्करैरभिताड़ितः ॥
स नीयमानो ददृशे बहुशाखं द्रुमोत्तमम् ।
सुच्छायं शीतलं रम्यं महान्तं पिप्पलद्रुमम् ॥
तत्रैव सजलान् कुम्भान् माल्यग्रीवान् सुशोभितान् ।
ददर्श वस्त्रावृतमुखान् सुवासितसुशीतलान् ॥
रक्षन्ति बहवस्तत्र किङ्कराः शस्त्रपाणयः ।
तोयदर्शनमात्रेण साह्लादो ब्राह्मणोऽभवत् ॥
विनयावनतो भूत्वा ययाचे किङ्कराज्जलम् ।
ब्राह्मण उवाच ।
यमदूता महात्मानस्तोयं मे दीयतामिति ।
अप्राप्य तोयं प्राणानां विनाशो जायते ध्रुवम् ॥
तस्मात्तोयप्रदानेन प्राणान् रक्षत मेऽधुना ।
श्रुत्वा विप्रस्य तद्वाक्यं तमूचुर्यमकिङ्कराः ॥
न कृतं कर्म्म तद्विप्र । येन तोयञ्च लभ्यते ॥
प्रार्थयानः पुनस्तोयं यमदूतैः स ताड़ितः ॥
तद्वार्त्तावचनं श्रुत्वा यमः प्रोवाच तं द्विजम् ।
ब्रूहि त्वं विप्र । मा रोदीः का ते पीड़ाद्य चेतसि ॥
पुनर्ययाचे तत्तोयं तृषयाकुलचेतनः ।
श्रुत्वा विप्रस्य तद्वाक्यं समुवाच स धर्म्मराट् ॥
त्वया तत्र कृतं कर्म्म येन वै लभ्यते जलम् ॥
ब्राह्मण उवाच ।
त्वयि प्रसन्ने दिक्पाल ! तत्तोयं दुर्लभं न मे ।
तस्मात्तोयप्रदानेन प्राणरक्षां कुरु प्रभो । ॥
इत्थं बहुविधैर्वाक्यैर्यमः प्रीतोऽभवत्तदा ॥
यम उवाच ।
वरं वरय विप्रेन्द्र । यत्ते मनसि वर्त्तते ॥
ब्राह्मण उवाच ।
यदि तुष्टोऽसि मे देव । येन प्राप्नोऽस्मि तज्जलम् ।
तत् कुरुष्व धर्म्मराज ! सर्व्वप्राणेश्वर ! प्रभो ! ॥

यम उवाच ।
वैशाखे तद्व्रतं विप्र ! कुरु गत्वा निजालयम् ।
विधानं शृणु विप्रेन्द्र । द्वादशी याहशी भवेत् ॥
वैशाखे शुक्लपक्षस्य द्वादशी वैशाखी तिथिः ।
तस्यां सुशीतलजलैः स्नापयेत् केशवं प्रभुम् ॥
पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैर्विधानतः ॥
नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वाससा ॥
जप्त्वा तु केशवं मन्त्रं दण्डवत् प्रणमेत्ततः ।
दद्याद्द्विजेभ्यो विधिवत् कुम्भांस्तोयसमन्वितान् ।
प्रथमेऽब्दे चतुःकुम्भान् दद्यात्लवणसंयुतान् ॥
शुक्लवस्त्राहतसुखाशुपवीतसुसंयुतान् ।
धनुर्व्वाणसमायुक्तान् सभोज्यदक्षिणान्वितान् ॥
द्वितीयेऽष्टौ घटान्दद्याद्दधिशर्करसंयुतान् ।
तृतीये द्वादश घटान् तिलमोदकसंयुतान् ॥
चतुर्थे षोड़शघटान् दुग्धलड्डुकसंयुतान् ।
दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः ॥
दक्षिणां शक्तितो दद्यात् भोज्यञ्चैव विशेषतः ।
यत्र कुत्रापि संगच्छेन्न कुत्रापि तृषान्वितः ॥
ततो द्विजो गृहं गत्वा चकार द्वादशीव्रतम् ॥
अन्ते जगाम स्वर्लोकं वैष्णवं पदमुत्तमम् ॥
पिपीतकीति नाम्नातो विख्यातो वैशाखी तिथिः ।
नरो यः कुरुते भक्त्या नारी वा भक्तिसंयुता ।
इह पुत्रादिसम्पन्ना धनधान्यसुतान्विता ॥”
इति भविष्यपुराणे पिपीतकीव्रतकथा समाप्ता ॥

पिपीलकः, पुं, (अपि पीलतीति । अपि + पील स्तम्भने + ण्वुल् । अपेरलोपः ।) पीलकः । इति हेमचन्द्रः । ४ । २७२ ॥ डेंउया पिंपीड़ा इति भाषा ॥

पिपीलिका, स्त्री, (पिपीलक + टापि अत इत्वम् ।) छोनाङ्गी । इति हेमचन्द्रः । ४ । २७३ ॥ क्षुद्रे पिँपीड़ा इति भाषा ॥ तत्पर्य्यायः । पिपीलिकः २ पिपीलः ३ पीलकः ४ । इति शब्दरत्नावली ॥ पिपीली ५ पिपिली ६ स्त्रीसंज्ञा ७ । इति राजनिर्घण्टः ॥ चीरा ८ । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । २४ । ४ ।
“श्रुत्वा तु याच्यमानां तां क्रुद्धां कृष्णपिपीलिकाम् ।
ब्रह्मदत्तो महाहासमकस्मादेव चाहसत् ॥”)

पिपीली, स्त्री, (अपिपीलतीति । पील् + अच् । अपेरलोपः । ततो गौरादित्वात् ङीष् ।) पिपीलिका । इति राजनिर्घण्टः ॥

पिप्पटा, स्त्री, खाद्यद्रव्यविशेषः । तत्पर्य्यायः । गुडशर्करा २ । इति त्रिकाण्डशेषः ॥

पिप्पलं, क्ली, (पीयते इति । पा + अलच् । पृषोदरादित्वात् साधुः ।) जलम् । वस्त्रच्छेदभेदः । इति मेदिनी । ले, १११ ॥

पिप्पलः, पुं, (पिप्पलं जलं सिच्यमानत्वेनास्त्यस्य मूलावच्छेदे इति । पिप्पल + “अर्श आदिभ्योऽच् ।” ५।२।१२७ । इत्यच् ।) अश्वत्थवृक्षः । (यथा, महाभारते । २ । २१ । ८ ।
“वनराजीस्तु पश्येमाः पिप्पलानां मनोरमाः ।
लोध्राणाञ्च शुभाः पार्थ ! गौतमौकःसमीपजाः ॥”)
निरंशुकः । पक्षिभेदः । इति मेदिनी । ले, ११२ ॥ * ॥ अश्वत्थस्वरूपं यथा,—

नारद उवाच ।
“अनायासेन यत्कर्त्तः सर्व्वान् कामानवाप्नुयात् ।
सर्व्वदेवात्मकञ्चैव तन्मे ब्रूहि पितामह ! ॥

ब्रह्मोवाच ।
शृणु नारद । यत्नेन शुद्धं सर्व्वात्मकं गुरुम् ।
प्रदक्षिणीकृत्य नित्यं नराणां सर्व्वकामदम् ॥
पूजयेत् परया भक्त्या सर्व्वसिद्धियुतो भवेत् ।
अश्वत्थं पूजयेद्विप्र ! सर्व्वसिद्धिविधायकम् ॥ * ॥
अश्वत्थदक्षिणे रुद्रः पश्चिमे विष्णुरेव च ।
ब्रह्मा चोत्तरतस्तस्य पूर्व्वे चेन्द्रादिदेवताः ॥
स्कन्धे स्कन्धे च पत्रेषु ब्राह्मणा ऋषयः स्मृताः ।
तस्य मूले सर्व्ववेदाः श्रद्धा तस्य द्रुमाश्रिता ॥
नदीनदाः सागराद्याः पूर्व्वस्यान्दिशि संस्थिताः ।
लोकधर्म्मान् समाश्रित्य तस्मात्तं सेवयेन्नरः ॥
पुराणस्मृतिमन्त्रेभ्यः सारमुद्धृत्य सञ्चितम् ।
निष्ठाप्रतिष्ठितं सम्यगश्वत्थं सेवयेन्नरः ॥
त्वं चोरो फलितश्चैव शीतलश्च वनस्पते । ।
त्वामाराध्य नरो हन्यात् दैहिकाधिष्ठितं मलम् ॥
अश्वत्थ । यस्मात् त्वयि वृक्षराज !
नारायणस्तिष्ठति सर्व्वकारणम् ।
अतः शुचिस्त्वं सततं तरूणां
विशेषतोऽरिष्टविनाशनोऽसि ॥
क्षीरोदमथनं चैव यथा श्रीस्त्वामुपासते ।
सत्येन तेन वृक्षेन्द्र । आशीर्मयि निषेवतु ॥
एकादशांऽसि रुद्राणां वसूनामष्टमस्तथा ।
नारायणोऽसि देवानां वृक्षाणामसि पिप्पलः ॥
अग्निगर्भस्त्वमश्वत्थ । देवगर्भः प्रजापतिः ।
हिरण्यश्चैव श्रीगर्भो यज्ञगर्भ । नमोऽस्तु ते ॥
अरातेरग्निरश्वत्थ । परापर । नमोऽस्तु ते ।
निर्वातेत्वभिवर्षन्तु स्वस्ति तेऽस्तु नमोऽस्तु ते ॥
अक्षिस्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्विचिन्तितम् ।
शत्रूणाञ्च समुत्थानमश्वत्थ । शमयाशु मे ॥
यं स्पृष्ट्वा मुच्यते रोगैः सर्व्वपापैः प्रमुच्यते ।
समाश्लिष्य च दीर्घायुस्तमश्वत्थं नमाम्यहम् ॥
अश्वत्थ । सुमहाभाग । सर्व्वदा प्रियदर्शन । ।
दिव्यान्नभोजनं देहि शत्रूणाञ्च पराजयम् ॥
आयुः प्रजां धनं धान्यं सौभाग्यं सर्व्वदा सुखम् ।
देहि देव महावृक्ष । त्वामहञ्चाभिवादये ॥
अश्वत्थ । देवमूलस्त्वमृषिभिः प्रोच्यते सदा ॥
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीड़ितः ।
आवृत्य दशलक्षन्तु शुद्धः पापातिगो भवेत् ॥
ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः ।
पापापहन्ता मर्त्त्यस्तु व्रतमेतत् समाचरेत् ॥
एकहस्तं द्विहस्तं वा कुर्य्याद्गोमयलेपनम् ।
अश्वत्थे स्थापितं यस्तु मूले स्नपनमाचरेत् ॥
धनायुःसन्ततेर्वृद्धौ नरकात्तारयेत् पितॄन् ॥
अश्वत्थमूलमासाद्य शाकेनान्नोदकेन वा ।
एकं वा भोजयेद्विप्रं कोटि कोटि फलं भवेत् ॥
अश्वत्थमूलमासाद्य तपो होमः सुरार्च्चनम् ।
अक्षयं मुनिशार्दूल । ब्रह्मणो वचनं यथा ॥
एवं समर्च्चितोऽश्वत्थः सर्व्वसौख्यप्रदो भवेत् ।
यज्ञार्थं छेदितोऽश्वत्थः सर्व्वारोग्यप्रदो भवेत् ॥
अश्वत्थः पूजितो येन पूजिताः सर्व्वदेवताः ।
अश्वत्थश्छेदितो येन छेदिताः सर्व्वदेवताः ॥
अन्तःशुद्धः सुसम्बुद्धोऽश्वत्थो देवमयो गुरुः ।
स सेव्यः पूजनीयश्च गुणत्रयविनाशकः ॥
भृगवर्कवारे भौमे च मध्याह्ने निशि सन्ध्ययोः ।
अश्वत्थदर्शनं कार्य्यं कुलक्षयभयात्मभिः ॥ * ॥
अश्वत्थस्य जले यस्य छाया तिष्ठति कुत्रचित् ।
तत् प्रयागसमं तीर्थं तत्र सन्निहितो हरिः ॥
तस्मात् कार्त्तिकमासेऽत्र पूर्व्वोक्तविधिना सुने । ।
अश्वत्थं सेचयेद्विद्वान् संप्रदक्षिणमाचरेत् ॥
पापोपहतमर्त्त्यानां पापनाशो भवेद्ध्रुवम् ।
सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥
यः पठेत् शृणुयाद्वापि अश्वत्थस्य समीपतः ।
सर्व्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥’
इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥

ऋषय ऊचुः ।
“कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥

सूत उवाच ।
अश्वत्थरूपो भगवान् विष्णुरेव न संशयः ।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥

ऋषय ऊचुः ।
कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ।
एतत् कथय सर्व्वज्ञ । संशयोऽत्र महान् हि नः ॥

सूत उवाच ।
पार्व्वतीशिवयोर्द्देवैः सुरतं कुर्व्वतोः किल ।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः ।
रतःसंकसुखभ्रंशकम्पमाना तदा रुषा ॥

पार्व्वत्युवाच ।
क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम् ।
तस्मान्मम सुखभ्रंशाद्यूयं वृक्षत्वमाप्स्यथ ॥

सूत उवाच ।
एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्ब्बोधिवटौ मुनीश्वराः । ।
बोधिस्त्वयं चार्कदिनं विनैव
नस्पृश्यतामर्कजवारयोगात् ॥

ऋषय ऊचुः ।
अस्पृश्यत्वं कथं यातः सूत । बोधितरुः स्वयम् ।
स्पृश्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे ॥

सूत उवाच ।
समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः ।
श्रियञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः ॥
यावद्ङ्गीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः ।
तावत् विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम् ॥

लक्ष्मीरुवाच ।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते ।
तस्मात्त्वमग्रजामेतामलक्ष्मीं मधुसूदन ! ॥
विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः ।
तस्मादुह्मेयतिक्रामं न कुर्य्या मधुसूदन ! ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ।
उद्दालकाय मुनये सुदीर्घतपसे तदा ।
आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम् ।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम् ॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम् ।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित् ॥
होमधूमसुगन्धाढ्यं वेदघोषेण नादितम् ।
आश्रमन्तं विलोक्याथ ज्येष्ठा साग्रवीदिदम् ॥
ज्येष्ठोवाच ।
नहि वासोऽनुरूपोऽयं वेदध्वनियुतो मम ।
नात्रागमिष्ये शौ ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् ॥
उद्दालक उवाच ।
कथं नायासि किञ्चात्र वर्त्तते त्वमतं तव ।
तव योग्या च वसतिः का भवेत्तद्वदस्व माम् ॥
ज्येष्ठोवाच ।
वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम् ।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम् ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते ।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम् ॥
दानशौचे न विद्येते परद्रव्यापहारिणः ।
परदाररता यत्र तत्र स्थाने रतिर्म्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादपमाननम् ।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम् ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् ।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥
उद्दालक उवाच ।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि ! स्थीयतां क्षणम् ।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः ॥
सूत उवाच ।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः ।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा ॥
तदा रुरोद करुणं भर्त्तृत्यागेन दुःखिता ॥
ततस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ।
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा ॥
लक्ष्मीरुवाच ।
स्वामिन् ! मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता ।
तामाश्वासयितुं याहि कृपालो ! यद्यहं प्रिया ॥
सूत उवाच ।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः ।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् ॥
विष्णुरुवाच ।
अश्वत्थवृक्षमासाद्य सदालक्ष्मि ! स्थिरा भव ।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति ।
अलक्ष्मीपि भवेत्तस्मान्मन्दवारं विना किल ॥
प्रत्यब्दमर्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्म्मिणः ।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया ॥”
इति पाद्मोत्तरखण्डे । १६०—१६१ । अध्यायौ ॥
(रेवत्यां जातो मित्रस्य पुत्त्रविशेषः । यथा,
भागवते । ६ । १८ । ६ ।
“रेतः सिषिचतुः कुम्भे उर्व्वश्याः सन्निधौ द्रुतम् ।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥”)

पिप्पलकं, क्ली, (पीयते इति । पा+अलच् । पृषोदरादित्वात् साधुः । ततः संज्ञायां कन् ।) स्तनवृन्तम् । सीवनसूत्रम् । इति मेदिनी । के, १६८ ॥

पिप्पलिः, स्त्री, (पिपर्त्तीति । पॄ लि पूर्त्तौ+बाहुलकात् अलच् । गौरादित्वात् ङीष् । ह्रस्वः । पृषोदरादित्वात् साधुः ।) पिप्पली । इति शब्दरत्नावली ॥

पिप्पली, स्त्री, (पिपर्त्तीति+पॄ+बाहुलकात् अलच् । पृषोदरादित्वात् साधुः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । पिंपुल इति भाषा ॥ तत्पर्य्यायः । कृष्णा २ उपकुल्या ३ वैदेही ४ मागधी ५ चपला ६ कणा ७ उषणा ८ शौण्डी ९ कोला १० । इत्यमरः । २ । ४ । ९७ ॥ ऊषणा ११ पिप्पलिः १२ । इति भरतः ॥ तिक्तला १३ कटुबीजा १४ कोरङ्गी १५ तिक्ततण्डुला १६ श्यामा १७ दन्तफला १८ मगधोद्भवा १९ । अस्या गुणाः । ज्वरनाशित्वम् । वृष्यत्वम् । स्निग्धत्वम् । उष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । मारुतश्वासकासश्लेष्मक्षयापहत्वञ्च । इति राजनिर्घण्टः ॥ स्वादुपाकत्वम् । रसायनत्वम् । लघुत्वम् । पित्तलत्वम् । रेचनत्वम् । कुष्ठप्रमेहगुल्मार्शःप्लीहशूलामनाशित्वञ्च ॥ आर्द्रायास्तस्या गुणाः । कफप्रदत्वम् । स्निग्धत्वम् । शीतलत्वम् । मधुरत्वम् । गुरुत्वम् । पित्तप्रशमनत्वञ्च । राजवल्लभे तु कफापहत्वम । मधुयुक्तायास्तस्या गुणाः । मेदःकफश्वासकासज्वरहरत्वम् । वृष्यत्वम् । मेधाग्निवर्द्धनत्वञ्च । गुडपिप्पलीगुणाः । जीर्णज्वरे अग्निमान्द्ये च शस्तत्वम् । कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिनाशित्वञ्च । द्विगुणात् पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः । इति भावप्रकाशः ॥ (कश्यपवत्सपल्लवताभिःवृतो नदीविशेषः । यथा, मात्स्ये । ११३ । २५ ।
“तमसा पिप्पली श्येनी तथा चित्रोत्पलापि च ॥”)

पिप्पलीका, स्त्री, अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

पिप्पलीमूलं, क्ली, (पिप्पल्या मूलमिव मूलमस्य ।) स्वनामख्यातमूलम् । पिँपुलमूल इति भाषा । तत्पर्य्यायः । ग्रन्थिकम् २ चटिकाशिरः ३ । इत्यमरः ।-२ । ९ । ११० ॥ षड्ग्रन्थि ४ । इति रत्नमाला ॥ मूलम् ५ कोलमूलम् ६ कटुग्रन्थि ७ कटुमूलम् ८ कटूषणम् ९ सर्व्वग्रन्थि १० पत्राढ्यम् ११ विरूपम् १२ शोषसम्भवम् १३ सुगन्धि १४ ग्रन्थिलम् १५ । इति राजनिर्घण्टः ॥ उषणम् १६ । अस्य गुणाः । दीपनत्वम् । कटुत्वम् । पाचनत्वम् । लघुत्वम् । रूक्षत्वम् । पित्तकरत्वम् । भेदकत्वम् । कफवातोदरानाहप्लीहगुल्मकृमिश्वासक्षयापहत्वञ्च । इति भावप्रकाशः ॥ उष्णत्वम् । रोचनत्वम् । इति राजनिर्घण्टः ॥

पिप्पिका, स्त्री, दन्तमलम् । इति हेमचन्द्रः । ३ । २९६ ॥

पिप्रुः, पुं, (अपि प्लवते देहोपरि इति । अपि+प्लु+डुः । अपेरल्लोपः ।) जटुलः । इत्यमरः । २ । ६ । ४९ ॥

पियालः, पुं, (पीयति तर्पयतीति । पीय+“पीयुकणिभ्यां कालन् ह्रस्वः सम्प्रसारणञ्च ।” उणां ३ । ७६ । इति कालन् ह्रस्वश्च ।) वृक्षविशेषः । अस्यैव बीजं चिरौञ्जीति ख्यातम् । तत्पर्य्यायः । राजादनम् २ सन्नकद्रुः ३ धनुष्पटः ४ । इत्यमरः । २ । ४ । ३५ ॥ राजातनम् ५ राजातनः ६ प्रियालः ७ सन्नः ८ कद्रुः ९ धनुः १० पटः ११ । इति तट्टीका ॥ ह्रस्वकः १२ धन्वपटः १३ पियालकः १४ । इति शब्दरत्नावली ॥ खरस्कन्धः १५ चारः १६ बहुलवल्कलः १७ तापसेष्टः १८ ॥ (यथा, भागवते । ८ । २ । १० ।
“चूतैः पियालैः पनसैराम्रैराम्रातकैरपि ॥”)
तस्य गुणाः । पित्तकफास्रनाशित्वम् । इति भावप्रकाशः ॥ अस्य फलगुणाः । मधुरत्वम् । स्निग्धत्वम् । बृंहणत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥ गुरुत्वम् । सरत्वम् । दाहज्वरतृषापहत्वञ्च । तस्य मज्जगुणाः । मधुरत्वम् । वृष्यत्वम् । पित्तानिलापहत्वम् । हृद्यत्वम् । अतिदुर्जरत्वम् । स्निग्धत्वम् । विष्टम्भित्वम् । आमवर्द्धनत्वञ्च । इति भावप्रकाशे पूर्व्वखण्डे प्रथमो भागः ॥

पिल, क क्षिपि । इति कविकल्पद्रुमः ॥ (चुरां-परं सकं-सेट् ।) क, पेलयति । क्षिपि प्रेरणे । इति दुर्गादासः ॥

पिलुकः, पु, (अपिलातीति । अपि+ला+बाहुलकात् डुः । अपेरलोपः । ततः कन् ।) पीलुवृक्षः । इति शब्दरत्नावली ॥

पिलुपर्णी, स्त्री, (पिलोरिव पर्णमस्याः । ङीष् ।) मोरटा । इति रत्नमाला ॥

पिल्लः, पु, (क्लिन्ने चक्षुषी यस्येति । “इनच्पिटच्चिकचि च ।” ५ । २ । ३३ । इत्यत्र “क्लिन्नस्य चिल्पिलश्चास्य चक्षुषी ।” इति वार्त्तिकोक्त्या पिल्लादेशः ।) क्लेदयुक्तचक्षुः । (अस्य चिकित्सा यथा,—
“ताम्रपात्रे गुहामूलं सिन्धूत्थंमरिचान्वितम् ।
आरनालेन संघृष्टमञ्जनं पिल्लनाशनम् ॥”
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥)
तद्युक्ते, त्रि । इत्यमरः । २ । ६ । ६० ॥

पिल्लका, स्त्री, (पिल्लेन क्लेदयुक्तचक्षुषा कायतीति । कै+कः । टाप् ।) हस्तिनी । इति शब्दमाला ॥

पिव, इ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) इ, पिन्वति । इति दुर्गादासः ॥

पिश, श प अवयवे । इति कविकल्पद्रुमः ॥ (तुदां-मुचां-परं अकं-सेट् ।) श प, पिंशति पटः अवयवी स्यादित्यर्थः । इति दुर्गादासः ॥

पिशङ्गः, पु, (पिंशतीति । पिश+“पिड़ादिभ्यः कित् ।” उणां ।१।१२०। इत्यङ्गच् स च कित् ।) पिङ्गलवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १६—१७ ॥ (यथा, ऋग्वेदे । १ । ८८ । २ ।
“तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः ॥”
यथा च माघे । १ । ६ ।
“पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं शितिवाससस्तनुम् ॥”
नागभेदः । यथा, महाभारते । १ । ५७ । १६ ।
“भैरवो मुण्डवेदाङ्गः पिशङ्गश्चोद्रपारकः ॥”)

पिशाचः, पुं, (पिशितं मांसमश्नातीति । पिशित+अश+“कर्म्मण्यण् ।” ३ । २ । १ । इति अण् । ततः “पृषोदरादीनि यथोपदिष्टम् ।” ६ । ३ । १०९ । इति शितभागस्य लोपः अशभागस्य शाचादेशः ।) देवयोनिविशेषः । इत्यमरः । १ । १ । ११ ॥ पिचाश इति भाषा ॥ (यथा, मनौ । १ । ३७ ।
“यक्षरक्षःपिशाचांश्च गन्धर्व्वाप्सरसोऽसुरान् ॥”
“यक्षो वैश्रवणस्तदनुचराश्च । रक्षांसि रावणादीनि । पिशाचास्तेभ्योऽपकृष्टा अशुचिमरुदेशनिवासिनः ।” इति तट्टीकायां कुल्लूकभट्टः ॥)
तस्य लोको यथा,—
“अन्तरीक्षचरा ये च भूतप्रेतपिशाचकाः ।
वर्जयित्वा रुद्रगणांस्तु तत्रैव चरन्ति हि ॥
नाहं विक्रमणे शक्तस्तेषां सम्भूतपाप्मनाम् ।
अत ऊर्द्ध्वं हि विप्रेन्द्र । राक्षसा वै कृतेनसः ।
ते तु सूर्य्यादधः सर्व्वे विहरन्त्यङ्कवर्जिताः ॥”
इति पाद्मे स्वर्गखण्डे १५ अध्यायः ॥
प्रेतः । यथा, मलिनतत्त्वे ।
“अशौचान्माद्दितीयेऽह्नि यस्य नोत्सृज्यते वृषः ।
पिशाचत्वं भवेत्तस्य दत्तैः श्राद्धशतैरपि ॥”

पिशाचकी, [न्] पु, (पिशाचाः सन्त्यस्येति । “वातातीसाराभ्यां कुक् च ।” ५ । २ । १२९ । इत्यत्र “पिशाचाच्च ।” इति वार्त्तिकोक्त्या इनिः कुक् च ।) कुबेरः । इति हेमचन्द्रः । २ । १०३ ॥

पिशाचद्रुः, पु, (पिशाचानां द्रुः पिशाचप्रियो द्रुर्निविडत्वादन्धकारवत्त्वादपुत्रियस्थानजातत्वाच्च ।) शाखोटवृक्षः । इति त्रिकाण्डशेषः ॥ (शाखोटशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

पिशाचवृक्षः, पु, (पिशाचानां वृक्षः पिशाचप्रियो वृक्षो वा ।) शाखोटवृक्षः । इति रत्नमाला ॥

पिशाचसभं, क्ली, पिशाचानां सभा । इति नपुंसकलिङ्गसंग्रहटीकायां भरतः ॥

पिशाची, स्त्री, (पिशाच+ङीष् ।) पिशाचिका । स्त्री पिशाची । इति शब्दमाला ॥ (पिशाचवद्गन्धोऽस्त्यस्या इति । अच् ततो ङीष् । तद्वद्गन्धयुक्तत्वात् तथात्वम् ।) गन्धमांसी । इति राजनिर्घण्टः ॥

पिशितं, क्ली, (पिंशति अवयवीभवतीति । पिश+“पिशेः किच्च ।” उणां । ३ । ९५ । इति इतन् स च कित् । यद्वा, पिश्यते स्मेति । क्तः ।) मांसम् । इत्यमरः । २ । ६ । ६३ ॥ (यथा, मार्कण्डेयपुराणे । २५ । १७ ।
“हासोऽस्थिसन्दर्शनमक्षियुग्ममत्युज्ज्वलं तज्जघनमङ्गनायाः ।
कुचादि पीनं पिशितं घनं तत् स्थानं रतेः किं नरकं न योषित् ॥”)

पिशिता, स्त्री, (पिशितवद्गन्धोऽस्त्यस्या इति । अच् ततष्टाप् ।) जटामांसी । इति मेदिनी । ते, ३३ ॥

पिशिताशी, [न्] त्रि, (पिशितं अश्नातीति । अश+णिनिः ।) शष्कुलः । मांसभक्षकः । इति हेमचन्द्रः । ३ । ८३ ॥ (यथा, महाभारते । १ । ८४ । १४ ।
“सङ्कीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च ।
पिशिताशिषु चान्त्येषु मूढ़ । राजा भविष्यसि ॥”)

पिशी, स्त्री, (पिंशतीति । पिश+कः । गौरादित्वात् ङीष् ।) जटामांसी । इति राजनिर्घण्टः ॥ (जटामांसीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पिशुनं, क्ली, (पिंशतीति । पिश+“क्षुधिपिशिमिथः कित् ।” उणां ३ । ५५ । इति उनन् । स च कित् ।) कुङ्कुमम् । इत्यमरः । २ । ६ । १२४ ॥ (पर्य्यायोऽस्य यथा,—
“कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पिशुनः, पु, (पिश+उनन् । स च कित ।) कपिवक्त्रः । नारदः । काकः । इति मेदिनी । नं, ८७ ॥ (अङ्गुष्ठः पुत्रः । यथा मार्कण्डेये । ५१ । ६५ ।
“अङ्गुष्ठक् तनयं लेभे पिशुनं नाम नामतः ॥”
कौशिकस्य पुत्त्रभेदः । यथा हरिवंशे । २१ । ५-६ ।
“वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च ।
खसृमः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा ॥
कौशिकस्य सुतास्तात । शिष्या गार्ग्यस्य भारत । ।
पितर्य्युपरते सर्व्वे व्रतवन्तस्तदाभवन् ॥”)

पिशुनः, त्रि, (पिश+उनन् । स च कित् ।) अप्रकाशितानुचितप्रबोधकः । परस्परभेदशीलः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः ।
“द्विजिह्वः सूचकः कर्णेजपः पिशुन इत्यपि ।
दुर्जनो दुर्व्विधो विश्वकद्रुश्च पिशुनः खलः ॥”
इति जटाधरः ॥ * ॥
“कर्णेजपः सूचकः स्यादनौचित्यप्रबोधके ।
परस्परं भेदशीले पिशुनो दुर्जनः खलः ॥”
इति शब्दरत्नावली ॥
(यथा, आर्य्यासप्तशत्याम् । ५८ ।
“अनुग्रहेण न तथा व्यथयति कटुकूजितैर्यथा पिशुनः ।
रुधिरादानादधिकं दुनोति कर्णे क्वणन् मशकः ॥”)
क्रूरः । इति मेदिनी । ने, ८२ ॥ (यथा, मनौ । ३ । १६१ ।
“भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ॥”)

पिशुना, स्त्री, (पिशुन+टाप् ।) पृक्का । इति मेदिनी । ने, ८२ ॥ पिडिंशाक इति भाषा ॥ (पृक्काशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पिष, ध औ लृ चूर्णने । इति कविकल्पद्रुमः ॥ (रुधां-परं-सकं-अनिट् ।) ध, पिनष्टि लोको गोधूमम् । औ, पेष्टा । लृ, अपिषत् । इति दुर्गादासः ॥

पिष्टं, क्ली, (पिष्यते स्मेति । पिष+क्तः ।) सीसकम् । इति रत्नमाला ॥ पिष्टकः । यथा,—
“अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनाच्च च भक्षणात् ॥” * ॥
अस्य गुणाः ।
“पिष्टं प्राणकरं रूक्षं विदाहि गुरु दुर्ज्जरम् ॥
शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः ।
वैदला गुरवो भक्ष्या विष्टम्भिन्नष्टमारुताः ॥
सगुडाः सतिलाश्चैव सक्षीरक्षारशर्कराः ।
भक्ष्या बल्याश्च हृद्याश्च गुरवो बृंहणाः परम् ॥
सस्नेहाः स्नेहसिक्ताश्च भक्ष्या गोधूमसम्भवाः ।
गुरवस्तर्पणा हृद्या बलोपचयवर्द्धनाः ॥
मर्द्दिता समिता क्षीरनारिकेलघृतादिभिः ।
अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते ॥
घृतपूरो गुरुर्वृष्यः कफकृद्रक्तमांसदः ।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः ॥”
गोधूमचूर्णं समिता ।
“समिता मधुदुग्धेन खण्डैलामरिचादिभिः ।
घृते पक्वा विपिन खण्डसंयावो बृंहणो गुरुः ॥
समिता वर्त्तिता मध्ये मधु दत्त्वा घृते धृता ।
मधुमस्तकमुद्दिष्टं तद्रुच्यं गुरु दुर्जरम् ॥”
इति राजवल्लभः ॥
पर्पटशष्कुलीफेनकवटलड्डुकानां गुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥ चूर्णीकृते, त्रि ॥ (यथा, कथासरित्सागरे । ६ । ४१ ।
“क्रत्वा नाग्नणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम् ।
चलितश्चत्वरं गत्वा छायायां नगराद्बहिः ॥”)

पिष्टकं, क्ली, (पिष्टमिव प्रतिकृतिः । इवार्थे कन् ।) तिलचूर्णम् । इति राजनिर्घण्टः ॥

पिष्टकः, पु, (पिष्टानां विकार इति । “संज्ञायाम् ।” ४ । ३ । १४७ । इति कन् ।) पिष्टानां तण्डुलादीनां विकारः । पिठा इति भाषा ॥

तत्पर्य्यायः । पूपः २ अपूपः ३ । इत्यमरः । २ । ९ । ४८ ॥ आपूपः ४ पिष्टः ५ । इति शब्द-रत्नावली ॥ अस्य गुणाः पिष्टशब्दे द्रष्टव्याः । नेत्ररोगविशेषः । इति मेदिनी । के, १२० ॥ तस्य लक्षणम् । यथा, —
"श्लेष्मा मारुतकोपेन शुक्ले पिष्टसमुन्नतम् ।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम् ॥"
इति माधवकरः ॥

(अस्य चिकित्सा यथा —
"वैदेही सितमरिचं सैन्धवं नागरं समम् ।
मातुलुङ्गरसैः पिष्टमञ्जनं पिष्टकापहम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥)

पिष्टपं, क्ली, पुं, (विशन्त्यत्र सुकृतिन इति । "विटपपिष्टपविशिपोलपाः ।" उणां । ३ । १४५ । इति कपप्रत्ययेन निपातनात् साधुः ।) भुवनम् । इत्यमररत्नकोषौ ॥ (यथा, मनौ । ४ । २३१ ।
"अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य पिष्टपम् ॥")

पिष्टपचनं, क्ली, (पच्यतेऽनेनेति । पच + आधारे ल्युट् । पिष्टस्य पचनम् ।) पिष्टपाकपात्रम् । तैलाभी इति ख्यातम् । इति सुभूतिः ॥ तत्पर्य्यायः । ऋजीषम् २ । इत्यमरः । २ । ९ । ३२ ॥ ऋचीषम् ३ । इति स्वामी ॥ पिष्टपाकभृत् ४ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते चिकित्सित-स्थाने सप्तविंशाध्याये ।
"विडङ्गतण्डुलानां द्रोणं पिष्टपचने पिष्टवदुत् स्वेदयेत् ॥")

पिष्टपाकभृत्, क्ली. (पिष्टपाकं तदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् पच्यमानपिष्टं बिभर्त्ति धारयतीति । भृ + क्विप् तुगागमश्च ।) पिष्टकपाकपात्रम । इति हेमचन्द्रः । ३ । ८६ ॥

पिष्टपूरः, पुं, (पिष्टैः पूर्य्यते इति । पूरि + कर्म्मणि अप् ।) वटकः । इति भूरिप्रयोगः । पिष्टक-विशेषः । तत्पर्य्यायः । घृतपूरः २ घृतवरः ३ घार्त्तिकः ४ । इति हेमचन्द्रः । ३ । ६४ ॥

पिष्टवर्त्तिः, पुं, (पिष्टं वर्त्तयतीति । वर्त्ति + इन् ।) सुद्गमसूरादिपिष्टम् । तत्पर्य्यायः । चमसिः २ । इति हेमचन्द्रः । ३ । ६४ ॥

पिष्टसौरभं, क्ली, (पिष्टेन पेषणेन सौरभं यस्य ।) चन्दनम् । इति हारावली । १०३ ॥

पिष्टातः, पुं, (पिष्टं अतति गच्छतीति । अत + अण् ।) पटवासचूर्णम् । इति भरतः ॥ वस्त्रादि-वासनार्थमेकीकृतगन्धद्रव्यचूर्णम् । इति सार-सुन्दरी ॥ फक्का । इति भानुदीक्षितः ॥ आवीर इति ख्यातः । इति रमानाथनीलकण्ठौ ॥ तत्पर्य्यायः । पटवासकः २ । इत्यमरः । २ । ७ । १३९ ॥ धूलिगुच्छकः ३ । इति त्रिकाण्डशेषः ॥

पिष्टिकं, क्ली, (पिष्टसुत्पत्तिकारणत्वेनास्त्यस्येति । ठन् ।) तण्डुलोद्भवतर्चारम् । इति राज-निर्घण्टः ॥

पिष्टिका, स्त्री, (पिष्टं पेषणं साधनतया अस्त्यस्या इति । पिष्ट + ठन् । ततष्टाप ।) पिष्टद्विदलः । पिठी इति हिन्दीभाषा ॥ यथा, —

"शालिः संस्थापिता तोये ततोऽपहृतकञ्चुका ।
शिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः ॥"
इति भावप्रकाशः ॥

पिष्टोडी, स्त्री, श्वेताम्लिः । इति राजनिर्घण्टः ॥

पिस, इ कि द्युतौ । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-अकं-सेट् । इदित् ।) इ, पिंस्यते । कि, पिंसयति पिंसति । द्युतिर्दीप्तिः । इति दुर्गादासः ॥

पिस, ऋ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अपिपेसत् अपिपिसत् । पिपेसतुः पिपिसतुः । इति दुर्गादासः ॥

पिस, क वधार्थे । गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पेसयति । महंन्या स्तोऽर्थमिति केचित् । वधार्थो निकेतनहिंसा-बलदानानि । इति दुर्गादासः ॥

पिहितं, त्रि, (अपि धीयते स्मेति । धा + क्तः । "दधातेर्हिः ।" ७ । ४ । ४२ । इति ह्यादेशः । अपेरल्लोपः ।) आच्छादितम् । तत्पर्य्यायः । संवीतम् २ रुद्धम् ३ आवृतम् ४ संवृतम् ५ छन्नम् ६ स्थगितम् ७ अपवारितम् ८ अन्त-र्हितम् ९ तिरोधानम् १० । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ४४ । १८ ।
"ध्वजेन पिहिताः सर्व्वा दिशो न प्रतिभान्ति मे । गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ ॥")

पी, ङ य पाने । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) ङ य, पीयते । इति दुर्गादासः ॥

पीठं, त्रि, (पठन्त्युपविशन्त्यस्मिन्निति । पिठ + "हलश्च ।" ३ । ३ । १२१ । इति घञ् । बाहु-लकादिकारस्य दीर्घः । यद्वा, पीयतेऽनेनेति । पी ङ पाने + बाहुलकात् ठक् ।) उपवेश-नाधारः । इत्यमरः । २ । ६ । १३८ ॥ पिड़ी चौकी इत्यादि भाषा । तत्पर्य्यायः । आसनम् २ उपा-सनम् ३ पीठी ४ विष्टरः ५ । इति शब्दरत्ना-वली । व्रतिनामासनम् । तत्तु कुशासनादि । तत्पर्य्यायः । विष्टरः २ । इति त्रिकाण्डशेषः ॥ वृषी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ५ । ३८ । ७ ।
"पीठं दत्त्वा साधवेऽभ्यागताय
आनीयापः परिनिर्णिज्य पादौ ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां
ततो दद्यादन्नमवेक्ष्य धीरः ॥")

अथ पीठोद्देशः ।
"धातुपाषाणकाष्ठैश्च पीठस्त्रिविध उच्यते ।
धातवश्च शिलाश्चैव काष्ठानि विविधानि च ॥
तदहं संप्रवक्ष्यामि यद्येषामुपयुज्यते ॥"

अथ मानम् ।
"हस्तद्वयस्तु दैर्घ्येण तदर्द्धं परिणाहतः ।
तदर्द्धेनोन्नतः पीठः सुख इत्यभिधीयते ॥
हस्तद्वयद्वयाधिक्यात् पञ्च पीठा भवन्ति हि ।
सुखं जयः शुभः सिद्धिः सम्पच्चेति यथाक्रमम् ॥
धनभोगसुखैश्वर्य्यवाञ्छितार्थप्रदायकः ।
समदीर्घसुखावाप्तिर्विषमे विषमापदः ॥
आयामपरिणाहाभ्यां हस्तद्वयमितो हि यः ।
अर्द्धहस्तोन्नतः पीठो जारको नाम विश्रुतः ॥
दैर्घ्योन्नतिपरीणाहैश्चतुर्हस्तमितो हि यः ।
राजपीठ इति ख्येयः सकलार्थप्रसाधकः ।
अत्राभिषेकमिच्छन्ति क्षितिपस्य पुराविदः ॥
दैर्घ्योन्नतिपरीणाहैः षड्हस्तमितो हि यः ।
राज्ञां चित्तप्रसादार्थं केलिपीठाभिधानकः ॥
दैर्घ्योन्नतिपरीणाहैरष्टहस्तमितो हि यः ।
अङ्गपीठो ह्ययं नाम्ना भवेत् पञ्चसुखप्रदः ॥
कानको राजपीठः स्यात्त्रयो वा राजतः सुखः ।
राज्ञामेवोपयोक्तव्यो जयश्चोत्तरोत्तरम् ॥
राजपीठे चिरायुः स्यात्त्वये सर्व्वां महीं जयेत् ।
जारको जारयेच्छत्रून् सुखे सुखमवाप्नुयात् ॥
राजतः कीर्त्तिजननो धनवृद्धिकरः परः ।
ताम्रः प्रतापजननो विपक्षक्षयकारकः ॥
लौहस्तूच्चाटने सार्व्वः सर्व्वकर्म्मसु युज्यते ।
त्रपुसीसकरङ्गाद्याः शत्रुक्षयफलप्रदाः ॥"
इति धातुपीठाः ।

अथ शिलापीठाः ।
"राजपीठो वज्रपाषाणैरेव नान्यस्य दृश्यते ।
पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि ॥
राहोर्मारकतः पीठः शनेर्नीलसमुद्भवः ।
गोमेदकस्तु सौम्यस्य स्फाटिकस्तु बृहस्पतेः ॥
शुक्रस्य वैदूर्य्यभवः प्रावालो मङ्गलस्य हि ॥"
इत्थं पुराणवार्त्ता ॥ * ॥
"यो यस्य हि दशानाथः पीठस्तस्य हि तन्मयः ।
स्फाटिकस्तु महीन्द्राणां सर्व्वेषामेव युज्यते ॥
अभिषेके च यात्रायामुत्सवे जयकर्म्मणि ।
अयस्कान्तोपघटितः संग्रामे पीठ इष्यते ॥
गरुडोद्गाररचिते वर्षासु नृपतिर्वसेत् ।
मुहूरत्नमयं पीठं भजते धनगर्ज्जितं ॥
सामान्यः प्रस्तरः पीठो विलासाय मही-
भुजाम् ।
एषां मानं गुणाश्चापि विज्ञेया धातुपीठवत् ॥"

अथ काष्ठपीठाः ।
तद्यथा, मानं पूर्ववदेव ।
"सम्पत्तिसुखवृद्ध्यर्थं गाम्भारीजनितो जयः ।
जारको रोगनाशाय सुखः शत्रुविनाशनः ॥
सिद्धिः सर्व्वार्थसंसिद्ध्यै विजयाय च वैरिणाम् ।
शुभः स्यादभिषेके च सम्पद्धेरिनिवारणः ॥
पानसो राजकः पीठः सुखसम्पत्तिकारकः ।
जयः स्यादभिषेके च शुभः शत्रुविनाशनः ॥
सुखो रोगविनाशाय सिद्धिः सर्व्वार्थदायिका ।
सम्पदुच्चाटनविधौ विज्ञेयं पीठलक्षणम् ॥
चान्दनस्तु सुखः पीठो अभिषेके महीभुजाम् ।
जयः स्याद्रोगनाशाय शुभः सौख्यं प्रयच्छति ॥
जारको यष्टतुष्ट्यर्थं अन्ये तु रतिदुष्कराः ।
पद्मतो निर्म्मितास्ते तु साम्राज्यफलदायकाः ॥
काशेयको यावको हि भूभुजामभिषेचने ।
पीठानगुरुकाष्ठानामर्च्य चन्दनवद्विदुः ॥
वाकुलस्तु शुभः पीठो भूभुजामभिषेचने ।

जयो रोगविनाशाय सुखसम्पत्तिकारकः ॥
सिद्धिः सिद्धिप्रदा सम्पत् संग्रामे विजयप्रदः ।
जारको जारणाय स्यादिति भोजस्य सम्मतम् ॥
एवं सुगन्धिकुसुमाः ससारा ये च पादपाः ।
वाकुलेन समः कार्य्य एवं पीठस्य निर्णयः ॥
ये शुष्ककाष्ठा वृक्षास्तु मृदवो लघवोऽथवा ।
गाम्भारीसदृशः पीठस्तेषां कार्य्यस्तथा गुणः ॥
फलिनश्च ससाराश्च रक्तसाराश्च ये नगाः ।
तेषां पानसवत् पीठस्तथैव गुणमाचरेत् ॥"* ॥

अथ निषेधः ।
"विज्ञेयो निन्दितः पीठो लौहोत्थः सर्व्वधातुजः ।
शिलोत्थः शार्करो वर्ज्यः कर्कटश्च विशेषतः ॥
काष्ठेषु च पीठेषु नासारा नातिसारिणः ॥"
तथाहि ।
"आम्रजम्बुकदम्बानामासनं वंशनाशनम् ॥"
भोजस्त्वाह ।
"गुरुः पीठो गौरवाय लघुर्लाघवकारकः ॥"
पराशरस्तु ।
"नात्युच्चो नातिनम्रश्च नागुरुर्नातिलाघवः ।
पीठः स्यात् सुखसम्पत्त्यै नातिदीर्घो न वामनः ॥
ये चान्ये पीठवद्वृक्षा हस्ताः शिल्पिविनिर्म्मिताः ।
गुणान्दोषांश्च मानञ्च तेषां पीठवदादिशेत् ॥
विचार्य्यानेन विधिना यः शुद्धं पीठमाचरेत् ।
तस्य लक्ष्मीरियं वेश्म कदाचिन्न विमुञ्चति ॥
अज्ञानादथवा मोहाद्योऽन्यथा पीठमाचरेत् ।
एतानि तस्य नश्यन्ति लक्ष्मीरायुर्बलं कुलम् ॥"
इति युक्तिकल्पतरौ पीठोद्देशः ॥ * ॥

सत्ययुगे दक्षकृतौ शिवनिन्दां श्रुत्वा प्राणां-स्त्यक्तवत्याः सत्याः शरीरं शिरसि धृत्वा भ्रमति शिवे विष्णुना चक्रेण छिन्नास्तस्या अवयवा यत्र यत्र पतितास्त एव देशा एकपञ्चाशन्महापीठा अभवन् ॥ इति पौराणिकी वार्त्ता ॥ * ॥
तेषां निरूपणं यथा,—

ईश्वर उवाच ।
"मातः परापरे ! देवि ! सर्व्वज्ञानमयीश्वरि ! ।
कथ्यतां मे सर्व्वपीठं शक्तिभैरवदेवता ॥

देव्युवाच ।
शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल ! ।
याभिर्विना न सिध्यन्ति जपसाधनसत्क्रियाः ॥
पञ्चाशदेकपीठानि एवं भैरवदेवताः ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
ममान्यवपुषो देव ! हिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ॥
कोट्टरी सा महामाया त्रिगुणा या दिगम्बरी ॥१
शर्करारे त्रिनेत्रं मे देवी महिषमर्द्दिनी ।
क्रोधीशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ २ ॥
सुगन्धायां नासिका मे देवस्त्र्यम्बकभैरवः ।
सुन्दरी सा महादेवी सुनन्दा तत्र देवता ॥३॥
काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥ ४ ॥
ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदानाम्नी ५ स्तनं जालन्धरे मम ।
भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी ॥ ६ ॥
हार्द्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः ।
देवता जयदुर्गाख्या ७ नेपाले जानुनी मम ।
कपाली भैरवः श्रीमान् महामाया च देवता ॥८॥
मानसे दक्षहस्तो मे देवी दाक्षायणी हर ।
अमरो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ९ ॥
उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥१०॥
गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः ।
तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः ॥११॥
बहुलायां वामबाहुर्बहुलाख्या च देवता ।
भीरुको भैरवो देवः सर्व्वसिद्धिप्रदायकः ॥१२॥
उज्जयिन्यां कूर्परञ्च माङ्गल्यः कपिलाम्बरः ।
भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका ॥१३॥
चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
व्यक्तरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥ १४ ॥
त्रिपुरायां दक्षपादो देवता त्रिपुरा मता ।
भैरवस्त्रिपुरेशश्च सर्व्वाभीष्टफलप्रदः ॥ १५ ॥
त्रिस्रोतायां वामपादो भ्रामरी भैरवोऽम्बरः ॥१६॥
योनिपीठं कामगिरौ कामाख्या तत्र देवता ।
यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी ।
यत्रास्ते माधवः साक्षादुमानन्दोऽथ भैरवः ॥
सर्व्वदा विहरेद्देवी तत्र मुक्तिर्न संशयः ।
तत्र श्रीभैरवी देवी तत्र च क्षेत्रदेवता ॥
प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुराम्बिका ।
वगला कमला तत्र भुवनेशी सुधूमिनी ॥
एतानि वरपीठानि शंसन्ति वरभैरव ! ।
एवं ता देवताः सर्व्वा एवन्ते दश भैरवाः ॥
सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे ।
गौरीशिखरमारुह्य पुनर्जन्म न विद्यते ॥१७॥
करतोयां समासाद्य यावत् शिखरवासिनीम् ।
शतयोजनविस्तीर्णं त्रिकोणं सर्व्वसिद्धिदम् ॥
देवा मरणमिच्छन्ति किं पुनर्म्मानवादयः ।
भूतधात्री महामाया भैरवः क्षीरखण्डकः ॥
युगाद्यायां महादेव ! दक्षाङ्गुष्ठं पदो मम ॥१८॥
नकुलीशः कालिपीठे दक्षपादाङ्गुलीषु च ।
सर्व्वसिद्धिकरी देवी कालिका तत्र देवता ॥१९॥
अङ्गुलीषु च हस्तस्य प्रयागे ललिता भवः ॥२०॥
जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः ॥२१॥
भुवनेशी सिद्धिरूपा किरीटस्था किरीटतः ।
देवता विमला नाम्नी संवर्त्तो भैरवस्तथा ॥२२॥
वाराणस्यां विशालाक्षी देवता कालभैरवः ।
मणिकर्णीति विख्याता कुण्डलञ्च मम श्रुतेः ॥२३॥
कन्याश्रमे च पृष्ठं मे निमिषो भैरवस्तथा ।
सर्व्वाणी देवता तत्र २४ कुरुक्षेत्रे च गुल्फतः ॥
स्थाणुर्नाम्ना च सावित्री देवता २५ मणि-वेदके ।
मणिबन्धे च गायत्री सर्व्वानन्दस्तु भैरवः ॥२६॥
श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता ।
भैरवः शम्बरानन्दो देशे देशे व्यवस्थितः ॥२७॥
काञ्चीदेशे च कङ्कालो भैरवो रुरुनामकः ।
देवता देवगर्भाख्या २८ नितम्बः कालमाधवे ॥
भैरवश्चासिताङ्गश्च देवी काली च सुसिद्धिदा ।
दृष्ट्वा दृष्ट्वा महादेव ! मन्त्रसिद्धिमवाप्नुयात् ॥
कुलवारे भूततिथौ निशार्द्धे यस्तु साधकः ।
नत्वा प्रदक्षिणीकृत्य मन्त्रसिद्धिमवाप्नुयात् ॥२९॥
शोणाख्या भद्रसेनस्तु नर्म्मदाख्ये नितम्बकः ॥३०॥
रामगिरौ स्तनान्यञ्च शिवानी चण्डभैरवः ॥३१॥
वृन्दावने केशजाले उमानाम्नी च देवता ।
भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥३२॥
संहाराख्य ऊर्द्ध्वदन्ते देवी नारायणी शुचौ ।
अधोदन्ते महारुद्रो वाराही पञ्चसागरे ॥३३॥
करतोयातटे तल्पं वामे वामनभैरवः ।
अपर्णा देवता तत्र ब्रह्मरूपा करोद्भवा ॥३४॥
श्रीपर्व्वते दक्षतल्पं तत्र श्रीसुन्दरी परा ।
सर्व्वसिद्धिकरी सर्व्वा सुन्दरानन्दभैरवः ॥ ३५ ॥
कपालिनी भीमरूपा वामगुल्फो विभाषके ॥३६॥
उदरञ्च प्रभासे मे चन्द्रभागा यशस्विनी ।
वक्रतुण्डो भैरव-३७ श्चोर्द्ध्वोष्ठो भैरवपर्व्वते ।
अवन्ती च महादेवी लम्बकर्णस्तु भैरवः ॥३८॥
चिबुके भ्रामरी देवी विकृताक्षी जले स्थले ॥३९॥
गण्डो गोदावरीतीरे विश्वेशी विश्वमातृका ।
दण्डपाणिर्भैरवस्तु वामगण्डे तु राकिणी ॥
अमायी भैरवो वत्स ! सर्व्वशैलात्मकोपरि ॥४०॥
रत्नावल्यां दक्षस्कन्धः कुमारी भैरवः शिवः ॥४१॥
मिथिलायां उमा देवी वामस्कन्धो महोदरः ॥४२॥
नलाहाट्यां नलापातो योगेशो भैरवस्तथा ।
तत्र सा कालिका देवी सर्व्वसिद्धिप्रदायिका ॥४३॥
कर्णाटे चैव कर्णं मे अभीरुर्नाम भैरवः ।
देवता जयदुर्गाख्या नानाभोगप्रदायिनी ॥ ४४ ॥
वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः ।
नदी पापहरा तत्र देवी महिषमर्द्दिनी ॥ ४५ ॥
यशोरे पाणिपद्मञ्च देवता यशोरेश्वरी ।
चण्डश्च भैरवो यत्र तत्र सिद्धिमवाप्नुयात् ॥४६॥
अट्टहासे चोष्ठपातो देवी सा फुल्लरा स्मृता ।
विश्वेशो भैरवस्तत्र सर्व्वाभीष्टप्रदायकः ॥ ४७ ॥
हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः ।
नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः ॥४८॥
लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः ।
इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा ॥४९॥
विराटदेशमध्ये तु पादाङ्गुलिनिपातनम् ।
भैरवश्चामृताख्यश्च देवी तत्राम्बिका स्मृता ॥५०॥
मागधे दक्षजङ्घा मे व्योमकेशस्तु भैरवः ।
सर्व्वानन्दकरी देवी सर्व्वकामफलप्रदा ॥ ५१ ॥
एतास्ते कथिताः पुत्र ! पीठनाथाधिदेवताः ॥
येनाधीशं विना देवं पूजयेत् पीठदेवताम् ।
भैरवैर्ह्रियते सर्व्वं जपपूजादिसाधनम् ॥
अज्ञात्वा भैरवं पीठं पीठशक्तिञ्च शङ्कर ! ।
शाणनाथ ! न सिध्येत कल्पकोटिजपादिभिः ॥
न देयं परशिष्येभ्यो निन्दकाय दुरात्मने ।
शठाय वञ्चकायेदं दत्त्वा मृत्युमवाप्नुयात् ॥
दद्यात् शान्ताय शिष्याय नैष्ठिकाय शुचौ प्रिये
साधकाय कुलीनाय मन्त्री मन्त्रार्थसिद्धये ॥")

इति तन्त्रचूडामणौ शिवपार्व्वतीसंवादे एक-पञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः ॥ * ॥ (देवीभागवतोक्ताष्टाधिकशतपीठनामानि यथा तत्रैव । ७ । ३० । ४४—९५ ।

"अपश्यत्तां सतीं वह्नौ दह्यमानान्तु चित्कलाम् ।
स्कन्धेऽप्यारोपयामास हा । सतीति वदन् मुहुः ॥
बभ्राम भ्रान्तचित्तः सन्नानादेशेषु शङ्करः ।
तदा ब्रह्मादयो देवाश्चिन्तामापुरनुत्तमाम् ॥
विष्णुस्तु त्वरया तत्र धनुरुद्यम्य मार्गणैः ।
चिच्छेदावयवान् सत्यास्तत्तत्स्थानेषु तेऽपतन् ॥
तत्तत् स्थानेषु तत्रासीन्नानामूर्त्तिधरो हरः ।
उवाच च ततो देवान् स्थानेष्वेतेषु ये शिवाम् ।
भजन्ति परया भक्त्या तेषां किञ्चिन्न दुर्लभम् ।
नित्यं सन्निहिता यत्र निजाङ्गेषु पराम्बिका ॥
स्थानेष्वेतेषु ये मर्त्याः पुरश्चरणकर्म्मिणः ।
तेषां मन्त्राः प्रसिध्यन्ति मायाबीजं विशेषतः ॥
इत्युक्त्वा शङ्करस्तेषु स्थानेषु विरहातुरः ।
कालं निन्ये नृपश्रेष्ठ । जपध्यानसमाधिभिः ॥

जनमेजय उवाच ।

कानि स्थानानि तानि स्युः सिद्धपीठानि चानघ । ।
कतिसंख्यानि नामानि कानि तेषाञ्च मे वद ॥
तत्र स्थितानां देवीनां नामानि च कृपाकर । ।
कृतार्थोऽहं भवे येन तद्वदाशु महामुने । ॥

व्यास उवाच ।

शृणु राजन् । प्रवक्ष्यामि देवीपीठानि साम्प्रतम् ।
येषां श्रवणमात्रेण पापहीनो भवेन्नरः ॥
येषु येषु च पीठेषु उपास्येयं सिद्धिकाङ्क्षिभिः ।
भूतिकामैरभिध्येया तानि वक्ष्यामि तत्त्वतः ॥
वाराणस्यां विशालाक्षी गौरीमुखनिवासिनी ।
क्षेत्रे वै नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी ॥
प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने ।
मानसे कुमुदा प्रोक्ता दक्षिणे चोत्तरे तथा ॥
विश्वकामा भगवती विश्वकामप्रपूरिणी ।
गोमन्ते गोमती देवी मन्दरे कामचारिणी ॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥
एकाम्रपीठे संप्रोक्ता देवी सा कीर्त्तिमत्यपि ।
विश्वे विश्वेश्वरी प्राहुः पुरुहूताञ्च पुष्करे ॥
केदारपीठे संप्रोक्ता देवी सन्मार्गदायिनी ।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥
स्थानेश्वरी भवानी तु बिल्वके बिल्वपत्रिका ।
श्रीशैले माधवी प्रोक्ता भद्रा भद्रेश्वरे तथा ॥
वराहशैले तु जया कमला कमलालये ।
रुद्राणी रुद्रकोट्यान्तु काली कालञ्जरे तथा ॥
शालग्रामे महादेवी शिवलिङ्गे जलप्रिया ।
महालिङ्गे तु कपिला माकोटे मुकुटेश्वरी ॥
मायापुर्य्यां कुमारी स्यात्सन्ताने ललिताम्बिका ।
गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ।
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने ॥
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ।
विपुले विपुला देवी कल्याणी मलयाचले ॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥
कोटवी कोटतीर्थे तु सुगन्धा माधवे वने ।
गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥
शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥
देवकी मथुरायान्तु पाताले परमेश्वरी ।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥
करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥
अभयेत्युष्णतीर्थेषु नितम्बा विन्ध्यपर्व्वते ।
माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरीपुरे ॥
छागलण्डे प्रचण्डा तु चण्डिकामरकण्टके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥
देवमाता सरस्वत्यां पारावारा तटे स्मृता ।
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ॥
सिंहिका कृतशौचे तु कार्त्तिके त्वतिशाङ्करी ।
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते ॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमादेवी हिमाद्रौ तु तुष्टिर्विश्वेश्वरी तथा ॥
कपालमोचने शुद्धिर्माता कायावरोहणे ।
शङ्खोद्धारे धरा नाम धृतिः पिण्डारके तथा ॥
कला तु चन्द्रभागायामच्छोदे शिवधारिणी ।
वेणायाममृता नाम बदय्यामुर्व्वशी तथा ॥
औषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ।
गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ।
सूर्य्यबिम्बे प्रभा नाम मातॄणां वैष्णवी मता ॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम् ॥
इमान्यष्टशतानि स्युः पीठानि जनमेजय । ।
तत्सङ्ख्याकास्तदीशान्यो देव्यश्च परिकीर्त्तिताः ॥
सतीदेवयङ्गभूतानि पीठानि कथितानि च ।
अन्यान्यपि प्रसङ्गेन यानि मुख्यानि भूतले ॥
यः स्मरेच्छृणुयाद्वापि नामाष्टशतमुत्तमम् ।
सर्व्वपापविनिर्म्मुक्तो देवीलोकं परं व्रजेत् ॥
एतेषु सर्व्वपीठेषु गच्छेद् यात्राविधानतः ।
सन्तर्पयेच्च पित्रादीन् श्राद्धादीनि विधाय च ॥
कुर्य्याच्च महतीं पूजां भगवत्या विधानतः ।
क्षमापयेज्जगद्धात्रीं जगदम्बां मुहुर्मुहुः ॥
कृतकृत्यं स्वमात्मानं जानीयाज्जनमेजय । ।
भक्ष्यभोज्यादिभिः सर्व्वान् ब्राह्मणान् भोजये-
त्ततः ॥
सुवासिनीः कुमारीश्च वटुकादींस्तथा नृप । ।
तस्मिन् क्षेत्रे स्थिता ये तु चाण्डालाद्या अपि
प्रभो । ॥
देवीरूपाः स्मृताः सर्व्वे पूजनीयास्ततो हि ते ।
प्रतिग्रहादिकं सर्व्वं तेषु क्षेत्रेषु वर्ज्जयेत् ॥
यथाशक्तिपुरश्चर्य्यां कुर्य्यान्मन्त्रस्य सत्तम ।
मायाबीजेन देवेशीं तत्तत्पीठाधिवासिनीम् ॥
पूजयेदनिशं राजन् । पुरश्चरणकृत्भवेत् ।
वित्तशाठ्यं न कुर्व्वीत देवीभक्तिपरो नरः ॥
य एव कुरुते यात्रां श्रीदेव्याः प्रीतमानसः ।
सहस्रकल्पपर्य्यन्तं ब्रह्मलोके महत्तरे ॥
वसन्ति पितरस्तस्य सोऽपि देवीपुरे तथा ।
अन्ते लब्धा परं ज्ञानं भवेन्मुक्तो भवाम्बुधेः ॥")

अन्यानि पीठादीनि कालीपुराणे १८।५०।६१ अध्यायेषु द्रष्टव्यानि ॥ * ॥ पीठन्यासस्तु न्यास-शब्दे द्रष्टव्यः । पीठदेवतापूजनं न्यासक्रमेणैव ॥

पीठकेलिः, पु, (पीठे आसने केलिर्न्नर्म्मादिरस्य ।) पीठमर्द्दनायकः । यथा,—

"शिड्गो यलीकः षट्प्रज्ञः कामकेलिर्विदूषकः ।
पीठकेलिः पीठमर्द्दो भविलश्छिद्दुरो विटः ॥"
इति त्रिकाण्डशेषः ॥

पीठमर्द्दः, पु, (मर्द्दयतीति । मर्द्द+अच् । पिठस्थासनस्य मर्द्दः ।) नायकविशेषः । तस्य लक्षणम् । कुपितस्त्रीप्रसादकः । उदाहरणं यथा,—

"कोऽयं कोपविधिः प्रयच्छ करुणागर्भं वचो
जायतां
पीयषद्रवदीर्घिकापरिमलैरामोदिता मेदिनी ।
आस्तां वा स्पृहयालु लोचनमिदं चावर्त्तयन्तो-
सुहु-
र्यस्मै कुप्यसि तस्य सुन्दरि । तपोवृन्दानि
वन्दामहे ॥
नर्म्मसचिवोऽप्ययमेव ।" इति रसमञ्जरी ॥ (अयं हि नायकस्य उत्तमसहायानामन्यतमः । इति साहित्यदर्पणम् ।३।५३ ॥ नायकप्रियः । अति-धृष्टः । यथा, मेदिनी । दे, ५० ।

"पीठमर्द्दोऽति धृष्टे स्यात् नायकस्य प्रियेऽपि च ॥"
यथा, महाभारते । ४ । २० । ३३ ।
"प्रेक्षते स्म विराटस्तु कङ्कश्च बहवो जनाः ।
रथिनः पीठमर्द्दाश्च हस्त्यारोहाश्च नैगमाः ॥")

पीठसर्पी, [न्] त्रि, (पीठेन सर्पतीति । सृप्+णिनि ।) खञ्जः । तत्पर्य्यायः । पांशुरः २ । इति हारावली ॥

पीठी, स्त्री, (पीठ+स्वल्पार्थे ङीष् ।) आसनम् । इति शब्दरत्नावली ॥ पीँढी इति भाषा ॥

पीड, क क बाधे । गाहे । इति कविकल्पद्रुमः ॥ (चुरां परं सकं-सेट् ।) बाधा विहतिः । गाहो विलोडनम् । क, अपीपिडत अपिपीडत् । क, पीडयति शत्रुं लोकः । पीडयति स्तनं कामी । इति दुर्गादासः ॥

पीडनं, क्ली, (पीड बाधे अवगाहे वा+भावे ल्युट् ।) शस्यादिसम्पन्नदेशस्य परचक्रेण पीड-नम् । शत्रुकृतगाढप्रहारः । इति केचित् । पराक्रमणम् । इति केचित । इति भरतः ॥ तत् पर्य्यायः । अवमर्द्दः २ । इत्यमरः ।२।८।१०९ ॥ (यथा, देवीभागवते । ३ । १७ । १३ ।
"पीडनञ्चैव पाञ्चाल्या स्तथा द्यूतं पराजयः ॥")

दुःखनम् । यथा,—
"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् ॥"
इति दायभागधृतमनुवचनम् ॥

मर्द्दनम् । टिपन चापन इत्यादि भाषा । यथा,—
"गर्भोऽभिघातविषमाशनपीडनाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन ॥"
इति माधवकरः ॥

पीडा, स्त्री, (पीडनमिति । पीड + "षिद्भिदा-दिभ्योऽङ् ।" ३ । ३ । १०४ । इति अङ् । ततष्टाप् ।) पीडनम् । तत्पर्य्यायः । बाधा २ व्यथा ३ दुःखम् ४ अमानस्यम् ५ प्रसूतिजम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९ । इत्यमरः । १ । ९ । ३ ॥ आबाधा १० । इति हलायुधः ॥ आमानस्यम् ११ । इति रायमुकुटः ॥ (शूलम् १२ रुग् १३ वेदना १४ आर्त्तिः १५ तोदः १६ रुजा १७ । इति वैद्यकरत्नमाला ॥ यथा, मनुः । ७ । १९९ ।
"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः ।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्र-येत् ॥")

एषां पीडादीनां मध्ये विशेषगामिनो ये दुःखकष्टकृच्छ्राभीलास्ते विशिष्टाः । सा आध्यात्मिकाधिभौतिकाधिदैविकतापत्रयभेदेन त्रिविधा । आध्यात्मिकोऽपि द्विविधः । यथा,—
"आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः ॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःश्वयथुश्वासच्छर्द्द्यादिभिरनेकधा ॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥"
अङ्गामयो वातजोदरादिः । १ ॥ * ॥
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्य्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ॥२॥
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥
गर्भजन्मजराज्ञानमृत्युनारकजं तथा ।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ! ॥"
इति विष्णुपुराणे । ६ । ५ । १—९ ॥ * ॥

कृपा । शिरोमाला । स्वरङ्कुः । इति मेदिनी । डे, २० ॥

पीडितं, त्रि, (पीड + क्तः । यद्वा, पीडास्य जातेति तारकादित्वात् इतच् ।) क्लेशं कर-वम् । बन्धितम् । बाधितम् । इति मेदिनी । ते, १३४ । मर्द्दितम् । इति हेमचन्द्रः ॥ इतप्रत्य-

यान्तः पीडापर्य्यायोऽप्यत्र ॥ (मत्स्यभेदः । यथा, तन्त्रसारे । [ङ्याः ॥)
"बहुवार्णाधिका मत्स्या दक्षकाः पीडिता-

पीतं, क्ली, (पा + भावे क्तः ।) पानम् । इति मेदिनी । ते, ३४ ॥ (पीतो वर्णोऽस्त्यस्येति । अच् । पीताभत्वादस्य तथात्वम् ।) हरितालम् । इति राजनिर्घण्टः ॥ (हरिचन्दनम् । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"पीतसारं सुशीतञ्च तत्पीतं हरिचन्दनम् ॥")

पीतः, पुं, (पिबति वर्णान्तरमिति । पा + कर्त्तरि औणादिकः क्तः ।) वर्णविशेषः । हलुदिया इति भाषा । तत्पर्य्यायः । गौरः २ हरिद्राभः ३ । इत्यमरः । १ । ५ । १४ ॥ कुसुम्भः । अङ्कोठः । शाखोटः । पुष्परागः । इति राजनिर्घण्टः ॥ पीतवस्तूनि यथा,—
"पीतानि ब्रह्म-१जीवे-२ज्ञ-३गरुड़-४न्वरहम्-५ जटाः ६ ।
गौरी-७द्वापर-८गोमूत्र-९मधु-१०वीररसा-११ रजः १२ ।
हरिद्रा१३रोचना१४रीति-१५गन्धके१६ द्वीप-१७ चम्पके १८ ।
किञ्जल्क-१९वल्कले२०शालि-२१हरिताल-२२ मनःशिलाः २३ ।
कर्णिकारम्२४ चक्रवाक-२५ वानरौ२६ शारिकासुखम् २७ ।
कौशेयांशुक-२८मकूक-२९सराग-३०कनका-द्यः३१ ॥" * ॥

पीतश्वेतवाचकानि यथा,—
"पीतश्वेतौ गौर-१द्विजराज-२कपर्द-३शम्भु-४ हरि-५तार्क्ष्याः ६ ।
हैमस्तोमा-७ष्टापद-८ महारजत-९चन्द्र-१० कलधौताः११ ॥"
अस्यार्थः । गौरः श्वेतपीतयोः । द्विजराजो गरुड़चन्द्रयोः । कपर्दः शम्भुजटाजूटकपर्द्दयोः । शम्भुर्ब्रह्मत्रिलोचनयोः । हरिः पिङ्गलसिंहयोः । तार्क्ष्यो गरुड़ः पक्षे उच्चैःश्रवाः । हैमस्तोमः हैम्योऽयं हैमः पक्षे हिमस्तोमम् । अष्टापदं सुवर्णशरभयोः । महारजतं सुवर्णरूप्ययोः । चन्द्रः स्वर्णशशाङ्कयोः । कलधौतं हेमरूप्ययोः ।
"सुशोभितारकूटश्रीः स्वर्णस्तोमसमद्युतिः ।
इन्दुगोपजवत्कान्तिर्गाङ्गेयच्छविपेशलः ॥"
अस्यार्थः । तारकूटो रूप्यवत्सः पक्षे आर-कूटो रीतिः । सुशोभनमर्थः कनकञ्च । गोपति-तार्क्ष्यकान्तिः रविगरुड़च्छविः । पक्षे गोपति-रिन्द्रः तस्य तार्क्ष्यसुरङ्गः । वामदेवगिरिर्मनोश्च-मेरुः कैलासश्च ॥*॥ पीतश्यामवाचकानि यथा,
"पीतश्यामौ ह्यश्याम्बर-१ मधुजित्-२ भ्रान्त-चेताः ३ ।
विद्युत्कान्तः ४ भ्रान्तरेचि-५ हरि-६ स्वर्ण-च्छायाः ७ ॥"
अस्यार्थः । ह्यश्याम्बरं विष्णुवस्त्रे हर्य्याकाशयोः । मधुजित् मधुसूदनविष्णोः । भ्रान्तचेता हर्य्य-तमस्तुल्ययोः । विद्युत्कान्तः मेघतड़िन्मनो-ज्ञयोः । भ्रान्तरेचि सूर्य्यान्धकारतुल्ययोः । हरिः कपिलश्यामयोः । स्वर्णच्छायः सुवर्णसुन्दर-वसुमतुल्यशोभयोः । इति कविकल्पलता ॥ (पर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ६३ ।
"प्रथमः सूर्य्यसङ्काशः सुमना नाम पर्व्वतः ।
पीतस्तु मध्यमस्तत्र शातकौम्भमयो गिरिः ॥")

पीतं, त्रि, (पीतवर्णोऽस्त्यस्येति । अच् ।) पीत-वर्णयुक्तम् । इति मेदिनी । ते, ३४ । (यथा, महाभारते । ४ । ४१ । २० ।
"ये त्विमे निशिताः पीताः पृथवो दीर्घवाससः ।
हैमपुङ्खाः शिलाधौता राज्ञ एते महाशराः ॥"
पा + कर्म्मणि क्तः ।) कृतपानम् । यथा,—
"हालाहलमपि पीतं बहुशो भिक्षापि भक्षिता भवता ।
अनयोरवगतरसयोः कियदन्तरं वद योगिन् ॥"
इत्युद्भटः ॥
(पीतं पानमस्यास्तीति । अच् । यद्वा, पीतं नीरं क्षीरं वा येन इत्युत्तरपदलोपः । पीतदुग्धादि-कम् । यथा, रघौ । २ । १ ।
"अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥")

पीतकं, क्ली, (पीत + "यावादिभ्यः कन् ।" ५ । ४ । २९ । इति स्वार्थे कन् ।) हरितालम् । इत्यमरः ॥ (पीतेन पीतवर्णेन कायतीति । कै + कः ।) कुङ्कुमम् । इति जटाधरः ॥ (अस्य पर्य्यायो लक्षणञ्च यथा,—
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धितम् ।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥
वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरन्ततम् ।
केतकीगन्धयुक्तन्तन्मध्यमं सूक्ष्मकेशरम् ॥
कुङ्कुमं पारसीकेयन्मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णन्तदधमं स्थूलकेशरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अगुरु । पद्मकाष्ठम् । रीतिः । माक्षिकम् । इति राजनिर्घण्टः ॥ गन्धोत्तमः । पीतशालः । इति रत्नमाला ॥ शोणाकप्रभेदः । हरिद्रुः । किङ्कि-रातद्रुमः । इति राजनिर्घण्टः ॥ (पीतेन पीतवर्णेन रक्तमिति । पीत + "लाक्षारोचना-ट्ठक् ।" ४ । २ । २ । इत्यस्य "पीतात् कन् ।" इति वार्त्तिकोक्त्या कन् । पीतवर्णरञ्जिते पीत-वर्णविशिष्टे च त्रि ॥ पीत + स्वार्थे कन् । पीतवर्णे, पुं । यथा, महाभारते । १२ । १८८ । ५ ।
"ब्राह्मणानां सितो वर्णः क्षत्रियाणान्तु लोहितः ।
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ॥")

पीतकदली, स्त्री, (पीता कदलीति विशेषणकर्म्म-धारयः ।) स्वर्णकदली । इति राजनिर्घण्टः ॥

पीतकद्रुमः, पुं, (पीतको द्रुम इति नित्यकर्म्मधारयः ।) हरिद्रुवृक्षः । इति राजनिर्घण्टः ॥ (हरिद्रुशब्देऽस्य विवरणं विज्ञेयम् ॥)

पीतकन्दं, क्ली, (पीतः कन्दोऽस्य ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतकरवीरकः, पु, (पीतः करवीर इति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) पीतवर्णकरवीरपुष्पवृक्षः । तत्पर्य्यायः । पीतप्रसवः २ सुगन्धिकुसुमः ३ । अस्य गुणाः । सामान्यकरवीरगुणतुल्याः । इति राजनिर्घण्टः ॥

पीतकावेरं, क्ली, (कुत्सितं वेरं शरीरं कावेरम् । पीतं कावेरं कुत्सितशरीरमपि यस्मात् ।) कुङ्कुमम् । पित्तलम् । इति मेदिनी । रे, ३०५ ॥ (विवृतिरस्य कुङ्कुमपित्तलशब्दयोर्ज्ञेया ॥)

पीतकाष्ठं, क्ली, (पीतं काष्ठमिति नित्यकर्म्मधारयः ।) पीतचन्दनम् । इति राजनिर्घण्टः ॥

पीतकीला, स्त्री, (पीता कीला कीलतुल्या लतेति नित्यकर्म्मधारयः ।) आवर्त्तकीलता । इति राजनिर्घण्टः ॥

पीतघोषा, स्त्री, (पीतानि पुष्पाणि सन्त्यस्या इति पीता पीतपुष्पेत्यर्थः । ततः पीता घोषेति कर्म्मधारयः ।) पीतपुष्पघोषालता । इति रत्नमाला ॥ अस्याः पर्य्यायः घोषकशब्दे द्रष्टव्यः ॥

पीतचन्दनं, क्ली, (पीतं चन्दनमिति नित्यकर्म्मधारयः ।) पीतवर्णचन्दनम् । तत्तु द्राविडदेशे प्रसिद्धम् । कलम्बक इति ख्यातम् । तत्पर्य्यायः । पीतगन्धम् २ कालेयम् ३ पीतकम् ४ माधवप्रियम् ५ कालेयकम् ६ पीतकाष्ठम् ७ वर्व्वरम् ८ । इति राजनिर्घण्टः ॥ कालीयकम् ९ कालीयम् १० पीताभम् ११ हरिचन्दनम् १२ हरिप्रियम् १३ कालसारम् १४ कालानुसार्य्यकम् १५ । अस्य गुणाः । रक्तचन्दनगुणतुल्यगुणत्वम् । व्यङ्गनाशित्वञ्च । इति भावप्रकाशः ॥ शीतलत्वम् । तिक्तत्वम् । कुष्ठश्लेष्मकण्डुविचर्च्चिकादद्रुक्रिमिनाशित्वम् । कान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥

पीतचम्पकः, पु, (पीतं चम्पकमिव शिखा यस्य ।) प्रदीपः । इति जटाधरः ॥ (पीतं चम्पकं तत्पुष्पमस्य ।) पीतवर्णचम्पकपुष्पवृक्षश्च ॥

पीततण्डुलः, पु, (पीतस्तण्डुलोऽस्य ।) कङ्गुनी । इति राजनिर्घण्टः ॥

पीततण्डुला, स्त्री, (पीतस्तण्डुलोऽस्याः ।) चविकावृक्षः । इति राजनिर्घण्टः ॥

पीततुण्डः, पुं, (पीतं तुण्डं यस्य ।) कारण्डवपक्षी । तत्पर्य्यायः । चक्षुस्रवः २ सुगृहः ३ । इति त्रिकाण्डशेषः ॥

पीतता, स्त्री, (पीत+तल्+टाप् ।) हरिद्राभता । पीतत्वम् । पीतशब्दात् भावार्थे तप्रत्ययनिष्पन्ना । इति व्याकरणम् ॥ (यथा, महाभारते । ३ । १४९ । २६ ।
"द्वापरेऽपि युगे धर्म्मो द्विभागोनः प्रवर्त्तते ।
विष्णुर्वै पीततां याति चतुर्द्धा वेद एव च ॥"

पीततैला, स्त्री, (पीतं तैलमस्याः ।) ज्योतिष्मती लता । इति जटाधरः ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥

पीतदारु, क्ली, (पीतञ्च तत् दारु चेति ।) देवदारु । इत्यमरः । २।४।५३ ॥ (पर्य्यायोऽस्य यथा,—
"सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठम्पीतदारु देवदारु च दारु च ॥"
इति वैद्यकरत्नमालायाम् ॥)
सरलः । इति रत्नमाला ॥ हरिद्रुः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ॥
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतदुग्धा, स्त्री, पीतं दुग्धं यस्या यया वा । धेनुष्या । दुग्धबन्धके संस्थिता गौः । इति हेमचन्द्रः ॥ (पीतं पीतवर्णं दुग्धं क्षीरमस्याः । कटुपर्णी । चोक इति भाषा ॥ यथास्याः पर्य्यायः ।
"कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतद्रुः, पुं, (पीतो द्रुरिति नित्यकर्म्मधारयः ।) सरलवृक्षः । दारुहरिद्रा । इत्यमरः । २।४।६०, २।४।१०१ ॥ (यथास्य पर्य्यायः ।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतनं, क्ली, (पीतं करोतीति । तत्करोतीति णिच् । ततो ल्युः । यद्वा, पीतं पीतवर्णं नयतीति । नी+डः ।) कुङ्कुमम् । (यथा, श्रीकण्ठचरिते । ६ । ३४ ।
"अपहृत्य पीतनमशेष-
ममरसुदृशां शरीरतः ।
भीत इव गहननाभिगुहां
प्रपलाय्य तूर्णमविशत् पयोभरः ॥")
हरितालम् । पीतदारु । इत्यमरमेदिन्यौ ॥

पीतनः, पुं, (पीतं करोतीति । णिच् । ततो ल्युः ।) प्लक्षः । इति राजनिर्घण्टः ॥ आम्रातकः । इति मेदिनी । ने, ६२ ॥ (नन्दीवृक्षः । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"नन्दीवृक्षस्ताम्रपाकी फलपाकी च पीतनः ।
गन्धभाण्डो गन्धमुण्डो द्वितीयः क्षिप्रपाक्यसौ ॥")

पीतनकः, पु, (पीतन एव । पीतन+स्वार्थे कन् ।) आम्रातकः । इति राजनिर्घण्टः ॥

पीतपर्णी, स्त्री, (पीतानि पीतवर्णानि पर्णानि यस्याः । ङीष् ।) वृश्चिकाली । इति शब्दचन्द्रिका ॥ विछाटि इति भाषा ॥

पीतपादा, स्त्री, (पीतौ पादौ यस्याः ।) शारिकापक्षी । इति हेमचन्द्रः ॥ पीतचरणयुक्ते, त्रि ॥

पीतपुष्पं, क्ली, (पीतानि पुष्पाणि यस्य ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥ (कुष्माण्डम् । तत्पर्य्यायो यथा भावप्रकाशे ।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं बृहत्फलम् ॥")
हरिद्राभकुसुमञ्च ॥

पीतपुष्पः, पुं, (पीतानि पीतवर्णानि पुष्पाणि यस्य ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ चम्पकवृक्षः । इति राजनिर्घण्टः ॥ पीतझिण्टी । पिण्डीतकभेदः । इति रत्नमाला ॥ (इङ्गुदीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"पीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः ॥"
राजकोशातकी । तत्पर्य्यायो यथा, भावप्रकाशे ।
"धामार्गवः पीतपुष्पो जालिनी कृतवेधना ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥")

पीतपुष्पा, स्त्री, (पीतं पुष्पं यस्याः ।) इन्द्रवारुणी । भिण्डरिदाक्षुपः । आढकी । इति राजनिर्घण्टः ॥ (महाबला । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"ज्यष्ठप्रोक्ता त्वतिबला पीतपुष्पा महाबला ॥")

पीतपुष्पी, स्त्री, (पीतं पुष्पं यस्याः । जातित्वात् ङीष् ।) शणपुष्पी । सहदेवी । महाकोशातकी । त्रपुषी । इति राजनिर्घण्टः ॥

पीतफलः, पु, (पीतानि फलानि यस्य ।) शाखोटवृक्षः । इति त्रिकाण्डशेषः ॥ कर्म्मारवृक्षः । इति राजनिर्घण्टः ॥

पीतफलकः, पुं, (पीतफल एव । स्वार्थे कन् ।) शाखोटवृक्षः । इति भावप्रकाशः ॥

पीतबालुका, स्त्री, (पीता बालुकेव चूर्णरजो यस्याः ।) हरिद्रा । इति त्रिकाण्डशेषः ॥ पीतवर्णसिकता च ॥

पीतबीजा, स्त्री, (पीतं बीजं यस्याः ।) मेथिका । इति राजनिर्घण्टः ॥ पीतवर्णबीजयुक्ते, त्रि ॥

पीतभृङ्गराजः, पुं, (पीतो भृङ्गराजः ।) पीतभृङ्गराजः । पीत केशुरिया इति भाषा । तत्पर्य्यायः । स्वर्णभृङ्गारः २ हरिप्रियः ३ देवप्रियः ४ वन्दनीयः ५ पावनः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामशोफनाशित्वम् । तत्र पीतो रसायनः । इति राजनिर्घण्टः ॥

पीतमणिः, पुं, (पीतो मणिरिति नित्यकर्म्मधारयः ।) पुष्परागः । इति राजनिर्घण्टः ॥ (पुष्परागशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पीतमाक्षिकं, क्ली, (पीतं माक्षिकम् ।) माक्षिकम् । इति राजनिर्घण्टः ॥

पीतमुद्गः, पु, (पीतः पीतवर्णो मुद्गः ।) मुद्गविशेषः । सोणा मुग इति भाषा । तत्पर्य्यायः । वसुः २ खण्डीरः ३ प्रवेलः ४ जयः ५ शारदः ६ । इति हेमचन्द्रः । ४ । २३८ ॥

पीतमूलकं, क्ली, (पीतं मूलमस्य । कप् ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतयूथी, स्त्री, (पीता यूथी ।) स्वर्णयूथी । इति राजनिर्घण्टः ॥ (स्वर्णयूथीशब्देऽस्या विवृतिर्विज्ञेया ॥)

पीतरक्तं, क्ली, (पीतं रक्तञ्च । वर्णो वर्णेनेति समासः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीतरागं, क्ली, (पीतो रागो वर्णो यस्य ।) किञ्जल्कम् । सिक्थकम् । इति राजनिर्घण्टः ॥ पीतवर्णे, पुं । तद्वति, त्रि ॥

पीतरोहिणी, स्त्री, (पीता सती रोहतीति । रुह + णिनिः + ङीप् ।) काश्मरी । इति भावप्रकाशः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

"काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ॥")

पीतलः, पुं, (पीतं लातीति । ला + कः ।) पीतवर्णः । इति हेमचन्द्रः ।६।३०। तद्युक्ते, त्रि ॥

पीतलकं, क्ली, (पीतलेन पीतेन वर्णेन कायति प्रकाशते इति । कै + कः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पीतलोहं, क्ली, (पीतं लोहमिति नित्यकर्म्मधारयः ।) पित्तलभेदः । इति हेमचन्द्रः ।४।११४॥

पीतवासाः, [स्] पुं, (पीतं वासो वस्त्रं यस्य ।) श्रीकृष्णः । इति हलायुधः ॥ पीतवस्त्रयुक्ते, त्रि ॥ (यथा, महाभारते । ९ । ६४ । ५३ ।

"यः सचक्रगदापाणिः पीतवासाः शितिप्रभः ॥")

पीतवृक्षः, पुं, (पीतो वृक्षः ।) श्योनाकप्रभेदः । सरलवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्याय ।

"सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतशा(सा)लः, पुं, (पीतः शालो वृक्षविशेषः ।) असनवृक्षः । इति शब्दचन्द्रिका ॥ (यथा, कालिकापुराणे ६८ अध्याये ।

"पीतशालः परिमलो विमर्द्दीकासनस्तथा ॥")

पीतसारं, क्ली, (पीतः सारो यस्य ।) पीतवर्णचन्दनकाष्ठम् । हरिचन्दनम् । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"पीतसारं सुपीतञ्च तत्पीतं हरिचन्दनम् ॥")

पीतसारः, पुं, (पीतः पीतवर्णः सारो यस्य ।) मलयजः । गोमेदकमणिः । इति मेदिनी । रे, २८३ ॥ अङ्कोटवृक्षः । इति जटाधरः ॥ तुरुष्कः । बीजकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"बीजकः पीतसारश्च पीतशालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥")

पीतसारकः, पुं, (पीतः सारो यस्य । कप् ।) निम्बवृक्षः । अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

पीतसारि, क्ली, (पीतं पीतवर्णं सरति प्राप्नोतीति । सृ + णिनिः ।) स्रोतोऽञ्जनम् । इति शब्दचन्द्रिका ॥

पीतसालकः, पुं, (पीतः सालकः सालवृक्षः ।) पीतवर्णसालवृक्षः । पैया साल इति भाषा । तत्पर्य्यायः । सर्ज्जकः २ असनः ३ बन्धूकपुष्पः ४ प्रियकः ५ जीवकः ६ । इत्यमरः । २ । ४ । ४३ ॥ अस्य पर्य्यायान्तरं गुणाश्च असनशब्दे द्रष्टव्याः ॥

पीतस्फटिकः, पुं, (पीतः स्फटिक इति नित्यकर्म्मधारयः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीता, स्त्री, (पीतो वर्णोऽस्त्यस्या इति । अच् । टाप् ।) हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"हरिद्रा पीतका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रजनी पीता वर्णिनी रात्रिनामिका ॥")

दारुहरिद्रा । महाज्योतिष्मती ॥ कपिलशिंशपा । प्रियङ्गुः । गोरोचना । इति राजनिर्घण्टः ॥ अतिविषा । इति शब्दचन्द्रिका ॥ (पीतवर्णयुक्ते, त्रि । यथा, विश्वकर्म्मप्रकाशे । ९ । २४ ।

"श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्व्वशः ॥")

पीताङ्गः, पुं, (पीतं अङ्गं यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

पीताब्धिः, पुं, (पीतः अब्धिः समुद्रो येन ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ॥ (अगस्त्यमुनेः समुद्रपानकथा यथा, महाभारते । ३ । १०५ । १—६ ।

"समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥
एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः ।
समुद्रमपिबत् क्रुद्धः सर्व्वलोकस्य पश्यतः ॥
पीयमानं समुद्रन्तु दृष्ट्वा सेन्द्रास्तदामराः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ॥
त्वं नस्त्राता विधाता च लोकानां लोकभावन !
त्वत्प्रसादात् समुच्छेदं न गच्छेत् सामरं जगत् ॥
संपूज्यमानस्त्रिदशैर्महात्मा
गन्धर्व्वतूर्य्येषु नदत्सु सर्व्वशः ।
दिव्यैश्च पुष्पैरवकीर्य्यमाणो
महार्णवं निःसलिलं चकार ॥")

पीताम्बरः, पुं, (पीतं अम्बरं वस्त्रं यस्य ।) विष्णुः । इत्यमरः ।१।१।१८॥ (यथा, विष्णुस्तोत्रे ।२१।

"एतत्पातित्यदाम्नो जघनमतिघनादेनसो माननीयं ।
सातत्येनैव चेतोविषयमवतरत् पातु पीताम्बरस्य ॥")

शैलूषः । इति मेदिनी । रे, २८३ ॥ पीतवस्त्रयुक्ते, त्रि । हरिद्राभवसने, क्ली ॥ (यथा,—

"पीताम्बरधरः स्रग्वी वनमालाविभूषितः ॥"

इति पुराणम् ॥)

पीताश्मा, [न्] पुं, (पीतः अश्मा ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥ (विवृतिरस्य पुष्परागशब्दे ज्ञातव्या ॥)

पीतिः, पुं, (पिबतीति । पा + क्तिच् । "कुमाख्यायामिति ।" ६ । ३ । ११ । इतीत्वम् ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥

पीतिः, स्त्री, (पा + भावे क्तिन् ।) पानम् । इति मेदिनी । ते, ३३ ॥ (पीयतेऽनयेति । करणे क्तिन्) शुण्डा । इति शब्दचन्द्रिका ॥

पीतिका, स्त्री, (पीतो वर्णोऽस्त्यस्या इति । ठन् ।) हरिद्रा । इति रत्नमाला ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ स्वर्णयूथी । इति जटाधरः ॥

पीती, [न्] पु, (पीतं पानं प्राचुर्य्येणास्त्यस्येति । इनिः ।) पीतिः । घोटकः । इत्यमरटीकायां रायमुकुटः ॥

पीतुः, पुं, (पिबति रसादीनिति । पा + "पः किच्च ।" उणां १।७१। इति तुन् । स च कित् । कित्त्वात् ईत्वम् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः । यूथपतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीथं, क्ली, (पीयते इति । पा + "पातॄतुदीति ।" उणां २ । ७ । इति थक् ।) जलम् । इति हेमचन्द्रः ॥ घृतम् । इत्युणादिकोषः ॥ (पिबति रसादीनिति । पा + कर्त्तरि थक् ।) सूर्य्यः । अग्निः । काल । इति त्रिकाण्डशेषः ॥

पीथिः, पुं, (पीतिः + पृषोदरादित्वात् तस्य थः ।) पीतिः । घोटकः । इत्यमरटीकायां स्वामी ॥

पीनः, त्रि, (ओ प्यायी ङ वृद्धौ + क्तः । "ओदितश्च ।" ८।२।४५ । इति निष्ठातस्य नः ।) स्थूलः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, आर्य्यासप्तशत्याम् । ५६१ ।

"वक्षःस्थलसुप्ते मम सुखसुमधातुं न मौलिमालभसे ।
पीनोत्तुङ्गस्तनभरदूरीभूतं रतश्रान्तौ ॥")

पीनसः, पु, (पीनं स्थूलमपि जनं स्यति नाशयतीति । सो + कः ।) नासिकारोगविशेषः । पीनास इति भाषा । तत्पर्य्यायः । प्रतिश्यायः २ । इत्यमरः । २ । ६ । ५१ ॥ अपीनसः ३ प्रतिश्या ४ । इति भरतः ॥ नासिकामयः ५ । इति शब्दरत्नावली ॥ तस्य निदानं यथा,—

"आनह्यते यस्य विशुष्यते च
प्रक्लिद्यते धूप्यति चैव नासा ।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं व्यवस्येत् खलु पीनसेन ॥
तच्चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥"

इति माधवकरः ॥

आमपीनसलक्षणं यथा,—

"शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः ।
क्षामः ष्ठीवति चाभीक्ष्णमामपीनसलक्षणम् ॥"

पक्वपीनसलक्षणं यथा,—

"आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति ।
स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम् ॥"* ॥

तस्यौषधानि यथा,—

"सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु ।
मरिचं गुडेन दध्ना भुञ्जीत नरः सुखं लभते ॥ १

कटफलं पौष्करं शृङ्गी व्योषं यासश्च कारवी ।
एषां चूर्णं कषायं वा दद्यादार्द्रकजै रसैः ॥
पीनसे स्वरभेदे च तमकाख्ये हलीमके ।
सन्निपाते कफे वाते कासे श्वासे च शस्यते ॥२॥
व्योषचित्रकतालीशतिन्तिडीकाम्लवेतसम् ।
सचव्याजाजितुल्यांशमेलात्वक्पत्रभागिकम् ॥
व्योषादिकमिदं चूर्णं पुराणगुडमिश्रितम् ।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम् ॥” ३ ॥
इति भावप्रकाशः ॥*॥
“पिप्पलीशिग्रुबीजानां चूर्णं मधुसमन्वितम् ।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत् ॥”
इति गारुडे १८६ अध्यायः ॥
(अस्य चिकित्सान्तरं यथा,—
“वातात् सकासवैस्वर्य्ये सक्षारं पीनसे घृतम् ।
पिबेद्रसं पयश्चोष्णं स्नैहिकं धूममेव वा ॥”
“दशमूलस्य निष्क्वाथे रास्नामधुककल्कवत् ।
सिद्धं सलवणं तैलं दशमूलो गुणाः स्मृतम् ।
शिरसस्त्वाप्यनैर्दोषं निर्हरेद्वातपीनसे ॥
स्निग्धाम्लोष्णैश्च लघ्वन्नं ग्राम्यादीनां रसैर्हितम् ।
उष्णाम्बुना स्नानपानैर्निवातोष्णप्रतिश्रयः ।
चिन्ताव्यायामवाक्चेष्टाव्यवायविरतो भवेत् ।
पैत्ते सर्पिः पिबेत् सिद्धं शृङ्गवेरशृतन्वयः ॥
पाचनार्थं पिबेत् पक्के कार्य्यमूर्द्धविरेचनम् ।
पाठाहरिद्रामूर्व्वापिप्पलीजातिपल्लवैः ॥
दन्त्या च साधितं तैलं नस्यं सम्यक्पीनसे ।
पूयास्रे रक्तपित्तघ्नाः कषायो नावनानि च ॥
पाकदाहाद्यवस्थेषु शीता लेपाः ससेचनाः ।
श्रेयमस्योपचारश्च कषायस्वादुतिक्तकाः ॥”
“गौरवारोचकेष्वादौ लङ्घनं कफपीनसे ।
स्वेदाः सेकाश्च पाकार्थं स्निग्धे शिरसि सर्पिषा ॥
लसुनं मुद्गयूषञ्च ओषधारसमाप्लुतम् ।
देयं कफघ्नं वमनमुत्क्लिष्टश्लेष्मणो हितम् ॥
अपीनसे पूतिनस्ये शाखनावनकाङ्कुके ।
धूमः शस्तोऽवपीडश्च कटुभिः कफपीनसे ॥
मनःशिला वचाव्योषं विडङ्गं हिङ्गु गुग्गुलुः ।
चूर्णो श्रेयः प्रधमनः कटुभिश्च फलैस्तथा ॥”
“शिरसश्च वाहते वेगे हृद्यं कफपीनसे ।
वमनीयकृतश्चोरतिलमाषयवागुभिः ॥”
“सर्व्वजित् पीनसे दुष्टे कार्य्यं शोफे च शोफजित्
चारोऽर्व्वुदाधिमांसेषु क्रिया सर्व्वाश्चवेक्ष्य च ॥”
इति चरके चिकित्सास्थाने २६ अध्याये ॥
“सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः ।
कालेन रोगजनना जायन्ते दुष्टपीनसाः ॥
बाधिर्य्यमान्ध्यमघ्रात्वं घोरांश्च नयनामयान् ।
कासाग्निसादशोफांश्च वृद्धाः कुर्व्वन्ति पीनसाः ॥”
इत्युत्तरतन्त्रे चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पीनसा, स्त्री, (पीनं स्यतीति । सो + कः । टाप् ।) कर्कटी । इति राजनिर्घण्टः ॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पीनसी, [न्] त्रि, पीनसरोगी । पीनसशब्दादस्त्यर्थे इनुप्रत्ययनिष्पन्नः ॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये ।
“त्रिजातकैः पाचनदीपनीयै-
रुपाचरेत् पीनसिनं यथावत् ।
मधुद्रवैर्वातकफोपपन्नं
प्रच्छर्दयेत् पीनसिनं वचःस्थम् ॥”)

पीनोध्नी, स्त्री, (पीनं स्थूलमूधोऽस्याः । “बहुव्रीहेरूधसो ङीष् ।” ४ । १ । २५ । इति ङीष् । “ऊधसोऽनङ् ।” ५ । ४ । १३१ । इति ऊधसोऽन्तस्य बहुव्रीहेरनङादेशः ।) पीवरस्तनी गौः । इत्यमरः । २ । ६ । ७१ ।

पीपरिः, पुं, (अपि पिपर्त्तीति । पॄ + इन् । अपेरल्लोपः । दीर्घश्च ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

पीय, प्रीणने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) पीयूषं प्रीणयति लोकमित्यादि पीयूयम् । इति दुर्गादासः ॥

पीयुः, पुं, (पिबतीति । पा + “कृकाभूपीयु-भीभूस्वपिभ्यः ।” उणा । १ । १० । इति कुः । निपातनात् युगागम ईत्वं चान्तादेशः ।) काकः । रविः । घूकः । इति मेदिनी । ये, १७ ॥ कालः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (हिंसके प्रतिकूले च त्रि । यथा, ऋग्वेदे ।१ । १७४ । ८।
“भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य
पीयोः ॥”
“पीयोः प्रतिकूलस्य हिंसकस्य ।” इति तद्भाष्ये सायनः ॥)

पीयूषं, क्ली, (पीयते इति । पीय सौत्रधातुः + “पीयेरूषन् ।” उणा । ४।७६ । इति ऊषन् ।) अमृतम् । इत्यमरः । १ । १ । ५१ ॥ (यथा, काशीखण्डे । २६ । ४६ ।
“स्वरसन्तापशमनो वाणिः पीयूषपायिनाम् ॥”)
दुग्धम् । इति राजनिर्घण्टः ॥ (यथा,—
“पानीयं श्रमनाशनं श्रमहरं मूर्च्छापिपासापहं
तन्द्राच्छर्द्दिविबन्धहृद्बलकरं निद्राहरं तर्पणम् ।
हृद्यं गुप्तरसं ह्यजीर्णशमनं नित्यं हितं शीतलं
लघ्वच्छं रसकारणम् निगते पीयूषवज्जीविनम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

पीयूषः, पुं, क्ली, (पीय + ऊषन् ।) अभिनवं पयः । नवप्रसूतायाः गोः सप्तदिनाभ्यन्तरीयदुग्धम् । इत्यमरभरतौ ॥
“अथ पीयूषपेयूषे नवं सप्तदिनावधि ।”
इति शब्दार्णवः ॥
“आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते ॥”
इति हारावली ॥

पीयूषमहाः, [स्] पुं, (पीयूषमन्ततमयं महः किरणं यस्य । यद्वा, पीयूषमिव महो यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥

पीयूषरुचिः, पुं, (पीयूषं पीयूषमयी रुचिर्द्युतिर्यस्य ।) चन्द्रः । इति हलायुधः ॥ (पीयूषे अमृते रुचिर्यस्य ।) अमृतप्रियश्च ॥

पील, रोधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) दीर्घी । रोधः क्रियानिरोधः जडीभावः इत्यर्थः । पीलति पङ्गुः । इति दुर्गादासः ॥

पीलकः, पुं, (पीलति स्तभ्नातीति । पील + ण्वुल् ।) पिपीलिका । इति हेमचन्द्रः ॥ (कालवर्णा महतिकरविशेषः । यथा, पञ्चतन्त्रे आर्य-शारिकायाम्
‘आदित्या विष्णुगुप्ताश्च स्तिमन्त्र पीलककथा ॥”)

पीलुः, पुं, (पीलति प्रतिष्टभ्नातीति । पील + “मृगय्वादयश्च ।”उणा । १ । ३७ । इति कुः ।) प्रसूनम् । परमाणुः । मतङ्गजः । अस्थिखण्डम् । तालकाण्डः । इति मेदिनी । ले, १२ ॥ बाणः । कृमिः । इति वरुचिः ॥ कोङ्कणादिदेशे प्रसिद्धः फलवृक्षविशेषः । पीलु इति भाषा । तत्पर्य्यायः । गुडफलः २ संसी ३ । इत्यमरः । २ । ४ । २८ ॥ शीतवहः ४ शाखी ५ विरेचनः ६ भद्रशाखी ७ श्यामः ८ करभवल्लभः ९ ॥ (यथा, महाभारते । २ । ५० । ४ ।
“उष्ट्रवामीस्त्रिंशतञ्च पुष्टाः पीलुशमीङ्गुदैः ॥”)
अस्य फलगुणाः । श्लेष्मवायुगुल्मनाशित्वम् । पित्तदत्वम् । भेदकत्वम् । यत् स्वादु तिक्तं तत् नात्युष्णं त्रिदोषहरत्वञ्च । इति राजनिर्घण्टः ॥

पीलुनी, स्त्री, (पील + बाहुलकात् उन । गौरादित्वात् ङीष् ।) मूर्व्वा । इति रत्नमाला ॥

पीलुपत्रः, पुं, (पीलुवत् पत्रमस्य ।) मोरटालता । इति राजनिर्घण्टः ॥

पीलुपर्णी, स्त्री, (पीलोरिव पर्णान्यस्याः । यद्वा, पीलुतुल्यानि पर्णान्यस्याः । “पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ।” ४ । १ । ६४ । इति ङीष् ।) मूर्व्वा । बिम्बिका । ओषधिभेदः । इति मेदिनी । णि, १०३ ॥

पीव, स्थौल्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पीवति लोकः स्थूलः स्यादित्यर्थः । इति दुर्गादासः ॥

पीव, [न्] त्रि, (प्यायते इति । प्यैङ् वृद्धौ + “श्वन्नुक्षन्पूषन् ।” उणा । ३ । ११४ । इति कनिप् सम्प्रसारणञ्च । “हलः ।” ६।४।२। इति दीर्घः ।) स्थूलम् । इत्यमरः । ३।१।६१। (यथा, भागवते । ६ । १६ । ६ ।
“पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ।
न स्पृशोऽनवकाशाख्यो यदीनां रतिवर्द्धनः ॥”)

पीवरः, त्रि, (प्यायते वर्द्धते इति । प्यैङ् + “छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः ।” उणा । ३ । १ । ष्वरच् । सम्प्रसारणं दीर्घश्च ।) उपचितावयवः । मोटा इति भाषा । तत्पर्य्यायः । पीनः २ पीवा ३ स्थूलः ४ । इत्यमरः ।३।१।६१। (यथा, आर्य्यासप्तशत्याम् । ४२० ।
“अयमिह हितं बालानां पीवरस्तनहृदयं कातरोऽसिः ।
निम्रायां प्रेमार्द्रः पश्यति निःश्वस्य निःश्वस्य ॥”
पुं, तामसमन्वन्तरीयसप्तर्षिभेदः । यथा, मार्कण्डेये । ७४ । ५६ ।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् । सप्त सप्तर्षयोऽभवन् ॥")

पीवरस्तनी, स्त्री, (पीवरौ स्थूलौ स्तनौ यस्याः । "स्वाङ्गाच्चोपसर्जनादिति ।" ४ । १ । ५४ । इति ङीष् ।) पीनोध्नी । इत्यमरः ।२।९।७१॥ स्थूलस्तनयुक्ता नारी ॥ (यथा, भारवौ । ८ । १९ ।

"व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ॥")

पीवा, [न्] पु, (प्यायते इति । प्यै ङ वृद्धौ + "ध्याप्योः सम्प्रसारणम् ।" उणा० ४ । ११४ । इति क्वनिप् सम्प्रसारणञ्च । "हलः ।" ६ । ४ । २ । इति दीर्घः ।) बलवान् । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीवा, स्त्री, (पीयत इति । पी ङ् य पाने + बाहुलकात् वः । ततष्टाप् ।) उदकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीवरा, स्त्री, (पीवर + टाप् ।) अश्वगन्धा । शतावरी । इति राजनिर्घण्टः ॥ स्थूला च ॥

पीवरी, स्त्री, (प्यायते इति । प्यै + ष्वरच् । सम्प्रसारणं दीर्घः ङीप् च ।) शतमूली । इति रत्नमाला ॥ शालपर्णी । इति भावप्रकाशः ।१।१॥ तरुणी । गौः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (बर्हिषदनामकपितृणां मानसीकन्यानामन्यतमा । सा तु शुकदेवस्य पत्नी । यथा, हरिवंशे । १८ । ४९—५२ ।

"एतेषां मानसी कन्या पीवरी नाम विश्रुता ।
योगा च योगिपत्नी च योगिमाता तथैव च ॥
भविष्या द्वापरं प्राप्य युगं धर्म्मभृतां वरा ।
पराशरकुलोद्भूतः शुको नाम महातपाः ।
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः ।
व्यासादरण्यां सम्भूतो विधूमाग्निरिवोज्ज्वलन् ॥
स तस्यां पितृकन्यायां पीवर्य्यां जनयिष्यति ।
कृष्णं गौरं प्रभुं शम्भु कृत्वी कन्यां तथैव च ॥")

पुंलिङ्गं, क्ली (पुंसो लिङ्गं चिह्नम् ।) पुंचिह्नम् । शिश्नः । (यथा महाभारते । ५ । १९४ । ३ ।
"किञ्चित् कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव ।
आगन्तव्य त्वया काले सत्यञ्चैव वदस्व मे ॥")
शब्दवाचकतायाम् पु । इति जुमरः ॥ (पुंसो लिङ्गमस्येति । पुंलिङ्गविशिष्टे, त्रि । यथा, महाभारते । ६ । ५८ । ५७ ।
"पुंलिङ्गा इव नार्य्यस्तु स्त्रीलिङ्गाः पुरुषाभवन् ।
दुर्य्योधन तदा राजन् । पतित तनये तव ॥")

पुंवृषः, पुं, (पुमानिव वर्षतीति । वृष + कः ।) गन्धमूषिकः । इति शब्दमाला ॥ छुँ चा । इति भाषा ॥ (पुमान् गौः ।) पुंगवश्च ॥

पुंश्चलः, पु, (पुंश्चलीव । उपचारात् पुंस्त्वम् ।) व्यभिचारी । यथा, गारुडे ६९ अध्याये ।
"ललाटोपस्थिताश्तिस्रो रेखाः स्युः शतवर्षिणाम् ।
नृपत्वं स्याच्चतस्रोऽभिरायुः पञ्चनवत्यथ ॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः ॥"

पुंश्चली, स्त्री, (पुंसो भर्त्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति । चल + अच् । गौरादित्वात् ङीष् ।) असती । इत्यमरः ।२।६।१०॥ अस्या अमरोक्तपर्य्यायः कुलटाशब्दे लिखितः । तदतिरिक्तपर्य्यायो यथा, धृष्टा १ दुष्टा २ धर्षिता ३ । इति शब्दरत्नावली ॥ लङ्का ४ निशाचरी ५ चपारला ६ । इति जटाधरः ॥ तस्याश्चरित्रदोषादि यथा,—

"अहो । को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः ।
पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः ।
बहिष्कृतस्य यशसा धर्म्मेण स्वकुलेन च ॥
वाञ्छितं नूतनं प्राप्य विनश्यति पुरातनम् ।
सदा स्वकर्म्मसाध्या सा को वा तस्याः प्रियोऽप्रियः ॥
दैवे कर्म्मणि पैत्रे च पुत्रे बन्धौ च भर्त्तरि ।
दारुणं पुंश्चलीचित्तं सदा शृङ्गारकर्म्मणि ॥
प्राणाधिकं रतिज्ञं सा स्मरतद्धा हि पुंश्चली ।
रत्नप्रदं रत्यविज्ञं विषदृष्ट्या हि पश्यति ॥
सर्व्वेषां स्थलमस्त्येव पुंश्चलीनां न कुत्रचित् ।
दारुणा पुंश्चली जातिर्गरजातिभ्य एव च ॥
निष्कृतिः कर्म्मभोगान्ते सर्व्वेषामस्ति निश्चितम् ।
न पुंश्चलीनां विप्रेन्द्र । यावच्चन्द्रदिवाकरौ ॥
अन्यासां कामिनीनाञ्च कोटं हन्तुञ्च या दया ।
सा नास्ति पुंश्चलीनान्तु कान्तं हन्तुं पुरातनम् ॥
रतिज्ञं नूतनं प्राप्य विषतुल्यं पुरातनम् ।
कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया ॥*॥
पृथिव्यां यानि पापानि पुंश्चल्येव भारते ।
निरन्ति नार्य्यो न पराः पापिष्ठाः सन्ति कञ्चन ॥
पुंश्चलीपरिपक्वान्नं सर्व्वपानकमिश्रितम् ।
दैवे कर्म्मणि पैत्रे च देयं न च तथा जलम् ॥
अन्नं विष्ठा पयो मूत्रं पुंश्चलीनाञ्च निश्चितम् ।
दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत् ॥
शतवर्षं कालसूत्रे पचत्येव सुदारुणे ।
घोरान्धकारे भ्रमयन् दशन्ति दिवानिशम् ॥
पुंश्चल्यन्नञ्च यो भुङ्क्ते दैवाद्यदि नराधमः ।
सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम् ॥
आयुः श्रीयशसां हानिरिह लोके परत्र च ।
तस्माद्यत्नाद्वर्जनीयं पाकपात्रं कलत्रकम् ॥
पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम् ।
स्पर्शने च महापापं तीर्थस्नानाद्विशुध्यति ॥
स्नानं दानं व्रतञ्चैव जपश्च देवपूजनम् ।
निष्फलं पुंश्चलीनाञ्च भारते जीवनं वृथा ॥"
उपस्थितसकामपुंश्चलीत्यागे दोषो यथा,—
"रहस्युपस्थितां कामात् पुंश्चलीं च्छिन्नेन्द्रियः ।
परित्यजेद्धर्म्मभयात् स धर्म्माद्यरकं व्रजेत् ॥"
सत्यदेव तस्यास्तपस्वित्वाप्युक्तं गर्हितत्वञ्च यथा,
"उपस्थिता च या योषिदत्याज्या रागिणामपि ।
श्रुतौ श्रुतमिति त्याज्या सतां नैव तपस्विनाम् ॥
अहो सर्व्वे, परित्याज्या पुंश्चली च विशेषतः ।
धनायुःप्राणयशसां नाशिनी दुःखदायिनी ॥
स्वकार्य्यतत्परा शश्वत् परकार्य्यविघातिनी ।
निष्ठुरा नरधातिभ्यः सर्व्वापद्बीजरूपिणी ॥
विदाहदीप्तिर्जले रेखा लोभाक्तैत्री यथा भवेत् ।
परद्रोहाद्यथा सम्पत् कुलटाप्रेमतत्परम् ॥
सर्व्वेभ्यो हिमजन्तुभ्यो विपद्बीजा सदैव सा ।
यो विश्वसेत्तां संसारे विपत्तस्य पदे पदे ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । २३ । २४ । ३२ अध्यायाः ॥

पुंश्चिह्नं क्ली, (पुंसः पुरुषस्य चिह्नम् ।) शिश्नः । इति हेमचन्द्रः । ३ । २७४ ।

पुंस, क मर्द्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । संयोगादनुस्वारः । तेन क्विपि पुंसोऽसुङ्गावित्यसुङि पुमान् । मर्द्दोऽभिमर्द्दनम् । क, पुंसयति खलं राजा । इति दुर्गादासः ॥

पुंसवनं, क्ली, (पुमांसमिव सूते बलप्रदानेन पुरुषवत् जनयत्यनेनेति । सू + करणे ल्युट् ।) दुग्धम् । इति हेमचन्द्रः । ३ । ४०४ ॥ (पुमांसं सूतेऽनेनेति । सू ङ ल + करणे ल्युट ।) संस्कारविशेषः । इति त्रिकाण्डशेषः ॥ (यथा, रघुवंशे । ३ । १० ।

"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥")

अस्येतिकर्त्तव्यता यथा । "गर्भस्य तृतीयमासोपक्रमे यच्छुद्धदिनं तस्मिन् पतिः कृतनित्यक्रियः कृतवृद्धिश्राद्धः चन्द्रनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य कृतस्नानां वधमग्नेः पश्चिमायां दिशि स्वदक्षिणतः कुशेषु प्राङ्मुखीमुपवेश्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात् । यथा । प्रजापतिरृषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः ॐ भूः स्वाहा । प्रजापतिरृषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः ॐ भुवः स्वाहा । प्रजापतिरृषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा । ततः पतिरुत्थाय वधूपृष्ठदेशे स्थितो वधूदक्षिणस्कन्धं स्पृष्ट्वा अनन्तरोक्तेन दक्षिणहस्तेन अनवच्छिन्नं वधूनाभिदेशं स्पृशन् जपेत् । प्रजापतिरृषिरनुष्टुप् छन्दो मित्रावरुणाश्विवायवो देवताः पुंसवने विनियोगः ।

ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे ॥

इत्येकं पुंसवनम् ॥ * ॥

अपरपुंसवनकर्म्मार्थञ्च वटवृक्षस्य पूर्ब्बोत्तरशाखायां फलयुगलशालिनीं कृमिभिरनुपहतां वटशुङ्गां यवानां माषाणां वा त्रिभिस्त्रिभिर्गण्डकैः सप्त वारान् सप्तभिर्मन्त्रैः क्रीणीयात् । सप्तानां मन्त्राणामृष्यादयः साधारणाः । प्रजापतिरृषिः सोमवरुणवसुरुद्रादित्यमरुद्विश्वेदेवा देवता न्यग्रोधशुङ्गापरिक्रयणे विनियोगः ॐ यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण एकं क्रयणम् ॥ १ ॥

ॐ यद्यसि वारुणी वरुणायत्वा, राज्ञे परिक्रीणामि। इति गुडकत्रयेण द्वितीय क्रयणम् ॥ २ ॥ ॐ यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण तृतीयं क्रयणम् ॥ ३ ॥ ॐ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण चतुर्थ क्रयणम् ॥४॥ ॐ यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण पञ्चमं क्रयणम् ॥५॥ ॐ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण षष्ठं क्रयणम् ॥६॥ ॐ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण सप्तमं क्रयणम् ॥ ७ ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण दृषादाहरेत्। प्रजापतिऋषिर्विराड्ओषध्यो देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः। ॐ ओषधयः सुमनसो भूत्वा अस्यां वीर्य्यं समाधत्त इयं कर्म्म करिष्यति। ततस्तां दृषद्वहिताभन्तरोत्तोलनीय अन्तरोत्ते स्थापयेत्। ततः कृतशौभनरोत्री-ऽत्रिरुत्तरतः प्रक्षालितशिलायां ब्रह्मचारी गर्भवती वा श्रुतस्वाध्यायशीलो वा ब्राह्मणः प्राङ्मुख आचारतो नाहारजलेन अनातृक्तलोष्टेन पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमत उत्तराग्रेषु कुशेषु पश्चिमाभिमुखीं वधू पूर्व्वदिगाननमस्तकां कृत्वा तत्पृष्ठदेशे स्थितः पतिर्दक्षिणपाणि-रङ्गुष्ठानामिकाभ्यां वस्त्रवद्धां पेषितवटशुङ्गां गृहीत्वा गर्भवत्या दक्षिणनासापुटे शुङ्गारसं निःक्षिपति। प्रजापतिऋषिरनुष्टुप छन्दो-ऽग्नीन्द्रबृहस्पतयो देवता न्यग्रोधशुङ्गारसस्य दाने विनियोगः।

ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः।
पुमांसं पुत्त्रं विन्दस्व तं पुमाननुजायताम् ॥

ततो महाव्याहृतिहोमं कृत्वा तृणीं प्रादेशप्रमाणां घृताक्तां समिधमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं शाट्यायनहोमादिवामदेव्यगानान्तं कर्म्म कृत्वा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यादिति पुंसवनम्।” इति दशकर्म्मपद्धतौ भवदेवभट्टः ॥*॥ अथ पुंसवनोक्तवाराः। रविमङ्गलबृहस्पतयः। नक्षत्राणि। पूर्व्वाषाढोत्तराषाढापूर्व्वभाद्रपदोत्तरभाद्रपदपुष्यपुनर्व्वसुमूलार्द्रारेवतीहस्ताश्रवणाश्लेषाशिरसः। तिथयः। नन्दा भद्राः। लग्नानि। कुम्भसिंहधनुर्मीनमिथुनानि। स्त्रियाश्चन्द्रादिषष्ठी दशयोगभङ्ग विष्टिभद्राव्यतीपातादीन् परित्यज्य गर्भधारणदिनावधितृतीयमासे कर्त्तव्यम्। इति ज्योतिषम् ॥ * ॥ स्त्रीकर्त्तव्यव्रतविशेषः। यथा,—

श्रीराजोवाच।

“व्रतं पुंसवनं ब्रह्मन्। भवता यदुदीरितम्।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥

श्रीशुक उवाच।

शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सार्व्वकामिकमादितः ॥
निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे।
पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ॥
अलं ते निरपेक्षाय पूर्णकाम। नमोऽस्तु ते।
महाविभूतिपतये नमः सकलसिद्धये ॥
यथा त्वं कृपया भूत्या तेजसा महिमौजसा।
जुष्ट ईशगुणैः सर्व्वैस्ततोऽसि भगवान् प्रभुः ॥
विष्णुपत्नि। महामाये महापुरुषलक्षणे।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्ब्बलिमुपहरामीति। अनेनाहरहर्म्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-स्नान-वासोपवीत-भूषणगन्धपुष्पधूपदीपोपहाराद्युपचारान् सुसमाहितोपाहरेत्।
हविःशेषञ्च जुहुयादनले द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।
श्रियं विष्णुञ्च वरदावाशिषां प्रभवावुभौ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत् सर्व्वसम्पदः ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा।
दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥
युवान्तु विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।
तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥
त्वं सर्व्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।
गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् ॥
त्वं हि सर्व्वशरीर्य्यात्मा श्रीः शरीरेन्द्रियाशयः।
नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ।
तथा म उत्तमश्लोक। सन्तु सत्या महाशिषः ॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह।
तन्निःसार्य्योपहरणं दत्त्वाचमनमर्च्चयेत् ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्च्चयेद्धरिम् ॥
पतिञ्च परया भक्त्या महापुरुषचेतसा।
प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥
बिभृयात् सर्व्वकर्म्माणि पत्न्या उच्चावचानि च।
कृतमेकतरेणापि दम्पत्योरुभयोरपि ॥
पत्न्यां कुर्य्यादनर्हायां पतिरेतत् समाहितः।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथञ्चन ॥
विप्रान् स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः।
अर्च्चेदहरहर्भक्त्या देवं नियममास्थिता ॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः।
अद्यादात्मविशुद्ध्यर्थं सर्व्वकामसमृद्धये ॥
एतेन पूजाविधिना मासान् द्वादशहायनम्।
नीत्वाथोपरमेत् साध्वी कार्त्तिके चरमेऽहनि ॥
श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्च्य पूर्व्ववत्।
पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥
आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥
आचार्य्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः।
दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥
एतच्चरित्वा विधिवद्व्रतं विभो-
रभीप्सितार्थं लभते पुमानिह।
स्त्री चैतदास्थाय लभेत सौभगं
श्रियं प्रजां जीवपतिं यशो गृहम् ॥
कन्या च विन्देत समग्रलक्षणं
पतिं त्ववीरा हतकिल्विषां गतिम्।
मृतप्रजा जीवसुता धनेश्वरी
सुदुर्भगा सुभगा रूपमग्रियम् ॥
विन्देद्विरूपा विरुजा विमुच्यते
य आमयावीन्द्रियकल्यदेहम्।
एतत् पठन्नभ्युदये च कर्म्म-
ण्यनन्ततृप्तिः पितृदेवतानाम् ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्
होमावसाने हुतभुक् श्रीर्हरिश्च।
राजन्महन्मरुतां जन्मपुण्यं
दितेर्व्रतञ्चाभिहितं महत्ते ॥”

इति श्रीभागवते ६ स्कन्धे पुंसवनव्रतकथनं १९ अध्यायः ॥ (पुमान् सूयते इति। कर्म्मणि ल्युट्। गर्भः। इति श्रीधरस्वामी ॥ यथा, भागवते। ५।२४।१५। “यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥”*॥ पुत्त्रोत्पादकं, त्रि। यथा, भागवते। ९।६।२८।
“पप्रच्छुः कस्य कर्म्मेदं पीतं पुंसवनं जलम् ॥”
तथा च तत्रैव। ४।१३।३७—३८।
“स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्।
अवघ्राय मुदा युक्तः प्रादात् पत्न्या उदारधीः ॥
सा तत् पुंसवनं राज्ञी प्राश्य वै पत्युरादधे।
गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजा: ॥”)

पुंस्कोकिलः, पुं, (पुमान् कोकिलः।) पुरुषपिकपक्षी। पुमस्शब्देन कोकिलशब्दस्य कर्म्मधारयसमासे तस्यान्तलोपे पुमः सन्निति सस्य सत्वे कृते सस्यानुस्वारे निष्पन्नः। इति मुग्धबोधव्याकरणम् ॥ (यथा, कुमारे। ३। ३२।
“चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ॥”)

पुंस्त्वं, क्ली, (पुंसः पुरुषस्य भावः। पुमस्+त्व।) शुक्रम्। इति हेमचन्द्रः। ३। २९३ ॥ पुरुषत्वञ्च ॥ (यथा, मार्कण्डेये। ५०। १२।
“सौम्यासौम्यैस्तथा शान्तैः पुंस्त्वं स्त्रीत्वञ्च स प्रभुः।
बिभेद बहुधा देवः पुरुषैरसितैः सितैः ॥”)

पुंस्त्वविग्रहः, पुं, (पुंस्त्वस्य शुक्रस्येव विग्रहो यस्य।) भूल्यम्। इति राजनिर्घण्टः ॥

पुक्कशः, पुं, (पुक् कुत्सितं कशति गच्छतीति। कश गतौ+अच्।) चण्डालः। इत्यमरः। २। १०। २० ॥ (यथा, मार्कण्डेये। १५। १८।
“अकृतज्ञोऽधमः पुंसां विमुक्तो नरकान्नरः।
मत्स्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥”
स तु निषादात् शूद्रायां जातो जातिविशेषः। यथा, मनुः। ४। ७९।
“न संवसेच्च पतितैर्न्न चाण्डालैर्न पुक्कशैः ॥”)

क्कश: पुं, (पुक् कुत्सितं कषतीति । कष गतौ + अच् ।) चण्डाल: । इत्यमरटीकायां भरत: ॥

क्कस:, पु, (पुक् कुत्सितं कसतीति । कस गतौ + अच ।) चण्डाल: । (स तु निषादात् शूद्रायां जात । यथा, मनु: । १० । १८ ।
"जातो निषादात् शूद्रायां जात्या भवति पुक्कस: ॥")
अधमे, त्रि । इति मेदिनीशब्दरत्नावल्यौ ॥

क्कसी, स्त्री, कालिका । नीली । इति मेदिनी-शब्दरत्नावल्यौ ॥ (पुक्कस + जातौ ङीष् । पुक्कस-स्त्रीजाति: । यथा, मनु: । १० । ३८ ।
"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पाप: सदा सज्जनगर्हित: ॥")

ङ्ख:, पु, (पुमांसं खनतीति । खन + ड: ।) काण्ड-मूलम् । इत्यमर: । ३ । ५ । १७ ॥ पुच्छल इति ख्यातम् ॥ (अर्द्धर्चादित्वात् क्लीवलिङ्गोऽपि ॥ यथा, रघु: । २ । ३१ ।
"सक्ताङ्गुलि: सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे ॥"
मङ्गलाचार: । इति हेमचन्द्रटीका ॥)

ञ्ज:, पु, क्ली, (पुञ्ज + पृषोदरादित्वात् साधु: ।) समूह: । इति शब्दचन्द्रिका ॥

ङ्गल:, पु, (पुङ्गं देहसमूहं लाति आदत्ते इति । पुङ्ग + ला + क: ।) आत्मा । इति भूरि-प्रयोग: ॥

ङ्गव:, पुं, (पुमान् गौ: । "गोरतद्धितलुकि ।" ५ । ४ । ९२ । इति टच् ।) वृष: । (यथा, हरिवंशे । ७५ । ४१ ।
"भवता रचिता लोका गोलोकश्च महालयम् ।
यद्वयं पुङ्गवै: सार्द्धं वर्द्धाम: प्रसवैस्तथा ॥")
औषधभेद: । (पुमान् गौरिव मदबलाद्याति-शय्यादित्युपमितसमास: ।) उत्तरपदस्थ: श्रेष्ठ-वाचक: । इति मेदिनी । वे ४४ ॥ (यथा, भाग-वते । १ । ८ । ३२ ।
"इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ॥")
ऋषभौषधम् । महौष: । इति राजनिर्घण्ट: ॥

च्छ, प्रमादे । इत्यमरटीकायां रायमुकुटधृत-धातु: ॥ (भ्वा-परं-अकं सेट् ॥)

च्छ:, पु, क्ली, (पुच्छतीति । पुच्छ प्रसादे + अच् ।) लाङ्गलम् । इत्यमर: ।२।८।५०॥ (यथा, देवी-भागवते । ५ । ७ । १६ ।
"खुरघातैस्तथा देवान् पुच्छस्य भ्रमणेन च ।
स जघान रुषाविष्टो महिष: परमाद्भुत: ॥")
पश्चाद्भागे, पु । इति मेदिनी । छे, ५ ॥ (यथा, महाभारते । ७ । ६ । ३८ ।
"उल्का ज्वलन्ती संग्रामे पुच्छेनावृत्य सर्वश: ॥")
लोमवल्लाङ्गूले कलापे च, क्ली । इत्युणादिकोष: ॥

च्छटि, स्त्री, (पुच्छ प्रमादे + भावे क्विप् । पुच्छं प्रमादं अटतीति । अट गतौ + इन् ।) अङ्गुलि मोटनम् । इति त्रिकाण्डशेष: ॥ आङ्गुलमट्-कान इति भाषा ॥

पुच्छदा, स्त्री, (पुच्छमिव ददातीति । दा + क: ।) लक्ष्मणाकन्द: । इति राजनिर्घण्ट: ॥

पुच्छी, [न्] पु, (पुच्छोऽस्त्यस्येति । पुच्छ + इनि: ।) अर्कवृक्ष: । इति राजनिर्घण्ट: ॥ कुक्कुट: । इति शब्दचन्द्रिका ॥ लाङ्गूलयुक्ते, त्रि ॥

पुञ्ज:, पु, (पिञ्जते पिञ्जयतीति वा । पिजि + अच । पृषोदरादित्वात् साधु: ।) समूह: । राशि: । इत्यमर: । २ । ५ । ४२ ॥ (यथा, मार्कण्डेये । ८ । ८२ ।
"गृहीतपक्षिपुञ्जश्च शवमाल्यैरलङ्कृत: ॥")

पुट, क चूर्णे । भासि । इति कविकल्पद्रुम: ॥ (चुरा-परं-चूर्णे सकं-भासि अकं-सेट् ।) क, पोटयति । भासि दीप्तौ । इति दुर्गादास: ॥

पुट, त क संसर्गे । इति कविकल्पद्रुम: ॥ (अदन्त-चुरा परं-सकं-सेट् ।) पुटयति पुष्पं सूत्रेण जन: संसृजतीत्यर्थ: । इति दुर्गादास: ॥

पुट, शि श्लेषे । इति कविकल्पद्रुम: ॥ (तुदा-कुटा-परं-अकं-सेट् ।) शि, पुटति अपुटीत् पुपोट । श्लेष: सम्बन्धीभाव: । इति दुर्गादास: ॥

पुटं, क्ली, (पुटतीति । पुट संश्लेषे + क: ।) जाती-फलम् । इति राजनिर्घण्ट: ॥ उपर्य्यधोभावा-पन्नसंयुक्तमृदादिकपालद्वयरूपौषधपाकपात्रम् । धात्वादिमारणोपयुक्तान् पुटप्रकारानाह रस-प्रदीपे ।
"लौहादेरपुनर्भावस्तद्गुणत्वं गुणाधानता ।
सलिले तरणञ्चापि तत्सिद्धि: पुटनाद्भवेत ॥
गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके ।
वनोपलसहस्रेण पूरिते पुटनीयधम् ॥
कोष्ठे रुद्धं प्रयत्नेन गोविष्ठोपरि धारयेत ।
वनोपलसहस्रार्द्धं कोष्ठिकोपरि नि:क्षिपेत् ॥
वह्निं विनि:क्षिपेत्तत्र महापुटमिति स्मृतम् ॥१॥
कोष्ठं मूषा । गोविष्ठा गोइठा । इति महापुटम् ॥
सपादहस्तमानेन कुण्डे निम्ने तथायते ।
वनोपलसहस्रेण पूर्णमध्ये विधारयेत् ॥
पुठनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे ।
अर्धाऽर्द्धानि करणानि अर्द्धान्युपरि नि:क्षिपेत् ॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम् ॥
हस्तश्चतुर्व्विंशत्यङ्गुलप्रमाण: स सपाद: तेन त्रिंशदङ्गुलप्रमाणेनेत्यर्थ: । अतएवोक्तम् ।
साधारणो नरस्तुल्या त्रिंशदङ्गुलको गज: ॥
इति गजपुटम् ॥ २ ॥
अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते ॥ ३ ॥
वितस्तिमात्रकं खातं कथितं कौक्कुटं पुटम् ।
'अरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमर: । २ । ६ । ८६ ॥ नि:सृतकनिष्ठया मुष्ट्योपलक्षितो हस्तोऽरत्निरित्यर्थ: ।
षोडशाङ्गुलके खाते कस्यचित् कौक्कुटं पुटम् ॥४॥
यत् पुटं दीयते खाते त्वष्टसंख्यैर्वनोपलै: ।
कपोतपुटमेतत्तु कथितं पुटपण्डितै: ॥ ५ ॥
गोष्ठान्तर्गोखुरक्षुण्णं शुष्कचूर्णितगोमयम् ।
गोवरं तत् समाख्यातं वारस्तं रससाधने ॥
इहद्भाण्डस्थितैर्यत्रगोवरे दीयते पुटम् ।
तद्गोवरपुटं प्रोक्तं भिषग्भि: सूतभस्मने ॥६॥
इहद्भाण्डे तुषै: पूर्णे मध्ये मूषां विधारयेत ।
त्रिम्नाग्निं मुद्रयेद्भाण्डं तद्भाण्डपुटमुच्यते ॥"*॥
इति भावप्रकाशे पूर्व्वखण्डे २ भाग: ॥

पुट:, पुं क्ली, (पुटतीति । पुट श्लेषे + क: ।) अश्व-खुर: । इति शब्दरत्नावली ॥

पुट:, त्रि, (पुट + क: ।) आच्छादनम् । पत्रादि-रचित: पुष्पाद्याधार: । यथा, रघु: । २ । ६५ ।
"दुग्ध्वा पय: पत्रपुटे मदीयं
पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥"
(यथा च मनौ । ६ । २८ ।
"ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना सकलेन वा ॥")
मिथ:संश्लेष: । इति मुकुट: ॥ इत्यमरटीकायां भरत: ॥

पुटकं, क्ली, (पुटवत् कायतीति । कै + क: ।) पद्मम् । इति शब्दरत्नावली ॥ स्वार्थे कप्रत्यये पुटशब्दार्थोऽप्यत्र ॥

पुटकन्द:, पु, (पुटमिव कन्दो यस्य ।) कोलकन्द: । इति राजनिर्घण्ट: ॥

पुटकिनी, स्त्री, (पुटकानि सन्त्यत्रेति । पुटक + "पुष्करादिभ्यो देशे ।" ५ । २ । १३५ । इति इनि: । स्त्रियां ङीप् ।) पद्मिनी । पद्मयुक्तदेश: । पद्मसमूह: पद्मलता च । इति हेमचन्द्र: ॥

पुटग्रीव:, पु, (पुटमिव ग्रीवा यस्य ।) गर्गरी । ताम्रकुम्भ: । इति मेदिनी । वे, ६१ ॥

पुटपाक:, पु, (पुटेन पाक: ।) पुटाभ्यन्तरितौ-षधपचनम् । अथ पुटपाकविधि: ।
"पुटपक्वस्य कल्कस्य स्वरसो गृह्यते यत: ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपञ्च द्व्यङ्गुलं स्थूलं कुर्य्याद्द्व्यङ्गुलिमात्रकम् ॥
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्य: कर्षमात्रं मधु क्षिपेत ॥
कल्कचूर्णद्रवाद्यास्तु देया: कोलमिता बुधै: ॥
अपि च ।
हे विल्वे स्निग्धमांसस्य परं द्वयं पलं मतम् ।
द्रव्यस्य कुडवोन्मानं सर्व्वमेकत्र पेषयेत ॥
तदेकत्र समालोड्य पत्रै: सुपरिवेष्टितम् ॥
पुटपाकविधानेन तत पक्त्वा तद्रसं बुध: ।
तर्पणोक्तेन विधिना यथावदवचारयेत् ॥
दृष्टिमध्ये निषेव्य: स्यान्नित्यमुत्तानशायिन: ।
स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा ॥
हित: स्निग्धो विरूक्षस्य स्निग्धस्य स तु लेखन: ।
दृष्टेर्ब्बलार्थमितर: पित्तासृग्व्रणवातनुत ॥
इतरो रोपण: ।
स्नेहमांसवसामज्जमेद:स्वाद्वौषधै: कृत: ।
स्नेहन पुटपाक: स्याद्धार्य्यो द्वे वाक्शते तु स: ॥
वाक्शतं छोटिकाशतम् ।
जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंयुतै: ।
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजै: ॥
समुद्रफेनकासीसस्रोतोजदधिमस्तुभि: ।

लेखनो वाक्‌शतं तस्य परं धारणमिष्यते ॥
सम्यगाङ्गलमध्वाम्यतिक्तकटुकभावितः ।
लेखनाच्चिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥
तिक्तकटुकायाह ।
निम्बाम्लताम्रपटोलनिदिग्धिकाभिः
स्यात् पञ्चतिक्तक इति प्रथितो गणोऽयम् ॥
आचरेत्तर्पणोक्तान्तु क्रियां व्यापत्तिदर्शने ॥
व्यापत्तिदर्शने मिथ्याकृतपटपाकजनितव्याधि-
दर्शने ।
नेत्रोऽस्यनिलमाकाशमादर्शं भास्कराणि च ।
नेक्षेत तर्पिते नेत्रे यश्च वा पुटपाकवान् ॥”
इति भावप्रकाशः ॥

पुटभेदः, पुं, (पुटं संश्लिष्टं भिनत्तीति । भिद+
“कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) नदी-
वक्रम् । (नदीचक्रम् । इत्यमरः । १ । १० । ७ ॥
यथा, आर्य्यासप्तशत्याम् । ३६८ ।
“प्रायेणैव हि मलिना मलिनानामाश्रयत्वमुप-
यान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥”)
पत्तनम् । आतोद्यम् । इति मेदिनी । दे, ५० ॥

पुटभेदनं, क्ली, (पुटैरश्वखुरैर्भिद्यते इति । भिद+
कर्म्मणि ल्युट् ।) नगरम् । इत्यमरः ।२।२।१॥
(यथा, महाभारते । १ । १०० । १२ ॥
“स हास्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्य्यन्तामन्वशामद्वसुन्धराम् ॥”)

पुटालुः, पु, (पुटः संश्लिष्ट आलुः ।) कोलकन्दः ।
इति राजनिर्घण्टः ॥

पुटिका, स्त्री, (पुटं अस्त्यस्या इति । पुट+ठन्
+टाप् ।) एला । इति हारावली । ६७ ॥

पुटितं, क्ली, (पुटं जातमस्येति । पुट+इतच् ।
पुट+क्त वा ।) हस्तपुटम् । पाटितम् । स्यूत,
त्रि । इति मेदिनी । त १३४ ॥ आच्छन्नप्रण-
वादियुक्तमन्त्रादौ पुटप्राप्ते च त्रि ॥

पुटी, स्त्री, (पुटतीति । पुट+कः । गौरादित्वात्
ङीष् ।) कौपीनम् । इति जटाधरः ॥ आच्छा
दनम् । पत्रादिरचितः पुष्पाद्याधारः । इत्य-
मरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् ।१४८।
“एरण्डपत्रशयना जनयन्ती स्वेदमलवुजघन-
तटा ।
धूलिपुटीव मिलन्ती ज्वरज्वरं हरति हलिक
वधूः ॥”)

पुटोटजं, क्ली, (पुटं संश्लिष्टमुटजमिव ।) श्वेत-
च्छत्रम् । इति त्रिकाण्डशेषः ॥

पुटोदकः, पु, (पुटे अन्तर्गुप्तपात्रमध्ये उदकं
यस्य ।) नारिकेलः । इति हारावली । १०० ॥

पुट्ट, क तौच्छ्ये । इति कविकल्पद्रुमः ॥ (चुरा-
परं-सकं-सेट् ।) पञ्चमस्वरी । टद्वयान्तः । एक
टकार इति रामः । क, पुट्टयति । तौच्छ्यमल्पी-
भावः । इति दुर्गादासः ॥

पुड, इ मर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वा परं-
सकं सेट् ।) पञ्चमस्वरी । इ, पुण्डते । मर्द्द
चूर्णीकरणम् । इति दुर्गादासः ॥

पुण, श धर्म्मे । इति कविकल्पद्रुमः ॥ (तुदा-परं-
सकं-सेट् ।) शुभक्रियायामित्यन्ये । श, पुणति
शुभं लोकः । पोषिता । इति दुर्गादासः ॥

पुण्डः, पु, (पुण्ड्यते इति । पुडि मर्द्दे+घञ् ।)
तिलकः । इति जटाधरः ॥

पुण्डरी, [न्] पु, हस्तिनां मनुष्याणाञ्च चक्षुष्यः
क्षुद्रविटपः । शालपर्णीपत्रतुल्यपत्रः । पुण्ड-
रिया इति ख्यातः । तत्पर्य्यायः । पौण्डरी-
कम् २ पुण्डरीकम् ३ पुण्डरीयकम् ४ प्रपौण्ड-
रीकम् ५ चक्षुष्यम् ६ पौण्डर्य्यम् ७ तालपुष्प-
कम् ८ सालपुष्पम् ९ दृष्टिकृतम् १० स्थलपद्मम्
११ मालकम् १२ । केचित्तु पूर्व्वदशकं पद्मकाष्ठे
प्रचक्षते ॥ इति शब्दरत्नावली ॥

पुण्डरीकं, क्ली, (पुण्डति अन्यपुष्पाणां गर्व्वं चूर्णी-
करोतीति । पुण्ड मर्द्दे+“फर्फरीकादयश्च ।”
उणां । ४ । २० । इति ईकन्प्रत्ययेन निपा-
तनात् साधुः । “पुणतेः पुण्डरीकम् ।” इत्यु
ज्ज्वलदत्तः ।) शुक्लपद्मम् । तत्पर्य्यायः । सिता-
म्भोजम् २ । इत्यमरः । १ । १० । ४१ ॥ शत-
पत्रम् ३ महापद्मम् ४ सिताम्बुजम् ५ । इति
रत्नमाला ॥ अस्य पर्य्यायान्तरं गुणाश्च श्वेत-
पद्मशब्दे द्रष्टव्याः ॥ (यथा, रघुः । ४ । १७ ।
“पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥”)
पद्ममात्रम् । इति भरतधृतव्याडिः ॥ श्वेत-
च्छत्रम् । भेषजभेदः । इति मेदिनी । कै, १६६ ॥
सप्तमहाकुष्ठानामन्यतमः । तल्लक्षणं यथाह
माधवकरः ।
“सश्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं तदुच्यते ॥”

पुण्डरीकः पु, (पुण्डरीकवद्वर्णोऽस्त्यस्येति । अच् ।)
अग्निकोणस्थदिग्गजः । व्याघ्रः । इत्यमरः ।३।३।
११ ॥ कोषकारभेदः । इति मेदिनी ॥ सहकारः ।
गणधरः । राजिलसर्पः । गजज्वरः । इति
हेमचन्द्रः ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥
(धान्यविशेषः । तद्यथा,—
“पुष्पाण्डकः पुण्डरीकस्तथा महिषमस्तकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कमण्डलुः । श्वेतवर्णः । इत्यनेकार्थकोषः ॥
(क्रौञ्चद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये ।
१२१ । ८१ ।
“देवावृतः परेणापि पुण्डरीको महान् गिरिः ।
एते रत्नमयाः सप्त क्रौञ्चद्वीपस्य पर्व्वताः ॥”
तीर्थविशेषः । यथा, महाभारते ।३।८३।७६।
“शुक्लपक्षे दशम्याञ्च पुण्डरीकं समाविशन् ।
तत्र स्नात्वा नरो राजन् । पुण्डरीकफलं लभेत् ॥”
यज्ञविशेषः । यथा, तत्रैव ।३।३०।१७ ।
“अश्वमेधो राजसूयः पुण्डरीको ऽथ गोसवः ।
एतैरपि महायज्ञैरिष्टं त भू र्दक्षिणैः ॥”
नागविशेषः । यथा, तत्रैव । । १०३ । १३ ।
“नागानामेकवंशानां यथाश्रेष्ठन्तु मे शृणु ।
द्वौ पद्मौ पुण्डरीकश्च पुष्पो मुद्गरपर्णकः ॥”
रामचन्द्रवंशीयनृपविशेषः । यथा, रघुः ।१८।८।
“तेन द्विपानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्य्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥”

पुण्डरीकाः सन्त्यत्रेति । अच् । पुण्डरीक
विशिष्टे, त्रि । यथा, मात्स्ये । १२० । ६८ ।
“पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ।
पुण्डरीकात् पयोदाच्च तस्मात् द्वे सम्प्रसूय-
ताम् ॥”)

पुण्डरीकाक्षं, क्ली, (पुण्डरीकवदक्षिणी यस्मात्
षच् समासे ।) पुण्डर्य्यम् । इति शब्दचन्द्रिका ।

पुण्डरीकाक्षः, पु, (पुण्डरीकवदक्षिणी नेत्रे यस्य
षच् समासे ।) विष्णुः । इत्यमरः ।१ । १ । १६
(यथा, महाभारते । ५ । ७० । ६ ।
“पुण्डरीकं परं धाम नित्यमक्षरमव्ययम् ।
तद्भावात् पुण्डरीकाक्षो दस्युत्रासाज्जनार्द्दनः ॥
“हृदयाख्यपुण्डरीकमश्नुते व्याप्नोति तत्रोपलभ्य
इति पुण्डरीकाक्षः । यत पुण्डरीकाक्षस्तत्
पुण्डरीकं परममध्यमन्त इति श्रुतेः । अक्षिणी
पुण्डरीकाभे यस्येति वा ।” इति शाङ्करभा
ष्यम् ॥) तस्य स्मरणे बाह्याभ्यन्तरशुचित्वं यथ
“अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
इति वामने ३३ अध्याय. ॥
(जलचरपक्षिविशेषः । तद्यथा,—
“उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटी ॥
इति चरके सूत्रस्थाने २७ अध्याये ।

पुण्डरीयकं, क्ली, स्थलपद्मम् । इति शब्दमाला
प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

पुण्डर्य्यं, क्ली, (पुण्डतीति । पुडि+अच् । तस्या
प्रधानम् । शकन्ध्वादित्वात् साधु. ।) प्रपौण्ड
रीकम् । इत्यमरः । २।४।१२७ ॥ “द्वे हस्तिनां
मनुष्याणाञ्च चक्षुष्ये क्षुद्रविटपे शालपर्णीप
तुल्यपत्रे । पुण्डरिया इति ख्याते । प्रकृष्टं पुण्ड
रीकमिव दाहहरणात् प्रपौण्डरीकं प्राः सु
प्रालादित्वादन्तपदस्यादौ वृद्धिः । पुण्डय
खण्डयति दोषान् पुण्डर्य्यं पुडि मर्द्दे नाम्नी
अर्य्यः पौण्डर्य्यमिति पाठे स्वार्थे ष्णः इ
पुण्डरीकादिरप्यत्र ।
‘स्थलपद्मं साधुपुष्पं दृष्टिकृत् पुण्डरीयकम् ॥’
इति रभसः ।” इत्यमरटीकायां भरतः ॥

पुण्ड्रः, पु, (पुण्डान्ते गुडशर्करादार्थं चूर्णीक्रि
इति । पुडि मर्द्दे+“स्फायितञ्चीति ।” उण
२।१३। इति रक् ।) इक्षुभेदः । पुण्ड्रियाक् इ
भाषा । इत्यमरः ।२ । ४ । १६३ । दैत्यविशेष
अतिमुक्तकः । चित्रम् । क्रिमिः । पुण्डरीक
देशविशेषे, पु भूम्नि । इति मेदिनी । रे, ५६
(यथा, मात्स्ये । ११३ । ४५ ।
“प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तक
शाल्वमागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥
तिलकवृक्षः । इति हेमचन्द्रः ॥ इक्षुजद

इति राजनिर्घण्टः ॥ (अश्वदेहस्थचिह्नविशेषः । अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य क्षेत्रजः पुत्रविशेषः । यन्नाम्नैव पुण्ड्रदेशो विख्यातः । यथा, महाभारते । १ । १०४ । ४७—५१ ।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ।
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ॥
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः ।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ॥
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ४ । ३ । ९६ । इति कन् ।) माधवीलता । इत्यमरः । २ । ४ । ७२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥")

तिलकवृक्षः । (पुण्ड्र+स्वार्थे कन् ।) इक्षुभेदः । पुँड़ि आक् इति भाषा । तत्पर्य्यायः । रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसदालिका ७ करङ्कशालिः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । रुचिकारित्वम् । स्निग्धत्वम् । पित्तदाहहरत्वम् । वृष्यत्वम् । तेजोबलविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (अश्वशरीरस्थचिह्नविशेषे, पुं, क्ली । यथा, अश्ववैद्यके । ३ । ७३—८१ ।

"अत ऊर्द्ध्वं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
आनुपूर्व्व्या यथादृष्टं समभिश्वार्थवेदिभिः ॥
शुक्तिशङ्खगदाखड्गपद्मचक्राङ्कुशोपमाः ।
शरासनसमाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः ॥
मत्स्यभृङ्गारप्रासादसर्व्वदीपसन्निभाः ।
श्रीवत्सदर्पणाकाराः शुभदाः परिकीर्त्तिताः ॥
शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति ।
स धन्यः पूजितो नित्यमृजुकश्चैव यो भवेत् ॥
पर्व्वतेन्द्रपताकाभा ये च स्रग्दामसन्निभाः ।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः ॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्व्वशास्त्रानुसारतः ।
अशुभांश्चैव वक्ष्यामि यथायोगं समासतः ॥
काककङ्ककबन्धाहिगृध्रगोमायुसन्निभाः ।
असिताः पीतका रक्ताः पुण्ड्रका नैव पूजिताः ॥
तिर्य्यग्गाश्चैव विच्छिन्नाः शृङ्खलापाशसन्निभाः ।
मूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभाः स्मृताः ॥
जिह्वाकल्मषरूपाणि भस्मवर्णनिभानि च ।
पुण्ड्रकाणि न शस्यन्ते भिन्नवर्णानि वाजिनः ॥"

पुण्ड्रदेशनृपतिः । यथा, महाभारते । २ । ४ । २४ ।

"तथाङ्गवङ्गौ सह पुण्ड्रकेण
पाण्ड्योड्रराजौ च सहान्ध्रकेण ॥")

पुण्ड्रकेलिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य ।) हस्ती । इति शब्दमाला ॥

पुण्यं, क्ली, (पूयतेऽनेनेति । पू+"पूञो यण्णुक् ह्रस्वश्च ।" उणा० ५ । १५ । इति यत् णुगागमो ह्रस्वश्च ।) शुभादृष्टम् । तत्पर्य्यायः । धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ पुण्यभारवोढुमशक्तस्य पण्डितस्य निन्दा यथा, अग्निपुराणे ।

"पण्डितेनापि किन्तेन समर्थेन च देहिनाम् ।
यत् पुण्यं भारसंवोढुमशक्तं पारलौकिकम् ॥"

आत्मकृतपुण्यकथननिषेधो यथा,—

"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
श्लाघानुशोचनाभ्याञ्च भग्नतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ॥"
इति शुद्धितत्त्वे देवलः ॥ * ॥

अदत्तपुण्यभागित्वं पापशब्दे द्रष्टव्यम् ॥ * ॥ शोभनकर्म्म । पावनम् । सुन्दरे, त्रि । इति हेमचन्द्रः ॥ सुगन्धि । इति जटाधरः ॥

पुण्यकं, क्ली, (पुण्याय कायतीति । कै+कः ।) व्रतम् । तच्च उपवासादि । शास्त्रे पुण्यत्वेन पवित्रताजनकत्वेन यद्बोधितमुपवासादि तदेव व्रतं न तु यः कोऽपि नियमः । आदिना नक्तभोजनाक्षारलवणादिपरिग्रहः । इत्यमरभरतौ ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति ।) पतिसौभाग्यस्य श्रीकृष्णतुल्यपुत्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः । तस्य विधिर्यथा,—

महादेव उवाच ।

"हरेराराधनं कृत्वा व्रतं कुरु वरानने । ।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि ॥
देवि । शुद्धे च कालेऽत्र परं नियमपूर्व्वकम् ।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये । ॥
गात्रं सुनिर्म्मलं कृत्वा शिरःसंस्कारपूर्व्वकम् ।
उपोष्य पूर्व्वदिवसं वस्त्रं प्रक्षाल्य यत्नतः ॥
धौते च वाससी धृत्वा उपविश्यासने शुचौ ।
आचम्य तिलकं कृत्वा निर्व्वाप्य आह्निकं पुरः ॥
घटस्यारोपणं कृत्वा स्वस्तिवाचनपूर्व्वकम् ॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ।
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥
व्रते द्रव्याणि नित्यानि चोपहाराणि षोडश ।
देयानि नित्यं देवेशि । कृष्णाय परमात्मने ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥
मधुपर्कञ्च स्नानीयं वस्त्राण्याभरणानि च ।
सुगन्धिपुष्पं धूपञ्च दीपनैवेद्यवन्दनम् ॥
यज्ञसूत्रञ्च ताम्बूलं कर्पूरादिसुवासितम् ।
द्रव्याण्येतानि पूजायाश्चाङ्गरूपाणि सुन्दरि । ॥
देवि । किञ्चिद्विहीनेनैवाङ्गहानिः प्रजायते ।
अङ्गहीनञ्च यत् कर्म्म चाङ्गहीनो यथा नरः ॥
अङ्गहीने च कार्य्ये च फलहानिः प्रजायते ।
अष्टोत्तरशतं पुष्पं पारिजातस्य विष्णवे ।
देयं प्रतिदिनं दुर्गे । स्वात्मनो रूपहेतवे ॥
श्वेतचम्पकपुष्पाणां लक्षमक्षतमीप्सितम् ।
प्रदेयं हरये भक्त्या चक्षुःसौन्दर्य्यहेतवे ॥
नीलोत्पलानां लक्षञ्च देयं कृष्णाय भक्तितः ।
व्रतान्तभूतं देवेशि । चक्षुषो रूपहेतवे ॥
हिमालयोद्भवं लक्षं रुचिरं श्वेतचामरम् ।
प्रदद्यौ केशवायैव केशसौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं दर्पणानां सहस्रकम् ।
देयं नारायणायैव नाभिसौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं पुटकानां सहस्रकम् ।
प्रदेयं गोपिकेशाय नासिकारूपहेतवे ॥
बन्धूकपुष्पलक्षञ्च देयं राधेश्वराय च ।
स्वस्यौष्ठाधरयोश्चैव बहुसौन्दर्य्यहेतवे ॥
मुक्ताफलानां लक्षञ्च दन्तसौन्दर्य्यहेतवे ।
देयं गोलोकनाथाय शैलजे । भक्तिपूर्व्वकम् ॥
रत्नगण्डकलक्षञ्च गण्डसौन्दर्य्यहेतवे ।
सर्व्वेश्वराय दातव्यं व्रते शैलेन्द्रकन्यके । ॥
रत्नपाशकलक्षञ्च देयं सर्व्वेश्वराय च ।
ओष्ठाधःस्थलरूपाय प्राणेशि । भक्तितो व्रते ॥
कर्णभूषणलक्षञ्च रत्नसारविनिर्म्मितम् ।
देयं सर्व्वेश्वरायैव कर्णसौन्दर्य्यहेतवे ॥
माध्वीककलसानाञ्च लक्षं रत्नविनिर्म्मितम् ।
देयं विश्वेश्वरायैव स्वरसौन्दर्य्यहेतवे ॥
सुधापूर्णञ्च कुम्भानां सहस्रं रत्ननिर्म्मितम् ।
देयं कृष्णाय देवेशि । वाक्यसौन्दर्य्यहेतवे ॥
रत्नप्रदीपलक्षञ्च गोपवेशविधायिने ।
देयं किशोरवेशाय दृष्टिसौन्दर्य्यहेतवे ॥
धुस्तूरकुसुमाकारं रत्नपात्रसहस्रकम् ।
देयं गोरक्षकायैव गलसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितं पद्मनालसहस्रकम् ।
देयं तनुकपालाय बाहुसौन्दर्य्यहेतवे ॥
लक्षञ्च रक्तपद्मानां करसौन्दर्य्यहेतवे ।
देयं गोपाङ्गनेशाय नारायणि । हरिव्रते ॥
अङ्गुरीयकलक्षञ्च रत्नसारविनिर्म्मितम् ।
अङ्गुलीनाञ्च रूपार्थं देयं देवेश्वराय च ॥
मणीन्द्रसारलक्षञ्च श्वेतवर्णं मनोहरम् ।
देयं मुनीन्द्रनाथाय नखसौन्दर्य्यहेतवे ॥
सद्रत्नसारहाराणां लक्षञ्चातिमनोहरम् ।
देयं मदनमोहाय वक्षःसौन्दर्य्यहेतवे ॥
सुपक्वश्रीफलानाञ्च लक्षञ्च सुमनोहरम् ।
देयं सिद्धेन्द्रनाथाय स्तनसौन्दर्य्यहेतवे ॥
सद्रत्नवर्त्तुलाकारं लक्षपात्रं मनोहरम् ।
देयं पद्मालयेशाय देहस्य रूपहेतवे ॥
सद्रत्नसाररचितनाभीनालसहस्रकम् ।
प्रदेयं पद्मनाभाय नाभिसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितरथचक्रसहस्रकम् ।
नितम्बसौन्दर्य्यार्थञ्च प्रदेयञ्चक्रपाणये ॥
सुवर्णरत्नकुम्भानां लक्षञ्च सुमनोहरम् ।
प्रदेयं श्रीनिवासाय श्रोणिसौन्दर्य्यहेतवे ॥
शतपत्रस्थलाब्जानां लक्षमम्लानमक्षतम् ।
प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेतवे ॥
सुवर्णरचितानाञ्च खञ्जनानां सहस्रकम् ।
गतिसौन्दर्य्यहेत्वर्थं देयं लक्ष्मीश्वराय च ॥
राजहंससहस्रञ्च गजेन्द्राणां सहस्रकम् ।
सुवर्णच्छत्रलक्षञ्च देयं नारायणाय च ॥

विचित्रं रत्नसारेण मह्यं: सौन्दर्य्यहेतवे ॥
मालतीनाञ्च कुसुमसम्भूतं लक्षमाल्यकं ।
देयं वृन्दावनेशाय हास्यसौन्दर्य्यहेतवे ॥
अमूल्यरत्नलक्षञ्च देयं नारायणाय वै ।
सुव्रते । व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ॥
शुद्धस्फटिकसङ्काशं मणीन्द्रसारलक्षकम् ।
देयं मुनीन्द्रनाथाय मन:सौन्दर्य्यहेतवे ॥
प्रवालसारसङ्काशं मणिसारसहस्रकम् ।
देयं कृष्णाय भक्त्या च प्रियानुरागवृद्धये ॥
माणिक्यसारलक्षञ्च देयं कृष्णाय यत्नत: ।
जन्मन: कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥
कुष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्रहेतवे ॥
रत्नेन्द्रसारलक्षञ्च देयं कृष्णाय यत्नत: ।
असंख्यजन्मपर्य्यन्तं स्वात्मनो धनवृद्धये ॥
वाद्यं नानाप्रकारञ्च कांस्यतालादिकं परम्
व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं श्रावयेद्व्रती ॥
पायसं पिष्टकं सर्पि:शर्करायुक्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वात्मनो भोगवृद्धये ॥
सुगन्धिपुष्पमाल्यानां लक्षमक्षतमाश्रितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे । नानाविधानि च ॥
नानाविधानि पुष्पाणि तुलसीसंयुतानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ॥
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वात्मन: शस्यवृद्ध्यर्थं व्रते जन्मनि जन्मनि ॥
पुष्पाञ्जलिशतं देयं नित्यं पूर्णञ्च पूजने ।
प्रणामशतकं देवि । कर्त्तव्यं भक्तिवृद्धये ॥
षण्मासांश्च हविष्यान्नं मासान् पञ्च फलादिकम्
हवि: पक्षं जलं पक्षं व्रते पक्षे च सुव्रते । ॥
रत्नप्रदीपशतकं वह्निं दद्याद्दिवानिशम् ।
रात्रौ हुताशनं कृत्वा नित्यं जागरणं व्रते ॥
स्मरणं कीर्त्तनं केलि: प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
मैथुनं विविधं त्याज्यं व्रते कीर्त्तिविवृद्धये ।
ज्ञानवृद्धिर्जागरणे सुबुद्धिर्मितभोजने ॥
लोभमोहकामक्रोधभयशोकविवादकम् ।
कलहञ्च परित्याज्यं व्रते बन्धुविवृद्धये ॥
संपूर्णे च व्रते देवि । प्रतिष्ठा तदनन्तरम् ॥
त्रिशतञ्च षष्ट्यधिकं कलसं वस्त्रसंयुतम् ।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम् ॥
त्रिशतञ्च षष्ट्यधिकं सहस्रं विप्रभोजनम् ।
त्रिशतञ्च षष्ट्यधिकं सहस्रं तिलहोमकम् ॥
त्रिशतञ्च षष्ट्यधिकं सहस्रं स्वर्णमेव च ।
देया व्रतसमाप्तौ च दक्षिणा विधिबोधिता ।
अन्यां सम्प्रतिदास्यामि कथयिष्यामि दक्षिणाम् ॥
व्रतस्यास्य फलं देवि । दृढा भक्तिर्हरौ भवेत् ।
हरेस्तुल्यो भवेत् पुत्रो विख्यातो भुवनत्रये ॥
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
स[illegible]सितानां बीजं जन्मनि जन्मनि ॥
इत्येतत् कथितं देवि । व्रतं कुरु सुखेप्सिते ।
पुत्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-४। अध्यायौ ॥

पुण्यकृत् त्रि, (पुण्यं करोति स्मेति । कृ + "सुकर्म्मपापमन्त्रपुण्येषु कृञ: ।" ३।२।८९। इति क्विप् । "ह्रस्वस्य तुक् पिति कृति ।" ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिक: । यथा,
"पुण्यकृच्चाटुकारस्ते किङ्कर: सुरतेषु क: ॥"
इति भट्टि: । ५ । ६८ ॥

पुण्यगन्ध:, पुं, (पुण्य: पवित्रो हृद्यश्च गन्धोऽस्य ।) चम्पक: । इति त्रिकाण्डशेष: ॥

पुण्यजन:, पुं, (पुण्य: विरुद्धलक्षणया पापी चासौ जनश्चेति ।) राक्षस: । इत्यमर: । १।१।६३॥ यक्ष: । (यथा, हरिवंशे । ७ । २६ ।
"सर्पै: पुण्यजनैश्चैव वीरुद्भि: पर्व्वतैस्तथा ॥"
पुण्याश्रितो जन: ।) सज्जन: । इति मेदिनी । ने, १६८ ॥

पुण्यजनेश्वर:, पुं, (पुण्यजनानां यक्षाणामीश्वर: ।) कुवेर: । इत्यमर: । १ । १ । ७३ ॥ (यथा, रघु: । ९ । ६ ।
"समतया वसुवृष्टिविसर्जनै:
नियमनादसताञ्च नराधिप: ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")

पुण्यतृणं, क्ली, (पुण्यं पवित्रं तृणम् ।) श्वेतकुशम् । इति राजनिर्घण्ट: ॥

पुण्यदर्शन:, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्ट: ॥ (यद्दर्शनेन पुण्यं भवति तत्र, त्रि । यथा, रघु: । १ । ८६ ।
"तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधि: ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥")

पुण्यफल:, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेद: । तत्पर्य्याय: । लक्ष्म्याराम: २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यजन्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनु: । ५ । ५३ ।
"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समा: ।
मांसानि च न खादेद्यस्तयो: पुण्यफलं समम् ॥")

पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + ण्वि: ।) पुण्यविशिष्ट: । यथा, पञ्चधायके ।
"क्रीडावन्तो विनीता लघुसुरतरता: पुण्यभाज: शशा: स्यु: ॥"

पुण्यभू:, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूर्भूमि: ।) आर्य्यावर्त्तदेश: । यथा, हेमचन्द्रे ।४।१६।
"आर्य्यावर्त्तो जन्मभूमिर्जिनचक्र्यर्द्धचक्रिणाम् ।
पुण्यभूराचारवेदी मध्यं विन्ध्यहिमालयो: ॥"

पुण्यभूमि:, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमि: ।) आर्य्यावर्त्तदेश: । इत्यमर: ।२।१।८॥ स तु विन्ध्यहिमालययोर्मध्यदेश: । यथा,—
"आसमुद्रात्तु पूर्व्वस्मादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधा: ॥"
इति भरतधृतमनु: ॥
पुत्रद: । इति शब्दरत्नावली ॥

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य व: ।) पुण्ययुक्त: । तत्पर्य्याय: । सुकृती २ धन्य: ३ । इत्यमर: ।३।१।३॥ सुकृत ४ पुण्यकृत ५ । इति जटाधर: ॥ धर्म्मवान् ६ श्रेयस्वान् ७ वृषवान् ८ । एते पुण्यपर्य्यायकशब्देभ्यो मत्वर्थप्रत्ययेन निष्पन्ना: ॥ (यथा, महाभारते । १२ । २६७ । २८ ।
"ऊर्द्ध्वं भित्त्वा प्रतिष्ठन्ते प्राणा: पुण्यवतां नृप ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥")

पुण्यश्लोक:, पुं, (पुण्य: पुण्यदायक: श्लोको यशश्चरित्रं वा यस्य ।) विष्णु: । इति श्रीभागवतम् ॥ युधिष्ठिर: । इति महाभारतम् ॥ नलराज: । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
"पुण्यश्लोकस्य वै दूतो वार्ष्णेय इति विश्रुत: ॥")
पुण्यचरित्रे, त्रि ॥ (यथा, भागवते ।१।१४।१।
"संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुञ्च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥")

पुण्यश्लोका, स्त्री (पुण्य: पुण्यजनक: श्लोको यशश्चरित्रं वा यस्या: ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
"पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिर: ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दन: ॥"
इति पुराणम् ॥

पुण्या, स्त्री, (पुनाति या पूयतेऽनयेति वा । पू + "पूञो यत् णुक् ह्रस्वश्च ।" उणा० ५ । १५ । इति यत् णुक् ह्रस्वश्च धातो: । ततष्टाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥

पुण्यात्मा, त्रि, (पुण्य: आत्मा स्वभावो यस्य ।) पुण्यस्वभाव: । तस्य गत्यादिर्यथा,—
सुयज्ञोवाच ।
"शृणु विप्र । प्रवक्ष्यामि यत्त्वया श्रोतुमिष्यते ।
पुण्यात्मनां पापिनाञ्च पन्थानं सुखदु:खदम् ॥
आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् ।
शृणुष्व द्विजशार्दूल । शृण्वतां प्रीतिवर्द्धनम् ॥
प्रस्तरैरिष्टकैर्बद्धो दिव्यवस्त्रै: समावृत: ।
भाति पुण्यात्मनां पन्था: सर्व्वोपद्रववर्ज्जित: ॥
क्वचिद्गन्धर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिच्च मञ्जुघोषाभिरप्सरोभिश्च नृत्यते ॥
क्वचिच्च वीणाक्वणितं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिद्वायु: सुशीतल: ॥
क्वचित् पुष्पा: शीततोया: कुत्रचित् भक्तशालिका: ।
क्वचिद्देवाश्च गन्धर्व्वा: पठन्ति स्तवमुत्तमम् ॥
क्वचित क्वचिद्दीर्घिकाश्च फुल्लपद्मसुशोभिता: ।
सुच्छाया: पादपा: क्वापि पुष्पिता बकुलादय: ॥
समस्तसुखसम्पन्ने पथि गच्छन्ति मानवा: ।
पुण्यात्मानो द्विजश्रेष्ठ । सुखस्थत्वमवाप्य च ॥
केचित्तुरङ्गमारूढा नानालङ्कारभूषिता: ।
उद्दण्डधवलच्छत्रैर्गच्छन्त्यावृतमस्तका: ॥
केचिद्यान्ति गजारूढा रथारूढाश्च केचन ।
यानारूढा जना: केचित् सुखेन यममन्दिरम् ॥

केचिद्दिव्याङ्गनाहस्तन्यस्तचामरवायुभिः ।
गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः ॥
केचिद्दिव्याङ्गमधराः सुवस्त्रैर्विभूषिताः ।
भुञ्जन्तो यान्ति ताम्बूलं पुण्याह्लानो यमालयम् ॥
विमानानि विना केचिच्चालयन्तो दिशो दश ।
व्रजन्ति धर्मनगरं जलदच्छत्रनिवासिनः ॥
केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः ।
सुधापानं प्रकुर्व्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्दधीनि खादन्तः केचिन्नानाफलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
नानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् ॥
चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च स्मेरचारुतराननः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः ।
सर्व्वे नारायणाकारा बभूवुर्मधुरोक्तयः ॥
ततः स्वयं धर्म्मराजस्तान् सर्व्वाननुजोत्तमान् ।
परमां प्रीतिमासाद्य मित्रवत् प्रत्ययेद्धिज ।॥
दिव्यैरन्नैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु तानुवाचाथ भास्करिः ॥
यम उवाच ।
यूयं सर्व्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गच्छत परमं पदम् ॥
संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् ॥
इत्युक्ता धर्म्मराजेन ते सर्व्वे द्विजसत्तम ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥"
इति पाद्मोत्तरे क्रियायोगसारे २० अध्यायः ॥
पुण्याहं, क्ली, (पुण्यञ्च तदहश्चेति । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "उत्तमैकाभ्याञ्च ।" ५ । ४।९० । इति अह्नादेशो न ।) पुण्यदिनम् । इत्यमरः ॥ (यथा, अमरुशतके । ६१ ।
"पुण्याहं व्रजमङ्गलं सुदिवसं प्रातः प्रयातस्य ते यत्स्नेहोचितमीहितं प्रियतम । त्वं निर्गतः श्रोष्यसि ॥")
पुण्याहवाचनं, क्ली, (पुण्याहस्य वाचनम् ।) देवादिकर्म्मादौ मङ्गलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनम् । यथा, —
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्त्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युद्वाहतत्त्वे यमः ॥
[illegible], गतौ ॥ (भ्वा-परं-सकं-सेट ।) तद्दयान्तः । पुत्तका । मौत्रधातुरयम् । इति दुर्गादासः ॥
[illegible]लक,, पु, (पुत्त गतौ + भावे घञ् । पुत्तं गमनं लाति अन्यस्मादिति । ला + कः । ततः संज्ञायां कन् । गत्याश्रयेणैव हि गमनादिक्रियावत्त्वादस्य तथात्वम् ।) धनादिनिर्म्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा "आचारात् यौवनाश्च प्रपञ्चे पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि दद्यात् ।" इति शुद्धितत्त्वम् ॥
पुत्तलिका, स्त्री, दृणकाष्ठप्रस्तरधातुरत्नादिनिर्म्मितप्रतिमूर्त्तिः । पुत्तली भवति स्वार्थे कनि ईकारस्य ह्रस्वे टापि नियमात् ॥
पुत्तली, स्त्री, (पुत्तं गमनं लाति अन्याश्रयेणेति । ला + कः । ततो ङीष् ।) स्वर्णादिनिर्म्मितप्रतिमूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥
"अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।
स्वर्णमयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम् ॥"
पुत्तिका, स्त्री, (पुत्तं इतस्ततो भ्रमणमस्त्यस्या इति । पुत्त + ठन् । ततष्टाप ।) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पत्तङ्गिका २ । इत्यमरः । २ । ५ । २७ ॥ (पिपीलिकाप्रभेदः । यथा, मनुः । ४ । २३८ ।
"धर्म्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्व्वभूतान्यपीडयन् ॥")
पु(त्र)त्रः, पु, लग्नात् पञ्चमस्थानम् । यथा,—
"पुत्रस्थेऽर्क्के नरोऽसौ प्रथममुतहतः सिंहराशौ सपुत्रः ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥
(पुनाति पित्रादीनिति । पू + "पुवो ह्रस्वश्च ।" उणा० ४ । १६४ । इति क्तः धातोर्ह्रस्वत्वञ्च । तकारद्वयं तु पुन्नामनरकात् त्रायत इति । पुत् + त्रै + डः । पितॄन् पातीति व्युत्पत्त्या पृषोदरादित्वात् साधुः । इति रामायणे ।२।१०७।१२। श्लोकटीकायां रामानुजः ।) पुमन्तानः । पुन्नामनरकत्राता । पुत इति बेटा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनूजः ६ अपत्यम् ७ दायादः ८ कुलाधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रसूतिः १३ स्वजः १४ । इति शब्दरत्नावली ॥ अस्य निरुक्तिर्यथा, —
"पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥"
इति महाभारते । १ । ७४ । ३९ ॥
(यथा च रामायणे । २ । १०७ । १२ ।
"पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः पितॄन् यः पाति सर्व्वतः ॥")
स च द्वादशविधः यथा,—
"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥"१॥
तेषां लक्षणानि यथा, —
"स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्त्रम्प्रथमकल्पितम् ॥२॥
यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्त्रः क्षेत्रजः स्मृतः ॥३॥
माता पिता वा दद्यातां यमद्भिः पुत्त्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥४॥
सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्त्रं पुत्त्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥ ५ ॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥६॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्त्रं परिगृह्णीयादपविद्धः स उच्यते ॥ ७ ॥
पितृवेश्मनि कन्या तु यं पुत्त्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥८॥
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥९॥
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥१०॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥११॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयं दत्तस्तु स स्मृतः ॥१२॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥१३॥
क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्त्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥"
इति मात्स्ये ६ अध्यायः ॥ * ॥
चतुर्व्विधपुत्त्रा यथा,—
सुमना उवाच ।
"ऋणसम्बन्धिनः केचित् केचिन्न्यासापहारकाः ।
रिपवश्च प्रियाश्चेति स्वकर्म्मवशवर्त्तिनः ॥
भेदैश्चतुर्भिरायान्ति पुत्त्रा मित्रा स्त्रियस्तथा ।
भार्य्या पिता च माता च भृत्याः स्वजनबान्धवाः ॥
स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले ।
न्यासापहारभावेन यस्य यस्य कृतं भुवि ॥
न्यासस्वामी भवेत् पुत्त्रो गुणवान् रूपवान् भुवि ।
येन चापहृतं न्यासं तस्य गेहे न संशयः ॥
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः ।
न्यासस्वामी स पुत्त्रोऽभून्न्यासापहारकस्य च ॥
गुणवान् रूपवांश्चैव सर्व्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयंस्तस्य पुत्त्रो भूत्वा दिने दिने ॥
प्रियवाक्यधरो वापि बहुस्नेहं प्रदर्शयन् ।
स्वीयं द्रव्यं समुद्धृत्य प्रीतिमुत्पाद्य चातुलाम् ॥
भुक्त्वा तु यौवनान्ते तु तदा याति पुनर्व्रजन् ।
यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा ॥
दुःखमेव महत्तत् कृत्वा दारुणं प्राणनाशनम् ।
तादृशं तस्य दत्त्वा स पुत्त्रो भूत्वा महागुणैः ॥
न्यत्पादयंस्तथा भूत्वा मरणं यान्ति ते तथा ।
[illegible] तदा प्रयान्त्येव प्रकृत्य पुत्त्रः पुनः ॥
यदाह पुत्त्र गच्छेति पुलायं [illegible] करोति सः ।
तदा हास्यं करोत्येष कः कस्य पुत्त्रो हि कस्य च ॥
अनेनापि कृतं न्यासं महायं परिचारिणा ।
द्रव्यापहारोऽपि पिता पूर्व्वमदेव तस्य च ॥
पित्राचलं मया दत्तमद्यैव हि दुरात्मनः ।

इत्थापहरणेनापि मम प्राणा गताः किल ॥
दुःखेन महता चैव यदाहं पीडितः पुरा ।
तथा दुःखं प्रदत्त्वाहं द्रव्यं सुद्दाप्यसुत्तमम् ॥
भोगेन सर्व्वमादाय चिरादिश्वास्य सौख्यवत् ।
गतोऽस्मि स्वगृहञ्चाद्य कस्याहं सुत ईदृशः ॥
न चैषोऽपि पिता पूर्व्वमद्दैव न च कस्यचित् ।
पिशाचत्वं मया दत्तमद्दैव च दुरात्मनः ॥
दानमुक्ता प्रयात्येव तं प्रहस्य पुनः पुनः ।
प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् ॥
एवं न्यासस्य सम्बन्धात पुत्त्राः किल्ल भवन्ति वै ।
समारे दुःखबहुला दृश्यन्त यत्र तत्र हि ॥१॥
ऋणसम्बन्धिनः पुत्त्रान् प्रवक्ष्यामि तवाग्रतः ।
ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल ॥
अर्थदाता सुतो भूत्वा भ्राता वाथ पिता प्रियः ।
मित्त्ररूपेण वर्त्तेत अत्यहृष्टः सदैव सः ॥
गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः ।
जल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च ॥
नित्यं मिष्टं समश्नाति भोगान् भुञ्जीत नित्यशः ।
द्यूतकर्म्मरतो नित्यं चौरकर्म्मणि नित्यशः ॥
गृहाद्द्रव्यं बलाद्धर्त्ता वार्य्यमाणः प्रकुप्यति ।
पितरं मातरञ्चैव कुत्सते च दिने दिने ॥
दायकञ्चासकञ्चैव बहुनिष्ठुरजल्पकः ।
वञ्चयित्वैव सुद्रव्यं हृत्वा सुखेन निष्ठति ॥
जातकर्म्मादिभिर्व्यत्यं द्रव्यं गृह्णाति दारुणः ।
पुनर्व्विवाहसंयोगात्मानाभेदैरनेकधा ॥
एवं संक्षीयते द्रव्यं नैवमेतद्ददात्यपि ।
गृहक्षेत्रादिकं सर्व्वं ममैव हि न संशयः ॥
पितरं मातरञ्चैव वदत्येव दिने दिने ।
सुदृढैर्मुषलैश्चैव कशाघातैस्तु दारुणैः ॥
मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् ।
निःस्नेहो निघृणश्चैव जायते नात्र संशयः ॥
श्राद्धकार्य्याणि दानानि न करोति कदाचन ।
एवंविधाश्चयः पुत्त्रा भवन्ति च महीतले ॥ २ ॥
रिपुपुत्त्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ।।
बाल्ये वयसि संप्राप्ते रिपुवद्वर्त्तते सदा ॥
पितरं मातरञ्चैव क्रीडमानो हि ताडयेत् ।
ताडयित्वा प्रयात्येव प्रहस्यैव पुनः पुनः ॥
पुनरायाति तं तत्र पितरं मातरं पुनः ।
सक्रोधो वर्त्तते नित्यं वैरकर्म्मणि सर्व्वदा ॥
पितरं मारयित्वा तु मातरञ्च पुनः पुनः ।
प्रयात्येव स दुष्टात्मा पूर्व्ववैरानुभावतः ॥ ३ ॥*॥
अथातः संप्रवक्ष्यामि यस्माल्लभ्यो भवेत प्रियः ।
जातमात्रः प्रियं कुर्य्याद्बाल्ये नटनक्रीडनैः ॥
वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम् ।
भक्त्या संतोषयेन्नित्यं तावुभौ परिपालयेत् ॥
स्नेहेन वचसा चैव प्रियसम्भाषणेन च ।
मृतौ गुरू समाज्ञाय स्नेहेन रुदते पुनः ॥
श्राद्धकर्म्माणि सर्व्वाणि पिण्डदानादिकां क्रियाम् ।
करोत्येव सुदुःखार्त्तस्तेभ्यो यात्रां प्रयच्छति ॥
ऋणत्रयान्वितः स्नेहान्निर्य्यापयति निश्चितः ।
यस्माल्लभ्यं भवेत् कान्त प्रयच्छति न संशयः ।
पुत्त्रो भूत्वा महाप्राज्ञः अनेन विधिना किल ॥४॥
उदासीनं प्रवक्ष्यामि तवाग्रे प्रिय । साम्प्रतम् ॥
उदासीनेन भावेन सदैव परिवर्त्तते ।
ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति ॥
नैवोपयाति संत्यज्य उदासीनो द्विजोत्तम ।।
तवाग्रे कथितं सर्व्वं पुत्त्राणां गतिरीदृशी ॥
यथा पुत्त्रास्तथा भार्य्या पिता माताथ बान्धवाः ।
भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा ।
गजा महिष्यो दास्यश्च ऋणसम्बन्धिनस्त्वमी ॥”*
सुपुत्त्रलक्षणं यथा,—

वशिष्ठ उवाच ।

“पुत्त्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम् ।
पुण्यप्रसक्तो यस्यात्मा सत्यधर्म्मरतः सदा ।
बुद्धिमान् ज्ञानसम्पन्नस्तपस्वी वाग्विदांवरः ॥
सर्व्वकर्म्मसु सन् धीरो वेदाध्ययनतत्परः ।
सर्व्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः ॥
याजकः सर्व्वयज्ञानां दाता त्यागी प्रियंवदः ।
विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत्सदा ॥
पितृमातृपरो नित्यं सर्व्वस्वजनवत्सलः ।
कुलस्य तारको विद्वान् कुलस्य परिपोषकः ॥
एवं गुणैः सुसंयुक्तः सुपुत्त्रः सुखदायकः ॥”*॥
पुत्त्रस्य जङ्गमतीर्थत्वं यथा,—
“सर्व्वतीर्थाद्वरं तीर्थं पुत्त्रतीर्थमुदाहृतम् ।
यद्वेणो वैणतवंशो सर्व्वधर्म्मबहिष्कृतः ॥
पृथुना पुत्त्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्त्रं परमं तीर्थं प्राप्य मुच्यन्ति पूर्व्वजाः ।
पितापि ऋणमुक्तः स्याज्जाते पुत्त्रे महात्मनि ॥”
वैष्णवपुत्त्रस्य पूर्व्वपुरुषत्रातृत्वं यथा,—
“वैष्णवो यदि पुत्त्रः स्यात स तारयति पूर्व्वजान् ।
पितृनधस्तना वंशास्तारयन्त्यतिपावनाः ॥”*॥
कुपुत्त्रजनने पितॄणां नरकगमनं यथा,—
“तथा यदि कुपुत्त्रः स्यात्तेन मज्जन्ति पूर्व्वजाः ।
सुघोरे नरके दीनाः प्रपन्ति च मुहुर्मुहुः ॥
यथा जलं कुप्लवेन तरन्मज्जति मूढधीः ।
तथा पिता कुपुत्त्रेण तमस्यन्धे निमज्जति ॥
जातमात्रे कुले जन्मौ संशोरते पितामहाः ।
किमेषोऽधो नयेदस्मानूर्द्ध्वं वा वैष्णवो भवन् ॥”
इति पाद्मे भूमिखण्डे ११ । १२ । १८ । १२० ।
अध्यायाः ॥ * ॥
सप्तविधपुत्त्रा यथा,—
“वरजो वैर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाञ्च गृहीता सप्तमः सुतः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥*॥
पुत्त्रमुखदर्शने पुण्यं यथा,—

पार्व्वत्युवाच ।

“गृहमागत्य प्राणेश । तपसां फलदायकम् ।
कस्मै कस्मै ध्यासते य तं पश्यागत्य मन्दिरम् ॥
शीघ्रं पुत्त्रमुखं पश्य पुण्यबीजं महोत्सवम् ।
पुन्नामनरकत्राणकारणं भवतारणम् ॥
स्नानञ्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दक्षिणा ।
पुत्त्रस्य दर्शनस्यास्य कलां नार्हन्ति षोडशीम् ॥
सर्व्वदानेन यत् पुण्यं यत् पृथिव्याः प्रदक्षिणम् ।
पुत्त्रदर्शनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥
सर्व्वैस्तपोभिर्यत् पुण्यं यदेवानशनैर्व्रतैः ।
सत्पुत्त्रोद्भवपुण्यस्य कलां नार्हन्ति षोडशीम् ॥
यद्विप्रभोजनैः पुण्यं यदेव सुरसेवनैः ।
सत्पुत्त्रप्राप्तिपुण्यस्य कलां नार्हन्ति षोडशीम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ८ अध्यायः ॥*॥
पुत्त्रोत्सवविधिर्यथा,—
“परं पुत्त्रोत्सवं नन्दश्चकार परमादरात ।
ददौ यशोदा गोपीभ्यो ब्राह्मणीभ्यो ददौ मुदा ।
धनानि नानावस्तूनि तैलसिन्दूरमेव च ॥”
अपि च ।
“नन्दः सचेलः स्नात्वा च धृत्वा धौते च वाससी ।
पारम्पर्य्यविधं तत्र चकार हृष्टमानसः ॥
ब्राह्मणान् भोजयामास कारयामास मङ्गलम् ।
वाद्यानि वादयामास वन्दिभ्यश्च ददौ धनम् ॥
ततो नन्दश्च सानन्दं ब्राह्मणेभ्यो ददौ धनम् ।
सद्रत्नानि प्रवालानि हीरकाणि च सादरम् ॥
तिलानां पर्व्वतान् सप्त सुवर्णं काञ्चनं सुते ।।
रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ॥
दधि दुग्धं शर्कराश्च नवनीतं घृतं मधु ।
मिष्टान्नं लड्डुकौघञ्च स्वादूनि मोदकानि च ॥
भूमिञ्च सत्वशस्याढ्यां वायुवेगांस्तुरङ्गमान् ।
ताम्बूलानि च तैलानि दत्त्वा हृष्टो बभूव ह ॥”
पुत्त्रप्रशंसा यथा —
“धनं धान्यञ्च रत्नं वा तत् सर्व्वं पुत्त्रहेतुकम् ।
न भक्षितं यत् पुत्त्रेण तद्द्रव्यं निष्फलं भुवि ॥
शतकूपाधिका वापी शतवापीसमं सरः ।
सरःशताधिको यज्ञः पुत्त्रो यज्ञशताद्वरः ॥
तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम् ।
सुखप्रदोऽपि सत्पुत्त्रः प्राणेभ्योऽपि सुनिश्चितम् ।
पुत्त्रादपि परो बन्धुर्न भूतो न भविष्यति ॥”
पुत्त्रात् पराजये आनन्दयुक्तत्वं यथा,—
“नन्दः सपुलको हृष्टः सभार्य्यां साश्रुलोचनः ।
आनन्दयुक्ता मनुजा यदि पुत्त्रैः पराजिताः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ । १४ । २१
अध्यायाः ॥ * ॥
बहवः पुत्त्राः काम्याः । यथा,—
“एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत ।
यजेद्वा चाश्वमेधेन नीलं वा वृषमुत्सृजेत ॥”
मातापित्रोराज्ञाकारिकनिष्ठपुत्त्रस्यापि राज्य
भागित्वं यथा,—

ययातिरुवाच ।

“पुत्त्रो यस्त्वनुवर्त्तेत स राजा पृथिवीपतिः ।
भवन्तः प्रतिजानन्तु पुरू राज्येऽभिषिच्यताम् ॥

प्रकृतय ऊचुः ।

यः पुत्त्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ।

इति मात्स्ये २७।३४ अध्यायौ ॥ * ॥

सत्पुत्त्रोत्पत्तिमात्रेण पुन्नामनरकत्राणं स्वर्ग
गमनञ्च । यथा,—
“सत्पुत्त्रेण मुनिश्रेष्ठाः सम्त्पन्नेन दुर्म्मतिः ।
उत्तरारान्वियात् स्वर्गं पुन्नामनरकादुद्धृतम् ॥”

इत्यग्निपुराणम् ॥

अपि च ।
"सत्पुत्त्रेण च जातेन वेणोऽपि विदितं ययौ ।
पुन्नामनरकात्त्रात: स तेन सुमहात्मना ॥"
इति विष्णुपुराणे । १ । १३ । ४१ ॥ * ॥
विद्यादिरहितस्य पुत्त्रस्य निन्दा यथा,—
"तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ।
कोऽर्थः पुत्त्रेण जातेन यो न विद्वान् धार्म्मिकः ॥
एकेनापि सुपुत्त्रेण विद्यायुक्तेन धीमता ।
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वनं सुवासितं सर्व्वं सुपुत्त्रेण कुलं यथा ॥
एको हि गुणवान् पुत्त्रो निर्गुणेन शतेन किम् ।
चन्द्रो हन्ति तमांस्येको न च ज्योतिः सहस्रशः ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्त्रं मित्त्रवदाचरेत् ॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम् ।
म्रियमाणो हरेत् प्राणान् नास्ति पुत्त्रसमो रिपुः ॥
शौर्य्ये तपसि दाने वा यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥"
इति गारुडे ११४।११५ अध्यायौ ॥ * ॥
स च मध्यमोत्तमाधमभेदेन त्रिविधः । यथा,—
"यदुपात्तं यशः पित्रा धनं वीर्य्यमथापि वा ।
तन्न ह्रापयते यस्तु स नरो मध्यमः स्मृतः ॥
तद्वीर्य्याभ्यधिकं यस्तु पुनरन्यत् स्वशक्तितः ।
निष्पादयति तं प्राज्ञा वदन्ति नरमुत्तमम् ॥
यः पित्रा समुपात्तानि धनवीर्य्ययशांसि च ।
न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अपि च ।
"उत्तमश्चिन्तितं कुर्य्यात् प्रोक्तकारी च मध्यमः ।
अधमोऽश्रद्धया कुर्य्यादकर्त्ताचरितं पितुः ॥"
इति महाभारतम् ॥
(अनुरूपपुत्त्रप्राप्त्युपायो यथा,—
"ततः समाप्ते कर्म्मणि पूर्ब्बं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनु परिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राज्यशेषं प्राश्नीयात् । पूर्ब्बं पुमान् पश्चात् स्त्री नचोच्छिष्टमवशेषयेत् । ततस्तौ सह संवसेतामष्टरात्रं तथाविधपरिच्छदावेव तथेष्टं पुत्त्रं जनयेताम् । या तु स्त्री श्यामं लोहिताक्षं व्यूढोरस्कं महाबाहुं पुत्त्रमाशासीत । या वा कृष्णं कृष्णमृदुदीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्यं स्यात् पुत्त्रवर्णानुरूपस्तु यथार्थेरेव तयोः परिवर्होऽन्यः कार्य्यः स्यात् । ह्लिभ्यः शूद्रा तु नमस्कारमेव कुर्य्यात् देवगुरुतपस्विसिद्धेभ्यश्च । या या च यथाविधं पुत्त्रमाशासीत तस्यास्तस्यास्तांस्तां पुत्त्राशिषमनुनिशम्य तांस्तान् जनपदान् मनसानुपरिक्रामयेत । ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्त्रमाशासीत सा सा तेषां तेषां जनपदानामाहारविहारोपचारपरिच्छदाननुविधीयस्वेति

वाच्या स्यात् । इत्येतत् सर्व्वं पुत्त्राशिषां समृद्धिकरं कर्म्म व्याख्यातम् ।"
"तथा च कुर्व्वतो शनैः शनैः पूर्ब्बं प्रवाहेत तमोऽनन्तरं बलवत्तरमिति तस्याश्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाता प्रजाता धन्यं धन्यं पुत्त्रमिति तथास्या हर्षेणाप्यायन्ते प्राणाः ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)
पुत्त्रकः, पुं, (पुत्त्र + स्वार्थे संज्ञायामनुकम्पायां वा कन् ।) पुत्त्रः । (यथा, विष्णुपुराणे ।१।११।२१।
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्त्रक ।।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥")
शरभः । धूर्त्तः । शैलविशेषः । वृक्षभेदः । इति मेदिनी । के, १२४ ॥ पतङ्गकः । अनुकम्पान्वितजनः । इति शब्दरत्नावली ॥
पुत्त्रकन्दा, स्त्री, (पुत्त्रप्रदो कन्दोऽस्याः । अस्याः कन्दस्य गर्भदोषनाशेन पुत्त्रदात्वात् तथात्वम् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥
पुत्त्रका, स्त्री, (पुत्त्र + स्वार्थे संज्ञायां वा कन् । टाप् । "न यासयोः ।" ७ । ३ । ४५ । इत्यस्य "सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम् ।" इति वार्त्तिकोक्त्या ढान इत्वस्य पक्षेऽकारः ।) पुत्त्रिका । इति शब्दरत्नावली ॥
पुत्त्रजीवः, पु, (पुत्त्रं गर्भं जीवयतीति । जीवि + अण् ।) वृक्षविशेषः । जियापुता इति भाषा । तत्पर्य्यायः । श्लीपदापहः २ । इति त्रिकाण्डशेषः ॥ कुमारजीवः ३ पुत्त्रश्रेणिकः ४ । इति रत्नमाला ॥ पवित्रः ५ गर्भदः ६ सुतजीवकः ७॥ अस्य गुणाः । हिमत्वम् । वृष्यत्वम् । श्लेष्मगर्भजीवदात्वम् । चक्षुष्यत्वम् । पित्तशमनत्वम् । दाहतृष्णानिवारणत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । वातकारित्वम् । बद्धमूत्रमलत्वम् । स्वादुत्वम् । पटुत्वम् । कटुत्वम् । इति भावप्रकाशः ॥
पुत्त्रजीवकः, पुं, (पुत्त्रं गर्भं जीवयतीति । जीवि + ण्वुल् । द्वितीयाया अलुक् ।) पुत्त्रजीवकवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने १८ अध्याये ।
"अनेनैव विधानेन पुत्त्रजीवकजं रसम् ।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित् ॥")
पुत्त्रस्य जीवके, त्रि ॥
पुत्त्रदा, स्त्री, (पुत्त्रं गर्भं ददाति सेवनेनेति । दा + कः ।) वन्ध्याकर्कोटकी । लक्ष्मणाकन्दः । गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥
पुत्त्रदात्री, स्त्री, (पुत्त्रं ददाति सेवनेनेति । दा + तृच् + ङीप् । वन्ध्यादोषनाशित्वादस्यास्तथात्वम् ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । वातारिः २ भ्रमरी ३ श्वेतपुष्पिका ४ वृत्तपत्रा ५ अतिगन्धालुः ६ वेणीजाता ७ पुत्त्रश्रेणी ८ । अस्या गुणाः । वातकटुत्वकफनाशित्वम् । सुरभित्वम् । सर्व्वदा पथ्यत्वम् । वन्ध्यादोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुत्त्रप्रदा, स्त्री, (पुत्त्रं प्रददाति सेवनेनेति । प्र + दा + कः । टाप् ।) ऋषिका । इति राजनिर्घण्टः ॥
पुत्त्रभद्रा, स्त्री, (पुत्त्रस्य भद्रमस्या इति ।) बृहज्जीवन्ती । इति राजनिर्घण्टः ॥
पुत्त्रशृङ्गी, स्त्री, (पुत्त्रं पवित्रं शृङ्गमिव पुष्पमस्याः । गौरादित्वात् ङीष् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥
पुत्त्रश्रेणी, स्त्री, (पुत्त्राणां तनसन्तानानां श्रेणिरिव । ङीप् ।) मूषिकपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये ।
"श्यामा महाश्यामा त्रिवृद्दन्ती शङ्खिनी तिल्वककम्पिल्लकरम्यकक्रमुकपुत्त्रश्रेणीगवाक्षी राजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥")
पुत्त्रसूः, स्त्री, (पुत्त्रं सूते इति । सू + क्विप् ।) पुत्त्रजनिका । यथा,—
"पुत्त्रसूः पुण्यभूमिः स्यात्तनयः पुत्त्रिकाप्रसूः ॥"
इति शब्दरत्नावली ॥
पुत्त्रान्नादः, त्रि, (पुत्त्रस्य अन्नं तदुपलक्षितमन्नमत्तीति । अद + अण् ।) पुत्त्रान्नभोजी । तत्पर्य्यायः । कुटीचकः २ । इति त्रिकाण्डशेषः ॥
पुत्त्रिका, स्त्री (पुत्त्री + स्वार्थे कन् टाप् । "केऽणः ।" ७ । ४ । १३ । इति ह्रस्वः ।) कन्या । तत्पर्य्यायः । आत्मजा २ दुहिता ३ पुत्त्री ४ तनुजा ५ सुता ६ अपत्यम् ७ पुत्त्रका ८ स्वजा ९ तनया १० नन्दिनी ११ । इति शब्दरत्नावली ॥
(यथा, पञ्चतन्त्रे । ३ । २२१ ।
"पुत्त्रिकार्थेन । तात । अतिदृष्टनामकोऽयं नाहमेतमभिलषामि ॥" पुत्त्रीव प्रतिकृतिरस्या इति । पुत्त्री + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ह्रस्वश्च ।) पुत्तलिका । यावतूलकः । इति मेदिनी । के, १२४ ॥
(यथा, सुश्रुते सूत्रस्थाने । १६ अध्याये ।
"पौतीपमपालिकभयतः क्षीणपुत्त्रिकाश्रितो निर्व्वेधिमः स्थलाश्रममविषमपालिश्च योजिमः ॥"
पुत्त्रस्वरूपत्वेन कृता कन्या । तद्गर्भजातः पुत्त्रस्तु कन्यादातुः पुत्त्रो भवतीति । यथा, मनौ । ९ । १२७ १२८ ।
"अपुत्त्रोऽनेन विधिना सुतां कुर्व्वीत पुत्त्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम् ॥"
यथा च महाभारते । १ । ६६ । १२ ।
"ताः सर्व्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः ।
पुत्त्रिकाः स्थापयामास नष्टपुत्त्रः प्रजापतिः ॥")
पुत्त्रिकापुत्त्रः, पु, (पुत्त्रिकायाः जातोऽस्याः पुत्त्रः स हि मदीयः पुत्त्रो भविष्यतीति पुत्त्रस्वरूपत्वेन कृतायाः सुतायाः पुत्त्रः । । पुत्त्रिकायाः सुतः । स च औरससमः । यथाह वशिष्ठः ।
"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्त्रः स मे पुत्त्रो भवेदिति ॥
अथवा पुत्त्रिकैव सुतः पुत्त्रिकासुतः सोऽप्यौरससम एव पितृवयवानामल्पत्वान्मातृवयवानां

बाहुल्याच्च । यथाह वशिष्ठः । द्वितीयः पुत्रिके-
ति । द्वितीयः पुत्रः कन्येत्यर्थः ।" इति मिता-
क्षरा ॥

पुत्रिकाप्रसूः, स्त्री, (पुत्रिकायाः कन्यायाः प्रसू-
र्जननी ।) पुत्रिकाजननी । तत्पर्य्यायः ।
धनसूः २ । इति शब्दरत्नावली ॥

पुत्रिकासुतः, पुं, (पुत्रिकायाः सुतः ।) पुत्रि-
कायाः पुत्रः । पुत्रिकैव पुत्रः । अस्य प्रमाणं
पुत्रिकापुत्रशब्दे द्रष्टव्यम् ॥

पुत्रिणी, स्त्री, (पुत्रोऽस्या अस्तीति । पुत्र +
इनि + ङीप् ।) पुत्रवती । यथा,—
"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुः ॥"
इति दायभागधृतमनुवचनम् ॥

पुत्री, [न्] पुं, (पुत्रोऽस्यास्तीति । पुत्र + इनिः ।)
पुत्रयुक्तः । पुत्रशब्दादस्त्यर्थे इनुप्रत्ययनिष्पन्नः ॥
यथा,—
"ज्येष्ठेन जातमात्रेण पुत्त्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात् सर्व्वमर्हति ॥"
इति मनुः ॥

पुत्री, स्त्री, (पुत्र + "शार्ङ्गरवाद्यञो ङीन् । ४ ।
१ । ७३ । इति ङीन् । यद्वा, गौरादित्वात्
ङीष् ।) सुता । इति हलायुधः ॥ अस्याः
पर्य्यायः पुत्रिकाशब्दे द्रष्टव्यः । वृक्षविशेषः ।
इति शब्दचन्द्रिका ॥

पुत्रीयं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो
वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० ।
इति छः ।) पुत्रजम् । (यथा, महाभारते १ ।
६७ । १६३ ।
"धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहम् ।
इदमंशावतरणं श्रोतव्यमनसूयता ॥"
यथा च रघौ । १० । ४ ।
"ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥"
"पुत्रीयां पुत्रनिमित्ताम् ।" इति तट्टीकायां
मल्लिनाथः ॥") पुत्रसम्बन्धि । पुत्रस्येदमित्यर्थे
ईयप्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥

पुत्रेष्टिः, स्त्री, (पुत्रनिमित्तिका इष्टिरिति मध्य-
पदलोपी समासः ।) पुत्रनिमित्तकयागविशेषः ।
इति जटाधरः ॥ यथा, —
"गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमञ्चरेत् ॥"
इति स्मृतिः ॥
(अस्या क्रियाविशेषो यथा,—
"ततः पुत्रकामा पश्चिमतोऽग्नेर्दक्षिणतो ब्राह्मण-
मुपवेश्यान्वालभेत सह भर्त्रा यथेष्टं पुत्रमाशा-
साना । ततस्तस्या आशासानाया ऋत्विक्
प्रजापतिमभिनिर्द्दिश्य योनौ तस्याः कामपरि-
पूरणार्थं काम्यामिष्टिं निर्व्वपेद्विष्णुर्योनिं कल्पय-
त्वित्यनयर्चा ततश्चैवाज्येन स्थालीपाकमभि-
घार्य्य त्रिर्जुहुयात् । यथाम्नायमन्त्रोपमन्त्रितमुद-
पात्रं तस्यै दद्यात् सर्व्वोदकार्थान् कुरुष्वेति ।
ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभि-
हरन्ती प्रदक्षिणमग्निमनुपरिक्रामेत् ततो ब्राह्म-
णान् स्वस्ति वाचयित्वा सह भर्त्राज्यशेषं प्राश्नी-
यात् । पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्ट-
मवशेषयेत् ततस्तौ सहसंवसेतामष्टरात्रं तथा-
विधपरिच्छदावेव तथेष्टपुत्रं जनयेताम् ।
या तु स्त्री श्यामं लोहिताक्षं व्यूढोरस्कं महाबाहुं
पुत्रमाशासीत । या या कृष्णं कृष्णमृदुदीर्घकेशं
शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष
एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्जं
स्यात् पुत्रवर्णानुरूपस्तु यथाशीरेव तयोः परि-
वर्होऽन्यः कार्य्यः स्यात् ।" इति चरके शारीर-
स्थानेऽष्टमेऽध्याये ॥)

पुत्रेष्टिका, स्त्री, (पुत्रेष्टि + स्वार्थे कन् टाप् च ।)
पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥

पुत्रौ, पुं, (दुहिता च पुत्रश्च पुत्रौ इत्येकशेषः ।)
पुत्रदुहितरौ । इत्यमरः । २ । ६ । ३७ ॥
द्विवचनान्तोऽयम् ॥

पुत्र्यं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो
वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० ।
चकाराद् यत् ।) पुत्रीयम् । पुत्रनिमित्तसंयोगः
पुत्रनिमित्तोत्पातो वा । इति पाणिनिः ॥

पुथ, इ कुन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) पञ्चमस्वरी । इ, पुन्थ्यते ।
अन्तःस्थप्रथमादिरयमित्यन्ये । पुन्थति । इति
दुर्गादासः ॥

पुथ, क त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-अक०-सेट् ।) क, पोथयति । त्विषि दीप्तौ ।
इति दुर्गादासः ॥

पुथ, य हिंसे । इति कविकल्पद्रुमः ॥ (दिवा०-
पर० सक० सेट् ।) य, पुथ्यति पुपोथ । इति
दुर्गादासः ॥

पुद्गलः, पुं (पूरणात् पुत् गलनात् गलः । ततः कर्म्म-
धारयः । वृद्धिह्रासवत्त्वाद्देहस्य तथात्वम् ।)
देहः । (यथा, पार्श्वनाथचरिते । १२ । ११० ।
"चक्षुः शिरसि भाले च नेत्रे सर्व्वाङ्गपुद्गलं ॥")
आत्मा । इति शब्दरत्नावली ॥ परमाणुः ।
यथा,—
"स्थूला मध्यास्तथा सूक्ष्माः सङ्घातसम्भ-
वाश्च ये ।
देहभेदा भवान् सर्व्वे ये केचित् पुद्गलाश्रयाः ॥"
इति विष्णुपुराणे ५ अंशे २० अध्यायः ॥
"पूर्य्यन्ते गलन्ति चेति पुद्गलाः । वृद्ध्यपक्षय-
भाजो येऽवयवास्तदाश्रया देहभेदाः । यथाहुः ।
पूरणाद्गलनाद्देहे पुद्गलाः परमाणव इति ।"
इति तट्टीकायां श्रीधरस्वामी ॥

पुद्गलः, त्रि, (पुत् वर्द्धनशीलः गलो ह्रासवांश्चेति
कर्म्मधारयः ।) सुन्दराकारः । इति शब्द-
रत्नावली ॥ रूपादिमद्द्रव्यम् । इति हेम-
चन्द्रः ॥

पुनः, [र्] अव्य, (पनाय्यते स्तूयते इति । पन +
बाहुलकात् अर् अस्य उत्वञ्च ।) अप्रथमः ।
(यथा, मनुः । २ । १२० ।
"ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥")
भेदः । अवधारणम् । इत्यमरः । ३ । ४ । १५ ॥
अधिकारः । पक्षान्तरम् । इति मेदिनी ॥ रे,
७२ ॥ (यथा, रघुः । २ । ४८ ।
"भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ । पितेव पासि ॥")

पुनःपुनः, [र्] अव्य, (पुनर् + वीप्सायां द्वित्वम् ।)
वारंवारम् । तत्पर्य्यायः । मुहुः २ शश्वत् ३
अभीक्ष्णम् ४ असकृत् ५ । इत्यमरः । ३ । ४ ।
वारंवारेण ६ पौनःपुन्यम् ७ प्रतिक्षणम् ८ ।
इति शब्दरत्नावली ॥ (यथा, चाणक्ये ।
"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च ।
अस्ति नास्ति न जानन्ति देहि देहि पुनः-
पुनः ॥")

पुनःपुना, स्त्री, नदीविशेषः । पनपुना इति
भाषा । यथा,—
"कीकटेषु गया पुण्या पुण्यं राजगृहं वनम् ।
च्यवनस्याश्रमः पुण्यो नदी पुण्या पुनःपुना ॥"
इति वायुपुराणे गयामाहात्म्यम् ॥

पुनःसंस्कारः, पुं, (पुनः पुनर्वारं कृतः संस्कारः ।)
द्वितीयवारोपनयनादिसंस्कारः । यथा,—
"पुनर्व्वसौ कृतो विप्रः पुनःसंस्कारमर्हति ॥"
इति ज्योतिस्तत्त्वम् ॥

पुनरागमनं, क्ली (पुनः पुनर्व्वारमागमनम् ।)
द्वितीयवारागमनम् । फिर आसा इति भाषा ॥
यथा—
"संवत्सरव्यतीते तु पुनरागमनाय च ॥"
इति दुर्गोत्सवपद्धतिः ॥

पुनरुक्तं, क्ली, (वच + भावे क्तः । पुनः पुनर्व्वार-
मुक्तम् ।) पुनर्व्वारकथनम् । यथा, —
"आपाततो यदर्थस्य पौनरुक्त्येव भाषणम् ।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ॥"
इति साहित्यदर्पणम् ॥
(यथाह गोतमः । ५ । ५७—५८ ।
"शब्दार्थयोः पुनर्व्वचनं पुनरुक्तमन्यत्रानु-
वादात् ॥"
"पुनर्व्वचनं पुनरुक्तं तस्य विभागार्थं शब्दार्थयो-
रिति । तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते ।
अनुवादेऽतिव्याप्तिवारणाय अन्यत्रानुवादादिति
अनुवादान्यत्वे सतीत्यर्थः । निष्प्रयोजनं पुन-
रभिधानं हि पुनरुक्तं अनुवादस्तु व्याख्यारूपः
सप्रयोजनक इति भावः । तथाच समा-
नार्थकपूर्व्वानुपूर्व्वीकशब्दप्रयोगः शब्दपुनरु-
क्तम् । समानार्थकभिन्नानुपूर्व्वीकशब्दस्य निष्प्रयो-
जनं पुनरभिधानमर्थपुनरुक्तम् । आद्यं यथा
घटो घट इति । द्वितीयं यथा, घटः कलस
इति । एतस्य प्रमादादिना सम्भवः ॥"* ॥
पुनरुक्तभेदान्तरमाह ।
"अर्थादापन्नस्य स्वशब्देन पुनरभिधानम् ।"

"पुनरुक्तमित्यनुवर्त्तते । यस्मिन्नुक्ते यस्यार्थस्यौत-सर्गिकी प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम् । इदमेव च अर्थपुन-रुक्तमिति गीयते । यथा वह्निरुष्ण इति पूर्ब्ब-पदार्थाभिप्रोक्तिरियम् । उष्णो वह्निरिति उत्तर-पदार्थाभिप्रोक्तिः । एव बहिरस्ति गेहे नास्तीति विध्याभिप्रोक्तिः । जीवन् गेहे नास्ति बहि-रस्तीति निषेधाभिप्रोक्तिः । पुनरुक्तत्वेविध्यमिदं भाष्यादि सम्मतम् । तस्यैव शब्दस्य पुनरभि-धानं पर्य्यायेणाभिधानम् अन्यत्र पुनरर्थपुन-रुक्तमित्याहुः ॥"* ॥ पुनर् + वच + कर्म्मणि क्तः । पुनःकथिते, त्रि । यथा, महाभारते ।८।४।१३। "ब्रूहि सञ्जय । तत्त्वेन पुनरुक्तां कथामिमाम् ॥")

पुनरुक्तजन्मा, [न्] पुं, (पुनरुक्तं जन्म यस्य । "द्वितीयं मौञ्जीबन्धने ।" इति मनूक्तेरस्य तथा-त्वम् ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

पुनर्जन्म, [न्] क्ली, (पुनर्भूयो जन्म ।) पुन-र्व्वारोत्पत्तिः । यथा,—

"आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्ज्जुन ।
मामुपेत्य तु कौन्तेय । पुनर्जन्म न विद्यते ॥"

इति श्रीभगवद्गीतायाम् । ८ । १६ ॥

पुनर्नवः पुं, (पुनरपि छिन्ने भूयोऽपि नवः ।) नखः । इति हेमचन्द्रः ॥

पुनर्नवा, स्त्री, (छिन्नायां पुनरपि नवा । यद्वा, पुनर्भूयोभूयः नूयते स्तूयते इति । नु स्तुतौ + "ऋदोरप् ।"३ । ३ । ५७ । इत्यप् । ततष्टाप् । क्षुभ्नादित्वान्न णत्वम् ।) शाकविशेषः । तत्पर्य्यायः । शोथघ्नी २ वर्षाभूः ३ प्रावृषा-यणी ४ कठिल्लकः ५ । एता अरुणाः ॥ श्वेतायाः पर्य्यायः । वृश्चीरः २ चिराटिका ३ । इति रत्नमाला ॥ विशाखः ४ कठिल्लः ५ शशि-वाटिका ६ पृथ्वी ७ सितवर्षाभूः ८ घनपत्रः ९ कठिल्लकः १० । अस्या गुणाः । उष्णत्वम् । तिक्तत्वम् । कफकासहृद्रोगशूलामपाण्डुशोफा-निलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेदक-त्वम् । रसायनत्वम् । आमदुर्नामब्रध्नोदरनाशि-त्वञ्च । इति राजवल्लभः ॥ * ॥

"पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ।
कटुः कषाया [illegible] पाण्डुघ्नी दीपनी परा ॥
शोफानिलगरश्लेष्महरी ब्रध्नोदरप्रणुत् ॥ * ॥
पुनर्नवा परा रक्ता रक्तपुष्पा शिलाटिका ।
शोथघ्नी क्षुद्रवर्षाभूर्वर्षकेतुः कठिल्लकः ॥
पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥"

इति भावप्रकाशः ॥

पुनर्भवः, पुं, (छिन्नोऽपि पुनर्भवतीति । भू + अच् ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ रक्त-पुनर्नवा । इति राजनिर्घण्टः ॥ (पुनर् + भू + भावे अप् । पुनरुत्पत्तिः । यथा, महाभारते । १ । १ । २५५ ।

"सन्ततिश्च प्रवृत्तिश्च जन्मन्यत्पुनर्भवाः ॥"* ॥ पुनर्भवतीति । भू + अच् ।) पुनर्व्वारजाते, त्रि ॥

पुनर्भवी [न्] पुं, (पुनर्भवः पुनः पुनरुत्पत्तिर-स्यास्तीति । पुनर्भव + इनिः ।) आत्मा । इति हेमचन्द्रः । ६ । २ ॥

पुनर्भूः स्त्री, (पुनर्भवति जायात्वेनेति । भू + क्विप् ।) द्विरूढा । तत्पर्य्यायः । दिधिषुः २ । इत्यमरः । २ । ६ । २३ ॥ "अक्षतयोनित्वाद्विधवा पुनरूह्यते । इत्थमाद्यस्य भूत्वा अन्यस्य पुन-र्भवतीति क्विपि पुनर्भूः । धिष्यते निन्दितत्वया शब्द्यते द्विधिषुः धिष शब्दे नाम्नीति कुः निपा-तनाद्वित्वम् ।" इति तट्टीकायां भरतः ॥ सा त्रिविधा । यथा,—

"परपूर्व्वास्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा ॥
देशधर्म्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्तिता ॥
उत्पन्नसाहसा उत्पन्नव्यभिचारा ।
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता ॥"

इति मिताक्षरा ॥ * ॥

पुनर्व्वारजाते, त्रि ॥

पुनर्यात्रा, स्त्री, (पुनरप्रथमा यात्रा ।) निवर्त्त-यात्रा । सा तु आषाढशुक्लपक्षीयरथद्वितीया-नन्तरं तन्नवमदिवसविहिता श्रीजगन्नाथदेवस्य दक्षिणमुखयात्रा । फिरे रथ इति उलटा रथ इति च भाषा । अस्या इतिकर्त्तव्यता यात्रा-शब्दे द्रष्टव्या ॥

पुनर्व्वसुः, पुं, (पुनः पुनः शरीरेषु वसति क्षेत्रज्ञ-रूपेणेति । पुनर् + वस + उः ।) विष्णुः । (यथा महाभारते । १३ । १४६ । ३६ ।

"अघनो विजयो जेता विश्वयोनिः पुनर्व्वसुः ॥")

शिवः । कात्यायनमुनिः । लोकभेदः । धना-रम्भः । इति शब्दरत्नावली ॥ नक्षत्रविशेषः । स च धनुराकृतिपञ्चतारात्मकः । यथा,—

"मध्यवर्त्मनि शरासनाकृता-
वम्बरस्य सुरमातृभे गता ।
लिम्पिका समशिव पञ्चतारकै
पञ्चशाखकमिता घटोदयात ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

तस्याधिष्ठात्री देवता अदितिः । इति जातकम् ॥ तत्र जातफलम् । यथा कोष्ठीप्रदीपे ।

"प्रभूतमित्रः कृतशास्त्रयत्नः
सदन्नकामी वरभूषणाढ्यः ।
दाता प्रतापी द्रव्यधाधिपश्री:
पुनर्व्वसौ यस्य भवेत प्रसूतिः ॥"

पुनर्व्वसू, पुं, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गत-सप्तमनक्षत्रम् । तत्पर्य्यायः । यामकौ २ आदित्यौ ३ । इति हेमचन्द्रः ॥ द्विवचनान्तोऽयम् ॥

पुन्नागः, पुं, (पुमान् नाग इव श्रेष्ठत्वात् ।) स्वनाम-ख्यातश्वेतपुष्पवृक्षविशेषः । तत्पर्य्यायः । पुरुषः २ तुङ्गः ३ केशरः ४ देववल्लभः ५ । इत्यमरः । २ । ४ । २५ ॥ कुम्भीकः ६ रक्तकेशरः ७ । इति रत्नमाला ॥ पुन्नामा ८ पाटलद्रुमः ९ रक्तपुष्पः १० रक्तरेणुः ११ अरुणः १२ । अस्य पुष्पगुणाः । मधुरत्वम् । शीतलत्वम् । सुगन्धि-त्वम् । पित्तनाशित्वम् । भ्रान्तौ द्रावणत्वम् । देवताप्रसादनत्वञ्च । इति राजनिर्घण्टः ॥ कषाय-त्वम् । कफरक्तनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ सितोत्पलः । जातीफलः । नरश्रेष्ठः । पाण्डु-नागः । इति मेदिनी । गे, ४६ ॥

पुन्नाटः, पुं, (पुन्नाड । पृषोदरादित्वात् डस्य टः ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ।
पद्माटः स्यादेडगजश्चक्री पुन्नाट इत्यपि ॥")

पुन्नाडः, पुं, (पुमांसं नाडयतीति । नड भ्रंशे + "कर्म्मण्यण् ।"३ । २ । १ । इत्यण् ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥

पुन्नामनरकः, पुं, (पुदिति नाम यस्य स पुन्नामा । पुन्नामा चासौ नरकश्चेति कर्म्मधारयः ।) पुत् इतिनामकनरकविशेषः । तत्र षोडशविधपापिः पतति । यथा,—

ब्रह्मोवाच ।

"परदाराभिगमनं पापानामाशुप्रसवनम् ।
पारुष्यं सर्व्वभूतानां प्रथमं नरकं स्मृतम् ॥
फलस्तेयं महापापं फलार्हस्य च पातनम् ।
पातनं वृक्षजातीनां द्वितीयं परिकीर्त्तितम् ॥
वर्ज्यादानं तथा द्विष्टमवध्यवधबन्धनम् ।
विवादित्वमहंकृत्यं तृतीयं नरकं स्मृतम् ॥
भयदं सर्व्वसत्त्वानां नरभूतिविनाशनम् ।
भ्रंशनं निजधर्म्माणां चतुर्थं नरकं स्मृतम् ॥
मारणं मित्रकौटिल्यं मिथ्याभिशपनञ्च यत् ।
मिष्टैकाशनमित्युक्तं पञ्चमञ्च विपाचनम् ॥
परोहणं यन्त्रकरं यमनं योगनाशनम् ।
यानमुख्यस्य हरणं षष्ठमुक्तं नृपाचनम् ॥
राजभागस्य हरणं राजजायानिषेवणम् ।
राज्ये त्वहितकारित्वं सप्तमं नरकं स्मृतम् ॥
लुब्धत्वं लोलुपत्वञ्च लब्धधर्म्मार्थनाशनम् ।
नानाकर्म्मकरं प्रोक्तमष्टमं नरकं स्मृतम् ॥
ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम् ।
विरोधो ब्राह्मणैः प्रोक्तो नवमो नरकस्त्वयम् ॥
शिष्टाचारविनाशश्च मित्रद्वेषं शिशोर्वधम् ।
शास्त्रस्तेयं धर्म्मघ्नो दशमं परिकीर्त्तितम् ॥
षडङ्गनिधनं घोरं षाड्गुण्यप्रतिषेधनम् ।
एकादशमसंप्रोक्तं नरकं सद्भिरुत्तम ॥
सद्भिरुक्ता सदा [illegible] समतां क्रिया ।
संस्कार[illegible] द्वादशमं स्मृतम् ॥
[illegible] त्रिवर्गस्य त्यागम् ।
स्वर्गाद[illegible] मतिदं त्रयोदशममुच्यते ॥
समलं धर्म्महीनञ्च यद्दुर्गं यत्र दीपजम् ।
चतुर्द्दशकं प्रोक्तं नरकं सद्विगर्हितम् ॥
अज्ञानमापि निर्त्तत्वमाशौ चमसुभावहम् ।
गम्यं तत् पञ्चदशकमसत्यवचनानि च ॥

आलस्यं वै षोड़शकमाक्रोशश्च विशेषतः ।
सर्व्वस्य चाततायित्वमगार्ग्ग्यमिदापनम् ॥
इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्य्याभावश्च सभ्येषु औद्धत्यन्तु विगर्हितम् ॥
एतैस्तु पापैः पुरुषः पुन्नामनरकं पतेत् ।
पुन्नामनरकं घोरं विनाशं प्राह सर्व्वतः ॥
एतस्मात् कारणात् साध्यस्ततः पुत्त्रो निगद्यते ॥"
इति वामने ५८ अध्यायः ॥

पुप्फुल., पु, (पुपफुम् । पृषोदरादित्वात् सस्य लत्वम् ।) उदरस्थवायुः । इति भूरिप्रयोगः ॥

पुप्फुसः, पु, (पुप् इसवत् आकृतिरस्यास्तीति । अच् ।) पद्मबीजाधारः । तत्पर्य्यायः । बीजकोशः २ वराटकः ३ । (पुप्फुस इति शब्दोऽप्यस्येति ।) वामपार्श्वस्थमलाशयः । फोँफड़ा इति फुलघरा इति च भाषा । तत्पर्य्यायः । क्लोमः २ । इति शब्दचन्द्रिका ॥ रक्तफेनजः ३ । इति हेमचन्द्रः ॥ तिलकम् ४ क्लोम ५ । इत्यमरः ॥ क्लोमम् ६ । इति भरतः ॥ फुप्फुसोऽपि पाठः ॥ (फुपफुसशब्देऽस्य विषयो ज्ञातव्यः ॥)

पुमान् [स्] पु, (पाति रक्षतीति । पा + "पातेर्डुम्सुन् ।" उणा० । ४ । १७७ । इति डुम्सुन् । डित्वात् टिलोपः ।) मनुष्यजातिपुरुषः । तत्पर्य्यायः । पञ्चजनः २ पुरुषः ३ पूरुषः ४ ना ५ । इत्यमरः । २ । ६ । १ ॥ (यथा,—

"स्वदेशजातस्य जनस्य लोके
गुणाधिके पुंसि भवत्यवज्ञा ।
निजाङ्गना यद्यपि रूपराशि-
स्तथापि पुंसां परदारचेष्टा ॥"

इत्युद्भटः ॥) मनुष्यजातिः । इति केचिदिति भरतः ॥ पुंलिङ्गमात्रञ्च ॥ (कूटस्थपुरुषः । यथा, विष्णुपुराणे । १ । १ । २ ।

"सदैकरूपरूपाय ईश्वरः पुमान्
गुणोर्म्मिस्टष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः ॥"

"अपचरमिति विकारं निराकरोति पुमान् कूटस्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

पुर, श अग्रगत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट ।) श, पुरति ज्येष्ठः कनिष्ठस्य अग्रे गच्छतीत्यर्थः । पोरिता । इति दुर्गादासः ॥

पुरं, क्ली (प्रियते पूर्य्यते इति । पॄ पालि पूर्त्तौ + कः ।) गेहः । देहः । पाटलिपुत्त्रः । पुष्पादीनां दलावृतिः । इति मेदिनी । रे, ५८—५६ ॥ नागरमुस्ता । इति रत्नमाला ॥ चर्म्म इति शब्दरत्नावली ॥ गृहोपरिगृहम् । इति विश्वः ॥

पुरं क्ली स्त्री, (पिपर्त्तीति । पॄ + मूलविभुजादित्वात् कः । यद्वा, पुरति अग्रे गच्छतीति । पुर + "इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः ।) हट्टादिविशिष्टस्थानम् । इति श्रीधरस्वामी ॥ बहुग्रामीयव्यवहारस्थानम् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । पूः २ पुरी ३ नगरम् ४ पत्तनम् ५ स्थानीयम् ६ कटकम् ७ पट्टम् ८ निगमः ९ पुटभेदनम् १० । इति शब्दरत्नावली ॥ तस्य लक्षणादि यथा,—

मत्स्य उवाच ।

"राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानम्य सामन्तं मध्यमन्देशमावसेत् ॥
वैश्यशूद्रजनप्रायमनाहार्य्यन्तथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्म्मकरन्तथा ॥
अदेवमातृकं रम्यमनुरक्तजनान्वितम् ।
करैरपीडितं वापि बहुपुष्पफलन्तथा ॥
अगम्यं परचक्राणां तद्वासगृहमापदि ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥
सरीसृपविहीनञ्च व्याडतस्करवर्ज्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥
एतद्दुर्गं नृपः कुर्य्यात् षण्णामेकतमं बुधः ।
वनदुर्गं महीदुर्गं नरदुर्गन्तथैव च ॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिघोपेतं चयाट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ॥
गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम् ।
सपताकं गजारूढो येन राजा विशेत् पुरम् ॥
चतस्रश्च तथा कार्य्या वीथयः सर्व्वतोसुखाः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥
द्वितीये चापि वीथ्यग्रे राजवेश्म विधीयते ।
धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके ॥
चतुर्थे चैव वीथ्यग्रे गोपुरन्तु विधीयते ॥
आयतं चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ।
मुक्तिहीनं त्रिकोणञ्च यवमध्यन्तथैव च ॥
अर्द्धचन्द्रप्रकारञ्च वज्राकारञ्च कारयेत् ॥
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसेत् ।
अन्यत्र तन्न कर्त्तव्यं प्रयत्नेन विजानता ॥
राज्ञा कारागृहं कार्य्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥
गजानां प्राङ्मुखा शाला कर्त्तव्या वाप्युदङ्मुखा ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥
महानसञ्च धर्म्मज्ञ । कर्म्मशालास्तथापराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ॥
मन्त्रिवेदविदाश्चैव चिकित्साकर्त्तरेव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥
गवां स्थानं तथैवात्र तुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः ॥
कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ॥
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कर्त्तव्यं देवदेव दिवाकरे ॥
ततस्तत्र यथास्थानं राजा विज्ञाय सारथिम् ।
दद्यादावसथस्थानं सर्व्वेषामनुपूर्व्वशः ॥
योधानां शिल्पिनाञ्चैव सर्व्वेषाम[illegible]
दद्यादावसथान् दुर्गे मन्त्रकालविदां शुभान् ॥
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत भृशं राजा दुर्गे परबलारुजः ॥
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।
न बहूनामतो दुर्गं विना कार्य्यं तथा भवेत् ॥
सर्व्वं निरर्थकं कार्य्यं विना दुर्गं महीपते ।
दुर्गे यन्त्राः प्रकर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तेषु रक्षा विधीयते ॥
दुर्गद्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा ।
सञ्चयश्चात्र सर्व्वेषामायुधानां विधीयते ॥
धनुषां क्षेपणीयानां तोमराणाञ्च भार्गव ।
शराणामथ खड्गानां कवचानान्तथैव च ॥
लगुडानाञ्च कुन्तानां परिघैः सह पार्थिव ।
अश्मनाञ्च प्रभूतानां मुद्गराणान्तथैव च ॥
त्रिशूलानां पट्टिशानां कुणपानाञ्च पार्थिव ।
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम ॥
परश्वधानां चक्राणां वर्म्मणाञ्चर्म्मभिः सह ।
कुद्दालरज्जुवेत्राणां पिटकानान्तथैव च ॥
हेसुकानाञ्च दात्राणामङ्गारस्य च सञ्चयः ।
सर्व्वेषां शिल्पभाण्डानां सञ्चयश्चात्र इष्यते ॥
वादित्राणाञ्च सर्व्वेषामौषधीनान्तथैव च ।
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ॥
गुडानां सर्व्वतैलानां गोरसानान्तथैव च ।
वसानामथ मज्ज्ञानां स्नायूनामस्थिभिः सह ॥
गोचर्म्मपटहानाञ्च धान्यानां सर्व्वतस्तथा ।
तथैव पर्पटानाञ्च यवगोधूमयोरपि ॥
रत्नानां सर्व्ववस्त्राणां लोहानाञ्चाप्यशेषतः ।
कलायमुद्गमाषाणां चणकानां तिलैः सह ॥
तथा च सर्व्वशस्यानां पांशुगोमययोरपि ।
शणसर्ज्जरसं भूर्जजतुलाक्षाञ्च टङ्कणम् ॥
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥
कुम्भाश्चाशीविषाः कार्य्या व्यालसिंहादयस्तथा ।
मृगाश्च पक्षिणश्चैव विरुद्धा ये परस्परम् ॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्त्तव्यानि महाभाग । यत्नेन पृथिवीक्षिता ॥
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्य्याज्जनानां हितकाम्यया ॥
जीवकर्षभकाकोलीआमलक्यः परूषकम् ।
शालपर्णी पृश्निपर्णी मुद्गपर्णी तथैव च ॥
माषपर्णी च मेदे द्वे शारिवे द्व बलात्रयम् ।
वीरा श्वसन्ती वृष्या च बृहती कण्टकारिका ॥
शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्दर्भरेणुका ।
मधुपर्णी विदार्य्यौ द्वे महाक्षुद्रा महातपा ॥
धन्वना सह देवाह्वा कटुकैरण्डकं विषम् ।
पर्णाशनाकन्दलीका फल्गुखर्ज्जूरयष्टिका ॥
शुक्रातिशुक्रकाश्मर्य्यश्छत्रातिच्छत्रवीरणाः ॥
इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम ।
सिंही च सहदेवी च विश्वेदेवाटरूषकम् ॥
मधुकं पुष्पकं सा च शतपुष्पा मधूलिका ।
शतावरीमधूकं च पियालन्तालमेव च ॥
आत्मगुप्ता कट्फलाख्या दारदा राजशीर्षिका ।
राजसर्षपधन्याकऋष्यप्रोक्ता तथोत्कटा ॥

कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका ।
शीतपाकी कुलिङ्गाक्षी काकजिह्वोरुपत्रिका ॥
द्वीपकत्वषुषौ चोभौ गुञ्जारकपुनर्नवे ।
कसेरुका तु काश्मीरी विम्बशालूकशेवलम् ॥ * ॥
शूकधान्यानि सर्व्वाणि शमीधान्यानि यानि च ।
क्षीरं क्षौद्रं तथा शुक्तं मज्जा तैलं वसा घृतम् ॥
निकोचाभिषुकास्फोटं वाताममामकमालकम् ।
एवमादीनि चान्यानि विज्ञेयो मधुरो गणः ॥
राजा सञ्चिनुयात् सर्व्वं पुरे निरवशेषतः ।
दाडिमाम्रातकाम्राश्च तिन्तिडीकाम्लवेतसम् ॥
भव्यं कर्कन्धु लकुचं करमर्द्दकरूषकम् ।
बीजपूरककाण्डीरं मालती राजबन्धुकम् ॥
कोटकद्वयपर्णानि द्वयोरम्लिकयोरपि ।
पारेवतं नागरकं प्राचीनारुकमेव च ॥
कपित्थामलकी चुक्रं फलं दन्तशठस्य च ।
जम्बीरं नवनीतञ्च सौवीरकतुषोदके ॥
सुरासवञ्च मद्यानि मण्डतक्रदधीनि च ।
शुक्तानि चैव सर्व्वाणि ज्ञेयान्यम्लगणं द्विजाः ॥
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
सैन्धवोद्भिदपाठेयपाक्यसामुद्ररोमकम् ।
कुपसौवर्च्चलविटं बालकेयं यवाह्वयम् ॥
औपत्यारं कालभस्म विज्ञेयो लवणो गणः ।
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
कुठेरकं मरिचञ्च शिग्रुभल्लातसर्षपाः ॥
कुष्ठाजमोदा किणिही हिङ्गुमूलकधान्यकम् ।
कारवी कुञ्चिकाजाज्य' सुमुखः कालमालिका
फणिज्झकोऽथ लशुनं भस्तृणं सुरसस्तथा ।
कायस्था च वयःस्था च हरितालं मनःशिला
अमृता च रुदन्ती च रोहिषं कुङ्कुमं तथा ।
तथा गण्डकाण्डीरं शल्लकी हपुषा तथा ॥
सर्व्वपित्तानि मूत्राणि प्रायो हरितकानि च ।
सङ्गाणि च मूलानि परिखारिविषाणि च ॥
फलानि चैव च तथा सूक्ष्मैला हिङ्गुपत्रिका ।
एवमादीनि चान्यानि गणः कटुकसंज्ञकः ।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम । ॥ * ॥
मुस्तचन्दनह्रीबेरकृतमालकदारवः ।
हरिद्रामलकोशीरं रक्तमालकवस्तुकम् ॥
दूर्व्वापटोलकटुकादन्तीत्वक्‌पत्रकच्छुराः ।
किरातनिक्तकं निम्बं विषा चातिविषा तथा ॥
तालीशपत्रं तगरं सप्तपर्णविकङ्कताः ।
काकोडुम्बरकोदीच्यसुषवः किणिही तथा ॥
षड्ग्रन्था रोहिणी मांसी पर्पटं मदयन्तिका ।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम् ॥
दुःस्पर्शा गुरुणी कामा श्यामाकं गन्धनाकुली ।
चतुष्पर्णी थाशनखसमङ्गका चतरङ्गुला ॥
रम्भा चैव कुथापुष्पी तारास्फोता हरेणुका ।
वेत्राग्रो वेतसस्तुम्बी विषाणी लोहमञ्जनम् ॥
मालती करतिक्ताख्या विषाङ्गी जिह्विका तथा,
पर्य्यटश्च गुडूची च गणस्तिक्तकसंज्ञकः ॥
एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे ।
अभयामलके चोभे तथैव च विभीतकम् ॥
प्रियङ्गुधातकीपुष्पं मोचलोऽशार्ज्जुनासनाः ।
अनन्तास्त्री सुराङ्गा श्योनाकं कट्फलं तथा ॥
भूर्जपत्रं शिलोद्भेदं पाटलापत्रलोमकम् ।
समङ्गा त्रिवृतामूलं कार्पासा गैरिकाञ्जनम् ॥
विद्रुमं समधूच्छिष्टं कुम्भीकाकुमुदोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थकिंशुका शिंशपा शमी ॥
पियालपिलुका शाल्मलिशिरीषं पद्मकन्तथा ।
बिल्वोऽग्निमन्थः प्लक्षश्च श्यामाकयवकोद्रवम् ॥
राजादनं करीरञ्च धान्यकप्रियकौ तथा ।
शाकोटाशोकवदराः कदम्बखदिरद्वयम् ॥
एषां पत्राणि साराणि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणो मतः ॥
प्रयत्नेन नृपश्रेष्ठ राजा सञ्चिनुयात् पुरे ।
कीटाश्च मारणे योग्या व्यङ्गतायान्तथैव च ॥
वातधमाम्बुमार्गाणां दूषणानि तथैव च ।
धार्य्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि भारत ! ॥
विषाणान्धारणं कार्य्यं प्रयत्नेन महीभुजा ।
विचित्राश्च गदा धार्य्या विषप्रशमनास्तथा ॥
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्द्धनाः ।
कलाविदश्च पुरुषाः पुरे धार्य्याः प्रयत्नतः ॥
भीतान् प्रमत्तान् कुपितान् तथैव च विमानि-
तान् ।
कुभृत्यान् पापशीलांश्च न राजा वासयेत् पुरे ॥
यन्त्रायुधाट्टालचयोपपन्नं
समग्रधान्यौषधिसंप्रयुक्तम् ।
वणिग्जनैश्चान्वितमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥"
इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १६१ अध्यायः ॥ * ॥ पुरे वर्णनीयानि यथा,—
"पुरे हट्टप्रतोली च परिखातोरणध्वजाः ।
प्रासादाध्वप्रपारामवापीवेश्या सती त्वरी ॥"
इति कविकल्पलता ॥
अत्रविशेषं नगरशब्दे द्रष्टव्यम् ॥

पुरः, पु (पिपर्त्तीति । पृ । कः ।) गुग्गुलुः । इत्यमरः ।२।४।१२६॥ (अस्य पर्य्यायो यथा —
"गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।
कुम्भोलूखलकं क्लीवे महिषाक्षः पलङ्कषः ॥"
"अन्यं नीलसमर्जोऽरसश्च अवायं अममातपम् ।
मत्वं रोधन्यजेन सम्यगगुणार्थी पुरसेवकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पौतभिरुन्टी । इति शब्दचन्द्रिका ॥

पुरः [स्] अ (पूर्व्वस्मिन् पूर्व्वस्मात् पूर्व्वा वा एत्र पूर्व्वस्याः पूर्व्वस्यामित्यादि । पूर्व्व + "पूर्व्वाधरावराणामसि पुरधवश्चैषाम् ।" ५ । ३ । ३९ । इति असि तद्योगेन पुर् इत्यादेशश्च ।) अग्रतः । इत्यमरः । ३ । ४ । ७ ॥ (यथा, कुमारे ।४।३।
"अयि जीवितनाथ ! जीवसी-
त्यभिधायोत्थितया तया पुरः ।
ददृशे पुरुषाकृति क्षितौ
हरकोपानलभस्म केवलम् ॥")
प्राची दिक् । प्रथमे काले । (यथा, अभिज्ञानशकुन्तलायाम् । ७ अङ्के ।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं विधि-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥")
पुरार्थं । अतीते । इति नङ्गोकार्यो भरतः ॥

पुरःसरः, त्रि (पुरोऽग्रे सरति गच्छतीति । सृ + "पुरोऽग्रतोऽग्रेषु सर्त्तेः ।" ३ । २ । १८ । इति टः ।) अग्रगामी । इत्यमरः ।२।८।७२॥ (यथा, महाभारते । ४ । १६ । २२ ।
"यस्याः पुरःसरा ह्यासन् एतत्स्वानुयायिनः ।
साद्यमद्य सुदेष्णायाः पुरःपश्चाच्च गामिनी ॥")
अस्य पर्य्यायः अग्रसरशब्दे द्रष्टव्यः ॥

पुरञ्जनः, पुं, (पुरं देहक्षेत्रं जनयतीति । जनि + बाहुलकात् खः ।) जीवः । यथा, —
"पुरुषं पुरञ्जनं विद्यात् यद्व्यनक्त्यात्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"
इति श्रीभागवते । ४ । २९ । २ ॥

पुरञ्जनी, स्त्री, (पुरञ्जन + गौरादित्वात् ङीष् ।) बुद्धिः । यथा,
"न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ ! ।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥
राजन् ! मदीयाः सर्व्वे त भामाहृश्च पुरञ्जनीम् ॥"
"बुद्धिन्तु प्रमदां विद्यान्ममाहमिति यत्कृतम् ।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षिभि-
र्गुणान् ॥"
इति श्रीभागवते । ४ स्कन्धे । २५।२९ अध्यायौ ॥

पुरञ्जयः, पु, (पुरं शत्रुपुरं जयतीति । जि + खच् ।) सूर्य्यवंशीयराजविशेषः । तत्पर्य्यायः । काकुत्स्थः २ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ९ । ६ । १२ ।
"पितर्य्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ।
शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति चाप्युक्तः शृणु नामानि
कर्म्मभिः ॥"
पुरुवंशीयः सृञ्जयपुत्रः । यथा हरिवंशे । ३१ । १८ ।
"सृञ्जयस्याभवत् पुत्त्रो वीरो राजा पुरञ्जयः ।
जनमेजयो महाराज ! पुरञ्जयसुतोऽभवत् ॥"
पुरं जयतीति । पुर + जि + खच् ।) पुरजय-
कर्त्तरि त्रि ॥ (यथा, महाभारते । १ । १०२ । ४५ ।
"स्वान्येव तेऽपि राष्ट्राणि जग्मुः परपुरञ्जय ! ॥")

पुरटं, क्ली, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अटन् ।) सुवर्णम् । यथा,—
"हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः ॥"
इति विदग्धमाधवः ॥

पुरणः, पु, (पिपर्त्ति पूरयति वेति । पृ पालनादौ + "कृपृवृजिमन्दिनिधाञ्भ्यः क्युः ।" उणा० २।८१। इति क्युः । उत्वं रपरत्वञ्च ।) समुद्रः । इत्युणादिकोषः ॥

पुरतः, [स्] व, (पुरति अग्रे गच्छतीति। पुर+ बाहुलकात् अतसुच्।) अग्रतः। इत्यमरः।३।४।७॥ (यथा, राजतरङ्गिण्याम्।१।१०७।
"निर्गते मञ्जरीकुञ्जादप्रग्रत् पुरतस्ततः।
कर्णे नीलाब्जयोर्लिप्नौ स कश्चिच्चारुलोचने॥")

पुरतटी, स्त्री, (पुरस्थिता तटीव।) हट्टी। क्षुद्रहट्टः। इति हारावली।१६४॥

पुरद्वारं, क्ली, (पुरस्य द्वारम्।) नगरद्वारम्। तत्पर्य्यायः। गोपुरम् २। इत्यमरः।२।२।१६॥ (यथा मनुः।५।९२।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः॥")

पुरद्विट्, [ष्] पुं, (पुरं द्वेष्टीति। द्विष्+क्विप्। मयनिर्म्मितानां पुरविशेषाणां दाहकत्वादस्य तथात्वम्।) शिवः। इति जटाधरः॥ (यथा, भागवते।४।६।७।
"स इत्यमादिश्य सुरानजस्तु तैः
समन्वितः पितृभिः सप्रजेशैः।
ययौ स्वधिष्ण्यान्निलयं पुरद्विषः
कैलासमद्रिप्रवरं प्रियं प्रभोः॥")

पुरन्दरं, क्ली, (पुर+दारि+खच्।) चविकम्। इति शब्दचन्द्रिका॥

पुरन्दरः, पुं, (अरीणां पुरो दारयतीति। दॄ+णिच्+"पूःसर्व्वयोर्दारिसहोः।" ३।२।४१। इति खच्। "वाचंयमपुरन्दरौ च।"६।३।६९। इति निपातितः।) इन्द्रः। इत्यमरः।१।१।४४॥ (यथा, महाभारते।३।१०१।८।
"कालेयभयसन्त्रस्तो देवः साक्षात् पुरन्दरः।
जगाम शरणं शीघ्रं तन्तु नारायणं प्रभुम्॥"
पुरं गेहं दारयतीति। दारि+खच्। निपातितः।) चौरः। यथा,—
"समांसमीना यदि पाकशाला
समांसमीना दश धेनवः स्युः।
पुरन्दरस्याविषयं यदि स्यात्
पुरन्दरस्यापि पुरं न याचे॥"
इत्युद्भटः॥

पुरन्दरा, स्त्री, (पुरं दारयति प्रवाहैरिति। दारि+खच्। निपातनात् साधुः। ततष्टाप्।) गङ्गा। इति हारावली॥

पुरन्ध्रिः, पुरन्ध्री स्त्री, (स्वजनसहितं पुरं धारयतीति। धृ+खच्। गौरादित्वात् ङीष्। पृषोदरादित्वात् ह्रस्वो वा।) पतिपुत्त्रवतीति। चारिमती। इति भरतः॥ तत्पर्य्यायः। कुटुम्बिनी। इत्यमरः।२।६।६॥ (यथा, रघुः।७।२८।
"तौ स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्।
कन्याकुमारौ कनकासनस्थौ
आर्द्राक्षतारोपणमन्वभूताम्॥")
क्षौमात्रम्। इति राजनिर्घण्टः॥

पुरश्चरणं, क्ली, (पुरोऽग्रतश्चरणं मन्त्रजपादिपञ्चाङ्गकर्म्माचरणमिति।) पुरस्क्रिया। सा तु स्वेष्टदेवतामन्त्रसिद्ध्यर्थं तद्देवतापूजापूर्व्वकं तन्मन्त्रजपहोमतर्पणाभिषेकब्राह्मणभोजनरूपपञ्चाङ्गकसाधना। यथा, योगिनीहृदये।
"गुरोराज्ञां समादाय मुक्तान्तःकरणो नरः।
ततः पुरस्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया॥
जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः॥
तस्मादादौ स्वयं कुर्य्यात् गुरुं वा कारयेद्बुधः।
गुरोरभावे विप्रं वा सर्व्वप्रायश्चित्ते रतम्।
स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम्॥
स्त्रियं वा सद्गुणोपेतां सपुत्त्रां विनियोजयेत्॥
आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते॥"
योगिनीहृदये।
"पुण्यक्षेत्रं नदीतीरं गुहापर्व्वतमस्तकम्।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम्॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः॥
तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम्॥
अश्वत्थामलकीमूलं गोशालाजलमध्यतः।
देवतायतनं कूलं समुद्रस्य निजं गृहम्॥
साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम्।
अथवा निवसेत्तत्र यत्र चित्तं प्रसीदति॥"*॥
तथा।
"गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत्।
कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ॥
म्लेच्छदुष्टमृगव्यालशङ्कातङ्कविवर्ज्जिते।
एकान्तपावने निन्दारहिते भक्तिसंयुते॥
सुदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे।
रम्ये भक्तजनस्थाने निवसन् तापसः प्रिये।॥
गुरूणां सन्निधाने च चित्तैकाग्रस्थले तथा।
एषामन्यतमस्थानमाश्रित्य जपमाचरेत्॥
यत्र ग्रामे जपेन्मन्त्री तत्र कूर्म्मं विचिन्तयेत्॥"
गौतमीये।
"पर्व्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे।
यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत्॥"
बिल्वमूलादावपि कूर्म्मचिन्ता नास्ति तदुक्तं वैशम्पायनसंहितायाम्।
"पुण्यक्षेत्रे गृहे तीर्थे देवतायतने शुभम्।
नदीतीरे तथा सिन्धुसङ्गमोऽतिमनोहरः॥
पर्व्वतस्य गुहायाञ्चैव तथा पर्व्वतमस्तकम्।
बिल्वमूलं समुद्रञ्च वनमुद्यानमेव च॥
एषु स्थानेषु विप्रेन्द्र। कूर्म्मचक्रं न चिन्तयेत्।
ग्रामे वा यदि वा वास्तौ गृहे तत्र विचिन्तयेत्॥"

अथ पुरश्चरणे भक्ष्यादिनियमः।
गौतमीये।
"पुरश्चरणकृन्मन्त्री भक्ष्याभक्ष्यं विचारयेत्।
अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते॥
शुक्लान्नञ्च समश्नीयात् मन्त्रसिद्धिसमीहया।
तस्मान्नित्यं प्रयत्नेन शुक्लाशाशी भवेन्नरः॥"
आगस्त्यसंहितायाम्।
"दधि क्षीरं घृतं गव्यं ऐक्षवं गुडवर्ज्जितम्।
निलाश्चैव सिता मुद्गाः कन्दः केमुकवर्ज्जितः॥
नारिकेलफलञ्चैव कदली लवली तथा।
आम्रमामलकञ्चैव पनसञ्च हरीतकी॥
व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः॥"
व्रतान्तर इति।
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत्।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी।
पिप्पली जीरकञ्चैव नागरङ्गञ्च तिन्तिडी॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम्।
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते॥
भुञ्जानो वा हविष्यान्नं शाकं यावकमेव वा।
पयो मूलं फलं वापि यत्र यत्रोपलभ्यते॥
रम्भाफलं तिन्तिडीकं कमला नागरङ्गकम्।
फलान्येतानि भोज्यानि रभ्योऽन्यानि विवर्ज्जयेत्॥"
यत्तु योगिनीतन्त्रे।
"चिञ्चाञ्च नालिकाशाकं कलायं लकुचं तथा।
कदम्बं नारिकेलञ्च व्रते कुष्माण्डकं त्यजेत्॥"
तत्तु व्रतान्तरे बोध्यम्। चिञ्चा तिन्तिडी॥*॥
अथ वर्ज्ज्यानि।
"विवर्ज्जयेन्मधु क्षारलवणं तैलमेव च।
ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च॥"
तथा।
"क्षारञ्च लवणं मांसं गृञ्जनं कांस्यभोजनम्।
माषाढकीमसूरांश्च कोद्रवांश्चणकानपि॥
अन्नं पर्य्युषितञ्चैव निःस्नेहं कीटदूषितम्॥"
रामार्च्चनचन्द्रिकायाम्।
"मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्ज्जयेत्।
ऋतुकालं विना मन्त्री स्वस्त्रियं नैव गच्छति॥
लवणञ्च पलञ्चैव क्षारं क्षौद्रं रसान्तरम्।
कौटिल्यं क्षौरमभ्यङ्गमनिवेदितभोजनम्॥
असङ्कल्पितकृत्यञ्च वर्ज्जयेन्मर्द्दनादिकम्।
स्नायाच्च पञ्चगव्येन केवलामलकेन वा॥
मन्त्रजप्ताम्बुपानीयैः स्नानाचमनभोजनम्।
कुर्य्याद्दृष्टोक्तविधिना त्रिसन्ध्यं देवतार्च्चनम्॥
अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा।
प्रलपन् प्रजपेद्यावत्तावत् निष्फलमुच्यते॥"
नारदीये।
"स्वदु वीर्य्यं सुपक्वञ्च कुर्य्याद्वै लघु भोजनम्।
नेन्द्रियाणां यथा वृद्धिस्तथा भुञ्जीत साधकः॥"
कुलार्णवेऽपि।
"यस्यान्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयम्।
अन्नदातुः फलस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः॥
तस्मात् सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत् सुधीः।
पुरश्चरणकालेषु सर्व्वकर्म्मसु शाम्भवि।॥
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्।
परस्त्रीभिर्म्मनो दग्धं कथं सिद्धिर्व्वरानने!॥"
परान्नं भिक्षेतरविषयम्। भिक्षायां तस्य स्वत्वोत्पादात्। तथा च।
"वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम्।
सत्कुलस्थानजातानां भिक्षार्थी चायजन्मनाम्॥

विहाय वह्निं नहि वस्तु किञ्चित्
ग्राह्यं परेभ्यः सति सम्भवे च ।
असम्भवे तीर्थवहिर्व्विशुद्धात्
पञ्चातिरिक्तं प्रतिगृह्य जप्यात् ॥
तत्रासमर्थोऽशुद्दिनं विशुद्धात्
याचेत यावद्दिनमात्रभैक्ष्यम् ।
गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतैरमुष्य ॥ * ॥
सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ।
प्रोक्ते पारशवे शब्दे प्राणायामं समाचरेत् ॥
बहुप्रलापी आचम्य न्यस्याङ्गानि ततो जपेत् ।
क्षुतेऽप्येवं तथाऽस्पृश्यस्थानानां स्पर्शनेन च ॥
एवमादींश्च नियमान् पुरश्चरणकृच्चरेत् ॥
विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म्म करोति यत् ।
जपार्च्चनादिकं सर्व्वमपवित्रं भवेत्प्रिये । ॥
मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥ * ॥
एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसंख्यं जपं कुर्य्यात् पुरश्चरणसिद्धये ॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ।
जपेदेकमनाः प्रातःकालं मध्यन्दिनावधि ॥
यत्सङ्ख्यया समारब्धं तत् कर्त्तव्यं दिने दिने ।
'यदि न्यूनाधिकं कुर्य्यात् व्रतभ्रष्टो भवेन्नरः ॥"
मुण्डमालायाम् ।
"यत्सङ्ख्यया समारब्धं तत् जप्तव्यं दिने दिने ।
न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत् ॥
प्रजपेदुक्तसङ्ख्यायाश्चतुर्गुणजपं कलौ ॥"
अन्यत्रापि ।
"कृते जपस्तु कल्पोक्तस्त्रेतायां द्विगुणो मतः ।
द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ ॥"
कुलार्णवेऽपि ।
"न्यूनातिरिक्तकर्म्माणि न फलन्ति कदाचन ।
यथाविधिकृतान्येव सत्कर्म्माणि फलन्ति हि ॥
भूशय्या ब्रह्मचारित्वं मौनमाचार्य्यसेविता ।
नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनम् ॥
नित्यं त्रिसवनं स्नानं क्षुद्रकर्म्मविवर्ज्जनम् ।
नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदेवयोः ॥
जपनिष्ठा द्वादशैते धर्म्माः स्युर्म्मन्त्रसिद्धिदाः ॥
स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ।
असत्यभाषणं जिह्मभाषणं परिवर्ज्जयेत् ॥
सत्येनापि न भाषेत जपहोमार्च्चनादिषु ।
अन्यथानुष्ठितं सर्व्वं भवत्येव निरर्थकम् ॥
पुरश्चरणकाले तु यदि स्यान्मृतसूतकम् ।
तथा च कृतसङ्कल्पो व्रतं नैव परित्यजेत् ॥"
योगिनीहृदये ।
"शयीत कुशशय्यायां शुचिवस्त्रधरः सदा ।
प्रत्यहं क्षालयेत् शय्यामेकाकी निर्भयः स्वपेत् ॥
असत्यभाषणं वाचं कुटिलां परिवर्ज्जयेत् ।
वर्ज्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनम् ॥
अभ्यङ्गं गन्धलेपञ्च पुष्पधारणमेव च ।
त्यजेदुष्णोदकस्नानमन्यदेवप्रपूजनम् ॥"
तत्रैव ।
"नैकवासा जपेन्मन्त्रं बहुवासाकुलोऽपि वा ॥"
वैशम्पायनसंहितायाम् ।
"विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः ।
उपर्य्यधो बहिर्व्वस्त्रे पुरश्चरणकृन्नरः ॥
पतितानामन्त्यजानां दर्शने भाषणे श्रुते ।
क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥
तथा तस्य च तत्प्राप्तौ प्राणायामं षडङ्गकम् ।
कृत्वा सम्यक् जपेत् शेषं यद्वा सूर्य्यादिदर्शनम् ॥"
आदिशब्दाद्वह्निं ब्राह्मणाश्च ॥ * ॥ तन्त्रान्तरे ।
"मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यग्रत्वमनिर्व्वेदो जपसम्पत्तिहेतवः ॥ * ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणावृतः ।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित् ॥
अनासनः शयानो वा गच्छन् भुञ्जान एव वा ।
अप्रावृतौ करौ कृत्वा शिरसा प्रावृतोऽपि वा ॥
चिन्ताव्याकुलचित्तो वा क्रुद्धो भ्रान्तः क्षुधा-
न्वितः ।
रथ्यायामशिवस्थाने न जपेत्तिमिरालये ॥
उपानद्गूढ़पादो वा यानशय्यागतोऽपि वा ।
प्रसार्य्य न जपेत् पादावुत्कटासन एव च ।
न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः ॥"
तथा ।
"मार्ज्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं कपिं खरम् ।
दृष्ट्वाचम्य जपेत् शेषं स्पृष्ट्वा स्नानं विधीयते ॥"
सर्व्वत्र जपे त्वयं नियमः ॥ मानसे तु नियमो
नास्त्येव । तथा च ।
"अशुचिर्व्वा शुचिर्व्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव सदाभ्यसेत ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
श्यामादिजपे तु तन्त्रान्ते विशेषो वक्तव्यः ॥
जपफलमाह शिवधर्म्मे ।
"जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत ।
सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्व-
तीम् ॥"
पाद्मे ।
"यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥"
पाद्मनारदीययोः ।
"यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥
माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥"
तथा तन्त्रे ।
"मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥"
गौतमीये ।
"शक्त्या त्रिसवनं स्नानमन्यथा द्विः सकृच्च वा ।
त्रिसन्ध्यं नजपेन्मन्त्रं पूजनं तत्समं भवेत् ॥
सन्ध्यात्रये पूजाङ्गत्वाज्जपमष्टोत्तरशतमित्यर्थः ॥
"एकदा वा भवेत् पूजा न जपेत् पूजनं विना ।
जपान्ते वा भवेत् पूजा पूजान्ते वा जपेन्मनुम् ॥
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥"
मध्यन्दिनावधीति न नियमपरं किन्त्वधिककाल-
व्यवच्छेदपरम् । अन्यथा तत्समयजपनियमे
कदाचित् जिह्वाया जाड्याद्वेग वा प्रति-
नियतदिवसीयजपसङ्ख्याया अपूर्णत्वे अधिकत्वे
वा नियमभङ्गः स्यात् ॥ * ॥
"मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपंक्तिवत् ॥ * ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेण्यां वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥"
मन्त्रनिर्णये ।
"मानसं मन्त्रवर्णस्य चिन्तनं मानसः स्मृतः ।
जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥
किञ्चित् श्रवणयोग्यः स्यात् उपांशुः स जपः
स्मृतः ।
मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्ज्जपादिविशिष्टः स्यादुपांशुर्द्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ॥"
प्रकारान्तरम् ।
"निजकर्णागोचरो यो मानसः स जपः स्मृतः ।
उपांशुर्निजकर्णस्य गोचरः स प्रकीर्त्तितः ॥
निगदस्तु जनैर्वेद्यस्त्रिविधोऽयं जपः स्मृतः ॥"
तन्त्रान्तरे ।
"उच्चैर्जपोऽधमः प्रोक्त उपांशुर्म्मध्यमः स्मृतः ।
उत्तमो मानसो देवि । त्रिविधः कथितो जपः ॥"
जिह्वाजपस्तु ।
"जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैरिति ॥
अतिविलम्बातिशीघ्रजपे दोषमाह ।
"अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥
मनसा यः स्मरेत् स्तोत्रं वचसा वा मनुं जपेत् ।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा ॥"
गौतमीये ।
"पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
सौषुम्नध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवन्ति ते ॥"
पाद्मनारदीययोः ।
"मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव परमव्योम्नि परमामृततृंहिते ॥
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्व्विना ॥"
गौतमीये दशाक्षरपटले ।
"मूलमन्त्रं प्राणबुद्ध्या सुषुम्नामूलदेशके ।
मन्त्रार्थं तस्य चैतन्यं जीवं ध्यात्वा पुनः पुनः ॥
कुलार्णवेऽपि ।
"मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः
न सिद्ध्यन्ति वरारोहे । कल्पकोटिशतैरपि ॥
जातसूतकमादौ स्यादन्ते च मृतसूतकम् ।
सूतकद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति ॥
गुरोस्तदर्शितं कृत्वा मन्त्रं यावज्जपेद्धिया ।

सूतकद्वयनिर्म्मुक्तः स मन्त्रः सर्व्वसिद्धिदः ॥
जातसूतकमादौ स्यादन्ते सूतकमन्त्रतः ।
सूतकद्वयनिर्म्मुक्तो मन्त्रः सिद्ध्यति नान्यथा ॥"
तत्रैव ।
"तस्माद्देवि ! प्रयत्नेन भुवेन पुटितं मनुम् ।
अष्टोत्तरशतं वापि सप्तवारं जपादितः ॥
जपान्ते च तथा जप्यात् चतुर्व्वर्गफलाप्तये ॥"
तत्रैव ।
"ब्रह्मबीजं मनोर्द्दत्त्वा चाद्यन्ते परमेश्वरि ! ।
सप्तवारं जपेन्मन्त्रं सूतकद्वयमुक्तये ॥ * ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥
लुप्तबीजाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये ! ।
मन्त्राश्चैतन्यसहिताः सर्व्वसिद्धिकराः स्मृताः ॥
चैतन्यरहिता मन्त्राः प्रोक्ता वर्णास्तु केवलम् ।
फलं नैव प्रयच्छन्ति लक्षकोटिजपैरपि ॥
मन्त्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ।
शते सहस्रे लक्षे वा कोटिजापे न तत्फलम् ॥
हृदये ग्रन्थिभेदश्च सर्व्वावयववर्द्धनम् ।
आनन्दाश्रूणि पुलको देहावेशः कुलेश्वरि ! ॥
गद्गदोक्तिश्च सहसा जायते नात्र संशयः ।
सकृदुच्चरितेऽप्येव मन्त्रे चैतन्यसंयुते ॥
दृश्यन्ते प्रत्यया यत्र पारम्पर्य्यं तदुच्यते ॥ * ॥
मासमात्रं जपेन्मन्त्रं भूतलिप्या तु संपुटम् ।
क्रमोत्क्रमात् सहस्रञ्च तस्य सिद्धो भवेन्मनुः ॥"
तत्र भूतलिपिः ।
"पञ्च ह्रस्वाः सन्धिवर्णा व्योमाराग्निजलान्धराः ।
अन्त्यमाद्यं द्वितीयञ्च चतुर्थं मध्यमं क्रमात् ॥
पञ्चवर्गाक्षराणि स्युर्व्वान्तश्वेतेन्दुभिः सह ।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥
मन्त्रस्तु ।
अ इ उ ऋ ऌ ए ऐ ओ औ ह य र व ल ङ
क ख घ ग ञ च छ झ ज ण ट ठ ढ ड न त
थ ध द म प फ भ ब श ष साः ।
अतः परं मन्त्रसुच्चार्य्य पुनः क्रमेणोल्लिखम् ॥*॥
गौतमीये ।
"एवं जपं पुरा कृत्वा तेजोरूपं समर्पयेत् ।
देवस्य दक्षिणे हस्ते कुशपुष्पार्घ्यवारिभिः ॥
सफलं तद्विभाव्यैव प्राणायामं समाचरेत् ।
जपस्यादौ जपान्ते च त्रितयं त्रितयं चरेत् ॥"*॥
शक्ति ... र्पं देव्या वामहस्ते । तथा च ।
"एव ज(प)ं पुरा कृत्वा गन्धाक्षतकुशोदकैः ।
जपं समर्पयेद्देव्या वामहस्ते विचक्षणः ॥ * ॥
जपान्ते प्रत्यहं मन्त्री होमयेत्तद्दशांशतः ।
तर्पणञ्चाभिषेकञ्च तत्तद्दशांशतो मुने ! ॥
प्रत्यहं भोजयेद्विप्रान् न्यूनाधिकप्रशान्तये ।
अथवा सर्व्वपूर्त्तौ च होमादिकमथाचरेत् ॥
सम्पूर्णायां प्रतिज्ञायां तर्पणादिकमाचरेत् ॥"
मुण्डमालायाम् ।
"यस्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात् ।
तत्तद्द्रव्यैर्जपस्यान्ते होमं कुर्य्याद्दिने दिने ॥"
जपसङ्ख्यायां विशेषमाह मुण्डमालायाम् ।

नाश्वत्थैर्हंसपर्व्वैर्वा न धान्यैर्न च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसङ्ख्यान्तु कारयेत् ॥
लाक्षाकुशीदसिन्दूरं गोमयञ्च करीषकम् ।
विलोड्य गुटिकां कृत्वा जपसङ्ख्यान्तु कारयेत् ॥"
पुरश्चरणचन्द्रिकायाञ्च ।
"ततो जपदशांशेन होमं कुर्य्याद्दिने दिने ।
अथवा जपसङ्ख्यायां पूर्णायां होममाचरेत् ॥"
तथा । होमाद्यशक्तौ च सनत्कुमारीये ।
"यद्यदङ्गं भवेद्भग्नं तत्सङ्ख्याद्विगुणो जपः ।
होमाभावे जपः कार्य्यो होमसङ्ख्याचतुर्गुणः ॥
विप्राणां क्षत्रियाणाञ्च रससङ्ख्यागुणः स्मृतः ।
वैश्यानां वसुसङ्ख्याकमेषां स्त्रीणामयं विधिः ॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिञ्चरेत् ।
अनाश्रितस्य शूद्रस्य दिक्सङ्ख्याकः समीरितः ।
शूद्रस्य विप्रभृत्यस्य तत्पत्न्याः सदृशो जपः ॥"
अत्राप्यशक्तश्चेत् योगिनीहृदये ।
"होमकर्म्मण्यशक्तानां विप्राणां द्विगुणो जपः ।
इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः ॥"
त्रिगुणादिः होमसङ्ख्यात्रिगुणजपः क्षत्रियेण कार्य्यः । वैश्येन चतुर्गुणः । शूद्रेण पञ्चगुणः ।
तदुक्तं कुलार्णवे ।
"यद्यदङ्गं विहीनं स्यात् तत्सङ्ख्याद्विगुणो जपः ।
कुर्व्वीत त्रिचतुःपञ्च यथासङ्ख्यं द्विजादयः ॥"
एतेन स्त्रीशूद्राणां होमाधिकारः । तथा च ।
"वर्णानामर्द्धशशाङ्ककोणं त्र्यस्रं भवति शूद्राणाम् ।"
इति नागभट्टनिबन्धे ॥
शूद्राणां त्र्यस्रमिति कुण्डप्रकरणे सारदायाम् ॥
स्त्रीणां होमाधिकारश्च तत्र ।
"लाजैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति ।
अनेन विधिना कन्या वरमाप्नोति वाञ्छितम् ॥"
अतः स्त्रीणां होमाधिकारः । तच्च ब्राह्मणद्वारा । तथा च तन्त्रे ।
"ओङ्कारोच्चारणाद्धोमात् शालग्रामशिलार्च्चनात् ।
ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत् ॥"
इति वाक्यान्निषेधात् ।
तथा स्त्रीणामपि सर्व्ववैदिककर्म्मसु शूद्रतुल्यत्वप्रतिपादनात् ।
स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम ॥
इति भगवद्वचनाच्च ॥ तथा च नारायणकल्पे ।
"अष्टाक्षरो महामन्त्रः सप्राणः शूद्रयोषितोः ।
प्रणवादिश्च यो मन्त्रो न स्त्रीशूद्रे प्रशस्यते ॥"
इति सर्व्वत्र स्त्रीणां शूद्रवद्व्यवहारः ॥*॥
शूद्रस्यापि स्वकर्त्तृकहोमः । तथा च वाराहीतन्त्रे ।
"यदि कामी भवत्येव शूद्रोऽपि होमकर्म्मणि ।
वह्निजायां परित्यज्य हृदयान्तेन होमयेत् ॥"
सर्व्वेषां वा द्विगुणो जपः । तथा च वाशिष्ठे ।
"यद्यदङ्गं विहीयेत तत्सङ्ख्याद्विगुणो जपः ।
कर्त्तव्यश्चाङ्गसिद्ध्यर्थं तदशक्तेन भक्तितः ॥
न चेदङ्गं विहीयेत तद्विशिष्टमवाप्नुयात् ।

विप्रभोजनमात्रेण यज्ञं साङ्गं भवेत् ध्रुवम् ॥
यत्र भुङ्क्ते द्विजस्तत्र भुङ्क्ते हरिः स्वयम् ॥"
तथा अगस्त्यसंहितायाम् ।
"यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा ।
तावत्सङ्ख्याजपेनैव ब्राह्मणाराधनेन च ॥
भवेदङ्गद्वयेनैव पुरश्चरणमार्य्य वै ॥"*॥
वीरतन्त्रे ।
"नियमः पुरुषे ज्ञेयो न योषित्सु कथञ्चन ।
न न्यासो योषितामत्र न ध्यानं न च पूजनम् ॥
केवलं जपमात्रेण मन्त्राः सिद्ध्यन्ति योषिताम् ॥"
तन्त्रञ्च ।
"गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः ।
गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम् ॥"*॥
तथा च योगिनीहृदये ।
"गुरोरभावे पुत्त्राय तत्पत्न्यै वा निवेदयेत् ।
तयोरभावे देवेशि ! ब्राह्मणेभ्यो निवेदयेत् ॥
सम्यक्सिद्धैकमन्त्रस्य पञ्चाङ्गोपासनेन च ।
सर्व्वे मन्त्राश्च सिद्ध्यन्ति त्वत्प्रासादात् कुलेश्वरि ॥
गुरुमूलमिदं सर्व्वमित्याहुस्तत्त्ववेदिनः ।
एकग्रामे स्थितो नित्यं गत्वा वन्देत वै गुरुम् ॥
गुरुरेव परं ब्रह्म तस्मादादौ समर्च्चयेत् ।
तदन्ते महतीं पूजां कुर्य्यात् साधकसत्तमः ॥
सुभाषिणीं कुमारीश्च भगणैरपि भूषयेत् ।
मिष्टान्नं बहुशः कार्य्यं भुञ्जीत बन्धुभिः सह ॥
एवं सिद्धमनुर्म्मन्त्री साधयेत् सकलेप्सितान् ॥"*॥
अथ ग्रहणपुरश्चरणम् ।
तन्त्रे ।
"अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्व्वा शुचिः पूर्व्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ।
स्पर्शाद्विमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥" * ।
यदि नक्रादिदूषिता नदी भवति तदा यत्कर्त्तव्यं तदाह रुद्रयामले ।
"अपि शुद्धोदकैः स्नात्वा शुचौ देशे समाहितः
ग्रासाद्विमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥
इति कृत्वा न सन्देहो जपस्य फलभाग्भवेत् ॥'
तदभावे ।
"यद्वा पुण्योदकैः स्नात्वा शुचिः पूर्व्वमुपोषितः
ग्रहणादिविमोक्षान्तं जपेन्मन्त्रमनन्यधीः ॥"*
उपवासासमर्थे तु तत्रैव ।
अथवान्यप्रकारेण पौरश्चारणिको विधिः ।
चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः ॥
स्पर्शनादिविमोक्षान्तं जपेन्मन्त्रं समाहितः ।
जपाद्दशांशतो होमं तथा होमात्तु तर्पणम् ।
एवं कृत्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥"*
गोपालमन्त्रतर्पणे तु होमसमसङ्ख्यात्वं यथा,—
"इह गोपालमन्त्रस्य तर्पणं होमसङ्ख्यया ।
वर्णानामिह सर्व्वेषामित्यागमविदो विदुः ॥
इष्ट्वा स्नात्वा सुसङ्कल्प्य विमोक्षान्तं जपञ्चरेत्
तावद्द्रव्यादिकं कुर्य्याद्ग्रहणान्ते शुचिः पुमान्
एवं जपान्मन्त्रसिद्धिर्भवत्येव न संशयः ॥" * ॥

ग्रहणे जपस्य आवश्यकत्वम् ।
"आह्वादेरनुरोधेन यदि जप्यं त्यजेन्नरः ।
स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः ॥"
इति सनत्कुमारीयवचनात् ॥
वस्तुतस्तु आरब्धपुरश्चरणविषयमिदम् ।
तथाहि ।
"आरब्धे पुरश्चरणे यदि च ग्रहणं भवेत्
तदा आह्वाद्यनुरोधेन जपं न त्यजेत् । एवं
राज्ञावपि पुरश्चरणविशेषे बोद्धव्यम् ।" इति
सर्व्वसमञ्जसम् ॥ * ॥ योगिनीहृदये ।
"कल्पोक्तविधिना मन्त्री कुर्य्याद्धोमादिकन्ततः ।
अथवा तद्दशांशेन होमादींश्च समाचरेत् ॥"
तथा ।
"अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणभोजनम् ॥ ।
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत् ।
एवञ्च मन्त्रसिद्धिः स्यात् देवता च प्रसीदति ॥"
अत्र ब्राह्मणभोजनमावश्यकमेव ।
"सर्व्वथा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये ।
विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवम् ॥"
क्रियासारे ।
"दीक्षाहीनान् पशून् यस्तु भोजयेद्वा स्वमन्दिरे ।
स याति परमेशानि । नरकानेकविंशतिम् ॥
एवं यः कुरुते देवि ! पुरश्चरणकं प्रिये । ।
सर्व्वपापविनिर्म्मुक्तो देवीसायुज्यमाप्नुयात् ॥"
यद्यपि पुरश्चरणपदं पञ्चाङ्गपरम् । तथा च ।
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमुच्यते ॥"
तथापि ग्रहणादौ पुरश्चरणपदं गौणं जपमात्र-
परम् ।
"सूर्य्योदयं समारभ्य यावत् सूर्य्योदयान्तरम् ॥"
इत्यादौ तथादर्शनात् तत्र होमादेरभावात् ।
तर्हि कथं ग्रहणपुरश्चरणे होमादि इति चेत्
वचनादेव । न च पुरश्चरणस्य पञ्चाङ्गत्वात्
सर्व्वत्र तदेव स्यादिति वाच्यम् । ग्रहणे पुन-
स्तद्विधानमनर्थकं स्यात् । किञ्च ग्रहणे होमादि-
नियमात् नान्यत्र होमादिः । ग्रहणपुरश्चरणे
होमादिविधानन्तु प्रकृतीभूतपञ्चाङ्गपुरश्चरण-
तुल्यताबोधनाय । अतएव ग्रहणे पञ्चाङ्ग-
स्वरूपपुरश्चरणे कृते मुख्यप्रयोगेऽप्यधिकार इति
प्रकटीकृतम् । तदकरणे पुनः केवलजपमात्र-
पुरश्चरणे कृते नाधिकार इति सर्व्वसम्मतमिति ।
पुरश्चरणकालस्तु वाराहीये ।
"चन्द्रतारानुकूले च शुक्ले पक्षे शुभेऽहनि ।
आरभेत पुरश्चर्य्यां हरौ सुप्ते न चाचरेत् ॥"
प्रतिप्रसवः । रुद्रयामले ।
"कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके ।
फाल्गुने श्रावणे दीक्षा पुरश्चर्य्या प्रशस्यते ॥"
मलमासे गुरुास्तोदये च दीक्षापुरश्चरणयोर्निषेध-
माह तन्त्रान्तरे ।
"मलमासे क्षयदिने नैव कुर्य्याद्दीक्षां जपं प्रिये ! ।
कृते नाशो भवेदाशु आयुःश्रीसुतसम्पदाम् ॥"

अथ पुरश्चरणप्रयोगः ।
तत्र तावत् भूमेः परिग्रहं कृत्वा पुरश्चरणप्राक्
तृतीयदिवसे क्षौरादिकं विधाय वेदिकाया-
श्चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रम्
आहारादिविहारार्थं परिकल्प्य तत्र कूर्म्म-
चक्रानुरूपं मण्डलं विधाय एकभक्तं कुर्य्यात् ।
ततः परदिने स्नानादिकं विधाय शुद्धः सन्
वेदिकायाश्चतुर्दिक्षु अश्वत्थोडुम्बरप्लक्षाणामन्य-
तमस्य वितस्तिमात्रान् दश कीलकान्, ॐ
नमः सुदर्शनाय अस्त्राय फडितिमन्त्रेणाष्टोत्तर-
शताभिमन्त्रितान् वेदिकाया दशदिक्षु,
ॐ ये चात्र विघ्नकर्त्तारो भुवि दिव्यन्तरी-
क्षगाः ।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु ॥
मयैतत् कीलितं क्षेत्रं परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्व्वे निर्व्विघ्नं सिद्धिरस्तु मे ॥
इत्यनेन निखन्य तेषु ॐ नमः सुदर्शनाय
अस्त्राय फडितिमन्त्रेणास्त्रं संपूज्य पूर्व्वादि
क्रमेण इन्द्रादिलोकपालान् पूजयेत् । तद्यथा ।
ॐ भूर्भुवःस्वरिन्द्रलोकपाल इहागच्छ इत्या-
वाह्य पञ्चोपचारैरन्यांश्च पूजयेत् । तथा च
मुण्डमालायाम् ।
"पुण्यक्षेत्रादिकं गत्वा कुर्य्याद्भूमेः परिग्रहम् ।
तथा ह्यमुकमन्त्रस्य पुरश्चरणसिद्धये ।
मयेयं गृह्यते भूमिर्मन्त्रोऽयं सिध्यतामिति ॥"
तथा ।
"ग्रामे क्रोशमितं स्थानं नद्यादौ स्वेच्छया मतम् ।
नगरादावपि क्रोशं क्रोशयुग्ममथापि वा ॥
क्षेत्रं वा यावदिष्टन्तु विहारार्थं प्रकल्पयेत् ।
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् ॥
क्षीरिवृक्षोद्भवान् कीलान् अस्त्रमन्त्राभिमन्त्रि-
तान् ।
निखनेद्दशदिग्भागे तेष्वस्त्रञ्च प्रपूजयेत् ॥
लोकपालान् पुनस्तेषु गन्धाद्यैः पूजयेत् सुधीः ।
ततो मध्यस्थाने क्षेत्रपालं वास्तोशञ्च संपूज्य
सर्व्वविघ्नविनाशार्थं गणपतिं पूजयेत् । ॐ
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा मन-
कामेशामुकमन्त्रपुरश्चरणकर्म्मणि सर्व्वविघ्नविना-
शाय गणेशपूजामहं करिष्ये । इति सङ्कल्प्य
वेदिकामध्ये पञ्चोपचारैर्गणेशं पूजयेत् । तदुक्तम् ।
"क्षेत्रपालादिकं तत्र पूजयेत् विधिवत्ततः ।
क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्च्चयेत् ॥
दिक्पालेभ्यो बलिं दद्यात् ततः क्षेत्रं समा-
विशेत् ॥"
ततो माषभक्तादिना पूजितदेवताभ्यो बलिं
दद्यात् । ततः ।
"ॐ ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननिवासिनः ।
मातरोऽप्युग्ररूपाश्च गणाधिपतयश्च ये ॥
विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ।
सर्व्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥"
इत्यनेन दशदिक्षु भूतेभ्यो बलिं दद्यात् । ततो
गायत्त्रीं जपेत् । तथा च ।

"प्रातः स्नात्वा तु गायत्त्र्याः सहस्रं प्रयतो
जपेत् ।
ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः ॥"
इति विद्याधराचार्य्यः ॥ * ॥
यत्तु प्रातः स्नात्वा तु गायत्त्र्या अयुतं प्रयतो
जपेत् इति । तत् पुनरत्यन्तपापशङ्कया । ॐ
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा
ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रगायत्त्री-
जपमयुतगायत्त्रीजपं वा अहं करिष्ये । इति
सङ्कल्प्य जपेत् । तत उपवासं हविष्यं वा
कुर्य्यात् ॥ * ॥
तत्परदिने उषसि स्नानादिकं कृत्वा स्वस्ति-
वाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । यथा विष्णुः
ओम् अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा
अमुकदेवताया अमुकमन्त्रसिद्धिप्रतिबन्धकता-
शेषदुरितक्षयपूर्व्वकतन्मन्त्रसिद्धिकामोऽद्यारभ्य
यावता कालेन तत् स्यात् तावत्कालममुकदेव-
ताया अमुकमन्त्रस्य इयत्संख्यजपतद्दशांश-
होमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांश-
ब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये । इति
सङ्कल्प्य भूतशुद्धिप्राणायामादिकं कृत्वा स्वस्व-
मुद्रां बद्ध्वा स्वस्वपूजापद्धत्युक्तक्रमेण देवतां संपूज्य
दीपे प्रज्वलिते देवतां हृदये प्रातःकालं समा-
रभ्य मध्यंदिनं यावत् जपं कुर्य्यात् । ततस्तद्-
दशांशहोम-तद्दशांश तर्पण-तद्दशांशाभिषेक-त-
द्दशांशब्राह्मणभोजनङ्कुर्य्यात् । तथा च । सनत्-
कुमारतन्त्रे ।
"प्रणव तत्सदद्येति मासपक्षतिथावपि ।
अमुकामुकगोत्रोऽहं मूलमुच्चार्य्य तत्परम् ॥
सिद्धिकामोऽस्य मन्त्रस्य इयत्सङ्ख्य जपन्ततः ।
दशांशं हवनं होमाद्दशांशं तर्पणं ततः ॥
दशांशं मार्ज्जनं तस्माद्दशांशं विप्रभोजनम् ।
पुरश्चरणमेव हि करिष्ये प्रागुदङ्मुखः ॥"
तथा ।
"दीपस्य ज्वलितस्याथ जपकर्म्म प्रशस्यते ।
तद्दीपस्थानमाश्रित्य वातातपसहां कुटिम् ॥
निर्म्माय विधिवत् कुर्य्यात् जपं तत्र शुभे दिने ॥"
ततो होमस्ततस्तर्पणम् ॥ * ॥
तन्त्रान्तरे ।
"तर्पणन्तु ततः कुर्य्यात्तीर्थादैश्चन्द्रमिश्रितैः ।
जले देवं समावाह्य पाद्याद्यैरुदकात्मकैः ॥
सम्पूज्य विधिवद्भक्त्या परिवारसमन्वितम् ।
एकैकमञ्जलिं तोयं परिवारान् प्रतर्पयेत् ॥
ततो होमदशांशेन तर्पयेत परदैवतम् ।
संपूर्णायान्तु सङ्ख्यायां पुनरेकैकमञ्जलिम् ।
अङ्गादिपरिवारेभ्यो दत्त्वा देवं विसर्ज्जयेत् ॥" * ॥
तर्पणवाक्यन्तु मूलमुच्चार्य्य श्रीअमुकं तर्पयामि
नमः । इति विष्णुविषयम् । तथा च गौतमीये ।
"आदौ मन्त्रं समुच्चार्य्य श्रीपूर्व्वं कृष्णमित्यपि ।
तर्पयामि पदञ्चोक्त्वा नमोऽन्त तर्पयेन्नरः ॥"
अन्यत्र मूलमुच्चार्य्य अमुकदेवतां तर्पया-
मीति ।

तथा च ।
"तर्पयामि पदस्थोक्ता मन्त्रान्ते स्वेषु नामसु ।
द्वितीयान्तेषु चैवैवं तर्पणस्य मनुर्म्मतः ॥"
शक्तिविषये पुनर्मूलमुच्चार्य्य अमुकीं तर्पयामि स्वाहा । होमतर्पणयोः स्वाहेति तत्तत्तन्त्रवचनात् । गौतमतन्त्रे ।
"मन्त्रान्ते नाम चोच्चार्य्य तर्पयामि ततः परम् ।
कुर्य्याच्चैव वरारोहे । स्वाहान्तं तर्पणं मतम् ॥"
इत्यादि ॥ विश्वेश्वरतन्त्रे ।
"विद्यां पूर्व्वं समुच्चार्य्य तदन्ते देवताभिधाम् ।
तर्पयामीति सम्प्रोक्ता स्वाहान्तस्तर्पणो मतः ॥"
अभिषेकवाक्यन्तु । नमोऽन्तं मूलमुच्चार्य्य अमुकदेवतामहमभिषिञ्चामि इति कलसमुद्रया स्वमूर्द्ध्नि अभिषिञ्चेत् । तथा च । गौतमीये ।
"नमोऽन्तं मूलमुच्चार्य्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु ॥
अभिषिञ्चेत् स्वमूर्द्धानं तोयैः कुम्भाख्यमुद्रया ॥"
शक्तिविषये गौतमतन्त्रे ।
"मन्त्रान्ते नाम चोच्चार्य्य सिञ्चामीति नमः पदम् ॥"
इति । ततो ब्राह्मणान् भोजयित्वा पूजां कुर्य्यात् ॥ * ॥ ततो दक्षिणा । अद्येत्यादि कृतैतदमुकमन्त्रपुरश्चरणकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनं वह्निदैवतं अमुकगोत्राय गुरवे तुभ्यमहं सम्प्रददे । ततोऽच्छिद्रावधारणं कुर्य्यात् ॥
अथ ग्रहणपुरश्चरणसङ्कल्पः ।
तद्यथा,—
ओम् अद्येत्यादि राहुग्रस्ते निशाकरे दिवाकरे वा अमुकगोत्रःश्रीअमुकदेवशर्म्मा अमुकदेवताया अमुकमन्त्रसिद्धिकामो ग्रासाद्विमुक्तिपर्य्यन्तं अमुकदेवताया अमुकमन्त्रजपरूपपुरश्चरणमहं करिष्ये । इति सङ्कल्प्य जपेत् । ततस्तद्दिने तत्परदिने वा स्नानादिकं विधाय ॐ अद्येत्यादि अमुकदेवताया अमुकमन्त्रस्य कृतैतत् ग्रहणकालीन-इयत्सङ्ख्यजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनकर्म्मणामहं करिष्ये । इति सङ्कल्प्य होमादिकं कुर्य्यात् । दक्षिणादिकन्तु पूर्व्ववत् ।"
इति तन्त्रानन्दतन्त्रसारः ॥ * ॥
(अथ रहस्य पुरश्चरणम् ।
श्रीपार्व्वत्युवाच ।
"कथयस्व महादेव । सिद्धिकारणमुत्तमम् ।
येन सिद्धिं समायान्ति सर्व्वतन्त्राश्च सिद्धिदाः ॥
येषु येषु च कालेषु पुरश्चर्य्या भवेद्ध्रुवम् ॥
श्रीशिव उवाच ।
कथयामि समासेन श्रूयतां पर्व्वतात्मजे ।।
मेषराशौ दशसहस्रं प्रजपेन्मन्त्रमुत्तमम् ॥
पुरश्चरणमेतद्धि श्रूयतां सुरवन्दिते ।॥
वृषराशौ यदा मन्त्री ह्ययुतं प्रजपेत् सुधीः ।
तेन तत्र सुसिद्धिः स्यात् नात्र कार्य्या विचारणा ॥
मिथुने च यदा मन्त्री ह्ययुतं मन्त्रमुत्तमम् ।
प्रजपेत् प्रयतो नित्यं पुरश्चरणमुच्यते ॥
कर्कटे च यदा मन्त्री सहस्रं प्रत्यहं जपेत् ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद्भवेत् ॥
सिंहे च सर्व्वमन्त्राणामयुतानां द्वयं जपेत् ।
धर्म्मार्थकाममोक्षाणां फलभाग्भवति ध्रुवम् ॥
कन्यायाञ्च यदा मन्त्री मन्त्रं मन्त्रपरायणः ।
सहस्रं द्वादशञ्चैव जपेन्नियतमानसः ॥
पुरश्चरणमेतद्धि सर्व्वकामार्थसाधनम् ।
इह लोके सुखं भुक्ता चान्ते देवीपदं व्रजेत् ॥
तुलायां प्रत्यहं मन्त्री सहस्रं साधको जपेत् ।
अनेन विधिना देवि । पुरश्चरणकृद्भवेत् ॥
वृश्चिके चायुतं मन्त्रं शय्यायां प्रजपेत् सुधीः ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चर्य्याफलं भवेत् ॥
धनुषि च यदा मन्त्रं जपेदयुतमादरात् ।
इहैव कन्दर्पसमो धनवान् बलवान् सुखी ॥
मकरे च यदा मन्त्रं जपेत् साधकसत्तमः ।
चतुर्णामयुतं देवि । प्रत्यहं यतमानसः ॥
धर्म्मार्थौ भावयेन्नित्यं पुरश्चरणमुच्यते ॥
कुम्भे चैव यदा मन्त्रं जपेदयुतमादरात् ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद्भवेत् ॥
मीने चैव यदा देवि । प्रजपेदयुतं द्वयम् ।
तेन पुरश्चरणमित्याहुः सर्व्वागमविशारदाः ॥
सर्व्वत्र जपनं ज्ञेयं रात्रौ वा मैथुनेऽपि वा ।
शय्यायान्तु विशेषेण परयोषित्समागमे ॥
हविष्याशी तदा देवि ! जपेन्नियतमानसः ।
एवंविधं जपं कृत्वा दशांशञ्च तदाचरेत् ॥
दक्षिणां गुरवे दत्त्वा सिद्धिभाग् भवति ध्रुवम् ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥
रविवारादिसर्व्वेषु वारसंख्यासहस्रकम् ।
जप्त्वा मन्त्रं सदा देवि । साधकः सिद्धिभाग् भवेत् ॥
पुरश्चरणमेतद्धि नात्र कार्य्या विचारणा ॥
एवंविधं समाचर्य्य दशांशञ्च तदाचरेत् ।
गुरवे दक्षिणां दत्त्वा सर्व्वकाममवाप्नुयात् ॥
केवलं जपमात्रेण पुरश्चरणमुच्यते ।
येषु येषु च नक्षत्रेषु जायते सिद्धिरुत्तमा ॥
कथयामि समासेन श्रूयतां पर्व्वतात्मजे ।।
अश्विन्यां जप्यते मन्त्रं साधकैश्च सहस्रकम् ॥
तेन सिद्धिमवाप्नोति साधको नात्र संशयः ।
द्विसहस्रं जपेन्मन्त्रं भरण्याञ्च यदा सुधीः ॥
यमलोकं परित्यज्य धनेन च धनाधिपः ।
कृत्तिकायां जपेन्मन्त्रं त्रिसहस्रञ्च साधकः ॥
रोहिण्याञ्च यदा मन्त्रं जपेत साधकसत्तमः ।
सहस्रं वा शतं वापि सर्व्वकामार्थमाप्नुयात् ॥
मृगशीर्षे यदा मन्त्रं नियतं प्रजपेत सुधीः ।
सहस्रपञ्चकञ्चैव वृहस्पतिसमो भवेत् ॥
आर्द्रायां जप्यते मन्त्रं साधकैः सुसमाहितैः ।
षट्सहस्रं यदा देवि । सर्व्वकामार्थसिद्धये ॥
पुनर्व्वसुसमायोगे यदा सहस्रमुत्तमम् ।
जप्यते साधको नित्यं लभते च सुरोत्तमम् ॥
पुष्यायाञ्च जपेन्मन्त्रं सप्तमाञ्च सहस्रकम् ।
तेन सर्व्वसुसिद्धिः स्यात् पुरश्चर्य्याधिको विधिः ॥
अश्लेषायां यदा देवि । मन्त्री मन्त्रं समाहितः ।
सहस्राष्टकञ्चैव जपेत् सर्व्वार्थसिद्धये ॥
दशसहस्रं मघायाञ्च जप्त्वा मन्त्रं समाहितः ।
पुरन्दरसमो भूत्वा साधको विचरेत् भुवि ॥
एकादशसहस्रन्तु पूर्व्वफल्गुन्ये जपेत सुधीः ।
कुवेर इव वित्ताढ्यो जायते नात्र संशयः ॥
उत्तरफल्गुनीये देवि । सहस्रं द्वादशं तथा ।
जप्यते साधकैर्नित्यं सर्व्वकामार्थसिद्धये ॥
हस्तायाञ्च जपेद्देवि । सहस्रञ्च त्रयोदश ।
सूर्य्यस्यैव समो भूत्वा विचरेत् भुवि साधकः ॥
चित्रायाञ्च जपेन्मन्त्रं द्विसहस्रञ्च साधकैः ।
नानाभोगसमायुक्तो भवेद् भुवि पुरन्दरः ॥
स्वात्या सर्व्वार्थसिद्धिः स्यात् द्विसहस्रस्य जापनात् ।
साधकोऽप्याहतगतिर्जायते नात्र संशय. ॥
विशाखायां यदा मन्त्रं चतुःसहस्रकं प्रिये ।।
जपेच्च साधको नित्यं सोमवत् प्रियदर्शनः ॥
अनुराधायां यदा देवि ! मन्त्री मन्त्रं सदा जपेत् ।
पुत्रपौत्रसमायुक्तः खेचरो जायते ध्रुवम् ॥
ज्येष्ठायाञ्च यदा मन्त्रं द्विसहस्रं विचक्षणः ।
प्रजपन् लभते सिद्धिं नात्र कार्य्या विचारणा ॥
मूलायाञ्च जपेन्मन्त्रं सहस्रं पञ्चकं प्रिये ।।
नानासिद्धिमवाप्नोति साधको नात्र संशयः ॥
वरुणेन समो भूत्वा जायते साधको भुवि ।
शतभिषायां यदा मन्त्रं द्विःसहस्रं जपेत् सुधीः ॥
महापातकान्मुच्येत फलभाग्भवति ध्रुवम् ।
रेवत्याञ्च यदा मन्त्रं चत्वारि सहस्रकं तथा ॥
जप्त्वा स्तुत्वा सदा देवि । सोमलोकमवाप्नुयात् ।
रात्रौ वा मैथुने वापि शय्यायाञ्च व्यवस्थितः ॥
प्रजपेत् साधको नित्यं साधयेदात्मनो हितम् ।
सर्व्वदा प्रजपेन्मन्त्रं हविष्याशी दिवा शुचिः ॥
दक्षिणां गुरवे दद्यात् यथा विभवविस्तरम् ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥
आदित्यादिवारयोगे नन्दादितिथियोगतः ।
ततस्तत्र जपेन्मन्त्रं सहस्रपञ्चकं प्रिये ।॥
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद् भवेत् ।
प्रतिपत्तिथिमारभ्य कुहूर्य्यावत् भवेत् प्रिये ।॥
तिथिसंख्यां समासाद्य वर्द्धयेच्च सहस्रकम् ।
जप्त्वा मन्त्रं सदा मन्त्री सर्व्वकाममवाप्नुयात् ॥
पुरश्चरणमेतद्धि कथितं ते वरानने ! ।
प्रतिपत्तिथिमारभ्य राका यावद् भवेत् प्रिये ।॥
तावन्मन्त्रं प्रजपेत तिथिसंख्याक्रमेण तु ।
सर्व्वभावसमायुक्तो जायते भावसाधकः ॥
एतेनैव सुसिद्धिः स्यात् नात्र कार्य्या विचारणा ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥
ववादिकरणे देवि । जप्त्वा विद्यामनन्यधीः ।
करणानुसारेणैव वर्द्धयेच्च सहस्रकम् ॥
पुरश्चरणमेतद्धि सर्व्वतन्त्रे च गोपितम् ।
साधकस्य हितार्थाय कथितं तदरानने ! ॥
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
विष्कुम्भादिषु योगेषु यो जपेत् योगसंख्यया ॥

संहस्रं साधको नित्यं सर्व्वसिद्धिपरायणः ।
पुरश्चरणमेतद्धि तन्त्रे तन्त्रे निरूपितम् ॥
संक्रान्त्यादिषु सर्व्वासु विषुवादिषु पार्व्वति ! ।
संक्रान्त्यनुसारेणैव वर्द्धयेच्च सहस्रकम् ॥
पूर्व्वमुखो जपेन्मन्त्रं धनार्थी सर्व्वदा प्रिये ! ।
श्मशानाश्रय सततं दक्षिणाभिमुखो जपेत् ॥”
इति स्वतन्त्रे तन्त्रे हरगौरीसंवादे रहस्यपुरश्चरणविधिः ॥ * ॥) अत्र आगमकल्पद्रुमोक्तकूर्म्मचक्रं तच्छब्दे द्रष्टव्यम् । हरिभक्तिविलासीयपुरश्चरणन्तु तद्ग्रन्थे सप्तदशविलासे द्रष्टव्यम् ॥

पुरश्छदः, पुं, (पुरश्छदति छादयतीति । छद् + अच् । यद्वा, पुरोऽग्रतश्छदाः पत्राण्यस्य ।) तृणविशेषः । उलु इति भाषा । तत्पर्य्यायः । दर्भः २ शरः ३ सोमपत्रः ४ परातृप्रियः ५ । इति शब्दचन्द्रिका ॥

पुरस्कारः, पुं, (पुरस्करणमिति + पुरस् + कृ + भावे घञ् ।) पुरस्क्रिया । अभिशापः । आरिग्रहणम् । अग्रकरणम् । (पुरः क्रियतेऽनेनेति ।) पूजनम् । (“तस्य बहुमानपुरस्कारं कृत्वा ।” इति हितोपदेशः ॥) स्वीकारः । सेकः । इति पुरस्कृतशब्दार्थदर्शनात् ॥

पुरस्कृतः, त्रि, (पुरः क्रियते स्मेति । पुरस् + कृ + क्त ।) अभिशस्तः । आरिग्रस्तः । अग्रकृतः । पूजितः । इति मेदिनी । ते, २१३ ॥ स्वीकृतः । सिक्तः । इति हेमचन्द्रः ॥

पुरस्तात्, व्य, (पूर्व्वस्मिन् पूर्व्वस्यां पूर्व्वस्मात् पूर्व्वस्याः वा पूर्व्वः पूर्व्वा वेति । पूर्व्व + “दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।” ५ । ३ । २७ । इति अस्तातिः । “अस्ताति च ।” ५ । ३ । ४० । इति पूर्व्वस्य पुरादेशः ।) प्राच्यां दिशि । यथा, पुरस्तात् सूर्य्य उदेति । प्रथमे काले । यथा, पुरस्ताद्गुरुः । पुरार्थे । अतीते । यथा, पुरस्ताद्रामोऽभूत् । अग्रतः अग्रे देशे । यथा, पुरस्तादायाति । इत्यमरभरतौ ॥ (यथा च रघौ । २ । ४४ ।
“मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्ने-
र्नश्यत् पुरस्तादनुपेक्षणीयम् ॥’)

पुरा, व्य, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् का ।) प्रबन्धः । वाक्यरचना पुराणादिः । यथा, पुराविदः । चिरम् । चिरन्तनम् । पुराणमित्यर्थान्तरम् । अतीतम् । भूतम् । चिरातीतमित्येकम् । यथा इतिहासः पुरावृत्तमिति केचित् ॥ निकटः । सन्निहितः । आगामिकम् । अनागतम् । निकटागामिकः । भविष्यदासत्तिः । इति केचित् ॥ इत्यमरभरतौ ॥ भीरुः । इति शब्दरत्नावली ॥ (प्राक् । इति हेमचन्द्रः । ६ । १७१ ॥ यथा, पञ्चदश्याम् । २ । १४ ।
“इदं सर्व्वं पुरा सृष्टेरेकमेवाद्वितीयकम् ।
सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः ॥”)

पुरा, स्त्री, (पुरतीति । पुर + क + टाप् ।) पूर्व्वदिक् । सुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । गन्धवती २ दिव्या ३ गन्धाढ्या ४ गन्धमादिनी ५ सुरभिः ६ भरिगन्धा ७ कुटी ८ गन्धकुटी ९ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कषायत्वम् । कफपित्तश्वासास्रविषदाहार्त्तिभ्रमम्लेच्छालक्ष्मीनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुराकृतं, त्रि, (पुरा पूर्व्वं पूर्व्वस्मिन् काले वा कृतम् ।) प्रारब्धकर्म्म । पूर्व्वकालकृतपुण्यादि । यथा,—
“अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥”
इति स्मृतिः ॥

पुराणं, क्ली, (पुरा भवमिति । पुरा + “सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।” ४ । ३ । २३ । इति ट्युः । “पूर्व्वकालैकसर्व्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।” २ । १ । ४९ । इति निपातनात् तुडभावः । यद्वा, “पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।” ४ । ३ । १०५ । इति निपातितः । यद्वा, पुरा नीयते इति । नी + ड । णत्वञ्च ।) व्यासादिमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितशास्त्रम् । तत्पर्य्यायः । पञ्चलक्षणम् २ । इत्यमरः । १ । ६ । ५ ॥ पञ्चलक्षणानि यथा, सर्गः १ प्रतिसर्गः २ वंशः ३ मन्वन्तरम् ४ वंशानुचरितम् ५ ॥ महापुराणस्य दश लक्षणानि । यथा, सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंशानुचरितम् ७ संस्था ८ हेतुः ९ अपाश्रयः १० ॥ अथाष्टादशमहापुराणानि तेषां श्लोकसंख्यानि च तथा । ब्राह्मं दशसहस्रम् १ पाद्मं पञ्चपञ्चाशत्सहस्रम् २ वैष्णवं त्रयोविंशतिसहस्रम् ३ शैवं चतुर्व्विंशतिसहस्रम् ४ भागवतम् अष्टादशसहस्रम् ५ नारदीयं पञ्चविंशतिसहस्रम् ६ मार्कण्डेयं नवसहस्रम् ७ आग्नेयं चतुःशताधिकपञ्चदशसहस्रम् ८ भविष्यं पञ्चशताधिकचतुर्द्दशसहस्रम् ९ ब्रह्मवैवर्त्तम् अष्टादशसहस्रम् १० लैङ्गम् एकादशसहस्रम् ११ वाराहं चतुर्व्विंशतिसहस्रम् १२ स्कान्दं शताधिकैकाशीतिसहस्रम् १३ वामनं दशसहस्रम् १४ कौर्म्मं सप्तदशसहस्रम् १५ मात्स्यं चतुर्द्दशसहस्रम् १६ गारुडं ऊनविंशतिसहस्रम् १७ ब्रह्माण्डं द्वादशसहस्रम् १८ । समुदायेन चतुर्लक्षश्लोकाः । इति श्रीभागवतीयद्वादशस्कन्धः ॥ (अपि च देवीभागवते १ स्कन्धे ३ अध्याये तथा मत्स्यपुराणे ५३ अध्याये एतद्विवरणं द्रष्टव्यम् ॥) अपि च ।

सूत उवाच ।

“विस्तराणि पुराणानि चेतिहासञ्च शौनक ! ।
संहितां पञ्चरात्राणि कथयामि यथागमम् ॥
सर्गञ्च प्रतिसर्गञ्च वंशो मन्वन्तराणि च ।
वंशानुचरितं विप्र । पुराणं पञ्चलक्षणम् ॥
एतदुपपुराणानां लक्षणञ्च विदुर्बुधाः ।
महताञ्च पुराणानां लक्षणं कथयामि ते ॥ * ॥
सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ॥
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम् ।
संख्यानञ्च पुराणानां निबोध कथयामि ते ॥
परं ब्रह्मपुराणञ्च सहस्राणां दशैव च ।
पञ्चोनषष्टिसाहस्रं पाद्ममेव प्रकीर्त्तितम् ॥
त्रयोविंशतिसाहस्रं वैष्णवञ्च विदुर्बुधाः ।
चतुर्विंशतिसाहस्रं शैवमेव निरूपितम् ॥
ग्रन्थोऽष्टादशसाहस्रं श्रीमद्भागवतं विदुः ।
पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्त्तितम् ॥
मार्कण्डं नवसाहस्रं पुराणं पण्डिता विदुः ।
चतुःशताधिकं पञ्चदशसाहस्रमेव च ॥
परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम् ।
चतुर्द्दशसहस्राणि परं पञ्चशताधिकम् ॥
पुराणप्रवरञ्चैव भविष्यं परिकीर्त्तितम् ।
अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीप्सितम् ॥
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः ।
एकादशसहस्रञ्च परं लिङ्गपुराणकम् ॥
चतुर्व्विंशतिसाहस्रं वाराहं परिकीर्त्तितम् ।
एकाशीतिसहस्रञ्च परमेव शताधिकम् ॥
वरं स्कन्दपुराणञ्च सद्भिरेवं निरूपितम् ।
वामनं दशसाहस्रं कौर्म्मं सप्तदशैव तु ॥
मात्स्यं चतुर्द्दशं प्रोक्तं पुराणं पण्डितैस्तथा ।
ऊनविंशतिसाहस्रं गारुडं परिकीर्त्तितम् ॥
परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्त्तितम् ।
एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम् ॥
अष्टादशपुराणानामेवमेव विदुर्बुधाः ।
एवञ्चोपपुराणानामष्टादश प्रकीर्त्तिताः ॥ * ॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च ।
पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यपूर्व्वकम् ।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥
पञ्चम्यः संहितानाञ्च कृष्णभक्तिसमन्विताः ।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च ॥
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः ।
इति ते कथितं सर्व्वं क्रमेण च पृथक् पृथक् ॥
अस्त्येवं विपुलं शास्त्रं ममापि च यथागमम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः ॥

पद्मपुराणमते तु ।
“निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ॥
पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत् ।
धर्म्माधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम् ॥
गतिश्च परमा सद्भक्तिर्भगवति प्रभौ ।
तानि ते कथयिष्यामि सप्रमाणानि भूतये ॥ * ॥
पुराणसंख्यान्तरमाह ।
“पुराणानि चतुर्लक्षाण्येतानि धरणीतले ।
तथा महाभारतञ्च लक्षसंख्यं प्रकीर्त्तितम् ॥
पञ्चलक्षमिदं राजन् । कथितं ग्रन्थ केवलम् ।
वेदः पञ्चमनामेष लोकानां निस्तारकः परः ॥

तत्र पद्मपुराणञ्च प्रथमं स प्रणीतवान्।
ततोऽन्यानि पुराणानि कृत्वा षोडश तु क्रमात्॥
अष्टादशं भागवतं सारमाकृष्य सर्व्वतः।
कृतवान् भगवान् व्यासः शुकञ्चाध्यापयत् सुतम्॥"

इति पातालखण्डे ७१ अध्यायः॥ *॥

आख्यानादिभिः सह व्यासः पुराणं चक्रे।
यथा,—
"आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे पुराणार्थविशारदः॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"
अस्य टीका यथा,—
आख्यानादिभिः सह पुराणं चक्रे व्यास इत्यन्वयः। तत्र च।
स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते॥
गाथास्तु पितृपृथ्वीप्रभृतिगीतयः। कल्पशुद्धिः श्राद्धकल्पादिनिर्णयः॥ *॥
"सुमतिश्चाग्निवर्च्चाश्च मित्रायुः शांशपायनः।
अकृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन्॥"
टीका। सुमत्यादयस्तु रोमहर्षणस्य षट्शिष्यास्ततस्ताः षट् संहिता जगृहुः॥ *॥
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः।
लौमहर्षणिका चान्या तिसृणां मूलसंहिता॥"
टीका। अकृतव्रण एव काश्यपः काश्यपोऽकृतव्रण इति वायूक्तेः। रौमहर्षणिका चान्या रोमहर्षणेन पुनः संक्षेपेण प्रोक्ता॥ *॥
"चतुष्टयेनाप्येतेन संहितानामिदं मुने।।"
टीका। एतासां काश्यपादिकृतानां संहितानामर्थचतुष्टयेनापि मूलभूतेन ततसारोद्धारात्मकं इदं श्रीविष्णुपुराणं मुने। मैत्रेय! मया कृतमिति शेषः॥ *॥
"आद्यं सर्व्वपुराणानां पुराणं ब्राह्ममुच्यते।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः॥*॥
तेषां नामोच्चारणादिमाहात्म्यं यथा,—
"अष्टादशपुराणानां नामधेयानि यः पठेत्।
त्रिसन्ध्यं जपते नित्यं सोऽश्वमेधफलं लभेत्॥"

इति मार्कण्डेयपुराणम्॥ *॥

तामसपुराणानि यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च।
आग्नेयञ्च षडेतानि तामसानि निबोधत॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै॥"
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः।
तथैव तामसा देवि! निरयप्राप्तिहेतवः॥"

इति पाद्मोत्तरखण्डे ४३ अध्यायः॥ *॥

अष्टादशोपपुराणानि यथा,—
"आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम्॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च॥
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥"

इति गारुडे २२७ अध्यायः॥ *॥

कौर्म्मोक्तान्येतानि उपपुराणशब्दे द्रष्टव्यानि॥ पुराणपाठक्रमस्तु पारायणशब्दे पाठशब्दे च द्रष्टव्यः॥ अथाष्टादशमहापुराणानामनुक्रमणिका अर्थात् तेषां श्लोकपर्व्वखण्डभागोपाख्यानश्रवणदानफलानि लिख्यन्ते।

सूत उवाच।

"एतच्छ्रुत्वा नारदस्तु कुमारस्य वचो मुदा।
पुनरप्याह सुप्रीतो जिज्ञासुः श्रेय उत्तमम्॥

नारद उवाच।

साधु साधु महाभाग। सर्व्वलोकोपकारकम्।
महातन्त्रं त्वया प्रोक्तं सर्व्वतन्त्रोत्तमोत्तमम्॥
अधुना श्रोतुमिच्छामि पुराणाख्यानमुत्तमम्।
यस्मिन् यस्मिन् पुराणे तु यद्यदाख्यानकं मुने!।
तत्तत् सर्व्वं समाचक्ष्व सर्व्वज्ञस्त्वं यतो मतः॥
तच्छ्रुत्वा वचनं विप्रा नारदस्य शुभावहम्।
पुराणाख्यानसंप्रश्नं कुमारः प्रत्युवाच ह॥

सनत्कुमार उवाच।

पुराणाख्यानकं विप्र। नानाकल्पसमुद्भवम्।
नानाकथासमायुक्तमद्भुतं बहुविस्तरम्॥
ऋषिः सनातनश्चायं यथा वेद तथापरः।
न वेद तस्मात् पृच्छ त्वं बहुकल्पविदांवरम्॥
श्रुत्वेत्थं नारदो वाक्यं कुमारस्य महात्मनः।
प्रणम्य विनयोपेतः सनातनमथाब्रवीत्॥
ब्रह्मन्। पुराणविच्छ्रेष्ठ। ज्ञानविज्ञानतत्पर!।
पुराणानां विभागं मे साकल्येनानुकीर्त्तय॥
यस्मिन् श्रुते श्रुतं सर्व्वं ज्ञाते ज्ञातं कृते कृतम्।
वर्णाश्रमाचारधर्म्मं साक्षात्कारत्वमेष्यति॥
कियन्ति च पुराणानि कियत् सङ्ख्यानि मानतः।
किं किमाख्यानयुक्तानि तद्वदस्व मम प्रभो।॥
चातुर्वर्ण्याश्रया नाना व्रतादीनां कथास्तथा।
सृष्टिक्रमेण वंशानां कथाः सम्यक् प्रकाशय॥
त्वत्तोऽधिको न चान्योऽस्ति पुराणाख्यानवित् प्रभो।।
तस्मादाख्याहि मह्यं त्वं सर्व्वसन्देहभञ्जनम्॥
ततः सनातनो विप्राः श्रुत्वा नारदभाषितम्।
नारायणं हृदा ध्यात्वा प्रोवाचाथ विदांवरः॥

सनातन उवाच।

साधु साधु मुनिश्रेष्ठ। सर्व्वलोकोपकारक।।
पुराणाख्यानविज्ञाने यज्जाता नैष्ठिकी मतिः॥
तुभ्यं समभिधास्यामि यत् प्रोक्तं ब्रह्मणा पुरा।
मरीच्यादिकऋषिभ्यस्तु पुलस्त्येहात्तात्मना॥
एकदा ब्रह्मणः पुत्रो मरीचिर्नाम विश्रुतः।
स्वाध्यायश्रुतसम्पन्नो वेदवेदाङ्गपारगः॥
उपसृत्य स्वपितरं ब्रह्माणं लोकभावनम्।
प्रणम्य भक्त्या पप्रच्छ इदमेव मुनीश्वर।।
पुराणाख्यानममलं यत्त्वं पृच्छसि मानद।॥

मरीचिरुवाच।

भगवन्! देवदेवेश। लोकानां प्रभवाप्यय।।
सर्व्वज्ञ! सर्व्वकृत्याण सर्व्वाध्यक्ष नमोऽस्तु ते॥
पुराणबीजमाख्याहि मह्यं शुश्रूषते पितः।।
लक्षणञ्च प्रमाणञ्च वक्तारं पृच्छकं तथा॥

ब्रह्मोवाच।

शृणु वत्स! प्रवक्ष्यामि पुराणानां समुच्चये।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम्॥
पुराणमेकमेवासीत् सर्व्वकल्पेषु मानद।।
चतुर्व्वर्गस्य बीजञ्च शतकोटिप्रविस्तरम्॥
प्रवृत्तिः सर्व्वशास्त्राणां पुराणादभवत्ततः॥
कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः।
हरिर्व्यासस्वरूपेण जायते च युगे युगे॥
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा।
तदष्टादशधा कृत्वा भूर्लोके निदिशत्यपि॥
अद्यापि देवलोके तु शतकोटि प्रविस्तरम्।
अस्त्यर्थं व तस्य सारस्तु चतुर्लक्षेण वर्ण्यते॥*॥
ब्राह्मम् १ पाद्मम् २ वैष्णवञ्च ३ वायवीयम् ४ तथैव च।
भागवतम् ५ नारदीयम् ६ मार्कण्डेयञ्च ७ कीर्त्तितम्॥
आग्नेयञ्च ८ भविष्यञ्च ९ ब्रह्मवैवर्त्त-१० लिङ्गके ११।
वाराहञ्च १२ तथा स्कान्दम् १३ वामनम् १४ कूर्म्म-१५ संज्ञकम्।
मात्स्यञ्च१६ गारुडम्१७ तद्वद्ब्रह्माण्डाख्य-१८ मिति त्रिषट्॥
एकं कथानकं सूत्रं वक्तुः श्रोतुः समाश्रयम्।
प्रवक्ष्यामि समासेन निशामय समाहितः॥"*॥
तत्र प्रथमं ब्रह्मपुराणम्।
"ब्राह्मं पुराणं तत्रादौ सर्व्वलोकहिताय व।
व्यासेन वेदविदुषा समाख्यातं महात्मना॥
तद्वै सर्व्वपुराणाग्र्यं धर्म्मकामार्थमोक्षदम्।
नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते॥*॥
तत्पूर्व्वभागे।
"देवानामसुराणाञ्च यत्रोत्पत्तिः प्रकीर्त्तिता।
प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर।॥
ततो लोकेश्वरस्यात्र सूर्य्यस्य परमात्मनः।
वंशानुकीर्त्तनं पुण्यं महापातकनाशनम्॥
यत्रावतारः कथितः परमानन्दरूपिणः।
श्रीमतो रामचन्द्रस्य चतुर्व्यूहावतारिणः॥
ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम्।
कृष्णस्य जगदीशस्य चरितं कल्मषापहम्॥
द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः।
वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते॥
नरकाणां समाख्यानं सूर्य्यस्तुतिकथानकम्।

पार्व्वत्याश्च तथा जन्म विवाहश्च निगद्यते ॥
दक्षाख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम् ।
पूर्व्वभागोऽयमुदितः पुराणस्यास्य मानद ! ॥"*॥
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम् ।
विस्तरेण समाख्यातं तीर्थयात्राविधानतः ॥
अत्रैव कृष्णचरितं विस्तारात् समुदीरितम् ।
वर्णनं यमलोकस्य पितृश्राद्धविधिस्तथा ॥
वर्णाश्रमाणां धर्म्माश्च कीर्त्तिता यत्र विस्तरात् ।
विष्णुधर्म्मयुगाख्यानं प्रलयस्य च वर्णनम् ॥
योगानाञ्च समाख्यानं साङ्ख्यानाञ्चापि वर्णनम् ।
ब्रह्मवादसमुद्देशः पुराणस्य च शंसनम् ॥
एतद्ब्रह्मपुराणन्तु भागद्वयसमाचितम् ।
वर्णितं सर्व्वपापघ्नं सर्व्वसौख्यप्रदायकम् ॥"*॥
तत्फलश्रुतिः ।
"सूतशौनकसंवादं भुक्तिमुक्तिप्रदायकम् ।
लिखित्वैतत् पुराणं यो वैशाख्यां हेमसंयुतम् ॥
जलधेनुयुतञ्चापि भक्त्या दद्याद्द्विजातये ।
पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः ।
स वसेद्ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् ॥
यः पठेच्छृणुयाद्वापि श्लोकानुक्रमणीं द्विज ! ।
सोऽपि सर्व्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत् ॥
शृणोति यः पुराणन्तु ब्राह्मं सर्व्वं जितेन्द्रियः ।
हविष्याशी च नियमात् स लभेद्ब्रह्मणः पदम् ॥
किमत्र बहुनोक्तेन यद्यदिच्छति मानवः ।
तत् सर्व्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे ९२ अध्यायः ॥१॥
द्वितीयं पद्मपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु पुत्त्र ! प्रवक्ष्यामि पुराणं पद्मसंज्ञिकम् ।
महत्पुण्यप्रदं नृणां शृण्वतां पठतां मुदा ॥
यथा पञ्चेन्द्रियः सर्व्वः शरीरीति निगद्यते ।
तथेदं पञ्चभिः खण्डैरुदितं पापनाशनम् ॥"*॥
तत्र प्रथमे सृष्टिखण्डे ।
"पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज ! ।
नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्म्मविस्तरः ॥
पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम् ।
ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम् ॥
दानानां कीर्त्तनं यत्र व्रतानाञ्च पृथक् पृथक् ।
विवाहः शैलजायाश्च तारकाख्यानकं महत् ॥
माहात्म्यञ्च गवादीनां कीर्त्तितं सर्व्वपुण्यदम् ।
कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक् ॥
ग्रहाणामर्च्चनं दानं यत्र प्रोक्तं द्विजोत्तम ! ।
तत्सृष्टिखण्डमुद्दिष्टं व्यासेन सुमहात्मना ॥"*॥
द्वितीये भूमिखण्डे ।
"पितृमात्रादिपूज्यत्वे शिवशर्म्मकथा पुरा ।
सुव्रतस्य कथा पश्चात् वृत्रस्य च वधस्तथा ॥
पृथोर्वेणस्य चाख्यानं धर्म्माख्यानं ततः परम् ।
पितृशुश्रूषणाख्यानं नहुषस्य कथा ततः ॥
ययातिचरितञ्चैव गुरुतीर्थनिरूपणम् ॥
राज्ञा जैमिनिसंवादो बह्वाश्चर्य्यकथायुतः ॥
कथा ह्यशोकसुन्दर्य्या हुण्डदैत्यवधान्विता ।
कामोदाख्यानकं तत्र विहुण्डवधसंयुतः ॥
कुञ्जलस्य च संवादश्च्यवनेन महात्मना ।
सिद्धाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोद्गमम् ॥
सूतशौनकसंवादं भूमिखण्डमिदं स्मृतम् ॥"*॥
तृतीये स्वर्गखण्डे ।
"ब्रह्माण्डोत्पत्तिरुदिता यत्रर्षिभिश्च सौतिना ।
सभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम् ॥
नर्म्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक् ।
कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः ॥
कालिन्दीपुण्यकथनं काशीमाहात्म्यवर्णनम् ॥
गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम् ।
वर्णाश्रमानुरोधेन कर्म्मयोगनिरूपणम् ॥
व्यासजैमिनिसंवादः पुण्यकर्म्मकथान्वितः ।
समुद्रमथनाख्यानं व्रताख्यानं ततः परम् ॥
ऊर्ज्जपञ्चाहमाहात्म्यं स्तोत्रं सर्व्वापराधनुत् ।
एतत्स्वर्गाभिधं विप्र ! सर्व्वपातकनाशनम् ॥"
चतुर्थे पातालखण्डे ।
"रामाश्वमेधे प्रथमं रामराज्याभिषेचनम् ।
अगस्त्याद्यागमश्चैव पौलस्त्यान्वयकीर्त्तनम् ॥
अश्वमेधोपदेशश्च हयचर्य्या ततः परम् ।
नानाराजकथाः पुण्या जगन्नाथानुवर्णनम् ॥
वृन्दावनस्य माहात्म्यं सर्व्वपापप्रणाशनम् ।
नित्यलीलानुकथनं यत्र कृष्णावतारिणः ॥
माधवस्नानमाहात्म्यं स्नानदानार्च्चने फलम् ।
धरावराहसंवादो यमब्राह्मणयोः कथा ॥
संवादो राजदूतानां कृष्णस्तोत्रनिरूपणम् ।
शिवशम्भुसमायोगो दधीच्याख्यानकन्ततः ॥
भस्ममाहात्म्यमतुलं शिवमाहात्म्यमुत्तमम् ।
देवरातसुताख्यानं पुराणज्ञप्रशंसनम् ॥
गौतमाख्यानकञ्चैव शिवगीता ततः स्मृता ।
कल्पान्तरी रामकथा भरद्वाजाश्रमास्थिता ॥
पातालखण्डमेतद्धि शृण्वतां ज्ञानिनां सदा ।
सर्व्वपापप्रशमनं सर्व्वाभीष्टफलप्रदम् ॥"
पञ्चमे उत्तरखण्डे ।
"पर्व्वताख्यानकं पूर्व्वं गौर्य्यै प्रोक्तं शिवेन वै ।
जालन्धरकथा पश्चाच्छ्रीशैलाद्यनुकीर्त्तनम् ॥
सगरस्य कथा पुण्या ततः परमुदीरितम् ।
गङ्गाप्रयागकाशीनां गयायाश्चाधिपुण्यकम् ॥
आम्रादिदानमाहात्म्यं तन्महाद्वादशीव्रतम् ।
चतुर्व्विंशैकादशीनां माहात्म्यं पृथगीरितम् ॥
विष्णुधर्म्मसमाख्यानं विष्णुनामसहस्रकम् ।
कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः ॥
जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम् ।
साभ्रमत्याश्च माहात्म्यं नृसिंहोत्पत्तिवर्णनम् ॥
देवशर्म्मादिकाख्यानं गीतामाहात्म्यवर्णने ।
भक्ताख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य च ॥
इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथान्वितम् ।
मन्त्ररत्नाभिधानञ्च त्रिपाद्भूत्यनुवर्णनम् ॥
अवतारकथा पुण्या मत्स्यादीनामतः परम् ।
रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव ! ॥
परीक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च ।
इत्येतदुत्तरं खण्डं पञ्चमं सर्व्वपुण्यदम् ॥" * ॥
तत्फलश्रुतिः ।
"पञ्चखण्डयुतं पाद्मं यः शृणोति नरोत्तमः ।
स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान् ॥
एतद्वै पञ्चपञ्चाशत्सहस्रं पद्मसंज्ञकम् ।
पुराणं लेखयित्वा वै ज्यैष्ठ्यां स्वर्णाब्जसंयुतम् ॥
यः प्रदद्यात् सुसत्कृत्य पुराणज्ञाय मानद ! ।
स याति वैष्णवं नाम सर्व्वदेवनमस्कृतः ॥
पद्मानुक्रमणीमेतां यः पठेत् शृणुयात् तथा ।
सोऽपि पद्मपुराणस्य लभेत श्रवणजं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे ९३ अध्यायः ॥ २ ॥
तृतीयं विष्णुपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि पुराणं वैष्णवं महत् ।
त्रयोविंशतिसाहस्रं सर्व्वपातकनाशनम् ॥
यत्रादिभागे निर्द्दिष्टाः षडंशाः शक्तृजेन च ।
मैत्रेयायादिमे तत्र पुराणस्यावतारिकाः ॥"
तत्र प्रथमभागस्य प्रथमांशे ।
"आदिकारणसर्गश्च देवादीनाञ्च सम्भवः ।
समुद्रमथनाख्यानं दक्षादीनां ततोऽन्वयाः ॥
ध्रुवस्य चरितं चैव पृथोश्चरितमेव च ।
प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम् ॥
पृथग्राज्याधिकाराख्या प्रथमोंऽश इतीरितः ॥"
प्रथमभागस्य द्वितीयांशे ।
"प्रियव्रतान्वयाख्यानं द्वीपवर्षनिरूपणम् ।
पातालनरकाख्यानं सप्तस्वर्गनिरूपणम् ।
सूर्य्यादिचारकथनं पृथग्लक्षणसंयुतम् ॥
चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् ॥
निदाघऋभुसंवादो द्वितीयोंऽश उदाहृतः ॥"
प्रथमभागस्य तृतीयांशे ।
"मन्वन्तरसमाख्यानं वेदव्यासावतारकम् ।
नरकोद्धारकं कर्म्म गदितञ्च ततः परम् ॥
सगरस्यौर्वसंवादे सर्व्वधर्म्मनिरूपणम् ।
श्राद्धकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धनं ।
सदाचारश्च कथितो मायामोहकथा ततः ।
तृतीयोंऽशोऽयमुदितः सर्व्वपापप्रणाशनः ॥"
प्रथमभागस्य चतुर्थांशे ।
"सूर्य्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम् ।
चतुर्थोंऽशे मुनिश्रेष्ठ ! नानाराजकथान्वितम् ॥"
प्रथमभागस्य पञ्चमांशे ।
"कृष्णावतारसंप्रश्नो गोकुलीया कथा ततः ।
पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम् ॥
कैशोरे कंसहननं माथुरं चरितं तथा ।
ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा ॥
सर्व्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः ।
यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः ॥
भूभारहरणं चक्रे परस्वहननादिभिः ।
अष्टावक्रीयमाख्यानं पञ्चमोंऽश इतीरितः ॥"

प्रथमभागस्य षष्ठांशे ।
"कलिजं चरितं प्रोक्तं चातुर्व्विध्यं लयस्य च ।
ब्रह्मज्ञानसमुद्देशः खाण्डिक्यस्य निरूपितः ॥
केशिध्वजेन चेत्येष षष्ठोऽंशः परिकीर्त्तितः ॥"
तस्य द्वितीयभागे ।
"अतःपरन्तु सूतेन शौनकादिभिरादरात् ।
पृष्टेन चोदिताः शश्वद्विष्णुधर्म्मोत्तराह्वयाः ॥
नानाधर्म्मकथाः पुण्या व्रतानि नियमा यमाः ।
धर्म्मशास्त्रं चार्थशास्त्रं वेदान्तं ज्योतिषं तथा ॥
वंशाख्यानं प्रकरणान् स्तोत्राणि मनवस्तथा ॥
नानाविद्याश्रयाः प्रोक्ताः सर्व्वलोकोपकारकाः ।
एतद्विष्णुपुराणं वै सर्व्वशास्त्रार्थसंग्रहम् ॥"*॥
तत्फलश्रुतिः ।
"वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह ।
यो नरः पठते भक्त्या यः शृणोति च सादरम् ।
तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ ॥
तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना ।
सहितं विष्णुभक्ताय पुराणार्थविदे द्विज ।
स याति वैष्णवं धाम विमानेनार्कवर्च्चसा ॥
यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ।
कथयेच्छृणुयाद्वापि स पुराणफलं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ९४ अध्यायः ॥ ३ ॥
चतुर्थं वायुपुराणम् ।
ब्रह्मोवाच ।
"शृणु विप्र । प्रवक्ष्यामि पुराणं वायवीयकम् ।
यस्मिन् श्रुते लभेद्धाम रुद्रस्य परमात्मनः ॥
चतुर्व्विंशतिसाहस्रं तत् पुराणं प्रकीर्त्तितम् ।
श्वेतकल्पप्रसङ्गेन धर्म्मानत्राह मारुतः ॥
तद्वायवीयमुदितं भागद्वयसमाचितम् ॥" * ॥
तस्य पूर्व्वभागे ।
"सर्गादिलक्षणं यत्र प्रोक्तं विप्र ! सविस्तरम् ॥
मन्वन्तरेषु वंशाश्च राज्ञां ये यत्र कीर्त्तिताः ।
गयासुरस्य हननं विस्तराद्यत्र कीर्त्तितम् ॥
मासानाञ्चैव माहात्म्यं माघस्योक्तं फलाधिकम् ।
दानधर्म्मा राजधर्म्मा विस्तरेणोदितास्तथा ॥
भूपातालककुब्व्योमचारिणां यत्र निर्णयः ।
व्रतादीनाञ्च पूर्व्वोऽयं विभागः समुदाहृतः ॥"
तदुत्तरभागे ।
"उत्तरे तस्य भागे तु नर्म्मदातीर्थवर्णनम् ।
शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर ! ॥
यो देवः सर्व्वदेवानां दुर्व्विज्ञेयः सनातनः ।
स तु सर्व्वात्मना यस्यास्तीरे तिष्ठति सन्ततम् ॥
इदं ब्रह्मा हरिरिदं साक्षाच्चेदं परो हरः ।
इदं ब्रह्म निराकारं कैवल्यं नर्म्मदाजलम् ॥
ध्रुवं लोकहितार्थाय शिवेन स्वशरीरतः ।
शक्तिः कापि सरिद्रूपा रेवेयमवतारिता ॥
ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते ।
वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम् ॥
ओङ्कारेश्वरमारभ्य यावत् पश्चिमसागरम् ।
सङ्गमाः पञ्च च त्रिंशन्नदीनां पापनाशनाः ॥
दशैकमुत्तरे तीरे त्रयोविंशति दक्षिणे ।
पञ्चत्रिंशत्तमः प्रोक्तो रेवासागरसङ्गमः ॥
सङ्गमैः सहितान्येवं रेवातीरद्वयेऽपि च ।
चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि ।
षष्टितीर्थसहस्राणि षष्टिकोट्यो मुनीश्वर ! ।
सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे ॥
संहितेयं महापुण्या शिवस्य परमात्मनः ।
नर्म्मदाचरितं यत्र वायुना परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"लिखित्वेदं पुराणन्तु गुड़धेनुसमाचितम् ।
श्रावण्यां यो ददेद्भक्त्या ब्राह्मणाय कुटुम्बिने ॥
रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्द्दश ।
यः श्रावयेद्वा शृणुयाद्वायवीयमिदं नरः ।
नियमेन हविष्याशी स रुद्रो नात्र संशयः ॥
यश्चानुक्रमणीमेतां शृणोति श्रावयेत वा ।
सोऽपि सर्व्वपुराणस्य फलं श्रवणजं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ९५ अध्यायः ॥ ४ ॥
पञ्चमं श्रीभागवतपुराणम् ।
ब्रह्मोवाच ।
"मरीचे । शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् ।
श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥
तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम् ।
सुरपादपरूपोऽयं स्कन्धैर्द्वादशभिर्युतः ॥
भगवानेव विप्रेन्द्र । विश्वरूपी समीरितः ॥"
तस्य प्रथमस्कन्धे ।
"तत्र तु प्रथमे स्कन्धे सूतर्षीणां समागमः ।
व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च ॥
पारीक्षितमुपाख्यानमितीदं समुदाहृतम् ॥"
द्वितीयस्कन्धे ।
"परीक्षिच्छुकसंवादे सृतिद्वयनिरूपणम् ।
ब्रह्मनारदसंवादेऽवतारचरितामृतम् ॥
पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः ।
द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ॥"
तृतीयस्कन्धे ।
"चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः ।
सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः ॥
कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥"
चतुर्थस्कन्धे ।
"सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः ।
पृथोः पुण्यसमाख्यानं ततः प्राचीनवर्हिषः ।
इत्येष तुर्य्यो गदितो विसर्गे स्कन्ध उत्तमः ॥"
पञ्चमस्कन्धे ।
"प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम् ।
ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः ॥
नरकस्थितिरित्येष संस्थाने पञ्चमो मतः ॥"
षष्ठस्कन्धे ।
"अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् ॥
वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् ।
षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे ॥"
सप्तमस्कन्धे ।
"प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् ।
सप्तमो गदितो वत्स । वासनाकर्म्मकीर्त्तने ॥"
अष्टमस्कन्धे ।
"गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् ।
समुद्रमथनञ्चैव बलिवैभवबन्धनम् ॥
मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः ॥"*॥
नवमस्कन्धे ।
"सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम् ।
वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते ! ॥"
दशमस्कन्धे ।
"कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः ॥
कैशोरं मथुरास्थानं यौवनं द्वारकास्थितिः ।
भूभारहरणञ्चात्र निरोधे दशमः स्मृतः ॥"
एकादशस्कन्धे ।
"नारदेन तु संवादो वसुदेवस्य कीर्त्तितः ।
यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च ॥
यादवानां मिथोऽन्तश्च मुक्तावेकादशः स्मृतः ॥"
द्वादशस्कन्धे ।
"भविष्यकालनिर्द्देशो मोक्षो राज्ञः परीक्षितः ॥
वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् ।
सौरी विभूतिरुदिता सात्वती च ततः परम् ॥
पुराणसङ्ख्याकथनमाश्रये द्वादशो ह्ययम् ।
इत्येवं कथितं वत्स ! श्रीमद्भागवतं तव ॥" * ॥
तत्फलश्रुतिः ।
"वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च ।
साहाय्यकर्त्तुर्गदितं भक्तिभुक्तिविमुक्तिदम् ॥
प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमाचितम् ।
देयं भागवतायेदं द्विजाय प्रीतिपूर्व्वकम् ॥
संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता ।
योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा ।
स पुराणश्रवणजं प्राप्नोति फलमुत्तमम् ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ९६ अध्यायः ॥ ५ ॥
षष्ठं नारदीयपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम् ।
पञ्चविंशतिसाहस्रं बृहत्कल्पकथाश्रयम् ॥" * ॥
तत्र पूर्व्वभागे प्रथमपादे ।
"सूतशौनकसंवादः सृष्टिसंक्षेपवर्णनम् ।
नानाधर्म्मकथाः पुण्याः प्रवृत्ते समुदाहृताः ॥
प्राग्भागे प्रथमे पादे सनकेन महात्मना ॥"
पूर्व्वभागे द्वितीयपादे ।
"द्वितीये मोक्षधर्म्माख्ये मोक्षोपायनिरूपणम् ।
वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात् ।
सनन्दनेन गदिता नारदाय महात्मने ॥" * ॥
पूर्व्वभागे तृतीयपादे ।
"महातन्त्रे समुद्दिष्टं पशुपाशविमोक्षणम् ।
मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारश्च पूजनम् ॥
प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च ।
गणेशसूर्य्यविष्णूनां शिवशक्त्योरनुक्रमात् ॥
सनत्कुमारमुनिना नारदाय तृतीयके ॥"
पूर्व्वभागे चतुर्थपादे ।
"पुराणलक्षणञ्चैव प्रमाणं दानमेव च ॥
पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम्

चैत्रादिसर्व्वमासेषु तिथीनाञ्च पृथक् पृथक् ॥
प्रोक्तं प्रतिपदादीनां व्रतं सर्व्वाघनाशनम् ।
सनातनेन मुनिना नारदाय चतुर्थके ॥
पूर्व्वभागोऽयमुदितो वृहदाख्यानसंज्ञितः ॥”
तदुत्तरभागे ।
“अस्योत्तरे विभागे तु प्रश्न एकादशीव्रते ॥
वशिष्ठेनाथ संवादो मान्धातुः परिकीर्त्तितः ।
रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म्म च ॥
वसुशापश्च मोहिन्यै पश्चाद्गुहरणक्रिया ।
गङ्गाकथा पुण्यतमा गयायात्रानुकीर्त्तनम् ॥
काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम् ।
यात्राविधानं क्षेत्रस्य वह्वाख्यानसमन्वितम् ॥
प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य तत्परम् ।
हरिद्वारस्य चाख्यानं कामोदाख्यानकं तथा ॥
वदरीतीर्थमाहात्म्यं कामाख्यायास्तथैव च ।
प्रभासस्य च माहात्म्यं पुराणाख्यानकं ततः ॥
गौतमाख्यानकं पश्चाद्वेदपादस्तवस्ततः ।
गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा ॥
सेतुमाहात्म्यकथनं नर्म्मदातीर्थवर्णनम् ।
अवन्त्याश्चैव माहात्म्यं मथुरायास्ततः परम् ॥
वृन्दावनस्य महिमा वसोर्ब्रह्मान्तिके गतिः ।
मोहिनीचरितं पश्चादेवं वै नारदीयकम् ॥”*॥
तत्फलश्रुतिः ।
“यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः ।
स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा ॥
यस्त्वेतदिषपूर्णायां धेनूनां सप्तकान्वितम् ।
प्रदद्याद्द्विजवर्य्याय स लभेन्मोक्षमेव च ॥
यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत् ।
शृणुयाद्वैकचित्तेन सोऽपि स्वर्गगतिं लभेत् ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे ९७ अध्यायः ॥ ६ ॥
सप्तमं मार्कण्डेयपुराणम् ।

श्रीब्रह्मोवाच ।

“अथ ते संप्रवक्ष्यामि मार्कण्डेयाभिधं मुने ! ।
पुराणं सुमहत् पुण्यं पठतां शृण्वतां सदा ॥
यत्राधिकृत्य शकुनीन् सर्व्वधर्म्मनिरूपणम् ।
मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् ॥
पक्षिणां धर्म्मसंज्ञानां ततो जन्मनिरूपणम् ।
पूर्व्वजन्मकथा चैषां विक्रिया च दिवस्पतेः ॥
तीर्थयात्रा बलस्यातो द्रौपदेयकथानकम् ।
हरिश्चन्द्रकथा पुण्या युद्धमाडीवकाभिधम् ॥
पितापुत्रसमाख्यानं दत्तात्रेयकथा ततः ।
हैहयस्याथ चरितं महाख्यानसमाचितम् ॥
मदालसाकथाप्रोक्ता ह्यलर्कचरिताचिता ।
सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् ॥
कल्पान्तकालनिर्द्देशो यक्षसृष्टिनिरूपणम् ।
रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम् ॥
मनूनाञ्च कथा नाना कीर्त्तिताः पापहारिकाः ।
तासु दुर्गाकथात्यन्तं पुण्यदा चाष्टमेऽन्तरे ॥
तत्पश्चात् प्रणवोत्पत्तिस्त्रयीतेजःसमुद्भवः ।
मार्त्तण्डस्य च जन्माख्या तन्माहात्म्यसमाचिता ॥
वैवस्वतान्वयश्चापि वत्सप्रश्चरितं ततः ॥”
वत्सप्रीख्याने वत्सश्री च पाठः ।
“खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः ॥
अविक्षिच्चरितं चैव किमिच्छव्रतकीर्त्तनम् ।
नरिष्यन्तस्य चरितं इक्ष्वाकुचरितं ततः ॥
तुलस्याश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा ।
कुशवंशसमाख्यानं सोमवंशानुकीर्त्तनम् ॥
पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता ।
ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् ॥
श्रीकृष्णबालचरितं माथुरं चरितं ततः ।
द्वारकाचरितञ्चाथ कथा सर्व्वावतारजा ॥
ततः सांख्यसमुद्देशः प्रपञ्चासत्त्वकीर्त्तनम् ।
मार्कण्डेयस्य चरितं पुराणश्रवणे फलम् ॥”*॥
तत्फलश्रुतिः ।
“यः शृणोति नरो भक्त्या पुराणमिदमादरात् ।
मार्कण्डेयाभिधं वत्स । स लभेत् परमां गतिम् ॥
यस्तु व्याकुरुते चैतच्छैवं स लभते पदम् ॥
तत् प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम् ।
कार्त्तिक्यां द्विजवर्य्याय स लभेद्ब्रह्मणः पदम् ॥
शृणोति श्रावयेद्वापि यश्चानुक्रमणीमिमाम् ।
मार्कण्डेयपुराणस्य स लभेद्वाञ्छितं फलम् ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे ९८ अध्यायः ॥ ७ ॥
अष्टमं अग्निपुराणम् ।

श्रीब्रह्मोवाच ।

“अथातः संप्रवक्ष्यामि तवाग्नेयपुराणकम् ।
ईशानकल्पवृत्तान्तं वशिष्ठायानलोऽब्रवीत् ॥
तत् पञ्चदशसाहस्रं नाम्नां चरितमद्भुतम् ।
पठतां शृण्वताञ्चैव सर्व्वपापहरं नृणाम् ॥
प्रश्नपूर्व्वं पुराणस्य कथा सर्व्वावतारजा ।
सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः ॥
अग्निकार्य्यं ततः पश्चान्मन्त्रमुद्रादिलक्षणम् ।
सर्व्वदीक्षाविधानञ्च अभिषेकनिरूपणम् ॥
लक्षणं मण्डलादीनां कुशाया मार्ज्जनं ततः ।
पवित्रारोपणविधिर्देवालयविधिस्ततः ॥
शालग्रामादिपूजा च मूर्त्तिलक्ष्म पृथक् पृथक् ।
न्यासादीनां विधानञ्च प्रतिष्ठा पूर्त्तका ततः ॥
विनायकादिदीक्षाणां विधिर्ज्ञेयस्ततः परम् ।
प्रतिष्ठा सर्व्वदेवानां ब्रह्माण्डस्य निरूपणम् ॥
गङ्गादितीर्थमाहात्म्यं जम्ब्वादिद्वीपवर्णनम् ।
ऊर्द्ध्वाधोलोकरचना ज्योतिश्चक्रनिरूपणम् ॥
ज्योतिषञ्च ततः प्रोक्तं शास्त्रं युद्धजयार्णवम् ।
षट्कर्म्म च ततः प्रोक्तं मन्त्रयन्त्रौषधीगणः ॥
कुब्जिकादिसमर्च्चा च षोढान्यासविधिस्तथा ।
कोटिहोमविधानञ्च तदन्तरनिरूपणम् ॥
ब्रह्मचर्य्यादिधर्म्माश्च श्राद्धकल्पविधिस्ततः ।
ग्रहयज्ञस्ततः प्रोक्तो वैदिकस्मार्त्तकर्म्म च ॥
प्रायश्चित्तानुकथनं तिथीनाञ्च व्रतादिकम् ।
वारव्रतानुकथनं नक्षत्रव्रतकीर्त्तनम् ॥
मासिकव्रतनिर्द्देशो दीपदानविधिस्तथा ।
नवव्यूहार्च्चनं प्रोक्तं नरकाणां निरूपणम् ॥
व्रतानाञ्चापि दानानां निरूपणमिहोदितम् ।
नाडीचक्रसमुद्देशः सन्ध्याविधिरनुत्तमः ॥
गायत्र्यर्थस्य निर्द्देशो लिङ्गस्तोत्रं ततः परम् ।
राजाभिषेकमन्त्रोक्तिर्धर्म्मकृत्यञ्च भूभुजाम् ॥
स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम् ।
मण्डलादिकनिर्द्देशो रत्नदीक्षाविधिस्ततः ॥
रामोक्तनीतिनिर्द्देशो रत्नानां लक्षणं ततः ।
धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम् ॥
देवासुरविमर्द्दाख्या ह्यायुर्व्वेदनिरूपणम् ।
गजादीनां चिकित्सा च तेषां शान्तिस्ततः परम् ॥
गोनरादिचिकित्सा च नानापूजास्ततः परम् ।
शान्तयश्चापि विविधा छन्दःशास्त्रमतः परम् ॥
साहित्यञ्च ततः पश्चादेकार्णादिसमाह्वयाः ।
सिद्धशिष्टानुशिष्टिश्च कोषः स्वर्गादिवर्गके ॥
प्रलयानां लक्षणञ्च शारीरकनिरूपणम् ।
वर्णनं नरकाणाञ्च योगशास्त्रमतः परम् ॥
ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम् ।
एतदाग्नेयकं विप्र । पुराणं परिकीर्त्तितम् ॥”
तत्फलश्रुतिः ।
“तल्लिखित्वा तु यो दद्यात् सुवर्णकमलान्वितम् ।
तिलधेनुयुतं वापि मार्गशीर्ष्यां विधानतः ।
पुराणार्थविदे सोऽथ स्वर्गलोके महीयते ॥
एषानुक्रमणी प्रोक्ता तवाग्नेयस्य भक्तिदा ।
शृण्वतां पठताञ्चैव नृणाञ्चेह परत्र च ॥”*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे ९९ अध्यायः ॥ ८ ॥
नवमं भविष्यपुराणम् ।

श्रीब्रह्मोवाच ।

“अथ ते संप्रवक्ष्यामि पुराणं सर्व्वसिद्धिदम् ।
भविष्यं भरतः सर्व्वलोकाभीष्टप्रदायकम् ॥
यत्राहं सर्व्वदेवानामादिकर्त्ता समुद्यतः ।
सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा ॥
स मां प्रणम्य पप्रच्छ धर्म्मं सर्व्वार्थसाधकम् ।
अहं तस्मै तदा प्रीतः प्रावोचं धर्म्मसंहिताम् ॥
पुराणानां यदा व्यासो व्यासञ्चक्रे महामतिः ।
तदा तां संहितां सर्व्वां पञ्चधा व्यभजन्मुनिः ॥
अघोरकल्पवृत्तान्तनानाश्चर्य्यकथाचिताम् ॥”
तत्र प्रथमपर्व्वणि ।
“तत्रादिमं स्मृतं पर्व्व ब्राह्मं यत्रास्त्युपक्रमः ।
सूतशौनकसंवादे पुराणप्रश्नसंक्रमः ।
आदित्यचरितः प्रायःसर्व्वाख्यानसमाचितः ॥
सृष्ट्यादिलक्षणोपेतः शास्त्रसर्व्वस्वरूपकः ।
पुस्तलेखकलेखानां लक्षणञ्च ततः परम् ॥
संस्काराणाञ्च सर्व्वेषां लक्षणञ्चात्र कीर्त्तितम् ।
पक्षत्यादितिथीनाञ्च कल्पाः सप्त च कीर्त्तिताः ॥
अष्टम्याद्याः शेषकल्पा वैष्णवे पर्व्वणि स्मृताः ।
शैवे च कामतो भिन्नाः सौरे चान्त्यकथान्वयः ॥
प्रतिसर्गाह्वयं पश्चान्नानाख्यानसमाचितम् ।
पुराणस्योपसंहारसहितं पर्व्व पञ्चमम् ॥
एषु पञ्चसु पूर्व्वस्मिन् ब्रह्मणो महिमाधिकः ॥”
द्वितीयतृतीयचतुर्थपञ्चमपर्व्वसु ।
“धर्म्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च ।
द्वितीये च तृतीये च सौरो वर्गचतुष्टये ॥
प्रतिसर्गाह्वयं त्वन्त्यं प्रोक्तं सर्व्वकथाचितम् ।

सभविष्यं विनिर्द्दिष्टं पर्व्व व्यासेन धीमता ।
चतुर्द्दशसहस्रन्तु पुराणं परिकीर्त्तितम् ।
भविष्यं सर्व्वदेवानां साम्यं यत्र प्रकीर्त्तितम् ॥
गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः ॥”
तत्फलश्रुतिः ।
“तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः ।
गुड़धेनुयुतं हेमवस्त्रमाल्यविभूषणैः ॥
वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः ।
गन्धाद्यैर्भोज्यभक्ष्यैश्च कृत्वा नीराजनादिकम् ।
यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः ॥
अथ वै यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि ।
स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् ॥
योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम् ।
पठेद्वा शृणुयाद्वैतौ भुक्तिं मुक्तिञ्च विन्दतः ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे १०० अध्यायः ॥ ९ ॥
दशमं ब्रह्मवैवर्त्तपुराणम् ।

श्रीब्रह्मोवाच ।

“शृणु वत्स ! प्रवक्ष्यामि पुराणं दशमं तव ।
ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम् ॥
सावर्णिर्यत्र भगवान् साक्षाद्देवर्षयेऽर्थितः ।
नारदाय पुराणार्थं प्राह सर्व्वमलौकिकम् ॥
धर्म्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे ।
तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम् ॥
रथन्तरस्य कल्पस्य वृत्तान्तं यन्मयोदितम् ।
शतकोटिपुराणे तत् संक्षिप्य प्राह वेदवित् ॥
व्यासश्चतुर्द्धा संव्यस्य ब्रह्मवैवर्त्तसंज्ञितम् ।
अष्टादशसहस्रन्तु पुराणं परिकीर्त्तितम् ॥
ब्रह्मप्रकृतिविघ्नेशकृष्णखण्डसमाचितम् ।
तत्र सूतर्षिसंवादे पुराणीयक्रमो मतः ॥”
तत्र प्रथमे ब्रह्मखण्डे ।
“सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः ।
विवादः सुमहान् यत्र द्वयोरासीत् पराभवः ॥
शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवान्मुनेः ।
शिववाक्येन तत्पश्चात् मरीचेः नारदस्य च ॥
गमनञ्चैव सावर्णेर्ज्ञानार्थं सिद्धसेविते ।
आश्रमे सुमहत्पुण्ये त्रैलोक्याश्चर्य्यकारिणि ।
एतद्धि ब्रह्मखण्डं हि श्रुतं पापविनाशनम् ॥”
द्वितीये प्रकृतिखण्डे ।
“ततः सावर्णिसंवादो नारदस्य समीरितः ।
कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः ॥
प्रकृतेरंशभूतानां कलानाञ्चापि वर्णितम् ।
माहात्म्यं पूजनाद्यञ्च विस्तरेण यथास्थितम् ॥
एतत्प्रकृतिखण्डं हि श्रुतं भूतिविधायकम् ॥”
तृतीये गणेशखण्डे ।
“गणेशजन्मसंप्रश्नः सपुण्यकमहाव्रतम् ।
पार्व्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः ॥
चरितं कार्त्तवीर्य्यस्य जामदग्न्यस्य चाद्भुतम् ।
विवादः सुमहान् पश्चाज्जामदग्न्यगणेशयोः ॥
एतद्विघ्नेशखण्डं हि सर्व्वविघ्नविनाशनम् ॥”
चतुर्थे श्रीकृष्णजन्मखण्डे ।
“श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतम् ।
गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः ॥
बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः ।
रासक्रीड़ा च गोपीभिः शारदी समुदाहृता ।
रहस्ये राधया क्रीडा वर्णिता बहुविस्तरा ॥
सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः ।
कंसादीनां वधे वृत्ते साग्रस्य द्विजसंस्कृतिः ॥
काश्यसान्दीपनेः पश्चाद्विद्योपादानमद्भुतम् ।
यवनस्य वधः पश्चाद्द्वारकागमनं हरेः ॥
नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः ।
कृष्णखण्डमिदं विप्र ! नृणां संसारखण्डनम् ॥”
तत्फलश्रुतिः ।
“पठितञ्च श्रुतं ध्यातं पूजितं चाभिवर्णितम् ।
इत्येतद्ब्रह्मवैवर्त्तं पुराणं चात्यलौकिकम् ॥
व्यासोक्तं चादिसम्भूतं पठन् शृण्वन् विमुच्यते ।
विज्ञानज्ञानशमनात् घोरात् संसारसागरात् ॥
लिखित्वैतच्च यो दद्यान्माघ्यां धेनुसमाचितम् ।
ब्रह्मलोकमवाप्नोति स मुक्तोऽज्ञानबन्धनात् ॥
यश्चानुक्रमणीं वापि पठेद्वा शृणुयादपि ।
सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम् ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे १०१ अध्यायः ॥ १० ॥
एकादशं लिङ्गपुराणम् ।

श्रीब्रह्मोवाच ।

“शृणु पुत्र ! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम् ।
पठतां शृण्वताञ्चैव भक्तिमुक्तिप्रदायकम् ॥
यच्च लिङ्गाभिधं तिष्ठन् वह्निलिङ्गे हरोऽभ्यधात् ।
मह्यं धर्म्मादिसिद्ध्यर्थं अग्निकल्पकथाश्रयम् ॥
तदेव व्यासदेवेन भागद्वयसमाचितम् ।
पुराणं लिङ्गमुदितं बह्वाख्यानविचित्रितम् ॥
तदेकादशसाहस्रं हरमाहात्म्यसूचकम् ।
परं सर्व्वपुराणानां सारभूतं जगत्त्रये ॥
पुराणोपक्रमे प्रश्नः सृष्टिसंक्षेपतः पुरा ॥”
तत्र पूर्व्वभागे ।
“योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततःपरम् ॥
लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततः परम् ।
सनत्कुमारशैलादिसंवादश्चाथ पावनः ॥
ततो दधीचिचरितं युगधर्म्मनिरूपणम् ।
ततो भुवनकोषाख्या सूर्य्यसोमान्वयस्ततः ॥
ततश्च विस्तरात् सर्गस्त्रिपुराख्यानकं तथा ।
लिङ्गप्रतिष्ठा च ततः पशुपाशविमोक्षणम् ॥
शिवव्रतानि च तथा सदाचारनिरूपणम् ।
प्रायश्चित्तान्यरिष्टानि काशीश्रीशैलवर्णनम् ॥
अन्धकाख्यानकं पश्चाद्वाराहचरितं पुनः ।
नृसिंहचरितं पश्चाज्जलन्धरवधस्ततः ॥
शैवं सहस्रनामाथ दक्षयज्ञविनाशनम् ।
कामस्य दहनं पश्चात् गिरिजायाः करग्रहः ॥
ततो विनायकाख्यानं नृत्याख्यानं शिवस्य च ।
उपमन्युकथा चापि पूर्व्वभाग इतीरितः ॥”*॥
तदुत्तरभागे ।
“विष्णुमाहात्म्यकथनमम्बरीषकथा ततः ।
सनत्कुमारनन्दीशसंवादश्च पुनर्मुने ! ॥
शिवमाहात्म्यसंयुक्तस्नानयागादिकं ततः ।
सूर्य्यपूजाविधिश्चैव शिवपूजा च मुक्तिदा ॥
दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः ।
प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम् ॥
व्रजेश्वरी महाविद्या गायत्रीमहिमा ततः ।
त्र्यम्बकस्य च माहात्म्यं पुराणश्रवणस्य च ॥
एतस्योपरिभागस्ते लैङ्गस्य कथितो मया ।
व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचिनः ॥”
तत्फलश्रुतिः ।
“लिखित्वैतत् पुराणन्तु तिलधेनुसमाचितम् ।
फाल्गुन्यां पूर्णिमायां यो दद्याद्भक्त्या द्विजातये ।
स लभेच्छिवसायुज्यं जरामरणवर्ज्जितः ॥
यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नरः ।
स भुक्तभोगो लोकेऽस्मिन्नन्ते शिवपुरं व्रजेत् ॥
लिङ्गानुक्रमणीमेतां पठेद्यः शृणुयात्तथा ।
तावुभौ शिवभक्तौ तु लोकद्वितयभोगिनौ ।
जायेतां गिरिजाभर्त्तुः प्रसादान्नात्र संशयः ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे १०२ अध्यायः ॥ ११ ॥
द्वादशं वराहपुराणम् ।

श्रीब्रह्मोवाच ।

“शृणु वत्स ! प्रवक्ष्यामि वाराहं वै पुराणकम् ।
भागद्वययुतं शश्वद्विष्णुमाहात्म्यसूचकम् ॥
मानवस्य तु कल्पस्य प्रसङ्गं मत्कृतं पुरा ।
निबबन्ध पुराणेऽस्मिंश्चतुर्व्विंशसहस्रके ॥
व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि ।
तत्रादौ शुभसंवादः स्मृतो भूमिवराहयोः ॥”
तत्र पूर्व्वभागे ।
“अथादिकृतवृत्तान्ते रभ्यस्य चरितं ततः ।
दुर्ज्जयाय च तत्पश्चाच्छ्राद्धकल्प उदीरितः ॥
महातपस आख्यानं गौर्य्युत्पत्तिस्ततः परम् ।
विनायकस्य नागानां सेनान्यादित्ययोरपि ॥
गणानाञ्च तथा देव्या धनदस्य वृषस्य च ।
आख्यानं सत्यतपसो व्रताख्यानसमन्वितम् ॥
अगस्त्यगीता तत्पश्चाद्रुद्रगीता प्रकीर्त्तिता ।
महिषासुरविध्वंसे माहात्म्यञ्च त्रिशक्तिजम् ॥
पर्व्वाध्यायस्ततः श्वेतोपाख्यानं गोप्रदानिकम् ।
इत्यादिकृतवृत्तान्तं प्रथमोद्देशनामकम् ॥
भगवद्धर्म्मके पश्चाद्व्रततीर्थकथानकम् ।
द्वात्रिंशदपराधानां प्रायश्चित्तं शरीरकम् ॥
तीर्थानाञ्चापि सर्व्वेषां माहात्म्यं पृथगीरितम्
मथुराया विशेषेण श्राद्धादीनां विधिस्ततः ॥
वर्णनं यमलोकस्य ऋषिपुत्रप्रसङ्गतः ।
विपाकः कर्म्मणाञ्चैव विष्णुव्रतनिरूपणम् ॥
गोकर्णस्य च माहात्म्यं कीर्त्तितं पापनाशनम्
इत्येष पूर्व्वभागोऽस्य पुराणस्य निरूपितः ॥”
उत्तरभागे ।
“उत्तरे प्रविभागे तु पुलस्त्यकुरुराजयोः ।
संवादे सर्व्वतीर्थानां माहात्म्यं विस्तरात्पृथक्
अशेषधर्म्माश्चाख्याताः पौष्करं पुण्यपर्व्व च ।
इत्येवं तव वाराहं प्रोक्तं पापविनाशनम् ॥”

तत्फलश्रुति: ।
"पठतां शृण्वताञ्चैव भगवद्भक्तिवर्द्धनम् ।
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ॥
लिखित्वैतच्च यो दद्याद्वैशाख्यां विप्राय भक्तित: ।
स लभेद्वैष्णवं धाम देवर्षिगणवन्दित: ॥
यो वानुक्रमणीमेतां शृणोत्यपि पठत्यपि ।
सोऽपि भक्तिं लभेद्विष्णौ संसारोच्छेदकारि-
णीम् ॥" * ॥
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे १०३ अध्याय: ॥ १२ ॥
त्रयोदशं स्कन्दपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्से मरीचे । त्वं पुराणं स्कन्दसंज्ञितम् ।
यस्मिन् प्रतिपदं साक्षान्महादेवो व्यवस्थित: ॥
पुराणे शतकोटौ तु यच्छैवं वर्णितं मया ।
तस्मिन्स्तस्यार्थजातस्य सारो व्यासेन कीर्त्तित: ॥
स्कन्दाह्वयस्तत्र खण्डा: सप्तैव परिकल्पिता: ।
एकाशीतिसहस्रन्तु स्कान्दं सर्व्वाघकृन्तनम् ॥
य: शृणोति पठेद्वापि स तु साक्षाच्छिव: स्थित: ।
यत्र माहेश्वरा धर्म्मा: षण्मुखेन प्रकाशिता: ॥
कल्पे तत्पुरुषे वृत्ता: सर्व्वसिद्धिविधायका: ॥"
तत्र प्रथमे माहेश्वरखण्डे ।
"तस्य माहेश्वरश्चाद्य: खण्ड: पापप्रणाशन: ॥
किञ्चिन्न्यूनार्कसाहस्रो बहुपुण्यो बृहत्कथ: ।
सुचरित्रशतैर्युक्त: स्कन्दमाहात्म्यसूचक: ॥
यत्र केदारमाहात्म्ये पुराणोपक्रम: पुरा ।
दक्षयज्ञकथा पश्चाच्छिवलिङ्गार्च्चने फलम् ॥
समुद्रमथनाख्यानं देवेन्द्रचरितं तत: ।
पार्व्वत्या: समुपाख्यानं विवाहस्तदनन्तरम् ॥
कुमारोत्पत्तिकथनं ततस्तारकसङ्गर: ।
तत: पशुपताख्यानं चण्डाख्यानसमन्वितम् ॥
द्यूतप्रवर्त्तनाख्यानं नारदेन समागम: ।
तत: कुमारमाहात्म्ये पञ्चतीर्थकथानकम् ॥
धर्म्मवर्म्मनृपाख्यानं नदीसागरकीर्त्तनम् ।
इन्द्रद्युम्नकथा पश्चान्नाडीजङ्घकथान्विता ॥
प्रादुर्भावस्ततो मह्या: कथा दमनकस्य च ।
महीसागरसंयोग: कुमारेशकथा तत: ॥
ततस्तारकयुद्धञ्च नानाख्यानसमन्वितम् ।
वधश्च तारकस्याथ पञ्चलिङ्गनिवेशनम ॥
द्वीपाख्यानं तत: पुण्यं ऊर्द्ध्वलोकव्यवस्थित: ।
ब्रह्माण्डस्थितिमानञ्च वर्करेशकथानकम् ॥
महाकालसमुद्भूति: कथा चास्य महाद्भुता ।
वासुदेवस्य माहात्म्यं कोटितीर्थं तत: परम् ॥
नानातीर्थसमाख्यानं गुप्तक्षेत्रे प्रकीर्त्तितम् ।
पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम् ॥
तीर्थयात्रासमाप्तिश्च कौमारमिदमद्भुतम् ।
अरुणाचलमाहात्म्ये सनकब्रह्मसंकथा ॥
गौरीतप:समाख्यानं तत्तत्तीर्थनिरूपणम् ।
महिषासुरजाख्यानं वधश्चास्य महाद्भुत: ॥
शोणाचले शिवाख्यानं नित्यदा परिकीर्त्तितम् ।
इत्येष कथित: स्कान्दे खण्डो माहेश्वरोऽद्-
भुत: ॥"

द्वितीये वैष्णवखण्डे ।
"द्वितीयो वैष्णव: खण्डस्तस्याख्यानानि मे शृणु ।
प्रथमं भूमिवाराहं समाख्यानं प्रकीर्त्तितम् ॥
यत्र वेङ्कटकूटस्य माहात्म्यं पापनाशनम् ।
कमलाया: कथा पुण्या श्रीनिवासस्थितिस्तत: ॥
कुलालाख्यानकं चात्र सुवर्णमुखरीकथा ।
नानाख्यानसमायुक्ता भारद्वाजकथाद्भुता ॥
मतङ्गाञ्जनसंवाद: कीर्त्तित: पापनाशन: ।
पुरुषोत्तममाहात्म्यं कीर्त्तितं चोत्कले तत: ॥
मार्कण्डेयसमाख्यानमम्बरीषस्य भूपते: ।
इन्द्रद्युम्नस्य चाख्यानं विद्यापतिकथा शुभा ॥
जैमिने: समुपाख्यानं नारदस्यापि वाडव । ।
नीलकण्ठसमाख्यानं नारसिंहोपवर्णनम् ॥
अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ।
रथयात्राविधि: पश्चाज्जपस्नानविधिस्तथा ॥
दक्षिणामूर्त्त्युपाख्यानं गुण्डिचाख्यानकं तत: ।
रथरक्षाविधानञ्च शयनोत्सवकीर्त्तनम् ॥
श्वेतोपाख्यानमत्रोक्तं वह्न्युत्सवनिरूपणम् ।
दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥
पूजा च कामिभिर्विष्णोरुद्दालकनियोगक: ।
मोक्षसाधनमत्रोक्तं नानायोगनिरूपणम् ॥
दशावतारकथनं स्नानादिपरिकीर्त्तनम् ।
ततो वदरिकायाश्च माहात्म्यं पापनाशनम् ॥
अग्न्यादितीर्थमाहात्म्यं वैनतेयशिलाभवम् ।
कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥
पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा ।
तत: कार्त्तिकमाहात्म्ये माहात्म्यं मदनालसम् ॥
धूम्रकेशसमाख्यानं दिनकृत्यानि कार्त्तिके ।
पञ्चभीष्मव्रताख्यानं कीर्त्तितं भुक्तिमुक्तिदम् ॥
तद्व्रतस्य च माहात्म्ये विधानं स्नानजं तथा ।
पुण्ड्रादिकीर्त्तनं चात्र मालाधारणपुण्यकम् ॥
पञ्चामृतस्नानपुण्यं घण्टानादादिजं फलम् ।
नानापुष्पार्च्चनफलं तुलसीदलजं फलम् ॥
नैवेद्यस्य च माहात्म्यं हरिवासरकीर्त्तनम् ।
अखण्डैकादशीपुण्यं तथा जागरणस्य च ॥
मत्स्योत्सवविधानञ्च नाममाहात्म्यकीर्त्तनम् ।
ध्यानादिपुण्यकथनं माहात्म्यं मथुराभवम् ॥
मथुरातीर्थमाहात्म्यं पृथगुक्तं तत: परम् ।
वनानां द्वादशानाञ्च माहात्म्यं कीर्त्तितं तत: ॥
श्रीमद्भागवतस्यात्र माहात्म्यं कीर्त्तितं परम् ।
वज्रशाण्डिल्यसंवादं अन्तर्लीलाप्रकाशकम् ॥
ततो माघस्य माहात्म्यं स्नानदानजपोद्भवम् ।
नानाख्यानसमायुक्तं दशाध्याये निरूपितम् ॥
ततो वैशाखमाहात्म्ये शय्यादानादिजं फलम् ।
जलदानादिविधय: कामाख्यानमत: परम् ॥
श्रुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ।
तथाक्षयतृतीयादेर्विशेषात् पुण्यकीर्त्तनम ॥
ततस्त्वयोध्यामाहात्म्ये चक्रब्रह्माख्यतीर्थके ।
ऋणपापविमोचाख्ये तथाधारसहस्रकम् ॥
स्वर्गद्वारं चन्द्रहरिधर्म्महर्य्युपवर्णनम् ।
स्वर्णवृष्टेरुपाख्यानं तिलोदा सरयूयुति: ॥
सीताकुण्डं गुप्तहरि: सरयूघर्घरायय: ।
गोप्रचारश्च दुग्धोदं गुरुकुण्डादिपञ्चकम् ॥
घोषार्कादीनि तीर्थानि त्रयोदश तत: परम् ।
गयाकूपस्य माहात्म्यं सर्व्वाघविनिवर्त्तकम् ॥
माण्डव्याश्रमपूर्व्वाणि तीर्थानि तदनन्तरम् ।
अजितादिमानसादितीर्थानि गदितानि च ॥
इत्येष वैष्णव: खण्डो द्वितीय: परिकीर्त्तित: ॥"
तृतीये ब्रह्मखण्डे ।
"अत:परं ब्रह्मखण्डं मरीचे । शृणु पुण्यदम् ।
यत्र वै सेतुमाहात्म्ये फलं स्नानेक्षणोद्भवम् ॥
गालवस्य तपश्चर्य्या राक्षसाख्यानकं तत: ।
चक्रतीर्थादिमाहात्म्यं देवीपत्तनसंयुतम् ॥
वेतालतीर्थमहिमा पापनाशादिकीर्त्तनम् ।
मङ्गलादिकमाहात्म्यं ब्रह्मकुण्डादिवर्णनम् ।
हनूमत्कुण्डमहिमागस्त्यतीर्थभवं फलम् ॥
रामतीर्थादिकथन लक्ष्मीतीर्थनिरूपणम् ।
शङ्खादितीर्थमहिमा तथा साध्यामृतादिज: ॥
धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्डादिजं तथा ।
गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्त्ति-
तम् ॥
रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम् ।
यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥
धर्म्मारण्यस्य माहात्म्यं तत: परमुदीरितम् ।
स्थाणु: स्कन्दाय भगवान् यत्र तत्त्वमुपादिशत् ॥
धर्म्मारण्यसुसंभूतिस्तत्पुण्यपरिकीर्त्तनम ।
कर्म्मसिद्धि: समाख्यानं ऋषिवंशनिरूपणम् ॥
अप्सरातीर्थमुख्यानां माहात्म्यं यत्र कीर्त्ति-
तम् ।
वर्णानामाश्रमाणाञ्च धर्म्मतत्त्वनिरूपणम् ॥
देवस्थानविभागश्च वकुलार्ककथा शुभा ।
छत्रा नन्दा तथा शान्ता श्रीमाता च मतङ्गिनी ॥
पुण्यदात्र्य: समाख्याता यत्र देव्य: समास्थिता: ।
इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥
लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम् ।
श्रीरामचरितञ्चैव सत्यमन्दिरवर्णनम् ॥
जीर्णोद्धारस्य कथनं शासनप्रतिपादनम् ।
जातिभेदप्रकथनं स्मृतिधर्म्मनिरूपणम् ॥
ततस्तु वैष्णवा धर्म्मा नानाख्यानैरुदीरिता: ।
चातुर्म्मास्ये तत: पुण्ये सर्व्वधर्म्मनिरूपणम् ॥
दानप्रशंसा ततपश्चाद्व्रतस्य महिमा तत: ।
तपसश्चैव पूजाया: सच्छिद्रकथनं तत: ॥
प्रकृतीनां भिदाख्यानं शालग्रामनिरूपणम् ।
तारकस्य वधोपायो गरुडार्च्चा महिमा तथा ॥
विष्णो: शापश्च वृक्षत्वं पार्व्वत्यनुनयस्तत: ।
हरस्य ताण्डवं नृत्यं रामनामनिरूपणम् ॥
हरस्य लिङ्गपतनं कथायै जवनस्य च ।
पार्व्वतीजन्मचरितं तारकस्य वधोऽद्भुत: ॥
प्रणवैश्वर्य्यकथनं तारकाचरितं पुन: ।
दक्षयज्ञसमाप्तिश्च द्वादशाक्षरनिरूपणम् ॥
ज्ञानयोगसमाख्यानं महिमा द्वादशार्णज: ।
श्रवणादिकपुण्यञ्च कीर्त्तितं शर्म्मदं नृणाम् ॥"
तृतीये ब्रह्मखण्डस्योत्तरभागे ।
"ततो ब्रह्मोत्तरे भागे शिवस्य महिमाद्भुत: ।

पञ्चाक्षरस्य महिमा गोकर्णमहिमा ततः ॥
शिवरात्रेश्च महिमा प्रदोषव्रतकीर्त्तनम् ।
सोमवारव्रतञ्चापि सीमन्तिन्याः कथानकम् ॥
भद्रायूत्पत्तिकथनं सदाचारनिरूपणम् ।
शिववर्म्मसमुद्देशो भद्रायूद्वाहवर्णनम् ॥
भद्रायुमहिमा चापि भस्ममाहात्म्यकीर्त्तनम् ।
शबराख्यानकञ्चैव उमामाहेश्वरव्रतम् ॥
रुद्राक्षस्य च माहात्म्यं रुद्राध्यायस्य पुण्यकम् ।
श्रवणादिकपुण्यञ्च ब्रह्मखण्डोऽयमीरितः ॥"* ॥
चतुर्थे काशीखण्डे ।
"अतः परं चतुर्थन्तु काशीखण्डमनुत्तमम् ।
विन्ध्यनारदयोर्यत्र संवादः परिकीर्त्तितः ॥
सत्यलोकप्रभावश्चागस्त्यावासे सुरागमः ।
पतिव्रताचरित्रञ्च तीर्थचर्य्याप्रशंसनम् ॥
ततश्च सप्तपुर्य्याख्या संयमिन्या निरूपणम् ।
ब्रध्नस्य च तथेन्द्राग्न्योर्लोकाप्तिः शिवशर्म्मणः ॥
अग्नेः समुद्भवश्चैव क्रव्यादवरुणसम्भवः ।
गन्धवत्यलकापुर्य्योरैश्वर्य्याश्च समुद्भवः ॥
चन्द्रोडुबुधलोकानां कुजेज्यार्कभुवां क्रमात् ।
सप्तर्षीणां ध्रुवस्यापि तपोलोकस्य वर्णनम् ॥
ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ।
स्कन्दागस्त्यसमालापो मणिकर्णीसमुद्भवः ॥
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् ।
वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ॥
दण्डपाणिज्ञानवाप्योरुद्भवः समनन्तरम् ।
ततः कलावत्याख्यानं सदाचारनिरूपणम् ॥
ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च ।
कृत्याकृत्यविनिर्द्देशो ह्यविमुक्तेशवर्णनम् ॥
गृहस्थयोगिनोर्धर्म्माः कालज्ञानं ततः परम् ।
दिवोदासकथा पुण्या काशीवर्णनमेव च ॥
योगिचर्य्या च लोलार्कोत्तरशाम्बार्कजा कथा ।
द्रुपदार्कस्य तार्क्ष्याख्यारुणार्कस्योदयस्ततः ॥
दशाश्वमेधतीर्थाख्या मन्दराच्च गणागमः ।
पिशाचमोचनाख्यानं गणेशप्रेषणन्ततः ॥
मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः ।
विष्णुमायाप्रपञ्चोऽथ दिवोदासविमोक्षणम् ॥
ततः पञ्चनदोत्पत्तिर्बिन्दुमाधवसम्भवः ।
ततो वैष्णवतीर्थाख्या शूलिनः काशिकागमः ॥
जैगीषव्येण संवादो ज्येष्ठेशाख्या महेशितुः ।
क्षेत्राख्यानं कन्दुकेशव्याघ्रेश्वरसमुद्भवः ॥
शैलेशरत्नेश्वरयोः कृत्तिवासस्य चोद्भवः ।
देवतानामधिष्ठानं दुर्गासुरपराक्रमः ॥
दुर्गाया विजयश्चाथ ओङ्कारेशस्य वर्णनम् ।
पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः ॥
केदाराख्या च धर्म्मेशकथा विश्वभुजोद्भवा ।
वीरेश्वरसमाख्यानं गङ्गामाहात्म्यकीर्त्तनम् ॥
विश्वकर्म्मेशमहिमा दक्षयज्ञोद्भवस्तथा ।
सतीशस्यामृतेशादेर्भुजस्तम्भः पराशरेः ॥
क्षेत्रतीर्थकदम्बश्च मुक्तिमण्डपसंकथा ।
विश्वेशविभवश्चाथ ततः यात्रापरिक्रमः ॥"* ॥
पञ्चमे अवन्तीखण्डे ।
"अतः परं त्ववन्त्याख्यं शृणु खण्डञ्च पञ्चकम् ।

महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ॥
प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः ।
देवदीक्षा शिवस्तोत्रं नानापातकनाशनम् ॥
कपालमोचनाख्यानं महाकालवनस्थितिः ।
तीर्थं कलकलेशस्य सर्व्वपापप्रणाशनम् ॥
कुण्डमप्सरसंज्ञञ्च सर्गं रुद्रस्य पुण्यदम् ।
कुटुम्बेशञ्च विद्याधरमर्कटेश्वरतीर्थकम् ॥
स्वर्गद्वारं चतुःसिन्धुतीर्थं शङ्करवापिका ।
सङ्करार्कं गन्धवतीतीर्थं व्यापप्रणाशनम् ॥
दशाश्वमेधैकानंशातीर्थं च हरिसिद्धिदम् ।
पिशाचकादियात्रा च हनूमत्कथमेश्वरौ ॥
महाकालेशयात्रा च वल्मीकेश्वरतीर्थकम् ॥
शुक्रेशभेशोपाख्यानं कुशस्थल्याः प्रदक्षिणम् ।
अक्रूरमन्दाकिन्यङ्कपादचन्द्रार्कवैभवम् ॥
करभेशकुक्कुटेशलड्डुकेशादितीर्थकम् ।
मार्कण्डेशं यज्ञवापी सोमेशं नरकान्तकम् ॥
केदारेश्वररामेशसौभाग्येशनरार्ककम् ।
केशार्कं शक्तिभेदश्च स्वर्णक्षुरसुखानि च ॥
ओङ्कारेशादितीर्थानि अन्धकस्तुतिकीर्त्तनम् ।
कालारण्ये लिङ्गसंख्या स्वर्णशृङ्गाभिधानकम् ॥
कुशस्थल्या अवन्त्याश्चोज्जयिन्या अभिधानकम् ।
पद्मावती कुमुद्वत्यमरावतीतिनामकम् ॥
विशालाप्रतिकल्पाभिधानं च ज्वरशान्तिकम् ।
शिप्रास्नानादिकफलं नागोक्ता शिवस्तुतिः ॥
हिरण्याक्षवधाख्यानं तीर्थं सुन्दरकुण्डकम् ।
नीलगङ्गा पुष्कराख्यं विन्ध्यावासनतीर्थकम् ॥
पुरुषोत्तमाधिमासं तत्तीर्थञ्चाघनाशनम् ।
गोमतीवामने कुण्डे विष्णोर्नामसहस्रकम् ॥
वीरेश्वरसरः कालभैरवस्य च तीर्थकं ।
महिमा नागपञ्चम्यां नृसिंहस्य जयन्तिका ॥
कुटुम्बेश्वरयात्रा च देवसाधककीर्त्तनम् ।
कर्कराजाख्यतीर्थञ्च विघ्नेशादिसुरोहनम् ॥
रुद्रकुण्डप्रभृतिषु बहुतीर्थनिरूपणम् ।
यात्राष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ॥
धर्म्मपुत्रस्य वैराग्ये मार्कण्डेयेन सङ्गमः ।
प्राग्लयानुभवाख्यानं अमृतापरिकीर्त्तनम् ॥
कल्पे कल्पे पृथक् नाम नर्म्मदायाः प्रकीर्त्तितम् ।
स्तवमार्षं नार्म्मदञ्च कालरात्रिकथा ततः ॥
महादेवस्तुतिः पश्चात् पृथक्कल्पकथाद्भुता ।
विशल्याख्यानकं पश्चाज्जालेश्वरकथा तथा ॥
गौरीव्रतसमाख्यानं त्रिपुरज्वालनन्ततः ।
देहपातविधानञ्च कावेरीसङ्गमस्ततः ॥
दारुतीर्थं ब्रह्मावर्त्तं यन्त्रेश्वरकथानकम् ।
अग्नितीर्थं रवितीर्थं मेघनादं दिदारुकम् ॥
देवतीर्थं नर्म्मदेशं कपिलाख्यं करञ्जकम् ।
कुण्डलेशं पिप्पलादं विमलेशञ्च शूलभित् ॥
शचीहरणमाख्यानमन्धकस्य वधस्ततः ।
शूलभेदोद्भवो यत्र दानधर्म्माः पृथग्विधाः ॥
आख्यानं दीर्घतपस ऋष्यशृङ्गकथा ततः ।
चित्रसेनकथा पुण्या काशिराजस्य मोक्षणम् ॥
ततो देवशिलाख्यानं शबरीचरिताचितम् ।
व्याधाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम् ॥

आदित्येश्वरतीर्थञ्च शक्रतीर्थं करोटिकम् ।
कुमारेशमगस्त्येशं च्यवनेशञ्च मातृजम् ॥
लोकेशं धनदेशञ्च मङ्गलेशञ्च कामजम् ।
नागेशञ्चापि गोपारं गौतमं शङ्खचूडजम् ॥
नारदेशं नन्दिकेशं वरुणेश्वरतीर्थकम् ।
दधिस्कन्दादितीर्थानि हनूमन्तेश्वरन्ततः ॥
रामेश्वरादितीर्थानि सोमेशं पिङ्गलेश्वरम् ।
ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम् ॥
चण्डार्कयमतीर्थञ्च कल्होडीशञ्च नान्दिकम् ।
नारायणञ्च कोटीशं व्यासतीर्थं प्रभासिकम् ॥
नागेशं सङ्कर्षणकं मन्मथेश्वरतीर्थकम् ।
एरण्डीसङ्गमं पुण्यं सुवर्णशिलतीर्थकम् ॥
करञ्जं कामदं तीर्थं भाण्डीरं रोहिणीभवम् ।
चक्रतीर्थं धौतपापं स्कान्दमाङ्गिरसाह्वयम् ॥
कोटितीर्थमयोन्याख्यमङ्गाराख्यं त्रिलोचनम् ।
इन्द्रेशं कम्बुकेशञ्च सोमेशं कोहनेशकम् ॥
नार्म्मदं चार्कमाग्नेयं भार्गवेश्वरसत्तमम् ।
ब्राह्मं दैवञ्च भागेशमादिवाराहजं कवे ॥
रामेशमथ सिद्धेशमाहल्यं कङ्कटेश्वरम् ।
शाक्रं सौम्यञ्च नान्देशं तापेशं रुक्मिणीभवम् ॥
योजनेशं वराहेशं द्वादशीशिवतीर्थके ।
सिद्धेशं मङ्गलेशञ्च लिङ्गवाराहतीर्थकम् ॥
कुण्डेशं श्वेतवाराहं भार्गवेशं रवीश्वरम् ।
शुक्लादीनि च तीर्थानि हूङ्कारस्वामितीर्थकम् ॥
सङ्गमेशं नारकेशं मोक्षं सार्पञ्च गोपकम् ।
नागं शाम्बञ्च सिद्धेशं मार्कण्डाक्रूरतीर्थकं ॥
कामोदशूलारोपाख्यं माण्डव्यं गोपकेश्वरम् ।
कपिलेशं पिङ्गलेशं भूतेशं गाङ्गगौतमे ॥
आश्वमेधं भृगुकच्छं केदारेशञ्च पापनुत् ।
कनखलेशं जालेशं शालग्रामं वराहकम् ॥
चन्द्रप्रभासमादित्यं श्रीपत्याख्यञ्च हंसकम् ।
मूलस्थानञ्च शूलेशमाग्नायाश्चित्रदैवकम् ॥
शिखीशं कोटितीर्थञ्च दशकन्यं सुवर्णकम् ।
ऋणमोक्षं भारभूतिरत्रास्ते पुंखसुखमम् ॥
आमलेशं कपालेशं शृङ्गरण्डीभवन्ततः ।
कोटितीर्थं लोटनेशं फलस्तुतिरतः परम् ॥
कृमिजङ्गलमाहात्म्ये रोहिताश्वकथा ततः ।
धुन्धुमारसमाख्यानं वधोपायस्ततोऽस्य च ॥
वधो धुन्धोस्ततः पश्चात् ततश्चित्रवहोद्भवः ।
महिमास्य ततश्चण्डीशप्रभावो रतीश्वरः ॥
केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम् ।
मुखारं च्यवनान्धाख्यं ब्रह्मणश्च सरस्ततः ॥
चक्राख्यं ललिताख्यानं तीर्थञ्च बहुगोमयम् ।
रुद्रावर्त्तञ्च मार्कण्डं तीर्थं पापप्रणाशनम् ॥
रावणेशं शुद्धपटं देवान्धुप्रेततीर्थकम् ।
जिह्वोदतीर्थसम्भूतिः शिवोद्भेदं फलस्तुतिः ॥
एष खण्डो ह्यवन्त्याख्यः शृण्वतां पापनाशनः ॥
षष्ठे नागरखण्डे ।
"अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते ॥
लिङ्गोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा ।
विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा ॥
हाटकेश्वरमाहात्म्ये वृत्रासुरवधस्तथा ।

नागबिलं शङ्खतीर्थमचलेश्वरवर्णनम् ॥
चमत्कारपुराख्यानं चमत्कारकरं परम् ।
गयशीर्षं बालशाख्यं बालमण्डं मृगाह्वयम् ॥
विष्णुपादञ्च गोकर्णं युगरूपं समाश्रयः ।
सिद्धेश्वरं नागसरः सप्तार्षेयं त्वगस्त्यकम् ॥
भ्रूणगर्त्तं नलेशञ्च भीष्मं दूर्व्वेशमर्ककम् ।
शार्म्मिष्ठं सोमनाथञ्च दौर्गमानर्त्तकेश्वरम् ॥
जमदग्निवधाख्यानं नैःक्षत्रियकथानकम् ।
रामह्रदं नागपुरं जड़लिङ्गञ्च यज्ञभूः ॥
मुण्डीरादित्रिकार्कञ्च सतीपरिणयस्तथा ।
बालखिल्यञ्च यागेशं बालखिल्यञ्च गारुड़म् ॥
लक्ष्मीशापः साप्तविंशः सोमप्रासादमेव च ।
अम्बावृद्धं पादुकाख्यमाग्नेयं ब्रह्मकुण्डकम् ॥
गोमुखं लोहयष्ट्याख्यमजापालेश्वरी तथा ।
शानैश्चरं राजवापी रामेशो लक्ष्मणेश्वरः ॥
कुशेशाख्यं लवेशाख्यं लिङ्गं सर्व्वोत्तमोत्तमम्
अष्टषष्टिसमाख्यानं दमयन्त्यास्त्रिजातकम् ॥
ततोऽम्बा रेवती चात्र भर्तृकातीर्थसम्भवम् ।
क्षेमङ्करी च केदारं शुक्लतीर्थं मुखारकम् ॥
सत्यसन्धेश्वराख्यानं तथा कर्णोत्पलाकथा ।
अटेश्वरं याज्ञवल्क्यं गौर्य्यं गाणेशमेव च ॥
ततो वास्तुपदाख्यानमजागृहकथानकम् ॥
सौभाग्यान्धुकशूलेशं धर्म्मराजकथानकम् ।
मिष्टान्नदेश्वराख्यानं गाणपत्यत्रयं ततः ॥
जावालिचरितञ्चैव मकरेशकथा ततः ।
कालेश्वर्य्यन्धकाख्यानं कुण्डमाप्सरसन्तथा ॥
पुष्यादित्यं रौहिताश्वं नागरोत्पत्तिकीर्त्तनम् ।
भार्गवं चरितं चैव वैश्वामित्रं ततः परम् ॥
सारस्वतं पैप्पलादं कंसारीशञ्च पैण्डिकम् ।
ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम् ॥
रैवतं भर्तृयज्ञाख्यं मुख्यतीर्थनिरीक्षणम् ।
कौरवं हाटकेशाख्यं प्रभासं क्षेत्रकत्रयम् ॥
पौष्करं नैमिषं धार्म्ममरण्यत्रितयं स्मृतम् ।
वाराणसी द्वारकाख्यावन्त्याख्येति पुरीत्रयम् ।
वृन्दावनं खाण्डवाख्यमद्वैकाख्यं वनत्रयम् ।
कल्पः शालस्तथा नन्दो ग्रामत्रयमनुत्तमम् ॥
असिशुक्लपितृसंज्ञं तीर्थत्रयमुदाहृतम् ।
आर्व्वुदो रैवतश्चैव पर्व्वतत्रयमुत्तमम् ॥
नदीनां त्रितयं गङ्गा नर्म्मदा च सरस्वती ।
सार्द्धकोटित्रयफलमेकैकस्त्रेषु कीर्त्तितम् ॥
कूपिका शङ्खतीर्थञ्चामरकं बालमण्डनम् ।
हाटकेशक्षेत्रफलप्रदं प्रोक्तं चतुष्टयम् ॥
शाम्बादित्यं श्राद्धकल्पं यौधिष्ठिरमथान्धकम् ।
जलशायि चतुर्म्मास्यमशून्यशयनव्रतम् ॥
मङ्कणेशं शिवरात्रिस्तुलापुरुषदानकम् ।
पृथ्वीदानं वाणकेशं कपालमोचनेश्वरम् ॥
पापपिण्डं साप्तलैङ्गं युगमानादिकीर्त्तनम् ।
निम्बेशशाकम्भर्य्याख्या रुद्रैकादशकीर्त्तनम् ॥
दानमाहात्म्यकथनं द्वादशादित्यकीर्त्तनम् ।
इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते ॥”
सप्तमे प्रभासखण्डे ।
“सोमेशो यत्र विश्वेशोऽर्कस्थलं पुण्यदं महत् ।

सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्त्तितम् ॥
अग्नितीर्थं कपर्द्दीशं केदारेशं गतिप्रदम् ।
भीमभैरवचण्डीशभास्कराङ्गारकेश्वराः ॥
बुधेज्यभृगुसौरेन्दुशिखीशा हरविग्रहाः ।
सिद्धेश्वराद्याः पञ्चान्ये रुद्रास्तत्र व्यवस्थिताः ॥
वरारोहा त्वजापाला मङ्गला ललितेश्वरी ।
लक्ष्मीशो वाड़वेशश्चार्घीशः कामेश्वरस्तथा ॥
गौरीशवरुणेशाख्यमुषीशञ्च गणेश्वरम् ।
कुमारेशञ्च शाकल्यं शकुलोतङ्कगौतमम् ॥
दैत्यघ्नेशं चक्रतीर्थं सन्निहत्याह्वयं तथा ।
भूतेशादीनि लिङ्गानि आदिनारायणाह्वयम् ॥
ततश्चक्रधराख्यानं शाम्बादित्यकथानकम् ।
कथा कण्टकशोधिन्या महिषघ्न्यास्ततः परम् ॥
कपालीश्वरकोटीशबालब्रह्मकसत्कथा ।
नरकेशसम्वर्त्तेशनिधीश्वरकथा ततः ॥
बलभद्रेश्वरस्याथ गङ्गाया गणपस्य च ।
जाम्बवत्याख्यसरितः पाण्डुकूपस्य सत्कथा ॥
शतमेधलक्षमेधकोटिमेधकथा तथा ।
दुर्व्वासार्कयदुस्थानहिरण्यासङ्गमोत्कथा ॥
नगरार्कस्य कृष्णस्य सङ्कर्षणसमुद्रयोः ।
कुमार्य्याः क्षेत्रपालस्य ब्रह्मेशस्य कथा पृथक् ॥
पिङ्गलासङ्गमेशस्य शङ्करार्कघटेशयोः ।
ऋषितीर्थस्य नन्दार्कत्रितकूपस्य कीर्त्तनम् ॥
शशीपानस्य पर्णार्कन्यङ्कुमत्योः कथाद्भुता ।
वाराहस्वामिवृत्तान्तं छायालिङ्गाख्यगुल्फयोः ॥
कथा कनकनन्दायाः कुन्तीगङ्गेशयोस्तथा ।
चमसोद्भेदविदुरत्रिलोकेशकथा ततः ॥
मङ्कणेशत्रैपुरशषण्डतीर्थकथा तथा ।
सूर्य्यप्राचीत्रीक्षणयोरुमानाथकथा तथा ॥
भूद्वारशूलस्थलयोश्च्यवनार्केशयोस्तथा ।
अजापालेशबालार्ककुवेरस्थलजा कथा ॥
ऋषितोयाकथा पुण्या सङ्गालेश्वरकीर्त्तनम् ।
नारदादित्यकथनं नारायणनिरूपणम् ॥
तप्तकुण्डस्य माहात्म्यं मूलचण्डीशवर्णनम् ।
चतुर्वक्त्रगणाध्यक्षकलम्बेश्वरयोः कथा ॥
गोपालस्वामिवकुलस्वामिनोर्म्मरुतीकथा ।
क्षेमार्कोन्नतविघ्नेशजलस्वामिकथा ततः ॥
कालमेघस्य रुक्मिण्या उर्व्वशीश्वरभद्रयोः ।
शङ्खावर्त्तमोक्षतीर्थगोष्पदाच्युतसद्मनाम् ॥
जालेश्वरस्य हुङ्कारकूपचण्डीशयोः कथा ।
आशापुरस्थविघ्नेशकलाकुण्डकथाद्भुता ॥
कपिलेशस्य च कथा जरद्गवशिवस्य च ।
नलकर्कोटेश्वरयोर्हाटकेश्वरजा कथा ॥
नारदेशमन्त्रभूषा दुर्गकूटगणेशजा ।
सुपर्णलाख्यभैरव्योर्भल्लतीर्थभवा कथा ॥
कीर्त्तनं कर्द्दमालस्य गुप्तसोमेश्वरस्य च ॥
बहुस्वर्णेशशृङ्गेशकोटीश्वरकथा ततः ॥
मार्कण्डेश्वरकोटीशदामोदरगृहोत्कथा ।
स्वर्णरेखा ब्रह्मकुण्डं कुन्तीभीमेश्वरौ तथा ॥
मृगीकुण्डञ्च सर्व्वस्वं क्षेत्रे वस्त्रापथे स्मृतम् ।
दुर्गाबिल्वेशगङ्गेशरैवतानां कथाद्भुता ॥
ततोऽर्व्वुदे श्वभ्रकथा अचलेश्वरकीर्त्तनम् ।

नागतीर्थस्य च कथा वशिष्ठाश्रमवर्णनम् ॥
भद्रकर्णस्य माहात्म्यं त्रिनेत्रस्य ततः परम् ।
केदारस्य च माहात्म्यं तीर्थागमनकीर्त्तनम् ॥
कोटीश्वररूपतीर्थहृषीकेशकथा ततः ।
सिद्धेशशुक्रेश्वरयोर्म्मणिकर्णीशकीर्त्तनम् ॥
पङ्गुतीर्थयमतीर्थवाराहतीर्थवर्णनम् ।
चन्द्रप्रभासपिण्डोदश्रीमाताशुक्लतीर्थजम् ॥
कात्यायन्याश्च माहात्म्यं ततः पिण्डारकस्य च ।
ततः कनखलस्याथ चक्रमानुषतीर्थयोः ॥
कपिलाग्नितीर्थकथा तथा रक्तानुबन्धजा ।
गणेशपार्थेश्वरयोर्यात्रायामुद्गलस्य च ॥
चण्डीस्थानं नागभवं शिवः कुण्डमहेशजा ।
कामेश्वरस्य मार्कण्डेयोत्पत्तेश्च कथा ततः ॥
उद्दालकेशसिद्धेशगततीर्थकथा पृथक् ।
श्रीदेवमातोत्पत्तिश्च व्यासगौतमतीर्थयोः ॥
कुलसन्तारमाहात्म्यं रामकोट्याह्वतीर्थयोः ।
चन्द्रोद्भेदेशानशृङ्गब्रह्मस्थानोद्भवोहनम् ॥
त्रिपुष्करुद्रह्रदगुहेश्वरकथा शुभा ।
अविमुक्तस्य माहात्म्यमुमामाहेश्वरस्य च ॥
महौजसः प्रभावश्च जम्बुतीर्थस्य वर्णनम् ।
गङ्गाधरमिश्रकयोः कथा चाथ फलस्तुतिः ॥
द्वारकायाश्च माहात्म्ये चन्द्रशर्म्मकथानकम् ।
जागराशाख्यव्रतञ्च व्रतमेकादशीभवम् ॥
महाद्वादशिकाख्यानं प्रह्लादर्षिसमागमः ।
दुर्व्वासस उपाख्यानं यात्रोपक्रमकीर्त्तनम् ॥
गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम् ।
चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः ॥
सनकादिह्रदाख्यानं नृगतीर्थकथा ततः ।
गोप्रचारकथा पुण्या गोपीनां द्वारकागमः ॥
गोपीसरःसमाख्यानं ब्रह्मतीर्थादिकीर्त्तनम् ।
पञ्चनद्यागमाख्यानं नानाख्यानसमाचितम् ॥
शिवलिङ्गमहातीर्थकृष्णपूजादिकीर्त्तनम् ।
त्रिविक्रमस्य मूर्त्त्याख्या दुर्व्वासःकृष्णसंकथा ॥
कुशदैत्यवधोऽर्च्चाख्या विशेषार्च्चनजं फलम् ।
गोमत्यां द्वारकायाञ्च तीर्थागमनकीर्त्तनम् ॥
कृष्णमन्दिरसंप्रेक्षा द्वारवत्यभिषेचनम् ।
तत्र तीर्थावासकथा द्वारकापुण्यकीर्त्तनम् ॥
इत्येष सप्तमः प्रोक्तः खण्डः प्राभासिको द्विज ।।
स्कान्दे सर्व्वोत्तरकथा शिवमाहात्म्यवर्णने ॥”
तत्फलश्रुतिः ।
“लिखित्वैतत्तु यो दद्याद्धेमशूलसमाचितम् ।
माघ्यां सत्कृत्य विप्राय स शैवे मोदते पदे ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे १०४ अध्यायः ॥ १३ ॥
चतुर्द्दशं वामनपुराणम् ।

श्रीब्रह्मोवाच ।

“शृणु वत्स । प्रवक्ष्यामि पुराणं वामनाभिधम् ।
त्रिविक्रमचरित्राढ्यं दशसाहस्रसङ्ख्यकम् ॥
कूर्म्मकल्पसमाख्यानं वर्गत्रयकथानकम् ।
भागद्वयसमायुक्तं वक्तृश्रोतृशुभावहम् ॥” * ॥
तत्र पूर्व्वभागे ।
“पुराणप्रश्नः प्रथमं ब्रह्मशीर्षच्छिदा ततः ।

कपालमोचनाख्यानं दक्षयज्ञविहिंसनम् ॥
हरस्य कालरूपाख्या कामस्य दहनं ततः ।
प्रह्लादनारायणयोर्युद्धं देवासुराह्वयम् ॥
सुकेश्यर्कसमाख्यानं ततो भुवनकोषकम् ।
ततः काम्यव्रताख्यानं श्रीदुर्गाचरितं ततः ॥
तपतीचरितं पश्चात् कुरुक्षेत्रस्य वर्णनम् ।
सत्रोमाहात्म्यमतुलं पार्व्वतीजन्मकीर्त्तनम् ॥
तपस्तस्या विवाहश्च गौर्य्युपाख्यानकं ततः ।
ततः कौशिक्युपाख्यानं कुमारचरितं ततः ॥
ततोऽन्धकवधाख्यानं साध्योपाख्यानकं ततः ।
जाबालिचरितं पश्चादरजायाः कथाद्भुता ॥
अन्धकेश्वरयोर्युद्धं गणत्वं चान्धकस्य च ।
मरुतां जन्मकथनं बलेश्च चरितं ततः ॥
ततस्तु लक्ष्म्याश्चरितं त्रैविक्रममतः परम् ।
प्रह्लादतीर्थयात्रायां प्रोच्यन्ते तत्कथाः शुभाः ॥
ततश्च धुन्धुचरितं प्रेतोपाख्यानकं ततः ।
नक्षत्रपुरुषाख्यानं श्रीदामचरितं ततः ॥
त्रिविक्रमचरित्रान्ते ब्रह्मप्रोक्तः स्तवोत्तमः ।
प्रह्लादबलिसंवादे सुतले हरिशंसनम् ॥
इत्येष पूर्व्वभागोऽस्य पुराणस्य तवोदितः ॥”
तदुत्तरे भागे हृहद्वामनाख्ये ।
“शृणु तस्योत्तरं भागं बृहद्वामनसंज्ञकम् ॥
माहेश्वरी भागवती सौरी गाणेश्वरी तथा ।
चतस्रः संहिताश्चात्र पृथक् साहस्रसंख्यया ॥
माहेश्वर्य्यान्तु कृष्णस्य तद्भक्तानाञ्च कीर्त्तनम् ।
भागवत्यां जगन्मातुरवतारकथाद्भुता ॥
सौर्य्यां सूर्य्यस्य महिमा गदितः पापनाशनः ।
गाणेश्वर्य्यां गणेशस्य चरितञ्च महेशितुः ॥
इत्येतद्वामनं नाम पुराणं सुविचित्रकम् ।
पुलस्त्येन समाख्यातं नारदाय महात्मने ॥
ततो नारदतः प्राप्तं व्यासेन सुमहात्मना ।
व्यासात्तु लब्धवान् वत्स । तच्छिष्यो रोमहर्षणः ॥
स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च ।
एवं परम्पराप्राप्तं पुराणं वामनं शुभम् ॥” * ॥
तत्फलश्रुतिः ।
“ये पठन्ति च शृण्वन्ति तेऽपि यान्ति परां गतिम् ।
लिखित्वैतत् पुराणन्तु यः शरद्विषुवेऽर्पयेत् ॥
विप्राय वेदविदुषे घृतधेनुसमान्वितम् ।
स समुद्धृत्य नरकान्नयेत् स्वर्गं पितॄन् स्वकान् ।
देहान्ते भुक्तभोगोऽसौ याति विष्णोः परं
पदम् ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे १०५ अध्यायः ॥ १४ ॥
पञ्चदशं कूर्म्मपुराणम् ।

श्रीब्रह्मोवाच ।

“शृणु वत्स । मरीचेऽद्य पुराणं कूर्म्मसंज्ञितम् ।
लक्ष्मीकल्पानुचरितं यत्र कूर्म्मवपुर्हरिः ॥
धर्म्मार्थकाममोक्षाणां माहात्म्यञ्च पृथक् पृथक् ।
इन्द्रद्युम्नप्रसङ्गेन प्राहर्षिभ्यो दयान्वितम् ॥
तत्सप्तदशसाहस्रं सुचतुःसंहितं शुभम् ।
यत्र ब्राह्म्यां पुरा प्रोक्ता धर्म्मा नानाविधा मुने ! ॥
नानाकथाप्रसङ्गेन नृणां सद्गतिदायकाः ॥” * ॥

तत्पूर्व्वभागे ।
“तत्र पूर्व्वविभागे तु पुराणोपक्रमः पुरा ।
लक्ष्मीप्रद्युम्नसंवादः कूर्म्मर्षिगणसत्कथा ॥
वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम् ।
कालसंख्या समासेन लयान्ते स्तवनं विभोः ॥
ततः सङ्क्षेपतः सर्गः शाङ्करं चरितं तथा ।
सहस्रनाम पार्व्वत्या योगस्य च निरूपणम् ॥
भृगुवंशसमाख्यानं ततः स्वायम्भुवस्य च ।
देवादीनां समुत्पत्तिर्दक्षयज्ञाहतिस्ततः ॥
दक्षसृष्टिकथा पश्चात् कश्यपान्वयकीर्त्तनम् ।
आत्रेयवंशकथनं कृष्णस्य चरितं शुभम् ॥
मार्कण्डकृष्णसंवादो व्यासपाण्डवसंकथा ।
युगधर्म्मानुकथनं व्यासजैमिनिकी कथा ॥
वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम् ।
त्रैलोक्यवर्णनञ्चैव वेदशाखानिरूपणम् ॥” * ॥
तदुत्तरभागे ।
“उत्तरेऽस्य विभागे तु पुरा गीतेश्वरी ततः ।
व्यासगीता ततः प्रोक्ता नानाधर्म्मप्रबोधनी ॥
नानाविधानां तीर्थानां माहात्म्यञ्च पृथक्
ततः ।
नानाधर्म्मप्रकथनं ब्राह्मीयं संहिता स्मृता ॥
अतः परं भागवती संहितार्थनिरूपणी ।
कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता ॥”
तदुत्तरभागीयभगवत्याख्यद्वितीयसंहितायाः
पञ्चपादेषु ।
“पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यव-
स्थितिः ।
सदाचारात्मिका वत्स । भोगसौख्यविवर्द्धनी ॥
द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक् प्रकी-
र्त्तिता ।
यया त्वाश्रितया पापं विधूयेह व्रजेद्दिवम् ॥
तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्व्विधा ।
यया चरितया सम्यक् लभते गतिमुत्तमाम् ॥
चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता ।
यया सन्तुष्यति श्रीशो नृणां श्रेयोविवर्द्धनः ॥
पञ्चमेऽस्यास्ततः पादे वृत्तिः सङ्करजोदिता ।
यया चरितयाप्नोति भाविनीमुत्तमां जनिम् ॥
इत्येषा पञ्चपद्युक्ता द्वितीया संहिता मुने ! ।
तृतीयात्रोदिता सौरी नृणां कामविधायिनी ॥
षोढा षट्कर्म्मसिद्धिं सा बोधयन्ती च कामि-
नाम् ।
चतुर्थी वैष्णवी नाम मोक्षदा परिकीर्त्तिता ॥
चतुष्पदी द्विजादीनां साक्षाद्ब्रह्मस्वरूपिणी ।
ताः क्रमात् षट्चतुर्द्वौषुसाहस्राः परि-
कीर्त्तिताः ॥”
तत्फलश्रुतिः ।
“एतत्कूर्म्मपुराणन्तु चतुर्व्वर्गफलप्रदम् ।
पठतां शृण्वतां नॄणां सर्व्वोत्कृष्टगतिप्रदम् ॥
लिखित्वैतत्तु यो भक्त्या हेमकूर्म्मसमन्वितम् ।
ब्राह्मणायायने दद्यात् स याति परमां गतिम् ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे १०६ अध्यायः ॥ १५ ॥

षोड़शं मत्स्यपुराणम् ।

श्रीब्रह्मोवाच ।

“अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम ! ।
यत्रोक्तं सप्तकल्पानां वृत्तं सङ्क्षिप्य भूतले ॥
व्यासेन वेदविदुषा नारसिंहोपवर्णनम् ।
उपक्रम्य तदुद्दिष्टं चतुर्द्दशसहस्रकम् ॥
मनुमत्स्यसुसंवादो ब्रह्माण्डवर्णनं ततः ।
ब्रह्मदेवासुरोत्पत्तिर्म्मारुतोत्पत्तिरेव च ॥
मदनद्वादशी तद्वत् लोकपालाभिपूजनम् ।
मन्वन्तरसमुद्देशो वैण्याराज्याभिवर्णनम् ॥
सूर्य्यवैवस्वतोत्पत्तिर्व्बुधसङ्गमनं तथा ।
पितृवंशानुकथनं श्राद्धकालस्तथैव च ॥
पितृतीर्थप्रचारश्च सोमोत्पत्तिस्तथैव च ।
कीर्त्तनं सोमवंशस्य ययातिचरितं तथा ॥
कार्त्तवीर्य्यस्य चरितं वृष्णिवंशानुकीर्त्तनम् ।
भृगुशापस्तथा विष्णोर्दशधा जन्म च क्षितौ ॥
कीर्त्तनं पुरुवंशस्य वंशो हौताशनः परः ।
क्रियायोगस्ततः पश्चात् पुराणं परिकीर्त्तितम् ।
व्रतं नक्षत्रपुरुषं मार्त्तण्डशयनं तथा ।
कृष्णाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम् ॥
तडागविधिमाहात्म्यं पादपोत्सर्ग एव च ।
सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च ॥
तथानन्ततृतीयाया रसकल्याणिनीव्रतम् ।
तथैवानन्दकर्य्याश्च व्रतं सारस्वतं पुनः ॥
उपरागाभिषेकश्च सप्तमीशयनं तथा ।
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा ॥
अशून्यशयनं तद्वत् तथैवाङ्गारकव्रतम् ।
सप्तमीसप्तकं तद्वद्विशोकद्वादशीव्रतम् ॥
मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च ।
ग्रहस्वरूपकथनं तथा शिवचतुर्द्दशी ॥
तथा सर्व्वफलत्यागः सूर्य्यवारव्रतं तथा ।
संक्रान्तिस्नपनं तद्वद्विभूतिद्वादशीव्रतम् ॥
षष्टिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः ।
प्रयागस्य तु माहात्म्यं द्वीपलोकानुवर्णनम् ॥
तथान्तरीक्षचारश्च ध्रुवमाहात्म्यमेव च ।
भवनानि सुरेन्द्राणां त्रिपुरोद्द्योतनं तथा ॥
पितृप्रवरमाहात्म्यं मन्वन्तरविनिर्णयः ।
चतुर्युगस्य सम्भूतिर्युगधर्म्मनिरूपणम् ॥
वज्राङ्गस्य तु सम्भूतिस्तारकोत्पत्तिरेव च ।
तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्त्तनम् ॥
पार्व्वतीसम्भवस्तद्वत्तथा शिवतपोवनम् ।
अनङ्गदेहदाहश्च रतिशोकस्तथैव च ॥
गौरीतपोवनं तद्वच्छिवेनाथ प्रसादनम् ।
पार्व्वतीऋषिसंवादस्तथैवोद्वाहमङ्गलम् ॥
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा ।
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ॥
पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम् ।
वाराणस्यास्तु माहात्म्यं नर्म्मदायास्तथैव च ।
प्रवरानुक्रमस्तद्वत् पितृगाथानुकीर्त्तनम् ।
तथोभयमुखीदानं दानं कृष्णाजिनस्य च ॥
ततः सावित्र्युपाख्यानं राजधर्म्मास्तथैव च ।
विविधोत्पातकथनं ग्रहशान्तिस्तथै च ॥

याचानिमित्तकथनं स्वप्नमङ्गलकीर्त्तनम् ॥
वामनस्य तु माहात्म्यं वाराहस्य ततः परम् ॥
समुद्रमथनं तद्वत् कालकूटाभिशान्तनम् ।
देवासुरविमर्द्दश्च वास्तुविद्या तथैव च ॥
प्रतिमालक्षणं तद्वद्देवतास्थापनं तथा ।
प्रासादलक्षणं तद्वत्मण्डपानाञ्च लक्षणम् ॥
भविष्यराजसंहुद्देशो महादानानुकीर्त्तनम् ।
कल्पानुकीर्त्तनं तद्वत् पुराणेऽस्मिन् प्रकीर्त्तितम् ॥”
तत्फलश्रुतिः ।
“पवित्रमेतत् कल्याणमायुःकीर्त्तिविवर्द्धनम् ।
यः पठेच्छृणुयाद्वापि स याति भवनं हरेः ॥
लिखित्वैतत्तु यो दद्याद्धेममत्स्यगवान्वितम् ।
विप्रायाभ्यर्च्य विषुवे स याति परमं पदम् ॥”
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०७ अध्यायः ॥ १६ ॥
सप्तदशं गरुड़पुराणम् ।

श्रीब्रह्मोवाच ।

“मरीचे शृणु वच्म्यद्य पुराणं गारुड़ं शुभम् ।
गरुडायाब्रवीत पृष्टो भगवान् गरुडासनः ॥
एकोनविंशसाहस्रं तार्क्ष्यं कल्पकथान्वितम् ॥”
तत्र पूर्व्वखण्डे ।
“पुराणोपक्रमो यत्र सर्गसंक्षेपतस्ततः ।
सूर्य्यादिपूजनविधिर्दीक्षाविधिरतः परम् ॥
श्राद्धपूजा ततः पश्चान्नवव्यूहार्च्चनं द्विज ।।
पूजाविधानञ्च तथा वैष्णवं पञ्जरं ततः ॥
योगाध्यायस्ततो विष्णोर्नामसाहस्रकीर्त्तनम् ।
ध्यानं विष्णोस्ततः सूर्य्यपूजा मृत्युञ्जयार्च्चनम् ॥
मालामन्त्राः शिवार्च्चाथ गणपूजा ततः परम् ।
गोपालपूजा त्रैलोक्यमोहनश्रीधरार्च्चनम् ॥
विष्ण्वर्च्चा पञ्चतत्त्वार्च्चा चक्रार्च्चा देवपूजनम् ।
न्यासादिसन्ध्योपास्तिश्च दुर्गार्च्चाथ सुरार्च्चनम् ॥
पूजा माहेश्वरी चातः पवित्रारोहणार्च्चनम् ।
मूर्त्तिध्यानं वास्तुमानं प्रासादानाञ्च लक्षणम् ॥
प्रतिष्ठा सर्व्वदेवानां पृथक्पूजाविधानतः ।
योगोऽष्टाङ्गो दानधर्म्मः प्रायश्चित्तं विधिक्रिया ॥
द्वीपेशनरकाख्यानं सूर्य्यव्यूहश्च ज्योतिषम् ।
सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम् ॥
माहात्म्यमथ तीर्थानां गयामाहात्म्यमुत्तमम् ।
ततो मन्वन्तराख्यानं पृथक् पृथक् विभागशः ॥
पित्राख्यानं वर्णधर्म्मा द्रव्यशुद्धिः समर्पणम् ।
श्राद्धं विनायकस्यार्च्चा ग्रहयज्ञस्तथाश्रमाः ॥
जननाख्या प्रेताशौचं नीतिसारो व्रतोक्तयः ।
सूर्य्यवंशः सोमवंशोऽवतारकथनं हरेः ॥
रामायणं हरिवंशो भारताख्यानकन्ततः ।
आयुर्व्वेदे निदानं प्राक् चिकित्साद्रव्यजा गुणाः ॥
रोगघ्नं कवचं विष्णोर्गारुडं त्रैपुरो मनुः ।
प्रश्नचूड़ामणिश्चान्ते हयायुर्व्वेदकीर्त्तनम् ॥
औषधीनामकथनं ततो व्याकरणोहनम् ।
छन्दःशास्त्रं सदाचारस्ततः स्नानविधिः स्मृतः ॥
तर्पणं वैश्वदेवञ्च सन्ध्या पार्व्वणकर्म्म च ।
नित्यश्राद्धं सपिण्डाख्यं धर्म्मसारोऽघनिष्कृतिः ॥
प्रतिसंक्रम उक्तोऽस्माद्युगधर्म्माः कृतेः फलम् ।
योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः ।
माहात्म्यं वैष्णवञ्चाथ नारसिंहस्तवोत्तमम् ।
ज्ञानामृतं गुह्याष्टकं स्तोत्रं विष्ण्वर्च्चनाह्वयम् ॥
वेदान्तसांख्यसिद्धान्तं ब्रह्मज्ञानं तथात्मकम् ।
गीतासारफलोत्कीर्त्तिः पूर्व्वखण्डोऽयमीरितः ॥”
उत्तरखण्डे प्रेतकल्पे ।
“अथास्यैवोत्तरे खण्डे प्रेतकल्पः पुरोदितः ।
यत्र तार्क्ष्येण संपृष्टो भगवानाह वाड़व ।॥
धर्म्मप्रकटनं पूर्व्वयोनीनां गतिकारणम् ।
दानादिकं फलञ्चापि प्रोक्तमत्रौर्द्ध्वदैहिकम् ॥
यमलोकस्य मार्गस्य वर्णनञ्च ततः परम् ।
षोड़शश्राद्धफलकं वृत्तान्तञ्चात्र वर्णितम् ॥
निष्कृतिर्यममार्गस्य धर्म्मराजस्य वैभवम् ।
प्रेतपीड़ाविनिर्द्देशः प्रेतचिह्ननिरूपणम् ॥
प्रेतानां चरिताख्यानं कारणं प्रेततां प्रति ।
प्रेतकृत्यविचारश्च सपिण्डीकरणोक्तयः ॥
प्रेतत्वमोचनाख्यानं दानानि च विमुक्तये ।
आवश्यकोत्तमं दानं प्रेतसौख्यकरं हितम् ॥
शारीरकविनिर्द्देशो यमलोकस्य वर्णनम् ।
प्रेतत्वोद्धारकथनं कर्म्मकर्त्तृविनिर्णयः ॥
मृत्योः पूर्व्वक्रियाख्यानं पश्चात् कर्म्मनिरूपणम् ।
मध्यं षोडशकं श्राद्धं स्वर्गप्राप्तिक्रियोहनम् ॥
सूतकस्याथ सङ्ख्यानं नारायणवलिक्रिया ।
वृषोत्सर्गस्य माहात्म्यं निषिद्धपरिवर्ज्जनम् ॥
अपमृत्युक्रियोक्तिश्च विपाकः कर्म्मणां नृणाम् ।
कृत्याकृत्यविचारश्च विष्णुध्यानं विमुक्तये ॥
स्वर्गतौ विहिताख्यानं स्वर्गसौख्यनिरूपणम् ।
भूर्लोकवर्णनञ्चैव सप्तधा लोकवर्णनम ॥
पञ्चोर्द्ध्वलोककथनं ब्रह्माण्डस्थितिकीर्त्तनम् ।
ब्रह्माण्डानेकचरितं ब्रह्मजीवनिरूपणम् ॥
आत्यन्तिकलयाख्यानं फलस्तुतिनिरूपणम् ।
इत्येतद्गारुड़ं नाम पुराणं भुक्तिमुक्तिदम् ॥”
तत्फलश्रुतिः ।
“कीर्त्तितं पापशमनं पठतां शृण्वतां नृणाम् ।
लिखित्वैतत् पुराणन्तु विषुवे यः प्रयच्छति ॥
सौवर्णहंसयुग्माढ्यं विप्राय स दिवं व्रजेत् ॥”*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने चतुर्थपादे १०८ अध्यायः ॥ १७ ॥
अष्टादशं ब्रह्माण्डपुराणम् ।

श्रीब्रह्मोवाच ।

“शृणु वत्स । प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम् ।
यच्च द्वादशसाहस्रं भाविकल्पकथायुतम् ॥
प्रक्रियाख्योऽनुषङ्गाख्य उपोद्घातस्तृतीयकः ।
चतुर्थ उपसंहारः पादाश्चत्वार एव हि ॥
पूर्व्वपादद्वयं पूर्व्वो भागोऽत्र समुदाहृतः ।
तृतीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः ॥”*॥
तत्र पूर्व्वभागे प्रक्रियापादे ।
“आदौ कृत्यसमुद्देशो नैमिषाख्यानकं ततः ।
हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च ॥
एष वै प्रथमः पादो द्वितीयं शृणु मानद ! ॥”
पूर्व्वभागे अनुषङ्गपादे ।
“कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम् ।
मानसीसृष्टिकथनं रुद्रप्रसववर्णनम् ॥
महादेवविभूतिश्च ऋषिसर्गस्ततः परम् ।
अग्नीनां विचयश्चाथ कालसद्भाववर्णनम् ॥
प्रियव्रतान्वयोद्देशः पृथिव्यायामविस्तरः ।
वर्णनं भारतस्यास्य ततोऽन्येषां निरूपणम् ॥
जम्ब्वादिसप्तद्वीपाख्या ततोऽधोलोकवर्णनम् ।
ऊर्द्ध्वलोकानुकथनं ग्रहचारस्ततः परम् ॥
आदित्यव्यूहकथनं देवग्रहानुकीर्त्तनम् ।
नीलकण्ठाह्वयाख्यानं महादेवस्य वैभवम् ॥
अमावास्यानुकथनं युगतत्त्वनिरूपणम् ।
यज्ञप्रवर्त्तनं चाथ युगयोरन्त्ययोः कृतिः ॥
युगप्रजालक्षणञ्च ऋषिप्रवरवर्णनम् ।
वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम् ॥
शेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः ।
चाक्षुषेऽद्यतने सर्गो द्वितीयोऽङ्घ्रिः पुरोदले ॥”
मध्यमभागे उपोद्घातपादे ।
“अथोपोद्घातपादे तु सप्तर्षिपरिकीर्त्तनम् ।
प्राजापत्यान्वयस्तस्माद्देवादीनां समुद्भवः ॥
ततो जयाभिव्याहारौ मरुदुत्पत्तिकीर्त्तनम् ।
काश्यपेयानुकथनमृषिवंशनिरूपणम् ॥
पितृकल्पानुकथनं श्राद्धकल्पस्ततः परम् ।
वैवस्वतसमुत्पत्तिः सृष्टिस्तस्य ततः परम् ॥
मनुपुत्रान्वयश्चातो गान्धर्व्वस्य निरूपणम् ।
इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः ॥
अमावसोरान्वयश्च रजेश्चरितमद्भुतम् ।
ययातिचरितञ्चाथ यदुवंशनिरूपणम् ॥
कार्त्तवीर्य्यस्य चरितं जामदग्न्यं ततः परम् ।
वृष्णिवंशानुकथनं सगरस्याथ सम्भवः ॥
भार्गवस्यानुचरितं तथा कार्य्यवधाश्रयम् ।
सगरस्याथ चरितं भार्गवस्य कथा पुनः ॥
देवासुराहवकथा कृष्णाविर्भाववर्णने ।
इन्द्रस्य च स्तवः पुण्यः शुक्रेण परिकीर्त्तितः ॥
विष्णुमाहात्म्यकथनं वलिवंशनिरूपणम् ।
भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे ॥
एवमुद्घातपादोऽयं तृतीयो मध्यमे दले ॥”
उत्तरभागे उपसंहारपादे ।
“चतुर्थमुपसंहारं वक्ष्ये खण्डे तथोत्तरे ।
वैवस्वतान्तराख्यानं विस्तरेण यथातथम् ॥
पूर्व्वमेव समुद्दिष्टं संक्षेपादिह कथ्यते ।
भविष्याणां मनूनाञ्च चरितं हि ततः परम् ॥
कल्पप्रलयनिर्द्देशः कालमानं ततः परम् ।
लोकाश्चतुर्द्दश ततः कथिता मानलक्षणैः ॥
वर्णनं नरकाणाञ्च विकर्म्माचरणैस्ततः ।
मनोमयपुराख्यानं लयः प्राकृतिकस्ततः ॥
शैवस्याथ पुरस्यापि वर्णनञ्च ततः परम् ।
त्रिविधाद्गुणसम्बन्धाज्जन्तूनां कीर्त्तिता गतिः ।
अनिर्द्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः ।
अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम् ॥
इत्येष उपसंहारः पादो वृत्तः स चोत्तरः ।
चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतम् ॥
अष्टादशमनौपम्यं सारात्सारतरं द्विज ।।
ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते ॥

तदेव यस्य गदितमष्टादशप्रधा पृथक्।
पाराशर्य्येण मुनिना सर्व्वेषामपि मानद!॥
वस्तुदृष्ट्वाथ तेनैव मुनीनां भावितात्मनाम्।
मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे॥
मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः।
मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम्॥
तेन शक्तिसुतायोक्तं जातूकर्ण्याय तेन च।
व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनसखोऽग्रतम्॥
प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम्॥"
ततफलश्रुतिः।
"य इदं कीर्त्तयेद्वत्स! शृणोति च समाहितः।
स विधूयेह पापानि याति लोकमनामयम्॥
लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम्।
पत्रेणाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति॥
स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा॥
मरीचेऽष्टादशैतानि मया प्रोक्तानि यानि ते।
पुराणानि तु सङ्क्षेपाच्छ्रोतव्यानि च विस्तरात्॥
अष्टादशपुराणानि यः शृणोति नरोत्तमः।
कथयेद्वा विधानेन नेह भूयः स जायते॥
सूत्रमेतत् पुराणानां यन्मयोक्तं तवाधुना।
तन्नित्यं शीलनीयं हि पुराणफलमिच्छता॥
न दाम्भिकाय पापाय देवगुर्व्वनुसूयवे।
देयं कदापि साधूनां द्वेषिणे न शठाय च॥
शान्ताय शमचित्ताय शुश्रूषाभिरताय च।
निर्म्मत्सराय शुचये देयं सद्वैष्णवाय च॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे १०८ अध्यायः॥ १८॥ *॥
इत्यष्टादशमहापुराणानुक्रमणिका समाप्ता॥*॥
(अष्टादशमहापुराणानां निरुक्तिर्यथा शिवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये।
"यत्र वक्ता स्वयं तर्क्ष्ये! ब्रह्मा साक्षान् चतुर्म्मुखः।
तस्माद्ब्राह्मं समाख्यातं पुराणं प्रथमं मुने!॥" १॥
तर्क्षे इति मुनिसम्बोधनम्।
"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम्॥ २॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम्।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः॥ ३॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च॥४॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं नतु देवीपुराणकम्॥५॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते॥ ६॥
यत्र वक्ताभवत्तर्क्ष्ये! मार्कण्डेयो महामुनिः।
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम्॥७॥
अग्नियोगात्तदाग्नेयं ८ भविष्योक्तेर्भविष्यकम्॥९॥
विवर्त्तनाद् ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते॥ १०॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते॥११॥
वराहस्य च वाराहं पुराणं द्वादशं मुने!॥१२॥
यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षान्महेश्वरः।
तत्तु स्कान्दं समाख्यातम् १३ वामनस्य तु वामनम्॥ १४॥
कौर्म्मं कूर्म्मस्य चरितम् १५ मात्स्यं मत्स्यस्य कीर्त्तितम्।१६।
गरुड़स्तु स्वयं वक्ता यत्तद् गारुड़संज्ञकम्॥ १७॥
ब्रह्माण्डचरितोक्तत्वात् ब्रह्माण्डं परिकीर्त्तितम्॥" १८॥
पुराभवः वेदः। सृष्ट्यादिप्रतिपादको ग्रन्थः। यथा, शतपथब्राह्मणे। १४। ६। १०। ६।
"ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि॥"
तथा च वृहदारण्यकोपनिषदि।
"अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणम्॥"
"इदं वा अग्रे नैव किञ्चिदासीदित्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्।" इति ऋग्वेदोपोद्घाते॥ *॥)
पुराणः, पुं, (पुरा पूर्व्वस्मिन् काले भव इति। पुरा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।" ४। ३। २३। इति ट्युः। निपातनात् तुडभावः।) पणः। (शिव.। यथा, महाभारते। १३। १७। १०६।
"बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी॥")
पुरातने, त्रि। (यथा, मनुः। ५। २३।
"बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम्।
पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च॥")
कार्षापणे, पुं क्ली। इति शब्दरत्नावली॥
(यथा, मनुः। ८। १३६।
"ते षोडश स्याद्धरणं पुराणश्चैव राजतम्।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥")
पुराणगः, पुं, (पुराणैर्गीयते इति। गै + घञर्थे कः। यद्वा, पुराणं वेदं गायतीति। गै + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) ब्रह्मा। इति हेमचन्द्रः। २। १२६॥ पुराणगायके, त्रि॥
पुराणपुरुषः, पुं, (पुराणैर्वेदादिभिरुपस्तुतः पुरुषः इति मध्यपदलोपिसमासः। यद्वा, पुराणः पुरुषः इति कर्म्मधारयः।) विष्णुः। इति हेमचन्द्रः। २। १२८॥ (यथा, महाभारते अनुशासनपर्व्वणि १४९ अध्याये विष्णोरष्टोत्तरशतनामकीर्त्तने।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः॥")
पुरातनः, पुं, (पुरा भवः। पुरा + ट्युल् तुट् च।) पुराणः। तद्वैदिकपर्य्यायः। प्रत्नम् १ प्रदिवः २ प्रवयाः ३ सनेमि ४ पूर्व्यम् ५ अह्नाय ६। इति षट्पुराणनामानि। इति वेदनिघण्टौ ३ अध्यायः॥ (विष्णुः। यथा, महाभारते। १३। १४९। ९६।
"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः॥")
पुरातनः, त्रि, (पुरा पूर्व्वस्मिन् काले भवः। पुरा + "सायंचिरेति।" ४। ३। २३। इति ट्युल्तुट् च।) पूर्व्वकालभवः। पुराण इति भाषा। तत्पर्य्यायः। पुराणः २ प्रतनः ३ प्रत्नः ४ चिरन्तनः ५। इत्यमरः। ३। १। ७७॥ चिरत्नः ६। इति जटाधरः॥ (यदुक्तं नीतिशास्त्रे।
"नवं वस्त्रं नवं छत्रं नव्या स्त्री नूतनं गृहम्।
सर्व्वत्र नूतनं शस्तं सेवकान्ने पुरातने॥")
पुराध्यक्षः, पुं, (पुरस्य पुराधिकृतो वा अध्यक्षः।) नगराधिकृतः। (यथा, महाभारते। १३। १३५। ११।
"चिकित्सकः काण्डपृष्ठः पुराध्यक्षः पुरोहितः।
सांवत्सरो वृथाध्यायी सर्व्वे ते शूद्रसम्मिताः॥")
अन्तःपुराध्यक्षलक्षणम्। यथा,—
"वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते॥"
इति युक्तिकल्पतरुः॥
पुरारिः, पुं, (पुरस्य त्रिपुरस्य अरिः शत्रुः।) शिवः। इति त्रिकाण्डशेषः॥ (यथा, अध्यात्मरामायणे। १। १। ५।
"पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम्॥")
पुरार्द्धविस्तरः, पुं, (पुरार्द्धे पूर्व्वार्द्धे विस्तरो विस्तृतिरस्येति।) खेटः। इति हेमचन्द्रः। ४। ३८॥
पुरावसुः, पुं, (पुरा पूर्व्वकाले उत्पत्तेः प्रागित्यर्थः वसुः।) भीष्मः। इति त्रिकाण्डशेषः॥
पुरावृत्तं, क्ली, (पुरा पुराणं वृत्तं चरितं यत्र।) पूर्व्ववृत्तान्तनिबन्धनम्। तत्पर्य्यायः। इतिहासः २। इत्यमरः। १। ६। ४॥ पूर्व्वचरितम् ३। इति स्वामी॥ (यथा, महाभारते। ७। २८। २४।
"शृणु गुह्यमिदं पार्थ! पुरावृत्तं यथानघ!॥")
पुरासिनी, स्त्री, (पुरं नगरमस्यति त्यजतीति। अस + णिनिः + ङीप्।) सहदेवीलता। इति राजनिर्घण्टः॥
पुरासुहृत्, [द्] पुं, (पुरस्य त्रिपुरस्य असुहृत् शत्रुः।) शिवः। इति हेमचन्द्रः। २। ११४॥
पुरिः, स्त्री, (पूर्य्यते इति। पॄ + "कॄगॄशॄपॄकुटीति।" उणा० ४। १४२। इति इः। स च किन्।) पुरी। इत्यमरटीकायां भरतः॥ नदी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (शरीरम्। इति पुरीतत्-शब्दटीकायां भरतः॥)
पुरिः, पुं, (पूर्य्यते यज्ञादिभिरिति। पॄ + इः। स च किन्।) राजा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (सन्न्यासिविशेषः। शङ्कराचार्य्यशिष्यतोटकस्य शिष्येषु अन्यतमशिष्यनामानुसाराधिविशेषः। इति केचित्॥ तल्लक्षणं यथा, प्राणतोषिण्यामवधूतप्रकरणे।
"ज्ञानतत्त्वेन संपूर्णः पूर्णतत्त्वपदे स्थितः।
परब्रह्मरतो नित्यं पुरिनामा स उच्यते॥"
तथा च मुण्डमालातन्त्रे २ पटले।
"देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा।
अन्तर्य्यागेषु यो निष्ठः स वीरः पुरिरेव च॥")

पुरी, स्त्री, (पुरि+वा ङीष् ।) नगरी । इत्यमरः । २ । २ । १ ॥ (यथा, श्रीधरस्वामिधृतभृगुवचनम् ।
"कृपावास: पुरी प्रोक्ता विश्वां पुरमपीष्यते ॥")
अस्या लक्षणादि पुरशब्दे नगरशब्दे च लिखितम् । तद्वर्णनं यथा, महाभारते । ३ । १५ । ५—८ ।
"पुरी समन्ताद्विहिता सपताका सतोरणा ।
सचक्रा सहुडा चैव सयन्त्रखनका तथा ॥
सोपशल्यप्रतोलीका साट्टाट्टालकगोपुरा ।
सचक्रग्रहणी चैव सोल्कालातावपोथिका ॥
सोद्धिका भरतश्रेष्ठ । सभेरीपणवानका ।
सतोरणाङ्कुशा राजन् । सशतघ्नीकलाङ्गला ॥
सभुशुण्ड्यश्मगुडका सायुधा सपरश्वधा ।
लोहचर्म्मवती चापि साग्निः सगुडशृङ्गिका ॥"
"पताका ध्वजाञ्चल: । तोरणानि बहिर्द्वाराणि । चक्राणि योधगणा: । हुडास्तदाश्रयस्थानानि भाषायां बुरुजसंज्ञानि । अन्ये तु विण्मूत्रोत्सर्ज्जनशृङ्गाणि हुडा इत्याहु: उदाहरन्ति च ।
'कल्याणि हुडशृङ्गाणि रथस्योपरि सूरिभि: ।
विण्मूत्रस्पर्शशुद्ध्यर्थं करादिस्पर्श उद्यते ॥'
इति ॥
यन्त्राणि आग्नेयौषधबलेन इषत्पिण्डानुक्षेपणानि महान्ति भाषायां कामानसंज्ञकानि । क्षुद्राणि सीसगुलिकोत्क्षेपणयन्त्राणि बन्दुकसंज्ञकानि । खनका: सुरङ्गद्वारा गुप्तमार्गकर्त्तार: ॥ उपशल्या: लोहमुखा: कीला: तद्युक्ता: प्रतोल्यो रथ्यामार्गा यस्यां सा । अट्टालका: उपरिगृहा: । गोपुराणि पुरद्वाराणि । साट्टानि अट्टेन अन्नेन सहितानि अट्टालकादीनि यस्यां सा । साट्टेति विशेषणं उपशल्यस्य ग्रामान्तस्य रथ्यायाश्चापृथा सम्बध्यते । चक्रग्रहणी सैन्यनिग्राहिका मोर्चा इति म्लेच्छप्रसिद्धा । सोल्कालातावपोथिका सोल्कमलातं ज्वालासहितमुल्मुकं यस्यां सा सोल्कालाता इति केचित् । अवपट्टा: पोथिका यन्त्रबद्धा: काष्ठपाषाणादयो रिपूणामुपरिपातनाय यस्यामिति प्राञ्च: । उल्केवोल्का प्राणहरत्वात् यन्त्रोत्क्षिप्तो गोल: । अलातं सकाष्ठदण्डलोहमयमाग्नेयं प्रहरणं बाण इति भाषायां प्रसिद्धम् । तयोरप्रत्याख्येयगत्योरपि पोथिका पातयित्र्य: मन्त्रमय्य: शक्तय: कर्णायेन्द्रदत्तशक्तिसदृशा तद्युक्ता: सोल्कालातावपोथिका ॥ * ॥ उद्धिका स्वचर्म्मयानि भाण्डानि । सर्द्धिकेति पाठे कश्चन आयुधविशेषा: ॥ * ॥ अश्मगुडका: वर्त्तुलीकृता: पाषाणा: । लोहमयानि चर्म्माणि कमठपृष्ठाकाराणि प्रहारवारकाणि ढाल इति प्रख्यातानि । साग्नि: आग्नेयौषधसहिता गुडा: गोलका: । शृङ्गिकास्तदुत्क्षेपकयन्त्राणि । शत्रूणामुपरि पातनाय तप्तो गुडो द्रवीभूतो यत्र शिखरे स्थाप्यते तत्सहितेत्यन्ये ॥" इति नीलकण्ठकृतभारतभावदीपनामटीका ॥

पुरीतत्, पुं क्ली, (पुरीं शरीरं तनोतीति । तन दुन् विस्तारे+क्विप् । "गम: क्वौ ।" ६ । ४ । ४० । इत्यत्र "गमादीनामिति वक्तव्यम् ।" इति वार्त्तिकोक्त्या अनुनासिकलोप: । तुगागमश्च । पुरिं तनोतीति वाक्ये "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घ: ।) अन्त्रम् । आँत इति ख्यातम् । अन्तति बध्नाति कालखण्डादि अन्त्रं अतिबन्धे नाम्नीति र: । पुरि: शरीरं तनोतीति पुरीतत् क्विप् वनतनाद्यनिमामिति नलोपे स्वस्य तगिति तन् निपातनादिकारस्य दीर्घ: । अन्त्रसाहचर्य्यात् क्लीवत्वम् । पुरीतदस्त्रियामिति वाचस्पति: । इत्यमरभरतौ ॥

पुरीमोह:, पुं, (पुरीं शरीरं मोहयतीति । मुह+णिच्+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) धुस्तूर: । इति शब्दमाला ॥

पुरीषं, क्ली, (पिपर्त्ति शरीरमिति । पृ+"पॄ-पूभ्यां किच्च ।" उणा० ४ । २७ । इति ईषन् । स च कित् ।) विष्ठा । इत्यमर: । २ । ६ । ६८ ॥ तदुत्सर्गविधिर्यथा,—
"मुहूर्त्ते ब्राह्म उत्थाय रात्रिवासं परित्यजेत् ।
परिधायापरं वस्त्रं शयनस्थानतोऽन्यत: ॥
सुखाद्विहस्तान् प्रक्षाल्य द्विराचम्य ततो द्विज: ।
कृष्णा कृष्णा स्मृतिं कृत्वा खनित्वा नैरृतीं दिशम् ॥
खनित्रखननेनैव द्वादशाङ्गुल्यधोऽन्तरम् ।
गृहीत्वोदकपात्रञ्च मितं गच्छेद्धनु:शतम् ॥
ग्रामाद्वा शरविक्षेपमात्रामनुदिते रवौ ।
भैत्रमावश्यकं कर्म्म नगराच्च चतुर्गुणाम् ॥
तत्रिमुष्ट्यायतं गर्त्तं तथा कृत्वा गभीरकम् ।
कृत्वा तद्भि: खनित्रेण कुर्य्यात् राशिकाद्य तत्तृणम् ॥
शुष्कै: काष्ठैरयज्ञीयैर्भूगर्त्तमवगुण्ठित: ।
संवीताङ्गो वेणुदलै: पर्णैर्म्मृण्मयभाजनै: ॥
कृत्वं खनित्रं संस्थाप्य वारिपात्रमुपानहौ ।
ततो द्विजस्तूपविश्य दक्षिणाच्छाद्य मस्तकम् ॥
यज्ञोपवीतं कर्णेऽथ धृत्वा मौनी च दक्षिणे ।
आगतो द्विजमग्निं नोपश्यन् सन्तञ्च भास्करम् ॥
गुरुं समीरणं सर्व्वदेवतामूर्त्तिमेव च ।
मातरं पितरं चन्द्रं सर्व्वं गुरुजनं स्त्रियम् ॥ * ॥
उदङ्मुखस्त्विह सन्ध्यासु दिवसे च यदा निशि ।
दक्षिणामुख उत्सर्गं कुर्य्यान्मूत्रपुरीषयो: ॥
पूर्व्वाह्णे तु द्विज: कुर्य्यात् पश्चिमाभिमुखोऽथवा ।
अपराह्णे पूर्व्वमुखो मूत्रगूथविसर्जनम् ॥
मध्याह्ने प्रयत: कुर्य्यादुयतवागुत्तराहुख: ।
दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नत: ॥
निशायामन्धकारे तु छायायां दिवसे तथा ।
यथेच्छमुखो भूत्वा मैत्रं कुर्य्यात् द्विजो भयात् ॥
दिग्भ्रमाच्च मनोदु:खाद्विजमूत्रस्य विसर्ज्जनम् ।
मोहाद्वाधोमुख: कुर्य्यादयतवाक् प्रयतो द्विज: ॥
सन्न्यासी ब्रह्मचारी च वानप्रस्थो गृही द्विज: ।
शाखाध्यायी च वेदानां सर्व्वयज्ञेषु दीक्षित: ॥
मुनिश्च सर्व्वधर्म्मज्ञो दान्त: शान्त उदारधी: ।
सदोत्तरमुख: कुर्य्याद्दिवावो नान्य एव च ॥
प्रातश्च मैत्रं सायाह्ने दक्षिणाभिमुखो निशि ।
योगिनान्तु यथा स्त्रीणां शूद्रादीनामयं क्रम: ॥
न देवायतने वृक्षमूले च न जले नदे ।
न नदीकूपमार्गेषु न वापीगोष्ठभस्मसु ॥
न चिताग्निश्मशानेषु गोचरे न द्विजालये ।
नाम्भ:समीपे न पुष्के नाकाशे न च शाद्वले ॥
न समुद्रे न काम्ये च न तीर्थे न द्विजालये ।
न यज्ञवृक्षमूलेषु गोपहारे चतुष्पथे ॥
न शस्यक्षेत्रे न खले पुष्पोद्याने न चत्वरे ।
सोपानत्को न नग्नश्च न रथ्यासन्निभूतले ॥
न वैष्णवालये गोष्ठे न सूर्य्याभिमुखस्तथा ।
न फालकृष्टकेदारे न तिष्ठंश्च कदाचन ॥
न गच्छंश्च च वल्मीके न च पर्व्वतमस्तके ।
न जलं न दिशो भागानाकाशमवलोकयन् ॥
न गोष्ठे नदीतीरे नित्यस्थाने न गोमये ।
न यज्ञभूमौ न गृहे न पवित्रीकृतस्थले ॥
द्विजो न देहच्छायायां शकृन्मूत्रविसर्जनम् ।
कुर्य्याद्वृक्षेष्टकाकूटे न च सप्राणिगर्त्तके ॥
उद्धृताम्भोम्मृत्तिकाभ्यामित्थं नारद । यत्नत: ।
कृत्वोत्सर्गं तत: कुर्य्यात् शौचं मूत्रपुरीषयो: ॥
शुष्ककाष्ठेन लोष्ट्रेणायज्ञीयेन तृणेन वा ।
प्रमार्ज्य गुह्यमुत्तिष्ठेत् शिश्नञ्चैव विशेषत: ॥
विधृत्य वामहस्तेन शिश्नन्तूपविशेन्निशि ।
चेद्दक्षिणामुख: सन्ध्यां दिवोत्तरमुखस्तदा ॥
पूतिगन्धिजलं दुष्टं सफेनञ्च सबुद्बुदम् ।
तीर्थोदकं सलवणं पाथो वर्णान्तरस्तथा ॥
समुद्रगानदीवार: सामुद्रञ्च सकर्द्दमम् ।
यवनान्त्यजखाताम्भ: समुद्रगनगोदकम् ॥
धान्यक्षेत्रस्य सलिलं सकीटञ्च परित्यजेत् ।
मानवो देवखाताम्भ: सकले शौचकर्म्मणि ॥ * ॥
मृद: सकीटास्तीर्थानां देवायतनगोष्ठयो: ।
नदीदीर्घनदीदेवखाततीरस्य मृत्तिका: ॥
महीतलोद्भवा: क्षेत्रकूपयो: सिकताश्च या: ।
अन्तर्जला धूलिमृदो वल्मीकस्य च कर्द्दमा: ॥
ऊषराश्च हलोत्खाता मृत्तिका भवनस्य च ।
अश्वत्थतुलसीधात्रीमूलादीनाञ्च या मृद: ॥
श्मशानभूमे: शैलस्य तथा पूतस्थलस्य च ।
शौचावशिष्टमार्गस्य आखूत्खाताश्च मृत्तिका: ॥
यज्ञस्थानस्य विप्राणां साधूनामालयस्य च ।
मृत्तिका वर्जयेदेता देवर्षे । शौचकर्म्मणि ॥
पवित्रस्थानतो ग्राह्या द्वादशाङ्गुल्यधोमृद: ।
द्विजै: सकलशौचार्थं शर्करादिविवर्जिता: ॥ * ॥
प्रथमेऽद्भिर्नर: शौचं कुर्य्यान्मृद्भिरत: परम् ।
पुनर्जलै: पुरीषस्य यथा गन्धक्षयो भवेत् ॥
मृत्तिका प्रथमा शौचे त्वर्द्धप्रसृतिसम्मिता ।
पूर्णप्रसृतिमात्रा तु द्वितीया सजला तथा ॥
तृतीया प्रमिता शौचे सार्द्धप्रसृतिमृत्तिका ।
चतुर्थ्याद्या क्रमादेवमर्द्धप्रसृतिवर्द्धिता ॥
यया मृत्तिकया पूर्य्यं त्रिपर्व्व शौचकारिण: ।
अर्द्धप्रसृतिमात्रा सा मुनिभि: परिकीर्त्तिता ॥
गुदे दद्यान्मृदस्तिस्र: पञ्च वा सप्त वा तथा ।
मृदमेकां तथा शिश्ने तिस्रो वा मृत्तिका द्वयम् ॥

सप्त वामकरे दद्यान्मृदश्चांशश्चतुर्दश ।
तिस्रो वा हस्तयोः सप्त चतुर्दश च षोडश ॥
पाद्योरेकां मृदं पृष्ठे षड्वा तिस्रश्च मृत्तिकाः ।
हस्तद्वयनखेष्वेकां तिस्रश्च षड्मृदस्तथा ॥ * ॥
मैथुने रेतःस्खलने मूत्रोत्सर्गे च मृद्द्वयम् ।
दद्यात्तिस्रश्च शिश्नेकां तिस्रो वामकरे मृदः ॥
हस्ते च मृद्द्वयं दद्यात्तिस्रो वा शुद्धितत्परः ।
पदेकैके द्विजस्तिस्रो गृहीत्यं शौचमाचरेत् ॥
गृहिणो द्विगुणं शौचं यततो ब्रह्मचारिणाम् ।
गृहस्थवानप्रस्थानां प्रोक्तं त्रिगुणमेव च ॥
सन्न्यासिनां वैष्णवानां शौचं सर्व्वं चतुर्गुणम् ।
हस्तपादादिपात्रन्तु मृद्भिरद्भिश्च गोमयैः ॥
दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत् ।
एतदर्द्धमशौचे तु जातके मृतकेऽपि च ॥
चौरादिबाधिते मार्गे शौचमस्यार्द्धमाचरेत् ।
योषितामेतदर्द्धन्तु शूद्रादीनाञ्च नारद ! ॥
व्याधिभिश्चातुरो मर्त्य आर्त्तो यदि यथाबलम् ।
शौचं कुर्य्यात् स्नातं यत्र तत् स्थानं शोधयेज्जलैः ॥
वेदस्मृतिपुराणानि धर्म्मशास्त्राणि नैत्यिकम् ।
मैत्रादिकर्म्म यः कुर्य्याद्विहाय मन्दधीर्द्विजः ॥
प्रतिप्रजानमायुश्च प्रज्ञां हन्ति यशः श्रियम् ।
बलमाचारहीनस्य सदा तस्यापवित्रता ॥ * ॥
सात्वताश्च द्विजा भूपा वैश्यशूद्रान्त्यजाः स्त्रियः ।
कुर्व्वन्ति शौचं यत्नेन यावच्चेतःपवित्रता ॥
येषां कृष्णस्य मननं तथा नामप्रजल्पनम् ।
सदैव स्मरणं भागवतानां साधुसेवनम् ॥
भक्तिप्रक्षौतमनसां गोविन्दार्पितकर्म्मणाम् ।
बाह्यान्तःशुद्धचित्तानां शुचिता तदहर्निशम् ॥
मृद्गोमयजलैः शौचमनेकैः कुरुते यदि ।
मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति ॥
गोविन्ददासता नास्ति यस्य लोकस्य जन्मनि ।
सोऽपि देहाशुचिः कृत्वा शौचं मैत्रादिकर्म्मसु ॥
शतधा यदि देवर्षे शौचं कुर्य्यात् सहस्रधा ।
मृद्वारिगोमयैर्लोको भावदुष्टो न शुध्यति ॥
सदा चित्तापवित्रत्वमकार्य्यो भुवि यो नरः ।
तस्य तु स्नात्र मैत्रादिशौचेनैव स शुध्यति ॥
पर्व्वताकारकूटैश्च गोविट्सर्व्वनदीजलैः ।
शौचं कृत्वा न शुध्येत दुष्टचित्तो भवेद्यदि ॥”
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥
(उदकम् । इति निघण्टुः । १ । १२ ॥ “पूरयति जगत् प्रलयकाले पूर्य्यते अनेन तडागादि पालकं वा जगतः शस्योत्पत्तिहेतुत्वात् । शृणातेर्वा बाहुलकात् कीषन्प्रत्ययः ईकारस्योकारादेशः स च पकारात् परो द्रष्टव्यः ।” इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । १६३ । १ ।
“यदक्रन्दः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात् ॥”
“पुरीषात् सर्व्वकामानां पूरकादुदकात् ॥”
इति तद्भाष्ये सायनः ॥)
पुरीषणः, पुं, (पुर्य्या देहात् इष्यते त्यज्यते इति । पुरी+इष+कर्म्मणि ल्युट् ।) पुरीषम् । इति त्रिकाण्डशेषः ॥
पुरीषमः, पुं, (पुरीषं मिमीते इति । मा+कः ।) माषः । इति त्रिकाण्डशेषः ॥
पुरु., पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ+“पॄभिदिव्यधिगृधिधृषिहृषिभ्यः ।” उणा० १ । २४ । इति कुः । “उदोष्ठ्यपूर्व्वस्य ।” ७ । १ । १०२ । इति उत्वम् । “उरण् रपरः” १ । १ । ५१ । इति रपरत्वम् ।) देवलोकः । नृपभेदः । स च ययातेः कनिष्ठपुत्त्रः । (आद्यूरन्तोऽपि पाठः ।) परागः । इति मेदिनी । रे, ५८ ॥ दैत्यः । इत्युणादिकोषः ॥ नदीभेदे, त्रि । इति शब्दरत्नावली ॥ (राजविशेषः । यथा, महाभारते । २ । ४ । २७ ।
“सुकर्म्मा चेकितानश्च पुरुश्चामित्रकर्षणः ॥”
चाक्षुषमनोः पुत्त्रभेदः । यथा, मार्कण्डेये । ७६ । ५५ ।
“ऊरुपुरुशतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्त्राः पृथिवीपतयोऽभवन् ॥”
पर्व्वतभेदः । यथा, महाभारते । ३ । ९० । २२ ।
“पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः ।
भृगुर्यत्र तपस्तेपे महर्षिगणसेविते ॥”
शरीरम् । यथा, शङ्करविजये । १३ अध्याये ।
“पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥”)
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६३ ॥ (यथा, नैषधे । १६ । ५ ।
“स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितरुचश्चञ्चच्चञ्चूपुटस्फुटचुम्बितः ॥”)
पुरुकुत्सवः, पु, इन्द्रारिपुविशेषः । यथा,—
“इन्द्रो विपश्चिद्देवानां तद्रिपुः पुरुकुत्सवः ।
जघान हस्तिरूपेण भगवान्मधुसूदनः ॥”
इति गारुडे ८७ अध्यायः ॥
पुरुदंशकः, पुं, (पुरु बहुलं यथा स्यात्तथा दशतीति । दन्श+ण्वुल् ।) हंसः । इति त्रिकाण्डशेषः ॥
पुरुदंशाः, [स्] पुं, (पुरुं दैत्यविशेषं दशति छिनत्तीति । दन्श+असुन् ।) इन्द्रः । इति जटाधरः ॥
पुरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर+“पुरः कुषन् ।” उणा० ४ । ७४ । इति कुषन् । पिपर्त्ति पूरयति बलं यः पुरि शेते य इति वा पुमान् । (यथा, मनौ । १ । ३२ ।
“द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥”
तत्पर्य्यायः । पूरुषः २ ना ३ नरः ४ पञ्चजन ५ पुमान् ६ अर्थाश्रयः ७ अधिकारी ८ कर्म्माङ्गः ९ जनः १० अर्थवान् ११ । इति राजनिर्घण्टः ॥ मनुष्यः १२ मानवः १३ मर्त्यः १४ मानुषः १५ मनुः १६ । इति शब्दरत्नावली ॥ रसिकराज १७ घनकामधामा १८ मदनशायकाङ्कः १९ मन्मथशायकलक्ष्यः २० । इति कविकल्पलता ॥ स चतुर्विधः । यथा,—
शशो मृगो वृषश्चाश्वो नृणां जातिचतुष्टयम् ॥
शशादीनां लक्षणं यथा,—
“मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलगुणनिधानः सत्यवादी शशोऽयम् ॥ १ ॥
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ॥ २ ॥
बहुगुणबहुबन्धुः शीघ्रकामो नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥ ३ ॥
उदरकटिकृशः स्यादुग्रकण्ठाधरौष्ठो
दशनवदननासाश्रोत्रदीर्घो हि वाजी ॥” ४ ॥
इति रतिमञ्जरी ॥ * ॥
तस्य पञ्चलक्षणत्वं यथा,—
“पाने त्यागी गुणी रागी भोगी परिजनैः सह ।
शास्त्रे बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः ॥”
इति प्राचीनाः ॥
जितेन्द्रियस्य पुरुषत्वं यथा,—
“सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयोज्झितः ।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥”
इति गारुडे १६ अध्यायः ॥ * ॥
(अस्य लक्षणादिकं यथा,—
“उन्मानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनूकमादौ ।
क्षेत्रं मृजाञ्च विधिवत् कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतञ्च ॥
अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ सुनिगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥
शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ।
मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छित्तिदौ
ब्रह्मघ्नौ परिपक्वमृद्द्युतितलौ पीतावगम्यारतौ ॥
प्रविरलतनुरोमवृत्तजङ्घा
द्विरदकरप्रतिमैर्वरोरुभिश्च ।
उपचितसमजानवश्च भूपा
धनरहिताः श्वशृगालतुल्यजङ्घाः ॥
रोमैकैकं कूपके पार्थिवानां
द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
त्र्याद्यैर्निःस्वा मानवा दुःखभाजः
केशाश्चैवं निन्दिताः पूजिताश्च ॥
निर्म्मांसजानुर्म्रियते प्रवासे
सौभाग्यमल्पैर्विकटैर्दरिद्राः ।
स्त्रीनिर्जिताश्चापि भवन्ति निम्नै
राज्यं समांसैश्च महद्भिरायुः ॥
लिङ्गेऽल्पे धनवानपत्यरहितः स्थूले विहीनो धनै-
र्मेढ्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्त्रवान् ।
दारिद्र्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते
स्थूलग्रन्थियुते सुखी मृदु करोत्यन्तं प्रमेहादिभिः ॥

कोषनिगूढैर्भूपा दीर्घैर्भग्नैश्च वित्तपरिहीनाः ।
ऋजुवृत्तशेफसो लघुशिरालशिश्नाश्च धनवन्तः ॥
जलमृत्युरेकवृषणो विषमैः स्त्रीचञ्चलः समैः क्षितिपः ।
ह्रस्वायुश्चोद्बद्धैः प्रलम्बवृषणस्य शतमायुः ॥
रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च ।
सुखिनः सशब्दमूत्रा निःस्वा निःशब्दधाराश्च ॥
द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः ।
पृथ्वीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः ॥
एकैव मूत्रधारा वलिता रूपप्रधानसुतदात्री ।
स्निग्धोन्नतसममणयो धनवनितारत्नभोक्तारः ॥
मणिभिश्च मध्यनिम्नैः कन्यापितरो भवन्ति निःस्वाश्च ।
बहुपशुभाजो मध्योन्नतैश्च नात्युल्बणैर्धनिनः ॥
परिशुष्कवस्तिशीर्षैर्धनरहिता दुर्भगाश्च विज्ञेयाः ।
कुसुमसमगन्धशुक्रा विज्ञातव्या महीपालाः ॥
मधुगन्धे बहुवित्ता मत्स्यसगन्धे बहून्यपत्यानि ।
तनुशुक्रः स्त्रीजनको मांससगन्धो महाभोगी ॥
मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्रः ।
शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाल्पायुः ॥
निःस्वोऽतिस्थूलस्फिक् समांसलस्फिक् सुखान्वितो भवति ।
व्याघ्रान्तोऽर्धस्फिग्मण्डूकस्फिग्नराधिपतिः ॥
सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः ।
समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः ॥
अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसन्त्यक्ताः ।
समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः ॥
उन्नतकुक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकुक्षाः ।
सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव ॥
परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः ।
स्वल्पा त्वदृश्यनिम्ना नाभिः क्लेशावहा भवति ॥
वलिमध्यगता विषमा शूलाबाधं करोति नैःस्वञ्च ।
शाठ्यं वामावर्ता करोति मेधां प्रदक्षिणतः ॥
पार्श्वायता चिरायुषमुपरिष्टाच्चेश्वरं गवाढ्यमधः ।
शतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते ॥
शस्त्रान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथासंख्यम् ।
एकद्वित्रिचतुर्भिर्वलिभिर्विद्यान्नृपं त्ववलिम् ॥
विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः ।
ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव ॥
मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः ।
विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः ॥

सुभगा भवन्त्यनुद्बद्धचूचुका निर्धना विषमदीर्घैः ।
पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः सुखिनः ॥
हृदयं समुन्नतं पृथु न वेपनं मांसलं च नृपतीनाम् ।
अधनानां विपरीतं खररोमचितं शिरालञ्च ॥
समवक्षसोऽर्थवन्तः पीनैः शूराश्चकिञ्चना तनुभिः ।
विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च ॥
विषमैर्विषमो जत्रुभिरर्थविहीनोऽस्थिसन्धिपरिणद्धैः ।
उन्नतजत्रुर्भोगी निम्नैर्निःस्वोऽर्थवान् पीनैः ॥
चिपिटग्रीवो निःस्वः शुष्का सशिरा च यस्य वा ग्रीवा ।
महिषग्रीवः शूरः शस्त्रान्तो वृषसमग्रीवः ॥
कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षणो भवति ।
पृष्ठमभग्नमरोमशमर्थवतामशुभदमतोऽन्यत् ॥
अस्वेदनपीनोन्नतसुगन्धिसमरोमसङ्कुलाः कक्षाः ।
विज्ञातव्या धनिनामतोऽन्यथार्थैर्विहीनानाम् ॥
निर्मांसौ रोमचितौ भग्नावल्पौ च निर्धनस्यांसौ ।
विपुलावव्युच्छिन्नौ सुश्लिष्टौ सौख्यवीर्यवताम् ॥
करिकरसदृशौ वृत्तावाजानुविलम्बिनौ समौ पीनौ ।
बाहू पृथिवीशानामधमानां रोमशौ ह्रस्वौ ॥
हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम् ।
मेधाविनाञ्च सूक्ष्माश्चिपिटाः परकर्मनिरतानाम् ॥
स्थूलाभिर्धनरहिता बहिर्नताभिश्च शस्त्रनिर्याणाः ।
कपिसदृशकरा धनिनो व्याघ्रोपमपाणयः पापाः ॥
मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिर्भूपाः ।
हीनैर्हस्तच्छेदः श्लथैः सशब्दैश्च निर्द्रव्याः ॥
पितृवित्तेन विहीना भवन्ति निम्नेन करतलेन नराः ।
संवृतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः ॥
विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाक्षाभैः ।
पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः ॥
तुषसदृशनखाः क्लीबाश्चिपिटैः स्फुटितैश्च वित्तसन्त्यक्ताः ।
कुनखविवर्णैः परतर्ककाश्च ताम्रैश्च भूपतयः ॥
अङ्गुष्ठयवैराढ्याः सुतवन्तोऽङ्गुष्ठमूलगैश्च यवैः ।
दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥
स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निःस्वानाम् ।
विरलाङ्गुलयो निःस्वा धनसञ्चयिनो घनाङ्गुलयः ॥
तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः ।

मीनयुगाङ्कितपाणिर्नित्यं सत्रप्रदो भवति ॥
वज्राकारा धनिनां विद्याभाजां तु मीनपुच्छनिभाः ।
शङ्खातपत्रशिबिकागजाश्वपद्मोपमा नृपतेः ॥
कलशमृणालपताकाङ्कुशोपमाभिर्भवन्ति निधिपालाः ।
दामनिभाभिश्चाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ॥
चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा रेखाः ।
कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ॥
मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः ।
वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ॥
वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः ।
अङ्गुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः सूक्ष्माः ॥
रेखाः प्रदेशिनीगाः शतायुषां कल्पनीयमूनाभिः ।
छिन्नाभिर्द्रुमपतनं बहुरेखारेखिणो निःस्वाः ॥
अतिकृशदीर्घैश्चिबुकैर्निर्द्रव्या मांसलैर्धनोपेताः ।
बिम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरस्वाः ॥
ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः ।
स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ॥
जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां ज्ञेया ।
श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु ॥
वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समञ्च भूपानाम् ।
विपरीतं क्लेशभुजां महासुखं दुर्भगाणाञ्च ॥
स्त्रीमुखमनपत्यानां शाठ्यवतां मण्डलं परिज्ञेयम् ।
दीर्घं निर्द्रव्याणां भीरुमुखाः पापकर्माणः ॥
चतुरस्रं धूर्तानां निम्नं वक्त्रञ्च तनयरहितानाम् ।
कृपणानामतिह्रस्वं सम्पूर्णं भोगिनां कान्तम् ॥
अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्नतञ्चैव ।
रक्तैः परुषैश्चौराः श्मश्रुभिरल्पैश्च विज्ञेयाः ॥
निर्मांसैः कर्णैः पापमृत्यवश्चिपिटैः सुबहुभोगाः ।
कृपणाश्च ह्रस्वकर्णाः शङ्कुश्रवणाश्च भूपतयः ॥
रोमशकर्णा दीर्घायुषस्तु धनभागिनो विपुलकर्णाः ।
क्रूराः शिरावनद्धैर्व्यालम्बैर्मांसलैः सुखिनः ॥
भोगी त्वनिम्नगण्डो मन्त्री सम्पूर्णमांसगण्डो यः ।
सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ॥
छिन्नानुरूपयागम्यगामिनो दीर्घया तु सौभाग्यम् ।
आकुञ्चितया चौरः स्त्रीमृत्युः स्याच्चिपिटनासः ॥
धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षणाः क्रूराः ।
ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सभाग्यानाम् ॥

धनिनां क्षुतं सकृद्द्विस्त्रिपिण्डितं ह्लादि सानुनादञ्च ।
दीर्घायुषां प्रसुक्तं विज्ञेयं संहतञ्चैव ॥
पद्मदलाभैर्धनिनो रक्तान्तविलोचनाः श्रियोभाजः ।
मधुपिङ्गलैर्महार्था मार्जारविलोचनाः पापाः ॥
हरिणाक्षा मण्डललोचनाश्च जिह्मैश्च लोचनैश्चौराः ।
क्रूराः केकरनेत्रा गजसदृशदृशश्च भूपतयः ॥
ऐश्वर्य्यं गम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः ।
अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवति ॥
मन्त्रित्वं स्थूलदृशां श्यावाक्षाणाञ्च भवति सौभाग्यम् ।
दीना दृष्टिःस्वानां स्निग्धा विपुलार्थभोगवताम् ॥
अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरतिसुखिनः ।
विषमभ्रुवो दरिद्रा बालेन्दुनतभ्रुवः सधनाः ॥
दीर्घासंसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीनाः ।
मध्यविनतभ्रुवो ये ते सक्ताः स्त्रीष्वगम्यासु ॥
उन्नतविपुलैः शङ्खैर्धन्या निम्नैः सुतार्थसन्त्यक्ताः ।
विषमललाटा विधना धनवन्तोऽर्द्धेन्दुसदृशेन ॥
शुक्तिविशालैराचार्य्यता शिरासन्ततैरधर्म्मरताः ।
उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ॥
निम्नललाटा वधबन्धभागिनः क्रूरकर्म्मनिरताश्च ।
अभ्युन्नतैश्च भूपाः कृपणाः स्युः सङ्कटललाटाः ॥
रुदितमदीनमनस्रु स्निग्धञ्च शुभावहं मनुष्याणाम् ।
रूक्षं दीनं प्रचुराश्रु चैव न शुभप्रदं पुंसाम् ॥
हसितं शुभदमकम्पं सनिमीलितलोचनञ्च पापस्य ।
दुष्टस्य हसितमसकृत् सोन्मादस्यासकृत्प्रान्ते ॥
तिस्रो रेखाः शतजीविनां ललाटायताः स्थिता यदि ताः ।
चतसृभिरवनीशत्वं नवतिश्चायुः सपञ्चाब्दा ॥
विच्छिन्नाभिश्चागम्यगामिनो नवतिरप्यरेखेण ।
केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ॥
पञ्चभिरायुः सप्ततिरेकाग्रावस्थिताभिरपि षष्टिः ।
बहुरेखेण शतार्द्धं चत्वारिंशच्च वक्राभिः ॥
त्रिंशद्भ्रूलग्नाभिर्विंशतिकश्चैव वामवक्राभिः ।
क्षुद्राभिः स्वल्पायुर्न्यूनाभिश्चान्तरे कल्प्यम् ॥
परिमण्डलैर्गवाढ्याश्छत्राकारैः शिरोभिरवनीशाः ।
चिपिटैः पितृमातृघ्नाः करोटिशिरसां चिराम्मृत्युः ॥
घटमूर्द्धा ध्वानरुचिर्द्विमस्तकः पापकृद्धनैस्त्यक्तः ।
निम्नन्तु शिरो महतां बहुनिम्नमनर्थदं भवति ॥
एकैकभवैः स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः ।
मृदुभिर्न चातिबहुभिः केशैः सुखभाङ्नरेन्द्रो वा ॥
बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रपरुषह्रस्वाश्च ।
अतिकुटिलाश्चातिघनाश्च मूर्द्धजा वित्तहीनानाम् ॥
यद्यद्गात्रं रूक्षं मांसविहीनं शिरावनद्धञ्च ।
तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्व्वम् ॥
त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः ।
सप्तसु रक्तो राजा पञ्चसु दीर्घश्च सूक्ष्मश्च ॥

नाभिः स्वरः सत्त्वमिति प्रदिष्टं
गम्भीरमेतत्त्रितयं नराणाम् ।
उरो ललाटं वदनञ्च पुंसां
विस्तीर्णमेतत्त्रितयं प्रशस्तम् ॥
वक्षोऽथ कक्षा नखनासिकास्यं
कृकाटिका चेति षडुन्नतानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठं
ग्रीवा च जङ्घे च हितप्रदानि ॥
नेत्रान्तपादकरताल्वधरोष्ठजिह्वा
रक्ता नखाश्च खलु सप्त सुखावहानि ।
सूक्ष्माणि पञ्च दशनाङ्गुलिपर्व्वकेशाः
साकं त्वचा कररुहाश्च न दुःखितानाम् ॥
हनुलोचनबाहुनासिकाः
स्तनयोरन्तरमत्र पञ्चमम् ।
इति दीर्घमिदं तु पञ्चकं
न भवत्येव नृणामभूभृताम् ॥

इति क्षेत्रम् ॥

छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान् बहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥
स्निग्धद्विजत्वङ्नखरोमकेशच्छाया सुगन्धा च महीसमुत्था ।
तुष्ट्यर्थलाभाभ्युदयान् करोति
धर्म्मस्य चाहन्यहनि प्रवृत्तिम् ॥
स्निग्धा सिताच्छहरिता नयनाभिरामा
सौभाग्यमार्द्दवसुखाभ्युदयान् करोति ।
सर्व्वार्थसिद्धिजननी जननीव चाप्या
छाया फलं तनुभृतां शुभमादधाति ॥
चण्डाधृष्या पद्महेमाग्निवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आग्नेयीति प्राणिनां स्याज्जयाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥
मलिनपरुषकृष्णा पापगन्धानिलोत्था
जनयति वधबन्धव्याध्यनर्थार्थनाशान् ।
स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा
निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा ॥
छायाः क्रमेण कुजलाग्न्यनिलाम्बरोत्थाः
केचिद्वदन्ति दश ताश्च यथानुपूर्व्या ।
सूर्य्याजनाभपुरुहूतयमोडुपानां
तुल्यास्तु लक्षणफलैरिति तत्समासः ॥

इति छाया ॥

करिवृषरथौघभेरीमृदङ्गसिंहाब्दनिःस्वना भूपाः ।
गर्द्दभजर्ज्जररूक्षस्वराश्च धनसौख्यसन्त्यक्ताः ॥

इति स्वरः ॥

सप्त भवन्ति च साराः मेदोमज्जात्वगस्थिशुक्राणि ।
रुधिरं मांसं चेति प्राणभृतां तत्समासफलम् ॥
ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥
स्निग्धत्वक्का धनिनो मृदुभिः सुभगा विचक्षणास्तनुभिः ।
मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुक्ताः ॥
स्थूलास्थिरस्थिसारो बलवान् विद्यान्तगः सुरूपश्च ।
बहुगुरुशुक्राः सुभगा विद्वांसो रूपवन्तश्च ॥
उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः ।

इति सारः ॥

सङ्घात इति च सुश्लिष्टसन्धिता सुखभुजो ज्ञेया ॥

इति संहतिः ॥

स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंस्थः ।
सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ॥

इति स्नेहः ॥

द्युतिमान्वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थवताम् ।
रूक्षो धनहीनानां शुद्धः शुभदो न सङ्कीर्णः ॥

इति वर्णः ॥

साध्यमनूकं वक्त्राद्गोवृषशार्दूलसिंहगरुडमुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ॥
वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुखभाजः ।
गर्द्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वसुखाः ॥

इत्यनूकम् ॥

अष्टशतं षण्णवतिः परिमाणं चतुरशीतिरिति पुंसाम् ।
उत्तमसमहीनानामङ्गुलसङ्ख्या स्वमानेन ॥

इत्युन्मानम् ॥

भारार्द्धतनुः सुखभाक् तुलितोऽतो दुःखभाग्भवत्यूनः ।
भारोऽतीवाढ्यानामध्यर्द्धः सर्व्वधरणीशः ॥
विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः ।
अर्हति मानोन्मानं जीवितभागे चतुर्थे वा ॥

इति मानम् ॥

भूजलशिख्यनिलाम्बर-
सुरनररक्षःपिशाचकतिरश्चाम् ।
सत्त्वेन भवति पुरुषो
लक्षणमेतद्भवत्येषाम् ॥
महीस्वभावः शुभपुष्पगन्धः
सम्भोगवान् सुश्वसनः स्थिरश्च ।
तोयस्वभावो बहुतोयपायी
प्रियाभिलाषी रसभोजनश्च ॥
अग्निप्रकृत्या चपलोऽतितीक्ष्णश्चण्डः क्षुधालुर्बहुभोजनश्च ।

वायोः स्वभावेन चलः कृशश्च
चित्तं च कोपस्य वशं प्रयाति ॥
स्वप्रकृतिनिःपृक्तो विस्ताख्यः
शब्दगतिः कुशलः सुचिराङ्गः ।
त्यागयुतो पुरुषो मृदुकोपः
खेचरतश्च भवेन्नरसत्त्वः ॥
मर्त्यसत्त्वसंयुतो गीतभूषणप्रियः ।
संविभागशीलवान्नित्यमेव मानवः ॥
तीक्ष्णप्रकोपः खलचेष्टितश्च
पापश्च सत्त्वेन निशाचराणाम् ।
चिरक्षयसत्त्वचपलो मलात्तो
बहुप्रलापी च सम्भवाङ्गः ॥
भीरुः क्षुधालुर्बहुभुक् च यः स्यात्
ज्ञेयः स सत्त्वेन नरस्तिरश्चाम् ।
एवं नराणां प्रकृतिः प्रदिष्टा
यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् ॥
इति प्रकृतिः ॥
शार्दूलहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनाश्च भूपाः ।
येषाञ्च शब्दरहितं स्तिमितञ्च यातं
तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः ॥
इति गतिः ॥
श्रान्तस्य यानमशनञ्च बुभुक्षितस्य
पानं तृषापरिगतस्य भयेषु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले
धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ॥
पुरुषलक्षणमुक्तमिदं मया
मुनिमतान्यवलोक्य समासतः ।
इदमधीत्य नरो नृपसम्मतो
भवति सर्व्वजनस्य च वल्लभः ॥"
इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पुरुषलक्षणं नामाष्टषष्टितमोऽध्यायः ॥ * ॥)
तस्य भक्तपुरुषस्य गोविन्दपदाश्रयत्वं यथा,—
"स्त्रियो वा पुरुषो वापि स्वाततायी नपुंसकः ।
भक्तत्वे गणनीयश्चेद्गोविन्दपदमाश्रयेत् ॥"
इति पाद्मोत्तरखण्डे ६८ अध्यायः ॥
पुरुषाणां मध्ये गुरवो यथा,—
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
आत्मा । इत्यमरः । ३ । ३ । २१८ ॥ (यथा, भागवते । ७ । १४ । ३७ ।
"पुराण्यनेन सृष्टानि नृतिर्य्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥"
यथा च शङ्करविजये १३ अध्याये ।
"पुरसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥")
नागलताः । पुन्नागपादपः । इति मेदिनी । षे,४१ ॥ (तत्पर्य्यायो यथा,वैद्यकरत्नमालायाम् ॥
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")

विष्णुः । इति शब्दरत्नावली ॥ (स हि पुराणपुरुष एव । यथा, हरिवंशे । १०८ । २० ।
"एवं पुराणः पुरुषो विष्णुर्वेदेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ॥"
शिवः । यथा, महाभारते । १४ । ८ । १४ ।
"माध्यायाव्यक्तरूपाय सद्वृत्ते शङ्कराय च ।
क्षेम्याय हरिकेशाय स्थाणवे पुरुषाय च ॥"
जीवः । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे । ४ । १६ ।
"प्रकृतिः परमित्युक्तं पुरुषोऽक्षर उच्यते ।
ताविमौ प्रेरयत्यन्यः स परः परमेश्वरः ॥")
दुर्गा । यथा,—
"महानिति च योगेषु प्रधानश्चेव कथ्यते ।
त्रिगुणा व्यतिरिक्ता या पुरुषश्चेति चोच्यते ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्य पञ्चविंशतितत्त्वात्मकत्वं जड़त्वञ्च यथा,—
"एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः ।
ईश्वरेच्छावशः सोऽपि जड़ात्मा कथ्यते बुधैः ॥"
इति मात्स्ये तत्त्वकथनावसरे ७ अध्यायः ॥
(अश्वस्थानकभेदः । यथा, माघे । ५ । ५६ ।
श्लोकटीकायां मल्लिनाथधृतवचनम् ।
"पश्चिमेनाग्रपादेन भुवि स्थित्याग्रपादयोः ।
ऊर्द्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥")
मेषमिथुनसिंहतुलाधनुःकुम्भराशयः । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
पुरुषग्रहा यथा,—
"भौमार्कजीवाः पुरुषाः क्लीबौ सोमजभानुजौ ।
स्त्र्याख्यौ भार्गवचन्द्रौ द्वौ तत्पतिलात्तथोच्यते ॥"
पुरुषनक्षत्राणि यथा,—
"हस्तो मूलश्रवणपुनर्व्वस्वनुराधाश्विन्यो पुष्यः ।
गर्भाधानादिकार्य्येषु पुन्नामानं गणः शुभदः ॥"
इति ज्योतिस्तत्त्वम् ॥
तद्वैदिकपर्य्यायः । मनुष्याः १ नरः २ धवाः ३ जन्तवः ४ विशः ५ क्षितयः ६ कृष्टयः ७ चर्षणयः ८ नहुषः ९ हरयः १० मर्य्याः ११ मर्त्ताः १२ मर्त्ताः १३ व्राताः १४ तुर्व्वशाः १५ द्रुह्यवः १६ आयवः १७ यदवः १८ अनवः १९ पूरवः २० जगतः २१ तस्थुषः २२ पञ्चजनाः २३ विवस्वन्तः २४ पृतनाः २५ । इति वेदनिघण्टौ २ अध्यायः ॥
पुरुषकं, क्ली,पुं, (पुरुष एवेति । पुरुष + स्वार्थे कन् ।)
घोटकानामद्धस्थितिः । इति त्रिकाण्डशेषः ॥ शोखपाओ इति हिन्दीभाषा ॥ (यथा, माघे । ५ । ५६ ।
"श्रोत्थकी पुरुषकोन्नमिताग्रकायः ॥"
"पुरुषकोऽश्वानां स्थानकभेदः । यदुक्तम्,—
'पश्चिमेनाग्रपादेन भुवि स्थित्याग्रपादयोः ।
ऊर्द्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥'
पुरुष एव पुरुषकस्तेन पुरुषकेण स्थानके-

नोन्नमित ऊर्द्धावस्थितोऽग्रकायः पूर्व्वकायो यस्य स तथोक्तः ।" इति तट्टीकायां मल्लिनाथः ॥)
पुरुषकारः, पुं, (पुरुषस्य कारः करणम् ।) पुरुषस्य कृतिः । पौरुषम् । चेष्टा । यथा,—
मनुरुवाच ।
"दैवे पुरुषकारे च किं ज्यायस्तद्ब्रवीहि मे ।
अत्र मे संशयो देव छेत्तुमर्हस्यशेषतः ॥
मत्स्य उवाच ।
स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्ज्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्म्मनीषिणः ॥
प्रतिकूलन्तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्ज्जिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवं न सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगाद्दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं नृभिः ।
एवन्ते प्राप्नुवन्तीह परलोकफलं ध्रुवम् ॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सर्व्वप्रयत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्त्वालसान् दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नाद्वृणुते नृपेन्द्र !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"
इति मात्स्ये दैवपुरुषकारको नाम२१५अध्यायः॥
(यथा च नीतिशास्त्रे ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")
पुरुषकुञ्जरः, पुं, (पुरुषेषु कुञ्जरः श्रेष्ठ इति । पुरुषः कुञ्जर इवेत्युपमितसमासो वा ।) पुरुषश्रेष्ठः । यथा, अमरे । ३ । १ । ५६ ।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्द्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ॥"
(यथा, रामायणे । २ । १० । ५ ।
"कृत्तानार्य्ये ! ममामित्रे ! सकामा भव केकयि ! ।
मृते मयि गते रामे वनं पुरुषकुञ्जरे ॥")
पुरुषत्रा, व्य, (द्वितीयासप्तम्यर्थवृत्तेः पुरुषशब्दात्
"देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ।"५ । ४ । ५६ । इति त्रा ।) पुरुषम् । पुरुषौ । पुरुषान् । पुरुषे । पुरुषयोः । पुरुषेषु ॥ देवादेर्द्वितीयासप्तम्योरन्तात्परतः त्राप्रत्ययनिष्पन्नम् । देवादिस्तु देवमनुष्यपुरुषपुरुमर्त्त्यबहु इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः । (यथा, ऋग्वेदे । ३ । ३३ । ८ ।

"उकथेषु कारो प्रति नो जुषस्व
मा नो नि क: पुरुषत्रा नमस्ते ॥"

"पुरुषत्रा पुरुषेषु ।" इति तद्भाष्ये सायन: ॥)

पुरुषत्वं, क्ली, पुरुषस्य भाव: । पुरुषवृत्तिरसाधारणधर्म्म: । पुरुषशब्दात् भावार्थे त्वप्रत्यय: । (यथा, महाभारते । ५ । १९८ । १३ ।
"हनिष्यसि रणे विप्रं पुरुषत्वञ्च लप्स्यसे ॥")
पुंस्त्वञ्च ॥

पुरुषदघ्न:, त्रि, पुरुषपरिमाण: । पुरुषशब्दात् परिमाणार्थे दघ्नट्प्रत्यय: । इति व्याकरणम् ॥

पुरुषदन्तिका, स्त्री, (पुरुषस्य दन्त इव आकृतिर्यस्या: । कप् । कापि अत इत्वम् ।) मेदा । इति राजनिर्घण्ट: ॥ (मेदाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

पुरुषद्वयस:, त्रि, पुरुषपरिमाण: । पुरुषशब्दात् परिमाणार्थे द्वयसट्प्रत्ययनिष्पन्न: । इति व्याकरणम् ॥

पुरुषद्वेषी, [न्] त्रि, पुरुषद्वेषशील: । पुरुषशब्दोपपदाद्द्विषधातोर्णिन्प्रत्ययनिष्पन्न: । इति व्याकरणम् ॥

पुरुषनाग:, पुं, (पुरुषो नाग इव ।) पुरुषश्रेष्ठ: । इत्यमर: । ३ । १ । ५९ ॥

पुरुषपुङ्गव:, पुं, (पुरुष: पुङ्गव इव ।) पुरुषश्रेष्ठ: । इत्यमर: । ३ । १ । ५९ ॥

पुरुषपुण्डरीक:, पुं, (पुरुषेषु पुण्डरीक: श्रेष्ठ इत्यर्थ: । यद्वा, पुरुष: पुण्डरीको व्याघ्र इवेत्युपमितसमास: ।) पुरुषव्याघ्र: । नरश्रेष्ठ: । इत्यमर: । ३ । १ । ५९ ॥ जिनराजविशेष: । इति हेमचन्द्र: । ३ । ३६० ॥

पुरुषमात्र:, त्रि, पुरुषपरिमाण: । पुरुषशब्दात् परिमाणार्थे मात्रट्प्रत्यय: । इति व्याकरणम् ॥ (यथा, तैत्तिरीयसंहितायाम् ।५ ।२ ।५ ।१ ।
"पुरुषमात्रेण वि मीमिते यज्ञेन वै पुरुष: सम्मित: ॥")

पुरुषर्षभ:, पुं, (पुरुष ऋषभ इव ।) पुरुषश्रेष्ठ: । इत्यमर: । ३ । १ । ५९ ॥

पुरुषव्याघ्र:, पुं, (पुरुषो व्याघ्र इव ।) पुरुषश्रेष्ठ: । इत्यमर: । ३ । १ । ५९ ॥ (यथा, महाभारते । ६ । १९ । ४३ ।
"एवन्ते पुरुषव्याघ्रा: पाण्डवा युद्धनन्दिन: ॥")

पुरुषशार्दूल:, पुं, (पुरुष: शार्दूल इव ।) पुरुषश्रेष्ठ: । इत्यमर: । ३ । १ । ५९ ॥ (यथा, महाभारते । ३ । ६१ । ६ ॥
"तव च भ्रातरं वीरमपश्यं सव्यसाचिनम् ।
शक्रस्यार्द्धासनगतं तत्र मे विस्मयो महान् ।
आसीत् पुरुषशार्दूल । दृष्ट्वा पार्थं तथागतम् ॥")

पुरुषसिंह:, पु, (पुरुष: सिंह इव पुरुषेषु सिंह: श्रेष्ठो वा ।) पुरुषश्रेष्ठ: । इत्यमर: । ३।१।५९॥ जिनराजविशेष: । तत्पर्य्याय: । शैवि: २ । इति हेमचन्द्र: । ३ । ३६० ॥

पुरुषाद्य:, पुं, (पुरुषाणां जिनपुरुषाणामाद्य: प्रथम: ।) आदिनाथनामा जिनविशेष: । इति धनञ्जय: ॥ (पुरुषेषु जीवेषु आद्य: प्रथम: । पुरुषाणामाद्य इति वा ।) विष्णु: ॥

पुरुषाधम:, पुं, (पुरुषेषु अधमोऽतिनिकृष्ट: ।) निकृष्टनर: । यथा, शान्तिशतके ।
"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढ़ा वराका वयम् ॥"

पुरुषार्थ:, पुं, (पुरुषस्य अर्थ: ।) पुरुषस्य प्रयोजनम् । स च चतुर्विध: । यथा, अग्निपुराणे ।
"धर्म्मार्थकाममोक्षाश्च पुरुषार्था उदाहृता: ॥"
(यथा, मनु: । ७ । १०० ।
"एतच्चतुर्व्विधं विद्यात् पुरुषार्थप्रयोजनम् ॥")
गोस्वामिमते भक्ति: पञ्चमपुरुषार्थ: ॥ (पुरुषकार: । यथा, महाभारते । ३ । १७९ । २७ ।
"दैवं पुरुषकारेण को वञ्चयितुमर्हति ।
दैवमेव परं मन्ये पुरुषार्थो निरर्थक: ॥")

पुरुषास्थिमाली, [न्] पुं, (पुरुषाणामस्थीनि तेषां मालास्त्यस्येति । पुरुषास्थिमाला + व्रीह्यादित्वात् इनि: ।) शिव: । इति हेमचन्द्र: । २ । ११९ ॥

पुरुषोत्तम:, पु, (पुरुषेषु उत्तम: ।) विष्णु: । इत्यमर: ।१।१।२१॥ (यथा, रघु: । ३ । ४९ ।
"हरिर्यथैक: पुरुषोत्तम: स्मृत:
महेश्वरस्त्र्यम्बक एव नापर: ।
तथा विदुर्म्मां मुनय: शतक्रतुं
द्वितीयगामी न हि शब्द एष न: ॥"
एतन्निरुक्तिर्यथा, महाभारते । ५ । ७० । १० ।
"पूरणात् सदनाच्चापि ततोऽसौ पुरुषोत्तम: ॥")
जिनराजविशेष: । तत्पर्य्याय: । सोमभू: २ । इति हेमचन्द्र: । ३ । ३५९ ॥ पुरुषेषु मध्ये उत्तम: । यथा, धर्म्मपुराणे ।
"विशेषसमभावस्य पुरुषस्यानघस्य च ।
अरिमित्रेऽप्युदासीने मनो यस्य समं व्रजेत् ॥
समो धर्म्म: सम: स्वर्ग: समो हि परमं तप: ।
यस्यैव मानसं नित्यं स नर: पुरुषोत्तम: ॥"
(पुरुषोत्तमो जगन्नाथोऽस्त्यत्रेति । अच् । उत्कलखण्डैकदेश: । स तु पीठस्थानानामन्यतम: । तत्र भगवती विमलारूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६४ ।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥"
ग्रन्थकर्तृविशेष: । स तु प्रयोगरत्नमालाव्याकरणस्य द्विरूपकोषत्रिकाण्डशेषहारावलीकोषाणां अन्येषाञ्च कतिपयग्रन्थानां प्रणेता ॥)

पुरुहं, त्रि, (पुरु प्रचुरं हन्ति गच्छतीति । पुरु + हन गतौ + अन्येभ्योऽपीति ड: ।) प्रचुरम् । इत्यमर: । ३ । १ । ६३ ॥

पुरुहु, त्रि, (पुरु प्रचुरं हन्ति गच्छतीति । हन गतौ + बाहुलकात् डु: ।) प्रचुरम् । इत्यमरटीकायां स्वामी ॥ (पुरुहूरित्यपि पाठ: ॥)

पुरुहूत: पुं, (पुरु प्रचुरं हूतमाह्वानं यज्ञेषु यस्य । पुरु यथा स्यात्तथा हूयते यज्वभिरिति वा । यद्वा, पुरूणि बहूनि हूतानि नामानि यस्य ।) इन्द्र: । इत्यमर: ।१।१।४४॥ (यथा, महाभारते । १ । १२३ । २५ ।
"पुरुहूतादयं जज्ञे कुन्त्यामेव धनञ्जय: ॥"
प्रचुरनामविशिष्टे, त्रि । यथा, भागवते । ८ । १ । १३ ।
"स विश्वकाय: पुरुहूत ईश:
सत्य: स्वयंज्योतिरज: पुराण: ॥"
स्त्री, भगवती । सा तु पुष्करे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३० । ५९ ।
"विश्वे विश्वेश्वरीं प्राहु: पुरुहूताञ्च पुष्करे ॥")

पुरूरवा: [स्] पुं, (पुरु प्रचुरं यथा स्यात्तथा रौतीति । "पर्व्वतश्च पुरुर्नाम यत्र यज्ञे पुरूरवा: ।"१।९०।२२। इति महाभारतोक्तवचनात् पुरौ पर्व्वते रौतीति वा । पुरु + रु + "पुरूरवा: ।" उणा० ४ । २३१ । इति असिप्रत्ययेन निपातनात् साधु: ।) बुधस्य पुत्र: । स तु चन्द्रवंशीयादिराज: । तत्पर्य्याय: । बौध: २ ऐल: ३ उर्व्वशीरमण: ४ । इति हेमचन्द्र: । यथा, अग्निपुराणे ।
"ततो बुधाश्रमं प्रायादिडा रूपाश्रिता सती
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ॥
सोमपुत्राद्बुधाद्राजन् । तस्यां जज्ञे पुरूरवा:
जनयित्वा तत: सा तं पुन: सुद्युम्नतां गता ॥"
अपि च ।
"इलोदरे च धर्म्मिष्ठं बुध: पुत्रमजीजनत् ।
अश्वमेधशतं साग्रमकरोद्य: स्वतेजसा ॥
पुरूरवा इति ख्यात: सर्व्वलोकनमस्कृत: ।
हिमवच्छिखरे रम्ये आराध्य स जनार्द्दनम् ।
लोकैश्वर्य्यमगाद्राजा सप्तद्वीपपतिस्तदा ॥
केशिप्रभृतयो दैत्यास्तस्य भृत्यत्वमागता: ।
उर्व्वशी यस्य पत्नीत्वमगात् सद्रूपमोहिता ॥
सप्तद्वीपा वसुमती सशैलवनकानना ।
धर्म्मेण पालिता तेन सर्व्वलोकहितैषिणा ॥
चामरग्राहिणी कीर्त्ति: सच्चैवाङ्गवाहिका ।
विष्णुप्रसादाद्देवेन्द्रो ददावर्द्धासनन्तदा ॥
धर्म्मार्थकामान्धर्म्मेण सममेवाभ्यपालयत् ।
धर्म्मार्थकामास्तं द्रष्टुमाजग्मु: कौतुकात् पुरा ॥
इति मात्स्ये २४ अध्याय: ॥
(अस्य विशेषविवरणन्तु हरिवंशे २६ अध्याये द्रष्टव्यम् ॥ * ॥) विश्वदेव: । इति जटाधर: पार्व्वणश्राद्धदेव: । यथा,—
"पुरूरवा माद्रवाश्च पार्व्वणे समुदाहृतौ ॥"
इति श्राद्धतत्त्वे बृहस्पति: ॥

पुरोग: त्रि, (पुरोऽग्रे गच्छतीति । पुरस् + गम + ड: ।) अग्रगामी । इत्यमर: । २ । ८ । ७२ (यथा, रघु: । ६ । ५५ ।
"ज्याघातरेखे सुभुजो भुजाभ्यां
बिभर्त्ति यश्चापभृतां पुरोग: ॥")
प्रधान: । इति हेमचन्द्र: । ६ । ७४ ॥

पुरोगतिः, पुं, (पुरोऽग्रे गतिर्गमनमस्य।) कुक्कुरः। इति धरणिः॥ अग्रगे, त्रि॥

पुरोगमः, त्रि, (पुरोऽग्रे गच्छतीति। गम+अच्।) अग्रगामी। इत्यमरः। ३। ८। ७२॥ (यथा, महाभारते। ६। १६। १०।
"यं दृष्ट्वा पार्थिवाः सर्व्वे दुर्य्योधनपुरोगमाः।
निवर्त्तिष्यन्ति संत्रस्ताः सिंहं क्षुद्रमृगा यथा॥"
कुक्कुरे, पुं। इति हेमचन्द्रटीका॥)

पुरोगामी, [न्] त्रि, (पुरोऽग्रे गच्छतीति। गम+णिनिः।) अग्रगामी। तत्पर्य्यायः। पुरोगः २ अग्रेसरः ३ प्रष्ठः ४ अग्रतःसरः ५ पुरःसरः ६ पुरोगमः ७। इत्यमरः। ३।८।७२॥ मार्सोरः ८ प्रग्रसरः ९। इति शब्दरत्नावली॥

पुरोटिः, पुं, (पुरोऽटतीति। अट+इन्।) पत्रझङ्कारः। इति त्रिकाण्डशेषः॥ रायभाटि इति भाषा॥ (पुरसंस्कारः। इति हारावली।१६४॥)

पुरोडाः, [श्] पु, (पुर आदौ दाश्यते दीयते इति। पुरस्+दाश्ृ दाने+क्विप्। निपातनात् दस्य डः।) हविः। इति मुग्धबोधव्याकरणम्॥

पुरोडाशः, पु, (पुरोऽग्रे दाश्यते दीयते इति। दाश+कर्म्मणि घञ्। निपातनात् दस्य डः।) हविर्भेदः। स तु यवचूर्णनिर्म्मितरोटिकाविशेषः। (यथा, मनुः। ६। ११।
"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत् पृथक्॥")
पिष्टकपमसौ। हुतशेषः। इति मेदिनी। शे,३८॥ सोमरसः। इति हेमचन्द्रः॥

पुरोडाश्यं, त्रि, (पुरोडाशाय हितमिति। पुरोडाश+यत्।) पुरोडाशीयम्। हविर्योग्यम्। पुरोडाशाय हितम्। यथा, भट्टिः। ५। १२।
"आमिक्षीयं दधि क्षीरं पुरोडाश्यं तथौषधम्।
हविर्हैयङ्गवीनञ्च नाप्युपघ्नन्ति राक्षसाः॥"

पुरोद्भवा, स्त्री, (पुरं उद्भवो यस्याः।) महामेदा। इति रत्नमाला॥

पुरोधाः, [स्] पु, (पुरोऽग्रे दधाति मङ्गलमिति। पुरस्+धा+"पुरसि च।" उणा० ४। २३०। इति असिः। स च डित्।) पुरोहितः। इत्यमरः। २।८।५॥ (यथा, रघुः। १। १८।
"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते॥")

पुरोभागी, [न्] त्रि, (पुरः पूर्व्वमेव भजते इति। पुरस्+भज+णिनिः।) दोषमात्रदर्शी। इत्यमरः। ३। १। ४६॥ (यथा, राजतरङ्गिण्याम्। ६। ८३।
"कुपितोऽपि स यत्नेनां व्यवधीद्रागमोहितः।
तेनैवागात् पुरोभागिवितर्कातङ्कपात्रताम्॥")
अग्रांशी च॥

पुरोहितः, पुं, पुरो दृष्टादृष्टफलेषु कर्म्मसु धीयते आरोप्यते यः। (यद्वा, पुर आदावेव हितं मङ्गलं यस्मात्।) शान्त्यादिकर्त्ता। तत्पर्य्यायः। पुरोधाः २। इत्यमरः। २। ८। ५॥ धर्म्मकर्म्मादिकारकः ३। इति शब्दरत्नावली॥ तस्य लक्षणं यथा, चाणक्ये।
"वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः।
आशीर्व्वादवचोयुक्त एष राजपुरोहितः॥"
तस्य वर्ज्जनीयलक्षणं यथा,—
"काणं खञ्जमपुत्त्रं वार्नभिज्ञमजितेन्द्रियम्।
न ह्रस्वं व्याधितं वापि नृपः कुर्य्यात् पुरोहितम्॥"
इति कालिकापुराणम्॥ * ॥
पुरोहिते वर्णनीयानि यथा,—
"पुरोहितो हितो वेदस्मृतिज्ञः सत्यवाक् शुचिः।
ब्रह्मण्यो विमलाचारः प्रतिकर्त्तापदाम्ऋजुः॥"
इति कविकल्पलता॥
(यथा च।
"दोषागन्तुजन्तुभ्यो रसमन्त्रविशारदौ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ॥
ब्रह्मा वेदाङ्गमष्टाङ्गमायुर्व्वेदमभाषत।
पुरोहितमते तस्माद्वर्त्तेत भिषगात्मवान्॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्याये॥)

पुर्व्व, पूर्त्तौ। पूर्णीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। पूः पुरौ पुरः। पुर्व्वति पयसा कुम्भं चेटी। इति दुर्गादासः॥

पुल, क उच्छ्रितौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) उच्छ्रितिरुच्चीभावः। क, पोलयति पर्व्वतः। इति दुर्गादासः॥

पुल, ज महत्त्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ज, पोलः पुलः। पोलति। इति दुर्गादासः॥

पुल, श महत्त्वे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) श, पुलति पुलिनं शरदि महत् स्यादित्यर्थः। पोलिता। इति दुर्गादासः॥

पुलः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+कः।) पुलकः। विपुले, त्रि। इति मेदिनी। ले, २३॥

पुलकं, क्ली, (पुलतीति। पुल+कः। ततः संज्ञायां कन्।) कङ्कुष्ठम्। तच्च पर्व्वतीयमृत्तिकाविशेषः। इति राजनिर्घण्टः॥

पुलकः, पु, (पुल+स्वार्थे कन्।) रोमाञ्चः। तत्पर्य्यायः। रोमोद्भेदः २ त्वक्पुष्पम् ३ त्वगङ्कुरः ४। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ३७६।
"प्रेमलघूकृतकेशववक्षोभरविपुलपुलककुचकलसा।
गोवर्द्धनगिरिगुरुतां मुग्धवधूर्निभृतमुपहसति॥")
शरीरान्तर्व्वहिर्भवकीटः। इति हेमचन्द्रः॥ (तुच्छधान्यम्। यथा, पञ्चतन्त्रे। ३। ६६।
"पुलका इव धान्येषु पूतिका इव पक्षिषु।
मशका इव मर्त्त्येषु येषां धर्म्मो न कारणम्॥")
प्रस्तरविशेषः। तस्य परीक्षा यथा,—
"पुण्येषु पर्व्वतवरेषु च निम्नगासु
स्थानान्तरेषु च तथोत्तरदेशगत्वात्।
संस्थापिताश्च नखरा भुजगैः प्रकाशं
संपूज्य दानवपतिं प्रथिते प्रदेशे॥
दाशार्णवागदवमेकलकालगाद्यौ
गुञ्जाञ्जनक्षौद्रमृणालवर्णाः।
गन्धर्व्ववह्निकदलीसदृशावभासा
एते प्रशस्ताः पुलकाः प्रसूताः॥
शङ्खाब्जभृङ्गार्कविचित्रभङ्गा
सूत्रैरुपेताः परमाः पवित्राः।
मङ्गल्ययुक्ता बहुभक्तिचित्रा
वृद्धिप्रदास्ते पुलका भवन्ति॥
काकश्वरासभसृगालवृकोग्ररूपै-
र्गृध्रैः समांसरुधिरार्द्रमुखैरुपेताः॥
मृत्युप्रदास्तु विदुषा परिवर्ज्जनीया
मूल्यं पलस्य कथितञ्च शतानि पञ्च॥"
इति गारुडे ७१ अध्यायः॥
मणिदोषविशेषः। हरितालम्। गजान्नपिण्डम्। गन्धर्व्वविशेषः। इति मेदिनी। के, १२१॥ असुराजी। गल्वर्कः। इति हेमचन्द्रः॥

पुलकी, [न्] पु, (पुलकोऽस्त्यस्येति। पुलक+इनिः।) धाराकदम्बः। इति राजनिर्घण्टः॥

पुलस्तिः, पु, (पुल महत्त्वे+क्विप्। पुलं महत्त्वं असते गच्छतीति। अस्+ति। इत्युज्ज्वलदत्तः। ४। १७६।) पुलस्त्यमुनिः। इत्युणादिकोषः॥

पुलस्त्यः, पु, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स ब्रह्मणः कर्णाभ्यां जातः। तस्य भार्य्या हविर्भूः कर्द्दमकन्या। तस्य पुत्त्रः अगस्त्यः विश्रवाश्च। इति श्रीभागवतम्॥ यथा, हरिवंशे। ७। ८।
"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः॥"

पुलहः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स च ब्रह्मणो नाभितो जातः। तस्य भार्य्या कर्द्दममुनिकन्या गतिः। तस्य पुत्त्राः कर्म्मश्रेष्ठः वरीयान् सहिष्णुश्च। इति श्रीभागवतम्॥

पुलाकः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+"बलाकादयश्च।" इति आकप्रत्ययेन निपातनात् साधुः।) तुच्छधान्यम्। आगडा इति ख्यातम्॥ (यथा, मनुः। १०। १२५।
"पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः॥")
संक्षेपः। अक्तत्वम्। भक्तसिक्थकम्। भक्तगुलिका। इत्यमरभरतौ॥ क्षिप्रम्। यथा पुलाककारी। इति स्वामी॥

पुलाकी, [न्] पुं, (पुलाकः क्षिप्रता इष्टौ विषये अस्त्यस्येति। पुलाक+इनिः।) वृक्षः। इति हेमचन्द्रः। ४। १८०॥

पुलायितं, क्ली, (पुल+क्यच्+क्तः।) अश्वगतिः। तत्पर्य्यायः। विक्रान्तिः २। इति त्रिकाण्डशेषः॥

पुलिनं, क्ली, (पोलतीति। पुल महत्त्वे+"तलिपुलिभ्याञ्च।" उणा० २। ५३। इति इनन्। स च कित्।) तोयोत्थिततटम्। इत्यमरः। १। १०। ९॥ चर इति चड़ा इति च भाषा॥

(यथा, रामायणे । २ । ९५ । ६ ।
"क्वचित्मणिनिकाशोदां क्वचित् पुलिनशालिनीम् ।
क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥")
जलादचिरोत्थितं तटम् । इति भरतः ॥ तत्-
च्युततोययुक्तद्वीपम् । इति सुभूतिः ॥ क्रमेणो-
त्थितं तटम् । इति स्वामी ॥ जलमध्यस्थसुत्थितं
तटम् । इति पञ्जिका ॥ द्वीपम् । इति त्रिकाण्ड-
शेषः ॥ (यक्षविशेषे, पुं । यथा, महाभारते ।
१ । ३२ । १६ ।
"उलकश्च सनाभ्याश्च निमिषेण च पत्रिराट् ।
प्ररुजेन च संग्रामं चकार पुलिनेन च ॥")
पुलिन्दः, पुं (पुल महत्त्वे + "कुलिपुल्योः किन्दच् ।"
उणा० ४ । ८५ । इति किन्दच् ।) चण्डाल-
भेदः । स च म्लेच्छशब्दवाच्यः । इत्यमरभरतौ ॥
तस्योत्पत्तिर्यथा,—
पुलस्त्य उवाच ।
"एवं गतेषु त्रैलोक्यं दानवेषु पुरन्दरः ।
जगाम ब्रह्मसदनं सह देवैः शचीपतिः ॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम् ।
ऋषिभिः सार्द्धमासीनं पितरं स्वञ्च कश्यपम् ॥
ततो ननाम शिरसा शक्रः सुरगणैः सह ।
ब्रह्माणं कश्यपञ्चैव तांश्च सर्व्वांस्तपोधनान् ॥
प्रोवाचेन्द्रः सुरैः सार्द्धं देवनाथं पितामहम् ।
पितामह । हृतं राज्यं बलिना बलिना मम ॥
ब्रह्मा प्रोवाच शक्रैतत् भुज्यते स्वकृतं फलम् ।
शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम् ॥
कश्यपोऽप्याह देवेश । भ्रूणहत्या कृता त्वया ।
दितेरुदरात्त्वया गर्भः कृत्तो वै बहुधा बलात् ॥
पितरं प्राह देवेन्द्रो मातुर्दूषणतो विभो ।।
कर्त्तनं प्राप्तवान् गर्भो यद्दशौचा हि साभवत् ॥
ततोऽब्रवीत् कश्यपस्तु मातुर्दोषेि सदासताम् ।
गतस्ततो विनिहतो दोषोऽपि कुलिशेन भोः ॥
तच्छ्रुत्वा कश्यपवचः प्राह शक्रः पितामहम् ।
विनाशं पाप्मनो ब्रूहि प्रायश्चित्तं विभो । मम ॥
ब्रह्मा प्रोवाच देवेशं वशिष्ठः कश्यपस्तथा ।
हितं सर्व्वस्य जगतः शक्रस्यापि विशेषतः ॥
शङ्खचक्रगदापाणिर्माधवः पुरुषोत्तमः ॥
तं प्रपद्यस्व शरणं स ते श्रेयो विधास्यति ॥
सहस्राक्षोऽपि वचनं गुरूणां स निशम्य वै ।
प्रोवाच स्वल्पकालेन कस्मिन् प्राप्यो वरप्रदः ॥
ता ऊचुर्देवता मर्त्त्यैः स्वल्पकाले वरप्रदः ॥
इत्येवमुक्तः सुरराड्विरिञ्चिना
मरीचिपुत्त्रेण च कश्यपेन ।
तथैव मित्रावरुणात्मजेन
वेगान्महीपृष्ठमवाप्य तस्थौ ॥
कालञ्जरस्योत्तरतः सुपुण्य-
स्तथा हिमाद्रेरपि दक्षिणस्याम् ।
कुशस्थलात् पूर्व्वत एव विश्रुतो
वसोः पुरात् पश्चिमतोऽवतस्थे ॥
यत्राथ चक्रे भगवान् सुरारि-
र्वासंश्रमस्तत्तनुसम्मर्द्दितः ।
ख्यातिं जगामाथ गदाधरेति
महासुरेन्द्रस्य शितः कुठारः ॥
यस्मिन् द्विजेन्द्राः श्रुतिशास्त्रसंयुताः
समागता यान्ति पितामहेन ।
महत्पितॄन् यत्र च संप्रपूज्य
भक्त्या त्वनन्यो नहि चेतसैव ।
फलम्महामेधमखस्य मानवा
लभन्त्यनन्तं भगवत्प्रसादात् ॥
महानदी यत्र सरर्षिकन्या
बालापदेशाद्धिमशैलमेत्य ।
चक्रे जगत् पापविनष्टमग्र्य
सन्दर्शनप्राशनमज्जनेन ॥
तत्र शक्रः समभ्येत्य महानद्यास्तटेऽद्भुते ।
आराधनाय देवस्य कृत्वाश्रममवस्थितः ॥
प्रातःस्नायी त्वधःशायी एकभक्तस्त्वयाचितः ।
तपस्तेपे सहस्राक्षः स्तुवन् देव गदाधरम् ॥
तस्यैव तप्यतः सम्यक् जितसर्व्वेन्द्रियस्य च ।
कामक्रोधविहीनस्य साग्रः संवत्सरो गतः ॥
ततो गदाधरः प्रीतो वासवं प्राह नारद ।।
गच्छ प्रीतोऽस्मि भवतो मुक्तपापोऽसि साम्प्र-
तम् ॥
निजं राज्यञ्च देवेश । प्राप्स्यसि त्वचिराद्दिवः ।
यतिष्यामि यथा शक्र । भाविश्रेयो यथा तव ॥
इत्येवमुक्तोऽथ गदाधरेण
विसर्जितः स्नाप्य मनोहरायाम् ।
स्नातस्य देवस्य ततः पुरस्तात्
संप्रोपुरुस्तानगुशासयस्य ॥
प्रोवाच तान् भीषणकर्म्मकारान्
नाम्ना पुलिन्दा मम पापसम्भवाः ।
वसध्वमेवान्तरमद्रिमुख्ययो-
र्हिमाद्रिकालाञ्जरयोः पुलिन्दाः ॥
इत्येवमुक्त्वा सुरराट् पुलिन्दान्
विमुक्तपापः सुरसिद्धयक्षैः ।
संपूज्यमानोऽनुजगाम चाश्रमं
मातुस्तदा धर्म्मनिवासमाद्यम् ॥"
इति वामने ७३ अध्यायः ॥
पुलोमजा, स्त्री, (पुलोम्नो दैत्यात् जायते इति ।
जन + डः ।) शची । इत्यमरः । १ । १ । ४८ ॥
(यथा, काशीखण्डे १० अध्याये ।
"निष्प्रत्यूहं क्रतुशतं यः कश्चित् कुरुतेऽवनौ ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम् ॥")
पुलोमजित्, पुं, (पुलोमानं जयतीति । जि +
क्विप् तुगागमश्च ।) इन्द्रः । इति केचित् ॥
पुलोमद्विट्, [ष्] पुं, (पुलोम्नो दैत्यविशेषस्य
द्विट् शत्रुः ।) इन्द्रः । इति हेमचन्द्रः ।२।८८ ॥
पुलोमभित्, [द्] पुं, (पुलोमानं भिनत्तीति ।
भिद् + क्विप् ।) इन्द्रः । इति भूरिप्रयोगः ॥
पुलोमा, [न्] पुं, असुरविशेषः । स इन्द्रस्य
श्वशुरः । इति पुलोमजाशब्दटीकायां भरतः ॥
(अयं खल्विन्द्रेण निपातितः । यथा, हरि-
वंशे । २० । १३४ ।
"हत्वा चमनकं चापि विप्रचित्तिसुतं नहि ।
पुलोमानं जघानाजौ जामाता सन् शत-
क्रतुः ॥")
पुलोमारिः, पुं, (पुलोम्नोऽरिः शत्रुः ।) इन्द्रः ।
इति त्रिकाण्डशेषः ॥
पुष, पुष्टौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट् ।) पोषति तातः पुत्त्रम् । इति
दुर्गादासः ॥
पुष, ऌ य औ पुष्टौ । पोषणे । इति कविकल्प-
द्रुमः ॥ (दिवा०-पर०-सक०-अनिट् ।) ऌ,
अपुषत् । य, पुष्यति । औ, पोष्टा । इति
दुर्गादासः ॥
पुष, क धृतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-
सक०-सेट् ।) क, पोषयति । इति दुर्गादासः ॥
पुष, श पुष्टौ । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-
सक०-सेट् ।) श, पुष्णाति पुपोष । इति
दुर्गादासः ॥
पुषा, स्त्री, (पुष्णातीति । पुष पुष्टौ + कः । तत-
ष्टाप् ।) लाङ्गलिकीवृक्षः । इति शब्दचन्द्रिका ॥
पुषितं, त्रि, (पुष्यते स्मेति । पुष + क्तः । श्वादि-
गणीयत्वात् इट् ।) पुष्टम् । हतपोषणपचि-
ष्नगादि । इत्यमरः । ३ । १ । ९७ ॥
पुष्करं, क्ली, (पुष्णातीति । पुष पुष्टौ + "पुषः
कित् ।" उणा० ४ । ४ । इति करन् । स च
कित् ।) हस्तिशुण्डाग्रम् । (यथा, माघे ।५।३०।
"आलोलपुष्करमुखोल्लसितैरभीक्ष्ण-
मुक्षाम्बभूवुरभितो वपुरम्बुवर्षैः ॥")
वाद्यभाण्डमुखम् । (यथा, रघुः । १७ । ११ ।
"नदद्भिः स्निग्धगम्भीरं तूर्य्यैराहतपुष्करैः ॥"* ॥
"पुष पुष्टौ । पुषः कित् । इति करन्प्रत्ययः ।
पुषिरत्रान्तर्णीतण्यर्थः । पोषयति भूतान्यवकाश-
प्रदानेन उदकदानाद्युपकारेण च । पुष्कं वारि
रातीति पुष्करं इति क्षीरस्वामी । पुषेरन्त-
र्णयर्थात् स्फन्दभ्रमुषियुधिभ्यः कित् । इति
विहितः करन्प्रत्ययो बाहुलकात् भवति ।
उन्दसदग्रुनीचीपुषिमुषिमृडभूस्य: कित् । इति
कर इति श्रीभोजदेवः । पोषयति भूतानीति ।
पुष्कोपपदात्रातेः आतोऽनुपसर्गे कः । यद्वा,
वपुरित्युदकनाम तत् कर्त्तुं शीलमस्येति । कृञो
हेतुताच्छील्यानुलोम्येषु । इति टः । वपुष्करं
सत् वकारलोपेन पुष्करम् । पृषोदरादिः ।" इति
निघण्टौ देवराजयज्वा ॥) जलम् । (यथा, शत
पथब्राह्मणे । ६ । ४ । २ । २ ।
"आपो वै पुष्करं प्राणोऽथर्वा प्राणो वा ॥")
व्योम । (यथा, हारीते प्रथमस्थाने चतुर्थेऽध्याये
"मेघाः सूर्य्यशशाङ्कसमानरुचयो ह्यल्पसवाल्प
स्वना
हंसालीकमलालिमण्डितजलः पद्माकरः
शोभनः ।
तीव्रस्निग्धमयूखचन्द्रविमला स्याज्जन्हुनी
कौमुदी
चित्रा धर्म्मविपक्वतोयसुरसा स्यान्निर्म्मलं
पुष्करम् ॥")

खड्गफलम् । पद्मम् । (यथा, रामायणे । २ । ६५ । १४ ।
"सखीवच्च विगाहस्व सीते ! मन्दाकिनीं नदीम् ।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि ॥")
तीर्थभेदः । (यथा, महाभारते । १ । ३६ । ३ ।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥"
अस्य अन्यद्विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम् ॥) कुष्ठौषधम् । इत्यमरः । २ । ४ । १८५ ॥
(यथास्य पर्य्यायः ।
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
खड्गकोषः । इत्यमरटीकायां मथुरेशः ॥
काण्डम् । द्वीपभेदः । इति मेदिनी । रे, १८७ ॥
(अस्य विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम् ॥)
युद्धम् । इति नानार्थरत्नमाला ॥ * ॥

पुष्करः, पुं, (पुष + "पुषः कित् ।" उणा० ४ । ४ । इति करन् । स च कित् ।) रोगविशेषः । नागविशेषः । सारसपक्षी । नृपभेदः । स तु नलराजभ्राता । (यथा, महाभारते ।३।५६।४।
" स समाविश्य च नलं समीपं पुष्करस्य च ।
गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै ॥"
अयं हि कलिसाहाय्येन अक्षद्यूते नलं विजित्य निषधाधिपोऽभवत् । एतद्वृत्तान्तं महाभारते वनपर्व्वणि ५६ अध्याये द्रष्टव्यम् ॥)
वरुणपुत्त्रः । इति मेदिनी । रे, १८७ ॥ (वाद्यविशेषः । यथा, मार्कण्डेये । १०६ । ६९ ।
"प्रावाद्यन्त ततस्तत्र वेणुवीणादिदर्दुराः ।
पणवाः पुष्कराश्चैव मृदङ्गाः पटहानकाः ॥")
पर्व्वतविशेषः । इति शब्दरत्नावली ॥ * ॥
सप्तद्वीपानां मध्ये द्वीपविशेषः । पुष्करद्वीपवर्णनं यथा,—

सूत उवाच ।
"शाकद्वीपस्य विस्ताराद्द्विगुणेन समन्ततः ।
क्षीरार्णवं समाश्रित्य द्वीपः पुष्करसंज्ञितः ॥
एक एवात्र विप्रेन्द्राः पर्व्वतो मानसोत्तरः ।
योजनानां सहस्राणि चोर्द्ध्वं पञ्चाशदुच्छ्रितः ॥
तावदेव च विस्तीर्णः सर्व्वत्र परिमण्डलः ।
स एव द्वीपो पश्चार्द्धमानसोत्तरसंज्ञितः ॥
एक एव महासानुः सन्निवेशाद्द्विधाकृतः ।
तस्मिन्द्वीपे स्मृतौ तु द्वौ पुण्यौ जनपदौ शुभौ ॥
अपरौ मानसस्याथ पर्व्वतस्यानुमण्डलौ ।
महावीतं स्मृतं वर्षं धातकीखण्डमेव च ॥
स्वादूदकेनोदधिना पुष्करः परिभावितः ।
तस्मिन्द्वीपे महावृक्षो न्यग्रोधोऽमरपूजितः ॥
तस्मिन्निवसति ब्रह्मा विश्वात्मा विश्वभावनः ।
तत्रैव मुनिशार्दूलाः शिवनारायणालयम् ॥
वसत्यत्र महादेवो हरार्द्धो हरिरव्ययः ।
संपूज्यमानो ब्रह्माद्यैः कुमाराद्यैश्च योगिभिः ॥
गन्धर्व्वैः किन्नरैर्यक्षैरीश्वरः कृष्णपिङ्गलैः ।
स्वस्थास्तत्र प्रजाः सर्व्वा ब्राह्मणाः सहस्रशः ॥
निरामया विशोकाश्च रागद्वेषविवर्ज्जिताः ।
सत्यानृते न तत्रास्तां नोत्तमाधममध्यमाः ॥
न वर्णाश्रमधर्म्माश्च न नद्यो न च पर्व्वताः ।
परेण पुष्करस्याथ समावृत्य स्थितो महान् ॥
स्वादूदकः समुद्रस्तु समन्ताद्द्विजसत्तमाः ।
परश्च तस्य महती दृश्यते लोकसंस्थितिः ॥"
इति कौर्म्मे ४७ अध्यायः ॥ * ॥

पुष्करद्वीपस्थराजा । तस्य रथः । यथा,—
"लोकेश्वरः सोऽपि नृभिर्मुनीन्द्रै-
र्द्देवैः सहेन्द्रैरथ ब्रह्मचारी ।
द्वीपे शुभे पुण्यजनैरुपेते
उवास राजा स तु पुष्करस्थः ॥
तेनैव नाम्ना स तु पुष्करोऽपि
सदोच्यते देवगणैः ससिद्धैः ।
तेनैव यानेन तथानुजेन
बभूव नाम्ना समथाकर्यन्ति ॥"
इत्यग्निपुराणम् ॥ * ॥

ब्रह्मकृततीर्थविशेषः । तस्य नामान्तरम् । रूपतीर्थम् २ सखदर्शनम् ३ । तत्र ज्येष्ठपुष्करमध्यमपुष्करकनिष्ठपुष्करनामकास्त्रयो ह्रदाः । तस्य परिमाणं शतयोजनमण्डलम् । इति पद्मपुराणम् ॥ * ॥ योगविशेषे गङ्गादीनां पुष्करत्वं यथा,—
"मकरस्थो यदा भानुस्तदा देवगुरुर्यदि ।
पूर्णिमायां भानुवारे गङ्गा पुष्कर ईरितः ॥
गङ्गोत्तर्य्यां प्रयागे च कोटिसूर्य्यग्रहैः समः ।
सिंहसंस्थे दिनकरे तथा जीवेन संयुते ॥
पूर्णिमायां गुरोर्व्वारे गोदावर्य्यास्तु पुष्करः ।
तत्र स्नानञ्च दानञ्च सर्व्वं कोटिगुणं भवेत् ॥
मेषसंस्थे दिवानाथे देवानाञ्च पुरोहिते ।
सोमवारे सिताष्टम्यां कावेरी पुष्करो मतः ॥
कर्कटस्थे दिवानाथे तथा जीवेन्दुवासरे ।
अमायां पूर्णिमायां वा कृष्णा पुष्कर उच्यते ॥"
इति स्कन्दपुराणे पुष्करखण्डे श्रीशैलमाहात्म्यम् ॥
मेघनायकविशेषः । तत्परिज्ञानं यथा,—
"त्रियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात् ।
आवर्त्तं विद्धि सम्वर्त्तं पुष्करं द्रोणमम्बुदम् ॥"
इति ज्योतिस्तत्त्वम् ॥

तस्य फलम् । यथा,—
"पुष्करे दुष्करं वारि शस्यहीना वसुन्धरा ।
विग्रहोपहता लोकाः पुष्करे जलदाधिपे ॥"
इति ज्योतिषम् ॥ * ॥

क्रूरवार-भद्रातिथि-भमपादनक्षत्र-घटिताशुभजनकयोगविशेषः । यथा,—
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी ।
पूर्व्वभाद्रं विशाखा च रविभौमशनैश्चराः ॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च ।
एतेषामेकदा योगे भवतीति त्रिपुष्करः ॥ * ॥
जाते तु जारजो योगो मृते भवति पुष्करः ।
त्रिगुणं फलदो हृष्टौ नष्टे हृते मृते तथा ॥
प्रथमे मासि वर्षे वा कुटुम्बमपि पीड़येत् ।
देवोऽपि यदि वा रक्षेत् तस्य पुत्त्रो न जीवति ॥
अनन्तदोषशान्त्यर्थं होमयेदयुतं बुधः ।
अशक्तश्च सुवर्णादिदानं कुर्य्याद्यथाविधि ॥"
समर्थश्चेत् वराहसंहितोक्तं अयुतहोमादिकं कुर्य्यात् । वाक्यं यथा,—
श्रीविष्णुरोम् तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणस्त्रिपुष्करयोगकालीनमरणजन्यदोषशमनकामः इदं काञ्चनं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे । ततो दक्षिणां दद्यात् । अन्यच्च पूजाहोमकर्म्मणी करिष्ये । इति विशेषः ॥ एतत् सर्व्वमशौचेऽपि कर्त्तव्यम् । यथा दक्षः ।
सुस्थकाले त्विदं सर्व्वं सूतकं परिकीर्त्तितम् ।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम् ॥"
इति शुद्धिकारिका ॥ * ॥

अपि च ।
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी ।
पूर्व्वभाद्रं विशाखा च षडेते वै त्रिपुष्कराः ॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च ।
शनिर्भौमो रविश्चैव वाराश्चैते त्रिपुष्कराः ॥
एते त्रिपुष्करा ज्ञेयास्तथा द्वादशमासिके ।
द्विमासे च तथा प्राप्ते षण्मासे च चतुर्थके ॥
षोडशे मासि संपूर्णे कुटुम्बं पीड़येद्ध्रुवम् ।
अर्व्वाङ्ग्युपान्ते मध्ये च पुष्करो हन्ति नान्यथा ॥
तद्दोषप्रशमार्थन्तु होमयेदयुतं बुधः ।
तिलव्रीहियवांश्चैव हुत्वाग्नौ समन्ततः ॥
क्षीरेणैव तथाचार्य्यो जुहुयाद्भक्तिभावतः ।
चरुञ्च श्रपयेत्तत्र प्राज्ञः कुर्य्याद्वलिन्तथा ॥
वैकङ्कोडुम्बराश्वत्थैः प्रत्येकाष्टोत्तरं शतम् ।
एकैकं त्रिसंयुक्तं दर्भेण परिवेष्टितम् ॥
यमाय वकक्लतेन धर्म्मायोडुम्बरेण च ।
अश्वत्थैश्चित्रगुप्ताय जुहुयात् क्रमशस्तथा ॥
तद्वद् घृततिलांश्चैव तथा समिधमेव च ।
एकीकृत्य समं सर्व्वं चरुमाश्रित्य होमयेत् ॥
यवव्रीहितिलैर्युक्तं तण्डुलं अपयेच्चरुम् ।
दधिमध्वाज्यसंयुक्तं होमः सहस्रसंख्यया ॥
वैकङ्कोडुम्बराश्वत्थैर्होमसंविधिपूर्व्वकम् ।
यमं धर्म्मं चित्रगुप्तं पुष्करं पुरुषं तथा ॥
तिथिं वारं तथा ऋक्षं पूजयित्वा तु होमयेत् ।
पञ्चवर्णेन चूर्णेन कुर्य्याद्धि पद्ममण्डलम् ॥
यमं धर्म्मं चित्रगुप्तं स्थापयेत् क्रमशस्ततः ।
तिलप्रपूरिते पात्रे लौहे च कृष्णवाससा ॥
वेष्टयित्वा यमं तत्र स्थापयेल्लोहनिर्म्मितम् ।
घृतप्रपूरिते पात्रे कांस्यपात्रे निरञ्जनम् ॥
रौप्याकृतिं शुक्लवस्त्रवेष्टितं तत्र पूजयेत् ।
गुड़प्रपूरिते पात्रे ताम्रपात्रे च मन्त्रिणम् ॥
स्वर्णाकृतिं रक्तवस्त्रवेष्टितं तत्र पूजयेत् ।
क्षीरप्रपूरिते पात्रे प्रस्तरपात्रे च पुष्करम् ॥
कृष्णाकृतिं कृष्णवस्त्रवेष्टितं तत्र पूजयेत् ।
सुवर्णतुल्यमर्द्धं वा अथवा शक्तिभावतः ॥
प्रतिमाश्च समाः सर्व्वाः क्रमात्तत्र नियोजिताः
व्रीहौ यवे तथा धान्ये क्रमात् पात्रत्रयन्ततः ॥

गगने च क्रमात् पीठे स्थापयेद्विधिपूर्व्वकम् ।
मण्डलस्य चतुर्दिक्षु चतुःकुम्भांश्च स्थापयेत् ॥
दधिगुडक्षीरपूर्णान् प्रकल्प्य संयुतेऽन्ततः ।
अथवा तज्जलदेशे सचूतपल्लवांस्तथा ॥
पीतवस्त्रेण संयुक्तं कुर्य्याद्घटचतुष्टयम् ।
चन्द्रातपं तदुपरि विचित्रं परिकल्पितम् ॥
कुम्भानाञ्च चतुःपार्श्वे यवतिलैर्युक्ततण्डुलान् ।
स्थापयेयुः क्रमात्तत्र पूजाकाले द्विजोत्तमाः ॥
मण्डलस्य तथा पूर्व्वे वारुणं घटमर्पयेत् ।
नानादेवान् गणेशादीन् ग्रहादींश्च समर्चयेत् ॥
हुत्वा यथाक्रमं तत्र बलिं दद्याद्विचक्षणः ।
पयोघृतेन क्षीरेण स्नापयित्वा यथाक्रमम् ॥
स्वेन स्वेनैव मन्त्रेण पूजयित्वा च होमयेत् ॥
एवं विधिप्रकारेण यः प्रेतं न तु होमयेत् ।
पुष्करारिष्टदोषस्तु चतुर्थ्यांतस्य सम्भवेत् ॥
संवत्सरे तथा पूर्णे षोडशे मासि वै तथा ।
षण्मासाभ्यन्तरे तस्य सुतहानिं विनिर्द्दिशेत् ॥
अथवा स्वामिनं हन्ति द्वितीयं भ्रातरन्तथा ।
तृतीयं सर्व्वहानिः स्यात् सुतवित्तविनाशनम् ॥
प्रेतारिष्टविनाशाय यमादीन् यो न होमयेत् ।
मर्त्यानि तस्य नश्यन्ति गोमहिषादीनि सर्व्वतः ॥
एवंविधिकृतं होमं यः कर्त्तुमक्षमो भवेत् ।
होमं कृत्वा यथाशक्त्या धेनुमेकां प्रदापयेत् ॥
अस्मिन् कृते न सन्देहः प्रेतारिष्टं न पीडयेत् ।
न विघ्नो यजमानस्य न चारिष्टं प्रजायते ॥
एतद्धोमं विनिर्द्दिष्टं यततो न करोति यः ।
न रक्षति यमस्तस्य एभिर्मासैश्च वंशजम् ॥
सुतो भ्राता तथा जाया पतिः श्वशुर एव च ।
माता पिता स्वसा वापि पितृव्यो भगिनीपतिः ॥
ज्येष्ठभ्राता पतिश्चापि स्वामी चापत्यमेव च ।
एकैकं वर्षसंपूर्णं कुटुम्बं पीडयेद्ध्रुवम् ॥
षोडशे मासि संपूर्णे बान्धवान् परिपीडयेत् ॥
बान्धवानामभावे च वास्तुहन्ता न जीवति ॥
त्रिपुष्करे तथा दोषे यः प्रेतं न तु होमयेत् ।
देवता यदि वा रक्षेत् तस्य पत्नी न जीवति ॥
यत्किञ्चिद्दानमुत्सृज्य शुद्धो भवति मानवः ।
न रक्षति यमस्तस्य यदि होमं न कारयेत् ॥
तस्मात् विधिप्रकारेण पुष्करारिष्टशान्तये ।
यमं धर्म्मं चित्रगुप्तं पूजयित्वा च होमयेत् ॥
मण्डले घटमारोप्य पूजयित्वा यथाक्रमम् ।
विधिपूर्व्वं तथा हुत्वा प्रान्ते दद्याद्बलिं बुधः ॥
प्रभाते च तथा रात्रावशौचान्तदिने तथा ।
आचार्य्यश्च प्रकुर्व्वीत श्रपयेच्च चरुं ततः ॥
विप्रक्षत्रिययोर्दर्भैः पिष्टैर्वैश्यस्य निर्म्मितम् ।
शूद्रस्य गोमयेनापि प्रतिमां दापयेत्ततः ॥
दत्त्वा मधुघृताक्तञ्च चरुं पश्चाच्च दापयेत् ।
ततोऽरिष्टः प्रशान्तः स्यात्ततो होमं समापयेत् ॥
संकल्प्य विधिना पूर्व्वं वस्त्रयुग्मेन यत्नतः ।
आचार्य्यं पूजयेत्तत्र पश्चादृत्विजमेव च ॥”
इति वराहसंहितोक्तपुष्करशान्तिप्रमाणम् ॥

पुष्करकर्णिका, स्त्री, (पुष्करं पद्मं कर्णयति साद्दृश्येन प्राप्नोतीति । कर्ण + ण्वुल । टापि अत इत्वम् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ (स्थलपद्मिनीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पुष्करनाडी, स्त्री, (पुष्करं पद्मं नाडयति सौन्दर्य्येण भ्रंशयतीति । नाड + अच् । ततो ङीष् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

पुष्करमूलं, क्ली, (पुष्करस्य मूलमिव मूलमस्य । पुष्करजातं मूलं वा ।) पुष्करदेशप्रसिद्धौषधिविशेषः । अस्य स्थाने कुष्ठं योजयन्ति । तस्य पर्य्यायः । मूलम् २ पुष्करम् ३ पद्मपत्रकम् ४ पुष्करिणी ५ वीरम् ६ पौष्करम् ७ पुष्कराह्वयम् ८ काश्मीरम् ९ ब्रह्मतीर्थम् १० श्वासारिः ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करशिफा १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरश्वासारोचककासशोफपाण्डुनाशित्वञ्च । इति राजनिर्घण्टः ॥ “विशेषात् पार्श्वशूलनुत् ।” इति भावप्रकाशः ॥ (व्यवहारोऽस्य यथा,—
“भार्गीं पुष्करमूलञ्च रास्नां विल्वं यमानिकाम् ।
नागरं दशमूलञ्च पिप्पलीश्चाम्बु साधयेत् ॥”
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे भार्ग्यादिक्वाथे ॥)

पुष्करमूलकं, क्ली, (पुष्करस्य कुष्ठस्य मूलम् । ततः संज्ञायां कन् ।) कुष्ठस्य मूलम् । इति त्रिकाण्डशेषः ॥ (कुष्ठशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पुष्करशिफा, स्त्री, (पुष्करस्य शिफा जटेव ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

पुष्करस्रजौ, पु, (पुष्करस्य पद्मस्य स्रक् ययोरिति ।) अश्विनीकुमारौ । द्विवचनान्तोऽयम् । इति शब्दरत्नावली ॥ (अश्विनीकुमारतुल्ये, त्रि । यथा, वाजसनेयसंहितायाम् । २ । ३३ ।
“आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥”
“किम्भूतं कुमारं पुष्करस्रजं पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ अश्विनौ अश्विनीकुमारौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । तत्तुल्यः कुमारः पुष्करस्रक् तम् । अश्विसाम्यकथनेन रोगहीनं सुन्दरञ्च पुत्त्रमधत्तेति सूचितम् ॥” इति तत्र वेददीपः ॥)

पुष्कराक्षः, पुं, (पुष्करवदक्षिणी यस्य । “अक्ष्णोऽदर्शनात् ।” ५ । ४ । ७६ । इति अच् ।) विष्णुः । यथा, तिथ्यादितत्त्वे ।
“पुष्कराक्ष ! निमग्नोऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता ॥”
(श्रीकृष्णः । यथा, महाभारते ।१।२२०।१६।
“अथाब्रवीत् पुष्कराक्षः प्रहसन्निव भारत । ॥”)

पुष्कराह्वः, पु (पुष्करस्य आह्वा आह्वा यस्य ।) सारसपक्षी । इत्यमरः । २ । ५ । २२ ॥ (पुष्करं आह्वा यस्य । पुष्करमूलम् । यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये ।
“तुम्बुरुपुष्कराह्वहिङ्गुत्वक्स्वर्जिकासपथ्यालवणत्रयं यवक्वाथेन पातुं प्रयच्छेत् ॥”)

पुष्कराह्वयं, क्ली, (पुष्करं आह्वयो यस्य ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (यथा,—
“क्षुद्रान्विता नागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोद्भवे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥”
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

पुष्करिणी, स्त्री,(पुष्करवत् आकृतिरस्त्यस्या इति । पुष्कर + इनिः । ततो ङीप् ।) स्थलपद्मिनी । पुष्करमूलम् । इति राजनिर्घण्टः ॥ (पुष्करं शुण्डादण्डाग्रमस्त्यस्या इति । इनिः ।) हस्तिनी । सरोजिनी । (पुष्कराणि पद्मानि सन्त्यत्रेति ।) जलाशयः । इति मेदिनी । णे, १०४॥ शतधनुःपरिमितसमचतुरस्रजलाधारः । पुकुर इति पुखरि इति च भाषा । तत्पर्य्यायः । खातम् २ । इत्यमरः ।१।१०।२७॥ जलकूपी ३ । इति जटाधरः ॥ पौष्करिणी ४ । इति शब्दरत्नावली ॥*॥ सा तु दक्षिणोत्तरायता कार्य्या ।
यथा,—
“कूपवापीपुष्करिण्यो दीर्घिका द्रोण एव च ।
तडागः सरसी चैव सागरश्चाष्टमो मतः ॥
सर्व्वो जलाशयः कार्य्यो यत्नाद्याम्योत्तरायतः ॥”
इति कल्पतरौ वायुपुराणम् ॥ * ॥
तस्या लक्षणं यथा । “पुष्करिणीतडागावाह वशिष्ठसंहितायाम् ।
‘चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुष्करः ।
शतधन्वन्तरञ्चैव तावत् पुष्करिणी मता ।
एतत्पञ्चगुणः प्रोक्तस्तडाग इति निश्चयः ॥’
तेन चतुर्दिक्षु विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनाभ्यन्तरत्वेन पुष्करिणी । एतज्जलाशयाधारपरं न तु उपरितटम् । शतेन धनुर्भिः पुष्करिणी । इति नव्यवर्द्धमानधृतो वशिष्ठः ॥*॥ तत्करणे वास्तुयागः कर्त्तव्यः । महाकपिलपञ्चरात्रम् ।
‘जलाधारगृहार्थेषु यजेद्वास्तुं विशेषतः ।
ब्रह्माद्यदितिपर्य्यन्ताः पञ्चाशत्त्रयसंयुताः ।
सर्व्वेषां किल वास्तूनां नायकाः परिकीर्त्तिताः ॥
असंपूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत् ।
अनिष्पत्तिर्विनाशः स्यादुभयोर्धर्म्मधर्म्मिणोः ॥’
ब्रह्माद्यदितिपर्य्यन्ता इति कल्पान्तरम् । देवीपुराणोक्त ईशादिकल्प एव व्यवह्रियते । धर्म्मधर्म्मिणोस्तडागादितत्कर्त्रोः । आरम्भदिने तदकरणे उत्सर्गादिनेऽपि आदौ तत्करणम् ।
यथा,—
‘प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ॥
वास्तुपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् ।
वास्तुपूजामकुर्व्वाणस्तवाहारो भविष्यति ॥’
इति मत्स्यपुराणे पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचने प्रासादधर्म्मातिदेशाच्च वाप्यादिप्रतिष्ठादिनेऽपि वास्तुयागकरणम् ॥ * ॥

तडागारम्भे चन्द्राद्युदये दीपिकायाम् ।
'पुष्याश्विनकरादौसरदस्ववणवसवाश्चयुमित्रेन्दुभि:
प्रश्नोर्द्धे शुभवीक्षणारदितिषु क्रूरेष्ववीर्येषु च ।
पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये
प्रारम्भ: सलिलाशयस्य शुभदो जीवेन्दुपुत्रोदये ॥'
पुष्यानुराधा-हस्तोत्तरात्रय-धनिष्ठा-शतभिषा-
रोहिणी-पूर्वाषाढ़ा-मघा-मृगशिरोभिर्म: ॥
मातृग्ये ।
'चन्द्रादिबलं लब्ध्वा सम्यं शुभगिरीक्षितम् ।
लग्नोष्ट्रायाद् वर्जयमन्यच परिवर्जयेत् ॥
अश्विनी रोहिणी नृजलगुत्तरात्रयमेवम् ।
स्वाती हस्तानुराधा च यज्ञारम्भे प्रशस्यते ॥
वज्रव्याघातशूले च व्यतीपातातिगण्डयो: ।
विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ॥
आदित्यभौमवर्जेषु सर्व्वे वारा: शुभावहा: ।
प्रासादेऽप्येषमेव स्यात् कूपवापीषु चैव हि ॥'
ज्योतिषे । गुरोर्भृगोरस्तबाल्ये इत्यभिधाय
प्रतिष्ठारम्भावौ देवकूपादवेऽथ्यन्ति हि ॥ * ॥
उत्सर्गफलमाह । कपिलपञ्चरात्रे ।
'संक्षेपात्तु प्रवक्ष्यामि जलदानफलं श्रृणु ।
पुष्करिण्यादिदानेन विष्णु: प्रीणाति विश्वदृक् ॥'
जलाशयकरणार्थभूमिदानफलमाह चित्रगुप्त: ।
'जलाशयार्थं यो दद्यात् वारुणं लोकमाप्नुयात् ॥'
भूमिमिति शेष: ॥ * ॥ तत्प्रतिष्ठाकालमाह ।
मत्स्यपुराणम् ।
'श्रृणु राजन् ! महाबाहो ! तड़ागादिषु यो विधि: ।
चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ॥
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ॥
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥'
अतीते प्रवृत्ते । तथा च प्रतिष्ठासमुच्चये ।
'माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढ़कयोर्वापि प्रवृत्ते चोत्तरायणे ॥'
ब्राह्मणवाचनं पुण्याहस्वस्तिऋद्धिवाचनम् ॥*॥
'पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृत्वा बहुफला भवेत् ॥
आषाढ़े द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्यैष्ठाश्रवणरोहिण्य: पूर्व्वभाद्रपदा तथा ॥
हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥*॥
बुधो बृहस्पति: शुक्रश्च इति शुभावहा: ।
एतन्निरीक्ष्य तं लग्नं नक्षत्रञ्च प्रशस्यते ॥
ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च ।
निमित्तं शकुनं लब्ध्वा वर्जयित्वाद्भुतादिकम् ॥
शुभयोगे शुभस्थाने क्रूरग्रहविवर्जिते ।
लग्ने ऋक्षे च कुर्व्वीत प्रतिष्ठादिकमुत्तमम् ॥*॥
अयने विषुवे तद्वत् षडशीतिमुखे तथा ।
एतेषु व्यतिपाते च कार्य्यं विधिवदेव तथा ॥'
भविष्ये ।
'प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुध: ।
एते सौम्यग्रहा: प्रोक्ता: प्रतिष्ठायागकर्म्मणि ॥'
प्रतिष्ठाधिकारे यव्यहारसमुच्चय: ।
'कृष्णपक्षे च पञ्चम्यामष्टम्याञ्चैव शस्यते ॥'
दीपिकायाम् ।
'पुष्याश्विपुष्पभगदैवतवासवेषु
सौम्याग्निविष्णुमघरोहिणिमूलहस्ते ।
मैत्र्यानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥'
वासवं धनिष्ठा । ईश आर्द्रा । आर्द्रायाश्चैव
सौभाग्यमिति प्रतिष्ठासारसमुच्चयात् ॥ * ॥
वाप्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकार-
माह जातूकर्ण्य: ।
'वापीकूपतड़ागादि देवतायतनादि च ।
अन्नप्रदानमारामा: पूर्त्तमित्यभिधीयते ॥
अग्निहोत्रं तप: सत्यं वेदानामनुपालनम् ।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्ते द्विजातीनां धर्म्म: सामान्य उच्यते ॥
अधिकारी भवेत् शूद्र: पूर्त्ते धर्म्मे न वैदिके ॥'
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-
कर: ॥ एवं स्त्रीणामपि पूर्त्ताधिकार: । यथा,
मार्कण्डेयपुराणे बृहस्पति: ।
'पितृव्यगुरुदौहित्रान् भर्त्तु: स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रिय: ॥'
अस्य पूर्त्तत्वात् वृद्धिश्राद्धमप्यादौ कर्त्तव्यम् ।
यथा, गोभिल: । 'वृद्धि: पूर्त्तेषु युग्मा नाश्नयेन
प्रदक्षिणमुपचार: । यवैस्तिलार्थ इति ॥' * ॥
हयग्रीवपञ्चरात्रे ।
'वापीकूपतड़ागानां पश्चिमे यागमण्डपम् ।
कुर्य्याद्यथाक्रमेणैव कन्यसं मध्यमुत्तमम् ॥
कन्यसं दशहस्तन्तु कूपे प्रशस्तं तथानघ ! ।
द्विषट्कं कारयेद्वाप्यां पुष्करिण्यां चतुर्दश ।
द्विरष्टहस्तं कुर्व्वीत तड़ागे मण्डपं शुभम् ॥'
कन्यसं कनीयसम् ॥ * ॥ सङ्कल्पविधिमाह
भविष्ये ।
'गृहीत्वौडुम्बरं पात्रं वारिपूर्णं गुणान्वितम् ।
दर्भत्रयं साग्रमूलं फलपुष्पसमन्वितम् ॥
जलाशयारामकूपे सङ्कल्पे पूर्व्वदिङ्मुख: ।
साधारणे चोत्तरास्य ऐशान्यां निक्षिपेत्पय: ॥'
मत्स्यपुराणे ।
'प्रागुदक्प्रवणे देशे तड़ागस्य समीपत: ।
चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मुखीम् ॥'
कारयेदित्यर्थ: । तथा,—
'तथैव: सवर्णा: स्युः पताका ध्वजसंयुता: ॥'
समवर्णा ध्वजमालालोकपालवर्णा: ।
'अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च ।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥'
तथा ।
'कुलशीलसमायुक्त: स्थापक: स्यादिह्निजोत्तम: ॥'
स्थापक आचार्य्य इति रत्नाकर: ॥ * ॥
'सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यदुण्डुभौ ।
ताम्रौ कुलीरमण्डूकावायस: शिशुमारक: ॥
एवमासाद्य तान् सर्व्वानादौ चैव विशाम्पते ! ।
शुक्लमाल्याम्बरधर: शुक्लगन्धविलेपन: ॥
सर्व्वौषध्युदकस्नानस्नापितो वेदपुङ्गव: ।
यजमान: सपत्नीक: पुत्रपौत्रसमन्वित: ।
पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम् ॥
ततो मङ्गलशब्देन भेरीणां नि:स्वनेन च ।
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ॥
षोडशारं ततश्चक्रं पद्मगर्भं चतुर्मुखम् ।
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ॥
वेद्याश्चोपरि तत् कृत्वा ग्रहांल्लोकपतींस्तथा ।
विन्यसेन्मन्त्रत: सर्व्वान् प्रतिदिक्षु विचक्षण: ।
झषादीन् स्थापयेन्मध्ये वारुणं मन्त्रमाश्रित: ॥'
झषादीन् कूर्म्मादीन् ।
'ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुध: ।
विनायकञ्च विन्यस्य कमलामम्बिकां तथा ॥'
पूजयेदिति शेष: । तथा,—
'नवग्रहमखं कृत्वा तत: कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥'
ग्रहपूजामण्डलं शान्तिदीपिकायाम् ।
'वर्त्तुलो भास्कर: कार्य्यो ह्यर्द्धचन्द्रो निशाकर: ।
अङ्गारकस्त्रिकोणस्तु बुधश्चापाकृतिस्तथा ॥
पद्माकृतिर्गुरु: कार्य्यश्चतुष्कोणस्तु भार्गव: ।
खड़्गाकृति: शनि: कार्य्यो राहुस्तु मकराकृति: ।
सर्पाकृतिस्तथा केतु: कार्य्यो मण्डलपूजने ॥'
मत्स्यपुराणे ।
'देवतानां तत: स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्य: सोमस्तथा भौमो बुधजीवसितार्कजा: ॥
राहु: केतुरिति प्रोक्ता ग्रहा लोकहिते रता: ।
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥
उत्तरेण गुरुं विद्याद्बुधं पूर्व्वोत्तरेण तु ।
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ॥
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ।
पश्चिमोत्तरत: केतुं स्थापयेत् शुक्लतण्डुलै: ॥*॥
भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्यापि तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्व्विद्यात् शुक्रस्यापि प्रजापतिम् ।
शनैश्चरस्य तु यमं राहो: कालन्तथैव च ।
केतूनाञ्चित्रगुप्तञ्च सर्व्वेषामधिदेवता: ॥ * ॥
अग्निराप: क्षितिर्व्विष्णुरिन्द्र ऐन्द्री च देवता: ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवता: ॥ * ॥
विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥
संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ॥
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदु: ।
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत् प्राज्ञ: फलपुष्पसमन्वितम् ॥
गुड़ौदनं रवे: कुर्य्यात् सोमाय घृतपायसम् ।
संयावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे ॥

दध्योदनञ्च जीवाय शुक्राय च घृतोदनम् ।
शनैश्चराय कृशरमाजमांसञ्च राहवे ।
चित्रौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्च्चयेत् ॥'
स्कन्दपुराणम् ।
'जन्मभूर्गोत्रमेतेषां वर्णस्थानमुखानि च ।
योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तेनावमानिताः ॥
उत्पन्नोऽर्कः कलिङ्गेषु यमुनायाञ्च चन्द्रमाः ।
अङ्गारकस्त्ववन्त्यान्तु मगधे तु हिमांशुजः ॥
सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा ।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिकापुरे ।
अन्तर्वेद्यां तथा केतुरित्येता ग्रहभूमयः ॥
आदित्यः काश्यपो गोत्र आत्रेयश्चन्द्रमा भवेत् ।
भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः ॥
सुरपूज्योऽङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा ।
शनिः काश्यप एवायं राहुः पैठीनसिस्तथा ।
केतवो जैमिनेयाश्च ग्रहा लोकहिते रताः ॥'
कात्यायनः ।
'तद्गोत्रजातीरज्ञात्वा होमं यः कुरुते नरः ।
न तस्य फलमाप्नोति न तुष्यन्ति देवताः ॥
न हुतं न च संस्कारो न च यज्ञफलं लभेत ।
ब्राह्मणौ भार्गवाचार्य्यौ क्षत्रियावर्कलोहितौ ॥
वैश्यौ सोमबुधौ चैव शेषान् शूद्रान् विनिर्द्दिशेत् ॥'
शान्तिदीपिकायाम् ।
'शुक्रार्कौ प्राङ्मुखौ स्थाप्यौ शशाङ्कार्कौ च दक्षिणौ ।
उत्तरास्यौ गुरुबुधौ पश्चिमास्यास्तथापरे ॥'
अग्निप्रणयनानन्तरं ग्रहावाहनमाह वैशम्पायनः ।
'अग्निप्रणयनं कृत्वा पश्चादावाहयेत् सुरान् ।
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥'
यद्यपि ग्रहादीनां बहवः शब्दा वाचकाः सन्ति शब्दोपहितश्चार्थोऽर्थापहितः शब्दो वा देवता उभयथापि शब्दनियमात् अविनिगमकः स्यात् तथापि बहुषु दृष्टत्वात् सूर्य्यादिशब्देन ग्रहाणां देवतात्वम् । तेन सूर्य्यसोमकुजबुधबृहस्पतिशुक्रशनैश्चरराहुकेतुपदैर्देवतात्वम् । अधिदेवतानान्तु त्र्यम्बकोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्तानामेभिरेव पदैः । तथा प्रत्यधिदेवतानाञ्च अग्न्यप्पृथिवीविष्णिन्द्रशचीप्रजापतिब्रह्मणामेभिरेव पदैः । तथा विनायकदुर्गावाय्वाकाशाश्विनामेभिरेव । इति कृत्यप्रदीपः ॥*॥
शान्तिदीपिकोक्तध्यानानि प्रयोगे वक्ष्यन्ते ।
लोकपालमन्त्रानाह भविष्ये ।
'न्यासमन्त्रानहं वक्ष्ये लोकपालात्मकानिह ।
इन्द्रस्तु महता दीप्तः सर्व्वदेवाधिपो महान् ।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
आग्नेयः पुरुषो रक्तः सर्व्वदेवमयोऽव्ययः ।
धूम्रकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः ॥
यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् सदा ।
धर्म्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥
निरृतिस्तु पुमान् कृष्णः सर्व्वरक्षोऽधिपो महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
वरुणो धवलो विष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥
वायुश्च सर्व्ववर्णोऽयं सर्व्वगन्धवहः शुभः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥
गौरो यस्तु पुमान् सौम्यः सर्व्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥
ईशानः पुरुषः शुक्लः सर्व्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥
पद्मयोनिश्चतुर्म्मूर्त्तिर्वेदवासाः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥
पुष्पवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः ।
ओँकारपूर्व्वका ह्येते न्यासे बलिनिवेदने ।
मन्त्राः स्युः सर्व्वकार्य्याणां तुष्टिपुष्टिफलप्रदाः ॥'
हयशीर्षपञ्चरात्रे ।
'अथवा कामतः कुर्य्यात् सुवर्णरत्नादिनिर्म्मितम् ।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम् ॥
वामेन नागपाशन्तु धारयन्तं सुभोगिनम् ।
मौलिनं वा महाभागं कारयेद्यादसां पतिम् ॥
वामे तु कारयेदृद्धिं दक्षिणे पुष्करं शुभम् ।
नागैर्नदीभिर्यादोभिः समुद्रैः परिवारितम् ॥
कृत्वैव वरुणं देव प्रतिष्ठाविधिमाचरेत् ॥'
पुष्करं तत्पुत्रम् । तथा प्रसन्नवदनमिति ध्यानं वक्ष्यते । वरुणमन्त्रोद्धारस्तु तत्रैव ।
'अष्टाविंशान्तबीजेन चतुर्द्दशयुतेन च ।
अर्द्धेन्दुविन्दुयुक्तेन प्रणवोद्दीपितेन च ॥'
तेन ॐ वौं इति मन्त्रः ।
'प्रतिमायां स्थितिं कृत्वा प्रणवेन निरोधयेत् ।
पूजयेत् गन्धपुष्पाद्यैः सान्निध्यं पाशमुद्रया ॥'
स्थितिं प्राणप्रतिष्ठाम् । निरोधयेत् अन्तर्गताङ्गुष्ठमुष्टिभ्यां निरोधमुद्रां दर्शयेत् । दानकल्पतरुरत्नाकरयोर्ब्बह्वृचगृह्यपरिशिष्टम् ॥ अथातो वरुणविधिं वापीकूपतडागयज्ञं व्याख्यास्यामः । पुण्ये तिथिकरणे शुभे नक्षत्रे प्रतीचीं दिशमास्थाय प्राक्प्रवणे उदक्प्रवणे वा उदक्समीपे अग्निमुपसमाधाय वारुणं श्रपयित्वा आज्यभागान्तं हुत्वा चतस्र आज्याहुतीर्जुहुयात् । समुद्रज्येष्ठा इति प्रत्यृचं ततो हविषा अष्टभिर्जुहुयात् । तत्त्वायामि ब्रह्मणा वन्दमानः इति पञ्च । त्वन्नोऽग्ने वरुणस्य विद्वानिति द्वे इमं मे वरुणं शृधी हवेति च स्विष्टकृतञ्च नवमं नव वै प्राणाः प्राण इव आपस्तस्मादापो नवभिर्जुहोति ॥*॥ मार्ज्जनान्ते धेनुमवतारयेत् । अवतार्य्यमाणामनुमन्त्रयेत् । इदं सलिलं पवित्रं कुरुष्व शुद्धः पूतो ऽमृतः सन्तु नित्यं तारयन्ती सर्व्वतीर्थाभिषिक्ता लोकाल्लोकं तरते तीर्य्यते च । इत्यनेन पुच्छाग्रे यजमानः स्वयं लग्न आचार्य्यमन्वारभ्य उत्तीर्य्य आपोऽस्मान्मातरः शुन्धयन्त्विति ऐशान्यां दिशि उत्थापयेत् । सुव्रता भगवतीह भूया इति हिं कारयेत् तदा हिं कृण्वती वसुमती वसूनामिति जपेत् । तां सचेलकर्णां कनकशृङ्गीं रूपप्रजां रूप्यखुरां कांस्योपदोहां विप्राय सामगाय दद्यात् इतरो वा । यथाशक्ति दक्षिणा च देया इति । तत्र चतुवर्गं कुर्य्यात् । देवपितृमनुष्याः प्रीयन्तां इत्याह शौनकः । यजमानो ब्राह्मणान् भोजयित्वा स्वस्ति वाचयीतेति । अस्यार्थः । तिथ्यादीनां शुभत्वं पूर्व्ववचनेभ्यो ज्ञेयम् । एष एव विधिर्गोभिलपारस्करगृह्योक्तकर्म्मानुष्ठातृभ्यामनुष्ठीयते ।
'यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्म्मवत् ॥'
इति छन्दोगपरिशिष्टात् ॥
ततश्च अग्निमुपसमाधायेति स्वस्वगृह्योक्तविधिनाग्निं संस्थाप्य वारुणं वरुणदेवताकं चरुं निष्पाद्य आज्यभागान्तं हुत्वा इति छन्दोगेतरपरम् । स तु विरूपाक्षजपान्तां कुशण्डिकां समाप्य महाव्याहृतीर्हुत्वा प्रकृतं कर्म्म कुर्य्यात् । तत्र प्रथमतः पिङ्गभ्रूश्मश्रु इत्यादि पुराणीयं ध्यात्वा अग्ने त्वं वरुणनामासीति नाम कुर्य्यात् ।
'प्रतिष्ठायां रोहितश्च वास्तुयागे प्रजापतिः ।
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ॥'
इति स्मृतेः ।
तत आवाह्य पूजयित्वा समित्प्रक्षेपानन्तरं महाव्याहृतिहोमं कृत्वा समुद्रज्येष्ठा इत्यादि चतुर्भिर्म्मन्त्रैश्चतस्र आहुतीर्जुहुयात । ॐ तत्त्वायामीति ॐ तदिदन्नक्तमिति ॐ शुनःशेपो ह्यह्वीति ॐ अवते हेलो वरुण इति ॐ उदुत्तममिति पञ्चभिः ॐ त्वन्नोऽग्ने इति द्वाभ्यां ॐ इमं वरुण इत्येकेन एवं स्थानत्रयोक्तैर्बह्वृचोक्तैः प्रत्येकमष्टभिर्म्मन्त्रैश्चरुं चतुरावत्तं भृगुगोत्रो भार्गवप्रवरश्च पञ्चावत्तं स्रुचा जुहुयात । अग्नये स्विष्टकृते च । ततः कुशण्डिकोक्तविधिना शेषं समापयेत् । नव वै प्राणा इति नवाहुतिस्तुतिः । मार्ज्जनान्त इति यजमानाभिषेकः । तद्विधानञ्च मत्स्यपुराणे ।
'गजाश्वरथ्यावल्मीकसङ्गमात् ह्रदगोकुलात् ।
मृदमादाय कुम्भेषु प्रक्षिपेच्चत्वरात्तथा ॥
गोरोचनाञ्च सिद्धार्थान् गन्धान् गुग्गुलुमेव च ।
स्नपनं तस्य कर्त्तव्यं पञ्चभङ्गसमन्वितम् ।
पूर्व्वकर्त्तुर्म्महामन्त्रैरेवं कृत्वा विधानतः ॥'
पञ्चभङ्गाश्च शान्तिकपौष्टिककल्पतरूक्ताः ।
'अश्वत्थोडुम्बरप्लक्षवटचूतस्य पल्लवाः ॥'
महामन्त्रैः । सुराणामभिषिञ्चन्त्वित्यादिभिः ।
एतत्पर्य्यन्तं कूर्म्मेऽपि । कापिले ।
'ऐशान्यां स्थापयेद्यूपं खातात् पञ्चकरान्तरम् ।
यमष्टेतिमन्त्रेण सर्पाकारं सुशोभनम् ।
पूजयित्वा तु वस्त्राद्यैस्ततो यष्टिं प्रचालयेत् ॥'
मात्स्ये ।
'चतुरत्निमात्रो यूपः स्यात् क्षीरिवृक्षविनिर्म्मितः ।

यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥'
गौरित्यत्रोऽन्यत्यादि: । ततो धेनुं सचैलकण्ठां
कांस्यानुकार्यविशेषयुक्तां जलाशयेऽवतारयेत् ।
तथा च हयशीर्षपञ्चरात्रे ।
'गां सवत्सां समानीय सुशीलाञ्च पयस्विनीम् ।
कांस्योपदोहां घण्टादिवस्त्रपुष्पोपशोभिताम् ।
स्वर्णशृङ्गीं रौप्यखुरीं ताम्रपृष्ठां सुशोभनाम् ॥
लाङ्गूलमवलम्ब्यासौ यजमान: सबान्धव: ।
शनै: सन्तारयित्वा तामाचार्य्याय निवेदयेत् ॥'
कांस्योपदोहां कांस्यक्रोडामिति यावत् ।
कापिले ।
'अजले जलसुत्पाद्य यजमान: सभार्य्यक: ।
तटेदे प्राङ्मुखो भूत्वा कृतगोलाङ्गूलाञ्जलि: ॥'
इदं सलिलं पवित्रं इतिमन्त्रेणावतार्य्यमाणा-
मनुमन्त्रयेत् । तत: प्राङ्मुख: सन्नवतारयेत् ।
सा च गौ: पश्चिमतोऽवतार्य्या । तत: कूल-
समीपं गत्वा तर्पयेत् । यथा कापिलम् ।
'पुन: पुष्पोदकेनाथ सतिलेन कुशेन तु ।
भुजेनैवापसव्येन पितृतीर्थेन तर्पयेत् ॥
गताश्चागामिष्यन्ति ये कुले मम बान्धवा: ।
ते सर्व्वे तृप्तिमायान्तु मया दत्तजलेन वै ।
ततो सुवामि मन्त्रेण सुवेशां वत्ससंयुताम् ॥'
आचार्य्यमान्वारभ्य उत्तीर्य्य आपोऽस्मान्मातर:
शुन्धयन्त्वितिमन्त्रेण ऐशान्यासुत्थापयेत् । सुय-
वसा भगवतीह भूया इति ब्रूयात् । सा यदि
हिङ्कारं करोति तदा हिं कृण्वतीत्यादि जपेत् ।
तत उक्तविशेषयुक्तां धेनुमाचार्य्याय सामगाय
दद्यात् । ततो यथाशक्ति दक्षिणाञ्च दद्यात् ।
एतत्पर्य्यन्तं न कूपे अवश्यितत्वेऽसम्भवात् ॥*॥
तत उत्सर्गं कुर्य्यात् । अत्र विशेषमाह रत्ना-
करधृतमत्स्यपुराणम् ।
'फलान्याचिन्त्य मनसा विविधानि शुभानि च ।
प्रदद्यात् सर्व्वभूतेभ्यो जलपूर्णं जलाशयम् ॥'
कापिलञ्च ।
'ततस्तत्पश्चिमं तीरं गत्वा पूर्व्वाननस्थित: ।
जलोत्सर्गं प्रकुर्व्वीत सर्व्वसत्त्वार्थकं शुभम् ॥'
सर्व्वसत्त्वार्थकं सर्व्वभूतप्रयोजनकम् । सर्व्वभूतेभ्य
उत्सृजेदित्यर्थ: । देवपितृमनुष्या: प्रीयन्ता-
मिति पठेदिति शेष: । उत्सृज्य यजमानो
ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति
शेष: । एतत्पर्य्यन्तं कूपेऽपि । जलाशयोत्सर्गस्य
सर्व्वभूतोद्देश्यकत्वेन अपकृष्टचेतनोद्देश्यकत्वेऽपि
त्यागत्वमपि । तत्र कीटादेर्ममेदमिति स्वीका-
रायोग्यत्वेन चेतनोद्देश्यगतस्वत्वाजनकत्यागत्व-
पत्वात् अस्य यागत्वम् । अतएव जलाशयोत्-
सर्गमुपक्रम्य मत्स्यपुराणेऽपि । प्राप्नोति तद्-
यागफलेन भूय इति यागत्वेनाभिहितम् । ततश्च
तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधा-
रणीकृतम् । अतएव
'सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम् ।
रमन्तु सर्व्वभूतानि स्नानपानावगाहनै: ॥'
इति मन्त्रलिङ्गेन उपादानं विना कस्यापि न
स्वत्वमिति । ततश्चास्य यागवदुत्तराप्रतिपत्तेर
शून्यत्वात् साधारणजनस्य परिग्रहमात्रेण गौत
मोक्तेन स्वामित्वश्रुतेर्यजमानस्यापि तत्रत्येन
स्वामित्वात् तत्र स्नानादावदोष इति तत्त्वम् ।
यथा गौतम: । स्वामी रिक्थक्रयसंविभाग-
परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रि-
यस्य विजितं निर्व्विष्टं वैश्यशूद्रयोरिति । परि-
ग्रहोऽनन्यपूर्व्वस्य जलतृणकाष्ठादे: स्वीकार
इति मिताक्षरा । रिक्थाधिकारे चाहापस्तम्ब: । दायाद्यं शिलोञ्छौ चान्यच्चापरि-
गृहीतमिति । अपरिगृहीतमन्याश्वीकृतमस्वा-
मिकमिति यावत् । निर्व्विष्टं वेतनलब्धं निर्व्वेशो
भृतिभोगयोरित्यमरकोषत्रिकाण्डशेषयो: ॥
हयशीर्षे ।
'आपोहिष्ठेति तिसृभि: पञ्चगव्यं विनि:क्षिपेत् ।
तीर्थतोयं तथा पुण्यं शान्तितोयं द्विजै: कृतम् ॥
गोकुलं पाययेत् पश्चात् द्विजान् वेदविदस्तथा ।
ततोऽन्नं भोजयेद्विप्रान् दद्यात्तेभ्यश्च दक्षिणाम् ॥
एतत्पर्य्यन्तं कूपेऽपि ॥ * ॥ कापिले ।
'नागानामष्ट नामानि लिखितानि पृथक् पृथक् ।
तत: कुम्भे च नि:क्षिप्य गायत्र्या च विलोड्य वै ॥
उद्धरेत् पत्रिकामेकां तन्नैव नागमीरयेत् ।
यस्य नामोद्धरेद्दत्तस्स वै जलाधिप: स्मृत: ॥
तस्य संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम् ॥'
पञ्चरात्रान्तरस्य योगीश्वरधृतवचनाद्यथा ।
'अष्टौ नामान्यात्मपत्रे कृत्वा चैव प्रयत्नत: ॥'
तानि च गारुडे ।
'अनन्तो वासुकि: पद्मो महापद्मोऽथ तक्षक: ।
कुलीर: कर्कट: शङ्खो ह्यष्टौ नागा: प्रकीर्त्तिता: ॥'
एतानि नामानि आम्रपत्रे लिखित्वा कलस
मध्ये नि:क्षिप्य गायत्र्या छन्दसा मथ्नामि इति
रघुनाथधृतमन्त्रेणालोड्य यस्य नामोत्तिष्ठति तं
यष्ट्यां समावाह्यानेन नागेनास्य जलस्य रक्षा
कर्त्तव्या इति ब्राह्मणान् श्रावयेत् । हयशीर्षे ।
'वैणवं वारणञ्चैव पुन्नागं नागकेशरम् ।
वकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम् ॥
एतेषामेव दारूणां नागयष्टि: प्रकीर्त्तिता ।
सवक्रकोटरं त्यक्त्वा तस्मात् कुर्य्याद्यथेप्सितम् ॥'
तथा च बृहस्पति: ।
'शूलचक्राङ्कितां कृत्वा स्थापयित्वा जलाशये ।
द्वादशाङ्गुलमानन्तु वापीचक्रं प्रकल्पयेत् ॥
षोडशं पुष्करिण्यान्तु विंशतिश्च सरोवरे ।
सागरे हस्तमात्रन्तु लौहं ताम्रन्तु पैत्तलम् ॥
चक्रञ्च त्रिविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम् ।
शतहस्ता भवेद्वापी द्विगुणा पुष्करिण्यपि ॥
त्रिगुणन्तु सरोमानमत ऊर्द्ध्वन्तु सागर: ॥'
ततो द्वादशपञ्चदशविंशत्येकविंशत्यन्यतमकनि-
ष्ठाङ्गुल्यवच्छिन्नहस्तप्रमाणां यष्टिं वक्ष्यमाण
मन्त्रेण स्नापयेत् । ॐ गन्धद्वारेति गन्धवारिणा
ॐ भद्रं कर्णेभिरिति तैलहरिद्रया ॐ काण्डात्
काण्डादिति दूर्व्वाभि: ॐ द्रुपदादिव इत्यादिना
सप्तमृत्तिकादिभि: ॐ मधुवातेति पञ्चामृतेन
या: फलिनीरिति फलोदकेन ॐ युवासुवासा
इति क्षुद्रघण्टिकायुतां पताकां यष्ट्यां बध्नीयात् ।
ॐ यष्ट्यै नम: इतिमन्त्रेण पूजयेत् । पुष्पाद्यल-
ङ्कृतां यष्टिं कन्दरसमीपं नयेत् । गुरवस्तु शङ्खादि-
नि:स्वने राजतवत्सप्रतिमां उत्तिष्ठेति समुत्थाप्य
प्रदक्षिणत्रयं कृत्वा आपोहिष्ठा इत्यादिना
मन्त्रेण वरुणस्योत्तम्भनमसि इतिमन्त्रेण च
जले क्षिपेत् । ततस्तत्रैव स्नाति शुक्लगोमय-
दधिमधुकुशमहानदीजलपञ्चरत्नानि ॐ येते-
वापी रोपणे दिव इतिमन्त्रेण क्षिपेत् । ॐ ध्रुवं
ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ
यूपव्रस्केतिमन्त्रेण जलमध्ये आरोपयेत् । ततो
जलमातृ: पूजयेत् । यथा श्रीं पूर्व्वस्याम् ।
श्रियं आग्नेय्याम् । शचीं दक्षिणस्याम् । मेधां
नैरृत्याम् । श्रद्धां पश्चिमायाम् । विद्यां वाय-
व्याम् । लक्ष्मीं उत्तरस्याम् । सरस्वतीं ऐशा-
न्याम् । अधो विद्याम् । ऊर्द्ध्वे लक्ष्मीम् । पाद्या-
दिभि: संपूज्य अग्निं प्रदक्षिणीकृत्य सूर्य्यादि-
द्वात्रिंशद्देवता: पूजयेत् । क्षमस्वेति वरुणं
क्षामयेत् । कापिलम् ।
'शङ्खतूर्य्यादिनिनदैस्तथा वै क्षीरधारया ॥'
जलाशयं प्रवेशयेदिति शेष: । प्रतिष्ठानन्तरं
मात्स्ये ।
तत: सहस्रं विप्राणामथवाष्टशतन्तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशदाथ विंशतिम् ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

पुष्करी, [न्] पुं, (पुष्करमस्यास्तीति । पुष्कर+इनि: ।) हस्ती । इति त्रिकाण्डशेष: ॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति । पुष+"कलंच ।" उणा० ४ । ५ । इति कलन् स च कित् ।) ग्रासचतुष्टयात्मकभिक्षा । यथा,—
"भिक्षामाहुर्ग्रासमात्रमन्नं तत्स्याच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥"
इति कौर्म्मे उपविभागे १७ अध्याय: ॥
अष्टकुञ्चिपरिमाणम् । यथा, प्रायश्चित्ततत्त्वे ।
"अष्टमुष्टिर्भवेत् कुञ्चि: कुञ्चयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि आढक: परिकीर्त्तित: ॥"
(नगरविशेष: । यथा, रामायणे ।७।११४।११।
"हतेषु तेषु सर्व्वेषु भरत: कैकयीसुत: ।
निवेशयामास तदा समृद्धे द्वे पुरोत्तमे ॥
तक्षं तक्षशिलायान्तु पुष्कलं पुष्कलावते ।
गन्धर्व्वदेशे रुचिरे गान्धारविषये च स: ॥")

पुष्कल:, त्रि, (पुष्कं महत्त्वं लातीति । ला+क: । यद्वा, पुष्कं पुष्टिर्महत्त्वमिति यावत् तदस्यास्तीति । पुष्क+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) श्रेष्ठ: । इत्यमर: । ३ । १ । ४८ ॥ बहु: । इति हेमचन्द्र: ॥ (यथा, महाभारते । ३ । ३ । १० ।
"राजानो हि महात्मानो योनिकर्म्मविशो-
धिना: ।
उद्धरन्ति प्रजा: सर्व्वास्तप आस्थाय पुष्कलम् ॥")
उपस्थित: । इति जटाधर: ॥

शक्रोऽपि तैः समं वत्स ! कुरुते ह्यभिभाषणम् ॥
ददात्यभीप्सितान् कामान् हृच्चिन्तामणिर्यथा ।
कार्त्तिके मुनिपुष्पेण पूजितो गरुड़ध्वजः ॥
गवामयुतदानेन यत्फलं कार्त्तिके मुने ।
मुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं स्मृतम् ॥
येऽर्च्चयन्ति सुराध्यक्षं करवीरैः सितासितैः ।
तेषां वर्षशतं यावत् प्रसुर्भवति केशवः ॥
वकुलाशोककुसुमैर्येऽर्च्चयन्ति जगत्पतिम् ।
निःशङ्कास्ते भवन्तीह यावच्चन्द्रदिवाकरौ ॥
अशोककुसुमै रम्यैर्जन्मशोकभयापहम् ।
पूजयित्वा हरिं याति पदं विष्णोरनामयम् ॥
शुभगन्धैः सितैर्वत्स । कुसुमैः पङ्कजोद्भवैः ।
अधोक्षजं समभ्यर्च्च्य नरो याति हरेः पदम् ॥
अभ्यर्च्च्य कौसुमैः पुष्पैः केशवं क्लेशनाशनम् ।
प्रयाति भवनं विष्णोर्व्वन्दितं त्रिदशैरपि ॥
अटरूषकपुष्पैश्च पूजयेद्यो जगत्पतिम् ।
स पुण्यवान्नरो याति तद्विष्णोः परमं पदम् ॥
कार्त्तिके योऽर्च्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः ॥
माधवे योऽर्च्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स वत्स शक्यो न किङ्करैः ॥
माधवे योऽर्च्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवैः ।
धूतपापो निरातङ्कः स विष्णोर्याति तत् पदम् ॥
समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
शूद्रानीतैश्च हरेः पूजां कुर्व्वन् व्रजत्यधः ॥
तस्माद्विप्रो मुनिश्रेष्ठ । शिष्येण स्वयमेव वा ।
पुष्पादीनि समाहृत्य पूजयेत् परमेश्वरम् ॥
विप्रो दूर्व्वामयैः पुष्पैस्तथा काशकुशोद्भवैः ।
तुलसीविल्वपत्रैश्च पूजयेद्देवताः पितॄन् ॥
नार्च्चयेत्तगरैः सूर्य्यं धूर्त्तपुष्पेण केशवम् ।
देवीं लकुचपुष्पैश्च शङ्करं नागकेशरैः ॥"
कालविशेषे तस्य पर्य्युषितत्वं यथा,—
"प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका ।
त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम् ॥"
आम्रमञ्जरीविल्वपत्रदानफलं यथा,—
"मञ्जरीं सहकारस्य ये प्रयच्छन्ति वैष्णवाः ।
कार्त्तिके सफलास्ते स्युर्गोकोटिफलभागिनः ॥
कार्त्तिके योऽर्च्चयेद्भक्त्या विल्वपत्रेण केशवम् ।
दद्यादश्वायुतफलं केशवस्तस्य वै मुने ! ॥
विल्वपत्रेण ये सर्व्वां कार्त्तिके कलिमर्द्दनम् ।
पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता ॥
नागकेशरपुष्पैर्यः पूजयेद्गरुड़ध्वजम् ।
स याति वैष्णवं स्थानं यत्र गत्वा न शोचते ॥
कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम् ।
जन्मायुतार्ज्जितं पापं स्फोटितं तेन नारद ! ॥
न तथा केतकीपुष्पैर्मालतीकुसुमैस्तथा ।
तोषमायाति देवेशः कदम्बकुसुमैर्यथा ॥
दृष्ट्वा कदम्बपुष्पाणि तोषमायाति माधवः ।
किं पुनः पूजितो देवः सर्व्वकामप्रदो हरिः ॥
हरिं किंशुकपुष्पैर्यः पूजयेत्त्रिदशाधिपम् ।
वैकुण्ठे रमते शश्वत् विष्णुना सह वैष्णवः ॥
वर्षाकाले च देवेशं कुसुदैश्चन्दनार्च्चितैः ।
योऽर्च्चयेत् परमं विष्णुं संसारे न पुनर्व्विशेत् ॥
कुन्दपुष्पैश्च विप्रर्षे । योऽर्च्चयेद्गरुडध्वजम् ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥
शमीपुष्पैश्च देवेशं पूजयेदसुरद्विषम् ।
यमं न पश्येद्विप्रर्षे । न याति दुर्गतिं नरः ॥"
इति पाद्मोत्तरखण्डे १३१ अध्यायः ॥ * ॥
लक्ष्मीतुल्यप्रियपुष्पाणि यथा, नारदीयसप्तम-
सहस्रे ।
"मालतीवकुलाशोकशेफालिनवमालिकाः ।
आम्रातनगराङ्कोठमल्लिकामधुपिण्डिकाः ॥
यूथिमष्टापदं कुन्दं कदम्बं मधुपिप्पलम् ।
पाटला चम्पकं लक्ष्मीं लवङ्गमतिमुक्तकम् ॥
केतकं कुरवकं विल्वं कह्लारकरकं द्विजम् ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे ॥"
केशवार्च्चने निषिद्धपुष्पाणि यथा, विष्णुधर्म्मोत्तरे ।
"उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत् ।
अन्यायतनजातानि कण्टकीनि तथैव च ॥
रक्तानि यानि धर्म्मज्ञ । चैत्यवृक्षोद्भवानि च ।
श्मशानजातान्यन्यानि यानि चाकालजानि च ॥"
तथा ।
"कुटजं शाल्मलीपुष्पं शिरीषञ्च जनार्द्दने ।
निवेदितं भयं रोगं निःस्वत्वञ्च प्रयच्छति ॥
बन्धुजीवकपुष्पाणि रक्तान्यपि च दापयेत् ।
अनुक्तरक्तकुसुमदानात दौर्भाग्यमाप्नुयात् ॥"
परारोपितवृक्षस्य पुष्पग्रहणे दोषः । अगस्त्यः ।
"परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्च्चयेत् ।
अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम् ॥'
एतद्द्विजेतरपरम् ।
"द्विजस्तृणैधःपुष्पाणि सर्व्वतः स्ववदाहरेत् ॥"
इति याज्ञवल्क्यात् ॥
"देवाद्यर्थन्तु कुसुममस्तेयं मनुरब्रवीत् ॥"
इति वचनात् ॥
"गोऽग्न्यर्थे तृणमेधांसि वीरुद्वनस्पतीनाम् ।
पुष्पाणि स्ववदाददीत फलानि चापरिवृत्त-
तानि ॥"
इति गौतमवचनाच्च ॥
द्विजेतरस्य दण्डोऽपि ।
"तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम्
अप्रयच्छन्निरादानो हस्तच्छेदनमर्हति ॥"
इति स्मृतेः ॥*॥
देवोपरि धृतं मस्तकोपरि धृतं अधोवस्त्रधृतं
अन्तर्जलक्षालितञ्च पुष्पं दुष्टमिति हरिभक्ति
नामके ग्रन्थे ॥ अभिवाद्याभिवादककरस्थपुष्पं
शोचयात् कर्म्मणयम् । इति केचित् ॥ * ॥
याचितादिपुष्पदानस्य निष्फलत्वम् । याचितं
निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलमिति वदन्ति ।
वामहस्तचितादिपुष्पस्यादेयत्वं यथा,—
"न पुष्पच्छेदनं कार्य्यं देवार्थं वामहस्ततः ।
न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्ततः ॥"
समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीत-
शातातपौ ।
"समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् पतत्यधः ॥"
क्रये प्रतिप्रसवमाह ब्रह्मपुराणम् ।
"पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयक्रियाकृतैः ॥"
वीरक्रयो वीरवत् याच्ञामूल्येन विक्रेतुरपन्यस्त-
मूल्येन क्रयः ॥ * ॥ पुष्पदानप्रकारो ज्ञान-
मालायाम् ।
"पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् ।
पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पणम् ॥"
मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा,—
"स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै
द्विजाः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ॥"
एतत्तु द्वितीयस्नानाभिप्रायम् । इति रत्नाकरः ॥
व्यक्तं मत्स्यसूक्ते ।
"स्नात्वा मध्याह्नसमये न छिन्द्यात कुसुमं नरः ।
तत्पुष्पस्यार्च्चनं देवि । रौरवे परिपच्यते ॥"
पुष्पाभावे देयानि यथा, विष्णुधर्म्मोत्तर ।
"पुष्पाभावेऽपि देयानि पत्राणि च जनार्द्दने ।
पत्राभावे जलं दद्यात्तेन पुण्यमवाप्यते ॥" * ॥
पुष्पदानमाहात्म्यं यथा,—
"न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा ।
तथा प्रसादमायाति यथा पुष्पैर्जनार्द्दनः ॥ * ॥
देवताविशेषे वर्ज्जनीयपुष्पं यथा, शातातपः ।
"शिवे विवर्ज्जयेत् कुन्दमुन्मत्तञ्च हरेस्तथा ।
देवीनामर्कमन्दारौ सूर्य्यस्य तगरन्तथा ॥" * ॥
पुष्पविशेषाणां कालिकपर्य्युषितत्वम् । भविष्ये ।
"पद्मानि सितरक्तानि कुमुदान्युत्पलानि च ।
एषां पर्य्युषिताशङ्का कार्य्या पञ्चदिनोत्तरम् ॥"
पुष्पविशेषस्यापर्य्युषितत्वं यथा,—
"तुलस्यगस्त्यविल्वानां न च पर्य्युषितात्मता ॥"
योगिनीतन्त्रे ।
"विल्वपत्रञ्च माध्यञ्च तमालामलकीदलम् ।
कह्लारं तुलसीचैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिका-
त्मकम् ॥"
कलिकात्मकं प्रस्फुटनयोग्यम् । इत्येकादशी-
तत्त्वम् ॥ राघवभट्टमते पुष्पविशेषाणां कालिक-
पर्य्युषितत्वं यथा,—
"विल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्ग-
दूर्व्वा
मन्दाम्भोजाद्दिदर्भा मुनितिलतगरश्वेतकह्लार-
मल्ली ।
चम्पाश्वारातिकुम्भीदमनमरुवका विल्वतो-
ऽह्नानि शस्ता-
स्त्रिंशत्त्रेकार्य्यरीशोनिधिनिधि-वसु-भू भू यमा
भूय एवम् ॥"
अस्यार्थः । शता शतावरी । मन्दः मन्दारः ।
अद्विर्नागकेशरः । मुनिरगस्त्यः । अश्वारातिः
करवीरः । कुम्भी पाटला । विल्वमारभ्य अद्वि-
पर्य्यन्तं गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादि
गणयेत् । एतद्दिनोत्तरं पर्य्युषितानीत्यर्थः । इति
पदार्थादर्शः ॥*॥ पुष्पक्रीड़ायां वर्ज्जनीयानि यथा,

पुष्पचयनम् १ पुष्पार्थंशी दयिताथिता २ माला ३ गोत्रस्खलनेर्ष्या ४ वक्रोक्तिः ५ सभ्रूमाक्षेपः ६ । इति कविकल्पलता ॥ (घोटकलक्षणविशेषः । यथा, अश्ववैद्यके । ३ । ८२—६२ ।
"अश्वानामवसुरङ्गस्य ये भवन्त्यथवर्णगाः ।
विन्दवः पुष्पसंज्ञास्तु ते हिताहितसंज्ञकाः ॥
तेषां प्रदेशभेदेन लक्षणं यद् व्यवस्थितम् ।
तत्तथैव समासेन विस्पष्टं कीर्त्यतेऽधुना ॥
अपाने च ललाटे च भ्रुवोर्मूर्द्धनि कर्णयोः ।
निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् ॥
स्कन्धे वक्षसि कक्षे च मुष्कयोर्बाहुकेशयोः ।
हन्वोः पृष्ठे च वाहानां पुष्पं स्वामिहित-
प्रदम् ॥
नाभौ केशे तथा कण्ठ दन्ते चव हि वाजिनाम् ।
पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्व्वार्थसाधकम् ॥
अप्रशस्तानि इष्टानि मुनिभिर्यानि वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि पुष्पाश्रयागमदर्शनात् ॥
अधरोष्ठे कठे प्रोथे उत्तरौष्ठे तथैव च ।
घोणायां गण्डयोश्चैव शङ्खयोश्च तथा भ्रुवोः ॥
ग्रीवायाञ्च वङ्के चैव स्कन्धयोः स्थूरके स्फिचि ।
पायौ क्रोडे च पुष्पाणि निन्दितानीति निश्चयः ॥
रक्तं पीतं तथा कृष्णं पुष्पं सर्व्वत्र नेष्यते ।
शुभप्रदेशसञ्जातं भवेत् साधारणं ततः ॥
पुत्त्रलाभं धनप्राप्तिमारोग्यं विजयं तथा ।
विन्द्यात् पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम् ॥
सर्व्वाङ्गपुष्पितो वाजी परित्याज्यो न संशयः ॥")
क्षीरजः । (यथा, मार्कण्डेये । ५१ । ४२ ।
"क्षीरं पुष्पं हरत्यन्या प्रवृत्तं सा तु कन्यका ॥")
विकाशः । इति मेदिनी । पे, ८ ॥ धनदस्य विमानम् । नेत्ररोगविशेषः । इति हेमचन्द्रः ॥ फुली इति भाषा ॥ अस्यौषधं यथा,—
"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ।
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ॥
नाशयेत्तिमिरं कण्डू पटलान्यर्व्वुदानि च ।
अधिकानि च मांसानि यश्च रात्रौ न पश्यति ॥
अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् ।
वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी ॥"
इति चक्रपाणिदत्तः ॥

(अस्य चिकित्सान्तरं यथा,—
"पूर्व्वाहारविहारैस्तु नेत्रे पुष्पञ्च जायते ।
प्रथमं सुखसाध्यं स्यात् द्वितीयं कष्टसाध्यकम् ॥
तृतीयं शस्त्रसाध्यन्तु चतुर्थन्त्वसाध्यकम् ।
शङ्खपुष्पं तथा रौप्यं शङ्खनाभिर्मनःशिला ॥
काञ्जिकेन तु संपेष्य छायाशुष्का भिषग्वर ! ।
वातिके काञ्जिकेनापि पैत्तिके पयसा हिता ॥
श्लैष्मिके मधुसंयुक्ता पुष्पस्याञ्जनतो हिता ।"
इति हारीते चिकित्सितस्थाने चतुश्चत्वारिंश-
त्तमेऽध्याये ॥)
पुष्पकं, क्लौ, (पुष्पमिव पुष्पैर्वा कायति प्रकाशते इति । कै + कः । पुष्प + संज्ञायां कन् वा ।) रीतिपुष्पम् । (पुष्पमिव प्रतिकृतिः । पुष्प + "इवे प्रतिकृतौ ।" ५ । ३ । ६६ । इति कन् ।) धनदस्य विमानम् । (कालपर्य्ययेण धनदं विजित्य रावणेन हृतेऽस्मिन् रावणस्यैव जातम् । यथा, रघौ । १० । ४६ ।
"वैमानिकाः पुण्यकृतः त्यजन्तु मरुतां पथि ।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥")
नेत्ररोगः । रत्नकङ्कणम् । रसाञ्जनम् । लोह-कांस्यम् । मृदङ्गारशकटी । इति मेदिनी ॥ कासीसम् । इति हेमचन्द्रः ॥ (पुष्प + स्वार्थे कन् । पुष्पम् । यथा, गारुडे १८२ अध्याये ।
"सप्ताभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च यथाहं सा वशा भवेत् ॥"
पुं, निर्व्विषसर्पजातिभेदः । यथा, सुश्रुते कल्प स्थाने । ४ अध्याये ।
"निर्व्विषास्तु गलगोली शुकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः क्षीरिकः पुष्पकोऽहिपताकोऽन्धाहिको गौरा-हिको वृक्षेशय इति ॥" * ॥ पर्व्वतभेदः । यथा, मार्कण्डेये । ५५ । १३ ।
"स्वर्णशृङ्गी शातशृङ्गी पुष्पको मेघपर्व्वतः ॥"
प्रासादस्य मण्डपभेदः । यथा विश्वकर्म्मप्रकाशे । ६ अध्याये ।
"अथातः संप्रवक्ष्यामि मण्डपानाञ्च लक्षणम् ।
मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥
विविधा मण्डपाः कार्य्याः श्रेष्ठमध्यकनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ॥
पुष्पकः पुष्पभद्रश्च सुवृत्तो मृतनन्दनः ।
कौशल्यो बुद्धिसंकीर्णो गजभद्रो जयावहाः ॥")
पुष्पकरण्डकं क्लौ, (पुष्पाधार करण्ड इव काय-तीति । कै + कः । बहुतरमनोरमपुष्पाधारक-त्वादस्य तथात्वम् ।) उज्जयन्यां शिवस्य उद्या-नम् । यथा, शब्दमाला ।
"महाकालस्योज्जयनी विशालावन्तिका तथा ।
तस्य उद्यानकं स्यात् नाम्ना पुष्पकरण्डकम् ॥"
पुष्पकरण्डिनी, स्त्री, (पुष्पकरण्डकं शिवोद्यान-मस्त्यस्या इति । इनिः । स्त्रियां ङीप् ।) उज्जयिनी । यथा, हेमचन्द्रः । ४ । ४१ ॥
"उज्जयिनी स्याद्विशालावन्ती पुष्पकरण्डिनी ॥"
पुष्पकासीसं क्लौ, (पुष्पमिव कासीसम् ।) पीत-वर्णकासीसम् । यथा, भावप्रकाशे ।
"अथ कासीसं भस्मवन्मृत्तिकाभम् ।
कासीसं धातुकासीसं पांशुकासीसमित्यपि ।
तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते ॥
कासीसमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा ।
वातश्लेष्महरं केश्यं नेत्रं कण्डूविषप्रणुत् ।
मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम् ॥"
तत्पर्य्यायः । कंसकम् २ नेत्रौषधम् ३ । इति हेमचन्द्रः ॥ वंसकम् ४ मलीमसम् ५ हंसम् ६ विपदम् ७ नीलमृत्तिका ८ । अस्य गुणाः । तिक्तत्वम् । शीतत्वम् । नेत्रामयापहत्वम् । लेपेन पामाकुष्ठादिनानात्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥
पुष्पकीटः, पुं, (पुष्पप्रियः कीटः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥ कुसुमकृमिमात्रञ्च ॥
पुष्पकेतनः, पुं, (पुष्पं केतनं ध्वजो यस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४२ ॥
पुष्पकेतु, क्लौ, (पुष्पस्य नेत्ररोगविशेषस्य केतुरिव विनाशकत्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ९ । १०३ ॥
पुष्पघातकः, पुं, (हन्तीति । हन + ण्वुल् । घातकः । पुष्पाणां पुष्पवृक्षाणां घातकः नाशकः ।) वंशः । इति शब्दमाला ॥
पुष्पचापः, पुं, (पुष्पमेव पुष्पमयो वा चापोऽस्य ।) कामदेवः । इति हेमचन्द्रः ।२ । १४१ ॥ (यथा, कथासरित्सागरे । १४ । २६ ।
"सा संमोहनवायव्यवारुणाक्षैर्निरन्तरैः ।
विद्धेव पुष्पचापेन तत्क्षणं समलक्ष्यत ॥"
पुष्पाणां चापः । पुष्पधनुः । यथा, रघौ ।११।४५।
"आततज्यमकरोत् स संसदा
विस्मयस्तिमितनेत्रमीक्षितः ।
शैलसारमपि नातियत्नतः
पुष्पचापमिव पेशलं स्मरः ॥")
पुष्पचामरः, पुं, (पुष्पं चामर इवास्य ।) दमन-वृक्षः । इति त्रिकाण्डशेषः ॥ केतकवृक्षः । इति शब्दमाला ॥
पुष्पदः, पुं, (पुष्पं ददातीति । दा + कः ।) वृक्षः । इति हेमचन्द्रः । ४ । १८० ॥ पुष्पदातरि, त्रि ॥
पुष्पदन्तः, पुं, (पुष्पमिव शुक्लो दन्तोऽस्य ।) वायु-कोणस्थदिग्गजः । इत्यमरः ।१।३।४॥ विद्याधर-विशेषः । इति मेदिनी । ते, २१३ ॥ जिनभेदः । इति हेमचन्द्रः ॥ नागभेदः । इति धरणिः ॥ (यथा, महाभारते । १ । २०० । ७० ।
"अर्णौ क्लवेलपुत्त्रश्च पुष्पदन्तश्च नागकः ॥"
पार्व्वतीप्रदत्तः कार्त्तिकेयस्यानुचरविशेषः । यथा महाभारते । ९ । ४५ । ४९ ।
"उन्मादं पुष्पदन्तञ्च शङ्कुकर्णं तथैव च ।
प्रददावग्निपुत्त्राय पार्व्वती शुभदर्शना ॥"
विष्णोरनुचरविशेषः । यथा,भागवते ।८।२१।१७।
"जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥"
शिवगणभेदः । यथा, कथासरित्सागरे ।१।४९।
"प्रसादवित्तकः शम्भोः पुष्पदन्तो गणोत्तमः ।
न्यषेधि च प्रवेशोऽस्य नन्दिना द्वारि तिष्ठता ॥"
पुष्पदन्तकः, पुं, गन्धर्व्वविशेषः । स च महिम्न स्तवकर्त्ता । इति शब्दरत्नावली ॥
पुष्पद्रवः, पुं, (पुष्पाणां द्रवः ।) पुष्परसः । तत्पर्य्यायः । पुष्पसारः २ पुष्पस्वेदः ३ पुष्पजः ४ पुष्पनिर्यासकः ५ पुष्पाम्बुजः ६ । अस्य गुणाः । सुरभित्वम् । शीतत्वम् । कषायत्वम् । गौल्य त्वम् । दाहभ्रमार्त्तिवमिमोहसुखामयतृष्णार्त्ति पित्तकफदोषचिरारोचकनाशित्वम् । सरत्वम् सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ॥
पुष्पधन्वा, [न्] पुं, (पुष्पं धनुरस्येति । "धनुषश्च ।" ५ । ४ । १३२ । इति अनङादेशः ।

कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, कुमारसम्भवे । ३ । ६४ ।
"सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥")

पुष्पनिचः, पुं, (पुष्पं निचति चुम्बतीति । पुष्प + निच + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पुष्पन्धयः, पुं, (पुष्पं धयतीति । धेट पाने + खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६।३।६७। इति मुम् ।) भ्रमरः । इति राजनिर्घण्टः ॥ पुष्परसपानकर्त्तरि, त्रि । पुष्पशब्दाद्धेटधातोः कर्त्तरि खश्प्रत्यय-निष्पन्नत्वात् । इति मुग्धबोधव्याकरणम् ॥

पुष्पपथः, पुं, (पुष्पस्य स्त्रीरजसः पन्थाः सरणिः ।) योनिः । इति त्रिकाण्डशेषः ॥

पुष्पपुरं, क्ली, (पुष्पवत् पाटलिपुष्पयुक्तं तद्वत् शोभाजनकं वा पुरम् ।) पाटलिपुत्त्रनगरम् । इति भूरिप्रयोगः ॥ (यथा, रघौ । ६ । २४ ।
"अनेन चेदिच्छसि गृह्यमाणं
पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥"
"पुष्पपुराङ्गनानां पाटलिपुराङ्गनानाम् ।" इति तट्टीकायां मल्लिनाथः ॥)

पुष्पफलः, पुं, (पुष्पयुक्तं फलं यस्य ।) कुष्माण्डः । इति शब्दमाला ॥ कपित्थः । इत्यमरः ।२।४।२१॥

पुष्पमासः, पुं, (पुष्पाणां मासः पुष्पप्रधानो मासो वा ।) वसन्तः । इति राजनिर्घण्टः ॥ (यथा, हरिवंशे । ५६ । ४ ।
"मासान् वै पुष्पमासादीन् गणयन्तु मम स्त्रियः ।
परिणामे तु गर्भस्य शेषं ज्ञास्यामहे वयम् ॥")

पुष्परक्तः, पुं, (पुष्पे पुष्पावच्छेदे रक्तं रक्तवर्ण-मस्य । यद्वा, पुष्पं रक्तमस्य ।) सूर्य्यमणि-वृक्षः । इति शब्दचन्द्रिका ॥

पुष्परसः, पुं, (पुष्पाणां रसः ।) मकरन्दः । इत्यमरः । २ । ४ । १७ ॥ (यथा, भावप्रकाशे कासाधिकारे ।
"फलं फलञ्चापि कटुत्रयञ्च
तथा चतुर्जातफलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तच्च विमिश्रयेच्च ॥")

पुष्परसाह्वयं, क्ली, (पुष्परस इत्याह्वय आख्या यस्य ।) मधु । इति राजनिर्घण्टः ॥

पुष्परागः, पुं, (पुष्पस्येव रागो वर्णोऽस्य ।) मणिविशेषः । पुखराज इति भाषा । तत्-पर्य्यायः । मञ्जुमणिः २ वाचस्पतिवल्लभः ३ । इति भावप्रकाशः ॥ पीतः ४ पीतस्फटिकः ५ पीतरक्तः ६ पीताश्म ७ गुरुरत्नम् ८ पीत-मणिः ९ पुष्पराजः १० ॥ (यथा, रघौ ।१८।३२।
"तस्य प्रभा निर्ज्जितपुष्परागं
पौष्यान्तिमौ पुष्यमसूत पत्नी ॥"
"प्रभया निर्ज्जितः पुष्परागो मणिविशेषो येन ।" इति तट्टीकायां मल्लिनाथः ॥) अस्य गुणाः । अम्लत्वम् । शीतत्वम् । वातनाशित्वम् । दीपनत्वञ्च ॥ * ॥ तस्य धारणगुणः । आयुःश्रीप्रज्ञा-कारित्वम् ॥ * ॥ तस्य लक्षणं यथा,—
"सुच्छायपीतगुरुगात्रसुरङ्गशुद्धं
स्निग्धञ्च निर्म्मलमतीव सुवृत्तशीतम् ।
यः पुष्परागसकलं कलयेत्तस्य
पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान् ॥" * ॥
तस्य कुलक्षणं यथा,—
"कृष्णविन्दूक्षितं रूक्षं धवलं मलिनं लघु ।
विच्छायं शर्कराकारं पुष्परागं सदोषकम् ॥"
तस्य परीक्षालक्षणं यथा, राजनिर्घण्टे ।
"घृष्टो निकषाश्मनि पुष्परागमधिकमात्मीयम् ।
न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः ॥"
तस्योत्पत्त्यादि यथा,—
सूत उवाच ।
"पतिता या हिमाद्रौ हि त्वचस्तस्य सुरद्विषः ।
प्रादुर्भवन्ति ताभ्यस्तु पुष्परागा महागुणाः ॥
आपीतपाण्डुरुचिरः पाषाणः पुष्परागसंज्ञस्तु ।
कौरण्टकनामा स्यात् स एव यदि लोहितापीतः ॥
आलोहितस्तु पीतः स्वच्छः काषायकः स एवोक्तः ।
आनीलशुक्लवर्णः स्निग्धः सोमालकः स्वगुणैः ॥
अत्यन्तलोहितो यः स एव खलु पद्मरागसंज्ञः स्यात् ।
अपि चेन्द्रनीलसंज्ञः स एव कथितः सुनीलः सन् ॥
मूल्यं वैदूर्य्यमणेरिव गदितं स्यस्य रत्नशास्त्रविदा ।
धारणफलञ्च तद्वत् किन्तु स्त्रीणां सुतप्रदो भवति ॥"
इति गारुडे ७५ अध्यायः ॥ * ॥
प्रकारान्तरम् ।
"शाणपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः ।
पुत्त्रदो धनदः पुण्यः पुष्परागमणिर्धृतः ॥
दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा ।
पद्मरागाकरे कश्चित् कश्चित्तार्क्ष्योपलाकरे ॥
ईषत्पीतच्छविच्छायास्वच्छं कान्त्या मनोहरम् ॥
पुष्परागमिति प्रोक्तं रङ्गसोममहीभुजा ॥
ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् ।
छाया चतुर्व्विधा तस्य सिता पीता सितासिता ॥"
इति युक्तिकल्पतरुः ॥

पुष्परेणुः, पुं, (पुष्पाणां रेणुः ।) परागः । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ३८ ।
"सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥")

पुष्परोचनः, पुं, (पुष्पं रोचनेवास्य । पुष्पेषु रोचते रुचिप्रदो वा ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

पुष्पलावः, पुं, (पुष्पं लुनाति अवचिनोति माला-द्यर्थमिति । पुष्प + लू + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) मालाकारः । इति जटाधरः ॥ (स्त्रियां ङीष् । मालाकारपत्नी । यथा, मेघदूते । २८ ।
"गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥")

पुष्पलावी, [न्] पुं, (पुष्पं लुनातीति । लूञ् छेदने + णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पलिट्, [ह्] पुं, (पुष्पं लेढीति । लिह + क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥

पुष्पवती, स्त्री, (पुष्पमस्त्यस्या इति । पुष्प + मतुप् । मस्य वः । ततो ङीप् ।) रजस्वला । इत्यमरः । २ । ६ । २० ॥ (यदुक्तं,—
"कालमेही भवेत् सोऽपि पुष्पवत्याश्च घर्षणात् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । १२ ।
"पुष्पवत्यामुपस्पृश्य त्रिरात्रोपषितो नरः ।
गोसहस्रफलं लब्ध्वा पुनाति स्वकुलं नृप ।॥")
पुष्पविशिष्टे, त्रि ॥ (यथा, रामायणे ।२।६४।१०।
"पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥")

पुष्पवन्तौ, पुं, (पुष्प विकासे + भावे घञ् । पुष्पो विकासोऽस्त्यनयोरिति । पुष्प + मतुप् । मस्य वः ।) एकयोक्त्या चन्द्रसूर्य्यौ । इत्यमरः ।१।४।१०॥
"एकया उक्त्या अपृथग्वचनेन चन्द्रार्कौ पुष्प-वच्छब्दवाच्यौ न तु पुष्पवानिन्दुः सूर्य्यो वेत्यभि-धीयते । साक्षे । एकयोक्त्येति भिन्नप्रयोगे नैवे-त्यर्थः । अतएव द्व्यर्थकत्वात् सदा द्विवचन-मित्यर्थः । पुष्पो विकाशस्तद्योगाद्वृत्तुः । पुष्प-वन्तशब्दोऽदन्तो रूढोऽपि रविशशिनौ पुष्प-वन्तावथाविति नाममाला ।" इति तट्टीकायां भरतः ॥

पुष्पवाटी, स्त्री, (पुष्पाणां वाटी ।) पुष्पोद्यानम् । फुलवागान इति भाषा ॥ यथा, हेमचन्द्रः । ४ । १७९ ॥
"वाटी पुष्पाद्वृक्षाच्चासौ क्षुद्रारामः प्रसे- [विका ॥"

पुष्पवाहनः, पुं, (पुष्पं पुष्करं वाहनमिव यस्य ।) पुष्करराजः । यथा, अग्निपुराणे ।
"राजा यथोक्तञ्च पुनरकरोत् पुष्पवाहनः ।
विभूतिद्वादशीं कृत्वा स गतः परमां गतिम् ॥"

पुष्पशकटी, स्त्री, आकाशवाणी । यथा,—
"चित्रोक्तिः पुष्पशकटी देवप्रश्न उपश्रुतिः ॥"
इति त्रिकाण्डशेषः ॥

पुष्पशरः, पुं, (पुष्पाणि शरा यस्य ।) कन्दर्पः । कुसुमेषुदर्शनात् ॥

पुष्पशरासनः, पुं, (पुष्पं शरासनं धनुर्यस्य ।) कन्दर्पः । पुष्पधन्वदर्शनात् ॥

पुष्पशून्यः, पुं, (पुष्पेण शून्यः ।) उडुम्बरः । इति राजनिर्घण्टः ॥ कुसुमरहिते, त्रि ॥

पुष्पसमयः, पुं, (पुष्पाणां समयः ।) वसन्तः । इत्यमरः ॥

पुष्पसारः, पुं, (पुष्पस्य सारः ।) पुष्पद्रवः । इति राजनिर्घण्टः ॥ (पुष्पश्रेष्ठे, त्रि । यथा, ब्रह्म-वैवर्त्ते प्रकृतिखण्डे ।
"पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥")

पुष्पसौरभा, स्त्री, (पुष्पे सौरभं यस्याः । तीव्रगन्धवत्त्वादेव तथात्वम् ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥

पुष्पस्वेदः, पुं, (पुष्पाणां स्वेदः ।) पुष्पद्रवः । इति राजनिर्घण्टः ॥

पुष्पहासा, स्त्री, (पुष्पं स्त्रीरजः हास इव यस्याः ।) रजस्वला । इति शब्दरत्नावली ॥

पुष्पहीना, स्त्री, (पुष्पेण हीना ।) उडुम्बरवृक्षः । इति शब्दचन्द्रिका ॥ निष्फला । रजःशून्या । इति हेमचन्द्रः ॥

पुष्पा, स्त्री, (पुष्पं अभिधेयत्वेनास्त्यस्या इति । अच् । टाप् ।) कर्णपुरी । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । चम्पा २ मालिनी ३ । इति त्रिकाण्डशेषः ॥

पुष्पाजीवः, पुं, (पुष्पैराजीवति जीविकां निर्व्वाहयतीति । आ+जीव+अच् ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पाजीवी, [न्] पुं, (पुष्पैराजीवतीति । आ+जीव+णिनिः ।) मालाकारः । इति जटाधरः ॥

पुष्पाञ्जनं, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य अञ्जनम् ।) अञ्जनभेदः । तत्पर्य्यायः । पुष्पकेतु २ कौसुम्भम् ३ कुसुमाञ्जनम् ४ रीतिकम् ५ रीतिपुष्पम् ६ पौष्पकम् ७ । तस्य गुणाः । हिमत्वम् । पित्तहिक्कास्रदाहविषकासार्त्तिसर्व्वनेत्रामयनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुष्पाञ्जलिः, पुं, (पुष्पाणामञ्जलिः ।) कुसुमाञ्जलिः । प्रसूनाञ्जलिः । यथा,—

"पञ्च पुष्पाञ्जलीन्दत्त्वा परिवारार्च्चनञ्चरेत् ॥"

इति तन्त्रसारधृतभट्टः ॥

पुष्पावचायी, [न्] पुं, (पुष्पं अवचिनोतीति । अव+चि+णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पासवं, क्ली, (पुष्पस्य आसवम् ।) मधु । इति राजनिर्घण्टः ॥ (यथा, ऋतुसंहारे । ५ । ५ ।

"गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः ॥")

पुष्पास्त्रः, पुं, (पुष्पमस्त्रमस्य ।) कन्दर्पः । इति शब्दरत्नावली ॥

पुष्पाह्वा, स्त्री, (पुष्पैराह्वयते स्पर्द्धते इति । आ+ह्वे+कः । ततष्टाप् ।) शतपुष्पा । इति राजनिर्घण्टः ॥

पुष्पिका, स्त्री, (पुष्प्यति विकसतीवेति । पुष्प+ण्वुल् । टापि अत इत्वम् ।) दन्तमलम् । इति हारावली । १६५ ॥ लिङ्गमलम् । इति हेमचन्द्रः । ३ । २६८ ॥ अध्यायान्ते तत्प्रतिपादितोक्तिः ॥

पुष्पितः, त्रि, (पुष्प+क्तः । पुष्पं जातमस्येति । पुष्प+तारकादित्वात् इतच् वा ।) जातपुष्पः । पुष्पविशिष्टः । कुसुमितः । यथा,—

"एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा ॥"

इति चाणक्यः ॥

पुष्पिताग्रा, स्त्री, (पुष्पितं विकसितमिवाग्रं यस्याः ।) छन्दोविशेषः । तस्य लक्षणम् । यथा,—

"अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥"

उदाहरणम् ।

"करकिसलयशोभया विभान्ती
कुचफलभारविनम्रदेहयष्टिः ।
स्मितरुचिरविलासपुष्पिताग्रा
व्रजयुवतिव्रततौ हरेर्मुदेऽभूत् ॥"

इति छन्दोमञ्जरी ॥

पुष्पेषुः, पुं, (पुष्पं इषुर्य्यस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥ (यथा, कथासरित्सागरे । ७ । १६ ।

"तुल्याभिलाषामालोक्य स चैकां मुनिकन्यकाम् ।
ययावकस्मात् पुष्पेषुशराघातरसज्ञताम् ॥")

पुष्यः, पुं, (पुष्यन्त्यस्मिन्नर्था इति । पुष+"पुष्यसिद्धौ नक्षत्रे ।" ३ । १ । ११६ । इति क्यप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टमनक्षत्रम् । तत्तु बाणाकारैकतारात्मकम् । इति ज्योतिषम् ॥ तत्पर्य्यायः । सिध्यः २ तिष्यः ३ । इत्यमरः । १ । ३ । २२ ॥ पुष्या ४ । इति भरतः ॥ (यथा, मनुः । ४ । ९६ ।

"पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्जनं द्विजः ॥")

तस्य स्वरूपं यथा,—

"बालपीठकठिनीरजःप्रभे
मध्यमाश्रितविहायसं गुरौ ।
मौलिकान पृषतश्रावलोचने
लोचनाङ्किकुमितागताः कलाः ॥"२।५२॥

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥*॥

तत्र जातस्य फलम् ।

"प्रसन्नगात्रः पितृमातृभक्तः
स्वधर्म्मयुक्तोऽभिनयाभियुक्तः ।
भवेन्मनुष्यः खलु पुष्यजन्मा
सम्मानचामीकरवाहनाढ्यः ॥"

इति कोष्ठीप्रदीपः ॥

तन्नक्षत्रे गङ्गास्नानफलं यथा,—

"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः ।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत् ॥"

इति ब्रह्माण्डपुराणम् ॥ * ॥

पौषमासः । कलियुगः । इति मेदिनी । ये, ३८ ॥ (कुशवंशीयनृपविशेषः । यथा, रघुः । १८ । ३२ ।

"तस्य प्रभानिर्ज्जितपुष्परागं
पौष्यां तिथौ पुष्यमसूत पत्नी ।
तस्मिन्नपुष्यन्नुदिते समग्रां
पुष्टिं जनाः पुष्य इव द्वितीये ॥"

पुष+भावे क्यप् । पुष्टिः । यथा, ऋग्वेदे । १ । १६१ । १२ ।

"त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्यमक्षन् ॥"

"विषस्यासादावरकस्य पुष्यं पोषमक्षन् ।" इति तद्भाष्ये सायनः ॥)

पुष्यरथः, पुं, (पुष्य इव रथः । पुष्ये यात्रोत्सवादौ रथो वा ।) यत् चक्रयानं युद्धार्थं न भवति किन्तु यात्रोत्सवादौ सः । तत्पर्य्यायः । चक्रयानम् २ । इत्यमरः । २ । ८ । ५१ ॥ (यथा, माघे । ३ । २२ ।

"मञ्जारथः पुष्यरथं रथाङ्गी
क्षिप्रं क्षपानाथ इवाधिरूढः ॥")

पुष्यलकः, पुं, (पुष्यं पुष्टिं लकति आकयति वा । लक+अच् ।) गन्धमृगः । (यथा,—

"कंशेषु चमरीं हन्ति सीम्नि पुष्यलको हतः ॥"

इति व्याकरणम् ॥)

क्षपणकः । कीलः । इति मेदिनी । के, १६६ ॥

पुष्यस्नानं, क्ली, (पुष्ये पुष्यनक्षत्रकाले स्नानम् ।) पुष्याभिषेकः । तस्य विधिर्यथा,—

और्व्व उवाच ।

"शृणु राजन् । प्रवक्ष्यामि पुष्यस्नानविधिक्रमम् ।
येन विज्ञातमात्रेण विघ्ना नश्यन्ति सन्ततम् ॥
पौषे पुष्यर्क्षगे चन्द्रे पुष्यस्नानं नृपश्चरेत् ।
सौभाग्यकल्याणकरं दुर्भिक्षमरकापहम् ॥
विष्ट्यादिदुष्टकरणे व्यतीपाते च वैधृतौ ।
वज्रे शूले हर्षणादौ योगे यदि न लभ्यते ॥
तृतीयायुक्तपुष्यर्क्षे रविसौरिकुजेऽहनि ।
तदा समस्तदोषाणां तत्स्नानं हानिकारकम् ॥
ग्रहदोषाश्च जायन्ते यदि राष्ट्रेषु चेतयः ।
तदा पुष्यर्क्षमात्रे तु कुर्य्यान्मासान्तरेऽपि तत् ॥
इयन्तु ब्रह्मणा शान्तिरुद्दिष्टा गुरवे पुरा ।
शक्रार्थं सर्व्वदेवानां शान्त्यर्थञ्च जगत्पते ! ॥*॥
तुषकेशास्थिवल्मीककीटदंशादिवर्ज्जिते ।
शर्कराक्षिभस्मादिदोषेण परिवर्जिते ॥
काकोलूककङ्कैश्च काकोलैर्गृध्रश्येनकैः ।
वर्जिते कण्टकिवनविभीतकविवर्जिते ॥
शिग्रुश्लेष्मातकाभ्याञ्च जलौकाद्यैर्विवर्जिते ।
सुस्थाने चम्पकाशोकवकुलादिविभूषिते ॥
हंससारसचक्राह्वैर्युते सरस्तीरेऽथवा शुचौ ।
पुष्यस्नानाय नृपतिर्गृह्णीयात् स्थानमुत्तमम् ॥
ततः पुरोहितो राजा नानावादित्रनिःस्वनैः ।
प्रदोषसमये गच्छेत्तत्स्थानं पूर्व्ववासरे ॥
तस्य स्थानस्य कौवेर्य्यां दिशि स्थित्वा पुरोहितः ।
सुगन्धचन्दनैः पानैः कर्पूराद्यधिवासितैः ॥
गोरोचनाभिः सिद्धार्थैरक्षतैश्च फलादिभिः ।
गन्धद्वारेत्यादिभिस्तु मन्त्रैः सर्व्वाधिवासिकैः ।
अधिवास्य तु तत् स्थानं पूजयेत्तत्र देवताः ॥
गणेशं केशवं शक्रं ब्रह्माणञ्चापि शङ्करम् ।
उमया सहितं देवं सर्व्वाश्च गणदेवताः ।
मातृश्च पूजयेत्तत्र नृपतिः सपुरोहितः ॥
मङ्गलान् सकलान् कृत्वा नानानैवेद्यसञ्चयम् ।
प्रदद्यात् पायसं स्वादु फलं मोदकयावकौ ॥
अधिवास्य तु तत् स्थानं दूर्व्वासिद्धार्थकाक्षतैः ।
तस्मात् स्थानात्तु भूतानि:सारयेन्मन्त्रमीरयन् ॥
अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन स्नानमेतत् करोम्यहम् ॥
ततः करौ पुटीकृत्य मन्त्रेणानेन पार्थिवः ।
आवाहयेदिमान्देवान् पूज्यान् पुष्याभिषेकतः ।
आगच्छन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः ।

दिशोऽभिपालकाः सर्व्वे ये चान्येऽप्यंशभागिनः ।
ततः पुष्पाञ्जलिं दत्त्वा पुनर्मन्त्रं पठेदिमम् ॥
अत्र तिष्ठन्तु विबुधाः स्थानमाधाय मामकम् ।
ततः पूजां प्राप्य यातारो दत्त्वा शान्तिं महीभुजे ॥
तत्र तां नृपती रात्रिं नयेत्तु सपुरोहितः ।
स्वप्ने शुभाशुभं विद्यान्नृपस्तु सपुरोहितः ॥
कृत्वा पूजान्तु देवानां रात्रौ स्थाने नृपः स्वपेत् ।
शुभाशुभफलं स्वप्ने ज्ञेयं दोषज्ञसम्मतैः ॥
दुःस्वप्नदर्शनं चेत् स्यात्तदा पुष्याभिषेचने ।
होमं चतुःशतं कुर्य्याद्दद्याच्चापि गवां शतम् ॥
नागवाजिकुञ्जराणाञ्च प्रासादस्य गिरेस्तरोः ।
आरोहणं शुभकरं राज्यश्रीवृद्धिकारकम् ॥
दधिदेवसुवर्णानां भुजगस्य च दर्शनम् ।
वीणादूर्व्वाक्षतफलपुष्पचन्दनविलेपनम् ॥
सितांशुकच्छत्रध्वजानां पद्मस्य सुहृदां तथा ।
लाभः जयकरः शत्रोरलङ्कारस्य भूभृतः ॥
दर्शनञ्चोपरागस्य निगडेनास्य बन्धनम् ।
मांसस्य भोजनञ्चैव पर्व्वतस्य विवर्त्तनम् ॥
नाभिमध्ये तरूत्पत्तिर्म्मृतं प्रत्यगुरोदनम् ।
अगम्यागमनं कूपपङ्कगर्त्तावतीर्णता ॥
पर्व्वतस्य तथा नद्याः प्रोत्तारः प्राग्नुकर्त्तनम् ।
स्वपुत्त्रमरणञ्चैव पानं रुधिरमद्ययोः ॥
भोजनं पायसस्यापि मनुष्यारोहणं तथा ।
कल्याणसुखसौभाग्यराज्यप्राप्तिजयांस्तथा ।
एते स्वप्नाश्च कुर्व्वन्ति नृपस्य नृपसत्तम । ॥
खरोष्ट्रमहिषाणान्तु आरोहो राज्यनाशकः ।
नृत्यं गीतं तथा हास्यं पाठश्चाप्यशुभप्रदः ॥
रक्तवस्त्रपरीधानं रक्तमाल्यानुरञ्जनम् ।
रक्तां कृष्णां स्त्रियञ्चैव कामयन् मृत्युमाप्नुयात् ॥
कूपान्तरे प्रवेशश्च दक्षिणाशागतिस्तथा ।
पङ्के निमज्जनं स्नानं भार्य्यापुत्त्रधनाशनम् ॥
नाभौ यस्य भवेत् स्वप्ने तरूत्पत्तिर्नृपस्य च ।
आदाय गर्भनाडीन्तु शकुनो याति खं द्रुतम् ।
स तु राज्यान्तरं प्राप्य महाकल्याणमाप्नुयात् ॥
दीर्घं विंशतिहस्तन्तु हस्तषोड़शविस्तृतम् ।
कुर्य्यात्तु लक्षणोपेतं यज्ञमण्डलमुत्तमम् ॥
ततोऽपरेऽह्नि पूर्व्वाह्ने मातृणां पूजनञ्चरेत् ।
कुशलम्! वसोर्धारां वृद्धिश्राद्धं तथैव च ॥
चन्दनागुरुकस्तूरीधूपकर्पूरपूर्व्वकैः ।
सम्पूज्य मण्डलस्थानं तस्मिन् ह्रीं शम्भवे नमः ॥
अस्त्राय हुं फडित्येवं लिखेन्मन्त्रद्वयं बुधः ।
मन्त्रविन्मण्डलञ्चैव सूत्रैः कमलसम्भवैः ॥
कौषेयैर्व्वा स्वस्तिकाख्यं प्रथमं मण्डलं लिखेत् ।
चतुर्हस्तप्रमाणन्तु मण्डलं विलिखेत्ततः ॥
हस्तप्रमाणं पद्मन्तु मण्डलस्य प्रकीर्त्तितम् ।
द्वाराणि सार्द्धहस्तानि कर्णिकार्कशरोन्मितम् ॥
सितं रक्तञ्च पीतञ्च कृष्णं हरितमेव च ।
शालिचूर्णैस्तु कौसुम्भैर्हारिद्रैर्हारिद्रवैः ॥
कुर्य्यात्तथाञ्जनैश्चूर्णैं राजा मण्डलवृद्धये ।
पश्चात्ततः समारभ्य नालां पश्चिमगामिनीम् ॥
पश्चिमद्वारमध्येन शतहस्तां विनिर्द्दिशेत् ।
प्रत्येकद्वारमध्ये तु पद्मञ्चैवाष्टपत्त्रकम् ॥
कुर्य्यान्मण्डलभागे तु चूर्णैरेव पृथक् पृथक् ।
चूर्णैस्तु मण्डलं कृत्वा सूत्राण्युत्सारयेत्ततः ॥
उत्थाप्य सूत्रं प्रथमं मण्डलं पूजयेत्ततः ।
भवनाय नम इति ततो हस्तं वियोजयेत् ॥
सव्यावलम्बहस्तस्तु रजःपातं समारभेत् ।
मध्यमानामिकाङ्गुष्ठैरुपरिष्टाद्यथेच्छया ॥
अधोमुखाङ्गुलिं कृत्वा पातयेत् सुविचक्षणः ।
समरेखा तु कर्त्तव्या विच्छिन्ना पुञ्जवर्ज्जिता ।
अङ्गुष्ठपर्व्वनैपुण्यात् समा कार्य्या विजानता ॥
संसक्तं विषमं स्थूलं विच्छिन्नं कृशराष्टनम् ।
पर्य्यन्तमर्पितं ह्रस्वमालिखेन्न कदाचन ।
संसक्ते कलहं विद्यादूर्द्ध्वरेखे तु विग्रहम् ॥
अतिस्थूले भवेद्व्याधिर्नित्यपीड़ा विमिश्रिते ॥
विन्दुभिर्भयमाप्नोति शत्रुपक्षान्न संशयः ।
कृशायां चार्थहानिः स्याच्छिन्नायां मरणं ध्रुवम् ॥
वियोगो वा भवेत्तस्य इष्टद्रव्यसुतस्य वा ॥
अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ॥
सितसर्षपदूर्व्वाढ्या रेखाः कार्य्याः प्रमाणतः ।
विमलं विजयं भद्रं विमानं शुभदं शिवम् ॥
वर्द्धमानञ्च दैवञ्च रताख्यं कामदायकम् ।
रुचकं स्वस्तिकाख्यञ्च द्वादशैते तु मण्डलाः ॥
यथास्थानं यथायत्नं योजनीया विचक्षणैः ॥
सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः ।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलां कलान्तु देवानामसित्वा ते पृथक् पृथक् ।
यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत ।
गोह्योपगोह्यौ मरुतो मयूखश्च तथापरः ॥
मनोहा त्वसिभद्रश्च विरुजस्तनुशोषकः ।
इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्भूप । नव नामानि यानि तु ।
श्रद्धया तान्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः ।
पवनाग्नी ततो द्वौ तु यजमानस्ततः परः ॥
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ।
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः ।
विजयो नाम कलसो योऽसौ नवम उच्यते ।
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक् ॥
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयन्तथा ।
यथाकाष्ठास्थितः सम्यक् वामदेवादिनामतः ।
मण्डलस्य च पद्मान्तः पञ्चवक्त्रं घटं न्यसेत् ॥
क्षितीन्द्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम् ।
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ॥
नैर्ऋत्यां यजमानन्तु ऐशान्यां कोषसम्भवम् ।
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्यैव कलसांश्चैव तेषु चैतान् विचिन्तयेत् ।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः ॥
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वा वेष्टयन्ति दिशो दश ॥
कुक्षौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ।
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ॥
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च ।
कलसेषु स्थिताः सर्व्वे तेषु तानपि चिन्तयेत् ॥
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ।
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः ॥
सर्व्वधाममयं बिल्वं नागरोडम्बरं तथा ।
बीजपूरकजम्बीरकाश्मीराम्रानदाड़िमान् ॥
यवं शालिञ्च नीवारं गोधूमं सितसर्षपम् ।
कुङ्कुमागुरुकस्तूरीमदनं रोचनं तथा ॥
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ।
कर्पूरं पञ्चपल्लवञ्च जलं निर्य्यासकाम्बुदम् ॥
शैलेयं बदरं जातीपत्त्रपुष्पे तथैव च ।
कालशाकं तथा पृक्कां देवीं पूर्णकमेव च ॥
वचां धात्रीं समाक्रान्तां तुवर्कां मङ्गलाष्टकम् ।
दूर्व्वां मोहनिकां भद्रां शतमूलीं शतावरीम् ॥
पर्णां सवलां क्षुद्रां सहदेवां गजाह्वयाम् ।
पूर्णकोषां सितां पाठां गुञ्जां शिरसिकाञ्जलौ ॥
श्यामकं गजदन्तञ्च शतपुष्पां पुनर्नवाम् ।
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसन्धानिकां तथा ।
समाहृत्य शुभान्येतान् कलसेषु निधापयेत ॥
कलसस्य यथादेशं विधिं शम्भुं गदाधरम् ।
यथाक्रमं पूजयित्वा शम्भुं सुव्यक्तया यजेत ॥
प्रासादेन तु मन्त्रेण शम्भुमन्त्रेण शङ्करम् ।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ।
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ॥
पूर्व्वं बहिःस्थापितेषु ग्रहाणां कलसेषु च ।
नवग्रहान् पूजयेत्तु मातृमांस्तघटेषु च ॥
सर्व्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक ।
नवैव तत्र पूर्व्वोक्ताः सदा सुव्यतमा नृप । ॥*॥
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ।
यावकैः पायसैश्चापि यथासम्भवयोजितैः ।
पुष्यस्नानाय नृपतिः पूजयेत सकलान् सुरान् ॥
दक्षिणे मण्डलस्याथ कुण्डं निर्म्माय पायसैः ।
समिद्भिः शालिसिद्धार्थैर्घृतैर्दर्व्वाक्षतैस्तथा ।
केवलैश्च तथैवाज्यैः पूजयेत सकलान् सुरान् ॥
होमान्ते तोषयेद्वृद्धैर्नृपः सार्द्धं पुरोहितम् ॥
होमान्ते मण्डलोदीच्यां वेदिकाया सपट्टकम् ।
रोचनाख्यमलङ्कारान् तथा सर्व्वान्नियोजयेत् ॥
दृष्ट्वा चाङ्गुलमङ्गुष्ठं द्विदशाङ्गुलयावधि ।
वृत्तं वा चतुरस्रं वा पद्मकत्रिकसंहितम् ।
रत्नेशान् पद्ममध्ये तु गोस्वास्तिकविनायकैः ॥
श्रीः श्रीवृषा वरारोहा स्वामी देवी शुभान्विता ।
रत्नैः सर्व्वैरलङ्कारैः पट्टं कार्य्यं द्विहस्तकम् ।
हस्तविस्तारमुच्छ्रायं कर्त्तव्यन्तु दशाङ्गुलम् ॥
स्नानार्थं सार्द्धहस्तन्तु पट्टं वृत्तासनान्वितम् ।
शय्या चतुर्गुणा दीर्घां धनुर्मानन्तु पीठकम् ॥
गजसिंहकृनाटीपं हेमरत्नविभूषितम् ।
सिंहाख्यं सार्द्धविस्ताराद्धस्तासनमथापि वा ॥
व्याघ्रचित्रकपट्टैर्वा उपधानानि कारयेत ।
अन्यैर्वा निर्म्मितैश्चर्म्मन्दुतूलकपूरितान् ॥
शय्या दैर्घ्यार्द्धविस्तीर्णा चतुर्हस्ता सुलक्षणा ।

वितस्त्यधिकमिच्छन्ति नृपस्य गुरुविद्यया ॥
अर्द्धचन्द्रसमं कुर्य्यादासनं चतुरस्रकम् ।
उपधानानि शय्यायाः कर्णादिस्थलदेशतः ॥
षोडशैवात्र कार्य्याणि वर्णचित्रयुतानि च ।
यानं सिंहासनं पट्टं शय्योपकरणादिकम् ॥
राज्ञो नूतनयोग्यं तद्वेद्या उत्तरतो न्यसेत् ।
तेषान्तु पश्चिमे स्वर्णरत्नौघनिचिते वरे ॥
पर्य्यङ्के चन्द्रदार्व्वीचनिर्म्मिते मृदुरास्तरे ।
जर्णाच्छादनसंयुक्त चर्म्मोद्धृता चतुष्टयम् ॥
वृषभस्य तथोर्व्वायाः सिंहशार्दूलयोरपि ।
पादपीठे रत्नयुते पादावारोप्य पार्थिवः ॥
तस्मिन् पर्य्यङ्कपृष्ठस्थे चर्म्मखण्डचतुष्टये ।
नानालङ्कारभूषाढ्यं नृपतिं रत्नमालिनम् ॥
स्नापयेद्ब्राह्मणैः सार्द्धं राजानं सुखसङ्गतम् ।
संवीतकम्बलं शय्यां रत्नवस्त्रावशोभितम् ॥
कलसैर्व्वारिपूर्णाद्यैः शान्तिपूर्व्वञ्च स्नापयेत् ॥
अष्टौ षोडशविंशाष्टशतमष्टाधिकञ्च वा ।
कलसानां समाख्याता अधिकस्योत्तरोत्तरम् ॥
जयकल्याणदैर्मन्त्रैर्मङ्गलोक्त्यैश्च शाम्भवैः ।
वैष्णवैरथ दिक्पालैर्ग्रहमन्त्रैश्च मातृकैः ॥
आप्यं तेजः समुद्दिष्टमाप्यं पापहरं परम् ।
आप्यं सुराणामाहारमाप्ये लोकाः प्रतिष्ठिताः ॥
भौमान्तरीक्षं दिव्यं वा यत्ते कल्मषमागतम् ।
सर्व्वं तदाप्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥
ततोऽपनीय गात्रात्तु कम्बलं वस्त्रमेव च ।
कलसैः स्नापयेद्भूपं पुण्यस्नानार्थपूरितैः ।
एभिर्मन्त्रैर्नरश्रेष्ठ ! तत्त्वतस्त्वार्थसाधकैः ॥ * ॥
सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः ॥
आदित्या वसवो रुद्रा आश्विनेयौ भिषग्वरौ ।
अदितिर्द्देवमाता च स्वाहा लक्ष्मीः सरस्वती ॥
कीर्त्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रुरेव च ॥
देवपत्न्यश्च याः प्रोक्ता देवमातर एव च ।
सर्व्वास्त्वामभिषिञ्चन्तु सर्व्वे चाप्सरसां गणाः ॥
नक्षत्राणि मुहूर्त्ताश्च पक्षाहोरात्रसन्धयः ।
संवत्सरो दिवा रात्रिः कलाः काष्ठाः क्षणा लवाः ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाश्च ये ।
वैमानिकाः सुरगणा मनवः सागरैः सह ॥
सरितश्च महानागा यक्षाः किंपुरुषास्तथा ।
वैखानसा महाभागा द्विजा वैहायसास्तथा ॥
सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि तु ।
मरीचिरत्रिः पुलहः पुलस्त्यो भृगुरङ्गिराः ॥
क्रतुः सनत्कुमारश्च सनकोऽथ सनन्दकः ।
सनातनश्च दक्षश्च जगीषव्योऽथ नन्दनः ॥
एकतश्च द्वितश्चैव त्रितो जावालिकाश्यपौ ।
दुर्व्वासा दुर्व्विनीतश्च कण्वः कात्यायनस्तथा ॥
मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः ।
और्व्वः सम्वर्त्तकश्चैव च्यवनोऽत्रिः पराशरः ॥
द्वैपायनो यवक्रीतो देवरातः सहानुजः ।
एते चान्ये च बहवो देवव्रतपरायणाः ॥
सशिष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधनाः ॥
पर्व्वतास्तरवो नद्यः पुण्यान्यायतनानि च ।
प्रजापतिः क्षितिश्चैव गावो विश्वस्य मातरः ॥
वाहनानि च दिव्यानि सर्व्वे लोकाश्चराचराः ।
अग्नयः पितरस्तारा जीमूताः खं दिशो जलम् ॥
एते चान्ये च बहवः पुण्यसंकीर्त्तनाः शुभाः ।
तोयैस्त्वामभिषिञ्चन्तु सर्व्वोत्पातनिवर्हणाः ॥
इत्येवं शुभदैर्व्वाक्यैर्मन्त्रैर्दिव्यैस्तथापरैः ।
शैवैर्नारायणै रौद्रैर्ब्राह्मकसमुद्भवैः ॥
आपोहिष्ठा हिरण्येति सम्भवेति सुरेति च ।
मानस्तोकेतिमन्त्रेण गन्धद्वारेत्यनेन च ॥
सर्व्वमङ्गलमङ्गल्यैः शैवैश्च ते महायोगिभिः ।
इत्येवं स्नानमासाद्य गात्रमामृज्य कम्बलैः ॥
सर्व्वमङ्गलमन्त्रेण वस्त्रं कार्पासकं भियात् ।
आचम्य च ततो देवान् गुरुं विप्रांश्च पूजयेत् ॥
ध्वजं छत्रं चामरञ्च घण्टामश्वान् गजांस्तथा ।
मन्त्रं जप्त्वा धारयेत्तु ततो गच्छेद्धुताशनम् ॥
तत्र गत्वा वह्निमध्ये वह्निश्रीर्वीक्ष्य पार्थिवः ।
अनिमित्तनिमित्तानि लक्षयेत्तत्र विज्ञुभिः ॥
देवत्वंकञ्चुकामात्यवन्दिपौरजनैर्वृतः ।
वादित्रघोषैस्तुमुलैस्तथा तौर्य्यत्रिकैः शुभैः ॥
ज्ञात्वा शेषे पुनः शान्तिमाशीर्व्वाद्य च वै द्विजान् ।
पूर्णां विधाय विधिवद्दक्षिणां कनकान्विताम् ॥
धान्यानि चाथ वासांसि दत्त्वा कुर्य्याद्विसर्ज्जनम् ।
ततः शेषजलैः सर्व्वानमात्यादीन् पुरोहितः ।
संचयेच्चतुरङ्गञ्च बलञ्चापि सराष्ट्रकम् ॥
एवं कृत्वा नृपः पश्चात्त्रिरात्रं संयतो भवेत् ।
मांसमैथुनहीनश्च कुर्य्याच्छङ्कस्य सेवनम् ॥
पुष्यनक्षत्रयुक्ता तु तृतीया यदि लभ्यते ।
तस्यां पूज्या सदा देवी चण्डिका शङ्करेण ह ॥
पञ्चालिकाविवाहाद्यैः शिशूनां कौतुकैस्तथा ।
वैवाहिकेन विधिना मोदयेच्चण्डिकां शिवाम् ॥
चतुष्पथेषु सर्व्वेषु देवदेवीगृहेषु च ।
पताकाभिरलङ्कुर्य्यादेवं कुर्व्वन्न सीदति ॥
एवं कृत्वा शान्तियागं तथा पुष्याभिषेचनम् ।
चतुरङ्गैः समं राजा भार्य्याभिस्तनयैः सह ।
राज्यमङ्गलसंयुक्तः परत्रेह न सीदति ॥
नातः परतरो यज्ञो नातः परतरोत्सवः ।
नातः परतरा शान्तिर्नातः परतरं शिवम् ॥
अनेनैव विधानेन नृपतेरभिषेचनम् ।
युवराज्याभिषेकञ्च कुर्य्याद्राजपुरोहितः ॥
नृपाभिषेककरणमादौ यदि समाचरेत् ।
अनेनैव विधानेन स्थिरः स्यान्नृपतिस्तदा ॥
अयं यज्ञः समुद्दिष्टः शक्रार्थं ब्रह्मणा पुरा ।
एव यज्ञं नृपो दृष्ट्वा परत्रेह न सीदति ॥”

इति कालिकापुराणे पुष्याभिषेकः ८६ अध्यायः ॥

पुष्या, स्त्री, (पुष्णाति कार्य्याणीति । पुष + क्यप् यत् वा । निपातनात् साधुः । ततष्टाप् ।) पुष्यनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, इन्द्रजालतन्त्रसंग्रहे ।
“अश्विनीहस्तमूलाश्च पुष्या पुनर्व्वसुस्तथा ।
वश्याकर्षञ्च कर्त्तव्यं कारयेच्च सदा बुधः ॥”)

पुस्त, क, बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट् ।) पञ्चमस्वरी । दन्त्योपधः । क, पुस्तयति । इति दुर्गादासः ॥

पुस्तं, क्ली, (पुस्यते इति । पुस्त बन्धादरयोः + घञ् ।) लेप्यादिशिल्पकर्म्म । आदिना काष्ठपुत्तलिकाखनित्रखननादि कर्म्म गृह्यते । इति सुभूत्यादयः ॥
“मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्म्मणा ।
लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते ॥”
इत्यमरटीकायां भरतः ॥
(यथा, वाभटे कल्पस्थाने । ३ ।
“पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिभिः ॥”
पुस्यते बध्यते ग्रथ्यते इत्यर्थः आद्रियते वेति + पुस्त + घञ् ।) पुस्तकम् । इति मेदिनी ॥ (पुस्त + गौरादित्वात् ङीष् ।) स्त्रियां पुस्ती ॥

पुस्तकम्, क्ली, स्त्री, (पुस्त + स्वार्थे कन् ।) पुस्तम् । पुंथि इति भाषा । (यथा, हरिवंशे । २५६ । ७६ ।
“शुक्लाम्बरधरः श्रीमान् शुचिर्भूत्वा स्वलङ्कृतः ।
अर्च्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ॥
संहितापुस्तकान् राजन् । प्रयतः शिष्टसम्मतः ॥”)
तस्य परिमाणं यथा,—
“मानं वक्ष्ये पुस्तकस्य शृणु देवि ! समासतः ।
मानेनापि फलं विन्द्यादमाने श्रीर्हता भवेत् ॥
हस्तमात्रं मुष्टिमात्रमाबाहुद्वादशाङ्गुलम् ।
दशाङ्गुलं तथाष्टौ च ततो हीनं न कारयेत् ॥”
तस्य वेधो यथा,—
“वेधद्वयं मुष्टिहस्तं बाहुमात्रे त्रिरन्ध्रकम् ।
समभागे मध्यशानि । हस्तादौ कपरन्ध्रकम् ॥
अष्टाङ्गुलं परित्यज्य मध्ये वेधं न कारयेत् ।
प्रादेशादौ भवेद्रन्ध्रो द्व्यङ्गुले वा समाचरेत् ॥
पुस्तकस्य च आद्यन्ते यन्त्रवेधं विकल्पयेत् ।
भार्य्याहानिर्भवेदाशु धनानां वा क्षयो भवेत् ॥
दशरन्ध्रे भवेत् पीड़ा वर्त्तुलं शुभदं भवेत् ।”
चतुष्कोणे विप्रवस्तु त्रिकोणे मरणं भवेत् ॥
पुस्तककरणपत्रं यथा,—
“भूर्जे वा तेजपत्रे वा ताले वा ताड़िपत्रके ।
अगुरुणापि देवेशि ! पुस्तकं कारयेत् प्रिये ! ॥
सम्भवे स्वर्णपत्रे च ताम्रपत्रे च शङ्करि ! ।
अन्यवृक्षत्वचि देवि ! तथा कैतकिपत्रके ॥
मार्त्तण्डपत्रे रौप्ये वा वटपत्रे वरानने ।
अन्यपत्रे वसुदले लिखित्वा यः समभ्यसेत् ।
स दुर्गतिमवाप्नोति धनहानिर्भवेद्ध्रुवम् ॥”
पुस्तके वेदलिखननिषेधो यथा,—
“वेदस्य लिखनं कृत्वा यः पठेद्ब्रह्महा भवेत्
पुस्तकं वा गृहे स्थाप्यं वज्रपातो भवेद्ध्रुवम् ॥
युगभेदे पुस्तकाचरस्थदेवा यथा,—
“सत्येऽक्षरे स्थितः शम्भुः शूलपाणिस्त्रिलोचनः
प्रजापतिर्द्वापरे च त्रेतायां स्वयं एव च ।
कृते युगे पिनाकी च कलौ लिप्यक्षरे हरिः ॥’

तल्लेखकपूजाफलं यथा,—
"आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत् ।
हरिच गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः ॥
यावदक्षरसंख्यानं प्रतिपत्रे च सुन्दरि ।
तावद्युगसहस्राणि ब्रह्मलोके वसेच्चिरम् ॥"
वेतनग्रहणे लेखकस्य दोषो यथा,—
"वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं स तु ।
यावदक्षरसंख्यानं तावच्च नरके वसेत् ॥"
भूमौ पुस्तकलेखनस्थापननिषेधो यथा,—
"न भूमौ विलिखेद्विद्यां मन्त्रं न पुस्तकं लिखेत् ।
न मुद्रा पुस्तकं स्थाप्यं न सूत्रमाहरेत् तत् ॥
भूतव्ययग्रहणे चैव अक्षरं वाथ पुस्तकम् ।
भूमौ तिष्ठति देवेशि ! जन्मजन्मसु मूर्खता ।
तदा भवति देवेशि ! तस्मात्तत् परिवर्ज्जयेत् ॥"
इति योगिनीतन्त्रे तृतीयभागे सप्तमपटलः ॥*॥
तस्य दानफलं यथा,—
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज ।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात् ॥
शास्त्रदृष्ट्या जगत् सर्व्वं सम्यक् च शुभाशुभम् ।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके ।
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते ॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती ॥"
इति पाद्मोत्तरखण्डे ११७ अध्यायः ॥ * ॥
वेदशास्त्रादिदानफलं यथा,—
"वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येन लेखयित्वा यो दद्याद्याति स वैदिकम् ॥
इतिहासपुराणानि लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम् ॥"
इति गारुडे २१५ अध्यायः ॥ * ॥
भागवतदानविधानं तु पारायणशब्दे द्रष्टव्यम् ॥

पुस्तकर्म्मा, त्रि, (पुस्तं लिखनादिकं कर्म्म यस्य ।) लेप्यादिशिल्पकर्म्मकर्त्ता । इति हलायुधः ॥

पू, ङ शोधे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) शोध इह शुद्धीकरणम् । ङ, पवते पापिनं गङ्गा । इति दुर्गादासः ॥

पू, ङ य शोधे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट् ।) अयं केश्चिन्न मन्यते । ङ य, पूयते । इति दुर्गादासः ॥

पू, ञ श शोधे । इति कविकल्पद्रुमः ॥ (क्र्या०-प्वा०-उभ०-सक०-सेट् ।) ञ श, जाह्नवी नः पुनातु । पुनीते । क्वचित् आप्रत्ययस्यापि प्वादित्वात् ह्रस्व इति वररुचिः । तेन ।
"स्मरणात् पुनते पापं धारणात् पूर्व्वसञ्चितम् ।
दर्शनाल्लभते मोक्षमेतद्योगस्य लक्षणम् ॥"
इति दुर्गादासः ॥

पूगं, क्ली, (पूयते सुखमनेनेति । पू ञ पवने + "छापूखडिभ्यः कित् ।" उणा० । १ । १२३ । इति गन् कित्च ।) गुवाकफलम् । इत्यमरटीकायां रायमुकुटः ॥ (यथा, भविष्यपुराणे । तालनवमीव्रतकथायाम् ।
"पिण्डखर्ज्जूरं जातिञ्च दत्त्वा चैव हरीतकी ।
नारिकेलं तथा पूगं रम्भापक्वफलान्यपि ।
तत्र मुख्यं प्रदातव्यं तालस्य फलमुत्तमम् ॥")

पूगः, पुं, (पूयतेऽनेनेति । पूञ् + "छापूखडिभ्यः कित् ।" उणा० । १ । १२३ । इति गन् । स च कित् ।) गुवाकः । समूहः । इत्यमरः ॥ (यथा, महाभारते । ६ । २१ । १४ ।
"अनन्ततेजा गोविन्दः शत्रुपूगेषु निर्व्यथः ।
पुरुषः सनातनतमो यतः कृष्णस्ततो जयः ॥")
छन्दः । भावः । कण्टकिवृक्षः । इति शब्दरत्नावली ॥

पूगपात्रं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य आधारभूतं पात्रम् ।) पूगपीठम् । पिकदानी । इति भाषा । तत्पर्य्यायः । फरुवकम् २ । इति हारावली ॥

पूगपीठं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य पीठमाधारपात्रम् ।) पूगपात्रम् । तत्पर्य्यायः । कटकोलः २ पतद्ग्रहः ३ । इति त्रिकाण्डशेषः ॥

पूगपुष्पिका, स्त्री, (पूगसहितं पुष्पमत्रेति । पूगपुष्प + कप् । कापि अत इत्वम् ।) विवाहसम्बन्धिपुष्पताम्बूलम् । तत्पर्य्यायः । कुहलिः २ । इति त्रिकाण्डशेषः ॥

पूगफलं, क्ली, (पूगस्य गुवाकस्य फलम् ।) गुवाकफलम् । तत्पर्य्यायः । पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ सोपाकम् ६ उद्वेगम् ७ क्रमुकफलम् ८ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कषायमीषन्मधुरं किञ्चित् पूगफलं सरम् ॥")

पूगरोटः, पुं, (पूगवृक्ष इव रोटयति दीप्यते प्रकाशते इति । रुट् + अच् ।) हिन्तालवृक्षः । इति त्रिकाण्डशेषः ॥

पूज, क पूजे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) षष्ठस्वरी । क, पूजयति गुरुं लोकः । इति दुर्गादासः ॥

पूजकः, त्रि, (पूजयतीति । पूज + ण्वुल् ।) पूजाकर्त्ता । यथा, तिथ्यादितत्त्वे ।
"यत्रैव भानुस्तु वियदुदेति
प्राचीति तां वेदविदो वदन्ति ।
तथा पुरः पूजकपूज्ययोश्च
तदागमज्ञाः प्रवदन्ति तान्तु ॥"

पूजनं, क्ली, (पूज + भावे ल्युट् ।) पूजा । अर्च्चनम् । यथा,—
"क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च ।
मत्पूजनं विधानेन यदीच्छेत् परमां गतिम् ॥"
इति वराहपुराणम् ॥

पूजनी, स्त्री, (पूज्यते इति । पूज + कर्म्मणि ल्युट् । ङीप् ।) चटका । इति भरतः ॥ (ब्रह्मदत्तगृहस्थितशकुनिविहङ्गमस्त्रीविशेषः । यथा, महाभारते ।१२ । १३९ । ४—१० ।
"इहासीद् राजन् । यदृत्तं ब्रह्मदत्तनिवेशने ।
पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः ॥
काम्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी ।
पूजनी नाम शकुनिर्दीर्घकालं सहोषिता ॥
रुतज्ञा सर्व्वभूतानां यथा वै जीवजीवकः ।
सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गतापि सा ॥
अभिप्रजाता सा तत्र पुत्त्रमेकं सुवर्च्चसम् ।
समकालञ्च राज्ञोऽपि देव्यां पुत्त्रो व्यजायत ॥
तयोरर्थे कृतज्ञा सा खेचरी पूजनी सदा ।
समुद्रतीरं सा गत्वा आजहार फलद्वयम् ॥
पुष्ट्यर्थञ्च स्वपुत्त्रस्य राजपुत्त्रस्य चैव ह ॥
फलमेकं सुतायादाद्राजपुत्त्राय चापरम् ।
अमृतास्वादसदृशं बलतेजोऽभिवर्द्धनम् ॥
आदायादाय सैवाशु तयोः प्रादात् पुनःपुनः ।
ततोऽगच्छत् परां वृद्धिं राजपुत्त्रः फलाशनात् ॥"
इत्यादि तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

पूजा, स्त्री, (पूजनमिति । पूज + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च ।" ३ । ३ । १०५ । इति अङ् । ततष्टाप् ।) पूजनम् । तत्पर्य्यायः । नमस्या २ अपचितिः ३ सपर्य्या ४ अर्च्चा ५ अर्हणा ६ । इत्यमरः । २ । ७ । ३५ ॥ नुतिः ७ । इति शब्दरत्नावली ॥ (यथा, रामायणे ।२।५१।५।
"अपि रामे महाभागा मम माता यशस्विनी ।
वन्येरुपाहरत् पूजां पूजार्हे सर्व्वदेहिनाम् ॥")
तस्याः सामान्यानुष्ठानं यथा,—
"आदावृष्यादिकन्यासः करशुद्धिस्ततः परम् ।
अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च ॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम् ।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः ॥"
इति तन्त्रसारे यामलः ॥
शक्तिविषये चतुःषष्टिउपचारा यथा,—
आसनारोपणम् १ सुगन्धितैलाभ्यङ्गः २ मज्जनशालाप्रवेशनम् ३ मज्जनमणिपीठोपवेशनम् ४ दिव्यस्नानीयम् ५ उद्वर्त्तनम् ६ उष्णोदकस्नानम् ७ कनककलसस्थितसकलतीर्थाभिषेकः ८ धौतवस्त्रपरिमार्ज्जनम् ९ अरुणदुकूलपरिधानम् १० अरुणदुकूलोत्तरीयम् ११ आलेपमण्डपप्रवेशनम् १२ आलेपमणिपीठोपवेशनम् १३ चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिव्यगन्धसर्व्वाङ्गानुलेपनम् १४ केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुहरीपुन्नागकह्लारयूथीसर्व्वर्त्तुकुसुममालाभूषणम् १५ भूषणमण्डपप्रवेशनम् १६ भूषणमणिपीठोपवेशनम् १७ नवमणिमुकुटम् १८ चन्द्रशकलम् १९ सीमन्तसिन्दूरम् २० तिलकरत्नम् २१ कालाञ्जनम् २२ कर्णपालीयुगलम् २३ नासाभरणम् २४ अधरयावकः २५ प्रथमभूषणम् २६ कनकचित्रपदकम् २७ महापदकम् २८ मुक्तावलिः २९ एकावलिः ३० देवच्छन्दकः ३१ केयूरयुगलचतुष्टयम् ३२ वलयावलिः ३३ ऊर्म्मिकावलिः ३४ काञ्चीदाम ३५ कटिसूत्रम् ३६ शोभाख्याभरणम् ३७ पादकटकम् ३८ रत्ननूपुरम् ३९ पादाङ्गुरीयकम् ४० एककरे

पाशः ४१ अन्यकरेऽङ्कुशम् ४२ इतरकरे पुण्ड्रेक्षुचापः ४३ अपरकरे पुष्पबाणाः ४४ श्रीमच्छ्रीविद्यापादुका ४५ स्वसमानवेशाभिरावरणदेवताभिः सह सिंहासनारोहणम् ४६ कामेश्वरपर्य्यङ्कोपवेशनम् ४७ अमृतासवचषकम् ४८ आचमनीयम् ४९ कर्पूरवटिका ५० आनन्दोल्लासविलासहासम् ५१ मङ्गलारात्रिकम् ५२ श्वेतच्छत्रम् ५३ चामरयुगलम् ५४ दर्पणः ५५ तालवृन्तम् ५६ गन्धः ५७ पुष्पम् ५८ धूपः ५९ दीपः ६० नैवेद्यम् ६१ पुनराचमनीयम् ६२ ताम्बूलम् ६३ वन्दनञ्च ६४। इति तन्त्रसारे सिद्धयामलः ॥ * ॥ षट्त्रिंशदुपचारा यथा,—

"आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरूक्षणे।
सम्मार्जनं सर्पिरादिस्नपनावाहने तथा ॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्ककौ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके ॥
अलङ्कारा गन्धपुष्पधूपदीपास्तथैव च।
ताम्बूलादिकनैवेद्यं पुष्पमाला तथैव च ॥
अनुलेपनञ्च शय्या च चामरव्यजनन्तथा।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्ये च दानानि स्तुतिहोमप्रदक्षिणम्।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्जनम्।
उपचारा इमे ज्ञेयाः षट्त्रिंशत् सुरपूजने ॥"

इत्येकादशीतत्त्वम् ॥

अष्टादशोपचारा यथा —

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्व्वशः ॥
गन्धं पुष्पं तथा धूपं दीपमन्नञ्च दर्पणम्।
माल्यानुलेपनञ्चैव नमस्कारविसर्जने ॥
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् ॥"

अथ षोडशोपचाराः।

"पाद्यमर्घ्यं तथाचामं स्नानं वसनभूषणे।
गन्धपुष्पधूपदीपनैवेद्याचमनन्ततः ॥
ताम्बूलमर्च्चना स्तोत्रं तर्पणञ्च नमस्क्रिया।
प्रपूजयेत् प्रपूजायां उपचारांस्तु षोडश ॥"

(अन्यप्रकारषोडशोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घमाचमनीयकम्।
मधुपर्काचमनीस्नानं वसनाभरणानि च।
गन्धपुष्पधूपदीपनैवेद्यं वन्दनन्तथा ॥")

अथ दशोपचाराः।

"पाद्यमर्घ्यं तथाचामं मधुपर्काचमनन्तथा।
गन्धादयो नैवेद्यान्ता उपचारा दश क्रमात् ॥"

अथ पञ्चोपचाराः।

"गन्धादयो नैवेद्यान्ताः पूजाः पञ्चोपचारिकाः ॥"

इति तन्त्रसारः ॥

अशुच्यादेः पूजानिषेधमाह।

"अशुचिर्न महामायां पूजयेत्तु कदाचन।
अवश्यन्तु स्मरेन्मन्त्रं सोऽतिभक्तियुतो नरः ॥
दन्तरक्ते समुत्पन्ने स्मरणञ्च न विद्यते।
सर्व्वेषामेव मन्त्राणां स्मरणास्मरणं त्यजेत् ॥
जानूर्द्ध्वे चतते जाते नित्यकर्म्म न चाचरेत्।
नैमित्तिकञ्च तदधःस्रवद्रक्तो न चाचरेत् ॥
जीवके च समुत्पन्ने क्षुरकर्म्मणि मैथुने।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत् ॥
द्रव्ये भुक्ते त्वजीर्णे च नैव भुक्त्वा च किञ्चन।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम्।
कणादिपिप्पल्यन्तञ्च फलं भुक्त्वा न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ। भोजनाद्भेषजादृते।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥
जलौकां गृध्रपादञ्च कृमिगण्डूपदादिकम्।
कामाद्दृष्ट्वा संस्पृश्य नित्यकर्म्माणि संत्यजेत् ॥
विशेषतः शिवापूजां प्रमीतपितृको नरः।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत् ॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवयुतञ्च यत् ॥
गुरुमाक्षिप्य विप्रञ्च प्रहृत्यैव च पाणिना।
न कुर्य्यान्नित्यकर्म्माणि रेतःपाते च भैरव। ॥
आसनञ्चार्घ्यपात्रञ्च भग्नमासादयेन्न यत्।
ऊषरे कृमिसंयुक्ते स्थाने दृष्टेऽपि नार्च्चयेत् ॥
नीचैरासाद्य तत्स्थानं शुचिः प्रयतमानसः।
अर्च्चयेच्चण्डिकां देवीं देवमन्यञ्च भैरव। ॥
दक्षिभागे तु कौवेरी दिक् शिवाप्रीतिकारिणी।
तस्मात्तन्मुखमासीनः पूजयेच्चण्डिकां सदा ॥"

पूजास्थानानि यथा,—

"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
स्थण्डिलस्थां महामायां पादुके प्रतिमासु च ॥
चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत्।
पञ्चाशदङ्गुलं खड्गं त्रिशिखञ्च त्रिमूलकम् ॥
शिलायां पर्व्वतस्याग्रे गङ्गायामपि तत्समा।
आर्य्यावर्त्ते मध्यदेशे तथा पर्व्वतगह्वरे ॥
देवीं संपूजयेन्नित्यं भक्तिश्रद्धासमन्वितः।
वाराणस्यां सदा पूजा सम्पूर्णफलदायिनी ॥
ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ।
ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषतः ॥
सर्व्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा।
विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा ॥
आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च।
विन्ध्यवत्फलदा पूजा प्रयागे पुष्करे तथा ॥
ततश्चतुर्गुणं प्रोक्तं करतोयानदीजले।
तस्माच्चतुर्गुणफला नन्दिकुण्डे च भैरव। ॥
तस्माच्चतुर्गुणा प्रोक्ता जल्पीशेन्द्रसन्निधौ।
तत्र सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता ॥
ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपाथसि।
तत्समा कामरूपे तु सर्व्वत्रैव जले स्थले ॥
सर्व्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्व्वोत्तमा यथा।
देवीपूजा तथा शस्ता कामरूपे सुरालये ॥
देवीक्षेत्रं कामरूपं विद्यतेऽन्यन्न तत्समम्।
अन्यत्र विरला देवी कामरूपे गृहे गृहे ॥
ततः शतगुणं प्रोक्तं नीलकूटस्य मस्तके।
ततोऽपि द्विगुणं प्रोक्तं हेरुके शिवलिङ्गके ॥
ततोऽपि द्विगुणा प्रोक्ता शैलपुत्त्र्यादियोनिषु।
ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डले ॥"

इति कालिकापुराणे ।५४।५७। अध्यायौ ॥

पूजार्हणानि तत्फलानि च यथा,—

"उपविश्यासने रम्ये कृष्णाजिनकुशोत्तरे।
दारवे कम्बले वापि काशादौ धर्म्मकर्म्मणि ॥
न कुर्य्यादर्च्चनं विष्णोः शिवे काष्ठासनादिषु।
काष्ठासने वृथा पूजा पाषाणे रोगसम्भवः ॥
भूम्यासने गतिर्नास्ति वस्त्रासने दरिद्रता।
कुशासने ज्ञानवृद्धिः कम्बले सिद्धिरुत्तमा ॥
कृष्णाजिने धनं पुत्रो मोक्षः स्याद्व्याघ्रचर्म्मणि।
मन्त्रयोगं प्रकुर्व्वीत भोगार्थं सुखमासने ॥"

इति पाद्मोत्तरखण्डे ७४ अध्यायः ॥

पूजाधिकारिता प्रयोजकदेवषट्कपूजा यथा,—

"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम्।
संपूज्य देवषट्कञ्च सोऽधिकारी च पूजने ॥
गणेशं विघ्ननाशाय निष्पापाय दिवाकरम्।
वह्निं शुद्धाय विष्णुञ्च मुक्तये पूजयेन्नरः ॥
शिवं ज्ञानाय ज्ञानेशं शिवाञ्च बुद्धिवृद्धये।
संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोऽन्यथा ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः ॥

द्वादशमासे विष्णुपूजाविधिर्यथा,—

"प्रत्यहं कार्त्तिके मासि जातीपुष्पैः समर्च्चयेत्।
दद्यादखण्डदीपञ्च नियतात्मा दृढ़व्रतः।
ब्राह्मणान् भोजयित्वाथ सहस्रायुष्यमाप्नुयात् ॥
मार्गशीर्षे नवान्नेन वकपुष्पैश्च केशवम्।
समर्च्च्य भोजयेद्विप्रान् वैकुण्ठपदमाप्नुयात् ॥
धनुष्युषसि देवेशं मासमेकं निरन्तरम्।
अर्च्चयेदुपवासैश्च करवीरैः सितासितैः ॥
धूपैर्दीपैश्च नैवेद्यैर्यथाशक्त्या निवेदयेत।
समाप्तौ भोजयेद्विप्रान् महाभागवतोत्तमान् ॥
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयः ॥
तपोमास्युदिते भानौ स्नात्वा नद्यां विशेषतः।
अर्च्चयेन्माधवीपुष्पैरुत्पलैश्च शुभानने। ॥
पायसं विविधं दिव्यं भक्त्या तत्र निवेदयेत्।
मासान्ते वैष्णवान् विप्रान् भोजयेत् शक्तितो द्विजः ॥
तपस्ये च तथा देवि। माधवैः कुसुमैः शुभैः।
स्नात्वा संपूजयेद्विष्णुं मासमेकं निरन्तरम् ॥
शर्कराम्बु घृतं नित्यमपूपांश्च निवेदयेत्।
वैष्णवान् भोजयेच्छक्त्या मासान्ते शुभदर्शने। ॥
मधुमासि तथा नित्यं वकुलैश्चम्पकैरपि।
पूजयेज्जगतामीशं गुड़ान्नञ्च। निवेदयेत् ॥
मासान्ते वैष्णवान् विप्रान् भोजयेत् सुसमाहितः।
सहस्रवार्षिकं पूजाफलं नित्यमवाप्नुयात् ॥
माधवे पूजयेद्विष्णुं शतपत्रैर्महोत्पलैः।
पूजयित्वा विधानेन दध्यन्नफलसंयुतम् ॥
शुद्धोदकञ्च भक्त्या वै तस्मिन् देवि! निवेदयेत्।
लक्ष्म्या युक्तो जगन्नाथः प्रीतो भवति पार्व्वति। ॥
ज्यैष्ठे तु शुक्लकमलैः पाटलैः कुमुदोत्पलैः।
अर्च्चयित्वा हृषीकेशमन्नं चूतफलैर्युतम् ॥
निवेदयित्वा भक्त्या वै गवां कोटिप्रदो भवेत् ॥
वैष्णवान् भोजयेन्नित्यं मासान्ते भक्तसत्तमः।
ब्राह्मणांश्च शिवे! सर्व्वं फलमानन्त्यमश्नुते ॥

आषाढ़े देवताधीशं जम्बीभर्त्तारमधुताम्।
श्रीपुष्पैरर्च्चयेन्नित्यं यावत्स्वाम्नं निवेदयेत्॥
मासान्ते भोजयेद्विप्रान् महाभागवतोत्तमान्।
प्रदद्यात्तस्य पूजां प्राप्नोत्यक्षयम्॥
नभोमासार्च्चयेद्विष्णुं पुन्नागैः केतकीदलैः।
अर्च्चयित्वाच्युतं भक्त्या न भूयो जन्मभाग्भवेत्॥
दद्याद्वै पिष्टकान् भक्त्या शर्कराघृतमिश्रितान्।
ब्राह्मणान् भोजयित्वा तु सर्व्वमानन्त्यमश्नुते॥
नभस्यार्च्चयेदीशं कुन्दैः कुरुवकैरपि।
चीरान्नं गुड़मिश्रन्तु भक्त्या तत्र निवेदयेत्।
गवां कोटिप्रदानस्य फलञ्च समवाप्नुयात्॥
इषे नीलोत्पलैर्मासि पूजयेन्मधुसूदनम्।
भक्त्या निवेदयेत्तस्मिन् चीरमाज्यविमिश्रितम्॥
कन्याकोटिसहस्राणि कन्याकोटिशतानि च।
वैष्णवं लोकमाप्नोति सुदितः स्वजनैर्युतः॥
ऊर्ज्जमासे स्वयं देवि! कोमलैस्तुलसीदलैः।
पूजयित्वाच्युतं भक्त्या तत्सायुज्यमवाप्नुयात्॥"

इति पाद्मोत्तरखण्डे ७५ अध्यायः॥

श्राद्धमासादौ दुर्गापूजादि देवीपुराणे द्रष्टव्यम्॥

अथ देवपूजाविधिः।

प्रातः स्नानासामर्थ्ये आर्द्रवाससा क्षालितगात्रमार्ज्जनादिर्गृहसमीपं गत्वा प्राङ्मुख उदङ्मुखो वा प्रक्षालितपादः शुचिर्द्विवासाः कुशहस्तः स्वाचान्तः सर्व्वत्र वीरासनोपविष्टः प्राङ्मुखः रात्रावुदङ्मुख एव मौनी ध्यानपरायणः कामरागभय-दम्भक्रोध-मात्सर्य्यत्वरा-रहितस्वमनाः सुमना वा शुचौ समुपविष्टोऽनिन्द्यगन्धरहिते देशे दक्षिणपार्श्वे नैवेद्याद्युपकरणानि च वामपार्श्वे जलं पुरतो धूपदीपौ ताम्रादिपात्रञ्च यथासन्निवेशं पाद्यार्घ्याचमनीयपात्रं जलादिपूर्णमग्रतः स्थापयित्वा यथालाभं यज्ञोपवीतवस्त्रालङ्करणादि संस्थाप्य।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिपालकाः।
भूतानामविरोधेन पूजाकर्म्म करोम्यहम्॥

इत्युच्चार्य्य अस्त्राय फडिति तर्ज्जन्यङ्गुष्ठयोगध्वनिच्छोटिकया दशदिग्बन्धनं कुर्य्यात्॥ * ॥ नादेवो देवमर्च्चयेदित्यनुरोधात् सर्व्वदेवार्च्चनेषु भूतशुद्धिमाहुरागमिकाः। सा यथा,—

सोऽहमिति मन्त्रेण जीवात्मानं नाभितो हृदिस्थपरमात्मनि संयोज्य ततः पृथिवीं जले जलं तेजसि तेजो वायौ ततो वायुमाकाशे प्रवेश्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा यमिति वायुबीजेन षोड़शवारजप्तेन वाय्वाकर्षणरूपपूरकसंज्ञया वायुचिन्तनरूपया वायव्याधारणया देहं शोषयित्वा तत्रो नासापुटावङ्गुष्ठानामिकाभ्यां धृत्वा रमिति वह्निबीजेन चतुःषष्टिवारजप्तेन स्तम्भनरूपकुम्भकसंज्ञया अग्निचिन्तनरूपया आग्नेय्या धारणया देहं दाहयित्वा वमितीन्द्रबीजेन द्वात्रिंशद्वारजप्तेन दक्षिणनासापुटेन वायुनिःसारणरूपया रेचकसंज्ञया ऐन्द्रध्यानरूपया ऐन्द्राधारणया शिरो-

स्थल वमिति वरुणबीजेन चतुःषष्टिवारजप्तेन जलाधिपध्यानरूपया जलाधिपधारणया चन्द्रमण्डलादमृतं स्रावयित्वा तेनाप्लाव्य प्रणवेन सर्व्वाङ्गं संघटितं पुनर्नवीभूतं चिन्तयित्वा वाय्वादिभूतानि व्योमादिभ्यो यथाक्रमेण बहिः कृत्वा हंस इति मन्त्रेण परमात्मतो जीवं नाभिपद्मे न्यसेत्॥ * ॥

तत ऋष्यादिन्यासः।

गोपालमन्त्रं तु नारदाय ऋषये नमः शिरसि। गायत्रीच्छन्दसे नमो मुखे। श्रीकृष्णाय देवाय नमो हृदि। एवमन्यत्रोह्नीयम्॥ * ॥

ततः प्राणायामः।

ततन्मूलमन्त्रेण षोड़शवारजप्तेन अङ्गुष्ठेन दक्षिणनासापुटं धृत्वा वामनासया वायुं पूरयेत्। अङ्गुष्ठानामिकाभ्यां नासापुटौ धृत्वा चतुःषष्टिवारजप्तेन वायुं कुम्भयेत्। वामनासामनामिकया धृत्वा दक्षिणनासया द्वात्रिंशद्वारजप्तेन वायुं त्यजेत्। पुनर्दक्षिणनासया पूरयेत्। उभाभ्यां कुम्भयेत्। वामनासया रेचयेत्। पुनर्वामया पूरयेत्। उभाभ्यां कुम्भयेत्। दक्षिणया रेचयेदिति॥ * ॥

ततो वाङ्मातृकान्यासः। न्यासप्रश्ने द्रष्टव्यः॥ अनेकदेवपूजने तु भूतशुद्धिमातृकान्यासयोरविशेषात् सकृदेवानुष्ठानम्॥ * ॥

ततः करन्यासः।

यथा गोपाले। ॐ क्लां अङ्गुष्ठाभ्यां नमः अङ्गुष्ठयोः। ॐ क्लीं तर्ज्जनीभ्यां स्वाहा तर्ज्जन्योः। ॐ क्लूं मध्यमाभ्यां वषट् मध्यमयोः। ॐ क्लैं अनामिकाभ्यां हूं अनामिकयोः। ॐ क्लौं कनिष्ठाभ्यां वौषट् कनिष्ठयोः। ॐ क्लः करतलपृष्ठाभ्यां फट् करतलपृष्ठयोः। एवमन्यत्राप्यूह्यम्॥

ततोऽङ्गन्यासः।

ॐ क्लां हृदयाय नमः हृदये हस्ततलेन। ॐ क्लीं शिरसे स्वाहा अङ्गुष्ठाङ्गुलिभिः शिरसि। ॐ क्लूं शिखायै वषट् अधोमुखाङ्गुलिमुष्टिना शिखायाम्। ॐ क्लैं कवचाय हूं वक्षःकरतलाभ्यां आशिरःपादपर्य्यन्तरूपसर्व्वाङ्गे। ॐ क्लौं नेत्राभ्यां वौषट् तर्ज्जनीमध्यमाभ्यां नेत्रयोः। ॐ क्लः अस्त्राय फट् ऊर्द्धहस्तात्रयं छोटिकाभिर्दशदिग्बन्धनञ्च कुर्य्यात्। एवमन्यत्राप्यूह्नीयम्। आगमोक्तादिपूजने तु भूतशुद्ध्यादिनियमः अन्यत्र त्वनियमः॥ * ॥

ततोऽर्घ्यस्थापनम्।

वामतोऽर्घ्यपाद्याद्याचमनीयपात्राणि संस्थाप्य अर्घ्यपात्रं जलगन्धपुष्पैः संपूज्य तत्तद्देवतामूलमन्त्रं सर्व्वदेवतासाधारणे तु प्रणवं वा अष्टधा जप्त्वा धेनुमुद्रया अमृतीकृत्य तदुदकं पात्रान्तरे किञ्चित् कृत्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षयेत्। प्रणवादितत्तद्देवताचतुर्थ्यन्तनाम्ना नमोऽन्तेन मूलमन्त्रेण वा आत्मानं गन्धादिभिरभ्यर्च्च्य तद्रूपं ध्यात्वा तत स्वात्मपात्रे चन्दनादिरचिताष्टदलपद्मे सम्बो-

धनान्तदेवतानाम्ना इहागच्छेत्यावाह्य स्थापयित्वा मुद्रेण चतुर्थ्यन्तनाम्ना आसनं दत्त्वा सम्बोधनान्तनाम्ना स्वागतं ते इति पृच्छेत्। दीक्षितस्तु मूलमन्त्रमुच्चार्य्य प्रणवादिचतुर्थ्यन्तनाम्ना नमोऽन्तेन दद्यादिति विशेषः। एवं पाद्यार्घ्याचमनीयादीनि दद्यात्। पाद्यार्घ्ययोः पौर्व्वापर्य्ये त्वनियमः। ततो घृतमधुदधिमेलकपलमितं कांस्यपात्रस्थं पिहितञ्च मधुपर्कं पुनराचमनीयञ्च दद्यात्। ततो लौकिकषट्त्र्यधिकशतपञ्चतोलकाप्यूनवैदिकाशीतपलमिताप्यूनजलेन तदभावे षष्टिरक्तिकमासद्वयाधिकत्रयोदशतोलकरूपवैदिकपलचतुष्टयाप्यूनजलेन इदं स्नानीयं एवं दुग्धादिनापि। घृतादिस्नाने तु गन्धद्रव्यचूर्णकविरूपयवसुप्याद्वर्त्तनं स्नानं चाङ्गं ततः पुनराचमनीयं वाससी पुनराचमनीयं दद्यात्। प्रत्येकमलङ्कारं यज्ञोपवीतं गन्धं पुष्पं धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दत्त्वा मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य च प्रदक्षिणीकृत्य अष्टाङ्गप्रणिपातेन पञ्चाङ्गप्रणिपातेन वा शिरसि करद्वयसंयोगेन च प्रणम्य स्तुत्वा प्रणवादिसम्बोधनान्तनाम्ना क्षमस्वेति विसर्ज्जयेत्। यत्र यदुपचारद्रव्यासम्भवस्तदर्थं जलं देयम्। प्रतिष्ठितस्थिरतरप्रतिमायां तत्तदावाहनविसर्ज्जने न स्तः। एवं शालग्रामे जले वा सर्व्वदेवपूजनेऽपि यथालाभं पाद्यादिदशोपचारैः। गन्धपुष्पधूपदीपनैवेद्यैः पञ्चोपचारैः गन्धपुष्पाभ्यां वा केवलेन पुष्पेण केवलेनाक्षतेन केवलेन जलेन मानसिकेन वा पूजयेत्। तत्र सामान्यदेवताधूपः शारदायाम्।

सगुग्गुल्वगुरूशीरशर्करामधुचन्दनैः।
धूपयेदाज्यसंमिश्रैर्नीचैर्दैवाय देशिकः॥

एतैर्मिलितैर्यथालाभं वा। इति सर्व्वदेवतासाधारणो विधिः॥ * ॥

ततः प्रथमं सूर्य्यपूजा।

ॐ सूर्य्याय नमः इति पूजयेत्। तत्र गन्धाः। चन्दनागुरुकर्पूरवीरणकलपद्मकाष्ठरक्तचन्दनानि। पुष्पाणि। मल्लिकामालतीकरवीरचम्पकपाटलावकुलनगरपीतभिण्टीकुन्दनवमल्लिकाशोकपद्माशण्डजवापुष्पाणि विहितानि। तुलसीकृष्णतुलसीदूर्व्वाबिल्वपत्राणि राजितकाचीरकदलनगरमुद्गलानि निषिद्धानि। धूपाश्च। गुग्गुलुगुरुदेवदारुबिल्वानि। दीपस्तु घृतेन तैलेन वा। नैवेद्यानि विविधभक्ष्याणि॥ * ॥

अथ गणेशपूजा।

तदावाहने। ॐ भूर्भुवःस्वर्गणेश इहागच्छ इति दूर्व्वापुष्पाक्षतैरावाह्य ॐ गणेशाय नम इत्यनेन पूजयेत्। तत्र तुलसी निषिद्धा। रक्तचन्दनरक्तपुष्पादिकं विहितम्। देवतान्तरप्रसिद्धं अन्यत् शुक्लादिकं न देयम्॥ * ॥

अथ दुर्गापूजा।

ॐ भूर्भुवःस्वर्दुर्गे इहागच्छ इति पुष्पाक्षतैरावाह्य ॐ दुर्गायै नम इत्यनेन पूजयेत्। तत्र

गन्धाः चन्दनागुरुकर्पूरकुङ्कुमानि । पुष्पाणि मल्लिकोत्पलपुन्नागशमीचम्पकाशोककर्णिकारकरवीरतुलसीविल्वपत्रादीनि विहितानि । मुकुन्दार्कमन्दारपुष्पाणि निषिद्धानि । धूपाः कृष्णागुरुवर्ह्नितघृतमहिषाक्षगुग्गुलुविल्वान्यतमानि वीरणमूलचन्दनेऽपि । दीपस्तु घृतेन तैलेन वा । नैवेद्यानि आम्रनारिकेलखर्ज्जूरकदलीबीजपूरादीनि । कथितं विल्वं फलं निषिद्धम् । यत्नपक्वकदलीफलमपि विहितम् ॥ * ॥

अथ शिवपूजा ।

उदङ्मुखः ॐ नमः शिवाय नमः इति मन्त्रेण पूजयेत् । तत्र गन्धः अगुरुचन्दने । पुष्पाणि च अर्ककरवीरजातीवकुलपाटलाश्वेतमन्दारनागकेशरचम्पक-धुस्तूरविल्वामलक-तुलसीपत्राणि विहितानि । केतकीमाधवीपुष्पकुन्दयूथीमल्लिकाशिरीषसर्जबन्धूकमुकुलमात्राणि निषिद्धानि । धूपस्तु घृतगुग्गुलुविल्वफलानि उशीरागुरुचन्दनानि च । दीपस्तु घृतेन तैलेन सर्षपादिना वा । नैवेद्यानि गुड़खण्डघृतपक्वमातुलुङ्गफलादीनि ॥ * ॥

अथ पार्थिवशिवलिङ्गपूजाविधिः ।

ॐ हराय नम इति मृदाहरणम् । ॐ महेश्वराय नम इति घटनम् । ॐ शूलपाणे इह सुप्रतिष्ठितो भव इति प्रतिष्ठा । आचारात् ध्यायेन्नित्यमित्यादिना शारदोक्तं ध्यायेत । पिनाकधृक् इहागच्छ इत्यावाहनम् । ॐ पशुपतये नम इति स्नपनम् । एतत् पाद्यं ॐ नमः शिवाय नम इति पाद्यादिभिः संपूज्य वामावर्त्तेन वेद्यां प्राच्यादिषु ॐ सर्व्वाय क्षितिमूर्त्तये नमः ॐ भवाय जलमूर्त्तये नमः ॐ रुद्राय अग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः ॐ भीमाय आकाशमूर्त्तये नमः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्य्यमूर्त्तये नमः । इत्यष्टमूर्त्तीः पुष्पैः पूजयेत् । ततो मुखवाद्यं कृत्वा महादेव क्षमस्वेति संहारमुद्रया विसर्ज्जयेत् । ओँ शूद्रस्तु नमः शिवायेति मन्त्रेण पूजयेत् ॥ * ॥

अथ विष्णुपूजा ।

शङ्खाद्यर्घ्यपात्रं पुरतो निधाय त्रिभागजलेनापूर्य्य वमिति धेनुमुद्रया अमृतीकृत्य ॐ विष्णवे नम इत्यष्टधा जपित्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षेत् । दीक्षितस्तु तन्मन्त्रमुच्चार्य्य तन्नाम्ना पूजयेत् अङ्गाद्यावरणञ्च पूजयेत् शालग्रामे मणौ प्रतिमाष्टदलपद्मजलादिषु । तत्र शालग्रामे आवाहनविसर्ज्जने न स्तः । ध्येयः सदेत्यादिना ध्यात्वा ॐ भगवन् विष्णो इहागच्छेत्याद्यक्षतपुष्पैरावाह्य इदमासनं ॐ श्रीविष्णवे नमः ॐ विष्णो स्वागतमिति पृष्ट्वा एतत् पाद्यं ॐ विष्णवे नमः सामगस्तु इदमर्घ्यं ॐ विष्णवे नमः इति वदेत् । तदितरस्तु एषोऽर्घ इति विशेषः । तत्र दूर्वाग्रकुशपुष्पाक्षतसिद्धार्थचन्दनतोयानि यथालाभं वा अर्घ्यपाद्ययोस्तु पौर्व्वापर्य्येण नियमः । आचमनीये सुगन्धिद्रव्ययुक्तजलं केवलं वा प्रशस्तजलम् । घृतमधुदध्यात्मको मधुपर्कः तदभावे केवलं वा मधु । पूर्व्ववदिदमाचमनीयं इदं स्नानीयं तत्र लौकिकप्रस्थाधिकशतपलतोलकान्यूनं जलम् । पुनराचमनीयं इदं वस्त्रं पुनराचमनीयं इदमाभरणं पुनराचमनीयं गन्धस्तु अङ्गुष्ठयुक्तकनिष्ठया गन्धमुद्रया तत्र चन्दनागुरुकर्पूरकुङ्कुमवीरणमूलपद्मकाष्ठसिन्दूरकरक्तचन्दनकस्तूरिकाजातीफलानि घृष्टानि एतच्चूर्णानि वा एतद्द्वादशरसो वा पुष्पाणि च तर्ज्जन्यङ्गुष्ठयोगरूपपुष्पमुद्रया तत्र मल्लिका-मालतीजाती-केतक्यशोक-चम्पकनागकेशरवकुल-पद्मोत्पलतुलसी-विल्वकरवीरपारिभद्रपाटलाश्वेतापराजितावन्धुदलतगरश्वेतजवारक्ताशोकशणपुष्पभूमिचम्पकशेफालीनवमालिकायूथिकाकदम्बकुन्दलवङ्गमाधवीपुष्पवकबन्धूककुरुवकविल्वपुष्प-वन्दुवारक-कह्लारद्रोणपलाशपुष्पाणि विहितानि । नरसिंहेतरावतारे केतकी निषिद्धा । पर्य्युषितमच्छिद्राशोच्छितस्वयंपतितोपहतमध्याह्नस्नानोत्तरत्रुटितपद्मचम्पकेतरकलिकातुलसीतरशुष्कपत्रपरिच्छिन्न-पुष्पविहितेतररक्तपुष्पचैत्यवृक्षोद्भवश्मशानजात-कुटज-शाल्मलीशिरीषपुष्पाणि निषिद्धानि । आश्वयीतरस्य वनोद्भवानि च । विहितपत्राणि तुलसीविल्वशमीभृङ्गराजतमालामलककेतकीपत्राणि । पद्मकुन्दोत्पलानि पञ्चदिनात् परतः पर्य्युषितानि । तुलस्यगस्त्यविल्वानि कदापि न पर्य्युषितानि । धूपस्थानञ्च देवस्य वामे पुरतो वा । तर्ज्जन्यङ्गुष्ठयोगरूपधूपमुद्रया वामहस्तेन घण्टां वादयन् देयः । स च भूमौ न देयः । धूपश्च जटामांसीमहिषाक्षगुग्गुलुकर्पूरागुरुसिह्लकदेवदारुजातीफलशारदोक्तमिश्रितगुग्गुल्वादयः । दीपस्थानं देवस्य दक्षिणतः पुरतो वा । मध्याङ्गुष्ठयोगरूपदीपमुद्रया एष दीपः घृतेन तैलेन वा भूमौ न देयः । नैवेद्यस्थानञ्च देवपृष्ठेतरदेशः । अनामिकाङ्गुष्ठयोगरूपनैवेद्यमुद्रया एतन्नैवेद्यं तत्र कदली-पनस-जम्बूलवली-करमर्दक-हविःसंस्कृततिलमाषमुद्गयवगोधूमव्रीहिशाल्यन्नं विहितम् । निषिद्धन्तु अनामहिषीक्षीरदधिघृतं पञ्चनखवराह-मत्स्य-मृग-च्छागेतरमांस-हिरण्योदकसर्पीनरश्वचाण्डालदृष्टविड़ालाद्युच्छिष्टपक्वान्न-पर्य्युषितेतरभक्ष्यम् । खण्डादीनि यवगोधूमक्षीरविकाराश्च न पर्य्युषिताः । ततः पुनराचमनीयं ताम्बूलञ्च दत्त्वा अष्टोत्तरसहस्रं शतं दश वा उत्तरीयवस्त्रेण छादितहृद्देशे स्थिततिर्य्यग्भूतदक्षिणकरः यथाशक्ति मूलमन्त्रं जपित्वा ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव । त्वत्प्रसादात् त्वयि स्थितं ॥ इत्यर्घ्योदकेन देवहस्ते जलं दद्यात् । ततोऽर्घ्यशङ्खं गृहीत्वा त्रिः प्रदक्षिणीकृत्य,

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष । ते चरणारविन्दम् ॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ ! आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष । ते चरणारविन्दम् ॥

इति स्तुत्वा ॐ प्रसीद भगवन्निति दण्डवत् प्रणमेत् ।

ॐ यत् किञ्चित् क्रियते देव मया सुकृतदुष्कृतम् ।
तत् सर्व्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥

इत्यनेन सर्व्वं समर्पयेत् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्द्दन ।
यत् पूजितं मया देव । परिपूर्णं तदस्तु मे ॥

इति प्रार्थयेत् ॥ ततः संहारमुद्रया निर्म्माल्यपुष्पमादाय भूमौ त्यजेत् विसर्ज्जनस्थले ॐ भगवन् विष्णो क्षमस्वेति विसर्ज्जयेत् तदसत्त्वे निर्म्माल्यपुष्पमादाय ।

ॐ तिष्ठ देव परे स्थाने स्वस्थाने परमेश्वर ।
यत्र ब्रह्मादयः सर्व्वे सुरास्तिष्ठन्ति मे हृदि ॥

इति मन्त्रेण देवं हृदि स्थापयेत् । तत ॐ विष्वक्सेनाय नम इति गन्धपुष्पनैवेद्याग्रं दद्यात् । ततो वैष्णवाय तन्निर्म्माल्यं अनुलेपनं नैवेद्यञ्च किञ्चिद्दत्त्वा शिरसि निर्म्माल्यं धार्य्यं सर्व्वाङ्गेष्वनुलेपनं कृत्वा यथाकालं पादोदकं नैवेद्यञ्चोपभुञ्जीत । तत्र पादोदकग्रहणे मन्त्रः ।

ॐ कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन ।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे ॥

ततस्तत्पानादौ परोदितेष्टदेवतानाम श्रुत्वा स्वयं त्रिरुच्चार्य्य पादोदकं पीत्वा तत्क्षणम् ।

अकालमृत्युशमनं सर्व्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम् ॥

इति शिरसि धारयेत् ॥ नैवेद्यभक्षणे मन्त्रः ।

ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः ।
येन लीलावराहेण हिरण्याक्षो निपातितः ॥

इत्युच्चार्य्य भक्षयेत् ॥ * ॥ यथालाभं दशोपचारेण वा पूजयेत् । तत्र दशोपचाराः । अर्घ्यपाद्याचमनीयमधुपर्काचमनगन्धपुष्पधूपदीपनैवेद्यानि । पञ्चोपचाराः । गन्धपुष्पधूपदीपनैवेद्यानि । गन्धपुष्पाभ्यां वा केवलपुष्पेण केवलजलेन वा पूजयेत् ततोऽभिन्नब्रह्मसरस्वतीलक्ष्मीणां पूजनम् । इत्याह्निकप्रयोगतत्त्वम् ॥ * ॥ तन्त्रोक्तसामान्यपूजा कलावतीशब्दे द्रष्टव्या ॥

पूजार्हः, त्रि, (पूजामर्हतीति । पूजा + अर्ह + "अर्हः ।" ३ । २ । १२ । इत्यच् ।) पूजायोग्यः । मान्यः । इति शब्दरत्नावली ॥ (यथा, मनुः । ९ । २६ ।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥")

पूजितः, त्रि, (पूज + क्तः ।) प्राप्तपूजः । अर्च्चितः । तत्पर्य्यायः । अपचितः २ । इत्यमरः । ३ । १ । ९८ ॥ (यथा, भट्टिः । ४ । १ ।

"निवृत्ते भरते धीमानत्रे रामस्तपोवनम् ।
प्रविवेश पूजितस्तत्र दण्डकारण्यमीयिवान् ॥")

पूजितव्यः, त्रि, पूजनीयः । पूजधातोः कर्म्मणि तव्यप्रत्ययनिष्पन्नः ॥

पूजिलः, पुं, (पूज्यते इति । पूज+"गुपादिभ्यः कित् ।" उणा० १ । ५७ । इति इलच् । स च कित् ।) देवता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूज्ये, त्रि । इत्युणादिकोषः ॥

पूज्यः, पुं, (पूजयितुमर्हः । पूज+"अर्हे कृत्यतृचश्च ।" ३ । ३ । १६९ । इति यत् ।) श्वशुरः । पूजनीये, त्रि । तत्पर्य्यायः । प्रतीक्ष्यः २ । इत्यमरः । ३ । १ । १५० ॥ यथा,—

"अहं हि पूर्व्वो वयसा भवद्भ्य-
स्तेनाभिवादं भवतां न युक्तम् ।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम् ॥
अष्टक उवाच ।
अवादीश्चेद्वयसास्मि प्रवृद्ध
इति वै राजाभ्यधिकः कथञ्चित् ।
यो वै विद्वांस्तपसा स वृद्धः
स एव पूज्यो भवति द्विजानाम् ॥"
इति मात्स्ये ३९ अध्यायः ॥

पूल, क संघाते । राशीकरणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) मळस्वरी । क, पूलयति धान्यं लोकः । राशीकरोतीत्यर्थः । इति दुर्गादासः ॥

पूतं, क्ली, (पूयते स्मेति । पू+कर्म्मणि क्तः ।) अपनीततुषधान्यम् । बक्षीतान धान इति भाषा ॥ तत्पर्य्यायः । बहुलीकृतम् २ । इत्यमरः । २ । ९ । २३ ॥

पूतः, त्रि, (पू ञ शोधे+क्तः ।) व्रतादिना शुद्धः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ । इत्यमरः । २ । ७ । ४५ ॥ शुद्धः । यथा,—
"दधिगोमयादि सामान्यं पवित्रं स्वभावपवित्रं वा ।" इति भरतः ॥ तत्पर्य्यायः । पवित्रम् २ । मेध्यम् ३ । इत्यमरः । ३ । १ । ५५ ॥ यथा,—
"चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं बुद्धिपूतं विचिन्तयेत् ॥"
इति मार्कण्डेयपुराणम् ॥

सत्यम् । इति जटाधरः ॥

पूतः, पुं, (पूयते स्म येनेति । पू+करणे क्तः । यद्वा, पवते स्मेति गत्यर्थेति कर्त्तरि क्तः ।) शङ्खः । श्वेतकुशः । विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

पूतक्रतायी, स्त्री, (पूतक्रतोरिन्द्रस्य स्त्री । पूतक्रतु+"पूतक्रतोरै च ।" ४ । १ । ३६ । इति ङीप् ऐकारादेशश्च ।) इन्द्रपत्नी । शची । इति जटाधरः ॥

पूतक्रतुः, पुं, (पूतः क्रतुर्येन ।) इन्द्रः । इति जटाधरः ॥

पूतगन्धः, पुं, (पूतः पवित्रो गन्धो यस्य ।) वर्व्वरः । इति राजनिर्घण्टः ॥

पूततृणम्, क्ली, (पूतं पवित्रं तृणमिति नित्यकर्म्मधारयः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥

पूतद्रुः, पुं, (पूतः पवित्रो द्रुः ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥

पूतधान्यं, क्ली, (पूतं धान्यमिति नित्यकर्म्मधारयः ।) तिलः । इति राजनिर्घण्टः ॥

पूतना, स्त्री, (पूतं करोतीति । तत्करोतीति णिच् । ततो बहुलमन्यत्रापीति युच् ।) हरीतकी । इत्यमरः ।२।४।५९॥ सिन्धुदेशजा स्वल्पत्वक् बृहदस्थिका हरीतकी लेपने प्रशस्ता। इति राजवल्लभः॥ (उत्पत्तिस्थानवाजतिरस्या यथा,—
"पूतना मगधोद्भवा ।" "पूतना चतुरस्रका ।"
"पूतना चतरङ्गुला———————————।"
इति हारीते कल्पस्थाने प्रथमेऽध्याये ॥)
गन्धमांसी । इति राजनिर्घण्टः ॥ दानवीभेदः । सा बकासुरभगिनी जिघांसया स्तनकालकूटप्रदानात् श्रीकृष्णेन हता । (एतद्वृत्तान्तस्तु हरिवंशे ६७ अध्याये द्रष्टव्यः ॥) रोगभेदः । इति मेदिनी । ने, ६३ ॥ स च अहिपूतनानामबालरोगः । तस्य निदानं यथा,—
"मलवर्चो मलद्यापत्ते बाले दोषत्रयोद्भवः ।
स्नानाभ्यां च्युदयं यो वा च्युदयाद्वा गुदं व्रजेत् ॥
क्षुद्ररोगे च कथिते अजगल्लाद्यहिपूतने ॥"
क्षुद्ररोगोक्तं यथा,—
"शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् ।
स्विन्ने वा स्नाप्यमाने वा कण्डूरक्तकफोद्भवा ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम् ॥"
इति माधवकरः ॥ * ॥
(लक्षणान्तरमस्या यथा,—
"स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ
विड्भिन्नं सृजति च काकतुल्यगन्धिः ।
छर्द्यार्त्तो हृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः ॥"
इति सुश्रुतेनोत्तरतन्त्रे सप्तविंशेऽध्याय उक्तम् ॥
चिकित्सास्या यथा,—
"कपोतवङ्कारलुको वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥
वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ॥
हितं घृतं तुगाक्षीर्य्यां सिद्धं मधुरकैश्च च ।
कुम्भतालीशखदिरं चन्दनस्यन्दने तथा ॥
देवदारु वचाहिङ्गु कुष्ठं गिरिकदम्बकः ।
एलाहरेणवश्चापि योज्या नस्यने सदा ॥
गन्धनाकुलिकुम्भीका मज्जानो वदरस्य च ।
कर्कटास्थि घृतश्चैव धूपनं सर्षपैः सह ॥
काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च धारयेत् ।
मत्स्यौदनञ्च कुर्व्वीत कृशरां पललं तथा ॥
शरावसम्पुटे कृत्वा वलिं शून्यगृहे हरेत् ।
उच्छिष्टेनाभिषेकेण शिरसि स्नानमिष्यते ॥
पूज्या च पूतना देवी वलिभिः सोपहारकैः ।
मलिनाम्बरसंवीता मलिनारूक्षमूर्द्धजा ॥
शून्यागाराश्रिता देवी दारकं पातु पूतना ।
दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका ॥
भिन्नागाराश्रया देवी दारकं पातु पूतना ॥"
इति चोत्तरतन्त्रे द्वात्रिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) बालमातृकाविशेषः । यथा,—
"तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः ॥ गात्रमुद्वेजयति स्तन्यं न गृह्णाति दृष्टिं बध्नाति क्रन्दति ऊर्द्धं निरीक्षते । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा गन्धं ताम्बूलं रक्तपुष्पं रक्तचन्दनं रक्तसप्तध्वजाः सप्तप्रदीपाः सप्तस्वस्तिकाः मत्स्यमांससुराः अन्नभक्तश्च दक्षिणस्यां दिशि मध्याह्ने चतुष्पथे वलिर्दातव्यः शिववनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत् । ॐ नारायणाय नमः हन हन मुच मुच हुं फट् स्वाहा । चतुर्थे दिवसे ब्राह्मणं भोजयेत् ततः सम्पद्यते शुभम् ।" इति चक्रपाणिदत्तः ॥

पूतनारिः, पु, (पूतनाया अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥

पूतनासूदनः, पु, (पूतनां सूदयति सूदितवानिति वा । सूद+ल्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥

पूतनाहा, [न्] पुं, (पूतनां हन्तीति । हन+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

पूतफलः, पुं, (पूतानि पवित्राणि फलान्यस्य ।) पनसः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पूता, स्त्री, (पूत+टाप् ।) दूर्व्वा । इति राजनिर्घण्टः ॥

पूतात्मा, [न्] पुं, (पूतः पवित्र आत्मा स्वभावः ।) पवित्रस्वभावः । (पूत आत्मा स्वरूपं यस्य विष्णुः । यथा, महाभारते । १३ । १४९ । १५ ।
"पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥")
शुद्धदेहे, त्रि । यथा,—
"शाम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥"
इति शाम्बपुराणे सूर्य्यस्तवः ॥

पूति, क्ली, (पुनातीति । पू+कर्त्तरि क्तिच् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥

पूतिः, स्त्री, (पू+भावे क्तिन् ।) पवित्रता । दुर्गन्धः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, गारुडे १८० अध्याये ।
"मेषमूत्रसैन्धवाभ्यां कर्णयोर्भरणात् शिव ।
कर्णयोः पूतिनाशः स्यात् कृमिस्रावो विनश्यति ॥")
खट्टाशखट्टाशी इति भाषा । तस्यालेपनगुणः । परमालस्यौरघोज्वरनाशित्वम् । इति राजवल्लभः ॥ (अस्या विशोधनं यथा,—
"यथालाभमपामार्गकृष्णादिक्षारलेपितम् ।
वासरैस्त्रैर्न संस्विद्य पूतिं निर्लोमतां नयेत् ॥
दोलापाकं पचेत् पश्चात् पञ्चपल्लववारिणा ।
खलः साधुमिवोतृषीय ततो निर्व्वाहतां नयेत् ॥

आजशोभाञ्जनजलैर्भावयेच्च पुनः पुनः ।
शिग्रुमूलैन कैतक्याः पुष्पपत्रपुटे च तम् ॥
पचेदेयं विशुद्धः सन् त्वगमाभिसमो भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥
दुर्गन्धविशिष्टे, त्रि । यथा, भगवद्गीतायाम् ।
१७ । १० ।
"यातयामं गतरसं पूति पर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥")

पूतिकं, क्ली, (पूत्या दुर्गन्धेन कायतीति । कै + कः ।) विष्ठा । इति राजनिर्घण्टः ॥ (दुर्गन्धविशिष्टे, त्रि । यथा, महाभारते ।१३।६।११।
"किं तया पापकं पूर्व्वं कृतं कर्म्म सुदारुणम् ।
यस्य स्वं घ्राणने त्वतकान् पूतिकानत्रसि कुत्सितान् ॥")

पूतिकः, पुं, (पूत्या कायतीति । कै + कः ।) पूतिकरञ्जवृक्षः । इत्यमरः । २ । ४ । ४८ ॥ (अस्य पर्य्यायादिकं पूतिकरञ्जशब्दे द्रष्टव्यम् ॥)

पूतिकरजः, पुं, (पूतियुक्तः करजः ।) करञ्जभेदः । इत्यमरः ।२।४।४८॥ यथा, "अथ कटुकरञ्जघोराकरञ्जनामगुणाः ।
करञ्जो नक्तमालश्च करजश्चिरविल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ॥
स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ।
करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषहृत् ॥
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ।
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ॥
भेदनं कटुकं पाके वीर्य्योष्णं पित्तलं लघु ।
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् ॥
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिकरञ्जः, पुं, (पूतियुक्तः करञ्जः ।) करञ्जविशेषः । नाटाकरञ्ज इति भाषा । कठकरेञ्ज इति हिन्दी भाषा । तत्पर्य्यायः । प्रकीर्य्यः २ पूतिकरजः ३ पूतीकरजः ४ पूतिकः ५ पूतीकः ६ कलिकारकः ७ कलिमालकः ८ कलहनाशनः ९ । इत्यमरभरतौ ॥ प्रकीर्णः १० रजनीपुष्पः ११ सुमनाः १२ पूतिकर्णिकः १३ कैडर्य्यः १४ कलिमाल्यः १५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्त्तिकण्डूविचर्च्चिकाकुष्ठत्वग्दोषनाशित्वञ्च ।
इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,
"स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिकर्णः, पुं, (पूतिर्दुर्गन्धः कर्णो यस्मात् ।) कर्णरोगविशेषः । तल्लक्षणं यथा,—
पूतिकर्णमाह ।
"कर्णविद्रधिपाकाद्वा स कर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः ॥"
कर्णस्रावाद्भेदार्थमाह ।
पूतीति नियमेन पूति यथा स्यादेवं स्रवति ॥
तच्चिकित्सा यथा,—
"कर्णमये पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥
सर्ज्जिकाचूर्णसंयुक्तबीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥१॥
आम्रजम्बुप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥ २ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ ३ ॥
छगं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थे तत् सास्रावे पूतिकर्णके ॥४॥
कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम् ॥
कुष्ठादितैलम् ॥ ५ ॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति ॥ ६ ॥
चूर्णेन गन्धकशिलारजनीभवेन
सुरेशकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाडीं जयेच्चिरभवामपि कर्णजाताम् ॥
सुरेटः पलम् ॥ ७ ॥
कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥"
इति भावप्रकाशः ॥
(चिकित्सास्य यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजो गुडः ।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ॥"
इत्युत्तरतन्त्रे एकविंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिकर्णकः, पुं, (पूतिः कर्णो यस्मात् । कप् ।) कर्णरोगभेदः । तस्य लक्षणम् । यथा,—
"कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात् ।
पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः ॥"
इति माधवकरः ॥
(लक्षणान्तरमस्य यथा,—
"स्थिते कफे स्रोतसि पित्ततेजसा
विलाप्यमाने भृशसम्प्रतापवान् ।
अवेदनो वाप्यथवा सवेदनो
घनं स्रवेत् पूति स पूतिकर्णकः ॥"
इत्युत्तरतन्त्रे विंशेऽध्याये सुश्रुतेनोक्तम् ॥)
औषधं यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजोगुडः ।
पूरणात् पूतिकर्णस्य शमनो मधुसंयुत ॥"
अथवा ।
"वकुलार्द्रकपित्थाम्रजम्बुपल्लवसाधितम् ।
पूतिकर्णापहं तैलं जातीपत्ररसेन वा ॥"
इति चक्रपाणिदत्तः ॥
(चिकित्सास्य यथा,—
"छगं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थेऽपि सास्रावे पूतिकर्णके ॥"
इति चोत्तरतन्त्रे एकविंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिका, स्त्री, (पूत्या कायतीति । कै + कः । टाप् ।) मार्जारी । इति राजनिर्घण्टः ॥ (कीटविशेषः । यथा, पञ्चतन्त्रे । १ । ६६ ।
"पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्त्येषु येषां धर्म्मो न कारणम् ॥")
लताशाकविशेषः । इत्यमरटीकायां भरतः ॥
पुँइ इति भाषा ॥ अस्याः पर्य्यायगुणौ उपोदकीशब्दे द्रष्टव्यौ ॥ द्वादशशां तद्भक्षणे दोषो यथा । पूतिका शतघातिका । यदपि ।
'कुसुम्भं नालिकाशाकं वृन्ताकं पौतिकीन्तथा ।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः ॥'
इत्युभयत्र सामान्यतोऽभिहितम् । यत्र नालिका श्वेतकलम्बीति कल्पतरुः । पूतिका च द्वादश्यामधिकदोषाय शूद्रविषयिका वा ।" इति तिथितत्त्वम् ॥ (इयं हि सोमांशुतो जातेति सोमस्यालाभे प्रतिनिधित्वेन ग्राह्या । यथा, महाभारते । ३ । ३५ । ३३ ।
"अस्ति मासः प्रतिनिधिर्यथा प्राहुर्मनीषिणः ।
पूतिकामिव सोमस्य तथेदं क्रियतामिति ॥")

पूतिकामुखः, पुं, (पूतिकाया मुखमिव मुखं यस्य ।) शम्बूकः । इति शब्दमाला ॥ (शम्बूकशब्देऽस्य विषयो ज्ञेयः ॥)

पूतिकाष्ठं, क्ली, (पूति काष्ठमिति कर्म्मधारयः ।) देवदारु । सरलद्रुमः । इत्यमरः । २ । ४ । ५४ २ । ४ । ६० ॥ पविचदारु च ॥

पूतिकाष्ठकं, क्ली, (पूतिकाष्ठ + स्वार्थे कन् ।) सरलवृक्षः । इति शब्दचन्द्रिका ॥

पूतिगन्धं, क्ली, (पूतिर्गन्धो यस्य ।) रङ्गम् । इति राजनिर्घण्टः ॥

पूतिगन्धः, पुं, (पूतिर्गन्धो यस्य ।) गन्धकः । इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥ दुर्गन्धे, त्रि । (यथा, मनुः । ४ । १०७ ।
"नित्यानध्याय एव स्यात् ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥")

पूतिगन्धिः, त्रि, (पूतिर्गन्धो यस्य । "गन्धस्येदुत्पूतिसुसुरभिभ्यः ।" ५ । ४ । १३५ । इति इः ।) दुर्गन्धः । इत्यमरः । १ । ५ । १२ पूतिर्विट् पूतिरिव गन्धोऽस्य । इति रायमुकुटः ।
(यथा, महाभारते । २ । ६० । २६ ।
"अयाचितं कटुकं तीक्ष्णमुष्णं
यशोमुषं परुषं पूतिगन्धि ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज ! पिब प्रशाम्य ॥")

पूतिगन्धिकः, त्रि, (पूतिगन्धि + स्वार्थे कन् । दुर्गन्धः । इति हेमचन्द्रः । ६ । २७ ॥

पूतिगन्धिका, स्त्री, (पूतिगन्धोऽस्त्यस्या इति पूतिगन्ध + ठन् ।) वाकुची । इति राजनिर्घण्टः ॥

पूतितैला, स्त्री, (पूति दुर्गन्धं तैलं यस्याः ।) ज्योतिष्मती । इति रत्नमाला ॥ लताफटक इति भाषा ॥ (पर्य्यायोऽस्या यथा,—
"पारावतपदी पिण्या लताख्यास्फुटवल्कली ।
ज्योतिष्मती पूतितैला केचित्ताभिङ्गुदीं विदुः
इति वैद्यकरत्नमालायाम् ॥)

पूतिनस्यः, पुं, (पूतिर्दुर्गन्धो नस्यः नासिकाभवो रोगः ।) नासारोगभेदः । तस्य लक्षणम् । यथा,
"दोषैर्विदग्धैर्गलतालुमूले
संमूर्च्छितो यस्य समीरणस्तु ।
निरेति पूतिर्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम् ॥"
इति माधवकरः ॥
औषधं यथा,—
"व्याघ्रीदन्तीवचाशिग्रुसुरसव्योषसम्भवैः ।
पाचितं नावनं तैलं पूतिनासागदं जयेत् ॥"
अथवा ।
"त्रिकटुविडङ्गकसैन्धववृहतीफलशिग्रुसुरस-
दन्तीभिः ।
तैलं गोजलसिद्धं नस्यं स्यात् पूतिनस्यस्य ॥"
इति चक्रपाणिदत्तः ॥
(अस्य व्याख्याने श्रीकण्ठदत्तेन यद्विदेहवचनमाहृतं तद्यथा । "नासिका भवो नस्यः पूतिगन्धो वायुर्यत्र तं पूतिनस्यम् ।" इहैव विदेहः ।
"कफपित्तमसृङ्मिश्रं सञ्चितं मूर्द्ध्नि देहिनाम् ।
विदह्यसुष्णोदुगाढ़ं वर्णा सत्वाभिभ्रंशजाम् ॥
ततः प्रस्यन्दते घ्राणात् सरक्तं पूति पीतकम् ।
पूतिनस्यन्तु तं विद्यादृघ्राणकण्ठूज्वरप्रदम् ॥"
चिकित्सान्तरमस्य यथा,—
"पूर्व्वोद्दिष्टे पूतिनस्ये च जन्तोः
स्वेदस्नेहौ छर्द्दनं स्रंसनञ्च ।
युक्तं भक्तं तीक्ष्णमल्पं लघु स्या-
दुष्णं तोयं धूमपानञ्च काले ॥"
इत्युत्तरतन्त्रे चयोविंशोऽध्याये सुश्रुतेनोक्तम् ॥)
पूतिपत्रः, पुं, (पूति पत्रं यस्य ।) श्योणाकप्रभेदः । इति राजनिर्घण्टः ॥
पूतिपुष्पिका, स्त्री, (पूति पुष्पमस्याः । कापि अत इत्वम् ।) मातुलुङ्गः । इति रत्नमाला ॥ मखुरलेबु इति मौटा वा इति च भाषा ॥ (गुणादयोऽस्या मातुलुङ्गशब्दे ज्ञातव्याः ॥)
पूतिफला, स्त्री, (पूति फलं यस्याः ।) सोमराजी । इति रत्नमाला ॥
पूतिफली, स्त्री, (पूति फलं यस्याः । ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ६६ ॥ (अस्याः पर्य्यायो यथा,—
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पूतिमयूरिका, स्त्री, (पूतिर्मयूरीव । ततः स्वार्थे कन् ह्रस्वश्च ।) अजगन्धा । इति राजनिर्घण्टः ॥
पूतिमेदः, पुं, (पूतिर्मेदोऽस्य ।) अरिमेदः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य अरिमेदशब्दे बोद्धव्यः ॥)
पूतिवातः, पुं, (पूतये पाविव्याय वातो यस्य ।) विल्ववृक्षः । इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा,
"विल्वो महाकपित्थाख्यः श्रीफलो गोहरीतकी ।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥
(पूतिर्वातः ।) दुर्गन्धवायुश्च ॥
पूतिवृक्षः, पुं, (पूतिर्वृक्षः ।) श्योणाकः । इति रत्नमाला ॥ पविचदुर्गन्धौ तरू च ॥
पूतिशारिजा, स्त्री, (पूतिः शारिरिव जायते इति । जन + डः । टाप् ।) खट्टाशी । इति त्रिकाण्डशेषः ॥
पूतीकः, पुं, (पुति + वा ङीष् । तद्वत् कायतीति । कै + कः ।) पूतिकरञ्जः । इत्यमरटीकायां भरतः ॥ (यथास्य पर्य्यायः ।
"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा च सुश्रुते । १ । ३६ ।
"पूतीकचित्रकः पाठा विडङ्गैलाहरेणवः ॥")
गन्धमार्जारः । इति राजनिर्घण्टः ॥
पूतीकरञ्जः, पुं, (पुतीयुक्तः करञ्जः ।) पूतिकरञ्जः । इति रत्नमाला ॥ नाटा इति भाषा ॥ (पर्य्यायोऽस्य यथा,—
"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"
इति वैद्यकरत्नमालायाम् ॥)
पूतीका, स्त्री, (पूत्या दुर्गन्धेन कायतीति । कै + कः ।) पूतिका । इत्यमरटीकायां भरतः ॥
पूत्यण्डः, पुं, (पूति दुर्गन्धमण्डमस्य ।) गन्धकीटः । गँदोपोका इति भाषा ॥ (यथा, महाभारते । १२ । ३२२ । ७ ।
"पुलाका इव धान्येषु पूत्यण्डा इव पक्षिषु ।
तद्विधास्ते मनुष्येषु येषां धर्म्मो न कारणम् ॥")
जन्तुभेदः । इति मेदिनी । डे, ३२ ॥ खट्टाशी इति भाषा ॥
पूनः, त्रि, (पू + क्तः । "पूञो विनाशे ।" ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) नष्टः । इति मुग्धबोधव्याकरणम् ॥
पूपः, पुं, (पू + क्विप् । पुवं पवित्रं पाति रक्षतीति । पा + कः ।) पिष्टकः । इत्यमरः ।२।९। ४८ ॥ (यथा, मार्कण्डेये । १५ । २४ ।
"मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ॥"
(पिष्टकशब्देऽस्य विवृतिर्ज्ञेया ॥)
पूपली, स्त्री, (पूपं तदाकारं लातीति । ला + कः ।) पोलिका । इति हेमचन्द्रः । ३ । ६३ ॥
पूपाली, स्त्री, (पूपाय अलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पोली । इति त्रिकाण्डशेषः ॥
पूपाष्टका, स्त्री, (पूपद्रव्यसाधनी अष्टका अष्टमी ।) अग्रहायणीपूर्णिमायाः परतः कृष्णाष्टमी । तद्विवरणं अष्टकाशब्दे द्रष्टव्यम् । "तत्र नित्यं श्राद्धं पूपाङ्गकं कर्त्तव्यम् । यथा गोभिलः । अष्टका योऽमाग्रहायण्यास्तमिस्राष्टमी । ब्रह्मपुराणे ।
पित्र्यदानाय मूले स्युरष्टकास्तिस्र एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी ॥
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ।
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
इति तिथितत्त्वम् ॥
पूपिका, स्त्री, (पूपः पूपाकारोऽस्त्यस्या इति ठन् । ततष्टाप् ।) पूलिका । इति हेमचन्द्रः ।३।६२॥
पूय, ई ङ दुर्गन्धे । शीर्णाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् । निष्ठायामनिट् ।) मन्त्रस्वरी । ई, पूतः । ङ, पूयते मत्स्यः दुर्गन्धः स्यादित्यर्थः । शीर्णिर्भेदनम् । इति दुर्गादासः ॥
पूयं, क्ली, (पूयते दुर्गन्धो भवतीति । पूय + अच् ।) पक्वव्रणादिसम्भवघनीभूतशुक्लवर्णविकृतरक्तम् । पुँय इति भाषा । तत्पर्य्यायः । चतजम् २ मलजम् ३ पूयनम् ४ । प्रसितम् ५ । इति शब्दचन्द्रिका ॥ (यथा, महाभारते ।३।१९९।५४।
"ये च दुष्कृतकर्म्माणः पूयं तेषां विधीयते ॥")
पूयवर्द्धनद्रव्याणि यथा,—
नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्ललवणकटुकगुड़पिष्टविकृतिवल्लूरशुष्कशाकाजाविकानूपौदकमांसवसाशीतोदकसुरापायसदधिदुग्धतक्रप्रभृतीन् परिहरेत् ।
"तक्रान्तैर्नवधान्यादिर्योऽयं वर्ग उदाहृतः ।
दोषसंजननो ह्येष विज्ञेयः पूयवर्द्धनः ॥"
इति सुश्रुतः ॥
(अस्य विषयो यथा,—
"वाताद्दृते नास्ति रुजा न पाकः
पित्ताद्दृते नास्ति कफाच्च पूयः ॥"
इति सुश्रुते सूत्रस्थाने सप्तदशेऽध्याये ॥)
पूयनं, क्ली, (पूयतेऽनेनेति । पूय + ल्युट् ।) पूयम् । इति शब्दचन्द्रिका ॥
पूयरक्तः, पुं, (पूयविशिष्टं रक्तमस्मिन् ।) नासारोगभेदः । तस्य लक्षणम् । यथाह माधवकरः ।
"दोषैर्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः ।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥"
(क्लीवलिङ्गेऽपि दृश्यते । यथा,—
"निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥"
इति वाभटे उत्तरस्थाने ऊनविंशेऽध्याये ॥
चिकित्सास्य यथा,—
"वक्ष्याम्यूर्द्ध्वं रक्तपित्तोपशान्तिं
नाडीवत्स्यात् पूयरक्ते चिकित्सा ।
वान्ते सम्यक् चावपीडं वदन्ति
तीक्ष्णं धूमं शोधनञ्चात्र नस्यम् ॥"
इत्युत्तरतन्त्रे त्रयोविंशेऽध्याये सुश्रुतेनोक्तम् ॥)
पूयारिः, पुं, (पूयानामरिः तद्विनाशकत्वात् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (विवरणमस्य निम्बशब्दे ज्ञातव्यम् ॥)
पूयालसः, पुं, (पूयः अलस इव यत्र । सान्द्रत्वेन चिराच्छिर्गमनादेव तथात्वम् ।) सन्धिगतरोगभेदः । तस्य लक्षणं यथा,—

"पक्वः शोफः सन्धिजः संस्रवेद्यः
सान्द्रं पूयं पूतिपूयालसः सः ॥"
इति सुश्रुतः ॥
("पूयालसः सोपनाहः स्रावाश्चत्वार एव च ।
पर्व्वणीकालजी जन्तुग्रन्थिसन्धौ न वामयाः ॥"
"पूयालसस्तु तं विद्यात् सन्धौ कानीनके व्रणा-
मिति वचनात् ॥" इति भावप्रकाशस्य मध्यखण्डे
चतुर्थे भागे ॥)

पूर, ई य ङ पूर्त्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-
आत्म०-सक०-सेट् । निष्ठायामनिट् ।) दीर्घौ ।
ई, पूर्णः । य ङ, पूर्य्यन्ते पितरस्तर्पणैरिति हला-
युधः । पूर्त्तिरिहाप्यायनम् । इति दुर्गादासः ॥

पूर, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-सक०-सेट् ।) दीर्घौ । क, पितन् पूरयति
श्राद्धे हव्यैः कव्यैश्च यः सदा । इति हलायुधः ॥
इति दुर्गादासः ॥

पूरं, क्ली, (पूरयति सौगन्ध्येनेति । पूर + कः ।)
दाहागुरु । इति राजनिर्घण्टः ॥

पूरः, पुं, (पूरयतीति । पूर + कः ।) जलसमूहः ।
(यथा, रघौ । ३ । १७ ।
"महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
व्रणसंशुद्धिः । खाद्यविशेषः । इति मेदिनी । रे,
६० ॥ (प्राणायामादिकर्त्तुर्नासारन्ध्रेण बहिः-
पवनाकर्षणम् । यथा, भागवते । ३ । २८ । ९ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम् ॥"
बीजपूरः । तत्पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
लुङ्गुषः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूरकः, पुं, (पूरयतीति । पूरि + ण्वुल् ।) बीज-
पूरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो
यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
लुङ्गुषः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)
गुणकाङ्कः । इति लीलावती ॥ ध्यानादिकर्त्तृ-
नासिकागतोच्छ्वासः । मन्त्रध्यानपूर्व्वकप्राणाया-
माङ्गत्वेनमन्त्रं जपन् वामनासिकया वायुना
देहपूरणम् । (यथा, हठयोगप्रदीपिकायाम् ।
२ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥")
यथाच व्यासः ।
"आदानं रोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत् ।
ब्रह्माणं केशवं शम्भुं ध्यायेद्देवाननुक्रमात् ॥
पूर्व्ववचने त्रिजपमात्राभिधानादत्र त्रिस्त्रिरिति
वीप्सा सन्ध्यात्रयापेक्षया ।
ब्रह्माणं केशवं शम्भुं ध्यायन् मुच्येत बन्धनात् ॥
इति योगियाज्ञवल्क्यः ।
'भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च ।
प्रत्योङ्कारसमायुक्तं तथा तत् सवितुः परम् ॥
ॐ आपो ज्योतिरित्येतच्छिरः पश्चात्तु योज-
येत् ।
त्रिरावर्त्तनयोगात्तु प्राणायामस्तु शब्दितः ॥
पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते ॥
कुम्भको निश्चलः श्वासो मुच्यमानस्तु रेचकः ॥
मोचनं विशेषयति विष्णुपुराणम् ।
नासंवृतमुखो जृम्भेद्धासकासौ च वर्ज्जयेत् ।
नोच्चैर्हसेत् सशब्दञ्च न मुञ्चेत् पवनं बुधः ॥"
इत्याह्निकाचारतत्त्वम् ॥
षोडशचतुरन्यतरसंख्यकप्रणवबीजान्यतरजपे-
नैकनासापुटकरणकप्राणायामाङ्गवायुपूरणम् ।
यथा, मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडश-
वारजपेन वामनासापुटे वायुपूरकं कुर्य्यादिति
तन्त्रसारः ॥ * ॥ क्ली, प्रेतदेहनिष्पादकाशौच-
कालदेयदशपिण्डम् । यथा,—
"पूरकेण तु पिण्डेन देहो निष्पाद्यते यतः ।
कृतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियाम् ॥"
इति वायुपुराणम् ॥
ऋष्यशृङ्गः ।
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाह्निके ।
भावेतैतच्च वै पिण्डं यस्मद्दत्तस्य पूरकम् ॥"
अत्र भाषणविधौ एतन्नपिण्डं यस्मद्दत्तस्य पूरक-
मित्येतावन्मात्रश्रुतेः शिरःपूरकमित्यादिविशे-
षोल्लेखे प्रमाणं नास्ति । इति स्मार्त्तभट्टा-
चार्य्याः ॥ प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्ग-
वेति विष्णुधर्म्मोत्तरे देहस्तेनैर्देहपूरकमिति
प्रयोगापत्तेश्च । तस्मादनिरुद्धभट्टाद्युक्तः केवल-
पूरकप्रयोग एव युक्त इति । शातातपः ।
"भर्त्तुः पिण्डप्रदानं तु साध्वी स्त्री चेद्रजस्वला ।
वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्याच्च पूरकम् ॥"
इति शुद्धितत्त्वम् ॥ * ॥
पूरणकर्त्तरि, त्रि । इति शब्दरत्नावली ॥ (यथा,
मनुः । ९ । २८९ ।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥")

पूरणं, क्ली, (पूर्य्यते अनेनेति । पूर + करणे
ल्युट् ।) पिण्डप्रभेदः । इति मेदिनी । णे, ६४ ॥
वृष्टिः । कुटन्नटम् । इति शब्दमाला ॥ अङ्कानां
गुणनम् । इति शुभङ्करः ॥ वापतन्तुः । इति
हेमचन्द्रः ॥

पूरणः, पु, (पूर्य्यतेऽनेनेति । पूरि + करणे ल्युट् ।)
विष्णुतैलम् । इति धरणिः ॥ सेतुः । इति हारा-
वली ॥ (पूरयतीति । पूरि + कर्त्तरि ल्युः ।)
समुद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूरके,
त्रि । इति मेदिनी । णे, ६३ ॥ (यथा, हरि-
वंशे । १२९ । ५२ ।
"आसन्नः सन्नतरः साधनानां
श्रद्धावतां श्राद्धवृत्तिप्रणीता ।
पतिर्गुणानां महतां सतृत्तीनां
पायाच्छ्रियः पूरणः षड्गुणानाम् ॥")

पूरणी, स्त्री, (पूर्य्यते अनयेति । पूरि + ल्युट् +
ङीप् ।) शाल्मलिवृक्षः । इत्यमरः ।२।४।४६॥
(अस्याः पर्य्यायान्तरं यथा, भावप्रकाशस्य पूर्व्व-
खण्डे प्रथमे भागे ।
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥")
पूर्य्यतेऽनया पूरणी । यथा पञ्चानां पूरणी पञ्चमी॥

पूराम्लं, क्ली, (पूरं पूरकमम्लमस्य ।) वृक्षाम्लम् ।
इति राजनिर्घण्टः ॥

पूरिका, स्त्री, (पूर्य्यते इति । पूरि + कः । स्त्रियां
ङीप् । पूरी । ततः स्वार्थे कन् । टाप् पूर्व्व-
ह्रस्वश्च ।) पिष्टकभेदः । पूरी इति कचुरी इति
च भाषा । यथा,—
"माषाणां पिष्टिकां युक्तां लवणार्द्रकहिङ्गुभिः ।
तया पिष्टिकया पूर्णा समिता कृतपोलिका ।
तलस्नेहे विपक्वा सा पूरिका कथिता बुधैः ॥"
अस्या गुणाः ।
"रुच्या स्वाद्वी गुरुः स्निग्धा वातपित्तास्रदूषिका ।
चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी ॥
तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ॥"
इति भावप्रकाशः ॥
(अस्या गुणान्तरं यथा,—
"पूरिकाघृतपूरस्तु त्रिदोषशमनं परम् ।
हृद्यं संहर्षणं स्वादु वातक्षयनिवारणम् ॥"
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥)

पूरितं, त्रि, (पूर्य्यते स्मेति । पॄ पूरि वा + क्तः ।
"वा दान्तशान्तपूर्णेति ।" ७ । २ । २७ । इति
पक्षे इट् ।) कृतपूरणम् । तत्पर्य्यायः । पूर्णम्
२ । इत्यमरः । ३ । १ । ९८ ॥ गुणितञ्च ॥

पूरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर + "पुरः
कुषन् ।" उणा० ४।७४। इति कुषन् । "अन्येषा-
मपि दृश्यते ।" ६।३।१३७ । इति निपातनात्
दीर्घः ।) पुरुषः । पुमान् । इत्यमरः ।२।६।१॥
अथ पूरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रद्वयं कुक्षिद्वौ तु नासा तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवाथ कर्णौ पृष्ठञ्च ह्रस्वे जङ्घे सुपूजिते ।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति नित्यशः ॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचम् ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते ॥ * ॥
कटिर्विशाला बहुपुत्त्रभागी
विशालहस्तो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥

न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितांसकम् ॥
कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशः सुखी ।
कदाचित्सुन्दरो दुःखी कदाचिच्चञ्चला सती ॥
नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् ।
हस्तस्नेहेन चैश्वर्य्यं पादस्नेहेन वाहनम् ॥
अकर्म्मकठिनौ हस्तौ पादावध्वनि कोमलौ ।
यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्द्दिशेत् ॥
दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः श्रियमाप्नोति कृष्णाभिर्लोकपूजितः ॥
अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
उन्नतं भोजनं तस्य शतं जीवति मानवः ॥
अङ्कुशं कुलिशं छत्रं यस्य पाणितले भवेत् ।
ऐश्वर्य्यञ्च विनिर्द्दिष्टमशीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्य्यञ्च राज्यञ्च अशीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्ज्जनीं यावत् रेखा भवति चाच्युता ।
विंशत्यब्दाधिकशतं नरा जीवन्त्यनामयाः ॥
कनिष्ठामध्यमां यावत् रेखा भवति चाच्युता ।
शताब्दं वाथ वाशीतिर्नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायाञ्चेत् रेखा भवति चाच्युता ।
षष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता ।
तावती पुरुषाणान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा ध्रुवा ऊर्द्ध्वम्भवेद्यदि ।
नृपो वा नृपतुल्यो वा चिरं ख्यातोऽर्थवान्
भवेत् ॥
मत्स्यपुच्छप्रकीर्णेन विद्याविद्यासमन्वितः ।
पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
तदाप्यसञ्चितं वित्तं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्याथ चक्रमङ्गुष्ठे यवाद्दूर्द्ध्वञ्च दृश्यते ।
तदा वै पामरादीनामर्ज्जितं धनमाप्नुयात् ॥
तर्ज्जन्यामथ चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
अनामायां भवेत् चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥*॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
अशीत्यायुः समाप्नोति पञ्चरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रवर्णञ्च दृश्यते ।
रेखाहीनञ्च कण्ठञ्च स चोन्नतो महीं भ्रमेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्व्वदा ।
योगी भवति निर्व्वाणः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य नीचवर्णोचकर्म्मकृत् ।
प्रगल्भो दन्तुरः सत्यं वेदान्तपारगो भवेत् ॥”

प्रकारान्तरम् ।
“दन्ताश्च विरला यस्य नखे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तेन वित्तवान् ॥
दीर्घलिङ्गे च सौभाग्यं सूक्ष्मलिङ्गे नृपो भवेत् ।
वक्रास्थकठिनैर्लिङ्गैः प्रमाणान्निर्गतः सदा ॥
रमते च सदा दास्यां निर्धनो भवति ध्रुवम् ।
कृशलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।
राज्यं सुखञ्च दिव्याश्याः कन्यकायाः पतिर्भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् ॥
कृशनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः ।
कातरा आलजिह्वाश्च ते दरिद्रा न संशयः ।
कपिला मलिनाङ्गाश्च ह्रस्वाश्चैव दृढनखाः ॥
कृशातिदीर्घा मनुजास्ते दरिद्रा न संशयः ।
चिबुके श्मश्रुशून्या ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः समुद्रवचनं यथा ॥
स्थूलसुखा भग्नपृष्ठाः कृष्णदन्ताः कुचेलकाः ।
वक्रनासा वक्रनासास्ते नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्व्वा मानवाः स्मृताः ॥”
इति सामुद्रके पुरुषलक्षणम् ॥ * ॥
दानवीरदयावीरयुद्धवीरसत्यवीरसंज्ञकपुरुष-
लक्षणन्तु पुरुषपरीक्षाग्रन्थे द्रष्टव्यम् ॥

पूर्णः, त्रि, (पूर्य्यते स्मेति । पॄ पूरि वा + क्तः ।
“वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।” ७ ।
२ । २७ । इति इडभावो निपात्यते च ।)
पूरितः । सकलः । इत्यमरः । ३ । १ । ६८ ॥
(यथा, पञ्चदश्याम् । ७ । ७७ ।
“तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥”)
शक्तः । इति मेदिनी । णे, २२ ॥ स्वीयसुखेच्छा-
वदन्यः । इति गदाधरभट्टाचार्य्यः ॥ (प्रधायाः
पुत्रभेदः । यथा, महाभारते । १ । ६५ । ४७ ।
“सिद्धः पूर्णश्च वर्हो च पूर्णायुश्च महायशाः ॥”
नागभेदः । यथा, महाभारते । १ । ५७ । ५ ।
“कोटिशो मानसः पूर्णः शलः पालो हलो-
मकः ॥”)

पूर्णकः, पुं, (पूर्ण + “संज्ञायां कन् ।” ५ । ३ ।
७५ । इति कन् ।) स्वर्णचूडपक्षी । इति मेदिनी ।
के, १२५ ॥ (देवयोनिविशेषः । यथा, महा-
भारते । ७ । ५५ । ४ ।
“नटनर्त्तकगन्धर्व्वैः पूर्णकैर्वर्द्धमानकैः ।
नित्योद्योगैश्च क्रीडद्भिस्तत्र स्म परिहर्षिताः ॥”)

पूर्णकुम्भः, पुं, (सलिलादिभिः पूर्णः कुम्भः ।)
जलपूरितघटः । तत्पर्य्यायः । भद्रकुम्भः २ ।
इत्यमरः । २ । ८ । ३२ ॥ (यथा, मनुः । ११ ।
१८७ ।
“प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नव ।
तेनैव सार्द्धं प्राश्नीयुः स्नात्वा पुण्ये जलाशये ॥”)
पूर्णकलशादिश्च । इति भरतः ॥ (अथिताङ्गु-
लिभ्यां हस्ताभ्यां परशिरसः पीडनं पूर्णकुम्भः ।
इति नीलकण्ठः ॥ यथा, महाभारते । ९ ।
२३ । १४ ।
“बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥”)

पूर्णकोष्ठा, स्त्री, (पूर्णं कोष्ठमस्याः ।) नागर-
मुस्ता । इति राजनिर्घण्टः ॥

पूर्णपात्रं, क्ली, (पूर्णञ्च तत् पात्रञ्चेति नित्यकर्म्म-
धारयः ।) वस्तुपूर्णपात्रम् । वर्द्धापकः । इति
मेदिनी । रे, २८४ ॥ उत्सवकाले हर्षात्
गृहीतवस्त्रालङ्कारादि । तत्पर्य्यायः । पूर्णा-
लकम् २ । यथा,—
“हर्षादुत्सवकाले यदलङ्कारांशुकादिकम् ।
आकृष्य गृह्यते पूर्णपात्रं पूर्णालकञ्च तत् ॥”
इति जटाधरः ॥
(यथा, अनर्घराघवे । ३ । ४५ ।
“शाम्भवं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यते ॥”)
होमकर्म्मणि ब्रह्मदक्षिणा । यथा, गोभिलेनापि
दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मणो
दद्यादित्युक्तम् । चान्तत्वेऽपि पुंस्त्वं छान्दसम् ।
तस्य प्रमाणन्तु गृह्यसंग्रहे यज्ञपार्श्वपरिशिष्टयोः ।
अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥
अत्र षट्पञ्चाशदधिकशतद्वयमुष्टिमितं पूर्ण-
पात्रम् । असम्भवे तु छन्दोगपरिशिष्टम् ।
यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन जायते ।
नावरार्द्धमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥”
इति संस्कारतत्त्वम् ॥

पूर्णबीजः, पुं, (पूर्णं बीजं यस्य ।) बीजपूरः ।
इति राजनिर्घण्टः ॥ (विवृतिरस्य बीजपूरशब्दे
ज्ञातव्या ॥)

पूर्णमा, स्त्री, (पूर्णं कलापूर्णचन्द्रं पूरणं वा
मातीति । मा + कः । टाप् । पूर्णिमा । इत्य-
मरटीकायां भरतः ॥

पूर्णमासः, पुं, (पूर्णमासी पूर्णिमा साधनत्वेनास्त्य-
स्येति । अच् ।) पौर्णमासयागः । इति जटा-
धरः ॥ (यथा, तैत्तिरीयसंहितायाम् । २ । २ ।
१० । २ ।
“वै तिष्यः सोमः पूर्णमासः साक्षादेव ब्रह्म-
वर्चसमवरुन्धे ॥”)
पूर्णो मासो यत्रेति । पूर्णिमा । यथा, महा-
भारते । १२ । २९ । ११४ ।
“दर्शं च पूर्णमासं च चातुर्मास्ये पुनः पुनः ।
अयजद्धयमेधेन सहस्रं परिवत्सरान् ॥”)

पूर्णमासी, स्त्री, (पूर्णो मासश्चान्द्रमासो यत्र ।
गौरादित्वात् ङीष् ।) पूर्णिमा । इति शब्द-
माला ॥

पूर्णा, स्त्री, (पूर्ण + टाप् ।) पञ्चमी । दशमी ।
पूर्णिमा । अमावस्या । यथा,—
“नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः
क्रमात् ॥”

तत्र स्त्रीसंसर्गनिषेधो यथा,—
"पूर्णासु योषित् परिवर्ज्जनीया ॥"
इति तिथितत्त्वम् ।
"गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः ॥"
इति ज्योतिःसारसंग्रहः ॥

पूर्णानकं, क्ली, वाद्यायनाम्नम् । तत्पर्य्यायः । पूर्णपात्रम् २ । इति त्रिकाण्डशेषः । पूर्णानकमपि पाठः ॥

पूर्णावतारः, पुं, (पूर्णः अवतारः ।) नृसिंहः । रामः । यथा,—
"पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड्विभुः ।
परिपूर्णतमः कृष्णो वैकुण्ठे गोलके स्वयम् ॥
वैकुण्ठे कमलाकान्तो रूपभेदाच्चतुर्भुजः ।
गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम् ॥
तस्यैव तेजो नित्यञ्च चिन्तां कुर्व्वन्ति योगिनः ।
भक्ताः पादाम्बुजं तेजः कुतस्तेजस्विना विना ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

पूर्णिका, स्त्री, नासाच्छिन्नीनामकपक्षी । इति त्रिकाण्डशेषः ॥

पूर्णिमा, स्त्री, (पूर्णिः पूरणम् । पूर्णिं मिमीते इति । मा+कः । टाप् ।) पञ्चदशी तिथिः । तत्पर्य्यायः । पौर्णमासी २ । निशाकरे कलाहीने सा अनुमतिः ३ पूर्णे निशाकरे सा राका ४ । इत्यमरः ।१।४।७-८ ॥ पित्र्या ५ चान्द्री ६ पूर्णमासी ७ अनन्ता ८ चन्द्रमाता ९ निरञ्जना १० । इति वाचस्पतिः ॥ पूर्णिमा ११ । इति हेमचन्द्रः ॥ ज्योत्स्नी १२ इन्दुमती १३ सिता १४ । इति राजनिर्घण्टः ॥ सा द्विविधा । यथा,—
"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
पूर्व्वोदितकलाहीने पौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चादस्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सोत्तरा राकास्तदानुमतिपूर्णिमा ॥
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥"
इति देवीपुराणम् ॥ * ॥
सा चन्द्रस्य तिथिः । यथा,—
"तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीं तिथिं प्रभुः ।
तस्यामुपोषयेद्यस्तु अन्नमर्थं प्रतिपादयेत् ॥
न चान्नाहारश्च भवेत्तस्य ज्ञानं प्रयच्छति ।
कान्तिं पुष्टिञ्च राजेन्द्र । धनं धान्यञ्च केवलम् ॥"
इति वराहपुराणे सोमोत्पत्तिरहस्यम् ॥ * ॥
तस्यां जातफलम् ।
"कन्दर्पतुल्यो युवतीप्रियश्च
न्यायाप्तवित्तः सततं सहर्षः ।
शूरो बली शास्त्रविचारदक्ष-
श्चेत् पूर्णिमा जन्मनि यस्य जन्तोः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

सा चतुर्द्दशीयुक्ता ग्राह्या युग्मात् । यमः ।
"पञ्चान्ते सोतपि व्यायान्तेन नायाति मत्पुरम् ॥"
विष्णुः ।
"दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा ॥
तस्यां स्नानोपवासाभ्यामक्षयं परिकीर्त्तितम् ॥"
सहितौ माससंज्ञाविशेषनिमित्तकृत्तिकादिनक्षत्रगतौ । महाकार्त्तिक्यादिदर्शनात् । तथा च राजमार्त्तण्डे ।
"माससंज्ञे यदा ऋक्षे चन्द्रः संपूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥"
स्कान्दमात्स्ययोः ।
"पौर्णमासीषु चैतासु मासर्क्षसहितासु च ।
एतासां स्नानदानाभ्यां फलं दशगुणं स्मृतम् ॥"
वैशाखीमधिकृत्य यमः ।
"गौरान् वा यदि वा कृष्णांस्तिलान् क्षौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄन्देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अब्दायुतञ्च तिष्ठेच्च स्वर्गलोके न संशयः ॥" * ॥
ब्रह्मपुराणे ।
"महाज्यैष्ठ्यान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोदं गङ्गाम्बुमज्जनात् ॥ * ॥
ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थगुरावपि ।
"ऐन्द्रे मैत्रे यदा जीवस्तत्पञ्चदशके रविः ।
पूर्णिमा शुक्रचन्द्रेण महाज्यैष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थचन्द्रेऽपि । वाग्भूतिः ।
"ऐन्द्रर्क्षे त्वथवा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥"
राजमार्त्तण्डे ।
"ज्येष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा ।
ज्येष्ठामेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता ॥"
ज्यैष्ठसंवत्सरश्च ।
"ज्येष्ठामूलोपगे जीवे वर्षं स्याच्छक्रदैवतम् ॥"
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः । संवत्सरोऽत्र वत्सरो बोध्यः । न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्येष्ठ इति विशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यात्विति पाठः काल्पनिकः । प्रपञ्चस्तु मलमासतत्त्वेऽनुसन्धेयः ॥ * ॥
विष्णुधर्म्मोत्तरब्रह्मपुराणयोः ।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्द्विजाः ॥
तस्मिन् काले तु ये मर्त्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति परमव्ययम् ॥"
स्कन्दपुराणे ।
"ज्येष्ठायामहमावतीर्णस्तन्पुण्यं जन्मवासरम् ।
तस्यां मे स्नपनं कुर्य्यान्महास्नानविधानतः ॥
ज्यैष्ठ्यां प्रातःस्नानकाले ब्रह्मणा सहितञ्च माम् ।
रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥"

विष्णुधर्म्मोत्तरे ।
"पौर्णमासी तथा माघी श्रावणी च नरोत्तम ।
प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ॥
एतास्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ॥"
तत्र पूर्व्वदिने सङ्गवलाभे रौहिणलाभे वा परदिने सङ्गवालाभे पूर्व्वदिने श्राद्धम् ।
"कृष्णपक्षस्य पूर्व्वाह्णे श्राद्धं कुर्य्याद्विचक्षणः ।
कृष्णपक्षापराह्णे तु रौहिणन्तु न लङ्घयेत् ॥"
इति वायुपुराणवचनात् ॥
उभयदिने सङ्गवलाभे परदिने ।
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥"
इति विष्णुधर्म्मोत्तरात् ॥
एवमक्षयतृतीयादावपि ॥ * ॥ आषाढकार्त्तिकमाघपौर्णमासीषु दानमावश्यकम् । तथा चायोध्याकाण्डे भरतशपथे ।
"आषाढी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः ।
अप्रदानवतो यान्तु यस्यार्य्योऽनुमतो गतः ॥"
अप्रदानवतो दानरहितस्यैतास्तिथयो यान्तु आर्य्यः श्रीरामचन्द्रो गतो यस्यानुमत इत्यन्वयः । उत्तरवाक्ये यच्छब्दात् तच्छब्दापेक्षा ॥
अथ कोजागरकृत्यम् । कल्पतरौ ब्रह्मपुराणम् ।
"आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्णवात् ।
आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम् ॥
तस्मात्तत्र नरैर्मार्गाः स्वगेहस्य समीपतः ।
शोधितव्याः प्रयत्नेन भूषितव्याश्च भूषणैः ॥
पुष्पार्घ्यफलमूलान्नसर्षपप्रकरैस्तथा ।
वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥
सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सबान्धवैः ।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥
स्त्रीबालवृद्धमूर्खैश्च भोक्तव्यं पूजितैः सुरैः ॥"
पूजितैः सुरैरिति विशेषणे तृतीया । तेन पूजितसुरैरित्यर्थः ।
"पूज्याश्च सफलैः पत्रैस्तथा द्वारोर्द्ध्वभित्तयः ।
द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः ॥
यवाचतस्तिलोपेतैस्तण्डुलैश्च सुतर्पितः ।
संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च ॥
रुद्रः सभार्य्यः स्कन्दश्च तदा नन्दीश्वरो मुनिः ।
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः ॥
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ।
पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ॥
ततः पूज्यो निकुम्भोऽपि समावेष्टिततण्डुलैः ।
सुगन्धिभिर्घृतोपेतैः सघारांश्च भूरिभिः ॥
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ।
वह्निपार्श्वगतैर्न्नैया हृष्टा क्रीडाः पृथग्विधाः ॥"
ततश्च द्वारोर्द्ध्वभित्तिहव्यवाहनपूर्णेन्दुसभार्य्यरुद्रस्कन्दनन्दीश्वरमुनयः सर्व्वैरेव पूज्याः । द्वारोर्द्ध्वभित्तिशब्दोऽत्र बहुवचनान्तः । नन्दीश्वरमुनिरेकः । गोमता सुरभिः । छागवता हुताशनः । मेषवता वरुणः । हस्तिमता विनायकः । अश्व-

यता देवता: । सर्व्वैरेव निकुम्भ: पूज्य: । मत्स्या-र्णवे लिङ्गपुराणम् ।
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सद्वेशो अक्षैर्जागरणञ्चरेत् ॥"
तथा,—
"निशीथे वरदा लक्ष्मी: को जागर्त्तीतिभाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षै: क्रीडां करोति य: ।
नारिकेलैश्चिपिटकै: पितॄन् देवान् समर्च्चयेत् ।
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् ॥"
अत्र निशीति निशीथ इति चाभिधानाद्राति-व्याप्तमिदम् ।
"तत: प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
प्रदोषोऽस्तमयादूर्द्ध्वं घटिकाद्वयमिष्यते ॥"
इति संवत्सरप्रदीपधृतवत्सवचनात् ॥
यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरकृत्यम् । उभयव्याप्त्यनुरोधात् । यदा तु पूर्व्वदिने निशीथव्याप्ति: परदिने प्रदोष-व्याप्तिस्तदा परेद्युस्तत्कृत्यम् । प्रधानपूजाकाल-व्याप्त्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथव्याप्ति: परेद्युर्न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्-कृत्यम् ।
"अह:सु तिथय: पुण्या: कर्म्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥"
इति वचनात् ॥
वर्जयेदित्यनुवृत्तौ मत्स्यसूक्ते ।
"मद्यालम्बान्तु तुलसीं झिण्टिकां काञ्चन-लताम् ॥"
लक्ष्मीध्यानमादित्यपुराणे ।
"पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययो: ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ।
रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु ॥"
पाशेति । दक्षिणे पाशाक्षमालाभ्यां वामे पद्मा-ङ्कुशाभ्यां भूषितां वामकरे हेमपद्मं दक्षिणकरे वरं दधतीत्यर्थ: । तत: पाद्यादिभि: संपूज्य,—
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ॥
इन्द्रध्यानमादित्यपुराणे ।
"चतुर्दन्तगजारूढो वज्रपाणि: पुरन्दर: ।
शचीपतिश्च ध्यातव्यो नानाभरणभूषित: ॥"
पाद्यादिभि: संपूज्य,—
"ॐ विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नम: ॥"
इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् । तत: कुवेर: संपूज्य: । इति रुद्रधर: ॥ तं माल्यादिभि: संपूज्य,—
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पद: ॥"
इति प्रणमेत् ॥

अत्र प्रदोषे सर्व्वेषां पूजेति रुद्रधरप्रभृतय: ॥ न च निकुम्भपर्य्यन्तानां पूर्व्वाह्ण एव पूजनं निरप-वादमिति वाच्यम् । दिवा तत्र न भोक्तव्यं इत्युपक्रम्य पूज्याश्च सफलै: पत्रैरित्यादिना विशिष्य पूजामभिधाय भोक्तव्यमित्यभिधानात् रात्रावेव पूजाभोजने अवगम्येते । अतएवा-शक्तानामेव भोक्तव्यं पूजितै: सुरैरित्यनेन विशिष्य दिवा पूजाभोजने विहिते ॥ * ॥
योगिनीतन्त्रे ।
"विरिञ्चेस्तु गृहे ढक्कां घण्टां लक्ष्मीगृहे त्यजेत् ।
सर्व्ववाद्यमयी घण्टा वाद्याभावे तु वादयेत् ॥"*॥
लक्ष्मीवाक्यम् ।
"प्रकीर्णभाण्डामनवेक्ष्य कारिणीं
सदा च भर्त्तु: प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्ज्जयामि ॥"
मार्कण्डेय: ।
"शिर: सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
मानुषास्थि गृहे यत्र अहोरात्रञ्च तिष्ठति ।
तत्रालक्ष्मि । तवावासस्तथान्येषाञ्च रक्षसाम् ॥
शूर्पवाताादिकं यत्र घटाकर्षैस्तथासनम् ॥"
हरिवंशे ।
"यत्र ह्री: श्री: स्थिता तत्र यत्र श्रीस्तत्र सन्नति: ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ॥"
मत्स्यपुराणे ।
"स्थिरो हि यो हि पुरुष: स्थिरश्रीरेव जायते ।
रक्षितुं नैव शक्नोति चपलश्चपलां श्रियम् ॥"
तथा,—
"अवश्यमुद्योगवतां श्रीरपारा भवेत् सदा ।
अब्धिप्रोत्साहिता देवा ममन्थु: पुनरम्बुधिम् ॥"
कृत्यकौमुद्याम् ।
"नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि ।
तस्मै वित्तं प्रयच्छामि को जागर्त्ति महीतले ॥"
अक्षक्रीडायां व्यासयुधिष्ठिरसंवाद: प्रचरति । तत्क्रीडा चतुरङ्गशब्दे द्रष्टव्या ॥ * ॥ वैष्णवा-मृते स्कन्दपुराणम् ।
"पौष्यान्तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य देवेन्द्र ! पूजा विष्णोर्विधीयते ॥"
इति । पौर्णमास्यन्तमासमुपक्रम्य ।
"पितॄणां देवतानाञ्च मूलकं नैव दापयेत् ।
ददन्नरकमाप्नोति भुञ्जीत ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।
अन्यथा नरकं याति क्षत्रो विट् शूद्र एव च ॥
वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत् ।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥"*॥
फाल्गुने दोलयात्रामाह तीर्थचिन्तामणौ ब्रह्म-पुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"

स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये ऊनचिंशा-ध्याये ।
"फाल्गुन्यां क्रीडनं कुर्य्यात् दोलायां मम भूमिप ! ॥"
इति तिथितत्त्वम् ॥ * ॥
तस्या: पर्व्वत्वं पर्व्वशब्दे द्रष्टव्यम् ॥

पूर्त्तं, क्ली, (पॄ पालने + भावे क्त: । "न ध्याख्या-पॄमूर्च्छिमदाम् ।" ८ । २ । ५७ । इति निष्ठा-तस्य न नत्वम् ।) पालनम् । इति शब्दरत्ना-वली ॥ (पिपर्त्ति पालयत्यनेन जीवानिति । पॄ + करणे क्त: ।) खातादिकर्म्म । इत्यमर: । २ । ७ । २८ ॥ आदिना देवकुलादि । तदुक्तम् ।
"पुष्करिण्य: सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्त्तं कर्म्म विनिर्द्दिशेत् ॥"
इति भरत: ॥
तत्करणफलम् ।
"इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्ते मोक्षञ्च विन्दति ॥
वापीकूपतडागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥"
इति वराहपुराणम् ॥ * ॥
वाप्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकार-माह जातूकर्ण्य: ।
"वापीकूपतडागादि देवतायतनानि च ।
अन्नप्रदानमारामा: पूर्त्तमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्म: सामान्य उच्यते ।
अधिकारी भवेत् शूद्र: पूर्त्ते धर्म्मे न वैदिके ॥"
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-कर: ॥ एवं स्त्रीणामपि पूर्त्ताधिकार: । यथा नारीत्यनुवृत्तौ हहस्पति: ।
"पितृश्वशुरदौहित्रान् भर्त्तु: स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रिय: ॥"
इति जलाशयतत्त्वम् ॥
(पूर्त्तं खातादिकर्म्म अङ्गत्वेनास्त्यस्येति । अच् । धर्म्मविशेषे, पुं । यथा, मार्कण्डेये । १३ । १५ ।
"यतस्ते विमुखा यान्ति निश्वस्य गृहमेधिन: ।
तस्मादिष्टश्च पूर्त्तश्च धर्म्मौ द्वावपि नश्यत: ॥")

पूर्त्त:, त्रि, (पॄ + कर्म्मणि क्त: ।) पूरित: । छन्न: । इति विश्व: ॥ (यथा, भागवते । ३ । २४ । ३१ ।
"ऐश्वर्य्यवैराग्ययशोऽवबोध-
वीर्य्यश्रिया पूर्त्तमहं प्रपद्ये ॥")

पूर्त्ति:, स्त्री, पूरणम् । पॄधातोर्भावे क्ति: । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । ६ । १३ । ६ ।
"विश्वाभिर्गीर्भिरभि पूर्त्तिमश्यां
मदेम शतहिमा: सुवीरा: ॥")

पूर्व्व, क निकेतने । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) मन्त्रणे महस्वरी । निकेतनमिह निमन्त्रणं निवासो वा । क, पूर्व्वयति द्विजान् भोक्तुं गृही । पूर्व्वयति तीर्थेषु साधु: । इति दुर्गादास: ॥ वर्ग्यवान्तो-ऽयम् ॥

पू(र्व्व)र्व्वः, त्रि, (पूर्व्वे निमन्नवे निवासे वा + अच् ।) प्रथमः । (यथा, कुमारे । १ । ५१ ।
"यदैव पूर्व्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज्ज ।
तदा प्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरिग्रहोऽभूत् ॥"
यथाच मनुः । २ । १८४ ।
"गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत् ॥")
आदिः । (यथा, मनुः । २ । ७४ ।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा ।
स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यति ॥")
प्रागदिग्-देशकालाः । इत्यमरः ॥ (यथा, मनुः । ५ । ९२ ।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः ॥")
अग्रम् । इति तट्टीकायां स्वामी ॥ अग्रः । इति हलायुधः ॥ (यथा, मनुः । २ । ५० ।
"चिरायामेदपः पूर्व्वं हि प्रत्यक्ष्यानतो सुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥")
पूर्व्वगङ्गा, स्त्री, (पूर्व्वा चासौ गङ्गा चेति ।) नर्म्मदानदी । इति हेमचन्द्रः । ४ । १४८ ॥
पूर्व्वजः, पुं, (पूर्व्वं जायते इति । पूर्व्व + जन + डः ।) ज्येष्ठभ्राता । इत्यमरः ।२।६।४३॥ (पूर्व्वकालोत्पन्ने, त्रि । यथा, महाभारते ।१।१०५।७६ ।
"तामद्भिः परिषिच्यार्त्तां महर्षिरभिवाद्य च ।
मातरं पूर्व्वजः पुत्त्रो व्यासो वचनमब्रवीत् ॥")
पूर्व्वजाः, पुं, (पूर्व्वं पूर्व्वस्मिन् काले जायन्ते इति । जन + डः ।) दिव्यपितृगणाः । तत्पर्य्यायः । पितरः २ चन्द्रगोलस्थाः ३ व्यक्तप्रस्ताः ४ स्वधाभुजः ५ कव्यवालादयः ६ । बहुवचनान्तोऽयम् । इति त्रिकाण्डशेषः ॥
पूर्व्वजा, स्त्री, (पूर्व्वं जायते इति । जन + डः । टाप् ।) अग्रजा । ज्येष्ठा भगिनी । पूर्व्वज इत्यमरदर्शनात् ॥
पूर्व्वजिनः, पुं, (पूर्व्वो जिनः ।) अतीतजिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अष्टारचक्रवान् ७ स्थिरचक्रः ८ वज्रधरः ९ प्रज्ञाकायः १० वादिराट् ११ नीलोत्पली १२ महाराजः १३ नीलः १४ शार्द्दूलवाहनः १५ धियाम्पतिः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥
पूर्व्वदिक्, स्त्री, (पूर्व्वा दिक् ।) प्राची दिक् । यस्यान्दिशि सूर्य्य उदेति । तदधिपतिरिन्द्रः । तस्याः पर्य्यायादिः पूर्व्वाशब्दे द्रष्टव्यः ॥
पूर्व्वदिक्पतिः, पुं, (पूर्व्वदिशः पतिरधिपतिः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ ॥
पूर्व्वदेवः, पुं (पूर्व्वश्चासौ देवश्चेति । यद्वा, पूर्व्वं देव इति सुप्सुपेति समासः ।) असुरः । इत्यमरः । १।१।१२ ॥ (नरनारायणर्षी । तत्र द्विवचनान्तोऽयम् । यथा, महाभारते । ५ । ४९ । ५ ।
"तेषां मनश्च तेजश्चाप्याददानाविवौजसा ।
पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥")
पूर्व्वदेशः, पुं, (पूर्व्वो देशः ।) प्राचीदिगवस्थितजनपदः । तत्पर्य्यायः । वर्णनिः २ । इति त्रिकाण्डशेषः ॥ यथा,—
"प्राच्या मागधशोणौ च वारेन्द्रीगौडराढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः ॥"
इति ज्योतिस्तत्त्वम् ॥
पूर्व्वपक्षः, पुं, (पूर्व्वः पक्षः ।) शुक्लपक्षः । इत्यमरः । (यथा, मनुः । ३ । २७८ ।
"यथा चैवापरः पक्षः पूर्व्वपक्षाद्विशिष्यते ॥")
शास्त्रीयप्रश्नः । सिद्धान्तविरुद्धकोटिः । (तत्पर्य्यायः । चोद्यम् २ । इति त्रिकाण्डशेषः ॥ देश्यम् ३ पञ्जिका ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १ । ३ ।
"पूर्व्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् ॥"
अधिकरणावयवभेदो व्यवहारविशेषः । यथा, याज्ञवल्क्ये । २ । १७ ।
"पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥")
पूर्व्वपक्षपादः, पुं, (पूर्व्वपक्ष एव पादः ।) चतुष्पाद्व्यवहारान्तर्गतः प्रथमः पादः । तस्य संज्ञान्तरम् । भाषा २ प्रतिज्ञा ३ पक्षः ४ । इति मिताक्षरा ॥ तत्र बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥
मिथ्योक्ता च पशुभ्यात् स्यात् प्रत्यवस्कन्दनं तथा ।
प्राङ्न्यायश्च स विज्ञेयो द्विपात् संप्रतिपत्तितः ॥"
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्याङ्गीकृतत्वेन क्रियासाध्यो न भवतीति द्विपादनोक्ता ॥ * ॥
अथ भाषापादः । तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती ।
"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्म्मुक्तो विरोधिप्रतिरोधकः ॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तम् । साध्यं साधनार्हाभिमतार्थं पक्षं विदुः । अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
असङ्करेण वक्तव्यं व्यवहारेषु वादिभिः ॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्तिः । नारदेनापि ।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥"
उत्तरो विजयी यद्यप्यत्र साध्यं साध्यं तद्विशिष्टधर्म्मी पक्ष इति भेदः । तथाप्यत्र वाक्प्रत्याय्यसाध्यविशिष्टधर्म्मिविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधमर्णादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम् । अतएव उपसंहारे च एवंविधः पक्ष इति मिताक्षरायाम् भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम् । भाषार्थसंज्ञा भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति । निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः ।
"अथ द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति ॥"
इति बृहस्पतिवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत् । तच्छोधनमाह बृहस्पतिः ।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥"
तल्लिखनप्रकारमाह व्यासः ।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
फलकं काष्ठादिपट्टकम् । कात्यायनः ।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्तिः शोधनं भवेत् ॥
अन्यदुक्तं लिखेदन्यो योऽर्थिप्रत्यर्थिनोर्वचः ।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः ॥"
स्वभावोक्तमलङ्घितम् । एतच्च स्वरविशेषादिना सुज्ञेयम् । अतएव याज्ञवल्क्यः ।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥"
भूतं तत्त्वार्थसम्बद्धम् । यदाह नारदः ।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम् ।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधुता ।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति ॥
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति । अत्रादानशब्दः पशुस्त्र्यादि । अर्थविवादग्रहणमन्यकुलविवादेषु प्रमादाभिधाने प्रज्ञातार्थाद्धीयत इति गम्यते । यथाहमनेन शिरसि पादेन ताड़ित इत्यभिधाय केवलं हस्तेन ताड़ित इति वदन् न केवलं दण्ड्यः पराजीयते च तथा च त्वं मम मत्तं ऋणं धारयसि मत्त ऋणत्वेन गृहीततावद्गुणकलादित्यादि भाषाशरीर एतच्च संस्कृतदेशभाषान्यतरेण यथाबोधं वक्तव्येषां वा मूर्खाणामपि वादिप्रतिवादिसदर्शनात् । अतएवाध्यापनेऽपि तथोक्तम् । विष्णुधर्म्मोत्तरे ।
"संस्कृतैः प्राकृतैर्व्वाक्यैः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
पूर्व्वपदं, क्ली, (पूर्व्वं पदम् ।) परपदप्राग्वर्त्तिविभक्त्यन्तप्रकृतिः । यथा पूर्व्वपदात् संज्ञायामगः । इति व्याकरणम् ॥
पूर्व्वपर्व्वतः, पुं, (पूर्व्वः पूर्व्वदिक्स्थः पर्व्वतः इति मित्रकर्म्मधारयः ।) उदयाचलः । इत्यमरः । २ । ३ । २ ॥

पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीति कर्म्मधारयः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकादशनक्षत्रम्। तत्तु खट्वाकृतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति मुहूर्त्तचिन्तामणिः ॥ अपि च।

"दक्षिणोत्तरगते द्वितारके
योनिभे मिलति मस्तकोपरि।
कीटतः स्फुटशरोदयागते!
निःसृता २१८ गजरसाक्षिलिप्तिकाः ॥"

इ० ४। २८। इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ * ॥ तत्र जातफलम्।

"शूरस्त्यागी साहसी भूमिभर्त्ता
कोपाक्रान्तः स्याच्चिराज्जोऽतिदक्षः।
धूर्त्तः क्रूरोऽत्यन्तवाताधिकः प्राक्-
फल्गुन्यर्क्षे जन्मकाले च यस्य ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू + अच्।) बृहस्पतिः। इति शब्दमाला ॥

पूर्व्वभद्रपदः, पुं, } अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदाः २।
पूर्व्वभद्रपदाः, स्त्री,
पूर्व्वभाद्रपदाः, स्त्री,

इत्यमरः ॥ "द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु। प्रोष्ठो गौः भद्रश्च गौः तस्येव पाद आसां तास्तथा। बहुमतिरिव भद्रपादाशुगतो रात्रेत्याश्चर्य्यमञ्जरी शेषाद्भद्रपदाशब्दो ह्रस्वादिः भाद्रपदाशब्दो दीर्घादिरपीति कश्चित्। दीर्घादिपाठः प्रामादिक इति मुकुटादयः ॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे समुदायश्चासां चतुःसंख्या इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वात् द्विवचनम्। फल्गुनीप्रोष्ठपदाशब्दो द्वित्वे बहुत्वे च भद्रपदा द्वेऽपीति कश्चित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति कश्चित्।" इति तट्टीकायां भरतः ॥ * ॥ तां तु दक्षिणोत्तरवर्त्तिखट्वाकृतितारकाद्वयात्मिकाः। भाराकृतितारद्वयरूपा वा। तदधिदेवता अजपादः आसां जघन्यगुणः। इति ज्योतिषम् ॥ अपि च।

"भारमल्लिभ्रमतिकोपरिस्थिते
पूर्व्वभाद्रपदभे द्वितारके।
लिप्तिकाः करिकराक्षि २२८ संमिता
निःसरन्ति वृषभोदयात् प्रिये।॥

इ० ३। ४८। इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ * ॥

तत्र जातफलम्।

"जितेन्द्रियः सर्व्वकलासु दक्षो
जितारिपक्षः खलु तस्य नित्यम्।
भवेत्कनीयान् सुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रसूतौ ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वयक्षः, पुं, (पूर्व्वश्चासौ यक्षश्चेति। पूर्व्वे पूर्व्वस्मिन् काले यक्षो वा।) जिनविशेषः। तत्पर्य्यायः। मणिभद्रः २ जम्भलः ३ जलेन्द्रः ४। इति त्रिकाण्डशेषः ॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रज्यतेऽस्मिन्निति। रञ्ज + अधिकरणे घञ्।) नाट्यारम्भः। इति हेमचन्द्रः। २। १९६ ॥ तत्पर्य्यायः। प्राक्संगीतम् २ गुणनिका ३। इति जटाधरः ॥ (अस्य लक्षणं यथा, साहित्यदर्पणे। ६। १०।

"यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते ॥")

पूर्व्वरागः, पुं, (पूर्व्वः पूर्व्वजातो रागोऽनुरागः।) नायकनायिकयोर्दशाविशेषः। यथा,—

"श्रवणाद्दर्शनाद्वापि मिथःसंरूढ़रागयोः।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते ॥"

इति साहित्यदर्पणम् ॥

पूर्व्वरात्रः, पुं, (रात्रेः पूर्व्वो भागः। अच् समासे। "रात्राह्नाहाः पुंसि।" २। ४। २९। इति पुंस्त्वम्।) रात्रेः पूर्व्वभागः। इति मुग्धबोधव्याकरणम् ॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"———————प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् ॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टञ्च। सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। श्रमो रतिर्विवर्णत्वमिति। तथा बालगुरुवाक्यप्रद्वेषादि। सामान्याभिप्रायेणैव तन्त्रान्तरं यथा। व्याधेर्जातिर्बुभूषा च पूर्व्वरूपेण लक्ष्यते। भावः किमात्मकत्वञ्च लक्ष्यते लक्षणेन तु इति। तथाह पराशरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। ज्वरातादौ लिङ्गान्येव वातादिजान्यव्यक्तानि। यदुक्तं तत्रैव। अव्यक्तं लक्षणं तेषां पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनमिति॥

हारीतेऽप्युक्तम्। इति पूर्व्वरूपमष्टानां ज्वराणां सामान्यतो विशेषात्तु जृम्भाङ्गमर्द्दभूयिष्ठं हृदयोद्वेगि वातजमिति। प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह रक्षितः। येन श्रमादिना उत्पित्सुः सामग्रीसाकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणवेपथ्वादिना अनधिष्ठितोऽसम्बद्धो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह स एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अव्यक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् न त्वावरणादियोगादव्यक्तत्वमित्यर्थः यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः। अन्ये तु पूर्व्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते ॥ इति ॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसमीपे प्रागावेदनम्। यथा,—

"पूर्व्ववादम्परित्यज्य योऽन्यमालम्बते पुनः।
पदसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥"

इति मिताक्षरा ॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्यास्तीति। पूर्व्ववाद + इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्द्दिशेत क्रियाम्।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत् ॥"

इति मिताक्षरा ॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः ॥

पूर्व्वसरः, त्रि, (पूर्व्वः सन् सरतीति। पूर्व्व + सृ + "पूर्व्वे कर्त्तरि।" ३। २। १९। इति टः।) अग्रगामी। यथा, भट्टिः। ५। ९७।

"द्विषन् वनेचराग्र्याणां त्वमादाय चरो वने।
अग्रेसरो जघन्यानां माभूत् पूर्व्वसरो मम ॥"

पूर्व्वसारः, त्रि, पूर्व्वं देशं सरतीति कर्त्तरि घञ् (अण्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम् ॥

पूर्व्वा, स्त्री, (पूर्व्व + टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माघोनी ४ ऐन्द्री ५ माघवती ६। तद्दिग्भववायुगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः।
गुरुर्विदाहजननो वातदः पित्तनाशनः ॥"

इति राजनिर्घण्टः ॥

अपि च। राजवल्लभः।

"प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः।
वैरस्यगौरवौष्ण्यानि करोत्यप्स्वोषधीषु च ॥
भग्नोत्पिष्टक्षतादीषु रागश्वयथुदाहकृत्।
सन्निपातज्वरश्वासत्वग्दोषार्शोविषक्रिमीन् ॥
कोपयेदामवातञ्च घनसंघातकारणम् ॥"॥*॥

तद्दिगधिपतयः मेषसिंहधनूराशयः। यथा,—

"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिरावृत्तिपरिभ्रमात् ॥

इति ज्योतिस्तत्त्वम् ॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः। ३। ३। १३३॥ (यथा, रघुः। १। ६७।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ॥")

पूर्व्वाद्रिः, पु, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। दिनमूर्द्धा २। इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे। १। १८।

"पिङ्गोत्तुङ्गजटाजूटगतो यस्यामृते नवः।
सन्ध्यापिशङ्गपूर्व्वाद्रिशृङ्गसङ्गसखं शशी ॥")

पूर्व्वाषाढ़ा, स्त्री, (पूर्व्वा चासावाषाढ़ा चेति ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतविंशनक्षत्रम् । सा कुर्पाकृतिचतुस्तारात्मिका । गजदन्ताकृतिद्वितारात्मिका वा । अस्या अधिष्ठातृदेवता तोयम् । इति ज्योतिषम् ॥ अपि च ।

"कुर्पमूर्त्तिनि शिरोगते चतुस्तारके करिकरोरुवारिभे ।
अब्धभाद्रपदवासि ! निर्गताः खेचराम्बरशशाङ्कमितिका: ॥"

द० १।४६ ॥ इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥*॥ तत्र जातफलम् ।

"भूयो भूयस्तूथमानागुरक्तो
भक्तो देवे बन्धुमान्योऽतिदक्षः ।
पूर्व्वाषाढ़ा जन्मकाले यदि स्यादाषाढ़ः स्यादेहिवर्गे नितान्तम् ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वाह्णः, पुं, (अह्नः पूर्व्वम् । पूर्व्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति समासः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । "अह्नोऽदन्तात् ।" ८ । ४ । ७ । इति णत्वम् । "रात्राह्नाहाः पुंसि ।" २ । ४ । २९ । इति पुंस्त्वम् ।) त्रिधाविभक्तदिनप्रथमभागः । स च त्रिंशद्दण्डदिनमाने सूर्य्योदयावधिदशदण्डकालः । यथा, पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम् । इति श्रुतिः ॥ अपि च । त्रिधाविभक्तदिनभागाभिप्रायेण तु लोकाक्षिः ।

"पूर्व्वाह्णे मध्यमे वापि यदि पर्व्व समाप्यते ।
तदोपवासः पूर्व्वेद्युस्तदहर्य्याग इष्यते ॥
अपराह्णेऽथवा रात्रौ यदि पर्व्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥"

उपोष्येति नाहोरात्राभोजनपरं किन्तु व्रते ह्यग्न्याधाने देवा यजमानस्य समीपमुपवसन्तीति उपवासशब्देनाग्न्याधानमुच्यते । सूर्य्योदयावधिप्रहरद्वयम् । द्विधाविभक्तदिनपूर्व्वभागः । यथा । पूर्व्वाह्णापराह्णरूपद्विधाविभक्तदिनस्यावधित्वेनावर्त्तनमाह स्कन्दपुराणम् ।

"आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततः परः ॥"

आवर्त्तनात् वासरस्य छायापरिवर्त्तनात् प्रागित्यर्थः अतएवोक्तम् ।

"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये ।
अत ऊर्द्ध्वं न वन्देत अश्वत्थन्तु कदाचन ॥"

इति मलमासतत्त्वम् ॥

पूर्व्वाह्णेतनः, त्रि, (पूर्व्वाह्णे भव इति । पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४।३।२४ । इति ट्युट्युलौ तुट् च । "घकालतनेषु कालनाम्नः ।" ६ । ३ । १७ । इति विभाषया सप्तम्या अलुक् ।) पूर्व्वाह्णे भवः । इति सिद्धान्तकौमुदी ॥

पूर्व्वेद्युः, [स्] अ, (पूर्व्वस्मिन्नहनीति । पूर्व्व + "सद्यःपरुत्परार्य्यैषमःपरेद्यव्यद्यपूर्व्वेद्युरन्येद्युरिति ।" ५।३।२२ । इत्येद्युसुप्रत्ययो निपात्यते ।) पूर्व्वदिनम् । इत्यमरः । ३।४।२१ ॥ प्रातःकालः । धर्म्मवासरः । इति मेदिनी । अव्ययवर्गे, ८४ ॥ (यथा, मनौ । ३ । १८७ ।

"पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते ।
निमन्त्रयेत त्र्यवरान् सम्यग्विप्रान् यथोदितान् ॥")

पूर्व्व, क निकेतने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) मध्यस्वरी । निकेतनमिह निमन्त्रणं निवासो वा । क, पूर्व्वयति द्विजान् भोक्तुं यज्वी । पूर्व्वयति तीर्थेषु साधुः । इति दुर्गादासः ॥ अन्त्यवान्तोऽयम् ॥

पूल, कि संहतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) मध्यस्वरी । कि, पूलयति पूलति । संहतौ राशीकरणम् । इति दुर्गादासः ॥

पूष, वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मध्यस्वरी । पूषति । इति दुर्गादासः ॥

पूषः, पुं, (पूषति वर्द्धते इति । पूष + कः ।) ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४१ ॥ तुत इति भाषा ॥ (ब्रह्मदारुशब्देऽस्य विषयो ज्ञेयः ॥)

पूषकः, पुं, (पूष + स्वार्थे कन् ।) ब्रह्मदारुवृक्षः । इति राजनिर्घण्टः ॥ पलाशपिपल इति हिन्दीभाषा ॥ अस्य पर्य्यायगुणाः तूलशब्दे द्रष्टव्याः ॥

पूषभाषा, स्त्री, (पूषेव सूर्य्य इव भासत इति । भास + अच् । टाप् ।) इन्द्रनगरी । तत्पर्य्यायः । सुरपुरी २ । इति शब्दरत्नावली ॥

पूषासुहृत्, [द्] पुं, (पूष्णोऽसुहृत् । शिवो हि स्वाशुगवीरभद्रेणास्य दन्तमुत्पाटयामास अतोऽस्य तथात्वम् ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥

पूषा, [न्] पुं, (पूषतीति । पूष वृद्धौ + "श्वन्नुक्षन् पूषन् प्लीहन्निति ।" उणा० १ । १५८ । इति कनिन्प्रत्ययान्तो निपात्यते ।) सूर्य्यः । इत्यमरः । १ । ३ । २९ ॥ (यथा, मार्कण्डेये । १०९ । ६४ ।

"आदित्यं भास्करं भानुं सवितारं दिवाकरम् ।
पूषाणमर्य्यमाणञ्च स्वर्भानुं दीप्तदीधितिम् ॥"

स तु द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५—१६ ।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥")

पृ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) पूर्त्तिः पूर्णीकरणम् । क, पारयति पयसा कुम्भं लोकः । इति दुर्गादासः ॥

पृ, न प्रीतौ । इति कविकल्पद्रुमः ॥ (स्वा०-पर०-सक०-अनिट् ।) न, अतिथीन् पृणोति । इति दुर्गादासः ॥

पृ, लि पालने । इति कविकल्पद्रुमः ॥ (ह्वा०-पर०-सक०-अनिट् ।) लि, पिपर्त्ति । इति दुर्गादासः ॥

पृ, श ङ व्यायामके । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-अनिट् ।) व्यायामको व्यापारः । श ङ, धर्म्मे व्याप्रियते सुधीः । इति दुर्गादासः ।

पृक्का, स्त्री, (पृच्यते इति । पृच् + बाहुलकात् कक् । पृषोदरादित्वात् साधुः ।) शाकविशेषः पिडिङ्‌ इति भाषा ॥ तत्पर्य्यायः । मरुन्माला १ पिशुना २ देवी ४ लता ५ लघुः ६ समुद्रान्ता ७ वधूः ८ कोटिवर्षा ९ लङ्कायिका १० । इत्यमरः ॥ मरुत् ११ माला १२ स्पृक्का १३ कोटी १४ वर्षा १५ लङ्कापिका १६ वर्षालङ्कायिका १७ । इति तट्टीकायां भरतः ॥ तस्करः १८ चोरकः १९ चक्रः २० । इति रत्नमाला ॥ अस्य गुणाः । पाके मधुरत्वम् । हृद्यत्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥

पृक्तं, क्ली, (पृच्यते स्म संबध्यते स्मेति । पृच सम्पर्के + क्तः ।) धनम् । इति हेमचन्द्रः । २ । १०६ ॥ सम्पर्कयुक्ते, त्रि ॥ (यथा, रघौ । २ । १२ ।

"पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी ॥")

पृक्तिः, स्त्री, (पृच् + भावे क्तिन् ।) सम्पर्कः स्पर्शः । तत्पर्य्यायः । स्पृष्टिः २ । इत्यमरः । ३ । २ । ९ ॥

पृच, ई ल ङ सम्पर्के । इति कविकल्पद्रुमः । (अदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् । ई, पृक्तः । ल ङ, पृक्ते । परीपृच्यते । स चैव सम्पृक्तीभावः । सम्पृक्ते नाभिशस्तैर्य इति हलायुधः । सम्पृक्ते मधुना चूर्णं भिषगिति तु अन्तर्भूतण्यर्थत्वादिति चतुर्भुजः । इति दुर्गादासः ।

पृच, कि संयमने । सम्पर्के । इति कविकल्पद्रुमः ॥ (चुरा० पक्षे भ्वा० पर०-सक० सेट् ।) संयमनं बन्धनम् । कि, पर्चयति पर्चति दुष्टं राजा इति दुर्गादासः ॥

पृच, ध ई सम्पर्के । इति कविकल्पद्रुमः ॥ (रुधा० पर०-सक० अक० च-सेट् । निष्ठायामनिट् ।) सम्पर्क इह संपृक्तीकरणं सम्पृक्तीभावश्च । ध, पृणक्ति मधुना वाणम् । संपृणक्ति न पापिभिर्य इति हलायुधः । ई, पृक्तः । पपर्च । इति दुर्गादासः ॥

पृच्छा, स्त्री, (प्रच्छ ज्ञीप्सायाम् + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः ।) प्रश्नः । इत्यमरः । १ । ६ । १० ॥ (यथा, नैषधचरिते । १६ । ६० ।

"इह किमुषसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष पृष्टः ।
भण फलिभवदाख्ये तामसः स्यान्निनौका
विततिविहितलुप्ताघ्राणुरार: कोकिलोऽभूत् ॥"
"पृच्छा तस्मात् यथान्यायं विधिना प्रश्न उच्यते ॥"

इति च वैद्यकचरके सूत्रस्थाने त्रिंशोऽध्याये ॥)

पृज, इ ल ङ सम्पर्के । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् ।) सप्तमस्वरी । इ, पृञ्जते । ल ङ, पृङ्क्ते । अयं केश्चिन्न मन्यते । इति दुर्गादासः ॥

पृड, श सुखे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) सुखि सुखीकरणे। श, पृडति दीनं दाता। पर्ड़िता। इति दुर्गादासः॥

पृण, श प्रीणे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-सेट्।) प्रीणि प्रीणीकरणे। श, अग्निं पृणति यो द्विजः। पर्णिता। इति दुर्गादासः॥

पृतना, स्त्री, (प्रियते इति। पृङ् व्यायामे+बाहुलकात् तनन् गुणाभावश्च।) सेना। सेनाभेदः। इति मेदिनी। ने, ६४॥ वाहिनीत्रयम्। अत्र गजाश्चिचत्वारिंशदधिकशतद्वयम् २४३। रथाश्चिचत्वारिंशदधिकशतद्वयम् २४३। अश्वा ऊनत्रिंशदधिकसप्तशतम् ७२९। पदातिकाः पञ्चदशाधिकशतद्वयाधिकसहस्रम् १२१५। समुदायेन त्रिंशदधिकचतुःशताधिकसहस्रद्वयम् २४३०। इत्यमरभरतौ॥ (यथा, महाभारते। १।२।२१।

"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः। स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥"

"व्याप्रियन्तेऽत्र योद्धारः इति। पृङ् व्यायामे। 'पृपूर्भ्यां कित्।' इति तनन्प्रत्ययः।" इति निघण्टौ देवराजयज्वा॥ संग्रामः। इति निघण्टुः॥ यथा, ऋग्वेदे। १।८५।८।

"शूरा इवेद्युयुधयो न जग्मयः
श्रवस्यवो न पृतनासु येतिरे॥"

"पृतनासु संग्रामेषु येतिरे।" इति तद्भाष्ये सायनः॥)

पृतनाषाट्, [साह्] पुं, (पृतनां सहते इति। सह+"छन्दसि सहः।" ३।२।६३। इति ण्विः। सहेरिति षः।) इन्द्रः। इति त्रिकाण्डशेषः॥

पृथ, क प्रक्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, पर्थयति गुडमौषधे जनः। इति दुर्गादासः॥

पृथक्, व्य, (प्रथयतीति। प्रथ विक्षेपे+"प्रथः कित् सम्प्रसारणञ्च।" उणा० १।१३६। इति अजिः कित् सम्प्रसारणञ्च धातोः।) भिन्नम्। तत्पर्य्यायः। विना २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६ वर्ज्जनम् ७। इत्यमरः।३।४।३॥ (यथा, मार्कण्डेये। १४।६६।

"तेषामेतैः स्थितैः शास्त्रैर्मुहुर्विलपतां त्वचः। पृथक् कुर्व्वन्ति वै याम्याः शरीरादतिदारुणाः॥")

पृथक्क्षेत्राः, पुं, (पृथक् भिन्नं क्षेत्रं उत्पत्तिस्थानं येषामिति।) एकस्मात्तानावर्णस्त्रीजातपुत्राः। इति मिताक्षरा॥

पृथक्त्वं, क्ली, (पृथगित्यस्य भावः। पृथक्+भावे त्व।) चतुर्व्विंशतिगुणान्तर्गतसप्तमगुणः। तस्य लक्षणम्। पृथक्प्रत्ययासाधारणकारणत्वम्। यथा, भाषापरिच्छेदे।

"सङ्ख्यावच्च पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम्। अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते॥ अस्मात् पृथगियं नेति प्रतीतिर्हि विलक्षणा॥"

"पृथक्त्वं निरूपयति संख्यावदिति पृथक्प्रत्ययासाधारणकारणं पृथक्त्वम्। तन्नित्यतादिकं संख्यावत् यथा हि नित्येषु एकत्वं नित्यं अनित्ये अनित्यम् आश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

पृथक्त्वचा, स्त्री, (पृथक् त्वग् यस्याः। टाप्।) मूर्व्वा। इति रत्नमाला॥ (विषयोऽस्या मूर्व्वाशब्दे ज्ञातव्यः॥)

पृथक्पर्णी, स्त्री, (पृथक् पर्णानि यस्याः। "पाककर्णपर्णपुष्पफलेति।" ४।१।६४। इति ङीष्।) क्षुद्रक्षुपविशेषः। चाकुल्या इति भाषा॥ तत्पर्य्यायः। पृश्निपर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४। इत्यमरः।२।४।९२॥ (यथा, सुश्रुते।१।३६।

"पृथक्पर्य्यात्मगुप्ता च हरिद्रे मालती सिता। काकोल्यादिश्च योज्यः स्यात्प्रशस्तो रोपणे घृते॥"

पर्य्यायान्तरमस्या यथा, वैद्यकरत्नमालायाम्।

"पृश्निपर्णी पृथक्पर्णी लाङ्गूली क्रोष्टुपुच्छिका। धावनिः कलशी तन्वी गुहा क्रोष्टुकमेखला॥ दीर्घा शृगालविन्नासा श्रीपर्णी सिंहपुच्छिका। दीर्घपत्रा त्वतिगुहा घृतिला चित्रपर्णिका॥")

पृथगात्मता, स्त्री, (पृथक् आत्मा स्वरूपं यस्य। तस्य भावः। तल्।) विवेकः। इत्यमरः।२।७।३८॥

पृथगात्मिका, स्त्री, (पृथक् आत्मा स्वरूपं यस्याः। कापि अत इत्वम्।) व्यक्तिः। यथा,—

"जातिर्जातञ्च सामान्यं व्यक्तिस्तु पृथगात्मिका॥"

इति अनुर्जनजन्मानीत्यादिश्लोकोत्तरं क्वचिदमरकोषे पाठः॥

पृथग्जनः, पुं, (पृथक् सज्जनेभ्यो विभिन्नो जनः।) मूर्खः। नीचः। इत्यमरः।३।१०।१६॥ (यथा, मनुः।७।१३७।

"यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम्। व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥")

पापी। इति शब्दरत्नावली॥ भिन्नलोकश्च॥

पृथग्बीजः, पुं, (पृथक् विभिन्नानि बीजानि यस्य।) भल्लातकः। इति राजनिर्घण्टः॥

पृथग्विध', त्रि, (पृथक् विभिन्नलक्षणा विधा प्रकारो यस्य।) नानारूपः। इत्यमरः। ३।१।९३॥ (यथा, मनुः।१।४०।

"सर्व्वञ्च दंशमशकं स्थावरञ्च पृथग्विधम्॥")

पृथवी, स्त्री, (प्रथते विस्तारमेतीति। प्रथ+"प्रथेः षिवन् सम्प्रसारणञ्च।" उणा० १।१५०। इत्यत्र 'षवन् इत्येके।' इत्युज्ज्वलदत्तोक्त्या षवन् सम्प्रसारणञ्च। षित्वात् ङीष्।) पृथिवी। यथा,

"पृथवी पृथिवी पृथ्वी धरा सर्व्वसहा रसा॥"

इति भरतधृतवाचस्पतिः॥

पृथा, स्त्री, कुन्ती। इति जटाधरः॥ (इयं हि शूरस्य कन्या वसुदेवस्य भगिनी। अस्याः पिता शूरस्तु कुन्तिनृपाय निजबान्धवायापुत्रायैनां स्वतकन्यकारूपेण दत्तवान्। तत्र कुन्तिराजवेश्मनि निवसन्ती दुर्व्वाससं सन्तोष्य तस्मात् मन्त्रवरं लब्ध्वा कन्यावस्थायामेव सूर्य्यात् कर्णं वीरवरं प्रसूतवती। ततो गच्छति काले कुरुवंशावतंसः पाण्डुनृपतिरेनां परिणीतवान्। भर्त्रादिष्टा धर्म्मात् युधिष्ठिरं वायोर्भीमं इन्द्रादर्ज्जुनं प्रसूतवती। अनन्तरं भर्त्रादेशेन सपत्न्यै मद्रसुतायै तन्मन्त्रं प्रदत्तवती तेन माद्री अश्विभ्यां नकुलसहदेवौ लेभे। इत्येषा कथा भागवते ९ स्कन्धे २४ अध्याये द्रष्टव्या॥)

पृथाजः, पुं, (पृथाया जायते इति। जन+डः।) कुन्तीपुत्रः॥ अर्ज्जुनद्रुमः। इति राजनिर्घण्टः॥

पृथापतिः, पुं, (पृथायाः पतिः।) पाण्डुराजः। इति त्रिकाण्डशेषः॥

पृथिका, स्त्री, शतपदी। इति शब्दमाला॥

पृथिविः, स्त्री, (पृथिवी। ङीषो वा ह्रस्वः।) पृथिवी। इति संक्षिप्तसारोणादिवृत्तिः॥

पृथिवी, स्त्री, (प्रथते विस्तारं यातीति। प्रथ+"प्रथेः षिवन् संप्रसारणञ्च।" उणा० १।१५०। इति षिवन् सम्प्रसारणञ्च। ङीष्।) मर्त्त्यलोकाधिष्ठानभूता। तत्पर्य्यायः। भूः २ भूमिः ३ अचला ४ अनन्ता ५ रसा ६ विश्वम्भरा ७ स्थिरा ८ धरा ९ धरित्री १० धरणी ११ क्षोणी १२ ज्या १३ काश्यपी १४ क्षितिः १५ सर्व्वंसहा १६ वसुमती १७ वसुधा १८ उर्व्वी १९ वसुन्धरा २० गोत्रा २१ कुः २२ पृथ्वी २३ क्ष्मा २४ अवनिः २५ मेदिनी २६ मही। इत्यमरः।२।१।२—३॥ भूर् २८ भूमी २९ धरणिः ३० क्षोणिः ३१ क्षोणी ३२ क्षौणिः ३३ क्षमा ३४ अवनी ३५ महिः ३६ रत्नगर्भा ३७ सागराम्बरा ३८ अब्धिमेखला ३९ भूतधात्री ४० रत्नावती ४१ देहिनी ४२ पारा ४३ विपुला ४४ मध्यमलोकवर्त्मा ४५। इति भरतः॥ धरणीधरा ४६ धारणी ४७ महाकान्ता ४८ जगद्वहा ४९ गन्धवती ५० खकनी ५१ गिरिकर्णिका ५२ धारयित्री ५३ धात्री ५४ सागरमेखला ५५ सहा ५६ अचलकीला ५७ गौः ५८ अब्धिद्वीपा ५९ स्थिरा ६० इडा ६१ इडिका ६२ इला ६३ इलिका ६४। इति शब्दरत्नावली॥ उदधिवस्त्रा ६५ इरा ६६ आदिमा ६७ ईला ६८ वरा ६९ उर्व्वरा ७० आद्या ७१ जगती ७२ पृथुः ७३ भुवनमाता ७४ निश्चला ७५ बीजप्रसूः ७६ श्यामा ७७ क्रोडकान्ता ७८। इति राजनिर्घण्टः॥ खगवती ७९ अदितिः ८०। इति जटाधरः॥ * ॥ (पृथवी ८१। इति शब्दार्णवः॥) न्यायमते अस्या धर्म्मः। रूपद्रवत्वप्रत्यक्षयोगित्वम्। इयं गुर्व्वी रसयुक्ता च। अस्या द्रवत्वं नैमित्तिकम्। अस्या गुणाः। स्पर्शः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२

रस: १३ गन्ध: १४। इयं गन्धकारणं नाना रूपवती बहुरसयुता। गन्धस्तु द्विविध: सौरभं असौरभम्। तस्या: स्पर्श: अनुष्णाशीत पाकज:। सा द्विविधा नित्या अनित्या च। परमाणुरूपा नित्या सावयवा अनित्या। सा त्रिविधा देहेन्द्रियविषयरूपा। देहरूपा योनिजादि: इन्द्रियात्मिका घ्राणरूपा विषयात्मिका द्व्यणुकादिब्रह्माण्डपर्य्यन्ता। यथा,—

"रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमत्रिकम्।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रव:॥"
"स्पर्शादयोऽष्टौ वेगश्च द्रवत्वञ्च गुरुत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्द्दश॥
स्नेहहीना गन्धयुता क्षितावेते चतुर्द्दश।
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मत:।
स्पर्शस्तु तस्या विज्ञेयो ह्यनुष्णाशीतपाकज:॥
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देहमिन्द्रियं घ्राणलक्षणम्॥
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृत:॥"

इति भाषापरिच्छेदे। २८—३८॥

तस्या अध्यात्मादि यथा,—

"पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते।
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्व॥

(यथा, मार्कण्डेये। ५४। ४।
"भूतार्द्धकोटिविस्तारो पृथिवी तन्नस्ती द्विज।।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत्॥")

तस्या उत्पत्तिकारणं यथा,—

"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्वदन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी पयसा संवृतेति च॥
तयोर्जीवनकालेन प्रत्यक्षा साभवत् स्फुटम्।
ततो बभूव मेदश्च मरणस्यान्तरन्तयो:॥
मेदिनीति च विख्यातेत्युक्ता येस्तन्मतं शृणु।
जलधौता कृता पूर्व्वं वर्द्धिता मेदसा यत:॥
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्।
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे॥
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्।
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्॥
स च प्रविष्ट: सर्व्वेषां तल्लोम्नां विवरेषु च।
कालेन महता तस्मादभूव वसुधा मुने।॥
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता।
आविर्भूता तिरोभूता सा जले च पुन: पुन:॥
आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥
प्रतिविश्वेषु वसुधा शैलकाननसंयुता।
सप्तसागरसंयुक्ता सप्तद्वीपमिता सती॥
हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता।
ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैस्तदाज्ञये॥
पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता।
पातालसप्ततदधस्तदूर्द्ध्वं ब्रह्मलोकक:॥
ब्रह्मलोकश्च तत्रैव सर्व्वविश्वञ्च तत्र वै।
एवं सर्व्वाणि विश्वानि पृथिव्यां निर्म्मितानि च।
उर्द्ध्वे गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ॥
नश्वराणि च विश्वानि सर्व्वाणि कृत्रिमाणि च।
प्रलये प्राकृते ब्रह्मन्। ब्रह्मणश्च निपातने।
महाविराडादिसृष्टौ सृष्ट: कृष्णेन चात्मना॥
नित्ये: स्थिता च प्रलये काष्ठाकाशेश्वरै: सह।
क्षित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरै:॥
मुनिभिर्म्मनुभिर्व्विप्रैर्गन्धर्व्वादिभिरेव च।
विष्णोर्व्वराहरूपस्य पत्नी सा श्रुतिसम्मता।
तत्पुत्त्रो मङ्गलो ज्ञेयो घटेशो मङ्गलात्मज:॥

नारद उवाच।

पूजिता केन रूपेण वाराहे च सुरैर्म्मही।
वराहेण च वाराही सर्व्वै: सर्व्वाश्रया सती॥
तस्या: पूजाविधानञ्चाप्यधश्चोर्द्धगमक्रमम्।
मङ्गलं मङ्गलस्यापि जन्म चास्तं वद प्रभो!॥

श्रीनारायण उवाच।

वाराहे च वराहश्च ब्रह्मणा संस्तुत: पुरा।
उद्दधार महीं हत्वा हिरण्याक्षं रसातलात्॥
जले तां स्थापयामास पद्मपत्रं यथा ह्रदे।
तत्रैव निर्म्ममे ब्रह्मा सर्व्वं विश्वं मनोहरम्॥
दृष्ट्वा तदधिदेवीञ्च सकामां कामुको हरि:।
वराहरूपी भगवान् कोटिसूर्य्यसमप्रभ:॥
कृत्वा रतिकरीं शय्यां मूर्त्तिञ्च सुमनोहराम्।
क्रीडाञ्चकार रहसि दिव्यं वर्षमहर्निशम्॥
सुखसम्भोगसंस्पर्शात् मूर्च्छां संप्राप सुन्दरी।
विदग्धाया विदग्धेन सङ्गमोऽतिसुखप्रद:॥
विष्णुस्तदङ्गसंस्पर्शात् बुबुधे न दिवानिशम्।
वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम्॥
पूर्व्वरूपञ्च वाराहं दधार चावलीलया।
पूजाञ्चकार भक्त्या च ध्यात्वा च धरणीं सतीम्।
धूपैर्दीपैश्च नैवेद्यै: सिन्दूरैरनुलेपनै:।
वस्त्रै: पुष्पैश्च बलिभि: संपूज्योवाच तां हरि:॥

श्रीमहावराह उवाच।

सर्व्वाधारा भव शुभे। सर्व्वै: संपूजिता सुखम्।
मुनिभिर्म्मनुभिर्द्देवै: सिद्धैश्च मानवादिभि:॥
अम्बुवाचीत्यागदिने गृहारम्भप्रवेशने।
वापीतडागारम्भे च गृहे च कृषिकर्म्मणि॥
तव पूजां करिष्यन्ति मद्वरेण सुरादय:।
मूढ़ा ये न करिष्यन्ति यास्यन्ति नरकञ्च ते॥

वसुधोवाच।

वहामि सर्व्वं वाराहरूपेणाहं तवाज्ञया।
लीलामात्रेण भगवन्। विश्वञ्च सचराचरम्॥
मुक्तां शुक्तिं हरेरर्चां शिवलिङ्गं शिलां तथा।
शङ्खं प्रदीपं मन्त्रञ्च माणिक्यं हीरकं मणिम्॥
यज्ञसूत्रञ्च पुष्पञ्च पुस्तकं तुलसीदलम्।
जपमालां पुष्पमालां कर्पूरञ्च सुवर्णकम्॥
गोरोचनां चन्दनञ्च शालग्रामजलं विना।
एतान् वोढुमशक्ताहं क्लिष्टा च भगवन्!
शृणु॥

श्रीभगवानुवाच।

द्रव्याण्येतानि मूढ़ा ये अर्पयिष्यन्ति सुन्दरि।।
ते यास्यन्ति कालसूत्रं दिव्यं वर्षशतं त्वयि॥
इत्येवमुक्त्वा भगवान् विरराम च नारद।।
बभूव तेन गर्भेण तेजस्वी मङ्गलग्रह:॥
पूजां चक्रु: पृथिव्याश्च ते सर्व्वे चाज्ञया हरे:।
काण्वशाखोक्तध्यानेन तुष्टुवु: स्तवनेन च॥
ददुर्मूलेन मन्त्रेण नैवेद्यादिकमेव च।
संस्तुता त्रिषु लोकेषु पूजिता सा बभूव ह॥

नारद उवाच।

किं ध्यानं स्तवनन्तस्या मूलमन्त्रञ्च किं वद।
गूढ़ं सर्व्वपुराणेषु श्रोतुं कौतूहलं मम॥

श्रीनारायण उवाच।

आदौ च पृथिवी देवी वराहेण च पूजिता।
तत: सर्व्वैर्मुनीन्द्रैश्च मनुभिर्मानवादिभि:।
ध्यानञ्च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद।॥
ॐ श्रीं ह्रीं क्लीं वसुन्धरायै स्वाहा।
इत्यनेनैव मन्त्रेण पूजिता विष्णुना पुरा॥
श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम्।
चन्दनोक्षितसर्व्वाङ्गीं रत्नभूषणभूषिताम्॥
रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम्।
वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे॥
ध्यानेनानेन सा देवी सर्व्वैश्च पूजिता भवेत्।
स्तवनं शृणु विप्रेन्द्र। काण्वशाखोक्तमेव च॥

श्रीविष्णुरुवाच।

जये जये जयाधारे जयशीले जयप्रदे।।
यज्ञसूकरजाये च जयं देहि जयावहे॥
मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रिये।
मङ्गलाढ्ये मङ्गलेशे मङ्गलं देहि मे भवे॥
सर्व्वाधार सर्व्वबीजे सर्व्वशक्तिसमन्वित।
सर्व्वकामप्रदे देवि सर्व्वेष्टं देहि मे भवे॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि।
पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥
रत्नाधारे रत्नगर्भे रत्नाकरसमन्विते।
स्त्रीरत्नरूपे रत्नाढ्ये रत्नसारप्रदे भवे॥
सर्व्वशस्यालये सर्व्वशस्याढ्ये सर्व्वशस्यदे।
सर्व्वशस्यहरे काले सर्व्वशस्याधिके भवे॥
भूमे भूमिपसर्व्वस्वे भूमिपानां परायणे।
भूपाहङ्काररूपेण भूमिं देहि च भूमिपे॥
इदं पुण्यं महास्तोत्रं तां संपूज्य च य: पठेत्
कोटि कोटि जन्म जन्म स भवेद्भूमिपेश्वर:॥
भूमिदानकृतं पुण्यं लभते पाठनाज्जन:।
भूमिदानहरात् पापान्मुच्यते नात्र संशय:॥
अम्बुवाचीभूखनने पापात् स मुच्यते ध्रुवम्।
अन्यकूपे कूपदानात् पापात् स मुच्यते ध्रुवम्।
परभूम्याहरणात् पापान्मुच्यते नात्र संशय:॥
भूमौ वीर्य्यपरित्यागात् भूमौ दीपादिस्थापना
पापेन मुच्यते प्राज्ञ: स्तोत्रस्य पठनान्मुने!।
अश्वमेधशतं पुण्यं लभते नात्र संशय:॥

नारद उवाच ।

भूमिदानकृतं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ श्राद्धपापं कूपे कूपदजं तथा ॥
अम्बुवाचीभूखननं वीर्य्यत्यागजमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नतः ॥
अन्यं वा पृथिवीजन्यं पापं मत्प्रश्नतः परम् ।
यदस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥

श्रीनारायण उवाच ।

वितस्तिमात्रां भूमिञ्च यो ददाति च भारते ।
सन्ध्यापूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति यः ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थितः ॥
ग्रामं भूमिञ्च धान्यञ्च यो ददात्याददाति च ।
सर्व्वपापविनिर्म्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुञ्च यत्काले यः साधुस्तामनुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वितः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्रपौत्रप्रभृतिर्भूमिहीनः श्रिया हतः ।
पुत्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृष्य यश्च शस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोष्ठं तडागं निष्कृष्य मार्गं शस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्द्दश ॥
न पञ्चपिण्डमुद्धृत्य परकूपे च स्नाति यः ।
प्राप्नोति नरकं नैव स्नानजं फलमेव च ॥
कामी भूमौ च रहसि वीर्य्यत्यागं करोति यः ।
त्रिधरेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
अम्बुवाच्यां भूखननं यः करोति च मानवः ।
स याति कृमिदंशञ्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयलुप्तकूपे कूपं मूढः प्रयच्छति ।
पुष्करिण्याञ्च लुप्तायां पुष्करिणीं यो ददाति च ॥
सर्व्वं फलं परस्यैव तप्तसूर्म्मिं व्रजेत्तु सः ।
तत्र तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्द्दश ॥
परकीयतडागे च पङ्कमुद्धृत्य नोत्सृजेत् ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नरः ॥
पिण्डं पित्रे भूमिभर्त्तुर्न प्रदाय च मानवः ।
श्राद्धं करोति यो मूढो नरकं याति निश्चितम् ॥
भूमौ दीपं योऽर्पयति स चान्धः सप्तजन्मनि ।
भूमौ शङ्खञ्च संस्थाप्य कुष्ठं जन्मान्तरे लभेत् ॥
मुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिन्तथा ।
यश्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पुष्पमालां कर्पूरं रोचनान्तथा ।
यो मूढः स्थापयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने । चन्दनकाष्ठञ्च रुद्राक्षं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यज्ञसूत्रञ्च भूमौ संस्थापयेत्तु यः ।
न भवेद्विप्रयोनौ च तस्य जन्मान्तरे जनिः ॥
ब्रह्महत्यासमं पापमत्र च लभेद्ध्रुवम् ।
ग्रन्थियुक्तं यज्ञसूत्रं पूज्यञ्च सर्व्ववर्णकैः ॥
यज्ञं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तप्तसूर्म्मिञ्च सन्तप्तः सप्तजन्मसु ॥
भूकम्पे ग्रहणे यो हि करोति खननं भुवः ।
जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र सर्व्वेषां भूर्भूमिस्तेन कीर्त्तिता ।
वसुरत्नं या दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकीर्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
इज्या च यागाधाराच्च क्षौणी क्षीणालये च या ।
महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी कश्यपस्येयमचला स्थिररूपतः ।
विश्वम्भरा तद्धरणादनन्तानन्तरूपतः ॥
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वान्महामुने ।॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्यानं ९ अध्यायः ॥ * ॥

तस्या भारा यथा,—

क्षितिरुवाच ।

“कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः ।
तेषां महापातकिनामशक्ता भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यकृत्यविवर्जिताः ।
श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीडिता ॥
पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः ।
ये न कुर्व्वन्ति तेषाञ्च न शक्ता भारवाहने ॥
ये मिथ्यावादिनस्तात । दयासत्यविहीनकाः ।
निन्दका गुरुदाराणां तेषां भारेण पीड़िता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्षिप्रदायकः ।
विश्वासघ्नः स्थाप्यहारी तेषां भारेण पीड़िता ॥
कल्याणसूक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ।
शवदाही शूद्रभोजी तेषां भारेण पीड़िता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढा विहन्तारस्तेषां भारेण पीड़िता ॥
सदा द्विषन्ति ये पापा गोविप्रसुरवैष्णवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता ॥
शङ्खादीनाञ्च भारेण पीड़िताहं यथा विधे ।।
ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता ॥
इत्येवमुक्ता वसुधा रुरोद च मुहुर्मुहुः ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥
भारं तवापनेष्यामि दस्यूनामप्युपायतः ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ।॥
मन्त्रं मङ्गलकुम्भञ्च शिवलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाशङ्खतुलसीप्रतिमाजलम् ।
शङ्खप्रदीपमालाञ्च शिलार्च्चातुलसीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिदर्भमणिन्तथा ।
ग्रन्थियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च मुक्ताञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां वह्निं कर्पूरं पद्मं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशाग्रजं तीर्थतोयं गव्यं गोमूत्रगोमयम् ॥
त्वयि ये स्थापयिष्यन्ति मूढा एतानि सुन्दरि ।।
पच्यन्ते कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

तस्या रूपान्तरं यथा,—

“इति तस्य वचः श्रुत्वा जनकस्य तदा क्षितिः ।
मुनीनां सन्निधौ रूपं दर्शयामास भूभृते ॥
नीलोत्पलदलश्यामामञ्चमालाब्जधारिणीम् ।
बाहुयुग्मेन शुभ्रेण मृणालायतशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा शम्भुनृपोऽनमत् ॥”
इति कालिकापुराणे ११ अध्यायः ॥

पृथिव्यां ग्रामशस्याद्युत्पत्तिकारणं यथा,—

प्रजा ऊचुः ।

“अराजके नृपश्रेष्ठ । धरित्र्या सकलौषधीः ।
ग्रस्तास्ततः क्षयं यान्ति प्रजाः सर्व्वाः प्रजेश्वर ।॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः ॥

श्रीपराशर उवाच ।

ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽभ्यधावद्वसुन्धराम् ॥
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादींस्त्रासादगमन्मही ।
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्बाणपरित्राणपरायणा ॥

पृथिव्युवाच ।

स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥

श्रीपृथुरुवाच ।

एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥

पृथिव्युवाच ।

प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥

पृथुरुवाच ।

त्वां हत्वा वसुधे ! बाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥

श्रीपराशर उवाच ।

ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
तस्माद्वदाम्युपायन्ते त्वं कुरुष्व यदीच्छसि ॥
समस्तास्ता मया जीर्णा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तत्तु वत्सं प्रयच्छस्व क्षरेयं येन वत्सला ॥
समाञ्च कुरु सर्व्वत्र येन क्षीरं समन्ततः ।
वरौषधीबीजभूतं वीर । सर्व्वत्र भावये ॥

श्रीपराशर उवाच ।

तत उत्सारयामास शैलान् शतसहस्रशः ।
धनुष्कोट्या तदा वैण्यस्तेन शैला विवर्द्धिताः ॥
नहि पूर्व्वविसर्गे वै विषमे पृथिवीतले

प्रतिभागः पुराणां वा ग्रामाणां वा पुराभवत् ॥
न शस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैण्यात् प्रभृति मैत्रेय ! सर्व्वस्यैतस्य सम्भवः ॥
यत्र यत्र समं त्वस्या भूमेरासीद्द्विजोत्तम ! ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता सोऽपि प्रणष्टास्वोषधीषु वै ॥
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुम् ।
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥
शस्यजातानि सर्व्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात ! वर्त्तन्तेऽद्यापि नित्यशः ॥
प्राणप्रदानात् स पृथुर्यस्माद्भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥
तत्तत्पात्रमुपादाय तत्र दुग्धा हुते । पयः ।
वत्स । दोग्धृविशेषाश्च तेषां तद्योनयोऽभवन् ॥
सैषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥
एवंप्रभावः स पृथुः पुत्त्रो वेणस्य वीर्य्यवान् ।
जज्ञे महीपतिः पूर्व्वो राजाभूज्जनरञ्जनात् ॥"
इति श्रीविष्णुपुराणे १ अंशे पृथुचरितं १३ अध्यायः ॥ * ॥
तस्या नामगोरूपदोहनानां कारणानि यथा,—
ऋषय ऊचुः ।
"बहुभिर्धरणी भुक्ता भूपालैः श्रूयते पुरा ।
पार्थिवाः पृथिवीयोगात् पृथिवी कस्य योगतः ॥
किमर्थञ्च कृता संज्ञा भूमिः किं पारिभाषिकी ।
गौरितीयञ्च विख्याता सूत ! कस्माद्ब्रवीहि नः ॥
सूत उवाच ।
वंशे स्वायम्भुवे ह्यासीदङ्गो नाम प्रजापतिः ।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्म्मुखी ॥
सुनीथा नाम तस्यास्तु वेणो नाम सुतः पुरा ।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः ॥
लोकेऽप्यधर्म्मकृज्जातः परभार्य्यापहारकः ।
धर्म्माचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्दिताः ।
ममन्थुर्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः ॥
तत्कायान्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः ॥
शरीरे मातुरंशेन कृष्णाञ्जनसमप्रभाः ।
पितुरंशस्य चांशेन धार्म्मिको धर्म्मचारिकः ॥
उत्पन्नो दक्षिणाद्धस्तात् सधनुः सशरो गदी ।
दिव्यतेजोमयवपुः सरत्नकवचाङ्गदः ॥
पृथुरेवाभवद्यस्मात्ततः पृथुरजायत ।
स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुश्चरम् ॥
विष्णोर्व्वरेण सर्व्वस्य प्रभुत्वमगमत् प्रभुः ।
निःस्वाध्यायवषट्कारं निर्धनं वीक्ष्य भूतलम् ॥
दग्धुमेवोद्यतः कोपाच्छरेणामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुत्सहेत् ॥
पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततः स्थित्वैकदेशे तु किं करोमीति साब्रवीत् ॥
पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते ! ।
सर्व्वस्य जगतः शीघ्रं स्थावरस्य चरस्य च ॥
तथैव साब्रवीद्भूमिर्दुदोह च नराधिपः ।
स्वे स्वे पाणौ पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुम् ॥
तदन्नमभवत् शुद्धं प्रजा जीवन्ति तेन वै ।
ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तदाभवत् ॥
दोग्धा बृहस्पतिरभूत् पात्रं वेदस्तपो रसः ।
देवैश्च वसुधा दुग्धा दोग्धा मित्रस्तदाभवत् ॥
इन्द्रो वत्सः समभवत् क्षीरमूर्ज्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतन्तदा ॥
अन्तकश्चाभवद्दोग्धा यमो वत्सः सुधारसः ।
अलावुपात्रं नागानां तक्षको वत्सकोऽभवत् ॥
विषं क्षीरं ततो दोग्धा धृतराष्ट्रोऽभवत् पुनः ।
असुरैरपि दुग्धेयमायसे शक्रपीडनीम् ॥
पात्रे मायामभूद्वत्सः प्रह्लादिश्च विरोचनः ।
दोग्धा द्विमूर्द्धा तत्रासीन्माया येन प्रवर्त्तिता ॥
यक्षैश्च वसुधा दुग्धा पुरान्तर्द्धानमीप्सुभिः ।
कृत्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥
प्रेतरक्षोगणैर्दुग्धा धरा रुधिरमुल्बणम् ।
रौप्यनाभोऽभवद्दोग्धा सुमाली वत्स एव तु ॥
गन्धर्व्वैश्च पुनर्दुग्धा वसुधा साप्सरोगणैः ।
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मदले तथा ॥
दोग्धा च सुरुचिर्नाम नाट्यवेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाचलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः ॥
वृक्षैश्च वसुधा दुग्धा क्षीरं छिन्नप्ररोहणम् ।
पालाशपात्रे दोग्धा तु सालः पुष्पलताकुलः ॥
प्लक्षोऽभवत्ततो वत्सः सर्व्ववृक्षगणाधिपः ।
एवमन्यैश्च वसुधा तथा दुग्धा यथेप्सितम् ॥"
इति मत्स्यपुराणे १० अध्यायः ॥ * ॥
अन्यद्विवरणं भूगोलशब्दे द्रष्टव्यम् । पृथ्वी ।
तद्वैदिकपर्य्यायः । गौः १ ग्मा २ ज्मा ३ क्ष्मा ४ क्षा ५ क्षामा ६ क्षोणी ७ क्षितिः ८ अवनिः ९ उर्व्वी १० पृथ्वी ११ मही १२ रिपः १३ अदितिः १४ इला १५ निरृतिः १६ भूः १७ भूमिः १८ पूषा १९ गातुः २० गोत्रा २१ । इत्येकविंशतिपृथिवीनामधेयानि । इति वेदनिघण्टौ १ अध्यायः ॥ (अन्तरिक्षम् । इति निघण्टुः ।१।३ ॥ यथा, ऋग्वेदे ।१०।१२१।१ ।
"स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥"
"पृथिवीत्यन्तरिक्षनाम ।" इति तद्भाष्ये सायनः ॥)
पृथिवीगीता, स्त्री, (पृथिव्या गीता ।) पृथिवी कथा । यथा,—
"मैत्रेय ! पृथिवीगीताः श्लोकाश्चात्र निबोध तान् ।
यानाह धर्म्मध्वजिने जनकायासितो मुनिः ॥
श्रीपृथिव्युवाच ।
कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन केन स्वधर्म्माणोऽप्यतिविश्वस्तचेतसः ॥
पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥
समुद्रावरणं याति मन्मण्डलमथो वशम् ।
कियदात्मजयादेतन्मुक्तिरात्मजये फलम् ॥
उत्सृज्य पूर्व्वे यां याता यां नादाय गतः पिता ।
तां मामतिविमूढत्वाज्जेतुमिच्छन्ति पार्थिवाः ॥
मत्कृते पितृपुत्त्राणां भ्रातॄणाञ्चापि विग्रहाः ।
जायन्तेऽत्यन्तमोहेन ममत्वादृतचेतसाम् ॥
पृथ्वी ममेयं सकला ममेयं
ममेति चैषा मम शान्ततियम् ।
यो यो मृतोऽत्यत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥
दृष्ट्वा ममत्वादृतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्थस्य कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥
पृथ्वी ममैषाशु परित्यजैनां
वदन्ति ये दूतमुखैः स्वशत्रून् ।
नराधिपास्तेषु ममातिहासः
पुनश्च मूढेषु दयाभ्युपैति ॥
श्रीपराशर उवाच ।
इत्येते धरणीगीताः श्लोका मैत्रेय ! यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हिमम् ॥"
इति विष्णुपुराणे ४ अंशे २४ अध्यायः ॥
पृथिवीपतिः, पुं, (पृथिव्याः पतिः ।) राजा । (यथा, मनुः । ७ । १७७ ।
"सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्त्रोदासीनशत्रवः ॥")
ऋषभनामौषधिः । इति मेदिनी । ते, २३१ । यमः । इति हेमचन्द्रः ॥
पृथिवीपालः, पुं, (पृथिवीं पालयतीति । पृथिवी + पालि + अण् ।) राजा । यथा,—
"बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥"
इति रघुः ॥
पृथिवीशक्रः, पुं, (पृथिव्यां शक्र इव ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥
पृथुः, पुं, (प्रथते विख्यातो भवतीति । प्रथ + "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।" उणा० १ । २९ । इति कुः सम्प्रसारणञ्च ।) त्रेतायुगे सूर्य्यवंशीयचक्रनृपः । वेणनृपस्य दक्षिणकरमथनाज्जातः । प्रजारञ्जनात् आदौ राजोपाधिं प्राप्तः । यथा,—
"अथ ते ऋषयः सर्व्वे प्रधानमनुकूलतः ।
गतकल्मषमेवं तं जातं वेणं नृपोत्तमम् ॥
ममन्थुर्दक्षिणं पाणिं तस्यैव च महात्मनः ।
मथिते तस्य पाणौ च सम्भूतं स्वेदमेव हि ॥
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणिमेव च ।
सकरात् पुरुषो जज्ञे द्वादशादित्यसन्निभः ॥
तप्तकाञ्चनवर्णाङ्गो दिव्यमाल्याम्बरावृतः ।
दिव्याभरणशोभाङ्गो दिव्यगन्धानुलेपनः ॥

मुकुटेन सुवर्णेन कुण्डलाभ्यां विराजते ॥
महाकायो महाबाहुः रूपेणाप्रतिमो भुवि ।
खड्गबाणधरो धन्वी कवची च महाप्रभः ॥
सर्व्वलक्षणसम्पन्नः सर्व्वालङ्कारभूषितः ।
तेजसा रूपभावेन साक्षादग्निरिव ज्वलन् ॥
आद्यमाजगवं नाम धनुर्गृह्य महावरम् ।
इन्द्रो दिवि यथा भाति भुवि वेणात्मजस्तथा ॥
तस्मिन् जाते महाभागे देवाश्च ऋषयोऽमलाः ।
उत्सवं चक्रिरे सर्व्वे वेणस्य तनयं प्रति ॥
दीप्यमानः स्ववपुषा वर्णेनैव महामतिः ।
शराश्च दिव्यान् चापं कवचञ्च महाप्रभम् ॥
ददाविन्द्रः सहस्राक्षो मालाञ्चाम्लानपुष्पिकाम् ॥
जाते तस्मिन् महाभागे पृथौ वीरे महात्मनि ॥
संप्रहृष्टानि भूतानि समस्तानि द्विजोत्तमाः ।
सर्व्वतीर्थानि तोयानि पुण्यानि विविधानि च ॥
स्थावराणि चराण्येव अभ्यषिञ्चन्नराधिपम् ।
महावीरं प्रजापालं पृथुमेवं द्विजोत्तमाः ॥
पृथुं वैण्यं महाराज्ये अभिषिक्तं चराचरैः ।
देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महात्मना ॥
राजाधिराजाधिकारे वै पृथुर्वैण्यः प्रतापवान् ।
तदा पित्रा प्रजाः सर्व्वाः कदा नैवानुरञ्जिताः ॥
तेनानुरञ्जिताः सर्व्वाः सुखैर्मुमुदिरे तदा ।
अनुरागात् वीरस्य नाम राजेत्यभाषत ॥
प्रयातस्य सुधीरस्य समुद्रस्य द्विजोत्तमाः ।
आपस्तस्तम्भिरे सर्व्वा भयात्तस्य महात्मनः ॥
प्रयातस्य रथस्यापि तस्यैव च महात्मनः ।
दुर्गमार्गं विलोक्यैव सुमार्गं पर्व्वता ददुः ॥
ध्वजभङ्गं न चक्रुस्ते गिरयः सर्व्व एव ते ।
अकृष्टपच्या पृथिवी सर्व्वत्र कामधेनवः ॥
पर्जन्यः कामवर्षी च वेदयज्ञान् महोत्सवान् ।
कुर्व्वन्ति ब्राह्मणाः सर्व्वे क्षत्रियाश्च तथापरे ॥
सर्व्वकामफला वृक्षास्तस्मिन् शासति राजनि ।
न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणाम् ॥
सर्व्वे सुखेन जीवन्ति लोका धर्म्मपरायणाः ।
तस्मिन् शासति दुर्द्धर्षे राजराजे महात्मनि ॥"
इति पाद्मोत्तरखण्डे २६ अध्यायः ॥ * ॥
तस्य माहात्म्यं यथा,—
"पृथुना प्रविभक्ता च शोभिता च वसुन्धरा ।
शस्यरत्नवती स्फीता पुरपत्तनशालिनी ॥
एवं प्रभावो वैण्यश्च राजासीद्राजसत्तमः ।
नमस्यश्चैव पूज्यश्च भूतिकामैर्नरोत्तमैः ॥
ब्राह्मणैर्व्वेदकामैश्च पृथुर्वैण्यः प्रतापवान् ।
आदिकर्त्ता स्वराजानां योधानां प्रथमो नृपः ॥
यो हि योद्धा रणं याति कीर्त्तयित्वा पृथुं नृपम् ।
घोररूपान् स संग्रामान् क्षेमी तरति कीर्त्तिमान् ॥
वैश्यैरपि हि मुख्यैश्च स्वाः स्वा वृत्तीरनुष्ठितैः ।
पृथुरेव नमस्कार्य्यः सर्व्वसिद्धिकरस्तु सः ॥
एवं पृथुरभूत् पूर्व्वं प्रजादाक्षप्रपालिनः ।
सार्व्वभौमो महातेजा दुर्निवार्य्यः सुरासुरैः ॥"
तस्य पुत्त्रौ द्वौ । यथा,—
"पृथोः पुत्त्रौ तु धर्म्मज्ञौ जज्ञातेऽन्तर्द्धिपालिनौ ।
शिखण्डी च हविर्द्धानमन्तर्द्धानाद्व्यजायत ॥"
अरेणाभूराजः पुत्त्रः । यथा, अग्निपुराणे ।
"अयोधस्य पुत्त्रोऽभूत् ककुत्स्थो नाम वीर्य्यवान् ।
ककुत्स्थस्य अरेणाभूस्तस्य पुत्त्रः पृथुः स्मृतः ॥"
अग्निः । इति मेदिनी । थे, १० ॥ (प्रियव्रतवंशोद्भवस्य विभोः पुत्त्रः । यथा, विष्णुपुराणे । २ । १ । ३८ ।
"भुवस्तस्मात् तयोद्गीथः प्रस्तारस्ततसुतो विभुः ।
पृथुस्ततोऽभवत्तस्मा नक्तस्यापि गयः सुतः ॥"
तामसमन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये । ७४ । ५८ ।
"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् । सप्त सप्तर्षयोऽभवन् ॥")
पृथुः, स्त्री, (प्रथते विस्तारमेतीति । प्रथ + कुः सम्प्रसारणञ्च ।) कृष्णजीरकः । इत्यमरः । २ । ९ । ३७ ॥ (एतत्पर्य्यायो यथा,—
"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
त्वक्पत्री । हिङ्गुपत्री । इति मेदिनी । थे, १० ॥
(पर्य्यायोऽस्या यथा,—
"हिङ्गुपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अहिफेनः । इति शब्दरत्नावली ॥
पृथुः, त्रि, (प्रथ + कुः सम्प्रसारणञ्च ।) महान् । इत्यमरः । ३ । १ । ६० ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।
"उच्छ्वसितभूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ! ।
अचला अपि न महान्तः के चपलभावमानीताः ॥")
निपुणः । इति शब्दरत्नावली ॥
पृथुकः, पुं, (पृथुरेव । पृथु + संज्ञायां कन् । यद्वा, प्रथते इति । प्रथ + "अर्भकपृथुकेति ।" उणा० ५ । ५३ । इति कुकन् संप्रसारणञ्च ।) चिपिटकः । इत्यमरः ॥ क्लीवलिङ्गोऽप्ययम् । यथा,—
"द्विःखिन्नमन्नं पृथुकं शुष्कं देशविशेषकं ।
नात्यन्नशस्तं विप्राणां भक्ष्यं च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः ॥
(यथास्य गुणाः ।
"पृथुका गुरवो बल्याः कफविष्टम्भकारिणः ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
"पृथुका गुरवो भृष्टान् भक्षयेदल्पशस्तु तान् ।
यावा विष्टभ्य जीर्य्यन्ति सतुषा भिन्नवर्च्चसः ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"पृथुका गुरवः स्निग्धा वृंहणाः कफवर्द्धनाः ।
बल्याः सक्षीरभावात्तु वातघ्ना भिन्नवर्च्चसः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
चाक्षुषमन्वन्तरे देवगणभेदः । यथा, हरिवंशे । ७ । ३२ ।
"आद्या प्रभूता भद्राश्च पृथुकाश्च दिवौकसः ॥")
पृथुकः, त्रि, (प्रथते इति । प्रथ + "अर्भकपृथुकपाका वयसि ।" उणा० ५ । ५३ । इति कुकन् सम्प्रसारणञ्च । यद्वा, पृथु यथा स्यात् तथा कायति शब्दायते इति । कै शब्दे + कः ।) बालकः । इति मेदिनी । के, १२४ ॥ (यथा, माघे । ३ । ३० ।
"प्रक्रीडितान् रेणुभिरेत्य सूर्व्वै-
र्निन्युर्ज्जनन्यः पृथुकान् पवित्राः ॥")
पृथुका, स्त्री, (पृथुः स्थूलेव । पृथु + कन् + टाप् ।) हिङ्गुपत्री । इति शब्दचन्द्रिका ॥
(अस्याः पर्य्यायो यथा,—
"हिङ्गुपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
बालिका च ॥
पृथुकोलः, पुं, (पृथुः कोलः ।) राजबदरः । इति राजनिर्घण्टः ॥
पृथुच्छदः, पुं, (पृथवश्छदाः पत्राणि यस्य ।) हरिदर्भः । इति राजनिर्घण्टः ॥ वृहत्पत्रे, त्रि ॥
पृथुपत्रः, पुं, (पृथूनि पत्राणि यस्य ।) रक्तलशुनः । इति राजनिर्घण्टः ॥
पृथुपलाशिका, स्त्री, (पृथूनि पलाशानि यस्याः । कप् । टापि अत इत्वम् ।) शटी । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृथुरोमा, [न्] पुं, (पृथूनि रोमाणि लोमस्थानीयानि शल्कान्यस्येति ।) मत्स्यः । इत्यमरः । १ । १० । १७ ॥ वृहल्लोमयुक्ते, त्रि ॥
पृथुलं, त्रि, (पृथुं पृथुत्वमस्यास्तीति । पृथु + सिध्मादित्वात् लच् । यद्वा, पृथुं लातीति । ला + कः ।) महत् । इत्यमरः । ३।१।६० ॥ (यथा, माघे । १० । ६५ ।
"श्रोणिषु प्रियकरः पृथुलासु
स्पर्शमाप सकलेन तलेन ॥")
पृथुला, स्त्री, (पृथुल + टाप् ।) हिङ्गुपत्री । इति जटाधरः ॥ (गुणादयोऽस्या हिङ्गुपत्रीशब्दे ज्ञातव्याः ॥)
पृथुशिम्बः, पुं, (पृथुः शिम्बा यस्याः ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (पर्य्यायान्तरमस्य यथा,—
"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ॥
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृथुशेखरः, पुं, (पृथु महत् शेखरं शृङ्गं यस्य ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥
पृथुस्कन्धः, पुं, (पृथुः स्थूलः स्कन्धो यस्य ।) शूकरः । इति राजनिर्घण्टः ॥

पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य।) तीर्थभेदः। यथा,—

"ते श्रुत्वा ऋषयः सर्व्वे तीर्थमाहात्म्यमुत्तमम्।
कपालमोचनमिति नाम चक्रुः समागताः॥
तत्रापि सुमहत्तीर्थं विश्वामित्रस्य विश्रुतम्।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम्।
ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात्॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः।
तत्र सिद्धस्तु ब्रह्मर्षी रुषद्गुर्नाम नामतः॥
जातिस्मरो रुषद्गुस्तु गङ्गाद्वारे तदा स्थितः।
अन्तकालं ततो दृष्ट्वा पुत्त्रान् वचनमब्रवीत्॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम्।
विज्ञाय तस्य तद्भावं रुषद्गोस्ते तपोधनाः॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम्।
स तैः पुत्त्रैः समानीतः सरस्वत्यां समाप्लुतः॥
स्मृत्वा तीर्थगुणान् सर्व्वान् प्राहेदमृषिसत्तमः।
सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्॥
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत्।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः।
चतुर्व्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत्॥
तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्त्रियास्तथा॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन्।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् मुनींस्ततः॥
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम्।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति॥"

इति वामनपुराणे ३८ अध्यायः॥

(यथा च महाभारते। ३। ८३।१३२—१३६।

"ततो गच्छेत राजेन्द्र। तीर्थं त्रैलोक्यविश्रुतम्।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप।॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः।
अज्ञानात् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना।
तत् सर्व्वं नश्यते तत्र स्नातमात्रस्य भारत।॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वती॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम्।
उत्तमं सर्व्वतीर्थानां यस्त्यजेदात्मनस्तनुम्॥
पृथूदके जप्यपरो न तस्य मरणं भवेत्।
गीतं सनत्कुमारेण व्यासेन च महात्मना॥
वेदे च नियतं राजन्नभिगच्छेत् पृथूदकम्।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह।॥
तन्मेध्यं तत् पवित्रञ्च पावनञ्च न संशयः।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृतो नराः।
पृथूदके नरश्रेष्ठ। एवमाहुर्मनीषिणः॥")

पृथूदरः, पुं, (पृथु महदुदरं यस्य।) मेषः। इति हारावली। ८०॥ वृहत्कुक्षौ, त्रि॥

पृथ्वी, स्त्री, (पृथुः स्थूलत्वगुणयुक्ता। "वोतो गुणवचनात्।" ४।१।४४। इति ङीष्।) पृथिवी। (यथा, देवीभागवते। ३। १३। ८।

"मधुकैटभयोर्मेदःसंयोगात् मेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")

पृथोर्दुहितृत्वस्वीकारादेतन्नाम। यथा, अग्निपुराणे।

"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते॥"

हिङ्गुपत्री। कृष्णजीरकः। इत्यमरः। २। ९। ३७, २।९।४०॥ (एतस्याः पर्य्यायो यथा,—

"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः।
कालाजाजी तु सुषवी कालिका चोपकालिका॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हस्ताहूर्बाला। इति हेमचन्द्रः॥ पुनर्नवा। स्थूलैला। इति राजनिर्घण्टः॥ (समदशाक्षरपादकश्छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

पृथ्वीका, स्त्री, (पृथ्वी+स्वार्थे कन्।) वृहदेला। इत्यमरः। २। ४। १२५॥ (अस्याः पर्य्यायो यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला वृहदेला च चन्द्रबाला च निष्कुटिः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सूक्ष्मैला। कृष्णजीरकः। इति रत्नमाला॥ हिङ्गुपत्री। इति राजनिर्घण्टः॥

पृथ्वीकुरबकः, पुं (पृथ्व्यां भूमौ कुरबक इव।) श्वेतमन्दारकः। इति राजनिर्घण्टः॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति। जन+डः।) गडलवणम्। इति राजनिर्घण्टः॥

पृदाकुः, पुं, (पर्द्दते इति। पर्द्द अपानशब्दे+"पर्द्देर्नित् सम्प्रसारणमल्लोपश्च।" उणा० ३। ८०। इति काकुः रेफस्य सम्प्रसारणं अल्लोपश्च।) सर्पः। इत्यमरः। १। ८। ६॥ (यथा, महाभारते। ६। १७८। ७७।

"स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम्।
जग्राहाजगरो ग्राहो भुजयोरुभयोर्बलात्॥")

वृश्चिकः। व्याघ्रः। चित्रकः। इति मेदिनी। के, १७५॥ कुञ्जरः। वृक्षः। इति संक्षिप्तसारोणादिवृत्तिः॥

पृश्निः, त्रि, (स्पृश्यते इति। स्पृश संस्पर्शे+"घृणिपृश्नीति।" उणा० ४।५२। इति नि निपातनात् साधुः।) अल्पतनुः। इत्यमरः। २। ६। ४८॥ (यथा, महाभारते। १३। २६। ८६।

"दर्शां पृश्निं हृष्टतोयां विपश्चां
शिवाम्बुदां भगिनीं सुप्रसन्नाम्।
विभावरीं सर्व्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते॥")

खर्व्वदुर्व्वलाल्पाङ्गिः। इति भरतः॥ (शुक्लवर्णः। यथा, ऋग्वेदे। १। १६०। ३।

"धेनुञ्च पृश्निं वृषभं सुरेतसम्॥"

"पृश्निं शुक्लवर्णां धेनुम्।" इति तद्भाष्ये सायनः॥ प्राप्ततेजाः। यथा, ऋग्वेदे। १०। १८९। १।

"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः॥")

पृश्निः, स्त्री, (स्पृशति नवजातं स्पृश्यते इति वा। स्पृश+"घृणिपृश्नीति।"उणा०४।५०। इति नि निपातनात् साधुः।) रश्मिः। इति शब्दरत्नावली॥ (अन्नम्। वेदाः। जलम्। अमृतम्। इति महाभारतम्। १२। ३४१। ४४॥) सुतपोराजपत्नी। सैव जन्मान्तरे देवकी भूता। इति श्रीभागवते १० स्कन्धः॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति। कै+कः। यद्वा, पृश्नि स्वल्पं कं जलं यत्र।) कुम्भिका। इति शब्दमाला॥

पृश्निगर्भः, पुं, (पृश्निर्वेदादयो गर्भे यस्य। यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भे उत्पत्तिस्थानत्वेनास्त्यस्येति। अच्।) श्रीकृष्णः। इति हारावली। ९॥ (अस्य निरुक्तिर्यथा महाभारते। १२। ३४१। ४४।

"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा।
ममैतानि सदा गर्भः पृश्निगर्भस्ततोऽस्म्यहम्॥")

पृश्निपर्णी, स्त्री, (पृश्नि स्वल्पं पर्णमस्याः। ङीष्।) लताविशेषः। चाकुलिया इति भाषा। चकरौन इति हिन्दी भाषा। तत्पर्य्यायः। पृथक्पर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलशिः ७ धावनिः ८ गुहा ९। इत्यमरः। २। ४। ९२॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम्। क्रोष्टुविन्नादिपञ्चकं चिरालकाँड इति ख्यातायामित्याहुः। एतत्तु वैद्या न मन्यन्ते। ते हि कलश्यादिशब्देन पृश्निपर्णीमेव गृह्णन्ति। पृश्निपर्णी सिंहपुच्छी चित्रपर्णी कटुसिंहपुच्छी अनयोरल्पभेदान्नवैकार्था इति केचित्। इति भरतः॥ अपि च।

पिष्टपर्णी १० लाङ्गली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलशी १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालवृन्ता १७ त्रिपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ घृष्टिला २२ चित्रपर्णिका २३। इति शब्दरत्नमाला॥ महागुहा २४ शृगालविन्ना २५ धमनी २६ मेखला २७ लाङ्गूलिका २८ पृष्टिपर्णी २९ दीर्घपर्णी ३०। इति राजनिर्घण्टः॥ अङ्घ्रिपर्णी ३१ धावनी ३२। इति भावप्रकाशः॥ अस्या गुणाः। कटुत्वम्। अतीसारकासवातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ त्रिदोषघ्नत्वम्। वृष्यत्वम्। मधुरत्वम्। सरत्वम्। श्वासरक्तातीसारतृड्वमिनाशित्वञ्च। इति भावप्रकाशः॥ ग्राहित्वम् इति राजवल्लभः॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य।) श्रीकृष्णः। इति शब्दमाला॥

पृश्निशृङ्गः, पुं, (पृश्निर्वेदादयः शृङ्गमिवास्य। विष्णुः। इति शब्दमाला॥ (पृश्नि स्वल्पं शृङ्गमिव शुण्डाग्रं यस्य।) गणेशः। इति त्रिकाण्डशेषः॥

पृश्नी, स्त्री, (स्पृशति जलमिति । स्पृश + निः । तस्य वा ङीष् ।) वारिपर्णी । इति शब्दरत्नावली ॥ (विवरणमस्या वारिपर्णीशब्दे ज्ञातव्यम् ॥) कुम्भिका । इति भूरिप्रयोगः ॥

पृष, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, पर्षित्वा पृष्ट्वा । इति दुर्गादासः ॥

पृषत्, क्ली, (पर्षति सिञ्चतीति । पृष सेचने + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा० २ । ८४ । इति । अतिप्रत्ययो गुणाभावश्च निपात्यते । शतृवदस्य कार्य्यं विज्ञेयम् ।) जलविन्दुः । इत्यमरः ।१।१०।६॥ यथा, "पृषदपत्रविषाणाग्रेण लुठति ।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः ॥ "पृषत् जलविन्दुस्तद्वत् अपरुषेण मृदुना विषाणाग्रेण लुठति कण्डूयति ।" इति तट्टीकायां श्रीधरस्वामी । इदं द्विवचनबहुवचनान्तमपि भवति ॥

पृषतः, पुं, (पर्षतीति । पृषि सेके + "पृषिरञ्जिभ्यां कित् ।" उणा० ३ । १११ । इति अतच् । स च कित् ।) विन्दुः । इत्यमरः । १।१०।६ ॥ (यथा, रघौ । ३ । ३ ।

"करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥")

श्वेतविन्दुयुक्तमृगः । इति मेदिनी । ते, १३५ ॥ तत्पर्य्यायः । रङ्कुः २ शबलपृष्ठकः ३ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "हरिणैणकुरङ्गर्क्षकरालतमालशरभश्वदंष्ट्रापृषतचारुष्करन्यङ्कुमालकाप्रभृतयो जाङ्गला मृगाः । कषाया मधुरा लघवो वातपित्तहराश्च तीक्ष्णा हृद्या वस्तिशोधनाश्च ॥"*॥ द्रुपदराजस्य पिता । यथा, महाभारते । १ । १३१ । १७ ।

"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥"

मण्डलिसर्पान्तर्गतसर्पविशेषः । यथा,—
"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्प इत्यादिषु ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

पृषताम्पतिः, पुं, (पृषतां विन्दूनां पतिर्नेता इत्यलुक् समासः ।) वायुः । इति जटाधरः ॥ (यथा, माघे । ६ । ५५ ।

"गजपतिद्वयसीरपि हैमन-
स्तुहिनयन् सरितः पृषताम्पतिः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतातनुतापकृतं दृशाम् ॥")

पृषताश्वः, पुं, (पृषतो मृगविशेषोऽश्व इव गतिसाधनं वाहनो वा यस्य ।) वायुः । इत्यमरटीकायां भरतः ॥

पृषती, स्त्री, (पृषत + स्त्रियां ङीष् ।) श्वेतविन्दुयुक्ता मृगी । इति मेदिनी । ते, १३५ ॥ (यथा, रघुः । ८ । ५६ ।

"पृषतीषु विलोलमीक्षितं
पवनाधूतलतासु विभ्रमाः ॥")

पृषत्कः, पुं, (पृष्यते सिच्यते सिच्यते इति । पृष + अतिः । ततः संज्ञायां कन् ।) बाणः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, रघौ । ७ । ४५ ।

"अप्यर्द्धभागे परबाणलूना
धनुर्भृतां हस्तवतां पृषत्काः ॥")

पृषदश्वः, पुं, (पृषन् मृगविशेषोऽश्व इव वाहको यस्य ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ (यथा, ऋग्वेदे । १ । ८७ । ४ ।

"स हि स्वसृत् पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः ।"

राजर्षिभेदः । यथा, महाभारते ।१।८।१२ ।

"अश्वः सदश्वो वध्राश्वः पृथुवेगः पृथुश्रवाः ।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः ॥"

विरूपस्य पुत्रः । यथा, भागवते । ९ । ६ । २ ।

"विरूपः केतुमान् शम्भुरम्बरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् तत्पुत्रस्तु रथीतरः ॥")

पृषदाज्यं, क्ली, (पृषद्भिः दधिविन्दुभिः सहितमाज्यम् ।) सदध्याज्यम् । दधिमिश्रितघृतम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, ऋग्वेदे । १० । ९० । ८ ।

"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"
"पृषदाज्यं दधिमिश्रमाज्यम् ।" इति तद्भाष्ये सायनः ॥)

पृषद्वलः, पुं, (पृषदेव बलमस्य ।) वायव्यः । यथा,—

"ध्रुविमभवदान्दोलः कुबेरस्यामरानिलः ।
पृषद्वलस्तु वायव्यः कुबेरे तु प्रमोदितः ॥"
इति शब्दमाला ॥

पृषन्तिः, पुं, (पर्षति सिञ्चतीति । पृष सेचने + अतिप्रत्ययः । निपातनात् साधुः ।) विन्दुः । यथा,—

"पयःपृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनैः ॥"
इति भरतधृतबाणवतीविजयकाव्यम् ॥

पृषभाषा, स्त्री, (पर्षतीति । पृष सेके + कः । पृषामृतवर्षिणी भाषा यत्र ।) अमरावती । इति शब्दरत्नावली ॥

पृषाकरा, स्त्री, (पृष + भावे क्विप् । पृषे सेचनाय आकीर्य्यते इति । आ + कॄ + अप् + टाप् । प्रातः सन्ध्यायाश्चास्या उपरि जलसेचनादेव तथात्वम् ।) क्षुद्रशिला । इति शब्दचन्द्रिका ॥ वाटखारा इति भाषा ॥

पृषातकं, क्ली, (पृषन्तं पृषदाज्यम् आतकति हसतीति । तक + अच् । पृषोदरादित्वात् साधुः ।) दधियुक्तघृतम् । इति हेमचन्द्रः ॥

पृषोदरः, त्रि, पृषद्दरं यस्य । ("पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति तलोपः ।) मनीषादित्वात् तलोपः । इति दुर्गादासः ॥

"भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्य्ययात् ।
वर्णादिष्टाश्च गूढात्मा वर्णलोपात् पृषोदरः ॥"
इति गोयीचन्द्रधृतकारिका ॥

पृषोद्यानं, क्ली, क्षुद्रोपवनम् । मनीषादित्वात् पृषच्छब्दस्य तकारलोपः । इति मुग्धबोधटीकायां दुर्गादासः ॥

पृष्ठं, क्ली, (पृष्यते सिच्यते इति । पृष "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्प्रत्ययेन निपातनात् सिद्धम् ।) शरीरपश्चाद्भागः । इत्यमरः । २ । ६ । ७८ ॥ पीठ इति भाषा ॥ (यथा, मनौ । ४ । ७२ ।

"न विगर्ह्य कथां कुर्य्याद्वहिर्माल्यं न धारयेत् ।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥")

चरममात्रम् । इति मेदिनी । ठे, ७ ॥
(स्तोत्रविशेषः । यथा, शतपथब्राह्मणे । ८ । १ । १ । ५ ।

"त्रिवृत्स्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥")

पृष्ठग्रन्थिः, पुं, (पृष्ठस्य ग्रन्थिः ।) गडुः । इति हेमचन्द्रः । ३ । ४४६ ॥ कुँज इति भाषा ॥

पृष्ठतः, [स्] व्य, (पृष्ठ + "प्रतियोगे पञ्चम्यास्तसिः ।" ५ । ४ । ४४ । इत्यस्य "आद्यादिभ्य उपसंख्यानम् ।" इति वार्त्तिकोक्त्या तसिः ।) पश्चात् । यथा, भट्टिः । १ । २४ ।

"तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्रास्त्रधरः कुमारः ॥"

पृष्ठदेशे । (यथा, मनौ । ८ । ३०० ।

"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम् ॥")

पृष्ठदृष्टिः, पुं, (पृष्ठे दृष्टिर्दर्शनं यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥

पृष्ठमांसादः, त्रि, (पृष्ठे परोक्षे मांसाद इव । असमक्षमनिष्टजनकवाक्यकथनादस्य तथात्वम् ।) वाक्याभिधायी । इति त्रिकाण्डशेषः ॥ चोगोलखोर इति पारस्यभाषा । (पृष्ठमांसमत्तीति । अण् । पृष्ठमांसभक्षके, त्रि ॥)

पृष्ठमांसादनं, क्ली, (पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनमस्यानिष्टजनकत्वात् ।) परोक्षे दोषकीर्त्तनम् । इति हेमचन्द्रः । ३ । २६५ ॥ तद्वति, त्रि ॥ (पृष्ठमांस + अद् + कर्त्तरि ल्युः । पृष्ठमांसभक्षके, त्रि ।)

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दण्ड इत्यर्थः ।) पृष्ठास्थि । पिठेर दाँडा इति भाषा ॥ तत्पर्य्यायः । रीढ़कः २ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते शारीरस्थाने ६ अध्याये ।

"तत्र पृष्ठवंशमुभयतः प्रतिश्रोणिकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी ।") स तु मात्रमात्रेण भवति । इति सुखबोधः ॥

पृष्ठवाट्, पृष्ठवाह्, } [ह्] पु, (पृष्ठं युगपार्श्वं वहतीति । वह + ण्वि ।) युगपार्श्वगवृषः । पाँटे बाँधा गरु इति भाषा । इत्यमरः ॥ (पृष्ठं पृष्ठभागं वहतीति । वह + ण्वि । पश्चाद्भागवाहकः । यथा, हरिवंशे भविष्यपर्व्वणि । ५५ । ३१ ।

"दारकं पृष्ठवाहन्तु कृत्वा केशव ईश्वरः ।

आग्नेयमस्त्रं संयोज्य शरे कस्मिंश्चिदीश्वरः ।
अनेन त्वां हनिष्यामि यदि शक्तोऽसि वारय ॥”)

पृष्ठवाह्यः, पुं, (पृष्ठे वाह्यं वहनीयद्रव्यमस्य ।) भारवाहकवृषः । तत्पर्य्यायः । स्थौरी २ पृष्ठ्यः ३ । इति हेमचन्द्रः । ४ । ३२८ ॥

पृष्ठशृङ्गः, पुं, (पृष्ठे शृङ्गमस्य । शृङ्गस्य वक्रभावेन पृष्ठगमनात् तथात्वम् ।) वनच्छागः । इति हेमचन्द्रः । ४ । ३४४ ॥

पृष्ठशृङ्गी, [न्] पुं, (पृष्ठे शृङ्गमिव अस्यास्तीति । शृङ्ग+इनिः ।) भीमसेनः । नपुंसकम् । महिषः । इति मेदिनीशब्दरत्नावल्यौ ॥

पृष्ठोदयः, पुं, (पृष्ठेनोदयोऽस्य ।) मेषवृषकर्कटधनुर्म्मकरमीनलग्नाः । यथा, ज्योतिस्तत्त्वे ।
“अजो गोपतियुग्मश्च कर्किधन्विन्दुगास्तथा ।
निशासंज्ञाः स्मृतास्त्वेते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञा विमिथुनाः स्मृताः पृष्ठोदयास्तथा ।
शेषाः शीर्षोदया ज्ञेया मीनश्चोभयसंज्ञकः ॥”

पृष्ठ्यं, क्ली, (पृष्ठानां स्तोत्रविशेषाणां समूह इति । पृष्ठ+“ब्राह्मणमाणववाडवाद् यत् ।” ४ । २ । ४२ । इत्यस्य “पृष्ठादुपसंख्यानम् ।” इति वार्त्तिकोक्त्या यत् ।) पृष्ठानां समूहः । इत्यमरः । ३ । २ । ४२ ॥

पृष्ठ्यः, पुं, (पृष्ठेन वहतीति । पृष्ठ+यत् ।) पृष्ठेन भारवाहकाश्वः । तत्पर्य्यायः । स्थौरी २ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, महाभारते । १ । २२२ । ४९ ।
“पृष्ठ्यानामपि चाश्वानां बाह्लिकानां जनार्द्दनः ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥”
धारके, त्रि । यथा, ऋग्वेदे । ४ । ३ । १० ।
“ऋतेन हि ष्मा वृषभश्चिदक्तः
पुमाँ अग्निः पयसा पृष्ठ्येन ॥”
“पृष्ठ्येन धारकेण पयसाक्तः ।” इति तद्भाष्ये सायनः ॥)

पृष्णिः, त्रि, (पृश्निः । पृषोदरादित्वात् साधुः ।) प्रश्निः । इत्यमरटीकायां भरतः ॥ पार्ष्णिः । तत्र स्त्रीलिङ्गः. इत्युणादिकोषः ॥

पॄ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पारयति । इति दुर्गादासः ॥

पॄ, ञि शि लि पालने । पूर्त्तौ । इति कविकल्पद्रुमः ॥ (ह्वा०-क्र्या०च-पर०-सक०-सेट् ।) ञि, पूर्त्तोऽस्ति । रल्वधोदिदित्यत्र पूर्व्वस्मान्निष्ठातस्य नः । शि पृणाति । स्त्रौ तु पूर्णिरित्येव मनीषादित्वान्न निः । लि, पिपर्त्ति । इति दुर्गादासः ॥

पेचकः, पुं, (पचति पच्यते वा । पच+“पचिमच्योरिच ।” उणा० ५ । ३७ । इति वुन् । उपधाया अत इच ।) पक्षिविशेषः । पेँचा इति भाषा । तत्पर्य्यायः । उलूकः २ वायसारातिः ३ । इत्यमरः । २ । ५ । १५ ॥ शक्राक्षः ४ दिवान्धः ५ वक्रनासिकः ६ घोरनेत्रः ७ दिवाभीतः ८ नखाशी ९ पीशुः १० घर्घरः ११ काकभीरुः १२ नक्तचारी १३ । इति त्रिकाण्डशेषः ॥ निशाचरः १४ कौशिकः १५ रूपनाशनः १६ पेचः १७ रक्तनासिकः १८ भीरुकः १९ । इति शब्दरत्नावली ॥ करिपुच्छमूलोपान्तः । गुदाच्छादकमांसपिण्डविशेषः । इत्यमरः । ३ । ३ । ६ ॥ पर्य्यङ्कः । यूकः । इति विश्वः ॥ मेघः । इति शब्दरत्नावली ॥

पेचकी, [न्] पुं, (पेचकोऽस्यास्तीति । पेचक+इनिः ।) हस्ती । इति शब्दरत्नावली ॥

पेचिलः, पुं, (पच+बाहुलकात् इलच् अत इच ।) हस्ती । इति त्रिकाण्डशेषः ॥

पेचु, क्ली, (पच्यते इति । पच+उन् । अत इत्वञ्च ।) पेचुली । इति त्रिकाण्डशेषः ॥

पेचुली, स्त्री, (पच्यते इति । पच+उलच् । अत-इत्वं गौरादित्वात् ङीष् ।) शाकभेदः । कचु इति ख्यातः । यथा,—
“कञ्चुकं पेचुली पेचु गाङ्गेयो विश्वरोचनः ॥”
इति त्रिकाण्डशेषः ॥

पेटः, पुं, (पेटतीति । पिट+अच् ।) प्रहस्तः । इति राजनिर्घण्टः ॥ पेटके, क्ली । इत्यमरः । २ । १० । ३० ॥

पेटकः, पुं, (पेटतीति । पिट+ण्वुल् ।) वंशवेत्रादिमयसमुद्गकप्रायः । पेटारी इति पेटी इति पेडा इति च ख्यातः । तत्पर्य्यायः । पिटकः २ पेडा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ आद्यौ स्वल्पपेटिकायाम् । परौ महापेटिकायामिति स्वामी ॥ समूहः । इति मेदिनी । के, ११७ ॥

पेटाकः, पु, (पेटक+पृषोदरादित्वात् साधुः ।) पेटकः । इति भरतद्विरूपकोषः ॥

पेटिका, स्त्री, (पिटतीति । पिट+ण्वुल् । कापि अत इत्वम् ।) वृक्षविशेषः । पेटारि इति भाषा । तत्पर्य्यायः । कुबेराक्षी २ कुलिङ्गाक्षी ३ लघ्वाङ्गुलिका ४ । इति रत्नमाला ॥ (यथा,—
“पेटिकामूललेपाच्च योनिर्भिन्ना प्रशाम्यति ॥”
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥)

पेटी, त्रि, (पेट+गौरादित्वात् ङीष् ।) पेटकः । इत्यमरः । २ । १० । ३० ॥

पेड़ा, स्त्री, (पेटा । पृषोदरादित्वात् साधुः ।) मञ्जूषा । महापेटिका । इत्यमरभरतौ ॥

पेण, ऋ पेषे । गतौ । श्लेषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-श्लेषे अक०-सेट् ।) ऋ, अपिपेणत् । पिपेणत् । इति दुर्गादासः ॥

पेत्वं, क्ली, (पीयते इति । पा पाने+“अन्येभ्योऽपि दृश्यन्ते ।” उणा० ४ । १०५ । इति त्वन् ।) अमृतम् । घृतम् । इत्युणादिकोषः ॥ (पु, पतनशीलः पशुः । छागः । यथा, वाजसनेयसंहितायाम् । २९ । ५८ ।
“सावित्रो वारुणः कृष्ण एकशितिपात् पेत्वः ॥”
“पेत्वः पतनशीलो वेगवान् पशुः ॥” इति तद्भाष्ये महीधरः ॥ तथाच ऋग्वेदे । ७ । १८ । १७ ।
“सिंह्यं चित् पेत्वेना जघान ॥”
“पेत्वेन छागेन जघान घातयामास ।” इति तद्भाष्ये सायनः ॥)

पेयं, क्ली, (पीयते यदिति । पा पाने+कर्म्मणि यत् । “ईद्यति ।” ६ । ४ । ६५ । इति आत ईत् ततो गुणः ।) जलम् । इति मेदिनी । ये, ३९ ॥ दुग्धम् । इति शब्दचन्द्रिका ॥ अष्टविधान्नान्तर्गतान्नविशेषः । यथा,—
“भोज्यं पेयं तथा चूष्यं लेह्यं खाद्यञ्च चर्व्वणम् ।
निष्पेयश्चैव भक्ष्यं स्यादन्नमष्टविधं स्मृतम् ॥”
इति राजनिर्घण्टः ॥
पातव्ये, त्रि । इति मेदिनी । ये, ३९ ॥ (यथा, महाभारते । १४ । ४४ । १० ।
“सर्व्वेषां भक्ष्यभोज्यानामन्नं परममुच्यते ।
द्रवाणाञ्चैव सर्व्वेषां पेयानामाप उत्तमाः ॥”)

पेया, स्त्री, (पीयते इति । पा+यत् । ततष्टाप् ।) सिक्थसमन्वितपेयद्रव्यम् । अस्या गुणाः ।
“पेया स्वेदाग्निजननी वातवर्च्चोऽनुलोमनी ।
क्षुत्तृष्णाग्लानिदौर्ब्बल्यकुक्षिरोगविनाशिनी ॥”
इति राजवल्लभः ॥
मिश्रेया । इति शब्दचन्द्रिका ॥ श्राणा । अच्छमण्डम् । इति मेदिनी । ये, ३९ ॥

पेयूषः, पुं, क्ली, (पीय पाने+“पीयेरूषन् ।” उणा० ४ । ७६ । इति ऊषन् बहुलवचनात् गुणः ।) अभिनवं पयः । इत्यमरः ॥ नवप्रसूताया गोः सप्तदिनाभ्यन्तरीणदुग्धम् । यथा,
“आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते ॥”
इति हारावली ॥
“पीयते पेयूषः पीङ् पाने नाम्नीति यूषः महंष्यान्तः स्त्रीवच्च । पीयूषञ्च अथ पीयूषपेयूषे नव सप्तदीनावधीति शब्दार्णवः ॥” इति तट्टीकायां भरतः ॥ (यथा, मनुः । ५ । ६ ।
“शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥”)
अमृतम् । अभिनवसर्पिः । इत्युणादिकोषः ॥

पेरुः, पुं, (पीयते रसानिति । पीङ् पाने+“मिपीभ्यां रुः ।” उणा० ४ । १०१ । इति रुः ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥ समुद्रः । इति त्रिकाण्डशेषः ॥ (त्रि, रक्षकः । यथा, ऋग्वेदे । ९ । ७४ । ४ ।
“नरो हितमवमेहन्ति पेरवः ॥”
“नरो नेतारः पेरवः । पा रक्षणे । मापोरित्त्वे बाह्नेति रुप्रत्ययः । सर्व्वस्य रक्षकाः ।” इति तद्भाष्ये सायनः ॥ पूरकः । यथा, ऋग्वेदे । ५ । ८४ । २ ।
“प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥”)

पेरोजं, क्ली, उपरत्नविशेषः । पीरोजा इति यवनभाषा । तत्पर्य्यायः । हरिताश्मम् २ पेरजम् ३ । तद्द्विविधम् । भस्माङ्गं हरितञ्च । तस्य गुणाः ।
“पेरजं सुकषायं स्यान्मधुरं दीपनं परम् ।
स्थावरं जङ्गमञ्चैव संयोगाच्च यथा विषम् ॥
तत् सर्व्वं नाशयेत् शीघ्रं शूलभूतादिदोषजम् ॥”

पाठान्तरं यथा,—
"पिच्छं सुकषायं स्यान्मधुरं दीपनं हरेत्।
स्थावरादिविषघ्नं स्याद्धरितश्चापरं ध्रुवम्॥
शीताङ्गं नाशयेच्छीघ्रं सूलं तिमिरभूतजम्॥"
इति राजनिर्घण्टः।

पेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-चाले अक०-गतौ सक०-सेट्।) ऋ, अपिपेलत् पिपेलतुः। चालः कम्पः। इति दुर्गादासः॥

पेलं, क्ली, (पेलति सदा चलतीति। पेल+अच्।) अण्डकोषः। इति हेमचन्द्रः। ३। २७५॥

पेलवं, त्रि, (पेलं कम्पनं वातीति। वा+कः।) विरलम्। अत्र सावकाशत्वं प्रकारः। इत्यमरभरतौ॥ तनुः। इति हेमचन्द्रः। ३। ११३॥ कोमलम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ४।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥")

पेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अपिपेवत्। ङ, पेवते। इति दुर्गादासः॥

पेशलः, त्रि, (पिश अवयवे+भावे घञ्। पेशं लातीति। ला+कः। यद्वा, पेशोऽस्यास्तीति। सिध्मादित्वात् लच्।) चारुः। (यथा, देवीभागवते। ५। ९। ५९।
"महिषस्य वचः श्रुत्वा पेशलं मन्त्रिसत्तमः।
जगाम तरसा कामं गजाश्वरथसंयुतः॥")
सुन्दरः। (यथा, रघुः। ९। ४०।
"युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम्॥")
दक्षः। चतुरः। कोमलः। इत्यमरभरतौ॥ (यथा, मुकुन्दमालायाम्। २९।
"इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धि जर्जरम्।
किमौषधैः क्लिश्यसि मूढ़ दुर्म्मते!
निरामयं कृष्णरसायनं पिब॥")
धूर्त्तः। इति शब्दरत्नावली॥

पेशस्कृत्, पुं, (पेशो रूपान्तरं करोतीति। पेशस्+कृ+क्विप्। "ह्रस्वस्य पिति कृति तुक्।" ६। १। ७१। इति तुगागमः। अनेन गृहीतस्य कीटस्य रूपान्तरं भवति इत्यतोऽस्य तथात्वम्।) कीटविशेषः। कुमिरके इति भाषा। यथा,—
"कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः।
याति तत्सात्मतां राजन्! पूर्व्वरूपमसंत्यजन्॥"
इति श्रीभागवते। ११। ९। २३॥

पेशिः, पुं, (पिश+"कृपिशीति।" उणा० ४। ११८। इति इन्।) शतकोटिः। इत्युणादिकोषः॥ अण्डे मांसपिण्डे च स्त्री। इति संक्षिप्तसारे उणादिपादः॥

पेशी, स्त्री, (पिश+इन्। वा ङीष्।) अण्डम्। इत्यमरः। २।५।३७॥ (गर्भवेष्टनचर्म्ममयकोषः। यथा, सुश्रुते। १। २९।
"धमनीस्रोतोऽस्थितन्त्रिवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु॥") सुपक्वकलिका। (यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।
"मधुकं बिल्वपेश्यश्च शर्करामधुसंयुताः।
अतीसारं निहन्युश्च शालीषष्टिकयोः कणाः॥")
मांसी। खड्गपिधानकम्। मांसपिण्डी। इति मेदिनी। शे, १२॥ (यथा, महाभारते। १। ११५। १२।
"तां स मांसमयीं पेशीं ददर्श जपतां वरः॥"
(अस्याः संख्यावस्थानादयो यथा,—
"पञ्च पेशीशतानि भवन्ति। तासां चत्वारिशतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वञ्चतुस्त्रिंशत्। एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश प्रपदे। पादोपरि कूर्च्चसन्निविष्टास्तावत्य एव। दश गुल्फतलयोः। गुल्फजान्वन्तरे विंशतिः। पञ्च जानुनि। विंशतिरूर्वौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। तिस्रः पायौ। एका मेढ्रे। सेवन्याञ्चापरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्तिशिरसि। पञ्चोदरे। नाभ्यामेका। पृष्ठोर्द्ध्वसन्निविष्टाः पञ्च पञ्च दीर्घाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकांसौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु॥ ग्रीवायाञ्चतस्रः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायाम्। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः। कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि।
सिरास्नाय्वस्थिपर्व्वाणि सन्धयश्च शरीरिणाम्।
पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः॥
स्त्रीणान्तु विंशतिरधिकाः। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते बाह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति। तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिशिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति॥
भवति चात्र।
पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षणमुष्कजाः।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)
नदीभेदः। पिशाचीविशेषः। राक्षसीविशेषः। इति शब्दरत्नावली॥ (वाद्यविशेषः। यथा, महाभारते। ६। ४२। ३।
"तथा भेर्य्यश्च पेश्यश्च क्रकचा गोविषाणिकाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")

पेषणं, क्ली, पिषधातोर्भावे ल्युट्प्रत्ययनिष्पन्नम्। चूर्णनम्। (यथा, मार्कण्डेये। १४। ८७।
"अयं कृतघ्नो मित्राणामपकारी सुदुर्म्मतिः।
तप्तकुम्भे निपतति ततो याखति पेषणम्॥")
खलम्। शतगुप्ता। इति शब्दचन्द्रिका॥ तेकाँटासिज इति भाषा॥

पेषणिः } स्त्री, (पिष्यतेऽनयेति। पिष+करणे
पेषणी } अणिः। वा ङीष्।) पेषणशिला। शिल इति भाषा। तत्पर्य्यायः। पेषणी २ मट्टः ३ गृहाश्मा ४ गृहकच्छपः ५। इति शब्दरत्नावली॥ (यथा, मनुः। ३। ६८।
"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥")

पेषलः, त्रि, (पेषोऽस्यास्तीति। पेष+सिध्मादित्वात् लच।) पेशलः। इत्यमरटीकायां भरतरमानाथौ॥

पेषाकः, पुं, (पिष+आकन्।) पेषणिः। इत्युणादिकोषः॥

पेस, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक०-सेट्।) ऋ, अपिपेसत् पिपेसतुः। इति दुर्गादासः॥

पेसलः, त्रि, (पेशलः। पृषोदरादित्वात् शस्य सत्वम्।) पेशलः। इत्यमरटीकायां भरतः॥

पै, शोषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) पायति धान्यमातपेन। इति दुर्गादासः॥

पैङ्गूषः, पु, (पिङ्गूषे साधुः। अण्।) कर्णः। इति हेमचन्द्रः। ३। २३७॥

पैठरं, त्रि, (पिठरे संस्कृतं पक्वम्। पिठर+अण्।) स्थालीपक्वमांसादि। इत्यमरः। २।९।४५॥ (यथा, गो० रामायणे। २। १००। ६३।
"प्रतप्तैः पैठरेश्चैव मार्गमायूरतैत्तिरैः॥")

पैठीनसिः, पुं, मुनिविशेषः। स च स्मृतिगोत्रयोः कारकः। इति पुराणम्॥

पैण्डिन्यं, क्ली, (पिण्डं परपिण्डं भक्ष्यतयास्यास्तीति। पिण्ड+इन्। ततः ष्यञ्।) भैक्ष्यजीविका। इति त्रिकाण्डशेषः॥

पैतामहं, त्रि, (पितामहस्येदम्। पितामह+"तस्येदम्।" ४।३।१२०। इत्यण्।) पितामहसम्बन्धिधनादि। यथा, कात्यायनः।
"पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्ज्जितम्।
दायादानां विभागेषु सर्व्वमेतद्विभज्यते॥"
बृहस्पतिः।
"पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्ज्जितम्।
विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्॥"
इति दायभागः॥

पैतृकं, त्रि, (पितुरागतं पितुरिदं वेति। पितृ+ठञ्।) पितृसम्बन्धि। इति शब्दमाला॥ यथा, मनुः।
"ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः॥"
मनुविष्णू।
"पैतृकन्तु यदा द्रव्यमनवाप्तमवाप्नुयात्।
न तत् पुत्त्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम्॥"

पैठीनसिः ।
"पैतृके विभज्यमाने दायाद्ये समो विभागः ॥"
नारदः ।
"शौर्य्यभार्य्याधने हित्वा यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥"
इति दायभागः ॥

पैतृकभूमिः, स्त्री, (पैतृकी पितृसम्बन्धिनी भूमिः ।) पितृसम्बन्धिस्थानम् । तस्या माहात्म्यं यथा,—
श्रीभगवानुवाच ।
"भवांश्च यादवैः सार्द्धं प्रविश्य द्वारकापुरीम् ।
मत्पित्रा मातृभिः सार्द्धं माहेन्द्रे च वसौ नृप ! ॥
उग्रसेन उवाच ।
वासुदेव न यास्यामि भूमिं तां पैतृकीं पुनः ।
सर्व्वतीर्थपरा शुद्धा देवे कर्म्मणि पैतृके ॥
पारक्ये भूमिदेशे च पितॄणां निर्व्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म निहन्यते ॥
पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम् ।
किञ्चिन्नफलप्रदञ्चैव सम्पूर्णं पैतृके स्थले ॥
पुत्त्रपौत्त्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा ।
दुर्लभा पैतृकी भूमिः पितुर्मातुर्गरीयसी ॥
तत् प्रत्यक्ष पवित्रञ्च देवे कर्म्मणि पैतृके ।
क्रीतञ्च महते दानं परदत्तमशुद्धकम् ॥
म्रियते पैतृकीभूम्यां तीर्थतुल्यफलं लभेत् ।
गङ्गाजलसमं पूतं पितृखातोदकं हरे ॥
तत्र स्नात्वा जले पूते गङ्गास्नानफलं लभेत् ।
पितॄणां तर्पणं तत्र पवित्रं देवपूजनम् ॥
पैतृकी जन्मभूमिश्चेत् फलं तद्द्विगुणं लभेत् ।
पैतृकीभूमितुल्या च दानभूमिः सतामपि ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः ॥

पैतृष्वसेयः, पु, स्त्री, (पितृष्वसुरपत्यमिति । पितृष्वसृ + "ढकि लोपः ।" ४ । १ । १३३ । इति ज्ञापकत्वात् ढक् अन्त्यलोपश्च ।) पितृभगिनीपुत्त्रः । इत्यमरः । २ । ६ । २५ ॥ पिसतुतभाइ इति भाषा ॥ (स्त्रियां ङीप् । पितृभगिनीपुत्त्री । यथा, मनुः । ११ । १७२ ।
"पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणञ्चरेत् ॥")

पैतृष्वस्रीयः, पु, स्त्री, (पितृष्वसुरपत्यमिति । "पितृष्वसुश्छण् ।" ४ । १ । १३२ । इति छण् ।) पितृभगिनीपुत्त्रः । इत्यमरः । २ । ६ । २५ ॥ पिसतुत भाइ इति भाषा ॥

पैत्तः, त्रि, (पित्तात् आगतं पित्तस्य शमनं कोपनं वेति । पित्त + अण् ।) पित्तजव्याधिः । इति राजनिर्घण्टः ॥ (यथा, माधवनिदाने गुल्माधिकारे ।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताशसेवा ।
आमाभिघातौ रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥")

पैत्तिकः, त्रि, (पित्तेन निर्वृत्त इति । पित्त + ठञ् ।) पित्तजव्याधिः । इति राजनिर्घण्टः ॥ (यथा, चरके चिकित्सास्थाने १८ अध्याये ।
"प्रततं कासमानश्च ज्योतींषीव च पश्यति ।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके ॥")

पैत्रं, क्ली, (पितुरिदमिति । पितृ + अण्) पितृतीर्थम् । अङ्गुष्ठतर्ज्जन्योर्मध्यम् । इत्यमरः । २ । ७ । ५१ ॥ पितृसम्बन्धिनि, त्रि । (यथा, महाभारते । ७ । १६६ । ७१ ।
"ऐन्द्रं याम्यं वारुणं वैत्तपाल्यं
पैत्रं त्वाष्ट्रं कर्म्म सौम्यञ्च तुभ्यम् ।
रूपं ज्योतिः शब्दमाकाशवायुः
स्पर्शः स्वाद्यं सलिलं गन्ध उर्व्वी ॥")

पैत्राहोरात्रः, पुं, (पैत्रः अहोरात्रः ।) पितृलोकस्य दिवारात्रिः । स तु मनुष्यमाने मासैकेन भवति । यथा —
"मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ॥"
इत्यमरः । १ । ४ । २१ ॥

पैलः पुं, (पीलाया अपत्यमिति । पीला + "पीलाया वा ।" ४ । १ । ११८ । इति अण् ।) मुनिविशेषः । स च ऋग्वेदी यथा,—
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥
अथर्व्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ।
इतिहासपुराणानां पिता मे रोमहर्षणः ॥"
इति श्रीभागवते १ स्कन्धे ४ अध्यायः ॥

पैशाचः, पुं, (पिशाचस्यायमिति । पिशाच + अण् ।) अष्टप्रकारविवाहान्तर्गताष्टमविवाहः । यथा याज्ञवल्क्यः । "पैशाचः कन्यका छलात् ।" छलमाह मनुः । ३ । ३४ ।
"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥"
इत्युद्वाहतत्त्वम् ॥
पिशाचसम्बन्धिनि, त्रि ॥ (राजसकायान्तर्गतकायविशेषः । तल्लक्षणं यथा,
"उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा ।
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचकायलक्षणम् ॥"
इति सुश्रुत शारीरस्थाने चतुर्थेऽध्याये ॥)

पैशुन्यं, क्ली, (पिशुनस्य भावः । पिशुन + ब्राह्मणादित्वात् ष्यञ् ।) पिशुनता । खलता । तच्च दशविधपापान्तर्गतवाङ्मयपापविशेषः । इति तिथितत्त्वम् ॥ यथा,—
"पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥")
इति मनौ । ६ । ४८ ॥
अस्य विवरणं पातकशब्दे द्रष्टव्यम् ॥

पैष्टः, त्रि, (पिष्टस्येदमिति । पिष्ट + अण् ।) पिष्टसम्बन्धी । यथा,—
"यत्रापदन्तकः पूषा पैष्टमत्ति सदा चरुम् ।
अर्म्मीन्द्रेश्वरसामान्यात्तन्नुलोऽत्र विधीयते ॥"
इति तिथ्यादितत्त्वम् ॥

पैष्टिकं, क्ली, (पिष्ट + ठञ् ।) पिष्टानां समूहः । इति आपूपिकशब्दटीकायां भरतः ॥ मद्यविशेषः । यथा । रूपमाध्वीकादिजनिते मद्यत्रये शिथपैष्टिकादि मद्यं मद्यं हेतुविपरीतमेव ॥ इति विजयरक्षितः ॥ (यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"पालला: श्लेष्मजननाः शष्कुल्यः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ॥")

पैष्टी, स्त्री, (पिष्टेन निर्वृत्तेति । पिष्ट + अण् + ङीप् ।) विविधधान्यविकारजा मदिरा । तस्या गुणाः ।
"पैष्टी कट्वम्लतीक्ष्णा स्यादीषद्धौतसमापरा ।
वातहृत् कफसन्दीपनपित्तप्रकोपनी च सा ॥"
इति राजनिर्घण्टः ॥
(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये ।
"गौडी माध्वी तथा पैष्टी निर्यासा कथिता-
परा ।
इति चतुर्व्विधा ज्ञेयाः सुराणां प्रभेदकाः ॥"
"पैष्टी सन्दीपनी रुच्या कफहृद्वातनाशिनी ।
पित्तला पाण्डुरोगाणां कारिणी बहुधा
मता ॥")

पोगण्डः, पुं, (पुनातीति । पू + क्विप् । पौः शुद्धो गण्डो यस्य ।) दशवर्षीयबालकः । यथा,—
"रोगी वृद्धस्तु पोगण्डः कुर्व्वन्त्यन्यैर्व्रतं सदा ॥"
इति प्रायश्चित्ततत्त्वे ब्रह्मपुराणम् ॥

पोगण्डः, त्रि, (पौः गण्ड एकदेशोऽस्य ।) अपोगण्डः । स्वभावतो न्यूनाधिकाङ्गः । ऊनविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादिजनः । यथा । पोगण्डो विकलाङ्गे स्यादिति हलायुधः । पोगण्डो विकलाङ्गकः । इति रत्नकोषः । इत्यमरटीकायां भरतः ॥

पोटः, पुं, (पुटत्यत्रेति । पुट संश्लेषे + आधारे घञ् ।) वेश्मभूमिः । इति जटाधरः ॥ (पुट श्लेषे + भावे घञ् ।) संश्लेषः । इति पोटगलशब्दटीकायां भरतः ॥

पोटगलः, पुं, (पोटेन संश्लेषेण गलतीति । गल + अच् ।) नलः । काशः । इत्यमरः । २ । ४ । १६२ ॥ (अस्य पर्य्यायो यथा,—
"पोटगलो इक्षुकाशः काकेक्षुः स च खड्-
गकः ॥"
इति वैद्यकरत्नमालायाम् ॥)
मत्स्यः । इति मेदिनी । ले, १५७ ॥ (सर्पजात्यन्तर्गतवैकरञ्जसर्पप्रभेदः ॥ "राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

पोटलिका, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली + डः । ततः स्वार्थे कन् टाप् अत इत्वञ्च ।) संश्लिष्टवस्त्रादि । इति केचित् ॥ पुँटुलि इति भाषा ॥

पोटा, स्त्री, (पुटति स्त्रीपुरुषस्वरूपं संश्लिष्यतीति । पुट + अच् । टाप् च ।) स्त्रीपुंसलक्षणा । इत्यमरः । २ । ६ । १५ ॥ स्त्रीपुंसयोर्लक्षणं चिह्नं स्तनश्मश्र्वादिरूपं यस्यां सा । इति भरतः ॥

पोटिकः, पुं, (पोटः संश्लेषोऽस्यास्तीति ठन् ।) विस्फोटकः । इति केचित् ॥ (विस्फोटकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

पोट्टली, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली+डः । पृषोदरादित्वात् साधुः । ङीप् ।) पोट्टलिका । वस्त्रबद्धद्रव्यम् । पुँटुलि इति भाषा । यथा,—
"शुद्ध्यर्थं त्रिफलाक्वाथे गुडुच्याः क्वाथ एव वा ।
दोलायन्त्रे पुरः पाच्यः पोट्टल्या वस्त्रबद्धया ॥"
इति वैद्यकम् ॥

पोडुः, पुं, (पुडतीति । पुड+उन् ।) कपालास्थितलम् । इति राजनिर्घण्टः ॥

पोतः, पुं, स्त्री, (पुनातीति । पू+"हसिमृग्रिण्-वामिदमिलूपूधूर्विभ्यस्तन् ।" उणा० ३ । ८६ । इति तन् ।) शिशुः । इत्यमरः । २ । ५ । ३८ ॥ (यथा, कथासरित्सागरे । १२ । १३३ ।
"तत्रस्थात् सर्वान् तालाख्याद् गिरेः संप्रेष्य राघ-वान् ।
आनाययत् पक्षिपोतं गरुडान्वयसम्भवम् ॥")

पोतः, पुं (पुनाति इति । पू+"हसीति ।" उणा० ३ । ८६ । इति तन् ।) वहित्रम् । गृहस्थानम् । पोता इति भाषा । वस्त्रम् । इति मेदिनी । त, ३७ ॥ दशवर्षीयहस्ती । इति हेमचन्द्रः ॥ समुद्रयानम् । जाहाज इति भाषा ॥ (यथा, देवीभागवते । १ । ३ । ४२ ।
"सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवजलोत्तरणाय कामम् ।
सम्प्राप्य वाचकमहो न शृणोति मूढः
सो वञ्चितोऽत्र विधिना सुखदं पुराणम् ॥")
यथा,—
"समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
शुकेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोताकूढास्ततः सर्व्वे पोतवाहैरुपासिताः ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन निर्भयाः ॥"
इति वाराहे गोकर्णमाहात्म्याध्यायः ॥

पोतकी, स्त्री, (पोत इवेति । पोत+इवार्थे कन् । स्त्रियां ङीप् ।) पूतिका । इति शब्दमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—
"पालक्यपोदिका सा तु मालवास्तवल्लरी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥
अकण्ठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत् पथ्या बृंहणी तृप्तिकारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्यामापर्णी । इति राजनिर्घण्टः ॥

पोतजः, पुं, (पोतः सन् न तु डिम्बादिरूप इति भावः । जायते इति । जन+डः ।) कुञ्जरादिः । यथा, हेमचन्द्रः । ४ । ४२१ ।
"अण्डजाः पक्षिसर्पाद्याः पोतजाः कुञ्जरा-दयः ॥"

पोतवणिक्, पुं, (पोतेन वणिक् ।) वाहित्रेण वाणिज्यकर्त्ता । नौवाणिज्यकरः । तत्पर्य्यायः । सांयात्रिकः २ । इत्यमरः । १ । १० । १२ । समुद्रयानचारी ३ । इति जटाधरः ॥ नौवाणिज्यकरः ४ । इति शब्दरत्नावली ॥

पोतरक्षः, पुं (पोतं रक्षतीति । रक्ष+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कर्णिपातकः । इति शब्दमाला ॥ हालि इति भाषा ॥

पोतलकप्रियः, पुं, (पोतलकः पर्व्वतविशेषः प्रियोऽस्य ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

पोतवाहः, पुं, (पोतं नावं वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) वहित्रवाहकः । दाँड़ि इति भाषा । तत्पर्य्यायः । नियामकः २ । इत्यमरः । १ । १० । १२ ॥

पोता, [ऋ] पुं, (पुनातीति । पू+"नप्तृनेष्टृ-त्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन निपात्यते ।) विष्णुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ऋत्विक् । इति भूरिप्रयोगः ॥ (यथा, ऋग्वेदे । ४ । ९ । ३ ।
"स सद्म परि णीयते होता मन्द्रो दिविष्टिषु ।
उत पोता नि षीदति ॥")

पोताच्छादनं, क्ली, (पोतमिवाच्छादयतीति । आ+छादि+ल्युः ।) वस्त्रकुट्टिमम् । इति हारावली ॥

पोताधानं, क्ली, (आधीयतेऽत्रेति । ल्युट् । आधानम् । पोतानां अण्डजमत्स्यानामाधानम् ।) क्षुद्राण्डमत्स्यसंघातः । इत्यमरः ।१।१०।१९॥ पोना इति भाषा । अस्य गुणाः । सुस्निग्धत्वम् । लघुत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

पोतिका, स्त्री, (पातोऽस्त्यस्या इति । पोत+ठन् । यद्वा, पूतिका पृषोदरादित्वात् साधुः ।) पूतिका । इत्यमरटीकायां भरतः ॥ शतपुष्पा ॥ मूलपोती । इति राजनिर्घण्टः ॥

पोतासः, पुं, (पोतेभ्यः शिशुभ्यः अस्यते क्षिप्यते इति । अस+घञ् ।) कर्पूरविशेषः । इति राजनिर्घण्टः ॥

पोत्रं, क्ली, (पूयतेऽनेनेति । पू+"हलसूकरयोः पुवः ।" ३ । २ । १८३ । इति ष्ट्रन् ।) सूकरमुखाग्रम् । लाङ्गलमुखाग्रम् । वज्रम् । इति मेदिनी । रे, ६१ ॥ वहित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पोतृनामर्त्विजः पात्रभेदः । यथा ऋग्वेदे । १ । १५ । २ ।
"मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन ।
यूयं हि ष्ठा सुदानवः ॥" "पोत्रात् पोतृनाम-कस्य ऋत्विजः पात्रात् सोमं पिबत ।" इति तद्भाष्ये सायनः ॥)

पोत्रायुधः, पुं, (पोत्रं तन्मुखाग्रमेव आयुधं यस्य ।) सूकरः । इति राजनिर्घण्टः ॥

पोत्रिरथा, स्त्री, (पोत्री सूकरः रथ इव गतिसाधकोऽस्याः ।) जिनशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

पोत्री, [न्] पुं, (पोत्रमस्यास्तीति । पोत्र+इनिः ।) सूकरः । इत्यमरः । २ । ५ । २ ॥ पोत्रविशिष्टे, त्रि ॥

पोलिन्दः, पुं (पोतस्य अलिन्द इवेति । पृषोदरादित्वात् साधुः ।) नौकावयवभेदः । तत्पर्य्यायः । मादारकः २ । इति त्रिकाण्डशेषः ॥

पोलिका, स्त्री, (पोली+स्वार्थे कन् टाप् । पूर्व्वह्रस्वश्च ।) पिष्टकविशेषः । पातला रोटी इति हिन्दी भाषा । यथा,—
"कुर्य्यात समितयातीव तन्वीं पर्पटिका ततः ।
स्वेदयेत्तप्तके तान्तु पोलिकां तां जगुर्बुधाः ॥
तां खादेल्लघिकायुक्तां तस्या मण्डकवद्‌गुणाः ।
तप्तकं तावा इति लोके ।" इति भावप्रकाशः ॥
तत्पर्य्यायः । पूलिका २ पोलिः ३ पूपिका ४ पूपला ५ । इति हेमचन्द्रः ॥

पोली, स्त्री, (पालति महत्त्वं गच्छतीति । पुल+ज्वलादित्वात् णः । ङीष् ।) पिष्टकविशेषः । तत्पर्य्यायः । पूपाली २ पर्पटी ३ । इति त्रिकाण्डशेषः ॥

पोषः, पुं, पोषणम् । पुषधातोर्भावे घञ्प्रत्ययनिष्पन्नः । यथा, भट्टिः ।
"यः सर्व्वदाज्ञानपुषत् स्वपोषम् ॥"
(यथा, च भागवते । ३ । ३० । १० ।
"अर्थैरापादितैर्गुर्व्व्या हिंसयेतस्ततश्च तान् ।
पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥")

पोषणं, क्ली, (पुष+ल्युट् ।) पुष्टिः । धृतिः । पुषधातोर्भावेऽनट् प्रत्ययनिष्पन्नः ॥ (यथा, मार्कण्डेये । २८ । ८ ।
"तद्वद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्मास्त्विमे प्रोक्ताः श्रूयन्तामाश्रमाश्रयाः ॥")

पोषयित्नुः, पुं, (पोषयतीति । पुष+णिच्+"स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।" उणा० ३ । २९ । इति इत्नुच् ।) कोकिलः । भर्त्ता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पोषणकर्त्तरि, त्रि ॥

पोष्टा, [ऋ] पुं, (पुष्णातीति । पुष+तृच् ।) पूनाकः । इति शब्दचन्द्रिका ॥ काँटाकरञ्ज इति भाषा ॥ पोषणकर्त्तरि, त्रि ॥ (यथा, हरिवंशे । २५ । १७ ।
"ताभिर्धार्य्यास्त्रयो लोकाः प्रजाश्चैव चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो जगतीपतिः ॥")

पोष्टृवरः, त्रि, पोषकश्रेष्ठः । पोष्टृषु वर इति सप्तमी तत्पुरुषसमासः ॥

पोष्यः, त्रि, (पुष्यते इति । पुष+ण्यत् ।) पोषणीयः । पोषितव्यः । पुषधातोः कर्म्मणि यप्रत्ययनिष्पन्नः ॥ (यथा, राधातन्त्रे चतुर्द्दशपटले ।
"नन्दगोपस्य देवेशि । कृष्णस्तु सर्व्वदा प्रियः ।
आत्मना जायते यस्तु आत्मजः स उदाहृतः ।
पोष्यः पुत्त्र इति ख्यातो नन्दस्य वरवर्णिनि ॥")

पोष्यपुत्त्रः, पुं, (पोष्यः पुत्त्रः । पोष्यत्वेनैव पुत्त्रत्वं प्राप्त इत्यर्थः ।) पालनादिना सुतत्वप्राप्तः । यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्याये ।
"अधुना कृत्तिकानाञ्च यशां तत्पोष्यपुत्त्रकः ।
तन्नाम चक्रुस्ताः प्रेम्णा कार्त्तिकश्चेति कौतु-कात् ॥"

अथ तस्य व्यवस्था।

"तत्राह मनुः।
'अपुत्त्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च॥'
अत्रिश्च।
'अपुत्त्रेणैव कर्त्तव्यः पुत्त्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः॥'
शौनकः।
'अपुत्त्रो मृतपुत्त्रो वा पुत्त्रार्थं समुपोष्य च॥'
इति। तेन पुत्त्रोत्पत्त्या।
'ज्येष्ठेन जातमात्रेण पुत्त्री भवति मानवः।
पितॄणामनृणश्चैव स तस्मात् सर्व्वमर्हति॥'
इति मनुवचनावगत ऋणपरिहारेऽपि तत्पुत्त्र-मरणे पिण्डोदकाद्यर्थं पुनः पुत्त्रकरणमावश्यकम्। अत्र पुत्त्रपदं पौत्त्रप्रपौत्त्रयोरप्युपलक्षणम्। तयो-रपि पिण्डदातृत्ववंशकरत्वाविशेषात्। अन्यथा सत्यपि पौत्त्रे मृतपुत्त्रस्य निर्निमित्तपुत्त्रपरि-ग्रहापत्तिरतः पुत्त्रपौत्त्रप्रपौत्त्ररहितस्यैव पुत्त्री-करणमवगम्यते॥ * ॥ स्त्रिया भर्त्तुरनुज्ञया तदधिकारः। यथाह वशिष्ठः। 'न स्त्री पुत्त्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः।' इति॥ * ॥ प्रतिनिधिरिति स च क्षेत्रजादि-रेकादशविधः। यथाह मनुः।
'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्त्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥'
बृहस्पतिः।
'पुत्त्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्व्वशः।
सन्तानकारणं तेषामौरसः पुत्त्रिका तथा॥
आज्यं विना यथा तैलं सद्भिः प्रतिनिधीकृतम्।
तथैकादश पुत्त्रास्तु पुत्त्रिकौरसयोर्व्विना॥'
तत्रापि कलौ न सर्व्वेषामभ्यनुज्ञानम्।
'अनेकधा कृताः पुत्त्रा ऋषिभिर्य्यैः पुरातनैः।
न शक्यास्तेऽधुना कर्त्तुं शक्तिहीनतया नरैः॥'
इति वचनात्॥
'दत्तौरसेतरेषान्तु पुत्त्रत्वेन परिग्रहः।'
इत्याद्यभिधाय।
'इमान् धर्म्मान् कलियुगे वर्ज्ज्यानाहुर्म्मनीषिणः।'
इति दत्तकेतरप्रतिनिधिनिषेधात्॥ * ॥ अतो दत्तकविधिर्व्विविच्यते। तत्र शौनकः।
'ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्त्रसंग्रहः।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्॥'
सपिण्डेष्विति सामान्यश्रवणात् समानासमान-गोत्रेष्वित्यर्थः। तथा च सपिण्डाभावेऽसपिण्डः सगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह शाकलः।
'सपिण्डापत्यकञ्चैव सगोत्रजमथापि वा।
अपुत्त्रको द्विजो यस्मात् पुत्त्रत्वे परिकल्पयेत्॥
समानगोत्रजाभावे पालयेदन्यगोत्रजम्।
दौहित्रं भागिनेयञ्च मातृष्वसृसुतं विना॥' इति
अन्यत्र तु न कारयेदिति ब्राह्मणातिरिक्त-क्षत्त्रियादिरसमानजातीयो दत्तको व्यावर्त्त्यते। यदाह मनुः।
'माता पिता वा दद्यातां यमद्भिः पुत्त्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः॥'
आपदि पुत्त्रप्रतिग्रहीतुरपुत्त्रत्वे सदृशं सजा-तीयं। अतएवाह वृद्धयाज्ञवल्क्यः।
'सजातीयः सुतो ग्राह्यः पिण्डदाता स ऋक्थ-भाक्।
तदभावे विजातीयो वंशमात्रकरः स्मृतः॥'
ग्रासाच्छादनमात्रन्तु स लभेत तदृक्थिन इति।
दौहित्रं भागिनेयञ्चेति दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः। तथा च शौनकः।
'क्षत्त्रियाणां स्वजातौ च गुरुगोत्रसमेऽपि वा।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु॥
सर्व्वेषामेव वर्णानां जातिष्वेव न चान्यतः।
दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्॥'
जातिष्वेव न चान्यत इति नियमः सजातीय-सम्भवे विजातीयनिषेधार्थः। अन्यथा प्रागुक्त-कात्यायनविरोधः स्यात्॥ * ॥ तत्रापि सन्नि-हितसपिण्डेषु सति भ्रातृपुत्त्रे स एव पुत्त्रीकार्य्य इत्याह मनुः।
'सर्व्वेषामेकजातानामेकश्चेत् पुत्त्रवान् भवेत्।
सर्व्वे ते तेन पुत्त्रेण पुत्त्रिणो मनुरब्रवीत्॥'
बृहस्पतिः।
"यद्येकजाता बहवो भ्रातरस्तु सहोदराः।
एकस्यापि सुते जाते सर्व्वे ते पुत्त्रिणः स्मृताः॥'
इति। अत्र वचनद्वयेऽपि भ्रातृसुते च पुत्त्र-प्रतिनिधितया कथञ्चित् सम्भवत्यन्यो न प्रति-निधिः कार्य्य इत्यवगम्यते॥ * ॥ भर्त्तृवंशमन्तरेण चास्या वंशान्तरासम्भवेन तस्यैव स्ववंशकरत्व-श्चेन यतः समस्तस्यापि पुत्त्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्त्रे न दत्तकाद्युपादानम्॥ * ॥ केन पुत्त्रो देय इत्याह शौनकः।
'नैकपुत्त्रेण कर्त्तव्यं पुत्त्रदानं कदाचन।
बहुपुत्त्रेण कर्त्तव्यं पुत्त्रदानं प्रयत्नतः॥'
द्विपुत्त्रस्यापि पुत्त्रदाने अपरपुत्त्रनाशे वंश-विच्छेदमाशङ्क्याह बहुपुत्त्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमते प्रोषिते मृते वा तद-नुज्ञां विनापि। यथा वशिष्ठः। 'न स्त्री पुत्त्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः।' इति। अनुमतिश्चाप्रतिषेधेऽपि भवति। अप्रति-षिद्धं परमनुमतं भवतीतिन्यायात्॥ * ॥ निर-पेक्षदानमाह याज्ञवल्क्यः।
'दद्यान्माता पिता वा यं स पुत्त्रो दत्तको भवेत्॥'
तथा 'मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वेति॥'
अथ पुत्त्रपरिग्रहविधिमाह शौनकः।
'शौनकोऽहं प्रवक्ष्यामि पुत्त्रसंग्रहमुत्तमम्।
अपुत्त्रो मृतपुत्त्रो वा पुत्त्रार्थं समुपोष्य च॥'
उपोष्य ग्रहणात् पूर्व्वदिने कृतोपवासः। वृद्ध-गौतमः।
'वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम्।
आचार्य्यं धर्म्मसंयुक्तं वैष्णवं वेदपारगम्॥
मधुपर्केण संपूज्य राजानञ्च द्विजान् शुचीन्॥'
राज्ञो विप्रकृष्टत्वे ग्रामस्वामिनम्। 'बन्धूनाहूय सर्व्वांस्तु ग्रामस्वामिनमेव च।' इतिस्मरणात्।
द्विजानिति बहुत्वं त्रित्वपर्य्यवसितं कपिञ्जल-न्यायात्।
'बर्हिः कुशमयञ्चैव पालाशञ्चेध्ममेव च।
एतानाहृत्य बन्धूंश्च ज्ञातीनाहूय यत्नतः॥
बन्धूनन्नेन सम्भोज्य ब्राह्मणांश्च विशेषतः।
अन्वाधानादिकं तत्र कृत्वाज्योत्पवनान्तकम्॥
दातुः समक्षं गत्वा च पुत्त्रं देहीति याचयेत्।
दाने समर्थो दातास्मै यो यज्ञेनेति पञ्चभिः॥'
दद्यादिति शेषः। बन्धून् आत्ममातृपितृबन्धून्।
ज्ञातीन् सपिण्डान्। तथा।
'देवस्यत्वेतिमन्त्रेण हस्ताभ्यां परिगृह्य च।
अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिशुमूर्द्धनि।
वस्त्रादिभिरलङ्कृत्य पुत्त्रच्छायावहं सुतम्॥'
पुत्त्रच्छाया पुत्त्रसादृश्यं नियोगादिना स्वयमुत्-पादनयोग्यत्वमिति यावत्। तथा।
'नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्।
गृहमध्ये तमाधाय चरुं कृत्वा विधानतः॥
यस्त्वाहृदेत्यृचा चैव तुभ्यमग्ने त्वृचैकया॥
सोमो ददद्दित्येताभिः प्रत्यृचं पञ्चभिस्तथेति।'
वृद्धगौतमः।
'पायसं तत्र साज्यञ्च घृतसंख्यञ्च होमयेत्।
प्रजापते न त्वदेतान्यन्य इत्युद्दिश्य प्रजापतिम्॥'
इति॥
वशिष्ठः। 'पुत्त्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूर-बान्धवं बन्धुसन्निकृष्टमेव गृह्णीयात्। सन्देहे चोत्पन्ने दूरबान्धव शूद्रमिव स्थापयेत्। विज्ञा-यते ह्येकेन बहूंस्त्रायत इति।' निवेशनं गृहम्। सन्देह इति दूरावस्थितबान्धवस्यात्यन्तदेश-भाषाविप्रकर्षादिना कुलशीलादिसन्देहो भव-त्येव तथात्वे निर्णयपर्य्यन्तं न व्यवहरेत् तत्र हेतुरेकेनेति। बन्धून् पित्रादीन्। एतदन्यतर-विधिरावश्यकः॥ * ॥ ततश्च शौनकः।
'दक्षिणां गुरवे दद्याद्यथाशक्ति द्विजोत्तमः।
नृपो राज्यार्द्धमेवाथ वैश्यो वित्तशतत्रयम्।
शूद्रः सर्व्वस्वमेवापि अशक्तश्चेद्यथाबलम्॥'
राज्यार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयद्रव्यम्। प्रद-द्यादर्द्धराज्योत्थमेकवर्षाहृतं धनमिति वृद्धगौतम स्मरणात्। उत्तममध्यमाधमभेदेन वित्तानां सुवर्णरजतताम्राणामिति ज्ञेयम्।
'शतत्रयं नाणकानां सौवर्णमथ राजतम्।
प्रदद्यात्ताम्रमथवा उत्तमादिव्यवस्थया॥'
इति वृद्धगौतमस्मरणात्॥
सर्व्वस्वमेकवर्षभृतिलब्धमिति यावत्॥ * ॥
तैत्तिरीयाणान्तु विधिविशेषमाह बौधायनः।
अथ पुत्त्रपरिग्रहविधिं व्याख्यास्यामः। प्रति-ग्रहीष्यन्नुपकल्पयते द्वे वाससी द्वे कुण्डले अङ्गु-लीयकमाचार्य्यञ्च वेदपारगं कुशमयं बर्हिः-पर्णमयमिध्ममित्यथ बन्धूनाहूय निवेशनस्य मध्ये राजनि निवेद्य परिषदि चागारमध्ये ब्राह्मणं

वागारम्भेण उपवेश्य पुण्याहस्वस्त्यृद्धिमिति वाचयित्वा यद्देवयजनोल्लेखप्रभृति आग्नेयी-तायाः कृत्वा दातुः समक्षं गत्वा मे पुत्रं देहीति भिक्षेत् ददामीतीतर आह तं परिगृह्णीत धर्म्माय त्वा परिगृह्णामि सन्तत्यै त्वा परिगृह्णामीत्यथैनं वस्त्रकुण्डलादिभिरलङ्कृत्य परिधान-प्रभृत्यग्निमुखं कृत्वा पक्वा जुहोति यस्त्वा हृदा कीरिणा मन्यमान इति पुरोऽनुवाक्यमनूच्य यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोति अथ व्याहृतिभिर्हुत्वा स्विष्टकृत्प्रभृति सिद्ध-माधेनुवरप्रदानात् दक्षिणां ददात्येते च वाससी एते कुण्डले एतच्चाङ्गुरीयकमेवं त्वौरस उत्पद्यते तुरीयभागे सम्भवतीति आह स्म बौधायन इति ॥ * ॥ एवमुक्तविध्यभावे परिग्रहीतस्य तु विवाहोचितधनमात्रभागित्वं न त्वंशभागित्वमित्यग्रे वक्ष्यते । तथा च मनुः ।

‘गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति ॥’

एतेन दातृधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्त्रिमस्य स्वत्वनिवृत्तिर्दातृगोत्रनिवृत्तिश्च भवतीत्युच्यते । तथा च गोत्रादिनिवृत्तेरेव दर्शनात् संस्कुर्य्यात् स्वसुतान् पितेति स्मरणात् ग्रहणानन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिग्रहीत्रा कार्य्या न पुनर्जनकेन कृतपूर्व्वा अपि निवर्त्तनीयाः ॥ * ॥ यदि च ततपूर्व्वभाविनोऽपि संस्कारा जनकेन न कृतास्तदा बीजगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिग्रहीत्रैव ते समाधेयाः ॥ * ॥ एवमुपनयनमात्रकरणेऽपि प्रतिग्रहीतुर्दत्तकपुत्रसिद्धिः ।

‘अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥’

इति वशिष्ठस्मरणात् ॥

एतच्चाष्टमाब्दरूपतन्मुख्यकालाभ्यन्तरवर्त्तिपरिग्रहे बोध्यम् । अन्यथा मुख्यकाले अधिकारयोग्यत्वाभावे गौणकाले अनधिकारान्न तत्सिद्धिरिति ॥ * ॥ अत्र च जनकप्रतिग्रहीत्रोरुभयोरपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वं विशेषतो वक्ष्यते ।

‘चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥’

एवञ्च चूडाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य विवाहलाभः ॥ * ॥ तथा पैठीनसिः । अथ दत्तकक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण येऽत्र जातास्तेऽसङ्गतकुलीना द्व्यामुष्यायणा भवन्तीति । आर्षेण ऋष्युक्तेन परिग्रहेण । जनकग्रहीत्रोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः ॥ * ॥ अथ तत्कर्त्तृकश्राद्धनिर्णयः । तत्र पितुः सपिण्डीकरणान्तषोडशश्राद्धे दत्तकस्य पूर्व्वग्रहीतत्वेऽपि सत्यौरसे नाधिकारः । औरसे पुनरुत्पन्ने तेषु ज्यैष्ठं न विद्यते । इति देवलेन ज्यैष्ठत्वप्रतिषेधात् ।

‘पिण्डदोंऽशहरश्चैषां पूर्व्वाभावे परः परः ।’

इति याज्ञवल्क्यवचनाच्च । अन्यत्र सर्व्वमौरसवत् । क्वचित्तु विशेषो यथा कात्यायनः ।

‘औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन तु ।
प्रदद्यातामितरे कुर्य्युरेकोद्दिष्टं सुता दश ॥’

इतरे दत्तकादयः ॥ * ॥ अथ दत्तकाशौचादिनिर्णयः । तत्र शुद्धदत्तकस्य तु जनककुले परस्परमशौचं नास्त्येव गोत्रनिवृत्त्याशौचनिवृत्तेरर्थसिद्धत्वात् । द्व्यामुष्यायणस्य तु उभयत्रैवाशौचमिति । ब्रह्मपुराणे ।

‘दत्तकश्च स्वयं दत्तः कृत्रिमः क्रीत एव च ।
अपविद्धाश्च ये पुत्रा भरणीयाः सदैव ते ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः ।
जनने मरणे चैव त्र्यहाशौचस्य भागिनः ॥’

पराशरः ।

‘भिन्नगोत्रः सगोत्रो वा नीतः संस्कृत्य चेच्छया ।
जनने मरणे तस्य त्र्यहाशौचं विधीयते ॥’

तथा ।

‘औरसं वर्जयित्वा च सर्व्ववर्णेषु सर्व्वदा ।
क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च ।
अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः ॥’

अथ दत्तकविभागः । मनुः ।

‘पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवास्तु षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥’

बौधायनः ।

‘औरसं पुत्त्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ ।
गूढञ्चैवापविद्धञ्च रिक्थभाजः प्रचक्षते ॥
कानीनञ्च सहोढञ्च क्रीतं पौनर्भवन्तथा ।
स्वयं दत्तं निषादञ्च गोत्रभाजः प्रचक्षते ॥’

औरस पुत्त्रिकापुत्र-क्षेत्रज-कानीन-गूढोत्पन्नापविद्ध-सहोढ पौनर्भव-दत्तक-स्वयमुपागत-कृतक-क्रीतानभिधाय देवलः ।

‘एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा याद्दच्छिकास्तथा ॥
तेषां षड्बन्धुदायादाः पूर्व्वेऽन्ये पितुरेव षट् ।
विशेषं वापि पुत्राणामानुपूर्व्व्यां विशिष्यते ॥
सर्व्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठं न विद्यते ॥
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ॥’ * ॥

वशिष्ठः । तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात् । स प्रतिगृहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः । अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वशिष्ठोक्तो दत्तकविषयो ज्ञेयः । तथा देवलकात्यायनवचने तृतीयांशग्रहणविधिरित्युत्तरगुणदत्तकविषयो वाच्यः ।

‘उपपन्नो गुणैः सर्व्वैः पुत्रो यस्य हि दत्त्रिमः ।
स हरेतैव तद्रिक्थं सम्प्राप्तोऽप्यन्यगोत्रतः ॥’

इति मनुवचनैकवाक्यत्वात् । गुणैर्जातिविद्याचारैः । तथा केनापि मुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तं तत्र गुणवद्गुणवद्भेदेन समाधेयं एवं दत्तकस्य धनग्रहणादौ मुनिभेदेन पूर्व्वापरोक्तिवैषम्यं गुणागुणविवेकेनापास्तं एतेनौरसस्य भ्रात्रादिधने येनैव भ्रातृत्वादिना सम्बन्धेन अधिकारित्वं तादृशेनैव सम्बन्धेन तादृशदत्तकस्यापि यथासम्भवमुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकदत्तकपौत्रस्यापि दत्तकोचितांशभागित्वम् । तदसत्त्वे सर्व्वहरत्वमपीति । न च पौत्रस्य स्वपितृयोग्यांशभागित्वं नियमात दत्तकग्रहीतुः पितामहौरससत्त्वे तादृशपितृत्वतुल्यस्यैवांशस्य तद्योग्यत्वात् दत्तकपौत्रः पितृत्वतुल्यमेवांशं लभतामिति वाच्यम् । पुत्रकस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्यादृशांशः प्राप्तिसिद्धस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु । एव रीतिः प्रपौत्रेऽप्यनुसर्त्तव्येति ॥ * ॥

‘औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षडिमे पुत्रपांसनाः ॥
अभावे पूर्व्वपूर्व्वेषां परान् समभिषेचयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥’

तथा ।

‘न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् ।
पितॄणां शोधयेन्नित्यमौरसे तनये सति ॥’ इति ।

एतावता प्रबन्धेनाभिहितो योऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः स तु शूद्रस्य न सम्भवति तस्य तु ।

‘दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्म्मो व्यवस्थितः ॥’

इति मनुवचनेन जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।

‘मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनम् ।
अभ्रातृको हरेन सर्व्वं दुहितॄणां सुतादृते ॥’

इति याज्ञवल्क्येन च दासीपुत्रस्याप्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन च दत्तापूपायितं सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशोऽसति तु तदर्द्धांशः अन्यथा यत्र च क्षेत्रजदत्तकादीनामौरसचतुर्थांशत्वं तत्र तदपेक्षया अत्यन्तनिकृष्टाधिकारस्य दासीपुत्रस्यौरससमांशित्वमिति महद्वैषम्यं स्यात् एवं सत्सु क्षेत्रजादिषु सत्योश्च पत्नीकन्ययो-

दौहित्राधिकारे कल्पनाधिकारविधिबाधापत्ति-स्तेन दौहित्रपर्य्यन्ताधिकारिशृङ्खलायां तदेकतमे सत्यपि न दासीपुत्रस्य सर्व्वहरत्वं किन्तु ततसमांशः । अतएव ।

'दत्तपुत्रे यथा जाते कदाचित्त्वौरसो भवेत् ।
पितुर्व्वित्तस्य सर्व्वस्य भवेतां समभागिनौ ॥'

इत्यपि वचनं शूद्रविषय एव योजनीयम् ॥ * ॥ अथान्धपङ्गुप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तद्गृहीतदत्तकपुत्रादेः पितामहधनाधिकारः किन्तु भरणमात्रं अन्धादिभार्य्याणां भरणविधानेन तद्भरणस्य दण्डापूपायितत्वात् । तथा अन्धपङ्ग्वादीननधिकारिपुत्रानभिधायाह ।

'औरसक्षेत्रजास्त्वेषां निर्द्दोषा भागहारिणः ।
अपुत्रयोषितश्चैषां भर्त्तव्याः साधुवृत्तयः ॥
सुताश्चैषां प्रभर्त्तव्या यावन्न भर्त्तृसात् कृताः ॥'

एव दत्तकग्रहणानन्तरोत्पन्नौरसेन सह दत्तकस्य विभागदर्शनात् सत्यौरसे गृहीतस्य तु नांशभागित्वमिति । तथा विधानं विना परिगृहीतस्यापि नांशभागित्वमित्याह ।

'तस्मिन् जाते सुते दत्ते न कृतं च विधानके ।
तत्सुतस्तस्य वित्तस्य यः स्वामी पितुरञ्जसा ॥'

मनुः ।

'अविधाय विधानं यः परिगृह्णाति पुत्त्रकम् ।
विवाहविधिभाजं तं न कुर्य्याद्धनभाजनम् ॥'

इति ।

अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह

'यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित् ।
अंशभाजं न तं कुर्य्यात् शौनकस्य मतं हि तत् ॥'

इत्युक्तप्रायमित्यास्तां विस्तारः ॥" इति दत्तकचन्द्रिका ॥

पोष्यवर्गः, पु, (पोष्याणां प्रतिपालनीयानां वर्गः ।) प्रतिपालनीयगणः । स तु मात्रादिः । यथा,—

"माता पिता गुरुः पत्नी त्वपत्यानि समाश्रिताः ।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गा अमी नव ॥"

इति काशीखण्डम् ॥

अपि च ।

"माता पिता गुरुर्भ्राता प्रजा दीनः समाश्रिताः ।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् ॥"

इति गारुडे २१५ अध्यायः ॥

पौंसवनं, क्ली, (पुंसवनमेव । स्वार्थे अण् ।) पुंसवनसंस्कारः । इति भूरिप्रयोगः ॥

पौंस्नं, क्ली, (पुंस इदम् । पुंस्+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ।" ४ । १ । ८७ । इति स्नञ् ।) पुंस्त्वम् । इति शब्दमाला ॥ (धैर्य्यम् । यथा, भागवते । ४ । २६ । २६ ।

"का देवरं वशगतं कुसुमास्त्रवेग-
विस्रस्तपौंस्नमुशती न भजेत कृत्ये ॥"

त्रि, पुंसु भवः । पुंस आगतः । यथा, भागवते । ३ । १५ । ४५ ।

"पौंस्नं वपुर्दर्शयानमनन्यसिद्धै-
रौत्पत्तिकैः समगृणन् युतमष्टभोगैः ॥"

स्त्रियां ङीप् । पुरुषयोग्या । पुरुषहिता । यथा, भट्टिः । ५ । ६१ ।

"सङ्गच्छ पौंस्नि । स्त्रैणं मां युवानं तरुणी शुभे ॥")

पौगण्डं, क्ली, (पोगण्डस्य भावः । पोगण्ड+अण् ।) अवस्थाविशेषः । यथा,—

"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम् ॥"

इतिदशमस्कन्धीयद्वादशाध्यायस्थसप्तत्रिंश श्लोकटीकायां श्रीधरस्वामिधृतवचनम् ॥ (पोगण्डावस्थावति तदवस्थासम्बन्धिनि च त्रि । यथा, भागवते । ३ । ३१ । २८ ।

"इत्येवं शैशवं भुक्त्वा दुःखं पौगण्डमेव च ॥")

पौण्डरीकं, क्ली, (पुण्डरीकमिव । पुण्डरीक+"शर्करादिभ्योऽण् ।" ५ । ३ । १०७ । इत्यण् ।) प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥ (कुष्ठविशेषः । यथा, सुश्रुते निदानस्थाने ५ अध्याये ।

"तत्र वातेनारुणं पित्तेनौडुम्बर्य्यर्षजिह्वकपालकाकणकानि । श्लेष्मणा पौण्डरीकं दद्रुकुष्ठेति ॥" पुं, यज्ञविशेषः । यथा, महाभारते । १३ । १०७ । ३६-३७ ।

"यस्तु संवत्सरं चाश्नो भुङ्क्ते ऽहन्यष्टमे नरः ।
देवकार्य्यपरो नित्यं जुह्वानो जातवेदसम् ॥
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ।
पद्मवर्णनिभञ्चैव विमानमधिरोहति ॥")

पौण्डर्य्यं, क्ली, (पुण्डर्य्यमेव । स्वार्थे ष्यञ् ।) पुण्डर्य्यम् । इत्यमरटीकायां भरतः ॥ (यथास्य पर्य्यायो गुणाश्च ।

"प्रपौण्डरीकं पौण्डर्य्यं चक्षुष्यं पौण्डरीयकम् ।
पौण्डर्य्यं मधुरं तिक्तं कषायं शुक्रलं हिमम् ।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पौण्ड्रः पु, देशभेदः । चन्देल इति ख्यातः । इति शब्दरत्नावली ॥ (सोऽस्य अभिजनस्तस्य राजा वा । अण् । तद्देशनृपः । यथा, हरिवंशे ।

"पाण्ड्रं पौण्ड्रं कलिङ्गञ्च मात्स्यञ्चैव जनार्द्दनः
जघान सहितान् सर्व्वान्—————— ॥"

पौण्ड्रदेशोद्भवे, पुंभूम्नि । यथा, हरिवंशे । ११६ । ५२ ।

"अङ्गवङ्गकलिङ्गैश्च सार्द्धं पौण्ड्रैश्च वीर्य्यवान् ।
निर्य्ययौ चेदिराजस्तु भ्रातृभिः स महारथैः ॥")

भीमसेनस्य शङ्खः । यथा,—

"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥"

इति श्रीभगवद्गीतायाम् । १ । १५ ॥

(पुडि खण्डने+"स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् । ततःप्रज्ञाद्यण् ।) इक्षुभेदः । इति रत्नमाला ॥ पुँड़ि इति भाषा ॥

पौण्ड्रकः, पुं, (पौण्ड्र एव । स्वार्थे कन् ।) इक्षुभेदः । पुँड़ि आक इति भाषा । (यथा,—

"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत् ।
इत्येता जातयः स्थौल्याद्गुणान् वक्ष्याम्यतः-परम् ॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

अस्य गुणाः । शीतलत्वम् । वृष्यत्वम् । स्निग्धत्वम् । मधुरत्वम् । बृंहणत्वञ्च । इति राजवल्लभः ॥ (गुणान्तरमस्य यथा,—

"वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुशीतो बृंहणो बल्यः पौण्ड्रको भीरुकस्तथा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

पौण्ड्रदेशीयनृपः । यथा, महाभारते ।२।३४।१०।

"पौण्ड्रको वासुदेवश्च वङ्गः कालिङ्गकस्तथा ॥")

जातिविशेषः । पुँड़ो इति भाषा । स च शौण्डिकायां वैश्याज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ (पौण्ड्रदेशोद्भवक्षत्रियविशेषः । स तु क्रियालोपादिना शूद्रत्वमापन्नः । यथा, मनुः । १० । ४४ ।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः ॥")

पौण्ड्रवर्द्धनः, पुं, (पौण्ड्राणामिक्षुविशेषाणां वर्द्धनं यत्र ।) देशभेदः । इति शब्दरत्नावली ॥ वेहार इति ख्यातः ॥ (यथा, कथासरित्सागरे । १८ । १७ ।

"अभवत्तस्य भार्य्या च नगरात् पौण्ड्रवर्द्धनात् ॥")

पौण्ड्रिकः, पुं, (पुण्ड्र+स्वार्थे ठञ् ।) इक्षुभेदः । पुँड़ि इति भाषा । तत्पर्य्यायः । पुण्ड्रेक्षुः २ पुण्ड्रः ३ सेव्यः ४ अतिरसः ५ मधुः ६ । इति शब्दमाला ॥

पौतवं, क्ली, परिमाणम् । इति यौतवशब्दटीकायां भरतः ॥

पौत्तिकं, क्ली, (पुत्तिकाभिर्मधुमक्षिकाविशेषैः कृतम् । पुत्तिका+"संज्ञायाम् ।" ४ । ३ । ११७ । इति ठञ् ।) पिङ्गलवर्णपुत्तिकाख्यबृहन्मक्षिकाकृतघृतवर्णमधु । इति जटाधररत्नमाला ॥ (यथा, सुश्रुते । १ । ४५ ।

"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च ।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः ॥")

पौ(त्र)त्रः, पुं, (पुत्रस्यापत्यम् । पुत्र+"अनृष्यानन्तर्य्ये विदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् ।) पुत्रस्य पुत्रः । नाति इति भाषा ॥ तत्पर्य्यायः । नप्ता २ । इति हेमचन्द्रः ॥ यथा,—

"पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥"

इति दायभागधृतमनुशङ्खलिखितवशिष्ठहारीतवचनम् ॥

पौत्री, स्त्री, (पुत्रस्यापत्यं स्त्री । पुत्र+अञ् । ङीप् ।) पुत्रात्मजा । तत्पर्य्यायः । नप्त्री २ । इत्यमरः । २ । ६ । २८ ॥

पौनःपुनिकः, त्रि, (पुनः पुनर्भवः । पुनःपुनः+ठञ् । टिलोपः ।) पुनःपुनर्भवः । इति मुग्धबोधव्याकरणम् ॥

पौनःपुन्यं, क्ल, (पुनःपुनः+स्वार्थे ष्यञ् । टिलोपः । पुनर्व्वारम् । तत्पर्य्यायः । वारंवारम् २ मुहुः ३

पृच्छत् ४ अवलत् ५ पुनःपुनः ६ वारंवारेण ७ अभीक्ष्णम् ८ प्रतिचणम् ९। इति शब्दरत्नावली ॥

पौनर्भवः, पुं, (पुनर्भुवोऽपत्यमिति। पुनर्भू+ "कल्याण्यादीनामिनङ्।" ४।१।१२६। इति अण्।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः। इति जटाधरः॥ पुनर्भूपुत्रः। स तु भर्तृपरित्यक्तविधवयोरन्येनोत्पादितः। तस्य लक्षणं यथा,—

"या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते॥"

इति मानवे। ९। १७५॥

"येति। या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत् स उत्पादकस्य पौनर्भवः पुत्र उच्यते।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ भर्तृविशेषः। अक्षतयोन्योर्भर्तृपरित्यक्तविधवयोः पौनर्भवेन भर्त्रा सह विवाहविधिः एवं कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनरागतायास्तेन कौमारेण भर्त्रा सह विवाहविधिर्यथा,—

"सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा। पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति॥"

इति मानवे। ९। १७६॥

"सा चेदिति। सा स्त्री यद्यक्षतयोनिः सती अन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति। यद्वा कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति।" इति तट्टीकायां कुल्लूकभट्टः॥*॥ कन्याविशेषे, स्त्री। सप्तविधपौनर्भवाः कन्या वर्ज्जनीयाः। यथा,—

"सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥ उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या। इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्॥ कृतकौतुकमङ्गला बद्धकङ्कणा। उदकस्पर्शिता उदकपूर्ब्बं दत्तेति रत्नाकरः।" इत्युद्वाहतत्त्वम्॥

पौरं, क्ली, (पुरे भवम्। पुर+"तत्र भवः।" ४। ३। ५३। इत्यण्।) रौहिषतृणम्। इत्यमरः। २। ४। १६६॥ रामकर्पूर इति ख्यातम्॥ (अस्य पर्य्यायो यथा,—

"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा। भूतीकं ध्यामपौरञ्च श्यामकं धूमगन्धिकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पुरोद्भूते, त्रि। इति मेदिनी॥ (यथा, रघुः।६।८५।

"इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥"

पुं, पुरुराजपुत्त्रः। यथा, ऋग्वेदे। ८। ३। १२।

"श्रुधी मे अस्य वज्र पौरमाविथ धिय इन्द्र सिषासतः॥"

पुरः पूरक एव। स्वार्थे अण्। उदरपूरके, त्रि। यथा, तत्रैव। २। ११। ११।

"एवान्तरे कुचो वह्नर्यस्यिया सुतः पौर इन्द्र-माव॥")

पौरकः, पुं, (पौर इव कायतीति। कै+कः।) गृहबाह्योपवनम्। यथा,—

"निष्कुटस्तु गृहारामो बाह्यारामस्तु पौरकः॥"

इति हेमचन्द्रः। ४। १७८॥

पौरवः, पुं, (पुरोरपत्यमिति। पुरु+अण्।) पुरुवंश्यः। यथा,—

"दुष्मन्तोस्तु तनया भोक्ता अन्योस्तु स्वेच्छतानृतः। पुरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव॥"

इति मात्स्ये ३४ अध्यायः॥

(देशविशेषः। यथा, मार्कण्डेये। ५८। ५२।

"त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम। पूर्ब्बोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः॥"

पुरुवंशीये, त्रि। (यथा, शकुन्तलायां प्रथमे अङ्के।

"कः पौरवे वसुमतीं शासति शासितरि दुर्व्विनीतानाम्।

अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु॥")

पौरस्त्यः, त्रि, (पुरो भवः। पुरस्+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ९८। इति त्यक्।) प्रथमः। इत्यमरः। ३। १। ८०॥ (पूर्व्वदिग्भवः। यथा, रघुः। ४। ३४।

"पौरस्त्यानेवमाक्रामन् तांस्तान् जनपदान् जयी॥")

पौराणिकः, त्रि, (पुराणमधीते वेद वा। पुराण+"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च।" ४। २। ६०। इत्यस्य वार्त्तिकोक्त्या ठक्।) पुराणवेत्ता। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १। ४। १। "लोमहर्षणपुत्त्र उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे॥" यथा च भागवते। १२। ७। ५।

"त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः। वैशम्पायनहारीतौ षड्वै पौराणिका इमे॥")

पौरुषं, क्ली, (पुरुष+अण्।) पुरुषस्य भावः। पुरुषस्य कर्म्म। पुरुषस्य तेजः। इति मेदिनी॥

"क्लीवा हि दैवमेवैकं प्रशंसन्ति न पौरुषम्। दैवं पुरुषकारेण घ्नन्ति शूराः सदोद्यमाः॥"

इत्यग्निपुराणम्॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥"

इति हितोपदेशः॥

पौरुषं, त्रि, (पुरुष+अण्।) ऊर्द्ध्वविस्तृतदोःपाणिनृमाणम्। पुरुषपरिमाणम्। इत्यमरः। ३। ३। २२२॥ (पुरुषवाह्यः। यथा, मनुः। ८। ४०४।

"पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे॥")

पौरुषेयः, पुं, (पुरुष+"सर्व्वपुरुषाभ्यां णढञौ।" ५। १। १०। इत्यत्र "पुरुषाद्वधविकारसमूहतेन कृतेषु" इत्यर्थेषु ढञ्।) समूहः। (यथा, माघः। २। ४।

"एकाकिनोऽपि परितः पौरुषेयवृता इव॥")

वधः। पुरुषस्य पदान्तरम्। इति मेदिनी॥

पौरुषेयः, त्रि,। (पुरुष+ढञ्।) पुरुषकृतः। पुरुषविकारः। इति मेदिनी॥ (पुरुषसम्बन्धिनि। यथा, ऋग्वेदे। १०। ८७। १६।

"यः पौरुषेयेण क्रविषा समङ्क्ते॥")

पौरोगवः, पुं, स्त्री, (पुरोऽग्रे गौर्नेत्रं यस्येति। पुरोगुः। ततः प्रज्ञाद्यण्।) पाकशालाध्यक्षः। इत्यमरः।२।९।२७॥ (यथा, हरिवंशे।१४६।५८।

"तृणाश्मलौचर्व्वलयुक्तपूर्णान्
पौरोगवोक्तानुपजह्नुरेवाम्॥")

पौरोडाशः, पुं, (पुरोडाश एव। प्रज्ञाद्यण्।) पुरोडाशः। पुरोडाशसहचरितो मन्त्रः। इति सिद्धान्तकौमुदी॥

पौरोडाशिकः, पु, (पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः। तस्य व्याख्यानस्तत्र भवो वा। "पौरोडाश-पुरोडाशात् ष्ठन्।" ४। ३। ७०। इति ष्ठन्।) पुरोडाशिकः। इति सिद्धान्तकौमुदी॥

पौर्णमासः, पुं, (पौर्णमास्यां भवः। पौर्णमासी+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४। ३। १६। इत्यण्।) यागविशेषः। इत्यमरः। २। ७। ४८॥ (यथा, मनुः। ४। २५।

"दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि॥")

तथा हि। अमावस्यायां अमावस्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मस्वरूपमाप्नकयोरुत्पत्तिश्रुती समामनन्ति। यथा। आग्नेयोऽष्टाकपालोऽमावस्यायां पौर्णमास्याञ्चाच्युतो भवति। उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायच्छत् ऐन्द्रं दधि भवत्यमावास्यायामैन्द्रं पयो भवत्यमावास्यायामिति। ताभ्यामाग्नेयाष्टाकपालोपांशुयाजाभ्याम्। तेन आग्नेयाष्टाकपालोपांशुयाजाग्नीषोमीयैकादशकपालास्त्रयः पौर्णमास्याम्। आग्नेयाष्टाकपालैन्द्रदधियागैन्द्रपयोयागास्त्रयोऽमावास्यायामित्यर्थः। आसु श्रुतिषु अमावास्यापौर्णमासीपदानि प्रतिपत्सहितत्तदुभयपराणि। तत्र पूर्व्वयोर्यागारम्भः प्रतिपदोर्यागः। तथा च द्वे ह वै पौर्णमास्यौ द्वे अमावास्ये तस्मात् प्रतिपद्युपवसन् यजेतापरेद्युरिति श्रुतिः। अस्यार्थः। यावज्जीविकयोर्दर्शपौर्णमासयोः प्रकृतिभूतयोर्व्विकृतिभूतौ दर्शपौर्णमासौ कौक्षपायिणामयनीयौ पश्चाद्दौ कर्त्तव्यौ।" इति मलमासतत्त्वम्॥

पौर्णमासी, स्त्री, (पूर्णो माशोऽस्यां वर्त्तते इति। पूर्णमासादण् वक्तव्य इत्यण्। ततो ङीप्।) पूर्णिमा। इत्यमरः। १। ४। ७॥

पौर्व्वाह्णिकः, त्रि, (पूर्व्वाह्ण+"विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४ । ३ । २४ । इति ठञ् ।) पूर्व्वाह्णे भवः । पूर्व्वाह्णसम्बन्धी । इति सिद्धान्तकौमुदी ॥

पौलस्ती, स्त्री, (पुलस्तेः अपत्यम् । पुलस्त+यञ् । ङीप् । यलोपः ।) शूर्पणखा । इति व्याकरणम् ॥

पौलस्त्यः, पुं, (पुलस्तेरपत्यमिति । पुलस्ति+गर्गादित्वात् यञ् ।) कुवेरः । इत्यमरः । १ । १ । ७२ ॥ रावणः । इति मेदिनी ॥ (यथा, हरिवंशे । ३३ । ३५ ।
"मुमोच रघः पौलस्त्यं पुलस्त्येनानुयाचितः ॥")
विभीषणः । इति शब्दरत्नावली ॥

पौलिः, पुं, (पोलतीति । पुल महत्त्वे+ज्वलादित्वात् णः । पौलेन निर्वृत्तः । सुतङ्गमादित्वात् इञ् ।) पाकावस्थागतकलायादिः । आरब्धपाकयवसर्षपादिः । वह्निना ईषद्दग्धपुट्पुट्शब्दवान् । इति केचित् । दरदग्धः । इति श्रीधरः । इति भरतः ॥ तत्पर्य्यायः ॥ आपक्कम् २ अभ्यूषः ३ । इत्यमरः ॥ अभ्युषः ४ अभ्योषः ५ । इति भरतः ॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति । पुलोमन्+अण् । अनो लोपः ।) शची । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । ७ । ६ ।
"विराजमानः पौलोम्या सहार्द्धासनया भृशम् ॥")

पौषः, पुं, (पौषी पौर्णमास्यस्मिन्निति । सास्मिन् पौर्णमासीत्यण् ।) वैशाखादिद्वादशमासान्तर्गतनवममासः । पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । तत्पर्य्यायः । तैषः २ सहस्यः ३ । इत्यमरः ॥ पौषिकः ४ हैमनः ५ । इति राजनिर्घण्टः ॥ तिष्यः ६ तिष्यकः ७ । इति शब्दरत्नावली ॥ अयं धनुःस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपो मुख्यचान्द्रः । कृष्णप्रतिपदादिपौर्णमास्यन्तरूपो गौणचान्द्रः । धनूराशिस्थरविकः सौरः । इति स्मृतिः ॥ * ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।
"निगूढमन्त्रः सुतशास्त्रयुक्तः
परोपकारी पितृवित्तहीनः ।
कष्टान्वितार्थव्ययकृद्विधिज्ञः
पौषप्रसूतः पुरुषः सुधीरः ॥"

पौषी, स्त्री (पुष्य+"नक्षत्रेण युक्तः ।" इत्यण् । तिष्यपुष्ययोरिति यलोपः ।) पुष्ययुक्ता पौर्णमासी । इत्यमरः ॥ पुष्येण युक्ता रात्रिः । इति मुग्धबोधव्याकरणम् ॥

पौष्करं, क्ली, (पुष्करस्येदमिति । पुष्कर+अण् ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥
पौष्करं कटुकन्तिक्तमुक्तं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ॥"
अस्य प्रतिनिधिर्यथा,—
"पौष्कराभावतः कुष्ठम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पौष्करमूलं, क्ली, (पौष्करं मूलम् ।) पुष्करमूलम् । यथा,—
"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।"
इत्यमरः ॥
"त्रीणि पुष्करमूले । पुष्करं सुगन्धिद्रव्यं वणिक्ख्यातं तस्य इदं पौष्करं यः पौष्करे मूले पुष्करादीत्यन्वयः ।" इति भरतः ॥

पौष्करिणी, स्त्री, (पौष्करं पुष्कराणां समूहोऽस्या अस्तीति । पौष्कर+इनि । स्त्रियां ङीप् ।) पुष्करिणी । इति शब्दरत्नावली ॥

पौष्टिकं, क्ली, (पुष्टेः वृद्धेः हितमिति । पुष्टि+ठञ् ।) चौरसमये गात्राच्छादनवस्त्रविशेषः । कावाइ इति भाषा ॥ अस्य गुणाः । घनत्विक्त्वम् । आयुष्यत्वम् । शुचित्वम् । रूपविराजनत्वञ्च । इति राजवल्लभः ॥ धन्यं धनचिह्नम् । वस्त्रमिति वा पाठः । पुष्टिर्धनजनादीनां वृद्धिरित्यभिधीयते । तद्धेतुभूतं कर्म्म । इति दुर्गाभट्टः ॥ (पुष्टिहिते, त्रि । यथा, महाभारते । १२ । २६६ । २८ ।
"सतां वृत्तमधिष्ठाय निहीनाशुभ्ररीर्षवः ।
मन्त्रवर्ज्जं न दुष्यन्ति कुर्व्वाणाः पौष्टिकीः
क्रियाः ॥")

पौष्यं, त्रि (पुष्येण निर्वृत्तम् । पुष्यस्येदं वेति । पुष्य+अण् ।) पुष्यनिर्म्मितम् । पुष्यसम्बन्धि । यथा, कालिकापुराणे ६७ अध्याये ।
"आसनं प्रथमं दद्यात् पौष्यं दारुजमेव वा ।
वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे त्यजेत् ॥"

पौष्पकं, क्ली, (पुष्पेण कायतीति । कै+कः । पुष्पक+स्वार्थे अण् ।) कुसुमाञ्जनम् । इत्यमरः ॥

पौष्पी, स्त्री, (पुष्पस्य इयं इति । पुष्प+अण् । गौरादित्वात् ङीष् । पुष्पाख्यया प्रसिद्धत्वात् तथात्वम् ।) देशविशेषः । यथा,—
"अथ पुष्पपुरं पौष्पी तथा पाटलिपुत्रकम् ॥"
इति शब्दरत्नावली ॥

पौष्यः, पुं, (पूष्णोऽपत्यमिति । पूषन्+ष्यञ् ।) पूषपुत्रः । स च करवीरपुरस्य राजा । तस्य पुत्रः शिवांशजचन्द्रशेखरः । यथा,—
"पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
प्रसादजफलं हस्ते दत्त्वेदं तमुवाच ह ॥
इदं फलं प्रसादत्तं विभज्य नृपते ! त्रिधा ।
भोजयेस्ताः स्वजायास्त्वं प्रहृष्टः शुद्धमानसः ॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ।
तत्प्रयासात् फलं भूतं त्रिभागं स्वयमेव हि ॥
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ।
तत् फलं नृपशार्द्दूल । गर्भांश्चाप्याहिताः शुभाः ॥
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ।
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ॥
तत् खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ।
एकं पिण्डं चकारासु तत्र पुत्रो व्यजायत ॥
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः ॥
प्रभावर्णाह्वये रम्ये करवीराह्वये पुरे ।
दृषद्वतीनदीतीरे राजा भूत्वा मुमोद ह ॥"
इति कालिकापुराणे ४६ अध्यायात् सङ्कलितः ॥ (नृपभेदः । स तु गुरुदक्षिणार्थमागताय उतङ्काय कुण्डले दत्तवान् । यथा, महाभारते । १ । ३ । ११२ ।
"तमुतङ्कं पौष्यः प्रत्युवाच भगवंश्चिरेण पात्रमासाद्यते भवांश्च गुणवानतिथिस्तदिच्छे श्राद्धं कर्त्तुं क्रियतां क्षण इति ॥" एतद्विशेषविवरणन्तु तत्रैव द्रष्टव्यम् ॥)

प्याट्, व्य, हे । भोः । इत्यमरः । ३ । ४ । ७ ॥

प्याय, ओ ई ङ वृद्धौ । इति कविकल्पद्रुमः । (भ्वा०-आत्म० अक०-सेट् ।) ओ ई, पीनं सुखम् । उपसर्गात्तु प्र्यानम् । अस्याङ्गे तु प्यानः पीनः स्वेदः । ङ, प्यायते । इति दुर्गादासः ।

प्युष, क उत्सृजि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) अन्तःस्थाद्ययुक्तः । उत्सृजि उत्सर्गे । क, प्योषयति धनं दाता । इति दुर्गादासः ॥

प्युष, य इर् भागे । दाहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थाद्ययुक्तः । य, प्युष्यति धनं दायादः । इर्, अप्युषत् अप्योषीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

प्युस, य इर् विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट ।) अन्तःस्थाद्ययुक्तः । य, प्युस्यति धनं दायादः । इर्, अप्युसत् अप्योसीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

प्यै, ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म० अक०-अनिट् ।) अन्तःस्थाद्ययुक्तः । ङ, प्यायते । इति दुर्गादासः ॥

प्र, व्य, (प्रथयतीति । प्रथ+डः ।) विंशत्युपसर्गान्तर्गतप्रथमोपसर्गः । अस्यार्थाः । गतिः । आरम्भः । उत्कर्षः । सर्व्वतोभावः । प्राथम्यम् । ख्यातिः । उत्पत्तिः । व्यवहारः । इति दुर्गादासधृतपुरुषोत्तमः ॥

प्रकटं, त्रि, (प्रकटतीति । प्र+कट+अच् ।) स्पष्टम् । अस्य पर्य्यायः प्रकाशशब्दे द्रष्टव्यः ।
"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते ।"
इति भागवतामृतम् ॥
(यथा च, देवीभागवते । १ । ७ । ३८ ।
"जानन्ति ये न तव देवि ! परं प्रभावं
ध्यायन्ति ते हरिहरावपि मन्दचित्ताः ।
ज्ञातं मयाद्य जननि । प्रकटं प्रमाणं
यद्विष्णुरप्यतितरां विवशोऽद्य शेते ॥")

प्रकटितं, त्रि, (प्र+कट+क्त ।) प्रकाशितम् । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । १ । ७ । ४४ ।

"दृष्ट्वा च मां भगवति ! प्रविनाशितुं चे-,
ष्वेच्छासि ते कुरु दयां परिहृत्य मौनम् ।
कस्मादिमौ प्रकटितौ किल कालरूपौ
यद्वा भवानि ! दृषितुं तु किमिच्छसि त्वम् ॥")

प्रकम्पनः, पुं, (प्रकम्पयतीति । प्र + कपि + णिच् + ल्युः ।) वायुः । इति हेमचन्द्रः ॥ (यथा, माघे । १ । ६१ ।

"निशान्तनारीपरिधानधूनन-
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेव तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥")

नरकविशेषः । इति शब्दरत्नावली ॥ (राक्षसविशेषः । इति रामायणम् ॥ प्र + कपि + ल्युट् ।) कम्पातिशये, क्ली ॥

प्रकरं, क्ली, (प्रकीर्य्यते इति । प्र + कॄ + कर्म्मणि अप् ।) अगुरु । इति मेदिनी । रे, १७६ ॥

प्रकरः, पुं, (प्रकिरतीति । प्र + कॄ + अच् ।) समूहः । (प्रकीर्य्यते इति । प्र + कॄ + "ॠदोरप् ।" ३ । ३ । ५७ । इति अप् ।) विकीर्णकुसुमादिः । इति मेदिनी । रे, १७८ ॥ (यथा, अमरुके । ३ ।

"यत्राशयो जगति तत्रागता वसतु कुत्रापि निस्तुलगुणा
सुत्रामकालसुखसम्भाषणप्रकरसुधाद्यकारिचरणा ।
कृत्वानिलातिरयपवाभिरामगुणमिथामरीसमवधूः
कृतावहन्नमणिविविधाकृतिः स्फुरितपुत्रादिदानविपुणा ॥")

प्रकरणं, क्ली, (प्रक्रियते अस्मिन्निति । प्र + कृ + आधारे ल्युट् ।) प्रस्तावः । (वृत्तान्तः । इत्यमरः । ३ । ३ । ६३ ॥ यथा, महाभारते । ३।२०४।२१ ।

"एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठिर ।
पतिव्रतानां नियतं धर्म्मव्याधहितः स्फुट ॥")

अभिनेयप्रकारः । रूपकभेदः । इति हेमचन्द्रः ॥ ग्रन्थसन्धिः । इति त्रिकाण्डशेषः ॥ पादः । स तु एकार्थावच्छिन्नवचनसमूहः । इति मुग्धबोधटीकायां दुर्गादासः ॥ (नाटकोक्तप्रकरणं तल्लक्षणादिर्यथा, साहित्यदर्पणे । ६।२२४—२२५ ।

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ॥
सापायधर्म्मकामार्थपरो धीरप्रशान्तकः ॥
विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥
कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गवृत्ते । द्वे अपि मृच्छकटिके । अस्य नाटकप्रतिकृतित्वात् शेषं नाटकवत् ॥")

प्रकरी, स्त्री, (प्रकीर्य्यते अनेति । प्र + कॄ + अप् । गौरादित्वात् ङीष् ।) नाट्याङ्गम् । चत्वरभूमिः । इति शब्दरत्नावली ॥

प्रकर्षः, पुं, (प्र + कृष + भावे घञ् ।) उत्कर्षः । यथा, काव्यप्रकाशे ।

"गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"

(यथा च महाभारते । १ । १५६ । ३४ ।

"बालोऽपि यौवनं प्राप्य मानुषेषु विशाम्पते ! ।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥")

प्रकाण्डः, पुं क्ली, (प्रकृष्टः काण्डः इति प्रादिसमासः ।) मूलादारभ्य शाखावधिस्तम्भभागः । गुँडी इति भाषा ॥ तत्पर्य्यायः । स्कन्धः २ । इत्यमरः । २ । ४ ।१०॥ काण्डम् ३ । इति शब्दरत्नावली ॥ दण्डः ४ । इति राजनिर्घण्टः ॥ विटपः । शस्तः । इति मेदिनी । डे, ३१ ॥ (यथा, अमरे । १ । ४ । २७ ।

"मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ ।
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥")

प्रकाण्ड + स्वार्थे कन्प्रत्ययेन प्रशस्तार्थे । यथा, भट्टौ । ५ । ६ ।

"दण्डकामध्यवासी यौ वीर ! रक्षःप्रकाण्डकौ ।
त्वया संक्षोभ्य घातौ तौ सभ्रात्रौ भूमिवर्द्धनौ ॥"
"रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ ।" इति तट्टीकायां जयमङ्गलः ॥)

प्रकाण्डरः, पुं, (प्रकाण्डं राति गृह्णातीति । रा + कः ।) वृक्षः । इति शब्दचन्द्रिका ॥

प्रकामं, त्रि, (प्रगतं काममिति प्रादिसमासः ।) यथेप्सितम् । इत्यमरः ॥ (यथा, महाभारते । ४ । १३ । २६ ।

"चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता ।
कामं प्रकामं सेवत्वं मया सह विलासिनि ॥")

प्रकारः, पुं, (प्रभेदकरणं प्रकृष्टकरणं वेति । प्र + कृ + घञ् ।) भेदः । (यथा, पञ्चदश्याम् ।७।१४४ ।

"अश्नाति वा नवाश्नाति भुङ्क्ते वा स्वेच्छयान्यथा ।
येन केन प्रकारेण सुधामपनिनीषति ॥")

सादृश्यम् । इत्यमरः । ३ । ६ । ५७ ॥

प्रकाशं, क्ली, (प्रकाशते इति । प्र + काश + अच् ।) कांस्यम् । इति हेमचन्द्रः ॥ (दीप्तिः । यथा, महाभारते । ३ । १७१ । २७ ।

"पुनः प्रकाशमभवत् तमसा ग्रस्यते पुनः ।
भवत्यदर्शनो लोकः पुनरप्सु निमज्जति ॥")

प्रकाशः, पुं, (प्रकाशते इति । प्र + काश + अच् ।) रौद्रः । तत्पर्य्यायः । द्योतः २ आतपः ३ । इत्यमरः । १ । ४ । ३४ ॥ राजनिर्घण्टोक्तपर्य्यायाः प्रभाशब्दे द्रष्टव्याः ॥ (यथा, पञ्चदश्याम् । २ । १८ ।

"निर्व्वणक्षोमहत्वेन प्रकाशतमसौ विना ।
न दृष्टं किञ्च ते पक्षे न प्रत्यक्षं वियत् खलु ॥")

प्रदीपः । तत्पर्य्यायः । स्फुटम् २ स्पष्टम् ३ प्रकटम् ४ उल्बणम् ५ व्यक्तम् ६ । इति हेमचन्द्रः ॥ प्रख्यातम् ७ उद्रिक्तम् ८ । इति जटाधरः ॥ प्रहासः । इति मेदिनी । शे, ६४ ॥ अतिप्रसिद्धः । इति शब्दरत्नावल्यमरौ ॥

प्रकाशकः, त्रि, प्रकाशकर्त्ता । प्रकाशयतीत्यर्थे (ण्वुल्) णकप्रत्ययः ॥ (यथा, भगवद्गीतायाम् । १४ । ६ ।

"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥")

प्रकाशकज्ञाता, [ऋ] पुं, (प्रकाशकस्य आतपस्य ज्ञाता ।) कुक्कुटः । इति शब्दचन्द्रिका ॥ प्रकाशकज्ञातरि, त्रि ॥

प्रकाशात्मा, [न्] पुं, (प्रकाशः आत्मा स्वरूपं देहो वा यस्य ।) सूर्य्यः । इति शब्दचन्द्रिका ॥ व्यक्तस्वभावे, त्रि ॥

प्रकाशितं, त्रि, (प्रकाशो जातोऽस्येति । प्रकाश + तारकादित्वात् इतच् । यद्वा, प्र + काश + णिच् + क्तः ।) प्रकाशविशिष्टम् । तत्पर्य्यायः । दर्शितम् २ आविष्कृतम् ३ प्रकटितम् ४ । इति हेमचन्द्रः ॥

प्रकीर्णं, क्ली, (प्रकीर्य्यते स्मेति । प्र + कॄ विक्षेपे + क्तः ।) ग्रन्थविच्छेदः । इति जटाधरः ॥ चामरम् । इति त्रिकाण्डशेषः ॥

प्रकीर्णः, पुं, (प्रकीर्य्यते दुर्गन्धमनेनेति । प्र + कॄ + क्तः ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥

प्रकीर्णः, त्रि, (प्रकीर्य्यते स्मेति । प्र + कॄ + क्तः ।) विक्षिप्तः । विस्तृतः । यथा,—

"प्रकीर्णभाण्डामनवेक्ष्यकारिणीं
सदैव भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्ज्जयामि ॥"
इति लक्ष्मीचरित्रम् ॥

नानाप्रकारमिश्रितः । यथा,—

"प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥"
इति वेणीसंहारः ।

प्रकीर्णकं, क्ली, (प्रकीर्ण + स्वार्थे कन् ।) चामरम् । इत्यमरः । २ । ८ । ३१ ॥ विस्तारः । इति मेदिनी । के, १६६ ॥ ग्रन्थविच्छेदः । इति हेमचन्द्रः ॥ पापविशेषः । तथा विष्णुः । यदनुक्तं तत् प्रकीर्णकम् ।

"प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमते सदा ॥"
अनुक्तं अनुक्तनिष्कृतिकं पापम् ।
"अतिपातकादयनन्तरलेन विशेषतोऽनुक्तकम् ॥"
इति प्रायश्चित्तविवेकः ॥

प्रकीर्णकः, पुं, (प्रकीर्ण + संज्ञायां कन् ।) तुरङ्गमः । इति मेदिनी । के, १६६ ॥ (यथा, महाभारते । ७ । ३५ । ३७ ।

"आरूढ़ान् शिक्षितैर्योधैः शक्त्यृष्टिप्रासयोधिभिः ।
विभक्तचामरकुथान् विप्रविद्धप्रकीर्णकान् ॥")

प्रकीर्त्तितं, त्रि, (प्रकीर्त्त्यते स्मेति । प्र + कृत् + क्तः ।) कथितम् । यथा,—

"प्रभूतमल्पं कार्य्यं वा यो नरः कर्त्तुमिच्छति ।
सर्व्वारम्भेण तत् कुर्य्यात् सिंहादेकं प्रकीर्त्तितम् ॥"
इति चाणक्यसंग्रहः ॥

प्रकीर्य्यः, पुं, (प्रकीर्य्यते इति । प्र + कॄ + अघ्न्यादित्वात् यक् ।) करञ्जभेदः । इत्यमरः ॥ नाटाकरञ्ज इति भाषा ॥ छतकरञ्जः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"छतपूतिकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ।
स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रकुलं, क्ली, (प्रकर्षेण कोलति राशीकरोति सैवीकरोति वेति । प्र + कुल + कः ।) प्रशस्तवपुः । इति त्रिकाण्डशेषः ॥

प्रकृतः, त्रि, (प्रक्रियते स्मेति । प्र + कृ + क्त ।) प्रकरणप्राप्तः । यथा । प्रकृतमनुसरामः । प्रकर्षेण कृतः । अविकृतः । प्रपूर्व्वककृधातोः कर्म्मणि क्तप्रत्ययः ॥ (प्रक्रान्तः । यथा, माघे ।११ ।४२ ।
"प्रकृतजपविधीनामास्यमुद्रश्मिदन्त-
मुहुरपि हितमौष्ठेरचरैर्लक्ष्यमन्त्रैः ॥")

प्रकृतिः, स्त्री, (प्रक्रियते कार्य्यादिकमनयेति । प्र + कृ + क्तिन् ।) स्वभावः । (यथा चरके विमानस्थाने प्रथमेऽध्याये ।
"तत्र प्रकृतिरुच्यते स्वभावो यः स पुनराहारौषधद्रव्याणां स्वभाविको गुर्व्वादिगुणयोगः ।
तद्यथा माषमुद्गयोः शूकरैणयोश्च ।") योनिः । लिङ्गम् ॥ स्वामी । अमात्यः । सुहृत । कोषः । राष्ट्रम् । दुर्गम् । बलम् । (यथा, मनौ ।९।२९४।
"स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा ।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥"
धर्म्माध्यक्षादिसप्तप्रकृतयो यथा,—
"धर्म्माध्यक्षो धनाध्यक्षः कोषाध्यक्षश्च भूपतिः ।
दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोऽभवन् ॥")
पौराणां श्रेणयः । इत्यमरः । २ । ८ । १८ ॥
(यथा, मार्कण्डेये । १९ । २० ।
"प्रणिपत्य ततस्तस्मै दत्तात्रयाय सोऽर्ज्जुनः ।
आनाय्य प्रकृतीः सम्यगभिषेकमगृह्णत ॥"
स्वरूपावस्था । यथा, हितोपदेशे । २ । १६६ ।
"वेदितो मर्द्दितश्चैव रज्जुभिः परिवेष्टितः ।
मुक्तो द्वादशभिर्वर्षैः श्वपुच्छः प्रकृतिं गतः ॥")
शिल्पी । इति हेमचन्द्रः ॥ शक्तिः । (यथा,—
"प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा ।
एतानि तस्या नामानि शिवमाश्रित्य याः
स्थिताः ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)
योषित् । इति शब्दरत्नावली ॥ परमात्मा । इति धरणिः । पञ्चभूतानि । करणम् । गुह्यम् । जन्तुः । एकविंशत्यक्षरपादच्छन्दोविशेषः । माता । इति नानार्थरत्नमाला ॥ प्रत्ययात् प्रथमः । स च द्विधा धातुर्नाम च । इत्यजयपालः ॥ (प्रकर्षेण सृष्ट्यादिकं करोतीति । प्र + कृ + कर्त्तरि क्तिच् ।) भगवतो मायाख्या शक्तिः । सा च परापरभेदेन द्विधा । यथा,—
"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥" ५ ॥
इति श्रीभगवद्गीतायां ७ अध्यायः ॥
"एवं श्रोतारमभिमुखीकृत्य इदानीं प्रकृतिद्वारा सृष्ट्यादिकर्त्तृत्वेन ईश्वरतत्त्वं प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमिरिति द्वाभ्याम् । भूम्यादीनि पञ्चभूतसूक्ष्माणि मनः-शब्देन तत्कारणभूतोऽहङ्कारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहङ्कारशब्देन तत्-कारणमविद्या इत्येवमष्टधा भिन्ना । यद्वा भूम्यादिशब्दैः पञ्च महाभूतानि सूक्ष्मैः सह एकीकृत्य गृह्यन्ते । अहङ्कारशब्देनैवाहङ्कारं तेनैव तत्कार्य्याणि इन्द्रियाण्यपि गृह्यन्ते बुद्धिरिति महत्तत्त्वम् । मनःशब्देन तु मनसैवोन्नेयं अव्यक्तस्वरूपं प्रधानमित्यनेन प्रकारेण मे प्रकृतिर्म्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता । चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवान्तर्भाव विवक्षयाष्टधा भिन्नेत्युक्तम् । तथा च क्षेत्राध्याये इमामेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपञ्चयिष्यति ।
'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचरा ॥'
इति ॥ ४ ॥
अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेयमिति । अष्टधा प्रकृतिरुक्ता इयमपरा निकृष्टा जड़त्वात् परार्थत्वाच्च । इतः सकाशात् परां प्रकृष्टामन्यां जीवभूतां जीव स्वरूपां मे प्रकृतिं जानीहि । परत्वे हेतुः यया चेतनया क्षेत्रज्ञस्वरूपया स्वकर्म्मद्वारेणेदं जगद्धार्य्यते ॥" ५ ॥ इति तट्टीकायां श्रीधरस्वामी ॥
सत्त्वरजस्तमसां साम्यावस्था । यथा,—
"सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता ॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः ।
एतदेव प्रजासृष्टिं करोति विकरोति च ॥"
इति मात्स्ये ३ अध्यायः ॥
तत्पर्य्यायः । प्रधानम् २ । इत्यमरः ॥ माया ३ शक्तिः ४ चैतन्यम् ५ । इति राजनिर्घण्टः ॥
तस्या नामान्तराणि यथा,—
"तमोऽव्यक्तं शिवो धाम रजो योनिः सनातनः ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ॥
अनुद्रिक्तमनूनं वाप्यकम्प्यमचलं ध्रुवम् ।
सदसच्चैव तत्सर्व्वमव्यक्तं त्रिगुणं स्मृतम् ।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः ॥
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्व्वाणि गतीश्च केवलाः ।
विमुक्तदेहः प्रविभागतत्त्ववित्
स मुच्यते सर्व्वगुणैर्निरामयः ॥"
इति-महाभारते आश्वमेधिकपर्व्व ॥ * ॥
सा पञ्चविधा ।
"गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चमी
स्मृता ॥" * ॥
तस्या व्युत्पत्तिर्यथा,—
"प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता ॥
गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ ।
मध्यमे रजसि कृश्च तिशब्दस्तामसः स्मृतः ॥
त्रिगुणात्मस्वरूपा या सर्व्वशक्तिसमन्विता ।
प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते ॥
प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता ॥" * ॥
तासां उत्पत्तिः स्वरूपञ्च यथा,—
"योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः ।
पुमांश्च दक्षिणार्द्धाङ्गात् वामाङ्गात् प्रकृतिः
स्मृता ॥
सा च ब्रह्मस्वरूपा च या या नित्या सनातनी ।
यथात्मा च यथाशक्तिर्यथाग्नौ दाहिका स्मृता ॥
अतएव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते ।
सर्व्वं ब्रह्ममयं ब्रह्मन् ! शश्वत् पश्यति नारद ! ॥
स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य सिसृक्षया ।
साविर्बभूव सहसा मूलप्रकृतिरीश्वरी ।
तदाज्ञया पञ्चविधा सृष्टिकर्म्मणि भेदतः ॥"
दुर्गाप्रकृतिर्यथा,—
"अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा ।
गणेशमाता दुर्गा या शिवरूपा शिवप्रिया ॥
नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ।
ब्रह्मादिदेवैर्मुनिभिर्म्मनुभिः पूजिता स्तुता ॥
सर्व्वाधिष्ठातृदेवी सा सर्व्वरूपा सनातनी ।
धर्म्मसत्यपुण्यकीर्त्तियशोमङ्गलदायिनी ॥
सुखमोक्षहर्षदात्री शोकार्त्तिदुःखनाशिनी ।
शरणागतदीनार्त्तपरित्राणपरायणा ॥
तेजःस्वरूपा परमा तदधिष्ठातृदेवता ।
सर्व्वशक्तिस्वरूपा च शक्तिरीशस्य सन्ततम् ॥
सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी ।
बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया
स्मृतिः ॥
जातिः शान्तिश्च क्षान्तिश्च कान्तिर्भ्रान्तिश्च
चेतना ।
तुष्टिः पुष्टिस्तथा लक्ष्मीर्धृतिर्माता तथैव च ॥
सर्व्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः ।
उक्तः श्रुतौ श्रुतिगुणश्चातिस्वल्पं यथागमम् ॥
गुणोऽस्त्यनन्तोऽनन्ताया अपराञ्च निशामय ॥" १
लक्ष्मीप्रकृतिर्यथा,—
"शुद्धसत्त्वस्वरूपा या पद्मा च परमात्मनः ।
सर्व्वसम्पत्स्वरूपा सा तदधिष्ठातृदेवता ॥
कान्ता दान्ता च शान्ता च सुशीला सर्व्व-
मङ्गला ।
लोभमोहकामरोषाहङ्कारपरिवर्ज्जिता ॥
भक्तानुरक्ता पत्युश्च सर्व्वाभ्यश्च पतिव्रता ।
प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा ॥

सर्व्वशस्यात्मिका सर्व्वजीवनोपायरूपिणी ।
महालक्ष्मीश्च वैकुण्ठे मातासे वरदा सती ॥
स्वर्गे च स्वर्गलक्ष्मीश्च मर्त्यानां गृहिणान्तथा ।
सर्व्वप्राणिषु द्रव्येषु शोभारूपा मनोहरा ॥
प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च ।
वाणिज्यरूपा वणिजां पापिनां कलहाङ्कुरा ॥
दयामयी भक्तिमती भक्तानुग्रहकातरा ।
चपले चपला भक्ता सम्पदे च धनाय च ॥
जगज्जीवं मृतं सर्व्वं यया देव्या विना मुने ! ।
शक्तिर्द्वितीया कथिता वेदोक्ता सर्व्वसम्मता ॥
सर्व्वपूज्या सर्व्ववन्द्या चान्यां मत्तो निशा-
मय ॥" २ ॥ * ॥

सरस्वतीप्रकृतिर्यथा,—
"वाग्बुद्धिविद्याज्ञानाधिदेवता परमात्मनः ।
सर्व्वविद्या सर्व्वरूपा सा च देवी सरस्वती ॥
सुबुद्धिकविता मेधा प्रतिभा स्मृतिदा सताम् ।
नानाप्रकारसिद्धान्तभेदार्थकल्पनाप्रदा ॥
व्याख्या बोधस्वरूपा च सर्व्वसन्देहभञ्जिनी ।
विचारकारिणी ग्रन्थकारिणी शक्तिरूपिणी ॥
स्वरसङ्गीतसन्धानतालकारणरूपिणी ।
विषयज्ञानवाग्रूपा प्रतिविश्वेषु जीविनाम् ॥
व्याख्या मुद्राकरा शान्ता वीणापुस्तकधारिणी ।
शुद्धसत्त्वस्वरूपा च सुशीला श्रीहरिप्रिया ॥
हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभा ।
जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया ॥
तपःस्वरूपा तपसां फलदात्री तपस्विनी ।
बुद्धिविद्यास्वरूपा च सर्व्वसिद्धिप्रदा सदा ॥
यया विना च विप्रौघो मूको मृतसमः सदा ।
देवी तृतीया गदिता श्रुत्युक्ता जगदम्बिका ॥
यथागमं यथाकिञ्चिदपरां संनिबोध मे ॥"३॥*॥

सावित्री प्रकृतिर्यथा,—
"माता चतुर्णां वेदानां वेदाङ्गानाञ्च छन्दसाम् ।
सन्ध्यावन्दनमन्त्राणां तन्त्राणाञ्च विचक्षणा ॥
द्विजातिजातिरूपा च जपरूपा तपस्विनी ।
ब्रह्मण्यतेजोरूपा च सर्व्वसंस्कारकारिणी ॥
पवित्ररूपा सावित्री गायत्री ब्रह्मणः प्रिया ।
तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छन्ति शुद्धये ॥
शुद्धस्फटिकसङ्काशा शुद्धसत्त्वस्वरूपिणी ।
परमानन्दरूपा च परमा च सनातनी ॥
परब्रह्मस्वरूपा च निर्व्वाणपददायिनी ।
ब्रह्मतेजोमयी शक्तिस्तदधिष्ठातृदेवता ॥
यत्पादरजसा पूतं जगत् सर्व्वञ्च नारद ! ।
देवी चतुर्थी कथिता पञ्चमीं वर्णयामि ते ॥"४॥

राधाप्रकृतिर्यथा,—
"प्रेमप्राणाधिका देवी या पञ्चप्राणरूपिणी ।
प्राणाधिकप्रियतमा सर्व्वाभ्यः सुन्दरी वरा ॥
सर्व्वसौभाग्ययुक्ता च मानिनी गौरवान्विता ।
वामार्द्धाङ्गस्वरूपा च गुणेन तेजसा समा ॥
परा वरा सारभूता परमाद्या सनातनी ।
परमानन्दरूपा च धन्या मान्या च पूजिता ॥
रासक्रीड़ाधिदेवी च कृष्णस्य परमात्मनः ।
रासमण्डलसंभूता रासमण्डलमण्डिता ॥
रासेश्वरी सुरसिका रासवासनिवासिनी ।
गोलोकवासिनी देवी गोपीवेशविधायिका ॥
परमाह्लादरूपा च सन्तोषहर्षरूपिणी ।
निर्गुणा च गुणाकारा निर्लिप्तात्मस्वरूपिणी ॥
निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा ।
वेदानुसारध्यानेन विज्ञाता सा विचक्षणैः ॥
दृष्टिदृष्टा नसद्वेशा सुरेन्द्रैर्मुनिपुङ्गवैः ।
वह्निशुद्धांशुकाधाना रत्नालङ्कारभूषिता ॥
कोटिचन्द्रप्रभाजुष्टपुष्टश्रीयुक्तविग्रहा ।
श्रीकृष्णभक्तिदा सैव दात्री च सर्व्वसम्पदाम् ॥
अवतारे च वाराहे वृषभानुसुता च या ।
यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा ॥
ब्रह्मादिभिरदृष्टा या सर्व्वदृष्टा च भारते ।
स्त्रीरत्नसारसंभूता कृष्णवक्षःस्थलोज्ज्वला ॥
यथा घने नवघने लोला सौदामिनी मुने ! ।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा ॥
यत्पादपद्मनखरदृष्टये चात्मशुद्धये ।
न च दृष्टापि स्वप्नेऽपि प्रत्यक्षस्यापि का कथा ॥
तेनैव तपसा दृष्टा भुवि वृन्दावने वने ।
कथिता पञ्चमी देवी सा राधा परिकीर्त्तिता ॥
अंशरूपा कलारूपा कलांशांशसमुद्भवा ।
प्रकृतिः प्रतिविश्वेषु देव्यश्च सर्व्वयोषितः ॥
परिपूर्णतमा पञ्चविधा देवी प्रकीर्त्तिता ।
या याः प्रधानांशरूपा वर्णयामि निशामय ॥"५॥

गङ्गा यथा,—
"प्रधानांशस्वरूपा या गङ्गा भुवनपावनी ।
विष्णुविग्रहसंभूता द्रवरूपा सनातनी ॥
पापिपापेन्धदाहाय ज्वलदिन्धनरूपिणी ।
सुखस्पर्शस्नानपाने निर्व्वाणपददायिनी ॥
गोलोके स्थानप्रस्थानसुखसोपानरूपिणी ।
पवित्ररूपा तीर्थानां सरिताञ्च परा वरा ॥
शम्भुमौलिजटामेरुमुक्तापंक्तिस्वरूपिणी ।
तपःसम्पादिनी सद्यो भारते च तपस्विनाम् ॥
चन्द्रपद्मक्षीरनिभा शुद्धसत्त्वस्वरूपिणी ।
निर्म्मला निरहङ्कारा साध्वी नारायण-
प्रिया ॥"१॥

तुलसी यथा,—
"प्रधानांशस्वरूपा च तुलसी विष्णुकामिनी ।
विष्णुभूषणरूपा च विष्णुपादस्थिता सती ॥
तपःसङ्कल्पपूजादिसद्यःसम्पादिनी मुने ! ।
सारभूता च पुष्पाणां पवित्रा पुण्यदा सदा ॥
दर्शनस्पर्शनाभ्याञ्च सद्योनिर्व्वाणदायिनी ।
कलौ कलुषशुष्केध्मदाहायाग्निस्वरूपिणी ॥
यत्पादपद्मसंस्पर्शसद्यःपूता वसुन्धरा ।
यत्स्पर्शदर्शं वाञ्छन्ति तीर्थानि चात्मशुद्धये ॥
यया विना च विश्वेषु सर्व्वकर्म्मातिनिष्फलम् ।
मोक्षदा या मुमुक्षूणां कामिनां सर्व्वकामदा ॥
कल्पवृक्षस्वरूपा च भारते ब्रह्मरूपिणी ।
त्राणाय भारतानाञ्च प्रजानां परदेवता ॥" २॥

मनसा यथा,—
"प्रधानांशस्वरूपा या मनसा कश्यपात्मजा ।
शङ्करप्रियशिष्या च महाज्ञानविशारदा ॥
नागेश्वरस्यानन्तस्य भगिनी नागपूजिता ।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी ॥
नागेन्द्रगणयुक्ता सा नागभूषणभूषिता ।
नागेन्द्रैर्व्वन्दिता सिद्धयोगिनी नागशायिनी ॥
विष्णुरूपा विष्णुभक्ता विष्णुपूजापरायणा ।
तपःस्वरूपा तपसां फलदात्री तपस्विनी ॥
दिव्यं त्रिलक्षवर्षञ्च तपस्तप्तं यया हरेः ।
तपस्विनीषु पूज्या च तपस्विषु च भारते ॥
सर्व्वमन्त्राधिदेवी च ज्वलन्ती ब्रह्मतेजसा ।
ब्रह्मस्वरूपा परमा ब्रह्मभावेन तत्परा ॥
जरत्कारुमुनेः पत्नी कृष्णांशस्य पतिव्रता ।
आस्तीकस्य मुनेर्म्माता प्रवरस्य तपस्वि-
नाम् ॥" ३॥

षष्ठी यथा,—
"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ।
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ॥
पुत्त्रपौत्त्रप्रदात्री च धात्रीति जगतां सती ।
सुन्दरी युवती रम्या सन्ततं भर्त्तुरन्तिके ॥
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ।
पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम् ॥
पूजा च सूतिकागारे परा षष्ठदिने शिशोः ।
एकविंशतिमे चैव पूजा कल्याणहेतुकी ॥
शश्वन्नियमिता चैषा नित्या काम्या श्रुतिः परा ।
मातृरूपा दयारूपा शश्वद्रक्षणरूपिणी ॥
जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे ॥"४॥

मङ्गलचण्डी यथा,—
"प्रधानांशस्वरूपा च देवी मङ्गलचण्डिका ।
प्रकृतेर्मुखसंभूता सर्व्वमङ्गलदा सदा ॥
सृष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥
प्रतिमङ्गलवारेषु प्रतिविश्वेषु वन्दिता ।
पञ्चोपचारैर्योषिद्भिर्भक्त्या च परिपूजिता ॥
पुत्त्रपौत्त्रधनैश्वर्य्ययशोमङ्गलदायिनी ।
लोकसन्तापपापार्त्तिदुःखदारिद्र्यनाशिनी ॥
परितुष्टा सर्व्ववाञ्छाप्रदात्री सर्व्वयोषिताम् ।
रुष्टा क्षणेन संहर्त्तुं शक्ता विश्वं महेश्वरी ॥"५॥

काली यथा,—
"प्रधानांशस्वरूपा च काली कमललोचना ।
दुर्गाललाटसम्भूता रणे शुम्भनिशुम्भयोः ॥
दुर्गार्द्धांशस्वरूपा सा गुणेन तेजसा समा ।
कोटिसूर्य्यप्रभाजुष्टपुष्टजाज्वल्यविग्रहा ॥
प्रधाना सर्व्वशक्तीनां वरा बलवती परा ।
सर्व्वसिद्धिप्रदा देवी परमा सिद्धयोगिनी ॥
कृष्णभक्ता कृष्णतुल्या तेजसा विक्रमैर्गुणैः ।
कृष्णभावनया शश्वत् कृष्णवर्णा सनातनी ॥
संहर्त्तुं सर्व्वब्रह्माण्डं शक्ता निश्वासमात्रतः ।
रणं दैत्यैः समं तस्याः क्रीड़या लोकरक्षया ॥
धर्म्मार्थकाममोक्षांश्च दातुं शक्ता च पूजिता ।
ब्रह्मादिभिः स्तूयमाना मुनिभिर्मनुभिर्नरैः ॥"६॥

वसुन्धराप्रकृतिर्यथा,—
"प्रधानांशस्वरूपा च प्रकृतेश्च वसुन्धरा ।
आधाररूपा सर्व्वेषां सर्व्वशस्यप्रसूतिका ॥
रत्नाकरा रत्नगर्भा सर्व्वरत्नाकरालया ।
प्रजाभिश्च प्रजेशैश्च पूजिता वन्दिता सदा ॥
सर्व्वोपजीव्यरूपा च सर्व्वसम्पद्विधायिनी ।
यया विना जगत् सर्व्वं निराधारं चराचरम् ॥ ७ ॥
प्रकृतेश्च कला या यास्ता निबोध मुनीश्वर ! ।
यस्य यस्य च याः पत्न्यस्ताः सर्व्वा वर्णयामि ते ॥
स्वाहा देवी वह्निपत्नी त्रिषु लोकेषु पूजिता ।
यया विना हविर्दानं न ग्रहीतुं सुराः क्षमाः ॥ १ ॥
दक्षिणा यज्ञपत्नी च दीक्षा सर्व्वत्र पूजिता ।
यया विना च विश्वेषु सर्व्वं कर्म्म च निष्फलम् ॥ २ ॥
स्वधा पितॄणां पत्नी च मुनिभिर्मनुभिर्नरैः ।
पूजिता पितृदानञ्च निष्फलञ्च यया विना ॥ ३ ॥
स्वस्तिदेवी वायुपत्नी प्रतिविश्वेषु पूजिता ।
आदानञ्च प्रदानञ्च निष्फलञ्च यया विना ॥ ४ ॥
पुष्टिर्गणपतेः पत्नी प्रतिविश्वेषु पूजिता ।
यया विना परिक्षीणाः पुमांसो योषितो
भवेत् ॥ ५ ॥
अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता भवे ।
यया विना न सन्तुष्टाः सर्व्वे लोकाश्च सन्ततम् ॥ ६ ॥
ईशानपत्नी सम्पत्तिः पूजिता च सुरैर्नरैः ।
सर्व्वलोका दरिद्राश्च विश्वेषु च यया विना ॥ ७ ॥
धृतिः कपिलपत्नी च सर्व्वैः सर्व्वत्र पूजिता ।
सर्व्वलोका अधैर्य्याः स्युर्जगत्सु च यया विना ॥ ८ ॥
यमपत्नी क्षमा साध्वी सुशीला सर्व्वपूजिता ।
समुन्मत्ताश्च रुष्टाश्च सर्व्वलोका यया विना ॥ ९ ॥
क्रीड़ाधिष्ठातृदेवी च कामपत्नी रतिः सती ।
केलिकौतुकहीनाश्च सर्व्वलोका यया विना ॥ १० ॥
सत्यपत्नी सती मुक्तिः पूजिता जगतां प्रिया ।
यया विना भवे लोका बन्धुतारहिताः सदा ॥ ११ ॥
मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया ।
सर्व्वे लोकाश्च सर्व्वत्र निष्फलाश्च यया विना ॥ १२ ॥
पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपातिपूजिता ।
यया विना जगत् सर्व्वं जीवन्मृतपरं मुने । ॥ १३ ॥
सुकर्म्मपत्नी कीर्त्तिश्च धन्या मान्या च पूजिता ।
यया विना जगत् सर्व्वं यशोहीनं मृतं यथा ॥ १४ ॥
क्रिया उद्योगपत्नी च पूजिता सर्व्वसम्मता ।
यया विना जगत् सर्व्वमुच्छिन्नमिव नारद । ॥ १५ ॥
अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता ।
यया विना जगन्मुक्तमुच्छिन्नं विधिनिर्म्मितम् ॥
सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी ।
अर्द्धावयवरूपा च द्वापरे संवृता भिया ॥
कलौ महाप्रगल्भा च सर्व्वत्र व्यापिका बलात् ।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे ॥ १६ ॥
शान्ति-१७ लज्जा १८ च भार्य्ये द्वे सुशीलस्य
च पूजिते ।
याभ्यां विना जगत् सर्व्वमुन्मत्तमिव नारद । ॥
ज्ञानस्य भार्य्यास्तिस्रश्च बुद्धि-१९ र्मेधा २०
स्मृति-२१ स्तथा ।
याभिर्व्विना जगत् सर्व्वं मूढ़ं मृतसमं सदा ॥
मूर्त्तिश्च धर्म्मपत्नी सा कान्तिरूपा मनोहरा ।
परमा सा च विश्वौघा निराधारा यया विना ॥
सर्व्वत्र शोभारूपा सा लक्ष्मीर्मूर्त्तिमती सती ।
श्रीरूपा मूर्त्तिरूपा च मान्या धन्या च पूजिता
॥ २२ ॥
कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी ।
सर्व्वलोकाः समाच्छन्ना मायायोगेन रात्रिषु ॥ २३ ॥
कालस्य तिस्रो भार्य्याश्च सन्ध्या-२४ रात्रि-२५
दिनानि च २६ ।
याभिर्व्विना विधात्रा च संख्यां कर्त्तुं न शक्यते ॥
क्षुत्-२७ पिपासे २८ मनोभार्य्ये धन्ये मान्ये
सुपूजिते ।
याभ्यां व्याप्तं जगत् सर्व्वं युक्तचिन्तितमेव च ॥
प्रभा च २९ दाहिका ३० चैव द्वे भार्य्ये तेजस-
स्तथा ।
याभ्यां विना जगत् स्रष्टुं विधातापि नहीश्वरः ॥
कालकन्ये मृत्यु-३१ जरे ३२ प्रज्वरस्य प्रिये
प्रिये ।
याभ्यां जगत् समुच्छन्नं विधात्रा निर्म्मितं विधौ ॥
निद्राकन्या च तन्द्रा ३३ सा प्रीति-३४ रन्या
सुखप्रिये ।
याभ्यां व्याप्तं जगत् सर्व्वं विधिपुत्त्रविधेर्विधौ ॥
वैराग्यस्य हि जाये च श्रद्धा-३५ भक्ती ३६ च
पूजिते ।
याभ्यां शश्वज्जगत सर्व्वं जीवन्मुक्तमिदं मुने । ॥
अदिति-३७ र्देवमाता च सुरभी ३८ च गवां
प्रसूः ।
दितिश्च ३९ दैत्यजननी कद्रुश्च ४० विनता ४१
दनुः ४२ ॥
उपयुक्ताः सृष्टिविधौ एताश्च प्रकृतेः कलाः ॥ *
कलाश्चान्याः सन्ति बह्व्यस्तासु काश्चिन्निबोध मे ॥
रोहिणी ४३ चन्द्रपत्नी च संज्ञा ४४ सूर्य्यस्य
कामिनी ।
शतरूपा ४५ मनोर्भार्य्या शचीन्द्रस्य च गेहिनी
४६ ॥
तारा ४७ बृहस्पतेर्भार्य्या वशिष्ठस्य त्वरु-
न्धती ४८ ।
अहल्या ४९ गौतमस्त्री तु सानसूया ५० त्रिका-
मिनी ॥
पितॄणां मानसी कन्या मेनका ५१ साम्बिका-
प्रसूः ।
लोपामुद्रा ५२ तथा भूती ५३ कुवेरकामिनी
तथा ॥
वरुणानी ५४ यमस्त्री च बलेर्व्विन्ध्यावली ५५
तथा ।
कुन्ती च ५६ दमयन्ती च ५७ यशोदा ५८
देवकी ५९ सती ॥
गान्धारी ६० द्रौपदी ६१ शैव्या ६२ सावित्री ६३
सत्यवत्प्रिया ।
वृषभानुप्रिया साध्वी राधामाता कलावती ६४ ॥
मन्दोदरी ६५ च कौशल्या ६६ सुभद्रा ६७
कैटभी ६८ तथा ।
रेवती ६९ सत्यभामा ७० च कालिन्दी ७१
लक्ष्मणा ७२ तथा ॥
जाम्बवती ७३ नाग्नजिती ७४ मित्रविन्दा ७५
तथापरा ।
लक्ष्मणा ७६ रुक्मिणी ७७ सीता ७८ स्वयं-
लक्ष्मीः प्रकीर्त्तिता ॥
कला योजनगन्धा च ७९ व्यासमाता महासती ।
बाणपुत्त्री तथोषा ८० च चित्रलेखा च ८१
तत्सखी ॥
प्रभावती ८२ भानुमती ८३ तथा मायावती ८४ सती ।
रेणुका ८५ च भृगोर्माता हलिमाता च
रोहिणी ८६ ॥
एकानंशा ८७ च दुर्गांशा श्रीकृष्णभगिनी सती ।
बह्व्यः सन्ति कलाश्चैव प्रकृतेरेव भारते ॥
या याश्च ग्रामदेव्यस्ताः सर्व्वाश्च प्रकृतेः कलाः ।
कलांशांशसमुद्भूताः प्रतिविश्वेषु योषितः ॥ * ॥
योषितामपमानेन प्रकृतेश्च पराभवः ।
ब्राह्मणी पूजिता येन पतिपुत्त्रवती सती ॥
प्रकृतिः पूजिता तेन वस्त्रालङ्कारचन्दनैः ।
कुमारी चाष्टवर्षीया वस्त्रालङ्कारचन्दनैः ।
पूजिता येन विप्रस्य प्रकृतिस्तेन पूजिता ॥ * ॥
सर्व्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः ।
सत्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः ॥
मध्यमा राजसाश्चांशास्ताश्च भोग्याः प्रकी-
र्त्तिताः ।
सुखसम्भोगवश्याश्च स्वकार्य्ये तत्पराः सदा ।
अधमास्तामसाश्चांशा अज्ञातकुलसम्भवाः ॥
दुर्मुखाः कुलटा धूर्त्ताः स्वतन्त्राः कलहप्रियाः ।
पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः ॥
प्रकृतेस्तामसांशांशाः पुंश्चल्यः परिकीर्त्तिताः ।
एवं निगदितं सर्व्वं प्रकृतेः परिकीर्त्तनम् ॥ * ॥
ताश्च सर्व्वाः पूजिताश्च पुण्यक्षेत्रे च भारते ।
पूजिता सुरथेनादौ दुर्गा दुर्गतिनाशिनी ॥
द्वितीये रामचन्द्रेण रावणस्य वधार्थिना ॥
तत्पश्चाज्जगतां माता त्रिषु लोकेषु पूजिता ।
जातादौ दक्षपत्न्याश्च निहत्य दैत्यदानवान् ॥
ततो देहं परित्यज्य यज्ञे भर्त्तुश्च निन्दया ।
जज्ञे हिमवतः पत्न्यां लेभे पशुपतिं पतिम् ॥
गणेशश्च स्वयं कृष्णः स्कन्दो विष्णुकलोद्भवः ।
बभूवतुस्तौ तनयौ पश्चात्तस्याश्च शौनक । ॥
लक्ष्मीर्म्मङ्गलभूपेन प्रथमे परिपूजिता ।
त्रिषु लोकेषु तत्पश्चाद्देवतामुनिमानवैः ॥
सावित्री चाश्वपतिना प्रथमे परिपूजिता ।
तत्पश्चात्त्रिषु लोकेषु देवतामुनिमानवैः ॥
आदौ सरस्वती देवी ब्रह्मणा परिपूजिता ।
तत्पश्चात्त्रिषु लोकेषु देवतामुनिमानवैः ॥
प्रथमे पूजिता राधा गोलोके रासमण्डले ।
पौर्णमास्यां कार्त्तिकस्य कृष्णेन परमात्मना ॥
गोपिकाभिश्च गोपैश्च बालिकाभिश्च बालकैः ।
गवां गणैः सुरभ्या च तत्पश्चान्मायया हरेः ॥
तदा ब्रह्मादिभिर्देवैर्मुनिभिर्मनुभिस्तथा ।
पुष्पधूपादिभिर्भक्त्या पूजिता वन्दिता सदा ॥

पृथिव्यां प्रथमे देवी सुयज्ञेनैव पूजिता ।
शङ्करेणोपदिष्टेन पुण्यक्षेत्रे च भारते ॥
त्रिषु लोकेषु तत्पश्चादाज्ञया परमात्मनः ।
पुष्पधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः ॥
कलया याः समुद्भूताः पूजितास्ताश्च भारते ।
पूजिता ग्रामदेव्यश्च ग्रामे च नगरे मुने ! ॥
एवं ते कथितं सर्व्वं प्रकृतेश्चरितं शुभम् ।
यथागमं लक्षणञ्च किं भूयः श्रोतुमिच्छसि ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे प्रकृतिचरितं नामानुक्रमः प्रथमोऽध्यायः ॥ * ॥ पुरुषनाम्नोऽग्रे प्रकृतेर्नाम उच्चार्य्यता यथा,—

नारद उवाच ।

"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः ।
निमित्तमस्य मां भक्तं वद भक्तजनप्रिय ! ॥

श्रीनारायण उवाच ।

निमित्तमस्य त्रिविधं कथयामि निशामय ।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता ।
गरीयसीति जगतां माता शतगुणैः पितुः ॥
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः ।
कृष्णराधेशगौरीति लोके न च कदा श्रुतः ॥
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम ।
गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर ! ॥
प्रसीद कमलाकान्त गृहाण मम पूजनम् ।
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम । ॥
राशब्दोच्चारणादेव स्फीतो भवति माधवः ।
धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः ॥
आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत् ।
स भवेन्मातृगामी च वेदातिक्रमणे मुने । ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५० अध्यायः ॥

प्रकृष्टं, त्रि, (प्रकृष्यते इति । प्र + कृष + क्त ।) प्रकर्षयुक्तम् । तत्पर्य्यायः । मुख्यम् २ प्रमुखम् ३ प्रवर्हम् ४ वर्य्यम् ५ वरेण्यम् ६ प्रवरम् ७ पुरोगम् ८ अनुत्तरम् ९ प्राग्रहरम् १० प्रवेकम् ११ प्रधानम् १२ अग्रेसरम् १३ उत्तमम् १४ अग्रम् १५ ग्रामणीः १६ अग्रणीः १७ अग्रिमम् १८ जात्यम् १९ अग्र्यम् २० अनुत्तमम् २१ अनवरार्द्ध्यम् २२ प्रेष्ठम् २३ परार्द्ध्यम् २४ परम् २५ । इति हेमचन्द्रः । ६ । ७४ ॥ (यथा, मनुः । ७ । १७० ।
"यदा प्रकृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥"
आकृष्टम् । यथा, देवीभागवते । १ । ९ । ८२ ।
"रथाङ्गेन तदा छिन्ने विष्णुना प्रभविष्णुना ।
जघनोपरि वेगेन प्रकृष्टे शिरसी तयोः ॥")

प्रकोष्ठः, पुं, (प्रकुष्यतेऽनेनेति । प्र + कुष निष्कर्षे + "उषिकुषीति ।" उणा० २ । ४ । इति स्थन् ।) कफोणेरधोमणिबन्धपर्य्यन्तहस्तभागः । इत्यमरः । २ । ६ । ८० ॥ (यथा, रघुः । ३ । ५९ ।
"ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्द्धमुखेन पत्रिणा
शरासनज्यामलुनाद्बिडौजसः ॥")
गृहद्वारपिण्डकम् । वीथी इति विन्दोन्द इति च ख्यातम् । इति प्रवाणशब्दटीकायां भरतमुकुटमधुरेशौ ॥ (यथा, मानवे । ७ । २२३ । श्लोकटीकायां कुल्लूकभट्टः ।
"ततः सन्ध्योपासनं कृत्वा तस्मात् प्रदेशात् कथान्तरं विविक्तप्रकोष्ठावकाशमन्यद्गत्वा गृहाभ्यन्तरे धृतशस्त्रो रहस्याभिधायिनां चराणां व्यापारं शृणुयात् ॥")

प्रक्खरः, पुं, (प्रखर + पृषोदरादित्वात् साधुः ।) अश्वकवचः । इति शब्दमाला ॥ प्रखर इति च पाठः ॥

प्रक्रन्ता, [न्तृ] त्रि (प्र + क्रम + तृच् ।) उपक्रमकर्त्ता । आरम्भकर्त्ता । इति व्याकरणम् ॥

प्रक्रमः, पुं, (प्र + क्रम + भावे घञ् ।) क्रमः । अवसरः । इति मेदिनी । मे, ४९ ॥ प्रथमारम्भः । तत्पर्य्यायः । उपक्रमः २ । इत्यमरः । ३ । २ । २६ ॥ (यथा, कथासरित्सागरे । १८ । ६३ ।
"पूर्व्वजैरपि हि प्राच्यौ प्रक्रमेण जिता दिशः ।
गङ्गोपकण्ठे वासश्च विहितो हस्तिनापुरे ॥")

प्रक्रान्तः, त्रि, (प्र + क्रम + क्तः ।) प्रकरणस्थः । आरब्धः । यथा, भट्टिः । ४ । ११ ।
"आतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् ।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम् ॥"

प्रक्रिया, स्त्री, (प्र + कृ + शः ।) नृपदीनां चामरधूननच्छत्रधारणादिव्यापारः । तत्पर्य्यायः । अधिकारः २ । इत्यमरः । २ । ८ । ३१ ॥ अधीकारः ३ नियतविधिः ४ । इति शब्दरत्नावली ॥ प्रकृष्टकार्य्यम् ॥ (यथा, महाभारते । १२ । १११ । ५८ ।
"नोच्छ्रितं सहते कश्चित् प्रक्रिया वैरकारिका ।
सुचेरपि हि युक्तस्य दोष एव निपात्यते ॥")

प्रक्लिन्नः, त्रि, (प्र + क्लिद् + क्त ।) तृप्तः । इति जटाधरः ॥ प्रकर्षेण क्लेदयुक्तश्च ॥

प्रक्वणः, पुं, (प्र + क्वण शब्दे + "क्वणो वीणायाञ्च ।" ३ । ३ । ६५ । इति अप् ।) वीणायाः क्वणितः । वीणाशब्दः । तत्पर्य्यायः । प्रक्वाणः २ । इत्यमरः । १ । ६ । २४ ॥ सुक्वाणः ३ सुक्वणः ४ उपक्वाणः ५ उपक्वणः ६ । इति भरतः ॥

प्रक्वाणः, पुं, (प्र + क्वण + घञ् ।) प्रक्वणः । इत्यमरः । १ । ६ । २४ ॥

प्रक्षरः, पुं, (प्रकर्षेण क्षरति चञ्चलतीति । प्र + क्षर + अच् ।) अश्वसन्नाहः । इति हेमचन्द्रः । ४ । ३१७ ॥

प्रक्षालनं, क्ली, (प्र + क्षालि + ल्युट् ।) धावनम् । मार्ज्जनम् । यथा,—
"धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥"
इति हितोपदेशे १ परिच्छेदः ॥

प्रक्षालितः, त्रि, (प्र + क्षालि + क्तः ।) धौतः । मार्ज्जितः । इति हलायुधः ॥

प्रक्षेपः, पुं, (प्र + क्षिप + घञ् ।) औषधादिषु क्षेपणीयद्रव्यम् । यथा,—
"प्रक्षेपः पादिकः क्वाथ्यात् स्नेहे कल्कसमो मतः ।
षोडशांशश्चतुर्भागं वातपित्तकफार्त्तिषु ॥
क्षौद्रं कषाये दातव्यं विपरीता तु शर्करा ।
मात्रा क्षौद्रघृतादीनां स्नेहे क्वाथे च पूर्व्ववत् ॥
माषिकं हिङ्गु सिन्धूत्थं जरणाद्यास्तु शाणिकाः ॥"
इति वैद्यकपरिभाषा ॥
विक्षेपः । यथा, "समित्प्रक्षेपान्तं कर्म्म कृत्वा ।" इति भवदेवभट्टः ॥ (प्रहरणम् । यथा, भागवते । ४ । २९ । १९ ।
"मनोरथस्त्वहङ्कारो गृहीतो दन्तकूबरः ।
पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥")

प्रक्षेपणं, क्ली, (प्र + क्षिप् + ल्युट् ।) प्रकर्षेण क्षेपः । निक्षेपणम् । (यथा, याज्ञवल्क्ये । २ । २६४ ।
"अर्घप्रक्षेपणात् विंशं भागं शुल्कं नृपो हरेत् ॥")

प्रक्ष्वेडनः, पुं, (प्रक्ष्वेडतीति । प्र + क्ष्विड अव्यक्तशब्दे + ल्युः ।) नाराचः । इत्यमरः । २ । ८ । ८७ ॥

प्रक्ष्वेडना, स्त्री, (प्रक्ष्वेडन + टाप् । यद्वा, प्रक्ष्वेडनं अव्यक्तशब्दोऽस्त्यस्या इति । अच् । टाप् ।) नाराचः । इत्यमरटीकायां भरतः ॥

प्रक्ष्वेदनः, पुं, (प्रक्ष्वेदतीति । प्र + क्ष्विद अव्यक्तशब्दे + ल्युः ।) नाराचः । इत्यमरटीकायां भरतः ॥

प्रक्ष्वेदना, स्त्री, (प्रक्ष्वेदन + टाप् ।) नाराचः । इत्यमरटीकायां भरतः ॥

प्रखरः, पुं (प्रकृष्टः खरः ।) हयसन्नाहः । कुक्कुरः । अश्वतरः । अत्यन्तखरे, त्रि । इति मेदिनी ॥

प्रख्यः, त्रि, (प्रख्यातीति । प्र + ख्या ख्यातौ + कः ।) उत्तरपदे तुल्यार्थवाचकः यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ॥"
इति हेमचन्द्रः ॥
(यथा, महाभारते । १ । २०८ । ३१ ।
"द्विपक्षगरुड़प्रख्यैर्द्वारैः सौधैश्च शोभितम् ।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः ॥"
श्रेष्ठः । यथा, तत्रैव । १२ । २०४ । ८ ।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ।
यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ॥")

प्रख्यातः, त्रि, (प्र + ख्या + क्त ।) प्रकृष्टख्यातियुक्तः । विख्यातः । यथा,—
"यस्य व्याकरणे वरेण्यघटनास्फीताः प्रबन्धा दश प्रख्याता नव वैद्यकेऽपि तिथिनिर्द्धारार्थमेकोऽद्भुतः ॥"
इति मुग्धबोधशेषे तच्छ्लोकपदम् ॥

प्रख्यातवप्तृकः, पुं, (प्रख्यातो वप्ता जनयिता यस्य । कप् ।) विख्यातपितृकः । यथा,—
"स्यादामुष्यायणोऽमुष्य पुत्त्रः प्रख्यातवप्तृकः ॥"
इति हेमचन्द्रः । ३ । १९६ ॥

प्रख्यातिः, स्त्री, प्रकृष्टकीर्त्तिः । विख्यातिः । प्रपूर्व्वख्याधातोः क्तिन्प्रत्ययनिष्पन्ना ॥

प्रगण्डः, पुं, (प्रत्यासन्नो गण्डो ग्रन्थिर्यस्य ।) कूर्परोपरिकक्षपर्य्यन्तभागः । इत्यमरः । २ । ६ । ८० ॥ कनुइ अवधि बगल पर्य्यन्त इति भाषा ॥

प्रगण्डी, स्त्री, (प्रगण्ड+गौरादित्वात् ङीष्) बहिःप्राकारः। दुर्गप्राकारभित्तौ शूराणां उपवेशनस्थानानि। (यथा, महाभारते। १२। ६९। ४३।
"प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तथा॥")

प्रगतजानुः, त्रि, (प्रगते असंश्लिष्टे जानुनी यस्य।) प्रगतजानुकः। इत्यमरटीकायां रमानाथः॥

प्रगतजानुकः, त्रि, (प्रगते जानुनी यस्य। कप्।) यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्तरालं सः। फाँफाराक् यक्ति इति भाषा॥ तत्पर्य्यायः। प्रज्ञुः २। इत्यमरः। २। ६। ४७॥ प्रज्ञः ३ प्रगतजानुः ४। इति भरतः॥

प्रगन्धः, पुं, (प्रकृष्टो गन्धो यस्य।) पर्पटः। इति राजनिर्घण्टः॥

प्रगल्भः, त्रि, (प्रगल्भते इति। प्र+गल्भ धार्ष्ट्ये+पचाद्यच्।) प्रत्युत्पन्नमतिः। तत्पर्य्यायः। प्रतिभान्वितः २। इत्यमरः। ३। १। २५॥ (यथा, महाभारते। १२। ६८। ५८।
"प्रज्ञा प्रगल्भं कुरुते मनुष्यं
राजा लघून् वै कुरुते मनुष्यान्॥")

प्रगल्भता, स्त्री, प्रगल्भस्य भावः। (प्रगल्भ+तल्।) प्रागल्भ्यम्। तत्पर्य्यायः। उत्साहः २ अभियोगः ३ उद्यमः ४ प्रौढ़िः ५ उद्योगः ६ कियदेतिका ७ अध्यवसायः ८ ऊर्ज्जः ९। इति हेमचन्द्रः। २। २१३॥ तस्य लक्षणम्। यथा,
"निःसाध्वसत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता॥"
इत्युज्ज्वलनीलमणिः॥
(यथा, कुमारे। ६। ३२।
"आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥")

प्रगल्भा, स्त्री, (प्रगल्भते धृष्टा भवतीति। प्र+गल्भ धार्ष्ट्ये+पचादित्वादच्। ततष्टाप्।) नायिकाभेदः। अस्या लक्षणम्। पतिमात्रविषयकेलिकलापकोविदा। अस्याश्चेष्टा रतिप्रीतिः। आनन्दादात्मसंमोहः। रतिप्रीतिर्यथा,—
"संसृष्टा क्षणमाकलय्य वदनं संश्लिष्य कण्ठस्थलं निष्पीयाधरबिम्बमम्बरमपाकृष्य व्युदस्यालकम्।
देवस्याम्बुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसनाञ्चलैः श्रवणयोर्नीलोत्पलं
निह्नुते॥"
आनन्दादात्मसंमोहो यथा,—
"नखाङ्कितमुरःस्थलेऽधरतले रदस्य क्षतं
च्युता बकुलमालिका विगलिता च मुक्तावली।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च पतिः क्व च क्व च तवालिङ्गिता-
विधिः॥"
सा मानावस्थायां त्रिविधा। धीरा अधीरा धीराधीरा च। व्यङ्ग्यकोपप्रकाशा धीरा। अव्यङ्ग्यकोपप्रकाशा अधीरा। व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा। प्रौढ़ाधीरायास्तु रतौदास्यम्। अधीरायास्तर्ज्जनताड़नादि। धीराधीराया रतौदास्यं तर्ज्जनादि च कोपस्य प्रकाशकम्। प्रौढ़ाधीरा यथा,—
"नो तल्पं भजसि न जल्पसि सुधाधाराभिकारा
गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाश-
च्छलात्।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव नयेत् पुनः सहचरी कुर्व्वीत साचि
स्मितम्॥"
प्रगल्भा अधीरा यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्या वासमाशङ्कमाना।
गिरिशमचलकन्या तर्ज्जयामास कम्प्र-
प्रचलवलयविलसत्कान्तिभाजा करेण॥"
प्रगल्भा धीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्ज्जत्कपोल-
श्रिया।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसक्षालित-
प्रोष्ठीपृष्ठमयूखमांसलरुचो विस्फारिता दृष्टयः॥"
इति रसमञ्जरी॥
(तल्लक्षणञ्च यथा साहित्यदर्पणे। ३। १०१।
"स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका॥"
तस्या उदाहरणभेदादिकं तत्रैव विशेषतो द्रष्टव्यम्॥)

प्रगाढ़ं, त्रि, (प्रकर्षेण गाह्यते स्मेति। प्र+गाह+क्तः। "यस्य विभाषा।" ७। २। १५। इति न इट्।) भृशम्। कृच्छ्रम्। इत्यमरः। ३। ३। ४४॥ (यथा, महाभारते। ४। ५९। २६।
"अहमिन्द्राद्दृढ़ां मुष्टिं ब्रह्मणः कृतहस्तताम्।
प्रगाढ़े तुमुले चित्रमभ्यशिक्षं प्रजापतेः॥")
दृढ़म्। इति भरतः॥ (यथा, महाभारते। ७। ९७। ४८।
"तत्रान्तरीक्षे बाणानां प्रगाढ़ानां विशाम्पते।
संघर्षेण महार्च्चिष्मान् पावकः समजायत॥")
घनम्। यथा, सुश्रुते चिकित्सितस्थाने ५ अः।
"तूणीप्रतूण्योः स्नेहलवणमुदकेन पाययेत्
पिप्पल्यादिचूर्णं वा हिङ्गुयवक्षारप्रगाढ़ं सर्पिर्वर्त्तिभिर्वैनमुपक्रमेत्॥")

प्रगाता, [ऋ] त्रि, (प्र+गै+तृच्।) उत्तमगायकः। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। २३९। ८।
"ततो गोपाः प्रगातारः कुशला नृत्यवादिते।
धार्त्तराष्ट्रमुपातिष्ठन् कन्याश्चैव स्वलङ्कृताः॥")

प्रगुणः, त्रि, (प्रकर्षेण गुणो यत्र।) ऋजुः। इत्यमरः। ३। १। ७२॥ (प्रकृष्टगुणवति, त्रि। यथा, रघौ। ९। ४९।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
श्रमजयात् प्रगुणाञ्च करोत्यसौ
तनुमतोऽनुमतः सचिवैर्ययौ॥")

प्रगृह्यं, त्रि, (प्रगृह्यते इति। प्र+ग्रह+"पदास्वैरिबाह्यापक्ष्येषु च।" ३।१। ११९। इति क्यप्। "ग्रहिज्येति। ६। १। १६। इति सम्प्रसारणम्।) सन्धिरहितं पदम्। इति मुग्धबोधव्याकरणम्॥ पदपाठपरतन्त्रैर्वाहिर्भूतेषु गृह्यपदं निपात्यते। यथा, प्रगृह्यं पदं यत् स्वरेण न समुन्नीयते। इति दुर्गादासः॥ "आप्रगृह्यः स्मृतौ वाक्ये।" इत्यमरः॥ प्रगृह्यः पाणिन्यादिकृतप्रगृह्यसंज्ञो ङानुबन्धरहितः आशब्दः योऽचा न सन्धीयते स इत्यर्थः। स्मृतौ स्मरणे यथा। आ ज्ञातं स जटायुरेषः। वाक्ये यथा। आ एवं मन्यसे। इति भरतः॥

प्रगे, व्य, (प्रकर्षेण गीयतेऽत्रेति। प्र+गै+के।) प्रातः। इत्यमरः। ३। ४। १९॥ (यथा, माघे। १२। १।
"इत्थं रथाश्वेभनिषादिनाम्प्रगे
गणो नृपाणामथ तोरणाद्बहिः।
प्रस्थानकालक्षमवेशकल्पना
कृतक्षणक्षेपमुदैक्षताच्युतम्॥")

प्रगेतनः, त्रि, (प्रगे प्रातर्भव इति। प्रगे+"सायंचिरमिति।" ४। ३। २३। इति ट्यु तुट् च।) प्रगे भवः। प्रातर्भवः। तत्पर्य्यायः। श्वस्तनः २। इति राजनिर्घण्टः॥

प्रग्रहः, पुं, (प्रगृह्यते इति प्रगृह्णात्यनेनेति वा। प्र+ग्रह+"प्रे वणिजाम्।"३।३।५२। "रश्मौ च।" ३। ३। ५३। इति घञभावपक्षे "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) तुलासूत्रम्। अश्वादिरश्मिः। बन्दी। इत्यमरः। ३। ३। २३६॥ नियमनम्॥ (यथा, महाभारते। ३। १७९। १६।
"नहि मे मुच्यते कश्चित् कथञ्चित् प्रग्रहं गतः।
गजो वा महिषो वापि षष्ठे काले नरोत्तम।॥")
भुजः। रश्मिः। (यथा, गोलाध्याये। ८।
"इन्दोः प्राच्यां भवति तरणेः प्रग्रहः किं प्रतीच्याम्॥")
सुवर्णालुमहीरुहः। इति मेदिनी॥ कर्णिकार वृक्षः। इति राजनिर्घण्टः॥ (तत्पर्य्यायो यथा,
"आरेवतो राजवृक्षः प्रग्रहश्चतुरङ्गुलः।
आरग्वधोऽथ सम्पाकः कृतमालः सुवर्णकः॥"
इति वैद्यकरत्नमालायाम्॥
प्र+ग्रह+भावे अप्। इन्द्रियादीनां निग्रहः। यथा, हरिवंशे भविष्यपर्व्वणि। ८। ७८।
"अर्थो हि केवलं तस्य प्रग्रहो बाह्यगोचरः।
तस्मात् सर्व्वप्रयत्नेन चित्तं रक्ष जनार्द्दन।॥"
धारणम्। यथा, हरिवंशे भविष्यपर्व्वणि। २२। ४।
"उद्धवोऽथ महाबुद्धिरुग्रसेनो महाबलः।
अन्ये च यादवाः सर्व्वे कवचप्रग्रहे रताः॥"
अवलम्बनम्। यथा, हरिवंशे। ४१। १६९।
"नृपेष्वथ प्रनष्टेषु जगत्यप्रग्रहाः प्रजाः।
चयेन निर्वृते चैवं हत्वा चान्योन्यमाहवे॥
परस्परहृतस्वाश्च निराक्रन्दाः सुदुःखिताः।

एवं बहुमनुप्राप्ताः कालिकल्याणके तदा ॥”
विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।
“प्रग्रहो निग्रहो व्यग्रोऽनेकशृङ्गो गदाग्रजः ॥”
प्रकृष्टाधिष्ठानादौ, त्रि । यथा, रामायणे । २ ।
८२ । १ ।
“तामार्य्यगणसम्पूर्णां भरतः प्रग्रहां सभाम् ।
ददर्श बुद्धिसम्पन्नः पूर्णचन्द्रां निशामिव ॥”
“प्रग्रहा प्रकृष्टैर्व्वशिष्ठादिभिर्ग्रहोऽधिष्ठानं
यस्यां वा ।” इति तट्टीका ॥ उद्यतबाहुः ।
यथा, रामायणे । ७ । ६५ । १४ ।
“एवमुक्तस्तु मुनिना प्राञ्जलिः प्रग्रहो नृपः ।
अभ्यवादयत प्राज्ञस्तमृषिं सत्यवादिनम् ॥”)

प्रग्राहः, पुं, (प्रगृह्यते इति । प्र + ग्रह + “प्रे वणिजाम् ।” ३ । ३ । ५२ । “रश्मौ च ।” ३ । ३ । ५३ । इति च घञ् ।) प्रग्रहः । इत्यमरः । ३ । ३ । ५३६ ॥ (“प्रे लिप्सायाम् ।” ३ । ३ । ४६ । इति घञ् । प्रग्रहणम् । “पात्रप्रग्राहेण चरति भिक्षुः ।” इति सिद्धान्तकौमुदी ॥)

प्रग्रीवः, पुं स्त्री, (प्रकृष्टा ग्रीवा ग्रीवाकृतिरस्य ।) गृहादौ प्रान्ते धार्य्यं दारुपङ्क्तिः । वातायनम् । इति सुभूतिः । सुखशाला । इत्येके । अश्वशाला । इति कश्चित् । हर्म्मशीर्षकम् । इति गोवर्द्धनः । इत्यमरटीकायां भरतः ॥

प्रघटावित्, [द्] त्रि, (प्रघटां आडम्बरं वेत्तीति । प्रघटा + विद् + क्विप् ।) शास्त्रगण्डः । इति त्रिकाण्डशेषः ॥

प्रघणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + “अगारैकदेशे प्रघणः प्रघाणश्च ।” ३ । ३ । ७९ । इति कर्म्मणि अप् । णत्वञ्च ।) वहिर्द्वारप्रकोष्ठकम् । तत्पर्य्यायः । प्रघाणः २ अलिन्दः ३ । इत्यमरः । २ । २ । १२ ॥ आलिन्दः ४ । इति भरतः ॥ ताम्रकुम्भः । लौहमुद्गरः । इति मेदिनी । णे, ६० ॥ (गृहाभ्यन्तरशय्यार्थपिण्डिका । यथा,—
“प्रघाणप्रघणालिन्दा द्वारबाह्यप्रकोष्ठके ।
गृहाभ्यन्तरशय्यार्थपिण्डिकायामपि त्रयम् ॥”
इति शब्दरत्नावली ॥)

प्रघनः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । न णत्वम् ।) प्रघणः । इति मुकुटः ॥

प्रघसः, पुं, (प्रकर्षेण अत्तीति । प्र + अद + अप् । “घञपोश्च ।” २ । ४ । ३८ । इति घस्लादेशः ।) असुरः । दैत्यः । इति त्रिकाण्डशेषः ॥ (राक्षसभेदः । यथा, महाभारते । ३ । २८४ । २ ।
“पर्व्वणः पूतनो जम्भः खरः क्रोधवशो हरिः ।
प्ररुजश्चारुजश्चैव प्रघसश्चैवमादयः ॥”)

प्रघाणः, पु, (प्रहन्यते इति । प्र + हन् + “अगारैकदेशे प्रघणः प्रघाणश्च ।” ३ । ३ । ७९ । अप् । पक्षे वृद्धिश्च ।) प्रघणः । इत्यमरः । २ । २ । १२ ॥ (यथा, नैषधे । १९ । ११ ।
“नयति भगवानम्भोजस्यानिबन्धनबान्धवः
किमपि मघवत्प्रासादस्य प्रघाणमुपघ्नताम् ।
अपसरदरिध्वान्तप्रत्यग्वियत्पथमध्यगो
नगनगपतद्भ्रान्तस्वर्णांचलभ्रमविभ्रमः ॥”)

प्रघातः, पुं, (प्रकर्षेण हन्यते यत्रेति । प्र + हन् + घञ् ।) युद्धम् । इति हेमचन्द्र-टीका ॥

प्रघानः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । वृद्धिः । न णत्वम् ।) प्रघणः । इति मुकुटः ॥

प्रघूर्णः, पुं, (प्रघूर्णति भ्रमतीति । प्र + घूर्ण + अच् ।) अतिथिः । इति हेमचन्द्रः ॥ प्रकृष्टघूर्णयुक्ते, त्रि ॥

प्रघोषकः, पुं, (प्र + घुष् + भावे घञ् । ततः कन् ।) ध्वनिः । इति जटाधरः ॥

प्रचक्रं, क्ली, (प्रगतञ्चक्रमिति प्रादिसमासः ।) चलितसैन्यम् । प्रस्थितसेना । इत्यमरः । २ । ८ । ९६ ॥

प्रचक्षाः, [स्] पुं, (प्रकर्षेण चष्टे वक्तीति । प्र + चक्ष + असिः । न ख्यादेशः ।) वृहस्पतिः । इत्युणादिकोषः ॥

प्रचण्डः, पुं, (प्रकर्षेण चण्डः उग्रगुणत्वात् ।) श्वेतकरवीरः । इति मेदिनी ॥ (वत्सप्रीनाम-नृपतेः सुनन्दागर्भजातः पुत्रभेदः । यथा, मार्कण्डेये । ११८ । २ ।
“बलीबलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥”)

प्रचण्डः, त्रि, (प्रकर्षेण चण्डः ।) दुर्व्वहः । दुर्धर्षः । प्रगल्भः । (यथा, आर्य्यासप्तशत्याम् । ३३० ।
“नाहं वदामि सुतनु त्वमशीला वा प्रचण्ड-
चरिता वा ।
प्रेमस्वभावसुलभं भयमुदयति मम तु हृदयस्य ॥”)
प्रतापी । इति मेदिनी नानार्थरत्नमाला च ॥ (यथा, भागवते । १ । ७ । २१ ।
“ततः प्रादुष्कृतं तेजः प्रचण्डं सर्व्वतोदिशम् ।
प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥”)

प्रचण्डमूर्त्तिः, स्त्री, (प्रचण्डा मूर्त्तिर्यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥ प्रतापयुक्तशरीरश्च ॥

प्रचण्डा, स्त्री, (प्रकर्षेण चण्डा ।) दुर्गाया अष्टनायिकान्तर्गतनायिकाभेदः । इति कालीपुराणम् ॥ (सा तु छगलण्डे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३० । ७३ ।
“छगलण्डे प्रचण्डा तु चण्डिकामरकण्टके ॥”)
श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

प्रचयः, पुं, (प्रचीयते इति । प्र + चिञ् चयने + “एरच् ।” ३ । ३ । ५६ । इत्यच् ।) समूहः । इति शब्दचन्द्रिका ॥ शिथिलाख्यसंयोगः । स च परिमाणजनकः । यथा,—
“संख्यातः परिमाणाच्च प्रचयादपि जायते ।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ।
परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः ॥”
इति भाषापरिच्छेदः ॥
(हस्तादिकरणकपुष्पफलादीनां चयने । यथा, “हस्तप्रचायमाने फलानां हस्तेन प्रचयं करोति ।”
इति सिद्धान्तकौमुदी । ३ । ३ । ४० ॥)

प्रचरः पुं, (प्रचरत्यस्मिन्निति । प्र + चर + आधारे अप् ।) पन्थाः । इति धरणिः ॥ प्रकर्षेण गमनञ्च ॥

प्रचरद्रूपः, त्रि, व्यक्तरूपः । प्रकारविशिष्टः । प्रचरत् प्रकाशमानं रूपं स्वरूपं यस्य सः ॥

प्रचलाकः, पुं, (प्रकर्षेण चलतीति । प्र + चल + आकन् ।) शराघातः । शिखण्डः । भुजङ्गमः । इति मेदिनी । के, १९६ ॥

प्रचलाकी, [न्] पुं, (प्रचलाकः शिखण्डोऽस्यास्तीति । प्रचलाक + इनिः ।) मयूरः । इति मेदिनी ॥ (यथा, उत्तररामचरिते । २ अङ्के ।
“कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्-
कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः
कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥”)

प्रचलायितं, त्रि, (प्रचल इवाचरतीति । “कर्त्तुः क्यङ् सलोपश्च ।” ३ । १ । ११ । इति क्यङ् । प्रचलाय-नामधातोः कर्त्तरि क्तः ।) निद्राविना घूर्णितम् । इत्यमरः । ३ । १ । ३२ ॥

प्रचारः, पु, (प्रचरणमिति । प्र + चर + भावे घञ् ।) प्रचरणम् । व्यक्तः । प्रकाशः । यथा,
“दमनकतरुशाखालम्बिकौलङ्गयुग्मं
तुहिनकिरणबिम्बे खञ्जरीटप्रचारः ॥”
इति शङ्कराचार्य्यः ॥
(प्रचरन्त्यस्मिन्निति । प्र + चर + आधारे घञ् । गवादेश्चरणस्थानम् । यथा, महाभारते । १ । ४० । १८ ।
“परिश्रान्तः पिपासार्त्त आससाद मुनिं वने ।
गवां प्रचारेष्वासीनं वत्सानां मुखनिःसृतम् ॥”)
...

प्रचुरं, त्रि, (प्रचोरतीति । प्र + चुर + “इगुपधज्ञाप्रीकिरः कः ।” ३ । १ । १३५ । इति कः । यद्वा, प्रगतचुराया इति प्रादिसमासः ।) अनेकम् । तत्पर्य्यायः । प्रभूतम् २ प्राज्यम् ३ अदभ्रम् ४ बहुलम् ५ बहु ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ६३ ॥ (यथा, भागवते । ५ । १३ । २१ ।

"अहो गुणज्ञानिखिलजगत्प्रशोभनं
किं जन्मभिश्चपरैरयुपहृतिम्।
न यत् कृष्णीकेश्यत्र:कृतात्मनां
महात्मनां वः प्रचुरः समागमः॥")

प्रचुरपुरुषः, पुं, (प्रचोरतीति। प्र+चुर कि स्तेये +कः। प्रचुरश्चासौ पुरुषश्चेति।) चौरः। इति त्रिकाण्डशेषः॥ (प्रचुरो बहुलः पुरुषश्चेति कर्म्मधारये।) बहुनरश्च॥

प्रचेतकी, स्त्री, (प्रचेतयति मूर्च्छितमिति। प्र+चित्+णिच्+अच्। गौरादित्वात् ङीष्।) कट्फलः। इति राजनिर्घण्टः॥ प्रचेतसः कन्या च॥

प्रचेता, [ऌ] पुं, (प्रचेतति युद्धादिस्थाने वीरान् सज्जिनोतीति। प्र+चित्+तृच्।) सारथिः। इति हेमचन्द्रः॥

प्रचेताः, [स्] पुं, (प्रचेततीति। प्र+चित+असुन्।) वरुणः। इत्यमरः।१।१।६४॥ (यथा, रघौ।१।८०।
"हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति॥"
मुनिविशेषः। (यथा, मनौ।१।३५।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च॥"
प्रकृष्टं चेतोऽस्य।) प्रकृष्टहृदि, त्रि। इति मेदिनी॥ प्राचीनवर्हिराजपुत्रः। यथा,—
"प्राचीनवर्हिर्भगवान् सर्व्वशस्त्रभृतांवरः।
समुद्रतनयायां वै दश पुत्त्रानजीजनत्॥
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः॥"
इति कौर्म्मे १२ अध्यायः॥
अपि च।
"प्राचीनवर्हिस्तत्पुत्त्रः पृथिव्यामेकराड्बभौ।
उपयेमे समुद्रस्य लवणस्य स वै सुताम्॥
तस्मात् सुषाव सामुद्री दश प्राचीनवर्हिषः।
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः॥
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः।
दश वर्षसहस्राणि समुद्रसलिले शयाः॥
प्रजापतित्वं संप्राप्य भार्य्या तेषाञ्च मारिषा।
अभवद्भवशापेन तस्यां दक्षोऽभवत् ततः॥"
इति गारुडे ६ अध्यायः॥
(प्रकृष्टज्ञानयुक्ते, त्रि। यथा, ऋग्वेदे।२।२३।२।
"देवाश्चित् ते असुर्य्यप्रचेतसो वृहस्पते यज्ञियं भागमानशुः॥"
"हे वृहस्पते। प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चिद् देवा अपि।" इति तद्भाष्ये सायनः॥)

प्रचेलं, क्ली, (प्रचेलतीति। प्र+चेल्+अच्।) पीतकाष्ठम्। इति शब्दचन्द्रिका॥

प्रचेलकः, पुं, (प्रकर्षेण चेलति गच्छतीति। प्र+चेल+ण्वुल्।) घोटकः। इति शब्दमाला॥

प्रचोदनी, स्त्री, (प्रचोदयते रोगो यथेति। प्र+चुद्+णिच्+ल्युट्। ङीप्।) कण्टकारी। इत्यमरः।२।४।९४॥

प्रचोदितः, त्रि, (प्र+चुद्+क्तः।) प्रेरितः। यथा,—
"प्रचोदिता येन पुरा सरस्वती।"
इति श्रीभागवते २ स्कन्धे ४ अध्यायः॥

प्रच्छ, औ ग्न ज्ञीप्से। इति कविकल्पद्रुमः॥ (तुदां०-परं०-द्विकं०-अनिट्।) ज्ञीप्सा ज्ञातुमिच्छा। ग्न क्व इत्यस्यैव ग्रानपत्ते निष्पाद्नात्। औ, अप्राक्षीत्। ग्न, पृच्छति वार्त्तां गुरुं शिष्यः। इति दुर्गादासः॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति। प्र+छद+णिच्+करणे घः। "छादेर्घेऽद्व्युपसर्गस्य।" ६।४।९६। इति उपधाया ह्रस्वः।) आच्छादनम्। इति शब्दरत्नावली॥ (यथा, रघुः।१९।२२।
"प्रच्छदान्तगलिताश्रुबिन्दुभिः
क्रोधभिन्नवलयैर्व्विवर्त्तनैः॥")

प्रच्छदपटः, पुं, प्रकर्षेण छाद्यतेऽनेन स चासौ पटश्चेति। आच्छादनपटः। पाछुडि इति ख्यातः। तत्पर्य्यायः। निचोलः २। इत्यमरः।२।६।११६॥ निचुलः ३। इति याड़िः॥ निचोलम् ४। इति रभसः॥ निचोली ५। इति राजदेवः॥ इत्यमरटीकायां भरतः॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे।
"स्तनीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्व्वावस्थं कथयति रतं प्रच्छदपटः॥")

प्रच्छना, स्त्री, (प्रच्छ+बाहुलकात् युच्। टाप्।) आमन्त्रणा। इति जटाधरः॥

प्रच्छन्नं, क्ली, (प्र+छद्+क्तः।) अन्तर्द्वारम्। इत्यमरः।२।२।१४॥ आच्छन्ने, त्रि॥ (यथा, महाभारते।३।७१।३१।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्॥")

प्रच्छर्द्दिका, स्त्री, (प्र+छर्द्द वमने+"रोगाख्यायां ण्वुल् बहुलम्।" ३।३।१०८। इति ण्वुल्। स्त्रियां टापि अत इत्वम्।) वमिः। इत्यमरः।२।६।५५॥ (वमनकारके, त्रि॥)

प्रच्छादनं, क्ली, (प्रच्छाद्यतेऽनेनेति। प्र+छद्+णिच्+ल्युट्।) उत्तरीयवस्त्रम्। तत्पर्य्यायः। प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४। इति हेमचन्द्रः।३।३३५॥ (नेत्रच्छदम्। यथा, अष्टाङ्गहृदये।२।१०।
"प्रच्छादनं भवेद्वर्त्म वाचिकूटमतः परम्॥"
"वर्त्म नेत्रच्छदं प्रच्छादनं प्रच्छादनापरनामकं भवेत्। वर्त्म नेत्रच्छदेऽस्त्रीत्यमरः॥" इति तट्टीका॥ भावे ल्युट्। गोपनम्। यथा, महाभारते।१।१६१।१७।
"आत्मप्रच्छादनार्थं वै बाहुवीर्य्यमुपाश्रितः।
विप्ररूपं विधायेदं मन्ये मां प्रति युध्यसे॥")

प्रच्छादितं, त्रि, (प्र+छद+णिच्+क्तः।) आच्छादितम्। इति हलायुधः॥

प्रजः, पुं, (प्रजायते जायागर्भे इति। प्र+जन्+डः।) पतिः। "जायायां प्रविश्य पुनर्जायते इति से प्रजः पतिः।" इति प्रजावतीशब्दटीकायां भरतः॥

प्रजनः, पुं, (प्रजायतेऽनेनेति। प्र+जन्+करणे घञ्। "जनिवध्योश्च।" ७।३।३५। इति न वृद्धिः।) उपसरः। इत्यमरः।२।९।३५॥ वे स्त्रीगवादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगः। प्रजनं स्त्रीवमिति केचित्॥ पशूनां गर्भग्रहणकालः। इति स्वामी॥ गवां प्रथमगर्भग्रहणाभियोगः। इति सुभूतिः॥ स्त्रीगवीषु पुङ्गवानां प्रथमगमनमिति सर्व्वम्॥ किन्तु वीगोसुपसरं इत्युक्ते भट्टिः। इत्यमरटीकायां भरतः॥ (मैथुनसाधनोपस्थेन्द्रियम्। यथा, मनुः।१२।१२१।
"वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्॥"
प्र+जन्+भावे घञ्। पुत्त्रोत्पादनम्। यथा, मनुः।९।१२१।
"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भजेत्॥"
जनयितरि, त्रि। यथा, भागवते।८।५।३४।
"ईशो नगानां प्रजनः प्रजानां
प्रसीदतां नः स महाविभूतिः॥"
तथा, भगवद्गीतायाम्।१०।२८।
"प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥")

प्रजननं, क्ली, (प्रजायतेऽनेनेति। प्र+जन्+ल्युट्।) योनिः। (यथा, सुश्रुते।१।२३।
"शिश्नकपायुप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोषोदरजत्रुमुखाभ्यन्तरसंस्थाः सुखरोपणीया व्रणाः॥" प्र+जन्+भावे ल्युट्।) जन्म। इति मेदिनी। ने, १६१॥ (यथा, राजतरङ्गिण्याम्।२।६१।
"वेधाः परां धुरसपैति परीक्षकाणामिष्टोः फलप्रजननेन कृतश्रमो यः॥"
धात्रीकर्म्म। यथा, सुश्रुते शारीरस्थाने।१० अध्याये। "ततः कृतोपधाने मृदुविस्तीर्णे शयने स्थितामाभुग्नसक्थीमुत्तानामसङ्गिनीयाश्चतस्रः स्त्रियः परिणतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति॥") प्रगमः। इति त्रिकः॥ (यथा, महाभारते।१।१२०।३७।
"तस्मात् प्रधेयाम्बद्य त्वां क्षीनः प्रजननात् स्वयम्।
सदृशात् श्रेयसो वा त्वं विद्ध्यपत्यं यशस्विनि॥"
प्रजनयतीति। प्र+जन+णुः। पुत्त्रोत्पादके, त्रि। यथा, वाजसनेयसंहितायाम्।१९।४८।
"इदं हविः प्रजननं मेऽस्तु॥")

प्रजनिका, स्त्री, (प्रजनयतीति। प्र+जन+णिच्+ण्वुल्। टापि अत इत्वम्।) माता। इति जटाधरः॥

प्रजल्पः, पुं, (प्र+जल्प+भावे घञ्।) वाक्यविशेषः। यथा,—
"असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया।
प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते॥"
इत्युज्ज्वलनीलमणिः॥

(बहुभाषणम् । यथा, हठयोगप्रदीपिकायाम् । १ । १५ ।

"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥")

प्रजवः, पुं, (प्रजवनमिति । प्र + जु वेगगतौ + "ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) प्रकृष्टवेगः । प्रपूर्ब्बजुधातोर्भावेऽल्प्रत्ययनिष्पन्नः ॥ (यथा, ऋग्वेदे । ७ । ३३ । ८ ।

"वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥")

प्रजवी, त्रि, (प्रजवतीति । प्र + जु वेगगतौ + "प्रजोरिनिः ।" ३ । २ । १५६ । इति इनिः ।) प्रकृष्टवेगयुक्तः । इत्यमरः । २ । ८ । ७३ ॥

प्रजा, स्त्री, (प्रजायते इति । प्र + जन् + "उपसर्गे च संज्ञायाम् ।" ३ । २ । ९९ । इति डः ।) सन्ततिः । पितृमातृगुणदोषैश्च प्रजा विभिन्ना भवति । यथा, अग्निपुराणे ।

"मातृणां शीलदोषेण पितृशीलगुणेन च ।
विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवशीलिनाम् ॥"

जनः । इत्यमरः । ३ । ३ । ३२ ॥ (यथा, रघुः । १ । २४ ।

"प्रजानां विनयाधानात् रक्षणात् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥"

उत्पत्तिः । यथा, ऋग्वेदे । १० । ७२ । ९ ।

"प्रजायै मृत्यवे त्वत्पुनर्मार्त्ताण्डमाभरत् ॥")

प्रजागरः, पुं (प्र + जागृ + "ऋदोरप् ।" ३।३।५७। इति भावे अप् ।) प्रकर्षेण जागरणम् । इति हलायुधः ॥ यथा, अग्निपुराणे ।

"देवतानां पितॄणाञ्च घोरं कृत्वा प्रजागरम् ।
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य सगणः क्षयमीयिवान् ॥"

(विष्णुः । यथा, महाभारते ।१३ । १४९ ।११५।

"आधारनिलयो धाता पुष्पहासः प्रजागरः ॥"

"नित्यबुद्धस्वरूपत्वात् प्रजागरः ।" इति तद्भाष्यम् ॥ प्राणः । यथा, भागवते । ४ । २७ । १५ ।

"ते चण्डवेगानुचराः पुरञ्जनपुरं यदा ।
हर्त्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः ॥"

"प्रजागरः प्राणः ।" इति तट्टीकायां स्वामी ॥)

प्रजाता, स्त्री, (प्रजातं प्रजननं सुतादीनामुत्पत्तिरित्यर्थः । तदस्या अस्तीति । अच् । ततष्टाप् ।) जातापत्या । प्रसूता । इत्यमरः । २ । ६ । १६ ॥ (यथा, सुश्रुते निदानस्थाने ९ अध्याये ।

"क्षीणामपप्रजातानां प्रजातानां तथाहितैः ।
दाहज्वरकरो घोरो जायते रक्तविद्रधिः ॥"

"ततोऽनन्तरं बलवत्तरमिति तस्याञ्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाता प्रजाता धन्यं धन्यं पुत्त्रमिति तथास्या हर्षेणाप्यायन्ते प्राणाः । यदा च प्रजाता स्यात् तदैनामवेक्षेत काचिदस्या अमरा प्रपन्ना वाप्रपन्ना वेति ।" इति चरके शारीरस्थाने ऽष्टमेऽध्याये ॥

अश्वविशेषे, पुं । यथा, कात्यायनश्रौतसूत्रे । २० । ३ । २० ।

"प्रजाते वायव्यम् ।" "वडवायां क्षतरेतःस्कन्दनः प्रजात इत्युच्यते ॥" इति तद्भाष्यम् ॥)

प्रजादा, स्त्री, (प्रजां गर्भदोषनिवारणेन सन्ततिं ददातीति । दा + कः । टाप् ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥ प्रजादातरि, त्रि ॥

प्रजादानं, क्ली, (प्रजातो जन्मतो दानं शुद्धिरस्य ।) रजतम् । इति शब्दचन्द्रिका ॥ (प्रजाया दाने आदाने अदाने च ॥)

प्रजानन्ती, स्त्री, (प्रजानातीति । प्र + ज्ञा + शतृ + ङीप् ।) पण्डिता । प्राज्ञी । इति हेमचन्द्रः । ३ । १८६ ॥ (विशेषवेत्तरि, त्रि । यथा, रामायणे । २ । ७२ । १४ ।

"तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता ॥")

प्रजापः, पुं, (प्रजाः पातीति । पा रक्षणे + कः ।) राजा । इति हेमचन्द्रः । ३ । ३५४ ॥

प्रजापतिः, पुं, (प्रजानां पतिः ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, महाभारते । १ । १ । ३२ ।

"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्म्मनुः कः परमेष्ठ्यथ ॥")

दक्षादिः । (यथा,—

"द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम् ।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः ॥
तपोविघ्नं शमीकर्त्तुं तपोविघ्नं महात्मनाम् ।
पश्यन् समर्थश्चापि चाचक्रे दक्षः प्रजापतिः ॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षप्रजापतिः ।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि ॥"

इति चरके चिकित्सास्थाने तृतीयेऽध्याये ॥)

महीपालः । इति मेदिनी । ते, २०८ ॥ (इन्द्रः । यथा, महाभारते । ३ । १८५ । १६ ।

"अयमेव विधाता हि तथैवेन्द्रः प्रजापतिः ॥")

जामाता । दिवाकरः । वह्निः । त्वष्टा । इति हेमचन्द्रः ॥ (यथा वाजसनेयसंहितायाम् ।१२।६१।

"तां विश्वैर्देवैरृतुभिः संविदानः
प्रजापतिर्विश्वकर्म्मा विमुञ्चतु ॥"

मनुः । यथा, मनौ । १० । ७८ ।

"न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजापतिः ॥")

दश प्रजापतयो यथा, आह्निकतत्त्वे ।

"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ।
देवान् सर्व्वानृषीन् सर्व्वांस्तर्पयेदक्षतोदकैः ॥"

एकविंशतिप्रजापतयो यथा,—

"ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्म्मस्तथा यमः ।
मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः ॥
वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च ।
कर्द्दमश्चापि यः प्रोक्तः क्रोधोऽर्व्वाक् क्रीत एव च ॥
एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः ॥"

इति महाभारते मोक्षधर्म्मः ॥ * ॥

पिता । यथा,—

"जनको जन्मदानाच्च रक्षणाच्च पिता नृणाम् ।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥ * ॥ स्वनामख्यातकीटविशेषश्च ॥

प्रजावती, स्त्री, (प्रजाऽस्त्यस्या इति । प्रजा + मतुप् । मस्य वः । स्त्रियां ङीप् ।) भ्रातृजाया । इत्यमरः ।२ । ६ । ३० ॥ ज्येष्ठभ्रातृपत्नी । इति केचित । इति भरतः ॥ (यथा, रघुः ।१४।४५ ।

"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां
प्रापय्य वाल्मीकिपदं त्यजैनाम् ॥"

प्रियव्रतपत्नी । यथा, मार्कण्डेये । ५३ । १३ ।

"प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत ॥")

सन्तानविशिष्टा ॥ (यथा, मार्कण्डेये ।९७।१८।

"साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभिप्सामि धन्यां दिव्यां प्रजावतीम् ॥")

प्रजाहितं, क्ली, (प्रजायै हितम् ।) जलम् । इति शब्दमाला ॥ प्रजोपकारे, त्रि ॥

प्रजिनः, पुं (प्रकर्षेण जयतीति । प्र + जि + बाहुलकात् नक् ।) वायुः । इति शब्दमाला ॥

प्रजेश्वरः, पुं, (प्रजानामीश्वरः ।) राजा । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ३ । ६८ ।

"तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः ॥")

प्रज्ञः, त्रि, (प्रकर्षेण जानातीति । प्र + ज्ञा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) पण्डितः । इति प्राज्ञशब्दटीकायां भरतः ॥ (यथा, माण्डूक्योपनिषदि । ७ ।

"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् ॥") प्रगतजानुकः । इति प्रज्ञुशब्दटीकायां भरतः धरणिश्च ॥

प्रज्ञप्तिः, स्त्री, (प्र + ज्ञा + णिच् + क्तिन् ।) सङ्केतम् । इति त्रिकाण्डशेषः ॥ (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम् ।

"विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्य्यते ।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा ॥"

ज्ञानम् । ज्ञापनम् । यथा, भागवते ।३ । २५।१।

"कपिलस्तत्त्वसंख्याता भगवानात्ममायया ।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥"

जिनविद्यादेवीविशेषः । इति हेमचन्द्रः । २ । १५३ ॥)

प्रज्ञप्ती, स्त्री, (प्रज्ञप्ति + वा ङीष् ।) जिनविद्यादेवीविशेषः । इति हेमचन्द्रः । २ । १५३ ॥

प्रज्ञा, स्त्री, (प्र + ज्ञा + कः । टाप् ।) बुद्धिः । (यथा, रघुः । १ । १५ ।

"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ॥"

एकाग्रता । यथा, पञ्चदश्याम् । ७ । १०६ ।

"तमेव धीरो विज्ञाय प्रज्ञां कुर्व्वीत ब्राह्मणः ॥")

प्राज्ञी । प्रकर्षेण जानाति या । इत्यमरः ॥

सरस्वती। इति शब्दरत्नावली ॥ बुद्धिवैदिक-पर्य्यायः। केतुः १ केतः २ चेतः ३ चित्तम् ४ क्रतुः ५ असुः ६ धीः ७ शची: ८ माया ९ वयुनम् १० अभिख्या ११। इत्येकादश प्रज्ञा-नामानि। इति वेदनिघण्टौ ३ अध्यायः ॥

प्रज्ञाकायः, पुं, (प्रज्ञा काय इवास्य।) मञ्जुघोषः। इति त्रिकाण्डशेषः ॥

प्रज्ञाचक्षुः, पुं, (प्रज्ञा एव चक्षुर्य्यस्य।) धृत-राष्ट्रः। इति शब्दरत्नावली ॥ (यथा, महा-भारते। १। १। १४७।

"श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः।
ततो गाल्गवि मां सौते प्रज्ञाचक्षुरभित्युत ॥")

प्रज्ञानं, क्ली, (प्रज्ञायतेऽनेनेति। प्र + ज्ञा + ल्युट्।) बुद्धिः। (यथा, महाभारते। ३। १८५। १६।
"त्वमेव सृजसे मोहात् न प्रज्ञानं तवास्ति ह ॥")
चिह्नम्। इत्यमरः। ३।३।११२॥ (यथा, महा-भारते। ५। ३३। २६।

"नासं पृष्टो ह्युपयुङ्क्ते परार्थे
तत् प्रज्ञानं प्रथमं पण्डितस्य ॥"

चैतन्यम्। तल्लक्षणं यथा, पञ्चतन्त्रे। ५। १।
"येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च।
स्वाद्वस्वादू विजानाति तत् प्रज्ञानमुदीरितम् ॥")
पण्डिते, त्रि। इति भरतद्विरूपकोषः ॥

प्रज्ञी, [न्] त्रि, (प्रज्ञाऽस्त्यस्येति। प्रज्ञा + इनिः।) पण्डितः। इति भरतद्विरूपकोषः ॥

प्रज्ञुः, पुं, (प्रगते जानुनी यस्य। "प्रसम्भ्यां जानु-नोर्ज्ञुः।" ५। ४। १२९। इति ज्ञुः।) प्रगत-जानुकः। इत्यमरः। २। ६। ४७॥ यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्तरालं तस्मिन् द्वयम्। इति भरतः ॥

प्रज्वलितः, त्रि, (प्र + ज्वल + क्तः।) प्रकृष्टज्वलन-विशिष्टः। यथा,—
"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णममलं समिद्धं सर्व्वतोमुखम् ॥"
इति भवदेवभट्टः ॥

प्रडीनं, क्ली, (प्र + डी नभोगतौ + क्तः।) पक्षिणां गतिविशेषः। इत्यमरः। २। ५। ३७॥ प्रथम-डीनं प्रडीनं उड्डयनाद्युक्रमबन्धः। तिर्य्यग्-गमनम्। इत्यन्ये। इति भरतः ॥

प्रणः, पुं, (प्र + "नश्च पुराणे प्रात्।" ५। ४। ५ इत्यस्य वार्त्ति० इति नः।) पुराणः। "पुरा-णार्थे वर्त्तमानात् प्रशब्दात् नो वक्तव्यः।" इति सिद्धान्तकौमुदी ॥

प्रणतः, त्रि, (प्र + णम + क्तः।) प्रकर्षेण नतः। प्रणतिविशिष्टः। यथा,—

"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष। ते चरणारविन्दम् ॥"
इति श्रीभागवतम् ॥

प्रणतिः, स्त्री, (प्रकृष्टं नमनमिति। प्र + णम + भावे क्तिन्।) प्रणामः। तत्पर्य्यायः। प्रणि-पातः २ अनुनयः ३। इति हेमचन्द्रः ॥ (यथा, रघौ। ११। ८९।

"राघवोऽपि चरणौ तपोनिधेः
क्षम्यतामिति वदन् समस्पृशत्।
निर्ज्जितेषु तरसा तरस्विनां
शत्रुषु प्रणतिरेव कीर्त्तये ॥")

प्रणयः, पुं, (प्रणयनम्। प्र + णी + "एरच्।" ३। ३। ५६। इति अच्।) प्रीत्या प्रार्थनम्। तत्पर्य्यायः। प्रश्रयः २। इत्यमरः। ३।२।२५॥ प्रसरः ३। इति भरतः ॥ (यथा, रघौ।२।५८।

"सम्बन्धमाभाषणपूर्व्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते।
तद्भूतनाथानुग! नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम् ॥")

प्रेम। (यथा, भगवद्गीतायाम्। ११। ४१।

"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि ॥")

याच्ञा। विश्रम्भः। निर्व्वाणः। इति मेदिनी। ये, ८९ ॥

प्रणयी, पुं, (प्रणयोऽस्यास्तीति। प्रणय + इनिः।) स्वामी। इति हेमचन्द्रः ॥ प्रणययुक्ते, त्रि। (यथा,—
"प्रणयिनि निजनाथे लज्जया मौनभावा
प्रति किमिह नवोढ़ा रौति विर्व्वोकयाक ॥"
इत्युद्भटः ॥)

प्रणयिनी, स्त्री, (प्रणयिन् + ङीप्।) भार्य्या। इति हेमचन्द्रः ॥

प्रणवः, पुं, (प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्ट-देवता वानेनेति। प्र + णुञ स्तुतौ + "ऋदो-रप्।" ३। ३। ५७। इति अप्। "उपसर्गा-दसमासेऽपि णोपदेशस्य।" ८। ४। १४। इति णत्वम्। यद्वा, ब्रह्मविष्णुमहेशरूपत्वात् प्रण-म्यते इति। प्र + णम + कर्म्मणि घञ्। संज्ञा-पूर्व्वकत्वात् वृद्ध्यभावः। पृषोदरादित्वात् मस्य वः।) ॐकारः। इत्यमरः। १। ६। ४॥ तस्य पर्य्यायो यथा,—

"ॐकारः प्रणवस्तारो वेदादिर्व्वर्त्तुलो ध्रुवः।
त्रैगुण्यं त्रिगुणो ब्रह्म सत्यो मन्त्रादिरव्ययः ॥
ब्रह्मबीजं त्रितत्त्वञ्च पञ्चरश्मिस्त्रिदैवतः ॥"
इति बीजवर्णाभिधानम् ॥

अपि च।
"ॐकारो वर्त्तुलस्तारो वामश्च हंसकारणम्।
मन्त्राद्यः प्रणवः सत्यं बिन्दुशक्तिस्त्रिदैवतम् ॥
सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम्।
पञ्चरश्मिस्त्रिकूटे च त्रिभवे भवनाशनः ॥
गायत्री बीजपञ्चांशौ मन्त्रविद्याप्रसूः प्रभुः।
अक्षरं मातृकासूश्चानादिदैवतमोक्षदौ ॥"
इति तन्त्रम् ॥ * ॥

(यथा, महानिर्व्वाणतन्त्रे। ३। ३२।
"अकारेण जगत्पाता संहर्त्ता स्यादुकारतः।
मकारेण जगत्स्रष्टा प्रणवार्थ उदाहृतः ॥"
यथा च।
"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः ॥"
वेदस्याध्ययनारम्भे अध्ययनसमाप्तौ च ब्राह्म-णस्य ॐकारोच्चारकर्त्तव्यत्वमुक्तं यथा मनौ। २। ७४।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा।
स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यति ॥")
अस्योद्धारक्रमो यथा,—
"एकमेवाद्वयं ब्रह्म मायया तु चतुष्टयम्।
रौहिणीतनयो रामः अकाराक्षरसम्भवः ॥
तैजसात्मकप्रद्युम्न उकाराक्षरसम्भवः।
प्राज्ञात्मको निरुद्धो वै मकाराक्षरसम्भवः।
अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठि-तम् ॥"
इति गोपालतापनीयोपनिषत् ॥ * ॥

स च माङ्गलिकः। यथा,—
"ॐकारश्चाथ शब्दश्च द्वावेतौ ब्राह्मणः पुरा।
कण्ठं भित्त्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥ * ॥

अस्य माहात्म्यं यथा,—
"विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनम्।
यत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत् ॥
तदेवाध्ययनं तस्य स्वरूपं शृणुतः परम्।
अकारश्च तथोकारो मकारश्चाक्षरत्रयम् ॥
एतास्तिस्रः स्मृता मात्राः सात्त्वराजसतामसाः।
निर्गुणा योगिगम्यान्या अर्द्धमात्रा तु सा स्मृता ॥
गान्धारीति च विज्ञेया गान्धारस्वरसंश्रया।
पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्द्ध्नि लक्ष्यते ॥
यदा प्रयुक्त ॐकारः प्रतिनिर्य्याति मूर्द्धनि।
तदोङ्कारमयो योगी अक्षरे त्वक्षरो भवेत् ॥
प्राणो धनुः शरश्चात्मा ब्रह्म वेध्यमुदाहृतम्।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥
ओमित्येते त्रयो देवास्त्रयो लोकास्त्रयोऽग्नयः।
विष्णुक्रमास्त्रयश्चैव ऋक्सामानि यजूंषि च ॥
मात्राश्चार्द्धश्चतस्रस्तु विज्ञेयाः परमार्थतः।
तत्र युक्तश्च यो योगी स तल्लयमवाप्नुयात् ॥
अकारस्त्वथ भूर्लोक उकारश्चोच्यते भुवः।
सव्यञ्जनो मकारश्च स्वर्लोकः परिकल्प्यते ॥
व्यक्ता तु प्रथमा मात्रा द्वितीयाव्यक्तसंज्ञिका।
मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदम् ॥
अनेनैव क्रमेणैता विज्ञेया योगभूमयः।
ओमित्युच्चारणात् सर्व्वं गृहीतं सदसद्भवेत् ॥
ह्रस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंयुता।
तृतीया तु प्लुतार्द्धाख्या वचसः सा नगोचरे ॥
इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितम्।
यस्तं वेद नरः सम्यक् तथा ध्यायति वा पुनः ॥
संसारचक्रमुत्सृज्य त्यक्तत्रिविधबन्धनः।
प्राप्नोति ब्रह्मनिलयं परमं परमात्मनि ॥

अधीतकर्म्मैवमस्तु ज्ञात्वा मृत्युमुपस्थितम् ।
उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति ॥
तस्मादसिद्धयोगेन सिद्धयोगेन वा पुनः ।
ज्ञेयान्यरिष्टानि सदा येनोत्क्रान्तौ न सीदति ॥”

इति श्रीमार्कण्डेयपुराणे ॐकारमाहात्म्यम् ॥ * ॥

“यन्न्यूनञ्चातिरिक्तञ्च यच्छिद्रं यदयज्ञियम् ।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत् ।
तदोङ्कारप्रयुक्तेन सर्व्वञ्चाविकलं भवेत् ॥”

इति तिथ्यादितत्त्वम् ॥ * ॥

“ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥”

इति श्रीभगवद्गीतायाम् । ८ । १३ ॥

प्रणादः, पुं, (प्रणदनमिति । प्र+णद+घञ् ।) अनुरागजशब्दः । इत्यमरः । १ । ६ । ११ ॥ “प्रीतिजनितो सुखकण्ठादिशब्दः । प्रीतिजं प्रीत्युत्थम् । ‘अनुरागजाते शब्दे प्रणादः प्रीत्युक्तं तृणाम् ।’ इति शब्दार्णवः ॥ गुणानुरक्तलोकप्रभवः शब्दः । इति मधुमाधवः । अनुरागजन्मा जनशब्दः । इति कलिङ्गः ।” इत्यमरटीकायां भरतः ॥ नादशब्दः । (यथा, रामायणे । २ । १८ । २ ।
“तेन तत्र प्रणादेन दुःखितः स महीपतिः ।
चिच्छेद जीविते श्रद्धां धर्म्मे यशसि चात्मनः ॥”)
श्रवणामयः । इति मेदिनी । दे, ३६ ॥ शेषस्य नामान्तरं कर्णनादः । यथा,—
“कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान् ।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते ॥”

इति माधवकरः ॥

प्रणामः, पुं, (प्र+णम+भावे घञ् ।) प्रणतिः प्रणिपातः । भक्तिश्रद्धातिशययुक्तनमस्कारः । स तु स्वापकर्षबोधकव्यापारविशेषः । इति मुग्धबोधटीकायां दुर्गादासः ॥ स चतुर्व्विधः । अभिवादनम् १ अष्टाङ्गः २ पञ्चाङ्गः ३ करशिरःसंयोगश्च ४ । प्रथमस्य लक्षणं तच्छब्दे द्रष्टव्यम् ॥ द्वितीयो यथा,—
“पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥”
तस्य फलम् ।
“भूमौ निपत्य यः कुर्य्यात् कृष्णेऽष्टाङ्गनतिं सुधीः
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात् ॥”
तृतीयो यथा,—
“बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥” * ॥
प्रकर्षेण नमनम् । तद्विधिर्यथा, कालिकापुराणे
“शिरोमत्पादयोः कृत्वा बाहुभ्याञ्च परस्परम्
प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥’
किञ्चागमे ।
“दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ ॥”

इति ॥ * ॥

“गत्वा दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः ।
अवशश्च प्रणामांस्त्रीन् शक्तश्चेदधिकाधिकान् ॥” * ॥
तथा च नारदपञ्चरात्रे ।
“सन्निं वीक्ष्य हरिं चार्चां गुरून् स्वगुरुमेव च ।
द्विचतुर्व्विंशदथवा चतुर्व्विंशत्तदर्द्धकम् ॥
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वदा नमेत् ॥” * ॥
विष्णुधर्म्मोत्तरे ।
“देवार्च्चादर्शनादेव प्रणमेन्मधुसूदनम् ।
स्थानापेक्षा न कर्त्तव्या दृष्ट्वार्च्चां द्विजसत्तमाः ॥
देवार्च्चादृष्टिपूतं हि शुचि सर्व्वं प्रकीर्त्तितम् ॥”* ॥
अथ नमस्कारमाहात्म्यम् । नारसिंहे ।
“नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥”
स्कान्दे ।
“दण्डप्रणामं कुरुते विष्णवे भक्तिभावतः ।
रेणुसङ्ख्यां वसेत् स्वर्गे मन्वन्तरशतं नरः ॥”
तत्रैव ब्रह्मनारदसंवादे ।
“प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥”
तत्रैव श्रीशिवोमासंवादे ।
“भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि ।
प्रणमेद्यो हि देवेशं सोऽश्वमेधफलं लभेत् ॥”
तत्रैवान्यत्र ।
“तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥
शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्वने ।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ॥
रेणुमण्डितगात्रस्य कणा देहे भवन्ति ये ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥”
विष्णुधर्म्मोत्तरे ।
“अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत् ।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी ॥
जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात् ॥’
विष्णुपुराणे ।
“अनादिनिधनं देवं दैत्यदानवदारणम् ।
ये नमन्ति नरा नित्यं न हि पश्यन्ति ते यमम् ॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः
नमन्ति न हि ते विष्णोः स्थानादन्यत्र गामिनः ॥’
नारदीये ।
“एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥”
हरिभक्तिसुधोदये ।
“विष्णोर्देवप्रणामार्थं भक्तेन पततां भुवि ।
पातितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह ॥”
स्कान्दे देवदूतविकुण्डलसंवादे ।
“तपस्तप्त्वा नरो घोरमरण्ये नियतेन्द्रियः ।
यत् फलं स समाप्नोति तन्नत्वा गरुडध्वजम् ॥
कृत्वापि बहुशः पापं नरो मोहसमन्वितः ।
न याति नरकं नत्वा सर्व्वपापहरं हरिम् ॥”
तत्रैव वेदनिधिस्तुतौ ।
“अपि पापं दुराचारं नरं त्वत्प्रणतं हरे ।
नेक्षन्ते किङ्करा याम्या उलूकास्तपनं यथा ॥”
विष्णुपुराणे श्रीयमस्य निजभटानुशासने ।
“हरिममरगणार्च्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः ।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम् ॥”
ब्रह्मवैवर्त्ते ।
“शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः ।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तान् सौ ॥”
अष्टमस्कन्धे च बलिवाक्ये ।
“अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः ।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपसदेऽसुरेऽर्पितः ॥”
अतएव नारायणव्यूहस्तवे ।
“अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम् ।
येषां हरिपदाब्जाग्रे शिरो न्यस्तं यथा तथा ॥”
किञ्च । नारसिंहे श्रीयमोक्तौ ।
“तस्य वै नारसिंहस्य विष्णोरमिततेजसः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥”
भविष्योत्तरे च जलधेनुप्रसङ्गे ।
“विष्णोर्देवजगद्धातुर्जनार्द्दनजगत्पतेः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥”

इत्यादि ॥ * ॥

अथ प्रणामनित्यता । बृहन्नारदीये लुब्धकोपाख्यानारम्भे ।
“सकृद्वा न नमेद्यस्तु विष्णवे शर्म्मकारिणे ।
शवोपमं विजानीयात् कदाचिदपि नालपेत् ॥”
किञ्च । पाद्मे वैशाखमाहात्म्ये यमब्राह्मणसंवादे ।
“पश्यन्तो भगवद्द्वारं नाम शङ्खपरिच्छदम् ।
अकृत्वा तत्प्रणामादि यान्ति ते नरकौकसः ॥”* ॥
अथ नमस्कारे निषिद्धानि । विष्णुस्मृतौ ।
“जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत् ।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात् ॥”
वाराहे ।
“वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि ! ॥”
किञ्चान्यत्र ।
“अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान्न कुर्य्यात् केशवालये ॥”

अपि च ।
"सद्भूमौ निपतितो न शक्तः प्रणमेन्मुहुः ।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
नतिविशेषस्तु यामले ।
"त्रिकोणाकारा सव्येन नतिः शक्तेः समीरिता ।
दक्षिणाद्वायवीं गत्वा दिशं तस्माच्च शाम्भवीम् ॥
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत् ॥"*॥
एकहस्तप्रणामनिषेधो यथा,—
"एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम् ।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुरातनम् ॥"
इति तन्त्रसारः ॥ * ॥
कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः ।
यथा, कालिकापुराणे ७० अध्याये ।
"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ॥
प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ।
जानुभ्यां क्षितिं संस्पृश्य शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ।
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ॥
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ॥
यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्वैदिकैर्वा मन्त्रैर्या क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥*
इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
मननं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ॥"*॥
शूद्रपूजितदेवताप्रणामनिषेधो यथा,—
"यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि ।
निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि ॥"
इति कर्म्मलोचनम् ॥

प्रणाय्यः, त्रि, (प्रणीयते इति । प्र + णी + ण्यत् । "प्रणाय्योऽसम्मतौ ।" ३ । १ । १२८ । इति साधुः ।) असम्मतः । (यथा, भट्टिः । ६ । ६६ ।
"न प्रणाय्यो जनः कश्चित् निकाय्यं तेऽधितिष्ठति ॥")
अभिलाषविवर्ज्जितः । इति मेदिनी । ये, ६३ ॥ साधुः । इति त्रिकाण्डशेषः ॥ प्रियः । इति मुग्धबोधव्याकरणम् ॥

प्रणालः, पुं, (प्रणल्यते जलादिभिःसार्य्यतेऽनेनेति । प्र + णल + घञ् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ पयनाला इति भाषा ॥

प्रणाली, स्त्री, (प्रणाल + गौरादित्वात् ङीष् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ पयनाला इति भाषा ॥ (यथा, रामायणे । २ । ६२ । १० ।
"तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौशल्या व्यसृजद्वाष्पं प्रणालीव नवोदकम् ॥")

प्रणिधानं, क्ली, (प्रणिधीयतेऽनेनेति । प्र + नि + धा + ल्युट् ।) प्रयत्नः । (यथा, महाभारते । ५ । १०३ । २१ ।
"प्रणिधानेन धैर्य्येण रूपेण वयसा च मे ।
मनःप्रविष्टो देवर्षे । गुणकेश्याः पतिर्व्वरः ॥")
समाधिः । (यथा, रघुः । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ॥")
प्रवेशनम् । इति मेदिनी । ने, १६३ ॥ (यथा, सुश्रुते शारीरस्थाने ८ अध्याये ।
"बहुशः स्नाता क्षीणशस्त्रप्रणिधानेनापविद्धा ॥")

प्रणिधिः, पुं, (प्रणिधीयते इति । प्र + नि + धा + किः ।) चरः । (यथा, देवीभागवते । ५।३।६ ।
"प्रणिधिं प्रेषयामास हयारिस्तु शचीपतिम् ॥")
प्रार्थनम् । इत्यमरः । ३ ।३ । ६६ ॥ अवधानम् । इति भरतः ॥ (बृहद्रथपुत्त्रः । यथा, महाभारते । ३ । २१६ । ६ ।
"बृहद्रथस्य प्रणिधिः काश्यपस्य बृहत्तरः ।
भानुरङ्गिरसो धीर । पुत्त्रो वर्च्चस्य सौरभः ॥")

प्रणिपातः, पुं, (प्र + नि + पत + घञ् ।) प्रणतिः । इति हेमचन्द्रः ॥ (यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्ब्बं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")

प्रणिहितं, त्रि, (प्र + नि + धा + क्तः ।) स्थापितम् । प्राप्तम् । समाहितम् । इति मेदिनी । ते, २०३ ॥ (मिलितम् । यथा, रामायणे । ४ । २५ । ३४ ।
"ततः प्रणिहिताः सर्व्वा वानर्य्योऽस्य वशानुगाः ।
चुक्रुशुर्व्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम् ॥")

प्रणीतं, त्रि, (प्र + णी + क्त ।) उपसम्पन्नम् । पाकेन रूपरसादिसम्पन्नव्यञ्जनादि । इत्यमरभरतौ । क्षिप्तम् । विहितम् । प्रवेशितम् । इति मेदिनी । ते, १२४ ॥ कृतम् । इति हेमचन्द्रः ॥

प्रणीतः, पुं, (प्रणीयते इति । प्र + णी + क्त ।) संस्कृतानलः । यज्ञे मन्त्रादिना संस्कृताग्निः । इत्यमरः । २ । ७ । २० ॥

प्रणीता, स्त्री, (प्रणीत + टाप् ।) यज्ञपात्रविशेषः । इति मेदिनी । ते, १२४ ॥

प्रणुतं, त्रि, (प्र + णु + क्त ।) स्तुतम् । इत्यमरः । ३ । १ । १०६ ॥

प्रणेयः, त्रि, (प्रकर्षेण नेतुं शक्यः । प्र + णी + "अचो यत् ।" ३ । १ । ६७ । इति यत् ।) वश्यः । इत्यमरः । ३ । १ । २५ ॥ (यथा, महाभारते । १२ । ५६ । ६० ।
"अक्षतप्रणेयो राजेति लोकांश्चैव वदन्युत ॥")

प्रततिः, स्त्री, (प्रतनोतीति । प्र + तन + क्तिच् ।) विस्तृतिः । वल्ली । इति मेदिनी । ते, १२६ ॥

प्रतती, स्त्री, (प्रतति + ङीष् ।) प्रतती । इत्यमरटीकायां भरतः ॥

प्रतनः, त्रि, (प्र + "नश्च पुराणे प्रात् ।" ५ । ४ । २५ । इत्यस्य वार्त्ति० इति चकारात् त्नु तुट् च ।) पुरातनः । इत्यमरः । ३ । १ । ७७ ॥

प्रतर्कणं, क्ली, (प्र + तर्क + भावे ल्युट् ।) वितर्कः । तत्पर्य्यायः । तर्कः २ वितर्कः ३ व्यूहः ४ वहः ५ ऊहः ६ वितर्कणम् ७ अध्याहारः ८ अध्याहरणम् ९ ऊहनम् १० । इति शब्दरत्नावली ॥

प्रतलं, क्ली, (प्रकृष्टं तलम् ।) पातालभेदः । इति मेदिनी । ले, १०६ ॥

प्रतलः, पुं, (प्रकृष्टं तलमस्य ।) विस्तृताङ्गुलिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८४ ॥

प्रतानः, पुं, विस्तृतः । प्रपूर्व्वतनधातोर्घञ्प्रत्ययनिष्पन्नः ॥ (तन्तुः । यथा, रघुः । २ । ८ ।
"लताप्रतानोद्ग्रथितैः स केशै-
रधिज्यधन्वा विचचार दावम् ॥")
वायुरोगविशेषः । तस्य संज्ञान्तरं अपतानकम् । यथा,—
"दृष्टिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति ।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ।
वायुना दारुणं प्राहुरेके तदपतानकम् ॥"
इति माधवकरः ॥

प्रतानिनी, स्त्री, (प्रतानो विस्तारोऽस्त्यस्या इति । प्रतान + इनिः ।) प्रतानवती । विस्तृतलतादिः । इत्यमरभरतौ ॥

प्रतापः, पुं, (प्र + तप् + घञ् ।) कोषदण्डजतेजः । कोषो धनं दण्डो दमः तद्धेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते सः । इति भरतः ॥ तत्पर्य्यायः । प्रभावः २ । इत्यमरः । २ । ८ । २० ॥ (यथा, मनुः । ६ । ३१० ।
"प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु ॥"
पौरुषम् । यथा, रामायणे । १ । १ । ११ ।
"समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ॥"
"प्रतापः स्तुतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान् । 'प्रतापौ पौरुषातपौ ।' इति कोषः ।" इति तट्टीकायां रामानुजः ॥) तापः । (यथा, रघुः । ४ । १२ ।
"यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")
तेजः । इति मेदिनी । पे,२० ॥ अर्कवृक्षः । इति राजनिर्घण्टः ॥ (युवराजस्य छत्रे, क्ली । यथा, भोजराजकृतयुक्तिकल्पतरौ ।
"नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु काञ्चनः ।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥")

प्रतापनं, क्ली, (प्र + तप + णिच् + भावे ल्युट् ।) पीडनम् । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । २६ ।
"काञ्चनं राजतं ताम्रं रैतिकं त्रपु सीसकम् ।
चिरस्थानाद्विलीयन्ते पित्ततेजःप्रतापनात् ॥")

प्रतापनः, पुं, (प्रतापयतीति । प्र + तप् + णिच् + ल्युः ।) नरकविशेषः । इति शब्दरत्नावली ॥ स च कुम्भीपाकः । इति श्रीभागवतम् ॥ (क्लेशदायके, त्रि । यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये ।
"रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रतापनः ॥")

प्रतापसः, पुं, (प्रतापं चक्षुस्तेजः स्यति नाशयतीति । षो + कः ।) शुक्लार्कवृक्षः । इत्यमरः । २ । ४ । ८१ ॥ (यथा, भावप्रकाशे ।
"श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।
श्वेतपुष्पो सदापुष्पः सबालार्कः प्रतापसः ॥"
प्रशस्तस्तापसश्च ॥)

प्रतारकः, त्रि, (प्रतारयतीति । प्र + तॄ + णिच् + ण्वुल् ।) वञ्चकः । धूर्त्तः । यथा । यो यस्य प्रतारकः स तस्याध्यापकः ॥ (यथा च ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याये ।
"शास्त्रज्ञोऽस्मीति वादी यो मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥")

प्रतारणं, क्ली, (प्र + तॄ + णिच् + भावे ल्युट् ।) प्रतारणा । तत्पर्य्यायः । वञ्चनम् २ व्यलीकम् ३ अभिसन्धानम् ४ । इति हेमचन्द्रः । ३ । ४३ ॥ (यथा, राजतरङ्गिण्याम् । १ । १५७ ।
"ह्रदे दामोदरीये यत्तस्यासीत् खलतं पुरम् ।
सेतुना तेन तन्नैच्छन् कर्त्तुं सोऽम्भःप्रतारणम् ॥")

प्रतारणा, स्त्री, (प्र + तॄ + णिच् + युच् । टाप् ।) वञ्चना । यथा,—
"यदीच्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा ।
उपास्यतां कलौ कल्पलता देवी प्रतारणा ॥"
इत्युद्भटः ॥

प्रतारितः, त्रि, (प्र + तॄ + णिच् + क्त ।) कृतप्रतारणः । तत्पर्य्यायः । वंसितः २ । इति त्रिकाण्डशेषः ॥

प्रति, व्य, (प्रथते इति । प्रथ विख्यातौ + बाहुलकात् डति ।) विंशत्युपसर्गान्तर्गतपञ्चदशोपसर्गः । चादिपठितत्वेनास्य निसंज्ञा कृता । अस्यार्थाः । प्रतिनिधिः । मुख्यसदृशः । यथा प्रद्युम्नः कृष्णात् प्रति ॥ वीप्सा । व्याप्तुमिच्छा । यथा वृक्षं वृक्षं प्रति सिञ्चति ॥ लक्षणम् । चिह्नम् । यथा वृक्षं प्रति विद्योतते विद्युत् ॥ इत्थम्भूताख्यानम् । कथञ्चित् प्रकारमापन्नं इत्थम्भूतं तस्याख्यानम् । यथा साधुर्विप्रो मातरं प्रति ॥ भागः । स्वीक्रियमाणोंऽशः । यथा हरं प्रति हलाहलम् ॥ प्रतिदानम् । गृहीतस्य प्रतिदानम् । यथा भक्तः प्रद्युम्नः शम्भोः । तिलेभ्यः प्रति माषान् यच्छति । तिलान् गृहीत्वा माषान् ददातीत्यर्थः ॥ स्तोकम् । अल्पम् । यथा । शाकप्रति सूपप्रति । क्षेपः । निश्चयः । इत्यमरभरतमेदिनीकाराः ॥ व्यावृत्तिः । प्रशस्तिः । विरोधः । समाधिः । इति मुग्धबोधटीकायां दुर्गादासः ॥ अभिमुखम् । स्वभावः । इति शब्दरत्नावली ॥

प्रतिकः, त्रि, कार्षापणेन क्रीतः । "कार्षापणाट्टिठन् वक्तव्यः प्रतिरादेशश्च वा ।" ५ । १ । २५ । इत्यस्य वार्त्तिकोक्त्या टिठन् । कार्षापणिकः । इति सिद्धान्तकौमुदी ॥

प्रतिकर्म्म, [न्] क्ली, (प्रत्यङ्गं प्रतिख्यातं वा कर्म्म । शाकपार्थिवादिवत् समासः ।) प्रसाधनम् । वेशः । इत्यमरः । २ । ६ । ९९ ॥ (यथा, माघे । ५ । २७ ।
"आस्तीर्णतल्परचितावसथः क्षणेन
वेश्याजनः कृतनवप्रतिकर्म्मकाम्यः ॥"
प्रतीकारः । यथा, महाभारते । ४ । ५६ । १८ ।
"उषिताः स्मो वने वासं प्रतिकर्म्मचिकीर्षवः ।
कोपं नार्हसि नः कर्त्तुं सदा समरदुर्ज्जय ! ॥"
अङ्गसंस्कारः । इति क्वचिदमरे । २ । ६ । १२१ ॥)

प्रतिकायः, पु, (प्रतिगतः कायो यत्र ।) शरव्यम् । प्रतिरूपकम् । इति जटाधरः ॥

प्रतिकारः, पुं, (प्रति + कृ + घञ् ।) प्रतीकारः । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ४० ।
"प्रतिकारविधानमायुषः
सति शेषे हि फलाय कल्पते ॥")

प्रतिकाशः, त्रि, (प्रति + काश + घञ् ।) प्रतीकाशः । इत्यमरटीकायां भानुदीक्षितः ॥

प्रतिकासः, त्रि, (प्रति + कास + घञ् ।) प्रतीकाशः । इत्यमरटीकायां रमानाथः ॥

प्रतिकूपः, पु, (प्रतिरूपः कूपः ।) परिखा । इति हारावली । १७४ ॥

प्रतिकूलं, त्रि, (प्रतीपं कूलादिति ।) अननुकूलम् । विपक्षः । तत्पर्य्यायः । प्रसव्यम् २ अपसव्यम् ३ अपष्ठु ४ । प्रतीपम् । इत्यमरः । ३ । १ । ८४ ॥ (यथा, मनुः । ९ । २७५ ।
"राज्ञः कोषापहर्त्तॄंश्च प्रतिकूलेषु च स्थितान् ।
घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान् ॥"

प्रतिकृतिः, स्त्री, (प्रकृष्टा कृतिः ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ प्रतिनिधिः । (यथा, रघुः । ८ । ९२ ।
"तेनाष्टौ परिगमिताः समाः कथञ्चित्
बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥"
प्रति + कृ + भावे क्तिन् ।) प्रतिकारः । इति मेदिनी । ते, २१० ॥ (यथा, हरिवंशे । २५७ । २३ ।
"शृणुध्वं देवताः सर्व्वाः शत्रुप्रतिकृतिं पराम् ।
अवध्या दानवाः सर्व्वे कृत शङ्करमव्ययम् ॥")

प्रतिकृष्टं, त्रि, (प्रति कृष्यते स्मेति । प्रति + कृष् + क्तः ।) गर्ह्यम् । द्विराकृष्ट्याकर्षितम् । इति मेदिनी । टे, ६४ ॥

प्रतिक्षणं, व्य, (क्षणं क्षणं प्रति ।) पौनःपुन्यम् । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । १० ।
"प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्व्वनिबद्धया तया
सरागमस्या रशनागुणास्पदम् ॥")

प्रतिक्षयः, पुं, (प्रतिक्षिणोति हिनस्ति विपक्षादीनिति । प्रति + क्षि + अच् ।) रक्षकः । इति शब्दरत्नावली ॥

प्रतिक्षिप्तः, त्रि, (प्रतिक्षिप्यते स्मेति । प्रति + क्षिप + क्तः ।) वारितः । प्रेषितः । इति मेदिनी । ते, २०५ ॥ अधिक्षिप्तः । इत्यमरः । ३ । १ । ४२ ॥ "द्वे कृताधिक्षेपे । स्पर्द्धया परगुणं प्रति दुर्व्वचनमधिक्षेपः अधिक्षिप्यते स्म अधिक्षिप्तः क्तः एवं प्रतिक्षिप्तः । कस्यचित् शौर्य्यादिकं प्रति स्पर्द्धमानेन दुर्व्वचनमधिक्षेपः स यस्य कृतः सोऽधिक्षिप्तः । इति मुकुटोऽपि । केचित्तु । द्वे प्रेषिते । आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते । इति शब्दार्णवः । इत्याहुः ।" इति भरतः ॥

प्रतिगतं, क्ली, (प्रतिमुखं गतं गमनम् ।) पक्षिगतिविशेषः । यथा,—
"गतागतप्रतिगतसम्पाताद्याश्च पक्षिणाम् ।
गतिभेदाः पक्षगृहं कुलायो नीड़मस्त्रियाम् ॥"
इति जटाधरः ॥
(प्रति + गम + कर्त्तरि क्तः । प्रतियातः, त्रि ॥)

प्रतिग्रहः, पुं, (प्रतिग्रहणमिति । प्रति + ग्रह + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति भावे अप् ।) स्वीकरणम् । सैन्यपृष्ठम् । (प्रतिगृह्णाति निष्ठीवनादिकमिति । प्रति + ग्रह + "विभाषा ग्रहः ।" ३ । १ । १४३ । इति पक्षे अच् ।) पतद्ग्रहः । (प्रतिगृह्यते इति । प्रति + ग्रह + अप ।) द्विजेभ्यो विधिवद्देयम् । सद्ग्रहः । ग्रहभेदः । इति मेदिनी । हे, ३१ ॥ * ॥ ब्राह्मणस्यार्थः प्रतिग्रहार्ज्जितः । यथा —
"प्रतिग्रहार्जिता विप्रे क्षत्रिये शस्त्रनिर्जिताः ।
वैश्ये न्यायार्जिताश्चार्थाः शूद्रे शुश्रूषयार्जिताः ॥"
अयाचितप्रतिग्रहे दोषाभावो यथा,—
"अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे ।
अमृतं तं विदुर्देवास्तस्मात्तन्नैव निर्णुदेत ॥ * ॥
गुरुभृत्यांश्चोज्जिहीर्षुरर्चिष्यन् देवतातिथीन् ।
सर्व्वतः प्रतिगृह्णीयान्न तु तृप्येत् स्वयं ततः ॥
साधुतः प्रतिगृह्णीयादथवासाधुतो द्विजः ।
गुणवानल्पदोषस्तु निर्गुणो हि निमज्जति ॥
एवं तस्करवृत्त्या वा कृत्वा भरणमात्मनः ।
कुर्य्याद्विशुद्धिं परतः प्रायश्चित्तं द्विजोत्तमः ।"
इति गारुडे ११५ अध्यायः ॥ * ॥
तीर्थे प्रतिग्रहनिषेधो यथा,—
"सुवर्णमथ मुक्तास्मा तथैवान्यप्रतिग्रहम् ।
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्च्चनेऽपि वा ॥
निष्फलं तस्य तत्तीर्थं यावत्तद्धनमश्नुते ।
अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च ।"
इति कौर्म्मे ३३ अध्यायः ॥ * ॥
राजादितः प्रतिग्रहनिषेधो यथा,—
"न राज्ञः प्रतिगृह्णीयान्न शूद्रपतितादपि ।
न चान्यस्मादशक्तश्च निन्दितान् वर्ज्जयेद्बुधः ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥
विद्यारहितस्य प्रतिग्रहनिषेधो यथा,—
"हेम भूमिं तिलान् गाश्च अविद्वानाददाति यः ।
भस्मीभवति सोऽन्नाय दातुः स्यान्निष्फलञ्च तत् ॥

तस्मादविद्वान्नादद्यादल्पशोऽपि प्रतिग्रहम् ।
विषमस्यापरित्यागी विधिज्ञाप्येन नश्यति ॥”*॥
गर्हितप्रतिग्रहादिर्यथा,—
“हस्तिकृष्णाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः ।
सद्विप्रास्तान् गृह्णीयुर्गृह्णन्तस्तु पतन्ति ते ॥
कृष्णाजिनप्रतिग्राही हयानां शुक्रविक्रयी ।
नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥”*॥
आपदि गर्हितप्रतिग्रहकर्त्तव्यता यथा,—
“प्रोक्तप्रतिग्रहाभावे प्रोक्तायां इहदापदि ।
विप्रोऽश्नन् प्रतिगृह्णन् वा यतस्ततोऽपि नाघभाक् ॥
गुर्व्वादिपोष्यवर्गार्थं देवाद्यर्थञ्च सर्व्वशः ।
प्रत्यादद्याद्द्विजो यस्तु भत्यर्थमात्मनोऽपि च ॥
दधिक्षीराज्यमांसानि गन्धपुष्पाम्बुमत्स्यकान् ।
शय्यासनं शाकं प्रत्याख्येयं न कर्हिचित् ॥
अपि दुष्कृतकर्म्मभ्यः समादद्यादयाचितम् ।
पतितेभ्यस्तथान्येभ्यः प्रतिग्राह्यमसंशयम् ॥”*॥
प्रतिग्रहीतुं शक्तस्य लभ्यमानपरित्यागेन स्वर्गो भवति । यथा,—
“शक्तः प्रतिग्रहीतुं यो वेदवृत्तः सुसंयतः ।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम् ॥*॥
प्रतिग्रहस्त्वयं वापि याचितं यो न यच्छति ।
तत्कोटिगुणितस्तस्तो न्तो दातव्यमिच्छति ॥*॥
दाता च न स्मरेद्दानं प्रतिग्राही न याचते ।
तावुभौ नरकं यातौ दाता चैव प्रतिग्रही ॥*॥
वदन्ति कवयः केचिद्दानप्रतिग्रही प्रति ।
प्रत्यर्थं लिङ्गमेवेह दातृयाचकयोर्बलम् ॥
दातृहस्तो भवेदूर्द्ध्वमधस्तिष्ठेत् प्रतिग्रही ।
यद्दानं प्रतिगृह्णीयात् प्रतिग्राही व्रजत्यधः ॥”*॥
प्रतिग्रहप्रकारो यथा,—
“भूमेः प्रतिग्रहं कुर्य्याद्भूमिं कृत्वा प्रदक्षिणम् ।
करे गृह्य तथा कन्यां दासदास्यौ तथा द्विजाः ॥
करं हि हृदि विन्यस्य धर्म्मज्ञैर्ज्ञेयः प्रतिग्रहः ।
आरुह्य च गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः ॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः ।
प्रतिगृह्णीत गां शृङ्गे पुच्छे कृष्णाजिनं तथा ॥
आरण्याः पशवः सर्व्वे ग्राम्याः पुच्छे विचक्षणैः ।
प्रतिग्रहमथोष्ट्रस्य आरुह्यैव तु पादुके ॥
ईषायान्तु रथो ग्राह्यस्कन्धे दक्षन्तु धारयेत् ।
द्रुमाणामथ सर्व्वेषां मूले न्यस्तकरो भवेत् ॥
आयुधानि समादाय तथा भूष्य विभूषणम् ।
धर्म्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथा गृहम् ॥
अवतीर्य्य तु सर्व्वाणि जलस्थानानि चैव हि ।
उपविश्य च शय्यायां स्पर्शयित्वा करेण वा ॥
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा श्रावणं पठेत् ।
कन्यादाने न तु पठेद्द्रव्याणि च पृथक् पृथक् ॥
प्रतिग्रहा द्विजश्रेष्ठ तत्रैवान्तर्भवन्ति ते ।
द्रव्याणामथ सर्व्वेषां द्रव्यसंश्रयणान्नरः ॥
वाचयेज्जलमादाय करेण च प्रतिग्रहम् ।
प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम् ॥
स द्रव्यस्तेयसंयुक्तो नरकं प्रतिपद्यते ।
अथापि हि प्रवक्ष्यामि विधिं सर्व्वं विशेषणात् ॥ * ॥

वाजिप्रदानेन प्रतिग्रहे वा
दातृग्रहीत्रोरपि येन पुण्यम् ।
स्वर्गं प्रजायेत द्वयमुष्यमेतत्
गृहीतयोर्वै विधिवद्द्विजेन्द्र ॥
कुर्य्यादसौ पञ्चदिनानि पूर्व्वं
पञ्चोपचारैर्युतविष्णुपूजाम् ।
कुशाक्षमन्त्रैर्घृतदुग्धहोमं
यद्वायाम इत्यादि मरुत्वतीयम् ॥
सोङ्कारपूर्व्वादिभिरन्वितं तं
प्रत्येकमष्टौ जुहुयाद्द्विजेन्द्रः ।
सूर्य्येण मन्त्रेण च तद्वदष्टौ
मत्या प्रयुक्तं नियतं जुहोति ॥
कुर्य्याच्च गायत्रिजपं सहस्रं
पश्चात् प्रयच्छं तुरगं द्विजाग्र्यः ।
तद्दत्तयात्मानमयं नयेद्धि
दातापि चैतद्व्रतमाविदध्यात् ॥
द्विजाग्र्यवत् प्राक्तनपापशुद्ध्यै
द्वावप्यमू स्वर्गजनं लभेताम् ॥”
इति वृहत्पाराशरे । ४ । ८ । अध्यायः ॥*॥
अपि च । विष्णुधर्म्मोत्तरे ।
“बीजानां मुष्टिमादाय रत्नान्यादाय सर्व्वतः ।
वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः ॥
आरुह्योपानहौ चैव यानमारुह्य पादुके ।
प्रतिग्रहीता सावित्रीं सर्व्वत्रैव प्रकीर्त्तयेत् ॥
ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम् ।
समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् ॥
विधिं धर्म्मज्ञमथो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम् ।
दात्रा सह तरत्येव नानादुर्गाण्यसौ द्विजः ॥”
ब्रह्मपुराणे ।
“ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा ।
अश्वमर्मपि मातङ्गतिललौहांश्च वर्ज्जयेत् ॥
कृष्णाजिनतिलग्राही न भूयः पुरुषो भवेत् ॥
शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥”
तथा ।
“ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति ।
आतुराद्यद्गृहीतन्तु तत् कथं वै तरिष्यति ॥”
एतदादिद्रव्यदानं प्रतिग्रहीतुर्दोषजनकम् ॥*॥
एतदनिष्टत्वे विद्यादिरहितत्वेनासमर्थाय च दातुरपि दोषजनकमाह दक्षः ।
“न केवलं हि तद्याति शेषमस्य च नश्यति ।”
तद्दत्तद्रव्यम् । अतएव याज्ञवल्क्यः ।
“विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥”
अधो नरकम् ॥ * ॥ एतद्दानप्रतिग्रहोत्तरमुक्ततपोजपादिभिरात्मितरणक्षमाय स्वेच्छया प्रतिगृह्णते दानं न दोषाय इत्याह विष्णुः ।
“एतानि प्रतिगृह्णाति स्वेच्छयाभ्यर्थितो न तु ।
तस्मै दाने न दोषोऽस्ति यस्त्वात्मानन्तु तारयेत् ॥”
तारणप्रकारमाह हारीतः ।
“मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् ॥” * ॥ देवलः ।

“प्रतिग्रहं समर्थो हि कृत्वा विप्रो यथाविधि ।
निस्तारयति दातारमात्मानञ्च स्वतेजसा ॥”
स्कान्दे ।
“वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम् ।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥”
महाभारते ।
“तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च ।
निमित्तेषु च सर्व्वेषु न प्रमत्तो भवेन्नरः ॥”
प्रतिग्रहसमर्थस्य तदकरणे फलाधिक्यं यथा ।
याज्ञवल्क्यः ।
“प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥”
अपवादमाह स एव ।
“कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः ।
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥”
“शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन् दधि ।
मत्स्यान् धानाः पयो मांसं शाकञ्चैव न निर्णुदेत् ॥”
मणीन् विषादिनिवारकान् ।
“एधोदकं फलं मूलमन्नमभ्युद्यतञ्च यत् ॥”
अभ्युद्यतमभ्यर्थ्य दत्तम् ।
“सर्व्वतः प्रतिगृह्णीयात् मध्वथोऽभयदक्षिणाम् ॥”
किमिति न प्रत्याख्येयमित्याह मनुः ।
“अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र कुलटाषण्डपतितेभ्यस्तथा द्विषः ॥”
प्रतिग्रहमात्रे प्रयोगसारे ।
“प्रतिग्रहं न गृह्णीयादात्मभोगविधित्सया ।
देवतातिथिपूजार्थं यत्नाद्धनमुपार्ज्जयेत् ॥”
अङ्गिराः ।
“कुटुम्बार्थं द्विजः शूद्रात् प्रतिगृह्णीत याचितम् ।
क्रत्वर्थमात्मने चैव न हि याचेत कर्हिचित् ॥”
यज्ञार्थं याचने निन्दामाह याज्ञवल्क्यः ।
“चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात् ॥”
इति शुद्धितत्त्वम् ॥

प्रतिग्राहः, पुं, (प्रतिगृह्णाति ष्ठीवनादिकमिति प्रति + ग्रह + “विभाषा ग्रहः ।” ३ । १ । १४३ । इति णः ।) पतद्ग्रहः । इत्यमरः । २ । ६ । १३९ ॥ (प्रति + ग्रह + भावे घञ् ।) प्रतिग्रहणञ्च ॥

प्रतिघः, पु, (प्रतिहन्त्यनेनेति । प्रति + हन् + डः । न्यङ्क्वादित्वात् कुत्वम् ।) क्रोधः । इत्यमरः । १ । ७ । २६ ॥ (यथा, माघे । १५ । ५३ ।
“प्रतिघः कुतोऽपि समुपेत्य
नरपतिगणं समाश्रयत् ॥”
प्रतिहननमिति ।) प्रतिघातः । इति मेदिनी । घे, १० ॥ मूर्च्छा । इति शब्दरत्नावली ॥

प्रतिघातनं, क्ली, (प्रति + हन् + णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११४ ॥

प्रतिघ्नं, क्ली, (प्रतिहन्यतेऽस्मिन्निति । प्रति + हन् + घञर्थे कः ।) अङ्गम् । इति शब्दचन्द्रिका ॥

प्रतिच्छन्दः, [स्] क्ली, (छन्दोऽभिप्रायः । प्रतिगतं छन्दः इति प्रादिसमासः ।) प्रतिरूपम् । इति त्रिकाण्डशेषः ॥ (अकारान्तोऽपि दृश्यते । यथा, राजतरङ्गिण्याम् ।३ । ७७ ।
"रत्नःशिरःप्रतिच्छन्दैः शिरप्रख्यातिसूचकः ।
सगायशिखरान् प्रादात् तस्मै रत्नःप्रतिच्छन्दान् ॥")

प्रतिच्छाया, स्त्री, (प्रतिगता छायामिति ।) प्रतिकृतिः । मूर्त्तिसदृशचन्द्रच्छिलादिनिर्म्मितप्रतिरूपम् । इत्यमरभरतौ ॥ (यथा, हरिवंशे । १५९ । ३० ।
"माययास्य प्रतिच्छाया दृश्यते हि नटालये ।
देहार्द्धेन तु कौरव्य । सिषेवे च प्रभावतीम् ॥")

प्रतिजङ्घा, स्त्री, (प्रतिगता जङ्घाम् ।) अग्रजङ्घा । इति हेमचन्द्रः । ३ । ६१५ ॥

प्रतिजल्पः, पुं, (प्रतिगतो जल्पम् ।) वाक्यविशेषः । यथा,—
"दुःस्थजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नाईत्यसुष्ठतम् ।
दूतसम्मानेनोक्तं यत्र स प्रतिजल्पकः ॥"
इत्युज्ज्वलनीलमणिः ॥

प्रतिजागरः, पुं, (प्रतिजागरणमिति । प्रति+जागृ+घञ् । "जाग्रोऽवीति ।" ७ । ३ । ८५ । इति गुणः ।) प्रत्यवेक्षणम् । तत्पर्य्यायः । अवधा २ । इत्यमरः । ३ । २ । २८ ॥ जागरप्रतिनिधिः प्रतिजागरः । हे गृहमर्य्यादस्य इत्यादिनियोगस्य इति रायमुकुटः ॥

प्रतिजिह्वा, स्त्री, (प्रतिरूपा जिह्वा ।) तालुमूलस्थक्षुद्रजिह्वा । आलजिव इति भाषा । तत्पर्य्यायः । प्रतिजिह्विका २ माध्वी ३ रसनकाकुः ४ अलिजिह्विका ५ । इति शब्दरत्नावली ॥

प्रतिजिह्विका, स्त्री, (प्रतिजिह्वा+स्वार्थे कन् । टापि अत इत्वम् ।) प्रतिजिह्वा । इति त्रिकाण्डशेषः ॥

प्रतिज्ञा, स्त्री, (प्रतिज्ञायते इति । प्रति+ज्ञा+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) कर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः । इत्यनुमितिगादाधरी ॥ साध्यनिर्द्देशः । इति गौतमसूत्रम् ॥ साध्याभिधायिका वाक् । इति व्यवहारतत्त्वम् ॥ तत्पर्य्यायः । आम् २ प्रतिज्ञानम् ३ अङ्गीकारः ४ प्रतिश्रवः ५ ओं ६ समाधिः ७ संवित् ८ आगूः ९ आश्रवः १० संश्रवः ११ नियमः १२ अभ्युपगमः १३ वाढम् १४ आत्था १५ । इति शब्दरत्नावली ॥ सन्धा १६ सङ्गरः १७ संश्रावः १८ उररीकारः १९ श्रवः २० । इति जटाधरः ॥ * ॥ (यथा, गो० रामायणे । २ । ११० । ४ ।
"पूर्व्वन्तु रामस्तमिहानुयुज्य
श्रुत्वा च वाक्यं भरतस्य तस्य ।
चिकीर्षमाणो रघुनन्दनस्तां
पितुः प्रतिज्ञां स बभूव तूष्णीम् ॥")
प्रतिज्ञारोधो न कर्त्तव्यः । यथा,—
"त्वयास्य दैत्याधिपते वाच्यं साम यतो फलम् ।
प्रतिज्ञा नावरोद्धव्या स्वल्पकेऽपि च वस्तुनि ॥"
इत्यग्निपुराणम् ॥

प्रतिज्ञातं, त्रि, (प्रतिज्ञायते स्मेति । प्रति+ज्ञा+क्तः ।) अङ्गीकृतम् । इत्यमरः । ३ । २ ।१०८ ॥ (यथा, मनुः । ८ । १३९ ।
"ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥")

प्रतिज्ञानं, क्ली, (प्रति+ज्ञा+ल्युट् ।) प्रतिज्ञा । इत्यमरः । १ । ५ । ५ ॥

प्रतिज्ञेयः, पुं, (प्रतिजानात्यनेनेति । प्रति+ज्ञा+यत् ।) स्तुतिपाठकः । इति भूरिप्रयोगः ॥ (प्रतिज्ञातुं शक्यः ।) प्रतिज्ञातव्ये, त्रि ॥

प्रतितालः, पुं, (प्रतिगतस्तालम् ।) तालविशेषः । यथा, सङ्गीतदामोदरे ।
"कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा ।
कथिताः शङ्करेणैव चत्वारः प्रतितालकाः ॥
कान्तारो यथा,—
कान्तारः प्रतितालस्तु चन्द्रक्रीड़े द्रुतद्वयम् ।
दशाक्षरपदैर्नायं शृङ्गारे वर्णते रसे ॥ १ ॥
समराख्यो यथा,—
लघुद्रुतौ लघुश्चान्ते नृपताल उदाहृतः ।
रुद्रसंख्याक्षरपदः समरे वीरके रसे ॥ २ ॥
वैकुण्ठो यथा,—
द्रुतत्रयस्तु वैकुण्ठे प्रतितालो समीरितः ।
अर्कसंख्याक्षरैः पादो हास्ये त्रिपुटतालके ॥३ ॥
वाञ्छितो यथा,—
वाञ्छितस्तृतीये ताले लघुरेको द्रुतस्तथा ।
त्रयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः ॥" ४ ॥

प्रतिताली, स्त्री, (प्रतिगता तालमिति । गौरादित्वात् ङीष् ।) तालकोद्घाटनयन्त्रम् । इति हेमचन्द्रः ॥ चावि इति भाषा ॥

प्रतिदानं, क्ली, (प्रतिकृत्य दानं प्रतिरूपं दानं वा ।) विनिमयः । न्यस्तार्पणम् । इत्यमरः । २ । ९ । ८१ ॥

प्रतिदारणं, क्ली, (प्रतिदार्य्यतेऽस्मिन्निति । प्रति+दॄ+णिच्+आधारे ल्युट् ।) युद्धम् । इति शब्दमाला ॥

प्रतिदिनं, क्ली, दिनं दिनं प्रति । प्रत्यहम् । यथा,
"ततः प्रतिदिनं वेला वर्द्धते चिपलात्मिका ॥"
इति सतत्त्वमुक्तावली ॥

प्रतिदिवा, [न्] पुं, (प्रतिदीव्यतीति । प्रति+दिव+"कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।" उणा० १ । १५६ । इति कनिन् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ प्रतिदिनञ्च ॥

प्रतिदीवा, [न्] पुं, (प्रतिदिवन् । पृषोदरादित्वात् साधुः ।) सूर्य्यः । इति शब्दरत्नावली ॥

प्रतिदेयं, त्रि, (प्रति+दा+यत् ।) क्रीतद्रव्यस्य दुष्क्रीतबुद्ध्या परावृत्य दानम् । यथा,—
"क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाह्न्यविक्षतम् ॥"
इति मिताक्षरा ॥

प्रतिध्वनिः, पुं, (प्रतिरूपो ध्वनिरिति ।) प्रतिनादः । गुमरन् इति भाषा ॥ तत्पर्य्यायः । प्रतिशब्दः २ प्रतिश्रुत् ३ प्रतिध्वानम् ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । १९ । १० ।
"वदनकुहरेभ्यस्तेषामयं तदुदञ्चति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥")

प्रतिध्वानं, क्ली, (प्रतिध्वननमिति । प्रति+ध्वन+घञ् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ ।२५ ॥

प्रतिनप्ता, [ऋ] पुं, (प्रतिरूपो नप्ता नप्तुः सदृश इत्यर्थः ।) प्रपौत्रः । इति हेमचन्द्रः ॥

प्रतिनवं, त्रि, (प्रतिगतं नवं नवतामिति ।) नूतनम् । इति जटाधरः ॥ (यथा, मेघदूते । ३८ ।
"पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ॥")

प्रतिनिधिः, पुं, (प्रतिनिधीयते सदृशीक्रियते इति । प्रति+नि+धा+"उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः ।) प्रतिमा । इत्यमरः ।२।१०।३६॥ सदृशः । (यथा, रघौ । १ । ८१ ।
"सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥")
तस्य विवेचनं यथा । "अत्यन्तासामर्थ्ये तु स्कन्दपुराणम् ।
'पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत् ॥'
गरुड़पुराणे ।
'भार्य्या भर्त्तृव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा ।
असामर्थ्ये तयोस्ताभ्यां व्रतभङ्गो न जायते ॥'
वराहपुराणे ।
'पितृमातृपतिभ्रातृश्वश्रूगुर्व्वादिभूभुजाम् ।
अहश्यार्थमुपोषित्वा स्वयञ्च फलभाग्भवेत् ॥'
अत्रैव विषये कात्यायनः ।
'दक्षिणा नात्र कर्त्तव्या शुश्रूषा विहिता च या ।'
ननु प्रतिनिधौ समेऽपि धर्म्माद्यङ्गमन्त्रस्थफलं कुर्व्वान्विति चेत् प्रधान एव । तथा च शारीरिकभाष्ये श्रुतिः । 'यां वै काञ्चनयज्ञऋत्विज आशिषमाशासते यजमानायैव तामाशासते इति होवाच इति ।' ब्राह्मणसर्व्वस्वे तु यजमानायेत्यादौ यजमानस्यैव सेति पाठे विशेषः । तथा च सरलायां सूत्रम् । 'यां वै काञ्चनयज्ञऋत्विगाशिषमाशास्ते सा यजमानस्यैवेति ।' ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकाङ्क्षितत्वादिति । अतएव प्रतिनिधिपुत्रादिनाप्यायान्तु नः पितर इत्यादिवदनूह एव मन्त्रत वाक्यस्य काल्पनिकत्वात्तत्र न तथेति ॥ * ॥ अत्र प्रतिनिधिप्रसङ्गेन स्मृत्यनुसारात् किञ्चिल्लिख्यते । कालमाधवीये ।
'काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः ।
काम्येषूपक्रमादूर्द्ध्वमन्ये प्रतिनिधिं विदुः ॥'
अस्यार्थस्तु माधवाचार्य्यैराभिहितः । यथा नित्यनैमित्तिकं प्रतिनिधिनाप्युपक्रम्य कारयेत् । काम्यन्तु स्वसामर्थ्यं परीक्ष्य स्वयमेव उपक्रम्य कुर्य्यात् । असामर्थ्ये तु उपक्रमादूर्द्ध्वं प्रतिनिधिनापि तत्कारयेत् । एतच्च काम्यं श्रौतपरम् । काम्यस्मार्त्तन्तु अन्यद्वाराप्युपक्रम्य कुर्य्यात् । तथा च पराशरभाष्ये शातातपः ।

'श्रौतं कर्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥'
अन्ततः उपक्रमात परतः। अन्यथा नित्य-
नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदेनोपादानं
व्यर्थं स्यात्तयोरविशेषादेव प्रतिनिधिलाभात्।
अतएव भारतपाठादौ तथा समाचारः ॥ * ॥
स्मृत्यर्थसारे।
'नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।'
सजातीयमप्यभावान्तरमभावस्य प्रतिनिधि-
र्नेष्यते। भावस्तु कदाचित्। यथोपवासादौ-
ब्राह्मणभोजनादि।
'नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्।
श्रोत्रियाणामभोज्यञ्च यद्द्रव्यं तदशेषतः।
ग्राह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित् ॥
द्रव्यं वैकल्पिकं किञ्चिद्यत्र सङ्कल्पितं भवेत्।
तदलाभे सदृग्ग्राह्यं न तु वैकल्पिकान्तरम् ॥
उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि।
तत्र मुख्यमनादृत्य गौणेनैव समापयेत् ॥
संस्काराणामयोग्योऽपि मुख्य एव हि गृह्यते।
न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः ॥
मुख्ये कार्य्यासमर्थे तु सर्व्वेऽप्येतस्य नादरः।
प्रतिरूपमुपादाय शक्तमेवोपयुज्यते ॥
काष्ठे रूपैस्तथा पर्णैः क्षीरैः पुष्पैः फलैस्तथा।
गन्धै रसैः सदृग्ग्राह्यं सर्व्वालाभे परं परम् ॥
ग्राम्याणान्तु भवेद्ग्राम्यमारण्यानामरण्यजम्।
यवाभावे तु गोधूमास्तथा वेणुयवादयः ॥
हविष्ये गोघृतं ग्राह्यं तदलाभे तु माहिषम्।
आजं वा तदलाभे तु साक्षात्तैलं प्रयुज्यते ॥
तैलाभावे ग्रहीतव्यं तैलजं तिलसम्भवम् ॥'
तैलजं तिलसम्भवं तैलभृष्टतिलपिष्टम्।
'तदभावे तु सार्षपं कौसुम्भं सर्षपोद्भवम् ॥
वृक्षस्नेहोऽथ वा ग्राह्यः पूर्व्वाभावे परः परः।
तदभावे गवादीनां क्रमात् क्षीरं विधीयते ॥
तदलाभे दधि ग्राह्यमलाभे तिल इष्यते।
यत्र मुख्यं दधि क्षीरं तत्रापि तदलाभतः ॥
अजादेः क्षीरदध्यादि तदलाभे तु गोघृतम्।
मुख्यासन्नोऽथवा ग्राह्यः कार्य्यकारणसन्ततौ ॥
अतएव घृताभावे पूर्व्वं दधि ततः पयः ॥'
तथा।
'सर्व्वत्र गौणकालेषु कर्म्मचोदितमाचरेत्।
प्रायश्चित्तं वाहुतिभिर्हुत्वा कर्म्म समाचरेत् ॥'
मात्स्ये।
'घृतं न लभ्यते यत्र शुक्लक्षीरेण होमयेत।
क्षीरस्य च दधि त्र्यं मधुनश्च गुड़ो भवेत् ॥'
आयुर्व्वेदेऽपि।
'मधु यत्र न विद्येत तत्र जीर्णगुड़ो भवेत् ॥'
पैठीनसिः। 'काण्डमूलपर्णपुष्पफलप्ररोहरस-
गन्धादीनां सादृश्येन प्रतिनिधिं कुर्य्यात्। सर्व्वा-
लाभे यवः प्रतिनिधिर्भवति।' काण्डं नालं
प्ररोहोऽङ्कुरः। 'सर्व्वालाभे यव' इति कल्पतरुः ॥
अवयव इति नारायणोपाध्यायाः ॥ शान्ति-
दीपिकायां नारदीयपञ्चरात्रम्।
'अभावे चैव धातूनां हरितालं प्रशस्यते।
बीजानामप्यलाभे तु यव एको विधीयते ॥
ओषधीनामलाभे तु सहदेवा प्रशस्यते।
रत्नानामप्यलाभे तु मुक्ताफलमनुत्तमम् ॥
लौहानामप्यलाभे तु हेमपात्रं प्रकल्पयेत्।'
लौहानां तैजसमात्राणाम्। न्यायप्राप्तप्रति-
निधिमधिकृत्य जैमिनिः।
'न देवताग्निशब्दक्रियाणामिति।' अस्यार्थः।
देवताया अग्नेश्च आहवनीयादेः शब्दस्य
मन्त्रस्य क्रियायाः प्रजाद्यदृष्टार्थकर्म्मणश्चादृष्ट-
मात्रार्थकत्वेन आरादुपकारकत्वान्न प्रति-
निधिः। व्रीह्यादीनान्तु सन्निपत्योपकारकाणां
पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र
प्रतिनिधिरुचित इत्युक्तम्।" इत्येकादशी-
तत्त्वम् ॥ * ॥ "आरब्धकार्त्तिकादिस्नाने तु
व्याध्यादिनासामर्थ्ये पुत्रादिभिः प्रतिनिधिना
कारयितव्यं नानुकल्पविधिना नित्यस्नान एव
तद्विधानादिति।" इति मलमासतत्त्वम् ॥ * ॥
स्वयंकरणासामर्थ्ये अन्यद्वारा। यथा,—"दक्षः।
'स्वयं होमे फलं यत्तु तदन्येन न जायते।
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्-
पतिः।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥'
विट्पतिर्जामाता। एवञ्च ऋत्विगादीतरत्र
फलन्यूनता ॥ * ॥ अत्राशौचाशङ्कया बोधन-
दिनात पूर्व्वं शुचितनकालजीवित्वरूपाधिकाण-
भावेऽपि यद्वरणादिकं क्रियते तत् कर्म्मकाले
तस्य नारदोक्तस्वयं प्रवर्त्तनवत् प्रवर्त्तनाय न तु
तदानीं प्रतिनिधीयते। अथवा।
'निःक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजन्तथा।
प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं वसेत् ॥'
इति छन्दोगपरिशिष्टवदन्यत्रापि प्रतिनिधी-
यते। एवं वरणं विनापि कश्चिद्यदि ऋत्विक्
प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः। दक्षिणा च
तस्मै शुचिकाले दातव्येति। तथा च नारदः।
'ऋत्विक् च त्रिविधो दृष्टः पूर्व्वजुष्टः स्वयंकृतः।
यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्व्वकम् ॥'
यदृच्छया स्वेच्छया।" इति तिथ्यादितत्त्वम् ॥

प्रतिपः, पुं, (प्रतिपाति पालयतीति। प्रति+
पा+कः।) शान्तनुराजपिता। इति शब्द-
रत्नावली ॥

प्रतिपक्षः, पुं, (प्रतिकूलः पक्ष इति प्रादि-
समासः।) शत्रुः। इति हेमचन्द्रः। ३।३९२।
(यथा, मृच्छकटिके १० अङ्के।
"अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं
बोधय-
न्नेष क्रीड़ति कूपयन्त्रघटिकान्यायप्रसक्तो
विधिः ॥")
सादृश्यम्। यथा,—
"प्रतिबिम्बप्रतिनिधिप्रतिपक्षविडम्बकाः।"
इति काव्यचन्द्रिका ॥
प्रतिवादी च ॥

प्रतिपत्, [द्] स्त्री, (प्रतिपद्यते उपक्रम्यते-
ऽनयेति। प्रति+पद्+करणे क्विप्।) आरम्भ-
वाद्यम्। इति त्रिकाण्डशेषः ॥ बुद्धिः। तिथि-
विशेषः। तत्पर्य्यायः। पक्षतिः २। इत्यमरः।
१।४।१ ॥ सा च चन्द्रस्य प्रथमकलाक्रियारूपा।
वृद्धिरूपा चेत् शुक्ला१ एकाङ्कबोधिता। ह्रास-
रूपा चेत् कृष्णा १७ सप्तदशाङ्कबोधिता ॥ * ॥
तस्या व्यवस्था यथा। "सा च कृष्णा द्वितीया-
युक्ता ग्राह्या प्रतिपत् सद्वितीया स्यादित्याप-
स्तम्बीयात्। शुक्ला अमावास्यायुता ग्राह्या।
प्रतिपदाप्यमावास्येति वचनात्। त्रिसन्ध्यव्यापि-
नीत्वे तु सर्व्वत्र न युग्मादरः। तथा च परा-
शरः।
'त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥'* ॥
कृष्णापि उपवासे द्वितीयायुता न ग्राह्या।
तथा च वृद्धवशिष्ठः।
'द्वितीया पञ्चमी वेधादष्टमी च त्रयोदशी।
चतुर्द्दशी चोपवासे हन्युः पूर्व्वोत्तरे तिथी ॥'
द्वितीया वेधात् योगात् प्रतिपत्तृतीये हन्तीत्यर्थः।
एवमन्यत्र। अत्रोपवासपरेण विशेषविधानात्
आपस्तम्बीयसामान्यवचनस्य सङ्कोचः ॥ * ॥
कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भग-
वद्वाक्यम्।
'वीर। प्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्दूल। हृष्टाः पुष्टाः स्वलङ्कृताः।
पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः ॥'
तत्र मन्त्रः।
'बलिराज। नमस्तुभ्यं विरोचनसुत प्रभो।
भविष्येन्द्र सुराराते पूजेयं प्रतिगृह्यताम् ॥'
प्रतिपदा प्रतिपत्तिथ्या। अत्र प्रतिपदि। ब्रह्म-
पुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
'मन्त्रेणानेन राजेन्द्र। समन्त्री सपुरोहितः।'
इत्यर्द्धम् ॥
पश्चादपि।
'एव पूजां नृपः कृत्वा रात्रौ जागरणं ततः।'
इत्युक्तमिति ॥
पुनर्ब्रह्मपुराणे।
'शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे च प्रथमेऽहनि भूपते। ॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी नित्यं गौरी सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ॥
पराजयो विरुद्धश्च लब्धनाशकरो भवेत् ॥'
द्यूतञ्चाप्राणिभिः क्रीड़नम्। यथा मनुः।
'अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ॥'* ॥
तत्तिथिमधिकृत्य भविष्योत्तरं।
'यो यो याद्दृशभावेन तिष्ठत्यस्यां युधिष्ठिर।।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि ॥'
तथा।
'महापुण्या तिथिरियं बलिराज्यप्रवर्द्धिनी।

स्नानं दानं शतगुणं कार्त्तिक्यां तिथौ भवेत्॥'
प्रतिपद्रोहिणीयोगो यथा। भविष्ये।'
'रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा॥' *॥
तस्याः संज्ञा नन्दा। तत्राभ्यङ्गनिषेधो यथा,—
'नन्दासु नाभ्यङ्गमुपाचरेच्च
क्षौरञ्च रिक्तासु जयासु मांसम्।
पूर्णासु योषित् परिवर्ज्जनीया
भद्रासु सर्व्वाणि समाचरेच्च॥' *॥
नन्दादिक्रममाह ज्योतिषे।
'नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्॥'
प्रतिपदादिपञ्चदशतिथिषु पञ्चदशद्रव्यभक्षण-
निषेधमाह स्मृतिः।
'कुष्माण्डे चार्थहानिः स्यात् वृहत्यां न स्मरे-
द्धरिम्।
बहुशत्रुः पटोले स्याद्धनहानिश्च मूलके॥
कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके।
ताले शरीरनाशः स्यान्नारिकेले च मूर्खता॥
तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका।
शिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका॥
वार्त्ताकौ सुतहानिः स्याच्चिररोगी च माषके।
महापापकरं मांसं प्रतिपदादिषु वर्ज्जयेत्॥' *॥
तत्र क्षौरनिषेधो यथा। क्षौरं विष्णुश्राप्रति-
पत्सु वर्ज्ज्यम्।" इति तिथ्यादितत्त्वम्॥ *॥
तत्र जातफलम्।
"मणिकनकविभूषासंयुतश्चारुकान्ति-
र्निजकुलकमलोद्घाटमार्त्तण्डबिम्बः।
प्रतिपदि शशिपूर्णो लब्धजन्मा प्रतापी
भवति विमलवेशश्चारुकेशः प्रजेशः॥"
इति कोष्ठीप्रदीपः॥ *॥
सा अग्नेर्जन्मतिथिः। यथा,—
महातपा उवाच।
"विष्णोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गतः।
तिथीनां शृणु माहात्म्यं कथ्यमानं मया नृप!॥
इत्यद्भूतो महानग्निर्ब्रह्मक्रोधोद्भवो महान्।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो!।
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम्॥
ब्रह्मोवाच।
देवानामथ यक्षाणां गन्धर्व्वाणाञ्च सत्तम।।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक!॥
त्वत्पदात् प्रातिपदिकं संभविष्यन्ति देवताः।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति॥
तस्यां तिथौ हविष्येण प्राजापत्येन मूर्त्तिना।
होष्यन्ति तेषां प्रीताः स्युः पितरः सर्व्वदेवताः॥
चतुर्व्विधानि भूतानि मनुष्याः पशवोऽसुराः।
देवाः सर्व्वे सगन्धर्व्वाः प्रीताः स्युस्तर्पिते त्वयि॥
यश्चोपवासं कुर्व्वीत त्वद्भक्तः प्रतिपद्दिने।
क्षीराशनो वा वर्त्तेत शृणु तस्य फलं महत्॥
चतुर्युगानि षट्त्रिंशत्स्वर्गलोके महीयते।
तेजस्वी रूपसम्पन्नो द्रव्यवान् जायते नरः॥
इह जन्मन्यसौ राजा स्वर्गलोके महीयते।
तूष्णीम्बभूव सोऽप्यग्निर्व्वह्निस्ताश्रयं ययौ॥

य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः।
अग्नेर्जन्म स पापेभ्यो मुच्यते नात्र संशयः॥"
इति वराहपुराणे महातपोपाख्याने अग्न्युत्-
पत्तिनामाध्यायः॥ *॥ प्रतिपदि चन्द्रदर्शन-
कारणम्। यथा, ज्योतिषे।
"अमावस्याघटीशेषा षष्ट्याहर्मानसंयुता।
षर्य्यराहुघटीभ्यश्चेदधिका दृश्यते शशी॥"
प्रतिपत्तिः, स्त्री, (प्रतिपदनमिति। प्रति + पद् +
क्तिन्।) प्रवृत्तिः। (यथा, कुमारे। ५। ४२।
"मनस्विनीनां प्रतिपत्तिरीदृशी॥")
प्रागल्भ्यम्। गौरवम्। (यथा, युक्तिकल्पतरौ
चारलक्षणे।
"सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान्॥")
संप्राप्तिः। (यथा, रघुः। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")
प्रबोधः। (यथा, भागवते। ३। ६। १४।
"चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत्॥")
पदप्राप्तिः। इति मेदिनी। ते, २०६॥ मीमां-
सकमते फलशून्यकर्म्माङ्गम्। यथा। देव-
तोद्देशेन यागादौ त्यक्तहविरादेरग्नौ निःक्षेपः।
पूजितप्रतिमादेर्जले विसर्जनमित्यादि। श्राद्धादौ
सर्व्वशेषाङ्गकर्म्म यथा। प्रतिपत्तिरूपकर्म्माङ्ग
एव प्रतिपाद्याभावे तन्निवृत्तिः। इति तिथ्यादि-
तत्त्वम्॥ *॥ निर्व्वाहिताङ्गकद्रव्यकरणकाङ्गत्वं
प्रतिपत्तिरूपकर्म्माङ्गत्वम्। प्रतिपत्तिकर्म्म
उत्तरा क्रिया। यत्र एकेन द्रव्येण कर्म्म-
द्वयं निर्व्वाह्यते तत्र उत्तरं कर्म्म प्रतिपत्तिकर्म्म।
तन्निर्व्वाहकञ्च प्रतिपाद्यम्। इति तट्टीकायां
काशीरामवाचस्पतिः॥ *॥ अथ प्रतिपत्त्यधि-
करणम्। शक्लान्निरस्यति लोहितं निर-
स्यति गुदेनोपयजति सर्व्वं जुहोति। इत्य-
ग्नीषोमीयपशौ श्रूयते। शक्लान्निरस्यतीति दृष्टा-
न्तार्थम्। यथा पशोरुदरवर्त्तिशकृत् त्यजति
तथा लोहितमपि त्यजति। अन्यत्र पशोः
शरीरमांसोपक्रमेण होमः। अत्र तु गुदमांसोप-
क्रमेणेति। तच्च यज्ञशेषमन्त्रिगभ्यो ददातीति
परिभाषया मांसस्योत्तरा प्रतिपत्तिः प्राप्ता।
अत्र सर्व्वहवनेन प्रतिपत्त्यभावात् कर्म्मवैगुण्यं
स्यादिति। अत्र सिद्धान्तः। यदिकाराद्रुपपत्ति
रिति। यदि प्रतिपाद्यं स्यात् तदा प्रतिपत्ति-
रङ्गमित्यर्थः। इति रामकृष्णीयाधिकरण-
कौमुदी॥ *॥ अपि च।
"उपांशुयाजद्रव्येण शेषकार्य्यं भवेन्न वा।
भवेद्धविष्यं सर्व्वस्य इत्युक्त्या प्रापितत्वतः॥
उक्ताज्यद्रव्यशेषस्तु भाव्युपस्तरणादिवत्।
अतो न प्रतिपत्त्यर्हः शेषकार्य्यं ततः कथम्॥"
इति माधवीयाधिकरणमालायाम् ५ पादे प्रथ-
माधिकरणम्॥
प्रतिपत्तिपटहः, पुं, (प्रतिपत्तये पटहः।) वाद्य-
विशेषः। नागरा इति भाषा। तत्पर्य्यायः।
कम्पापटहः २। इति हारावली॥

प्रतिपत्तूर्य्यं, क्ली, (प्रतिपदे संविदे तूर्य्यम्।)
शृगङ्गवाद्यम्। इति त्रिकाण्डशेषः॥
प्रतिपच्चपला, स्त्री, (प्रतिपत्तं पलमस्याः।) क्षुद्र-
कारवेल्ली। इति राजनिर्घण्टः॥
प्रतिपन्नं, त्रि, (प्रतिपद्यते स्मेति। प्रति + पद् +
क्तः।) अवगतम्। इत्यमरः। ३। २। १०८॥
(यथा, कुमारे। ४। ३३।
"प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि॥")
अङ्गीकृतम्। इति मेदिनी। ने, १६४॥
विक्रान्तः। इति हेमचन्द्रः॥
प्रतिपर्णशिफा, स्त्री, (प्रतिपर्णं शिफा जटा
अस्याः।) द्रवन्ती। इति राजनिर्घण्टः॥
प्रतिपादकः, त्रि, (प्रतिपादयतीति। प्रति + पद् +
णिच् + ण्वुल्।) प्रतिपत्तिजनकः। बोधकः।
(यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शने। "ननु
सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्व-
मिति प्रतिपादकेषु वेदान्तेषु जागरूकेषु कथ-
मशेषशून्यत्वमिति॥") यथा च। प्रतिपाद्यप्रति-
पादकभावश्च सम्बन्धः। इति दिनकरी॥
प्रतिपादनं, क्ली, (प्रति + पद् + णिच् + भावे
ल्युट्।) दानम्। प्रतिपत्तिः। बोधनम्। इति
मेदिनी। ने, ३३६॥ (निष्पादनम्। यथा,
महाभारते। १२। १४१। १४।
"त्रेता विमोक्षसमये द्वापरप्रतिपादने॥")
प्रतिपालकः, त्रि, (प्रति + पा + णिच् + ण्वुल्।)
पालनकर्त्ता। प्रतिपालयतीति प्रतिपूर्व्व-
ण्यन्तपाधातोर्ण्वकप्रत्ययनिष्पन्नः॥
प्रतिपालनं, क्ली, (प्रति + पा + णिच् + भावे ल्युट्।)
रक्षणम्। पोषणम्। यथा। "कुन्त्या प्रसूतस्य
कर्णस्य राधाप्रतिपालनात् राधेयत्वं सङ्गच्छते।"
इति दुर्गादासः॥
प्रतिपाल्यं, त्रि, (प्रति + पा + णिच् + कर्म्मणि
यत्।) प्रतिपालनीयम्। प्रतिपालितव्यम्।
प्रतिपूर्व्वण्यन्तपालरक्षणे इत्यस्मात् कर्म्मणि
यप्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते।
१३। ४५। २।
"या पुत्त्रकस्य वृद्धस्य प्रतिपाल्या तदा भवेत्,
अथचेत्राहरेत् शुल्कं क्रीता शुल्कप्रदस्य सा॥")
प्रतिप्रसवः, पुं, (प्रति प्रतिषिद्धं प्रसूते इति,
प्रति + प्र + सू + अप्।) निषिद्धस्य पुनर्विधा-
नम्। यथा, प्रायश्चित्ततत्त्वे।
"रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे।
इत्यादिना निषिद्धस्य तिलतर्पणस्य तीर्थेतरत्र
प्रतिप्रसवमाह स्मृतिः।
अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च॥"
प्रतिप्रसूतः, त्रि, (प्रतिप्रसूते स्मेति। प्रति + प्र +
सू + क्तः।) प्रतिप्रसवविशिष्टः। इति मल-
मासतत्त्वम्॥ पुनःसम्भावितः। यथा,—
"उक्तानि प्रतिसिद्धानि पुनःसम्भावितानि च।
सापेक्षनिरपेक्षाणि मीमांसानीह कोविदैः॥"
इति सतुलसमुक्तावली॥

प्रतिफलं, क्ली, (प्रतिफलतीति । प्रति+फल्+ ।) प्रतिबिम्बम् । यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां हरशिरसि परस्या वासमाशङ्कमाना ॥"
इति रसमञ्जरी ॥

तुल्यफलम् । फलं फलञ्च ॥

प्रतिफलनं, क्ली, (प्रति+फल्+ल्युट् ।) प्रतिबिम्बम् । यथा,—
"न बिम्बं त्वद्बिम्बप्रतिफलनलाभादकलितं
तुलामध्यारोढुं कथमपि न लज्जेत कलया ॥"
इत्यानन्दलहरी । ६२ ॥

प्रतिफलितं, त्रि, (प्रति+फल्+क्त ।) प्रतिबिम्बितम् । यथा,—
"मोहातीतो विशुद्धो मुनिभिरभिहितो मोहसंक्रान्तमूर्त्तिः
साक्षी स्वान्ते तदुत्थे प्रतिफलितवपुः—— ॥"
इत्यादि मुक्तिवादगादाधरी ॥

प्रतिफुल्लकः, त्रि, (प्रतिफुल्लति विकसतीति । प्रति+फुल्ल+ण्वुल् ।) प्रफुल्लः । इति शब्दचन्द्रिका ॥

प्रतिबद्धः, त्रि, प्रतिबन्धविशिष्टः । प्रतिपूर्व्वबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

प्रतिबध्यः, त्रि, (प्रति+बन्ध+यत् ।) प्रतिबन्धनीयः । प्रतिबन्धार्हः । यथा । वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिताशून्यज्ञानवृत्तिप्रकारितानवच्छेदकत्वेनैव प्रतिबध्यत्वं निवेश्यमिति व्याप्त्यनुगमजागदीशी ॥

प्रतिबन्धः, पु, (प्रति+बन्ध+घञ् ।) कार्य्यप्रतिघातः । तत्पर्य्यायः । प्रतिष्टम्भः २ । इत्यमरः । ३ । २ । २७ ॥ (यथा, रघौ । ८ । ८० ।
"स तपःप्रतिबन्धमन्युना
प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां
शमवेलाप्रलयोर्म्मिणा भुवि ॥")

प्रतिबन्धकः, पु, (प्रतिबध्नातीति । प्रति+बन्ध+ण्वुल् ।) विटपः । इति शब्दचन्द्रिका ॥ प्रतिरोधके, त्रि ॥ (यथा, राजतरङ्गिण्याम् ।३।१८८।
"त्यागिनो निष्कलङ्कस्य को दोषोऽस्य महीपतेः ।
ममापुण्यन्तु तन्निन्द्यं यच्छ्रेयःप्रतिबन्धकम् ॥")

प्रतिबन्धिः, पुं, (प्रतिबध्नात्यनेनेति । प्रति+बन्ध+इन् ।) अनिष्टान्तरप्रसञ्जकं वाक्यम् । प्रतिबन्धः । यथा । प्रतिबन्धिरनुत्तरत्वादाहेति विशेषव्याप्तिजागदीशी ॥

प्रतिबलः, त्रि, (प्रतिगतं बलमस्य ।) समर्थः । शक्तः । इति त्रिकाण्डशेषः ॥ (प्रतिरूपं बलमस्य ।) तुल्यबलः ॥ (यथा, महाभारते । १ । १५४ । ८ ।
"नायं प्रतिबलो भीरु । राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः ॥")

प्रतिभयं, त्रि, (प्रतिगतं भयं यत्र ।) भयङ्करम् । इत्यमरः । १ । ७ । २० ॥ (यथा, रामायणे । ६ । ६० । ३५ ।
"दिशश्च प्रदिशश्चैव बभूवुः शब्दसङ्कुलाः ।
तमसा पिहितं सर्व्वमासीत् प्रतिभयं महत् ॥")
भये, क्ली । इति मेदिनी । ये, १२२ ॥

प्रतिभा, स्त्री, (प्रतिभाति शोभते इति । प्रति+भा+कः । टाप् ।) बुद्धिः । इति हेमचन्द्रः ॥ प्रत्युत्पन्नमतित्वम् । इति प्रतिभान्वितशब्दटीकायां भरतः ॥ नवनवोन्मेषशालिनी प्रज्ञा । यथाह, रुद्रः ।
"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ॥"
(यथा च, महाभारते । १२ । २५६ । १ ।
"सूक्ष्मं साधु समुद्दिष्टं नियतं ब्रह्मलक्षणम् ।
प्रतिभा त्वस्ति मे काचित् तां ब्रूयामनुमानतः ॥"
प्रतिभायते इति । प्रति+भा+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् ।) दीप्तिश्च ॥

प्रतिभान्वितः, त्रि, (प्रतिभया अन्वितः ।) प्रगल्भः । प्रत्युत्पन्नमतियुक्तः । इत्यमरः । ३ । १ । २५ ॥

प्रतिभामुखः, त्रि, (प्रतिभान्वितं मुखमस्य ।) प्रगल्भः । इति हेमचन्द्रः । ३ । ७ ॥

प्रतिभावान्, [त्] त्रि, (प्रतिभा विद्यतेऽस्य । प्रतिभा+मतुप् । मस्य वः ।) प्रतिभान्वितः । प्रागल्भ्ययुक्तः । प्रतिभाशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे ।४।३२।
"आगच्छन्तीञ्च तामन्तां कुमारसचिवो हठात् ।
अपहृत्य सार्धमनवोचत् प्रतिभावती ॥")

प्रतिभाहानिः, स्त्री, (प्रतिभाया हानिः ।) बुद्धिनाशः । इति शब्दमाला ॥

प्रतिभूः, पुं, (प्रतिरूपः प्रतिनिधिर्वा भवतीति । प्रति+भू+"भुवः संज्ञान्तरयोः ।" ३ । २ । १७९ । इति क्विप् । "धनिकाधमर्णयोरन्तरं यस्तिष्ठति विश्वासाय स प्रतिभूः ।" इति सिद्धान्तकौमुदी ॥) लग्नकः । इत्यमरः । २ । १० । ४४ ॥ जामिन् इति पारस्यभाषा ॥ (यथा, प्रद्युम्नविजये । १ अङ्के ।
"यश्चैकः प्रतिभूः फलेषु जगतां यश्चेशयज्ञेश्वरो
विश्वस्तोमतमःसमूहतपनः सोऽयं स्वयं
श्रीहरिः ॥")

तस्य कर्त्तव्यतं यथा,—
"सभापतेः कर्त्तव्यमाह कात्यायनः ।
'अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनोः ।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम् ॥'
प्रतिभवति तत्कार्य्ये तद्वद्भवतीति प्रतिभूर्लग्नकः । वादयोग्यः विवादफलस्य साधितधनादिदानस्य दण्डदानस्य च क्षमः । वादिनोः भाषावादिन उत्तरवादिनश्च । तथा च याज्ञवल्क्यः ।
'उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ।
प्रतिभुवस्त्वभावे च राज्ञा संज्ञपनं तयोः ॥'
राज्ञा संज्ञपनं दण्डतुल्याधिकरणम् । निर्णयस्य कार्य्यं धनादिदाने राजदन्तादित्वात् कार्य्यशब्दस्य पूर्ब्बनिपातः । भृत्यस्तद्रक्षको राजनियुक्तः ।" इति व्यवहारतत्त्वम् ॥

प्रतिमः, त्रि, (प्रतिमातीति । प्रति+मा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) उत्तरपदस्थो सदृशवाचकः । यथा —
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ॥"
इति हेमचन्द्रः ॥
(यथा, रामायणे । २ । ४० । १३ ।
"आयसं हृदयं नूनं राममातुरसंशयम् ।
यद्देवगर्भप्रतिमे वनं याति न भिद्यते ॥")

प्रतिमा, स्त्री, (प्रतिमीयते इति । प्रति+मा+अङ् । टाप् ।) अङ्गुलितः । गजदन्तस्य बन्धः । इति मेदिनी । मे, ४८ ॥ (प्रतिबिम्बम् । यथा, रघुः । ७ । ६४ ।
"निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥"
तथा च कुमारे । ७ । ३६ ।
"आत्मानमालोक्य च शोभमानं
खड्गे निषक्तप्रतिमं ददर्श ॥"
प्रतिमीयते अनयेति करणे अङ् ।) मृत्तिकादारुशिलादिनिर्म्मितप्रतिरूपकम् । तत्पर्य्यायः । प्रतिमानम् २ प्रतिबिम्बम् ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृतिः ६ अर्च्चा ७ प्रतिनिधिः ८ । इत्यमरः ।२।१०।३६॥ प्रतिच्छन्दः ९ प्रतिकायः १० प्रतिरूपम् ११ । इति हेमचन्द्रः ॥*॥ (यथा, महाभारते । ११।१७०।२७ ।
"गिरिपृष्ठे तु सा तस्मिन् स्थिता स्वसितलोचना ।
विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी ॥")
देवप्रतिमाघटनप्रमाणादि यथा,—
"विष्णोस्तावत् प्रवक्ष्यामि यादृग्रूपं प्रशस्यते ।
शङ्खचक्रधरं शान्तं पद्महस्तं गदाधरम् ॥
छत्राकारं शिरस्तस्य कम्बुग्रीवं शुभेक्षणम् ।
तुङ्गनासं शुक्तिकर्णं प्रशान्तोरुभुजक्रमम् ॥
क्वचिदष्टभुजं विद्याच्चतुर्भुजमथापि वा ।
द्विभुजं वापि कर्त्तव्यं भवनस्य पुरोधसा ॥" * ॥
देयमष्टभुजस्यास्य यथास्थानं निबोध मे ।
खड्गो गदा शरः पद्मं देयं दक्षिणतो हरेः ।
धनुश्च खेटकञ्चैव शङ्खचक्रे च वामतः ॥ * ॥
चतुर्भुजस्य वक्ष्यामि यथैवायुधसंस्थितिः ।
दक्षिणेन गदां पद्मं वासुदेवस्य कारयेत् ॥
वामतः शङ्खचक्रे च कर्त्तव्ये भूतिमिच्छता ।
कृष्णावतारे तु गदा वामहस्ते प्रशस्यते ॥
यथेच्छया शङ्खचक्रमुपरिष्टात् प्रकल्पयेत् ।
अधस्तात् पृथिवी तस्य कर्त्तव्या पादमध्यतः ।
दक्षिणे प्रणतं तद्वत् गरुत्मन्तं निवेशयेत् ।
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता सुशोभना ।
गरुत्मानग्रतो वापि संस्थाप्यो भूतिमिच्छता ॥
श्रीश्च पुष्टिश्च कर्त्तव्ये पार्श्वयोः पद्मसंयुते ।
तोरणञ्चोपरिष्टाच्च विद्याधरसमन्वितम् ॥
देवदुन्दुभिसंयुक्तं गन्धर्व्वमिथुनान्वितम् ।
पत्रवल्लीसमोपेतं सिंहव्यालसमन्वितम् ।
तथा कल्पलतोपेतं स्तुवद्भिरमरेश्वरैः ।
एवंविधो भवेद्विष्णुस्त्रिभागेनास्य पीठिका ॥
नवतालप्रमाणास्तु देवदानवकिन्नराः ।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः ॥*॥
जालान्तरप्रविष्टानां भानूनां यद्रजः स्फुटम् ।

त्रसरेणुः स विज्ञेयो बालाग्रैरथाष्टभिः ॥
तदष्टकेन लिक्षा तु यूका लिक्षाष्टकैर्मता ।
यवो यूकाष्टकं तद्वदष्टभिस्तैस्तदङ्गुलम् ॥
स्वकीयाङ्गुलमानेन मुखं स्याद्द्वादशाङ्गुलम् ।
मुखमानेन कर्त्तव्या सर्व्वावयवकल्पना ॥ * ॥
सौवर्णी राजती वापि ताम्री रत्नमयी शुभा ।
शैलदारुमयी वापि लौहसीसमयी तथा ॥
रीतिका धातुयुक्ता वा ताम्रकांस्यमयी तथा ।
शुभदारुमयी वापि देवतार्च्चा प्रशस्यते ॥ * ॥
अङ्गुष्ठपर्व्वादारभ्य वितस्तिर्यावदेव तु ।
गृहेषु प्रतिमा कार्य्या नाधिका शस्यते बुधैः ॥
आषोड़शात्तु प्रासादे कर्त्तव्या नाधिका ततः ।
मध्यमेन कनिष्ठा तु कार्य्या वित्तानुसारतः ॥
द्वारोच्छ्रायस्य यन्मानमष्टधा तत्तु कारयेत् ।
भागद्वयेन प्रतिमा त्रिभागीकृत्य तत् पुनः ॥
पीठिका भागतः कार्य्या नातिनीचा न
चोच्छ्रिता ।
प्रतिमामुखमानेन नव भागान् प्रकल्पयेत् ॥
चतुरङ्गुला भवेद्ग्रीवा भागेन हृदयं पुनः ।
नाभिस्तस्मादधः कार्य्या भागेनैकेन शोभिता ॥
निम्नत्वे विस्तरत्वे च अङ्गुलं परिकीर्त्तितम् ॥
नाभेरधस्तथा मेढ्रं भागेनैकेन कल्पयेत् ।
त्रिभागमायतावूरू जानुनी चतुरङ्गुले ॥
जङ्घे द्विभागे विख्याते पादौ तु चतुरङ्गुलौ ।
चतुर्द्दशाङ्गुलस्तद्वन्मौलिरस्य प्रकीर्त्तितः ॥
ऊर्द्ध्वमानमिदं प्रोक्तं पृथुत्वञ्च निबोधत ।
सर्व्वावयवमानेषु विस्तरं शृणुत द्विजाः ॥ * ॥
चतुरङ्गुलं ललाटं स्यादूर्द्ध्वं नासा तथैव च ।
द्व्यङ्गुलं हनु विज्ञेयमोष्ठश्चाङ्गुलसम्मितः ॥
अष्टाङ्गुलं ललाटन्तु तावन्मात्रे भ्रुवौ मते ।
अर्द्धाङ्गुला भ्रुवोर्लेखा मध्ये धनुरिवानता ॥
उन्नताग्रा भवेत् पार्श्वे श्लक्ष्णा तीक्ष्णा प्रशस्यते ।
अक्षिणी द्व्यङ्गुलायामे तदर्द्धञ्चैव विस्तरे ॥
उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे ।
तारका च त्रिभागेन दृष्टिः स्यात् पञ्चभागिकी ॥
द्व्यङ्गुलं भ्रुवोर्मध्यं नासामूलमथाङ्गुलम् ।
नासाग्रविस्तरं तद्वत् पुटद्वयमथानतम् ॥
नासापुटबिलं तद्वदर्द्धाङ्गुलमुदाहृतम् ।
कपोले द्व्यङ्गुले तद्वत् कर्णमूलाद्विनिर्गते ॥
हन्वग्रमण्डलं तद्वद्विस्तारो द्व्यङ्गुलो भवेत् ।
अर्द्धाङ्गुला भ्रुवो राजी प्रणालसदृशी समा ॥
अर्द्धाङ्गुलः समस्तद्वदुत्तरोष्ठस्तु विस्तरं ।
निष्पावसदृशं तद्वन्नासापुटदलम्भवेत् ॥
सृक्कणी ज्योतिस्तुल्ये च कर्णमूलात् षड़ङ्गुले ।
कर्णौ तु भ्रूसमौ ज्ञेयावूर्द्ध्वन्तु चतुरङ्गुलौ ॥
द्व्यङ्गुलौ कर्णपाशौ तु मात्रामेकान्तु विस्तृतौ ।
कर्णयोरुपरिष्टाच्च मस्तकं द्वादशाङ्गुलम् ।
ललाटं पृष्ठतोऽर्द्धेन प्रोक्तमष्टादशाङ्गुलम् ।
षट्त्रिंशदङ्गुलश्चास्य परिणाहः शिरोगतः ॥
सकेशनिचयश्चास्य द्विचत्वारिंशदङ्गुलः ।
केशान्ताद्धनुके तद्वदङ्गुलानि तु षोड़श ॥
ग्रीवामध्यपरीणाहश्चतुर्व्विंशतिरङ्गुलः ।

अष्टाङ्गुला भवेद्ग्रीवा पृथुत्वेन विशिष्यते ॥
स्तनग्रीवान्तरं प्रोक्तमेकतालं स्वयम्भुवा ।
स्तनयोरन्तरं तद्वद्द्वादशाङ्गुलमिष्यते ॥
स्तनयोर्मण्डलं तद्वद्द्व्यङ्गुलं परिकीर्त्तितम् ।
चूचुके मण्डलस्यान्तर्यवमात्रे उभे स्मृते ॥
द्वितालञ्चापि विस्तारादुरःस्थलमुदाहृतम् ।
कक्षे षड़ङ्गुले प्रोक्ते बाहुमूलस्तनान्तरे ॥
चतुर्द्दशाङ्गुलौ पादावङ्गुष्ठस्तु त्र्यङ्गुलः ।
पञ्चाङ्गुलपरीणाहमङ्गुष्ठाग्रं तथोन्नतम् ॥
अङ्गुष्ठकसमा तद्वदायामे स्यात् प्रदेशिनी ।
तस्याः षोड़शभागेन हीयते मध्यमाङ्गुली ॥
अनामिकाष्टभागेन कनिष्ठा चापि हीयते ।
पर्व्वत्रयेण चाङ्गुल्यो गुल्फौ द्व्यङ्गुलकौ मतौ ॥
पार्ष्णिर्द्व्यङ्गुलमात्रा तु कलयोक्ता प्रकीर्त्तिता ।
द्विपर्व्वाङ्गुष्ठकः प्रोक्तः परीणाहश्च द्व्यङ्गुलः ॥
प्रदेशिनीपरीणाहस्त्र्यङ्गुलः समुदाहृतः ।
अन्यासामष्टभागेन हीयते क्रमशो द्विजाः ॥
अङ्गुलेनोच्छ्रयः कार्य्यः अङ्गुष्ठस्य विशेषतः ।
तदर्द्धेन तु शेषाणामङ्गुलीनान्तथोच्छ्रयः ॥
जङ्घाग्रे परिणाहस्तु अङ्गुलानि चतुर्द्दश ।
जङ्घामध्ये परीणाहस्तथैवाष्टादशाङ्गुलः ॥
जानुमध्ये परीणाह एकविंशतिरङ्गुलः ।
जानूच्छ्रायोऽङ्गुलः प्रोक्तो मण्डलं त्र्यङ्गुलं पुनः ॥
ऊरुमध्ये परीणाहश्चाष्टाविंशतिकाङ्गुलः ।
एकत्रिंशोपरिष्टाच्च वृषणौ त्र्यङ्गुलौ पुनः ॥
त्र्यङ्गुलञ्च तथा मेढ्रं परीणाहे षड़ङ्गुलम् ।
मणिबन्धोदयं विद्यात् केशरेखां तथैव च ॥
मणिकोषपरीणाहश्चतुरङ्गुल इष्यते ।
विस्तारेण भवेत्तद्वत् कटिरष्टादशाङ्गुला ।
द्वाविंशतिस्तथा स्त्रीणां स्तनौ च द्वादशाङ्गुलौ ॥
नाभिमध्ये परीणाहो द्विचत्वारिंशदङ्गुलः ।
पुरतः पञ्चपञ्चाशत् कट्याश्चैव तु वेष्टनम् ॥
कक्षयोरुपरिष्टात्तु स्कन्धौ प्रोक्तौ षड़ङ्गुलौ ।
अष्टाङ्गुलाश्च विस्तारे ग्रीवाश्चैव तु निर्द्दिशेत् ॥
परीणाहे तथा ग्रीवां कला द्वादश निर्द्दिशेत् ।
आयामो भुजयोस्तद्वद्द्विचत्वारिंशदङ्गुलः ॥
कार्य्यन्तु बाहुशिखरं प्रमाणे षोड़शाङ्गुलम् ।
ऊर्द्ध्वं यद्बाहुपर्व्वान्तं विद्यादष्टादशाङ्गुलम् ॥
तथैकाङ्गुलहीनन्तु द्वितीयं पर्व्वमुच्यते ।
बाहुमध्ये परीणाहो भवेदष्टादशाङ्गुलः ॥
षोड़शोक्तः प्रबाहुस्तु षट्कलोऽग्रकरो मतः ।
सप्ताङ्गुलं करतलं पञ्चमध्याङ्गुली मता ॥
अनामिका मध्यमायाः सप्तभागेन हीयते ।
तस्यास्तु पञ्चभागेन कनिष्ठा परिहीयते ॥
मध्यमायास्तु हीना वै पञ्चभागेन तर्ज्जनी ।
अङ्गुष्ठस्तर्ज्जनीमूलादधः प्रोक्तस्तु तत्समः ॥
अङ्गुष्ठपरिणाहस्तु विज्ञेयश्चतुरङ्गुलः ।
शेषाणामङ्गुलीनान्तु भागो भागेन हीयते ॥
मध्यमामध्यपर्व्वन्तु अङ्गुलद्वयमायतम् ।
यवो यवस्तु सर्व्वासां तस्यां तस्यां प्रहीयते ॥
अङ्गुष्ठपर्व्वमध्यन्तु तर्ज्जन्या सदृशं भवेत् ।
यवद्वयाधिकं तद्वदग्रपर्व्वमुदाहृतम् ॥

पर्व्वार्द्धेन नखान् विद्यादङ्गुलीषु समन्ततः ।
स्निग्धं श्लक्ष्णं प्रकुर्व्वीत ईषद्रक्तं तथाग्रजम् ॥
निम्नपृष्ठं भवेन्मध्ये पार्श्वतः कलयोच्छ्रितम् ।
तथैव केशपर्य्यन्तः स्कन्धोपरि दशाङ्गुलः ॥
स्त्रियः कार्य्यास्तु तद्विज्ञैस्तनोरुजघनाधिकाः ।
चतुर्द्दशाङ्गुलायाममुदरं तासु निर्द्दिशेत् ॥
नानाभरणसम्पन्नाः किञ्चिच्छ्लक्ष्णभुजाननाः ।
किञ्चिद्दीर्घं भवेद्वक्त्रमलकावलिरुत्तमा ॥
नासा ग्रीवा ललाटञ्च निर्द्दिष्टाश्चतुरङ्गुलाः ।
अर्द्धाङ्गुलिविस्तारः शस्यतेऽधरपल्लवः ॥
अधिकं नेत्रयुग्मन्तु चतुर्भागेन निर्द्दिशेत् ।
ग्रीवावलिश्च कर्त्तव्या किञ्चिदर्द्धाङ्गुलोच्छ्रया ॥
एवं नारीषु सर्व्वासु देवानां प्रतिमासु च ।
नवतालमिदं प्रोक्तं लक्षणं पापनाशनम् ॥ * ॥
अतः परं प्रवक्ष्यामि देवाकारान् विशेषतः ।
दशतालः स्मृतो रामो बलिर्वैरोचनिस्तथा ॥
वराहो नरसिंहश्च सप्ततालश्च वामनः ।
मत्स्यकूर्म्मौ तु निर्द्दिष्टौ यथाशोभं स्वयम्भुवा ॥
अतः परं प्रवक्ष्यामि रुद्राद्याकारमुत्तमम् ।
आपीनोरुभुजस्कन्धस्तप्तकाञ्चनसप्रभः ॥
शुक्लार्करश्मिसंघातचन्द्राङ्कितजटो विभुः ।
जटामुकुटधारी च द्व्यष्टवत्सराकृतिः ॥
बाहुवारणहस्ताभो वृत्तजङ्घोरुमण्डलः ।
ऊर्द्ध्वकेशस्तु कर्त्तव्यो दीर्घायतविलोचनः ॥
व्याघ्रचर्म्मपरीधानः कटिसूत्रत्रयान्वितः ।
हारकेयूरसम्पन्नो भुजङ्गाभरणस्तथा ॥
बाहवश्चापि कर्त्तव्या नानाभरणभूषिताः ।
पीनोरुगण्डफलकः कुण्डलाभ्यामलङ्कृतः ॥
आजानुलम्बबाहुश्च सौम्यमूर्त्तिः सुशोभनः ।
खेटकं वामहस्ते तु खड्गञ्चैव तु दक्षिणे ॥
शक्तिं दण्डं त्रिशूलञ्च दक्षिणे तु निवेशयेत् ।
कपालं वामपार्श्वे तु नागं खट्वाङ्गमेव च ॥
एकश्च वरदो हस्तस्तथाक्षवलयोऽपरः ।
वैशाखस्थानकं कृत्वा नृत्याभिनयसंस्थितः ॥
नृत्ये दशभुजः कार्य्यो गजासुरवधे तथा ।
तथा त्रिपुरदाहे च बाहवः षोड़शैव तु ॥
शङ्खचक्रं गदा शार्ङ्गं घण्टा तत्राधिका भवेत् ।
तथा धनुः पिनाकञ्च शरो विष्णुमयस्तथा ॥
चतुर्भुजोऽष्टबाहुर्व्वा ज्ञानयोगेश्वरो मतः ।
तीक्ष्णनासाग्रदशनः करालवदनो महान् ॥
भैरवः शस्यते लोके प्रत्यायतनसंस्थितः ।
न मूलायतने कार्य्यो भैरवस्तु भयङ्करः ॥
नारसिंहो वराहो वा तथान्येऽपि भयङ्कराः ।
न हीना नाधिकाङ्गा च कर्त्तव्या देवता क्वचित् ॥
स्वामिनं घातयेन्न्यूना करालवदना तथा ।
अधिका शिल्पिनं हन्यात् कृशा चैवार्थनाशिनी ॥
कृशोदरी तु दुर्भिक्षं निर्म्मांसा धननाशिनी ।
वक्रनासा तु दुःखाय संक्षिप्ताङ्गी भयङ्करी ॥
चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी ।
दुःखदा हीनवक्त्रा तु पाणिपादकृशा तथा ॥
हीनाङ्गा हीनजङ्घा च भ्रमोन्मादकरी नृणाम् ।
वक्रवक्त्रा च राजानं कटिहीना च या भवेत् ॥

पाणिपादविहीनायां जायते मरको महान् ।
जङ्घाजानुविहीना च शत्रुकल्याणकारिणी ॥
पुत्रमित्रविनाशाय हीना वक्षःस्थलेन तु या ।
सम्पूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा ।
एवं लक्षणमासाद्य कर्त्तव्यः परमेश्वरः ॥ * ॥
स्तूयमानः सुरैः सर्व्वैः समन्ताद्दर्शयेद्भवम् ।
शक्रेण नन्दिना चैव महाकालेन शङ्करम् ॥
प्रणता लोकपालाश्च पार्श्वे तु गणनायकाः ।
नृत्यद्भृङ्गिरिटिश्चैव भूतवेतालसंवृतः ।
सर्व्वे हृष्टाश्च कर्त्तव्याः स्तुवन्तः परमेश्वरम् ॥

गन्धर्व्वविद्याधरकिन्नराणा-
मथाप्सरोगुह्यकनायकानाम् ।
गणैरनेकैः शतशो महेन्द्र-
मुनिप्रवीरैरभिवन्द्यमानम् ॥
धृताञ्जलैः शतशः प्रवाल-
पुष्पोपहारप्रचयं ददद्भिः ।
संस्तूयमानं भगवन्तमीश-
मेवं यजेन्नामरमर्त्यपूज्यम् ॥ * ॥

सूत उवाच ।

अधुना संप्रवक्ष्यामि अर्द्धनारीश्वरं परम् ।
अर्द्धेन देवदेवस्य नारीरूपं सुशोभनम् ॥
ईशार्द्धे तु जटाभारो बालेन्दुकलया युतः ।
उमार्द्धे तु प्रदातव्यौ सीमन्ततिलकावुभौ ॥
वासुकिं दक्षिणे कर्णे वामे कुण्डलमादिशेत् ।
बालिका चोपरिष्टात्तु कपालं दक्षिणे करे ॥
त्रिशूलं वापि कर्त्तव्यं देवदेवस्य शूलिनः ।
वामतो दर्पणं दद्यादुत्पलं वा विशेषतः ॥
वामबाहुश्च कर्त्तव्यः केयूरवलयान्वितः ।
उपवीतञ्च कर्त्तव्यं मणिमुक्तामयन्तथा ॥
स्तनभारमथार्द्धे तु वामे पीनं प्रकल्पयेत् ।
हारार्द्धमुज्ज्वलं कुर्य्यात् श्रोण्यर्द्धन्तु तथैव च ॥
लिङ्गार्द्धमूर्द्ध्वं कर्त्तव्यं व्याघ्राजिनकृताम्बरम् ।
वामे लम्बपरीधानं कटिसूत्रत्रयान्वितम् ॥
नानारत्नसमोपेतं दक्षिणं भुजगान्वितम् ।
देवस्य दक्षिणं पादं पद्मोपरिसमास्थितम् ॥
किञ्चिदूर्द्ध्वन्तथा वामं भूषितं नूपुरेण च ।
रत्नैर्विभूषितान् कुर्य्यादङ्गुलीष्वङ्गुलीयकान् ॥
सालक्तकं तथा पादं पार्व्वत्या दर्शयेत् सदा ।
अर्द्धनारीश्वरस्येदं रूपमस्मिन्नुदाहृतम् ॥ * ॥
उमामहेश्वरस्यापि लक्षणं शृणुत द्विजाः ।
संस्थानन्तु तयोर्वक्ष्ये लीलाललितविभ्रमम् ॥
चतुर्भुजं द्विबाहुं वा जटाभारेन्दुभूषितम् ।
लोचनत्रयसंयुक्तमुमैकस्कन्धपाणिनम् ॥
दक्षिणेनोत्पलं शूलं वामं कुचभरं तरम् ।
द्वीपिचर्म्मपरीधानं नानारत्नोपशोभितम् ॥
सुप्रतिष्ठं सुवेशञ्च तथार्द्धेन्दुकृताननम् ।
वामे तु संस्थिता देवी तस्योरौ बाहुगूहिता ॥
शिरोभूषणसंयुक्तैरलकैर्ललितानना ।
सबालिका कर्णवती ललाटतिलकोज्ज्वला ॥
मणिकुण्डलसंयुक्ता कर्णिकाभरणा क्वचित् ।
हारकेयूरबहुला हरवक्त्रावलोकिनी ॥
वामांसं देवदेवस्य स्पृशन्ती लीलया क्वचित् ।
दक्षिणन्तु बहिः कृत्वा बाहुं दक्षिणतोऽथवा ॥
स्कन्धे वा दक्षिणे कुर्य्यात् स्पृशन्त्यङ्गुलिभिः क्वचित् ।
वामे च दर्पणं दद्यादुत्पलं वा सुशोभनम् ॥
कटिसूत्रत्रयञ्चैव नितम्बे स्यात् प्रलम्बकम् ।
जया च विजया चैव कार्त्तिकेयविनायकौ ॥
पार्श्वयोर्दर्शयेत्तत्र सतोरणमगुह्यकम् ।
मालाविद्याधरास्तत्र वीणावानप्सरोगणः ।
एतद्रूपमुमेशस्य कर्त्तव्यं भूतिमिच्छता ॥ * ॥
शिवनारायणं वक्ष्ये सर्व्वपापप्रणाशनम् ।
वामार्द्धे माधवं कुर्य्याद्दक्षिणे शूलपाणिनम् ॥
बाहुद्वयञ्च कृष्णस्य मणिकेयूरभूषितम् ।
शङ्खचक्रधरं शान्तमारक्ताङ्गुलिविभ्रमम् ॥
चक्रस्थाने गदाञ्चापि पाणौ दद्यादधस्तले ।
शङ्खञ्चैवेतरे दद्यात्कट्यर्द्धे भूषणोज्ज्वलम् ॥
पीतवस्त्रपरीधानं चरणं मणिभूषितम् ।
दक्षिणार्द्धे जटाभारमर्द्धेन्दुकृतलक्षणम् ॥
भुजङ्गहारवलयं वरदं दक्षिणं करम् ।
द्वितीयञ्चापि कुर्व्वीत त्रिशूलवरधारिणम् ॥
व्यालोपवीतसंयुक्तं कट्यर्द्धे कृत्तिवाससम् ।
मणिरत्नैश्च संयुक्तपादं नागविभूषितम् ।
शिवनारायणस्यैवं कल्पयेद्रूपमुत्तमम् ॥ * ॥
महावराहं वक्ष्यामि पद्महस्तं गदाधरम् ।
तीक्ष्णदंष्ट्राग्रघोरास्यं मेदिनीवामकूर्परम् ॥
दंष्ट्राग्रेणोद्धृतां दान्तां धरणीमुत्पलान्विताम् ।
विस्मयोत्फुल्लनयनामुपरिष्टात् प्रकल्पयेत् ॥
दक्षिणं कटिसंस्थन्तु करन्तस्य प्रकल्पयेत् ।
कूर्म्मोपरि तथा पादमेकं नागेन्द्रमूर्द्धनि ।
संस्तूयमानं लोकेशैः समन्तात् परिकल्पयेत् ॥ * ॥
नारसिंहञ्च कर्त्तव्यं भुजाष्टकसमन्वितम् ।
रौद्रसिंहासनं तद्वद्विदारितमुखेक्षणम् ॥
स्तब्धपीनसटाकीर्णं दारयन्तं दितेः सुतम् ।
विनिर्गतान्त्रजालञ्च दानवं परिकल्पयेत् ॥
वमन्तं रुधिरोद्गारं भ्रुकुटीकुटिलेक्षणम् ।
युध्यमानश्च कर्त्तव्यः क्वचित् करणबन्धनैः ॥
परिश्रान्तेन दैत्येन तर्ज्जमानं मुहुर्मुहुः ।
दैत्यं प्रदर्शयेत्तत्र खड्गखेटकधारिणम् ।
स्तूयमानं तथा विष्णुं दर्शयेदमराधिपैः ॥ * ॥
तथा त्रिविक्रमं वक्ष्ये ब्रह्माण्डाक्रमणोद्यतम् ।
वामपार्श्वे तथा राहुमुपरिष्टात् प्रकल्पयेत् ॥
अधस्ताद्वामनं तावत् कल्पयेत् सकमण्डलुम् ।
दक्षिणे छत्रिकां दद्यान्मुखं दीनं प्रदर्शयेत् ।
भृङ्गारधारिणं तद्वद्बलिमस्यैव पार्श्वतः ॥
बन्धनञ्चापि कुर्व्वन्तं गरुडन्तस्य दर्शयेत् ॥ * ॥
मत्स्यरूपं तथा मात्स्यं कौर्म्मं कूर्म्माकृतिं न्यसेत् ।
एवं रूपस्तु भगवान् कार्य्यो नारायणो हरिः ॥ * ॥
ब्रह्मा कमण्डलुधरः कर्त्तव्यः स चतुर्मुखः ॥
हंसारूढ़ः क्वचित् कार्य्यः क्वचिच्च कमलासनः ।
वर्णेन पद्मगर्भाभश्चतुर्ब्बाहुः शुभेक्षणः ॥
कमण्डलुं वामकरे स्रुवं हस्ते च दक्षिणे ।
वामे दण्डधरं तद्वत् स्रुचञ्चापि प्रदर्शयेत् ॥
मुनिभिर्देवगन्धर्व्वैः स्तूयमानं समन्ततः ।
कुर्व्वाणमिव लोकांस्त्रीन् शुक्लाम्बरधरं विभुम् ॥
मृगचर्म्मधरञ्चापि दिव्ययज्ञोपवीतिनम् ।
आज्यस्थालीं न्यसेत् पार्श्वे वेदांश्च चतुरः पुनः ।
वामपार्श्वे तु सावित्री दक्षिणे च सरस्वती ।
अग्रे च ऋषयस्तद्वत् कार्य्याः पैतामहे पदे ॥ * ॥
कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्यसन्निभम् ।
कमलोदरवर्णाभं सुकुमारं कुमारकम् ॥
गेरुकैश्चीरकैर्युक्तं मयूरवरवाहनम् ।
स्थानीयखेटनगरे भुजान् द्वादश कल्पयेत् ॥
चतुर्भुजः कर्व्वटे स्याद्वने ग्रामे द्विबाहुकः ।
शक्तिः पाशस्तथा खड्गः शरः शूलन्तथैव च ।
वरदश्चैव हस्तः स्यादथवाभयदो भवेत् ॥
एते दक्षिणतो ज्ञेयाः केयूरकटकोज्ज्वलाः ।
धनुः पताका मुष्टिश्च तर्ज्जनी च प्रसारिता ॥
खेटकं ताम्रचूड़श्च वामहस्ते प्रशस्यते ।
द्विभुजस्य करे शक्तिर्वामे स्यात् कुक्कुटोऽपरे ।
चतुर्भुजे शक्तिपाशौ वामतो दक्षिणे त्वसिः ।
वरदोऽभयदो वापि दक्षिणः स्यात् तुरीयकः ॥ * ॥
विनायकं प्रवक्ष्यामि गजवक्त्रं त्रिलोचनम् ।
लम्बोदरं चतुर्ब्बाहुं व्यालयज्ञोपवीतिनम् ॥
स्तब्धकर्णं बृहत्तुण्डमेकदंष्ट्रं पृथूदरम् ।
स्वं दन्तं दक्षिणकरे उत्पलञ्च तथापरे ॥
लड्डुकं परशुञ्चैव वामतः परिकल्पयेत् ।
बृहत्संचिप्रगमनं पीनस्कन्धाङ्घ्रिपाणिनम् ।
युक्तं ऋद्धिबुद्धिभ्यामधस्तान्मूषिकान्वितम् ॥ * ॥
कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजन्तथा ।
त्रयाणामपि देवानामनुकारानुकारिणीम् ॥
जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रन्तथैव च ।
तीक्ष्णवाणं तथा शक्तिं दक्षिणे सन्निवेशयेत् ।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ।
घण्टां वा परशुं वापि वामतः सन्निवेशयेत् ॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं निर्य्यदन्त्रविभूषितम् ।
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
सपाशवामहस्तेन धृतकेशञ्च दुर्गया ॥
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ॥
किञ्चिदूर्द्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत् ॥ * ॥
इदानीं सुरराजस्य रूपं वक्ष्ये विशेषतः ।
सहस्रनयनं देवं मत्तवारणसंस्थितम् ॥
पृथूरुवक्षोवदनं सिंहस्कन्धं महाभुजम् ।
किरीटकुण्डलधरं पीवरोरुभुजेक्षणम् ॥
वज्रोत्पलधरं तद्वन्नानाभरणभूषितम् ।
पूजितं देवगन्धर्व्वैरप्सरोगणसंस्तुतम् ॥

छत्रचामरधारिण्यौ स्त्रियौ पार्श्वे तु कारयेत् ।
सिंहासनगतं वापि गन्धर्व्वगणसंयुतम् ॥
इन्द्राणीं वामतस्तस्य कुर्य्यादुत्पलधारिणीम् ॥

सूत उवाच ।

प्रभाकरस्य प्रतिमामिदानीं शृणुत द्विजाः ।
रथस्थं कारयेद्देवं पद्महस्तं सुलोचनम् ॥
सप्ताश्वञ्चैकचक्रञ्च रथन्तस्य प्रकल्पयेत् ।
मुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥
नानाभरणभूषाढ्यं भुजाभ्यां धृतपुष्करम् ।
स्कन्धस्थे पुष्करे ते तु लीलयैव धृते सदा ॥
चोलकच्छन्नवपुषं क्वचिच्चित्रेषु दर्शयेत् ।
वस्त्रयुग्मसमोपेतं चरणौ तेजसावृतौ ॥
प्रतीहारौ च कर्त्तव्यौ पार्श्वयोर्दण्डपिङ्गलौ ।
कर्त्तव्यौ खड्गहस्तौ च पार्श्वयोः पुरुषावुभौ ॥
लेखनीकृतहस्तञ्च पार्श्वे धातारमव्ययम् ।
नानादेवगणैर्युक्तमेवं कुर्य्याद्दिवाकरम् ॥
अरुणः सारथिस्तस्य पद्मिनीपत्रसन्निभः ।
अश्वौ च वलिसुग्रीवावन्तस्थौ तस्य पार्श्वयोः ॥
भुजङ्गरज्जुभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः ।
पद्मस्थं वा हयस्थं वा पद्महस्तं प्रकल्पयेत् ॥*॥
अग्नेस्तु लक्षणं वक्ष्ये सर्व्वकामफलप्रदम् ।
दीप्तं सुवर्णवपुषमर्द्धचन्द्रासनस्थितम् ॥
बालार्कसदृशन्तस्य वसनञ्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बकूर्च्चधरन्तथा ॥
कमण्डलुं वामकरे दक्षिणे त्वक्षसूत्रकम् ।
ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलम् ।
कुण्डस्थञ्चापि कुर्व्वीत मूर्द्धि सप्तशिखान्वितम्॥*
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ।
महामहिषमारूढं कृष्णाञ्जनचयोपमम् ॥
सिंहासनगतञ्चापि दीप्ताग्निसमलोचनम् ।
महिषं चित्रगुप्तञ्च करालान् किङ्करांस्तथा ॥
समन्ताद्दर्शयेत्तस्य सौम्यासौम्यांस्तथा सुरान् ॥
राक्षसेन्द्रं तथा वक्ष्ये लोकपालञ्च नैर्ऋतम् ।
नरारूढं महाकायं रक्षोभिर्बहुभिर्वृतम् ॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
नरयुक्तविमानस्थं पीताम्बरविभूषितम् ॥ * ॥
वरुणञ्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शङ्खस्फटिकवर्णाभं हारकेयूरसंवृतम् ॥
झषाधिरूढं वरदं पताकाध्वजसंयुतम् ।
भूषणावगतं शान्तं किरीटवरधारिणम् ॥ * ॥
वायुरूपं प्रवक्ष्यामि धूम्रञ्च मृगवाहनम् ।
चित्राम्बरधरं शान्तं युवानं कुञ्चितभ्रुवम् ।
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ॥ * ॥
कुवेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं सदा ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं निध्यष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरैस्तथा ॥ * ॥
तथैवेशं प्रवक्ष्यामि धवलं धवलेक्षणम् ।
त्रिशूलपाणिनं देवं त्र्यक्षं वृषगतं विभुम् ॥ * ॥

मातृणां लक्षणं वक्ष्ये यथावदनुपूर्व्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ।
हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमण्डलुः ॥*॥
महेश्वरस्य रूपेण तथा माहेश्वरी मता ।
जटामुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपालशूलखट्वाङ्गवरदाढ्या चतुर्भुजा ॥ * ॥
कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा ॥
हारकेयूरसम्पन्ना कृकवाकुधरा तथा ॥ * ॥
वैष्णवी विष्णुसदृशी गरुत्मति समाश्रिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासनगता वापि बालकेन समन्विता ॥ * ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरि संस्थिताम् ।
वराहसदृशीं देवीं घण्टाचामरधारिणीम् ।
गदाचक्रधरान्तद्वद्दानवेन्द्रविनाशिनीम् ॥ * ॥
इन्द्राणीमिन्द्रसदृशीं वज्रशूलगदाधराम् ।
गजासनगतान्देवीं लोचनैर्बहुभिर्वृताम् ।
तप्तकाञ्चनवर्णाभां सर्व्वाभरणभूषिताम् ॥ * ॥
तीक्ष्णखड्गधरान्तद्वद्वक्ष्ये योगीश्वरीमिमाम् ।
दीर्घजिह्वामूर्द्ध्वकेशीमस्थिखण्डैश्च मण्डिताम् ।
दंष्ट्राकरालवदनां कुर्य्याच्चैव कृशोदरीम् ॥ * ॥
कपालमालिनीं देवीं मुण्डमालाविभूषिताम् ।
कपालं वामहस्ते तु मांसशोणितपूरितम् ॥
सकेशन्तु शिरो न्यस्य शक्तिका दक्षिणे तथा ।
गृध्रस्था वायसस्था वा निर्म्मांसा विनतोदरी ।
करालवदना तद्वत् कर्त्तव्या सा त्रिलोचना ॥*॥
चामुण्डा बद्धघण्टा च द्वीपिचर्म्मधरा शिवा ।
दिग्वासा कालिका तद्वद्रासभस्था कपालिनी ॥
सुरक्तपुष्पाभरणा वर्द्धनी ध्वजसंयुता ।
विनायकञ्च कुर्व्वीत मातॄणामन्तिके सदा ॥
वीरेश्वरश्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्तस्त्रिशूली च मातॄणामग्रतो भवेत् ॥*॥
श्रियन्देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगण्डां रक्तोष्ठीं कुञ्चितभ्रुवम् ॥
पीनोन्नतस्तनतटां मणिकुण्डलधारिणीम् ।
सुमण्डलं मुखं तस्याः शिरः सीमन्तभूषितम् ॥
पद्मस्वस्तिकशङ्खैर्वा भूषिता कुन्तलालकैः ।
कञ्चुकाबद्धगात्रौ च हारभूषौ पयोधरौ ॥
नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ ।
पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे ॥
मेखलाभरणान्तद्वत्तप्तकाञ्चनसुप्रभाम् ।
नानाभरणसम्पन्नां शोभनाम्बरधारिणीम् ।
पार्श्वे तस्याः स्त्रियः कार्य्याश्चामरव्यग्रपाणयः
पद्मासनोपविष्टान्तु पद्मसिंहासनस्थिताम् ॥
करिभ्यां स्नाप्यमाना सा भृङ्गाराभ्यामनेकशः ।
प्रतिपालयन्तौ करिणौ भृङ्गाराभ्यां तथापरौ ॥
स्तूयमाना च लोकेशैस्तथा गन्धर्व्वगुह्यकैः ॥*॥
तथैव यक्षिणी कार्य्या सिद्धासुरनिषेविता ।
पार्श्वयोः कलसौ तस्यास्तोरणे देवदानवाः ॥
नागाश्चैव तु कर्त्तव्याः खड्गखेटकधारिणः ।
अधस्तात्प्रकृतिस्तेषां नाभेरूर्द्धञ्च पौरुषी ॥
फणाश्च मूर्द्धि कर्त्तव्या द्विजिह्वा बहवः समाः ।

पिशाचा राक्षसाश्चैव भूतवेतालजातयः ॥
निर्म्मांसाश्चैव ते सर्व्वे रौद्रा विकृतरूपिणः ।
क्षेत्रपालश्च कर्त्तव्यो जटिलो विकृताननः ॥
दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः ।
कपालं वामहस्ते तु शिरः केशसमावृतम् ।
दक्षिणे शक्तिकां दद्यादसुरक्षयकारिणीम् ॥*॥
अथातः संप्रवक्ष्यामि द्विभुजं कुसुमायुधम् ।
पार्श्वे चाश्वमुखं तस्य मकरध्वजसंयुतम् ॥
दक्षिणे पुष्पवाणञ्च वामे पुष्पमयं धनुः ।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ॥
रतिस्तु वामपार्श्वे च शयनोपस्करान्विता ।
पटश्च पटहश्चैव खरः कामातुरस्तथा ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च ।
सुशोभनश्च कर्त्तव्यो भगवान् कुसुमायुधः ॥
संस्थानमीषद्रक्तं स्याद्विस्मयं विम्बनेत्रकम् ।
एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया ॥
विस्तरेण न शक्नोति बृहस्पतिरपि द्विजा. ॥”
इति मत्स्यपुराणे देवार्च्चानुकीर्त्तने प्रतिमालक्षणं नाम २६२ । २६३ । २६४ । २६५ अध्यायाः ॥ * ॥ सा द्विविधा । स्थापनरूपा स्वयं व्यक्तरूपा च । यथा,—

श्रीसदाशिव उवाच ।

“शृणु देवि । प्रवक्ष्यामि तदंशावसथं हरेः ।
स्थापनञ्च स्वयं व्यक्तं द्विविधं तत् प्रकीर्त्तितम् ॥
शिलाम्रद्दारुलौहाद्यैः कृत्वा प्रतिकृतिं हरेः ।
श्रौतस्मार्त्तागमैः प्रोक्ता क्रियासंस्थापना हि तत् ॥
तत्स्थापनमिति प्रोक्तं स्वयं व्यक्तं हि मे शृणु ।
यस्मिंस्तु निहितो विष्णुः स्वयमेव नृणां भुवि ॥
पाषाणदार्व्वोरात्मेशः स्वयं व्यक्तं हि तत् स्मृतम् ।
स्वयं व्यक्ते स्थापने वा पूजयेन्मधुसूदनम् ॥
देवतानां महर्षीणामर्च्चनार्थं सनातनः ।
स्वयमेव जगन्नाथः सान्निध्यं याति केशवः ॥
यस्य यद्विग्रहे भाग्यं तदेवाविरभूद्भुवि ।
तदेव पूजयेन्नित्यन्तस्मिन्नेव रमेत सदा ॥
श्रियोऽङ्कशायी देवेशो विधेरर्थाः शुभानने । ।
स एवेक्ष्वाकुनाथानां तपसाविरभूद्भुवि ॥
मथापि काश्यां संपूज्यो माधवः कलुषापहः ।
दक्षिणोदधितीरे तु नीलाद्रौ पुरुषोत्तमे ॥
दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः स्वयम् ।
स एव पूज्यः सर्व्वेषां लोकानां खलु पार्व्वति । ॥
नरनारायणः साक्षात् पूज्यो वदरिकाश्रमे ।
गदाधरो गयायान्तु प्रयागे माधवस्तथा ॥
माधवो विधिवत् पूज्यो गङ्गासागरसङ्गमे ।
कपालमोचने तीर्थे कलिङ्गेऽश्वग्रो हरिस्तथा ॥
विष्णुश्च वहिरङ्गे तु भीममूर्त्तिः शिवे यतः ।
द्वारकायां वासुदेवः कुरुक्षेत्रे रणेश्वरः ॥
नारायणो वङ्कटाद्रौ पूज्यो नित्यं सनातनः ।
स्वयं श्रीभगवान् कृष्णो धाम्नि वृन्दावने शुभे ॥
गोविन्दः केशवो नन्दयशोदानन्दनो विभुः ।
पूज्यो मदनगोपालगोवर्द्धनधरादिकः ॥
चतुरशीतिके क्रोशे ब्रह्माख्यातीतके शिवे ! ।

कलिन्दनन्दिनीतीरे महाप्रलयवर्ज्जिते ॥
सदैव कार्त्तिकेयस्य: श्रीगोपीजनवल्लभः ।
यत्र यत्र हरेरर्च्चा स्वयं व्यक्ता शुभानने ! ॥
स्नानं तीर्थं तथा क्षेत्रं यद्दानमहोत्सवम् ।
संकीर्त्तनं सर्व्वभक्तिस्तथा कार्य्यादिकं जनम् ॥
कायेन मनसा वाचा भक्त्या देवि ! पुनः पुनः ।
तत्र तत्र समागम्य रमेऽहं संयतव्रतिनः ॥
गाढाङ्गयोगजं ज्ञानमर्च्चायां विन्दते ध्रुवम् ।
चक्षुर्गोविषयं प्राप्य ददाति फलमीप्सितम् ॥
सर्व्वावस्थासु सौरभ्यमर्च्चायां लभते नरः ।
अङ्गानामपि सान्निध्यं सर्व्वदा पृथिवीतले ॥
जम्बुद्वीपे महापुण्ये वर्षे वै भारते शुभे ।
अर्च्चायां सन्निधिर्विष्णोर्नेतरेषु कदाचन ॥
तस्माद्वै भारतं वर्षं मुनिभिस्त्रिदशैरपि ।
सेवितं सततं सुभ्रु ! तपोयज्ञक्रियादिभिः ॥
भारतेऽस्मिन् महावर्षे नित्यं सन्निहितो हरिः ।
इन्द्रद्युम्ने तथा कौर्म्मे सिंहाद्रौ वदरीवने ॥
काश्यां प्रयागे सोमे च शालग्रामाचले तथा ।
नारायणाचले सोमे वराहे वामनाश्रमे ।
एवमाद्याः स्वयं व्यक्ताः सर्व्वकामफलप्रदाः ॥
स्वयमेव हि सान्निध्यं यस्मिन् याति जनार्द्दनः ।
तस्मिन्नेव स्वयं व्यक्तं वसन्ति मुनयः शुभाः ॥
महाभागवतश्रेष्ठो विधिना स्थाप्य केशवम् ।
मन्त्रेण कुर्य्यात् सान्निध्यं स्थापनं तद्विधिष्यति ॥
न तु शाक्तादिभिः कार्य्यं मुकुन्दस्थापनादिकम् ।
श्रीहरेरर्च्चनं कर्म्म यात्रोत्सवमथाध्वरम् ॥
यत्किञ्चिद्वैष्णवैः कार्य्यमपरं मन्दिरादिकम् ।
ध्रुवं विष्णुर्न गृह्णाति कृतमेतद्बहिर्म्मुखैः ॥"
　　इति पाद्मोत्तरखण्डे ७३ अध्यायः ॥ * ॥
भगवत्याः प्रतिमाराधनविधिर्य्यथा,—
　　ब्रह्मोवाच ।
"शृणु तस्याः सुरश्रेष्ठ ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शक्रादौः फलेप्सुभिः ॥
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ॥
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ।
अष्टमांशाकरो नित्यं तेनासौ विभुरीश्वरः ॥
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ।
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ॥
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयत सदा ।
विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनम् ॥
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ।
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ॥
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन सत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांसिकां देवीं पूजयन्ति विधानतः ।
प्राप्तवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवीं देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन लक्ष्म्या समन्वितम् ॥

देवीमश्ममयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ।
ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चनेन तत्र सम्प्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम्॥
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम् ॥
कृष्णायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
वज्रोद्भिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम्॥
एवं देवाः समस्ताश्च पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्च्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शिवां मणिमयीं पूज्य लभसे मनसेप्सितम् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजिता सदा ।
ददाति सर्व्वलोकानां चिन्तामणिर्यथा शिवा ॥"
अपि च ।
"हैमताम्रा च महार्षीं शैलाचित्रायसापि वा ।
शक्तिमूले स्थिता देवी सर्व्वकामफलप्रदा ॥
यो यस्य आयुधः प्रोक्तस्तस्मिंस्तां प्रतिपूजयेत् ।
देवी शस्त्रार्च्चिता पुंसां कामायुःसुखसौख्यदा ॥
शूले संपूजिता वत्स ! सर्व्वं भवति पूजितम् ।
वार्क्षीं वा शैलजां वापि रत्नधातुमयीमपि ॥
विधिना शास्त्रदृष्टेन दशबाहुत्रिलोचनाम् ।
कारयेद्भक्तिमान् यस्तु देवीं शास्त्रविशारद ॥"
स्थापनविधिर्य्यथा,—
"सर्व्वशैलेष्टकाष्ठोत्थं गृहं वास्तुविभाजितम् ।
बलभीमष्टकं वत्स ! तासान्तु स्थापने शुभम् ॥
गन्धैर्नैवेद्यधूपैश्च बलिमाल्यविभूषणैः ।
अधिवासनपूर्व्वास्तु स्थापनीयास्तु तद्विदैः ॥
वेदध्वनिमहाघोषैः स्त्रीसङ्गीतोपशोभितम् ।
कर्त्तव्यं स्थापनं तासां बहुवादित्रनादितम् ॥
रात्रौ जागरणं तत्र देव्याः पूजार्थसिद्धये ।
सर्व्वलक्षणसम्पूर्णं सर्व्वोपकरणान्वितम् ॥
वापीकूपतडागादिवाटिकावनशोभितम् ।
वेश्यातूर्य्योपसम्पन्नं ध्वजच्छत्रविभूषितम् ॥
घण्टादर्पणदीपादि देयं द्रव्यं निरूपितम् ।
घटिका तत्र वह्न्यादि दिनसंख्यार्थसिद्धये ॥
कर्त्तव्या एकमेकं वा यथाकालपरिच्छिदे ।
अनेन विधिना यस्तु मातरः स्थापयेन्नरः ।
इहैव पूजनीयस्तु मृतो याति परां गतिम् ॥"
इति देवीपुराणे मातृप्रतिष्ठामाहात्म्यम् ॥*॥
अल्पबुद्धीनां प्रतिमासु देवत्वं यथा,—
"अप्सु क्रियावतां देवो हृदि देवो मनीषि-
　　णाम् ।
प्रतिमा स्वल्पबुद्धीनां ज्ञानिनां सर्व्वतो हरिः ॥"

अपि च ।
"अप्सु क्रियावतामग्निर्हृदि चाहं मनीषिणाम्।
प्रतिमा स्वल्पबुद्धीनां ज्ञानिनामस्मि सर्व्वतः॥*॥
प्रतिमां लक्षणवतीं यः कुर्य्यादेव मानवः ।
केशवस्य परं लोकमक्षयं प्रतिपद्यते ॥
षष्टिवर्षसहस्राणां सहस्राणि महामुने ! ॥
क्रीडते देववत्तत्र अप्सरोभिः सकिन्नरैः ॥
यः स्थापयेद्धरेरर्च्चां सुप्रशस्ते निवेशने ।
पुरुषः कृतकृत्यत्वमनेनैव भवेन्नरः ॥ * ॥
संस्थाप्य प्रतिमां विष्णोर्दैमकल्पसहस्रकाम् ।
रत्नजां रैतिकीं वापि वह्निजीर्णे गृहेऽपि वा ॥
महाक्षानेन गोविन्दं सम्यक् संस्थाप्य मानवः ।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम् ॥"
　　　वह्निपुराणम् ॥
प्रतिमानं, क्ली,(प्रतिमीयतेऽनेनेति । प्रति + मि मा
　वा + ल्युट् ।) प्रतिबिम्बम् । वाहित्यस्याधोभागः।
　इत्यमरः । २ । १० । ३६, २।८।३६ । "अस्य
　वाहित्थस्याधोभागो दन्तयोर्मध्यं प्रतिमान-
　मुच्यते प्रतिमीयते अनेन प्रतिमानं डु मिञ
　न क्षेपे अनट् मिञ्योरिति डा । प्रतिमानं प्रति-
　च्छाया गजदन्तान्तरालयोरिति रुद्रः ।" इति
　भरतः ॥ (यथा, महाभारते । ८ । २८ । २८ ।
　"प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
　निरन्तरीता भग्नं नागाः प्रासतोमर-
　　　　　शक्तिभिः ॥"
　हस्तिललाटदेशः । इति महाभारतटीकायां
　नीलकण्ठः । ६ । ४५ । २७ ॥ * ॥ सादृश्यम् ।
　यथा, ऋग्वेदे । १ । ५२ । ७ ।
　　"वृष्णो वध्रिः प्रतिमानं बुभूषन् ।
　　पुरुत्रा वृत्रो अशयद्व्यस्तः ॥"
　"प्रतिमानं सादृश्यम् ।" इति तद्भाष्ये सायनः ॥
　प्रतिनिधिः । यथा, ऋग्वेदे । ६ । १८ । १२ ।
　"नास्य शत्रुर्न प्रतिमानमस्ति ।"
　"प्रतिमानं प्रतिनिधिर्नास्ति ।" इति तद्भाष्ये
　सायनः ॥ * ॥ दृष्टान्तम् । यथा, भागवते ।
　७ । ४ । ३५ ।
　"यं साधुगाथासदसि रिपवोऽपि सुरा नृप ! ।
　प्रतिमानं प्रकुर्व्वन्ति किमुतान्ये भवादृशाः ॥"
　तथा च महाभारते । ६ । २ । ३६ ।
　"उग्रायुधश्च विक्रान्तः प्रतिमानं धनुष्मताम् ॥"
　धान्यादिपरिमाणनिर्द्धारार्थप्रस्थद्रोणादिकम् ।
　यथा, याज्ञवल्क्ये । २ । १०० ।
　"तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
　प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥"
　मनुसंहितायान्तु । ८ । ४०३ । श्लोके प्रतीमानं
　इत्येव दृश्यते ॥)
प्रतिमार्गकः, पुं, (प्रतिदिशं मार्गो गमनपन्था
　यस्य । कप् ।) पुरविशेषः । यथा,—
　"सोमचारिपुरं शोभसुदकः प्रतिमार्गकः ॥"
　　　　　इति जटाधरः ॥
　"हरिश्चन्द्रपुरं शोभसुदकः प्रतिमार्गकः ॥"
　　　　　इति त्रिकाण्डशेषः ॥

प्रतिमुक्तः, त्रि, (प्रतिमुच्यते स्मेति । प्रति+मुच्+क्तः ।) परिहितवस्त्रादिः । इत्यमरः । ३।८।६५ ॥ (परित्यक्तः । यथा, रघुः । ४ । ४३ ।
"गृहीतप्रतिमुक्तस्य स धर्म्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥"
बद्धः । यथा, भागवते । ३ । १८ । १० ।
"न वल्गुपाशैः प्रतिमुक्तस्य वीरा
विकत्थनं तव गृह्णन्त्यभद्र ॥"
प्रतिनिष्क्रान्तः । विच्युतः । यथा, मार्कण्डेये ।१५।१।
"नरकात् प्रतिमुक्तस्तु ततः पतितयाजकः ॥"
प्रत्यर्पितः । यथा, रघुः । १६ । ५८ ।
"तद्गमतीभिर्म्मदरागशोभां
विलोचनेषु प्रतिमुक्तमासाम् ॥")

प्रतियत्नः, पुं, (प्रतियत्यते इति । प्रति+यत् प्रयत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३।३।९० । इति नङ् ।) लिप्सा । वाञ्छा । उपग्रहः । वन्दी । इत्यमरः । ३ । ३ । १०६ ॥ नियन्त्रणादिः । सतो गुणान्तराधानम् । इति भरतः ॥ संस्कारः । इति स्वामी ॥ (यथा, माघे ।३।५४।
"सुगन्धितामप्रतियत्नपूर्व्वां
बिभ्रन्ति यत्र प्रमदाय पुंसाम् ॥"
"यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वो यस्यास्ताम् ।" इति तट्टीकायां मल्लिनाथः ॥) यत्नादिः । इति रामाश्रमः ॥ प्रतियत्नः । इति मुकुटः ॥
"प्रतियत्नस्तु संस्कारलिप्सोपग्रहयोषु च ॥"
इति मेदिनी । ने, १६६ ॥
रचना । इति जटाधरः ॥ प्रयत्नवति, त्रि । इति त्रिकाण्डशेषः ॥

प्रतियातना, स्त्री, (प्रतियात्यते अनया इति । प्रति+यत्+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ (यथा, माघे ।३।३४।
"अनिर्व्विदा या विदधे विधात्रा
पृथ्वी पृथिव्या प्रतियातनेव ।")
तुल्ययातना च ॥

प्रतियोगः, पुं, प्रतियुज्यत इति । प्रति+युज्+भावे घञ् ।) विरोधः । (पुनरुद्योगः । यथा, भागवते । ४ । १० । २२ ।
"इति ब्रुवंश्चित्ररथः स्वसारथिं
यत्तः परेषां प्रतियोगशङ्कितः ।
शुश्राव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥"
"प्रतियोगः पुनरुद्योगः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

प्रतियोगी, [न्] त्रि, (प्रतिरूपं युज्यते इति । प्रति+युज+घिनुण् ।) विरोधी । यथा,—
"साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम् । इति चिन्तामणिः ॥ सत्प्रतिपक्षः । यथा,—
"प्रतियोगिनं दृष्ट्वा प्रतियोगी निवर्त्तते ।" इति प्राचीनकारिका ॥

प्रतिरम्भः, पुं, (प्रति+लभ+भावे घञ् । लस्य रः ।) प्रतिलम्भः । इति द्विरूपकोषः ॥

प्रतिरूपं, क्ली, (प्रतिगतं प्रतिकृतं वा रूपमिति प्रादिसमासः ।) प्रतिमा । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ७ । १० । २९ ।
"भवान् मे खलु भक्तानां सर्व्वेषां प्रतिरूपधृक् ॥"
त्रि, प्रतिगतं रूपमस्य । अनुरूपः । यथा, महाभारते । १ । १०२ । ६१ ।
"आत्मनः प्रतिरूपोऽसौ लब्धः पतिरिति स्थितौ ।
विचित्रवीर्य्यं कल्याण्यौ पूजयामासतुः शुभे ॥"
दानवविशेषे, पुं । यथा, महाभारते । १२ । २२७ । ५१ । [मधुः ॥")
"विश्वजित् प्रतिरूपश्च वृषाण्डो विष्करो

प्रतिरूपकं, क्ली, (प्रतिरूप+स्वार्थे कन् ।) प्रतिबिम्बम् । इति जटाधरः ॥ (यथा, महाभारते । १२ । ५६ । ४६ ।
"अभिर्दैर्गरदैश्चैव प्रतिरूपककारकैः ।
श्रेयोसुखोपजापेन वीवधच्छेदनेन च ॥")

प्रतिरोधः, पु, (प्रतिरुध्यते अनेनेति । प्रति+रुध्+करणे घञ् ।) तिरस्कारः । इति युक्तयानशब्दटीकायां भरतः ॥ (प्रति+रुध्+कर्त्तरि अच् ।) सत्प्रतिपक्षः । यथा । पक्षसाध्यसाधनप्रसिद्धिस्वरूपा सिद्धिबाधप्रतिरोधानां निरासः । इति सव्यभिचारशिरोमणिः ॥

प्रतिरोधकः, पुं, (प्रतिरुणद्धि प्रतिरुध्य चौर्य्यं करोतीति । प्रति+रुध्+ण्वुल् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥

प्रतिरोधी, [न्] पु, (प्रतिरुणद्धीति । प्रति+रुध्+णिनिः । प्रतिरोधस्तिरस्कारोऽस्यास्तीति वा । प्रतिरोध+इनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

प्रतिलम्भः, पुं, (प्रति+लभ+भावे घञ् ।) लाभः । तत्पर्य्यायः । लम्भनम् २ । इति हेमचन्द्रः ॥ यथा, श्रीहर्षः ।
"नैव नः प्रियतमोभयथासौ
यद्यमुं न दृश्यते दृश्यते वा ।
एकतो हि धिगमुमगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः ॥"

प्रतिलोमः, त्रि, (प्रतिगतं लोम आनुकूल्यं यस्मादिति । "अच् प्रत्यन्ववपूर्व्वात्सामलोम्नः ।" ५ । ४ । ७५ । इति समासान्तोऽच्प्रत्ययः ।) वामः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १२७।१४ ।
"बहूनि प्रतिलोमानि पुरा स कृतवान् मयि ।
क्षमो नारद ! सोढानि भ्रातेति स मयानघ ॥")
विलोमः । यथा,—
"तावुभावप्यसंस्कार्य्याविति धर्म्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः ॥"
इति मानवे । ६ । ६८ ॥

प्रतिलोमजः, त्रि, (प्रतिलोमात् जायते इति । प्रतिलोम+जन्+डः ।) प्रतिलोमजातः । उत्तमवर्णायां अधमवर्णाज्जातः । यथा,—
"संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥"
इति मानवे १० अध्याये ॥

प्रतिवचः, [स्] क्ली, (प्रतिरूपं वचः ।) प्रत्युत्तरम् । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । १ । ११ । ५४ ।
"सोमः प्राक्वचः श्रुत्वा किञ्चित् क्रोधसमाकुलः।
भक्त्या प्रतिवचः प्राह शुक्रदूतं तदा शशी ॥")

प्रतिवचनं, क्ली, (प्रतिरूपं वचनम् ।) प्रतिवाक्यम् । उत्तरम् । इति त्रिकाण्डशेषः ॥ (यथा, कलाविलासे । २ । ६ ।
"न ददाति प्रतिवचनं विक्रयकाले शठो वणिग् मौनी ।
निक्षेपयाचिपुरुषं दृष्ट्वा सम्भाषणं कुरुते ॥"
प्रतिनिर्द्देशः । इति निरुक्तम् । ६ । ३ । ६ ॥)

प्रतिवसथः, पु (प्रतिवसन्त्यस्मिन्निति । प्रति+वस्+बाहुलकात् अथ ।) ग्रामः । इति हेमचन्द्रः । ४ । २७ ॥

प्रतिवाक्, [च्] स्त्री, (प्रतिरूपा वाक् ।) उत्तरम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ७२ । ७१ ।
"लाङ्गुलचालनं क्ष्वेडा प्रतिवाक्यो विवर्त्तनम् ।
दन्तदर्शनमारावस्ततो युद्धं प्रवर्त्तते ॥")

प्रतिवाक्यं, क्ली, (प्रतिरूपं वाक्यम् ।) उत्तरम् । इत्यमरः । १ । ६ । १० ॥

प्रतिवाणिः, स्त्री, (प्रतिरूपा वाणिः ।) प्रत्युक्तिः । प्रत्युत्तरम् । इति भूरिप्रयोगः ॥

प्रतिवादी, [न्] त्रि, (प्रतिवादोऽस्यास्तीति इनिः । यद्वा, प्रतिकूलं वदतीति । प्रति+वद्+णिनिः ।) प्रतिपक्षः । यथा,—
"यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम् ॥"
इति व्यवहारतत्त्वे बृहस्पतिवचनम् ॥

प्रतिवासरः, पु, (प्रतिगतो वासरम् ।) प्रतिदिनम् । तद्दिनम् । इति हारावली । १६८ ॥ (क्ली, वासरं वासरं प्रतीति समासे । प्रतिदिनम् । यथा, राजतरङ्गिण्याम् ।१। १२७ ।
"भूतेशवर्द्धमानेशविजयेशानपश्यतः ।
नियमो राजकार्य्येषु तस्याभूत् प्रतिवासरम् ॥")

प्रतिवासी, [न्] त्रि, (प्रत्यासन्नं वसतीति । प्रति+वस्+णिनिः ।) आसन्नगृही । निकट स्थायी । पड़सि इति भाषा । प्रतिवसतीति ग्रहादित्वाण्णिनिप्रत्ययनिष्पन्नः ॥

प्रतिविम्बं, क्ली, (प्रतिरूपं विम्बमिति । "कुगतिप्रादयः ।" २ । २ । १८ । इति समासः ।) प्रतिमा । प्रतिच्छाया । इत्यमरः । २।१०।३६ ॥ (यथा, पञ्चदश्याम् । १ । १५ ।
"चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता ।
तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ॥")

प्रतिविषा, स्त्री, (प्रतीपं विषं यस्याः ।) अतिविषा । इत्यमरः । २।४।६६ ॥ आतइच इति भाषा ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ४० अः ।

"महौषधं प्रतिविषा सुक्तं चेत्यामपाचना: ॥"
अस्या: पर्य्यायो यथा,—
"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रतिविष्णु, अव्य, विष्णुं विष्णुं प्रति । इति मुग्धबोध-व्याकरणम् ॥

प्रतिविष्णुकः, पुं, (प्रतिगतो विष्णुर्यस्मिन्निति । प्रति-विष्णुर्मुचुकुन्दो नृपतिः । तन्नाम्ना कायति प्रकाशते इति । कै + कः ।) मुचुकुन्दवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"मुचुकुन्दः चत्रवृक्षश्च प्रतिविष्णुकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रतिवेशः, पुं, (प्रत्यासन्नो वेशो निवेशः । प्रति-विशन्त्यत्रेति आधारे घञ् वा ।) प्रतिवासिगृहम् । आसन्नगृहिणां गृहम् । इति शब्दरत्नावली ॥ (त्रि, आसन्नवर्त्ती । यथा, ऋग्वेदे ।१०।६६।१३।
"क्षेत्रस्य पतिं प्रतिवेशमीमहे ।"
"प्रतिवेशं समीपे वर्त्तमानम् ।" इति तद्भाष्ये सायनः ॥)

प्रतिवेशवासी, [न्] त्रि, (प्रतिवेशे वसतीति । वस् + णिनिः ।) प्रतिवासी । यथा,—
"नो जाने प्रतिवेशवासिनि गुरोः किं भावि सम्भावितम् ।"
इत्यलङ्कारकौस्तुभम् ॥

प्रतिवेशी, [न्] त्रि, (प्रतिवेश आसन्नवर्त्तिगृह-मस्यास्तीति । इनिः ।) प्रतिवासी । इति शब्द-रत्नावली ॥ (यथा, मृच्छकटिके ३ अङ्के ।
"दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्म्मणि कौशलञ्च ॥")

प्रतिशासनं, क्ली, (प्रति + शास् + भावे ल्युट् ।) आहूय भृत्यादीनां कार्य्ये प्रेरणम् । इत्यमरः ॥

प्रतिशिष्टं, त्रि, (प्रतिगतं शिष्टमवशिष्टम् ।) प्रत्याख्यातम् । (प्रति + शास् + क्तः ।) प्रेषितम् । इति त्रिकाण्डशेषः ॥

प्रतिश्या, स्त्री, (प्रतिश्यायते इति । प्रति + श्यैङ् गतौ + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । टाप् ।) प्रतिश्यायः । इति शब्दरत्नावली ॥

प्रतिश्यायः, पुं, (प्रतिक्षणं श्यायते इति । प्रति + श्यै + "श्याद्व्यधास्रुसंस्र्वतीणेति ।" ३ ।१।१४१ । इति णः ।) पीनसरोगः । इत्यमरः ।२।६।५१॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥"
अस्य सकारणलक्षणां सम्प्राप्तिश्च यथा,—
"सन्धारणाजीर्णरजोऽतिभाष्य-
क्रोधर्त्तुवैषम्यशिरोऽभितापैः ।
प्रजागरातिस्वपनाम्बुशीतै-
रवश्यया मैथुनवाष्पधूमैः ॥
संस्त्यानदोषे शिरसि प्रवृद्धो
वायुः प्रतिश्यायमुदीरयेत्तु ।
शीर्षाभितोदैः श्वयथुर्ज्वलाभः
सावोऽनिलात् सम्भवतीह रोगः ॥
घोष-
तृष्णोष्णपीतस्रवणानि पित्तात् ।
कासारुचिस्रावघनप्रसेकाः
कफाद्गुरुः स्रोतसि चापि कण्डूः ॥
सर्व्वाणि रूपाणि तु सन्निपातात्
स्युः पीनसे तीव्ररुजोऽतिदुःखे ।
सर्व्वोऽतिवृद्धोऽहितभोजनात्तु
दुष्टप्रतिश्याय उपेक्षितः स्यात् ॥"
इति चरके चिकित्सास्थाने षड्विंशेऽध्याये ॥)

प्रतिश्रयः, पुं (प्रतिश्रीयते अस्मिन्निति । प्रति + श्रि + आधारे अच् ।) यज्ञशाला । इति जटाधरः ॥ सभा । आश्रयः । इति मेदिनी । ये, १२२ ॥ ओकः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १६६ । ४ ।
"स सम्यक् पूजयित्वा तं विप्रं विप्रर्षभस्तदा ।
ददौ प्रतिश्रयन्तस्मै सदा सर्व्वातिथिव्रतः ॥"
निवासः । यथा, मनौ । १० । ५१ ।
"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ॥"
"प्रतिश्रयो निवासः ।" इति मेधातिथिः ॥)

प्रतिश्रवः, पुं, (प्रति + श्रु + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) अङ्गीकारः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४२४ ।
"इति सोऽभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् ।
दूरमुत्क्रान्तमर्य्यादः सङ्गमं तमयाचत ॥")

प्रतिश्रुत्, स्त्री, (प्रतिरूपं श्रूयते इति । प्रति + श्रु + सम्पदादित्वात् क्विप् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ । २५॥ (यथा, रघौ । १३ । ४० ।
"यस्यायमन्तर्हितसौधभाजः
प्रसक्तसङ्गीतमृदङ्गघोषः ।
वियद्गतः पुष्पकचन्द्रशालाः
क्षणं प्रतिश्रुन्मुखराः करोति ॥")

प्रतिश्रुतः, त्रि, (प्रतिश्रूयते स्मेति । प्रति + श्रु + क्तः ।) अङ्गीकृतः । इत्यमरः । ३ । २ । १०८ ॥

प्रतिषिद्धः, त्रि, (प्रति + सिध् + क्तः ।) प्रतिषेध-विषयः । निषिद्धः । यथा । अप्रतिषिद्धमनुमतं भवतीति दत्तकचन्द्रिका ॥ (यथा च,—
"सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

प्रतिषेद्धा, [ऋ] त्रि, (प्रति + सिध् + तृच् ।) प्रतिषेधकर्त्ता । तत्पर्य्यायः । माशब्दिकः २ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १८१ । १० ।
"यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् ।
तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्म्मसु ॥")

प्रतिषेधः, पुं, (प्रति + सिध् + भावे + घञ् ।) निषेधः । यथा, मलमासतत्त्वे ।
"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥"

प्रतिषेधकः, त्रि, (प्रतिषेधतीति प्रति + सिध् + ण्वुल् ।) प्रतिषेधकर्त्ता । यथा अग्निपुराणे ।
"षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि ।
योऽनुमन्तापि भवति निरये प्रतिषेधकः ॥"

प्रतिष्कः, पुं, (प्रतिष्कन्दति प्रतिगच्छतीति । प्रति + स्कन्द् + बाहुलकात् डः ।) दूतः । इति शब्दरत्नावली ॥

प्रतिष्कशः, पुं, (प्रतिकाशतीति । प्रति + काश् + अच् । बाहुलकात् सुट् ।) सहायः । वार्त्ता-हरः । पुरोगः । इति मेदिनी । शे, ३६ ॥

प्रतिष्कषः, पुं, (प्रतिकष्यतेऽनेनेति । प्रति + कष् हिंसायाम् + अच् । बाहुलकात् सुट् ।) चर्म्म-रज्जुः । इति जटाधरः ॥

प्रतिष्कसः, पुं, (प्रतिकसति प्रतिगच्छतीति । प्रति + कस् + अच् । सुट् ।) चरः । इति शब्दरत्नावली ॥

प्रतिष्टम्भः, पुं, (प्रतिष्टम्भनमिति । प्रति + स्तम्भ + भावे घञ् । षत्वम् ।) प्रतिबन्धः । इत्यमरः । ३ । २ । ७ ॥ (यथा, रघौ । २ । ३२ ।
"बाहुप्रतिष्टम्भविवृद्धमन्यु-
रभ्यर्णमागस्कृतमस्पृशद्भिः ॥")

प्रतिष्ठः, पुं, (प्रतिष्ठा अस्यास्तीति । अच् ।) सुपार्श्वनामकष्टमार्हत्पिता । इति हेमचन्द्रः । १ । ३६ ॥ प्रतिष्ठायुक्ते, त्रि ॥ (यथा, महा-भारते । ५ । ४६ । ३० ।
"आत्मैव स्थानं मम जन्म चात्मा
ओतप्रोतोऽहमजरः प्रतिष्ठः ॥)

प्रतिष्ठा, स्त्री, (प्रतितिष्ठतीति । प्रति + स्था + "आतश्चोपसर्गे ।" ३।३।१०६ । इति भावादौ अङ् । टाप् ।) गौरवः । (यथा, कथासरित्-सागरे । २ । ६८ ।
"किञ्च व्याकरणं लोके प्रतिष्ठां प्रापयिष्यति ॥")
स्थितिः । स्थानम् । (यथा, रघुः । १६ । ३५ ।
"वेदिप्रतिष्ठान् विततार्ध्वराणां
यूपानपश्यच्छतशो रघूणाम् ॥"
आश्रयः । यथा, मार्कण्डेये । ८४ । १० ।
"गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥")
यागनिष्पत्तिः । चतुरक्षरपद्यम् । इति मेदिनी । ठे, १३ ॥ * ॥ (स्थितिः । यथा, हरिवंशे । २८ । ३७ ।
"य इदं च्यावनं स्थानात्प्रतिष्ठाञ्च शतक्रतोः ।
शृणुयाद्धारयेद्वापि न स दौरात्म्यमाप्नुयात् ॥"
शरीरम् । यथा, ऋग्वेदे । १० । ७३ । ६ ।
"साकं प्रतिष्ठा हृद्या जघन्थ ॥")
संस्कारविशेषः ।(यथा, आर्य्यासप्तशत्याम् ।३८६।
"पूजा विना प्रतिष्ठां नास्ति न मन्त्रं विना प्रतिष्ठा च ।
तदुभयविप्रतिपन्नः पश्यतु गीर्व्वाणपाषाणम् ॥")
तद्दिनादि यथा,—
मत्स्यपुराणे ।
"चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ।
समयः सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ॥
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ॥*

प्रतिष्ठा सर्व्वदेवानां केशवस्य विशेषतः ।
उत्तरायणमापन्ने शुक्लपक्षे शुभे दिने ॥
कृष्णपक्षे च पञ्चम्यामष्टम्याञ्चैव शस्यते ।' * ॥
शुक्लयजभीमे ।
'शुभादायने पुण्ये कर्त्तव्यं विषुवद्वये ।
चन्द्रसूर्य्यग्रहे वापि दिने पुण्येऽथ पर्व्वसु ॥
या तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्त्तिता ।
शास्त्रागमविशेषेण प्रतिष्ठा मुक्तिदायिनी ॥' * ॥
पद्मपुराणे ।
'प्रतिपद्धनदस्योक्ता पवित्रारोपणे तिथिः ।
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा स्मृता ॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी तथा ।
मातृणां नवमी प्रोक्ता दशमी वासुकेस्तथा ॥
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी ।
मम चैव मुनिश्रेष्ठ । पौर्णमासी तिथिः स्मृता ॥'
कल्पतरौ देवीपुराणम् ।
'महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने ।
यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे ॥
गर्त्तापूरशिलान्यासे शुभदस्तस्य पूजितः ॥'
यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभद-स्तस्य गर्त्तापूरशिलान्यासे गृहारम्भे स कालः पूजित इत्यर्थः ॥ * ॥ प्रतिष्ठासमुच्चये ।
'माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढकयोर्वापि प्रतिष्ठा शुभदा भवेत् ॥' * ॥
भविष्ये ।
'सोमो बृहस्पतिश्चैव शुक्रश्चैव बुधस्तथा ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यज्ञकर्म्मणि ॥
मत्स्यपुराणम् ।
'आषाढे द्वे तथा मूलमुत्तराद्वयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदस्तथा ॥
हस्ताश्विनी रेवती च पुष्या मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादौ प्रशस्यते ॥'
दीपिकायाम् ।

'प्राजेशवाश्वकरादितिभाश्विनीषु
पौष्णामरेज्यशशिभेषु तथोत्तरेषु ।
कर्त्तुः शुभे शशिनि केन्द्रगते च जीवे
कार्य्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा ॥'

प्राजेशादयः । रोहिणीज्येष्ठाहस्तापुनर्व्वस्वश्वि-नीरेवतीपुष्यामृगशिरउत्तरफल्गुन्युत्तराषाढो-त्तरभाद्रपदनक्षत्राणि ॥ * ॥ सर्व्वमङ्गलाष्टदशान्ते देवीपुराणम् ।
'यथा द्वादशमे जीवे अष्टमे वाथ भास्करे ।
प्रतिष्ठा कारिता विष्णोर्महाभयकरी मता ॥'
कल्पतरौ देवीपुराणम् ।
'चतुर्व्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।'
प्रतिष्ठा ब्राह्मणद्वारैव कर्त्तव्या ।
'कर्त्तुमिच्छति यः पुण्यं मम मूर्त्तिप्रतिष्ठया ॥
अन्वेषणीयस्त्वाचार्य्यस्तेन लक्षणसंयुतः ॥
ब्राह्मणः सर्व्ववर्णानां पञ्चरात्रविशारदः ।
ब्राह्मणानामलाभे तु क्षत्त्रियो वैश्यशूद्रयोः ॥
क्षत्त्रियाणामलाभे तु वैश्यः शूद्रस्य कथितः ।
कदाचिदपि शूद्रस्तु न च कार्य्यार्थमर्हति ॥' * ॥
बृहन्नारदीये ।
'प्रणमेच्छूद्रसंस्पृष्टं लिङ्गं वा हरिमेव वा ।
स सर्व्वयातनाभोगी यावदाभूतसंप्लवम् ॥'
यावदाभूतसंप्लवं प्रलयपर्य्यन्तम् ॥ तथा ।
'स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर ! ।
स्पर्शने नाधिकारोऽस्ति विष्णौ वा शङ्करेऽपि वा ॥' * ॥

प्रतिष्ठाप्रकारस्तु मत्स्यपुराणादावुक्तः । तद-सम्भवे विद्याकरवाजपेयिप्रभृतिसम्मतो भवि-ष्यादुक्तः । यथा भविष्यपुराणम् ।
'स्नपनादि यथाशक्ति कृत्वा तन्मूलमन्त्रकम् ।
विन्यसेद्धृदयाम्भोजे प्रतिमासु कृता भवेत् ॥'
आदिपदात् पूजोत्सवहोमादि महाकपिल-पञ्चरात्रोक्तकर्म्म च कर्त्तव्यम् । तद्यथा,—
'सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्तरम् ॥
ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
पूजाञ्च महतीं कुर्य्यात् स्वमन्त्रोक्तां यथाविधि ।
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ॥'
लिपिन्यासस्तु मातृकान्यासः । उक्तञ्च ।
जपादौ सर्व्वमन्त्राणां विन्यसेन्न लिपिं विना ।
कृतं तन्निष्फलं विद्यात्तस्मात् पूर्व्वं लिपिं न्यसेत् ॥
कादिमतेऽपि ।
'मातृकायाः षडङ्गञ्च मातृकान्यासमेव च ।
सर्व्वासां प्रथमं कृत्वा पश्चात्तन्त्रोदितं न्यसेत् ॥
एतद्वचनाच्च मातृकान्यासः पूर्व्वं पश्चात्तत्त्व-न्यासः ॥'

क्रमदीपिकायामप्येवं क्रमः । मन्त्रन्यासश्च तत्त-न्मन्त्रविशेषोक्तपदवर्णन्यासः । तदभावे मूल-मन्त्रेण शिरसि हस्तन्यासः । तत्त्वन्यासस्तु विष्णुविषयक एव । न्यासप्रमाणानि सारदाक्रम दीपिकोक्तान्यनुसन्धेयानि ॥ * ॥ प्राणप्रतिष्ठा-मन्त्रस्तु सारदात्रयोविंशतिपटलोक्तः । यथा,—
'पाशाङ्कुशपुटाशक्तिर्वाणीबिन्दुविभूषितः ।
याद्याः सप्त सकारान्ता व्योमसत्येन्दुसंयुतम् ॥
समन्ते हंसमन्त्रः स्यात्ततोऽमुष्यपदं भवेत् ।
प्राणा इति वदेत् पश्चात् इह प्राणास्ततः परम् ॥
अमुष्य जीव च इह स्थितोऽमुष्यपदं भवेत् ।
सर्व्वेन्द्रियाण्यमुष्यान्ते वाङ्मनश्चक्षुरन्ततः ॥
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम् ।
तिष्ठन्त्वग्निवधूरन्ते प्राणमन्त्रोऽयमीरितः ॥
प्रत्यमुष्यपदात् पूर्व्वं पाशाद्यानि प्रयोजयेत् ।
प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः ॥'
पाशाङ्कुशपुटाशक्तिरित्यनेन प्रथमं पाशबीजं आं ततः शक्तिबीजं ह्रीं ततोऽङ्कुशबीजं क्रों वाणी यकारः बिन्दुविभूषितो यं । याद्याः सप्त सकारान्ताः उद्धृतयकाराद्यनुवादेन सप्त तद्भिन्नं बीजं पूर्व्वं पृथगुद्धारस्तु सप्तानामपि सबिन्दुताख्यापनाय । अङ्कुशवायूनलावनि-वरुणबीजानीत्युक्तम् । अत्र वायुबीजस्यैकत्वं बीजत्वेन सर्व्वेषां सबिन्दुत्वं चोक्तम् । राघवभट्टो-ऽप्येवम् । अन्यस्तु वाणीबिन्दुविभूषिता इति पठित्वा नादबिन्दुविभूषिता इति व्याख्यातं याद्या इत्यस्य विशेषणं वदति । व्योम हकारः सत्य ओंकारः इन्दुर्बिन्दुः तेन हों । अतएव पाशाङ्कुशान्तरितशक्तिमनोः परस्ताद्याद्यं यादिवसुवर्णयुक्तं सहंसमिति प्रपञ्चसारप्रति-पाद्यगुणमित्यनेन हंसमिति पद्मपादाचार्य्यैर्व्या-ख्यातम् । अग्निवधूः स्वाहा । तेनायं मन्त्रः ।
आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुष्य प्राणा इह प्राणाः आमित्यादि अमुष्य जीव इह स्थितः आमित्यादि अमुष्य सर्व्वेन्द्रि-याणि आमित्यादि अमुष्य वाङ्मनश्चक्षुःश्रोत्र-घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।
अमुष्य इति षष्ठ्यन्तदेवतानामोपलक्षणम् ।
'अदःपदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते ।
अमुष्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ॥'
इति नारदीयात् ॥

वशिष्ठसंहितायाम् ।
'हृदि हस्तं सन्निधाय प्राणस्थापनमाचरेत् ॥' * ॥
प्रागुक्तभविष्यपुराणवचनेन तन्मूलमन्त्रकं तत्त-द्देवतामन्त्रकं स च वैदिकस्तान्त्रिकश्च ।
'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥'
ब्रह्मपुराणे ।
'ओङ्कारादिनमोऽन्तेन चतुर्थ्यन्ततत्तद्देवतानाम-रूपो वा ।"

कालिकापुराणे ।
'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शश्वच्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् ।
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वसंख्यायै स्वाहेति यजुरीरयन् ॥
अङ्गमन्त्रैरङ्गिमन्त्रैर्वैदिकैरित्यनेन च ।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥'
अङ्गमन्त्रैः अङ्गन्यासमन्त्रैः । अङ्गिमन्त्रैः मूल-मन्त्रैः वैदिकैर्मनोज्योतिरित्यादिभिः ॥ * ॥
स्नपनात् पूर्व्वं वल्मीकमृत्तिकादिभिः स्नपनमाह हयशीर्षपञ्चरात्रम् ।
'वल्मीकमृत्तिकाभिस्तु गोमयेन स्वभस्मना ।
क्षालयेच्छिल्पिसंस्पर्शदोषाणामुपशान्तये ॥
स्नापयेद्गन्धतोयेन शुद्धवत्या तु देशिकः ॥
नमस्तेऽस्तु सुरेशानि प्रणीते विश्वकर्म्मणा ।
प्रभावितासेषजगद्धात्रि ! तुभ्यं नमो नमः ॥
त्वयि संपूजयामीशं नारायणमनामयम् ।
रहिता शिल्पिदोषैस्त्वमृद्धियुक्ता सदा भव ॥' * ॥
तेन यथाशक्ति स्नपनादिपूर्व्वकप्रतिमाहृदये तन्मूलमन्त्रविन्यासेन देवताया विशेषसन्निधिः प्रतिष्ठेति । राघवभट्टधृतमहाकपिलपञ्चरात्रे-ऽपि ।

'प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्व्वाच्च तिष्ठतेः ।
बह्वर्थत्वान्निपातानां संस्कारादौ प्रतेः स्थितिः ॥
अर्थद्वयमेतस्य गीयते शाब्दिकैर्जनैः ।
विशेषसन्निधिर्या तु क्रियते व्यापकस्य तु ॥
सम्मूर्त्तौ भावनामन्त्रैः प्रतिष्ठा साभिधीयते ॥'*॥
स्वभक्षणा गोमयभक्षणा ।
'अष्टोत्तरं पलशतं स्नाने देयञ्च सर्व्वदा ॥'
पलमाह मनुः ।
'पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ।'
पलं सुवर्णाश्चत्वारः । तेनाष्टरक्तिकाधिक-
तौलिकमाषद्वयाधिकतोलकद्वयेन पलं भवति
एवंविधाष्टोत्तरपलशतेन तौलिकषष्ट्यधिकशत-
चयतोलका इति । एवं वल्मीकमृदादिस्नाने
गायत्र्या वल्मीकमृदा स्नापयेत् । तत्रापि
अष्टोत्तरशतपलं मूलपाणिलिखितन्यायात् ।
गायत्र्या मूलमन्त्रेण वा गन्धोदकस्नाने शुद्धवत्या
यतोऽन्विन्द्रमित्यादि ऋक्त्रयात्मिकया देशिको
गुरुर्यजमानो वा विप्रः नमोऽस्तु इत्यादिमन्त्रौ
देवतान्तरे च तत्तद्देवतानामोहः । शिवलिङ्ग-
स्याप्यचीत्वात् सौलिङ्गमविरुद्धम् ॥*॥ यमः ।
'कृत्वा देवकुलं सर्व्वं प्रतिष्ठाप्य च देवताम् ।
विधाय विविधं चित्रं तल्लोकं विन्दते ध्रुवम् ॥'
नारसिंहे ।
'प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत् ।
सर्व्वपापानि सन्त्यज्य स तु विष्णुपुरं व्रजेत् ॥
प्रतिष्ठा नरसिंहस्य यः करोति यथाविधि ।
निष्कामो नरशार्द्दूल ! देहबन्धात् प्रमुच्यते ।
सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते ॥
विधिवत् स्थापयेद्यस्तु कारयित्वा जनार्द्दनम् ।
न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्चन ॥'
माधवमानसोल्लासे ।
'देवस्य प्रतिमायान्तु यावन्तः परमाणवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥'
राजमार्त्तण्डे ।
'पुत्त्रोत्पत्तौ सदा श्राद्धमन्नप्राशनिके तथा ।
चूडाकार्य्ये व्रते चैव नाम्नि पुंसवनेऽपि च ॥
पाणिग्रहे प्रतिष्ठायां प्रवेशे नववेश्मनः ।
एतद्वृद्धिकरं नाम गृहस्थस्य विधीयते ॥'
सूत उवाच ।
'कलौ चैकाहसाध्येन प्रतिष्ठां मन्त्रवित्तवान् ।
मध्यमेनाधमेनापि प्रकुर्य्यात्तान्त्रिकैर्मतैः ॥'
तथा ।
नित्यं निर्व्वर्त्त्य मतिमान् कुर्य्यादभ्युदयं ततः ।
विप्रान् संपूजयित्वाथ ततो यागपुरं व्रजेत् ॥
गणेशग्रहदिक्पालान् प्रतिकुम्भेषु पूजयेत् ।
स्थण्डिले विधिवद्विष्णुं परिवारगणं यजेत् ॥
स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि ।
पञ्चामृतैः पञ्चगव्यैः पञ्चन्त्वित्वक्कैरपि ॥
तिलतैलेन सर्व्वैश्च कषायैरपि सत्तमाः ।
पञ्चपुष्पोदकैर्वाथ त्रिपत्त्रैरपि सत्तमाः ॥
तुलसीकुन्दमालूरपत्त्राण्याहुस्त्रिपत्त्रकम् ।
चम्पकाम्रशमीपद्मकरवीरञ्च पञ्चमम् ॥

मृत्तिका करिदन्तस्य पर्व्वताग्रस्थस्य च ।
कुशवल्मीकसम्भूतं मृदां पञ्चकमीरितम् ॥*॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
कुर्य्यात् प्राणप्रतिष्ठाञ्च होमं कुर्य्याद्यथाविधि ।
दक्षिणां विधिवद्दद्यात् पूर्णार्थं तदनन्तरम् ॥'
इति भविष्यपुराणे तृतीयभागे ६ अध्यायः ॥*॥
'चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि ।
पताका लोकपालानां दशानां परिकीर्त्तिताः ।
पञ्चहस्ताश्च वै दण्डाः पताकानां प्रकीर्त्तिताः ॥'
ज्योतिषे ।
'दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु ।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥'* ॥
प्रतिष्ठानन्तरं मात्स्ये ।
'ततः सहस्रं विप्राणामष्टोत्तरशतन्तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम् ॥'
षोडशोपचाराः आसनमित्यादि । दशोप-
चाराः पाद्यादि । पञ्चोपचारा गन्धादि ।
'सर्व्वोपचारवस्तूनामलाभे भावनैव हि ।
निर्म्मलेनोदकेनानुपूर्व्येत्याह नारद. ॥' * ॥
नारसिंहे ।
'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥'
कालिकापुराणम् ।
'यद्दीयते च देवेभ्यो गन्धपुष्पादिकं तथा ।
अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तमुत्सृजेत् ॥'
देवीपुराणम् ।
'होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥'
कात्यायनः ।
'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ॥'
अथ नीराजनमाह पूजारत्नाकरे देवीपुराणम् ।
'शुभैर्घृतादिभिर्दीपैर्जयशब्दैश्च पुष्कलैः ।
यावतो दिवसान् वीर । देव्या नीराजनं कृतम् ।
तावत्कल्पसहस्राणि स्वर्गलोके महीयते ॥
भक्त्या पिष्टप्रदीपाद्यैश्चूतामत्थादिपल्लवैः ।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः ॥
नवम्यां पर्व्वकालेषु यात्राकाले विशेषतः ।
यः कुर्य्याच्छ्रद्धया वीर । देव्या नीराजनं नरः ।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोकं स गच्छति ॥'
पर्व्वकाल उत्सवकालः । देव्या इति स्त्रीत्वम-
विवक्षितं बहुशो निबन्धकारैर्व्याख्यातत्वात्
आचाराच्च ॥ * ॥ अथ प्रतिष्ठितमूर्त्तौ कदा-
चित् पूजाभावेन महाकपिलपञ्चरात्रम् ।
'एकाहपूजाविहतौ कुर्य्याद्द्विगुणमर्च्चनम् ।
त्रिरात्रे च महापूजा संप्रोक्षणमतः परम् ॥
मासादूर्द्ध्वमनेकाहपूजा यदि विहन्यते ।
प्रतिष्ठैवेष्यते केश्चित् केश्चित् संप्रोक्षणक्रमः ॥'
संप्रोक्षणं ॐ देवस्य त्वेत्यादिना ।
'गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च ।
प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम् ॥
सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्तरम् ॥
ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति ।

तन्न्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ।
पूजाञ्च महतीं कुर्य्यात् स्वतन्त्रोक्तां यथाविधि ।
यागहोमादिषु प्रायः संक्षेपोऽयं विधिः स्मृतः ॥'
अशुद्धस्पर्शने तु बौधायनः । तासां द्रव्यवत्
शुद्धिरेवाभावे देवार्च्चानां भूयः प्रतिष्ठापयेत् ।
तासामशुद्धस्पर्शानाम् । प्रकृतिद्रव्यस्य तास्राद्दे-
र्यथेष्टशौचं कृत्वा पुनः प्रतिष्ठां कारयेदिति
रत्नाकरः । तदा पूज्यत्वमित्याहु रत्नाकरा-
दयः ॥ * ॥ आदित्यपुराणे ।
'खण्डिते स्फुटिते दग्धे भ्राजमानविवर्जिते ।
योगहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्च्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥
इति सर्व्वगतो विष्णुः परिभाषाञ्चकार ह ॥'
उपचारद्रव्याणि सारदातिलके ।
'पाद्यं श्यामाकदूर्व्वाब्जविष्णुक्रान्ताभिरिष्यते ।'
तद्युक्तजलमिति शेषः ।
'गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ।
सदूर्व्वैः सर्व्वदेवानामर्घ्यमेतदुदीरितम् ॥
जातीलवङ्गकक्कोलैर्जलमाचमनीयकम् ।
आज्यं दधिमधून्मिश्रं मधुपर्कं निवेदयेत् ॥'
कात्यायनः ।
'मधुपर्कं दधिमधुघृतसर्पिःसहितं कांस्ये
कांस्येन ।'
गन्धश्चन्दनकर्पूरकालागुरुभिरीरितः । पुष्पाणि
देवदेयानि ।
'गुग्गुल्वगुरुशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नैवेद्यैर्देवस्य देशिकः ।
तत्र तत्र जलं दद्यादुपचारान्तरान्तरे ॥'
अत्र वृद्धिहोमौ त्वनावश्यकौ यथाशक्ति इत्य-
भिधानात् ॥ * ॥ तथा चाल्पधनानां यज्ञ-
मन्त्रेण विनापि पूजामाह विष्णुधर्म्मोत्तर-
प्रथमकाण्डम् ।
'पूजा कार्य्या बहिर्वेद्यां श्रद्धया भृगुनन्दन ।।
न त्वल्पदक्षिणैर्यज्ञैर्यजेदिह कदाचन ॥
विष्णुं देवनिकायस्थं यथाश्रद्धमरिन्दम ! ।
तपसा पूजयेन्नित्यं तस्मादल्पधनो नरः ॥"*॥
यद्येकाहे देवप्रतिष्ठावास्तुयागग्रहोत्सर्गास्तदा
तन्त्रेण वृद्धिश्राद्धं कुर्य्यात् । गणशः क्रियमाणे
ष्वितिवचनात् ॥ * ॥ तथा एकस्मिन्नपि अग्नौ
होमद्वयं विधेयम् । एकाग्नावनेकहोमकरण-
पक्षे तन्त्रेण परिसमूहनादिकमाह गोभिलः ।
गणश्वेकं परिसमूहनमिध्मो बर्हिःपर्य्युक्षणा-
माज्यभागाविति ॥ * ॥ पूजादिकन्तु प्रत्येकमेव ।
मत्स्यपुराणे ।
देवानां प्रतिमा यत्र घृताभ्यङ्गक्षमा भवेत् ।
पलानि तस्यै देयानि श्रद्धया पञ्चविंशतिः ॥
अष्टोत्तरशतपल स्नाने देयञ्च सर्व्वदा ॥'
नारसिंहे ।
यवगोधूमजैश्चूर्णैरुद्वर्त्योष्णेन वारिणा ।
प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात् ॥

पादपीठञ्च यो दद्यात् विश्वपत्रविवर्ज्जितम् ।
उद्धारेण च प्रस्थाप्य सर्व्वपापैः प्रमुच्यते ॥”
इति प्रतिष्ठातत्त्वम् ॥ * ॥
प्रकारान्तरं गारुडे ४८ अध्याये मत्स्यपुराणे च द्रष्टव्यम् ॥

प्रतिष्ठानं, क्ली, (प्रतितिष्ठत्यस्मिन्निति । प्रति + स्था + अधिकरणे ल्युट् ।) नगरविशेषः । विठोर इति ख्यातः । तत्र पुरूरवा राजचक्रवर्त्ती आसीत् । इति महाभारतम् ॥ (यथा, देवीभागवते । १ । १३ । १-२ ।
“सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ।
सगुणश्च सुरूपश्च प्रजारञ्जनतत्परः ॥
प्रतिष्ठाने पुरे रम्ये राज्यं सर्व्वनमस्कृतम् ।
चकार सर्व्वधर्म्मज्ञः प्रजारञ्जनतत्परः ॥”
इदं हि गङ्गातीरस्थम् । यथा, हरिवंशे । २६ । ४७—४८ ।
“एवं प्रभावो राजासीदैलस्तु पुरुषोत्तमः ।
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ।
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥”)

प्रतिष्ठितः, त्रि, (प्रतिष्ठा जातास्येति । तारकादित्वात् इतच् ।) प्रतिष्ठायुक्तः । (यथा, देवीभागवते । ३ । ६ । ७३ ।
“सदुद्भूतस्त्वहङ्कारस्तेनाहं कारणं शिवा ।
अहङ्कारश्च मे कार्य्यं त्रिगुणोऽसौ प्रतिष्ठितः ॥”)
गौरवान्वितः । यथा,—
“प्रतिष्ठितागाथाकीर्त्तिर्मरणादतिरिच्यते ॥”
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३४ अध्यायः ॥
निष्पन्नयागः । संस्कृतः । इति प्रतिष्ठाशब्दार्थदर्शनात् ॥

प्रतिसरः, पुं, (प्रतिसरतीति । प्रति + सृ + अच् ।) मन्त्रभेदः । माल्यम् । कङ्कणम् । व्रणशुद्धिः । चमूपृष्ठम् । इति मेदिनी । रे, २७६ ॥ प्रातःकालः । इति शब्दमाला ॥

प्रतिसरः, पुं क्ली, (प्रतिसरतीति । प्रति + सृ + अच् ।) मङ्गलम् । आरक्षम् । करसूत्रम् । नियोज्ये, त्रि । इति मेदिनी । रे, २७६ ॥

प्रतिसर्गः, पुं, (प्रतिरूपः सर्गः ।) ब्रह्मणः सृष्ट्यनन्तरं दक्षादीनां सृष्टिः । स च पुराणपञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा,—
ऋषय ऊचुः ।
“आदिसर्गस्त्वया सूत । कथितो विस्तरेण च ।
प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः ॥
सूत उवाच ।
यदाभिषिक्तः सकलाधिराज्ये
पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपञ्चकार
यज्ञव्रतानां तपसाञ्च सोमम् ॥
नक्षत्रताराद्विजवृक्षगुल्म-
लतावितानस्य च रुक्मगर्भः ।
अपामधीशं वरुणं धनानां
राज्ञां प्रभुं वैश्रवणञ्च तद्वत् ॥
विष्णुं रवीणामधिपं वसूना-
मग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपञ्च दक्षं
चकार शक्रं मरुतामधीशम् ॥
दैत्याधिपानामथ दानवानां
प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षःपशुभूतयक्ष-
वेतालराजन्त्वथ शूलपाणिम् ॥
प्रालेयशैलञ्च पतिं गिरीणा-
मीशं समुद्रं सरितां नदानाम् ।
गन्धर्व्वविद्याधरकिन्नराणा-
मीशं पुनश्चित्ररथञ्चकार ॥
नागाधिपं वासुकिमुग्रवीर्य्यं
सर्पाधिपं तक्षकमादिदेश ।
दिग्वारणानामधिपञ्चकार
गजेन्द्रमैरावतनामधेयम् ॥
सुपर्णमीशं पततामथाश्व-
राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च
प्लक्षं पुनः सर्व्ववनस्पतीनाम् ॥
पितामहः पूर्व्वमथाभ्यषिञ्च-
देतान् पुनः पूर्व्वदिगाधिनाथान् ।
पूर्व्वेण दिक्पालमथाभ्यषिञ्च-
न्नाम्ना सुधर्म्माणमरातिकेतुम् ॥
ततोऽधिपन्दक्षिणतश्चकार
सर्व्वेश्वरं शङ्खपदाभिधानम् ।
सकेतुमन्तं दिगधीशमीश-
श्चकार पश्चाद्भुवनाण्डगर्भः ॥
हिरण्यरोमाणमुदग्दिगीशं
प्रजापतिं मेरुसुतञ्चकार ।
अद्यापि कुर्व्वन्ति दिशामधीशाः
शत्रून् दहन्तस्तु भुवोऽभिरक्षाम् ॥
चतुर्भिरेभिः पृथुनामधेयो
नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
मन्वन्तरे चापि गते तु एव
वैवस्वतश्चक्रुरिमं पृथिव्याम् ॥
गतेऽन्तरे चाक्षुषनामधेये
वैवस्वताख्ये च पुनः प्रवृत्ते ।
प्रजापतिः सोऽस्य चराचरस्य
बभूव सूर्य्यान्वयवंशचिह्नः ॥”
इति मात्स्ये आधिपत्यसेचनं मन्वन्तराधिपत्यं नाम ८ अध्यायः ॥ * ॥ अपि च ।
मार्कण्डेय उवाच ।
“वाराहोऽयं शृणु सर्गो वराहाधिष्ठितो यतः ।
प्रतिसर्गः स्मृतः सो वै दक्षाद्योऽयं ततः पृथक् ॥
तस्मै विराड्मनुर्दक्षो मरीच्याद्यास्तु मानसाः ।
यं यं सर्गं पृथक् चक्रुः प्रतिसर्गः स स स्मृतः ॥
विराट्सुतोऽत्रसंख्यान् मनून् यैर्व्विततं जगत् ।
मनुः सप्त मनून् सृष्ट्वा चकार बहुधा प्रजाः ॥
प्रजाः सिसृक्षुः स मनुर्योऽसौ स्वायम्भुवाह्वयः ।
अस्रजत् प्रथमं षड्वै मनून् षट्परान् सुतान् ॥
स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा ।
चाक्षुषश्च महातेजा विवस्वान् परतस्तथा ॥
यक्षरक्षःपिशाचांश्च नागगन्धर्व्वकिन्नरान् ।
विद्याधरानप्सरसः सिद्धान् भूतगणान् बहून् ॥
मेघान् सविद्युतो वृक्षान् लतागुल्मतृणादिकान् ।
मनुष्यान् पशूंश्च कीटांश्च जलजान् खेचरांस्तथा ॥
एतान्यन्यानि सर्व्वाणि मनुः स्वायम्भुवः सुतैः ।
सहितः ससृजे सोऽस्य प्रतिसर्गः प्रकीर्त्तितः ॥
अन्ये षण्मनवो ये वै तेऽपि स्वे स्वेऽन्तरेऽन्तरे ।
प्रतिसर्गं स्वयं कृत्वा प्राप्नुवन्ति चराचरम् ॥
यज्ञस्य संश्रुतं यज्ञात् यूपं प्रावंशमेव च ।
धर्म्माधर्म्मौ गुणान् सर्व्वान् वराहः स्मृतवान् पुरा ॥
सुतान् बहून् ससृजे पाद्य इतो देवर्षिसत्तमान् ।
महर्षीन् सोमपांश्चैव बहून् पितृगणांस्तथा ॥
सृष्टिं प्रवर्त्तयामास प्रतिसर्गोऽस्य स स्मृतः ।
अजायन्त मुखाद्विप्राः क्षत्रिया बाहुयुग्मतः ॥
ऊर्व्वोर्व्वैश्याः पदः शूद्राश्चतुर्वेदाश्चतुर्मुखात् ।
ब्रह्मणः प्रतिसर्गोऽयं ब्राह्मः सर्गस्ततः स्मृतः ॥
मरीचेः काश्यपो जातः काश्यपात् सकलं जगत् ।
देवा दैत्या दानवाश्च तस्य सर्गः प्रकीर्त्तितः ॥
अत्रेर्नेत्रादभूच्चन्द्रश्चन्द्रवंशस्ततोऽभवत् ।
तेन सर्व्वं जगद्व्याप्तं सोमसर्गः प्रकीर्त्तितः ॥
अथर्व्वाङ्गिरसौ कृत्वा पुत्राश्च बहवोऽपरे ।
मन्त्रयज्ञादयो ये वै ते सर्व्वेऽङ्गिरसः स्मृताः ॥
आज्यपाख्याः पुलस्त्यस्य पुत्राश्चान्ये च राक्षसाः ।
प्रतिसर्गाः पुलस्त्यस्य बलवीर्य्यसमन्विताः ॥
कादवेया गजा अश्वाः प्रजा बहुनरास्तथा ।
ससृजे पुलहेनैष सर्गस्तस्य प्रकीर्त्तितः ॥
क्रतोः पुत्रा वालिखिल्याः सर्व्वज्ञा भूरितेजसः ।
अष्टाशीतिसहस्राणि ज्वलद्भास्करसन्निभाः ॥
प्रचेतसः सुताः सर्व्वे ये वै प्राचेतसाः स्मृताः ।
षडशीतिसहस्राणि पावकोपमतेजसः ॥
सुकालिनो वशिष्ठस्य पुत्रास्तान्येऽपि योगिनः ।
आरुन्धतेयाः पश्चाश्च वाशिष्ठः सर्ग उच्यते
भृगोश्च भार्गवा जाता ये वै दैत्यपुरोधसः ।
कवयस्ते महाप्राज्ञास्तैर्व्याप्तमखिलं जगत् ॥
नारदात्तारका जाता विमानानि तथैव च ।
प्रश्नोत्तरास्तथैवान्ये नृत्यं गीतञ्च कौतुकम् ॥
एते दक्षमरीच्याद्याः शतदारान् बहून् सुतान्
उत्पाद्योत्पाद्य पृथिवीं दिवञ्च समपूरयन् ॥
तेषां सुतेभ्यश्च सुतास्तत्सुतेभ्यः परे सुताः ।
ससृजुः प्रवर्त्तन्ते येऽद्यापि भुवनेषु वै ॥
विष्णोस्तु चक्षुषः सूर्य्यो मनसश्चन्द्रमाः स्मृतः ।
श्रोत्राद्वायुः ससृकृतो मुखादग्निरजायत ॥
प्रतिसर्गो त्र्ययं विष्णोस्तथा चापि दिशो दश ।
दक्षार्थं चन्द्रमाः पश्चादत्रिनेत्राद्व्यजायत ॥
भास्करः काश्यपाज्जातो भार्य्ययास्य समन्वितः ।
कद्राश्च बहवो जाता भूतग्रामाश्चतुर्व्विधाः ॥
खराश्वोष्ट्ररूपाश्च श्वगोमायुमुखाः ।
ऋक्षमार्जारवदनाः सिंहव्याघ्रमुखाः परे ॥

"नागाश्च धराः सर्व्वे नागाख्या महाबलाः ।
एष वः प्रतिसर्गोऽपि कथितो द्विजसत्तमाः ॥"
इति कालिकापुराणे २६ अध्यायः ॥

प्रतिसव्यं, त्रि, (गतिगतं सव्यं वाममिति ।) प्रतिकूलम् । इति जटाधरः ॥

प्रतिसान्धानिकः, पुं, (प्रतिसन्धानं प्रयोजनमस्येति । प्रतिसन्धान + ठक् ।) मागधः । स्तुतिपाठकः । इति शब्दरत्नावली ॥

प्रतिसीरा, स्त्री, (प्रतिसिनोति प्रतिबध्नातीति । प्रति + सि + "सुसिचिमिञ्भ्यो दीर्घश्च ।" उणा० २ । २५ । इति क्रन् दीर्घश्च । ततष्टाप् ।) यवनिका । अवधायकपटः । इत्यमरः ।२।६।१२०॥

प्रतिसूर्य्यः, पुं, (प्रतिरूपः सूर्य्य इति प्रादिसमासः ।) कृकलासः । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । कल्पस्थानेऽष्टमाध्याये ।
"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः ॥"
उपसूर्य्यकमण्डलम् । यथा, वृहत्संहितायाम् । ३७ । २ ।
"प्रतिसूर्य्याणां माला
दस्युभयातङ्कनृपघ्नी ॥")

प्रतिसूर्य्यकः, पुं, (प्रतिसूर्य्य + स्वार्थे कन् ।) कृकलासः । (यथा, उत्तररामचरिते द्वितीयेऽङ्के ।
"सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो या स्वयं
तृष्यद्भिः प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते ॥"
तद्दंशस्य चिकित्सा सुश्रुते कल्पस्थाने ८ अध्याये उक्ता । यथा,—
"प्रतिसूर्य्यकदष्टानां सर्पदष्टवदाचरेत् ॥")
उपसूर्य्यकमण्डलम् । इति विश्वः ॥ (अस्य शुभाशुभलक्षणम् । यथा, वृहत्संहितायाम् ।३७।१-३।
"प्रतिसूर्य्यकः प्रशस्तो
दिवसकृदृतुवर्णसप्रभः स्निग्धः ।
वैदूर्य्यनिभः स्वच्छः
शुक्लश्च क्षेमसौभिक्षः ॥
पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय ।
प्रतिसूर्य्याणां माला
दस्युभयातङ्कनृपघ्नी ॥
दिवसकृतः प्रतिसूर्य्यो
जलकृदुदग्दक्षिणे स्थितोऽनिलकृत् ।
उभयस्थः सलिलभयं
नृपमुपरि निहन्त्यधो जनहा ॥")

प्रतिसृष्टः, त्रि, (प्रति + सृज् + कर्म्मणि क्तः ।) प्रेषितः । प्रत्याख्यातः । इति मेदिनी । टे, ६५ ॥ दत्तः । इति धरणिः ॥

प्रतिसोमा, स्त्री, (प्रतिरूपः सोमः सोमवल्ली यस्याः ।) महिषवल्ली । इति राजनिर्घण्टः ॥

प्रतिस्पर्द्धा, स्त्री, (प्रति + स्पर्द्ध + भावे अङ् ।) प्रतिकक्षा । स्पर्द्धा । इति शब्दरत्नावली ॥

प्रतिहतः, त्रि, (प्रतिहन्यते स्मेति । प्रति + हन् + क्तः ।) द्विष्टः । प्रतिस्खलितः । बद्धः । इति मेदिनी । ते, २०५ ॥ निराशः । यथा,—
"मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥"
इति सुभूतिधृतामरकोषे पाठः । ३ । १ । ४१ ॥

प्रतिहस्तकः, पुं, (प्रतिरूपः हस्तोऽवलम्बनरूपो यस्य । कप् ।) प्रतिनिधिः । यथा,—
"स्वामिनां भर्त्ता स्वामिसेवायां धर्म्मसेवने ।
पुत्त्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥"
इति हितोपदेशे नीतिशास्त्रे सुहृद्भेदो नाम द्वितीयकथासंग्रहे परिच्छेदः ॥

प्रतिहारः, पुं, (प्रतिविषयं प्रतीपकं वा हरति स्वामिसमीपमानयतीति । प्रति + हृ + अण् ।) द्वारपालः । (यथा, देवीभागवते । १ । १७ । ३० ।
"ज्ञानी हि प्रतिहारेण ज्ञानी कश्चिद् द्विजोत्तमः ॥"
प्रति + हृ + आधारे घञ् ।) द्वारः । इति शब्दरत्नावली ॥ (यथा, रघौ । ६ । २० ।
"ततो नृपाणां श्रुतवृत्तवंशा
पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ॥"
प्रतिरूपं हरतीति । हृ + अण् ।) मायाकारः । इत्यमरटीकायां भरतः ।२।१०।११ ॥ (परमेष्ठिनः पुत्त्रः । यथा, विष्णुपुराणे ।२।१।३७।
"परमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ॥")

प्रतिहारकः, पुं, (प्रतिरूपं हरतीति । हृ + ण्वुल् ।) मायाकारः । इत्यमरटीकायां भरत. । २ । १० । ११ ॥

प्रतिहासः, पुं, (प्रतिरूपो हासो यस्य ।) करवीरः । इत्यमरः । २ । ४ । ७६ ॥ हासकम्पृति हासश्च ॥

प्रतीकः, पुं, (प्रतीयते प्रत्येति वा इति । प्रति + इ + अलीकादयश्चेति ईकन्प्रत्ययेन साधुः ।) एकदेशः । अङ्गम् । (यथा, ऋग्वेदे । ७ । ३६ । १ ।
"वि सानुना पृथिवी सस्र उर्व्वी पृथु प्रतीकमध्येधे अग्निः ॥"
"तथाग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवम् ॥" इति तद्भाष्ये सायनः ॥) स्वाङ्गवाद्यनिषेधो यथा, कौर्म्मे १५ अध्याये ।
"न स्वाङ्गनखवाद्यं वै कुर्य्यान्नाञ्जलिना पिबेत् ॥"
अपि च, लक्ष्मीचरित्रे ।
"स्वाङ्गे पीठे च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीम् ॥"
प्रतिकूले, त्रि । इत्यमरः ।१।६।१० ॥ विलोमः । इति मेदिनी । के, ११२ ॥

प्रतीकारः, पुं, (प्रतिकरणमिति । प्रति + कृ + घञ् । उपसर्गस्येति पक्षे दीर्घः ।) कृतापकारस्य प्रत्यपकारः । तत्पर्य्यायः । वैरशुद्धिः २ वैरनिर्य्यातनम् ३ । इत्यमरः । २ । ८ । ११० ॥ (यथा, देवीभागवते । ३ । २५ । ३ ।
"दुर्गया तौ हतौ संख्ये नापराधो ममात्र वै ।
अवश्यम्भाविभावेषु प्रतीकारो न विद्यते ॥")
चिकित्सा । इति शब्दमाला ॥

प्रतीकाशः, पुं, (प्रतिकाशते इति । प्रति + काश् + अच् । उपसर्गस्य दीर्घः ।) उपमा । इत्यमरः ।२।१०।३८ ॥ (यथा, महाभारते । १ । १५४ । ३२ ।
"अद्य त्वां भगिनी रक्षः क्षयमाणं मयाहतम् ।
द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥")

प्रतीक्षा, स्त्री, (प्रति + ईक्ष + अङ् ।) प्रतीक्षणम् । अपेक्षा । प्रतिपूर्व्वेक्षधातोर्भावे अप्रत्ययेन निष्पन्नः । (यथा महाभारते ।८।४०।५२।
"मित्रप्रतीक्षया शल्य धार्त्तराष्ट्रस्य चोभयोः ।
अपवादतितिक्षाभिस्त्रिभिरेतैर्हि जीवसि ॥")

प्रतीक्ष्यः, त्रि, (प्रतीक्ष्यते इति । प्रति + ईक्ष + ण्यत् ।) पूज्यः । इत्यमरः । ३ । १ । ५ ॥ (यथा, रघौ । ५ । १४ ।
"भक्तिः प्रतीक्ष्येषु कुलोचिता ते
पूर्व्वान् महाभाग । तयातिशेषे ।
व्यतीतकालस्त्वहमभ्युपेतस्
त्वामर्थिभावादिति मे विषादः ॥")
प्रतीक्षणीयः ॥ (यथा, माघे । २ । १०८ ।
"प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम् ॥")

प्रतीची, स्त्री, (प्रतिदिनान्तं प्रतिदिनान्ते इत्यर्थः अञ्चति सूर्य्यमिति । अञ्चु गतिपूजनयोः + "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च ।" ३ । २ । ५९ । इति क्विन् अनलोपो दीर्घश्च । "उगितश्च ।"४ । १ । ६ । इति ङीप् ।) पश्चिमदिक् । इत्यमरः । १ । ३ । १ ॥ (यथा, महाभारते । ४ । ४१ । १८ ।
"येनार्जुनो व्यजयत् क्षत्रियान् प्रतीचीं दिशमाहवे ।
कलापो ह्येष तस्यासीन्मान्धातृपुत्रस्य धीमतः ॥"
त्रि, पश्चिमाभिमुखी । यथा, ऋग्वेदे ।१।९२।९।
"विश्वानि देवी भुवनाभिचक्ष्या
प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती
विश्वस्य वाचमविदन्मनायोः ॥"
"भुवना भुवनानि भूतजातान्यभिचक्ष्याभिप्रकाश्य प्रकाशयन्ति तत्तानन्तरं प्रतीची प्रत्यङ्मुखी सती ।" इति तद्भाष्ये सायनः ॥ प्रतिनिवृत्तमुखी । यथा, ऋग्वेदे । १ । १२४ । ७ ।
"अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम् ॥"
"अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन् प्रतीची स्वकीयस्थानात् प्रतिनिवृत्तमुखी ।" इति तद्भाष्ये सायनः ॥)

प्रतीचीनं, त्रि, (प्रतीचि भवम् । प्रत्यच् + "विभाषाञ्चेरदिक् स्त्रियाम् ।"५ ।४ । ८ । इति खः । अल्लोपो दीर्घश्च ।) प्रत्यक् । प्रतीच्यां भवः । इति हेमचन्द्रः । २ । ८२ ॥ (पराङ्मुखम् । यथा, ऋग्वेदे । ३ । ५५ । ८ ।
"शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत् ॥"
"विश्वं भूतजातं प्रतीचीनं पराङ्मुखं ददृशे ।" इति तद्भाष्ये सायनः ॥)

प्रतीच्यः, त्रि प्रतीच्यां भवः। प्रतीचीशब्दाद्भवार्थे-स्त्रप्रत्ययनिष्पन्नः॥ पश्चिमदिग्जातः। (यथा, महाभारते। २। ३२। १२।

"रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपाः। तान् सर्व्वान् स वशे चक्रे शासनादेव पाण्डवः॥")

प्रतीतः, त्रि, (प्रतीयते स्म प्रत्येक्षमगाद्वेति। प्रति + इण् + कर्म्मणि कर्त्तरि वा क्तः।) ख्यातः। इत्यमरः। ३। १। ८॥ (यथा, रामायणे। २। ८। १०।

"प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषम्। उपस्थास्यसि कौशल्यां दासीवत्त्वं कृता-ञ्जलिः॥")

सादरः। ज्ञातः। हृष्टः। इति मेदिनी। ते, १२५॥ (पुं विश्वेदेवानामन्यतमः। यथा, महाभारते। १३। ९१। ३२।

"अनुकम्पी प्रतीतश्च प्रदातारांशुमांस्तथा॥")

प्रतीतिः, स्त्री, (प्रति + इण् + भावे क्तिन्।) ज्ञानम्। इति जटाधरः॥ (यथा, भाषापरिच्छेदे। ११४।

"अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते। अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा॥")

ख्यातिः। आदरः। हर्षः। इति प्रतीतशब्दार्थे-दर्शनात्॥

प्रतीपं, त्रि, (प्रतिकूला आपो यस्मिन्। "ऋक्-पूरब्धूःपथामानक्षे।" ५। ४। ७४। इति अप्रत्ययः। "द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७। इति ईत्।) प्रतिकूलम्। इति हेम-चन्द्रः। ६। १०१॥ (यथा, भागवते। ३। १। १४।

"स एनमत्रोपकृताव जिह्मं दास्याः सुतं यद्बलिनेव पुष्टः। तस्मिन् प्रतीपः परकृत्य आस्ते निर्व्वास्यतामाशु पुराच्छ्‌वसानः॥"

क्ली, अर्थालङ्कारभेदः। तस्य लक्षणादिकं साहित्यदर्पणे १० परिच्छेदे उक्तम्। यथा,—

"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥

क्रमेण उदाहरणं यथा,—

यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये! तव मुखच्छायानुकारी शशी।

येऽपि त्वद्गमनानुकूलगतयस्ते राजहंसा गता-स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥

तद्वक्त्रं यदि मुद्रिता शशिकथा हा हेम सा चेद्द्युति-स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्मितं का सुधा।

धिक्कन्दर्पधनुर्भ्रुवौ यदि च ते किंवा बहु ब्रूमहे यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः॥

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिरेक-नात् तेषां निष्फलत्वम्।

उक्ता चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः। कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे॥

यथा,—

"अहमेव गुरुः सुदारुणाना-मिति हालाहल! तात! मास्म दृप्यः। ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्ज्जनानाम्॥"

अत्र प्रथमपादे उत्कर्षातिशय उक्तः। तदुक्तौ तु नायमलङ्कारः॥")

प्रतीपः, पुं, चन्द्रवंशीय क्षत्रराजपुत्रः। शान्तनु-राजपिता च। इति पुराणं शब्दरत्नावली च॥ (यथा, महाभारते। १। ९४। २०।

"प्रतीपः शान्तनुं पुत्त्रं यौवनस्थं ततोऽन्वशात्॥" एतस्य विवरणं तत्रैवाध्याये विस्तरशो द्रष्टव्यम्॥)

प्रतीपदर्शिनी, स्त्री, (प्रतीपं प्रतिकूलं वामं वा पश्यतीति। दृश् + णिनिः। ङीप्।) स्त्रीमात्रम्। इत्यमरः। २। ६। २॥

प्रतीरं, क्ली, (प्रतीरयति जलगतिकर्म्मसमाप्तिं नयतीति। प्र + तीर कर्म्मसमाप्तौ + कः।) तटम्। इत्यमरः। १। १०। ७॥

प्रतीवापः, पु, (प्रत्युप्यते प्रक्षिप्यते अथवा निक्षिप्यतेऽस्मिन्निति। प्रति + वप निवेशादौ + घञ्।) गलितस्य स्वर्णादेर्द्रव्यान्तरेणावचूर्णनम्। इति स्वामी॥ व्यसनम्। निःक्षेपणमिति यावत्। इति सुभूतिः॥ उपद्रवः। इति मुकुटः॥

"आवापस्तु प्रतीवापो मारीरीतिरुपद्रवः॥" इति राजनिर्घण्टः॥

इत्यातञ्चनशब्दटीकायां भरतः॥ पानीयौषध-विशेषः। यथा,—

"उत्पलादि प्रतीवापं पिबेत् संग्रहणाय वै॥" इति चिकित्सितचिकित्सायां चक्रपाणिदत्तः॥ (यथा च सुश्रुते कल्पस्थाने। ४३ अध्याये।

"मदनफलमज्जकाथं वा पिप्पल्यादि प्रतीवापं तत्पूर्वं वा निम्बकल्पिका कषाययोरन्यतरं वा सन्त-र्पणं कफजव्याधिहरम्॥")

प्रतीवेशः, पु, (प्रतिविश्यते इति। प्रति + विश् + घञ्। उपसर्गस्य दीर्घः।) प्रतिवेशः। इति शब्दरत्नावली॥

प्रतीवेशी, [न्] स्त्री, (प्रतीवेशोऽस्यास्तीति। प्रतिवेश + "अत इनिठनौ।" ५। २। ११५। इति इनिः।) प्रतिवेशी। इति शब्दरत्नावली॥

प्रतीहारः, पुं, (प्रतिह्रियते अनेनेति। प्रति + हृ + घञ्। उपसर्गस्य दीर्घः।) द्वारः। (प्रतिहरत्यनेनेति। करणे घञ्।) द्वारपालः। इत्यमरः। २। ८। ६॥ तस्य लक्षणम्। यथा,—

"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः। अप्रमादी सदा दक्षः प्रतीहारः स उच्यते॥" इति चाणक्यसंग्रहः॥

अपि च। मात्स्ये १८९ अध्यायः।

"प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः। चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते॥"

सन्धिविशेषः। यथा, हारावली।

"मयास्योपकृतं पूर्व्वमयञ्चोपकरिष्यति। इति यः क्रियते सन्धिः प्रतीहारः स उच्यते।"

प्रतीहारी, [न्] त्रि, (प्रतिहरति स्वामिसमीपे सर्व्वविषयमिति। प्रति + हृ + णिनिः। उप-सर्गस्य दीर्घः। यद्वा, प्रतीहारो द्वारमस्यास्त्वेना-स्यास्तीति। इनिः।) द्वारी। द्वारार्थकप्रती-हारशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः॥

प्रतीहारी, स्त्री, (प्रतीहारोऽस्या अस्तीति। अच्। गौरादित्वात् ङीष्।) द्वाःस्थिता। इति मेदिनी। रे, २८०॥

प्रतीहासः, पुं, (प्रतिक्रमो हासोऽस्य। उपसर्गस्य दीर्घः।) करवीरः। इत्यमरः। २। ४। ७६॥

प्रतुदः, पुं, (प्रतुदतीति। प्र + तुद + कः।) श्येनादिः। आदिना श्येनः। कङ्कः। काकः। द्रोणकाकः। उलूकः। मयूरः। इति राज-निर्घण्टः॥ अस्य मांसगुणाः।

"लावाद्या विष्किरो वर्गः प्रतुदा जाङ्गला मृगाः। लघवः शीतमधुराः कषायाश्च हिता नृणाम्॥" इति राजवल्लभः॥

(यथा च चरके सूत्रस्थाने सप्तविंशाध्याये।

"शतपत्रो भृङ्गराजः कोयष्टी जीवजीवकः। कैरातः कोकिलोऽत्यूहो गोपापुत्रः प्रियात्मजः॥ लट्टा लट्टूषको बभ्रुर्वटहा डिण्डिमानकः। जटी दुन्दुभिपाक्कारलोहपृष्ठकुलिङ्गकाः॥ कपोतशुकसारङ्गाश्चिरिटीकङ्कुयष्टिकाः। शारिकाकलविङ्कश्च चटकोऽङ्गारचूडकः॥ पारावतः पाण्डविक इत्युक्ताः प्रतुदा द्विजाः॥"

यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्ग-गृहकुलिङ्गगोक्षोडकडिण्डिमानकशतपत्रकमा-तृनिन्दकमेदाशिशुकसारिकावल्गुलीगिरिशाल-कालटूषकसुगृहीखञ्जरीटकहारीतदात्यूहप्रभृ-तयः प्रतुदाः॥")

प्रतोदः, पुं, (प्रतुद्यतेऽनेनेति। प्र + तुद + करणे घञ्।) अश्वादिताडनदण्डः। चाबुक् इति भाषा। तत्पर्य्यायः। प्राजनम् २ प्रवयणम् ३ तोत्रम् ४ तोदनम् ५। इति जटाधरः॥ (यथा, महाभारते। २। ५४। ८।

"प्रकाशयेद्दिशः सर्व्वाः प्रतोदेनेव सारथिः। प्रत्यमित्रश्रियं दीप्तां जिघृक्षुर्भरतर्षभ॥")

प्रतोली, स्त्री, (प्रतुल्यते परिमीयते इति। प्र + तुल परिमाणे + घञ्। गौरादित्वात् ङीष्।) रथ्या। इत्यमरः। २। २। ३॥ (यथा, रामायणे। २। ८०। १८।

"बहुपांशुचयाश्चापि परिखापरिवारिताः। तन्द्रिकीलप्रतिमाः प्रतोलीवरशोभिताः॥")

अभ्यन्तरमार्गः। गाछ इति ख्याते। कुली इति च ख्याते। दुर्गादिमध्यनिर्म्मिते पथीति वाक्ये। दुर्गनगरद्वारे इति केचित्। इति तट्टीकायां भरतः॥

प्रत्तं, त्रि, (प्रदीयते स्मेति। प्र + दा + क्तः। "अच उपसर्गात् तः।" ७। ४। ४७। इति तादेशः।) दत्तम्। इति मुग्धबोधव्याक-रणम्॥

प्रत्नः, त्रि, (प्र+"नश्च पुराणे प्रात्।" इति चकारात् त्नप्।) पुरातनः। इत्यमरः। ३। १। ७७॥ (यथा, भागवते। ५। २०। ५।
"प्रत्नस्य विष्णो रूपं यत् सत्यर्त्तस्य ब्रह्मणः।
अमृतस्य च मृत्योश्च सूर्य्यमात्मानमीमहि॥")

प्रत्यक् [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अञ्च्+क्विन्।) पश्चिमदिक्। पश्चिमदेशः। (यथा, मनुः। २। २१।
"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥")
पश्चिमकालः। इति मेदिनी। चे, १६॥ (अ, प्रतीच्यां दिशि प्रतीच्या दिशः प्रतीची दिक् एवं देशे काले च। "दिक्शब्देभ्यः सप्तमी-पञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः।" ५। ३। २७। इति अस्तातिः। "अञ्चेर्लुक्।" ५। ३। ३०। इति अस्तातेर्लुक्। "लुक् तद्धितलुकि।" १। २। ४९। इति लुक्। दिग्देशकाले। इति मेदिनी। चे, १६॥ प्रतिलोमम्। यथा, भागवते। ४। २२। ३७।
"यः स्वेतरविततया हृदि विश्वगावि:
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि॥"
प्रतिकूलम्। यथा, महाभारते। ५। ८४। ६।
"प्रत्यगूहुर्महानद्यः प्राङ्मुखाः सिन्धुसत्तमाः।
विपरीता दिशः सर्व्वा न प्राज्ञायत किञ्चन॥")

प्रत्यक्पर्णी, स्त्री, (प्रत्यञ्चि पर्णानि अस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २। ४। ८६॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तोऽन्यो वशिरो हस्तपर्णो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥")
द्रवन्ती। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"द्रवन्ती शावरी चित्रा प्रत्यक्पर्ण्येकपर्ण्यपि।
चित्रोपचित्रान्यग्रोधी प्रत्यक्श्रेण्याखुकर्ण्यपि॥"

प्रत्यक्पुष्पी, स्त्री, (प्रत्यञ्चि पुष्पाण्यस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २। ४। ८८॥ (यथा, सुश्रुते। १। ४३।
"प्रत्यक्पुष्पीसदापुष्पीनिम्बकषायाणामन्यतमेनालोड्य मधुसैन्धवयुक्तां मात्रां पाययित्वा वामयेत्॥" पर्य्यायान्तरमस्याः। यथा,—
"अथामार्ग्योऽपामार्गः प्रत्यक्पुष्पी मयूरकः।
क्षारमध्यस्त्वधोघण्टा शिखरी खरमञ्जरी॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्श्रेणी, स्त्री, (प्रतीची श्रेणी यस्याः। समासान्तविधेरनित्यत्वात् न कप्।) दन्तीवृक्षः। मूषिकपर्णी। इत्यमरः। २।४।८८॥ (अस्याः पर्य्यायो यथा,—
"प्रत्यक्श्रेणी द्रवन्ती च पुत्रश्रेण्याखुपर्णिका।
वृषपर्ण्याखुपर्णी च मूषिका काञ्चिपत्रिका॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्षं, त्रि, (प्रतिगतमक्षि इन्द्रियं यत्र। समासे अच्। यद्वा, प्रत्यक्षमस्त्यस्येति। अर्श आदित्वात् अच्।) इन्द्रियग्राह्यम्। तत्पर्य्यायः। ऐन्द्रियकम् २। इत्यमरः। ३। १। ७९॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ५२।
"यत्पादपद्मनखरद्वये चात्मसुहृये।
न च दृष्टं स्वप्नेऽपि प्रत्यक्षस्यापि का कथा॥")
अनुभवविशेषः। तत् षड्विधम्। घ्राणजम् १ रासनम् २ श्रावणम् ३ चाक्षुषम् ४ स्पार्शनम् ५ मानसम् ६। निर्व्विकल्पकसविकल्पकभेदेन प्रत्येकं द्विविधम्। निर्व्विकल्पकन्तु अतीन्द्रियम्। सविकल्पकं मनोग्राह्यम्। षड्विधप्रत्यक्षे आत्मनस्य महत्त्वं कारणम्। इन्द्रियं करणम्। विषयेण सह इन्द्रियसन्निकर्षः। अस्य व्यापारः। यथा, भाषापरिच्छेदे।
"घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतः॥
उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥
क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम्।
गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः॥"
(यथा, विद्वन्मोदतरङ्गिण्याम्।
"देवानर्च्चय सञ्चय प्रतिदिनं पुण्यानि जन्मान्तरे
भोगाय प्रयतो महाक्रतुविधौ स्वर्गाय हिंसां कुरु।
इत्थं वञ्चकवञ्चनोत्पथगता बुद्धिस्तवेयं यथा-चिरा-
दप्रत्यक्षपदार्थसार्थरहितं पन्थानमारोहतु॥")
अ, अक्षि अक्षि प्रतीति वीप्सायां यथार्थत्वेन समासः। अक्ष्णोराभिमुख्यमित्यर्थे। "लक्षणेनाभिप्रती आभिमुख्ये।" २। १। १४। इत्यव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः।" ५। ४। १०७। इत्यत्र "प्रतिपरसमनुभ्योऽक्ष्णः।" इति टच्। इन्द्रियलक्षणम्। अपरोक्षम्। यथा, मनुः। ६। ५२।
"फलन्त्वनभिसन्धाय स्वेत्रियां बीजिनां तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गरीयसी॥")

प्रत्यक्षदर्शनं, त्रि, (प्रत्यक्षं पश्यतीति। प्रत्यक्ष+दृश्+ल्युः। प्रत्यक्षं दर्शनं यस्येति वा।) साक्षी। इति शब्दमाला॥ (क्ली, प्रत्यक्षं दर्शनम्। यथा, महाभारते। ३। ५७। ३६।
"प्रत्यक्षदर्शनं यज्ञे गतिञ्चानुत्तमां शुभाम्।
नैषधाय ददौ शक्रः प्रीयमाणः शचीपतिः॥")

प्रत्यक्षवादी, [न्] पुं, (प्रत्यक्षमेव प्रमाणत्वेन वदतीति। वद्+णिनिः।) बौद्धः। नाप्रत्यक्षं प्रमाणमिति तन्मतम्॥ (प्रत्यक्षं वदति यस्तत्र, त्रि॥)

प्रत्यक्षी, [न्] त्रि, (प्रत्यक्षमस्यास्तीति। प्रत्यक्ष+इनिः।) चक्षुर्द्रष्टा। इति त्रिकाण्डशेषः॥

प्रत्यगाशापतिः, पुं, (प्रत्यगाशायाः पश्चिमस्या दिशः अधिपतिः।) वरुणः। इति हलायुधः॥

प्रत्यग्रः, त्रि, (प्रतिगतमग्रं श्रेष्ठं प्रथमदर्शनं वास्येति।) नूतनः। इत्यमरः। ३। १। ७७॥ (यथा महाभारते। ८। ३८। १८।
"दासीनां निष्ककण्ठीनां मागधीनां शतं तथा।
प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्धनञ्जयम्॥")
शोधितः। इति जटाधरः॥ (पुं, उपरिचरस्य वसोः पुत्राणामन्यतमः। यथा, भागवते। ९। २२। ६।
"वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः।
कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः॥")

प्रत्यग्रथः, पुं, (प्रतीचां रथ इव।) अहिच्छत्रदेशः। इति हेमचन्द्रः। ४। २६॥

प्रत्यङ्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अञ्च्+क्विन्।) पश्चिमदिक्। पश्चिमदेशः। पश्चिमकालः। प्रतिपूर्व्वाञ्चधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥ (यथा, शतपथब्राह्मणे। १२। ८। २। ३५।
"ऋतवः सर्व्वे पराञ्चः सर्व्वे प्रत्यञ्चः॥"
प्रतिगतः। अभिमुखः। यथा, ऋग्वेदे। १।५०।५।
"प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान्।
प्रत्यङ् विश्वं स्वर्दृशे॥"
"हे सूर्य्य त्वं देवानां विशो मरुन्नामकान् देवान्। मरुतो वै देवानां विश इति श्रुत्यन्तरात्। तान् मरुत्संज्ञकान् देवान् प्रत्यङ्ङुदेषि। तान् प्रतिगच्छन्नुदयं प्राप्नोषि। तथाभिमुखं यथा भवति तथेत्यर्थः। तथा मानुषान् मनुष्यान् प्रत्यङ्ङुदेषि। तेऽपि यथास्वदभिमुखमेव सूर्य्य उदेतीति मन्यन्ते। तथा विश्वं व्याप्तं स्वः स्वर्लोकं दृशे द्रष्टुं प्रत्यङ्ङुदेषि। यथा स्वर्लोकवासिनो जनाः सर्व्वेऽपि स्वस्वाभिमुख्येन सूर्य्यं पश्यन्तीति।" इति तद्भाष्ये सायनः॥ अन्तर्यामी। इति श्रीधरस्वामी॥ यथा, भागवते। ६। ९। २०।
"प्रत्यक्षमादिपुरुषमुपतस्थुः समाहिताः॥")

प्रत्यङ्गं, क्ली, (प्रतिगतमङ्गमिति।) अवयवविशेषः। यथा, शब्दचन्द्रिकायाम्।
"प्रत्यङ्गं कर्णनासाक्षिलिङ्गाङ्गानि करादिकम्॥"
(यथा, रामायणे। २। ७४। १४।
"अङ्गप्रत्यङ्गजः पुत्त्रो हृदयाच्चापि जायते।
तस्मात् प्रियतरो मातुः प्रिया एव तु बान्धवाः॥"
"अतः परं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः। कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशति-

रहूनयः। सोतांसि च वक्ष्यमाणानि। एवं प्रत्यङ्गविभाग उक्तः॥” इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥ अप्रधानम्। यथा, निरुक्ते। ७।१।५।
“एक आत्मा बहुधा स्तूयते एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि॥” अङ्गं अङ्गं प्रति। यथा, गीतगोविन्दे। ११।११।
“श्यामं नीलनिचोलचारुसुदृशां प्रत्यङ्गमालिङ्गति॥”
तथा च मनुः। ८।२०८।
“यस्मिन् कर्म्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः।
स एव ता आददीत भजेरन् सर्व्व एव वा॥”
नृपविशेषे, पुं। यथा, महाभारते।१।१।२३५।
“महापुराणसम्भाव्यः प्रत्यङ्गः परहा स्मृतिः।
एते चान्ये च राजानः शतशोऽथ सहस्रशः।
श्रूयन्तेऽयुतशश्चान्ये संख्याताश्चैव पद्मशः॥”)
प्रत्यङ्गिरा, स्त्री, देवीविशेषः। तस्या ध्यानम्। यथा,—
“शवोपरिसमासीनां रक्ताम्बरतनुच्छदाम्।
सर्व्वाभरणसंयुक्तां गुञ्जाहारविभूषिताम्॥
षोड़शाब्दाञ्च युवतीं पीनोन्नतपयोधराम्।
कपालकर्त्तृकाहस्तां परमानन्दरूपिणीम्।
वामदक्षिणयोगेन ध्यायेच्चन्द्रविदुत्तमाम्॥”
इति प्रत्यङ्गिराकोशान्तर्गतम्॥
प्रत्यनीकः, पुं, (प्रतिगतः अनीकं युद्धमिति।) शत्रुः। इति हेमचन्द्रः। ३।३९२॥ (प्रतिपक्षः। विरोधी। यथा, महाभारते। ७। १०। ३६।
“यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेन्नृपः॥”
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
“अतीवायतयामास्तु क्षपा येष्वृतुषु स्मृताः।
तेषु तत्प्रत्यनीकाढ्यं भुञ्जीतप्रातरेव तु॥”
क्ली, प्रतिपक्षसैन्यम्। यथा, भगवद्गीतायाम्। ११।३२।
“ऋतेऽपि त्वां न भविष्यन्ति सर्व्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥”
अलङ्कारविशेषः। यदुक्तं काव्यप्रकाशे।
“प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥”
उदाहरणं यथा,—
“त्वं विनिर्ज्जितमनोभवरूपः
सा च सुन्दर। भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां
तापयत्यनुशयादिव कामः॥”)
प्रत्यन्तः, पुं, (प्रतिगतोऽन्तमिति। अत्यादयः क्रान्ताद्यर्थे। इति समासः।) म्लेच्छदेशः। इत्यमरः।२।१।७॥ (प्रान्तदुर्गम्। यथा, रघुः। ४।२६।
“स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥”
“गुप्तौ मूलं स्वनिवासस्थानं प्रत्यन्तः प्रान्तदुर्गञ्च येन सः।” इति तट्टीकायां मल्लिनाथः॥
तद्देशजाते, त्रि॥ यथा, वराहसंहितायाम्। ४।२१।
“प्रत्यन्तान् कृष्णांश्च हन्त्युडुपतिः श्यङ्गे कुजेनाहते॥”)
सन्निकृष्टे च त्रि॥
प्रत्यन्तपर्व्वतः, पुं, (प्रत्यन्तः सन्निकृष्टः पर्व्वतः।) महापर्व्वतसमीपवर्त्तिक्षुद्रपर्व्वतः। इत्यमरः। २।३।७॥
प्रत्यभियोगः, पु, (प्रतिरूपोऽभियोगः।) प्रत्यपराधः। यथा,—
“अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्।
अभियुक्तञ्च नान्येन नोक्तं विप्रकृतिं नयेत्॥”
“अभियुज्यत इति अभियोगोऽपराधस्तमभियोगमनिस्तीर्य्यापहृत्यैनमभियोक्तारं न प्रत्यभियोजयेदपराधेन न संयोजयेत्। यद्यपि प्रत्यभिस्कन्दनं प्रत्यभियोगरूपन्तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः। अतः स्वाभियोगानुपमर्द्दनरूपस्य प्रत्यभियोगस्यायं निषेधः।” इति मिताक्षरा॥
प्रत्यभिवादः, पुं, (प्रति+अभि+वद्+णिच्+भावे घञ्।) अभिवाद्यस्य गुरोराशीर्व्वचनम्। इति गोयीचन्द्रः॥
प्रत्यभिवादनं, पुं, (प्रति+अभि+वद्+णिच्+भावे ल्युट्।) अभिवाद्यस्य गुरोराशीर्व्वचनम्। इति गोयीचन्द्रः॥
प्रत्ययः, पु, (प्रति+इण्+भावकरणादौ यथायथं अच्।) अधीनः। शपथः। ज्ञानम्। (यथा, गारुड़े २३६ अध्याये।
“जायत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः॥”)
विश्वासः। (यथा, कुमारे। ४।४५।
“इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनामाश्वासयत् सुचरितार्थपदैर्व्वचोभिः॥”)
हेतुः। (यथा, रघुः। १०।३।
“अतिष्ठत् प्रत्ययापेक्षसन्ततिः स चिरं नृपः॥”)
रन्ध्रम्। शब्दः। इत्यमरः।३।३।१४७॥
प्रथितत्वम्। आचारः। इति मेदिनी। ये, ८६॥
निर्णयः। (यथा, मनुः। ८। २५३।
“यदि संशय एव स्यात् लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः॥”)
स्वादुः। इति हेमचन्द्रः॥ प्रकृत्युत्तरजायमानः। वोपदेवेनास्य त्यसंज्ञा कृता। प्रत्याययन्तीति सुप्तिङ्कृत्तद्धिताः प्रत्ययाः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, रघुः। ११।५६।
“ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन् कृतार्थताम्।
सोऽभवद्वरवधूसमागमः
प्रत्ययप्रकृतियोगसन्निभः॥”)
सहकारी। इति त्रिकाण्डशेषः॥
प्रत्ययकारिणी, स्त्री, (प्रत्ययस्य विश्वासस्य कारिणी।) मुद्रा। इति त्रिकाण्डशेषः॥ मोहर इति पारस्यभाषा॥
प्रत्ययितः, त्रि, (प्रत्ययो विश्वासः सञ्जातोऽस्येति। प्रत्यय+“तदस्य सञ्जातं तारकादिभ्य इतच्।” ५।२।३६। इति इतच्।) आप्तः। विश्वस्तः। इत्यमरः। २।८।१३॥ (यथा, कथासरित्सागरे। १५।६८।
“तत् श्रुत्वा वत्सराजा सोऽथ प्रत्ययितान् द्विजान्॥”)
प्रत्यर्थी, [न्] त्रि, (प्रतिरोधं प्रतिकूलं वा अर्थयते इति। प्रति+अर्थ+णिनिः।) शत्रुः। इत्यमरः। २। ८। ११॥ (यथा, साहित्यदर्पणे। ३ परिच्छेदे।
“मेन्ने स्वङ्गनगाङ्गने सरसिजप्रत्यर्थि पाणिद्वयं
वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं
गच्छतः॥”)
पु, प्रतिवादी। इति शब्दरत्नावली॥ (यथा, मनुः। ८। ७९।
“सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ।
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन्॥”)
अर्थिप्रतिपक्षः। यथा,—
“प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना।
समामासतदर्द्धाहर्नामजात्यादिचिह्नितम्॥”
“अर्थ्यत इत्यर्थः साध्यः। सोऽस्यास्तीत्यर्थी। तत्प्रतिपक्षः प्रत्यर्थी।” इति मिताक्षरा॥
प्रत्यर्पितं, त्रि, (प्रति+ऋ+णिच्+क्तः।) प्रतिदत्तम्। यथा। “अर्थव्यवहारोऽपि एकस्मिन् वत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितञ्चेति। पुनरन्यस्मिन् वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं याच्यमानोऽपि यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितञ्चेति वत्सरान्तरे गृहीतं प्रत्यर्पितञ्च नास्मिन् वत्सरे इत्युपयुज्यते।” इति मिताक्षरा॥
प्रत्यवसानं, क्ली, (प्रति+अव+सो+ल्युट्।) भोजनम्। इति हेमचन्द्रः। ३। ८७॥
(पर्य्यायान्तरमस्य यथा,—
“जग्धिः प्रत्यवसानञ्च भक्षणं भोजनाशने॥”
इति वैद्यकरत्नमालायाम्॥)
प्रत्यवसितं, त्रि, (प्रति+अव+सो+क्तः।) भक्षितम्। इत्यमरः।३।२।११०॥
प्रत्यवस्कन्दः, पु, (प्रति+अव+स्कन्द+घञ्।) चतुर्व्विधोत्तरान्तर्गतोत्तरविशेषः॥
प्रत्यवस्कन्दनं, क्ली, (प्रति+अव+स्कन्द+ल्युट्।) चतुर्व्विधोत्तरान्तर्गतोत्तरविशेषः। यथा,—
“प्रत्यवस्कन्दनं नाम सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहलब्धमिति वा। यथाह नारदः।
अर्थिना लेखितो योऽर्थः प्रत्यर्थी यदि तत्तथा।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम्॥”
इति मिताक्षरा॥

अपि च ।
"अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तत्तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥"
इति व्यवहारतत्त्वे हारीतवचनम् ॥

प्रत्यवस्थाता, [ऋ] त्रि, (प्रतिपक्षतया अवतिष्ठते इति । प्रति+अव+स्था+तृच् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३९२ ॥

प्रत्यवायः, पुं, (प्रत्यवाय्यते इति । प्रति+अव+अय गतौ+घञ् ।) पापम् । दुरदृष्टम् । यथा,
"अयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ।
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते ॥"
इत्येकादशीतत्त्वे जावालवचनम् ॥

प्रत्यश्मा, [न्] पुं, (प्रतिरूपः अश्मा ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

प्रत्यहं, व्य, (अहः अहः प्रति । "नपुंसकादन्यतरस्याम् ।" ५ । ४ । १०९ । इति टच् ।) प्रतिदिनम् । यथा कुमारसम्भवे ।
"गिरिशमुपचचार प्रत्यहं सा सुकेशी ॥"

प्रत्याकारः, पुं, (प्रतिरूपः खड्गेन सदृश आकारो यस्य ।) खड्गकोषः । इति हेमचन्द्रः । ३ । ४४७ ॥ खाप् इति भाषा ॥

प्रत्याख्यातः, त्रि, (प्रति+आ+ख्या+क्तः ।) दूरीकृतः । तत्पर्य्यायः । प्रत्यादिष्टः २ निरस्तः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ । इत्यमरः ।३।१।४०॥ क्वचित् पुस्तके प्रत्यादिष्टेत्यादिश्लोकमेकमधिकं दृश्यते तन्माद्यचतुष्कं प्रत्यादिष्टे । परचतुष्कं तिरस्कृते । इति तट्टीकासारसुन्दरी ॥ (यथा, महाभारते । १ । १५६ । ८ ।
"वीरेणाहं तथानेन त्वया वापि यशस्विनि ।
प्रत्याख्याता न जीवामि सत्यमेतद्‌ब्रवीमि ते ॥")

प्रत्याख्यानं, क्ली, (प्रति+आ+ख्या+भावे ल्युट् ।) निराकरणम् । तत्पर्य्यायः । निरसनम् २ प्रत्यादेशः ३ निराकृतिः ४ । इत्यमरः ।३।२।३१ ॥ (यथा, मार्कण्डेये । ६१ । ७२ ।
"प्रत्याख्यानादहं तत्तु त्वञ्च पापमवाप्स्यसि ॥")

प्रत्यागमः, पुं, (प्रत्यागमनमिति । प्रति+आ+गम्+अप् ।) प्रत्यागमनम् । फिरे आसा इति भाषा ॥ यथा,—
"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । ३९ । २४ ।
"किमर्थं ब्रूहि विप्रेन्द्र । अस्मिन् प्रत्यागमो हि वः ॥")

प्रत्यादिष्टः, त्रि, (प्रत्यादिश्यते स्मेति । प्रति+आ+दिश्+क्तः ।) प्रत्यादेशविशिष्टः । तत्पर्य्यायः । निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ । इत्यमरः । ३ । १ । ४० ॥

प्रत्यादेशः, पुं, (प्रत्यादेशनमिति । प्रति+आ+दिश्+घञ् ।) निराकरणम् । प्रत्याख्यानम् । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मेघदूते । ९६ ।
"प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥"
प्रसङ्गनिवारणम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ८ । ३३४ ।
"येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥")
भक्तं प्रति देवानामादेशश्च ॥

प्रत्याध्मानः, पुं, (प्रतिगतमाध्मानमीषत्-शब्दो यत्र ।) वातव्याधिविशेषः । तस्य लक्षणमाह ।
"विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम् ॥"
विमुक्तपार्श्वहृदयं पार्श्वे हृदये विहाय जातं तदेवाध्मानम् । कफव्याकुलितानिलं कफेनावरुद्धवातम् ॥ * ॥ अथ तस्य चिकित्सा ।
"प्रत्याध्माने समुत्पन्ने कुर्य्यात् वमनलङ्घने ।
दीपनादि नियुञ्जीत पूर्व्ववद्वस्तिकर्म्म च ॥"
इति भावप्रकाशः ॥

प्रत्यालीढं, क्ली, (प्रति+आ+लिह+क्तः ।) धन्विनां पादसंस्थानविशेषः । तच्चाहस्य वामपादप्रसारे दक्षिणपादसङ्कोचः । इत्यमरटीकायां भरतः ॥ धन्विनामवस्थानविशेषः । यथा,—
"स्यात् प्रत्यालीढमालीढं समं पादं तथापरम् ।
वैशाखं मण्डलञ्चेति धन्विनां स्थानपञ्चकम् ॥
स्याद्दक्षपादसङ्कोचात् वामपादप्रसारणात् ।
प्रत्यालीढमिति प्रोक्तमालीढं तद्विपर्य्ययात् ॥
तुल्यं पादयुगं यत्र समपादमुदाहृतम् ।
वितस्त्यन्तरितं पादयुगं वैशाखमुच्यते ।
मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"
इति शब्दरत्नावली ॥
(यथा च यादवः ।
"स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् ।
वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृती ॥
समानौ स्यात् समपदमालीढं पदमग्रतः ।
दक्षिणं वाममाकुञ्च्य प्रत्यालीढं विपर्य्ययः ॥")
अशिते, त्रि । इति मेदिनी । ढ, १२ ॥

प्रत्याशा, स्त्री, (प्रति किञ्चित् वस्तु लक्षीकृत्य आ समन्तात् अश्नुते व्याप्नोतीति । प्रति+आ+अश्+अच् । ततष्टाप् ।) आकाङ्क्षा । यथा, शान्तिशतके ।
"मूढोऽयम मरीचिकासु पशुवत् प्रत्याशया धावति ॥"

प्रत्यासन्नः, त्रि, (प्रति+आ+सद्+क्तः ।) निकटवर्त्ती । इति जटाधरः ॥ (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्य ! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभाव्यतामार्य्येण ॥")

प्रत्यासरः, पुं, (प्रत्यास्रियते इति । प्रति+आ+सृ+"ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) सैन्यपृष्ठः । इति शब्दरत्नावली ॥

प्रत्यासारः, पुं, (प्रत्यास्रियते इति । प्रति+आ+सृ+घञ् ।) व्यूहस्य पश्चाद्भागः । व्यूहस्य पश्चाद्व्यूहान्तरम् । तत्पर्य्यायः । व्यूहपार्ष्णिः २ । इत्यमरभरतौ ॥

प्रत्याहरणं, क्ली, (प्रति+आ+हृ+भावे ल्युट् ।) प्रत्याहारः । इति शब्दरत्नावली ॥

प्रत्याहारः, पुं, (प्रति+आ+हृ+भावे घञ् ।) स्वस्वविषयेभ्य इन्द्रियाकर्षणम् । तत्पर्य्यायः । उपादानम् २ । इत्यमरः ॥ प्रत्याहरणम् ३ । इति शब्दरत्नावली ॥ स च योगाङ्गविशेषः । यथा,
"प्रत्याहारश्च तर्कश्च प्राणायामस्तृतीयकः ।
समाधिर्धारणं ध्यानं षडङ्गो योगसंग्रहः ॥"
इति तट्टीकायां भरतः ॥
प्रत्याहारमाह ।
"शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
अपि च ।
"इन्द्रियाणीन्द्रियार्थेभ्यः समाहृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेषु संस्थितः ॥"
इति गारुडे २४० अध्यायः ॥
(यथा च पातञ्जले साधनपादे ।
"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥" २९ ॥
"स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इन्द्रियाणां प्रत्याहारः ॥" ५४ ॥)
अल्पेन बहूनां ग्रहणम् । यथा, अच् इति द्व्यक्षरेण सर्व्वस्वराणां ग्रहणम् । इति भरतः ॥

प्रत्युक्तिः, स्त्री, (प्रतिवचनमिति । प्रति+वच्+भावे क्तिन् । प्रतिरूपा उक्तिरिति वा ।) प्रत्युत्तरम् । इति शब्दरत्नावली ॥

प्रत्युत, व्य, (प्रति च उत च इति द्वन्द्वः ।) वैपरीत्यम् । यथा । बुधादिवाक्यं तु न नियामकं प्रमाणाभावात् प्रत्युत फलश्रुतेर्गुणफलबोधकमिति । इति तिथ्यादितत्त्वे जन्माष्टमीप्रकरणम् ॥ (यथा, मार्कण्डेये । ९५ । २० ।
"विहिताकरणात् पुंभिरसद्भिः क्रियते तु यः ।
संयमो मुक्तये सोऽन्ते प्रत्युताधोगतिप्रदः ॥")

प्रत्युत्क्रमः, पुं, (प्रत्युत्क्रमणमिति । प्रति+उत्+क्रम्+घञ् ।) प्रधानप्रयोजनानुकूलप्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रयोगार्थः २ । इत्यमरः ॥ प्रकृष्टयोगः । इति केचित् । प्रकृष्टयुद्धार्थमुपक्रमः प्रयोगः तच्चाद्यः । इति केचित् । प्रयोगो युद्धं तदभिधेय इति केचित् । प्रत्युत्क्रमो युद्धार्थे इति भागुरिः । युद्धार्थं प्रथमाक्रान्तिः । इत्यपरे । कर्म्मारम्भे प्रथमयुक्तिः प्रयोगः । इत्यपरे ॥ इति भरतः ॥

प्रत्युत्क्रान्तिः, स्त्री, (प्रति+उत्+क्रम्+क्तिन् ।) प्रत्युत्क्रमः । इत्यमरटीकायां चौरस्वामी ॥

प्रत्युत्तरं, क्ली, (प्रतिरूपमुत्तरम् ।) उत्तरं प्रति उत्तरम् । यथा । ममेयं भूमिः क्रमागतत्वात् इति वाद्युक्ते ममेयं भूमिर्दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम् । इति व्यवहारतत्त्वम् ॥

प्रत्युत्थानं, क्ली, (प्रत्युत्थीयते इति । प्रति+उत्+स्था+ल्युट् ।) अभ्युत्थानम् । गात्रोत्थानम् । यथा,—

"दीक्षमाणाश्चेक्षमाणापि विकसा चोद्दमिन च ।
भूषित:,समर बलाद प्रत्युद्गमनमनाविति: ॥"

इति श्रीभागवते । १० । ६८ । २० ॥

प्रत्युद्गमनः, त्रि, (प्रति+उत्+गद्+क्तः ।) उत्पूर्वगिरिविशिष्टः । प्रत्युद्गतपूर्वकवद्धातो: कर्मणि क्तप्रत्ययेन निष्पन्नः ॥

प्रत्युद्गमनमतिः, त्रि, (प्रत्युद्गमना मतिर्यस्य ।) कष्ट-बुद्धियुक्तः । तत्पर्य्यायः । कुशाग्रीयमतिः २ कुशाग्रधीः ३ तत्तुल्यधीः ४ । इति हेमचन्द्रः ॥ प्रतिभान्वितः । इति जटाधरः ॥ (यथा,—

"प्रत्युद्गमनमतिर्व्विमान् बलवान् विद्याधरः ।
ब्रह्मकर्म्मपरो यश्च स भिषक्पारमश्नुते ॥"

इति सुश्रुते कल्पस्थाने ३४ अध्यायः ॥)

प्रत्युद्गमनीयं, क्ली, (प्रति+उत्+गम्+अनी-यर् ।) धौतांशुकयुगम् । इति मेदिनी । ये,१२४॥ (यथा, कुमारे । ७ । ११ ।

"सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा ॥"

क्वचित् प्रत्युद्गममनीयवस्त्रा इत्यपि पाठः ॥) उत्पद्यमानयोग्ये पूजनीये च, त्रि । इति शब्द-रत्नावली ॥

प्रत्युद्गमः, पुं, (प्रति+उत्+गम्+अप् ।) प्रत्यु-त्थानम् । यथा, साहित्यदर्पणे तृतीयपरि-च्छेदे । ७१ ।

"एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्-दूरतः ॥"

प्रत्युद्गमनं, क्ली, (प्रति+उत्+गम्+ल्युट् ।) प्रत्युत्थानम् । (यथा, प्रबोधचन्द्रोदये २ अङ्के ।

"आर्य्य ! प्रभावतो महाराजः । तत्प्रत्युद्गम-नेन संभावतामार्य्येण ॥")

प्रत्यूषः, पुं, (प्रतीषति विनाशयति अन्धकार-मिति । प्रति+उष् दाहे+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) प्रत्यूषः । प्रातः । इत्यमरटीकायां मथुरेशः ॥ (यथा, पञ्चतन्त्रे । १ । २१२ ।

"प्रत्यूषे च समुत्थाय शयनादुत्थितोऽपि विविधपौरजनैस्तुल्यतया तामाचैव ॥")

प्रत्यूषः, [ष्] क्ली, (प्रत्योषति नाशयत्यन्धकार-मिति । प्रति+उष्+"उषः कित् ।" उणा० ४ । २३३ । इति असिः । स च कित् ।) प्रत्यूषः । इत्यमरः । १ । ४ । २ ॥ यथा, भरत-

"याति यातिं पुरुषाश्वयातिचलनी प्रत्यूषः-पारिजातः ॥"

प्रत्यूषः, पुं, (प्रत्यूषति वसति वासुभासिनिति । प्रति+उष् दाहे+कः ।) प्रभातम् । इत्य-मरः । १ । ४ । २ ॥ (यथा, मेघदूते । ३१ ।

"दीर्घीकुर्व्वन् पटुमदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ॥")

वसुः । इति शब्दरत्नावली ॥ वसुभेदः । इति जटाधरः ॥ (यथा, विष्णुपुराणे ।१।१५।१११।

"धवो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः ॥")

प्रत्यूषः, [ष्] क्ली, (प्रति+उष्+असिः ।) प्रभातम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । २१ ।

"प्रत्यूषस्यपराह्णे तु जीर्णेऽन्ने च प्रकुप्यति ॥")

प्रत्यूहः, पुं, (प्रत्यूहनमिति । प्रति+ऊह्+घञ् ।) विघ्नः । इत्यमरः । १ । २ । १८ ॥ (यथा, मार्कण्डेये । १६ । ५५ ।

"अप्रत्यूहमुखादेव मया प्राप्तं महत् फलम् ।
सर्व्वकामफलावाप्त्या प्रत्यूहाः परिवर्जिताः ॥")

प्रत्येकं, क्ली, एकं एकं प्रति । यथा, बहू राजा क्षोभे ।

"प्रत्येकं वा सर्व्वं वा जलमपि च परं वीज-मक्षमागुणम् ॥"

(यथा च कुमारे । २ । ३१ ।

"एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥")

प्रथ, क प्रक्षेपे । ख्यातौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अक०-च सेट् ।) रेफयुक्तः । क, प्राथयति । इति दुर्गादासः ॥

प्रथ, म ञ ङ ख्यातौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) रेफयुक्तः । म, प्रथ-यति । ञ, प्रथा । ङ, प्रथते गुणी प्रसिद्धः ख्यातिमान् । इति दुर्गादासः ॥

प्रथमः, त्रि, (प्रथते प्रसिद्धो भवतीति । प्रथ्+"प्रथेरमच् ।" उणा० ५ । ६८ । इति अमच् ।) प्रधानम् । (यथा, रघुः । १० । ६७ ।

"राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥")

आदिमः । तत्पर्य्यायः । आदिः २ पूर्व्वः ३ पौरस्त्यः ४ आद्यः ५ । इत्यमरः ॥ अग्रिमः ६ इति जटाधरः ॥ प्राक् ७ । इत्यजयपाले अमरः ॥ (यथा, विष्णुपुराणे । १ । ११ । ५२ ।

"राज्यासनसिंहासनादितं क्षात्रमेत्यग्रमं नरः ॥")

प्रथा, स्त्री, (प्रथ्+"षिद्भिदादिभ्योऽङ् ।" ३।३।१०४। इत्यङ् । ततष्टाप् ।) ख्यातिः । इत्यमरः । १ । २ । ८ । (यथा, राजतरङ्गिण्याम् । १ । १२ ।

" या प्रथाममगमदिति यापि वाच्यप्रकाशने ॥")

प्रथितः, त्रि, (प्रथ्+क्तः ।) ख्यातः । इत्यमरः । ३ । १ । ८ ॥ (यथा, रघुः । ६ । ७६ ।

"तेनावतीर्य्य तुरगात् प्रथितान्वयेन
दृष्टान्वयः स जलकुम्भनिषण्णदेहः ॥")

आरोपितगुणेः पुत्रे, पुं । यथा, हरिवंशे । ७ । १४ ।

"कविः सुजातिर्ज्योतिरामो वर्णिरयः [illegible] ।
प्रथितश्च नभश्चैव नभ सप्तसुतैव च ।
आरोपितश्च पुत्राश्च मनोकात । महात्मनः ॥")

प्रथितिः, स्त्री, (प्रथ्+"पचिप्रथिभ्यां कित् ।" उणा० ४ । १८२ । इति तिः । स च कित् ।) ख्यातिः । प्रथयातोर्मापि क्तिबन्तेन निष्पन्ना । इति व्याकरणम् ॥

प्रथिमा, [न्] पुं, (पृथोर्भावः । "पृथ्वादिभ्य इम-निज्वा ।" ५।१।१२२ । इति इमनिच् । "र ऋतो-हलादेर्लघोः ।" ६।४।१६१ । इति रः । "टेः ।" ६ । ४ । १५५ । इति टेर्लोपः ।) पृथोर्भावः । पृथुत्वम् । इति सिद्धान्तकौमुदी ॥ यथा,—

"प्रथिमानमदधानैव यमैव अथमैव वा ॥"

इति भट्टिः । ४ । १८ ॥

त्रि, अतिशयेन पृथुः । पृथुशब्दादतिशयार्थे इमन्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

प्रथिमिनी, स्त्री, (प्रथिमाऽस्त्यस्या इति । प्रथिमन्+"ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) प्रथिमगुणवती । इति सिद्धान्त-कौमुदी ॥

प्रथिष्ठः, त्रि, अतिशयेन पृथुः । (पृथु+इष्ठन् ।) अतिवृहत् । इति मुग्धबोधव्याकरणम् ॥

प्रथुकः, पुं, पृथुकः । इत्यमरटीकायां रायमुकुटः ॥

प्रदः,त्रि,प्रकर्षेण ददाति यः । (प्र+दा+कः ।) प्रदाता । इति सिद्धान्तकौमुदी ॥ (कर्म्मण्युप-पदे तु "प्रे दाज्ञः ।" ३ । २ । ६ । इति कः । यथा, मनुः । ४ । २३२ ।

"यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः ॥")

प्रदक्षिणं, क्ली,पुं, (प्रगतं दक्षिणमिति । "तिष्ठद्गु-प्रभृतीनि च ।" २ । १ । १७ । इति समासः ।) दक्षिणावर्त्तेन देवादिकमुद्दिश्य भ्रमणम् । यथा,

"एकं देव्यां रवौ सप्त त्रीणि कुर्य्याद्विनायके ।
चत्वारि केशवे कुर्य्यात् शिवे चार्द्धप्रदक्षिणम् ॥"

इति कर्म्मलोचनम् ॥

सर्व्वदेवतानुद्दिश्यप्रदक्षिणं यथा,—

"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः ।
दर्शयन् दक्षिणं पार्श्वं मनसापि च दक्षिणः ॥
सकृत्सर्व्वा वेदयेता देवाः प्रीतिः प्रजायते ।
स च प्रदक्षिणो ज्ञेयः सर्व्वदेवौघतुष्टिदः ॥
सर्व्वान् कामान् समासाद्य महाजोऽप्यमला-भुयात् ॥
मनसापि च यो दद्यादेवे भक्त्या प्रदक्षिणम् ।
प्रदक्षिणादृयमपि नरकाणि न गच्छति ॥"

इति कालिकापुराणे ७० अध्यायः ॥ * ॥

अपि च । तन्त्रसारे ।

"दक्षिणाद्वामपर्य्यन्तं गत्वा दिशं तदग्र प्रागमनीम् ।
ततश्च दक्षिणां गत्वा नमस्कारत्रिकोणवत् ॥
अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम् ।
शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु ॥
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् ॥"

सोमसूत्रं जलनिःसरणस्थानम् ।

"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः ।
दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः ॥
विधा च वेदयेत् सम्यक् देवतायाः प्रदक्षिणम् ॥
एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम् ।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"

(समर्थे, त्रि । यथा, रामायणे ।३। ४१ । ५१ ।

"प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा बुद्धिमता च लक्ष्मण ! ॥"

"प्रदक्षिणेन समर्थेन।" इति तट्टीकायां रामानुजः ॥)

प्रदक्षिणा, स्त्री, (प्रगता दक्षिणमिति। "तिष्ठद्गुप्रभृतीनि च। २। १। १७।" इति समासः।) प्रदक्षिणम्। यथा,—

अथ प्रदक्षिणा।

"ततः प्रदक्षिणां कुर्य्याद्भक्त्या भगवतो हरेः।
नामानि कीर्त्तयन् शक्तौ ताश्च साष्टाङ्गवन्दनाम् ॥"

प्रदक्षिणासङ्ख्या चोक्ता नारसिंहे।

"एकां चण्ड्यां रवेः सप्त तिस्रो दद्याद्विनायके।
चतस्रः केशवे दद्यात् शिवे त्वर्द्धप्रदक्षिणाम् ॥"

प्रदक्षिणामाहात्म्यं वाराहे।

"प्रदक्षिणां ये कुर्व्वन्ति भक्तियुक्तेन चेतसा।
न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम् ॥
यश्चैः प्रदक्षिणं कुर्य्यात् साष्टाङ्गकप्रणामकम्।
दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः ॥"

स्कान्दे ब्रह्मनारदसंवादे ॥

"विष्णोर्विमानं यः कुर्य्यात् सकृद्भक्त्या प्रदक्षिणम्।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥"

तत्रैव चातुर्मास्यमाहात्म्ये।

"चतुर्व्वारं भ्रमीभिस्तु जगत् सर्व्वं चराचरम्।
क्रान्तं भवति विप्राग्य्र! तत्तीर्थगमनाधिकम् ॥"

तत्रैवान्यत्र।

"प्रदक्षिणं तु यः कुर्य्याद्धरिं भक्त्या समन्वितः।
हंसयुक्तविमानेन विष्णुलोकं स गच्छति ॥"

नारसिंहे।

"प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे।
कृतेन यत् फलं नृणां तच्छृणुष्व नृपात्मज।।
पृथ्वीप्रदक्षिणफलं यत्तत् प्राप्य हरिं व्रजेत् ॥"

अन्यत्र च।

"एवं कृत्वा तु कृष्णस्य यः कुर्य्याद्विप्रदक्षिणम्।
सप्तद्वीपवतीपुण्यं लभते तु पदे पदे ॥
पठन्नामसहस्रन्तु नामान्येवाथ केवलम् ॥"

भक्तिसुधोदये।

"विष्णुं प्रदक्षिणीकुर्व्वन् यस्तत्रावर्त्तते पुनः।
तदेवावर्त्तनं तस्य पुनर्नावर्त्तते भवे ॥"

बृहन्नारदीये यमभगीरथसंवादे।

"प्रदक्षिणत्रयं कुर्य्यात् यो विष्णोर्मनुजेश्वर।।
सर्व्वपापविनिर्मुक्तो देवेन्द्रत्वं समश्नुते ॥"

तत्रैव प्रदक्षिणमाहात्म्ये सुधर्म्मोपाख्यानारम्भे।

"भक्त्या कुर्व्वन्ति ये विष्णोः प्रदक्षिणचतुष्टयम्।
तेऽपि यान्ति परं स्थानं सर्व्वलोकोत्तमोत्तमम् ॥
तत् ख्यातं यत् सुधर्म्मस्य पूर्व्वस्मिन् ग्रामजन्मनि
श्वप्रदक्षिणाभावात्सद्यो विहिरभूदिति ॥"

प्रदक्षिणायां निषिद्धं विष्णुस्मृतौ।

"एकहस्तप्रणामश्च एका चैव प्रदक्षिणा।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"

अकाले भोजनादिसमये। किञ्च।

"कृष्णस्य पुरतो नैव धर्य्यस्यैव प्रदक्षिणाम्।
कुर्य्याद्भ्रमरिकाकृष्णं वैमुख्यापादनीं प्रभौ ॥"

तथा चोक्तम्।

"प्रदक्षिणं न कर्त्तव्यं विमुखत्वाच्च कारणम् ॥"

इति श्रीहरिभक्तिविलासे ८ विलासः ॥

प्रदत्तं, त्रि, (प्र+दा+क्तः।) प्रकर्षेण दत्तम्। इति मुग्धबोधव्याकरणम् ॥

प्रदरः, पुं, (प्र+दॄ विदारणे+"ऋदोरप्।" ३। ३। ५७। इति भावादौ यथायथं अप्।) भङ्गः। वाणः। इत्यमरः ॥ विदारः। नारीरुग्भेदः। इति मेदिनी ॥ * ॥ अस्य नामान्तरं असृग्दरम्। तत्तु फलितयोन्या रक्तादिधातुक्षरणम्। अस्य निदानम्। यथा,—

"विरुद्धमद्याध्यशनादजीर्णाद्
गर्भप्रपातादतिमैथुनाच्च।
यानाध्वशोकादतिकर्षणाच्च
भाराभिघाताच्छयनाद्दिवा च ॥
असृग्दरं भवेत् सर्व्वं साङ्गमर्द्दं सवेदनम् ॥
तस्यातिवृद्धौ दौर्ब्बल्यं भ्रमो मूर्च्छा मदस्तृषा।
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः ॥"

स च चतुर्व्विधो यथा,—

"तं श्लेष्मपित्तानिलसन्निपातै-
श्चतुःप्रकारं प्रदरं वदन्ति ॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"आमं सपिच्छाप्रतिमं सपाण्डु-
पुलाकतोयप्रतिमं कफात्तु ॥"

पैत्तिकस्य तस्य लक्षणम्।

"सपीतनीलासितरक्तमुष्णं
पित्तार्त्तियुक्तं भृशवेगि पित्तात् ॥"

वातिकस्य तस्य लक्षणम्।

"रूक्षारुणं फेनिलमल्पमल्पं
वातार्त्तिवातात् पिशितोदकाभम् ॥"

तस्य त्रैदोषिकस्य लक्षणम्।

"सक्षौद्रसर्पिर्हरितालवर्णं
मज्जप्रकाशं कुणपं त्रिदोषात्।
तच्चाप्यसाध्यं प्रवदन्ति तज्ज्ञा
न तत्र कुर्व्वीत भिषक् चिकित्साम् ॥"

इति माधवकरः ॥ * ॥

अस्यौषधं यथा,—

"घृततुल्या रक्तलाक्षा पीता चौरेण वै सह।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥"

इति गारुडे १८६ अध्यायः ॥ * ॥

अपि च।

"दध्ना सौवर्च्चलाजाजीमधूकं नीलमुत्पलम्।
पिबेत् क्षौद्रयुतं नारी वातासृग्दरशान्तये ॥
एषां प्रत्येकं माषद्वयम्। सर्व्वमेकीकृत्य दध्ना कर्षचतुष्टयेन पिष्ट्वा तत्र माषाष्टकं मधु निःक्षिप्य पेयम् ॥ * ॥
"मधुकं कर्षमेकन्तु चतुष्कर्षां सिताम्तथा।
तण्डुलोदकसंपिष्टां लोहिते प्रदरे पिबेत् ॥
बला कङ्कतिकाख्या या तस्या मूलन्तु चूर्णितम्।
लोहिते प्रदरे खादेच्छर्कराम धुसंयुतम् ॥ * ॥
मुष्टिस्थानि चाश्मन्या मूलमुत्तरदिग्भवम्।
नीतमुत्तरफल्गुन्यां कटिबद्धं हरेदसृक् ॥ * ॥
रसाञ्जनं तण्डुलकस्य मूलं
क्षौद्रान्वितं तण्डुलतोयपीतम्।
असृग्दरं सर्व्वभवं निहन्ति
श्वासञ्च भार्गी सह नागरेण ॥ * ॥
अशोकवल्कलक्वाथशृतं दुग्धं सुशीतलम्।
यथाबलं पिबेत् प्रातस्तीव्रासृग्दरनाशनम् ॥"

अशोकवल्कलपलं द्वात्रिंशत्पलजलमितेन जलेन निक्वाथ्य शेषेण पलाष्टकजलेन सह क्षीरं पलाष्टकमितं विपचेत् तत्तु दुग्धावशेषं कर्त्तव्यं तन्मध्ये पलचतुष्टयमितं दुग्धं पेयं वह्निबला-पेक्षया वा ॥ * ॥

"कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना।
एतत् पीत्वा त्र्यहं नारी प्रदरात् परिमुच्यते ॥"

इति भावप्रकाशः ॥

(तथास्य चिकित्सान्तरं यथा,—

"काकजङ्घामूलं वा मूलं कार्पासमेव वा।
पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा ॥"
"कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना।
एतत् पीत्वा त्र्यहान्नारी प्रदरात् परिमुच्यते ॥"
"प्रदरं हन्ति बलायामूलं दुग्धेन मधुयुतं पीतम् ॥"
"गुडेन बदरीचूर्णं मोचमामं तथा पयः।
पीता लाक्षा च सघृता पृथक्प्रदरनाशनाः ॥"

इति चक्रपाणिसंग्रहेऽसृग्दराधिकारे ॥)

प्रदर्शितः, त्रि, (प्र+दृश्+णिच्+क्तः।) आलोकितः। यथा,—

"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽयं प्रदर्शितः।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"

इति मुग्धबोधटीकायां दुर्गादासः ॥

प्रदलः, पुं, (प्रकर्षेण दलति दारयतीत्यर्थः। प्र+दल्+अच्।) वाणः। इति जटाधरः ॥

प्रदानं, क्ली, (प्र+दा+भावे ल्युट्।) दानम्। इति शब्दरत्नावली ॥ प्रकृष्टदानञ्च। (यथा, मनौ। ३। २४०।

"होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते ॥")

प्रदिक्, [श्] स्त्री, (प्रगता दिग्भ्यः।) विदिक्। इति जटाधरः ॥ (यथा, महाभारते ।१।१७४।१६।

"ततो विश्रान्तमनसो जनाःसुभयपीड़िताः।
महाक्षि संपरित्यज्य वव्रसुः प्रदिशो दिशः ॥"

प्रकृष्टा दिक्। (यथा, हरिवंशे। १६३। ८।

"प्रदिशो विदिशश्चैव शरधारासमावृताः।
अन्धकारीकृतं व्योम दिनेशो नैव दृश्यते ॥")

प्रदिग्धं, क्ली, (प्र+दिह्+कर्म्मणि क्तः।) मांसव्यञ्जनभेदः। यथा, शब्दचन्द्रिकायाम्।

"मांसं बहुघृतैर्भृष्टं सिद्धं चोष्णाम्बुना सह।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥
तदेव घृततक्राढ्यं प्रदिग्धं सज्जिजातकम् ॥"

त्रि, प्रलिप्तः ॥ (रूषितः। यथा, रामायणे। ५। ५। २८।

"अयशक्तरेखामिव चन्द्रलेखां
पांशुप्रदिग्धामिव हेमरेखाम् ॥")

प्रदीपः, पुं, (प्रकर्षेण दीपयति प्रकाशयति प्रदीप्यते इति वा। प्र+दीप्+णिच् वा+कः।)

दीपः । इत्यमरः । २ । ७ । १६८ ॥ तत्पर्य्यायः । कज्जलध्वजः २ स्नेहाशः ३ शिखातरुः ४ गृहमणिः ५ ज्योतिराधारः ६ दशेन्धनः ७ दीपालिकः ८ दोषास्यः ९ नयनोत्सवः १० । इति शब्दरत्नावली ॥ (यथा, रघौ । ५ । २० ।

"कृत्स्नं तपोजालि तदैव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वाद्विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥")

दीपमाहात्म्यम् । यथा,—
"दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ।
चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपं ददेत् प्रिये ! ॥"
अष्टप्रकारा दीपा यथा,—
"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः ।
सार्षपः फलनिर्य्यासजातो वा राजिकोद्भवः ॥
दधिजश्चान्नजश्चैव प्रदीपाः अष्ट कीर्त्तिताः ॥"
तस्य पञ्चप्रकारा वर्त्तिका यथा,—
"पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ।
शाणजा बादरी वापि फलकोषोद्भवाथवा ॥
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥"
दीपपात्राणि यथा,—
"तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम् ।
तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥"*॥
दीपवृक्षे दीपस्थापनं भूमौ तन्निषेधश्च यथा,—
"दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्यैश्च भैरव ! ।
वृक्षे च दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापन्तथैव च ॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव ! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपमुत्सृजेन्नरः ।
स तावत्तापं नरकमाप्नोत्येव शतं समाः ॥ * ॥
सुदृशवर्त्तिः सस्नेहः पात्रेऽभग्ने सुदर्शने ।
शस्त्राये द्रव्यकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ओघवह्निस्तु स स्मृतः ॥
नेत्राह्लादकरः सर्व्वभूमितापविवर्ज्जितः ।
सुशिखः शब्दरहितो निर्धूमो नातिह्रस्वकः ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये ।
दीपवृक्षस्थिते गुह्यकैर्नैव प्रपूरिते ॥
दक्षिणावर्त्तवर्त्ता तु चारुदीपः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः ॥
हस्तेन वर्ज्जितो दीपो मध्यमः परिकीर्त्तितः ।
विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥"
इति कालिकापुराणे ६८ अध्यायः ॥ * ॥
कार्त्तिके तद्दानफलं यथा,—
"कार्त्तिके मासि यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चाश्वमेधफलं लभेत् ॥"
इति कर्म्मलोचनम् ॥ * ॥
अपि च ।
"समभ्यर्च्य हरिं भक्त्या दीपं दत्त्वा दिवानिशम् ।
तत्र पापविशुद्धात्मा नरो याति दिवं नृप ! ॥
सम्यग्वै विशेषेण तत्र पञ्च दिनानि तु ।
पुण्यानि तेषु यद्दत्तमक्षयं सर्व्वकामिकम् ॥
एकादश्यां हरिमुद्दिश्य दीपं प्रज्वाल्य लुब्धिका ।
मानुष्यं दुर्लभं प्राप्य परां गतिमवाप सा ॥
द्वादश्यां तस्करो रात्रिदीपस्नेहोऽथ चौर्य्यतः ।
कारणात् परमं प्राप्तो लोकं विष्णोः सनातनम् ॥
अपापोऽपि चयोदश्यां दीपान् दत्त्वा पुरे जनात् ।
वैश्या लीलावती भूत्वा जगाम स्वर्गमक्षयम् ॥
लुब्धकोऽपि चतुर्द्दश्यां पूजयित्वा जनार्द्दनम् ।
निर्भक्तिः परयाभक्त्या विष्णुलोकं जगाम सः ॥
गोपः कश्चिदमावास्यां पूर्णां दृष्ट्वा यथाविधिः ।
सुदुर्ज्जयस्त्वनायासो राजराजेश्वरोऽभवत् ॥
तस्माद्दीपाः प्रदातव्या रात्रावस्यामिति स्तवौ ।
गृहेषु सर्व्वगोष्ठेषु चैत्येष्वायतनेषु च ॥
देवागारेषु रथ्यासु श्मशानेषु सरःसु च ॥"
इत्यग्निपुराणम् ॥

प्रदीपनः, पुं, (प्रदीपयतीति । प्र + दीप् + णिच् + ल्युः ।) स्थावरविषभेदः । इत्यमरः ।१।८।१०॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"काकोलो गरलः शृङ्गी वत्सनाभः प्रदीपनः ।
शौक्लिकेयो ब्रह्मपुत्रो विषं स्यान्नरदो विषः ॥")
तस्य लक्षणम् यथा,—
"वर्णतो लोहितो यः स्यात् दीप्तिमान् दहन-
प्रभः ।
महादाहकरः पूर्व्वैः कथितः स प्रदीपनः ॥"
इति राजनिर्घण्टः ॥
प्रकाशके, त्रि ॥

प्रदेशः, पुं, (प्रदिश्यते इति । प्र + दिश् + "हल-
श्च ।" ३ । ३ । १२१ । इति घञ् । "उप-
सर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ ।
इति पाक्षिको दीर्घाभावः ।) देशमात्रम् ।
(यथा, हरिवंशे भविष्यपर्व्वणि । ५ । ३६ ।
"गरुडाद्यवरस्याथ दीपिकादीपिते तदा ।
प्रदेशे पुण्डरीकाक्षो स्थितस्त्वाचरत्वामरैः ॥")
तत्पर्य्यायः । आस्थानम् २ आस्था ३ भूः ४
अवकाशः ५ स्थितिः ६ पदम् ७ । इति राज-
निर्घण्टः ॥ तर्ज्जन्यङ्गुष्ठवर्ज्जितः । भित्तिः । इति
मेदिनी । शे, २५ ॥ (संज्ञा । इति निरुक्तम् ।
१ । ४ । २ ॥ तन्त्रयुक्तिप्रकारविशेषः । यथा,—
"प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः । यथा
देवदत्तस्यानेन शल्यमुद्धृतं तस्मादयमदत्तस्याप्यय-
मेवोद्धरिष्यतीति ।" इत्युत्तरतन्त्रे पञ्चषष्टितमे-
ऽध्याये सुश्रुतेनोक्तम् ॥)

प्रदेशनं, क्ली, (प्रदिश्यते अनेनेति । प्र + दिश् +
करणे ल्युट् ।) नृपादेरुपढौकनम् । भेटी इति
ख्यातम् । तत्पर्य्यायः । प्राभृतम् २ उपायनम् ३
उपग्राह्यम् ४ उपहारः ५ उपदा ६ । इत्यमरः ।
२ । ८ । २७ ॥ केचित्तु देवताभ्यो भक्त्या मित्रा-
दिभ्यश्च प्रीत्या यत् प्रयुक्तं वस्त्रफलादि दीयते
तत् इत्याहुः । केचिच्च प्राभृतादि द्वयं भक्त्या
देवताब्राह्मणराजादिभ्यो यद्दीयते तत् । उपा-
यनादि चतुष्कं तुष्टमिदं दीयते तदेतत् क्रम
कार्य्यं साधनीयमिति यद्दीयते भृती इति ख्याते
इत्याहुः । किन्तु षट्कमेकार्थमेवेति बहवः ।
उपायनमुपग्राह्यं प्राभृतञ्चोपदा स्त्रियामिति-
मरमाला । इति भरतः ॥

प्रदेशनी, स्त्री, (प्रदिशति अनयेति । प्र + दिश् +
करणे ल्युट् ।) तर्ज्जनी । इत्यमरटीकायां भरतः ॥

प्रदेशिनी, स्त्री, (प्रदिशतीति । प्र + दिश् +
णिनिः ङीप् ।) तर्ज्जनी । इत्यमरः । २।६।८२ ॥
(यथा, महाभारते । १ । ८३ । १६ ।
"तेऽदर्शयन् प्रदेशिन्या तमेव कृपसत्तमम् ।
प्राञ्जलिर्मातरश्चैव तथाचक्रुश्च दारकाः ॥"
"स्त्रीरङ्गुले: पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलायते ।
प्रदेशिन्यास्तु मध्यमानामिका कनिष्ठिका यथो-
त्तरं पञ्चमभागहीना ।" इति सुश्रुते सूत्र-
स्थाने ३५ अध्याये ॥)

प्रदेहः, पुं, (प्रदिह्यते इति । प्र + दिह लेपने +
घञ् ।) प्रलेपः । इति वैद्यकम् ॥ (यथा, सुश्रुते
सूत्रस्थाने । १३ अध्याये ।
"इन्द्रवस्त्याश्रितदंशेऽपि जीवति प्रतिकारयेत् ।
लेहाभ्यङ्गपरीषेकैः प्रदेहैश्च तथा भिषक् ॥"
यथा च "प्रदेहो वातश्लेष्मप्रशमनः सन्धानः
शोधनो रोपणः शोफवेदनापहश्च तस्योपयोगः
क्षताक्षतेषु ।" इति सुश्रुते सूत्रस्थानेऽष्टादशे-
ऽध्याये ॥ वस्त्रलवविशेषः । तद्यथा —
"ततः सुपौरन्तं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥"
इति च तत्र सूत्रस्थाने ४६ अध्याये ॥)

प्रदोषः, पुं, (दोषा रात्रिः । प्रारम्भो दोषाया
इति प्रादिसमासः । प्रक्रान्ता दोषा रात्रि-
रनेनेति वा ।) रजनीमुखम् । इत्यमरः । १।४।६॥
तत्तु रात्रेः प्रथमदण्डचतुष्टयम् । यथा,—
"प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"
इति तिथ्यादितत्त्वम् ॥
(यथा, कुमारे । ५ । ४४ ।
"वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥")
दोषः । इति हेमचन्द्रः ॥ (प्रकृष्टो दोषो
यस्येति । दुष्टे, त्रि । यथा, माघे । २ । ६८ ।
"ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ।
तम:स्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥"
"ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयो
राजानस्तमःस्वभावाः तमोगुणात्मकाः अतएव
तेऽपि प्रदोषं प्रकृष्टदोषम् । प्रदोषो दुष्टरात्रौ
चेति वैजयन्ती । तामसमेवैनं चैद्यमनुयायिनः
अनुयास्यन्ति साहचर्यादिति भावः ॥" इति
तट्टीकायां मल्लिनाथः ॥)

प्रद्यु, क्ली, प्रकृष्टा द्यौः स्वर्गो यस्मात् तत् । पुण्यम् ।
इति मुग्धबोधटीकायां दुर्गादासः ॥

प्रद्युम्नः, पुं, (प्रकृष्टं द्युम्नं बलं यस्य ।) कन्दर्पः ।
इत्यमरः । १ । १ । २६ ॥ स वासुदेवस्य चतु-
र्थांशः । यथा,—
"एकदेवं चतुष्पादं चतुर्द्धा पुनरच्युतः ।
बिभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥

कृष्णद्वैपायनो व्यासो विष्णुर्नारायणः स्वयम् ।
अपान्तरतमाः पूर्व्वं स्वेच्छया ह्यभवद्धरिः ॥”

इति कौर्म्मे ४८ अध्यायः ॥

अपि च ।

“अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च ।
बलदेवः स्वयं शिवः कृष्णश्च प्रकृतिः परः ॥”

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११६ अध्यायः ॥

(मनुजागर्भजातो मनोरपत्यभेदः । यथा, भागवते । ४ । १३ । १५–१६ ।

“मनोरसूत महिषी विरजान् नड्वला सुतान् ।
पुरुं कुत्सं ऋतं द्युम्नं सत्यवन्तं ऋतं व्रतम् ॥
अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम् ॥”)

प्रद्योतः, पुं, (प्रकृष्टो द्योतः ।) रश्मिः । इति हलायुधः ॥ (यक्षभेदः । यथा, महाभारते । २ । १० । १५ ।

“कुबेरको गण्डकण्डुः प्रद्योतश्च महाबलः ॥”)

प्रद्योतनः, पुं, (प्रद्योतते इति । प्र + द्युत् + “अनुदात्तेतश्च हलादेः ।” ३।२।१४९ । इति युच् ।) सूर्य्यः । इति हलायुधः ॥ (भावे ल्युट् ।) द्युतौ, स्त्री ॥

प्रद्रावः, पुं, (प्र + द्रु + “प्रे द्रुस्तुस्रुवः ।” ३।३।२७। इति घञ् ।) पलायनम् । इत्यमरः । २ । ८ । ११२ ॥

प्रधनं, क्ली, (प्रदधातीति । प्र + धा + “कृपृवृजिमन्दिनिधाञ्भ्यः क्युः ।” उणा० २ । ८१ । इति बाहुलकात् क्युः आतो लोपश्च ।) युद्धम् । इत्यमरः । २ । ८ । १०३ ॥ (यथा, देवीभागवते । ४ । ७ । ५३ ।

“वैरं भवति वित्तार्थं दारार्थं वा परस्परम् ।
एवकारहितौ कस्मात् चक्रतुः प्रधनं महत् ॥”)

दारणम् । इति मेदिनी । ने, ८३ ॥ (प्रकृष्टं धनमस्येति विग्रहे प्रभूतधनविशिष्टे, त्रि ॥)

प्रधानं, क्ली, (प्रधत्ते सर्व्वमात्मनीति । प्र + धा + युच् ।) प्रकृतिः । (यथा, विष्णुपुराणे ।१।१।२ ।

“सदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥”)

महामात्रः । (यथा, मनुः । ७ । २०२ ।

“प्रमाणानि च कुर्व्वीत तेषां धर्म्मान् यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥”

प्रधत्तेऽनेनास्मिन् वा । प्र + धा + ल्युट् ।) परमात्मा । बुद्धिः । त्रि, प्रशस्तम् । तत्पर्य्यायः । प्रमुखम् २ प्रवेकम् ३ अनुत्तमम् ४ उत्तमम् ५ मुख्यम् ६ वर्य्यम् ७ वरेण्यम् ८ प्रवर्हम् ९ अनवरार्द्ध्यम् १० परार्द्ध्यम् ११ अग्रम् १२ प्राग्रहरम् १३ प्राग्र्यम् १४ अग्र्यम् १५ अग्रीयम् १६ अग्रियम् १७ । इत्यमरः ।३।१। ५७ ॥ (यथा, मनुः । ६ । १२१ ।

“उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भजेत् ॥”

प्रधानः, पुं, (प्रधत्ते इति । प्र + धा + ल्युः ।) महामात्रः । सेनापत्यादिः । महामात्रः प्रधानः स्यादिति पुंस्काण्डे नोपाजितः । इत्यमरटीकायां भरतः ॥ (राजविशेषः । यथा, महाभारते । १२ । २३० । १८१ ।

“प्रधानो नाम राजा च यक्षं ते मोक्षमागतः ।
कुले तस्य समुत्पन्नां सुलभां नाम विद्धि माम् ॥”)

प्रधिः, पुं, (प्रधीयते अनेनेति । प्र + धा + “उपसर्गे घोः किः ।” ३ । ३ । ९२ । इति किः ।) नेमिः । इत्यमरः । २ । ८ । ५६ ॥ (यथा, महाभारते । ५ । ५१ । ५८ ।

“मन्ये पर्य्यायधर्म्मोऽयं कालस्यात्यन्तगामिनः ।
चक्रे प्रधिरिवासक्तो नाख्य शक्यं पलायितुम् ॥”)

प्रधीः, त्रि, (प्रकृष्टा धीर्बुद्धिर्यस्य ।) प्रकृष्टबुद्धियुक्तः । (प्रकृष्टा धीः ।) प्रकृष्टबुद्धौ, स्त्री । इति मुग्धबोधव्याकरणम् ॥

प्रधूपिता, स्त्री, (प्रकर्षेण धूपिता ।) क्लेशिता । सूर्य्यगन्तव्यादिक् । इति मेदिनी । ते, २०७ ॥ प्रकर्षेण तप्ते दीप्ते च त्रि ॥

प्रनष्टः, त्रि, (प्र + नश् + क्तः ।) प्रकर्षेण नाशयुक्तः ।

“कच्चिदज्ञानसम्मूढः प्रनष्टस्ते धनञ्जय ! ॥”

इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

प्रनिघातनं, क्ली, (प्र + नि + हन् + णिच् + भावे ल्युट् ।) प्रणिघातनम् । वधः । इति हेमचन्द्रः ॥

प्रपञ्चः, पुं, (प्रपञ्चयते इति । प्र + पचि व्यक्तीकरणे + घञ् ।) विपर्य्यासः । विस्तरः । इत्यमरः ॥ “विपर्य्यासो वैपरीत्यं भ्रमो वा मायेति स्वामी ॥” इति भरतः ॥ सञ्चयः । प्रतारणम् । इति मेदिनी । चे, १५ ॥ संसारः । यथा,—

“पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलोपेतं प्रपञ्चे चातिदुर्लभम् ॥”

इति गुरुपादुकास्तोत्रम् ॥

प्रपञ्चितं, त्रि, (प्रपञ्चयते स्मेति । प्र + पचि + क्तः ।) विस्तृतम् । भ्रमयुक्तम् । यथा,—

“आत्मानमेवात्मतया विजानतां
तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत् प्रलीयते
रज्ज्वामहेर्भोगभवाभवौ यथा ॥”

इति श्रीभागवते । १० । १४ । २५ ॥

प्रपथः, त्रि, (प्रकृष्टः पन्था यत्र ।) शिथिलः । इति भूरिप्रयोगः ॥ (प्रकृष्टः पन्था इति प्रादिसमासः । प्रकृष्टमार्गः । यथा ऋग्वेदे । १० । १७ । ४ ।

“आयुर्विश्वायुः परिपासति त्वा
पूषा त्वा पातु प्रपथे पुरस्तात् ॥”)

प्रपथ्या, स्त्री, (प्रकृष्टा पथ्येति प्रादिसमासः ।) हरीतकी । इति राजनिर्घण्टः ॥ (हरीतकीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

प्रपदं, क्ली, (प्रारब्धं प्रगतं वा पदमिति प्रादिसमासः ।) पादाग्रम् । इत्यमरः । २ । ६ । ७१ ॥ (यथा, मनौ । ६ । २२ ।

“भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः ॥”)

प्रपन्नः, त्रि, (प्रपद्यते स्मेति । प्र + पद् + क्तः ।) शरणागतः । यथा,—

“गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति ॥”

इति मार्कण्डेयपुराणे मृत्युञ्जयो नाम७अध्यायः ॥

प्रपन्नाडः, पुं (प्रपन्नं अलति भूषयतीति । प्रपन्न + अल् + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । डलयोरैक्यम् ।) प्रपुन्नाडः । चक्रमर्द्दकः । इति रत्नमाला ॥ (विवृतिरस्य चक्रमर्द्दकशब्दे ज्ञेया ॥)

प्रपा, स्त्री, (प्रकर्षेण पिबन्त्यस्यामिति । प्र + पा + “आतश्चोपसर्गे ।” ३ । ३ । १०६ । इत्यङ् । स्वार्थे कन् वा ।) पानीयशालिका । इत्यमरः । २ । २ । ७ ॥ (यथा, मनुः । ८ । ३१९ ।

“यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥”)

यज्ञशाला । यथा, रामायणे । १ । ७३ । २० ।

“विश्वामित्रं पुरस्कृत्य शतानन्दञ्च धार्म्मिकम् ।
प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥”

“प्रपामध्ये यज्ञशालामध्ये इति कतकः ॥” इति तट्टीकायां रामानुजः ॥)

प्रपाणिः, पुं, (प्रकृष्टः पाणिः । प्रादिसमासः ।) करस्याधोदेशः । पाणितलम् । इति राजनिर्घण्टः ॥ (विषयोऽस्य यथा, “मच्चद्रम्याङ्गुली प्रपाणी ।” इति चरके विमानेऽष्टमेऽध्याये ॥)

प्रपातः, पुं, (प्रपतत्यस्मादिति । प्र + पत् + “अकर्त्तरि च कारके संज्ञायाम् ।” ३ । ३ । १९ । इति घञ् ।) निरवलम्बनपर्व्वतादिपार्श्वम् । आरड़ि इति ख्यातम् । यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति । तत्पर्य्यायः । अतटः २ भृगुः ३ । इत्यमरः । २ । ३ । ४ ॥ (यथा, देवीभागवते । ४ । ७ । ४९ ।

“मधु पश्यति मूढात्मा प्रपातं नैव पश्यति ।
करोति निन्दितं कर्म्म नरकान्न बिभेति च ॥”)

निर्झरः । इति मेदिनी । ते, १२७ ॥ (भावे घञ् ।) अध्यवस्कन्दः । कूलम् । इति हेमचन्द्रः ॥ (उड्डीनगतिविशेषः । यथा, महाभारते । ८ । ४१ । २७ । “अहं सम्पातादिकानष्टाबुड्डीनगतिविशेषान् वेद्मि । उक्तञ्च ।

सम्पातञ्च प्रपातञ्च महापातं निपातनम् ।
चक्रं तिर्य्यक् तथा चोर्द्ध्वमष्टमं लघुसंज्ञकम् ॥”

प्रपातनम् । यथा, सुश्रुते चिकित्सितस्थाने । ४० अध्याये ।

“तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषावबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु इति ॥”)

प्रपायी, [न्] त्रि, (प्रपिबतीति । प्र + पा + णिनिः ।) पानकर्त्ता । रक्षणकर्त्ता । इति मुग्धबोधव्याकरणम् ॥

प्रपावनं, क्ली, (प्रपैव कामपूरकं वनम् । यद्वा, प्रकर्षेण पावयतीति । पू + णिच् + कर्त्तरि ल्युः ।) वनभेदः । कामारण्यम् । इति शब्द-माला ॥

प्रपितामहः, पुं, (प्रकर्षेण पितामहः पितामह-स्यापि पिता ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेयपुराणे । १०१ । २२ ।
"तद्विमिह तदन्तःस्थो भगवान् प्रपितामहः ।
पद्मयोनिः स्वयं ब्रह्मा यः स्रष्टा जगतां प्रभुः ॥")
पितामहपिता । इत्यमरः । २ । ६ । ३३ ॥ (यथा, मनौ । ३ । २२१ ।
"पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्त्तयेत्प्रपितामहम् ॥")

प्रपितामही, स्त्री, (प्रपितामह + स्त्रियां ङीष् ।) प्रपितामहपत्नी । यथा,—
"स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयम् ।
पितामही च स्वेनैव स्वेनैव प्रपितामही ॥"
इति दायभागः ॥

प्रपुनाडः, पुं, (पुमांसं नाडयतीति । नड भ्रंशे + अच् । प्रकृष्टः पुन्नाडः इति प्रादिसमासः । पृषोदरादित्वात् साधुः ।) प्रपुन्नाडः । इत्यमर-टीकायां भरतः ॥ (अस्य शाकगुणा यथा,—
"कषायद्वं शाकतत्तं वदन्त्यप्रपुनाडयोः ।
रूक्षं लघु च शीतञ्च वातपित्तप्रकोपणम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

प्रपुन्नडः, पुं, (प्रपुनाडः । पृषोदरादित्वात् ह्रस्वः ।) प्रपुन्नाडः । इत्यमरभरतौ ॥

प्रपुन्नाटः, पुं, (पुमांसं नाटयतीति । नट + णिच् + अच् । प्रकृष्टः पुन्नाट इति प्रादिसमासः ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥

प्रपुन्नाडः, पुं, (पुमांसं नाडयतीति । नड् + अच् । प्रकृष्टः पुन्नाड इति प्रादिसमासः ।) चक्र-मर्द्दकः । चाकुन्दिया इति भाषा । इत्यमरः । २ । ४ । १४७ ॥ (विवृतिरस्य चक्रमर्द्दकशब्दे ज्ञेया ॥)

प्रपुन्नालः, पुं, (प्रपुन्नाडः । डस्य लत्वम् ।) प्रपु-न्नाडः । इति भरतद्विरूपकोषः ॥

प्रपूरिका, स्त्री, (प्रपूर्य्यते कण्टकैरिति । प्र + पूर + कर्म्मणि घञ् । स्वार्थे कन् । यद्वा, प्रपूरयतीति । प्र + पूर + ण्वुल् । टाप् । कापि अत इत्वम् ।) कण्टकारी । इति शब्दचन्द्रिका ॥

प्रपौण्डरीकं, क्ली, (पुण्डरीक + स्वार्थे अण् । प्रकृष्टं पौण्डरीकस्येव पुष्पं यस्य ।) हिमालये मधुजाताच्च चक्षुष्यः क्षुद्रविटपः । शालपर्णीपत्रतुल्यपत्रः । पुण्डरिया ख्यातः । इत्यमरभरतौ ॥ तत्पर्य्यायः । चक्षुष्यम् २ शीतम् ३ श्रीपुष्पम् ४ पुण्डरी ५ । इति रत्नमाला ॥ पुण्डर्य्यम् ६ पुण्डरीयकम् ७ पौण्डरीयम् ८ सुपुष्पम् ९ सानुजम् १० अनुजम् ११ ॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये ।
"प्रपौण्डरीकं मधुकं समङ्गां धवमेव च ।
तैलमेभिश्च सम्यक्तं ब्रह्म वाकूमतः क्रियाम् ॥"
अस्य गुणाः । चक्षुर्हितत्वम् । मधुरत्वम् । तिक्तत्वम् । शीतलत्वम् । पित्तरक्तकफज्वर-दाहव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्रलं हिमम् ।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफापहृत् ॥"
इति भावप्रकाशः ॥

प्रपौत्रः, पुं, (प्रकर्षेण पौत्रः । पौत्रस्यापि पुत्रत्वात् तथात्वम् ।) पौत्रस्य पुत्रः । तत्पर्य्यायः । प्रतिनप्ता २ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । ११० । १५ ।
"पुत्रान् पौत्रान् प्रपौत्रांश्च तथान्यानपि बान्धवान् ।
पश्यतो मे भ्रातॄन् दुःखं किमतः हि भवि-ष्यति ॥")

प्रपौत्री, स्त्री, (प्रपौत्र + ङीष् ।) पौत्रस्य कन्या । इति स्मृतिः ॥

प्रफुल्लः, त्रि, (फलतीति । ञि फला विशरणे + क्तः । "आदितश्चेति ।" ७ । २ । १६ । इति इड-भावः । "तिच ।" ७ । ४ । ८९ । इति उत् । "अनुपसर्गात् फुल्लक्षीबेति ।" ८ । २ । ५५ । इति निष्ठातस्य लः । ततः प्रादिसमासः । यद्वा, प्रफुल्लतीति । प्र + फुल्ल विकसने + अच् ।) विकाशयुक्तः । तत्पर्य्यायः । उत्फुल्लः २ संफुल्लः ३ व्याकोषः ४ विकचः ५ स्फुटः ६ फुल्लः ७ विक-सितः ८ । इत्यमरः । २ । ४ । ७ ॥ प्रबुद्धः ९ जृम्भः १० स्मितः ११ उन्मिषितः १२ दलितः १३ स्फुटितः १४ उच्छ्वसितः १५ विजृम्भितः १६ स्मेरः १७ विनिद्रः १८ उन्निद्रः १९ विनुन्नः २० हसितः २१ । इति हेमचन्द्रः ॥ (यथा, रघौ । २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्धरः केशरिणं ददर्श
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥")

प्रबन्धः, पुं, (प्रबध्यते इति । प्र + बन्ध + घञ् ।) सन्दर्भः । इति त्रिकाण्डशेषः ॥ (प्र + बन्ध + भावे घञ् ।) काव्यादिग्रथनम् । यथा,—
"प्रबन्धोऽयं बन्धोरखिलजगतान्तस्य सरसाम् ॥"
इति हंसदूतः ॥

प्रबन्धकल्पना, स्त्री, प्रबन्धस्य कल्पना रचना बहुकृता स्तोकसत्या कथा ।
"प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः ।
परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित् ॥"
इति कोलाहलाचार्य्यः ।
इत्यमरटीकायां भरतः ॥

प्रबलः, पुं, (प्रकृष्टं बलतीति । प्र + बल प्राणने + अच् ।) पल्लवः । इति शब्दमाला ॥ (प्रकृष्टं बलमस्य ।) प्रकृष्टबलयुक्ते, त्रि । यथा, मार्क-ण्डेयपुराणे । ८१ । ६ ।
"आक्रान्तः स महाभागस्तैस्तदा प्रबला-रिभिः ॥"
प्रकृष्टबले क्लीवञ्च ॥

प्रबला, स्त्री, (प्रकृष्टं बलमस्याः ।) प्रसारिणी । इति राजनिर्घण्टः ॥ प्रकृष्टबलवती च ॥ (यथा, रघौ । ८ । ५० ।
"अवहृतां हतजीवितं मम
प्रबलामात्मकृतेन वेदनाम् ॥")

प्रबालः, पुं क्ली, (प्रबलतीति । प्र + बल प्राणने + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः । यद्वा, प्र + बल् + णिच् + अच् ।) रक्तवर्णवर्त्तुलाकाररत्नविशेषः । पला इति मुङ्गा इति च भाषा ॥ तस्याधिष्ठात्री देवता मङ्गलः । इति ज्योतिषम् ॥ तत्पर्य्यायः । विद्रुमः २ । इत्यमरः । २ । २ । ९३ ॥ अङ्गारकमणिः ३ अम्भोधिवल्लभः ४ भौमरत्नम् ५ रक्ताङ्गः ६ रक्ता-कारः ७ लतामणिः ८ । अस्य गुणाः । मधु-रत्वम् । अम्लत्वम् । कफपित्तादिदोषनाशित्वम् । क्षीणवीर्य्यकान्तिकरत्वम् । धृते मङ्गलदायि-त्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च । सारकत्वम् । शीतत्वम् । कषायत्वम् । स्वादु-त्वम् । वान्तिकारित्वम् । चक्षुर्हितत्वम् । धारणे पापालक्ष्मीनाशित्वञ्च ॥ इति राजवल्लभः ॥ * ॥
तस्य शुभलक्षणं यथा,—
"शुद्धं दृढं घनं वृत्तं स्निग्धं गात्रसुरङ्गकम् ।
समं गुरु शिराहीनं प्रबालं धारयेत् शुभम् ॥"
तस्याशुभलक्षणं यथा,—
"गौरं रङ्गजलाक्रान्तं वक्रसूक्ष्मं सकोटरम् ।
रूक्षलक्ष्मं लघु श्वेतं प्रबालमशुभं त्यजेत् ॥"
इति राजनिर्घण्टः ॥ * ॥
तस्योत्पत्त्यादि यथा,—
सूत उवाच ।
"आदाय शेषस्तस्यान्त्रं यमस्याकम्बलादिषु ।
चिक्षेप तत्र जायन्ते विद्रुमाः सुमहागुणाः ॥
तत्र प्रधानं शशलोहिताभं
गुञ्जाजवापुष्पनिभं प्रदिष्टम् ।
सनीसकं देवकरोमकञ्च
स्थानानि तेषु प्रभवं सुरागम् ॥
अन्यत्र जातञ्च न तत् प्रधानं
मूल्यं भवेच्छिल्पिविशेषयोगात् ॥
प्रसन्नं कमलं स्निग्धं सुरागं विद्रुमं हि तत् ।
धनधान्यकरं लोके विषाग्निभयनाशनम् ॥
परीक्षा पुलकस्योक्ता रुधिराख्यस्य वै मणेः ।
स्फाटिकस्य विद्रुमस्य रत्नशानाय शौनक ! ॥"
इति गारुडे ८० अध्यायः ॥ * ॥
अथ विद्रुमपरीक्षा ।
"श्वेतसागरमध्ये तु जायते वल्लरी तु या ।
विद्रुमा नाम रत्नाख्या दुर्लभा वज्ररूपिणी ॥
पाषाणं प्रभवत्येषा प्रयत्नात् कथिता सती ।
विद्रुमं नाम यद्रत्नमामनन्ति मनीषिणः ॥*॥
ब्रह्मादिजातिभेदेन तच्चतुर्व्विधमुच्यते ।
अरुणं शशरक्ताभं कोमलं स्निग्धमेव च ।
प्रबालं विप्रजातिः स्यात् सुखवेध्यं मनोरमम् ॥
जवाबन्धूकसिन्दूरदाडिमीकुसुमप्रभम् ।
कठिनं दुर्व्वेधमस्निग्धं क्षत्रजातिं तदुच्यते ॥

पलाशकुसुमाभासं तथा पाटलसन्निभम् ।
वैश्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिभम् ॥
रक्तोत्पलदलाकारं कठिनं न चिरद्युति ।
विद्रुमं शूद्रजाति: स्याद्धारणीयं तथैव च ॥*॥
रक्तता स्निग्धता दार्ढ्यं चिरद्युति: सुवर्णता ।
प्रवालानां गुणा: प्रोक्ता धनधान्यकरा: परा: ॥
हिमाद्रौ यत्तु संजातं तद्रक्तमतिनिष्ठुरम् ।
तत्र लिप्तो भवेन्निम्बकल्कोऽतिमधुर: स्थित: ।
तस्य धारणमात्रेण विषवेग: प्रशाम्यति ॥*॥
विवर्णता तु खरता प्रवाले दूषणद्वयम् ।
रेखाकाकपदौ बिन्दुर्यथा वर्णेषु दोषकृत् ।
तथा प्रवाले सर्व्वत्र वर्जनीयं विचक्षणै: ॥
रेखा हन्यादृयशो लक्ष्मीमावर्त्त: कुलनाशन: ।
पटलो रोगकृत् ख्यातो बिन्दुर्धनविनाशकृत् ॥
त्रास: संजनयेत्त्रासं नीलिका मृत्युकारिणी ।
मूल्यं शुद्धप्रवालस्य रूप्यद्विगुणमुच्यते ॥
धारणेऽस्यापि नियमो जातिभेदेन पूर्व्ववत् ॥"*॥
तथाहि ।

"विरूपजातिं विषमं विवर्णं
खरप्रवालं प्रवहन्ति ये ये ।
ते मृत्युमेवात्मनि वै वहन्ति
सत्यं वदत्येष कृती मुनीन्द्र: ॥"
इति युक्तिकल्पतरौ प्रवालपरीक्षा ॥*॥

(अस्य संशोधनादिकं यथा,—
"कुमार्य्या तण्डुलीयेन स्तन्येन च निषेचयेत् ।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि कृत्स्नश: ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषत: ।
क्षाराद्विविधवर्णानि शुध्यन्ति नात्र संशय: ॥
क्षीरदुग्धेन प्रवालञ्च भावयित्वा तु हस्तिके ।
मध्येऽपि तत्क्षपहितं स्थापयेत्तन्निरोधयेत् ।
पुटग्राममग्निप्रतापेन म्रियते प्रहरद्वये ॥
इति प्रवालमारणम् ॥"
· इति वैद्यकरसेन्द्रसंग्रहे जारणमारणाधिकारे॥
किशलय: । (यथा, कुमारे । १ । ४४ ।
"पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्य्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्य्यस्तरुच: स्मितस्य ॥")
वीणादण्ड: । इति मेदिनी । ले, १०७ ॥
प्रवालफलं, क्ली, (प्रवालवद्रक्तं फलं यस्य ।) रक्तचन्दनम् । इति भावप्रकाश: ॥
प्रवालिक:, पुं, (प्रवालोऽस्त्यस्य बाहुल्येनेति । प्रवाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) जीवशाक: । इति राजनिर्घण्ट: ॥
प्रबाहु:, पुं, (प्रगतो बाहुमिति ।) कूर्परस्याधोभाग: । यथा, विष्णुपुराणे ५ । ५ । १६ ।
"सुखं बाहुप्रबाहू च मन: सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्यय: ॥"
प्रबाहुकम्, व्य, समानकाले । ऊर्द्ध्वे । प्रवाह्निकेति पाठान्तरम् । इति कौमुदीटीका तत्त्वबोधिनी ॥
प्रबुद्ध:, त्रि, (प्र + बुध + क्त: ।) पण्डित: । प्रफुल्ल: । इति हेमचन्द्र: ॥ (यथा, रघु: । १० । ६ ।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥")
जागरित: । यथा, भट्टि: । ४ । १४ ।
"प्रातस्तरां पतत्रिभ्य: प्रबुद्ध: प्रणमन् रविम् ॥"
प्रबोध:, पुं, (प्र + बुध्यौ ङ अपगमे + भावे घञ् ।) विनिद्रत्वम् । इति हेमचन्द्र: ॥ (यथा, मार्कण्डेये । ८१ । ६७ ।
"प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥")
प्रकृष्टज्ञानञ्च । यथा,—
"तावत् सत्यं जगद्भाति प्रबोधे सत्यसम्भवेत् ॥"
इत्यात्मबोधग्रन्थ: ॥
(यथा च रघु: । ५ । ६५ ।
"तमात्मजा: सवयस: प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाच: ॥")
प्रबोधनं, क्ली, (प्र + बुध् + ल्युट् ।) न्यूनपूर्व्वगन्धस्य चन्दनादे: प्रयत्नविशेषेण पुन: पूर्व्वसौगन्ध्योत्पादनम् । तत्पर्य्याय: । अनुबोध: २ । इत्यमरभरतौ । बोधजननञ्च ॥ (जागरणम् । यथा, हरिवंशे । १७७ । ७१ ।
"ततस्तूर्य्यनिनादैश्च शङ्खानाञ्च महास्वनै: ।
प्रबोधनं महाबाहो: कृष्णस्याक्रियतालये ॥"
विकाश: । यथा, पञ्चतन्त्रे कथामुखे ।
"तदेतेषां बुद्धिप्रबोधनं यथा भवति तथा केनाप्युपायेनानुष्ठीयतामिति ॥" तथा च ऋतुसंहारे । ५ । १० ।
"सुगन्धिनि:श्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधनम् ॥")
प्रबोधनी, स्त्री, (प्रबोध्यतेऽनयेति । प्र + बुध् + णिच् + ल्युट् + ङीप् ।) दुरालभा । इति राजनिर्घण्ट: ॥ (प्रबुध्यते हरिरत्रेति ।) श्रीहरेरुत्थानैकादश्यादि: ।

अथ प्रबोधनीकृत्यम् ।
"शयन्यामिव कृत्यास्यां क्षीराम्भोधिमहोत्सवम् ।
प्रबोध्य कृष्णं संपूज्य विधिनारोहयेद्रथम् ॥"

अथ प्रबोधनीकृत्यनित्यता ।
स्कान्दे तत्रैव ।
"जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि ।
वृथा भवति तत्सर्व्वं न कृत्वा बोधवासरम् ॥"

अथ प्रबोधनीमाहात्म्यम् । तत्रैव ।
"प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम् ।
मुक्तिदं तत्त्वबुद्धीनां शृणु त्वं मुनिसत्तम ! ॥
तावद्गर्ज्जति विप्रेन्द्र ! गङ्गा भागीरथी क्षितौ ।
यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी ॥
तावद्गर्ज्जन्ति तीर्थानि आसमुद्रसरांसि च ।
यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके ॥
वाजपेयसहस्राणि अश्वमेधशतानि च ।
एकेनैवोपवासेन प्रबोधन्यां लभेन्नर: ॥
दुर्लभञ्चैव दुष्प्रापं त्रैलोक्ये सचराचरे ।
तदपि प्रार्थितं विप्र ! ददाति हरिबोधनी ॥
ऐश्वर्य्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पद: ।
ददात्युपोषिता विप्र ! हेलया हरिबोधनी ॥
मेरुमन्दरतुल्यानि पापान्यत्युर्ज्जितान्यपि ।
एकेनैवोपवासेन दहते हरिबोधनी ॥
पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते ।
एकेनैवोपवासेन ददाति हरिबोधनी ॥"
किञ्च ।
"जात: स एव सुकृती कुलं तेनैव पावितम् ।
कार्त्तिके मुनिशार्दूल ! कृता येन प्रबोधनी ॥
यानि कानि च तीर्थानि त्रैलोक्ये सम्भवन्ति च ।
तानि तस्य गृहे सम्यक् य: करोति प्रबोधनीम् ॥
सर्व्वं कृत्यं परित्यज्य तुष्ट्यर्थं चक्रपाणिन: ।
उपोष्यैकादशी सम्यक् कार्त्तिके हरिबोधनी ॥
किं तस्य बहुभि: कृत्यै: परलोकप्रदैर्मुने ! ।
सम्यगुपोषिता येन कार्त्तिके हरिबोधनी ॥
स ज्ञानी स हि योगी च स तपस्वी जितेन्द्रिय: ।
स्वर्गमोक्षौ च तस्यास्तामुपास्ते हरिबोधनीम् ॥
विष्णो: प्रियतमा ह्येषा धर्म्मसारस्य दायिनी ।
इमां सकृदुपोष्यैव मुक्तिभागी भवेन्नर: ॥
प्रबोधनीमुपोष्यैव न गर्भे विशते नर: ।
सर्व्वधर्म्मान् परित्यज्य तस्मात् कुर्व्वीत नारद ! ॥
स्नानं दानं तपो होम: समुद्दिश्य जनार्द्दनम् ।
नरैर्यत् क्रियते विप्र ! प्रबोधन्यां तदक्षयम् ।
महाव्रतमिदं पुत्र ! महापापौघनाशनम् ।
प्रबोधवासरं विष्णोर्विधिवत् समुपोषयेत् ॥
व्रतेनानेन देवेशं परितोष्य जनार्द्दनम् ।
विराजयन् दिशो दीप्त्या प्रयाति भुवनं हरे: ॥"
पाद्मे च तत्रैव ।
"दुग्धाब्धिभोगिशयने भगवाननन्तो
यस्मिन्दिने स्वपिति चाथ विबुध्यते च ।
तस्मिन्ननन्यमनसामुपवासभाजां
पुंसां ददात्यभिमतं गरुडाङ्कशायी ॥"
वाराहे च ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या समुपोष्या प्रबोधनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीव्रतम् ॥
उत्तराषाढयुक्ता यदि सा भवति प्रिये ! ।
तदा सा महती पुण्या कोटिकोटिगुणोत्तरा ॥
शयने बोधने चैव कटिदाने च सुन्दरि ! ।
उपोष्यैव विधानेन यान्ति मत्क्षयतां नरा: ॥
एकादशी सोमयुता कार्त्तिके मासि भाविनि ! ।
उत्तराभाद्रसंयोगे अनन्ता सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे ! सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता पुरा ॥"
तत्रैव श्रीयमनारदसंवादे ।
"अन्यच्च ते प्रवक्ष्यामि गुह्याद्गुह्यतरं मुने ! ।
कार्त्तिकेऽमलपक्षे तु साक्षादेकादशी स्मृता ॥
भक्तिप्रदा हरे: सा तु नाम्ना ख्याता प्रबोधनी ।
या सा विष्णो: परा मूर्त्तिरव्यक्तानेकरूपिणी ॥
सा क्षिप्ता मानुषे लोके द्वादशी मुनिपुङ्गव ! ॥"
मथुरायाञ्च विशेषत: पाद्मे तत्रैव ।
"तावद्गर्ज्जन्ति तीर्थानि वाजिमेधादयो मखा: ।

मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी ॥
संसारदावतप्तानां काम्यसौख्यपिपासिनाम्।
श्रीकृष्णपादपद्मस्य सान्निध्यं शीतलं शुभम् ॥
भवपान्थजनानां वै प्रापिकेयं प्रबोधनी।
कथं न सेव्यते सद्भिर्मथुरायां किमन्यतः ॥”*॥
अथ विशेषतः प्रबोधन्यां श्रीभगवत्पूजादि-माहात्म्यम्। स्कान्दे तत्रैव प्रबोधनीमाहात्म्ये।
“येऽर्च्चयन्ति नरास्तस्यां भक्त्या देवन्तु माधवम्।
समुपोष्य प्रमुच्यन्ते पापैर्जन्मसमार्ज्जितैः ॥
बाल्ये यद्यार्ज्जितं वत्स! यौवने वार्द्धके च यत्।
शतजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
शुष्कार्द्रं मुनिशार्दूल! सुगुरुमपि नारद।।
तत् क्षालयति गोविन्दस्तिथौ तस्यां प्रपूजितः ॥”
किञ्च।
“प्रबोधवासरे विष्णोः कुरुते च हरेः कथाम्।
सप्तद्वीपावनीदाने यत् फलं तल्लभन्मुने।॥”
वाराहे च।
“कौमुदस्य तु मासस्य या सिता द्वादशी भवेत्।
अर्च्चयेद्यस्तु मां तत्र तस्य पुण्यफलं शृणु ॥
यावल्लोका हि वर्त्तन्ते यावच्चन्द्रेन माधवि।।
मद्भक्तो जायते तावद्न्यभक्तो न जायते ॥”*॥
तस्या अनुष्ठानं यथा,—

ब्रह्मोवाच।

“शृणु मे भक्तितः पुत्र। बोधन्येकादशी हरेः।
उपोष्या येन विधिना तं विप्र। प्रवदामि ते ॥
कार्त्तिके शुक्लपक्षे तु दशम्यां नियतः शुचिः।
स्नात्वा देवार्च्चनं कृत्वा वह्निकार्य्यं यथाविधि ॥
आचान्तः सुप्रसन्नात्मा हविष्यान्नं सुसंस्कृतम्।
भुक्ताचम्य स्वपेत् सम्यक् कृत्वा शौचञ्च पादयोः ॥
रात्रेश्च पश्चिमे यामे समुत्थाय यथाविधि।
कृत्वा मूत्रपुरीषे तु शौचं कुर्य्यादतन्द्रितः ॥
कृत्वाष्टाङ्गुलमात्रन्तु क्षीरवृक्षसमुद्भवम्।
भक्षयेद्दन्तकाष्ठञ्च स्नात्वाचामेत् प्रयत्नतः ॥
स्तुत्वाङ्गानि तथाङ्गिश्च चिरं ध्यायेज्जनार्द्दनम्।
अतसीपुष्पसङ्काशं कमलाक्षं चतुर्भुजम् ॥
शङ्खचक्रगदाशार्ङ्गपीतवस्त्रं किरीटिनम्।
प्रसन्नवदनं देवं सर्व्वलक्षणलक्षितम् ॥
ततश्चाञ्जल्ये वारिहस्तेन पक्षिराज च।
कुशान्वितं प्रगृह्णीयात् नियमं विष्णुतुष्टये ॥
ध्यात्वा जलं गृहीत्वा तु भानुरूपं जनार्द्दनम्।
दद्यार्घ्यं दापयेत् पश्चात् करतोयेन मानवम् ॥
एवमुच्चारयेद्वाक्यं तस्मिन् काले महामुने।।
एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि।
भोक्ष्येऽहं पुण्डरीकाक्ष! शरणं मे भवाच्युत।॥
एवमुक्त्वा ततः सम्यक् नित्यकर्म्म सुकर्म्मधीः।
समर्पयेद्विधानेन विष्णुं संपूजयेन्मुने।॥
सहस्रसंख्यया सुस्थः सावित्रीं संजपेद्द्विजः।
सर्व्वपापक्षयकरीं व्रतस्य परिपूर्त्तये ॥”

इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥ * ॥

अथ प्रबोधकालनिर्णयः। भविष्ये।
“आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती।
आदिमध्यावसानेषु प्रस्वापावर्त्तनादिकम् ॥”
पाद्मे।
“पौष्णर्क्षेषो यदा नाह्नि मैत्राद्यमपि नो निशि।
द्वादश्यामपि तत् कुर्य्यादुत्थानं शयनं हरेः ॥
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥”
वाराहे च।
“अपादनियमस्तत्र स्वापे वा परिवर्त्तने।
पादयोगो यदा न स्याद्द्वेश्वापि तदा भवेत् ॥”
किञ्च स्कान्दे।
“रेवत्यन्तो यदा रात्रौ द्वादश्या च समन्वितः।
तदा विबुध्यते विष्णुर्द्दिनान्ते प्राप्य रेवतीम् ॥
रेवत्यादिरथान्तो वा द्वादश्या च विना भवेत्।
उभयोरप्यभावे तु सन्ध्यायाञ्च महोत्सवः ॥”
वाराहे च।
“द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥”
अतएव पुष्करपुराणे।
“यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या।
तस्य देवस्य तस्मिंश्च शयनावर्त्तनादिकम् ॥” *॥
अथ भगवत्प्रबोधनविधिः।
“शयन्तामिव निष्पाद्य महापूजां जलाशये।
कृष्णं नीत्वाथ सङ्कल्पं कृत्वा तत्र प्रबोधयेत् ॥”
तत्र मन्त्रः।

“ब्रह्मेन्द्ररुद्राग्निकुवेरसूर्य्य-
सोमादिभिर्वन्दितपादपद्मः।
बुध्यस्व देवेश जगन्निवास।
मन्त्रप्रभावेण सुखेन देव।॥

इयन्तु द्वादशी देव प्रबोधार्थं विनिर्म्मिता।
त्वयैव सर्व्वलोकानां हितार्थं शेषशायिना ॥
उत्तिष्ठोत्तिष्ठ गोविन्द! त्यज निद्रां जगत्पते।।
त्वयि सुप्ते जगत् सुप्तमुत्थिते चोत्थितं भवेत् ॥
गता मेघा वियच्चैव निर्म्मलं निर्म्मला दिशः।
शारदानि च पुष्पाणि गृहाण मम केशवेति ॥”
उत्तिष्ठोत्तिष्ठेत्यत्र क्वचिच्चैवम्।
“त्वयि सुप्ते जगन्नाथे जगत् सुप्तं भवेदिदम्।
उत्थिते चेष्टते सर्व्वमुत्तिष्ठोत्तिष्ठ माधवेति ॥”
वाराहे च।

“ब्रह्मेन्द्ररुद्रैरवितर्क्यभावो
भवाद्यृषिर्वन्दितवन्दनीयः।
प्राप्ता तव द्वादशी कौमुदाख्या
जागृष्व जागृष्व च लोकनाथ।॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शारदपुष्पाणि च लोकनाथ।।
अहं ददानीति च भक्तिहेतो-
र्जागृष्व जागृष्व च लोकनाथ! ॥”

श्रुतिश्च। “इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांशुले” इत्यादि।
“ततस्तस्मात् समुत्थाप्य कृष्णं घण्टादिनिस्वनैः।
तीरे सुखं निवेश्याथ प्रार्थयेत्तदनुग्रहम् ॥
तथा हि तृतीयस्कन्धे श्रीब्रह्मस्तुतौ।

“सोऽसावदभ्रकरुणो भगवान् विवृद्ध-
प्रेमस्मितेन नयनाम्बुरुहं विजृम्भन्।
उत्थाय विश्वविजयाय च नो विषादं
माध्व्या गिरापनयतात् पुरुषः पुराणः ॥”

इति।

“ततः पुष्पाञ्जलिं दत्त्वा संस्थाप्य विधिवत् प्रभुम्।
नीराज्य न्यासपूर्व्वञ्च वस्त्रादीनि समर्पयेत् ॥”
तथा च ब्राह्मे।
“एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवम्।
प्रसुप्तं बोधयेद्रात्रौ भक्तिश्रद्धासमन्वितः ॥
नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुःसाममङ्गलैः।
विना पणवशब्दैश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः।
सुभाषितैरिन्द्रजालैर्भूमिशोभाभिरेव च ॥
पुष्पैर्धूपैश्च नैवेद्यैर्दीपदृष्टैः सुशोभनैः।
होमैर्भक्ष्यैरपूपैश्च फलैः शाकैश्च पायसैः ॥
इक्षुविकारैर्मधुना द्राक्षाखर्ज्जूरैः सदाडिमैः।
कुठेरकस्य मञ्जर्य्या मालत्या नवनेन च ॥”
तत्र पुष्पविशेषः।
“कृष्णाभ्यां श्वेतरक्ताभ्यां चन्दनाभ्याञ्च सर्व्वदा।
कुङ्कुमालक्तकाभ्याञ्च रक्तकैः सकुङ्कुमैः ॥
तथा नानाविधैः पुष्पैर्दिव्यैर्वीरक्रयाहृतैः ॥”
एवमेव प्रायः पाद्मे च। तथा स्कान्दे च।
“बहुपुष्पैर्बहुफलैः कर्पूरागुरुकुङ्कुमैः ॥
हरेः पूजा विधातव्या कार्त्तिके बोधवासरे ॥”

इति ॥

“इत्थं कृत्वा महापूजां महानीराजनं तथा।
स्वभक्तान्यर्पयेन् कृष्णे सपुष्पाक्षतवारिणा ॥
वेदस्तुत्यादिना स्तुत्वा स्वकृत्यस्तुत्यादिना प्रभुम्।
संप्रार्थ्य गीतवाद्यादिघोषैरारोहयेद्रथम् ॥”
तथा च भविष्योत्तरे श्रीकृष्णयुधिष्ठिरसंवादे।
“महातूर्य्यरवे रात्रौ भ्रामयेत स्यन्दने स्थितम् ॥
उत्थितं देवदेवेशं नगरे पार्थिवः स्वयम्।
दीपोद्योतकरे मार्गे नृत्यगीतसमाकुले ॥”
अथ रथयात्रामाहात्म्यं भविष्योत्तरे तत्रैव।
“यं यं दामोदरः पश्येद्रथस्थितो धरणीधरः।
तं तं प्रदेशं राजेन्द्र। सर्व्वं स्वर्गाय कल्पयेत् ॥”
किञ्च।
“यावत्पदानि कृष्णस्य रथस्याकर्षणं नरः।
करोति क्रतुभिस्तानि तुल्यानि नरनायक।॥
रथस्थं ये निरीक्षन्ते कौतुकेनापि केशवम्।
देवतानां गणाः सर्व्वे भवन्ति श्वपचादयः ॥
स्त्रियोऽपि मुक्तिमायान्ति रथयात्रापरायणाः।
पितृमातृभर्तृकुलं नयन्ति हरिमन्दिरम् ॥
कुर्व्वन्ति नर्त्तकीरूपं रथाग्रे कौतुकान्वितम्।
अप्सरोभिः सह क्रीड़ां कुर्व्वन्त्याचतुर्द्दश ॥
ये रथाग्रे प्रकुर्व्वन्ति गीतवाद्यादि मानवाः।
देवलोकात् परिभ्रष्टा जायन्ते मण्डलेश्वराः ॥
मौल्येन स्यन्दनस्याग्रे गायमानाश्च गायकाः।
वादकैः सह राजेन्द्र। प्रयान्ति हरिमन्दिरम् ॥
रथोत्सवे मुकुन्दस्य येषां हर्षोऽपि जायते।
तेषां न नारकी पीड़ा यावदिन्द्राश्चतुर्द्दश ॥
रथोत्सवस्य माहात्म्यं कलौ वितनुते हि यः।
पुण्यबुद्ध्या विशेषेण लोभेनाप्यथवा नरः ॥

सप्तद्वीपवसुन्धराढ्या रत्नधान्यसमन्विता ।
सुवर्णधनपुण्याढ्या तेन दत्ता मही भवेत् ॥"
अन्यच्च ।
"बोधनी जगदाधारा कार्त्तिके शुक्लपक्षतः ।
रथस्थो यत्र भगवांस्तुष्टो यच्छति वाञ्छितम् ॥
भजन्ते ये रथारूढं देवं सर्व्वेश्वरेश्वरम् ।
तेषां यात्रा कृता सम्यक् कामानिष्टान् प्रयच्छति ॥
श्रीकृष्णरथशोभां ये प्रकुर्व्वन्ति प्रहर्षिताः ।
तेषां मनोरथावाप्तिं यच्छति पुरुषोत्तमः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति समुत्सुकाः ।
वाञ्छितं तेभ्यो यच्छन्ति नित्यं सूर्य्यादयो ग्रहाः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति सुहर्षिताः ।
पदे पदे तथा पुत्र ! पुण्यं तेषां प्रयागजम् ॥
रथयात्रास्थिते कृष्णे जयेति प्रवदन्ति ये ।
जयेति च पुनर्ये वै शृणु पुण्यं वदाम्यहम् ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
वाराणस्यादितीर्थेषु देवानाञ्चैव दर्शने ।
यत् पुण्यं कविभिः प्रोक्तं कार्त्स्न्येन च नरेश्वर ॥
जयशब्दे कृते विष्णौ रथस्थे तत् फलं स्मृतम् ।
रथस्थितो नरैर्यस्तु पूजितो धरणीधरः ।
यथालाभोपपन्नैश्च पुष्पैर्भक्त्या समर्च्चितः ॥
ददाति वाञ्छितान् कामानन्ते च परमं पदम् ।
मङ्गलं ये प्रकुर्व्वन्ति धूपदीपांस्तथा स्तवम् ॥
नैवेद्यं वस्त्रपूजाञ्च भक्त्या नीराजनं हरेः ।
रथारूढस्य कृष्णस्य संप्राप्ते हरिवासरे ॥
फलं न तस्यया ज्ञातं जानाति यदि केशवः ।
ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा ब्रह्मनिन्दकः ॥
महापातकयुक्तोऽपि ब्रह्महा गुरुतल्पगः ।
मद्यपः सर्व्वपापोऽपि कलिकालेन मोहितः ॥
रथाग्रतः पदैकेन मुच्यते सर्व्वपातकैः ॥"
किञ्चान्यच्च ।
"रथारूढे महाविष्णौ ये कुर्व्वन्ति जयस्वनम् ।
पूजयाखिलपापेभ्यो मुक्ता यान्ति हरेः पदम् ॥"
किञ्च ।
"रथस्याकर्षणं पूर्व्वं कुरुते दैत्यनायकः ।
ततः सुराः विहङ्गश्च यथा गन्धर्व्वमानवाः ॥
इत्थञ्च रथयात्राया विधिर्य्युक्तः स्मृतोऽभवत् ।
तथापि कथितस्त्वन्यो विधिर्योऽपि वितन्यते ॥"
अथ रथयात्राविधिः ।
"श्रीकृष्णं तु रथारूढं कृत्वा जयजयध्वनिम् ।
निन्याय्य च महापूजामाशीर्व्वादांश्च कीर्त्तयेत् ॥"
तथा च विष्णुधर्म्मे ।
"वक्त्रं नीलोत्पलरुचि लसत्कुण्डलाभ्यां सुन्दरं
चन्द्राकारं रचिततिलकं चन्दनेनाच्युतस्य ।
भक्त्या लीलां जगत्सुखकरीं प्रेक्षणेनाच्युतीयं
पद्मावासां सततसुखदा धारयन् पातु विष्णुः ॥
युक्तः श्वेतादिवाहैर्मधुरतररथस्त्वङ्किणीजालमाले-
रत्नौघैर्मौक्तिकानामविरतमखिभिः संवृतैश्चैव हारैः ।
हैमैः कुम्भैः पताकाध्वजवरचविभिर्भूषितः केतुदण्डै-
र्घण्टैर्ग्लैर्ध्वनद्भ्यो दुरितहरहरैः पातु देवो रथो वः ॥
मोदन्तां सुजना सुनिश्चितधियः सन्तोऽखिलो-मङ्गलाः
सन्त्याः सुस्थिरबुद्धयः प्रतिहृतामिषा रमन्तां सुखम् ।
रे दैत्या गिरिगह्वराणि गहनान्याशु व्रजध्वं भया-
दैत्यारिर्भगवानयं यदुपतिर्यानं समारोहति ॥
पलायध्वं पलायध्वं रे रे दितिजदानवाः ।
संरक्षणाय लोकानां रथारूढो वृकेश्वरी ॥
ततो विविधगद्यानि पठित्वाथ महाप्रभोः ।
महाप्रसादमालाञ्च स्वीकुर्य्यात् परया मुदा ॥"
तन्माहात्म्यञ्चोक्तम् ।
"भक्त्या गृह्णाति यो मालां वैष्णवीं मङ्गलालयाम् ।
न तेषां दुर्लभं किञ्चिदिह लोके परत्र च ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामसमृद्धये ।
मालामेतां प्रगृह्णीयात् सौख्यमोक्षप्रदायिनीम् ॥"
इति ।
"संचिन्त्याशुभमार्गञ्च श्रीप्रह्लादादिभी रथम् ।
आकृष्य प्रेरयन् पूर्व्वां भ्रामयेद्वैष्णवैः सह ॥"
तथा च भविष्योत्तरे तत्रैव ।
"नृत्यमानैर्भागवतैर्गीतवादित्रनिस्वनैः ।
भ्रामयेत् स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥"
किञ्च ।
"प्रबोधवासरे प्राप्ते कार्त्तिके पाकशासन ! ।
देवालयेषु सर्व्वेषु पुरमध्ये समन्ततः ॥
भ्रामयेत्तूर्य्यनिर्घोषै रथस्थं धरणीधरम् ॥"
किञ्च ।
"रथागमे तु कृष्णस्य पुरशोभान्तु कारयेत् ।
सर्व्वतो रमणीयन्तु पताकाध्वजशोभितम् ॥
तोरणैर्वन्दुभिर्युक्तं रम्भास्तम्भैश्च शोभितम् ।
स्थाने स्थाने महीपाल ! कर्त्तव्यं पुण्यसंयुतम् ॥
विविधरथशोभा च कर्त्तव्या भावितैर्नरैरिति ॥
रथेन गच्छन् भगवाननुगम्योऽखिलैर्जनैः ।
स्वगेहागतयात्रोऽन्यथा दोषो महान्
भवेत् ॥" ● ॥
अथ रथानुगमनफलम् । तत्रैव ।
"रथेन सह गच्छन्ति पार्श्वतः पृष्ठतोऽग्रतः ।
विष्णुनैव समाः सर्व्वे भवन्ति श्वपचादयः ॥
रथस्थं ये न गच्छन्ति भ्रममाणं जनार्द्दनम् ।
विप्राध्ययनसम्पन्ना भवन्ति श्वपचाधमाः ॥"
किञ्च ।
"येषां गृहागतो याति रथस्थो मधुसूदनः ।
पूजा तैस्तैः प्रकर्त्तव्या वित्तशाठ्यविवर्ज्जितैः ॥
अनर्च्चितो यदा याति गृहाद्यस्य महीधरः ।
पितरस्तस्य विमुखा वर्षाणां दश पञ्च च ॥
यः पुनः कुरुते पूजां गृहायाते तु माधवे ।
वसति श्वेतद्वीपे तु यावदिन्द्राश्चतुर्द्दश ॥"
अन्यच्च ।
"नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् ।
ज्ञानाग्निदग्धकर्म्मापि स भवेद्ब्रह्मराक्षसः ॥"
इति ।
"अथ स्वमन्दिरं नीत्वा पूर्व्ववत् पूजयेत् प्रभुम् ।
रात्रौ जागरणं कुर्य्याद्विविधवैष्णवैः समम् ॥"
अथ प्रबोधनीजागरणमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"पूर्व्वजन्मसहस्रेषु पापं यत् समुपार्ज्जितम् ।
जागरेण प्रबोधन्यां दह्यते तूलराशिवत् ॥
कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ।
कृत्वा जागरणं विष्णोर्धूतपापो भवेन्मुने ! ॥
कर्म्मणा मनसा वाचा पापं यत् समुपार्ज्जितम् ।
क्षालयेत्तच्च गोविन्दः प्रबोधिन्यान्तु जागरे ॥
दुष्प्राप्यं यत् फलं विप्रैरश्वमेधादिभिर्मखैः ।
प्राप्यते तत् सुखेनैव प्रबोधिन्यान्तु जागरे ॥
आप्लुत्य सर्व्वतीर्थानि दत्त्वा गां काञ्चनीं महीम् ।
न तत् फलमवाप्नोति यत् कृत्वा जागरं हरेः ॥
चन्द्रसूर्य्योपरागे तु यत् फलं परिकीर्त्तितम् ।
तत्सहस्रगुणं पुण्यं प्रबोधिन्यान्तु जागरे ॥
स्नानं दानं तपो होमः स्वाध्यायश्चार्च्चनं हरेः ।
तत् सर्व्वं कोटिगुणितं प्रबोधिन्यान्तु जागरे ॥
समतीतं भविष्यञ्च वर्त्तमानं कुलायुतम् ।
विष्णुलोकं नयत्याशु जागरेण प्रबोधनी ॥
वसन्ति पितरो हृष्टा विष्णुलोकमलङ्कृताः ।
विमुक्ता नारकैर्दुःखैः कर्त्तुः कृष्णप्रजागरम् ॥
भार्य्यापक्षे तु ये जाता मातृतः पितृतस्तथा ।
तारयेत्तांश्च सर्व्वेशः प्रबोधन्यां तु जागरे ॥"
किञ्च ।
"फलैर्नानाविधैर्द्दिव्यैः प्रबोधिन्यान्तु जागरे ।
शङ्खे तोयं समादाय अर्घ्यं दद्याज्जनार्द्दने ॥
यत् फलं सर्व्वदानेषु सर्व्वतीर्थेषु यत् फलम् ।
तत् सर्व्वं कोटिगुणितं दत्त्वार्घ्यं बोधवासरे ॥"
पाद्मे च तत्रैव ।
"अन्यत्रापि प्रिया विष्णोर्जागरे स्यात् प्रबोधनी ।
किं पुनर्मधुरायां वा ततो वै जन्मसद्मनि ॥
एकैकादश्यां [illegible]जन्मगेहे कृता नरैः ।
ततोऽधिकं न कर्त्तव्यं लोके किञ्चन विद्यते ॥
रात्रौ जागरणं तत्र प्रीत्या कुर्व्वन्ति ये नराः ।
संसारे मोहसम्प्राप्ते सदा जाग्रति जाग्रति ॥"
किञ्च तत्रैव श्रीराधिकोपाख्याने ।

"सुबोधनीजागरपुण्यवैभवात्
प्रसन्न ईशो विविधाक्षरस्तवात् ।
चकार रासोत्सवनर्त्तनं सह
वृन्दावनेऽन्याभिरपीह राधया ॥
सा नृत्यमानाद्भुतमोपकम्पिता
कृष्णेन जन्मान्तरवाञ्छितेन ।
राधा महाप्रेमभराकुलेन्द्रिया
निन्येऽन्यलोकं कथया कृतार्थताम् ॥

तस्मात् सुबोधनीं कृत्वा रात्रौ कृत्वा च जागरम् ।
सुप्तोत्थितं हरिं दृष्ट्वा का भीः संसारजा द्विजाः ॥

मथुरायाञ्च किं वाच्यं जागरे हरिसन्निधौ ।
कार्त्तिके बोधनीं प्राप्य ततः श्रेयः परं न हि ॥
मथुरायां प्रबोधिन्यां कृतजागरणस्य हि ।
चर्य्याहँदानतो वैष्णोऽभीप्सयद्ब्रह्मराघवम् ॥
जागरस्य च माहात्म्यं गीतवादित्रनर्त्तनम् ।
हरेः प्रीतिकरं रात्रौ वक्तुं मे नैव शक्यते ॥
यस्तु गायति शय्याग्रे कौमुदीं द्वादशीं चयम् ।
सर्व्वलोकान् परित्यज्य विष्णुलोकं स गच्छति ॥”
अतएवोक्तं तत्रैव ।
“राज्यमन्यच्च संत्यज्य स्फीतं निहतकण्टकम् ।
कार्त्तिके मथुरायां वै कौमुद्यां जागरं चरेत् ॥”
अथ पारणादिमाहात्म्यम् ।
“प्रातर्नित्यक्रियां कृत्वा शक्त्या संभोज्य भूसुरान् ।
यष्टान् कृतव्रतान्छेदं प्रदद्याद्दिव्याह्निकम् ॥
दानं यथाव्रतं तेभ्यो दत्त्वा पारणमाचरेत् ।
प्रवर्त्तयेच्च संत्यक्तं चातुर्मास्यव्रतेषु यत् ॥”
तथा च भविष्योत्तरे तत्रैव ।
“प्रभाते विमले स्नात्वा भोजयेदन्नविस्तरैः ॥
घृतक्षीरदधिक्षौद्रकासारगुडमोदकैः ।
अर्च्चयेच्चन्दनैश्चूर्णैः पुष्पैर्गन्धैर्द्विजोत्तमान् ॥
आचान्तेभ्यस्ततो दद्यात्तत्रं यत्किञ्चिदेव हि ।
सुवाचा सुमनोऽभीष्टपक्वपुष्पफलादिकम् ॥
चतुरो वार्षिकान्मासान् नियमं यस्य यत् कृतम् ।
कथयित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या सुदक्षिणाम् ॥”
एवमेव पाद्मे । तत्रैव किञ्चाधिकम् ।
“चातुर्म्मास्यव्रते विप्राः पश्चाद्देवच्छिद्रवाचनम् ॥”
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
प्रबोधिनी, स्त्री, (प्रबोधयति हरिमिति । प्र+बुध्+णिच्+णिनिः । ङीप् ।) प्रबोधनी । उत्थानैकादशी । यथा,—
वराह उवाच ।
“उपवासासमर्थानां सदैव पृथुलोचने ।।
एका सा द्वादशी पुण्या उपोष्या या प्रबोधिनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीफलम् ॥
पूर्व्वभाद्रपदा योगे सैव वा द्वादशी भवेत् ।
अतीव महती तस्यां सर्व्वमक्षयमव्ययम् ॥
उत्तराषाढसंयुता यदि चैकादशी भवेत् ।
तदा कोटिगुणं पुण्यं केशवाराधनं फलम् ॥
सर्व्वदेवार्च्चिते तस्यां सर्व्वं कृतमिहाव्ययम् ।
यथा प्रबोधिनी पुण्या तथा यस्यां स्वपेद्धरिः ॥
उपोष्या हि महाभागे! अनन्तफलदा हि सा ।
शयने बोधने चैव हरेस्तु परिवर्त्तने ॥
उपोष्यैव विधानेन नरो निर्म्मलतां व्रजेत् ।
तस्मात् सर्व्वप्रयत्नेन द्वादशीं समुपोषयेत् ॥
यदीच्छेत विशालाक्षि । शाश्वतीं गतिमात्मनः ।
एकादशी सोमयुक्ता कार्त्तिके मासि भामिनि! ।
उत्तराभद्रसंयोगे अनन्ता सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे । सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता प्रिये ! ॥
एकादशी भौमयुता यदा स्यात्फाल्गुनि हारिणि ! ॥
स्नात्वा देवं समभ्यर्च्च्य प्राप्नोति परमं फलम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीं नरः ॥
जलपूर्णं तदा कुम्भं स्थापयित्वा विचक्षणः ।
पञ्चरत्नसमोपेतं घृतपात्रयुतं तथा ॥
तस्यां स्कन्धे तु धरितं मत्स्यरूपं जनार्द्दनम् ।
माषकेण सुवर्णेन सुतप्तेन वरानने ! ॥
स्नापयित्वा विधानेन कुङ्कुमेन विलेपितम् ।
पीतवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥
पूजयेत् कमलैर्द्देवि ! मद्भक्तः संजितेन्द्रियः ।
मत्स्यं कूर्म्मं वराहञ्च नारसिंहञ्च वामनम् ॥
रामं रामञ्च कृष्णञ्च बुद्धञ्चैव तु कल्किनम् ।
एवं दशावताराँश्च पूजयेद्भक्तिसंयुतः ॥
पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ।
संपूज्यैवमलङ्कारैर्विविधैः पूजनञ्चरेत् ॥
ततस्तस्याग्रतो देयं नैवेद्यं पायसं सितम् ।
एवं संपूज्य गोविन्दं दिवापि कमलेक्षणम् ॥
रात्रौ चोत्थापनं कार्य्यं देवदेवस्य सुव्रते ।।
प्रभाते विमले स्नात्वा भक्त्या संपूज्य केशवम् ॥
पुष्पधूपादिनैवेद्यैः फलैर्नानाविधैः शुभैः ।
ततस्तु पूजयेद्विद्वानाचार्य्यं भक्तिसंयुतः ॥
अलङ्कारोपहारैश्च वस्त्राद्यैश्च स्वशक्तितः ।
पूजयित्वा विधानेन तं देवं प्रतिपादयेत् ॥
जगदादे जगद्रूप अनादे जगदादिकृत् ।
जलशायिन् जगद्योने प्रीयतां मे जनार्द्दन ! ॥
अनेनैव विधानेन कुर्य्यादेकादशीं नरः ।
तस्य पुण्यं भवेद्यत्तु तच्छृणुष्व वसुन्धरे ! ॥
यदि वक्त्रसहस्राणां सहस्राणि भवन्ति हि ।
संख्यातुं नैव शक्यन्ते प्रबोधिन्यास्तथा गुणाः ॥
तथाप्युद्देशमात्रेण शक्त्या वक्ष्यामि तच्छृणु ।
चन्द्रतारार्कसङ्काशमधिष्ठायानुजीविभिः ॥
सहैव यानमागच्छेन्मम लोकं वसुन्धरे ।।
ततः कल्पसहस्रान्ते सप्तद्वीपेश्वरो भवेत् ॥
आयुरारोग्यसम्पन्नो जन्मान्तरितो भवेत्ततः ।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥
पापान्येतानि सर्व्वाणि श्रवणेनैव नाशयेत् ॥
यश्चैव धीमानधनोऽपि भक्त्या
शृणोत्यनुष्य इह धीयमानः ।
शृणोति भक्तस्य मतिं ददाति
विकल्मषः सोऽपि दिवं प्रयाति ॥
दुःस्वप्नं प्रशमसुपैति पठ्यमाने
माहात्म्ये भवभयहारके नरस्य ।
यः कुर्य्याद्व्रतवरमेतदव्ययाया
बोधिन्याः किमुत फलन्तु तस्य वाच्यम् ॥
ते धन्यास्ते कृतार्थाश्च तैरेव सुकृतं कृतम् ।
तैराप्तञ्च सफलं कृतं ये व्रतकारकाः ॥”
इति वराहपुराणे प्रबोधिनीमाहात्म्यम् ॥
प्रभञ्जनः, पु, (प्रकर्षेण भनक्ति वृक्षादीनिति । प्र+भन्ज्+युच् ।) वायुः । इत्यमरः । १ । १ । ६६ ॥ (यथा, महाभारते । ७ । १५४ । ७८ ।
“घटोत्कचसुतः श्रीमान् भिन्नाञ्जनचयोपमः ।
ररोध द्रौणिमायान्तं प्रभञ्जनमिवाद्रिराट् ॥”
मणिपुराधिपतिराजविशेषः । यथा, महाभारते । १ । २१७ । १८ ।
“राजा प्रभञ्जनो नाम कुलेऽस्मिन् सम्बभूव ह ।
अपुत्रः प्रसवेनार्थी तपस्तेपे स उत्तमम् ॥”)
भञ्जनकर्त्तरि, त्रि ॥ (यथा, हरिवंशे ।२४५।१३।
“प्रभञ्जनो यो लोकानां युगान्ते सर्व्वनाशनः ॥”
यथा च महाभारते । १ । १२३ । १२ ।
“सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम ।।
बलवन्तं महाकायं सर्व्वदर्पप्रभञ्जनम् ॥”)
प्रभद्रः, पुं, (प्रकृष्टं भद्रं यस्मात् ।) निम्बः । इति राजनिर्घण्टः ॥ (प्रकृष्टो भद्र इति प्रादिसमासः । श्रेष्ठे, त्रि ॥)
प्रभद्रा, स्त्री, (प्रकृष्टं भद्रं यस्मात् । टाप् ।) प्रसारिणी । इति राजनिर्घण्टः ॥
प्रभवः, पुं, (प्रभवत्यस्मादिति । प्र+भू+“अकर्त्तरि च कारके” इत्यधिकारात् अपादानार्थे । “ऋदोरप् ।” ३ । ३ । ५७ । इति अप् ।) जन्महेतुः । पित्रादिः । आद्योपलब्धिस्थानम् । आद्योपलब्धये प्रथमज्ञानार्थं यत् स्थानं देशः सः । यथा । वाल्मीकिः श्लोकप्रभवः । हिमवान् गङ्गाप्रभवः । इत्यमरभरतौ ॥ अपां मूलम् । सुनिभेदः । इति हेमचन्द्रः ॥ पराक्रमः । इति मेदिनी । वे, ४१ ॥ जन्म । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । ८१ ।
“विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥”
सृष्टिः । यथा, देवीभागवते । १ । १६ । २ ।
“महाशक्त्या प्रभावेन त्वं मां विस्मृतवान् पुरा ।
प्रभवे प्रलये जाते भूत्वा भूत्वा पुनः पुनः ॥”
साध्यभेदः । यथा, हरिवंशे । १६६ । ४४ ।
“धर्म्मात्ऋत्युरुद्भवः कामः साध्यासाध्यान् यजायत ।
प्रभवं च्यवनञ्चैवमीशानं सुरभीस्तथा ॥”
त्रि, प्रभूतः । यथा, ऋग्वेदे । २ । ३८ । ५ ।
“नानौकांसि दुर्य्यो विश्वमायुर्वि तिष्ठते प्रभवः
शोको अग्नेः ॥”
“प्रभवः प्रभूतो अग्नेः शोकस्तेजः ।” इति तद्भाष्ये सायनः ॥)
प्रभविष्णुः, पुं, (प्रभवितुं शीलमस्येति । प्र+भू+“भुवश्च ।” ३ । २ ।१३८ । इति इष्णुच् ।)वटुकभैरवस्याष्टोत्तरशतनामान्तर्गतनामविशेषः । यथा । “प्रभविष्णुः प्रभाववान् ।” इत्यादि विश्वसारतन्त्रे आपदुद्धारकल्पः ॥ प्रभुः । यथा,
“न भर्त्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥”
इति दायभागः ॥
प्रकर्षेण भवनशीले, त्रि ॥
प्रभविष्णुता, स्त्री, प्रभुता । प्रभविष्णुशब्दात् भावार्थे तप्रत्ययेन पदं निष्पन्नम् ॥ (यथा, राजतरङ्गिण्याम् । २ । ४७ ।
“यद्यसाध्यानि दुःखानि हर्त्तुं न प्रभविष्णुता ।
तन्महीपाल ! महती महत्त्वस्य किमङ्गनम् ॥”)

प्रभा, स्त्री, (प्रकर्षेण भातीति। प्र+भा+"आत-श्चोपसर्गे।" ३। ३। १०६। इति अङ्।) कुवेरपुरी। इति हेमचन्द्र:। २। १०४॥ (प्र+भा+भावे अङ्।) दीप्ति:। तत्पर्य्याय:। रोचि: २ द्युति: ३ शोचि: ४ त्विषा ५ ओज: ६ भा: ७ रुचि: ८ विभा ९ आलोक: १० प्रकाश: ११ तेज: १२ रुक् १३। इति राजनिर्घण्ट:॥ * ॥ (यथा, रामायणे। २।३६।१८।

"व्यराजयत वैदेही वेश्म तत् सुविभूषिता।
उद्यतोऽंशुमत: काले खं प्रभेव विवस्वत:॥"

तथा च महाभारते। ४। १३। १७।

"इतीव रूपिणी किञ्चमनङ्गाङ्गविहारिणी।
अतीव भाजसे सुभ्रु। प्रभेवेन्दोरनुत्तमा॥")

गोपीविशेष:। यथा,—

"इदन्तु प्रभया गोप्या युक्तो वृन्दावने वने।
तद्योमनश्चन्द्रमात्रेण तिरोधानं कृतं त्वया॥
प्रभा देहं परित्यज्य जगाम सूर्य्यमण्डलम्।
ततस्तस्या: शरीरञ्च तीव्रं तेजो बभूव ह॥
संविभज्य त्वया दत्तं प्रेम्णाम्बु वदता पुरा।
विलप्य चक्षुषोर्लीहं लज्जया मज्जयेन च॥
हुताशनाय किञ्चिच्च नृपेभ्यश्चापि किञ्चन।
किञ्चित् पुरुषसिंहेभ्यो देवेभ्यश्चापि किञ्चन॥
किञ्चिद्दस्युजनेभ्यश्च नागेभ्यश्चापि किञ्चन।
ब्राह्मणेभ्यो मुनिभ्यश्च तपस्विभ्यश्च किञ्चन॥
स्त्रीभ्य: सौभाग्ययुक्ताभ्यो यशस्विभ्यश्च किञ्चन।
तच्च दत्त्वा तु सर्व्वेभ्य: पूर्व्वं रोदितुमुद्यत:॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ११। ५७—६२॥ दुर्गा। यथा,—

"यमस्य भगिनी जाता यमुना तेन सा मता।
प्रभा प्रभादशीलत्वात् ज्योत्स्ना चन्द्रार्क-मालिनी॥"

इति देवीपुराणे ४५ अध्याय:॥ * ॥ (इयं हि सूर्य्यबिम्बे एतन्नाम्ना कीर्त्त्यते। यथा, देवीभागवते। ७। ३०। ८२।

"देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती।
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता॥")

सूर्य्यपत्नी। यथा,—

सूत उवाच।

"विवस्वान् काश्यपात् पूर्व्वमदित्यामभवत् पुरा।
तस्य पत्नीत्रयन्तद्वत् संज्ञा राज्ञी प्रभा तथा॥
रैवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्।
प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्॥"

इति मात्स्ये। ११। २—३॥ (द्वादशाक्षरवृत्तिविशेष:। तल्लक्षणं यथा, वृत्त-रत्नाकरटीकायाम्।

"वसुयुगविरतिर्ननौ रौ प्रभा॥")

प्रभाकर:, पुं, (प्रभां करोतीति। कृ+"दिवा-विभानिशाप्रभेति।" ३। २। २१। इति ट:।) सूर्य्य:। (यथा, रघौ। १०। ७४।

"क्रियाणुरधूमत्वात् प्रसन्नत्वात् प्रभाकर:।
रक्षोविप्रकृतावासामपविद्धभुजाविव॥")

अग्नि:। चन्द्र:। (यथा, महाभारते। ७।९९।५।

"तावतीश्च दशाणीकं विसृज्य मधवर्षभौ।
हृष्यते यथा राहोरास्यान्मुक्तो प्रभाकरौ॥"

"प्रभाकरौ चन्द्रसूर्य्यौ॥") समुद्र:। इति शब्द-रत्नावली॥ अर्कवृक्ष:। इत्यमर:। ११३।१०८॥ (अष्टममन्वन्तरे देवगणभेद:। यथा, मार्कण्डेय-पुराणे। ८०। ६।

"तपस्तप्य शक्रश्च द्युतिर्ज्योति: प्रभाकर:॥"

अत्रिवंशीयमुनिविशेष:। यथा, हरिवंशे। ३१। १०।

"क्षत्रियोत्तमोऽत्रिवंशे तु तासां भर्त्ता प्रभाकर:।
भद्रायां जनयामास सुतसोमं यशस्विनम्॥"

नागभेद:। यथा महाभारते। १। ३५। १५।

"कुठर: कुञ्जरश्चैव तथा नाग: प्रभाकर:॥"

मीमांसकप्रभेद:। स च गुरुत्वेन प्रसिद्ध:। तस्य मतं दर्शनशास्त्रादौ प्राभाकरमतमिति प्रसिद्धम्। यदुक्तं वेदान्तसारे। ५३। "प्राभाकर-तार्किकौ तु 'अन्योऽन्तरात्मा आनन्दमय' इत्यादि-श्रुते: सुषुप्तौ बुद्ध्यादीनामज्ञाने लयदर्शनात् अहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्च अज्ञान-मात्मेति वदत:॥" स्त्री, कुशद्वीपस्थवर्षभेद:। यथा, मात्स्ये। १२१। ६८।

"मद्दिरं मदिरस्यापि पुनश्चापि प्रभाकरम्॥")

प्रभाकीट:, पुं, (प्रभान्वित: कीट इति मध्यलोपी समास:।) खद्योत:। इति राजनिर्घण्ट:॥

प्रभाञ्जन:, पुं, शोभाञ्जन:। इति हेमचन्द्र:॥

प्रभातं, क्ली, (प्रकर्षेण भातुं प्रवृत्तमिति। प्र+भा+आदिकर्म्मणि क्त:। यद्वा, प्रकृष्टं भातं दीप्तिरत्रेति।) प्रात:काल:। तत्पर्य्याय:। प्रत्यूष: २ अहर्मुखम् ३ कल्यम् ४ उष: ५ प्रत्युष: ६। इत्यमर:। १। ४। ३॥ दिनादि: ७ निशान्तम् ८ व्युष्टम् ९ प्रगे १० प्राह्णम् ११। इति राजनिर्घण्ट:॥ गोस: १२ गोसर्ग: १३ ऊष: १४ ऊषकम् १५ उषा १६ ऊषा १७ विभातम् १८। इति शब्दरत्नावली॥ * ॥ (यथा,—

"प्रभाते य: स्मरेन्नित्यं दुर्गा दुर्गाक्षरद्वयम्।
आपदस्तस्य नश्यन्ति तम: सूर्य्योदये यथा॥"

इति धर्म्मशास्त्रम्॥)

तत्र दर्शनीया यथा,—

"वैद्य: पुरोहितो मन्त्री दैवज्ञोऽथ चतुर्थक:।
प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता॥"

इति राजवल्लभ:॥

प्रभाव:, पुं, (प्र+भू+घञ्।) कोषदण्डजतेज:। तत्पर्य्याय:। प्रताप: २। इत्यमर:। २।८।२०॥ "कोषो धनं दण्डो दम: तद्धेतुत्वात् सैन्यमपि दण्ड: ताभ्यां यत्तेजो जायते स प्रताप: प्रभा-वश्च कथ्यते।" इति भरत:॥ शक्ति:। (यथा,—

"प्रभावतो यथा धात्री लकुचस्य रसादिभि:।
समापि कुरुते दोषत्रितयस्य विनाशनम्॥
क्वचित्तु केवलं द्रव्यं कर्म्म कुर्य्यात् प्रभावत:।
ज्वरं हन्ति शिरोबद्धा सहदेवी जटा यथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) तेज:। इति हेमचन्द्र:। ३। ४०४॥ (यथा, रामायणे। २। २३। ३८।

"अद्य मेऽस्त्रप्रभावस्य प्रभाव: प्रभविष्यति।
राज्ञश्चाप्रभुतां कर्त्तुं प्रभुत्वञ्च तव प्रभो!॥")

शान्ति:। इति मेदिनी। वे, ४०॥ (प्रभागर्भ-जात: सूर्य्यपुत्र:। इति मात्स्ये। ११। ३॥ कलावत्यां जात: स्वरोचिषो मनो: पुत्रविशेष:। यथा, मार्कण्डेये। ६६। ५।

"सतश्च जज्ञिरे तस्य त्रय: पुत्रा: स्वरोचिष:।
विजयो मेरुनन्दश्च प्रभावश्च महाबल:॥")

प्रभावज:, पुं, (प्रभावात् जायते इति। जन्+ड:।) शक्तिविशेष:। प्रभावो वीर्य्याधिक्यं तज्जात:। इत्यमरटीकायां सारसुन्दरी॥ प्रभुत्व-साधकत्वात् दण्डकोषौ प्रभुशक्ति:। इति भरत:॥ (प्रभावजाते, त्रि। यथा,—

"रसादिसाम्ये यत् कर्म्म विशिष्टं तत् प्रभावजम्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रभावान्, [त्] त्रि, (प्रभा अस्यास्तीति। प्रभा+मतुप् मस्य व:।) प्रभायुक्त:। प्रभाशब्दा दस्त्यर्थे वतुप्रत्ययेन निष्पन्नम्॥

प्रभावती, स्त्री, (प्रभावत्+ङीप्।) मालिनाम-कोमविंशत्यक्षरच्छन्द:। गन्धर्वाणां वीणा। इति हेमचन्द्र:। २। २०३॥ त्रयोदशाक्षरच्छन्द:। यथा, श्रुतबोधे। ३। ०।

"यस्यां प्रिये। प्रथमकमन्त्यदद्वयं
सुयुग्मकं तथा गुरु नवमं दशान्तिमम्।
सान्त्यं भवेद्यतिरपि वेदयुग्मके:
सालङ्करनामकृतकृते। प्रभावती॥"

(सूर्य्यपत्नी। यथा, महाभारते। ५। ११७।८

"रेमे स तस्यां राजर्षि: प्रभावत्यां यथा रवि:॥"

कुमारानुचरमातृगणविशेष:। यथा, तत्रैव। ९। ४६। ३।

"प्रभावती विशालाक्षी पलिता गोनसी तथा॥"

वज्रनाभासुरस्य कन्या। सा तु प्रद्युम्नेन विवा-हिता। यथा, हरिवंशे। १४८। ३१।

"तस्यास्ति कन्यारत्नं हि त्रैलोक्यातिशयं शुभम्।
नाम्ना प्रभावती नाम चन्द्राभेव प्रभावती॥"

अङ्गेश्वरचित्ररथस्य स्वनामख्याता भार्य्या। यथा, महाभारते। १३। ४२। ८।

"तस्या हि भगिनी तात। ज्येष्ठा नाम्ना प्रभावती।
भार्य्या चित्ररथस्याथ बभूवाङ्गेश्वरस्य च॥")

प्रभाष:, पुं, (प्रभाषते य: स:। प्र+भाष्+अच्।) वसुभेद:। इति जटाधर:॥ (यथा, महा-भारते। १। ६६। १८।

"प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृता:॥"

प्र+भाष्+भावे घञ्।) प्रकृष्टकथनञ्च॥

प्रभास:, पुं, (प्रभासते शोभते इति। प्र+भास्+अच्।) सोमतीर्थम्। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। ३। ८२। ५६—५७।

"ततो गच्छेत राजेन्द्र। प्रभासं तीर्थमुत्तमम्।
तत्र सन्निहितो नित्यं स्वयमेव हुताशन:।
देवतानां मुखं वीर। ज्वलनोऽनिलसारथि:॥

तस्मिंस्तीर्थे नरः स्नात्वा शुचिः प्रयतमानसः ।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति मानवः ॥")
जैनगणाधिपविशेषः । इति हेमचन्द्रः । १।३२ ॥
(वसुभेदः । यथा, मात्स्ये । ५ । २९ ।
"प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")

प्रभिन्नः, पुं (प्र+भिद्+क्त ।) चरन्मदहस्ती । तत्पर्य्यायः । गर्ज्जितः २ मत्तः ३ । इत्यमरः । २ । ८ । ३६ ॥ भान्तः ४ मदकलः ५ । इति राजनिर्घण्टः ॥ (यथा, रामायणे । २।१५।२६ ।

"ततो महामेघमहीधराभं
प्रभिन्नमत्यङ्कुशमत्यसह्यम् ।
रामोपवाह्यं रुचिरं ददर्श
शत्रुञ्जयं नागमुदग्रकायम् ॥"

तथा च महाभारते । ७ । २७ । २० ।
"यथा नलवनं क्रुद्धः प्रभिन्नः षष्टिहायनः ।
मृद्गीयात्तद्दायस्तः पार्थोऽमृद्गाच्चमूं तव ॥")
प्रस्फुटभेदविशिष्टे, त्रि ॥ (यथा, ऋतुसंहारे ।२।५।
"प्रभिन्नवैदूर्य्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ॥")

प्रभुः, पुं, (प्रभवतीति । प्र+भू+डुः ।) विष्णुः । इति शब्दरत्नावली ॥ (शिवः । यथा, महाभारते । १३ । १७ । ३१ ।
"हरश्च हरिणाक्षश्च सर्व्वभूतहरः प्रभुः ॥")
पारदः । इति राजनिर्घण्टः ॥ शब्दः । इति धरणिः ॥

प्रभुः, त्रि, (प्रभवतीति । प्र+भू+"विप्रसंभ्यो ड्वसंज्ञायाम् ।" ३ । २ । १८० । इति डुः ।) अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३ पतिः ४ ईशिता ५ अधिभूः ६ नायकः ७ नेता ८ परिवृढः ९ अधिपः १० । इत्यमरः । ३ । १ । ११ ॥ पालकः ११ । इति शब्दरत्नावली ॥ (यथा, भगवद्गीतायाम् । ५ । १४ ।
"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः ।
न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥")
नित्यः । इति धरणिः ॥ शक्तः । इति नानार्थरत्नमाला ॥ (यथा, कुमारे । ३ । ४० ।
"आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥"
श्रेष्ठः । यथा, मनौ । १० । ३ ।
"वैशेष्यात् प्रकृतिश्रैष्ठ्यात् नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥")

प्रभुता, स्त्री, (प्रभोर्भावः । प्रभु+तल् ।) प्रभुत्वम् । ऐश्वर्य्यम् । इति हलायुधः । ४ । १०० ॥

प्रभुभक्तः, पु, (प्रभोर्भक्तः ।) उत्तमघोटकः । यथा,
"प्रभुभक्ता भक्तिलाश्च कुलीनेषु कुलोत्कटाः ॥"
इति शब्दचन्द्रिका ॥
स्वाम्यनुरक्ते, त्रि । यथा, चाणक्यसंग्रहे ।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥"

प्रभूतं, त्रि, (प्र+भू+क्तः ।) प्रचुरम् । इत्यमरः । ३ । १ ६३ ॥ (यथा, कलाविलासे । १।६।
"तत्राभूदभिभूतप्रभूतमायानिकायशतधूर्त्तः ।
सकलकलानिलयानां धुर्य्यः श्रीमूलदेवाख्यः ॥")
उद्गतम् । इति मेदिनी । ते, १२१ ॥ भूतम् । उन्नतम् । इति शब्दरत्नावली ॥

प्रभूष्णुः, त्रि, (प्रभवतीति । प्र+भू+"ग्लाजिस्थश्च ग्स्नुः ।" ३ । २ । १३९ । इति ग्स्नुः ।) क्षमः । शक्तः । इति हेमचन्द्रः । ३ । १५५ ॥

प्रभृति, व (प्र+भृ+क्तिच् ।) तदादिः । यथा,
"ततःप्रभृति पितरः पिण्डसंज्ञान्तु लेभिरे ॥"
इति तिथ्यादितत्त्वम् ॥

प्रभेदः, पुं, (प्र+भिद्+घञ् ।) भेदः । तत्पर्य्यायः । प्रकारः २ विशेषः ३ भिदा ४ अन्तरम् ५ । इति जटाधरः ॥ (यथा, सुश्रुते निदानस्थाने १० अध्याये ।
"पित्तात्मको द्रुतगतिर्ज्वरदाहपाक-
स्फोटप्रभेदबहुलः क्षतजप्रकाशः ॥"
स्फोटनम् । यथा, रघुः । ३ । ३७ ।
"बभूव तेनातितरां सुदुःसहः
कटप्रभेदेन करीव पार्थिवः ॥")

प्रभ्रष्टकं, क्ली, (प्र+भ्रंश्+क्तः । ततः स्वार्थे कन् ।) शिखालम्बिमाल्यम् । चूडातो लम्बमानमाल्यम् । इत्यमरभरतौ । २ । ६ । १३५ ॥

प्रमत्तः, त्रि, (प्रमाद्यति स्मेति । प्र+मद्+गत्यर्थेति क्तः । नध्याख्येति नत्वाभावः ।) प्रमादी । अनवधानतायुक्तः । यथा,—
"मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जड़म् ।
प्रपन्नं विरथं भीतं न रिपु हन्ति धर्म्मवित् ॥"
इति श्रीभागवते १ स्कन्धे ७ अध्यायः ॥
"मत्तं मद्यादिना । प्रमत्तमनवहितम् । उन्मत्तं ग्रहवातादिना । जड़ं अनुद्यमम् । प्रपन्नं शरणागतम् । विरथं भग्नरथम् ।" इति श्रीधरस्वामी ॥
अपरप्रमत्तो यथा,—
"सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
स च राज्ञा नाक्रानयितव्यः । यथा —
"मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाक्रानयेन्नृपः ॥"
इति मिताक्षरा ॥

प्रमथः, पुं, (प्रमथतीति । प्र+मथ्+अच् ।) घोटकः । शिवपारिषदः । इति शब्दरत्नावली ॥ स च षट्त्रिंशत्कोटिसंख्यकः । यथा,
"षट्त्रिंशत्तु सहस्राणि प्रमथा द्विजसत्तमाः ।
तत्रैकत्र सहस्राणि भागे षोड़श संस्थिताः ॥
नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः ।
ते सर्व्वे सकलैश्वर्य्ययुक्ता ध्यानपरायणाः ॥
योगिनो मदमात्सर्य्यदम्भाहङ्कारवर्ज्जिताः ।
क्षीणपापा महाभागाः शम्भोः प्रीतिकराः पराः ॥
न ते परिग्रहं राज्ञां काङ्क्षन्ति स्म कदाचन ।
संसारविमुखाः सर्व्वे यतयो योगतत्पराः ॥
ध्यानावस्थं महादेवं परिवार्य्य धृतव्रताः ।
कृत्वा परिषदं सर्व्वा तिष्ठन्ति विगतक्लमाः ॥
यदैव परमं ज्योतिश्चिन्तयत्यम्बिकापतिः ।
तदैव ते पारिषदाः सर्व्वे संवेदयन्ति तम् ॥
ते षोड़श समाख्याताः कोटयो ये धृतव्रताः ।
सिंहव्याघ्रादिवक्त्राख्या अणिमादिसमायुताः ॥ * ॥
अपरे कामिनः शम्भोः सुनर्म्मसचिवाः स्मृताः ।
विचित्ररूपाभरणा जटाचन्द्रार्द्धमण्डिताः ॥
हरस्य तुल्या रूपेण विशदा वृषभध्वजाः ।
उमासदृशरूपाभिः प्रमदाभिः समागताः ॥
विचित्रमाल्याभरणा दिव्यस्रग्गन्धभूषणाः ।
उमासहायं क्रीड़न्तमनुगच्छन्ति भूषिताः ।
शृङ्गारवेशाभरणा अष्टौ ते कोटयो गणाः ॥ * ॥
अर्द्धनारीश्वराख्ये त्वर्द्धनारीश्वरं हरम् ।
अनुयान्ति महाभागास्तुल्यरूपा हरस्य ये ॥
उमासहायो हि यदा रमते स सुखं हरः ।
अर्द्धनारीशरीरास्तु द्वारपाला भवन्ति ते ॥
आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः ।
ध्यानस्थं परिचर्य्यन्ति सलिलादिभिरीश्वरम् ॥
नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः स्मृताः ।
प्रमथ्नन्ति च युद्धेषु युध्यमानान्महाबलान् ।
ते वै महाबलाः शूराः संख्यया नवकोटयः ॥ * ॥
अपरे गायनास्तालमृदङ्गपणवादिभिः ।
नृत्यन्ति वाद्यं कुर्व्वन्तो गायन्ति मधुरस्वरम् ॥
नानारूपधरास्ते वै संख्यया कोटयास्त्रयः ।
सततं चानुगच्छन्ति विचरन्तं महेश्वरम् ॥
सर्व्वे मायाविनः शूराः सर्व्वे शास्त्रार्थपारगाः ।
सर्व्वे सर्व्वत्र सर्व्वज्ञाः सर्व्वे सर्व्वत्रगाः सदा ॥
मुहूर्त्तात् सर्व्वभुवनं गत्वा यान्ति पुनः पुनः ।
अणिमाद्यष्टकैश्वर्य्ययुक्तास्ते वै महाबलाः ॥
अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः ।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा ॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः ।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः ॥
विस्मयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च ।
अनुगृह्णन्ति सततं धृतपाशुपतव्रतान् ॥
विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम् ।
षट्त्रिंशत् कोटयश्चैते हरस्य सकला गणाः ॥
वराहगणनाशार्थं हिताय जगतां तथा ।
शङ्करस्य च सेवायै समुत्पन्ना इमे गणाः ॥
वराहस्य गणान् दृष्ट्वा नरसिंहं तथा हरिम् ।
स्वयं सरभरूपः सन् ध्यायन् नादं यतोऽकरोत् ॥
तच्छीकराम्बुनो जातास्तत्तेषां बहुरूपता ।
क्रूरदृष्ट्या क्रूरयुद्धैः क्रूरकृत्यैरिमान् गणान् ॥
वराहस्य हतस्यैव यतः प्रोक्तं कपर्द्दिना ।
ततस्ते क्रूरकर्म्माणः प्रमाणाश्च भयङ्कराः ॥
न सदा क्रूरकर्म्माणि ते कुर्व्वन्ति महौजसः ।
दृष्टिमात्रस्य ते क्रूराः क्रूरक्रूराश्च कार्य्यतः ॥
फलं जलं तथा पुष्पं पत्रं मूलं तथैव च ।
निवेदितानि भुञ्जन्ति वनपर्व्वतसानुषु ॥
आहृत्यापि च भुञ्जन्ति पत्रं पुष्पादिकञ्च यत् ।
भवेद्भोगस्य यद्भोग्यं तद्भोगास्ते महौजसः ॥
आमिषं नापि चाश्नन्ति हित्वा चैत्रचतुर्द्दशीम् ।
तत्रामिषं हरो भुङ्क्ते चतुर्द्दश्यां मधौ सदा ॥

ततः सर्व्वे गणाश्चैव सृजन्ते गणजान्यपि ।
इति वराहस्य मध्ये भर्गमासाद्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा ।
वचनात् मम्मजातस्य भूतग्रामास्ततो मताः ॥
यो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्व्विधः ।
अतस्तेभ्योऽधिका यस्मैस्तदृष्टग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः प्रमथगणा यथा ।
यदाहारा यदाकारा यत्तत्त्वास्ते महौजसः ॥
य इदं शृणुयान्नित्यमाख्यानं योगमुत्तमम् ।
स दीर्घायुः सदोत्साही योगयुक्तश्च जायते ॥”
इति कालिकापुराणे पारिषदोत्पत्तिर्नाम २६ अध्यायः ॥ (धृतराष्ट्रपुत्त्राणामन्यतमः । यथा, महाभारते । १ । ११७ । १२ ।
“प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् ॥”)

प्रमथनं, क्ली, (प्र+मथ+भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ (यथा, रामायणे । १ । १ । २४ ।
“वालिप्रमथनञ्चैव सुग्रीवप्रतिपादनम् ॥”
क्षोभणम् । विलोड़नम् । इति मथधात्वर्थदर्शनात् ॥ (प्रकर्षेण मथतीति । प्र+मथ्+ल्युः । प्रमाथके, त्रि । यथा, महाभारते । १।१०२।६२।
“स चाश्विरूपसदृशो देवतुल्यपराक्रमः ।
सर्व्वासामेव नारीणां चित्तप्रमथनो रहः ॥”)

प्रमथा, स्त्री, (प्रमथति त्रिदोषानिति । प्र+मथ्+अच् ।) हरीतकी । इति मेदिनी । थे,२१ ॥ (गुणादिकमस्य हरीतकीशब्दे ज्ञातव्यम् ॥)

प्रमथाधिपः, पुं, (प्रमथानां अधिपः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥

प्रमथितं, क्ली, (प्रकर्षेण मथितम् ।) निर्जलतक्रम् । इति राजनिर्घण्टः ॥

प्रमदः, पुं, (प्र+मद्+“प्रमदसंमदौ हर्षे ।” ३ । ३ । ६८ । इति अप् ।) हर्षः । इत्यमरः । १।४।२४ ॥ (यथा, कथासरित्सागरे । ६।१६२ ।
“तच्छ्रुत्वा मम राज्ञश्च विषादप्रमदौ हृदोः ।
अभूतां मेघमालोक्य हंसचातकयोरिव ॥”
प्रमाद्यत्यनेनेति । प्र+मद्+करणे अप् ।) धुस्तूरफलम् । इति शब्दचन्द्रिका ॥ (दानवविशेषः । यथा, हरिवंशे । ३ । ८७ ।
“प्रमदो मयः कुपथो हयग्रीवश्च वीर्य्यवान् ॥”
वशिष्ठतनयानामन्यतमः । स तु उत्तममन्वन्तरे सप्तर्षिप्रभेदः । यथा, भागवते । ८ । १ । २४ ।
“वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥”)
प्रमाद्यतीति । प्र+मद्+कर्त्तरि अच् । यद्वा प्रकर्षेण मदोऽस्य ।) मत्ते, त्रि । इति मेदिनी । दे, ७५ ॥ (यथा, रघौ । १९ । ३७ ।
“प्राविषि प्रमदबर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः ॥”)

प्रमदकाननं, क्ली, (प्रमदानां काननम् । “ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् ।” ६ । ३ । ६३ । इति ह्रस्वः । यद्वा, प्रमदाय हर्षाय यत् काननम् ।) प्रमदावनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदवनं, क्ली, (प्रमदानां वनमिति । “ङ्यापोरिति ।” ६ । ३ । ६३ । इति ह्रस्वः ।) राज्ञोऽन्तःपुरोचितवनम् । इत्यमरः । २ । ४ । ७ ॥

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति । प्र+मद हर्षे+णिच्+अच् । यद्वा, प्रमदो हर्षोऽस्त्यस्या इति अच् । टाप् ।) उत्तमयोषित् । इति मेदिनी । दे, ५ ॥ (यथा, कुमारे । ४ । १२ ।
“नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना ॥”)
चतुर्द्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम् ।
“ननभजला गुरुश्च भवति प्रमदा ॥”)

प्रमदाकाननं, क्ली, (प्रमदानां काननम् ।) प्रमदवनम् । इत्यमरटीकायां भरत. । २ । ४ । ३ ।

प्रमदावनं, क्ली, (प्रमदानां वनम् ।) प्रमदवनम् । इति शब्दरत्नावली ॥

प्रमनाः, [स्] त्रि, (प्रहृष्टं मनोऽस्य ।) हर्षयुक्तः । इत्यमरः । ३ । १ । ७ ॥ (यथा, महाभारते । ८ । ३७ । ४९ ।
“इति बहुपरुषं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ।”)

प्रमयः, पुं, (प्र+मी वधे+भावे अच् ।) वधः । इति हेमचन्द्रः । ३ । ३४ ॥ (यथा, राजतरङ्गिण्याम् । १ । ६ ।
“इदं इदं नृपोदन्तं बद्धा प्रमयमीयुषाम् ।
अर्व्वाक्कालभवैर्वार्त्ता यत्प्रबन्धेषु पूर्य्यते ॥”)

प्रमा, स्त्री, (प्रमीयते इति । प्र+माङ् माने+“आतश्चोपसर्गे ।” ३ । ३ । १०६ । इति अङ् । टाप् ।) यथार्थज्ञानम् । तत्पर्य्यायः । प्रमितिः २ । इत्यमरः । ३ । २ । १० ॥ प्रमाणम् ३ । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । २य अङ्के ।
“प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥”
यथा च ऋग्वेदे । १० । १३० । ३ ।
“कासीत्प्रमा प्रतिमा किम् ॥”
“यद्यस्य प्रमा प्रमाणमियत्ता का कथम्भूतासीत् ।”
इति तद्भाष्ये सायनः ॥) न्यायमते तद्वति तत्प्रकारकज्ञानम् । भ्रमभिन्नज्ञानम् । अस्याः कारणं गुणः । स च प्रत्यक्षे विशेष्ये विशेषणस्य सम्बन्धः । अनुमितौ साध्यविशिष्टपक्षे परामर्शः । शाब्दबोधे योग्यतायाः तात्पर्य्यस्य वा यथार्थज्ञानम् । उपमितौ शब्दे साहश्यबुद्धिः । यथा,—
“दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् ।
शक्ये साहश्यबुद्धिस्तु भवेदुपमितौ गुणः ।
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा ॥
गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ।
अथवा तत्प्रकारं यत् ज्ञानं तद्विशेष्यकम् ॥”
इति भाषापरिच्छेदे । १३१-१३५ ।
(“दोष इति । अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्रापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्याजन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमस्त्विति वाच्यम् । पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धात् शङ्खे न शैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च । तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति । क्वचित् पीतादिभ्रमे पित्तं दोषः क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः । क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः । अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्षेत्विति । प्रत्यक्षे विशेषणवत् विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण इति एवमग्रेऽप्यूह्यः । प्रमां निरूपयति भ्रमभिन्नमिति । ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवेति । तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः । इदन्तु बोध्यम् । येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः ॥” * ॥)

प्रमाणं, क्ली, (प्रमीयते विश्वमनेनेति । प्र+मा+ल्युट् ।) विष्णुः । यथा,—
“प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ॥’
इति महाभारते शान्तिपर्व्वणि दानधर्म्मः ॥
नित्यम् । मर्य्यादा । शास्त्रम् । (यथा,—
“आप्ता ह्यवितर्कस्मृतिविभागविदो निष्प्रीत्युपतापदर्शिनश्च । तेषामेवङ्गुणयोगात् यद्वचनं तत् प्रमाणम् । अप्रमाणं पुनर्मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टवचनमिति ।” इति चरके विमानस्थाने चतुर्थेऽध्याये ॥) सत्यवादी (प्र+मा+भावे ल्युट् ।) इयत्ता । हेतुः (प्रमिणोतीति । प्र+मा+कर्त्तरि ल्युः । प्रमाता । इति मेदिनी । णे, ६९ ॥ प्रमा

इति शब्दरत्नावली ॥ निश्चयात्मकज्ञानजनकवाक्यं शब्दः । यथा वेदाः प्रमाणं स्मृतयः प्रमाणमित्यादि ॥ प्रमाया: करणम् । न्याये तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । इत्यत्र बहुवचनान्तोऽपि ॥ (यथा, मनौ । २ । १३ ।
"अर्थकामेष्वसक्तानां धर्म्मज्ञानं विधीयते ।
धर्म्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"
वेदान्तसारे च । "वेदान्तो नाम उपनिषत् प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि च ।"
"उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः । सैव उपनिषत् प्रमाणं तस्याः प्रमाकरणायाः करणभूता ।" इति विद्वन्मनोरञ्जनीटीका ॥)
प्रमाणबाधितार्थकः, पुं, (प्रमाणेन बाधितः अर्थो यस्य । ततः कप् ।) तर्कविशेषः । तस्य लक्षणम् । आत्माश्रयादिपञ्चकान्यप्रसञ्जनम् । स द्विविधः । व्याप्तिग्राहकः विषयपरिशोधकश्च । तत्राद्यो यथा । धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यात् । द्वितीयस्तु पर्व्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यात् । इति तर्कवागदीपिका ॥
प्रमातामहः, पुं, (प्रकृष्टो मातामहस्तस्यापि जनकत्वादिति । प्रादिसमासः ।) मातामहपिता । यथा, अमरे ।
"पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"
प्रमातामही, स्त्री, (प्रकृष्टा मातामही ।) प्रमातामहपत्नी । इति स्मृतिः ॥
प्रमाथः, पुं, (प्र+मथ्+भावे घञ् ।) प्रमथनम् । बलात् हरणम् । इति पुराणम् । (निपात्य भूमौ पेषणम् । यथा, महाभारते । ४ । १२ । २७ ।
"कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्माथनैस्तथा ॥"
अस्य टीकायां नीलकण्ठेन सङ्ग्रहात् एतल्लक्षणमुद्धृतम् । यथा,—
"निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते ॥"
कुमारस्यानुचरभेदः । यथा, महाभारते । ९ । ४५ । ७६ ।
"तत्र प्रादादनुचरौ यमः कालोपमावुभौ ।
उन्माथञ्च प्रमाथञ्च महावीर्य्यौ महाद्युती ॥"
शिवपारिषद्प्रमथगणः । यथा, हरिवंशे । १७८ । ५३ ।
"ते प्रदीप्तप्रहरणा दैत्यदानवराक्षसाः ।
प्रमाथगणमुख्याश्च प्रायुध्यन् लक्षमव्ययम् ॥")
प्रमाथी, [न्] त्रि, प्रपूर्व्वमथधातोः कर्त्तरि णिन् । पीड़नकर्त्ता । मारणकर्त्ता । प्रमथनशीलः । देहेन्द्रियक्षोभक इत्यर्थः । इति श्रीधरस्वामी ॥ यथा,—
"चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ॥"
अपि च ।
"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥"
इति श्रीभगवद्गीता ॥

प्रमादः, पुं, (प्र+मद्+भावे+घञ् ।) अनवधानता । इत्यमरः । १ । ७ । ३० ॥ यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यते त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुड़े नीतिसारे ११५ अध्यायः ॥
प्रमादवान्, [त्] त्रि, (प्रमादोऽस्त्यस्यास्मिन् वा । प्रमाद+मतुप् । मस्य वः ।) प्रमादयुक्तः । तत्पर्य्यायः । जाल्मः २ असमीक्ष्यकारी ३ खट्टारूढः ४ । इति जटाधरः ॥ (यथा, याज्ञवल्क्ये । ३ । १३६ ।
"निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्य्यक्षु तामसः ॥")
प्रमादिका, स्त्री, (प्रमादोऽनवधानताऽस्त्यस्या इति । प्रमाद+ठन् । टाप् ।) दूषिता कन्या । तत्पर्य्यायः । संवेदा २ दूषिता ३ धर्षकारिणी ४ । इति शब्दरत्नावली ॥
प्रमादी, [न्] त्रि, (प्रमादोऽस्त्यस्येति । प्रमाद+इनिः ।) प्रमादविशिष्टः । अनवधानतायुक्तः । यदुक्तम् ।
"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"
प्रमापणं, क्ली, (प्र+मीञ् हिंसायाम्+स्वार्थे णिच्+भावे ल्युट् ।) मारणम् । इत्यमरः । ३ । ८ । ११२ ॥ (यथा, मनुः । ११ । १४१ ।
"अस्थिमतान्तु सत्त्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतञ्चरेत् ॥")
प्रमितः, त्रि, (प्र+मि+क्तः । यद्वा, प्र+मा+क्तः । "द्यतिस्यतिमास्थेति ।" ७ । ४ । ४० । इतीत्वम् ।) ज्ञातः । इति जटाधरः ॥ (अल्पतमम् । इति विजयरक्षितः ॥ यथा, निदाने अर्शोरोगाधिकारे ।
"प्रमिताव्यायामं तीक्ष्णं मद्यं मैथुनसेवनम् ॥"
परिमितम् । यथा, बृहत्संहितायाम् ।१०४।३७।
"प्रमिताक्षराणि वदन् ॥")
प्रमितिः, स्त्री, (प्र+मा वा मि+क्तिन् ।) प्रमा । इत्यमरः । ३ । २ । १० ॥
प्रमीढः, त्रि, (प्र+मिह सेचने+क्तः ।) घनः । मूत्रितः । इति मेदिनी । ढे, ८ ॥ (यथा,—
"लग्नद्दोषिकां प्रमीढानां जिह्माभिम्लानदृष्टिचिकानाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥"
इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥)
प्रमीतः, त्रि, (प्र+मीञ् हिंसायाम्+क्तः ।) मृतः । यज्ञार्थहतपशुः । इत्यमरः ।२।८।११७॥
प्रमीला, स्त्री, (प्रमीलनमिति । प्र+मील संमीलने+"गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । ततष्टाप् ।) तन्द्रा । इत्यमरः । ३ । ३ । १७५ ॥
प्रमुखं, क्ली, (प्रकृष्टं मुखमारम्भः ।) तदात्वम् । तत्कालः । इति त्रिकाण्डशेषः ॥ (सम्मुखम् । यथा, भगवद्गीतायाम् । २ । ६ ।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥")
प्रमुखः, पुं, (प्रकृष्टं मुखं अग्रभागो यस्य ।) पुन्नागवृक्षः । इति शब्दचन्द्रिका ॥ समूहः । इति शब्दरत्नावली ॥
प्रमुखः, त्रि, (प्रकृष्टं मुखमाद्यं यस्य ।) प्रधानम् । (यथा, कुमारसम्भवे । २ । ३८ ।
"ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्य्युपासते ॥")
श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, हितोपदेशे । ३ । १२४ ।
"वनेषु प्रमुखो हस्ती न तथान्यो महीपतिः ॥")
प्रथमः । इति मेदिनी । खे, १० ॥ (यथा, महाभारते । २ । ६ । २ ।
"नारदप्रमुखास्तस्यामन्तर्व्वेद्यां महात्मनः ।
समासीनाः शुशुभिरे सह राजर्षिभिस्तथा ॥")
मान्यः । इति शब्दरत्नावली ॥
प्रमुत्, [द्] त्रि, (प्रकृष्टा मुत् प्रीतिर्यस्य ।) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ (प्रकृष्टा मुदिति विग्रहे प्रहर्षानन्दे, स्त्री । यथा, महाभारते । १४ । ७ । ६ ।
"श्रुत्वा तु पार्थिवस्तेन तत् सम्वर्त्तः प्रमुदं गतः ॥")
प्रमुदितः, त्रि, (प्र+मुद्+क्तः । "उदुपधादिति ।" १ । २ । २१ । इति पक्षे कित् ।) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, देवीभागवते । १ । १२ । ४७ ।
"वाञ्छत्यहो हरिरशोक इवातिकामं
पादाहतिं प्रमुदितः पुरुषः पुराणः ॥")
प्रमेहः, पुं, (प्रकर्षेण मेहति क्षरति वीर्य्यादिरनेनेति । प्र+मिह क्षरणे+करणे घञ् ।) रोगविशेषः । तत्पर्य्यायः । मेहः २ मूत्रदोषः ३ । इति राजनिर्घण्टः ॥ बहुमूत्रता ४ । इति हेमचन्द्रः । ३ । १३४ ॥ अस्य निदानम् ।
"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुडवैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्व्वम् ॥" * ॥
अस्य सम्प्राप्तिर्यथा,—
"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो वस्तिगतः प्रदूष्य ।
करोति मेहान् समुदीर्णमुष्णै-
स्तानेव पित्तं परिदूष्य चापि ॥" * ॥
वातिकस्य तस्य लक्षणम् ।
"क्षीणेषु दोषेष्ववकृष्य धातून्
सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥" * ॥
तस्य कफजादिभेदेन साध्यादिलक्षणम् । यथा,
"साध्याः कफोत्था दश पित्तजाः षट्
याप्या न साध्याः पवनाच्चतुष्काः ।
समक्रियत्वाद्विषमक्रियत्वा-
न्महात्ययत्वाच्च यथाक्रमन्ते ॥
कफः सपित्तः पवनश्च दोषा
मेदोऽस्रशुक्राम्बुवसालसीकाः ।

मज्जा रसौजः पिशितञ्च दूष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥” * ॥

तस्य पूर्ब्बरूपम् ।
“दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे तृट् स्वाद्वास्यञ्च जायते ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः ।
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ॥” * ॥
क्रमेण कफजानां दशानां लक्षणानि ।
“अच्छं बहुसितं शीतं निर्गन्धमुदकोपमम् ।
मेहत्युदकमेहेन किञ्चिच्चाविलपिच्छिलम् ॥
इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ।
सान्द्रो भवेत् पर्य्युषितं सान्द्रमेहेन मेहति ॥
सुरामेही सुरातुल्यमुपर्य्यच्छमधोघनम् ।
संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सितम् ॥
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ।
मूर्त्ताणून् सिकतामेही सिकतारूपिणो मलान् ॥
शीतमेही सुबहुशो मधुरं भृशशीतलम् ।
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥”
क्रमेण पित्तजानां षण्णां लक्षणानि ।
“गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥
नीलमेहेन नीलाभं कालमेही मसीनिभम् ।
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् ॥
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ।
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥” * ॥
क्रमेण वातजानां चतुर्णां लक्षणानि ।
“वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः ।
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ॥
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्ज्जितम् ।
सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति ॥” * ॥
कफजादिभेदेन तेषामुपद्रवाः ।
“अविपाकोऽरुचिश्छर्द्दिर्निद्राकासः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥
वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाम्लिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥
वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः ।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥”
अरिष्टलक्षणम् ।
“यथोक्तोपद्रवारिष्टमतिप्रस्रुतमेव च ।
पिड़कापीडितं गाढ़ं प्रमेहो हन्ति मानवम् ॥
जातः प्रमेही मधुमेहिनो वा
न साध्यरोगः स हि बीजदोषात् ।
ये चापि केचित् कुलजा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥ * ॥
सर्व्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि ॥
मधुमेहे मधुसमं जायते स किल द्विधा ।
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ॥
आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् ।
क्षीणः क्षणात् क्षणात् पूर्णो भजते कृच्छ्र-साध्यताम् ॥
मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।
सर्व्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥ * ॥
प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम् ।
विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥”
इति माधवकरः ॥
अस्य दशविधपिड़काः पिड़काशब्दे द्रष्टव्याः ॥
अथ प्रमेहस्य चिकित्सा ।
“श्यामाककोद्रवोद्दाला गोधूमचणकाढकी ।
कुलत्थाः कथिता भोज्ये पुराणा मेहिनां हिताः ॥
यवान्नविकृतिर्मुद्गाः शालयः षष्टिकास्तथा ।
तथा तिक्तानि शाकानि जाङ्गलाः पक्षिणो मृगाः ॥
उद्दालो वनकोद्रवः ॥ * ॥
प्रमेही गुड़दुग्धाम्लतैलतक्रसुराः सदा ।
अनूपमांसानि … वर्ज्जयेत् ॥ * ॥
मुस्ताहरीतकीलोध्र-कट्फलैः क्वथितं हतम् ।
पीतं मधुयुतं हन्ति प्रमेहं कफहेतुकम् ॥ * ॥
पटोलनिम्बामलकामृतानां
पिबेत् कषायं मधुना समेतम् ।
उशीरलोध्रार्ज्जुनचन्दनानां
तथा पिबेत् पित्तनिमित्तमेही ॥ * ॥
पाठाशिरीषदुःस्पर्शाजातितिन्दुककिंशुकैः ।
कपित्थस्य भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥
पाठादिभिः सहितस्य कपित्थस्य क्वाथम् ।
गुड़ूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित् ।
हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥
मधुना त्रैफलं चूर्णमथवाश्मजतूद्भवम् ।
लौहचूर्णं वाभयोत्थं वा लिह्यान्मेहनिवृत्तये ॥ * ॥
चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्ती पत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विड़ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षं हतलौहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्तथोदश ।
अण्डवृद्धिं पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नाद्गुटिकामिमाम् ।
प्राप्नवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥
चन्द्रप्रभाकर्पूर इति लोके । व्योषं त्रिकटु । द्वौ क्षारौ सर्जिकायवक्षारौ । लवणत्रयम् । सैन्धवं रुचकञ्चापि विड़ञ्च लवणत्रयमिति चन्द्रप्रभादिर्व्वटिका ॥ * ॥
प्रमेहपिड़कानां प्राक् कार्य्यं रक्तविमोक्षणम् ।
पाटनञ्च विपक्कानां ततो व्रणविधिः स्मृतः ॥”
इति भावप्रकाशः ॥
(अस्य सकारणपूर्ब्बरूपसम्प्राप्तिलक्षणोपद्रवाः ।
यथा,—
“त्रिदोषकोपननिमित्ता विंशतिप्रमेहविकारा-श्चापरेऽपरिसंख्येयाः । तत्र यथा त्रिदोषप्रकोप-प्रमेहानभिनिर्व्वर्त्तयति तथानुव्याख्यास्यामः ।
इह खलु निदानदोषदूष्यविशेषेभ्यो विकाराणां विघातभावाभावप्रतिविशेषा भवन्ति । यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानु-बध्नन्त्यथवा कालप्रकर्षाद्बलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः । चिराद्वाप्यभिनिर्व्व-र्त्तन्ते तनवो भवन्त्ययथावाप्ययथोक्तसर्व्वलिङ्गा विपर्य्ययेण विपरीता इति सर्व्वविकारविघात-भावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुर्भवति ।
तत्र इमे निदानादि विशेषाः श्लेष्मनिमित्तानां प्रमेहाणामाश्वभिनिर्वृत्तिकरा भवन्ति तद्यथा हाय-नकयवचीनकोद्दालकनैषधोत्कटमुकुन्दक महा-व्रीहिप्रमोदकसुगन्धकानां नवानामतिवेलमति-प्रमाणेनोपयोगः । तथा सर्पिष्मतां नवहरेणु-माषसूपानां ग्राम्यानूपौदकानां मांसानां शाक-तिलपललपिष्टान्नपायसकृशरविलेपीक्षुविका-राणां क्षीरमन्दकदधिद्रवमधुरतरुणप्रायाणा-मुपयोगो मृजाव्यायामवर्ज्जनस्वप्नशयनासन-प्रसङ्गो यश्च कश्चिद्विधिरन्योऽपि श्लेष्ममेदो-मूत्रसञ्जननः सर्व्वः स निदानविशेषः ।
बहुद्रवश्लेष्मा दोषविशेषः बहुबद्धं मेदः मांसञ्च शरीरक्लेदः शुक्रं शोणितञ्च वसामज्जालसीका रसश्चौजः सङ्ख्याता इति दूष्यविशेषाः ।
त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मा प्रकोपमापद्यते प्रागतिभूयस्त्वात् । स प्रकुपितः क्षिप्रमेव शरीरे विसृतिं लभते । शरीरशैथिल्यात् स विसर्पन् शरीरे मेदसैवा-दितो मिश्रीभावं गच्छति । मेदसश्चैव बहु-बद्धत्वान्मेदसश्च गुणानां गुणैः समानगुणभूयि-ष्ठत्वात् स मेदसा मिश्रीभावं गच्छन् दूषयत्येत-द्विकृतत्वात् स विकृतो दुष्टेन मेदसोपहितः शरीरक्लेदमांसाभ्यां संसर्गं गच्छति । क्लेद-मांसयोरतिप्रमाणाभिवृद्धित्वात् स मांसे मांस-प्रदोषात् पूतिमांसपिड़काः शराविका कच्छपि-काद्याः सञ्जनयत्यप्रकृतिभूतत्वात् शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति । मूत्रवहानां स्रोतसां वङ्क्षणवस्तिप्रभवाणां मेदःक्लेदोपहि-तानि गुरूणि मुखान्यासाद्य प्रतिबध्नाति । ततः स्थैर्य्यं साध्यतां वा जनयति प्रकृतिविकृति-भूतत्वात् ।
शरीरक्लेदस्तु श्लेष्ममेदोमिश्रः प्रविशन् मूत्राशये मूत्रत्वमापद्यमानः श्लैष्मिकैरेभिर्दशभिर्गुणैरुप-सृज्यते वैषम्यद्वारनिर्द्दिष्टैर्युक्तैस्तद्यथा श्वेतशीत-मूर्त्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्द-स्तत्र येन गुणेनैकेनानेकेन वा भूयस्तरमुप-

च्यवते। तत्समाख्यं गौणं नामविशेषं प्राप्नोति।

ते तु खल्विमे दश प्रमेहा नाम विशेषेण भवन्ति। तथा उदकमेहश्चेक्षुबालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्लमेहश्च शुक्रमेहश्च शीतमेहश्च सिकतामेहश्च शनैर्मेहश्च लालामेहश्चेति।

ते दश प्रमेहाः साध्याः समानगुणमेदःस्थानत्वात् कफस्य प्राधान्यात् समानक्रियत्वाच्च।"

"उष्णाम्ललवणक्षारकटुकाजीर्णभोजनोपसेविनस्तथातितीक्ष्णातपाग्निसन्तापश्रमक्रोधविषमाहारोपसेविनश्च तथात्मकशरीरस्यैव क्षिप्रं पित्तं प्रकोपमापद्यते।

तत् प्रकुपितं तयैवानुपूर्व्या प्रमेहानिमान् षट् क्षिप्रमभिनिर्वर्त्तयति। तेषामपि च पित्तगुणविशेषेण नामविशेषाः। तद्यथा,— क्षारमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च माञ्जिष्ठामेहश्च हारिद्रमेहश्चेति ते षड्भिरेव क्षाराम्ललवणकटुकविशेषैः पित्तगुणैः पूर्व्ववत् समन्विताः। सर्व्व एव ते याप्याः संसृष्टदोषमेदःस्थानत्वात् विरुद्धोपक्रमत्वाच्चेति।"

"कटुककषायतिक्तरूक्षलघुशीतव्यवायव्यायामवमन-विरेचनास्थापन-शिरोविरेचनातियोग सन्धारणानशनाभिघातातपोद्वेगशोकशोणितातिसेकजागरणविषमशरीरन्यासानुपसेवमानस्य तथात्मकशरीरस्यैव क्षिप्रं वायुः प्रकोपमापद्यते। स प्रकुपितस्तथात्मके शरीरे विसर्पन् यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहमभिनिर्वर्त्तयति ॥ * ॥ यदा पुनर्म्मज्जानं मूत्रवस्तावाकर्षति तदा मज्जमेहमभिनिर्वर्त्तयति ॥ * ॥ यदा लसीकां मूत्राशयेऽभिवहन् मूत्रमनुबध्नं च्यावयति। लसीकातिबहुत्वाद्विक्षेपणाच्च वायोः खल्वस्यातिमूत्रप्रवृत्तिसङ्गं करोति। तदा स मत्त इव गजः क्षरत्यजस्रं मूत्रमवेगं तं हस्तिमेहिनमाचक्षते ॥ * ॥ ओजः पुनर्मधुरस्वभाव तद्रौक्ष्याद्वायुः कषायत्वेनाभिसंसृज्य मूत्राशयेऽभिवहति तदा मधुमेहं करोति ॥ * ॥

तानिमांश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते। महात्ययिकत्वाद्विप्रतिषिद्धोपक्रमत्वात् तेषामपि च पूर्व्ववत् गुणविशेषेण नामविशेषाः। तद्यथा,—वसामेहश्च मज्जमेहश्च हस्तिमेहश्च मधुमेहश्चेति।"

"त्रयस्तु दोषाः प्रकुपिताः प्रमेहानभिनिर्वर्त्तयिष्यन्त इमानि पूर्व्वरूपाणि दर्शयन्ति। तद्यथा,—जटिलीभावं केशेषु माधुर्य्यमास्ये करपादयोः सुप्ततां दाहं मुखतालुकण्ठशोषं पिपासामालस्यं मलञ्च काये कायच्छिद्रेषूपदेहं परिदाहं सुप्ततां चाङ्गेषु षट्पदपिपीलिकाभिः शरीरमूत्राभिसरणं मूत्रे च मूत्रदोषान्वितं शरीरगन्धं निद्रां तन्द्राञ्च सर्व्वकालमिति।

उपद्रवास्तु खलु प्रमेहिणां तृष्णातीसारज्वरदाहदौर्ब्बल्यारोचकाविपाकाः पूतिमांसपिडका अलजीविद्रध्यादयश्च तत् प्रसङ्गाद्भवन्ति।

तत्र साध्यान् प्रमेहान् संशोधनोपशमनैर्यथार्हमुपपादयेच्चिकित्सेदिति।" इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

प्रमोचनी, स्त्री, (प्रकर्षेण मुच्यतेऽनयेति। प्र+मुच्+ल्युट्+ङीप्।) गवाक्षी। गोडुम्बा। इति जटाधरः ॥ प्रकृष्टमोचनकर्त्तरि, त्रि ॥ (यथा, महाभारते। ३। ८४। ५०।

"महाश्रमे वसेद्रात्रिं सर्व्वपापप्रमोचने ॥")

प्रमोदः, पुं, (प्र+मुद हर्षे+भावे घञ्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, देवीभागवते। ४। २४। ५५।

"उत्पाद्य पुत्त्रजननप्रभवं प्रमोदं
दत्त्वा पुनर्विरहजं किल दुःखभारम्।
त्वं क्रीड़से सुललितैः खलु तैर्विहारै-
र्नोचेत् कथं मम सुताप्तिरतिर्वृथा स्यात् ॥"

आमोदः। स तु गन्धविशेषः। यथा, भागवते। ७। ६। २।

"अश्विनोरोषधीनाञ्च घ्राणो मोदप्रमोदयोः ॥"

"मोदप्रमोदयोः सामान्यविशेषगन्धयोः घ्राणेन्द्रियं परमायनम्।" इति तट्टीकायां श्रीधरस्वामी ॥ नागविशेषः। यथा, महाभारते। १। ५७। ११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः ॥"

स्कन्दानुचरविशेषः। यथा, तत्रैव। ९। ४५। ६३।

"आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ॥")

प्रमोदितः, पु, (प्र+मुद हर्षे+क्तः। "उदुपधाद्विति।" १। २। २१। इति किद्भावः। प्रमोदोऽस्य जातः इति तारकादित्वात् इतच् वा।) कुवेरः। इति शब्दमाला ॥ प्रमोदयुक्ते, त्रि ॥

प्रमोदिनी, स्त्री, (प्रमोदयतीति। प्र+मुद+णिच्+णिनिः। ङीप्।) जिङ्गिनीवृक्षः। इति भावप्रकाशः ॥ प्रकृष्टहर्षयुक्ता च ॥

प्रम्लोचा स्त्री, (प्रम्लोचति तापसादीन् प्रति गच्छतीति। प्र+म्लुच् गतौ+अच्। टाप्।) अप्सरोविशेषः। यथा, गारुड़े ६० अध्याये।

"तत्र तस्मान्नदीमध्यात् समुत्तस्थौ मनोरमा।
प्रम्लोचा नाम तन्वङ्गी तत्समीपं वराप्सराः ॥"

प्रयतः, त्रि, (प्र+यम्+क्तः। यद्वा, प्रयतते धर्म्मादार्थमिति। प्र+यत्+अच्।) पवित्रः। इत्यमरः। २। ७। ४५॥ (यथा, मनुः। २। १८३।

"ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥"

नम्रः। इति रामायणटीकायां रामानुजः ॥ यथा, रामायणे। १। २। २४।

"वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः ॥"

प्रयत्नविशिष्टे च ॥)

प्रयत्नः, पु, (प्र+यत यत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) प्रकृष्टयत्नः। (यथा, मनुः। ७। ६८।

"बुद्ध्वा च सर्व्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीड़येत् ॥")

न्यायमते स च त्रिविधः। यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम् ॥
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥
निवृत्तिस्तु भवेद्द्वेषा द्विष्टसाधनताधियः।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत् ॥
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम् ॥"

इति भाषापरिच्छेदः ॥

(तल्लक्षणं यथा, साहित्यदर्पणे।

"प्रयत्नस्तु फलावाप्तेर्व्यापारोऽतित्वरान्वितः ॥")

प्रयत्नवान्, [त्] त्रि, (प्रयत्नोऽस्त्यस्येति। प्रयत्न+मतुप्। मस्य वः।) प्रकृष्टयत्नविशिष्टः। तत्पर्य्यायः। प्रसितः २। इति त्रिकाण्डशेषः ॥

प्रयस्तं, त्रि, (प्र+यस् प्रयत्ने+क्तः।) घृतचतुर्ज्जातादिना द्रव्येण प्रयत्नसुसंस्कृतव्यञ्जनादि। इत्यमरः। २। ९। ४५॥

प्रयागः, पुं, (प्रकृष्टो यागो यत्र। यत्र यज्ञः प्रकर्षेण भवतीत्यर्थः।) तीर्थभेदः। (प्रकृष्टो यागः।) यज्ञः। (प्रकृष्टा यागाः यज्ञा यस्य यस्माद्वा।) इन्द्रः। अश्वः। इति मेदिनी। गे, ४१ ॥ * ॥

अथ प्रयागमाहात्म्यम्।

"ततो गच्छेत धर्म्मज्ञ। प्रयागमृषिसंस्तुतम्।
यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः ॥
लोकपालाश्च सिद्धाश्च नियताः पितरस्तथा।
सनत्कुमारप्रमुखास्तथैव च महर्षयः ॥
तथा नागाः सुपर्णाश्च सिद्धाश्च क्रतवस्तथा।
गन्धर्व्वाप्सरसश्चैव सरितः सागरास्तथा ॥
हरिश्च भगवानास्ते प्रजापतिभिरावृतः।
तत्र त्रीण्यग्निकुण्डानि तयोर्मध्ये तु जाह्नवी ॥
प्रयागात् समतिक्रान्ता सर्व्वतीर्थपुरस्कृता।
तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता ॥
यमुना गङ्गया सार्द्धं सङ्गता लोकभाविनी।
गङ्गायमुनयोर्म्मध्ये पृथिव्या जघनं स्मृतम् ॥
प्रयागं जघनस्यान्तमुपस्थमृषयो विदुः।
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ ॥
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः।
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो महामते। ॥
प्रजापतिमुपासन्ते ऋषयश्च महाव्रताः।
यजन्ते क्रतुभिर्देवास्तथा चक्रधराः सदा ॥
ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत। ।
प्रयागं सर्व्वतीर्थेभ्यः प्रवदन्त्यधिकं द्विजाः ॥
श्रवणात्तस्य तीर्थस्य नामसङ्कीर्त्तनादपि।
मृत्तिकालम्भनाद्वापि सर्व्वपापैः प्रमुच्यते ॥
तत्राभिषेकं यः कुर्य्यात् सङ्गमे संशितव्रतः।
पुण्यं स महदाप्नोति राजसूयाश्वमेधयोः ॥
एषा यजनभूमिर्हि देवानामपि सत्कृता।
दत्तं तत्र स्वल्पमपि महद्भवति भारत। ॥
न वेदवचनात्तात। न लोकवचनादपि।
मतिरुत्क्रमणं याति प्रयागमरणं प्रति ॥

दश तीर्थसहस्राणि षष्टिकोट्यस्तथापराः ।
तेषां सान्निध्यमत्रैव कीर्त्तितं कुरुनन्दन ! ॥
यत् पुण्यं सर्व्वतीर्थेषु वेदविद्यासु यत् फलम् ।
स्नातमात्रस्य तत् पुण्यं गङ्गायमुनसङ्गमे ॥”
इति पाद्मे भूमिखण्डे १२७ अध्यायः ॥ * ॥
अपि च ।
“पुत्त्रकामः प्रयागे हि स्नायात् पुण्ये सितासिते ॥
धनकामः पुरा शक्रः स्नातो ह्यत्र द्विजोत्तम ! ॥
धनदस्य निधीन् सर्व्वान् तस्माज्जहार मायया ।
नारायणो नरेणैव वर्षाणामयुतं पुरा ॥
अनाहारः प्रयागेऽस्मिन् तप्तवान् पुण्यमुत्तमम् ।
सिद्धिञ्च साधका यान्ति प्रयागेऽस्मिन् द्विजो-
त्तम ! ॥”
इति पाद्मोत्तरखण्डे २३ अध्यायः ॥ * ॥
अपि च ।
युधिष्ठिर उवाच ।
“भगवन् ! श्रोतुमिच्छामि प्रयागगमने फलम् ।
मृतानां का गतिस्तत्र स्नातानामपि किं फलम् ॥
ये वसन्ति प्रयागे तु ब्रूहि तेषान्तु किं फलम् ।
भवता विदितं ह्येतत् तन्मे ब्रूहि नमोऽस्तु ते ॥
मार्कण्डेय उवाच ।
कथयिष्यामि ते वत्स ! या चेष्टा यच्च तत्
फलम् ।
पुरा महर्षिभिः सम्यक् कथ्यमानं मया श्रुतम् ॥
यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ।
यत्र ब्रह्मादयो देवा रक्षां कुर्व्वन्ति सङ्गताः ॥
बहून्यन्यानि तीर्थानि सर्व्वपापहराणि च ।
कथितुं नेह शक्नोमि बहुवर्षशतैरपि ॥
संक्षेपेण प्रवक्ष्यामि प्रयागस्येह कीर्त्तनम् ।
षष्टिर्धन्विसहस्राणि यथा रक्षन्ति जाह्नवीम् ॥
यमुनां रक्षति सदा सविता सप्तवाहनः ।
प्रयागन्तु विशेषेण स्वयं रक्षति वासवः ॥
मण्डलं रक्षति हरिः सर्व्वदेवैश्च सम्मितम् ।
न्यग्रोधं रक्षते नित्यं शूलपाणिर्महेश्वरः ॥
स्थानं रक्षन्ति वै देवाः सर्व्वं पापहरं शुभम् ।
स्वकर्म्मणावृता लोका नैव गच्छन्ति तत्पदम् ॥
स्वल्पमल्पतरं पापं यदा तस्य नराधिप ! ।
प्रयागं स्मरमाणस्य सर्व्वमायाति संक्षयम् ॥
दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ॥
पञ्चकुण्डानि राजेन्द्र ! येषां मध्ये तु जाह्नवी ।
प्रयागं विशतः पुंसः पापं नश्यति तत्क्षणात् ॥
योजनानां सहस्रेषु गङ्गां यः स्मरते नरः ।
अपि दुष्कृतकर्म्मासौ लभते परमां गतिम् ॥
कीर्त्तनान्मुच्यते पापात् दृष्ट्वा भद्राणि पश्यति ॥
व्याधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः ।
गङ्गायमुनमासाद्य त्यजेत् प्राणान् प्रयत्नतः ॥
दीप्तकाञ्चनवर्णाभैर्विमानैर्भानुवर्णिभिः ।
ईप्सितान् लभते कामान् वदन्ति मुनिपुङ्गवाः ॥
सर्व्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः ।
वराङ्गनासमाकीर्णैर्मोदन्ते शुभलक्षणैः ॥
गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते ।
यावन्न स्मरते जन्म तावत् स्वर्गे महीयते ॥
तस्मात् स्वर्गात् परिभ्रष्टः क्षीणकर्म्मा नरोत्तमः ।
हिरण्यरत्नसंपूर्णे समृद्धे जायते कुले ॥
तदेव स्मरते तीर्थं स्मरणात्तत्र गच्छति ।
देशस्थो यदि वारण्ये विदेशे यदि वा गृहे ॥
प्रयागं स्मरमाणस्तु यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकमवाप्नोति वदन्ति मुनिपुङ्गवाः ॥
सर्व्वकामफला वृक्षा मही यत्र हिरण्मयी ।
ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति ॥
स्त्रीसहस्राकुले रम्ये मन्दाकिन्यास्तटे शुभे ।
मोदते मुनिभिः सार्द्धं स्वकृतेनेह कर्म्मणा ॥
सिद्धचारणगन्धर्व्वैः पूज्यते दिवि दैवतैः ।
अथ स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
ततः शुभानि कर्म्माणि चिन्तयानः पुनः पुनः ।
गुणवान् वित्तसम्पन्नो भवतीह न संशयः ॥
कर्म्मणा मनसा वाचा सत्यधर्म्मप्रतिष्ठितः ॥
गङ्गायमुनयोर्मध्ये यस्तु ग्रामं प्रयच्छति ।
सुवर्णमथ मुक्तां वा तथैवान्यत् प्रतिग्रहम् ॥
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्च्चनेऽपि वा ।
निष्फलं तस्य तत्तीर्थं यावत् तद्धनमश्नुते ॥
अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च ॥
कपिलां पाटलाभाम्वा यस्तु धेनुं प्रयच्छति ।
यावद्रोमाणि तस्या वै सन्ति गात्रेषु सत्तम ! ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥”
इति कौर्म्मे प्रयागमाहात्म्ये ३३ अध्यायः ॥ * ॥
तत्र मुण्डनविधिर्यथा,—
“गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥”
इति स्मृतिसमुच्चयलिखितवचनं प्रयागावच्छिन्न-
गङ्गायां विधायकम् । भास्करक्षेत्रं प्रयागः ।
अपि च । प्रयागमधिकृत्य ।
“केशानां यावती संख्या छिन्नानां जाह्नवीजले ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥”
प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां द्व्यङ्गुल-
च्छेदनमात्रम् । यथा,—
“केशमूलमुपाश्रित्य सर्व्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत् ॥”
प्रयागे मुण्डनाकरणे दोषोऽपि ।
“गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् ।
स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत् ॥”
इति प्रायश्चित्ततत्त्वम् ॥

प्रयागभयः, पुं, (प्रयागात् प्रकृष्टयागकारिजनात् बिभेति स्वपदपरिग्रहशङ्कयेति । भी + अच् ।) इन्द्रः । इति शब्दरत्नमाला ॥

प्रयाणं, क्ली, (प्र + या + ल्युट् । यात्रम् ।) गमनम् । इति हलायुधः । २ । २६७ ॥ यथा,—
“उद्घाटितनवद्वारे पञ्जरे विहगोऽनिलः ।
यत्तिष्ठति तदाश्चर्य्यं प्रयाणे विस्मयः कुतः ॥”
इत्युद्भटः ॥
तत्पर्य्यायः । प्रस्थानम् २ गमनम् ३ व्रज्या ४ अभिनिर्य्याणम् ५ प्रयाणकम् ६ । इति हेमचन्द्रः । ३ । ४५३ ॥ अत्र राज्ञां युद्धादिप्रयाणे वर्ज्जनीयानि यथा । भेरीस्खलनः १ भूकम्पः २ वज्रधूलिः ३ करभः ४ हयः ५ अजः ६ छत्त्रम् ७ वणिक् ८ शकटम् ९ … १० । इति कवि-कल्पलता ॥

प्रयातः, पुं, (प्रकर्षेण यातः । प्र + या + कर्त्तरि क्तः ।) सौप्तिकः । भृगुः । इति हेमचन्द्रः ॥ गते, त्रि ॥ (क्ली, भावे क्तः । गमनम् । प्रस्थानम् । यथा, छन्दोमञ्जर्य्याम्,
“मया क्षेपितः कालियेत्थं कुरु त्वं
भुजङ्ग ! प्रयातं द्रुतं सागराय ॥”)

प्रयामः, पुं, (प्र + यम् + घञ् ।) नीवाकः । इत्यमरः । ३ । २ । २३ ॥ महार्घहेतोर्धान्यादिषु जनानामादरातिशये तुलाधरस्याधिक्यम् । इति केचित् । क्रयादरः । इति केचित् । मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम् । इति केचित् । इति भरतः ॥

प्रयासः, पुं, (प्र + यस प्रयत्ने + भावे घञ् ।) प्रयत्नः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५ आयासः ६ व्यायामः ७ । इति हेमचन्द्रः । २ । २३४ ॥ (यथा, हठयोगप्रदीपिकायाम् । १ । १५ ।
“अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥”)

प्रयुक्तं, त्रि, (प्र + युज् + क्तः ।) प्रकर्षेण युक्तम् । यथा,—
“गुणप्रयुक्ताः परमर्म्मभेदिनः
शरा इवावंशभवा भवन्ति हि ।
तथाविधा ये तु विशुद्धवंशजा
व्रजन्ति चापा इव तेऽतिनम्रताम् ॥”
इत्युद्भटः ॥
प्रकृष्टसमाधियुक्तम् । प्रकृष्टसंयोगविशिष्टम् । प्रकृष्टनिन्दायुक्तम् । प्रकृष्टसंयमविशिष्टम् । प्रपूर्व्वयुजधात्वर्थदर्शनात् । हेतौ क्ली । यथा । न च समवायिनिमित्ताभावप्रयुक्तो नियमेन कार्य्याभावः किन्त्वसमवायिकारणाभावप्रयुक्तोऽपि । इति रक्षितः ॥

प्रयुक्तिः, स्त्री, प्रयोजनम् । प्रपूर्व्वयुजधातोर्भावे क्तिः (क्तिन्) । यथा,—
“तवयो दृषणी भार्य्या प्रवीरं पुत्त्रकाम्यति ।
महत्स्य राजमातङ्गा इति न स्युः प्रयुक्तयः ॥”
इति प्राञ्चः ॥
(प्रयोगः । यथा, ऋग्वेदे । १ । १५१ । ८ ।
“युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना
मनसो न प्रयुक्तिषु ॥”
“प्रयुक्तिषु प्रयोगेषु ।” इति तद्भाष्ये सायनः ॥)

प्रयुतं, क्ली, (प्रकर्षेण युतम् ।) नियुतम् । इति हेमचन्द्रः । ३ । ५३७ ॥ (दशलक्षसंख्या । “एक-दशशतसहस्रायुत लक्षप्रयुतकोटयः क्रमशः ।” इति लीलावती ॥ यथा च महाभारते । १ । ३५ । १६ ।
“बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
अशक्यान्येव संख्यातुं पन्नगानां तपोधन ! ॥”)

प्रयुक्तार्थ:, पुं, (प्रयुक्त: अर्थो यस्य स: ।) प्रत्युत्क्रम: । इति प्रयोगार्थशब्दटीकायां रमानाथ: । १ । २ । २६ ।

प्रयोक्ता, [ऋ] पुं, (प्रयुनक्तीति । प्र+युज्+तृच् ।) उत्तमर्ण: । यथा,—

'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ॥'

इत्यमर: । २ । ९ । ५ ॥

त्रि, प्रयोगकर्त्ता । (यथा रघु: । ५ । ५७ ।

"संमोहनं नाम सखे ! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्वमादत्स्व यत: प्रयोक्तु-
र्नचारिहिंसा विजयश्च हस्ते ॥"

अनुष्ठाता । यथा, रघु: । ६ । ७६ ।

"पुत्त्रो रघुस्तस्य पदं प्रशास्ति
महाक्रतोर्विश्वजित: प्रयोक्ता ॥"

नियोगकर्त्ता । यथा, महाभारते । १३ । २३ । ६२ ।

"परदाराभिहर्त्तार परदाराभिमर्षिण: ।
परदारप्रयोक्तारस्ते वै निरयगामिन: ॥"

नाट्याचार्य्य: । यथा, रघु: । १९ । ३६ ।

"स प्रयोगनिपुणै: प्रयोक्तृभि:
सञ्जघर्ष सह मित्रसन्निधौ ॥")

प्रयोग:, पुं, (प्र+युज्+भावकर्म्मादौ यथायथं घञ् ।) कार्म्मणम् । वशीकरणम् । प्रयुक्ति: । (यथा, रघु: । २ । ४२ ।

"प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्व्वभङ्गे वितथप्रयत्न: ॥")

निदर्शनम् । इति मेदिनी । गे, ४४ ॥ (यथा, पञ्चदश्याम् । ६ । ४३ ।

"स्वयमात्मेति पर्य्यायस्तेन लोके तयो: सह ।
प्रयोगो नास्त्यत: स्वत्वमात्मत्वस्यान्यवारकम् ॥"

घोटक: । इति शब्दमाला ॥ (सामाद्युपायानुष्ठानम् । यथा, माघे । ११ । ६ ।

"अवशयितविबुद्धा: कल्पयन्त: प्रयोगानुदधिमहति राज्ये काव्यवद्दुर्विगाहे ॥"

अभिनय: । यथा, रघु: । १९ । ३६ ।

"स प्रयोगनिपुणै: प्रयोक्तृभि:
सञ्जघर्ष सह मित्रसन्निधौ ॥"

हवेर् ऋणदानम् । स तु धनप्राप्तुगणयेषु अन्यतम: । यथा, मनु: । १० । ११५ ।

"सप्त वित्तागमा धर्म्या दायो लाभ: क्रयो जय: ।
प्रयोग: कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥")

प्रयोगार्थ:, पुं, (प्रयोग: अर्थ: प्रयोजनं यस्य ।) प्रधानप्रयोगानुकूलं प्रयोजनानुष्ठानम् । तत्पर्य्याय: । प्रत्युत्क्रम: २ । इत्यमर: ।१।२।२६॥

प्रयोगी, [न्] त्रि, (प्रयोगोऽस्यस्येति । प्रयोग+ "अत इनिठनौ ।" ५।२।११५ । इति इनि: ।) प्रयोगयुक्त: । (यथा, अमरे । २ । ७ । २० ।

"समूह्य: परिचाय्योपचाय्यावग्नौ प्रयोगिण: ॥")

प्रयोजक:, त्रि, (प्रयुनक्ति प्रेरयति कार्य्यादौ भृत्यादीनिति । प्र+युज्+ण्वुल् ।) प्रयोगकर्त्ता । नियोगकर्त्ता । स्वतन्त्रतत्प्रयोजको कर्त्ता इति मुग्धबोधव्याकरणम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । ११९ ।

"याम् द्रोहभीरून् सम्भाव्य संविभेजे यशस्कर: ।
तस्य तत्तनयोच्छेदे त एवासन् प्रयोजका: ॥"

नियन्ता । यथा, याज्ञवल्क्ये । १ । ५ ।

"शातातपो वशिष्ठश्च धर्मशास्त्रप्रयोजका: ॥")

प्रयोजनं, क्ली, (प्रयुज्यते इति । प्र+युज्+ल्युट्) कार्य्यम् । (प्रयुज्यतेऽनेनेति । प्र+युज्+करणे ल्युट् ।) हेतु: । इति मेदिनी । ने, १९३ ॥ यथा,

"सर्व्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् केन प्रगृह्यते ॥
सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
ग्रन्थादौ तेन वक्तव्य: सम्बन्ध: सप्रयोजन: ॥"

इति प्राञ्च: ॥

('प्रयोजनञ्च द्विविधं मुख्यं गौणञ्च । तत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम् । तत्राद्यं सुखं तद्भोगो दु:खाभावश्च । द्वितीयं तदुपकारि शयनभोजनादि । तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छाया विषयत्वात्तथात्वम् ।" इति मुक्तिवादे गदाधर: ॥ उद्देश: । यथा "अथ प्रयोजनम् । प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भा: । यथा यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्यैरुपचरिष्याम्यनायुष्यै: परिहरिष्यामि कथं न मामकालमृत्यु: प्रसहेतेति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

प्रयोज्य:, त्रि, (प्र+युज्+ण्यत् । 'प्रयोज्यनियोज्यौ शक्यार्थे ।" ७।३।६८ । इति निपातनात् साधु: । प्रयोक्तुं शक्य: । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनु: । ३।१५९ ।

"वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ॥")

मूलधने, क्ली ॥

प्ररूढ:, पुं, (प्ररोहत्यस्मादिति । प्र+रुह+क्त: ।) जठरम् । इति मेदिनी । ढे, ८॥ (क्वचित् जरठोऽपि पाठ: ॥)

प्ररूढ:, त्रि, (प्र+रुह्+क्त: ।) बद्धमूल: । इति मेदिनी । ढे, ८॥ (यथा भागवते । ४ । १३ । १ ।

"प्ररूढभावो भगवत्यधोक्षजे
प्रष्टु पुनस्तं विदुर: प्रचक्रमे ॥")

जात: । (यथा, रघु: । १३ । ६ ।

"नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमान: प्रथमेन धात्रा ॥")

प्रवृद्ध: । इति शब्दरत्नावली ॥

प्ररोह:, पुं, (प्ररोहतीति । प्र+रुह्+अच् ।) अङ्कुर: । इति हेमचन्द्र: । ४ । १८५ ॥ (यथा, कुमारे । ५ । ६० ।

"द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तप:साक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्या: शशिमौलिसंश्रय: ॥"

नन्दीवृक्ष: । तत्पर्य्यायो यथा,—

"नन्दीवृक्षोऽश्वत्थभेद: प्ररोही गजपादप: ।
स्थालीवृक्ष: क्षयतरु: क्षीरी च स्याद्वनस्पति: ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रलपित:, त्रि, प्रपूर्व्वलपधातो: कर्म्मणि क्त: । कथित: । यथा, काव्यप्रकाशे ।

"जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ॥"

प्रलम्ब:, पुं, (प्रलम्बते इति । प्र+लम्ब+अच् । अतिदीर्घत्वादेव तथात्वम् ।) दैत्यभेद: । स च दनुपुत्त्र: मनुष्यवध्य: । यथा,—

"एकाक्ष ऋषभोऽरिष्ट: प्रलम्बनरकौ तथा ।
इन्द्रवाधनकेशी च पुर: शङ्कोऽथ धेनुक: ॥
गवेष्टिको गवाक्षश्च तालकेतुश्च वीर्य्यवान् ।
एते मनुष्यवध्यास्तु दनो: पुत्त्रान्वया: स्मृता:"

इत्यग्निपुराणम् ॥

(अयं हि बलदेवेन निहत: । यथा, भागवते १० स्कन्धे १८ । अध्याये ।

"तत्रोपाहूय गोपालान् कृष्ण: प्राह विहारवित् ।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥
तत्र चक्रु: परिवृढौ गोपा रामजनार्द्दनौ ।
कृष्णसङ्घट्टिन: केचिदासन् रामस्य चापरे ॥
आचेरुर्विविधा: क्रीडा वाह्यवाहकलक्षणा: ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिता: ॥"

"उवाह कृष्णो भगवान् श्रीदामानं पराजित: ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥
अविषह्यं मन्यमान: कृष्णं दानवपुङ्गव: ।
वहन् द्रुततरं प्रागादवरोहणत: परम् ॥

"अथागतस्मृतिरभयो रिपुं बली
विहाय सार्थमिव हरन्तमात्मन: ।
रुषाहनच्छिरसि दृढेन मुष्टिना
सुराधिपो गिरिमिव वज्ररंहसा ॥
स आहत: सपदि विशीर्णमस्तको
मुखाद्वमन् रुधिरमपस्मृतोऽसुर: ।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहत: ॥")

त्रपुष: । पयोधर: । लताङ्कुर: । शाखा । हारभेद: । (भावे घञ्) प्रलम्बनम् । इति मेदिनी । बे १३॥ (देशविशेष: । यथा, रामायणे२।६८।१२।

"न्यन्तेनापरतालस्य प्रलम्बस्योत्तरं प्रति ।
निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीम् ॥"

लम्बमाने, त्रि । यथा, महाभारते १।१९५।१०।

"गूढोत्तरांसान् भुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान् ॥")

प्रलम्बघ्न:, पुं, (प्रलम्बं हन्तीति । हन्+क: । बलराम: इत्यमर: । १ । १ । २४ ॥

प्रलम्बभित्, पुं, (प्रलम्बं भिनत्तीति । भिद्+क्विप् । बलराम: । इति हेमचन्द्र: । २ । १३८ ॥

प्रलम्बाण्ड:, पुं, (प्रलम्बौ लम्बमान: अण्डो यस्य ।) दीर्घाण्डकोषविशिष्ट: । तत्पर्य्याय: । मुष्कर: २ इति हेमचन्द्र: । ३ । १२१ ॥

प्रलम्बितः, त्रि, प्रपूर्व्वलम्बधातोः कर्त्तरि क्तः ॥ प्रकर्षेण लम्बितमाम्रादिः ॥

प्रलयः, पुं, (प्रलीयते चीयते जगदस्मिन्निति । प्र+ली+"एरच् ।" ३ । ३ । ५६ । इत्यच् ।) प्रलयः । तत्पर्य्यायः । संवर्त्तः २ कल्पः ३ क्षयः ४ कल्पान्तः ५ । इत्यमरः । १।४।२२ ॥ लयः ६ संक्षयः ७ विलयः ८ । इति शब्दरत्नावली ॥ प्रतिसर्गः ९ प्रतिसञ्चरः १० । स च नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्धा । यथा,—

कूर्म्म उवाच ।

"नित्यं नैमित्तिकश्चैव प्राकृतात्यन्तिकौ तथा ।
चतुर्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः ॥"*

नित्यो यथा,—

"योऽयं सन्दृश्यते नूनं नित्यं लोके क्षयस्त्विह ।
नित्यं संकीर्त्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः ॥"

नैमित्तिको यथा,—

"ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति ।
त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः ॥"

प्राकृतो यथा,—

"महदाद्यं विशेषान्तं यदा संयाति संक्षयम् ।
प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः ॥"

आत्यन्तिको यथा,—

"ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि ।
प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः ॥
आत्यन्तिकश्च कथितः प्रलयो लयसाधनः ॥"*

नैमित्तिकप्रलयविस्तारो यथा,—

'नैमित्तिकमिदानीं वः कीर्त्तयिष्ये समासतः ॥
चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे ।
आत्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः ॥
ततो भवत्यनावृष्टिस्तीव्रा सा शतवार्षिकी ।
भूतक्षयकरी घोरा सर्व्वभूतभयङ्करी ॥
ततो यान्यल्पसाराणि शस्यानि पृथिवीतले ।
तानि चाग्रे प्रलीयन्ते भूमित्वमुपयान्ति च ॥
सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः ।
असह्यरश्मिर्भवति पिबन्नम्भो गभस्तिभिः ॥
तस्य ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे ।
तेनाहारेण ते सूर्य्याः दीप्ताः सप्त भवन्ति हि ॥
तस्य ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्द्दिशम् ।
चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा
व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वञ्चाधश्च रश्मिभिः ।
दीप्यन्ते भास्कराः सप्त दहन्तोऽग्निप्रतापिनः
ते सूर्य्या वारिणा दीप्ता बहुसाहस्ररश्मयः ।
खं समाहृत्य तिष्ठन्ति निर्द्दहन्तो वसुन्धराम् ॥
ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा ।
साद्रिनद्यर्णवद्वीपा निःस्नेहा समपद्यत ॥
दीप्ताभिः सन्तताभिश्च ज्वालाभिश्च समाहृतः ।
अधश्चोर्द्ध्वञ्च तिर्य्यक् च समाहृत्य सहस्रशः ॥
सूर्य्याग्निना प्रसृष्टाना संसृष्टानां परस्परम् ।
एकत्वमुपजातानामेकज्वाला भवेत् प्रभुः ।
सर्व्वलोकप्रणाशश्च सोऽग्निर्भूत्वा तु कुण्डली ।
चतुर्लोकमिदं कृत्स्नं निर्द्दहत्यात्मतेजसा ॥
ततः प्रलीने सर्व्वस्मिन् जङ्गमे स्थावरे तथा ।
निर्वृक्षा निस्तृणा भूमिः कूर्म्मपृष्ठे प्रकाशते ॥
अम्बरीषमिवाभाति सर्व्वमापूरितं जगत् ।
सर्व्वमेव तदार्च्चिर्भिः पूर्णं जाज्वल्यते नभः ॥
पाताले यानि तीर्थानि महोदधिगतानि तु ।
तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै ॥
द्वीपांश्च पर्व्वतांश्चैव वर्षाण्यथ महोदधीन् ।
तान् सर्व्वान् भस्मसात् कृत्वा सप्तात्मा पावकः प्रभुः ॥
समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः ।
पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत्
ततः संवर्त्तकः शैलानतिक्रम्य महांस्तथा ।
लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः ॥
स दग्ध्वा पृथिवीन्देवो रसातलमशोषयत् ।
अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्ध्वं दहिष्यति ॥
योजनानां शतानीह सहस्राण्ययुतानि च ।
उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्त्तकस्य च ॥
गन्धर्व्वांश्च पिशाचांश्च सयक्षोरगराक्षसान् ।
तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः ॥
भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः ।
दहेदशेषं कालाग्निः कालो विश्वतनुः स्वयम्
व्याप्तेषु तेषु लोकेषु तिर्य्यगूर्द्ध्वमथाग्निना ।
तत्तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः ॥
अयोगुडनिभं सर्व्वं तदैवैकं प्रकाशते ।
ततो गजकुलोन्नादाः स्तनितैः समलङ्कृताः ॥
उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः
केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः
धूम्रवर्णास्तथा केचित् तथा पीताः पयोधराः ।
केचिद्रासभवर्णाश्च स्थूलाः क्षारनिभास्तथा ॥
शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे ।
मनःशिलानिभास्त्वन्ये कपोतसदृशाः परे ॥
केचिद्गोरोचनवर्णाभास्तथान्ये क्षीरसन्निभाः ।
तथा कर्ब्बुरवर्णाभा भिन्नाञ्जननिभास्तथा ॥
इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा ।
काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि
केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः ।
कूटागारनिभाश्चान्ये केचिन्मीनकुलाहृताः ॥
बहुरूपा घोररूपा घोरस्वरनिनादिनः ।
तदा जलधराः सर्व्वं पूरयन्ति नभस्तलम् ॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः
सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥
ततस्ते जलदा वर्षं वर्षन्तीह हिमौघवत् ।
सुघोरमशिवं सर्व्वं नाशयन्ति च पावकम् ॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल ।
अद्भिस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः ॥
नष्टे चाग्नौ वर्षशतैः पयोदा जलसम्भवाः ।
प्लावयन्तोऽथ भुवनं महाजलपरिस्रवैः ॥
धाराभिः पूरयन्तीदं चोद्यमानाः स्वयम्भुवा ।
उद्यन्तः सलिलौघश्च वेला इव महोदधेः ॥
साद्रिद्वीपा तथा पृथ्वी अद्भिः संछाद्यते शनैः ।
आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति ।
पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः ॥
ततः समुद्राः स्वां वेलामतिक्रान्तास्तु कृत्स्नशः
पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति ॥
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
योगनिद्रां समास्थाय शेते देवः प्रजापतिः ॥
चतुर्युगसहस्रान्तं कल्पमाहुर्महर्षयः ।
वाराहो वर्त्तते कल्पो यस्य विस्तार ईरितः ॥
असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः
कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः ॥
सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।
तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः ।
सोऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः ॥
अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः ।
ध्यानन्तपस्तथा ज्ञानं लब्ध्वा तेष्वेव योगिनः ॥
आराध्य गिरिशं यत्नात् याति तत्परमं पदम् ।
सोऽहं सत्त्वं समाधाय मायी मायामयं स्वयम् ॥
एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु ।
मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः ॥
जनलोके वर्त्तमानास्तपसा योगचक्षुषा ।
अहं पुराणपुरुषो भूर्भुवः प्रभवो विभुः ॥
सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात् ।
मन्त्रोऽग्निर्ब्राह्मणा गावः कुशाश्च समिधो ह्यहम्
प्रोक्षणी च स्रुवश्चैव सोमो घृतमयोऽस्म्यहम् ।
संवर्त्तको महानात्मा पवित्रं परमं यशः ॥
वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्रह्मणो मुखम् ।
अनन्तस्तारको योगी गतिर्मतिमतां वरः ॥
हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः ।
क्षेत्रज्ञः प्रकृतिः कालो जगद्बीजमथामृतम् ॥
माता पिता महादेवो मत्तो ह्यन्यन्न विद्यते ॥

आदित्यवर्णो भुवनस्य गोप्ता
नारायणः पुरुषो योगमूर्त्तिः ।
मां पश्यन्ति यतयो योगनिष्ठा
ज्ञात्वात्मानममृतत्वं व्रजन्ति ॥"* ॥

प्राकृतप्रलयविस्तारो यथा,—

कूर्म्म उवाच ।

"अतः परं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम् ।
प्राकृतं प्रसमासेन शृणुध्वं गदतो मम ॥
गते परार्द्धद्वितये काले लोकप्रकालकः ।
कालाग्निर्भस्मसात् कर्त्तुं करोति निखिलं मतिम् ॥
आत्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः ।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ॥
तमाविश्य महादेवो भगवान्नीललोहितः ।
करोति लोकसंहारं भीषणं लोकमाश्रितः ॥
प्रविश्य मण्डलं सौरं कृत्वासौ बहुधा पुनः ।
निर्द्दहत्यखिलं लोकं सप्तसप्तिस्वरूपधृक् ॥
स दग्ध्वा सकलं सत्त्वं मस्त्रं ब्रह्मशिरो महत् ।
देवतानां शरीरेषु क्षिपत्यखिलदाहकः ॥
दग्धेष्वशेषदेहेषु देवी गिरिवरात्मजा ।
एका सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः
शिरःकपालैर्देवानां कृतस्रग्वरभूषणः ।
आदित्यचन्द्रादिगणैः पूरयन् व्योममण्डलम् ॥

प्रलयः
प्रलयः

सहस्रनयनो देवः सहस्राकृतिरीश्वरः ।
सहस्रहस्तचरणः सहस्रार्चिर्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूली कृत्तिवसनो योगमैश्वरमास्थितः ॥
पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम् ।
करोति ताण्डवं देवीमालोक्य परमेश्वरः ॥
पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला ।
योगमास्थाय देवस्य देहमायाति शूलिनः ॥
स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम्
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरनेकैः पृथिवी विलयं याति वारिषु ।
स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः ॥
तैजसं गुणसंयुक्तं वायौ संयाति सङ्क्षयम् ।
आकाशे सगुणो वायुः प्रलयं याति सत्तमाः ॥
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ।
इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम् ॥
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः ।
वैकारिकस्तैजसश्च भूतादिश्चेति सत्तमाः ॥
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ।
महान्तमेभिः सहितं ब्रह्माणमतितेजसम् ॥
अव्यक्तं जगतो योनिः संहरेदेकमव्ययम् ।
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः ॥
नियोजयत्यथान्योन्यं प्रधानं पुरुषं परम् ।
प्रधानपुंसोरजयोरेष संहार ईरितः ॥
महेश्वरेच्छाजनितो न स्वयं विद्यते लय ।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते ॥
प्रधानं जगतो योनिर्मायातत्त्वमचेतनम् ।
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः ॥
गीयते मुनिभिः साक्षी महानेकः पितामहः ।
एव संहारकरणी शक्तिर्माहेश्वरी ध्रुवा ॥
प्रधानाद्य विशेषान्तं दहेद्रुद्र इति श्रुतिः ।
योगिनामथ सर्वेषां ज्ञानविन्यस्तचेतसाम् ।
आत्यन्तिकञ्चैव लयं विदधातीह शङ्करः ॥”
इति कौर्म्मे ।४२।१३। अध्यायौ ॥ * ॥
आत्यन्तिकप्रलयविस्तारो यथा,—
श्रीपराशर उवाच ।
“आध्यात्मिकादि मैत्रेय । ज्ञात्वा तापत्रयं बुधः
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च स. ॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानस श्रोतुमर्हसि ॥
कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः ॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा ।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥
तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म्म चोक्तं महामुने ! ॥
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥
अन्धन्तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्य्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ! ।
तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः ।
परया त्वक्षरप्राप्तिरृग्वेदादिमया परा ॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥
विभुं सर्व्वगतं नित्य भूतयोनिमकारणम् ।
व्याप्यव्याप्य यतः सर्व्वं त वै पश्यन्ति सूरयः ।
तद्ब्रह्म तत् परं धाम तद्ध्येय मोक्षकाङ्क्षि-
णाम् ।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ।
तदेव भगवद्वाच्य स्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः ॥
एवंनिगदितार्थस्य सतत्त्वं तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम् ॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज ! ।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ॥
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते ।
मैत्रेय ! भगवच्छब्दः सर्व्वकारणकारणे ॥
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः ॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा ।
नामव्याख्या ह्यनन्तस्य वासुदेवस्य तत्त्वतः ॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत् ।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥
स सर्व्वभूतप्रकृतिविकार-
गुणांश्च दोषांश्च मुने ! व्यतीतः ।
अतीतसर्व्वावरणाखिलात्मा
तेनास्तृतं यद्भुवनान्तराणि ॥
समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्य्यमहावबोध-
स्ववीर्य्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपो-
ऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्व्वेश्वरः सर्व्वदृक् सर्व्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥
स ज्ञायते येन तदस्तदोषं
शुद्धं परं निर्म्मलमेकरूपम् ।
संदृश्यते वाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥”
इति विष्णुपुराणे ६ अंशे आत्यन्तिकप्रति-
सञ्चारो नाम ५ अध्यायः ॥*॥ अपि च ।
नारद उवाच ।
“कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
दिव्यमेकयुगं ज्ञेयं तस्य या चैकसप्ततिः ॥
मन्वन्तरन्तु तज्ज्ञेयं ते तु यत्र चतुर्द्दश ।
स कल्पो नाम वै कालस्तदन्ते प्रलयस्तु यः ॥
सा ब्रह्मरात्री राजेन्द्र ! तत्र शेतेऽब्जुजासनः ।
त्रयो लोकास्तदा राजन् लीयन्ते तन्निमित्ततः ॥
नैमित्तिको लयो नाम दैनन्दिन इतीर्य्यते ॥
एव दिनप्रमाणेन ब्रह्मणः शतवार्षिकम् ।
आयुः पूर्व्वपरार्द्धे तु परार्द्धे द्वे प्रकीर्त्तिते ॥
द्विपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः ।
तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप ! ॥
लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते ! ।
अण्डकोषेऽपि सकलः प्रलयं याति सर्वश ॥
पूर्व्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते ! ।
शतवर्षाणि भूमौ हि पर्ज्जन्यो नैव वर्षति ॥
दुर्भिक्षे निर्जने लोके प्रजाः सर्वाः क्षुधार्द्दिताः ।
परस्परं भक्ष्यमाणाः क्षयं यास्यन्ति भूमिप ! ॥
समुद्रे च धरण्याञ्च वृक्षेषु च लतासु च ।
देहे च यो रसस्तं हि रविर्हरति रश्मिभिः ॥
ततः संवर्त्तको नाम ज्वालामाली हुताशनः ।
सङ्कर्षणमुखोत्पन्नो दहत्यनिलसारथिः ॥
सर्व्वं ब्रह्माण्डभाण्डं वै तत्कालक्षोभगर्जितः ।
एव दग्धं महाराज ! वह्न्यर्काभ्यां समन्ततः ॥
दग्ध्वा गोमयपिण्डाभ ब्रह्माण्ड सारवर्ज्जितम् ।
प्रचण्डपवनो राजंस्ततो वषशतं पुनः ॥
संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति ।
ततो मेघा महाघोरा नानावर्णा अनेकशः ॥
शतं वर्षाणि वर्षन्ति गर्ज्जन्ति च महास्वनाः ।
एकोदकं ततो विश्वं निर्गुण निर्विकारकम् ॥
भूमिर्गन्धगुणं राजन् ! ग्रसन्त्यापः समन्ततः ।
गुणनाशात् स्वय पृथ्वी प्रलय प्राप्स्यते तदा ॥
तेजस्त्वपां रसगुणं सगन्ध पिबते बलात् ।
ततः प्रलयमायान्ति राजन्नापोऽपि तत्क्षणात् ॥
तेजसस्तु ततो रूप रसगन्धसमन्वितम् ।
वायुर्हरति चण्डात्मा तेजःप्रलयमृच्छति ॥
आकाशस्तु ततो वायोः स्पर्शं परगुणैः सह ।
समादत्ते महाराज ! अम्बरेऽथ प्रलीयते ॥
आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम् ।
अहङ्कारः समादत्ते नभस्तस्मिन् प्रलीयते ॥
तैजसेष्विन्द्रियाण्यङ्ग देवा वकारिके तथा ।
अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम् ॥
अहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः ।
ग्रसते तान् महाराज ! आद्या प्रकृतिरुच्यते ॥

न तस्याः कालदोषेण परिणामो भवेत् भ ।।
आद्यन्तरहिता सा हि नित्यं कारणमव्ययम्॥
शक्तिर्भगवतः सा हि तदेकपरमा च सा ।
इत्युक्तः प्रलयो राजन्! विश्वस्यास्य महामते ॥
यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा ॥"
इति पाद्मे स्वर्गखण्डे ३८ अध्यायः ॥
(सात्त्विकविकारान्तर्गतविकारविशेषः । तल्ल-
क्षणं यथा, साहित्यदर्पणे । ३।१६७ ।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः॥")
प्रलापः, पुं, (प्रलपनमिति । प्र+लप्+भावे
घञ् ।) प्रलपनम् । अनर्थकवाक्यम् । निष्प्रयो-
जनमुक्तादिवचनम् । इत्यमरभरतौ । १ ।
६ । १५ ॥ रोगाणामुपसर्गोऽयम् ॥ (यथा,
भावप्रकाशे ।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः
उपद्रवा भवन्त्येते मूर्त्तिश्च रसशोषतः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
स्वहेतुकुपिताद्वातादसम्बद्धनिरर्थकम् ।
वचनं यत्नरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताम्भोदतिक्ता
नलदतुरगगन्धा भारती शर्करा ।
मलयजदमनूलीशक्रपुष्पी सुपक्वा
प्रलपनमपहन्युः पानतो नातिदूरात् ॥
वरतिक्तोऽत्र पपटः नलदमुशीरं भारती ब्राह्मी
शर्करा द्राक्षा ।" इति भावप्रकाशस्य मध्य-
खण्डे प्रथमे भागे ॥)
प्रलापहा, [न] पुं, (प्रलापं हन्तीति । हन्+
क्विप् ।) कुलत्थाञ्जनम् । इति राजनिर्घण्टः ॥
प्रलीनता, स्त्री, (प्रलीनस्य निश्चेष्टस्य भावः ।
प्रलीन+तल् ।) प्रलयः । तत्पर्य्यायः । इन्द्रिय-
स्वापः २ चेष्टानाशः ३ । इति राजनिर्घण्टः ॥
प्रलेहः, पुं (प्रलिह्यते इति । प्र+लिह्+घञ् ।)
व्यञ्जनविशेषः । इति पाकराजेश्वरः । दम्पो-
खत कोरमा इत्यादि पारस्यभाषा ॥)चिन्ता-
मणौ छतः प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च
वारिणा ।
तप्तखण्डे विनिक्षिप्य दर्व्या सञ्चालयन् पचेत्॥
तत्र तत्र विनिःक्षिप्य लावणं जलमल्पकम् ।
पचेत् पटपटाशब्दं तस्मिन् मांसे प्रकुर्वति ॥
प्रक्षिपेद्दाडिमीनीरं बहुलेन पचेत् पुनः ।
मांसपिण्डेषु सिद्धेषु देया शुण्ठी सजीरका ॥
ततश्चोत्तार्य्य तन्मांसं पृथक् कुर्य्यात् प्रलेहतः
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
हिङ्गुना घृतयुक्तेन धूपेन तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु ।
"हिङ्ग्वार्द्रबीजपूरैलालवणैः सघृतेन तु ।
कुट्टितामिषपिष्टेन तप्त दाड़िमबीजतः ॥
शोषणावेसवारश्च प्रलेहो गौड़देशजः ॥
प्रलेहो रुचिदो बल्यः कफानिलरुजापहः ।
समाहो पित्तकृत् किञ्चिच्छ्वासानगदान्
जयेत् ॥"
पूर्णप्रलेहस्तु ।
"मांसपूरणयोगेन कोष्ठाकारं विधाय च ।
स्विन्नं तप्तं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरणस्य प्रलेहोऽयं विज्ञेयो वातनाशनः ।
श्रमान्तकारकश्चैव सुखवैरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः ।
"घृते वेसरधान्याकहिङ्गुभृदधिसंयुते ।
वस्त्रपूतेऽर्द्धसम्पक्वे स्विन्नं मांसं विनिःक्षिपेत्॥
पीतवर्णस्तु ।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत् ।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि ।
"तप्तखण्डे क्षिपेद्धिङ्गुसंयुक्तं कासमर्दकम् ।
धान्यकं लवणाजाजीधौतं मांसञ्च तत् क्षिपेत्
ततोऽर्द्धस्फुटिते मांसे दाडिमीबीजसंयुते ।
सम्यक्के चातिमृदुले तक्रं शुण्ठीञ्च निःक्षिपेत्॥
तत उत्तार्य्य वस्त्रेण गालयेत् पयेदपि ।
रक्तवर्णप्रलेहस्य संसिद्ध्यर्थं विनिःक्षिपेत् ॥
करमर्दं दाड़िमस्य स्थाने शेषन्तु पूर्व्ववत् ॥"
हरितवर्णस्तु ।
"मेथिकाकासमर्दाम्लकल्केन चलकारिते ।
घृते मांसं विनिःक्षिप्य पचेच्छुक्लप्रलेहवत् ॥
सिद्धे च गालयेदस्मै ज्ञात्वा वर्णप्रयोजनम् ।
ताम्बूलं कष्टजङ्गारं देयं हरितहेतुना ॥
अन्यो रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि ।
"माषस्य पिष्टिका सूक्ष्मा वेसवारेण संयुता ।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रबिम्बीफलाकारं लड्डुकावटकादिकम् ।
शृङ्गाटकफलाकारं यथाविधिप्रकारजम् ॥
कृत्वा हि बहुधाधारे स्वेदितं घृतभर्ज्जितम् ।
सवेसवारजे तक्रे क्वथितं च मनोरमे ॥
निःक्षिप्य चालयेदीषदुत्तार्य्यैलादिवासिते ।
एवन्तु बहुधा कार्य्यो माषमुद्गप्रलेहकः ॥
प्रलेहो वातजिद्बल्यः शुक्रमांसप्रदो रसः ।
प्रीणनः प्राणयुक्तानां शुक्रदः क्षीणरेतसाम् ॥"
मत्स्यप्रलेहस्तु ।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः ।
आदौ तैले परं पक्वं सर्व्वमन्यत्तु पूर्व्ववत् ॥
वर्णस्य करणं देयं पूर्व्वोक्तं द्रव्यकं हि यत् ।
उत्पलं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥
मत्स्यखण्डप्रलेहस्तु ।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम्
तप्ततैले क्षिपेत् खण्डं हिङ्गुसैन्धवमिश्रितम् ।
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥"
प्रवक्ता, [ऋ] त्रि, प्रकर्षेण वक्ति यः (प्र+
वच्+तृच् ।) वेदादिवाचकः । यथा,—
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मण-
ब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
इति मत्स्ये ७ अध्यायः ॥
प्रवचनं, क्ली,(प्रकर्षेण उच्यते इति । प्र+वच्+
ल्युट् वेदः । (यथा, अमरकोषे । २।७।१० ।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते ॥"
वेदाङ्गम् । यथा, मनुः । २ । १८४ ।
"अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनान्य-
ङ्गानि तेषु अग्र्याः षड़ङ्गविदः।" इति तत्र कुल्लूक-
भट्टः ॥ तथा च हरिवंशे । १६७ । ६८ ।
"उवाच वेदांश्चतुरो सन्ध्याप्रवचनार्च्चिताम् ॥"*
प्रकृष्टं वचनमिति कर्म्मधारयः । प्रकृष्टवाक्यम् ।
इति मेदिनी । ने, १८१ ॥ (यथा, मुण्डकोप-
निषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")
प्रवचनीयः, त्रि,(प्रवक्तीति । प्र+वच्+"भव्य-
गेयप्रवचनीयेति ।" ३।४।६८ । इति कर्त्तरि
अनीयर् ।) प्रवक्ता । (प्रोच्यते इति । प्र+वच्
कर्म्मणि अनीयर ।) प्रवाच्यः । इति मेदिनी
ये १३२ ।
प्रवणः, पुं, (प्रवन्ते गच्छन्ति जना अनेनेति प्रु
गतौ+करणे ल्युट्) चतुष्पथः इत्यमरः
३।३।५६ ।
प्रवणः, त्रि,(प्रवतेऽत्रेति । प्रु+अधिकरणे ल्युट
क्रमनिम्नभूमिः । (यथा, मनुः । ३ ।
२०६ ।
"दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत् ॥"
उदरम् । प्रह्वः । इति मेदिनी ।ने,५८॥ (यथा,
मार्कण्डेये । २३ । ८८ ।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो-
मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥")
आयतः । प्रगुणः । क्षणः । इति विश्वः ॥
प्लुत । स्निग्धः । इति शब्दरत्नावली ॥
आसक्तः । इति हेमचन्द्रः । ३।४८ ॥ (यथा,
विष्णुपुराणे ।६ । १ । ११ ।
"प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्वर्ण्यव्यवस्थितौ ।
सम्यक्श्रद्धासमाचारप्रवणा मुनिसत्तम ! ॥")
क्षीणः इति धरणिः ।
प्रवत्स्यत्पतिका, स्त्री, (प्रवत्स्यन् प्रवासं गमि-
ष्यन् पतिर्यस्याः । कप् ।) नायिकाभेदः ।
अस्या लक्षणम् । यस्याः पतिरग्रिमक्षणे देशा-
न्तरं यास्यत्येव सा अस्याश्चेष्टा । काकुवचन-
कातरप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसन्ताप-
सम्मोहनिश्वासवाष्पादयः ॥ मुग्धा प्रवत्स्य-
त्पतिका यथा,—
"प्राणेश्वरे किमपि जल्पति निर्गमाय
वामोदरी वदनमानमयाञ्चकार ।
आली पुनर्निभृतमेत्य लतानिकुञ्ज-
मुन्मत्तकोकिलकलध्वनिमाततान ॥ १ ॥

मुग्धा प्रवत्स्यत्पतिका यथा,—

"गन्तुं प्रिये ! वदति निःश्वसितं न दीर्घ-
मासीन्न वा नयनयोर्जलमाविरासीत् ।
आयुर्लिपिं पठितुमेणदृशः परन्तु
भालस्थलीं किमु करः समुपाजगाम ॥"२॥

प्रौढा प्रवत्स्यत्पतिका यथा,—

"नायं मुञ्चति सुभ्रुवामपि तनुत्यागी वियोगज्वर
स्नेनाङ्क विहिताञ्जलिर्यदुपते ! पृच्छामि सत्यं वद
ताम्बूल कुसुम पटीरमुदक यद्बन्धुभिर्दीयते
तत् स्वादन परत्र वा किमु विषज्वालावली-
दुःसहम् ॥"३॥

परकीया प्रवत्स्यत्पतिका यथा,—

"न्यस्य पन्नगमूर्द्धि पादयुगल भक्तिर्विमुक्ता गुरौ
त्यक्ता नीतिरकारि किं न भवतो हेतोर्मया
दुष्कृतम् ।
अङ्गानां शतयातना नयनयोः कोपक्रमो रौरवः
कुम्भीपाकपराभवश्च मनसो युक्तं त्वयि
प्रस्थिते ॥"४॥

सामान्यप्रवत्स्यत्पतिका यथा,—

"मुद्रां प्रदेहि वलयाय भवद्वियोग-
मासाद्य यास्यति वहिः सहसा यदेतत् ।
इत्थं निगद्य विगलन्नयनाम्बुधारा
वाराङ्गना प्रियतम करयोर्बभार ॥"५॥
इति रसमञ्जरी ॥

प्रवयणं, क्ली, (प्रवीयतेऽनेनेति । प्र+अज गतौ क्षेपणे च+ल्युट् । "वा यौ ।" २ । ४ । ५७ । इति वी । "कृत्यचः ।" ८ । ४ । २९ । इति णत्वम् ।) प्रतोदः । इति हेमचन्द्रः ।३।५५७॥ (प्र+वय गतौ+भावे ल्युट् । प्रकर्षेण गमनम् । इति केचित्) ॥

प्रवयाः, [स्] त्रि, (प्रगतं वयो यस्य ।) वृद्धः । इत्यमरः २ । ६ । ४२ ॥(यथा,रघुः । ८ । १८ ।

"नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा ।
परिचेतुमुपांशुधारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥"

पुराणः । इति निघण्टुः । ३ । २७ ॥ यथा, ऋग्वेदे । २ । १७ । ४ ।

"अधा यो विश्वा भुवनानि मज्मनेशानकृत-
प्रवया अभ्यवर्धत ॥")

प्रवर, क्ली, (प्रव्रियते इति । प्र+वृ+अप् ।) अगुरु । इति भावप्रकाशः ॥ गोत्रम् । श्रेष्ठे, त्रि । इति मेदिनी । रे १७६ ॥ (यथा, मनुः । १० । २७ ।

एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्या प्रसूयन्ते प्रवरासु च योनिषु ॥")

प्रवरः, पुं, (प्र+वृ+अप् ।) सन्ततिः । इति मेदिनी । रे, १७६ ॥ गोत्रप्रवर्त्तकमुनिव्यावर्त्तको मुनिगणः । तथा च यमदग्निगोत्रस्य प्रवराः यमदग्न्यौर्व्ववशिष्ठाः । भरद्वाजगोत्रस्य भरद्वाजाङ्गिरसबार्हस्पत्याः । विश्वामित्रगोत्रस्य विश्वामित्रमरीचिकौशिकाः । अत्रिगोत्रस्य अत्र्यात्रेयशातातपाः । गोतमगोत्रस्य गोतमवशिष्ठबार्हस्पत्याः । वशिष्ठगोत्रस्य वशिष्ठः । केषाञ्चित् वशिष्ठात्रिसाङ्कृतयः । काश्यपगोत्रस्य काश्यपाप्सारनैध्रुवाः । अगस्त्यगोत्रस्य अगस्त्यदधीचिजैमिनयः । मौकालिनगोत्रस्य मौकालिनाङ्गिरसबार्हस्पत्याप्सारनैध्रुवाः । मौद्गल्यगोत्रस्य और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । पराशरगोत्रस्य पराशरशक्तिवशिष्ठाः । बृहस्पतिगोत्रस्य बृहस्पतिकपिलपार्व्वणाः । काञ्चनगोत्रस्य अश्वत्थदेवलदेवराजाः । विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः । कौशिकगोत्रस्य कौशिकात्रिजमदग्नयः ।कात्यायनगोत्रस्य अत्रिभृगुवशिष्ठाः । आत्रेयगोत्रस्य आत्रेयशातातपसांख्याः । काण्वगोत्रस्य काण्वाश्वत्थदेवलाः । कृष्णात्रेयगोत्रस्य कृष्णात्रेयात्रेयावासाः । साङ्कृतिगोत्रस्य अव्याहाराभिसाङ्कृतयः । कौण्डिन्यगोत्रस्य कौण्डिन्यस्तिमिककौत्साः । गर्गगोत्रस्य गार्ग्यकौस्तुभमाण्डव्याः । आङ्गिरसगोत्रस्य आङ्गिरसवशिष्ठबार्हस्पत्याः । अनावृकाक्षगोत्रस्य गार्ग्यगौतमवशिष्ठाः । अव्ययगोत्रस्य अव्ययवलिसारस्वताः । जैमिनीगोत्रस्य जैमिन्युतथ्यसाङ्कृतयः । वृद्धिगोत्रस्य कुरुवृद्धाङ्गिरोबार्हस्पत्याः । शाण्डिल्यगोत्रस्य शाण्डिल्यासितदेवलाः । वात्स्यगोत्रसावर्णगोत्रयोः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । शालङ्कायनगोत्रस्य शालङ्कायनशालङ्कायनशाकटायनाः । वैयाघ्रपद्यगोत्रस्य साङ्कृतिः । घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः । केषाञ्चित् कुशिककौशिकबन्धुलाः । शक्तिगोत्रस्य शक्तिपराशरवशिष्ठाः । काण्वायनगोत्रस्य काण्वायनाङ्गिरसबार्हस्पत्यभरद्वाजाजमीढाः । वासुकिगोत्रस्य अक्षोभ्यानन्तवासुकयः । गौतमगोत्रस्य गौतमाप्सराङ्गिरसबार्हस्पत्यनैध्रुवाः । केषाञ्चित् गौतमाङ्गिरसावासाः । शुनकगोत्रस्य शुनकशौनकगृत्समदाः । सौपायनगोत्रस्य प्रवराः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । इति धनञ्जयकृतधर्म्मप्रदीपे गोत्रप्रवरविवेकः ॥

प्रवर्गः, पुं, (प्रवृज्यते निःक्षिप्यते हविरादिकमस्मिन्निति । प्र+वृज्+अधिकरणे घञ् ।) होमाग्निः । इति हेमचन्द्रः ।३।५०० ॥ (यथा, हरिवंशे । ४१ । ३४ ।

"दक्षिणाहृदयो योगी महासत्रमयो महान् ।
उपाकर्म्मोष्ठरुचकः प्रवर्गावर्त्तभूषणः ॥"

प्रवर्ग्य इति पाठोऽपि दृश्यते ॥)

प्रवर्त्तकः, त्रि, (प्रवर्त्तयतीति । प्र+वृत्+णिच्+ण्वुल् ।) प्रवर्त्तनकारी । प्रवृत्तिजनकः । यथा,

"प्रवर्त्तकं वाक्यमुवाच चोदनां
निवर्त्तकं मैवमुवाच भाष्यकृत् ।
ततश्च विद्मो नहि चोदनास्ति सा
प्रवर्त्तिका या न भवेदिति स्थितिः ॥"
इति संक्षेपशारीरकम् ॥

(यथा च देवीभागवते । १ । १४ । ४२ ।

"प्रथमं पठिता वेदा मया विस्तारिताश्च ते ।
हिंसामयास्ते पठिताः कर्म्ममार्गप्रवर्त्तकाः ॥"

प्रयोजकः । यथा, भागवते । ९ । १७ । ४ ।

"धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः ।
यज्ञभुग् वासुदेवांशः स्मृतिमात्रार्त्तिनाशनः ॥")

प्रवर्त्तन, क्ली, (प्र+वृत्+णिच्+ल्युट् ।) प्रवृत्तिः । यथा,—

"तेऽन्यैर्वान्त समश्नन्ति परोत्सर्गञ्च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्त्तनम् ॥"
इति काव्यप्रकाशः ॥

आरम्भः । यथा,—

"मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे ।
राजानमामन्त्र्य तत कुर्य्यात् सेतुप्रवर्त्तनम् ॥"
इति मिताक्षरा ॥

प्रवर्त्तना, स्त्री, (प्र+वृत्+णिच्+युच् ।)प्रवृत्तिप्रेरणम् । यथा, नैषधे । २ । ६१ ।

"अथवा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि नः ।
स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥"

प्रवर्त्तितः, त्रि, (प्र+वृत्+णिच्+क्तः ।)जातः । यथा, रघुवंशे । ५ । ३७ ।

"रूपं तदोजस्वि तदेव वीर्य्यं
तथैव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वात् बिभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥"

प्रवर्द्धन, क्ली, प्रपूर्ववृधधातोर्भावे अनट् (ल्युट् ।) विवर्द्धनम् । कर्त्तरि(ल्यु)अनप्रत्यये,वृद्धिकारके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"हृत्मांसं समधुरं कषायानुरसं स्मृतम् ।
वातपित्तोपशमन गुरु शुक्रप्रवर्द्धनम् ॥")

प्रवर्हः, त्रि, (प्रवर्हति प्रवर्हते इति । प्र+वृह+अच् ।) प्रधानम् । श्रेष्ठः । इत्यमरः ।३।१।५७।

प्रवल्लाकी, पुं भुजङ्गः । चित्रमेखलक । इति विश्वः ॥

प्रवहः, पुं, (प्र+वह+भावे+अच् ।) गृहनगरादेर्व्वहिर्गमनम् । इत्यमरः ।३।१।१८ ॥ (प्रवहतीति । प्र+वह्+अच् ।) वायुः । इति हेमचन्द्रः ॥ सप्तवायुन्तर्गतद्वितीयवायुः । स तु आवहवायोरूर्द्ध्वं स्थितः । इति सिद्धान्तशिरोमणिः ॥

"यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः ।"
इति विष्णुपुराणे २ अंशे १२ अध्यायः ॥

अस्य टीका । "यस्माज्ज्योतींषि प्रकर्षेण वहति तेन स वायुः प्रवहः स्मृतः प्रवहस्यैव भेदाः सर्व्वे वायुस्कन्धाः ॥" (मेघविशेषः । यथा स्कान्दे सह्याद्रिखण्डे । ५ । ६ ।

"आवहः प्रवहश्चैव उद्वहासो महांस्तथा ।
परीवहः पश्चमश्च विनहश्च परावहः ॥")

प्रवहणं, क्ली, (प्रोह्यते अनेनेति । प्र+वह्+करणे ल्युट् ।) कर्णीरथः । स्त्रीरत्नवहनार्थं-

मुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः इत्यमरभरती । २ । ८ । ५२ ॥ (यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के । "प्रविश्य सप्रवहणचेट इति ॥")

प्रवह्लिः, स्त्री, (प्रवह्लते आच्छादयतीति । प्र + वह्ल + इन् ।) प्रवह्लिका । इत्यमरटीकायां भरतः ॥

प्रवह्लिका, स्त्री, (प्र + वह्ल + ण्वुल् । टाप् अत इत्वम् ।) प्रहेलिका । इत्यमरः । १ । ६ । ६ ।

प्रवह्ली, स्त्री, (प्रवह्लि + पक्षे ङीष् ।) प्रवह्लिका । इति भरतः ॥

प्रवाक्, [च्] त्रि, (प्रकृष्टा वाग् यस्य ।) वाचोयुक्तिपटुः यथा,—

"वाचोयुक्तिपटुर्वाग्मी वचोज्ञः प्रवचाः प्रवाक् ॥"

इति जटाधरः ॥

(स्त्री, प्रकृष्टा वागिति प्रादिसमासः ।) प्रकृष्टवाक्यञ्च ॥

प्रवाचक, त्रि, (प्रकृष्टं वक्तीति । प्र + वच् + ण्वुल् ।) प्रकृष्टवक्ता । प्रपूर्ब्बवचधातोः कर्त्तरि णकप्रत्ययः ॥

प्रवाणिः, स्त्री, (प्रकर्षेण अयतेऽनयेति । प्र + वे + करणे ल्युट् । ङीप् । निपातनात् ङीपो ह्रस्वः ।) तन्त्रशलाका । इति निष्पुवाणिशब्दटीकायां भरतः ॥ माकु इति भाषा ॥

प्रवाणी, स्त्री, (प्र + वे + ल्युट् + ङीप् ।) तन्त्रशलाका । इति निष्प्रवाणिशब्दटीकायां भरतः ॥ माकु इति भाषा ॥

प्रवादः, पु, (प्रकृष्टो वादः । प्र + वद् + घञ् वा ।) परस्परवाक्यम् । यथा, भट्टिः । २ । ३६ ।

"इत्थं प्रवाद युधि सम्प्रहारं
प्रचक्रतू रामनिशाविहारी ।
त्वणाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निराखत् ॥"

जनरवः । यथा,—

"प्रयास्तोऽहं त्वमपि च मम प्रेयसीति प्रवादस्त्वं मे प्राणा अहमपि तवास्मीति हन्त प्रलापः, त्वं मे तेऽस्यामहमपि च यत्तच्च नो साधु राधे व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः ॥"

इत्यलङ्कारकौस्तुभः ॥

प्रवारः, पुं, (प्रव्रियतेऽनेनेति । प्र + वृ + करणे घञ् ।) प्रवर । वस्त्रम् । प्रपूर्ब्बवृधातोर्घञ् । इति संक्षिप्तसारव्याकरणम् ॥

प्रवारण, क्ली, (प्र + वृ + णिच् + ल्युट् ।) काम्यदानम् । इत्यमरः । ३।२।३ ॥ काम्यस्य कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानम् । काम्येन कामनया वा दानं प्रवारणमुच्यते । काम्यशब्दोऽत्र तन्द्रूपोभयार्थः । प्रकर्षेण वार्य्यते सङ्कल्प्यते प्रवारणं तच्च महादानम् । प्रवारणं महादानमिति त्रिकाण्डशेषः । इति तट्टीकायां भरतः ॥ (प्रकर्षेण वारणमिति ।) निषेधः । इति मेदिनी । णे, १०१ ॥

प्रवासः, पुं, (प्रवसत्यस्मिन्निति । प्र + वस् + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) विदेशः । विदेशस्थितिः । यथा,—

"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता निकृतिं लघिम्ना ।
रामप्रवासे व्यमृशन्नदोषं
जनापवादं सनरेन्द्रमृत्युम् ॥"

इति भट्टिः । ३ । ७ ॥ * ॥

द्वादशवर्षाश्रुतवार्त्ताकप्रोषितस्य तत्प्रवासादिने श्राद्धं कर्त्तव्यम् । यथा,—

"प्रवासवासरे ज्ञेयं तस्मात्सेन्दुक्षयेऽथवा ॥"

इति मिताक्षरा । १ । ७ ॥ * ॥

प्रवासागतेन गुर्वादाभिवादनं कर्त्तव्यम् । यथा,

विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितृ स्वसा ।
संपूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य भूप । संग्राह्या ज्ञातिसम्बन्धियोषितः॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥"

इति कौर्म्मे उपविभागे १३ अध्यायः ॥

प्रवासनं, क्ली, (प्र + वास च्छेदे + ल्युट् ।) वधः । इत्यमरः ॥ (प्र + वस् + णिच् + ल्युट् ।) प्रवासना । यथा, उत्तररामचरित्रे ।

"सीताप्रवासनपटोः करुणा कुतस्ते ॥"

प्रवासी, त्रि, (प्रवसितुं शीलमस्येति । प्र + वस् + "प्रे लपसृद्रुमथवदवसः ।" ३।२।१४५ । इति घिनुण् ।) प्रवासविशिष्टः । प्रोषितः । विदेशस्थः । यथा,—

"अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ
प्रवासी तद्गणो हारिः पाथेयं सम्बलं समे ॥"

इति हेमचन्द्रः । ३ । १६७ ॥

(यथा, मार्कण्डेये । १८ । ५१ ।

लक्ष्मीर्लक्ष्मावता श्रेष्ठा कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारैश्च तथास्येव प्रवासिभिः ॥")

प्रवाहः, पु, (प्र + वह् + भावे घञ् ।) प्रवृत्तिः । (यथा, भागवते । ७ । ८ । ८ ।

"सत्त्वैकतानगतयो वचसां प्रवाहैः ॥"

जलस्रोतः । इति मेदिनी । हे, २१ ॥ (यथा, रघौ । ५ । ४६ ।

"पूर्व्वं तटुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥")

व्यवहारः । इति विश्वः ॥ प्रकृष्टाश्वः । इति नानार्थरत्नमाला ॥ (पुरीषादिनिर्गमः । यथा, सुश्रुते उत्तरतन्त्रे । ४० अध्याये ।

"प्रवाहणे गुदभ्रंशे मूत्राघाते कटिग्रहे ।
मधुराम्लशृतं तैलं सर्पिर्व्वाप्यनुवासनम् ॥")

प्रवाहकः, पु, (प्रवहतीति । प्र + वह् + ण्वुल् ।) राक्षसः । इति शब्दमाला ॥ प्रकृष्टवहनकर्त्तरि, त्रि ॥

प्रवाहिका, स्त्री, (प्रवहति मुहुर्म्मुहुः प्रवर्त्तते इति । प्र + वह् + ण्वुल् । टाप् अत इत्वम् ।) ग्रहणीरुक् । इत्यमरः । २ । ६ । ५५ ॥ (यथा, सुश्रुते सूत्रस्थाने । ३१ अध्याये ।

"प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥"

अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम् । अस्याः स्वरूपमाह चरकः ।

"अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता ।
अपक्वं धारयेत् तत्र पक्वं त्यजति वाप्यधः ॥"

सुश्रुतोऽपि ।

"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता
आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते ॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः ।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति ॥
तस्मात् कार्य्यः परीहारो ह्यतिसारे विरिक्तवत् ॥" * ॥

अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यान्तु बद्धस्यापि मलस्य प्रवृत्तिरिति तयोर्भेदः ॥ * ॥ ग्रहणीरोगस्य भेदं सम्ग्रहग्रहणीरोगमाह ।

"द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत् ।
आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् ॥
पक्षान्मासाद्दशाहाद्वा नित्यञ्चापि विमुञ्चति ।
अन्त्रकूजनमालस्यं दौर्ब्बल्यं सदनं भवेत् ॥
दिवा प्रकोपो भवति रात्रौ शान्तिञ्च गच्छति
दुर्व्विज्ञेया दुर्निवारा चिरकालानुबन्धिनी ॥
सा भवेदामवातेन संग्रहग्रहणी मता ॥"

अथ घटीयन्त्राख्यं ग्रहणीरोगमाह ।

"प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः ।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ॥"

अथ ग्रहणीरोगस्यारिष्टमाह ।

"एभिर्लक्षणैः सिध्यति नातिसारस्तैः स्यात् साध्यो ग्रहणीगदोऽपि ।
वृद्धस्य जायेत यदा गदोऽयं
देहं तदा तस्य विनाशमृच्छेत् ॥" * ॥

अथ सामान्यग्रहणीरोगस्य चिकित्सामाह ।

ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः ॥
दोषं सामं निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि ॥"

संवर्त्तयति घनीकरोति ॥

अथ खड्यूषः ।

"मुद्गयूषं रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात् खड्यूषमिति कीर्त्तितम् ॥"

रसं लघ्वाद्विकमांसभवम् ॥ * ॥

"कर्षं गन्धकमर्द्धपारदमुभे कुर्य्याच्छुभां कज्जलीं तत्र व्योषयमानीपञ्चलवणं सार्द्धञ्च कर्षं पृथक् ।

कुष्ठं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धभागान्वितं
खादेदेकमितं प्रवाहिगदवांस्तक्रस्य पिबेन च॥
लघुनायिकाचूर्णमित्यर्थं ॥ इति लघुलाईचूर्णम्॥
त्रिकटु त्रिफला चैव विडङ्गं जीरकद्वयम् ।
भल्लातकं यवानी च हिङ्गुलवणपञ्चकम् ॥
शटीधूमो वचा कुष्ठं रसो गन्धकमभ्रकम् ॥
क्षारत्रयाजमोदे च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागकृतञ्चैषा चूर्णं श्लक्ष्णं विनिर्म्मितम् ॥
शक्राशनस्य चूर्णन्तु चूर्णतुल्यं प्रदापयेत् ।
मन्दाग्निकासदुर्नामशोथपाण्डुरुचिज्वरान् ॥
विष्टम्भं सग्रहं शूलं हन्यात्सानातिसारजित्
आमवातापहं श्रेष्ठं सूतिकादोषनाशनम् ॥
वर्ज्जयेन्माषमत्स्यञ्च स्नानं पिष्टितभोजनम् ।
पथ्यं काञ्जिकमत्रापि दधितक्रमथापि वा ॥
वृहल्लाईचूर्णमिदं लाईभाषितमुत्तमम् ॥”
इति वृहल्लाईचूर्णम् । वृहन्नायिकाचूर्णमिति
प्रसिद्धम् ॥ * ॥
“जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीशपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गाञ्च तावतीम् ।
सर्व्वचूर्णसमानाश्च प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादन्मधुना प्लावितं जनः ।
नाशयेद्ग्रहणीं कास क्षय श्वासमरोचकम् ॥”
इति जातीफलादिचूर्णम् ॥*॥
चित्रकं पिप्पलीमूल क्षारौ लवणपञ्चकम् ।
व्योष हिङ्ग्वजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्वा दाडिमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥
क्षारौ सर्ज्जिका यवक्षारश्च । लवणपञ्चकमिति ।
“सैन्धवं रुचकञ्चैव विड् सामुद्रकं गडम् ॥” इति ॥
व्योषं शुण्ठीपिप्पलीमरिचानि । अजमोदात्र
यवानिका । मातुलुङ्ग बीजपूरकम् । इति चित्र-
कादिवटिका ॥*॥
“श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः
सगुडः ।
ग्रहणीगदमत्युग्रं तक्रभुजाशीलितो जयति ॥”
श्रीफलशलाटुः बिल्वस्यामं फलम् । गुडस्यात्र
भागद्वयम् । इति बिल्वकल्कः ॥ * ॥
“चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम् ।
वार्त्ताकाः कुडवश्चार्कमूलाद्विपलं तथानलात्
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ॥
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कास श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥”
इति वार्त्ताकुगुटिका ॥*॥
“मुस्तकातिविषाबिल्वकौटजं सूक्ष्मचूर्णितम् ।
मधुना च समालीढं ग्रहणीं सर्व्वजां त्यजेत् ॥”
कौटजं इन्द्रयवः । मुस्तकादिचूर्णम् ॥*॥
“शीतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः
गुडेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥”
सर्ज्जः शालः । सर्ज्जरसचूर्णम् ॥ * ॥
“बिल्वाब्दशक्रयवबालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥”
मोचो मोचरसः । क्षिणोति हन्ति ॥*॥
“प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहवुषाजमोदैः ॥
विडङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
त भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चाय चिरमन्दवह्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम्
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्व्वके ॥”
इति कल्याणकगुडः ॥*॥
“पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकञ्च विडङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी जारकस्तथा ।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विडम् ॥
आरग्वधश्च त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका ।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
मृद्वीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुडस्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
औडम्बरं चामलकं वादरं वा यथा फलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम्
उरोघात प्रतिश्याय दौर्ब्बल्य वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्वरम् ।
पिचुपाठान्वयाद्धन्ति रक्तपित्तञ्च विड्ग्रहम् ॥
धातुक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाः क्षयी च यः
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुडः ॥”
इति महाकल्याणकगुडः ॥*॥
“कुष्माण्डानां सुपक्वानां स्विन्नानां निष्कुलत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विडङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ॥
एकैकस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च ।
तैलस्य च पलान्यष्टौ गुडात् पञ्चाशदेव तु ॥
आमलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्
यावद्दर्व्वीप्रलेपः स्यात्तथैनमवतारयेत् ।
औडम्बरञ्चामलकं वादरं वा यथा फलम्
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ।
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ।
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ॥
कामला पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ।
वातशोणितवीसर्पदद्रुचर्म्मदलोमकान् ॥
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत् ।
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः ॥
तेभ्यो हितो गुडोऽयं स्याद्वन्ध्यानामपि पुत्त्रदः
हृष्यो बल्यो ह वृंहणश्च वयसः स्थापनः परः ॥”
इति कुष्माण्डकल्याणकगुडः ॥*॥
अतीसाराधिकारलिखितं बिल्वतैलञ्चात्र हि-
तम् । इति भावप्रकाशे ग्रहणीरोगाधिकारः ॥
(चिकित्सान्तरमस्या यथा,—
“बालं बिल्वं गुड तैलं पिप्पली विश्वभेषजम् ।
लिह्याद्वात प्रतिश्यायं सशूले सप्रवाहिके ॥
पयसा पिप्पलीकल्क पीतो वा मरिचोद्भवः ।
त्र्यहात् प्रवाहिका हन्ति चिरकालानुबन्धि-
नीम् ॥
कल्कः स्याद्बालबिल्वानां तिलकल्कश्च तत्समः ।
दध्नः सराम्लः स्नेहाढ्यः खड्गो हन्यात् प्रवाहि-
काम् ॥”
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥

प्रवाही, स्त्री, (प्रोह्यते इति । प्र+वह्+
घञ् । गौरादित्वात् ङीष्) वालुका । इति
राजनिर्घण्टः ॥

प्रविख्यातिः, स्त्री, (प्र+वि+ख्या+क्तिन् ।)
अतिप्रसिद्धिः । तत्पर्य्यायः । विश्रावः २ । इत्य-
मरः । ३ । २ ।२८ ॥

प्रविदारणं, क्ली, (प्रविदारयन्त्यत्रेति । प्र+वि+
दॄ+णिच्+आधारे ल्युट् ।) युद्धम् । इत्यमरः ।
२।८।१०३ ॥ (प्र+वि+दॄ+णिच्+भावे
ल्युट् ।)अवदारणम् । इति मेदिनी । णे,११३॥
आकीर्णम् । इति शब्दरत्नावली ॥ (प्र+वि+
दॄ+णिच्+कर्त्तरि ल्युः । प्रविदारके, त्रि ॥)

प्रविरः, पु , पीतकाष्ठम् इति । शब्दचन्द्रिका ॥

प्रविश्लेषः, पु , (प्रकृष्टो विश्लेषो यस्य ।) प्रकृष्ट-
विश्लेष । तत्पर्य्यायः । विधुरम् २ । इत्यमरः ।
३ । २ । १० ॥ यथा,—
“वैक्लव्येऽपि प्रविश्लेषे विधुरं विकलं त्रिषु ॥”
इति भरतधृतत्रिकाण्डशेषः ॥

प्रविषा, स्त्री, (प्रकृष्टं विषमनया ।) अतिविषा ।
इति क्वचिदमरः । २ । ४ । ९९ ॥ (अतिविषा-
शब्देऽस्य विवरणं ज्ञातव्यम् ॥)

प्रविष्टः, त्रि, (प्र+विश्+कर्त्तरि क्तः ।) प्रवेश-
विशिष्टः । यथा,—

"स तं प्रविष्टं वृतमाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

प्रवीणः, त्रि, (प्रकृष्टा संसाधिता वीणाऽस्य । यद्वा प्रवीणयति वीणया प्रगायतीति । प्र+वीण+णिच+अच् । वीणया गायकस्य नैपुण्यप्रसिद्धेस्तत्तुल्यनैपुण्यात् तथात्वम् ।) प्रकृष्ट वेत्ति यः तत्पर्य्यायः । निपुणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृत मुखः ८ कृती ९ कुशलः १० । इत्यमरः । ३ । १ । ४ ॥ (यथा कुमारे । १ । ४८ ।
"विश्वावसुप्राग्रहरैः प्रवीणैः
सङ्गीयमानत्रिपुरावदानः ।
अध्वानमध्वान्तविकारलङ्घ्य-
स्ततार ताराधिपखण्डधारी ॥")

प्रवीरः, पुं, (प्रकृष्टो वीरः ।) सुभटः । (यथा, कथासरित्सागरे । २५ । १४५ ।
"इति तस्या वच. श्रुत्वा स प्रवीरोऽप्युवाच
तान् ॥"
भौत्यस्य मनोः पुत्त्रभेदः । यथा, हरिवंशे ।७।८८
"अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥"
अत्र क्वचित प्रवीणोऽपि पाठः ॥ पुरुवंशीयस्य प्रचिन्वत पुत्त्रः । यथा, तत्रैव । ३१ । ५ ।
„प्रचिन्वत प्रवीरोऽभून्मनस्युस्तस्य चात्मजः ॥"
धर्म्मनेत्रस्य उपदानवीगर्भजातः पुत्त्रभेदः । यथा, तत्रैव । ३२ । ७—८ ।
"तंसोः सुरोधो राजर्षिर्धर्म्मनेत्रः प्रतापवान् ।
ब्रह्मवादी पराक्रान्तस्तस्य भार्य्योपदानवी ॥
उपदानवी सुतान् लेभे चतुरस्तान् सुयोधत. ।
दुष्मन्तमथ सुषन्तं प्रवीरमनघ तथा ॥"
चण्डालपुरुषविशेषः । यथा, मार्कण्डेये ।८।८६
"चण्डालोऽहमिहाख्यातः प्रवीरेति पुरोत्तमे ।
विख्याता वध्यवधको मृतकम्बलहारकः ॥")
उत्तमे, त्रि । इति धरणिः ॥ (यथा, देवीभागवते । २ । ५ । २० ।
"कुरुप्रवीर कुरु मां पतिं त्वं
वृथा न गच्छेन्ननु यौवनं ते ॥")

प्रवृत्त, त्रि, (प्रवर्त्तते स्मेति । प्र+वृत्+क्तः ।) प्रवृत्तिविशिष्टः । यथा,—
"प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टुं भुवनद्विषामसि ।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ॥"
इति शिशुपालवधे । १ । ४० ॥
आरब्धः । यथा,—
"प्रवृत्तमन्यथा कुर्य्यात् यदि मोहात् कथञ्चन
यतस्तदन्यथा भूतं तत एव समापयेत् ॥"
इति छन्दोगपरिशिष्टम् ॥
प्रकृष्टवर्त्तनविशिष्टश्च ॥ (यथा रामायणे ।७। ८० । १ ।
"अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो भृगुनन्दनम् ।
पप्रच्छ च्यवनं विप्रं लवणस्य यथा बलम ॥

प्रवृत्तिः, स्त्री, (प्रवर्त्तते इति । प्र+वृत्+क्तिन् । प्रवाहः । उदन्तः । (यथा, मेघदूते । ४ ।
"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ॥"
प्रवर्त्तनमिति । प्र+वृत्+क्तिन् ।) प्रवर्त्तनम् । (यथा. महाभारते । १२ । ३० । १६ ।
"ववृधे हि ततस्तस्य हृदि कामो महात्मनः ।
यथा शुक्लस्य पक्षस्य प्रवृत्तौ चन्द्रमाः शनैः ॥"
प्रवर्त्तते व्याप्नोति प्रसिद्धत्वेनेति । प्र+वृत्+क्तिच् । यत्नादिव्यापारः । यथा, महाभारते । १ । १ । २५५ ।
"असच्च सदसच्चैव यस्माद्विश्वं प्रवर्त्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्ममृत्युपुनर्भवाः ॥"
"सन्ततिर्ब्रह्मादिः । प्रवृत्तिर्यज्ञादिः ॥"इति तट्टीकायां नीलकण्ठः ॥") अवन्त्यादिदेशः । इति मेदिनी । ते, १३० ॥ हस्तिमदः । इति हेमचन्द्र ।४। २८० ॥ न्यायमते यत्नविशेषः । अस्याः कारणम् । चिकीर्षा । कृतिसाध्यताज्ञानम् । इष्टसाधनताज्ञानम । उपादानप्रत्यक्षम् । यथा,—
"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम् ॥
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्ष प्रवृत्तौ जनक भवेत् ॥"
इति भाषापरिच्छेद ॥
(यथा, पञ्चदश्याम् । ६ १७३ ।
"देहादि पञ्जरं यन्त्र तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"
प्रयत्नसहितादन्तःकरणात् प्रवृत्तिर्जायते ।
यदुक्त कामन्दकीये नीतिसारे । १।३३—३५ ।
"आत्मा मनश्च तद्विद्यरन्तःकरणमुच्यते ।
आभ्यान्तु सप्रयत्नाभ्यां सङ्कल्प उपजायते ॥
आत्मा बुद्धीन्द्रियाण्यर्थो वहिष्करणमुच्यते ।
सङ्कल्पाध्यवसायाभ्यां सिद्धिरस्य प्रकीर्त्तिता ॥
उभे एते हि करणे यत्नानन्तर्य्यके स्मृते ।
तस्मात् प्रवृत्तिसंरोधाद्भावयेन्निर्मनस्कताम् ॥"
"आत्ममनोबुद्धिकर्मेन्द्रियाणां लक्षणमभिधाय बुद्धेरन्तःपरिकल्पनया कारणविभागमभिधातुमाह । आत्मा मनश्चेति । अभिहितेन लक्षणेनेति प्रतिपाद्यते यथा विद्यया साऽन्वयविद्या सा विद्यते येषां ते तद्विद्याः कणादाक्षपादादयः तैः तद्विद्यैः आत्मा मनश्च अन्तःकरणमुच्यते । आभ्या आत्ममनोभ्या प्रयत्नसहिताभ्यां सङ्कल्पः प्रवृत्तिः इन्द्रियप्रवर्त्तन उपजायते । वहि करणमभिधातुमाह । आत्मा बुद्धीति । आत्मा उक्तलक्षणः । बुद्धिः मनः । इन्द्रियाणि बाह्यरूपाणि । अर्थाः शब्दादयः । कर्मेन्द्रियाणा हि उत्सर्गादिका अर्थाः प्रयोजनानि एतत् सर्व्वं बहिःकरणम् । सङ्कल्पः सम्यग्भूतार्थकल्पनं अध्यवसायः प्रयत्नविशेषः ताभ्या अस्य आत्मनः सुखानुभवलक्षणा सिद्धिः प्रकीर्त्तिता । तदेवं अन्तःकरणप्रवृत्तिः प्रयत्नादेव बहिःकरणप्रवृत्तिरपि अध्यवसायलक्षणात् प्रयत्नादेवेति दर्शितं भवति एतदेव समर्थयन्नाह । उभे एते इति । उभे एते अनन्तरोक्ते हि स्फुटं करणे अन्तर्बहिःकरणसंज्ञके यत्नानन्तर्य्यके प्रयत्नानन्तरं वर्त्तेते प्रयत्नप्रेरणादित्यर्थः । तस्मादिति । यस्मादेवं तस्मात् प्रवृत्तिसंरोधात् उभयात्मकस्य प्रयत्नस्यैव संरोधं कृत्वा निर्म्मनस्कतां भावयेत् निर्मनस्कभावं अभ्यस्येत् यावत् प्रयत्न एव निरुद्धो भवति तावदात्मा मनसा न युज्यते ततश्च विद्यमानमपि मनो नास्त्येव मनःकार्य्याकरणात् । अन्तःकरणविशेषात् प्रवृत्तिर्नोपपद्यते । एवमन्तःकरणप्रवृत्त्यभावात् वहिःकरणप्रवृत्तेरप्यभावः । तदभावात् इन्द्रियाणां विषयैः सम्बन्ध एव न स्यात् इति भावः ।"इति तट्टीका)

प्रवृत्तिज्ञः, पुं, (प्रवृत्तिं वृत्तान्तं जानातीति । ज्ञा+कः ।) चारभेदः । तत्पर्य्यायः । वार्त्तिकः २ वार्त्तायन ३ । इति त्रिकाण्डशेषः ॥

प्रवृद्धः, त्रि, (प्रवर्द्धते स्मेति । प्र+वृध्+क्तः ।) वृद्धियुक्तः । तत्पर्य्यायः । प्रौढ़ः २ एधितः ३ । प्रसारितः । तत्पर्य्यायः । प्रसृतः २ इत्यमरः । ३ । १ । ७६ ॥ (यथा, देवीभागवते ।३।८।२९ ।
"सत्त्वं समुत्कटं जात प्रवृद्धं शास्त्रदर्शनात् ।
वैराग्यं तत्फलं जात तामसार्थेषु नारद ! ॥")

प्रवेक, त्रि, (प्रविच्यते पृथक् क्रियते इति । प्र+विच्+कर्म्मणि घञ् ।) उत्तमः । प्रधानम् । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भागवते । २ । ९ । ११ ।
"श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्व्वे चतुर्बाहव उन्मिषन्मणि-
प्रवेकनिष्काभरणाः सुवर्च्चसः ॥")

प्रवेटः, पुं, (प्रवीयते खाद्यते इति । प्र+वी+बाहुलकात् टः ।)यवः । इति त्रिकाण्डशेषः ॥

प्रवेणि, स्त्री, (प्रकर्षेण वीयते इति । प्र+वी गतौ +"वीज्याज्वरिभ्यो नि." उणा० ४।४८ । इति निः । णत्वम् । यद्वा, प्रवेणति सौन्दर्य्यं प्राप्नोतीति । प्र+वेण गतौ+इन् । (कुथः वेणी । इति मेदनी । णे, ६३ ॥)

प्रवेणी, स्त्री, (प्रकर्षेण वीयते इति । प्र+वी गतौ +"वीज्याज्वरिभ्यो निः ।" उणा० ४।४८ । इति निः । णत्वम् । कृदिकारादिति पाक्षिको ङीष् । वेणी । (यथा, रघौ । १५ । ३० ।
"तत्र सौधगतः पश्यन् यमुना चक्रवाकिणीम् ।
हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥")
गजपृष्ठस्थचित्रकम्बलम् । इत्यमरः ।२।८।४८॥ (यथा, महाभारते । १५ । २७ । १३ ।
"अजितानि प्रवेणीश्च स्रुक् स्रुवञ्च महीपतिः ।
कमण्डलूंश्च स्थालीश्च पिठराणि च भारत !॥
नदीविशेषः । यथा, महाभारते ।३।८८।११।
"प्रवेण्युत्तरमार्गे तु पुण्ये कण्वाश्रमे तथा ।
तापसानामरण्यानि कीर्त्तितानि यथाश्रुति ॥"

प्रवेल, पुं, (प्र+वेल्+अच्।) पीतमुद्गः। इति हेमचन्द्रः। ४। २४८॥

प्रवेशः, पुं, (प्र+विश+"हलश्च।" ३। ३। १२१। इति भावे घञ्।) अन्तर्विगाहनम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, कामन्दकीये नीतिसारे। ७। ३९।
"निर्गमे च प्रवेशे च राजमार्गं समन्ततः।
प्रोत्सारितजनं गच्छेत् सम्यगाविष्कृतो-
न्नतिः॥")

प्रवेशनं, क्ली, (प्रविश्यतेऽनेनेति। प्र+विश्+करणे ल्युट्।) सिंहद्वारम्। इति हेमचन्द्रः। ४। ५९॥ (प्र+विश+भावे ल्युट्।) प्रवेशः। यथा हरिवंशे। १७४। ११२।
"तव योगप्रभावेन शक्यं तत्र प्रवेशनम्।
किं मे बहुविलापेन श्रूयतां सखि। कारणम्॥"

प्रवेष्टः, पुं, (प्रवेष्टते इति। वेष्ट् वेष्टने+अच्।) बाहुः। इत्यमरः। २। ६। ८०॥ बाहुनोचभागः। इति शब्दचन्द्रिका॥ हस्तिदन्तमांसम् इति हारावली। ३०॥ गजपृष्ठतल्पनम्। इति त्रिकाण्डशेषः॥

प्रव्यक्तं, त्रि, प्रव्यज्यते स्मेति। प्र+वि+अन्ज्+क्तः।) स्फुटम्। इत्यमरः। ३। १। ८१॥ (यथा सुश्रुते निदानस्थाने द्वितीयाध्याये।
"जातेष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति")

प्रव्रजित, पु, (प्र+व्रज्+क्तः।) वृद्धभिक्षुशिष्यः। तत्पर्य्यायः। चेलुकः २ श्रामणेरः ३ महापाशकः ४ गोमी ५ इति त्रिकाण्डशेषः॥ त्रि, प्रव्रज्याश्रमविशिष्टः॥ (यथा पराशरसंहितायाम्। ४। २६।
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥"
प्र+व्रज्+भावे क्तः। क्ली सन्न्यासः। यथा, महाभारते। ५। १७६। ५।
"अलं प्रव्रजितेनेह भद्रे! शृणु हितं वचः।
इतो गच्छस्व भद्रन्ते पितुरेव निवेशनम्॥")

प्रव्रजिता, स्त्री, (प्रव्रजितस्य लिङ्गमिव जटादिकमस्त्यस्या इति। अच्। टाप।) मांसी। मुण्डीरी। (प्रव्रजित+टाप्। तापसी। इति मेदिनी। ते, २१०॥

प्रव्रज्या, स्त्री, (प्र+व्रज+"व्रजयजोर्भावे क्यप्।" ३।३।९८। इति भावे क्यप्प्रत्ययः।) सन्न्यासः॥ (यथा, महाभारते। ३। १७१। ७।
"बाणवेगं हि कस्तस्य शक्तः सोढुं महात्मनः।
प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः॥"
यथा च कुमारे। ६। ६।
"मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः।
रत्नाक्षसूत्राः प्रव्रज्या कल्पवृक्षा इवाश्रिताः॥"
"अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते 'जहुः परिग्रहव्रीड़ां प्राजापत्यास्तपस्विनः' इति सपत्नीकत्वाभिधानात् 'सुतविन्यस्तपत्नीकः तया वानुगतोऽपि सन्, इति वानप्रस्थस्योभयथा स्मरणात्॥" इति तत्र मल्लिनाथः॥ तथाप्रव्रज्याश्रितानां निन्दनीयत्वमुक्तम्। यथा, मनौ। ५। ८९।
"वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया॥"
क्ली, प्रव्रजनम्। यथा, महाभारते।४।१७।११।
"कोऽहि राज्यं परित्यज्य सर्व्वस्वं चात्मनासह।
प्रव्रज्यायेव दीव्येत विना दुर्द्यूतदेविनम्॥")

प्रव्रज्यावसितः, पुं, (प्रव्रज्याया अवसितो विच्युतः सन्न्यासभ्रष्टः। यथा,—
"तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥"
इति दायभागवचनव्याख्यायां क्रमसंग्रहः॥
(यथा, कात्यायनवचनम्।
"प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः।
निर्व्वासं कारयेद्विप्रं दासत्वं क्षत्त्रवैश्ययोः॥")

प्रशंसा, स्त्री, (प्र+शन्स+भावे अः। स्त्रियां टाप्।) प्रशंसनम्। तत्पर्य्यायः। वर्णना २ ईड़ा ३ स्तवः ४ स्तोत्रम् ५ स्तुतिः ६ नुतिः ७ श्लाघा ८ अर्थवादः ९। इति हेमचन्द्रः। २। १८४॥ (यथा, मनुः। १०। १२७।
धर्म्मेप्सवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः।
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥")
आत्मप्रशंसानिषेधो यथा;—
"न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्ज्जयेत्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥

प्रशमः, पुं, (प्रशमनमिति। प्र+शम्+भावे घञ्।) शमता। उपशमः यथा,—
"एतानि दशपापानि प्रशमं यान्तु जाह्नवि।"
इति तिथ्यादितत्त्वम्॥
(यथा च हरिवंशे। ९८। ८१।
"स तेन वारिणा वह्निस्तत्क्षणात्प्रशमं ययौ॥"

प्रशमन, क्ली, (प्र+शम्+णिच्+ल्युट्।) मारणम्। वधः इति हेमचन्द्रः॥ (प्र+शम्+ल्युट्।) शमता। प्रशान्तिः। यथा,—
"सर्व्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि!।
एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनम्॥"
इति मार्कण्डेयपुराणम्। ९१। ३५।
(प्रतिपादनम्। दानम्। इति कुल्लूकभट्टः॥ यथा, मनुः। ७। ५६।
"तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥"
स्थिरीकरणम्। प्रशमनेन स्थिरीकरणेन। यथा रघुः। ४। १४।
"लब्धप्रशमनस्वस्थमथैनं समुपस्थिता।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा॥")
इति मल्लिनाथः॥

प्रशस्तं, त्रि, (प्रशस्यते स्मेति। प्र+शन्स+क्तः।) क्षेमम्। इति शब्दरत्नावली॥ प्रशंसनीयम्। अतिश्रेष्ठम्। इति मतान्तिकादिशब्दटीकाया भरतः॥ (यथा, रघुः। ५। २५।
"स त्वं प्रशस्ते महिते मदीये
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे॥")

प्रशस्यः, त्रि, प्रशंसनीयः। प्रपूर्व्वशन्सधातोः कर्म्मणि क्यप्प्रत्ययेन निष्पन्नः॥ (यथा, कामन्दकीयनीतिसारे। ११। ५५।
अपयात् तापक्त्वस्यगनुरक्तिफलप्रदः।
अदीर्घकालोऽभीष्टश्च प्रशस्यो मन्त्र इष्यते॥")

प्रशान्, [म] त्रि, प्रकर्षेण शाम्यति यः। (प्र+शम्+क्विप्। "अनुनासिकस्य क्विझलोः क्ङिति।" ६। ४। १५। इति दीर्घः।) शान्तः। इति मुग्धबोधव्याकरणम्॥ (सामर्थ्ये नान्तोऽप्ययोऽयम॥)

प्रशान्तः, त्रि, (प्रकर्षेण शान्तः।) प्रकृष्टशमताविशिष्टः। यथा,—
"प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम्॥"
इति मार्कण्डेयपुराणे। ८१। ९।

प्रशास्ता, [ऋ] त्रि, (प्रशास्तीति। प्र+शास्+तृच्। "प्रसितस्कभितेति।" ७। २। ३४। इति निपातनादिडभावः। यद्वा, 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायाञ्चानिटौ। उणा० २। ९४। इति तृण् इट् च न।) ऋत्विक्। मित्रम्। इति मल्लिनसारोणादिवृत्तिः॥ शासनकर्त्ता॥ (यथा, कामन्दकीयनीतिसारे। १३। ४५।
"प्रशास्त्रध्यक्षसेनानां मन्त्रमात्यपुरोधसाम्।
सम्यक्प्रचारविज्ञानं दृष्टानाञ्चावबोधनम्॥"

प्रश्नः, पुं, (प्रच्छनमिति। प्रच्छ+"यजयाचयतेति।" ३। ३। ९०। इति नङ्। "च्छ्वोः शूडिति।" ६। ४। १९। इति शः। "प्रश्ने चेति" ३। २। ११७। इति ज्ञापकात् न सम्प्रसारणम्।) जिज्ञासा। तत्पर्य्यायः। अनुयोगः २ पृच्छा ३। इत्यमरः। १। ६। १०॥ (यथा, मनुः। १। ११५।
"साक्षिप्रश्नविधानञ्च धर्म्मं स्त्रीपुंसयोरपि॥"
"पृच्छा तन्त्राद्यथाम्नाय विधिना प्रश्न उच्यते॥"
इति चरके सूत्रस्थाने त्रिंशोऽध्याये॥)

प्रश्नदूती, स्त्री, प्रश्नस्य दूतीव।) प्रहेलिका। इति त्रिकाण्डशेषः॥

प्रश्नी, स्त्री, (पृश्निः पृषोदरादित्वात् रः। वा ङीष्।) कुम्भिका। इति त्रिकाण्डशेषः॥

प्रश्रयः, पुं, (प्रश्रयणमिति। प्र+श्रि+भावे अच्।) प्रणय। इत्यमरः। ३। २। २५॥ (यथा कामन्दकीयनीतिसारे। ८। ८।
'अदीर्घसूत्रताशौर्य्यं प्रश्रयः स्वप्रधानता।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः॥')

प्रश्रित, त्रि, (प्र+श्रि+क्तः।) विनीतः। इत्यमरः। ३। १। २५॥ (यथा, रामायणे। १। १३। २।
"अब्रवीत् प्रश्रितं वाक्य प्रसवार्थं द्विजोत्तमम्॥)

प्रश्लथः, त्रि, (प्रकृष्टः श्लथः।) शिथिलः। इति त्रिकाण्डशेषः॥

प्रष्टा, [ऋ] त्रि, (पृच्छतीति। प्रच्छ+तृच्। "व्रश्चेति।" ८। २। ३६। इति षः।) प्रश्नकर्त्ता। तत्पर्य्यायः। कथकथिकः २। इति

त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये ।७५। २९।
"विवेश वह्निशालां वै प्रष्टारं प्राह हव्यभुक् ॥")

प्रष्ठः, त्रि, (प्रतिष्ठते अग्रतो गच्छतीति । प्र + स्था + "सुपि स्थः ।" ३।२।४। इति कः । "प्रष्ठोऽग्रगामिनि ।" ८ । ३ । ९२ । इति षत्वम् ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, रघुः । १५ । १० ।
"आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥")

प्रष्ठवाट्, [ह्] पुं, प्रष्ठः अग्रगामी सन् वहतीति । प्रष्ठ + वह् + "वहश्च ।" ३ । २ । ६४। इति ण्विः ।) युगपार्श्वगः । इत्यमरः । २ । ९ । ६३ ॥ शिक्षार्थं युगवाहिपार्श्वयोजितः । इति भरतः ॥ योजितं युगपार्श्वं दमनार्थं य हालिका भ्रामयन्ति सः । इति मधुः ॥ युवा गौर्दमनाय योजितः । इत्यन्ये ॥

प्रष्ठी, स्त्री, (प्रष्ठ + ङीष् ।) प्रष्ठभार्य्या । अग्रगामिपत्नी । इति जटाधरः ॥

प्रष्ठौही, स्त्री, (प्रष्ठवाह् + "वाहः ।" ४ । १ । ६१ । इति ङीष् ।) बालगर्भिणी । प्रथमगर्भवती गौः । प्रष्ठं प्रथमगर्भं वहति या सा । बाला सती गर्भिणी प्रथमगर्भेत्यर्थः । इति भरतः ॥ (यथा, महाभारते । १३।९३ । ३३ ।
प्रष्ठौहीनां पीवराणाञ्च तावद्
अग्र्या गृष्ट्यो धेनवः सुव्रताश्च ॥")

प्रस, म ष ङ प्रसवे । ततौ । इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक०-सेट् । रेफयुक्ताद्यः । म, प्रसयति । ष, प्रसा । ङ, प्रसते कीर्त्तिं विद्या। प्रसते विस्तारयति वेत्यर्थः । इति दुर्गादासः ॥

प्रसक्तं, क्ली, (प्र + सन्ज + क्त ।) नित्यम् । इति जटाधरः ॥ (यथा माधवकृतरुग्विनिश्चयस्य कासाधिकारे ।
"प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव ॥"
"प्रसक्तवेगः सततकासवेगः ।" इति तट्टीकायां विजयरक्षितः ।) तद्वति, त्रि ॥ (आसक्तः । यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥")

प्रसक्तिः, स्त्री, (प्र + सन्ज + भावे क्तिन् ।) प्रसङ्गः (यथा, किराते । ५ । ५० ।
"मा भूवन्नपथहरास्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसक्तिम् ॥")
अनुमितिः । आपत्तिः । इति सव्यभिचारशिरोमणिः ॥

प्रसङ्गः, पुं, (प्र + सन्ज + घञ् । सङ्गतिविशेषः। यथा,—
"स प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते ॥"
तस्य लक्षणम् । स्मृतस्योपेक्षानर्हत्वम् । तदर्थस्तु स्मृतिविषयतापन्नत्वे सति द्वेषविषयतानापन्नत्वम् । इत्यनुमितिग्रन्थे गदाधरभट्टाचार्य्यः ॥*॥ "प्रकरणान्तरेण समापनं प्रसङ्गः । यथा प्रकारान्तरितो योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति स खल्वेवं कर्म्म पुरुषश्चिकित्सायामधिकृतः ॥' इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ।") अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः । यथा,—
"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
(यथा च देवीभागवते । ३ । ९ । ४२ ।
"अदृष्टमपि तन्नाम प्रसङ्गेनापि भाषितम् ।
ददाति वाञ्छितानर्थान् दुर्लभानपि सर्व्वथा ॥")
प्रसक्तिः । यथा,—
"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता
स्फूर्ज्जद्राक्षसमायया न च कथं रामाङ्गमङ्गीकृतम् ।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्व्वादलश्यामलं
तुच्छं ब्रह्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः ॥"
इति नाटकम् ॥*॥
प्रस्ताव । यथा,—
तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
इति पौराणिकाः ॥*॥
मैथुनम् । यथा । प्रसङ्गनित्यद्रुतपृष्ठयानादिति रुग्विनिश्चयवचनटीकायां विजयरक्षितः ॥ (यथा च देवीभागवते । १ । १२ । २० ।
"कृपयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
परिहृत्य ययुस्तूर्णं नरनारायणाश्रमम् ॥")

प्रसज्यप्रतिषेधः, पु, (प्रसज्य प्रवृत्तिं सम्पाद्य प्रतिषेधो निषधः ।) निषेधविशेषः । तल्लक्षण यथा,
"अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥"
अस्योदाहरणम् । भोजराजः ।
"पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेज्जन्मान्तरं रोगी पितॄणां नोपतिष्ठते ॥"
अत्र रोगीतिनिन्दाश्रवणात् प्रसज्यता । नोपतिष्ठते इति श्रवणात् पर्य्युदासता । इति मलमासतत्त्वम् ॥

प्रसत्तिः, स्त्री, (प्र + सद् + क्तिन् ।) प्रसन्नता । नैर्म्मल्यम् । इति जटाधरः ॥

प्रसत्वरी, स्त्री, (प्रसत्वन् + "वनो र च ।" ४ । १ । ७ । इति ङीब्रौ ।) प्रतिपत्तिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रसत्वा, [न्] पुं, (प्रसीदतीति । प्र + सद् + क्वनिप् ।) धर्म्मः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रसन्नः, त्रि, (प्रसीदतीति । प्र + सद् + गत्यर्थेति क्तः ।) निर्म्मलः । तत्पर्य्यायः । अच्छः २ । इत्यमरः । १।१०।१४ ॥ (यथा, महाभारते । ४ । २७ । २४ ।
"रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥")
सन्तुष्टः । इति मेदिनी ने, ८६ ॥ (यथा, रघुः । ५ । १० ।
अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय ॥")

प्रसन्नता, स्त्री, (प्रसन्न + तल् ।) प्रसन्नस्य भावः । तत्पर्य्यायः । प्रसादः २ । इत्यमरः ।१।३।१६ ॥ (यथा, हठयोगप्रदीपिकायाम् । २ । ७८ ।
"वपुः कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले ॥"

प्रसन्ना, स्त्री, (प्रसन्न + टाप् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ मद्यविशेषः । तस्य गुणाः ।
"प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
इति राजवल्लभः ॥
प्रसादविशिष्टा । यथा, मार्कण्डेये ।८१।४३ ।
"सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥"

प्रसन्नेरा, स्त्री, (प्रसन्ना निर्म्मला इरा जलमिव । मदिरा । इत्यमरटीकायां भरतः ।२।१०।४०॥)

प्रसभः, पुं, (प्रगता सभा सभाधिकारो यस्मात् । बलात्कारः । इत्यमरः । २ । ८ । १०८ ॥ (यथा, श्रीकण्ठचरिते । ५ । ४२ ।
"यस्मिन् विनिर्म्मितवति प्रसभं प्रकोपादत्युग्रनिग्रहनवानुभवोपदेशम् ॥")

प्रसरः, पुं, (प्र + सृ + भावादौ यथायथं अप् ।) तन्तुव्रणविटपादेर्विसर्पणम् । प्रकर्षेण निकटे सरण सर्पणम् । तत्पर्य्यायः । विसर्पः २ । इत्यमरभरतौ । ३।२।२३ ॥ (यथा, रघुः ।१६।२० ।
"तिरस्क्रियन्ते कृमितन्तुजालैर्विच्छिन्नधूमप्रसरा गवाक्षाः ॥"
प्रणयः । वेगः । इति मेदिनी । रे, १८२ ॥ (यथा, कलाविलासे । १ । २१ ।
"इति विनयनम्रशिरसा तेन वचो युक्तमुक्तमवधार्य्य ।
तमुवाच मूलदेवः प्रीतिप्रसरैः प्रसारितोच्छ्वासः ॥")
समूहः । इति शब्दरत्नावली ॥) यथा, आर्य्यासप्तशत्याम् । ५८९ ।
"स्तननूतननखलेखालम्बी तव घर्म्मबिन्दुसन्दोहः ।
आभाति पट्टसूत्रे प्रविशन्निव मौक्तिकप्रसरः ॥"
प्रकृष्टसञ्चरणम् । यथा,—
अत ऊर्द्ध्वं प्रसरं वक्ष्यामः । तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति तेषां वायुर्गतिमत्त्वात् प्रसरणहेतुः सत्यप्यचेतन्ये सहि

रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्व्वभावानाम् । यथा महानुदकसञ्चयोऽतिवृद्धः सेतुमवदार्य्यापरेणोदकेन व्यामिश्रः सर्व्वतः प्रधावत्येवं दोषा कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति ।” इति सुश्रुते सूत्रस्थाने २१ अध्यायः ॥) युद्धम् । इति विश्वः । नाराचः । इति भूरिप्रयोगः ॥

प्रसरणं, क्ली, (प्र + सृ + भावे ल्युट् ।) सैन्यानां सर्व्वतो व्याप्तिः । तत्पर्य्यायः । आसारः २ । इत्यमरः । २ । ८ । ९६ ॥ प्रसरणी ३ प्रसरणिः ४ प्रसारणी ५ । इति रामाश्रमः ॥ सैन्यानां तृणकाष्ठादिहेतवे इतस्ततो गमनम् इति हेमचन्द्रः । ३ । ४५५ ॥ (गमनमात्रम् । यथा, मृच्छकटिके । ३ अङ्के ।

“मार्ज्जारः क्रमणे मृगः प्रसरणे श्येनो गृहालुञ्चने
सुप्तासुप्तमनुष्यवीर्य्यतुलने श्वा सर्पणे पन्नगः ॥”

अभ्युत्थानादिकम् । यथा, भागवते । ५ । १ । २९ ।
“वर्द्धमानानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिरिति ॥”)

प्रसरणी, स्त्री, (प्र + सृ + “अर्त्तिसृभ्यनिः ।” इति अनिः । कृदिकारादिति वा ङीष् ।) प्रसरणम् । इत्यमरटीकायां भरतः । २।८।९६ ।

प्रसर्पणं, क्ली, (प्र + सृप् + ल्युट ।) गमनम् । प्रसरणम् । प्रपूर्व्वसृपधातोर्भावेऽनट्प्रत्ययः ॥ (यथा महाभारते । ३ । १२९ । ६ ।
“प्रसर्पणं महीपाल ! सौम्यायाममितौजसः ।”
गतिसाधने, त्रि । यथा, ऋग्वेदे । १०।६०।७
“इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥”
वर्त्तमानेदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनम् ॥” इति तद्भाष्ये सायनः ॥)

प्रसवः, पुं, (प्र + सू + “ऋदोरप् ।)” ३।३।५७ इत्यप् ।) गर्भमोचनम् । तत्पर्य्यायः । प्रसूतिः २ इत्यमरः । ३।२।१० ॥ यथा, रघुः । ३।१२ ।

“पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥”

गर्भग्रहणम् यथा, मनुः । ९ । ७० ।
“यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात् सकृत्सकृदृतावृतौ ॥”)
उत्पादः । (जन्म । यथा, रघुः । १ । २२ ।
“ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥”
“सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव ।” इति तट्टीकायां मल्लिनाथः ॥) अपत्यम् । (यथा, रघुः । ८ । ३० ।

“ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥”)

फलम् । कुसुमम् । इति मेदिनी । वे, ४२ ॥ (यथा, रघुः । ४ । २३ ॥

“प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥”

आज्ञा । यथा, वाजसनेयसंहितायाम् । १०।२१ ।
“मरुतां प्रसवेन जय ।” “हे धुर्य्य मरुतां देवानां प्रसवेनाज्ञया त्वं जय शत्रूनिति शेषः ॥” इति तद्भाष्ये महीधरः ॥) प्रसवस्य मासनियमो यथा,—

“नवमे दशमे मासि नारी गर्भं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ॥”
इति भावप्रकाशः ॥ * ॥

प्रसूतिकारकौषधादि यथा,—
“पीतन्तु काञ्जिकं रुद्र ! कथितं शरपुङ्खया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्त्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥”
इति गारुडे १९६ अध्यायः ॥ * ॥

अपि च
“पाठालाङ्गलिसिंहास्यमयूरकजटैः पृथक् ।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते ॥
पाठायास्तु शिफा योनौ या नारी संप्रधारयेत्
उषः प्रसवकाले तु सा सुखेन प्रसूयते ॥
तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत् ।
लाङ्गल्याश्चरणौ सूते क्षिप्रमेतेन गर्भिणी ॥
मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम् ।
घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥”
इति चक्रपाणिदत्तः ॥ * ॥

सुखप्रसवमन्त्रो यथा,—
“अस्ति गोदावरीतीरे जम्भला नाम राक्षसी ।
तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥”
सुखप्रसवचक्रं यथा—
“पञ्चरेखाः समुल्लिख्य तिर्य्यगूर्द्ध्वं क्रमेण हि ।
पदानि षड्दशापाद्य त्वेकमाद्ये सुनौ वयम् ॥
नवमे सप्त दद्यात्तु बाण पञ्चदशे तथा ।
द्वितीयेऽष्टावष्टमे षट्दिशि द्वौ षोडशे श्रुतिः ॥
एकादिना समं श्रेयमिच्छाद्वाद्वं त्रिकोणके ।
तदा द्वात्रिंशदादिः स्याच्चतुष्कोष्ठेषु सर्व्वतः ॥
दर्शनाद्धारणात्तासां शुभ स्यादेषु कर्म्मसु ।
द्वात्रिंशत् प्रसवे नार्य्याश्चतुस्त्रिंशद्रणे नृणाम् ॥
भूताविष्टेषु पञ्चाशन्मृतापत्यासु वै शतम् ।
द्वासप्ततिस्तु बन्ध्याया चतुःषष्टी रणाध्वनि ॥
विंश विंशा धान्यकोटेष्वधाविंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिताः ॥”
इति ज्योतिस्तत्त्वम् ॥ * ॥

तस्य वैकृतं यथा,—
गर्ग उवाच
“अकालप्रसवा नार्य्यः कालातीतप्रजास्तथा ।
विकृतप्रसवाश्चैव युग्मप्रसवनास्तथा ॥
अमानुषा अवण्डाश्च न जातव्यञ्जनास्तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्द्दिशेत् ॥
निर्व्वासयेत्तां नृपतिः स्वराष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
किमिच्छकैर्ब्राह्मणतर्पणैश्च
लोके ततः शान्तिमुपैति पापम् ॥”
इति मात्स्ये अद्भुतशान्तिस्त्रीप्रसवविकृतो नाम २०९ अध्यायः ॥ * ॥

प्रसवाद्भुतत्वं यथा,—
“एको वृषस्त्रयो गावः समाख्या नवदन्तिनः ।
सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातकाः ॥”
तिस्र इति वक्तव्ये छान्दसत्वात् त्रय इत्युक्तम् । सिंहप्रसूताश्च स्त्रियो बोध्याः ।
“भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥ *
अत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥”
व्याहृतिभिश्चायं होमः ।
“सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥”
अपि च ।
“सिंहराशौ गते सूर्य्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषौ सूते दिवैवाश्वतरी तथा ॥
तदानिष्टं भवेत्किञ्चित् तच्छान्त्यै शान्तिकञ्चरेत् ।
अस्य वामेति सूक्तेन तद्विष्णोरिति मन्त्रतः ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ॥”
इत्यद्भुतसागरे नारदः ॥

प्रसवकः, पुं, (प्रसवेन पुष्पादिना कायति शोभते इति । कै + कः ।) पियालवृक्षः । इति शब्दमाला ॥ (विवृतिविशेषोऽस्य पियालशब्दे ज्ञातव्यः ॥)

प्रसवबन्धनं, क्ली, (प्रसवानां पुष्पफलानां बन्धनं यत्र ।) वृन्तम् । इत्यमरः । २ । ४ । १५ ॥

प्रसवस्थली, स्त्री, (प्रसवस्य स्थलीव ।) माता । यथा, महानाटके ।

“इयमियं मयदानवनन्दिनी
त्रिदशनाथजितः प्रसवस्थली ॥”

प्रसविता [ऋ] पुं, (प्रसूते जनयतीति । प्र — सू + तृच् ।) पिता इति शब्दरत्नावली ॥ (अनुज्ञाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ७।६३।२
उद्वेति प्रसविता जनानां महान् केतुरर्णवः सूर्य्यस्य ।”
“जनानां सर्व्वेषां प्रसविता सर्व्वेषु कर्म्मसु अनुज्ञाता ॥” इति तद्भाष्ये सायनः ॥)

प्रसवित्री, स्त्री, (प्रसूते इति । प्र + सू + तृच् + ङीप् ।) जनयित्री । (यथा, महाभारते । १२ । २६३ । ८ ॥

"सावित्री प्रसवित्री च वह्निर्वाक् मनसीतत:॥
माता। प्रपूर्वकसूधातो: कर्त्तरि तृण् ङीप् च ॥
प्रसव्य, त्रि, (प्रगतं सव्यादिति।) प्रतिकूलम्। इत्यमर:। ३। १। ८४ ॥ प्रदक्षिणम्। यथा, रामायणे। २। ७३। २० ॥
"प्रसव्यञ्चापि तञ्चक्रुर्ऋत्विजोऽग्निचितं नृपम्'
प्र+सू+कर्म्मणि यत्। प्रसवनीये च ॥)
प्रसह:, पुं, (प्रसहते इति। प्र+सह्+अच्।) बलात्कारेण भक्षकपक्षी। स च कुररश्येनादि:। यथा,—
"प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिता: ॥"
अस्य मांसगुणा:।
"गुरूष्णमधुरा: स्निग्धा वातघ्ना शुक्रवर्द्धना:।'
इति राजवल्लभ:।
अपि च भावप्रकाशे।
"काको गृध्रं उलूकश्च चिल्लश्च शशघातक।
चाषो भाषश्च कुरर इत्याद्या: प्रसहा: स्मृता:॥'
शशघातक: बाज इति लोके।
"प्रसहा: कीर्त्तिता एते प्रसह्य छिद्य भक्षणात्।
प्रसहा' खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये॥
ते शोषभस्मकोन्मादै: शुक्रक्षीणा भवन्ति हि॥"
प्रसहन, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।) हिंस्रपशु:। यथा,—
शार्द्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।
ते कीर्त्तिता: प्रसहना: पलल तदीय-
मश्नं प्रमेहजठरामयजाड्यहारि ॥"
इति राजनिर्घण्ट. ॥
आलिङ्गने. क्ली। यथा,—
"परस्परप्रसहनचुम्बनादिका:
मुदा सुखे बहुलविधा भिदा मता: ॥"
इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी ॥ (प्र+सह्+भावे ल्युट्।) सहने क्ली। सहति, त्रि ॥
प्रसहा, स्त्री, (प्र+सह्+अच्। टाप्।) वृहतिका। इति रत्नमाला ॥ (गुणादयोऽस्या वृहतीशब्दे ज्ञातव्या: ॥)
प्रसह्य, व्य, (प्रकर्षेण सोढ़्वा इति। प्र+सह्+क्त्वो ल्यप्।) हठार्थकम्। बलात्कारार्थम्। इत्यमर:। ३। ४। १० ॥ (यथा, माघे।१।२७
"प्रसह्य तेजोभिरसङ्ख्यतां गतै-
रदस्त्वया नुन्नमनुत्तमं तम: ॥"
प्रसोढ़ुं शक्य इति। प्र+सह्+यत। प्रकर्षेण सोढ़ुं शक्ये त्रि। यथा, रघु:। १४। ६२।
"मन्दैव जन्मान्तरपातकाना
विपाकविस्फूर्जथुरप्रसह्य. ॥")
प्रसह्यचौर:, पु, (प्रसह्य बलात्कारेण चौर:।) हठात् चौर्य्यकारी। डाकाइत इति लुटेरा इति च भाषा ॥ तत्पर्य्याय:। बन्दीकार: २ मोषक. ३ चिल्लाभ: ४। इति त्रिकाण्डशेष: ॥
प्रसातिका, स्त्री, (सो नाशे+भावे क्तिन्। प्रगता सातिर्नाशो यस्या:। कप्।) अणुव्रीहि:। सूक्ष्मधान्यम्। इति रत्नमाला ॥ (यथा, मार्कण्डेये। ३२। ८ ॥
"श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिका:।
नीवारा: पौष्कलाश्चैव धान्यानां पितृतृप्तये ॥"
प्रसाद:, पुं, (प्र+सद्+घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमर:। १। ३। १६ ॥ (यथा, "प्रबोधचन्द्रोदये प्रस्तावनायाम् ॥
"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृत:।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधे: ॥")
अनुग्रह:। (यथा, रघु:। २। ६८।
"तस्या: प्रसन्नेन्दुमुख: प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ॥")
काव्यगुण:। स्वास्थ्यम्। प्रसत्ति:। इति मेदिनी। दे,३५॥ वैदर्भीरीतियुक्तकाव्यगुण:। तस्य लक्षणम्। ग्राम्यशब्दभिन्नव्यक्तार्थपदवत्त्वम्। यथा,—
"ओज:प्रसादमाधुर्य्यगुणत्रितयभेदत:।
गौड़वैदर्भपाञ्चाला रीतय: परिकीर्त्तिता:।
व्यक्तार्थपदमग्राम्यं प्रसाद: परिकीर्त्तित: ॥"
इति काव्यचन्द्रिका ॥ * ॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे।
"चित्तं व्याप्नोति य: क्षिप्रं शुष्केन्धनमिवानल:
स प्रसाद: समस्तेषु रसेषु रचनासु च ॥"
देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषश्च। यथा,
"आसीद्ध्वजध्वजो राजा प्रजापालनतत्पर:।
प्रसादं सत्यदेवस्य त्यक्त्वा दु:खमवाप स: ॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा
प्रसादनं, क्ली (प्रसादयतीति। प्र+सद्+णिच्+ल्यु।) अन्नम्। इति त्रिकाण्डशेष: ॥ (प्र+सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा, बलवर्णप्रसादनमिति राजवल्लभ: ॥ (यथा च महाभारते। ४। ६८। २२।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये ॥")
प्रसादना, स्त्री, (प्र+सद्+णिच्+युच्+टाप्) सेवा। परिचर्य्या। इति हेमचन्द्र: ।३।१६०॥
प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र+साध्+ल्युट्।) वेश:। इत्यमर:। २। ६। ९८ ॥ (यथा, मनु:। २। २११।
"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम ॥"
कङ्कतिका। इति भरतधृतामरमाला ॥ प्रकृष्टनिष्पत्तिश्च ॥(प्र+साध्+णिच्+ल्यु:। प्रसाधयितरि, त्रि। यथा, ऋग्वेदे। १०।५३।२।
"यो यज्ञस्य प्रसाधनस्तं तुर्दवेश्वानत: ॥")
प्रसाधनी स्त्री,(प्रसाध्यतेऽनयेति। प्र+साध्+ल्युट्। ङीप्।) सिद्धि:। इति मेदिनी ।नै,१८५ कङ्कतिका। इत्यमर:। २। ६। १३९ ॥(यथा, सुश्रुते चिकित्सितस्थाने। २४ ॥
'केशप्रसाधनी केश्या रजोजन्तुमलापहा ॥")
तद्युक्तिर्यथा,—
"प्रसाधनी दिङ्नवनागसप्त-
सङ्ख्याभिरुक्ताङ्गुलिभि: क्रमेण।
चतुर्विधानां पृथिवीपतीनां
सम्पत्तिसौभाग्ययश:समृद्धिदा ॥
काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम् ॥
जाङ्गलानूपसामान्यदेशजानां महीभुजाम् ॥
छत्रदण्डवदुक्तेय: काष्ठजाया विनिश्चय:।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा ॥
लौहं सर्व्वञ्च सर्व्वार्थमादित्यादिदशाभुवाम्।
राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी ॥
मृगाणां महिषाणाञ्च सिंहजाता प्रसाधनी।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते ॥
अत्रापि रत्नविन्यासो ज्ञेयश्चामरदण्डवत् ॥"
इति युक्तिकल्पतरु:।
प्रसाधिका, स्त्री, (प्रसाध्यति निष्पादयतीति। प्र+साध्+ण्वुल्। टापि अत इत्वम्।) नीवार:। यथा,—
"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्।"
अस्या गुणा:।
"नीवार: शीतलो ग्राही पित्तघ्न: कफवातकृत्॥"
इति भावप्रकाश' ॥
(प्रसाधयति अलङ्करोतीति ।प्र+साध्+णिच्+ण्वुल्।) वेशकारिणी। यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् द्रवरागमेव ॥"
इति कुमारसम्भवे सप्तम: सर्ग' ॥
(धान्यविशेष: यथा। "अणुव्रीहि: प्रसाधिका।" इति वैद्यकरत्नमालायाम् ॥)
प्रसाधित:, त्रि, (प्र+साधि+क्त:। अलङ्कृत:। इत्यमर:। २। ६। १०० ॥ प्रकृष्टनिष्पन्न:। निष्पादित:। यथा, सारसंग्रहे।
"तत: प्रस्थमितं कल्कं दत्त्वा तोयचतुर्गुणे।
क्षीरे प्रसाधितं तैलं ग्रहघ्नो बलवर्णकृत ॥"
प्रसार:, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति हेमचन्द्र:। ३। ४९८ ॥ (यथा, सुश्रुते ।१।२६
प्रसाराकुञ्चनाकूनं नि:शल्यमिति निर्द्दिशेत् ॥"
प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) पञ्चविधकर्मान्तर्गतकर्म्मविशेष:। स तु विस्ताररूप:। यथा, भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनन्तथा।
प्रसारणञ्च गमन कर्माण्येतानि पञ्च च ॥"
(परिवर्द्धनम्। यथा, कामन्दकीयनीतिसारे। १३। ३५।
"मित्रामित्रहिरण्यानां भूमीनाञ्च प्रसारणम्॥"
प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सारि+ल्युट्। ङीप्।) लताविशेष:। गन्धभादालिया इति भाषा ॥ अस्य गुणा:। वातपित्तनाशित्वम्। उष्णत्वम्। बलशुक्रकारित्वञ्च। इति राजवल्लभ: ॥ सैन्यानां सर्व्वतो व्याप्ति:। इति प्रसरणशब्दटीकायां भरत: ॥
प्रसारिणी, स्त्री, प्रसरतीति। प्र+सृ+णिनि: ङीप्। लज्जालुलता। प्रसारणी। गन्धभादा-

लिया इति भाषा ॥ तत्पर्य्यायः । सुप्रसरा २ सारिणी ३ प्रसरा ४ सरा ५ चारुपर्णी ६ राजबला ७ भद्रपर्णी ८ प्रतानिका ९ प्रबला १० राजपर्णी ११ चन्द्रपर्णी १२ भद्रबला १३ चन्द्र वल्ली १४ प्रभद्रा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । तिक्तत्वम । वातार्शःश्वयथुमलविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥

प्रसारी,[न्]त्रि,(प्रसरतीति । प्र + सृ + णिनिः) प्रसरणशीलः । तत्पर्य्यायः । विसृत्वरः२ विसृमरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १७ । ४४ ।

"प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ॥")

प्रसितं,क्ली, (प्र + सो + क्तः।) पूयम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३।१।८॥ (यथा, रघौ । ८ । २३ ।

"इति शत्रुषु चेन्द्रियेषु च
प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयो-
रुभयीं सिद्धिमुभाववापतु ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र + सि + करणे क्तिन् ।) बन्धनसाधनरज्जुनिगडादिः । इत्यमरः । ३ । २ । १४ ॥ (ज्वाला । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अग्नेरिव प्रसितिर्नाह वर्त्तवे ।"
"प्रसीयते बध्यतेऽनयेति । प्रसितिर्ज्वाला ।"

इति तद्भाष्ये सायनः ॥*॥ भावे क्तिन् । प्रबन्धनम । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"शूरस्येव प्रसितिः क्षातिरग्नेः ॥")

प्रसिद्धः त्रि, (प्रसिध्यतीति । प्र + सिध् + गत्यर्थेति क्तः ।) भूषितः ख्यातः । इति मेदिनी । धे, ३४॥ (यथा, पञ्चदश्याम् । ४ । ५७ ।

"काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥")

प्रसिद्धिः, स्त्री, प्र + सिध् + क्तिन् ।) टङ्कारः । ख्यातिः । इति त्रिकाण्डशेषः (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्याश्चतस्र एवैता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्धार्थं यासु लोको व्यवस्थितः ॥")

भूषा । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसूः, स्त्री, (प्रसूत इति । प्र + सू + "सत्सूद्विषेति ।" ३।२।६१ । इति क्विप् ।) माता इत्यमरः । २ । ६ । २९ ॥ (यथा, ब्रह्मवैवर्त्ते २ । १ । १२८ ।

"पितॄणां मानसी कन्या मेनका साम्बिकाप्रसूः॥"

घोटकी । इत्यमरः । ३ । ३ ।२२८॥ कदली । वीरुत् । इति मेदिनी । से, ४॥ (प्रसवकर्त्री । यथा सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।

"प्रशंसिनी स्यन्दते तु क्षोभिता दुःप्रसूश्च या ॥")

प्रसूका, स्त्री, (प्रसूरेव । प्रसू + स्वार्थे कन् ।) वाजिनी । इति राजनिर्घण्टः ॥

प्रसूतं, क्ली, (प्रसूयते इति । प्र + सू + क्त ।) कुसुमम् । इति मेदिनी । ते, १२४ ॥

प्रसूतः, त्रि, (प्र + सू + क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")

सूतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र + सू + कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूता स्त्री स्नेहपानं विवर्ज्जयेत् ॥"

यथा च हरिवंशे । ८४ । १०१ ।

"श्रूयन्ते हि स्त्रियो बह्व्यो व्यभिचारव्यतिक्रमैः
प्रसूता देवसङ्काशान् पुत्त्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री,(प्रसूयते इति । प्र + सू + क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"कृष्णा वचा चापि जलेन पिष्टा
सैरण्डतैला खलु नाभिलेपात् ।
सुखं प्रसूतिं कुरुतेऽङ्गनानां
निपीडितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र + सू + भावे क्तिन्) उद्भवः । (यथा, शकुन्तलायाम् ४ अङ्के ।

"आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ते, १२९ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कच्चिन्मृगीणामनघा प्रसूतिः ॥"

कारणम् । यथा, रघुः । २ । ६३ ।

" न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २३३ । १४ ।

"त्वं सर्व्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने । भवसि प्रतिष्ठा ॥"

दक्षपत्नी । सा तु सतीजननी । यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"देवहूतिः कर्द्दमस्य प्रसूतिर्दक्षकामिनी ॥")

प्रसूतिका, स्त्री, प्रसूतः सूतोऽस्या अस्तीति । ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिजं, क्ली, (प्रसूतेरुद्भवमारभ्य त्यर्थः जायते इति । जन् + डः ।) दुःखम् । इत्यमरः।१।८।३।

प्रसूनं,क्ली,(प्रसूयते स्मेति । प्र + सू + क्तः । ओदित्वात् निष्ठातस्य नः ।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अवाकिरन् बाललताः प्रसूनै-
राचारलाजैरिव पौरकन्याः ॥")

फलम् । इत्यमरः । ३ । ४ । १७॥ जाते, त्रि । इति मेदिनी, ने । ८७ ॥

प्रसूनेषुः,पुं,(प्रसूनं पुष्पं इषुर्बाणो यस्य । कामदेवः । इति त्रिकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र + सृ + क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा,सुश्रुते चिकित्सितस्थाने ६

"कृष्णतिलप्रसृतं प्रकुञ्चं वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम् ॥"
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

प्रसृतः, पुं, (प्र + सृ + क्तः ।) निकुब्जपाणिः । अर्द्धाञ्जलिः । इत्यमरः । २ । ६ । ८५॥ (यथा, शतपथब्राह्मणे । ४ । ५ । १० । ७।

"यद्यनुलभेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥"

प्रसृतः, त्रि, (प्र + सृ + क्तः ।) प्रहृष्टः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा,देवीभागवते । १ । १४ । ५ ।

"न शशाक नियन्तुञ्च स व्यासः प्रसृतं मनः ॥")

विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति त्रिकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । ३६० ॥

प्रसृता, स्त्री, (प्र + सृ + क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते,१२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र + सृ + क्तिन् ।) प्रसृतः । आकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत्तस्माज्जलाञ्च प्रसृतित्रयम् ॥"

सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।

"वर्द्धितानि प्रसृत्या वै विनताकुलकर्त्तृभिः ॥"

प्रसूत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,

"पलाभ्यां प्रसृतिर्ज्ञेया———॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

प्रसेकः, पु, (प्रसेचनमिति । प्र + सिच् + घञ् ।) सेचनम् । च्युतिः । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥"

रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।

"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्तिमूलकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १७९ ॥ प्रमोदिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्व्वसदधातोः कर्त्तरि क्वसुप्रत्ययनिष्पन्नः ॥

प्रसेव, पुं,(प्रसीव्यते स्मेति । प्र + सिव + "अकर्त्तरि चेति ।" ३ । ३ । १९ । इति घञ् ।) वीणाङ्गम् । स्यूतः । इति मेदिनी । वे, ४३ ॥

प्रसेवकः, पुं, (प्र + सिव + ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) वीणाप्रान्तवक्रकाष्ठम् । दण्डाधः शब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणा आच्छाद्य दीयते सः । इत्यन्ये । वीणाश्रितालावूफलम् । इत्यपरे । इति भरतः ॥

तत्पर्य्यायः । ककुभः २ । इत्यमरः । १।७।७ ॥ सूत्ररचितभाण्डम् । धोकड़ा इति ख्यातः । तत्पर्य्यायः । स्यूनः २ स्योनः ३ धौतकटः ४ स्योतः ५ स्यूतः ६ । इति भरतः ॥ (यथा, सुश्रुते । १ । ८ ।

"इतिवस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्य-योग्यम् ॥") प्रकृष्टतन्तुसन्तानकर्त्ता च ॥

प्रस्कण्वः, पुं, (प्रगत कण्वं पापं यस्मादिति । "प्रस्कण्वहरिश्चन्द्रावृषौ ।" ६।१।१५३ । इति सुट् ।) ऋषिविशेषः । स च वैदिकसन्ध्यान्तर्गतसूर्य्योपस्थानमन्त्रस्य ऋषिः । (यथा, ऋग्वेदे । १ । ४४ । ६ ।

"प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥")

प्रस्कन्दनं, क्ली, (प्र + स्कन्द + ल्युट् ।) विरेकः । इति रत्नमाला ॥ (यथा, महाभारते । १ । ८४ । २६ ।

"अग्निप्रस्कन्दनपरस्त्वञ्चाप्येवं भविष्यसि ॥")

प्रस्कन्नः, त्रि, (प्रकर्षेण स्कन्नः ।) पतितः, त्रि । इति हेमचन्द्रः ॥

प्रस्तरः, पुं, प्रस्तृणाति आच्छादयति यः । (प्र + स्तॄ + पचाद्यच् ।) शिला । पातर इति भाषा । तत्पर्य्यायः । ग्रावा २ पाषाणः ३ उपलः ४ अश्मा ५ दृषत् ६ इषत् ७ पाराङ्कः ८ पारटीटः ९ मरुः १० काचकः ११ शिला १२ ॥ पल्लवादिरचितशय्या । यथा,—

"पल्लवाद्यैर्विरचिते शयनीये तु संस्तरः । प्रस्तरः प्रस्तिरश्चेति प्रस्तारोऽपि च कुत्रचित् ॥"

इति शब्दरत्नावली ॥

(यथा, मनुः । २ । २०४ ।

"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च । आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥")

मणिः । इति मेदिनी । रे, १८१ ॥

प्रस्तरिणी, स्त्री, (प्रस्तरस्तदाकारोऽस्त्यस्या इति प्रस्तर + इनिः ङीप् ।) गोलोमिका । इति राजनिर्घण्टः ॥ (विपर्य्यास्या गोलोमिकाशब्दे ज्ञेयः ॥)

प्रस्तारः, पु, (प्र + स्तॄ + घञ् ।) तृणवनम् । तत्पर्य्यायः । तृणाटवी २ कक्ष ३ । इति हेमचन्द्रः । ४ । १७७ ॥ पल्लवादिविरचितशयनीयम् । इति शब्दरत्नावली ॥ शय्या । इति हारावली ॥ छन्दःप्रभृतीनां प्रभेदज्ञापकसङ्केतविशेषः । यथा,—

"पादे सर्वगुरावाद्यात् लघु न्यस्य गुरोरधः । यथोपरि तथा शेषं भूयः कुर्य्यादमुं विधिम् ॥ ऊनं दद्यात् गुरूनेव यावत् सर्वलघुर्भवेत् । प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥"

इति वृत्तरत्नावली ॥ ७ ॥

अपि च । "पढमपत्थारे । पढम गुरु हेट्ठ ठाणे लहुआ परिठवहु अप्पबुद्धी ए । सरिसा सरिसा पन्ती उव्वरिआ गुरुलहू देहु ॥" अस्य टीका । एतद्दर्शन प्रस्तारज्ञानाधीनमिति प्रस्तारं दर्शयति । प्रथमं गुरोरधःस्थाने लघुकं स्थापय आत्मबुद्ध्या सदृशी सदृशी पंक्तिश्चेदुद्वृत्तौ गुरुलघू देहि सदृशी पंक्तिर्दक्षिणे कार्य्या वामे गुरुलघुभिः पूरणं कार्य्यं इदन्तु मात्राप्रस्तारविषयं तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः अपरत्र लघुर्देयः । वर्णप्रस्तारे तु गुरुरेव पूरणे कार्य्यं तत्रायं प्रकारः आदौ गुरुर्लेख्यः तत्र प्रथमं गुरोरधःस्थाने लघुर्लेख्यः तद्दक्षिणे चोपरिस्थितपङ्क्तिः सदृशी कार्य्या वामे च गुरुलघुभिः पूरणं कार्य्यं वामे चैक एकलघुः पतति वर्णप्रस्तारे तु वामे लघुस्थापनं नास्ति यथा त्रिकलप्रस्तारे । ऽऽ । प्रथमगुरोरधो लघुर्वामतश्च कलाद्दर्शनं पूरणं गुरुणैव कार्य्यं दक्षिणे च पङ्क्त्यभावः ततो गुरोरधो लघुर्लेख्यः दक्षिणे च लघोरधो लघुर्लेख्यः वामे च कलापूरणं एकेन लघुना कार्य्यं एवं चतुष्कला-ऽऽ दावपि बोध्यं यथा अक्षरच्छन्दसिऽऽएवमन्यत्रापि बोध्यम् ॥ अथ सकलप्रस्तारसङ्ख्या । दव्वीसा सत्तसआतह सत्तावह सहस्साइं वावालिसह लक्खं तेरहकोडी समग्गाइं । अस्य टीका । अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती सङ्ख्येत्यत आह । १३४,२१७,७२८,षड् विंशतिः समशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षाण्यत्रयोदशकोट्यः समग्राणि अङ्कस्य वामा गतिरित्यङ्का स्थाप्याः । इति पिङ्गलः शोभाबोधभूषणञ्च ॥

प्रस्तार्य्यर्म्म, [न्] क्ली, नेत्ररोगभेदः । तस्य लक्षणम् ।

"प्रस्तार्य्यर्म्म तनुस्तीर्णं श्यावं रक्तनिभं सितं ॥"

इति माधवकर ॥

अपि च ।

"समस्तादिस्तृतः श्यावो रक्तो वा मांससञ्चयः । सन्निपातेन दोषाणां प्रस्तार्य्यर्म्म तदुच्यते ॥"

इति रक्षितकृतनिमिः ॥

तस्यौषधम् ।

"कतकस्य फलं शङ्खं त्रपुषं सैन्धवान्वितम् । फेनो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ॥ कुक्कुटाण्डकपालानि वर्त्तिरेषा व्यपोहति । तिमिरं पटलं काचमर्म्मशुक्रं तथैव च ॥ कण्डूक्लेदार्बुदं हन्ति मलमाशु सुखावती ॥"

इति चक्रपाणिदत्तः ॥

प्रस्तावः, पु, (प्र + स्तु + "प्रे द्रुस्तुस्रुवः ।" ३।३। २७ । इति घञ् ।) अवसरः । इत्यमरः । ३ । २ । २४ ॥ प्रसङ्गस्तुतिः ॥ इति भरतः ॥ प्रसङ्गः इति भानुदीक्षितः ॥ (यथा, मृच्छकटिके । ८ अङ्के । "प्रस्तावेनाधिकरणिकस्त्वाद्रष्टुमिच्छतीति ॥") प्रकरणम् । यथा,—

"प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ॥"

इत्यस्यार्थे काव्यप्रकाशः ॥

प्रस्तावना, स्त्री, (प्रस्तावयति विज्ञापयति कार्य्यादिकमिति । प्र + स्तु + णिच् + युच् । टाप् ।) आरम्भः । इति जटाधरः ॥ सूत्रधारेण सह नटीविदूषकादीनां परस्परविचित्रभाषणम् । तस्या लक्षणम् । यथा,—

"नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते ॥ चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ॥ आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥"

इति साहित्यदर्पणम् ॥

प्रस्तिरः, पुं, (प्रस्तरः । निपातनात् इत्वम् ।) पल्लवादिरचितशय्या । इति शब्दरत्नावली ॥

प्रस्तीतः, } त्रि, (प्र + स्त्यै + क्तः । "प्रस्त्योऽन्यतरस्याम् ।" ८ । २ । ५४ । इति निष्ठातस्य मो वा ।) संहतः । ध्वनितः । प्रपूर्व्वस्त्यैधातोः कर्म्मणि क्तप्रत्ययः । इति मुग्धबोधव्याकरणम् ॥
प्रस्तीमः,

प्रस्तुतः, त्रि, प्रस्तूयते स्मेति । प्र + स्तु + क्तः ।) प्रकरणप्राप्तः । यथा,—

"अप्रस्तुतप्रशंसा सा या सैव प्रस्तुताश्रया ॥"

इति काव्यप्रकाशः ॥

प्राकरणिकः । प्रासङ्गिकः । इत्यलङ्कारकौस्तुभः ॥ निष्पन्नः । यथा । प्रस्तुतद्वृत्तिमेयट् । अन्न प्रस्तुतं अन्नमयम् । यवागूः प्रस्तुता यवागूमयी । इति कलापतद्धितः ॥ प्रकर्षस्तुतियुक्तः । प्रपूर्वस्तुधातोः कर्म्मणि क्तः । उपस्थितः । प्रतिपन्नः । उद्युक्तः । इति लोकव्यवहारदर्शनात् ॥

प्रस्तृतः, त्रि, (प्र + स्तॄ + क्तः ।) अन्तरितः । इति त्रिकाण्डशेषः ॥

प्रस्थः, पुं, (प्रकर्षेण तिष्ठतीति । प्र + स्था + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । यद्वा, प्रतिष्ठतेऽस्मिन्ननेन वेति घञर्थे कः ।) परिमाणविशेषः । स तु चतुःकुड़वरूपः । इत्यमरभरतौ ॥ आढ़कचतुर्थांशः । इति लीलावती ॥ द्विशरावपरिमाणम् । इति वैद्यकपरिभाषा ॥ (यथा, सुश्रुते शारीरस्थाने । ८ । अध्याये ।

"बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः । परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे ॥")

प्रस्थः, पु, क्ली, (प्र + स्था + कः ।) अद्रेः समभूभागः । अद्रेरेकदेशः । इति भरतः ॥ तत्पर्य्यायः । स्नुः २ सानुः ३ । इत्यमरः । २ । ३ । ५ ॥ (यथा, कुमारे । १ । ५४ ।

"प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किञ्चित् क्वणत्किन्नरमध्युवास ॥)

उच्छ्रितवस्तु । इति मेदिनी ॥ विस्तारः । यथा,

"दीर्घं प्रस्थं समानञ्च न कुर्य्यान्मन्दिरे बुधः ॥"

इति ब्रह्मवैवर्त्ते जन्मखण्डे १०३ अध्यायः ॥ प्रकर्षस्थितिविशिष्टे, त्रि ॥

प्रस्थपुष्पः, पुं, (प्रस्थमितं पुष्पमस्य ।) मरुवकः । इत्यमरः । २ । ४ । ७९ ॥ (तत्पर्य्यायो यथा,— भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"मारुतोऽसौ मरुवको मरुन्मरुरपि स्मृतः । फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥")

स्वल्पपत्रतुलसी । जम्बीरभेद: । इति केचित् ॥ जम्बीरसामान्यम् । इति केचित् । इति तट्टी-कायां भरत: ॥

प्रस्थानं, क्ली, (प्र + स्था + ल्युट् ।) विजीगीषो: प्रयाणम् । इत्यमर: । २ । ८ । ९५ ॥ (यथा, देवीभागवते । ५ । ४ । १२ ।

"सेनाभियोगं प्रस्थानं बलसंख्या यथार्थत: ।
धीराणाञ्च परिज्ञानं ज्ञात्वा यान्तु त्वरान्विता:॥")

गमनमात्रम् । यथा, पदाङ्कदूते ।

"प्रस्थानन्ते कुलिशकमलमालिखितं पण्डितायै:")

प्रस्थानविघ्न:,पुं, (प्रस्थानस्य विघ्न: ।) गमन-व्याघात: । यथा । य: पुनर्विवाहावसरे मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानौप-यिकं कर्म्म प्रागङ्गीकृत्य तदानीं न करिष्या-मीति प्रस्थानविघ्नमाचरति तदसौ द्विगुणां भृतिं दाप्य: । इति मिताक्षरा ॥

प्रस्थापित:, त्रि, (प्र + स्था + णिच् + क्त: ।) प्रेषित: । इति हेमचन्द्र: ॥ प्रकर्षेण स्थापितश्च॥

प्रस्थिका, स्त्री, (प्रस्थस्तदाकारोऽस्त्यस्या इति । प्रस्थ + ठन् ।) अम्बष्ठा । इति भावप्रकाश: ॥

प्रस्फुट:, त्रि, (प्रस्फुटति विकशतीति । प्र + स्फुट् + क: ।) प्रफुल्ल: । इति शब्दरत्नावली ॥ (सुस्पष्ट: । यथा, मार्कण्डेये । २७ । २१ ।

"निष्कृष्य शासनं तस्मादृष्टे प्रस्फुटाक्षरम्॥")

प्रस्फोटनं,क्ली, (प्रस्फोट्यतेऽनेनेति । प्र + स्फुट् + णिच् + करणे ल्युट् ।) सूर्पम् । इत्यमर: । २ । ९ । २६ ॥ (प्र + स्फुट् । भावे ल्युट् ।) ताडनम् । विकाशनम् । इति मेदिनी । ने, १९२ ॥ पवनम् । तुषादिशोधनम् । इति हेम-चन्द्र: । ४ । ८३ ॥

प्रस्रवणं,क्ली,(प्रस्रवति जलमस्मादस्मिन्निति वा । प्र + स्रु + अपादाने अधिकरणे वा ल्युट् । यत्र स्थाने स्नुत्वा जलं गलति तत् । इति भरत: ॥ अविच्छेदेन स्वल्पं जलं यत्र स्थाने पतति यत्र निपत्य च बहुलीभवति तत् । इति स्वाम्या-दय: ॥ गिरेरुपरि निर्झरादिप्रभवजलसधात: इति साञ्च: ॥ (यथा, हरिवंशे ।८ । ५४।११ ।

"पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गत: ।
प्रभावञ्च सरस्वत्या: प्लक्षप्रस्रवणं बल: ॥")

अजस्रं मन्दवेगेन स्वल्पजलम् । इति कोकट: ॥ तत्पर्य्याय: । उत्स २ । इत्यमर: । २ । ३ । ५ ॥ जलप्रस्राव: ३ । यथा, मनु: । ४ । २०३ ।

"स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥")

अस्य गुणा: । प्रस्रवणजलं स्वच्छं लघु मधुरं रोचनञ्च दीपनकृत् ॥ इति राजनिर्घण्ट: ॥ (प्र + स्रु + भावे ल्युट् ।) प्रकर्षेण क्षरणम् ॥

प्रस्रवण:,पुं,(प्रस्रवति जलमस्मादिति। प्र + स्रु + अपादाने ल्युट् । माल्यवत्पर्वत: । इति हेम-चन्द्र: ।४।९५ ॥ स्वेद: । इति त्रिकाण्डशेष: ॥

प्रस्राव:, पुं, (प्रस्रूयते इति । प्र + स्रु + "उदुस्नु-स्रुव: ।" ३ । ३ । २७ । इति घञ् ।) मूत्रम् । इत्यमर: ।२ । ६ । ६७ ॥ गोप्रस्रावमाहात्म्य

यथा, वराहपुराणे ।

"प्रस्रावेण तु य: स्नायात् रोहिण्यां मानवो द्विज: ।
सर्व्वपापक्षतान्दोषान् दहत्याशु न संशय: ॥"

(गुणादयोऽस्य मूत्रशब्दे ज्ञातव्या ॥)

प्रस्वान:, पुं, उच्चै:शब्द: । प्रपूर्व्वस्वनधातोर्घञ्-प्रत्ययेन निष्पन्न: ॥

प्रस्वेद:,पुं,(प्र + स्विद् घर्म्मस्रुतौ + घञ्)अति-शयघर्म्म: । (यथा, मार्कण्डेये । १२४ । १३ ।

"नरेन्द्रपुत्रा प्रस्वेदजलक्लिन्नानना: समम् ॥")

तस्यौषधं यथा,—

"चन्दनं कुङ्कुमं मासी कर्पूरो जातिपत्रिका ।
जातीककोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुश्चौरकाश्मर्य्य: कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च बालं मदनकं नखम् ॥
सरल: सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्व्वूरक: पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ।
पुमान् युवा स्यात् शक्राभ: स्त्रीणामत्यन्त-वल्लभ: ॥
स्त्रीगतं गच्छते वृद्ध । वन्ध्यापि लभते सुतम्॥"
इति गारुडे १९८ अध्याय: ॥

(विषयोऽस्य यथा,—

"स्तैमित्यं मधुरास्यता च जडता निद्रा च तन्द्रा भ्रम:
गात्राणां गुरुताऽरुचिर्विरमता रोमोद्गम: शीतता ।
प्रस्वेद: श्रुतिबाधनञ्च कुरुते नेत्रे च पाण्डुच्छवि-
विष्टब्धामलवर्त्तिका च वमनं श्लेष्मज्वरे विद: ॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

प्रहत, त्रि, (प्रहन्यते स्मेति । प्र + हन् + क्त: ।) विततम् । क्षुण्णम् । इति शब्दरत्नावली ॥ प्रक-र्षेण हिंसितम् । (यथा, महाभारते ।८।३०।६।

"प्रहतरथनराश्वकुञ्जरं
प्रतिभयदर्शनमुल्बणव्रणम् ।
तदहितहतमाबभौ बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥")

प्रकर्षेण गतश्च ॥ (विताडितम् । यथा, । भाग-वते । १० । ७२ । ३८ ।

"इत्थं तयो: प्रहतयोर्गदयोर्नृ वीरौ
क्रुद्धौ स्वमुष्टिभिरय:स्पर्शैरपिष्टाम् ॥"

वादितम् । यथा, रघु: । १९ । १४ ।

"स स्वयं प्रहतपुष्कर: कृती
लोलमाल्यवलयो हरन् मन: ।
नर्त्तकीरभिनयातिलङ्घिनो:
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥")

प्रहनेमि:,पुं, (प्रहाणा नेमिरिव । निपातनात् ग्रस्य प्र: ।) चन्द्र: । इति त्रिकाण्डशेष: ॥ (ग्रहनेमिरिति वा पाठ: ॥)

प्रहर:, पुं, (प्रक्रियते डक्कादिरस्मिन्निति । प्र + हृ + घ: । अप् वा ।) यामस्याष्टभागैक-भाग: । पहर इति हिन्दीभाषा । तत्पर्य्याय: ।

याम: २ । इत्यमर: । १ । ४ । ६ ॥ (यथा, कथासरित्सागरे । ४ । ३७ ।

"सह तेन द्वितीयेऽस्मिन् प्रहरे पर्य्यकल्पयत्॥")

प्रहरकुटुम्बी,स्त्री,(प्रहरस्य कुटुम्बी कुटुम्बिनीव") कुटुम्बिनीक्षुप: । इति राजनिर्घण्ट: ॥

प्रहरणं, क्ली, (प्रह्रियतेऽनेनेति । प्र + हृ + करणे ल्युट् ।) अस्त्रम् । इत्यमर: । २।८।८२॥ (यथा, महाभारते । १२ । १६६ । २ ।

"धनु: प्रहरणं श्रेष्ठमतोवात्र पितामह ! ॥")

कर्णीरथ: । इति तट्टीका सारसुन्दरी ॥ (यथा,) भागवते । ४ । २६ । २ ।

"पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥"

प्रह्रियतेऽस्मिन्निति ।) युद्धम् । इति हलायुध: । २ । २९८ ॥ (प्र + हृ + भावे ल्युट् ।) प्रहार: ॥ (यथा, महाभारते । ४ । ४ । ७ ।

"यानं प्रहरणं चैव तथैवाग्निञ्च भारत ! ॥")

प्रहरी, [न्] त्रि, यामिक: । प्रहरो विद्यते अस्येतिप्रहरशब्दात्स्त्वर्थे इन् प्रत्ययेन निष्पन्न:।

प्रहर्ष:, पुं,(प्रहर्षयतीति । प्र + हृष् + णिच् + अच् ।) बुधग्रह: । इति त्रिकाण्डशेष: ॥ हर्ष-विशिष्टे, हर्षकारके च, त्रि ॥ यथा, महा-भारते । १ । २७ । ८ ।

"नानापक्षिरुतं रम्यं कद्रुपुत्रप्रहर्षणम् ॥"

प्र + हृष + भावे ल्युट् । आनन्दे क्ली । यथा, महाभारते । १२ । ३३६ । २५ ।

"अथ व्रतस्यावभृते वागुवाचाशरीरिणी ।
स्निग्धगम्भीरया वाचा प्रहर्षणकरी विभो ।")

प्रहर्षणी,स्त्री,(प्रहर्षयतीति । प्र + हृष् + णिच् + ल्यु । ङीप् ।) हरिद्रा । इति हारावली । त्रयोदशाक्षरपादच्छन्दोभेद: । तस्या लक्षणं यथा । छन्दोमञ्जर्य्याम् । "त्र्याशाभिर्मनजरगा प्रहर्षणीयम् ।" तस्या उदाहरणं यथा,—

"गोपीनामधरसुधारसस्य पाने-
रुत्तुङ्गस्तनकलसोपगूहनेषु ।
आसक्तैरपि रतिविभ्रमैर्मुरारे:
संसारे मतिरभवत् प्रहर्षणीह ॥"

प्रहसनं,क्ली,(प्र + हस् + भावे ल्युट् ।) प्रहास: । (प्रहसत्यत्रानेन वा । प्र + हस् + आधारे करणे वा ल्युट् ।) रूपकभेद: । परिहास: । इति मेदिनी । ने, १९० ॥ आक्षेप: । इति हेमचन्द्र: ॥ रूपकभेदस्य लक्षणं यथा,—

"भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम् ।
भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम् ॥
तत्र नारभटीनापि विष्कम्भकप्रवेशकौ ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा ॥
तपस्विभगवद्विप्रप्रभृतिष्वत्र नायक: ।
एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते ॥"
इति साहित्यदर्पणम् ॥

प्रहसन्ती,स्त्री, (प्रहसति प्रकर्षेण विकशतीति । प्र + हस् + शतृ + ङीप् ।) यूथी । इति त्रिकाण्डशेष: ॥ वासन्ती । इति राजनिर्घण्ट:॥ प्रकाण्डाङ्गारधानी च ॥

प्रहस्तः, पुं, (प्रततः प्रसृतो वा हस्तो यत्र ।) विस्तृताङ्गुलिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८४ ॥ रावणसेनापतिविशेषः । यथा—
"ततो नीलाम्बुदप्रख्यं प्रहस्तो नाम राक्षसः ।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥"
इति रामायणे लङ्काकाण्डे ८ सर्गः ॥

प्रहारः, पुं, (प्रहरणमिति । प्र + हृ + घञ् ।) आघातः । यथा, मार्कण्डेये ।
"करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥"

प्रहारणं, क्ली, (प्र + हृ + णिच् + ल्युट् ।) काम्यदानम् । इति प्रवारणशब्दटीकायां सारसुन्दरी ॥

प्रहारवल्ली, स्त्री, (प्रहारोपशमा आघातजन्यवेदनादिनाशिका वल्ली लता । शाकपार्थिवादित्वात् मध्यपदलोपः ।) मांसरोहिणी । इति भावप्रकाशः ॥ (पर्य्यायोऽस्या यथा,—
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी कृशा ।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रहासः, पुं, (प्रकृष्टो हासो यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ९ । ४५ । ६६ ।
"रणोत्कटः प्रहासश्च श्वेतसिद्धश्च नन्दकः ॥"
नागविशेषः । तथा तत्रैव । १ । ५७ । १५ ।
"पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्दरिः ॥"
प्रकृष्टो हासो यस्मात् ।) नटः । इति धरणिः ॥ (प्रकृष्टो हासः प्रकाशो यस्य ।) सोमतीर्थम् । इति जटाधरः ॥ (प्रकृष्टो हास इति ।) अट्टहासः । इति शब्दरत्नावली ॥ (यथा, कामन्दकीये । ५ । २० ।
"न नर्म्मसचिवैः सार्द्धं किञ्चिदप्यप्रियं वदेत् ।
ते हि मर्म्माण्यभिघ्नन्ति प्रहासेनापि संसदि ॥"

प्रहासी, [न्] पुं, प्रकृष्टं हासयति हसति च यः । (प्र + हस् + णिच् वा + णिनिः ।) हासकारकः भाँड इति भाषा । तत्पर्य्यायः । वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रीतिदः ६ । इति हेमचन्द्रः । २ । २४५ ॥ (हासकारिणि, त्रि । यथा, अथर्व्ववेदे । ८।६।१४ ।
"आपाकेस्थाः प्रहासिनस्तम्बे ये कुर्व्वते ॥")

प्रहिः, पुं, (प्रकर्षेण ह्रियतेऽत्रेति । प्र + हृ + "प्रहरतेः कूपे ।" उणा० ४ । १३४ । इति इण् । स च डित् ।) कूपः । इत्यमरः ।१।१०।२६

प्रहितं, क्ली, (प्रधीयते स्मेति । प्र + धा + क्तः ।) सूपः । इति हेमचन्द्रः । ३ । ६१ ॥ (प्र + हि प्रेरणे + क्त ।) क्षिप्ते, त्रि । इति निरस्तशब्दटीकायां भरतः ॥

प्रहीणः, त्रि, (प्र + ओ हा त्यागे + क्त । "घुमा स्थागेति ।" ६ । ४ । ६६ । इति आत ईत् । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः । ततो णत्वम् ।) परित्यक्तः । प्रपूर्व्वहाधातोः कर्म्मणि क्तः । इति मुग्धबोधव्याकरणम् ॥ यथा,—
"प्रहीणपूर्व्वध्वनिनाधिरूढ़-
स्तुलामधारेण शरत्घनेन ॥"
इति रघुकाव्यम् ॥

प्रहुतं, क्ली, (प्रहूयते स्मेति । प्र + हु + क्तः ।) भूतयज्ञः । इति जटाधरः ॥ (यथा, मनुः । ३ । ७३—७४ ।
"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च ।
ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते ॥
जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ।
ब्राह्म्यं हुत द्विजाग्र्यार्च्चा प्राशितं पितृतर्पणम् ॥")

प्रहेणकं, क्ली, (प्रहेलकम् । पृषोदरादित्वात् लस्य णः ।)पिष्टकविशेषः । तत्पर्य्यायः । वाचनम् २ व्रतोपायनम् ३ । इति त्रिकाण्डशेषः ॥ प्रहेलकम् ४ वाचनकम् ५ । इति हारावली १५२

प्रहेलकं, क्ली, (प्रहिलति स्वादादिना अभिप्रायं सूचयतीव । प्र + हिल भावसूचने + ण्वुल् । प्रहिलति चेष्टयतीति । प्र + हेल ण्वुल् वा ।) प्रहेणकम् । इति हारावली । १५२ ॥

प्रहेलिका, स्त्री, (प्रहिलति अभिप्रायं सूचयतीति । प्र + हिल अभिप्रायसूचने + क्वुन् । टापि अत इत्वम् ।)दुर्विज्ञानार्थप्रश्नः । कूटार्थभाषिता कथा । हेयालि इति भाषा । तत्पर्य्यायः । प्रवल्हिका २ । इत्यमरः ।१।६।६ ॥ प्रवह्लिका ३ प्रवह्लिः ४ प्रवह्ली ५ प्रहेलिः ६ इति भरतः ॥ प्रश्नदूती ७ प्रवह्लीका ८ । इति शब्दरत्नावली ॥ तस्य लक्षणम् ।
"व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने
आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य
भङ्गतः ॥"
आर्थी । यथा,—
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ॥"
पानीयकुम्भ इति ॥ शाब्दी यथा,—
"सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयन्ति ॥"
सारिका । इति विदग्धमुखमण्डनम् ॥

प्रह्रादः, पुं, (प्रह्रादते इति । प्र + ह्राद शब्दे + अच् । यद्वा, प्रह्लादयतीति । प्र + ह्लाद + णिच् + अच् । रलयोरैक्यम् । प्रह्लादः । स च हिरण्यकशिपोः पुत्त्रः परमवैष्णवः । (यथा, हरिवंशे । ३ । ७१ ।
"हिरण्यकशिपोः पुत्त्राश्चत्वारः प्रथितौजसः ।
अनुह्रादश्च ह्रादश्च प्रह्रादश्चैव वीर्य्यवान् ॥")
तस्य चरित्रादिकं प्रह्लादशब्दे द्रष्टव्यम् ॥ (जनपदविशेषः । यथा, महाभारते ।६।९।४६
"मल्लाः सुदेष्णाः प्रह्रादा माहिषाः शशिकास्तथा ॥")

प्रह्लत्तिः, स्त्री, (प्र + ह्लाद् + क्तिन् । ह्रस्वः ।) प्रीतिः । ("ह्लादेः ह्रः क्तौ च ।") इति मुग्धबोधव्याकरणम् ॥

प्रह्लन्नः, त्रि, (प्र + ह्लाद + क्त । "ह्लादो निष्ठायाम् ।" ६ । ४ । ९५ । इति ह्रस्वः । प्रीतः । इत्यमरः । ३ । १ । १०२ ॥

प्रह्लादः, पुं, (प्रह्लादयतीति । प्र + ह्लाद् + णिच् + अच् ।) प्रह्रादः । स च पूर्व्वजन्मनि शिवशर्म्मणः पुत्त्रः सोमशर्म्मनामाभूत् ततो दैत्यभावनया मृतः अनन्तरं कमलायां हिरण्यकशिपोः सकाशाद्दैत्यभावेन जातः । यथा,
सूत उवाच ।
"स लोष्टेन समं मेने काञ्चनं भूषणं पुनः ।
जिताहारः स धर्म्मात्मा निद्रया परिवर्जितः ॥
विषयान् स परित्यज्य एकान्तमपि सेवते ।
योगासनसमारूढ़ो निराशो निष्परिग्रहः ॥
तस्य वेलां सुसंप्राप्य मृत्युकालः समागतः ।
आगतान् दानवान् विप्रः सोमशर्म्मा व्यलोकयत् ॥
मृत्युकाले तु संप्राप्ते प्राणयाणप्रवर्त्तके ।
शालग्रामे महाक्षेत्रे ऋषीणामेव सन्निधौ ॥
केचिद्वदन्ति वै दैत्याः केचिद्वदन्ति दानवाः ।
एवंविधो महाशब्दः कर्णरन्ध्रगतस्तदा ॥
तस्यैव विप्रवर्य्यस्य सुविप्राः सोमशर्म्मणः ।
ज्ञानध्यानात् प्रचलतः प्रविष्टं दैत्यजं भयम् ॥
तेन ध्यानेन तस्यापि दैत्यभूतेन वै तदा ।
सत्वरं तस्य वै प्राणा गतास्तस्य महात्मनः ॥
दैत्यभावेन संयुक्तः स हि मृत्युवशं गतः ।
तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा ॥
देवासुरे महायुद्धे निहतश्चक्रपाणिना ।
युध्यमानेन तेनापि प्रह्लादेन महात्मना ॥
सुभृशं वासुदेवं तद्विश्वरूपं विचिन्तितम् ।
योगाभ्यासेन पूर्व्वेण ज्ञानमासीन्महात्मनः ॥
सस्मार पौर्व्विकं सर्व्वं चरित्रं शिवशर्म्मणः ।
सोऽप्यहं सोमशर्म्मा वै प्रविष्टो दानवीं तनुम् ॥
कस्य कार्य्यं कदा पुण्यं केवलं ध्यानमुत्तमम् ।
प्रयामि च महापुण्यैर्ज्ञानाख्यैर्मोक्षदायिभिः ॥
समरे पीयमाणेन प्रह्लादेन महात्मना ।
एवं चिन्ता कृता पूर्व्वं श्रूयतां द्विजसत्तम ! ॥
एतत्ते सर्वमाख्यातं सर्व्वसन्देहनाशनम् ॥"
सूत उवाच ।
"प्रह्लादे तु हते संख्ये देवदेवेन चक्रिणा ।
संह्लादे च महावीर्य्ये तस्मिंश्च कालनेमिनि ॥
प्रह्लादस्य तु या माता हिरण्यकशिपोः प्रिया ।
प्रह्लादस्य महाशोकैर्दिवा रात्रौ प्रशोचति ॥
पतिव्रता महाभागा कमला नाम दुःखिता ।
खिद्यमाना दिवा रात्रौ नारदस्तामुवाच ह ॥
मा शुचस्त्वं महाभागे पुत्त्रार्थं पुण्यभागिनि !
निहतो वासुदेवेन तव पुत्त्रः समेष्यति ॥
तद्रूपलक्षणोपेतस्तवोदरे महामतिः ।
प्रह्लादेति च वै नाम पुनरस्य भविष्यति ॥
विहीन आसुरैर्भावैर्वैष्णवेन समन्वितः ।

इन्द्रत्वं भोक्ष्यते भद्रे ! सर्वदेवैर्नमस्कृतः ॥
सुखीभव महाभागे ! पुत्त्रेण तेन वै सदा ।
न प्रकाश्या त्वया देवि ! सवार्त्तेयञ्च कस्यचित्
।गर्त्तव्यमप्रमानभावैः सुगोप्यं त्वं सदा कुरु ।
एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः ॥
कमलायाश्चोदरे वै आसीत् तज्जञ्च चोत्तमम्
पुनः प्रह्लादो वै नाम तस्यां जातो महात्मनः ॥
बाल्यभावं गतो विप्र कृष्ण एवं विचिन्त्य च ।
नरसिंहप्रसादेन देवराजोऽप्यभूत् स हि ॥"
इति पाद्मे भूमिखण्डे ५ अध्यायः ॥ *॥
(अनेन सह नरनारायणयोर्युद्धमासीत् । एत-
द्विवरणन्तु देवीभागवते चतुर्थस्कन्धे नवमा-
ध्याये द्रष्टव्यम् ॥) प्रमोदः । इति विश्वः ॥
(यथा, महाभारते । १ । ७० । ३ ।
"मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥")
शब्दः । इति धरणिः ॥ (नागविशेषः । यथा,
महाभारते । २ । १० ।
"प्रह्लादो मूषिकादश्च तथैव जनमेजय: ॥")
प्रह्वः, त्रि,(प्रह्वयते इति । प्र+ह्वे+"सर्व्वानि-
घृष्वरिष्वेति ।" उणा० १ । १५३ । इति वन् ।
आलोपश्च ।) नम्रः । इत्युणादिकोषः ॥ (यथा,
रघुः । १६ । ८० ।
"विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ॥")
आसक्तिः । इति हेमचन्द्रः । ३ । ४८ ॥
प्रा, ल पूर्त्तौ । (अदा०-पर०-सक०-अनिट् ।)
ल, प्राति घटं जलेन लोकः । इति दुर्गा-
दासः ॥
प्राक्, व्य, पूर्व्वदिग्देशकालाः । इत्यमरः । ३ ।
४ । २३ ॥ प्राची दिक् प्राङ् देशः कालो वा
प्राक् । एवं प्राच्या दिशः प्राचो देशात्
कालाद्वा आगतः प्रागागतः । एवं प्राच्यां
दिशि प्राचि देशे वा वसति प्राग्वसति । दिक्-
शब्दाद्दिग्देशकाले इति प्रथमापञ्चमीसप्तमीनां
स्तात् अचो लुगिति स्तातो लुक् । इति तट्टी-
कायां भरतः ॥ ("दिक्शब्देभ्यः सप्तमीपञ्चमी-
प्रथमाभ्यो दिक्देशकालेष्वस्तातिः ।"५।३।२७
इति अस्तातिः । "अञ्चेर्लुक् ।" ५ । ३ । ३० ।
अस्तातेर्लुक् । "लुक् तद्धितलुकि ।" १ । २ ।
४९ । इति स्त्रीप्रत्ययस्य लुक् ।)पूर्व्वम् । (यथा,
मनुः । २ । २९ ।
"प्राक्नाभिवर्द्धनात्पुंसो जातकर्म्मविधीयते॥")
प्रभातम् । अवान्तरम् । अतीतम् । अग्रम् ।
इति हेमचन्द्रः मेदिनी च । चे, ७॥ क्रम-
प्राप्तिः । इति शब्दरत्नावली ॥
प्राकषिकः, पु, (प्राकषति हिनस्तीति । प्र+
आ+कष् हिंसायाम्+"प्राङि पनिकषः ।"
उणा० २ । १४ । इति किकन् ।) षिड्गः ।
मायानर्त्तकः । इत्युणादिकोषः ॥ (परदारोप-
जीवी । इत्युज्ज्वलदत्तः ॥)

प्राकाम्यं, क्ली, (प्रकामस्य भावः प्रकाम+
ष्यञ् ।)शिवस्याष्टविधैश्वर्य्यान्तगतैश्वर्य्यविशेषः
तच्च इच्छानभिघातः । इत्यमरटीकायां भरतो
हेमचन्द्रश्च । २।११६ ॥ (यथा,तत्त्वकौमुद्याम् ।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥")
स्वाच्छन्द्यानुमतिः । तत्पर्य्यायः । अववर्गः २
स्वाच्छन्द्यानुमननम् ३ । इति त्रिकाण्डशेषः ॥
(यथा, कुमारे । २ । ११ ।
"व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु॥")
प्राकारः, पुं, (प्रक्रियते इति । प्र+कृ+घञ् ।
उपसर्गस्य घञीति दीर्घः ।) वप्रोपरि अश्मन
वा इष्टकादिरचितवेष्टनम् । (यथा, महा-
भारते । १ । २०८ । २९ ।
"प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता ॥")
तत्पर्य्यायः । वरणः २ सालः ३ । इत्यमरः ।२।
२ । ३ ॥ शालः ४ । इति भरतः ॥ वप्रः ५ ।
यथा,—
"प्राकाररोधसोर्वप्रः पिद्धकेदारयोरपि ॥"
इति रत्नकोषः ॥
तस्य परिमाणं यथा,—
"ऊर्द्धं षोड़शहस्तेभ्यो नैव कुर्य्याद्गृहं गृही ।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥"
तस्य द्वारमानम् ।
"प्रस्थे हस्तद्वयात् पूर्वं दीर्घे हस्तत्रयन्तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३अध्यायः
प्राकृतः,त्रि,(प्रकृष्टमकृतमकार्य्यं यस्य ।) नीचः ।
इत्यमरः ॥ (यथा, देवीभागवते ।१।१५।३१ ।
"अश्रुपातं करोत्यद्य विवशः प्राकृतो यथा ॥"
अविकारकः । यथा, भावप्रकाशे अजीर्ण-
रोगाधिकारे ।
"वदन्ति षष्ठं आजीर्णं प्राकृतं प्रतिवासरम् ॥
प्राकृतं अविकारकम् ॥"*॥) प्रकृतिसम्बन्धी ।
यथा,—
"इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः॥"
इति श्रीभागवते दशमस्कन्धे ३ अध्यायः ॥
(यथाच मार्कण्डेये । ४५ । ७३ ।
"इत्येष प्राकृतः सर्गः शिवस्याधिष्ठितस्तु सः ॥"
यथा च मनौ । ११ । १५८ ।
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ॥"
"प्राकृतं प्राजापत्य प्रकृतौ भवं प्राकृतं सर्व-
कृच्छ्राणां प्रकृतित्वादेवमुच्यते ।" इति तद्भाष्ये
मेधातिथिः ॥*॥ प्रकृतौ भवस्तत आगतो वा ।
प्रकृति+"तत्र भवः ।" ४ । ३ । ५३ । "तत
आगतः ।" ४ । ३ । ७४ । इति वा अण् ।)
भाषाभेदे, क्ली । स च संस्कृतप्रकृतिकः । यथा,
अथ प्राकृतम् । अथशब्द आनन्तर्य्यार्थोऽधि-
कारार्थश्च । प्रकृतिः संस्कृतं तत्र भवं तत

आगतं वा प्राकृतम् । संस्कृतानन्तरं प्राकृत-
मधिक्रियते । संस्कृतानन्तरं प्राकृतस्यानुशास-
नम् । सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य
लक्षणं न देश्यस्य इति ज्ञापनार्थम् । संस्कृत-
समन्तु संस्कृतलक्षणेनैव गतार्थम् । प्राकृते
प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृ-
तवद्वेदित्याः । लोकादिति च वर्त्तते । तेन ऋ
ॠ ऌ ॡ ऐ औ ङ ञ श ष विसर्ज्जनीयप्लुतवर्जो
वर्णसमाम्नायो लोकादवगन्तव्यः। ङञौ स्ववर्ग्य-
संयुक्तौ भवत एव । ऐदौतौ च केषाञ्चित् ।
कैतवं कैअवम् । सौन्दर्य्यं सौअरिअम् । कौरवाः
कौरवा । तथा स्वरव्यञ्जनं द्विवचनं चतुर्थी-
बहुवचनञ्च न तु भवति । अबहुलं बहुल-
मित्यधिकृतं वेदितव्यमाशास्त्रपरिसमाप्तेः ।
ततश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्-
विभाषा क्वचिदन्यदेव भवति । इति हेमचन्द्र-
कृतशब्दानुशासनवृत्तौ अष्टमाध्यायस्य चतुर्थः
पादः ॥*॥ (यथा च प्राकृतचन्द्रिकायाम् ।
"प्रकृतिः सस्कृतं तत्र भवत्वात् प्राकृतं स्मृतं
तद्भव तत्सम देशीत्येवमेतत् त्रिधा मतम् ॥"
चण्डाचार्य्यादयस्तु आर्षप्राकृतमेकेन प्राकृतं
द्विविधं कल्पयन्ति । जैनबौद्धानां शास्त्रेषु
प्राचीनतमनाटकादिषु च आर्षप्राकृतप्रयोगः
प्रायशो दृश्यते ॥ कानिचित् विशेषलक्षणानि
प्राकृतचन्द्रिकायामुक्तानि । यथा,—
"तच्चार्षं मागधी शौरसेनी पैशाचिकी तथा ।
चूलिका पैशाचिकञ्चापभ्रंशश्चेति षड् विधम् ॥
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः ।
आकरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥"
नाटकादौ उत्तमस्यापि नायकादेः कदाचित्
मत्तादिदोषोपहतस्य प्राकृतकथनं नैव दोषाय
यदुक्तं तत्रैव ।
"ऐश्वर्य्यादिप्रमत्तस्य दारिद्र्योपप्लुतस्य च ।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीडार्थं नृपतेरिष्टं प्राकृतञ्च द्विजन्मनाम् ।
भरतेनोदितं प्राज्यमबाधितमिदं वचः ॥"
नाटकादौ बालस्त्रीहृद्वादीनामगुणान्वितानां
प्राकृतकथनमेव युक्ततरम् । यथाह भरद्वाजः ।
"गाथासु तु महाराष्ट्रा अन्या नाट्याश्रया
मताः ।
बालस्त्रीहृद्धभिक्षूणां श्रावकव्याजलिङ्गिनाम् ।
ग्रहोपसृष्टमत्तानां प्राकृत षण्ढरूपिणाम् ॥"*
प्रलयविशेषे, पुं । यथा, विष्णुपुराणे । १।७ ।
३८—३९ ।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः ।
प्रयाति प्राकृते चैव ब्रह्माण्ड प्रकृतौ लयम् ॥"
प्राकृतज्वर,पुं,(प्राकृत- प्रकृतिसम्बन्धी ज्वरः ।
वर्षाशरद्वसन्तेषु त्रिषु, ऋतुषु क्रमेण वातपित्त-
कफज्वरः । यथा, माधवकरः ।
"वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥"

प्राकृतदोषः, पुं, (प्राकृतो दोषः।) वर्षाशरद्वसन्तेषु क्रमेण कुपितो वातः पित्तं कफश्च। यथा, रचितः।
"चयप्रकोपप्रशमाः पित्तस्य प्रावृडादिषु।
श्लेष्मणः शिशिराद्येषु वायोर्घर्म्मादिषु त्रिषु॥"

प्राकृतप्रलयः, पुं, (प्राकृतः प्रकृतिसम्बन्धी प्रलयः) प्रकृतेर्लयः। तस्य विवरणम्। यथा,—
"निर्गुणस्य च नित्यस्य चाद्यन्तरहितस्य च।
निमेषाणां सहस्रेण प्रकृतेर्द्दण्ड उच्यते॥
षष्टिदण्डात्मकस्तस्य वासरश्च प्रकीर्त्तितः।
मासस्त्रिंशद्दिवारात्रैर्वर्षं द्वादशमासकैः॥
एवं गते शताब्दे च श्रीकृष्णे प्रकृतेर्लयः।
प्रकृत्याश्च प्रलीनायां तदैव प्राकृतो लयः॥
सर्व्वाः संहृत्य सा चैका महाविष्णोः प्रसूश्च या
कृष्णवक्षसि लीना च मूलप्रकृतिरीश्वरी॥
ज्ञाता वदन्ति तां दुर्गां विष्णुमायां सनातनीम्
सर्व्वशक्तिस्वरूपाञ्च परां नारायणीं सतीम्॥
बुद्ध्यधिष्ठातृदेवीञ्च कृष्णस्य त्रिगुणात्मिकाम्।
यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः॥
वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते।
यदर्द्धाङ्गा महालक्ष्मीः प्रिया नारायणस्य च॥
प्राणाधिष्ठातृदेवीञ्च प्रेम्णा प्राणाधिकां वराम्
शश्वत् प्रेममयीं शक्तिं निर्गुणां निर्गुणस्य च॥
नारायणश्च शम्भुश्च संहृत्य स्वगणान् बहून्।
शुद्धसत्त्वस्वरूपौ च कृष्णे लीनश्च निर्गुणे॥
गोपा गोप्यश्च गावश्च सुरभ्यश्च नराधिप।।
सर्व्वे लीनाः प्रकृत्याश्च प्रकृतिः प्रकृतीश्वरे॥
महाविष्णौ विलीनाश्च सर्व्वे ते क्षुद्रविष्णवः।
महाविष्णुः प्रकृत्याश्च सा चैव परमात्मनि॥
प्रकृतिर्योगनिद्रा च श्रीकृष्णनेत्रपद्मयोः।
अधिष्ठानं चकारैवं मायया चेश्वरेच्छया॥
प्रकृतेर्व्वासरं यावन्मितं कालं प्रकीर्त्तितम्।
तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः॥
अमूल्यरत्नतल्पे च वह्निशुद्धांशुकार्च्चिते।
गन्धचन्दनमाल्याढ्ये वायुना सुरभीकृते॥
पुनः प्रजागरे तस्य सर्व्वसृष्टिर्भवेत् पुनः
एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥*॥
अपि च।
"प्रकृतौ संस्थितो यस्मात् सर्व्वस्तन्मात्रसञ्चयः।
अहङ्कारमहत्तत्त्वगतो यत् प्राकृतो लयः॥
प्रकृतौ संस्थितो व्यक्तमतीतप्रलयस्तु यत्।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः॥
अयं यः कथितो विप्राः प्राकृताख्यो महालयः॥"
इति कालिकापुराणे २४ अध्यायः॥

प्राकृतमानुषः, पुं, (प्राकृतः सामान्यो मानुषः।) सामान्यमनुष्यः। यथा महाभारते गदापर्व्वणि।
"एकादशचमूनाथ भीम। पादेन मा स्पृश।
पञ्चानामपि यो भर्त्ता नासौ प्राकृतमानुषः॥"

प्राकृतमित्रं, क्ली, (प्राकृतं स्वाभाविकं मित्रं सुहृत्।) स्वदेशाव्यवहितदेशावस्थितराजादि। यथा, माघे। २। ३६।
"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः स्यातामभित्रौ मित्रे च सहजप्राकृतावपि॥"
अस्य टीका। "ननु चद्योऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं तावत् करोति। सखेति। क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकाररूपकार्य्यवशात् निर्वृत्तावितिशेषः। उक्तकार्य्योपाधेर्य्यावज्जीवमनपायादनयोर्म्मित्रामित्रभावोऽपि अनपायीति गरीयस्त्वमिति भावः। सहजप्राकृतौ तु नैवमित्याह स्यातामिति। सह जातः सहजः एकशरीरावयवत्वात् तत्र सहजमित्रं मातृष्वसेयपितृष्वसेयादि, सहजशत्रुस्तु पितृव्यतत्पुत्रादिः प्रकृत्या मित्रः प्राकृतः पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः। तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि त्वर्थे तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां न त्वात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुशत्रवं मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः। अनेन कृत्रिमत्व सर्व्वापवादीति सिद्धम्।" इति मल्लिनाथः॥

प्राकृतशत्रुः, पुं, (प्राकृतः स्वाभाविकः शत्रुः।) स्वदेशाव्यवहितदेशावस्थितराजादिः। यथा। "विषयान्तरः प्राकृतः शत्रुः।" इति माघटीकायां मल्लिनाथः॥

प्राकृतिकः, त्रि, (प्रकृति + ठञ्।) प्रकृतिविकारः। प्रकृतिसम्बन्धी। यथा,—
"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥
(प्रलयविशेषे, पुं। यथा विष्णुपुराणे १।७।३८।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्विधः॥")

प्राक्तनः, त्रि, (प्राक् प्राचि काले देशे प्राच्यां दिशि वा भवः। प्राक् + कालवाचिनोऽव्ययात् ट्युट्युलौ।) प्रागभवः। यथा। "प्रपेदिरे प्राक्तनजन्मविद्याः॥" इति कुमारसम्भवम्॥ अन्यच्च।
"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवश्चिरम्।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च साम्प्रतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४ अध्यायः
अपि च तत्रैव १२८ अध्याये।
"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते।
मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि॥"

प्राक्तनकर्म्म, क्ली, (प्राक्तनं पुराभवं कर्म्म अत्रास्य तज्जनकत्वादपि तज्जन्यत्वारोपः।) भाग्यम्। अदृष्टम्। इति जटाधरः॥ पुराकृतकार्य्यञ्च॥

प्राक्फलः, पुं, (प्राक् फलं यस्य।) पनसः। इति जटाधरः॥

प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी।) पूर्व्वफल्गुनी। यथा। प्राक्फल्गुन्यश्च जन्मकाले च यस्य। इति कोष्ठीप्रदीपः॥

प्राक्फल्गुनीभवः, पुं, (प्राक्फल्गुन्यां भव उत्पत्तिर्यस्य।) बृहस्पतिः। इति हारावली। २६॥ पूर्व्वफल्गुन्यां जाते, त्रि॥

प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति। प्राक्फल्गुण + अण्।) बृहस्पतिः। इति शब्दरत्नावली॥

प्राक्फाल्गुनेयः, पुं, (प्राक्फल्गुन्यां भव इति। प्राक्फल्गुन + ढञ्।) बृहस्पतिः। इति त्रिकाण्डशेषः॥

प्राखर्य्य, (प्रखरस्य भावः। प्रखर + ष्यञ्।) प्रखरत्वम्। तीक्ष्णता। प्रखरशब्दात् भावार्थे ष्यञ्प्रत्ययः॥

प्रागभावः, पुं, (प्राग्वर्त्ती अभावः।) संसर्गाभावविशेषः॥ (यथा, भाषापरिच्छेदे। १२-१३
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते॥")
तस्य लक्षणम्। विनाश्यभावत्वम्। इति सिद्धान्तमुक्तावली॥

प्रागल्भ्यं, क्ली, प्रगल्भस्य भावः। प्रगल्भ + ष्यञ्।) प्रगल्भता। यथा,—
प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते।
न तुष्टिमुत्पादयते शरीरे
हृद्दस्य दारा इव दर्शनीयाः॥"
इति ज्योतिस्तत्त्वम्॥
स्त्रीणामयत्नजभावविशेषः। यथा,—
"प्रागल्भ्यौदार्य्यमाधुर्य्यशोभाधीरत्वकान्तयः।
दीप्तिश्चायत्नजा भावहावहेलास्त्रयोऽङ्गजाः॥"
इति हेमचन्द्रः। ४। १७३॥
(यथा च साहित्यदर्पणे। ३। १०२।
"निःसाध्वसत्वं प्रागल्भ्यम्॥" यथा,—
"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि।
दष्टाश्च दशनैः कान्तं दासीकुर्व्वन्ति योषितः॥"

प्रागुदीची, स्त्री, (प्राची उदीची च दिगिति कर्म्मधारयः। पूर्व्वोत्तरदिक्। ईशानकोणः। यथा
तन्नोत्कीर्णमृत्तिकाः प्रागुदीच्यां दिशि क्षिपेत्"
इति भवदेवभट्टः॥

प्राग्ज्योतिषः, पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र। तदुक्तं कालिकापुराणे।
"अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह।
"ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥"
कामरूपदेशः। इति हेमचन्द्रः। ४। २२॥
स तु नरकराजपुरम्। यथा,—
श्रीभगवानुवाच।
"करतोया सत्यगङ्गा पूर्व्वभागावधिश्रिता।
यावल्ललितकान्तास्ति तावद्देशं पुरं तदा॥
तत्र देवी महामाया योगनिद्रा जगत्प्रसूः।
कामाख्यारूपमादाय सदा तिष्ठति शोभना॥

अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक।॥
सर्व्वे क्रीडार्थमायाता रहस्यदेशमुत्तमम्।
अत्र श्रीः सर्व्वतो भद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते त्वमभिषिक्तो मया स्वयम्।
ततो विदर्भराजस्य पुत्रीं मायाह्वयां हरिः।
पुत्रार्थे वरयामास नरकस्य स मां गुणैः॥"

इति कालिकापुराणे ३७ अध्यायः॥
(इदानीं प्रसिद्धमासामप्रदेशकियदंशकुचविहार)
कामरूपं पुराप्राग्ज्योतिषाख्ययाभिहितम्॥"

प्राग्भारः, पु, (प्रकृष्टो भारो यत्र।) पर्व्वताग्रभागः। इति त्रिकाण्डशेषः॥ कुत्रचित् प्राग्भाव इति च पाठः॥

प्राग्रहरः, त्रि, (प्राग्रं प्रकृष्टमग्रं क्रियतेऽनेनेति। हृ + अप्।) श्रेष्ठः। इत्यमरः। ३।१।५८॥ (यथा, रघौ। १६। २३।

"तथेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहीत्प्राग्रहरो रघूणाम्।
पूरप्यभिव्यक्तमुखप्रसादा
शरीरबन्धेन तिरोबभूव॥")

प्राग्राटं, क्ली, (प्राग्रं अटतीति। अट् + अच्।) घनदधि। इति त्रिकाण्डशेषः॥

प्राग्र्य, त्रि, (प्रकर्षेणाग्रे भव इति। प्राग्र + यत्) श्रेष्ठः। इत्यमरः। ३।१।५८॥ (यथा, महाभारते। ८। ५८। ११।

"कृत्वा हि सुमहत् कर्म्म हत्वा भीष्ममुखान् कुरून्।
जयः प्राप्तो यशःप्राग्र्यं वैरञ्च प्रतियाचितम्॥"

प्राग्वंशः, पुं, (प्राञ्चतीति। प्र + अञ्च + क्विन्प्राक् प्राक् वंशः सपत्नीकयजमानादिसमूहोऽत्र।) हविषां होतव्यानां आधारो यद्गृहं ततः प्राक् पूर्व्वदेशे यजमानसदस्यादिस्थित्यर्थं गृहम् इत्यमरभरतौ॥ (यथा, हरिवंशे। ४१। ७।

"यूपं समितकुशं दर्व्वीचमसोलूखलानि च।
प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत्॥"
प्राक्चासौ वंशश्चेति कर्म्मधारयः॥) पूर्व्वकुलञ्च॥

प्राघातः, पुं, (प्रकृष्ट आघातोऽस्मिन्। यद्वा, प्राहन्यतेऽस्मिन्निति। प्र + आ + हन् + आधारे घञ्।) युद्धम्। इति हेमचन्द्रः। ३। ४६१॥

प्राघारः, पुं, (प्राघरणमिति। प्र + घृ प्रस्रवणे + घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इत्युपसर्गस्य दीर्घः।) घृतादिक्षरणम्। तत्पर्य्यायः। श्चोतः २। इत्यमरः। ३। २। १०॥

प्राघुणः, पु, (प्राघोषते भ्राम्यतीति। प्र + आ + घुण + कः।) अतिथिः। इति त्रिकाण्डशेषः॥ (कन्प्राघुण + स्वार्थे। प्राघुणकस्स्वार्थे। यथा, पञ्चतन्त्रे चतुर्थतन्त्रे।

"तदागच्छ प्राघुणकन्यायेनास्मदावासम॥")

प्राघुणिकः, पुं, (प्राघुण + स्वार्थे ठक्।) अतिथिः। यथा, नैषधे। २। ५६।

"अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः।
मदनानलबोधनेऽभवत्
खग धाय्या धिगधैर्य्यधारिणः॥"

प्राघूर्णिकः, पुं, (प्र + आ + घूर्ण + भावे घञ्। प्राघूर्णो भ्रमणम्। तत्र साधु इति ठञ्।) अतिथिः। इति हेमचन्द्रः। २। ३३४॥

प्राङ्, त्रि, (प्रकर्षेण अञ्चतीति। प्र + अन्च + "ऋत्विग्दधृक्स्रगिति।" ३। २। ५९। इति क्विन्। "अनिदितां हल उपधायाः क्ङिति।" ६। ४। २४। इति नलोपः। "उगिदचाम्।" इति नुम्। संयोगान्तस्य लोपः। नुमो नकारस्य। "क्विन् प्रत्ययस्य कुः।" ८। २। ६२। इति कुत्वेन ङकारः।) पूर्व्वदिक्। पूर्व्वदेशः। पूर्व्वकालः। इति मेदिनी चे, ७॥

प्राङ्गः, पुं, (प्रकृष्टमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥

प्राङ्गणं, क्ली, (प्रकृष्टमङ्गनमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥ (प्रकर्षेण अङ्गनं गमनं यत्र। णत्वम्।) गृहभूमिः। आङ्गिना इति उठान इति च भाषा। तत्पर्य्यायः। अजिरम् २ चत्वरम् ३ अङ्गनम् ४। इति हेमचन्द्रः। ४। ७०॥ (यथा, भविष्योत्तरे।

प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्त्रिकाम्॥")

सूर्य्यविद्धस्य तस्य दोषो यथा,—
"अभद्रदं सूर्य्यवेधं प्राङ्गनस्य तथैव च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अः॥

प्राङ्न्यायः, पुं, (प्राक् न्यायः।) चतुर्थोत्तरान्तर्गतोत्तरविशेषः। यत्राभियुक्त एव ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तु तत्र चायं व्यवहारमार्गेण पराजित इति। उक्तञ्च कात्यायनेन।

"आचारेणावसन्नोऽपि पुनर्लेखयते यदि।
सोऽभिधेयो जितः पूर्व्वं प्राङ्न्यायश्च स उच्यते॥"
इति मिताक्षरा॥

प्राचिका, स्त्री, (प्राञ्चतीति। प्र + अञ्च + क्वुन्। टापि अत इत्वञ्च।) वनमक्षिका। इत्यमरभरतौ। ३। ५। ८॥ डाँश इति भाषा॥

प्राची स्त्री, (प्रथमं अञ्चति सूर्य्यं प्राप्नोतीति। प्र + अञ्च + "ऋत्विग्दधृक्स्रगिति।" ३।२।५९। इत्यादिना क्विन्। "उगितश्च।" ४। १। ६। इति ङीप्।) पूर्व्वा दिक् इत्यमरः। १।३।१॥ (यथा, महाभारते। १। ९५। १२।

"जनमेजय. खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्। यः प्राचीं दिशं जिगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचिन्वत्वम्॥") पूजकपूज्ययोरग्रम्। यथा,—

"देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः॥"
इति।

"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तज्ज्ञे॥"

इति तिथ्यादितत्त्वम्॥

प्राचीनः, त्रि, (प्रागेवेति। प्राक् + "विभाषाञ्चेरदिक् स्त्रियाम्।" ५। ४। ८ इति खः स्वार्थे।) नादेशः। पूर्व्वदिग्देशकालभवः। तत्पर्य्यायः। प्राक् २। (यथा, आर्य्यासप्तशत्याम्। ३५१।

"प्राचीनाचलमौलेर्य्यथा शशी गगनमध्यमधिवसति।
त्वां सखि। पश्यामि तथा छायामिव सकुचन्तीनाम्॥"

यथा च भागवते। ४। २४। १०।
"प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्॥"
प्रागग्रम्। यथा, ऋग्वेदे। १। १८८। ४।
"प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन्॥"
"प्राचीनं प्रागग्रम्।" इति तद्भाष्ये सायनः॥
प्रकृष्टगन्ता। अपराङ्मुखः। यथा, ऋग्वेदे। १। ५४। ५।
"प्राचीनेन मनसा बर्हणावता।"
"प्राचीनेन प्रकर्षेण गन्त्रा अपराङ्मुखेनेत्यर्थः॥"
इति तद्भाष्ये सायनः॥)
पुं, प्राचीरम्। तत्पर्य्यायः आवेष्टकः२ वृतिः ३। इति हेमचन्द्रः। ४। ४८॥

प्राचीनपनसः, पु, (प्राचीनः पनस इति नित्यकर्म्मधारयः।) विल्वम्। इति त्रिकाण्डशेषः॥

प्राचीनबर्हिः, [स्] पु, इन्द्रः। इति हेमचन्द्रः। २। ८५॥ (यथा, रघौ। ४। २८॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहिताननिलोद्धूतैस्तर्ज्जयन्निव केतुभिः॥")
राजविशेषः। (यथा, महाभारते। १२।२०८।६॥
"अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः।
प्राचीनबर्हिर्भगवांस्तस्मात् प्रचेतसो दश॥")
यथा च।
"हविर्द्धानात् षडाग्नेयी पुत्त्रानजनयद्व्रतम्।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं प्रजाजिनौ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः।
हविर्द्धानात् द्विजश्रेष्ठ! येन सवर्द्धिताः प्रजाः॥
प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः॥
समुद्रतनयायान्तु कृतदारो महीपतिः।
महतस्तपसः पारे सुवर्णायां महीपतिः॥
सुषुवे दश पुत्त्रांश्च शुभिर्यां वै प्रचेतसः।
दशवर्षसहस्राणि समुद्रसलिलेशयाः॥"
इति वह्निपुराणे वरसर्गो नामाध्यायः॥

प्राचीना, स्त्री, (प्राचीन + टाप्।) वनतिक्तिका। इत्यमरः। २।४।८५॥ आकनादि इति भाषा॥ रास्ना। इति शब्दचन्द्रिका॥ (प्राचि भवेति। प्राच् + खः। टाप्।) प्रागभवा च॥ (पाठा।

तत्पर्य्यायो यथा,—

"पाठाम्बष्ठावष्ठकी च प्राचीना पापचेलिका।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्राचीनामलकं, क्ली, (प्राचीनमामलकमिति नित्य-कर्म्मधारयः।) पानीयामलकम्। पानी आमला इति भाषा। तत्पर्य्यायः। वारिबदरम् २। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १। २०८। ४१।

"प्राचीनामलकैर्लोध्रै रङ्कोलैश्च सुपुष्पितैः॥")

अस्य गुणः। दोषत्रयगरनाशित्वम्। इति भाव-प्रकाशः॥ (यथा च।

"गरदोषहरं नीपं प्राचीनामलकं तथा॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्राचीनावीतं, क्ली, (प्राचीनं प्रदक्षिणं आवीयते अनेनेति। आ+वी गत्यादौ+क्तः। यद्वा, प्राचीनं आवेतीति। "गत्यर्थेति" क्तः।) आहादौ वामकरे बहिष्कृते सति दक्षिणस्कन्धार्पितयज्ञसूत्रम्। इत्यमरभरतौ।२।७।५०॥ तथाहि कौर्म्मे उपविभागे १० अध्याये।

"सव्यं बाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः।
प्राचीनावीतमित्युक्तं पित्र्ये कर्म्मणि योजयेत्॥"

प्राचीनावीती, [न्]पु,(प्राचीनावीतमस्त्यस्येति। प्राचीनावीत+इनिः।)प्राचीनावीतविशिष्टः। यथा। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति एवं प्राचीनावीती भवतीति। इति गोभिलः॥ प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। इत्याह्निकतत्त्वम्॥

प्राचीपतिः, पुं, (प्राच्याः पूर्व्वस्या दिशः पतिः।) इन्द्रः। इति त्रिकाण्डशेषः॥

प्राचीरं, क्ली, (प्राचीयते इति। प्र+आ+चिञ् चयने+"शुसिचिमिञां दीर्घश्च।" उणा॰ २।२५। इति क्रन् दीर्घश्च।) प्रान्ततो वृतिः। इत्यमरः। २। २। ३॥ पाँचील इति भाषा॥ दुर्गादौ नगरादेः प्रान्तभागे वेणुकण्टकवेष्टनादिमयी वृतिर्वेष्टनिका। इति भरतः॥ सूक्ष्मत्वा-मपि वृतौ प्राचीरमुपचारादिति स्वाम्यादयः॥ तत्पर्य्यायः। वृतिः २। इति भट्टः। प्राचीनम् ३। इति मुकुटः।

"प्राचीर प्रावरोऽपि४ स्यात् प्रावृतिः५ प्रान्ततो वृतिः ६।
इष्टकामृत्तिकाद्यैश्च गृहवाप्यादिवेष्टने॥"
इति शब्दरत्नावली॥*॥

अथ प्राचीर निर्णयः।

"गजैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति॥
राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः।
विंशतिस्ते तु पञ्चाग्रे पार्श्वयोः पञ्च पञ्च च॥
पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः
सर्व्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते॥
प्रतिप्राकारसंस्थानां द्वारं नाभिमुखाश्रितम्"॥*

तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः। तद्यथा,—

इन्द्रान्तरे पञ्च राजद्वारे महीपतेः।
राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः॥
महाद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः।
एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति॥
राजदण्डद्वयं सार्द्धमायामे जयवास्तुनि।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः॥
राजपट्टाभिधानेन स्थानमेतन्निगद्यते।
अस्मिन् गृहे नृपः कृत्वा सुचिरं सुखमश्नुते॥
अस्मानाद्यन्यतो राजा योऽन्यत्र गृहमारभेत्।
सोऽचिरान्मृत्युमाप्नोति रोगं शोकं भयन्तथा॥
यमदण्डोदयदण्डौ कोणादितिरपम्नवः॥
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः
न स्पृशन्ति राजपट्टस्तैः सर्पैर्गरुडो यथा।
हिरण्यादिरतोऽपि स्यात् क्रमात्प्राक्कादि वास्तुषु
राजच्छत्रमितिऽप्येवं प्राचीरे गुणदोषकौ॥"
इति युक्तिकल्पतरुः॥

प्राचेतसः, पुं, (प्रचेतसोऽपत्यमिति। प्रचेतस्+अण्।) वाल्मीकिमुनिः। इति हेमचन्द्रः। ३।५१०॥ (यथा, रघुः। १५। ६३॥

"अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगदुर्गुरुचोदितौ॥"

प्रचेतसोऽपत्यमात्रम्। विष्णुः। यथा, हरिवंशे। २०३। १४॥

"प्रज्ञया तेजसा योगात्तस्मात् प्राचेतसः प्रभुः।
विष्णुरेव महायोगी कर्म्मणामन्तरङ्गतः॥"

दक्षः। यथा, महाभारते। १। ७५। ५।

"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान्॥")

प्राचेतसः, [स्] पुं, प्राचीनबर्हीराजपुत्राः। सान्तनित्यबहुवचनान्तोऽयम्। यथा,—

"एवमुक्तास्तु ते पुत्रास्ततः प्राचेतसो दश।
पयोधिसलिले मग्नास्तपस्तेपे सुदारुणम्॥
पतत्त्रिराजमारूढं नीलोत्पलदलच्छविम्।
दृष्ट्वा प्राचेतसः सर्व्वे शिरोभिरवनीं गताः॥"
इति वह्निपुराणम्।

प्राच्यः, पुं, (प्राचि भवः। प्राच्+"द्युप्रागपागुदक्प्रतीचो यत्।" ४। २। १०१। इति यत्।) शरावत्याः प्रागदक्षिणदेशः। इत्यमरः। २। १। ७॥ (पूर्व्वदिग्भवे, त्रि। यथा मार्कण्डेये। ५७। ४२—४४।

"———प्राच्यान् देशान् निबोध मे।
अन्धारका मुदकरा अन्तर्गिर्य्या बहिर्गिराः॥
यथा प्रवङ्गा वङ्गेया मालदा मालवर्त्तिकाः।
ब्रह्मोत्तराः प्रविजया भार्गवा ज्ञेयमल्लकाः॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः।
मल्ला मगधगोमन्ताः प्राच्या जनपदाः स्मृताः॥'

पूर्व्वदेशीये च, त्रि॥ (यथा, महाभारते। ८। ४५। २८॥

"प्राच्या दासा वृषला दाक्षिणात्याः।
स्तेनाः वाह्लीकाः सङ्करा वै सुराष्ट्राः॥")

प्राजकः, पुं, (प्राजयति प्रकर्षेण गमयति घोटकादीनिति। प्र+अज्+णिच्+ण्वुल्।) सारथिः। यथा, मनुवचने। ८। १९३॥

"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्"
"यत्र सारथेरकौशल्यादयानमन्यथा गच्छति तत्र हिंसायां अशिक्षितसारथिनियोगात् स्वामी द्विशतं दण्डं दण्ड्यः स्यादिति कुल्लूकभट्टः।" इति प्रायश्चित्ततत्त्वम्॥

प्राजनं, क्ली, (प्रवीयतेऽनेनेति। प्र+अज्+ल्युट्। "वा यौ।" २। ४। ५७॥ इति पक्षे व्यभावः।) तोदनम्। इत्यमरः। २। ८। १२॥ पाचनीवाड़ी इति भाषा॥

प्राजापत्यं, क्ली, (प्रजापतिर्देवताऽस्येति। प्रजापति+'दित्यदित्यादित्यपत्युत्तरपदात् ण्यः।' ४।१।८५। इति ण्यः।) द्वादशाहसाध्यव्रतविशेषः तत्र दिवसत्रयं रात्रिमात्रभोजनम्२२ग्रासाः। दिवसत्रयं दिवामात्रभोजनम् २६ ग्रासाः। दिवसत्रयं अयाचितभोजनम् २४ ग्रासाः। दिवसत्रयं उपवासः। यथा,—

"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्।
त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः॥"

ग्राससंख्या पराशरेणोक्ता।

"सायं द्वाविंशतिग्रासाः प्रातः षड्विंशतिस्तथा
अयाचिते चतुर्व्विंशः परस्त्वनशनं स्मृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥*॥

तत्र अगम्यागमनादिप्रायश्चित्तम्। यथा,—

"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्व्विशुध्यति॥
प्रायश्चित्ते कृते दद्याद्गवां ब्राह्मणभोजनम्॥"
इति गारुडे २२६ अध्यायः॥*॥

रोहिणीनक्षत्रम्। यथा—

"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता॥"
इति प्रायश्चित्ततत्त्वम्॥

(प्रजापतेरपत्यमिति। ण्यः। प्रजापतिपुत्रः। यथा, कुमारे। ६। ३४॥

"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः॥"

प्रजापतेरिदमिति। प्रजापतिसम्बन्धिनि, त्रि। यथा, मार्कण्डेये। ४९। ७७॥

"प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम्॥"

प्राजापत्यः, पुं, (प्रजापतेरयमिति। प्रजापति+ण्यः। "प्रजापतेर्यज्ञ आसीत् प्रयागे।" इति महाभारतीय। १। ५५। १॥ वचनात् तथात्वम्।) प्रयागः। इति त्रिकाण्डशेषः॥ जैनराजभेदः। तत्पर्य्यायः। त्रिपृष्ठः २। इति हेमचन्द्रः। ३। ५९॥ कायनामकविवाहः।

सह धर्म्मं चरतां इति नियमं कृत्वा कन्या-दानम् । यथा,—

"इत्युक्ता चरतां धर्म्मं सहजा दीयतेऽर्थिने ।
स कायः पावयेत्तज्जः षट् षड् वंश्यान् सहा-त्मना ॥"

इति मिताक्षरा ॥

कायः कः प्रजापतिर्देवता अस्येति प्राजापत्य इत्यर्थः । इत्युदाहृतलक्षणम् ॥ (तथा च मनुः । ३ । ३० ।

"सहोभौ चरतां धर्म्ममिति वाचानुभाष्य च ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥")

प्राजापत्या, स्त्री, (प्रजापतिर्देवतास्या इति । प्राजापति+ण्यः । स्त्रियां टाप् ।) प्रव्रज्या-श्रमपूर्वकर्त्तव्यप्रजापतिदेवताकसर्वस्वदक्षिणा इष्टिः । यथा, मानवे ६ अध्याये ।

"प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्-गृहात् ॥"

प्राजिता, [ऋ] पुं, (प्राजतीति । प्र+अज्+तृच् । वीभावाभाव. ।) सारथिः । इत्यमर. । २ । ८ । ५९ ॥ प्रकृष्टगन्तरि, त्रि ॥

प्राज्ञः, पुं, (प्रकर्षेण जानातीति । प्र+ज्ञा+कः । ततः प्रज्ञ एव स्वार्थे अण् ।) कल्कि-देवस्य ज्येष्ठभ्राता । यथा,—

"कल्किं दृष्ट्वा हरिं ब्रह्मा माविर्भूतस्य मण्डले ।
कवि प्राज्ञ सुमन्त्रश्च पुरस्कृत्य महाप्रभम् ॥"

इति कल्किपुराणे द्वितीय अध्यायः ॥

पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा,—

"पण्डिते च गुणाः सर्वे मूर्खे दोषा हि केवलम् ।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते ॥"

इत्युद्भटः ॥)

राजशुकः । इति राजनिर्घण्टः ॥ (प्रकर्षेण अज्ञः इति विग्रहे मूर्खोऽपि ॥)

प्राज्ञः, त्रि, (प्रज्ञ+स्वार्थे अण् । यद्वा, प्रज्ञा-स्त्यस्येति । अच् ।) पण्डितः । (यथा, महा-भारते । १ । १४६ । १९ ॥

"पौरेषु विनिवृत्तेषु विदुरः सर्वधर्म्मवित् ।
बोधयन् पाण्डवश्रेष्ठमिद वचनमब्रवीत् ॥
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः ॥")

दक्षः । इति शब्दरत्नावली ॥ (विज्ञः । यथा, मनुः । २ । १२३ ।

"नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥")

प्राज्ञमानी, [न्] त्रि, (आत्मानं प्राज्ञं मन्यते इति । प्राज्ञ+मन्+णिनिः ।) पण्डिताभि-मानी । यथा, चरके ।

"दुःखिताय शयानाय श्रद्दधानाय रोगिणे ।
यो भेषजमभिप्राय प्राज्ञमानी प्रयच्छति ॥"

प्राज्ञा, स्त्री, (प्रज्ञास्त्यस्या इति । अच् । टाप् । बुद्धिमती । तत्पर्य्यायः । धीमती २ । इत्य-मरः । ३ । ६ । १२ ॥ बुद्धिः । यथा,—

"प्रज्ञा प्राज्ञा धरा ज्ञप्तिः पण्डा संवेदनं विदा"

इति रायमुकुटधृतशब्दार्णवः ॥

प्राज्ञी, स्त्री, (प्रज्ञ+स्वार्थे अण् । ङीप् ।) स्वयं ज्ञात्री । तत्पर्य्यायः । प्रज्ञा २ । इत्यमरः ।२। ६।१२ ॥ पण्डितपत्नी । इति प्राज्ञशब्दटीकायां भानुदीक्षितः ॥

प्राज्य, त्रि, प्रवीयते इति । प्र+अज्+ण्यत् । वीभावाभावः ।) प्रचुरम् । इत्यमरः ।३।१।६३॥ (यथा, कुमारे । २ । १८ ।

"स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः ।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥"

प्रभूतं आज्यं घृतं यस्येति विग्रहे प्रचुरघृत-सम्पन्नः । प्रकृष्टमाज्यमिति विग्रहे प्रकृष्ट-घृते, क्ली ॥)

प्राञ्जलः, त्रि, (प्र+अञ्ज+बाहुलकात् अलच् ।) सरलः । यथा,—

"ऋजावजिह्मप्रगुणौ प्राञ्जलः सरलोऽपि च ।"

इति जटाधरः ॥

प्राट्, [छ्] पुं, पृच्छति यः । (प्रच्छ+"क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घः सम्प्रसारणाभावश्च ।) प्रश्नकर्त्ता । इति मुग्धबोधव्याकरणम् ॥

प्राड्विवाकः, पुं, (पृच्छतीति प्राट् विविच्य वक्तीति विवाकः । ततः कर्म्मधारयः ।) व्यवहारद्रष्टा । जज् इति इङ्गरेजी भाषा । तत्पर्य्यायः । अक्ष-दर्शकः २ । इत्यमरः । २ । ८ । ५ ॥ व्यवहार-दर्शी ३ । इति शब्दरत्नावली ॥ हे व्यव-हाराणां ऋणादानादिविवादानां द्रष्टरि निर्णे-तरि धर्म्माध्यक्षे इत्यर्थः । पृच्छति वादिप्रति-वादिवाक्यं प्राट् दृष्टज्ञुष्टवाक् प्राडिति निपातः विविच्य वक्ति विवाकः कर्भावेऽसौ इति घञ् प्राट् चासौ विवाकश्चेति प्राड्विवाकः ।

"विवादानुगतं पृष्ट्वा पूर्ववाक्य प्रयत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥"

इति स्मृतिः । इति भरतः ॥

अपि च । अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धाविरुद्धञ्च सभ्यैः सह विवि-नक्ति विवेचयति वेति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः । उक्तञ्च ।

"विवादानुगत पृष्ट्वा ससभ्यस्तत् प्रजत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥"

इति मिताक्षरा ॥

प्राणः, पुं, (प्राणिति जीवति बहुकालमिति । प्र+अन्+अच् । प्राणित्यनेनेति करणे घञ् वा ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥ हृन्मा-रुतः । (यदुक्तम् ।

'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः')

बोलः । काव्यजीवः । अनिलः । बलम् । (यथा, हरिवंशे । ८६ । ३६ ।

"बाहुप्राणेन शूराणां समाजोत्सवसन्निधौ ॥")

पूरितं, त्रि । इति मेदिनी ॥ सूक्ष्मशरीरसमष्टुप-हितचैतन्यम् ॥ प्राग्गमनवान् नासाग्रस्थान-वर्त्ती वायुः । इति वेदान्तसारः ॥ तस्य कर्म्म बहिर्गमनम् । इति श्रीधरस्वामी ॥ तस्य रूपं स्थानानि च यथा,—

"इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम् ।
आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे ॥
प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन ॥"

इति योगार्णवः ॥

(यथा महाभारते । १२ । ३२८ । ३५ ।

"प्राणिना सर्वतो वायुश्चेष्टां वर्त्तयते पृथक् ।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते ॥")

पञ्चप्राणविवरणं बहुवचनान्तप्राणशब्दे द्रष्ट-व्यम् ॥ धातुः पुत्त्रः । यथा,—

"आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ।
भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ॥"

इति मार्कण्डेये रुद्रसर्गाध्यायः ॥

(वरपुत्त्रविशेषः । यथा मत्स्यपुराणे ।५।२३-२४

"ध्रुवस्य हव्यवाहश्च नरपुत्त्रावुभौ स्मृतौ ।
कल्याणिन्या ततः प्राणो रमणः शिशिरोऽपि च ॥
मनोहरा धरात् पुत्त्रानवापाथ हरेः सुता ॥")

प्राणकः, पुं, (प्राणैः प्राणेन वा कायतीति । कै+कः ।) सत्त्वजातीयः । प्राणिमात्रम् । जीवक-द्रुमः । बोलः । इति मेदिनी । के, ११५ ॥

प्राणथः, पुं, (प्राणित्यनेनेति । प्र+अन् प्राणने +"शीङ्शपिरुगमीति ।" उणा० ३ । ११३ । इति अथः ।) वायुः । (प्राणितीति । कर्त्तरि अथः ।) बलवान् इत्युणादिकोषः ॥ प्रजा-पतिः । तीर्थम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्राणदं, क्ली, (प्राणं प्राणनं बलं वा ददातीति । प्राण+दा+"आतोऽनुपेति ।" ३ । २ । ३ । इति कः ।) जलम् । रक्तम् । इति हेमचन्द्रः । ४ । १३६ ॥ (प्राणदातरि, त्रि । यथा, कथा-सरित्सागरे । २८ । ६ ॥

"अर्थप्रदानमेवाहुः संसारे सुमहत् तपः ।
अर्थदः प्राणदः प्रोक्तः प्राणा ह्यर्थेषु कीलिताः ॥")

प्राणदः, पुं, (प्राणं ददातीति । दा+कः ।) जीवकवृक्षः । इति राजनिर्घण्टः ॥

प्राणदा, स्त्री, (प्राण जीवन बल वा ददातीति । दा कः । टाप् ।) ऋद्धिवृक्षः । हरीतकी । इति राजनिर्घण्टः ॥ (प्राणदात्री । यदुक्तम् ।

"यशोहरे किमाश्चर्य्यं प्राणदा यमदूतिका ॥")

प्राणनं, क्ली, (प्र+अन प्राणने+ल्युट् ।) जीव-नम् । इति जटाधरः ॥ (यथा, भागवते । ३ । २६ । ४१ ।

"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम् ।
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ॥"

चेष्टनम् । यथा, ऋग्वेदे । १ । ४८ । १० ।

"विश्वस्य हि प्राणनं जीवनं त्वे वियदुच्छसि सूनरि ॥"

"हे सूनरि उषोदेवि विश्वस्य सर्वस्य प्राणि-जातस्य प्राणनं चेष्टनं जीवनं प्राणधारणञ्च।"

इति तद्भाष्ये सायनः ॥ प्राणित्यनेनेति करणे
ल्युट्) गले, पुं । (इति शब्दचन्द्रिका ॥
प्राणनाथः, पुं, (प्राणानां नाथः ।) पतिः । इति
शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३
परिच्छेदे ।
"चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥"
स्त्रियां टाप् । पत्नी । यथा, विष्णुस्तोत्रे ।८।
"धात्रीं स्वात्रीं जनित्रीं प्रकृतिमविकृतिं विश्व
शक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां
प्रणौमि ॥")
प्राणन्तः, पुं, (प्राणित्यनेनेति । प्र + अन् + "रुहि
नन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणा० ३ ।
१२७ । इति झच् ।) वायु । इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः ॥ रसाञ्जनम् । इत्युणादि
कोषः ॥
प्राणन्ती, स्त्री, (प्र + अन् झच् । स च षित् ।
षित्वात् ङीष् ।) क्षुत् । हिक्का । इत्युणादि-
कोषः ॥
प्राणप्रदा, स्त्री, (प्राणं प्रददातीति । प्र + दा + कः)
ऋद्धिनामकौषधम् । इति रत्नमाला ॥ (प्राण-
दातरि, त्रि । यथा, कथासरित्सागरे ।२२।८९।
"त्वाञ्च दृष्ट्वाधुनात्मीयो देवि ! प्राणप्रदः सुहृत्
सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्मृतः ॥")
प्राणभास्वान्, [त्] पुं, (प्राणेन वायुना जलेन
वा भास्वान् उद्दीप्तः । समुद्रः । इति शब्द-
रत्नावली ॥
प्राणमयकोषः, पु, (प्राणमयः कोषः आच्छादकः ।)
कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदा-
न्तसारः ॥
प्राणसंयमः, पुं, (प्राणानां संयमः ।) प्राणा-
यामः । यथा, "तदशक्तौ तच्चतुर्थमेवं प्राणस्य
संयमः ॥" इति तन्त्रसारः ॥
प्राणसद्म, [न्] क्लो, प्राणानां सद्म गृहम् ।)
शरीरम् । इति केचित् ॥
प्राणसमा, स्त्री, (प्राणाना समा ।) पत्नी । इति
हेमचन्द्रः । ३ । १८० ॥ (यथा, गीतगोविन्दे ।
१ । ३८ ।
"नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥'
प्राणतुल्य, त्रि । यथा, रामायणे ।१।१।२६ ।
"रामस्य दयिता भार्य्या नित्यं प्राणसमा
हिता ॥"
तथा च तत्रैव । २ । ३१ । १० ।
"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे ॥"
पत्यौ, पुं । इति हेमचन्द्रः । ३ । १८० ॥)
प्राणहारकं, क्लो, (प्राणान् हरतीति । हृ +
ण्वुल् ।) वत्सनाभः । इति राजनिर्घण्टः ॥
असुनाशके, त्रि ॥
प्राणाः, पु, (प्राणित्येभिरिति । प्र + अन + करणे
घञ् । असवः । इत्यमरः । २ । ८ । ११९ ॥
"हे पञ्चसन्निहितेषु पञ्चवायुषु । अस्यन्ते असवः
नाश्नोति उः । प्राणिति एभिः प्राणाः घञ् ।
एवमिति असवन् प्राणा अपि पुं बहुत्वे इत्यर्थः
असुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणा-
दय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम्
अतएव प्राणोऽपान इत्युक्त हृदि प्राणो गुदे-
ऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां
भरतः ॥ (यथा, हितोपदेशे । १ । ७३ ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दया कुर्वन्ति साधवः ॥")
शरीरस्थपञ्चप्राणा यथा,—
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥"
शरीरस्था इमे——————॥"
इत्यमरः । १ । १ । ६७ ॥
"इमे प्राणादयः पञ्च वायवः शरीरं तिष्ठन्ति ते
च नियतस्थानस्थाः ॥ यदाहुः ।
"हृदि प्राणो गुदेऽपानः समानो नाभि-
संस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥"
एवं तद्व्यापाराश्च यथा,—
"अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"
इति च भरतः ॥
प्राणकराणि यथा,—
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
प्राणहराणि यथा,—
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यकर्म्मलोलोचने ॥
प्राणवियोगकालकर्त्तव्यं यथा,—
कण्ठस्थाने गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र शीघ्रं निःसारयेद्गृहात् ।
कुशास्तरणशायी च दिशः सर्वा न पश्यति ।
लब्धस्मृतिमुहूर्त्तान्तु यावज्जीवो न नश्यति ॥
वाचयेत् स्व इभावेन भूमे देवा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोत्पन्नेन माधवि ॥
परलोकहितार्थाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गाव ईश्वरेणावतारिताः ॥
अमृतं चरयन्त्यथ प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन शीघ्रं मुच्येत किल्बिषात् ॥
पश्चात् श्रुतिपथं दिव्यमुत्कर्णेन च श्रावयेत् ।
यावत्प्राणान् प्रमुच्येत कृत्वा कर्म्म सुदुष्करम् ॥
दृष्ट्वा सुविह्वलं दीनं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोक्षणम् ।
मधुपर्कं त्वरन् गृह्य इदं मन्त्रमुदाहरेत् ॥"
मन्त्र ।
"गृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवत्-प्रियाणां
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
तत एतेन मन्त्रेण दद्यादे मधुपर्ककम् ।
पुरुषो मृत्युकाले तु परलोकसुखावहम् ॥
एवं विनिःसृतात् प्राणात् संसारञ्च न गच्छति
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशं गतम् ॥
महावनस्पतिं गत्वा गन्धांश्च विविधानपि ।
घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥
तेजोऽव्ययकरं वास्य तत्सर्व्वं परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च ॥
तीर्थस्यावाहनं कृत्वा स्नापनं तस्य कारयेत् ॥
गयादीनि च तीर्थानि ये च पुण्याः शिलो-
च्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ॥
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयुर्बलदा तथा ॥
वनानि नववाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत् ॥
प्राणान्तन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ॥
देवानग्निमुखान् ध्यात्वा गृह्य हस्ते हुताशनम्
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदाहरेत् ॥"
मन्त्रः ।
"कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
दहेयं तस्य गात्राणि दैवलोकाय गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवम्भवति पुत्रक ! ।
गात्राणि वाससी चेव प्रक्षाल्य विनिवर्त्तयेत् ॥
मृतनाम तथोद्दिश्य दद्यात् पिण्डं महीतले ।
तदाप्रभृति चाशौच दैवकर्म्म न कारयेत् ॥"
इति वराहपुराणे श्राद्धोत्पत्तिनामाध्यायः ॥
प्राणा, स्त्री, (प्राणिति बहुकालमिति । प्र + अन्
+ अच् । टाप् ।) पक्षिणीविशेषः । सा
चारुणगरुडयोः श्वश्रूः । यथा,—
"पुत्रहस्यात्मजः सर्गः प्राणायास्तु निबोधत ।
कन्याः षडिति विख्याताः प्राणाया वै विजज्ञिरे ॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुनी शुकी
अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ॥
सम्पातिश्च जटायुश्च प्रसूता पक्षी सत्तमौ ।
सम्पातिर्जनयत् गृध्रान् काकाः पुत्रा जटायुषः
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ॥"
इत्यग्निपुराणम् ॥
प्राणाधिनाथः, पु, (प्राणानामधिनाथः ।) पतिः ।
इति हलायुधः । २ । ३४२ ॥
प्राणापानौ, पुं, (प्राणश्च अपानश्च तौ । तदा-
त्मकौ वायू । यथा, विष्णुपुराणे ।६।७।४१ ।
"परस्परेणाभिभव प्राणापानौ यथानलौ ॥")
अश्विनीकुमारौ । यथा,—
"प्राणापानौ कथं देवावश्विनौ संबभूवतुः ॥"
इति प्रजापालप्रश्ने ।

महातपा उवाच ।
"तस्याः प्राणायामवत्यां मार्त्तण्डस्तीव्रतेजसा
बीजं निर्व्वापयामास तज्जलं तद्द्विधापतत् ॥
तत्र प्राणश्चापानश्च योगी वायुजितौ पुरा ।
वरदानेन च पुनर्मूर्त्तिमन्तौ बभूवतुः ॥
तौ प्राणायामवत्यां जातौ येन नरोत्तमौ ।
ततस्तावश्विनौ देवौ कीर्त्यते रविनन्दनौ ॥"
इति वाराहे अश्विनोत्पत्तिनामाध्यायः ॥

प्राणायामः, पुं, (प्राणस्य वायुविशेषस्य आयामो रोधः । यद्वा, प्राण आयस्यतेऽनेनेति । आ + यम् + करणे घञ् ।) योगाङ्गविशेषः । (यथा, भागवते । ३ । २८ । ११ ।
"प्राणायामैर्द्दहेद्दोषान् धारणाभिश्च किल्विषान् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥")
तत्राङ्गुलिनियमो ज्ञानार्णवे ।
"कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्ज्जनीमध्यमे विना ॥"
स द्विविधः । सगर्भो निर्गर्भश्च । तथा च ।
"सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेदिति"
मात्रा च ।
वामजानुनि तद्धस्तभ्रामणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्व्वेदपारगैः ॥"
अथ प्राणायामः । मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडशवारजपेन वामनासापुटे वायुं पूरयेत् तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत् । तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत् । पुनर्द्दक्षिणेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् । पुनर्व्वामेनापूर्य्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत् । तथा च कालीहृदये ।
"प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेन वा ।
अथवा मन्त्रबीजेन यथोक्तविधिना सुधीरिति ॥"
सारसमुच्चयेऽपि ।
"विपरीतमतो विदधीत बुधः
पुनरेव तु तद्विपरीतकर्म्मेति ॥"
यौगिकं पुनर्मात्रानियमः । तथा च गौतमीये
"मन्त्रप्राणायामः प्रोक्तो यौगिकं कथयामि ते
पूरयेदिडया विद्वान् मात्राषोडशसंख्यया ॥"
यद्वा, चतुःषोडशाष्टवारजपेन पूरकादिकं कुर्य्यात् । अथवा एकचतुर्द्विवारेण । तथा च तन्त्रान्तरे ।
"पूरयेत् षोडशभिर्व्वायुं धारयेत्तच्चतुर्गुणैः ।
रेचयेत् कुम्भकार्द्धेन अशक्त्या तत्तुरीयकः ॥"
तदशक्तौ तच्चतुर्थमेव प्राणस्य संयमः । अस्य नित्यत्वमाह तत्रैव ।
"प्राणायामं विना मन्त्रपूजने न हि योग्यता ॥"
गोपाले तु विशेषो यथा, —
कामबीजस्यैकवारजपेन दक्षिणनासया वायुं रेचयेत् । पुनः सप्तवारजपेन वामनासया वायुं पूरयेत् । नासापुटौ धृत्वा विंशतिवारजपेन वायुं कुम्भयेत् । पुनर्व्वामेन रेचयेत् । दक्षिणेन पूरयेत् । उभाभ्यां कुम्भयेत् पुनर्द्दक्षिणेन रेचयेत् । वामेनापूर्य्य उभाभ्यां कुम्भयेत् । तथा च ।
"एकेन रेचयेत् कामबीजेनैव पृथक् पृथक् ।
पूरयेत् सप्तजप्तेन विंशत्या तेन धारयेत् ।
सर्व्वेषु कृष्णमन्त्रेषु बीजेनानेन रेचयेत् ॥"
यद्वा मूलमन्त्रेणैव प्राणायामः । तथा च ।
"पवनसंयममन्त्रमुनाचरेत् ।
यमिह जप्तुमसौ मनुमिच्छति ।"
यदि दशाक्षरं जपति तदा दशाक्षरेण चेत्तथ चाष्टाविंशतिवारं रेचयेत् ।
"पूरयेदिडया तद्वद्धारयेत्तत्प्रमाणतः ।
प्राणायामो भवेदेको रेचपूरककुम्भकैः ॥
अष्टादशाक्षरेण चेत् द्वादशैव समाचरेत् ॥"
अन्यमनुभिर्व्वर्णानुरूपमित्युक्तत्वात् ।
तत्तन्मन्त्रवर्णसंख्याकैः रेचकादित्रयं कुर्य्यात् ।
क्रमदीपिकायाम् । रेचयेन्मारुतं दक्षया दक्षिणः । पूरयेदिडया मध्यनाड्या पुनर्धारये दित्यादि एतत्तु श्रीकृष्णमन्त्रविषयं नान्यत्र ।
इति तन्त्रसारः ॥ * ॥ अपि च ।
"आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ।
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ॥
अगर्भात्तु सगर्भश्च प्राणायामस्ततोऽधिकः ।
एव द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ॥
कुम्भको निश्चलत्वात् स रेचनाद्रेचकस्त्रिधा ।
लघुर्द्वादशमात्रः स्याच्चतुर्व्विंशतिकः परः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारश्च रोधनम् ॥"
इति गारुडे ४९ अध्यायः ॥ * ॥
तस्य फलं यथा, —
"प्रथमं जनयेत् स्वेदं मध्यमेन च वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥"
इति तत्रैव २३० अध्यायः ॥ * ॥
अन्यच्च ।
"यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमं जनयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहशार्द्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी च्छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वन्निषिद्धः पवनः किल्विषं न नृणां तनुम् ।
तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्राप्तिस्तथा सम्वित्प्रसादश्च महीपते !
स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणामिष्टदुष्टानां जायते फलसंक्षयः ।
चेतसो विकषायत्वं यत्र सा ध्वस्तिरुच्यते ॥"
इष्टदुष्टानां पुण्यपापानाम् ।
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्वकामिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानातीन्दुसूर्य्यक्षग्रहाणां ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति सम्विदम् ।
तदा सम्विदिति ख्याता प्राणायामस्य सा स्थितिः ॥
यान्ति प्रसादं येनास्य मनः पञ्च च वायवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युञ्जतश्च यथायोगं यादृग्विहितमानसम् ॥"
इति मार्कण्डेयपुराणे योगिचिकित्सानामाध्यायः ॥ * ॥ अन्यच्च ।
"प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥"
एतेषां टीका । "प्राणायाममाह प्राणाख्यमिति सबीजः सालम्बनो भगवन्मूर्त्तिध्यानमन्त्रजपसहितः । द्विविधस्यापि तस्य पुनस्त्रैविध्यमाह परस्परेणेति । उच्छासेन मुखनासिकाभ्यां बहिर्निर्गच्छति वायुः स प्राणः । निश्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणवृत्त्यापानवृत्तेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानवृत्त्या प्राणवृत्तेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन स प्राणायामो द्विधा । तयोर्युगपत्संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः यद्वा । सद्विधानेनेत्येकमेव पदम् । तत्र चायमर्थः । सद्विधानेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूत इव यश्च कुम्भकेनोभयोः सहाभिभवः । एवमभिभवत्रयेणैव प्राणायाम इति । सबीजस्यालम्बनमाह । तस्य चेति । स्थूलं वक्ष्यमाणं हिरण्यगर्भादिरूपम् ।" इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥ गायत्री-प्राणायामो यथा, —
'सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः ।
अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः ॥
सर्व्वपापहरं प्रोक्तं प्राणायामं द्विजन्मनाम् ।

ततस्त्वभ्यधिकं नास्ति तपः परमपावनम् ॥
प्राणसंधारणं मासं कुशाग्रेणाम्बुबिन्दुना ।
यः कुर्य्यात् प्रयतो नित्यं प्राणायामस्तु तत्समः ॥
निरोधाज्जायते वायुस्तस्मादग्निस्ततो जलम् ।
त्रिभिः शरीरं सकलं प्राणायामेन शुध्यति ॥
आकेशादानखाग्राच्च तपस्तप्येत् सुदारुणम् ।
आत्मानं शोधयेद्यस्तु प्राणायामैः पुनः पुनः ॥
श्रावण्यां पौर्णमास्याञ्च सोपवासो जितेन्द्रियः
प्राणायामशतं कृत्वा मुच्यते सर्वकिल्बिषैः ॥”
इत्यग्निपुराणम् ॥

प्राणिद्यूतं, क्ली, (प्राणिभिर्मेषादिभिः कृतं द्यूतमिति मध्यपदलोपी समासः ।) पणपूर्व्वकमेषकुक्कुटादियुद्धम् । तत्पर्य्यायः । समाह्वयः २ । इत्यमरः । २ । १० । ४६ ॥ साह्वयः । ३ । इति शब्दरत्नावली ॥

प्राणिमाता, स्त्री, (प्राणिनां मातेव गर्भदातृत्वात् ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

प्राणिहिता, स्त्री, (प्राणिनां हिता ।) पादुका । इति त्रिकाण्डशेषः ॥ लोकहितकारिणी च ॥

प्राणी, [न्] त्रि, (प्राणाः सन्त्यस्येति । प्राण + “अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः ।) प्राणविशिष्टः । मनुष्यादिः । तत्पर्य्यायः । चेतनः २ जन्मी ३ जन्तुः ४ जन्युः ५ शरीरी ६ । इत्यमरः । १ । ४ । ३० ॥ (यथा, मनौ । १ । २२ ।
“कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः ।
साध्यानाञ्च गणं सूक्ष्मं यज्ञञ्चैव सनातनम् ॥”)

प्राणीत्यं, क्ली, (प्रणीतस्य प्रयोजितस्य भावः । प्रणीत + ष्यञ् ।) ऋणम् । यथा, त्रिकाण्डशेषः ।
“प्राणीत्यमृणमर्थानां प्रयोगः स्यात् कलान्तिका ॥”

प्राणेशः, पुं, (प्राणानामीशः ।) पतिः इति जटाधरः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
“स्वामिन् ! भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥”)

प्राणेशा, स्त्री, (प्राणानामीशा ।) भार्य्या । इति हेमचन्द्रः ॥

प्रातः, [र्] व्य, (प्राततीति । प्र + अत् + “प्रातेररन् ।” उणा० ५ । ५८ । इति अरन् ।) प्रभातम् । तत्पर्य्यायः । प्रगे २ । इत्यमरः । ३ । ४ । १८ ॥ सूर्य्योदयादवधित्रिमुहूर्त्तकालः । यथा,—
“प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु ॥”
इति तिथ्यादितत्त्वम् ॥
(यथा, रघौ । १ । ८० ।
“प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥”)

प्रातःकृत्यं, क्ली, (प्रातः प्रभातकालस्य कृत्यं कर्त्तव्या क्रिया ।) प्रभातकर्त्तव्यकर्म्म । तदनुष्ठानं यथा,
“ब्राह्मे मुहूर्त्ते उत्थाय धर्म्ममर्थञ्च चिन्तयेत् ।
कायक्लेशांस्तदुद्भूतं ध्यायेत मनसेश्वरम् ॥
उषःकालेऽथ संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन शुध्यन्ति येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं शुभम् ।
ऋषीणां ऋषिता नित्यं प्रातःस्नानान्न संशयः ॥
मुखे सुप्तस्य सततं लालाद्याः प्रस्रवन्ति हि ।
ततो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्व्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ॥
न च स्नानं विना पुंसां पावनं प्रत्यहं स्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत् ॥
अशक्तावशिरस्कं वा स्नानमस्य विधीयते ।
आर्द्रेण वाससा वाथ मार्ज्जनं कायिकं स्मृतम्
अप्रायत्ये समुत्पन्ने स्नानमेव समाचरेत् ।
ब्राह्मादीनि यथाशक्ति स्नानान्याहुर्म्मनीषिणः ॥
ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च ।
वारुणं यौगिकं तद्वत् षोढा स्नानं प्रकीर्त्तितम् ॥
ब्राह्मन्तु मार्ज्जनं मन्त्रैः कुशैः सोदकबिन्दुभिः ।
आग्नेयं भस्मना पादमस्तकादिविधूननम् ॥
गवां हि रजसा प्रोक्तं वायव्यं स्नानमुत्तमम् ।
यत्तु सातपवर्षेण स्नानन्तद्दिव्यमुच्यते ॥
वारुणञ्चावगाहन्तु मानसन्त्वात्मवेदनम् ।
यौगिकं स्नानमाख्यातं योगो विष्णुविचिन्तनम्
आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः ॥
मनःशुचिकरं पुंसां नित्यन्तत्स्नानमाचरेत् ।
शक्तश्चेद्वारुणं विद्वान् प्राजापत्यन्तथैव च ॥*॥
प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा विधानतः ।
आचम्य प्रयतो नित्यं स्नानं प्रातः समाचरेत् ॥
मध्याङ्गुलिसमस्थौल्यं द्वादशाङ्गुलसम्मितम् ।
सत्वचं दन्तकाष्ठं स्यात्तस्याग्रेण च धावयेत् ॥
क्षीरिवृक्षसमुद्भूतं मालतीसम्भवं शुभम् ।
अपामार्गञ्च बिल्वञ्च करवीरं विशेषतः ॥
वर्ज्जयित्वा निन्दितानि गृहीत्वैकं यथोदितम् ।
परिहृत्य दिनं पापं भक्षयित्वा विधानतः ॥
नोत्पाटयेद्दन्तकाष्ठं नाङ्गुल्या धावयेत् क्वचित्
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः ॥
स्नात्वा सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा ।
सम्मार्ज्य मन्त्रैरात्मानं कुशैः सोदकबिन्दुभिः ॥
आपोहिष्ठाव्याहृतिभिः सावित्र्या वारुणैः शुभैः ।
ओँकारव्याहृतियुतां गायत्त्रीं वेदमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक्कूलेषु समासीनो दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत् सन्ध्यामिति श्रुतिः
या सन्ध्या सा जगत्सूतिर्मायातीता च निष्कला ।
ऐश्वरी तु परा शक्तिस्तत्त्वत्रयसमुद्भवा ॥
ध्यात्वार्कमण्डलगतां विप्रः सन्ध्योपासनमाचरेत्
प्राङ्मुखः सततं विप्रः सन्ध्योपासनमाचरेत् ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
यदन्यत् कुरुते किञ्चित् न तस्य फलमाप्नुयात् ॥
अनन्यचेतसः शान्ता ब्राह्मणा वेदपारगाः ।
उपास्य विधिवत् सन्ध्यां प्राप्ताश्च परमां गतिम्
योऽन्यत्र कुरुते यत्नं धर्म्मकार्य्ये द्विजोत्तमः ।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम् ॥
तस्मात् सर्व्वप्रयत्नेन सन्ध्योपासनमाचरेत् ।
उपासितो भवेत्तेन देवो योगतनुः परः ॥
सहस्रपरमां नित्यं शतमध्यां दशावराम् ।
सावित्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः स्थितः
अथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैरृग्यजुःसामसम्भवैः ॥
उपस्थाय महायोगं देवदेवं दिवाकरम् ।
कुर्व्वीत प्रणतिं भूमौ मूर्द्ध्ना नित्यञ्च मन्त्रतः ॥*॥
ओँ खं खद्योताय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
नमस्ते घृणये तुभ्यं सूर्य्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम् ॥
भूर्भुवः स्वस्त्वमोङ्कारः सर्वे रुद्राः सनातनाः ।
पुरुषः सन्महोऽन्तस्त्वां प्रणमामि कपर्द्दिनम् ॥
त्वमेव विश्वं बहुधा सदसत् सूयसे च यत् ।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः ॥
प्राचेतसे नमस्तुभ्यमुमायाः पतये नमः ।
नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ॥
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ।
नम उमापतये तुभ्यमादित्याय नमोऽस्तु ते ॥
नमस्ते वज्रहस्ताय त्र्यम्बकाय नमोऽस्तु ते ।
प्रपद्ये त्वां विरूपाक्ष ! महान्तं परमेश्वरम् ॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परामृतम् ॥
विश्वं पशुपतिं भीमं नरनारीशरीरिणम् ।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने ।
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥*॥
एतद्वै सूर्य्यहृदयं जप्त्वा स्तवमनुत्तमम् ।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम् ॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये ।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम् ॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम् ।
ब्राह्मणानां हितं पुण्यं ऋषिसङ्घैर्निषेवितम् ॥
यस्तु नित्यं पठेद्धीमान् प्रेक्षन्नादित्यमण्डलम् ।
महापातकयुक्तोऽपि पूयते नात्र संशयः ॥
क्षयापस्मारकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि सन्
जप्त्वा शतगुणं स्तोत्रं स स्वाध्यो भवति द्रुतम् ॥
भूतग्रहपिशाचातिबीजव्यसनकर्षिभिः ।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात्
अथागत्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसम् ॥
ऋत्विक्पुत्त्रोऽथ पत्नी वा शिष्यो वापि सहोदरः ।
प्राप्यानुज्ञां विशेषेण जुहुयुर्वा यथाविधि ॥
पवित्रपाणिः पूतात्मा शुक्लाम्बरधरोत्तरः ।
अनन्यमानसो भूत्वा जुहुयात् संयतेन्द्रियः ॥
विना दर्भेण यत् कर्म्म विना मन्त्रेण वा पुनः
राक्षसं तद्भवेत् सर्व्वं नामुत्रेह फलप्रदम् ॥*॥

दैवतानि नमस्कुर्य्यादेयमाराधिवेदयेत्।
दद्यात् पुष्पादिकं तेषां वृद्धांश्चैवाभिवादयेत्॥
गुरुञ्चैवाप्युपासीत हितञ्चास्य समाचरेत्।
वेदाभ्यासं ततः कुर्य्यात् प्रयत्नाच्छक्तितो द्विजः।
जपेदध्यापयेच्छिष्यान् श्रावयेच्च विधारयेत्।
अवेक्षेत च शास्त्राणि धर्म्मादीनि द्विजोत्तमः॥
वैदिकांश्चैव नियमान् वेदाङ्गानि विशेषतः।
उपेयादीश्वरञ्चाथ योगक्षेमप्रसिद्धये॥
साधयेद्विविधानर्थान् कुटुम्बार्थे ततो द्विजः॥"
इति कौर्म्मे उपविभागे १७ अध्यायः॥ *॥
अपि च।
"प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम्।
प्रसन्नवदनं शान्तं स्मरेत्तन्नामपूर्व्वकम्॥"
ॐ नमो गुरवे तस्मा इष्टदेवस्वरूपिणे।
यस्य वाक्यामृतं हन्ति विषं संसारसंज्ञकम॥"
इति पठेत्॥
"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्॥"
इति भावयेत्।

"लोकेश! चैतन्यमयाधिदेव
श्रीकान्त विष्णो भवदाज्ञयैव।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये॥
जानामि धर्मं न च मे प्रवृत्ति-
र्जानाम्यधर्मं न च मे निवृत्तिः।
त्वया हृषीकेश! हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि॥"

विष्णुपुराणे।
"प्रबुद्धश्चिन्तयेद्धर्म्ममर्थञ्चास्याविरोधिनम्।
अपीडया तयोः काममुभयोरपि चिन्तयेत्॥"
धर्म्मलक्षणन्तु भविष्ये।
'धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनम्॥"
अतएव जैमिनिः। चोदनालक्षणोऽर्थो धर्म्म इति। तेन वैदिकलिङ्गप्रतिपाद्योऽर्थो धर्म्मः। कोऽर्थो योऽभ्युदयाय इति तु भविष्ये॥ *॥
ततः ॐ प्रियदत्तायै भुवे नमः। इति नमस्कृत्य दक्षिणं चरणं न्यसेत्। छन्दोगपरिशिष्टम्।
"श्रोत्रियं सुभगाङ्गाञ्च अग्निमग्निचितं तथा
प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते॥
पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम्।
प्रातरुत्थाय यः पश्येत्तत् कलेरुपलक्षणम्॥"
अतएव व्यास।
"धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्॥"
महाभारते।
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम॥"
मात्स्ये।
"कार्त्तवीर्य्यार्ज्जुनो नाम राजा बाहुसहस्रभृत्
योऽस्य संकीर्त्तयेन्नाम कल्यमुत्थाय मानवः॥
न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः॥"

कल्यं प्रातः॥ *॥
अथ विण्मूत्रोत्सर्गः। विष्णुधर्म्मोत्तरे।
"निद्रां जह्यादृग्द्धो राम! नित्यमेवारुणोदये
वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम्॥
स्नानं समाचरेत् प्रातः सर्व्वकल्मषनाशनम्॥"
अरुणोदयकालमाह स्कन्दपुराणम्।
"उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः।
तत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतम्॥"
नाडिका दण्डः। विष्णुधर्मोत्तरे।
"वेगरोधं न कर्त्तव्यमन्यत्र क्रोधवेगत।"
आयुर्व्वेदीयेऽपि। न वेगितोऽन्यकार्य्यसिद्धिः स्यान्नाजित्वा साध्यमामयम्। अङ्गिराः।
"उत्थाय पश्चिमे रात्रेस्तत आचम्य चोदकम्।
अन्तर्द्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा॥
वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्ज्जितः॥
कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः॥"
विष्णुपुराणम्।
"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर!।
नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः॥
तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत्॥"
कल्यमुषःकालम्। मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गं। नैरृत्यामुत्थानदेशमारभ्य उत्थायेत्यनेन उपस्थितेः इषुप्रक्षेपयोग्यदेशाद्दहिः। तद्देशपरिमाणमाह पितामहः।
"मध्यमेन तु चापेन प्रक्षिपेत् शरत्रयम्।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥"
आपस्तम्बः।
मूत्रपुरीषोत्सर्गं कुर्य्याद्दक्षिणां दिशं दक्षिणापरां वेति।" दक्षिणापरां नैरृतीम्। मनुः।
"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥"
यत्तु यमवचनम्।
"प्रत्यङ्मुखश्च पूर्व्वाह्णे त्वपराह्णे च प्राङ्मुखः।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः॥"
इति तदिच्छाविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात्।
तथा च देवलः।
"सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः।
विण्मूत्रमाचरेन्नित्य सन्ध्यायां परिवर्ज्जयेदिति"
अत्र प्रातःसायाह्नशब्दौ दिवारात्रिपरौ पूर्व्वोक्तमनुवचनैकवाक्यत्वात्। सन्ध्यायां परिवर्ज्जयेदिति तु पीडितेतरपरम्॥*॥ यमः।
"कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्।
विण्मूत्रे च गृही कुर्य्यादथवा कर्णे समाहितः॥
पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतं तत् पृष्ठलम्बितंनिवीतमापृष्ठदेशावलम्बं ग्राम्यधर्मेष्विति निगमपरिशिष्टवचनात्।
"नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः॥"
इति मनुवचनाच्च॥
अत्र संवीतं निवीतं संवीतं मानुष इति तैत्तिरीयश्रुतेः। मानुषे सनकादिकृत्ये। पृष्ठलम्बित निवीती वेति बौधायनीयाच्च। ततश्च हारवत्

कृत्वा पृष्ठलम्बितं स्कन्धे इत्यर्थः। एकवस्त्रतापक्षे व्यवस्थामाह सांख्यायनः। यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति। कर्णे दक्षिणे। पवित्रं दक्षिणे कर्णे विण्मूत्रमाचरेदिति स्मृतौ तथा दर्शनात्। अवगुण्ठितः कृतशिरोऽवगुण्ठनः। मनुः।
"छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥"
महाभारते।
"प्रत्यादित्यं प्रतिजलं प्रति गाञ्च प्रति द्विजम्।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः॥"
प्रतिः सांमुख्ये॥ *॥ मनुः।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
नवाग्निविप्रानादित्यमपः पश्यंस्तथैव च॥
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्ज्जनम्॥"
ससत्त्वेषु प्राणिमत्सु। संस्थित उत्थितः। पर्व्वतनिषेधादेव मस्तकनिषेधे सिद्धे पुनर्निषेधो यत्र पर्व्वतोऽशक्यपरीहारस्तत्रापि मस्तकवर्ज्जनार्थः। अथवा। पर्व्वतमस्तकनिषेधोऽधिकदोषाय॥ *॥ वशिष्ठः।

"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्बुद्धिगुप्ती च तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये॥"

निर्हारो मूत्रपुरीषोत्सर्गः। विहारः स्त्रीसंभोगः। योगः समाधिः। वाग्गुप्तिरशुभालापत्यागः। बुद्धिगुप्तिरनिष्टचिन्तात्यागः। हारीतः
"आहारन्तु रहः कुर्य्यान्निर्हारञ्चैव सर्व्वदा।
गुप्ताभ्यां लक्ष्म्यपतेः स्यात् प्रकाशे हीयते तया॥"
विष्णुपुराणम्।
"सामाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न सम्मुखम्
कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः॥"
आपस्तम्बः। "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति।" लघुमनुः।
"करगृहीतपात्रेण कृत्वा मूत्रपुरीषके।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत्॥"
भरद्वाजः।
"अथावकृष्य विण्मूत्रं लोष्टकाष्ठतृणादिना।
उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः॥"*॥
उदस्तवासाः कटिदेशादूर्द्ध्वक्षिप्तवस्त्रः।

अथ शौचम्। देवलः।
"धर्मविद्दक्षिणं हस्तमधःशौचे न योजयेत्।
तथैव वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत।
प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया॥"
कारणाद्रोगादेः। ब्रह्माण्डपुराणम्।
"उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः।
उदङ्मुखो दिवा कुर्य्याद्रात्रौ चेद्दक्षिणामुखः॥
सुनिर्णिक्ते मृदं दद्यात्सदन्ते त्वप एव च॥"

कुर्य्याच्छौचमिति शेषः। सुनिर्णिक्ते भरद्वाजोक्त लोष्टादिप्रमृष्टे गुदे। उदकपात्राभावे करैव जलाशयात् उदकग्रहणमाह आदित्यपुराणम्।
"हस्तमात्रं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते।
पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्॥"
तस्मिन् देशे शौचं कर्त्तव्यं यस्माद्धस्तमात्रव्यव हितं जलं तत्स्थलमिव तीर्थं जलसमीपत्वात्॥*
विष्णुपुराणम्।
"वल्मीकमूषिकोत्खातां मृदमन्तर्जलान्तथा।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम्॥
अन्तःप्राण्यवपन्नाञ्च हलोत्खातां सकर्द्दमाम्॥"
मनुदक्षौ।
"एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश।"
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥"
उभयोः करयोः। वामहस्ते दशदानानन्तरं तत्पृष्ठे षड्दानमाह हारीतः। दशमध्ये च षट् पृष्ठे इति। शङ्खदक्षौ।
"तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम्
तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः॥"
नखशोधनं तृणादिना नखान्तर्मलशोधनम्।
तिस्र इति हस्तयोरिति शेषः॥ * ॥
पादप्रक्षालनं न कांस्ये कर्त्तव्यमित्याह विष्णु धर्म्मोत्तरम्।
"दर्भैर्न मार्ज्जयेत् पादौ न च कांस्ये प्रधावयेत्॥
दक्षः।
"लिङ्गे तत्र समाख्याता त्रिपर्व्वी पूर्य्यते यया
अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥
द्वितीया च तृतीया च तदर्द्धं परिकीर्त्तितम्॥"
यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्।
"गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः॥"
इति याज्ञवल्क्यवचनात्॥
गुदादन्यत्र परिमाणमाह यमः।
"मृत्तिका तु समुद्दिष्टा त्रिपर्व्वी पूर्य्यते यया।
त्रिपर्व्वी तर्ज्जनीमध्यमानामिकानामग्रपर्व्व-त्रयम्॥ * ॥ मूत्रमात्रे तु स्मृतिः।
"एकां लिङ्गे मृदं दद्यात् वामहस्ते तु मृत्त्रयम्
उभयोर्हस्तयोर्द्वे तु मूत्रशौच प्रकीर्त्तितम्॥"
ब्रह्मपुराणे।
"पादयोर्द्वे गृहीत्वा च सुप्रक्षालितपाणिमान्
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्"
पादयोर्द्वे एकैका। इदं मूत्रे पुरीषोत्सर्गे तिसृणां विधानात्॥ * ॥ दक्षः।
"यथोदितं दिवा शौचमर्द्धं रात्रौ विधीयते।
आतुरे च तदर्द्धं स्यात् तदर्द्धन्तु पथि स्मृतम्॥"
यथोक्तकरणाशक्ताविदं न तु निद्रादिपुरस्कारेणैव वाक्यस्यादृष्टार्थतापत्तेः॥*॥ आपस्तम्बः।
"पथि पादस्तु विज्ञेय आर्त्तः कुर्य्याद्यथाबलम्
एतयोर्व्विरोधस्तु आर्त्तानार्त्ताभ्यां परिहरणीयः। दक्षः।
"देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थाञ्च ज्ञात्वा शौच प्रकल्पयेत्॥"

ब्रह्मपुराणे।
"न यावदुपनीयते द्विजः शूद्रस्तथाङ्गना।
गन्धलेपक्षयकरं शौचं तेषां विधीयते॥
प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते।
यावच्च शुद्धिं मन्येत तावत् शौचं समाचरेत्॥"
दक्षः।
"न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता।
प्रायश्चित्त प्रसज्जेत विहितातिक्रमे कृते॥
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥"
गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं पूर्व्वोक्तयाज्ञवल्क्याविरोधात्। गन्धलेपाक्षये त्वधिकसंख्ययापि। याज्ञवल्क्यवचनमनुपनीतादिपरं वा पूर्व्वोक्तब्रह्मपुराणैकवाक्यत्वात्॥ * ॥
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम॥'
इदन्तु द्वैगुण्यादिकं संख्यामात्रे तदनन्तराभिधानात्। व्याघ्रपादः।
"शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथापरम्॥
गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः।
आमृत्योः स्नातकश्चैव भावदुष्टो न शुध्यति॥"
स्मृतिः।
"धावतश्च प्रमत्तस्य मूत्रोच्चारकृतस्तथा।
भुञ्जानमाचमानञ्च नास्तिकं नाभिवादयेत्।
जन्मप्रभृति यत्किञ्चित् चेतसा धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥'
ऋष्यशृङ्गः।
"यस्मिन् स्थाने कृतं शौच वारिणा तद्विशोधयेत्।
न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्॥'
शौचानन्तरं हारीतः। गोमयेन मृदा वा कमण्डलुं प्रमृज्य पूर्व्ववदुपस्पृश्य आदित्यसोमममग्निं वा वीक्षेतेति। अत्र मार्ज्जनानन्तरं क्षालनं अन्यत्र तथादर्शनात्। आचमनानन्तर आदित्यादिदर्शनं यथासम्भवम्। शौचं कृत्वा मूत्रोच्चारं न पश्येत् दृष्ट्वादित्यमग्निं सोमं वा पश्येदिति॥*॥ अथाचमनविधिः। दक्षः।
"प्रक्षाल्य पाणी पादौ च त्रिः पिबेदम्बु वीक्षितम्।
संहत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥"
पादप्रक्षालन विशेषयति देवलः।
"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् शनैः
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः॥"
शनैरत्वरः। दैवपैतृकेतरत्रापस्तम्बः। प्रत्यक्पादावसेचनमिति। प्रत्यक् पश्चिमाभिमुखः। क्रममाह गोभिलः। सव्यं पादमवनेनिज इति

सव्यं पादं प्रक्षालयेत्। दक्षिणं पादमवनेनिज इति दक्षिणं पादं प्रक्षालयेदिति अर्द्धणीये तथादर्शनात् सर्व्वत्र तथा कल्प्यते। पारस्करः।
सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीतिसूत्रेण प्राक् सव्यपादप्रक्षालने सिद्धे सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र सव्यपदग्रहणं सामान्यार्थं तेनान्यस्यापि पादप्रक्षालने सव्यस्यैव प्राथम्यम् अन्यार्थं पुनर्व्वचनमिति न्यायात्। अन्यार्थमधिकार्थम्। ब्राह्मणश्चेद्दक्षिणं प्रथममिति सूत्रं तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं प्रथममिति न सव्यम्। यथा प्रक्षालयतीत्यनुवृत्तौ आश्वलायनः। दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत् सव्यं शूद्रायेति। स्वयं प्रक्षालने सव्यस्यैव प्राथम्यमिति एवं हरिशर्म्मापि। आचमने पाणिपादप्रक्षालनं मूत्राद्युत्सर्गे। यथा वृद्धपराशरः।
"कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः।
निबद्धशिख आसीनो द्विज आचमनञ्चरेत्॥
कृत्वोपवीतं सव्यांशे वाङ्मनःकायसंयतः॥"
आपस्तम्बः।
"इत्येवमङ्गिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामणिबन्धाभ्यां पश्चादाचामेत संयतः॥
आजानु आमणिबन्धाभ्यामित्यवध्य पादानन्तत् पर्य्यन्ताशुचित्वशङ्कायां अध्वश्रमापनोदनाय अतिशयशौचाय वा। अतएवोक्तं अङ्गप्रकर्षात् फलप्रकर्ष इति॥*॥ शिखाबन्धने विशेषमाह ब्रह्मपुराणम।
"गायत्र्या तु शिखां बद्ध्वा नैरृत्यां ब्रह्मरन्ध्रतः
जुटिकाञ्च ततो बद्ध्वा ततः कर्म समाचरेत्॥"
पिबेदित्यत्रान्तर्जान्वाह याज्ञवल्क्यः।
"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥
अन्तर्जानु जानुनोर्म्मध्ये हस्तौ कृत्वेति शेषः।
वाशब्दादीशानाभिमुखः।
ईशानाभिमुखो भूत्वापस्पृशेत् यथाविधि॥"
इति मरीचुक्तेः।
ब्राह्मेण तीर्थेन अङ्गुष्ठमूलेन।
"कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥"
इति याज्ञवल्क्यात्॥
देशिनी तर्ज्जनी। करस्य दक्षिणस्य। यथा मार्कण्डेयपुराणम्।
"अङ्गुष्ठोत्तरतो रेखा या पाणेर्द्दक्षिणस्य च।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै॥"
अत्र द्विजो न स्त्रीशूद्राविति मिताक्षरा॥ अत एव।
"स्त्रियाश्चैव दशिकं तीर्थं शूद्रजातेस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः॥"
ब्राह्मतीर्थावरोधे तु मनुः।
"कायत्रैदशिकाभ्यां वा न पैत्रेण कदाचन।"
उक्ततीर्थत्रयस्य व्रणादिनावरोधे करमध्याम-

कांस्येनापि । एवञ्च सर्व्वाविरोधे सुवर्णादि-
पात्रेणाप्याचमनं कार्य्यं स्वयमसामर्थ्येऽन्येना-
चमनं कारयितव्यम् । याज्ञवल्क्यः ।
"अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ।
हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ॥
शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः ॥"
अन्ततः ओष्ठोपान्ते । उत्तरोत्तरमपकर्षात् ।
अतएव स्पृष्टाभिरित्युक्तं न तु भक्षिताभिरिति ।
स्त्री शूद्रो वाथ नित्यार्थः क्षालनाच्च करोष्ठयोः
इति ब्रह्मपुराणाच्च । आचमनार्थं पाणिपाद-
प्रक्षालनमेवेत्यन्ये । इति शूद्राधिकारे गौतमो-
क्तेश्च । आचमनार्हजलाभावे इदमित्याचारा-
ध्याये । मनुः ।
"हृद्गाभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः ।
वैश्योऽद्भिः प्राशिताभिश्च शूद्रः स्पृष्टाभिर-
न्ततः ॥"
अत्र वक्ष्यावधिप्राशनमुक्तम् अनुपनीतानान्तु
स्त्रीशूद्रवदाचमनं न यावदुपनीयेत । इति
प्रागुक्तशौचे तथादर्शनात् । मिताक्षरादयो-
ऽप्येवम् । अत्र विशेषयति बौधायनः । पाद-
प्रक्षालनाच्छेषेण नाचामेत यद्याचामेत् भूमौ
स्रावयित्वाचामेदिति । उशना. ।
"कांस्यायसेन पात्रेण त्रपुसीसकपित्तलैः ।
आचान्तः शतकृत्वोऽपि न कदाचिच्छुचि-
र्भवेत् ॥"
कांस्यादिपात्रकरणकाचमनं कांस्यायसेनेत्या-
दिना निषिद्धमिति केचित् । हस्ते नाचमनेऽपि
कांस्यादिपात्रावर्ज्जितं तन्निषिद्धमित्यपरे ।
आचमनजलनिषेधे शङ्खलिखितौ । न शूद्रा-
शुच्येकपाण्या वर्ज्जितेनेति अत्राशुचिपदम्
आचमनकर्त्तृभिन्नपरम् । शूद्रसाहचर्य्यात् एक
पाणिपदमपि आचमनकर्त्तृभिन्नपाणिपरम् ।
तेन स्वीयवामपाण्यावर्ज्जितमनिषिद्धम् । तथा
च कमण्डल्वधिकारे बौधायनः । मूत्रपुरीषे
कुर्व्वन् दक्षिणहस्तेन गृह्णाति सव्येनाचमनीय-
मिति । गृह्णाति जलपात्रमिति शेषः । आचा-
मेदित्यनुवृत्तौ देवलः ।
"शिखां बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे ।
तूष्णीं भूत्वा समादाय नोर्द्ध्वन्नवलोकयन् ॥"
एकवस्त्रः प्राचीनावीति न इत्यादिपारस्कर-
दर्शनात् यत्र प्रेतस्नानतर्पणादौ एकवस्त्रत्वं
विहितं तत्र तदङ्गत्वादेकवासा एवाचमनं
कुर्य्यात् । प्रचेताः ।
"अनुष्णाभिरफेनाभिः पूताभिर्वीक्ष्य चक्षुषा ।
हृद्गताभिरशब्दाभिस्त्रिश्चतुर्वाद्भिराचमेत् ॥"
चतुर्व्वेति भावशुद्ध्यपेक्षया विकल्पः । न तु
फलभूयस्त्वार्थं कल्पनागौरवापत्तेः । वीक्षणा-
नुष्णयोर्भट्टभाष्यमाधवाचार्य्यकृतपराशरभाष्य-
योरपवादमाह यमः ।
"रात्रावबीक्षितेनापि शुद्धिरुक्ता मनीषिभिः ।
उदके नातुराणाञ्च तथोष्णं नोष्णपायिनाम् ॥"
आचामेदित्यनुवृत्तौ वशिष्ठः । प्रदरादपि या
गोस्तर्पणाय स्युर्न वर्णरसदुष्टाभिर्याश्च स्युरशु-
भागमा इति । प्रदरो विदीर्णभूभागः । अशु-
भागमाः अशुचिदेशादागताः । यस्मिन् देशे
वर्णादिदुष्टमेव तोयं तत्र तदपि ग्राह्यम् । तथा
च मरीचिः ।
"येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः ।
तत्र तन्नावमन्येत धर्म्मस्तत्रैव तादृशः ॥
येषु स्थानेषु ये देवा येषु देशेषु ये द्विजाः ।
येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका ॥"
आचमने उदकग्रहणप्रकारं परिमाणञ्चाह
भरद्वाजः ।
"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिवत् करम् ।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनञ्चरेत् ।
माषमज्जनमात्रास्तु सगृह्य त्रिः पिबेदपः ॥"
पाणिना दक्षिणेन । त्रिः पिबेद्दक्षिणेनापि
इत्यादिपुराणोक्तेः । मार्कण्डेयः ।
"अग्रविच्छिन्न हस्तेन कुर्य्यादाचमनक्रियाम् ।
नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्ज्जयेत् ॥"
मदनपारिजाते हारीतः ।
"ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनञ्चरेत् ॥"
ग्रन्थनाद्ग्रन्थिरिति समुद्रकरेऽपि । आचमना-
नुवृत्तौ देवलः ।
"न गच्छन्न शयानश्च न चलन्न परान् स्पृशन् ।
न हसन्नैव सजल्पन्नात्मानञ्चैव वीक्षयन् ॥"
चलन् कम्पमान इति रत्नाकरः ॥ आत्मानं
आत्मस्थान हृदयम् । वीक्षयन्निति स्वार्थे णिच् ।
"केशान्नीवीमधःकायं न स्पृशन् धरणीमपि ।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम् ॥"
अधःकायं नाभेरधःप्रदेशम् । करं दक्षिणम् ।
आचमनानुवृत्तौ गोभिलः ।
"नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ॥"
अन्तरीयमधःपरिधानं तदेकदेशमुत्तरीय कृत्वा
मरीचिः ।
"न बहिर्जानुस्त्वरया नाशनस्थो न चोत्थितः ।
न पादुकास्थोऽन्यचित्तः शुचिः प्रयतमानसः ॥
उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः ।
भुक्तासनस्थो नाचामेन्नान्यकाले कदाचन ॥
जलस्थलोभयकर्म्मानुष्ठानार्थन्तु जलस्थलैकचर-
णेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । अन्त
रुदके आचान्तोऽन्तरेव शुद्धः स्यात् तस्मा-
दन्तरेकं बहिरेकञ्च कृत्वा पादमाचरेत् सर्व्वत्र
शुद्धो भवतीति । जले तूत्तिष्ठन्नाचामेत् । जानौ
रुद्धे जले तिष्ठन्नाचान्तः शुचितामियात् ।
अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्य
तीति विष्णूक्तेः । हारीत. ।
"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम् ।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम् ॥"
कात्यायनः ।
"स्नानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढपादः स उच्यते ॥"
आसनारूढपादः आसनारोपितपादतलः ।
जान्वोर्जङ्घयोः कृतावसक्थिको वस्त्रादिना
कृतपृष्ठजानुजङ्घाबन्धः । तृतीयेन भेदप्रतीतेः
प्रौढपादस्य द्विविधत्वं प्रतीयते ॥*॥ अत्र च
अनेकोदाहृते दारुशिले भूमिसमे इष्टकाश्च
सङ्कीर्णीभूता इति बौधायनवचनात्तथाविधे
आरूढपादोऽपि कुर्य्यात् । व्यासः ।
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि
वा ।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचि-
र्भवेत् ॥"
तथा ।
"अपः पाणिनखाग्रेण आचामेद्यस्तु ब्राह्मणः ।
सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥"
सहृत्येति मुखं संहृत्य अलोमकोष्ठस्पर्शो यथा
न भवतीति तात्पर्य्यम् । तथा च वशिष्ठः ।
"आचान्तः पुनराचामेद्वासो विपरिधाय च ।
ओष्ठौ च संस्पृश्य तथा यत्र स्यातामलोमकौ ॥"
एवञ्च प्रागुक्तहारीतवचने ओष्ठयोर्म्मार्ज्जनमुक्तं
तत् सलोमकयोरेवेति । एतदनन्तरं वामहस्तं
पादौ शिरश्च दक्षिणेन पाणिनाभ्युक्षयेत् ।
तथा च कामधेनावापस्तम्बः । त्रिराचामेत्
द्विराभिस्त्रिरोष्ठौ परिमृज्जेत् द्विरित्येके दक्षिणेन
पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेति ।
गोभिलः । त्रिराचामेत् द्विः परिमृजीत पादा-
वभ्युक्ष्य शिरोऽभ्युक्षयेदिति इन्द्रियाण्यद्भिः ।
स्पृशेत अक्षिणी नासिके कर्णाविति । इन्द्रि-
याणि इन्द्रियायतनानि इन्द्रियाणाममूर्त्तत्वात्
तिसृभिरिति तर्ज्जनीमध्यमानामिकाभिः ॥*॥
सर्व्वत्राङ्गुष्ठयोगेन आचमनकारणमाह पैठी-
नसिः । अग्निरङ्गुष्ठस्तस्मात्तेनापि सर्व्वाणि
स्थानानि स्पृशेत् । निष्ठीवनादावाचमनं
यथा । वायुपुराणे ।
"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने ।
उच्छिष्टस्य च सम्भाषादशुच्युपहतस्य च ॥
सन्देहेषु च सर्व्वेषु शिखां मुक्त्वा तथैव च ।
विना यज्ञोपवीतेन नित्यमेव उपस्पृशेत् ॥
उष्ट्रवायसस्पर्शे दर्शने चान्त्यवासिनाम् ॥"
हारीतः ।
"स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने-
देवमभिगन्तुकाम आचामेदिति ।" याज्ञवल्क्यः
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥"
ब्रह्मपुराणे ।
"होमे भोजनकाले च सन्ध्ययोरुभयोरपि ।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत् ॥
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम् ॥"
स्मृतिः ।
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थं एषु नाचामेत् दक्षिणं श्रवणं
स्पृशेत् ॥"

अत्र हेतुमाह पराशरः।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत्॥"
सांख्यायनः।
"आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट्।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः॥"
पुराणसारवायुपुराणयोः।
"यः कर्म्म कुरुते मोहादनाचम्यैव नास्तिकः।
भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः॥"*॥

अथ दन्तधावनम्। वृद्धशातातपः।
"मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः।
तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम्॥"
श्राद्धदिनादौ तस्य वर्ज्यत्वं यथा। विष्णुः।
"श्राद्धे जन्मदिने चैव विवाहेऽजीर्णसम्भवे।
व्रते चैवोपवासे च वर्जयेद्दन्तधावनम्॥"
दन्तधावनमध्यादुदङ्मुखः प्राङ्मुखो वेति॥*॥
दन्तलग्नस्य दन्ततुल्यत्वं यथा। गोतमः।
दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिघर्षणात् प्राक् च्युतेरित्येके। च्युतेष्वास्राववद्विद्यान्निगिरन्नेव तच्छुचिरिति। जिह्वाभिघर्षणायोग्यं दन्तलग्नं अशौचजनकं न भवतीत्यर्थः। इदञ्चानुपलभ्यमानरसविषयम्। दन्तवद्दन्तलग्नेषु रसवर्ज्जमिति शङ्खवचनात्। जिह्वाभिघर्षणेऽपि अशक्योद्धरणे न दोषः।
"भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत्।
दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत्॥
न तत्र कुर्य्याद्बहुशो यत्नमुद्धरणे पुनः।
भवेदशौचमत्यर्थं व्रणवेधाद्व्रणे कृते॥"
इति देवलवचनात्॥
च्युतेरित्युपलभ्यमानरसविषयम्। आस्रावो लाला तद्वन्निगरन्नित्यर्थः अतएव शोणितं यथा न भवति तथा तृणादिना दन्तलग्ननिःसारणाचरणम्॥*॥ छन्दोगपरिशिष्टम्।
"नाद्याच्छुक्लवालमयमष्टाङ्गुलमपाटितम्।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत्॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः।
परिजप्य तु मन्त्रेण भक्षयेद्दन्तधावनम्॥
आयुर्बलं यशो वर्चः प्रजा पशुवसूनि च।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते॥"
शुचिर्भूत्वा हिराचमनेनेति शेषः॥*॥ नरसिंहपुराणम्॥
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम्।
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः॥"
प्रमाणं स्थौल्यञ्चाह विष्णुः।
"कनीन्यग्रनिभस्थौल्यं सकूर्चं द्वादशाङ्गुलम्।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम्॥
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः॥"
सकूर्चं दलिताग्रम्। द्वादशाङ्गुलन्तु छन्दोगेतरेषाम्।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्
अष्टाङ्गुलन्तु वैश्यानां शूद्राणान्तु षडङ्गुलम्।
भक्षयेत् प्राञ्जहष्टानि पर्वस्वपि च वर्जयेत्॥"
तिथिविशेषे तस्य वर्ज्जनं यथा। नृसिंहपुराणम्।
"प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सत्तमाः।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्॥
अलाभे दन्तकाष्ठानां प्रतिसिद्धदिने तथा।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"
गण्डूषस्य दन्तकाष्ठकार्य्यकारित्वेऽपि न तत्र मन्त्रान्वयः। शातातपः।
"प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम्।
पर्णैरन्यत्र काष्ठैश्च जिह्वोल्लेखः सदैव हि॥"
गुवाकादिपर्णैर्दन्तधावनं निषिद्धं यथा। क्रियाकौमुद्यां वशिष्ठः।
"गुवाकतालहिन्तालास्तथा ताडी च केतकी।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः॥
तृणराजशिरापर्णैर्यः कुर्य्याद्दन्तधावनम्।
तावद्भवति चाण्डालो यावद्गां नैव पश्यति॥"
पराशरभाष्ये याज्ञवल्क्यः।
"नैष्टकालोष्टपाषाणैरितराङ्गुलिभिस्तथा।
त्यक्त्वा अनामिकाङ्गुष्ठौ वर्ज्जयेद्दन्तधावनम्॥
प्रचेताः।
"मध्याह्नस्नानकाले तु यः कुर्य्याद्दन्तधावनम्।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह॥"
स्मृतिः।
"वमन्तं जृम्भमाणञ्च कुर्वन्तं दन्तधावनम्।
अभ्यक्तशिरसञ्चैव स्नातं नैवाभिवादयेत्॥"
हारीतः।
"शुचिं देवाभिरक्षन्ति पितरः शुचिमन्वियुः।
शुचेर्बिभ्यति रक्षांसि ये चान्ये दुष्टचारिणः॥
तथा।
"स्नानं दानं तपस्त्यागो मन्त्रकर्म्मविधिक्रियाः
मङ्गलाचारनियमाः शौचभ्रष्टस्य निष्फलाः॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा।
मृज्जलाभ्यां भवेत् बाह्यं भावशुद्धिस्तथापरम्॥"
अथ प्रातःस्नानसन्ध्ये। ब्रह्मपुराणम्।
"प्रातःस्नानं ततः कृत्वा संक्षेपेण यथोदितम्।
सन्ध्याञ्चापि तथा कुर्य्यात् नित्यनैमित्तिकं तथा॥
कात्यायनः।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्॥
दन्तान् प्रक्षाल्य प्रातरनातुरः स्नायात्॥*॥
आतुरं विशेषयति आयुर्वेदे।
"स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्॥"
तत्कालमाह विष्णुः। प्रातःस्नायादरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात्। इति समुद्रकरधृतम्॥*॥
"मृत्तिकातिलकं कुर्य्यात् स्नात्वा हुत्वा च भस्मना।
दृष्टदोषविघातार्थं चाण्डालाद्यादिदर्शने॥"
छन्दोगाः।
"अभावे तूदकेनापि पितृदेवतमर्चयेत्॥"
ब्रह्माण्डपुराणे।
"कर्म्मादौ तिलकं कुर्य्याद्रूपं तद्वैष्णवं परम्।
गोप्रदानं जपो होमः स्वाध्यायः पितृतर्पणम्॥
भस्मीभवति तत्सर्व्वमूर्द्ध्वपुण्ड्रं विना कृतम्॥"
ब्राह्मे।
"अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमा पुष्करी भवेत्
अनामिकाद्यदा नित्यं मुक्तिदा च प्रदेशिनी॥"
व्यासः।
"जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्नि बिभर्त्ति यः।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम्॥"
गोपीचन्दनमाह शातातपः।
"गोमतीतीरसम्भूतां गोपीदेहसमुद्भवाम्।
मृदं मूर्द्ध्ना वहेद्यस्तु सर्वपापैः प्रमुच्यते॥"
ब्रह्माण्डपुराणे।
"ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया॥
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः॥"*॥
आतुराणान्तु।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ च कर्म्मिणाम्।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः॥"
इति जाबालवचनात् शिरो विहाय गात्रप्रक्षालनम्। तदशक्तावार्द्रवाससा गात्रमार्जनं कुर्य्यात् तदनन्तरं सन्ध्यां कुर्य्यात्। एतत्परमेव प्रातःसन्ध्यां ततः कुर्य्याद् दन्तधावनपूर्वकमिति याज्ञवल्क्यवचनम्। इत्याह्निकाचारतत्त्वम्॥
प्रातःसन्ध्या, स्त्री, (सन्धौ भवा। यत् प्रत्ययः। टाप् प्रातः प्रथमार्द्धीया सन्ध्या।) सन्ध्यादेहपूर्व्वार्द्धम् तदुत्पत्तिर्यथा।
"तस्मिन् गिरौ चन्द्रभागे बृहल्लोहिततीरगाम्।
सन्ध्या दृष्ट्वाथ पप्रच्छ वशिष्ठः सादरन्तदा॥
वशिष्ठ उवाच।
किमर्थमागता भद्रे! निर्जनं त्वं महीधरम्।
कस्य वा तनया गौरि! किं वा तवचिकीर्षितम्
एतदिच्छाम्यहं श्रोतुं यदि गुह्यं न ते भवेत्।
वदनं पूर्णचन्द्राभं निःश्रीकं वा कथं तव॥
श्रीमार्कण्डेय उवाच।
तत् श्रुत्वा वचनं तस्य वशिष्ठस्य महात्मनः।
दृष्ट्वा च तं महात्मानं ज्वलन्तमिव पावकम्॥
शरीरधृग्ब्रह्मचर्य्यसदृशं तं जटाधरम्।
सादरं प्रणिपत्याथ सन्ध्योवाच तपोधनम्॥
सन्ध्योवाच।
यदर्थमागता शैलं सिद्धं तन्मे तपोधन!।
तव दर्शनमात्रेण तन्मे सेत्स्यति वा विभो!॥
तपः कर्त्तुमहं ब्रह्मन्! निर्जनं शैलमागता।
ब्रह्मणोऽहं मनोजाता सन्ध्या नाम्ना च विश्रुता
नोपदेशमहं जाने तपसो मुनिसत्तम!।
यदि ते युज्यते गुह्यं मां त्वं समुपदेशय॥
एतच्चिकीर्षितं गुह्यं नान्यत् किञ्च न विद्यते।
अज्ञात्वा तपसो भावं तपोवनमुपाश्रिता॥
चिन्तया परिशुष्येऽहं वेपते च मनः सदा॥

श्रीमार्कण्डेय उवाच ।
आकर्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्व्वतत्त्वज्ञो नान्यत् किञ्चन पृष्टवान् ॥
अथ तां नियतात्मानं तपसेऽतिष्ठतीमथाम् ।
वशिष्ठो मन्त्रयाञ्चक्रे गुरुवत् शिष्यवत्तदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्षास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येङ्गितं ददौ तस्यै वाचं दिव्ये च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिक्षीणं जटाव्रातैः पवित्रं मूर्द्धि राजितम् ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम् ॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहकृते तव ।
स सद्यः क्लीवतां प्राप्य दुर्बलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
सप्तकल्पान्तजीवी च भविष्यति सह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्ब्बं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्ब्बमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे मुनेर्द्वादशवार्षिके ।
हुतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं छन्न मुनिभिर्नोपलक्षिता ।
मत्प्रसादाद्वह्निजाता तस्य पुत्री भविष्यसि ॥
यस्ते वा वाञ्छनीयोऽस्ति स्वामी मनसि कश्चन,
तन्निधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ॥
नारायणः स्वयं सन्ध्यां पस्पर्शाथाग्रपाणिना ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले ।
शुद्धं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रथे ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्द्ध्वभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्य्योदयाच्च प्रथम यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी ॥
इति कालिकापुराणे २२ अध्यायः ॥

प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः वैदिके तदनुष्ठानानि यथा । मार्ज्जनम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्ज्जनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्रीध्यानम् १० सावित्रीजपः ११ सावित्रीविसर्ज्जनम् १२ आदित्यशुक्रप्रोक्षणम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८॥ तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम् १ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ हस्तक्षालनम् ६ आचमनम् ७ सूर्य्यार्घदानम् ८ गायत्र्या जलदानम् ९ तर्पणम् १० गायत्रीध्यानम् ११ गायत्रीजपः १२ जपसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ मूलमन्त्रजपः १६ जपसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति स्मृतितत्त्वे ॥

प्रातःस्नानं, क्ली, (प्रातः प्रभातकाले यत् स्नानम् ।) प्रभातकर्त्तव्यावगाहनादि । यथा, गारुडे ५० अः
"उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौच कृत्वा यथाविधि ॥
प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्ट करं हि तत् ।
सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि ॥
अतो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादित ।
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ।
न च स्नानं विना पुंसां प्राशस्त्यं कर्म्मसम्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्
अशक्तावशिरस्कन्तु स्नानमस्य विधीयते ॥"
अपि च गारुडे २१५ अध्याये ।
"प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् ।
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥
यतेस्त्रिसवनं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥"
अपि च ।
"उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम ॥
यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् ।
प्रातःस्नायी तदाप्नोति वर्षेण श्रद्धयान्वितः ॥
य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्
प्रातःस्नायीभवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥
षट्तिली माघमासन्तु प्रातःस्नायी हविष्यभुक्
अतिपापं महाघोरं मासादेव व्यपोहति ॥
मातर पितरञ्चापि भ्रातरं सुहृदं गुरुम् ।
समुद्दिश्य निमज्जेत द्वादशांशं लभेत्तु सः ॥"

प्रातराशः, पु, (अशनमिति । अश्+भावे घञ् । आशः । प्रातः प्रातःकाले आशो भोजनम् ।) प्रातःकालीनभोजनम् । तत्पर्य्यायः । कल्यवर्त्तः २ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ काल्यजग्धिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ ।
"यः पञ्चहायनो मात्रा प्रातराशाय याचितः ।
तन्नैच्छद्रचयन् यस्य सपर्य्यां बाललीलया ॥")

प्रातर्गेयः, पुं, प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेष ॥ प्रभातगातव्ये, त्रि ॥

प्रातर्भोक्ता, [ऋ] पुं, (प्रातर्भुङ्क्ते इति । भुज + तृच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥

प्रातर्भोजनं, क्ली, (प्रातः प्रातःकाले भोजनम् ।) प्रातराशः । इति जटाधर ॥

प्रातिका, स्त्री, (प्राततीति । प्र + अत् + ण्वुल्टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥

प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद् + "कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,—
"इत्यम्भुतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ।
ब्रह्मोवाच ।
देवानामथ यक्षाणां गन्धर्वाणाञ्च सत्तम ! ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! ॥
त्वत्पदात् प्रातिपदिकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥"
इति वराहपुराणम् ॥
(प्रतिपदे धातुभिन्नपदे भव इति । प्रतिपद + ठक् ।)नाम्नि, क्ली, । यथा, अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम्

प्रातिभाव्यं, क्ली, (प्रतिभू + ष्यञ् । द्विपदवृद्धिः ।) प्रतिभुवो भावः । जामिनी इति भाषा । यथा,
"साक्षित्व प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥

प्रातिस्विकं, त्रि, (प्रतिस्वं भवः । प्रतिस्व + ठक् । असाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेशिकम् ३ । इति त्रिकाण्डशेषः ॥

प्रातिहारः, पु, (प्रतिहार एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥

प्रातिहारकः, पुं, (प्रतिहारक एव । स्वार्थे अण् ।)प्रातिहारिकः इत्यमरटीकायां भरतः ॥

प्रातिहारिकः, पु, (प्रतिहारः प्रतिहरणं व्याज इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार + "प्रयोजनम् ।" ५ । १ । १०९ । इति ठञ् ।) मायाकारः । इत्यमरः । २ । १० । ११ ॥

प्रातीपः, पुं, (प्रतीपस्यापत्य प्रतीपस्यायमिति वा । प्रतीप + अण् ।) प्रतीपपुत्त्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ५ । १४८ । २ ।
'प्रातीपः शान्तनुस्तात ! कुलस्यार्थे यथोत्थितः॥)

प्राथमकल्पिकः, पुं, (प्रथमकल्प आचारः प्रयोजनं यस्य। "प्रयोजनम्।" ५।१।१०९। इति ठञ्। यद्वा, प्रथमकल्पमधीते इति। विद्यालक्षणकल्पान्ताच्चेति वक्तव्यमिति ठक्।) प्रथमारब्धवेदाध्ययनः। प्रथमं शिक्षणीयकल्पशास्त्रमधीते यः इत्यर्थे णिकः। तत्पर्य्यायः। शैक्षः २। इत्यमरभरतौ॥

प्राथमिकः, त्रि, (प्रथमे भवः। प्रथम+ठञ्।) प्रथमभवः। यथा। यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पचताम्यच्चयं द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु किमर्थम्। इति पक्षताशिरोमणिः॥

प्राथम्यं, त्रि, (प्रथम+ष्यञ्।) प्रथमस्य भावः। यथा, "अस्माभिरेव प्राथम्येन नानामुनीना वचनैरेवं विधो निबन्धः क्रियते।" इति विजयरक्षितः॥

प्रादु [स्] व्य, (प्राप्नोति। प्र+अद्+"बाहुलकाद्देरप्युसिप्रत्ययः।" उणा० २।११८। इत्यत्र उज्ज्वलदत्तोक्त्या उसि।) नाम। प्राकाश्यम्। स्फुटत्वम्। तत्पर्य्यायः। आविः २। यथा। प्रादुरासीत्। आविर्भूतः। इत्यमरभरतौ॥ (यथा, रघुः। ११।१५।

"ज्यानिनादमथ गृह्णती तयोः
प्रादुरास बहुलक्षपाच्छविः।
ताडका चलकपालकुण्डला
कालिकेव निविडा बलाकिनी॥")

प्रकाशः। सम्भाव्यम्। हृतिः। इति शब्दरत्नावली॥

प्रादुर्भावः, पुं, (प्रादुस्+भू+भावे घञ्।) आविर्भावः। यथा,—

"वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा॥'
इति कुवलयानन्दः॥

प्रादेशः पुं, (प्रदिश्यते इति। प्र+दिश्+हलश्चेति घञ्। "उपसर्गस्य घञि"इति दीर्घः।) तर्ज्जनीसहितविस्तृताङ्गुष्ठः। इत्यमरः। २।६।८३॥ (यथा, महाभारते। ५।५१।१९।

"प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्ज्जुनात्॥
प्रदेश एव। स्वार्थे अण्।) देशमात्रम्। यथा,

"प्रादेशो देशमात्रे च तर्ज्जन्यङ्गुष्ठसम्मिते॥"
इति मेदिनी॥

"अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते॥"
इति देवीपुराणञ्च॥

प्रादेशनं, क्ली, (प्र+आ+दिश्+ल्युट्।) दानम्। इत्यमरः। २।७।३०॥

प्रादोषः, त्रि, (प्रदोषस्यायमिति। प्रदोष+अण्।) प्रदोषसम्बन्धी। इति सिद्धान्तकौमुदी॥ (प्रदोषे व्याहरतीति। "व्याहरति मृगः।" ४।३।५१। इति अण्। प्रादोषो मृगः। प्रदोषसहचरितमध्ययन सोढमस्य। "तदस्य सोढम्।" ४।३।५२। इति अण्। प्रादोषः शिष्यः। इति व्याकरणम्॥)

प्रादोषिकः, त्रि, (प्रदोषस्यायमिति। प्रदोष+"निशाप्रदोषाभ्याञ्च।" ४।३।१४। इति ठञ्।) प्रदोषसम्बन्धी। इति सिद्धान्तकौमुदी।

प्राधान्यं, क्ली, प्रधानस्य भावः। (प्रधान+भावे ष्यञ्।) प्रधानत्वम्। यथा, धर्म्मदीपिकायाम्।

"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्॥"

प्राध्वं, व्य, (प्राध्वनतीति। प्र+आ+ध्वन+डम्।) अनुकूलम्। इत्यमरः। ३।४।४॥ (यथा, रघुः। १३।४३।

'सभाजने मे भुजमूर्द्ध्वबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते॥")

प्राध्वः, त्रि, (प्रगतोऽध्वानमिति। "उपसर्गादध्वनः।" ५।४।८५। इति अच्।) बहुदूरगामि-रथादिः। इति वोपदेवः॥ दूरपथः। प्रह्वः। बन्धः। इति हेमचन्द्रः॥ (यथा, महाभारते। ३।१६२।२७।

"ततः शक्तिं गदां खड्गं धनुश्च भरतर्षभः।
प्राध्वं कृत्वा नमश्चक्रे कुवेराय वृकोदरः॥")

प्रान्तः, पुं, (प्रकृष्टोऽन्तः।) अन्तभागः। शेषसीमा। यथा, कुमारे। ३।४३।

"प्रान्तेषु संसक्तनमेरुशाखं
ध्यानास्पदं भूतपतेर्विवेश॥"

प्रान्ततः, [स्] व्य, (प्रान्त+तसिल्।) प्रान्तभागे। यथा, प्राचीर प्रान्ततो वृतिः। इत्यमरः। २।२।३॥

प्रान्तरं, क्ली, (प्रकृष्टमन्तरमवकाशो व्यवधानं वा यत्र।) दूरशून्योऽध्वा। इत्यमरः। २।१।१७॥ छायातरुजलादिरहिते पथि प्रान्तर दूर शून्यौ दूरशून्यः दूरगामी शून्यश्चेति वा दूरशून्यो जलादिवर्जितत्वात् ईदृक् योऽध्वा स प्रान्तरमित्यन्वयः। प्रकृष्टमन्तरं व्यवधानमवकाशो वा अत्रेति प्रान्तरम्। इति भरतः॥ (यथा, महानिर्व्वाणतन्त्रे। १।६४।

"कन्दे गर्त्ते प्रान्तरे च प्रासादात् पर्व्वतादपि।
पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः॥"
विपिनम्। कोटरम्। इति मेदिनी॥

प्रान्तशून्यं, क्ली, (प्रान्ते शून्यमस्य।) दूरशून्यपथः। छायादिरहितपथः। इति शब्दरत्नावली॥

प्रापणं, क्ली, (प्र+आप्+ल्युट्।) नयनम्। प्राप्तिः। (यथा, मनुः। २।९५।

"प्रापणात् सर्व्वकामानां परित्यागो विशिष्यते॥")

प्राप्तिप्रेरणा। प्रकर्षेण व्यापनम्। आन्ताटच्यान्ताद्दा प्रपूर्व्वापधातोर्भावे अनट् प्रत्ययः॥

प्रापणिकः, पुं, (प्रापणायते इति। प्र+आ+पण व्यवहारे+"प्राङि पणिकषः।" उणा० २।४१। इति किकन्।) पण्यविक्रयी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, माघे। ४।११।

"आच्छादिव प्रापणिकादजस्रं
जग्राह रत्नान्यमितानि लोकः॥")

प्रापणीयं, त्रि, प्राप्यते यत्। (प्र+आप्+अनीयर।) प्राप्यम् (यथा, मेघदूते। ५।

"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः॥")

प्रापेयः, पुं, गन्धर्व्वगणविशेषः। यथा, अग्निपुराणे

"प्रवाचा जनयत् पुत्त्रान् दिव्यान् वैणायनोसमान्।
चतुर्द्दश देवगन्धर्व्वाः प्रापेयाः परिकीर्त्तिताः॥"

प्राप्तः, त्रि, (प्र+आप्+क्त।) प्रख्यापितः। तत्पर्य्यायः। प्रणिहितः २। लब्धः। तत्पर्य्यायः। विन्नः २ भावितः ३ आसादितः ४ भूतः ५। इत्यमरः। ३।१।८६, ३।१।१०४॥ (उत्पन्नः। समुपस्थितः। यथा, मनुः। ११।१२२

"एतस्मिन्नेनसि प्राप्ते वसित्वा गर्द्दभाजिनम्।
सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकीर्त्तयन्॥")

प्राप्तपञ्चत्वं, त्रि, (प्राप्तं पञ्चत्वं मरणं येन।) मृतम्। इत्यमरः। २।८।११७॥

प्राप्तभावः, पुं, (प्राप्तो भावो येन।) जातोक्षः। इति शब्दचन्द्रिका॥ (प्राप्तभार इत्यपि क्वचित् पाठः॥) लब्धसत्तादौ, त्रि॥

प्राप्तरूपः, त्रि, (प्राप्तं रूपं येन।) पण्डितः। मनोज्ञः। इत्यमरः। ३।३।१३१॥ रूपवांश्च

प्राप्तव्यं, त्रि, प्राप्यते यत्। प्रपूर्व्वापधातोः कर्मणि तव्यप्रत्ययः। प्राप्यम्। (यथा, रामायणे। २। २८।१०।

"आदेशो वनवासस्य प्राप्तव्यः स मया किल॥")

प्राप्तिः, स्त्री, (प्र+आप्+क्तिन्।) उदयः। (यथा, महाभारते। १४।४८।३।

"गच्छन्त्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम्॥")

धनादिवृद्धिः। अधिगमः। लाभः। इत्यमरभरतौ॥ प्रापणम्। (यथा, मनुः। ८।१०३।

"एष स्त्रीपुंसयोरुक्तो धर्म्मो वो रतिसंहितः।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत॥")

सङ्गतिः। इति शब्दरत्नावली॥ अणिमाद्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। स च अभीष्टितप्रापणम्। इति हेमचन्द्रो भरतश्च॥

प्राप्यं, त्रि, (प्र+आप्+ण्यत्।) प्राप्तव्यम्। तत्पर्य्यायः। गम्यम् २ समासाद्यम् ३। इत्यमरः। ३।१।९२॥ (यथा, मार्कण्डेये। ६२।२०

"मयैषा सानुरागेण बहुशः प्रार्थिता सती।
निराकृतवती सेयमद्य प्राप्या भविष्यति॥"
व्य, प्र+आप्+ल्यप्। यथा, मेघदूते।

'प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान्॥)

प्राबोधिकः, पुं, (प्रबोधाय हितः। प्रबोध+ठक्) उषःकालः। इति शब्दमाला॥ प्राबोधकोऽपि पाठः॥

प्राभवं, क्ली, (प्रभोर्भावः। प्रभु+अण्।) श्रेष्ठत्वम्। इति शब्दचन्द्रिका॥

प्राभाकरः पुं, (प्रभाकरस्यायं तन्मतं वेत्तीति। प्रभाकर+अण्।) मीमांसकविशेषः। यथा,

"व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वक

स्वमतेन तद्ग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना ।” इति व्याप्तिग्रहोपायशिरोमणिः ॥ प्राभाकरमते व्याप्तेः सकृद्दर्शनगम्यत्वंयथा,तस्मात् परिशेषेण सकृद्दर्शनगम्या सा । इति व्याप्तिग्रहोपायचिन्तामणिः ॥

प्राभृतं,क्ली, (प्राभ्रियते स्मेति । प्र+आ+भृ+क्त ।) उपढौकनम् । इत्यमरः ॥ (यथा कथासरित्सागरे । १७ । १६४ ।
“तं दत्तप्राभृतं दूतं स संमान्य व्यसर्जयत् ॥ ”)

प्राभृतकं, क्ली, (प्राभृत+स्वार्थेकन ।) प्राभृतम् तत्पर्य्यायः । कौशलिका २ । इति हारावली १५९ ॥

प्रामाद्यः,पुं,(प्रमाद्यत्यनेनेति । प्र+मद्+ण्यत्।) वासकः । इति शब्दचन्द्रिका ॥ स्वार्थेष्यञ प्रमादः । तस्य भावे, क्ली ।

प्रामाणिकः, त्रि, (प्रमाणादागतः । प्रमाण+ठक् ।) हैतुकः । मर्य्यादार्हः । शास्त्रज्ञः । परिच्छेदकः । प्रमाणकर्त्ता । इतिप्रमाणशब्दात् कर्त्तरि ष्णिकप्रत्ययः ।

प्रामाण्यं, क्ली, (प्रमाणस्य भावः । प्रमाण+ष्यञ ।) प्रमाकरणत्वम् । प्रमाणशब्दाद्भावार्थे ष्यञप्रत्ययः ॥ (यथा, मार्कण्डेये । १५ । ४३ ।
“सत्यंभूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनम् ।
गुरुदेवर्षिसिद्धर्षिपूजनं साधुसङ्गमः ॥ ”)

प्रामाण्यवादः, पुं, (प्रामाण्यस्यवादः कथनम् ।) प्रमाकरणताकथनम् । तद्वतितत्प्रकारकत्वप्रमात्वकथनम् । चिन्तामणिन्यायग्रन्थविशेषः। इति पूर्व्वाचार्य्याः ॥ स यथा । अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधोर्षुरष्टादशसुविद्यास्थानेष्वभ्यर्हिततमामन्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय । तत्र प्रेक्षावत् प्रवृत्त्यर्थं प्रमाणादि पदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत् । तेषु प्रमाणाधीना सर्व्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते । इत्यादि गङ्गेशोपाध्यायः ॥

प्रामीत्यं क्ली, (प्रमयनमिति । प्र+मी वधे+भावे क्त । तत्र प्रमीतं मरणे साधु इति ष्यञ् । अस्य वधतुल्यत्वात्तथात्वम् ।) ऋणम् । इति त्रिकाण्डशेषः । (प्रमीतस्य भाव इति । प्रमीत+ष्यञ् ।) मृतत्वञ्च ॥

प्राय, पुं,(प्रकृष्टमयनमिति । प्र+अय+घञ् यद्वा, प्र+इ+“एरच् । ” ३ । ३ । ५६ । इत्यच् ।) मरणम् । मरणार्थमनशनम् । (यथा, रामायणे । ४ । ५३ । १२ ।
“अह वः प्रतिजानामि न गमिष्याम्यहं पुरीम् इहैव प्रायमासिष्ये श्रेया मरणमेव च ॥”)
तुल्यम् । बाहुल्यम् । इति मेदिनी । ये, ३६ ॥ (यथा, साहित्यदर्पणे । ३ । १११ ।
“तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसां (वेश्यानाम्)
प्रायेण वल्लभाः ॥”)
वयः । इति हेमचन्द्रः ॥ (पापम् । तपः । इति स्मृतिः ॥ क्ली,प्रवेशः । युद्धम् । यथा, ऋग्वेदे । २ । १८ । ८ ।
“उप ज्येष्ठे वरूथे गभस्तौ
प्राये प्राये जिगीवांसः स्याम ॥ ”
“किञ्च प्राये प्राये सोमपानार्थमिन्द्रस्य यज्ञशालाया प्रवेशे प्रवेशे जिगीवांसः शत्रूणां जेतारो भवेम । यद्वा, प्राये प्राये प्रकर्षेण इयते गम्यते योद्धृभिरिति प्रायं युद्धम् । तस्मिन् युद्धे जिगीवांसः शत्रून् जितवन्तो भवेम ॥ ” इति तद्भाष्ये सायनः ॥ त्रि, गमकः । यथा, मनौ । ३ । २६४ ।
“प्रक्षाल्यहस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ।
ज्ञातिभ्यः सत्कृतं दत्त्वाबान्धवानपि भोजयेत्॥
“प्रक्षाल्यति । तदनु हस्तौ प्रक्षाल्याचम्य ज्ञातिप्रायमन्नं कुर्य्यात् । ज्ञातीन् प्रैति गच्छतीति ज्ञातिप्रायं कर्म्मण्यण् । ज्ञातीन् भोजयेदित्यर्थः ॥” इति कुल्लूकभट्टः ॥)

प्राय, [स्] व्य, (प्र+अय गतौ+असुन् ।) बाहुल्यम् । इत्यमरः । ३ । ४ । १७ ॥ (यथा, कथासरित्सागरे ६ । १२३ ।
“ततोऽहं शर्व्ववर्म्मा च ज्ञातवन्तौ क्रमेण ताम् अवान्तरे स च प्रायः पर्य्यहीयत वासरः ॥”)

प्रायश्चित्तं, क्ली, (प्रायस्य पापस्य चित्तं विशोधनं यस्मात् । यदुक्तं स्मृतौ ।
“प्रायः पापं समुद्दिष्टं चित्तं तस्य विशोधनम् ॥
यद्वा, प्रायस्य तपसः चित्तम् निश्चय इति । “पारस्करप्रभृतीनि च सञ्ज्ञायाम् ।” ६ । १ । १५७ । इत्यत्र । “प्रायस्य चित्तिचित्तयोः ।” इति वार्त्तिकोक्त्या सुट् निपात्यते च । निरुक्तिस्तु निम्ने द्रष्टव्या ।) पापक्षयमात्रसाधनं कर्म्म । यथा, हारीतः । प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तम् ॥ * ॥ (प्रायश्चित्तमिति । यत्तपःप्रभृतिकं कर्म्म उपचितं सञ्चितमशुभं पापं नाशयतीति कृत-तत्-तत्-कर्म्मभिः कर्त्तुः प्रयतत्वाद्वा शुद्धत्वादेव तत् प्रायश्चित्तम् । तथाच पुनर्हारीतः । यथा, क्षारोपस्व टचर्म्मनिर्णजनं प्रक्षालनादिभिर्वासांसि शुध्यन्ति एवं तपोदानयज्ञैः पापकृतः शुद्धिमुपयान्ति । शुद्धि पापक्षयम् । यथा, महाभारते ।
‘अङ्गिरोत्तान् मलमिव तमो ह्यग्निभयाद्यथा दानेन तपसा चैव सर्व्वपापमपोहति ॥”
तेन पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म्म प्रायश्चित्तम् । मात्रार्थेनाश्वमेधस्य प्रयतत्वादेत्यत्रकारार्थकवाशब्दात् । तथाच विश्वः ।
वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये ।”
एवञ्च ।
“अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे । ”
इति विष्णूक्त्याश्वमेधस्यापि प्रायश्चित्तत्वम् । पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम् । प्रायश्चित्तस्य स्वध्वंसादिजनकत्वेऽपि तदंशे विधिबोधितत्वाभावान्नातिव्याप्तिः ॥ इति प्रायश्चित्ततत्त्वम् ॥) तस्य व्युत्पत्तिर्यथा । अङ्गिराः ।
“प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥”
निश्चयसंयुक्तस्यापक्षयसाधनत्वेन निश्चितमित्यर्थः ॥ * ॥ पापन्तु वैदिकप्रतिपाद्योऽनर्थः अनर्थश्चानिष्टसाधनम् । पापकारणमुक्तं याज्ञवल्क्येन । यथा,—
“विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥” * ॥
पापविशेषेणावस्थाविशेषमाह मनुः ।
“शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥
इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा ।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम् ॥”
यमः ।
“सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकृन्नरः ।
पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः ।
एते पतन्ति सर्व्वेषु नरकेष्वनुपूर्व्वशः ॥” * ॥
प्रायश्चित्तमाहात्म्यं यथा । अङ्गिराः ।
“उदयन्नेव यद्वदादित्यस्तमः सर्व्वं व्यपोहति
तद्वत् कल्याणमातिष्ठन् सर्व्वं पापं व्यपोहति ॥
पापञ्चेत् पुरुषः कृत्वा कल्याणमभिपद्यते ।
मुच्यते पातकैः सर्व्वैर्महाभ्रैरिव चन्द्रमाः ॥
कल्याणं प्रायश्चित्तम् ॥ * ॥ तस्यावश्यकर्त्तव्यत्वमाह यमः ।
“तपसोऽन्ते विशुध्यन्ति कर्म्मणां वा परिक्षयात्
तस्मात् कर्त्तव्यमेतैस्तु प्रायश्चित्तं विशुद्धये ॥”
कर्म्मणा भोगेन परिक्षयादित्यर्थः ॥ ॥ प्रायश्चित्तार्हत्वमाह मनुः ।
“अकुर्व्वन् विहितं कर्म्म निषिद्धञ्च समाचरन् ।
प्रसजंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥ * ॥
अज्ञानाद्यदि वा ज्ञानात् कृत्वा कर्म्म विगर्हितम् ।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत् ॥
प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथा । जावालः ।
“काम्यानां सफलार्थञ्च दोषघातार्थमेव च ।
अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति
स्थितिः ॥
चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ।
निन्द्यश्च लक्षणैर्युक्ता जायन्ते निष्कृतैनसः ॥ ॥
ज्ञानाज्ञानकृतपापयोः प्रायश्चित्तभेदो यथा । अङ्गिराः ।
“अकामतः कृते पापे प्रायश्चित्तं न कामतः ।
स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्व्वके ॥” *
अथ प्रायश्चित्तिनस्पर्शदूपस्थानम् ।
तत्राङ्गिराः ।
‘कृते निःसंशये पापे न भुञ्जीतानुपस्थितः ।
भुञ्जानो वर्द्धयेत् पापमसत्यं पर्षदं ब्रुवन् ॥
सचैलं वाग्यतः स्नात्वा क्लीन्नवासाः समाहितः ।

उपस्थाय ततः शीघ्रमार्त्तिमान् धरणीं गतः।
गात्रैश्च शिरसा चैव न च किञ्चिदुदाहरेत् ॥"
उपस्थानञ्च ब्राह्मणान् वस्त्रादिना तोषयित्वा
कार्य्यम्। महत्सु पापेषु राज्ञोऽप्युपस्थितिः
कार्य्येत्याह देवलः।
"स्वयं वा ब्राह्मणैः कृच्छ्रमल्पदोषे विधीयते।
राज्ञा च ब्राह्मणैश्चैव महत्सु परिचक्षते ॥"*
परिषदमाहाङ्गिराः।
"एकविंशतिसंख्याकैर्मीमांसावेदपारगैः।
वेदाङ्गकुशलैश्चैव परिषत् संप्रकल्पयेत् ॥
चातुर्विद्यो विकल्पी च अङ्गविद्धर्म्मपाठकः।
आश्रमास्त्रमिणो मुख्याः पर्षत् स्यात् दशावरा॥"
मनुः।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्व्वे पर्षत् स्यात् दशावरा॥"
अङ्गिराः।
"एषा तु लघुकार्य्येषु मध्यमेषु तु मध्यमा।
महापातकिशोधेषु शतशो भूय एव वा ॥"
प्रदर्शनार्थमिदम्। यावद्भिरेव निरूपणं ताव-
द्भिरेव परिषत्। दृष्टार्थत्वादेव तस्याः। तथा च
यमः।
"एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्म्मपाठकाः।
स धर्म्म इति विज्ञेयो नेतरेषां सहस्रशः ॥*"॥
प्रायश्चित्ताकथने दोषो यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये
द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः॥
अनर्हं तैरनाहूतैरपृष्टैश्चैव सर्व्वदा।
प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः॥
व्यायतो मार्गमाणस्य अस्त्रियार्त्तं प्रणामिनः।
अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत् ॥
हारीतः।
"यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे।
प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः॥
तस्मात् कृच्छ्रमथार्द्धं पादं वापि विधानतः।
ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत्॥"
अशक्तावनुग्रहमाह पराशरः।
"दुर्ब्बलेऽनुग्रहः कार्य्यस्तथा वै शिशुवृद्धयोः।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहो भवेत् ॥"
स्नेहादिनानुग्रहे दोषो यथा,—
"स्नेहाद्वा यदि वा लोभात् मोहादज्ञानतो-
ऽपि वा।
कुर्व्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति ॥"
शास्त्रीयप्रायश्चित्तमुदाहृत्य पश्चादनुग्रहःकार्य्य
इत्याहाङ्गिराः।
"कृत्वा पूर्व्वमुदाहारं यथोक्तं धर्म्मवक्तृभिः।
पश्चात्कार्य्यानुसारेण शक्त्या कुर्व्वन्त्यनुग्रहम्।
वृद्धत्वादिभेदात् प्रायश्चित्तं यथा,—
"अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥"
अथ पापनिष्कृमणादिः।
तत्र मनुः।
"ख्यापनेनानुतापेन तपसाध्ययनेन च।
पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥"
चापदीत्यनेन अध्ययनतपसोर्दानमनुकल्पइत्यु-
क्तम्। एतच्चहिंसाव्यतिरिक्तविषयम्। हिंसा-
यान्तु दानं मुख्यम्। यथा, भविष्ये।
"हिंसात्मकानां सर्व्वेषां कीर्त्तितानां मनीषिभिः
प्रायश्चित्तकदम्बानां दानं प्रथम उच्यते ॥"
तथा मनुः।
"दानेन बधनिर्णेकं सर्पादीनामशक्नुवन्।
एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये ॥"*॥
सामान्यप्रायश्चित्तानि यथा, संवर्त्तः।
"हिरण्यदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥"
यमः।
"शोषणेन शरीरस्य तपसाध्ययनेन च।
पापकृन्मुच्यते पापात् दानेन च दमेन च ॥"
मनुः।
"कृत्वा पापं हि सन्तप्य तस्मात् पापात्प्रमुच्यते
नैतत् कुर्य्यां पुनरिति निवृत्त्या पूयते नरः ॥"
विष्णुपुराणम्।
"प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥"
यमः।
"गवाह्निका देवपूजा वेदाभ्यासः सरित्प्लवः।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"
गोतमः। "हिरण्यं गौर्व्वासोऽश्वो भूमिस्तिला
घृतमन्नमिति देयानि। एतान्येवानादेशे विक-
ल्पेन क्रियेरन् एनांसि लघूनि लघूनि गुरूणि
गुरूणि।" विष्णुपुराणम्।
"एवं विषयभेदाद्वै व्यवस्थाप्यानि पुत्रक!।
प्रायश्चित्तानि सर्व्वाणि गुरूणि च लघूनि च ॥
अन्यथा हि महाबाहो। लघूनामुपदेशतः।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत् ॥"
महाभारते।
"यद्यकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम्।
सर्व्वं दहति गङ्गाम्भस्तूलराशिमिवानलः ॥"
व्रतानि शुद्धिकारणान्याह विश्वामित्रः।
"कृच्छ्रचान्द्रायणादीनि शुद्धभ्युदयकारणम्।
प्रकाशे वा रहस्ये वा सञ्चयेऽनुक्तके स्फुटे ॥
प्राजापत्यः सान्तपनः शिशुकृच्छ्रः पराककः।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्राति-
कृच्छ्रकः ॥
महासान्तपनः शुद्धैः तप्तकृच्छ्रस्तु पावनः।
जलोपवासकृच्छ्रश्च ब्रह्मकूर्च्चस्तु शोधकः ॥
एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नतः ॥
कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति।
उपवासत्रिरात्रं वा मासं पञ्चदशाहकम् ॥
षड्द्वादशाहकादि कार्य्यं शुद्धिफलार्थिना।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया।
जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा ॥
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥"
प्रकाशकृते पापे व्रतानि मुख्यानि। रहस्यकृते
जपादीनि। यथा प्राजापत्यादीन्यभिधाय मनुः।
"एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैस्तु शोधयेत् ॥"
देवलः।
"प्रकाश उक्तं यत्किञ्चित् विंशभागो रहस्यके।
विंशभागः षष्टिभागः कल्प्यो जात्याद्यपेक्षया॥
इति प्रायश्चित्तविवेकः ॥
अथ प्रायश्चित्तपूर्व्वाङ्गकृत्यम्। शङ्खलिखितौ।
"वाप्य केशनखान् पूर्व्वं घृतं प्राश्य वह्निर्भिशि।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्।
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिसवनं स्पृशेत्॥"
केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः
"राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ॥
केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत्।
द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत्॥"
विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम्।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥"
सधवास्त्रीणां विशेषमाह भवदेवभट्टधृतं
वचनम्।
"वपनं नैव नारीणां नानुव्रज्या जपादिकम्।
न गोष्ठे शयनं तासां न च दद्याद्गवाजिनम्॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्।
सर्व्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्॥"
अथ धेनुमूल्यव्यवस्था। तत्र संवर्त्तः।
"प्राजापत्यप्रनाशार्थं धेनुं दद्यात् पयस्विनीम्।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥"
पयस्विनीमिति विशेषणं दुग्धोपयोगाय। स च
वत्सं विना न सम्भवति। अतः सवत्साया एव
दानं मुख्यम्। तदभावे यथोचितं मूल्यम्। तद
सम्भवे पुराणत्रयम्। हानि शल्पणिका गावो
वत्सः पौराणिको भवेदिति कात्यायनवचनात्
षट्त्रिंशत्पणमिति कृत्वा पठन्ति।
"धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिकी।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता ॥"
प्रायश्चित्तोत्तरकर्त्तव्यानि। यथा भविष्ये।
"क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम्।
शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय! मनीषिभिः ॥
जावालः।
"आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषतः।
आज्येनैव हि शाकल्यैः जुहुयादाहुतीःपृथक्
आर्द्धं कुर्य्याद्व्रतस्यान्ते गोहिरण्यान्नदक्षिणाम्॥
प्रायश्चित्तानन्तरं गोभ्यो यवसं दद्यात्। यदि तु
गावस्तत्तृणं न गृह्णीयुस्तदा पुनस्तत्प्राय-
श्चित्तमनुतिष्ठेत्। यथा हारीतः। स्वशिरसा
यवसमादाय गोभ्यो दद्यात् यदि ताः प्रमुदिता
न गृह्णीयुरथैनं प्रवर्त्तयेयुः। एवं कृतप्रायश्चि-
त्तम् इतरथा न। इति प्रायश्चित्ततत्त्वम् ॥*॥

अथ प्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि लिख्यन्ते।

अथातिपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणस्य मातृगमनं दुहितृगमनं स्नुषागमनञ्च।	अज्ञानतो द्विगुणद्वादशवार्षिकव्रतम्। तत्तु महापातके द्रष्टव्यम्। ज्ञानत एतद्द्विगुणम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
क्षत्रियवैश्यशूद्राणां मातृदुहितृस्नुषागमनम्।	हुताशनप्रवेशेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा। एतत्तु अकामतः कामतस्तद्द्विगुणम्। मातृदुहितृस्नुषाणामपि एतद्व्रतादिकं करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अकामतो ब्राह्मणकर्तृकब्रह्मवधः।	द्वादशवार्षिकव्रतम्। यथा मनुः। "ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्। भिक्षाशी विचरेद्ग्रामं वन्यैर्यदि न जीवति॥"	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यहिरण्यादिकं वा।	१०० गावः। तदशक्तौ १०० कार्षापणाः।
कामतो ब्राह्मणकर्तृकब्रह्मवधः।	याज्ञवल्क्योक्तप्रकारेण मरणम्। तथा। लोमभ्यः स्वाहेति ऋचा लोमप्रभृति वै तनुम्। मज्जान्तां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम्। एतत्तु कलौ ब्राह्मणेतरपरम्। तदशक्तौ द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ज्ञानतो ब्राह्मणकर्तृकब्राह्मणीगर्भवधः।	ब्रह्मवधप्रायश्चित्तम्। अज्ञानत एतदर्द्धम्। अनुपनीतबालकवधेऽप्येवम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अकामतः सवनस्थब्राह्मणवधः	द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
कामतः सवनस्थब्राह्मणवधः।	तद्द्विगुणम्। ४८ अष्टचत्वारिंशद्वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
ब्राह्मणकर्तृकमातृसोदरभ्रातृगुरुश्रोत्रियाहिताग्नीनां वधः।	४८ अष्टचत्वारिंशद्वार्षिकव्रतम्। एतच्च कामतः। अकामत एतदर्द्धम्।	७२० धेनवः।	२१६० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
ज्ञानतो ब्राह्मणकर्तृकवेदपारगाततायिब्राह्मणवधः।	१२ वार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतस्तस्य वधः।	तदर्द्धम्। ६ वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। तदशक्तौ ५० कार्षापणाः।
ज्ञानतोऽज्ञानतो वा ब्राह्मणकर्तृकपतितब्राह्मणवधः।	तथा।	तथा	तथा।	तथा।
अकामत आग्रहारिकादिब्राह्मणवधः।	एकवार्षिकव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। तदशक्तौ ८।/६॥ कार्षापणाः।
कामतस्तस्य वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतः क्षत्रियकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तद्विगुणम्। तच्च २४ वार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो वैश्यकर्तृकब्रह्मवधः।	ब्राह्मण कर्तृकवधप्रायश्चित्तत्रिगुणम्। तच ३६ वार्षिकव्रतम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।
कामतो वैश्यकर्तृकब्रह्मवधः।	७२ वार्षिकव्रतम्।	१०८० धेनवः।	३२४० कार्षापणाः।	६०० गावः। अशक्तौ ६०० कार्षापणाः।
अकामतः शूद्रकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तचतुर्गुणम्। तच ४८ वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो ब्राह्मणकर्तृकब्राह्मणीवधः।	ब्रह्मवधप्रायश्चित्तार्द्धम्। तच ६ वार्षिकव्रतम्।	८० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्। क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्तृकवधप्रायश्चित्त-द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्। अनेकब्राह्मणवधे प्रायश्चित्तस्यैकत्वम्। यदेव साक्षाद्वधकर्तुः प्रायश्चित्तं तदेव स्वल्पप्रहर्त्तुरनुग्राहकस्य अप्रवृत्तप्रवर्तकरूपप्रयोजकस्य च पादहीनम्। वधप्रतिरोधकस्य अनुग्राहकस्य प्रवृत्त-प्रवर्त्तकरूपप्रयोजकस्य च अर्द्धम्। अनुमन्तुर्निमित्तिनश्च पादः। अशक्तौ स्त्रीबालवृद्धानां सर्वत्रार्द्धम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
ज्ञानतो ब्राह्मणस्य पैष्टीसुरापानम। हिरण्यस्तगौड़ीमाध्वीपानञ्च।	अग्निसमवर्णानां सुरागोमूत्रजलदुग्धघृतगोमयरसानामन्यतमस्यामरणात् पानम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तन्नभ्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो ब्राह्मणस्य तासां पानम्।	एतदर्द्धम्। तत्तु द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्नभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतः क्षत्रियस्य पैष्टीसुरापानम्।	नववार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्।	१३५ धेनवः।	४०५ कार्षापणाः। तन्नभ्यस्वर्णादि वा।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
अज्ञानतो वैश्यस्य पैष्टीसुरापानम्।	षाड्वार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम् स्त्रीबालवृद्धानामर्द्धादिकम्।	९० धेनवः।	२७० कार्षापणाः। तन्नभ्यस्वर्णादि वा।	५० गावः। अशक्तौ ५० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयम्।	अपहृतद्रव्यं तस्यानुरूपं मूल्यं वा स्वामिने दत्त्वा द्वादशवार्षिकव्रतं कारयीयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्नभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतस्तत्कर्तृकतत्स्तेयम्।	एतद्द्विगुणं २४ वार्षिकव्रतम्। गुणवद्ब्राह्मणकर्तृके तु सर्वत्रार्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ज्ञानतः क्षत्रियवैश्यशूद्रकर्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयम्।	राजकर्तृकमुषलाघातेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तन्नभ्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अज्ञानतस्तत्संसृष्टतत्स्वामिकतत्सुवर्णस्तेयम्।	द्वादशवार्षिकव्रतं स्त्रीबालहत्यानामर्द्धम्। एकस्योभयधर्मवत्त्वे पादः।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यरूप्यादि वा	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतो गुर्व्वङ्गनागमनम्। अर्थात् विमातृगमनम्। शूद्रस्य ब्राह्मणीगमनञ्च।	गुरुतल्पगः पापमभिभाष्य तप्ते लौहमये स्वप्यात्। ज्वलन्तीं लौहप्रतिमां स्त्रीमयीं प्रतिमां वा आलिङ्ग्य म्रियेत। अथवा शिश्नवृषणावुत्कृत्य अञ्जलौ निधाय आमरणात् नैरृतीं दिशमातिष्ठेत्। चतुर्विंशतिवार्षिकव्रतं वा कुर्य्यात्। गुर्व्वङ्गनयापि एतत् करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यरूप्यादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो गुर्व्वङ्गनागमः।	द्वादशवार्षिकव्रतम्। बालहत्ययोरर्द्धम्। एतच्चातुर्वर्ण्य विषयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यरूप्यादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
चतुर्णां महापातकिनां संसर्गः।	ज्ञानतः सकृत् प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यरूप्यादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
तत्र गुरुसंसर्गो यथा। पतिताचार्य्यात् वेदाध्ययनम्।१। पतितशिष्याय वेदाध्यापनम्।२। पतितेन ऋत्विजा ज्योतिष्टोमादियजनम्।३। पतितस्य ज्योतिष्टोमादिनिष्पादनरूपयाजनम्।४। पतितेन पतितया वा परिणयनम्।५। स्तेयादिपतितान्यब्राह्मणीगमनम्।६। पतितान्नस्य पतितेन सहैकपात्रे भोजनम्।७।	अज्ञानतःसकृत्प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतो द्वितीयसंसर्गिणः नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतो द्वितीयसंसर्गिणः सार्द्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
	ज्ञानतस्तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतस्तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः। ब्रह्मघातिनां क्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण एतस्य द्विगुणं त्रिगुणं चतुर्गुणं ज्ञेयम्।			
तत्र लघुसंसर्गो यथा। उपनयन विना पतिताय वेदाध्यापनम्।१। पतितात्ताह्याध्ययनम्।२। पतितयजमानस्य अष्टकादियज्ञयाजनम्।३। पतितेन ऋत्विजाष्टकादियज्ञयजनम्।४ पतितस्वब्राह्मणीगमनम्।५। पतितशूद्रागमनम्।६। अपतितान्नस्य पतितेन सहैकपात्रे भोजनम्।७। पतितोच्छिष्टभोजनम्।८।	ज्ञानतः षण्माससंसर्गप्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतः षण्माससंसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतः षण्माससंसर्गे द्वितीयसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतः षण्माससंसर्गे द्वितीयसंसर्गिणः सार्द्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
	ज्ञानतः षण्माससंसर्गे तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतः षण्माससंसर्गे तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	चतुर्थसंसर्गिणो ज्ञानाज्ञानतः प्रायश्चित्ताभावः।			

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
महापातकिनां लघुतरसंसर्गो-यथा। एकशय्यासनयानादिः। ततो लघुतर आलापस्पर्शनिःश्वासादिः।	एभिश्च त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः।			
	ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम्। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तत्सख्यसुवर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतो वत्सरद्वयेन।	तथा।	तथा।	तथा।
	ज्ञानत एकैकशो वत्सरत्रयेण।	तथा।	तथा।	तथा।
	अज्ञानाद्वत्सरषट्केन।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमानत्वादज्ञानाद्वर्षषट्केन पातः। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तत्सख्यसुवर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	ज्ञानादेकैकशो वत्सरनवकेन।	तथा।	तथा।	तथा।
	अज्ञानादेकैकशोऽष्टादशवत्सरे पातः। *। नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः स तस्य व्रतं पादहीनं कुर्य्यात्॥ एतच्च प्रथमसंसर्गिणाम्। द्वितीयसंसर्गिणां द्विपादहीनम्। तृतीयसंसर्गिणां त्रिपादहीनं सर्व्वत्र ज्ञेयम्॥ *॥ संसर्गाणामुक्तकालन्यूनाधिक्ये भागहारेण प्रायश्चित्तस्य न्यूनाधिक्यं ज्ञेयम्॥ *॥ रघुनन्दनभट्टाचार्य्यमते कलौ लघुसंसर्गेषु प्रतिग्रहादिषु पातित्याभावात् तत्प्रायश्चित्ताभावः।	तथा।	तथा।	तथा।
पतितोत्पन्नत्वमपि महापातकिसंसर्गविशेषः।	यस्य पतितस्य यत् प्रायश्चित्तं तस्य पातित्यदशायां जातस्य पुत्रस्य तत् तृतीयभागप्रायश्चित्तम्। तदानीं तज्जातायाः कन्यायाः पतितोत्पन्नपुत्रप्रायश्चित्ततृतीयभागप्रायश्चित्तम्।			

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ। धेनुदानम्।	तदशक्तौ। चूर्णीदानम्।	दक्षिणा।
समुत्कर्षे अनृतम्। तत्त समुत्कर्षनिमित्तं वाचा क्रियया वा अन्यथा प्रतिपादनं यथा शूद्रस्य ब्राह्मणोऽहमिति वचन यज्ञोपवीतधारणञ्च। अथवा परस्य सम्यग्जातिविद्योत्कर्षे सति नायं ब्राह्मणो न च किञ्चिदयं जानीते इत्यनृतवचनम्। १। राजगामिपैशुनम्। तत्त राजनि निर्दोषस्य दोषख्यापनम्। २। गुरोरलीकनिर्बन्धः। स तु गुरोर्मिथ्यादातुर्मृषादोषाभियोगः। ३।	द्वादशवार्षिकव्रतम्। एतच्च ज्ञानात्यन्ताभ्यासतः॥ *॥ एतन्मध्याद्यदुपपातके दृश्यते तदज्ञानादिना लघुविषयञ्चेत्यादिव्यवस्थेयम्॥ *॥ यच्च वशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्य्यात्। विष्णुः। समुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदस्वारणे च मासं पयसा वर्त्तेत। आचारणं परदारगमनाभिशापः। वशिष्ठः। गुरोश्चालीकनिर्बन्धे सचेलस्नातो गुरुं प्रसादयेत् प्रसादात् पूतो भवति। एतानि प्रमादादिकृते बोध्यानि।	१८० धेनवः।	५४० कार्षापणाः	१०० गावः। अशक्तौ १०० कार्षापणाः।

महानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
एतानि त्रीणि ज्ञानतः अत्यन्ताभ्यासे अज्ञानकृत-ब्रह्महत्यासमानि। यागस्थयोः क्षत्रियवैश्ययोर्व्वधः। ४। गर्भिणीवधः। ५। रजस्वलावधः। ६। अत्रिगोत्रावधः। ७। ब्राह्मण-व्यतिरिक्ताविज्ञातगर्भवधः। ८। शरणागतवधः। ९। एतानि च अज्ञानकृतब्रह्म-हत्यासमानानि।				
ब्रह्मोज्झता। सा च अस-च्छास्त्राभियोगेन अधीत-वेदविस्मरणम्। १। वेद-निन्दा। अर्थतो ग्रन्थतश्च।२। कौटसाक्ष्यम्। ३। सुहृद्-वधः। स च ब्राह्मणव्यति-रिक्तमित्रवधः। ४। गर्हि-तान्नजग्धिः। सा च ज्ञानतो-ऽत्यन्ताभ्यासेन अन्त्यजान्न-भोजनम्। ५। गर्हितान्न-जग्धिः। ज्ञानतोऽत्यन्ता-भ्यासेन छत्राकलशुनादि-भोजनम्। ६। एतानि षट् अज्ञानकृतसुरापानसमानि।	द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षा-पणाः। तन्मूल्य-स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणसम्बन्धिनिःक्षेपहरणम्। १। नरा२श्व३रजत४भूमि५ वज्र ६ मणीना ७ मभ्यासेन हरणम्। एतानि सप्त ब्राह्मणस्वामिकाशीतिरक्तिका परिमितसुवर्णस्तेयसमानि।	ज्ञानतो द्वादशवार्षिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१८० धेनवः।	५४० कार्षा-पणा'। तन्मूल्य-स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
सपिण्डस्त्रीगमनम्। १। ब्राह्मणकुमारीगमनम्। २। चाण्डालादिस्त्रीगमनम्। ३। सवर्णमित्रस्त्रीगमनम्। ४।	ज्ञानतो महापातकोक्तप्रकारेण मरणं तदूर्द्ध्वं कल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षा-पणाः। तन्मूल्य-स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
पुत्रस्यासवर्णस्त्रीगमनम्। ५। औरसेतरपुत्रभार्य्यागमनम्। ६। पितृष्वसृगमनम्। ७।	अज्ञानतो१२ द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षा-पणाः। तन्मूल्य-स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
मातृष्वसृगमनम्। ८। गन्तारमपेक्ष्य हीनवर्णपितृ-पत्नीगमनम्। ९। पितृव्य-	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षाप-णाः। सार्द्धसप्त-धेनुसंकलनात्।	यथाशक्ति।
पत्नीगमनम्। १०। माता-महपत्नीगमनम्। ११। मा-तुलपत्नीगमनम्। १२। श्व-	अभ्यासव्यभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
श्रूगमनम्। १३। स्वसृगम-नम्! १४। ज्येष्ठभ्रातृपत्नी-गमनम्। १५। राजपत्नी-गमनम्। १६। क्षत्रिय-	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः।	११।० कार्षाप-णाः। पादोन-धेनुचतुष्टयस्य ग्राह्यत्वात्।	यथाशक्ति।

अथानुपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
पत्नीगमनम् ।१७। ऋत्विक्पत्नीगमनम् । १८ । उपाध्यायपत्नीगमनम् । १९ ।	अज्ञानादारोहणमात्रे सम्बन्धविप्रकर्षे वा पराकस्तप्तकृच्छ्रो वा ।			
मित्रपत्नीगमनम् । २० । स्वसृसखीगमनम् । २१ । असवर्णाजातदुहितृगमनम् ।	ज्ञानतो महापातकोक्तप्रकारेण मरणम् । तद्दै कल्पिकं चतुर्विंशतिवार्षिकव्रतम् ।	३६० धेनवः ।	१०८० कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
२२ । आचार्य्यपत्नीगमनम् । २३ । शरणागतागमनम् । २४ । प्रव्रजितागमनम् ।२५।	अज्ञानतो द्वादशवार्षिकव्रतम् ।	१८० धेनवः ।	५४० कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
धात्रीगमनम् । २६ । साध्वीगमनम् । २७ । निःक्षिप्तस्त्रीगमनम् । २८ । व-	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम् ।	८ धेनवः ।	२२॥० कार्षापणाः । सार्द्धसप्तधेनुसङ्कलनात् ।	यथाशक्ति ।
र्णिनीमातृगमनम् ।२९। एतानि गुरुतल्पगमनसमानि ।*।	अव्याभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः ।	५ धेनवः ।	१५ कार्षापणाः	यथाशक्ति ।
इति चतुःप्रकाराण्यनुपातकानि मिलित्वा एकपञ्चाशत्संख्येयानि ।	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः ।	११।० कार्षापणाः । पादोनधेनु-चतुष्टयस्य प्राप्तत्वात् ।	यथाशक्ति ।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ । धेनुदानम् ।	तदशक्तौ । चूर्णीदानम् ।	दक्षिणा ।
ब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणकृतब्राह्मणस्वामिकगवोवधः ।	त्रैमासिकव्रतम् । तद्यथा । कृतसशिखवपनो व्यापादितायाः गोश्चर्म्मणाकृतपरिधानोत्तरावगुण्ठनो मासमेकं गोमूत्रेण यवागूकृतान् यवान् पिबन् गोष्ठे वसेत् । अपरमासद्वये उपोष्यापरदिने सायं स्वल्पं भुञ्जीत । जितेन्द्रियो गोमूत्रेण स्नानं चरेत् । दिवा गवानुगमनं ऊर्द्ध्वं तिष्ठन् गोरजःपानञ्च चरेत् । गोः शुश्रूषां नमस्कारञ्च कुर्य्यात् । रात्रौ वीरासनं वसेत् । तिष्ठन्तीषु गोष्वनुतिष्ठेत् । व्रजन्तीषु तास्वनुव्रजेत् आसीनासु तास्वासीनः । वीतमत्सरः । आतुरामभिशस्तां पतितां पङ्कलग्नां भयनिमित्तैश्चौरव्याघ्रादिभिराक्रान्ताञ्च गां सर्व्वशक्तिभिर्विमोचयेत् । शीतवर्षाशीतेषु मारुते भृश वाति वा गोस्त्राणमकृत्वा आत्मत्राणं न कुर्य्यात् आत्मनः अन्येषां वा गृहक्षेत्रखलेषु भक्षयन्तीं पिबन्तं वत्सञ्च निवारणाभिप्रायेण न कथयेत् । एतद्विधानेन यो गामनुगच्छति स गोहत्याकृतपापात् प्रमुच्यते । एक वृष दश गाश्च दक्षिणां दद्यात् । एतदशक्तौ वेदविद्भ्यः सर्व्वस्वं दद्यात् । एतच्चतुर्थांशः स्वाध्यायशालाद्विषयम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	१२ धेनवो भवदेवभट्टसम्मता ।	३६ कार्षापणाः तन्मूल्यस्वर्णादि वा ।	१ वृष १० गावः अशक्तौ १५ कार्षापणाः ।
		१७धेनवो बहुसम्मताः ।	५१ कार्षापणाः	तथा ।

गवोपपापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानब्राह्मणस्वामिकाज्ञानकृतगवीवधः।	सार्द्धमासिकव्रतम्। तद्यथा। गोष्ठे गोसमीपे गोघ्नः स्थितिं कुर्य्यात्। तत्रैव स्थितो शयनञ्च। सक्तुयावकपयोदधिसर्पिर्गोमयानां भक्षणं क्रमशः कुर्य्यात्। नखरोमविवर्जितस्त्रिसवनस्नानमाचरेत्। जितेन्द्रियो वीतमत्सरश्च भवेत्। यथाशक्ति गायत्रीञ्च जपेत्। सार्द्ध मासे पूर्णे सति विप्रान् भोजयेत्। गां तन्मूल्यं वा दक्षिणां दद्यात्। अनेन विधानेन गोघ्नः पापात् मुच्यते। एतद्व्रतं गोस्वामिने तत्प्रतिरूपं गवान्तरं यथोक्तमूल्यं वा दत्त्वा कर्त्तव्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धं प्रायश्चित्तम्।	६ धेनवो भवदेवभट्टसम्मताः। ८ धेनवो बहुसम्मताः।	१८ कार्षापणाः। तन्न्यूनस्वर्णादि वा। २५॥० कार्षापणाः। बहुसम्मताः। सार्द्धाष्टधेनुसङ्कलनात्।	१ गौः। अशक्तौ १ कार्षापणः। आर्त्तमते ७॥० कार्षापणाः।
ज्ञानकृतशूद्रकर्तृक-ब्राह्मणस्वामिकगवीवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्।	६ धेनवो भवदेवभट्टसम्मताः। ८ धेनवो बहुसम्मताः।	१८ कार्षापणाः। २५॥० कार्षापणाः। बहुसम्मताः। तन्न्यूनस्वर्णादि वा।	१ गौः। अशक्तौ १ कार्षापणः।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतम्। तद्यथा। षाण्मासान् तच्चर्मणा परिवृतो गोग्रासाशनो गाव्रतो यवाशी गोभिरेव सञ्चरन् तत्पापात् विमुच्येत।	१२ धेनवः।	३६ कार्षापणाः। तन्न्यूनस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तन्न्यूनस्वर्णादि वा।	यथाशक्ति।
शूद्रकर्तृकज्ञानकृत-क्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तन्न्यूनस्वर्णादिवा	यथाशक्ति।
तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतद्व्रतार्द्धम्। स्त्रीशूद्रबालवृद्धानां सर्व्वत्रार्द्धम्।	३ धेनवः।	९ कार्षापणाः। तन्न्यूनस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यस्वामिक-गवीवधः।	द्विगुणं मासव्रतम्। मासव्रतं यथा। मासैकं पञ्चगव्यपानं गोष्ठे वासः गवानुगमनं गोमतीजपः।	१० धेनवः।	३० कार्षापणाः। तन्न्यूनस्वर्णादि वा।	यथाशक्ति।
तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतदर्द्धम्।	५ धेनवः।	१५ कार्षापणाः। तन्न्यूनस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतशूद्रस्वामिकगवीवधः।	४ प्राजापत्यानि।	४ धेनवः।	१२ कार्षापणाः। तन्न्यूनस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः।	२ प्राजापत्ये। स्त्रीशूद्रबालवृद्धानां सर्व्वत्रार्द्धम्। एकस्य स्वात्वशूद्रत्वाद्युभयधर्म्मवत्त्वे प्रायश्चित्तपादः।	२ धेनू।	६ कार्षापणाः। तन्न्यूनस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	द्विगुणत्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२४ धेनवो भवदेवभट्टसम्मताः। ३४ धेनवो बहुसम्मताः।	७२ कार्षापणाः। १०२ कार्षापणाः। बहुसम्मताः।	२ वृषौ २० गावः। अशक्तौ ३० कार्षापणाः।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः	त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१२ धेनवः। १७ धेनवो बहुसम्मताः।	३६ कार्षापणाः। ५१ कार्षापणाः। बहुसम्मताः।	१० वृषः १० गावः। अशक्तौ १५ कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	द्विगुणं षाण्मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२४ धेनवः।	७२ कार्षापणाः।	यथाशक्ति।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१२ धेनवः।	३६ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	चतुर्गुणं मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२० धेनवः।	६० कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	द्विगुणं मासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१० धेनवः।	३० कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	८ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्।	८ धेनवः।	२४ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः।	४ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकाधमशूद्रस्वामिकगवोवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अज्ञानकृतशूद्रकर्तृकाधमशूद्रस्वामिकगवोवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	४ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रताना गवां शूद्रकर्तृकाज्ञानकृतवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतपादः। अज्ञानतस्तदर्द्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्कलनात्।	३॥० कार्षापणाः।
ब्राह्मणस्वामिकाया गोर्गात्रसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२५॥० कार्षापणाः। सार्द्धाष्टधेनुसङ्कलनात्।	७॥० कार्षापणाः।
ब्राह्मणस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतपादत्रयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम्।	१३ धेनवः।	३८।० कार्षापणाः। पादोनत्रयोदशधेनुसङ्कलनात्।	११।० कार्षापणाः।
क्षत्रियस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादः। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।

वधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
क्षत्रियस्वामिकाया गोर्गावसञ्चितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
क्षत्रियस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादत्रयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम्।	८ धेनवः।	२७ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकाया गोरल्पमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	द्विगुणमासव्रतस्य पादः। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	७॥० कार्षापणाः। सार्द्धद्वयधेनुसङ्कलनात्।	यथाशक्ति।
वैश्यस्वामिकाया गोर्गावसञ्चितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकवधः।	द्विगुणमासव्रतस्य पादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	द्विगुणमासव्रतस्य पादत्रयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
शूद्रस्वामिकाया गोरल्पकगर्भस्य अर्थात् गर्भग्रहणदिनात् सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकाया गोर्गावसञ्चितगर्भस्य अर्थात् मासद्वयोपरिसावनमासद्वयानतिक्रान्तगात्राद्यवयवोत्पन्नगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य अर्थात् चतुर्थमासोपरि सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	३ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम्।	३ धेनवः।	८ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२५॥० कार्षापणाः। सार्द्धाष्टधेनुसङ्कलनात्।	७॥० कार्षापणाः।
क्षत्रियस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	१ मासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकानामतिवृद्धातिकृशातिबालातिरोगिणीनां	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।

गोवधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पणादानम्।	दक्षिणा
गवां ब्राह्मणक्षत्रियवैश्यक- र्तृकाज्ञानकृतवधः।	स्त्रीशूद्रबालवृद्धानामर्द्धम्।			
ब्राह्मणस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैक- प्रयत्ननिष्पन्नाज्ञानकृतवधः।	द्विगुणत्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२४ धेनवः।	१०२कार्षापणाः।	२ वृषौ २० गावः। अशक्तौ ३० कार्षापणाः।
क्षत्रियस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैक- प्रयत्ननिष्पन्नाज्ञानकृतवधः।	द्विगुणषाण्मासिकव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२४ धेनवः।	७२कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैक- प्रयत्ननिष्पन्नाज्ञानकृतवधः।	चतुर्गुणमासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२० धेनवः।	६० कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकानां बहूना गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैक- प्रयत्ननिष्पन्नाज्ञानकृतवध.।	८ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः। प्रयत्नभेदे प्रायश्चित्तावृत्तिः।	८ धेनवः।	२४कार्षापणाः।	यथाशक्ति।
ज्ञानकृतबहुकर्तृकब्राह्मणस्वा- मिकैकगवीवधः।	प्रत्येकं त्रैमासिकव्रतपादः। अज्ञानतस्तदर्द्धम्।	५ धेनवः।	१२॥० कार्षा पणाः। सपाद- धेनुचतुष्टयसङ्क- लनात्।	३॥० कार्षापणाः।
ज्ञानकृतबहुकर्तृकक्षत्रियस्वा- मिकैकगवीवधः।	प्रत्येकं षाण्मासिकव्रतपादः। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	८ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतबहुकर्तृकवैश्यस्वामि- कैकगवीवधः।	प्रत्येकं द्विगुणमासव्रतपादः। अज्ञानतस्तदर्द्धम।	३ धेनवः।	७॥०कार्षापणाःसा र्द्धद्वयधेनुसङ्कलात्	यथाशक्ति।
ज्ञानकृतबहुकर्तृकशूद्रस्वामि- कैकगवीवधः।	प्रत्येकं प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
द्वाभ्यामेकगवीवधः।	यद्यत्स्वामिकाया गोर्वधे यद्यत्प्रायश्चित्त- मुक्तं प्रत्येकं सम्पूर्णं तत्तत् प्रायश्चित्तम्।			
द्वाभ्यामेकप्रयत्ननिष्पन्नबहुगवी- वधः।	यद्यत्स्वामिकाया गोर्वधे यद्यत्प्रायश्चित्त प्रत्येकं तद्द्वैगुण्यम्।			
एकप्रयत्ननिष्पन्नबहुकर्तृकबहु- गवीवधः।	प्रत्येकं तत्तद्वधोक्तव्रतपादद्वयम्।			
एकप्रयत्ननिष्पन्नाभ्यामज्ञानबहु- कर्तृकबहुगवीवधः।	प्रत्येकं तत्तद्वधोक्तव्रतद्विपादप्रायश्चित्ता- वृत्तिः।			
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक- र्तृकब्राह्मणस्वामिकैकहाय- नगवीवधः।	त्रैमासिकव्रतपादः। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१२॥० कार्षा- पणाः। सपाद- धेनुचतुष्टयसङ्क- लात्।	३॥० कार्षापणाः।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक- र्तृकब्राह्मणस्वामिकद्विहाय- नगवीवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२५॥० कार्षा- पणाः। सार्द्धाष्ट- धेनुसङ्कलनात्।	७॥ कार्षापणाः।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक- र्तृकब्राह्मणस्वामिकत्रिहाय- णगवीवधः।	पादन्यूनत्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	१३ धेनवः।	३८।० कार्षा- पणाः। पादोन- त्रयोदश धेनुसङ्क लनात्।	११।० कार्षापणाः।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक- र्तृकक्षत्रियस्वामिकैकहायन गवीवधः।	षाण्मासिकव्रतपादः। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	३ धेनवः।	८ कार्षापणाः।	यथाशक्ति।

उपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकद्विहायनगवीवधः।	षाण्मासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकत्रिहायणगवीवधः।	पादन्यूनषाण्मासिकव्रतम्। अज्ञानस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	९ धेनवः।	२७कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकवैश्यस्वामिकैकहायनगवीवधः।	मासैकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	७॥० कार्षापणाः। सार्द्धद्वयधेनुसङ्कलनात्	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकवैश्यस्वामिकद्विहायनगवीवधः।	मासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकवैश्यस्वामिकत्रिहायणगवीवधः।	पादोनं द्विगुणमासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकैकहायनगवीवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकद्विहायनगवीवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ज्ञानकृत ब्राह्मणक्षत्रियवैश्यकर्तृक शूद्रस्वामिकत्रिहायणगवीवधः।	३ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणाहारप्रचारनिर्गमरोधनिमित्तवधः।	प्राजापत्यपादः।	१ धेनुः।	॥॥० पणाः। धेनुपादसङ्कलनात्	यथाशक्ति।
	क्षैण्यज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपाद। इदन्तु सर्व्वस्वामिकायाः सर्व्ववयस्काया गोः सर्व्वकर्तृकवधे बोद्धव्यम्।	२ धेनू।	५॥/० कार्षापणाः। पादार्द्धधेनुद्वयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण अकालबन्धना यथा बन्धननिमित्तवधः।	प्राजापत्यपादद्वयम्।	१ धेनुः।	१॥०कार्षापणाः। धेन्वर्द्धसंकलनात्।	यथाशक्ति।
	क्षैण्यज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादद्वयम्। एतदपि सर्व्वस्वामिकायाः सर्व्ववयस्काया गोः सर्व्वकर्तृकवधं बोद्धव्यम्।	४ धेनवः।	११।० कार्षापणाः। पादोनधेनुचतुष्टयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण हलशकटादियोजननिमित्तवधः।	प्राजापत्यपादत्रयम्।	१ धेनुः।	२।०कार्षापणाः। पादोनधेनुसङ्कलनात्।	यथाशक्ति।
	क्षैण्यज्ञाने तु चान्द्रायणपादत्रयम्।	६ धेनवः।	१६॥/कार्षापणा पादोनसार्द्धसप्तधेनुसङ्कलनात्	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण कूपावटादिषु भयादिना निपातनेन शास्त्रीयदण्डनिपातनेन च वधः।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	क्षैण्यज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणम्। एतदपि सर्व्वस्वामिकादिविषयम्। यद्यत्स्वामिकयद्यत्	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।

गवोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	कर्तृकायद्दृष्टगववधे यद्यत्प्रायश्चित्तमुक्तं अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य तत्तत्प्रायश्चित्तस्य पादत्रयम्। प्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य पादद्वयम्। अल्पप्रवृत्तृंरूपानुग्राहकस्य पादत्रयम्। वध्यप्रतिरोधकरूपानुग्राहकस्य पादद्वयम्॥			
ब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रेतरस्वामिकगवापालननिमित्तवधः।	सेतिकर्त्तव्यताकप्राजापत्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। इति कर्त्तव्यता यथा। सशिखं वपनं कार्य्यं त्रिसन्ध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलश्रवणादिभिः॥ आर्द्रमेव हि तच्चर्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्॥ ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्। अनडुत्सहितां गाश्च दद्याद्विप्राय दक्षिणाम्॥ इति पराशरोक्ता।	२ धेनू।	६ कार्षापणाः।	१ वृषः १ गौः। अशक्तौ ६ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकगवापालननिमित्तवध।	प्राजापत्यद्वयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रेतरस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। अप्राप्तदम्यावस्था तु त्रिहायणपर्य्यन्तम्।	सेतिकर्त्तव्यताकप्राजापत्यपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः।	१॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः।	प्राजापत्यव्रतद्वयपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः	यथाशक्ति।
उत्सृष्टवृषवत्सतर्य्योर्वधः।	भूतपूर्वस्वामिकगववधप्रायश्चित्तद्विगुणम्। पूर्व्वस्वाम्यज्ञाने ब्राह्मणस्वामिकगववधद्विगुणप्रायश्चित्तम्।			
गवां शृङ्गभङ्गास्थिभङ्गचर्म्मनिर्म्मोचनलाङ्गूलच्छेदनम्।	दशरात्रं वज्रव्रतम्। मासार्द्धं यवपानम्। प्राजापत्य वा। वज्रव्रतं यथा। गोमूत्रेण समायुक्तं यावकञ्चोपयोजयेत्। एकाहमेव कृच्छ्रोऽयमुक्तश्चाङ्गिरसा स्वयम्। सर्व्वपापहरो दिव्यो नाम्ना वज्र इति स्थितः॥*॥ शृङ्गभङ्गादिना षण्मासाभ्यन्तरे गोर्मरणे अन्यूनं वधप्रायश्चित्तं करणीयम्। गुरुणा समेन वा तेन प्रायश्चित्तेन शृङ्गभङ्गादिप्रायश्चित्तसिद्धिः। षण्मासोत्तरमरणे शृङ्गभङ्गादिप्रायश्चित्तमात्रं कर्त्तव्यम्॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
गवां मुष्कमोचः।	यत्कर्तृजयत्स्वामिकगववधे यत्प्रायश्चित्तमुक्तं तत्कर्तृकतत्स्वामिकगवमुष्कमोचे तत्प्रायश्चित्तम्। मृत्युलिङ्गच्छेदयोस्तुल्यत्वाभिमानात्। अत्र प्रयोजकभेदस्त्वावं पादोनत्व।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
वृषस्य स्वयं ब्राह्मणकर्तृकहलशकटादियोजनम्।	प्राजापत्यद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
योषिद्गवां ब्राह्मणकर्तृकहलशकटादियोजनम्।	४ प्राजापत्यानि। ब्राह्मणेतरेषां प्राजापत्यद्वयम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
उत्कृष्टवृषस्य कपिलायाश्च ब्राह्मणकर्तृकहलशकटादियोजनम्।	यतिचान्द्रायणद्वयम्। ब्राह्मणेतरेषां यतिचान्द्रायणैकम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
गोमांसखादके गोविक्रयविनिमयादिः।	विक्रयादिमात्रे अज्ञानकृततत्कर्तृकतत्तत्स्वामिकगववधप्रायश्चित्तार्द्धम्। गोमांसखादककर्तृकतद्ववधे तु अज्ञानकृततत्कर्तृकतत्तत्स्वामिकगववधोक्तसंपूर्णप्रायश्चित्तम्।			

अथ गोवधापवादः।

तत्र पराशरः।

"धूर्य्येषु वह्यमानेषु दण्डेनाभिहतेषु च। काष्ठेन लेष्टुना वापि पाषाणेन तु ताडितः॥ मूर्च्छितः पतितश्चैव मृतो वा सद्य एव च। एवंगतानां धूर्य्याणां प्रवक्ष्यामि यथाविधि॥ उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशापि वा। ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते॥" सम्वर्त्तः। "यन्त्रणे गोचिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते॥ औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च। प्राणिनां प्राणहत्यर्थं प्रायश्चित्त न विद्यते॥ दाहच्छेदशिराभेदप्रयत्नैरुपकुर्व्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते॥" याज्ञवल्क्यः। "क्रियमाणोपकारे तु मृते विप्रे न पातकम। विपाके गोवृषाणाञ्च भेषजाग्निक्रियासु च॥" मिताक्षराधृतपराशरवचनम्। "कूपे खाते च धर्म्मार्थे गृहदाहे च ये मृता। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते॥" भवदेवभट्टधृतवचनम्। "शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च। यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते॥" सम्वर्त्तः। "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च। एषु गोषु प्रपन्नासु प्रायश्चित्तं न विद्यते॥" देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगह्वरम्। विहारो गवां मैथुनम। आयतनं सोमाभिवन्धनस्थानम्। अत्र कूपायतनकर्तुर्दोषाभावो न तु गोस्वामिनः। इति प्रायश्चित्तविवेकप्रायश्चित्ततत्त्वस्मृतिसारमौखंडसम्मतं गोवध प्रायश्चित्तं समाप्तम॥ * ॥

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ स्वर्णदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियकर्तृकज्ञानकृतक्षत्रियवधः।	अज्ञानकृत ब्रह्महत्याप्रायश्चित्तपादः। स तु त्रैवार्षिकव्रतरूप.।	४५ धेनवः।	१३५ कार्षापणा।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृत क्षत्रियवधः।	सार्द्ध वार्षिकव्रतम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनव'।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
वैश्यकर्तृकज्ञानकृतक्षत्तियवध	षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गाव'। अशक्तौ ५० कार्षापणा।
वैश्यकर्तृकाज्ञानकृतक्षत्तियवधः	त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणा।	२५ गाव। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकज्ञानकृतक्षत्रियवधः	नववार्षिकव्रतम्।	१३५ धेनव'।	४०५ कार्षापणाः।	७५ गाव। अशक्तौ ७५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतक्षत्तियवध	सार्द्ध चतुर्वार्षिकव्रतम्।	सार्द्धसप्तषष्टिधेन्वसम्भवात ६८ धेनव।	२०२॥० कार्षापणा'।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यवध।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्धवार्षिकव्रतरूपः।	सार्द्ध द्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवैश्यवधः।	ब्रह्महत्याव्रतषोडशभागः। स च नवमासिकव्रतरूपः।	सपादैकादशधेन्वसम्भवात् १२ धेनव.।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पणदानम्।	दक्षिणा
शूद्रकर्तृकब्राह्मणकृतवैश्यवधः।	ब्रह्महत्याव्रतचतुर्थभागः। स च चैवार्षिक व्रतरूपः।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतवैश्यवधः।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्ध-वार्षिकव्रतरूपः।	सार्द्धद्वाविंशति-धेन्वसम्भवात् २२ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृक-ज्ञानकृतशूद्रवधः।	ब्रह्महत्याव्रतषोडशभागः। स च नवमा-सिकव्रतरूपः।	सपादैकादशधेन्व-सम्भवात् १२ धेनवः	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृका-ज्ञानकृतशूद्रवधः।	ब्रह्महत्याव्रतद्वात्रिंशत्तमभागः। स च सार्द्धचतुर्मासिकव्रतरूपः। सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः।	पादाद्धाधिकसा-र्द्धपञ्चधेन्वसम्भ-वात् ६ धेनवः।	१६॥/० कार्षापणाः।	४ गावः। अशक्तौ ३/० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृक-ज्ञानकृतवृत्तिस्थशूद्रवधः।	ब्रह्महत्याव्रतद्वादशभागः। स च वार्षिक व्रतरूपः। अज्ञानतस्त्वेतदर्द्धम्।	१५ धेनवः।	१५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥= कार्षापणा।
सर्व्ववर्णकर्तृकज्ञानकृतप्रतिलो-मजातवधः अर्थात् अपकृष्ट-शूद्रवधः।	चान्द्रायणव्रतम्।	सार्द्धसप्तधेन्वस-म्भवात् ८धेनवः	२२॥० कार्षापणाः।	यथाशक्ति।
सर्व्ववर्णकर्तृकाज्ञानकृताप-कृष्टशूद्रवधः।	पराकव्रतम्। सर्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकज्ञानकृतब्राह्म-णीवधः।	षाड्वार्षिकं महाव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। ५० कार्षापणा वा।
क्षत्रियकर्तृकज्ञानकृतब्राह्म-णीवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। १०० कार्षापणा वा।
वैश्यकर्तृकज्ञानकृतब्राह्मणी-वधः।	अष्टादशवार्षिकव्रतम्। अज्ञानतस्त्वं तदर्द्धम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। १५० कार्षापणा वा।
शूद्रकर्तृकज्ञानकृतब्राह्मणी-वधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्। सर्वत्र बालवृद्ध-स्त्रीणामर्द्धम्। एकस्य बालत्वाद्युभय-धर्म्मवत्त्वे पादः।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकज्ञान-कृतक्षत्रियावधः।	त्रैवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। २५ कार्षापणा वा।
वैश्यकर्तृकज्ञानकृतक्षत्रिया-वधः।	षाड्वार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। ५० कार्षापणा वा।
शूद्रकर्तृकज्ञानकृतक्षत्रिया-वधः।	नववार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्। सर्वत्र बालवृद्ध-स्त्रीणामर्द्धम्। एकस्य बालत्वाद्युभय-धर्म्मवत्त्वे पादः।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृक-ज्ञानकृतवैश्यावधः।	वार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। ८।/६॥ कार्षापणा वा।
शूद्रकर्तृकज्ञानकृतवैश्यावधः।	द्विवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्। स्त्रीबालवृद्धानामर्द्धम् एकस्य स्त्रीत्वाद्युभयधर्मवत्त्वे पाद।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३॥ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृक-शूद्रावधः।	वार्षिकव्रतम्। अज्ञानतस्तु एतदर्द्धम्। स्त्रीबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वा द्युभयधर्म्मवत्त्वे पादः।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
आत्रेयीवधः। आत्रेयी त्रिविधा। अत्रिगोत्रा ऋतुस्नाता गर्भिणी च।'	यत्कर्तृकयद्वर्णस्त्रीवधे यत्प्रायश्चित्तं तद्द्विगुणम्।			

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मण कर्त्तृकाज्ञानकृतसकृत्सवर्णव्यभिचरितब्राह्मणीवधः।	वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
क्षत्रियकर्त्तृकाज्ञानकृतसकृत् सवर्णव्यभिचरितब्राह्मणीवधः।	द्विवार्षिकव्रतम्। अज्ञानस्त्वेतदर्द्धम्।	३० धेनवः।	८०कार्षापणाः।	१७ गावः। अशक्तौ१६॥/१३॥ कार्षापणाः।
वैश्यकर्त्तृकाज्ञानकृतसकृतसवर्णव्यभिचरितब्राह्मणीवधः।	त्रैवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्त्तृकाज्ञानकृतसकृत्सवर्णव्यभिचरितब्राह्मणीवधः।	चतुर्वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्। बालवृद्धस्त्रीणामर्द्धम्। एकस्य उभयधर्म्मवत्त्वे पादः।	६० धेनवः।	१८० कार्षापणाः।	३४ गावः। अशक्तौ ३३।/६॥ कार्षापणाः।
ब्राह्मणकर्त्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च ब्राह्मण्या वधः।	दृतिदानम्। ज्ञानकृते तु द्वैगुण्यम्। क्षत्रियस्य एतद्द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्।	०	०	यथाशक्ति।
ब्राह्मणक्षत्रियकर्त्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च क्षत्रियाया वधः।	धनुर्दानम्। कामतो द्वैगुण्यम् वैश्यस्य एतद्द्विगुणम्। शूद्रस्य त्रिगुणम्।	०	०	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च वैश्याया वधः।	छागदानम्। कामतस्त्वेतद्द्विगुणम्। शूद्रस्य एतद्द्विगुणम्।	०	०	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकाज्ञानकृतोभूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च शूद्राया वधः।	मेषदानम्। ज्ञानतो द्वैगुण्यम्। सर्वत्र स्त्रीबालवृद्धानामर्द्धम्। एकस्य उभयधर्म्मवत्त्वे पादः। प्रयोजकादीनां पाद पादहानिः।	०		यथाशक्ति।
ब्राह्मणकर्त्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणकर्त्तृकाज्ञानकृतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणकर्त्तृकाज्ञानकृत वैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणकर्त्तृकाज्ञानकृत शूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियकर्त्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
क्षत्रियकर्त्तृकाज्ञानकृतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
क्षत्रियकर्त्तृकाज्ञानकृतवैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशति धेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
क्षत्रियकर्त्तृकाज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
वैश्यकर्त्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	षट्त्रिंशद्वार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
वैश्यकर्त्तृकज्ञानकृतक्षत्रियागर्भवधः।	षाड्वार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
वैश्यकर्त्तृकज्ञानकृतवैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २२ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
वैश्यकर्त्तृकज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
शूद्रकर्त्तृकज्ञानकृतब्राह्मणीगर्भवधः।	अष्टचत्वारिंशद्वार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
शूद्रकर्त्तृकज्ञानकृतक्षत्रियागर्भवधः।	नववार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
शूद्रकर्त्तृकज्ञानकृतवैश्यागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्त्तृकज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्। ब्राह्मण्यादिगर्भे पुंस्त्वेन ज्ञाते विशेषेणाज्ञाते चोक्तं प्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते सर्वत्रार्द्धं प्रायश्चित्तं ज्ञेयम्। सर्वत्र स्त्रीबालवृद्धानामर्द्धम्। प्रयोजकादीनां पादपादहानिः।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
यद्यपि गजाश्वादिवधः सङ्करीकरणपापमिदं तथापि हिंसासाजात्यादुपपातकप्रकरणे तत्प्रायश्चित्तं निरूप्यते।				
हृष्यासामान्यपशुघातः। हर्यतिग्रहणात् यागार्थे प्रायश्चित्ताद्यभावः।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
राजसम्बन्ध्युत्तमगजवधः।	पञ्चनीलवृषदानम्।	•	२५ कार्षापणाः।	यथाशक्ति।
अत्युत्तमवाजिरासभवधः।	चान्द्रायणम्।	८ धेनवः। सार्द्धसप्तधेन्वसम्भवात्	२२॥० कार्षापणाः।	यथाशक्ति।
अश्ववधः।	वासोयुगदानम्। एतच्च ज्ञानतः। अज्ञानतस्तदर्द्धम्।	•	•	यथाशक्ति।
मृगमहिषवराहकुञ्जरगण्डकऋक्षव्याघ्रवानरसिंहव्याघ्रपृषतचमरवृकादीनां वधः।	अहोरात्रोपवासान्ते घृतघटदानम्। एतच्चाज्ञानत सकृद्वधविषयम्। ज्ञानतो द्वैगुण्यम्।	•	उपवासासामर्थ्ये अष्ट पणाः।	यथाशक्ति।
अजाश्व्यादिवधः।	त्रिरात्रोपवासः। एतदज्ञानतोऽत्यन्तधार्मिकब्राह्मणकर्त्तृकसकृद्वधे वेदितव्यम्।	•	१॥०कार्षापणाः	हिरण्यं वस्त्रं वा।
	शक्तस्य एकहायनवृषदानम्।	•	वृषमूल्यम् ५ कार्षापणाः।	यथाशक्ति।
	अशक्तस्य धेनुदानम्। तदशक्तौ प्राजापत्यव्रतम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मास यावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	४ धेनवः।	१२कार्षापणाः।	यथाशक्ति।
मार्जारगोधानकुलमण्डूकश्वपतत्रिमूषिकसर्पवधः। पतत्री गृहपक्षी।	त्र्यहं क्षीरपानम्। पादिककृच्छ्रं वा। एतत्सकृदज्ञानविषयम्।	•	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतोऽभ्यासे द्वादशरात्रं कृच्छ्रम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	यत्किञ्चिदधिकसपादधेन्वसम्भवात् २ धेनू।	४ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	कृष्णसर्पवधे तीक्ष्णाग्रलौहकीलिकादानमादौ कर्त्तव्यम्। सर्पजातीयषण्ढवधे पलालभारः सीसकमाषश्च दातव्यः। एतज्ज्ञानतः। एतदशक्तौ व्रतादिकं कर्त्तव्यम्।			
अथ सामान्यपक्षिवधः।	नक्तव्रतम्। द्विरक्तिपरिमितरौप्यदानं वा।	०	/१३।— पणौ। नक्तव्रतस्योपवासतृतीयभागत्वात्।	यथाशक्ति।
	कामतोऽत्यन्ताभ्यासे शूद्रहत्याव्रतम्। गुरुगोवधव्रतं वा। स्त्रीशूद्रबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः।	१२ धेनवः।	३६ कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
अथ विशेषपक्षिवधः।	अहोरात्रोपवासः सर्वबीजदानञ्च। एतदज्ञानविषयम्।	०	उपवासानुकल्पः ॥० पणाः। सर्व्वबीजमूल्यम् ।० पणाः।	यथाशक्ति।
बकबलाका-हंससारसकारण्डवचक्रवाककुररगृध्रश्येनखञ्जरीटटिट्टिभोलूक शुकशारिकातित्तिरिमयूरकाककलविङ्ककालञ्जकमद्गुकपोतपारावतादीनां वधः।	ज्ञानकृते त्र्यहोपवासः। शक्तस्य गोदानम्। तत्रायं विशेषः। शुकवधे द्विहायनगवदानम्। क्रौञ्चवधे त्रिहायणगवदानम्। क्रौञ्चशुकभासमयूरश्येनगृध्रवधे वत्सतरीदानम्। अत्र वृषदानवत्सतरीदानयोर्व्यवस्था शक्ताशक्तविषयिका। एतद्दानाशक्तानां व्रतादिकम्।	०	१॥० कार्षापणः।	यथाशक्ति।
कोकिलशुककपोतकपिञ्जलकुक्कुटटिट्टिभखञ्जूरखञ्जरीटानां पुरुषभारपरिमितानां वधः।	उत्कृष्टशूद्रहत्याव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
मत्स्यमण्डूकमकरशिशुमारादिजलचरवधः।	समगावब्रह्महत्याव्रतम्। एतदज्ञानतः सकृद्वधे।	०	१ कार्षापणः।	/११॥—पणौ।
	अहोरात्रोपवासः यथाशक्तिलवणदानञ्च। एतत् कामतः सकृत्। अभ्यासात्यन्ताभ्यासयोस्तु महापातकप्रायश्चित्ते दर्शयिष्यते।	०	॥० पणाः उपवासानुकल्पः। १॥०कार्षापणः। लवणमूल्यम् ।२।	।/३॥=पणाः।
अथ सास्थ्यनस्थिप्राणिवधः।				
सहस्रसंख्यकानां अस्थिमतां कृकलासादीनां ज्ञानकृतवधः।	आब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
अनस्थ्नां कृमिकीटपतङ्गभ्रमरदंशमशकमक्षिकादीनां शकटपूरितमितानां ज्ञानकृतवधः।	आब्दिक शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
अस्थिमतां प्रत्येक वधः।	पणदानम्।	०	०	यत्किञ्चित्।
अनस्थ्नां प्रत्येकं वधः।	प्राणायामः। पणदानं वा।	०	०	तथा।
अन्नशक्तादिगुडादिसर्वरसफलपुष्पजातप्राणिवधः।	दिनमेकं घृतमात्रभोजनम्। एतदज्ञाने ज्ञाने तद्द्वैगुण्यम्।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
फलवद्वृक्षलतागुल्मच्छेदनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अफलवतामेतेषां छेदनम्।	अष्टाहसाध्यकृच्छ्रम्।	०	२ कार्षापणौ।	यथाशक्ति।
अत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम्।	चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
अभ्यासादत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम्।	आब्दिकव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
चैत्यवृक्षश्मशानसीमपुण्यस्थानसुरालयजातवृक्षच्छेदनम्। विंशतिसंख्यकोपजीव्यवृक्षच्छेदनम्। ख्यातवृक्षच्छेदनञ्च।	पूर्वोक्तवृक्षच्छेदनप्रायश्चित्तद्विगुण्यादि। सर्वत्र स्त्रीशूद्रबालवृद्धानामर्द्धम्।			
वापीकूपारामसेतुसभातडागवप्रदेवतायतनभेदनम्।	ब्राह्मणेभ्यो निवेद्य चतस्र आहुतीर्जुहुयात्। इदं विष्णुरिति प्रथमां मानस्तोके इति द्वितीयां विष्णोः कर्माणीति तृतीयां पादोऽस्यान्यामिति चतुर्थीं या देवतामुत्सादयति तस्यै देवतायै। ब्राह्मणान् भोजयेत्। एतत् सकृदल्पोपघातविषयम्। अभ्यासे महोपघाते च प्राजापत्यम्। दण्डश्च। यथा। सकृदल्पोपघाते प्रथमसाहसः २५० पणाः। अभ्यासे महोपघाते उत्तमसाहसः। १००० पणाः।			
देवताया उत्कृष्टप्रतिमाभेदनच्छेदनदहनहरणानि।	चान्द्रायणम्। वाप्यादिभेदनोक्ताश्चतस्र आहुतयः। उत्तमसाहसो दण्डश्च। १००० पणाः।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवताया अपकृष्टप्रतिमाभेदनच्छेदनदहनहरणानि।	प्राजापत्यम्। पूर्वोक्तचतुराहुत्यादिदानम्। प्रथमसाहसो दण्डश्च। २५० पणाः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथाभिचारः। स तु परहिंसार्थं जपहोमादिकर्म।	अतिकृच्छ्रम्। एतत् सकृदाचरणे। अभ्यासे प्रायश्चित्तावृत्तिः। इति हिंसाप्रायश्चित्तम्॥*॥	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
व्रात्ययाजनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
मूल्येन श्रुतस्य दहनवहनादिकम्।	सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अथाभक्ष्यभक्षणम्। अभक्ष्यं षड्विधम्। जातिदुष्टम् १ क्रियादुष्टम् २ कालाश्रयविदूषितम् ३ संसर्गाश्रयदुष्टम् ४ सहृल्लेखम् ५ स्वभावतो दुष्टम् ६। जातिदुष्टं लशुनगृञ्जनपलाण्डुच्छत्राकश्वेतवार्त्ताकीलालिकावर्त्तुलाकारालावूरूपम् १ क्रियादुष्टं पतितसंस्पृष्टम् २ कालदुष्टं ह्यस्तनं चिरसंस्थितञ्च ३ संसर्गदुष्टं सुरालशुनपीयूषादियुक्तम् ४ सहृल्लेखं विचिकित्सितान्नम् ५ स्वभावदुष्टं पुरीषादि ६।	चान्द्रायणम्। एतद्गुरुतरविषयम्। विशेषानिर्देशे ज्ञेयम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
अपरस्य। संघातान्नम्। शूद्रोपनीतान्नम्। पतितोपनीतान्नम्। शूद्रवेश्मस्थान्नञ्च।				
शूद्रस्य पक्वान्नभक्षणम्।	ब्राह्मणस्य त्र्यहोपवासः। एतदज्ञानतः।	१ धेनुः। अर्द्धधेन्वसम्भवात्।	१॥कार्षापणः।	यथाशक्ति।
	ज्ञानतः प्राजापत्यम्। आपदि भक्षणे मनस्तापः द्रुपदां शतजपो वा। क्षत्रियादीना पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभ्यासात् शूद्रस्य पक्वान्नभक्षणम्	ब्राह्मणस्य मासयावकपानम्। क्षत्रियादीनां पादपादहानिः।	२धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्यामान्नभक्षणम्।	उक्तप्रायश्चित्ततुरीयभागः। आपदि भक्षणे प्रायश्चित्ताभावः।			
अथ रजकशैलूषवेणुचर्मोपजीविकैवर्त्ताद्यन्त्यजान्नभक्षणम्।	चान्द्रायणम्। एतत् ज्ञानाभ्यासविषयम्। अज्ञाने त्वर्द्धम्।	८ धेनवः सार्द्धसप्तधेन्वसम्भवात्	२२॥० कार्षापणाः।	यथाशक्ति।
	ज्ञानतोऽष्टधाभ्यासे कृच्छ्राब्दव्रतम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥≠१६॥ कार्षापणाः।
	अज्ञानतोऽष्टधाभ्यासे एतदर्द्धम्। एतत्तु ब्राह्मणविषयम्। क्षत्रियादीनां पादपादहानिः।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।/८॥ कार्षापणाः।
सकृदज्ञानकृतान्त्यजोत्सृष्टाशनम्।	ब्राह्मणस्य चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	क्षत्रियस्य तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य तप्तकृच्छ्रार्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य तप्तकृच्छ्रपादः। ज्ञानत एतद्द्विगुणम्।	१धेनुः।	३ कार्षापणाः।	यथाशक्ति।
कापालिकान्नभक्षणम्।	ज्ञानात् कृच्छ्राब्दम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥≠१६॥ कार्षापणाः।
	अज्ञानात् चान्द्रायणद्वयम्। एतदष्टधाभ्यस्तविषयम्। एतत् सर्व्वं ब्राह्मणस्य। क्षत्रियादौ पादपादहानिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
चाण्डालश्वपचक्षत्तृसूतवैदेहकमागधायोगवानामन्त्यावसायिनामन्नभक्षणम्।	ब्राह्मणस्य कामतः सकृद्भोजने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	बलाद्भोजने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अज्ञानतोऽष्टचत्वारिंशद्वारभोजने द्वादशवार्षिकव्रतम्। ज्ञानतश्चतुर्विंशतिवारभोजने एतदेव।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	ज्ञानतोऽष्टचत्वारिंशद्वारभोजने चतुर्व्विंशतिवार्षिकव्रतं अव्यवहार्य्यता च।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	सकृदज्ञानत आमान्नभोजने त्रिरात्रोपवासः। सर्व्वत्र क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
	आपदि पक्वान्नभोजने क्षत्रियस्यसान्तपनम्	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य षड्रात्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य त्रिरात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
चाण्डालपतितादीनामुत्सृष्टान्नभक्षणम्।	द्विजस्य पराकः।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
	शूद्रस्य कृच्छ्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयं ज्ञानतो द्विगुणादिकम्।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अथ सामान्याभोज्यान्नभोजनम्।	त्र्यहोपवासः। एतत् सकृदज्ञानविषयम्।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभोज्यान्नानि यथा। अनधीतवेदाध्ययनान्नम्। ग्रामयाजिहोत्रकयज्ञान्नम्। स्त्रीक्लीवहुतयज्ञान्नम्। मत्तक्रुद्धातुराणामन्नम्। केशेन कीटेन वा सह पक्वमन्नम्। कामतः पादस्पृष्टमन्नम्। भ्रूणघ्नादिपतितावेक्षितान्नम्। रजस्वलास्पृष्टान्नम्। पतत्त्रिणावलीढमन्नम्। शुना स्पृष्टमन्नम्। गवाघ्रातमन्नम्। घुष्टान्नम्। घोषयया दत्तमन्नमित्यर्थः। गणान्नम्। मठब्राह्मणसंघान्नमित्यर्थः। गणिकान्नम्। विद्वज्जुगुप्सितान्नम्। स्तेनान्नम्। गायनान्नम्। तक्ष्णान्नम्। वार्द्धुषिकान्नम्। दीक्षितान्नम्। दीक्षणीययागानन्तरं यज्ञसमाप्तिपर्य्यन्तं तद्यागकर्त्तुरन्नमित्यर्थः। कदर्य्यस्यान्नम्। रज्ज्वादिना बद्धस्यान्नम्। अयोनिगड़युक्तस्यान्नम् अभिशस्तस्यान्नम्। क्लीवान्नम्। पुंश्चल्यन्नम्। दाम्भिकान्नम्। छद्मना धर्म्मचारिणोऽन्नमित्यर्थः। शुक्तान्नम्। पर्य्युषितान्नम्। शूद्रोच्छिष्टान्नम्। चिकित्सकान्नम्। व्याधान्नम्। क्रूरान्नम्। उच्छिष्टभोजिनामन्नम्। उग्रस्यान्नम्। दारुणकर्म्मणो जातिविशेषस्य वा अन्नमित्यर्थः। सूतिकोद्देशेन पक्वमन्नम्। पर्य्याचान्तम्। आचमनव्यवहितान्नमित्यर्थः एकपंक्तिस्थानन्यानवमन्य यत्रान्ने भुज्यमाने केनचिदाचमनं क्रियते तत् पर्य्याचान्तमिति कुल्लूकभट्टः। अनर्च्चितान्नम् अनर्हस्यावज्ञया द भन्नमित्यर्थः। वृथामासम्। अवीरान्नम्। द्विषदन्नम्। नगराधिपान्नम्	एतेषामभोज्यानामन्यतमानां भक्षणे पूर्वोक्तत्र्यहोपवासः। एष सकृदज्ञानविषयः।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
पतितान्नम्। अवक्षुतान्नम्। चवथुसहितान्नमित्यर्थः। पिशुनान्नम्। अनृतिनामन्नम्। कूटसाक्ष्याद्यन्नमित्यर्थः। यज्ञफलविक्रायकान्नम्। शैलूषान्नम् । तुन्नवायान्नम। कृतघ्नान्नम्। कर्म्मारान्नम्। निषादान्नम्। रङ्गावतारकान्नम्। स्वर्णकारान्नम्। वेणुजीविनामन्नम्। लौहविक्रायकान्नम्। श्ववतामन्नम्। आखेटकाद्यर्थं शुनः पोषकाणामन्नमित्यर्थः। शौण्डिकवृत्तिद्विजान्नम्। चेलनिर्णेजकस्यान्नम्। वस्त्रधावकस्यान्नमित्यर्थः। रजकान्नम्। कुसुम्भादिना वस्त्ररागकारकस्यान्नमित्यर्थः। नृशंसान्नम्। गृहस्थितोपपतिकान्नम्। उपपतिमर्षकान्नम्। गृहे ज्ञातं भार्य्याजारं ये सहन्ते तेषामन्नमित्यर्थः। स्त्रीजितान्नम्। अनिर्द्दशं प्रेतान्नम्। अनिर्गताशौचस्य सूतिकान्नमित्यर्थः। अतुष्टिकरान्नञ्च ॥७०॥	एतेषामभोज्यानामन्यतमानां भक्षणे पूर्वाक्रस्त्र्यहोपवासः। एष सकृदज्ञानविषयः। ज्ञाने प्राजापत्यम्। क्षत्रियादीना पादपादह्रानिः।	•	१॥० कार्षापणः।	यथाशक्ति।
		१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
चाण्डालादिपतितस्पृष्टान्नभक्षणम्। अत्र पतितपदं सर्वधर्म्मबहिष्कृतवाचि यवनादिम्लेच्छपरं उच्छिष्टान्नभोजनप्रकरणे तथा लिखनात् अतएव चण्डालस्पृष्टान्नभक्षणप्रतिज्ञाया पतितपद पृथक् न लिखितम्।	प्राजापत्यम्। एतत्सकृदज्ञाने ब्राह्मणविषयम्। ज्ञाने द्वैगुण्यम्। अभ्यासे तु प्रायश्चित्तावृत्तिः। क्षत्रियादीना पादपादह्रानिः। एतत्कुण्ड्यादिष्वभ्यासे ज्ञेयम्। रजकादिस्पृष्टान्नभक्षणे तु एतदर्द्धम्।	१ धेनु।	३ कार्षापणाः।	यथाशक्ति।
पतितस्पर्शे अकृतस्नातस्य भोजनम्।	याज्ञवल्क्योक्तचतुरहःसाध्य तप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः।			
	अत्यन्ताभ्यासे चान्द्रायणम्। क्षत्रियादीना पादपादह्रानिः। चाण्डालादिस्पर्शे एतद्बोधितव्यम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
शूद्रादिस्पृष्टान्नस्य केशकीटोपहतान्नस्य च भक्षणम्।	एकोपवासः।	•	॥० पणाः।	यथाशक्ति।
श्वपाकान्नभक्षणम्। तच्च देवतापित्रतिथिभक्षणवर्जितान्नम्।	प्राणायामत्रयम् घृतमात्रभोजनञ्च। एतदज्ञानतः। ज्ञानतो द्वैगुण्यम्।	•	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
वृथामांसभक्षणम्। तत्तु पितृदेवार्च्चनरहितं मांसम्।	प्राजापत्यव्रतम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः। अभ्यासे प्राजापत्यावृत्तिः। एतत् रोगिदैवपितृकर्म्मनिमन्त्रितेतरविषयम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
सामान्याभक्ष्यमांसभक्षणम्।	सप्तरात्रयवागूपानम्। एतत् सकृदज्ञाने। ज्ञानतो द्विगुणम्। क्षत्रियादीनां पादपादहानिः। एतदभ्यासे प्रायश्चित्तावृत्तिः।	०	१॥० कार्षापणः।	यथाशक्ति।
अश्वगोकुञ्जरोष्ट्रशशकादिपञ्चनखातिरिक्तपञ्चनखक्रव्यादग्राम्यकुक्कुटानां मांसभक्षणम्। विड्वराहनरमांसभक्षणञ्च।	ब्राह्मणानां सकृदज्ञानतः प्राजापत्यम्। पुनरुपनयनञ्च। ज्ञाने तु द्विगुणम्। अभ्यासे उपनयनसहितप्रायश्चित्तावृत्तिः। उपनयनाशक्तौ चान्द्रायण तदशक्तौ धेन्वष्टकम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	अनडुत्सहितगौः। अशक्तौ ६ कार्षापणाः।
हंससद्गुकाकोलकाकखञ्जरीटमत्स्यादवलाकाशुकसारिकाचक्रवाकप्लवकोकिलविष्किरज्जुवालसारसदात्यूहभासकोकिलमण्डूकभुजगानामन्यतमस्य मांसभक्षणम्।	विप्रस्याज्ञानतः सकृद्भोजने त्रिरात्रोपवासः। ज्ञानतो द्विगुणम्। ज्ञानाभ्यासे प्रायश्चित्तावृत्तिः। क्षत्रियादीनां पादपादहानिः।	०	१॥०कार्षापणः।	यथाशक्ति।
मत्स्यभक्षणम्।	विप्रस्य कामतस्त्र्यहोपवासः। अकामत एतदर्द्धम्। क्षत्रियादीनां पादपादहानिः।	०	१॥०कार्षापणः।	यथाशक्ति।
शुष्कमांस-गर्भशय्याभूम्यन्तर्गतपक्वमांसजीर्णपक्वमांससूनामांसशुष्कमांसानामन्यतमस्य भक्षणम्। सूना घातनस्थलो तद्भव मांसम्।	कामतः सकृद्भक्षणे त्र्यहोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अकामत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः। एतत् ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	॥० पणाः।	यथाशक्ति।
षष्ठ्यां पञ्चपर्व्वसु च स्त्रीतैलमांससम्भोगः क्षुरकर्म च।	एकाहोपवासः। अभ्यासे प्रायश्चित्तावृत्तिः। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	॥० पणाः।	यथाशक्ति।
वृथापायसपूपशष्कुलीकृशरसंयावशिग्रुलोहितवृक्षनिर्यासमिध्यप्रभवानां भक्षणम्।	कामतस्त्र्यहोपवासः। अज्ञानतस्तदर्द्धम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१॥०कार्षापणः।	यथाशक्ति।
एकाकिमिष्टान्नभक्षणम्।	एकाहोपवासः। अभ्यासे द्विगुणम्।	०	॥० पणाः।	यथाशक्ति।
अन्ने ह्यातपर्य्युषितात्दधिवर्ज्जशुक्तक्षारलवणभक्षणम्।	अज्ञानत एकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
	ज्ञानतस्त्र्यहोपवासः। अभ्यासे द्विगुणम्।	०	१॥०कार्षापणः।	यथाशक्ति।
वाग्दुष्टभावदुष्टभावदुष्टभाजनपक्वद्रव्यभक्षणम्।	अभ्यासे त्रिरात्रयावकपानम्।	०	॥॥० पणाः।	यथाशक्ति।
शूद्रभाजने भिन्नकांस्ये च भोजनम्।	अहोरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
कुम्भीभक्षणम्।	द्वादशरात्रं पयःपानम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
लशुनपलाण्डुगृञ्जनभक्षणम् । कुपरसादिभिर्लशुनादितुल्यद्रव्यभक्षणञ्च ।	ज्ञानतश्चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	अज्ञानात्तप्तकृच्छ्रम् ।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः ।	११।० कार्षापणाः ।	यथाशक्ति ।
	चिरतराभ्यासे संवत्सरयावकपानम् । एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रकृतव्रतस्य पादः ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
सजातीयमृतसूतकिनां पक्वान्नभक्षणम् ।	ज्ञानतः प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अज्ञानात् त्र्यहोपवासः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	अभ्यासे द्वैगुण्यादिकम् ।			
मृतसूतकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम् ।	विप्रस्यामान्ने प्राणायामः । क्षत्रियस्यामान्ने शतगायत्रीजपः । वैश्यस्यामान्ने पञ्चशतगायत्रीजपः । शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः । अभ्यासे द्वैगुण्यम् ।			
सूतकिसूतकिजलपानम् ।	ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः । एतत् सकृदज्ञाने ज्ञाने तु द्वैगुण्यम् । अभ्यासे त्वावृत्तिः । तज्जलस्पर्शे स्नानमात्रम् । क्षत्रियादीनां पादपादहानिः ।	०	॥० पणाः ।	यथाशक्ति ।
नवश्राद्धान्नभोजनम् । नवश्राद्धन्तु माम्नीनां चतुर्थपञ्चमनवमैकादशाहक्रियमाणं निरग्नीनान्तु आद्यश्राद्धमात्रम् ।	चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
प्रथममासिकश्राद्धान्नभोजनम् ।	पराकः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
त्रिपक्षे प्रेतश्राद्धान्नभोजनम् ।	अतिकृच्छ्रम् ।	३ धेनवः ।	८ कार्षापणाः ।	यथाशक्ति ।
द्विमासादिषण्मासपर्य्यन्तं प्रेतश्राद्धान्नभोजनम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
षण्मासादूर्द्ध्वमब्दपर्य्यन्तं प्रेतश्राद्धान्नभोजनम् ।	पादकृच्छ्रम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
पुनराब्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम् । एतत् स्मार्त्तमत शूलपाणिमते तु द्वितीयसांवत्सरिकान्नभोजनम् ।	एकाहोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
पत्राद्यनन्तरितहस्तदत्तानां पक्वहस्तदत्ताना शूद्रादत्तानाज्यघृततैललवणव्यञ्जनपानीयपायसमाक्षिकफाणितगोरसशाकाना भक्षणम् ।	द्वादशाध्यसान्तपनम् । एतत् ज्ञानतः । अज्ञानादर्द्धम् । लौहपात्रेण परिवेशनेऽप्येतदेव प्रायश्चित्तं ज्ञेयम् । एतद् ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः ।	०	१ कार्षापणः ।	यथाशक्ति ।
अकृतापोशानस्य अकृतमौनस्य च भोजनम् ।	अष्टोत्तरशतगायत्रीजपः । एतद्द्विजानामनापद्विषयम् ।	०	०	०
अकृताचमनस्य पानभोजनम् ।	अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा । अभ्यासे द्विगुणादि । एतत् कटुकषायताम्बूलेक्षुव्यतिरिक्तभोजनविषयम् ।	०	॥० पणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
यज्ञोपवीतरहितकर्तृकान्नभोजनम्।	स्नानं शतगायत्रीजपः उपवासश्च।	०	॥० पणाः।	यथाशक्ति।
रेतोमूत्रपुरीषाणामन्यतमस्य भक्षणम्।	ज्ञानतश्चान्द्रायणम्।	८धेनवः। सार्द्धसप्तधेन्वसम्भवात्	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	बलात्कारे प्राजापत्यम्। सर्व्वत्र द्विजातीनां पुनः संस्कारश्च।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
विण्मूत्रादिदूषितफलादिभक्षणम्।	संसर्गमात्रे कृच्छ्रपादः।	०	।॥० पणाः।	यथाशक्ति।
	सन्निकृष्टे अर्थात् महत्संसर्गे कृच्छ्रार्द्धम्। एतत् रसास्वादनानुपलम्भनपक्षे अज्ञानतः सकृद्विषयम्। ज्ञानतो द्विगुणम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	रसाद्युपलम्भे तु गौतमोक्ततप्तकृच्छ्रं द्वादशाहसाध्यम्। अज्ञानत उपलम्भे अर्द्धम्। क्षत्रियादीना पादपादहानिः।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
कृशोष्टभोजनम्।	अहोरात्रोपवास।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे याज्ञवल्क्योक्तचतुरहसाध्यतप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनु।	३॥० कार्षापणाः	यथाशक्ति।
ब्रह्मचारिणा मधुमांसभोजनम्।	ज्ञानतः प्राजापत्यम्। अज्ञानात् अर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणामामिषभाण्डपक्वान्नभोजनम्।	त्र्यहं कुशमूलविपक्वक्षीरपानमात्रम्। एतदज्ञानत।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्विगुणम्।	०	२ कार्षापणौ।	यथाशक्ति।
देवतातिथिभृत्यादिवर्जनभोजनम्।	अभ्यासे प्राजापत्यम्।	१ धेनु.।	३ कार्षापणा.।	यथाशक्ति।
अस्थ्यादिदूषितान्नभोजनम्। अस्थिशब्दोऽत्राभक्ष्यास्थिमात्रवचनम्।	स्नात्वार्कमर्च्चयित्वा घृतमात्राशनम्।	०	॥० पणाः।	यथाशक्ति।
मत्स्यकण्टकशम्बूकशङ्खशुक्तिकपर्द्दकभक्षणम्।	पञ्चगव्यमात्रभक्षणम्।	०	॥० पणाः।	यथाशक्ति।
पुंसवनसीमन्तोन्नयनकर्म्मणि भोजनम्।	ज्ञानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	अज्ञानाभ्यासे तदर्द्धम्।	८ धेनव।	११।०कार्षापणा	यथाशक्ति।
	सकृदज्ञाने विप्रा कृच्छ्रपादः।	०	।॥० पणाः।	यथाशक्ति।
	सकृज्ज्ञाने द्विगुणं कृच्छ्रार्द्धम्।	०	१॥०कार्षापणः।	यथाशक्ति।
जातकर्म्मादिसंस्कारान्नभोजनम्।	अज्ञानतोऽसपिण्डाना द्व्यहसाध्य सान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्विगुणम्।	०	२ कार्षापणौ।	यथाशक्ति।
भोजनकाले गुदस्रावः।	अहोरात्रमुषित्वा पञ्चगव्यपानम्। एतत् सकृन्निर्गीर्णग्रासे।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्तग्रासाशने त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
भोजनकाले मृतसूतकाद्यशौचे तदन्नभक्षणम्।	ग्रासभोजने एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सकलान्नभोजन त्रिरात्रोपवासः। अभोजने स्नानमात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
तैलाभ्यङ्गादिस्नानार्हस्याकृतस्नानस्य भोजनम्।	स्नात्वा अष्टोत्तरसहस्रगायत्रीजप.। अभ्यासे प्रायश्चित्तावृत्तिः।	०	०	०

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
परिहितनीलीवस्त्रस्य भोजनम्।	अज्ञानतस्त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानात् द्विगुणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
स्वकीयोच्छिष्टभोजनम्।	कृच्छ्रपादः। एतत् सकृदज्ञानतः। अभ्यासे द्विगुणादिकम्। त्यक्तभाजने भोजनेऽप्येवम्।	०	॥० पणाः।	यथाशक्ति।
ब्राह्मणकर्तृकब्राह्मणोच्छिष्टभोजनम्।	महाव्याहृतिभिरामन्त्र्य जलं पीत्वा उपवसेत्। एतत् सकृदज्ञानतः।	०	॥० पणाः।	यथाशक्ति।
	ज्ञानात् द्विगुणम्।	०	१ कार्षापणः।	यथाशक्ति।
ब्राह्मणकर्तृकक्षत्रियोच्छिष्टभोजनम्।	सकृदज्ञाने त्र्यहं ब्राह्मीरसविपक्वक्षीरपानमात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञाने द्विगुणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकवैश्योच्छिष्टभोजनम्।	सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चलापानञ्च।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञानात् द्विगुणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकशूद्रोच्छिष्टभक्षणम्।	सकृदज्ञाने षड्रात्रोपवासः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्विगुणम्।			
	ज्ञानाभ्यासे चान्द्रायणम्। क्षत्रियादीनां पादपादहानिः। एतच्चात्र पितृज्येष्ठभ्रातॄणामुच्छिष्टव्यतिरिक्तविषयं तेषामुच्छिष्टस्य भोज्यत्वात	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
बिडालकाकमूषिकनकुलश्वगवां उच्छिष्टभोजनम्।	त्र्यहोपवासः। एतत् सकृज्ज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः। ब्रह्मसुवर्चला तु पीतकुसुमसूर्य्यावर्त्तः।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य कुत्सितपङ्क्तौ भोजनम्। पङ्क्तेः कुत्सितत्वन्तु निन्दितब्राह्मणाद्युपवेशनेन जलादिना पङ्क्तिभेदमन्तरेण च भवति।	अहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च। एतत् ज्ञानतः।	०	॥० पणाः।	यथाशक्ति।
	क्षत्रियपङ्क्तौ भोजने नक्तव्रतम्।	०	।० पणाः।	यथाशक्ति।
	वैश्यपङ्क्तौ एकरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	शूद्रपङ्क्तौ त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
पङ्क्तिषु एकस्योत्थाने भोजनम्।	द्व्यहसाध्यसान्तपनम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादह्रानिः। एतज्ज्ञानतः सकृत्। अज्ञानतोऽर्द्धम्।	०	१ कार्षापणः।	यथाशक्ति।
सुराभाजनस्थजलपानम्।	पञ्च यावकपानम्। एतज्ज्ञानतः। अज्ञानतोऽर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
मद्यभाण्डस्थजलपानम्।	सप्तरात्रं यावकपानम्। एतज्ज्ञानतः। अज्ञानतोऽर्द्धम्।	०	१॥०कार्षापणः।	यथाशक्ति।
	सुरासंसृष्टेतरेतोमूत्रादिदूषितजलादिपाने तु चतुरहसाध्यं तप्तकृच्छ्रम्। एतदपि स्वादनुपलब्धावभ्यासे।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।
चण्डालकूपभाण्डोदकपानम्।	ब्राह्मणस्य सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	क्षत्रियस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य प्राजापत्यार्द्धम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	शूद्रस्य प्राजापत्यपादः। एतत् सर्व्वं ज्ञानतः। अज्ञानादेतस्यार्द्धम्।	०	॥० पणाः।	यथाशक्ति।
	आपत्काले तु पूर्ब्बं शुद्धोपोष्य पञ्चगव्यपानम्	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
चण्डालस्पृष्टक्षीरजलादिपानम् ।	त्रिरात्रमुपोष्य पञ्चगव्यपानम् । एतत् ज्ञानतः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	अज्ञानात् द्व्यहसाध्यसान्तपनम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
अन्त्यजखानितकूपादिजलपानम् ।	उपवासपूर्व्वकपञ्चगव्यपानम् । एतदज्ञानतः	०	॥० पणाः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
अन्त्यजभाण्डस्थजलादिपानम्	ब्राह्मणस्य द्व्यहसाध्यं ब्रह्मकूर्च्चं व्रतम् । एतत् अज्ञानतः । ज्ञानतो द्वैगुण्यम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
	शूद्रस्य नोपवासः पञ्चगव्यपानमात्रम् । ब्रह्मकूर्च्चं यथा । "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः । पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः ॥" पञ्चगव्यं यथा । "गोशकृत् द्विगुणं मूत्रं सर्पिर्विद्याच्चतुर्गुणम् । क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि ॥" अथवा । "गोमूत्रमाषकास्त्वष्टौ गोमयस्य तु षोडश । क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्त्तिताः ॥ गोमूत्रवद्घृतस्योक्तास्तदर्द्धेन कुशोदकम् ॥"	०	॥० पणाः ।	यथाशक्ति ।
शूद्रोदकपानम् ।	उपोष्य बिल्वपद्मपलाशकुशानामुदकमात्रपानम् । एतद्द्व्यहसाध्यं ज्ञानतः सकृत्पाने । अज्ञानादर्द्धम् । नवभाण्डोदकपाने प्रायश्चित्ताभावः ।	०	१ कार्षापणः ।	यथाशक्ति ।
पीतशेषपानीयपानम् । केवलवामहस्तेन जलपानञ्च ।	त्रिरात्रोपवासः । एतच्च ज्ञानतः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	अज्ञानतोऽर्द्धम् ।	०	॥० पणाः ।	यथाशक्ति ।
	एतत् प्रायश्चित्तं ग्रासशेषाशनादिष्वपि ज्ञेयम् ।			
	शूद्रपीतशेषजलपाने तु ब्राह्मणस्य चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
प्रपादिजलपानम् । आदिना कूपजलाहरणार्थघटस्थजलं द्रोणीजलं खड्गादिकोषस्थजलञ्च ।	सचेलस्नानम् । उपवासश्च । एतत् सकृज्ज्ञानतः । आपदि दोषाभावः ।	०	॥० पणाः ।	यथाशक्ति ।
विण्मूत्रसंस्पृष्टकूपजलपानम् ।	त्रिरात्रोपवासः । एतदज्ञानतः ।	०	१॥० कार्षापणाः ।	यथाशक्ति ।
	ज्ञानतः सान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	तथा ।
विण्मूत्रसंस्पृष्टकुम्भस्थजलपानम् ।	अज्ञानतः सान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	ज्ञानतो द्वैगुण्यम् ।			
शवदूषितजलपानम् । एतत् मानुषेतराभक्ष्यपञ्चनखशवदूषितकूपजलपानपरम् ।	ब्राह्मणस्य त्रिरात्रोपवासः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	क्षत्रियस्य द्व्यहोपवासः ।	०	१ कार्षापणः ।	यथाशक्ति ।
	वैश्यस्यैकाहोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
	शूद्रस्य नक्तम् ।	०	।० पणाः ।	यथाशक्ति ।
	सर्व्वेषां व्रतान्ते पञ्चगव्यपानम् । एतत् ज्ञानतः । अज्ञानतोऽर्द्धम् । एतदक्लिन्नशवे ।			
	ज्ञानतः क्लिन्ने षड्रात्रोपवासः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	एतत् सर्व्वं मानुषशवेतरपरम् । मानुषशवे द्विगुणम् ।			
	कामाभ्यासे पराकः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	अत्यन्ताभ्यासे चान्द्रायणम् ।	८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
अपेयक्षीरपानम्। तत्क्षीरविकारपानञ्च। अपेयक्षीरं यथा। अनिर्दशाहानां गोमहिष्यजागीनां क्षीरम्। औष्ट्रं ऐकशफं आविकञ्च। सन्धिनीक्षीरम्। सन्धिनी वृषाक्रान्ता। विवत्साक्षीरम्। आरण्यमृगीक्षीरम्। स्त्रीक्षीरम्। स्रवद्दुग्धाक्षीरम्। यमसूक्षीरम्। विवत्साया अन्यवत्सायाश्च क्षीरम्। मथितक्षीरम्। छागवर्ज्जं द्विस्तनीक्षीरम्। अमेध्यभुजः क्षीरम्। व्रणादिदूषितस्तनीक्षीरञ्च।	ज्ञानतोऽभ्यासे पञ्च यावकपानम्। अज्ञानतोऽर्द्धम्। क्षत्रियादौ पादपादहानिः। अत्र उष्ट्रीक्षीरमानुषीक्षीरपाने पुनरुपनयनञ्च। इति अभक्ष्यभक्षणप्रायश्चित्तम् ॥*॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ स्तेयम्। मणिमुक्ताप्रवालाश्ममयलौहकांस्योपलानां हरणम्।	द्वादशाहं कणभक्षणम्। तत् षड़ुपवासात्मकम्। अपहृतद्रव्यं स्वामिने दत्त्वैतत् करणीयम्। अत्र च सकृदभ्यासकालदेशद्रव्यस्वाम्यपहर्त्तृगुणदैन्याद्यपेक्षया उत्कृष्टापकृष्टद्रव्ययोर्वैषम्यदोषः समथनीयः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
रजताश्वगोभूमिकन्यानां सकृत् हरणम्। एतत् ब्राह्मणासम्बन्धिविषयम्। अत्र कन्यापदं अधमकन्यापरम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
उक्तेतरक्षुद्रपशुहरणम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
धान्यान्नधनानां हरणम्। अन्नं कृतान्नम्। धन गवादि।	अब्दकृच्छ्रम्। एतत् ब्राह्मणकर्त्तृकब्राह्मस्वामिकदशकुम्भाधिकधान्यस्तेये ज्ञेयम्। कुम्भपरिमाणं यथा। दशद्रोणं भवेत् खारी कुम्भोऽपि द्रोणविंशतिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
	द्विकालभोजनोचितभक्ष्यभोज्यान्नहरणे त्रिरात्रं पञ्चगव्यपानमात्रम्। भक्ष्यं मोदकादि। भोज्यशक्त्वादि।	०	१॥० कार्षापणः।	यथाशक्ति।
	एककालभोजनोचितान्नहरणे एकरात्रं पञ्चगव्यमात्रपानम्। धनमपि एतत्परिमाणधान्यमूल्यमवसेयम।	०	॥० पणाः।	यथाशक्ति।
मनुष्यादिस्तेयम्। तत्तु दासदासीक्षेत्रगृहकूपवापीजलानां हरणम्।	चान्द्रायणम्। क्षेत्रादीनान्तु उपयोगातिशयाद्यभ्यासाद्यपेक्षयास्त्वेव प्रायश्चित्तं गुरुलाघवमिति।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
गुडादिस्तेयम्। आदिना कार्पाससर्पिर्लवणधान्यपक्वान्नौषधतैलशय्यावस्त्रोपानत्कांस्यलौहताम्रसीसकादयः।	कृच्छ्रपादः। एतत् सकृद्धरणविषयम्। अभ्यासे द्विगुणम्। अत्र किञ्चिदधिकद्रोणत्रयस्य धान्यस्य तावद्धान्यमूल्यानाञ्चान्येषाञ्च हरणे एतद्वेदितव्यम्।	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
तृणादिस्तेयम्। आदिना काष्ठद्रुमचेलचर्म्मामिषेक्षुतक्रमूलपुष्पवैदलसूत्रगन्धानां ग्रहणम्। वैदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्यादिः। अत्रापवादः। अस्तेयमन्यी काष्ठमस्तो यस्य तृणं गवे।	त्रिरात्रोपवासः तृणादीनां हरणे मासैकव्रतम्। मासार्द्धव्रतञ्च। प्रकृमुनिना यदुक्तं तत् कालदेशापहर्त्तृस्वामीगुणदौर्गत्याभ्यासानभ्यासकामाकामापेक्षया उत्कृष्टापकृष्टद्रव्यापहारे च वेदितव्यम्।		१॥०कार्षापणः।	यथाशक्ति।
जीविकाहरणम्।	यस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्।			
	अल्पद्रव्यापहारे चान्द्रायणम्। अत्र चोत्तमाधमत्वे प्रयोजकादिकं सकृदभ्यासौ ज्ञानाज्ञाने च संवीक्ष्य यथोक्तपादार्द्धादिव्यवस्थोहनीया।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवद्विजद्रव्यापहरणम्।	संवत्सरमप्सु मज्जनं अघमर्षणावर्त्तनञ्च। यद्यत्र गुरुप्रायश्चित्तं मुन्यन्तरोक्तं तदत्यन्ताभ्यास उत्तमसम्बन्धादपेक्षया समूह्यम्। इति स्तेयप्रायश्चित्तम्॥*॥			
अथ अगम्यागमनम्। तत्र सवर्णासु अस्वजनस्त्रीगमनम्। तत्र ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्।	सकृद्गमने त्रैवार्षिकव्रतम्। द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	अश्रोत्रियनिर्गुणभार्य्यागमने द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३ कार्षापणाः।
क्षत्रियस्य क्षत्रियभार्य्यागमनम्।	द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे द्वैगुण्यादिकम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३ कार्षापणाः।
वैश्यस्य वैश्यभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।/७ कार्षापणाः।
शूद्रस्य पञ्चयज्ञानुष्ठायिन्यायवृत्तशूद्रभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।/७ कार्षापणाः।
शूद्रस्यान्यशूद्रागमनम्।	षाण्मासिक व्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१३॥ कार्षापणाः।
ब्राह्मणस्य क्षत्रियागमनम्।	सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च।	षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१३॥ कार्षापणाः।
ब्राह्मणस्याधमशूद्रागमनम।	सार्द्धमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२ धेनू।	५॥/० कार्षापणाः।	१ गौः। अशक्तौ १ कार्षापणः।
क्षत्रियस्य वैश्यभार्य्यागमनं सच्छूद्रागमनञ्च।	नवमासिकव्रतम् एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	१२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियस्याधमशूद्रागमनम्।	त्रैमासिकव्रतम। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	४ धेनवः।	११।० कार्षापणाः।	२ गावौ। अशक्तौ २ कार्षापणौ।
वैश्यस्य सच्छूद्रागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानत। अज्ञानादर्द्धम्।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।/७ कार्षापणाः।
वैश्यस्याधमशूद्रागमनम्।	सार्द्धचातुर्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	६ धेनवः।	१६॥/० कार्षापणाः।	३ गावः। अशक्तौ ३/१ कार्षापणाः।
अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याज्ञानतो ब्राह्मणीगमनम।	द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्व्वङ्गनागमनोक्तप्रकारेणमरणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्। एतद्ब्राह्मण्यापि करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
वैश्यस्याज्ञानतो ब्राह्मणीगमनम्।	नववार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। ब्राह्मण्यापि एतत् कार्य्यम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
क्षत्रियस्याज्ञानतो ब्राह्मणीगमनम्।	षाड्वार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। ब्राह्मण्यापि एतत् कार्य्यम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
यद्यपि शूद्रस्य ब्राह्मणीगमनं महापातकत्वेन तथा क्षत्रियवैश्ययोर्ब्राह्मणीगमनमनुपातकत्वेन चोक्तं तथाप्यनुलोमगमनं तावदुपपातकमेव तत्प्रसङ्गादसवर्णत्वेन प्रतिलोमस्त्रीगमनप्रायश्चित्तमप्युक्तमतो न वैषम्यमिति।				
शूद्रस्याज्ञानतः क्षत्रियागमनम्।	नववार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। क्षत्रियाया अप्येतत्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
वैश्यस्याज्ञानतः क्षत्रियागमनं शूद्रस्याज्ञानतो वैश्यागमनञ्च।	नवमासाधिकषाड्वार्षिकव्रतम्। ज्ञानाद्द्विगुणम्। क्षत्रियाया वैश्यायाश्चाप्येतत्।	१०२ धेनवः। •	३०३॥० कार्षापणाः।	५७ गावः। अशक्तौ ५६।० कार्षापणाः।
अथ समोत्तमवर्णद्वित्रिपुरुषव्यभिचरितसवर्णासवर्णस्त्रीगमनम्।				
तत्र ब्राह्मणस्य समोत्तमवर्णद्वित्रिपुरुषव्यभिचरितशूद्रागमनम्।	सकृद्गमने मासार्द्धं गोमूत्रसिद्धयावकपानम्	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मास गोमूत्रसिद्धयावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य समोत्तमवर्णद्वित्रिपुरुषव्यभिचरितक्षत्रियागमनम्। तथाविधवैश्यागमनञ्च।	सकृद्गमने सान्तपनम्। अभ्यासे प्रायश्चित्तावृत्तिः।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अथ चातुर्वर्ण्यस्वैरिणीगमनम्। स्वैरिणी चतु पुरुषगामिनी। सा द्विविधा। केनचिदनवरुद्धा अवरुद्धा च।	ब्राह्मणस्य स्वैरिण्या ब्राह्मण्या गमने त्रिरात्रोपवासः ब्राह्मणाय मृगाजिनदानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधक्षत्रियाया गमने त्रिरात्रोपवास धनुर्दानञ्च।	०	१॥० कार्षापण।	यथाशक्ति।
•	तथाविधवैश्याया गमने त्रिरात्रोपवास अश्मशिलादानञ्च।	०	१॥० कार्षापण।	यथाशक्ति।
	तथाविधशूद्राया गमने त्रिरात्रोपवास उदकुम्भदानन्तथा समार्जनीदानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
ब्राह्मणस्य शूद्रान्त्यजादिगामिस्वैरिणीगमनम्।	द्वादशवार्षिकव्रतम्। क्षत्रियादौ पादपादहानिः। विमातृस्वैरिणीचाण्डालस्वैरिणीगमनेऽप्येवम्। सर्व्वत्राभ्यासे द्विगुणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणबन्धकीगमनम्। बन्धकी चात्र स्वभर्त्तृव्यतिरिक्तपञ्चपुरुषगामिनी।	कमण्डलुदानम्।	०	०	यथाशक्ति।
क्षत्रियबन्धकीगमनम्।	आयुधदानम्।	०	०	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
ब्राह्मणस्य वेदानध्ययन यज्ञाकरण पुत्रानुत्पादनस्य।	त्रैमासिकं गोव्रतम्।	१२ धेनवः।	३६ कार्षापणाः।	१ वृष। १० गावः। अशक्तौ १५ कार्षापणाः।
अनाश्रमित्वम्।	संवत्सरे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वर्षद्वये अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
	वर्षत्रये कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अत ऊर्द्धं चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
सूर्य्योदयास्तकालयोः शयनम्।	सकृदाचरणे स्नानम्।			
	अभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणः सन्ध्यादीनामतिक्रमः। आदिना अग्नीन्धनाकरण भैक्ष्यचर्य्याकरणस्य।	अरोगिणो निरन्तरं सप्तरात्रमकरणे अवकीर्णिव्रतम्। तत्तु खरचर्मपरिधानपूर्व्वकषाण्मासिक ब्रह्महत्याव्रतम् एतदूने ऊनं अधिके अधिकम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४॥१४ कार्षापणाः।
अनातुरगृहस्थस्य सन्ध्यास्नानाग्निकार्य्यनित्यक्रियापातः।	दिनैकनित्यक्रियातिपाते एकाहोपवासः।	०	६ रत्तिकरजतम्	यथाशक्ति।
	दिनत्रयक्रियातिपाते कृच्छ्रार्द्धम्।	०	१॥० कार्षापणाः।	यथाशक्ति।
	वर्षैकनित्यक्रियातिपाते एकदिनक्रियातिपातप्रायश्चित्तानुसरणेन प्रायश्चित्तम्।	०	२ पल ६ तोलक ४ माषकमितरजतम्।	यथाशक्ति।
शूद्रव्यतिरिक्तायाज्ययाजनम्। अयाज्याश्च निन्दितप्रतिग्रहादिना निन्दितब्राह्मणादयः।	शतगायत्रीजपः।	०	०	०
	अभ्यासे सहस्राधिकं चान्द्रायणं वा। दक्षिणात्यागाच्च पूतो भवति।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
शूद्रयाजनम्।	लोभादिना याजने अर्जितभुक्तावशिष्टधनस्यागाधजले प्रक्षेपपूर्व्वकं ब्रह्मचारिणि दानपूर्व्वकं वा चान्द्रायणं पुनरुपनयनञ्च। अक्षारलवणब्रह्मसुवर्च्चलापानञ्च। एतदशक्तौ तद्धनं परित्यज्य त्रिंशत्पुराणाः प्रदातव्याः।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	स्नेहादनुप्रसङ्गादिना याजने द्रव्यत्यागपूर्व्वकं प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अज्ञानतः प्राणायामसहस्रम्।			
शूद्रप्रतिग्रहः।	सकृत्प्रतिग्रहे त्रिसहस्रगायत्रीजपः।			
	अभ्यासे चान्द्रायणम्। एतच्च द्रव्यत्यागपूर्व्वकं कार्य्यम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
उच्छास्त्रवर्त्तिक्षत्रियनृपतिप्रतिग्रहः।	षष्ठे काले क्षीराशन मासैक जलवासः प्रचुरतरगायत्रीजपश्च। मासोपवासेनैवास्य सङ्कलनम्।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
अथान्त्यजप्रतिग्रहः। स च अयाचितपुष्पफलशाकतृणकाष्ठधान्यपयोमासदधिशय्यागृहकुशगन्धमणिमत्स्यादीतरविषयः।	ज्ञानादष्टचत्वारिंशद्दाराभ्यासात् द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	अज्ञानात् द्विरभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्विरभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
चाण्डालप्रतिग्रहः।	अज्ञानात् अष्टचत्वारिंशद्दाराभ्यासात् द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	अज्ञानात् सकृत्कृते तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् सकृत्कृते चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
पतितप्रतिग्रहः।	ज्ञानात् सकृत्कृते चान्द्रायणम्। अज्ञानात्तदर्द्धम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
प्रायश्चित्तद्रव्यग्रहणम् ।	त्रिसहस्रगायत्रीजपः मासैकं गोष्ठे पयःपानं वा । एतत् लघुतरपापप्रायश्चित्तद्रव्यग्रहणे ।	०	०	०
स्वभावाशास्त्रब्राह्मणाजिनोभयतोमुखीमणयादिप्रतिग्रहः ।	उत्तममणयादिप्रतिग्रहे दशसहस्रगायत्रीजपः । मध्यमे पञ्चसहस्रगायत्रीजपः । अधमे अष्टोत्तरसहस्रसावित्रीजपः । द्वादशरात्रं पयोव्रतञ्च । अत्यन्तनिषिद्धकृष्णाजिनोभयतोमुखीप्रतिग्रहे लक्षगायत्रीजपः ।			
अथ ब्राह्मणस्य क्षत्रियवैश्यवृत्त्या धनार्जनम् ।	संवत्सरे चान्द्रायणम् । संवत्सराभ्यन्तरे मासैकद्विकादौ चान्द्रायणभागहारः कल्प्यः । संवत्सरादूर्द्धं द्वैगुण्यत्रैगुण्यादिकं कल्प्यम् । आपत्काले दोषाभावः ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्य सेवावृत्तिधनार्ज्जनम् ।	प्राजापत्यत्रयं पुनरुपनयनञ्च । द्रव्यत्यागपूर्व्वकं करणीयम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्य गीतादिना धनार्जनम् ।	चान्द्रायणम् । कृतप्रायश्चित्तस्याप्यव्यवहार्य्यत्वम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्य शूद्रसेवनम् ।	चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	चिरतरकालाभ्यासे त्रैवार्षिकव्रतम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
अविक्रेयविक्रयः । ब्राह्मणस्याविक्रेयद्रव्याणि यथा । लवण पक्वान्न मधु क्षीर दधि घृतोदक सर्व्वगन्धोपल लाक्षा रक्तवासः गुड तैल ग्राम्यपशु एकशफ केश सर्व्वारण्यपशु विद्या याग खात गो शस्त्र ऊर्णा रस विष तिल शुक्ल नीली कौषेयवासः चर्म्म तक्राममांस सुरा सोम केश गोधूम कन्या हिङ्गु गुग्गुलु सर्जरस हरिताल मनःशिलाञ्जन गैरिक क्षार मणि मौक्तिक प्रवाल दन्त नख आर्द्रौषधि शुक्ति वेणु वैणव मृण्मयपात्र पुष्प मूल तुष कार्पास भस्मास्थि पिण्याक त्रपु सीसक कृष्णलोहोडम्बर खड्गपात्राणि इत्यविक्रेयाणि ।	सकृत्कृते त्रिरात्रोपवासः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	द्विरभ्यासे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अत्यन्ताभ्यासे चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	निखिलविक्रये बहुतरकालाभ्यासे वा त्रिसवनस्नानाधःशयनचतुर्थकालभोजनरूपसंवत्सरव्रतम् । शूद्रस्यात्यन्तापदि दोषाभावः ।	१५ धेनवः ।	४५ कार्षापणाः ।	९ गावः । अशक्तौ ८।० कार्षापणाः ।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
निन्दितदेशगमनम्। ननु तीर्थयात्राव्यतिरेकेण। निन्दितदेशा यथा। कारस्करकलिङ्गोड्रान्ध्रशबरयुगन्धरभूमिलयसिन्धुसौराष्ट्रसौवीरप्रत्यन्तदेशाङ्गवङ्गकलिङ्गादयः।	एतान् गत्वा तत्रैव चिरमुषित्वा गङ्गादिगमनम्। तदशक्तौ पुनरुपनयनम्।			
	अतिचिरवासे पुनरुपनयनं चान्द्रायणञ्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणा.।	यथाशक्ति।
असत्याभिधानम्।	सकृदसत्यभाषणे कृच्छ्रानुसरणम्।			
	अत्यन्ताभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अतिबहुतरकालाभ्यासे माससाध्यचान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२०॥० कार्षापणाः।	यथाशक्ति।
	साक्षिणोऽसत्यभाषणे ज्ञानाज्ञानतो द्वादशवार्षिकव्रतमित्युक्तमनुपातके। विवाहभयमैथुनबालप्रतारणपरीहासगोब्राह्मणहितस्त्रीराजस्वप्राणात्ययसर्व्वधनापहारविषयेषु मिथ्याकथने दोषाभावः।			
उच्छिष्टस्य चाण्डालादिदर्शनम्।	दर्शने एकरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सम्भाषणे द्विरात्रोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	संस्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	सहगमने सचैलस्नानम्। अनुच्छिष्टस्य दर्शने सूर्य्यादिदर्शनम्। सम्भाषणे ब्राह्मणसम्भाषणम्। इदं ज्ञाने।			
उच्छिष्टस्य सूर्य्यादिदर्शनम्। आदिना नक्षत्रचन्द्रौ। कामत इदम्।	एकोपवासः।	०	६ रक्तिकरजतम्।	यथाशक्ति।
तैलाभ्यक्तादिमूत्रोच्चारसमुत्सर्गः। आदिना अनाचान्तश्मश्रुकर्म्मिमैथुनिनः।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
विप्राग्न्यादिमध्यगमनम्। आदिना दम्पत्योर्गवोर्ग्रहणम्।	कामतोऽत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	सकृदभ्यासादिषु तु स्नातकव्रतलोपप्रायश्चित्तम्। एकदिनाभोजनम्। तदावृत्तिश्चोहनीया।	०	॥० पणाः।	यथाशक्ति।
अग्नौ पादप्रतापनम्। कुशेन पादसम्मार्जनञ्च।	एकोपवासः। इदं सकृत्करणे। अभ्यासे द्वैगुण्यादिकम्।	०	॥० पणाः।	यथाशक्ति।
गुरोर्ब्राह्मणस्य च तिरस्कारः।	दर्पेण हुङ्कारे त्वङ्कारे वादेन जये वाससा बन्धने तृणेन ताडने च क्षिप्रं प्रसाद्य दिनमेकमुपवासः। एतदीषत्संरम्भतः सकृज्ज्ञेयम्।	०	॥० पणाः।	यथाशक्ति।
	शास्त्रीयविवादे दर्पात् पुनः पुनर्जये स्नात्वा प्रणिपत्य त्रिरात्रोपवासः।	०	१॥० कार्षापणाः।	यथाशक्ति।
	प्रमादतः पादेन स्पर्शे एकरात्रोपवासः अभिवादनं प्रसादनञ्च।	०	॥० पणाः।	यथाशक्ति।
	क्रोधादिना अनुबन्धापेक्षया त्र्यहप्राजापत्यादिकं कल्प्यम्।			
	महापातकेन ब्राह्मणस्य विरुद्धाभिधाने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पणादानम्।	दक्षिणा।
	उपपातकेन ब्राह्मणस्य विरुद्धाभिधाने प्राजापत्यम्। जातिभ्रंशकरपातकोपपातकादन्यत्राक्रोशस्य लघुगुरुभाव प्रतिसन्धाय एकरात्रत्रिरात्रषड्रात्रोपवासाः। प्रतिश्रुत्यादानादौ अल्पत्वबहुत्वाभ्याम् एकरात्रत्रिरात्रषड्रात्रोपवासाः। देवर्षिगोब्राह्मणाचार्यमातृपितृनरेन्द्राणां प्रति ष्ठीवनाक्रोशे उल्मुकेन जिह्वादाहो हिरण्यदानञ्च। गुरुब्राह्मणाभिन्न प्रत्याक्रोशने प्रतिताडने च दोषाभावः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
मिथ्याब्राह्मणशपथः। यावज्जीवसुकृतशपथश्च।	विप्रस्य वधसंयुक्तमिथ्याशपथे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	यावज्जीवसुकृतशपथे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभिशापकरणम्।	मासमब्भक्षणम्। गायत्र्या वशिष्ठोक्तशुद्धवतीनां वा शत जपश्च। एतत् सकृन्महापातकाद्यभिशापे। उपपातके त्वभ्यासतो ज्ञेयम्। स्वयामहापातकाभिशापाभ्यासे त्वावृत्तितारतम्यात् प्रायश्चित्ततारतम्यं कल्प्यम्। महापातकादन्यत्र एकविंशतिरात्रं सुवर्चलापानम्। हीनवर्णेन उत्तमवर्णाभिशापे प्रतिलोमोक्तदण्डव्यवस्थया प्रायश्चित्तं कल्प्यम्।	१२ धेनवः।	३६ कार्षापणाः।	यथाशक्ति।
अनृताभिशस्तता।	मासं कृच्छ्रम्।	सार्द्धधेनुद्वयासम्भवात ३ धेनवः।	७॥० कार्षापणाः।	यथाशक्ति।
	महापातकाभिशापे द्विमासं कृच्छ्रम्। एतदभिशापकालातिक्रमे ज्ञेयम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अभिशापकालनिर्णयप्रवृत्तस्य उपपातकादिना अभिशस्तस्य कृच्छ्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
आरूढपतितत्वम्। व्याधिक्रोधादिना सन्न्यासवाक्यमुच्चार्य यो गृहस्थाश्रममाश्रयितुमिच्छति स आरूढपतितः तस्य भावः।	षण्मासान् प्राजापत्यम्। एतत् सन्न्यासग्रहणान्तरनिवृत्तानाम्। चिरतरकालसन्न्यासनिवृत्तस्य ब्राह्मणस्य स्वपदाङ्कनपूर्व्वकनिर्वासनम्। क्षत्रिय विप्रादेर्दास्यकरणम्।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
	यावज्जीवव्रतानशनप्रवृत्तयोः ब्रह्मचारिवाणप्रस्थयोः स्वधर्म्मनिवृत्तयोश्चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
जलाग्न्यादिभ्रष्टता। आदिना उद्बन्धनप्रव्रज्यानशनविषप्रपतनप्रायोपवेशशस्त्रघातेभ्यो भ्रंशनम्।	चान्द्रायणं तप्तकृच्छ्रद्वयं वा। अभ्यासे त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च। जातकर्म्मादिसंस्काराश्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	चिताभ्रष्टायाः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
व्रणकृम्युत्पत्तिः	त्रिसन्ध्यं गोमयगोमूत्राभ्यां स्नानम्। त्र्यहं पञ्चगव्यकुशोदकमात्रपानञ्च। इदञ्च नाभ्यधोदेशदंशविषयम्।			
	नाभेरूर्द्ध्वं कृम्युत्पत्तौ षड्रात्रमुपवासः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ स्वर्णदानम् ।	दक्षिणा ।
	शिरसि क्रिमिदंशने वृषदक्षिणायुक्तसान्तपनं तप्तकृच्छ्रं वा ।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः ।	११।० कार्षापणाः ।	यथाशक्ति ।
श्वादिदंशः । आदिना शृगालखरग्राम्यक्रव्यादग्राम्योष्ट्रवराहपुरुषलीवानरवायसानां दंशनम् ।	पादयोरुधिरदर्शने जले प्राणायामः घृतप्राशनञ्च । पादयोरतिगाढ़दंशने नद्यां १६ प्राणायामाः । नाभेरधोगाढ़दंशने ब्रह्मचारिणस्त्र्यहं सायं पयःपानम् ।			
	गृहस्थस्य त्रिरात्रमुपवासः ।	०	१।० कार्षापणः ।	यथाशक्ति ।
	एकाहमग्निहोत्रिणः ।	०	॥० पणाः ।	यथाशक्ति ।
	नाभ्यूर्द्धं दंशने एतद्द्विगुणम् । बाह्वोश्चतुर्गुणम् । मूर्ध्नि षोडशगुणम् । दृढं सरुधिरदंशने । नाभेरूर्द्धमतिगाढ़दंशने सागरगनदीस्नानपूर्व्वकोपवासः शतं प्राणायामावर्त्तनञ्च ।			
	व्रतस्थस्य श्वादिदंशने त्रिरात्रोपवासः सघृतयावकपानञ्च । बालस्याशक्ते अशक्तत्वे वा तदीयपापक्षयं संकल्प्य पित्रादिः प्रायश्चित्तं कुर्य्यात् । दष्टस्थानस्य गायत्र्यष्टसहस्राभिमन्त्रणपूर्व्वकमुल्मुकेन दहनम् । चतुर्भिः कलसैर्नदीसङ्गमे वा स्नानम् । स्त्रियास्तु विशेषः । उदितसोमनक्षत्रदर्शनं समुद्रदर्शनं वा । कृष्णपक्षे चन्द्रगमनदिग्दर्शनम् ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
विप्रादिहते चात्मघातस्तते वा अश्रुपातजलादिदानम् ।	दहनवहनकटक्रियातर्पणश्राद्धादौ तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	तच्छवस्य केवलस्पर्शे अश्रुपाते वा एकाहोपवासः ।	०	६ रक्तिकरजतम् ।	यथाशक्ति ।
	अभ्यासे अनडुत्सहितगोदक्षिणायुक्ततप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	१ वृषः । १ गौः । अशक्तौ ६ कार्षापणाः ।
	आत्मघातिनः स्नेहात् दाहादिकरणे तप्तकृच्छ्रसहितचान्द्रायणम् ।	१२ धेनवः ।	३४॥० कार्षापणाः ।	यथाशक्ति ।
	बलात्कारेण उद्बन्धनस्तस्य पाशच्छेदने दहनवहनेषु मासं भैक्ष्यभक्षणं त्रिसवनस्नानञ्च ।			
	वेतनेन दहनवहनादिकरणे असम्बन्धिनां कृच्छ्रपादः ।			
	दहनवहनव्यतिरेकेण कामतः सर्व्वाङ्गीनानभ्यासस्पर्शे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	तथैवाभ्यासे तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	द्विजस्य शूद्रशवानुगमने त्रिरात्राशौचं तदन्ते समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतप्राशनम् । अवर्णोमामाद्य १००८ गायत्रीजपो वा ।			
	द्विजस्य द्विजशवानुगमने १०८ गायत्रीजपः ।			
	शूद्रस्य सर्व्वशवानुगमने स्नानम् ।			
बलात्कारिम्लेच्छदास्याशुभकर्म्म ।	म्लेच्छैश्चाण्डालादिदस्युभिः उच्छिष्टमार्ज्जनोच्छिष्टभक्षणखरोष्ट्रविड्वराहमांसभक्षणम्लेच्छस्त्रीसङ्गतदीयस्त्रीसहभोजना-			

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ । चूर्णीदानम् ।	दक्षिणा ।
	द्विकृतचितकर्म्म बलान्मासैकं कारितस्य निरग्निद्विजातेः प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	साग्नेश्चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	क्षत्रियवैश्ययोः पराकः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	शूद्रस्य मासार्द्धं यावकपानम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	वत्सरादूर्द्ध्वं वर्षचतुष्टयं यावत् भागहारेण प्रायश्चित्तमूहनीयम् ।			
	तदूर्द्ध्वं तत्समत्वात् पतितत्वेन प्रायश्चित्तान्तराभावाच्चरणम् ।			
अनुदकमूत्रपुरीषकरणम् ।	सचेलस्नानं गोस्पर्शश्च ।			
	अभ्यासे एकोपवासः सचेलस्नानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
जलाग्न्योरशुचिद्रव्यप्रक्षेपः ।	मासं यावकपानम् । एतदभ्यासे ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	अज्ञानत ईषदार्त्तस्य त्रिरात्रोपवासः ।	०	१॥० कार्षापणाः ।	यथाशक्ति ।
	इदमापः प्रवहत इति जपश्च ।			
	अनार्त्तस्य कौतूहलादिना तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
अन्योन्यानुक्तद्वेषोत्पादनम् । अर्थार्जनेवाक्छेदकरणम् ।	अहोरात्रमनश्नन् भूत्वा पयःपानम् ।	०	५ रजतमाषकाः ।	धनुर्दण्डश्च ।
शक्रधनुःपलाशाग्निदर्शकत्वम् ।	इदं शक्रधनुरिति व्यपदिश्य कामतो दर्शयित्वाहोरात्रोपवासः ।	०	३ रूप्यमाषकाः ।	यथाशक्ति ।
श्राद्धनिमन्त्रितब्राह्मणानाक्रानम् ।	यतिचान्द्रायणम् ।	४ धेनवः ।	११।० कार्षापणाः ।	यथाशक्ति ।
देवागारकृतेष्टकाकाष्ठशिलादिना गृहकरणम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
निष्ठीवनादि । आदिना वातकर्म्मदन्तश्लिष्टानृतस्तुत्पतितसम्भाषणवासःपरिधानानि ।	आचमनम् । गोपृष्ठस्पर्शः । अर्कदर्शनम् । दक्षिणश्रवणस्पर्शो वा । अत्र पूर्व्वाभावे ततः परम् । इन्द्रियस्पृष्टामेध्यस्य मुखस्पर्शे स्नानम् ।			
यतीनां व्रतोपव्रतभङ्गः । व्रतानि यथा । अहिंसासत्यास्तेयमैथुनवर्ज्जनानि । उपव्रतानि यथा । अक्रोधगुरुशुश्रूषाप्रमादशौचाहारशुद्धीनि ।	अहोरात्रोपवासपूर्व्वकचान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	रमणीच्छया स्त्रीसमीपगमने प्राणायामशतपूर्व्वकसान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	असद्वादे उपवासः प्राणायामशतञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
	अकामतः पशुक्रिमिहिंसायां कृच्छ्रातिकृच्छ्रम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
	चान्द्रायणं वा ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	इन्द्रियदौर्बल्यात् स्त्रीदर्शनात् स्कन्दने षोडशप्राणायामाः । स्त्रियं विना कामतो दिवास्कन्दने त्रिरात्रोपवासः प्राणायामशताचरणञ्च । रात्रौ स्कन्दने स्नानपूर्व्वकद्वादशप्राणायामाः ।			
	एकान्नमधुमांसामश्राद्धप्रत्यक्षलवणानामभोज्यानामेकैकस्य भोजने प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	योगिनां प्रमादे योगेन शुद्धिः ।			
	ज्ञानिनां ज्ञानमेव शुद्धिकारणम् ।			
	ब्रह्मचारिणोऽकामतः स्वप्ने रेतस्स्खलने स्नानम् । अर्कार्चनम् । त्रिः पुनर्मामित्यृचो जपश्च ।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
व्रतभङ्गः।	लोभान्मोहात् प्रमादाद्वा व्रतभङ्गे उपवासत्रयं केशमुण्डनञ्च।	०	१॥० कार्षापणाः।	यथाशक्ति।
उदुरासभयानम्।	कामतः सक्तदारोहणे नग्नस्नाने च प्राणायामः।			
	अभ्यासे त्रिरात्रोपवासः।	०	१॥० कार्षापणाः।	यथाशक्ति।
	अथवधानेनारोहणे नग्नस्य ईषदभ्यस्नानभोजने च प्राणायामशतम्। अत्र उपपातकगणपठितेषु यत्र प्रायश्चित्तं नोक्तं तत्रोपपातकसामान्यप्रायश्चित्तमेव ग्राह्यम्। तत्तु मनूक्तं त्रैमासिकं गोव्रतं चान्द्रायणं वा। याज्ञवल्क्योक्तं मासं पयःपानं पराको वा। एतान्येव प्रायश्चित्तानि पापस्य गुरुलाघवमवगम्य व्यवस्थेयानि॥ *॥			

अथ जातिभ्रंशकरपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणपीडाकरणम्। लशुनादिमद्ययोर्घ्राणम्। मित्रे कौटिल्यम्। पुंसि मैथुनञ्च।	कामतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अकामतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतच्चाभ्यासे।			
	अत्रायं विशेषः।			
	ब्राह्मणावगोरणे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणे दण्डादिनिपातने अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणस्य शोणितोत्पादने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणाङ्गच्छेदने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	चान्द्रायणम्। दशगोदानञ्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथ सङ्करीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
खराश्वोष्ट्रमृगहस्तिच्छागमेषमीनाहिमहिषाणां वधरूपाणि।	सकृत्करणे मासं यावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अभ्यासे कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथापात्रीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
निन्दितेभ्यो धनादानम्। वाणिज्यम्। शूद्रसेवनम्। असत्यभाषणञ्च।	सकृत्करणे चतुरहसाध्यं तप्तकृच्छ्रं शीतकृच्छ्रं वा।	सपादधेन्वसम्भवात् २ धेनू।	३॥।०कार्षापणाः।	यथाशक्ति।
	अभ्यासे महासान्तपनम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथ मलावहपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
कृमिकीटपक्षिणां हननम्। मद्यानुगतद्रव्यभोजनम्। फलकाष्ठपुष्पाणां स्तेयम्। अधैर्यम्। तच्च गीतश्रवणादि। अल्पेऽपचये अत्यन्तवैक्लव्यञ्च।	सकृदाचरणे त्र्यहयावकपानम्।	०	॥०१२	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्। एषु चतुर्षु यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव बोध्यम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
यदनुक्तं तत्प्रकीर्णकम्। इतिवचनात अतिपातकाद्यष्टान्यतमत्वेन विशेषतोऽनुक्तानि पापानि।	चान्द्रायणम्। पराकः। तुलापुरुषः। गवानुगमनम्। प्राजापत्यम्। एतानि सर्व्वपापप्रणाशकानि। पापस्य गुरुलाघवं वीक्ष्य प्रायश्चित्तान्येतानि शिष्टैर्व्यवस्थेयानि।			
अथास्पृश्यस्पर्शनम्। तच्च चाण्डालरजस्वलापतितसूतिकाशवशवस्पृक्चिवाण्डालसूतिकश्वान्याश्वकुक्कुटवराहादीनां स्पर्शनम्।	अनुच्छिष्टस्य चाण्डालादिस्पर्शे अकामतः सचेलं सशिरस्कं स्नानम्। कामतः सचेलस्नानम्। महाव्याहृतिभिर्होमः। घृतप्राशनञ्च। चिताधूमस्पर्शे ऋतुकालीनमैथुने दुःस्वप्ने वमने विरेके श्मश्रुकर्म्मणि यूपभक्ष्यपञ्चनखशवस्पृष्टहतदस्थ्नां स्पर्शे स्नानपूर्व्वकं प्रक्षालितवस्त्रपरिधानम्। अनृतौ मैथुने मूत्रपुरीषत्यागवच्छुद्धिः।			
	सर्व्वाङ्गस्पर्शे त्रिरात्रोपवासः। रात्रौ शववर्ज्जास्पृश्यस्पर्शने सुवर्णं प्रक्षिप्य अग्निं सन्निधाप्य दिवाहृतजलैः स्नानम्। सर्व्वत्र प्रागन्नप्राशनात् शिशोरभ्युक्षणम्। प्राक् चूडाकरणात् बालस्याचमनम्। प्रागुपनयनात् कुमारस्य स्नानम्।	०	१॥० कार्षापणः।	यथाशक्ति।
अथोच्छिष्टस्य चाण्डालादिस्पर्शः। आदिना पतितरजस्वलान्त्यजश्वसूकरमद्यभाण्डानां ग्रहणम्।	सद्यः स्नात्वा परदिने प्रायश्चित्तं करणीयम्।			
	ऊर्द्ध्वोच्छिष्टस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे सान्तपनम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अज्ञाने त्रिरात्रोपवासः। पञ्चगव्यपानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	अर्द्धोच्छिष्टस्य अर्थादनिर्गीर्णग्रासस्य आमाशनोच्छिष्टस्य च प्राजापत्यपादः।	०	॥० पणाः।	यथाशक्ति।
	आपदि ज्ञानात् विशेषो यथा।			
	मूत्रत्यागाशौचिनः शवादिस्पर्शे एकोपवासः।		॥० पणाः।	यथाशक्ति।
	पुरीषत्यागाशौचिनः शवादिस्पर्शे दिनद्वयमुपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	मैथुनाशौचिनः शवादिस्पर्शे दिनत्रयमुपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	पानाशुचीनां शवादिस्पर्शे दिनचतुष्टयमुपवासः।	०	२ कार्षापणौ।	यथाशक्ति।
अथ तैलाभ्यक्तस्य चाण्डालादिस्पर्शः।	उपवासः। पञ्चगव्यपानञ्च। चाण्डालोदकसंस्पृष्टस्य स्नानम्।	०	॥० पणाः।	यथाशक्ति।
	उच्छिष्टस्य चाण्डालोदकस्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।

अथ प्रकीर्णकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ मूल्यदानम् ।	दक्षिणा ।
अथ रजकादिस्पर्शः। आदिना चर्म्मारवेणुधीवरनटानां ग्रहणम् ।	अनुच्छिष्टस्य द्विजस्य रजकादिभिरकामतः स्पर्शे आचमनम् ।			
	कामतः शिरोव्यतिरिक्ताङ्गस्पर्शे तदङ्गप्रक्षालनपूर्व्वकमाचमनम् ।			
	शिरःस्पर्शे स्नानम् ।			
	उच्छिष्टस्य तु ब्राह्मणस्यानुच्छिष्टचर्म्मकारादिस्पर्शे एकरात्रं पयःपानम् ।			
	उच्छिष्टचर्म्मकारादिकर्तृकस्पर्शे त्रिरात्रोपवासान्ते घृतप्राशनम् । ज्ञानत उर्द्धोच्छिष्टविषयञ्चेदम् ।	०	१॥० कार्षापणाः ।	यथाशक्ति ।
	अज्ञानतस्तदर्द्धम् ।	०	॥० पणाः ।	यथाशक्ति ।
अथोच्छिष्टस्य ब्राह्मणस्योच्छिष्टतच्छूद्रस्पर्शः ।	एकोपवासानन्तरं पञ्चगव्यपानम् ।	०	॥० पणाः ।	यथाशक्ति ।
	कामत इदम् ।			
	अकामेऽधोच्छिष्टे च नक्तम् ।	०	२ रजतरक्तिके ।	यथाशक्ति ।
	शुनः स्पर्शेऽप्येवम् ।			
अथोच्छिष्टोच्छिष्टसवर्णस्पर्शः ।	द्वयोरेवोच्छिष्टयोर्ब्राह्मणयोरन्योन्यस्पर्शे तदन्नत्यागपूर्व्वकं स्नानम् ।			
	अत उच्छिष्टस्य विप्रस्यानुच्छिष्टविप्रस्पर्शे दोषाभाव एव । एतदकामतः ।			
	कामतो नक्तपूर्व्वं घृताशनम् ।	०	२ रजतरक्तिके ।	यथाशक्ति ।
	उच्छिष्टब्राह्मणस्योच्छिष्टचाण्डालस्पर्शे नक्तम् ।	०	२ रजतरक्तिके ।	यथाशक्ति ।
	तादृशवैश्यस्पर्शे उपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
	भुञ्जानयोः सवर्णयोः परस्परस्पर्शे तदन्नत्यागपूर्व्वकं स्नानं प्राणायामश्च ।			
	अज्ञानात्तदन्नभोजने परदिने नक्तं पञ्चगव्यपानम् । तदन्ते भोजने न दोषः ।			
	ज्ञानात् उपवासानन्तरं ब्रह्मकूर्च्चपानं हविष्यभोजनञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
	शूद्रस्यापि विशेषाश्रवणादुच्छिष्टोच्छिष्टसंस्पर्शे एतदेव । नक्ताशक्तौ रजतरक्तिकाद्वयं देयम् ।			
अथ नीलावस्त्रपरिधानम् ।	अहोरात्रोपवासानन्तरं पञ्चगव्यपानम् ।	०	॥० पणाः ।	यथाशक्ति ।
	इदमज्ञाने ।			
	ज्ञाने द्विगुणम् ।			
	पालनाद्विक्रयात्तद्वृत्त्युपजीवनात् त्रीणि कृच्छ्राणि ।	३ धेनवः ।	८ कार्षापणाः ।	यथाशक्ति ।
	नीलीवस्त्रधारिणां स्नानदानतपोहोमस्वाध्यायपितृतर्पणमहायज्ञानां वृथात्वम् । स्त्रीणां क्रीडार्थसंयोगे शयनीये न दोषः ।			
अथ पलाण्डुलशुनादिस्पर्शः । आदिना सुरामद्यशूद्रोच्छिष्टानां ग्रहणम् ।	उर्द्धोच्छिष्टस्य द्विजस्य कामतः स्पर्शे त्र्यहं कुशजलपानं सावित्रीशतजपश्च ।	०	१॥० कार्षापणलभ्यकाञ्चनम् ।	यथाशक्ति ।
	मूत्रोच्छिष्टस्य स्पर्शे नक्तम् ।	०	२ रजतरक्तिके ।	यथाशक्ति ।
	कृतपुरीषोत्सर्गस्य पलाण्डुलशुनादिस्पर्शे एकोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
	उर्द्धोच्छिष्टस्य द्विरात्रोपवासः ।	०	१ कार्षापणः ।	यथाशक्ति ।
	एतत्त्रयमकामतः ।			
	अनुच्छिष्टस्य स्पर्शे केवलं स्नानम् ।			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
	अधोच्छिष्टस्य कामतः सुरेतरमद्यस्पर्शे अकामतः मूर्द्धोच्छिष्टस्य तस्मुखादीनाञ्च स्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च। कामतः सुराया दर्शने स्नानं प्राणायामत्रयं घृतप्राशनञ्च। अकामतः सुरायाः स्पर्शने प्राशे चाप्येवम्। कामतस्तस्याः स्पर्शे प्राशे च जातिभ्रंशकरपापस्य प्रायश्चित्तं ज्ञेयम्। अशोमपायिनां सुरापसम्बन्धिसुराप्राशे उदकमज्जनं त्रिरघमर्षणं घृतप्राशनञ्च।	०	॥० पणाः।	यथाशक्ति।
अधोच्छिष्टस्य नरादिपुरीषस्पर्शः। आदिना श्वकाककङ्कगृध्रादिग्रहणम्।	अधोच्छिष्टस्य सचेलस्नानम्।			
	ऊर्द्धोच्छिष्टस्योपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
अथाशुच्छिष्टस्य मलस्पर्शः। मला यथा। "वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः। श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः॥"	पूर्व्वेषां षण्णां नाभेरधः करद्वये च स्पर्शे मृज्जलाभ्यां क्षालनम्। उत्तरेषां षण्णां नाभेरधः करद्वये च स्पर्शे केवलजलेन क्षालनम्। नाभेरूर्द्धं विण्मूत्रप्रभृतिस्पर्शे स्नानम्। चक्षुषि ओष्ठे बाहुकरयोश्च स्पर्शे मृत्तोयगोमयैस्तदङ्गक्षालनं स्नानं उपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	भासवानरमार्जारखरोष्ट्रसूकराणाममेध्यस्पर्शे सचेलं स्नानम्।			
	एतदपि अशुच्छिष्टस्य नाभ्यूर्द्धलेपोपहतविषयम्। अथ उच्छिष्टविषयञ्च।			
	काकवलाहकाभ्यां विष्ठितस्य श्वोत्रमुखाप्रविष्टामेध्यलिप्तशरीरस्य च तदङ्गक्षालनं स्नानञ्च। अमेध्यानि यथा। "मानुषास्थि शव विष्ठा रेतो मूत्रार्त्तवं वसा। स्वेदाश्रुदूषिका श्लेष्मा मद्यञ्चामेध्यमुच्यते॥" एषां देहात् प्रच्युतानामेवामेध्यत्वम्। मद्यविण्मूत्रविप्रुषां मुखमध्यस्पर्शे मृत्तिकागोमयैर्लेपनं स्नानं उपवासः। तदन्ते पञ्चगव्यपानञ्च। अत्र विशेषो यथा। परस्य मानुषस्यास्थिवसाविष्ठार्त्तवमूत्ररेतोमज्जशोणितानां स्पर्शे लेपमार्जनं स्नानं आचमनञ्च। आत्मसम्बन्धिनामेतेषां स्पर्शे परिमार्ज्जनमाचमनञ्च।	०	॥० पणाः।	यथाशक्ति।
अथ मानुषास्थिस्पर्शः।	सस्नेहमानुषास्थिस्पर्शे स्नानम्।			
	कामतः स्पर्शे स्नानं गायत्र्यष्टशतजपः। घृतप्राशनं त्रिराचमनञ्च।			
	कामतोऽत्यन्ताभ्यासे त्रिरात्राशौचान्ते कृच्छ्रपादः।	०	॥।० पणाः।	यथाशक्ति।
	निःस्नेहस्य स्पर्शे आचमनं गोस्पर्शः अर्कदर्शनं वा। कामतोऽत्यन्ताभ्यासे अहोरात्राशौचान्ते एतानि कार्य्याणि।			
अथ शवनिर्म्माल्यस्पर्शः।	सचेलस्नानम्।	०	०	०
अथ रजस्वलायाः सवर्णासवर्णरजस्वलास्पर्शः।	रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः। पञ्चगव्यपानञ्च। एतत् कामतः।	०	॥० पणाः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
	अकामतस्तदर्द्धं अर्द्धकृच्छ्रव्रतम्।	०	।० पणाः।	यथाशक्ति।
	रजस्वलाया ब्राह्मण्याः शेषवर्णरजस्वलायाः अर्थात् क्षत्रियादिरजस्वलायाः स्पर्शे षड्रात्रोपवासः। एतच्च कामतः। अकामतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	रजस्वलायाः शूद्रायाः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	सवर्णयो रजस्वलयोरन्योन्यस्पर्शे एकोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्ताधमरजकादिरजस्वलास्पर्शे द्यहसाध्यं ब्रह्मकूर्चव्रतम्। एतच्च कामतः। अकामतस्तदर्द्धम्। एतत् सर्व्वं शुद्धिकालानन्तरं अर्थात् पञ्चमेऽहनि कार्य्यम्।	०	१ कार्षापणसार्द्धकाञ्चनम्।	यथाशक्ति।
अथ रजस्वलायाः पतितचाण्डालादिस्पर्शः। आदिना अन्त्यजवायसयोर्ग्रहणम्।	प्रथमेऽह्नि स्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	द्वितीयेऽह्नि द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयेऽह्नि अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थेऽह्नि विशुद्धिस्नानात् पूर्व्वं स्पर्शे नक्तम्। एतच्चाकामतः।	०	१ रौप्यमाषकम्।	यथाशक्ति।
	कामतः स्पर्शे सर्व्वत्र त्रिरात्रोपवासः। तदन्ते अजाघ्राता कारयितव्या च।	०	१॥० कार्षापणः।	यथाशक्ति।
अथ रजस्वलाया उच्छिष्टशूद्राश्वशूकरादिस्पर्शः। आदिना जम्बुकखरश्वकुक्कुटानां ग्रहणम्।	प्रथमद्वितीयदिनयोरुच्छिष्टशूद्रास्पर्शे द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयदिने स्पर्शे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थदिने स्पर्शे नक्तम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	कुक्कुटादिस्पर्शे सर्व्वत्र नक्तमेव। एतच्च प्रायश्चित्तं विशुद्धिस्नानानन्तरं कर्त्तव्यम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	एकशय्यादौ रजस्वलायाश्चाण्डालस्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पणा.।	यथाशक्ति।
	रजस्वलाया उच्छिष्टचाण्डालादिस्पर्शे द्विजस्त्रीणां प्राजापत्यम्। शूद्राया धेनुदानम्। एषु प्रायश्चित्तेषु रजस्वलात्वमेव निमित्ततो न ब्राह्मण्यादिभ्यो विशेषः। अत्रापवादः। "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टि न दूष्यति॥"	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ चाण्डालादिसङ्करः। आदिना श्वपाकपुक्कसयोर्ग्रहणम्।	संवत्सरैकचाण्डालसङ्करे मासैकं गोमूत्रयावकाहारः। एतत् प्रायश्चित्तं यौनादिवर्जितसंसर्गविषयम्।	१२ धेनवः।	३६ कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः। अभावे सर्व्वस्वम्।
	बालवृद्धस्त्रीशूद्राणामर्द्धम्। आषोडशाद्बालाः। सप्तत्यूर्द्धं स्थविराः। चीर्णे प्रायश्चित्ते ब्राह्मणभोजनम्। एतत् प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव।	६ धेनवः।	१८ कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः। अभावे सर्व्वस्वार्द्धम्।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
	पूर्व्वोक्तकालादल्पकालसङ्करे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	स्वल्पतरे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्तस्वल्पकाले कृच्छ्रद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्यात्र प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	चाण्डालादिसङ्करे गृहादिशुद्धिर्यथा। भवनदहनं अर्थात् तृणाग्निज्वालासंस्पृष्टम्। खननं अर्थात् पूर्व्वमृत्तिकाकर्षणेन मृत्तिकान्तरदानम्। सर्व्वमृन्मयभाण्डभेदनम्। दारवाणां तक्षणम्। शङ्खशुक्तिरजतसुवर्णशिलानामद्भिः प्रक्षालनम्। कांस्यताम्रायसामाकरे अर्थादग्नौ शुद्धिः। सौवीरपयोदधितक्राणां परित्यागः। लाक्षादिरसधान्यादिद्रव्याणां रक्षणम्। घृतादीनां तापनञ्च।			
	एकस्मिन्नेव कूपे द्विजानां चाण्डालानाञ्च सह जलपानं कुर्व्वतां संसर्गदुष्टानां उपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	बालापत्यारोगिगर्भिणीवृद्धानां नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	बालानां प्रहरद्वयमभोजनम्।	०	१ रजतरक्तिका।	यथाशक्ति।
	चर्म्मकारादीनामविज्ञातसङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः। संहतानां एकस्मिन्नुपहते तस्यैव शोधनम्। न तु तत्स्पर्शिनां सर्व्वेषां शोधनम्। एकशाखापाषाणादौ चाण्डालादिभिः सहारोहणे ब्राह्मणस्य स्नानमात्रम्।			
	तत्र फलभोजने ब्राह्मणानुज्ञापनं सचेलस्नानं अहोरात्रोपवासः पञ्चगव्यपानञ्च। एतद्व्यवधाने।	०	॥० पणाः।	यथाशक्ति।
	सन्निधाने त्रिरात्रोपवासः। पञ्चगव्यपानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	एतदुभयं ज्ञानविषयम्। अज्ञाने एकवृक्षादौ चाण्डालादिभिः सह फलभोजने अघमर्षणम्। एकावयविद्वारा परम्परास्पर्शेऽपि स्नानादिकम्। अत्रापवादः। "रथ्याकर्द्दमतोयानि नावः पन्थास्तृणानि च। स्पर्शनान्न प्रदुष्यन्ति पक्वेष्टचितानि च॥" तृणानि तृणसमूहः। पक्वेष्टचितानि मठादीनि। द्वितीयसंसर्गितृतीयसंसर्गिणोर्हस्तपादप्रक्षालनपूर्व्वकमाचमनम्। चतुर्थसंसर्गे दोषाभावः।			
	इत्यस्पृश्यस्पर्शप्रायश्चित्तम्॥ * ॥			
अथ रहस्यपापानि।	रहस्यकृते पापे रहस्यप्रायश्चित्तं करणीयम्। अन्येनावेदितमित्यर्थः। तत्र यदि कर्त्ता स्वयं प्रायश्चित्तानभिज्ञस्तदा कस्यचिद्रहस्यपापस्य किं रहस्यप्रायश्चित्तमिति सामान्येन प्रायश्चित्ताभिज्ञं पृष्ट्वा रहस्यं प्रायश्चित्तं कुर्य्यात्। तत्र यदि			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
	मरणान्तिकं प्रायश्चित्तं तत्र रहस्यकृतेऽपि मरणमेव कर्त्तव्यम्। यत्र तु व्रतादिकं तत्र जातिशक्तिगुणसकृदभ्यासाद्यपेक्षया प्रकाशकृतपापोक्तप्रायश्चित्तस्य विंशतिभागत्रिंशद्भागषड्भागाः कल्प्याः।			
	अथवा महापातकेष्वकामतो मनूक्तमाब्दिकं व्रतं करणीयम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८॥६॥ कार्षापणाः।
	कामतो द्वैगुण्यम्।	३० धेनवः।	६० कार्षापणाः।	१७ गावः। अशक्तौ १६॥८१३॥ कार्षापणाः।
	अन्येषु पापेषु गुरुलाघवापेक्षया प्राणायामशतमेव एकाहद्व्यहत्र्यहक्रमेण मासं षण्मासं संवत्सरं वाभ्यसनीयम्। व्रतकरणाशक्तेनापि जपहोमध्यानतीर्थसेवादानवेदाभ्यासादयः कार्य्याः। इति रहस्यप्रायश्चित्तम्॥			

इति शूलपाणिकृतप्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि समाप्तानि॥ * ॥

प्रायिकं, त्रि, (प्रायेण प्राये वा भवमिति। प्राय + ठक।) बाहुल्ये भवम्। यथा। "दैवयज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणादिकम्।" इति प्रायश्चित्ततत्त्वम्॥

प्रायुद्धेषी, [न्] पुं, (प्रायुधि प्रकृष्टयुद्धादिस्थाने हेषते शब्दायते इति। हेष् + णिनिः।) घोटकः। इति शब्दचन्द्रिका॥

प्रायोज्यं, त्रि, (प्र + आ + युज् + णिच् + यत्।) प्रयोजनार्हम्। यथा। प्रायोज्यं न विभज्येत। यद्द्रव्यस्य प्रयोजनार्हं पुस्तकादि तन्मूल्यैः सह न विभजनीयमिति दायभागः॥

प्रायोपविष्टः, त्रि, (प्रायेण मरणार्थमनशनेन उपविष्टः।) प्रायोपवेशविशिष्टः। यथा,—
"प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः॥"
इति श्रीभागवतम्।
"प्रायेण मृत्युपर्य्यन्तानशनेनोपविष्टम्।" इति तट्टीकायां श्रीधरस्वामी॥

प्रायोपवेशः, पुं, (प्रायेण मृत्युनिमित्तकानशनेन उपवेशः स्थितिः।) सन्न्यासपूर्व्वकानशनस्थितिः। यथा,—
"प्रायोपवेशो राजर्षेर्विप्रशापात् परीक्षितः॥"
इति श्रीभागवते १२ स्कन्धः॥

प्रारब्धं, क्ली, (प्रकृष्टमारब्धं स्वकार्य्यजननायेति।) प्राक्तनम्। शरीरारम्भकादृष्टविशेषः। यथा,—
"प्रारब्धकर्म्मणां भोगादेव क्षयः॥" इति स्मृतिः।
"प्रारब्धमश्नन्नभिमानशून्यः।"
इति श्रीभागवतम्॥
"प्रारब्धकर्म्मविक्षेपाद्वासना तु न नश्यति॥"
इति भगवद्गीतायां मधुसूदनसरस्वती च॥
(प्र + आ + रभ + कर्म्मणि क्तः। कृतारम्भे, त्रि। यथा, रघौ। १४। ७।
"अथाभिषेकं रघुवंशकेतोः
प्रारब्धमानन्दजलैर्जनन्योः।
निर्वर्त्तयामासुरमात्यवृद्धा-
स्तीर्थाहृतैः काञ्चनकुम्भतोयैः॥")

प्रारब्धिः, स्त्री, (प्र + आ + रभ् + क्तिन्।) गजबन्धनरज्जुः। इति हारावली॥

प्रारम्भः, पु, (प्र + आ + रभ् + भावे घञ्। नुम् च।) प्रकर्षेण आरम्भः। यथा, स्मृतिः।
"प्रारम्भे कर्म्मणां विप्रः पुण्डरीकं स्मरेद्धरिम्॥"
(प्रारभ्यते इति। प्र + आ + रभ् + कर्म्मणि घञ्। नुम् च। कर्म्म। यथा, मार्कण्डेयपुराणे। ५१। १७।
"शुभाशुभञ्च कुशलैः कुमारोऽन्यो ब्रवीति वै।
तत्रापि दुष्टे ध्यात्वेपः प्रारम्भत्याग एव च॥"
प्रकृष्ट आरम्भो योगो यस्येति विग्रहे। योगी। यथा, रघुः। १०। ६।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥")

प्रार्थनं, क्ली, (प्र + अर्थ + ल्युट्।) प्रकर्षेण याचनम्। तत्पर्य्यायः। याच्ञा २ अभिशस्तिः ३ याचना ४ अर्थना ५ प्रार्थना ६। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १४९। ३७।
"युगक्षयकृता धर्म्माः प्रार्थनानि विकुर्व्वते।
एतत् कलियुगं नाम अचिराद् यत् प्रवर्त्तते॥")

प्रार्थना, स्त्री, (प्र + अर्थ + णिच् + युच्।) प्रकर्षेण याचनम्। (यथा, महाभारते। ३। ३१२। ८१।
"कस्मो दिग्जलमाकाशं गौरन्नं प्रार्थना विषम्।
श्राद्धस्य ब्राह्मणः कालः कथं वा यत्र मन्यसे॥")

प्रार्थनीयं, क्ली, (प्रार्थ्यते इति। प्र + अर्थ + णिच् + अनीयर्।) द्वापरयुगम्। इति शब्दरत्नावली॥ प्रार्थनाविषये, त्रि॥ (यथा, पञ्चतन्त्रे। २। ११६।
"ततस्तयोः सम्भूय बुद्धा एकस्य वरः प्रार्थनीयः॥")

प्रार्थितः, त्रि, (प्रार्थ्यते स्मेति। प्र + अर्थ + क्तः।) याचितः। (यथा, देवीभागवते। २। ६। ५६।
"प्रार्थिता पतिना कुन्ती ददौ मन्त्रं दयान्विता।
एकपुत्त्रप्रबन्धेन माद्री पतिमते स्थिता॥")
शत्रुसंरुद्धः। अभिहितः। इति मेदिनी॥ हतः। इति त्रिकाण्डशेषः॥

प्रालम्बं, क्ली, (प्रालम्बते इति। लबि अवस्रंसने + अच्।) कण्ठात् ऋजुलम्बमानमाल्यम्। इत्यमरः। २।६।१३६॥ (यथा, रघौ। ६। १४।
"विसृष्टमंसादपरो विलासी
रत्नानुविद्धाङ्गदकोटिलग्नम्।
प्रालम्बमुत्कृष्य यथावकाशं
निनाय साचीकृतचारुवक्त्रः॥"
प्रकर्षेण लम्बमाने, त्रि॥)

प्रालम्बिका, स्त्री, (प्रालम्बते इति। अच्। संज्ञायां कन्। टापि अत इत्वम्।) स्वर्णरचितलम्बिका। सुवर्णहारः। इत्यमरः।२।६।१०४॥

प्रालेयं, क्ली, (प्रकर्षेण लीयन्ते लीना भवन्ति पदार्था अत्रेति प्रलयो हिमालयस्तत आगतम्। प्रलय + अण्। "केकयमित्त्रयुप्रलयानां यादेरियः।" ७। ३। २। इति यस्येयादेशः।) हिमम्। इत्यमरः। १। ३। १८॥ (यथा, देवीभागवते। ४। ५। १३।
"नरनारायणौ चैव चेरतुस्तप उत्तमम्।
प्रालेयाद्रिं समागम्य तीर्थे वदरिकाश्रमे॥")

प्रालेयांशुः, पुं, (प्रालेयानि हिमानि तद्वत् शीता वा अंशवो यस्य ।) चन्द्रः । इति हलायुधः ॥ (यथा, माघे । ६ । ८७ ।
"इत्थं नारीर्घटयितुमलङ्कामिभिः काममासन्
प्रालेयांशोः सपदि रुचयः शाल्तमानाभ्य-
रायाः ॥")

प्रावटः, पुं, (प्र + अव + अट् + अच् । शकन्ध्वादित्वात् साधुः ।) यवः । इति जटाधरः ॥

प्रावरः, पुं, (प्राव्रियतेऽनेनेति । प्र + आ + वृ + करणे अप् ।) प्राचीरम् । इति शब्दरत्नावली ॥

प्रावरणं, क्ली, (प्रावृणोत्यनेन गात्रमिति । प्र + आ + वृ + करणे ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रच्छादनम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६७४ ।
"बन्धकीपादसंक्रान्तचाटुप्रावरणादि सः ।
गौरवार्हान् दुराचारैः सचिवान् पर्य्यधापयत् ॥")
प्रच्छादनञ्च ॥

प्रावारः, पुं, (प्राव्रियते आच्छाद्यतेऽनेनेति । प्र + आ + वृ + करणे घञ् ।) उत्तरासङ्गः । उत्तरीयवस्त्रम् । इत्यमरः ॥ (यथा, महाभारते । २ । ४८ । ६ ।
"आच्छादयन्ति प्रावारानश्नन्ति पिशितौदनम् ।
आजानेया बहुत्वचाः केनासि हरिणः कृशः ॥")

प्रावारकीटः, पुं, (प्रावारस्य कीटः ।) कीटविशेषः । तत्पर्य्यायः । कुणः २ । इति जटाधर. ॥

प्रावृट्, [ष्] स्त्री, (प्रकर्षेण आ सम्यक्प्रकारेण च वर्षतीति । प्र + आ + वृष् + क्विप् । प्रावर्षन्त्यत्रेति आधारे क्विप् वा । यद्वा, वर्षणमिति वृट् प्रकृष्टा वृड्त्र । "नहिवृतिवृषीति ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः ।) वर्षाकालः । श्रावणभाद्रमासौ । इत्यमरः । १ । ४ । १९ ॥ (यथा, रघौ । ६ । ५१ ।
"अध्यास्य चाम्भः पृषतोक्षितानि
शैलेयगन्धीनि शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्यं
कान्तासु गोवर्द्धनकन्दरासु ॥")

प्रावृडत्ययः, पुं, (प्रावृषः अत्ययो नाशो यत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

प्रावृतं, त्रि, (प्राव्रियते स्मेति । प्र + आ + वृ + क्तः ।) प्रच्छादनम् । ओडितवस्त्रम् । इति भरतः ॥ तत्पर्य्यायः । निवीतम् २ । इत्यमरः ॥ निवृतम् ३ । इति तट्टीकायां स्वामी ॥

प्रावृतिः, स्त्री, (प्रावृणोति प्रकर्षेण आच्छादयति दृष्टिपथमनयेति । प्र + आ + वृ + करणे क्तिन् ।) प्राचीरम् । इति शब्दरत्नावली ॥ (मलः । यथा, सर्व्वदर्शनसंग्रहे शैवदर्शने ।
"प्रावृतीशौ बलं कर्म्म मायाकार्य्यं चतुर्विधम् ।
पाशजालं समासेन धर्म्मा नाम्नैव कीर्त्तिता ॥"
"अस्यार्थः । प्रावृणोति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति प्रावृतिः स्वाभाविक्यशुचिर्मल इति ॥")

प्रावृषा, स्त्री, (प्रावृष् + हलन्तात् टाप् वा ।) घनागमः । वर्षाकालः । इति त्रिकाण्डशेषः ॥

प्रावृषायणी, स्त्री, (प्रावृषायां अयनमुद्भवो यस्याः । गौरादित्वात् ङीष् ।) कपिकच्छुः । इत्यमरः । २ । ४ । ६ ॥ आलकुशी इति भाषा ॥

प्रावृषिकः, पुं, (प्रावृषि वर्षाकाले कायति शब्दायते इति । कै + कः । अलुक्समासः ।) मयूरः । इति धरणिः ॥ (प्रावृषि भवः । प्रावृष् + ठक् ।) प्रावृट्कालभवे, त्रि ॥

प्रावृषेण्यः, पुं, (प्रावृषि भवः प्रावृट् देवतास्य वेति । प्रावृष् + "कालेभ्यो भववत् ।" ४ । २ । ३४ । इति "प्रावृष एण्यः ।" ४ । ३ । १७ । इति एण्यः ।) कदम्बवृक्षः । इति मेदिनी ॥ कुटजवृक्षः । धाराकदम्बः । इति राजनिर्घण्टः ॥

प्रावृषेण्यः, त्रि, (प्रावृषि भव इति । प्रावृष् + एण्यः ।) प्रावृट्कालभवः । इति मेदिनी ॥ (यथा, रघौ । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥")
प्राचुर्य्यम् । इति शब्दरत्नावली ॥

प्रावृषेण्या, स्त्री, (प्रावृषेण्य + टाप् ।) कपिकच्छुः । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

प्रावृष्यं, क्ली, (प्रावृषि भवमिति । यत् ।) वैदूर्य्यम् । इति राजनिर्घण्टः ॥ प्रावृषि भवे, त्रि ॥

प्रावृष्यः, पुं, (प्रावृषि भव इति । प्रावृष् + यत् ।) कुटजः । धाराकदम्बः । विकङ्कतः । इति राजनिर्घण्टः ॥

प्राशितं, क्ली, (प्रकर्षेण अशितं यत्र ।) पितृयज्ञः । इति जटाधरः ॥ (प्र + अश् + कर्म्मणि क्तः ।) भक्षिते, त्रि ॥

प्राश्निकः, पुं, (प्रश्नाय तदुत्तरप्रदानाय साधुरिति । प्रश्न + ठक् ।) सभ्यः । इति त्रिकाण्डशेषः ॥ प्रश्नकर्त्तरि, त्रि ॥

प्रासः, पुं, (प्रास्यते क्षिप्यते इति । प्र + अस् + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) कुन्तास्त्रम् । इत्यमरः । २ । ८ । ९३ ॥ कोँच इति भाषा ॥ (यथा, महाभारते । ६ । ६७ । २३ ।
"गदाभिरसिभिः प्रासैर्बाणैश्चानतपर्व्वभिः ॥"
अस्य आकृतिलक्षणादिकं यदुक्तं शुक्रनीतौ तद्यथा,—
"प्रासस्तु चतुर्हस्तं दण्डबुध्नं क्षुराननम् ॥"
यथाच ।
"प्रासस्तु सप्तहस्तः स्याद्दीर्घत्वेन तु वैणवः ।
लौहशीर्षस्तीक्ष्णपादः कौशेयस्तवकाचितः ॥
आकर्षश्च विकर्षश्च धूननं वेधनं तथा ।
चतस्र एता गतय उक्ताः प्रासं समाश्रिताः ॥")

प्रासकः पुं, (प्रास + संज्ञायां स्वार्थे वा कन् ।) प्रासास्त्रम् । पाशकः । इति हेमचन्द्रः ॥

प्रासङ्गः, पुं, (प्रसज्यते इति । प्र + सन्ज + घञ् । उपसर्गस्येति दीर्घः) युगम् । इत्यमरः । २ । ८ । ५७ ॥ योयालि इति भाषा । "अनसः शकटस्य सम्बन्धि अनसि सम्बद्धं वा यत् युगं ततोऽन्यत् यत् वत्सानां दमनकाले स्कन्धे आसज्यते तत् युगं प्रासङ्गः ।" इति भरतः ॥ (यथा, महाभारते । १३ । ६४ । १६ ।
"विशाखायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम् ।
सप्रासङ्गञ्च शकटं सधान्यं वस्त्रसंयुतम् ॥")

प्रासङ्ग्यः, पुं, (प्रासङ्गं वहतीति । प्रासङ्ग + "तद्वहति रथयुगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत् ।) युगवोढृवृषः । इत्यमरः । २ । १ । ६४ ॥

प्रासादः, पुं, (प्रसीदन्त्यस्मिन्निति । प्र + सद् + "हलश्च ।" ३ । ३ । १२१ । इत्याधारे घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति उपसर्गस्य दीर्घः ।) देवभूभुजां गृहम् । इत्यमरः । २ । २ । ९ ॥ (यथा, देवीभागवते । २ । ९ । ४२ ।
"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्ष-
काम् ।
कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम् ॥")
तल्लक्षणादि यथा,—

सूत उवाच ।

"प्रासादानां लक्षणन्तु वक्ष्ये शौनक । तच्छृणु ।
चतुःषष्टिपदं कृत्वा दिग्विदिक्षूपलक्षितम् ॥
चतुष्कोणं चतुर्भिश्च द्वाराणि सूर्य्यसंख्यया ।
चत्वारिंशाष्टभिश्चैव भित्तीनां कल्पना भवेत् ॥
ऊर्द्ध्वक्षेत्रसमा जङ्घा जङ्घार्द्धद्विगुणं भवेत् ।
गर्भविस्तारविस्तीर्णा शुकाङ्घ्रा च विधीयते ॥
तत्त्रिभागेण कर्त्तव्या पञ्चभागेन वा पुनः ।
निर्गमस्तु शुकाङ्घ्राया उच्छ्रयः शिखरार्द्धगः ॥
चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम् ।
चतुर्थे पुनरस्यैव कण्ठमामलसारकम् ॥ * ॥
अथवापि समं वास्तु कृत्वा षोड़शभागिकम् ।
तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् ॥
भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत् ।
चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः ॥
द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः ।
शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः ॥
चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः ।
पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥
भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः ।
गर्भसूत्रसमो भागादग्रतो मुखमण्डपः ॥
एतत् सामान्यमुद्दिष्टं प्रासादस्य हि लक्षणम् ।
लिङ्गमानमथो वक्ष्ये पीठो लिङ्गसमो भवेत् ॥
द्विगुणेन भवेद्गर्भः समन्ताच्छौनक ! ध्रुवम् ।
तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा ॥
द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक ! ।
पीठं गर्भावरं कर्म्म तन्मानेन शुकाङ्घ्रकाम् ॥
निर्गमस्तु समाख्यातः शेषं स्यात्पूर्व्ववदेव तु ।
लिङ्गमानः स्मृतो ह्येष द्वारमानमथोच्यते ॥ * ॥
कराग्रं वेदवत् कृत्वा द्वारं भागाष्टकं भवेत् ।
विस्तरेण समाख्यातं द्विगुणं चोच्छ्रया भवेत् ॥
द्वारवत् पीठमध्ये तु शेषं सुषिरकं भवेत् ।
पादिकं शेषिकं भित्तिर्द्वारार्द्धेन परिग्रहात् ॥
तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् ।

शुकाग्रा पूर्ब्बवज्ज्ञेया निर्गमोच्छ्रायकं भवेत् ॥
मण्डपे मानमेतत्तु स्वरूपञ्चापरं वदे । * ।
नैवेद्यं कारयेत क्षेत्रं यत्र तिष्ठन्ति देवताः ॥
इत्थं कृतेन मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भन्तु द्विगुणं कुर्य्यात नेम्या मानं भवेदिह ।
स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः ॥*॥
प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च नामतः ।
वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः ॥
त्रिपिष्टपञ्च पञ्चैते प्रासादाः सर्व्वयोनयः ।
प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः ॥
वृत्तो वृत्तायतश्चान्योऽष्टास्रश्चेह च पञ्चमः ।
एतेभ्य एव सम्भूताः प्रासादाः सुमनोहराः ॥
'सर्व्वप्रकृतिभूतेभ्यश्चत्वारिंशच्च नव च ।
मेरुश्च मन्दरश्चैव विमानश्च तथापरः ॥
भद्रकः सर्व्वतोभद्रो रुचको नन्दनस्तथा ।
नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवैत्यमी ॥
चतुरस्रात् समुद्भूता वैराजादिति गम्यताम् ।*।
वडभी गृहराजश्च शालागृहञ्च मन्दिरम् ॥
विमानञ्च तथा ब्रह्ममन्दिरं भवनं तथा ।
उत्तम्भं शिविका वेश्म नवैते पुष्पकोद्भवाः ॥*॥
वलयो दुन्दुभिः पद्मो महापद्मस्तथापरः ।
भद्रकः सर्व्वतोभद्रो रुचको नन्दनस्तथा ॥
गुवाक्षस्तथान्यश्च वृत्ताः कैलाससम्भवाः ।*।
गजोऽथ वृषभो हंसो गरुडः सिंहनामकः ॥
भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः ।
वृत्तायतः समुद्भूता नवैते मालकाह्वयात् ॥*॥
वज्रं चक्रं तथान्यच्च मुष्टिकं बभ्रुसंज्ञितम् ।
वक्रः स्वस्तिकखड्गौ च गदा श्रीवृक्ष एव च ॥
विजयो नामतः श्वेतस्त्रिपिष्टपसमुद्भवाः ।*।
त्रिकोणपद्ममर्द्धेन्दु चतुष्कोणं द्विरष्टकम् ॥
यत्र तत्र विधातव्यं संस्थानं मण्डपस्य तु ।
राज्यञ्च विजयश्चैवमायुर्व्वर्द्धनमेव च ॥
पुत्त्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् ॥*॥
कुर्य्यात् ध्वजादिसंख्या वा द्वारि गर्भगृहन्तथा ।
मण्डपः समसंख्याभिर्गणितः सूत्रतस्तथा ।
मण्डपस्य चतुर्थांशाद्भद्रः कार्य्यो विजानता ॥
सद्गवाक्षकोपेतो निर्गमाद्योऽथवा भवेत् ।
सार्द्धभित्तिप्रमाणेन भित्तिमानेन वा पुनः ॥
भित्तेर्द्विगुणयतो वापि कर्त्तव्या मण्डपाः क्वचित् ।
प्रासादे मञ्जरी कार्य्या चित्रा विषमभूमिका ॥
परिमाणविरोधेन रेखा वैषम्यभूमिका ।
आधारस्तु चतुर्द्वारश्चतुर्मण्डपशोभितः ॥
शतशृङ्गसमायुक्तो मेरुप्रासाद उत्तमः ।
मण्डपास्तस्य कर्त्तव्या भद्रैस्त्रिभिरलङ्कृताः ॥
घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये ।
कियन्तो येषु साधारा निराधाराश्च केचन ॥
प्रतिच्छन्दकभेदेन प्रासादाः सम्भवन्ति ते ।
अन्योन्यसङ्करात्तेषां घटना नाम भेदतः ॥
देवतानां विशेषाय प्रासादा बहवः स्मृताः ।
प्रासादे नियमो नास्ति देवतानां स्वयम्भुवाम् ॥
तान्येव देवतानाञ्च पूर्ब्बमानेन कारयेत् ।
चतुरस्रायतास्तत्र चतुष्कोणसमन्विताः ॥
चन्द्रशालान्विताः कार्य्या भेरीशिखरसंयुताः ।
पुरतो वाहनानाञ्च कर्त्तव्या लघुमण्डपाः ॥
नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया ।
प्रासादा देवतानाञ्च कार्य्या दिक्षु विदिक्ष्वपि ॥
द्वारपालाश्च कर्त्तव्या मुख्या गत्वा पृथक् पृथक् ।
किञ्चिद्दूरतः कार्य्या मठास्तत्रोपजीविनाम् ॥
प्राङ्गना जगती कार्य्या फलपुष्पजलान्विता ।
प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेन्नरः ॥
वासुदेवं सर्व्वदेवान् सर्व्वभाक् तद्गृहादिकृत् ॥"
इति गारुड़े प्रासादकीर्त्तनं नाम ४७ अध्यायः ॥
(यथाच ।
"एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ।
अथान्यच्च प्रवक्ष्यामि प्रासादं लिङ्गमानतः ॥
लिङ्गपूजाप्रमाणेन कर्त्तव्या पीठिका बुधैः ।
पीठिकार्द्धेन भागः स्यात्तन्मानेन तु भित्तयः ॥
बाह्यभित्ति प्रमाणेन उत्सेधस्तु भवेत्ततः ।
भित्त्युच्छ्रायात्तु द्विगुणः शिखरस्य समुच्छ्रयः ॥
शिखरस्य चतुर्भागा कर्त्तव्या स्यात् प्रदक्षिणा ।
प्रदक्षिणायास्तु समन्ततो मण्डपो भवेत् ॥
तस्य चार्द्धेन कर्त्तव्यस्त्वग्रतो मुखमण्डपः ।
प्रासादान्निर्गतौ कार्य्यौ कपोतौ गर्भमानतः ॥
ऊर्द्धभित्त्युच्छ्रयात्तस्य मञ्जरीं तु प्रकल्पयेत् ।
मञ्जर्य्याश्चार्द्धभागेन शुकनासं प्रकल्पयेत् ॥
ऊर्द्धं तथार्द्धभागेन वेदिबन्धो भवेदिह ।
वेद्याश्चोपरि यच्छेषं कण्ठमामलसारकम् ॥
एवं विभज्य प्रासादं शोभनं कारयेद्बुधः ।
अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥
गर्भमानेन प्रासादप्रमाणं शृणुत द्विजाः ।
विभज्य नवधा गर्भं मध्ये लिङ्गस्य पीठिका ॥
पादाष्टकञ्च रुचिरं पार्श्वतः परिकल्पयेत् ।
मानेनानेन विस्तारो भित्तीनान्तु विधीयते ॥
पादं पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ।
स एव शिखरस्यापि द्विगुणः स्यात् समुच्छ्रयः ॥
चतुर्द्धा शिखरं भज्य अर्द्धभागद्वयस्य वा ।
शुकनासं प्रकुर्व्वीत तृतीये वेदिका मता ॥
कण्ठमामलसारन्तु चतुर्थे परिकल्पयेत् ।
कपोलयोस्तु संहारो द्विगुणोऽस्य विधीयते ॥
शोभनैश्च प्रवल्लीभिरण्डकैश्च विभूषितः ।
प्रासादेषु तृतीयस्तु मया तुभ्यं निवेदितः ॥
सामान्यमपरं तद्वत् प्रासादं शृणुत द्विजाः ।
नैवेद्यं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः ॥
इत्थं कृत्वा तु मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भन्तु द्विगुणं कुर्य्यान्नेमिमानं भवेदिह ।
स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः ॥
प्राग्ग्रीवपञ्चभागेन निष्क्रामस्तस्य चोच्यते ।
कारयेच्छिखरं तद्वत् प्राकारस्य विधानतः ॥
प्राग्ग्रीवं तस्य मानेन निष्क्रामेण विशेषतः ।
कुर्य्याद्द्वयञ्च भागेन प्राग्ग्रीवं कर्णमूलतः ॥
कारयेत् कनकं तत्र गर्भान्ते द्वारमूलतः ।
एवन्तु त्रिविधं कुर्य्यात् ज्येष्ठमध्यकनीयसम् ॥
लिङ्गमानात् भेदेन रूपभेदेन वा पुनः ।
इति सामान्यतः प्रोक्ता नामतः शृणुताधुना ॥
मेरुमन्दरकैलाशकुम्भसिंहगजास्तथा ।
विमानच्छन्दकस्तद्वच्चतुरस्रस्तथैव च ॥
अष्टास्रः षोड़शास्रश्च वर्त्तुलः सर्व्वभद्रकः ।
वलभी नन्दनश्चैव नन्दिवर्द्धन एव च ॥
सिंहो वृषः सुपर्णश्च पद्मकोऽथ समुद्गकः ।
प्रासादानां मतः प्रोक्तो विभागं शृणुत द्विजाः ॥
शतशृङ्गश्चतुर्द्वारो भूमिकाषोड़शोच्छ्रितः ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश प्रोक्तः कैलासो नवभूमिकः ।
विमानच्छन्दकस्तद्वदनेकशिखरान्वितः ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः ।
विंशाण्डकसमायुक्तो नन्दनः समुदाहृतः ॥
षोडशाण्डकसंयुक्तो नानारूपसमन्वितः ।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥
चन्द्रशालासमोपेतो विज्ञेयः पञ्चभूमिकः ।
वलभी छन्दकस्तद्वच्छुकनासत्रयान्वितः ॥
वृषस्योच्छ्रायतस्तुल्यो मण्डलश्च विवर्ज्जितः ।
सिंहः सिंहाकृतिर्ज्ञेयो गजो गजसमस्तथा ॥
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ।
अङ्गुलीपुटसंस्थानपञ्चाण्डकविभूषितः ॥
षोडशास्रः समन्तात्तु विज्ञेयः स समुद्गकः ।
पार्श्वयोश्चन्द्रशालास्य उच्छ्रयो भूमिकाद्वयम् ॥
तथैव पद्मकः प्रोक्तः उच्छ्रयो भूमिकात्रयम् ।
षोड़शास्रः स विज्ञेयो विचित्रशिखरः शुभः ॥
मृगराजस्तु विख्यातः चन्द्रशालाविभूषितः ।
प्राग्ग्रीवेन विशालेन भूमिका स षडुत्तमाः ॥
अनेकचन्द्रशालस्तु गजप्रासाद उच्यते ।
पर्य्यन्तगृहराजो वै गरुडो नामनामतः ॥
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वितः ।
भूमिकास्तु षड़शीतिर्व्वाह्यतः सर्व्वतो भवेत् ॥
तथान्यो गरुड़स्तद्वदुच्छ्रायो दशभूमिकः ।
पद्मकः षोड़शास्रस्तु भूमिद्वयमथाधिकः ॥
पद्मतुल्यप्रमाणेन श्रीतुष्टक इति स्मृतः ।
पञ्चाण्डकस्त्रिभूमिस्तु गर्भे हस्तचतुष्टयः ॥
वृषो भवति नाम्ना यः प्रासादः सार्व्वकामिकः ।
सप्तकाः पञ्चकाश्चैव प्रासादा ये मयोदिताः ॥
सिंहस्य ते समा ज्ञेया ये चान्येऽन्यतप्रमाणतः ।
चन्द्रशालैः समोपेताः सर्व्वे प्राग्ग्रीवसंयुताः ॥
ऐष्टिका दारवाश्चैव शैलजाश्च सतोरणाः ।
मेरुश्च शतहस्तः स्यान्मन्दरः पञ्चहीनकः ॥
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानकः ।
नन्दिवर्द्धनकस्तद्वद्द्वात्रिंशत् समुदाहृतः ॥
त्रिंशद्भिर्नन्दनः प्रोक्तः सर्व्वतोभद्रकस्तथा ।
एते षोड़शहस्ताः स्युश्चत्वारो देववल्लभाः ॥
कैलासो मृगराजस्तु विमानच्छन्दको गजः ।
एते द्वादशहस्ताः स्युस्तेषां सिंहनादकः ॥
गरुड़ोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ।
एवमेव प्रमाणेन कर्त्तव्याः शुभलक्षणाः ॥
यक्षराक्षसनागानां माल्यहस्तः प्रशस्यते ।
तथा मेर्व्वादयः सप्त ज्येष्ठलिङ्गाः शुभावहाः ॥

श्रीवत्सकादयश्चाष्टौ मध्यमाश्च उदाहृताः ।
तथा सिंहादयः पञ्च कनिष्ठाः शुभदा मताः ॥"
इति विश्वकर्म्मप्रकाशे ५ अध्यायः ॥)

प्रासादकुक्कुटः, पुं, (प्रासादस्य देवभूभुजां गृहस्य कुक्कुट इव । सर्व्वदा प्रासादविहारित्वादस्य तथात्वम् ।) पारावतः । इति त्रिकाण्डशेषः ॥

प्रासिकः, पुं, (प्रासः प्रहरणमस्येति । प्रास + "प्रहरणम् ।" ४।४।५७। इति ठक् ।) प्रासास्त्र-धारी । प्रासप्रहारी । तत्पर्य्यायः । कौन्तिकः २ । इत्यमरः । २ । ८ । ७० ॥

प्रास्थिकः, त्रि, (प्रस्थ + "सम्भवत्यवहरति पचति ।" ५ । १ । ५२ । इति ठञ् । प्रस्थपरिमितधान्यादेः समावेशकः अवहारकः पाचकश्च ।) प्रस्थं सम्भवति प्रास्थिकः कटाहः । प्रस्थं स्वस्मिन् समावेशयतीत्यर्थः । प्रास्थिकी ब्राह्मणी । प्रस्थमवहरति पचति वेत्यर्थः । इति सिद्धान्तकौमुदी ॥ (प्रस्थं परिमाणमस्येति । "तदस्य परिमाणम् ।" ५ । १ । ५७ । इति ठञ् । प्रस्थपरिमितः । यथा, सुश्रुते चिकित्सितस्थाने । १७ अध्याये ।
"यवकोलकुलत्थांश्च प्रास्थिकान् सलिलद्रोणे निःक्वाथ्येति ॥" प्रस्थेन क्रीतमिति । "तेन क्रीतम् ।" ५ । १ । ३७ । इति ठञ् । प्रस्थक्रीतः ॥ प्रस्थस्य वापः । "तस्य वापः ।" ५ । १ । ४५ । इति ठञ् । प्रस्थपरिमितव्रीह्यादिवपनयोग्ये क्षेत्रे । यथा, शब्दरत्नावल्याम् ।
"द्रौणाढ़कखार्य्यादिर्वापादौ द्रौणिकस्तथा ।
स्यादाढ़किकखारीकौ उत्तमर्णादयस्त्रिषु ।
आदिभ्यां प्रास्थिकादिश्च पाकादौ द्रौणिको ऽपि च ॥")

प्राहः, पुं, नृत्योपदेशः । इति शब्दमाला ॥ निर्व्विसर्गश्चेत् प्रपूर्व्वतिवन्तब्रूधातो रूपमप्येवम् ॥ (यथा, भट्टिः ।
"प्राह स्म रामं भरतोऽपि सम्यक् ॥")

प्राह्णः, पुं, (प्रथमश्च तदहश्चेति । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । "अह्नोऽदन्तात् ।" ८ । ४ । ७ । इति णत्वम् ।) पूर्व्वाह्णः । इत्यमरः । १ । ४ । ३ ॥ (यथा, सुश्रुते । ६ । १८ ।
"अञ्जनानि यथोक्तानि प्राह्णसायाह्नरात्रिषु ॥"
तदभिमानिनी देवता च । यथा, भागवते । ७ । १५ । ५४ ।
"अग्निः सूर्य्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् ॥" * ॥
प्रगतमहर्य्यत्रेति विग्रहे । "तिष्ठद्गुप्रभृतीनि च ।" २ । १ । १७ । इत्यव्ययीभावः । प्राह्णदिनयुते, त्रि ॥)

प्राह्णे, व्य, पूर्व्वाह्णे । इति सिद्धान्तकौमुदी ॥

प्राह्णेतनः, त्रि, (प्राह्णे भवः । "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।" ४ । ३ । २३ । इति ट्यु तुट् च ।) पूर्व्वाह्णसम्बन्धी । इति सिद्धान्तकौमुदी ॥

प्राह्णेतरां, व्य, (द्वयोरतिशयेन प्राह्णे । प्राह्णे + "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ।" — "किमेत्याघाद्रव्ये चतरां चतमाम् ।" ४६५ । इति मुग्धबोधसूत्रात् चतराम् ।) अतिशय-पूर्व्वाह्णे । इति मुग्धबोधव्याकरणम् ॥

प्रियः, पुं, (प्रीणातीति । प्री + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) भर्त्ता । इत्यमरः । २ । ६ । ३५ ॥ (यथा, आर्य्यासप्तशत्याम् । ३४७ ।
"प्रणमति पश्यति चुम्बति संश्लिष्यति पुलकमुकुलितैरङ्गैः ।
प्रियसङ्गाय स्फुरितां वियोगिनी वामबाहुलताम् ॥"
जामाता । यथा, मनुः । ३ । ११९ ।
"राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् ।
अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः ॥"
कार्त्तिकेयः । यथा, महाभारते स्कन्दनामानुकीर्त्तने । ३ । २३१ । ५ ।
"अमोघस्त्वनघो रौद्रः प्रियश्चन्द्राननस्तथा ॥")
मृगविशेषः । इति जटाधरः ॥ जीवकौषधम् । इति राजनिर्घण्टः ॥ ऋद्धिनामौषधम् । वृद्धौ, त्रि । इति मेदिनी ॥ (यथा, महाभारते ।
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः ॥")
प्रियोऽप्रियश्च कार्य्यवशाद्भवति । यथा, —
"न हि कस्य प्रियः को वा विप्रियो वा जगत्त्रये ।
काले कार्य्यवशात् सर्व्वे भवन्त्येवाप्रियाः प्रियाः ॥"
इति श्रीकृष्णजन्मखण्डे ५ अध्यायः ॥

प्रियंवदः, पुं, (प्रियं वदतीति । वद् + "प्रियवशे वदः खच् ।" ३ । २ । ३८ । इति खच् । मुम् ।) खेचरः । गन्धर्व्वभेदः । (यथा, रघुः । ५ । ५३ ।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥")
प्रियभाषिणि, त्रि । इति शब्दरत्नावली ॥ तत्कारणं यथा, दानसागरे शिवपुराणम् ।
"गोसहस्रप्रदातारो भूमिदातार एव च ।
ये सुवर्णप्रदातारस्तथा सर्व्वे प्रियंवदाः ॥"
(द्वादशाक्षरवृत्ती, स्त्री । तल्लक्षणं यथा, वृत्तरत्नाकरे ।
"भुवि भवेन्नभजरैः प्रियंवदा ॥")

प्रियकः, पुं, (प्रिय + स्वार्थे संज्ञायां वा कन् ।) पीतशालकः । (यथा, रामायणे । २ । ७१ । १२-१३ ।
"तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ ।
उद्यानमुज्जिहानायाः प्रियका यत्र पादपाः ॥
शालांस्तु प्रियकान् प्राप्य शीघ्रानास्थाय वाजिनः ।
अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ ॥")
नीपः । (यथा, हरिवंशे । ७२ । १५ ।
"प्रियकैः पुष्पितैः गौरं श्यामं बाणासनैः क्वचित् ।
कठोरत्वमिवाभाति निर्म्मयूरस्तं वनम् ॥")
चित्रमृगः । (यथा, माघे । ४ । ३२ ।
"रुचिरचित्रतनूरुहशालिभि-
र्विचलितैः परितः प्रियकव्रजैः ॥"
पक्षिविशेषः । यथा, महाभारते । ३ । १५८ । ५१ ।
"प्रियकैश्चातकैश्चैव तथान्यैर्विविधैः खगैः ॥") ।
अलिः । प्रियङ्गुः । कुङ्कुमम् । इति मेदिनी ॥ धाराकदम्बः । अशनवृक्षः । इति राजनिर्घण्टः ॥ (स्कन्दानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ६० ।
"प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान् ॥")

प्रियङ्करः, त्रि, (प्रियं करोतीति । प्रिय + कृ + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति चकारात् खच् । मुम् ।) प्रियकारकः । यथा,
"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम् ॥"
इति भट्टिः । ५ । ७७ ॥
(दानवविशेषः । यथा, कथासरित्सागरे । ४७ । २४ ।
"महाबुद्ध्यचलाख्यौ च प्रियङ्करशुभङ्करौ ।
एते महारथा यज्ञकविधर्म्मकर्षी तथा ॥")

प्रियङ्करी, स्त्री, (प्रियङ्कर + गौरादित्वात् ङीष् ।) दृढ्जीवन्ती । श्वेतकण्टकारी । अश्वगन्धा । इति राजनिर्घण्टः ॥

प्रियङ्गुः, स्त्री, (प्रियं गच्छतीति । प्रिय + गम् + मृगय्वादित्वात् कुप्रत्ययेन साधुः ।) स्वनामख्यातसुगन्धिवृक्षविशेषः । (यथा, महागणपतिस्तोत्रे । १० ।
"वामे चक्रगदाधरः स भगवान् क्रोडो प्रियङ्गोस्तलं
हस्तोद्यच्छुकशालिमञ्जरिकया देव्या धरण्या सह ॥")
तत्पर्य्यायः । श्यामा २ महिलाह्वया ३ लता ४ गोवन्दनी ५ गुन्द्रा ६ फलिनी ७ फली ८ विष्वक्सेना ९ गन्धफली १० कारम्भा ११ प्रियकः १२ । इत्यमरः । २ । ४ । ५५ ॥ प्रियवल्ली १३ फलप्रिया १४ गौरी १५ वृत्ता १६ कङ्गुः १७ कङ्गुनी १८ भङ्गुरा १९ गौरवल्ली २० शुभगा २१ पर्णभेदिनी २२ शुभा २३ पीता २४ मङ्गल्या २५ श्रेयसी २६ । अस्या गुणाः । शीतलत्वम् । तिक्तत्वम् । दाहपित्तास्रदोषभ्रमवान्तिज्वरवक्त्रजाड्यनाशित्वम् । इति राजनिर्घण्टः ॥ तुवरत्वम् । अनिलनाशित्वम् । रक्तातियोगदौर्गन्ध्यस्वेदगुल्मदाह-विषमोहनाशित्वञ्च । इति भावप्रकाशः ॥ * ॥ राजिका । पिप्पली । कङ्गुः । इति मेदिनी ॥ कटुकी । इति धरणिः ॥

प्रियजनः, पुं, (प्रियो जनः ।) हृद्यलोकः । (यथा, आर्य्यासप्तशत्याम् । ६१६ ।
"सखि ! दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि ।
खल इव दुर्लक्ष्यस्तव विनतमुखस्योपरि स्थितः कोपः ॥")
प्रौढ़भावश्च । यथा, उज्ज्वलनीलमणिः ।
"प्रौढ़भावानुविद्धो यस्तस्य प्रियजनोऽत्र सः ॥"

प्रियजीवः, पुं, (प्रियो जीवो यस्य यस्मिन् वा ।) श्योनाकवृक्षः । इति राजनिर्घण्टः ॥

प्रियतमः, पुं, मयूरशिखावृक्षः। इति शब्दचन्द्रिका ॥ (अयमेषामतिशयेन प्रियः। प्रिय+तमप्।) अतिशयप्रिये, त्रि ॥

प्रियतरः, त्रि, (अयमनयोरतिशयेन प्रियः। प्रिय+तरप्।) अनयोरतिशयेन प्रियः। इति व्याकरणम् ॥ (यथा, गो० रामायणे। २। ३६। ७।
"प्राणेभ्योऽपि प्रियतरो ज्येष्ठो भ्राता गुरुश्च ते।
तस्मादस्य प्रयत्नेन त्वं शरीरं प्रतिपालय ॥")

प्रियता, स्त्री, (प्रिय+तल्।) प्रियस्य भावः। हार्द्दम्। इत्यमरः। १।७।२७ ॥ (यथा, मनुः। ५। ५०।
"न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्।
न लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥")

प्रियतोषणः, पुं, (प्रियस्य तोषणं यस्मात्। यद्वा, प्रियं तोषयतीति। तुष्+णिच्+ल्युः।) षोड़शबन्धातिरिक्तरतिबन्धविशेषः। तस्य लक्षणं यथा,—
"नारी पादौ स्वहस्तेन धारयेज्जघनोपरि।
स्तनापीड़करः कामी कामयेत् प्रियतोषणः ॥"
इति रतिमञ्जरी ॥
प्रियस्य तुष्टिकारिणि, त्रि ॥

प्रियत्वं, क्ली, (प्रियस्य भावः। प्रिय+त्व।) प्रियता। तत्पर्य्यायः। प्रेम २ प्रेमा ३ स्नेहः ४ प्रणयः ५ हार्द्दम् ६ प्रियता ७ स्निग्धता ८। इति शब्दरत्नावली ॥

प्रियदर्शनः, त्रि, (प्रियं दर्शनं यस्य।) सुदृश्यः। तत्पर्य्यायः। चक्षुष्यः २। इति जटाधरः ॥ (यथा, रघुः। १। ४७।
"तत्तद्भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥")

प्रियदर्शनः, पुं, (प्रियं दर्शनं यस्य।) शुकपक्षी। क्षीरिकावृक्षः। इति जटाधरः ॥ (गन्धर्व्वविशेषः। यथा, रघुः। ५। ५३।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥")

प्रियप्रायं, क्ली, (प्रियस्य प्रायो यत्र।) प्रियवाक्यम्। तत्पर्य्यायः। चटु २ चाटु ३। इति हेमचन्द्रः। २। १७८ ॥

प्रियप्रेप्सुः, त्रि, (प्रियं प्रेप्सतीति। प्र+आप्+सन्+उः।) इष्टार्थोद्युक्तम्। उत्सुकः। इति जटाधरः ॥

प्रियमधुः, पुं, (प्रियं मधु मद्यं यस्य।) बलरामः। इति हेमचन्द्रः। २। १३८ ॥

प्रियवर्णी, स्त्री, (प्रियो वर्णो यस्याः। गौरादित्वात् ङीष्।) प्रियङ्गुः। इति जटाधरः ॥

प्रियवल्ली, स्त्री, (प्रिया मनोज्ञा वल्ली लता।) प्रियङ्गुः। इति राजनिर्घण्टः ॥

प्रियवादी, [न्] त्रि, (प्रियं मनोज्ञं वदतीति। वद्+णिनिः।) मनोज्ञवक्ता। यथा, चाणक्ये।
"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥"
(यथा च पञ्चतन्त्रे। २। १७४।
"सुलभाः पुरुषा राजन्! सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥")

प्रियव्रतः, पुं, (प्रियं व्रतं यस्य।) स्वायम्भुवमनुपुत्रः। यथा,—
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥"
इत्यग्निपुराणम् ॥
(प्रियाणि व्रतानि यस्येति विग्रहे व्रतप्रिये, त्रि। यथा, ऋग्वेदे। १०। १५०। ३।
"अग्ने देवाँ आवह नः प्रियव्रतान्
मृळीकाय प्रियव्रतान् ॥")

प्रियसखः, पुं, (प्रियः सखा च हितकारित्वात्। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) खदिरः। इति शब्दचन्द्रिका ॥ प्रियश्चासौ सखा चेति। (प्रियबन्धुः। यथा, मेघदूते। १२।
"आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम् ॥")
प्रियस्य सखा इति च। इति व्याकरणम् ॥

प्रियसत्यं, क्ली, (प्रियं सत्यमिति कर्म्मधारयः।) सूनृतवाक्यम्। इति हेमचन्द्रः। २। १७८ ॥
(प्रियं सत्यं यस्येति विग्रहे सत्यप्रिये, त्रि ॥)

प्रियसन्देशः, पुं, (प्रियं सन्दिशतीति। प्रिय+सम्+दिश+अण्।) चम्पकवृक्षः। इति शब्दचन्द्रिका ॥ (प्रियः सन्देश इति कर्म्मधारयः।) प्रियसंवादश्च ॥

प्रियसालकः, पुं, (प्रियः सालः। ततः स्वार्थे कन्।) असनवृक्षः। इति राजनिर्घण्टः ॥ पेयासाल इति ख्यातः ॥

प्रिया, स्त्री, (प्रिय+टाप्।) नारी। इति शब्दरत्नावली ॥ भार्य्या। इति हेमचन्द्रः ॥ (यथा, कुमारे। ३। ३८।
"पुष्पासवाघूर्णितनेत्रशोभि
प्रियामुखं किम्पुरुषश्चुचुम्बे ॥")
एला। इति शब्दचन्द्रिका। मल्लिका। मदिरा। इति राजनिर्घण्टः ॥ वार्त्ता। इति धरणिः ॥ (पञ्चाक्षरच्छन्दोविशेषः। इति छन्दोमञ्जरी ॥)

प्रियाम्बुः, पुं, (प्रियमम्बु यस्य।) आम्रवृक्षः। इति राजनिर्घण्टः ॥ तत्फले कुद्यजले च स्त्री ॥ (जलप्रिये, त्रि ॥)

प्रियालः, पुं, (प्रियाय हिताय अलति पर्य्याप्नोतीति। अल+अच्।) वृक्षभेदः। पियाल इति भाषा। अस्य बीजं चिरञ्जीति प्रसिद्धम्। तत्पर्य्यायः। चारः २ अखट्टः ३ खरस्कन्धः ४ ललनः ५ चारकः ६ बहुवल्कः ७ सन्नद्रुः ८ तापसप्रियः ९ स्नेहबीजः १० उपवटः ११ मधबीर्य्यः १२। इति राजनिर्घण्टः ॥ पियालः १३। इत्यमरः। २।४।३५ ॥ बहुलवल्कलः १४ राजादनम् १५ तापसेष्टः १६ सन्नकद्रुः १७ धनुःपटः १८। अस्य गुणाः। पित्तकफास्रनाशित्वम् ॥ तत्फलगुणाः। मधुरत्वम्। गुरुत्वम्। स्निग्धत्वम्। सरत्वम्। मरुत्पित्तदाहज्वरतृष्णापहत्वञ्च। तन्मज्जगुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तानिलापहत्वम्। हृद्यत्वम्। दुर्ज्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाशः ॥ अपि च।
"चारस्य च फलं पक्वं वृष्यं गौल्याम्लकं गुरु।
तद्बीजं मधुरं वृष्यं पित्तदाहार्त्तिनाशनम् ॥"
इति राजनिर्घण्टः ॥

प्रियाला, स्त्री, (प्रियाय अलतीति। अल+अच्+टाप्।) द्राक्षा। इति राजनिर्घण्टः ॥

प्रियोदितं, त्रि, (प्रियाय प्रियेण वा यदुदितम्। प्रियमुदितमिति वा।) चाटुवाक्यम्। इति शब्दरत्नावली ॥ प्रियवाक्यविषयः ॥ (प्रियकथितवाक्यञ्च ॥)

प्री, क तर्पणे। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अनिट्।) क, शं प्राययन्ति कविसूक्तिरसायनानि। इति हलायुधः ॥ प्रीणयत्यपीति केचित्। इति दुर्गादासः ॥

प्री, ङ य प्रीतौ। कान्तौ। इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट्।) प्रीतिरिह प्रीतीभावः। ङ य, यः प्रीयते प्रणयिषु। इति हलायुधः। इति दुर्गादासः ॥

प्री, ञ तर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट्।) ञ, प्रयति प्रयते। इति दुर्गादासः ॥

प्री, ञ श कान्तौ। तर्पणे। इति कविकल्पद्रुमः ॥ (क्र्या०-उभ०-अक०-सक० च अनिट्।) तर्पणमिह प्रीतीभावः प्रीतीकरणञ्च। ञ श, प्रभुः प्रीणातु विश्वभुक्। प्रीणाति बान्धवजनानिति हलायुधः। प्रीणीते। इति दुर्गादासः ॥

प्रीः, स्त्री, (प्री+क्विप्।) प्रीतिः। इति कलधातुटीकायां दुर्गादासः ॥ प्रथमा विभक्तिः। यथा, "त्रिशः प्रीद्वौत्रौचौपौषौभ्रः। स्यादीनि त्रीणि त्रीणि क्रमात् प्रीद्वौभौचौपौषौभ्रौसंज्ञानि स्युः।" इति मुग्धबोधव्याकरणम् ॥

प्रीणः, त्रि, (प्र+"नश्च पुराणे प्रात्।" ५।४।२५। इत्यस्य वार्त्तिकोक्त्या खः।) पुरातनः। इति त्रिकाण्डशेषः ॥ प्रीतः। इति व्याकरणम् ॥

प्रीणनं, क्ली, (प्री+स्वार्थे णिच्+ल्युट्। धूञ् प्रीञोरिति नुक्।) तृप्तिकरणम्। तत्पर्य्यायः। तर्पणम् २ अवनम् ३। इत्यमरः। ३। २। १ ॥ (यथा, महानिर्व्वाणतन्त्रे। २। ४७।
"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्।
तदाराधनतो देवि! सर्व्वेषां प्रीणनं भवेत् ॥")

प्रीणसः, पुं, गण्डकः। इति राजनिर्घण्टः ॥

प्रीतः, त्रि, (प्रीञ् प्रीणने+क्तः।) प्रीतियुक्तः। तत्पर्य्यायः। हृष्टः २ मत्तः ३ तृप्तः ४ प्रह्लन्नः ५ प्रमुदितः ६। इत्यमरः। ३।१।१०३ ॥ तुषितः ७। (यथा, महाभारते। ४। ४०। २।
"प्रीतोऽस्मि पुरुषव्याघ्र। न भयं विद्यते तव।
सर्व्वांस्तुदामि ते शत्रून् रणे रणविशारद! ॥")
क्ली, नर्म्म। इति मेदिनी। ते, ३३ ॥

प्रीतिः, स्त्री, (प्रीञ् तर्पणे+भावे क्तिन्।) तृप्तिः। (यथा, रामायणे। १। ६८। १२।

"प्रतिज्ञा मम राजेन्द्र ! निर्वर्त्तयितुमर्हसि ।
पुत्त्रयोरुभयोरेव प्रीतिं समुपकल्पये ॥") ।
तत्पर्य्यायः । मुत् २ प्रमदः ३ हर्षः ४ प्रमोदः ५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ शर्म्म १० सातम् ११ सुखम् १२ । इत्यमरः । १ । ४ । २४ ॥ केचित्तु । मुदादित्रयकं प्रीतौ । आनन्दथ्वादित्रयकं सुखे इत्याहुः इति भरतः ॥ इष्टदर्शनजन्यं सुखम् । इति मोक्षधर्म्मे नीलकण्ठः ॥ कामपत्नी । इति मेदिनी । ते, ३४ ॥ सा पुरा अनङ्गवती वेश्या आसीत् विभूतिद्वादशीव्रतं कृत्वा रत्याः सपत्नी जाता । यथा,—
"वेश्यानङ्गवती नाम विभूतिद्वादशीव्रतम् ।
समाप्य माघमासस्य द्वादश्यां लवणाचलम् ॥
निवेदयन्ती गुरवे शय्याञ्चोपस्करान्विताम् ।
अलंकृत्य हृषीकेशं सौवर्णामरपादपम् ॥
सा चानङ्गवती वेश्या कामदेवस्य साम्प्रतम् ।
पत्नी सपत्नी संजाता रत्याः प्रीतिरिति श्रुता ॥"
इति मात्स्ये ९२ अध्यायः ॥
विष्कम्भादिसप्तविंशतियोगान्तर्गतद्वितीययोगः । तत्र जातफलम् ।
"प्रसूतिकाले यदि प्रीतियोगो
नरो नरोगः सुखवान् विनोदी ।
स्त्र्यनुरक्तो विदुषां प्रपन्नः
संप्रार्थितो यच्छति वित्तमेव ॥"
इति कोष्ठीप्रदीपः ॥
प्रेम । इति मेदिनी । ते, ३४ ॥

प्रीतिजुषा, स्त्री, (प्रीतिं जुषते सेवते इति । जुष् सेवने + कः । टाप्) अनिरुद्धपत्नी । उषा । इति शब्दरत्नावली ॥ (प्रीतिभाजि, त्रि ॥)

प्रीतिदः, पुं, (प्रीतिं ददातीति । दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भण्डः । भाँड़ इति भाषा । तत्पर्य्यायः । वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रहासी ६ । इति हेमचन्द्रः ॥ हर्षसुखप्रेमदातरि, त्रि ॥

प्रीतिदत्तं, क्ली, (प्रीत्या दत्तमिति ।) प्रीत्या दत्तवस्तु । यथा, मिताक्षरायाम् ।
"प्रीत्या दत्तन्तु यत् किञ्चित् श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकञ्चैव प्रीतिदत्तं तदुच्यते ॥"
भावे क्तप्रत्यये प्रीतिदानञ्च ॥

प्रीतिभोज्यं, त्रि, (प्रीत्या भोज्यम् ।) प्रीत्या भक्षणीयमन्नादि । यथा,—
"अन्नानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयसे राजन् न चैवापद्गता वयम् ॥"
इति महाभारते । ५ । ९१ । २५ ॥

प्रु, ङ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) रेफयुक्तः । ङ, प्रवते । इति दुर्गादासः ॥

प्रुष, उ दाहे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् । उदित्वात् क्त्वावेट् ।) उ, प्रोषित्वा प्रुष्ट्वा । दाहि भस्मीकरणे । इति दुर्गादासः ॥

प्रुष, श स्नेहे । पूर्त्तौ । क्लेदे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-स्नेहे पूर्त्तौ च सक०-क्लेदे अक०-सेट् ।) श, प्रुष्णाति पुप्रोष । स्नेहस्थाने मोचनमिति धातुप्रदीपभट्टमल्लौ । इति दुर्गादासः ॥

प्रुष्टः, त्रि, (प्रुष् दाहे + क्तः ।) दग्धः । इत्यमरः । ३।१।९९ ॥ (यथा, राजतरङ्गिण्याम् ।६।१४४ ।
"सा यागव्यजने राजललना पीतसर्पिषि ।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ।
उपर्य्यस्या निरस्तासोः प्रुष्टाः कुसुमवृष्टयः ॥")

प्रुष्वः, पुं, (प्रुष्णाति सिञ्चति पिपर्त्ति वेति । प्रुष् + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।" उणा० १ । १५१ । इति क्वन् टाप् ।) ऋतुः । (प्रोषति दहतीति ।) दिवाकरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रुष्वा, स्त्री, (प्रुष्णाति सिञ्चतीति । प्रुष् + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।" उणा० १ । १५१ । इति क्वन् । टाप् ।) जलबिन्दुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, शतपथब्राह्मणे ।५।३।४।१६ । "अथ प्रुष्वा गृह्णाति ॥")

प्रेक्षणं, क्ली, (प्रेक्षते पश्यत्यनेनेति । प्र + ईक्ष + करणे ल्युट् ।) चक्षुः । इति शब्दरत्नावली ॥ (भावे ल्युट् ।) दर्शनम् । यथा, रसमञ्जरी ।
"सञ्चारो रतिमन्दिरावधि पदन्यासावधि
प्रेक्षणम् ॥"

प्रेक्षणकूटः, पुं, (प्रेक्षणस्य कूटः ।) चक्षुर्गोलकः । यथा, पाण्डुरोगपूर्ब्बरूपे माधवकरः ।
"त्वक्स्फोटनष्ठीवनगात्रसाद-
मृद्भक्षणप्रेक्षणकूटशोथाः ॥"

प्रेक्षा, स्त्री (प्रकर्षेण ईक्षते ययेति । प्र + ईक्ष + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) प्रज्ञा । (यथा, महाभारते ।३।१३६।७।
"सा तस्मै सर्व्वमाचष्ट यवक्रीभाषितं शुभा ।
प्रत्युक्तञ्च यवक्रीतं प्रेक्षापूर्ब्बं तथात्मना ॥")
नृत्येक्षणम् । इत्यमरः । ३ । ३ । २२३ ॥ (यथा, मनौ । ९ । ८४ ।
"प्रतिषिद्धापि चेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि
षट् ॥"
प्र + ईक्ष् + भावे अः । टाप् ।) ईक्षणम् । इति भरतः ॥ (यथा, भागवते ।३ । १६ । ७ ।
"यत्सेवया चरणपद्मपवित्ररेणुं
सद्यःक्षताखिलमलं प्रतिलब्धशीलम् ।
न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थमितरे नियमान् वहन्ति ॥")
शाखा । इति शब्दरत्नावली॥ (शोभा । यथा, भागवते । ३ । ८ । २५ ।
"प्रेक्षां क्षिपन्तं हरितोपलाद्रेः
सन्ध्याभ्रनीवेरुरुरुक्ममूर्द्ध्नः ।
रत्नोदधारौषधिसौमनस्य-
वनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः ॥"
"हरितोपलाद्रेर्मरकतशिलामयपर्व्वतस्य प्रेक्षां शोभां क्षिपन्तं स्वकान्त्यातिशयेन तिरस्कुर्व्वन्तम् ॥" इति तट्टीकायां स्वामी ॥)

प्रेङ्खत् [त्] त्रि, (प्र + इखि गतौ + शतृ ।) चलनविशिष्टः । संचलितविशिष्टः । यथा,—
"श्वासाञ्चितबृहत्कटकाम्बुजपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ॥"
इत्याद्यसप्तशतके । १ ॥

प्रेङ्खा, स्त्री, (प्रेङ्खते गच्छत्यनयेति । प्र + इखि गतौ + करणे घञ् । टाप् ।) दोला । इत्यमरः । २ । ८ । ५३ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये । "नातिशीघ्रयानयानप्रेङ्खाद्यत्यन्तकरेणाभियायात् ॥"*॥) पर्य्यटनम् । अश्वगतिः । संवेशनान्तरम् । इति मेदिनी । खे, ३ ॥ नृत्यम् । इति धरणिः ॥

प्रेङ्खितं, त्रि, (प्र + इखि गतौ + क्तः ।) कम्पितम् । इत्यमरः । ३ । १ । ८७ ॥

प्रेङ्खोल, तृ क चालने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) अन्तःस्थतृतीयोपधः । अपिप्रेङ्खोलत् । चालनं चञ्चलीभावः । इति दुर्गादासः ॥

प्रेङ्खोलनं, क्ली, (प्रेङ्खोल्यते चाल्यतेऽनेनेति । प्रेङ्खोल + करणे ल्युट् ।) दोला । इति हेमचन्द्रः ॥ (भावे ल्युट् । कम्पनम् । यथा, सुश्रुते निदानस्थाने ८ अध्याये । "विरेचनप्रेङ्खोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः ॥")

प्रेङ्खोलितं, त्रि, (प्रेङ्खोल + क्तः ।) दोलितम् । तत्पर्य्यायः । तरलितम् २ दुलितम् ३ प्रेङ्खितम् ४ धुतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १० । इति हेमचन्द्रः ॥

प्रेतः, पुं, (प्र + इ गतौ + क्तः ।) नरकस्थप्राणी । इत्यमरः ।३ । ३ । ५९ ॥ भूतभेदः । मृते, त्रि । इति मेदिनी । ते, ३७ ॥ (यथा, मनुः ।२।२४७।
"आचार्य्ये तु खलु प्रेते गुरुपुत्त्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवत् वृत्तिमाचरेत् ॥")
वैदिकविधानेन और्द्ध्वदेहिकाभावात् विष्णुद्वेषाच्च बहुनरकभोगान्ते प्रेतशरीरं भवति । यथा,—
लोमश उवाच ।
"ततो बहुतिथे काले स राजा पञ्चतां गतः ।
वैदिकेन विधानेन न लेभे चौर्द्ध्वदेहिकम् ॥
विष्णुप्रद्वेषमात्रेण युगानां सप्तविंशतिम् ।
भुक्त्वा च यातनां याम्यां निस्तीर्णनरको नृपः ॥
समया गिरिराजस्य पिशाचोऽभूत्तदा
महान् ॥"
तस्य रूपं यथा,—
"देवद्युतिरधीयानः शुभाय कृताश्रमः ।
समागत्य ततस्तत्र तं पिशाचं ददर्श सः ॥
विकरालमुखं दीनं पिशङ्गनयनं भृशम् ।
ऊर्द्ध्वकेशं नग्नाङ्गं यमदूतमिवापरम् ॥
चलज्जिह्वञ्च लम्बोष्ठं दीर्घजङ्घशिराकुलम् ।
दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्त्ताक्षं शुष्कपञ्जरम् ॥"
इति पाद्मोत्तरखण्डे १६ अध्यायः ॥*॥

प्रेतत्वादिजनककर्म्माणि यथा,—
"हरिर्व्वैकृति नाम्नी ये गोविन्दं नार्च्चयन्ति ये।
सभक्त्या नामविद्याञ्च सुतीर्थेषु वसन्ति ये ॥
सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुतनदारका: ॥
ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चका: ॥
नास्तिका: कुहकाश्चौरा ये चान्ये बकव्रताः।
बालवृद्धातुरस्त्रीषु निर्द्दया: सत्त्ववर्ज्जिता: ॥
अग्निदा गरदा ये च ये चान्ये कूटसाक्षिण:।
अगम्यागामिन: सर्व्वे ये चान्ये ग्रामयाजिन: ॥
स्वाध्यायरतसम्पन्ना वर्णादिधर्म्मवर्ज्जिता:।
देवोपदेवद्रव्यस्य चौर्य्याद्युपजीविन: ॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विष:।
देवतोच्छिष्टपतितदुष्टमांसान्नभोजिन: ॥
असत्कर्म्मरता नित्यं सर्व्वघातकपापिन:।
पाषण्डधर्म्मचरका: पुरोधोवृत्तिजीविन: ॥
मित्रमातृस्नुषापत्नीसुदारगामिनश्च ये।
ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्म्मदूषका: ॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषका: ॥
महाक्षेत्रेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसका: ॥
परापवादिन: पापा देवतागुरुनिन्दका:।
कुप्रतिग्राहिण: सर्व्वे सम्भवन्ति पुन: पुन: ॥
प्रेतराक्षसपैशाचतिर्य्यग्दृश्यकुयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च ॥"
इति पाद्मोत्तरखण्डे १८ अध्याय: ॥*॥

पञ्चप्रेतोपाख्यानं यथा,—
ब्राह्मण उवाच।
"प्रेतानां नामजातीनां युष्माकं सम्भव: कथम्।
किन्नु कारणमुद्दिश्य यूयमीदृङ्नामका: ॥
प्रेता ऊचु:।
अहं स्वादु सदा भुक्त्वा ददौ पर्य्युषितं सदा।
एतत्कारणमुद्दिश्य नाम पर्य्युषितं मम ॥ १ ॥
सूचिता बहवोऽनेन विप्राद्या ह्यन्नकाङ्क्षिण:।
एतत् कारणमुद्दिश्य सूचीमुखमिमं विदु: ॥ २ ॥
शीघ्रं गच्छति विप्रेण याचित: क्षुधितेन वै।
पश्चाद्भुङ्क्ते द्विज: शीघ्रमेव शीघ्रक उच्यते ॥ ३ ॥
गृहोपरि सदा भुङ्क्ते स्वादु द्विजभयेन हि।
द्विजाय कुत्सितं दत्त्वा एष रोहक उच्यते ॥ ४ ॥
मौनेनापि स्थितो नित्यं याचितो विलिखन्महीम्।
अकार्य्यमपि पापिष्ठो लेखको नाम एष वै ॥ ५ ॥
मेढ्रेण लेखको याति रोहक: पार्श्वत:शिरा:।
शीघ्रक: पङ्गुतां प्राप्त: सूची सूचीमुखोऽभवत् ॥"
प्रेतानामाहारो यथा,—
द्विज उवाच।
"ये जीवा भुवि तिष्ठन्ति सर्व्वे आहारमूलका:।
युष्माकमपि आहारं श्रोतुमिच्छामि तत्त्वत: ॥
प्रेता ऊचु:।
शृणु आहारमस्माकं सर्व्वसत्त्वविगर्हितम्।
श्लेष्ममूत्रपुरीषैश्च योषिताञ्च मलेन च ॥
गृहाणि ह्यशुचीन्यत्र प्रेता भुञ्जन्ति तत्र वै ॥
स्त्रीभिर्भग्नानि जीर्णानि संकीर्णोपहतानि च।
मलेनातिजुगुप्सानि प्रेता भुञ्जन्ति तत्र वै ॥
भयलज्जाविहीनानि पतितै: सेवितानि च।
अन्योन्यदस्युयुक्तानि प्रेता भुञ्जन्ति तत्र वै ॥
कलहाक्रान्तशोकानि शब्दशोभानि मज्जनै:।
सवर्णकानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै ॥
बलिमन्त्रविहीनानि हिंसाद्यष्टानि यानि तु।
नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै ॥
गुरवो नैव पूज्यन्ते स्त्रीजितानि भजानि च।
सक्रोधान्यविवाहानि प्रेता भुञ्जन्ति तत्र वै ॥
भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च।
अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते ॥
सकेशमक्षिकोच्छिष्टं पूतिपर्य्युषितं तथा।
सक्रोधश्च सशोकश्च तत्र प्रेतेषु भोजनम् ॥
सगन्धं भोजनं यत्र शीतरीषं पदाहतम्।
शोणितं साश्रुदीर्घं तत्र प्रेतेषु भोजनम् ॥
अर्द्धपाकं महापाकं सोतुच्छिन्नं पतितं तथा।
दुर्भक्तं गोलिकञ्चैव तत्र प्रेतेषु भोजनम् ॥
शीतलं च्युतकञ्चैव रजसं कलुषीकृतम्।
निर्दोषं द्विजवक्त्रे यद्भुक्तं प्रेतिकन्तु तत् ॥
एतत्ते कथितं सर्व्वं यत् प्रेतेष्वेव भोजनम्।
निर्व्विण्णा: प्रेतभावाद्वै पृच्छामस्त्वां द्विजो-
त्तम! ॥"*॥

प्रेतत्वाभावकारणं यथा,—
"न प्रेतो जायते येन येन चैवेह जायते।
एतत् सर्व्वं समासेन प्रब्रूहि वदतां वर! ॥
ब्राह्मण उवाच।
एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्।
व्रतञ्चर्णुषियो यस्तु न प्रेतो जायते नर: ॥
मिष्टान्नपानदाताच सततं श्रद्धयान्वित:।
देवपूजाकरो नित्यं न प्रेतो जायते नर: ॥
निरग्निरेकपञ्चाग्निर्निरग्निर्वाप्युपासक:।
सर्व्वभूतदयापन्नो न प्रेतो जायते नर: ॥
तुल्यमानापमानश्च तुल्य: काञ्चनलोष्टयो:।
तुल्य: शत्रौ च मित्रे च न प्रेतो जायते नर: ॥
देवतातिथिपूजासु गुरुजातिषु नित्यश:।
वेदशास्त्ररतो नित्यं न प्रेतो जायते नर: ॥
जितक्रोधो मदैश्वर्य्यदम्भलोभविवर्ज्जित:।
क्षमाक्रोधसुशीलश्च न प्रेतो जायते नर: ॥
देवतातिथिपूजासु पर्व्वताश्च नदीस्तथा।
पश्येद्दिवाजलाश्चैव न प्रेतो जायते नर: ॥"*॥

प्रेतत्वकारणं यथा,—
"शूद्रान्नं यो द्विजो भुङ्क्ते य: क्रामति द्विजो-
त्तमम्।
दूषिता द्विजदेवेषु स प्रेतो जायते नर: ॥
मातरं पितरं दृष्ट्वा ज्ञातिं साधुजनं तथा।
लोभात् त्यजति य: स्नेहं स प्रेतो जायते नर: ॥
अयाज्ययाजकश्चैव याज्यञ्च परिवर्ज्जयेत्।
शूद्राद्युपहकर्त्ता च स प्रेतो जायते नर: ॥
कुज्योतिषि कुविप्रस्तु कुजनेषु कुदेशक:।
शूद्रसेवाकरो राज्ञां स प्रेतो जायते नर: ॥
सेवकापापहृतो य: सेवकस्वपरिग्रह:।
त्वाशुभावपि जाते प्रेतो कालान्तरेऽपि स: ॥
द्विजाद्यमन्त्रितो भुङ्क्ते शूद्रान्नं वा द्विजस्तु।
शूद्रेणैव द्विज: प्रेतो निरयाद्युपगच्छति ॥
गीतवाद्यरतो नित्यं मद्यपस्त्रीनिषेवणात्।
द्यूतमांसप्रियो यस्तु स प्रेतो जायते नर: ॥
वृथारेतो वृथामांसो वृथावादी वृथामति:।
निन्दको द्विजदेवानां स प्रेतो जायते नर: ॥
दृष्टं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै।
कन्यां ददाति शुल्केन स प्रेतो जायते नर:।
न्यासापहर्त्ता मित्रध्रुक् परपाकरतस्तथा।
विश्वस्तघाती कूटश्च स प्रेतो जायते नर: ॥
निर्द्दोषान् सुहृदो भार्य्यां त्यजेत् कालान्न
पाति य:।
धनमीहेत यस्तेषां स प्रेतो जायते नर: ॥
वृद्धम्बरधनागारान् व्रतशुद्ध्यासनादि य:।
तस्याजिनञ्च गृह्णाति ब्रवायनस्तु मतो द्विज: ॥
तथोभयमुखीं कालं सप्तेजां मेदिनीं द्विज:।
कुलस्त्रीसङ्घ यद्दानं चाकाशात् पतितास्तथा।
मासिकेऽपि नवश्राद्धे भुञ्जन् प्रेतान्न मुच्यते ॥
ब्रह्महा गोवधी स्तेयी सुरापो गुरुतल्पग:।
भूमिकन्यापहर्त्ता य: स प्रेतो जायते नर: ॥
नानासङ्करसंमिश्रं मर्त्त्यसङ्करणस्तथा।
योनिसङ्करणश्चापि स प्रेतो जायते नर: ॥
विक्रीणाति विषं शस्त्रं तिलानां लवणस्य तु।
गवां केशादिकां मोहात् विक्रयात् प्रेततां
व्रजेत् ॥
कूटमाप्ये च तौल्येन क्रयं क्रीणाति विक्रयात्।
मद्यतक्रपयोदध्ना स प्रेतो जायते नर: ॥
स्त्रीरतो मद्यपानी तु स्वगामानुधावति।
नित्यनैमित्तिकेऽदाता स प्रेतो जायते नर: ॥"
स्कन्दपुराणम् ॥*॥

मनुष्याणां आतिवाहिकदेहानन्तरं प्रेतदेहो भवति। यथा, विष्णुधर्म्मोत्तरे।
"तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्।
आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव! ॥
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्।
प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव! ॥
भोगदेहमिति प्रोक्तं क्रमादेव न संशय:।
प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोचनम् ॥
श्मशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते।
तत्रास्य यातना घोरा: शीतवातातपोद्भवा: ॥
तत: सपिण्डीकरणे बान्धवै: स कृते नर:।
पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते ॥
तत: स नरके याति स्वर्गे वा स्वेन कर्म्मणा ॥"
इति शुद्धितत्त्वम् ॥

प्रेतकार्य्यं, क्ली, (प्रेताय प्रेतस्य वा कार्य्यम्।) मृतस्य दाहादिसपिण्डीकरणान्तं कर्म्म। यथा,
"असत्वा प्रेतकार्य्याणि प्रेतस्य धनहारक:।
वर्णानां यदधे प्रोक्तं तद्व्रतं नियतश्चरेत् ॥"
इति दायतत्त्वम् ॥

(यथाच महाभारते। १। १०२। ६५।

"धर्म्मात्मा स तु माङ्गेयश्चिन्ताशोकपरायणः।
प्रेतकार्य्याणि सर्व्वाणि तस्य सम्यगकारयत्॥")

प्रेतगृहं, क्ली, (प्रेतस्य गृहम्।) श्मशानम्। इति हेमचन्द्रः। ४। ५५॥

प्रेततर्पणं, क्ली, (प्रेतस्य तर्पणम्।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतशब्दोल्लेखेन जलदानम्। यथा। "अथ प्रेततर्पणे तिलाञ्जलि विशेषो-पादानात् सूर्य्यादिवारेणापि तिलैरेव तर्पणं प्रतीयते॥ तदनुष्ठानं यथा। अपः सर्व्वे प्रव-श्यैर्गो गत्वा पितृपदस्थाने प्रेतपदोहेन द्वितो-यान्तं तर्पयेयुः पितृशब्दोच्चारणेऽपि पितृत्वा भवति। एतेन अमुकगोत्रं प्रेतं अमुकदेव-शर्म्माणं तर्पयामि। इति सामगानां प्रयोगः। यजुर्व्वेदिनान्तु अमुकगोत्र प्रेत अमुकदेवशर्म्मन् तृप्यस्व। इति सम्बोधनान्तवाक्यम्।" इति शुद्धितत्त्वम्॥

प्रेतदेहः, पुं क्ली, (प्रेतस्य देहः।) प्रेतशरीरम्। यथा,—
"ततो सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरीयवचनम्॥
पूरकपिण्डदानेन तदुत्पत्तिर्यथा,—
"शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा।
द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः॥
गलांसभुजवक्षांसि तृतीयेन यथाक्रमात्।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाडयः॥
दन्तलोमाद्यष्टमेन वीर्य्यञ्च नवमेन तु।
दशमेन च पूर्णत्वं तृप्तता क्षुद्विपर्य्ययः॥"
इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

प्रेतनदी, स्त्री, (प्रेतनरकीया नदी।) वैतरणी। इति शब्दरत्नावली॥

प्रेतपक्षः, पुं, (प्रेतप्रियः पक्षः।) गौणचान्द्रा-श्विनकृष्णपक्षः। तत्र मृतस्य पार्व्वणविधिना सांवत्सरिकं श्राद्धं कर्त्तव्यम्। यथा,—
"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे॥
तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम्॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥" इति।
तत्र मृतस्य।
"सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते।
तत्र तत्र च तं कुर्य्याद्वर्ज्जयित्वा मृताहनि॥
अमावास्या क्षयो यस्य प्रेतपक्षेऽथवा पुनः।
सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्व्वणो विधिः॥"
इति शूद्रोक्तेन प्रत्याब्दिकं पार्व्वणविधिना कर्त्त-व्यम्। इति मलमासतत्त्वम्॥ *॥ तत्र निषिद्ध-दिनेऽपि तिलतर्पणं कर्त्तव्यम्। यथा, स्मृतिः।
"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम्॥"
इति च मलमासतत्त्वम्॥

प्रेतपटहः, पुं, (प्रेतस्य पटहः।) मरणकाले वादनीयवाद्यविशेषः। तत्पर्य्यायः। भवषत् २ मृत्युभङ्गुरकः ३। इति त्रिकाण्डशेषः॥

प्रेतपतिः, पुं, (प्रेतानां पतिः।) यमः। इति हलायुधः॥ (यथा, मार्कण्डेये। १०८। ४।
"दक्षः प्रेतपतिः शक्तिर्देवसेनापतिस्तथा।
अन्येषाञ्चैव देवानामायुधानि स विन्यसन्।
चकार तेजसा भागोभांसुराख्यविशान्तये॥")

प्रेतपिण्डः, पुं, (प्रेताय देयः पिण्डः।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतसम्प्रदानकपिण्डाकारा-न्नम्। यथा,—
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके।
भागितेतच्च वै पिण्डं यच्छदत्तस्य पूरकम्॥" *॥
तत्तत्पिण्डस्य प्रेताङ्गकरणत्वं यथा, ब्रह्मपुराणे।
"शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा।
द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः॥
गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाडयः॥
दन्तलोमाद्यष्टमेन वीर्य्यञ्च नवमेन तु।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्य्ययः॥" *॥
तदकरणे दोषो यथा,—
"प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोचनम्।
श्मशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते॥" *॥
पूरकपिण्डदानादर्व्वाक्तिकर्त्तव्यता यथा। पार-स्करः। प्रेताय पिण्डं दत्त्वा अवनेजनदान-प्रत्यवनेजनेषु नामग्राहं मृताय ते राचिं विहायसि चीरोदके निदध्युः प्रेतात्र स्नाहि पिब चेदं चीरमित्युच्चार्य्येति। अत्र दानशब्देन पिण्डदानमुक्तं बहुवचनात्। तेनावनेजनपिण्ड-दानप्रत्यवनेजनेषु नामग्राहं नाम गृहीत्वा प्रेतपिण्डानुष्ठानं समाप्यम्। विहायसि रात्रौ चीरोदके प्रेतात्र स्नाहि पिब चेदं चीरमित्यु-च्चार्य्य निदध्युः।
"प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः।
स नामवस्तु चान्येषु स एव प्रददात्यपि॥" *॥
प्रथमपिण्डकर्त्तृनियमवत् प्रथमपिण्डद्रव्यनियम-माह सुनः पुष्पः।
"प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकम्।
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा॥
त्र्यहाशौचे प्रदातव्याः प्रथमे त्वेक एव हि।
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि॥
एकस्तोयाञ्जलिश्चैवं प्राग्वमेकश्च दीयते।
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा॥
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश॥
येन स्युः पञ्चपञ्चाशत् तोयस्याञ्जलयः क्रमात्।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः॥"
इति शुद्धितत्त्वम्॥

प्रेतपुरं, क्ली, (प्रेतानां पुरम्।) यमालयः। यथा,
"यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।
तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा॥"
इति श्राद्धतत्त्वम्॥

प्रेतराक्षसी, स्त्री, (प्रेतानां पिशाचभेदानां राक्ष-सीवापसर्पणकारित्वात्।) तुलसी। इति रत्न-माला॥

प्रेतवनं, क्ली, (प्रेतानां वनमिव।) श्मशानम्। इति हेमचन्द्रः। ४। ५५॥

प्रेतवाहितः, त्रि, (प्रेतेन वाहितः।) भूताविष्टः। इति त्रिकाण्डशेषः॥

प्रेतशिला, स्त्री, (प्रेतानां प्रेतेभ्यो वा या शिला।) पिण्डदानार्थगयास्थितप्रस्तरविशेषः। यथा,—
ब्रह्मोवाच।
"येयं प्रेतशिला ख्याता गयायां सा त्रिधा स्थिता।
प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि॥
धर्म्मेण धारिता भूत्वै सर्व्वदेवमयी शिला॥
प्रेतत्वं ये गता नृणां पित्राद्या बान्धवादयः।
तेषामुद्धरणार्थाय यतः प्रेतशिला ततः॥
अतोऽत्र सुनयो भूपा राजपत्न्यादयः सदा।
तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः॥
गयासुरस्य यन्मुण्डं तस्य पृष्ठे शिला यतः।
मुण्डपृष्ठो गिरिस्तस्मात् सर्व्वदेवमयो ह्ययम्॥
मुण्डपृष्ठस्य पादेषु यतो ब्रह्मसरोमुखाः।
अरविन्दवनन्तेषु तेन चैवोपलक्षितः॥
अरविन्दो गिरिर्नाम क्रौञ्चपादाङ्कितो यतः।
तस्माद्गिरिः क्रौञ्चपदः पितृणां ब्रह्मलोकदः॥
गदाधरादयो देवा आद्या आदौ व्यवस्थिताः।
शिलारूपेण च व्यक्ताव्यक्तादेवमयी शिला।
गयाशिरस्यादयित्वा गुरुत्वाद्धारिता शिला॥ *॥
स्नात्वा प्रेतशिलादौ तु वरुणास्वृतेन च।
पिण्डं दद्यादिमैर्म्मन्त्रैरावाह्य च पितॄन् परान्॥
अस्मत्कुले मृता ये च गतिर्येषां न विद्यते।
तेषामावाहयिष्यामि दर्भपृष्ठे तिलोदकैः॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
मातामहकुले ये च गतिर्येषां न जायते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
अजातदन्ता ये केचित् ये च गर्भेषु पीडिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
बन्धुवर्गाश्च ये केचिन्नामगोत्रविवर्ज्जिताः।
स्वगोत्रे परगोत्रे वा गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
उद्बन्धनमृता ये च विषशस्त्रहताश्च ये।
आत्मोपघातिनो ये च तेभ्यः पिण्डं ददाम्यहम्॥
अग्निदाहे मृता ये च सिंहव्याघ्रहताश्च ये।
दंष्ट्रिभिः शृङ्गिभिर्व्वापि तेषां पिण्डं ददाम्यहम्॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे।
विद्युच्चौरहता ये च तेषां पिण्डं ददाम्यहम्॥
रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
असिपत्रवने घोरे कुम्भीपाके च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
अन्येषां यातनास्थानां प्रेतलोकनिवासिनाम्।

तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः ।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥
असंख्ययातनासंस्था ये नीता यमशासने ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
जात्यन्तरसहस्राणि भ्रमन्तः स्वेन कर्म्मणा ।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये मे पितृकुले जाताः कुले मातुस्तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥
ये मे कुले लुप्तपिण्डाः पुत्त्रदारविवर्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥
विरूपा आमगर्भा ये ज्ञाताज्ञाताः कुले मम ।
तेषां पिण्डं मया दत्तमक्षय्यमुपतिष्ठताम् ॥
साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥
आगतोऽहं गयां देव । पितृकार्य्ये गदाधर ।।
त्वं मे साक्षी भवस्वाद्य अनृणोऽहमृणत्रयात् ॥”
इति गारुडे गयामाहात्म्ये । ८५-८६ । अध्यायौ ॥

प्रेतशौचं, क्ली, (प्रेते सति प्रेतस्य वा शौचम् ।) मृतसंस्कारादि । यथा,—

याज्ञवल्क्य उवाच ।

“प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः ।
ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकन्ततः ॥
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः ।
यमसूक्तं तथा जप्यं जपद्भिर्लौकिकाग्निना ॥
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ।
सप्तमाद्दशमाद्वापि ज्ञातयो ह्युपयन्त्यपः ॥
अप नः शोशुचदघमनेन पितृदिङ्मुखाः ।
एवं मातामहाचार्य्यप्रेतानाञ्चोदकक्रियाः ॥
कामोदकाः सखिपुत्त्रस्वस्रीयश्वशुरर्त्विजः ।
नामगोत्रेण ह्युदकं सकृत् सिञ्चन्ति वाग्यताः ॥
पाषण्डपतितस्तेना न कुर्य्युरुदकक्रियाम् ।
न ब्रह्मचारिणो व्रात्या योषितः कामगास्तथा ॥
सुरापाश्चात्मघातिन्यो नाशौचोदकभाजनाः ।
अतो न रोदितव्यं हि त्वनित्या जीवसंहृतिः ॥
क्रिया कार्य्या यथाशक्ति ततो गच्छेद्गृहान्
प्रति ।
विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥
आचम्याथाग्निमुदकं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥
प्रवेशनादिकं कर्म्म प्रेतसंस्पर्शिनामपि ।
इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात् ॥
क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् पृथक् ।
पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ॥
जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये ।
वैतानोपासनाः कार्य्याः क्रियाश्च श्रुतिचोदिताः ॥
त्रिरात्रमाशौचम् (?) ... आचूडात्रैरात्रिकी स्मृता ।
त्रिरात्रमान्तादेशाहस्त्ररात्रमतः परम् ॥
निरात्रं दशरात्रं वा शावमाशौचमुच्यते ।
ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि ।
अस्पृश्या जननस्त्री स्नानाद्यैरभिर्विशुद्ध्यति ॥
दश द्वादश वर्णानां तथा पञ्चदशैव च ।
त्रिंशद्दिनानि च तथा भवति प्रेतसूतकम् ॥
अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् ।
गुर्व्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ॥
अनौरसेषु पुत्त्रेषु भार्य्यास्वन्यगतासु च ।
निवासराजनि तथा तदहः शुद्धिकारकम् ॥
हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम् ।
विषाद्यैश्च हतानाञ्च नाशौचं पृथिवीपते ॥
ऋत्विग्व्रतिब्रह्मचारिदीक्षितब्रह्मविदां तथा ।
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यःशौचं विधीयते ॥
कालोऽग्निः कर्म्ममृद्वायुर्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्व्वेषां शुद्धिहेतवः ॥”
इति गारुडे १०६ अध्यायः ॥

प्रेतश्राद्धं, क्ली, (प्रेताय प्रेतोद्देशकं वा श्राद्धम् ।) प्रेतोद्देशकश्राद्धम् । तदनुष्ठानं यथा । तत्र गोभिलः । अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ एकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः । उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति । इति श्राद्धतत्त्वम् ॥ * ॥ तत्र नवश्राद्धं तत्तु वाचिककर्त्तव्यं चतुर्थपञ्चमनवमैकादशाहेषु प्रेतश्राद्धम् । यथा यमः ।
“चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
तदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥”
इति श्राद्धविवेकः ॥ * ॥
सामिभिरनुभयकर्त्तव्यं आद्यश्राद्धादिसपिण्डीकरणान्तं श्राद्धम् । यथा,—
“द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा ।
सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोडशम् ॥”
इति श्राद्धतत्त्वम् ॥ * ॥
अन्नघटश्राद्धम् । तत्तु संवत्सरं यावत् प्रत्यहं प्रेतोद्देशकान्नजलदानरूपम् । यथा । पारस्करः । अहरहरन्नमस्मै ब्राह्मणायोदकुम्भञ्च दद्यात् पिण्डमप्येके निपृणन्ति । ददतीत्यर्थः । इति श्राद्धविवेकः ॥ * ॥ गयादितीर्थब्रह्मादिप्राप्तिनिमित्तमेकोद्दिष्टश्राद्धम् । यथा,—
“पितृयज्ञन्तु निर्व्वर्त्य मासिके श्राद्ध एव तु ।
श्राद्धं प्रतिसमौ चैव मातापित्रोर्मृताहनि ॥
असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ॥
तेनान्नघटश्राद्धे मृताहविहितमासिके तथा विशिष्टतीर्थब्रह्मादिप्राप्तौ प्रेतश्राद्धकरणेच्छायां मातापित्रोर्मृताहनि च असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ।” इति श्राद्धतत्त्वम् ॥

प्रेता, स्त्री, (प्रेत+स्त्रियां टाप् ।) प्रेतभावापन्ना । यथा । विष्णुरोम् तत् सद्द्यादि असुकगोत्रायाः प्रेताया असुकीदेव्या अशौचान्तद्वितीयेऽह्नि असुकगोत्रायाः प्रेतायाः प्रेतत्वविमुक्तिपूर्व्वकस्वर्गलोकगमनकामः सोपकरणान्नमाहितपिण्डदानमहं करिष्यामि । इति मौलस्था ॥ * ॥ मृता । यथा,—
“प्रेतायाः पुत्त्रिकाया न भर्त्ता धनमर्हेदपुत्त्रायाः ।” इति दायभागे शङ्खलिखितौ ॥

प्रेत्य, व, (प्र+इ+ल्यप् ।) लोकान्तरम् । तत्पर्य्यायः । अमुत्र २ । इत्यमरः । ३ । ४ । ८ ॥ (यथा, मनुः । २ । ९ ।
“श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥”)

प्रेम, [न्] क्ली, पुं, (प्रियस्य भावः । प्रिय+“पृथ्वादिभ्य इमनिज्वा ।” ५ । १ । १२२ । इति इमनिच् । “प्रियस्थिरेति ।” ६।४।१५७। इति प्रादेशः । प्री तर्पणे+मनिन् वा ।) सौहार्द्दम् । तत्पर्य्यायः । प्रेमा २ प्रियता ३ हार्द्दम् ४ स्नेहः ५ । इत्यमरः । १ । ७ । २७ । (यथा, देवीभागवते । १ । १४ । २४ ।
“दृष्ट्वा व्यासः शुकं प्राप्तं प्रेम्णोत्थाय ससम्भ्रमः ।
आलिलिङ्ग मुहुर्व्वाहुं मूर्द्ध्नि तस्य चकार ह ॥”)
नर्म्म । इति मेदिनी । मे, ९४ ॥

प्रेमपातनं, क्ली, (प्रेम्णः स्नेहस्य पातनं यस्मात् । प्रेम्णा पातनं यस्येति वा ।) रोदनम् । नेत्रजलम् । इति शब्दचन्द्रिका ॥

प्रेमभक्तिः, स्त्री, (प्रेम्णा भक्तिः ।) स्नेहयुक्तश्रीकृष्णसेवा । विष्णावैकान्तिकममता । तल्लक्षणं यथा, नारदपञ्चरात्रे ।
“अनन्यममता विष्णौ ममता प्रेमसंप्लुता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैरिति ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्म्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥” * ॥
अथ प्रेमसम्पत्तिचिह्नानि यथा, भागवते ७ स्कन्धे ७ अध्याये श्रीप्रह्लादस्य बालानुशासने ।
“निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥
यदा ग्रहग्रस्त इव क्वचिद्धस-
त्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्द्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥”
इति श्रीहरिभक्तिविलासे ११ विलासः ॥

प्रेमा, [न्] पुं, (प्रिय+इमनिच् । प्री तर्पणे+मनिन् वा ।) स्नेहः । इत्यमरः । १ । ७ । २७ ॥ अस्य लक्षणं यथा,—
“सर्व्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे ।
यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः ॥”
इत्युज्ज्वलनीलमणिः ॥
वासवः । वायुः । इति मेदिनी । मे, ९४ ॥

प्रेमालिङ्गनं, क्ली, (प्रेम्णा यदालिङ्गनम्।) स्नेहेन परिष्वङ्गः। नायकनायिकयोरालिङ्गनविशेषः। तल्लक्षणं यथा। नायककटिं नायिकयैकपादेन वेष्टयित्वा द्वितीयं पादं तस्य जङ्घोपरि स्थापयित्वा यदालिङ्गनं तत्। इति कामशास्त्रम्॥

प्रेमी, [न्] त्रि, (प्रेम अस्यास्तीति। इनिः।) प्रेमयुक्तः। स्नेहविशिष्टः। प्रेमशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

प्रेयसी, स्त्री, (इयमनयोरतिशयेन प्रिया। प्रिय+ ईयसुन्। "प्रियस्थिरेति।" ६।४।१५७। इति प्रादेशः। स्त्रियां ङीप्।) प्रियतमा नारी। तत्पर्य्यायः। दयिता २ कान्ता ३ प्राणेशा ४ वल्लभा ५ प्रिया ६ हृदयेशा ७ प्राणसमा ८ प्रेष्ठा ९ प्रणयिनी १०। इति हेमचन्द्रः॥

प्रेयान् [स्] पुं, (अयमनयोरतिशयेन प्रियः। प्रिय+ईयसुन्। प्रादेशः।) पतिः। तत्पर्य्यायः। दयितः २ कान्तः ३ प्राणेशः ४ वल्लभः ५ प्रियः ६ हृदयेशः ७ प्राणसमः ८ प्रेष्ठः ९ प्रणयी १०। इति हेमचन्द्रः॥ अतिप्रिये, त्रि। इति जटाधरः॥

प्रेरणं, क्ली, (प्र+ईर्+णिच्+ल्युट्।) प्रेषणम्। पाठान इति भाषा। यथा, नैषधे। ३। ५५।

"धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या॥"

प्रेरणा, स्त्री, (प्र+ईर्+णिच्+"ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्।) चोदना। (यथा, मेघदूते। ७०।
"स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु" ...

"श्रीकण्ठानां भवति विफला प्रेरणा चूर्णमुष्टिः॥") फलभावना। विधिरिति यावत्। इति धर्म्मदीपिका॥

प्रेरितः, त्रि, (प्र+ईर्+क्तः।) प्रेषितः। यथा,—
"नपुंसकमिति ज्ञात्वा प्रियायै प्रेरितं मनः।
मनस्तत्रैव रमते हताः पाणिनिना वयम्॥"
इति प्राचीनाः॥

प्रेत्वा [न्] पुं, (प्रकर्षेण ईर्त्ते इति। प्र+ईर् गतौ +"प्र ईरशदोस्तुट् च।" उणा० ४।११६। इति क्वनिप् तुडागमश्च।) समुद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रेत्वरी, स्त्री, (प्रकर्षेण ईर्त्ते इति। प्र+ईर् गतौ+"प्र ईरशदोस्तुट् च।" उणा० ४।११६। इति क्वनिप् तुट् च। "वनोरच।"४।१।७। इति ङीप् रश्चान्तादेशः।) नदी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रेष, ऋ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्॥)

प्रेषः, पुं (प्र+ईष्+घञ्।) प्रेषणम्। पीड़ा। इति जटाधरः॥

प्रेषणं, क्ली, (प्रेष्+भावे ल्युट्।) प्रेरणम्। यथा,
"जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये॥"
इति चाणक्यसंग्रहः॥

प्रेषितं, त्रि, (प्रेष्+क्तः।) प्रेरितम्। तत्पर्य्यायः। प्रस्थापितम् २ प्रनिशिष्टम् ३ प्रतिहतम् ४। इति हेमचन्द्रः॥ (यथा, देवीभागवते।२।११।४६।
"प्रेषितोऽहं महाभाग। शक्रेण त्वां विपश्चिता।
कथितं प्रभुणा यच्च तद् ब्रवीमि महामते।॥")

प्रेष्ठः, त्रि, (अयमेषामतिशयेन प्रिय इति। प्रिय +इष्ठन्। प्रादेशः।) अतिशयप्रियः। इत्यमरः। ३।१।१११॥

प्रेष्ठा, स्त्री, (प्रेष्ठ+टाप्।) प्रेयसी। इति हेमचन्द्रः॥ जङ्घा। इति शब्दचन्द्रिका॥

प्रेष्यः, त्रि, (प्र+ईष्+कर्म्मणि ण्यत्।) दासः। इत्यमरः।२।१०।१७॥ (यथा, मनौ। ३।१५३।
"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः॥")
प्रेरणीयश्च॥

प्रैषः, पुं, (प्र+इष्+घञ्। "प्रादूहोढोढ्येषैष्येषु।" ६।१।८९। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) क्लेशः। मर्द्दनम्। उन्मादः। प्रेषणम्। इति मेदिनी। षे, ९॥

प्रैष्यः, पुं, (प्र+इष्+कर्म्मणि ण्यत्। "प्रादूहोढोढ्येषैष्येषु।" ६।१।८९। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) प्रेष्यः। इत्यमरटीकायां भरतः॥ (यथा, कुमारे। ६।५८।
"जङ्गमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम्।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः॥"
क्ली, प्रैष्यस्य भावः। दासकर्म्म। यथा, कथासरित्सागरे। ३०। ९५।
"गवादिरत्नकान् पुत्त्रान् भार्य्यां कर्म्मकरीं निजाम्।
तस्य हत्वा गृहाभ्यर्णे प्रैष्यं कुर्व्वन्नुवास सः॥")

प्रोक्तं त्रि, (प्रकर्षेण उच्यते स्मेति। प्र+वच्+ क्तः।) कथितम्। प्रकर्षेणोक्तम्। यथा,—
"अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु॥"
इति श्रीभागवतम्॥

प्रोक्षणं, क्ली, (प्र+उक्ष सेचने+ल्युट्।) यज्ञार्थपशुहननम्। इत्यमरः। २।७।२६॥ (यथा, महाभारते। ५।१७।९।
"य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम्।
एते प्रमाणं भवतः उताहो नेति वासव।॥"
आह्लादुचितसंस्कारः। यथा, भागवते। ९। ६।८।
"चोदितः प्रोक्षणायाह दुष्टमेतदकर्म्मकम्॥")
वधः। सेचनम्। इति मेदिनी। णे, ६४॥ (यथा, मनुः। ५।११८।
"अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते॥")

प्रोक्षितं, त्रि, (प्र+उक्ष+क्त।) निहतम्। सिक्तम्। इति मेदिनी। ते, १३६॥ यज्ञार्थं मन्त्रैः संस्कृतमांसादि। यथा,—
"भक्षयेत् प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया।
दैवे नियुक्तः श्राद्धे वा नियमे तु विवर्ज्जयेत्॥"
आरण्यानामिदानीन्तनप्रोक्षणापेक्षा नास्ति। यथा, महाभारते।
"आरण्याः सर्व्वदैवत्याः प्रोक्षिताः सर्व्वशो मृगाः।
अगस्त्येन पुरा राजन्! मृगया येन पूज्यते॥"
इति तिथ्यादितत्त्वम्॥

प्रोच्चाटनं, क्ली, (प्र+उद्+चट हिंसायाम्+ णिच्+ल्युट्।) मारणम्। इति हेमचन्द्रः। ३।३४॥

प्रोज्झितं, त्रि, (प्र+उज्झ+कर्म्मणि क्तः।) त्यक्तम्। यथा, श्रीभागवते। १।१।२।
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम्॥"

प्रोञ्छनं, क्ली, (प्र+उञ्छ+ल्युट्।) प्रचर्जनम्। लोपनम्। मोछा इति भाषा॥ यथा,—
"प्रोञ्छनैर्वामपादेन दरिद्रो भवति ध्रुवम्।
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम्॥"
इति रुद्रयामले वैरिहरकालीकवचम्॥

प्रोष्ठः, पुं, (प्रकर्षेण अष्ठते निष्ठीवनादिकं प्राप्नोतीति। प्र+अठि गतौ+अच्। पृषोदरादित्वात् अस्य उत्वम्।) पतद्ग्रहः। पीगदान इति भाषा। यथा,—
"स्यादाचमनकः प्रोष्ठः कटक्रोलः पतद्ग्रहः॥"
इति हारावली। ४७॥

प्रोतं, क्ली, (प्र+वेञ् स्यूतौ+क्तः। यजादित्वात् सम्प्रसारणम्।) वस्त्रम्। इति जटाधरः॥

प्रोतं, त्रि, (प्र+वेञ्+क्तः। यजादित्वात् सम्प्रसारणम्।) ग्रथितम्। इति मेदिनी। ते, ३७॥ स्यूतम्। (यथा, श्रीकण्ठचरिते। १५। २५।
"गौरत्वमात्तपरिरम्भविजृम्भणस्य
रम्भोरुभिः सह विलासिजनस्य कामः।
प्रोतं विधातुमिव चेतसि रागसूत्रं
रोमाञ्चसूचिनिचयं प्रचुरीचकार॥")
गुम्फितम्। इति हेमचन्द्रः॥

प्रोतोत्सादनं, क्ली, (प्रोते स्यूते सति प्रोतानां वस्त्राणां वा उत्सादनं उत्तोलनं उच्चालनं वा यत्र।) वस्त्रकुट्टिमम्। छत्रम्। इति त्रिकाण्डशेषः॥

प्रोत्फलः, पु, (प्रकर्षेण उत्फलतीति। प्र+ उत्+फल्+अच्।) हस्तविशेषः। तत्पर्य्यायः। सिंहलाङ्गूलः २ छड़ी ३ छटा पिल्ला ५। इति शब्दमाला॥

प्रोत्फुल्लं, त्रि, (प्रकर्षेण उत्फुल्लम्। प्र+उत्+ फुल्ल विकासे+कर्त्तरि अच् वा।) विकसितम्। यथा,—
"ये वर्द्धिताः करिकपोलमदेन भृङ्गाः
प्रोत्फुल्लपङ्कजरजःसुरभीकृताङ्गाः।
ते साम्प्रतं विधिवशाद्गमयन्ति कालं
निम्बेषु चार्ककुसुमेषु करीलकेषु॥"
इति भामिनीविलासः॥

प्रोत्साहः, पु, (प्र+उत्+सह+घञ्।) प्रकृष्टोत्साहः। "कर्म्मसु सुकरप्रत्यय उत्साह इति मधुः॥ कर्म्मसु दृढ़यत्नकारको भावः उत्साह

इति रमानाथः ॥ कर्म्मसु प्रश्नय उत्साह इति नयनानन्दः। अप्रकर्षे बलोद्यम उत्साह। इति केचित्।" इत्यमरटीकायां भरतः ॥ (यथा, कथासरित्सागरे। १६। ६७।
"सोऽब्रवीत्: प्रोत्साहविश्लेषदुःखं यावद्व्यपो-
हति।
तावत् पद्मावतीपार्श्वं प्रयुक्ते महत्तराः ॥")

प्रोथ, ऋ ङ पर्य्याप्तौ। इति कविकल्पद्रुमः॥(भ्वा०-उभ०-अक०-सेट्।) रेफयुक्तः। ऋ, अपुप्रोथत्। ङ, प्रोथति प्रोथते। पर्य्याप्तं सामर्थ्यम्। पुप्रोथासौ न कश्चन। पर्य्याप्तं परिपूर्णता। इति गोविन्दभट्टः। इति दुर्गादासः ॥

प्रोथः, पुं, स्त्री, (प्रवते इति। प्रुङ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक् निपातनात् गुणः। यद्वा, प्रोथते इति। प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण।" ३।३। ११८। इति घः।) अश्वनासिका। इत्यमरः। २। ८। ४९ ॥ (यथा, माघे ११। ११।
"हिरवयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥"
शूकरनासिकापि। यथा, देवीभागवते। ५। २८। २५।
"वाराही शूकराकारा गूढ़प्रोथा सटावृता॥")

प्रोथः, पुं, (प्रोथते इति। प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण।" ३।३। ११८। इति घः। यद्वा, प्रुङ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्। निपातनात् गुणः।) कटी। इति मेदिनी। थे, १०॥ प्राटकः। इति त्रिकाण्डशेषः॥ स्त्रीगर्भः। इति विश्वः॥ गर्भः। भीषणम्। स्फिक्। अश्वमुखम्। इति संक्षिप्तसारोणादिवृत्तिः॥

प्रोथः, त्रि, (प्रवते इति। प्रुङ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्। निपातनात् गुणः।) अध्वगः। इति मेदिनी। थे, १०॥ प्रथितः। इति त्रिकाण्डशेषः॥ स्थापितः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रोषः, पु, (प्रुष दाहे + भावे घञ्।) सन्तापः। इति राजनिर्घण्टः॥

प्रोषितः, त्रि, (वस् + क्त। इट्। सम्प्रसारणम्। प्रकृष्टदूरं उषितः।) प्रवासगतः। यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥"
इति शुद्धितत्त्वम्॥
(दूरीभूतः। यथा, कलाविलासे। १। १४।
"पिहितहट्टसमितिश्चियणो
बधिरः प्रशमरीचिनिचयस्ते।
तीक्ष्णांशोरिव सज्जनः
प्रोषिततिमिराः करोत्याशाः॥")

प्रोषितभर्तृका, स्त्री, (प्रोषितो विदेशगतो भर्त्ता यस्याः। समासान्तकप्प्रत्ययः।) विदेशस्थपतिका। इति जटाधरः॥ स्त्रीयादिनायिकाभेदः। तस्या लक्षणं यथा। देशान्तरे गते भर्त्तरि सन्तापाकुला प्रोषितभर्तृका। अस्याश्चेष्टा दशावस्था। यथा। अभिलाषः १ चिन्ता २ स्मृतिः ३ गुणोत्कीर्त्तनम् ४ उद्वेगः ५ विलापः ६ उन्मादः ७ व्याधिः ८ जड़ता ९ निधनम् १०। मुग्धा प्रोषितभर्तृका यथा,—
"दुःखं दीर्घतरं वहन्त्यपि सखीवर्गाय नो भाषते
शैवालैः शयनं सृजन्त्यपि पुनः शेते न वा
लज्जया।
कण्ठे गद्गदवाचमञ्चति दृशा धत्ते न वाष्पोदकं
सन्तापं सहते यदम्बुजमुखी तद्वेद चेतोभवः॥"
मध्या प्रोषितभर्तृका यथा,—
"वासस्तदेव वपुषो वलयस्तदेव
हस्तस्य सैव जघनस्य च रत्नकाञ्ची।
वाचालभृङ्गसुभगे सुरतौ समस्त-
मद्याधिकं भवति तत् सखि किन्निदानम्॥"
प्रगल्भा प्रोषितभर्तृका यथा,—
"माला बालाम्बुजदलमयी मौक्तिकी हार-
यष्टिः
काञ्ची स्थानात् प्रसरति हरौ सुभ्रुवः प्रस्थितेव।
अन्यद्ब्रूमः किमपि धमनी विद्यते वा नवेति
ज्ञातुं बाहोरहह वलयं पाणिमूलं प्रयाति॥"
परकीया प्रोषितभर्तृका यथा,—
"श्वश्रूः पद्मदलं ददाति तदपि भ्रूसंज्ञया गृह्यते
सद्यो मर्म्मरशङ्कया न च तया संस्पृश्यते
पाणिना।
यातुर्व्वाचि सुहृज्जनस्य वचसा प्रत्युत्तरं दीयते
श्वासः किन्तु न मुच्यते हुतवहक्रूरः कुरङ्गी-
दृशा॥"
सामान्यवनिता प्रोषितभर्तृका यथा,—
"विरहविदितमन्तःप्रेम विज्ञाय कान्तः
पुनरपि वसु तस्मादेत्य मे दास्यतीति।
मरिचनिचयमक्ष्णोर्न्यस्य वाष्पोदबिन्दून्
सृजति च पुरयोषिद्वारदेशोपविष्टा॥"
इति रसमञ्जरी॥
(अस्याः अकर्त्तव्यं यदुक्तं चिन्तामणौ तद्यथा,
"हास्यं परगृहे यानं समाजोत्सवदर्शनम्।
क्रीड़ां शरीरसंस्कारं त्यजेत् प्रोषितभर्तृका॥")

प्रोष्ठः, पुं, (प्रकृष्ट ओष्ठोऽस्येति। "ओत्वोष्ठयोः समासे वा।" ६। १। ९४। इत्यस्य वार्त्तिकोक्त्या साधुः।) प्रोष्ठीमत्स्यः। इत्यमरटीकायां रायमुकुटः॥ (जनपदविशेषः। यथा, महाभारते। ६। ९। ६१।
"शूद्रकाः कोरकाः प्रोष्ठाः समवेगवशास्तथा॥"
गौः। इति सिद्धान्तकौमुदी। ५। ४। १२०॥)

प्रोष्ठपदः, पुं, (प्रोष्ठो गौस्तस्येव पादौ यस्य सः। "सुप्रातसुश्वसुदिवेति।" ५।४।१२०। इति अच् प्रत्ययेन साधुः। प्रोष्ठपदो नक्षत्रविशेषस्तद्युक्ता पौर्णमासी यत्र मासे। अण्। पक्षे न वृद्धिः।) भाद्रमासः। इत्यमरः॥ (नक्षत्रविशेषः। यथा, महाभारते। ६। ३। १४।
"शुक्रः प्रोष्ठपदे पूर्व्वे समारुह्य विरोचते॥"
यथा च मार्कण्डेये। ३३। १५।
"अजाविकं प्रोष्ठपदे विन्देद्वार्यांस्तथोत्तरे॥"
गोतुल्यपदयुक्ते, त्रि। इति व्याकरणम्॥)

प्रोष्ठपदाः, स्त्री, (प्रोष्ठो गौस्तस्येव पादा यासाम्। "सुप्रातसुश्वेति।" ५। ४। १२०। इति बहुव्रीहावच् पद्भावश्च निपातितः।) पूर्व्वभाद्रपदनक्षत्रम् २५। उत्तरभाद्रपदनक्षत्रम् २६। तत्पर्य्यायः। भाद्रपदाः २। इत्यमरः। १। ३। २२॥ द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु प्रोष्ठो गौः भद्रश्च गौः तस्येव पाद आसां तास्तथा। पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भाद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वाद्द्विवचनम्। इति भरतः॥ भाद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते तिरोहितावयवभेदपक्षे एकवचनम्। प्रोष्ठपदाशब्दस्तद्व्यक्तावयवभेदपक्षे बहुवचनमिति मैत्रेयः। इति रायमुकुटः॥

प्रोष्ठपदी, स्त्री, (प्रोष्ठपदाभिर्युक्ता पौर्णमासी। अण्। स्त्रियां ङीप्।) भाद्री पूर्णिमा। यथा,—
"प्रोष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।
एतासु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"
इति तिथ्यादितत्त्वम्॥
अपि च।
"लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्।
प्रोष्ठपद्यां पौर्णमास्यां स याति परमां गतिम्॥"
इति श्रीभागवतटीकायां श्रीधरस्वामी॥

प्रोष्ठपादः, त्रि, (प्रोष्ठपद + "सन्धिवेलेति।" ४। ३। १६। इत्यण्। "जे प्रोष्ठपदानाम्।" ७। ३। १८। इति उत्तरपदस्याचामादेरचो वृद्धिः।) प्रोष्ठपदासु जातः। इति सिद्धान्तकौमुदी॥

प्रोष्ठी, स्त्री, पुं, (प्रकृष्ट ओष्ठो यस्याः। "ओत्वोष्ठयोः समासे वा।" नासिकोदरोष्ठेति जातेरिति वा ङीष्।) मत्स्यभेदः। पुँटी माछ इति भाषा। तत्पर्य्यायः। शफरी २ शफरः ३। इत्यमरः॥ श्वेतकोलः ४। इति शब्दरत्नावली॥ तस्या गुणाः। तिक्तत्वम्। कटुत्वम्। स्वादुत्वम्। शुक्रकारित्वम्। कफवातनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वम्। आस्यकण्ठरोगनाशित्वम्। श्रेष्ठत्वञ्च। इति राजनिर्घण्टः॥

प्रोहः, पुं, (प्रोह्यते वितर्क्यते विस्मयाकुलितैरिति। प्र + ऊह + घञ्।) हस्तिचरणः। पर्व्व। इति विश्वमेदिन्यौ। हे, ५। गजचरणपर्व्व। इति त्रिकाण्डशेषशब्दरत्नावल्यौ॥

प्रोहः, त्रि, (प्रकर्षेण ऊहते वितर्कयतीति। प्र + ऊह + कः।) निपुणः। (प्र + ऊह + भावे घञ्।) तर्कः। इति मेदिनी। हे, ६॥

प्रौढ़ं, त्रि, (प्रोह्यते स्मेति। प्र + वह + क्तः। सम्प्रसारणम्। "प्रादूहोढोढ्येषैष्येषु।" इति वृद्धिः।) वर्द्धितम्। तत्पर्य्यायः। प्ररूढम् २ एधितम् ३। इत्यमरः। ३। १। ७६॥ (यथा, मेघदूते।२७।
"त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः॥")

प्रगल्भः । इति हेमचन्द्रः । ६ । १३१ ॥ (यथा, रघुः । ६ । ५८ ।
"आवातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढ़प्रिया नयनविभ्रमचेष्टितानि ॥")
विपुलः । इति राजनिर्घण्टः ॥ (यथा, भागवते । ३ । २ । ६ ।
"इङ्गितज्ञाः पुरुप्रौढ़ा एकारामाश्च सात्वताः ॥")
प्रकर्षेण ऊढ़श्च ॥

प्रौढ़पादः, पुं, (प्रौढ़ः पादो यस्य ।) आसनारोपितपादतलः । आसनोपरिपादतलद्वयसंयोगपूर्ब्बकोपवेशः । वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः । वस्त्रादिद्वारा पृष्ठजानुजङ्घाद्वयदृढ़बन्धनपूर्ब्बकोपवेशः । यथा,—
"आसनारूढ़पादस्तु जान्वोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते ॥
स्नानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥"
इति कात्यायनः ॥ * ॥
अनेकोद्वासे दावाग्निले भूमिसमे इष्टकाश्च संकीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात् । इत्याह्निकतत्त्वम् ॥

प्रौढ़ा, स्त्री, (प्रौढ़+टाप् ।) नायिकाभेदः । तत्पर्य्यायः । चिरिण्टी २ सुवयाः ३ श्यामा ४ दृष्टरजाः ५ । इति राजनिर्घण्टः ॥ यथा,—
"बाला तु तरुणी प्रौढ़ा वृद्धा भवति नायिका ।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा ॥"
त्रिंशद्वर्षादूर्द्ध्वं पञ्चपञ्चाशद्वर्षपर्य्यन्तं प्रौढ़ावस्था । यथा,—
"आषोडशी भवेद्बाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशता प्रौढ़ा भवेद्वृद्धा ततः परम् ॥"
अस्या वश्यत्वकारणं यथा,—
"अलङ्कारादिभिर्ब्बाला तरुणी रतियोगतः ।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात् ॥"
तस्या रमणे दोषो यथा,—
"बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणदा भवेत् ॥"
इति रतिमञ्जरी ॥
मुग्धादित्रिविधान्तर्गतप्रगल्भा नायिका । तत्र प्रौढ़ा खण्डिता यथा,—
"मासुद्वीक्ष्य विपक्षपक्ष्मलदृशः पादाम्बुजालक्तकैरालिप्ताननमागतौकृतसुखी चित्रार्पितेवाभवत् ।
कष्टं नोक्तवती न वा कृतवती निश्वासकोष्णादृशः
प्रातर्मङ्गलमङ्गना करतलादादर्शमादर्शयन् ॥"
प्रौढ़ा कलहान्तरिता यथा,—
"अकरोः किमु नेत्रशोणिमानं
किमकार्षीः करपल्लवं निरोधम् ।
कलहं किमधाः क्रुधा रसज्ञे
हितमर्थं न विदन्ति देवदुष्टाः ॥"
प्रौढ़ा उत्कण्ठिता यथा,—
"आतर्नि कुञ्जसखियूथिरसालवल्ली
मातस्तमस्विनि पितस्तिमिर प्रसीद ।
पृच्छामि किञ्च नवनीरधराभिरामो
दामोदरः कथय किं न समाजगाम ॥"
प्रौढ़ा वासकसज्जा यथा,—
"कृतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहलिषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्द्दिनम् ॥"
प्रौढ़ाभिसारिका यथा,—
"स्फुरदुरसिजभारभङ्गुराङ्गी
किसलयकोमलकान्तिना पदेन ।
अथ कथय कथं सहेत गन्तुं
यदि न निशासु मनोरथो रथः स्यात् ॥"
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं मुञ्चति सुभ्रुवामपि तनुत्यागे वियोगज्वरक्लेशाहं विहिताञ्जलिर्यदुपते ! पृच्छामि सत्यं वद ।
ताम्बूलं कुसुमं पटीरमुदकं यद्बन्धुभिर्दीयते
तत् स्यादत्र परत्र वा किमु विषज्वालावलीदुःसहम् ॥"
इति रसमञ्जरी ॥
अन्यत् प्रगल्भाशब्दे द्रष्टव्यम् ॥

प्रौढ़िः, स्त्री, (प्र+वह+क्तिन् । प्रादूहेति वृद्धिः ।) सामर्थ्यम् । इति मुग्धबोधव्याकरणम् ॥ तत्पर्य्यायः । उत्साहः २ प्रगल्भता ३ अभियोगः ४ उद्यमः ५ उद्योगः ६ कियदेतिका ७ अध्यवसायः ८ ऊर्ज्जः ९ । इति हेमचन्द्रः । २ । २१४ ॥ (यथा, कथासरित्सागरे । १४ । ६३ ।
"यथा यथा च दम्पत्योः प्रौढ़िं परिचयो ययौ ।
तयोस्तथा तथा प्रेम नवीभावमिवाययौ ॥")

प्रौणः, त्रि, (प्र+ओण अपनयने+अच् ।) निपुणः । इति केचित् ॥

प्रौष्ठपदः, पुं, (प्रोष्ठो गौस्तस्येव पादा यासामिति प्रोष्ठपदा नक्षत्रविशेषाः । तद्युक्ता पौर्णमासी । प्रोष्ठपद+"नक्षत्रेण युक्तः कालः ।" ४।२।३। इति अण् । ङीप् । प्रौष्ठपदी पौर्णमास्यस्मिन् । प्रौष्ठपदी+"साऽस्मिन् पौर्णमासीति ।" ४।२।२१। इति अण् ।) भाद्रमासः । इत्यमरः । १ । ३ । २२ ॥ (यथा, महाभारते । १३ । १०६ । २८ ।
"प्रौष्ठपदन्तु यो मासमेकाहारो भवेन्नरः ।
धनाढ्यं स्फीतमचलमैश्वर्य्यं प्रतिपद्यते ॥"
प्रोष्ठपदासु भवे, त्रि । इति सिद्धान्तकौमुदी । ७ । ३ । १८ ॥)

प्रौहः, पुं, (प्र+ऊह+कः । प्रादूहेति वृद्धिः ।) प्रकर्षेणोहः । इति मुग्धबोधव्याकरणम् ।

प्लक्ष, ञ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । ञ, प्लक्षति प्लक्षते । इति दुर्गादासः ॥

प्लक्षः, पुं, (प्लक्ष्यते भक्ष्यते विहगादिभिरिति । प्लक्ष+कर्म्मणि घञ् ।) वृक्षविशेषः । पाकुड़ इति भाषा । तत्पर्य्यायः । जटी २ पर्कटी ३ । इत्यमरः ॥ पर्कटिः ४ प्लक्षा ५ प्लोक्षा ६ जटिः ७ । इति शब्दरत्नावली ॥ कपीतनः ८ चीरी ९ सुपार्श्वः १० कमण्डलुः ११ शृङ्गी १२ अवरोहशाखी १३ गर्दभाण्डः १४ कपीतकः १५ दृढ़प्ररोहः १६ प्लवकः १७ प्लवङ्गः १८ महाबलः १९ ॥ हृस्वप्लक्षपर्य्यायः । क्षुद्रः २० सुशीतः २१ शीतवर्य्यकः २२ पुण्ड्रः २३ महावरोहः २४ हृस्वपर्णः २५ पिम्परिः २६ भिदुरः २७ मङ्गलच्छायः २८ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । इति राजनिर्घण्टः ॥ व्रणयोनिगदवाहपित्तकफशोथरक्तपित्तनाशित्वम् । पर्कटी च स्त्रियामपि । इति भावप्रकाशः ॥ कन्दरालवृक्षः । द्वीपभेदः । अश्वत्थवृक्षः । इति मेदिनी । षे, १७ ॥ पक्षकः । इति हेमचन्द्रः ॥

प्लक्षद्वीपः, पुं, (प्लक्षनक्षत्रलक्षितो द्वीपः ।) सप्तद्वीपान्तर्गतद्वीपविशेषः । तस्य विवरणं यथा,
सूत उवाच ।
"जम्बुद्वीपस्य विस्ताराद्द्विगुणेन समन्ततः ।
संवेष्टयित्वा क्षीरोदं प्लक्षद्वीपो व्यवस्थितः ॥
प्लक्षद्वीपे च विप्रेन्द्राः सप्तासन् कुलपर्व्वताः ।
ऋज्वायताः सुपर्व्वाणः सिद्धसंघनिषेविताः ॥
गोमेदः प्रथमस्तेषां द्वितीयश्चन्द्र उच्यते ।
नारदो दुन्दुभिश्चैव सोमश्च ऋषभस्तथा ॥
विभ्राजः सप्तमः प्रोक्तो ब्रह्मणोऽत्यन्तवल्लभः ।
तत्र देवर्षिगन्धर्व्वैः सिद्धैश्च भगवानजः ॥
उपास्यते स विश्वात्मा साक्षी सर्व्वस्य विश्वसृक् ।
तेषु पुण्या जनपदा नाधयो व्याधयोऽपि च ॥
न तत्र पापकर्त्तारः पुरुषा वा कदाचन ।
तेषां नद्यः सप्त चैव वर्णानान्तु समुद्रगाः ॥
तासु ब्रह्मर्षयो नित्यं पितामहमुपासते ।
अनुतप्ता शिखी चैव विपाशा त्रिदिवा कृता ॥
अमृता सुकृता चैव नामतः परिकीर्त्तिताः ।
क्षुद्रनद्यस्त्वसंख्याताः सरांसि सुबहून्यपि ॥
न वै तेषु युगावस्थाः पुरुषा वै चिरायुषः ।
आर्य्यकाः कुरवाश्चैव विदश्चा भाविनस्तथा ॥
ब्रह्मक्षत्रियविट्शूद्रास्तस्मिन् द्वीपे प्रकीर्त्तिताः ।
इज्यते भगवान् सोमो वर्णैस्तत्र निवासिभिः ॥
तेषाञ्च सोमसायुज्यं सारूप्यं मुनिपुङ्गवाः ।
सर्व्वे धर्म्मपरा नित्यं नित्यं मुदितमानसाः ॥
पञ्चवर्षसहस्राणि जीवन्ति च निरामयाः ॥"
इति कौर्म्मे भुवनकोषे ४६ अध्यायः ॥ * ॥
अपि च "ऋषिरुवाच । अतःपरं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते । जम्बुद्वीपो यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन । लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन । प्लक्षो जम्बुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः । तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम । शिवं वयसं सुभद्रं शान्तं क्षेम-

मन्ततमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्द्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते। प्रत्नस्य विष्णो रूपं यत् सत्यर्त्तस्य ब्रह्मणः। अमृतस्य च मृत्योश्च सूर्य्यमात्मानमीमहीति॥ प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्व्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्तते। प्लक्षः स्वसमानेनेक्षु रसोदेनावृतः।” इति श्रीभागवते ५ स्कन्धे २० अध्यायः॥

प्लव, ङ गत्याम्। (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थवर्गतीययुक्तः। ङ, प्लवते। प्लु ङ इत्यनेनैवेष्टसिद्धे अस्य पाठः प्लविष्यते प्लवते इत्यादि सिद्ध्यर्थः। इति दुर्गादासः॥

प्लवं, क्ली, (प्लवते इति। प्लु+अच्।) कैवर्त्तीमुस्तकम्। (अस्याः पर्य्यायो यथा,—

“कुटन्नटं दासपुरं वानेयं परिपेलवम्।

प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) गन्धतृणम्। इति मेदिनी। वे,१८॥ प्लुतगे, त्रि॥

प्लवः, पुं, (प्लु+“ऋदोरप्।”३।३।५७। इत्यप्।) प्लवनम्। (यथा, हरिवंशे। १२२। १०१।

“सागरानूपविपुलां प्रागुदक्प्लवशीतलाम्।

सर्व्वतोऽद्धिमध्यस्थामभेद्यां त्रिदशैरपि॥”

प्लूयतेऽनेनेति करणे अप्।) भेलः। (यथा, मुण्डकोपनिषदि। १। २। ७।

“प्लवा ह्येते अदृढा यज्ञरूपा

अष्टादशोक्तमवरं येषु कर्म्म।

एतच्छ्रेयो येऽभिनन्दन्ति मूढा

जरामृत्युं ते पुनरेवापि यन्ति॥”

प्लवते सन्तरतीति। प्लु+अच्।) भेकः। अविः। श्वपचः। कपिः। जलकाकः। (यथा, सुश्रुते। १। ४६।

“प्लवानामिक्षुरसासवः॥”)

कुलकः। प्लवगः। पर्कटीद्रुमः। कारण्डवविहगः। शब्दः। प्रतिगतिः। इति मेदिनी। वे, १६॥ प्रेरणम्। शत्रुः। इति शब्दरत्नावली॥ जलान्तरम्। इति हेमचन्द्रः।३। ५४३॥ पलवः। इति त्रिकाण्डशेषः॥ पोलो इति भाषा॥ जलकुक्कुटः। इति मिताक्षरा॥ (यथा, मनौ। ५। १२।

“कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्।

सारसं रज्जुवालञ्च दात्यूहं शुकसारिके॥”

बकविशेषः। यथा, रामायणे।२।१०३।४३।

“रथाङ्गहंसा नत्यूहाः प्लवाः कारण्डवाः परे।

तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः॥”

“प्लवा बकविशेषाः।” इति तट्टीकायां रामानुजः॥) जलचरपक्षिमात्रम्। यथा,—

“हंससारसकादम्बबककारण्डवचक्रवाकाः।

नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः॥

प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥”

एतेषां मांसगुणाः।

“प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।

वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥”

इति भावप्रकाशः॥

प्लवकः, पुं, (प्लवते इवेति। प्लु+अच्। ततः स्वार्थे संज्ञायां वा कन्।) खड्गधारादिनर्त्तकः। तत्पर्य्यायः। केलकः २। इति त्रिकाण्डशेषः॥ केकलः ३ नर्त्तुः ४ केलिकोषः ५ कलायनः ६। इति शब्दरत्नावली॥ चण्डालः। इति हलायुधः॥ (सन्तरणोपजीवी। यथा, महाभारते। १३। २३। १५।

“गायना नर्त्तकाश्चैव प्लवका वादकास्तथा।

कथका योधकाश्चैव राजन्नार्हन्ति केतनम्॥”)

भेकः। प्लक्षः। इति राजनिर्घण्टः॥

प्लवगः, पुं, (प्लवेन प्लुतगत्या गच्छतीति। गम्+“अन्येष्वपि दृश्यते।” ३। २। १०१। इति डः।) वानरः। (यथा, रघुवंशे। १२। ७०।

“स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि।

रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः॥”)

भेकः। सूर्य्यसारथिः। इति मेदिनी। गे, ४२॥ प्लवपर्णी। इति शब्दरत्नावली॥ शिरीषवृक्षः। इति राजनिर्घण्टः॥

प्लवगतिः, पुं, (प्लवेन गतिर्यस्य।) भेकः। इति शब्दचन्द्रिका॥ (प्लवस्य भेकादेर्गतौ प्लुतगतौ च, स्त्री॥)

प्लवङ्गः, पुं, (प्लवेन प्लुतगत्या गच्छतीति। गम+“गमश्च।” ३। २। ४७। इति खच्। “खच्च डिद्वा वाच्यः।” इति डित्। डित्वात् टेर्लोपः। मुमागमः।) वानरः। इत्यमरः। २। ५। ३॥ (यथा, रामायणे। २। २५। १८।

“प्लवङ्गा वृश्चिका दंशा मशकाश्चैव कानने।

सरीसृपाश्च कीटाश्च माभूवन् गहने तव॥”

“प्लवङ्गा वानराः।” इति तट्टीकायां रामानुजः॥) मृगः। इति शब्दचन्द्रिका॥ प्लक्षवृक्षः। इति राजनिर्घण्टः॥

प्लवङ्गमः, पुं, (प्लवेन गच्छतीति। गम्+“गमश्च।” ३। २। ४७। इति खच्। मुमागमः।) भेकः। वानरः। इत्यमरः। ३। ३। १३७॥ (यथा, रामायणे। ४। ६२। ११।

“एष्यन्ति प्रेषितास्तत्र रामदूताः प्लवङ्गमाः।

आख्येया राममहिषी त्वया तेभ्यो विहङ्गम।॥”)

प्लुतगतियुक्ते, त्रि॥

प्लवनः, त्रि, (प्लवते इति। प्लु+ल्यु।) प्रवणः। क्रमनिम्नभूम्यादिः। यथा,—

“प्रागुदक्प्लवनां भूमिं कारयेत् यत्नतो नरः॥”

इति तिथ्यादितत्त्वे मत्स्यपुराणम्॥

(क्ली, प्लु+ल्युट्। प्लवः। यथा,—

“शयनञ्चासनं वापि नेच्छेद्वापि द्रवोत्तरम्।

नाम्भ्रातपौ न प्लवनं न यानं नापि वाहनम्॥”

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्लाक्षं, क्ली, (प्लक्षस्य फलम्। “प्लक्षादिभ्योऽण्।” ४। ३। १६४। इत्यण्। विधानसामर्थ्यात् तस्य फले न लुक्।) प्लक्षवृक्षस्य फलम्। इत्यमरः। २।४।१८॥ प्लक्षस्य विकारः। प्लक्षस्य समूहः। प्लक्षस्य भावः। प्लक्षस्येदम्। प्लक्षस्य हितम्। इत्यादि व्याकरणम्॥ (प्लक्षसम्बन्धिनि, त्रि। यथा,—

“नैयग्रोध औडुम्बर आश्वत्थ प्लाक्ष इतीध्मो भवन्त्येते वै गान्धर्व्वाप्सरसां गृहाः स्म एव॥”

इति तैत्तिरीयसंहितायाम्। ३। ४। ८। ४॥)

प्लावनं, क्ली, (प्लु+णिच्+ल्युट्।) द्रवद्रव्यस्योर्द्ध्व-प्रापणम्। उथलन इति भाषा। यथा,—

“तापनं घृततैलानां प्लावनं गोरसस्य च।

तन्मात्रमुद्धृतं शुद्धेत् कठिनन्तु पयो दधि॥”

इति शुद्धितत्त्वम्॥ *॥

मज्जनम्। बहुतरजलसंयोगः। यथा,—

“एतत् श्रुत्वा वचो राजा प्रातिष्ठत भगीरथः।

यत्र तानि शरीराणि सागराणां महात्मनाम्॥

प्लावनार्थं नरश्रेष्ठ। पुण्येन सलिलेन ह॥”

इति महाभारते। ३। ११०॰ अध्यायः॥

प्लावितं, त्रि, (प्लु+णिच्+क्तः।) जलादिमग्नस्थानादि। यथा,—

“सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम्।

सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम्॥”

इति गङ्गावाक्यावली॥

(यथा च देवीभागवते। २। ८। १०।

“पुरी सा वासुदेवस्य प्लावितोदधिना ततः॥”)

प्लिह, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थद्वतीययुक्तः। ङ, प्लेहते। इति दुर्गादासः॥

प्लीहा, [न्] पुं, (प्लेहते वृद्धिं गच्छतीति। प्लिह+कनिन्।) प्लीहरोगः। यथा, यकृत्प्लीहामानि सुखादिष निर्मिमीते वैद्यकम्। इत्यमरटीकायां भरतः॥ (यथा, याज्ञवल्क्ये।३।९४।

“वपावसावहननं नाभिः क्लोम यकृत् प्लिहा॥”)

प्लीहघ्नः, पुं, (प्लीहानं हन्तीति। हन+टक्।) वृक्षविशेषः। रोहड़ा इति ख्यातः। तत्पर्य्यायः। रोही २ रोहितकः ३ प्लीहशत्रुः ४ दाड़िमपुष्पकः ५ मांसदलनः ६ यकृद्वैरी ७ चलच्छदः ८। इति शब्दचन्द्रिका॥ रौहितेयः ९ रोहितः १० रोहीतकः ११ रोही १२। इति शब्दरत्नावली॥ (अस्य गुणाः रोहितकशब्दे द्रष्टव्याः॥)

प्लीहशत्रुः, पुं, (प्लीह्नः शत्रुर्नाशकत्वात्।) प्लीहघ्नवृक्षः। इत्यमरः। २। ४। ४९॥ (यथा, वैद्यकरत्नमालायाम्।

“रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः॥”)

प्लीहा, स्त्री, (प्लिह + कः । पृषोदरादित्वात् दीर्घः । स्त्रियां टाप् ।) प्लिहरोगः । यथा, यकृत्प्लीहे च सम्बन्धे । इति बालकाख्यः । इत्यमरटीकायां भरतः ॥

प्लीहा, [न्] पुं, (प्लिह + "श्वन्नुक्षन्पूषन्प्लीहन्-क्लिन्निति ।" उणा० १ । १५८ । इति कनिन् प्रत्ययेन साधुः ।) कुक्षिवामपार्श्वस्थमांसखण्डम् । पिला इति ख्यातम् । तत्पर्य्यायः । गुल्मः २ प्लिहा ३ । इत्यमरभरतौ ॥ अस्य निदानम् ।

"विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसृक् कफश्च ।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ
प्लीहोत्थमेतज्जठरं वदन्ति ॥
तद्वामपार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र ।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः ॥"
इति माधवकरः ॥ * ॥

रक्तजस्य तस्य लक्षणम् ।
"क्लमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम् ।
मोहो रक्तोदरत्वञ्च ज्ञेयं रक्तजलक्षणम् ॥" * ॥
पैत्तिकस्य तस्य लक्षणम् ।
"सज्वरः सपिपासश्च सदाहो मोहसंयुतः ।
पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते ॥"
श्लैष्मिकस्य तस्य लक्षणम् ।
"प्लीहा मन्दव्यथः स्थूलः कठिनो गौरवान्वितः ।
अरोचकयुतः शीतः प्लीहा कफज उच्यते ॥"
वातिकस्य तस्य लक्षणम् ।
"नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीडितः ।
वेदनाभिः परीतश्च प्लीहा वातिक उच्यते ॥
दोषत्रितयरूपाणि प्लीह्न्यसाध्ये भवन्ति हि ॥"
अथ तस्य चिकित्सा ।
"पातव्यो युक्तितः क्षारः क्षीरेणोदधिशुक्तिजः ।
तथा दुग्धेन पातव्याः पिप्पल्यः प्लीहशान्तये ॥१॥
अर्कपत्रं सलवणं पुटदग्धं सुचूर्णितम् ।
निहन्ति मस्तुना पीतं प्लीहानमपि दारुणम् ॥२॥
हिङ्गु त्रिकटुकं कुष्ठं यवक्षारञ्च सैन्धवम् ।
मातुलुङ्गरसापीतं प्लीहशूलहरं रजः ॥ ३ ॥
पलाशक्षारतोयेन पिप्पली परिभाविता ।
प्लीहगुल्मातिशमनी वह्निमान्द्यहरी मता ॥४॥
रसेन जम्बीरफलस्य शङ्ख-
नाभीरजः पीतमवश्यमेव ।
शम्बूकमांसं शमयेदशेषं
प्लीहामयं कुम्भसमानमाशु ॥ ५ ॥
शरपुङ्खामूलकल्कस्तक्रेणालोडितः पीतः ।
प्लीहानं यदि न हरति शैलोऽपि तदा जले
प्लवते ॥ ६ ॥
सुपक्वसहकारस्य रसः क्षौद्रसमन्वितः ।
पीतः प्रशमयत्येव प्लीहानं नेह संशयः ॥ ७ ॥
सुस्विन्नं शाल्मलीपुष्पं निशापर्य्युषितं नरः ।
राजिकाचूर्णसंयुक्तं खादेत् प्लीहोपशान्तये ॥"८॥
इति भावप्रकाशः ॥ * ॥

"पिप्पलीमधुपानाच्च यथा मधुरभोजनात् ।
प्लीहा विनश्यते रुद्र इति ॥ ९ ॥
केतकीपत्रजं क्षारं गुडेन सह भक्षयेत् ।
तक्रेण शरपुङ्खाख्यां पीत्वा प्लीहां विना-
शयेत् ॥" १० ॥
इति गारुडे १८७ । १८८ अध्यायौ ॥
("शोणितकफप्रसादजं हृदयं यदाश्रया हि धमन्यः प्राणवहाः । तस्याधो वामतः प्लीहा फुप्फुसश्च ॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥ अस्य सहेतुकलक्षणादीनि यथा,—
"अशितस्यातिसंक्षोभाद् यानयानातिचेष्टितैः ।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः ॥
वामपार्श्वाश्रितः प्लीहा च्युतः स्थानात् प्रवर्द्धते ।
शोणितं वा रसादिभ्यो विवृद्धं तं विवर्द्धयेत् ॥
इति तस्य प्लीहा कठिनोऽष्ठीलेवादौ वर्द्धमानः कच्छपसंस्थान उपलभ्यते स चोपेक्षितः क्रमेण कुक्षिं जठरमग्न्यधिष्ठानञ्च परिक्षिपन्नुदरमभिनिर्व्वर्त्तयति ॥
तस्य रूपाणि । दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःप्रवेशपिपासाङ्गमर्द्दच्छर्द्दिमूर्च्छाङ्गसादकासश्वासमृदुज्वरानाहाग्निनाशकार्श्यास्यवैरस्यपर्व्वभेदकोष्ठवातशूलान्यपि चोदरमरुणवर्णं विवर्णं वा नीलहरितहारिद्रराजिमद्भवति ।"
चिकित्सास्य यथा,—
"पिप्पलीं तिल्वकं हिङ्गु नागरं हस्तिपिप्पलीम् ।
भल्लातकं शिग्रुफलं त्रिफलां कटुरोहिणीम् ॥
देवदारुहरिद्रे द्वे सरलातिविषे वचाम् ।
कुष्ठं मुस्तं तथा पञ्च लवणानि प्रकल्प्य च ।
दधिसर्पिर्वसातैलमज्जयुक्तानि दाहयेत् ॥
अन्तर्धूममतः क्षारात् बिडालपदकं पिबेत् ।
मदिरा दधिमण्डोष्णजलारिष्टसुरासवैः ॥
हृद्रोगं श्वयथुं गुल्मं प्लीहार्शो जठराणि च ।
विसूचिकामुदावर्त्तं वाताष्ठीलाञ्च नाशयेत् ॥"
इति चरके चिकित्सास्थानेऽष्टादशेऽध्याये ॥)

प्लीहारिः, पुं, (प्लीहाया अरिः शत्रुस्तन्नाशकत्वात् ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥ (प्लीहनाशकवटिकौषधविशेषः । यथा,—
"टङ्कणं लौहभस्मापि कर्षं ताम्रं प्रदापयेत् ।
शुद्धसूतं तथा गन्धं कर्षमानं भिषग्वरः ॥
मृगाजिनं पलं भस्म निम्बाकाङ्कोलत्वचः पलम् ।
एव भागक्रमेणैव कुर्य्यात् प्लीहारिसंज्ञकम् ॥
नवगुञ्जामितं खादेदथ नित्यं हि पूतवान् ।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः ॥"
इति प्लीहारिरसः ॥ * ॥
इति वैद्यकरसेन्द्रसंग्रहे प्लीहाधिकारे ॥)

प्लीहशत्रुः, पुं, (प्लीहायाः शत्रुः ।) प्लीहशत्रुः । रोहितवृक्षः । इति केचित् ॥

प्लुषिः, पुं, (प्लुष्यति दहतीति । प्लुष दाहे + "प्लुषिकुषिशुषिभ्यः क्सिः ।" उणा० ३ । १५५ । इति क्सिः ।) अग्निः । इत्युणादिकोषः । क्लेदः । गृहदाहः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्लु, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् ।) अन्तःस्थतृतीययुक्तः । ङ, प्लवते । इति दुर्गादासः ॥

प्लुतं, क्ली, (प्लु + क्तः ।) अश्वगतिविशेषः । स च त्वरया झम्पेन गतिः । इत्यमरभरतौ ॥ (यथा, अश्ववैद्यके । ३ । १३२ ।
"अथ यः पुच्छतोऽश्वस्य शनैरविशदे ध्वनिः ।
अन्तरुत्पद्यते कश्चित्तदश्वप्लुत उच्यते ॥")
तिर्य्यग्गतिः । इति कलिङ्गः ॥ (यथा, कथासरित्सागरे । २७ । १५६ ।
"तिर्य्यक्क्षिप्तं तिर्य्यगेवास्य पेतुर्वक्रप्लुता मृगाः ॥")

प्लुतः, पुं, (प्लुतं प्लुतवद्गतिरस्यास्तीति । प्लुत + अच् ।) त्रिमात्रवर्णः । इति मेदिनी । ते, ३५ ॥ यथा,—
"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम् ॥"
इति दुर्गादासादिधृतप्राचीनकारिका ॥
(तथाच ।
"दूराह्वाने च गाने च रोदने च प्लुतो मतः ॥"
इति च दुर्गादासधृतवचनम् ॥
प्लु + क्तः ।) झम्पगतियुक्ते, त्रि ॥ (यथा, हरिवंशे । ९८ । ८४ ।
"रामादनन्तरं कृष्णः प्लुतो वै वीर्य्यवाहनः ।
ताभ्यामेव प्लुताभ्याञ्च चरणैस्ताडितो गिरिः ॥"
अन्तर्णिजर्थत्वात् प्लावितः । यथा, बृहत्संहितायाम् । ५ । ३४ ।
"सप्तगते तमसि जगज्जलप्लुतं भवति मुदित-
मभयञ्च ॥"
सिक्तः । यथा, याज्ञवल्क्ये । १ । २३५ ।
"अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम् ॥"
व्याप्तः । यथा, भागवते । ३ । २ । १४ ।
"यस्यानुरागप्लुतहासरास-
लीलावलोकप्रतिलब्धमानाः ।
व्रजस्त्रियो दृग्भिरनुप्रवृत्त-
धियोऽवतस्थुः किल कृत्यशेषाः ॥")

प्लुष, उ दाहे । भस्मीकरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, प्लोषित्वा प्लुष्ट्वा । इति दुर्गादासः ॥

प्लुष, श सेके । पूर्त्तौ । स्नेहे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-स्नेहे अक०-सेट् ।) श, प्लुष्णाति । इति दुर्गादासः ॥

प्लुष, य ऌ दाहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । य, प्लुष्यति । ऌ, अप्लुषत् । पुप्लोष । इति दुर्गादासः ॥

प्लुषः, पुं, दहनम् । इति प्लुषधातोर्भावे अल्प्रत्ययः ॥

प्लुष्टः, त्रि, (प्लुष + क्तः । "यस्य विभाषा ।" ७ । २ । १५ । इति इट् न ।) दग्धः । इत्यमरः । ३ । १ । ९९ ॥ (यथा, ऋतुसंहारे । १ । २७ ।
"पटुतरवनदाहात् प्लुष्टशष्पप्ररोहाः
परुषपवनवेगात् क्षिप्तसंशुष्कपर्णाः ॥"

अस्य लक्षणं यथा,—
"तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत् प्लुष्टम् ॥
चिकित्सास्य यथा,—
"इत्यस्योपशमार्थाय चिकित्सां संप्रवक्ष्यते ।
प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णन्तथौषधम् ॥
शरीरे स्विन्नभूयिष्ठे स्विन्नं भवति शोणितम् ॥
प्रकृत्या ह्युदकं शीतं स्कन्दयत्यतिशोणितम् ॥
तस्मात् सुखयति ह्युष्णं नतु शीतं कथञ्चन ॥"
इति सुश्रुते सूत्रस्थाने द्वादशोऽध्याये ॥)

प्लुष, इर् य दाहे । विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । इर्, अप्लुषत् आप्लोषीत् । य, प्लुष्यति । इति दुर्गादासः ॥

प्लुष, ऋ ङ सेवने । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । ऋ, अपिप्लोषत् । ङ, प्लोषते । इति दुर्गादासः ॥

प्लोषः, पुं, (प्लुष दाहे + भावे घञ् ।) दाहः । इत्यमरः । ३ । २ । ८ ॥ (यथा, श्रीकण्ठचरिते । ४ । १७ ।
"दर्शेषु किन्नरीलोकं धत्ते यः प्लोषविप्लवे ।
न्यासीकृतमनङ्गेन भाण्डागारमिव स्वकम् ॥"
पित्तविकारविशेषः । तद्यथा । "पित्तविकाराश्चत्वारिंशदत ऊर्द्ध्वं व्याख्यास्यन्ते । तद्यथा ओषश्च प्लोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च इत्यादिषु ॥" इति चरके सूत्रस्थाने विंशेऽध्याये ॥)

प्सा, ल भक्षणे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, प्साति । इति दुर्गादासः ॥

प्सा, स्त्री, (प्सा + भावे क्विप् ।) भक्षणम् । इति त्रिकाण्डशेषः ॥

प्सातं, त्रि, (प्सा + क्तः ।) भक्षितम् । इत्यमरः । ३ । १ । ११० ॥

प्सानं, क्ली, (प्सा + भावे ल्युट् ।) भोजनम् । इति हेमचन्द्रः । ३ । ८८ ॥

फ

फ, फकारः । द्वाविंशतितमव्यञ्जनवर्णः । (पवर्गस्य द्वितीयवर्णश्च ।) अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "उपूपध्मानीयानामोष्ठौ ॥") तस्य तत्त्वं यथा,—
"फकारं शृणु चार्व्वङ्गि ! रक्तविद्युल्लतोपमम् ।
चतुर्व्वर्गप्रदं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् ।
आत्मादितत्त्वसंयुक्तं त्रिविन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे पञ्चमपटलः ॥ * ॥
"वक्रा वामगता रेखा ततोऽधःसङ्गता भवेत् ।
तस्मादूर्द्ध्वगता भूत्वा दक्षमारभ्य कुण्डली ॥
ब्रह्मा रुद्रश्च विष्णुश्च कुण्डली ब्रह्मरूपिणी ।
मात्रा वामादृजिग्गत: क्रमशः परिकीर्त्तिता ॥"
इति वर्णोद्धारतन्त्रम् ॥
तत्पर्य्यायः ।
"फकारश्च महेशानि । शिखी चैव जनार्द्दनः ॥"
इति रुद्रयामलोक्तवर्णाभिधानम् ॥
अस्य ध्यानं यथा,—
"प्रलयाम्बुदवर्णाभां ललज्जिह्वां चतुर्भुजाम् ।
भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् ॥
एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"फः सखी दुर्गिणी धन्वा वामपार्श्वो जनार्द्दनः ।
जया पादः शिखा रौद्री फेत्कारः शाखिनीप्रियः ॥
उमा विहङ्गमः कालः कुब्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी ॥
फुत्कारो यामिनी व्यक्ता पावनी मोहवर्द्धनः ।
निष्फलवागहङ्कारः प्रयागो ग्रामणीः फलम् ॥"
इति नानातन्त्रशास्त्रम् ॥
(पद्यादौ अस्य प्रयोगेण भयसम्भावना । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"दो धः सौख्यं मुदं नः सुखभयमरणक्लेशदुःखं पवर्गः ॥")

फं, क्ली, (फक्क असद्व्यवहारे + डः ।) रूक्षोक्तिः । फुत्कृतिः । निष्फलभाषणम् । इति मेदिनी । फे, १ ॥

फः, पुं, यज्ञसाधनम् । स्फानम् । झञ्झावातः । इति मेदिनी । फे, १ ॥ चर्द्धकः । जृम्भानिष्कारः । स्फुटः । फललाभः । इति विश्वः ॥ संज्ञाविशेषः । यथा । "हसोऽन्तः फः । हसो विरामश्च फसंज्ञः स्यात् ।" इति मुग्धबोधव्याकरणम् ॥

फक्क, असद्व्यवहारे । शनैर्गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) कोपधः । फक्कति खलः कुत्सितं व्यवहरतीत्यर्थः । फक्कति वृद्धो मन्दं गच्छतीत्यर्थः । इति दुर्गादासः ॥

फक्किका, स्त्री, (फक्क + "धात्वर्थनिर्द्देशे ण्वुल् वक्तव्यः ।" इति वार्त्तिकोक्त्या ण्वुल् । टापि अत इत्वम् ।) असद्व्यवहारः । फाकि इति भाषा । तत्पर्य्यायः । चोद्यम् २ देश्यम् ३ पूर्व्वपक्षः ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । २ । ९५ ।
"फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥")
न्यायमन्त्रिव्याख्या । यथा,—
"श्रीमता मथुरानाथतर्कवागीशधीमता ।
विवरीतव्य दर्श्यन्ते द्वितीयमणिफक्किकाः ॥"
इत्यनुमानखण्डटीकारम्भे मथुरानाथः ॥

फञ्जिका, स्त्री, (भनक्ति रोगानिति । भञ्ज आमर्द्दने + ण्वुल् । पृषोदरादित्वात् भस्य फः । टापि अत इत्वम् ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८९ ॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे हृदयचूडामणिरसे ।
"निर्गुण्डी फञ्जिका वासा रविमूलचिकराटकैः ॥"
"फञ्जिका ब्राह्मणयष्टिका ।" इति तट्टीका ॥) देवताडः । दुरालभा । इति शब्दचन्द्रिका ॥

फञ्जिपत्रिका, स्त्री, (भनक्ति रोगानिति भञ्जि । पृषोदरादित्वात् भस्य फः । फञ्जि रोगहारकं पत्रं यस्याः । कप् । टाप् । अत इत्वम् ।) आखुपर्णी । इति रत्नमाला ॥ (विवृतिरस्या आखुपर्णीशब्दे ज्ञातव्या ॥)

फञ्जी, स्त्री, (भनक्ति रोगानिति । भञ्ज + अच् । पृषोदरादित्वात् भस्य फः । गौरादित्वात् ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥ (यथा, वैद्यकचक्रपाणौ श्वासाधिकारे ।
"अमृता नागरफञ्जीव्याघ्रीपर्णासखाधितः
क्वाथः ।
पीतः सकणाचूर्णः कासश्वासौ निहन्त्याशु ॥"
तथाचास्या गुणाः हारीते प्रथमस्थाने दशमेऽध्याये ।
"वन्ताकनी तथा फञ्जी तैलपर्णी तु सिंहिका ।
चक्रमर्द्दक इत्येते दुर्ज्जरा वातकोपनाः ॥")

फट्, व्य, अनुकरणशब्दः । अस्त्रबीजम् । यथा । फडन्तं शस्त्रमायुधम् । इति बीजवर्णाभिधानम् ॥ * ॥ शान्तिकुम्भचालने अर्घ्यपात्रचालने अर्घ्यजलेन पूजोपकरणाभ्युक्षणे अन्तरीक्षगविघ्नोत्सारणे विकिरक्षेपणे गन्धपुष्पाभ्यां करशोधने अघमर्षणे पापपुरुषताडने कराङ्गन्यासे नैवेद्यप्रोक्षणे होमाग्नेः क्रव्यादांशत्यागे होमाग्न्यावाहने तदग्निप्रोक्षणादौ च फडिति मन्त्रस्य प्रयोगः ॥ (यथा, भागवते । ६ । ८ । १० ।
"सविसर्गं फडन्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥"
विशीर्णादौ, त्रि । यथा, वाजसनेयसंहितायाम् । ७ । ३ । "देवांशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भङ्गेन हतोऽसौ फट् ॥"
"असौ द्वेष्यो हतो निहतः सन् फट् विशीर्णो भवतु निष्फला विशरणो अस्य क्रियन्तस्यैतद्रूपम् । फलतीति फट् डलयोरैक्यम् । स्वाहाकारस्थाने फडित्यभिचारे प्रयुज्यते ।" इति तद्भाष्ये वेददीपे महीधरः ॥)

फटः, पुं स्त्री, (स्फुट विकसने + पचाद्यच् । पृषोदरादित्वात् साधुः) फणा । इत्यमरजटाधरौ ॥

फटा, स्त्री, (फट + स्त्रियां टाप् ।) फणा । (यथा, पञ्चतन्त्रे । ३ । ८३ ।
"निर्व्विषेणापि सर्पेण कर्त्तव्या महती फटा ।
विषं भवतु मा वास्तु फटाटोपो भयङ्करः ॥")
दम्भः । इति मेदिनी । टे, २३ ॥ कितवः । इति हेमचन्द्रः ॥ * ॥
"स्यात् पवर्गद्वितीयादि फटायाञ्च स्फटापि च ॥"
इतिभरतधृतशब्दभेदः ॥

फड़िङ्गा, स्त्री, (फडिति शब्दं इङ्गति गच्छतीति । इङ्ग गतौ + अच् । टाप् ।) झिल्लिका । इति शब्दचन्द्रिका ॥ फड़िङ्ग इति भाषा ॥

फण, ग निःस्नेहे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) फेणतुः पफणतुः । निःस्नेहः अनायासेनोत्पत्तिः । फणति वाञ्छितं श्रीमताम् । अनायासेन जातम् । अस्यैव भ्रान्तस्य

निहायां अनायासकृतं फाण्टं इत्यमरः॥ अतएव रमानाथोऽपि घटादौ फण गतौ इत्यत्र गतेरन्यत्र। फाणयति अनोऽनायासेन जनयतीत्यर्थं इत्याह। इति दुर्गादासः॥

फण, मि ञ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मि, फणयति फाणयति। ञ, फेणतुः पफणतुः। इति दुर्गादासः॥

फणः, त्रि, (फणति विस्तृतिं गच्छतीति। फण+अच्।) सर्पस्य विस्तृतमस्तकम्। यथा। फटायान्तु फणा द्वयोरित्यमरः॥ शब्दोऽयं कारणं फणम्। इति लीवकाण्डे चन्द्रगोमी॥ तत्पर्य्यायः। फणा २ फणम् ३ फटा ४ फटः ५ स्फटः ६ स्फटा ७। इत्यमरभरतौ॥ दर्व्वी ८ भोगः ९ स्फुटः १०। इति हेमचन्द्रः।४।३८१॥ स्फुटा ११ दर्व्विः १२ फटी १३। इति शब्दरत्नावली॥ (यथा, महाभारते।१२।११४।१५।

"परिवादं ब्रुवाणो हि दुरात्मा वै महाजने।
प्रकाशयति दोषांस्तु सर्पः फणमिवोच्छ्रितम्॥"

अङ्गुष्ठस्यमर्म्मविशेषः। यथा, सुश्रुते।३।६।

"अष्टौ मर्म्माणि चतस्रो धमन्योऽष्टौ मातृकाः द्वे कृकाटिके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि शृङ्गाटकान्येकोऽधिपतिरिति॥")

फणकरः, पुं, (फणः कर इवास्येति। फणस्य करो वा।) भुजङ्गः। इति शब्दरत्नावली॥

फणधरः, पुं, (धरतीति। धृ+अच्। फणस्य धरः।) सर्पः। इति शब्दरत्नावली॥

फणधरधरः, पुं, (फणधरस्य सर्पस्य धरः।) शिवः। इति कविकल्पलता॥

फणभृत, पुं, (फणं बिभर्त्तीति। भृ+क्विप् तुक् च।) सर्पः। इति हेमचन्द्रः।४।३६९॥ (यथा, राजेन्द्रकर्णपूरे।४।

"व्याप्तव्योमतले त्वगाङ्कधवले निर्धौतदिङ्मण्डले देवत्वद्यशसि प्रशान्ततमसि प्रौढ़िं जगत् प्रेयसि।
कैलासन्ति महीभृतः फणभृतः शेषन्ति पाथोधयः
क्षीरोदन्ति सुरद्विपन्ति करिणो हंसन्ति पुंस्कोकिलाः॥")

फणवान्, [त्] पुं, (फणोऽस्यास्तीति। फण+मतुप्। मस्य वः।) सर्पः। इति शब्दरत्नावली॥

फणा, स्त्री, (फणति प्रसारसङ्कोचं गच्छतीति। फण गतौ+अच्। टाप्।) सर्पफटा। इत्यमरः।१।८।६॥ (यथा, अभिज्ञानशकुन्तले ६ अङ्के।

"ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः॥")

फणाकरः, पुं, (करोतीति। कृ+अच्। फणाया करः।) सर्पः। इति शब्दरत्नावली॥

फणाधरः, पुं, (धरतीति। धृ+अच्। फणाया धरः।) सर्पः। इति शब्दरत्नावली॥

फणाभरः, पुं, (बिभर्त्ति धरतीति। भृ+पचाद्यच्। फणाया भरः।) सर्पः। इति हारावली।१५॥

फणावान्, [त्] पुं, (फणास्यास्तीति। फणा+मतुप्। मस्य वः।) सर्पः। इति शब्दरत्नावली॥

फणिकेसरं, क्ली, (फणीव केसरोऽस्य।) नागकेसरम्। इति राजनिर्घण्टः॥ (गुणादयोऽस्य नागकेसरशब्दे ज्ञातव्याः॥)

फणिखेलः, पुं, (फणिना सह खेलतीति। खेल+अच्।) भारतीपक्षी। इति त्रिकाण्डशेषः॥ भारद इति भाषा॥

फणिचक्रं, क्ली, (फणाकारं चक्रम्।) विवाहादिकर्म्मसु शुभाशुभज्ञानार्थं सप्तविंशतिनक्षत्रघटितसर्पाकारत्रिनाड़िकचक्रम्। यथा,—

"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाड़िकम्।
तत्र वेधवशाज्ज्ञेयं विवाहादौ शुभाशुभम्॥
त्रिनाड़ीवेधनक्षत्रमश्विन्यार्द्रायुगोत्तरा।
हस्तेन्द्रमूलवारुण्यः पूर्व्वभाद्रपदास्तथा॥
याम्यः सौम्यो गुरुर्योनिश्चित्रा मित्रजलाह्वयम्।
धनिष्ठा चोत्तरा भाद्रा मध्यनाड़ीव्यवस्थिताः॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशाखके।
उत्तरा श्रवणा पौष्णं पृष्ठनाड़ीव्यवस्थिताः॥
अश्व्यादिनाड़ीवेधर्क्षे षष्ठं द्वितीयकं क्रमात्।
याम्यादितुर्य्यतुर्य्यञ्च कृत्तिकादिद्विषट्ककम्॥
एवं निरीक्षयेद्वेधं कन्यामर्त्ते गुरौ सुरे।
पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे॥
एकनाड़ीस्थधिष्ण्यानि यदि स्युर्व्वरकन्ययोः।
तदा वेधं विजानीयाद्गुर्व्वादिषु तथैव च॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो भवेत्।
द्वयोर्जन्मभयोर्व्वेधे न कर्त्तव्यं कदाचन॥
एकनाड़ीस्थिता चेत् स्याद्गुर्व्वर्णाश्रय चाङ्गना।
तस्मान्नाड़ीवधो वीक्ष्यो विवाहे शुभमिच्छता॥
प्राड़नाड़ी वेधतो भर्त्ता मध्यनाड़ी भयन्तथा।
पृष्ठनाड़ीवधे कन्या म्रियते नात्र संशयः॥
एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवता।
तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत्॥
समासन्ने वधे शीघ्रं दूरवेधे चिरेण तु।
वेधान्तरभमानेन वर्षै दुष्टं प्रजायते॥
प्रभु. पण्याङ्गना मित्रं देशो ग्रामः पुरं गृहम्।
एकनाड़ीगता भव्या अभव्या वेधवर्ज्जिताः।
एकराश्यादियोगे तु नाड़ीदोषो न विद्यते॥"
इति ज्योतिस्तत्त्वम्॥

अपि च।

"सर्पाकारो घटनविशेषः
कृत्तिकादियमदैवतशेषः।
पृष्ठे सुतहतिसङ्कटरोगः
क्रोड़े कान्तापुत्त्रवियोगः।
मध्ये रेखे विहितविवाह
उभयोर्म्मरणं वदति वराहः॥
क्रोड़े पृष्ठे यत्र उद्वाहम्
मध्ये क्रोड़े बहुसन्मानम्।
मध्ये पृष्ठे भवति विवाहो
बहुसुतवित्तमिति च मुनिराह॥"
इति समयप्रदीपः॥*॥

तस्य विन्यासो यथा,—

पृष्ठे १ ६ ७ १२ १३ १८ १९ २४ २५

मध्ये २ ५ ८ ११ १४ १७ २० २३ २६

क्रोड़े ३ ४ ९ १० १५ १६ २१ २२ २७॥

फणिजिह्वा, स्त्री, (फणिजिह्वेव आकृतिरस्त्यस्या इति अच्।) महाशतावरी। महासमङ्गा। इति राजनिर्घण्टः॥

फणिज्झकः, पुं, (फणिनामुज्झकः बहिष्कारक उत्पादक इति यावत्। पृषोदरादित्वात् साधुः। फणितुल्यबहुपत्रपुष्पवत्त्वात् तथात्वम्।) खरपत्रतुलसी॥ (रक्तवर्णतुलसी च। तत्पर्य्यायश्च यथा, वैद्यकरत्नमालायाम्।

"सुगन्धको गन्धनामा तीक्ष्णगन्धः फणिज्झकः॥",

जम्बीरभेदः। इति केचित॥ जम्बीरसामान्यः। इति केचित्॥ तत्पर्य्यायः। मरुवकः २ मरुवक. ३ प्रस्थपुष्पः ४ जम्बीरः ५। इत्यमरभरतौ॥ (यथा,—

"मारुतोऽसौ मरुवको मरुन्मरुरपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

फणितः, त्रि, (फण गतौ+क्तः।) गतः। निःसृतः॥

फणितल्पगः, पुं, (फणी शेष एव तल्पं फणितल्पं तस्मिन् गच्छतीति। गम+डः।) विष्णुः। सर्पशय्यायां गच्छति यः। इति शुनपक्षिः॥

फणिप्रियः, पु, (फणिनां प्रियः भक्ष्यत्वात्।) वायुः। इति शब्दरत्नावली॥

फणिफेनः, पुं, (फणिनां फेन इव उग्रगुणत्वात्।) अहिफेनः। आफिं इति भाषा। यथा —

"जातीफलं टङ्कणमभ्रकञ्च
हिङ्गुलगन्धं परिमर्द्य यामम्।
भागद्वयं स्यात् फणिफेनकस्य
गान्धालिकापत्ररसेन मर्द्यम्॥"
इति रत्नावली॥

फणिवल्ली, स्त्री, (फणीव दीर्घा वल्ली।) नागवल्ली। इति राजनिर्घण्टः॥

फणिहन्त्री, स्त्री, (फणिनो हन्तीति। हन्+तृच्+ङीप्।) गन्धनाकुली। इति राजनिर्घण्टः॥

फणिहृत, स्त्री, (फणिनो हरति स्वगन्धेन अपसारयतीति। हृ+क्विप्। तुगागमश्च।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

फणी, [न्] पु, (फणास्त्यस्येति। फणा+"व्रीह्यादिभ्यश्च।"५।२।११६। इति इनिः।) सर्पः। इत्यमरः॥ (यथाच सुश्रुते कल्पस्थाने ४ अध्याये।
"ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः।
मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः॥"

महंशनप्रतीकारविधिर्यथा,—
"फणिना विषवेगे तु प्रथमे शोणितं हरेत्।
द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक् ॥
नस्यकर्म्माञ्जने युञ्ज्यात्तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत् ॥
शीतोपचारं कृत्वादौ भिषक्पञ्चमषष्ठयोः।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
सप्तमे त्ववपीडेन शिरस्तीक्ष्णेन शोधयेत्।
तीक्ष्णमेवाञ्जनं दद्यात्तीक्ष्णशस्त्रेण मूर्द्ध्नि च ॥
कुर्य्यात् काकपदं चर्म्म साऽसृग्वा पिशितं क्षिपेत्॥"
इति च सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥)
भर्पिणीनामकौषधिः। इति राजनिर्घण्टः ॥
(केतुः। यथा, ग्रहभावप्रकाशे।
"कविरत्नधवलः फणी छायः शशिस्तथा ॥"
सौसकं अस्य विषयो यथा,—
"रसो गन्धष्टङ्गणः सोषणोऽयं
फणी पिप्पलीत्येष धुस्तूरपिष्टः
जयेत् सन्निपातं द्विगुञ्जकानुपानं
भवेदर्कमूलाम्बु सद्योऽनुपानम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे पञ्च-
वक्त्ररसे ॥ मरुवकनामौषधं यथा,—
"मारुतोऽसौ मरुवको मरुत्करस्तथा स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
फणीश्वरः, पुं, (फणिनामीश्वरः।) अनन्तः।
इति शब्दरत्नावली ॥
फण्डः, पु, (फणति। फण गतौ+"अमन्तात् डः।" उणा० १। ११३। इति डः।) जठरम्।
इत्युणादिकोषः ॥
फत्कारी, पुं, (फत् इत्यव्यक्तशब्दं करोतीति। कृ+ णिनिः।) पक्षिमात्रम्। इति शब्दचन्द्रिका ॥
फरं, क्लौ, (फलतीति। फल्+अच्। लस्य रत्वम्।) फलकम्। इत्यमरटीकायां भरतः ॥
फरवकं, क्लौ, पूगपात्रम्। इति हारावली ।१३७॥
फर्फरीकः, पुं, (स्फुरतीति। स्फुर स्फुरणे+"फर्फरीकादयश्च।" उणा० ४। २०। इति ईकन् धातोः फर्फरादेशश्च।) चपेटः। मार्द्दवे, क्लौ। इति मेदिनी। के, २०० ॥
फर्फरीका, स्त्री, (फर्फरीक+टाप्।) पादुका। (स्फुरतीति ईकन्। टाप्। मर्मसु स्फुरणा-देव तथात्वम्।) मदनः। इति संक्षिप्तसारो-णादिवृत्तिः ॥
फल, निष्पत्तौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०- अक०-सेट्।)
"इह नवशुककोमला मणीनां
रविकरसम्वलिताः फलन्ति भासः ॥
इति भारविः ॥
निष्पादनेऽपि वाल्मीकिः।
फलति स्म यस्य चरितस्तोत्राय दिव्या गिरः ॥"
इति दुर्गादासः ॥
फल, ञ गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०- सक०-सेट्।) ञ, फालः फलः। इति दुर्गादासः ॥
फल, ञि श भिदि। इति कविकल्पद्रुमः। (भ्वा०- पर०-सक०-सेट्।) ञि, फुल्लोऽस्ति। श, फलितं फुल्तं तेन। फलति काष्ठं कुठारः। इति दुर्गादासः ॥
फलं, क्लौ, (फलतीति। फल निष्पत्तौ ञि फला विशरणे वा+अच्।) लाभः। (यथा, शकु-न्तलायाम्। १ अङ्के।
"शान्तमिदमाश्रमपदं स्फुरति च बाहुः
कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥")
शस्यम्। (यथास्य भक्षणविधिः।
"फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दक्षिणेषु च ॥"
"फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्यायः ॥
यथा च शकुन्तलायाम्।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ॥")
फलकम्। (शरिफलकार्थे यथा, महाभारते। ४। १। २४।
"वैदूर्य्यान् काञ्चनान् दान्तान् फलैर्ज्योतीरसैः
सह।
कृष्णाक्षान् लोहिताक्षांश्च निर्व्वर्त्स्यामि मनो-
रमान् ॥")
हेतुकृतम्। इत्यमरः ॥ जातीफलम्। शुक्तिः।
त्रिफला। (यथा,—
"हरीतकी चामलकी विभीतकमिदं त्रयम्।
त्रिफला फलमित्युक्तं तच्च ज्ञेयं फलत्रिकम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
कक्कोलम्। इति मेदिनी। ले, ३३ ॥ बाणाग्रम्।
आर्त्तवम्। इति शब्दरत्नावली ॥ फालः। इति हेमचन्द्रः ॥ दानम्। इति धरणिः ॥ मुष्कः।
यथा,—
"अफलो भुज्यते मेषः सफलस्तु न भुज्यते।"
इति रामायणम् ॥
(प्रमेयभेदः। यथा,—
"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्य-भावफलदुःखापवर्गास्तु प्रमेयम् ॥" इति गोतम सूत्रम्।
तत्रैव फललक्षणम् यथा। "प्रवृत्तिदोषजनितो-ऽर्थः फलम् ॥" "सुखदुःखसंवेदनं फलम्। सुख-विपाकं कर्म्मदुःखविपाकञ्च तत् पुनर्देहेन्द्रिय-विषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम्। तथाहि प्रवृत्तिदोषजनितो-ऽर्थः फलमेतत् सर्व्वं भवति तदेतत् फलमुपात्तमु-पात्तं हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वास्ति स खल्वयं हानोपादानस्रोतसोह्यते लोकः।" इति वात्स्यायनः ॥) जीवस्य कर्म्मफलभुक्तिर्यथा,—
"जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव च।
आत्मनः प्रतिबिम्बश्च देही जीवः स एव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
दानफलं यथा,—
"यथा फलन्ति शस्यानि न्यूनानि वाधिकानि च।
क्षेत्रकाणां क्षेत्रभेदे पात्रभेदे फलं तथा ॥
सामान्यदिवसे विप्रे दानं समफलं भवेत्।
अमायां रविसंक्रान्त्यां फलं शतगुणं भवेत्।
चातुर्मास्यां पौर्णमास्यामनन्तं फलमेव च ॥
ग्रहणे शशिनः कोटिगुणञ्च फलमेव च।
सूर्य्यस्य ग्रहणे चापि ततो दशगुणं भवेत् ॥
अक्षयायामक्षयञ्चैवासंख्यं फलमुच्यते।
एवमन्यत्र पुण्याहे फलाधिक्यं भवेदिह ॥
यथा दाने तथा स्नाने जपेऽन्यत्पुण्यकर्म्मसु।
एवं सर्व्वत्र बोद्धव्यं नराणां कर्म्मणां फलम् ॥
सामान्यदेशे दानञ्च विप्रे समफलं भवेत्।
तीर्थे देवगृहे चैव फलं शतगुणं स्मृतम् ॥
गङ्गायाञ्च कोटिगुणं क्षेत्रे नारायणे फलम्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥
यथा चैव कोटिगुणं तथा च विष्णुमन्दिरे।
केदारे च लक्षगुणं हरिद्वारे तथा फलम् ॥
पुष्करे भास्करक्षेत्रे दशलक्षगुणं फलम्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥
सामान्यब्राह्मणे दानं सममेव फलं भवेत्।
लक्षं त्रिसन्ध्यपूते च पण्डिते च जितेन्द्रिये ॥
विष्णुमन्त्रोपासके च बुधे कोटिगुणं भवेत्।
एव सर्व्वत्र बोद्धव्यं फलाधिक्यं गुणां भवेत् ॥
यथा दण्डेन सूत्रेण शरावेण जलेन च।
कुम्भं निर्म्माति चक्रेण कुम्भकारो मृदा भुवि।
तथैव कर्म्मसूत्रेण फलं धाता ददाति च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः ॥ * ॥
स्वप्रियफलस्य विष्णुदेयत्वं यथा,—
"भक्ष्याणि यानि पेयानि भोज्यान्यभिमतानि
च।
फलञ्च वल्लभं यच्च तत्तद्देयं जनार्द्दने ॥"
इत्यग्निपुराणम् ॥ * ॥
इष्टकफलद्वारा फलपातननिषेधो यथा,—
"न पातयेदिष्टकाभिः फलानि वै फलेन तु।
न म्लेच्छभाषां शिक्षेत नाकर्षेच्च पदासनम् ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
कर्म्मजन्यशुभाशुभदृष्टादृष्टसम्भवस्वर्गनरकादि।
तत्त्रिविधं यथा,—
"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥
"अनिष्टं नारकित्वम्। इष्टं देवत्वम्। मिश्रं मनु-ष्यत्वम्। एवं त्रिविधं पापस्य पुण्यस्य उभय-मिश्रस्य च कर्म्मणो यत् फलं प्रसिद्धं तत् सर्व्व-मत्यागिनामेव प्रेत्य परत्र भवति तेषां त्रिविध-कर्म्मसम्भवात् न तु सन्न्यासिनां क्वचिदपि भवति।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥
वेदादीनां फलम्। यथा, वह्निं प्रति मरीचि वाक्यम्।
"स तं प्राह फलं ब्रूहि वेदस्य च धनस्य च।
दारश्रुतस्य विप्रादेः स्वर्गापवर्गहेतवे ॥

वह्निरुवाच ।
"अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् ।
रतिपुत्त्रफला दाराः शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे नित्याह्निकज्ञानविधिर्नामाध्यायः ॥ * ॥ लवणादिसंयोगे फलस्याम्लत्वं यथा,
"तक्रतोऽम्लमितसंयोगाल्लवणयोगेन पिष्टकम् ।
फलं चित्तवसंयोगादम्लं भवति तत्क्षणात् ॥"
इति रामार्चनचन्द्रिकाधृतवचनमिति केचित् ॥

फलः, पुं, (फलतीति । फल + अच् ।) कुटजवृक्षः । इति शब्दरत्नावली ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कण्टकारिकाफलपटोलवार्त्ताकुकारवेल्लककर्कोटकाकेबुकोरुवूकमर्ष्य टङ्ककिरातितिक्तककर्कोटकारिष्टकोशातकीवेत्रकरीराटरूषकार्कपुष्पीप्रभृतीनि ॥")

फलकं, क्ली, पुं, (फल + संज्ञायां कन् ।) चर्म्म । इत्यमरः । २ । ८ । ६० ॥ ढाल इति भाषा ॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । ३३ ।
"शार्ङ्गं चापं कृपाणं फलकमरिगदे पद्मशङ्खौ सहस्रम्
बिभ्राणाः शस्त्रजालं मम ददतु हरेर्बाहवो मोहहानिम् ॥")

फलकः, पुं, (फल + संज्ञायां कन् ।) अस्थिखण्डम् । इति जटाधरः ॥ नागकेशरम् । इति शब्दचन्द्रिका ॥ काष्ठादिफलकम् । यथा,—
"पाण्डुलेख्येन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
इति व्यवहारतत्त्वे व्यासः ॥
(यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥")
रजकपट्टम् । धोपार पाट इति भाषा । यथा,
"शाल्मले फलके श्लक्ष्णे निर्ण्याद्वासांसि नेजकः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
इति मिताक्षरा ॥

फलकपाणिः, पुं, (फलकं पाणौ यस्य ।) चर्म्मी । इत्यमरः ॥ २ । ८ । ७१ ॥ ढाली इति भाषा ॥

फलकर्कशा, स्त्री, (फलेन कर्कशा ।) वनकोलिः । इति केचित् ॥

फलकामः, त्रि, (फलं कामयते इति । कम + अण् ।) कर्म्मफलकामी । यथा,—
"धर्म्मवाणिजिका मूढाः फलकामा नराधमाः ।
अर्च्चयन्ति जगन्नाथं ते कामान्नाप्नुवन्त्युत ॥"
इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरीयतृतीयकाण्डीयवचनम् ।

फलकी, [न्] पुं, (फलकं फलकाकारोऽस्त्यस्येति । फलक + इनिः ।) मत्स्यभेदः । फलुइ इति भाषा । (गुणादिकमस्य फलिशब्दे ज्ञातव्यम् ।) फलकान्विते, त्रि । इति मेदिनी । ने, १६ ॥

फलकाण्डः, पुं, (फले फलावच्छेदे काण्डः ।) पानीयामलकम् । इति शब्दचन्द्रिका ॥

फलकेशरः, पुं, (फले केशरा इवास्य ।) नारीकेलवृक्षः । इति जटाधरः ॥

फलकोषकः, पुं, (फलं मुष्क इव कोषो यस्य । ततः कन् ।) मुष्कः । इति त्रिकाण्डशेषः ॥ (विवृतिरस्य मुष्कशब्दे ज्ञातव्या ॥)

फलग्रहिः, त्रि, (फलं गृह्णातीति । ग्रह + इन् ।) फलेग्रहिः । यथासमयं फलधरवृक्षः । इत्यमरटीकायां भरतः ॥

फलग्राही, [न्] पुं, (फलं गृह्णातीति । ग्रह + णिनिः ।) वृक्षः । इति धरणिः ॥ फलग्रहणकर्त्तरि, त्रि ॥

फलचमसः, पुं, दधिमिश्रितवटलकचूर्णम् । इति श्राद्धतत्त्वम् ॥

फलचोरकः, पुं, (फलं चोर इवास्य कन् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

फलत्रयं, क्ली, (फलस्य त्रयम् ।) द्राक्षापरूषकाश्मर्य्यम् । (यथा,—
"द्राक्षापरूषकाश्मर्य्यैः फलत्रयमुदाहृतम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
त्रिफला । इति शब्दचन्द्रिका ॥

फलत्रिकं, क्ली, (फलस्य त्रिकम् ।) त्रिफला । (यथा,—
"पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
शुण्ठीपिप्पलीमरिचानि । इत्यमरः । २।९।१११ ॥

फलदः, पुं, (फलं ददातीति । दा + "आतोऽनुपसर्गे ।" ३ । २ । ३ । इति कः ।) वृक्षः । इति धरणिः ॥

फलदः, त्रि, (फलं ददातीति । दा + कः ।) फलदाता । यथा,—
"विघ्निघ्नफलदा कन्या निष्कामाणां विमुक्तिदा ।"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥

फलपाकं, क्ली, अम्लपक्वफलम् । इति राजनिर्घण्टः ॥

फलपाकः, पुं, (फलेषु पाकोऽस्य ।) करमर्द्दकः । इत्यमरटीकायां भरतः ॥ पानीयामलकम् । इति शब्दचन्द्रिका ॥

फलपाकान्ता, स्त्री, (फलपाकेनान्तो नाशो यस्याः ।) ओषधिः । धान्यकदल्यादिः । इत्यमरः । २।४।७ ॥

फलपाकी, [न्] पुं, (फलपाकोऽस्त्यस्येति । इनिः ।) गर्द्दभाण्डः । इति रत्नमाला ॥ (यथास्य पर्य्यायः ।
"नन्दीवृक्षस्त्वश्वपाकी फलपाकी च पीतनः ।
गर्द्दभाण्डो गन्धमुण्डो कपीतनः चिप्रपाककौ ॥"
इति च वैद्यकरत्नमालायाम्)

फलपुच्छः, पुं, (फलं पुच्छ इव यस्य ।) वरकालुः । इति त्रिकाण्डशेषः ॥

फलपुष्पा, स्त्री, (फलानि पुष्पाणीवास्याः ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्टः ॥

फलपूरः, पुं, (फलेन पूरः पूर्णः ।) बीजपूरः । इत्यमरः । २ । ४ । ७८ ॥ (विवरणमस्य बीजपूरशब्दे ज्ञातव्यम् ॥)

फलपूरकः, (फलपूर + स्वार्थे कन् ।) बीजपूरः । इति भावप्रकाशः ॥

फलप्रदः, त्रि, (फलं प्रददातीति । प्र + दा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) फलदाता । यथा,—
"श्रीर्यातीति भोः फलानीति श्रुत्वा सत्वरमच्युतः ।
फलार्थी धान्यमादाय ययौ सर्व्वफलप्रदः ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ॥

फलप्रिया, स्त्री, (फलेन प्रीणातीति । प्री + कः । टाप् ।) प्रियङ्गुः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः प्रियङ्गुशब्दे ज्ञेयाः ॥)

फलभाक्, [ज्] त्रि, (फलं भजते इति । भज + "भजो ण्विः ।" ३ । २ । ६२ । इति ण्विः ।) फलभागी । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत् ॥"
इति तिथ्यादितत्त्वधृतभविष्यपुराणवचनम् ॥

फलभूमिः, स्त्री, (फलाय कर्म्मफलभोगाय भूमिः ।) कर्म्मफलभोगस्थानम् । यथा,—
"भरताख्यैरावतानि विदेहाश्च कुरून् विना ।
वर्षाणि कर्म्मभूम्यः स्युः शेषाणि फलभूमयः ॥"
इति हेमचन्द्रः । ४ । १२ ॥

फलमुख्या, स्त्री, (फलेन मुख्या श्रेष्ठा ।) अजमोदा । इति राजनिर्घण्टः ॥

फलमुद्गरिका, स्त्री, (फले फलावच्छेदे मुद्गरिका मुद्गर इव ।) पिण्डखर्ज्जूरः । इति शब्दमाला ॥

फललक्षणा, स्त्री, (फलहेतुका लक्षणा ।) प्रयोजनवती लक्षणा । यथा, साहित्यदर्पणे ।
"व्यङ्ग्यस्य गूढागूढत्वाद्द्विधा स्युः फललक्षणाः ।"

फलवर्त्तुलं, क्ली, (फलं वर्त्तुलमस्य ।) कालिङ्गम् । इति राजनिर्घण्टः ॥

फलवान्, [त्] त्रि, (फलमस्यास्तीति । फल + मतुप् । मस्य वः ।) फलयुक्तवृक्षः । तत्पर्य्यायः । फलिनः २ फली ३ । इत्यमरः ॥ फलितः ४ । इति राजनिर्घण्टः ॥ (यथा, मनुः । १ । ४७ ।
"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥")

फलविक्रयिणी, त्रि, (फलविक्रयोऽस्या अस्तीति । इनिः । ङीप् ।) फलविक्रेत्री । कुञ्जड़ाइनी इति हिन्दी भाषा । यथा,—
"फलविक्रयिणी तस्य च्युतधान्यकरद्वयम् ।
फलैरपूरयद्रत्नैः फलभाण्डमपूरि च ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ॥

फलश्रेष्ठकः, पुं, (फलप्रधानो वृक्षः । संज्ञायां कन् ।) पनसः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विशेषो व्याख्यातः ॥)

फलशाकं, क्ली, (फलमेव शाकम् ।) षड्विधशाकान्तर्गतफलरूपशाकम् । यथा, राजवल्लभे ।
"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥"

अग्निवर्णं ततश्चौरो जिह्वया लेहयेत् सकृत्
न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते ॥"
चौरोऽत्र गोचौरः। गोचौरस्य प्रदातव्यं तप्त-
फालावलेहनमिति स्मृतिरिति मैथिलाः ॥
अत्रापि त्वमग्ने इत्यादिमन्त्रानन्तरं आयसं
लेलिह्यानस्य जिह्वयापि समादिशेदिति पिता-
महोक्तेः प्राड्विवाकशोध्याभ्याममन्त्राभिमन्त्रणं
कार्य्यम् ॥*॥ तत्र प्रयोगः। लौकिकचत्वारिंश-
त्तोलकमितं लौहघटितमष्टयवमध्यात्मकाङ्गुलाष्ट-
दीर्घं तथाविधचतुरङ्गुलप्रस्तारं फालमग्नौ ताप-
येत्। तत्र प्राड्विवाको धर्म्मावाहनादिहवनान्तं
कर्म्म कृत्वा दक्षिणां दत्त्वा,—
'ॐ त्वमग्ने वेदाश्चत्वारस्त्वञ्च यज्ञेषु हूयसे।
त्वं मुखं सर्व्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ॥
जठरस्थोऽसि भूतानां ततो वेत्सि शुभाशुभम्।
पापं पुनासि वै यस्मात्तस्मात् पावक उच्यते ॥
पापेषु दर्शयात्मानमर्च्चिष्मान् भव पावक !।
अथवा शुभभावेन शीतो भव हुताशन !॥
त्वमग्ने सर्व्वभूतानामन्तश्चरसि साक्षिवत्।
त्वमेव देव जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥'
इत्येतैः फालस्थमग्निं अभिमन्त्रयेत्। शोध्यस्तु
प्रतिज्ञापत्रं शिरसि निधाय।
'त्वमग्ने सर्व्वभूतानामन्तश्चरसि पावक !।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥'
इत्यनेनाभिमन्त्र्य अग्निवर्णं फालं जिह्वया सकृ-
ल्लिह्यात् न दग्धश्चेत्तदा शुद्धः।" इति दिव्य-
तत्त्वम् ॥

फालकृष्टः, त्रि, (फालेन कृष्टः।) फालेन कर्षित-
भूम्यादिः। यथा, मानवे। ४। ४६।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते ॥"

फालाः, पुं, (फालयन्तीति। फल + णिच् + अच्।)
अर्म्मीरवीजानि। इति दुर्गटीकाटिप्पनीकृत्-
कुलचन्द्रः ॥

फाल्गुनः, पुं, (फलति निष्पादयतीति। फल +
"फलेर्गुक् च।" उणा० ३। ५६। इति उनन्
ततो गुक्। ततः प्रज्ञाद्यण्। यद्वा फल्गुन्यां
फल्गुनीनक्षत्रे जातः फल्गुनः। स एव। अण्।
एतन्निरुक्तिर्यथा, महाभारते। ४। ४२। १६।
"उत्तराभ्याञ्च पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः ॥")
गुडाकेशः। नदीजश्चः। अर्ज्जुनश्चः। तपस्य
मासः ॥ यथा,—
"फाल्गुनस्तु गुडाकेशे नदीजार्ज्जुनभूरुहे।
तपस्यसंज्ञे मासे तत्पूर्णिमायान्तु फाल्गुनी ॥"
इति दन्त्यनान्तवर्गे मेदिनी ॥
अतएव।
"फाल्गुने गगने फेने नत्वमिच्छन्ति बर्व्वराः।"
इति कारिका सम्मूलिका। अत्र अनत्वमिच्छ
न्तीति अकारप्रश्लेषो भ्रान्तानाम् ॥ * ॥
(फाल्गुनी पौर्णमासी अस्मिन्निति। "विभाषा
फल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।" ४।२।२३।
इति पक्षे अण्।)
वैशाखादिद्वादशमासान्तर्गतैकादशमासः।
फल्गुनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे
सः। इति तु प्रायिकाभिप्रायम्। स च त्रिविधः।
मुख्यचान्द्रो गौणचान्द्रः सौरश्च। यथा।
कुम्भस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तो मासो
मुख्यचान्द्रः। मुख्यचान्द्रफाल्गुनमासीयपौर्ण-
मास्यन्तः कृष्णप्रतिपदादिको मासो गौण-
चान्द्रः। कुम्भराशिस्थरविभोगोपलक्षितकाला-
त्मको मासः सौरः। इति मलमासतत्त्वम् ॥*॥
तत्पर्य्यायः। तपस्यः २ फाल्गुनिकः ३ फल्गुनः
४। इत्यमरभरतौ ॥ वत्सरान्तकः ५। इति
राजनिर्घण्टः ॥ * ॥ तत्र जातफलम्।
"प्रियंवदः सज्जनवल्लभश्च
परोपकारी विमलाशयश्च।
दाता नितान्तं प्रमदाभिलाषी
स्यात् फाल्गुने यस्य जनस्य जन्म ॥"
इति कोष्ठीप्रदीपः ॥
अथ फाल्गुनकृत्यम्। तत्र माघवदन्तरं
फाल्गुनकृष्णाष्टम्यां कालशाकवास्तूकशाकोप-
करणान्नेन श्राद्धं कर्त्तव्यम् ॥ * ॥ गौणचान्द्र-
फाल्गुनकृष्णचतुर्द्दश्यां शिवरात्रिव्रतम्। यद्दिने
प्रदोषनिशीथोभयव्यापिनी चतुर्द्दशी तद्दिने
व्रतमुभयव्याप्त्यनुरोधात्। यदा पूर्व्वेद्युर्निशीथ-
व्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वे-
द्युर्व्रतं प्रधानकालव्याप्त्यनुरोधात्। यदा तु
पूर्व्वेद्युर्न निशीथव्याप्तिः परदिने प्रदोषव्यापिनी
तदा परदिने प्रदोषव्यापिनीति वचनात् ॥ * ॥
मुख्यचान्द्रफाल्गुनशुक्लद्वादशी गोविन्दद्वादशी।
"फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥"
महापातकनाशकामो गङ्गायां स्नानमहं
करिष्ये। अत्र महापुराणीयो मन्त्रः।
"महापातकसंज्ञानि यानि पापानि सन्ति मे।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि !॥"
फाल्गुनपौर्णमास्यां दोलयात्रा। तीर्थचिन्ता
मणौ ब्रह्मपुराणम्।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"
स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये त्रिंशाध्याये।
"फाल्गुन्यां क्रीडनं कुर्य्यात् दोलायां मम
भूपते !॥"
इति कृत्यतत्त्वम् ॥

फाल्गुनानुजः, पुं, (फाल्गुनादनुपश्चात् जायते
इति। अनु + जन् + ड।) वसन्तकालः। इति
हारावली ॥ अर्ज्जुनस्य कनिष्ठभ्राता च ॥

फाल्गुनिकः, पुं, (फाल्गुनी पौर्णमास्यस्मिन् मासे
इति। "विभाषा फाल्गुनीश्रवणेति।" ४। २।
२३। इति ठक्।) फाल्गुनमासः। इत्यमरः।
१। ४। १५ ॥

फाल्गुनी, स्त्री, (फल्गुनीभिर्युक्ता पौर्णमासी।
"नक्षत्रेण युक्तः कालः।" ४। २। ३। इति
अण्। ततो ङीप्।) फाल्गुनमासस्य पूर्णिमा।
इति मेदिनी। ने, ८६ ॥ पूर्व्वफल्गुनीनक्षत्रम्।
उत्तरफल्गुनीनक्षत्रम्। इत्यमरटीकायां
भरतः ॥

फिः, पुं, पापः। निष्फलवाक्यम्। इत्येकाक्षर-
कोषः। कोपः। इति शब्दरत्नावली ॥

फिङ्गकः, पुं, (फिङ्ग इति शब्देन कायति शब्दा-
यते इति। कै + कः।) पक्षिविशेषः। फिङ्गा
इति भाषा। तत्पर्य्यायः। कुलिङ्गः २ कलिङ्गः
३ धूम्याटः ४। इति शब्दमाला। भृङ्गः ५।
इत्यमरः ॥

फिरङ्गः, पुं, (फौ पापे क्रोधे वा रङ्गोऽनुरागो
यस्य।) स्वनामख्यातम्लेच्छदेशः। यथा,—
"पूर्व्वाम्नाये नवशतं षड्शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनाद्भुवि ॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्ड्जाश्चापि भाविनः ॥"
इति मेरुतन्त्रे २३ प्रकाशः ॥
रोगविशेषः। अथ फिरङ्गस्य निरुक्तिमाह।
"फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत्।
तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः ॥"
तस्य विप्रकृष्टं निदानमाह।
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥
व्याधिरागन्तुजो ह्येष दोषाणामत्र संक्रमः।
भवेत्तां लक्षयेत्तेषां लक्षणैर्भिषजां वरः ॥"
फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम् ॥ * ॥
रूपमाह।
"फिरङ्गस्त्रिविधो ज्ञेयो बाह्याभ्यन्तरतस्तथा।
बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे ॥
तत्र बाह्यः फिरङ्गः स्याद्विस्फोटसदृशोऽल्परुक्।
स्फुटितो व्रणवद्भेद्यः सुखसाध्योऽपि स स्मृतः ॥
सन्धिष्वाभ्यन्तरः स स्यादुभयोर्लक्षणैर्युतः।
कष्टोऽतिचिरस्थायी कष्टसाध्यतमश्च सः ॥"
उपद्रवान् आह।
"कार्श्यं बलक्षयो नासाभङ्गो वह्नेश्च मन्दता।
अस्थिशोषोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी ॥"
साध्यत्वादिकमाह।
"बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः ॥
बहिरन्तर्भवो जीर्णः क्षीणस्योपद्रवैर्युतः।
बोध्यो व्याधिरसाध्योऽयमित्यूचुर्म्मुनयः पुरा ॥"
अथ फिरङ्गस्य चिकित्सा।
"फिरङ्गसंज्ञकं रोगं रसः कर्पूरसंज्ञकः।
अवश्यं नाशयेदेतद्रूचुः पूर्व्वे चिकित्सकाः ॥
लिख्यते रसकर्पूरप्राशने विधिरुत्तमः।
अनेन विधिना खादन्मुखे शोथं न विन्दति ॥
गोधूमचूर्णं संनीय विदध्यात् क्षुद्रकूपिकाम्।
तन्मध्ये निःक्षिपेत् सूतं चतुर्गुञ्जामितं भिषक् ॥
ततस्तु गुटिकां कुर्य्याद्यथा न स्यान्मुखो बहिः।

हृद्यचूर्णं लवङ्गस्य तां वटीमवधूलयेत् ॥
दन्तास्पर्शो यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत् पश्चाच्छाकाम्ललवणांस्त्यजेत् ॥
श्रममातपमध्वानं विशेषात् स्त्रीनिषेवणम् ॥
इति कर्पूररसः ॥ १ ॥

पारदष्टङ्कमानः स्यात् खदिरष्टङ्कसंमितः ।
आकारकरभश्चापि पाशष्टङ्कद्वयोन्मितः ॥
टङ्कत्रयमितं चौद्रं खल्ले सर्व्वं विनिःक्षिपेत् ।
संमर्द्य तस्य सर्व्वस्य कुर्य्यात् सप्त वटीर्भिषक् ॥
स रोगी भक्षयेत् प्रातरेकैकामम्बुना वटीम् ।
वर्जयेदम्ललवणौ फिरङ्गस्तस्य नश्यति ॥
इति सप्तशालिकावटी ॥ २ ॥

पारदः कर्षमात्रः स्यात्तावदेव हि गन्धकः ।
तन्दुला अष्टमाषाः स्युस्तेषां कुर्य्याच्च कज्ज-
लीम् ॥
तस्याः सप्त वटीः कुर्य्यात्ताभिर्धूमं प्रयोजयेत् ।
दिनानि सप्त तेन स्यात् फिरङ्गान्तो न संशयः ॥
इति धूमप्रयोगः ॥ ३ ॥

पीतपुष्पबलापत्ररसैष्टङ्कमितं रसम् ।
हस्ताभ्यां मर्द्दयेत्तावत् यावत् सूतो न दृश्यते ॥
ततः संस्वेदयेद्वस्त्रादेवं वासरसप्तकम् ।
त्यजेल्लवणमम्लञ्च फिरङ्गस्तेन नश्यति ॥ ४ ॥
चर्व्वयेन्निम्बपत्राणि पथ्यां निम्बाष्टमांसिकाम् ।
धात्रीञ्च तावतीं रात्रिं निम्बषोड़शभागिकाम् ॥
शाणमानमिदं चूर्णमश्नीयादम्भसा सह ।
फिरङ्गं नाशयत्येव वाह्यमाभ्यन्तरं तथा ॥ ५ ॥
तोपचीनिभवं चूर्णं शाणमानं समाक्षिकम् ।
फिरङ्गव्याधिनाशाय भक्षयेल्लवणं त्यजेत् ॥
लवणं यदि वा त्यक्तुं न शक्नोति तदा जनः ।
सैन्धवं स हि भुञ्जीत मधुरोपरसं हि तत् ॥६॥
अर्द्धकर्षमितं सूतं कुरण्टकरसैः सह ।
खल्ले विमर्द्दयेत्तत्र पलार्द्धं गुग्गुलुं क्षिपेत ॥
मचार्ककरभं कुष्ठं त्रिफलाञ्च पृथक् पृथक् ।
अर्द्धकर्षमितं सर्व्वं चूर्णयित्वा तु निःक्षिपेत् ॥
तत् सर्व्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् पृथक् ।
मर्द्दयेदथ तत् खादेदर्द्धकर्षमितं रसम् ॥
व्रणः फिरङ्गरोगोत्थस्तस्यावश्यं विनश्यति ।
अल्पोऽपि चिरजातोऽपि प्रशाम्यति महाव्रणः ॥
एतद्भक्षयतः शोथो मुखस्य च न जायते ।
वर्जयेदत्र लवणमेकविंशतिवासरान् ॥ ७ ॥
इति फिरङ्गाधिकारः ।” इति भावप्रकाशः ॥

फिरङ्गरोटी, स्त्री, (फिरङ्गप्रिया रोटी । फिर-ङ्गाणां रोटीति वा ।) रोटिकाविशेषः । पाओरोटी इति पाँउरुटि इति च भाषा । सा तु तालस्याथवा खर्ज्जूरस्य रसेन मधुरिका-ख्येन वा मिश्रितां गोधूमकणिकामधिक-कालमुत्तमं संमर्द्य गोलाकारं स्थूलं स्थूलं निर्म्माय तन्दूरपाकेन मिश्र्यादिना भवति । इति पाकराजेश्वरः ॥

फिरङ्गिणी, स्त्री, (फिरङ्गदेशो जन्मस्थानत्वेना-स्त्यस्या इति । फिरङ्ग + इनि । ङीप् ।) फिरङ्गदेशोद्भवनारी । यथा,—
“गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥”
इति भावप्रकाशः ॥

फिरङ्गी [न्] पुं, (फिरङ्ग + इनिः ।) फिरङ्ग-देशोद्भवपुरुषः । अस्य प्रमाणं पूर्व्वशब्दे द्रष्टव्यम् ॥

फुः, पुं, मन्त्रकम् । तुच्छवाक्यम् । इति विश्वः ॥

फुकः, पुं, (फुनाव्यक्तवाक्येन कायति शब्दायते इति । फु + कै + क ।) पक्षी । इति शब्दचन्द्रिका ॥

फुटः, त्रि, (स्फुटतीति । स्फुट + कः । पृषोदरा-दित्वात् साधुः ।) सर्पफणा । इति हेमचन्द्रः । ४ । ३८१ ॥

फु(फ़्)त्, अ, अनुकरणशब्दः । इति फुत्कारशब्द-दर्शनात् । (यथा “बालः पयसा दग्धो दध्यपि फुत्कृत्य भक्षयति ।” इति प्राञ्चः ॥) तुच्छ भाषणम् । इति केचित ॥

फुत्करः, पु, (फुदित्यव्यक्तशब्दं करोतीति । कृ + टः ।) अग्निः । इति शब्दचन्द्रिका ॥

फुत्कारः, पुं, (कृ + भावे घञ् । फुदित्यव्यक्तशब्दस्य कारः करणम् ।) फुत्करणम् । फु इति फुँक् इति च भाषा । फुत्कारवति पावके आहुति निषेधो यथा, तिथ्यादितत्त्वे ।
“अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठैः समुत्पन्ने फुत्कारवति पावके ॥
कृष्णार्च्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् ।
आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद्-ध्रुवम् ॥’

फुत्कृतिः, स्त्री, (फुदित्यव्यक्तशब्दस्य कृतिः करणम् ।) फुत्कारः । यथा, काव्यचन्द्रिका ।
“स्फूर्ज्जत्फुत्कृतिभीतिसम्भ्रमचमत्कारस्फुरत्-सम्भ्रमा ॥”

फुप्फुसः, पु, पुप्फुसः । कोष्ठविशेषः । स च हृदय-नाड़िकासंलग्नाशयविशेष. । फ्यापड़ा फुलका कापासे इति च लोके । इति सुश्रुतः ॥ यथा,—
“स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥”
इति माधवकरः ।
अस्य व्याख्या । “आमस्य स्थानं आमाशयः । नाभेरूर्द्ध्वम् । अग्नेः स्थानं पच्यमानाशयः नाभिमध्यम् । पक्वस्य स्थानं पक्वाशयः नाभे-रधः । मूत्रस्य स्थानं वस्तिः । रुधिरस्य स्थानं यकृत्प्लीहानौ । स्तन हृदयं इत्युरसपाकमल-वद्धृयः शोणितमलस्तत्र. उण्डुकः स चान्त्रदेशे व्यवस्थितः पुरीषाधानम् । फुप्फुसः हृदयस्य वामपार्श्वे फुप्फुस इति ख्यातः ।” इति विजय-रक्षितः ॥ (यथा च ।
“तद्वामे फुप्फुसः प्रोक्ता रक्तवाहि यदञ्जनम् ।
उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः ॥”
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

फुल्तिः, स्त्री, (फल + क्तिन् । “ति च ।”७।४।८६। इति अत उत् ।) फलनम् । इति मुग्धबोध-व्याकरणम् ॥

फुल्ल, विकासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) फुल्लति । लदयान्तः । विकास इह कस ञ गताविति दन्त्यान्तस्य घञि रूपम् । विपूर्व्वत्वेनार्थान्तरवाचितया विकसनमित्यर्थः । फुल्लति मल्लीकलिका । इति दुर्गादासः ॥

फुल्लः, त्रि, (फुल्लतीति । फुल्ल + अच् । यद्वा, फलतीति । ञि फला विसरणे + क्तः । “आदि-तश्च ।”७।२।१६ । इति इड़भावः । “ति च ।” ७ । ४ । ८९ । इति उत्वम् । अनुपसर्गात् । फुल्लक्षीवेति ।”८।२।५५। इति निष्ठातस्य लः ।) विकसितः । इत्यमरः । २।४।८ ॥ (यथा, महा-भारते । १ । १२८ । ४१ ।
“जलञ्च शुभ्रं स्वच्छं फुल्लैर्जलरुहैस्तथा ॥”) पुष्पम् । फुल इति भाषा । यथा,—
“श्रीपञ्चम्यां श्रियं देवीं फुल्लैः संपूजयेत् सदा ॥”
इति कालिकापुराणम् ॥

फुल्लदाम, [न्] स्त्री, (फुल्लानां पुष्पाणां दाम इव ।) छन्दोभेदः । यथा,—
“मो गौ नौ तौ गौ शरहयतुरगैः फुल्लदाम प्रसिद्धम् ॥”
उदाहरणं यथा,—
“श्रुत्वा लोकानां प्रकटितकथनं ध्वस्तमालोक्य कंसं
कृष्णश्चेतोभिर्व्रजदिववसतिभिर्व्योमसंस्थैर्वि-मुक्तम् ।
मुग्धामोदेन स्थगितदशदिशाभोगमाकृष्टभृङ्गं
मौलौ दैत्यारेर्न्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥”
इति छन्दोमञ्जरी ॥

फुल्लफाल', पु, (फुल्लं फलतीति । फल + अण् ।) शूर्पवातः । इति त्रिकाण्डशेषः ॥

फुल्लरीकः, पु, (फल + “फर्फरीकादयश्च ।” उणा० ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) देशः । सर्प. । इति संक्षिप्तसारो-णादिवृत्तिः ॥

फुल्ललोचनः, पु, (फुल्ले विकसिते लोचने यस्य ।) मृगविशेषः । इति शब्दचन्द्रिका ॥ प्रफुल्लनेत्र-युक्ते, त्रि ॥

फुल्लिः, स्त्री, विकाशः । इङ्धातुकथने तिङ्वत्तिङ् वा इति संक्षिप्तसारसूत्रात् भावे इङ्प्रत्ययेन निष्पन्नः ॥

फेणः, पुं, (स्फायते वर्द्धते इति । स्फाय + “फेन-मीनौ ।” उणा० ३ । ३ । इति नक् फे-शब्दा-देशश्च । मतान्तरे णत्वम् । दन्त्यनान्तपाठस्तु गरीयान् ।) फेनः । तरलद्रव्योपर्य्युत्थितबुद्बुदा-कारवस्तु । फेना इति भाषा । यथा,—
“पयःफेणनिभा शय्या दान्ता रुक्मपरिच्छदा ॥”
इति पुराणम् ॥
डिण्डीरः । इत्यमरः । २ । ६ । १०५ ॥ समुद्र-फेना इति भाषा । अस्य मूर्द्धन्यणान्तत्व प्रमाणं यथा,—
“हंसश्रेण्यो नदीतीरे निनदैः संप्रनीषिरे ।
यथा सारस्वता मन्त्रा अन्तरे फेणरुद्धता ॥”
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ॥

फेण(न)पः, पुं, स्वयंपतितफलादिजीविमुनिविशेषः। यथा, श्रीभागवते। ३। १२। ४३।
"वैखानसा वालिखिल्यौडुम्बराः फेणपा वने। न्यासे कुटीचकः पूर्व्वं बह्वोदो हंसनिष्क्रियौ॥"
"वने स्थिताश्चत्वारः। तत्र वैखानसाः अकृष्टपच्यवृत्तयः। वालिखिल्याः नवेऽन्ने लब्धे पूर्व्वसञ्चितान्नत्यागिनः। औडुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः फलादिभिर्जीवन्तः। फेणपाः स्वयं पतितैः फलादिभिर्जीवन्तः। कुटीचकः स्वाश्रमधर्म्मप्रधानः। बह्वोदः कर्म्मोपसर्ज्जनीकृत्य ज्ञानाभ्यासप्रधानः। हंसो ज्ञानाभ्यासनिष्ठः। निष्क्रियः प्राप्ततत्त्वः। एते च सर्व्वे यथोत्तरं श्रेष्ठाः।" इति तट्टीकायां श्रीधरस्वामी॥ (फेणं पिबतीति। फेण+पा+कः। फेनपानकर्त्तरि, त्रि। यथा, महाभारते। १। ६४। २२।
"फेनपांश्च तथा वत्सान्न दुहन्ति स्म मानवाः॥")

फेणी(नी), स्त्री, (स्फायते वर्द्धते इति। स्फाय+नक्। गौरादित्वात् ङीष्।) स्वनामख्यातमिष्टान्नविशेषः। यथा, जीर्णमञ्जरी।
"वटो वेशवाराक्तवङ्गेन फेणी-
समं पर्पटः शिग्रुबीजेन याति॥"

फेत्कारिणी, स्त्री, (फेत् करोतीति। कृ+णिनिः। ङीप्।) तन्त्रविशेषः। यथा,—
"उन्मत्तभैरवं नारसिंहं डामरभैरवम्।
शिवाकारं मलिन्याद्यमसिताङ्गादि यामलम्॥
सिद्धयोगेश्वरं तन्त्रं योगिनीजालसम्बरम्।
दृष्ट्वा कृत्वा विधिं फेत्कारिणीतन्त्रं विरच्यते॥"
इति प्रथमश्लोकद्वयम्॥
"फेत्कारिणीतन्त्र इयं मयोक्ता
कृत्वा समस्तागमसारभूता।
शत्रोर्विनाशाय धनाय धर्म्म-
मोक्षाय सम्यक् प्रयतो नियोज्या॥"
इति फेत्कारिणीतन्त्रस्य शेषश्लोकः॥

फेत्कारीयः, पुं, तन्त्रविशेषः। तन्त्रसारादिसंग्रहे फेत्कारीये इति शासनं लिखितम्॥

फेनः, पुं, (स्फायते वर्द्धते इति। स्फाय+"फेनमीनौ।" उणा० ३। ३। इति नक् फेशब्दादेशश्च।) फेणः। फेना इति भाषा। तत्पर्य्यायः। डिण्डीरः २ अब्धिकफः ३। इत्यमरः। २। ६। १०५।॥ डिण्डिरः ४। इति शब्दरत्नावली॥ समुद्रकफः ५ जलहासः ६ फेनकः ७। इति त्रिकाण्डशेषः॥ स्फायते फेनः स्फायी छ वृद्धौ नामीति नः। निपातनात् सलुक् इत्यन्तः। इत्यमरटीकायां भरतः॥ अस्य दन्त्यनान्तस्य प्रमाणान्तरं यथा,
"वानीरं नगनं फेनमूनश्च दन्त्यनान्वितम्।
आहुर्गगनमिच्छन्ति केचिन्मूर्द्धन्यणान्वितम्॥"
इति भरतसेनविरचितं मुखलेखनम्॥
(यथा, रघुः। १३। ११।
"मातङ्गनक्रैः सहसोत्पतद्भि-
र्भिन्नान् द्विधा पश्य समुद्रफेनान्॥"
तरलद्रव्योपरिसमुत्थितबुद्बुदाकारवस्तुमात्रम्
यथा, महाभारते। १। ३। ५२।
"भोः फेनं पिबामि यमिमे वत्सा मातॄणां स्तनात् पिबन्त उद्गिरन्ति॥" * ॥ उग्रद्रयस्य पुत्रः। यथा, हरिवंशे। ३१। ७६।
"उग्रद्रयो महाराज। फेनस्तस्य सुतोऽभवत्॥")

फेनकः, पुं, (फेन+स्वार्थे संज्ञायां वा कन्।) फेनः। इति त्रिकाण्डशेषः॥ पिष्टकविशेषः। अस्य गुणाः। लघुत्वम्। रूचत्वम्। शुक्रकारित्वम्। पित्तवायुनाशित्वञ्च। इति राजवल्लभः॥ (यथा च सुश्रुते। १। ४६।
"लुप्ताः पथ्यतमास्तेषां लघवः फेनकादयः॥"
गात्रमार्ज्जनादिवत् क्रियाविशेषः। तस्य गुणा यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
"ऊर्व्वोः सक्थ्नयत्यास्तु फेनकः स्थैर्य्यलाघवे।
कण्डूकोठानिलस्तम्भमलरोगापहश्च सः॥")

फेनका, स्त्री, (फेनेन कायतीति। कै+कः। टाप्।) जलपक्वतण्डुलचूर्णम्। इति शब्दचन्द्रिका॥

फेनदुग्धा, स्त्री, (फेन इव दुग्धं यस्याः।) दुग्धफेनीक्षुपः। इति राजनिर्घण्टः॥

फेनलः, त्रि, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ९९। इति चात् लच्।) फेनवान्। इति सिद्धान्तकौमुदी॥

फेनवान्, [त्] त्रि, (फेनोऽस्यस्येति। "फेनादिलच्च।" ५। २। ९९। इत्यत्र अन्यतरस्यामित्यनुवृत्तेः पक्षे मतुप्। मस्य वः।) फेनिलः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ३। १४३। २०।
"तत्र सागरगा आपः कीर्य्यमाणाः समन्ततः।
प्रादुरासन् सुकलुषाः फेनवत्यो विशाम्पते!॥")

फेनवाही, [न्] पुं, (फेनवत् शुभ्रतां वहतीति। वह्+णिनिः।) वस्त्रम्। इति शब्दमाला॥

फेना, स्त्री, (फेनोऽस्ति बाहुल्येनास्याः। फेन+अच्। टाप्।) सातलाक्षुपः। इति राजनिर्घण्टः॥

फेनाग्रं, क्ली, (फेनस्याग्रम्।) बुद्बुदम्। इति हारावली। २०५॥

फेनायमानः, त्रि, (फेनमुद्वमतीति। फेन+"फेनाच्चेति वाच्यम्।" ३। १। १६। इत्यस्य वार्त्तिकोक्त्या क्यङ्। ततः शानच्।) उत्थितफेनदुग्धादिः। फेन इव आचरति यः इत्यर्थे फेनशब्दात् क्यप्रत्ययानन्तरं शानप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ६। ३। ३४।
"प्रतिस्रोतोवहा नद्यः सरितः शोणितोदकाः।
फेनायमानाः कूपाश्च नर्द्दन्ति वृषभा इव॥")

फेनाशनिः, पुं, (फेन एवाशनिर्वज्रं यस्य। फेनेन वृत्रासुरनाशनादेवास्य तथात्वम्।) इन्द्रः। इति शब्दमाला॥ (एतद्वृत्तान्तो यथा, देवीभागवते। ६। ६। ५५—५९।
"इति सञ्चिन्त्य मनसा कथं हन्यां रिपुं हरिः।
अजेयं सर्व्वदा सर्व्वदेवैश्च दानवेश्वरम्॥
यदि ह्यहं न हन्म्यद्य वञ्चयित्वा महाबलम्।
न श्रेयो मम नूनं स्यात् सर्व्वथा रिपुरक्षणात्॥
अपां फेनं तदापश्यत् समुद्रे पर्व्वतोपमम्।
नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा॥
अपां फेनं तदा शक्रो जग्राह किल लीलया।
परां शक्तिञ्च सस्मार भक्त्या परमया युतः॥
स्मृतमात्रा तदा देवी स्वांशं फेने न्यधापयत्।
वज्रं तदावृतं तत्र चकार हरिरंशुतम्॥
फेनावृतं पविं तत्र शक्रश्चिक्षेप तं प्रति।
सहसा निपपातासु वज्राहत इवाचलः॥")

फेनिका, स्त्री, (फेन इवास्तिरस्त्यस्याः। फेन+ठन्। टाप्।) पक्वान्नविशेषः। खाजा इति भाषा। यथा,—
"समितायाः घृताढ्याया वर्त्तीर्दीर्घाः समाचरेत्।
तास्तु सन्निहिता दीर्घाः पीठस्योपरि धारयेत्॥
वेल्लयेद्वेल्लनेनैता यथैका पर्पटी भवेत्।
ततश्छुरिकया तान्तु संलग्नामेव कर्त्तयेत्॥
ततस्तु वेल्लयेद्भूयः सकृत्केन च लेपयेत्।
शालिचूर्णं घृतं तोयं मिश्रितं सट्टकं भवेत्॥
ततः संहृत्य तां लोप्त्रीं विदधीत पृथक् पृथक्।
पुनस्तां वेल्लयेत् लोप्त्रीं यथा स्यान्मण्डलाकृतिः॥
ततस्तां सुपचेदाज्ये भवेयुश्च पुटाः स्फुटाः।
सुगन्धया शर्करया तद्धूलनमाचरेत्॥
सिद्धैषा फेनिकानाम्नी मण्डकेन समा गुणैः।
ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः॥"
इति भावप्रकाशः॥

फेनिलं, क्ली, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ९९। इति इलच्।) कोलिफलम्। (अस्य पर्य्यायो यथा,—
"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत्।
अजप्रिया कुहा कोली विषमो भयकण्टका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मदनफलम्। सफेने, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। १५३। १०।
"उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु॥")

फेनिलः, पुं, (फेन+इलच्।) अरिष्टवृक्षः। इत्यमरः। २। ४। ३१॥ रिठा इति ख्यातः॥ (अस्य पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) बदरवृक्षः। इति राजनिर्घण्टः॥ (स्त्रियां टाप्। जलशाली। यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।
"अब्जपिष्टैः सुशीतैश्च फेनिलापल्लवैस्तथा॥")

फेरः, पुं, (फे इति शब्दं राति गृह्णातीति। रा ग्रहणे+कः।) शृगालः। इति शब्दरत्नावली॥

फेरण्डः, पुं, (फे इत्यव्यक्तशब्देन रण्डतीति। रण्ड+अच्।) शृगालः। इति हेमचन्द्रः। ४। ३५५॥

फेरवः, पुं, (फे इति रवो यस्य ।) शृगालः । इत्यमरः ।२।५।५ ॥ (यथा, कथासरित्सागरे । ४७ । ५६ ।
"नृत्यतां तरतां रक्तै नदतां चोत्सवाय सः ।
भूरासौ फेरवाणाञ्च भूतानाञ्चाभवद्रणः ॥")
राक्षसः । इति मेदिनी । वे, ४४ ॥ धूर्त्ते हिंस्रे च, त्रि । इति शब्दरत्नावली ॥

फेरुः, पुं, (फे इति शब्देन रौतीति । रु ल शब्दे + मितद्र्वादित्वात् डुः ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥ (यथा, भागवते ।८।१६।७।
"गृहेषु येष्वतिथयो नार्च्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥")

फेल, ऋ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अपिफेलत् पिफेलतुः । इति दुर्गादासः ॥

फेलं, क्ली, (फेल्यते दूरे निक्षिप्यते इति । फेल + घञ् ।) भुक्तसमुज्झितम् । उच्छिष्टम् । इति शब्दरत्नावली ॥

फेलकः, पुं, (फेल + स्वार्थे संज्ञायां वा कन् ।) भुक्तसमुज्झितम् । इति जटाधरः ॥

फेला, स्त्री, (फेल्यते इति । फेल + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) भुक्तसमुज्झितम् । इत्यमरः । २ । ९ । ५६ ॥

फेलिः, स्त्री, (फेल + इन् ।) उच्छिष्टम् । इति जटाधरः ॥

फेलिका, स्त्री, (फेलिरिव । स्वार्थे कन् ।) उच्छिष्टम् । फेलाशब्दात् स्वार्थे ण्विकप्रत्ययेन निष्पन्ना ॥

फेली, स्त्री, (फेलि + "कृदिकारादक्तिनः ।" इति पक्षे ङीष् ।) भुक्तसमुज्झितम् । इति शब्दरत्नावली ॥

ब

ब, बकारः । स च त्रयोविंशव्यञ्जनवर्णः । (पवर्गस्य तृतीयवर्णश्च ।) तस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "उपूपध्मानीयानामोष्ठौ ॥") तस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"बकारं शृणु चार्व्वङ्गि । चतुर्व्वर्गप्रदायकम् ।
शरच्चन्द्रप्रतीकाशं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं त्रिबिन्दुसहितं सदा ॥"
(वङ्गीयवर्णमालायामस्य स्वरूपमाह ।)
"त्रिकोणरूपिणी रेखा विष्णुीशब्रह्मरूपिणी ।
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रचक्ष्यते ॥"
अस्य ध्यानं यथा,—
"नीलवर्णां त्रिनयनां नीलाम्बरधरां पराम् ।
नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम् ॥
एवं ध्यात्वा बकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं विविधान्तर्व्वेपितम् ।
स्वयं कुण्डलिनीं देवीं सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"बो वनी भूधरो मार्गो चर्च्चरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः ।
मुखबिन्दुर्ब्बली घण्टा योद्धा त्रिलोचनप्रियः ॥
क्लेदिनी तापिनी भूमिसुगन्धिर्न्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारी वसुधाधिपः ॥
षष्ठापुरं चपेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भतृतीयकौ ॥"
इति नानातन्त्रशास्त्रम् ॥

बंहिष्ठः, त्रि, (अयमेषामतिशयेन बहुलः । बहुल + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति बंहि-आदेशः ।) अतिशयबहुलः । इत्यमरः ॥ (यथा, महाभारते । १२ । ३२८ । ३९ ।
"योऽद्भिः संयोज्य जीमूतान् पर्ज्जन्याय प्रयच्छति ।
उद्वहो नाम बंहिष्ठस्तृतीयः स सदागतिः ॥")

बंहीयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुलः । बहुल + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "प्रियस्थिरस्फिरोरुबहुलेति ।" ६ । ४ । १५७ । इति बंहि-आदेशश्च ।) अतिशयबहुलः । अयमनयोरतिशयेन बहुः इत्यर्थे बहुशब्दादीयसुप्रत्ययेन निष्पन्नः । इति मुग्धबोधमतम् ॥

बः, पु, वरुणः । कुम्भः । इति शब्दरत्नावली ॥
"बः पुमान् वरुणे सिन्धौ भगे तोये गतेऽपि च ।
गन्धने तन्तुसन्ताने पुंस्येव वपने स्मृतः ॥"
इति मेदिनी । बे, १ ॥ * ॥
तस्य साङ्केतिकनामानि यथा । युगन्धरः १ सुरभिः २ सुखविष्णुः ३ संहारः ४ वसुधाधिपः ५ । इति बीजवर्णाभिधानम् । भूधरः ६ दशगण्डः ७ । इति रुद्रयामलोक्तबीजाभिधानम् ॥
अपि च ।
"बो वनी भूधरो मार्गो चर्च्चरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्ब्बली घण्टा योद्धा त्रिलोचनप्रियः ।
क्लेदिनी तापिनी भूमिसुगन्धिर्न्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारी वसुधाधिपः ॥
षष्ठापुरं चपेठा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भतृतीयकौ ॥"
इति तन्त्रान्तरम् ॥

ब(व)क, इ ङ कौटिल्ये । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-सक० च-सेट् ।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इ, वङ्क्यते । ङ, वङ्कते काष्ठं कुटिलं स्यादित्यर्थः । वङ्कते काष्ठं कुटिलं करोतीत्यर्थः । इति दुर्गादासः ॥

ब(व)कः, पुं, (ब(व)ङ्कते कुटिलीभवतीति । वकि + अच् । पृषोदरादित्वात् नलोपः ।) स्वनामख्यातपक्षिविशेषः । तत्पर्य्यायः । कह्वः २ । इत्यमरः । २ । ५ । २२ ॥ द्वारबलिभुक् ३ काचिकः ४ शुक्लवायसः ५ दीर्घजङ्घः ६ बकोटः ७ गृहबलिप्रियः ८ । इति शब्दरत्नावली ॥ निशैतः ९ शिखी १० चन्द्रविहङ्गमः ११ । इति त्रिकाण्डशेषः ॥ तीर्थसेवी १२ तापसः १३ मीनघाती १४ ध्यानाध्यायी १५ निश्चलाङ्गः १६ दाम्भिकः १७ । इति राजनिर्घण्टः ॥ अस्य मांसस्य गुणाः ।
"शरारिबककाकाश्च दारुणाः पवनापहाः ॥"
इति रत्नावली ॥
अपि च ।
"हंससारसकाचाक्षबकक्रौञ्चशरारिकाः ।
नन्दीमुखीसकादम्बावलाकाद्याः प्लवाः स्मृताः ॥
प्लवन्ते सलिले यस्मात एते तस्मात् प्लवाः स्मृताः ॥
कुलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः
स्मृताः ॥"
इति भावप्रकाशः ॥
स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । शिववल्ली २ पाशुपतः ३ एकाष्ठीलः ४ वसुः ५ । इत्यमरः ॥ एकाष्ठीला ६ शुकः ७ वसुकः ८ वसूकः ९ । इति तट्टीका ॥ बकपुष्पः १० शिवमल्ली ११ । इति शब्दरत्नावली ॥ काकशीर्षः १२ स्थूलपुष्पः १३ शिवप्रियः १४ काकनामा १५ वसहट्टः १६ स्वपूरकः १७ रक्तपुष्पः १८ मुनितरुः १९ अगस्तिः २० वङ्गसेनकः २१ । इति रत्नमाला ॥ अगस्त्यः २२ शीघ्रपुष्पः २३ मुनिद्रुमः २४ व्रणारिः २५ दीर्घफलकः २६ वक्रपुष्पः २७ सुरप्रियः २८ ।
"सितपीतनीललोहितकुसुमभेदाच्चतुर्विधोऽगस्तिः ।
मधुरशिशिरदोषश्रमकासविनाशनश्च भूतघ्नः ॥"
तथा च ।
"अगस्ति शिशिरं गौल्यं त्रिदोषघ्नं श्रमापहम् ।
बलासकासवैवर्ण्यभूतघ्नञ्च बलावहम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् ।
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"
इति राजवल्लभः ॥
"बकः पाशुपतश्चैव शिवापीड़श्च सुव्रतः ।
वसुकश्च शिवाह्वश्च शिवेष्टः क्रमपूरकः ॥
शिवमल्लिः शिवाह्लादः शाम्भवो रविसंमितः ।

बकोऽनिशिशिरस्तिक्तो मधुरो मधुगन्धकः ॥
पित्तदाहकफश्वासश्रमहारी च दीपनः ॥"
इति च राजनिर्घण्टः ॥
"शिवमल्ली पाशुपत एकाष्ठीला बुको वसुः ।
बुकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलव्रणदाहकुष्ठशोथास्रनाशनः ॥"
इत्यपि भावप्रकाशः ॥
तालव्यशकारः । यथा,—
"————शो वान्तो वपरो बकः ।"
इति बीजवर्णाभिधानम् ॥ * ॥
कुबेरः । रक्षोविशेषः । इति मेदिनी । के, ३० ॥ स च भीमेन हतः । (यथा महाभारते ।१।१६५।७३।
"तस्यामप्येकचक्रायां बकं नाम राक्षसं हत्वा पाञ्चालनगरमभिगताः ॥") अत्र कोषे पवर्गीय बकारादौ पठितोऽयं शब्दः किन्तु अमरटीकायां भरतेन अन्तःस्थवकारादिवञ्चवकधातुभ्यां क्रमेण घप्रत्ययेन अनुप्रत्ययेन च साधितः ॥ * ॥ यन्त्रविशेषः । यथा,—
"जलकच्छपपातालदोलाभूधरवालुकाः ।
बकाद्या यन्त्रभेदाः स्युर्व्वक्ष्यमाणाश्च मूषिकाः ॥"
इति शब्दचन्द्रिका ॥
अस्य विवरणं यथा, वैद्यके ।
"दीर्घकण्ठकाचकूप्या गिलयेन स्वल्पभाण्डकम् ।
तिर्य्यक् कृत्वा पचेत् चुल्ल्यां बकयन्त्रमिति स्मृतम् ॥"
असुरविशेषः । स च श्रीकृष्णेन हतः । यथा,—
"स्वं स्वं वत्सकुलं सर्व्वे पाययिष्यन्त एकदा ।
गत्वा जलाशयाभ्यासं पाययित्वा पपुर्जलम् ॥
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ।
तत्र सुवज्रनिर्भिन्नं गिरेः कूटमिव च्युतम् ॥
स वै बको नाम महानसुरो बकरूपधृक् ।
आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ॥
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ।
बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ॥
तं तालुमूलं प्रदहन्तमग्निवद्
गोपालसूनुं पितरं जगद्गुरोः ।
चच्छर्द्द सद्योऽतिरुषाक्षतं बक-
स्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥
तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां बकं कंससखं सतां पतिः ।
पश्यत्सु बालेषु ददार लीलया
मुदावहो वीरणवद्दिवौकसाम् ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ॥
ब(व)कचिञ्चिका, स्त्री, मत्स्यविशेषः । तत्पर्य्यायः । बकाची २ । इति हारावली । १८८ ॥
ब(व)कजित्, पुं, (बकं जितवान् इति । जि + क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णश्च ॥
ब(व)कधूपः, पु, (बक इव शुभ्रवर्णो धूपः ।) तुरुष्कधूपः । इत्यमरटीका ॥
ब(व)कनिषूदनः, पुं, (निषूदयति हन्तीति । सूदि + ल्युः । बकस्य निषूदनो घातकः ।) भीमसेनः । इति हेमचन्द्रः । ३ । ३७२ ॥ श्रीकृष्णश्च ॥
ब(व)कपञ्चकं, क्ली, (बकोपलक्षिताः पञ्च तिथयो यत्र कप् । बकोऽपि तत्र नाश्नीयादिति वचनादेव तथात्वम् ।) कार्त्तिकशुक्लैकादश्यादिपञ्चतिथ्यात्मकम् । यथा,—
"तत्रैकादश्यादितिथिपञ्चके बकपञ्चकम् ।
बकोऽपि तत्र नाश्नीयान्मत्स्यञ्चैव कदाचन ॥
इति वचनात् ।" इति कृत्यतत्त्वम् ॥
"किञ्च । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
'एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ॥'
ततश्च मांसभक्षणनिषेधे कार्त्तिकमासतच्छुक्लपक्षतदेकादश्यादिपञ्चदिनानि शक्ताशक्तभेदात् पापतारतम्याद्वा निषिद्धानि ।" इति तिथ्यादितत्त्वम् । अपि च ।
"एकादशीं समारभ्य यावत् पञ्चदशी भवेत् ।
बकोऽपि तत्र नाश्नीयात् कीर्णं मांसञ्च किं नरः ॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥
ब(व)कपुष्पः, पुं, (बक इव वक्रं पुष्पं यस्य ।) बकवृक्षः । इति शब्दरत्नावली ॥ (बकस्य पुष्पम् ।) अगस्तिकुसुमे, क्ली ॥
ब(व)कवृत्तिः, पुं, (बकस्येव स्वार्थसाधिका वृत्तिर्यस्य ।) बकतुल्यवर्त्तनविशिष्टः । यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
तस्य लक्षणं यथा,—
"अर्व्वाग्दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः ॥"
इति तट्टीकायां श्रीधरस्वामी ॥
अपि च ।
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठः शिक्यौ विनीतश्च बकवृत्तिरुदाहृतः ॥"
इति पाद्मोत्तरखण्डे ११५ अध्यायः ॥
ब(व)कवैरी, [न्] पु, (बकस्य वैरी घातकत्वात् ।) भीमसेनः । इति जटाधरः ॥ श्रीकृष्णश्च ॥
ब(व)कव्रती, [न्] पु, (बकव्रतमस्यास्तीति इनिः ।) मिथ्याविनीतः । बकवृत्तिः । इति जटाधरः ॥
तस्य लक्षणं यथा,—
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतधरो द्विजः ॥"
इति दानसागरे मनुः ॥
ब(व)काची, स्त्री, बकचिञ्चिकामत्स्यः । इति हारावली । १८८ ॥
ब(व)कारिः, पुं, (बकस्य अरिः ।) श्रीकृष्णः । यथा,
"तदा बकारिं सुरलोकवासिनः
समाकिरन्नन्दनमल्लिकादिभिः ।
समीडिरे चानकशङ्खसंस्तवै-
स्तद्वीक्ष्य गोपालसुता विसिस्मिरे ॥"
इति श्रीभागवते । १० । ११ । ५२ ॥
(भीमसेनश्च । बकराक्षसघातकत्वात् ॥)
ब(व)कुलः, पुं, (ब(व)कते इति । ब(व)कि कौटिल्ये + "मद्गुरादयश्च ।" उणा० १ । ४२ । इति उरच् प्रत्ययरेफस्य लत्वं बहुलं नलोपश्चेत्युज्ज्वलदत्तः ।) स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । केसरः २ । इत्यमरः । २ । ४ । ६४ ॥ केशरः ३ । इति भरतः ॥ बकूलः ४ सिंहकेसरः ५ वरलब्धः ६ सीधुगन्धः ७ मुकुलः ८ सुकुलः ९ । इति शब्दरत्नावली ॥ स्त्रीमुखमधु १० दोहलः ११ मधुपुष्पः १२ सुरभिः १३ भ्रमरानन्दः १४ स्थिरकुसुमः १५ शारदिकः १६ करकः १७ सीसंज्ञः १८ विशारदः १९ गूढपुष्पकः २० धन्वी २१ मदनः २२ महामोदः २३ चिरपुष्पः २४ ॥ (यथा, महाभारते । १ । ६३ । ४२ ।
"पुन्नागैः कर्णिकारैश्च बकुलैर्दिव्यपाटलैः ॥")
अस्य गुणाः । शीतलत्वम् । हृद्यत्वम् । विषदोषनाशित्वम् । मधुरत्वम् । कषायत्वम् । मदाढ्यत्वम् । हर्षदायकत्वञ्च ॥ तत्कुसुमगुणाः । रुच्यत्वम् । क्षीराढ्यत्वम् । सुरभित्वम् । शीतलत्वम् । मधुरत्वम् । स्निग्धत्वम् । कषायत्वम् । मलसंग्रहकारकत्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
बकुलस्तु वरोऽनुष्णः कटुः पाके रसे गुरुः ॥
कफपित्तविषश्वित्रकृमिदन्तगदापहः ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"बकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"
तत्पुष्पगुणाः ।
"पद्मं कषायं मधुरं शीतं पित्तकफास्रनुत् ।
तद्वत् बकुलपुन्नागकह्लारोत्पलपाटलम् ॥"
इति राजवल्लभः ॥
अस्योत्पत्तिर्यथा,—
"विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाध्मातदृशा हरः ।
स्मरमालोकयामास शिखाग्राच्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् । पादादारभ्य कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदासीन्मुष्टिबन्धन्तु रुक्मपृष्ठं महाप्रभम् ।
स चम्पकतरुर्जातः सुगन्धाढ्यो गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्वज्रभूषितम् ।
तज्जातं केशवारण्यं बकुलं नामतो नगैः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविराजिता ॥
नाहोपरि तथा मुष्टौ स्थानं चन्द्रमणिप्रभम् ।
पञ्चगुल्माभवज्जाती शशाङ्ककिरणोज्ज्वला ॥
ऊर्द्ध्वं मुष्ट्या अधः कोट्याः स्थानं विद्रुमभूषितम् ।
तस्मात् बहुपुटा मल्ली संजाता विविधा मुने ॥"
इति श्रीवामनपुराणे ६ अध्यायः ॥

(शिवः । यथा, महाभारते तस्य सहस्रनाम-
कीर्त्तने । १३ । १७ । १०६ ।
"बलिशो वल्कली हंसो बकुलश्चन्दनच्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥")

ब(व)कुला, स्त्री, (बकुल + टाप् ।) कटुका । इति राजनिर्घण्टः ॥

ब(व)कुली, स्त्री, (बकुल + गौरादित्वात् ङीष् ।) काकोली । इति शब्दचन्द्रिका ॥

ब(व)कूलः, पुं, (बकुल । पृषोदरादित्वात् दीर्घः ।) बकुलवृक्षः । इति शब्दरत्नावली ॥

ब(व)केरुका, स्त्री, (बकानां बकसमूहानां ईरुकं गतिर्यत्र ।) बलाका । वातावर्ज्जितशाखा । इति मेदिनी । के, २०२ ॥

बकोटः, पु, बकः । इति त्रिकाण्डशेषः ॥

बठ, पैन्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) पैन्यमिह सामर्थ्यम् । वठति वीरो योद्धुं समर्थः स्यादित्यर्थः । इति दुर्गादासः ॥

ब(व)ड़वा, स्त्री, (बलं वातीति । बल + वा + कः । टाप् । डलयोरैक्यात् लस्य ड़त्वम् ।) घोटकी । इत्यमरः । २ । ८ । ४३ ॥ (यथा, महाभारते । १ । २२२ । ४५ ।
"वड़वानान्तु मुख्यानां चन्द्रांशुसमवर्च्चसाम् ।
ददौ जनार्द्दनः प्रीत्या सहस्रं हेमभूषितम् ॥"
अस्या दुग्धगुणा यथा,—
"रूक्षोष्णं वड़वाक्षीरं बल्यं शोषानिलापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
वड़वारूपधारिणी सूर्य्यपत्नी संज्ञा । यथा, मार्कण्डेयपुराणे । ७७ । २३ ।
"सूर्य्यतापमनिच्छन्ती तेजसस्तस्य बिभ्यती ।
तपश्चचार तत्रापि वड़वारूपधारिणी ॥"
अस्या विशेषविवरणन्तु तत्रैव विशेषतो द्रष्टव्यम् ॥
तृतीया सूर्य्यपत्नी । इति केचित् । यथा, भागवते । ८ । १३ । ८—९ ।
"विवस्वतश्च द्वे जाये विश्वकर्म्मसुते उभे ।
संज्ञा छाया च राजेन्द्र ! ये प्रागभिहिते तव ॥
तृतीयां वड़वामेके तासां संज्ञासुतास्त्रयः ।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु ॥")
अश्विनीनक्षत्रम् । इति ज्योतिषम् ॥ (नारी-विशेषः । इति हेमचन्द्रः ॥ दासी । यथाह नारदः ।
"भक्तदासश्च विज्ञेयस्तथैव वड़वाहृतः ॥"
वासुदेवस्य स्वनामख्याता परिचारिका । इति हरिवंशः । ३५ । ३ ॥) वाड़वाग्निः । अस्योत्पत्तिर्यथा,—
"अथाकाशगता देवाः क्रुद्धं दृष्ट्वा महेश्वरम् ।
प्रसीद जगतां नाथ ! कामे क्रोधं परित्यज ॥
इति स वदतां तेषाममराणां तदानलः ।
ललाटचक्षुःसम्भूतो भस्माकार्षीन्मनोभवम् ॥
ब्रह्मा क्रोधानलं शम्भोर्दहन्तं सकलान् जनान् ।
वड़वारूपिणं चक्रे देवानां पुरतस्तदा ॥
वड़वां तां तदा देवाः सौम्यां ज्वालामुखीं शुभाम् ।
दृष्ट्वा निर्व्विग्नमनसो बभूवुः पूर्व्वपीड़िताः ॥
वड़वां तां समादाय तदा ज्वालामुखीं विधिः ।
सागरं प्रययौ लोकहिताय जगतां प्रभुः ॥
गत्वाथ सागरं ब्रह्मा प्रोवाच परिपूजितः ।
यथावत्तेन विप्रेन्द्राः समयञ्च निदर्शयन् ॥
अयं क्रोधो महेशस्य वड़वारूपधृक् त्वया ।
ज्वालामुखः सदा धार्य्यो यावन्न विलयाम्यहम् ॥
यदा त्वामहमागत्य वदामि सरितांपते ! ।
तदा त्वया परित्याज्यः क्रोधोऽयं वड़वामुखः ॥
भोजनं भवतस्तोयमेतस्य तु भविष्यति ।
यत्नादेव विधार्य्योऽयं यथा नो याति चान्तरम् ॥
इत्युक्तो ब्रह्मणा सिन्धुरङ्गीचक्रे तदा क्रुधम् ।
ग्रहीतुं वड़वावक्त्रं शम्भोश्चाप्यथमप्यरम् ॥
ततः प्रविष्टो जलधौ पावको वड़वामुखः ।
वार्य्योघविन्रहंसस्य ज्वालामालातिदीपितः ॥"
इति कालिकापुराणे ४१ अध्यायः ॥
(नदीविशेषः । यथा, महाभारते । ३ । २२१ । २४ ।
"तमसा नर्म्मदा चैव नदी गोदावरी तथा ।
वेण्योपवेण्या भीमा च वड़वा चैव भारत ! ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८२ । ८८ ।
"ततो गच्छेत वड़वां त्रिषु लोकेषु विश्रुताम् ।
पश्चिमायान्तु सन्ध्यायां उपस्पृश्य यथाविधि ॥")

ब(व)ड़वाहृत, पुं, (वड़वया दास्या हृतः ।) पञ्चदशदासान्तर्गतदासविशेषः । यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वड़वाहृतः ॥"
इति नारदः ॥
वड़वा दासी तल्लोभादङ्गीकृतदास्यः । इति दायक्रमसंग्रहः ॥ कुत्रचित् वड़वाभृतो वड़वाकृतोऽपि पाठः ॥

ब(व)ड़वाग्निः, पु, (वड़वायाः समुद्रस्थितायाः घोटक्या मुखस्थोऽग्निः ।) समुद्रस्थाग्निः । (अस्य विवरणन्तु वड़वानलशब्दे द्रष्टव्यम् ॥)

ब(व)ड़वानलः, पुं, (वड़वाया अनलः ।) वड़वाग्निः । तत्पर्य्यायः । सलिलेन्धनः २ वड़वामुखः ३ काकध्वजः ४ वाडिजः ५ स्कन्दाग्निः ६ तृणधुक् ७ काष्ठधुक् ८ । इति त्रिकाण्डशेषः ॥ और्व्वः ९ वाड़वः १० । इत्यमरः । १ । १ । ५९ ॥ उर्व्वस्य ऋषेरपत्यम् और्व्वः ष्णः । वड़वायां विद्यमानो वाड़वः ष्णः । वड़वाया अनलो वड़वानलः । आधाराधेयभावसम्बन्धः । पुरा किल उर्व्वेण मुनिना अयोनिजं पुत्त्रमिच्छता ऊरुर्मथितं तत्र ज्वालामयः पुरुषो जातः स च समुद्रे वड़वामुखे अवस्थापितः । इति पौराणिकाः ॥ इति तट्टीकायां भरतः ॥ * ॥ तस्य विवरणं यथा,—
"और्व्वस्तु तपसाविष्टो निवेश्योरुं हुताशने ।
ममन्थैकेन दर्भेण सुतस्य व्रतधारिणम् ॥
तस्योरुं सहसा भित्त्वा ज्वालामाली ह्यनिन्धनः ।
जगतो दहनाकाङ्क्षी पुत्त्रोऽग्निः समपद्यत ॥
और्व्वस्योरुं विनिर्भिद्य और्व्वो नामान्तकोऽनलः ।
दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः ॥
उत्पन्नमात्रश्चोवाच पितरं दीनया गिरा ।
क्षुधा मे बाधते तात ! जगद्भक्ष्ये त्यजस्व माम् ॥
त्रिदिवारोहिभिर्ज्वालैर्जृम्भमाणो दिशो दश ।
निर्द्दहन् सर्व्वभूतानि ववृधे सोऽन्तकोऽनलः ॥
एतस्मिन्नन्तरे ब्रह्मा मुनिमौर्व्वं समागतः ।
उवाच वार्य्यतां पुत्त्रो जगतश्च दयां कुरु ॥
अस्यापत्यस्य ते विप्र ! करिष्ये स्थानमुत्तमम् ।
तथ्यमेतन्मम वचः शृणु त्वं वदतांवर ! ॥
और्व्व उवाच ।
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मेऽद्य भगवान् शिशोः ।
मतिमेतां ददातीह परमानुग्रहाय वै ॥
प्रभातकाले संप्राप्ते काङ्क्षितव्ये समागमे ।
भगवंस्तर्पितः पुत्त्रः कैर्हव्यैः प्राप्स्यते सुखम् ॥
कुत्र चास्य निवासः स्याद्भोजनन्तु किमात्मकम् ।
विधास्यतीह भगवान् वीर्य्यतुल्यं महौजसः ॥
ब्रह्मोवाच ।
वड़वामुखेऽस्य वसतिः समुद्रे वै भविष्यति ।
मम योनिर्जलं विप्र ! तच्च मे तोयदं सुखम् ॥
तत्राहमासे नियतं पिबन् वारिमयं हविः ।
तद्धविस्तव पुत्त्रस्य विसृजाम्यालयञ्च तम् ॥
ततो युगान्ते भूतानां मेघवाहश्च पुत्त्रक ! ।
सहितौ विचरिष्यावो निष्पुत्राणकराविह ॥
एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः ।
दहनः सर्व्वभूतानां सदेवासुररक्षसाम् ॥
एवमस्त्विति तं सोऽग्निः संवृतज्वालमण्डलः ।
प्रविवेशार्णवमुखं विप्रणष्टान्तरप्रभम् ॥"
इति मात्स्ये १५० अध्यायः ॥
(मदनदहनाय हरनेत्रसमुद्भूतोऽग्निरपि वड़वानलः । अस्य प्रमाणादिकं वड़वाशब्दे द्रष्टव्यम् ॥)
लङ्काया दक्षिणे पृथिव्याश्चतुर्थभागरूपस्थानविशेषः । इति सिद्धान्तशिरोमणिः ॥ (वटिकौषधविशेषः । यथा,—
"शुद्धताम्रस्य भागैकं मरिचस्य तथैव च ।
विषं तत्तुल्यकं दद्यात् तत्सर्व्वं श्लक्ष्णचूर्णितम् ॥
लाङ्गलीरससंयुक्तं तत्सर्व्वं पुटके पचेत् ।
रक्तिकाद्वितयं वापि त्रितयं वा प्रकल्पते ॥
दोषे चौषधमायुक्तस्त्रिदोषशमनो भवेत् ।
भक्षयेत् पवनं चोग्रे वड़वानलसंज्ञितम् ॥
इति वड़वानलो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)

ब(व)ड़वामुखः, पुं, (वड़वाया घोटक्या मुखमाश्रयत्वेनास्त्यस्य । अर्श आदित्वात् अच् ।) वड़वानलः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । ६७ । २२ ।
"सा यथैवार्णवगता तथैव वड़वामुखे ॥"
महादेवस्य मुखमित्येके । यथा, महाभारते । ७ । २०० । १११ ।
"तस्य देवस्य यद्वक्त्रं समुद्रे तदतिष्ठत ।
वड़वामुखेति विख्यातं पिबत्तोयमयं हविः ॥"
महादेवस्य नामभेदः । यथा, महाभारते । १३ । १७ । ५५ ।

"विष्णुः प्रभादितो यत्र समुद्रो बडवामुखः ॥" कूर्म्मस्य दक्षिणकुक्षिस्थजनपदविशेषः । यथा मार्कण्डेये । ५८ । ४० ।
"कूर्म्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ।
काम्बोजाः पह्लवाश्चैव तथैव बडवामुखाः ॥")
वटिकौषधविशेषः । यथा,—
"शुद्धसूतं समं गन्धं मृतताम्राभ्रटङ्कणम् ।
सामुद्रञ्च यवक्षारं स्वर्ज्जिसैन्धवनागरम् ॥
अपामार्गस्य च क्षारं पलाशवरुणस्य च ।
प्रत्येकं सूततुल्यं स्यादम्लयोगेन मर्द्दयेत ॥
हस्तिशुण्डीदवैश्चाम्लै मर्द्दयित्वा पुटेल्लघु ॥
माषमात्रः प्रदातव्यो रसोऽयं बडवामुखः ।
ग्रहणीं विविधां हन्ति संग्रहग्रहणीं ज्वरम् ॥
इति बडवामुखो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ग्रहण्यधिकारे ॥)

ब(व)डवासुतौ, पुं, (बडवाया घोटकीरूपायाः त्वष्टसुतायाः संज्ञायाः सुतौ ।) अश्विनीकुमारौ । यथा, हेमचन्द्रः ।
"स्वर्वैद्यावश्विनीपुत्त्रावश्विनौ बडवासुतौ ॥"
(तयोरुत्पत्तिकथा यथा, हरिवंशे ।९।४९–५३।
"गच्छ देव । निजां भार्य्यां कुरुंश्चरति सोत्तरान् ।
बडवारूपमास्थाय वने चरति शाद्वले ॥
स तथा रूपमस्थाय स्वभार्य्यारूपलीलया ।
ददर्श योगमास्थाय स्वां भार्य्यां बडवां ततः ॥
अधृष्यां सर्व्वभूतानां तपसा नियमेन च ।
बडवावपुषा राजंश्चरन्तीमकुतोभयाम् ॥
सोऽश्वरूपेण भगवांस्तां मुखे समभावयत् ॥
मैथुनाय विचेष्टन्तीं परपुरुषशङ्कया ।
सा तन्निरवमच्छुक्रं नासिकायां विवस्वतः ॥
देवौ तस्यामजायेतामश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥")

ब(व)डवाहृतः, पु, (बडवया दास्या हृतः ।) बडवाहृतः । पञ्चदशदासान्तर्गतदासविशेषः । यथा, बडवागृहदासीं तया हृतस्तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः । इति मिताक्षरा ॥

बडिशं, क्ली, (बलिनो मत्स्यान् श्यति नाशयतीति । शो + कः । लस्य डत्वम् ।) मत्स्यधरणार्थं वक्रलौहकण्टकविशेषः । बँड्शी इति भाषा । तत्पर्य्यायः । मत्स्यवेधनम् २ । इत्यमरः । १।१०।१६ ॥ बलिशम् ३ बडिशी ४ बडिशा ५ । इति भरतः ॥ बलिशी ६ मत्स्यवेधनी ७ । इति तट्टिकान्तरम् ॥ बलिसौ ८ बलिसम् ९ वरिशी १० बलिशः ११ । इति शब्दरत्नावली ॥ मत्स्यभेदनम् १२ । इति जटाधरः ॥ (यथा, महाभारते । १ । २८ । १० ।
"यस्ते कण्ठमनुप्राप्तो निगीर्णं बडिशं यथा ।
दहेदङ्गारवत् पुत्त्र । तं विद्यात् ब्राह्मणर्षभम् ॥")

बडिशी, स्त्री, (बडिश + गौरादित्वात् ङीष् ।) बडिशम् । इति शब्दरत्नावली ॥

बण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) बणति । इति दुर्गादासः ॥

बणः, पुं, (बणनमिति । बण् + अप् ।) शब्दः । इत्यमरटीकायां रमानाथः ॥

ब(व)णिक्, [ज्] पुं, (पणते क्रयविक्रयादिना व्यवहरतीति । पण + "पणेरिज्यादेश्च वः ।" उणा० २ । ७० । इति इजिः पस्य च वः ।) क्रयविक्रयकर्त्ता । वाणिज्यकारकः । तत्पर्य्यायः । वैदेहकः २ सार्थवाहः ३ नैगमः ४ वणिजः ५ पण्याजीवः ६ आपणिकः ७ क्रयविक्रयिकः ८ । इत्यमरः । २ । ९ । ७८ ॥ वैदेहः ९ विदेहः १० वाणिजः ११ वाणिजिकः १२ क्रायिकः १३ विक्रयिकः १४ । इति भरतादयः ॥ वाणिजकः १५ वाणिज्यकारः १६ । इति शब्दरत्नावली ॥ (यथा, माघे । १२ । २६ ।
"स्थाणौ निषङ्गिण्यनसि क्षणमुरः
शुश्रोच लाभाय कृतक्रयो वणिक् ॥")
करणान्तरम् । इति मेदिनी । जे, २६ ॥ वैश्यः । इति राजनिर्घण्टः ॥ (वाणिज्ये अधिकारादेवास्य तथात्वम् ॥ करणविशेषः । यथा, वृहत्संहितायाम् । ९९ । ७ ।
"क्षेत्रबीजगृहाश्रयजानि गरे
वणिजिध्रुवकार्य्यवणिग्युतयः ॥")

ब(व)णिक्, [ज्] स्त्री, (पण्यते व्यवह्रियते इति । पण + इजि । पस्य वः । अभिधानात् स्त्रीत्वम् ।) वाणिज्यम् । इति मेदिनी । जे, २६ ॥

ब(व)णिग्बन्धुः, पुं, (वणिजः पण्याजीवस्य बन्धुर्धनदत्वात् ।) नीलीवृक्षः । इति शब्दचन्द्रिका ॥

वणिग्भावः, पु, (वणिजो भावः ।) वाणिज्यम् । वणिजां धर्म्मः । तत्पर्य्यायः । सत्यानृतम् २ । इत्यमरः ॥ वाणिज्यम् ३ वाणिज्या ४ वणिक्पथः ५ । इति जटाधरः ॥ वणिज्यम् ६ । इति शब्दरत्नावली ॥

ब(व)णिग्वहः, पुं, (वहतीति । वह + अच् । वहः । वणिजां वाणिज्यद्रव्याणां वहः ।) उष्ट्रः । इति शब्दचन्द्रिका ॥

ब(व)णिजः, पु, (वणिगेव । वणिज् + स्वार्थे अण् । अभिधानात न वृद्धिः ।) वणिक् । इत्यमरः । २ । ९ । ७८ ॥ ववादिकादशकरणान्तर्गतपञ्चकरणम् । तज्जातफलं यथा, कोष्ठीप्रदीपे ।
"प्राज्ञः कृतज्ञो गुणवान् गुणज्ञो
वणिग्जनप्राप्तमनोरथः स्यात् ।
यस्य प्रसूतौ वणिजाभिधानं
भाण्डप्रधानं द्रविणं हि तस्य ॥"

ब(व)णिज्यं, क्ली, (वणिजो भावः कर्म्म वा । वणिज् + "दूतवणिग्भ्यां च ।" ५ । १ । १२६ । इत्यत्र काशिकोक्तेर्यः ।) वाणिज्यम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये । ५० । ७६ ।
"त्रिभिः पूर्व्वगुणैर्युक्तं पाशुपाल्यवणिज्ययोः ॥")

बणिज्या, स्त्री, (वणिजां कर्म्म । वणिज् + य । टाप् । स्वभावात् स्त्रीलिङ्गोऽयम् ।) वाणिज्यम् । (यथा, कथासरित्सागरे । १३ । ३८ ।
"ततः स तत्पिता तेन तनयेन समं ययौ ।
द्वीपान्तरं क्षुधाहेतोर्वणिज्याव्यपदेशतः ॥")

बद, स्थैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) बदति पर्व्वतः । अबादीत् अबदीत् । हसादेः सेम इत्यादिना वा दीर्घः । व्रजवदेत्यादौ हल्यादिवदंरग्रहणादिति प्राञ्चः । इति दुर्गादासः ॥

ब(व)दरं, क्ली, (बदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहतीति । बद + अर ।) सेविफलम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"मुष्टिप्रमाणं बदरं सेवं सिवितिकाफलम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कार्पासफलम् । कोलिफलम् । इति हेमचन्द्रः ॥ शृगालकोलिः । शियाकुल इति भाषा । बदति स्थिरीभवति छिन्नस्यापि पुनःप्ररोहणात् । बदरं वृन्तफलेऽपि क्लीवम् । इति भरतः ॥ तत्पर्य्यायः । घोण्टा २ । इत्यमरः ॥ गोपघोण्टा ३ । इति सुभूतिः ॥ हस्तिकोलिः ४ गोपघण्टी ५ बदरीच्छदा ६ शृगालकोलिः ७ कर्कन्धुः ८ । इति रत्नकोषः ॥ बादरम् ९ । इति शब्दरत्नावली ॥ अस्य विवरणं कोलशब्दे द्रष्टव्यम् ॥*॥ वृहत्कोलिः । तत्पर्य्यायः । सौवीरम् ७ । इति रत्नमाला ॥*॥ कोलिमात्रम् । तत्पर्य्यायः । कर्कन्धुः २ बदरी ३ कोलम् ४ फेनिलम् ५ कुवलम् ६ घोण्टा ७ सौवीरम् ८ अजाप्रिया ९ कुहा १० कोलिः ११ विषमः १२ भयकण्टकः १३ । इति भावप्रकाशः ॥ सौवीरकः १४ गुडफलः १५ बालेष्टः १६ फलशैशिरः १७ दृढबीजः १८ वृत्तफलः १९ कण्टकी २० वक्रकण्टकः २१ सुरसः २२ सुफलः २३ स्वच्छः २४ कर्कन्धूः २५ बदरः २६ कोला २७ कोली २८ कुवली २९ स्वादुफला ३० गृध्रनखी ३१ पिच्छिला ३२ कुवलः ३३ । इति च शब्दरत्नावली ॥ (यथा, भागवते । ४ । ८ । ७२ ।
"त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः ।
आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन् हरिम् ॥")
अस्य गुणाः । मधुरत्वम् । कषायत्वम् । अम्लत्वञ्च ॥ परिपक्वस्य तस्य गुणाः । मधुराम्लत्वम् । उष्णत्वम् । कफकारित्वम् । पवनातिसाररक्तश्रमदोषार्त्तिविनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ राजबदरभूबदरलघुबदराणां पर्य्याय गुणास्तत्तच्छब्दे द्रष्टव्याः ॥*॥ अथ बदरविशेषाणां लक्षणानि गुणाश्च ।
"पच्यमानं सुमधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ॥
वृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।*।
सौवीरात्तु संपक्वं मधुरं कोलमुच्यते ॥
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातहृत् ।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥*॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित् ॥"
इति भावप्रकाशः ॥

ब(व)दरः, पुं, (बदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहतीति। बद्+अर।) कोलिवृक्षः। तत्फलादिगुणाः।
"बदरस्य पत्रलेपो ज्वरदाहविनाशनः।
त्वचा विस्फोटशमनी बीजं नेत्रामयापहम्॥"
इति राजनिर्घण्टः॥
अस्य पर्य्यायः फलगुणाश्च क्लीवलिङ्गबदरशब्दे द्रष्टव्याः॥ * ॥ देवसर्षपवृक्षः। इति राजनिर्घण्टः॥ कार्पासास्थि। इति मेदिनी॥ कापासेर विचि इति भाषा॥ तत्र अन्तःस्थवकारादिशब्दमध्ये गृहीतोऽयम्॥

ब(व)दरफली, स्त्री, (बदरस्येव फलमस्याः। बदरफल+ङीप्।) भूबदरी। इति राजनिर्घण्टः॥

ब(व)दरवल्ली, स्त्री, (बदरा बदरफलबहुला वल्ली लता।) भूबदरी। इति राजनिर्घण्टः॥

बदरा, स्त्री (बदति छिन्नायामपि पुनः प्ररोहणात् स्थिरीभवति या। बद्+बाहुलकादरः। टाप्।) वराहक्रान्तावृक्षः। (तत्पर्य्यायो यथा,
"वाराहीकन्द एवान्यैश्चर्म्मकारालुको मतः।
अनूपसम्भवे देशे वाराह इव लोमवान्।
विदारी स्वादुकन्दा च सा तु क्रोष्टी सिता स्मृता॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना गृष्टिर्बदरेत्यपि कथ्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कार्पासीवृक्षः। इत्यमरः। २। ४। ११६॥ एलापर्णी। इति मेदिनी। रे, २०७॥ विष्णुक्रान्ता। इति विश्वः॥

बदरामलकं, क्ली, (बदरफलमिवामलकम्।) प्राचीनामलकम्। इति हारावली। १०२॥

बदरिः, स्त्री, (बद+बाहुलकादरिः।) कोलिवृक्षः। इति शब्दचन्द्रिका॥

बदरिकाश्रमः पुं, क्ली, (बदरिकाचिह्नित आश्रमः।) तीर्थविशेषः। (असौ च हिमालयपर्व्वतैकदेशे श्रीनगरसमीपे अलकनन्दानद्याः पश्चिमस्थतीरे अवस्थितः।) स तु नारायणस्य व्यासस्य चाश्रमः। यथा, महाभारते। ३ धौम्यतीर्थयात्रापर्व्वणि ६०। २३—३३।
"नारायणो विभुर्विष्णुः शाश्वतः पुरुषोत्तमः।
तस्यातियशसः पुण्यां विशालां बदरीमनु॥
आश्रमः ख्यायते पुण्यस्त्रिषु लोकेषु विश्रुतः।
उष्णतोयवहा गङ्गा शीततोयवहा पुरा॥
सुवर्णसिकता राजन्! विशालां बदरीमनु।
ऋषयो यत्र देवाश्च महाभागा महौजसः॥
प्राप्य नित्यं नमस्यन्ति नारायणमजं विभुम्।
यत्र नारायणो देवः परमात्मा सनातनः॥
तत्र कृत्स्नं जगत् पार्थ। तीर्थान्यायतनानि च।
तत् पुण्यं तत् परं ब्रह्म तत्तीर्थं तत्तपोवनम्॥
तत् परं परमं देवं भूतानां परमेश्वरम्।
शाश्वतं परमञ्चैव धातारं परमं पदम्॥
यं विदित्वा न शोचन्ति विद्वांसः शास्त्रदृष्टयः।
तत्र देवर्षयः सिद्धाः सर्व्वे चैव तपोधनाः॥
आदिदेवो महायोगी यत्रास्ते मधुसूदनः।
पुण्यानामपि तत् पुण्यं तत्र ते संशयोऽस्तु मा॥
एतानि राजन्। पुण्यानि पृथिव्यां पृथिवीपते।
कीर्त्तितानि नरश्रेष्ठ। तीर्थान्यायतनानि च॥
एतानि वसुभिः साध्यैरादित्यैर्मरुदश्विभिः।
ऋषिभिर्ब्रह्मकल्पैश्च सेवितानि महात्मभिः॥
चरन्नेतानि कौन्तेय। सहितैर्ब्राह्मणादिभिः।
भ्रातृभिश्च महाभागैरुत्कण्ठां विहरिष्यसि॥"
(तथा च भागवते। ७। ११। ६।
"योऽवतीर्य्यात्मनोंऽशेन दाक्षायण्यान्तु धर्म्मतः।
लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे॥")

बदरी, स्त्री, (बदर+गौरादित्वात् ङीष्। बदरि+कृदिकारादिति पक्षे ङीष् वा।) कोलिवृक्षः। इत्यमरः। २।४।३६॥ (अस्याः पर्य्यायो बदरशब्दे द्रष्टव्यः। यथा, भागवते। १। ७। ३।
"तस्मिन् स आश्रमे व्यासो बदरीषण्डमण्डिते॥")
कार्पासी। इति शब्दरत्नावली॥ कपिकच्छुः। इति राजनिर्घण्टः॥ (बदर्य्याः फलम् हरीतक्यादिभ्यश्चेति विकारार्थस्य लुक्। बदरीफलम्॥)

बदरीच्छदा, स्त्री, (बदर्य्याश्छदा इव छदा यस्याः।) हस्तिकोलिवृक्षः। शङ्खनखी। इति रत्नमाला॥

बदरीपत्रः, पु, (बदर्य्याः पत्रमिव आकृतिर्यस्य।) नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (यथा,—
"बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्।
स्वरोपघाते कासे च लेहमेतत् प्रयोजयेत्॥"
इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारे॥)

बदरीपत्रकं, क्ली, (बदरीपत्र+स्वार्थे कन्।) नखीनामगन्धद्रव्यम्। इति जटाधरः॥

बदरीफला, स्त्री, (बदर्य्याः फलमिव फलं यस्याः।) नीलशेफालिका। इति शब्दमाला॥

बदरीशैलः पु, (बदरीबहुलः शैलः पर्व्वतः।) हिमालयपर्व्वतैकदेशः। बदरीवनं बदरिकाश्रम इति च ख्यातः। स तु श्रीनगराख्यदेशे अलकनन्दानदीपश्चिमतीरे वर्त्तते। इति पुराणान्तरम्॥

बद्ध त्रि, (बध्यते स्म इति। बन्ध+कर्म्मणि क्तः।) बन्धनयुक्तम्। बाँधा इति भाषा। तत्पर्य्यायः। सन्दानितम् २ मूतम् ३ उद्दितम् ४ सन्दितम् ५ सितम् ६। इत्यमरः। ३। १। ६५॥ निगडितम् ७ नद्धम् ८ कीलितम् ९ यन्त्रितम् १० संयतम् ११। इति हेमचन्द्रः॥ (यथा, मनुः। ९। ३०८।
"वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते।
तथा पापान्निगृह्णीयात् व्रतमेतद्धि वारुणम्॥"
तथा च मेघदूते। ७९।
"तन्मध्ये च स्फटिकफलका काञ्चनीवासयष्टिर्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः॥"
तथा च शाकुन्तले २ अङ्के।
"छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।")

बद्धगुदं, क्ली, (बद्धं गुदं पायुर्येन।) उदररोगविशेषः। तस्य निदानं यथा,—
"यस्यान्त्रमन्नैरुपलेपिभिर्व्वा
बालाश्मभिर्वा पिहितं यथावत्।
सञ्चीयते तस्य मलः सदोषात्
शनैः शनैः सङ्करवच्च नाड्याम्॥
निरुध्यते तस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
हृन्नाभिमध्ये परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति॥"
इति माधवकरः॥ * ॥
तस्य चिकित्सा यथा। "स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणमन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोधकरमश्मानं बालं वापोह्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा वाह्यं व्रणमुदरस्य सीव्येत् द्विव्रणीयोक्तेन विधानेन च रोपयेत्।" इति सुश्रुते चिकित्सितस्थाने १४ अध्यायः॥ (तथास्य सकारणलक्षणम्।
"पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे।
उदावर्त्तैस्तथार्शोभिरन्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधात् हत्वाग्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्ध्वा जनयत्युदरं ततः॥"
तस्य रूपाणि।
"तृष्णादाहज्वरमुखतालुशोषोरुसादकासश्वासदौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रसङ्गाध्मानच्छर्दिक्षवथुशिरोहृन्नाभिगुदशूलान्यपि चोदरं मूढवातं स्थिरमरुणनीलराजीसिरावनद्धमराजिकं वा प्रायो नाभ्युपरि गोपुच्छवदभिनिर्व्वर्त्तयति इत्येतत् बद्धगुदोदरमिति विद्यात्॥"
तथास्य चिकित्सा।
"स्विन्नाय बद्धोदरिणे मूत्रं तीक्ष्णौषधान्वितम्।
सतैललवणं दद्यात् निरूहं सानुवासनम्॥"
इति चरके चिकित्सितस्थाने त्रयोदशेऽध्याये॥)

बद्धाण्य, क्ली, बद्धपाणिः। मुष्टिः। इति पुराणान्तरम्॥ बद्धार्ण्यीति च पाठः॥

बद्धफलः, पु, (बद्धानि फलानि यस्येति।) करञ्जवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्य करञ्जशब्दे ज्ञातव्या॥)

बद्धमुष्टिः, त्रि, (बद्धा दृढा दानाभिमुखा वा मुष्टिर्यस्येति।) दृढमुष्टिः। कृपणः। यथा, नैषधे। ३। ८५।
"सञ्जीवमर्थ्यर्थिमुदे ददद्भ्यस्त्वत्र त्रपा नेह शबद्धमुष्टेः॥"

बद्धमूलं, त्रि, (बद्धं मूलं यस्येति।) दृढमूलम्। उत्पाटनानर्हमूलम्। यथा, माघे। २। ३८।
"त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे।।
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः॥"

बद्धरसालः, पु, (बद्धो रसेन आवृतः अतएव रसालः रसवान्।) त्रिविधराजाम्रान्तर्गता-

त्वक्सारः । तत्पर्य्यायः । चक्रलाक्षः २ मध्वाक्षः ३ चित्रसारकः ४ वनेच्यः ५ मन्मथानन्दः ६ मदनेच्छाफलः ७ । तस्य कोमलफलगुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदत्वञ्च । तस्य सुपक्वफलगुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

बद्धशिखः, त्रि, (बद्धा शिखा चूडा यस्येति ।) शिशुः । इति मेदिनी । खे, १५ ॥ शिखाबन्धनविशिष्टः । यथा, प्रायश्चित्ततत्त्वधृतवचनम् ।
"सदोपवीतिना भाव्यं सदा बद्धशिखेन तु ।
विशिखो व्युपवीतश्च यत् करोति न तत् कृतम् ॥"

बद्धशिखा स्त्री, (बद्धा शिखा यस्याः ।) उच्चटा । इति मेदिनी । खे, १५ ॥ (बद्धा शिखा केशकलापो यस्याः ।) सम्बद्धकेशा च ॥

बध, क बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-पर० सक०-सेट् ।) क, बाधयति । इति दुर्गादासः ॥

बध, ङ निन्दे । बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, बीभत्सते खलं लोकः । बधते तत्र त्यादयो न प्रयुज्यन्ते । इति रमानाथः ।
'माबधिष्ठा जटायुं मां सीतां रामाहमैच्छिषि ।'
इति भट्टिः । ६ । ४१ ॥ इति दुर्गादासः ॥

बधिरः,त्रि,(बध्नाति कर्णाविति । बन्ध+"इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) श्रवणेन्द्रियरहितः । श्रुतिशक्तिहीनः । काला इति भाषा । तत्पर्य्यायः । एडः २ । इत्यमरः । २ । ६ । ४८ ॥ काल. ३ अवणापटुः ४ । इति शब्दरत्नावली ॥ उच्चैःश्रवाः ५ । इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, मनुः ।११।५०।
"एवं कर्म्मविशेषेण जायन्ते सद्विगर्हिताः ।
जडमूकान्धबधिराविकृताकृतयस्तथा ॥"
बाधिर्य्यनिदानं यथा,—
"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकरः ॥
असाध्यबाधिर्य्यमाह ।
"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत् ।"
इति भावप्रकाशः ॥*॥
अस्यौषधम् ।
"कर्णमूले कर्णनादे बाधिर्य्ये क्ष्वेड एव च ।
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं शृणु ॥
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कदुष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम् ॥१॥
कर्णमूले कर्णनादे बाधिर्य्ये क्ष्वेड एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ २ ॥
शिखरिक्षारजलादितन्मूलकल्केन साधितं तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः ॥
शिखरी अपामार्गः ॥ ३ ॥
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सजलञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम् ॥
क्षीरमजाजं चाम्लम् । बिल्वतैलम् ॥ ४ ॥" इति भावप्रकाशः ॥ यथा च ।
"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दत्त्वा तैलमेतैर्व्विपाचयेत् ॥
बाधिर्य्यं कर्णमूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रिमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"५
इति गारुडे १८७ अध्यायः ॥

ब(व)धूः, स्त्री, (बध्नाति प्रेम्णा या । बन्ध+ऊः नलोपश्च । अन्तःस्थवादौ तु वहति संसारभारं उह्यते भर्त्रादिभिरिति वा । वह+"वहेर्धश्च ।" उणा० १ । ८५ । इति ऊः धश्चान्तादेशः ।) नारी । स्नुषा । पृक्का । इत्यमरः । ३ । ३ ।१०१, २।४।१३३॥ (अस्याः पर्य्यायो यथा,—
"पृक्का स्यादृब्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षालङ्कापिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥) शारिवौषधिः । शटी । (अस्याः पर्य्यायो यथा,
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) नवोढ़ा । (यथा, रघुः । ७ । ४ ।
"वरः स वध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम् ॥")
भार्य्या । इति मेदिनी । धे, १४ ॥ भरतेन अमरकोषटीकायां पवर्गीयबकारादिबन्धधातुना निष्पादितोऽयम् । मेदिनीकारेण तु अन्तःस्थवकारादिशब्दमध्ये संगृहीतः ॥ अथ नववध्वा द्विरागमनयात्रा । तत्राष्टमदशमद्वादशवर्षचतुर्थं वर्षाणि निषिद्धानि । मासाः मार्गशीर्षफाल्गुनवैशाखा विहिताः । पक्षः शुक्लः । पुष्यस्वातीहस्ताधनिष्ठोत्तराषाढ़ोत्तरफल्गुन्युत्तरभाद्रपद्रेवतीमृगशिरोरोहिणीपुनर्व्वसुपूर्व्वाषाढ़ा नक्षत्राणि विहितानि । सोमबुधगुरुशुक्राणां वाराः विहिताः । तिथयो यात्राप्रकरणोक्ताः । चन्द्रताराशुद्धौ कालशुद्धौ त्र्यहस्पर्शवारवेलादिकमूलादीन् परित्यज्य कर्त्तव्या । इति ज्योतिषम् ॥
"वृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्द्विरागमनं विदुः ॥
विवाहमासि प्रथमं वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं शुभायाब्दं विचक्षणैः ॥
भुक्त्वा पितृगृहे नारी भुङ्क्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः॥"
इति ज्योतिस्तत्त्वम् ॥

वधूजनः, पुं, (वधूरेव जनः ।) योषित् । इति त्रिकाण्डशेषः ॥ (यथा, माघे । ३ । ५२ ।
"स्थितिप्रतिष्ठोऽपि सुखारविन्दै-
र्वधूजनश्चन्द्रमधश्चकार ॥")

वधूटशयनं, क्ली, (वधूटीनां शयनमिव । पृषोदरादिकारस्याकारः ।) गवाक्षः । यथा,—
"वातायनं गवाक्षः स्याद्वधूटशयनन्तथा ॥"
इति त्रिकाण्डशेषः ॥

वधूटिः } स्त्री, (अल्पवयस्का वधूः । अल्पार्थे
वधूटी, } टिः । पक्षे ङीष् । यद्वा, वधू+"वयस्यचरम इति वाच्यम् ।" ४ । १ । २० । इत्यस्य वार्त्ति० इति ङीप् ।) पुत्रभार्य्या । इति भरतधृतरत्नकोषः । सुवासिनी । इति हेमचन्द्रः ॥ अल्पा वधूः । यथा,—
"नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय ॥"
इति भाषापरिच्छेदः । १ ॥

बध्रूत्थप्रसवः, पुं, (बध्ना उत्थव आर्त्तवः स इव प्रसवः पुष्यादिर्यस्य ।) रक्ताम्लानः । इति राजनिर्घण्टः ॥

बध्रं, क्ली, (बध्यतेऽनेनेति । बन्ध+"सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।) सीसकम् । इत्यमरः ॥ वध्रमिति पठति स्वामी ॥ (अस्य पर्य्यायो यथा,—
"सीसं वध्रञ्च वप्रञ्च योगेष्टं नागनामकम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

बध्री, स्त्री, (बध्यतेऽनया । बन्ध+"सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् षित्वात् ङीष् ।) चर्म्मरज्जुः । इत्यमरः ।२ ।१०।२३॥ बध्री द्विरेफेति केचित् । बद्ध्रां चर्म्मबन्धे भवा बाद्ध्री दीर्घादिरिति वृद्धः ॥

बन, द ङ उ याचने । इति कविकल्पद्रुमः ॥ (तना०-आत्म०-द्विक०-सेट् । क्त्वावेट् ।) द ङ बनुते । उ, बनित्वा बत्वा । इति दुर्गादासः ॥

बन्ध, औ श बन्धे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) औ, अबान्त्सीत् । श, बध्नाति । बन्धान्नं शठ तुच्छ तुच्छ शपथैः किं धर्म्म निर्व्वध्यसे । इत्यपपाठः । निर्व्वध्यते इति पाठ्यमिति रमानाथः । वस्तुतस्तु अस्य गणकृतानित्यतया कर्म्मभावे आत्मनेपदे च सिद्धम् । इति दुर्गादासः ॥

बन्ध, क बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-पर० सक०-सेट् ।) क, बन्धयति । इति दुर्गादासः ॥ (यथा, रामायणे । ७ । ८४ । ४ ।
"बन्धयिष्यति वा पाशैरथवास्मान् वधिष्यति ॥")

बन्धः, पुं, (बन्ध+हलश्चेति घञ् ।) आधिः । बन्धनम् । इति मेदिनी । धे, ८ ॥ शरीरम् । इति हेमचन्द्रः ॥ (कर्म्मजनितादृष्टवशात् देहाद्देहान्तरोत्पत्तेः शरीरस्य तथात्वम् ।) रत्यादिबन्धनम् । इति शब्दरत्नावली ॥ तद्विवरणं यथा,
"कृपाटकैर्विनिहतो भवतस्य बन्धः
कर्णौ स्कन्धमिह युग्मपदैकनिम्नम् ।
एकीकृतं रसनिशाकरयुग्मयुक्त-
शीर्षं ततो भवति पिक्वपदं गृहस्य ॥
गृहभूमिसमाहृतपिक्वपदं
वसुलोचनरन्ध्रगङ्गणितम् ।
रविभूधरचिंशद्द्युयोगहत-
मायव्ययस्थितिकवचपदम् ॥"

रूपाष्टकैरेकाशीत्या विनिहत: पूरितो भवनस्य बन्ध: दीर्घप्रस्तारमिलितहस्ता: स्वान्घ्नं तत्संख्याकं युग्मघ्नैकाभिन्नं द्विपञ्चाशद्दुत्तरशतपूरितम् एकीकृतं पूर्व्वाङ्केन मिलितं रस निशाकरयुग्मभुक्तशेषं षोड़शाधिकद्विशतहृतावशिष्टं तत्संख्याकं पिण्डपदसंज्ञं गृहस्य भवति तद्गृहभूमिसमाहृतपिण्डपदं वसुशोचनरन्ध्रगजै:। अष्टदिनषाष्टभिर्यथाक्रमं गुणितं पूरितं यथाक्रमं रविभूधरत्रिंशद्द्योगकृतं द्वादशसप्तत्रिंशत्सप्तविंशतिभिर्हृतं गृहस्य यथाक्रममायव्ययस्थितिकक्षपदं भवतीत्यर्थ:।

"हस्तहस्तमिते बन्धे भरणा योगतो यथा।
आयादयो भवन्त्यत्र वसुषट्तिथियुक्षिता:॥
अत्र भचक्रं दीयते पश्चात्तदेवायाति।
प्रत्यक्दक्षिणयोर्भे द्रविणाद्यं विदिक्षु दश्नादि।
पूर्व्वोत्तरयोर्गृहयोरश्विन्यादिभानि स्यु:।
यत्र तु शेषो नास्ति तत्र हारकाङ्क: शेष:॥
शेषाङ्केन फले बोध्ये शेषाभावे तु हारकात्।
अङ्कादेव फलं बोध्यमिति तन्त्रविदाम्मतम्॥
इत्युक्तत्वात्॥
वयाधिकं न कर्त्तव्यं गृहमायाधिकं शुभम्॥"
इति ज्योतिस्तत्त्वम्॥ * ॥

षोड़शप्रकारा रतिबन्धा यथा, रतिमञ्जर्य्याम्। ४०—४१।
"पद्मासनो नागपदो लतावेष्टोऽर्द्धसम्पुट:।
कुलिशं सुन्दरश्चैव तथा केशर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापर:।
क्षुब्धो वै धेनुकश्चैव समुत्कण्ठस्तत: पर:।
सिंहासनो रतिनागो विद्याधरस्तु षोडश॥"
(एतेषां लक्षणानि तत्रैव। ४२-५७। उक्तानि। यथा,—
"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्गाढ़ं समाकृष्य बन्धोऽयं पद्मसंज्ञक:॥
पादौ स्कन्धयुगे हस्तौ क्षिपेल्लिङ्गं भगे लघु।
प्ररमेत् कामुको नारीं बन्धो नागपदो मत:॥
बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम्।
लघु लिङ्गं ताड़येद्द् योनौ लतावेष्टोऽयमुच्यते॥
स्त्रीपादावन्तरीक्षे तु किञ्चिद्भूमौ च जानुनि।
स्तनयोर्मर्द्दनं पीड़ा बन्धोऽयं मर्द्दसंपुट:॥
स्त्रीपादद्वयमास्फाल्य हठाल्लिङ्गस्य ताड़नम्।
योनिमापीड़येत् कामी बन्ध: कुलिशसंज्ञक:॥
नारीपादद्वयं कामी धारयेदूर्द्ध्वसंस्थित:।
कुचौ धृत्वा पीवेद्वक्त्रं बन्धोऽयं रतिसुन्दर:॥
स्त्रियो वक्षे समापीड्य दोर्भ्यां गात्रस्य मर्द्दनम्।
पुन: प्रपीड़येद्द् योनिं बन्ध: केशरसंज्ञक:॥
हृदि कृत्वा स्त्रिय: पादौ कराभ्यां धारयेत् करौ।
यथेष्टं ताड़येत् योनिं बन्धो हिल्लोलसंज्ञक:॥
पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम्।
हस्तयोर्वेष्टनं गाढ़ं बन्धो नृसिंहसंज्ञक:॥
पादमेकमुरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीच सुरमेत् कामी विपरीतस्तु बन्धक:॥
पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताड़येत्।
बाहुभ्यां ताड़येद्गाढ़ं क्षुब्धको बन्ध एव स:॥
सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुन:।
यल्लिङ्गं चालयेत् योनौ बन्धोऽयं धेनुक: स्मृत:॥
नारीपादौ च हस्तेन धारयेत् गलके पुन:।
स्तनार्पितकरो कामी बन्धश्चोत्कण्ठसंज्ञक:॥
स्वयं जङ्घाद्वयं बाह्यौ कृत्वा योषित्पदद्वयम्॥
स्तनौ धृत्वा रमेत् कामी बन्ध: सिंहासनो मत:॥
पीड़येदुरुयुग्मेन कामुक: कामिनीं यदि।
रतिर्नाग: समाख्यात: कामिनीनां मनोहर:॥
नार्य्याश्चोरुयुगं धृत्वा कराभ्यां ताड़येत् पुन:।
रमयेन्निर्भरं कामी बन्धो विद्याधरो मत:॥"
इति॥)

संज्ञाप्रभेदेन अन्योऽपि बन्धोऽस्ति। यथा,—
"कामप्रदो विपरीतो नागरो रतिपाशक:।
केयूर: प्रियतोषश्च तत: समपदस्तथा॥
ततश्चैकपदो ज्ञेय: सम्पुटश्चार्द्धसम्पुट:।
तत: स्तनभवश्चैव ततो तु रतिसुन्दर:॥
ऊरुपीडस्मरचक्रौ ततश्चोरुक्रम: स्मृत:।
वेष्टको हंसकीलस्तु ततो लीलासनस्तथा॥
अष्टादशक्रमाद्बन्धा: स्त्रीणां बहुसुखप्रदा:।
पुंसां सुखकराश्चैव कथितास्तु क्रमागता:॥"
इति स्मरदीपिका॥ * ॥

अनभिसन्धितकर्म्मकर्त्तुर्बन्धाभावो यथा,—
"पञ्चांदानैरशुभं शुद्यतेऽनभिसन्धितै:।
फलैस्तथोपभोगैश्च पूर्व्वकर्म्मशुभाशुभै:॥
एवं न बन्धो भवति कुर्व्वत: कारणं विना।
न च बन्धाय तत् कर्म्म भवत्यनभिसन्धितम्॥"
इति मार्कण्डेयपुराणम्॥

(हठयोगप्रदीपोक्ता योगसाधकबन्धा यथा, तत्रैव। ३। ५५—५७।
अथोड्डीयानबन्ध:।
"बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यत:।
तस्मादुड्डीयनाख्योऽयं योगिभि: समुदाहृत:॥
उड्डीनं कुरुते यस्मादविश्रान्तं महाखग:।
उड्डीयानं तदेव स्यात् तत्र बन्धोऽभिधीयते॥
उदरे पश्चिमं तानं नाभेरूर्द्ध्वञ्च कारयेत्।
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेशरी॥"
अथ मूलबन्ध:। तल्लक्षणादिकमुक्तं तत्रैव ३। ६१—६२।
"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम्।
अपानमूर्द्ध्वमाकृष्य मूलबन्धोऽभिधीयते॥
अधोगतिमपानं वा ऊर्द्ध्वगं कुरुते बलात्।
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिन:॥"
अथ जालन्धरबन्ध:। अस्य लक्षणादिकमुक्तं तत्रैव। ३। ७०—७१।
"कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढम्।
बन्धो जालन्धराख्योऽयं जरामृत्युविनाशक:॥
बध्नाति हि शिराजालमधोगामि नभोजलम्।
ततो जालन्धरो बन्ध: कण्ठदु:खौघनाशन:॥")

बन्धकं, क्ली, (बध्नातीति। बन्ध+ण्वुल्।) ऋणाय स्थापितं वस्तु। बाँधा इति भाषा। इति आधिशब्दनामार्थे अमर:॥ इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयत इत्याधि:। स च द्विधैव। कृतकालोऽकृतकालश्च। पुनश्चैकैकशो द्विविध: गोप्यो भोग्यश्च। यथाह नारद:।
"अधिक्रियत इत्याधि: स विज्ञेयो द्विलक्षण:।
कृतकालापनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविध: प्रोक्तो गोप्यो भोग्यस्तथैव चेति॥"
कृते काले आधानकाल एवास्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेय: आत्मसमीपे नेतव्यो मोचनीय इत्यर्थ: देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियत: स्थापित इत्यर्थ:। यावद्देयम् उद्यतो यावद्देयोद्यत: गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थ:। गोप्यो रक्षणीय:। एवञ्चतुर्विधस्याधेर्विशेषमाह।
"आधि: प्रणश्येत् द्विगुणे धने यदि न मोच्यते।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति॥"
प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन मोच्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तु: स्वम्भवति। कालकृत: कृतकाल: आहिताग्न्यादिषु पाठात् कालशब्दस्य पूर्व्वनिपात: स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात् प्रागूर्द्ध्वं वा। फलभोग्य: फलं भोग्यं यस्यासौ फलभोग्य: क्षेत्रारामादि: स न कदाचिदपि नश्यति। कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्त:। काले कालकृतो नश्येदिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्त: फलभोग्यो न नश्यतीति पारिशेष्यादाधि: प्रणश्येदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्द्दशदिवसप्रतीक्षणं कर्त्तव्यं इति बृहस्पतिवचनात्।
"हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च।
तदन्तराधनं दत्त्वा ऋणी बन्धमवाप्नुयादिति॥"
किञ्च।
"गोप्याधिभोगे नो वृद्धि: सोपकारेऽथ हापिते।
नष्टो देयो विनष्टश्च दैवराजकृतादृते॥"
गोप्याधिस्ताम्रकटाहादेरुपभोगेन वृद्धिर्भवति। अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्द्दताम्रकटाहादौ भोग्याधौ वर्द्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति सम्बन्ध:। नष्टो विकृतिं गतस्ताम्रकटाहादिश्छिद्रभेदादिना पूर्व्ववत् कृत्वा देय: तत्र गोप्याधिर्नष्टश्चेत् पूर्व्ववत् कृत्वा देय:। उपभुक्तोऽपि चेत् वृद्धिरपि हातव्या भोग्याधिर्यदि नष्टस्तदा पूर्व्ववत् कृत्वा देय:। वृद्धिसद्भावे वृद्धिर्वा हातव्या। विनष्ट आत्यन्तिकं नाशं प्राप्त: सोऽपि देयो मूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते

यदि न ददाति तदा मूलनाशः । 'विनष्टे मूलनाशः स्याद्दैवराजकृताहृते ।' इति नारदवचनात् । दैवराजकृताहृते । दैवमग्न्युदकदेशोपप्लवादि । दैवकृताद्विनाशादिना । तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सवृद्धिकं मूल्यं दातव्यमधमर्णेनाध्यन्तरं वा

"स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते ।
आधिरन्योऽथ कर्त्तव्यो देयं वा धनिने धनमिति ॥"
तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् ।
अपि च ।
"आधेः स्वीकरणात् सिद्धी रक्ष्यमाणोऽप्यसारताम् ।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥"
आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपभोगादाधिग्रहणसिद्धिर्न साक्षिलिखनमात्रेण नाप्युद्देशमात्रेण यथाह नारदः ।
"आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥"
अस्य च फलम् ।
"आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरेति ।"
या स्वीकारान्ता क्रिया सा पूर्व्वा बलवती स्वीकाररहिता तु पूर्व्वापि न बलवतीति स चाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामसितः एव सवृद्धिकमूल्यद्रव्यापर्य्याप्ततां गतस्तदाधिरन्यः कर्त्तव्यः । धनिने वा धनं देयं रक्ष्यमाणोऽप्यसारतामिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम् । आधिः प्रणश्येद्द्विगुणे इत्यस्यापवादमाह ।
"चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥"
चरित्रं शोभनाचरितम् । चरित्रेण बन्धकं चरित्रबन्धकम् । तेन यत् द्रव्यमात्मसात् कृत पराधीनं वा कृतम् । एतदुक्तं भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात् कृतम् । यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं नृपो वृद्ध्या सह दापयेत् अयमाशयः एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणं दातव्यमिति । तथा सत्यङ्कारकृतं करणं कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः कारे सत्यागदस्येति मुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः । यदा बन्धकार्पणसमय एव इत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम् । नाधिनाश इति तदा तद्द्विगुणं दापयेदिति । अन्योऽर्थः । चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्व्वमुच्यते यत्र तदेवाधीकृत्य यत् द्रव्यमात्मसात् कृतम् । तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति । आधिप्रसङ्गादन्यदुच्यते । सत्यङ्कारकृतमिति क्रयविक्रयादिव्यवस्थानिर्व्वाहणाय यदङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तत्रापि येनाङ्गुलीयकाद्यर्पितं स एव चेद्व्यवस्थातिवर्त्ती तेन तदेव हातव्यम् । इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाङ्गुलीयकादिद्विगुणं प्रतिदापयेदिति । किञ्च ।
"उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा
भवेत् ।
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ॥"
धनदानेनाधिमोचनायोपस्थितस्याधिर्मोक्तव्यो धनिना वृद्धिलोभेन न स्थापयितव्यः । अन्यथा अमोचने स्तेनचौरवद्दण्ड्यो भवेत असन्निहिते पुनःप्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् । अथ प्रयोक्ताप्यसन्निहितस्तदाप्ताश्च धनस्य गृहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्त्तव्यमित्यपेक्षित आह ।
"तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ।"
तस्मिन् काले यत्तस्याधेर्मूल्यं तत् परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्द्धं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यद्रव्यन्धनिने प्रवेशयति । यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव गृहीतव्यं न त्वाधिनाश इति विचारितन्तथा ग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहित चाधमर्णे धनिना किं कर्त्तव्यमित्यत आह ।
"विनाधारणकाद्वापि विक्रीणीत ससाक्षिकम् ।"
धारणकादधमर्णादिना अधमर्णे असन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तद्धनं गृह्णीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः । यदर्थग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं न त्वाधिनाश इति न विचारितम् । तदा आधिः प्रणश्येद्द्विगुणे इत्यस्याधिनाशः । विचारिते त्वयं पक्ष इति ॥ * ॥ भोग्याधौ विशेषमाह ।
"यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥"
यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं तदाधौ कृते तदुत्पन्ने आध्युत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः । यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन तदा द्विगुणीभूतमृणन्तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्व्वथा सवृद्धिकमूल्यापाकरणार्थाध्युपभोगविषयमिदं वचनम् । नमेनं चयाधिमाचक्षते लौकिकाः यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूल्यदानं तावदुपभुङ्क्त एवाधिम् एतदेव स्पष्टीकृतं बृहस्पतिना
"—————ऋणी बन्धमवाप्नुयात् ।
फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम् ॥
यदि प्रकर्षितं तत् स्यात्तदा न धनभाग्धनी ।
ऋणी च न लभेद्बन्धं परस्परमतं विना ॥"
अस्यार्थः । फलं भोग्यं यस्यासौ फलभोग्यो बन्ध आधिः स च द्विविधः सवृद्धिकमूल्यापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र च वृद्धिमूल्यापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी । यदा सवृद्धिकं मूल्यं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकं दत्त्वाप्नुयादृणी । समं मूल्यं सममेव सामकम् । अस्यापवादमाह । यदि प्रकर्षितं तत् स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरभ्यधिकफलं यदि स्यात्तदा न धनभाग्धनी । सामकं न लभेन्मूल्यं मूल्यमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत् । अथाप्रकर्षितं तद्बन्धकं वृद्धेरप्यपर्य्याप्तन्तदा सामकं दत्त्वापि बन्धं लभेताधमर्णः वृद्धिशेषमदत्त्वैव लभेतेत्यर्थः । पुनरुभयत्रापवादमाह । परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितं इत्याद्युक्तम् । परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूल्यदानन्तावदुपभुङ्क्ते धनी निकृष्टमपि मूल्यमात्रदाने नैवाधमर्णो लभते । इति मिताक्षरा ॥

बन्धकः, पुं, (बन्ध + स्वार्थे कन् ।) विनिमयः । इति विश्वमेदिन्यौ ॥ आधिः । इति शब्दरत्नावली ॥ रतहिण्डकः । इति नानार्थरत्नमाला ॥ (बध्नातीति । बन्ध + ण्वुल् । बन्धनकर्त्तरि, त्रि । यथा, देवीभागवते । ५ । १ । ३६ ।
" न नारी न धनं गेहं न पुत्रा न सहोदराः ।
बन्धनं प्राणिनां राजन्नहङ्कारस्तु बन्धकः ॥")

बन्धकी, स्त्री, (बध्नाति मानसमिति । बन्ध + ण्वुल् । गौरादित्वात् ङीष् ।) पुंश्चली । इत्यमरः । २ । ६ । १० ॥ (यथा, मार्कण्डेयपुराणे । ३४ । ८८ ।
"न बन्धकीभिर्न न्यूनैर्बन्धकीपतिभिस्तथा ॥")
इभी । इति मेदिनीहेमचन्द्रौ ॥ पञ्चपुरुषगामिनी । (यथा, महाभारते ।१।१२३।७४।
"नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत ।
अतःपरं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत् ॥")

बन्धनं, क्ली, (बन्ध + भावे ल्युट् ।) बन्धनक्रिया । बाँधा इति भाषा । तत्पर्य्यायः । उद्दानम् २ । इत्यमरः । २ । ८ । २६ ॥ कङ्गनम् ३ बन्धः ४ संयमनम् ५ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । ६५ ।
"आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥")
वधः । इति मेदिनी । ने, ६७ ॥ हिंसा । इति शब्दरत्नावली ॥ रज्जुः । इति हेमचन्द्रः ॥ बध्यतेऽनेनेति करणल्युत्पत्त्या त्रि ॥ (बध्यतेऽस्मिन् इति अधिकरणे ल्युट् । कारागारम् । बन्धनस्थानम् । यथा, भागवते ।३।२।२५।

"वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ॥"
बन्ध+कर्त्तरि ल्युः । महादेवस्य नामभेदे, पुं ।
यथा, महाभारते । १३ । १७ । १०० ।
"बन्धनो बन्धकर्त्ता च सुबन्धनविमोचनः ॥"
बन्धनकर्त्तरि, त्रि । यथा, तत्रैव ।१३।१७।६१।
"बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥")

बन्धनवेश्म, क्ली, (बन्धनाय बन्धनस्य वा वेश्म गृहम् ।) कारागारम् । इति हारावली ।१६६॥

बन्धनालयः, पुं, (बन्धनाय बन्धनस्य वा आलयः।) कारागारम् । इत्यमरः । २ । ८ । ११६ ॥

बन्धस्तम्भः, पुं, (बन्धाय स्तम्भः ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । आलानम् २ । इत्यमरः । २ । ८ । ४१ ॥ शङ्कुः ३ अचोड़ः ४ । इति शब्दरत्नावली ॥

बन्धित्रं, क्ली, (बन्ध + इत्र ।) कामदेवः । इत्युणादिकोषः ॥ चर्म्मव्यजनम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

बन्धुः, पुं, (बन्ध बन्धने + "शॄस्वृस्निहित्रप्यसिवसि-हनिक्लिदिबन्धिमनिभ्यश्च ।" उणा० १।११। इति उः ।) स्नेहेन मनो बध्नाति यः । तत्पर्य्यायः । सगोत्रः २ बान्धवः ३ ज्ञातिः ४ स्वः ५ स्वजनः ६ । इत्यमरः । २ । ६ । ३४ ॥ दायादः ७ गोत्रः ८ । इति शब्दरत्नावली ॥ बन्धवश्च त्रिविधा । आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति । यथोक्तम् ।
"आत्मपितृष्वसुः पुत्त्रा आत्ममातृष्वसुः सुताः ।
आत्ममातुलपुत्त्राश्च विज्ञेया ह्यात्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्त्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्त्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुःपितृष्वसुः पुत्त्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्त्राश्च विज्ञेया मातृबान्धवाः ॥"
तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः । बन्धूनामभावे आचार्य्यः । इति मिताक्षरा ॥ * ॥ (यथा, मनुः ।२।१३६।
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥'
"बन्धुः पितृव्यादिः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) बन्धूकः । (यथा, अघ्नोकवधी । २६
"आभ्यर्च्य बन्धुपुष्पमालयेति ॥")
मित्रम् । (यथा, मेघदूते । ३४ ।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ॥")
भ्राता । इति मेदिनी ॥ (यथा, रघुः । १२।१२।
"अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥")

बन्धुकः, पुं, (बन्ध + उकः । यद्वा, बन्धुर्बन्धूकवृक्ष एव । बन्धु + स्वार्थे कन् ।) बन्धूकवृक्षः । इति शब्दरत्नावली ॥

बन्धुजीवः । बन्धुरिव जीवयति रसादिनेति । बन्धु + जीव + अच् ।) बन्धूकवृक्षः । इति शब्दरत्नावली ॥ (यथा, रघुः । ११ । २५ ।
"वीक्ष्य वेदिमथ रक्तबिन्दुभि-
र्बन्धुजीवपृथुभिः प्रदूषिताम् ॥")

बन्धुजीवकः, पुं, (बन्धुवत् जीवयति रसादिना इति । बन्धु + जीव + ण्वुल् । यद्वा, बन्धुजीव एव । स्वार्थे कन् ।) बन्धूकवृक्षः । इत्यमरः । २ । ४ । ७३ ॥

बन्धुता, स्त्री, (बन्धोर्भावः बन्धूनां समूहो वा इति । "ग्रामजनबन्धुभ्यस्तल् ।" ४।२।४३। इति तल् ।) बन्धूनां समूहः । बन्धोर्भावः । इत्यमरः ।३।६।३५॥ (यथा, ऋग्वेदे । ४ । ४ । ११ ।
"महो रुजामि बन्धुता वचोभिः ॥")

बन्धुदत्तम्, क्ली, (बन्धुना दत्तम् ।) पितृमातृभ्यां दत्तं स्त्रीधनम् । यथा । याज्ञवल्क्यः ।
"बन्धुदत्तं यथा शुल्कमन्वाधेयकमेव च ।
अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः ॥"
बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते । इति दायभागः ॥

बन्धुरं, क्ली, (बन्ध बन्धने + "मद्गुरादयश्च ।" उणा० १ । ४२ । इति उरप्रत्ययेन निपातनात् साधुः ।) मुकुटम् । इति शब्दरत्नावली ॥ (रथबन्धनम् । यथा, महाभारते । ३ । ३२ । ३१ ।
"अक्षौ छत्रं वरूथञ्च बन्धुरञ्च तथापरे ।
गन्धर्व्वा बहुसाहस्राञ्छिलग्रो धमन्नृपम् ॥"
तथा च भागवते । ४ । २६ । १ ।
"दीर्घं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ॥")

बन्धुरः, पुं, (बन्ध + "मद्गुरादयश्च ।" उणा० १।४२। इति उरः निपातनात् साधुः ।) स्त्रीचिह्नम् । तिलकल्कम् । बन्धूकः । वधिरः । हंसः । इति मेदिनी । रे, १८६ ॥ विडङ्गः । इति हेमचन्द्रः ॥ ऋषभौषधम् । इति राजनिर्घण्टः ॥ बकः । विहङ्गः । इति शब्दरत्नावली ॥

बन्धुरः, त्रि, (बन्ध + उर ।) रम्यम् । (यथा, महागणपतिस्तोत्रे । १५ ।
"श्रेयः श्रेयः स देयान्मम विमलदृशो बन्धुरं सिन्धुरास्यः ॥")
नम्रम् । इति मेदिनी । रे, १८६ ॥ उन्नतानतम् । इत्यमरः ॥ (यथा, रघुः । १३ । ४७ ।
"बध्नाति मे बन्धुरगात्रि ! चक्षु-
र्दृप्तः ककुद्मानिव चित्रकूटः ॥")

बन्धुरा, स्त्री, (बन्धुर + टाप् ।) पण्ययोषा । इति मेदिनी । रे, १६० ॥

बन्धुराः, पुं, शक्तवः । इति मेदिनी । रे, १६० ॥ बहुवचनान्तोऽयम् ॥

बन्धुलः पुं, (बन्धुं लातीति । बन्धु + ला + क ।) असतीसुतः । इत्यमरः ।२ । ६ । २६ ॥ (यथा, मृच्छकटिकनाटके चतुर्थे अङ्के ।
"परगृहललिताः परान्नपुष्टाः
परपुरुषैर्जनिताः पराङ्गनासु ।
परधननिरता गुणेष्ववाच्या
गजकलभा इव बन्धुला ललामः ॥")
बन्धूकः । इति शब्दरत्नावली ॥

बन्धुलः, त्रि, (बन्धून् लाति स्नेहेन गृह्णातीति । बन्धु + ला + क।) सुन्दरः । नम्रः । इत्यजयपालः ॥

बन्धूकः, पुं, (बध्नाति चौर्य्यं चित्तमिति । बन्ध + "उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊकः ।) पीतशालकः । इति मेदिनी । के, १२८॥ पुष्पवृक्षविशेषः । बाँदुली इति वङ्गभाषा । दोपहरिया इति हिन्दी भाषा । तत्पर्य्यायः । रक्तकः २ बन्धुजीवकः ३ । इत्यमरः ।२।४।७३॥ बन्धुकः ४ बन्धुः ५ बन्धुलः ६ बन्धुजीवकः ७ बन्धुजीवः ८ बन्धूलिः ९ बन्धुरः १० । इति शब्दरत्नावली ॥ रक्तः ११ माध्याह्निकः १२ । इति भावप्रकाशः ॥ ओष्ठपुष्पः १३ अर्कवल्लभः १४ मध्यन्दिनः १५ रक्तपुष्पः १६ रागपुष्पः १७ हरिप्रियः १८ । अस्य गुणाः ।
"असितसितपीतलोहितपुष्पविशेषात् चतुर्व्विधो बन्धूकः ।
ज्वरहरो विविधारिग्रहपिशाचशमनः प्रसादनः सवितुः स्यात् ॥"
इति राजनिर्घण्टः ॥
"बन्धूकः कफकृद्ग्राही रक्तपित्तहरो लघुः ॥"
इति भावप्रकाशः ॥
खधूपी, स्त्री । बन्दुक इति ख्यातम् । यथा,—
"बन्धूको बन्धुजीवं स्यात् खधूपी स्यान्नपुंसकम् ॥"
इति हड्डचन्द्रः ॥

बन्धूकपुष्पः, पुं, (बन्धूकस्य बन्धुजीवस्य पुष्पमिव पुष्पं यस्य ।) पीतशालः । इत्यमरः ।२।४।४४॥ बीजकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"बीजकः पीतसारश्च पीतशालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥")

बन्धूरः, पुं, (बन्ध बन्धने । बन्ध + "मद्गुरादयश्च ।" उणा० १ । ४२ । इत्यत्र खर्ज्जूरादित्वादूरप्रत्ययेन सिद्धम् इत्युज्ज्वलदत्तः ।) विवरम् । इत्युणादिकोषः ॥

बन्धूरः, त्रि, (बन्ध + खर्ज्जूरादित्वादूरप्रत्ययः ।) रम्यः । नम्रः । यथा, रभसः ।
"बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः ॥"
उन्नतानतम् । स्वभावात् यदुन्नतं उपाधिवशादीषन्नतं तत् । क्वचिदुन्नतं क्वचिदानतं स्थलादिकम् । इति केचित् । इत्यमरटीकायां भरतः ॥

बन्धूलिः पुं, (बन्ध बन्धने । बन्ध + ऊलि ।) बन्धूकवृक्षः । इति शब्दरत्नावली ॥

बन्ध्यः, त्रि, (बन्ध + यत् ।) ऋतुप्राप्तावपि फलरहितवृक्षादिः । (यथा, रघुः । १ । ७० ।
"सिक्तं स्वयमिव स्नेहाद्बन्ध्यमाश्रमपादपम् ॥")
तत्पर्य्यायः । अफलः २ अवकेशी ३ । इत्यमरः । २ । ४ । ७ ॥ विफलः ४ निष्फलः ५ । इति राजनिर्घण्टः ॥ बन्धनीयः । इति बन्धधातोः कर्म्मणि यप्रत्ययः ॥ (यथा, याज्ञवल्क्यः ।२।२४६।
"अवन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ॥"
पुं, निवर्त्तितवारिः सेतुः । यथा, मिताक्षरायाम् ।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च ।
तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात्तन्निवर्त्तनात् ॥")

वन्ध्या, स्त्री, (वन्ध + "अघ्न्यादयश्च ।" उणा० ४।१११। इति यक् ।) अप्रजस्त्री । इति मेदिनी ॥ बाँजा इति भाषा ॥ (यथा, भागवते । ६ । १४ । १२ ।
"रूपौदार्य्यवयोजन्मविद्यैश्वर्य्यश्रियादिभिः ।
संपन्नस्य गुणैः सर्व्वैश्चिन्ता वन्ध्यापतेरभूत् ॥"
वन्ध्या स्त्री अष्टमे वर्षे अधिवेदनीया भवति यथाह मनुः । ९ । ८१ ।
"वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा ॥")
अपत्यशून्यगौः । तत्पर्य्यायः । वशा २ । इत्यमरः । २ । ९ । ६९ ॥ वालाखण्डगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ वृषलीविशेषः । यथा,—
"वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥"
इति प्रायश्चित्तविवेके उशनसो वचनम् ॥*॥
योनिरोगविशेषः । यथा,—
"उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता ।
वातला योनिजो रोगो वातदोषेण पञ्चधा ॥"
तस्या लक्षणं यथा,—
"सा फेनिलमुदावर्त्ता रजःकृच्छ्रेण मुञ्चति ।
वन्ध्या निरार्त्तवा ज्ञेया विप्लुता नित्यवेदना ॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम् ।
वातला कर्कशास्तब्धा शूलनिस्तोदपीड़िता ॥"
तस्याश्चिकित्सा यथा,—

"बला सिता चातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च ।
एतन्मधुक्षीरघृतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते ॥

अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम् ।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि ॥
पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया ।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ॥
कुरण्टमूलं धातक्याः कुसुमानि वटाङ्कुराः ।
नीलोत्पलं पयोयुक्तमेव गर्भप्रदं ध्रुवम् ॥

या बला पिबति पार्श्वपिप्पलं
क्षीरकेण सहितं हिताशना ।
श्वेतया विशिखपुङ्खया युतं
सा सुतं जनयतीह नान्यथा ॥"
इति भावप्रकाशः ॥

(चिकित्सान्तरमस्या यथा,—
"पिप्पल्यः शृङ्गबेरञ्च मरिचं केशरन्तथा ।
घृतेन सह पातव्यं वन्ध्यापि लभते सुतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे॥
"बला चातिबला यष्टिशर्करा मधुसंयुता ।
वन्ध्यागर्भकरी पीता नात्र कार्य्या विचारणा॥"
इति भैषज्यरत्नावल्यां स्त्रीरोगाधिकारे ॥)

वन्ध्याकर्कोटकी, स्त्री, (वन्ध्यायाः कर्कोटकी । पुत्रदातृतया वन्ध्यायाः उपकारिणी अतोऽस्यास्तथात्वम् ।) तिक्तकर्कोटकी । बाँझखखसा इति बाँझचठेल इति बाँझककरोल इति च हिन्दीभाषा । तत्पर्य्यायः । वन्ध्या २ देवी ३ नागारातिः ४ नागहन्त्री ५ मनोज्ञा ६ पथ्या ७ दिव्या ८ पुत्रदा ९ सकन्दा १० श्रीकन्दा ११ कन्दवल्ली १२ ईश्वरी १३ सुगन्धा १४ सर्पदमनी १५ विषकण्टकिनी १६ परा १७ कुमारी १८ भूतहन्त्री १९ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफापहत्वम् । स्थावरादिविषघ्नत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"वन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च ।
नागारिर्नक्तदमनी विषकण्टकिनी तथा ॥
वन्ध्याकर्कोटकी लघ्वी कफशुद्व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"
इति भावप्रकाशः ॥

ब(व)भ्र, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ब(व)कारादिः । ओष्ठ्यवर्गचतुर्थोपधः । ब(व)भ्रति । इति दुर्गादासः ॥

बभ्रवी, स्त्री, (बभ्रोः शिवस्येयं पत्नी । बभ्रु+अण् +ङीप् । न वृद्धिः ।) दुर्गा । इति भूरिप्रयोगः ॥

बभ्रिः, पु, (बभ्र+इन् ।) वज्रम् । इति केचित् ॥ (भरणकर्त्तरि धारके च त्रि । यथा, ऋग्वेदे । ६ । २३ । ४ ।
"गन्तेयान्ति सवना हरिभ्यां
बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ॥")

बभ्रुः, पुं, (बिभर्त्ति भरति वा । भृ+"कुर्भ्रश्च ।" उणा० १ । २३ । इति कुद्वित्वञ्च ।) अग्निः । शिवः । (यथा, महाभारते १३ । महादेवस्य सहस्रनामकथने । १७ । १४८ ।
"भृङ्गी भृङ्गप्रियो बभ्रू राजराजो निरामयः ॥")
विष्णुः । (यथा, महाभारते १३ । विष्णोः सहस्रनामकथने । १४९ । २६ ।
"रुद्रो बहुशिरा बभ्रुर्व्विश्वयोनिः शुचिश्रवाः ॥")
विशालः । नकुलः । इति मेदिनी ॥ (यथा, मार्कण्डेये । १५ । ९ ।
"सञ्जायते महावक्त्रो मूषिको बभ्रुसन्निभः ॥")
मुनिविशेषः । इति हेमचन्द्रः ॥ देशभेदः । इति शब्दरत्नावली ॥ सितावरशाकः । इति राजनिर्घण्टः ॥ खलतिः । इति हेमचन्द्रः ।३।११७॥ (कपिलो वर्णः । इति मेधातिथिः ॥ तद्गुणयुक्ते तु वाच्यलिङ्गः । यथा, मनुः । ४ । १३० ।
"नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ॥"
लोमपादसुतः । यथा, भागवते ।९।२४।१।
"रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ।"
देवावृधसुतः । यथा, तत्रैव । ९ । २४ । ९ ।
"बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू ॥"
ययातिपुत्त्रस्य द्रुह्योः सुतः । यथा, तत्रैव । ९ । २३ । १४ ।
"द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥"
पञ्चगन्धर्व्वपतिषु अन्यतरः । यथा, रामायणे । ४ । ४१ । ४२ ।
"तत्र गन्धर्व्वपतयः पञ्च सूर्य्यसमप्रभाः ।
शैलूषो ग्रामणीः शिक्षः शुक्रो बभ्रुस्तथैव च ॥"
विश्वामित्रपुत्त्रभेदः । यथा, महाभारते । १३ । ४ । ५० ।
"अश्वीतश्च शुक्रश्च बभ्रुः कालपथस्तथा ।"
विश्वगर्भस्य पुत्त्रः । स तु यादवानामन्यतमः । यथा, हरिवंशे । ९४ । ४८ ।
"वसुर्बभ्रुः सुषेणश्च सभाक्षश्चैव वीर्य्यवान् ।
यदुप्रवीरा विख्याता लोकपाला इवापरे ॥"
यथा च माघे । २ । ४० ।
"आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ॥"
स च विनष्टप्राये यादवकुले पथि गच्छन् दस्युभिर्हतः । तत्कथा च महाभारते । १६ । मौषलपर्व्वणि द्रष्टव्या ॥ स्त्री, कपिला गौः । सा च निशि अजानता पृषध्रेण खड्गेन हता । यथा, भागवते । ९ ।२ । ६ ।
"खड्गमादाय तरसा प्रलीनोडुगणे निशि ।
अजानन्नहनद्बभ्रोः शिरः शार्द्दूलशङ्कया ॥")

बभ्रुः, त्रि, (बिभर्त्तीति । भृ+"कुर्भ्रश्च ।" उणा० १ । २३ । इति कुद्वित्वञ्च ।) पिङ्गलः । इत्यमरः ॥ (यथा, कुमारे । ५ । ८ ।
"बबन्ध बालारुणबभ्रुवल्कलं
पयोधरोत्सेधविशीर्णसंहति ॥"
यथा च रघुः । १५ । १६ ।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥")

बभ्रुधातुः, पुं, (बभ्रुः पिङ्गलो धातुः ।) सुवर्णगैरिकम् । इति राजनिर्घण्टः ॥

बभ्रुवाहनः, पुं, मणिपुरस्य राजविशेषः । स च चित्राङ्गदायां अर्ज्जुनाज्जातः । यथा,—
"करेणुमत्यां नकुलो निरमित्रं तथार्ज्जुनः ।
इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् ॥
मणिपुरपतेः सोऽपि तत्पुत्त्रः पुत्त्रिकासुतः ॥"
इति श्रीभागवते । ९ । २२ । ३२ ॥
अपि च ।
वैशम्पायन उवाच ।
"श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः ।
निर्ययौ विनयेनाथ ब्राह्मणार्घपुरःसरः ॥
मणिपुरेश्वरन्त्वेवमुपायातं धनञ्जयः ।
नाभ्यनन्दत् स मेधावी क्षात्रधर्म्ममनुस्मरन् ॥"
"भर्त्तारं निहतं दृष्ट्वा पुत्त्रञ्च पतितं भुवि ।
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरे ॥"
इति महाभारते । १४ । ७९ अध्यायः ॥
(अस्यार्ज्जुनादिना युद्धादिकं तत्रैव विस्तरशो द्रष्टव्यम् ॥)

, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) बभ्रति । इति दुर्गादासः ॥

बर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) बर्ब्बति । इति दुर्गादासः ॥

बर्ब्बटः, पुं, (बर्ब्ब+अटन् ।) राजमाषः । इति त्रिकाण्डशेषः ॥ बर्ब्बटी इति ख्यातः ॥ (विवृतिरस्या राजमाषशब्दे ज्ञेया ॥)

बर्ब्बटी, स्त्री, (बर्ब्बट+गौरादित्वात् ङीष् ।) पण्ययोषा । व्रीहिभेदः । इति मेदिनी । टे, ५१ ॥

बर्ह, ङ वृतौ । हिंसायाम् । दाने । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०

सेट्।) रेफोपधः। ङ, बर्हते। इति दुर्गादासः॥

बल, क ङ निरूपणे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, बालयते धर्म्मं धीरः। अयं केश्चिन्न मन्यते। इति दुर्गादासः॥

बल, क म जीवने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) बलयति। इति दुर्गादासः॥

बल, ङ दाने। वधे। निरूपणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, बलते। इति दुर्गादासः॥

बल, ज धान्यावरोधे। जीवने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अक०च-सेट्।) बालः बलः। धनस्य भावो धान्यं सम्हिस्तस्य अवरोधः प्रतिबन्धः धान्यावरोधः। बलति पुण्यहीनं विधिः। पुण्यहीनस्य सम्हिं प्रतिबध्नाति इत्यर्थः। अयमर्थो अन्यैर्न मन्यते। बलत्यन्नेन लोकः। इति दुर्गादासः॥

ब(व)लं, क्ली, (बलते विपक्षान् हन्तीति। बल + पचाद्यच्।) सैन्यम्। (यथा, भगवद्गीतायाम्।१।१०
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम्॥")
स्थौल्यम्। सामर्थ्यम्। अत्र शेषस्य पर्य्यायः। द्रविणम् २ तरः ३ सहः ४ शौर्य्यम् ५ स्थाम ६ शुष्मम् ७ शक्तिः ८ पराक्रमः ९ प्राणः १० इत्यमरः।२।८।१०२॥ महः ११ सूष्म १२। इति शब्दरत्नावली॥ ऊर्ज्जः १३। इति जटाधरः॥ तद्वैदिकपर्य्यायः। ओजः १ पा(वा)जः २ शवः ३ तरः ४ तवः ५ त्वचः ६ शर्द्धः ७ बाधः ८ नृम्णम् ९ तविषी १० शुष्मम् ११ शुष्णम् १२ सूषम् १३ दक्षः १४ वीळु: १५ च्यौत्नम् १६ सहः १७ यहः १८ वधः १९ वर्गः २० वृजनम् २१ वृक् २२ मज्मना २३ पौंस्यानि २४ धर्णसिः २५ द्रविणम् २६ स्यन्द्रासः २७ शम्बरम् २८। इत्यष्टाविंशतिर्बलनामानि। इति वैदनिघण्टौ।२।९॥ (यथा, मनुः।२।५५।
"पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति॥")
तत्तु गर्भस्थबालकस्य षष्ठे मासि भवति। इति सुखबोधः॥ गन्धरसः। रूपम्। इति मेदिनी। ले, १७॥ शुक्रम्। इति हेमचन्द्रः।३।२९३॥ (यथाह सुश्रुतः। "धातूनां यत्परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते॥") वपुः। इति जटाधरः॥ (यथा, रामायणे।७।१।३३।
"कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः॥")
पल्लवम्। इति शब्दरत्नावली॥ रक्तः। इति शब्दचन्द्रिका॥ (बलमस्यास्तीति। बल + अर्श आद्यच्।) बलयुक्ते, त्रि। इति मेदिनी॥ *॥
सद्योबलकराणि बलहराणि च यथा,—
"सद्योबलकराण्येव बालाभ्यङ्गं सुभोजनम्।
सद्योबलहराण्येव अध्वानं मैथुनं ज्वरः॥"
बलकारकौषधं यथा, गारुडे।११५।१९ अः।
"शिवामलकचूर्णं वै मधुना उदकेन वा।
बलानि कुर्य्यान्मासाया प्रत्युषे भक्षयं शिव।॥"
पारिभाषिकबलानि। यथा,—
"विद्याभिजनमित्राणि हृष्टिसत्त्वधनानि च।
तपःसहायवीर्य्याणि दैवञ्च दशमं बलम्॥"
इति महाभारते आपद्धर्म्मः॥
अपि च।
"अबलस्य बलं राजा बालस्य रुदितं बलम्।
बलं मूर्खस्य मौनन्तु तस्करस्यानृतं बलम्॥"*॥
अपि च।
"क्षत्त्रियाणां बलं युद्धं व्यापारश्च बलं विशाम्।
भिक्षा बलं भिक्षुकाणां शूद्राणां विप्रसेवनम्॥
हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः।
हिंसा बलं खलानाञ्च तपस्या च तपस्विनाम्॥
बलं वेशश्च वेश्यानां योषितां यौवनं बलम्।
बलं प्रतापो भूपानां बालानां रुदितं बलम्॥
सतां सत्यं बलं मिथ्या बलमेवासतां सदा।
अगुणानामनुगमः स्वल्पस्वानाञ्च सञ्चयः॥
विद्या बलं पण्डितानां वाणिज्यं वणिजां बलम्।
शश्वत्सुकर्म्मशीलानां गाम्भीर्य्यं साहसं बलम्॥
धनं बलञ्च धनिनां शुचीनाञ्च विशेषतः।
बलं विवेकः शान्तानां गुणिनां बलमेकता॥
गुणो बलञ्च गुणिनां चौराणाञ्चौर्य्यमेव च।
विप्रवाक्यञ्च कापट्यमधर्म्मन्ध्वनिनां बलम्॥
हिंसा च हिंस्रजन्तूनां सतीनां पतिसेवनम्।
वरशापौ सुराणाञ्च शिष्याणां गुरुसेवनम्॥
बलं धर्म्मो गृहस्थानां भृत्यानां राजसेवनम्।
बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम्॥
यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम्।
पापं बलं पातकिनां सुभक्तानां हरिर्बलम्॥
पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम्।
फलं बलञ्च वृक्षाणां जलधीनां जलं बलम्॥
जलं बलञ्च शस्यानां मत्स्यानाञ्च जलं बलम्।
शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३५ अध्यायः॥

ब(व)लः, पुं, (बलते निरूपयति स्वेष्टमिति। बल + अच्। बलदेवपक्षे नामैकदेशग्रहणादपि सिध्यति भीमादिवत्।) काकः। (यथा, महाभारते।७।६।२५।
"गृध्राः श्येना बलाः कङ्का वायसाश्च सहस्रशः॥")
बलदेवः। इत्यमरः॥ (यथा, भागवते।४।५।१९।
"पूष्णो ह्यपातयत् दन्तान् कलिङ्गस्य यथा बलः॥")
अस्य पत्न्यादीनां नामानि यथा,—
"रेवतीं नाम तनयां रेवतस्य महीपतेः।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ॥"
इति विष्णुपुराणे।५।२५।१९॥
वरुणवृक्षः। इति शब्दचन्द्रिका॥ (वायुना प्रदत्तः कार्त्तिकेयानुचरभेदः। यथा, महाभारते।९।४५।४२।
"बलञ्चातिबलञ्चैव महावक्त्रौ महाबलौ।
प्रददौ कार्त्तिकेयाय वायुर्भरतसत्तम!॥"
रामपुत्रस्य कुशस्यान्वये जातस्य पारियात्रस्य पुत्रविशेषः। यथा, भागवते।९।१२।२।
"देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः।
ततो बलः स्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः॥"
दनायुषः पुत्रविशेषः। यथा, महाभारते।१।६५।३३।
"दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः।
विक्षरो बलवीरौ च वृत्रश्चैव महासुरः॥"
मेघः। इति निघण्टुः।१।१०॥) दैत्यविशेषः। इति मेदिनी। ले, ३७॥ तस्य विवरणं यथा,—
"आसीद्दैत्यो बलो नाम महाबलपराक्रमः।
देवगन्धर्व्वयक्षाणां चन्द्रेन्द्रभयकारकः॥
येन विष्णुर्यमः सूर्य्यो भग्ना आजौ प्रपीड़िताः।
अग्निजागलरक्षाश्च वरुणश्च वशीकृताः॥
संयम्य येन नागेन्द्रा महाभोगा महाविषाः।
गरुडश्च कृतो भृत्यः सदाज्ञामभिवर्त्तिनः॥
येन संलिख्य शैलेन्द्रः कन्दुकाकारकारिनः।
क्रीडार्थं येन विप्रेन्द्र। गिरयः प्रथिता भुवि॥
तेन देवाः समाक्रान्ता दिवः सर्व्वे पलायिताः।
दत्तं स्थानन्तु पातालं समयं शरदां शतम्॥
तथा ते भयमापन्ना मार्गं त्यक्त्वा गता गुरुम्।
पृच्छन्ति विनयात् सर्व्वे शक्रस्य हितकारिणः॥
केनोपायेन देवानां स्वर्गवासो भवेद्द्विज!।
भवान् हि नयवेत्ता च उपायं वद पृच्छताम्॥
त्वमेव शास्त्रवेत्ता च हितः शक्रस्य नित्यशः।
शक्रोदयिनिमग्नानामन्तिपोतो भव द्विज।॥
एवं पृष्टः स देवैस्तु गुरुर्व्वचनमब्रवीत्॥
बृहस्पतिरुवाच।
यदयं दानवः शक्र! न युद्धे भवतो वध्यः।
रणे न क्षयमायाति अजेयः सङ्गरे यतः॥
अतः कपटमास्थाय प्रार्थनीयः क्रतुं प्रति।
दाता सत्त्वबलोपेतः स्वकायमर्थितैस्त्वपि॥
अतस्तस्य प्रार्थयिता विष्णुर्म्मायामहोदधिः।
द्विजरूपधरो भूत्वा याचनाय वधाय च॥
गुरुणा चोदिता देवाः स्तुनान्ते निधनस्यति।
गताः सर्व्वे ततः शान्ता यत्र देवो जनार्द्दनः॥
माधवेन तदा देवा दृष्टा भयसमाकुलाः।
क्रमार्घ्यासनसंलापैः सर्व्वे ते संस्तुता भृशम्॥
संपृच्छितास्तदा सर्व्वे किमायातावदन् सुराः॥
देवा ऊचुः।
बलेन बलिना देव! सर्व्वे विनाशिता वयम्।
मायावी त्वं वधे तस्य नान्योपायो भवेत् क्वचित्॥
विष्णुरुवाच।
करोमि भवतामिष्टं किन्त्वसौ बलसंयुतः।
सात्विको नयवेत्ता च सर्व्वशास्त्रार्थपारगः॥
गूढमन्त्रविचारी स्याद्धर्म्मैकाक्ततनिश्चयः।
तस्य मायां कथं कर्त्तुं शक्यते सुरसत्तमाः॥
पुरैका भवते विद्या मम दत्ता तु शूलिना।
मोहिनी नाम विख्याता मोहं सा कुरुते भृशम्॥
ततोऽहं तस्य नाशाय स्मरामि परमेश्वरीम्।
स्मरित्वा परमां विद्यां द्विजभावो जनार्द्दनः॥

मध्यकायस्तुवेशश्च वेदपाठी सविस्तरः ।
परिव्राड्वै हुताशस्य चपयन्तो ब्रजेद्दृयजेन् ॥
यत्नार्थं याचनां कस्य करोमि कथ्यतां मम ।
तं दृष्ट्वा सूर्य्यतेजाभमुक्तो विप्रेन्द्रजन् स च ॥
बलस्ते यज्ञनिष्पत्तिं करोति द्विजसत्तम ! ।
हेमकूटे महाशैले तिष्ठते दानवोत्तमः ॥
सर्व्वज्ञोऽपि महामायी वधनाय तदा गतः ।
मोहिनीं जपमानस्तु विद्यां परमसिद्धिदाम् ॥
विचित्रं दनुराजस्य पुरं सर्व्वपुरोत्तमम् ।
प्राविशद्वेदं वेदात्मा पठमानो जनार्द्दनः ॥
दानवस्तु पुरं रम्यं जानासि त्वं महोत्तम । ।
द्वारं गतोऽसुरेन्द्रस्य कुर्य्यां प्राध्ययनं तदा ॥
द्वारपालो वदत्येवं श्रुत्वा वेदध्वनिं शुभम् ।
पुराणि रत्नानि शुभं ददामि याचतां वर ! ॥
इदं दानं द्विजश्रेष्ठ । दुर्लभञ्च महामते । ।
तेनोक्तं दर्शनं द्वाःस्थ दीयतां दनुसत्तमे ॥
तदा स पूर्व्वमादिष्टः प्रेषयामास तं नृपम् ।
बलिनं बलसम्पन्नं दानवं सुरमर्द्दनम् ॥
दानोद्यतकरो भद्रं दृष्ट्वा प्रोत्याबभाषत ।
किमायातो भवांश्चात्र कार्य्यं विप्र ! तदुद्दिश ॥
मोहिनीं जपमानस्तु वदतं द्विजकेशवः ॥
ब्रह्मोवाच ।
अहं संप्रेषयामास विद्धि मां कश्यपात्मजम् ।
यज्ञाः सर्व्वैः समारब्धा ऋषिभिश्चासुरा-
धिप । ॥
तस्य निष्पत्तये नाथ । आगतोऽहं तवान्ति-
कम् ।
दानं मे दीयतां राजन् ! सिध्यते येन तन्मखः ॥
बल उवाच ।
येन संसिध्यते यज्ञो देवारब्धो द्विजोत्तम । ।
तथा चाहं धनं दारान् शिरमद्य ददामि ते ॥
ब्रह्मोवाच ।
येन संसिध्यते यज्ञो देवानामसुराधिप । ।
तद्देयं तव आदिष्टं सत्यमत्रावयोरपि ॥
बल उवाच ।
याच्यतां येन ते कार्य्यं सत्यं विप्र ! ददामि ते ।
संस्तुत्य मोहिनीं विद्यां वदतं द्विजसत्तमः ॥
ब्राह्मण उवाच ।
न मे धनैः सदारैर्वा न भूम्या गजवाजिभिः ।
रत्नैः कार्य्यं महाबाहो । देवयज्ञोऽसुरा-
धिप। ॥
येन निष्पाद्यते यज्ञः सुखदश्च दिवौकसाम् ।
तमहं याचयिष्यामि दीयतां तद्व्रतं तव ॥
एतत् कार्य्यं मम भद्रं ऋषीणाञ्च विशेषतः ।
देवार्थं तव कायेन सिध्यतं तन्मखोत्तमः ॥
तदा दत्ता तनुस्तेन दानवेन महात्मना ।
विष्णुनापि स्वचक्रेण शिरस्त्वभिहतोऽसुरः ॥
प्राप्तं देहमुत्सृज्य दिव्यकायस्त्वभूत्तदा ।
तस्यावयवसंजाता वज्राद्या रत्नजातयः ॥
लोचने सुरतेजांसि पद्मरागाणि चाभवन् ।
विशुद्धपात्रदानेन कायो रत्नाकरोऽभवत् ॥”
इति देवीपुराणे ४७ अध्यायः ॥

ब(व)लचः, पुं, धवलः । इत्यमरः ।१।५।१३॥ बलतेः
क्विप् बलं अचत्यश्निम् घञ् बलच इति कष
संयोगवान् । इति रायमुकुटः ॥ अवलक्षते
इति वलक्षः घञ् अकारलोपः । इति स्वाम्या-
दयः ॥ एतन्मते अन्त.स्थवकारादिः ॥ (यथा,
माघे । ६ । ३४ ।
“द्विरदन्तवलक्षमलक्षयत
स्फुरितभृङ्गमृगाङ्कविकैतकम् ॥”)

बलजं, क्ली, (बलात् जायते इति । बल+जन+
ड ।) क्षेत्रम् । पुरद्वारम् । इत्यमरः ।३।३।३१॥
शस्यम् । (धान्यराशिः । इति वैजयन्ती ॥ यथा,
माघे । १४ । ७ ।
“त्वं समीरण इव प्रतीक्षितः
कर्षकेण बलजान् पुपूषता ॥”)
युद्धम् । इति मेदिनी ॥ बलजन्ये, त्रि ॥

बलजा, स्त्री, (बलात् बलप्रतसाहसयुद्धादिकात्
जायते या । बल+जन+ड+टाप् ।) वरयोषा ।
यूथी । इति मेदिनी । जे, ७६ ॥

बलती, स्त्री, प्रासादोपरिमल्लिका । इति
पुराणम् ॥

बलदः, पुं, (बलं ददातीति । बल+दा+कः ।)
जीवकः । इति राजनिर्घण्टः । पौष्टिककर्म्माङ्ग-
होमाग्निः । यथा । पौष्टिके बलदः स्मृतः ।
इति तिथ्यादितत्त्वम् ॥ (वृषभः । यथा, कथा-
सरित्सागरे । ३७ । १५३ ।
“कस्येनुः प्रणयक्रीड़ायाचाच्च मम स्तनकम् ।
गतोऽबभादहं दान्तस्तन्नत्यं बलदोऽभवम् ॥”)
बलदातरि, त्रि ॥ (यथा, ऋग्वेदे ।३।५३ । १८ ।
“बलं तोकाय तनयाय जीवसे त्वं हि बलदा
असि ॥”)

बलदा, स्त्री, (बलद+टाप् ।) अश्वगन्धा । इति
राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
“गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलदीनता, स्त्री, (बलस्य दीनता ।) ग्लानिः ।
इति हेमचन्द्रः ॥

बलदेवः, पुं, (बलेन दीव्यतीति । दिव+अच् ।)
बलरामः । तत्पर्य्यायः । बलभद्रः २ प्रल-
म्बघ्नः ३ अच्युताग्रजः ४ रेवतीरमणः ५ रामः ६
कामपालः ७ हलायुधः ८ नीलाम्बरः ९ रौहि-
णेयः १० तालाङ्कः ११ मुषली १२ हली १३
सङ्कर्षणः १४ सीरपाणिः १५ कालिन्दी-
भेदनः १६ बलः १७ । इत्यमरः । १ । १ । २४ ॥
रुक्मिदर्पः १८ मधुप्रियः १९ हलधरः २०
हलभृत् २१ तालभृत् २२ सौनन्दी २३ गुप्त-
वरः २४ संवर्त्तकः २५ बली २६ । इति
शब्दरत्नावली ॥ (यथा भागवते । ९ । ३ । ३३ ।
“तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥”)
अस्य ध्यानम् ।
“बलदेवं द्विबाहुञ्च शङ्खकुन्देन्दुसन्निभम् ।
वामे हलायुधधरं मुषलं दक्षिणे करे ॥
हाराकेयूरं नीलवस्त्रं हेलावन्तं स्मरेत् परम् ॥”
इति कश्चित्निबन्धः ॥
(अयं हि शेषपर्य्यायांशावतारः । यथा, महा-
भारते । १ । ६७ । १५२ ।
“शेषस्यांशश्च नागस्य बलदेवो महाबलः ॥”
नाम्नामस्य कारणानि बलभद्रशब्दे द्रष्टव्यानि ॥)
वायुः । इति मेदिनी । वे, ६२ ॥

बलदेवा, स्त्री, त्रायमाणौषधिः । इति मेदिनी ।
वे, ६२ ॥ (गुणादयोऽस्यास्त्रायमाणाशब्दे
ज्ञातव्याः ॥)

बलप्रसूः, स्त्री (प्रसूते इति प्रसूर्जननी । बलस्य
बलदेवस्य प्रसूः ।) रोहिणी । बलराममाता ।
इति शब्दरत्नावली ॥

बलभद्रः, पुं, (बलं भद्रं श्रेष्ठमस्य । यद्वा, बलमस्या-
स्तीति बलः । अर्श आद्यच् । बलो बलवानपि
भद्रः सौम्यः ।) बलदेवः । इत्यमरः ।१।१।२४॥
अनन्तः । बलशाली । इति हेमचन्द्रः ।२।१३६॥
लोध्रः । इति शब्दचन्द्रिका ॥ गवयः । इति
राजनिर्घण्टः ॥ बलदेवस्य नाम्नां कारणानि
यथा,—
“स्रतं निरूपितं नाम्नां कनिष्ठस्य यथाश्रुतम् ।
ज्येष्ठस्य हलिनो नाम्नः सङ्केतं शृणु मन्मुखात् ॥
गर्भसङ्कर्षणादेव नाम्ना सङ्कर्षणः स्मृतः ।
नास्त्यन्तोऽस्यैव वेदेषु तेनानन्त इति स्मृतः ॥
बलदेवो बलोद्रेकाद्धली च हलधारणात् ।
सितवासो नीलवासात् मुषली मुषलायुधात् ।
रेवतीसहसम्भोगाद्रेवतीरमणः स्वयम् ॥
रोहिणीगर्भवासात्तु रौहिणेयो महामतिः ।
इत्येव ज्येष्ठपुत्रस्य श्रुतं नाम निवेदितम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
विष्णुपूजनोक्ताष्टदलपद्मस्थयोगिनिविशेषः । यथा,
“सर्व्वत्र मण्डलं कार्य्यं वासुदेवस्य पूजने ।
एवमेव नृपश्रेष्ठ ! निष्फलं चान्यथेतरत् ॥
बलभद्रश्च कामश्च अनिरुद्धस्तदुद्भवः ।
नारायणस्तथा ब्रह्मा विष्णुः बहुः प्रकीर्त्तितः ॥
नरसिंहो वराहश्च योगिनोऽष्टौ प्रकीर्त्तिताः ।
पूर्व्वाद्यष्टदलेष्वेतान् वर्ण्णतो मन्त्रतः पृथक् ॥
पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम् ।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता ।
बलभद्रमुखानान्तु योगिन्यः शृणु पार्थिव ! ॥
आदावुत्कर्षिणी ज्ञेया ज्ञाना पश्चात् क्रिया
परा ।
योगा प्रह्वा तथेशानी अनुग्रानी तथा स्मृनी ॥
सर्व्वाश्चतुर्भुजाः प्रोक्ताः शङ्खचक्रगदाधराः ।
योगिन्यो बलभद्रन्तु कामं विधियुते तथा ॥
विधे रूपन्तु पूर्व्वोक्तं हलञ्च मुषलन्तथा ।
शङ्खचक्रञ्च धत्ते स गदां पार्श्वस्थितान्तथा ॥”
इति कालिकापुराणे ८२ अध्यायः ॥
(पर्व्वतविशेषः । यथा, भागवते । ५।२०।२६।
“एतेषां वर्षमर्य्यादा गिरयो नद्यश्च सप्त सप्तैव ।
ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्र-
स्रोतो देवपालो महानस इति ॥”)

बलभद्रा, स्त्री, कुमारी । त्रायमाणा । इति मेदिनी । दे, २८४ ॥ (अस्याः पर्य्यायो यथा,—
"बलभद्रा त्रायमाणा त्रायन्ती गिरिजानुजा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलभद्रिका, स्त्री, (बलभद्रैव । बलभद्रा + स्वार्थे कन् । टापि अत इत्वम् ।) त्रायमाणा । इत्यमरः । २ । ४ । १५० ॥

बलरामः, पुं, (रम + भावे घञ् । बलेन रामो रमणं यस्य ।) बलदेवः । यथा,—
"बलरामानुजः श्रीमान् गजेन्द्रसुतपादकः ॥"
इति नारदपञ्चरात्रे चतुर्थरात्रीयः ८ अध्यायः ॥
अस्य ध्यानम् ।
"अन्तरे दिव्य उद्याने हरिचन्दनसंज्ञके ।
मत्राधस्तात् स्वर्णपीठे विचित्रे मणिमण्डपे ॥
तन्मध्ये मणिमाणिक्यदिव्यसिंहासनोज्ज्वले ।
तत्रोपरि च रेवत्या सहसंगहलायुधम् ॥
ईश्वरस्याभयाननममभिन्नगुणरूपिणम् ।
शुद्धस्फटिकसंकाशं रक्ताम्बरधरेक्षणम् ॥
नीलवेलधरं स्निग्धं दिव्यगन्धानुलेपनम् ।
कुण्डलाञ्चितसद्गण्डं दिव्यमण्डलरञ्जनम् ॥
मधुपाने सदासक्तं मदाघूर्णितलोचनम् ।
सुवर्णं दक्षिणे पाणौ बलरामं सदा स्मरेत् ॥"
इति कश्चिन्निबन्धः ॥

बललः, पुं, (बलं लातीति । बल + ला + क ।) बलरामः । इत्यमरटीकायां भरतः ॥

बलवत्, अ, (बलमस्यास्तीति । बल + मतुप् । मस्य वः ।) अतिशयम् । इत्यमरः ।३।४।१॥ (यथा, शकुन्तले प्रस्तावनायां सूत्रधारस्योक्तिः ।
"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥")

बलवान् [त्], त्रि, (बलमस्यास्तीति । बल + मतुप् । मस्य वः ।) बलविशिष्टः । तत्पर्य्यायः । मांसलः २ अंसलः ३ । इत्यमरः ।२।६।४४॥ वीर्य्यवान् ४ बली ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । १ । ७६ ।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः ।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः ॥")

बलवर्द्धिनी, स्त्री (बलं वर्द्धयतीति । बल + वृध + णिच् + णिनिः । ङीप् ।) जीवकौषधिः । इति जटाधरः ॥

बलविन्यासः, पु, (बलानां सैन्यानां विशेषेण दुर्भेद्यत्वेन न्यासः स्थापनम् ।) युद्धार्थं सैन्यस्य देशविशेषे विभज्य दुर्लङ्घत्वनिमित्तं स्थापनम् । तत्पर्य्यायः । व्यूहः २ । इत्यमरः ।२।८।७६॥ (बलविन्यासास्तु मकरश्येनादिभेदात् बहवः । तत्र संक्षेपतो मनुना युद्धयात्रायां कैचिन्निर्द्दिष्टाः । यथा, मानवे । ७ । १८७—१९१ ।
"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गारुडेन वा ॥
यतश्च भयमाशङ्केत् ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत् ।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम् ॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः ।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥")

बलसूदनः, पुं, (बलं तन्नामानं प्रसिद्धं असुरं सूदयतीति । बल + सूद + ल्युः ।) इन्द्रः । इति हलायुधः ॥ (यथा, देवीभागवते ।५।३।१३।
"नापेक्षितं शक्राद्यास्तु युद्धाय बलसूदन ॥"
विष्णुः । इति देवीपुराणे ४१ अध्यायः ॥)

बलस्थितिः, स्त्री, (बलानां स्थितिरवस्थानं यत्र । अभिधानात् स्त्रीत्वम् ।) शिबिरम् । इति त्रिकाण्डशेषः ॥

बलहा, [न्], पुं, (बलं सामर्थ्यं हन्तीति । बल + हन + क्विप् ।) श्लेष्मा । इति शब्दरत्नावली ॥ (बलं तन्नामानमसुरं हन्तीति । इन्द्रः ॥ परबलविनाशके, त्रि । यथा, हरिवंशे ।११०।४२।
"तत्राहं युध्यमानस्तु भ्रातास्य बलहा बली ।
स्थितो ममाग्रतः शूरो गदापाणिर्हलायुधः ॥")

ब(व)ला, स्त्री, (कार्य्यकारित्वेन बलमस्त्यस्याः । बल + अर्श आद्यच् ततष्टाप् ।) क्षुपविशेषः । बाला इति वाड़ियाला इति भाषा । तत्पर्य्यायः । वाट्यालकः २ । इत्यमरः ।२।४।१०२ ॥ समङ्गा ३ ओदनिका ४ भद्रा ५ भद्रोदनी ६ खरकाष्ठिका ७ कल्याणिनी ८ भद्रबला ९ मोटा १० वाटी ११ बलाढ्या १२ । इति राजनिर्घण्टः ॥ शीतपाकी १३ वाट्या १४ वाटी १५ विनया १६ वाट्याली १७ वाटिका १८ । इति शब्दरत्नावली ॥ अपि च ।
"वाट्यालको वाट्यपुष्पी समांसा विलला बला ।
श्वेतवाड़ियाला इति भाषा ॥
कत्यप्रोक्ता त्वतिबला पीतपुष्पी महाबला ।
पीतवाड़ीयाला ।" इति रत्नमाला ॥ अस्या गुणाः । अतितिक्तत्वम् । मधुरत्वम् । पित्तातिसारनाशित्वम् । बलवीर्य्यप्रदत्वम् । पुष्टिकफदोषविशोधनञ्च । इति राजनिर्घण्टः ॥ अथ बलाचतुष्टयनामादि ।
"बला वाट्यालिका वाट्या सैव वाट्यालकोऽपि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिका तथा ।
गाङ्गेरुकी नागबला झषा ह्रस्वा गवेधुका ॥
बलाचतुष्टयगुणाः ।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशयः ॥"
इति भावप्रकाशः ॥
"स्निग्धायुष्या बला हृद्या ग्राहिणी वातपित्तजित् ॥"
इति राजनिर्घण्टः ॥
(विद्याविशेषः । सा च ब्रह्मणः सुता । विश्वामित्रेण रामाय प्रदत्ता । अस्याः प्रभावात् क्षुधातृष्णादिजनितक्लेशो न भवेत् । यथा, रामायणे । १ । २२ । ११—२२ ।
"अध्यर्द्धयोजनं गत्वा सरय्वा दक्षिणे तटे ।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥
गृहाण वत्स ! सलिलं माभूत् कालविपर्य्ययः ।
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्य्ययः ।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैरृताः ॥
न बाह्वोः सदृशो वीर्य्ये पृथिव्यामस्ति कश्चन ।
त्रिषु लोकेषु वा राम ! न भवेत् सदृशस्तव ॥
बलामतिबलाञ्चैव पठतस्तात राघव ! ॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये ।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ । ॥
एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव ।
बला चातिबला चैव सर्व्वज्ञानस्य मातरौ ॥
क्षुत्पिपासे न ते राम । भविष्येते नरोत्तम ।
बलामतिबलाञ्चैव पठतस्तात राघव । ॥
विद्याद्वयमधीयाने यशश्चाथ भवेद्भुवि ॥
पितामहसुते ह्येते विद्ये तेजःसमन्विते ।
प्रदातुं तव काकुत्स्थ । सदृशस्त्वं हि पार्थिव । ॥
कामं बहुगुणाः सर्व्वे त्वय्येते नात्र संशयः ।
तपसा सम्भृते चैते बहुरूपे भविष्यतः ॥
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ।
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥
विद्यासमुदितो रामः शुशुभे भीमविक्रमः ।
सहस्ररश्मिर्भगवान् शारदीव दिवाकरः ॥")

ब(व)लाकः, पुं, (बलेन अकतीति । बल + अक + पचाद्यच् ।) बकजातिः । इति भरतः ॥ (पूरुपुत्रः । स च पौत्रगङ्गस्य जह्नोः पौत्रः । यथा, भागवते । ९ । १५ । ३ ।
"जह्नोस्तु पूरुस्तत्पुत्त्रो बलाकश्चात्मकोऽजकः ॥"
वत्सप्रीपुत्रभेदः । यथा, मार्कण्डेये ।११८।२।
"तस्य तस्यां सुनन्दायां पुत्त्रा द्वादश जज्ञिरे ।
प्रांशुः प्रचारः सूरश्च सुचक्रो विक्रमः क्रमः ॥
बली बलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥"
जातूकर्ण्यस्य मुनेः शिष्यविशेषः । यथा, श्रीभागवते । १२ । ६ । ५८ ।
"जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बलाकपैलजाबालविरजेभ्यो ददौ मुनिः ॥"
राक्षसभेदः । यथा, मार्कण्डेये । ६९ । ६४ ।
"तां जहाराद्भितनयो बलाको नाम राक्षसः ॥"
स्वनामख्यातो व्याधविशेषः । यथा, महाभारते । ८ । ६९ । ४० ।
"व्याधोऽभवत् कश्चित् बलाको नामभारत ॥")

ब(व)लाका, स्त्री, (बलते इति । बल संवरणे + बलाकादयश्च ।" उणा० ४ । १४ । इति अक । यद्वा, बलेन अकतीति । बल + अक कुटिलगतौ + पचाद्यच् ।) बकजातिविशेषः । (यथा, मनुः । ५ । १४ ।
"बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् ॥")
तत्पर्य्यायः । विषकण्ठिका २ । इत्यमरः । २ । ५ । २५ ॥ विसकण्ठी ३ बलाकी ४ । इति शब्दरत्नावली ॥ कारायिका ५ शिक्लिका ६ । इति जटाधरः ॥ विसकण्ठी ७ शुक्लाङ्गा ८

दीर्घकन्धरा ८ धर्म्माण्ना १० कामुकी ११ श्येना १२ मेघानन्दा १३ जलप्रिया १४। बलेन शक्त्या दूरमुड्डीयमकति। बल बल्ल संवरणे बलाकादय- श्चेत्याकन् बलाका। इति रायमुकुटकृतव्युत्पत्ति- द्वयेन पवर्गीयबकारादिरन्त्यबकारादिश्चायं शब्दः॥*॥ अस्या मांसगुणाः। वायुनाशित्वम्। स्निग्धत्वम्। बद्धमलत्वम्। वृष्यत्वम्। कफपित्त- हरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ सारस- हंसबलाकाचक्रक्रौञ्चादयो जले प्लवनात् प्लव- संज्ञाः कथितास्ते तन्मांसं गुरूष्णञ्च बलदायि। अपि च।

"अन्ये बकबलाकाद्या गुरवः प्राणिभक्षणात्।"

इति राजनिर्घण्टः॥

अन्यच्च।

"हंससारसकाचाक्षबकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"

इति भावप्रकाशः॥

(कामुकी। इति शाश्वतः॥)

बलाञ्चिता, स्त्री, (बलेन अञ्चिता।) रामवीणा। इति शब्दरत्नावली॥

बलाटः, पुं, (बलेन अट्यते प्राप्यते इति। अट्+ घञ्।) मुद्गः। इति हेमचन्द्रः॥

बलात्, व्य, (बलमततीति। बल+अत्+क्विप्।) हठात्। बलादिति निपातो हठार्थे इति स्वामी। इत्यमरटीकायां भरतः॥ यथा,—

"बलात् संदूषयेद्यस्तु परभार्य्यां नरः क्वचित्।
वधदण्डो भवेत्तस्य नापराधो भवेन् स्त्रियाः॥"

इति मात्स्ये २०१ अध्यायः॥

बलात्कारः, पुं, (बलात्करणम्। बलात्+कृ+ भावे घञ्।) हठात्करणम्। तत्पर्य्यायः। प्रसभम् २ हठः ३। इत्यमरः। २। ८।१०८॥ हठात्कारः ४ प्रसभः ५। इति शब्दरत्नावली॥

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथा॥"

इति ऋणादाने मिताक्षराधृतनारदवचनम्॥

(यथा, रघुः। १०। ४७।

"शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥")

बलात्मिका, स्त्री, (बलमेव आत्मा स्वरूपं यस्याः।) हस्तिशुण्डीवृक्षः। इति शब्दरत्नावली॥

बलाद्या, स्त्री, (बलाय आद्या श्रेष्ठा।) बला। इति राजनिर्घण्टः॥ (बलाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

बलानुजः, पुं, (बलस्य बलरामस्य अनुजः कनिष्ठः।) श्रीकृष्णः। इति पुराणम्॥

बलामोटा, स्त्री, (बलमामोटयतीति। बल+ आ+मुट्+अच्। टाप्।) नागदमनी। इति भावप्रकाशः॥ (यथास्या गुणाः।

"बलामोटा कटुस्तिक्ता लघुः पित्तकफापहा।
मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्दभान्॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

बलायः, पुं, (अयतीति अयः प्रापकः। बलस्य अयः।) वरुणवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य वरुणशब्दे ज्ञातव्याः॥)

बलारातिः, पुं, (बलस्य तन्नाम्ना प्रसिद्धस्यासुरस्य अरातिः शत्रुः।) इन्द्रः। इत्यमरः।१।१।४६॥

बलालकः, पुं, (बलाय अलति समर्थो भवतीति। बल+अल्+ण्वुल्।) पानीयामलकम्। इति शब्दचन्द्रिका॥

बलाशः, पुं, (बलमश्नातीति। बल+अश्+अण्।) श्लेष्मा। इति हेमचन्द्रः। ३। १२६॥ (यथा,

"बलाश एवायतमुन्नतञ्च
शोफं करोत्यन्नगतिं निवार्य्य॥"

कण्ठगतरोगविशेषः। तल्लक्षणं यथा,—

"गले च शोफं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेतमाहु-
र्बलाशसंज्ञं निपुणा विकारम्॥"

इति सुश्रुते निदानस्थाने षोड़शेऽध्याये॥

दन्त्यसान्तोऽप्ययं शब्दो दृश्यते॥)

बलासमः, पुं, मुद्गः। इति त्रिकाण्डशेषः॥

ब(व)लाहकः, पुं, (बलेन हीयते इति। बल+हा+कुन्। यद्वा, वारीणां वाहकः। पृषोदरादित्वात् साधुः।) मेघः। (यथा, कुमारे। १। ४।

"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

मुस्तकः। इत्यमरः। १। ३। ६॥ पर्व्वतः। दैत्यविशेषः। नागविशेषः। इति मेदिनी॥ (यथा, महाभारते। २। ६। ६।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ॥"

बलाहकसर्पस्तु दर्व्वीकराणामन्तर्गतः। इति सुश्रुते कल्पस्थाने ४ अध्यायः॥) रमागर्भोद्भवः कल्किदेवपुत्रः। यथा,—

"तथा रमा सिते पक्षे वैशाखे द्वादशीदिने।
नामद्वादशव्रतं चक्रे पूर्णं वर्षचतुष्टयम्॥
पट्टवस्त्रं करे बद्धा भोजयित्वा द्विजान् बहून्॥
भुक्त्वा हविष्यं क्षीराक्तं सुमिष्टं स्वामिना सह॥
कुरुते पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता।
सा पुत्रौ सुषुवे साध्वी मेघमालबलाहकौ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥"

इति कल्किपुराणे ३१ अध्यायः॥

श्रीकृष्णरथाश्वविशेषः। यथा,—

"स्यन्दनस्तु शतानन्दः सारथिश्चास्य दारुकः।
तुरङ्गाः शैव्यसुग्रीवमेघपुष्पबलाहकाः॥"

इति त्रिकाण्डशेषः॥

(यथाच भागवते। १०। ५३। ५।

"स चाश्वैः शैव्यसुग्रीवमेघपुष्पबलाहकैः।
युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः॥"

जयद्रथस्य भ्रातृविशेषः। यथा, महाभारते। ३। २५४। १२।

"जयद्रथो नाम यदि श्रुतस्ते
सौवीरराजः सुभगे। स एषः।
तस्यापरे भ्रातरोऽदीनसत्त्वा
बलाहकानीकविदारणाद्याः॥"

नदविशेषः। स तु लवणसमुद्रगामी। यथा, मात्स्ये। १२०। ७२।

"बलाहकश्च ऋषभश्चक्रो मैनाक एव च।
विनिविष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम्॥"

कुशद्वीपस्थपर्व्वतविशेषः। यथा, तत्रैव। १२१। ५५।

"बलाहकस्तृतीयस्तु जात्यञ्जनमयो गिरिः॥"

तारापीड़स्य राज्ञः स्वनामख्यातो बलाधि- कारी। यथा, कादम्बर्य्यां चन्द्रापीड़विद्या- भ्यासकथने। "चन्द्रापीड़मानेतुं राजा बलाधि- कृतं बलाहकनामानं आहूय हयतुरगबल- पदातिपरिवृतमतिप्रशस्तेऽहनि प्राहिणोत्॥")

बलाङ्ककन्दः, पुं, (बलं आङ्कयतीति बलाङ्कस्ता- दृशः कन्दः।) गुलञ्चकन्दः। इति राजनिर्घण्टः॥

बलिः, पुं, (बल्यते दीयते इति। बल दाने+"सर्व्व- धातुभ्य इन्।" उणा० ४। ११७। इतीन्।) करः। राजग्राह्यो भागः। (यथा, मनुः। ७। ८०।

"सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्॥"

"राजा शक्तैरमात्यैर्वर्षग्राह्यं धान्यादिभाग- मानयेत्।" इति कुल्लूकभट्टः॥) उपहारः। पूजासामग्री। इत्यमरभरतौ॥ (यथा, मार्क- ण्डेये। ६३। ८।

"ददतुस्तौ बलिञ्चैव निजगात्रासृगुक्षितौ॥")

चामरदण्डः। बलिर्वैश्वगामकपञ्चमहायज्ञान्त- र्गतभूतयज्ञः। इति हेमचन्द्रः।३।४८६॥ (गृहस्थो हि पञ्चसूनापापेन प्रतिदिनं संबध्यते। तन्निष्कृ- त्यर्थं प्रत्यहं पञ्च महायज्ञाः कर्त्तव्याः। यथाह मनुः। ३। ६८—७१।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च कॢप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते॥"

"पशुवधस्थानं सूना। सूना इव सूना हिंसा- स्थानगुणयोगात्। चुल्ल्यादयः पञ्च गृहस्थस्य जीवहिंसास्थानानि। चुल्ली उद्धानी। पेषणी दृषदुपलात्मिका। उपस्करः गृहोपकरण- कुण्डसंमार्जन्यादिः। कण्डनी उदूखलमुषले। उदकुम्भो जलाधारकलशः।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ गृहस्थानां बलिरूपभूत- यज्ञस्य प्रतिदिनकर्त्तव्यतया तस्य विधृतिरुच्यते। गृहस्थः अनन्यचित्तो देवताध्यानपर एव होमान् कृत्वा प्राच्यादिषु दिक्षु बलिं हरेत्। तत्प्रकरणमाह। प्राच्यां इन्द्राय नमः। इन्द्र-

पुरुषेभ्यो नमः। दक्षिणस्यां यमाय नमः। यमपुरुषेभ्यो नमः। पश्चिमायां वरुणाय नमः। वरुणपुरुषेभ्यो नमः। उत्तरस्यां सोमाय नमः। सोमपुरुषेभ्यो नमः। ननु मनौ ।३।८७।
"इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत्।"
इत्युक्तेः अन्तकाय नमः। अन्तकपुरुषेभ्यो नमः इत्यादिप्रयोगः साधुः स्यात्। अत उच्यते यद्यपि शब्दावगम्यत्वाद्देवतात्वस्यान्तकाप्पतीन्दुशब्दैरेवोद्देशो युक्तस्तथापि बह्वृचानुष्ठानसंवादाद्गृह्यपरिशिष्टे च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यो सोमाय सोमपुरुषेभ्य इति प्रतिदिशमिति पाठात् यथोक्त एव प्रयोगः। मरुद्भ्यो नमः इति द्वारे बलिं दद्यात्। जले अद्भ्यो नमः। मुषलोलूखले वनस्पतिभ्यो नमः। वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्व्वस्यां दिशि श्रियै नमः इति बलिं दद्यात्। वास्तुपुरुषस्य पाददेशे दक्षिणपश्चिमायां दिशि भद्रकाल्यै नमः। इत्यनेन दद्यात्। केचित्तु गृहस्थशयनस्य शिरःस्थान-भूप्रदेशे श्रियै नमः। चरणभूप्रदेशे भद्रकाल्यै नमः इत्याहुः। ततो गृहमध्ये ब्रह्मणे पतये नमः वास्तोः पतये नमः इत्यनेन बलिं हरेत्। गृहाकाशे विश्वेभ्यो देवेभ्यो नमः। दिवाचरेभ्यो भूतेभ्यो नमः। दिवानक्तञ्चारिभ्यो भूतेभ्यो नमः इत्यनेन दद्यात्। गृहस्योपरिस्थितगृहे सर्व्वात्मभूतये नमः इत्यनेन बलिं दद्यात्। केचित् बलिदातुः पृष्ठदेशस्थभूभागे सर्व्वात्मभूतये नम इत्यनेन दद्यादित्याहुः। ततो बलिदात्रा प्राचीनावीतिना दक्षिणामुखेन च तता उक्तबलिदानावशिष्टं सर्व्वमन्नं दक्षिणस्यां दिशि पितृभ्यः स्वधा इत्यनेन देयम्। ततोऽन्यदन्नं पात्रे समुद्धृत्य यथा रजसा न संसृज्यते तथा भुवि शुनकेः श्वपतितचाण्डालपापरोगिवायसकृमिप्रभृतिभ्यो दद्यात्। एवं नित्यं कुर्व्वन् परं स्थानमभ्येतीति ॥ * ॥) यथा,—
"येऽर्च्चयन्ति सदा विष्णुं निश्चलेनान्तरात्मना।
न ते भूयोऽभिजायन्ते श्वेतद्वीपनिवासिनः ॥
एवं पूज्य विधानेन अतिथिं भोजयेत्ततः।
सायं प्रातर्यदन्नं स्यात्कृत्वाग्निं तेन तद्बलिम् ॥"
इति वह्निपुराणम् ॥ * ॥
"ततोऽग्नितर्पणं कुर्य्याद्दद्याच्च बलिमित्यथ।
ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च ॥
धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत्।
प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत् ॥
प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्।
दद्याद्धात्रे विधात्रे च बलिं द्वारं गृहस्य च ॥
अर्य्यम्णे च बलिं दद्यात् गृहेभ्यश्च समन्ततः।
नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् ॥
पितॄणां निर्व्वपेच्चैव दक्षिणाभिमुखः स्थितः।
गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः ॥
ततस्तोयमुपादाय तिष्ठेदाचमनाय वै।
स्थानेषु निक्षिपेत् प्राज्ञस्तास्ता उद्दिश्य देवताः॥
एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः।
आप्यायनाय भूतानां कुर्य्यादुत्सर्गमादरात् ॥
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि।
वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अथ बलिः। वैश्वदेवपश्चाद्भूमौ जलं क्षिप्त्वा तच्छेषान्नेन सांगुष्ठेन देवतीर्थेन ॐ विश्वेभ्यो देवेभ्यो नमः इति बलिं दद्यात् तदुपरि जलमनेन मन्त्रेण दद्यात् एवं सर्व्वत्र जलप्रक्षेपः। तदुत्तरे ॐ सर्व्वेभ्यो देवेभ्यो नमः। उभयोर्द्दक्षिणे प्राचीनावीती पातितवामजानुर्दक्षिणामुखो दक्षिणाग्रकुशत्रयोपरि सतिलमन्नं शुभ्रकुशत्रयेण पितृतीर्थेन ॐ पितृभ्यः स्वधा। ततः सर्व्वेषां बलीनामुपरि सर्व्वत्र प्रत्येकं जलनिषेकः। तत उपवीती देवतीर्थेन बलिपात्रप्रक्षालनोदकेनान्नेन ऐशान्यां ॐ यक्ष्मैतत्ते नमस्तेऽस्तु मा मा हिंसीः ॐ यक्ष्मणे नमः इत्यनेन दद्यात् जलञ्च देयम्॥ इत्यावश्यकबलिः॥ * ॥
अथ काम्यबलिः। बलीनां पश्चिमे अग्रेणोत्तराग्रां रेखां कृत्वा भूमौ जलं दत्त्वा,—
"ॐ देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता
ये चान्नमिच्छन्ति मया प्रदत्तम् ॥
पिपीलिकाः कीटपतङ्गकाद्या
बुभुक्षिताः कर्म्मनिबन्धबद्धाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु ॥
येषां न माता न पिता न बन्धु-
र्नैवान्नसिद्धिर्न तथान्नमस्ति।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
प्रयान्तु तृप्तिं मुदिता भवन्तु ॥
ॐ भूतानि सर्व्वाणि तथान्नमेत-
दहञ्च विष्णुर्न यतोऽन्यदस्ति।
तस्मादहं भूतनिकायभूत-
मन्नं प्रयच्छामि भवाय तेषाम् ॥
चतुर्द्दश भूतगणो य एष
तत्र स्थिता येऽखिलभूतसङ्घाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदन्तेऽमुदिता भवन्तु ॥"
इत्युच्चार्य्य बलिं दद्यात्।
"ॐ ऐन्द्रवारुणवायव्याः सौम्या वै नैरृतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम् ॥"
ॐ वायसेभ्यो नम इति पुनर्जलं देयम्।
भूमौ जलं दत्त्वा,—
"ॐ श्वानौ द्वौ श्यामशवलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ ॥"
ॐ श्वभ्यां नमः ततः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ चण्डालपतितपापरोगिभ्यो नम. पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ धर्म्मराजचित्रगुप्ताभ्यां नमः ततः पुनर्जलदानम्।
ततो जलं स्पृष्ट्वा अग्निं विसृज्य नमस्कृत्य संप्राश्य जले क्रियमाणे बलीनप्सौ जले वा क्षिपेत् पिण्डवत्। अन्नाभावे केवलजलेन पात्रान्तरस्थजले कुर्य्यात्। ततः कुशकुसुमसहितं जलपूर्णं ताम्रादिपात्रं हस्ते निधाय महावामदेव ऋषिर्विराड्गायत्री छन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनियोगः। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढ़ाचिदारुजे वसु। ॐ अभीषु णः सखीनामविता जरितॄणां शतम्भवास्यूतये। इति वामदेव्यं गीत्वा गानाशक्तौ त्रिः पठित्वा ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। ॐ स्वस्तीति त्रिः पठेत्। पार्व्वणश्राद्धादिकरणे पार्व्वणादिकं कृत्वैव वैश्वदेवादिकं कार्य्यं रात्रावपि पाकसत्त्वे यत्किञ्चिद्द्रव्यसत्त्वे वा वैश्वदेवबलिकर्म्मणी कुर्य्यात्। शूद्रस्तु ब्राह्मणाभावे मन्त्रार्थं भावयन् नमो नम इति मन्त्रेण कुर्य्यात्। अविभक्तानामेकत्रपाकादेव सर्व्वेषां सिद्धिः। इत्याह्निकाचारप्रयोगतत्त्वम् ॥ * ॥ नवग्रहबलिर्यथा,—
"गुड़ौदनं रवेर्दद्यात् सोमाय घृतपायसम्।
यावकं मङ्गलायैव क्षीरान्नं सोमसूनवे ॥
दध्योदनञ्च जीवाय शुक्राय तु घृतौदनम्।
शनैश्चराय कृशरमाजमांसञ्च राहवे ॥
चित्रौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्च्चयेत् ॥"
सर्व्वभक्ष्यैस्तु तत्तद्द्रव्याभावे यथालाभोपपन्नैर्भक्ष्यैः। इति ग्रहयज्ञतत्त्वम् ॥ * ॥
दैत्यभेदः। इति मेदिनी। (अयं सावर्णस्य मनोरन्तरे इन्द्र आसीत्। यथा, मार्कण्डेये ।८०।१०।
"तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने। ॥")
स च दैत्यो विरोचनपुत्रः। तस्य अशनायां पत्न्यां बाणज्येष्ठं पुत्रशतं जातम्। इति श्रीभागवतम् ॥ यथा,—
"विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान्।
बलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः।
सहस्रबाहुर्ज्येष्ठश्च कार्य्ये द्वे च बलेः शुभे ॥
बलेः पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः।
बालेया नाम विख्यातो गणो विक्रान्तपौरुषः॥"
इत्यग्निपुराणम् ॥
तस्य पूर्व्वजन्मवृत्तान्तो यथा,—
शुक्र उवाच।
"धर्म्मध्वजो नाम बभूव राजा
विदेहदेशे निजधर्म्मशीलः।
यज्वा सुवाग्मी शुभकर्म्मकर्त्ता
स विष्णुभक्तोऽनुदिनं महात्मा ॥
तस्य त्वमासीर्नृपतेः सुभृत्यो
द्वेष्टा द्विजानां पिशुनोऽविवेकी।
द्वेष्टा गुरूणां सततं त्वदाता
नो साधसं ते वत पारलौक्यम् ॥

एवंविधस्त्वं नृपसत्तमेन
प्रोक्तः कुरुव्याघ्रविनाशनाय ।
त्यागं त्वदीयेन सुखं हि लप्स्ये
लोके परे गच्छतेन चापि ॥
श्रुत्वा भवांस्तद्वचनञ्चकार
त्यागं त्वनेनापि जनार्द्दनस्य ।
दानं तथा गोः कृतवान् विभक्त्या
तस्मात् फलं विद्धि तवाप्रमेयम् ॥
एवं त्वया प्राप्यमपीमराज्यं
देवासुराणामहतं विपक्षैः ।
संलप्स्यसे त्वं पुनरेव सर्व्वं
संपूजयन् भक्तियुतः सुरेशम् ॥”

इत्यग्निपुराणम् ॥

बलिराजयज्ञे वामनदेवभिक्षा । यथा,—

लोमहर्षण उवाच ।

“सपर्व्वतवनामुर्व्वीं दृष्ट्वा संक्षुभितां बलिः ।
पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः ॥
आचार्य्य क्षोभमायाति साब्धिभूभृद्वना मही ।
कस्माच्च नासुरान् भागान् प्रतिगृह्णन्ति वह्नयः ॥
इति पृष्टोऽथ बलिना काव्यो वेदविदाम्वरः ।
उवाच दैत्याधिपतिं चिरं ध्यात्वा महामतिः ॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः ।
वामनेनेह रूपेण परमात्मा सनातनः ॥
स नूनं यज्ञमायाति तव दानवपुङ्गव ।।
तस्य पादप्रविक्षेपादियं प्रचलिता मही ॥
इयमस्य जगद्धातुर्माया क्षुभ्यास्य सात्वती ।
तत्सन्निधानादसुरा भागार्हा नासुरोत्तम ।॥
भुञ्जते नासुरान् भागानपि तेन त्रयोऽग्नयः ।
शुक्रस्य वचनं श्रुत्वा हृष्टलोमाब्रवीद्बलिः ॥
धन्योऽहं कृतपुण्यश्च यतो जगत्पतिः स्वयम् ।
यज्ञमभ्यागतो ब्रह्मन् ! मत्तः कोऽन्योऽधिकः पुमान् ।
यं योगिनः सदोद्युक्ताः परमात्मानमव्ययम् ॥
द्रष्टुमिच्छन्ति देवोऽसौ ममाध्वरमुपेष्यति ।
यन्मयाचार्य्य । कर्त्तव्यं तन्ममादेष्टुमर्हसि ॥

शुक्र उवाच ।

त्वयास्य दैत्याधिपते । स्वल्पकेऽपि हि वस्तुनि ।
प्रतिज्ञा नैव वोढ़व्या वाच्यं साम तथा फलम्

बलिरुवाच ।

ब्रह्मन् । कथमहं ब्रूयामन्येनापि हि याचितः ।
नास्तीति किमु देवेशे संसाराघौघहारिणि ॥

लोमहर्षण उवाच ।

इत्येवं वदतस्तस्य सम्प्राप्तः स जनार्द्दनः ।
सर्व्वदेवमयोऽचिन्त्यो मायावामनरूपधृक् ॥
तं दृष्ट्वा यज्ञवाटन्तु प्रविष्टमसुराः प्रभुम् ।
जग्मुः प्रभावात् क्षोभन्ते तेजसा तस्य निष्प्रभाः ॥
स चार्घ्यमादाय बलिः प्रोद्भूतपुलकस्तदा ।
पूजयामास गोविन्दं प्राह चेदं महासुरः ॥

बलिरुवाच ।

सुवर्णरत्नसंघातान् गजाश्वमहिषीस्तथा ।
स्त्रियो वस्त्राण्यलङ्कारान् गावः कृप्यञ्च पुष्कलम् ।
तद्ददामि त्वमर्व्वेदं ममार्थी सततं प्रियः ॥
इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितं वचः ।
प्राह सस्मितगम्भीरं भगवान् वामनाकृतिः ॥
ममाग्निशरणार्थाय देहि भूमिं पदत्रयम् ।
सुवर्णग्रामरत्नादि तदर्थिभ्यः प्रदीयताम् ॥
एतच्छ्रुत्वा तु गदितं वामनस्य महात्मनः ।
ददौ तस्मै महाबाहुर्व्वामनाय पदत्रयम् ॥
पाणौ तु पतिते तोये वामनोऽभूदवामनः ।
सर्व्वदेवमयं रूपं दर्शयामास तत्क्षणात् ॥
जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुङ्गवान् ।
पुरन्दराय त्रैलोक्यं ददौ विष्णुरुरुक्रमः ॥
सुतलं नाम पातालमधस्ताद्वसुधातलम् ।
बलेर्द्दत्तं भगवता विष्णुना प्रभविष्णुना ॥
अथ दैत्येश्वरं प्राह विष्णुः सर्व्वेश्वरेश्वरः ।
यत्त्वया सलिलं दत्तं गृहीतं पाणिना मया ॥
कल्पप्रमाणं तस्मात्ते भविष्यत्यायुरुत्तमम् ।
वैवस्वते तथातीते बले ! मन्वन्तरे तथा ॥
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति ।
इदानीं भुवनं दत्तं सर्व्वं शक्राय सर्व्वदा ॥
यदा सुरैश्च विप्रैश्च विरोधं त्वं करिष्यसि ।
बन्धिष्यति तदा पाशो वारुणो घोरदर्शनः ॥

बलिरुवाच ।

तत्रासतो मे पाताले भगवन् ! भवदाज्ञया ।
किं भविष्यत्युपादानमुपभोगोपयोगकम् ॥

श्रीभगवानुवाच ।

दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ।
हुतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥
अदक्षिणास्तथा यज्ञाः क्रियाश्चाविधिना कृताः ।
फलानि तव दास्यन्ति अधीतान्यव्रतानि च ॥
उदकेन विना पूजा विना दर्भेण या क्रिया ।
आज्येन च विना होमं फलदास्ते च ते बले ॥”

इति वामनपुराणे ३१ अध्यायः ॥*॥

ययातिवंशोद्भवसुतपोराजपुत्रः । यथा, विष्णुपुराणे । ४ । १८ । १ । “तितिक्षोरपि रुषद्रथः पुत्त्रोऽभूत् तस्यापि हेमः हेमस्य सुतपाः सुतपसश्च बलिः ॥” (तथा च भागवते । ९ । २३ । ४ ।
“ततो होमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥”
मुनिविशेषः । यथा, महाभारते ।२।४।१०।
“अर्व्वावसुः सुमित्रश्च मैत्रेयः शुनको बलिः ॥”)
देवतोद्देशेन घातार्थोपकल्पितच्छागादिः । यथा, भविष्ये ।
“अजानां महिषाणाञ्च मेषाणाञ्च तथा वधात् ।
प्रीणयेद्विधिवत् दुर्गां मांसशोणिततर्पणैः ॥”

इति ।

पशुघातपूर्व्वकरक्तशीर्षयोर्ब्बलित्वम् । यथा,—
“स्थाने नियोजयेद्रक्तं शिरश्च सप्रदीपकम् ।
एवं दत्त्वा बलिं पूर्णं फलं प्राप्नोति साधकः ॥”

इति च दुर्गोत्सवतत्त्वम् ॥ * ॥

तच्छेदनार्थखड्गलक्षणमाह निबन्धतन्त्रे ।
“द्वादशाङ्गुलिको मुष्टा दीर्घो द्वात्रिंशदङ्गुलः ।
षडङ्गुलस्तु विस्तारः खड्गः कार्य्यो विधूपमः ॥
हृदयेनैव खड्गेन बलिं पूर्व्वमुखस्थितम् ।
अथवोत्तरवक्त्रञ्च स्वयं पूर्व्वाननस्ततः ॥”*॥
खड्गप्रहारेण बलिहननं तदभावे दोषश्च तत्रैव ।
“छिन्द्यादेकप्रहारेण स्वयं वा चान्यतोऽपि वा
यद्यप्येकेन घातेन बलिच्छेदो न जायते ।
तदन्त्यं चाप्य च महान् कर्त्तुर्हानिः पदे पदे
तन्त्रान्तरे ।
“एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयात् कर्त्तुर्व्वा हेतुरेव वा
निबन्धेऽपि ।
“यशोहानिर्ब्बलहानिश्चार्थहानिस्ततः परम्
पुत्त्रहानिः सुते सत्त्वे तदसत्त्वे निजक्षयः ॥
अतः सद्यो महेशानि । तस्मात्सा होमयेत् सुधीः
होमादेव भवेच्छान्तिरित्येव न संशयः ॥”*
प्रकारान्तरशान्तिमाह तत्रैव ।
“छिन्द्यादेकप्रहारेण चान्यथा दोषमावहेत् ॥
तच्छान्तये जपेद्विद्यां तारादेव्याः सहस्रकम् ।
सहस्रं जुहुयात्तासिद्ध्याद्वा स्वर्णमाषकम् ॥
रुधिरं तत्तु पात्रस्थे न तु देयं कदाचन ।
बलिमन्यं समादाय भगवत्यै निवेदयेत् ॥”*॥
निबन्धे ।
“यद्येकेन घातेन महिषो नैव छिद्यते ।
तदन्त्यं महती हानिः कर्त्तुः पुत्त्रादिसम्पदाम् ॥
यस्मात् प्रजायते देवि ! ततः शान्तिं समाचरेत् ।
आनीय महिषं तत्र घातयित्वा च तत्र वै ।
सास्थिभिर्लोमसहितैर्जुहुयाद्देवि । यथायतः ॥
तच्छान्तये जपेद्विद्यां कालीं वा तारिणीं पराम्
अयुतं परमेशानि । सहस्रं वापि साधकः ॥
सहस्रं विल्वपत्रैस्तु जुहुयात् संस्कृतेऽनले ।
ब्राह्मणं वा गुरुं वापि वरयेद्वसुभिः प्रिये ।।
पश्चिमं वरयेद्वाथ बहुमानपुरःसरैः ।
ततः स्वर्णं ब्राह्मणाय तस्मै दद्यात् शुभानने ॥
एवञ्चेद्यजमानस्य शान्तिर्भवति निश्चयः ।
कृतस्तस्यैव शङ्का स्यात् दृष्टिकृद्वत्सरावधि ॥*
अथवा सर्व्वतोभद्रे नवकुम्भं निधापयेत् ।
सौवर्णं राजतं वापि ताम्रं वा तैजसन्तु वा ।
मात्तिकं वा चरेत्तत्र वित्तशाठ्यं न चाचरेत् ॥
तत्रैव कालिकां तारां तथा महिषमर्द्दिनीम् ।
यजेद्वा त्रिपुरां देवीं समस्तरश्मिमण्डिताम् ॥
कुलदीपैस्तथा वस्त्रैर्धनधान्यादिभिः प्रिये ।।
पूजयेत् परमेशानीं वित्तशाठ्यविवर्ज्जितः ॥
बलिमन्यं छागलं वा तथाच सुलक्षणम् ।
घातयित्वा पुरोभागे चतुर्था शोणितं न्यसेत् ॥
अपरं शोणितं तत्र राजते खर्परे न्यसेत् ।
अष्टगन्धैस्तर्पयेद्देवीं वक्ष्यमाणविधानतः ॥
एकेन वटुकादींश्च तथैकेनापि भैरवान् ।
अपरेणापि चैकेशानन्येन योगिनीगणम् ॥
तर्पयित्वा ततः पश्चाद्देव्यात्मर्पणमाचरेत् ।
दक्षिणान्तं ततः कृत्वा पठेन्नामसहस्रकम् ॥
यथाशक्ति महेशानि ! भूयो देवीं घटे यजेत् ।
घटवक्त्रे वटाश्वत्थप्लक्षोडुम्बरशाखिकाम् ॥

ब्रह्मकूर्चेन निःषिच्य चषकं सफलाक्षतम् ।
पिधाय कुम्भवस्त्रेण चौमेणाच्छादयेत् पुनः ॥
जप्त्वा मत्त्वा ततः सार्द्धं तत्रानीय सुहृद्वृतम् ।
वदनन्तु पञ्चवाद्येन सुहूर्त्ते शोभने सुधीः ॥
अभिषिञ्चेन्नाहकार्य्यैर्यजमानञ्च साधकः ।
सुमङ्गलाभिर्नारीभिः शिरःपुष्पाक्षतार्च्चितम् ॥
अर्च्चितानां द्विजातीनामाशीर्व्वादपरःसरम् ।
करेणास्य शिरः स्पृष्ट्वा प्रयुञ्जीताशिषं पुनः ॥
भद्रमस्तु शिवञ्चास्तु महामाया प्रसीदतु ।
रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्व्वदा ॥
अथोत्थायाभिषिक्तः सन् तोषयेद्ब्राह्मणान् धनैः ।
एवञ्चेद्यजमानस्य शान्तिर्भवति नित्यदा ॥
प्रसङ्गाद्बलिविघ्नस्य शान्तिकर्म्म निरूपितम् ।
सर्व्वसम्पत्करं पुंसां सर्व्वसौभाग्यसिद्धिदम् ।
भूते च दुर्निमित्तादावप्येवं शान्तिमाचरेत् ॥"
इति निबन्धतन्त्रोक्तबलिविघ्नशान्तिसंग्रहः ॥*॥
अन्यच्च ।
"एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयाद्दातुर्व्वा च्छेत्तुरेव वा ॥"
प्रायश्चित्तमाह ।
"हन्याद्देकप्रहारेण अन्यथा दोषमावहेत् ।
तच्छान्तये जपेद्विद्वान् दुर्गाबीजसहस्रकम् ।
सहस्रं जुहुयाद्देव्यै प्रदद्यात् स्वर्णमाषकम् ॥"
इति तत्त्वमहार्णवे वाचस्पतिमिश्रवचनम् ॥*॥
अपरञ्च कालिकापुराणे ।
"चन्द्रहासेन कर्त्तार्य्या छेदनं मुख्यमिष्यते ।
हस्तेन च्छेदयेद्यस्तु प्रोक्षितं साधकः पशुम् ।
पक्षिणं वाथ राजेन्द्र । ब्रह्महत्यामवाप्नुयात् ॥"
मत्स्यसूक्ते ।
"छेदयेत्तीक्ष्णखड्गेन प्रहारेण सकृद्वधः ॥"
इति दुर्गोत्सवतत्त्वम् ॥
पश्वादिबलिदानविधिर्यथा,—
"बलिदानविधानञ्च श्रूयतां मुनिसत्तम ।।
मायातिं माहिषं छागं दद्यान्मेषादिकन्तथा ॥
सहस्रवर्षं सा प्रीता दुर्गा मायातिदानतः ।
माहिषेण वर्षशतं दशवर्षञ्च छागलात् ॥
वर्षमेकेन कुष्माण्डैः पक्षिभिर्हरिणैस्तथा ।
दशवर्षं कृष्णसारैः सहस्राब्दञ्च गण्डकैः ॥
कृत्रिमैः पिष्टनिर्म्माणैः सन्मासं पशुभिस्तथा ।
मासं सुशाखादिफलैरन्यैरिति नारद ।॥
युवकं व्याधिहीनञ्च सशृङ्गं लक्षणान्वितम् ।
विशुद्धमविकाराङ्गं सुवर्णं पुष्टमेव च ॥
शिशुना बालिका दातुर्हन्ति पुत्रञ्च चण्डिका ।
वृद्धेनैव गुरुजनं कृशेन बान्धवन्तथा ॥
कुलञ्चैवाधिकाङ्गेन हीनाङ्गेन प्रजान्तथा ।
कामिनीं छिन्नशृङ्गेण काणेन भ्रातरन्तथा ॥
घण्टिकेन भवेन्मृत्युर्व्विप्रञ्च चित्रमस्तके ।
हतं मित्रं ताम्रपृष्ठे भ्रष्टश्रीः पुच्छहीनके ॥
मायातीनाञ्च निर्णीतं श्रूयतां मुनिसत्तम ।।
वच्म्यथर्व्ववेदोक्तं फलहानिर्व्यतिक्रमे ॥"*॥

अथ नरबलिः ।
"पितृमातृविहीनञ्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिकं विशुद्धञ्च सच्छूद्रं मूलकं वरम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मी संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा चरद्वारेण यत्नतः ।
वर्षान्ते च समुत्सृज्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्नायात्तिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥"*॥
अपि च ।
"सप्तम्यां पूजनं कृत्वा बलिं दद्याद्विचक्षणः ।
अष्टम्यां पूजनं शस्तं बलिदानविवर्ज्जितम् ॥
अष्टम्यां बलिदानेन विपत्तिर्जायते ध्रुवम् ।
दद्याद्विचक्षणो भक्त्या नवम्यां विधिवद्बलिम् ॥
बलिदानेन विप्रेन्द्र । दुर्गाप्रीतिर्भवेन्नृणाम् ।
हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः ॥
उत्सर्गकर्त्ता दाता च च्छेत्ता पोष्टा च रक्षकः ।
अग्रपश्चान्निरोद्धा च सप्तैते वधभागिनः ॥
योऽयं हन्ति स तं हन्ति चेति वेदोक्तमेव च ।
कुर्व्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।६१-६२। अध्यायौ ॥
श्रीभगवानुवाच ।
"क्रमन्तु बलिदानस्य स्वरूपं रुधिरादिभिः ।
यथा स्यात् प्रीतये सम्यक् तथा वक्ष्यामि पुत्रकौ ॥
वैष्णवीतन्त्रकल्पोक्तः क्रमः सर्व्वत्र सर्व्वदा ।
साधकैर्ब्बलिदानेषु ग्राह्यः सर्व्वसुरस्य तु ॥
पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः ।
महिषो गोधिका गावश्छागो बभ्रुश्च शूकरः ॥
खड्गश्च कृष्णसारश्च गोधिका सरभो हरिः ।
शार्द्दूलश्च नरश्चैव स्वगात्ररुधिरन्तथा ।
चण्डिकाभैरवादीनां बलयः परिकीर्त्तिताः ॥
बलिभिः साध्यते मुक्तिं बलिभिः साध्यते दिवम् ।
बलिदानेन सततं जयेत् शत्रून् नृपान् नृपः ॥*॥
मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा ।
मासैकन्तृप्तिमायाति ग्राहैर्मासांस्तु त्रीनथ ॥
मृगाणां शोणितैर्देवी नराणामपि शोणितैः ।
अष्टौ मासानवाप्नोति तृप्तिं कल्याणदा च सा ॥
गोगोधिकानां रुधिरैर्व्वार्षिकीं तृप्तिमाप्नुयात् ॥
कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः ।
आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीम् ॥
अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम् ।
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम् ।
तृप्तिमाप्नोति परमां शार्द्दूलरुधिरैस्तथा ॥
सिंहस्य सरभस्याथ स्वगात्रस्य च शोणितैः
देवी तृप्तिमवाप्नोति सहस्रं परिवत्सरान् ॥
मांसैरपि तथा प्रीतो रुधिरैर्यस्य यावती ॥
कृष्णसारन्तते खड्गं तथा मत्स्यञ्च रोहितम् ।
वार्द्धीनसयुगञ्चापि फलं तेषां पृथक् शृणु ॥*॥
कृष्णसारस्य मांसेन तथा खड्गेन चण्डिका ।

वर्षान् पञ्चशतान्येव तृप्तिमाप्नोति केवलाम् ॥
रोहितस्य तु मत्स्यस्य मांसैर्वार्द्धीनसस्य च ।
तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया ॥
त्रिःपिबस्त्विन्द्रियक्षीणः श्वेतो वृद्धश्छागपतिः ।
वार्द्धीनसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्तमः ॥
नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः ।
वार्द्धीनसः स्यात पक्षीशो मम विष्णोरतिप्रियः ॥
नरेण बलिना देवी सहस्रं परिवत्सरान् ।
विधिदत्तेन चाप्नोति तृप्तिं लक्षं त्रिभिर्नरैः ॥
नारेणैवाथ मांसेन त्रिसहस्राणि वत्सरान् ।
तृप्तिं प्राप्नोति कामाख्या भैरवी मम रूपधृक् ॥
मन्त्रपूतं शोणितन्तु पीयूषं जायते सदा ।
मस्तकञ्चापि तस्यान्ति मांसञ्चापि सदा शिवा ॥
तस्मात्तु पूजने दद्याद्बलेः शीर्षञ्च लोहितम् ।
भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः ॥
पूजासु नाम मांसानि दद्यात्तु साधकः क्वचित् ।
ऋते तु लोहितं शीर्षमन्नतं तत्तु जायते ॥*॥
कुष्माण्डमिक्षुदण्डञ्च मद्यमासवमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा ॥
चन्द्रहासेन कर्त्र्या वा छेदनं मुख्यमिष्यते ।
दात्रासिधेनुकक्रचसकुद्दालाभिस्तु मध्यमम् ।
क्षुरक्षुरप्रभल्लैश्चैवाधमं परिकीर्त्तितम् ॥
एभ्योऽन्यैः शक्तिबाणाद्यैर्बलिश्छेद्यः कदापि न ।
नाप्नोति देवी बलिं तत्तु दाता मृत्युमवाप्नुयात् ॥
हस्तेन छेदयेद्यस्तु प्रोक्षितं साधकः पशुम् ।
पक्षिणं वा ब्रह्महत्यां सोऽवाप्नोति सुदुःसहाम् ।
नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः ॥
खड्गस्यामन्त्रणे मन्त्रा यावन्तः कथिताः पुरा ।
महामायाबलौ ते वै योज्यास्तत्रोदिता बुधैः ॥
तैः सार्द्धमेते मन्त्रास्तु योज्याः खड्गाभिमन्त्रणे ।
पूजने शारदादीनां कामाख्याया विशेषतः ॥
ह्रीः कालीति ततो देव्या वज्रेश्वरिपदन्तथा ।
ततोऽनु लौहदण्डायै नमः शेषे तु योजयेत् ॥
संपूज्यानेन मन्त्रेण खड्गमादाय पाणिना ।
कालरात्र्यास्तु मन्त्रेण तं खड्गमभिमन्त्रयेत् ॥
नेत्रबीजस्य मध्यन्तु द्विरावृत्य प्रयोजयेत् ।
ततोऽनु करालि विकटदंष्ट्रेऽनु तत्पदम् ॥
छान्तादीनां तृतीयेन स्वरेणैकादशेन च ।
योजितौ नादबिन्दुभ्यां द्वौ तत्पश्चान्नियोजयेत् ॥
फेत्कारिणिपदं तस्मात् खादय छिदयेति च ।
सर्व्वदुष्टानिति ततो द्विर्मारय तुलापकम् ॥
खड्गेन छिन्धि छिन्धीति ततः किल किलेति वै ।
ततश्चिकि चिकीत्येव ततः पिब पिबेति च ॥
ततोऽनु रुधिरञ्चैव स्फ्रौं स्फ्रौं किरि किरीति च ।
कालिकायै नम इति कालरात्र्यास्तु मन्त्रकम् ॥
इत्यनेन तु मन्त्रेण करवालोऽभिमन्त्रिते ।
कालरात्रिः स्वयं तस्मिन् प्रसीदत्यरिहानये ॥*॥
बलेः पूर्व्वोदिता मन्त्रा नित्यं ग्राह्यास्तु साधकैः ।
अयं मन्त्रस्तु वक्तव्यस्तस्य छत्राविघातये ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥

ततो दैवतमुद्दिश्य काममुद्दिश्य चात्मनः ।
छेदयेत्तेन खड्गेन बलिं पूर्व्वाननं तु तम् ॥
अथवोत्तरवक्त्रन्तं स्वयं पूर्व्वमुखस्तथा ।
पूर्व्वोक्तान् भैरवादींस्तु रक्ते वध्यं नियोजयेत् ॥
सौवर्णं राजतं ताम्रं रैत्यं पत्रपुटञ्च वा ।
माहेयं कांस्यमथवा यज्ञकाष्ठमयञ्च वा ।
पात्रं रुधिरदानाय कर्त्तव्यं विभवावधि ॥
न लौहे वाल्कले वापि रैत्ये वाङ्गेऽथ सैसके ।
दद्याद्रक्तं बलीनान्तु भूमौ स्रुचि स्रुवेऽथवा ॥
न घटे भूतले नापि न क्षुद्रे पानभाजने ।
रुधिराणि प्रदद्यात्तु भूतिकामो नरोत्तमः ॥
नरस्य तु सदा रक्तं माहेये तैजसेऽथवा ।
दद्यान्नरपतिस्तत्तु न पुटादौ कदाचन ॥*॥
हयमेधमृते दद्यान्न कदाचिद्धयं बलिम् ।
तथा दिक्पालमेधेषु गजं दद्यान्नराधिपः ॥
न कदाचित्तथा देव्यै प्रदद्याद्धयहस्तिनौ ।
क्षयाकर्षे चामरन्तु बलिं दद्यान्नराधिपः ॥
सिंहं व्याघ्रं नरञ्चापि स्वगात्ररुधिरन्तथा ।
न दद्याद्ब्राह्मणो मद्यं तथा देव्यै कदाचन ॥
सिंहव्याघ्रनरान्दत्त्वा ब्राह्मणो नरकं व्रजेत् ।
इहापि स्यात् स क्षीणायुः सुखसौभाग्यवर्जितः ॥
स्वगात्ररुधिरं दत्त्वा चात्महत्यामवाप्नुयात् ।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥
न लक्ष्मासारं वितरेद्बलिन्तु क्षत्रियः क्वचित् ।
ददतः लक्ष्मासारन्तु ब्रह्महत्या भवेद्यतः ॥
यत्र सिंहस्य व्याघ्रस्य नरस्य विहितो वधः ।
ब्राह्मणोक्ते तु वन्ध्यादौ तत्रायं विहितः क्रमः ॥
कृत्वा घृतमयं व्याघ्रं नरं सिंहञ्च भैरव ।।
अथवा पूपपिष्टकं यवक्षोदमयञ्च वा ।
घातयेच्चन्द्रहासेन तेन मन्त्रेण संस्कृतम् ॥*॥
प्रभूतबलिदाने तु द्वौ वा त्रीन् वाग्रतः कृतान् ।
पूजयेत् प्रमुखान् कृत्वा सर्व्वान् तन्त्रेण साधकः ।
सामान्यपूजा कथिता बलीनां पूर्व्वतो मया ।
विशेषो यत्र यत्रास्ति तत्तत्तः शृणु भैरव ।॥*॥
महिषं प्रददौ देव्यै भैरव्यै भैरवाय वा ।
अनेनैव तु मन्त्रेण तथा तं पूजयेद्बलिम् ॥
यथा वाहं भवान् देहि यथा वहसि चण्डिकाम् ।
तथा मम रिपून् हिंस शुभं वह सुलापक ।॥
यमस्य वाहनस्त्वन्तु वररूपधराव्यय ।।
आयुर्वित्तं यशो देहि कासराय नमोऽस्तु ते ॥
खड्गस्य तु यदादानं क्रियते तत्र मन्त्रकम् ।
अनेनाभ्युक्ष्य कुर्व्वीत गुह्यजातीति भावयन् ॥
देवे पित्रे च सुभगः खड्गत्वं खड्गसन्निभः ।
छिन्धि विघ्नान् महाभाग । गुह्यजात नमोऽस्तु ते ।
प्रदाने लक्ष्मासारस्य मन्त्रोऽयं परिकीर्त्तितः ।
लक्ष्मासार । महासत्त्व ब्रह्मतेजोविवर्द्धन ।
चतुर्व्वेदमयः प्राज्ञः प्रज्ञां देहि यशो मम ॥*॥
तथा सरभपूजायां मन्त्रमेतत् प्रकीर्त्तितम् ।
त्वमष्टपादो विभ्रंशश्चन्द्रभागसमुद्भव ! ।
अष्टमूर्त्ते महाभाग भैरवाख्य नमोऽस्तु ते ॥
यथा भैरवरूपेण वराहो निहतस्त्वया ।
तथा सरभरूपेण रिपुं विनाशिसूदय ॥

हरिस्त्वं हररूपेण यथा वहसि चण्डिकाम् ।
तथाशुभानि मे नित्यं बहुविघ्नांश्च सूदय ॥
त्वं हरिः सिंहरूपेण जगत्त्रयस्वरूपिणाम् ।
जघान येन सत्त्वेन हिरण्यकशिपुं हरन् ।
इत्येवं सिंहपूजायां क्रम उक्तो मयानघ ।॥*॥
नरे स्वगात्ररुधिरे पर्य्यायं शृणु भैरव ।।
पीठे चेद्दीयते मर्त्त्यं बलिं दद्यात् स्मशानके ॥
स्मशानं भैरवाख्यञ्च तत्पूर्व्वं प्रतिपादितम् ।
कामाख्यानिलये शैले तत्रादौ विद्धि तत्क्रमम् ॥
मम रूपं स्मशानन्तु भैरवाख्यन्तु कथ्यते ।
तत्राङ्गत्वं तपःसिद्धौ त्रिभागन्तु भविष्यति ॥
पूर्व्वांशे भैरवाख्ये तु समुतच्छिर्नरस्य च ।
दक्षिणांशे शिरो दद्यात् भैरव्या सुक्ष्ममालया ॥
रुधिरं पश्चिमांशे तु भैरवाख्ये नियोजयेत् ।
दत्त्वा संपूज्य च नरं विलम्ब्यागमनक्रमे ॥
पीठस्मशानेषु बलिं नेच्छेत्तु बलिदायकम् ।
अन्यत्रापि यतो यत्र दीयतेऽयं महाबलिः ॥
तत्राप्यत्र चोत्सृज्य छित्त्वाप्यत्र शिरोऽन्त-
तम् ।
निवेदयेत् साधकस्तु विलम्ब्य न विलोकयेत् ॥*॥
सुजातं मनुजं दीप्तं पूर्व्वाह्णे नियताशनम् ।
मांसमैथुनभोग्येन हीनं स्रक्चन्दनोचितम् ॥
कृतोत्तरामुखं तस्य तदङ्गेषु च देवताः ।
पूजयेत्तच्च नाम्ना तु दैवतेन च मानुषम् ॥
ब्रह्मरन्ध्रे तु ब्रह्माणं तन्नासायाञ्च मेदिनीम् ।
कर्णयोस्तु तथाकाशं जिह्वायां सर्व्वतोमुखम् ॥
ज्योतींषि नेत्रयोर्विष्णुं वदने परिपूजयेत् ।
ललाटे पूजयेच्चन्द्रं शक्रं दक्षिणगण्डतः ॥
वामगण्डे तथा वह्निं ग्रीवायां समवर्त्तिनम् ।
केशाग्रे निर्ऋतिं मध्ये भ्रुवोश्चापि प्रचेतसम् ॥
नासामूले च श्वसनं स्कन्धे चापि धनेश्वरम् ।
हृदये सर्पराजन्तु पूजयित्वा पठेदिदम् ॥
नरवर्य्य ! महाभाग सर्व्वदेवमयोत्तम ।
रक्ष मां शरणापन्नं सपुत्त्रवसुबान्धवम् ॥
सराज्यं मां सहामात्यं चतुरङ्गसमन्वितम् ।
रक्षन् परित्यज प्राणान् मरणे नियते सति ॥
महातपोभिर्दानैश्च यज्ञैर्यत् साध्यते नृणाम् ।
तत्त्वं देहि महाभाग ! त्वञ्चापि प्राप्नुहि श्रियम् ॥
राक्षसाश्च पिशाचाश्च वेतालाद्याः सरीसृपाः ।
नृपाश्च रिपवश्चान्ये न मां ते घ्नन्तु त्वन्नते ॥
त्वत्कण्ठनालगलितैः शोणितैरङ्गसंयुतैः ।
आप्याययात्मवन्त्वा मरणे नियते सति ॥
एवं सपूज्य विधिवत् पूर्व्वमन्त्रैश्च पूजयेत् ।
पूजितो मनुजरूपोऽयं दिक्पालाधिष्ठितो
भवेत् ॥
अधिष्ठितस्तथान्यैश्च ब्रह्माद्यैः सकलैः सुरैः ।
कृतपापोऽपि मनुजो निष्पापो स तु जायते ॥
तस्य निष्कलुषस्याशु पीयूषं शोणितं भवेत् ।
प्रीणाति च महादेवी जगन्माता जगन्मयी ॥
सोऽपि कायं परित्यज्य मानुषं न चिरादृतः ।
भवेद्गणानामधिपो ममापि बहुसत्कृतः ॥
इतोऽन्यथा पापयुतं मलमूत्रवसायुतम् ।

तं बलिं नहि गृह्णाति कामाख्याम्बापि नामतः ॥
अन्येषां महिषादीनां बलीनामथ पूजनात् ।
कायो मेध्यत्वमायाति रक्तं गृह्णाति वै शिवा ॥
अन्येभ्योऽपि च देवेभ्यो यदा यद्यत् प्रदीयते ।
तदर्च्चितं प्रदद्यात्तु पूजिताय सुराय वै ॥*॥
काणं व्यङ्गञ्चातिवृद्धं रोगिणञ्च गलव्रणम् ।
क्लीवं क्षीणाङ्गमथवा हृतलिङ्गं गलद्व्रणम् ॥
श्वित्रिणञ्चातिहृस्वञ्च महापातकिनन्तथा ।
अष्टादशकवर्षीयं शिशुं सूतकसंयुतम् ॥
ऊर्द्धं संवत्सराच्चापि महागुरुनिपातिनम् ।
बलिकर्म्मणि चैतांस्तु वर्ज्जयेत् पूजितानपि ॥
पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः ।
स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात् ॥*॥
संघातबलिदानेषु योषितं पशुपक्षिणोः ।
बलिं दद्यान्नानुषीन्तु त्यक्त्वा संघातपूजितम् ॥
न त्रिमासीयकान्यूनं पशुं दद्यात् शिवाबलिम् ।
न च त्रिपक्षकान्यूनं प्रदद्याद्वै पतत्त्रिणम् ॥
काणखञ्जादिदुष्टन्तु न पशुं पक्षिणन्तथा ॥
देव्यै दद्याद्यथा मर्त्त्यं तथैव पशुपक्षिणौ ॥
छिन्नलाङ्गूलकर्णादि भग्नदन्तन्तथैव च ।
भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन ॥
न ब्राह्मणं बलिं दद्यात् चाण्डालमपि पार्थिव ।।
गोतुल्यं द्विजदेवेभ्यो भूपतेस्तनयं तथा ॥
रणे न विजितं दद्यात्तनयं रिपुभूभृतः ।
स्वपुत्रं भ्रातरं वापि पितरञ्च विरोधिनम् ॥
विट्पतिञ्च न दद्यात्तु भागिनेयञ्च मातुलम् ।
अनुक्तानपि दद्यात्तु तथाज्ञातान् वनगद्विजान् ॥
उष्ट्राश्वाभे प्रदद्यात्तु गर्द्दभञ्चोष्ट्रमेव च ।
ताभेऽन्येषां न वितरेद्दद्यान्मुखं खरन्तथा ॥
सम्पूज्य विधिवन्मर्त्त्यं पशुं पक्षिणमेव वा ।
संछिद्य चापि मन्त्रेण मन्त्रेणैव निवेदयेत् ॥*॥
नारं सर्व्वं शिरोरक्तं देव्याः सर्व्वन्निवेदयेत् ।
छागन्तु वामतो दद्यान्माहिषं वितरत् पुरः ॥
पक्षिणं वामतो दद्यादग्रतो देहशोणितम् ।
क्रव्यादानां पशूनान्तु पक्षिणाञ्च शिरोऽसृजम् ॥
वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः ।
लक्ष्मासारस्य कूर्म्मस्य खड्गस्य शशकस्य च ॥
ग्राहाणामथ मत्स्यानामग्र एव निवेदयेत् ।
सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च
दक्षिणे ॥
पृष्ठदेशे न दद्यात्तु शिरो वा रुधिरं बलेः ।
उपप्लवे रणे वापि यथेष्टं वितरेन्नरम् ॥
यः कश्चिद्राजपुत्रो नाप्यसावपि कदाचन ।
बलिदानदिनात् पूर्व्वदिवसे तु बलिं नरम् ॥
मानस्तोकेतिमन्त्रेण देवीसूक्तत्रयेण च ।
गन्धद्वारेत्यनेनापि खड्गशीर्षे निधाय च ॥
तस्मिन् खड्गे च गन्धादि दत्त्वा तेनाधि-
वासयेत् ॥
गन्धादिकन्तु खड्गस्थं गले तस्य प्रदापयेत् ॥
अम्बेऽम्बिकेति मन्त्रेण रौद्रेण भैरवस्य च ।
एवन्तु संस्कृते मर्त्त्ये देवी रक्षति तं बलिम् ॥
न तस्य व्याधयश्चापि क्षुधता रजनी न च ।

न लूनकं दूषयेत्तं श्वायुनुर्यात्तक्तादिकम् ॥*॥
छिन्नं नरस्य शीर्षन्तु पतितं यत्र यत्र च ।
यत् शुभञ्चाशुभं वापि पश्वादीनाञ्च तत् शृणु ॥
छिन्नं शिरस्तथैशान्यां नारं दिश्यथ राघसि ।
पतितं राज्यहानिञ्च विनाशञ्च विनिर्द्दिशेत् ॥
पूर्व्वाग्नियाम्यवारुण्यवायव्यादिगतं क्रमात् ।
श्रियं पुष्टिं भवं लाभं पुत्रलाभं धनं तथा ॥
क्रमाद्विनिर्द्दिशेन्नारं छिन्नशीर्षन्तु भैरव ! ।
उत्तरादिक्रमादेव महिषस्यापि मस्तकः ॥
पतितो वायुकालान्तं सूचयेद्यत् शृणुष्व तत् ॥
भोग्यं हानिस्तथैश्वर्य्यं वित्तं रिपुजयो भयम् ।
राज्यलाभं श्रियञ्चापि क्रमात्तद्विद्धि भैरव ! ॥
पशूनाञ्चैव सर्व्वेषां छागादीनामशेषतः ।
एवं फलं क्रमाद्विद्याद्वदते जलभवाब्जजौ ॥
अन्यच्च तु श्रियं दद्यात् पतितं शातितं शिरः ॥
यः स्यात् कटकटाशब्दो दन्तानां छिन्नमस्तके ।
नराणां पशुपक्ष्यादिग्राहादीनाञ्च रोगदः ॥
लोतकं चक्षुषोर्जातं यदि स्रवति मस्तके ।
छिन्ने नरस्य राज्यस्य तदा हानिं विनिर्द्दिशेत् ॥
माहिषे मस्तके नेत्राद्यदि स्रवति लोतकम् ।
छिन्ने निवेदिते वैरिभूपन्तु तदादिशेत् ॥
अन्येषामथ पश्वादिजन्तूनां शिरसोऽर्द्दितात् ।
निर्गतं लोतकं धत्ते परां भीतिं गदन्तथा ॥
हसति छिन्नशीर्षञ्चेन्नारं स्यात्तु रिपुक्षयः ।
श्रीवृद्धिरायुषो वृद्धिः सदा दातुरसंशयः ॥
यद्यद्वाक्यं निगदति तथा भवति चाचिरात् ।
हूङ्काराच्छान्यहानिः स्यात् श्लेष्ममाघाच्च पञ्चताम् ॥
देवानां यदि नामानि भाषते छिन्नमस्तकः ।
विभूतिमतुलां विन्द्यात् षण्मासाभ्यन्तरे तदा ॥
रुधिरादानकाले तु शकृन्मूत्रे यदि स्रवेत् ।
कार्यं तदाधश्चोर्द्ध्वं वा दातुः स्यान्मरणं तथा ॥
आक्षेपाद्वामपादस्य महारोगः प्रजायते ।
अन्यथाक्षेपचरणैः कल्याणमुपजायते ॥*॥
महिषस्य तु रक्तस्य मानुषस्याथ साधकः ।
अङ्गुष्ठानामिकाभ्यान्तु किञ्चिदुद्धृत्य भूतले ॥
महाकौशिकमन्त्रेण निक्षिपेद्बलिमुत्तमम् ।
देवेभ्यः पूतनादिभ्यो नैरृत्यां दिशि पूर्व्वतः ॥
महिषः पञ्चवर्षो यः पञ्चविंशतिवार्षिकः ।
बलिर्देयो नरो देव्यै तस्य रक्तन्तु भूतले ॥
नेत्रबीजत्रयं कामबीजं हान्तात् प्रजापतिः ।
वह्निबीजं षट्स्वराभ्यां संपृक्तञ्च तथापरः ॥
स एवैतास्तथैतावदादिवर्गान्तसंयुतः ।
षष्ठस्वरशिखाबिन्दुचन्द्रयुक्तस्तथापरः ॥
दिर्गाधिकाबीजकान्तः कौशिकीत्यभिमन्त्रणम् ।
एष बलिः स्वाहेति च मन्त्रोऽयं कौशिकः स्मृतः ॥
नृपो वैरिबलिं दद्यात् खड्गमामन्त्र्य पूर्व्वतः ॥
महिषं वाथवा छागं वैरिनाम्नाभिमन्त्र्य च ।
सूत्रेण वदनं बद्धा त्रिधा तस्य च मन्त्रकैः ।
छित्त्वा तस्योत्तमाङ्गन्तु देव्यै दद्यात् प्रयत्नतः ॥
यदा यदा रिपोर्वह्निर्बलिदानं तदापरम् ।
दद्यात्तथा शिरश्छित्त्वा रिपोस्तस्य क्षयाय च ॥

प्राणप्रतिष्ठाञ्च रिपोः कुर्य्यात्तस्मिन् पशावथ ।
तस्मिन् चीर्णे रिपुप्राणाः क्षीयन्ते विपदा युताः ॥
आदौ विश्वरूपिणी च चण्डिकेति ततः परम् ।
वैरिनाममुकश्चेति स्वाहेत्यन्तेति तं पुनः ॥
वह्निभार्य्यां ततः पश्चात् खड्गमन्त्रं प्रकीर्त्तितम् ।
स्वयं स वरी यो देहि तमिमं पशुरूपिणम् ॥
विनाशय महामारि स्फें स्फें खादय खादय ॥
इत्यनेन तु मन्त्रेण बलेः शिरसि पुष्पकम् ।
दद्यात्ततस्तद्रुधिरं हाहाराभ्यां निवेदयेत् ।
महानवम्यां शरदि यद्येवं दीयते बलिः ।
तदा तदाद्याङ्गभवैर्मांसैर्होमं समाचरेत् ॥
दुर्गातन्त्रेण मन्त्रेण प्रणीते दहने सुधीः ।
एवं दत्त्वा बलिं मर्त्यो रिपुक्षयमवाप्नुयात् ॥*॥
नाभेरधस्ताद्रुधिरं पृष्ठभागस्य च प्रिये ! ।
स्तनाच्च रुधिरं दद्यान्न कदाचन साधकः ॥
ओष्ठस्य चिबुकस्यापि नेन्द्रियाणाञ्च मानवः ।
कण्ठाधो नाभितश्चोर्द्ध्वं बाह्वोः पार्श्वन्तते तथा ॥
प्रदद्याद्रुधिरं घातं नातिकुर्य्याच्च साधकः ।
गण्डयोश्च ललाटस्य भ्रुवोर्मध्यस्य शोणितम् ॥
कर्णाग्रस्य च बाह्वोश्च स्तनयोरुदरस्य च ।
कण्ठाधो नाभितश्चोर्द्ध्वं स्कन्धाग्रस्य यत्नतः ।
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ॥
न गुल्फतोऽरुक् प्रदद्यात् जङ्घोर्वापि च साधकः ।
न च रोगाविलाद्गात्रान्न्यघाताच्च भैरव ! ॥
तदर्थं च क्षताघातात् सशब्दो क्षुब्धमानसः ।
क्षतं रक्तं प्रदद्यात्तु पद्मपुष्पस्य पत्रके ॥
सौवर्णे राजते पात्रे कांस्ये पात्रे च मानवः ।
निधाय देव्यै दद्यात्तु तद्रक्तं चन्द्रमन्त्रकैः ॥
क्षयाने क्षुरिकाखड्गं संकुलादि यदस्त्रकम् ।
घातेन हृदयस्य महाफलमवाप्नुयात् ॥
पद्मपुष्पस्य पत्रन्तु यावद्गृह्णाति शोणितम् ।
तत्प्रमाणचतुर्भागाधिकं रक्तन्तु साधकः ।
न कदाचित् प्रदद्यात्तु नाङ्गच्छेदमथाचरेत् ॥
यः स्वहृदयसंजातं मांसं माषप्रमाणतः ।
तिलमुद्गप्रमाणाद्वा देव्यै दत्त्वा तु भक्तितः ।
षण्मासाभ्यन्तरे तस्मात् काममिष्टमवाप्नुयात् ॥
बाह्वोस्तु स्कन्धयोर्वापि यो दद्याद्दीपवर्त्तिकाम् ।
हृदये वा देहपार्श्वं विना भक्त्या तु साधकः ।
क्षणमात्रेण तद्दीपप्रदानस्य फलं शृणु ॥
भुक्त्वा च विपुलान् भोगान् देवीगेहे यथेच्छया ।
कल्पत्रयन्तु संस्थाय सार्व्वभौमो नृपो भवेत् ॥
महिषस्य शिरश्छिन्नं सप्रदीपं शिवापुरः ।
हस्ताभ्यां यः समादाय अहोरात्रञ्च तिष्ठति ॥
स चिरायुः पूतकीर्त्तिरिह भुक्त्वा मनोरमान् ।
भोगांस्तेन मद्गृहगो गणानामधिपो भवेत् ॥
नरस्य शीर्षमादाय साधको दक्षिणे करे ।
वामे सरुधिरं पात्रं गृहीत्वा निशि चाग्रतः ॥
यावद्याम स्थितो मर्त्यो राजा भवति चेह वै ।
अन्ते मम पुरं प्राप्य गणानामधिपो भवेत् ॥
क्षणमात्रं बलीनां यः शिरोरक्तं करद्वये ।
गृहीत्वा चिन्तयेद्देवीं पुरस्तिष्ठति मानवः ।
स कामानिह संप्राप्य देवीलोके महीयते ॥

महामाये ! जगन्माये ! सर्व्वकामप्रदायिनि ! ।
ददामि देहरुधिरं प्रसीद वरदा भव ॥
इत्युक्त्वा मूलमन्त्रेण नतिपूर्व्वं विचक्षणः ।
स्वगात्ररुधिरं दद्यान्मानवः सिद्धसन्निभः ॥
येनात्ममांसं सघृतं ददामीश्वरि ! भूतये ।
निर्व्वाणं तेन सत्येन देहि हुं हुं नमो नमः ॥
इत्यनेन तु मन्त्रेण स्वमांसं वितरेद्बुधः ।
सौभाग्यं सुखसम्पन्नं प्रदीपं परमं शुचिम् ॥
दीपयन् मांसमिश्रञ्च दीपं ह्रौं ह्रौं नमो नमः ।
इत्यनेन तु मन्त्रेण दीपं दद्याद्विचक्षणः ॥
महानवम्यां शरदि रात्रौ स्कन्दविशाखयोः ।
यवचूर्णमयं कृत्वा रिपुं स्वपक्षमेव वा ॥
शिरश्छित्त्वा बलिं दद्यात् ज्ञात्वा तस्य तु मन्त्रतः ।
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिलो घोरघोरा धारविहिंसकः ।
अघशिखाम्बिकाशिखममुकवारिसत्तमम् ॥
भान्तो विसर्गसहितः स च बिन्दुयुतोऽपरः ।
अथाग्नियोगचन्द्रेण बिन्दुना च समन्वितः ।
शिरश्छित्त्वा बलिं दद्यान् ज्ञात्वा तस्य तु मन्त्रतः ॥
अनेनैव तु मन्त्रेण बिन्दुना च समन्वितः ।
षड्भ्यो बलिषु प्रोक्तः खड्गः स्कन्दविशाखयोः ॥
रक्तद्रवैः सेचयित्वा कृत्रिमं तं रिपुं बलिम् ।
कुचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ॥
रक्तमाल्यधरं कृत्वा रक्तवस्त्रधरन्तथा ।
कण्ठे बद्धा रक्तसूत्रैर्नाभौ प्रत्यञ्च कृत्रिमम् ।
दत्त्वोत्तरशिरः स्कन्धं ज्ञात्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय ते नमस्ततः ।
चतुर्द्दशस्वराभिभ्यां संसक्तः स परः समः ॥
परतः परतः पूर्व्व चन्द्रबिन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्मै बलिं क्षिपेत् ॥
चतुर्द्दशस्वराभिभ्यां पञ्चतीयन्तु पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्मै बलिं क्षिपेत् ॥
कुटिलाक्षौ लम्बपिङ्गवर्णौ रक्ताम्बुधारिणौ ।
त्रिशूलं करवालञ्च पाणिभ्यां दक्षिणे तथा ॥
बिभ्रतौ नृकपालञ्च कर्त्तृकञ्चापि वामतः ।
त्रिनेत्रौ नरमुण्डानां मालामुरसि बिभ्रतौ ॥
विकटौ दशनैर्भीमैर्गणेशौ द्वारपालकौ ।
ध्यानेन चिन्तयेद्देव्याः पुरतः संस्थितौ सदा ॥
चैत्रे मासि सिते पक्षे चतुर्द्दश्यां विशेषतः ।
बलिभिर्महिषैश्छागैर्मांसैश्च भैरवरूपिणम् ।
तोषयेन्मधुभिर्मन्त्रैस्तैस्तेन तुष्यामहं सुतौ ॥
चण्डिकाबलिदानेन बलेः शीर्षं जलेन तु ।
अभिषिच्य तु मन्त्रेण मूलेनैव निवेदयेत् ॥
ईषत् प्राणन्तु बहुधा चालितं पूर्व्वमर्च्चितम् ।
वीक्षेत् कामस्य सिद्धिन्तु सिद्धाभावञ्च साधकः ॥
सितप्रेतो रथस्थोऽयं योगपीठस्य सन्निभः ।
ध्यायेद्यस्मिन् महामाया सिद्धिं बोधयते नमः ॥
अनेनामन्त्रितं शीर्षं न चिराद्यदि वेपते ।
तत्कार्य्यस्य तदा सिद्धिरसिद्धिस्तु विपर्य्ययात् ॥
एवं दद्यद्बलिं वीरो यथोक्तविधिनामुना ।
बलिदानादेव चतुर्व्वर्गमाप्नोत्यसंशयम् ॥

एवं बलिप्रदानस्य क्रमो रूपन्तथैव च ।
कथितो रुधिराध्याय उपचारान् शृणुष्व मे ॥”
इति कालिकापुराणे ६६ अध्यायः ॥

बलिदाननिषेधो यथा,—
“जीवानुकम्पां विज्ञातुं ततो दुर्गां सदाशिवः ।
पप्रच्छ परमप्रीत्या गूढ़मेनञ्च यो मुदा ॥
सर्व्वे विष्णुमया जीवास्त्वद्भक्ताश्च कथं शिवे ! ।
श्रुतं मया तवोद्देशे कुर्य्युः कामनया वधम् ।
महान् सन्देह इति मे ब्रूहि भद्रे ! सुनिश्चितम् ॥
शङ्करी तद्वचः श्रुत्वा शिववक्त्रविनिर्गतम् ।
भीतात्यर्न्तं हि अपर्णे ! प्रत्युवाच सदाशिवम् ॥
श्रीपार्व्वत्युवाच ।
ये ममार्च्चनमित्युक्ता प्राणिहिंसनतत्पराः ।
तत्पूजनं ममामेध्यं यद्दोषात्तदधोगतिः ॥
मदर्थे शिव ! कुर्व्वन्ति तामसा जीवघातनम् ।
आकल्पकोटिनिरये तेषां वासो न संशयः ॥
मम नाम्नाथवा यज्ञे पशुहत्यां करोति यः ।
कापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात ॥
दैवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम् ।
कल्पकोटिशतं शम्भो ! रौरवे स वसेत् ध्रुवम् ॥
यो मोहान्मानसैर्देहिहत्यां कुर्य्यात सदाशिव ! ।
एकविंशतिजन्मस्य तत्तद्योनिषु जायते ॥
यज्ञे यज्ञे पशून हत्वा कुर्य्यात शोणितकर्द्दमम् ।
स पचेन्नरके तावद्यावल्लोमानि तस्य वै ॥
हन्ता कर्त्ता तथानुसर्गकर्त्ता धर्त्ता तथैव च ।
तुल्या भवन्ति सर्व्वे ते ध्रुव नरकगामिनः ॥
ममोद्देशे पशून् हत्वा सरक्तं पात्रमुत्सृजेत ।
यो मूढ़ः स तु पूयोदे वसेद्यदि न संशयः ॥
देवतान्तरमन्नामव्याजेन स्वेच्छया तथा ।
हत्वा जीवांश्च यो भक्षेत् नित्यं नरकमाप्नुयात् ॥
यूपे बद्धा पशून् हत्वा यः कुर्य्याद्रक्तकर्द्दमम् ।
तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते ॥
उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी ।
उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् ॥
मध्यस्थस्य वधायापि प्राणिनां क्रयविक्रये ।
तथा दद्युश्च सूनायां कुम्भीपाको भवेद्ध्रुवम् ॥
स्वयं कामाशयो भूत्वा योऽज्ञानेन विमोहितः ।
हन्त्यन्यान् विविधान् जीवान् कुर्य्यान्मन्नाम
शङ्कर ! ॥
तद्राज्यवंशसम्पत्तिज्ञातिदारादिसम्पदाम् ।
अचिराद्वै भवेन्नाशो मृतः स नरकं व्रजेत् ॥
देवयज्ञे पितृश्राद्धे तथा माङ्गल्यकर्म्मणि ।
तस्यैव नरके वासो यः कुर्य्याज्जीवघातनम् ॥”
तथा ।
“मद्याजेन पशून् हत्वा यो भक्षेत् सह
बन्धुभिः ।
तद्गात्रलोमसंख्याब्दैरसिपत्रवने वसेत् ॥
आवयोरन्यदेवानां नाम्ना च परकर्म्मणि ।
यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमा-
प्नुयात् ॥
पशून् हत्वा तथा त्वां मां योऽर्च्चयेन्मांसशो-
णितैः ।
तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ ॥
निर्व्विहिभक्ततुल्यं तत् बहुदत्तेन यत् कृतम् ।
यस्मिन् यज्ञे प्रभो शम्भो ! जीवहत्या भवेद्
ध्रुवम् ॥
यज्ञमारभ्य चेत् शक्रः कुर्य्याद्वै पशुघातनम् ।
स तदाधोगतिं गच्छेदितरेषाञ्च का कथा ॥
आवयोः पूजनं मोहाद्ये कुर्य्युर्मांसशोणितैः ।
पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः ॥
फलकामास्तु वेदोक्तैः पशोरालभनं मखे ।
पुनस्तत्तत् फलं भुक्त्वा ये कुर्व्वन्ति पतन्त्यधः ॥
स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया ।
तद्भोगान्ते पतेद्भूयः स जन्मानि भवार्णवे ॥
ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः ।
ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर ! ॥
आत्मपुत्रकलत्रादिसुसम्पत्तिकुलेच्छया ।
यो दुरात्मा पशून् हन्यादात्मादीन् घातयेत्
स तु ॥

जानन्ति नो वेदपुराणतत्त्वं
ये कर्म्मठाः पण्डितमानयुक्ताः ।
लोकाधमास्ते नरके पतन्ति
कुर्व्वन्ति मूर्खाः पशुघातनञ्चेन ॥
येऽज्ञानिनो मन्दधियोऽज्ञतायां
भवे पशुं घ्नन्ति न धर्म्मशास्त्रम् ।
जानन्ति नाकं नरकं न मुक्तिं
गच्छन्ति घोरं नरकं नरास्ते ॥
शुद्धा अकार्य्यां न विदन्ति शास्त्रा
न धर्म्ममार्गं परमार्थतत्त्वम् ।
पापं न पुण्यं पशुघातका ये
पूयोदवासो भवतीह तेषाम् ॥
जीवानुकम्पां न विदन्ति मूढ़ा
भ्रान्ताश्च येऽसत्पथिनो न धर्म्मम् ।
स्वार्त्ता भवे प्राणिवधं न कुर्य्यु-
स्ते यान्ति मर्त्याः खलु रौरवाख्यम् ॥
ततस्तु खलु जन्तूनां घातनं नो करिष्यति ।
शुद्धात्मा धर्म्मवान् ज्ञानी प्राणान्ते नैव मानवः ॥
यदीच्छेदात्मनः क्षेमं त्यक्त्वा ज्ञानं तदा नरः ।
जीवान् क्वापि नो हन्यात् सङ्कटापन्न एव चेत् ॥
सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान् ।
कदाचित् प्राणिनो हत्यां न कुर्य्यात्तत्त्ववित्
सुधीः ॥
मानवो यः परत्रेह तत्त्वमिच्छेत् सदाशिव ! ।
सर्व्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां वधम् ॥
वधाद्रक्षति यो मर्त्यो जीवान् तत्त्वज्ञधर्म्मवित् ।
किं पुण्यं तस्य वर्ण्येऽहं ब्रह्माण्डं स तु रक्षति ॥
यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दया-
परः ।
तस्य प्रियतमो नित्यं सर्व्वरक्षां करोति सः ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं तेन रक्षितम् ॥
वधात् शङ्कर ! वै येन तस्माद्रक्षेन्न घातयेत् ॥”
तथा —
“पशुहिंसा विधिर्यत्र पुराणे निगमे तथा ।
उक्तो रजस्तमोभ्यां स केवलं तमसापि वा ॥
नरकस्वर्गसेवार्थं संसाराय प्रवर्त्तितः ।
यतस्तत्कर्म्मभोगेन गमनागमनं भवेत ॥
सत्त्वेन सात्त्वतग्रन्थे स विधिर्नैव शङ्कर ! ।
प्रवृत्तितो निवृत्तिस्तु यत्रापि सात्त्विकी क्रिया ।
एवं नानाविधं कर्म्म पशोरालभनादिकम् ।
कामाशयः फलाकाङ्क्षी तत्वाज्ञानेन मानवः ॥
पश्चान्मानाखिला छित्त्वा भास्याशां तामसीं
सदा ।
यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत ॥”
इति पाद्मोत्तरखण्डे । १०४।१०५ । अध्यायौ ॥

ब(व)लिः, स्त्री, (बलति संवृणोतीति । बल संवरणे + इन् ।) जरया श्लथचर्म्म । तत्-पर्य्यायः । चर्म्मतरङ्गः २ वलूर्म्मिः ३ त्वक्-तरङ्गः ४ । इति राजनिर्घण्टः ॥ जठरा-वयवः । (यथा, कुमारे । १ । ३६ ।
“मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला ॥”)
गृहदारुप्रभेदः । इति मेदिनी । ले, ५ ॥ गुदा-ङ्कुरः । यथा,—
“पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रयम् ।
सर्व्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥
तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च ।
सर्व्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥*॥
वाह्यायान्तु वलौ जातान्येकदोषोल्वणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ॥
द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितान्यपि ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥
सहजानि त्रिदोषाणि यानि चाभ्यन्तरा वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दि-
शेत् ॥”
इति माधवकरः ॥
(यथा च । “तत्र स्थूलान्त्रप्रतिबद्धमर्द्धपञ्चाङ्गुलं गुदमाहुस्तस्मिन् वलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तर-भूताः प्रवाहणी विसर्ज्जनी संवरणी चेति ।
चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः ।
शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः ।
गजतालुनिभाश्चापि वर्णतः संप्रकीर्त्तिताः ॥”
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ॥
गन्धकः । तत्पर्य्यायो यथा,—
“गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्बलरसापि च ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलिका, स्त्री, (बलेव । बला + स्वार्थे कन् । टापि अत इत्वञ्च ।) अतिबला । इति राज-निर्घण्टः ॥

बलिदानं, क्ली, (बलेः पूजोपकरणस्य देवतो-द्देशेन संकल्पितच्छागादेर्वा दानम् ।) श्रीकृष्ण-पार्षदेभ्यस्तन्निवेदितनैवेद्यांशप्रदानम् । यथा,—
अथ बलिदानम् ।
“ततो यवनिकां विद्वानपसार्य्य यथाविधि ।
विष्वक्सेनाय भगवन्नैवेद्यांशं निवेदयेत् ॥
यथा च पञ्चरात्रे श्रीनारदवचनम् ।

विष्वक्सेनाय दातव्यं नैवेद्यं तच्छताशकम्।
पादोदकं प्रसादञ्च लिङ्गे चण्डेश्वराय च ॥ * ॥
तद्विधिश्चोक्तः।
मुखादीशानतः पात्रान्नैवेद्यांशं समुद्धरेत्।
सर्व्वदेवस्वरूपाय पराय परमेष्ठिने ॥
श्रीकृष्णसेवायुक्ताय विष्वक्सेनाय ते नमः।
इत्युक्त्वा श्रीहरेर्वामे तीर्थक्लिन्नं समर्पयेत्।
शतांशं वा सहस्रांशमन्यथा निष्फलं भवेत् ॥
पश्चाच्च बलिरित्यादिश्लोकावुच्चार्य्य वैष्णवः।
सर्व्वेभ्यो वैष्णवेभ्यस्तं शतांशं विनिवेदयेत् ॥ * ॥
तौ च श्लोकौ।
बलिर्विभीषणो भीमः कपिलो नारदोऽर्ज्जुनः।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः शिवः ॥
विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः।
श्रीकृष्णस्य प्रसादोऽयं सर्व्वे गृह्णन्तु वैष्णवाः ॥ इति।
इदं यद्यपि युज्येत दर्पणापणतः परम्।
तथापि भक्तवात्सल्यात् कृष्णस्यात्रापि सम्भवेत् ॥
अथ बलिदानमाहात्म्यम्। नारसिंहे।
ततस्तदग्रपार्श्वे पार्षदेभ्यः समन्ततः।
पुष्पाक्षतैर्विमिश्रेण बलिं यस्तु प्रयच्छति ॥
बलिना वैष्णवेनाथ तृप्ताः सन्तो दिवौकसः।
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
देवोद्देशेन यथाविधिपूजोपहारत्यागः। दुर्गादि-
देवतोद्देशेन सङ्कल्पपूर्व्वकच्छागादिपशुघात-
नम्। यथा,—
"बलिदानेन सततं जयेच्छत्रून् नृपान् नृप। ॥"
इति कालिकापुराणम् ॥
अस्य विधिनिषेधौ बलिशब्दे द्रष्टव्यौ ॥ * ॥
अथ बलिदानक्रमः। स्वयमुत्तराभिमुखः पूर्व्वा-
भिमुखं बलिं अव्यङ्गावयव सुन्दरं हृष्टपुष्टं
माल्यं कण्ठे वेष्टयित्वा स्नातं समानीय कृता-
ञ्जलिः पठेत्।
"ॐ वाराही यमुना गङ्गा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुभैरवसागराः ॥
पशुस्नानविधानाय सान्निध्यमिह कल्पय ॥"
इति तीर्थान्यावाह्य ॐ अग्निः पशुरासीत्तेना-
यजन्त स एतल्लोकमजयत्तस्मिन्नग्निः स ते
लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ
वायुः पशुरासीत्तेनायजन्त स एतल्लोकमजय-
त्तस्मिन् वायुः स ते लोको भविष्यति तं जेष्यसि
पिबैता अपः। ॐ सूर्य्यः पशुरासीत्तेनायजन्त
स एतल्लोकमजयत् तस्मिन् सूर्य्यः स ते लोको
भविष्यति तं जेष्यसि पिबैता अपः। ॐ वाचन्ते
शुन्धामि प्राणान्ते शुन्धामि श्रोत्रन्ते शुन्धामि
मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि। मनस्त
आप्यायतां वाक् त आप्यायतां प्राणस्त आप्या-
यतां चक्षुस्त आप्यायतां श्रोत्रन्त आप्यायतां
यत्ते क्रूरं यदा स्थितं तत्त आप्यायतां तत्ते
निष्टायतां तत्ते शुध्यतु शमहोभ्यः स्वाहा। इति
मन्त्रैः स्नापयित्वा ॐ मेघाकारस्तम्भमध्ये पशुं
बन्धय बन्धय सद्यङ्गाद्यवयवं पशुं बन्धय बन्धय
महाक्लखक्लरूपस्तम्भे पशुं बन्धय बन्धय हूः
फट् स्वाहा ॐ ह्रां ह्रीं ह्रूं चां चण्डिकायै
इमं पशुं प्रोक्षामि स्वाहा। इति प्रोक्षणम्।
ततः सद्यङ्गाद्यवयवं पशुं मोक्षं कुरु कुरु
स्वाहेति मोक्षं कृत्वा चमस्वेति ललाटे सिन्दूरं
दत्त्वा ॐ छागपशवे नम इति पाद्यादिकं दत्त्वा
एतदधिपतये ॐ अग्नये नमः एततसम्प्रदानी-
यायै ह्रीं दुर्गायै नमः इति पुष्पं दत्त्वा पश्वो-
रङ्गदेवताः पूजयेत्। यथा, शिरसि ॐ रुधिर-
वदनायै नमः ललाटे ॐ शाङ्करियै नमः भ्रूमध्ये
ॐ भङ्गायै नमः चक्षुषोः ॐ त्रिनेत्रायै नमः
कर्णयोः ॐ पार्व्वत्यै नमः घ्राणे ॐ गौर्य्यै नमः
चिबुके ॐ चण्डिकायै नमः दन्तपङ्क्तौ ॐ
उग्रचण्डिकायै नमः जिह्वायां ॐ चण्डघण्टायै
नमः मुखे ॐ विरूपाक्षायै नमः ग्रीवायां ॐ
चण्डायै नमः। पृष्ठे ॐ महाभैरव्यै नमः उदरे
ॐ वैष्णव्यै नमः चतुष्पदे ॐ चण्डप्रियायै नमः
पार्श्वयोः ॐ सर्व्वेश्वर्य्यै नमः कटिदेशे ॐ विरू-
पाक्षायै नम॰ खुराग्रे ॐ कौशिक्यै नमः लाङ्गूले
ॐ प्रहर्षिण्यै नमः सर्व्वाङ्गेषु पश्वधिष्ठातृदेव-
ताभ्यो नमः। इति संपूज्य उत्सृजेत्। विष्णुः
ॐ तत् सदद्याश्विने मासि शुक्ले पक्षे अमुक-
तिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुक-
गोत्रस्य श्रीअमुकस्य दुर्गाप्रीतिकामनया दुर्गा-
देव्यै इमं पशुं वह्निदैवतं तुभ्यमहं घातयिष्यामि
इत्युत्सृज्य कृताञ्जलिः पठेत्।
"ॐ छाग! त्व बलिरूपेण मम भाग्यादुप-
स्थितः।
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम् ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥
पशुयोनिप्रसूतोऽसि पूजाहोमादिकर्म्मसु।
तुष्टा भवतु सा देवी सरक्तपिशितैस्तव ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशन।
चामुण्डाबलिरूपाय बले! तुभ्यं नमोऽस्तु ते ॥"
ततः "पशुपाशाय विद्महे शिरश्छेदाय धीमहि।
तन्नः पशुः प्रचोदयात्।" इति कर्णे जपेत्।
ततः खड्गमानीय ह्रीं इति बीजाक्षरं
लिखित्वा ध्यायेत्।
"कृष्णां पिनाकपाणिञ्च कालरात्रिस्वरूपिणम्।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥
रक्ताम्बरधरञ्चैव पाशहस्तं कुटुम्बिनम्।
पिबमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम् ॥"
एवं खड्गं ध्यात्वा गृहीत्वा,
"ॐ रसनात्वं चण्डिकायाः सुरलोकप्रसाधकः।"
इत्यभिमन्त्र्य ऐं ह्रीं खड्गाय नम इति
पाद्यादिभिः संपूज्य पुनर्मुष्टौ ॐ महादेवाय
नमः। धारे ॐ यमाय नमः। अग्रे ॐ ब्रह्मणे
नमः।
"ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरा-
सदः।
श्रीगर्भो विजयश्चैव धर्म्मपाल! नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥"
ॐ तीक्ष्णदंष्ट्राय नम इति पुष्पं दत्त्वा आं ह्रीं
फट् इति खड्गमादाय ॐ कालि कालि वज्रे-
श्वरि लौहदण्डायै नम इति जपित्वा छागस्य
ग्रीवायां खड्ग। त्वं शीघ्रं छिन्धि छिन्धि फट्
फट् स्वाहा। इति पूर्व्वाभिमुखं बलिं स्वयमुत्त-
रास्यः उत्तराभिमुखं बलिं स्वयं पूर्व्वाभिमुखो
वा सकृत्प्रहारेण छिन्द्यात्। ततो मृण्मयादि-
पात्रे रुधिरमादाय चतुर्भागं कृत्वा ऐशान्यां
ॐ विदारिकायै नमः आग्नेय्यां ॐ पूतनायै
नमः नैर्ऋत्यां ॐ पापराक्षस्यै नमः वायव्यां
ॐ कौशिक्यै नमः। ॐ तत् सदद्यामुके मासि
अमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गा-
महोत्सवे अमुकगोत्रस्य श्रीअमुकस्य दशवर्षा-
वच्छिन्नश्रीदुर्गाप्रीतिकामः श्रीदुर्गादेव्यै छागपशु
रुधिरं दास्यामि इति सङ्कल्प्य।
ॐ कालि कालि महाकालि कालिके पाप-
नाशिनि।
शोणितञ्च बलिं गृह्ण वरदे वामलोचने ॥"
एष रुधिरबलिः ॐ दक्षयज्ञेति मन्त्रेण दद्यात्।
ततः ऐं ह्रीं श्रीं कौशिकि रुधिरेणाप्यायता-
मिति वदेत्। ततः शिरसि ज्वलद्दीपं दत्त्वा
ॐ तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ
वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य
श्रीअमुकस्य श्रीमद्दुर्गादर्शनाभिवन्दनस्पर्शना-
भिपूजनस्तवनतर्पणजनितपूर्व्वपूर्व्वाधिकपुण्य-
प्राप्तिकामो दुर्गादेव्यै सप्रदीपच्छागपशुशीर्षं
दास्यामीति सङ्कल्प्य एष सप्रदीपच्छागपशु-
शीर्षबलिः ह्रीं दुर्गायै नम इत्युत्सृजेत्।
"ॐ जय त्वं सर्व्वभूतेशि सर्व्वभूतसमावृते।
रक्ष मां निजभूतेभ्यो बलिं भुङ्क्ष्व नमो-
ऽस्तु ते ॥
ततः खड्गरुधिरमादाय।
"ॐ यं यं स्पृशामि पादेन यं यं पश्यामि
चक्षुषा।
स स मे वश्यतां यातु यदि शक्रसमो भवेत् ॥"
इति ललाटे तिलकं कुर्य्यात्। मेषघाते तु मेषे-
त्युहेन योज्यम्। मेषरुधिरदाने तु एकवर्षाव
च्छिन्नदुर्गाप्रीतिकामः। प्रभूतबलिदाने तु द्वौ
वा त्रीन् वा अग्रतः कृत्वा संप्रोक्ष्य तत्तत्पशुभ्यो
नम इति संपूज्य छाग त्वमित्येकवचनानूहेन
प्रयोगः। पञ्चस्वरेऽप्येवम्। वाक्ये तु एतान्
पशून् तुभ्यमहं घातयिष्ये। रुधिरदाने तु
एतान् रुधिरबलीन् दास्यामि इति सङ्कल्प्य
प्रत्येकेन दद्यात् शीर्षदानमप्येवम्। ततो मूल-
मन्त्रं यथाशक्ति जप्त्वा समर्प्य प्रणमेदिति नन्दि-
केश्वरपुराणोक्तपद्धतिः ॥ * ॥

अथ तान्त्रिकबलिदानविधिः। "तत्र सुलक्षणं पशुं देव्यग्रे संस्थाप्य वक्ष्यमाणविधिना उत्सृजेत्। तदुक्तं यामले।

'देव्यग्रे स्थापयित्वा तु पशुं लक्षणसंयुतम्।
श्वेतसर्षपविक्षेपात् भूतानुत्सारयेत्ततः॥'

अर्घोदकेन संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयाऽमृतीकृत्य गन्धपुष्पाक्षतैः पशुं संपूज्य मूलेन स्वधया तत्त्वमुद्रया प्रोक्षणं कृत्वा कर्णे इमं मन्त्रं पठेत्। पशुपाशाय विद्महे विश्वकर्म्मणे धीमहि तन्नो जीवः प्रचोदयात्। ततो ह्रीं कालि कालि वज्रेश्वरि लौहदण्डायै नम इति मन्त्रेण खड्गं पूजयेत्। ततः खड्गमध्यायमध्यमूलं क्रमेण पूजयेत्। यथा ह्रूं वागीश्वरीब्रह्मभ्यां नमः। ह्रूं लक्ष्मीनारायणाभ्यां नमः। ह्रूं उमामहेश्वराभ्यां नमः। ततो ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः। इति सर्व्वत्र पूजयित्वा प्रणमेत्।

'खड्गाय खरधाराय शक्तिकार्य्यार्थतत्पर।
पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ! नमोऽस्तु ते॥'

ततो महावाक्यं अमुकदेवताप्रीतिकामः अमुकदेव्यै इमं पशुं तुभ्यमहं संप्रददे। ततो निवेदयेत्।

'यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्॥'

ततो बलिं छिन्द्यात्। ततो रुधिरं समांसं देव्यै दद्यात्। ततोऽवशिष्टं बटुकादिभ्यो बलिं दद्यात् यथा ह्रूं वां वटुकाय नमः। इति गन्धादिभिः संपूज्य पूर्व्ववन्मन्त्रेण वायव्ये बलिं दद्यात्। ह्रूं यां योगिनीभ्यो नमः इति संपूज्य पूर्व्ववन्मन्त्रेण ऐशाने बलिं दद्यात्। ह्रूं क्षां क्षेत्रपालाय नमः इति संपूज्य पूर्व्ववन्मन्त्रेण नैरृत्यां बलिं दद्यात्। ह्रूं गां गणपतये नमः इति संपूज्य पूर्व्ववन्मन्त्रेण आग्नेय्यां गणेशाय बलिं दद्यात्।" इति तन्त्रसारः॥ *॥ (ननु "मा हिंस्यात् सर्व्वा भूतानि" "अहिंसा परमो धर्म्मः।" इत्यादि वचनात् कथमेव सर्व्वथा हिंसा कथं तर्हि हिंसाप्रवृत्तिः शुभादृष्टजनकत्वेन शास्त्रेणोपदिश्यते अतोऽभिधीयते। अथ वैधहिंसाविचारः। 'मा हिंस्यात् सर्व्वाभूतानि' इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया एतद्विधिमनुलङ्घ्य 'वायव्यं श्वेतमालभेत' इत्यादि विधेर्विषयप्राप्तेरगत्या वैधातिरिक्तविषयत्वं सर्व्वाः सर्व्वाणि छन्दसि वैकल्पेन तत्परं सिद्धम्। यद्यपि नाना दर्शनटीकाप्रभृतिग्रन्थेष्वेतत्प्रकारमिश्रैस्तत्त्वकौमुद्यादौ अभिहितं न च 'मा हिंस्यात् सर्व्वाभूतानि' इति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेत' इत्यनेन बाध्येत इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथाहि 'मा हिंस्यात्' इति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थत्वमपि। न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीत्यनेन तदपि सांख्यमते। मीमांसकमते तु विरोध एव तथाहि गुरुमते न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यं इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थं उपपद्यते। भट्टमते तु अङ्गे यथा तथास्तु। न च मुख्यपशुयागे पुरुषार्थकपशुहिंसनस्यार्थसाधनत्वं अनर्थसाधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतो विधेरेव स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं 'तस्मादृयज्ञे वधोऽवधः' इति। नन्वेवं 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतं 'अभिचारो मूलकर्म्म च।' ११।६३। इति मनुना उपपातकगणमध्ये पाठात् अनिष्टसाधनत्वमवगतम्। तदेतत्कथमुपपद्यतामिति चेत्सैवं 'आततायिनमायान्तं हन्यादेवाविचारयन्।' ८।३५०। इत्येकवाक्यतया आततायिवधे इष्टसाधनत्वं अनाततायिवधे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध एव॥" इति निर्णीतत्त्वम्॥)

ब(व)लिध्वंसी, [न्] पुं, (बलिं तदाख्यया प्रसिद्धं दैत्यविशेषं ध्वंसयतीति। बलि+ध्वंस+णिनि। वामनरूपेण बलेः सर्व्वस्वग्रहणादस्य तथात्वम्। यद्वा, बलिना पूजोपहारेण अविद्यां ध्वंसयितुं शीलमस्य।) विष्णुः। इत्यमरः। १। १। २१॥ (भगवता वामनरूपधरेण बलिकृतयज्ञगमनपूर्व्वकं तत्सकाशात् सर्व्वस्वं गृहीतमित्येतत्कथा बलिशब्दे द्रष्टव्या॥)

ब(व)लिनः, त्रि, (बलिः शिथिलं चर्म्म अस्यास्तीति। बलि+पामादित्वात् नः।) बलिभः। जरया श्लथचर्म्मयुक्तः। इत्यमरः। २। ६। ४५॥

ब(व)लिनन्दनः, पुं, (बलेस्तदाख्यया प्रसिद्धस्य दैत्यस्य नन्दनः पुत्रः।) बाणासुरः। इति शब्दरत्नावली॥ (अयं खलु यादवश्रेष्ठेन भगवता कृष्णेन सह युद्धमकरोत्। तपःप्रतापप्रसन्नेन महादेवेन स्वयमस्य दौवारिकत्वञ्चकार। तद्विवरणादिकं हरिवंशे १७३ अध्यायमारभ्य १८३ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ बलेः ययातिवंशीयस्य राज्ञः नन्दनः क्षेत्रजः पुत्रः इति व्युत्पत्त्या अङ्गवङ्गकलिङ्गाद्याः। यदुक्तं, विष्णुपुराणे। ४। १८। १। "हेमात् सुतपास्तस्मात् बलिः यस्य क्षेत्रे दीर्घतमसा अङ्गवङ्गकलिङ्गसुह्मपुण्ड्राख्यं बालेयं क्षत्रमजन्यत॥")

ब(व)लिनी, स्त्री, (बलं दैत्यत्वेनास्त्यस्या इति इनिः। ङीप्।) वात्यालकः। इति शब्दचन्द्रिका॥

ब(व)लिपुष्टः, पुं, (वैश्वदेवेन बलिना पुष्टः।) काकः। इत्यमरः। २। ५। २०॥

ब(व)लिपोदकी, स्त्री, (बलेः पोदकी उपोदकी।) उपोदकी। इति राजनिर्घण्टः॥

ब(व)लिप्रियः, पुं, (बलिरुपहारः प्रीणातीति। बलि+प्री+क।) लोध्रवृक्षः। इति शब्दचन्द्रिका॥ (बलिर्वैश्वदेववलिः प्रियो यस्य इति व्युत्पत्त्या काकः। उपहारप्रिये वाच्यलिङ्गः॥)

ब(व)लिभः, त्रि, (बलिश्चर्म्मसंकोचोऽस्यास्तीति। बलि+"तुन्दिबलिवटेर्भः।" ५। २। १३९। इति भः।) बलिनः। इत्यमरः। २। ६। ४५॥

ब(व)लिभुक्, [ज्] पुं, (बलिं वैश्वदेवबलिं गृहस्थदत्तद्रव्यं वा भुङ्क्ते इति। भुज्+क्विप्।) काकः। इत्यमरः। २। ५। २०॥ (यथा, भागवते। १। १८। ३३।
"अहो अधर्म्मः पालानां पीव्यं बलिभुजामिव॥")

ब(व)लिमन्दिरं, क्ली, (बलेः स्वनामख्यातस्य राज्ञो मन्दिरमालयः। बलिर्हि वामनरूपाय विष्णवे सर्व्वस्वं दत्त्वा प्रह्लादेन सह पाताले निवसति इति पौराणिकी कथात्रानुसन्धेया।) अधोलोकः। पातालम्। इति शब्दमाला॥

ब(व)लिमान्, [त्] त्रि, (बलिश्चर्म्मसंकोचोऽस्यास्तीति। बलि+मतुप्।) बलिनः। जरया श्लथचर्म्मयुक्तः। इत्यमरटीका॥ (बलिः पूजोपहारं विद्यतेऽस्येति व्युत्पत्त्या उपहारविशिष्टः। यथा, रघुः। १४। १५।
"वाप्यायमायो बलिमन्निकेतमालेख्यशेषस्य पितुर्विवेश॥")

ब(व)लिमुखः, पुं, (बलिर्मुखे यस्य। यद्वा, बलिश्चर्म्मसङ्कोचस्तद्युक्तं मुखं यस्य।) वानरः। इत्यमरटीकायां रमानाथः॥

ब(व)लिष्ठः, पुं, (अतिशयेन बलवान्+बलवत्+इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्। प्रशस्तभारवाहकत्वादस्य तथात्वम्।) उष्ट्रः। इति राजनिर्घण्टः॥ (धर्म्मसावर्णिकमन्वन्तरान्तर्गत ऋषिभेदः। यथा, मार्कण्डेये। ९४। १६।
"हविष्मांश्च बलिष्ठश्च ऋषिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नग्निरिन्द्रश्च सप्तमः॥"
इत्ययोरैक्यात् क्वचित् वरिष्ठश्चेति पाठो दृश्यते॥)

ब(व)लिष्ठः, त्रि, (अतिशयेन बलवान्। बलवत्+इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्।) अतिशयबलवान्। यथा,—
"प्रायश्चित्तं विना पूता त्वमेव शुद्धमानसा।
अकामा या बलिष्ठेन न स्त्री जारेण दुष्यति॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥

बलिदा यथा। वायुः १ विष्णुः २ गरुडः ३ हनूमान् ४ यमः ५ महावराहः ६ शरभः ७ सप्तर्षिः ८ गजः ९ पृथुराजः १० बलरामः ११ वाली १२ बलिः १३ भीमः १४ सती १५ ध्रुवः १६ पुराणतम १७। इति कविकल्पलता॥

बलिष्णु, त्रि, (बल्यते बध्यते इति । बल+इष्णुः ।) अपमानितः । इत्युणादिकोषः ॥

ब(व)लिसद्म, [न्] क्ली, (बलेस्तदाख्यदैत्यस्य सद्म निकेतनम् ।) रसातलम् । इत्यमरः ।१।८।१॥

ब(व)लिहा, [न्] पुं, (बलिं हन्ति इति । बलि+हन्+क्विप् । वामनरूपेण बलेः सर्व्वस्वग्रहणादस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

ब(व)ली, [न्] पुं, (बलमस्यास्तीति । बल+"बलादिभ्यो मतुबन्यतरस्याम् ।" ५ । २ । १३६ । इति पक्षे इनिः ।) बलरामः । इति शब्दरत्नावली ॥ उष्ट्रः । महिषः । वृषभः । शूकरः । कफः । कुन्दवृक्षः । इति जटाधरः ॥ माषः । (स्वनामख्यातो वत्सप्रीपुत्रः । यथा, मार्कण्डेये । ११८ । २ ।

"बली बलाकश्चक्षुश्च प्रचक्षश्च सुविक्रमः ॥")

बलयुक्त, त्रि । तत्पर्य्यायः । अंशल. २ लिहङ्गः ३ मांसलः ४ उपचितः ५ । इति हेमचन्द्रः । ३ । ११२ ॥ (यथा, मार्कण्डेये । ३४ । ८६ ।

"सार्द्धं न बलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः ॥")

ब(व)ली, स्त्री, (बलि+पक्षे ङीष् ।) बलिः । जरया श्लथचर्म्म । इत्यमरटीकायां भरतः ॥ (यथा,—

"कुष्ठं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम् ।
भक्षणात् स्वप्नवेलायां बलीपलितनाशनम् ॥"

इति वैद्यकभैषज्यग्रन्थावल्यां रसायनाधिकारे ॥)

ब(व)लीकं, क्ली (बलति संवृणोतीति । बल संवरणे+"अलीकादयश्च ।" उणा० ४ ।२५। इति कीकन् ।) पटलप्रान्तम् । इत्यमरः । २ । २ । १४ ॥ छाँच इति भाषा ॥ (यथा, माघे । ३ । ५३ ।

"यस्यामसेवन्त नमद्वलीकाः
समं वधूभिर्वलभीर्युवानः ॥")

ब(व)लीमुखः, पुं, (बलीयुक्तं मुखं यस्य ।) वानरः । इत्यमरः । २ । ५ । ३ ॥

ब(व)लीयान्, [स्] त्रि, (अतिशयेन बलवान् । बलवत्+ईयसुन् ।) अतिशयबलयुक्तः । यथा,—

"आगमादेशयोर्मध्ये बलीयानागमो विधिः ॥"

इति दुर्गादासटीका ॥

ब(व)लीवर्द्दः, पुं, (ईर्लक्ष्मीः वर् वरणम् । वर ईप्सायां क्विप् । ई च वर् च ईवरौ तौ ददातीति ईवर्द्दः । बलमस्यास्तीति बली । ततो बली च ईवर्द्दश्च इति ।) वृषः । इत्यमरः । २ । ९ । ५९ ॥ (यथा, कथासरित्सागरे । २० । २१ ।

"सद्योऽथ बलीवर्द्दयुगं रचितमङ्गलः ।
दत्त्वा बलिं तस्य तरोरारेभे कृषिमत्र सः ॥")

तीर्थयात्रायां तदारूढस्य दोषो यथा,—

"बलीवर्द्दसमारूढः श्रृणु तस्यापि यत् फलम् ।
नरके वसते घोरे गवां क्रोधे हि दारुणे ॥
सलिलञ्च न गृह्णन्ति पितरस्तस्य देहिनः ॥"

इति मात्स्ये ८८ अध्यायः ॥

ब(व)ल्यं, क्ली, (बलाय हितम् । बल+"उगवादिभ्यो यत् ।" ५।१।२। इति यः ।) प्रधानधातुः । शुक्रम् । बलकरे, त्रि । इति मेदिनी । ये, ४० ॥ (यथा,—

"कटुस्तवीर्य्यो लघुनो हितश्च
स्निग्धो गुरुस्वादुरसोऽथ बल्यः ॥"

इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥)

बल्यः, पु, (बलाय मुक्तये हितः । बल+यः ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

बल्या, स्त्री, (बलाय हिता । बल+"वृक्षगा कठेति ।" ४ । २ । ८० । इति यः । ततष्टाप् ।) अतिबला । अश्वगन्धा । प्रसारिणी । इति राजनिर्घण्टः ॥

बल्ह, ङ स्तुतौ । हिंसायाम् । दाने । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीयोपधः । ङ, बल्हते । इति दुर्गादासः ॥

बष्कयणी } स्त्री, (बष्कयस्तरुणवत्सः । सोऽस्ति
बष्कयिणी } अस्याः । बष्कय+पामादित्वात् पक्षे इनिः । अट्कुप्वाङिति णत्वम् । ततो ङीष् ।) चिरप्रसूता गौः । इत्यमरभरतौ ॥ (यथा, सिद्धान्तकौमुद्याम् । २ । १ । ६५ ।

"पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः ॥")

बहु, त्रि, (बंहते इति । बहि वृद्धौ+"लङ्घिबंह्योर्नलोपश्च ।" उणा० १ ।३० । इति कुर्नलोपश्च ।) त्र्यादिसंख्या ॥ अनेकम् । विपुलः । इति मेदिनी । हे, ६ ॥ तत्पर्य्यायः । प्रभूतम् २ प्रचुरम् ३ प्राज्यम् ४ अदभ्रम् ५ बहुलम् ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ६३ ॥ तद्वैदिकपर्य्यायः । उरु १ तुवि २ पुरु ३ भूरि ४ शश्वत् ५ विश्वम् ६ परिणसा ७ व्यानशिः ८ शतम् ९ सहस्रम् १० सलिलम् ११ कुवित् १२ । इति द्वादश बहुनामानि । इति वेदनिघण्टौ । ३ । १ ॥ (यथा, मनुः । ७ । ८६ ।

"अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम् ॥"

तथा, तत्रैव । ८ । ७७ ।

"एकोऽलुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योऽपि न स्त्रियः ॥"

बहुमतम् । बहुमानम् । यथा, रघुः ।१२। ८९ ।

"रामस्तुलितकैलासमरातिं बह्वमन्यत ॥")

बहुकः, पु, (बहु+संज्ञायां कन् ।) कर्कटः । अर्कः । दात्यूहः । जलखातकः । इति मेदिनी । के, १२९ ॥ ("संख्यायाः अतिशदन्तायाः कन् ।" ५ । १ । २२ । इति कन् । बहुभिः क्रीतं, त्रि ।)

बहुकण्टकः, पुं, (बहूनि कण्टकान्यस्य ।) क्षुद्रगोक्षुरः । यवासः । हिन्तालः । इति राजनिर्घण्टः ॥

बहुकण्टका, स्त्री, (बहूनि कण्टकान्यस्याः ।) अग्निदमनी । इति राजनिर्घण्टः ॥

बहुकण्टा, स्त्री, (बहवः कण्टाः कण्टकानि यस्याः ।) कण्टकारी । इति राजनिर्घण्टः ॥ (विवृतिरस्याः कण्टकारीशब्दे ज्ञातव्या ॥)

बहुकन्दः, पुं, (बहवः कन्दा यस्य ।) शूरणः । इति राजनिर्घण्टः ॥

बहुकन्दा, स्त्री, (बहवः कन्दा यस्याः ।) कर्कटी । इति राजनिर्घण्टः ॥

बहुकरः, पु (बहु कार्य्यं करोतीति । बहु+कृ+"दिवाविभानिशाप्रभेति ।" ३ । २ । २१ । इति टः ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

बहुकरः, त्रि, (बहु करोति भुवं संमार्ष्टि इति । बहु+कृ+टः ।) मार्जनकारी । तत्पर्य्यायः । खलपूः २ । इत्यमरः । ३ । १ । १७ ॥ भूमिसम्मार्ज्जकः ३ । इति शब्दरत्नावली ॥ बहुकार्य्यकर्त्ता । यथा, भट्टिः । ५ । ७८ ।

"निघ्नन्ता वैरकारिणां सतां बहुकरः सदा ।
पारश्वधिकरामस्य शक्तेरस्तकरो रणे ॥"

बहुकरी, स्त्री, (बहु करोति भुवं संमार्ष्टि इति । बहु+कृ+टः । ङीष् ।) सम्मार्ज्जनी । इति हेमचन्द्रः । ४ । ८२ ॥

बहुकर्णिका स्त्री, (बहवः कर्णा इव पत्राणि यस्याः ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुकूर्च्चः, पुं, (बहूनि कूर्चानि यस्य ।) मधुनालिकेरिकः । इति राजनिर्घण्टः ॥

बहुगन्धं, क्ली, (बहुर्गन्धो यस्मिन् ।) त्वचम् । इति राजनिर्घण्टः ॥ (दारचिनी इति भाषा ॥)

बहुगन्धः, पुं, (बहुर्गन्धो यस्मिन् ।) कुन्दुरुकः । इति राजनिर्घण्टः ॥ (उग्रगन्धे, त्रि ॥)

बहुगन्धदा, स्त्री, (बहुगन्धं ददाति या । बहुगन्ध+दा+क ।) कस्तूरी । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः कस्तूरीशब्दे ज्ञातव्याः ॥)

बहुगन्धा, स्त्री, (बहुर्गन्धो यस्याम् ।) चम्पककलिः । यूथिका । कृष्णजीरकः । इति राजनिर्घण्टः ॥

बहुगर्ह्यवाक, [च्] त्रि, (बहु गर्ह्या बहु निन्दिता वाग् यस्य ।) कुत्सितबहुवादी । इत्यमरः ॥

बहुग्रन्थिः, पु, (बहवो ग्रन्थयो यस्य ।) झावुकः । इति शब्दचन्द्रिका ॥ (झाउ इति भाषा ॥)

बहुच्छिन्ना, स्त्री, (बहु यथा स्यात्तथा छिद्यते स्मेति । बहु+छिद्+क्त ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

बहुतः [स्] अ, (बहुभ्य इत्यर्थे बहुशब्दात् "पञ्चम्यास्तसिल् ।" ५।३।७। इति तसिल्प्रत्ययः ।) बहुभ्यः ॥

बहुतन्त्रिः, त्रि, (बहवस्तन्त्रयो यस्य ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रिः कायः । बहुतन्त्री ग्रीवा । बहुतन्त्रि गात्रम् । यथा च । विभक्ष्य नक्तं दिवमस्ततन्द्रिणेति किराते ह्रस्वेकारान्ततन्त्रिशब्दस्य प्रयोगः । इति संक्षिप्तसारः ॥

बहुतन्त्रीः, त्रि, (बहवस्तन्त्र्यो यस्मिन् ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रीर्ग्रीवा बहुतन्त्रीर्धमनी । इति सिद्धान्तकौमुदी ॥ एवं बहुतन्त्रीः कायः । बहुतन्त्रि गात्रम् ॥

बहुतन्त्रीकः, त्रि, (बहुतन्त्री+स्वार्थे कन् ।) बहुतन्त्रविशिष्टः । यथा । बहुतन्त्रीका ग्रीवा ।

इति सिद्धान्तकौमुदी ॥ एवं बहुतन्त्रीकः पटः । बहुतन्त्रीकं वस्त्रम् ॥

बहुतरकणिशः, पुं, (बहुतराणि कणिशानि धान्यशीर्षाणि यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

बहुता, स्त्री, बहूनां भावः । बहुशब्दात् तस्य भावे इति तप्रत्ययः ॥

बहुतिक्ता, स्त्री, (बहुस्तिक्तो रसो यस्याः ।) काकमाची । इति राजनिर्घण्टः ॥

बहुतिथः, त्रि, (बहु + "बहुपूगगणसङ्घस्य तिथुक्" । ५ । २ । ५२ । इति तिथुक् । मुग्धबोधमते "बहुगणपूगसंघातात्तिथट् तलोपश्च ।" ७ । ४२ । इति तिथट् ।) बहूनां पूरणः । इति व्याकरणम् ॥ (यथा, मार्कण्डेयपुराणे । ७० । १ ।
"ततः काले बहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छाशु विप्राणां आज्ञाय चर
मेदिनीम् ॥")

बहुत्र, व्य, (बहु + "सप्तम्यास्त्रल् ।" ५ । ३ । १० । इति त्रल् ।) बहुषु । इति सिद्धान्तकौमुदी ॥

बहुत्वं, क्ली, बहूनां भावः । बहुशब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ३५ । ४ ।
"बहुत्वान्नामधेयानि पन्नगानां तपोधन ! ॥")

बहुत्वक्, [च्] पुं, (बह्व्यस्त्वचो यस्य ।) भूर्जवृक्षः । इति शब्दरत्नमाला ॥

बहुत्वक्कः, पुं, (बहुत्वगेव । बहुत्वच + स्वार्थे कन् । भूर्जवृक्षः । इति हेमचन्द्रः । ४ । २१० ॥

बहुदण्डिकः, त्रि, (बहवो दण्डाः सन्त्यस्य । बहुदण्ड + ठन् ।) बहुदण्डविशिष्टः । यथा । बहुदण्डिका नगरी बहुदण्डिको ग्रामः । इति सिद्धान्तकौमुदी ॥

बहुदुग्धः, पुं, (बहूनि दुग्धानि अपक्वावस्थायां यस्य । यद्वा, बहूनि दुग्धानीव शुक्लवस्तून्यस्य ।) गोधूमः । इति राजनिर्घण्टः ॥

बहुदुग्धा, स्त्री, (बहु दुग्धं यस्याः ।) बहुक्षीरा गौः । तत्पर्य्यायः । वष्कुला २ । इति हेमचन्द्रः । ४ । ३३५ ॥ (स्नुहीवृक्षः । बहुदुग्धविशिष्टत्वात् ॥)

बहुदुग्धिका, स्त्री, (बहुदुग्धा + स्वार्थे कन् । टाप् । अत इत्वम् ।) स्नुहीवृक्षः । इति शब्दचन्द्रिका ॥

बहुधा, व्य, (बहु + "विभाषा बहोर्धाऽविप्रकृष्टकाले ।" ५ । ४ । २० । इति धा ।) बहुप्रकारम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । ४६ ।
"एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"
तथा, गीतायाम् । ६ । १५ ।
"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥"
"केचित्तु विश्वतो मुखं सर्व्वात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेणोपासते ॥" इति तट्टीकायां श्रीधरस्वामी ॥)

बहुधारं, क्ली, (बह्वी धारा यस्य ।) वज्रम् । इति राजनिर्घण्टः ॥

बहुनाडिकः, त्रि, (बहुनाडि + कन् ।) कायः । इति सिद्धान्तकौमुदी ॥

बहुनाडीकः, त्रि, (बह्व्यो नाड्यो यस्मिन् । बहुनाडी + कप् ।) दिवसः । इति संक्षिप्तसारः ॥ स्तम्भः । इति सिद्धान्तकौमुदी ॥

बहुनादः, पुं, (बहुर्महान् नादः शब्दो यस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

बहुपटुः, त्रि, ईषदूनः पटुः । इति व्याकरणम् ॥ बहुषु कर्म्मसु दक्षश्च ।

बहुपत्रं, क्ली, (बहूनि पत्राण्यस्य ।) अभ्रकम् । इति राजनिर्घण्टः ॥

बहुपत्रः, पुं, (बहूनि पत्राणि दलान्यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपत्रा, स्त्री, (बहुपत्र + टाप् ।) तरणीपुष्पम् । इति राजनिर्घण्टः ॥ (भूम्यामलकी । तत्पर्य्यायो यथा, —
"भूम्यामलकिका प्रोक्ता शिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्य्याजझटापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपत्रिका, (बहुपत्रा + संज्ञायां स्वार्थे वा कन् । टापि अत इत्वम् ।) भूम्यामलकी । मेथिका । (अस्याः पर्य्यायो यथा,
"मेथिका मिथिनिर्म्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुवीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) महाशतावरी । इति राजनिर्घण्टः ॥

बहुपत्री, स्त्री, (बहुपत्र + गौरादित्वात् ङीष् ।) लिङ्गिनी । गृहकन्या । तुलसी । जतुका । वृहती । गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

बहुपर्णः, पुं, (बहूनि पर्णानि पत्राणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपर्णिका, स्त्री, (बहुपर्ण + संज्ञायां कन् । टापि अत इत्वम् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुपर्णी, स्त्री, (बहुपर्ण + गौरादित्वात् ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा,—
"मेथिका मिथिनिर्म्मेथिर्दीपनी बहुपर्णिका ।
बोधिनी बहुवीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पित्तजिह्वाशुशुद्धिधा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपात्, [द्] पुं, (बहवः पादो यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इत्यमरः । २ । ४ । ३२ ॥

बहुपादः, पुं, (बहवः पादा यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अनेकपादविशिष्टे, त्रि । यथा, भागवते ४ । २६ । २ ।
"पुरुषं पुरञ्जनं विद्यात यद्व्यनक्त्यात्मनः पुरम्
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"
तथा च महाभारते । १४ । ४२ । ३७ ।
"द्विपादबहुपादानि तिर्य्यग्गतिमतीनि च ॥"

बहुपुत्रः, पुं, (बहवः पुत्राः सन्तानयो यस्य । सप्तपर्णः । इति शब्दचन्द्रिका ॥ अनेकसुतविशिष्टे, त्रि ॥ (यथा, हरिवंशे । ३ । ६४ ।
"बहुपुत्रस्य विदुषश्चतस्रो विद्युतः सुताः ॥")

बहुपुत्री, स्त्री, (बहवः पुत्राः पुत्रसदृशमूलानि यस्याः ।) शतमूली । इति रत्नमाला ॥ (शतमूलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

बहुपुष्पः, पुं, (बहूनि पुष्पाणि यस्य ।) पारिभद्रवृक्षः । इति राजनिर्घण्टः ॥

बहुपुष्पिका, स्त्री, (बहुपुष्पा + संज्ञायां कन् । अत इत्वम् ।) धातकी । इति राजनिर्घण्टः ॥

बहुप्रजः, पुं, (बह्व्यः प्रजा यस्य ।) मुञ्जतृणम् । इति राजनिर्घण्टः ॥ सूकरः । इति हेमचन्द्रः । ४ । ३५४ ॥ बहुसन्ततिविशिष्टे, त्रि ॥ (छन्दसि तु "बहुप्रजाश्छन्दसि ।" ५ । ४ । १२३ । इति असुभागान्तः । यथा, सिद्धान्तकौमुद्यां वैदिकप्रक्रिया ।
"बहुप्रजा निरृतिमाविवेश ॥")

बहुप्रतिज्ञः, त्रि, (बह्व्यः प्रतिज्ञाः यस्मिन् ।) अनेक-पदसङ्कीर्ण-पूर्व्वपक्ष-विशिष्ट-व्यवहारः । यथा । "यत्तु अनेकपदसङ्कीर्णः पूर्व्वपक्षो न सिद्ध्यतीति । तत्र यद्यनेकवस्तुसङ्कीर्ण इत्युच्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि चापहृतमित्येवंविधस्यादुष्टत्वात् । ऋणादानपदसङ्करे पक्षाभास इति चेत् तदपि न मदीया रूपका अनेन वृद्ध्या गृहीताः सुवर्णञ्चास्य हस्ते निक्षिप्तं मदीयं क्षेत्रमपहरति चेत्यादीनां पक्षत्वमिष्यते एव । किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येतावत् । यथाह कात्यायनः ।
'बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् ।
कामन्तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया ॥'
तस्मादनेकपदसङ्कीर्णः पूर्व्वपक्षो युगपन्न सिध्यतीति तस्यार्थः ।" इति मिताक्षरा ॥ अनेकप्रतिज्ञायुक्ते, त्रि ॥

बहुप्रदः, त्रि, (प्रददातीति प्रदः । प्र + दा + क । बहूनां प्रदः ।) प्रचुरदाता । तत्पर्य्यायः । वदान्यः २ स्थूललक्ष्यः ३ दानशौण्डः ४ । इत्यमरः । ३ । १ । ६ ॥ स्थूललक्षः ५ दानवीरः ६ दानपूर्णः ७ । इति शब्दरत्नावली ॥ (पुं, महादेवः । यथा, महाभारते १३ । शिवसहस्रनामकथने । १७ । १०८ ।
"कुलहारी कुलकर्त्ता बहुविद्यो बहुप्रदः ॥")

बहुप्रजः, स्त्री (बहून् प्रजते इति। बहु+प्र+जन+ङिप्।) बहुसन्तानप्रसवकारिणी।, तत्पर्य्यायः। शमिका २। इति हेमचन्द्रः।३।२२२॥

बहुफलः, पुं, (बहूनि फलानि यस्य।) कदम्बवृक्षः। इति मेदिनी। ले, १५१॥ विकङ्कतः। तेजःफलः। इति राजनिर्घण्टः॥

बहुफला, स्त्री, (बहूनि फलानि यस्याः।) चर्विका। माषपर्णी। काकमाची। त्रपुसी। शशाण्डुली। क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥ भूम्यामलकी। इति भावप्रकाशः॥

बहुफलिका, स्त्री, (बहुफला+संज्ञायां कन्। अत इत्वम्।) भूवदरी। इति राजनिर्घण्टः॥

बहुफली, स्त्री, (बहुफल+ङीप्।) न्यग्रोधः। इति राजनिर्घण्टः॥ आमलकी। इति मेदिनी। ले, १५७॥

बहुफेना, स्त्री, (बहुः फेनो यस्याः।) सातला। इति राजनिर्घण्टः॥

बहुबलः, पुं, (बहु अतिशयं बलं यस्य।) सिंहः। इति राजनिर्घण्टः॥ अतिशयबलयुक्ते, त्रि॥

बहुमञ्जरी, स्त्री, (बह्वी मञ्जर्यो यस्याः।) तुलसी। इति भावप्रकाशः॥

बहुमलः, पुं, (बहूनि मलानि यस्य।) सीसकम्। इति रत्नमाला॥ अनेकमलयुक्ते, त्रि॥

बहुमार्गी, स्त्री, (बहवो मार्गा यस्मिन्। चतुर्दिक्षु पथवत्त्वात् तथात्वम्।) चत्वरम्। इति हेमचन्द्रः। ४। ५४॥ अनेकपथयुक्ते, त्रि॥

बहुमूर्त्तिः, स्त्री, (बह्वी मूर्त्तिर्यस्याः।) वनकार्पासः। इति शब्दचन्द्रिका॥ नानाकारश्च॥ (बहुमूर्त्तिधरे त्रि। पु, सकलासवन् जन्तुविशेषः। बहुरूपी इति ख्यातः॥ विष्णुः। यथा, महाभारते। १३। १४९। ९०।
"अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः सनातनः॥"

बहुमूर्द्धा, [न्] पु, (बहवो मूर्द्धानो यस्य। "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।" इति श्रुतेस्तथात्वम्॥) विष्णुः। इति शब्दरत्नावली॥

बहुमूलः, पुं, (बहूनि मूलानि यस्य।) इक्कटः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा,—
"इक्कटो बहुमूलश्च वाटीदीर्घः खरच्छदः॥"
इति वैद्यकरत्नमालायाम्॥)
शिग्रुः। स्थूलसरः। इति राजनिर्घण्टः॥ अनेकमूलयुक्ते, त्रि॥

बहुमूलकं, क्ली, (बहुमूल+कन्।) उशीरम्। इति भावप्रकाशः॥ (वीरणम्। तत्पर्य्यायो यथा,—
"स्याद्वीरणं वीरतरुर्वीरश्च बहुमूलकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बहुमूलकः, पुं, (बहुमूल एव। बहुमूल+स्वार्थे कन्।) इक्कटः। इति जटाधरभूरिप्रयोगौ॥

बहुमूला, स्त्री, (बहुमूल+टाप्।) शतावरी। इति राजनिर्घण्टः॥

बहुमूली, स्त्री, (बहुमूल+ङीप्।) माकन्दी। इति राजनिर्घण्टः॥

बहुमूल्यं, त्रि, (बहूनि मूल्यानि यस्य।) महार्घवस्तु। तत्पर्य्यायः। महाधनम् २। इत्यमरः। २। ६। ११३॥

बहुरन्ध्रिका, स्त्री, (बहूनि रन्ध्राणि यस्याः। बहुरन्ध्र+टाप्। संज्ञायां कन्। टापि अत इत्वम्।) मेदा। इति राजनिर्घण्टः॥

बहुरसा, स्त्री, (बहू रसो यस्याः।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ (रसवती स्त्री॥)

बहुरुहा, स्त्री, (बहु यथा तथा रोहतीति। बहु+रुह+क। टाप्।) कन्दगुडूची। इति राजनिर्घण्टः॥

बहुरूपः, पुं, (बहूनि रूपाणि यस्य।) सर्जरसः। इत्यमरः। २। ६। १२८॥ शिवः। विष्णुः। कामदेवः। सरटः। इति मेदिनी। के, २७॥ ब्रह्मा। केशः। इति शब्दरत्नावली॥ (रुद्रः। यथा, भागवते। ६। ६। १८।
"अजैकपादहिर्ब्रध्नो बहुरूपो महानिति॥"
प्रियव्रतपुत्रस्य मेधातिथेः पुत्रभेदो वर्षभेदश्च। यथा, भागवते। ५। २०। २५। "तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव-मनोजव-पवमान-धूम्रानीक-चित्ररेफ बहुरूप-विश्वाधारसंज्ञान्।" इति॥) बुद्धविशेषः। इति त्रिकाण्डशेषः॥ नानारूपयुक्ते, त्रि॥ (यथा, मनुः। १। ४९।
"तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना॥")

बहुरूपकः, पुं, (बहुरूप+स्वार्थे कन्।) जाहकजन्तुः। इति राजनिर्घण्टः॥

बहुरूपा, स्त्री, (बहुरूपस्य शिवस्य स्त्री। टाप्।) दुर्गा। यथा,—
"अरूपा परभावत्वाद्बहुरूपा क्रियात्मिका।
जाता शैलेन्द्रगेहे सा शैलराजसुता ततः॥"
इति देवीपुराणे ४५ अध्यायः॥

बहुरेखा स्त्री, (बह्वी बहुला रेखा करस्यादिचिह्नम्।) प्रचुरदीर्घचिह्नम्। बहुरेखायुक्तानां दोषो यथा,—
"रेखाभिर्बहुभिः क्लेशं स्वल्पाभिर्धनहीनताम्।
रक्ताभिः सुखमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्॥"
इति गारुडे ६४ अध्यायः॥

बहुरेताः, [स्] पुं, (बहु रेतो यस्य।) ब्रह्मा। इति शब्दरत्नावली॥

बहुरोमा, [न्] पुं, (बहूनि लोमानि यस्य।) मेषः। इति हारावली। ८०॥ लोमशे, त्रि॥

बहुलं, क्ली, (बंहते वृद्धिं गच्छतीति। बहि वृद्धौ कुलच्। नलोपश्च।) आकाशम्। इति मेदिनी॥ सितमरीचम्। इति राजनिर्घण्टः॥

बहुलं, त्रि, (बहूनर्थान् लातीति। बहु+ला+क।) प्रचुरम्। (यथा, मनुः। ४। ६०।
"नाधार्म्मिके वसेद्ग्रामे न व्याधिबहुले भृशम्॥")
कृष्णवर्णः। इति मेदिनी। ले, ११८॥

बहुलः, पुं, (बहूनर्थान् लातीति। बहु+ला+क।) अग्निः। कृष्णपक्षः। इति मेदिनी। ले, ११८॥ (यथा, कुमारे। ४। १३।
"बहुलेऽपि गते निशाकर-
स्तनुतां दुःखमनङ्ग! मोक्ष्यति॥"
महादेवः। यथा, महाभारते। १३। १७। १२८।
"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः॥")

बहुलगन्धा स्त्री, (बहुलो गन्धो यस्याः।) एला। इति राजनिर्घण्टः॥

बहुलच्छदः, पुं, (बहुलानि च्छदानि यस्य।) रक्तशिग्रुः। इति राजनिर्घण्टः॥

बहुलवणं, क्ली, (बहूनि लवणानि यस्मिन्।) औषरकम्। इति राजनिर्घण्टः॥

बहुला, स्त्री, (बहूनर्थान् लाति या। बहु+ला+क। टाप्।) नीलिका। एला। (यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गौः। इति मेदिनी। ले, ११७॥ देवीविशेषः। यथा,—
"दृष्टा सा तेन मुनिना निःसृत्य रविमण्डलात्।
बहुला त्वागता तूर्णं प्रस्थं मानसभूभृतः॥
प्रत्यहं तत्र सावित्री गायत्री बहुला तथा।
सरस्वती च द्रुपदा पञ्चैता मानसाचले॥"
इति कालिकापुराणे। २३ अध्यायः॥
(नदीभेदः। यथा, मार्कण्डेये। ५७। ३९।
"चीनाश्चैव तुखाराश्च बहुला बाह्यतो नराः॥"
स्वनामख्याता उत्तमराजपत्नी। यथा, तत्रैव। ६९। ६।
"बाभ्रव्यां बहुलां नाम उपयेमे स धर्म्मवित्।
उत्तानपादतनयः शचीमिन्द्र इवोत्तमः॥")

बहुलाः, स्त्री, कृत्तिकानक्षत्रम्। नित्यबहुवचनान्तोऽयं शब्दः। इति मेदिनी। ले, ११७॥

बहुलीकृतं, त्रि, (अबहुलं बहुलं कृतम्। अभूततद्भावे च्विः।) अपनीततुषधान्यादि। वलोलान इति भाषा। तत्पर्य्यायः। पूतम् २। इत्यमरः। २। ९। २३॥ (विस्तृतीकृतम्। यथा, मार्कण्डेये। २१। ९२।
"पराक्रमवता वीर। त्वया तद्बहुलीकृतम्॥")

बहुवल्कः, पुं, (बहूनि वल्कानि यस्य।) प्रियालः। इति राजनिर्घण्टः॥

बहुवल्ली, स्त्री, होडिक्षुपः। इति राजनिर्घण्टः॥

बहुवारः, पुं, (बहूनि वारयतीति। बहु+वृ+णिच्+अण्।) वृक्षविशेषः। बहुयार इति ख्यातः। तत्पर्य्यायः। शेलुः २ शीतः ३ श्लेष्मातः ४ श्लेष्मातकः ५ उद्दालः ६ उद्दालकः ७। इति शब्दरत्नावली॥ सेलुः ८। इत्यमरटीकायां भरतः॥ अस्य फलगुणाः। हिमत्वम्। श्लेष्मलत्वम्। शुक्रकारित्वम्। गुरुत्वम्। दुर्जरत्वम्। मधुरत्वञ्च। इति राजवल्लभः॥

बहुवारकः, पुं, (बहूनि रूक्षादीनि वारयतीति। बहु+वृ+णिच्+ण्वुल्।) वृक्षविशेषः। (अस्य

गुणा बहुवारशब्दे उक्ताः। बहुयार इति ख्यातः। यथा, मनुसंहितायाः ।५।६। श्लोकस्य टीकायां कुल्लूकभट्टः। "शेलुं बहुवारकफलं गोभवं पेयूषं नवप्रसूताया गोः क्षीरमग्निसंयोगात् कठिनं भवति एतान् यत्नतस्त्यजेत् ॥")

बहुविधः, त्रि, (बहवो विधा यस्य।) नानाप्रकारः। तत्पर्य्यायः। विविधः २ नानारूपः ३ पृथग्विधः ४। इत्यमरः। ३।१।९३॥ (यथा, गीतायाम्। ४।३२।
"एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥")

बहुविस्तीर्णा, स्त्री, (बहु यथा स्यात् तथा विस्तीर्णा।) क्षुपिकावृक्षः। इति शब्दचन्द्रिका॥ कुपद इति भाषा॥

बहुबीजं, क्ली, (बहूनि बीजानि यस्य।) गण्डगात्रम्। इति शब्दचन्द्रिका॥ आता इति भाषा॥ अस्य गुणा आतृप्यशब्दे द्रष्टव्याः॥

बहुवीर्य्यः, पुं, (बहु वीर्य्यं तेजो यस्य।) विभीतकः। इति जटाधरः॥ तण्डुलीयशाकः। शाल्मलिवृक्षः। मरुवः। इति राजनिर्घण्टः॥

बहुवीर्य्या, स्त्री, (बहु वीर्य्यं तेजो यस्याः।) भूम्यामली। इति राजनिर्घण्टः॥

बहुव्रीहिः, पुं, षट्समासान्तर्गतसमासविशेषः। (मुग्धबोधमते।) अस्य साङ्केतिकसंज्ञा हः। यथा, अन्यार्थानां दानां हसंज्ञः। उदाहरणं यथा। पीतमम्बरं यस्यासौ पीताम्बरो हरिः। इति वोपदेवः॥ स च तुल्याधिकरणानां पदानां अन्यार्थत्वे स्यादिति बोध्यम्। यथा पीताम्बरादि। भिन्नाधिकरणानान्तु पुत्राय धनमस्य शिष्याय विद्या अस्य इत्यादौ न स्यात्। समालक इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानाञ्च स्यात्। धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः। एवं कामवृत्तिः उरसि लोमा कण्ठे काल इत्यादि। एवं पीताम्बर इत्युदाहरणात् विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितम्। तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। एवं त्रिलोचनः चतुर्भुजः दीर्घकेशीत्यादि। एवं पीताम्बर इत्युदाहरणात् क्वचित् क्तान्तविशेषणं पूर्व्वं स्यात् क्वचित् परं वा स्यात् इति सूचितम्। तेन अभ्याहतस्वैरगतैरिति। अर्थैश्चितं भग्नैरपश्रितोदयमिति। स वृत्तचूडश्चलकाकपक्षकैरित्यादि रघुः॥ सुखजातः सुरापीतो कृष्णो माल्यधारक इति। एवं जातदन्तः दन्तजातः जातश्मश्रुः श्मश्रुजातः पीततैलः तैलपीतः पीतघृतः घृतपीतः ऊढभार्य्यः भार्य्योढः गतभार्य्यः भार्य्यागतः गतार्थः अर्थगतः अग्न्याहितः आहिताग्निः पुत्रजातः जातपुत्रः जातयामः यामजातः दुःखजातः जातदुःखः गडुकण्ठः कण्ठगडुः इत्यादि बोध्यम्। एवमुद्यतचक्रः चक्रोद्यतः उद्यतासिः अस्युद्यतः उद्यतगदः गदोद्यतः उद्यतखड्गः खड्गोद्यत इति। आयुधेभ्यो नित्यं पूर्व्वमिति कौमाराः॥ यथा उद्यतचक्र इत्यादि। एवं सर्व्वनामसक-लात् पूर्व्वम्। सर्व्वश्वेतः। संख्यासर्व्वनाम्नोः संख्यापूर्व्वं स्यात्। द्विपरः त्रिपूर्व्वः। सप्तम्यन्तमचन्द्रादेः। सप्तम्यन्तं पदं पूर्व्वं स्यान्न चन्द्रादेः। धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् लुक्। चन्द्रादेस्तु चन्द्रशेखरः चन्द्रचूडः पद्मनाभः शूलपाणिः कुशहस्तः। प्रियो वा। गुडप्रियः प्रियगुडः। किञ्च आरूढो वानरो यं स आरूढवानरो वृक्षः। हृतः कर्णो येन स हृतकर्णो भक्तः। दत्ता भूमिर्यस्मै स दत्तभूमिर्व्विप्रः। निर्गताः पक्षिणो यस्मात् वृक्षात् स निर्गतपक्षी वृक्षः। चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः। बहूनि नक्षत्राणि यत्र तद्बहुनक्षत्रमाकाशम्। इति द्वितीयान्ताद्यन्यपदार्था बहुव्रीहयः सर्व्वैर्मन्यन्ते। स्वमते तु प्रथमान्तान्यपदार्थोऽपि यथा सह माला वर्त्तते योऽसौ समालकः एवं सपक्षकः सनामकं ब्राह्मणमानिनीत्यादि। इति दुर्गादासः॥ * ॥ (बहवो व्रीहयो यस्येति व्युत्पत्त्या) प्रचुरधान्ययुक्ते, त्रि। यथा,—
"इन्द्रो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष। कर्म्म धारय येनाहं स्यां बहुव्रीहिः॥"
इति प्राचीनाः॥

बहुशत्रुः, पुं, (बहवः शत्रवो यस्य।) चटकः। इति शब्दचन्द्रिका॥ (बहुशत्रुविशिष्टे, त्रि। तृतीयायां तिथौ पटोलभक्षणेन बहुशत्रुः स्यात्। यथा, तिथितत्त्वे।
"कुष्माण्डे चार्थहानिः स्याद्बृहत्यां न स्मरेद्धरिम्।
बहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके॥")

बहुशः, व्य, (बहूनि ददाति करोतीत्यादि वा। बहु + "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्।" ५।४।४२। इति शस्।) बहूनि। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ५२।२८।
"कथ्यन्ते बहुशश्चैते पिता पुत्त्रत्रयश्च यत्॥")

बहुशल्यः, पुं (बहु शल्यं यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अनेकशल्ययुक्ते, त्रि॥

बहुशालः, पुं, (बहुभिः शालते इति। बहु + शाल + अच्।) स्नुही। इति राजनिर्घण्टः॥

बहुशिखा, स्त्री, (बह्वी शिखा यस्याः।) जलपिप्पली। इति राजनिर्घण्टः॥ (बह्वी शिखा इति कर्म्मधारयसमासः।) अनेकशिखा च॥

बहुसन्ततिः, पुं, (बह्वी सन्ततिर्व्विस्तारोऽन्वयो वा यस्य।) ब्रह्मयष्टिः। इति शब्दचन्द्रिका॥ वेङ्गाश इति भाषा॥ अनेकसन्तानयुक्ते, त्रि॥

बहुसम्पुटः, पुं, (बहुः सम्पुटो यस्य।) विष्णुकन्दः। इति राजनिर्घण्टः॥

बहुसारः, पु, (बहुः सारः स्थिरांशो यस्य।) खदिरः। इति राजनिर्घण्टः॥ (बहुसारविशिष्टे, त्रि। यथा, शतपथब्राह्मणे। ११।७।३।१॥ "स य एष बहुसारः॥")

बहुसुता, स्त्री, (बहुः सुतः सन्ततिर्मूलं वा यस्याः।) शतमूली। इत्यमरः। २।४।१५॥

बहुसूः, स्त्री, (बहून् सूते या। बहु + सू + क्विप्।) शूकरी। इति शब्दरत्नावली॥ बहुप्रसवा च॥

बहुसूतिः, स्त्री, (बहुः सूतिः प्रसवो यस्याः।) बहुपत्या गौः। इत्यमरः। २।९।७॥ बहुसन्तानप्रसवा च॥

बहुस्रवा, स्त्री, (बहु यथा स्यात् तथा स्रवति या। बहु + स्रु + अच्। टाप्।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥ अनेकक्षरणशीला च॥

बहुस्वनः, पुं, (बहुः प्रचुरः स्वनः शब्दो यस्य।) पेचकः। इति केचित्॥ अनेकशब्दयुक्ते, त्रि॥

बह्वपत्यः, पुं स्त्री, (बहूनि अपत्यानि यस्य।) शूकरः। मूषकः। इति राजनिर्घण्टः॥ बहुसन्तानयुक्ते, त्रि॥

बह्वाशी, [न्] त्रि, (बहु अश्नातीति। बहु + अश् + णिनि।) बहुभोजनशीलः। यथा, चाणक्ये। ६८।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः॥"
(बह्वी आशा यस्य।) बह्वाशाविशिष्टः॥ (धृतराष्ट्रपुत्रविशेषे, पुं। यथा, महाभारते। १।११७।१९।
"आदित्यकेतुर्बह्वाशी नागदन्तोऽग्रयाय्यपि॥")

बह्वृक, स्त्री, ऋग्वेदः (बह्व्य ऋचो यस्मिन्।) सूक्ते, क्ली। इति मुग्धबोधव्याकरणम्॥ "बह्व्य ऋचोऽध्येतव्या येन इति व्युत्पत्त्या ऋग्वेदज्ञे ब्राह्मणे, पु। यथा, मनुः। ३।१४५।
"यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम्॥"
केचित्तु बह्वृच इत्यकारान्तमिच्छन्ति॥)

बह्वृची, स्त्री, (बह्वृचस्य ऋग्वेदज्ञस्य पत्नी। बह्वृच + ङीप्।) ऋग्वेदवेत्तुः पत्नी। इति जटाधरः॥ (बह्व्य ऋचोऽध्येतव्या यया इति विग्रहे अध्वर्युनामाध्येत्री स्त्री। अत्र बह्वृचावध्येतर्य्येवेति वचनात्। "ऋक्पूरब्धूःपथामानक्षे।" ५।४।७४। इत्यप्रत्ययः समासान्तः। "गोत्रञ्च चरणैः सह" इति जातित्वात् ङीष्। यद्यपि स्त्रीणां स्वाध्यायाध्ययनं निषिद्धं तथापि पुरा कल्पेष्वेतदासीत्। यथाह यमः।
"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥"
इति॥)

बा(वा)ड, ऋ ङ आप्लावे। स्नाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। आप्लावः उन्मज्जनम्। इति दुर्गादासः॥) वोपदेवेन अन्तःस्थवकारादौ गृहीतः॥ (बाडते। ऋदित्त्वात् चङि न ह्रस्वः। अबबाडत्॥)

बा(वा)डव, क्ली, (बडवानां समूहः। बडवा + "खण्डिकादिभ्यश्च।" ४।२।४५। इत्यञ्।) बडवासमूहः। इत्यमरः॥ (बडवाया इद-

मिति । बड़वा + अण् । बड़वासम्बन्धिनि, त्रि । यथा, सुश्रुते । १ । ४५ ।

"दीपनीयमचक्षुष्यं बाड़वं दधि वातलम् ॥")

बा(वा)ड़वः, पुं, (बाड़ं यत्नात् स्नानं वाति प्राप्नोतीति । बाड़ + वा + कः ।) ब्राह्मणः । (बड़वायां घोटक्यां जातः । बड़वा + अण् ।) बड़वानलः । इत्यमरः ॥ तत्पर्य्यायः । और्व्वः २ संवर्त्तकः ३ अब्धग्निः ४ बड़वामुखः ५ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ६६ । ६४ ।

"महोदधेर्ज्जठरगतश्च बाड़वो
भवान् विभूत्या परया करे स्थितः ॥")

बा(वा)ड़वाग्निः, पुं, (बड़वा समुद्रस्था घोटकी तत्सम्बन्धग्निः ।) बड़वानलः । इति जटाधरः ॥ (यथा, माघे । ११ । ४५ ।

"पयसि सलिलराशेर्न्नक्तमन्तर्निमग्नः
स्फुटमनिशमतापि ज्वालया बाडवाग्नेः ॥")

बा(वा)ड़वाग्र्यः, पुं, (बाडवेषु ब्राह्मणेषु अग्र्यः श्रेष्ठः ।) ब्राह्मणश्रेष्ठः । यथा,—

"इत्याकर्ण्य वचस्तस्य बाड़वाग्र्यस्य धीमतः ।
पप्रच्छ लुब्धमानस्तत्तीर्थयात्राविधिं मुनिम् ॥"
इति पाद्मे पातालखण्डे १६ अध्यायः ॥

बा(वा)ड़वेयौ, पुं, (बड़वाया घोटकरूपधारिण्याः सूर्य्यपत्न्या अपत्ये पुमांसौ । बड़वा + ढक् ।) अश्विनीकुमारौ । इति शब्दमाला ॥

बा(वा)डव्यं, क्ली, (बाड़वानां ब्राह्मणानां समूहः । बाड़व + "ब्राह्मणमाणववाड़वाद् यत् ।" ४।२। ४२ । इति यत् ।) ब्राह्मणसमूहः । इत्यमरः ॥

बाडिङ्गनः, पुं (बाड् प्लावनं तस्मै इङ्गते इति । बाड् + इङ्ग + ल्यु ।) वार्त्ताकुः । इति रत्नमाला ॥

बाढं, क्ली, (बाह प्रयत्ने + क्तः । "क्षुब्धस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति निपातनात् साधुः ।) अतिशयः । (यथा, कथासरित्सागरे । २४ । ६८ ।

"बाढं मया सा नगरी दृष्टा विद्याधिना सता ॥")

प्रतिज्ञा । इत्यमरः । ३ । ३ । ४४ ॥ बाढमित्यव्ययमपीति वृद्धाः । इति भरतः ॥

"बाढं त्रिषु दृढे क्लीवमनुमत्यामथ त्रिषु ॥"
इति नानार्थरत्नमाला ॥

(सत्यम् । यथा, रघुः । १६ । ५२ ।

"बाढमेषु दिवसेषु पार्थिवः
कर्म्म साधयति पुत्त्रजन्मने ॥")

बा(वा)णः, पुं, (वणनं बाणः शब्दस्तदस्यास्तीति । बाण + अच् ।) अस्त्रविशेषः । तिर इति भाषा । तत्पर्य्यायः । पृषत्कः २ विशिखः ३ अजिह्मगः ४ खगः ५ आशुगः ६ कलम्बः ७ मार्गणः ८ शरः ९ पत्री १० रोपः ११ इषुः १२ । इत्यमरः । २ । ८ । ८६ ॥ चित्रपुङ्खः १३ शायकः १४ वीरतरः १५ तूणक्ष्वेड़ः १६ काण्डः १७ विपर्षकः १८ शरुः १९ वाजी २० पत्रवाहः २१ अस्त्रकण्टकः २२ ॥ लौहमयबाणस्य पर्य्यायः । प्रक्ष्वेड़नः १ लोहनालः २ नाराचः ३ ॥ लिप्तबाणस्य पर्य्यायः । प्रलिप्तः १ निरस्तः २ ॥ विषाक्तबाणस्य पर्य्यायः । तीक्ष्णः १ लिप्तकः २ दिग्धः ३ ॥ तीरो निष्फलशायके । इति शब्दरत्नावली ॥ * ॥ (यथा, ऋग्वेदे । ६ । ७५ । १७ ।

"यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।
तत्रा नो ब्रह्मणस्पतिरदितिः शर्म्म यच्छतु
विश्वहा शर्म्म यच्छतु ॥")

बलिराजस्य ज्येष्ठपुत्त्रः । यथा,—

"बलेः पुत्त्रशतं त्वासीद्बाणज्येष्ठन्ततो द्विजाः ।
बाणः सहस्रबाहुः स्यात् सर्व्वास्त्रगुणसंयुतः ॥
तपसा तोषितो यस्य पुरे वसति शूलधृक् ।
महाकालत्वमगमत साम्यं यस्य पिनाकिनः ॥"
इति मत्स्यपुराणे ५ अध्यायः ॥

(अस्य जन्मादिविवरणन्तु बाणयुद्धशब्दे द्रष्टव्यम् । विस्तृतिस्तु हरिवंशे विष्णुपर्व्वणि १७३ अध्यायमारभ्य द्रष्टव्या ॥) नीलत्नः । केवलः । इति मेदिनी । णे, २७ ॥ अग्निः । इति त्रिकाण्डशेषः ॥ काण्डावयवः । इति विश्वः ॥ भद्रमुञ्जः । इति राजनिर्घण्टः ॥ (पुं, स्त्री, नीलझिण्टी । इति वैजयन्ती ॥ यथा, माघे । ६ । ४६ ।

"विकचबाणदलावलयोऽधिकं
रुरुचिरे रुचिरेक्षणविभ्रमाः ॥"

बाण्यते शब्द्यते इति । बण शब्दे + "अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति घञ् । बाक् । इति निघण्टुः ॥ इक्ष्वाकुवंशीयो ऽयोध्याराजः स्वनामख्यातो विकुक्षेः पुत्त्रः । यथा, रामायणे । १ । ७० । २२—२३ ।

"इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः ।
कुक्षेरथात्मजः श्रीमान् विकुक्षिरुदपद्यत ॥
विकुक्षेस्तु महातेजा बाणः पुत्त्रः प्रतापवान् ।
बाणस्य तु महातेजा अनरण्यः प्रतापवान् ॥"

कादम्बरीप्रणेता कविविशेषः । यथा, कादम्बर्य्यां कविवंशवर्णने ।

"सरस्वतीपाणिसरोजसम्पुट-
प्रसुप्तहंसाश्रमसीकराम्भसः ।
यशोऽंशुशुक्लीकृतसप्तविष्टपात्
ततः सुतो बाण इति व्यजायत ॥
द्विजेन तेनाक्षत कण्ठकौण्ठ्यया
महामनोमोहमलीमसान्धया ।
अलब्धवैदग्ध्यविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा ॥"

अयमेव हर्षचरितप्रणेता इति केचित् ॥)

बा(वा)णगङ्गा, स्त्री, (बाणेन प्रकटिता गङ्गा नदीविशेषः ।) रावणबाणनिर्भिन्नसोमेश्वरगिरिभवनदीविशेषः । यथा,—

"सोमेशाद्दक्षिणे भागे बाणेनाद्रिं विभिद्य वै ।
रावणेन प्रकटिता जलधारातिपुण्यदा ।
बाणगङ्गेति विख्याता या स्नानादघहारिणी ॥
स्नात्वा तु बाणगङ्गायां दृष्ट्वा बाणेश्वरं विभुम् ।
गङ्गास्नानफलं प्राप्य मोदते देववद्दिवि ॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमावत्लिङ्गक्षेत्रमहिमा त्रिवेण्यादिमहिमा नामाध्यायः ॥

बा(वा)णदण्डः, पुं, (बाणस्य दण्डः ।) वापदण्डः । तत्पर्य्यायः । वेमा २ । इति हेमचन्द्रः ॥

बा(वा)णपुष्पा, स्त्री, (बाणस्य + पुष्पा ।) शरपुष्पा । इति राजनिर्घण्टः ॥

बा(वा)णपुरं, क्ली, (बाणस्य राज्ञः पुरं नगरम् ।) बाणराजनगरम् । तत्पर्य्यायः । देवीकोटः २ कोटीवर्षम् ३ उषावनम् ४ शोणितपुरम् ५ । इति त्रिकाण्डशेषः ॥ आग्नेयम् ६ उमावनम् ७ कोट्टवीपुरम् ८ । इति शब्दरत्नावली ॥

बा(वा)णभट्टः, पुं, ग्रन्थकारविशेषः । (स तु कादम्बर्य्यादिग्रन्थप्रणेता ।) "ननु मङ्गलं कथं क्रियते मङ्गलाद्विघ्नध्वंसः विघ्नध्वंसात् प्रारिप्सितसिद्धिरिति चेन्न । बाणभट्टादेर्मङ्गले सत्यपि ग्रन्थसमाप्त्यभावात् माघादौ मङ्गलाभावेऽपि समाप्तिदर्शनात् ।" इति मुग्धबोधटीकायां दुर्गादासः ।

बा(वा)णयुद्धं, क्ली, (बाणेन सह युद्धम् ।) बाणराजेन सह श्रीकृष्णस्य संग्रामः । तस्य विवरणम् । यथा,—

श्रीशुक उवाच ।

"बाणः पुत्त्रशतज्येष्ठो बलेरासीन्महात्मनः ।
सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृड़म् ॥
भगवान् सर्व्वभूतेशः शरण्यो भक्तवत्सलः ।
वरेण च्छन्दयामास स तं वव्रे पुराधिपम् ॥
स एकदाह गिरिशं पार्श्वस्थं वीर्य्यदुर्म्मदः ।
किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम् ॥
नमस्ये त्वां महादेव । लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥
दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् ।
त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम् ॥
कण्डूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् ।
आद्यायां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवुः ॥
तत् श्रुत्वा भगवान् क्रुद्धः केतुस्ते भज्यते यदा ।
त्वद्दर्पघ्नं भवेन्मूढ़ । संयुगं मत्समेन ते ॥
इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप । ।
प्रतीक्षन् गिरिशादेशं स्ववीर्य्यनशनं कुधीः ॥
तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम् ।
कन्यालभत कान्तेन प्रागदृष्टश्रुतेन सा ॥
सा तत्र तमपश्यन्ती क्वासि कान्तेतिवादिनी ।
सखीनां मध्य उत्तस्थौ विह्वला व्रीड़िता भृशम् ॥
बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता ।
सख्यपृच्छत सखीमूषां कौतूहलसमन्विता ॥
कं त्वं मृगयसे । सुभ्रु । कीदृशस्ते मनोरथः ।
हस्तग्राहं न तेऽद्यापि राजपुत्त्र्युपलक्षये ॥

ऊषोवाच ।

दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः ।
पीतवासा बृहद्बाहुर्योषितां हृदयङ्गमः ॥
तमहं मृगये कान्तं पाययित्वाधरं मधु ।
क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे ।

चित्रलेखोवाच ।

व्यसनन्तेऽपनेष्यामि त्रिलोक्यां यदि भाव्यते ।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥
इत्युक्ता देवगन्धर्व्वसिद्धचारणपन्नगान् ।
दैत्यविद्याधरान् यक्षान् मनुजांश्च यथालिखत् ॥
मनुजेषु च सा वृष्णीन् शूरमानकदुन्दुभिम् ।
व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥
अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी
ह्रिया ।
सोऽसावसाविति प्राह स्मयमाना महीपते ! ॥
चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् ! द्वारकां कृष्णपालि-
ताम् ॥
तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता ।
गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥
सा च तं सुन्दरवरं विलोक्य मुदितानना ।
दुष्प्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समम् ॥
परार्द्ध्यवासः स्रग्गन्धधूपदीपासनादिभिः ।
पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्च्चितः ॥
गूढः कन्यापुरे शश्वत् प्रवृद्धस्नेहया तया ।
नाहर्गणान् स बुबुधे ऊषयापहृतेन्द्रियः ॥
तां तथा यदुवीरेण भुज्यमानां हतव्रताम् ।
हेतुभिर्लक्षयाञ्चक्रुराप्रीतां दुरवच्छदैः ॥
भटा आवेदयाञ्चक्रू राजंस्ते दुहितुर्व्वयम् ।
विचेष्टितं लक्षयामः कन्यायाः कुलदूषणम् ॥
अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ! ।
कन्याया दूषणं पुम्भिर्दुष्प्रेक्ष्याया न विद्महे ॥
ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहम् ॥

कामात्मजं तं भुवनैकसुन्दरं
श्यामं पिशङ्गाम्बरमम्बुजेक्षणम् ।
बृहद्भुजं कुण्डलकुन्तलत्विषा
स्मितावलोकेन च मण्डिताननम् ॥
दीव्यन्तमक्षैः प्रिययाभिनृम्णया
तदङ्गसङ्गस्तनकुङ्कुमस्रजम् ।
बाह्वोर्दधानं मधुमल्लिकाश्रितां
तस्याग्र आसीनमवेक्ष्य विस्मित. ॥
स तं प्रविष्टं वृतमाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ।
उद्यम्य मौर्व्वं परिघं व्यवस्थितो
यथान्तको दण्डधरो जिघांसया ॥
जिघृक्षया तान् परितः प्रसर्पतः
शुनो यथा शूकरयूथपोऽहनत् ।
ते हन्यमाना भवनाद्विनिर्गता
निर्भिन्नमूर्द्धोरुभुजाः प्रदुद्रुवुः ॥
तं नागपाशैर्बलिनन्दनो बली
घ्नन्तं स्वसैन्यं कुपितो बबन्ध ह ।
ऊषा भृशं शोकविषादविह्वला
बद्धं निशम्याश्रुकलाक्ष्यरौत्सीत् ॥”

इति श्रीभागवते महापुराणे पारमहंस्यां संहि-
तायां वैयासिक्यां दशमस्कन्धे बाणयुद्धे द्विषष्टि-
तमोऽध्यायः ॥ * ॥

श्रीशुक उवाच ।

“अपश्यतां चानिरुद्धं तद्बन्धूनाञ्च भारत ! ।
चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥
नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म्म च ।
प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥
प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः ।
नन्दोपनन्दभद्राद्या रामकृष्णानुवर्त्तिनः ॥
अक्षौहिणीभिर्द्वादशभिः समेताः सर्व्वतो
दिशम् ।
रुरुधुर्बाणनगरं समन्तात् सात्वतर्षभाः ॥
भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ।
प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥
बाणार्थे भगवान् रुद्रः ससुतः प्रमथैर्वृतः ।
आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥
आसीत् सुतुमुलं युद्धमद्भुतं लोमहर्षणम् ।
कृष्णशङ्करयो राजन् ! प्रद्युम्नगुहयोरपि ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगम् ।
साम्बस्य बाणपुत्त्रेण बाणेन सह सात्यकेः ॥
ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ।
गन्धर्व्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥
शङ्करानुचराञ्छौरिर्भूतप्रमथगुह्यकान् ।
डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ॥
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्षसान् ।
द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥
पृथग्विधानि प्रायुङ्क्त पिनाक्यस्त्राणि
शार्ङ्गिणे ।
प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्व्वतम् ।
आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥
मोहयित्वाथ गिरिशं जृम्भणास्त्रेण जृम्भितम् ।
बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥
स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः ।
असृग्विमुञ्चन् गात्रेभ्यः शिखिनापाद्रवद्रणात् ॥
कुम्भाण्डः कूपकर्णश्च पेततुर्मुषलार्द्दितौ ।
दुद्रुवुस्तदनीकानि हतनाथानि सर्व्वशः ॥
विशीर्य्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षितः ।
कृष्णमभ्यद्रवत् संख्ये रथी हित्वैव सात्यकिम् ॥
धनूंष्याकृष्य युगपद्बाणः पञ्चशतानि वै ।
एकैकस्मिन् शरौ द्वौ द्वौ सन्दधे रणदुर्म्मदः ॥
तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ।
सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥
तन्माता कोटवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्त्रप्राणरिरक्षया ॥
ततस्तिर्य्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः ।
बाणश्च तावद्विरथश्छिन्नधन्वाविशत् पुरम् ॥
विद्राविते भूतगणे ज्वरस्तु त्रिशिराख्निपात् ।
अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥
अथ नारायणो देवस्तं दृष्ट्वा व्यसृजत् ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥
माहेश्वरः समाक्रन्दन् वैष्णवेन बलार्द्दितः ।
अलब्ध्वा भयमन्यत्र भीतो माहेश्वरो ज्वरः ॥
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥

ज्वर उवाच ।

नमामि त्वानन्तशक्तिं परेशं
सर्व्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्नै-
र्देवान् साधून् लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहन्ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥

श्रीभगवानुवाच ।

त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयम् ।
यो नौ स्मरति संवादं तस्य त्वन्नो भवेद्भयम् ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्द्द-
नम् ॥
ततो बाहुसहस्रेण नानायुधधरो नृप ।
मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ! ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ।
चिच्छेद भगवान् बाहून् शाखा इव वनस्पतेः ॥
बाहुषु छिद्यमानेषु बाणस्य भगवान् भवः ।
भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥

श्रीरुद्र उवाच ।

त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मान आकाशमिव केवलम् ॥
नाभिर्नभोऽग्निर्मुखमम्बु रेतो
द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्व्वी ।
चन्द्रो मनो यस्य दृगर्क आत्मा
अहं समुद्रो जठरं भुजेन्द्रः ॥
रोमाणि यस्यौषधयोऽम्बुवाहाः
केशा विरिञ्चो धिषणा विसर्गः ।
प्रजापतिर्हृदयं यस्य धर्म्मः
स वै भवान् पुरुषो लोककल्पः ॥
तवावतारोऽयमकुण्ठधामन्
धर्म्मस्य गुप्त्यै जगतो भवाय ।
वयञ्च सर्व्वे भवतानुभाविता
विभावयामो भुवनानि सप्त ॥
त्वमेक आद्यः पुरुषोऽद्वितीय-
स्तुर्य्यः स्वदृग्धेतुरहेतुरीशः ।
प्रतीयसेऽथापि यथा विकारं
स्वमायया सर्व्वगुणप्रसिद्ध्यै ॥
यथैव सूर्य्यः पिहितः स्वच्छायया
छायाञ्च रूपाणि च सञ्चकास्ति ।
एवं गुणेनापिहितो गुणांस्त्व-
मात्मप्रदीपो गुणिनश्च भूमन् ॥

यन्मायामोहितधियः पुत्त्रदारगृहादिषु ।
उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ॥
देवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्म-
वञ्चकः ॥
यस्त्वां विसृजते मर्त्त्य आत्मानं प्रियमीश्वरम् ।
विपर्य्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजेत् ॥
अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ।
सर्व्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥
तं त्वां जगत्स्थित्युदयान्तहेतुं
समं प्रशान्तं सुहृदात्मदैवम् ।
अनन्यमेकं जगदात्मकेतुं
भवापवर्गाय भजाम देवम् ॥
अयं ममेष्टो दयितोऽनुवर्त्ती
मयाभयं दत्तममुष्य देव ! ।
सम्पाद्यतां तद्भवतः प्रसादो
यथा हि ते दैत्यपतौ प्रसादः ॥
श्रीभगवानुवाच ।
यदात्थ भगवंस्त्वन्नः करवाम प्रियन्तव ।
भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥
अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुरः ।
प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥
दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ।
सूदितञ्च बलं भूरि यच्च भारायितं भुवः ॥
चत्वारोऽस्य भुजाः शिष्टा भविष्यत्यजरामरः ।
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥
इति लब्ध्वाभयं कृष्णं प्रणम्य शिरसासुरः ।
प्राद्युम्निं रथमारोप्य स वध्वा समुपानयत् ॥
अक्षौहिण्या परिवृतं सुवासःसमलङ्कृतम् ।
सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥
स राजधानीं समलङ्कृतां ध्वजै-
र्मनोरमैर्भूषितमार्गचत्वराम् ।
विवेश शङ्खानकदुन्दुभिस्वनै-
रभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥
य एतत् कृष्णविजयं शङ्करेण च संयुगम् ।
संस्मरेत् प्रातरुत्थाय न तस्य स्यात् पराजयः ॥”
इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणासुर-संग्रामे श्रीकृष्णविजयस्त्रिषष्टितमोऽध्यायः ॥

बा(वा)णलिङ्गं, क्ली, (बाणार्चनार्थं कृतं लिङ्गम् । अन्यास्य निरुक्तिरुक्ता हेमाद्रौ । यथा,—
“बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ।
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ॥”) नर्म्मदानद्युद्भवशिवलिङ्गम् । तस्य विवरणम् । यथा,—
“नर्म्मदाजलमध्यस्थं बाणलिङ्गमिति स्मृतम् ।
बाणलिङ्गे स्वयम्भूते चन्द्रकान्ताह्वयं स्थितम् ॥
चाण्डालाद्यशुतं कार्य्यं शम्भोर्नैवेद्यभक्षणात् ।
ग्राह्याग्राह्यविभागोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं जलं चान्नं ग्राह्यं प्रसादसंज्ञया ॥
शिवनाभमयं लिङ्गं सदा पूज्यं महर्षिभिः ।
यतश्च सर्व्वलिङ्गेभ्यस्तद्धि पूज्यतमं मतम् ॥
चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं पञ्चसूत्रसुसाधितम् ॥
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमवरं स्मृतम् ।
तस्य न्यूनं पूजनीयं न कदापि न तत्फलम् ॥
बहवश्च शिवलिङ्गस्य स्थूलस्थूलं प्रशस्यते ।
शालग्रामो नार्म्मदश्च सूक्ष्मसूक्ष्मो विशिष्यते ॥”
पार्थिवादिलिङ्गापेक्षया बाणलिङ्गस्य श्रेष्ठत्वम् यथा,—
“कोमलेषु तु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।
कठिनेषु तु पाषाणं पाषाणात् स्फाटिकं परम् ॥
स्फाटिकात् पद्मरागश्च काश्मीरं पद्मरागतः ।
काश्मीरात् पुष्परागोत्थमिन्द्रनीलोद्भवं ततः ॥
इन्द्रनीलाच्च गोमेदं गोमेदाद्विद्रुमोद्भवम् ।
विद्रुमान्मौक्तिकं श्रेष्ठं तस्मात् श्रेष्ठन्तु राजतम् ॥
हैरण्यं राजतात् श्रेष्ठं हैरण्याद्धीरकं वरम् ।
हीरकात् पारदं श्रेष्ठं बाणलिङ्गं ततः परम् ॥”
इति मेरुतन्त्रे ६ प्रकाशः ॥
अथ बाणलिङ्गलक्षणम् । वीरमित्रोदयधृत-कालोत्तरे ।
“बाणलिङ्गं तथा श्रेयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शृणुतः श्रृणु ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुख ! ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ।
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च ॥”
इतीन्द्रलिङ्गलक्षणम् ॥
“आरक्तं हव्यकीलालमुखाकारं करोत्यलम् ।
आग्नेयं तच्छक्तिनिभमथवा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत् ॥”
इत्याग्नेयलिङ्गलक्षणम् ॥
“दण्डाकारं भवेद्‌ याम्यमथवा दस्तनाकृति ।
यद्‌यदुक्तं सह तेन निर्म्मितं जायते तदा ।
निषिद्धं निधनं तेन क्रियते स्थापितेन तु ॥”
इति याम्यलिङ्गलक्षणम् ॥
“राक्षसं खड्‌गसदृशं ज्ञानयोगफलप्रदम् ।
कर्कराद्यिप्रलिप्तन्तु कुपठङ्क्षियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थ्ये न सुखप्रदम् ॥”
इति नैरृतलिङ्गलक्षणम् ॥
“वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्च्चसम् ।
दृष्टिं सुखादैर्वैत्वलसंभोगाप्तन्तु मध्यगे ॥”
इति वारुणलिङ्गलक्षणम् ॥
“कृष्णं धूम्रं नवारुण्यं ध्वजाभं ध्वजलक्षणम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥”
इति वायुलिङ्गलक्षणम् ॥
“तूणपाशगदाकारं गुह्यकेशस्य मध्यगम् ॥”
इति कुवेरलिङ्गलक्षणम् ॥
“दिनं वाप्यथवा रात्रिं शस्याहृत्किरव्वलम् ।
अस्थिशूलाङ्कितं रौद्रं हिमकुन्दलवर्च्चसम् ॥”
इति रौद्रलिङ्गलक्षणम् ॥
“चतुर्व्वर्णमयं वापि वैष्णवं जायतेऽग्रतः ।
वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम् ॥
श्रीवत्सकौस्तुभाङ्कञ्च सर्व्वसिंहासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ॥”
इति वैष्णवलिङ्गलक्षणम् ॥
“शालग्रामादिसंस्थन्तु शशाङ्कं श्रीविवर्द्धनम् ।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥”
इत्यपि वैष्णवलिङ्गलक्षणम् ॥
हेमाद्रिधृतलक्षणकाण्डे ।
नारद उवाच ।
“अथ वक्ष्यामि ते विप्रचिह्नमेकादशं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं कृष्णकुण्डलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटाशूलसमन्वितम् ।
त्र्यम्बकाह्वयं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रणोदनम् ॥
ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ।
प्रलयाख्यसमायुक्तं त्रिपुरारिसमाह्वयम् ॥
शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ॥
त्रिशूलडमरुधरं शुभ्ररक्तार्द्धभागतः ।
अर्द्धनारीश्वराख्यानं सर्व्वदेवैरभीष्टदम् ॥
ईषद्रक्तमयं कान्तं स्थूलं दीर्घं समुज्ज्वलम् ।
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ॥
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महर्षिसु ! ।
एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ! ॥”
इति बाणलिङ्गचिह्नानि ॥
वीरमित्रोदयधृतकालोत्तरे ।
“उक्ताङ्कं श्रेयसे योग्यं शीर्णमन्नं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा कमण्डलुम् ॥
दण्डाङ्कं छत्रचिह्नं वा ब्रह्मस्थानान्वितं मतम् ।
शशिवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धिपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ॥
वसुदैः संन्द्रयक्षेशगुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शशाङ्कमण्डलप्रभम् ॥”
इति बाणलिङ्गलक्षणम् ॥
वीरमित्रोदयधृतम् ।
“इत्येतत् लक्षणं प्रोक्तं परीक्षातत्त्वकोविदैः ।
त्रिःसप्तपञ्चवारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥”
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्य-मवधार्य्यं लिङ्गञ्चेदधिकं तदोदासीनपूज्यत्व-

इति किंवदन्तीति हेमाद्रिधृतलक्षणकाण्डे ॥
सूतसंहितायाम् ।
"सप्तकृत्वस्तुलारूढ़ं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं शेषं नार्म्मदमुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥"
वीरमित्रोदये ।
"गर्त्ता वा प्रतिपिण्ड्यो यदा तद्दलमश्नुते ।
बाणलिङ्गं तदा विद्धि शुभं सुखविवर्द्धनम् ॥"
इति बाणलिङ्गपरीक्षा ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
"अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः ।
बाणः सदाशिवो देवो बाणो बाणासुरोऽपि च ॥
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
क्रमप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पक्वजम्बुफलाकारं कुक्कुटाण्डसमाकृति ॥"
पक्वजफलं पद्मबीजम् ॥ पक्वजम्बुफलाकारं कुक्कुटाण्डसमाकृतीति हेमाद्रिधृतलक्षणकाण्डे पाठः ।
"भुक्तिमुक्तिप्रदञ्चैव बाणलिङ्गमुदाहृतम् ॥"
याज्ञवल्क्यसंहितायां देवीं प्रति शिववाक्यम् ।
"प्रशस्तं नार्म्मदं लिङ्गं पक्वजम्बुफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संस्रवते लिङ्गं गिरितो नर्म्मदाजले ॥
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
अविवासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्त्यो बाणलिङ्गैकपूजनात् ॥"
तथा ।
"ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥
प्रत्यहं योऽर्च्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥"
इति प्रत्यहबाणलिङ्गपूजाफलम् ॥
सूतसंहितायाम् ।
"संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ॥"
कदारखण्डे ।
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पुण्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥"
इति बाणलिङ्गप्रशंसा ॥
निन्द्यलिङ्गमाह तत्रैव ।
"कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वश्रिते चैव पुत्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिमरणमेव च ॥
छिद्रलिङ्गेऽर्च्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतिविलाग्रे तु गोधनानां क्षयो भवेत् ॥"
हेमाद्रिधृतम् ।
"तीक्ष्णाग्रं वक्रशीर्षञ्च त्र्यस्रलिङ्गं विवर्ज्जयेत् ।
अतिस्थूलं चातिकृशं स्वल्पं वा भूषणान्वितम् ।
गृही विवर्ज्जयेत्तादृक् तद्धि मोक्षार्थिनो हितम् ॥"
इति दुष्टबाणलिङ्गलक्षणम् ॥
शुभलिङ्गमाह वीरमित्रोदये ।
"अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्च्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ।
ततसपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रवादपीठगम् ॥"
इति शुभबाणलिङ्गलक्षणम् ॥
सूतसंहितायां भैरववाक्यम् ।
"बाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः ।
जितः क्रोधोऽनुरक्तश्च शिवपूजाविधौ रतः ॥
वह्निज्ञो निपुणश्चैव शिवज्ञो लक्षणान्वितः ।
दिने दिने स्वयं दत्त्वा लिङ्गं स्थाप्य प्रपूजयेत् ॥
एव वर्षशतं देवि ! दिव्यमानेन पूजयेत् ।
तदा तद्भक्तिसुलभः प्रत्यक्षः शङ्करो भवेत् ॥
शङ्कर उवाच ।
तुष्टोऽहं तव हे बाण ! वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि दीनाय मह्यं त्वं मन्दभागिने ।
क्लिष्टोऽहं तव देवेश ! लिङ्गं कृत्वा दिने दिने ॥
ततस्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्म्मितम् ।
शास्त्रार्थौ दुर्लभौ देव ! सिद्धश्चार्थश्च दुर्लभः ॥
तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् ।
सर्व्वकामकृतार्थञ्च सर्व्वसत्त्वानुकम्पनम् ।
सर्व्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर ! ॥
इत्येवं वचनं तस्य शिवः परमकारणम् ।
श्रुत्वा कैलासमद्धानं शङ्करेण विनिर्म्मिताः ॥
लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्द्दश ।
सिद्धलिङ्गं तदा तत्तत् सर्व्वं सदोदयं स्वयम् ॥
अयोन्येवं सुसम्पूर्णं बाणस्य च समर्पितम् ॥
अक्षय्यफलदं बाणं स्थाप्यमानञ्च नित्यशः ।
संपूज्य बाणः सद्भावं कृत्वा प्रणयतस्तदा ॥
तद्भावं स्वपुरं नीत्वा नूनं चिन्तयते शुचिः ।
अक्षय्यं यदि संसिद्धं स्थाप्यमानं दिने दिने ॥
सत्त्वानां सिद्धिहेत्वर्थं बाणस्थाने सुसंरये ।
लिङ्गानां कालिकागर्त्ते सञ्चितास्तु त्रिकोटयः ॥
श्रीशैले कोटयस्तिस्रः कोट्येका कन्यकाश्रमे ।
माहेश्वरे च कोटिस्तु कन्यातीर्थे तु कोटिका ॥
महेन्द्रे चैव नेपाले एकैका कोटिरेव च ।
बाणार्चार्थं कृतं लिङ्गं बाणलिङ्गमतः स्मृतम् ॥
बाणो वा शिव इत्युक्तस्तत्कृतं बाणमुच्यते ॥
तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा ।
स्थितं तच्छिवसद्भावं शिवस्याकृतिविग्रहे ॥"
हेमा तदाकृतिलक्षणसमुच्चयेऽपि ।
"स्वयम्भुलिङ्गवद्बाणलिङ्गं मुख्यं स्मृतं क्षये ।
सहस्रफलमन्यस्माद्द्यथा स्थापनपूजने ॥
श्रीशैले कालिकागर्त्ते लिङ्गाद्रौ कन्यकाश्रमे ।
कन्यातीर्थे वने यानं महेन्द्रे वा सुरेश्वरे ॥
स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु ॥"
सिद्धान्तशेखरे बाणलिङ्गान्यधिकृत्य ।
"तदनेकप्रकारं स्यादन्यवर्णमपीठकम् ।
लक्ष्ममूर्त्तिविहीनञ्च बाणं तत् पृथलाग्रकम् ॥"
बाणलिङ्गेष्वावाहनादि न कर्त्तव्यम् । तदुक्तं भविष्ये ।
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥" इति
योगसारे पञ्चमपरिच्छेदे ।
"ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥"
अथ बाणलिङ्गध्यानं तत्रैव ।
ॐ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ॥"
तथा ।
"प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ।
तदिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ॥
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥"
अथ स्तवः ।
"ॐ बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो ॥
नमस्ते चोग्ररूपाय नमस्ते व्यक्तयोनये ॥
संसाराकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो त्रिश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
बाणस्य वरदात्रे च रावणस्य जयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
सुरेणां याग़दात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ऐं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां निग्रहाय च ॥
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय सिद्धाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सर्व्वाय शिवाय निर्गुणाय च ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ! ।

य: पठेत् साधकश्रेष्ठो साधकत्वं लभेत स: ॥
स्मरणात् प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव ! कौलिकानां कुलं भवेत् ।
यं यं कामयते मर्त्त्यो तं तमाप्नोति लीलया ॥
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ॥
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
बाणलिङ्गं महाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां पशुनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो साधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥"
इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिव-संवादे बाणलिङ्गस्तोत्रं समाप्तम् ॥

वा(बा)णवार:, पुं, (वाणं परसृष्टशरं वारयतीति । वृ + णिच् + अण् ।) भटादेश्चोलाकृतिसन्नाहः । तत्पर्य्याय: । वारवाण: २ वारण: ३ । इति शब्दरत्नावली ॥ चोलक: ४ । इति हारावली । १६० ॥ (क्लीवेऽपि दृश्यते । यथा, सुश्रुते । ४ । २४ ।
"वाणवारं स्थानवर्त्तेनोबलविवर्द्धनम् ॥")

वा(बा)णसुता, स्त्री, (वाणस्य बाणासुरस्य सुता ।) उषा । इति शब्दरत्नावली ॥

वा(बा)णहा, [न्] पुं, (वाणं बाणासुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

वा(बा)णा, स्त्री, पुं, (वण्यते शब्द्यते इति । वण + घञ् । टाप् ।) नीलझिण्टी । इत्यमरः । २ । ४ । ७४ ॥

वा(बा)णा, स्त्री, बाणमूलम् । इति मेदिनी । णे, २७ ॥

वा(बा)णारि:, पुं, (बाणस्य बाणासुरस्य अरि: ।) विष्णुः । इति केचित् ॥

वा(बा)णाश्रय:, पुं, (बाणस्याश्रय: ।) धनुः । इति हलायुध: ॥

वा(बा)णासनं, क्ली, (बाणस्य आसनम् ।) धनुः । इति हलायुध: ॥

वा(बा)णिज:, पुं, (वणिगेव । वणिज् + अण् ।) वणिक् । इत्यमरः ॥ बाडवाग्नि: । इति त्रिकाण्डशेष: ॥

वा(बा)णिजिक:, पुं, (वणिगेव । वणिज् + ठञ् ।) बाडवाग्नि: । वणिक् । इति मेदिनी ॥ (वाणिजकोऽप्यत्र । यथा, मनुः । ३ । १८१ ।
"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥")
धूर्त्त: । इति शब्दरत्नावली ॥

वा(बा)णिज्यं, क्ली, (वणिजो भाव: कर्म्म वा । वणिज् + ष्यञ् ।) वैश्यवृत्तिविशेष: । इत्यमरः ॥ वणिज: कर्म्म भावो वा । वाणिज्योऽपि दृश्यते । इति भरत: ॥ तत्पर्य्याय: । सत्यानृतम् २ वाणिज्या ३ वणिक्पथ: ४ । इति जटाधर: ॥ (यथा, मार्कण्डेये । ५१ । ५४ ।
"कृष्यां वाणिज्यलाभे च प्राणिनां कुर्व्वतु मे सदा ॥")
क्रयविक्रयरूपस्य तस्य विवरणादि यथा,—
"मानेन तुलया वापि योंऽशमष्टमकं हरेत् ।
द्रव्यं स दाप्यो द्विगुणं वृद्धौ हानौ च कल्पितम् ॥"
य: पुनर्व्वणिक् व्रीहिकार्पासादे: पण्यस्याष्टमभागं कूटमानेन कूटतुलया वान्यथापहरत्यसौ पणानां द्विगुणं दण्डनीय: । अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये ॥
"भेषजस्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोडश ॥"
भेषजमौषधद्रव्यं स्नेहो घृतादि: गन्धद्रव्यमुशीरादि आदिग्रहणाद्धिङ्गुमरिचादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयत: षोडशपणो दण्ड: ॥ किञ्च ।
"मृच्चर्म्ममणिसूत्रायःकाष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दम: ॥"
न विद्यते बहुमूल्या जातिर्यस्मिन् मृच्चर्म्मादिके तदजाति: तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन मृत्तिकायां सुगन्धामलकमिति । मार्जारचर्म्मणि वर्णोत्कर्षाधानेन व्याघ्रचर्म्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कार्ष्णायसे वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौषेयमिति विक्रेयस्यापादितस्य द्रव्यस्याष्टगुणो दण्डो वेदितव्य: ॥
"समुद्गपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥
भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥"
सुद्गं पिधानं सुद्गेन सह वर्त्तत इति समुद्गं करण्डकम् । परिवर्त्तनं व्यत्यास: । योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने न्यूनपणमूल्यमिति । यावत्सु न्यूने कृत्रिमे विक्रीयते पञ्चाशत्पणो दण्ड: ; पणमूल्ये पुन: शतं द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरूहनीया ॥ * ॥ वणिज: प्रत्याह ।
"सम्भूय कुर्व्वतामर्घं सबाधं कारुशिल्पिनाम् ।
अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तम: ॥"
राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानन्तोऽपि वणिज: सम्भूय मिलिता कारूणां रजकादीनां शिल्पिनां चित्रकरादीनां सबाधं पीडाकरमर्घान्तरं लाभलोभात् कुर्व्वन्त: पणसहस्रं दण्डनीया: ॥ * ॥ किञ्च ।
"सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहस: ॥"
ये पुनर्व्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणन्ति तेषामुत्तमसाहसो विहितो दण्डो मन्वादिभि: ॥*॥ केन पुनरर्घेण वणिजामित्याह ।
"राजनि स्थाप्यते योऽर्घ: प्रत्यहं तेन विक्रय: ।
क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृत् स्मृत: ॥"
राजनि सन्निहिते सति यत्नेनार्घ: स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्य्य: । निर्गत: स्रवो निस्रवोऽवशेष: तस्माद्राजनिरूपितादर्घो निस्रव: स एव वणिजो लाभकारी न पुन: स्वच्छन्दपरिकल्पितात् । मनुना चार्घकरणे विशेषो दर्शित: ।
"पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते ।
कुर्व्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप ! ॥"
इति ।
किञ्च ।
"स्वदेशपण्ये च शतं वणिक् गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु य: सद्य: क्रयविक्रयी ॥"
स्वदेशप्राप्तपण्यं गृहीत्वा यो विक्रीणीतेऽसौ पञ्चकं शतं पणशते पणपञ्चकं लाभं गृह्णीयात् । परदेशप्राप्ते पुन: पण्ये शतपणमूल्ये दशपणान् लाभं गृह्णीयात् । यस्य पण्यग्रहणदिवस एव विक्रय: सम्पद्यते । य: पुन: कालान्तरेऽपि विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्ष: कल्प्य: । एवञ्च यथार्घे निरूपिते पणशतं पञ्चपणो लाभो भवति तथैवार्घं राज्ञा स्वदेशपण्यविषये स्थापनीय: ॥ * ॥ परदेशपण्ये अर्घनिरूपणप्रकारमाह ।
"पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत् कार्य्य: क्रेतुर्विक्रेतुरेव च ॥"
देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिगणय्य पण्यमूल्येन सह मेलयित्वा यथा पणशते दशपणो लाभ: सम्पद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्य्योऽर्घो राज्ञा स्थापनीय: ॥ * ॥ प्रासङ्गिकं परिसमाप्याधुना विक्रीयासम्प्रदानमुपक्रमते । तत्स्वरूपं नारदेनाभिहितम् ।
"विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥"
तच्च विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुन: षड् विधत्वं तेनैव प्रत्यपादि ।
"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा ।

षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ॥
गणिमं तुलिमं मेयं क्रियया रूपतः श्रिया ॥"
इति ॥

गणिमं क्रमुकफलादि । तुलिमं कुङ्कुमादि । मेयं शाल्यादि । क्रियया वाहदोहादिरूपया उपलक्षितमश्वमहिष्यादि । रूपतः पण्याङ्गनादि । श्रिया दीप्त्या मरकतपद्मरागादि ॥ * ॥ इत्येतत् षट्प्रकारमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह ।

"गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥"

गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद्गृहीतमूल्यं तद्यदि विक्रेता प्रार्थयमानाय स्वदेश वणिजे क्रेत्रे न समर्पयति । तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्येनैव लभ्यते तदार्घह्रासकृतो य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः । यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यस्यैतत्पण्यमिति प्रतिपन्नं तावदेव तदा तत् पण्यमादाय तस्मिन् देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादि प्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेत्रे वाञ्छावशाद्दापनीयः ॥ * ॥ यथाह नारदः ।

"अर्घश्चेदवहीयेत सोदयं पण्यमावहेत् ।
स्थानिनामेष नियमो दिग्लाभं दिग्विचारिणाम् ॥"
इति ॥

यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये वस्त्रगृहादिके य उपभोगः तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः । यथाह नारदः ।

"विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति ।
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम् ॥"
इति ॥

विक्रेतुरुपभोगः क्षय उच्यते । क्रेतुः सम्बन्धित्वेन चीयमानत्वान्न पुनः कुड्यपातगृहदाहाद्युपघातादिरूपः । तस्य तु ।

"उपहन्येत वा पण्यं दह्येतापह्रियेत वा ।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः ॥"
इत्यनेनोक्तत्वात् ।

यदा त्वसौ क्रेता देशान्तरात् पण्यग्रहणार्थमागतस्तदा तत् पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः । अयञ्च क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः । सति त्वनुशये क्रीत्वा विक्रीय वा किञ्चिदित्यादि मनूक्तं वेदितव्यम् ॥ * ॥ किञ्च ।

"विक्रीतमपि विक्रेयं पूर्व्वे क्रेतर्यगृह्णति ।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥"

यदा पुनर्जातानुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयम् । यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत् । पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात् ॥ * ॥ अपि च ।

"राजदैवोपघातेन पण्ये दोषमुपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥"

यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अजातानुशयोऽपि तच्च राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेवातोऽन्यददुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम् ॥ किञ्च ।

"अन्यहस्ते च विक्रीतं दुष्टं वा दुष्टवद्यदि ।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥"

यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्रच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्यात् द्विगुणो दमो वेदितव्यः । * । नारदेनाप्यत्र विशेषो दर्शितः ।

"अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति ।
द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥
निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव ते ॥"
इति ॥

सर्व्वश्चायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः ॥ * ॥ यथाह नारदः ।

"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः ॥" इति ॥

विक्रयानुशयोऽभिहितः क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितमधुना तदुभयसाधारणं धर्म्ममाह ।

"क्षयं वृद्धिं च वणिजा पण्यानामविजानता ।
क्रीत्वा नानुशयः कार्य्यः कुर्व्वन् षड्भागदण्डभाक् ॥"

परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणेनोऽर्घकृतां वृद्धिमपश्यता क्रेत्रानुशयो न कार्य्यः । विक्रेत्रा च महार्घनिबन्धनं पण्यक्षयमपश्यता नानुशयितव्यम् । वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तम्भवति । अनुशयकालावधिश्च नारदेनोक्तः ।

"क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम् ॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमावहेत् ।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥"
इति ॥

अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबन्धनानुशयावधि दर्शकपञ्चकमाहेत्यादिना दर्शित एव । तदनया वाचो युक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते । यथा पण्यपरीक्षाविधिवशात् पण्यदोषाणां अतः पण्यदोषे तद्वृद्धिक्षयकारणपरिज्ञानाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशयं करोति तदा पण्यषड्भागं दण्डनीयः । अनुशयकारणपरिज्ञानेऽपि अनुशयकालातिक्रमेणानुशयं कुर्व्वतोऽप्ययमेव दण्डः । उपभोगेनाविनश्वरेषु स्थिरार्थेष्वनुशयकालातिक्रमेणानुशयं कुर्व्वतो मनूक्तो दण्डो द्रष्टव्यः ।

"परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥"

इति मिताक्षरायां विक्रीयासम्प्रदानं नाम प्रकरणम् ॥

अथ बृहस्पतिः ।

"कुसीदकृषिवाणिज्यं प्रकुर्व्वीतास्वयं कृतम् ।
आपत्काले स्वयं कुर्व्वन् नैनसा लिप्यते द्विजः ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत् ।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः ॥
वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम् ।
वणिक् कुसीदादोषः स्यात् ब्राह्मणानाञ्च पूजनात् ॥"
इत्याह्निकतत्त्वम् ॥

वा(वा)णिज्या, स्त्री, (वाणिज्य + टाप् । अभिधानात् स्त्रीत्वम् ।) वाणिज्यम् । इति जटाधरः ॥

बा(वा)ध, ऋ ङ विहतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अबबाधत् । ङ, बाधते । जनं न सत्त्वेष्वधिको बबाधे । इति रघुः ॥ २ । १४ ॥ इति दुर्गादासः ॥

बा(वा)धः, पुं, (बाधनमिति । बाध + भावे घञ् ।) प्रतिबन्धकः । आघातः । (यथा, ऋग्वेदे । ६ । ५१ । ४ ।
"यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥") न्यायमते साध्याभाववत्पक्षः । यथा । ह्रदो वह्निमान् । इति सामान्यनिरुक्तिगादाधरी ॥

बा(वा)धकः, पुं (बा(वा)धते इति । बाध + ण्वुल् ।) स्त्रीरोगविशेषः । यथा,—

"रक्तमाद्री तथा षष्ठी चाङ्कुरो जलकुमारकः ।
चतुर्व्विधो बाधकः स्यात् स्त्रीणां मुनिविभाषितः ॥
तेषां स्वभावं वक्ष्यामि यथाशास्त्रं विधानतः ।
एतेषां पूजनं कार्य्यं जनैः सन्तानकाङ्क्षिभिः ॥
निःसारणं स्थापनञ्च बलिदानं जपस्तथा ।
कर्त्तव्यो गुरुवाक्येन यथाशास्त्रं विपश्चिता ॥
चतुर्व्विधो बाधकस्तु जायते ऋतुकालतः ॥"

तस्य लक्षणं यथा,—

"कट्यां कुक्ष्यां तथा नाभेरधः पार्श्वे स्तनेऽपि च ।
रक्तमाद्रीप्रदोषेण जायते फलहीनता ॥
मासमेकं द्वयं वापि ऋतुयोगो भवेद्यदि ।
रक्तमाद्रीप्रदोषेण फलहीना तदा भवेत् ॥"
इति रक्तमाद्रा ॥

"नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः ।
लालासंयुतरक्तञ्च षष्ठीबाधकयोगतः ॥
मासैकेन भवेद्यस्या ऋतुस्नानद्वयं तथा ।
मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः ॥"
इति षष्ठी ॥

"उद्दिष्टो गुदतो देहे रक्तस्रावो भवेद्वहु ।
नाभेरधो भवेन् मूलं चाङ्कुरः स तु बाधकः ॥
ऋतुहीना चतुर्म्मासं त्रिमासं वा भवेद्यदि ।
लघ्वाङ्गी करपादे च ज्वाला चाङ्कुरयोगतः ॥"
इति चाङ्कुरस्य ॥
"सशूला च सगर्भा च शुष्कदेहाल्परक्तिका ।
जलकुमारस्य दोषेण जायते फलहीनता ॥
या लघ्वाङ्गी भवेत् स्थूला बहुकालकृतुस्तथा ।
गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात् ॥"
इति जलकुमारस्य ॥
इति वैद्यकम् ॥ बाधाजनके, त्रि ॥ (यथा, मार्कण्डेये । ३४ । १६ ।
"धर्म्मो धर्म्मानुबन्धार्थो धर्म्मो नात्मार्थबाधकः ॥")

बा(वा)धनं, क्ली, (बाध + ल्युट् ।) पीडा । इति शब्दरत्नावली ॥ प्रतिबन्धकञ्च ॥ (बाधते इति । बाध + ल्युः । पीडादातरि प्रतिबन्धके च त्रि । यथा, हरिवंशे । ६५ । ५३ ।
"श्रूयतां कथयिष्यामि यत्रोभौ शत्रुबाधनौ ॥")

बा(वा)धा, स्त्री,(बाध + टाप् ।) पीडा । इत्यमरः । १ । ६ । ३ ॥ (यथा, मार्कण्डेये । २२ । ३ ।
"दुर्वृत्ताः सन्ति शतशो दानवाः पापयोनयः ।
तेभ्यो न स्यात् यथा बाधा मुनीनां त्वं तथा कुरु ॥")
निषेधः । इति हेमचन्द्रः ॥

बा(वा)धितः, त्रि, (बाध + क्त ।) बाधायुक्तः । निवर्त्तः । यथा । सत्क्रान्तविप्रतिषेधेन यद्बाधितं तद्बाधितमेव । इति मुग्धबोधटीकायां दुर्गादासः ॥

बाधिर्य्यं, क्ली, (बधिरस्य भावः । बधिर + ष्यञ् ।) बधिरस्य भावः । कर्णरोगविशेषः । तस्य निदानम् । यथा,—
"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकरः ॥
अस्यौषधं यथा,—
"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णमूलञ्च पूयस्रावञ्च कर्णयोः ।
कृमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"
अपि च ।
"प्रस्थे द्वे गजकर्मालानां क्वाथयेद्द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ।
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ॥
पुनर्नवा गोक्षुरकं सैन्धवं त्र्यूषणं वचा ।
सरलं सुरदारुञ्च बृहती कण्टकारिका ॥
नस्यपानादहरत्येव कर्णमूलं हनुग्रहम् ।
बाधिर्य्यं सर्व्वरोगञ्च अभ्यङ्गाच्च महेश्वर । ॥"
इति गारुडे १९८ अध्यायः ॥
(असम्यक्प्रतिकारत्वमस्य यथा,—
"स एव शब्दाभिवहा यदा शिराः
कफानुयातो व्यनुसृत्य तिष्ठति ।
तदा नरस्याप्रतिकारसेविनो
भवेत्तु बाधिर्य्यमसंशयं खलु ॥"
इत्युत्तरतन्त्रे विंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥
अस्य चिकित्सा यथा,—
"सामान्यतो विशेषेण बाधिर्य्ये पूरणं श्रृणु ।
गव्यं मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकबिम्बीभिः सिद्धं वाजे पयस्यथ ॥
सिद्धं वा बिल्वनिःक्वाथे शीतीभूतं तदुद्धृतम् ।
पुनः पचेद्दशक्षीरं सितामधुकचन्दनैः ॥
बिल्वाम्बु गाढं तत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ।
वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ॥"
इति च तत्रैकविंशतितमेऽध्याये तेनैवोक्तम् ॥)

बाध्यं, त्रि, (बाध + ण्यत् ।) बाधनीयम् । बाधितव्यम् । निवर्त्त्यम् । यथा । साङ्ख्यतालिङ्गदर्शनात् प्रकरणमिदं बाध्यम् । इति ब्रह्मसूत्रस्य समञ्जसावृत्तिः ॥ (यथा, मार्कण्डेये । ६६।४० ।
"नाहं स्वारोचिषस्तुल्यः स्त्रीबाध्यो वा जलेचरि । ॥")

बाध्यता, स्त्री, (बाध्यस्य भावः । बाध्य + तल् ।) बाध्यत्वम् । बाध्यस्य भावः इत्यर्थे तप्रत्ययनिष्पन्नोऽयं शब्द. ॥

बान्धकिनेयः, त्रि, (बन्धक्या अपत्यं पुमान् । बन्धकी + "कल्याण्यादीनामिनङ् ।" ४।१।१२६। इति ढक् इनङ् च ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥

बान्धवः, पुं, (बन्धुरेव । बन्धु + "प्रज्ञादिभ्यश्च ।" ५। ४ । ३८ । इति स्वार्थे अण् ।) ज्ञातिः । इत्यमरः ।२।६।३४॥ सुहृत् । इति मेदिनी । वे,४५॥ (यथा, मनुः । ५ । ७० ।
"नातिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया ॥")
अस्य विवरणं बन्धुशब्दे द्रष्टव्यम् ॥

बाभ्रवी, स्त्री, (बभ्रोर्महादेवस्य पत्नी । बभ्रु + अण् + ङीष् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ९१ । २१ ।
"मेधे सरस्वति वरे भूति बाभ्रवि तामसि । ॥")

बारकीरः, पु, द्वारग्राही । वाड़वः । यूका । वेणिवेधिनी । नीराजितहयः । इति मेदिनी ।रे,२८३॥

बार्ब्बटीरः, पुं, त्रपु । आम्रास्थि । अङ्कुरः । गणिकासुतः । इति हेमचन्द्रः ॥

बार्हस्पतं, त्रि, बृहस्पतिसम्बन्धि । बृहस्पतेरिदं इत्यर्थे (अण्) ष्णप्रत्ययेन निष्पन्नम् ॥

बार्हस्पत्यः, पु, (बार्हस्पत्यं बृहस्पतिप्रोक्तं शास्त्रं अधीयमानत्वेनास्त्यस्येति । अर्श आदित्वादच् ।) नास्तिकः । यथा, हेमचन्द्रः ।
"स्याद्वादवाद्यार्हतः स्याच्छून्यवादी तु सौगतः ।
नैयायिकस्त्वक्षपादो योगः साङ्ख्यस्तु कापिलः ॥
वैशेषिकः स्यादौलूक्यो बार्हस्पत्यस्तु नास्तिकः ।
चार्व्वाको लौकायतिकश्चैते षडपि तार्किकाः ॥"
(बृहस्पतिना प्रोक्तमिति । बृहस्पति + ण्यः ।) नीतिशास्त्रे, स्त्री । इति केचित् ॥ बृहस्पतेरिदमिति वा । बृहस्पति + "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।" ४ । १ । ८५ । इति ण्यः ।) बृहस्पतिसम्बन्धिनि, त्रि ॥

बालं, क्ली, पुं, (बलतीति । बल + णः ।) गन्धद्रव्यविशेषः । बाला इति ख्यातम् । इति मेदिनी ॥ तत्पर्य्यायः । ह्रीवेरम् २ बर्हिष्ठम् ३ उदीच्यम् ४ केशनामकम् ५ अम्बुनामकम् ६ । इत्यमरः । २ । ४ । १२२ ॥ ह्रिवेरम् ७ बर्हिष्ठम् ८ । इति भरतः ॥ बालकम् ९ वारिदम् १० इति शब्दरत्नावली ॥ वरम् ११ ह्रीवेरकम् १२ केश्यम् १३ वज्रम् १४ पिङ्गम् १५ ललनाप्रियम् १६ कुन्तलोशीरम् १७ कचामोदम् १८ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । पित्तवान्तितृषाज्वरकुष्ठातिसारश्वासव्रणनाशित्वम् । केशहितत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"बाला वाट्यालिका वाट्या सैव वाट्यालिकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिका च ।
गाङ्गेरुकी नागबला श्वसा ह्रस्वा गवेधुका ॥
अस्य गुणाः ।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥
बालाचतुष्टयविशेषगुणाः ।
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशयः ॥
हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमनी ।
हन्यादतिबला मेहं पयसा सितया सह ॥"
इति भावप्रकाशः ॥

बालः, त्रि, (बलतीति । बल प्राणने + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः ।) मूर्खः ॥ (यथा, मनुः । २ । १५३ ।
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥"
"वैशब्दोऽवधारणे अज्ञ एव बालो भवति नत्वल्पवयाः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) अर्भकः । इति मेदिनी । ले, ४० ॥ द्वितीयस्य पर्य्यायः । माणवकः २ । इत्यमरः ।२।६।४२॥ बालकः ३ माणवः ४ किशोरः ५ वटुः ६ सुशिन्धयः ७ वटुकः ८ किशोरकः ९ । इति शब्दरत्नावली ॥ पाकः १० गभः ११ डिम्भकः १२ पृथुकः १३ शिशुः १४ शावः १५ अर्भः १६ डिम्भकः १७ डिम्भः १८ । इति राजनिर्घण्टः ॥ स तु षोड़शवर्षपर्य्यन्तः प्रथमवयस्कः । यथा,—
"आषोडशाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम् ॥"
इति स्मृतिः । इति भरतः ॥
तस्य रक्षकाः सर्व्वदेवताः । यथा,—
"अनाथबालवृद्धानां रक्षकाः सर्व्वदेवताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः
अथ बालस्य परिचर्य्याविधिः ।
"बालमङ्के सुखं दध्यान्न चैनं तर्ज्जयेत् क्वचित्

सहसा बोधयेन्नैव नायोग्यमुपवेशयेत् ॥"
अयोग्यमुपवेशनाक्षमम् ।
"नाशक्ष्य स्थापयेत् क्रोडे न क्षिप्रं शयने क्षिपेत् ।
रोदयेन्न क्वचित् कार्य्ये विधिमावश्यकं विना ॥"
आवश्यको विधिः भेषजदानतैलाभ्यङ्गोद्वर्त्तनादिः ॥
तमिच्छन्तमनुवर्त्तेत तं सदैवानुमोदयेत् ।
संसेवितमना एवं नित्यमेवाभिवर्द्धयेत् ॥
बालातपतडिद्दृष्टिधूमानलजलादितः ।
निम्नोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः ॥"
बालस्य स्वभावाहितान्याह ।
"अभ्यङ्गोद्वर्त्तने स्नानं नेत्रयो रञ्जनं तथा ।
वसनं मृदु यच्च तथा चन्दनानुलेपनम् ॥
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्व्वथा ॥"
बालस्य कवलादेः समयमाह ।
"कवलः पञ्चमाद्वर्षाद्विंशतेश्चैव मैथुनम् ॥"
बाल्यादेरवधिमाह सुश्रुतः ।
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक् ॥
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम् ।
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्ये षोडशसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्धा मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः ॥
चत्वारिंशत्समा यावत्तस्तेदौर्ध्यादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥
वीर्य्यादीर्ध्यादिशब्देन रसादिसर्व्वधात्विन्द्रियबलोत्साहा उच्यन्ते । क्षीणः सर्व्वधात्विन्द्रियबलोत्साहैर्हीनः ।
ततस्तु सप्ततेरूर्द्ध्वं क्षीणधातुरसादिकः ॥
क्षीयमाणेन्द्रियबलः क्षीयरता दिने दिने ।
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ॥
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमाव्दिकम् ।
वार्द्धक्ये वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत् ॥
उपक्रमेत् चिकित्सेत् ॥ तन्त्रान्तरे तु ।
बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्म्मेन्द्रियं रेतो जीवितं दशतो ह्रसेत् ॥"
इति भावप्रकाशः ॥

(अथ बालाद्यशौचम् ।
"नवमादिमासजातबालस्याशौचकालाभ्यन्तरमरणे मातापित्रोरस्पृश्यत्वं युक्तम् । तदेव स्वजातुक्तजननाशौचम् । ज्ञातीनान्तच्छौचं नास्ति । नवमादिमासान्तजातयोस्तु कन्यापुत्रयोः पित्रादि सपिण्डानां मातुश्च जननाशौचम् । तत्र ब्राह्मणानां दशाहं शूद्राणां मासः । पुत्रजन्मनि पितुः सचेलस्नानं पुत्रमुखदर्शनात् परं पुनः सचेलस्नानम् । पुत्रकन्याजननं ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः ॥ पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात् वैदिककर्म्माधिकारः । कन्याजनने तु ब्राह्मण्या मासोत्तरस्नानात् वैदिककर्म्माधिकारः । शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं लौकिककर्म्माधिकारः वैदिककर्म्मणि तु मासोत्तरस्नानात् शुद्धिः । एतत् सर्व्वं कन्यापुत्रयोर्विद्यमानत्वे बोध्यम् ॥
जननाशौचोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे मातापित्रोरेकाहः । सपिण्डानान्तु सद्यःशौचम् ॥ षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे मातापित्रोस्त्र्यहः । सपिण्डानामेकाहः । षण्मासोपरि द्विवर्षपर्य्यन्तं पित्रोस्त्र्यहः । सपिण्डानामकृतचूड़े एकाहः कृतचूड़े त्र्यहः । द्विवर्षोपरि मासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबालकस्य मरणे मातापित्रादिसपिण्डानां त्र्यहः ॥ तन्मध्येऽप्युपनीतस्य मरणे दशाहः । मासत्रयाधिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां दशाहः ॥
शूद्रस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे त्रिरात्रम् । उत्पन्नदन्तस्य पञ्चाहः । षण्मासोपरि द्विवर्षाभ्यन्तरे अकृतचूड़मरणे पञ्चाहः । तत्रापि कृतचूड़मरणे द्वादशाहः । द्विवर्षोपरि षड्वर्षाभ्यन्तरे मरणे द्वादशाहः । अत्रापि कृतोद्वाहेऽपि मासो यत्र श्रूयते षड्वर्षोपरिमासः ॥ * ॥ "बालकजननान्तरकर्त्तव्यमाह वैद्यके । यथा,—"अथबालं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाययेत् । पीलुबदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत् । मूर्द्ध्नि चास्याहरहस्तैलपिचुमवचारयेत् । धूपयेच्चैनं रक्षोघ्नैर्धूपैः । रक्षोघ्नानि चास्य पाणिपादशिरोग्रीवास्ववसृजेत् तिलातसीसर्षपकणांश्चात्र प्रकिरेत् । अधिष्ठाने चाग्निं प्रज्वालयेत् । व्रणितोपासनीयञ्चावेक्षेत ॥ ततो दशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां यदभिप्रेतं नक्षत्रनाम वा ॥
ततो यथावर्णं धात्रीमुपेयान्मध्यमप्रमाणां मध्यमवयसमरोगां शीलवतीमचपलामलोलुपामकृशामस्थूलां प्रसन्नक्षीरामलम्बौष्ठीमलम्बोर्द्धस्तनीमव्यङ्गामव्यसनिनीं जीववत्सां दोग्ध्रीं वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतो भूयिष्ठैश्च गुणैरन्वितां श्यामामारोग्यबलवृद्धये बालस्य । तस्योर्द्धस्तनो करालं कुर्य्यात् । लम्बस्तनी नासिकामुखं छादयित्वा मरणमापादयेत् । ततः प्रशस्तायां तिथौ शिरःस्नातमहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं धौतमीषत्परिस्रुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ।
चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिणः ।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा ॥
अतोऽन्यथा नानास्तन्योपयोगस्यासात्म्यात् व्याधिजन्म भवति । अपरिस्रुतेऽप्यतिस्तब्धस्तन्यपूर्णस्तनपानादुत्क्षुहितस्रोतसः शिशोः कासश्वासवमीप्रादुर्भावः । तस्मादेवं विधात् स्तन्यं न पाययेत् ॥"
"बालं पुनर्गात्रसुखं गृह्णीयान्न चैनं तर्ज्जयेत् सहसा न प्रतिबोधयेद्वित्रासभयात् सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवेशयेत् कौब्जभयात् नित्यञ्चैनमनुवर्त्तेत प्रियशतैरजिघांसुः । एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति । वातातपविद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च बालं रक्षेत् ।
नाशुचौ विसृजेद्बालं नाकाशे विषमे न च ।
नोष्ममारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा ।
दद्यादास्तन्यपर्य्याप्तेर्बालानां वीक्ष्यमात्रया ॥"
इति सुश्रुते शारीरस्थाने दशमेऽध्याये ॥)

वा(वा)लः, पुं, (बलति मस्तकं रक्षति संवृणोतीति वा । बल + णः ।) शिरोभवाच्छादनविशेषः । चुल इति भाषा । तत्पर्य्यायः । चिकुरः २ कचः ३ केशः ४ कुन्तलः ५ कुञ्जरः ६ शिरोरुहः ७ शिरसिरुट् ८ शिरोरुट् ९ शिरजः १० । इति शब्दरत्नावली ॥ घोटकशिशुः । तत्पर्य्यायः । किशोरः २ । इत्यमरः ॥ अश्ववालधिः । करिवालधिः । नारिकेलः । इति मेदिनी । ले, ३९ ॥ पञ्चवर्षीयहस्ती । यथा,—
"पञ्चवर्षो गजो बालः स्यात् पोतो दशवर्षकः ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । ९ । १० । ६ ।
"यो लोकवीरसमितौ धनुरैशमुग्रं
सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं
सज्यीकृतं नृप ! विकृष्य बभञ्ज मध्ये ॥")
पुच्छः । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।
"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्बालप्रियत्वं शिथिलं चमर्य्यः ॥")
मत्स्यविशेषः । इति शब्दचन्द्रिका ॥

बालकं, क्ली, (बाल + स्वार्थे कन् ।) ह्रीवेरम् । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"बालकं शीतलं रूक्षं लघुदीपनपाचनम् ।
हृल्लासारुचिवीसर्पकुष्ठरोगामातिसारजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अङ्गुलीयकम् । मारिहार्य्यम् । इति विश्वः ॥

बालकः, पुं, (बाल एव । बाल + स्वार्थे कन् ।) शिशुः । (यथा, मार्कण्डेये । ५१ । ५३ ।
"भूतानां मातृभिः सार्द्धं बालकानाञ्च शान्तये ॥")
अश्वः । हयवालधिः । हस्तिवालधिः । अङ्गुरीयकम् । ह्रीवेरम् । वलयम् । इति मेदिनी । के, १५७ ॥ केशः । इति विश्वः ॥ * ॥

बालाशौचं यथा,—

"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया॥
यदि गर्भो विपद्येत स्रवते वापि योषितः।
यावन्मासान् स्थितो गर्भस्तावद्दिनानि सूतकम्॥
आ नामकरणात् सद्य आ चूडान्तादहर्निशम्।
आ व्रतस्यापि रात्रेण तदूर्द्ध्वं दशभिर्दिनैः॥"

इति गारुडे १०६ अध्यायः॥

बालकस्य रक्षा यथा,—

"आदाय भ्रान्त्या संत्रस्ता यशोदापि ततो द्विज!।
गोपुच्छभ्रामणेनाशु बालदोषमपाकरोत्॥
गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके।
कृष्णस्य प्रददौ रक्षां कुर्व्वन्निदमुदीरयन्॥

नन्द उवाच।

रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत्।
वराहरूपधृक् देवः स त्वां रक्षतु केशवः॥
नखाङ्कुरविनिर्भिन्नवैरिवक्षःस्थलो विभुः।
नृसिंहरूपी सर्व्वत्र स त्वां रक्षतु केशवः॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभूत्।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः।
गुह्यं सजठरं विष्णुर्जङ्घापादं जनार्द्दनः॥
मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः॥
शार्ङ्गखड्गगदाचक्रशङ्खनादहताः क्षयम्।
गच्छन्तु प्रेतकुष्माण्डा राक्षसा ये तवाहिताः॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः॥
एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः।
शायितः शकटास्याधो बालपर्य्यङ्किकातले॥"

इति विष्णुपुराणे। ५। ५॥

बालकप्रिया, स्त्री, (बालकानां प्रिया।) इन्द्रवारुणी। कदली। इति राजनिर्घण्टः॥

बालकृमिः, पुं, (बालस्य केशस्य कृमिः।) केशकीटः। इति जटाधरः॥

बालक्रीडनं, क्ली, (बालस्य क्रीडनम्। क्रीड्+भावे ल्युट्।) बालखेला। यथा,—

"बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि प्रक्रता॥"

इत्यादि महानाटकम्॥

बालक्रीडनकः, पुं, (बालानां क्रीडनकः क्रीडनद्रव्यम्। बालका हि कपर्द्दकेन क्रीडन्तीति प्रसिद्धेस्तथात्वम्।) कपर्द्दकः। इति राजनिर्घण्टः॥

बालखिल्यः, पुं, बालखिल्यमुनिः। यथा,—

"विधिना निर्म्मिता पूर्व्वं वेदी परमपावनी।
अग्निवेश्यादिमुनयो बालखिल्यादयः स्थिताः॥"

इति वृहद्रामायणे चित्रकूटमाहात्म्ये १ सर्गः॥

(बालखिल्यास्तु अङ्गुष्ठपरिमिताः षष्टिसहस्रसंख्यकाः। यथा, मार्कण्डेये। ५२। २४।

"क्रतोश्च सन्नतिर्भार्य्या बालखिल्यानसूयत।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम्॥"

अङ्गुष्ठपरिमितमुक्तमेतेषान्देहपरिमाणम्। यथा, महाभारते। १। ३१। ८—९।

"अथापश्यदृषीन् ह्रस्वान् अङ्गुष्ठोदरवर्ष्मणः।
पलाशवृन्तिकामेकां सहितान् वहतः पथि॥
सीदमानान् मन्दबलान् गोष्पदे संप्लुतोदके॥")

बालगर्भिणी, स्त्री, प्रथमगर्भवती गौः। तत्पर्य्यायः। प्रष्ठौही २। इत्यमरः। २।९।७०॥ पलोक्नी ३। इति जटाधरः॥ बालगर्भवती ४। इति शब्दरत्नावली॥

बालगोपालः, पुं, (बालः शिशुमूर्त्तिधरो गोपालः।) श्रीकृष्णमूर्त्तिविशेषः। यथा,—

"क्षीरपयोनिधिष्टनिवासं
हास्यकटाक्षजवंशिनिनादम्।
श्यामलसुन्दरनृत्यविलासं
तं प्रणमामि च बालगोपालम्॥"

इति नारदपञ्चरात्रे गोपालाष्टकम्॥

बालग्रहः, पुं, (बालानां बालकानां ग्रहः।) बालकहन्तृग्रहविशेषः। (यथा, मार्कण्डेये। ६२। २७।

"बालग्रहाभिभूतानां बालानां शान्तिकारकम्॥")

एतेषां विवरणम्। यथा,—

"बालग्रहा अनाचारात् पीडयन्ति शिशुं यतः।
तस्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः॥"

अथ बालग्रहाणां नामान्याह।

"स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च।
शकुनी रेवती चैव पूतना गन्धपूतना॥
पूतना शीतपूर्व्वा च तथैव मुखमण्डिका।
नवमो नैगमेयश्च प्रोक्ता बालग्रहा अमी॥"

अथ ग्रहाणामुत्पत्तिमाह।

"नवस्कन्दादयः प्रोक्ता बालानां ये ग्रहा अमी।
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः॥
एते स्कन्दस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः।
सृष्टाः शरवणस्थस्य रक्षितस्य स्वतेजसा॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा।
बिभर्त्ति चापरां संज्ञां कुमार इति संग्रहः॥"

अयं हि कार्त्तिकेयादन्यः।

"स्कन्दापस्मारसंज्ञो यः सोऽग्निना तत्समद्युतिः।
स च स्कन्दसखो नाम्ना विशाख इति चोच्यते॥
ग्रहाः स्त्रीविग्रहा ये ते नानारूपाः प्रकीर्त्तिताः।
देवानां कृत्तिकानां ते भागा राजसतामसाः॥
नैगमेयस्तु पार्व्वत्या सृष्टो मेषाननो ग्रहः।
कुमारस्य हि देवस्य गुहस्यात्मसमोऽस्ति वै॥
ततो भगवति स्कन्दे सुरसेनापतौ कृते।
उपतस्थुर्ग्रहा ह्येते दीप्तशक्तिधरं गुहम्॥
ऊचुः प्राञ्जलयश्चैनं वृत्तिर्नो दीयतामिति।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत्।
तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत्॥
परस्परोपकारेण वर्त्तते धार्य्यते तथा।
देवा नरान् प्रीणयन्ति तिर्य्यग्योनींस्तथैव च॥
यथाकालं प्रवृत्तास्तु उष्णवर्षाहिमानिलैः।
इज्याञ्जलिनमस्कारैर्जपहोमैस्तथैव च॥
सम्यक् प्रयुक्तैश्च नराः प्रीणयन्त्यपि देवताः।
भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते॥
तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति॥"

अथ बालग्रहाणां बालग्रहणकारणमाह।

"कुलेषु येषु नेज्यन्ते देवाः पितर एव च।
ब्राह्मणाः साधवो वापि गुरवोऽतिथयस्तथा॥
निवृत्तशौचाचारेषु तथा कृतसितवर्णिषु।
निवृत्तभिक्षावलिषु भग्नकांस्यगृहेषु च॥
गृहेषु तेषु बालांस्तान् ग्रहा हिंसत्यशङ्किताः।
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति॥
एवं ग्रहाः समुत्पन्ना बालान् हिंसन्ति चाप्यथ।
ग्रहोपसृष्टा बालाः स्युर्दुश्चिकित्स्यतमास्ततः॥"

अथ सामान्यग्रहजुष्टानां बालानां लक्षणान्याह।

"क्षणादुद्विजते बालः क्षणात्त्रस्यति रोदिति।
नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च॥
ऊर्द्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते।
भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति चाप्यसृक्॥
क्षामोऽति निशि जागर्त्ति शूनाङ्गो भिन्नविट्स्वरः।
मत्स्यशोणितगन्धश्च न चाश्नाति यथा पुरा॥
दुर्ब्बलो मलिनाङ्गश्च नष्टसंज्ञोऽपि जायते।
सामान्यग्रहजुष्टस्य लक्षणं समुदाहृतम्॥"

अथ विशिष्टग्रहजुष्टानां लक्षणान्याह।

"स्रस्ताङ्गः क्षतजसगन्धिकस्तनद्विट्-
वक्रास्यो हतचलितैकपक्ष्मनेत्रः।
उद्विग्नः सललितचक्षुरल्परोदी
स्कन्दार्त्तो भवति च गाढमुष्टिवर्च्चाः॥
निःसंज्ञो भवति पुनर्लभेत संज्ञां
संरब्धः करचरणैश्च नृत्यतीव।
विण्मूत्रे सृजति विनद्य जृम्भमाणः
फेनं वा सृजति च तत्सखाभिजुष्टः॥"

तत्सखाभिजुष्टः स्कन्दापस्मारयुक्तः।

"स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
संस्रावव्रणपरिपीडितः समन्तात्।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या॥
रक्तास्यो हरितमलोऽतिपाण्डुदेहः
श्यावो वा ज्वरमुखपाकवेदनार्त्तः।
गृह्णातिव्यथिततनुश्च कर्णनासं
रेवत्या भृशमभिपीडितः कुमारः॥
स्रस्ताङ्गः स्वपिति न वासरे न रात्रौ
विड्भिन्नं विसृजति काकतुल्याङ्गगन्धिः।
छर्द्द्यार्त्तो हृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः॥
यो द्वेष्टि स्तनमपि न क्वाचिद्दिवा-
चर्द्दीभिर्ज्वरसहिताभिरर्द्द्यमानः।
दुर्व्वर्णः सततमथापि योऽस्रगन्धि-
स्तं ब्रूयाद्भिषगथ गन्धपूतनार्त्तम्॥
आक्रन्दन् परिचकितः सुवेपमानः
संलीनो भवति यथान्त्रकूजयुक्तः।

स्रस्ताङ्गो भृशमतिसार्य्यते च यो वै
तं ब्रूयाद्भिषगथ शीतपूतनार्त्तम् ॥
म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो
बह्वाशी कलुषशिरावृतोदरो यः ।
स ज्ञेयः शिशुरथ रक्तमक्षिकार्त्तः
सोद्वेगो भवति च मूत्रतुल्यगन्धिः ॥
यः फेनं वमति विनम्यते च मध्ये
सोद्विग्नो विलपति चोर्द्धमीक्षमाणः ।
कूजेच्च प्रततमथो वसासगन्धि-
र्निःसंज्ञो भवति स नैगमेयजुष्टः ॥"
अथ सामान्यग्रहजुष्टानां चिकित्सामाह ।
सहासुक्ततिकोदीच्यक्वाथस्नानं ग्रहापहम् ।
सहा माषपर्णी ।
"सप्तच्छदामयनिशाचन्दनैश्चानुलेपयेत् ।
सर्पत्वक् लशुनं मूर्व्वा सर्षपारिष्टपल्लवाः ॥
विडालविड्वालोममेषशृङ्गी वचा मधु ।
धूपः शिशोर्ज्वरघ्नोऽयमशेषग्रहनाशनः ॥
बालशान्त्यष्टकर्म्माणि कार्य्याणि ग्रहशान्तये ।
वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ॥
सारिवा सैन्धवञ्चैव पिप्पली घृतमष्टमम् ।
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्दिने दिने ॥
दृढ़स्मृतिः क्षिप्रमेधा कुमारो बुद्धिमान् भवेत् ।
न पिशाचा न रक्षांसि न भूता न च मातरः ॥
न भवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥"
अष्टमङ्गलं घृतम् ॥
अथ विशिष्टग्रहजुष्टानां चिकित्सामाह ।
"सोमवल्लीमिन्द्रवृक्षं वन्दाकं विषजं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"
तत्र स्कन्दग्रहजुष्टस्य चिकित्सामाह ।
"स्कन्दग्रहोपसृष्टस्य कुमारस्य प्रशस्यते ।
वातघ्नद्रुमपत्राणां क्वाथेन परिषेचनम् ॥
देवदारुणि रास्नायां मधुरेषु गणेषु च ।
सिद्धं सर्पिश्च सक्षीरं पातुमस्मै प्रदापयेत् ॥
सर्षपाः सर्पनिर्म्मोको वचा काकादनी घृतम् ।
उष्ट्राजाविगवाञ्चापि रोमाण्युद्धूपनं भवेत् ॥"
काकादनी श्वेतगुञ्जा ।
सोमवल्लीमिन्द्रवृक्षं हन्ताकं विषजं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"
सोमवल्ली सोमलता । इन्द्रवृक्षं ककुभम् ।
मृगादनी इन्द्रवारुणी ।

रक्तानि माल्यानि तथा पताका
रक्तांश्च गन्धान् विविधांश्च भक्ष्यान् ।
घृतञ्च देवाय बलिं निवेद्य
सकुक्कुटं स्कन्दग्रहे निधाय ॥
स्नानं त्रिरात्रं निशि चत्वरेषु
कुर्य्यात् परं शालियवैर्निवेद्य ।
गायत्रियुक्ताभिरथाद्भिरग्निं
प्रज्वालयेदाहुतिभिश्च धीमान् ॥

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ।
अहन्यहनि कर्त्तव्या याभिरद्भिरतन्द्रितैः ॥
तपसां तेजसाञ्चैव यशसां वपुषां तथा ।
निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥
ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु ॥
रक्तमाल्याम्बरधरो रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चसूदनः ॥"
अथ स्कन्दापस्मारग्रहजुष्टस्य चिकित्सामाह ।
"बिल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेकः प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥"
गोलोमी श्वेता दूर्व्वा । सुरसादिगणो यथा,—
"सुरसा श्वेतसुरसा पाठा फञ्जी फणिज्झकः ।
सौगन्धिकं भूस्तृणको राजिका श्वेतबर्व्वरी ॥
कट्फलं खरपुष्पा च कासमर्द्दश्च शल्लकी ।
विडङ्गमथ निर्गुण्डी कर्णिकार उडुम्बरः ॥
बला च काकमाची च तथा च विषमुष्टिका ।
कफक्रिमिहरः ख्यातः सुरसादिरयं गणः ॥"
सुरसा कृष्णतुलसी । श्वेतसुरसा श्वेततुलसी । फञ्जी भार्गी । फणिज्झकः मरुवकः । सौगन्धिकं कह्लारम् । भूस्तृणकः सुगन्धतृणम् । खरपुष्पा वर्व्वरी । कासमर्द्दः कसौंदी । विषमुष्टिका मकाईति ॥ * ॥
"अष्टमूत्रविपक्वञ्च तैलमभ्यञ्जने हितम् ।"
मूत्राष्टकमाह ।
"गोजाविमहिषाश्वानां खरोष्ट्रकरिणान्तथा ।
मूत्राष्टकमिति ख्यातं सर्व्वशास्त्रेषु सम्मतम् ॥
क्षीरीवृक्षकषायेण काकोल्यादिगणेन च ।
विपक्तव्यं घृतं पश्चात् पातव्यं पयसा सह ॥
काकोल्यादिगणेन कल्कीकृतेन तैलं पक्तव्यम् ।
काकोल्यादिगणो यथा,—
"काकोली क्षीरकाकोली जीवकर्षभकस्तथा ।
ऋद्धिर्वृद्धिस्तथा मेदा महामेदा गुडूचिका ॥
मुद्गपर्णी माषपर्णी पद्मकं वंशरोचना ।
शृङ्गी प्रपौण्डरीकञ्च जीवन्ती मधुयष्टिका ॥
द्राक्षा चेति गणो नाम्ना काकोल्यादिरुदीरितः ।
स्तन्यकृद्बृंहणो वृष्यः पित्तरक्तानिलापहः ।
उन्मादनं वचा हिङ्गुयुक्तमत्र प्रकीर्त्तितम् ॥
गृध्रोलूकपुरीषाणि केशा हस्तिनखो घृतम् ।
वृषभस्य च रोमाणि योज्यान्युद्धूपने सदा ॥
अनन्तां कुक्कुटीं बिम्बीं मर्कटीञ्चापि धारयेत ॥"
अनन्ता यवासा इति लोके । कुक्कुटी शाल्मली ।
"पक्वान्यामानि मांसानि प्रसन्नं रुधिरं पयः ।
मुद्गौदनं निवेद्याथ स्कन्दापस्मारिणे वटे ॥"
वटे वटतले बलिं निवेदयेदित्यन्वयः ।
तेन स्कन्दापस्मारिणा स्नानं कारयेदित्यन्वयः ।
"चतुष्पथे कारयेच्च स्नानं तेन ततः पठेत् ।
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ।
विशाखः स शिशोरस्य शिवायास्तु शुभाननः ॥"
अथ शकुनीग्रहजुष्टस्य चिकित्सामाह ।
"शकुनीग्रहजुष्टस्य कार्य्यं वैद्येन जानता ।
वेतसाम्रकपित्थानां क्वाथेन परिषेचनम् ॥
ह्रीवेरमधुकोशीरसारिवोत्पलपद्मकैः ।
लोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम् ॥"
प्रदिहेत् लिम्पेत् । क्रमविहितत्वात् ।
"स्कन्दग्रहोक्ता धूपाश्च हिता अत्र भवन्ति हि ।
स्कन्दापस्मारशमनं घृतमत्रापि पूजितम् ॥
शतावरी मृगेर्व्वारुनागदन्तीनिदिग्धिकाः ।
लक्ष्मणां सहदेवाञ्च बृहतीञ्चापि धारयेत् ॥"
मृगेर्व्वारुः बड़ी इन्द्रवारुणी । नागदन्ती नागदुनी इति लोके प्रसिद्धा ।
"तिलतण्डुलकं माल्यं हरितालं मनःशिलाम् ।
बलिरेष विकुम्भेषु निवेद्यो नियतात्मना ॥
निकटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ।
श्वेतशिरीषगन्धाढ्यकुष्ठगुग्गुलुसर्षपैः ॥
सिद्धमभ्यञ्जने तैलं धार्य्यं पूर्व्वमेव तु ।
शकुनीग्रहशान्त्यर्थं प्रदेहं कारयेद्धितम् ॥
कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ।
निकुम्भोक्तेन विधिना स्नपयेत्तं ततः पठेत् ॥
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता ।
अयोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु ॥
दुर्द्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु ॥" * ॥
अथ रेवतीग्रहजुष्टस्य चिकित्सामाह ।
"अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा ।
सहा विदारी चैतासां क्वाथेन परिषेचनम् ॥
अजशृङ्गी मेढ़ाशृङ्गी । सहा सेवतीपुष्पजातिः ।
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसे तथा ।
पलङ्कषायां नलदे तथा गौरकदम्बके ॥
सर्ज्जरसः रालः पलङ्कषा गुग्गुलुः । नलदं लामज्जकसुशीरवत्पीतच्छवि । गौरकदम्बकः हारिद्रकः । हरदुया कदम्ब इति लोके ।
धवाश्वकर्णककुभशल्लकीतिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः ॥
अश्वकर्णः शाखु इति लोके प्रसिद्धः ।
कुलत्थाः शङ्खचूर्णञ्च प्रदेहः सालगन्धिकः ।
गृध्रोलूकपुरीषाणि यवान् यवफले घृतम् ॥
सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः ॥
यवफलो वंशाङ्कुरः ।
शुक्लाः सुमनसो लाजाः पयःशाल्योदनं दधि ।
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ॥
गोतीर्थे गोष्ठे ।
स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक् ।
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ॥
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ।
उपासते यां सततं देव्यो विविधभूषणाः ॥
लम्बा करालाविनता तथैव बहुपुत्रिका ।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु ॥*॥
अथ पूतनाग्रहजुष्टस्य चिकित्सामाह ।
कपोतवङ्का श्योनाको वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्ब्बालानां परिषेचने ॥
कपोतवङ्का ब्राह्मी इति लोके । पारिभद्रो निम्बः । आस्फोता अपराजिता ।
नता पयस्या गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थं कल्क इष्यते ॥

वचा वयस्था पूतना चीरविदारी। गोलोमी श्वेतदूर्व्वा।
हितं घृतं तगरश्चीर्य्या संसिद्धं मधुकेऽपि च।
कुष्ठतालीशखदिराः स्यन्दनोऽर्जुन एव च ॥
चन्दनः ककुभश्चापि सप्ताश्वो वदरस्य च।
कुक्कुटास्थि घृतञ्चापि धूपनं सह सर्षपैः ॥
स्यन्दनः स्यन्दन इत्येव नाम्ना प्रसिद्धः।
काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च धारयेत्।
काकादनी श्वेतगुञ्जा। चित्रफला इन्द्रचिर्भिटी-वारुणी।
मत्स्यौदनं बलिं दद्यात् कृसरं पललं तथा।
शरावसंपुटं कृत्वा तस्मै शून्ये गृहे भिषक्।
उत्सृष्टात्राभिषिक्तस्य शिशोः स्नपनमिष्यते ॥
कुष्ठतालीसखदिरं चन्दनं स्यन्दनं तथा।
देवदारु वचा हिङ्गु कुष्ठं गिरिकदम्बकः।
एला हरेणवश्चापि योज्या उद्वर्त्तने सदा ॥
मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा।
शून्यागाराश्रया देवी दारकं पातु पूतना ॥*॥
अथ गन्धपूतनाग्रहजुष्टस्य चिकित्सामाह।
तिक्तद्रुमाणां पत्रेषु क्वाथं कार्य्योऽभिषेचने।
तिक्तद्रुमानाह।
निम्बः पटोलः क्षुद्रा च गुडूची वासकस्तथा।
विसर्पकुष्ठनुत् ख्यातो गणोऽयं पञ्चतिक्तकः ॥
पिप्पली पिप्पलीमूलं वर्गो मधुरको मधु।
शालपर्णी बृहत्यौ च घृतार्थं सममाहरेत् ॥
सर्व्वगन्धैः प्रदेहश्च गात्रे चाच्छोऽथ शीतलैः ॥
सर्व्वगन्धैः कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनैः।
अस्त्योस्तु शीतलैः चन्दनकर्पूरैः न तु कस्तूरी-कुङ्कुमागुरुभिस्तेषामुष्णत्वात्।
पुराणं कौक्कुटं केशचर्म्म सर्पभवन्तथा।
जीर्णञ्चाभीक्ष्णशो वासो धूपनार्थोपकल्पयेत् ॥
कुक्कुटीं मर्कटीं बिम्बीमनन्ताञ्चापि धारयेत्।
मांसमामं तथा पक्वं शोणितञ्च चतुष्पथे।
निवेद्यमन्तश्च गृहे शिशोः स्नपनमिष्यते ॥
कराला पिङ्गला मुक्ता कषायाम्बरसंवृता।
देवी बालमिमं प्रीता रक्ष त्वं गन्धपूतने ॥"*॥
अथ शीतपूतनाग्रहजुष्टस्य चिकित्सामाह।
गोमूत्रं वस्तमूत्रञ्च मुस्ताश्चामरदारु च।
कुष्ठञ्च सर्व्वगन्धांश्च तैलार्थमवधारयेत् ॥
सर्व्वगन्धान् चन्दनादीन्।
रोहिणीनिम्बखदिरपलाशककुभत्वचः।
निःक्वाथ्य तन्निर्निःक्वाथे सक्षीरं विपचेद्धृतम् ॥
गृध्रोलूकपुरीषाणि वस्तगन्धा महित्वचम्।
निम्बपत्राणि च तथा धूपनार्थं समाहरेत् ॥
धारयेदपि गुञ्जाञ्च वलां काकादनीं तथा।
मद्यां मुद्गौदनञ्चापि तर्पयेच्छीतपूतनाम् ॥
जलाशयान्ते बालस्य स्नपनञ्चोपदिश्यते।
जलाशयान्ते जलाशयतीरे।
देयश्चैवोपहारो वारुणी रुधिरं तथा ॥
मुद्गौदनाशिनी देवी सुराशोणितपायिनी।
जलाशयरता नित्यं पातु त्वां शीतपूतना ॥"*॥
अथ मुखमण्डिकाग्रहजुष्टस्य चिकित्सामाह।

कपित्थं बिल्वतर्कारीवाशागन्धर्व्वहस्तकाः।
कुबेराक्षी च योज्याः स्युर्बालानां परिषेचने ॥
तर्कारी गणियारि इति लोके। गन्धर्व्वहस्तकः श्वेत एरण्डः। कुबेराक्षी पाङरि इति लोके।
स्वरसैर्भृङ्गराजानां तथैव हयगन्धया।
तैलं वचाञ्च संयोज्य पचेदभ्यञ्जनं शिशोः ॥
भृङ्गराजः भगरा इति लोके।
वचा सर्जरसं कुष्ठं सर्पिश्चोद्धूपने हितम् ॥
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा।
मनःशिलाञ्चोपहरेत् गोष्ठमध्ये बलिन्ततः ॥
पायसं सपुरोडाशं तद्बल्यर्थमुपाहरेत्।
मन्त्रपूताभिरद्भिश्च तथैव स्नपनं हितम् ॥
तत्राभिमन्त्रणमन्त्रमाह।
अलङ्कृता कामवती सुभगा कामरूपिणी।
गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका ॥*॥
अथ नैगमेयग्रहजुष्टस्य चिकित्सामाह।
बिल्वाग्निमन्थपूतीकैः क्वाथः स्यात् परिषेचनम्।
पूतीकः चोराकरञ्ज इति लोके प्रसिद्धः।
प्रियङ्गुशरलानन्ताशतपुष्पाकुटन्नटैः।
पचेत्तैलं सगोमूत्रं दधिमस्त्वम्लकाञ्जिकैः ॥
कुटन्नटं वितुन्नकनाम्नो द्रव्यविशेषस्य त्वक्। गुडतची इति लोके प्रसिद्धा। मुस्तामिति शोणाको वा।
वचां वयस्थां जटिलां गोलोमीं चापि धारयेत्।
वयस्था आमलकी गुडूची वा।
उत्सादनं हितञ्चात्र स्कन्दापस्मारनाशनम् ॥
मर्कटोलूकगृध्राणां पुरीषाणि पितृग्रहे।
धूमः सुप्रजने कार्य्यो बालस्य हितमिच्छता ॥
पितृग्रहे नैगमेयग्रहे।
तिलतण्डुलकं माल्यं भक्ष्यांश्च विविधानपि।
कौमारपितृमेषाय वृक्षमूले निवेदयेत् ॥
मेषाय नैगमेयग्रहाय।
अधस्तात् चीरवृक्षस्य स्नपनञ्चोपदिश्यते ॥
अजाननश्चलाक्षिभ्रुः कामरूपी महायशाः।
बालं पालयिता देवो नैगमेयोऽभिरक्षतु ॥"
इति भावप्रकाशः ॥
(तथास्य लक्षणान्तरं चिकित्सितञ्च यथा,—
"बलिशान्तीष्टकर्म्माणि कार्य्याणि ग्रहशान्तये।
मन्त्रश्चायं प्रयोक्तव्यस्तत्रादौ सर्व्वकामिकः ॥
ओँ नमो भगवते गरुडाय त्र्यम्बकाय सद्यस्त्वर स्तुत स्तुत स्वाहा। ओँ कं खं टं पं शं वैनतेयाय नमः। ओँ ह्रीं हुं चं।
बालदेहप्रमाणेन पुष्पमालान्तु सर्व्वतः।
प्रगृह्य सुचिक्कणाभक्तबलिर्देयस्तु शान्तिकः।
ओँकारी सुवर्णपक्षी बालकं रक्ष रक्ष स्वाहा॥
ओँ नारायणाय नमः ॥"
"प्रथमे दिवसे मासे वर्षे वा गृह्णाति नन्दा नाम मातृका तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। चक्षुरुन्मीलयति गात्रमुद्वेजयति न शेते क्रन्दति स्तन्यं न गृह्णाति। आँतकारश्च भवति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। नद्युभयतटमृत्तिकां गृहीत्वा पुत्त-लिकां कृत्वा शुक्लौदनः शुक्लपुष्पं शुक्लध्वजाः सप्तप्रदीपाः सप्तस्वस्तिकाः सप्तवटकाः। सप्त-सष्कुलिकाः जम्बुलिका गन्धताम्बूलं मत्स्यमांसं सुरामद्यभक्तञ्च पूर्व्वस्यान्दिशि चतुष्पथे मध्याह्ने बलिर्दातव्यः अश्वत्थपत्रं जलकुम्भे निक्षिप्य शान्त्युदकेन स्नापयेत्। रक्षोघ्नविद्यार्थञ्च मेषशृङ्गनिम्बपत्रशिवनिर्म्माल्यैर्वालकं धूपयेत। ओँ नमो नारायणाय अमुकस्य व्याधिं हन हन मुच मुच स्वाहा एवं दिनत्रयं बलिं दत्त्वा चतुर्थे दिवसे ब्राह्मणं भोजयेत्। ततः सम्पद्यते शुभम् ॥
द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दा-नाम मातृका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। चक्षुरुन्मीलयति गात्रमुद्वेजयति न शेते क्रन्दति स्तन्यं न गृह्णाति आँतकारश्च भवति।
बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्।
तण्डुलं हस्तपृष्ठैकं गृहीत्वा दधिगुडघृतमिश्रितं शरावैकं गन्धताम्बूलं पीतपुष्पं पीतसप्त-ध्वजाः। चत्वारः प्रदीपाः दशस्वस्तिकाः मत्स्यमांससुराक्षिलचूर्णञ्च पश्चिमस्यान्दिशि चतुष्पथे बलिर्दातव्यः। दिनानि त्रीणि विसर्ज्यं ततः शान्त्युदकेन स्नापयेत्। शिवनिर्म्माल्य-विद्यार्थमार्ज्जाररोम उशीरवालकघृतैर्धूपं दद्यात्। ओँ नमो नारायणाय अमुकस्य व्याधिं हन हन मुच मुच ह्रीं फट् स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।
तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतनानाम-मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति स्तन्यं न गृह्णाति मुष्टिं बध्नाति क्रन्दति ऊर्द्धं निरीक्षते। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा रक्तचन्दनं गन्धताम्बूलं रक्तसप्तध्वजाः। सप्त-प्रदीपाः सप्तस्वस्तिकाः। मत्स्यमांससुराभक्तं दक्षिणस्यान्दिशि अपराह्णे चतुष्पथे बलि-र्दातव्यः। शिवनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेष शृङ्गैर्दिनत्रयं धूपयेत्। ओँ नमो नारायणाय अमुकस्य व्याधिं हन हन मुच मुच स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्प-द्यते शुभम् ॥
चतुर्थे दिवसे मासे वर्षे वा गृह्णाति मुख-मुण्डिकानाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। ग्रीवां नामयति चक्षुरु-न्मीलयति स्तन्यं न गृह्णाति रोदिति स्वपिति मुष्टिं बध्नाति बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा उत्पलपुष्पं गन्धं ताम्बूलं दशध्वजाः दीपाश्चत्वारः। त्रयोदश स्वस्तिकाः मत्स्य-मांससुरामद्यभक्तञ्च उत्तरस्यां दिशि अपराह्णे बलिर्देयः चतुष्पथे। ओँ नमो नारायणाय अमु-कस्य व्याधिं हन हन मथ मथ स्वाहा। चतुर्थे

दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कटपूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति स्तन्यं न गृह्णाति मुष्टिं बध्नाति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं शुक्लपुष्पं शुक्लौदनं पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च वटकाः ऐशान्यां दिशि बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्यसर्पनिर्म्मोक गुग्गुलु निम्बपत्रबालकष्टतैर्धूपं दद्यात् । ओँ नमो नारायणाय असुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥

षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिकानाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रभेदं दर्शयति दिवारात्रावुत्थानं भवति । ऊर्द्ध्वं निरीक्षते । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पिष्टकेन पुत्तलिकां कृत्वा शुक्लपीतरक्तपुष्पगन्धताम्बूलानि दश दीपाः । दश पीतध्वजाः दश स्वस्तिकाः दश वटकाः । पौरजम्बुडिकाः । मत्स्यमांससुरा आग्नेय्यान्दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्यरसोनगुग्गुलुसर्पनिर्म्मोकनिम्बपत्रघृतैर्धूपं दद्यात् । ओँ नमो नारायणाय असुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥

सप्तमे दिवसे मासे वर्षे वा गृह्णाति शुष्करेवती नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति मुष्टिं बध्नाति रोदिति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । रक्तशुक्लपुष्पं गन्धताम्बूलरक्तौदनं हरिद्राचयोदश स्वस्तिकाः चयोदश शष्कुलिका जम्बुडिका मत्स्यमांससुराः चयोदश ध्वजाः पञ्च प्रदीपाः । पश्चिमस्यान्दिशि ग्रामनिष्क्रान्तेऽपराह्णे वृक्षमाश्रित्य बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । गुग्गुलुमेषशृङ्गसर्षपोशीर बालकघृतैर्धूपन्दद्यात् । ओँ नमो नारायणाय दीप्ततेजसे हन हन मुच मुच स्वाहा ॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

अष्टमे दिवसे मासे वर्षे वा गृह्णाति अर्य्यका नाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । शवगन्धः पूतिगन्धश्च जायते । आहारं न गृह्णाति गात्रमुद्वेजयति । बलिन्तस्य प्रवक्ष्यामि ततः सम्पद्यते शुभम् । रक्तपीतध्वजाः चन्दनं पीतपुष्पं शष्कुल्यः पर्पटिका मत्स्यमांससुराः जम्बुडिकाः प्रत्यूषे बलिन्दद्यात् ॥ ओँ नमो नारायणाय त्रैलोक्यविक्रमणाय चतुर्द्दिशामोक्षणाय व्याधिं हन हन मुच मुच ज्वल ज्वल दह दह ओँ ह्रौं फट् स्वाहा ॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

नवमे दिवसे मासे वर्षे वा गृह्णाति सूतिका नाम मातृका । तया गृहीतमात्रस्य प्रथमं भवति ज्वरः । नित्यं छर्द्दयति गात्रभेदं दर्शयति मुष्टिं बध्नाति । निद्रातितरां स्याद्बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां निर्म्माय शुक्लवस्त्रेण वेष्टयेत् । शुक्लपुष्पं शुक्लौदनं गन्धताम्बूलं शुक्लाः चयोदश ध्वजाः चयोदश प्रदीपाः चयोदश स्वस्तिकाः चयोदश मत्स्यमांससुराः । उत्तरदिग्विभागे ग्रामनिष्क्राशे बलिं दापयेत् । शान्त्युदकेन स्नापयेत् । गुग्गुलुनिम्बपत्रगोधूमगोशृङ्गश्वेतसर्षपघृतैर्धूपं दद्यात् । ओँ नमो नारायणाय चतुर्भुजाय हन हन मुच मुच स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम् ।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति आँत्कारं करोति पुरीषमूत्रञ्च बहु भवेत् । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पारावारस्य मृत्तिकया पुत्तलिकां कृत्वा रक्तचन्दनगन्धताम्बूलादिभिर्भूषयित्वा पञ्च वर्णाः पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च स्वस्तिकाः पञ्च पुत्तलिका मत्स्यमांससुराः वायव्यान्दिशि बलिन्दद्यात् । काकविष्ठागोमांसगोशृङ्गरसोनमार्ज्जाररोमनिम्बपत्रघृतैर्धूपयेत् । ओँ नमो नारायणाय पूर्णितहस्ताय हन हन मुच मुच स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम् ॥

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मातृका । तया गृहीतमात्रस्य प्रथमं भवति ज्वरः । आहारं न गृह्णाति । ऊर्द्ध्वदृष्टिर्भवति गात्रभङ्गश्च भवति आँत्कारश्च भवति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तां तस्या मुखं दुग्धेन सिञ्चेत् पीतपुष्पं गन्धताम्बूलं सप्त प्रदीपा अष्टौ वटका अष्टौ शष्कुलिका अष्टौ पुरिका मत्स्यमांससुराः पूर्व्वस्यान्दिशि बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्य गुग्गुलु गोशृङ्गसर्पनिर्म्मोकघृतैर्धूपयेत् । ओँ नमो नारायणाय मुच मुच स्वाहा । चतुर्थे दिवसे विप्रान् भोजयेत्तेन सम्पद्यते शुभम् ॥

द्वादशे दिवसे मासे वर्षे वा यदा गृह्णाति कामुका नाम मातृका । तया गृहीतमात्र स्यादौ जायते ज्वरः । हसित्वा रोदिति अङ्गुल्यातर्ज्जयति क्रामति निःश्वसिति । मुहुर्मुहुश्छर्द्दयति । आहारं न करोति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । चौरेण पुत्तलिकां कृत्वा शुक्लकुसुमं गन्धताम्बूलं शुक्लाः सप्त ध्वजाः । सप्त शष्कुलिकाः ॥ सप्त प्रदीपाः । करम्भेण दधिभक्तेन सर्व्वकर्म्मबलिं दद्यात् शान्त्युदकेन स्नापयेत् । श्वेतसर्षपगुग्गुलुशिवनिर्म्माल्यघृतैर्धूपयेत् । ओँ नमो नारायणाय व्याधिं मुच मुच हन हन स्वाहा । चतुर्थ दिवसे विप्रान् भोजयेत् । ततः सम्पद्यते शुभम् ॥

इति रावणकृतं बालतन्त्रं समाप्तम् ॥

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

बालचर्य्यः, पुं, (बालस्य बालकस्येव चर्य्या यस्य ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥ बालकस्य चरित्रे, स्त्री ॥

बालतनयः, पुं, (बालानि नवीनतपत्राणि तनया इव यस्य ।) खदिरवृक्षः । इत्यमरः ।२।४।४६ ॥ (गुणादयोऽस्य खदिरशब्दे ज्ञातव्याः ॥) बालकपुत्रश्च ॥

बालतन्त्रं, स्त्री, (बालाय बालकरक्षार्थं तन्त्रमुपायः शास्त्रं वा ।) गर्भिणीचर्य्या । तत्पर्य्यायः । कुमारभृत्या २ गर्भिण्यवेक्षणम् ३ । इति त्रिकाण्डशेषः ॥ (अस्य विवरणन्तु सुश्रुते सूत्र स्थाने १ अध्याये । यथा, "शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं वाजीकरणतन्त्रमिति ॥" कौमारभृत्यस्य वा बालतन्त्रस्य लक्षणमाह तत्रैव । "कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम् ॥" बालतन्त्राणि कानि तान्याह तत्रैव ३ अध्याये ।

"नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनम् ।
अपस्मारशकुन्योश्च रेवत्याश्च पुनः पृथक् ॥
पूतनायास्तथान्धाया मण्डिका शीतपूतना ।
नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा ॥
कौमारतन्त्रमित्येतत् शारीरेषु प्रकीर्त्तितम् ॥"

एतेषां विवरणन्तु बालग्रहशब्दे द्रष्टव्यम् ॥)

बालतृणं, स्त्री, (बालं नवजातं तृणम् ।) नवतृणम् । तत्पर्य्यायः । शष्पम् २ । इत्यमरः ।२।४।२६७ ॥ (यथा, रघौ २।२६ श्लोकटीकायां मल्लिनाथः । गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढ़ानि जातानि शष्पाणि बालतृणानि यस्मिन् तत् ॥")

बालदलकः, पुं, (बालानि दलानीव दलानि यस्य । यद्वा बाल इव क्षुद्रं दलं यस्य । ततः स्वार्थे कन् ।) खदिरवृक्षः । इत्यमरटीकायां भरतः ॥

बालधिः, पुं, (बालाः केशाः धीयन्तेऽत्र । बाल+धा+कि ।) केशयुक्तलाङ्गूलम् । इत्यमरः ।२।८।५० ॥ (यथा, किराते । १२ । ४७ ।

"चमरीगणैः शिवबलस्य
बलवति भयेऽप्युपस्थिते ।
वंशविततिषु विषक्तपृथु-
प्रियबालवालधिभिरादधे धृतिः ॥")

बालपत्रः, पुं, (बाल इव क्षुद्रं पत्रं यस्य ।) खदिरवृक्षः । इत्यमरटीकायां भरतः ॥ यवासः । इति राजनिर्घण्टः ॥ (बालं पत्रमिति विग्रहे ।) स्त्री । नूतनपत्रम् ॥ (यथास्य पर्य्यायः ॥

"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बालपत्रकः, पुं, (बालपत्र एव । स्वार्थे कन् ।) खदिरवृक्षः । इति त्रिकाण्डशेषः ॥

बालपाश्या, स्त्री, (बालपाशे केशसमूहे साधुः तत्र साधुरिति यत् ।) सीमन्तिकास्थितस्वर्णादि-रचितपट्टिका । सिंती इति भाषा । तत्-पर्य्यायः । पारितथ्या २ । इत्यमरः ।२।६।१०३॥ बालपाश्यस्थितमणिः । इति तट्टीकायां तर्क-वागीशः ॥

बालपुष्पिका, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः । ततः स्वार्थे कन् कापि अत इत्वम् ।) यूथिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या यूथिकाशब्दे ज्ञेया ॥)

बालपुष्पी, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः सा ।) यूथिका । इति जटाधरः ॥

बालभद्रकः, पुं, (बालेऽपि भद्र इव । ततः स्वार्थे कन् ।) विषभेदः । तत्पर्य्यायः । प्राम्भवः २ । इति शब्दचन्द्रिका ॥

बालभैषज्यं, क्ली, (बालं भैषज्यम् । यद्वा, बालस्य शिशोर्भैषज्यम् ।) रसाञ्जनम् । इति राज-निर्घण्टः ॥ बालकस्यौषधञ्च ॥ (तद्यथा,—
"भैषज्यं पूर्व्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
कार्य्यन्तदेव बालानां मात्रा तस्य कनीयसी ॥"
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

बालभोज्यः, पुं, (बालानां भोज्यः ।) चणकः । इति राजनिर्घण्टः ॥ बालकभक्षणीये, त्रि ॥

बालमूषिका, स्त्री, (बाला क्षुद्रा मूषिका इन्दुरः ।) क्षुद्रमूषिका । छिट्का इन्दुर इति भाषा । तत्पर्य्यायः । गिरिका २ । इत्यमरः ।२।५।१८॥ चिका: ३ वेश्मनकुलः ४ चिक्का ५ । इति शब्द-रत्नावली ॥

बालयज्ञोपवीतकं, क्ली, (बालं यज्ञोपवीतम् । ततः स्वार्थे कन् ।) उपवीतविशेषः । तत्पर्य्यायः । उरस्कटः २ पञ्चवटः ३ । इति त्रिकाण्डशेषः ॥

बालराजं, क्ली, (बालः स्वल्पोऽपि राजते इति । राज + पचाद्यच् ।) वैदूर्य्यम् । इति शब्दरत्ना-वली ॥ बालकश्रेष्ठे, पु ॥

बालरोगः, पुं, (बालस्य रोगः ।) बालकस्य व्याधिः । तस्य निदानं लक्षणानि चाह ।
"धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा ।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदूष्यति ॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः ।
दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः ॥*॥
वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः ।
क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः ॥
स्विन्नो भिन्नमलो बालः कामलापित्तरोगवान् ।
तृष्णालुरुष्णसर्व्वाङ्गः पित्तदुष्टं पयः पिबन् ॥
श्लेष्मदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान् ।
निद्रार्दितो जडः शूनवक्त्राक्षश्छर्द्दनः शिशुः ॥
ज्वराद्या व्याधयः सर्व्वे वर्त्तन्ते महतान्तु ये ।
बालानामपि ते तद्वद्बोद्धव्या भिषगुत्तमैः ॥
बालानामेव ये रोगा भवन्ति महतां न च ।
तालुकण्टकमुख्यांस्तानवधारय यत्नतः ॥"
तत्रादौ तालुकण्टकमाह ।
"तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् ।
तेन तालुप्रदेशस्य निम्नता मूर्द्ध्नि जायते ॥
तालुपातात् स्तनद्वेषः कृच्छ्रात् पानं शकृद्
द्रवम् ।
तृड्छिकण्ठास्यरुजा ग्रीवादुर्द्धरता वमिः ॥"
पानं स्तन्यस्य । शकृद्द्रवं द्रवरूपम् ॥
अथ महापद्ममाह ।
"विसर्पस्तु शिशोः प्राणनाशनः शीर्षवस्तिजः ।
पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः ।
शङ्खाभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत् ॥"
पद्मवर्णः लोहितवर्णः तत्र शीर्षजो विसर्पः शङ्खाभ्यां हृदयं याति हृदयात् गुदं व्रजेत् । एवं वस्तिजो गुदं याति । गुदतो हृदयं हृदया-च्छिरो याति इति बोद्धव्यम् ॥
अथ कुकूणकमाह ।
'कुकूणकः क्षीरदोषात् शिशूनामेव वर्त्मनि ।
जायते तेन तन्नेत्रं कण्डुरं प्रस्रवेन्मुहुः ॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासाप्रघर्षणम् ।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः ॥'
कुकूणकः कोथुया इति लोके ख्यातः ॥ * ॥
अथ तुण्डिगुदपाकमाह ।
'वातेनाध्मापिता नाभिः सरुजा तुण्डिरुच्यते ।
बालस्य गुदपाकाख्यो व्याधिः पित्तेन जायते ॥'
अथाहिपूतनं आह ।
'शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् ।
स्विन्ने वा स्नाप्यमानस्य कण्डू रक्तकफोद्भवा ॥
कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम् ॥
स्विन्ने स्वेदिते ॥ * ॥ अथाजगल्लीमाह ।
स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥'
ग्रथिता गुम्फितेव । मुद्गसन्निभा । मुद्गाकृतिः ॥
अथ पारिगर्भिकमाह ।
'मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि ।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः ॥
युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिकम् ।
रोगं परिभवाख्यञ्च तत्र युञ्ज्यात्तु दीपनम् ॥
पिबन्नपीत्यपिशब्दादपिबन्नपि पारिगर्भिकः ।
अहीड़ी इति लोके ।
परिभवाख्यं परिभवेति नामान्तरम् ॥ * ॥
अथ दन्तोद्भेदकान् रोगानाह ।
'दन्तभेदः शिशोः सर्व्वरोगाणां कारणं स्मृतम् ।
विशेषाज्ज्वरविड्भेदकासच्छर्द्दिशिरोरुजम् ॥
अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते ॥
कारणमित्यन्वयः । पोथक्याः वर्त्मरोगविशेषस्य ॥
अथ बालरोगाणां चिकित्सा ।
'भैषज्यं पूर्व्वमुद्दिष्टं महतां यज्ज्वरादिषु ।
तदेव कार्य्यं बालानां किन्तु दाहादिकं विना ॥'
दाहादिकं विना अग्निदाहादिक्षारवमनविरे-चनशिराव्यधादिकं विना । महाकष्टे चोत्पन्ने वमनविरेकाद्यं दद्यात् । यत आह सुश्रुतः ।
विरेकवस्तिवमनान्यृते कुर्य्याच्च नात्ययादिति ।
अत्ययात् विनाशकारकष्टात् ऋते विना ॥
'त एव दोषा दूष्याश्च ज्वराद्या व्याधयश्च ते ।
अतस्तदेव भैषज्यं मात्रा त्वस्य कनीयसी ॥'
अस्य बालस्य । कनीयसीं मात्रामाह विश्वा-मित्रः ।
'विडङ्गफलमात्रन्तु जातमात्रस्य भेषजम् ।
अनेनैव प्रमाणेन मासि मासि प्रवर्द्धयेत् ॥'
विडङ्गपरिमितं भेषजं चर्व्वयित्वा किंवा कल्की-कृत्याथवावलेहीकृत्य दद्यादित्यर्थः । तन्त्रान्तरे त्वन्यथाभिहितम् ।
'प्रथमे मासि बालाय देया भेषजरक्तिका ।
अवलेह्या तु कर्त्तव्या मधुक्षीरसिताघृतैः ॥
एकैकां वर्द्धयेत्तावद्यावत् संवत्सरो भवेत् ।
तदूर्द्ध्वं माषवृद्धिः स्याद्यावत् षोड़शवत्सराः ॥'
एकैकां रक्तिकाम् तदूर्द्ध्वं वर्षोपरि माषवृद्धिः प्रतिवर्षं पञ्चगुञ्जात्मकस्य माषस्य वृद्धिर्भवति । गुञ्जाः पञ्चाद्यमाषक इत्यमरसिंहः ॥
'ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः ।
ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः ॥'
ततः षोड़शवत्सरोपरि ।
'चूर्णकल्कावलेहानामियं मात्रा प्रकीर्त्तिता ।
कषायस्य पुनः सैव विज्ञातव्या चतुर्गुणा ॥
क्षीरपस्य शिशोर्देयमौषधं क्षीरसर्पिषा ।
धात्र्यास्तु केवलं देयं न क्षीरेणापि सर्पिषा ॥'
क्षीरान्नादस्य पूर्व्ववत् क्षीरसर्पिषा । प्रकारा-न्तरेणौषधपानमाह सुश्रुतः ।
'येषां गदानां ये योगाः प्रवक्ष्यन्ते गदङ्कराः ।
तेषु तत्कल्कसलिप्तौ पाययेत शिशुं स्तनौ ॥'
अवचनानां बालानामभ्यन्तरव्याधिज्ञानोपाय-माह ।
'अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते ।
मुहुर्मुहुः स्पृशति तं स्पृश्यमानेन रोदिति ॥
निर्मीलिताक्षो मूर्द्धस्थे रोगे नो धारयेच्छिरः ।
वस्तिस्थे मूत्रसङ्गार्त्तो क्षुधार्त्तोऽपि गच्छति ॥
विण्मूत्रसङ्गवैवर्ण्यच्छर्द्दाध्मानान्त्रकूजनैः ।
कोष्ठे व्याधीन् विजानीयात् सर्व्वत्रस्थांश्च
रोदनैः ॥'
अत्रादौ ज्वरस्य चिकित्सामाह ।
'सर्व्वे निवार्य्यते बालो स्तन्यं नैव निवार्य्यते ।
मात्रया लङ्घयेद्धात्रीं शिशोरेतद्विलङ्घनम् ॥'
मात्रया लङ्घयेत् लघु भोजयेत् ।
'भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः ।
क्वाथः कोष्णः शिशोरेष निःशेषज्वरनाशनः ॥'
भद्रमुस्तादिक्वाथः सर्व्वज्वरेषु ॥ * ॥
'घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम् ।
शिशोर्ज्वरातिसारघ्नं कासं श्वासं वमिं हरेत् ॥'
अरुणा अतिविषा । चतुर्भद्रिका ज्वराति-सारेषु ॥

'बिल्वञ्च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥'
जलं बाला । बिल्वादिक्वाथावलेहौ । अतीसारेषु ॥
'समङ्गाधातकीलोध्रसारिवाभिः शृतं जलम् ।
दुर्द्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥'
समङ्गा लज्जालुलता । समङ्गादिक्वाथो दुर्द्ध-
रेऽतीसारे ॥ * ॥
'विडङ्गाजमोदा च पिप्पलीतण्डुलानि च ।
एषामालीढ्य चूर्णानि सुखं तप्तेन वारिणा ।
आमे प्रवृत्तेऽतीसारे कुमारं पाययेद्भिषक् ॥'
विडङ्गादिचूर्णमतीसारे ॥ * ॥
'मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥'
मोचरसलज्जालुलताधावेपुष्पकमलकेशरसहि-
तनोला १ तण्डुलकोथुदीतोला १ जलतोला
११ सर्व्वमेकीकृत्य यवागूः साधनीया । मोच-
रसादियवागू रक्तातिसारे ॥ * ॥
'नागरातिविषामुस्तावालकेन्द्रयवैः शृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥'
नागरादिक्वाथः सर्व्वातीसारे ॥ * ॥
'लाजाः सयष्टिमधुका शर्करा क्षौद्रमेव च ।
तण्डुलोदकयोगेन क्षिप्रं हन्ति प्रवाहिकाम् ॥'
लाजादिचूर्णं प्रवाहिकायाम् ॥ * ॥
'रजनी सरलो दारु बृहती गजपिप्पली ।
पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥
दीपनं ग्रहणी हन्ति मारुतार्त्तिसकामलाम् ।
ज्वरातीसारपाण्डुघ्नं बालानां सर्व्वरोगनुत् ॥'
रजन्यादिचूर्णं ग्रहण्यादौ ॥ * ॥
'पौष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
शृतं चूर्णन्तु सक्षौद्रं शिशूनां पञ्चकासजित् ॥'
पौष्करादिचूर्णं कासेषु ॥ * ॥
'पौष्करातिविषावासाकण्टाशृङ्गीरसं लिहन् ।
मधुना मुच्यते बालः कासैः पञ्चभिरुत्थितैः ॥'
मुस्तकादिरसः कासेषु ॥ * ॥
'धात्रीकुसुमसञ्जातकेशरैरवलेहिका ।
मधुना चिरसञ्जातान् शिशोः कासान् व्यपो-
हति ॥'
कासे ॥ * ॥
'धान्यं शर्करया युक्तं तण्डुलोदकसंयुतम् ।
पानमेतत् प्रदातव्यं कासश्वासापहं शिशोः ॥'
धान्यादिपानं कासश्वासयोः ॥ * ॥
'द्राक्षावासाभयाकृष्णाचूर्णं क्षौद्रेण सर्पिषा ।
लीढं श्वासं निहन्त्याशु कासञ्च तमकं तथा ॥'
तमकं श्वासभेदम् । द्राक्षादिचूर्णं कासश्वासयोः ॥
'चूर्णं कटुकरोहिण्या मधुना सह योजयेत् ।
हिक्कां प्रशमयेत् क्षिप्रं छर्द्दिञ्चापि चिरो-
त्थिताम् ॥'
हिक्कायां छर्द्याञ्च ॥ * ॥
'आम्रास्थिलाजसिन्धूत्थं सक्षौद्रं छर्द्दिनुद्भवेत् ॥'
छर्द्याम् ॥ * ॥

'पीतं पीतं वमेद्यस्तु स्तन्यं तं मधुसर्पिषा ।
द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत् ॥'
द्विवार्त्ताकी बृहतीद्वयम् ॥ * ॥
'पञ्चकोलानि पिप्पलीपिप्पली-
मूलचव्यचित्रकनागराणि ॥'
क्षीरच्छर्द्याम् ॥ * ॥
'ह्रीवेरशर्कराक्षौद्रं लीढं तृष्णाहरं परम् ।
घृतेन सिन्धुविश्वैलाहिङ्गुभार्गीरजो लिहन् ॥
आनाहं वातिकं शूलं हन्यात्तोयेन वा शिशुः ॥'
आनाहे वातशूले च ॥ * ॥
'कणोषणसिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः ।
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः ॥'
मूत्राघाते ॥ * ॥
'यदा तु दुर्ब्बलो बालः खादन्नपि च वह्निमान् ।
विदारीकन्दगोधूमयवचूर्णं घृतप्लुतम् ॥
खादयेत्तदनुक्षीरं शृतं समधुशर्करम् ॥'
कार्श्ये ॥ * ॥
'मुस्तकुष्ठाक्षबीजानि भद्रदारुकलिङ्गकाम् ।
पिष्ट्वा तोयेन संलिम्पेल्लेपोऽयं शोथहृच्छिशोः ॥'
शोथे ॥ * ॥
'पटोलपिचुमन्दारिष्टहरिद्राक्वथितं पिबेत् ।
मसूरीवर्म्मविस्फोटज्वराणां शान्तये शिशुः ॥'
मसूरीवर्म्मविस्फोटज्वरेषु ॥ * ॥
'गृहधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्त्याशु सिध्मपामविचर्च्चिकाम् ॥
वारिवातिललोध्राभ्यां कषायो मधुकस्य च ।
संस्राविणि मुखे शस्तो धावनार्थं शिशोः सदा ॥'
मुखस्रावे ॥ * ॥
'अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ॥'
मुखपाके ॥ * ॥
'पिप्पलीत्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतम् ।
बालो रोदिति यस्तस्मै लेढुं दद्यात् सुखा-
वहम् ॥'
रोदने ॥ * ॥
'हरीतकी वचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात् ॥'
तालुकण्टके ॥ * ॥
'फलत्रिकं लोध्रपुनर्नवे च
शृङ्गवेरं बृहतीद्वयञ्च ।
आश्चोतनं शोथहरं सुखोष्णं
कुकूणके कार्य्यमुदाहरन्ति ॥'
कुकूणके ॥ * ॥
'स्नुहिपत्रेणाग्नितप्तेन क्षीरसिक्तेन सोष्मणा ।
स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति ॥'
नाभिशोथे ॥ * ॥
'नाभिपाके निशालोध्रप्रियङ्गुमधुकैः शृतम् ।
तैलमभ्यञ्जने शस्तमेभिर्वाप्यवधूलनम् ॥
दग्धेन च्छागशकृता नाभिपाकेऽवचूर्णनम् ।
लक्तचूर्णैः क्षीरिणां वापि कुर्य्याच्चन्दन-
रञ्जना ॥'
नाभिपाके ॥ * ॥
'गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥
शङ्खयष्ट्यञ्जनैश्चूर्णं शिशूनां गुदपाकनुत् ॥'
अञ्जनं रसाञ्जनम् । गुदपाके ॥ * ॥
'शङ्खसौवीरयष्ट्याह्वैर्लेपो देयोऽहिपूतने ॥'
अहिपूतने ॥ * ॥
'पारिगर्भिकरोगे तु पूज्यते वह्निदीपनम् ॥'
पारिगर्भिके ॥ * ॥
'दन्तपालिन्तु मधुना चूर्णेन प्रतिसारयेत् ।
धातकीपुष्पपिप्पल्योर्धात्रीफलरसेन वा ॥
दन्तोत्थानभवा रोगाः पीडयन्ति न बालकम् ।
जाते दन्ते हि शाम्यन्ति यतस्तद्धेतुका
गदाः ॥'
दन्तोद्भेदजरोगेषु ॥ * ॥
'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥
अर्कपुष्पीमधु घृतं चूर्णितं कनकं वचा ।
सहेमचूर्णं कैटर्य्यं श्वेता दूर्व्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राश्या अर्द्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलपुष्टिकराः स्मृताः ॥'
सावर्णचूर्णम् । चतुर्ष्वपि योगेषु मारित-
सुवर्णचूर्णम् । मत्स्याक्षकः ब्राह्मी इति लोक
वकम इत्येके । अर्कपुष्पी अर्कसदृशपुष्पलता ।
कैटर्य्यं कट्फलम् । श्वेता दूर्व्वाविशेषणं धवेत
केचित् । संवत्सरं यावदेते योगाः प्रयोज्याः
द्वादशवर्षाणीति केचित् ॥ * ॥
'बालानाञ्च वपुर्मेधाबलपुष्टिकराः स्मृताः ।
लाक्षारसे समे तैलं मस्तुन्यथ चतुर्गुणे ॥
रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुतैः ।
शताह्वादारुयष्ट्याह्वसर्व्वातिक्ताहरेणुभिः ॥
संसिद्धं ज्वररक्षोघ्नं बलवर्णकरं शिशोः ॥”
लाक्षादितैलं बालेषु ॥ * ॥ इति भावप्रकाशे
बालरोगाधिकारः ॥

बालवायजं क्ली, (बालवाये वैदूर्य्यप्रभवे देश-
विशेषे जायते इति । जन् + ड ।) वैदूर्य्यम् ।
इति त्रिकाण्डशेषः ॥ (विवृतिर्विशेषश्चास्य
वैदूर्य्यशब्दे ज्ञेयः ॥)

बालवासः [स्] क्ली, (बालानां लोम्नां बालै-
र्निर्म्मितं वा वासः ।) केशनिर्म्मितवस्त्रम् ।
बालकस्य वस्त्रञ्च । इति केचित् ॥

बालवाह्यः पुं, (बालाः शिशवो वाह्या यस्य ।
एते खलु कस्मिंश्चिदुपस्थिते भये शिशून् पृष्ठे
निधाय पलायन्ते इति प्रसिद्धेस्तथात्वम् ।)
वनच्छागः । इति हारावली । ८१ ॥ बालक
वहनीये त्रि ॥

बालव्यजनं, क्ली, (बालस्य चमरीपुच्छस्य बालैर्न
वा निर्म्मितं व्यजनम् ।) चामरम् । तत्पर्य्यायः ।
रोमगुच्छः २ प्रकीर्णकम् ३ । इति हेमचन्द्रः ॥
(यथा, कुमारे । १ । १३ ।
“लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्य्यः ॥”)

बालकस्य बलनञ्च ॥
"बालव्यजनमीचक्षं मक्षिकादीन् यथोद्धृति ।"
इति शब्दगुणः ॥

बालव्रतः, पुं, मञ्जुघोषनामकपूर्व्वजिनविशेषः । इति त्रिकाण्डशेषः ॥

बालसन्ध्याभः, पुं, (बालसन्ध्या इव आभा यस्य ।) अरुणवर्णः । इति हेमचन्द्रः ॥

बालसूर्य्यं, क्ली, (बालः सूर्य्य इव) वैदूर्य्यमणिः । इति त्रिकाण्डशेषः ॥ प्रातःकालीनसूर्य्ये, पुं ॥

बालसूर्य्यकं, क्ली, (बालसूर्य्य एव । बालसूर्य्य + स्वार्थे कन् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥

बालहस्तः, पुं, (बाला हस्त इव मक्षिकादीनां निवारकत्वात् ।) बालधिः । लोमयुक्तलाङ्गूलम् । इत्यमरः ॥ (केशानां हस्तः समूहः त्रि । केशसमूहश्च इत्युज्ज्वलदत्तः ॥)

बाला, स्त्री, (बालाः केशा इव पदार्था विद्यन्ते यस्याः । बाल + अर्श आद्यच् ततष्टाप् ।) नारिकेलः । हरिद्रा । मल्लिकाभेदः । अलङ्कारभेदः । मेध्यम् । त्रुटिः । स्त्री । इति सुखाङ्किता मेदिनी ॥ घृतकुमारी । ह्रीवेरम् । इति शब्दचन्द्रिका ॥ अम्बष्ठा । नीलझिण्टी । इति राजनिर्घण्टः ॥ एकवर्षवयस्का गौः । यथा,—
"वर्षमाला तु बाला स्यादतिबाला द्विवार्षिकी ।"
इति प्रायश्चित्ततत्त्वम् ॥
षोड़शवर्षीया स्त्री । सा शीतशरत्काले च प्रशंसनीया हर्षदा च । इति राजवल्लभः ॥
(यथा, रतिमञ्जर्य्याम् ।
"बाला स्त्री प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥"
यथा, मेघदूते । ८३ ।
"गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥"
कन्यामात्रेऽपि । यथा, मार्क ण्डे । २१ । ९८ ।
"इयञ्च मूर्च्छामगमत् कारणं यत् शृणुष्व तत् ।
त्वयि प्रीतिमती बाला दर्शनादेव मानद ! ॥"
पञ्चवर्षा स्मृता बाला । इति हारीते । १ । ५ ।)
ऊनद्विवार्षिकी कन्या । तस्यास्तद्वयस्कबालस्य च अग्निसंस्कारादिनिषेधो यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥"
इति गारुड़े १०७ अध्यायः ॥

बालाची, स्त्री, (बालाः केशा इवाञ्चितसदृशं च पुष्पं यस्याः ।) केशपुष्पाख्यश्चः । तत्पर्य्यायः । मानसी २ दुर्गपुष्पी ३ केशधारिणी ४ । इति शब्दचन्द्रिका ॥

बालार्कः, पुं, (बालो नवोदितोऽर्कः सूर्य्यः ।) प्रातःकालीनसूर्य्यः । यथा,—
"रक्तवस्त्रपरीधानां बालार्कसदृशीं तनूम् ॥"
इत्यादि विम्बधारे जगद्धात्रीध्यानम् ॥
कन्याराशिस्थसूर्य्यः । यथा,—
"शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यम् ॥

बालिः, पुं (बाले केशे जातः । बाल + इञ् ।) कपिविशेषः । तत्पर्य्यायः । ऐन्द्रः २ बाली ३ । इति त्रिकाण्डशेषः ॥ (अयमेव श्रीरामेण हतः । अस्य जन्मादिकविवृतिस्तु बालिन् शब्दे द्रष्टव्या ।)

बालिका, स्त्री, (बाला एव । बाल + स्वार्थे कन् । टाप् अत इत्वम् ।) बाला । कन्या । बालुका । पत्रशब्दला । कर्णभूषणम् । इति मेदिनी । के, १३० ॥ एला । इति शब्दरत्नावली ॥ कन्यास्वरूपलक्षणं यथा,—
"कन्या देया स्वयं प्रोक्ता कन्यारूपा तु शूलिनी ।
यावदृतयोनिः स्यात्तावद्देवी सुरारिहा ॥"
इति देवीपुराणम् ॥

बालिखिल्याः, पुं, पुलस्त्यकन्यायां सन्नत्यां क्रतोः षष्टिसहस्रसंख्यकपुत्रा ऋषिविशेषाः । यथा,—
"प्रीत्या पुलस्त्यो भगवान् दत्ताग्निमसृजत् प्रभुः ।
पूर्व्वजन्मनि सोऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ॥
वंदवाहुं तथा कन्यां सन्नतिर्नाम नामतः ।
पुत्राणां षष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः ॥
ते चोर्द्ध्वरेतसः सर्व्वे बालिखिल्या इति स्मृताः ॥"
इति कौर्म्मे १२ अध्यायः ॥
अपि च ।
"क्रतोश्च सन्नतिर्भार्य्या बालिखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः । ५२ । २४ ॥
तेषामङ्गुष्ठपरिमाणस्य प्रमाणं यथा,—
"अथापश्यद्दर्षीन् ह्रस्वानङ्गुष्ठोदरवर्ष्मणः ।
पलाशशृन्तिकामेकां सहितान् वहतः पथि ॥
प्रलीनान् स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् ।
क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके ॥"
इति महाभारते । १ । ३१ ॥
बालखिल्योऽपि पाठः । यथा, "ऋग्वेदान्तर्गतबालखिल्यमेकादशसूक्तं बालखिल्याः शंसन्ति प्राणा वै बालखिल्याः । इति चरणव्यूहभाष्यम् ॥

बालिनी, स्त्री, अश्विनीनक्षत्रम् । इति हेमचन्द्रः ॥

बालिशं, क्ली, (बालाः सन्ति यस्य इति बाली मस्तकस्तेन शेते यत्र । शी + आधारे ड ।) उपधानम् । इति शब्दमाला ॥ (ब्राह्मणादिराकृतिगणः । इति पाणिनिः । ५ । १ । १२४ ॥)

बालिशः, त्रि, (वाड़ + इन् । डस्य लत्वं । बालिं वृद्धिं श्यतीति । बालि + शो + आतोऽनुपसर्गे कः ।) शिशुः । (यथा, भागवते ।४।१४।२३।
"बालिशा वत यूयं वा अधर्म्मे धर्म्ममानिनः ॥"
बालिशाः शिशुतुल्याः इत्यर्थः ॥) मूर्खः । इति मेदिनी । शे, २६ ॥ (यथा, मनुः । ३ । १७६ ।
"अपाङ्क्त्यो यावतः पाङ्क्त्यान् भुञ्जानाननुपश्यति ।
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥"
"बालिशोऽज्ञः ।" इति तट्टीका ॥)

बालिहन्ता, पुं, (बालेर्बालिनो वा वानरराजस्य हन्ता ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥
(बालिवधकथा यथा, रामायणे । ४ । १६ । २७—३६ ।
"सूर्य्यपुत्रो महावीर्य्यः सुग्रीवः परिपीड़ितः ।
बालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ॥
बालिनं प्रति सामर्षो दर्शयामास राघवम् ।
वृक्षैः सशाखैः शिखरैर्वज्रकोटिनिभैर्नखैः ॥
मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः ।
तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव ॥
तौ शोणिताक्तौ युध्येतां वानरौ वनचारिणौ ।
मेघाविव महाशब्दैस्तर्जमानौ परस्परम् ॥
हीयमानमथापश्यत् सुग्रीवं वानरेश्वरम् ।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥
ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।
स शरं वीक्षते वीरो बालिनो वधकाङ्क्षया ॥
ततो धनुषि सन्धाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं कालचक्रमिवान्तकः ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः ।
प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥
मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ।
राघवेण महाबाणो बालिवक्षसि पातितः ॥
ततस्तेन महातेजा वीर्य्ययुक्तः कपीश्वरः ।
वेगेनाभिहतो बाली निपपात महीतले ॥)
ओड्रदेशान्तर्गतग्रामविशेषश्च ॥

बाली, [न्] पुं, (बालः केश उत्पत्तिस्थानत्वेन विद्यते यस्य । बाल + इनिः । नामनिरुक्तिश्च यथा, रामायणे ।
"अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव सः ॥")
इन्द्रपुत्रवानरराजविशेषः । स तु श्रीरामचन्द्रेण हतः । तस्योत्पत्तिर्यथा,—
"मेरुर्नगवरः श्रीमान् जाम्बूनदमयः शुभः ।
तस्य यन्मध्यमं शृङ्गं सर्व्वदेवतपूजितम् ॥
तस्मिन् दिव्या सभा रम्या ब्रह्मणः शतयोजना ।
तस्यामास्ते सदा देवः पद्मयोनिश्चतुर्मुखः ॥
योगमभ्यसतस्तस्य नेत्राभ्यां यदस्रु स्रवत् ।
तद्गृहीतं भगवता पाणिना मर्द्दितञ्च मम ॥
निःक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्त्तृणा ।
तस्मिन्नश्रुकणे राम । वानरः संबभूव ह ॥
उत्तरं मेरुशिखरं गतस्तत्र च दृष्टवान् ।
नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ॥
आप्लुत्य चापतत्तस्मिन् ह्रदे वानरसत्तमः ॥
उत्प्लुत्य तस्मात् स ह्रदादुत्थितः प्लवगः पुनः ॥
तस्मिन्नेव क्षणे राम ! स्त्रीत्वं प्राप स वानरः ॥
तद्रूपमद्भुतं दृष्ट्वा त्याजितो धैर्य्यमात्मनः ।
ततस्तस्यां सुरेन्द्रेण स्कन्नं शिरसि पातितम् ॥
अनासाद्यैव तां नारीं सन्निहत्तमथाभवत् ।
ततः सा वानरपतिं जज्ञे वानरमीश्वरम् ॥
अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव ह ॥
भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना ।

बीजं निषिक्तं ग्रीवायां विधानमनुवर्त्तत ।
ग्रीवायां पतितं बीजं सुग्रीवः समजायत ॥”

इति रामायणे उत्तरकाण्डे । ३७ सर्गः ॥

अपि च ।

“वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥”

इति रामायणे बालकाण्डे १७ सर्गः ॥

“ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥”

इति किष्किन्ध्याकाण्डे १७ सर्गः ॥

(वालाः केशाः सन्त्यस्य ।) वालविशिष्टे, त्रि ॥

वालीशः, पुं, मूत्रकृच्छ्ररोगः । इति शब्दरत्नावली ॥

वा(बा)लुः, स्त्री, (वलते अनेन । वल प्राणने । वल + उण् ।) एलवालुकनामकगन्धद्रव्यम् । इत्युणादिकोषः ॥

वा(बा)लुकं, क्ली, (वालुरेव । स्वार्थे कन् ।) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥

वा(बा)लुकः, पुं,पानीयालुः । इति राजनिर्घण्टः ॥

वा(बा)लुका,स्त्री,(वालुक+टाप् ।) रेणुविशेषः । बालि इति भाषा । तत्पर्य्यायः । सिकता २ सिक्ता ३ शीतला ४ सूक्ष्मशर्करा ५ प्रवाही ६ महासूक्ष्मा ७ सूक्ष्मा ८ पानीयवर्णिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्तापश्रमनाशित्वञ्च ।

“सेकप्रयोगतश्चैव शाखाशोषानिलापहा ॥”

इति राजनिर्घण्टः ॥

शाखा हस्तपादादि ॥ कर्कटी । इति जटाधरः ॥ कर्पूरः । वृक्षविशेषः । इति शब्दचन्द्रिका ॥

वा(बा)लुकागडः, पुं, (वालुकायाः गडतीति तस्मात् चरति यः । वालुका+गड़चरणे+ पचाद्यच् । वालुकाजातत्वादस्य तथात्वम् ।) मत्स्यविशेषः । बालिया इति भाषा । तत्पर्य्यायः ॥ शिलाङ्कः २ । इति हारावली । १९० ॥

वा(बा)लुकात्मिका, स्त्री, (वालुकावदात्मा स्वरूपो यस्याः । कन् अत इत्वम् ।) शर्करा । इति शब्दचन्द्रिका ॥ (वालुका आत्मा यस्य ।) वालुकामये, त्रि ॥

वा(बा)लुकाप्रभा, स्त्री, (वालुकानामुष्णरेणूनां प्रभा यस्याम् । अत्युष्णवालुकापरिणामत्वादस्य तथात्वम् ।) नरकविशेषः । इति हेमचन्द्रः । ५ । ३ ॥

वा(बा)लुकामयं, त्रि, (वालुका+मयट् ।)सिकतामयम् । इति सैकतशब्दटीकायां भरतः ॥

वा(बा)लुकायन्त्रं, क्ली, (वालुकाया यन्त्रम् ।) औषधपाकार्थयन्त्रविशेषः । यथा,—

“भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम् ॥”

इति भावप्रकाशः ॥

वा(बा)लुकास्वेदः, पुं, (वालुकाभिर्विहितः स्वेदः ।) तप्तवालुकाभिस्तापनम् । यथा,—

“वातश्लेष्मगते स्वेदान् कारयेद्वह्निनिर्म्मितान् ।
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान्॥
खर्परभ्रष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
स्रोतसां मार्द्दवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥”

इति भावप्रकाशः ॥

वा(बा)लुकी, स्त्री, (वलति वालयति वा । वल-प्राणने+उक । स्त्रियां ङीप् ।) कर्कटीभेदः । तत्पर्य्यायः । बहुफला २ स्निग्धफला ३ क्षेत्रकर्कटी ४ क्षेत्ररुहा ५ काङ्क्षिका ६ नम्रला ७ । अस्या गुणाः ।

“वालुकी वातशमनी शीता रुच्या श्रमापहा ।
पित्तास्रशमनी रुच्या कुरुते कासपीनसौ ॥
“स्याद्वालुकी शरदि वर्षजदोषकर्त्री
हेमन्तजा च खलु पित्तहरा च रुच्या ।
क्षिप्रं करोति खलु पीनसमङ्गपक्वा
पक्वा त्वतीवमधुरा फलकारिणी च ॥”

इति राजनिर्घण्टः ॥

वा(बा)लुङ्की, स्त्री, कर्कटी । इति त्रिकाण्डशेषः ॥

वा(बा)लुङ्गिका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥

वा(बा)लुङ्गी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥

वा(बा)लूकः, पुं, (वलतः प्राणान् हन्ति यः । वल ड वधे+ऊक ।) विषभेदः । इति हेमचन्द्रः । ४ । २ । ३ ॥

वा(बा)लेयः, पुं, (बलये उपकरणाय साधुः । बलि + “छदिरुपधिबलेर्ढञ् ।” ५ । १ । १३ । इति ढञ् ।) रासभः । इत्यमरः । २ । ९ । ७७ ॥ (यथा, मार्कण्डेये । ५० । ८५ ।

“एकच्छागं द्विवालेयं त्रिगवं पञ्चमाहिषम् ।
षडश्वं सप्तमातङ्गं गृहं यत्नात् शोषय ॥”

बलेः स्वनामख्यातस्य दैत्यस्यापत्यं पुमान् । बलि + ढञ् ।) दैत्यविशेषः । इति धरणिः ॥ (बलिः विरोचनपुत्रस्तस्य बाणज्येष्ठं पुत्रशतं जातम् ते च बालेयनाम्ना विख्याताः । यदुक्तमग्निपुराणे ।

“विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ।
बलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः ।
सहस्रबाहुर्ज्येष्ठश्च कन्ये द्वे च बलेः शुभे ॥
बलेः पुत्रास्तु पौत्राश्च शतशोऽथ सहस्रशः ।
बालेयो नाम विख्यातो गणो विक्रान्तपौरुषः ॥”

जनमेजयवंशोद्भवस्य सुतपसो राज्ञः पुत्रो बलिस्तस्य पञ्च पुत्राश्च बालेयाः ; यथा, हरिवंशे । ३१ । ३०—३३ ।

“फेनस्य सुतपा जज्ञे जज्ञे सुतपसो बलिः ।
जातो मानुषयोनौ तु स राजा काञ्चनेषुधिः ॥
महायोगी स तु बलिर्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ॥
अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा बालेयं क्षत्रमुच्यते ॥
बालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
बलेस्तु ब्रह्मणा दत्ता वराः प्रीतेन भारत । ॥”)

अङ्गारवल्लरी । इति विश्वः ॥ · चाणक्यमूलकम् । इति राजनिर्घण्टः ॥

वालेयः, त्रि, (बालाय हितः । बाल+ढञ् ।) मृदुः । बालहितः । इति मेदिनी ॥ (बलये उपहाराय हितः । बलि+छदिरुपधिबलेर्ढञ् ।” ५ । १ । १३ । इति ढञ् । तण्डुलः ॥ यथा, सिद्धान्तकौमुद्याम् ।“बालेयास्तण्डुलाः ॥” बलियोग्यः । यथा, रघौ ।१४ । ७७ ।

“पुष्पं फलञ्चार्त्तवमाहरन्त्यो
बीजञ्च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
मुदारवाचो मुनिकन्यकास्त्वाम् ॥”

वितुन्नकनाम्नो वृक्षस्य त्वचि क्ली । तत्पर्य्यायो यथा,—

“कुटन्नटं दासपुरं बालेयं परिपेलवम् ।
प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च ॥
मुस्तावत् पेलवपुटं शुक्राभं स्यादितुन्नकम् ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वालेयशाकः, पुं, (बालेयः बलिहितः शाकः ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ९० ॥

वालेष्टः, पुं, (बालानां इष्टः प्रियः ।) बदरः । इति राजनिर्घण्टः ॥ बालकाभिलषिते, त्रि ॥

वालोपवीतं, क्ली, (बालानां बालकानां उपवीतम् ।) बालकपरिधानवस्त्रम् । तत्पर्य्यायः । पञ्चावटम् २ उरस्कटम् ३ । इति हारावली । ४८ ॥ द्विजबालकानां यज्ञसूत्रञ्च ॥

वाल्मीकिः, पुं, वल्मीकस्यापत्यम् । (वल्मीक+इञ् ।) वल्मीकप्रभवो यस्मात् तस्माद्वाल्मीकिरित्यसौ इति ब्रह्मवैवर्त्तोक्तेः । वल्मीकप्रभवत्वेन गौणी पुत्रादिवच्छौणमस्य वल्मीकापत्यत्वं गृहीत्वैव साधुरपत्यार्थः । यद्वा वल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः ॥ मुनिविशेषः । यथा,—

“तपःस्वाध्यायनिरतं तपस्वी वाग्विदाम्वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥”

इति रामायणप्रथमश्लोकः ॥

अपि च । ततस्तदनुग्रहलब्धं रामचरितं सरहस्यं निरवशेषं तत्प्रसादादेव सम्यक् विज्ञाय भूलोकवर्त्तिनां चतुर्णां वर्णानां तापत्रयविमोचनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः स्वकृतशतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यापरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामग्राहयत् । इति तट्टीका ॥ अपि च ।

“नारायणात्मकाः सर्व्वे तेषां रामोऽग्रजोऽभवत् ।
रावणान्तकरो राजा रघूणां वंशवर्द्धनः ॥
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः ॥”)

इति मात्स्ये १२ अध्यायः ॥

बाल्यं, (बालस्य भावः कर्म्म वा । बाल+“पत्यन्त-पुरोहितादिभ्यो यक् ।” ५ । १ । १२८ । इति यक् ।) बालस्य भावः । तत्पर्य्यायः । शिशुत्वम् २ शैशवम् ३ । इत्यमरः ॥ तच्च षोड़श-वर्षपर्य्यन्तम् । आषोड़शाद् भवेद्बाल इत्युक्तेः । इति भरतः ॥ (यथा मनुः । ५ । १४८ ।
“बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ॥”
“वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकन्तथा ।
ऊनषोड़श वर्षस्तु नरो बालो निगद्यते ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

बा(वा)ष्पः (ष्पः) पुं, (बाधते नेत्रे इति । बाध+“खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः ।” उणां । ३ । २८ । इति पः । निपात्यते च ।) उष्म । अश्रु । इत्यमरः । ३ । ३ । १३० ॥ (यथा, रघौ । ८ । ७० ।
“अकरोत् पृथिवीरुहानपि
स्नुतशाखारसबाष्पदूषितान् ॥)

बाहः, पुं, } (बाहुरेव । पृषोदरादित्वात् साधुः ।)
बाहा, स्त्री, } बाहुः । इत्यमरटीकायां रमानाथः ॥ (यथाह उज्ज्वलदत्तः । १ । १८ ।
“अकारान्तोऽपि बाहशब्दो भुजवाचकः । यथा च । बाहोऽश्वभुजयोः पुमानिति दामोदरः । टावन्तोप्ययं । बाहुर्बाहा भुजाभुजः । सुबाहा इति वासवदत्तायां सुबन्धुश्लेषः ॥”)

बाहाबाहवि, व्य, बाहुभिर्बाहुभिः प्रहृत्त्य यद् युद्धं तत् । इति मुग्धबोधव्याकरणम् ॥

बाहुः पुं, स्त्री, (बाधते शत्रून् इति । बाध+“अर्जिदृशिकम्यमिपंसिबाधाम्‌ऋजिपशि तुक् धुक् दीर्घहकाराश्च ।”उणा० १ । २८ । इति कुप्रत्ययोऽन्त्यस्य हकारादेशश्च ।) कक्षाद्यङ्गुल्यग्रपर्य्यन्तावयवविशेषः । तत्पर्य्यायः । भुजः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० । दोषः ५ बाहः ६ । इति जटाधरशब्दरत्नावल्यौ ॥ तद्वैदिकपर्य्यायाः । आयती १ च्यवना २ अभीशू ३ अप्नवाना ४ विनंगृसौ ५ गभस्ती ६ कवस्नौ ७ बाहू ८ भूरिजौ ९ क्षिपस्ती १० शक्वरी ११ भरित्रे १२ । इति द्वादश बाहुनामानि । इति वेदनिर्घण्टौ २ अध्यायः ॥ * ॥ (यथा ऋग्वेदे । ५ । ५७ । ६ ।
“ऋष्टयो वो मरुतो अंसयोरधि
सह ओजो बाह्वोर्वो बलं हितम् ॥”
नृपत्वसूचकबाहुलक्षणम् । यथा,—
“निर्म्मांसौ चैव भग्नाख्यौ श्लिष्टौ च विपुलौ भुजौ ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥”
इति गारुड़े ६६ अध्यायः ॥
(अस्य शुभाशुभलक्षणमुक्तं यथा सामुद्रके ।
“उद्बद्धबाहुः पुरुषो वधबन्धनमाप्नुयात् ।
दीर्घबाहुर्भवेद्राजा समुद्रवचनं यथा ॥
प्रलम्बबाहुरैश्वर्य्यं प्राप्नुयाद्गुणसंयुतम् ।
ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरस्तथा ॥
वामावर्त्तभुजा ये तु ये च दीर्घभुजा नराः ।
संपूर्णबाहवो ये तु राजानस्ते प्रकीर्त्तिताः ॥
पुरुषस्य दक्षिणबाहुस्पन्दने स्त्रियो वामबाहुस्पन्दने शुभं तद्विपरीते तु अशुभम् । यथा शाकुन्तले १ अङ्के ।
“शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥”
बाहुर्दक्षिणबाहुः । फलं वरस्त्रीलाभरूपम् ॥
“वामेतरभुजस्पन्दो वरस्त्रीलाभसूचकः ॥”
इतिवचनात् ॥)
कूर्परस्य ऊर्द्ध्वभागः । यथा,—
“मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
इच्छतश्चाहृतैश्वर्य्यस्तव नारायणोऽव्ययः ॥”
अस्य टीका । बाहू प्रबाहू च कूर्परस्य ऊर्द्ध्वाधोभागौ । इति विष्णुपुराणे । ५ । ५ ॥

बाहुकः, पुं, नलराजा । तत्पर्य्यायः । पुण्यश्लोकः २ अश्ववित् ३ नैषधः ४ । इति त्रिकाण्डशेषः ॥ (पुष्करेण हृतराज्यो हि नलः यदृच्छया वने विपिने दमयन्तीमपहाय प्रगच्छन् दावानलपरीतमनलभयादाक्रोशन्तं कर्कोटकनामानं नागमवलोक्य तत उद्धृतवान् । अथ प्रसन्नस्यास्य पन्नगस्योपदेशात् ऋतुपर्णस्य राज्ञो नगरं गत्वा बाहुक इत्यभिहितस्तस्यैव राज्ञः घोटकपरिचर्य्यायां नियुक्तोऽभवत् । यदुक्तं महाभारते । ३ । ६७ । १-७ ।
“तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः ।
ऋतुपर्णस्य नगरं प्राविशद्दशमेऽहनि ॥
स राजानमुपातिष्ठत् बाहुकोऽहमितिब्रुवन् ।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः ॥
अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च ।
अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः ॥
यानि शिल्पानि लोकेऽस्मिन् यच्चैवान्यत सुदुष्करम् ।
सर्व्वं यतिष्ये तत् कर्त्तुमृतुपर्ण । भरस्व माम् ॥
ऋतुपर्ण उवाच ।
वस बाहुक ! भद्रन्ते सर्व्वमेतत् करिष्यसि ।
शीघ्रयाने सदा बुद्धिर्ध्रियते मे विशेषतः ॥
स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम ।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः ॥
त्वामुपस्थास्यतश्चैव नित्यं वार्ष्णेयजीवलौ ।
एताभ्यां रंस्यसे सार्द्धं वस वै मयि बाहुक ! ॥”
कौरव्यकुलोद्भवो नागभेदः । यथा महाभारते । १ । ५७ । १३ ।
“बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम् ॥”)

बाहुकुण्ठः, त्रि (बाहौ बाह्वोर्वावयवयोः कुण्ठः ।) कुण्ठितबाहुयुक्तः । कोपा इति भाषा । तत्पर्य्यायः । कुम्यः २ दोर्गडुः ३ इति जटाधरः ॥

बाहुकुन्थः, पुं (बाहुरिव कुन्थाति आचरतीति । बाहु+कुन्थ+पचाद्यच् ।) पक्षः । यथा,—
“गरुत्पक्षच्छदाः पत्रं पतत्रञ्च तनूरुहम् ।
देहधिर्देहकोषश्च बाहुकुन्थश्च कथ्यते ॥”
इति शब्दचन्द्रिका ॥

बाहुजः, पुं, (ब्रह्मणो बाहुभ्यां जायते यः । बाहु+जन्+डः । “ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽभ्यजायत ॥” इति श्रुतेस्तथात्वम् ।) क्षत्रियः । इत्यमरः । २ । ८ । १ । (यथा,—
“वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ।
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) कीरः । स्वयंजाततिलः । इति मेदिनी । जे, २७ ॥ बाहुजाते त्रि ॥

बाहुत्राणं क्ली, (त्रै+भावे+ल्युट् । बाह्वोस्त्राणं यस्मात् ।) अस्त्राघातनिवारणार्थबाहुबद्धलौहादि । तत्पर्य्यायः । बाहुलम् २ । इति हेमचन्द्रः । ३ । ४३३ ॥

बाहुदन्ती, [न्] पुं, (बहवो दन्ता यस्य स बहुदन्त ऐरावतः स एव बाहुदन्तः । स्वार्थे अण् । बाहुदन्तोऽस्यास्तीति इनिः ।) इन्द्रः । इति भूरिप्रयोगः ॥

बाहुदा, स्त्री, (बाहू दत्तवती या । बाहु+दा+“आतोऽनुपसर्गे कः ।”३ । २ ।३। इति कः । लिखितस्य मुनेर्बाहुप्रदानादस्यास्तथात्वम् ।) नदीविशेषः । तत्पर्य्यायः । सैतवाहिनी २ । इत्यमरः ॥ कदाचिल्लिखिताख्यस्य मुनेर्ज्येष्ठभ्रातुः शङ्खस्य शून्याश्रमे फलभक्षणाद्राज्ञा बाहू च्छिन्नौ तौ चास्यां नद्यां तपस्यतस्तस्य पुनर्जाताविति । इत्यमरटीकायां भरतः ॥ * ॥ (एतत्कथा यथा, महाभारते । १२ । २३ । १७—४० । व्यास उवाच ।
“अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शङ्खश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ ॥
तयोरावसथावास्तां रमणीयौ पृथक् पृथक् ।
नित्यं पुष्पफलैर्वृक्षैरुपेतौ बाहुदामनु ॥
ततः कदाचिल्लिखितः शङ्खस्याश्रममागतः ।
यदृच्छयाथ शङ्खोऽपि निष्क्रान्तोऽभवदाश्रमात् ॥
सोऽभिगम्याश्रमं भ्रातुः शङ्खस्य लिखितस्तदा ।
फलानि पातयामास सम्यक्परिणतान्युत ॥
अभ्युपादाय विस्रब्धो भक्षयामास स द्विजः ।
तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागतः ॥
भक्षयन्तन्तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत् ।
कुतः फलान्यवाप्तानि हेतुना केन खादसि ॥
सोऽब्रवीत् भ्रातरं ज्येष्ठमुपस्पृत्याभिवाद्य च ।
इत एव गृहीतानि मयेति प्रहसन्निव ॥
तमब्रवीत्तथा शङ्खस्तीव्ररोषसमन्वितः ।
स्तेयं त्वया कृतमिदं फलान्याददता स्वयम् ॥
गच्छ राजानमासाद्य स्वकर्म्म कथयस्व वै ।
अदत्तादानमेवं हि कृतं पार्थिवसत्तम ! ॥
स्तेनं मां त्वं विदित्वा च स्वधर्म्ममनुपालय ।
शीघ्रं धारय चौरस्य मम दण्डं नराधिप ! ॥
इत्युक्तस्तस्य वचनात् सुद्युम्नं स नराधिपम् ।
अभ्यगच्छन्महाभागो लिखितः संशितव्रतः ॥
सुद्युम्नस्त्वन्तपालेभ्यः श्रुत्वा लिखितमागतम् ।

अभ्यगच्छत् सहामात्यः पद्भ्यामेव जनेश्वरः ॥
तमब्रवीत् समागम्य स राजा धर्म्मवित्तमम् ।
किमागमनमाचक्ष्व भगवन् ! कृतमेव तत् ॥
एवमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत् ।
प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्त्तुमर्हसि ॥
अनिसृष्टानि गुरुणा फलानि मनुजर्षभ ! ।
भक्षितानि महाराज । तत्र मां शाधि मा
चिरम् ॥

सुद्युम्न उवाच ।
प्रमाणञ्चेन्मतो राजा भवतो दण्डधारणे ।
अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ ! ॥
स भवानभ्यनुज्ञातः शुचिकर्म्मा महाव्रत ।
ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वच ॥
व्यास उवाच ।
स च्छन्द्यमानो ब्रह्मर्षिः पार्थिवेन महात्मना ।
नान्यं स वरयामास तस्माद्दण्डादृते वरम् ॥
ततः स पृथिवीपालो लिखितस्य महात्मनः ।
करौ प्रच्छेदयामास धृतदण्डो जगाम सः ॥
स गत्वा भ्रातरं शङ्खमार्त्तरूपोऽब्रवीदिदम् ।
धृतदण्डस्य दुर्बुद्धेर्भवांस्तत्क्षन्तुमर्हसि ॥
शङ्ख उवाच ।
न कुप्ये तव धर्म्मज्ञ ! न त्वं दूषयसे मम ।
धर्म्मस्तु ते व्यतिक्रान्तस्ततस्ते निष्कृतिः कृता ॥
स गत्वा बाहुदां शीघ्रं तर्पयस्व यथाविधि ।
देवानृषीन् पितॄंश्चैव मा चाधर्म्मे मनः कृथाः ॥
तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा ।
अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे ॥
प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ ।
ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ॥"
नदीयं पुरा प्रसेनजिद्भार्य्या गौरी नाम
आसीत् । ततः क्रुद्धेन भर्त्राभिशप्ता नदीरूपा
जाता । यथा, हरिवंशे । १२ । ५ ।
"लेभे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम् ।
अभिशप्ता तु सा भर्त्रा नदी वै बाहुदा कृता ॥"
पूरुवंशोद्भवस्य परीक्षिन्नाम्नो नृपतेर्भार्य्येयं
बाहुदा । यथा, महाभारते । १ । ९५ । ४२ ।
"परीक्षित् खलु बाहुदामुपयेमे सुयशां नाम
तस्यामस्य जज्ञे भीमसेनः ॥) बाहुदासी च ॥

बाहुभूषा, स्त्री, (बाह्वोर्भुजयोर्भूषा भूषणम् ।)
केयूरम् । इति हेमचन्द्रः । ३ । ३२६ ॥ बाहु-
भूषणमाप्यत्र ॥

बाहुभेदी, [न्] पुं, (बाहुं भिनत्तीति । बाहु +
भिद् + णिनिः ।) विष्णुः । इति भूरिप्रयोगः ।
बाहुभेदके त्रि ॥

बाहुमूलं, क्ली, (बाह्वोर्मूलम् ।) कक्षः । बगल
इति भाषा । इत्यमरः । २ । ६ । ३८ ॥ (यथा
साहित्यदर्पणे । ३ । १२३ ।
"क्वापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥")

बाहुयुद्धं, क्ली, (बाह्वोर्बाहुभ्यां वा युद्धम् ।)
भुजाभ्यां संग्रामः । मल्लयुद्धम् । तत्पर्य्यायः ।
नियुद्धम् २ । तस्य क्रमो यथा,—
"कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सकङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः ।
तलैर्वज्रनिपातैश्च प्रहृष्टाभिस्तथैव च ॥
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः ॥
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥"
इति विराटपर्व्वणि १२ अध्यायः ॥
सकङ्कटैः कङ्कटः करसंयमः क्रियासातत्य-
मित्यर्थः । कृतप्रतिकृतैः परप्रयुक्तिप्रतिकृतैः ।
चित्रैर्विचित्रैर्बन्धैरिति शेषः । सन्निपातेत्यादि ।
एते मल्लानां क्रियाविशेषाः । सन्निपातैः
परस्परसङ्घातैः । अवधूतैर्बहुसहिष्णुजाघातैः ।
प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः अन्त-
रीक्षे भुजाभ्यां मथनैः । क्षेपणैः स्थानात्
प्रच्यावनैः । वज्राङ्गुलिकरो मुष्टिः ।
"अधाङ्गुष्ठं स्कन्धगतं भ्रामयित्वा तथैव यः ।
चिप्तस्य शब्दः स भवेद्वराहोद्धूतनिःस्वनः ॥
तर्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः ।
सम्प्रहारस्तलाख्यस्तु संघट्टो वज्रमिष्यते ॥"
अर्द्धचन्द्रतुल्यमङ्गुष्ठैश्चैकमित्यर्थः ।
"प्रहृताङ्गुलिहस्तेन प्रहृष्टिः प्रहृतिः स्मृता ।
शिग्विलीकृतबाहुर्य्यस्तदीयार्थं यथाबलम् ॥
प्रहारः स शलाका स्यात् पादोद्धूतः पदा-
हतम् ॥"
जानुभिश्चाश्मनिर्घोषैः पाषाणघोरसदृशध्व-
निभिः करणैर्यान्यवघट्टनानि तैः । बलप्राणेन
बलोत्कर्षेण । इति तट्टीका ॥ (यथा, मार्क-
ण्डेयपुराणे । ८३ । १३ ।
"ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥")

बाहुल्यं, क्ली, बाहुल्यम् । इति हेमचन्द्रः । ३ ।
४३१ ॥ (बहुल + ष्यञ् ।) बहुलभावश्च ॥

बाहुलः, पुं, अग्निः । इति शब्दरत्नावली ॥
(बहुला कृत्तिका तया युक्ता पौर्णमासी
बाहुली । बाहुली पौर्णमासी यस्मिन् । तस्मिन्
पौर्णमासीत्यण् ।) कार्त्तिकमासः । इत्यमरः ।
१ । ४ । १८ ॥

बाहुलेयः, पुं, (बहुलानां कृत्तिकादीनामपत्यं
पुमान् बहुला + ढक् ।) कार्त्तिकेयः । इत्य-
मरः । १ । १ । ४२ ॥

बाहुसहस्रभृत्, पुं, (बाहूनां सहस्रं बिभर्त्तीति ।
क्विप् । "ह्रस्वस्य पिति कृति तुक् । ६ । १ ।
७१ । इति तुक् च ।) कार्त्तवीर्य्यार्ज्जुनः । इति
त्रिकाण्डशेषः ॥ (अस्य बाहुसहस्रप्राप्तिकथा
यथा, महाभारते । १३ । १५२ । ७-८ ॥
"स वरैश्छन्दितस्तेन नृपो वचनमब्रवीत् ।
सहस्रबाहुर्भूयां वै चमूमध्ये गृहेऽन्यथा ॥
मम बाहुसहस्रन्तु पश्यन्तां सैनिका रणे ।
विक्रमेण महीं कृत्स्नां जयेयं संशितव्रतः ॥"
परशुरामो हि अस्य बाहुसहस्रं परशुना
चिच्छेद । अस्य विवरणादिकं कार्त्तवीर्य्यशब्दे
द्रष्टव्यम् ॥)

बाहूबाहवि च, बाहुभिर्बाहुभिर्यद् युद्धं इत्तं तत् ।
हाताहाति इति भाषा । इति मुग्धबोधव्याक-
रणम् ॥

बिद इ अंशे । अवयव इत्यर्थः । इति कविकल्प-
द्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ बिन्द्यते ।
बिन्दुरितिशब्दव्युत्पत्त्यर्थमेवायं धातुपाठायनम् ।
इति दुर्गादासीयटीका ॥

बिल क श भिदे । इति कविकल्पद्रुमः ॥
(चुरा०-तुदा०-च-पर०-सक०-सेट् ।) क, बेल-
यति । श बिलति । इति दुर्गादासः ॥

बिस इर् य क्षेपे । इति कविकल्पद्रुमः । (दिवा०-
पर०-सक०-सेट् ।) य बिस्यति । इर् अबिसत्
अबेसीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये ।
इति दुर्गादासः ॥

बीभत्सः, पुं (बीभत्सतेऽनेन । बध + सन् + करणे
घञ् ।) अर्ज्जुनः । इति मेदिनी । से, २९ ॥

बीभत्सः, त्रि, (बीभत्सा घृणास्त्यस्य । अर्श-
आद्यच् ।) क्रूरः ॥ (यथा महाभारते । १ ।
१ । २१० ।
"यदाश्रौषं द्रोणपुत्रादिभिस्तै-
र्हतान् पाञ्चालान् द्रौपदेयांश्च सुप्तान् ।
कृतं बीभत्समयशस्यञ्च कर्म्म
तदा नाशंसे विजयाय सञ्जय ! ॥")
घृणात्मा ॥ (यथा, मार्कण्डेये । १६ । १८ ।
"तथापि प्रश्रिता भार्य्या तममन्यत दैवतम् ।
तं तथाप्यतिबीभत्सं सर्व्वश्रेष्ठममन्यत ॥")
विकृतिः । इति मेदिनी । से, २९ ॥ (यथा,—
"दुष्टैर्दोषैः पृथक् सर्व्वैर्बीभत्सालोकनादिभिः ।"
इति माधवकरकृतरुग्विनिश्चये छर्द्यधिकारे ॥
बीभत्सालोकनं विकृतिदर्शनमिति तट्टीकायां
विजयरक्षितेनोक्तम् ॥) पापी । इत्यजयः ॥
शृङ्गाराद्यष्टरसान्तर्गतषष्ठरसः । तत्पर्य्यायः ।
विकृतम् २ । इत्यमरः ॥ तस्य लक्षणादि यथा,
साहित्यदर्पणे । ३ । २३३ ।
"जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम् ।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥"
अस्य रसस्योदाहरणं यथा तत्रैव ।
"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथ-
भूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि
जग्ध्वा ।
आर्त्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः
करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्र-
मत्ति ॥")

वैकृतञ्च । यथा । अतिशोणितपाकवमभिशिखितवैकृतमित्यभिनन्दः । इयमिदं, इति क्लीवम् । तदाजन्मने तु मांसशोणितादौ विधु । इति तट्टीकायां भरतः ॥

बीभत्सुः, पुं, (बीभत्सतीति । बध+सन्+उ । युद्धे न्यायपथेन शत्रुहननादस्य तथात्वम् । एतन्निर्वक्तिवक्ता । यथा, महाभारते ४ । ४२ । १८ ।
"न कुर्य्यां कर्म्म बीभत्सं युध्यमानः कथञ्चन ।
तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः ॥")
अर्ज्जुनः । यथा,—
अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥
इति महाभारते । ४ । ४२ । ६ ॥

बुक्क, कि भाषणे शब्दे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा० पर०-सक०-पक्षे अक०-सेट् ।) पञ्चमस्वरी कोपधः । चुरादिपक्षे कथने भ्वादिपक्षे कुक्कुरादिशब्देऽयमिति रमानाथः । कि, बुक्कयति वाचा मधुलोकः । बुक्कति श्वा । इति दुर्गादासः ॥

बुक्कं, त्रि, (बुक्कयति बुक्बुक् इत्यव्यक्तशब्दं करोतीति । बुक्क+पचाद्यच् ।) वक्षोऽभ्यन्तरमांसविशेषः । तत्पर्य्यायः । अग्रमांसम् २ हृदयम् ३ हृत् ४ । इत्यमरः । २ । ६ । ६४ ॥ केचित्तु बुक्कात् पृथगेव हृदयान्तर्गतमांसविशेषे पद्माकारे हृदयादिद्वयमाहुः । धातोरनेकार्थत्वात् बुक्कते खादुत्वात् कथ्यते बुक्कं बुक्क कि भाषणे शब्दे पचः । नान्तः पुंलिङ्गोऽप्ययम् । क्लीलिङ्गोऽपीत्येके । इति स्वामी ॥ बुक्का स्त्री बुक्कः पुमानपि । शोणितेषु स्त्रियां बुक्का बुक्कस्तु समये द्वयोरिति रभसात् । गदादित्वात् स्त्रियां बुक्कीत्यन्ये । बुक्कनान्तं क्लीवमप्युत्पन्नमितिवन्द्यकलिङ्गादयः ॥ उरस्यपि च बुक्कायां हृदयं मानसेऽपि चेति त्रिकाण्डशेषः ॥ बुक्कशब्दस्य उकारस्य ककारादेशे तथैव हक्कादिरूपञ्च । अग्रञ्च तन्मांसञ्चेति अग्रमांसं बुक्कस्याग्रं संमुखीभूतं मांसं बुक्काग्रमांसमित्येकं नाम तन्वे । इति तट्टीकायां भरतः ॥

बुक्कः, पुं, (बुक्कयति शब्दायते इति । बुक्क+अच् ।) छागः । इति त्रिकाण्डशेषः ॥ समये पुं, स्त्री । इति रभसः ॥

बुक्कनं, क्ली, (बुक्क कि भाषणे शब्दे+भावे ल्युट् ।) कुक्कुरशब्दः । तत्पर्य्यायः । भषणम् २ । इति हेमचन्द्रः । ६ । ४३ ॥

बुक्का, स्त्री, (बुक्क+टाप् ।) बुक्कम् । इत्यमरटीकायां भरतः । शोणितम् । इति रभसः ॥

बुक्का, [न्] (बुक्क+कनिन् ।) पुं, बुक्कम् । इत्यमरटीकायां भरतः ॥

बुक्काग्रमांसं, क्ली, (बुक्कस्याग्रमांसं ।) हृदयम् । इत्यमरटीकायां रायमुकुटः ॥

बुक्कारः, पुं, (बुक्क कि भाषणे शब्दे भावे घञ् । बुक्कं निनादं करोति तस्य कारः करणम् । "एकवर्ग्यद्वयो यत्र मध्यमस्य च लुप्यते" इति न्यायात् मध्यस्य ककारस्य लोपः ।) सिंहध्वनिः । इति हारावली । १६४ ॥

बुक्की, स्त्री, (बुक्क+गौरादित्वात् ङीष् ।) बुक्कम् । इत्यमरटीकायां भरतः ॥

बुट, कि हिंसे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) कि बोटयति बोटति । इति दुर्गादासः ॥

बुड, शि उत्सर्गे । संहतौ । इति कविकल्पद्रुमः ॥ (कुटा०-तुदा०-पर०-सक०-सेट् ।) शि बुडति अबुडीत् बुबोड इति दुर्गादासः ॥

बुद, इर् ञ उ निशामने । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) पञ्चमस्वरी । इर् अबुदत् अबोदीत् । ञ बोदति बोदते । उ बोदित्वा बुत्वा । निशामनमालोचनं प्रणिधानमिति यावत् । इति दुर्गादासः ॥

बुद्धः, पुं, (बुध्यते स्म इति । बुध+क्त । यद्वा भावे क्त बुद्धं ज्ञानमस्यास्तीति अर्श आद्यच् ।) भगवदवतारविशेषः । स तु दशावतारान्तर्गतनवमावतारः । यथा,—
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति ॥"
इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥
अञ्जनस्य सुतः । अजिनसुत इति पाठे अजिनोऽपि स एव । कीकटेषु मध्ये गयाप्रदेशे । इति श्रीधरस्वामी ॥ तत्पर्य्यायः । सर्व्वज्ञः २ सुगतः ३ धर्म्मराजः ४ तथागतः ५ समन्तभद्रः ६ भगवान् ७ मारजित् ८ लोकजित् ९ जिनः १० षडभिज्ञः ११ दशबलः १२ अद्वयवादी १३ विनायकः १४ मुनीन्द्रः १५ श्रीघनः १६ शास्ता १७ मुनिः १८ । इत्यमरः । १ । १ । १३ ॥ धर्म्मः १९ त्रिकालज्ञः २० धातुः २१ बोधिसत्त्वः २२ महाबोधिः २३ आर्य्यः २४ पञ्चज्ञानः २५ दशार्हः २६ दशभूमिगः २७ चतुस्त्रिंशज्जातकज्ञः २८ दशपारमिताधरः २९ द्वादशाक्षः ३० त्रिकायः ३१ संगुप्तः ३२ दयाकूर्च्चः ३३ खजित् ३४ विज्ञानमातृकः ३५ महामैत्रः ३६ । इति हेमचन्द्रः । २ । १४६ ॥ धर्म्मचक्रः ३७ महामुनिः ३८ असमः ३९ खसमः ४० मैत्री ४१ बलः ४२ गुणाकरः ४३ अकनिष्ठः ४४ त्रिशरणः ४५ बुधः ४६ वज्री ४७ वागाशनिः ४८ जितारिः ४९ अर्हकः ५० अर्हन् ५१ महासुखः ५२ । इति शब्दरत्नावली ॥ महाबलः ५३ । इति जटाधरः ॥ * ॥ ईश्वरनिरूपणे बुद्धविशेषाणां मतमाह । सर्व्वज्ञ इति सौगताः । निरावरण इति दिगम्बराः । लोकव्यवहारसिद्ध इति चार्व्वाकाः । शरीरादावेव चेतनानि गौरोऽहं जानामीत्यादिज्ञानेन गौरत्वज्ञानवत्त्वयोः सामानाधिकरण्यानुभवादिति चार्व्वाकाणां मतञ्च । तेषां मते जगत्क्षणभङ्गुरत्वं नन्वस्तु क्षणभङ्गः पूर्व्वपुञ्जाज्ञोत्तरपुञ्जोत्पत्तिस्तथा च पुञ्जनिष्ठ एव कुर्व्वद्रूपत्वाख्यजातिविशेषः कारणजनकतावच्छेदक इति न दोषः । इति कुसुमाञ्जलिप्रथमस्तवकटीकायां रामभद्रः ॥ * ॥ बुद्धानां दशविधमतभेदमाह ।
"वदन्ति पुत्र आत्मेति १ दृढ़प्राकृतबुद्धयः ।
देह आत्मेति २ चार्व्वाका इन्द्रियाण्यपरे ३ च ते ॥
तेऽन्ये प्राण ४ स्ततोऽन्ये ते मन ५ आत्मेति वादिनः ।
बुद्धिरात्मेति६ बौद्धा वै शून्यमात्मेति७ तेऽपरं ॥
याज्ञिका यज्ञपुरुषं सर्व्वज्ञं ८ सौगता विदुः ।
निरावरण ९ माहुर्यं दिगम्बरमतानुगाः ॥
चार्वाकाश्चापि लोकानां व्यवहारप्रसिद्धकम् १० ॥"
इत्यात्मप्रकाशः ॥ * ॥
पण्डितः । बुधिते, त्रि । इति मेदिनी । धे, १० ॥
(बुद्धावतारस्य विवरणं यथा,—
इह खलु बौद्धशास्त्रसन्दर्भेषु सम्प्रोक्ताः पञ्चविंशतिर्बुद्धा इष्यन्ते । तेषां शुद्धोदनौरसात् मायादेवीगर्भजातः शाक्यसिंहसर्व्वार्थसिद्धार्कबन्धुगौतमेति नामचतुष्टयेन प्रसिद्धोऽन्तिमः लोकविश्रुतो बुद्धः कपिलवस्तुनगरं कलेश्चतुःशतनवत्यधिकद्विसहस्रमितेषु गतेष्वब्देषु शुक्रवासरे सुरद्विषां सम्मोहनाय साक्षाद्विवेकमूर्त्तिः स्वेच्छाविग्रहैव प्रादुर्बभूव ।
अथ स वयसा सह क्रमेण शीलगुणलावण्यरूपौदार्य्यबलवीर्य्यादिभिर्वर्द्धते स्म । उदिते यौवने पित्राज्ञया स शाक्यान्वयजां मनोज्ञां रूपलावण्यवतीं इच्छयाश्रितनयां गोपानाम्नीमनुमतामुपयेमे ।
जननसमयेऽस्य गणकाच्छ्रुतवान् नरेश्वरः शुद्धोदनः व्याधिग्रस्तजराजर्ज्जरसञ्जातचिन्तजनदर्शनाज्जातवैराग्यः पुत्रस्ते यतं सन्न्यस्यतीति । तस्मात् सञ्जातशङ्को राजा शिविकाभि रुपवनपरिवृतं सुगुप्तं रम्यं हर्म्यास्तृतं भूभृद्भवं निर्म्मापयामास । तत्रासौ युवतीजनपरिवेष्टितसुपच्छन्नितं विषयविमुग्धचेतसं तनयं नित्यनिर्गमनम् स्वच्छन्देनाध्यवासयत् । अथ गच्छति कालेऽस्य शिथिलीबभूव भोगवन्धनं । ततः कारागारमिव प्रतीयमानं निष्कुटनिकेतं विहायास्य धरण्या नानास्थानं द्रष्टुमिच्छा सञ्जाता । ततः सोऽस्मै पित्रे शुद्धोदनाय सम्बोधयामास पर्य्यन्य नगरं प्रजानाञ्चस्थिमवस्थाञ्च विलोकयितुं वाञ्छा मे बलवतीति । राजा प्रथमं निवारयितुमियेष प्रलोभनेन । स नैव तु ततो विरराम । अथ विज्ञाय निर्बन्धं पुत्रस्य मन्त्रिणमादिदेश, कुमारे शाक्यसिंहे भ्रमितुमारब्धे राष्ट्रे मे जरातुरसञ्जातचिन्तसमानवाः केनापि कारणेन राजवर्त्मनि नोपतिष्ठन्तामिति विघोषयेति । तथानुष्ठिते कुमारः रथमारुह्य

सारथिना सह बहिर्निर्गत्य भ्रमितुमारब्धवान्। तत्रचतुर्दिक्षु प्रकृतिभिस्तारस्वरैर्जयोऽस्य प्राघोषि। नगरं वीक्षमाणो मनसि परां मुद प्राप्तवान्।

अथ स जरया जर्ज्जरतनुं मानवमेकं दृष्टवान्। इतः प्राक् कदाचिदपि स शाक्यसिंहो जगतो दुःखं नानुभूतवान् इदानीं निरीक्ष्य प्रथमं तं जराग्रस्तं विवरणमस्य विज्ञातुं कुतूहली सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष दुर्ब्बल अल्पस्थाम
उच्छुष्कमांस रुधिरत्वचस्नायुनद्धः।
श्वेतशिरो विरलदन्तकृशाङ्गरूप
आलम्ब्य दण्ड व्रजतेऽसुखं स्खलन्त॥

सारथिराह।
एषो हि देव। पुरुषो जरयाभिभूतः
क्षीणेन्द्रियः सुदुःखितो बलवीर्य्यहीनो।
बन्धुजनेन परिभूत अनाथभूतः
कार्य्यासमर्थ अपविद्ध वनेव दारु॥

बोधिसत्त्व आह।
कुलधर्म्म एष अयमस्य हितं भणाहि
अथवापि सर्व्वजगतोऽस्य इयमवस्था।
शीघ्रं भणाहि वचनं यथभूतमेत-
च्छ्रुत्वा तथार्थमिह योनि सचिन्तयिष्ये॥

सारथिराह।
नैतस्य देव। कुलधर्म्म न राष्ट्रधर्म्मः
सर्व्वे जगस्य जरयौवनधर्षयाति।
तुभ्यंपि मातृपितृबान्धवज्ञातिसंघो
जरया अमुक्तं न हि अन्यगतिर्जनस्य॥"

बोधिसत्त्व आह।
धिक् सारथे। अबुधबालजनस्य बुद्धि-
र्यद्यौवनेन मदमत्त जरां न पश्यी।
आवर्त्तयाश्विह रथं पुनरहं प्रवेक्ष्ये
किं मह्य क्रीडरतिभिर्जरयाश्रितस्य॥"

इति ललितविस्तरे १४ अध्याये।

अथ शाक्यसिंहः सारथिं सन्दिश्य रथं सञ्चालयेति। गत्वा नगरस्य दक्षिणे द्वारि व्याधिग्रस्तं यातनापरीतपुरुषमेकमीक्षाचक्रे। ततः स सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष रूपविवर्णगात्रः
सर्व्वेन्द्रियेभि विकलो गुरु प्रश्वसन्तः।
सर्व्वाङ्गशुष्क उदराकुल प्राप्तकृच्छ्रा
मूत्रे पुरीष स्वकि तिष्ठति कुत्सनीये॥"

सारथिराह।
एषो हि देवपुरुषः परमं गिलानो
व्याधीभयं उपगतो मरणान्तप्राप्तः।
आरोग्यतेजरहितो बलविप्रहीनो
अत्राणद्वीपशरणो ह्यपरायणश्च॥"

बोधिसत्त्व आह।
"आरोग्यता च भवते यथ स्वप्नक्रीडा
व्याधिभयञ्च इम ईदृश घोररूपम्।
को नाम विज्ञपुरुषो इम दृष्ट्वा अवस्थां
क्रीडारतिञ्च जनयेच्छुभसंज्ञितां वा॥"

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्त्य रथवरं पुनरपि पुरवरे प्राविशत्।
इति हि भिक्षवो बोधिसत्त्वोऽपरेण कालसमयेन पश्चिमेन नगरद्वारेणोद्यानभूमिमभिनिष्क्रमन्स्तदा शूद्धेन सोऽद्राक्षीत् पुरुषं मृतं कालगतं मार्गे समारोपितं चैलवितानीकृतं ज्ञातिसङ्घपरिवृतं सर्व्वैरुदद्भिः क्रन्दद्भिः परिदेवमानैः प्रकीर्णकेशैः पांशुवकीर्णशिरोभिरुरांसि ताडयद्भिरुत्क्रोशद्भिः पृष्ठतोऽनुगच्छद्भिः। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे। पुरुष मञ्चोपरिगृहीतो
उद्धृत केशनख पांशु शिरे क्षिपन्ति।
परिवारयित्व विहरन्त्युरस्ताडयन्तो
नानाविलापवचनानि उदीरयन्तः॥"

सारथिराह।
"एषो हि देवपुरुषो मृतु जम्बुद्वीपे
न हि भूय मातृपितृ द्रक्ष्यति पुत्त्रदाराम्।
अपहाय भोगगृहमातृपितृमित्रज्ञातिसङ्घं
परलोक प्राप्तु न हि द्रक्ष्यति भूय ज्ञातिम्॥"

बोधिसत्त्व आह।
"धिग्यौवनेन जरया समभिद्रुतेन
आरोग्य धिग्विविधव्याधिपराहतेन।
धिग्जीवितेन पुरुषो न चिरस्थितेन
धिक्पण्डितस्य पुरुषस्य रतिप्रसङ्गैः॥

यदि जर न भवेया नैव व्याधिर्न मृत्यु-
स्तथपि च महदुःखं पञ्चस्कन्धं धरन्तो
किं पुन जरव्याधिर्मृत्यु नित्यानुबद्धाः
साधु प्रतिनिवर्त्त्य चिन्तयिष्ये प्रमोचम्॥

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्त्य तं रथवरं पुनरपि पुरं प्राविशत्॥ इति हि भिक्षवो बोधिसत्त्वस्यापरेण कालसमयेनोत्तरेण नगरद्वारेणोद्यानभूमिमभिनिष्क्रामतस्तेरेव देवपुत्त्रैर्बोधिसत्त्वस्यानुभावेनैव तस्मिन् मार्गे भिक्षुरभिनिर्म्मितोऽभूत्॥ अद्राक्षीद्बोधिसत्त्वस्तं भिक्षुं शान्तं दान्तं संयतं ब्रह्मचारिणमनतिक्षिप्तचक्षुर्युगमात्रप्रेक्षिणं प्रासादिकेनेर्य्यापथेन सम्पन्नं प्रासादिकेनाभिक्रमप्रतिक्रमेण सम्पन्नं प्रासादिकेनालोकितव्यवलोकितेन प्रासादिकेन सङ्घाटीपिण्डपात्रचीवरधारणेन मार्गे स्थितम्। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे। पुरुष शान्त प्रशान्तचित्तो
नोत्क्षिप्तचक्षु व्रजते युगमात्रदर्शी।
काषायवस्त्रवसनो सुप्रशान्तचारी
पात्रं गृहीत्व न च उद्धत उन्नतो वा॥

सारथिराह।
एषो हि देवपुरुष इति भिक्षुनामा
अपहाय कामरतयः सुविनीतचारी।
प्रव्रज्यप्राप्तः शममात्मन एषमाणो
संरागद्वेषविगतो विचरति पिण्डचर्य्या॥

बोधिसत्त्व आह।
साधु सुभाषितमिदं मम रोचते च
प्रव्रज्य नाम विदुभिः सततं प्रशस्ता।
हितमात्मनश्च परसत्त्वहितञ्च यत्र
सुखजीवितं सुमधुरममृतं फलञ्च॥"

इति ललितविस्तरे १४ अः।

ततः संक्षुब्धचित्तोऽसौ स्वकीयं गृहान्तं विवेश। दिवसेऽस्मिन् राहुलनामा पुत्त्रोऽस्य समजनि। राजा शुद्धोदनः स्वाङ्गजस्य भ्रमणकृत्तान्तं सर्व्वं निशम्यास्य सन्न्यासग्रहणं शङ्कमानः चतुर्षु नगरद्वारेषु सैनाव्यूहान् सन्निवेशयति स्म तस्य परिरक्षणार्थम्।

रतिरसाभिज्ञान् युवतिजनानन्तःपुरेषु बहुतरान् प्रेषयामास बोधिसत्त्वस्य प्रमोहनाय। अथागता रजनी, विहारार्थस्य तु चित्तं व्याकुलितमतीव गेहात् प्रव्रज्य भैक्ष्यग्रहणार्थम्। ततो नृत्यादिप्रमोदात् परं निद्रिताः सर्व्वा युवतीर्विलोक्य शयनात् शनैः शनैरुत्थितो व्यलोकयत्।

"तत्र काश्चिदुत्पन्नवस्त्राः काश्चिद्विधुतकेश्यः काश्चिद्विकीर्णाभरणाः काश्चिद्विभ्रष्टमुकुटाः काश्चिद्विवृत्तैरंसैर्विगोपितगात्राः काश्चिद्विसंस्थितमुखाः काश्चिद्विपरिवर्त्तितनयनाः काश्चित् प्रस्रवन्त्यो लालाभिः काश्चिद्धसन्त्यः काश्चित् प्रहसन्त्यः काश्चित्प्रलपन्त्यः काश्चिद्दन्तान् कटकटायन्त्यः काश्चिद्विवर्णवदनाः काश्चिद्विसंस्थितरूपाः काश्चित् प्रलम्बितबाहवः काश्चिद्विक्षिप्तवदनाः काश्चिदुद्घाटितशीर्षाः काश्चिदवगुण्ठितशीर्षाः काश्चिद्विपरीतवर्त्तितमुखमण्डलाः काश्चित् प्रध्वस्तशरीराः काश्चिद्विभग्नगात्राः काश्चिन्निकुब्जाः घुरघुरायमाणाः काश्चिन्मृदङ्गमुपगुह्य परिवर्त्तितशीर्षशरीराः काश्चिद्वीणावल्लक्याद्यपरिगृह्यपाण्यः काश्चिद्वेणुं दन्तैः कटकटायन्त्यः काश्चित् क्षिप्तवेणुकुलसम्पताडावकर्षितवाद्यभाण्डाः काश्चिन्निमेषोन्मेषपरिवर्त्तनयनाः काश्चिद्दृष्टास्या एवं तद्विकृतं धरणीतलगतमन्तःपुरं निरीक्षमाणो बोधिसत्त्वः श्मशानसंज्ञामुत्पादयति स्म।" तत्रेदमुच्यते।

"तां दृष्ट्व उद्विग्न स लोकनाथः
करुणं विनिश्वस्य इदं जगाद।
अहो वता कृच्छ्रगता प्रजेयं
कथं रतिं विन्दति राक्षसीगणैः॥
अतिमोहतमावृते दुर्म्मति-
कामगुणैर्निगुणसंज्ञिनः।
विहगपञ्जरगता यथा नहि
लभन्ति कदाचिदु विनिःसृतम्॥"

इति ललितविस्तरे। १५ अध्याये॥

अतीतेऽथ निशीथे विहारार्थोऽश्वपालमाहूयाह "जरामरणपञ्जरनियतसत्त्वपरिमोचनस्य समयो ह्युपस्थितो मे।" अतएव ग्रहीष्यामि सन्न्यासम्। विस्मितोऽश्वपालोऽब्रवीत् राजपुत्रस्य ते सन्न्यासग्रहणमनुचितं न समर्थोऽपि सन्न्यासाश्रमस्य कष्टानि सोढुम्।

सिद्धार्थ आह ।

"विषपिता: सर्पशिरा यथा कुम्भे-
विगर्हिता मीढ़घटा यथाशुचि: ।
विनाशका: सर्व्वसुखस्य छन्दक
ज्ञात्वा हि कामान्न विजायते रति: ॥"
छन्दक ग्रस्य यानि दु:खशतान्यर्जिता पूर्व्व-
जन्मान्तरे ।
वधबन्धनताड़नात्तर्ज्जना: कामहेतो-
र्मया नो च निर्व्विदभूत् ॥
संस्कृतमानसं प्रमदवशगतञ्च
मोहाकुलं दृष्टिजालावृतम् ।
अन्वभूतं पुरा आत्मसंज्ञा-
महाकारका वेदनावीतिहत्ता इमे ॥
धर्म्माश्चागत: सम्भूता चलचपलाऽ-
नित्यमेघै: समा विद्युद्भि: सदृशा: ।
ओसबिन्दूपमा रिक्ततुच्छा असारा:
अनात्मा च शून्यस्वभावा इमे सर्व्वश: ॥
स्वयमहमभिबुद्ध्य नावामिमामात्मनाऽवतीर्य
संसार ओघेरहं तारयिष्येऽनन्तं जगत्
शोकसंसारकान्तारदोषोर्म्मिरागग्रहा-
व्याकुले वैराकुले दुस्तरे एव चित्तं मम ॥
तदात्मनोत्तीर्य इदं भवार्णवं
सवैरदृष्टिग्रहक्लेशराक्षसम् ।
स्वयं तरित्वा च अनन्तरं जगत्
स्थापेऽन्तरीये अजरामरे शिवे ॥"

ललितविस्तरे १५ अध्याये ।

अतश्छन्दक ! प्रव्रजाम्यधुनैव सत्वरमानयाश्वम् तथानुष्ठिते सिद्धार्थोऽसौ आत्मीयगुरुजनान् सर्व्वान् राज्यमैश्वर्य्यञ्च विहायाश्वमारुह्य निर्गत: । निजनगराद्द्वादशयोजनदूरस्थितं मल्लराज्यं प्राप्य तत्रैव वशिष्ठाश्रमसन्निधौ छन्दकमश्वसहितं विसृज्य कौषेयमपहाय पिधाय वल्कलवासस्तमेकाकी वैशालीं नाम-नगरीमुपतस्थे । तत्र आराढ़कालामनामा जिनपुरुषस्त्रिशतकशिष्यैरवात्सीत्, सिद्धार्थोऽस्य शिष्योऽभूत् । आहैकदा गुरु:, पवित्रचेता ऋजुर्भक्तिमान् पुरुष एवालं ब्रह्मचर्य्यं ग्रहीतुम्, लब्धुञ्च सर्व्वमैश्वर्य्यम् । हृदि यस्य विमलो निर्व्वाणप्रदीप: प्रदीप्तस्तम:स्तोमध्वंसनपटुर्भवस्य । न तस्य सुखदमैश्वर्य्यविजृम्भितगुणवचनम् । तत: सप्तशतीं शिष्यततिन्दधानस्य रुद्रकनाम्न: साधो: समीपं गत्वा ज्ञानेन सम्भाषणं गय शीर्षं जगाम । तत्रोन्नावितमनेन षड् ब्राह्मणा: समवाप्य बोधस्वरूपं लब्धुमविशुद्धं कायमानसं नियोजयन्ति तदग्निमुत्पादयितुमार्द्रकाष्ठद्वय-घर्षणमिव वैफल्यं भजते । शुष्ककाष्ठद्वय-घर्षणेन यथा लब्धमनोरथा मानवास्तद्वत् कायमनसोर्विशुद्धयो: सतो: स्वतश्च बोध-लाभ: शक्य: । तत:परमसौ बोधिसत्त्वो गत्वा ग्राममुरुविल्वाख्यं विजनं तत्रैवोषितुं मनो दधे । परमयत्नेनाचैव कायशुद्धिं चित्तशुद्धिञ्च विधाय आस्फानकाख्यं दुष्करं ध्यानं दधार ।

अत्रासौ कस्मिंश्चिद्दिवसे बदरीमेकिकां कस्मिं-श्चिद्वा तण्डुलमेकं कदाचिदेकमाषं कलायं भक्षयित्वा कस्मिंश्चिदुपोषणेन वा कालं विलङ्घ्य शुष्कचर्म्मावशेषवपुर्बभूव । ततोऽसौ देहमित्थं निभज्य लब्धुं सम्बोधं न समर्थोभवेय-मिति विचिन्त्य पोषककरमाहारं जग्राह ।

दिवसेऽस्मिन् शुद्धोदन: स्वप्नं ददर्श प्रिय: पुत्रो मे मणिमुक्तादिविभूषितवारणरूपेण उडुम्बर-तरुमारुरोह । त्रैलोक्यलोका: पूजनायास्या-गच्छन्तीव, यशोधरापि गोपापरनाम्नी ददर्श स्वप्नं विविधम् स्वयं शाक्यसिंहश्च पञ्च, यथा जगदखिलं शय्या मे, विम्बपलमिव सुमेरु-शिखरमुपधानीभूतं मे, वामदक्षिणकरद्वयं मे प्राच्यपश्चिमसमुद्रोपरि पादावुभौ मे दक्षि-णाब्धौ प्लवन्ते, नाभिकमलान् मे समुत्थितै: स्थिरिकाहस्तैश्चापूरितमखिलं नभ: । ततश्चो-त्थायासौ उरुविल्वोषिताया: सुजातानामि-काया नार्य्या: सकाशात् भिक्षां जग्राह ।

इत: सिद्धार्थो ध्यानं दधार, निर्व्वाणे पथि तस्य सततं परिपन्थी सन्नपि दुर्निवारो मार: परा-जितो ध्यानवीरेण योगिसिंहेन पलायनं चक्रे । ततस्तस्यैव कन्दर्पस्य तनये यतेते तन्द्रा रतिश्च योगिप्रवरस्य मोहनाय, विफलानि तु जाता-न्यनयोर्मनोरथानि । तत: सर्व्वेभ्य: कलुषेभ्यो विमुक्त: सिद्धार्थो बोधञ्च विमलं लेभे । तदासा-वधिरूढ़योग: मनस्यस्य मुकुरे प्रतिफलितं सकारणमखिलं जगत् । ततश्च चिन्तयामास स: जीवानां जन्म, तेषु च जीवस्य संयोगो वियोग-श्चैव दु:खदु:खान्येतानि । न जानीते मानवस्तन् मोहजालेनावृतो दुर्व्विषहं दु:खं सहत इति । तत: कस्मादागतं जरामरणमिति चेतसा कृते प्रश्ने तेनैव निश्चिनोति स:, यज्जन्मन एवागच्छति जरामरणमिति, कुतस्तर्ह्यागतं जन्म किमस्य वा कारणम् ? संसारादस्माज्जाति-रतएव भव एव कारणमत्र । भवस्तर्हि कुत आयत: किमस्य वा कारणं ? उपादानादागतो भवस्तदुपादानमेवास्य कारणम् । कस्मादुपा-दानमायातन्तर्हि किमस्य वा कारणं ? तृष्णाया आगतमुपादानमतस्तृष्णैव कारणमस्येति । तर्हि कुत आयाता तृष्णा कारणं वा किमस्या: ? वेदनाया आगता तृष्णा अतो वेदनैव कारण-मस्या: । कुत आयाता वेदना, अस्या वा किं कारणम् ? स्पर्शादायाता वेदना, अत: स्पर्श एव कारणं वेदनाया इति । स्पर्शस्तर्हि कुत आयात: किं वा कारणमस्य ? । षड़ायतना-दागत: स्पर्शस्ततोऽस्य कारणं स एवेति । कुत आयातं षड़ायतनं कारणं वा किमस्य ? नामरूपाभ्यामागतं षड़ायतनम् अतएवास्य कारणमेव तद्भवति । कुतस्तच्चायाते नामरूपे कारणं वा किमनयो: ? विज्ञानादागते नाम-रूपेऽतोऽनयो: कारणं विज्ञानमिति । कुत आयातं विज्ञानन्तर्हि कारणं वा किमस्य ? संस्कारादागतं विज्ञानमतोऽस्य कारणं स एवेति । संस्कारस्तर्हि कुत आयात: कारणं वा किमस्य ? अविद्याया आगत: संस्कार-स्ततोऽस्य कारणमविद्यैवेति ।

स्फुटमिदानीमविद्यैव कारणं जगतोऽखिलस्य । ततो विलोमेन प्रकटीभूतं यत् अविद्याया: संस्कार: संस्काराद् विज्ञानम्, विज्ञानान्नाम-रूपे ताभ्यां नामरूपाभ्यां षड़ायतनम्, षड़ाय-तनात् स्पर्श:, स्पर्शाद् वेदना, वेदनायास्तृष्णा तृष्णाया उपादानम् उपादानात् संसार: संसाराज्जाति: जातेर्ज्जरामरणमिति ।

प्रकारेणानेनोत्पन्नो दु:खद्रुमो जीवानाम् । तदिदानीं प्रतिभातं अविद्यैव मूलमस्य पाद-पस्य निरस्तायामविद्यायां कुतो दु:खप्रसङ्ग: क्रमेण तस्मात् जन्मजरामरणं दु:खं चिन्ता-क्लेश: पीड़ा च सर्व्वं दूरे पलायन्ते । एवं जीवानामुदेति चित्ताकाशे धर्म्मालोक: । उदिते तस्मिन् मन:संयोगेन ज्ञानं दर्शनं विद्या स्मृतिर्बुद्धिश्च सर्व्वं प्रत्यक्षीभवति । तत इदानीं सिद्धार्थो बुद्ध: सञ्जात: ।

ततश्चागतोऽत्र बिम्बिकानगर्य्या राजा बुद्धस्य श्रीपादपद्मसन्दर्शनाय । सोऽस्मै उपदिदेश "अहिंसा परमो धर्म्म: ।" इत्येतत्त्वमनुतिष्ठ तद्धर्म्मं निर्व्वाणमोक्षमाप्स्यसीति ।

ततोऽसौ बुद्धो नैरञ्जननाम्नीं नदीं चिरिका-वनञ्च त्यक्त्वा उच्छलमुपवनं प्रतस्थे । अत्र स जनपथाद्दासराशुपोषणमङ्गीकृतवान् । तत स्तस्मात् स्थानान्निर्गत्य गयां नाड़ालं कुन्दिरं लोहितवस्तुकं गन्धपुरं सारथिपुरञ्च क्रमेण गत्वा त्यक्त्वा च काशिकामुपतस्थे, अत्रास्य कौण्डिन्य: सिद्ध: शिष्योऽभूत् बुद्धस्तं नाम्ना ज्ञानकौण्डिन्यं चकार । कालेऽस्मिन् बहु-संख्यका लोका आगत्यागत्य बुद्धस्य शिष्या अभवन् ।

तत: काश्यपाख्य: स उरुविल्वास्थितं सेनानी-नामकं ग्रामं प्रययौ तत्र नैरञ्जनतीरे नाम्ना उरुविल्वाकाश्यप: शताधिकविंशतिवया: पञ्च-शतशिष्यैरनुगत: प्रतिवसति स्म । लोका जान-न्त्यमुमर्हन्निति । बुद्धो गत्वास्य समीपं प्रदा-यास्मै ज्ञानोपदेशं विमलं शिष्यं तं चकार । दृष्ट्वा शक्तिमलौकिकीं बहवो लोका विस्मिता धर्म्मं बौद्धं गृहीतवन्त: ।

तदा बिम्बसारो मगधराज: शुश्राव गयशीर्षे बुद्धदेव: प्राप्त इति । गत्वा समीपं प्रपूज्य च परमया भक्त्यास्य शिष्यत्वं स्वीचकार । ततो मागधो स्वीयां नगरीं गन्तुं निमन्त्रयामास तम् । जग्राहास्य प्रश्रयं बुद्ध: । शारीपुत्रोऽत्र मौद्गलायनोऽस्य शिष्योऽभवन् ।

श्रुतवान् कोशलपति: प्रसेनजित् बुद्धो देवो राजगृहे जेतवने प्रतिवसत्यधुनेति । गत्वा च तत्र त्वरितं बुद्धसन्निधिमुवाच, पूर्ण्णकाश्यप: परिव्राजकगोशाल: वैरापुत्रसञ्जय: अजितकेश:

काबल इत्यते अन्ये च बहवो बुद्धवंशस्तिष्ठन्ति, न ते लोके कदापि बुद्धनाम्ना परिचाययितुं शेकुस्तर्हि भवान् किं न लज्जते अहं बुद्ध इत्यात्मानं परिचाययितुम्। बुद्धस्तम् ‘कुमारइत्यागतम्, आवयामास तेनोन्मीलितचक्षुः शिष्योऽभूत्तस्य ततः प्रसेनजित् कोशलराजः। दीक्षिते राज्ञि कोशलेश्वरे बुद्धः शुद्धोदनाय संवादं प्रेषयामास “राजन्। पुत्रस्ते पपाविदानीं मृत्युनिवारणमन्त्रम्। तेनैव सोऽखिलस्य जगतस्तृष्णां पापीयसीं वारयामास, शुद्धोदनः शाक्यपतिराकर्ण्य इत्तान्तं परां मुदमवाप। आनेतुं पुत्रं कपिलवस्तुनगर्य्यामस्मै दूतं पुनः पुनः प्रेषितवान् यो यः प्रयाति दूतोऽस्य सकाशं न स पुनः प्रतिनिवृत्तः स्थितोऽस्य दीक्षितस्तत्रैव। शुद्धोदनः साधुं कालुदायीतिनामानं पञ्चभिः सह प्रेषितवान्। उदायी शाक्यमनादङ्गीचकार यदि चाहं दीक्षितोऽप्यभविष्यम् वारमेकमपि प्रनिन्यवर्त्स्ये। उदायी बुद्धस्य समीपं गत्वैव दीक्षितः। बुद्धस्तं प्रतिज्ञापरिपूरणाय शुद्धोदनस्यान्तिकं प्रेषयामास। उदायी गत्वाह राजानं भो भूप! देवो बुद्धोऽत्रागिनमिषुर्न्नत्ववस्थातुमिच्छुर्नगर्य्याम् विहारेऽवस्थातुमियेष सः। राजा जेतवनस्थमिव न्यग्रोधारामं कपिलवस्तुनगरे विरचय्यागमनमस्य प्रतीक्षाञ्चक्रे। तत्रागत्य बुद्धो न्यग्रोधारामे तस्मिन्नुवास। अत्रागत्य पितृव्यौ शुद्धोदनोऽमृतोदनश्चास्य लब्धं लब्धं शाक्यसन्ततयश्च शिष्या अभूवन्। तत्रावस्थानसमये बुद्धस्य पालयित्री गौतमी वनिता यशोधरा च भैक्षाश्रमं गृहीतवत्यौ पुत्रोऽपि राहुलोऽजातकनिष्ठो जनकेन दीक्षितः।

ततो बुद्धो गृध्रकूटमागत्य वसतिञ्चक्रे। समयेऽस्मिन् देवदत्तोऽस्य ज्ञातिजः शत्रुः शिल्पिनं दाक्षिणात्यादानिनाय। तेन च निहन्तुं बुद्धं कूटयन्त्रं निरमायि। अनेनाहतो बुद्धो यथा प्राप निक्षेपणावसरे यन्त्रस्य तं बुद्धं विरचिषुः कुम्भीरस्तत्प्रहारेण प्राणांस्तत्याज।

कालेऽस्मिन् विम्बसारे मागधे पञ्चत्वं गते अजातशत्रुर्लब्धो दुर्द्दान्तो मगधं शशास, देवदत्तोऽस्य मित्रमासीत्। एकदाजातशत्रुर्बुद्धसन्निधावागत्य पप्रच्छ तं “नानाकर्मसु व्यासक्तो मनुष्यो धनमभीष्टमुपार्ज्जयितुं यतते, प्राप्य तु वाञ्छितं धनं सुखी च भवति, धर्मं तथा तु निधाय मनस्तद्रूपं सुखं प्रत्यक्षमाप्नुयात् किम्? बुद्धः प्रत्युवाच किं कर्मणा यागेन होमेन वा। न्यायान्यायौ विफलौ अधमानामुत्तमानाञ्च तिरस्कारपुरस्कारौ च तद्वत् निष्फलौ। पितरौ मातुलेयौ च योऽस्मिन् जगति प्राप्तवान् महासत्यम्, सत्ये पथि प्रविष्टश्च जानाति स एव जन्मैव व्यर्थमिति। सोऽस्मिन् जन्मन्येवान्त्ययोऽव्ययो निर्व्वाणं मोक्षं लभते न पुनरायाति सः। पृथिव्यादिभूतचतुष्टयेऽस्य यथाक्रमं भूतान्यलीभवन्ति। इत्थमुपदेशेन बुद्धस्य अजातशत्रोर्मानसं तत् पश्चादेव प्रवणं बभूव। योऽस्य जुगुप्सापात्रमासीत् स इदानीं भक्तिपात्रमस्याभूत्। अजातशत्रुर्बुद्धाद् दीक्षां जग्राह।

गृध्रकूटाद्बुद्धः पाटलीग्राममाजगाम। कपिलनामाच साधुर्ज्ञानयोगेन व्यलोकि। सम्भाव्य तं पथि गच्छन्तौ चतुर्द्दिशं निरीक्षाञ्चक्रे, आनन्दोऽस्य परिचरो जिज्ञासयामास किमित्थं निरीक्षसे व्यापारयंश्चक्षुषीति। बुद्ध आह आनन्द! परिहास्येऽहमिमं लोकमिदानीम्। ततः स आम्रग्रामं जम्बुग्रामं भण्डग्रामं हस्तिग्रामम् अन्यांश्च हजिनी मल्लागाञ्च ग्रामानतिक्रम्य भोजनगरं प्राप्तः। स्यागादस्माच्छुकाश्रमहावनमागत्यावस्थितः। अत्र कुण्डनाम्नो धातुगालकाद् वणिग्विशेषादाहार्य्यं गृहीतवान्।

ततोऽसावानन्दं सम्बोधयामास भो नगरीं कुशीं गन्तास्मि। अतःपरं तथागतो नगरीं पावामतिक्रम्य नदीं हिरण्वतीं तीर्त्वा निविडं वनमेकं प्राप्तः। अत्रानन्दं प्राह पार्श्वयोरहन्तीव्रवेदनया समाक्रान्तोऽस्मि, अतोऽहमत्रैव तिष्ठामीति। आनन्दो जलमानिनाय प्रक्षाल्य पादौ बुद्धो ध्यानं समालम्बे। कालेऽस्मिन्नागत्य पुक्कशो मल्लराजः पादौ बुद्धस्य प्रपूजयामास। बुद्धोऽस्य दीक्षां चकार। सोऽस्मै दत्तवान् सौवर्णानलङ्कारान् प्रणम्य च प्रस्थितः। गते मल्लराजे आनन्दं प्राह बुद्धः प्रियान् मे आनन्द! त्वं परिधापयालङ्कारान् सौवर्णानङ्गेष्विति। तथानुष्ठिते तदानीं देहस्य ज्योतिषास्याखिलं जगद् व्यालोकितमिवासीत्। भक्तिभरेणानन्दः प्राह भगवन्! न दृष्टं कदापि मयात्रभवतामेतादृशमौज्ज्वल्यं देहस्य। इदस्य तावत् कथय कारणञ्चामेति। चकार प्रत्युत्तरं बुद्धो देवो निबोध आनन्द। निर्व्वास्यतः प्रदीपस्य शिखेवाङ्गकान्तिर्मे वृद्धिमाप्तेत्यत्र कारणम्।

अनन्तरमुभौ मिलित्वा हिरण्वत्यास्तीरे आजग्मतुः। बुद्धस्तत्र स्वीयं समस्तं परिच्छदं परिहायैकवसनो नद्या हिरण्वत्याः कुशायाश्च नगर्य्या उभययोर्मध्यदेशस्थं वनं विविक्तं विवेश। पथि प्राह चानन्दं क्लान्तस्य मे शय्यां विधत्स्वेति। आनन्दः शय्यां सज्जीचकार, सुप्तोत्थितो बुद्ध आनन्दाय भिक्षुकाणां कर्त्तव्यं सूत्रान्तं विनयं मातृकादीनि धर्मतत्त्वान्युपदिदेश। आनन्दस्तत्सर्व्वं समाहितेन मनसा जग्राह। तत आनन्दमादिदेश सालमहिरुहयोर्मध्ये शय्यां स्थापय निशीथेऽद्य मे शेषं विज्ञाने हीति। ततो बुद्धस्तत्रैव समाधिमाधाय अपार्थिवं ज्योतिरवलोकयामास ततोऽसौ चिन्तयति स्म निर्व्वाणम्।

भक्तः परमानन्दो ररोद गाढं संज्ञायास्य विगलितवाष्पप्रवाहोऽविरलधारया समाह बुद्ध आनन्द! संसारोऽयमसारः सारो निर्व्वाणमेव तदर्थं यतस्वेति। इत्थं परमकृपालुर्बुद्धदेवो निर्व्वाणं प्राप।

इत्थं स हरेरवतारः—

“विकीर्य्य विज्ञानमयीं प्रभां प्रभुर्जगत्प्रदीपः प्रथितः प्रभाकरः।
बुद्धः स रात्रिर्महसां महोज्ज्वलो ज्वलंश्च निर्व्वाणपदं परं गतः॥
प्रक्षाल्य त्रैलोक्यमलं मलीमसं प्रदुष्टहिंसारसदूषितं विभुः।
प्रबोधधाराधरभूरिवारिभी रराज देवो भुवि बोधभास्करः॥”

कुशीनगरस्थिते मुकुटबन्धनचैत्येऽस्य शिष्याः देहं भस्मीभूतं चक्रुः। शिष्यवृन्देनास्य पवित्रदेहभस्मावशेषार्थं विवदमानेन निरणायि भस्मभिरेभिरष्टप्रदेशेष्वष्टौ चैत्या निर्म्मिता भवन्त्विति॥)

बुद्धमयं, क्ली, (बुद्धं स्तूपाकारतो ज्ञातं मयम्।) स्तौपिकम्। लोत् इति भाषा। इति त्रिकाण्डशेषः॥

बुद्धिः, स्त्री, (बुध्यतेऽनयेति। बुध्+क्तिन्।) निश्चयात्मिकान्तःकरणवृत्तिः। इति वेदान्तसारः॥ सविकल्पकज्ञानम्। इति चक्षौटीकायां नागभट्टः॥ तत्पर्य्यायः। मनीषा २ धिषणा ३ धीः ४ प्रज्ञा ५ शेमुषी ६ मतिः ७ प्रेक्षा ८ उपलब्धिः ९ चित् १० संवित् ११ प्रतिपत् १२ ज्ञप्तिः १३ चेतना १४। इत्यमरः। १। ५। १॥ धारणा १५ प्रतिपत्तिः १६ मेधा १७ मननम् १८ मनः १९ ज्ञानम् २० बोधः २१ कुशलः २२ संख्या २३ प्रतिभा २४। इति राजनिर्घण्टः॥ आत्मजा २५ पक्षा २६ विज्ञानम् २७। इति शब्दरत्नावली॥ *॥ अस्याः स्वरूपं यथा,—

“बुद्धिर्विवेचनारूपा सा ज्ञानजननी श्रुतौ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

अस्या अध्यात्माधिभूताधिदैवतानि यथा,—

“अध्यात्मं बुद्धिरित्याहुः षड्विन्द्रियविचारिणी।
अधिभूतञ्च मन्तव्यं ब्रह्मा तत्राधिदैवतम्॥”

इति महाभारते आश्वमेधिकपर्व्व॥ *॥

सा च सात्त्विकराजसतामसभेदेन त्रिविधा। सात्त्विकी यथा,—

“प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ।
सात्त्विकी॥”

राजसी यथा,—

“यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ।
राजसी॥”

तामसी यथा,—

“अधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ।
तामसी॥”

इति श्रीभगवद्गीता॥

तस्याः पञ्च गुणा यथा,—
"इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता ।
संशयः प्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः ॥"
इति महाभारते मोक्षधर्म्मः ।
इष्टानिष्टविपत्तिः इष्टानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्राख्या वृत्तिरित्यर्थः । व्यवसायः उत्साहः । समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः । संशयः कोटिद्वयस्पृक् ज्ञानम् । प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः । इति तट्टीका ॥ * ॥ तस्याः सप्त गुणा यथा—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा ।
ऊहोपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः ॥"
इति हेमचन्द्रः ॥ * ॥
तस्या वृत्तिः पञ्चधा यथा । प्रमाणम् १ विपर्य्ययः २ विकल्पः ३ निद्रा ४ स्मृतिः ५ । इति पातञ्जलम् ॥ * ॥ बुद्धिक्षयकरा यथा,—
"शोकः क्रोधश्च लोभश्च कामो मोहः परासुता ।
ईर्ष्या मानो विचिकित्सा कृपासूया जुगुप्सता ॥
द्वादशैते बुद्धिनाशहेतवो मानसा मताः ।"
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
अपि च ।
"बुद्धिक्षयकरा एते मामकासवकल्पिताः ॥"
बुद्धिवृद्धिकरा यथा,—
"निम्बाटरूषवृन्ताश्च बुद्धिवृद्धिकरा मताः ॥
बुद्धिक्षयकरान्नित्यं वर्जयेद्राजा च भोजनं ।
भोजयेदन्वहं बुद्धिवृद्धिहेतुं नृपोत्तम । ॥"
इति कालिकापुराणे ८६ अध्यायः ॥ * ॥
न्यायमते सा विभुगुणः पुनर्द्विविधा अनुभूतिः स्मृतिश्च । यथा,—
"विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्व्विधा ॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।"
इति भाषापरिच्छेदः ॥

बुद्धिमान्, [त्] त्रि, (बुद्धिर्व्विद्यते यस्य । बुद्धि + मतुप् ।) बुद्धियुक्तः । ज्ञानवान् । यथा,—
"तद्बुध्यते यद्धि जनस्तुदन्तं
स बुद्धिमान् यो न करोति पापम् ॥"
इति गारुडे १५५ अध्यायः ॥

बुद्धिसहायः, पुं, (बुद्धौ बुद्ध्या कृते कार्य्ये इति भावः । सहायः ।) मन्त्री । इति हलायुधः ॥ मन्त्री सहायकर्त्ता च ॥

बुद्धीन्द्रियं, क्ली, (बुद्धेर्बुद्ध्यात्मकं वा इन्द्रियम् ।) ज्ञानेन्द्रियम् । यथा,—
"मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके ।
बुद्धीन्द्रियमिति प्राहुः शब्दकोषविचक्षणाः ॥"
इति शब्दरत्नावली ॥
(यथा मनुः । २ । ९०-९२ ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वशः ।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम् ।
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ ॥"

बुद्बुदः, पुं वर्त्तुलाकारजलविकारः । जलविम्बुकी इति भुड्भुड़ि इति च ख्यातः । बुद्बुदोऽम्बु-स्फोट इत्यस्य । इत्यमरभरतौ ॥ अन्यच्च ।
"अभ्रच्छाया तृणादग्निर्नीचसेवा पथे जलम् ।
वेश्यारागः खले प्रीतिः षड़ेते बुद्बुदोपमाः ॥"
इति गारुड़े ११५ अध्यायः ॥
गर्भस्थावयवविशेषः । यथा,—
"पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत् ॥"
इति सुखबोधः ॥
(यदुक्तं यथा,—
"प्रथमेऽहनि रेतस्य संयोगात् कललञ्च यत् ।
जायते बुद्बुदाकारं शोणितञ्च दशाहनि ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥)

बुध, इर् ज ञ वेदने । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् । ज्वलादिरयम् ।) इर्, अबुधत् अबोधीत् । ज बोधः बुधः । ञ बोधति बोधते । इति दुर्गादासः ॥

बुध, औ विज्ञापने । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-अनिट् ।) औ बोद्धा । बोधति गुरुः । इति दुर्गादासः ॥

बुध, य ङ औ वेदने । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ बुध्यते शास्त्रं सुधीः । औ बोद्धा । इति दुर्गादासः ॥ (जागरार्थे अकर्म्मकोऽपि । यथा, रघौ ।१०।६।
"ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ॥"
"आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां जहौ इत्यर्थः ॥" इति तट्टीका ॥)

बुधः, पुं, (बुध्यते यः । "बुध + इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) पण्डितः । तत्पर्य्यायः । विद्वान् २ विपश्चित् ३ दोषज्ञः ४ सन् ५ सुधीः ६ कोविदः ७ धीरः ८ मनीषी ९ ज्ञः १० प्राज्ञः ११ संख्यावान् १२ पण्डितः १३ कविः १४ धीमान् १५ सूरिः १६ कृती १७ कृष्टिः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२ । इत्यमरः । २ । ७ । ५ ॥ विदग्धः २३ दूरदृक् २४ सूरी २५ वैदी २६ वृद्धः २७ वृद्धः २८ विधानगः २९ प्रशिलः ३० । इति शब्दरत्नावली ॥ व्यक्तः ३१ प्राप्तरूपः ३२ सुरूपः ३३ अभिरूपः ३४ बुधानः ३५ कवितावेदी ३६ वप्ता ३७ विदितः ३८ काविः ३९ । इति जटाधरः ॥ (यथा, नवरत्ने । १ ।
"अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्य्याद्वशम् ॥")
नवग्रहान्तर्गतचतुर्थग्रहः । स च बृहस्पतिभार्य्यातारागर्भे चन्द्राज्जातः । तत्पर्य्यायः । रौहिणेयः २ सौम्यः ३ । इत्यमरः । १ । ३ । २६ । हेमा ४ वित् ५ ज्ञः ६ बोधनः ७ इन्दुपुत्रः ८ । इति ज्योतिस्तत्त्वम् ॥ * ॥ तस्य जन्मादिवृत्तान्तं यथा । "महायशेमाश्च सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार । बहुशश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच । तस्य बृहस्पतिद्वेषादुशना पार्ष्णिग्राहोऽभूत् । अङ्गिरसश्च सकाशादुपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत् । यतश्चोशना ततो हि जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यममचक्रुः । बृहस्पतेरपि सकलदेवसैन्ययुतः सहायः शक्रोऽभवत् । एवं तयोरतीवोग्रः संग्रामस्तारानिमित्तस्तारकामयनामाभवत् । ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवाः देवेषु चाशेषदानवा मुमुचुः । एवञ्च देवासुराहवक्षोभक्षुब्धहृदयमशेषमेव जगद् ब्रह्माणं शरणं जगाम । ततश्च भगवानप्युशनसं शङ्करमसुरान् देवांश्च निवार्य्य बृहस्पतये तारामदात् । ताञ्चान्तःप्रसवामवलोक्य बृहस्पतिराह । नैष मम क्षेत्रे भवत्यान्यस्तुतो धार्य्यस्त्वत्स्वैनं अलमलमतिधार्ष्ट्येनेति । सा च तेनैवमुक्ता पतिव्रता भर्त्तृवचनात्तमिषीकास्तम्बे गर्भमुत्सर्ज्जं । स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप । बृहस्पतिमिन्दुञ्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः । सत्यं कथयास्माकमतिसुभगे । कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच । बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे ततः स कुमारस्तां शप्तुमुद्यतः प्राह च । दुष्टाम्ब । कस्मान्मम तातं नाख्यासि । अद्यैव ते अलीकलज्जावत्यास्तथा शास्तिमयमहं करोमि । यथा नैवमन्याप्यतिमन्थरवचना भविष्यतीति । अथ भगवान् पितामहस्तं कुमारं सन्निवार्य्य स्वयमपृच्छत्ताराम् । कथय वत्से । कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्येवमुक्ता लज्जाजडमाह सोमस्येति । ततः स्फुरदुच्छ्वसितामलकपोलकान्तिर्भगवानुडुपतिरालिङ्ग्य कुमारं साधु साधु वत्स । प्राज्ञोऽसीति बुध इति नाम चक्रे । इति विष्णुपुराणे ४ अंशे ६ अध्यायः ॥ मत्स्यपुराणे चतुर्व्विंशाध्याये विशेषश्चायम् । सूत उवाच ।
"ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः ।
दिव्यपीताम्बरधरः पीताभरणभूषितः ॥
सर्व्वास्त्रशास्त्रविद्विद्वान् हस्तिशास्त्रप्रवर्त्तकः ।
राज्ञः सोमस्य पुत्रत्वाद्राजपुत्रो बुधः स्मृतः ॥
जातमात्रः स तेजांसि सर्व्वाण्येवाचिपद्बली ।
ब्रह्माद्यास्तत्र ते जग्मुर्देवा देवर्षिभिः सह ॥
बृहस्पतिगृहे सर्व्वे जातकर्म्मोत्सवं तदा ।
पप्रच्छुश्च सुरास्तारां केन जातः कुमारकः ॥
ततः सा लज्जिता तेषां न किञ्चिदवदत्तदा ।
पुनः पुनस्तदा पृष्टा लज्जयन्ती वराङ्गना ॥
सोमस्येति चिरादाह ततोऽगृह्णाद्विधुः सुतम् ।

बुध इत्यकरोन्नाम प्रादाद्राज्यञ्च भूतये ॥
अभिषेकं ततः कृत्वा प्रधानमकरोद्विभुः ।
ग्रहसाम्यं प्रदायाथ ब्रह्मा ब्रह्मर्षिसंयुतः ॥
पश्यतां सर्व्वभूतानां तत्रैवान्तरधीयत ।
इलोदरे च धर्म्मिष्ठं बुधः पुत्त्रमजीजनत् ॥”
अन्यत् सर्व्वमाख्यानमेकमेव ॥ * ॥ अस्य वर्णः दूर्व्वाश्यामः । स च उत्तरदिङ्नपुंसकमूर्त्तआत्रेयसर्व्ववेदरजोगुणमिश्रितरसमिथुनराशिमरकतमणिमगधदेशानामधिपतिः । अस्य मित्रं आदित्यः शुक्रश्च । अस्य शत्रुः शशी । अस्य राशिभोगः अष्टादश दिनानि । इति ज्योतिस्तत्त्वम् ॥ * ॥ स तु मगधदेशोद्भवः । अत्रिवंशजातः । द्व्यङ्गुलदीर्घः । पीतवर्णः । वैश्यजातिः । चतुर्भुजः । वामोर्द्धक्रमतश्चर्म्मवरखड्गगदाधारी । उत्तरास्यः । सिंहवाहनः । सौम्यः । पीतवस्त्रः । अस्याधिदेवता नारायणः । प्रत्यधिदेवता विष्णुः । धनिष्ठानक्षत्रयुक्तद्वादश्यां जातः । इति ग्रहयज्ञतत्त्वम् ॥ * ॥ स च ग्रामचारी । शुभग्रहः । नीलवर्णः । सुवर्णद्रव्यस्वामी । वर्त्तुलाकृतिः । शिशुः । इष्टकागृहसञ्चारी । वातपित्तकफात्मकः । क्लीग्रहः । प्रातःकाले प्रबलः । पक्षिस्वामी । सकलरसप्रियश्च । इति ज्योतिषम् । अस्य वारे जातफलं यथा,—

“गुणी गुणज्ञः कुशलः क्रियादौ
विलासशाली मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥”
इति कोष्ठीप्रदीपः ॥ * ॥

सूर्य्यवंशीयराजविशेषः । यथा,—
“तस्मात् कृतिरथस्तस्य देवामीढ़स्ततो बुधः ।
बुधाच्च विबुधश्चैव तस्माच्चाश्वतिस्ततः ॥”
इत्यग्निपुराणम् ॥

(वेगवतो राज्ञः पुत्त्रः । यथा, भागवते । ९ । २ । ३० ।
“ततस्तत् केवलस्तस्मात् बन्धुमान् वेगवांस्ततः ।
बुधस्तस्याभवद् यस्य तृणविन्दुर्महीपतिः ॥”)

बुधचक्रं, क्ली (बुधस्य ग्रहविशेषस्य चक्रम् ।) बुधग्रहस्य स्वसञ्चारादष्टादशदिनोत्तरराशिसञ्चारगत्यावधिसप्तविंशतिनक्षत्रघटितनरशुभाशुभज्ञानार्थनराकारचक्रम् । यथा,—
“भोगो मुखैकमथ मूर्द्ध्नि चतुर्षु रोगः
षट्पाणिभे सुखहतं सुखदं श्रुतेऽष्ट ।
दुःखं पदाब्धिसुयशो हृदि वस्वराज्यं
नाभीन्दुभे द्विभगलेति फलं बुधस्य ॥”
इति समयामृतम् ॥

बुधतातः, पुं, (बुधस्य ग्रहविशेषस्य तातः पिता ।) चन्द्रः । इति शब्दचन्द्रिका ॥

बुधरत्नं, क्ली, (बुधप्रियं रत्नम् । शाकपार्थिवादित्वात् समासः ।) मरकतमणिः । इति राजनिर्घण्टः ॥

बुधवारः, पुं, (बुधस्य वारः ।) बुधग्रहस्य वासरः । यथा,—
“यैः कृता श्रावणे मासि अष्टमी रोहिणी-
युता ।
किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥”
इति तिथ्यादितत्त्वम् ॥
(अस्मिन् जातफलं यथा, कोष्ठीप्रदीपे ।
“गुणी गुणज्ञः कुशलः क्रियादौ-
विलासशीलो मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥)

बुधसानुः, पुं, पर्णम् । यज्ञपुरुषः । इति संक्षिप्तसारोणादिवृत्तिः ॥

बुधसुतः, पुं, (बुधस्य सुतः पुत्त्रः ।) पुरूरवाः । इति पुराणम् ॥ (यदुक्तं हरिवंशे । २६ । १ ।
“बुधस्य तु महाराज ! विद्वान् पुत्त्रः पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥”
अयं हि इलागर्भसंभूतः ॥ बुधस्य बुद्धदेवस्य सुतः पुत्त्र इति विग्रहे । बुद्धपुत्त्रो राहुलः । स तु यशोधराया गर्भसम्भूतः ।)

बुधा, स्त्री, (बोधयति रोगिणं या । बुध् + “इगुपधेति ।” ३ । १ । १३५ । इति कस्ततष्टाप् ।) जटामांसी । इति शब्दचन्द्रिका ॥ (गुणादिकमस्या जटामांसीशब्दे ज्ञातव्यम् ॥)

बुधानः, पुं, (बोधयति बुध्यते वा । बुध बोधने + “युधिबुधिदृशः किच्च ।” उणा० २ । ९० । इति आनच् किच्च ।) गुरुः । विज्ञः । इति मेदिनी । ने, २९ ॥ ब्रह्मवादी । प्रियवादी । इत्युणादिकोषः ॥ कविः । इति जटाधरः ॥

बुधाष्टमी, स्त्री, (बुधवारयुता अष्टमी । शाकपार्थिवादित्वात् समासः ।
“अष्टमीबुधवारेण पक्षयोरुभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कथा पुरा ॥”
इति वचनादस्यास्तथात्वम् ।)
व्रतविशेषः यथा । बुधाष्टमीव्रतं चैत्रपौषहरिशयनादीतरकाले कर्त्तव्यम् । यदाह राजमार्त्तण्डः ।
“पतङ्गे मकरे याते देवे जाग्रति माधवे ।
बुधाष्टमीं प्रकुर्व्वीत वर्जयित्वा तु चैत्रकम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मधौ तथा ।
बुधाष्टमीं न कुर्व्वीत कृता हन्ति पुराकृतम् ॥”
एतद्व्रतमारब्धमपि चैत्रादौ न कर्त्तव्यमिति । यथा स्मृतिः ।
“मीने धनुषि देवेशे सुप्तेऽस्तङ्गदिने तथा ।
बुधाष्टमीं न कुर्व्वीत पूर्व्वविद्धामपि क्वचित् ॥”
इति व्रतकालविवेकः ॥ * ॥
अपि च ।
“अष्टमी बुधवारेण पक्षयोरुभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कथा पुरा ॥
तस्यां नियमकर्त्तारो न स्युर्दुर्गतिभाजनाः ।
तण्डुलस्याष्टमुष्टीनां वर्जयित्वाङ्गुलीद्वयम् ॥
भक्तं यद्भक्तिमद्भ्यां कामनायुक्तमानवः ।
आम्रपत्रपुटे कृत्वा यो भुङ्क्ते कुशवेष्टिते ॥
कलम्बिकाम्लिकोपेतं काम्यं तस्य फलं भवेत् ।
बुधं यथोपचारेण पूजयित्वा जलाशये ॥
शक्तितो दक्षिणां दद्यात् कर्कटीं तण्डुलान्विताम् ।
बुं बुधायेति बीजाद्यैः कार्य्यं वा कमलादिके ॥
बाबचापचरं ग्रासं दधे चाङ्गानि भक्षतः ।
बुधाष्टमीकथा पुण्या श्रोतव्या व्रतिभिर्गुह ॥ * ॥
पुरे पाटलिपुत्त्राख्ये वीरो नाम द्विजोत्तमः ।
रम्भा भार्य्या च तस्यासीत् कौशिकः पुत्त्र
उत्तमः ॥
दुहिता विजया नाम धनपालो वृषोऽभवत् ।
गृहीत्वा कौशिकस्तञ्च गोभि गङ्गागतोऽरमत् ॥
गोपालकैर्वृषश्चौरैः क्रीडन्नपहृतो बलात् ।
गङ्गातः स च उत्थाय वनं बभ्राम दुःखितः ॥
जलार्थं विजया चागात् भ्राता सार्द्धञ्च साग्र-
गात् ।
पिपासितो मृणालार्थी आगतोऽथ सरोवरम् ।
दिव्यस्त्रीश्च पूजादि दृष्ट्वा चाप्यथ विस्मितः ॥
स च गत्वा ययाचेऽन्नं तानुचेऽहं बुभुक्षितः ।
स्त्रियोऽब्रुवन् व्रतं कर्त्तुं दास्यामश्च कुरु व्रतम् ।
पश्चार्थमन्नपानार्थं पूजयामासतुर्बुधम् ।
पुटकद्वयं गृहीत्वान्नं बुभुजाते प्रदत्तकम् ॥
स्त्रियो गता गतौ तौ तु धनपालमपश्यताम् ।
चौरैर्हृतं गृहीत्वाथ प्रदोषे प्राप्तवान् गृहम् ॥
वीरश्च दुःखितं मत्वा रात्रौ सुप्ता यथासुखम् ।
जनश्च त्वरितं दृष्ट्वा कस्य देया सुता मया ।
यमायेत्यब्रवीद्दुःखात् स चायाद्व्रतसत्-
फलात् ॥
स्वर्गं गतौ च पितरौ व्रतं राज्याय कौशिकः ।
चक्रेऽयोध्यामहाराज्यं दत्त्वा च भगिनीं यमे ॥
यमोऽपि विजयामाह गृहस्था त्वं पुरान्तरम् ।
गोहाटयान्यत्र गते यमे सा न तथाकरोत् ॥
अपश्यद्भ्रातरं स्वां सा यामिकां पाशयातनाम् ।
अथोद्विग्ना कौशिकाय आचचाक्षा विमुक्ति-
दम् ।
व्रतं चक्रे ततो मुक्ता माता तस्याश्चरद्व्रतम् ॥”
इति गारुडे बुधाष्टम्यादि १३३ अध्यायः ॥ * ॥
विस्तरस्तु ब्रह्मपुराणोक्तबुधाष्टमीव्रतपद्धतौ द्रष्टव्यः ॥

बुधितं, त्रि, (बुध्यते स्म । सेट् बुध् + क्त ।) बुद्धम् । ज्ञातम् । इत्यमरः । ३ । २ । १०८ ॥

बुधिलः, त्रि, (बुध्यते यः । बुध् + किलच् ।) विद्वान् । इत्युणादिकोषः ॥

बुध्नः, पुं, (बध्नातीति । बन्धबन्धने “बन्धेर्ब्रधिबुधी च ।” उणा० ३ । ५ । इति नक् बुधादेशश्च ।) वृक्षमूलम् । इत्यमरः । २ । ४ । १२ ॥ (मूलदेशः । अधोभागः । यथा, अथर्ववेदे । २ । १४ । ४ ।
“गृहस्य बुध्न आसीनास्ता इन्द्रो वज्रेणाधि-
तिष्ठतु ।”)
शिवः । यथा,—
“निवेश्य बुध्नं चरणं शितानना
गुरुं समारोढुमथोपचक्रमुः ।”
इति हरविलासे राजशेखरः । इति भरतः ॥

बुम्ह, इर् न उ निशामने। (इति कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अबुम्हीत्। न बुम्हति बुम्हते। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ७२।
"ससंसे शरवर्षेण दिव्येनेति बुबुम्ह सः॥")

बुम्ध, इर् न उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर्, अबुधत् अबुन्धीत्। न बुन्धति बुन्धते। उ बुन्धित्वा बुद्धा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

बुन्ध, क बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी। क बुन्धयति॥ इति दुर्गादासः॥

बुबुधानः, पुं, आचार्य्यः। देवः। पण्डितः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ७। ४४। ३।
"दधिक्रावाणं बुबुधानो
अग्निमुपब्रुव उषसं सूर्य्यं गाम्॥")

बुभुक्षा, स्त्री, (भोक्तुमिच्छा। भुज धौ भक्षे + "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३। १। ७। इति सन्। ततः "अः प्रत्ययात्।" ३। ३। १०२। इत्यस्ततष्टाप्।) क्षुधा। इत्यमरः। २। ९। ५४॥ (यथा, रामायणे। २। २८। १८।
"अतीववातस्तिमिरं बुभुक्षा चास्ति नित्यशः।
भयानि च महान्यत्र ततो दुःखतरं वनम्॥")

बुभुक्षितः, त्रि, (बुभुक्षा भोजनेच्छा सञ्जातास्य। बुभुक्षा + "तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षुधितः। इत्यमरः। ३। १। १०॥ (यथा, मनुः। १०। १०५।
"अजीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन्॥")

बुल, क मज्जने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क बोलयति प्रस्तरः पयसि। तालव्यवर्गाद्यादिरयमिति केचित्। इति दुर्गादासः॥

बुलिः, स्त्री, (बुल + इन् किच्च।) भगम्। इति हेमचन्द्रः। ३। २७३।

बुषं, क्ली, (बुस्यते उत्सृज्यते यत्। बुसिर् उत्सर्गे + "इगुपधेति।" ३। १। १३५। इति कः। पृषोदरादित्वात् षत्वं विभाषया।) बुसम्। तुच्छधान्यम्। आगड़ा इति भाषा। यथा,—
"उक्तेषमेवतुषतोयभषाभिलाषकुक्षाषमाषबुषवेषतुषाररोषाः। इति महर्न्मषमध्ये पुरुषोत्तमः। इति भरतः॥

बुस, य इर् त्यागे। इति कविकल्पद्रुमः। (दिवा०-पर०-सक०-सेट्।) य बुस्यति जलं मेघः त्यजतीत्यर्थः। इर् अबुसत् अबोसीत्। असात् पुषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

बुसं, क्ली, (बुस्यते तुच्छत्वादुत्सृज्यते इति। बुस इर् उत्सर्गे + "इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) तुच्छधान्यम्। आगड़ा इति भाषा। तत्पर्य्यायः। कडङ्गरः २। इत्यमरः। २। ९। २२॥ बुषम् २। इति भरतः॥ बूषम् ४। इति शब्दरत्नावली॥ (उदकम्। यथा, ऋग्वेदे। १०। २७। २४।
"आविः स्वः कृणुते गूहते बुसम्॥"
"बुसमुदकम्॥" इति सायनः॥)

बुस्त क अनादरे। आदरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बुस्तयति खलं लोकः। बुस्तयति धीरं साधुः। इति दुर्गादासः॥

बुस्तं, क्ली, (बुस्यते अनाद्रियते यत्। बुस्त क अनादरे + घञ्। यद्वा बुस्यते त्यज्यते स्म इति। बुस्इर उत्सर्गे कर्म्मणि क्तः।) मांसपिण्डकविशेषः। स्थालीभृष्टमांसम्। पनसादिफलस्यासारभागः। इत्यमरभरतौ॥ भौँता इति ख्यातः॥

बूक्कं, त्रि, (बुक्कयति शब्दायते इति। बुक्क + अच्। पृषोदरादित्वाद्दीर्घः।) बुक्कम्। हृदयम्। इत्यमरटीकायां रमानाथः॥

बृक्कं, त्रि, (बुक्कयति शब्दायते इति। बुक्क + अच्। पृषोदरादित्वादृकारः।) बुक्कम्। इत्यमरटीकायां सारसुन्दरी॥

बृ गि वृत्याम्। भृत्याम्। इति कविकल्पद्रुमः॥ (स्वादि, क्र्यादि०-पर०-सक०-सेट्।) गि बृणोति बूर्य्यः बूर्णिः। इति दुर्गादासः॥

बेकटः, पुं, मत्स्यभेदः। तरुणः। विदूषकः। इति शब्दरत्नावली॥

बोकड़ी, स्त्री, वस्ताम्नी। इति राजनिर्घण्टः॥

बोद्धा, त्रि, (बुध्यते यः। बुध् + तृच्।) बोधकर्त्ता। यथा,—
"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥"
इति भर्त्तृहरिः॥

बोधः, पुं, (बोधनमिति। बुध् + भावे घञ्।) ज्ञानम्। इति त्रिकाण्डशेषः॥ (यथा मार्कण्डेये। २६। १।
"वर्द्धमानं सुतं सा तु राजपत्नी दिने दिने।
तमुल्लापादिना बोधमनयन्निर्ममात्मकम्॥"
अयं हि बुद्धेर्जातः। तथाहि मार्कण्डेये। ५०। २७।
"बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम्।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत॥"
ऋषिविशेषः। यथा मार्कण्डेये। ७६। २८॥
"तयात्र सूक्तो हैमिन्या गृहीत्वा च सुतश्च सा।
बोधस्य द्विजमुख्यस्य गृहे नीतवती पुनः॥"
सूर्य्यरूपभेदः। यथा, मार्कण्डेये। १०१। १६।
"बोधश्चावगतिश्चैव स्मृतिर्विज्ञानमेव च।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः॥"
जागरणकालः। चैतन्यम्। यथा, मार्कण्डेये। ८१। ६७।
"प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥")

बोधकः, पुं, (बोधयतीति। बुध् + णिच् + ण्वुल्।) सूचकः। इति शब्दमाला॥ पुस्तकान्तरे बाधकोऽपि पाठः। बोधजनके त्रि॥ (यथा, साहित्यदर्पणे। २। ४।
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः॥")

बोधकरः, पुं, (करोतीति करः। कृ + ट। बोधस्य प्रबोधस्य करः।) निशान्ते बोधकारकः॥ तत्पर्य्यायः। वैतालिकः २। इत्यमरः। २। ८। ९७॥

बोधज्ञः, पुं, (बोधं अभिप्रायं जानातीति। बोध + ज्ञा + क।) अभिप्रायवेत्ता। श्रीकृष्णः। यथा,—
"सर्व्वभावविदां श्रेष्ठो बोधज्ञः कामशास्त्रवित्।
कामिनीं बोधयामास वासयामास वक्षसि॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५३ अध्यायः॥

बोधनं, क्ली, (बुध् + णिच् + ल्युट्।) गन्धदीपनम्। इति मेदिनी। ने, ९९॥ वेदनम्। विज्ञापनम्। इति बुधधात्वर्थदर्शनात्॥ (उद्दीपनम्। यथा माघे। ९। ३४।
"समयेन तेन चिरसुप्तमनो-
भवबोधनं सममबोधि यत॥"
"मनोभवस्य कामस्य बोधनं उद्दीपनं यस्मिन्।"
इति तट्टीकायां मल्लिनाथः। ज्ञानम्। यथा, रघौ। ९। ४९।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम्॥"
"तेषां चललक्ष्याणां इङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानं च करोति।"
इति तट्टीकायां मल्लिनाथः॥) दुर्गाया बोधनं यथा। देवीपुराणे।
"इषे मास्यसिते पक्षे कन्याराशिगते रवौ।
नवम्यां बोधयेद्देवीं क्रीडाकौतुकमङ्गलैः॥"
अत्र कन्यादित्यादिषु इत्यपि गौणाश्विनपरम्। अतएव कालकौमुद्यादिधृतम्। यथा,—
"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाश्विने।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्द्दनम्॥"
इति॥
बोधयेदिति शेषः। तथापि नवमीबोधनं कन्यायामेव तथैव सम्भवात् तेन सिंहार्के तुलार्केऽप्याश्विनत्वेन वाक्यरचना। एवं प्रतिवर्षं कर्त्तव्यत्वादार्द्रादिनक्षत्रालाभेऽपि बोधनादिकार्य्यम्। नक्षत्रयोगस्तु फलातिशयाय। तथा च लिङ्गपुराणम्।
"मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेत्।
तथा तिथ्यन्तरेष्वेवमृक्षेषु च फलोदयः॥"
यथाह देवलः।
"तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम्।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्म्मणि॥"
कृष्णनवम्यामार्द्रायोगो विधौ मन्त्रे च श्रूयते।
तथा च लिङ्गपुराणम्।
"कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः॥"
चतुर्थपादे गीतवादित्रनिःस्वनैरिति कालिकापुराणे पाठः।
"इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः।

श्रीहर्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥”
इति मन्त्रलिङ्गम् ॥
अकाल इति तु रात्रित्वेन दक्षिणायनस्य। तथाच श्रुतिः। तपस्तपस्यौ शैशिरावृतुः मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च ग्रैष्मावृतुः। अथैतदुत्तरायणं देवानां दिनं नभाश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः सहाश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनं देवानां रात्रिरिति। एवञ्च। रात्रावेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नराः कुर्य्युः प्रतिसम्वत्सरं नृपेत्येत-द्विषयम् ॥ अतएव लिङ्गपुराणकालिकापुराणयोर्द्दिवेत्युक्तम्। एवञ्च कालिकापुराणे बोधने रात्राविति पदं दैवतरात्रिपरम्। ततश्च पूर्व्वाह्णे नवम्यामार्द्रायुक्तायां बोधनं पूर्व्वाह्णेतरकाल एव आर्द्रालाभे दिवेत्यत्र दिवापदात्तत्रापि बोधनं अन्यथा दिवापदं व्यर्थं स्यात्। ज्योतिषार्णवे व्यक्तमुक्तं वराहेण।
“कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः।
तत्र बोधः प्रकर्त्तव्यो देव्या रात्रौ शुभप्रदः ॥”
शिव आर्द्रा। एवञ्चोभयदिने पूर्व्वाह्णे नवमीलाभे परत्रार्द्रालाभे परत्र बोधनं न तु युग्मात् पूर्व्वत्र। युग्मबाधकपूर्व्वाह्णस्य बाधकनक्षत्रानुरोधात् दिवा नक्षत्रालाभे तु पूर्व्वाह्ण एव नवम्यां उभयत्र पूर्व्वाह्णलाभे पूर्व्वदिन एव युग्मात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणफलत्वाच्च।
“माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी।
माकरीति च यत्प्रोक्तं तत्प्रायोऽस्तिदर्शनात ॥”
इति ॥
सौरागमात माकर्य्यादिवत् आर्द्रायोग इत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते। ततश्चार्द्रारहितबोधने मन्त्रान्तरानुपदेशात् तन्मन्त्रः प्रणवयुक्तत्वेन प्रयुज्यते।
“यन्न्यूनञ्चातिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वञ्चाविकलं भवेत् ॥”
इति योगियाज्ञवल्क्यात् षष्ठ्यां बोधनेऽप्येवम् ॥
नवमीबोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनम्। तथा भविष्ये।
“षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥”
सन्ध्योक्ता वराहेण।
“अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत् ॥”
षष्ठ्यां बोधने तु प्रागुक्त ऐं रावणस्य वधार्थायेति अष्टमपद्यान्तिमे षष्ठ्यां सायाह्ने बोधयाम्यत इति पठेत्। यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभः तदा पूर्व्वदिन-बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायं षष्ठ्यलाभस्तदा परेऽहनि पूर्व्वाह्णे षष्ठ्यां बोधनम्।
“बोधयेद्विल्वशाखायां षष्ठ्यां देवीं फलेषु च।
षष्ठ्यां बोधने तु नक्षत्रानुपदेशान्न तदादरः ॥”
इति तिथ्यादितत्त्वम् ॥

बोधनी, स्त्री, (बुध्+भावे ल्युट्। ङीप्। बोधः। (बोध्यतेऽनया। बुध्+णिच्+करणे ल्युट्। अनया हि मूर्च्छितो बोध्यते अतोऽस्य तथात्वम्।) पिप्पली। इति मेदिनी ॥ (बुध्यतेऽस्याम्। बुध्+अधिकरणे ल्युट्। स्त्रियां ङीप्। अस्यां हि योगनिद्राया हरेः प्रबोधनात्तथात्वम्।) कार्त्तिकशुक्लैकादशी। सा तु उत्थानैकादशी। यथा,—
“शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥”
इति तिथ्यादितत्त्वम् ॥
अपि च।
“तावद्गर्ज्जन्ति तीर्थानि वाजिमेधादयो मखाः।
मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी ॥”
इति हरिभक्तिविलासे पद्मपुराणवचनम् ॥

बोधनीयः, त्रि, (बुध्+कर्म्मणि अनीयर्।) बोध्यः। बोधितव्यः। बोधयोग्यः ॥

बोधवासरः, पुं, (बोधस्य भगवतो मायानिद्रायाः प्रबोधस्य वासरः।) भगवतः प्रबोधदिनम्। उत्थानैकादशी। यथा,—
“जन्मप्रभृति यत् पुण्यं नरेणोपार्ज्जितं भुवि।
वृथा भवति तत् सर्व्वं न कृत्वा बोधवासरम् ॥”
इति हरिभक्तिविलासधृतस्कन्दपुराणवचनम् ॥

बोधानः, पुं, (बुध्यते इति। बुध्+आनच्।) गीष्पतिः। विज्ञः। बुधभेदः। इति शब्दरत्नावली ॥

बोधिः, पु, (बुध+“सर्व्वधातुभ्य इन्।” ४।११७। इति इन्।) समाधिभेदः। पिप्पलवृक्षः। इति मेदिनी। धे, ११ ॥ (यथास्य पर्य्यायः।
“पिप्पलो बोधिरश्वत्थश्चैत्यवृक्षो गजाशनः ॥”
इति वैद्यकरत्नमालायाम् ॥)
बोधः। इति त्रिकाण्डशेषः ॥ ज्ञातरि, त्रि। इत्युणादिकोषः ॥

बोधितं, त्रि, (बुध्+णिच्+क्त।) ज्ञापितम्। यथा,—
“रात्रावेव महामाया ब्रह्मणा बोधिता पुरा ॥”
इति तिथ्यादितत्त्वम् ॥

बोधितरुः, पुं, (बोधिरेव तरुः।) अश्वत्थवृक्षः। इति हेमचन्द्रः। ४। १९७ ॥ (गुणादयोऽस्याश्वत्थशब्दे ज्ञातव्याः ॥)

बोधितव्यं, त्रि, (बुध+णिच्+तव्य।) ज्ञापितव्यम्। यथा। बोधितव्योऽयं पूर्व्वपक्षः। इति शाङ्करभाष्यम् ॥

बोधिद्रुमः, पु, (बोधिरेव द्रुमः।) अश्वत्थवृक्षः। इत्यमरः। २। ४। २० ॥

बोधिवृक्षः, पुं, (बोधिरेव वृक्षः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः ॥

बोधिसत्त्वं, स्त्री, (बोधि बोधवत् सत्त्वम्।) बुद्धविशेषः। इति हेमचन्द्रः। २। १४६ ॥ (यथा, कथासरित्सागरे। २२। ३५।
“दयालुर्बोधिसत्त्वांशः कोऽप्यो जीमूतवाहनात्।
शक्नुयादर्थिसात् कर्त्तुमपि कल्पद्रुमं कृती ॥”)

बौद्धं, स्त्री, (बुद्धेन प्रणीतम्। बुद्ध+अण्।) बुद्धकृतनिरीश्वरशास्त्रम्। तत् सर्व्वैः शास्त्रकारैः खण्डितं अग्राह्यम्। इति श्रीभागवतम्। बौद्धशास्त्रसंस्थापनकर्त्ता बृहस्पतिः। यथा,—
“प्राह वाचस्पतिं देवः पीडितोऽस्मि रजेः सुतैः।
न यज्ञभागो राज्यं मे निर्जितश्च बृहस्पते !।
राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप। ॥
ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम्।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्म्मणा ॥
गत्वाथ मोहयामास राजपुत्रान् बृहस्पतिः।
जिनधर्म्मं समास्थाय वेदबाह्यं स वेदवित् ॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः।
वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान् ॥”
इति मात्स्ये २४ अध्यायः ॥
(बौद्धदर्शनं यथा, सर्व्वदर्शनसंग्रहे। “अत्र बौद्धैरभिधीयते यदभ्यधायि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम्,
“कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्तरदर्शनात् ॥”
इति ॥
अन्वयव्यतिरेकावविनाभावनिश्चायकाविति पक्षे साध्यसाधनयोर्व्यभिचारो दुरवधारणो भवेत् भूते भविष्यति वर्त्तमाने अनुपलभ्यमानेऽपि व्यभिचारशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकेऽपि मते व्यभिचारशङ्का दुष्परिहरेति चेत् मैवं वोचः विनापि कारणं कार्य्यमुत्पद्यतामित्येवंविधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्येत यस्मिन्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तं व्याघातावधिराशङ्केति। तस्मात्तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः कारणोपलम्भे सत्युपलम्भः उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलम्भ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते तथा तादात्म्यनिश्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः अप्रवृत्ते तु बाधके भूयः सहभावोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता। शिंशपावृक्षयोश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ह्यत्यन्ताभेदे तत् सम्भवति पर्य्यायत्वेन युगपदपि प्रयोगायोगात् नाप्यत्यन्तभेदे गवाश्वयोरनुपलम्भात्। तस्मात्

कार्य्यलिङ्गकौ कारणमात्मानमनुमापयत इति सिद्धम्।

यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्य्यात् तं प्रति ब्रूयात् अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न प्रथमः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अग्निरस्कवचनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात्। किञ्च प्रमाणतदाभासव्यवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्य्यलिङ्गकमनुमानम् अनुपलब्ध्या कञ्चिदर्थं प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम्। तथाचोक्तं तथागतैः।

"प्रमाणान्तरसामान्यस्थितिरन्यधियो गतेः।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्॥"
इति॥

पराक्रान्तञ्चात्र सूरिभिरिति ग्रन्थभूयस्त्वभयादुपरम्यते।

ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्व्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्क इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुध्यन्ते। सर्व्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिन्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधत इति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्थायिनः सकाशाद्व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्।

नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति नो वा। आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्यं समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि शिलाशकलमङ्कुरे न चेष वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवत्सहकारिलाभात् स्थायिनः अतीतानागतयोः क्रमेण करणमुपपद्यत इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्व्वन्ति न वा न चेत् नापेक्षणीयास्ते अकिञ्चित् कुर्व्वतां तेषां तादात्म्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते न वा भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात्। कार्य्यस्य। तदुक्तम्।

"वर्षातपाभ्यां किं व्योम्नश्चर्म्मण्यस्ति तयोः
फलम्।
चर्म्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः॥"
इति।

अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा सततं कार्य्यं कुर्य्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादौःस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽऽस्थेया तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजञ्चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्व्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे तस्मिन्नप्युपकारे पूर्व्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्य्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्य्यं जनयति तत्सापेक्षो वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीये अपेक्ष्यमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्ष्यमाणेनोपकारेण बीजादौ धर्म्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः

सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्व्वद्रूपादिपदवेदनीयो जायत इति फलितं ममापि मनोरथद्रुमेण।

तस्मादक्षणिकस्यार्थक्रिया दुर्घटा नाप्यक्रमेण घटते विकल्पासहत्वात्। तथाहि युगपत्सकलकार्य्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा। प्रथमे तत्कालवत् कालान्तरेऽपि तावत् कार्य्यकरणमापतेत्। द्वितीये स्थायित्वदुराशा मूषिकभक्षितबीजादावङ्कुरादिजननप्रार्थनामनुहरेत। यद् विरुद्धधर्म्माध्यस्तं तन्नाना यथा शीतोष्णे। विरुद्धधर्म्माध्यस्तञ्चायमिति जलधरे प्रतिबन्धसिद्धिः। न चायमसिद्धो हेतुः स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्य्ययसिद्धत्वात्तत्रासामर्थ्यसाधकौ प्रसङ्गतद्विपर्य्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यद्यदा यज्जननासमर्थं तत्तदा तन्न करोति यथा शिलाशकलमङ्कुरम् असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः। यद्यदा यत् करोति तत्तदा तत्र समर्थं यथा सामग्री स्वकार्य्यं करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसङ्गव्यत्ययः विपर्य्ययः। तस्माद्विपक्षे क्रमयौगपद्यव्यावृत्त्या व्यापकानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्य्ययबलात् गृहीतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धम्।

तदुक्तं ज्ञानश्रिया।

"यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च
भावा अमी
सत्ताशक्तिरिहार्थकर्म्मणि मितेः सिद्धेषु सिद्धा
न सा।
नाप्येकैव विधान्यथा परकृतेनापि क्रियादिर्भवेत्।
द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति॥" इति॥

न च कणभक्षाक्षचरणादिपक्षकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात्। न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः प्रयोजकगौरवापत्तेः अनुगतत्वाननुगतत्वविकल्पपराहतेश्च सर्षपमहीधरादिषु विलक्षणेषु क्षणेष्वनुगतस्याकारस्य मणिषु सूत्रवद्भूतकणेषु गुणवच्चाप्रतिभासनाच्च। किञ्च सामान्यं सर्व्वगतं स्वाश्रयसर्व्वगतं वा प्रथमे सर्व्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन स्वविषयसर्व्वगतमिति। किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत् सम्बध्यते अनागच्छद्वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः। किञ्च विनष्टे घटे सामान्यमवतिष्ठते विनश्यति स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः द्वितीये नित्यत्ववाचो युक्त्ययुक्तिः

तृतीये प्रत्यक्षप्रवृत्तिः इत्यादि दूषणप्रसङ्गात् सामान्यमप्रामाणिकम् । तदुक्तम् ।

"अन्यत्र वर्तमानस्य ततोऽन्यस्थानजन्मनि ।
तस्मादचलतः स्थानाद्वृत्तिरित्यतियुक्तता ॥
यत्रासौ वर्तते भावस्तेन सम्बध्यते न तु ।
तद्देशिनञ्च व्याप्नोति किमप्येतन्महाद्भुतम् ॥
न याति न च तत्रासीदस्ति पश्चान्न चांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥"

इति ॥

अनुवृत्तप्रत्ययः किमालम्बन इति चेत् अङ्ग अन्यापोहालम्बन एवेति सन्तोष्टव्यमायुष्मतेति अलमतिप्रसङ्गेन ।

सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम् अन्यथा तन्निविवृत्सूनां तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः । तस्मात् सर्वं दुःखं दुःखमिति भावनीयम् । ननु किंवदिति पृष्टे दृष्टान्तः कथनीय इति चेन्मैवं स्वलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावात् नैतेन सदृशमपरमिति वक्तुमशक्यत्वात् । ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् एवं शून्यं शून्यमित्यपि भावनीयं स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात् । यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्येदन्ताया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात् न चैतदिष्टं कस्यचिद्वादिनः । न चार्द्धजरतीयमुचितं न हि कुक्कुट्या एको भागः पाकाय अपरो भागः प्रसवाय कल्प्यतामिति कल्प्यते । तस्मादध्यस्ताधिष्ठानतत्सम्बन्धदर्शनद्रष्टॄणां मध्ये एकस्यानेकस्य वा असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्थमचीकथन् भिक्षुपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमव्यावर्त्तनेन सर्वशून्यतायामेव पर्यवसानम् । अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव तथाहि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम् । असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादुःष्यात् । यथोक्तम् ।

"न सतः कारणापेक्षा व्योमादेरिव युज्यते ।
कार्यस्यासम्भवो हेतुः खपुष्पादेरिवासतः ॥"

इति ॥

विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवता अलङ्कारावतारे

"बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः ॥"

इति ।

"इदं वस्तुबलायातं यद्वदन्ति विपश्चितः ।
यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥"

इति च ॥

न क्वचिदपि पक्षे अवतिष्ठत इत्यर्थः । इष्टार्थ-

व्यवहारश्च न स्वप्नव्यवहारवत् संवृत्या सङ्गच्छते । अत एवोक्तम्

"परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ ।
कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना ॥"

इति ॥

तदेवं भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ परनिर्वाणं शून्यरूपं सेत्स्यतीति वयं कृतार्थाः नास्माकमुपदेश्यं किञ्चिदस्तीति । शिष्यैस्तावद्योगश्चाचारश्चेति द्वयं करणीयम् । तत्राप्राप्तस्यार्थस्य प्राप्तये पर्यनुयोगो योगः गुरूक्तस्यार्थस्याङ्गीकरणमाचारः गुरूक्तस्याङ्गीकरणादुत्तमाः पर्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः । गुरूक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्यान्तरस्य शून्यत्वमङ्गीकृतं कथमिति पर्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा । एषा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्यम् अन्यथा जगदान्ध्यं प्रसज्येत । तत् कीर्तितं धर्मकीर्तिना ।

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति ॥"

बाह्यं ग्राह्यं नोपपद्यत एव विकल्पानुपपत्तेः । अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात् । अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च । किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा । न चरमः कृत्स्नैकदेशविकल्पादिना तन्निराकरणात् । न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च । यथोक्तम्

"षट्केन युगपद्योगात् परमाणोः षडंशता ।
तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः ॥"

इति ॥

तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम् । तदुक्तम्

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥"

इति ॥

ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानेनात्मा वेद्यन्ते तैश्च नीलादयः । भेदे हि सत्यधुना अनेनार्थस्य सम्वित्तं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्राप्यनादिरविच्छिन्नप्रवाहाभेदवासनैव निमित्तम् । यथोक्तम् ।

"सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥" इति ॥

"अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥"

इति च ॥

न च रसवीर्यविपाकादि समानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुराया अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिराद्युपहताक्ष्णां केशेन्द्रनाडीज्ञानभेदवदनाद्युपप्लववासनासामर्थ्याद्व्यवस्थोपपत्तेः पर्यनुयोगायोगात् । यथोक्तम्

"अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते ।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा ॥
तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत् ।
यदा तदा न सञ्चोद्या ग्राह्यग्राहकलक्षणा ॥"

इति ॥

तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम् । ततश्च प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो महोदय इति । अन्ये तु मन्यन्ते यदोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात् । न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात् । ननु भेदे सहोपलम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसहत्वनियमासम्भवाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादव्यतिरेकात् । अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेन प्रतिभासत इति न च तत्राहमुल्लेख इति । तथोक्तम् ।

"परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः ।
ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः ॥"

इति ॥

"यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते ॥"

इति च ॥

तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेर्न हि वसुमित्रो बन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं तत्प्रामाण्ये भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च अविसंवादान्नीलतादिकमेव संविदाना बाह्यमेवोपाददते जगदुपेक्षन्तेऽवान्तरमिति व्यवस्थादर्शनाच्च । एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत अतो बहिर्वदिति वदता बाह्यं ग्राह्यमेवेति भावनीयमिति भवदीय एव बाणो भवन्तं प्रहरेत् ।

ननु ज्ञानाभिन्नकालस्यार्थस्य ग्राह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया

समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्य्यनुयोगपरिहारौ समग्राहिषाताम्।
"भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः।
हेतुत्वमेव च युक्तिज्ञा ज्ञानाकारार्पणक्षमम्॥"
इति॥

तथाच यथा पुष्ट्या भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण स्नेहः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्। तदुक्तम्
"अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम्।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता॥"
इति॥

न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्व्वत्राविशेषात् तान्तु सारूप्यमाविशत् सरूपयितुं घटयेदिति च। तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्व्वे तदतिरिक्तसापेक्षाः यथा अविवक्षत्यजिगमिषति मयि वचनगमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथाच विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखना इति। तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम्। यथोक्तम्
"तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्॥"
इति॥

तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम्। विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्य्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्व्वक्षणः कक्षीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्व्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्तव्यं न चेदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात्। सर्व्वे समर्था इति पक्षे कार्य्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्व्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरस्यानिच्छताप्यच्छमतिना स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम्। ते चत्वारः प्रत्ययाः प्रसिद्धाः आलम्बनसमनन्तरसहकार्य्यधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति समनन्तरप्रत्ययात् प्राचीनज्ञानाद्बोधरूपता सहकारिप्रत्ययादालोकाच्चक्षुषोऽधिपतिप्रत्ययाद्विषयग्रहणप्रतिनियमः विदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तौ नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्। एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि एवं चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्त एभिर्विषया इति रूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिसविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्म्माधर्म्मौ च संस्कारस्कन्धः।

तदिदं सर्व्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं दुःखसमुदायनिरोधमार्गाश्चत्वारः आर्य्यस्य बुद्धाभिमतानि तत्त्वानि। तत्र दुःखं प्रसिद्धं समुदायो दुःखकारणं तद्द्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् इदं कार्य्यं ये अन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं कारणसमवायः तन्मात्रस्य फलं न चेतनस्य कस्यचिदिति सूत्रार्थः यथा बीजहेतुरङ्कुरो धातूनां षण्णां समवायाज्जायते। तत्र पृथिवी धातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति अब्धातुः स्नेहं रसञ्च जनयति तेजोधातू रूपमौष्ण्यञ्च वायुधातुः स्पर्शनं चलनञ्च आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्म्माणां धर्म्मता धर्म्मस्थितिता धर्म्मनियामकता च प्रतीत्यसमुत्पादानुलोमतेति। तथागतानां बुद्धानां मते धर्म्माणां कार्य्यकारणरूपाणां या धर्म्मता कार्य्यकारणभावरूपा एषोत्पादादनुत्पादाद्वा स्थिता यस्मिन् सति यदुत्पद्यते तत्तस्य कारणस्य कार्य्यमिति धर्म्मतेत्यस्य विवरणं धर्म्मस्य कार्य्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्तल्प्रत्ययः धर्म्मस्य कारणस्य कार्य्यं प्रति नियामकता। नन्वयं कार्य्यकारणभावश्चेतनमन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्म्मता उत्पादादनुत्पादाद्वा धर्म्माणां स्थिता न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालो नालाद्गर्भस्ततः शूकं ततः पुष्पं ततः फलं न चात्र बाह्ये समुदाये कारणं बीजादि कार्य्यमङ्कुरादि वा चेतयते अहमङ्कुरं निर्व्वर्त्तयामि अहं बीजेन निर्व्वर्त्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयाब्धौ ग्रन्थविस्तरभीरुभिरुपरम्यते। तदुभयनिरोधः तदनन्तरं विमलज्ञानोदयो वा मुक्तिः तन्निरोधोपायो मार्गः स च तत्त्वज्ञानं तच्च प्राचीनभावनाबलाद्भवतीति परमं रहस्यं सूत्रस्यान्तं पृच्छतां कथितं भवन्तश्च सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्त्विति भगवताभिहिततया सौत्रान्तिकसंज्ञा सञ्जातेति। केचन बौद्धा बाह्येषु गन्धादिषु आन्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्रानास्थामुत्पादयितुं सर्व्वं शून्यमिति प्राथमिकान् विनेयानचीकथत् भगवान् द्वितीयांस्तु विज्ञानमात्रग्रहाविष्टान् विज्ञानमेवैकं सदिति तृतीयानुभयं सत्यमित्यास्थितान् विज्ञेयमनुमेयमिति सेयं विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः। एषा हि तेषां परिभाषा समुन्मिषति विज्ञेयानुमेयत्ववादे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन व्याप्तिसंवेदनस्थानाभावेनानुमानप्रवृत्त्यनुपपत्तेः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तम्।
"कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्।
विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः॥"
इति॥

"ग्राह्यं वस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा।
न तद्वस्तु न तज्ज्ञानं शब्दलिङ्गेन्द्रियादिजम्॥"
इति च॥

ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्भद्रं मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्य्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बोधिचित्तविवरणे
"देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः।
भिन्ना हि देशना भिन्ना शून्यताऽद्वयलक्षणा॥"
इति॥

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्।
"अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै।
परितः पूजनीयानि किमन्यैरिह पूजितैः॥
ज्ञानेन्द्रियाणि पञ्चैव तथा कर्म्मेन्द्रियाणि च।
मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥"
इति॥

विवेकविलासे बौद्धमतमित्थमभ्यधायि।
"बौद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम्।
आर्य्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात्॥
दुःखमायतनञ्चैव ततः समुदयो मतः।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः॥
दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि।
आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः॥
क्षणिकाः सर्व्वसंस्कारा इति या वासना
स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः॥
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः॥
रागादिज्ञानसन्तानवासनाच्छेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता॥
कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्व्वाह्णभोजनम्।
सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिः॥”
इति॥

इति सर्व्वदर्शनसंग्रहे बौद्धदर्शनम्॥)

(बुद्धेरिदमिति व्युत्पत्त्या वाच्यलिङ्गः। बुद्ध-सम्बन्धि वस्तु॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति। बुद्ध+अण्।) बुद्धशास्त्रावलम्बी। तत्पर्य्यायः। भिक्षुकः २ चपणः ३ अह्नीकः ४ वैनायिकः ५। इति त्रिकाण्डशेषः॥

बौधः, पुं, (बुधस्यापत्यं पुमान्। बुध+अण्।) बुधस्य पुत्रः। स च पुरूरवाः। इति हेमचन्द्रः। ३। ३६५॥

ब्यध, य औ ताडे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) य विध्यति शत्रुं शूरः। औ अव्यात्सीत्। कश्चित्तु द्विर्भूतस्यादिकारी-भूतयकारस्य बधेर्वकारो वर्ग्यः अन्यत्र दन्त्यः इति मन्वानः सनि विव्यत्सतीत्याह। इति दुर्गादासः॥

ब्युष, क उत्सर्जे। उत्सर्गे। (चुरा०-पर०-सक०-सेट्।) क ब्योषयति धनं दाता। ब्योषं चिकटु। इति दुर्गादासकृतधातुदीपिकायां गोविन्दभट्टः॥

ब्रण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ब्रणति। इति दुर्गादासः॥

ब्रततिः, स्त्री, (व्रजन्ती ततिर्विस्तृतिर्यस्याः। पृषोदरादित्वात् साधुः। यद्वा, प्रतनोतीति। तन-दुणविस्तारे “स्त्रिय् क्तौ च संज्ञायाम्।” ३। ३। १७४। इति स्त्रिच्। पृषोदरादित्वात् पस्य वः।) लता। विस्तारः। इत्यमरः॥

ब्रध्नः, पुं, (बन्धबन्धने+“बन्धेर्ब्रधिबुधी च। उणा० ३। ५। इति नक् ब्रधादेशश्च।) सूर्य्यः। (यथा, ऋग्वेदे। १। ६। १।
“युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः।
रोचन्ते रोचना दिवि॥”)
हयमूलम्। अर्कवृक्षः। इत्यमरः। २। ४। १५। शिवः। इति हेमचन्द्रः॥ मेदिनीकारस्त्वान्तःस्थ

वकारादौ लिखितोऽयं शब्दः॥ (दिनम्। अश्वः। इति निघण्टुः॥ चतुर्दशमनोर्भौत्यस्य पुत्रभेदः। यथा, मार्कण्डेये। १००। ३२।
“गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः॥”)
रोगविशेषः। तस्य लक्षणं यथा,
“अभ्यभिष्यन्दिगुर्व्वामसेवनान्निचयं गतः।
करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्द्दिशेत्॥”
इति माधवकरः॥

तस्य चिकित्सा।
“भृष्टश्चैरण्डतैलेन सम्यक् कल्कोऽभयाभवः।
कृष्णासैन्धवसंयुक्तो ब्रध्नरोगहरः परः॥
अजाजीहपुषाकुष्ठं गोमेदबदरान्वितम्।
काञ्जिकेन तु संपिष्टं तल्लेपो ब्रध्नजित् परः॥”
गोमेदं पत्रम्। तथा च निघण्टौ धन्वन्तरिः।
“पत्रं दलाह्वयं रामं गोमेदं रसनाह्वयम्॥”
इति भावप्रकाशः॥
(अस्य सम्प्राप्तिलक्षणं यथा,—
“यस्य वायुः प्रकुपितः शोफशूलकरश्चरन्।
वंक्षणाद्वृषणौ याति ब्रध्नस्तस्योपजायते॥”
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये॥)

ब्रह्म, क्ली, (बृंहति वर्द्धते निरतिशयमहत्त्व-लक्षणवृद्धिमान् भवतीत्यर्थः। बृहिर्वृद्धौ+“बृंहे-र्नोऽच्च।” उणा० ४। १४५। मनिन् नकार-स्याकारः। रत्वञ्च।) वेदः। (यथाह श्रुतिः।
“तस्मादेतद्ब्रह्मनामरूपमन्नञ्च जायते॥”
तथा च भागवते। १। १। १।
“जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः
स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्
सूरयः॥”
वेदान्तमते ‘वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजड़समूहोऽवस्तु।’ ‘ब्रह्मैव नित्यं वस्तु तदन्यदखिलमनित्यम्।’ तथाहि,—
“यस्मादर्व्वाक् संवत्सरोऽहोभिः परिवर्त्तते।”
तदेव ज्योतिषां ज्योतिः। नित्यं विभु सर्व्वगतं सुसूक्ष्मम्। आकाशवत् सर्व्वगतश्च नित्यः। अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातिर्दातुः परायणं यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति सभूमा यो वै भूमा तदमृतम्।” इत्यादि श्रुतिभ्यो ब्रह्मणो नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति। तथा, नेवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत्। आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन-मिषत् सदेव सौम्येदमग्र आसीदेकमेवा-द्वितीयं नेति नेति नेह नानास्ति किञ्चन यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्त्यम्।” इत्यादि श्रुतिवच-नेभ्यो ब्रह्मणोऽन्यत्वं भेदप्रपञ्चेऽनित्यत्वञ्च तस्यैव पुंसः प्रतिभाति। तथानुमानमपि यथा, विम-तोऽचेतनवर्गोऽनित्यो विभक्तत्वात् घटपटस्तम्भा-

दिवत् इति। अनेन हि विभक्तस्यानित्यत्वे-ऽवगते तद्विलक्षणतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमपि अर्थादवगच्छति। इति वेदान्तसारे विद्वन्मनोरञ्जिनीटीका॥ तत्र श्रुतिवाक्यानि यथा, “सत्यं ज्ञानमनन्तं ब्रह्म। विज्ञानमानन्दं ब्रह्म।” “आनन्दो ब्रह्मेति व्यजानात् आनन्दरूपममृतं यद् विभाति, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तत् विजि-ज्ञासस्व तद्ब्रह्मेति।” इत्याद्यसंख्येयं श्रुति-वचनमनुसन्धेयम्॥”)

तत्त्वम्। तपः। इत्यमरः। ३। ३। ११४॥ ब्रह्म चतुर्व्विधं यथा। विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४। इति वेदान्तसारः॥ अस्य लक्षणम्। यथा, आत्मबोधे।
“यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्॥
तिर्य्यगूर्द्ध्वमधःपूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते द्वयम्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्॥
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्॥”
अपि च। “सत्यमानन्दमद्वयमनन्तमेकरूपं वाङ्मनसोऽगोचरं सर्व्वगं सर्व्वातीतं चिदेकरसं देशकालापरिच्छिन्नमपादमपि शीघ्रगमपाणि च सर्व्वग्रहमचक्षुरपि सर्व्वदृक् अश्रोत्रमपि सर्व्वश्रोतृ अचिन्त्यमपि सर्व्वज्ञं सर्व्वनियन्तृ सर्व्वशक्ति सर्व्वेषां सृष्टिस्थितिलयकर्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति॥” शुद्धबुद्धस्वभाव इत्यौपनिषदाः। १। आदिविद्वान् सिद्ध इति कापिलाः। २। क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः। ३। लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः। ४। शिव इति शैवाः। ५। पुरुषोत्तम इति वैष्णवाः। ६। पितामह इति पौराणिकाः। ७। यज्ञपुरुष इति याज्ञिकाः। ८। सर्व्वज्ञ इति सौगताः। ९। निरावरण इति दिगम्बराः। १०। उपास्यत्वेन देशित इति मीमांसकाः। ११। लोकव्यवहारसिद्ध इति चार्व्वाकाः। १२। यावदुक्तोपपन्न इति नैयायिकाः। १३। विश्वकर्म्मेति शिल्पिनः। १४। इति कुसुमाञ्जलिवृत्तिः॥ योगशास्त्रमते।
“ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं रवः।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम्॥
इति महाभारते मोक्षधर्म्मः॥

तस्य टीका। ब्रह्मणः स्वरूपमक्षराविक्षरणाद्बोधमाह। ब्रह्मतेजोमयमिति। तेजोमयं ज्ञानात्मकम्। शुक्रं बीजभूतम्। यस्य सर्व्वमिदं द्वयः रचनीयं श्रेयं सर्व्वं यस्यैकस्य भूतं सत्यं न तु विवर्त्तवादिनामिवासत्यं भूतस्य विद्वस्य अकल्पितस्य तत्र सर्व्वं स्थावरजङ्गमोपाधिवशात् इयं द्वेधा॥ तच्च सगुणनिर्गुणभेदेन द्विविधं यथा,

"ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सन्ततम्।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!॥
मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवानिच्छया विकरोति च॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्॥
केचिद्वदन्ति द्विविधं ब्रह्म प्रकृतिपूर्व्वकम्।
शश्वद् ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्॥
तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्व्वकारणम्।
अथवैकं परं ब्रह्म द्विविधं भवतीच्छया॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
तत्रासक्तश्च सगुणः स शरीरी च प्राकृतः॥
निर्गुणश्च निर्लिप्तः अशरीरी निरङ्कुशः।
स चात्मा भगवान्नित्यः सर्व्वाधार, सनातनः॥
सर्व्वेश्वरः सर्व्वसाक्षी सर्व्वशास्ता फलप्रदः।
शरीरं द्विविधं शम्भो। नित्यं प्राकृतमेव च॥
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
अहं त्वञ्चापि भगवन्नावयोर्नित्यविग्रहः॥
आवयोरंशभूता ये प्राकृता नष्टविग्रहाः।
ब्रह्मादयश्चांशाश्च मदंशा विष्णुरूपिणः॥
ममाप्येवं द्विधा रूपं द्विभुजश्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह॥
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं मे वदन्त्येवं द्वौ प्रधानौ तु तन्मते॥
पुरुषश्च सदा नित्यो नित्या प्रकृतिरीश्वरी।
सदा तौ द्वौ च संश्लिष्टौ सर्व्वेषां पितरौ शिव।॥
सशरीरौ निःशरीरौ स्वेच्छया सर्व्वरूपिणौ।
प्राधान्यञ्च यथा पुंसः प्रकृतेश्च तथा सदा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४३ अध्यायः॥

नन्दयशोदां प्रति श्रीकृष्णवाक्यं यथा,—
"मामेव परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुत्त्रबुद्धिं त्यक्त्वा लभ परं पदम्॥"
इति तत्रैव १२७ अध्यायः॥

सगुणस्य तस्य नवधा रूपं यथा,—
"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्१।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्२॥
वेदा वदन्ति सत्यं यं ३ नित्यमाद्यं विचक्षणाः४।
यं वदन्ति सुराः सर्व्वे परं स्वेच्छामयं प्रभुम्५॥
सिद्धेन्द्रा मुनयः सर्व्वे सर्व्वरूपं वदन्ति यम् ६।
यमनिर्व्वचनीयञ्च योगीन्द्रः शङ्करो वदेत् ७॥
स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८।
शेषो वदेदनन्तं यं नवधा रूपमीश्वरम् ९॥
तर्काणामेव संख्या यं बहुविधं रूपमीश्वरम्।
वैष्णवानामेकरूपं वेदानामेकमेव च॥
पुराणानामेकरूपं तस्मान्नवविधं स्मृतम्।
न्यायो निर्व्वचनीयञ्च यन्मतं शङ्करोऽब्रवीत्॥
नित्यं वैशेषिकास्त्वन्तं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्व्वरूपञ्च वेदान्तः सर्व्वकारणम्।
पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्॥"
इति तत्रैव १२८ अध्यायः॥

सगुणनिर्गुणभेदेन तस्य चतुर्द्धा रूपं यथा,—
"चतुर्व्विभागः संसृष्टौ चतुर्द्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्द्दनः॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान्।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः।
इत्थं चतुर्द्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितो विष्णुः करोति परिपालनम्।
मन्वादिरूपी चान्येन कालरूपी परेण च॥
सर्व्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः॥
अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपो भागोऽन्यः सर्व्वभूतानि चापरः॥
विनाशं कुर्व्वतस्तस्य चतुर्द्धैवं महात्मनः॥"
इति विष्णुपुराणे १ अंशे २१ अध्याय॥

ब्रह्मध्यानं यथा,—
"ब्रह्मध्यानं प्रवक्ष्यामि मायातत्त्वविमर्द्दकम्।
यच्छेद्वाङ्मनसि प्राज्ञस्तद्यच्छेज्ज्ञानमात्मनि॥
ज्ञानं महति संयच्छेद्य इच्छेत् श्रेय आत्मनि।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूततन्मात्रैर्गुणजन्मायुनादिभिः।
स्वप्रकाशं निराकारं सदानन्दमनादिमत्॥
नित्यं शुद्धं बुद्धमुक्तं सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचराः॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्य विज्ञानवानात्मा युक्तेन मनसा सदा॥
न स तत्पदमाप्नोति युक्तेन मनसा तदा।
स तत्पदमवाप्नोति स हि भूयो न जायते।
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिनियमः स्मृतः।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम्।
मनोधृतिर्धारणं स्यात् समाधिर्ब्रह्मणः स्मृतः॥'
साकारस्य तस्य ध्यानं यथा,—
"अमूर्त्ते चेत् स्थिरो न स्यात्ततो मूर्त्तं विचिन्तयेत्।
हृत्पद्मकर्णिकामध्ये शङ्खचक्रगदाब्जवान्॥
श्रीवत्सकौस्तुभयुतो वनमाली श्रिया युतः।
नित्यः शुद्धो बुद्धियुक्तः नित्यानन्दात्मकः परः॥
आत्माहं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्व्विंशतिमूर्त्तिः स शालग्रामशिलास्थितः॥
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा हरिः।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत॥
निष्कामो मुक्तिमाप्नोति मूर्त्तीर्ध्यायन् स्तुवन् जपन्॥"
इति गारुडे मूर्त्तिमूर्त्तध्यानं ४४ अध्यायः॥

ब्रह्मपदप्राप्तिकारणं यथा,—
"ब्रह्मण्याधाय कर्म्माणि निःसङ्गः कामवर्जितः।
प्रसन्नेनैव मनसा कुर्व्वाणो याति तत्पदम्॥"
इति कूर्म्मपुराणे ३ अध्यायः॥

सर्व्वं ब्रह्म यथा,—
"ब्रह्मैवेदं जगत् सर्व्वं ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका॥"
इत्यात्मबोधः॥

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पु, ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं सरोवरम्।) ब्रह्मणा निर्म्मितसरोवरविशेषः। यथा,
"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाख्यं सरः।
ब्रह्मणा निर्म्मितं पूर्व्वं स्नानाय स्वर्गवासिनाम्॥
आयामेन शतव्यामं विस्तीर्णेन तदर्द्धकम्।
सर्व्वपापहरं पुण्यं देवलोकात् समागतम्॥
तत्र स्नानमन्त्रः।
कमण्डलुसमुद्भूत ब्रह्मकुण्डाम्बसत्तम।।
हर मे सर्व्वपापानि पुण्यं स्वर्गञ्च साधय॥
इत्यनेन तु मन्त्रेण स्नाति तस्मिन् सरोजले।
पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्॥
ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"
इति कालिकापुराणे ८१ अध्यायः॥

ब्रह्मकूटः, पुं, (ब्रह्मा कूटे शिखरे यस्य।) पर्व्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥
"ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

ब्रह्मकूर्च्चं, क्ली, (ब्रह्मणो ब्राह्मणस्य कूर्च्चमिव।) व्रतविशेषः। यथा। वृद्धशातातपः।
"रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतःपरम्॥"
पञ्चगव्यपानं व्रतरूपं तेनोपवासः। ब्रह्मकूर्च्चमाह जावालः।
"अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः॥"

प्राणायामो जपश्चैव प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येते षड् योगस्य प्रसाधकाः ॥
पापक्षयो देवतानां प्रीतिरिन्द्रियसंयमः ।
मनसः स्थिरता तेभ्यस्तत्त्वालोकश्च सर्व्वदा ॥
गायत्र्या प्रणवेनाथ मात्रया प्राणसंयमः ।
जपध्यानयुतो गर्भस्तेन हीनस्त्वगर्भकः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठश्चतुर्विंशतिमात्रिकः ।
मध्या द्वादशमात्रास्तु ॐकारं सततं जपेत् ॥
श्रुत्वा यथाक्षरं सम्यक् शब्दं गीर्यातिं संश्रुणी ।
प्रणवे च जते तद्वत् परं ब्रह्म न संशयः ॥
तारके प्रणवे जप्ते परं ब्रह्म प्रसीदति ।
अष्टाक्षरश्च मन्त्रो गायत्री द्वादशाक्षरा ॥
सर्व्वेषामिन्द्रियाणान्तु प्रवृत्तिर्विषयेषु या ।
निवृत्तिर्मनसा तस्याः प्रत्याहारः प्रकीर्त्तितः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः समाहृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेषु संस्थितः ॥
प्राणायामैर्द्वादशभिर्यावत् कालकृतो भवेत् ।
यस्तावत् कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ॥
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
तुष्टे तु नियतो युक्तः समाधिः सोऽभिधीयते ॥
ध्यायन्न चलते यस्य मनोऽभिध्यायते भृशम् ।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्थिता ।
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तत् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्येयस्तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥
मनः संकल्परहितमिन्द्रियार्थांस्तु चिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥
चित्तस्यास्थिरता भ्रान्तिर्दौर्मनस्यं प्रमादता ।
योगिनां कथिता दोषा योगविघ्नप्रवर्त्तकाः ॥
स्थित्यर्थं मनसः सर्व्वं स्थूलरूपं विचिन्तयेत् ।
तद्गतं निश्चलीभूतं सूक्ष्मस्थं स्थिरतां व्रजेत् ॥
न विना परमात्मानं किञ्चिज्जगति विद्यते ।
विश्वरूपं तमेवेह इति ज्ञात्वा न मुह्यति ॥
ॐकारं परमं ब्रह्म ध्यायेद्हृत्स्थितं विभुम् ।
दीर्घघोषस्वरहितं जपेत्तत्रार्थयान्वितम् ॥
हृदि सञ्चिन्तयेत् पूर्व्वं प्रधानं तस्य चोपरि ।
तमो रजस्तथा सत्त्वं मण्डलत्रितयं क्रमात् ॥
तन्मध्ये चिन्तयेत् तस्मिन् पुरुषं जीवसंज्ञितम् ।
तस्योपरि गुणैश्वर्य्यमष्टपत्रं सरोरुहम् ॥
ज्ञानन्तु कर्णिका तत्र विज्ञानं केशरं स्मृतम् ।
वैराग्यं नालं तत्कन्दो वैष्णवो धर्म्म उत्तमः ॥
कर्णिकायांस्थितं चक्रं जीववर्णन्नचलं विभुम् ।
ध्यायेद्हृदि संयुक्तमोङ्कारं मुक्तिसाधकम् ॥
व्यक्ताव्यक्तं च पुरुषस्तिस्रो मात्राः प्रकीर्त्तिताः ।
अर्द्धमात्रा परं ब्रह्म ज्ञेयोऽध्यात्मविदुत्तमैः ॥
ध्यायन् यदि त्यजेत् प्राणान् याति ब्रह्मण्य-
सेनिकम् ।
हरिं संस्थाप्य देहेऽन्ते ध्यायन् योगी च
मुक्तिभाक् ॥
आत्मानमात्मना केचित् पश्यन्ति ध्यानचक्षुषः ।
सांख्यबुद्ध्या तथैवान्ये योगेनान्ये तु योगिनः ॥
ब्रह्मप्रकाशकं ज्ञानं भवबन्धविभेदकम् ।
तदेकचित्ततायोगो मुक्तिदो नात्र संशयः ॥
जितेन्द्रियान्तःकरणो ज्ञानरूपो हि यो भवेत् ।
स मुक्तः कथ्यते योगी परमात्मन्यवस्थितः ॥
आसनस्थानविधयो न योगस्य प्रसाधकाः ।
विलम्बजनकाः सर्व्वे विस्ताराः परिकीर्त्तिताः ॥
शिशुपालः सिद्धिमागात् स्मरणाभ्यासगौरवात् ।
आश्रमाः सर्व्व एवेह पूर्व्वराज्ञे परे तथा ॥
योगाभ्यासं प्रकुर्व्वन्तः पश्यन्त्यात्मानमात्मना ।
सर्व्वभूतेषु कारुण्यं विद्वेषं विषयेषु च ॥
गुह्यशिश्नोदरादिषु कुर्व्वन् योगी विमुच्यते ।
इन्द्रियैरिन्द्रियार्थांस्तु न जानाति नरो यदा ॥
काष्ठवत् ब्रह्मसंलीनो योगयुक्तस्तदा भवेत् ॥
सर्व्वे वर्णाः स्त्रियः सर्व्वाः कृत्वा पापानि
भस्मसात् ।
ध्यानाग्निनामलाः सन्तो लभन्ते परमां गतिम् ।
मथनात् दृश्यते वह्निस्तद्वत् ध्यानेन वै हरिः ॥
ब्रह्मात्मनोर्यदेकत्वं स योगश्चोत्तमोत्तमः ॥
वाह्यैरुपायैर्मुक्तिर्न नान्तःस्थैः स्वाद्द्यमादिभिः ।
सांख्यज्ञानेन योगेन वेदान्तश्रवणेन च ।
प्रत्यक्तात्मनो या हि सा मुक्तिरभिधीयते ॥
अनात्मन्यात्मरूपत्वमसतः सत्स्वरूपता ।
दुःखाभावे तथा सौख्यं माया विद्याविना-
शिनी ॥”

इति गारुडे ब्रह्मज्ञाने २४० अध्यायः ॥

ब्रह्मज्ञानी, [न्], त्रि, (ब्रह्मज्ञानं विद्यतेऽस्य । ब्रह्म-ज्ञान + इन् ।) ब्रह्मज्ञानविशिष्टः । यथा,—
“कुशलाकुशलाद्वृत्तिरहितः समदर्शकः ।
लिङ्गाश्रमपरित्यागी ब्रह्मज्ञानी निगद्यते ॥”
इति शङ्करानन्ददीपिका ॥
तेनापि कृष्णभक्तिः कर्त्तव्या । यथा,—
ब्रह्मानन्देन पूर्णोऽहं तेनानन्देन पूर्णधीः ।
तथापि शून्यमात्मानं मन्ये कृष्णरतिं विना ॥”
इति पाद्मे पातालखण्डे जावालिं प्रति ब्रह्म-विद्यावचनम् ॥

ब्रह्मण्यः, पुं, (ब्रह्मणे हितः । ब्रह्मन् + “खलयव-माषतिलवृषब्रह्मणश्च ।” ५ । १ । ७ । इति यत् । “ये चाभावकर्म्मणोः ।” ६ । ४ । १६८ । इत्यन्-प्रकृत्या ।) विष्णुः । यथा, महाभारते १३ । १४९ । ८१ ।
“ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥”
अपि च ।
“ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥”
इत्याह्निकचन्द्रिका ॥
ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४१ ॥ मुञ्ज-तृणम् । तूलवृक्षः । इति राजनिर्घण्टः ॥
शनैश्चरः । (स्त्री । दुर्गा । यथा महाभा-रते ६ । २२ । २६ ।
“वदश्रुतिमहापुण्ये ब्रह्मण्ये जातवेदसि
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ॥”)
ब्रह्मणि साधौ त्रि । इति मेदिनी । ये, ६६ ॥

ब्रह्मण्यदेवः, पुं, (ब्रह्मण्यो देवः ।) श्रीकृष्णः । यथा,—
“नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥”
इति नारदीयपुराणम् ॥
(यथा च भागवते । ४ । २१ । ३७ ।
“ब्रह्मण्यदेवः पुरुषः पुरातनो
नित्यं हरिर्यच्चरणाभिवन्दनात् ॥”)

ब्रह्मतालः, पुं, चतुर्मुखतालः । स तु, दशतालात्मकः । तत्र ७ मात्राः । मात्रा तु, क च ट त प इति पञ्चाक्षराणामुच्चारणकालः । सैव लघुमात्रा । तदर्द्धं द्रुतमात्रा । तन्मध्ये ४ लघवः ६ द्रुताः । ० । ०० । ००० । यथा,—
“चतुर्मुखाभिधे ताले जगणानन्तरं द्रुतः ॥”
इति सङ्गीतदामोदरः ॥

ब्रह्मतीर्थं, क्ली, (ब्रह्मणस्तीर्थम् ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ पुष्करतीर्थञ्च ॥ (तत्र स्नानफलम् । यथा, महाभारते । ३ । ८३ । १०५ ।
“ततो गच्छेत राजेन्द्र । ब्रह्मणस्तीर्थमुत्तमम् ।
तत्र वर्णावरः स्नात्वा ब्राह्मण्यं लभते नरः ।
ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम् ॥”)

ब्रह्मत्वं, क्ली, ब्रह्मणो भावः । (“ब्रह्मणस्त्वः ।” ५ । १ । १३६ । इति त्वः ।) तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मसायुज्यम् ३ । इत्यमरः । २ । ७ । ५२ । ब्रह्मसापूज्यम् ४ । इति शब्दरत्नावली ॥ (यथा मार्कण्डेये । ५७ । ६० ।
“ब्रह्मत्वममरेशत्वं देवत्वं मरुतस्तथा ॥”)

ब्रह्मदण्डः, पुं, (ब्रह्मणो ब्राह्मणस्य दण्डः सिद्ध-यष्टिः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥ वशिष्ठस्य सिद्धयष्टिः । यथा,—
“धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ।
एकेन ब्रह्मदण्डेन बहवो नाशिता मम ॥”
इति रामायणे विश्वामित्रवाक्यम् ॥
(ब्रह्मणो ब्राह्मणस्य शापरूपो दण्डः ।) ब्रह्म-शापः । यथा,—
“ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥”
इति तिथ्यादितत्त्वम् ॥
(अयं हि राजधर्म्मे शत्रुनाशनोपायः । यदुक्तं महाभारते । २ । ५ । १२३ ।
“कच्चिदङ्गानि सर्व्वाणि ब्रह्मदण्डश्च तेऽनघ ।।
विषयोगास्तथा सर्व्वे विदिताः शत्रुनाशनाः ॥”)

ब्रह्मदण्डी, स्त्री, (ब्रह्मणे ब्रह्मोपासनार्थं दण्डी सुभो दण्डः ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । अजदण्डी २ कण्टपत्रफला ३ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कफशोफानिलापहत्वञ्च ।

इति राजनिर्घण्टः ॥ (यथा मार्कण्डे १८६ अध्याये ।

"ब्रह्मदण्डी तु पुष्पेण जाते पाने वशीकरा ॥")

ब्रह्मदत्तः, पुं, इक्ष्वाकुवंशीयराजविशेषः । तत्पर्य्यायः । ब्रह्मसूः २ । इति हेमचन्द्रः । ३ । ३५८ ॥ (यथा महाभारते । २ । ८ । २० ।

"ब्रह्मदत्तस्त्रिगर्त्तश्च राजोपरिचरस्तथा ।"

स्वनामख्यातो नीपपुत्रः । यथा, भागवते । ९ । २१ । २५ ।

पारस्य तनयो नीपस्तस्य पुत्त्रशतं त्वभूत् ।

स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥"

ब्रह्मणा दत्त इति विग्रहे वाच्यलिङ्गः । यथा, रामायणे । ३ । १८ । ३८ ।

"अमोघा इषवश्चेमे ब्रह्मदत्ताः सुतेजसः ।

दत्ता मह्यं महेन्द्रेण तूणौ चाक्षयसायकौ ॥")

ब्रह्मदर्भा, स्त्री, (ब्रह्मणा छिन्नो दर्भो यस्याः ।) यमानिका । इत्यमरः । २ । ४ । १४५ ॥ (यथास्याः पर्य्यायः ।

"यमानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।

सैवोक्ता दीप्यका दीप्या तथा स्याद्यवसाह्वया ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ब्रह्मदारु, क्ली, (ब्रह्मणो ब्राह्मणस्य हितकरो दारुः ।) स्वनामख्यातास्वत्याकारवृक्षविशेषः ॥ तत्पर्य्यायः । तूदः २ पूषः ३ क्रमुकः ४ ब्रह्मण्य. ५ तूलम् ६ । इत्यमरः । २ । ४ । ४१ ॥ यज्ञाङ्गिकम् ७ । इति वाचस्पतिः ॥ तलम् ८ । इति भरतः ॥ पूगः ९ यूषः १० । इति शब्दरत्नावली ॥ (क्रमुकार्थे पर्य्यायो यथा,

"तूतः स्थूलश्च पूगश्च क्रमुको ब्रह्मदारु च ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ब्रह्मदैत्यः, पुं, (ब्रह्मा ब्राह्मणरूपी दैत्यः ।) प्रेतयोनिप्राप्तब्राह्मणः । इत्यैतिह्यम् ॥

ब्रह्मनालं, क्ली, (ब्रह्मणो ब्रह्मलोकप्राप्तेर्नालमिव ।) काश्यां चक्रतीर्थस्य पूर्व्वभागे पितामहेश्वरलिङ्गस्याधस्तीर्थविशेषः यथा,—

"पितामहेश्वरं लिङ्गं ब्रह्मनालोपरि स्थितम् ।

पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात् ॥

ब्रह्मस्रोतःसमीपे तु कृतं कर्म्म शुभाशुभम् ।

परोमच्चयतामेति शुभमेव ततश्चरेत् ॥

अनल्पमपि यत् कर्म्म कृतमत्र शुभाशुभम् ।

प्रलयेऽपि न तस्यास्ति प्रलयो मुनिसत्तम ! ॥

नाभितीर्थमिदं प्रोक्तं नाभीभूतं यतः चितेः ।

अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया ॥

सा माणिकर्णिकेकीयं नाभिनाभ्यीर्य्यभूमिका ।

ब्रह्माण्डगोलकं सर्व्वं यस्यामेति लयोदयम् ॥

ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम् ।

तत्सङ्गमे नरः स्नातः कोटिजन्ममलं हरेत् ॥

ब्रह्मनाले पतिद्युयेषामपि कीकसमात्रकम् ॥

ब्रह्माण्डमण्डपान्तस्ते न विशन्ति कदाचन ॥"

इति स्कन्दपुराणे काशीखण्डे बिन्दुमाधवाग्निबिन्दुसंवादे वैष्णवतीर्थमाहात्म्यं नाम ६१ अः ॥

ब्रह्मनिर्व्वाणं, क्ली, (ब्रह्मणि परब्रह्मणि निर्व्वाणं लयः ।) ब्रह्मणि निर्वृतिः । यथा, श्रीभगवद्गीतायाम् । २ । ७२ ।

"एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति ।

स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥"

ब्रह्मपत्रं, क्ली, (ब्रह्मवृक्षस्तदाख्यया प्रसिद्धस्य वृक्षस्य पत्रम् । पलाशपत्रम् । यथा,—

"भोजनं ब्रह्मपत्रेषु कथयालोचनं हरेः ।

दर्शनं वैष्णवानाञ्च महापातकनाशनम् ॥"

इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११८ अः ॥

ब्रह्मपर्णी, स्त्री, (ब्रह्मेव विस्तीर्णानि आमूलं स्थितानि पर्णानि यस्याः ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥

ब्रह्मपवित्रः, पुं, (ब्रह्मणि वेदोक्तकर्म्मणि पवित्रः ।) कुशः । इति राजनिर्घण्टः ॥

ब्रह्मपादपः, पुं, (ब्रह्मा तदाख्यया प्रसिद्धः पादपः ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥

ब्रह्मपुत्त्रः, पुं, विषभेदः । इत्यमरः । १ । ८ । १० ॥ तस्य लक्षणं यथा,—

"वर्णतः कपिलो यः स्यात्तथा भवति सारकः ।

ब्रह्मपुत्त्रः स विज्ञेयो जायते मलयाचले ॥"

इति भावप्रकाशः ॥

(पर्य्यायोऽस्य यथा,

"काकोली गरल. चुण्डो वत्सनाभः प्रदीपनः ।

शौक्लिकेयो ब्रह्मपुत्त्रो विषं स्याद्गरलो विषः ॥"

इति वैद्यकरत्नमालायाम् ॥

ब्रह्मणः पुत्त्रः । सनकम् । धर्म्मः । मरीच्यादिः ॥ मनुः । यथा मार्कण्डेये । ९४ । ११ ।

"मन्वन्तरे च दशमे ब्रह्मपुत्त्रस्य धीमतः ।

सुखासीना निरुद्धाश्च त्रिःप्रकाराः सुराः स्मृताः ॥"

नारदः । वशिष्ठः ॥) क्षेत्रभेदः । नदभेदः । इति मेदिनी । रे, २८५ ॥ शेषस्य पर्य्यायः । अमोघानन्दनः २ लौहित्यः ३ लोहितः ४ । इति शब्दरत्नावली ॥ * ॥ अस्य नदस्योत्पत्तिमाहात्म्ये यथा,—

सगर उवाच ।

"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः ।

कथं शान्तनुभार्य्यायां रेतः स कमलासनः ॥

पारक्षेत्रीयपुत्त्रो वा कथं जज्ञे पितामहात् ।

तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ! ॥

और्व्व उवाच ।

शृणु त्वं नृपशार्द्दूल ! कथयामि महत्तरम् ।

आख्यानं ब्रह्मपुत्त्रस्य लौहित्यस्य महात्मनः ॥

हरिवंशे महावंशे शान्तनुर्नाम नामतः ।

मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः ।

तस्य भार्य्या महाभागा अमोघाख्या महासती ।

हिरण्यगर्भस्य मुनेस्तुष्टयेऽन्द्राश्रमोद्भवा ॥

तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत् ।

लौहित्याख्यस्य सरसस्तीरे वै गन्धमादने ॥

एकदा स तपोनिष्ठो निजपुष्पादिगोचरे ।

जगाम वनमध्यन्तु चिन्वन् बहुफलानि च ॥

तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः ।

तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया ॥

तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम् ।

मोहितो मदनेनाशु तथाभूद्रविचेतिन्द्रियः ॥

उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम् ।

अथाधावत्तदा ब्रह्मा सम्मुखो मदनार्द्दितः ॥

धावमानं विधातारं दृष्ट्वामोघा महासती ।

नैव नैवमिति प्रोक्ता पर्णशालां व्यलीयत ॥

इदञ्चोवाच धातारममोघा कुपिता तदा ।

पर्णशालान्तरगता द्वारमावृत्य तत्क्षणात् ॥

अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।

बलात् प्रमथ्या चाहं त्वया त्वाञ्च शपाम्यहम् ॥

अमोघया चैवमुक्ते विधातुश्च तदा नृप ! ।

रेतश्चस्कन्द च तद्वेवाश्रमे शान्तनोर्मुनेः ॥

च्युते रेतसि धातापि हंसयानं समास्थितः ।

लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥ * ॥

गते वेधसि शान्तनुर्निजमाश्रममागतः ।

आगत्य दृष्ट्वा हंसानां पदक्षोभं तथा भुवि ॥

तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम् ।

अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् ॥

किमेतदद्य सुभगे ! प्रवृत्तं दृश्यते तु यत् ।

पश्चिणाञ्च पदक्षोभस्तेजश्चेदञ्च कीदृशम् ॥

सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम् ।

अमर्षितेव न्यगदद्राकुला विकलानना ॥

हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः ।

कमण्डलुकरो भीक्ष रतिं मां समयाचत ॥

ततो मया भर्त्सितः स कुटजान्तरलीनया ।

प्रच्याव्य तेजः स यातो मया शापभयार्द्दितः ॥

कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो ! ।

न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीवभृत ॥

स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः ।

इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् ॥

दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यमुपस्थितम् ।

तीर्थावतारणञ्चापि हिताय जगतां मुनिः ।

ज्ञात्वोदर्कं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत ॥

इदं तेजो ब्रह्मणस्त्वं पिवामोघे ! ममाज्ञया ।

हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये ॥

भवत्या निकटं ब्रह्मा स्वयमेव समागतः ।

त्वामप्राप्य स महात्मा आवयोः स समर्थ्य च ।

गतो निजाश्रमं तत्त्वं कर्त्तुमर्हसि मद्वचः ॥

तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता ।

शान्तयन्तीव तं प्राह पतिं नत्वा महासती ॥

नान्यस्य तेजो धास्यामि न पेक्ते विमनस्कना ।

अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोतस्त्रज ।

ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः ।

स्वयं पीत्वा च तत्तेजस्तस्या गर्भे व्यसेचयेन ॥

संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती ।

गर्भं दधानामोघाख्या हिताय जगतां ततः ॥

तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः ।

तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक ॥

रत्नमालासमायुक्ता रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा ।
शिशुमारशिरश्चास्य तुल्यकायो जलोनकरैः ॥
तं जानश्च तथाभूतं शान्तनुर्लोकशान्तनुः ।
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत ॥
कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्व्वे सम्बर्त्तकाह्वयः ॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधिः सुतः ।
लावण्यनिवहाधि नित्यं शरदीव निशाकरः ॥
स तोयमध्यगं पुत्रमासाद्य द्रुहिणः स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्धितबुद्धये ॥
अथ काले बहुतिथे यातीते ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण वबृधे पञ्च योजनान् ॥
तस्मिन् देवाः पपुः सक्षुर्द्वितीय इव सागरे ।
शौतामलजले कुण्डे देवश्चाप्सरसां गणैः ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमतुग्रं पितुराज्ञया ॥
तस्य पापस्य मोचाय स्वपितुस्तोपदेशतः ।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीथिं परशुना कृत्वा तञ्च व्याममवतारयत् ॥*॥
अपि च ।
ब्रह्मकुण्डात् स्रुतः सोऽथ कासारे लोहिता-
ह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदमुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽ-
भवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां स त्यक्त्वा ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥*॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥"
इति कालिकापुराणे ८४ । ८५ अध्यायः ॥
अन्यच्च ।
मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
पिबेदशोककलिकाः स्नायाल्लौहित्यवारिणि ॥
पुनर्व्वसौ बुधे लग्ने चैत्रे मासि सिताष्टमीम् ।
लौहित्ये विरजे स्नायात् सर्व्वपापैः प्रमुच्यते ॥*॥
स्नानमन्त्रो यथा,—
"पृथिव्यां यानि तीर्थानि सरितः सागरादयः ।
सर्व्वे लौहित्यमायान्ति चैत्रे मासि सिताष्टमीम् ।
ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ! ।
अमोघागर्भसम्भूत पापं लौहित्य मे हर ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

ब्रह्मपुत्री, स्त्री. (ब्रह्मणः पुत्री कन्या ।) सर-
स्वती नदी । इति हेमचन्द्रः । ४ । १५१ ॥
वाराहीकन्दः । इति राजनिर्घण्टः ॥

ब्रह्मपुरी, स्त्री, (ब्रह्मणः पुरी ।) विधातुर्धाम ।
यथा । भूलोकान्तरीक्षस्वर्गलोकादि ब्रह्माण्डो
दरवर्त्ति च ब्रह्मपुरीनामकं त्रैलोक्यस्वरूपं मम
हृदयमध्ये वर्त्ते च सूर्य्यमण्डलमध्यवर्त्ति तेजसा
स एकीभूतं ज्योतिरहमिति चिन्तयन् जपं
कुर्य्यात् । इति गायत्रीव्याख्या ॥ * ॥ काशी ।
यथा,—
"विद्याप्रबोधोदयजन्मभूमि-
र्वाराणसी ब्रह्मपुरी दुरत्यया ॥"
इति प्रबोधचन्द्रोदयनाटकम् ॥

ब्रह्मबन्धुः, पु, (ब्रह्मणो बन्धुरिव ।) अधिक्षेपः ।
निन्दितब्राह्मणः । निर्द्देशः । अग्राह्यनामक-
ब्राह्मणः । इत्यमरः ।३।३।१०३ ॥ तथा हि ।
अधिक्षेपे निन्दायां गम्ये अधिक्षेप्यो ब्रह्मबन्धुः ।
यथा ब्रह्मबन्धो । किमेतत्ते इति । अधिक्षिप्यते-
ऽसौ अधिक्षेपोऽधिक्षेप्यः कर्म्मणि घञ् वा ।
ब्रह्मेव बन्धुरस्य नान्यः । ब्रह्मकर्म्माभावात् निन्दा
अधिक्षेपे समासोऽभिधानात् । ब्रह्मबन्धुः निर्द्देशे
यस्य देशनाम न गृह्यते स ब्रह्मबन्धुरितिनिर्द्दि-
श्यते इत्यर्थः । स्त्रियां ("ऊङुतः ।" ४ । १ । ६६ ।
इति ऊङ् ।) ब्रह्मबन्धूः । ब्रह्मबन्धुर्ब्राह्मणजाति-
विशेषे च । ब्राह्मणजातिविशेषे निर्द्देशे ब्रह्म-
बन्धुरधिक्षेपे इति वोपालितः । इति भरतः ॥*॥
(यथा, मार्कण्डेये । ७५ । ६० ।
"ब्रह्मबन्धोः सुता न त्वं बाले । नैव तपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुत्-
सहे ॥")
तस्य दैहिकवधनिषेधो । यथा, भागवते १
स्कन्धे ।
"वपनं द्रविणादानं स्थानान्निर्यापणन्तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥"

ब्रह्मभूतिः, स्त्री, (ब्रह्मणो भूतिरङ्गसम्पदिव भूति
र्यस्याः ।) सन्ध्या । इति शब्दरत्नावली ॥
(ब्रह्मणो भूतिरुत्पत्तिर्यस्या इति विग्रहे
वाच्यलिङ्गः ॥)

ब्रह्मभूमिजा, स्त्री, (ब्रह्मभूमेर्जायते या । ब्रह्म
भूमि + जन + ड । टाप्) सिंहली । इति राज-
निर्घण्टः ॥

ब्रह्मभूयं, क्ली, (ब्रह्मणो भावः । ब्रह्म + भू +
"भुवो भावे ।" ३ । १ । १०७ । इति क्यप् ।)
ब्रह्मत्वम् । इत्यमरः । २ । ७ । ५२ ॥ (यथा
मनुः । १२ । १०२ ।
"वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥"
"अस्मिन्नेव लोके तिष्ठन् ब्रह्मभूयाय ब्रह्मत्वाय
कल्पते ।" इति तट्टीकायां कुल्लूकभट्टः ॥
मोक्षः । यथा गीतायाम् । १४ । २६ ।
"माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते ।
सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥"
"ब्रह्मभूयाय ब्रह्मभावाय मोक्षाय कल्पते समर्थो
भवति ।" इति तट्टीकायां स्वामी ॥)

ब्रह्ममूर्द्धभृत्, पुं, (ब्रह्मणो मूर्द्धभृत् शिरोमालीति ।)
शिवः । इति वटुकभैरवस्य वकारादिसहस्र-
नामान्तर्गतनाम ॥

ब्रह्ममेखलः, पुं (ब्राह्मणानां ब्रह्मणानां मेखला पुंवद्
भावः ।) मुञ्जः । इति केचित् ॥

ब्रह्मयज्ञः पुं, (ब्रह्मणो ब्रह्मणे वा यज्ञः ।) विधिना
वेदस्याध्ययनम् । शिष्याणामध्यापनञ्च । इत्य
मरभरतौ ॥ यथा, मनौ । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

ब्रह्मयष्टिः, स्त्री (ब्रह्मणो यष्टिरिव ।) भार्गी ।
इति शब्दरत्नावली ॥ (वृक्षविशेषः । यथा,
गारुडे १६२ अध्याये ।
"ब्रह्मयष्टिफलं पिष्टं वारिणा तेन लेपनः ।
तेन दुष्टं रक्तदोषः प्रणश्यति न संशयः ॥"
ब्रह्मणो ब्राह्मणस्य यष्टिर्लगुडः । विप्रयष्टिः ॥)

ब्रह्मयोनिः, पुं, (ब्रह्मणो योनिरुत्पत्तिस्थानम् ।)
ब्रह्मगिरिः । इति शब्दरत्नावली ॥ (ब्रह्मप्राप्ति
कारणब्रह्मध्यानम् । यथा मनुः । १० । ७४ ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट् कर्म्माणि यथाक्रमम् ॥"
"ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः
स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्माणि वक्ष्य
माणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेयुः ॥"
इति तट्टीकायां कुल्लूकभट्टः ॥ अपरस्य ब्रह्मणो
योनिरुत्पत्तिकारणम् । यद्वा ब्रह्म सत् योनिः
सर्व्वेषामुत्पत्तिकारकं ब्रह्म । यथा, मुण्डकोप-
निषदि । ३ ।१ । ३ ॥
"यदा पश्यः पश्यते रुक्मवर्णम्
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ॥"
तीर्थविशेषः । यथा महाभारते ।३।८३।१३१।
"ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।
तत्र स्नात्वा नरव्याघ्र । ब्रह्मलोकं प्रपद्यते ॥"
ब्रह्मा योनिरुत्पत्तिकारणं यस्य इति विग्रहे
वाच्यलिङ्गः । यथा रघौ । १ । ६४ ।
"त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धा कथं न स्युः सम्पदो मे निरापदः ॥"
यथा च मार्कण्डेये । २३ । ३० ।
जगद्धात्रीमहं देवी मारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")

ब्रह्मयोनी, स्त्री, (ब्रह्मा योनिरुत्पत्तिकारणं दस्याः ।
स्त्रियां पक्षे ङीप् ।) कुरुक्षेत्रे सरस्वतीतीरे
पृथूदकनिकटे तीर्थविशेषः । तत्र ब्रह्मणा
चत्वारो वर्णाः सृष्टाः । यथा,—
"सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् ।
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत् ॥
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिताः ।
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ॥
चतुर्व्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ।
तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ॥

मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रिया-
स्तथा ।
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ॥
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्ततः ।
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम् ॥
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ।”
इति वामनपुराणे ३८ अध्यायः ॥

ब्रह्मरन्ध्रं, क्ली, (ब्रह्मणः परमात्मनः अधिष्ठानाय रन्ध्रं आकाशः यद्वा, ब्रह्मणो ब्रह्मप्राप्तये रन्ध्रम् । एतद्रन्ध्रेण प्राणोत्क्रमणे ब्रह्मलोकप्राप्तेरस्य तथात्वम् ।) उत्तमाङ्गम् । ब्रह्मतालु इति भाषा । यथा । ओं नमः ब्रह्मरन्ध्रे । इति तन्त्रसारः ॥ अपि च । ब्रह्मरन्ध्रसरसीरुहोदरे इत्यादि गुरुपादुकास्तोत्रम् ॥ (यथा च हठयोगप्रदीपिकायाम् । ४ । १६ ।
“स्नात्वा सुषुम्नासद्भेदं कृत्वा वायुञ्च मध्यगम् ।
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रे निरोधयेत् ॥”)

ब्रह्मरात्रः, पुं, (रात्रेरयं रात्रः । ब्रह्मणो रात्रः ।) ब्राह्ममुहूर्त्तः । इति श्रीधरस्वामी ॥ यथा,—
“ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः ।
अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥”
इति श्रीभागवते । १० । ३३ । ३९ ॥

ब्रह्मरातिः, पुं, याज्ञवल्क्यमुनिः । इति हेमचन्द्रः ॥ ब्रह्मज्ञानं राति ददाति यः । ब्रह्मशब्दात् राधातोर्णिनीति क्तिप्रत्ययनिष्पन्नोऽयम् । इति तट्टीका ॥ ब्रह्मणो निशायां स्त्री । सा दैवसहस्रयुगेन भवति । इति पुराणम् ॥ (मनुष्यकालपरिमाणतो ब्रह्मणो रात्रिपरिमाणमुच्यते । नेत्रपरिस्पन्दनकालो निमेषः । अष्टादशनिमेषास्तु काष्ठा । त्रिंशत् काष्ठास्तु कला । त्रिंशत् कलास्तु क्षणः । क्षणास्तु द्वादश मिलित्वा एको मुहूर्त्तः ।
“तास्तु त्रिंशत् क्षणस्ते तु मुहूर्त्तो द्वादशा-
स्त्रियाम् ॥”
इत्यमरः । १ । ४ । ११ ॥
मनुमते तु त्रिंशत्कला मिलित्वा एको मुहूर्त्तः स्यात् यदुक्तं तत्रैव । १ । ६४ ।
“त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रस्तु तावतः ॥”
ते त्रिंशन्मुहूर्त्ता एकोऽहोरात्रः । अहोरात्रास्तु पञ्चदशसंख्यका एकः पक्षः । पक्षस्तु शुक्लकृष्णभेदात् द्विविधः । ताभ्यामुभाभ्यां पक्षाभ्यां मासः स्यात् । मासस्तु पित्र्यो रात्र्यहनी । कृष्णपक्षस्तु पितॄणामहः शुक्लपक्षस्तु शर्व्वरी । षड्भिर्मासैरयनं भवेत् । अयनन्तु दक्षिणोत्तरभेदात् द्विविधम् । ताभ्यामयनाभ्यां वत्सरः स्यात् । वत्सरस्तु दैवं रात्र्यहनी । उत्तरायणं देवानामहः दक्षिणायनन्तु रात्रिः । मानुषाणां यत् कृतादियुगचतुष्टयं तद्दैवं युगं ज्ञेयम् । एवं दैवयुगसहस्रेण ब्रह्मणोऽहः दैवयुगसहस्रेण च रात्रिर्भवति । तथा च मनौ । १ ७१ । श्लोकस्य टीकायां कुल्लूकभट्टः ।
“विष्णुपुराणे मानुषचतुर्युगसहस्रेण ब्रह्माहः-
कीर्त्तनान्मानुषचतुर्युगेनैव दिव्ययुगानुगमनात् ।
तथा च विष्णुपुराणम् ।
“कृतं त्रेताद्वापरञ्च कलिश्चेति चतुर्युगम् ।
प्रोच्यते तत्सहस्रन्तु ब्रह्मणो दिवसो मुने ।॥”
तथा च मनुः । १ । ६८-७३ ।
“ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः ॥”
“यदेतदिति । एतस्य श्लोकस्यादौ यदेतन्मानुषं चतुर्युगं परिगणितं एतद्देवानां युगमुच्यते । चतुर्युगशब्देन सन्ध्यासन्ध्यांशयोरप्रविष्टच्छाया-मात्रं एतद्द्वादशसाहस्रमिति स्वार्थेऽण् । चतुर्युगैरेव द्वादशसहस्रसंख्यैर्दिव्यं युगमिति तु मेधातिथेर्भ्रमो नादर्त्तव्यः मन्वन्तरं दिव्ययुगसहस्रेण ब्रह्माहस्याप्यभिधानात् ॥” इति तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मराक्षसः, पुं, (आदौ ब्रह्मा ब्राह्मणः पश्चात् राक्षसः कुकर्म्मभिः राक्षसयोनिं गतः ।) भूतविशेषः । यथा,—
“संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥”
इति मानवे । १२ । ६० ॥
(स च यज्ञविनाशकारी भूतयोनिगतत्वात् । यथा, रामायणे । १ । ११ । २१ ।
“शक्योऽवाप्तुमयं यज्ञो नाशक्तेन महीक्षिता ।
तच्चैवाश्रद्दधानेन न चाल्पद्रविणेन च ॥
छिद्रं हि मृगयन्त्यत्र यज्ञघ्ना ब्रह्मराक्षसाः ॥”)
महादेवस्य गणविशेषः । यथा —
“डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ।
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्ष-
सान् ॥”
इति श्रीभागवते बाणयुद्धे ६३ अध्यायः ॥
पारिभाषिकब्रह्मराक्षसाः । यथा,—
“मूर्खः स्त्री कच्छपश्चैव बालो वधिर एव च ।
गृहीतार्थं न मुञ्चन्ति पञ्चैते ब्रह्मराक्षसाः ॥”
इति व्यवहारप्रदीपः ॥

ब्रह्मरीतिः, स्त्री, (ब्रह्मवर्णा रीतिः ।) पित्तलभेदः । यथा, हेमचन्द्रः । ४ । ११४ ॥
“पित्तलारेऽथारकूटः कपिलोहं सुवर्णकम् ।
रिरी रीरी च रीतिश्च पीतलोहं सुलोहकम् ।
ब्राह्मी तु राज्ञी कपिला ब्रह्मरीतिर्महेश्वरी ॥”
राजरीतिः । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायान्तरम् ।
“पित्तलञ्चारकूटं स्यादारीरीतिश्च कथ्यते ।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलापि च ॥”
इति वैद्यकरत्नमालायाम् ।
ब्रह्मणो ब्राह्मणस्य रीतिश्च ॥)

ब्रह्मर्षिः, पुं, (ब्रह्मा ब्राह्मणः ऋषिः । यद्वा, ब्रह्म वेद परब्रह्म वा ऋषति वेत्ति इति । वशिष्ठादिमुनिगणः । इति हेमचन्द्रः ॥ (यथा, रामायणे । १ । ६३ । २०—२१ ।
“ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्म्मभिः शुभैः ।
यदि मे भगवानाह ततोऽहं विजितेन्द्रियः ॥”
तथा च महाभारते । १३ । १९ । ३७ ।
“ततो वैश्रवणोऽभ्येत्य अष्टावक्रमनिन्दितम् ।
विधिवत् कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत ॥”)

ब्रह्मर्षिदेशः, पुं, (ब्रह्मर्षीणां देशः वासयोग्यस्थानम् ।) कुरुक्षेत्रादिदेशचतुष्टयम् । यथा,
“कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥
इति मानवे । २ । १९-२० ॥

ब्रह्मलोकः (ब्रह्मणो लोको भुवनम् ।) ब्रह्मणो भुवनम् । यथा,—
“सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥”
इति देवीपुराणम् ॥
अपि च ।
“षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥”
अस्य टीका । जनलोकापेक्षयैव षड्गुणेन द्वादशकोटियोजनायामेन तपोलोकानन्तरं सत्यलोकः । न तु तपोलोकात् षड्गुणेनेति मन्तव्यम् । तथासत्यष्टचत्वारिंशत्कोटियोजनायामेन ब्रह्माण्डे तस्यावकाशाभावात् । सूर्य्याण्डगोलयोरन्तः कोट्यः स्युः पञ्चविंशतिरिति शुकोक्तेः । सत्यलोक एव कल्पाभेदेन ब्रह्मधिष्ठानं परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च भूतलादूर्द्ध्वं पञ्चदशलक्षोत्तरात्रयोविंशतिकोट्यो भवन्ति । सत्यलोकादूर्द्ध्वञ्च पञ्चदशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम् । अपुनर्मारकाः पुनर्मृत्युशून्याः । इति विष्णुपुराणे । २ अं । ७ अः ॥ (ब्रह्मैव लोकः । तुरीयब्रह्मस्वरूपम् । यदुक्तं शतपथब्राह्मणे । १४ । ७ । १ । ३१ ।
“एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । स यो मनुष्याणां राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्व्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः । अथ ये शतं मनुष्याणामानन्दाः । स एकः पितॄणां जितलोकानामानन्दः । अथ ये शतं पितॄणां जितलोकानामानन्दाः स एक

कर्म्मदेवानामानन्दः ये कर्म्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्म्मदेवानामानन्दाः । स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं आजानदेवानामानन्दाः । स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं देवलोक आनन्दाः । स एको गन्धर्व्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं गन्धर्व्वलोक आनन्दाः । स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं प्रजापतिलोक आनन्दाः । स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । एषः ब्रह्मलोकः सम्राट् ॥ प्रियः यथा, महाभारते । १३ । १० । १४२ ।
"निर्म्मायं ज्ञानदत्तैव ब्रह्मलोकः परागतिः ॥")

ब्रह्मवद्यं, क्ली, (ब्रह्म वेदस्तस्य वदनम् । "वद सुपि क्यप् च ।" ३ । १ । १०६ । इति भावे यत् ।) ब्रह्मणो वाक्यम् । इति क्यप्रकरणे मुग्धबोधटीकायां दुर्गादासः ॥

ब्रह्मवद्या, स्त्री, (ब्रह्मणा वेदेन उद्यते या । "वद सुपि क्यप् च ।" ३ । १ । १०६ । इति कर्म्मणि यत् स्त्रियां टाप् ।) कथा । इति मुग्धबोधव्याकरणे क्यप्रकरणम् ॥

ब्रह्मवर्च्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्च्चस्तेजः । "ब्रह्महस्तिभ्यां वर्च्चसः ।" ५ । ४ । ७८ । इति अच् ।) ब्राह्मणस्य वृत्ताध्ययनर्द्धिः । इत्यमरः । २ । ७ । ३८ ॥ अस्य टीका । वेदबोधितस्याचारस्य परिपालनं वृत्तम् । व्रतग्रहणपूर्व्वकं गुरुसन्निधौ वेदाभ्यासोऽध्ययनम् । तयोर्द्धिस्तत्परिपालनजन्यतेजस उपचयो ब्रह्मवर्च्चसं स्यात् । ब्रह्महस्तिराजेति अच् । इति भरतः ॥ तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्च्चसम् । इति जटाधरः ॥ (यथा च मनुः । ४ । ९४ ।
"ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ।
प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्च्चसमेव च ॥")

ब्रह्मवर्त्तः, पुं, (ब्रह्मणां ब्राह्मणानां वर्त्तः वर्त्तनं यस्मिन् ।) ब्रह्मावर्त्तदेशः । इति शब्दरत्नावली । (सरस्वतीदृशद्वत्यो र्देवनद्यो र्मध्यगतोऽयं प्रदेशः ॥)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्मणस्तपसो वर्द्धनं यस्मात् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ ॥

ब्रह्मवादः पुं, (ब्रह्मणो वेदस्य वादो वदनं पठनमिति यावत् ।) वेदपाठः । तत्पर्य्यायः । श्रुताध्ययनम् २ । इति हारावली । २०१ ॥ (यथा भागवते । ४ । २२ । ६२ ।
"इत्थमतिर्ब्रह्मवादे आत्मवर्त्म स्वयं हरिः ॥"
ब्रह्मणो ब्रह्मनिर्णयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्णयवाक्यम् ॥ ब्रह्मवादो वेदपाठोऽस्यास्तीति ब्रह्मवादविशिष्टे, त्रि । यथा, हरिवंशे । ८१ । ३४ ।
"ब्रह्मणैर्ब्रह्मवादैश्च पुराणोऽयं हि गीयते ॥")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति । ब्रह्मवाद+इनि ।) वेदवक्ता । तत्पर्य्यायः । वेदान्ती २ । इति जटाधरः ॥ यथा, गीतायाम् । १७ । २४ ।
"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥")

ब्रह्मवादिनी, स्त्री, गायत्री । यथा,—
"आयाहि वरदे देवि ! त्र्यक्षरे ब्रह्मवादिनि ।"
इत्यादि गायत्र्या आवाहनम् ॥

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या ।) ब्रह्मज्ञानम् । यथा,—
"न्यायागतधनः प्राज्ञो ब्रह्मविद्यापरायणः ।
स्वधर्म्मपालको नित्यं सोऽन्तस्तत्त्वाय कल्पते ॥"
इति कौर्म्मे ३ अध्यायः ॥
(दुर्गा । यथा, महाभारते । ६ । २३ । २० ।
"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम् ।
स्कन्दमातर्भगवति । दुर्गे कान्तारवासिनि ! ॥")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः ।) वेदपाठे मुखनिर्गतविन्दुः । इति भरतः ॥

ब्रह्मवृक्षः, पुं, (तदाख्यया प्रसिद्धो वृक्षः । यद्वा, ब्रह्मणे वेदकर्म्मार्थं यो वृक्षः ।) पलाशवृक्षः । इति हलायुधः ॥ उडुम्बरः । इति रत्नमाला ॥

ब्रह्मवृत्तिः, स्त्री, (ब्राह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः ।) ब्राह्मणस्य जीवनोपायः । यथा,—
"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥"
इति श्रीभागवतम् ॥

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम् ।) ब्रह्मज्ञानम् । यथा,—
"प्राणायामः परं ब्रह्म परमात्मा चतुर्म्मुखः ।
प्राणायामः परं विष्णोर्ब्रह्मवेदस्वरूपकम् ॥"
इति गीतासारः ॥

ब्रह्मवेदिः, स्त्री, (ब्रह्मणो वेदिरिव ।) देशविशेषः । यथा,—
"ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम् ॥"
इति हेमचन्द्रः । ४ । १६ ॥

ब्रह्मवैवर्त्तं, क्ली, (विवर्त्तनमेव वैवर्त्तम् । स्वार्थे अण् । ब्रह्मणो वैवर्त्तं विवर्त्तो विवर्त्तनं यत्र ।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे । १ । ५८ ।
"विवृतं ब्रह्म कार्त्स्न्येन कृष्णेन यत्र शौनक ! ।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः ॥")
अष्टादशमहापुराणान्तर्गतदशमपुराणम् । यथा,
"अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीप्सितम् ।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः ॥

ब्रह्मशल्यः, पुं, (ब्रह्मेव शल्यं शल्यमग्रभागो यस्य । अतिसूक्ष्माग्रत्वात्तथात्वम् ।) सोमवल्कः । इति रत्नमाला ॥ वावला इति भाषा ॥

ब्रह्मशासनं क्ली, (ब्रह्मणः शासनं निर्णयो उपदेशो वा यस्मिन् ।) ब्रह्मविचारग्रन्थम् । तत्पर्य्यायः । धर्म्मकीलकः २ । इति शब्दरत्नावली ॥ ब्रह्मण आज्ञा ॥ नवद्वीपस्य पूर्व्वदक्षिणकोणे गङ्गापारे ग्रामविशेषे, पुं ॥ (ब्रह्मणो विधातुः शासनम् । वेदः ॥ प्रतिपादितमेतत् वृहन्नारदीये ४ पादे १०१ अध्याये ॥)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता ।) भगवत्सिद्धान्तसंग्रहग्रन्थविशेषः । यथा,—
"अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता ।
तत्रापि पञ्चमो सारः संचिता ब्रह्मणोदिता ॥"
इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलसूत्राख्यपञ्चमाध्यायस्य श्रीजीवगोस्वामिकृतटीका ॥

ब्रह्मसम्भवः, पुं, द्वादशनामकचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥

ब्रह्मसर्पः, पुं, (ब्रह्म इवान् सर्पः ।) सर्पविशेषः । तत्पर्य्यायः । हलाहलः २ ब्रह्मलाला ३ । इति त्रिकाण्डशेषः ॥

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युक् । "इगुपधेति ।" ३ । १ । १३५ । कः । ततः "तेन सहेति ।" २ । २ । २८ । इति बहुव्रीहिः । "वोपसर्ज्जनस्य ।" ६ । ३ । ८२ । इति सहस्य सः । ततः सयुजस्य भावः सायुज्यं । यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप् । ततो बहुव्रीहिस्ततः सयुजो भावः । ततः ब्रह्मणः सायुज्यं योजकत्वम् ।) ब्रह्मणो भावः । तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मत्वम् ३ । इत्यमरः । २ । ७ । ५२ ॥ ब्रह्मसारूप्यम् ४ । इति शब्दरत्नावली ॥ (मुग्धबोधमतेऽस्य व्युत्पत्तिर्यथा ।) ब्रह्मणो भवनं तादृप्यं ब्रह्मभूयं भूयम् क्यबिति क्यप् । त्वमो भावे इति त्वे ब्रह्मत्वं । योजनं युक् तत्सहितः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विग्रहः । इति भरतः ॥

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्रो सावर्णिः ।) दशम मनुः । अस्मिन् मन्वन्तरे विष्वक्सेनोऽवतारः । शम्भुरिन्द्रः । सुरसेनविरुद्धाद्याः देवाः । हविष्मदाद्याः सप्तर्षयः । भूरिसेनाद्या मनुपुत्रा भविष्यन्ति । इति श्रीभागवतम् । ८ । १३ । २१-२२ ॥ अन्यच्च ।
"मन्वन्तरे तु दशमे ब्रह्मपुत्रस्य धीमतः ।
सुरसेना विरुद्धाश्च द्विप्रकारास्तथा स्मृताः ॥
शतसंख्या हि ते देवा भविष्याश्च वै मनौ ।
तत्पुत्राणां शतं भावि तद्देवानां तदा शतम् ॥
शान्तिरिन्द्रस्तदा भावी सर्व्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तु निबोध त्वं ये भविष्यन्ति वै तदा ॥
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च ।
नाभागोऽप्रतिमश्चैव वासिष्ठश्चैव सप्तमः ॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिसेनः सुवीर्य्यवान् ।
शतानीकोऽथ वृषभो अनमित्रो जयद्रथः ॥
भूरिद्युम्नः सुवर्चाश्च तस्यैते तनया मनोः ।"
इति ब्रह्मसावर्णिकम् ।
इति मार्कण्डेयपुराणे ॥ ९४ । ११-१६ ॥

ब्रह्मसूः, पुं, प्रद्युम्नः । इत्यमरः । १ । १ । २८ ॥ कामदेवः । इत्यमरमाला ॥ अनिरुद्धपक्षे ब्रह्माणं सूतवान् ब्रह्मसूः ॥ (षूङ्प्रसवे । “अन्येभ्योपीति ।” ३ । २ । १७८ । क्विप् ।) कल्पान्तरे किलानिरुद्धमूर्त्तेर्भगवतो ब्रह्मा जातः । तथा च ब्रह्मपुराणम् । अनिरुद्धात्ततो ब्रह्मा तन्नाभिकमलोद्भवः ॥ कामदेवपक्षे । ब्रह्म तपः सुवति प्रेरयति ब्रह्मसूः । षू प्रेरणे (“अन्येभ्योऽपि दृश्यते ।”३।२।१७८ इति) क्विप् । इति भरतः । (कामेनैव सर्व्वतपःसु प्रवर्त्तनादस्य तथात्वम् ॥)

ब्रह्मसूत्रं, क्ली, (ब्रह्मार्थं वेदग्रहणकाले उपनयनसमये इत्यर्थः धृतं यत् सूत्रम् ।) यज्ञसूत्रम् । तत्पर्य्यायः । पवित्रम् २ यज्ञोपवीतम् ३ द्विजायनी ४ । इति त्रिकाण्डशेषः ॥ उपवीतम् ५ सावित्रम् ६ सावित्रीसूत्रम् ७ । इति शब्दरत्नावली ॥ (यथा भागवते । ८ । १८ । १४ ।
“तस्योपनीयमानस्य सावित्रीं सविताब्रवीत् ।
बृहस्पति र्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥”
तटस्थलक्षणपरं उपनिषद्वाक्यम् । ब्रह्मनिर्णयसूत्रम् । यथा गीतायाम् । १३ । ४ ।
“ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥”
अस्य व्याख्याने श्रीधरस्वामिना यदुक्तं तदुच्यते । “ऋषिभिर्वशिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराग्यादिस्वरूपेण बहुधा गीतं निरूपितम् । विविधैर्विविच्य नित्यनैमित्तिककाम्यकर्मादिविषयैश्छन्दोभिर्वेदैर्नानापूजनीयदेवतारूपेण गीतं ब्रह्मणः सूचकैः पदैश्च ब्रह्म सूच्यते सूच्यते एभिरिति ब्रह्मसूत्राणि यतो वा इमानि भूतानि जायन्ते इत्यादीनि तटस्थलक्षणपराणि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादीनि तैश्च बहुधा गीतम् । किञ्च हेतुमद्भिः सदेव सोम्येदमग्र आसीत् कथमसतः सज्जायेत इति । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयातीत्यादि युक्तिमद्भिः । अन्यात् अपानचेष्टां कः कुर्य्यात् प्राण्यात् प्राणव्यापारं वा कः कुर्य्यादिति श्रुतिपदयोरर्थः । विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया असन्दिग्धार्थप्रतिपादकैरित्यर्थः । तदेवमेतैर्विस्तरशोक्तं दुःसग्रहं संक्षेपतस्तुभ्यं कथयिष्यामि तत् शृण्वित्यर्थः । यद्वा “अथातो ब्रह्मजिज्ञासा” इत्यादीनि ब्रह्मसूत्राणि गृह्यन्ते तान्येव ब्रह्म पद्यते निश्चीयते एभिरिति पदानि तैर्हेतुमद्भिरीक्षतेर्नाशब्दं आनन्दमयोऽभ्यासादित्यादि युक्तिमद्भिर्विनिश्चितार्थैः ॥)

ब्रह्मसूनुः, पु, (ब्रह्मणः सूनुः पुत्रः ।) इक्ष्वाकुवंशोद्भवराजविशेषः । तत्पर्य्यायः । ब्रह्मदत्तः २ । इति हेमचन्द्रः । ३ । ३२८ ॥ (ब्रह्मपुत्रे अग्निष्टादौ च ॥)

ब्रह्मस्वं, क्ली, (ब्रह्मणो ब्राह्मणस्य स्वं धनम् ।) ब्राह्मणसम्बन्धि धनम् । तस्य हरणे दोषो यथा,
“ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वापि यो हरेत् ।
स हतश्च इति ज्ञेयो महापापी च भारते ॥
अवटोदे वसेत् सोऽपि यावदिन्द्रशतं शतम् ।
ततो भवेत् सुरापीती ततः शूद्रस्ततः शुचिः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्याय ॥

ब्रह्महत्या, स्त्री, ब्रह्मणो हननम् ॥ (हनस्त च ।३। १ । १०८ । इति भावे क्यप् तकारोऽन्तादेशश्च । स्त्रीत्वं लोकात् ।) ब्राह्मणवधः । यथा,
“एकदा च गुरोः कोपात् प्रकृतेरवहेलनात् ।
ब्रह्महत्या चक्रभृतो बभूव हतचेतसः ॥”
तस्या रूपं यथा,—
“रक्तवस्त्रपरीधाना वृद्धा जीर्णधारिणी ।
सप्ततालप्रमाणा सा शुष्ककण्ठोष्ठतालुका ॥
ईशाप्रमाणदशना महाभीतश्च कातरम् ।
धावन्तं परिधावन्ती बलिष्ठा हतचेतनम् ॥
खड्गहस्ता हताक्षं तं दयाहीना च मूर्च्छितम् ॥
इन्द्रो दृष्ट्वा च तां घोरां स्मारं स्मारं गुरोः पदम् ॥
विवेश मानससरो मृणालसूक्ष्मसूत्रतः ।
तत्र गन्तुं न शक्ता सा ब्रह्मणः शापकारणात् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ४७ अः ॥
आतिदेशिकब्रह्महत्या यथा,—
यम उवाच ।
“श्रीकृष्णे च तदर्च्चायां ऽंशायां प्रकृतौ यथा ।
शिवे च शिवलिङ्गे वा सूर्य्ये सूर्य्यमणौ यथा ॥
गणेशे वा तदर्च्चायामेवं सर्व्वत्र सुन्दरि ॥
यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत्तु सः ॥
स्वगुरौ स्वेष्टदेवे च जन्मदातरि मातरि ।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः ॥
वैष्णवेष्वन्यभक्तेषु ब्राह्मणेष्वितरेषु च ।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥
हरेः पादोदकेष्वन्यदेवपादोदके तथा ।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥
यो मूढो विष्णुनैवेद्ये चान्यनैवेद्यके तथा ।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥
सर्व्वेश्वरेश्वरे कृष्णे सर्व्वकारणकारणे ।
सर्व्वाद्ये सर्व्वदेवानां सेव्ये सर्व्वात्मनात्मनि ॥
माययानेकरूपे वाप्येक एव हि निर्गुणे ।
करोत्यन्येन समतां ब्रह्महत्यां लभेत्तु सः ॥
पितृदेवार्च्चनं पौर्व्वापरं वेदविनिर्म्मितम् ।
यः करोति निषेधञ्च ब्रह्महत्यां स विन्दति ॥
ये निन्दन्ति हृषीकेशं तन्मन्त्रोपासकं तथा ।
पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते ॥
ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम् ।
सर्व्वशक्तिस्वरूपाञ्च प्रकृतिं सर्व्वमातरम् ॥
सर्व्वदेवीस्वरूपाञ्च सर्व्वाद्यां सर्व्ववन्दिताम् ।
सर्व्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते ॥
कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम् ।
शिवरात्रिन्तथा चैकादशीं वारं रवेस्तथा ॥
पञ्च पर्व्वाणि पुण्यानि ये न कुर्व्वन्ति मानवाः ।
लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः ॥
अम्बुवाच्यां भूखननं जले शौचादिकञ्च ये ।
कुर्व्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते ॥
गुरुञ्च मातरं तातं साध्वीं भार्य्यां सुतं सुताम् ।
अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत्तु सः ॥
विवाहो यस्य न भवेत् न पश्यति सुतन्तु यः ।
हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत्तु सः ॥
हरेरनैवेद्यभोजी नित्यं विष्णुं न पूजयेत् ।
पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत्तु सः ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यश्च सन्ध्याविहीनश्च ब्रह्महत्यां लभेत्तु सः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।३०।१४४-१५९॥
तथा च मनुः । ११ । ५४-५५ ।
“ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥
अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ॥”
तथा च चिन्तामणिधृतदेवीभागवतवचनम् ।
“निद्राभङ्गः कथाच्छेदो दम्पत्योः प्रीतिभेदनम् ।
शिशुमातृविभेदश्च ब्रह्महत्या समं स्मृतम् ॥”)
ब्रह्महत्याप्रायश्चित्तं प्रायश्चित्तशब्दे महापातकप्रायश्चित्तव्यवस्थायामादौ द्रष्टव्यम् ॥

ब्रह्महा, [न्] पु, (ब्रह्माणं ब्राह्मणं हतवान् । ब्रह्म + हन् + “ब्रह्मभ्रूणवृत्रेषु क्विप् ।” ३ । २ । ८७ । इति क्विप् ।) ब्रह्मघ्नः ब्राह्मणवधकर्त्ता । यथा,—
“ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् ।
भिक्षाण्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥
भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति ।
ब्रह्महत्यापनोदाय मितभुक् संयतेन्द्रियः ॥
स सर्व्वस्वं वेदविदे ब्राह्मणायोपपादयेत् ।
धनं वा जीवनायालं गृहं वा सपरिच्छदम् ॥”
इति प्रायश्चित्तविवेकः ॥
तस्य नरकभोगान्ते जन्मानि यथा,—
“श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम् ।
चण्डालपुक्कशानाञ्च ब्रह्महा योनिमृच्छति ॥”
इति मानवे । १२ । ५५ ॥

ब्रह्महविः, [स्] क्ली, (ब्रह्मैव हविरर्प्यमाणमाज्यम् ।) अर्प्यमाणं, हविरपि ब्रह्मैव । यथा,—
“ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना ॥”
इति श्रीभगवद्गीतायाम् । ४ । २४ ॥

ब्रह्महुतं, क्ली, (ब्रह्मणि ब्राह्मणे हुतम् दत्तम् । ब्रह्मपदमत्र उपलक्षणं तेन नृमात्रे बोध्यम् ।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः । स तु नृयज्ञः । अतिथिपूजनरूपः । इति जटाधरः ॥

ब्रह्मा, [न्] पु, (बृंहति वर्द्धते यः । बृहि वृद्धौ + “बृंहेर्नोऽच्च ।” उणा० ४ । १४५ । मनिन् नकारस्याकारश्च ।) ऋत्विग्भेदः । तस्य स्थापनविधिर्यथा । ततः प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा ब्रह्मस्थापनं कुर्य्यात् । समाग्रपञ्चाशत्कुशपत्ररचितं द्विर्दक्षिणावर्त्तमूर्द्धमुखं दर्भवटुं अधीतवेदं ब्राह्मणं वा कृत्व

सुत्तराग्रं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरत: प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरग्निमात्रान्तरिते देशे पूर्व्वाभिमुखीं वारिधारां दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य पश्चिमाभिमुखोऽनुपविष्टस्तिष्ठेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता तृणनिरसने विनियोग:। ॐ निरस्त: परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। तत अप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखीभूय आस्तीर्णकुशानङ्गिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मोपवेशने विनियोग: ॐ आवसो: सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सीदामीति ब्रूयात् अनेन कुशोपरि पूर्व्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्वा अद्भिरभ्युक्ष्य कुशकुसुमैरर्च्चयेत्। ततस्तेनैव पथा प्रत्यावृत्य आसने पूर्व्वाभिमुख उपविष्टो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्रह्मा अयज्ञीयवाचं वदेत तदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवागवचननिमित्तजपे विनियोग:। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांशुले इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्त्तैव तत्तदाज्यावेक्षणादिब्रह्मकार्य्यकर्त्तृत्वादयज्ञीयवागवचननिमित्तं स एव जपेत्। इति भवदेवभट्ट:॥ * ॥ योगभेद:। स तु विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चविंशयोग:। तत्र जातफलम्।

“नानाशास्त्राभ्याससंजातकालो
वर्णाचारै: संयुतश्चारुकीर्त्ति:।
शान्तो दान्तो जायते चारुकर्म्मा
सूतौ यस्य ब्रह्मयोगप्रयोग:॥”

इति कोष्ठीप्रदीप:॥ ·

विप्र:। इति मेदिनी॥ अर्हदुपासकविशेष:। इति हेमचन्द्र:॥ सृष्टिकर्त्तृदेवताविशेष:। तद्व्यति प्रजा य:। तत्पर्य्याय:।। आत्मभू: २ सुरज्येष्ठ: ३ परमेष्ठी ४ पितामह: ५ हिरण्यगर्भ: ६ लोकेश: ७ स्वयम्भू: ८ चतुराननः ९ धाता१० अब्जयोनि:११ द्रुहिण:१२ विरिञ्चि:१३ कमलासन: १४ स्रष्टा १५ प्रजापति: १६ वेधा: १७ विधाता १८ विश्वसृक् १९ विधि: २०। इत्यमर:।१।१।१६-१७॥ द्रुघण: २१ विरिञ्च: २२ स्वयम्भु: ४३ पद्मयोनि: २४ पद्मासन: २५ विश्वसृग्विधि: २६। इति भरत:॥ देवदेव: २७ पद्मगर्भ: २८ गुणसागर: ३९ वेदगर्भ: ३० बहुरेता: ३१ स्वभू: ३२ सन्ध्याराम: ३३ सुधावर्षी ३४ स्नपाहित: ३५ खसपंश: ३६ लोकनाथ: ३७ महावीर्य्य: ३८ सरोजी ३९ मञ्जुप्राण: ४० नाभिजन्मा ४१ बहुरूप: ४२ जटाधर: ४३ जगत्प्रसूति: ४४ कञ्जज: ४५ प्रभु: ४६ चिन्तामणि: ४७ पद्मपाणि: ४८ पुराणग: ४९ अष्टकर्ण: ५० हंसरथ: ५१ सर्व्वकर्त्ता ५२ चतुर्मुख: ५३। इति शब्दरत्नावली॥ क: ५४। इत्येकाक्षरकोष:॥ आ: ५५ शतपत्रनिवास:५६ स्वायम्भुवमनुपिता ५७। इति कविकल्पलता॥ म: ५८। इति प्रणवव्याख्या॥ (नाभिजन्मा ५९। अण्डज: ६०। पूर्व्व: ६१। निधन: ६२। कमलोद्भव: ६३। सदानन्द: ६४। रजोमूर्त्ति: ६५। सत्यक: ६६। हंसवाहन: ६७। इति कस्मिंश्चिदमरकोषे दृश्यते।१।१।१७॥) तस्य स्वरूपं यथा,—

मार्कण्डेय उवाच।

“ततो ब्रह्माण्डसंस्थानं दर्शयामास शाम्भवे।
वक्षे तोयराशिस्थं ब्रह्माण्डञ्च यथा पुरा॥
तन्मध्ये पद्मगर्भाभं ब्रह्माणं जगत: पतिम्।
ज्योतीरूपं प्रकाशार्थं सृष्ट्यर्थञ्च पृथग्गतम्॥
शरीरिणं स ददृशे ब्रह्माण्डान्तर्गतं मुहु:।
चतुर्भुजं प्रकाशन्तं ज्योतिर्भि: कमलासनम्॥
तत्रैव च त्रिधाभूतं वपुर्ब्राह्मं ददर्श स:।
ऊर्द्ध्वमध्यान्तभागैस्तु ब्रह्मविष्णुशिवात्मिकान्॥
अधोर्द्ध्वभागौ वपुषो ब्रह्मत्वमगमत्तथा।
मध्यो यथा विष्णुभूतो ददर्शान्तस्य शम्भुताम्॥
एकमेव शरीरन्तु त्रिधाभूतं मुहुर्मुहु:।
हरो ददर्श स्वे गर्भे तथा सर्व्वमिदं जगत्॥
कदाचिद्वैष्णवं कायं ब्राह्मे काये लयं व्रजेत्।
ब्राह्मं तथा वैष्णवे च शाम्भवे वैष्णव तथा॥
शाम्भवं वैष्णवे काये ब्राह्मे चाप्यथ शाम्भवम्।
गच्छन्तं लीनतां शम्भुरेकताञ्च मुहुर्मुहु:॥
ददर्श वामदेवोऽपि भिन्नं चाप्यपृथग्गतम्।
परमात्मनि गच्छन्तं लीनतां तद्वपुश्च यत्॥”

इति कालिकापुराणे १४ अध्याय.॥ * ॥

तस्य पूजाविधिर्यथा।

“शृणु राजन्नवहितो ब्रह्मण: पूजनक्रमम्॥
ब्रह्मबीजं पुरा प्रोक्तं यन्मन्त्रं पूर्व्वतश्चरेत।
तेनैव तन्तु संपूज्य परं निर्व्वाणमाप्नुयात्॥
एतस्य चाङ्गमन्त्रन्तु यथा भर्गेण भाषितम्।
वेतालभैरवाद्यांस्तु रूपञ्च शृणु भूमिप।॥
तस्य मन्त्रोद्धारो यथा,—
“षष्ठतोयञ्च वह्निञ्च शेषस्वरसमन्वित:।
चन्द्रबिन्दुसमायुक्तो ब्रह्ममन्त्र: प्रकीर्त्तित:॥
अनेनैव तु मन्त्रेण ब्रह्माणं य: प्रपूजयेत्।
स काममिष्टं संप्राप्य ब्रह्मलोके प्रमोदते॥”
तस्य ध्यानं यथा,—
“ब्रह्मा कमण्डलुधरश्चतुर्वक्त्रश्चतुर्भुज:।
कदाचिद्रक्तकमले हंसारूढ: कदाचन॥
वर्णेन रक्तगौराङ्ग: प्रांशुस्तुङ्गाङ्ग उन्नत:।
कमण्डलुर्वामकरे स्रुवो हस्ते तु दक्षिणे॥
दक्षिणाधस्तथा माला वामाधश्च तथा स्रुव:।
आज्यस्थाली वामपार्श्वे वेदा: सर्व्वेऽग्रत: स्थिता:॥
सावित्री वामपार्श्वस्था दक्षिणस्था सरस्वती।
सर्व्वे च ऋषयो ह्यग्रे कुर्य्यादेभिश्च चिन्तनम्॥
चतुष्कोणं चतुर्द्वारमष्टपत्रसमन्वितम्।
चतुष्कोणे वह्नितन्तु शुक्लमण्डलजुक्स्रुवे:॥
सर्व्वार्च्चनादिकं सर्व्वं याज्ञाख्या: प्रतिपत्तय:।
याश्या उत्तरतन्त्रोक्ता योगपीठेऽङ्गकादिका॥”
तस्य पूजाक्रमो गायत्री च यथा.—
“आधारशक्तिप्रमुखांस्तथा सर्व्वांस्तु पूजयेत्।
अष्टपत्रेषु पद्मस्याष्टौ दिक्पालान् प्रपूजयेत्॥
पद्मासनाय विद्महे हंसारूढाय धीमहि।
तन्नो ब्रह्मेति पदं तत्पश्चात् प्रचोदयात्॥
यथा तु ब्रह्मगायत्री पूजयेदनया विधिम्।
निर्म्माल्यधारी चैतस्य सनत्कुमार उच्यते॥
उपचारा: पूर्व्ववत्तु नैवरक्तगराङ्किता:।
रक्तकौषेयवस्त्रन्तु ब्रह्मप्रीतिकरं परम्॥
आज्यं सपायसं सर्पिस्तिलयुक्तस्य भोजनम्।
सितरक्तसमायुक्तं चन्दनं परिकीर्त्तितम्॥
पार्श्वयो: शङ्करं विष्णुं पूजने पूजयेन्नर:।
सनादीन् करसंस्थांस्तु मण्डले परिपूजयेत॥
सरस्वतीञ्च सावित्रीं हंसं पद्मन्तथैव च।
अयं विशेष: कथित: प्रणामश्चास्य दण्डवत्॥
पद्मबीजभवा माला जपकर्म्मणि कीर्त्तिता।
पूर्णादर्शौ तिथौ शस्ते पूजाकर्म्मणि सर्व्वदा॥
क्षीरेणार्घ्यं प्रदद्यात्तु सर्व्वदा ब्रह्मणे नृप।।
अयन्ते कथितो भूप। यथा भर्गेण भाषित:॥
दर्शयता स्वपुत्राभ्यां कामरूपाश्रयं शुभम्।
यत्र तत्र विधिश्चैव साधक: परिपूजयेत्॥
पीठे सम्यक् पूजयित्वा परं निर्व्वाणमाप्नुयात॥”

इति कालिकापुराणे ८२ अध्याय:॥

तस्यापूज्यत्वकारणम् यथा। मोहिन्युवाच।
“उत्तिष्ठ जगतीनाथ! पारं कुरु स्मरार्णवे।
निमग्नां दुस्तरे घोरे कर्णधार। भयानके॥
अतीवनिर्जनस्थाने सर्व्वजन्तुविवर्ज्जिते।
सुगन्धिवायुना रम्ये पुंस्कोकिलरुतस्तुते॥
सन्ततं त्वत्पदस्थानां दासीं जन्मनि जन्मनि।
क्रीणीहि रतिपण्येनाप्यत्यरत्नेन सत्वरम्॥
इत्युक्ता मोहिनी सद्यो जगत्स्रष्टुश्च ब्रह्मण:।
विश्वकर्मं करं वक्षं सस्मिता कामविह्वला॥
विज्ञाय समयं धाता तामुवाच भयातुर:।
पीयषतुल्यवचनं परं विनयपूर्व्वकम्॥”

ब्रह्मोवाच।

“शृणु मोहिनि। मद्वाक्यं सत्यं सारं हितं स्फुटम्।
न कुरु त्वञ्च त्रैलोक्ये स्त्रीजातीनामपत्रपाम्॥
त्यज मामम्बिके! पुत्रं शुद्धं निष्काममेव च।
त्वत्कर्म्मयोग्यं रसिकं युवानं पश्य सस्मिते।॥
निषिकात्मभ्यते पत्नी गुरुभर्त्ता शुभाशुभम्।
मन्त्र: शिल्पमपत्यञ्च सर्व्वमेतन्न यत्नत:॥
त्वया सह मम रतिर्निर्बन्धो नास्ति सुव्रते।।
श्रुतं महद्धा यत् कर्म्म सर्व्वं दैवनिबन्धकम्॥
इत्युक्तवन्तं ब्रह्माणं स्मरन्तं मत्पदाम्बुजम्।
विश्वकर्मं पुनर्वेश्या कामेन हतचेतना॥
एतस्मिन्नन्तरे शीघ्रं स्थानं तत् सुमनोहरम्।
आजग्मुर्मुनय: सर्व्वे ज्वलन्तो ब्रह्मतेजसा॥
दृष्ट्वा तांश्च मुनिश्रेष्ठानागतांश्च समेच्छया।

ननाम मोहिनी शीघ्रं व्रीडया कमलोद्भवम् ॥
तस्थौ वाच जगद्धाता तद्वामपार्श्वतश्च सा ।
प्रणेमुर्मुनयस्तञ्च भक्तिनम्रात्मकन्धराः ॥
आशिषं युयुजे ब्रह्मा वासयामास तान् प्रभुः ।
तेषु मध्ये प्रजज्वाल यथा तारासु चन्द्रमाः ॥
पप्रच्छुर्मुनयो देवं कथमेषा तवान्तिके ।
सर्व्वेषामाश्च प्रवरा मोहिनीत्येवमेव च ॥
श्रुत्वा मुनीनां वचनमुवाच तान् प्रजापतिः ॥

ब्रह्मोवाच ।

अपूर्व्वं नृत्यगीतञ्च चिरं कृत्वा शुभावहा ।
उवासेयं परिश्रान्ता यथा कन्या पितुः पुरः ॥
इत्युक्त्वा जगतां धाता जहास मुनिसंसदि ।
जहसुर्मुनयः सर्व्वे सर्व्वज्ञास्तत्र राधिके ।॥
सर्व्वं रहस्यं विज्ञाय जगत्स्रष्टुश्च मानसम् ।
सद्यश्चुकोप कुलटा हास्यर्याजेन संसदि ॥
सर्व्वाङ्गकम्पमाना सा कुलटा कुटिलानना ।
रक्तपङ्कजनेत्रा च कोपप्रस्फुरिताधरा ॥
उत्थाय च सभामध्ये तेषाञ्च पुरतः स्थिता ।
सबुध्योवाच ब्रह्माणं मृत्युकन्या यथा रुषा ॥

मोहिन्युवाच ।

अये ब्रह्मन् ! जगन्नाथ । वेदकर्त्ता त्वमेव च ।
किं वा वेदप्रणिहितं कर्म्म किन्तद्विपर्य्ययम् ॥
विचारं मनसा स्वेन कुरु वेदविदां गुरो ।।
स्वकन्यायां यतस्पृहा स कथं हसति नर्त्तकीम् ॥
निर्म्मिताहमीश्वरेण सर्व्वेषां सर्व्वगामिनी ।
सतां कर्म्म विरुद्धं यत्तदत्यन्तविडम्बनम् ॥
दासीतुल्यां विनीताञ्च देवेन शरणागताम् ।
यतो हससि गर्व्वेण ततोऽपूज्यो भवाचिरम् ॥
अचिराद्दर्पभङ्गन्ते करिष्यति हरिः स्वयम् ।
निर्बाध शरणं ब्रह्मन् । वेश्यायाश्चैव साम्प्रतम् ॥
तवैव वचनं स्तोत्रं मन्त्रं गृह्णाति यो नरः ।
भविता तस्य विघ्नश्च स यास्यत्युपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघ्याञ्च संक्रान्त्यां न भविष्यति सा पुनः ॥
कल्पान्तरे च कल्पे वा देहे देहान्तरेऽत्र ते ।
पुनः पूजा न भविता या गता सा गतैव च ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ।
तत्र सार्द्धं रतिं कृत्वा बभूव विज्वरा पुनः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे मोहिनीशाप-
ब्रह्मदर्पभङ्गप्रस्तावः ३३ अध्यायः ॥
तस्य सृष्टिक्रमो यथा । मनुरुवाच ।
“चतुर्मुखत्वमगमत् कस्माल्लोकपितामहः ।
कथञ्च लोकानसृजद्ब्रह्मा ब्रह्मविदांवरः ॥”

मत्स्य उवाच ।

“तपश्चचार प्रथमममराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसा न्यायविद्या च प्रमाणाष्टकसम्मता ॥”
तस्य मानसदशपुत्त्रसृष्टिर्यथा, —
“वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनसः पूर्व्वसृष्टा वै जाता ये तेन मानसाः ॥
मरीचिरभवत् पूर्व्वं ततोऽत्रिर्भगवानृषिः ।
अङ्गिराश्चाभवत् पश्चात् पुलस्त्यस्तदनन्तरम् ॥
ततः पुलहनामा वै ततः क्रतुरजायत ।
प्रचेताश्च ततः पुत्त्रो वशिष्ठश्चाभवत् पुनः ॥
पुत्त्रो भृगुरभूत्तत्र नारदोऽपि चिरादभूत् ।
दशेमान् मानसान् ब्रह्मा जपन् पुत्त्रानजी-
जनत् ॥”
तस्य शारीरदशप्रजासृष्टिर्यथा,—
“शारीरानथ वक्ष्यामि मातृहीनान् प्रजापतेः ।
अङ्गुष्ठाद्दक्षिणाद्दक्षप्रजापतिरजायत ॥
धर्म्मस्तनान्तादभवद्धृदयात् कुसुमायुधः ।
भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः ॥
बुद्धेर्मोहः समभवदहङ्कारादभून्मदः ।
प्रमोदश्चाभवत् कण्ठान्मृत्युर्लोचनतो नृप ।॥
रभसः करमध्यात्तु ब्रह्मसूनुरभूत्ततः ।
एते नव सुता राजन् । कन्या च दशमी पुनः ॥
अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता ॥”
तस्य चतुर्मुखत्वस्य कारणं यथा,—
“ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत ।
दृष्ट्वा तां व्यथितस्तावत् कामबाणार्द्दितो विभुः ।
अहो रूपमहो रूपमिति चाह प्रजापतिः ॥
ततो वशिष्ठप्रमुखा भगिनीमिति चुक्रुशुः ।
ब्रह्मा न किञ्चिद्ददृशे तन्मुखालोकनादृते ॥
अहो रूपमहो रूपमिति प्राह पुनः पुनः ।
ततः प्रणामनम्रां तां पुनस्तामभ्यलोकयत ॥
अथ प्रदक्षिणञ्चक्रे सा पितुर्वरवर्णिनी ।
पुत्त्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया ।
आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ॥
विस्मयस्फुरदोष्ठञ्च पाश्चात्यमुदगात्ततः ।
चतुर्थमभवत् पश्चाद्वामं कामशरातुरम् ॥
ततोऽन्यदभवत्तस्य कामातुरतया तथा ।
उत्पतन्त्यास्तदाकाशमालोकनकुतूहलात् ॥
सृष्ट्यर्थं यत् कृतं तेन तपः परमदारुणम् ।
तत् सर्व्वं नाशमगमत् स्वसुतोपगमेच्छया ॥
तेनाशु वक्त्रमभवत् पञ्चमन्तस्य धीमतः ।
आविर्भवज्जटाभिश्च तद्वक्त्रञ्चावृणोत्प्रभुः ॥”

इति मत्स्यपुराणे ३ अध्यायः ॥ * ॥

नव ब्रह्माणो यथा, मार्कण्डेयपुराणे ।
“भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसन्तथा ।
मरीचिं दक्षमत्रिञ्च वशिष्ठञ्चैव मानसम् ।
नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥”
कल्पभेदे तस्य जन्मानि यथा,—
“त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम् ।
चाक्षुषं वै द्वितीयं मे जन्म चासीत् पुरातनम् ॥
त्वत्प्रसादात्तु मे जन्म तृतीयं वाचिकं महत् ।
त्वत्तः श्रवणजं चापि चतुर्थं जन्म मे विभो ।॥
नासत्यञ्चापि मे जन्म त्वत्तः पञ्चममुच्यते ।
अण्डजं चापि मे जन्म त्वत्तः षष्ठं विनिर्म्मितम् ॥
इदञ्च सप्तमं जन्म पद्मजन्मेति मे प्रभो ।।
सर्गे सर्गे ह्यहं पुत्त्रस्तव त्रिगुणवर्ज्जित ।॥”
इति महाभारते शान्तिपर्व्वणि मोक्षधर्म्मे
अनिरुद्धरूपविष्णुं प्रति पाद्मकल्पीयब्रह्मवच-
नम् ॥ * ॥ तस्य पतनकालो यथा,—
“द्वात्रिंशद्दन्तकोऽप्यस्मि तथा इन्द्राष्टकं भवेत् ।
खर्वैश्च निखर्वैश्च शङ्कुत्रययुतं तथा ॥
पद्ममेकं समुद्राश्च त्रयी ब्रह्मसमागते ।
ब्रह्मा विष्णुर्दिनं चैकं पतत्येव वदन्ति ते ॥
मनीषिणस्तथा विष्णुरहन्युग्रस्य शङ्करः ।
ईश्वरस्य तथा चासौ स सांख्यप्रकृतेस्तथा ॥
अतः परं परे धाम्नि कालसंख्या न विद्यते ।
ब्रह्मणोऽतः परं संख्या नास्ति चैतन्मतं हि नः ॥”
अपि च ।
“एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्राससंहितः ॥
जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः ।
तत्तीनायाम्स शर्व्वर्यां स बुद्धा सृजते पुनः ॥
एवन्तु ब्रह्मणो वर्षं तथा वर्षशतं भवेत् ।
शतं वर्षं शते ब्रह्मा परमात्मनि लीयते ॥”

इत्यग्निपुराणम् ॥

ब्रह्माग्रभूः, पु, (ब्रह्मणोऽग्रे सम्मुखे भवतीति । भू +
क्विप । यद्वार्थं ब्रह्मणो देहाज्जातत्वात्तथात्वम् ।)
घोटकः । इति हारावली । ५२ ॥
ब्रह्माञ्जलिः, पुं, (ब्रह्मणे वेदपाठार्थं कृतो यो-
ऽञ्जलिः ।) सामवेदपाठे स्वरविभागार्थं यो-
ऽञ्जलिः क्रियते स. । अध्ययनस्यादावन्ते च
गुरवे प्रणवोच्चारणपूर्व्वकोऽञ्जलिः क्रियते सः ।
तत्पाठार्थत्वात् ब्रह्मणोऽञ्जलिः । इत्यमर-
टीकायां भरतः । २ । ७ । ३६ ॥ (यथा, मनुः ।
२ । ७०-७१ ।
“अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जिते-
न्द्रियः ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥”)
ब्रह्माणी, स्त्री, (ब्रह्माणमानयति जीवयतीति ।
आन प्राणे कर्म्मण्यण् । ङीप् । यद्वा ब्रह्माण-
मानयति जीवयतीति । अनचलुप्राणनं यस्मा
इस्मात् कर्म्मणि अणि कृते “गौरनिट ।६।४।
५१ । इति णिलोपः “टिड्ढाणञ् ।” ४।१।१५।
इति ङीप् पूर्व्वपदादिति णत्वञ्च ।) ब्रह्मणः पत्नी ।
इति शब्दमाला ॥ ब्रह्मणोऽर्द्धशरीरात् तस्या
उत्पत्तिर्नामान्तरञ्च यथा,—
“ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ।
स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् ॥
शतरूपा च सा ख्याता सावित्री च निगद्यते ।
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ।॥”

इति मत्स्यपुराणे ३ अध्यायः ॥*॥

अपि च ।
“हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥”

इति मार्कण्डेयपुराणे । ८८ । १४ ॥*॥

(इयं हि पूर्णशक्तेर्दुर्गायाः कलाशक्तिः । यदुक्तं
मार्कण्डेये । ६० । १४ ।

देव्युवाच ।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट ! मय्येव विशन्त्यो मद्विभूतयः ॥
ततः समस्तास्ता देव्यो ब्रह्माणी-प्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥")
दुर्गा । यथा,—
"ब्रह्माणी ब्रह्मजननाद्ब्रह्माचारपरा मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥ * ॥
रेणुकानामगन्धद्रव्यम् । इति रत्नमाला ॥ राज-
रीतिः । इति राजनिर्घण्टः ॥

ब्रह्माण्डं, क्ली, (ब्रह्मणो जगत्स्रष्टुरण्डम् । चतुर्द्दश-
भुवनगोलकः । यद्वा, ब्रह्मणा विश्वस्रष्ट्रा सृष्ट-
मण्डम् ।) भुवनकोषः । विश्वगोलकः । यथा,—
"ब्रह्माण्डरचनाख्यानं श्रूयतां सावधानतः ।
ब्रह्माण्डरचनार्थञ्च भक्ता जानन्ति यत्नतः ॥
मुनयश्च सुराः सन्तः किञ्चिज्जानन्ति दुःखतः ।
जानामि विश्वसर्व्वार्थं ब्रह्मानन्तो महेश्वरः ॥
धर्म्मः सनत्कुमारश्च नरनारायणावृषी ।
कपिलश्च गणेशश्च दुर्गा लक्ष्मीः सरस्वती ॥
वेदाश्च वेदमाता च सर्व्वज्ञा राधिका स्वयम् ।
एते जानन्ति विश्वार्थं नान्यो जानाति कश्चन ॥
वैष्णवार्थञ्च सुधियः सर्व्वे विद्यातुमक्षमाः ।
नित्याकाशो यथात्मा च तथा नित्या दिशो
दश ॥
यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ।
गोलोकश्च यथा नित्यस्तथा वैकुण्ठ एव च ॥
एकदा मयि गोलोके रासे नृत्यं प्रकुर्व्वति ।
आविर्भूता च वामाङ्गाद् बाला षोडश-
वार्षिकी ॥
श्वेतचम्पकवर्णाभा शरच्चन्द्रसमप्रभा ।
अतीवसुन्दरी रम्या रमणीनां परात्परा ॥
ईषद्धास्या प्रसन्नास्या कोमलाङ्गी मनोहरा ।
वह्निशुद्धांशुकाधाना रत्नाभरणभूषिता ॥
यथा जलदपङ्क्तिश्च बलाकाभिर्विभूषिता ।
सिन्दूरबिन्दुना चारुचन्द्रचन्दनबिन्दुभिः ॥
कस्तूरीबिन्दुभिः सार्द्धं सीमन्ताधःस्थलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणसुस्निग्धकिरणोज्ज्वला ॥
रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वला ।
कुङ्कुमालक्तकस्तूरीचारुचन्दनपत्रकैः ॥
विचित्रैश्च सुचित्रैश्च सुकपोलस्थलोज्ज्वला ।
खगेन्द्रचञ्चुविजितनासा चार्व्वी सुशोभिता ॥
गजेन्द्रगण्डनिर्म्मुक्तमुक्ताभूषणभूषिता ।
स्वच्छा विमुक्तमुक्ताभदन्तपङ्क्तिमनोहरा ॥
वलिना ललितानीव पक्वबिम्बाधरा वरा ।
शश्वत्पूर्णेन्दुनिन्दास्या पद्मनिन्दितलोचना ॥
हृष्यासारनिभोद्भिन्नसुचारुकज्जलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणकेयूरकङ्कणोज्ज्वला ॥
मणीन्द्रराजराजीभिः शङ्खयुग्मकरोज्ज्वला ।
रत्नाङ्गुरीयकैरभिरन्तराङ्गुलिभूषिता ॥
रत्नेन्द्रराजराजेन क्वणन्मञ्जीररञ्जिता ।
रत्नपाशकराजीभिः पादाङ्गुलिविराजिता ।
सुन्दरालक्तरागेण चरणाधःस्थलोज्ज्वला ॥
गजेन्द्रगामिनी रामा कामिनी वामलोचना ।
मां ददर्श कटाक्षेण रमणी रमणोत्सुका ॥
रासे संभूय रामा सा दधाव पुरतो मम ।
तेन राधा समाख्याता पुराविद्भिः प्रपूजिता ॥
प्रकृष्टप्रकृतिश्चाद्यास्तेन प्रकृतिरीश्वरी ।
शक्ता स्यात् सर्व्वकार्य्येषु तेन शक्तिः प्रकी-
र्त्तिता ॥
सर्व्वाधारा सर्व्वरूपा मङ्गलार्हा च सर्व्वतः ।
सर्व्वमङ्गलदक्षा सा तेन स्यात सर्व्वमङ्गला ॥
वैकुण्ठे सा महालक्ष्मीर्म्मूर्त्तिभेदे सरस्वती ।
प्रसूय वेदान् विदिता वेदमाता च सा सदा ॥
सावित्री सा च गायत्री धात्री त्रिजगतामपि ।
पुरा संहृत्य दुर्गञ्च सा दुर्गा च प्रकीर्त्तिता ॥
तेजःसु सर्व्वदेवानामाविर्भूता पुरा सती ।
तेनाद्यप्रकृतिर्ज्ञेया सर्व्वासुरविमर्द्दिनी ॥
सर्व्वानन्दा च सानन्दा दुःखदारिद्र्यनाशिनी ।
शत्रूणां भयदात्री च भक्तानां भयहारिणी ॥
दक्षकन्या सती सा च शैलजा तेन पार्व्वती ।
सर्व्वाधारस्वरूपा सा कलया सा वसुन्धरा ॥
कलया तुलसी गङ्गा कलया सर्व्वयोषितः ।
सृष्टिं करोमि च यया तया शक्त्या पुनःपुनः ॥
दृष्ट्वा तां रासमध्यस्थां मम क्रीड़ा तया सह ।
बभूव सुचिरं तात ! यावद्वै ब्रह्मणः शतम् ॥
अत्यद्भुतं कौतुकञ्च महाशृङ्गारमीप्सितम् ।
तयोर्द्देवोर्घर्म्मराशिः सुस्राव रासमण्डले ॥
तस्मान्मनोहरं जज्ञे नाम्ना कामसरोवरम् ।
पपात घर्म्मधाराधो वेगेन विश्वगोलके ॥
बभूव जलपूर्णञ्च ब्रह्माण्डानाञ्च गोलकम् ।
जलपूर्णं पुरा सर्व्वं सृष्टिशून्यं व्रजेश्वर ! ॥
शृङ्गारान्ते च तस्याश्च वीर्य्याधानं मया कृतम् ।
दधार गर्भं सा राधा यावद्वै ब्रह्मणः शतम् ॥
सुषाव सा तदन्ते च डिम्बं तत् परमाद्भुतम् ।
चुकोप देवी तं दृष्ट्वा रुरोद विषसाद सा ॥
पादेन प्रेरयामास तमर्धो विश्वगोलके ।
स पपात जले तात । सर्व्वाधारो महान् विराट् ॥
दृष्ट्वापत्यं जलस्थञ्च मया शप्ता च सा पुरा ।
अनपत्या च सा राधा मत्शापेन पुरा विभो ! ॥
तेन प्रसूता क्रमतो दुर्गा लक्ष्मीः सरस्वती ।
चतस्रः परिपूर्णा सा प्रसूताश्च सुनिश्चितम् ॥
देव्योऽन्याश्चापि कामिन्यो न प्रसूता व्रजेश्वर ! ।
कलया प्रभवो यासां कलांशांशेन वा व्रज ॥
जज्ञे महान् विराट् तेन डिम्बेन कलयाश्रयः ।
अन्तराकुष्ठपीयूषं मया दत्तं पपौ च सः ॥
जले स्थावररूपश्च स शेते निजकर्म्मणा ।
उपाधानं जलं तल्पं तस्य योगबलेन च ।
तस्य लोम्नाञ्च कूपानि जलपूर्णानि सन्ततम् ।
प्रत्येकं क्रमतस्तेषु शेते क्षुद्रविराट् पुनः ॥
सहस्रपत्त्रं कमलं जज्ञे क्षुद्रस्य नाभितः ।
तत्र जज्ञे स्वयं ब्रह्मा तेनायं कमलोद्भवः ॥
तत्राविर्भूय स विधिश्चिन्ताग्रस्तो बभूव च ।
कस्मादहं क्व माता मे पिता वा क्व च
बान्धवः ॥
दिव्यं चिन्तयन्येव बभ्राम कमलान्तरे ।
ततो दक्षे पद्मलक्षं सस्मार तपसा च माम् ॥
तदा मया दत्तमन्त्रं जजाप कमलान्तरे ।
दिव्यं सप्तवर्षलक्षं नियतं संयतः शुचिः ॥
तदा मत्तो वरं लब्ध्वा स्रष्टा सृष्टिञ्चकार सः ।
मायया प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवात्मकाः ॥
दिक्पाला द्वादशादित्या रुद्राश्चैकादशापि वा ।
नव ग्रहाष्टौ वसवो देवाः कोटित्रयस्तथा ॥
ब्राह्मणक्षत्त्रविट्शूद्रा यक्षगन्धर्व्वकिन्नराः ।
भूतादयो राक्षसाश्चाप्येवं सर्व्वं चराचरम् ॥
विश्वे विश्वे विनिर्म्माणं स्वर्गाः सप्त क्रमेण वै ।
सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ॥
काञ्चनीभूमिसंयुक्ता तमोयुक्तस्थलं ततः ।
पातालाश्च तथा सप्त ब्रह्माण्डमेभिरेव च ॥
विश्वे विश्वे चन्द्रसूर्य्यौ पुण्यक्षेत्रञ्च भारतम् ।
तीर्थान्येतानि सर्व्वत्र गङ्गादीनि व्रजेश्वर ! ॥
यावन्ति लोमकूपानि महाविष्णोः क्रमेण च ।
विश्वान्येव हि तावन्ति ह्यसंख्यानि पितर्ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ८४ । ५७-१०१ ॥
अपि च ।
"देवीगुणत्रयाविष्टमण्डञ्च कोटिविस्तरम् ।
ब्रह्मादिस्तम्बपर्य्यन्तमुत्पन्नं सचराचरम् ॥
अण्डे हिरण्यगर्भस्य यदूर्द्ध्वं गर्भसंश्रितम् ।
तस्मादुत्पन्नमिदं व्योमरूपाणि द्यौर्महो भवेत् ॥
अधोर्द्ध्वं काञ्चनमयश्चतुरस्रोच्छ्रितो महान् ।
उत्पन्नः स चतुःशृङ्गो मेरुर्द्देवसंश्रयः ॥
पृथिवी पद्मदिक् चैवं मेरुस्तस्य तु कर्णिका ।
युगाद्यकोटिविस्तीर्णां तत्र कृत्वा रथं रविः ।
देवीवशानुगो देवैर्याति तस्य प्रदक्षिणम् ॥"
इति देवीपुराणम् ॥
अथ ब्रह्माण्डगोलमाह ।
"भूभूधरत्रिदशदानवमानवाद्या
ये याश्च धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकत्रयस्थितिरुपर्युपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथान्योदितं ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रस
ङ्गादनुवदति ।
कोटिघ्नैर्नखनन्दषट्कनखभूभृद्भुजङ्गेन्दुभि-
र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां
योजनैः ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं
केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः
सूरयः ॥
करतलकलितामलकवदमलं
सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहततमसो
नभसः परिधिरुदितस्तैः ॥
ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोषः ॥

महादानविशेषः । यथा,—

मत्स्य उवाच ।

“अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम् ।
यच्छ्रेष्ठं सर्व्वदानानां महापातकनाशनम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
लोकेशावाहनं तद्वदधिवासनकं यथा ।
कुर्य्याद्विंशपलादूर्द्ध्वमासहस्राच्च शक्तितः ॥
कनकद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः ।
दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम् ॥
लोकपालाष्टकोपेतं मध्यस्थितचतुर्म्मुखम् ।
शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम् ॥
वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम् ।
वितस्तेरङ्गुलशतं यावदायामविस्तरम् ॥
कौशेयवस्त्रसम्वीतं तिलद्रोणोपरि न्यसेत् ।
तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ॥
पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे ।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम् ॥
पश्चिमे चतुरो वेदाननिरुद्धमतः परम् ।
अग्निमुत्तरतो हैमं वासुदेवमतः परम् ॥
समन्ताद्गुडपीठस्थानर्च्चयेत् काञ्चनान् बुधः ।
स्थापयेद्वस्त्रसंयुक्तान् पूर्णकुम्भान् दशैव तु ॥
दशैव धेनवो देयाः सहेमाम्बरदोहनाः ।
पादुकोपानहच्छत्रचामरासनदर्पणैः ॥
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ।
होमाधिवासनान्ते तु स्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं त्रिः कृत्वाथ प्रदक्षिणम् ॥
नमोऽस्तु विश्वेश्वर ! विश्वधाम
जगत्सवित्रे भगवन्नमस्ते ।
सप्तर्षिलोकामरभूतलेश
गर्भेण सार्द्धं वितरामि रक्ष माम् ॥
ये दुःखितास्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम् ।
त्वद्दानशस्त्राहतपातकानां
ब्रह्माण्डदोषाः प्रलयं व्रजन्तु ॥
एवं प्रणम्यामरविश्वगर्भं
दद्याद्द्विजेभ्यो दशधा विभज्य ।
भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण ॥
स्वल्पे तु होमे गुरुरेक एव
कुर्य्यादथैकाग्निविधानयुक्त्या ।
स एव संपूज्यतमोऽल्पवित्ते
यथोक्तवस्त्राभरणादिकेन ॥
इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम् ।
निर्द्धूतकल्मषविशुद्धतनुर्म्मुरारे-
रानन्दकृत्पदमुपैति सहाप्सरोभिः ॥
सन्तारयेत् पितृपितामहपुत्त्रपौत्त्रान्
बन्धुप्रियातिथिकलत्त्रशताधिकः सः ।
ब्रह्माण्डदानशकलीकृतपातकौघ-
मानन्दयेच्च जननीकुलमप्यशेषम् ॥
इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्म्मिकाणाम् ।
मतिमपि च ददाति मोदतेऽसा-
वमरपतेर्भवने सहाप्सरोभिः ॥”

इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्डदानको नाम २५० अध्यायः ॥*॥ अपि च ।

“इदानीं कार्त्तिकीं चैवं वर्त्ततेऽद्य नराधिप ! ।
ब्रह्माण्डं सर्व्वसम्पन्नं भूतरत्नौषधीयुतम् ॥
देवदानवयक्षैश्च युक्तमेतत् सदा विभो ! ।
एतद्धेममयं कृत्वा सर्व्वबीजरसान्वितम् ॥
सरत्नं पुरुषं कृत्वा कार्त्तिक्यां द्वादशीदिने ।
अथवा पञ्चदश्यां वै कार्त्तिक्यामेव नान्यतः ॥
पुरोहिताय गुरवे दापयेद्भक्तिमान्नरः ।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव ! ।
तानि दत्तानि तेन स्युः समासात् कथितं तव ॥
यो यज्ञैर्यजते राजन् ! सहस्रवरदक्षिणैः ।
सैकोद्दिष्टो यजेत्तस्य ब्रह्माण्डस्य विशेषतः ॥
यः पुनः सकलञ्चेदं ब्रह्माण्डं दातुमिच्छति ।
तेन यष्टं कृतं दत्तं पठितं कीर्त्तितं भवेत् ॥”

वराह उवाच ।

“एतत् कृत्वा ततो राजा हैमकुम्भे प्रकल्पनम् ।
ब्रह्माण्डस्थये प्रादात सपिधानञ्च तत्क्षणात ॥
सर्व्वकामैः सुसम्पीतो ययौ स्वर्गं नराधिपः ॥”

इति वराहपुराणम् ॥

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति । ब्रह्मात्मन् + भू + क्विप् ।) अश्वः । इति शब्दमाला ॥ (अस्य ब्रह्मशरीरजातत्वमुक्तं बृहदारण्यकोपनिषदि ।१।२।६-७। तद् यथा,—
“प्राणा वै यशोवीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत तस्य शरीर एव मन आसीत् । सोऽकामयत मेध्यं म इदं स्यादात्मन्व्यनेन स्यामिति । ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् ।” अत्र शाङ्करभाष्यं यथा,—
“प्राणाश्चक्षुरादयः । वै यशो यशोहेतुत्वात्तेषु हि सत्सु ख्यातिर्भवति । तथा वीर्य्यं बलमस्मिन् शरीरे । नह्युत्क्रान्तप्राणो यशस्वी बलवान् भवति । तस्मात् प्राणा एव यशो वीर्य्यं चास्मिन् शरीरे । तदेवं प्राणलक्षणं यशोवीर्य्यमुदक्रामत उत्क्रान्तवत तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावङ्गन्तुमध्रियतामेध्यञ्चाभवत् । तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत् । यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत् । स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति ॥ उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात् । किञ्चात्मन्वी आत्मवांस्तानेन शरीरेण शरीरवान् स्यामिति प्रविवेश । यस्मात्तच्छरीरं मद्वियोगाद्गतयशोवीर्य्यं सदश्वदश्वयत् ततस्तस्मादश्वः समभवत् । ततोऽश्वनामा प्रजापतिरेव साक्षादत्र स्तूयते । यस्माच्च पुनस्तत्प्रवेशात् गतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत तदेव तस्मात्तदेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनाम लाभः ॥”)

ब्रह्मादनी, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥

ब्रह्मादिजाता, स्त्री, (ब्रह्मणः आदिजाता सम्भूता । क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते ।) गोदावरी । इति राजनिर्घण्टः ॥

ब्रह्मापेतः, पुं, (ब्रह्माणं ब्रह्मतेजःस्वरूपं सूर्य्यं सुपेत उपगतः ततः पृषोदरात् साधुः ।) माघमासे सूर्य्यनिकटस्थितराक्षसः । यथा,—
“त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजिद्धृतराष्ट्रश्च सप्तमः ॥
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ।”
इति विष्णुपुराणे । २ । १० । १५ ॥

ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव ।) वेदपाठभूमिः । इति त्रिकाण्डशेषः ॥

ब्रह्मार्पणं, क्ली, (ब्रह्मैवार्पणमितिविग्रहे यदर्पणं तद्ब्रह्मैव । यथा, गीतायाम् । ४ । २४ ॥
“ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ॥”
“ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्धविरग्नावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तद्वदुच्यते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकेवेति । ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः । इति शाङ्करभाष्यम् ॥) ब्रह्मणि समर्पणम् । तत्प्रकारो यथा,
“ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते ।
ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम् ॥
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रीणातु भगवानीशः कर्म्मणानेन शाश्वतः ।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम् ॥
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे ।
कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् ॥”
इति कूर्म्मपुराणे ४ अध्यायः ॥

ब्रह्मावर्त्तः, पुं, (ब्रह्मणां ब्रह्मनिष्ठब्राह्मणानामावर्त्त इव । बहुलब्राह्मणाश्रयत्वादस्य तथात्वम् ।) देशविशेषः । तत्पर्य्यायः । तपोवटः २ । इति त्रिकाण्डशेषः ॥ तत्परिमाणादि यथा,—
“सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥”
इति मानवे । २ । १७-२० ॥
(तीर्थविशेषः । यथा, महाभारते ।३।८३।५०।
“ततो गच्छेत धर्म्मज्ञ ! ब्रह्मावर्त्तं नराधिप ! ।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥”

अपरञ्च तत्रैव । ३ । ८४ । ४० ।
"ब्रह्मावर्त्तं ततो गच्छेत् ब्रह्मचारी समाहितः ।
अश्वमेधमवाप्नोति सोमलोकञ्च गच्छति ॥")

ब्रह्मासनं, क्ली, (ब्रह्मणो ब्रह्मप्राप्त्यै आसनम् ।) ध्यानासनम् । योगासनम् । इत्यमरः ।२।७।४०॥ ध्यानं परमार्थचिन्तनम् । योगश्चित्तवृत्तिनिरोधमात्रम् । ध्यानं निराकारभावनम् । योगः साकारभावनमिति वा । तयोः पद्मस्वस्तिकाद्यासनं यत् तत्र ब्रह्मासनं स्यात् । इति भरतः ॥ (आसनविशेषः । तल्लक्षणं यथा,—
"ब्रह्मासनं तदा वक्ष्ये यत्कृत्वा ब्राह्मणो भवेत् ।
एकपादमुरौ दत्त्वा तिष्ठेद्दण्डाकृतिर्भवेत् ॥"
ब्रह्मण आसनमिति विग्रहे ब्रह्मास्त्ररणम् ॥)

ब्रह्मास्त्रं, क्ली, (ब्रह्मस्वरूपमस्त्रम् ।) ब्रह्मस्वरूपास्त्रम् । यथा, देवीपुराणे ।
"तदा रामेण क्रुद्धेन ब्रह्मास्त्रं प्रति रावणे ।
नारायणविधानार्थं चिन्तितं चतुराननम् ॥
सुक्षेमस्खलद्दण्डाग्रसुवदर्भकृताजिनम् ।
हुङ्काररावबहुलमागत्य पुरतः स्थितम् ॥"

ब्रह्मिष्ठा, स्त्री, (अतिशयेन ब्रह्म । ब्रह्म + इष्ठन् + टाप् च ।) दुर्गा । यथा,—
"ब्रह्मिष्ठा वेदमातृत्वात् गायत्री चरणाग्रजा ।
वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी ॥"
इति देवीपुराणे ४५ अध्यायः ॥

ब्रह्मी, स्त्री, (मेधाजनकत्वात् ब्रह्मणा हिता । ब्रह्म + अण् । बाहुलकात् न वृद्धिः । ततो ङीप् ।) पङ्कगण्डकमत्स्यः । इति त्रिकाण्डशेषः ॥ पाँकाल इति भाषा । फञ्जिकाख्यः । शाकभेदः । ब्रमी इति भाषा । इति मेदिनी । मे, १६ ॥ ब्रह्मीशाकस्य पर्य्यायः । मत्स्याक्षी २ सुरसा ३ वयस्था ४ ब्रह्मचारिणी ५ । इति रत्नमाला ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठरोगचिकित्सायाम् ।
"तैलतुल्यं प्रदातव्यं स्वरसञ्च पृथक् पृथक् ।
महाकालवचाब्रह्मी तुम्बीमिरहपुत्रिका ॥")
अस्या गुणाः । भेदकत्वम् । स्वरकारित्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥ अस्याः पर्य्यायान्तरं गुणाश्च ब्राह्मीशब्दे द्रष्टव्याः ॥

ब्रह्मीघृतं, क्ली, (ब्रह्मीजातं घृतम् ।) औषधविशेषः । सारस्वतघृतमिति ख्यातम् । यथा,—
"समूलपत्रामुत्पाट्य ब्रह्मीं प्रक्षाल्य वारिणा ।
उदूखले क्षोदयित्वा रसं वस्त्रेण गालयेत् ॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।
हरिद्रा मालती कुष्ठं त्रिवृता सहरीतकी ।
एतेषां पलिकैर्भागैः शेषास्तु कार्षिकाः स्मृताः ॥
पिप्पल्योऽथ विडङ्गानि सैन्धवं शर्करा वचा ।
सर्व्वमेतत् समालोड्य शनैर्मृद्वग्निना पचेत् ॥
एतत्प्राशितमात्रेण वाग्विशुद्धिः प्रजायते ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥
अर्द्धमासप्रयोगेण स्वरो भवति कौकिलः ।
मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः ॥
पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत् ।
वन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णवपुःप्रदम् ॥"
इति जयनारायणकृतचिकित्सारत्नसंग्रहः ॥
(अपरञ्च ।
"ब्रह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेव च ।
पुराणं मेध्यमुन्मादग्रहापस्मारनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ॥)

ब्रह्मोतं, त्रि, ब्रह्मणि आ सम्यक् प्रकारेण ऊतं ग्रथितम् । ("लोपोऽस्योमाङोः ।" इति सूत्रेण अकार लोपः ।) इति मुग्धबोधव्याकरणम् ॥

ब्रह्मोत्तरं, त्रि, ब्रह्मा ब्राह्मणः उत्तरः प्रधानं यस्य । ब्राह्मणस्वामिकभूम्यादि । इति व्यवहार प्रसिद्धम् ॥ (देशभेदः । इति मात्स्यम् ।१२०।५०॥)

ब्रह्मोद्यं, क्ली, (ब्रह्मणो वेदस्य वदनम् । ब्रह्म + वद् + क्यप् ।) ब्रह्मणो वाक्यम् । इति मुग्धबोधव्याकरणम् ॥

ब्रह्मोद्या, त्रि, (ब्रह्म + वद् + क्यप् + टाप् ।) ब्राह्मणः कथा । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । ३ । २३१ ।
"ब्रह्मोद्याश्च कथाः कुर्य्यात् पितॄणामेतदीप्सितम् ॥"
"परमात्मनिरूपणपराः कथाश्च कुर्य्यात् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मोपनेता, [ऋ] पुं, (ब्रह्माणं ब्राह्मणं उपनयति इति । ब्रह्म + उप + णी + तृच् । उपनयनहेतुकदण्डत्वात्तथात्वम् ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मणोपनयनकर्त्ता च ॥

ब्रह्मौदनं, क्ली, (ब्रह्मणे देयमोदनम् ।) यज्ञे ऋत्विग्भ्यो दत्तमन्नम् । इति वैदिकाः । (यथा, अथर्व्ववेदे । ४ । ३५ । ७ ।
"ब्रह्मौदनं विश्वजितं पचामि शृण्वन्तु मे श्रद्दधानस्य देवाः ॥")

ब्राह्मं, क्ली, (ब्रह्मण इदम् । ब्रह्मन् + "तस्येदम् ।" ।४।३।१२०। इत्यण् । 'नस्तद्धिते ।' ६।४।१४४। इति टिलोपः ।) ब्रह्मतीर्थम् । तत्तु अङ्गुष्ठस्य मूले वर्त्तते । इत्यमरः ॥ २ । ७ । ५१ ॥ अनेन तीर्थेन द्विजस्याचमनं यथा, आह्निकतत्त्वे ।
"अन्तर्जानुः शुचौ देश उपविष्ट उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥
अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥"
ब्रह्मपुराणम् । यथा,—
"ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
(ब्रह्मसम्बन्धिनि, त्रि । यथा, मनुः । १ । ६८ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥"
ब्रह्मा देवतास्य इति । ब्रह्मन् + "सास्य देवता ।" ४ । २ । २४ । इत्यण् । टिलोपः । ब्रह्मदैवताकमन्त्रादि । यथा, रघुः ।१२ । ९७ ।
"अमोघं सन्दधे चास्मै धनुष्येकधनुर्द्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥")

ब्राह्मः, पुं, (ब्रह्मणोऽपत्यं पुमान् इति । ब्रह्मन् + "तस्यापत्यम् । ४ । १ । ९२ । इत्यण् । "नस्तद्धिते ।" ६ । ४ । १४४ । इति टिलोपः । नारदः । इति जटाधरः ॥ (ब्रह्मणा इदमिति अण् ।) विवाहविशेषः । यथा,—
"वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते सः ।"
यथा,—
"आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्
आहूय दानं कन्याया ब्राह्मो धर्म्मः प्रकीर्त्तितः ॥'
इत्युद्वाहतत्त्वम् ॥
("रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते ।'
इति नियमात् रात्रिशेषयामार्द्धस्थितोऽरुणोदयात् प्राक्दण्डद्वयात्मकः कालविशेषः । यथा, मनुः । ४ । ९२ ।
"ब्राह्मे मुहूर्त्ते बुद्ध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥")

ब्राह्मणं, क्ली, (ब्रह्मन् + अण् न टिलोपः ।) ब्रह्मसंघातः । ब्राह्मणसमूहः । वेदभागः । इति मेदिनी । णे, ६७ ॥

ब्राह्मणः, पुं, ब्राह्मणो विप्रस्य प्रजापतेर्वा अपत्यम् । ब्रह्म वेदस्तमधीते वा सः । इति भरतः ॥ (ब्रह्मन् + अण् "ब्राह्मोऽजातौ ।" ६ । ४ । १७१ । इति नटिलोपः ।) तत्पर्य्यायः । द्विजातिः २ अग्रजन्मा ३ भूदेवः ४ बाड़वः ५ विप्रः ६ । इत्यमरः ॥ २ । ७ । ४ ॥ द्विजः ७ सूत्रकण्ठः ८ ज्येष्ठवर्णः ९ अग्रजातकः १० द्विजन्मा ११ वक्त्रजः १२ मैत्रः १३ वेदवासः १४ नयः १५ गुरुः १६ । इति शब्दरत्नावली ॥ ब्रह्मा १७ षट्कर्म्मा १८ द्विजोत्तमः १९ । इति राजनिर्घण्टः ॥ *॥ अयं सर्व्ववर्णश्रेष्ठः । ब्रह्मणो मुखाज्जातः । प्लक्षद्वीपे तस्य संज्ञा हंसः । शाल्मलद्वीपे श्रुतिधरः । कुशद्वीपे कुशलः । क्रौञ्चद्वीपे गुरुः । शाकद्वीपे ऋतव्रतः । पुष्करद्वीपे सर्व्वे एकवर्णाः । अस्य शास्त्रनिरूपितधर्म्मास्त्रयः अध्ययनं यजनं दानञ्च । जीविकास्तिस्रः अध्यापनं याजनं प्रतिग्रहश्च । अयमाश्रमचतुष्टयवान् भवति । यथा । ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च । क्षत्रियवैश्ययोस्तु क्रमश एकैकपादहीनत्वमिति बोध्यम् । इति श्रीभागवतम् ॥ * ॥ ब्राह्मणीक्षत्रियावैश्यासु ब्राह्मणाज्जातो ब्राह्मणः । यथा,—
"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः ।
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥'
इति महाभारते अनुशासने । ४७ । २८ ॥
तस्य लक्षणं यथा,—
"जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते ॥"
इति वह्निपुराणम् ॥
अपि च ।
"न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः ।
सर्व्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ॥

अहेरिव गणाद्भीतः सौहित्यान्नरकादिव ।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥
येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः ॥
विमुक्तं सर्व्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम् ।
अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः ॥
जीवितं यस्य धर्म्मार्थं धर्म्मो रत्यर्थमेव च ।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्म्माणं तं देवा ब्राह्मणं विदुः ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥
अपि च । विशाखयूप उवाच ।
"विप्रस्य लक्षणं ब्रूहि त्वद्भक्तिः का च तन्मता ।
यतस्त्वानुग्रहेण वाग्बाणाः ब्राह्मणाः कृताः ॥
कल्किरुवाच ।
वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत् परम् ।
ते वेदा ब्राह्मणमुखे नाना धर्म्माः प्रकाशिताः ।
यो धर्म्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला ।
तयाहं तोषितः श्रीशः सम्भवामि युगे युगे ॥
ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥
मृद्भस्मचन्दनाद्यैस्तु धारयेत्तिलकं द्विजः ।
भाले त्रिपुण्ड्रं कर्म्माङ्गं केशपर्य्यन्तमुज्ज्वलम् ॥
पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधाकृतम् ।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम् ॥
ब्राह्मणानां करे स्वर्गा वाचो वेदाः करे हरिः ।
गात्रे तीर्थानि यागाश्च नाडीषु प्रकृतिस्त्रिवृत् ।
सावित्री कण्ठकुहरा हृदयं ब्रह्मसङ्गतम् ।
तेषां स्तनान्तरे धर्म्मः पृष्ठेऽधर्म्मः प्रकीर्त्तितः ॥
भूदेवा ब्राह्मणा राजन् । पूज्या वन्द्याः सदु-
क्तिभिः ।
चातुराश्रम्यकुशला मम धर्म्मप्रवर्त्तकाः ॥
बालाश्चापि ज्ञानवृद्धास्तपोवृद्धा मम प्रियाः ।
तेषां वचः पालयितुमवताराः कृता मया ॥
महाभाग्यं ब्राह्मणानां सर्व्वपापप्रणाशनम् ।
कलिदोषहरं श्रुत्वा मुच्यते सर्व्वतो भयात् ॥"
इति कल्किपुराणे ४ अध्यायः ॥ * ॥
अपि च ।
"कर्म्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम् ।
स्वधर्म्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३५ अध्यायः ॥ * ॥
अपि च ।
"जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथोऽद्रोह आनृशंस्यं क्षमा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥ * ॥

तस्य धर्म्मो यथा,—
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज । धर्म्ममाहुः पुरातनम् ॥
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ।
तञ्चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि ॥
अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् ।
कुर्व्वीतापत्यसन्तानमथ दद्याद्यजेत च ॥
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ॥
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ।"
इति पाद्मे स्वर्गखण्डे २६ अध्यायः ॥ * ॥
तस्य माहात्म्यादि यथा,—
"सर्व्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः ।
तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः ॥
सर्व्वदेवाग्रजो विप्रः प्रत्यक्षत्रिदशो भुवि ।
स तारयति दातारं दुस्तरे विश्वसागरे ॥
हरिशर्म्मोवाच ।
सर्व्ववर्णगुरुर्विप्रस्त्वया प्रोक्तः सुरोत्तम ।।
तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते ॥
ब्रह्मोवाच ।
सर्व्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि ।
अविद्या वा सविद्या वा नात्र कार्य्या विचारणा ॥
स्तेयादिदोषलिप्ता ये ब्राह्मणा ब्राह्मणोत्तम ।
आत्मभ्यो द्वेषिणस्तेऽपि परेभ्यो न कदाचन ॥
अनाचारा द्विजाः पूज्या न च शूद्रा जिते-
न्द्रियाः ।
अभक्ष्यभक्षका गावः कोलाः सुमतयो न च ॥
माहात्म्यं भूमिदेवानां विशेषादुच्यते मया ।
तव स्नेहाद्द्विजश्रेष्ठ । निशामय समाहितः ॥
क्षत्त्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः ।
अन्योन्यं गुरवो ज्ञेयाः पूजनीयाश्च भूसुर ॥
ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तमः ।
आयुः पुत्त्राश्च कीर्त्तिश्च सम्पत्तिस्तस्य वर्द्धते ॥
न च नौति द्विजं यस्तु मूढधीर्मानवो भुवि ।
सुदर्शनेन तच्छीर्षं हन्तुमिच्छति केशवः ॥"
्यादिहस्तब्राह्मणस्य प्रणामनिषेधो यथा,—
'पुष्पहस्तं पयोहस्तं देवहस्तञ्च भूसुर ।
न नमेद्ब्राह्मणं शास्त्रतैलाभ्यङ्गितविग्रहम् ॥
जलस्थं देवधामस्थं ध्यानमञ्चितचेतसम् ।
देवपूजाञ्च कुर्व्वन्तं न नमेद्ब्राह्मणं बुधः ॥
आह्निकक्रियां प्रकुर्व्वन्तं भुञ्जानञ्च द्विजोत्तम ।
तथा सामानि गायन्तं न नमेद्ब्राह्मणं बुधः ॥
ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम ।
प्रत्येकन्तु नमस्कारस्तत्र कार्य्यो न धीमता ॥
कृताभिवादनं विप्रं भक्त्या यो नाभिवादयेत् ।
स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च ॥
कृतप्रणामं तनयं नमेतां पितरौ न च ।
कृतप्रणामाः सर्व्वेऽपि नमस्कार्य्या द्विजैर्द्विजाः ॥
कृतदोषान् द्विजान् गाश्च न द्विषन्ति विच-
क्षणाः ।
द्विषन्ति वापि मोहेन तेषां रुष्टः सदा हरिः ॥
याचकान् ब्राह्मणान् यस्तु कोपदृष्ट्या प्रपश्यति ।

सूचीप्रक्षेपणं तस्य नेत्रयोः कुरुते यमः ॥
विप्रनिर्भर्त्सनं मूढा येन वक्त्रेण कुर्व्वते ।
तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै ॥
ब्राह्मणो यद्गृहे भुङ्क्ते तद्गृहे केशवः स्वयम् ।
देवताः सकला एव पितरश्च सुरर्षयः ॥"
तस्य पादोदकादिमाहात्म्यं यथा,—
विप्रपादोदकं यस्तु कणमात्रं वहेद्बुधः ।
देहस्थं पातकं तस्य सर्व्वमेवाशु नश्यति ॥
कोटिब्रह्माण्डमध्येषु सन्ति तीर्थानि यानि वै ।
तीर्थानि तानि सर्व्वाणि वसन्ति द्विजपादयोः ॥
विप्रपादोदकैर्नित्यं सिक्तं स्याद्यस्य मस्तकम् ।
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ॥
सर्व्वपापानि घोराणि ब्रह्महत्यादिकानि च ।
सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात् ॥
ज्वराद्या व्याधयः सर्व्वे परमक्लेशदायकाः ।
गच्छन्ति विलयं सद्यो विप्रपादाम्बुभक्षणात् ॥
पित्रर्थं यानि तोयानि दीयन्ते विप्रपादयोः ।
तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम् ॥
प्रणाम्य विप्रचरणौ दूर्व्वाभिर्योऽर्च्चयेद्बुधः ।
तेनार्च्चितो जगत्स्वामी विष्णुः सर्व्वसुरोत्तमः ॥
विप्राणां पादनिर्म्माल्यं यो मर्त्यः शिरसा वहेत् ।
सत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि शाश्वती ॥
तस्य प्रदक्षिणफलम् ।
"विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥"
तस्य पादसेवनफलम् ।
यो दद्यात् फलताम्बूलं विप्राणां पादसेवने ।
इह लोके सुखं तस्य परलोके ततोऽधिकम् ॥
पुत्त्रार्थी लभते पुत्त्रं धनार्थी लभते धनम् ।
मोक्षार्थी लभते मोक्षं विप्रपादस्य सेवनात् ॥
रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात् ।
मुच्येत बन्धनाद्बद्धो विप्राणां पादसेवनात् ॥
अनपत्याश्च या नार्य्यो मृतापत्याश्च याः स्त्रियः ।
बह्वपत्या जीववत्साः स्युर्विप्रपादसेवनात् ॥"
इति पाद्मे क्रियायोगसारे २० अध्यायः ॥
तस्य सन्ध्याया अकरणे दोषो यथा,—
"नोपतिष्ठति यः पूर्व्वां नोपास्ते यस्तु पश्चिमाम् ।
स शूद्रवद्बहिः कार्य्यः सर्व्वस्माद्द्विजकर्म्मणः ॥"
तस्य सन्ध्याकरणफलं यथा,—
"यावज्जीवनपर्य्यन्तं यस्त्रिसन्ध्यं करोति च ।
स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा ॥
तत्पादपद्मरजसा सद्यः पूता वसुन्धरा ।
जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः ॥
तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः ।
ततः पापानि यान्त्येव वैनतेयादिवोरगाः ॥
सन्ध्याया अकरणे दोषो यथा, –
"न गृह्णन्ति सुरास्तेषां पितरः पिण्डतर्पणम् ।
स्वेच्छया च द्विजातेश्च त्रिसन्ध्यरहितस्य च ॥"
तस्य निन्दितकर्म्माणि यथा,—
"विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः ।
एकादशीविहीनश्च विषहीनो यथोरगः ॥
हरेर्नैवेद्यभोजी न धावको वृषवाहकः ।

शूद्रान्नभोजी विप्रश्च विषहीनो यथोरगः ॥
शवदाही च शूद्राणां यो विप्रो वृषलीपतिः ।
शूद्राणां सूपकारी च शूद्रयाजी च यो द्विजः ।
असिजीवी मसीजीवी विषहीनो यथोरगः ॥
यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः ।
भगजीवी वार्द्धुषिको विषहीनो यथोरगः ।
यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी ।
यो विद्याविक्रयी विप्रो विषहीनो यथोरगः ॥
सूर्य्योदये च द्विर्भोजी मत्स्यभोजी च यो
द्विजः ।
शिलापूजादिरहितो विषहीनो यथोरगः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥*॥
अपि च ।
"यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ।
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः
स्मृतः ॥
विण्मूत्रसमश्च तत्पिण्डो मूत्रं तस्य च तर्पणम् ।
तत्पितॄणां सुराणाञ्च पूजने तत्समं सति ॥
कोटिजन्मार्जितं पुण्यं सन्ध्यार्च्चातपसार्जितम् ।
द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः ॥
ब्राह्मणश्च सुरापीती विड्भोजी वृषलीपतिः ।
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ॥"
अपि च ।
"करोत्यशुद्धां सन्ध्याञ्च सन्ध्यां वा न करोति यः ।
त्रिसन्ध्यं वर्जयेद्यो वा सन्ध्याहीनश्च स द्विजः ॥
नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहदोषो यथा,
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरपाचने ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये ॥
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥"
पारिभाषिकमहापातकिब्राह्मणा यथा,—
"शूद्रसेवीद्विजस्त्वयाजी ग्रामयाजीति कीर्त्तितः ।
देवोपजीवजीवी च देवलश्च प्रकीर्त्तितः ॥
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः ।
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥*॥
विप्राणामाशीर्वचनं पूर्णस्वस्त्ययनं यथा,—
"आशिषं कर्त्तुमर्हन्ति प्रसन्नमनसा शिशुम् ।
पूर्णस्वस्त्ययनं सद्यो विप्राशीर्वचनं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
ब्राह्मणस्य स्वधर्म्मो यथा,—
"ब्राह्मणस्य स्वधर्म्मश्च त्रिसन्ध्यमर्च्चनं हरेः ।
तत्पादोदकनैवेद्यभक्षणञ्च सुधाधिकम् ॥
अन्नं विष्ठा जलं मूत्रमनिवेद्यं हरेर्नृप ।
भवन्ति शूकराः सर्व्वे ब्राह्मणा यदि भुञ्जते ॥
आजीवं भुञ्जते विप्रा एकादश्यां न भुञ्जते ।
कृष्णजन्मदिने चैव शिवरात्रौ सुनिश्चितम् ॥
तथा रामनवम्याञ्च यत्नतः पुण्यवासरे ।
ब्राह्मणानां स्वधर्म्मश्च कथितो ब्रह्मणा नृप ।॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः ॥
गृहस्थब्राह्मणनियमा यथा,—
"वेदं वेदौ तथा वेदानधीत्य तु समाहितः ।
तदर्थमभिगम्याथ ततः स्नायाद्द्विजोत्तमः ॥
गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया ।
चीर्णव्रतोऽथ युक्तात्मा स शक्तः स्नातुमर्हति ॥
वैणवीं धारयेद्यष्टिमन्तर्व्वासमथोत्तरम् ।
यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम् ॥
छत्रञ्चोष्णीषममलं पादुके चाप्युपानहौ ।
रौक्मे च कुण्डले धार्य्ये कृत्तकेशनखः शुचिः ॥
स्वाध्याये नित्ययुक्तः स्याद्बहिर्माल्यं न धारयेत् ।
अन्यत्र काञ्चनाद्विप्रो न रक्तां विभृयात् स्रजम्॥
शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥
न रक्तमुल्वणञ्चान्यधृतं वासो न कुण्डिकाम् ।
नोपानहौ स्रजं वाथ पादुके च प्रयोजयेत् ॥
उपवीतमलङ्कारं कुशान् कृष्णाजिनानि च ।
नापसव्यं परीदध्याद्वासो न विकृतं वसेत् ॥
आहरेद्विधिवद्दारान् सदृशानात्मनः शुभान् ।
रूपलक्षणसंयुक्तां योनिदोषविवर्ज्जिताम् ॥
अमातृगोत्रप्रभवामसमानार्षगोत्रजाम् ।
आहरेद्ब्राह्मणो भार्य्यां शीलशौचसमन्विताम्॥
ऋतुकालाभिगामी स्याद्यावत् पुत्त्रोऽभिजायते।
वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु ॥
षष्ठ्यष्टमीं पञ्चदशीं द्वादशीञ्च चतुर्द्दशीम् ।
ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मत्रयाहनि ॥
आदधीतावसथ्याग्निं जुहुयाज्जातवेदसम् ।
व्रतानि स्नातको नित्यं पावनानि च पालयेत् ॥
वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः ।
अकुर्व्वाणः पतत्याशु नरकानतिभीषणान् ॥
अभ्यसेत प्रयतो नित्यं वेदं यत्नान्न हापयेत् ।
कुर्य्याद्गृह्याणि कर्म्माणि सन्ध्योपासनमेव च ॥
सख्यं समाधिकैः कुर्य्यादुपेयादीश्वरं सदा ।
दैवतान्यपि गच्छेत्तु कुर्य्याद्भार्य्याभिपोषणम् ॥
न धर्म्मं ख्यापयेद्विद्वान् न पापं गूहयेदपि ।
कुर्व्वीतात्महितं नित्यं सर्व्वभूतानुकम्पकः ॥
वयसः कर्म्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
देशवाग्बुद्धिसारूप्यमाचरन् विचरेत सदा ॥
श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यश्च सेवितः ।
तमाचारन्निषेवेत नेहेतान्यत्र कर्हिचित् ॥
येनास्य पितरो याता येन याताः पितामहाः ।
येन यान्ति सतां मार्गं तेन गच्छन्न रिष्यति ॥
नित्यं स्वाध्यायशीलः स्यान्नित्यं यज्ञोपवीतिमान् ।
सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते ॥
सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः ।
अनसूयुर्म्मृदुर्दान्तो गृहस्थः प्रेत्य वर्द्धते ॥
वीतरागभयक्रोधो लोभमोहविवर्ज्जितः ।
सावित्रीजापनिरतः श्राद्धवान् मुच्यते गृही ॥
मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रतः ।
दाता यज्वा देवभक्तो ब्रह्मलोके महीयते ॥
त्रिवर्गसेवी सततं देवतानाञ्च पूजनम् ।
कुर्य्यादहरहर्नित्यं नमस्येत् प्रयतः सुरान् ॥
विभागशीलः सततं क्षमायुक्तो दयालुकः ।
गृहस्थस्तु समायुक्तो न गृहे न गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मं नित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥
एतस्मान्न प्रमाद्येत विशेषेण द्विजोत्तमः ।
यथाशक्ति चरन् कर्म्म निन्दितानि विवर्जयेत् ॥
विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ।
गृहस्थो मुच्यते बन्धात्तान्न कार्य्या विचारणा ॥
विगर्हातिक्रमक्षेपहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा ॥
स्वदुःखेष्विव कारुण्यं परदुःखेषु सौहृदात् ।
दया यन्मुनयः प्राहुः साक्षाद्धर्म्मस्य साधनम् ॥
चतुर्द्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमितरं विद्याद्येन धर्म्मो विवर्द्धते ॥
अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु ।
धर्म्मकार्य्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते ॥
सत्येन लोकं जयति सत्यन्तत् परमं पदम् ।
यथा भूतप्रसादस्तु सत्यमाहुर्मनीषिणः ॥
दमः शरीरोपरतिः शमः प्रज्ञा प्रसादजः ।
अध्यात्ममक्षरं विद्याद्यत्र गत्वा न शोचति ॥
यया स देवो भगवान् विद्यते यत्र विद्यते ।
साक्षाद्देव महादेव! तज्ज्ञानमिति कीर्त्तितम् ॥
तन्निष्ठस्तत्परो विद्वान्नित्यमक्रोधनः शुचिः ।
महायज्ञपरो विप्रो लभते तदनुत्तमम् ॥
धर्म्मस्यायतनं यत्नाच्छरीरं परिपालयेत् ।
न हि देहं विना रुद्र! पुरुषैर्विद्यते परः ॥
नित्यं धर्म्मार्थकामेषु युञ्जीत नियतो द्विजः ।
न धर्म्मवर्ज्जितं काममर्थं वा मनसा स्मरेत् ॥
सीदन्नपि स्वधर्म्मेण नत्वधर्म्मं समाचरेत् ।
धर्म्मो हि भगवान्देवो गतिः सर्व्वेषु जन्तुषु ।
भूतानां प्रियकारी स्यान्न परद्रोहकर्म्मधीः ॥
न वेददेवतानिन्दां कुर्य्यात्तैश्च न सम्वदेत् ।
यस्त्विमं नियतो विप्रो धर्म्माध्यायं पठेत् शुचिः ।
अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते ॥"
इति कौर्म्मे उपविभागे १४ अध्यायः ॥
अपि च । सूत उवाच ।
"आनृशंस्यं क्षमा सत्यमहिंसा दममार्द्दवम् ।
ध्यानं प्रसादो माधुर्य्यमार्ज्जवं शौचमेव च ॥
इज्या दानं तपः सत्यं स्वाध्यायो ह्यात्मनिग्रहः ।
व्रतोपवासौ मौनञ्च स्नानं पैशुन्यवर्जनम् ॥
एभिर्युक्तो सुनिश्चिन्तो यः सदा वर्त्तते द्विजः ।
हुत्वा तु पावकं सर्व्वं परं ब्रह्माधिगच्छति ॥
अविद्यो वा सविद्यो वा निरग्निः साग्निकोऽपि
वा ।
यो विप्रस्तपसा युक्तः स परं स्वर्गमाप्नुयात् ॥
सर्व्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम् ॥
ब्राह्मणस्य तपो वक्ष्ये तन्मे निगदतः शृणु ।
सायं प्रातश्च यः सन्ध्यामुपास्ते स्वल्पमानसः ॥
जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् ।
तपसा भावितो देव्या ब्राह्मणः पूतकिल्विषः ॥

न सीदेत् प्रतिगृह्णन् स महीमपि ससागराम् ।
द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः ॥
यत्तस्य दुष्कृतं नास्ति पूर्व्वतः परतोऽपि वा ।
यश्चादानरतो विद्वान् साङ्गवेदस्य पाठकः ॥
गायत्र्यध्यानपूतस्य कलां नार्हन्ति षोडशीम् ।
एवं किल्विषयुक्तस्तु विनिर्दहति पातकम् ॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः ॥
तस्य देहापवित्रत्वं यथा, —
"यथा देहापवित्रत्वं विप्रादीनां यतो भवेत् ।
देवर्षे ! शृणु तत्सर्व्वं नराणामानुपूर्व्विकम् ॥
जातके मृतकेऽस्नाति जलौकाभिः क्षते तथा ।
अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्म्मसु ॥
अपूतमनुचनुत्सर्गे नरो मूत्रपुरीषयोः ।
अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु ॥
रक्तपाते नखश्चङ्गदन्तखड्गादिभिः क्षते ।
विप्रादेरशुचिः कायः शस्त्राद्यैः कण्टकादिभिः ॥
भुक्त्वा स्नानतोच्छिष्टेऽपवित्रः कृतमैथुने ।
शयने ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि ॥
ज्वरादिभिश्चतुःषष्टिरोगैर्युक्ते द्विजन्मनाम् ।
वपुरप्रयतं पूजादानहोमजपादिषु ॥
धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजनैः ।
तथा च रेतःस्खलने मर्त्यदेहापवित्रता ॥
अपवित्रं द्विजातीनां वपुः स्याद्दाहुदर्शने ।
गर्हितदानग्रहणे पतितं पातकादिभिः ॥
अशौचान्तेन शुद्धिः स्याज्जातके मृतके द्विज ।॥
सर्व्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्म्मसु ॥"

इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥

अथ श्राद्धीयब्राह्मणनिर्णयः ।

मान्धातोवाच ।

"कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं महामुने ।।
द्विजेभ्यः किं गुणिभ्यो वा तन्मे व्याख्यातुमर्हसि ॥

नारद उवाच ।

ब्राह्मणान्न परीक्षेरन्नान्यवर्णाश्रयो नृप ।।
दैवे कर्म्मणि पित्रे च न्याय्यमाहुः परीक्षणम् ॥
देवताः पूजयन्तीह दैवेनैव हि तेजसा ।
उपेत्य तस्माद्भावेभ्यः सर्व्वेभ्यो दापयेन्नरः ॥
श्राद्धे त्वथ महाराज । परीक्षेद्ब्राह्मणं बुधः ।
कुलशीलवयोरूपैर्विद्ययाभिजनेन च ॥
तेषामन्ये पङ्क्तिदूषास्तथान्ये पङ्क्तिपावनाः ।
अपाङ्क्तेयास्तु ये राजन् ! कीर्त्तयिष्यामि तान्
शृणु ॥"

अपाङ्क्तेया यथा,—
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
सामुद्रिको राजदूतस्तैलिकः कूटकारकः ॥
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ॥
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः ।
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ॥
श्वभिश्च यः परिक्रामेद्यः शुना दष्ट एव च ।
परिवित्तिस्तु यश्च स्याद्दुश्चर्म्मा गुरुतल्पगः ॥
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः ॥
रक्षांसि गच्छते हव्यं यदेभ्यस्तु प्रदीयते ।
श्राद्धे भुक्त्वा महाराज । दुश्चर्म्मा गुरुतल्पगः ॥
श्राद्धं नाशयते तस्य पितरोऽपि न भुञ्जते ।
सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप ।॥
भिषजे शोणितसमं नष्टं देवलके तथा ।
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ॥
वहुवाणिजके दत्तं नेह नामुत्र तद्भवेत् ।
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ॥
ये तु धर्म्मव्यपेतेषु चारित्रापगतेषु च ।
हव्यं कव्यं प्रयच्छन्ति तेषां तत्प्राय नश्यति ॥
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ।
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ॥
एतान् विद्धि महाबाहो ! अपाङ्क्तेयान् द्विजाधमान् ।
शूद्राणामुपदेशन्तु ये कुर्व्वन्त्यल्पबुद्धयः ॥
षष्टिं काणः शतं खञ्जः श्वित्री यावत् प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ।॥
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
असूयते च यद्दत्तं यच्च श्रद्धाविवर्जितम् ।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन ।
तस्मात् परिवृते दद्यात्तिलांश्चान्नं विकीरयेत् ॥
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च ।
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ॥
अपाङ्क्तेयो यतः पङ्क्त्यां भुञ्जानो नगु पश्यति ।
तावत् फलाद्भ्रंशयति दातारं तस्य वालिशम् ॥"

पङ्क्तिपावना यथा,—
"इमे हि मनुजश्रेष्ठ । विज्ञेयाः पङ्क्तिपावनाः ।
विद्यावेदव्रतस्नाताः ब्राह्मणाः सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः ।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः ॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ।
मखेषु च समस्तेषु भवन्त्यवभृतप्लुताः ॥
अक्रोधना ह्यचपलाः क्षान्ता दान्ता जितेन्द्रियाः ।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत् ॥
एतयु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः ॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद् ये च व्याकरणे रताः ॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः ।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च ।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः ॥
अनृत्विगनुपाध्यायः स चेदग्रासनं व्रजेत् ।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्विवर्जितः ।
न च स्यात् पतितो राजन् । पङ्क्तिपावन
उच्यते ॥
तस्मात् सर्व्वप्रयत्नेन परीक्ष्यामन्त्रयेद्द्विजान् ।
स्वकर्म्मनिरतान् शान्तान् कुले जातान् बहुश्रुतान् ॥
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
न प्रीणाति पितॄन् देवान् स्वर्गञ्च न स गच्छति ॥
ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मिन् श्राद्धं न दातव्यं न हि भस्मनि हूयते ॥
ऋषीणां समये नित्यं ये चरन्ति महीपते ।।
निश्चिताः सर्व्वधर्म्मशास्त्रान् देवा ब्राह्मणान्
विदुः ॥
स्वाध्यायनिष्ठानिरता ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च बोद्धव्याः कर्म्मनिष्ठाश्च पार्थिव ।॥
कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भूमिप ।।
तत्र ये ब्राह्मणान् केचिन्न निन्दन्ति हि ते वराः ॥
ये तु निन्दन्ति जल्पेषु न तान् श्राद्धेषु योजयेत् ।
ब्राह्मणा निन्दिता राजन् । हन्युस्ते पुरुषं सदा ॥
वैखानसानां वचनमृषीणां श्रूयते नृप ! ।
दूरादेव निरीक्षेत ब्राह्मणान् वेदपारगान् ॥
प्रियो वा यदि वा द्वेष्यस्तेषां न श्राद्धमावपेत् ॥"

इति पाद्मे स्वर्गखण्डे श्राद्धपात्रनिर्णयो नाम ३५ अध्यायः ॥ आततायिब्राह्मणवधे दोषाभावो यथा,—

"आत्मानं हन्तुमायान्तमपि वेदान्तपारगम् ।
न दोषो हनने तस्य न तेन ब्रह्महा भवेत ॥
प्रायश्चित्तं हिंसकानां न वेदेषु निरूपितम् ।
वधं समुचितं तेषामित्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २५ अध्यायः ॥

(क्लीं, मन्त्रेतरवेदभागः । आशङ्कोपन्यासतन्निरसनपूर्व्वकं तल्लक्षणमाह ऋग्वेदभाष्योपद्घातप्रकरणे यथा । "तत्र ब्राह्मणस्य लक्षणं नास्ति । कुतः ? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्यतिव्याप्त्योः शोधयितुमशक्यत्वात् । पूर्व्वोक्तमन्त्रभाग एकः । भागान्तराणि च कानिचित् पूर्व्वैरुदाहृत्य संगृहीतानि ।
"हेतुर्निर्व्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारणकल्पना ॥" इति ।
तेन ह्यन्नं क्रियते इति हेतुः १ । तद्दध्नो दधित्वमिति निर्व्वचनम् २ । अमेध्या वै माषाः इति निन्दा ३ वायुर्वै क्षेपिष्ठा देवतेति प्रशंसा ४ । तद्व्यचिकित्सन् जुहवानी मा हौषामिति संशयः ५ । यजमानेन सम्मितौदुम्बरी भवतीति विधिः ६ । माषानेव मह्यं पचन्तीति परकृतिः ७ पुरा ब्राह्मणा अभैषुरिति पुराकल्पः ८ । यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपाला-

श्रिवेषेदिति विशेषावधारणकल्पना ८। एव-मन्यदपि उदाहार्य्यम्॥ न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणम्। मन्त्रेष्वपि हेत्वादि-सद्भावात्। इन्द्रवोवासुप्रन्तिहीनि हेतुः। उदानिषुर्महीरिति तस्मादुदकमुच्यते इति निर्वचनम्। मोघमन्नं विन्दते अप्रचेताः इति निन्दा। अग्निर्मूर्द्धादिवः इति प्रशंसा। अधः स्विदासीदुपरिस्विदासीदिति संशयः वसन्ताय कपिञ्जलानालभत इति विधिः सहस्रमयुताद-ददिति परकृतिः। यज्ञेन यज्ञमयजन्त देवा इति पुराकल्पः। इति करणबहुलं ब्राह्मणमिति चेत् न इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्य मन्त्रेऽतिव्याप्तेः। इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेन्न राजाचिन्नं भगं भक्षीत्याह यो वा रक्षाः शुचिरस्मीत्याह इत्यनयोर्मन्त्रयो-रतिव्याप्तेः आख्यायिकारूपं ब्राह्मणमिति चेन्न यमयमीसंवादसूक्तादावतिव्याप्तेः तस्मान्नास्ति ब्राह्मणस्य लक्षणमिति प्राप्ते ब्रूमः मन्त्रब्राह्मण-रूपौ द्वावेव वेदभागौ इत्यङ्गीकारात् मन्त्र-लक्षणस्य पूर्व्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षण-द्वयं जैमिनिः सूचयामास तच्चोदकेषु मन्त्रा-ख्याशेषे ब्राह्मणशब्द इत्यादि॥”

विष्णुः। यथा, महाभारते। १३। १४९। ८४।

“ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः॥”

शिवः। यथा, तत्रैव। १३। १७। १३३।

“गभस्तिर्ब्रह्मकृद्ब्रह्मा ब्रह्मविद् ब्राह्मणो गतिः॥”

ब्रह्म जानातीति व्युत्पत्त्या परब्रह्मवेत्तरि, त्रि॥)

ब्राह्मणब्रुवः, पुं, (ब्राह्मणवंशोत्पन्नतया वेदोक्त-कर्म्माकुर्व्वन्नपि आत्मानं ब्राह्मणं ब्रवीतीति। ब्राह्मण+ब्रू+क+बाहुलकात् न वच्यादेशः।) ब्राह्मणजातिमात्रोपजीवी। यथा,—

“विप्रः संस्कारयुक्तो न नित्यं सन्ध्यादि कर्म्म यः।
नैमित्तिकन्तु नो कुर्य्यात् ब्राह्मणब्रुव उच्यते॥
युक्तः स्यात् सर्व्वसंस्कारैर्द्विजस्तु नियमव्रतैः।
कर्म्म किञ्चिन्न कुरुते वेदोक्तं ब्राह्मणब्रुवः॥
गर्भाधानादिभिर्युक्तस्तथोपनयनेन च।
न कर्म्मकृन्न चाधीते स ज्ञेयो ब्राह्मणब्रुवः॥
अध्यापयति नो शिष्यान्नाधीते वेदमुत्तमम्।
गर्भाधानादिसंस्कारैर्युतः स्याद्ब्राह्मणब्रुवः॥”

इति पाद्मोत्तरखण्डे १०९ अध्यायः॥

तस्मै दाने फलविशेषो यथा,—

“सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
अधीते शतसाहस्रमनन्तं वेदपारगे॥”

इति मानवे ७। ८५॥

ब्राह्मणयष्टिका, स्त्री, (ब्राह्मणस्य यष्टिरिव। ततः स्वार्थे संज्ञायां वा कन् अत इत्वञ्च।) क्षुप-विशेषः। वामनहाटी इति भाषा। तत्पर्य्यायः। पद्मिका २ ब्राह्मणी ३ पद्मा ४ भार्गी ५ अङ्गार-वल्ली ६ वालेयशाकः ७ वर्व्वरः ८ वर्द्धकः ९। इत्यमरः। २। ४। ८९॥ ब्रह्मयष्टिः १० ब्रह्म-यष्टी ११ फञ्जीका १२ यष्टी १३ ब्रह्मयष्टिका १४ दुर्व्वरा १५ अङ्गारवल्लरी १६ बालेयः १७ ब्राह्मिका १८। इति शब्दरत्नावली॥ भृगु-भवा १९ पद्या २० खरशाकः २१ हञ्जिका २२। अस्या गुणाः।

“भार्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघुः।
दीपनी तुवरा गुल्मरक्तनुन्नाशयेद्ध्रुवम्॥
शोथकासकफश्वासपीनसज्वरमारुतान्॥”

इति भावप्रकाशः॥

ब्राह्मणयष्टी, स्त्री, (ब्राह्मणस्य यष्टीव।) भार्गी। इति राजनिर्घण्टः॥

ब्राह्मणहितः, त्रि, (ब्राह्मणस्य हितः।) ब्राह्म-णस्य हितकारी। तत्पर्य्यायः। ब्राह्मण्यः २। इति जटाधरः॥

ब्राह्मणायनः, पुं, (ब्राह्मणस्यापत्यम्। “नडादिभ्यः फक्।” ४। १। ९९। इति फक्।) शुद्ध-सन्तानजो विप्रः। इति त्रिकाण्डशेषः॥

ब्राह्मणी, स्त्री, फञ्जिका। स्पृक्का।

(“स्पृक्कासृक् ब्राह्मणीदेवी मरुन्माला लता लघुः।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भार्गी। तत्पर्य्याया यथा,—

“पद्मा गन्धर्व्वशाका च काञ्जी चाङ्गारपर्ण्यपि।
भार्ग्यब्रयष्टिका ब्राह्मं ब्राह्मणी ब्रह्मचारिणी॥”
“हरेणुरेणुका कौन्ती ब्राह्मणी हैमगन्धिनी॥”

इत्युभे वैद्यकरत्नमालायाम्॥

ब्राह्मण+ङीप्।) ब्राह्मणपत्नी। इति विश्वः। (यथा, मनुः। ८। ३७६।

“ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्॥”)

वरटी। इति त्रिकाण्डशेषः॥ पिपीलिकाभेदः। तत्पर्य्यायः। स्थूलशीर्षिका ७। इति हेमचन्द्रः॥

ब्राह्मणीगमने दोषो यथा,—

“कुलटाविप्रपत्नीनां गमनं सुरविप्रयोः।
ब्रह्महत्याषोडशांशं पातकन्तु भवेद्ध्रुवम्॥
तासामुपस्थितानाञ्च गमनं तच्चतुर्थकम्।
त्यागे धर्म्मो नास्ति पापमित्याह कमलोद्भवः॥
विप्रपत्नीसतीनाञ्च गमनेन बलेन चेत्।
ब्रह्महत्याशतं पापं भवेदेव श्रुतौ श्रुतम्॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥

(बुद्धिः। इयं हि भगवता ब्राह्मणीत्वेन कल्पिता अर्ज्जुनाय कथिता। यथा, महा-भारते १४। ३४। ११-१२।

अर्ज्जुन उवाच।

“क नु सा ब्राह्मणी कृष्ण! क चासौ ब्राह्मणर्षभः।
याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत!॥

श्रीभगवानुवाच।

मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम्।
क्षेत्रज्ञ इति यश्चोक्तः सोऽहमेव धनञ्जय॥”

तीर्थविशेषः। यथा, महाभारते।३।८४।५५।

“ततो वै ब्राह्मणीं गत्वा ब्रह्मचारी जितेन्द्रियः।
पद्मवर्णेन यानेन ब्रह्मलोकं प्रपद्यते॥”)

ब्राह्मण्यं, क्ली, (ब्राह्मणानां समूहः। ब्राह्मण+“ब्राह्मणमाणववाडवाद्यत्।” ४। २। ४२। इति यत्।) ब्राह्मणसमूहः। इत्यमरः। ३। ३।४१॥ ब्राह्मणत्वम्। इति मेदिनी। ये, ९७। (यथा, मनुः। ३। १७।

“शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥”)

ब्राह्मण्यः, पुं, शनिग्रहः। इति शब्दमाला॥

ब्राह्ममुहूर्त्तः, पुं, (ब्राह्मो ब्रह्मदेवताको मुहूर्त्तः।) अरुणोदयकालस्य प्रथमदण्डद्वयम्। ब्राह्म-मुहूर्त्तमाह पितामहः।

“रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते।”

पश्चिमे यामे शेषार्द्धप्रहरे। शेषार्द्धप्रहरे ब्राह्मो मुहूर्त्त इति मदनपारिजातात्। तथापि सूर्य्यो-दयात् प्राक् अर्द्धप्रहरे द्वौ मुहूर्त्तौ तत्राद्यो ब्राह्मः द्वितीयो रौद्रः। इत्याह्निकतत्त्वम्॥ *॥

“ब्राह्मे मुहूर्त्ते चोत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।
शरीरचिन्तां निर्वर्त्य मैत्रं कर्म्म समाचरेत्॥”

इति राजवल्लभः॥

तत्कृत्यं प्रातःकृत्यशब्दे द्रष्टव्यम्। ब्रह्मणो मुहूर्त्तः। स तु एकमनुस्थितिकालः।

“दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागश्चतुर्द्दश॥”

इति लिङ्गपुराणदर्शनात्।

ब्राह्माहोरात्रः, पुं, (ब्रह्मणोऽहोरात्रः।) ब्रह्मणो दिनयामिन्यौ। स तु देवयुगसहस्रद्वयेन भवति। स च कृत्स्नो कल्पद्वयकालः। तत्र दिनमुदय-कल्पः रात्रिश्च क्षयकल्पः। इत्यमरटीकायां भरतः॥

“दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ज्ञेयं तावती रात्रिरेव च॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्व्विदुः।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः॥”

इति मानवे १। ७३॥

ब्राह्मिका, स्त्री, (ब्राह्मी एव। संज्ञायां स्वार्थे वा कन् अत इत्वञ्च।) ब्राह्मणयष्टिका। इति शब्दरत्नावली॥

ब्राह्मी, स्त्री, (ब्रह्मण इयम्। ब्रह्मन्+अण्। टिलोपः। स्त्रियां ङीप्।) दुर्गा। यथा,—

“बृहद्ब्रह्मशरीरं यदप्रमेयं प्रमाणतः।
बृहद्विस्तीर्णमित्युक्तं ब्राह्मी देवी ततः स्मृता॥”

इति देवीपुराणे ४५ अध्यायः॥

शिवस्याष्टमातृकान्तर्गतमातृकाविशेषः। सा च ब्रह्मशक्तिः। सरस्वती। शाकभेदः। तत्-पर्य्यायः। मत्स्याक्षी २ वयस्था ३ सोम-वल्लरी ४। इत्यमरः। २। ४। १३७॥ चत्वारि सोमलतायां। ब्राह्मीशाकं इति केचित्। इति तट्टीकायां भरतः॥ (यथा, गारुडे १९९ अध्याये।

“यथा त्रिकटुकञ्चैव लवणं चूर्णमुत्तमम्।
ब्राह्मीरसे भावितञ्च मधुसर्पिःसमन्वितम्।

तथाहं भविता कुर्य्यास्त्वहित्यं मतिं पराम् ॥”) ब्राह्मीशाकस्य पर्य्यायान्तरं यथा। सरस्वती ५ सौम्या ६ सुरश्रेष्ठा ७ सुवर्चला ८ कपोतवेगा ९ वैधात्री १० दिव्यतेजाः ११ महौषधी १२ स्वायम्भुवी १३ सौम्यलता १४ सुरेष्टा १५ ब्रह्मकन्यका १६ मण्डूकमाता १७ मण्डूकी १८ सुरसा १९ मेध्या २० वीरा २१ भारती २२ वरा २३ परमेष्ठिनी २४ दिव्या २५ शारदा २६। अस्या गुणाः। हिमत्वम्। कषायत्वम्। तिक्तत्वम्। वातास्रपित्तनाशित्वम्। बुद्धिप्रज्ञा-मेधाकारित्वम्। आयुर्वर्द्धकत्वञ्च। इति राज-निर्घण्टः ॥ अपि च।

“ब्राह्मी कपोतवङ्का स्यात् सोमवल्ली सरस्वती ॥”

अथ ब्रह्ममाण्डूकी।

“मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौ-
षधी ॥”

अस्या गुणाः।

“ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च
शीतला।
कषाया मधुरा स्वादुपाकायुष्या रसायनी ॥
स्वर्य्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी ॥”

इति भावप्रकाशः ॥ ॥

फञ्जिका। वामनहाटी इति भाषा। पङ्क-गडमत्स्यः। पाँकाल इति भाषा। सोमवल्लरी। सोमलता इति ख्याता। इति मेदिनी ॥ महाज्योतिष्मती। बड़ी मालकङ्गनी इति हिन्दी भाषा। मत्स्याक्षी। मच्छाक्षी इति छछमछरिया इति च हिन्दी भाषा। वाराही कन्दः। हिलमोचिका। इति राजनिर्घण्टः ॥ हिंचा इति भाषा। रोहिणीमत्स्यम्। इति हेमचन्द्रः ॥ (ब्रह्म+अण्+ङीप्।) ब्रह्माधि-ष्ठातृदेवताकत्वात् तथात्वम् ॥ दुर्गामूर्त्तिः। यथा, मार्कण्डेये। १०९। ७१।

“ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु ॥”

त्रि, ब्रह्मप्राप्तियोग्या। यथा, मनुः। २। २८।

“स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥”)

ब्रह्मभवा। यथा गीतायाम्। २। ७२।

“एषा ब्राह्मी स्थितिः पार्थ। नैनां प्राप्य
विमुह्यति ॥”)

ब्राह्मीकन्दः, पुं, (ब्राह्म्याः कन्द इव कन्दो यस्य।) वाराहीकन्दः। इति राजनिर्घण्टः ॥

ब्राह्म्यं, क्ली, विस्मयः। हास्यम्। इति धरणिः ॥ (ब्रह्मण इदम्। ब्रह्मन्+ष्यञ्।) ब्रह्मसम्बन्धिनि त्रि। (यथा, मार्कण्डेये। ६। ३८।

“चतुर्द्दश गुणो ह्येष कालो ब्राह्म्यमहः
स्मृतम् ॥”)

निर्य्यकारब्राह्मशब्दार्थोऽप्यत्र ॥ (यथा, रघुः। १२। ६७।

“ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥”)

ब्रुवन् [त्] त्रि, (ब्रवीतीति। ब्रू+शतृ।) कथयन्। वक्ता। यथा,—

“हते निःसंशये पापे न भुञ्जीतानुपस्थितः।
भुञ्जानो वर्द्धयेत् पापमसत्यं संवदि ब्रुवन् ॥”

इति प्रायश्चित्ततत्त्वम् ॥

ब्रुवाणः, त्रि, (ब्रूते इति। ब्रू+शानच्।) वक्ता। यथा,—

“इति ब्रुवाणो मधुरं हितञ्च
तमाश्लिष्यत्कोथिलयत्नभूमिम्।
रामं सुनिः प्रीतिमना मखान्ते
यशांसि राज्ञां निनिहृच्छयिष्यन् ॥”

इति भट्टिः। २। ४० ॥

ब्रू ञ उक्तौ। इति कविकल्पद्रुमः ॥ (अदा०-उभ०-द्विक०-सेट्।) ञ ञ ब्रवीति। ब्रूते। विभूतिः, कटके कृतेऽत्र अरविहितकार्य्य-स्यानित्यत्वान्न वचादेशः। इति दुर्गादासः ॥

—

भ

भ भकारः। स च व्यञ्जनचतुर्विंशतितमः पवर्गीय-चतुर्थो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति व्याकरणम् ॥ (तथा च सिद्धान्तकौमुद्याम्। उपूपध्मानीयानामोष्ठौ ॥”) तस्य स्वरूपादि यथा,—

“भकारं शृणु चार्व्वङ्गि। स्वयं परमकुण्डली।
महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम् ॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।”

इति कामधेनुतन्त्रम् ॥

(वङ्गाक्षराकृतौ) तस्य लिखनक्रमो यथा,—

“ऊर्द्धाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव अत ऊर्द्धगता पुनः ॥
ब्रह्मा शम्भुश्च विष्णुश्च क्रमतस्तासु तिष्ठति ॥”

अस्य लेखनप्रकारान्तरं यथा,—

“किञ्चिदाकुञ्चिता रेखा वामदक्षिणतो गता।
ततो वक्रा वामगता तासु वाण्यादयः क्रमात् ॥
ऋजुमात्रा ऊर्ध्वगता कोणाद्दक्षगता पुनः।
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥”

तद्यथा,—

“तड़ित्प्रभां महादेवीं नागकङ्कणशोभिताम् ॥
षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम् ॥
रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्।
चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”

तत्प्रणाममन्त्रो यथा,—

“त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये।
आत्मादितत्त्वसंयुक्तं भकारं प्रणमाम्यहम् ॥”

इति वर्णोद्धारतन्त्रम् ॥

तस्य नामानि यथा,—

“भः क्लिन्नाभ्रमरी भीमो विश्वमूर्त्तिर्निशाभवम्।
द्विरण्डो भूषणो मूलं यक्षस्तत्रस्य वाचकः ॥
नक्षत्रं भ्रमणा दीप्तिर्वधो भूमिः पयो नभः।
नाभिभेदं महाबाहुर्विश्वमूर्त्तिर्निशाकरः ॥

शस्यात्मा तापिनी वक्रा विश्वरूपी च चन्द्रिका।
भीमसेनः सुधासिन्धुः सुखो मायापुरं हरः ॥”

इति नानातन्त्रशास्त्रम् ॥

भं, क्ली, (भातीति। भा दीप्तौ+बाहुलकात् डः।) नक्षत्रम्। इत्यमरः। १। ३। २१ ॥ (यथा, सूर्य्यसिद्धान्ते। १। २६।

“प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः।
परिणाहवशाद्भिन्ना तद्वशाद् भानि भुञ्जते ॥”)

ग्रहः। इति शब्दरत्नावली ॥ राशिः। यथा,—

“राशिनामानि च भं भवनं गृहनाम च ॥”

इति ज्योतिस्तत्त्वम् ॥

भः, पुं, (भातीति। भा दीप्तौ+बाहुलाद् डः।) शुक्राचार्य्यः। इति मेदिनी। भे, १ ॥ भ्रमरः। इत्येकाक्षरकोषः। भ्रान्तिः। इति शब्दरत्ना-वली ॥

भक्तं, क्ली, (भज्यते स्मेति भज सेवायां+कर्म्मणि क्तः।) अन्नम्। इत्यमरः। २। ९। ४८ ॥ अथ भक्तस्य नामानि साधनं गुणाश्च।

“भक्तमन्नं तथान्धश्च क्वचित् कूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि
भाषितः ॥”

सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्।
तद्भक्तं प्रस्रुतञ्चोष्णं विशदं गुणवन्मतम् ॥
भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमस्रुतं शीतं गुर्व्वरुच्यं कफप्रदम् ॥”

इति भावप्रकाशः ॥

हरये निवेदितान्नस्य नित्यं भक्षणे फलं यथा,

“ये विप्रा हरये दत्त्वा नित्यमन्नञ्च भुञ्जते।
उच्छिष्टभोजनात्तेषां हरिदास्यं लभेन्नरः ॥”

हरये अदत्त्वा तद्भक्षणे दोषो यथा,—

“न दत्त्वा हरये भक्त्या भुङ्क्ते चेद्भ्रमादपि।
पुरीषसदृशं वस्तु जलं मूत्रसमं भवेत् ॥ ॥
शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति ॥”

अन्नदानफलं यथा,—

“अन्नञ्च सर्व्वजीविभ्यः पुण्यार्थं दातुमर्हति।
दत्त्वा विशिष्टजीविभ्यो विशिष्टं फलमाप्नुयात् ॥
अतो दत्त्वा मानुषेभ्यो लभतेऽष्टगुणं फलम्।
ततो विशिष्टशूद्रेभ्यो दत्त्वा तद्द्विगुणं फलम् ॥
दत्त्वान्नं वैश्यजातिभ्यस्ततश्चाष्टगुणं फलम्।
दत्त्वान्नं क्षत्त्रियेभ्योऽपि वैश्यानां द्विगुणं भवेत् ॥
क्षत्त्रियाणां शतगुणं विप्रेभ्योऽन्नं प्रदाय च।
विप्राणाञ्च शतगुणं शास्त्रज्ञे ब्राह्मणे फलम् ॥
शास्त्रज्ञाना शतगुणं भक्ते विप्रे लभेद्ध्रुवम्।
स चान्नं हरये दत्त्वा भुङ्क्ते भक्त्या च
सादरम् ॥
विष्णवे भक्तविप्राय दत्त्वा दातुश्च यत् फलम्।
तत् फलं लभते नूनं भक्तब्राह्मणभोजने ॥
भक्ते तुष्टे हरिस्तुष्टो हरौ तुष्टे च देवताः।
भवन्ति सिक्ताः शाखाश्च यथा मूलनिषे-
चनात् ॥”

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्यायः ॥

तस्य एकादश्यां पापाश्रयत्वं भक्तस्य दोषश्च
यथा,—
"एकादश्यामागतायां पापयन्त्यां जगत्त्रयम् ।
स्थानत्रयमन्नमाश्रित्य भवता पापपूरुष ! ॥
अन्नमाश्रित्य तिष्ठन्तं भवन्तं पापपूरुषम् ।
न हनिष्यति मन्मूर्त्तिरियमेकादशी तिथिः ॥
तस्मादन्नं न भोक्तव्यं कदाचिदपि सत्तमैः ।
आत्मनो हितमिच्छद्भिः संप्राप्ते हरिवासरे ॥
संसारे यानि पापानि तान्यवैकादशीदिने ।
अन्नमाश्रित्य तिष्ठन्ति पुण्डरीकेक्षणाज्ञया ॥
कुर्व्वतां सर्व्वपापानि नरकान्निष्कृतिर्भवेत् ।
न निष्कृतिर्भवेन्नूनमश्नतां भुञ्जतां हरिवासरे ॥
मर्त्या भक्तानि यावन्ति भुञ्जते हरिवासरे ।
प्रतिभक्तं ब्रह्महत्याकोटिजं पातकं लभेत् ॥
सर्व्वपापाश्रयं भक्तं त्यक्तव्यं हरिवासरे ।
मोहादृयं भुञ्जते वापि ते ज्ञेयाः पापिनां
वराः ॥"
इति पाद्मे क्रियायोगसारे २१ अध्यायः ॥
वर्ज्जनीयान्नं यथा,—
"नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि-
वान्यतः ।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि ॥
षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विग-
र्हितम् ।
जीवन्नेव भवेन् शूद्रो मृतः श्वा चाभिजायते ॥
ब्राह्मणक्षत्रियविशां शूद्रस्य च मुनीश्वराः ।
यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात् ॥
राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नञ्चक्रकारिणः ।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्जयेत् ॥
चक्रोपजीविरजकतस्करध्वजिनां तथा ।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्जयेत् ॥
कुलालचित्रकर्म्मान्नं वार्द्धुषेः पतितस्य च ।
पौनर्भवच्छत्रिकयोरभिशस्तस्य चैव हि ॥
सुवर्णकारशैलूषव्याधबन्धातुरस्य च ।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाण्डिकस्य च ॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च ।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः ॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे ।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजनः ॥
अपाङ्क्त्यान्नञ्च सङ्घान्नं शस्त्रजीवस्य चैव हि ।
क्लीवसन्न्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि ॥
भीतस्य रुदितस्यान्नं अवक्रुष्टं परिक्षुतम् ।
ब्रह्मद्विषः पापरुचेः श्राद्धान्नं सूतकस्य च ॥
वृथापाकस्य चैवान्नं शावान्नं श्वशुरस्य च ।
अप्रजानान्तु नारीणां भृतकस्य तथैव हि ॥
कन्दुकान्नं विशेषेण शस्त्रविक्रयिणस्तथा ।
शौण्डान्नं घाण्टिकान्नञ्च भिषजामन्नमेव च ।
विद्धप्रजननस्यान्नं परिवित्तान्नमेव च ॥
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः ।
अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम् ।
गुरोरपि न भोक्तव्यमन्नं संस्कारवर्ज्जितम् ॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्नेव्यवस्थितम् ।
यो यस्यान्नेन जीवति स तस्याश्नाति किल्बिषम् ॥"
"आभीरः कुलमित्रञ्च गोपालो दासनापितौ ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥
कुशीलवः कुम्भकारः क्षेत्रकर्म्मक एव च ।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पं पणं बुधैः ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
तस्य सुखत्वं पारिभाषिकत्वञ्च यथा,—
"तण्डुलोऽम्बग्निसंयोगाद्भक्तयोगेन पिष्टकम् ।
फलं विनयसंयोगादन्नं भवति तत्क्षणात् ॥"
इति रामार्च्चनचन्द्रिकाधृतवचनमिति केचित् ॥
(धनम् । यथा, मनौ । ११ । ७ ।
"यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥"
"भक्तं धनम् ।" इति तट्टीकायां मेधातिथिः ।)
भक्तः, त्रि, (भजते स्मेति । भजसेवायां + क्तः ।)
तत्परः । इति हेमचन्द्रः ॥ (यथा, महा-
भारते । १ । १७३ । १४ ।
"न त्वां दृष्ट्वा पुनरन्यां द्रष्टुं कल्याणि ! रोचये ।
प्रसीद वशगोऽहन्ते भक्तं मां भज भाविनि ॥"
पूज्यविषयकानुरागो भक्तिस्तद्वांश्च ।) अथ
श्रीभगवद्भक्तलक्षणानि । लिङ्गपुराणे ।
"व्रतकर्म्मगुणज्ञानभोगजन्मादिमत्स्वपि ।
शैवेष्वपि च कृष्णस्य भक्ताः सन्ति तथा तथा ॥
श्रीभागवते एकादशस्कन्धे । उत्तमभक्ता यथा,
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥"
मध्यमभक्तो यथा,—
"ईश्वरे तदधीनेषु वालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
प्राकृतभक्तो यथा,—
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥"
इति श्रीहरिभक्तिविलासः ॥
अपि च ।
"भक्तानां लक्षणं ब्रूहि भक्तानुग्रहकातर ! ।
येषां स्पर्शनसन्दर्शात् सद्यः पूतो नराधमः ॥
हरिभक्तिविहीनाश्च महाहङ्कारसंयुताः ।
स्वप्रशंसारता धूर्त्ताः शठाश्च साधुनिन्दकाः ॥
पुनन्ति सर्व्वतीर्थानि येषां स्नानावगाहनात् ।
येषाञ्च पादरजसा पूता पादोदकान्मही ॥
येषां सन्दर्शनं स्पर्शं देवा वाञ्छन्ति भारते ।
सर्व्वेषां परमो लाभो वैष्णवानां समागमः ॥
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन विष्णुभक्ताः क्षणादहो ॥
सौतिरुवाच ।
महालक्ष्मीवचः श्रुत्वा लक्ष्मीकान्तश्च सस्मितः ।
निगूढतत्त्वं कथितुन्त्वपि सोपचक्रमे ॥
श्रीनारायण उवाच ।
भक्तानां लक्षणं लक्ष्मि ! गूढं श्रुतिपुराणयोः ।
पुण्यस्वरूपं पापघ्नं सुखदं भक्तिमुक्तिदम् ।
सारभूतं गोपनीयं न वक्तव्यं खलेषु च ॥
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविशति ।
वेदान्तवेदवेदाङ्गास्तं पवित्रं वदन्ति हि ॥
पुरुषाणां शतं पूर्व्वं पूतं तज्जन्ममात्रतः ।
स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात् ॥
ये: कैश्चिद्यत्र वा जन्म लब्धं येषु च जन्तुषु ।
जीवन्मुक्तास्ते च पूता यान्ति काले हरेः पदम् ॥
मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणान्वितः ।
मद्गुणश्लाघनीयश्च मन्निविष्टश्च सन्ततम् ॥
सगद्गदः साश्रुनेत्रः स्वात्मविस्मृत एव च ।
न वाञ्छन्ति सुखं मुक्तिं सालोक्यादिचतुष्टयीम् ॥
ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवनं ।
इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम् ॥
स्वर्गराज्यादिभोगञ्च स्वप्ने च नहि वाञ्छति ।
ब्रह्माण्डानि विनश्यन्ति देवा ब्रह्मादयस्तथा ।
कल्पान्तभक्तियुक्तश्च मद्भक्तो न प्रणश्यति ।
भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्
तेऽपि यान्ति मर्त्यं पूत्वा नव तीर्थं ममालयम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः ॥
अपि च ।
"हरेः कृष्णकथायाञ्च यस्याश्रुपुलकोद्गमः ।
मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः ॥
पुत्त्रदारादिकं सर्व्वं जानाति श्रीहरेरपि ।
आत्मना मनसा वाचा स भक्तः कथितो बुधैः ॥
दयास्ति सर्व्वभूतेषु सर्व्वं कृष्णमयं जगत् ।
यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
भगवद्भक्ता यथा, तत्रैव ३ अध्याये ।
मद्भक्ताश्चैव निःशङ्काः कर्म्मनिर्मूलकारकाः ।
नाहं शक्तश्च भक्तानां संहारे नित्यदेहिनाम् ॥
भक्ता ममानुगा नित्यं मत्पादार्च्चनतत्पराः ।
अहं भक्तान्तिके नित्यं तेषां रक्षणहेतवे ॥
सर्व्वे नश्यन्ति ब्रह्माण्डे प्रभवन्ति पुनः पुनः ।
न मे भक्ताः प्रणश्यन्ति निःशङ्काश्च निरापदः ॥
हरिभक्तिमाहात्म्यं यथा,—
द्विजानां हरिभक्तानां प्रभावो दुर्लभः श्रुतौ ।
येषां पादाब्जरजसा सद्यः पूता वसुन्धरा ॥
तेषाञ्च पादचिह्नं यत्तीर्थं तत् परिकीर्त्तितम् ।
तेषाञ्च स्पर्शमात्रेण तीर्थपापं प्रणश्यति ॥
आलिङ्गनात् सदालापात्तेषामुच्छिष्टभोजनात् ।
दर्शनात् स्पर्शनाच्चैव सर्व्वपापात् प्रमुच्यते ॥
भ्रमणे सर्व्वतीर्थानां यत् पुण्यं लभते भवेत् ।
हरिदासस्य विप्रस्य तत् पुण्यं दर्शनाल्लभेत् ॥
इति तत्रैव २१ अध्यायः ॥
त्रिविधभक्तलक्षणं यथा,—
भक्तानां त्रिविधानाञ्च लक्षणं श्रूयतामिति ।
कृष्णप्रणयारतो भक्तो मन्नामगुणकीर्त्तिषु ॥
मनो निवेशयेत्त्यक्त्वा संसारसुखकारणम् ।
दास्यं विना न वाञ्छन्ति सालोक्यादिचतुष्टयम् ॥
नैव निर्व्वाणमुक्तिञ्च सुधापानमभीप्सितम् ।
ध्यायते मत्पदाब्जञ्च पूजयेद्भक्तिभावतः ॥
श्रीहेतुः किं तस्य देवः सद्धर्म्मरहितस्य च ।
सर्व्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सितम् ॥

ब्रह्मत्वममरत्वं वा सुरत्वं सुखकारणम् ।
वाञ्छन्ति निश्चलां भक्तिं मदीयामतुलामपि ॥
स्त्रीपुंविभेदो नास्त्येवं सर्व्वजीवेषु भिन्नता ।
तेषां सिद्धेश्वराणाञ्च प्रवराणां व्रजेश्वर ! ॥
क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम् ।
त्यक्त्वा दिवानिशं माञ्च ध्यायते च दिगम्बरः ॥
स मद्भक्तोत्तमो नन्द ! श्रूयतां मध्यमादिकम् ॥”
“नासक्तः कर्म्मसु गृही पूर्व्वप्राक्तनतः शुचिः ॥
करोति सततञ्चैव पूर्व्वकर्म्मनिकृन्तनम् ।
न करोत्यपरं यत्नात् सङ्कल्परहितश्च यः ॥
सर्व्वं कृष्णस्य यत्किञ्चिन्नाहं कर्त्ता च कर्म्मणः ।
कर्म्मणा मनसा वाचा सततं चिन्तयेदिति ॥
न्यूनभक्तश्च तदन्यः स च प्राक्तनिकः श्रुतौ ।
यमं वा यमदूतं वा स्वप्नेन च न पश्यति ॥
पुरुषाणां सहस्रञ्च पूर्व्वं भक्तः समुद्धरेत् ।
पुंसां शतं मध्यमश्च तच्चतुर्थञ्च प्राक्तनः ॥
भक्तश्च त्रिविधस्तात ! कथितश्च तवाज्ञया ॥”
इति तत्रैव ८४ अध्यायः ॥
कृष्णभक्तशरीरे तीर्थादीनि यथा,—
“पृथिव्यां यानि तीर्थानि पुण्यान्यपि च जाह्नवि ! ।
मद्भक्तानां शरीरेषु सन्ति पूतेषु सन्ततम् ॥
मद्भक्तपादरजसा सद्यः पूता वसुन्धरा ।
सद्यः पूतानि तीर्थानि सद्यः पूतं जगत्तथा ॥
मन्मन्त्रोपासका विप्रा ये मदुच्छिष्टभोजिनः ।
मामेव नित्यं ध्यायन्ते ते मत्प्राणाधिकाः प्रियाः ।
तदुपस्पर्शमात्रेण पूतो वायुश्च पावकः ।
कलेर्दशसहस्राणि मद्भक्ताः सन्ति भूतले ॥
एकवर्णा भविष्यन्ति मद्भक्तेषु गतेषु च ।
मद्भक्तशून्या पृथिवी कलिग्रस्ता भविष्यति ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२८ अः ॥
भगवद्भक्तमाहात्म्यं यथा,—
“सकृत्तु कीर्त्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये ! ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥”
इति वाराहे उपविभागे प्रबोधिनीमाहात्म्यम् ॥ हरिभक्तकर्त्तव्यानि यथा,—
“हरेश्चरितमीशस्य सर्व्वलोकेषु कीर्त्तनम् ।
वैष्णवेषु च कार्य्येषु भक्तः कुर्य्यादहर्निशम् ॥
दासीदासांश्च यत्किञ्चित् स्वकीयं वस्तु चात्मनः ।
कृष्णभक्तस्य गार्हस्थ्यं सर्व्वं कृष्णे निवेदनम् ॥”
भक्तस्य लक्षणान्तरं यथा,—
“प्रेम्णा संजातया भक्त्या तनुसुतपुलकाञ्चनः
विभर्त्त्यलौकिकं भक्तो वदेद्धसति नृत्यति ॥
परमानन्दयुक्तोऽसौ क्वचिद्गायति नन्दति ।
क्रन्दत्यच्युतभावेन गद्गदेन पुनः पुनः ॥
अनुशीलयति भजेत् गोविन्दमनुमोदते ।
तरेदेवं विष्णुमायां दुस्तरां मुनिमोहिनीम् ॥
सर्व्वेश्वरबुद्ध्या यो भजेदीशं सनातनम् ।
स तत्त्ववादी भक्तश्च सर्व्वभूतसुहृत्तमः ॥”
इति पाद्मोत्तरखण्डे १०१ अध्यायः ॥*॥

भक्तत्यागे दोषो यथा,—
“ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा ।
तुल्यमेभिर्महापापं भक्तत्यागादुदाहृतम् ॥
भजन्तं भक्तमत्याज्यमदुष्टं त्यजतः सुखम् ।
नेह नामुत्र पश्यामि तस्मात् शक्र ! दिवं व्रज ॥”
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानम् ॥
(कृतविभागः । यथा, लीलावत्याम् ।
“भक्तो हरः शुध्यति यद्गुणः स्यात् ॥’)

भक्तकरः, पु, (भक्तं भजनं करोतीति । कृ + टः ।) कृत्रिमधूपः । यथा, शब्दचन्द्रिकायाम् ।
“दृकधूपे भक्तकरो गिरिः स्यात् समगन्धकः ॥”
भक्तकारके त्रि ॥

भक्तकारः, त्रि, (भक्तमन्नं करोतीति । कृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) पाचकः । भक्तमन्नं करोति पचति यः । तत्पर्य्यायः । सूदः २ औदनिकः ३ गुणः ४ भक्ष्यंकारः ५ सूपकारः ६ सूपः ७ आरालिकः ८ वल्लवः ९ । इति हेमचन्द्रः ॥

भक्तता, स्त्री, भक्तत्वम् । भक्तस्य भाव इत्यर्थे (तल्) तप्रत्ययेन निष्पन्ना ॥

भक्ततूर्य्यं, क्ली, (भक्तस्य तद्भोजनकालस्यावेदकं यद्वा भक्ते तद्भोजनकाले वादनीयन्तूर्य्यम् ।) भोजनकाले वादनीयतूर्य्यम् । तत्पर्य्यायः । नृपमानम् २ । इति त्रिकाण्डशेषः ॥

भक्तदासः, पुं, (भक्तेनान्नमात्रेण दासः ।) पञ्चदशदासान्तर्गतदासविशेषः । यथा,—
“भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
सुभिक्षेऽपि भक्तेनाङ्गीकृतदास्यः । इति दायक्रमसंग्रहः ॥ (यथा, मनौ । ८ । ४१५ ।
“ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ॥”)

भक्तमण्डः, पु क्ली, (भक्तस्यान्नस्य मण्डः ।) अन्नाग्ररसः । भातेर माड इति भाषा । तत्पर्य्यायः । मासरः २ आचामः ३ निःस्रावः ४ । इत्यमरः ॥ (भक्तस्य भजनशीलस्य मण्डोभूषणम् ।) पिच्छा ५ । इति जटाधरः ॥

भक्तिः, स्त्री, (भज्यते इति । भज + क्तिन् ।) विभागः । सेवा । इति मेदिनी । ते, ३९ ॥ गौणवृत्तिः । भङ्गी । (अनुरागविशेषः । पूर्व्वेष्वनुरागो भक्तिरित्युपदेशः ॥ ईश्वरे परानुरक्तिः ।
“अथातो भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे ।” इति शाण्डिल्यसूत्रम् ॥ उपासना । परमेश्वरविषये परमप्रेम । उपास्याकाराकारितचित्तवृत्त्यावृत्तिरूपा परिपक्वनिदिध्यासनाख्या श्रवणमननाभ्यासफलभूता अनुरक्तिः ॥
“नष्टोऽदेवात् परमस्ति किञ्चित् ।” इति बुद्धिपूर्व्विका चित्तवृत्तिः । सा च परमप्रीत्यधीना । यथा, विष्णुपुराणे । १ । २० । १८-१९ ।
“नाथ ! योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ।
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥”
“हे अच्युत ! त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु । एकान्तभक्तिः परमप्रीत्यधीनेति तां प्रीतिं प्रार्थयते येनेति यादृशी प्रीतिर्विषयेषु आसक्तानां सा तादृशी प्रीतिर्मे हृदयात् मापसर्पतु मापयातु हृदये सदा तिष्ठत्वित्यर्थः ॥” इति तट्टीकायां श्रीधरस्वामी ॥ चन्दनादिभिस्तिलकादिरचना । यथा, रघौ । १३ । ५५ ।
“क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पंक्तिः ।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव ॥”)
श्रद्धा । इति हेमचन्द्रः ॥ (भक्तिविवरणं यथा,—
“भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी ॥
इति गारुडे २३१ अध्यायः ॥*॥
अथ श्रीमद्भक्तिलक्षणं तृतीये श्रीकापिलेये ।
“देवानां गुणलिङ्गानामानुश्रविककर्म्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥
अथ विशेषलक्षणानि । श्रीगौतमीयतन्त्रे ।
“देवतायाञ्च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य कृष्णः प्रसीदति ॥
तद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम् ।
सुमना अर्च्चयेन्नित्यं तदर्थे दम्भवर्ज्जनम् ॥
तत्कथाश्रवणे रागस्तदर्थे चाङ्गविक्रिया ।
तदनुस्मरणं नित्यं यस्तन्नाम्नोपजीवति ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ।
स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः ॥”
सप्तमस्कन्धे श्रीप्रह्रादोक्तौ ।
“श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥”
तत्रैव श्रीनारदयुधिष्ठिरसंवादे ।
“श्रवणं कीर्त्तनञ्चास्य स्मरणं महतां गतेः ।
सेवेज्यावनतिर्दास्यं सख्यमात्मनिवेदनम् ॥”
पाद्मे कार्त्तिकमाहात्म्ये श्रीयमधूम्रकेशसंवादे ।
“श्रवणं कीर्त्तनं पूजा सर्व्वकर्म्मार्पणं स्तुतिः ।
परिचर्य्या नमस्कारः प्रेम स्वात्मार्पणं हरौ ॥”
तत्रैवोत्तरखण्डे शिवपार्व्वतीसंवादे ।
“आद्यन्तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः ।
धारणञ्चोर्द्ध्वपुण्ड्राणां तन्मन्त्राणां परिग्रहः ॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा ।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम् ।
तत्पादोदकसेवा च तन्निवेदितभोजनम् ॥
तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता ।
तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः ॥
भक्तिः षोड़शधा प्रोक्ता भवबन्धविमुक्तये ॥”
इति च ।
किञ्च ।
“दर्शनं भगवन्मूर्त्तेः स्पर्शनं क्षेत्रसेवनम् ।

आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम् ॥
नृत्यं भगवदग्रे च तथा वीणादिवादनम् ।
कृष्णलीलाद्यभिनयः श्रीभागवतसेवनम् ॥
पद्माचमालादिधृतिरेकादश्यादिजागरः ।
प्रासादरचनाद्यन्यज्ज्ञेयं शास्त्रानुसारतः ॥
लिखिता भगवद्धर्म्मा भक्तानां लक्षणानि च ।
तानि ज्ञेयानि सर्व्वाणि भक्तेर्वै लक्षणानि च ॥
तेषु ज्ञेयानि गौणानि मुख्यानि च विवेकिभिः ।
बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि
यत् ॥
भेदास्तु विविधा भक्तेर्भक्तभावादिभेदतः ।
मुक्तापलादिग्रन्थेभ्यो ज्ञेयास्तल्लिखनैरलम् ॥
प्रेमभक्तौ च सिद्धायां सर्व्वेऽर्थाः सेवकाः स्वयम् ॥
भगवत्कृपानिचयः स्यात्तिष्ठतस्तस्याः सुल-
क्षणम् ॥”
अथ प्रेमभक्तिलक्षणम् । नारदपञ्चरात्रे ।
“अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म । प्रह्लादोद्धवनारदैः ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥
चिह्नानि प्रेमसम्पत्तेर्बाह्याभ्यन्तराणि च ।
कियन्त्युल्लिखितान्यस्या महिमैव विलिख्यते ॥”
अथ प्रेमसम्पत्तिचिह्नानि सप्तमस्कन्धे श्रीप्रह्ला-
दस्य बालानुशासने ।
“निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति नृत्यते च ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्या-
क्रन्दति ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे । जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्द्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥”
एकादशे च श्रीकवियोगेश्वरोक्तं ।
शृण्वन् सुभद्राणि रथाङ्गपाणे-
र्जन्मानि कर्म्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन् विलज्जो विचरेदसङ्गः ॥
एवंव्रतः स्वप्रियनामकीर्त्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥”
तत्रैव श्रीप्रबुद्धयोगेश्वरोक्तं ।
“स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या विभ्रत्युत्पुलकां तनुम् ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥
श्रीभगवदुद्धवसंवादे च ।
“कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥
वाग्गद्गदा द्रवते यस्य चित्तं
रोदित्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥
यथोक्तभक्त्यशक्तौ तु भगवच्चरणाम्बुजम् ।
शरणागतभावेन कृतकृत्भीतिस्समाश्रयेत् ॥”
इति हरिभक्तिविलासे ११ विलासः ॥
अपि च । उत्तमभक्तेर्लक्षणं यथा,—
“अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥
तथा नारदपञ्चरात्रे ।
“सर्व्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्म्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥”
श्रीभागवतस्य तृतीयस्कन्धे च ।
“अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥”
इति ॥
सा उत्तमा भक्तिः षड्विधा यथा,—
“क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा ॥”
तत्रास्याः क्लेशघ्नत्वम् ।
“क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥”
शुभदत्वं यथा,—
“शुभानि प्रीणनं सर्व्वजगतामनुरक्तता ।
सद्गुणाः सुखमित्यादीन्याख्यातानि मनी-
षिभिः ॥”
मोक्षलघुताकृद्यथा,—
“मनागेव प्ररूढायां हृदये भगवद्रतौ ।
पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥”
सुदुर्लभा यथा,—
“साधनौघैरनासङ्गैरलभ्या सुचिरादपि ।
हरिणा चाश्वदेयेति द्विधा सा स्यात् सुदुर्लभा ॥”
सान्द्रानन्दविशेषात्मा यथा,—
“ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥”
श्रीकृष्णाकर्षणी यथा ।
“कृत्वा हरिं प्रेमभाजं प्रियवर्गसमन्वितम् ।
भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षणी च सा ॥”
सा उत्तमा भक्तिस्त्रिधा यथा,—
“सा भक्तिः साधनं भावः प्रेमा चेति त्रिधो-
दिता ॥”
साधनभक्तिर्यथा,
“कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥”
भावभक्तिर्यथा,
“शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥”
प्रेमभक्तिर्यथा,—
“सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥”
इति भक्तिरसामृतसिन्धौ पूर्व्वविभागः ॥
भक्तिमान् [त्] त्रि, (भक्तिरस्यास्तीति । भक्ति+
“तदस्यास्त्यस्मिन्निति मतुप् ।” ५ । २ । ९४ ।
इति मतुप् ।) भक्तियुक्तः । यथा,—
“गुणवान् पुत्त्रवान् श्रीमान् कीर्त्तिमान् भक्ति-
मान् भवेत् ।
ऐहिके परमैश्वर्य्यमन्ते नाथपदं व्रजेत् ॥”
इति शाम्भवीतन्त्रान्तर्गतमहाकालभैरवस्तोत्रम् ॥
अपि च ।
“अन्येऽपि ये विकर्म्मस्थाः शूद्राद्या नीचजातयः ।
भक्तिमन्तः प्रमुच्यन्ते कालेन मयि सङ्गताः ॥”
इति कौर्म्मे ४ अध्यायः ॥
भक्तियोगः, पुं, (भक्तेर्योगः भक्त्या यो योग इति
वा ।) परमेश्वरे भजनसम्बन्धः । यथा,—
“भक्तियोगप्रकाशाय लोकस्यानुग्रहाय च ।
सन्न्यासाश्रममाश्रित्य कृष्णचैतन्यनामधृक् ॥”
इति चैतन्यभागवतम् ॥
अपि च ।
“वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम् ॥”
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
(भक्तियोग उच्यते । यथा, गीतायाम् । १२ ।
१-२ । १४-२० ।
“एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥
श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्व्वारम्भपरित्यागी यो मे भक्तः स मे
प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे
प्रियः ॥ १७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्ज्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो
नरः ॥ १९ ॥
ये तु धर्म्मामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे
प्रियाः ॥” २० ॥
भक्तिरसः, पुं, भक्तिरेव रसः । यथा,—
“विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।

यथा ब्रह्मरतिः स्थायीभावो भक्तिरसो भवेत् ॥"
इति भक्तिरसामृतसिन्धुः ॥

भक्तिलः, पुं, (भक्तिं भक्तिं लातीति । ला+कः ।) साधुघोटकः । यथा,—
प्रभुभक्ता भक्तिलाश्च कुलीनेषु कुलोत्कटाः ।
इति शब्दचन्द्रिका ॥

भक्तिहारादि च ॥

भक्ष क भक्षे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क भक्षयति । इति दुर्गादासः ॥

भक्ष ञ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ञ भक्षति भक्षते । इति दुर्गादासः ॥

भक्षकः, त्रि, (भक्षयतीति । भक्ष+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) खादकः । भक्षणपरः । तत्पर्य्यायः । घस्मरः २ अद्मरः ३ । इत्यमरः ।३।१।२०॥ (यथा, हितोपदेशे ।१।६५।
"भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन
रक्षितः ॥")

भक्षटकः, पुं, (भक्ष+अटन् । ततः संज्ञायां कन् ।) क्षुद्रगोक्षुरकः । इति राजनिर्घण्टः ॥

भक्षणं, क्ली, (भक्ष+भावे ल्युट् ।) द्रवेतरद्रव्यगलाधःकरणम् । तत्पर्य्यायः । स्वादः २ खदनम् ३ खादनम् ४ अशनम् ५ निघसः ६ वल्भनम् ७ अभ्यवहारः ८ जग्धिः ९ जक्षणं १० लेहः ११ प्रत्यवसानम् १२ घसिः १३ आहारः १४ प्सानम् १५ अवष्वाणम् १६ विष्वाणम् १७ भोजनम् १८ जेमनम् १९ अदनम् २० । इति हेमचन्द्रः ॥ द्रव्यविशेषस्य भक्षणनिषेधो यथा, कर्म्मलोचने ।
"शुष्कशाकं वृथामांसं करेण मथितं दधि ।
तर्ज्जन्या दन्तधावञ्च सद्यो गोमांसभक्षणम् ॥"

भक्षणीयं, त्रि, (भक्ष+अनीयर्) भक्ष्यद्रव्यम् । भक्षणयोग्यम् । इति भक्षधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ४ । २५ । "तन्न भेतव्यम् । त्वद्वचनेन भक्षणीयास्ते दायादाः ।") तत्स्थापनविधिर्यथा, पाकराजेश्वरे ।
"पुरस्ताद्विमलं पात्रं सुविस्तीर्णं मनोरमम् ।
तत्र भक्तं परिन्यस्तं मध्यभागे सुसंयुतम् ॥
सूपं सर्पिः पलं शाकं पिष्टमन्नन्तु मत्स्यकम् ।
स्थापयेद्दक्षिणे पार्श्वे भुञ्जानस्य यथाक्रमम् ॥
प्रलेह्याद्याः द्रवाः सर्व्वे पानीयं पानकं पयः ।
चोष्यं सन्धानकं लेह्यं सव्यपार्श्वे निधापयेत् ॥
सर्व्वान् इक्षुविकारांश्च पक्वान्नं पायसं दधि ।
पुरतः स्थापयेद्धीमान् द्वयोः पंक्त्योश्च मध्यतः ॥"

भक्ष(क्ष्य)पत्रा, स्त्री, (भक्षं वा भक्ष्यं भक्षणीयं पत्रमस्याः ।) नागवल्ली । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्या नागवल्लीशब्दे ज्ञातव्या ॥)

भक्षितं, त्रि, (भक्ष्यते स्मेति । भक्ष+कर्म्मणि क्तः ।) कृतभक्षणवस्तु । (यथा, हितोपदेशे ।२।
"भक्षितेनापि भवता नाहारो मम पुष्कलः ॥")
तत्पर्य्यायः । चर्व्वितम् २ लिप्तम् ३ प्रत्यवसितम् ४ गिलितम् ५ खादितम् ६ प्सातम् ७ अभ्यवहृतम् ८ अन्नम् ९ जग्धम् १० ग्रस्तम् ११ ग्लस्तम् १२ अशितम् १३ भुक्तम् १४ । इत्यमरः । ३।२।११० ॥ जक्षितम् १५ । इति शब्दरत्नावली ॥

भक्ष्यं, त्रि, (भक्ष्यते इति । भक्ष+ण्यत् ।) भक्षितव्यम् । भक्षणीयम् । यथा । 'प्रतिपदि कुष्माण्डं न भक्ष्यम् । दशम्यां कलम्बी न भक्ष्या ।' इति स्मृतिसर्व्वस्वम् ॥ अपि च, हितोपदेशे ।
"मासमेकं नरो याति द्वौ मासौ मृगसूकरौ ।
अहिरेकदिनं याति अद्य भक्ष्यो धनुर्गुणः ॥"
(भक्ष्यद्रव्याणि तेषां गुणादिकञ्च यथा,—
"वक्ष्याम्यतःपरं भक्ष्यान् रसवीर्य्यविपाकतः ।
भक्ष्याः क्षीरकृतास्तल्या वृष्या हृद्याः सुगन्धिनः ॥
अदाहिनः पुष्टिकराः दीपनाः पित्तनाशनाः ॥
तेषां प्राणकरा हृद्या घृतपूराः कफावहाः ।
वातपित्तहरा वृष्या गुरवो रक्तमांसलाः ॥
वृंहणा गौडिकाभक्ष्या गुरवोऽनिलनाशनाः ।
अदाहिनः पित्तहराः शुक्रलाः कफवर्द्धनाः ॥
मधुमस्तकसंयावाः पूपा ये ते विशेषतः ।
गुरवो वृंहणाश्चैव मोदकास्तु सुदुर्ज्जराः ॥
रोचनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः ।
गुरुर्भृष्टतमश्चैव सट्टकः प्राणवर्द्धनः ॥
हृद्यः सुगन्धिर्मधुरः स्निग्धः कफकरो गुरुः ।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः ॥
वृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु सामिताः ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥
शुष्कादिवेशवाराढ्या पूर्णा विष्टम्भिनो मताः ।
वेशवारैः सपिष्टैः सम्पूर्णा गुरुवृंहणाः ॥
पालला श्लेष्मजननाः शष्कुल्यः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ॥
विदाहिनो नातिबला गुरवश्च विशेषतः ।
वैदला लघवो भक्ष्याः कषायाश्चसमारुताः ॥
विष्टम्भिनः पित्तसमाः श्लेष्मघ्ना भिन्नवर्च्चसः ।
बल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिताः ॥
कूर्च्चिका विहृता भक्ष्या गुरवो नातिपित्तलाः ।
विरूढ़ककृता भक्ष्या गुरवोऽनिलपित्तलाः ॥
विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणाः ।
हृद्याः सुगन्धिनो वृष्या लघवो घृतपाचिताः ॥
वातपित्तहरा बल्या वर्णदृष्टिप्रसादनाः ।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः ॥
उष्णा मारुतदृष्टिघ्नाः पित्तलास्त्वक्प्रदूषणाः ।
फलमांसेक्षुविकृतितिलमाषोपसंस्कृताः ॥
भक्ष्या बल्यास्तु गुरवो वृंहणा हृदयप्रियाः ।
कपालाङ्गारपक्वास्तु लघवो वातकोपनाः ॥
सुपक्वास्तनवश्चापि भूयिष्ठं लघवो मताः ।
सकिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः ॥"
"आप्तान्वितमसंकीर्णं शुचिकार्य्यं महानसम् ॥
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक् ॥"
"घृतं कार्ष्णायसे देयं पेया देया तु राजते ॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्वैदलेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत् ।
कट्टराणि खडांश्चैव सर्व्वान् शैलेषु दापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्वैदूर्य्यपात्रेषु रागषाड़वसट्टकान् ॥
पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खड़ान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुड़विकारांश्च रागषाड़वसट्टकान् ।
पुरस्तात् स्थापयेत् प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।"
इति सुश्रुते सूत्रस्थाने ४६ अध्याय. ॥)

भक्ष्यकारः, त्रि, (भक्ष्यं भक्ष्यद्रव्यं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) पिष्टकविक्रयजीवी । पिष्टकशिल्पी । इति भरतः ॥ तत्पर्य्यायः । आपूपिकः २ कान्दविकः ३ । इत्यमरः । २।९।२८ ॥ पूपिकः ४ पूपविक्रयी ५ मोदकादिविक्रयी ६ । इति शब्दरत्नावली ॥

भक्ष्याभक्ष्यं, क्ली, (भक्ष्यमभक्ष्यञ्च ।) खाद्याखाद्यद्रव्यम् । यथा,—
"भक्ष्याभक्ष्याण्यनेकानि ब्राह्मणस्य विशेषतः ।
अत्र शिष्टा यथा ब्रूयुस्तथा कार्य्यविनिर्णयः ॥"
इत्येकादशीतत्त्वे शङ्खवचनम् ॥ * ॥
नारद उवाच ।
"भक्ष्यं किं वाप्यभक्ष्यञ्च द्विजानां गृहिणां प्रभो ! ।
यतीनां वैष्णवानाञ्च विधवाब्रह्मचारिणाम् ॥
किं कर्त्तव्यमकर्त्तव्यमभोग्यं भोग्यमेव च ।
सर्व्वं कथय सर्व्वज्ञ ! सर्व्वेश ! सर्व्वकारण ! ॥"
श्रीमहेश्वर उवाच ।
"कश्चित्तपस्वी विप्रश्च निराहारी चिरं मुनिः ।
कश्चित् समीरणाहारी फलाहारी च कश्चन ॥
अन्नाहारी यथा लोके गृही च गृहिणीयुतः ।
येषामिच्छा च या ब्रह्मन् ! धर्म्मीणां विविधा
गतिः ॥
हविष्यान्नं ब्राह्मणानां प्रशस्तं गृहिणां सदा ।
नारायणोच्छिष्टमिष्टमनिवद्यमभक्ष्यकम् ॥
अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदनम् ।
विण्मूत्र सर्व्वपापोत्थमन्नञ्च हरिवासरे ॥
ब्राह्मणः कामतोऽन्नञ्च यो भुङ्क्ते हरिवासरे ।
त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः ॥
न भोक्तव्यं न भोक्तव्यं न भोक्तव्यञ्च नारद ! ।
गृहिभिर्ब्राह्मणैरन्नं संप्राप्ते हरिवासरे ॥
गृही शैवश्च शाक्तश्च ब्राह्मणा ज्ञानदुर्बलाः ।
प्रयाति कालसूत्रञ्च भुक्त्वा च हरिवासरे ॥
कृमिभिः शूलमानैश्च भक्षितस्तत्र तिष्ठति ।
विण्मूत्रभक्षणं कृत्वा यावदिन्द्राश्चतुर्द्दश ॥
जन्माष्टमीदिने रामनवमीदिवसे हरेः ।
शिवरात्रौ च यो भुङ्क्ते सोऽपि द्विगुणपापभाक् ॥

उपवासासमर्थश्चेत् फलमूलजलं पिबेत् ।
नष्टे शरीरे स भवेदन्यथा चात्मघातकः ॥
सकृद्भुङ्क्ते हविष्यान्नं विप्रानैवेद्यमेव च ।
न भवेत् प्रत्यवायी स चोपवासफलं लभेत् ॥
एकादश्यामनाहारो गृही विप्रश्च भारत ! ।
ते च तिष्ठन्ति वैकुण्ठे यावद्वै ब्रह्मणो वयः ॥
गृहिणां शैवशाक्तानामिदमुक्तञ्च नारद ! ।
विशेषतो वैष्णवानां यतीनां ब्रह्मचारिणाम् ॥
नित्यं नैवेद्यभोजी च श्रीकृष्णस्य च वैष्णवः ।
नित्यं शतोपवासानां जीवन्मुक्तो लभेत् फलम् ॥
वाञ्छन्ति तस्य संस्पर्शं तीर्थानि सर्व्वदेवताः ।
आलापं दर्शनञ्चैव सर्व्वपापप्रणाशनम् ॥
हविष्यमन्नं पृथुकं शुद्धं देशविशेषके ।
नात्यन्तशस्तं विप्राणां भक्ष्यो च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥
सर्व्वेषां ब्राह्मणानाञ्च अभक्ष्यं शृणु नारद ! ।
यदुक्तं सामवेदे च हरिणा चाह्निकक्रमे ॥
ताम्रपात्रे पयःपानं उच्छिष्टे घृतभोजनम् ।
दुग्धं लवणसार्द्धञ्च सद्यो गोमांसभक्षणम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
ऐक्षवं ताम्रपात्रस्थं सुरातुल्यं न संशयः ॥
उत्थाय वामहस्तेन यत्तोयं पिबति द्विजः ॥
सुरापीती स विज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
अनिवेद्यं हरेरन्नं भक्ष्यशेषञ्च नित्यशः ।
पीतशेषं जलञ्चैव गोमांससदृशं मुने ! ॥
वात्तिङ्गनफलञ्चैव गोमांस कार्त्तिके स्मृतम् ।
माघे च मूलकञ्चैव कलम्बी शयने तथा ॥
श्वेतवर्णञ्च तालञ्च मसूरं मत्स्य एव च ।
सर्व्वेषां ब्राह्मणानाञ्च त्याज्यञ्च सर्व्वदेशतः ॥
मत्स्यांश्च कामतो भुक्त्वा चोपवासं त्र्यहं वसेत् ।
प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति ब्राह्मणः ॥
प्रतिपत्सु च कुष्माण्डमभक्ष्यमर्थनाशनम् ।
द्वितीयायाञ्च वृहतीभोजको न स्मरेद्धरिम् ॥
अभक्ष्यञ्च पटोलञ्च शत्रुवृद्धिकरं परम् ।
तृतीयायाञ्चतुर्थ्याञ्च मूलकं धननाशकम् ॥
कलङ्ककारणञ्चैव पञ्चम्यां विल्वभक्षणम् ।
तिर्य्यग्योनिं प्रापयेत्तु षष्ठ्याञ्च निम्बभक्षणम् ॥
रोगवृद्धिकरञ्चैव सप्तम्यां तालभक्षणम् ।
नारिकेलफलं भक्ष्यमष्टम्यां बुद्धिनाशनम् ॥
तुम्बी नवम्यां गोमांसं दशम्याञ्च कलम्बिका ।
एकादश्यां तथा शिम्बी द्वादश्यां पूतिका तथा ॥
त्रयोदश्यान्तु वार्त्ताकीभक्षणं पुत्त्रनाशनम् ।
चतुर्द्दश्यां माषभक्षं महापापकरं परम् ॥
पञ्चदश्यां तथा मांसमभक्ष्यं गृहिणां मुने ! ।
गृहिणां प्रोक्षितं मांसं भक्ष्यमन्यदिने दिने ॥
मांसञ्च रक्तशाकञ्च कांस्यपात्रे च भोजनम् ।
निषिद्धं शयने चैव कूर्म्ममांसञ्च शोचितम् ॥
रात्रौ च दधिभक्तञ्च शयनं सन्ध्ययोर्दिने ।
रजस्वलावीरान्नञ्च पुंश्चलीनामभक्ष्यकम् ॥
शूद्राणां याजकानाञ्च शूद्रश्राद्धान्नमेव च ।
अभक्ष्याणाञ्च विप्रर्षे ! यदन्नं वृषलीपतेः ॥
ब्रह्मन् ! वार्द्धुषिकान्नञ्च गणकानामभक्ष्यकम् ॥
अग्रदानीद्विजानाञ्च चिकित्साकारकस्य च ।
वस्त्राचिमाहरौ तैलमग्राह्यञ्चाप्यभक्ष्यकम् ।
मृते स्वगे भाद्रपदे मांसं गोमांसतुल्यकम् ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः प्राग्गे
सर्गखण्डे ११ अध्यायश्च ॥

नारद उवाच ।

“वर्णानाञ्च चतुर्णाञ्च भक्ष्याभक्ष्यञ्च साम्प्रतम् ।
विपाकं कर्म्मणाञ्चैव सर्व्वेषां प्राणिनामपि ॥
कथयस्व महाभाग ! कारणानाञ्च कारण ! ।
त्वत्तोऽन्यं कञ्च पृच्छामि नितान्तं सत्त्व-
मीश्वर ! ॥

श्रीभगवानुवाच ।

भक्ष्याभक्ष्यं चतुर्णाञ्च वर्णानाञ्च यथोचितम् ।
वेदोक्तं श्रूयतां तात ! सावधानं निशामय ॥
अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च ।
भ्रष्टादिकं मधु गुडं नारिकेलोदकं तथा ॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मनुरब्रवीत् ।
दग्धान्नं तप्तसौवीरमभक्ष्यं ब्रह्मणा मतम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
गव्यञ्च ताम्रपात्रस्थं सर्व्वं मद्यं घृतं विना ॥
ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम् ।
दुग्धं सलवणञ्चैव सद्यो गोमांसभक्षणम् ॥
अभक्ष्यं मधुमिश्रञ्च घृतं तैलं गुडं तथा ।
आर्द्रकं गुडसंयुक्तमभक्ष्यं श्रुतिसम्मतम् ॥
पीतशेषं जलञ्चैव माघे च मूलकं तथा ।
द्विर्भोजनञ्च दिवसे सन्ध्ययोर्भोजनं तथा ॥
भक्ष्यञ्च रात्रिशेषे च ध्रुवं प्राज्ञः परित्यजेत् ।
पानीयं पायसं चूर्णं घृतं लवणमेव च ॥
स्वस्तिकं लवणञ्चैव क्षीरं तक्रं तथा मधु ।
हस्ताद्धस्तगृहीतञ्च सद्यो गोमांसभक्षणम् ॥
कर्पूरं रौप्यपात्रस्थमभक्ष्यं श्रुतिसम्मतम् ।
परिवेशनकारी चेद्भोक्तारं स्पृशते यदि ॥
अभक्ष्यञ्च तदन्नञ्च सर्व्वेषामेव सम्मतम् ।
नकुलानां गण्डकानां महिषाणाञ्च पक्षिणाम् ॥
सर्पाणां शूकराणाञ्च गर्द्दभानां विशेषतः ।
मार्ज्जाराणां शृगालानां कुक्कुराणां व्रजेश्वर ! ॥
व्याघ्राणामपि सिंहानां त्याज्यं मांसं कृणां सदा ।
जलौकसाञ्च नक्राणां गोधिकानां तथैव च ॥
मण्डूकानां कर्कटीनां चञ्चुकानाञ्च निश्चितम् ।
गवाञ्च चमरीणाञ्च कलौ मांसमभक्ष्यकम् ॥
हस्तिनां घोटकानाञ्च कृणामेव च रक्षसाम् ।
दंशञ्च मशकञ्चैव मक्षिका च पिपीलिका ॥
अन्येषाञ्च निषिद्धानां लोके वेदे व्रजेश्वर ! ।
वानराणां भल्लूकानां शरभाणां तथैव च ॥
निषिद्धं म्लेच्छनाभीनां गर्द्दभानाञ्च मांसकम् ।
अभक्ष्यं महिषाणाञ्च दुग्धं दधि घृतं तथा ॥
स्वस्तिकञ्च तथा चक्रं त्रिप्राणां नवनीतकम् ।
मांसमुर्व्वैःश्रवसकं तस्य दुग्धादिकं तथा ॥
वर्णानाञ्च चतुर्णाञ्चाप्यभक्ष्यञ्च श्रुतौ श्रुतम् ।
अभक्ष्यमार्द्रकञ्चैव सर्व्वेषाञ्च रवेर्दिने ॥
पर्य्युषितं जलञ्चान्नं विप्राणां दुग्धमेव च ।
वर्णानाञ्च चतुर्णाञ्चावीरान्नस्य च भक्षणम् ॥
तदन्नञ्च सुरातुल्यं गोमांसाधिकमेव च ।
अवीरान्नञ्च यो भुङ्क्ते ब्राह्मणो ज्ञानदुर्ब्बलः ।
पितृदेवार्च्चनं तस्य निष्फलं मनुरब्रवीत् ॥
ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव च ।
इतरेषामभक्ष्यञ्च पञ्चपर्व्वसु निश्चितम् ॥
पितृदेवावशेषे च भक्ष्यं मांसं न दूषितम् ।
पञ्चपर्व्वसु त्याज्यञ्च सर्व्वेषां मनुरब्रवीत् ॥
असंस्कृतञ्च लवणं तैलञ्चाभक्ष्यमेव च ।
भक्ष्यं पवित्रं सर्व्वेषां यज्ञे वह्निसंस्कृतम् ॥
एकहस्ते घृतं तोयमभक्ष्यं सर्व्वसम्मतम् ।
आविलं कृमियुक्तञ्चापरिशुद्धजलं निर्म्मलम् ॥
अभक्ष्यं ब्राह्मणानाञ्च वैष्णवानां विशेषतः ।
अनिवेद्यं हरेरेव यतीनां ब्रह्मचारिणाम् ॥
पिपीलिकामिश्रितञ्च मधु गव्यं गुडं तथा ।
यत्किञ्चिद्वस्तु वा तात ! न भक्ष्यञ्च श्रुतौ श्रुतम् ।
पक्षिभक्ष्यं कीटभक्ष्यं शुद्धं पक्वफलन्तथा ।
काकभक्ष्यमभक्ष्यञ्च सर्व्वेषां द्रव्यमेव च ॥
घृतपक्वं तैलपक्वं मिष्टान्नं शूद्रसंस्कृतम् ।
अभक्ष्यं ब्राह्मणानाञ्च शूद्रभष्टं चिपीटकम् ॥
सर्व्वेषामशुचीनाञ्च जलमन्नं परित्यजेत् ।
अशौचान्तात् परदिने शुद्धमेव न संशयः ॥
विपाकः कर्म्मणामेव दुष्करः श्रुतिसम्मतः ।
भक्ष्याभक्ष्यञ्च कथितं यथाज्ञानं व्रजेश्वर ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
“भक्ष्याभक्ष्यञ्च ते शिष्य ! वेदितव्यं तदन्तरे ।
करीरस्य वधः शस्तः फलान्यौदुम्बरस्य च ॥
सद्यो भर्गो भवेत्तेन अभक्ष्या पूतिवासिका ।
न भक्षणीयं वाराहं मांसं मत्स्यश्च सर्व्वशः ॥
अभक्ष्या ब्राह्मणैर्ह्येते दीक्षितैर्हि न संशयः ॥”
इति वाराहे ब्राह्मणदीक्षासूत्रनामाध्यायः ॥

भक्ष्यालाबुः, स्त्री, (भक्ष्या भक्षार्हा अलाबुः ।) राजालाबुः । इति राजनिर्घण्टः ॥

भर्गं, क्ली, पुं, (भज्यते अनेनास्मिन् वेति एतदा-श्रित्यैव कन्दर्पं सेवते इति भावः । भजसेवा-याम्+“पुंसि संज्ञायां घः प्रायेण ।” ३ । ३ । ११८ । इति घः । “खनो घ च ।”३।३।१२५। चित्करणमन्यतोऽप्ययमिति विज्ञापनार्थम् इति हरिदत्तभट्टोजीदीक्षितः ।) स्त्रीचिह्नम् । तत्-पर्य्यायः । योनिः २ । इत्यमरः ।२।६।७६॥ वरा-ङ्गम् ३ उपस्थः ४ स्मरमन्दिरम् ५ । इति राज-निर्घण्टः ॥ (भजन्त्यनेनेति भगो मेहनम् । भज-न्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥
“ब्रह्मा वृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥”
इति वाभटे शारीरस्थाने प्रथमेऽध्याये ॥) रतिगृहम् ६ जन्मवर्त्म ७ अधरम् ८ अवाच्य-देशः ९ प्रकृतिः १० अपथम् ११ स्मरकूपः १२

अप्रदेशः १३ प्रकृतिः १४ पृथ्वी १५ संसारमार्गः १६ गुह्यम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रताङ्गम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३। इति शब्दरत्नावली ॥ तस्य लक्षणम्। यथा,—

“विस्तीर्णञ्च गभीरञ्च द्विविधं भगलक्षणम्।”

तद्गुणा यथा,—

“कूर्म्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्।
अलोमकं सुविस्तीर्णं पञ्चैते च भगोत्तमाः ॥”

तद्दोषा यथा,—

“शीतलं निम्नमत्युच्चं गोजिह्वासदृशं परम्।
इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम् ॥
विस्तीर्णं सुघनं योन्यं गभीरे वंशबीजकम्।”
इति रतिमञ्जरी ॥

तस्य शुभाशुभलक्षणम्। यथा,—

“शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः।
वामोन्नतस्तु कन्याजः पुत्रजो दक्षिणोन्नतः ॥
आखुरोमा गूढमणिः श्लिष्टः संहतः पृथुः।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः ॥
कुरङ्गखुररूपो यश्चुल्लिकोदरसन्निभः।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः ॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति।
चिपिटः कर्परकारः किङ्करीपददो भगः ॥
वंशवेतसपत्राभो गजरोमोच्चनासिकः।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः ॥”
इति स्कान्दे काशीखण्डे ३७ अध्यायः ॥

श्रीः। वीर्य्यम्। इच्छा। ज्ञानम्। वैराग्यम्। कीर्त्तिः। माहात्म्यम्। ऐश्वर्य्यम्। (यथा, भागवते। २। ७। ६।

“यद्वेणुसुत्पथगतं द्विजवाक्यवज्र-
निष्प्लुष्टपौरुषभगं निरये पतन्तम् ॥”

“निष्प्लुष्टं दग्धं पौरुषं भगमैश्वर्य्यञ्च यस्य।” इति तट्टीकायां स्वामी ॥) यत्नः। धर्म्मः। मोक्षः। इति मेदिनी। गे,१४ ॥ पुंसां गुदमुष्कमध्यभागः। इति राजनिर्घण्टः ॥ श्रीः। यशः। सौभाग्यम्। (यथा, भागवते। १। १७। १०।

“यस्य राष्ट्रे प्रजाः सर्व्वास्त्रस्यन्ते साध्व्यसाधुभिः।
तस्य मत्तस्य नश्यन्ति कीर्त्तिरायुर्भगो गतिः ॥”

“भगो भाग्यम्।” इति तट्टीकायां स्वामी ॥) कान्तिः। सूर्य्यः। शम्भुविशेषः। चन्द्रः। इत्यनेकार्थध्वनिमञ्जरी ॥ पूर्व्वफल्गुनीनक्षत्रम्। यथा, ज्योतिस्तत्त्वे।

“अश्वतामाघयुक्ताश्च भगे सर्पिस्तदुत्तरे ॥”

भगः पुं, (भज्यते इति। भज सेवायां + “पुंसि संज्ञायां घ प्रायेण।” ३। ३। ११८। इति घ। “खनो घ च।” ३। ३। १२५। इति चितकरणाद् वा घ।) रविः। इति मेदिनी ॥ गे, १४। क्लीवेऽप्ययम्। यथा,—

“ज्ञानवैराग्ययोर्योनौ भगमस्त्री तु भास्करे।”
इति रुद्रः ॥”

(भजनीये, त्रि। यथा, ऋग्वेदे। ३। ३६। ५।

“इन्द्रो भगो वाजदा अस्य गावः
प्रजायन्ते दक्षिणा अस्य पूर्व्वीः ॥”

“भगः सर्व्वैर्भजनीयः स इन्द्रः।” इति तद्भाष्ये सायनः ॥ द्वादशादित्यभेदः। यथा, ऋग्वेदे। २। २७। १।

“इमा गिर आदित्येभ्यो घृतस्नूः
सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्य्यमा भगो नस्तुवि
जातो वरुणो दक्षो अंशः ॥”

यथा च महाभारते। १। ६५। १५-१६।

“धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥”

रुद्रांशो वीरभद्रोऽस्य भगस्य दक्षयज्ञे नेत्रे उत्पाटितवान्। यथा, भागवते। ४। ५। १८।

“भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि।
उज्जहार सदस्थोऽक्ष्णा यः शपन्तमसूसुचत् ॥”

ऐश्वर्य्यादिषट्कम्। यदुक्तम्।

“ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥”

भोगास्पदत्वम्। यथा, भागवते। १। १६। २९।

“प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः।
गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिर्मानोऽनहं-
कृतिः ॥

“भगः भोगास्पदत्वम्।’ इति तट्टीकायां श्रीधरस्वामी ॥ स्थूलमण्डलाभिमानी। यथा, रामायणे। ३। १२। १८।

“विष्णोः स्थानं महेन्द्रस्य स्थानञ्चैव विवस्वतः।
सोमस्थानं भगस्थानं स्थानं कौवेरमेव च ॥”

“भगः स्थूलमण्डलाभिमानी।” इति तट्टीकायां रामानुजः ॥)

भगणः, पु, (भानां नक्षत्राणां गणः समूहः।) नक्षत्रसमूहः। शीघ्रगामिनां ग्रहाणामल्पेन कालेन मन्दगामिनां ग्रहाणां महता कालेन पूर्व्वगत्या पातानां पश्चिमगत्या परिवर्त्तनेनाश्विन्यादिरेवत्यन्तनक्षत्रभोगकालः। षष्टिविकलाभिः कला षष्टिकलाभिर्भागस्त्रिंशद्भागै राशिर्द्वादशराशिभिर्भगणः। यथा,—

“शीघ्रगस्तान्यथाल्पेन कालेन महताल्पगः।
तेषान्तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः ॥
विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते ॥
युगे सूर्य्यज्ञशुक्राणां खचतुष्करदार्णवाः
४३२००००।
कुजार्किगुरुशीघ्राणां भगणाः पूर्व्वयायिनाम् ॥
इन्दो रसाग्नित्रित्रीषुसप्तभूधरमार्गणाः
५७७५३३३६।
दस्रत्र्यष्टरसाङ्काक्षिलोचनानि कुजस्य तु
२२९६८३२ ॥
बुधशीघ्रस्य शून्यर्त्तुखाद्रित्र्यङ्कनगेन्दवः
१७९३७०६०।
बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा
३६४२२० ॥
सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः
७०२२३७६।
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः १४६५६८ ॥
चन्द्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा
४८८२०३ युगे।
वामं पातस्य वस्वग्नियमाश्विशिखिदस्रकाः
२३२२३८ ॥
इति सूर्य्यसिद्धान्तः ॥ * ॥

अपि च। ग्रहाणां मन्दोच्चानां चलोच्चानां ग्रहपातानाञ्च भगणान् श्लोकषट्केनाह।

अर्कज्ञशुक्रपर्य्यया विधेरह्नि कोटिगुणिता रदाब्धयः। ४३२००००००० एत एव शशिजोच्चभूभुवां कीर्त्तिताश्च गणकैश्चलोच्चजाः ॥ १ ॥
खाभ्रखाभ्रगगनामरेन्द्रियव्याधराद्रिविषया
५७७५३३००००० हिमद्युतेः।
युग्मयुग्मशरनागलोचनव्यालषड्वयमाश्विनोऽ-
म्बुजः ७२१६८२८५२२ ॥ २ ॥
सिन्धुसिन्धुरनगाष्टगोऽङ्कषट्नाङ्कनभशशिनो
१७९३६९९८८४ शशिजाः।
पञ्चपञ्चयुगषट्कलोचनद्व्यब्धिषड्गुणमिता
३६४२२६४५५ गुरोर्मिताः ॥ ३ ॥
द्विनन्दवेदाङ्कगजाग्निलोचनद्विशून्यशैलाः
७०२२३८९४९७ सितशीघ्रपर्य्ययाः।
भुजङ्गनन्दद्विनगाङ्गबाणषट्कनेन्दवः
सूर्य्यसुतस्य पर्य्ययाः १४६५६७२९८ ॥ ४ ॥
खाष्टाब्धयो४८०ऽष्टाष्टगजेषुदिग्विषयद्विशाब्धयो
४८०१०५८५८ द्वाङ्कयमा २९२ रदाश्वयः ३३२।
शरेभविभा८५५ स्त्वचरसाः६५४ कुसागराः ४१
स्युः पूर्व्वगत्या नरशैलदन्तजाः ॥ ५ ॥
गजाद्रिभर्गाक्षरदाश्विनः २३२११६८ कुभद्र-
साश्विनः २६१ कुद्विशराः ५२१ क्रमशश्च ६३।
त्रिनन्दनागा ८९३ युगकुञ्जरेषवो ५८४
निशाकरादाक्रमपातपर्य्ययाः ॥ ६ ॥”
इति सिद्धान्तशिरोमणिः ॥ * ॥

ग्रहाणां पूर्व्वगमनेन कल्पे एते पर्य्ययाः। तथा मन्दोच्चानाञ्च प्राग्गत्या एतावन्तः। पातानां पश्चिमगत्या एतावन्तो भवन्ति। अत्रोपपत्तिः सा तु तद्भाषाकुशलेन स्वतुच्चसंस्थानज्ञेन सुगोलेनैव श्रोतुं शक्यते नान्येन। ग्रहमन्दशीघ्रपाताः स्वस्वमार्गेषु गच्छन्त एतावतः पर्य्ययान् कल्पे कुर्व्वन्तीत्यत्रागम एव प्रमाणम्। इति तट्टीका ॥

भगदत्तः, पु, (भगमैश्वर्य्यं दत्तमस्मै इति।) नरकराजस्य ज्येष्ठपुत्रः। स तु प्राग्ज्योतिषपुराधिपः। यथा,

“ऋतुमत्यान्तु जायायां कालेन नरकः क्रमात्।
भगदत्तं महाशीर्षं मदवन्तं सुमालिनम् ॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुतः ॥”
श्रीभगवानुवाच।
“भारावतरणे देवि। नरकस्य वधः पुरा।
त्वयैव प्रार्थितो यस्मात् तेनासौ निहतो मया ॥

पाशविश्लेषु सर्वांस्तं देवि ! ब्रह्मवचनाद्रुषम् ।
प्राग्ज्योतिषेऽभिषेक्ष्यामि नगरं भगदत्तकम् ॥
हर्षिता नारदेनैव वचितः केशवस्तदा ।
भगदत्तं भौमसुतं प्राग्ज्योतिषपुरोत्तमे ।
अभिषिच्य तदा भूपं पुरमध्ये न्यवेशयत् ॥"
इति कालिकापुराणे ३८ अध्यायः ॥
(यथा च महाभारते । २ । २६ । ८ ॥
"स तानपि महेष्वासान् विजित्य भरतर्षभ ! ।
तैरेव सहितः सर्व्वैः प्राग्ज्योतिषमुपाद्रवत् ॥"
तत्र राजा महानासीद्भगदत्तो विशाम्पते ! ।
तेनासीत् सुमहद्युद्धं पाण्डवस्य महात्मनः ॥")
भगदैवतं, क्लो, (भगो योनिर्दैवतं देवता यस्य ।)
पूर्व्वफल्गुनीनक्षत्रम् । तत्तु इन्द्रस्तेनैव दैवतमस्य-
त्रम् । यथा, ज्योतिस्तत्त्वे ।
"विश्वाख्यानलतोयानि वैष्णवं भगदैवतम् ।
पुष्या पौष्णो यमः सर्पो जन्मभाग्यर्क्षतः
क्रमात् ॥"
भगन्दरः, पुं, (भगं गुह्यमुष्कमध्यस्थानं दारय-
तीति । "दृ + णिच् + पूःसर्व्वयोर्दारिसहोः ।"
३ । २ । ४१ । इत्यत्र । "भगे च दारेरिति वक्त-
व्यम् ।" इति काशिकोक्तेः खच् । "खचि
ह्रस्वः ।" ६ । ४ । ९४ । इति ह्रस्वः । मुमच ।)
अपानदेशे व्रणरोगविशेषः । तस्य रूपमाह ।
"गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिड़कार्त्तिकृत् ।
भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो भवेत् ॥"
अर्त्तिकृत् पीड़ाकृत् । पञ्चविधः वातकफपैत्तिक-
श्लैष्मिकसान्निपातिकशल्यजभेदैः ॥ भगन्दर-
शब्दस्य निरुक्तिमाह भोजः ।
"भगं परिसमन्ताद्यो गुदवस्ती तथैव च ।
भगवद्दारयेद्यस्मात्तस्मादेष भगन्दरः ॥"
भजत्यनेनेति भगं मेहनम् । भजन्त्यस्मिन्निति
भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते ।
भगवत् योनिवत् ॥ पूर्व्वरूपादीनि यथा,—
"कटीकपालनिस्तोदराहकण्डूरुजादयः ।
भवन्ति पूर्व्वरूपाणि भविष्यति भगन्दरे ॥"
कटीकपालमत्र कटीफलकम् ॥ वातिकं शत-
पोनकसंज्ञं भगन्दरमाह ।
"कषायरूक्षैरतिकोपितोऽनिल-
स्त्वपानदेशे पिड़कां करोति याम् ।
उपेक्षणात् पाकमुपैति दारुणं
रुजाश्च भिन्नारुणफेनवाहिनीम् ॥
तत्रागमो मूत्रपुरीषरेतसां
व्रणैरनेकैः शतपोनकं वदेत् ।
दारुणं अतिदारुणत्वात् । व्रणैरनेकैः सूक्ष्ममुखैः ।
शतपोनकचालनी तत्तुल्यम् ॥ पैत्तिकमुष्ट्रग्रीव-
संज्ञमाह ।
"प्रकोपणैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़कां गुदे गताम् ।
तदाशुपाकाहिमपूतिवाहिनीं
भगन्दरञ्चोष्ट्रशिरोधरं वदेत् ॥"
आशुपाकाहिमपूतिवाहिनीम् । शीघ्रपाकाम्
उष्णदुर्गन्धवाहिनीञ्च । तदा तं भगन्दरं उष्ट्र-
शिरोधर उष्ट्रग्रीवसंज्ञं वदेत् । उष्ट्रग्रीव-
संज्ञञ्च पिड़काकाठीनवक्त्रतयोष्ट्रग्रीवाकार-
त्वेन ॥ * ॥ श्लैष्मिकपरिस्राविसंज्ञमाह ।
"कण्डूयनो घनस्रावी कठिनो मन्दवेदनः ।
श्वेतावभासः कफजः परिस्रावी भगन्दरः ॥"
कठिनः पिड़कावस्थायां परिस्रावी निरन्तरं
स्रवणशीलः ॥ * ॥ सान्निपातिकशम्बूकावर्त्त-
संज्ञमाह ।
"बहुवर्णरुजास्रावाः पिड़का गोस्तनोपमाः ।
शम्बूकावर्त्तवन्नाड़ी शम्बूकावर्त्तको मतः ॥"
बहुवर्णरुजास्रावा बहुशब्दो वर्णादिभिः
प्रत्येकं सम्बध्यते । नाड़ी स्रावमार्गः ॥ * ॥
शल्यजमुन्मार्गसंज्ञमाह ।
"क्षताकृतिः पायुगतास्थिशल्यं
क्षुणोत्यथात् स्युः कृमयो विदार्य्यते ।
प्रकुर्व्वते मार्गमनेकधा मुखै-
र्व्रणैस्तमुन्मार्गभगन्दरं वदेत् ॥
क्षतात् कण्टकादिना नखेन
कण्डूयनादिना वाभिघातात् ।
क्षतिः स्रावः उन्मार्गभगन्दरम् । एतस्य क्रमि-
कृतमार्गैः पुरीषादिनिर्गमादुन्मार्गसंज्ञा ॥"
कष्टसाध्यमसाध्यञ्चाह ।
"घोराः साधयितुं दुःखाः सर्व्व एव भग-
न्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥
वातमूत्रपुरीषाणि शुक्रश्च क्षमयस्तथा ।
भगन्दरात् स्रवन्तस्तु नाशयन्ति तमातुरम् ॥"
अथ भगन्दरस्य चिकित्सा । यथा,—
"अथास्य पिड़कामेव तथा यत्नादुपाचरेत् ।
शुद्ध्यसृगुतिसेकाद्यैर्यथा पाकं न गच्छति ॥
पुनर्नवाद्यतामुस्तपिप्पलीकावदरैः सतः ।
लेपाय पिड़कावस्थे कल्कः शस्तो भगन्दरे ॥
पयःपिष्टैस्तिलाद्यैर्मधुकैः शीतलैः सतः ।
लेपो भगन्दरे शस्तः पैत्तिके वेदनान्विते ॥"
अरिष्टो निम्बः ॥
"सुमनायाश्च पत्राणि गुड़ूची विश्वभेषजम् ।
सैन्धव तक्रसंपिष्टं लेपाद्धन्ति भगन्दरम् ॥"
सुमना जातिस्तस्याः पत्रम् ।
"पिड़कानामपक्वानामपतर्पणपूर्व्वकम् ।
कर्म्म कुर्य्याद्विरेकान्तं भिन्नानां व्रणवत् क्रिया ॥
निशार्कक्षीरसिन्धूत्थपुराश्वहननेन्द्रवैः ।
सिद्धमभ्यञ्जने तैलं भगन्दरहरं परम् ॥"
पुरो गुग्गुलुः । अश्वहननश्छदाः करवीर-
पत्राणि । निशादितैलम् ॥ * ॥
"त्रिफलापुरकृष्णानां त्रिपञ्चांशैकयोजिता ।
गुटिका शोथगुल्मार्शोभगन्दरवतां हिता ॥"
नववार्षिको गुग्गुलुः ॥ * ॥
"शस्त्रक्रियापि कथिता शस्त्रसाध्ये भगन्दरे ।
सा च तेनैव कर्त्तव्या शस्त्रशास्त्रमवैति यः ॥
व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च ।
रूढव्रणोऽपि यत्नेन वर्जयेद्वत्सरं नरः ॥"
इति भावप्रकाशे भगन्दराधिकारः ॥
अपि च ।
"लङ्घनं स्वेदनं लेपविस्रावणविरेचनैः ।
रक्तमोक्षादिभिः शीघ्रं गुदजां पिड़कां जयेत् ॥
तथा यत्नं भिषक् कुर्य्याद्यथा पाकं न गच्छति ।
अपक्वं वाथ पक्वं वा जलौकापातनं हितम् ॥
तदभावे तु शृङ्गाभ्यामिदं रक्तस्य मोक्षणम् ॥"
वटपत्रेष्टकाशुण्ठीगुड़ूच्यः सपुनर्नवाः ।
पिष्टा तु पिड़कारम्भे लेपः शस्तो भगन्दरे ॥
आमावस्थाक्रिया प्रोक्ता पक्वावस्थाक्रियोच्यते ॥
मृषव्यापाटलाचारवह्निदारवादिकं क्रमम् ।
विधाय व्रणवत् कार्य्यं यथा दोषो यथा बलम् ॥
कुष्ठार्कदुग्धदार्व्वीभिर्वर्त्तिं कृत्वा भगन्दरे ।
दद्यात् सर्व्वशरीरस्था नाड़ीर्हन्यात् प्रयोगराट् ॥
तिलाभयालोध्रमरिष्टपत्रं
निशा वचा कुष्ठमगारधूमः ।
भगन्दरे नाड्युपदंशयोश्च
दुष्टव्रणे शोधनरोपणोऽयम् ॥
सुणोऽश्विष्टं त्रिफलारसेन
विड़ालकास्थि लयवा विलेपनात् ।
चिरप्रभूतं व्रणरोगदुष्टं
भगन्दरं नाशमुपैति नूनम् ॥ * ॥
जम्बूकमांसं भुञ्जीत प्रकारैर्व्यञ्जनादिभिः ॥"
शृगालमांसव्यञ्जनं खादेत् । अथवा शल्लक-
मांसव्यञ्जनं खादेत् ॥
"त्रिकटु त्रिफला मुस्तं विड़ङ्गामृतचित्रकम् ।
शठ्येला पिप्पलीमूलं हवुषा सुरदारु च ॥
तुम्बुरु पुष्करं चव्यं विशाला रजनीद्वयम् ।
विड़ं सौवर्च्चलक्षारौ सैन्धवं गजपिप्पली ॥
यावन्त्येतानि चूर्णानि तावद्द्विगुणगुग्गुलुः ।
कोलप्रमाणां गुटिकां खादयेन्मधुना सह ॥
भगन्दरं श्वासकासं चयं श्लीपदमुदरम् ।
नाड़ीदुष्टव्रणानाहकुष्ठोन्मादाश्मरीकृमीन् ॥
मेहानर्शांसि हृद्रोगमूलं शोषमेव च ।
सप्तविंशतिको हन्ति गुग्गुलुः सर्व्वरोगहा ॥"
कुष्ठरोगमूलमित्यत्र कृमरोगमूलमित्यपि पाठः ॥
सप्तविंशतिगुग्गुलुः ॥ * ॥
"चित्रकार्कौ त्रिवृत्पाठौ मलपूहयमारकौ ।
सुधां वचां लाङ्गलिकां हरितालं सुवर्च्चलाम् ॥
ज्योतिष्मतीञ्च संयुक्तं तैलं वैद्यो विपाचयेत् ।
एतत्स्यन्दनं नाम तैलमुक्तं भगन्दरे ।
शोधनं रोपणञ्चैव सवर्णकरणं स्मृतम् ॥"
विस्यन्दनतैलम् ॥ * ॥
"सूतस्य द्विगुणेन शुद्धवलिना कन्याप्रयोभि-
र्व्याहं
पिष्टा ताम्रमयं समस्ततुलितं पात्रं विधायोपरि ।
खेदं यामयुगं सभस्मपिठरे जम्बूजलैः सप्तधा
साद्धं तत्पुटयेत् भगन्दरहरो गुञ्जोन्मिता
स्यादिति ॥"
जम्बूजलैरित्यत्र निम्बूजलैरिति च पाठः ।
भगन्दरहरो रसः ॥ * ॥
"शुद्धसूतं समं गन्धं मृतताम्रं समांशकम् ।
जीरकं सैन्धवं तुल्यं तिक्तकोषातकीद्रवैः ॥

पिष्ट्वा तल्लेपनाद्धन्ति भयगाथ भगन्दरम् ।
रसः कालाग्निरुद्रोऽयं गुञ्जैकं कनुजिद्भवेत् ॥"
कालाग्निरुद्रो रसः ॥ * ॥
इति सारदीपिकायां भगन्दरचिकित्साध्यायः ॥
अपि च । गारुडे १८८ अध्याये ।
"गुग्गुलुं त्रिफलायुक्तं पीत्वा नश्येत् भग-
न्दरः ॥"
(अस्य सकारणलक्षणचिकित्सितं यथा,—
क्रिम्यस्थि शल्यानलसाशनव्यवाय-
प्रवाहनाद्युत्कटकाश्वपृष्ठैः ।
गुदस्य पाके पिडका भृशार्त्तिः
पक्वप्रभिन्ना तु भगन्दरः स्यात् ॥
विरेचनञ्चैषणपाटनञ्च
विशुद्धमार्गस्य च तैलदाहः ।
स्यात् क्षारसूत्रेण सुपाचितेन
छिन्नस्य चास्य व्रणवच्चिकित्सा ॥"
इति चरके चिकित्सास्थाने सप्तदशोऽध्याये ॥)

भगभक्षकः, पु, (भगं योनिस्तामुपाश्रित्य भक्षयति जीविकां निर्व्वाहयतीति । भक्ष + ण्वुल् ।) कुट्टाशी । इति महाभारते दानधर्म्मः ॥ कोटना इति भाषा ॥ तस्यान्नभक्षणनिषेधो यथा,—
"यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुण्डाशी यश्च तस्यान्नं भुक्त्वा चान्द्रायणञ्चरेत् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥

भगवती, स्त्री, (भगः ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षसां भग इतीङ्गना ॥" इत्युक्तलक्षणम् षडैश्वर्य्यमस्य-स्येति । भग + "तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ । इति मतुप् । मस्य वः ।
"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥"
इति काशिकोक्तेर्नित्ययोगेऽत्र मतुप्प्रत्ययः । ततः स्त्रियां ङीप् ।) पूज्या । गौरी । इति मेदिनी । ते, २१४ ॥ (सा च प्रकृतिस्वरूपिणी महामाया देवी । यथा, मार्कण्डेये ।८१।४२।
"ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥")
सरस्वती । यथाह पौराणिकाः ।
"सा मां पातु सरस्वती भगवती निःशेष-
जाड्यापहा ॥"
गङ्गा । यथा, शङ्कराचार्य्यकृतगङ्गास्तोत्रे ।
"भगवति । भवलीलामौलिमाले तवाम्भः-
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ॥"
तस्याः स्वरूपं यथा,—
"यथा नित्यो हि भगवान् नित्या भगवती तथा ।
स्वमायया तिरोभूता तत्रेशे प्राकृते लये ॥
आब्रह्मस्तम्बपर्य्यन्तं सर्व्वं मिथ्यैव कृत्रिमम् ।
दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान् यथा ॥
सिद्धैश्वर्य्यादिकं सर्व्वं यस्यामस्ति युगे युगे ।
सिद्ध्यादिके भगो ज्ञेयस्तेन भगवती स्मृता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥

अपि च ।
"सेवते या सुरैः सर्व्वैस्तामेव भजते यतः ।
धातुर्भजेति सेवायां भगवत्येव सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्याः प्रतिमाविशेषस्य पूजने फलविशेषो यथा,
ब्रह्मोवाच ।
"शृणु तस्याः सुराध्यक्ष ! आराधनविधिं
परम् ।
यथा सा तोषिता पूर्व्वं शङ्कराद्यैः फलेप्सुभिः ॥
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ।
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ॥
अक्षमालाकरो नित्यं तेनासौ विबुधाधिपः ।
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ॥
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ।
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते सदा ॥
विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनम् ।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ॥
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ।
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांसिकां देवीं पूजयन्ति विधानतः ।
प्राप्नुवन्तो महात्मानो वसुत्वं सुमहोत्सवम् ॥
अश्विनौ पार्थिवां देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिवदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन ऋद्ध्या समन्वितम् ॥
देवीमग्निमयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ॥
ताम्रीं देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चेत तत्र संप्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं यजन्ति पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम् ॥
कृष्णायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
त्रैलोहिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलोहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः समन्वर्ज्याः पिशाचोरगराक्षसाः ।
पूजयन्ति सदाकालं चर्च्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र । यदीच्छसि परां गतिम् ।
शिवां मणिमयीं पूज्य लभसे मनसेप्सितान् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजितैः सदा ।
ददाति सर्व्वलोकानां चिन्तामणिरिवा शिवा ॥"
इत्याद्ये देवयतारे द्रव्यविधिपूजामाहात्म्ये १८ अध्यायः ॥ तस्यै गृहदानस्य फलं यथा,—

ईश्वर उवाच ।
"देव्या गृहन्तु यः शुक्रकरापयति शोभनम् ।
सर्व्वोपकरणैर्युक्तं सकपाटार्गलान्वितम् ॥
तस्मिन् घण्टां ध्वजं छत्रं वितानं दर्पणानि च ।
दत्त्वा सुरजवंशादि नित्यं सङ्गीतकानि च ॥
देवीशास्त्रार्थवेत्तारं पूजकं भवने शुभम् ।
एवं प्रवर्त्तते यस्तु तस्य पुण्यफलं शृणु ॥
दशपूर्व्वापरांस्तात ! आत्मनश्चैकविंशतिम् ।
उद्धृत्य च कुलं पापाद्ब्रह्मलोके महीयते ॥
गच्छते भगवती यत्र परा परमपूजिता ।
तत्र कल्पान्तरं यावद्भुक्त्वा भोगान् मनो-
रमान् ॥
पुनः कालादिहायातः पृथिव्यामेकराड्भवेत् ।
सप्तत्ववाहनोपेतः शान्तः पुरपरिच्छदः ॥
पुनर्देव्या द्विजातीनां तद्भक्तानां प्रियो भवेत् ॥
कन्यासम्पूजको नित्यं देवीशास्त्रार्थपारगः ।
लभते परसद्भाव तदन्ते शिवतां व्रजेत् ॥
देव्या गृहन्तु यः शुक्र । सम्मार्ज्जयति नित्यशः ।
स भवेद्बलवान् सौम्यसर्व्वसम्पत्तिसंयुतः ॥
तदागर्च्छित्सवालोकं सर्व्वकालफलप्रदम् ।
देव्या गृहन्तु यः शुक्र । गोमयेनानुलेपयेत् ॥
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्त
रम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च
गच्छति ॥"
इत्याद्ये देवयतारे ४२ अध्यायः ॥

भगवद्भक्तः, पु, (भगवतो भगवत्या वा भक्तः ।) श्रीकृष्णभक्तियुक्तः । अथ भगवद्भक्तानां लक्षणानि । सामान्यतः लैङ्गे ।
"विष्णुरेव हि यस्यैष देवता वैष्णवः स्मृतः ॥"
अत्र विशेषः ।
"व्रतकर्म्मशुभज्ञानभोगजन्मादिमत्स्वपि ।
शैवेष्वपि च कृष्णस्य भक्ताः सन्ति तथा तथा ॥"
तत्र व्रतिषु मध्ये भगवद्भक्तिहेतुव्रतपरता भगवद्भक्तलक्षणम् । तथा च स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे ।
"दशमीशेषसंयुक्तं दिनं वैष्णववल्लभम् ।
त्यपास्यन्ते महीपाल । ते वै भागवता नराः ॥
प्राणात्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः ।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते ॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम् ।
अत्यान्तु साधयेद्यस्तु स वै भागवतो नरः ॥
भक्तिर्न विष्णुना येषां न च्यवन्ति व्रतानि च ।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः ॥"
कर्म्मिषु भगवदर्पणादिना तदाज्ञाबुद्ध्या वा भक्तिहेतुसदाचारपरता तत्रैव ।
"धर्म्मार्थं जीवितं येषां सन्तानार्थञ्च मैथुनम् ।
पचनं विप्रमुख्यार्थं ज्ञेयास्ते वैष्णवा नराः ॥
अध्वगन्तु पथि श्रान्तं कालेऽत्र गृहमागतम् ।
योऽतिथिं पूजयेद्भक्त्या वैष्णवः स न संशयः ॥
सदाचाररताः शिष्टाः सर्व्वभूतानुकम्पकाः ।
शुचयस्त्यक्तरागा ये सदा भागवता हि ते ॥"

पाद्मे वैशाखमाहात्म्ये श्रीनारदाम्बरीषसंवादे।
यथा,—
"जीवितं यस्य धर्म्मार्थे धर्म्मो हर्य्यर्थमेव च।
अहोरात्राणि पुण्यार्थे तं मन्ये वैष्णवं जनम्॥"
लैङ्गे च।
"विष्णुभक्तिसमायुक्तान् श्रौतस्मार्त्तप्रवर्त्तकान्।
प्रीतो भवति यो दृष्ट्वा वैष्णवोऽसौ प्रकीर्त्तितः॥"
गुणवन्तु भक्तिहेतुकृपालुत्वादिसद्गुणशीलता तत्रैव।
"परदुःखेनात्मदुःखं मन्यन्ते ये नृपोत्तम।।
भगवद्धर्म्मनिरतास्ते नरा वैष्णवा नृप।॥"
भागवततृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादे।
यथा,—
"तितिक्षवः कारुणिकाः सुहृदः सर्व्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥"
पञ्चमस्कन्धे ऋषभदेवस्य पुत्त्रानुशासने। यथा,
"महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये॥"
एकादशस्कन्धे श्रीभगवत्प्रश्नोद्धवप्रश्नोत्तरे।
यथा,—
"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामाह्तधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो
मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्यो मैत्रः कारुणिकः
कविः॥"
विष्णुपुराणे यमतद्भटसंवादे। यथा,—
"न चलति निजवर्णधर्म्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च हन्ति किञ्चिदुच्चैः
स्थिरमनसं तमवेहि विष्णुभक्तम्॥"*॥
ज्ञानिषु भक्तिहेतुज्ञानवत्ता एकादशे। यथा,—
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥
ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः॥
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥
अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"
भोगवत्सु भक्तिहेतुभोगानासक्तता हरियोगेश्वरोत्तरे। यथा,—
"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"
सत्कुलविद्यादिमत्सु भक्तिहेतुनिरभिमानिता तत्रैव। यथा,—
"न यस्य जन्मकर्म्मभ्यां न वर्णाश्रमजातिभिः।
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः॥
भावाः कथञ्चिद्भक्त्यैव ज्ञानानासक्त्यमानिता।
भक्तिनिष्ठापका ज्ञातास्ततो युक्तमतोदिता॥"
निष्ठापकाः परिपाकं प्रापकाः॥ *॥
शैवेषु श्रीशिवविष्ण्वभेदकता बृहन्नारदीये।
"शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"
इति॥*॥
"अन्यच्च तेषां भगवच्छास्त्राद्यर्थपरतादिकम्।
साक्षाद्भक्त्यात्मकं मुख्यं लक्षणं लिख्यतेऽधुना॥"
श्रीभागवतशास्त्रपरता स्कान्दे।
"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"
वैष्णवसम्माननिष्ठा लैङ्गे।
"विष्णुभक्तमथायातं यो दृष्ट्वा सुमुखप्रियः।
प्रणामादि करोत्येव वासुदेवे यथा तथा।
स वै भक्त इति ज्ञेयः स पुनाति जगत्त्रयम्॥
रूक्षाक्षरा गिरः शृण्वन् तथा भागवतेरिताः।
प्रणामपूर्व्वं क्षान्त्वा यो वदेद्वै वैष्णवो हि सः॥
भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥
गारुडे।
"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः॥*॥
श्रीतुलसीसेवानिष्ठा बृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृद्धृतं येषां ते वै भागवतोत्तमाः॥"*॥
श्रीभगवतः कथापरता बृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तारि सुभक्ताश्च ते वै भागवतोत्तमाः॥"
स्कान्दे श्रीभगवदर्ज्जुनसंवादे।
"मत्कथां कुरुते यस्तु मत्कथाञ्च शृणोति यः।
हृष्यते मत्कथायाञ्च स वै भागवतोत्तमः॥"
तृतीयस्कन्धे तत्रैव।
"मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः॥"*॥
नामपरता बृहन्नारदीये तत्रैव।
मन्नामसाञ्च मद्भक्ता मद्भक्तजनलोलुपाः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥"
तत्रैवान्यत्र।
"अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"
स्मरणपरता। तत्र स्वधर्म्मनिष्ठया रागद्वेषादिनिवृत्त्या स्मरणं श्रीविष्णुपुराणे यमतद्भटसंवादे।
"न चलति हृदये श्रीभगवत्पदार-
विन्दे सितमणारसमवेहि विष्णुभक्तम्।
कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनीकृतस्तमेनम्।
मनसि कृतजनार्द्दनं मनुष्यं
सततमवेहि हरेरतीव भक्तम्॥
कनकमपि रहस्यवेक्ष्य बुद्ध्या
तृणमिव यः समवैति वै परस्वम्।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम्॥
स्फटिकगिरिशिलामलः क्व विष्णु-
र्मनसि नृणां क्व च मत्सरादिदोषः।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति हुताशनदीप्तिजः प्रतापः॥
विमलमतिरमत्सरः प्रशान्तः शुचि-
चरितोऽखिलसत्त्वमित्रभूतः।
प्रियहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव शालपोत.॥
अन्यविजयेन वैराग्यादिना च स्मरणं श्रीहरियोगेश्वरोत्तरे।
देहेन्द्रियप्राणमनोधियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्म्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः॥
त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥
भगवत उरुविक्रमाङ्घ्रिशाखा-
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः॥"
पूजापरता स्कान्दे तत्रैव।
"येऽर्च्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"
लैङ्गे।
"विष्णुचिह्नैः शुभान्येव करोति श्रद्धसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"
वैष्णवधर्म्मनिष्ठतादि पाद्मोत्तरखण्डे।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः॥"
तापः तप्तमुद्राधारणं तदादिपञ्चसंस्कारयुक्तः।
पञ्चसंस्काराश्च तत्रैवोक्ताः। [इति॥
"तापः पुण्ड्रस्तथा नाम मन्त्रो यागस्तु पञ्चमः॥"

अस्यार्थः । नाम श्रीकृष्णदासेत्यादि । मन्त्रः श्रीगुरोः सकाशात् मन्त्रग्रहणम् । यागः होमपूर्व्वकयथाविधिदीक्षाग्रहणमित्यर्थः । नव इज्याकर्म्माणि पूजासम्बन्धिकृत्यानि श्रवणादीनि पाद्योक्तार्च्चनादीनि वा सर्व्वेषां तेषां पूजाङ्गत्वात् । तानि च तत्रैवोक्तानि । यथा,—
"अर्च्चनं मन्त्रपठनं यागयोगौ महात्मनः ।
नामसङ्कीर्त्तनं सेवा तच्चिह्नैरङ्कनं तथा ।
तदीयाराधनं चर्य्या नवधा भिद्यते शुभे ! ॥"
अर्थपञ्चकं चत्वारो चत्वारो धर्म्मादयः पुरुषार्थाः पञ्चमपुरुषार्थश्च भक्तिः । यद्वा पञ्चतत्त्वानि अनात्मात्मपरमात्मपरमेश्वरतद्भक्तानां याथार्थ्यानि । इति तट्टीका ॥ * ॥
एकान्तिता गारुडे ।
"एकान्तेन सदा विष्णौ यस्माद्देवे परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥"
तद्विज्ञानेनानन्यपरता एकादशे उद्धवप्रश्नोत्तरे ।
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥"
भागवते । ११ । ३ । ५० ।
"न कामकर्म्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥"
सा च एकान्तिता चतुर्द्धा । तत्र धर्म्मानादरेण श्रीमदुद्धवप्रश्नोत्तर एव ।
"आज्ञायैव गुणान् दोषान् मयादिष्टानपि स्वकान् ।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च सत्तमः ॥
गीतायाञ्च ।
सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
यदा यस्यानुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठताम् ॥"
अन्यसर्व्वनिरपेक्षता भागवते श्रीमद्भगवदुद्धवसंवादे ऐलोपाख्याने ।
"सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः ।
निर्म्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः ॥"
तत्रैव तृतीये श्रीकपिलदेवहूतिसंवादे ।
"त एते साधवः साध्वि ! सर्व्वसङ्गविवर्ज्जिताः ।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥"
विघ्नाकुलत्वेऽपि मनोरतिपरता स्कान्दे ।
"यस्य कृच्छ्रगतस्यापि केशवे रमते मनः ।
न विच्युता च भक्तिर्वै स वै भागवतो नरः ॥
आपन्नस्य यस्येह भक्तिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥"
प्रेमैकपरता च भागवते पञ्चमस्कन्धे श्रीऋषभदेवस्य पुत्रानुशासने ।
"ये वा मयीशे कृतसौहृदार्था
जनेषु देहम्भरवार्त्तिकेषु ।
गृहेषु जायात्मजरातिमत्सु
न प्रीतियुक्ता यावदर्थाश्च लोके ॥"
राति मित्रं धनं वा ।
"त्रिधा प्रेमैकपरता प्रेम्णः स्यात्तारतम्यतः ।
उत्तमा मध्यमा चासौ कनिष्ठा चेति भेदतः ॥"
तत्रोत्तमा यथा एकादशे हरियोगेश्वरोत्तरे ।
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥
स्वेष्टदेवस्य भावं यः सर्व्वभूतेषु पश्यति ।
भावयन्ति च तान्यस्मिन्नित्यर्थः सम्मतः सताम् ॥"
तृतीये श्रीकपिलदेवहूतिसंवादे ।
"मय्यनन्येन भावेन भक्तिं कुर्व्वन्ति ये दृढ़ाम् ।
मत्कृते त्यक्तकर्म्माणस्त्यक्तस्वजनबान्धवाः ॥"
एकादशे श्रीहरियोगेश्वरोत्तरे च ।
"विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥"
तत्रैव मध्यममाह हरियोगेश्वरोक्तावेव ।
"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
कनिष्ठता तत्रैव ।
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥
श्रद्धया पूजनं प्रेमबोधकं भक्त इत्यपि ।
प्रेम्णो हि कारणात्तत्तु स्वल्पं भक्तानपेक्षणात् ॥
लक्षणानि च यान्यग्रे भक्तेर्लेख्यानि तान्यपि ।
दर्शनादीनि विद्यन्ते येषु भागवता हि ते ॥
एतानि लक्षणानीत्थं गौणमुख्यादिभेदतः ।
ऊह्यानि लक्षणान्येव विवेच्यानि पराण्यपि ॥
ईदृग्लक्षणवन्तः स्युर्दुर्लभा बहवो जनाः ।
दिष्ट्या हि मणयो यत्नं न वर्त्तन्ते इतस्ततः ॥"
अतएवोक्तं मोक्षधर्म्मे नारदीये ।
"जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चयः ॥"
इति श्रीहरिभक्तिविलासे १० विलासः ॥
भगवान्, [त्] (भगः "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इत्युक्तलक्षणं षडैश्वर्य्यमस्त्यस्येति । भग + नित्ययोगे मतुप् मस्य वः ।) पु बुद्धः । इत्यमरः । १ । १ । १३ ॥ श्रीकृष्णः । यथा,—
"भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥
पूज्ये त्रि । इति मेदिनी ॥ भगवत्स्वरूपं यथा,
"मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ! ।
तदेतत् श्रूयतामत्र संबन्धे गदतो मम ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।
द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः ।
परया त्वक्षरप्राप्तिरृग्वेदादिमयापरा ॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्यव्याप्तं यतः सर्व्वं तं वै पश्यन्ति सूरयः ॥
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिणा ।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ॥
वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः ।
एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः ॥
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम् ॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज ! ।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते ।
मैत्रेय ! भगवच्छब्दः सर्व्वकारणकारणे ॥
संभर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः ।
नेतागमयिता स्रष्टा गकारार्थस्तथा मुने ! ॥
ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि ।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥
एवमेव महाशब्दो । भगवानिति सत्तम ! ।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः ॥
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥
ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥
अपि च ।
"परमात्मा च भगवान् विष्वक्सेनो जनार्द्दनः ।
तद्भक्तिमान् भागवतो नाल्पपुण्यैर्हि जायते ॥
भगवच्छासनालम्बी भगवच्छासनप्रियः ।
भगवद्भक्तिमास्थाय वत्स ! भागवतो भव ॥
भगवान् भूतभृच्छ्रीशो भूतादिप्रभवोऽव्ययः ।
भावेन तं भजस्वेशं भवभङ्गकरं हरिम् ॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम् ।
ततो भागवतो भूत्वा भवबन्धात् प्रमोक्ष्यसि ॥"
इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः ॥ अन्यच्च ।
"महतां क्षुद्रजन्तूनां सर्व्वेषां जीविनां सदा ।
स्रष्टा पाता च शास्ता च भगवान् करुणानिधिः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः ॥
षडैश्वर्य्यान्वितः । स च परमेश्वरः । तन्नामविशेषस्य सेवनं यथा,—
"अथ श्रीभगवन्नाम सदा सेव्यं सर्व्वतः ।
तन्माहात्म्यञ्च विख्यातं सङ्क्षेपेणात्र लिख्यते ॥
अथ श्रीभगवन्नामविशेषस्य च सेवनम् ।
ऋषिभिः कृपयादिष्टं तत्तत्कामहृतात्मनाम् ।
अथकामविशेषेण श्रीभगवन्नामविशेषसेवामाहात्म्यम् । तत्र पापक्षयार्थं कौर्म्मे । यथा,—
"श्रीशब्दपूर्व्वं जयशब्दपूर्व्वं
जयद्वयाद्युत्तरतस्तथा हि ।
त्रिः सप्तकृत्वो नरसिंहनाम
जप्तं निहन्यादपि विप्रहत्याम् ॥"

महाभयनिवारणार्थं तत्रैव ।
"श्रीपूर्व्वो नरसिंहो हि क्रियादन्तरमस्तु यः ।
त्रि.सप्तकृत्वो जप्तस्तु महाभयनिवारणः ॥"
कालविशेषे तु मङ्गलार्थं विष्णुधर्म्मोत्तरे श्रीमार्कण्डेयवज्रसंवादे ।
"पुरुषं वामदेवञ्च तथा सङ्कर्षणं विभुम् ।
प्रद्युम्नमनिरुद्धञ्च क्रमादब्देषु कीर्त्तयेत् ॥"
अब्देषु संवत्सरादिषु पञ्चसु ॥
"बलभद्रं तथा कृष्णं कीर्त्तयेदयनद्वये ।
माधवं पुण्डरीकाक्षं तथा वै भोगशायिनम् ॥
पद्मनाभं हृषीकेशं तथा देवं त्रिविक्रमम् ।
क्रमेण राजशार्द्दूल । वसन्तादिषु कीर्त्तयेत् ॥
विष्णुञ्च मधुहन्तारं तथा देवं त्रिविक्रमम् ।
वामनं श्रीधरञ्चैव हृषीकेशं तथैव च ॥
दामोदरं पद्मनाभं केशवञ्च यदूत्तमम् ।
नारायणं माधवञ्च गोविन्दञ्च तथा क्रमात् ॥
चैत्रादिषु च मासेषु देवदेवमनुस्मरेत् ।
प्रद्युम्नमनिरुद्धञ्च पक्षयोः कृष्णशुक्लयोः ॥
सर्व्वः शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
आदित्यादिषु वारेषु क्रमादेवमनुस्मरेत् ॥
विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतभृद् भूतकृद् भावो भूतात्मा भूतभावनः ॥
अव्यक्तः पुण्डरीकाक्षो विश्वकर्म्मा शुचिश्रवाः ।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
अग्राह्यः शाश्वतो धाता कृष्णश्चैतान्यनुस्मरेत् ॥
देवदेवस्य नामानि कृत्तिकादिषु यादव ! ।
ब्रह्माणं श्रीपतिं विष्णुं कपिलं श्रीधरं प्रभुम् ॥
दामोदरं हृषीकेशं गोविन्दं मधुसूदनम् ।
भूधरं गदिनं देवं शङ्खिनं पद्मिनं तथा ॥
चक्रिणञ्च महाराज । प्रथमादिषु संस्मरेत् ॥"
प्रथमादिषु प्रतिपदादिषु ।
"सर्व्वं वा सर्व्वदा नाम देवदेवस्य यादव । ॥
नामानि सर्व्वाणि जनार्द्दनस्य
कालश्च सर्व्वः पुरुषप्रवीर ।
तस्मात् सदा सर्व्वगतस्य नाम
ग्राह्यं यथेष्टं वरदस्य राजन् । ॥"
विविधकामसिद्धये च पुलस्त्योक्तौ ।
'कामः कामप्रदः कान्तः कामपालस्तथा हरिः ।
आनन्दो माधवश्चैव कामसंसिद्धये जपेत् ॥
रामः परशुरामश्च नृसिंहो विष्णुरेव च ।
विक्रमश्चैवमादीनि जप्यान्यरिजिगीषुभिः ॥
विद्यामभ्यस्यता नित्यं जप्यः पुरुषोत्तमः ।
दामोदरं बन्धगतो नित्यमेव जपेन्नरः ॥
केशवं पुण्डरीकाक्षमनिशं हि तथा जपेत् ।
नेत्रबाधासु सर्व्वासु हृषीकेशं भयेषु च ॥
अच्युतञ्चामृतञ्चैव जपेदौषधकर्म्मणि ।
संग्रामाभिमुखो गच्छन् संस्मरेदपराजितम् ॥
चक्रिणं गदिनञ्चैव शार्ङ्गिणं खड्गिनं तथा ।
क्षेमार्थी प्रवसन्नित्यं दिक्षु प्राच्यादिषु स्मरेत् ॥
अजितञ्चाधिपञ्चैव सर्व्वं सर्व्वेश्वरं तथा ।
संस्मरेत् पुरुषो भक्त्या व्यवहारेषु सर्व्वदा ॥
नारायणं सर्व्वकालं क्षुतप्रस्खलनादिषु ।
ग्रहनक्षत्रपीडासु देवबाधासु सर्व्वतः ॥
दस्युवैरिनिरोधेषु व्याघ्रसिंहादिसङ्कटे ।
अन्धकारे तमस्तीव्रे नरसिंहमनुस्मरेत् ॥
अग्निदाहे समुत्पन्ने संस्मरेज्जलशायिनम् ।
गरुडध्वजानुस्मरणाद्विषवीर्य्यं व्यपोहति ॥
स्नाने देवार्च्चने होमे प्रणिपाते प्रदक्षिणे ।
कीर्त्तयेद्भगवन्नाम वासुदेवेति तत्परः ॥
स्थापने वित्तधान्यादेरपध्याने च दुष्कृते ।
कुर्व्वीत तन्मना भूत्वा अनन्ताच्युतकीर्त्तनम् ॥
नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम् ।
वामनं खड्गिनञ्चैव दुःस्वप्ने सदा स्मरेत् ॥
महार्णवादौ पर्य्यङ्कशायिनञ्च नरः स्मरेत् ।
बलभद्रं समस्तार्थे सर्व्वकर्म्मणि संस्मरेत् ॥
जगत्पतिमपत्यार्थे स्तुवन् भक्त्या न सीदति ।
श्रीशं सर्व्वाभ्युदयिके कर्म्मण्याशु प्रकीर्त्तयेत् ॥
अरिष्टेषु ह्यशेषेषु विशोकञ्च सदा जपेत् ।
मरुत्प्रपाताग्निजलबन्धनादिषु मृत्युषु ॥
स्वतन्त्रपरतन्त्रेषु वासुदेवं जपेद्बुधः ।
सर्व्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ॥
यथाभिरोचते नाम तत् सर्व्वार्थेषु कीर्त्तयेत् ।
सर्व्वार्थसिद्धिमाप्नोति नाम्नामेकार्थता यतः ॥
सर्व्वाण्येतानि नामानि परस्य ब्रह्मणो हरेः ॥"
एवं विष्णुधर्म्मोत्तरे च मार्कण्डेयवज्रसंवादे ॥
किञ्च ।
"कूर्म्मं वराहं मत्स्यं वा जलप्रतरणे स्मरेत् ।
भ्राजिष्णुमग्निजनने जपेन्नाम त्वखण्डितम् ॥
गरुडध्वजानुस्मरणादापदो मुच्यते नरः ।
ज्वरजुष्टशिरोरोगविषवीर्य्यञ्च शाम्यति ॥
बलभद्रन्तु युद्धार्थी कृष्यारम्भे हलायुधम् ।
उत्तारणं वाणिज्यार्थी राममभ्युदये नृप । ॥
माङ्गल्यं मङ्गलं विष्णुं माङ्गल्येषु च कीर्त्तयेत् ।
उत्तिष्ठन् कीर्त्तयेद्विष्णुं प्रस्वपन् माधवं नरः ॥
भोजने चैव गोविन्दं सर्व्वत्र मधुसूदनम् ॥"
तत्रैवान्यच्च
"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च मैथुने च प्रजापतिम् ॥
संग्रामे चक्रिणं क्रुद्धं स्थानभ्रंशे त्रिविक्रमम् ।
नारायणं वृषोत्सर्गे श्रीधरं प्रियसङ्गमे ॥
जलमध्ये वराहञ्च पावके जलशायिनम् ।
कानने नरसिंहञ्च पर्व्वते रघुनन्दनम् ॥
दुःस्वप्ने स्मर गोविन्दं विसङ्कटे मधुसूदनम् ।
मायासु वामनं देवं सर्व्वकार्य्येषु माधवम् ॥"
किञ्च ।
"कीर्त्तयेद्वासुदेवञ्च अनुक्तेष्वपि यादव ! ।
कार्य्यारम्भे तथा राजन् ! यथेष्टं नाम कीर्त्तयेत् ॥
सर्व्वाणि नामानि हि तस्य राजन् ।
सर्व्वार्थसिद्धौ तु भवन्ति पुंसः ।
तस्माद्यथेष्टं खलु कृष्णनाम
सर्व्वेषु कार्य्येषु जपेत भक्त्या ॥"
इति श्रीहरिभक्तिविलासे ११ विलासः ॥
भगवद्धर्म्मकारित्वम् । यथा, महाभारते भगवद्वाक्यम् ।
"ऋणमेतत् प्रवृद्धं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णा ! मां दूरवासिनम् ॥"
आदिपुराणे श्रीकृष्णार्ज्जुनसंवादे ।
"गीत्वा तु मम नामानि नर्त्तयेन्मम सन्निधौ ।
इदं ब्रवीमि ते सत्यं क्रीतोऽहं तेन चार्ज्जुन ! ॥
गीत्वा च मम नामानि रुदन्ति मम सन्निधौ ।
तेषामहं परिक्रीतो नान्यक्रीतो जनार्द्दनः ॥"
एवं श्रुत्वा च मम नामानीत्यादि ॥ विष्णुधर्म्मे प्रह्लादेन ।
"जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥"
इति तत्रैव ११ विलासः ॥
भगवत्सान्निध्यलक्षणानि यथा । हयशीर्षे ।
"तस्मिन्नेव मुहूर्त्ते तु हर्षो वा भयमेव च ।
चक्षुर्भ्रमो विभ्रमो वा त्रासो वा जायते यदि ॥
आमोहः परमोहो वा स्तम्भितं परमं तथा ।
अश्रुतानां श्रुतिर्वा स्यात् गात्राणां वाथ वेपथुः ॥"
आमोहो मौढ्यविशेषः । परमोहो मूर्च्छा ।
"वैराग्यं नैचयोर्वा स्याद्दर्पः कन्दर्प एव वा ।
परमो विस्मयो वाथ दिव्यो वा श्रूयते ध्वनिः ॥
दिव्यवादित्रघोषो वा गन्धर्व्वनगरस्य वा ।
दर्शनं जायते काले तस्मिन् सुरगणार्च्चितम् ॥
नरा नार्य्योऽथ हसन्ते गायन्तोऽप्यथ हर्षिताः ।
नन्दितूर्य्यरवो वापि श्रूयते छन्दसां ध्वनिः ॥
दिव्यगन्धा रसा वापि एकस्यापि भवन्ति हि ।
लिङ्गैरेतैर्विजानीयात् तत्र सन्निहितं हरिम् ॥
प्रभा चैव विशेषेण ज्वलतीव च दृश्यते ।
स्फुरन्तीव च दृश्येत प्रतिमा च विशेषतः ॥
स्फुरन्निव जनः कश्चित् श्रमयमाण इव क्वचित् ।
वीक्ष्यमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते ॥
एतैस्तु लक्षणैर्ज्ञेयस्तत्र सन्निहितो हरिः ।
विशेषादथवा पश्येच्छक्रचापोपमं क्वचित् ॥
छविं वज्रप्रभां पश्येत् पद्मरागप्रभां यथा ।
सौदामिनीप्रभां पश्येत् प्रतिमायां क्वचिद्यदि ॥
एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।
बधिरा इव केचित्तु मूका इव तथापरे ।
विभ्रान्ता इव केचिच्च जडा इव तथापरे ॥
धावन्त इव केचित्तु पतन्त इव चापरे ।
नृत्यन्त इव चाप्यन्ये मत्ता इव तथा यदि ।
चित्रस्था इव केचित्तु विवशा इव केचन ।
भवन्ति तत्र चोन्मत्ताः प्रमत्ता इव चापरे ।
लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
(शिवः । यथा, महाभारते । १३ । १७ । १२७ ।
"निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवान् उत्थानः सर्व्व-कर्म्मणाम् ॥")
भगालं, क्ली, (भजति सुखदुःखादिकं कर्म्मजन्यमनेनेति भज्यते अनेनेति वा । भज+"पीयु-

क्षुदिभ्यां कालनिति।” उणा० ३।७६। बाहुलकात् अजेरपीति उज्ज्वलदत्तः इति कालन्। गङ्गादित्वात् ङीप च।) वृकरोटिः। यथा। भगालं नरमस्तकम्। इति कश्चित् जटाधरः॥ भगस्य महादेवस्य अलं भूषणमितिव्युत्पत्तिः॥

भगाली, [न्] पुं, (भगालं नृकपालं भूषणत्वेनास्त्यस्येति इनिः।) शिवः। इति त्रिकाण्डशेषः॥ (चन्द्रीकान्तो भगाली च। इति उज्ज्वलदत्तधृतो रामशेखरश्च।)

भगिनी, स्त्री, सहोदरा। तत्पर्य्यायः। स्वसा २। इत्यमरः॥२।६।२८॥ भगं यत्नः पित्रादितो द्रव्यदाने विद्यतेऽस्या इति इनिप्रत्ययेन भगिनी। इति तट्टीकायां भरतः॥ (भगं योनिरस्या अस्तीति। भग + इनिः ङीप्।) स्त्रीमात्रम्। यथा,—

"परिपुष्टा च वामाङ्गी भगिनी प्रकृतिर्नरी॥"

इति शब्दचन्द्रिका॥

भगिनीपतिः, पुं, (भगिन्याः पतिः।) स्वसृभर्त्ता। तत्पर्य्यायः। आवुत्तः २ भामः ३। यथा,—

"भगिनीपतिरावुत्तो भावो विद्वानथावुकः॥"

इति नाट्योक्तावमरः॥१।७।१२॥

"अहो भगिन्यहो भाम। मया वां बत पाप्मना। पुरुषाद इवापत्यं सुहृदोर्हिंसिताः सुताः॥"

इति श्रीभागवते १० स्कन्धे ४ अध्यायः॥

भगीरथः, पुं, (भं ज्योतिष्कमण्डलं गीर्वाङ्मयं तत्र रथ इन्द्रियाणि रथ इवास्य।) दिलीपराजपुत्त्रः। कपिलशापेन भस्मीभूतानामधःपतितानां पितृव्यासुहृद्रक्षायानेन मर्त्त्यलोके गङ्गा आनीता। यथा, मात्स्ये १२ अध्यायः।

"असमञ्जसस्तनयो ह्यंशुमान्नाम विश्रुतः।
तस्य पुत्त्रो दिलीपस्तु दिलीपात्तु भगीरथः॥
येन भागीरथी गङ्गा तपः कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुतः॥"

भगोः, पुं, } हे भगवन्।। इति मुग्धबोधव्याकर-
भगोःख, } णम्। संचिप्तसारश्च॥ (सम्बोधनवाचकाविमौ॥)

भगोलः, पुं, (भानां नक्षत्राणां गोलः। नक्षत्रसमूहेन विरचितः गोलाकारः पदार्थ इत्यर्थः।) भपञ्जरम्। नक्षत्रचक्रम्। यथा। इदानीं भगोलमाह।

"याम्योत्तरक्षितिजवत् सुदृढं विदध्या-
दाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्।
षष्ट्यङ्कमत्र सममण्डलवत्तृतीयं
नाड्याह्वयञ्च विषुवद्वलयं तदेव॥"

यथा खगोले क्षितिजं याम्योत्तरञ्च तदाकारमपरमाधारवृत्तद्वयं ध्रुवयष्टिस्थं कृत्वा तदुपरि अन्यत्तृतीयं सममण्डलाकारं घटीषष्ट्या चाङ्कितं कार्य्यं तन्नाडीवृत्तं विषुवत् वृत्तसंज्ञम्॥ * ॥ इदानीं क्रान्तिवृत्तमाह।

"क्रान्तिवृत्तं ग्रहाङ्कं विधेयं भम-
त्वञ्च भागश्च भार्द्धे कुभा भागतः।
क्रान्तिपातः प्रतीपं तथा प्रस्फुटा
क्षेपपातश्च तत्स्थानकान्यङ्कयेत्॥

अथान्यत्तत्प्रमाणमेव वृत्तं कृत्वा तत्र
मेषादीन् प्रकल्प्य द्वादशराशयोऽङ्क्याः॥"

तत् क्रान्तिवृत्तसंज्ञम्। तस्मिन् वृत्ते रविर्भ्रमति तथा रवेर्भार्द्धान्तरे भूभा च। तथा तत्र क्रान्तिपातो मेषादेर्विलोमं भ्रमति। तथा ग्रहाणां विक्षेपपाताः प्रस्फुटा विलोमं भ्रमन्ति। अतः क्रान्तिपातादीनि स्थानानि तत्राङ्क्यानि॥ इदानीं क्रान्तिवृत्तनिवेशमाह।

"क्रान्तिपाते च पाताङ्कषट्कान्तरे
नाडिकावृत्तलग्नं विदध्यादिदम्।
पाततः प्राक् त्रिभे सिद्धभागैरुदग्
दक्षिणे तैश्च भागैर्विभागेऽपरे॥"

क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यचिह्नं कार्य्यम्। ते चिह्ने नाडीवृत्तेन संसक्ते कृत्वा पातचिह्नादग्रतः त्रिभेऽन्तरे नाडीवृत्ताद्भागचतुर्विंशत्या उत्तरतो यथा भवति। अपरभागे त्रिभेऽन्तरे दक्षिणतश्च तैर्भागैर्यथा भवति तथा बध्नीयात॥*॥ इदानीं विमण्डलमाह।

"नाडिकामण्डले क्रान्तिवृत्तं यथा
क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्।
क्षेपवृत्तन्तु राश्यङ्कितं तत्र च
क्षेपपातेषु चिह्नानि कृत्वोक्तवत्॥
क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च
क्षेपपाते सषड्भे च कृत्वा युतिम्।
क्षेपपाताग्रतः पृष्ठतश्च त्रिभे
क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्॥
शीघ्रकर्णेन भक्ताश्चिभज्या गुणाः
स्युः परक्षेपभागा ग्रहाणां स्फुटाः।
क्षेपवृत्तानि सप्तां विदध्यात् पृथक्
स्वस्ववृत्ते भ्रमन्तीन्दुपूर्व्वा ग्रहाः॥"

अस्य श्लोकस्य समग्रस्य व्याख्यानम्। यथा क्रान्तिवृत्तं पृथक् कृतं एवं विमण्डलमपि राश्यङ्कं पृथक् पृथक् कृत्वा तत्र मेषादेर्यस्तं स्फुटक्षेपपातं दत्त्वाग्रे चिह्नं कार्य्यम्। अथ क्रान्तिवृत्तस्य विमण्डलस्य च क्षेपपातचिह्नयोः सम्पातं कृत्वा तस्मात् षड्भेऽन्तरे अन्यच्च सम्पातं कृत्वा क्षेपपाताग्रतस्त्रिभेऽन्तरे क्रान्तिवृत्तादुत्तरतः स्फुटैः क्षेपभागैः पृष्ठतश्च त्रिभेऽन्तरे तैरेव भागैर्दक्षिणतः स्थिरं कृत्वा विमण्डलं निवेशनीयम्। अथ पठिता ये विक्षेपभागास्ते त्रिज्या गुणाः शीघ्रकर्णेन भक्ताः स्फुटा ज्ञेयाः॥*॥ अथानुपातः। यदि कर्णाग्रे एतावदन्तरं तर्हि त्रिज्याग्रे कियदिति। यतो भगोले त्रिज्यैव व्यासार्द्धम्। एवं चन्द्रादीनां षट् विमण्डलानि कार्य्याणि। स्वस्वविमण्डले ग्रहा भ्रमयन्ति॥ इदानीं क्रान्तिं विक्षेपञ्चाह।

"नाडिका मण्डला तिर्य्यगत्रापमः
क्रान्तिवृत्तावधिः क्रान्तिवृत्ताक्षरः।
क्षेपवृत्तावधिस्तिर्य्यगेव स्फुटो
नाडिकावृत्तखेटान्तरालेऽपमः।
क्रान्तिवृत्ते स्फुटग्रहस्थानं तस्य
नाडीवृत्ताद्यत्तिर्य्यगन्तरं सा क्रान्तिः॥"

अथ विमण्डले च यद्ग्रहस्थानं तस्य क्रान्तिवृत्तात् यत्तिर्य्यगन्तरं स विक्षेपः। अथ विमण्डलस्थग्रहस्य नाडीवृत्ताद्यत्तिर्य्यगन्तरं सा स्फुटा क्रान्तिः॥ *॥ इदानीं क्रान्तिपातमाह। विषुवत्क्रान्तिवलययोः संपातः क्रान्तिपातः स्यात्। तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे॥ अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्। तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः १९९६६९॥ तत् सञ्जातं पातं क्षिप्त्वा खेटेऽपमः साध्यः। क्रान्तिवशाच्चरखण्डोदयाश्चरदलल्लमापमे तत क्षेप्याः। क्रान्त्यर्थपातः क्रान्तिपातः। पातो नामसम्पातः कयोः विषुवत्क्रान्तिवलययोः। नहि तयोर्मेषादावेव सम्पातः। किन्तु तस्यापि चलनमस्ति। ये अयनचलनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः। मेषादेः पृष्ठतस्तावद्भागान्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थः। नहि क्रान्तिपातोऽस्तीति वक्तुं न शक्यते। प्रत्यक्षेण तस्योपलब्धत्वात्। उपलब्धिप्रकारमग्रे वक्ष्यति। स कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत्। तदा स्वल्पत्वात्तैर्नोपलब्धः। इदानीं बहुत्वात् साम्प्रतैरुपलब्धः। अतएव तस्य गतिरस्तीत्यवगतम्। यद्येवमप्यनुपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिध्यादिवत् कथं तैर्नोक्तः। सत्यम्। अत्र गणितस्कन्धे उपपत्तिमानेवागमः प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ता इति न वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणैवोपलभ्यन्ते तान्येव मन्दोच्चस्थानानि यान्येव विक्षेपाभावस्थानानि तान्येव पातस्थानानि किन्तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम्। तत्र मन्दोच्चपातानां गतिरस्ति। चन्द्रमन्दोच्चपातवदित्यनुमानेन सिद्धा। सा च कियती तदुच्यते। यैर्भगणैरुपलब्धिस्थानानि तानि गणितेनागच्छन्ति। तद्भगणसम्भवा वार्षिकी दैनन्दिनी वा गतिर्ज्ञेया। नैवम्। यदन्यैरपि भगणैस्तान्येवस्थानानि आगच्छन्ति। तदा कतरस्या गतेः प्रामाण्यम्। सत्यम् तर्हि साम्प्रतोपलब्ध्यनुसारिणी कापि गतिरङ्गीकर्त्तव्या। यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्म्मिण एव उत्पत्स्यन्ते। तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि व्याकरिष्यन्ति। अतएवायं गणितस्कन्धो महामतिमद्भिर्धृतः सन् अनाद्यनन्ते कालेऽपि खिलत्वं न याति। अतोऽस्य क्रान्तिपातस्य भगणाः कल्पेऽयुतत्रयं तावत् सूर्य्यसिद्धान्तोक्ताः। तथा मुञ्जालाद्यैर्यदयनचलनमुक्तं स एव क्रान्तिपातः। ते गोऽङ्गर्तुनन्दगोचन्द्रा उत्पद्यन्ते। अथ च ते वा ये वा भगणा भवन्तु। यदा येंऽशा निपुणैरुपलभ्यन्ते तदा स एव क्रान्ति-

पात इत्यर्थः। तं विलोमं क्रान्तिपातं ग्रहे प्रक्षिप्य क्रान्तिः साध्या। इदानीं विक्षेपपातानाह। एवं क्रान्तिविमण्डलसम्पाताः क्षेपपाताः स्युः। चन्द्रादीनां चलाः क्षेपानयने तु ते योज्याः।

"मन्दस्फुटो द्राक् प्रतिमण्डले खे
ग्रहो भ्रमत्यत्र च तस्य पातः।
पातेन युक्ता गणितागतेन
मन्दस्फुटात् खेचरतः शरोऽस्मात्॥
पातेऽथवा शीघ्रफलं विलोमं
कृत्वा स्फुटान्तेन युताच्छरोऽतः।
चन्द्रस्य कक्षावलये हि पातः
स्फुटाद्विधोर्मध्यमपातयुक्तात्॥"

तथा क्रान्तिवृत्तविमण्डलयोः सम्पातः क्षेपपातः। तं ग्रहे प्रक्षिप्य क्षेपः साध्यः। एतदुक्तं भवति क्रान्तिपातः प्रसिद्धः। यथा तं ग्रहे प्रक्षिप्य क्रान्तिः साध्यत एव क्षेपपातं ग्रहे प्रक्षिप्य क्षेपः साध्य इत्यर्थः। अथ विक्षेपपातो मन्दस्फुटे यत् प्रक्षिप्यते तत्कारणमाह। मन्दस्फुटो द्राक् प्रतिमण्डल इत्यादि। यतः शीघ्रप्रतिमण्डले मण्डलस्फुटगत्या ग्रहो भ्रमति तत्र च वृत्ते पातः। अतो गणितागतपातं मन्दस्फुटे प्रक्षिप्य क्षेपः साध्यते। शेषं स्पष्टार्थम्॥ * ॥ इदानीं ज्ञशुक्रयोर्विशेषमाह।

"ये चात्र पातभगणाः कथिता ज्ञभृग्वोः
ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः।
स्वल्पाः सुखार्थमुदिताश्चलकेन्द्रयुक्तौ
पातौ तयोः पठितचक्रभवौ विधेयौ॥
चलाद्विशोध्यः किल केन्द्रसिद्धौ
केन्द्रे सपाते तु परस्तु योज्यः।
अतश्चलात् पातयुताद् ज्ञभृग्वोः
सुधीभिराद्यैः शरसिद्धिरुक्ता॥"
"स्फुटोनशीघ्रोच्चयुतौ स्फुटौ तयोः
पातौ भगोले स्फुट एव पातः॥"

ननु ज्ञशुक्रयोः शीघ्रोच्चपातयुतिं केन्द्रं कृत्वा यो विक्षेप आनीतः स शीघ्रोच्चस्थान एव भवितुमर्हति न ग्रहस्थाने। यतो ग्रहोऽन्यत्र वर्त्तते। अत इदमनुपपन्नमिव प्रतिभाति। तथा ब्रह्मसिद्धान्तभाष्ये। ज्ञशुक्रयोः शीघ्रोच्चस्थाने यावान् विक्षेपस्तावानेव यत्रतत्रस्थस्यापि ग्रहस्य भवत्यत्रोपलब्धिरेव वासना। नान्यत् कारणं वक्तुं शक्यत इति चतुर्वेदे नाप्यनध्यवसायोऽत्र कृतः। अत्रोच्यते। येऽत्र ज्ञशुक्रयोः पातभगणाः पठितास्ते शीघ्रकेन्द्रभगणैर्युताः सन्तस्तद्भगणा भवन्ति। तथा च माधवीये सिद्धान्तचूड़ामणौ पठिताः। अतोऽल्पभगणभवः पातः स्वशीघ्रकेन्द्रेण युतः कार्यः। शीघ्रोच्चाद्ग्रहे शोधिते शीघ्रकेन्द्रं तस्मिन् स पाते क्षेपकेन्द्रकरणार्थं ग्रहः क्षेप्यः। अतस्तुल्यशोध्यक्षेपकयोः नाशे कृते शीघ्रोच्चपातयोग एवावशिष्यत इत्युपपन्नम्। किञ्च। मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्डले चलकेन्द्रं तत्पाते क्षेप्तुं युज्यते। एवं कृते सति क्षेपकेन्द्रं मन्दफलेनान्तरितं स्यात्। तदङ्गीकृतम्। इतरकेन्द्रस्यानुपपत्तेः। अतो मन्दफलं पाते धनं देयम्। यतोऽनुपातसिद्धं चलकेन्द्रं मध्योनं शीघ्रोच्चं भवति। यत्तु भगोले क्रान्तिवृत्तं तत् कक्षावृत्तं तत्र यद्विमण्डलं तत्र स्फुटग्रहः। तत्स्फुटपातयोगो हि विक्षेपकेन्द्रं अतः स्फुटपातस्थाने सम्पातं कृत्वा ततस्त्रिभेऽन्तरे स्फुटोक्तैः परमक्षेपांशैः प्रागवदुत्तरे दक्षिणे च विन्यस्तम्। तथा न्यस्ते विमण्डले स्फुटग्रहस्थाने विक्षेपः स्फुटविक्षेपेण गणितागतेन तुल्यो दृश्यते नान्यथेत्यर्थः॥ * ॥ इदानीं ग्रहगोले विशेषमाह।

"ग्रहस्य गोले कथितापमण्डलं
प्रकल्प्य कक्षावलयं यथोदितम्।
निबध्य शीघ्रप्रतिवृत्तमस्मिन्
विमण्डलं तत् पठितैः शरांशैः॥
मध्योऽत्र पातो बुधदां भृग्वोः
स्वशीघ्रकेन्द्रेण युतौ तु योज्याः॥"

भगोल एव तावद्ग्रहगोलः कल्प्यः तत्र स्फुट एव पातः। अथ यदि तदन्यग्रहगोलोऽन्यो निबध्यते तदा तत्र यथोक्तविषुवद्वृत्तं क्रान्तिवृत्तञ्च बद्धा कक्षामण्डलं प्रकल्प्य तत्र छेद्यकोक्तविधिना शीघ्रप्रतिमण्डलं बद्धा तत्र प्रतिमण्डले गणितागतपातं मेषादेर्विलोमं गणयित्वा तत्र चिह्नं कार्य्यम्। अथ त्रिज्या व्यासार्द्धमेवान्यद्वृत्तं राश्यङ्कं विमण्डलाख्यं कृत्वा तत्रापि मेषादेर्व्यस्तं पाताग्रे चिह्नं कृत्वा प्रतिमण्डलविमण्डलयोः सम्पातचिह्ने प्रथमं सम्पातम्। ततो भार्द्धान्तरे द्वितीयं कृत्वा पातादग्रतः पृष्ठतश्च त्रिभेऽन्तरे परमविक्षेपांशैः पठितैः प्रतिवृत्तादुत्तरे दक्षिणे च विमण्डलं न्यस्यम्। तत्र मन्दस्फुटगत्या पारमार्थिको ग्रहो भ्रमति। अतो मेषादेरनुलोममन्दस्फुटो विमण्डले देयः। स तत्रस्थः प्रतिमण्डलात् यावतान्तरेण विक्षिप्तस्तावान् तत्प्रदेशे विक्षेपः। यतो वृत्तसंपातस्थे ग्रहे विक्षेपाभावः त्रिभेऽन्तरे परमो विक्षेपो मध्येऽनुपातेन। अतो वृत्तसम्पातग्रहयोरन्तरं ज्ञेयम्। तदन्तरं पातग्रहयोगे कृते भवति। पातस्य विलोमगत्वात्। संयोगः शरार्थं केन्द्रम्। यदि त्रिज्यातुल्यया केन्द्रज्यया परमशरस्तदाभीष्टयानया क इति फलं प्रतिमण्डलविमण्डलयोस्तिर्य्यगन्तरं स्यात्। विमण्डलस्थग्रहाद्भूमध्यगं सूत्रं तद्भूमध्यग्रहान्तरं स च शीघ्रकर्णः। यदि भूमध्यात् कर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे कियानिति द्वितीयत्रैराशिकम्। आद्ये त्रिज्या हरो द्वितीये गुणः। तयोर्नाशे कृते केन्द्रज्यायाः परमशरगुणितायाः कर्णो हरः फलं कक्षावृत्तस्थग्रहयोस्तिर्य्यगन्तरं स्फुटशरः॥ * ॥ इदानीमहोरात्रवृत्तमाह। ईप्सितक्रान्तितुल्येऽन्तरे सर्वतो नाड़िकाख्यादहोरात्रवृत्ताकारं तत्र बद्धा। घटीनाञ्च षष्ट्याङ्कयेदस्य विष्कम्भार्द्धं द्युज्या मता। नाड़ीवृत्तादुत्तरतो दक्षिणतो वा सर्वत्रैवं क्रान्तितुल्यान्तरे यद्वृत्तं निबध्नाति तदहोरात्रवृत्तं तेन वृत्तेन तस्मिन् दिने रविर्भ्रमतीत्यर्थः। तस्य वृत्तस्य व्यासार्द्धं द्युज्या॥ * ॥ इदानीमन्यदाह। अथ कल्प्या मेषाद्या अनुलोमं क्रान्तिपाताङ्कात् एषा मेषादीनां द्युरात्रवृत्तानि बध्नीयात्। नाड़ीवृत्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमात्तानि। क्रान्तिपातादारभ्य त्रिंशत्त्रिंशद्भिर्भागैरन्यान् मेषादीन् प्रकल्प्य तदग्रसूत्रवदहोरात्रवृत्तानि बध्नीयात्। तानि च नाड़ीवृत्तोभयतस्त्रीणि त्रीणि भवन्ति तान्येव क्रमोत्क्रमतः सायनांशार्कस्य द्वादशराशीनाञ्च॥ * ॥ इदानीमस्योपसंहारः। एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः। इति सिद्धान्तशिरोमणिः॥

भग्नं, त्रि, (भञ्ज्+क्तः। संघात् विश्लिष्टत्वात् तथात्वम्।) पराजितम्। इति हेमचन्द्रः॥ त्रुटितम्। चूर्णितम्। भाङ्गा इति भाषा। यथा, भट्टिः।

"चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तके॥"

भग्नं, क्ली, (भज्यते आमर्द्द्यते विश्लिष्यते इति। भञ्ज+क्तः) रोगविशेषः। अथ भग्नाधिकारः। तत्र भग्नस्य भेदमाह।

"भग्नं समासाद्द्विविधं हुताश !
काण्डे च सन्धावपि तत्र सन्धौ।
उत्पिष्टविश्लिष्टविवर्त्तितानि
तिर्य्यग्गतं क्षिप्तमधश्च षड्धा॥"

भग्नमत्र भावार्थे क्तप्रत्ययेन भग्नं भङ्गः स चात्र विश्लेषोऽभिप्रेतः। तेन भग्नमस्थिविश्लेषलक्षणम्। समासात् संक्षेपात्। हुताश ! हे अग्निवेश !। यतश्चरकेऽग्निवेशस्य हुताशेति नामान्तरमुक्तम्। काण्डे सन्धिपर्य्यन्ते एकखण्डे। अस्थिसन्धौ द्वयोरस्थ्नोः सन्धानस्थाने। तत्र सन्धौ उत्पिष्टादिभेदैः षट्प्रकारं भग्नं भवति। स्वल्पवक्तव्यत्वेन सन्धिभग्नस्यादौ विवरणम्। उत्पिष्टेत्यादि। अधः अधोभग्नम्॥ * ॥ सन्धिभग्नस्य सामान्यं लिङ्गमाह।

"प्रसारणाकुञ्चनवर्त्तनोग्रा-
रुक्स्पर्शविद्वेषणमेतदुक्तम्।
सामान्यतः सन्धिगतस्य लिङ्ग-
मुत्पिष्टसन्धेः श्वयथुः समन्तात्॥
विशेषतो रात्रिभवा रुजश्च
विश्लिष्टके तौ च रुजा च नित्यम्॥"

वर्त्तनं परिवर्त्तनम्॥ * ॥ उत्पिष्टस्य लिङ्गमाह। उत्पिष्टसन्धेः उत्पिष्टः द्वाभ्यामस्थिभ्यां पिष्टः सन्धिर्यस्य तस्य। समन्तात् उभयभागद्वयोः। विश्लिष्टमाह विश्लिष्ट इत्यादि। तौ उभयतः शोथौ। रुजा च नित्यं सदा रुजाधिका भवतीत्युत्पिष्टाद्भेदः॥ * ॥ विवर्त्तिततिर्य्यग्गताक्षिप्ताधोगतानाह। *

"विवर्त्तिते पार्श्वरुजश्च तीव्रा-
स्तिर्य्यग्गते तीव्ररुजो भवन्ति ।
क्षिप्तेऽतिमूलं विषमञ्च सक्थ्नोः
क्षिप्ते त्वधो रुक् विघटश्च सन्धेः ॥"

विवर्त्तिते सन्धावस्थ्नि । अस्थिद्वयोपरिविवर्त्तिते पार्श्वरुजः सन्धिस्थितास्थिखण्डद्वयपार्श्वयो रुजः । तिर्य्यग्गते सन्धिगते । एकस्मिन्नस्थि सन्धिस्थानं त्यक्त्वा तिर्य्यग्गते क्षिप्ते सक्थ्नोः ऊरुसन्ध्योः । एकस्मिन्नस्थ्नि परस्यास्थ्न उपरिगते । सक्थ्नोः अतिमूलं तत्र विषमं कदाचिदधिकं कदाचिन्न्यूनम् । अधःक्षिप्ते सन्धिगते एकस्मिन्नस्थ्नि अधोगते । रुक् सन्धेर्विघटः विघटनञ्च ॥ * ॥ काण्डभग्नमाह । भग्नञ्च काण्डे बहुधा प्रयाति विशेषतो नामभिरेव तुल्यम् । भग्नं काण्डे काण्डविषये बहुधा बहुभिः प्रकारैः प्रयाति । अत्र बहुविधत्वं द्वादशविधत्वं बोद्धव्यम् । बहुविधस्य काण्डभग्नस्य पृथक् लक्षणं नोक्तं किन्तु काण्डनामभिरेव तुल्यत्वम् । कर्कटकादिनामाशुरूपमेव लक्षणं किन्तु नामभिरेव बोद्धव्यम् ॥ * ॥ तान् प्रकारानाह ।

"काण्डे त्वतः कर्कटकाश्वकर्णौ
विचूर्णितं पिच्चितमस्थि छल्लितम् ।
काण्डेषु भग्नं ह्यतिपातितञ्च
मज्जागतं विस्फुटितञ्च वक्रम् ॥"

छिन्नं द्विधा द्वादशधा च काण्डे । अतः सन्धिभग्नानन्तरं काण्डे काण्डभग्ने तदाह । कर्कटकः अस्थिविश्लेषपूर्व्वको मध्ये प्रोन्नतः पार्श्वयोरवनतः कर्कटतुल्यरूपत्वात् कर्कटः । अश्वकर्णः अश्वकर्णवदिपुलास्थिनिर्गमादश्वकर्णः । विचूर्णितं चूर्णितमस्थि तच्च शब्दस्पर्शाभ्यां बोद्धव्यम् । पिच्चितमस्थि नियन्त्रितं बहुशोथम् । छल्लितं विश्लिष्टं सत्वक्स्रवम् । काण्डेषु भग्नं काण्डभग्नम् । यद्यपि कर्कटकादि सर्व्वमेव काण्डभग्नं तथापि इयं काण्डभग्नसंज्ञाविशिष्टा । अत्र भग्नं भङ्गः त्रुटिः तेन सर्व्वथा त्रुटितं पृथग्भूतं त्वचि स्थितं यत्र काण्डं तत्काण्डभग्नम् । अतिपातितं अशेषेण छित्वा पातितमस्थि । मज्जागतं अस्थ्यवयवोऽस्थिमध्ये प्रविश्य मज्जानं गतम् । विस्फुटितं स्तोकविदीर्णं वक्रं स्थानं त्यक्त्वा कुब्जीभूतम् । छिन्नं द्विधा एकं विदीर्णं सत् लग्नं अपरं विदीर्य्य द्विधाभूतम् । द्वादशधा च काण्डे । काण्डे च भग्नं द्वादशधेत्यन्वयः । तथोक्तमेव कर्कटकादि ॥ * ॥ काण्डभग्नस्य सामान्यं लक्षणमाह ।

"श्वयथुर्बहुलत्वं स्पर्शासहिष्णुता ...

"स्रस्ताङ्गता शोथरुजातिवृद्धिः
संपीड्यमाने भवतीह शब्दः ।
स्पर्शासहं स्पन्दनतोदशूलं
सर्व्वास्ववस्थासु न शर्म्मलाभः ॥"
भग्नस्य काण्डे खलु चिह्नमेतत् ॥"

स्पर्शासहमिति काण्डभग्नस्य विशेषणं स्पन्दनं नाडीनां स्फुरणं शूलं शूलेनेव व्यथा । रुजा सामान्या पीडा । सर्व्वास्ववस्थासु शयनासनादिषु ॥ कष्टसाध्यमाह ।

"अल्पाशिनोऽनात्मवतो जन्तोर्वातात्मकस्य च ।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥"

अनात्मवतो रोगप्रतीकारे यत्नरहितस्य । वातात्मकस्य च वातप्रकृतेः । उपद्रवैः ज्वराध्मानमोहमूत्रपुरीषसङ्गादिभिः ॥ * ॥ असाध्यमाह ।

"भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतम् ।
जघनं प्रतिपिष्टञ्च वर्जयेत्तच्चिकित्सकः ॥"

कपालं जानुनितम्बांसगण्डतालुशङ्खवङ्क्षणशिरोऽस्थीनि कपालानि तथा च्युतं तथा क्षिप्तम् । प्रतिपिष्टं उत्पिष्टम् ॥ पुनरसाध्यमाह ।

"असंश्लिष्टकपालञ्च ललाटे चूर्णितञ्च यत् ।
भग्नं गुदे स्तने पृष्ठे शङ्खे मूर्द्धनि वर्ज्जयेत् ॥"

असंश्लिष्टकपालमिति भग्नविशेषणम् । स्तने स्तनयोरन्तरं उरसि । मूर्द्धनि चूडस्थाने ॥ * ॥ अपरमप्यसाध्यमाह ।

"सम्यक्संहितमप्यस्थि दुर्न्यासाद्दुर्निबन्धनात् ।
संक्षोभाद्वापि यद्गच्छेद्विक्रियां तच्च वर्ज्जयेत् ॥"

सम्यक्संहितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दुःस्थापनात् संन्यस्तमपि दुष्टबन्धनात् सुबद्धमपि संक्षोभात् अभिघातादिना सञ्चलनात् यद्विक्रियां गच्छेत् विकृतं भवति तद्वर्ज्जयेत् ॥ अस्थिविशेषेण भग्नविशेषमाह ।

"तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु ।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥"

तरुणास्थीनि घ्राणकर्णाक्षिगुदेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति । तेनात्र वक्रनालस्था भग्नम् । नलकानि नलाद्दीनि नाडीवत् सरन्ध्राण्यस्थिपर्व्वाणि भिद्यन्ते अस्थ्यन्तरानुप्रवेशादि दीर्य्यन्ते । कपालानि जानुनितम्बांसगण्डतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि दन्ताः स्फुटन्ति त्रुटन्ति । अस्थीनि तरुणनलककपालरुचकवलयभेदात् पञ्चविधानि । तत्र रुचकानि चेति । चकाराद्वलयान्यपि त्रुटन्तीति बोद्धव्यम् ।

"पाण्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु ।
पादयोरपि चास्थीनि वलयानि बभाषिरे ॥"

अथ भग्नस्य चिकित्सा ।

"भग्ने लेपाय मञ्जिष्ठामधुकञ्चाम्लपेषितम् ।
शतधौतघृतोन्मिश्रं शालिपिष्टञ्च लेपनम् ॥"

लेपात् पिच्छिलवर्गैरन्तीका फलरसाभ्यां वा । सद्योऽभिघातजनिता रागरुजा श्वयथवः प्रशाम्यन्ति ।

"सघृतञ्चास्थिसंहारं लाक्षागोधूममर्ज्जुनम् ।
सन्धिभग्नेऽस्थिसम्भग्ने पिबेत् क्षीरेण वा पुनः ॥"

घृतेन पिबेत् क्षीरेण वेत्यर्थः । अस्थिसंहारः हडसिंहार इति लोके ।

"रसोनामधुलाक्षाज्यसिताकल्कं समश्नतः ।
छिन्नभिन्नच्युतास्थ्नाञ्च सन्धानमचिराद्भवेत् ॥"

"लाक्षास्थिसंहृत् ककुभाश्वगन्धा
चूर्णीकृता नागबला पुरश्च ।
संभग्नमुक्तास्थिरुजो निहन्या-
दङ्गानि कुर्य्यात् कुलिशोपमानि ॥"

अस्थिसंहृत् हडसिंहार । लाक्षादिगुग्गुलुः ॥

"मांसं मांसरसः क्षीरं सर्पिर्यूषः कलायजः ।
बृंहणञ्चान्नपानञ्च देयं भग्नाय जानता ॥
लवणं कटुकं क्षारं मद्यं मैथुनमातपम् ।
रूक्षमन्नं श्रमञ्चापि भग्नः सेवेत न क्वचित् ॥"

इति भावप्रकाशे भग्नाधिकारः ॥

(अथास्य निदानं यथा । पतनपीडनप्रहाराक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्य्यमाणं द्विविधमेवोत्पद्यते सन्धिमुक्तं काण्डभग्नञ्च ॥ इति सुश्रुते निदानस्थाने पञ्चदशेऽध्याये ॥

अथ भग्नचिकित्सा ।

"भग्नास्थिञ्च नरं दृष्ट्वा तस्य वक्ष्यामि भेषजम् ।
मणिबन्धे कूर्परे च जानौ भग्ने कटौ तथा ॥
पृष्ठवंशे विभग्ने च साध्यान्येतानि सत्तम ! ।
ग्रीवादेशे चेन्द्रवस्तौ रोहिण्यां कूर्परादधः ॥
स्कन्धकूर्परमध्ये च तथा च त्रिकमध्यतः ।
उरसि क्रोडके चैव विभग्नं तद्‌साध्यकम् ॥
विभग्नञ्च नरं दृष्ट्वा वेणुखण्डेन बन्धयेत् ।
म्रक्षयेन्नवनीतेनैरण्डपत्रेण वेष्टयेत् ॥
उष्णाम्भसा सेचयेच्च वस्त्रेण मृदु बन्धयेत् ।
धवार्ज्जुनकदम्बानां वल्कलं काञ्जिकेन तु ॥
पिष्ट्वा हितः प्रलेपश्च तेन सौख्यं प्रजायते ।
स्वेदयेत्तानि चोष्णेन आवासं कारयेत् पुनः ॥
एवं क्रिया समाप्तौ ततो बन्धं विमोचयेत् ।
एकाहान्तरिते नापि पूर्व्ववत्तत् प्रबन्धयेत् ॥
यावद्ग्रन्थिं न बध्नाति तावन्न स्नापयेन्नरम् ॥"

इति हारीते चिकित्सितस्थाने । ५६ अः ॥

अथ पथ्यविधिः ।

"शीताम्बुसेचनं पङ्कप्रदेहो बन्धनक्रिया ।
शालिप्रियङ्गुगोधूमा यवो मुद्गसतीलयोः ॥
नवनीतं घृतं क्षीरं तैलं माषरसो मधु ।
पटोलं लशुनं शिग्रु पत्तूरो बालमूलकम् ॥
द्राक्षा धात्री वज्रवल्ली लाक्षा यच्चापि बृंहणम् ।
तत्सर्व्वं भिषजा नित्यं देयं भग्नाय जानता ॥"

अथापथ्यविधिः ।

"लवणं कटुकं क्षारमम्लं मैथुनमातपम् ।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च ॥"

इत्यायुर्व्वेदपथ्यापथ्यग्रन्थस्य भग्नाधिकारे ॥)

भग्नपादर्क्षं, क्ली, (भग्नपदं ऋक्षम् ।) पुष्कराख्यनक्षत्रषट्कम् । यथा,—

"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी ।
पूर्व्वभाद्रं विशाखा च षड़ेते पुष्कराः स्मृताः ॥
भग्नपादर्क्षसंयोगात् द्वितीया द्वादशी यदि ।
सप्तमी चार्कमन्दारे जायते जारजो ध्रुवम् ॥".

इति ज्योतिस्तत्त्वम् ॥

भग्नपृष्ठः, पुं, (भग्नं पृष्ठमस्मिन् ।) सम्मुखः । इति त्रिकाण्डशेषः ॥ त्रुटितमेरुदण्डः । यथा,—
"भग्नपृष्ठकटिग्रीवं स्तब्धदृष्टि ह्यधोमुखम् ।
कष्टेन लिखितं पुस्तं यत्नेन परिपालयेत् ॥"
इति प्राचीनवाक्यम् ॥
(भग्नं पृष्ठं यस्य । त्रुटितमेरुदण्डके, त्रि ॥)

भग्नसन्धिः, पुं, (भग्नः सन्धिरस्मात् वा ।) शरीरस्य सन्धिस्थानभङ्गरोगविशेषः । तस्यौषधं यथा,—
"अभया त्रिफला व्योषः सर्व्वैरेभिः समीकृतैः ।
तुल्यो गुग्गुलुना योज्या भग्नसन्धिप्रसारकः ॥"
इति गारुडे १७५ अध्यायः ॥

भग्नसन्धिकं, क्ली, (भग्नो विश्लिष्टः दध्नः सन्धिः सञ्चातोऽत्र ।) घोलम् । इति शब्दचन्द्रिका ॥

भग्नात्मा, पुं, (भग्नः क्रमेण क्षीण आत्मा देहो यस्य । कृष्णप्रतिपदादिक्रमेणैकैककलाच्छेदेन भग्नदेहत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दचन्द्रिका ॥

भग्नाशः, त्रि, (भग्ना आशा यस्य । हताशः । दीर्घतृष्णाभङ्गयुक्तः । यथा,—
"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥"
इत्याह्निकतत्त्वम् ॥

भग्नी, स्त्री, (भगिनी । पृषोदरादित्वात् साधुः ।) भगिनी । इति द्विरूपकोषः ॥

भङ्कारी, स्त्री, (भमित्यव्यक्तशब्दं करोतीति । कृ+अण् । गौरादित्वात् ङीष् ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्क्ता, [ऋ] त्रि, भङ्गकर्त्ता । भन्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, मनौ ।९।२८९।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥"

भङ्गः, पुं, (भज्यते इति । भञ्ज+कर्म्मणि घञ् ।) तरङ्गः । इत्यमरः । १ । १० । ५ ॥ पराजयः । (भन्ज्+भावे घञ् ।) भेदः । रोगविशेषः । इति मेदिनी । गे, १३ ॥ (रोगविशेषार्थे यथा,—
"पातघातादिभिर्द्वेधा भङ्गोऽस्थ्नां सन्ध्यसन्धितः ।
प्रसारणाकुञ्चनयोरशक्तिः सन्धिमुक्तता ॥
इतरस्मिन् भृशं शोफः सर्व्वावस्थास्वनिश्चया ।
अशक्तिश्चेष्टितेऽल्पेऽपि पीड्यमाने सशब्दता ॥
समासादिति भङ्गस्य लक्षणं बहुधा तु तत् ।
भिद्यते भङ्गभेदेन तस्य सर्व्वस्य साधनम् ॥
यथास्यादुपयोगाय तथा तदुपदेक्ष्यते ।
शाख्याग्रदारि यत्त्वस्थि स्पर्शे शब्दं करोति यत् ।
यत्रास्थिलेशः प्रविशेन्मध्यमस्थ्नो विदारितः ।
भग्नं यच्चाभिघातेन किञ्चिदेवावशेषितम् ॥
उन्नम्यमानं क्षतवत् यच्च मज्जति मज्जति ।
तद्दुःसाध्यं कृशाशक्तवातलात्याशिनामपि ॥
भिन्नं कपालं यत् कट्यां सन्धिमुक्तं च्युतञ्च यत् ।
जघनं प्रतिपिष्टञ्च भग्नं यत्तद्विवर्ज्जयेत् ॥
असंश्लिष्टकपालञ्च ललाटं चूर्णितन्तथा ।
यच्च भग्नं भवेच्छङ्खशिरः पृष्ठस्तनान्तरे ।
सम्यग्यमितमप्यस्थि दुर्न्यासाद्दुर्निबन्धनात् ॥
संक्षोभादपि यद्गच्छेद्विक्रियां तद्विवर्ज्जयेत् ।
आदितो यच्च दुर्जातमस्थि सन्धिरथापि वा ॥
तरुणास्थीनि भुज्यन्ते भज्यन्ते नलकानि तु ॥
कपालानि विभिद्यन्ते स्फुटन्त्यन्यानि भूयसा ।
अथावनतमुन्नम्यमुन्नतञ्चावपीडयेत् ॥ .
आञ्छेदतिक्षिप्तमधो गतञ्चोपरि वर्त्तयेत् ।
आञ्छनोत्पीडनोन्नामचर्म्मसंक्षेपबन्धनैः ॥
सन्धीन् शरीरगान् सर्व्वान् चलानप्यचलानपि ।
इत्येतैः स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम् ॥
पट्टैः प्रभूतसर्पिर्भिर्वेष्टयित्वा सुखैस्ततः ।
कदम्बोदुम्बराश्वत्थसर्ज्जार्ज्जुनपलाशजैः ॥
वंशोद्भवैर्वा पृथुभिस्तनुभिः सुनिवेशितैः ।
सुश्लक्ष्णैः सुप्रतिस्तम्भैर्वल्कलैः शकलैरपि ॥
कुशाह्वयैः समं बन्धं पट्टस्योपरि योजयेत् ।
शिथिलेन हि बन्धेन सन्धेः स्थैर्य्यं न जायते ।
गाढेनापि रुजादाहपाकश्वयथुसम्भवः ।
त्र्यहात्त्र्यहादृतौ घर्म्मे सप्ताहाच्चोपयेद्धिमे ॥
साधारणे तु पञ्चाहाद्भङ्गदोषवशेन वा ।
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत् ॥
तं पञ्चमूलपक्वेन पयसा तु सवेदनम् ।
सुखोष्णं वावचार्य्यं स्याच्चक्रतैलं विजानता ॥
विभज्य देशं कालञ्च वातघ्नौषधसंयुतम् ।
प्रततं संकलेपांश्च विदध्याद्भग्नशीतलान् ॥
गृष्टिक्षीरं स सर्पिष्कं मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्भग्नः शीतलं लाक्षया युतम् ॥
सव्रणस्य तु भग्नस्य व्रणो मधुघृतोत्तरैः ।
कषायैः प्रतिसार्य्योऽथ शेषो भङ्गोदितः क्रमः ॥
सम्बानि व्रणमांसानि प्रलिप्य मधुसर्पिषा ।
सन्दधीत व्रणान् वैद्यो बन्धनैश्चोपपादयेत् ॥
तान् समान् सुस्थिताञ्ज्ञात्वा फलिनीरोध-
कट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ॥
धातकीरोध्रचूर्णैर्वा रोहन्त्याशु तथा व्रणाः ।
इति भङ्ग उपक्रान्तः स्थिरधातोर्ऋतौ हिमे ॥
मांसलस्याल्पदोषस्य सुसाध्यौ दारुणोऽन्यथा ।
पूर्व्वमध्यान्तवयसामेकद्वित्रिगुणैः क्रमात् ॥
मासैः स्थैर्य्यं भवेत् सन्धेर्यथोक्तं भजतो विधिम् ।
कटीजङ्घोरुभग्नानां कपाटशयनं हितम् ॥
यन्त्रणार्थं तथाकीलाः पञ्च कार्य्या निबन्धनाः ।
जङ्घोर्व्वोः पार्श्वयोर्द्वौ द्वौ तलएकश्च कीलकः ॥
श्रोण्यां वा पृष्ठवंशे वा वक्षस्यासकयोस्तथा ।
विमोक्षे भग्नसन्धीनां विधिमेवं समाचरेत् ॥
सन्धींश्चिरविमुक्तांश्च स्निग्धस्विन्नान् मृदूकृतान् ।
उक्तैर्विधानैर्बुद्ध्या च यथास्वं स्थानमाचरेत् ॥
असन्धिभग्ने रूढे तु विषमोल्वणसाधिते ।
आपोथ्य भङ्गं यमयेत्ततो भग्नवदाचरेत् ॥
भग्नं नैति यथा पाकं प्रयतेत तथा भिषक् ।
पक्वमांससिरास्नायुसन्धिः श्लेषं न गच्छति ॥
वातव्याधिविनिर्द्दिष्टान् स्नेहान् भग्नस्य
योजयेत् ॥"
इति वाभटे उत्तरस्थाने । २७ अध्यायः ॥)
कौटिल्यम् । भयम् । विच्छित्तिः । इति हेमचन्द्रः ॥ (विच्छित्त्यर्थे व्यवहारो यथा,—
"यङ् धातुविभागो वियोगः सञ्जीवापगमः सप्राणनिरोधः स भङ्गः स्वजीवकक्षभावः । इति चरके शारीरस्थाने पञ्चमेऽध्याये ॥)
रोगमात्रम् । इति राजनिर्घण्टः ॥ गमनम् । जलनिर्गमः । इत्यजयपालः ॥ (नागभेदः । यथा, महाभारते । १ । ५७ । ६ ।
"उच्छिखः शरभो भङ्गो बिल्वतेजा विरोहणः ॥")

भङ्गवासा, स्त्री, (भङ्गेन वासः सौरभमस्याः ।) हरिद्रा । इति शब्दरत्नावली ॥

भङ्गसार्थः, त्रि, (भङ्गं वक्रभावं अनार्ज्जवत्वमित्यर्थः स्यति व्यवस्यति यत् या क्रिया इति यावत् भङ्गसमर्थयतीति अर्थ+अच् । कौटिल्यव्यवसायक्रियार्थित्वादस्य तथात्वम् ।) कुटिलः । इति हारावली ॥

भङ्गा, स्त्री, (भज्यति इति । भन्ज्+"हलश्च ।" ३ । ३ । १२१ । इति बाहुलकात् घञ् टाप् ।) वृक्षविशेषः । तत्पर्य्यायः । मातुलानी २ । इत्यमरः ।२।९।२०॥ (अस्याः पर्य्याया गुणाश्च यथा,
"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ॥
तीक्ष्णोष्णा पित्तला मोहमन्दवाग्वह्निवर्द्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
द्वे भङ्गायां भङ्गा काश्मीरेषु स्वनामख्याता । इति सुभूत्यादयः । इति भरतः ॥ एतस्याः फलं कलायपरिमाणमिति सर्व्वस्वम् । इति सारसुन्दरी ॥ शणाख्यशस्यम् । यथा,— भङ्गा शस्ये शणाह्वये । इति मुकुटधृतरुद्रः ॥ चिह्नता । तेउडी इति भाषा । यथा,—
"त्रिभण्डी रेचनी भङ्गा कलिङ्गा परिपाकिनी ॥"
इति शब्दचन्द्रिका ॥
ओषधिविशेषः । भाङ् इति सिद्धि इति च भाषा । यथा,—
"त्रैलोक्यविजया भङ्गा विजयेन्द्राशनं जया ॥"
इति शब्दचन्द्रिका ॥
अस्या गुणाः विजयाशब्दे द्रष्टव्याः ॥

भङ्गानः, पुं, (भङ्गेन अनिति इति । अन्+अच् ।) मत्स्यविशेषः । भाङ्गन इति भाषा । तत्पर्य्यायः । दीर्घजङ्घलः २ । इति शब्दमाला ॥

भङ्गारी, स्त्री, (भङ्कारी पृषोदरात् साधुः ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्गिः, स्त्री, (भज्यते इति । भन्ज+इन् । न्यङ्क्वादित्वात् कुत्वम् ।) विच्छेदः । (यथा, रघौ ।१३ । ५४ ।
"यावादवातरदूरमहीतलेन
मार्गेण भङ्गिरचितस्फटिकेन रामः ॥")
कौटिल्यभेदः । इत्यमरभरतौ ॥ विन्यासः । इति कलिङ्गः ॥ (भङ्गं करोतीति । भन्ज+णिच्+इः ।) कल्लोलः । इत्यजयदत्तः ॥ भङ्गः । इत्यन्ये ॥ व्याजः । छलनिभः । इति रभसः ॥

भङ्गिमा, [न्] पुं, (भङ्ग+बाहुलकात् स्वार्थे इमनिच् ।) भङ्गिः । यथा,—

"अधरे कज्जलं चाव ह्योताम्बूलरक्तिमा ।
प्राणनाथ ! किमेतत्ते वेशविन्यासभङ्गिमा ॥"
इति काव्यचन्द्रिका ॥

भङ्गी, स्त्री, (भङ्गि + कृदिकारादिति पक्षे ङीष् ।) भङ्गिः । यथा,—
"जानामि मानमलसाङ्गि ! वचो विभङ्गी
भङ्गीगतं नयनयोरपि चातुरीञ्च ।
आभीरनन्दनमुखाम्बुजसङ्गमांसी
वंशीरवो यदि न मामवशीकरोति ॥"
इत्युद्भटः ॥

भङ्गुरः, त्रि, (भज्यते स्वयमेवेति । भनज + "भञ्ज-भासमिदो घुरच् ।" ३ । २ । १६१ । इति कर्म-कर्त्तरि घुरच् । घित्वात् कुत्वमिति काशिका । स्वयं भञ्जनशीलः । यथा, भागवते ।७।७।४३।
"कामान् कामयते काम्यैर्यदर्थमिह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥")
कुटिलः । इति जटाधरः ॥

भङ्गुरः पुं, (भञ्ज + घुरच् । कुत्वञ्च ।) नद्या वङ्कः । इति शब्दमाला । नदीर वाँक इति भाषा ॥

भङ्गुरा, स्त्री, (भङ्गुर + टाप् ।) अतिविषा । प्रियङ्गुः । इति राजनिर्घण्टः ॥ (अतिविषा-शब्दे प्रियङ्गुशब्दे चास्या विषयो ज्ञेयः ॥)

भङ्ग्यं, क्ली, (भङ्गाया भवनं क्षेत्रमिति । भङ्ग + "विभाषा तिलमाषोमाभङ्गाणुभ्यः ।" ५।२।४। इति पक्षे यत् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गीनम् २ । इत्यमरभरतौ ॥ (भङ्गमर्हतीति । भङ्ग + दण्डादित्वाद् यत् । भङ्गार्हे त्रि ॥)

भचक्रं, क्ली, (भानां राशीनां चक्रम् । भानां भानां स्वस्वसंस्थानविशेषैर्विरचितो गोलाकारः पदार्थः ।) राशिचक्रम् । यथा,—
"भ्रमावर्त्तो भचक्रेऽस्मिन् ध्रुवो नाभौ व्यवस्थितः ।
चाराचक्रे त्विन्दुभौमौ शुक्रजीवशनैश्चराः ॥
राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः ।
यदा दिक्षु च ब्दाासु मेरोर्भूगोलकोद्भवा ॥
छाया भवेत्तदा रात्रिः स्याच्च तद्विरहा-
द्दिनम् ।
सूर्य्येन्द्वोरुपरागस्तु गोलकच्छायया भवेत् ॥
अन्योन्ययोस्तयोरेव व्यापयोरेव कारणात् ॥
व्यासमोक्षौ तु चार्येते तस्मात् पूर्व्वपश्चिमौ ॥
तत्र पुण्यफलाद्भागः क्तो राहोस्तु विष्णुना ॥"
इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः ॥*॥
अथ भचक्रभ्रमणव्यवस्थामाह ।
"निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत् तदा
भ्रमद्भचक्रं निजमस्तकोपरि ॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा स्यान्नतमृक्षमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः ॥
योजनसंख्या भांशैः ३६०र्गुणिता
कुपरिधिहृता ४९६७ भवन्त्यंशाः ।

भूमौ कक्षायां वा भागेभ्यो
योजनानि च व्यस्तम् ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥
(भानां नक्षत्राणां चक्रमितिविग्रहे नक्षत्र-चक्रम् । नक्षत्रसमूहश्च ॥)

भज, इक् भासि । इति कविकल्पद्रुमः ॥ (चुरा० पर०-अक०-सेट् ।) इक्, भञ्जयति । भासि दीप्तौ । इति दुर्गादासः ॥

भज, क पाके । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक० सेट् ।) क भाजयति । विश्राणने इति प्राञ्चः । विश्राणनं दानम् । इति दुर्गा दासः ॥

भज, ञ औ भागसेवयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) ञ विभजति विभजते धनं भ्राता । औ अभाक्षीत् कृष्णं साधुः । इति दुर्गादासः ॥

भजत् [त्] त्रि, (भजति विभजतीति वा । भज + लटः शत्रादेशः ।) भागकर्त्ता । सेवा-कर्त्ता । इति भजधातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम् ॥

भजनं, क्ली, (भज + भावे ल्युट् ।) भागः । सेवा । इति भजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ।
"दाराः के ये भजनसहाया:
पुत्राः के ये तनुजकायाः ।
धनमपि तद्धरिभजनार्थं
नो चेदेतत् सर्व्वं व्यर्थम् ॥"
इति मोहमुद्गरः ॥

भजमानः, त्रि, (भजते फलमनुभवतीति । भज + "ताच्छील्यवयोवचनशक्तिषु चानश् ।" ३ । २ । १२९ । इति चानश् । शानच् वा ।) न्याय्यम् । न्यायागतद्रव्यादिः । इत्यमरः । २ ।८। २४ ॥ भागकर्त्ता । सेवाकर्त्ता । इति भजधातोः कर्त्तरि शानप्रत्ययेन निष्पन्नम् ॥ (सात्वतनृपस्य पुत्रभेदः । यथा, भागवते । ९ । २४ । ६ ।
"पुरुहोत्रस्त्वनोः पुत्त्रस्तस्यायुः सात्वतस्ततः ।
भजमानो भजिर्दिव्योवृष्णिर्देवावृधोऽन्धकः ॥")

भञ्जकः, त्रि, (भञ्ज् + ण्वुल् ।) भञ्जनकर्त्ता । भनक्ति यः इत्यर्थे भनजधातोः कर्त्तरि णकप्रत्य-येन निष्पन्नः ॥

भञ्जन्, त्रि, वर्त्तमानभञ्जनाश्रयः । इति भनज-धातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम् ॥

भञ्जनं, क्ली, मोटनम् । इति भनजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १२ । ५९ । ६२ ।
"यत्नाच्च विविधाश्चैव क्रियास्तेषाञ्च वर्णिताः ।
अवमर्दः प्रतीघातः केतनानाञ्च भञ्जनम् ॥")

भञ्जनकः, पुं, (भनक्ति आमर्द्दयतीति । भञ्ज + ल्युः । ततः स्वार्थे संज्ञायां वा कन् ।) मुखरोग-विशेषः । तस्य निदानादि यथा,—
"वक्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥"
इति माधवकरः ॥

भञ्जरः, पुं, (भनक्तीति । भञ्ज + बाहुलकात् अर-प्रत्ययः ।) देवकुलोद्भूततरुः । तत्पर्य्यायः । चात्विमः २ । इति त्रिकाण्डशेषः ॥

भञ्जा, स्त्री, (भनक्ति भयादिकमिति । भञ्ज + अच् । टाप् ।) अन्नपूर्णा । यथा,—
"भीतिच्छा भयच्छेत्री च भावनाभयवर्जिनी ।
भीमाङ्गवासिनी भञ्जा भित्तिसंवित्तिवर्द्धिनी ॥"
इति रुद्रयामले सप्तविंशारहस्यम् ॥

भट, भृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) भृतिरिह पोषणम् । कर्म्मभूल्य-मिति गोविन्दभट्टः । भटति भृत्यं स्वामी । इति दुर्गादासः ॥

भट म भाषणे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् घटादिः ।) म भटयति । भाषणं कथनम् । इति दुर्गादासः ॥

भटः, पुं, (भण्यते भ्रियते इति । यद्वा भटतीति । भट + अच् ।) योद्धा । इत्यमरः । २ । ८ । ६१ ॥ (यथा, भागवते । ८ । १० । ९ ।
"उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ।
केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥"
म्लेच्छभेदः । इति हेमचन्द्रः ॥ वीरः । (यथा, नैषधे । १ । १३२ ।
"पदे पदे सन्ति भटा रणोद्भटा
न तेषु हिंसारस एष पूर्य्यते ।
धिगीदृशन्ते नृपते ! कुविक्रमं
कृपाश्रये यः कृपणे पतत्रिणि ॥")
पामरविशेषः । इति मेदिनी । टे, २४ ॥ रजनीचरः । इति शब्दरत्नावली ॥ वर्णसङ्कर-विशेषः । यथा,
"वर्द्धकाराद्भटो जातो नाटिक्यां वरवाहकः ॥"
इति पराशरपद्धतिः ॥

भटा, स्त्री, (भट + टाप् ।) इन्द्रवारुणी । इति रत्नमाला । राखालशसा इति भाषा ॥

भटित्रं, क्ली, (भटति भज्यते वेति । भट् + इत्र ।) शूलपक्वमांसादि । इत्यमरः । २ । ९ । ४५ ॥ काबाब इति पारस्यभाषा ॥

भट्टः, पुं, (भटतीति । भट् + बाहुलकात् तन् ।) जातिविशेषः । भाट इति भाषा । तस्योत्-पत्तिर्यथा,—
"वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव ह ।
स भट्टो वावदूकश्च सर्व्वेषां स्तुतिपाठकः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥ अपि च ।
"क्षत्त्रियाद्विप्रकन्यायां भट्टो जातोऽनुवाचकः ॥"
इति युधिष्ठिरपरशुरामसंवादे जातिसङ्कर-लक्षणम् ॥ शिविराजिके राज्ञा तस्य वासो देयः । यथा,
"ब्राह्मणं क्षत्त्रियं वैश्यं सच्छूद्रं गणकं शुभम् ।
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविराजिके ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०१ अः ॥

भट्टाचार्य्यः, पुं, (भट्टः सुतातभट्टः । आचार्य्यः उदयनाचार्य्यः तौ तुल्यतया तत्तन्मताभिज्ञत्वेना-

च्यच्छेति । अण् ।) तुतातभट्टमतं न्यायशास्त्रम् उदयनाचार्य्यमतं न्यायशास्त्रम् एतदुभयशास्त्रवेत्ता । एतदुभयमतं जानाति यः इत्यर्थे ढघेकादिति कारकात् कर्त्तरि भणिता श्लप्रत्ययेन निष्पन्नः ॥

भट्टार:, त्रि, (भटतीति । भट्+क्विप् । भट् चासौ तारश्चेति कर्म्मधारयः । पृषोदरादित्वात् साधुः । यद्वा भट्टं स्वामित्वं ऋच्छतीति । अण् ।) पूज्यः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ७ । ८६७ ।
"नोणविक्कारभट्टारप्रशस्तकलशादयः ।
बद्धाथ हर्षदेवेन कारागारं प्रवेशिताः ॥")

भट्टारक:, पुं, (भट्टार । संज्ञायां कन् ।) नाट्योक्तौ राजा । इत्यमरः ।१।७।१३॥ देवः । तपोधनः । इति मेदिनी । के, २५० ॥ पूज्ये त्रि । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।६।२४०।
"प्रविष्टेषु ततः कोपात् पुरं शुभधरादिषु ।
भट्टारकामठे दिद्दा भूयः पुत्तं न्यसर्ज्जयत् ॥")

भट्टारकवार:, पुं, (भट्टारः संज्ञायां कन् । भट्टारकः सूर्य्यः तस्य वारः ।) रविवारः । यथा,—
"सखे । श्वायुनिर्म्मितपाशाख्यव भट्टारकवारे कथमेतान् दन्तैः खण्डयामि ॥" इति हितोपदेशे १ परिच्छेदे मृगं प्रति जम्बूकवाक्यम् ॥

भट्टि:, पुं, स्वनामख्यातरामकथाश्रयमहाकाव्यम् । तत्तु वलभीवास्तव्यश्रीस्वामिसूनुभट्टमहाब्राह्मणमहावैयाकरणेन कृतम् । इति जयमङ्गलकृता सट्टीका ॥ एतत् काव्यं भर्त्तृहरिणा कृतमिति भरतमल्लिकेन लिखितम् ॥

भट्टिनी, स्त्री, (भट्टं स्वामित्वमस्या अस्तीति । भट्ट+इनिः+ङीप् ।) नाट्योक्तौ अकृताभिषेका राजपत्नी । इत्यमरः । १ । ७ । १३ ॥ ब्राह्मणभार्य्या । इति मेदिनी । ने, ३१ ॥

भण्ड इक् शिवे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । इदित् ।) शिवं कल्याणक्रिया वेदेष्वेव । प्रतारणे प्रसिद्धोऽयम् । इक्, भण्डयति प्रतारको मुग्धं धनदानाङ्गीकारेण । इति दुर्गादासः ॥

भण्ड इ ङ वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) परिभाषण इति गोविन्दभट्टः । परिहास इति चतुर्भुजः । इ भण्ड्यते ङ भण्डते विडम्बी लोकः । इति दुर्गादासः ॥

भण्ड:, पुं, (भण्डतीति । भडि इङ परिहासे परिभाषणे वा+अच् ।) वर्णसङ्करजातिविशेषः । स तु लेटात् तीवरकन्यायां जातः । यथा,—
"लेटस्तीवरकन्यायां जनयामास षट्सुतान् ।
मालं मल्लं मातरञ्च भण्डं कोलञ्च कन्दरम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

भण्डिल:, पुं, (भण्डतीति । भडि+"सलिकल्यनिमहिभडिभण्डीति ।" उणा० १ । ५५ । इति इलच् ।) सेवकः । शूरः । इत्युणादिकोषः ॥

भण क शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-द्विक०-सेट् ।) क, अबीभणत् अबभाणत् स चेह वक्तृवाक्यम् । श्रीजयदेवकृतहरिसेवं भणति परमरमणीयम् । इति दुर्गादासः ॥

भणितं, त्रि, (भण+क्तः ।) शब्दितम् । कथितम् । यथा,—
"श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।"
इति गीतगोविन्दः ॥

भणिति:, स्त्री, (भण्यते इति । भण+क्तिन् ।) वाक्यम् । इति भूरिप्रयोगः त्रिकाण्डशेषश्च ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५४ ।
"नियन्त्रिता यद्भणितिस्तद्गुणोदीरणादियम् ।
अतिप्रसङ्गभङ्गात्तन्नैयत्तावाप्तितः पुनः ॥")

भण्टाकी, स्त्री, (भण्यते भण्यते वा । भट् भृतौ भण शब्दे वा+"पिनाकादयश्च ।" उणा० । ४ । १५ । इति आक । निपात्यते च । गौरादित्वात् ङीष् ।) वार्त्ताकी । इत्यमरः । २ । ४ । ११४ ॥ वृहती । इति रत्नमाला ॥ (वृन्ताकम् । तत्पर्य्यायो यथा,—
"वृन्ताकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टिकापि च ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भण्डुक:, पुं, (भण्डतीति । भडि-उकन् ।) श्योनाकवृक्षः । इति रत्नमाला ॥ क्वचित् भण्डुकोऽपि पाठः ॥

भण्ड:, पु, (भण्डते इति । भडि प्रतारणे+अच् ।) अश्लीलभाषी । भाँड़ इति भाषा । इति संक्षिप्तसारोणादिवृत्तिः ॥ तत्पर्य्यायः । चाटुपटुः २ । इति भूरिप्रयोगः ॥

भण्डक:, पुं, (भण्ड+संज्ञायां कन् ।) खञ्जनपक्षी । इति जटाधरः ॥

भण्डनं, क्ली, (भडि+भावादौ ल्युट् ।) खलीकारः । कवचम् । युद्धम् । इति मेदिनी । ने, १०० ॥

भण्डहासिनी, स्त्री, (भण्डेन खलीकारेण हसति या । हस्+णिनिः । ङीप् ।) गणिका । इति शब्दरत्नावली ॥

भण्डि:, स्त्री, (भडि+इन् ।) वीचिः । इति हारावली ॥

भण्डिका, स्त्री, मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डिर:, पुं, (भण्डिल+रलयोरैक्यम् ।) शिरीषवृक्षः । यथा । भण्डिलो भण्डिरो नेमीति भरतधृतवाचस्पतिः ॥

भण्डिल:, पु, (भण्डते परिहसतीवेति भाषते इवेति वा । भडि+"सलिकल्यनिमहिभडिभण्डीति ।" उणा० १ । ५५ । इति इलच् ।) शिरीषवृक्षः । इत्यमरः । २ । ४ । ६३ ॥ (तत्पर्य्यायो यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भण्डिल:, त्रि, (भडि+इलच् ।) शुभः । दूतः । इत्युणादिकोषः ॥ शिल्पी । इति संक्षिप्तसारोणादिवृत्तिः ॥

भण्डी, स्त्री, (भण्डते इति । भडि-इन् ।) कृदिकारादिति पक्षे ङीष् ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ६१ ॥ (पर्य्यायोऽस्या यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी गण्डीरी च मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥"
श्वेतत्रिवृता । तत्पर्य्यायो यथा,—
"श्वेतात्रिवृता भण्डी स्यात् त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भण्डीतकी, स्त्री, (भण्डी सती तकतीति । तक+अच् । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इति भावप्रकाशः ॥

भण्डीर:, पुं, (भडि+बाहुलकात् ईरन् ।) समष्ठिलक्षुपः । तण्डुलीयशाकः । (यथा,—
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलो वीजो विषघ्नश्चाल्पमारिषः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (वटवृक्षः । यथा, रामायणे । ३ । ७५ । २४ ।
"मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥"
"भण्डीरो वटः ।" इति तट्टीकायां रामानुजः ।)

भण्डीरलतिका, स्त्री, (भण्डीर इव लतति इति । लतिः सौत्रो धातुः+अच् । स्वार्थे कन् । टाप् अत इत्वम् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

भण्डीरी, स्त्री, (भण्डीर । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इत्यमरः ॥

भण्डील:, पु, (भण्डीर । रलयोरेकत्वम् ।) मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डूक:, पुं, (भडि+ऊक् ।) मत्स्यविशेषः । भाकुर इति भाषा । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । वृष्यत्वम् । श्लेष्मकरत्वम् । गुरुत्वम् । विष्टम्भित्वम् । रक्तपित्तहरत्वञ्च । इति भावप्रकाशः ॥ श्योनाकवृक्षः । इति रत्नमाला ॥

भद इक् शुभे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इक्, भन्दयति शुभं कल्याणक्रिया । इति दुर्गादासः ॥

भद इ ङ हर्षे । प्रीतौ । शुभे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्-इदित् ।) इ भन्द्यते । ङ भन्दते पण्डितः सदा । इति दुर्गादासः ॥

भदन्त:, पुं, (भन्दते इति । भदि कल्याणे+"भन्देर्नलोपश्च ।" उणा० ३ । १३० । इति झच् । नलोपश्च ।) सौगतादिबुद्धः । इति हेमचन्द्रः ॥ मायादेवीसुतः । सुतेजः । पूजिते, त्रि । इत्युणा-

दिकोषः ॥ (भद्रनः प्रशस्तिः । इत्युणादौ । ३ । १३० । शुभवाख्यायां उज्ज्वलदत्तः । यथा, कथासरित्सागरे । ३६ । १७८ ।

"तत्राविश्य यथावत् तं भद्रन्तमभिगम्य च ।
परिचर्य्यापरो भक्त्या चौरिं वर्षाण्यशेषतः ॥")

भद्राकः, पुं, क्ली, (भन्दते इति । भदि + "पिनाकादयश्च ।" उणा० । ४ । १५ । इति आकः । नलोपश्च ।) मङ्गलम् । इत्युणादिकोषः ॥

भद्रं, क्ली, (भन्दते इति । भदि कल्याणे + "ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रेति ।" उणा० । २ । २८ । इति रन् । निपात्यते च ।) मङ्गलम् । (यथा, ऋग्वेदे । २ । २६ । २ ।

"यजस्व वीर । प्रविहि मनायतो भद्रं मनः
कृणुष्व वृत्रतूर्य्ये ॥"

यथा च कामन्दकीयनीतिसारे । १३ । १२ ।

"किरीटमणिचित्रेषु मूर्द्धसु चाप्यसारिषु ।
नाहत्वा विद्विषां पादं पुरुषो भद्रमश्नुते ॥")

मुस्तम् । काञ्चनम् । इति मेदिनी । रे, ७१ ॥

भद्रं, क्ली, स्त्री, (भदि + रन् निपात्यते च ।) करणविशेषः । इति मेदिनी । रे, ७२ ॥ तत्तु विष्टिभद्राख्येन प्रसिद्धमशुभदम् । इति ज्योतिषम् ॥

भद्रः, पुं, (भन्दते इति भदि + रन् निपातितश्च ।) शिवः । खञ्जरीटः । वृषभः । कदम्बकः । करिजातिविशेषः । इति मेदिनी । रे, ७० ॥ नवशुक्लावलान्तर्गतजिनभेदः । रामचरः । सुमेरुः । इति हेमचन्द्रः ॥ वृक्षः । इति राजनिर्घण्टः ॥ (चन्दनम् । तत्पर्य्यायो यथा,—

"श्रीखण्डं चन्दनं नश्री भद्रः श्रीत्तेलपर्णिकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) ज्योतिषोक्तमौलिकानां पद्धतिविशेषः । यथा,—

विष्णुर्नागः खिलपिलगृत इन्द्रो गुप्तः पालो भद्रः ।

इति कुलाचार्य्यकारिका ॥ (वसुदेवस्य पुत्त्रभेदः । यथा, भागवते । ९ । २४ । ४७ ।

"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च ।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥"

सरोवरविशेषः । यथा, मत्स्यपुराणे ।११२।४६।

"अरुणोदं मानसञ्च सितोदं भद्रसंज्ञितम् ।
तेषामुपरि चत्वारि सरांसि च वनानि च ॥"

तृतीयमनोरुत्तमस्यान्तरे देवगणभेदे बहुवचनान्तोऽयम् । यथा, भागवते । ८ । १ । २४ ।

"वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥"

स्वायम्भुवमन्वन्तरे विष्णोर्दक्षिणागर्भजात तुषितनामकदेवगणभेदः । यथा, भागवते ।४।१।६-७।

"तां कामयानां भगवानुवाह यजुषां पतिः ।
तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥
तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः ॥
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट् ॥"

पर्व्वतविशेषः । यथा, ब्रह्माण्डपुराणे । भुवनकोषे । ४० अध्याये ।

"अरुणः शिखिरौतश्च सको वैदूर्य्यपर्व्वतः ।
कपिलः पिङ्गलो भद्रः सुरसश्च महाचलः ॥"

एकादशद्वापरजातो महेश्वरस्य ऋषिमूर्त्त्यवतार विशेषः । यथा, ब्रह्माण्डे । २७ अध्याये ।

"एकादशद्वापरे तु व्यासस्तु त्रिवृतो यदा ।
तदाप्यहं भविष्यामि गङ्गाद्वारे युगान्तिके ॥
भद्रो नाम महातेजास्तत्रापि मम पुत्त्रकाः ।
भविष्यन्ति महात्मानो सुवृत्ता वेदपारगाः ॥")

भद्रः, त्रि, (भन्दते इति । भदि कल्याणे रन् । निपात्यते च ।) श्रेष्ठः । साधुः । इति मेदिनी । रे, ७२ ॥ (यथा, पञ्चतन्त्रे । १ । ७६ ।

"भद्र । कण्टक ! अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य्य स्थितः ॥")

भद्रकं, क्ली, (भद्र + संज्ञायां स्वार्थे वा कन् ।) भद्रमुस्तकम् । इति रत्नमाला ॥ (देवदारुशब्देऽस्य विषयोऽभिहितः ॥) मनोज्ञे, त्रि । इति त्रिकाण्डशेषः ॥

भद्रकः, पु, (भद्र + संज्ञायां कन् ।) देवदारुः । इति शब्दरत्नावली ॥

भद्रकण्टः, पु, (भद्रः कण्टो यस्य ।) गोक्षुरः । इति राजनिर्घण्टः ॥

भद्रकाली, स्त्री, (भद्रा मङ्गलमयी चासौ काली चेति कर्म्मधारयः । यद्वा, भद्रं कल्याणं कालयतीति । भद्र + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ङीप् ।) गन्धोली । कात्यायनी । इति मेदिनी । ली, १५८ । तस्या उत्पत्तिर्यथा,—

श्रीऔर्व्व उवाच ।

"शृणु त्वं नृपशार्दूल । भद्रकाली यथा पुरा ।
प्रादुर्भूता महाभागा महिषेण सदैव तु ॥
महिषासुर एवासौ निद्रायां निशि पर्व्वते ।
स्वप्नं प्रददृशे वीरो दारुणं घोरदर्शनम् ॥
महामाया भद्रकाली छित्त्वा खड्गेन कात्शिरम् ।
पपौ तस्य च रक्तानि खादितास्यातिभीषणा ॥
ततः प्रातर्भययुतः स दैत्यो महिषासुरः ।
तामेव पूजयामास सुचिरं सानुगस्तदा ॥
आराधिता तदा देवी महिषेणासुरेण वै ।
प्रादुर्भूता भद्रकाली भुजैः षोड़शभिर्युता ॥
ततः प्रणम्य महिषो महामायां जगन्मयीम् ।
उवाचेदं वचो नम्रमूर्त्तिर्भक्तियुतोऽसुरः ॥

महिष उवाच ।

देवि । खड्गेन संछिद्य शोणितानि शिरो मम ।
त्वया भुक्तानि दृष्टानि मया स्वप्ने सुनिश्चितम् ॥
अवश्यं तत्त्वया कार्य्यं मया ज्ञातं प्रमाणतः ।
एतद्रुधिरपानं मे तच्चैकं देहि मे वरम् ॥
वध्यस्त्वयाहं नास्त्यत्र संशयः परमेश्वरि ।।
ममापि तत्र नो दुःखं नियतिः केन लङ्घ्यते ॥
किन्तु त्वयैव सहितः शम्भुराराधितः पुरा ।
मम पित्रा महर्षेण जातः पश्चादहं ततः ॥
मयाप्याराधितः शम्भुः प्राप्ताश्चेष्टास्तथा वराः ।
मन्वन्तरत्रयं यावदासुरं राज्यमुत्तमम् ।
अकण्टकं मया भुक्तमनुतापो न विद्यते ॥
कात्यायनेन मुनिना शप्तोऽहं शिष्यकारणात् ।
सीमन्तिनी विनाशं ते करिष्यति न संशयः ॥
पुरा मुनिं तपस्यन्तं रौद्राश्वं नाम चोत्तमम् ।
मुनेः कात्यायनाख्यस्य शिष्यं हिमवदन्तिके ॥
दिव्यस्त्रीरूपमतुलं कृत्वाहं कौतुकात्तदा ।
मया संमोहितो विप्रोऽत्यजन्मूढ़स्तदा तपः ॥
न दूरात् संस्थितेनाहं मुनिना कात्यसूनुना ।
ज्ञात्वा मायां तदा शप्तः शिष्यार्थे क्रोधवह्निना ॥
यस्मात्त्वया मे शिष्योऽयं मोहितस्तपसश्च्युतः ।
स्त्रीरूपेण ततस्त्वां स्त्री हनिष्यति ॥
इति मां शप्तवान् पूर्व्वं मुनिः कात्यायनः पुरा ।
तस्य शापस्य कालोऽयमागत्य समुपस्थितः ॥
देवेन्द्रत्वं मया प्राप्तं भुक्तं त्रिभुवनं समम् ।
किञ्चिन्न शोच्यं तत्रास्ति वाञ्छनीयं हि यन्मया ॥
तस्मात्त्वां वै प्रपन्नोऽहं प्रार्थ्यं शेषं हि यन्मया ।
तद्देहि देवि दुर्गे । त्वं भूयस्तुभ्यं नमो नमः ॥

श्रीदेव्युवाच ।

"प्रार्थनीयो वरो यस्ते तं वृणु त्वं महासुर ।।
दास्यामि ते वरं प्रार्थ्यं संशयो नात्र विद्यते ॥"

महिष उवाच ।

"यज्ञभागमहं भोक्तुमिच्छामि त्वत्प्रसादतः ।
यथा यज्ञेषु सर्व्वेषु पूज्योऽहं स्यां तथा कुरु ॥
त्वत्पादसेवां न त्यक्ष्ये यावत् सूर्य्यः प्रवर्त्तते ।
एवं वरद्वयं देहि यदि देयो वरो मम ॥"

श्रीदेव्युवाच ।

"यज्ञभागाः सुरेभ्यश्च कल्पिता वै पृथक्
पृथक् ।
भागो न विद्यते चान्यो यद्दास्यामि तवाधुना ॥
किन्तु त्वयि मया युद्धे निहते महिषासुर ! ।
नैव त्यक्ष्यसि मत्पादं सततं नात्र संशयः ॥
मम प्रवर्त्तते पूजा यत्र यत्र च तत्र ते ।
पूज्यश्चिन्त्यश्च तत्रैव कायोऽयं तव दानव । ॥
इति श्रुत्वा वचस्तस्याः प्रत्युवाच महिषासुरः ।
वरं प्राप्येह मुदितः प्रसन्नवदनस्तदा ॥
उग्रचण्डे ! भद्रकालि । दुर्गे देवि ! नमोऽस्तु ते ।
प्रभूता मूर्त्तयो देवि ! भवत्याः सकलात्मिकाः ॥
काभिस्त्वं मूर्त्तिभिः पूज्यो यत्रोऽहं परमेश्वरि ।।
तत् समाचक्ष्व यदि मे भवत्येह कृपा कृता ॥"

श्रीदेव्युवाच ।

"यानि नामानि चोक्तानि त्वयेह महिषासुर ।।
तासु मूर्त्तिषु संस्थः पूज्यो लोके भविष्यति ॥
उग्रचण्डेति या मूर्त्तिर्भद्रकाली त्वहं पुनः ।
यया मूर्त्त्या त्वां हनिष्ये सा दुर्गेति प्रकीर्त्तिता ॥
एतासु मूर्त्तिषु सदा पादलग्नो नृणां सदा ।
पूज्यो भविष्यसि त्वं वै देवानामपि रक्षसाम् ॥
आदिसृष्ट्या उग्रचण्डामूर्त्त्या त्वं निहतः पुरा ।
द्वितीयसृष्टौ तु भवान् भद्रकाल्या मया हतः ॥
दुर्गारूपेणाधुना त्वां हनिष्यामि सहानुगम् ।
किन्तु पूर्व्वं न गृहीतस्त्वं मया पादयोस्तथे ॥
अधुना प्रार्थितवरो गृहीतः पूर्व्वकाययोः ।
गृहीतश्च पश्चात्त्वं यज्ञभागोपभुक्तये ॥"

इति कालिकापुराणे ५९ अध्यायः ॥*॥

गङ्गायाः पश्चिमे तीरे ग्रामविशेषश्च ॥

भद्रकाशी, स्त्री, (भद्राय काशते इति । काश + अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

भद्रकुम्भः, पुं, (भद्रस्य भद्राय वा कुम्भोऽथवा भद्रः कुम्भः ।) पूर्णकुम्भः । इत्यमरः । २ । ८ । ३२ ॥

भद्रगन्धिका, स्त्री, (भद्रो गन्धोऽस्यास्तीति । ठन् । टाप् ।) मुस्तकम् । इति रत्नमाला ॥

भद्रङ्करः, त्रि, (भद्रं करोतीति । कृ + "बाहुलकात् खच् । मुम् च ।) मङ्गलकारकः । तत्पर्य्यायः । क्षेमङ्करः २ क्षेमकारः ३ मद्रङ्करः ४ शुभङ्करः ५ अरिष्टतातिः ६ शिवतातिः ७ शङ्करः ८ । इति भूरिप्रयोगः ॥

भद्रचूडः, पुं, (भद्रा चूडास्य ।) लङ्काशायी । इति शब्दचन्द्रिका । लङ्कालिज इति भाषा ॥

भद्रजः, पुं, (भद्राय जायते इति । जन + डः ।) इन्द्रयवः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्येन्द्रयवशब्दे ज्ञातव्याः ॥)

भद्रतरुणी, स्त्री, (भद्रा तरुणीव ।) कुब्जकवृक्षः । इति राजनिर्घण्टः ॥ (तथास्या अन्यतरः पर्य्यायः ।
"कुब्जको भद्रतरुणी वृहत्पुष्पोऽतिकेसरः ।
महा सहा कण्टकाढ्या नीलालिकुल-
सङ्कुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भद्रतुरगं, क्ली, (भद्रा तुरगा अत्र ।) जम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । यथा,—
"माल्यवज्जलधिमध्यवर्त्ति यत्तत्तु भद्रतुरगं
जगुर्बुधाः ।"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

भद्रदन्तिका, स्त्री, (भद्रा दन्तिका ।) दन्तीवृक्षभेदः । भद्रदन्ती इति ख्याता । तत्पर्य्यायः । केशरुहा २ विषभद्रा ३ जयावहा ४ आवर्त्तकी ५ ज्वराङ्गी ६ जयाह्वा ७ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रेचनत्वम् । कृमिशूलकुष्ठामदोषतुन्दामयनाशित्वञ्च । इति राजनिर्घण्टः ॥

भद्रदारु, क्ली, पुं, (भद्रं दारु ।) देवदारु । इत्यमरभरतौ ॥ सरलकाष्ठम् । इति रत्नमाला ॥

भद्रदार्व्वादिकः, पुं, (भद्रदारु आदौ यस्य कप् ।) औषधगणविशेषः । यथा । भद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीबलातिबलार्त्तगलकच्छुरासल्लकीकुबेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्यैरण्डाश्मभेदकालर्क्काकर्णशतावरीपुनर्नवावसुकवशिरकाञ्चनकभार्गीकार्पासीवृश्चिकालीपत्तूरवदरयवकोलकुलत्थप्रभृतीनि । इति सुश्रुतसूत्रस्थानस्य संशोधनसंशमनीयाध्यायः ॥ * ॥
अपिच ।
"देवदारु हरिद्रे द्वे वरुणः कुष्ठमेव च ।
महानिम्बं नागबला श्यामला नरलोऽपरः ।
पाटला चातिगुप्ता च मुण्डी पाषाणभेदिका ।
शतावरी चार्कमूलं गुडूची गणिकारिका ॥
पुनर्नवा च वास्तूकवृश्चीवकर्णकनाशनम् ।
गोक्षुरं शरमूलञ्च कुशमूलं समांशिकम् ॥
जनचत्वारिंशद्द्रव्यैर्भद्रदार्व्वादिको गणः ॥"
इति शब्दचन्द्रिका ॥ * ॥
एतन्मध्ये चतुर्द्दशद्रव्याणि न प्राप्तानि ॥

भद्रनामा, [न्] पुं, (भद्रं नाम यस्य ।) काष्ठकुट्टपक्षी । इति त्रिकाण्डशेषः । काठ्ठोकरा इति भाषा ॥

भद्रनामिका, स्त्री, (भद्रं नामास्याः । कप् । टाप् । अत इत्वम् ।) त्रायन्तीवृक्षः । इति रत्नमाला । वहुला इति भाषा ॥

भद्रनिधिः, स्त्री, (भद्रा निधयोऽत्र ।) महादानविशेषः । यथा,—

इन्द्र उवाच ।

"विधानं ब्रूहि मे ब्रह्मन् । दानस्यास्य महानिधेः ।
यथा देव ! विशेषेण विष्णोरानन्दकारकम् ॥"

ब्रह्मोवाच ।

"पुण्यां तिथिं प्राप्य तु पौर्णमास्यां
तथोपरागे शशिसूरयोर्वा ।
चतुर्थनाड्यिस्वयनद्वये वा
प्रबोधने प्रस्वपनेऽथ विष्णोः ॥
कुर्य्याद्दृढं चौडम्बरमेव कुम्भं
हिरण्मयमानेन यथात्मशक्त्या ।
तथा पिधानञ्च सुराजतं स्याद्
हिरण्यभारेण तु पूरयेत्तत् ॥
तदर्द्धतोऽर्द्धेन तदर्द्धतो वा
स्वशक्तितः स्वर्णपलैः शतेन ।
तदर्द्धमध्येन तु वित्तशक्त्या
पलत्रयादूनमथो न कुर्य्यात् ॥
तत्ताम्रभाण्डे कनकं निधेयं
सवज्रनीलोत्तमपद्मरागम् ।
सुमुक्तवैदूर्य्यसविद्रुमञ्च
तद्राजतं पात्रमधोमुखं स्यात् ॥
एवन्तु तं भद्रनिधिं सुविद्वान्
कृत्वासने प्रावरणोपयुक्ते ।
कुशोत्तरे दर्पणचामराढ्यं
सपादुकोपानहच्छत्रयुक्तम् ।
तं क्षौमवस्त्रोत्तमयुग्मयुक्तं
सम्पूजयेत्सर्व्ववरैरथैनम् ॥
आदौ तु पश्चान्तमाप्य विष्णुं
संस्थाप्य संसारतरं समर्च्य ।
तथेश्वरं पावकमेव हुत्वा
आमन्त्रयेद्भद्रनिधिं ततस्तम् ॥
श्रीखण्डकर्पूरसकुङ्कुमेन
पश्चान्तरं वाम श्रियः प्रलिख्य ।
नमस्तथोङ्कारयुतञ्च पात्रे
तद्राजतेऽप्येवमथार्च्चयेत्ताम् ॥
त्वया समस्तामरसिद्धयक्ष-
विद्याधरेन्द्रोरगकिन्नरेन्द्रैः ।
गन्धर्व्वदैत्यासुरदानवेन्द्रै-
र्यतं कृतं विश्वमिदं नमस्ते ॥
समस्तसंसारकरी त्वमेव
विभोः सदानन्दमयी च माया ।
समस्तकल्याणनिधिः समाधि-
र्हरिप्रिये । भद्रनिधे ! नमस्ते ॥
'एवं संपूज्य विधिना ततो विप्रमथार्च्चयेत् ।
किरीटाङ्गदनिष्काद्यैः कुण्डलाङ्गुलिभूषणैः ॥
अलंकृत्य हरिं यद्वत् पीताम्बरधरं ततः ।
पूजयेदच्युतं ध्यात्वा मन्त्रध्यानेन भक्तिमान् ॥
भूदेवोऽसि विभो । नित्यं नित्यानन्दमयो
हरे ।।
.हर मे दुष्कृतं सर्व्वं । कृपाकर । नमोऽस्तु ते ॥
भूदेव । भगवान् भर्ग भवभङ्गकरेश्वर ! ।
भवभूतिकरो जिष्णो । प्रभविष्णो नमोऽस्तु ते ॥
एवं पूज्य हृदि ध्यात्वा तं दिव्यं ब्रह्मरूपिणम् ।
ततो भद्रनिधिं दद्यान्मन्त्रध्यानेन वासव ! ॥
स्वगोत्रोच्चारणेनादौ विप्रनाम तथात्मनः ।
यवदर्भतिलैः सार्द्धमुदकं संपरित्यजेत् ॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये ।
सर्व्वाघौघविघाताय विष्णोर्दानं मया कृतम् ॥
तदनेन सरत्नेन धातुत्रययुतेन च ।
सक्षौमाम्बरयुक्तेन सादर्शपादुकेन च ॥
सासनेन सच्छत्रेण चामरोपानहेन च ।
सदानन्दनिधानेन प्रीयतां विष्णुरीश्वरः ॥
एवमुच्चार्य्य तं दद्याद्द्विजाय हरिरूपिणे ।
गोप्येन विधिना दद्याद्धेमसंख्यां न कीर्त्तयेत् ॥
प्रकीर्त्तिते कोटियुगायुतं फलं
प्रगोपिते कल्पगणैर्न संक्षयः ।
इतीयमज्ञो न तु कीर्त्तयेत् सुधी-
र्निधानमध्ये निहितञ्च यद्वसु ॥
एवं कृते स्यान्मनुजः कृतात्मा
तपेन च स्वामरणं कदाचित् ।
प्रयाति विष्णोः पदमव्ययं तत्
शिवात्मकानन्दमयं सदाख्यम् ॥"
इत्याद्ये वह्निपुराणे भद्रनिधिदाननामाध्यायः ॥

भद्रपदा, स्त्री, (भद्रं पदमासाम् ।) भाद्रपदा । पूर्ब्बभाद्रपदोत्तरभाद्रपदानक्षत्रम् । इत्यमरटीकायां रायमुकुटः ॥ (यथा, वृहत्संहितायाम् । ६ । ९ ।
"नगा तु पवनयाम्या
वलानिपैतामहात् त्रिभाक्तियः ।
गोवीथ्यामश्विन्यः
पौष्णं द्वे चापि भद्रपदे ॥")

भद्रपर्णा, स्त्री, (भद्राणि पर्णान्यस्याः । टाप् ।) कटम्भरावृक्षः । इति शब्दमाला ॥ (गुणादिकमस्याः कटम्भराशब्दे विज्ञेयम् ॥)

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः । गौरादित्वात् ङीष् ।) गाम्भारी । इत्यमरः । २ । ४ । ३६ ।
(अस्याः पर्य्यायो यथा,—
"गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥
काश्मिरी काश्मरी हीरा काश्मर्य्यः पीत-
रोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च ॥")
प्रसारिणी । इति जटाधरः ॥ (अस्याः पर्य्यायो यथा,—

"प्रसारणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"प्रसारणी च गन्धाली भद्रपर्णी कटम्भरा॥"
इति वैद्यकरत्नमालायाम्॥
यथा, शतपथब्राह्मणे।३।४।१।१६। इत्यस्य भाष्ये
"काश्मर्य्यां भद्रपर्ण्यां प्रकृतौ पलाशवैकङ्कता-
दीनामेच्छिकत्वादत्र नियमविधिः॥")

भद्रबलनः, पुं, (भद्रं महद्बलनं बलमस्य।) बलरामः। इति शब्दमाला॥

भद्रमल्लिका, स्त्री, (भद्रा मल्लिका।) गवाक्षी। इति शब्दमाला॥

भद्रमुञ्जः, पुं, (भद्रो मुञ्ज इति कर्म्मधारयः।) मुञ्जभेदः। रामशर इति शरपत इति च भाषा। तत्पर्य्यायः। शरः २ बाणः ३ तेजनः ४ इक्षुवेष्टनः ५। अथ मुञ्जस्य पर्य्यायः। मुञ्जः १ मुञ्जातकः २ बाणः ३ स्थूलदर्भः ४ सुमेधसः ५। एतयोर्गुणाः।
"मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा।
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित्॥
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते॥"
इति भावप्रकाशः॥

भद्रमुस्तकः, पुं, (भद्रो मुस्तकः।) नागरमुस्तकः। इत्यमरः।२।४।१६०॥ (तत्पर्य्यायो यथा,—
"मेघाख्यं मुस्तकं मुस्ता गाङ्गेयं भद्रमुस्तकम्॥"
इति वैद्यकरत्नमालायाम्॥)

भद्रमुस्ता, स्त्री, (भद्रा मुस्ता।) नागरमुस्तकः। तत्पर्य्यायः। वराही २ गुन्द्रा ३ ग्रन्थिः ४ भद्रकाशी ५ कशेरुः ६ क्रोडेष्टा ७ कुरुविन्दाख्या ८ सुगन्धिः ९ ग्रन्थिला १० हिमा ११ वन्या १२ राजकशेरुः १३ कच्छोत्था १४ मुस्ता १५ अर्णोदः १६ वारिदः १७ अम्भोदः १८ मेघः १९ जीमूतः २० अब्दः २१ नीरदः २२ अभ्रम् २३ घनः २४ गाङ्गेयः २५। अस्या गुणाः। कषायत्वम्। तिक्तत्वम्। शीतलत्वम्। पाचनत्वम्। पित्तज्वरकफनाशित्वम्। संग्राहित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकः।
कुरुविन्दश्च संख्यातोऽपरः क्रोडकशेरुकः॥
भद्रमुस्तञ्च गुन्द्रा च तथा नागरमुस्तकः।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुहृत्।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते॥
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम्॥"
इति भावप्रकाशः॥

भद्रयवः, पुं, क्ली, (भद्रः शुभदो यवः।) इन्द्रयवम्। इत्यमरः।२।४।६७॥ (विवरणमस्य इन्द्रयवशब्दे ज्ञातव्यम्॥)

भद्ररेणुः, पुं, (भद्रा रेणवोऽस्य।) ऐरावतहस्ती। इति त्रिकाण्डशेषः॥

भद्रवत्, क्ली, (भद्रमस्त्यस्मिन्निति। मतुप् मस्य वः।) देवदारु। इति राजनिर्घण्टः॥

भद्रवती, स्त्री, (भद्रं विद्यतेऽस्याम्। भद्र+मतुप्। मस्य वः। ङीप्।) भद्रपर्णी। इति जटाधरः॥ (कट्फलः। अस्य पर्य्यायो यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च।
श्रीपर्णी काकमुदिका भद्रा भद्रवतीति च॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
कल्याणविशिष्टे, त्रि। यथा, महाभारते। ४।२४।१८।
"इमाश्च नः प्रिया वीर। वाचं भद्रवतीं शृणु॥"
श्रीकृष्णस्य नाग्नजितीगर्भजाता कन्या। यथा, हरिवंशे।१६०।१०-११।
"मित्रबाहुः सुनीथश्च नाग्नजित्याः प्रजाः शृणु।
भद्रकालो भद्रविन्दः कन्या भद्रवती तथा॥"
मधोर्माता। यथा, हरिवंशे।३६।३।
"आसीन्मरुवसः पुत्रः पुरुद्वान् पुरुषोत्तमः।
मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरूद्वह।॥")

भद्रवर्म्मा, [न्] पुं, (भद्रेण वृणाति आत्मानमिति शेषः। वृ+मनिन्।) नवमल्लिका। इति शब्दचन्द्रिका॥ (विवरणोऽस्य नवमल्लिकाशब्दे ज्ञातव्यः॥)

भद्रबला, स्त्री, (भद्रा बला।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। सरणा २ प्रसारणी ३ कटम्भरा ४ राजबला ५। इत्यमरः।२।४।१५३॥ अस्याः पर्य्यायान्तरं गुणाश्च प्रसारणीशब्दे द्रष्टव्याः॥ बला। इति राजनिर्घण्टः॥

भद्रवल्लिका, पुं, (भद्रा वल्लिका।) गोपवल्ली। इति रत्नमाला। अनन्तमूल इति भाषा॥

भद्रवल्ली, स्त्री, (भद्रा चासौ वल्ली चेति कर्म्मधारयः।) मल्लिका। माधवीलता। इति राजनिर्घण्टः॥ लताविशेषः। मदनमाली इति छापरमाली इति च भाषा। तत्पर्य्यायः। शीतभीरुः २ भूमिमण्डा ३ अष्टपादिका ४। इति रत्नमाला॥

भद्रश्रयं, क्ली, (भद्राय श्रीयते गृह्यते इति। श्रि+कर्म्मणि अच्।) चन्दनम्। इति रत्नमाला॥

भद्रश्रीः, पुं, (भद्रा श्रीरस्य।) चन्दनवृक्षः। इत्यमरः।२।६।१३१॥

भद्रसोमा, स्त्री, (भद्रः सोम इवास्या अत्र इति। टाप्।) गङ्गा। इति शब्दमाला॥ (कुरुवर्षस्थनदीविशेषः। यथा, मार्कण्डेये। ५९।२३।
"तस्मिन् कुलाचलौ वर्षे तन्मध्ये च महानदी।
भद्रसोमा प्रयात्युर्व्वी पुण्यामलजलौघिनी॥")

भद्रा, स्त्री, (भद्र+अजादित्वात् टाप्।) रास्ना। लक्ष्मा। व्योमनदी। तिथिभेदः। सा तु द्वितीया सप्तमी द्वादशी च॥ प्रसारणी। (अस्याः पर्य्यायो यथा,—
"प्रसारिणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
कट्फलम्। अनन्ता। इति मेदिनी। दे, ७१॥ जीवन्ती। अपराजिता। नीली। बला। शमी। वचा। दन्ती। हरिद्रा। श्वेतदूर्व्वा। काश्मरी। (पर्य्यायोऽस्या यथा,—
"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका।
कुमुदा च सदाभद्रा कट्फला लक्ष्मदन्तिका॥"
इति वैद्यकरत्नमालायाम्॥
चन्द्रशूरः। तत्पर्य्यायो यथा,—
"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
सारिवाविशेषः। गौः। इति राजनिर्घण्टः॥ काकोडुम्बरिका। इति रत्नमाला॥ (भद्राश्ववर्षस्थनदीभेदः। यथा, मार्कण्डेये।५९।७।
"शीता शङ्खावती भद्रा चक्रावर्त्तादिका-स्तथा॥")
गङ्गायास्त्रिस्रोतोऽन्तर्गतस्रोतोविशेषः। तत्तु उत्तरं कुरुवर्षीयगङ्गा। इति पुराणं शब्दमाला च॥ बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरात्मजा १२ खदूरवासिनी १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥ छायागर्भजाता सूर्य्यकन्या। यथा,—
"यमलौ तु ततस्तस्यां जनयामास भास्करः।
शनैश्चरञ्च भद्राञ्च छायायाममितद्युतिः॥
तथा च तेजसा विष्णोस्तस्य चक्रमवर्त्तयत्।
तदप्रतिहतं युद्धे दानवान्तचिकीर्षया।
तद्भगिनी सुखती भद्रा नियुक्तैव विगर्हिता॥"
इति वह्निपुराणे वैवस्वतानुकीर्त्तनम्॥
सुभद्रा। यथा,—
"आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह॥"
इति स्कान्दे भगवद्वाक्यम्॥ * ॥
विष्टिभद्रा यथा,—
"एकादश्यां चतुर्थ्यान्तु शेषार्द्धे शुक्लपक्षके।
अष्टमीपौर्णमास्योस्तु पूर्व्वार्द्धे विष्टिसम्भवः॥
कृष्णपक्षे तृतीयाया दशम्याश्च परार्द्धतः।
सप्तम्याश्च चतुर्द्दश्याः पूर्व्वार्द्धे विष्टिरीरिता॥
विहाय विवरोद्वाहि विष्टिं सर्व्वत्र वर्जयेत्।
विष्टिशेषे त्रिदण्डे हि पुच्छे कार्य्यं जयावहम्॥"
कर्म्मप्रकाशे तस्या अङ्गविशेषो यथा,—
"नाड्यस्तु पञ्चवदनं गलकस्तथैका
वक्षो दशैकसहिता नियतं चतस्रः।
नाभिः कटिः षडथ पुच्छलता च तिस्रो
विष्टेर्भुव निगदितोऽङ्गविभाग एषः॥"
अङ्गविशेषे कार्य्यध्वंसादिफलम् यथा,—
"मुखे कार्य्यध्वंसो भवति मरणञ्चाथ गलके
धनध्वानिर्वक्षसि च कटितटे बुद्धिविलयः।

कलिन्नाभीर्हेषी विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः पृथगिति फलं सर्व्वमुनयः ॥"
मनुजसुसुमितिथियुगदशशिवगुणसंख्यासु तिथिषु पूर्व्वाद्यास्वम्। आयाति विष्टिरेषा पृष्ठे शुभदा पुरस्त्वशुभा ॥ चतुर्द्दश्यादिषु पूर्व्वार्द्धादिसुखं भवतीत्यर्थः। इति ज्योतिस्तत्त्वम् ॥

भद्राकरणं, क्ली, (भद्र+डाच्। कृ+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः ॥

भद्रात्मजः, पुं, (भद्रः हितकर आत्मज इव रक्षाकरत्वात्।) खड्गः। इति त्रिकाण्डशेषः ॥

भद्रारकः पु, अष्टादशक्षुद्रद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला ॥

भद्रालपत्रिका, स्त्री, (भद्राय अलति पर्य्याप्नोतीति। अल+अच्। भद्रालं पत्रं यस्याः। कप्। टाप्। अत इत्वम्।) गन्धाली। इति शब्दमाला ॥

भद्राली, स्त्री, (भद्र+अल+अच्। भद्राल+गौरादित्वात् ङीष्।) गन्धाली। इति शब्दमाला ॥

भद्रावती, स्त्री, (भद्रमस्या अस्तीति। मतुप्। मस्य वः। संज्ञायां पूर्व्वपदस्य दीर्घः।) कट्फलवृक्षः। इति राजनिर्घण्टः ॥

भद्राश्रयः, पु, (भद्रस्याश्रयः।) चन्दनम्। इति शब्दचन्द्रिका ॥

भद्राश्वं, क्ली, (भद्रा अश्वा अत्र।) भुवि जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा। माल्यवतः पूर्व्वपार्श्वे पूर्व्वगण्डिका एकषष्ट्यङ्गाद्योजनसहस्राणि मानन्तत्र च भद्राश्वा नाम जनपदाः भद्रशालवनञ्च तत्र अवस्थितं कालाम्रश्च। पुरुषाः श्वेताः पद्मवर्णाः स्त्रियः कुमुदवर्णाः दशवर्षसहस्राणि च तेषामायुस्तत्र च पञ्च कुलपर्व्वताः तद्यथा, शैलवर्णः मालाख्यको वरजस्कः त्रिपर्णो नीलश्चेति तद्विनिर्गता नद्यो गव्यस्तदम्भःस्थितानां देशानां तान्येव नामानि ते च देशाः एताः नदीः पिबन्ति। तद्यथा, सीता सुवाहिनी हंसवती कावेरी सुरसा शाखावती इन्द्रनदी अङ्गारवाहिनी हरितोया सोमावर्त्ता शतह्रदा वनमाला वसुमती हंसा पर्णा पञ्चगङ्गा धनुष्मती मणिवप्रा सुब्रह्मभागा विलासिनी कृष्णतोया पुण्योदा नागवती शिवा शैवालिनी मणितटा क्षीरोदा वरुणावती विष्णुपदी महानदी हिरण्यस्कन्धवाहा सुरावती वामोदा पताकाश्चेत्येता महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः आजन्मान्तं पापं विनाशयन्ति क्षुद्रनद्यश्च कोटिशस्ताश्च नदीर्ये पिबन्ति ते दशवर्षसहस्रायुषः रुद्रोमाभक्ता इति। इति वाराहे भुवनकोषे रुद्रगीता ॥ अपि च। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाने। मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्द्दिशमवष्टम्भगिरय उपकॢप्ताः। चतुर्षु एतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः। ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति। येष्वमरपरिवृढाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति। मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि निपतन्ति। तेषां विशीर्य्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति। यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धिवातो दशयोजनं समन्तादनुवासयति। एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनदी नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दति। तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति। यस्तु महाकदम्बः सुपार्श्वनिरूढस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति यो ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्तात् शतयोजनमनुवासयति। एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्य्यजारुधिहंसर्षभनागकालञ्जरनारदादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपकॢप्ताः। जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः। मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपकॢप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकॢप्ताः। इति श्रीभागवते ५ स्कन्धे भुवनकोषवर्णने १६ अध्यायः ॥

भद्रासनं, क्ली, (भद्राय लोकहिताय आसनम्।) नृपासनम्। इत्यमरः। २।८।३१॥ (योगिनामासनविशेषः। यथा, तन्त्रसारे।
"सीवन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चलम्।
भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम् ॥")

भद्रेश्वरः, पुं, (भद्रः शुभदश्चासावीश्वरश्चेति भद्रात्मकः मङ्गलमय ईश्वरो वेति।) कल्पग्रामस्थशिवः। यथा,—
"उत्तिष्ठ कान्त! गच्छावः कल्पग्रामं सुशोभनम्।
तया सार्द्धं जगामाथ कल्पग्रामं वसुन्धरे। ॥
भद्रेश्वरनिमित्तं हि द्रव्यञ्च कथितं शुभम्।
नित्यञ्च भुज्यते यत्र पात्रद्वयं समर्पितम् ॥
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं लभेत्।
कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे। ॥"
इति वाराहे मथुरामाहात्म्ये चक्रतीर्थप्रभावो नामाध्यायः ॥
शिवप्राप्त्यर्थं दुर्गाराधितहिमालयस्थपार्थिवशिवलिङ्गम्। यथा,—
"तवार्थाय ग्रहीष्यामि महर्षीन् हिमवद्गृहे।
यच्चेह भद्रमीहन्त्या मृण्मयश्चेश्वरः कृतः ॥
असौ भद्रेश्वरत्वेन ख्यातिं लोके भविष्यति।
देवदानवगन्धर्व्वा यक्षकिम्पुरुषोरगाः ॥
पूजयिष्यन्ति सततं मानवाश्च शुभेप्सवः ॥"
इति वामनपुराणे ४६ अध्याये उमां प्रति शिववाक्यम् ॥ गङ्गायाः पश्चिमतीरे नरिन्याख्यग्रामस्योत्तरं पाषाणमयशिवलिङ्गविशेषो ग्रामविशेषश्च ॥

भद्रैला, स्त्री, (भद्रा एला।) स्थूलैला। इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला इन्द्रैला च चन्द्रवाला च निष्कुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भद्रोदनी, स्त्री, (भद्रं उदनिति अनयेति। उत्+अन्+अच्। गौरादित्वात् ङीष्।) बला। नागबला। इति राजनिर्घण्टः ॥

(भञ्ज, ओ ञ औ मोटने। इति कविकल्पद्रुमः ॥ रुधा०-पर०-सक०-अनिट्। ञ, भनक्ति ॥)

भन्दिलं, क्ली, (भदि+इलच्।) शुभम्। इत्युणादिकोषः ॥ कम्पः। दूतः। इति संक्षिप्तसारोणादिवृत्तिः ॥

भनूभुकः, पु, भारतवर्षान्तर्गतदेशविशेषः। यथा,
"लक्षाश्चत्वार एवापि ग्रामाणां भनूभुकाः स्मृताः ॥"
इति स्कान्दे कुमारिकाखण्डे वर्क्केश्वरमाहात्म्यनामाध्यायः ॥

भपञ्जरं, क्ली, (भानां नक्षत्राणां पञ्जरम्।) नक्षत्रचक्रम्। इति सिद्धान्तशिरोमणिः ॥

भपतिः, पुं, (भानां नक्षत्राणां पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

भम्भः, पुं. (भम् इत्यव्यक्तशब्देन भातीति । भा+कः ।) मक्षिका । इति शब्दरत्नावली ॥ धूमः । इति त्रिकाण्डशेषः ॥

भम्भरालिका, स्त्री, (भमित्यव्यक्तशब्दस्य भरं बाहुल्यमालाति गृह्णातीति । आ+ला+कः । गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्व्वस्य ह्रस्वत्वम् ।) भङ्कारी । इति त्रिकाण्डशेषः ॥ डाँश इति भाषा ॥

भम्भराली, स्त्री, (भमित्यव्यक्तशब्दस्य भरमालातीति । आ+ला+कः । गौरादित्वात् ङीष् ।) मक्षिका । इति त्रिकाण्डशेषः ॥

भम्भासारः, पुं, मगधराजविशेषः । तत्पर्य्यायः । श्रेणिकः २ । इति हेमचन्द्रः ॥

भयं, क्ली, (भी+"एरच् ।" ३ । ३ । ५६ । इत्यत्र "भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम् ।" इति वार्त्तिकोक्त्या अपादाने अच् ।) बिभेत्यस्मात् तत् । इति भरतः ॥ अस्य लक्षणं यथा,

"रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

अपि च । रागविषयस्य विनाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकश्चित्तवृत्तिविशेषो भयम् । इति भगवद्गीतायां २ ,अध्याये मधुसूदनसरस्वती ॥ अन्यच्च । परतः स्वानिष्टसम्भावना भयम् । यथा । व्याघ्राद्बिभेति व्याघ्राधीनत्वेन स्वीयमरणं सम्भावयति । इति २. व्युत्पत्तिवादे गदाधरभट्टाचार्य्यः । तत्पर्य्यायः । दरः २ त्रासः ३ भीतिः ४ भीः ५ साध्वसम् ६ । इत्यमरः । १ । ७ । २१ ॥ उद्रासः ७ साध्वसंभवः ८ प्रतिभयम् ९ । इति शब्दरत्नावली ॥ आतङ्कः १० आशङ्का ११ भिया १२ । इति हेमचन्द्रः ॥ आगत भये अभीतवत् स्थातव्यम् । यथा,—

"तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।

उत्पन्ने तु भये तीव्रे स्थातव्यं वै अभीतवत् ॥"

इति गारुडे नीतिसारे ११५ अध्यायः ॥

कुब्जकपुष्पम् । घोरे, त्रि । इति मेदिनी । ये, ४१ ॥ पुं रोगः । इति राजनिर्घण्टः ॥ (निरृतेः पुत्रभेदः । यथा, महाभारते । १ । ६६ । ५५-५६ ।

"तस्यापि निरृतिर्भार्य्या नैरृता येन राक्षसाः ।

घोरास्तस्यास्त्रयः पुत्राः पापकर्म्मरताः सदा ॥

भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा ।

न तस्य भार्य्या पुत्रो वा कश्चिदस्त्यन्तको हि सः ॥"

द्रोणस्य वसोरभिमतिनामिकायां पत्न्यां जातः पुत्रभेदः । यथा, भागवते । ६ । ६ । ११ ।

"द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥"

यवनराजविशेषः । यथा, भागवते ।४।२७।२३।

"ततो विहतसङ्कल्पा कन्यका यवनेश्वरम् ।

मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥")

भयङ्करं, त्रि, (भयं करोतीति । भय+कृ+"मेघर्त्तिभयेषु कृञः ।" ३ । २ । ४३ । इति खच् । मुमच ।) भयजनकम् । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भीमम् ७ भयानकम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ भयावहम् १० । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । १४ । ८६ ।

"इत्थं भयङ्करैः एतं नित्यमस्योपभुज्यते ॥")

पुं, डुण्डुलपक्षी । इति राजनिर्घण्टः ॥

भयडिण्डिमः, पुं, (भयाय शत्रुभयजननाय डिण्डिमः ।) संग्रामपटहः । इति पुराणम् ॥

भयद्रुतः, त्रि, (द्रु+कर्त्तरि क्तः । भयेन द्रुतः ।) भीत्या पलायितः । तत्पर्य्यायः । कान्दिशीकः २ । इत्यमरः । ३ । १ । ४२ ॥

भयनाशिनी, स्त्री, (भयं रोगभयं नाशयतीति । भय+नश्+णिच्+णिनिः ।) त्रायमाणा लता । इति राजनिर्घण्टः ॥ भयनाशकर्त्री च ॥

भयभीतः, त्रि, (भयेन भीतः ।) त्रासेनातङ्कितः । यथा, वह्निपुराणे शिवरात्र्युपाख्याने ।

"एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ।

नातो गुरुतरो धर्म्मः कश्चिदन्योऽस्ति खेचर । ॥

भयभ्रष्टः, त्रि, (भयेन भ्रष्टः ।) भयद्रुतः । इति जटाधरः ॥

भयानकः, पुं, (बिभेत्यस्मादिति । भी+"आनकः शीङ्भियः ।" उणा० । ३ । ८२ । इति आनकः ।) व्याघ्रः । राहुः । रसविशेषः । इति मेदिनी । के, २०५ ॥ स तु शृङ्गाराद्यष्टरसान्तर्गतषष्ठरसः । तस्य लक्षणं यथा,—

"भयानको भयस्थायिभावः कालाधिदैवतः ।

स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥

यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।

चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥

अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ।

प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥

जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।

शङ्कापस्मारसंभ्रान्तिमृत्य्वाद्या व्यभिचारिणः ॥"

उदाहरणं यथा,—

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

भयानकः, त्रि, (भी+आनकः ।) भयङ्करः । इत्यमरः । १ । ७ । २० ॥ (यथा, भगवद्गीतायाम् । ११ । २७ ।

"वक्त्राणि ते त्वरमाणा विशन्ति

दंष्ट्राकरालानि भयानकानि ।

केचिद्विलग्ना दशनान्तरेषु

संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥"

भयापहः, पुं, (भयं अपहन्तीति । हन्+"अन्येभ्योऽपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) राजा । इति त्रिकाण्डशेषः ॥ (भयनाशके, त्रि ॥)

भयावहः, त्रि, (आवहतीति । आ+वह्+अच् । भयस्यावहः इति ।) भयङ्करः । इति हेमचन्द्रः ॥ (यथा, भगवद्गीतायाम् । ३ । ३५ ।

"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।

स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥")

भरः, पुं, (भरतीति । भृ+पचाद्यच् ।) अतिशयः । इत्यमरः । १ । २ । ६९ ॥ (यथा, गीतगोविन्दे । ४१ ।

"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ॥"

भारः । यथा, भागवते । १ । ३ । २३ ।

"एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।

रामकृष्णाविति भुवो भगवानहरद्भरम् ॥")

भरणकर्त्तरि, त्रि । (यथा, ऋग्वेदे ।१०।१००।२।

"भराय सु भरत भागमृत्वियं

प्र वायवे शुचिपे क्रन्ददिष्टये ॥"

"भराय सर्व्वेषां पोषकाय ।" इति तद्भाष्ये सायनः ॥ संग्रामः । यथा, ऋग्वेदे ।४।३८।५।

"उत स्मैनं वस्त्रमथिं न तायु

मनुक्रोशन्ति क्षितयो भरेषु ॥"

"भरेषु संग्रामेषु ।" इति तद्भाष्ये सायनः ॥)

भरटः, पुं, (बिभर्त्तीति । भृ+"शकिशम्यमिरमिसभ्यजिशिभ्यो..."

"अन्यादिभ्योऽटजपि..." —

भरटः, पुं, (बिभर्त्तीति । भृ+"जनिदाच्युसृवृमदिशमिनमिभृञ्भ्य इत्वन्..." इति ।" उणा० । ४ । १०४ । इति अटच् ।) कुम्भकारः । इत्युणादिकोषः ॥

भरणं, क्ली, (भ्रियतेऽनेनेति । भृ+करणे ल्युट् ।) वेतनम् । भृतिः । इति मेदिनी । णे, ६८ ॥ (भृ+भावे ल्युट् ।) पोषणम् । यथा,—

"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।

नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् ॥"

इति दायभागः ॥

भरणः, पुं, (भरतीति । भृ+ल्युः ।) भरणीनक्षत्रम् । इति शब्दरत्नावली ॥

भरणी, स्त्री, (भरण+गौरादित्वात् ङीष् ।) घोषकलता । इति मेदिनी । णे, ६८ ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वितीयनक्षत्रम् । तत्पर्य्यायः । यमदैवता २ । इति हेमचन्द्रः ॥ सा तारकात्रयमितत्रिकोणाकृतिः । तस्या अधिष्ठात्री देवता यमः । यथा,—

"तारकात्रयमिते त्रिकोणके

मध्यगे द्विविषदध्वगो यमे ।

पङ्क्तिशालिगणिताः कृशोदर

सायकाग्निभुजसंख्यकाः कलाः ॥"

इं ३ । ४५ । इति कालिदासकृतरात्रिलक्षणम् ॥ सा च उग्रगणान्तर्गता । अधोमुखगणान्तर्गता च । विद्यार्थं भूमिखनने प्रशस्ता । इति ज्योतिस्तत्त्वम् ॥ तत्र जातफलम् ।

"सदापकीर्त्तिर्हि महापवादो

नानाविनोदैश्च विनीतकालः ।

जले विलासी चपलः खलः स्यात्

प्राणिप्रणीतो भरणीषु जातः ॥"

इति कोष्ठीप्रदीपः ॥

भरणीभूः, पुं, (भरणी भूरुत्पत्तिस्थानं यस्य ।) राहुग्रहः । इति हेमचन्द्रः ॥

भरणीयः, त्रि, भरणयोग्यः । पोष्यः । भृधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ५ । १५० । १७ ।
"सर्व्वं भवतु ते राज्यं पञ्च ग्रामान् विसर्ज्जय ।
अवध्यं भरणीया हि पितुस्ते राजसत्तम ॥")

भरण्डः, पुं, (बिभर्त्तीति । भृ + "अण्डन्कृसृभृवृञः ।" उणा० । १ । १२८ । इति अण्डन् ।) स्वामी । भूपालः । वृषः । इत्युणादिकोषः ॥ भूः । कृमिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भरण्यं, क्ली, (भरणे साधु । "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) मूल्यम् । वेतनम् । इत्यमरः । २ । १० । ३९ ॥

भरण्यभुक्, त्रि, (भरण्यं वेतनं भुनक्ति इति । भुज + क्विप् ।) कर्म्मकरः । मूल्यं गृहीत्वा कर्म्मकारकः । इत्यमरः । ३ । १ । १६ ॥

भरण्या, स्त्री, (भरण्य + अजादित्वात् टाप् ।) वेतनम् । इत्यमरटीकायां स्वामी ॥

भरण्याज्ञा, स्त्री, (भरण्या आज्ञा आख्या यस्याः ।) पर्य्ययपुष्पी । इति शब्दचन्द्रिका ॥ रामदूतीति ख्याता ॥

भरण्युः, पुं, (कण्ड्वादिगणीयभरण्यधातुः । ततो बाहुलकात् उः ।) शरण्युः । मित्रम् । इति शब्दमाला ॥ अग्निः । चन्द्रमाः । ईश्वरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भरतः, पुं, (बिभर्त्ति स्वाङ्गमिति । बिभर्त्ति लोकानिति वा । भृ + "भृमृदृशियजीति ।" उणा० ३ । ११० । इति अतच् ।) नाट्यशास्त्रम् । मुनिविशेषः । स तु अलङ्कारादिशास्त्रस्य कर्त्ता । (भरतस्य शिष्यः । तस्येदमित्यण् । अणो लुक् ।) नटः । रामानुजः । दौष्मन्तिः । इति मेदिनी । ते, १३७-३८ ॥ शबरः । तन्तुवायः । इति विश्वः ॥ क्षेत्रम् । भरतात्मजः । इति हेमचन्द्रः ॥ दुष्मन्तराजपुत्त्रभरतस्य पर्य्यायः । शाकुन्तलेयः २ दौष्मन्तिः ३ सर्व्वदमनः ४ । इति त्रिकाण्डशेषः ॥ यस्त्रयस्त्रिंशच्छतमश्वमेधं कृतवान् । पञ्चाशद्राजसूयं एवमन्यान् नानाविधान् यज्ञानकरोत् । सप्तविंशतिसहस्रवत्सरानेकच्छत्रं राज्यं कृतवान् । तस्योत्पत्त्यादिर्यथा,—

"दुष्मन्तो मृगयां यातः कण्वाश्रमपदं गतः ।
तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥
विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ।
बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥
तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ।
पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा ॥
का त्वं कमलपत्राक्षि ! कस्यासि हृदयङ्गमे ! ।
किं स्विच्चिकीर्षितं त्वत्र भवत्या निर्ज्जने वने ॥
व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ! ।
न हि चेतः पौरवाणामधर्म्मे रमते क्वचित् ॥

श्रीशकुन्तलोवाच ।
विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद्भगवान् कण्वो वीर ! किं करवाम ते ॥
आस्यतां ह्यरविन्दाक्ष ! गृह्यतामर्हणञ्च नः ।
भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥

श्रीदुष्मन्त उवाच ।
उपपन्नमिदं सुभ्रु ! जातायाः कुशिकान्वये ।
स्वयं हि वृणुते राज्ञां कन्यकाः सदृशं वरम् ॥
ओमित्युक्ते यथाधर्म्ममुपयेमे शकुन्तलाम् ।
गान्धर्व्वविधिना राजा देशकालविधानवित् ॥
अमोघवीर्य्यो राजर्षिर्महिष्यां वीर्य्यमादधे ।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥
कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः ।
बद्ध्वा मृगेन्द्रं तरसा क्रीडति स्म स बालकः ॥
तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ।
हरेरंशांशसम्भूतं भर्त्तुरन्तिकमागमत् ॥
यदा न जगृहे राजा भार्य्यापुत्त्रावनिन्दितौ ।
शृण्वतां सर्व्वभूतानां खे वागाहाशरीरिणी ॥
माता भस्त्रा पितुः पुत्त्रो येन जातः स एव सः ।
भरस्व पुत्त्रं दुष्मन्त ! मावमंस्थाः शकुन्तलाम् ॥
रेतोधाः पुत्त्रो नयति नरदेव ! यमक्षयात् ।
त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥
पितर्य्युपरते सोऽपि चक्रवर्त्ती महायशाः ।
महिमा गीयते तस्य हरेरंशभुवो भुवि ॥
चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ।
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥
पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः ।
मामतेयं पुरोधाय यमुनामनु च प्रभुः ॥
अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद्वसु ।
भरतस्य हि दौष्मन्तेरग्निः साचीगुणे चितः ॥
सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे ।
त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् ॥
दौष्मन्तिरत्यगान्मायां देवानां गुरुमाययौ ।
मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् ॥
अदात् कर्म्मणि मष्णारे नियुतानि चतुर्द्दश ।
भरतस्य महत् कर्म्म न पूर्व्वे नापरे नृपाः ॥
नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ।
किरातहूणान् यवनान् पौण्ड्रान् कङ्कान् खशाञ्छकान् ॥
अब्रह्मण्यनृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान् ।
जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे ॥
देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ।
सर्व्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी ॥
समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्त्तयत् ।
स सम्राट् लोकपालाख्यमैश्वर्य्यमधिराट्श्रियम् ॥
चक्रञ्चास्खलितं प्राणान् मृषेत्युपरराम ह ।
तस्यासन् नृप ! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः ।
जघ्नुस्त्यागभयात् पुत्त्रान्नानुरूपा इतीरितम् ॥"

इति श्रीभागवते ९ स्कन्धे २० अध्यायः ॥ * ॥ ऋषभदेवात् इन्द्रदत्तजयन्त्यां कन्यायां जातशतपुत्त्रान्तर्गतज्येष्ठपुत्त्रः । यथा । "अथ ह भगवान् ऋषभदेवः स्वं वर्षं कर्म्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्म्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयविधं कर्म्म समाम्नायमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास । येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति ।" इति श्रीभागवते ५ स्कन्धे ४ अध्यायः ॥ * ॥ पावकपुत्त्रः । यथा,—

"पावको लौकिको ह्यग्निः प्रथमो ब्रह्मणः सुतः ।
ब्रह्मौदनाग्निस्तत्पुत्त्रो भरतो नाम विश्रुतः ॥"

इति मात्स्ये अग्निवंशो नाम ४८ अध्यायः ॥

रामानुजभरतस्य जन्म यथा,—

"भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षाद्विष्णोश्चतुर्भागः सर्व्वैः समुदितो गुणैः ॥"

तस्यानुगतः शत्रुघ्नः । यथा,—

"भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ।
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥"

स कुशध्वजकन्यां माण्डवीं परिणीतवान् । यथा,

"भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः ।
अस्य धर्म्मात्मनो राजन् ! रूपेणाप्रतिमं भुवि ।
सुताद्वयं नरश्रेष्ठ ! पत्न्यर्थं वरयामहे ।
तमेवमुक्त्वा जनको भरतञ्चाभ्यभाषत ॥
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ! ॥"

स नन्दिग्रामे राज्यं कृतवान् । यथा,—

"स वल्कलजटाधारी मुनिवेशधरः प्रभुः ।
नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा ॥
सबालव्यजनं छत्रं धारयामास स स्वयम् ।
भरतः शासनं सर्व्वं पादुकाभ्यां निवेदयन् ॥
ततस्तु भरतः श्रीमानभिषिच्यार्य्यपादुके ।
तदधीनस्तदा राज्यं कारयामास सर्व्वदा ॥"

इति रामायणे बालकाण्डे । १८ । ७२ । ७३ अध्यायाः । अयोध्याकाण्डे २४ अध्यायश्च ॥

तस्य द्वौ पुत्त्रौ । यथा,—

"भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च ।
मातुलेन सुगुप्तौ तु धर्म्मेण सुसमाहितौ ॥
भरतश्चाग्रतः कृत्वा कुमारौ सबलानुगौ ।
निवेश्य गन्धर्व्वसुतान् द्वे पुरे विभजिष्यतः ॥"

इति रामायणे उत्तरकाण्डे १०१ अध्यायः ॥

भरतखण्डं, क्ली, भारतवर्षान्तर्गतकुमारिकाखण्डम् । यथा,—

"कुमारिकेति विख्याता यस्या नाम्ना प्रकथ्यते ।
इदं कुमारिकाखण्डं चतुर्वर्गफलप्रदम् ॥
यथा कृतावनीयञ्च नानाग्रामादिकल्पना ।
इदं भरतखण्डञ्च यथा सम्यक् प्रकल्पितम् ॥"

इति स्कान्दे कुमारिकाखण्डे भूसंस्थितिनामाध्यायः ॥

भरतपुत्त्रकः, पुं, (भरतस्य नाट्यशास्त्रप्रवेतुः पुत्त्रकः ।) नटः । इति हेमचन्द्रः ॥

भरतप्रसूः, स्त्री, (प्रसूते इति । प्र + सू + क्विप् । प्रसूः । भरतस्य प्रसूः ।) कैकयी । इति शब्दरत्नावली ॥

भरताग्रजः, पुं, (भरतस्य अग्रजः ।) श्रीरामचन्द्रः । यथा, वोपदेवः ।
"श्रुते च चित्तग्रहणे मम मीनकूर्म्म-
कोलोऽभवन्नृहरिवामनजामदग्न्याः ।
योऽभूद्बभूव भरताग्रजजह्नुबुद्धः
कल्की सताञ्च भविता प्रहरिष्यतेऽरीन् ॥"

भरथः, पुं, (बिभर्त्तीति । भृञ्+"भृञश्चित् ।" उणा० ३ । ११५ । इति अथप्रत्ययः । स च चित् ।) लोकपालः । इत्युणादिकोषः ॥

भरद्वाजः, पुं, (द्वाभ्यां जायते इति । जन्+डः ततः पृषोदरादित्वात् द्वाजः सङ्करः । भ्रियते मरुद्भिरिति । भृ+अप् । भरः । भरश्चासौ द्वाजश्चेति कर्म्मधारयः ।) मुनिविशेषः । स च उतथ्यपत्न्यां ममतायां बृहस्पतिवीर्य्याज्जातः तस्य जन्मविवरणं यथा । "ततोऽस्य वितथे पुत्त्रजन्मनि पुत्त्रार्थिने मरुत्सोमयाजिने दीर्घतमसा पार्ष्णिप्रहारापास्ताद्बृहस्पतिवीर्य्यादुतथ्यपत्नी ममतासमुत्पन्नो भरद्वाजाख्यो नाम पुत्त्रो मरुद्भिर्दत्तः । अस्यापि नामनिर्वचनश्लोकः पठ्यते । 'मूढ़े भर द्वाजमिमं भर द्वाजं बृहस्पते ! । यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥' इति भरद्वाजश्च तस्य वितथे पुत्त्रजन्मनि मरुद्भिर्दत्तं वितथसंज्ञामवाप ॥"*॥ अस्य टीका । वितथे व्यर्थे सति । अत्रैवमितिहासः । बृहस्पतेरग्रजस्योतथ्यस्य ममताख्या पत्नी गर्भिण्यासीत् । तस्यां बृहस्पतिः कामाभिभूतो वीर्य्यं यदजनत् । तत्र गर्भं प्रविशन्नर्भस्थेन स्थानसङ्कोचभयात् पार्ष्णिप्रहारेणापास्तं बहिः पतितमपि अमोघवीर्य्यतया बृहस्पतेर्भरद्वाजनामपुत्त्रोऽभूत् । गर्भस्थश्च बृहस्पतिना तस्मादेवापराधादन्धो भवेति शप्तो दीर्घतमा नामाभवत् । तत्र भरद्वाजनामनिरुक्तिपरः तत्पित्रोर्विवादकरोऽयं श्लोको देवैः पठितः । हे मूढ़े ममते द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्त्रं त्वं भर रक्ष । एव बृहस्पतिनोक्तेन ममता तमाह हे बृहस्पते ! द्वाजं द्वाभ्यां जातमिममेकाकिनी किमित्यहं भरिष्यामि । त्वमिमं भरेति परस्परमुक्त्वा तं पुत्त्रं त्यक्त्वा यस्मात् पितरौ ममताबृहस्पती ततो यातौ । ततो भरद्वाजाख्योऽयम् । पाठान्तरे एवं विवदमानौ । यद्दुःखात् यन्निमित्ताद् दुःखात् पितरौ यातावित्यर्थः । तदेवं ताभ्यां त्यक्तो मरुद्भिर्भृतः । मरुत्सोमाख्येन च यागेनाराधितैर्मरुद्भिस्तस्य वितथे पुत्त्रजन्मनि सति दत्तत्वाद्वितथसंज्ञावाप । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ * ॥ (चाक्षुषद्वापरेऽयमेव व्यासः । यथा, देवीभागवते । १ । ३ । २९ ।
"एकादशेऽथ त्रिवृषो भरद्वाजस्ततःपरम् ।
त्रयोदशे चान्तरिक्षो धर्म्मश्चापि चतुर्द्दशे ॥"
यथा च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहराः
दृष्टा इन्द्रियशक्तिसंक्षयकराः सर्व्वाङ्गपीड़ाकराः ।
धर्म्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ॥
तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्यो भवद्भिर्बुधै-
र्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् ।
त्वं योग्यो भगवन् ! सहस्रनयनं याचस्व तस्मात् क्रमा-
दायुर्व्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयम् ॥")
पक्षिविशेषः । भारुइ इति भाषा । तत्पर्य्यायः व्याघ्राटः २ । इत्यमरः । २ । ५ । १५ ॥ भरद्वाजकः ३ । इति शब्दरत्नावली ॥ (गोत्रभेदः । यथा, मनौ ।
"शाण्डिल्यः काश्यपश्चैव वात्स्यः सावर्णकस्तथा ।
भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥"
इत्यादि गोत्रशब्दे द्रष्टव्यम् ॥ भृ+शतृ । भरत्+वाजः । संभ्रियमाणहविर्लक्षणान्ने यजमानादौ, त्रि । यथा, ऋग्वेदे । १ । ११६ । १८ ।
"यदयातं दिवोदासाय वर्त्तिर्भरद्वाजायाश्विना हयन्ता ॥"
"भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय ।" इति तद्भाष्ये सायणाचार्य्यः ॥)

भरद्वाजकः, पुं, (भरद्वाज+स्वार्थे कन् ।) व्याघ्राटपक्षी । इति शब्दरत्नावली ॥

भरिणी, स्त्री, (मनो बिभर्त्ति हरतीति । भृ+णिनिः । गौरादित्वात् ङीष् । पृषोदरादित्वात् पूर्ब्बदीर्घे साधुः ।) हरिद्रा । इत्युणादिकोषः ॥

भरितः, त्रि, (हरितः । पृषोदरादित्वात् हस्य भः ।) हरिद्वर्णः । इत्युणादिकोषः ॥ पुष्टः । भारयुक्तः । भरोऽस्य जात इत्यर्थे इतप्रत्ययेन निष्पन्नः ॥

भरिमा, [न्] पुं, (भृ+"हृभृधृसृस्तृशृभ्य इमनिच् ।" उणा० ४ । १४७ । इति भावे इमनिच् ।) भरणम् । इत्युणादिकोषः ॥ (भ्रियते इति । कुटुम्बः । इत्युज्ज्वलदत्तः ॥)

भरुः, पुं, (भरति बिभर्त्ति जगदिति । भृञ् भरणे+"भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः ।" उणा० १ । ७ । इति उः ।) विष्णुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । समुद्रः । स्वामी । इति संक्षिप्तसारोणादिवृत्तिः ॥ स्वर्णम् । शिवः इति । मेदिनी । रे, ९९ ॥

भरुजः, पुं, (भेति शब्देन रुजतीति । रुज्+क ।) क्षुद्रशृगालः । इति हेमचन्द्रः ॥

भरुटकं, क्ली, (भृ+बाहुलकात् उट । संज्ञायां कन् ।) भृष्टामिषम् । इति हेमचन्द्रः ॥

भर्गः, पुं, (भृज्यते कामादिरनेनेति । भ्रस्ज्+"हलश्च ।" इति घञ् ।) शिवः । इत्यमरः ॥ (यथा, कथासरित्सागरे । १ । ३४ ।
"प्रत्युवाच ततो भर्गः पुरा दक्षप्रजापतेः ।
देवि ! त्वञ्च तथान्याश्च बह्व्योऽजायन्त कन्यकाः ।
स मह्यं भवतीं प्रादात् धर्म्मादिभ्योऽपराश्च ताः ॥
वीतिहोत्रस्य पुत्त्रः । यथा, भागवते । ९ । १७ । ९ ।
"वीतिहोत्रोऽस्य भर्गोऽतो भार्गभूमिरभून्नृप ॥")
आदित्यान्तर्गततेजः । यथा,—
"आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुमुक्षुभिः ।
जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च ॥
ध्यानेन पुरुषो यश्च द्रष्टव्यः सूर्य्यमण्डले ॥"
इत्याह्निकतत्त्वम् ॥

भर्गः, [स्] क्ली, (भर्जते इति । भ्रस्ज भर्जने+"अञ्च्यञ्जियुजिभृजिभ्यः कुश्च ।" उणा० ४ । २१५ । इति असुन् कवर्गश्चान्तादेशः ।) ज्योतिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । ३ । ६२ । १० ।
"तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥")

भर्ग्यः, पुं, (भृज्+"ऋहलोर्ण्यत् ।" ३।१।१२४। इति ण्यत् । चजोरिति कुत्वम् ।) भर्गः । इत्यमरटीकायां भरतरायमुकुटौ ॥

भर्जनं, क्ली, (भृज्+ल्युट् ।) भृष्टिः । इति शब्दमाला ॥ भाजा इति भाषा ॥

भर्त्तव्यं, त्रि, (भृ+तव्य ।) भरणीयम् । पोषणीयम् । यथा, दायभागटीकाधृतवचनम् ।
"वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः ।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥"

भर्त्ता, [ऋ] पुं, (बिभर्त्ति पुष्णाति पालयति धारयतीति वा । भृञ् धारणपोषणयोः+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति तृच् ।) अधिपतिः । (यथा, रघौ । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्त्तुरथैनं प्रत्यबोधयत् ॥")
तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढ़ः ५ अधिभूः ६ पतिः ७ इनः ८ स्वामी ९ नाथः १० आर्य्यः ११ प्रभुः १२ ईश्वरः १३ विभुः १४ ईशिता १५ इनः १६ नायकः १७ । इति हेमचन्द्रः ॥ (विष्णुः । प्रपञ्चाधिष्ठानत्वेन भरणात् ॥) धातरि पोष्टरि च त्रि । इति मेदिनी । ते, ३८ ॥ (यथा, ऋग्वेदे । १० । २२ । ३ ।
"भर्त्ता वज्रस्य धृष्णोः पिता पुत्त्रमिव प्रियम् ॥"
विवाहितायाः पतिः । यथा, महाभारते । १ । १०४ । २८ ।
"भार्य्याया भरणाद्भर्त्ता पालनाच्च पतिः स्मृतः ।
अहं त्वां भरणं कृत्वा जात्यन्धं ससुतं तदा ।
नित्यकालं श्रमेणार्त्तो न भरेयं महातपः ॥")

भर्तृघ्नी, स्त्री, (भर्त्तारं हन्तीति । हन्+टक् । ङीप् ।) पतिघातिनी । इति महाभारतम् ॥

भर्तृदारकः, पुं, (भर्त्रा द्रियते इति । दृङ् आदरे+कर्म्मणि घञ् । ततः स्वार्थे कः ।) नाट्योक्तौ युवराजः । इत्यमरः । १ । ७ । १२ ॥

भर्तृदारिका, स्त्री, (भर्तृदारक+टापि अत इत्वम् ।) नाट्योक्तौ राजसुता । इत्यमरः । १ । ७ । १३ ॥

भर्तृहरिः, पुं, स्वनामख्यातः काव्यकर्तृराजविशेषः । इति जटाधरः । स च विक्रमादित्यभ्राता ॥ (अयमेव गन्धर्व्वसेनात् दासीगर्भजातः । यथा, राजावल्याम् । ४ । १-२ ।
"अथ कालेन कियता रममाणो महीतले ।
दास्यां गन्धर्व्वसेनस्तु पुत्त्रमेकमजीजनत् ॥
तस्य भर्तृहरीत्येवं नाम चक्रे महामतिः ॥")

भर्त्स, क ङ न भर्त्से । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-उभ० च-सक०सेट् ।) रेफयुक्तः । दन्त्यवर्गाद्योपधः । भर्त्सो भर्त्सनम् । भर्त्सनन्त्वपकारगीरित्यमरः । १ । ६ । १४ ॥ क ङ, भर्त्सयते खलं राजा । न, भर्त्सयति भर्त्सयते । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो नकारः । इति दुर्गादासः ॥

भर्त्सनं, क्ली, (भर्त्स+ल्युट् ।) अपकारगीः । इत्यमरः । १ । ६ । १४ ॥ चौरोऽसि त्वां घातयिष्यामि इत्याद्यपकारार्थं वचनम् । इति भरतः ॥ तत्पर्य्यायः । कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ परीवादः १० जुगुप्सनम् ११ आक्षेपः १२ अवर्णः १३ निर्वादः १४ अपक्रोशः १५ । इति शब्दरत्नावली ॥ (भर्त्स+ णुच् । भर्त्सनाप्यर्थे । यथा, कथासरित्सागरे । ३२ । ५३ ।
"इत्यादि भर्त्सनां कृत्वा गच्छद्भिस्तैः समं स च ।
विप्रः प्रययौ विद्युदत्तस्त्वों बभूव च ॥")

भर्त्सपत्त्रिका, स्त्री, (भर्त्स्यते क्षेति । भर्त्स+ घञ् । भर्त्सं निन्दितं पत्त्रं यस्याः । कप् । टाप् । अत इत्वम् ।) महानीली । इति राजनिर्घण्टः ॥ (भर्त्स्यपत्त्रिकापि पाठः ॥)

भर्म्म, क्ली, (भ्रियतेऽनेनेति । भृ+बाहुलकात् मन् ।) स्वर्णम् । भृतिः । नाभिः । इति हेमचन्द्रकोषः ॥

भर्म्मन्, [न्] क्ली, (भरति ध्रियते वेति । भृञ् + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४।१४४। इति मनिन् ।) वेतनम् । इति हेमचन्द्रः ॥ स्वर्णम् । धुस्तूरम् । इत्यमरः ।२।९।९४ ॥ नाभिः । इति विश्वः ॥ (भरणम् । यथा, ऋग्वेदे ।१०।८८।१ ।
"हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त ॥"
"भर्म्मणे भरणाय ।" इति तद्भाष्ये सायनः ॥)

भर्म्मण्या, स्त्री, (भर्म्मणि भरणे साधुरिति । भर्म्मन्+यत् । टाप् ।) वेतनम् । इति हेमचन्द्रः ॥

भर्व, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफोपधः । भर्वति । इति दुर्गादासः ॥

भर्व्व, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सक०-सेट् ।) भर्व्वति । अन्तःस्थवान्तोऽयम् । इति दुर्गादासः ॥

भल, क ङ निरूपणे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, भालयते । इति दुर्गादासः ॥

भल, ङ दानवधनिरूपणेषु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, भलते । इति दुर्गादासः ॥

भलता, स्त्री, (भातीति । भा+बाहुलकात् डः । भा चासौ लता चेति कर्म्मधारयः ।) राजबला । इति शब्दरत्नावली ॥

भलन्दनः, पुं, कान्यकुब्जदेशीयनृपविशेषः । यथा,
"कलावती कान्यकुब्जे बभूवायोनिसम्भवा ।
अतिसारा महासाध्वी सुन्दरी कमला कला ॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उदक्रमः ।
स तां संप्राप योगान्ते यज्ञकुण्डसमुत्थिताम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

भल्ल, ङ दानवधनिरूपणेषु । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट् ।) लद्वयान्तः । ङ, भल्लते । इति दुर्गादासः ॥

भल्लः, पुं, (भल्लते इति । भल्ल+अच् ।) भल्लूकः । इत्यमरः । २ । ५ । ४ ॥ (देशभेदः । यथा, वृहत्संहितायाम् । १४ । ३० ।
"ब्रह्मपुरदार्व्वडामर-
वनराज्यकिरातचीनकौणिन्दाः ।
भल्लापलोलजटासुर-
कुनटखसघोषकुचिकाख्याः ॥")

भल्लः, पुं स्त्री, (भल्लते हन्तीति । भल्ल+अच् ।) शस्त्रभेदः । इति मेदिनी शब्दमाला च । भाला इति भाषा ॥ (यथा महाभारते ।१।१४०।६।
"प्रगाढ़दृढ़मुष्टित्वे लाघवे वेधने तथा ।
क्षुरनाराचभल्लानां विपाठानाञ्च तत्त्ववित् ॥"
अनेन देहविद्धशल्यादिकमुद्धरति । यथा,—
"स च शल्योद्धरणकः प्रोच्यते वैद्यकागमे ।
नाराचवाणमुखाद्यैर्भल्लैः कुन्तैश्च तोमरैः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ॥)

भल्लकः, पुं, (भल्ल+स्वार्थे कन् ।) भल्लूकः । इति द्विरूपकोषः ॥ (पक्षिभेदः । यथा, भागवते । ३ । १० । २३ ।
"काकगृध्रवककश्येनभासभल्लकबर्हिणः ।
हंससारसचक्राह्वकाकोलूकादयः खगाः ॥")

भल्लपुच्छी, स्त्री, (भल्लस्य पुच्छमिव पुष्पं यस्याः ।) गन्धशुण्ठा । इति शब्दचन्द्रिका ॥ गोरक्षतण्डुला इति ख्याता ॥

भल्लाटं, क्ली, शशिध्वजराजपुरम् । यथा,—
"सेनागणैः परिवृतः कल्किर्नारायणः प्रभुः ।
भल्लाटनगरं प्रायात् खड्गधृक् वाजिवाहनः ॥"
इति कल्किपुराणे । २२ अध्यायः ॥
(इन्द्रसेनस्य पुत्त्रे, पु । यथा, हरिवंशे ।२०।३२।
"विष्वक्सेनस्य पुत्त्रोऽभूत् इन्द्रसेनो महीपतिः ।
भल्लाटो तनुकुमारोऽभून्नाधेयेन हतः पुरा ॥")

भल्लातः, पुं, (भल्लं भल्लाख्यमिव अतति आत्मानं ज्ञापयतीति । अत+अच् ।) भल्लातकवृक्षः । इति रत्नमाला ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"भल्लाताभावतश्चित्रं नक्तञ्चोरभावतः ॥")

भल्लातकः, पुं, (भल्ल इवाततीति । अत+क्वुन् । यद्वा, भल्लात+स्वार्थे कन् ।) वृक्षविशेषः । भेला इति भाषा । तत्पर्य्यायः । अरुष्करः २ भल्लातः ३ शोफकृत् ४ वह्निनामा ५ वीरतरुः ६ व्रणकृत् ७ भूतनाशनः ८ । इति रत्नमाला ॥ भल्लातकी ९ अग्निमुखी १० वीरवृक्षः ११ । इत्यमरः ॥ निर्दहनः १२ तपनः १३ अनलः १४ क्रमिघ्नः १५ स्फोटबीजः १६ वातारिः १७ स्फोटबीजकः १८ पृथग्बीजः १९ धनुर्वृक्षः २० बीजपादपः २१ वह्निः २२ । (यथा, सुश्रुते । सूत्रस्थाने । ४६ ।
"उष्णोदकानुपानन्तु स्नेहानामथ शस्यते ।
ऋते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । क्रिमिकफवातोदरानाहमेहदुर्नामनाशित्वञ्च । तत्फलगुणाः । कषायत्वम् । मधुरत्वम् । कोष्णत्वम् । कफाश्मिमरुत्नाहविबन्धमूलजठराध्मानक्रिमिनाशित्वञ्च । तन्मज्जगुणाः । विशेषेण दाहशमनत्वम् । पित्तापहत्वम् । तर्पणत्वम् । वातारोचकहारित्वम् । दीप्तिजनकत्वम् । पित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् ॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रमीन् ॥
तन्मज्जा मधुरो वृष्यो वृंहणो वातपित्तहा ।
वृन्तमाध्मानकरं स्वादु पित्तघ्नं केशवर्धनकृत् ॥
भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ॥
हन्ति गुल्मज्वरं श्वित्रवह्निमान्द्यक्रिमिव्रणान् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"भल्लातकफलं स्निग्धं क्रिमिदुर्नामनाशनम् ।
दन्तश्लेष्मकरं ग्राहि कषायं मधुरञ्च तत् ॥
भल्लातरन्तं मधुरं कषायं वातकोपनम् ॥"
इति राजवल्लभः ॥

भल्लातकी, स्त्री, (भल्लातक+गौरादित्वात् ङीष् ।) भल्लातकवृक्षः । इत्यमरः ॥

भल्लिका, स्त्री, (भल्ल+अच् । स्वार्थे कन् । टाप् । अत इत्वम् ।) भल्लातकः । इति शब्दचन्द्रिका ॥

भल्ली, स्त्री, (भल्ल+गौरादित्वात् ङीष् ।) भल्लातकः । इति शब्दरत्नावली ॥ (अस्याः पर्य्यायः ।

"भल्लातकं विषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भलुकः, पुं, (भल्लूक+पृषोदरादित्वात् ह्रस्वः ।) भाल्लूकः । इत्यमरः ॥

भल्लूकः, पुं, (भल्लते इति । भल्ल+"उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊकप्रत्ययेन साधुः ।) जन्तुविशेषः । भालूक इति भाषा । तत्पर्य्यायः । ऋक्षः २ भल्लः ३ वृक्षः ४ दुर्घोषः ५ भल्लुकः ६ पृथुहविः ७ द्राविडः ८ दीर्घकेशः ९ चिरायुः १० हुवरः ११ दीर्घदर्शी १२ । इति राजनिर्घण्टः ॥ भाल्लुकः १३ भाल्लूकः १४ अच्छः १५ भाल्लूकः १६ भौल्लूकः १७ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १२ । ११६ । ६ ।
"सिंहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः ।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः ॥"
कोशस्थप्राणिविशेषः । तद्यथा,—
"शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः ।" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
श्योनाकप्रभेदः । (यथास्य पर्य्यायः ।
"श्योनाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकष्टुण्टुकोऽरलुः ॥"
इति वैद्यकरत्नमाला ॥)
कुक्कुरः । इति राजनिर्घण्टः ॥

भवं, क्लौ, (भवति भूयते वा । भू+अच् अप् वा ।) भव्यम् । इति राजनिर्घण्टः ॥ चालता । इति भाषा ॥

भवः, पुं, (भूयते इति । भू+भावे अप् ।) जन्म । (यथा, याज्ञवल्क्ये । ३ । १६४ ।
"भवो जातिसहस्रेषु प्रियाप्रियविपर्य्ययः ॥"
भवत्यस्मादिति । भू+अपादाने अप् । शिवः । इत्यमरः ॥ यथा, शतपथब्राह्मणे ।६।१।३।१५।
"तमब्रवीद् भवोऽसीति तद्यदस्य तन्नामाकरोत्पर्जन्यस्तद्रूपमभवत् पर्जन्यो वै भवः ॥")
स च जलमूर्त्तिः । यथा,—
"भवाय जलमूर्त्तये नमः ।"
इति पार्थिवशिवलिङ्गपूजाप्रयोगः ॥
(भवति प्रभवत्यनेनेति । भू+अप् ।) क्षेमः । (यथा, महाभारते । १ । २२१ । २८ ।
"को हि नाम भवेनार्थी साहसेन समाचरेत् ॥"
भवति उत्पद्यतेऽस्मिन्निति । भू+आधारे अप् ।) संसारः । (यथा, मार्कण्डेये । १६ । ७ ।
"अनयस्त्वं तवैवेयं देवी सर्व्वभवारणिः ॥")
सत्ता । प्राप्तिः । इति मेदिनी ॥

भवकः, पुं, (भवतादिति । भू+वुन् ।) आशीर्वाचकः । इति संक्षिप्तसारः ॥

भवघस्मरः, पुं, (भवस्य वनस्य घस्मरः ध्वंसकारकः ।) दावानलः । इति शब्दमाला ॥

भवत्, त्रि, (भाति विद्यते इति । भा+डवतुप्रत्ययः ।) युष्मदर्थम् । अत्र भाधातोर्डवतुप्रत्ययेन निष्पन्नम् । तस्य लिङ्गत्रये रूपम् । भवान् भवती भवत् । (यथा, मार्कण्डेये देवीमाहात्म्ये । ८५ । ५ ।
"भवतीं नाशयिष्यामि तत्प्रसादात् परमापदः ॥")
वर्त्तमानार्थम् । इति मेदिनी । ते, १३७ ॥ अत्र भूधातोः शतृप्रत्ययेन निष्पन्नम् । तस्य लिङ्गत्रये रूपं भवन् भवन्ती भवत् ॥ (यथा, मनौ । १२ । ९७ ।
"चातुर्व्वर्ण्यं त्रयो लोका चत्वारश्चाश्रमाः पृथक् ।
भूतं भवद्भविष्यच्च सर्व्वं वेदात् प्रसिध्यति ॥")

भवती, स्त्री, (भवत्+ङीप् ।) बाणभेदः । स तु विषाक्तः । इति शब्दरत्नावली ॥ दीप्तिमती । यथा । वाल्मीकिकृतगङ्गास्तोत्रम् ।
"स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ॥"

भवदारु, क्लौ, (भवाख्यं भवप्रियं वा दारु ।) देवदारुवृक्षः । इति राजनिर्घण्टः ॥

भवदीयं, त्रि, (भवत्+"भवतष्ठक्छसौ ।" ४।२। ११५ । इति छस् ।) भवत इदम् । युष्मत्सम्बन्धि । यथा, उद्भटे ।
"श्रुत्वातिदूरं भवदीयकीर्त्तिं
कर्णौ च तृप्तौ न च चक्षुषी मे ।
तयोर्विवादं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय ॥"
(यथा, भागवते । ९ । १८ । ३९ ।
"वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥")

भवनं, क्लौ, (भवत्यस्मिन्निति । भू+अधिकरणे ल्युट् ।) गृहम् । (यथा, मनौ । ११ । १८ ।
"स लघु तं घटं प्राप्य प्रविश्य भवनं स्वकम् ॥"
प्रासादः । यथा, महाभारते ।३।५४।१३ ।
"देवराजस्य भवनं विविशाते सुपूजितौ ॥"
भू+भावे ल्युट् ।) भावः । इति मेदिनी ॥ (यथा,
"ननु प्रागसतो घटस्य भवनं दृश्यते ॥"
इति तार्किकाः ॥)

भवनाशिनी, स्त्री, (भवं संसारं जन्मादिकं वा नाशयति उत्तारयति नाशयितुं शीलमस्येति वा । नश्+णिच्+णिनिः ।) सरयूनदी । इति पुराणम् ॥

भवनीयं, त्रि, (भवितुमर्हमिति । भू+अनीयर ।) भवितव्यम् । भव्यम् । उत्पत्त्यर्हम् । इति मुग्धबोधव्याकरणम् ॥

भवन्तः, पु, (भवत्यत्रेति । भू+"तॄभूवहिवसीति ।" उणा० ३।१२८ । इति झच् । स च चिद्वति ।) कालभेदः । स तु वर्त्तमानः । इत्युणादिकोषः ॥ (भान्ति इति । भा+डवतु प्रत्ययः ।) भवच्छब्दस्य प्रथमाबहुवचनान्तरूपोऽप्ययम् ॥ (यथा, महाभारते । ३ । ५४ । २ ।
"के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ॥")

भवन्तिः, पु, (भू+"भुवो झिच् ।" उणा० ३ । ५० । इति झिच् ।) वर्त्तमानकालः । इत्युणादिकोषः संक्षिप्तसारोणादिवृत्तिश्च ॥

भवभूतिः, पुं, (भवेन शिवेन भूतिरैश्वर्य्यादिकं यस्य भव एव भूतिर्यस्येति वा । शिवोपासनयैवास्य विद्याद्युत्पत्तेस्तथात्वम् ।) कविविशेषः स च भोजराजस्य पण्डितः । मालतीमाधवादिनाटककर्त्ता च । तत्पर्य्यायः । भूगर्भः २ । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् । ४ । १४४ ।
"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ॥"
भवस्य महादेवस्य भूतिरिति विग्रहे तु ।) महादेवस्य ऐश्वर्य्यञ्च ॥

भवरुत्, [द्] स्त्री, (भवे जन्मादिप्रदे संसारे रोदिति अनेनेति भवे जन्मान्ते रोदित्यनेन वेति । रुद्+क्विप् ।) प्रेतपटहः । इति त्रिकाण्डशेषः ॥

भवात्मजा, स्त्री, (भवस्य शिवस्य आत्मजेति ।) मनसादेवी । इति शब्दमाला ॥

भवादृक्, } [श्] त्रि, युष्मत्सदृशः । भवानिव
भवादृशः } दृश्यते च इति युत्पत्त्या भवच्छब्द-
भवादृशः } पूर्व्वकदृशधातोः कर्म्मणि क्रमेण क्विप्-टक्सक्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

भवानी, स्त्री, भवस्य भार्य्या । (भव+"इन्द्रवरुणभवशर्व्वेति ।" ४ । १ । ४९ । इति स्त्रियां ङीष् तत आनुक् चागम इति ।) दुर्गा । इत्यमरः ।१।१।३१॥ एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारसागरः ।
भवः कामस्तथा तत्पत्नी भवानी परिकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ६ ।
"भवानी तत्र मे देव ! परिचर्त्तुं तदाभवत् ॥") ।

भवानीगुरुः, पु,(भवान्याः शिवपत्न्या गुरुः पिता ।) हिमालयपर्व्वतः । इति हेमचन्द्रः ॥

भवाभीष्टः, पु, (भवे अभीष्टः ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

भवाब्धिः, पु (भवः अब्धिरिवेत्युपमितसमासः । भव एव अब्धिर्वा ।) संसाररूपसमुद्रः । यथा,
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम् ॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः ॥

भवायना, स्त्री, (भवः शिव एवायनमाश्रयस्थानमस्याः । शिवशिरसि स्थितत्वादस्यास्तथात्वम् ।) गङ्गा । इति शब्दरत्नावली ॥ (भवायनी स्त्रीके ॥)

भविकं, क्लौ, (भवः प्रभाव ऐश्वर्य्यादिकमित्यर्थः उत्पाद्यत्वेनास्त्यस्येति ठन् ।) मङ्गलम् । तद्वति त्रि । इत्यमरः ॥

भवितः, त्रि, (भवो मङ्गलं जातोऽस्येति तारकादित्वात् इतच् ।) अतीतोत्पत्तिकः । भूतः । इति जटाधरः ॥

भवितव्यं, त्रि, भवनीयम् । भव्यम् । इति भविष्यत्काले कर्म्मणि भावे शक्यार्हप्रैषाद्यवाप्तकालार्थे च भूधातोस्तव्यप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ यथा, वह्निपुराणे ।

"न भवद्भ्यामहं शोच्यो नायं राजापराध्यति।
भवितव्यमनेनैव येनाहं निधनं गतः॥"

भवितव्यता, स्त्री, (भवितव्य+भावे तल्।) भाव्यम्। इति जटाधरः॥ (यथा, कथासरित्सागरे। २७। ८६।
"तन्ममाचक्ष्व तावत् त्वं कथयिष्याम्यहञ्च ते।
यदस्तु कोऽन्यथा कर्त्तुं शक्तो हि भवितव्यताम्॥")

भविता, [ऋ] त्रि, (भू+शीलार्थे तृच्।) भवनशीलः। इति भरतः॥ साधु भवनशीलः। इति सुकुटः। तत्पर्य्यायः। भूष्णुः २ भविष्णुः ३। इत्यमरः॥ (भविष्यदर्थेऽपि तृच्प्रत्ययः स्यात् यथा, मार्कण्डेये। २४। २६।
"नान्या भार्य्या भवित्रीति वर्णयित्वा मदालसाम्।")

भविनः, पुं, (भवाय काव्यादिप्रकाशाय इनः सूर्य्यः इव। ततः पृषोदरादित्वात् साधुः।) काव्यकर्त्ता। इति त्रिकाण्डशेषः॥

भविलः, पुं, (भू+"सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्।" उणा०। १। ५५। इलच्।) विटः। इति त्रिकाण्डशेषः। भव्यः। इति सिद्धान्तकौमुद्यामुणादिपादः॥

भविष्णुः, त्रि, (भू+"भुवश्च।" ३।२।१३८। इति इष्णुच्। भवतेर्धातोश्छन्दसि विषये तच्छीलादिषु इष्णुच् प्रत्ययो भवतीति काशिका।) भविता। इत्यमरः॥

भविष्यः, त्रि, (भू+लृटः सदिति शतृस्यट् च ततो विभाषायां पृषोदरात् तस्य लोपः।) भविष्यत्कालः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ८१। २८।
"अयं भविष्ये कथितो भविष्यकुशलैर्द्विजैः॥")
पुराणविशेषे, क्ली। यथा,—
"चतुर्द्दशं भविष्यं स्यात्तथा पञ्चशतानि च॥"
इति श्रीभागवते १२ स्कन्धे १३ अः॥
(फलविशेषे, क्ली॥)

भविष्यत्, त्रि, (भू+लृटः शतृस्यट् च।) कालविशेषः। तस्य लक्षणम्॥ वर्त्तमानप्रागभावप्रतियोगित्वम्। इति सारमञ्जरी॥ वर्त्तमानकालोत्तरकालीनोत्पत्तिकत्वम्। इति शिरोमणिकृततपदार्थटीकाखण्डनम्॥ तत्पर्य्यायः। अनागतम् २ भावनम् ३ प्रगेतनम् ४ वर्त्स्यत् ५ वर्त्तिष्यमाणम् ६ आगामि ७ भावि ८। इति राजनिर्घण्टः॥ अद्यतने भव्ये स्त्री दूरभव्ये लौ। इति सांप्रदायिकः। यथा श्वो भविता वर्षान्तरे भविष्यति। इति दुर्गादासः॥

भव्यं, क्ली, (भवतीति भूयते इति वा। भू+"भव्य गेयेति।" ३।४।६८। इति यत्। भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते। इति काशिका।) फलविशेषः। चालता इति भाषा॥ तत्पर्य्यायः। भवम् २ भविष्यम् ३ भावनम् ४ वक्त्रशोधनम् ५ लोमफलम् ६ पिच्छिलबीजम् ७। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वञ्च। बालस्य तस्य गुणाः। वातकफापहत्वम्। पक्वस्य तस्य गुणाः। मधुराम्लत्वम्। रुचिकारित्वम्। श्रमशूलहरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"भव्यं स्वादु कषायाम्लं हृद्यमास्यविशोधनम्।
तदेव पक्वं दोषघ्नं गुरु ग्राहि विषापहम्॥"
इति राजवल्लभः॥
अस्थि। इति मेदिनी। ये, ४३॥

भव्यं, त्रि, (भवतीति। भू+कर्त्तरि निपातनात् वा यत्।) शुभम्। (यथा, भागवते। ४। १४। १०।
"भव्यायां भव्याच्छायां तस्मै विदुर! चुक्रुशुः॥")
सत्यम्। योग्यम्। भावि। इति मेदिनी शब्दरत्नावली च॥ (यथा, मार्कण्डेये। ७६। ७।
"भूतभव्यभवन्नाथाः श्रृणु चैतत् वयं द्विज।॥"
श्रेष्ठम्। यथा, भागवते। १। १५। १७।
"यत्पादपद्मभवाय भजन्ति भव्याः॥"
"भव्याः श्रेष्ठाः।" इति तट्टीकायां स्वामी॥
प्रसन्नम्। यथा, रामायणे। १। ६२। ७।
"स मे नाथो ह्यनाथस्य भव भव्येन चेतसा।"
भव्येन प्रसन्नेन चेतसेति तट्टीकायां रामानुजः॥)

भव्यः, पुं, (भवति उत्पद्यते भू+निपातनात् कर्त्तरि वा यत्।) कर्म्मरङ्गवृक्षः। इति मेदिनी। ये, ४२॥ रसभेदे, पुं स्त्री। इति शब्दरत्नावली॥

भव्या, स्त्री, (भव्य+टाप्।) उमा। गजपिप्पली। इति मेदिनी। ये, ४२॥

भष, वृके। पिशुनोक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-भषशब्दे अक० पिशुनोक्त्यादौ सक०-सेट्।) वृकः कुक्कुरादिकर्त्तृकशब्दः। भषति श्वा। भषत्यपदोषं खलः सूचयतीत्यर्थः। भर्त्सने इति प्राञ्चः। भषति श्वा पान्थं शब्देन निर्भर्त्सयतीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

भषः, पुं, (भषतीति। भष कुक्कुरादि शब्दे+अच्।) कुक्कुरः। इति रत्नमाला॥

भषकः, पुं, स्त्री, (भषतीति। भष+"क्वुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति क्वुन्।) कुक्कुरः। इत्यमरः। २। १०। २२॥

भषणं, क्ली, (भष्+ल्युट्।) वृकणम्। कुक्कुरशब्दः। इति हेमचन्द्रः॥

भषा, स्त्री, स्वर्णक्षीरी। इति रत्नमाला॥

भषी, स्त्री, (भष+स्त्रियां जातित्वात् ङीष्।) शुनी। इति शब्दरत्नावली॥

भस, र लि द्युतौ। भर्त्से। इति कविकल्पद्रुमः॥ (ह्वा०-पर०-अक०-सक० च सेट्।) र वैदिकः। लि, बभस्ति। इति दुर्गादासः॥

भसत्, स्त्री, (बभस्तीति। भस्+"शृदृभसोऽदिः।" उणा० १। १२६। इति अदिः।) कालम्। अन्त्रमांसम्। जघनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भसत्, [द्] स्त्री, (भस+अदिः।) भास्करः। योनिः। इति मेदिनी॥ मांसम्। कारण्डवपक्षी। प्लवः। इत्युणादिकोषः॥ कालः। इति त्रिकाण्डशेषः॥

भसनः, पुं, (बभस्तीति। भस्+क्युः।) भ्रमरः। इति भूरिप्रयोगः॥

भसन्तः, पुं, (बभस्तीति। भस+बाहुलकात् झच्।) कालः। इति त्रिकाण्डशेषः॥

भसितं, क्ली, (भस्+क्त।) भस्म। इति हेमचन्द्रः॥ (यथा, शिवपुराणे वायुसंहितायाम्। २६। ४१।
"चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे।
ईशाने भसितं केचिदालेपनमितीदृशम्॥")

भसूचकः, पुं, (भानां नक्षत्राणां सूचकः।) दैवज्ञः। इति शब्दरत्नावली॥

भस्त्रका, स्त्री, (भस्यते इति। भस दीप्तौ+ष्ट्रन्+टाप्। भस्त्रा ततः स्वार्थे कन्। "भस्त्रैषाजाज्ञेति।" ७।३।४७। इति इत्वं न। आतः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्य्याणां मतेन। इति काशिका।) चर्म्मप्रसेविका। इति शब्दरत्नावली॥

भस्त्रा, स्त्री, (भस्यतेऽनयेति। भस+"हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन् अजादित्वात् टाप्।) अग्निदीपकचर्म्मनिर्म्मित यन्त्रविशेषः। भाथी इति याँता इति च भाषा। तत्पर्य्यायः। चर्म्मप्रसेविका २। इत्यमरः।२।१०।३३॥ चर्म्मप्रसेवकः ३। इति भरतः॥ भस्त्राका ४ भस्त्रका ५ भस्त्री ६। इति शब्दरत्नावली॥ भस्त्रिका ७। इति व्याकरणम्॥ (यथा, भागवते। ९। २०। २१।
"माता भस्त्रा पितुः पुत्त्रो येन जातः स एव सः।
भरस्व पुत्त्रं दुष्मन्त। मावमंस्थाः शकुन्तलाम्॥")

भस्त्राका, स्त्री, भस्त्रा। इति शब्दरत्नावली॥

भस्त्री, स्त्री, (भस्यतेऽनयेति। भस्+त्रन्। गौरादित्वात् ङीष्।) भस्त्रा। इति शब्दरत्नावली॥

भस्म, [न्] क्ली, (बभस्तीति। भस् भर्त्सनदीप्त्योः+"सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्॥ दग्धकाष्ठादिविकारः।) शिवाङ्गभूषणम्। छाइ इति भाषा। यथा,—
"अस्याङ्गभूषणं भस्म विभूतिर्भूतिरस्य तु।"
इति शब्दरत्नावली॥
तद्भस्म कामदेवशरीरजम्। यथा,—
"प्रसीद सर्व्वभूतेश! भक्ता त्वत्प्रणता वयम्।
इति स्म वदतां तेषाममराणां तदानलः।
ललाटचक्षुःसम्भूतो भस्माकार्षीत्मनोभवम्॥
दग्ध्वा कामं तदा वह्निर्ज्वालामालातिदीपितः।
संस्तम्भितोऽथ विधिना हरं गन्तुं शशाक न॥
महादेवोऽथ तद्भस्म मनोभवशरीरजम्।
आदाय सर्व्वगात्रेषु भूतिलेपं तदाकरोत्॥
शेषशेषाणि भस्मानि समादाय तदा हरः।
सगणोऽन्तर्दधे काशीं विहाय विधिवत्ततः॥"
इति कालिकापुराणे ४१ अध्यायः॥*॥

भस्मलेपनं सर्व्वविधस्नानान्तर्गताग्नेयस्नानम्। यथा,—
"आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्।"
इति यामलः॥
शिवपूजायां ललाटे तस्य धारणमावश्यकम्। यथा,—
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥"
इत्याह्निकतत्त्वम्॥
तेन कांस्यशुद्धिर्यथा,—
"अम्भसा हेमरूप्याय: कांस्यं शुध्यति भस्मना।
अम्लैस्ताम्रञ्च रैत्यञ्च पुनःपाकेन मृण्मयम्॥"
इति शुद्धितत्त्वम्॥*॥
अश्मरीविकारः। यथा,—
"शर्करासिकतामेही भस्माख्योऽश्मरीविकृतम्।
अश्मर्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना॥"
इति सुश्रुते निदानस्थाने अश्मरीनिदानम्॥
भस्मकं, क्ली, (भस्म+संज्ञायां कन्।) रोगभेदः। भस्मकीट इति ख्यातः। विडङ्गः। (यथास्य पर्य्यायः।
"कृमिघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम्।
क्रिमिघ्नञ्च विडङ्गञ्च गर्द्दभं तच्च केवलम्॥"
इति वैद्यकरत्नमालायाम्॥)
कलधौतम्। इति मेदिनी। के, १३३॥*॥
भस्मकस्य निदानसंप्राप्तिपूर्व्वकं लक्षणमाह।
"कट्वादिरूक्षान्नभुजां नराणां
क्षीणे कफे मारुतपित्तवृद्धौ।
अतिप्रवृद्धः पवनान्वितोऽग्नि-
र्भुक्तं क्षणाद्भस्म करोति यस्मात्।
तस्मादसौ भस्मकसंज्ञकोऽभ्र-
दुपेक्षितोऽयं पचते च धातून्॥"
भस्मकस्य सोपद्रवमरिष्टमाह।
"तृट्स्वेददाहज्वरमूर्च्छादीन् कृत्वैवात्यग्निसम्भवान्।
पक्वान्नमाशु धात्वादीन् स चिप्रं नाशयेद्-
ध्रुवम्॥"
इति भावप्रकाशः॥
(अत्र तीक्ष्णाग्निव्याख्याने विजयेनोक्तम्। तीक्ष्णग्रहणेन भस्मकस्यावरोधः। अत्यन्ततीक्ष्णाग्निरेव हि भस्मकमित्युच्यते॥ यदुक्तं चरके चिकित्सास्थाने ऊनविंशेऽध्याये। भस्मकचिकित्सामाह।
"नरे क्षीणकफे पित्तं कुपितं मारुतानुगम्।
स्वोष्मणा पावकस्थाने बलमग्नेः प्रयच्छति॥
तथा लब्धबलो देहे विरूक्षे सानिलोऽनलः।
परिभूय पचत्यन्नं तैक्ष्ण्यादाशु मुहुर्मुहुः॥
पक्त्वान्नं ससतं धातून् शोणितादीन् पचत्यपि।
ततो दौर्ब्बल्यमातङ्कान् मृत्युञ्चोपनयेन्नरम्॥
भुक्तेऽन्ने लभते शान्तिं जीर्णमात्रे प्रताम्यति॥"
"तमत्यग्निं गुरुस्निग्धशीतमधुरविज्वलैः॥
अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः।
मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत्॥
निरिन्धनोऽन्तरं लब्ध्वा यथैनं न विपादयेत्।

पायसं कृशरं स्निग्धं पैष्टिकं गुडवैकृतम्॥
अद्यात्तथौदकानूपपिशितानि घृतानि च।
मत्स्यान् विशेषतः स्निग्धान् स्थिरतोयचराश्च ये।
तथा॥
आविकं सघृतं मांसमद्यादत्यग्निनाशनम्।"
"पिबेत् शीताम्बुना सर्पिर्मधूच्छिष्टेन वा युतम्
गोधूमचूर्णं पयसा ससर्पिष्कं पिबेन्नरः॥
आनूपरससिद्धान् वा शालीन् स्नेहाक्तिलवर्ज्जितान्।
गोधूमचूर्णमद्यं वा वधयित्वा शिरां पिबेत॥"
"श्यामा त्रिवृद्विपक्वं वा पयो दद्याद्विरेचनम्।
असकृत् पित्तशान्त्यर्थं पायसप्रतिभोजनम्॥
यत्किञ्चिन्मधुरं मेध्यं श्लेष्मलं गुरुभोजनम्।
तदत्यग्निहितं सर्व्वं भुक्त्वा प्रस्वपनं दिवा॥
कफे वृद्धे जिते पित्ते मारुते चानलः समः।
समधातोः पचत्यन्नं पुष्ट्यायुर्ब्बलवृद्धये॥")
भस्मकारः, पुं, (भस्म करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इति अण्।) रजकः। इति शब्दमाला॥
भस्मकूटः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—
"नन्दनात् पूर्व्वभागे तु भस्मकूटो महागिरिः।
यत्र तिष्ठति भूतेशो महादेवो वृषध्वजः॥"
इति कालिकापुराणे ८१ अध्यायः॥
भस्मगन्धा, स्त्री, (भस्मन इव गन्धो यस्याः।) रेणुका। इति भावप्रकाशः॥
भस्मगन्धिका, स्त्री (भस्मगन्धोऽस्त्यस्या इति। भस्मगन्ध+"अत इनिठनौ।" ५।२।११५। इति ठन्। टाप्।) रेणुकाख्यगन्धद्रव्यम्। इति जटाधरः॥
भस्मगन्धिनी, स्त्री, (भस्मन इव बाहुल्येन गन्धोऽस्त्यस्या इति। भस्मगन्ध+इनिः। ङीप्।) रेणुकाख्यगन्धद्रव्यम्। इत्यमरः।२।४।१२०॥
भस्मगर्भः, पुं, (भस्म गर्भेऽस्य।) तिनिशवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य तिनिशशब्दे ज्ञातव्यम्॥)
भस्मगर्भा, स्त्री, (भस्म गर्भेऽस्या इति। टाप्।) कपिलशिंशपा। इत्यमरः।२।४।६३॥ (अस्याः पर्य्यायो यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता॥")
रेणुकानामगन्धद्रव्यम्। इति जटाधरः॥
भस्मतूलं, क्ली, (भस्म तूलति तूलयति वेति। तूल+क।) ग्रामकूटः। पांशुवर्षणम्। हिमम्। इति मेदिनी। ले, १६८॥
भस्मरोहा, स्त्री, (भस्मनि रोहति इति। रुह्+अच्। टाप्।) दग्धावृक्षः। इति राजनिर्घण्टः॥
भस्मवेधकः, पुं, (भस्म इव वेधकः।) कर्पूरः। इति शब्दरत्नावली॥
भस्माचलः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—
"सर्व्वतीर्थजले स्नात्वा दृष्ट्वा चक्रं सवा-
सवम्।

मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचलं गते॥"
इति श्रीकालिकापुराणे ८१ अध्यायः॥
भस्माह्वयः, पुं, (भस्म आह्वयति स्पर्द्धते इति। आ+ह्वे+बाहुलकात् शः।) कर्पूरः। इति त्रिकाण्डशेषः॥ (विवरणोऽस्य कर्पूरशब्दे ज्ञातव्यः॥)
भा, ल य दीप्तौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-अनिट्।) ल, भाति। य, भा। इति दुर्गादासः॥
भा, स्त्री, (भा दीप्तौ+"विद्भिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। टाप्।) प्रभा। दीप्तिः। इत्यमरः।१।४।३४॥ (यथा, वाजसनेयसंहितायाम्।१०।१२।
"भायै दार्व्वाहारमिति॥")
भाः, [स्] पुं, (भासते इति। भास् दीप्तौ+"भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।" ३।२।१७७। इति क्विप्।) सूर्य्यः। इति त्रिकाण्डशेषः॥ (क्ली, दीप्तिः। इत्यमरः।१।४।३४॥ यथा, ऋग्वेदे।१।४६।१०।
"अभूदु भा उ अंशवे हिरण्यं प्रति सूर्य्यः॥")
भाकुटः, पुं, (भया दीप्त्या कुटतीति। कुट+क।) मत्स्यविशेषः। भेकटी इति भाषा॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। वृष्यत्वम्। श्लेष्मकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥
भाकूटः, पुं, (भायुक्ताः कूटाः शिखराणि यस्य।) पर्व्वतभेदः। मत्स्यभेदः। इति मेदिनी। टे,५३॥
भाकोषः, पुं, (भासां दीप्तीनां कोष इव।) सूर्य्यः। इति त्रिकाण्डशेषः॥
भाक्तं, त्रि, (भक्तिः गौण्यावृत्तिरागतमिति। भक्ति+अण्।) पारिभाषिकम्। गौणम्। लाक्षणिकम्। औपचारिकम्। यथा। "नन्वेव परत्र सप्तमे मासि क्रियमाणस्य कथं वाष्मासिकत्वम्। इति चेद्भाक्तम्।" इति तिथ्यादितत्त्वम्॥ (भक्तस्येदमिति तस्येदमित्यण्।) भक्तसम्बन्धि च॥ (भक्तमस्मै दीयते नियुक्तमिति। भक्त+"भक्तादणन्यतरस्याम्।"४।४।६८। इत्यण्। अन्नेन पोष्यं च॥)
भाक्तिकः, त्रि, (भक्तमस्मै नियुक्तं दीयते इति। भक्त+"भक्तादणन्यतरस्याम्।"४।४।६८। इति पक्षे ठक्।) अन्नेन पोष्यः। भक्तमस्मै दीयते। इति सिद्धान्तकौमुदी॥
भागः, पुं, (भज्यते इति। भज भागसेवयोः+कर्म्मणि घञ्।) अंशः। इत्यमरः।२।६।८८॥ रूप्यार्द्धकः। भाग्यम्। एकदेशः। इति शब्दरत्नावली॥ राशित्रिंशभागैकभागः। यथा,—
"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरवचनम्॥ (भज+भावे घञ्। भजनम्। भगानामैश्वर्याणां समूहः इति अण्। ऐश्वर्य्यसमूहः॥)
भागधेयं, क्ली, (भाग एव। भाग+"भागरूपनामभ्यो धेयः।" इति धेयप्रत्ययः। अभिधानात् नपुंसकत्वम्।) भाग्यम्। इत्यमरः।१।४।२८॥

भागधेयः, पुं, (भागेन धीयते इति । धा + कर्म्मणि यत् ।) राजकरः । इत्यमरः । २ । ८ । २७ ॥ दायादः । इत्यजयपालः ॥

भागवतं, क्ली, (भगवतो भगवत्या वा इदम् । भगवत् + तस्येदमित्यण् ।) अष्टादशपुराणान्तर्गतमहापुराणविशेषः । स च वेदव्यासकृतद्वादशस्कन्धद्वात्रिंशदुत्तरत्रिशताध्यायसमन्विताष्टादशसहस्रश्लोकसंख्याक-भगवन्माहात्म्यवर्णन-प्रधानको ग्रन्थः । यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे ।

"यत्राधिकृत्य गायत्त्रीं वर्ण्यते धर्म्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम् ॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्त्तितम् ॥"

पुराणान्तरे च ।

"ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः ।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥
गायत्त्र्या च समारम्भस्तद्वै भागवतं विदुरिति ॥"

पद्मपुराणे च अम्बरीषं प्रति गौतमवचनम् ॥

"अम्बरीष ! शुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति ॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

(तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धम् । एकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतम् । लोकेऽप्युपलभ्यते द्वयोर्देवीभागवतनाम्ना विष्णुभागवतनाम्ना चाख्येव । तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्व्विवादमेव । तथापि किं देवीभागवतं महापुराणमन्यदुपपुराणमथवा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये केचित् विष्णुभागवतमेव महापुराणमिति वदन्ति । केचित् देवीभागवतमेव महापुराणमिति वदन्ति । तत्र प्रथमपक्षैकदेशिनः केचिदुपपुराणेषु द्वितीयं भागवतं नास्त्येव महापुराणेष्वेवैकं भागवतं प्रसिद्धम् । तच्च विष्णुभागवतमेव न देवीभागवतम् । देवीभागवतन्तु निर्म्मूलमेवेति वदन्ति । द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं वोपदेवकृतमिति वदन्ति । वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वमुपपुराणत्वञ्च । ननु महापुराणेष्वेवैकं भागवतं प्रसिद्धम् । नतूपपुराणेषु द्वितीयमस्तीति चेन्न । कूर्म्मगरुडपाद्मादिषूपपुराणेषु द्वितीयस्य स्पष्टपरिगणनात् । तथाहि हेमाद्रौ दानप्रस्तावे कूर्म्मपुराणेऽष्टादशपुराणान्युक्त्वा,—

"अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ॥"

इत्यादि ॥

"पराशरोक्तं प्रवरं तथा भागवतद्वयम् ॥" इति ।

तथा गारुडे तत्त्वरहस्ये द्वितीयांशे धर्म्मकाण्डे प्रथमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागमुक्त्वा लघुपुराणानां सात्त्विकादिभेदेन विभागप्रदर्शनपरे ग्रन्थेऽप्युक्तम् ।

"पुराणं भागवतं शैवं नन्दिप्रोक्तं तथैव च ।
पाशुपतं रैणुकञ्च भैरवञ्च तथैव च ॥"

इति ॥

तथा तत्पूर्व्वमपि ।

"विष्णुधर्म्मोत्तरे चैव तच्च भागवतं तथेति ॥"

तच्च भागवतं तथेति पाठे तच्च ग्राह्यमित्यर्थः । तद्विशेषणेन चोत्तमत्वं सूचितम् । तथा पाद्मे शकुनपरीक्षायाम् ।

"ब्राह्मं पाद्मं वैष्णवञ्च मात्स्यं नारदेरितम् ॥"

इत्यादि ॥

"तथैव गदितं राम ! पुराणं कापिलं तथा ।
वाराहं ब्रह्मवैवर्त्तं शकुनेषु प्रशस्यते ।
शैवं भागवतं शैवं भविष्योत्तरमेव च ॥" इति ॥

तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु ।

"शैवमादिपुराणञ्च देवीभागवतं तथा ॥" इति ॥

तथा मधुसूदनसरस्वतीकृतसर्व्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतं परिगणितम् । नागोजीभट्टादिभिश्च धर्म्मशास्त्रग्रन्थेष्वेवमन्यैरपि निबन्धकारैरिति । ननु देवीभागवतस्य ।

"तच्च भागवतं पुण्यं पञ्चमं वेदसम्मितम् ॥"

इति प्रथमाध्यायस्थस्ववचनेनाष्टादशमहापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतः कथमन्यपुराणमुपपुराणत्वं बोधयेन्नह्येवं क्वचिद्दृष्टचरमिति चेन्न । नारदीयशिववायव्यादित्यपुराणानां स्वमुखेनान्यमुखेन वा महापुराणत्वेन ख्यायमानानामन्यपुराणैरुपपुराणत्वस्य व्यवस्थापनात् । पुराणमतभेदेन कस्यापि पुराणस्य महापुराणत्वोपपुराणत्वसिद्ध्या तद्विरोधाभावात् पुराणभेदेन मतभेदस्तु बहुशः प्रसिद्धः । वैष्णवपुराणेषु सात्त्विकत्वं शैवपुराणेषु तामसत्वं वैष्णवपुराणमतेन । शैवपुराणेषु सात्त्विकत्वं वैष्णवपुराणेषु तामसत्वम् ।

"दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः ।
तामसानि च चत्वारि वैष्णवानि प्रचक्षते ॥"

इति स्कान्दे ॥

शैवपुराणमतेनैव प्रकारेणेति । तथाहि नारदीयस्य पुराणस्य स्वान्तर्गतमहापुराणग्रन्थसूच्या स्वमुखेनैव स्वात्मनो महापुराणत्वं बाधयतः ।

"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अलिंपाग्निपुराणानि कूस्कंगारुडमेव च ॥"

इति वचनेन वक्ष्यमाणसूतपुराणवचनेन च महापुराणबहिर्भूतत्वं बोध्यते । आलिंपाग्नीत्यत्राऽऽग्नेयस्थाने आदित्यपुराणं तथा शिवपुराणस्य स्वमुखेन स्वस्य महापुराणत्वं बोधयतो मद्वयं भद्वयमित्येव वचनं तद्बहिर्भूतत्वं बोधयति । ननु वायव्यं पुराणमेव शैवं शिवप्रतिपादकत्वात्तस्य च वचतुष्टयपदेन संग्रहात्तदुदाहरणं न सम्भवतीति चेन्न । सूतपुराणे ।

"ब्राह्मञ्च वैष्णवं पाद्मं शैवं भागवतं तथा ।
भविष्यं ब्रह्मवैवर्त्तं मार्कण्डेयञ्च वामनम् ॥
आग्नेयं वायवं मात्स्यम् ।" इति वचनेन शैववायव्यपुराणयोः परस्परं पृथक्त्वेन परिगणनात् । तथा वायव्यपुराणस्य स्ववचनेन स्वस्य महापुराणत्वं बोधयतो वक्ष्यमाणशैवपुराणवचनं महापुराणबहिर्भूतत्वं बोधयति । तथादित्यपुराणस्यापि आलिंपाग्निपुराणानीति क्वचित् पुराणसम्मतपाठेन महापुराणत्वम् । अनापलिङ्गकूस्काण्डमिति क्वचित् पुराणसम्मतपाठेन महापुराणबहिर्भूतत्वं यथा चैतेषां चतुर्णां क्वचित् पुराणेषु महापुराणत्वेन क्वचिच्चोपपुराणत्वेन ग्रहणम् । तथा देवीभागवतस्यापि भविष्यतीति को विरोधः । मतभेदेनोभयोरपि वचनयोः प्रमाणत्वात् । ननु अन्यान्युपपुराणानि मुनिभिः कथितानि त्वित्यादिवचनैरुपपुराणानि व्यासान्यमुनिकृतान्येव सन्ति । देवीभागवत तु व्यासकृतमेवेति । तस्य कथमुपपुराणेष्वन्तर्भाव इति चेन्न । नारदशैववायव्यादित्यपुराणेषु व्यासकृतत्वेऽपि कस्यचित् पुराणमते उपपुराणत्वदर्शनात्ताहशनियमस्यास्वीकारात् प्रायशस्तथा सत्त्वाभिप्रायेण तु तद्वचनम् । इत्थं भागवतद्वयस्य महापुराणमध्ये उपपुराणमध्ये च सत्त्वसिद्धौ कस्य पुराणस्य मते किं भागवतं महापुराणान्तर्गतमिति चेदुच्यते । शैवपुराणमते मात्स्यपुराणमते च देवीभागवतमेव महापुराणमिति । तथाहि शैवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये शिवान्स्वम्बरेण व्यासेन महापुराणानि प्रणीतानीत्युक्त्वानन्तरं तेषां नामान्यष्टादशोक्त्वा तेषां यौगरूढानां नाम्नां निर्व्वचनं तत्रैव कृतम् । तद्यथा,—

"यत्र वक्ता स्वयं तार्क्ष्य ! ब्रह्मा साक्षाच्चतुर्मुखः ।
तस्माद्ब्राह्मं समाख्यातं पुराणं प्रथमं मुने ! ॥"

तार्क्ष्य इति मुनिसम्बोधनम् ।

"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम् ॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम् ।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः ॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं ननु देवीपुराणकम् ॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते ॥
यत्र वक्ताभवत्तार्क्ष्य ! मार्कण्डेयो महामुनिः ।
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम् ॥
अग्नियोगात्तदाग्नेयं भविष्योक्तेर्भविष्यकम् ।
विवर्त्तनाद्ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते ॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते ।
वराहस्य च वाराहं पुराणं द्वादशं मुने ! ॥
यत्र स्कन्दः स्वयं वक्ता श्रोता साक्षान्महेश्वरः ।
तत्तु स्कान्दं समाख्यातं वामनस्य तु वामनम् ॥
कौर्म्मं कूर्म्मस्य चरितं मात्स्यं मत्स्यस्य कीर्त्तितम् ।

भवद्भ्यस्तु मया यत्ना यत्तद् गावद्संज्ञकम् ।
ब्रह्मणश्चरितोक्तत्वाद् ब्राह्मं परिकीर्त्ति-
तम् ॥"

अत्र कश्चिद्वक्तृसम्बन्धः कश्चिच्छ्रोतृसम्बन्धः कश्चित्प्रतिपाद्यमुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। तत्र भागवतनाम्नो निर्व्वचनवाक्यमेतत्।

"भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम् ॥"

अनेन च वाक्येन भगवत्या इदं भागवतमिति व्युत्पत्त्या मुख्यप्रतिपाद्यमुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। का सा भगवतीत्यपेक्षायामाह दुर्गाया इति। तत्तु भागवतं तु शब्दो निश्चयार्थकः। तदेव भागवतपदवाच्यं प्रोक्तमित्यर्थः। न तु पुराणान्तरमतप्राप्तं विष्णुभागवतं महापुराणान्तर्गतं भागवतमित्यर्थं इति शैवपुराणेन स्वमतं प्रदर्शितम्। कश्चिदेतत् पुराणान्तरमतेन उपपुराणं जानीयात्तत्राह न तु देवीपुराणकमिति। पुराणकमित्यत्र कप्रत्ययोऽल्पार्थकः अल्पे इति सूत्रात् पुराणकमल्पं पुराणमिति यावत्। देव्याः पुराणकं देवीपुराणकम्। यदिदमुक्तं तद्देव्या उपपुराणं नैवास्तीत्यर्थः। अनेन च वाक्येनान्यस्य महापुराणत्वनिषेधेन स्वाभिप्रेतस्य च उपपुराणत्वनिषेधेन श्रीमद्देवीभागवतस्यैव महापुराणत्वं बोधयति व्यासः। मुख्यत्वेन भगवतीचरितप्रतिपादकस्य महापुराणमध्ये कस्यचित् पुराणस्यान्यस्याभावात्। ननु नारदादिपुराणवचनबलात् विष्णुभागवतस्य महापुराणान्तर्गतत्वे निर्व्विघ्नं निश्चिते तद्बलात् भागवतद्वयस्य मतभेदेन महापुराणत्वकल्पनापेक्षया यत्किञ्चित् भगवतीचरितस्यास्मिन्वचने ग्रहणेनानेन वचनेन विष्णुभागवतनाम्न एव निरुक्तिः कृतेति कुतो न कल्प्यते। वर्णते च विष्णुभागवते दशमस्कन्धे किञ्चिद्विन्ध्यवासिन्याश्चरितमिति चेन्न। तथा सति मुनेर्व्विष्णुभागवतविषय एव तात्पर्य्यसत्त्वे भगवत इदं भागवतमित्येव व्युत्पत्तिं कुर्य्यान्नहि केनचिन्मुनेः शिरसि भारः स्थापितो यत् स्वाभिप्रेतां युक्तियुक्तां निरुक्तिं त्यक्त्वा निष्प्रयोजनोऽनभिप्रेतां निरुक्तिं करोति। किञ्च सर्व्वैतद्वचनप्रकरणे

"यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥"

इति बहुवचनैर्बहुचरितमुख्यचरितसम्बन्धरूपप्रवृत्तिनिमित्तस्यैवाभिप्रेतत्वं मुनेरवसीयते। मतभेदेन पुराणभेदकल्पना तु नात्रैव नवीनास्ति। पूर्व्वोक्तयुक्त्या नारदशैववायव्यादित्यपुराणेष्वन्यत्रापि सत्त्वात्। अस्तु वा गौरवं नहि तद्भयात् मुनेस्तात्पर्य्यमन्यथाकर्त्तुं कश्चिदीष्टे। तस्मात् पूर्व्वोक्तं तात्पर्य्यं विहायान्यतात्पर्य्येणान्यार्थकरणं महासाहसमेव। ननु लक्षणवाक्यमेतत्। ततश्च दुर्गाचरितं यत्र वर्णते तद्भागवतमित्यर्थः। तच्च न देवीभागवतं भवितुमर्हति। तस्य तल्लक्षणलक्ष्यत्वे न तु देवीपुराणकमिति निषेधविषयत्वेन निषेधविध्योः समानविषयत्वापत्तेः। किन्तु विष्णुभागवतमेव। ननु तथाप्येतल्लक्षणमन्यपुराणेष्वतिप्रसक्तमिति चेन्न। यथा वृत्रासुरवधलक्षणमन्यपुराणेषु प्रसक्तमपि यथा लक्षणत्वेन गृहीतम्। तद्वदत्रापि सत्त्वादिति चेन्न। पूर्व्वोक्तनिरुक्तिवचनप्रकरणस्यास्य विरोधात्। किञ्च लक्षणवाक्यमेतदिति पक्षेऽप्येतस्य लक्षणस्य महापुराणोद्देशेनैव सत्त्वादुपपुराणेष्वस्य प्रसक्त्यभावाद्देवीपुराणकालिकापुराणयोरुपपुराणत्वस्य निश्चितत्वात् तयोरेतल्लक्षणस्य प्रसक्तिरेव नास्तीति न तु देवीपुराणकमिति निषेधो व्यर्थ एव स्यात्। तस्मादेव तद्वचनस्य पूर्व्वोक्त एवार्थः। किञ्च लक्षणवाक्यमेतदिति पक्षे यत् किञ्चिच्चरितं गृह्यते उत यावच्चरितम्। यत्किञ्चिच्चरितस्य सर्व्वमहापुराणेषु सत्त्वाद्देवीपुराणमात्रनिषेधेन न निर्व्वाहः। तस्माद्देवीपुराणस्यैव निषेधसामर्थ्याद्यावच्चरितं मुख्यत्वेन भगवतीचरित्रमेव ग्राह्यम्। तदा तव नाभीष्टार्थसिद्धिः। मुख्यत्वेन विष्णुभागवते दुर्गाचरितस्याभावात्तमैव त्वभीष्टार्थसिद्धिः। निषेधविध्योः समानविषयकत्वरूपं दूषणन्तु नैव सम्भवति। प्रकरणबलात् तात्पर्य्ये निश्चिते तद्विषयं विहायैव निषेधप्रवृत्तेः। वृत्रासुरवधोपेतत्वलक्षणं तु गायत्र्यारम्भविशिष्टमिति न तदतिप्रसक्तं तस्मात् पूर्व्वोक्त एव तद्वचनार्थ इति तद्वचनाद्देवीभागवतं महापुराणं न तु विष्णुभागवतमिति शिवपुराणमतम्। अत्र च नियमद्वयस्य पूर्व्वोक्तस्य सत्त्वाद्विष्णुभागवतविषये तथा नियमद्वयाभावादिदं शिवपुराणमतमेव मुख्यमन्यपुराणमतं त्वकाण्डमिति नियमद्वयप्रदर्शकव्याससवाक्येन स्पष्टमेव बोधितमिति सुधियो विभावयन्तु। किञ्च।

"शैवमादिपुराणञ्च देवीभागवतं तथा ।"

इति पाद्मवचनसंवादितया,—

"नवरात्रे तु देवेशि । दौर्गं भागवतं पठेत् ।
जपेत् सप्तशतीं चण्डीं नियमेन समाहितः ॥"

इति दुर्गातरङ्गिणीधृतयामलवचनेन तथा,—

"देवीभागवतं नित्यं पठेद्भक्त्या समाहितः ।
नवरात्रे विशेषेण श्रीदेवीप्रीतये सदा ॥"

इति महेशठक्कुरकृतदुर्गाप्रदीपधृतदेवीयामलवचनेन च सप्रमाणस्य देवीभागवतस्य सर्व्वथोपपुराणमध्ये एव निवेशात्।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम् ।"

इति प्रथमस्कन्धस्थस्य महापुराणेषु पञ्चममिदं पुराणमित्यर्थकस्य देवीभागवतोक्तवचनस्य निरालम्बनत्वादप्रामाण्यापत्तेः। मन्मते तु तस्य विषयलाभान्नाप्रामाण्यं तद्वचनप्रामाण्यादपि देवीभागवतमेव महापुराणमिति। किञ्च हेमाद्रौ कालिकापुराणे।

"यदिदं कालिकाख्यं तन्मूलं भागवतं स्मृतम् ।"

इति वचनं तदपि देवीभागवतस्यैव महापुराणत्वं बोधयति। तथाहि।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते ।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम् ॥"

इति मात्स्यवचनेनोपपुराणानां महापुराणमूलकत्वनियमादिदं कालिकापुराणं किम्पुराणमूलकमित्याकाङ्क्षायां तस्यानिवर्त्तकमिदं वाक्यं यदिदं कालिकाख्यं पुराणं तन्मूलं तस्य मूलं भागवतं विदुरिति हि तस्यार्थो निबन्धकारैर्दर्शितः। यथान्यान्युपपुराणान्येकैकस्मान्महापुराणान्निर्गतानि तद्वदिदं भागवतादुत्पन्नमिति यावत्। तच्च भागवतं न वैष्णवं तन्मूलं भवितुमर्हति। वैष्णवोपपुराणस्य देवीपुराणमूलकत्वे एव सामञ्जस्यात्। शैवोपपुराणानां शैवेभ्य एव वैष्णवोपपुराणानां वैष्णवेभ्य एवोत्पत्तिदर्शनादिति देवीभागवतमेव तन्मूलमिति तस्य महापुराणत्वं सिद्धम्। यत्र तु क्वचित् क्वचिन्महापुराणमूलकत्वमप्रसिद्धं तत्र यथायोग्यमनुमेयमिति। किञ्चादित्यपुराणदृष्ट्यापि देवीभागवतमेव महापुराणम्। तथाहि आदित्यपुराणे रक्तासुरवधप्रस्तावे।

"या जघ्ने महिषं दैत्यं क्रूरं वृत्रासुरं तथा ।
साद्य रक्तासुरं हत्वा स्वाराज्यं ते प्रदास्यति ॥"

इति वचनम्। अनेन वचनेन देवीभागवते स्वसम्मतिर्द्दर्शिता। न हि देवीभागवतातिरिक्तसर्व्वपुराणेषु देवीकृतो वृत्रासुरवधः क्वचिदप्यस्ति। इन्द्रकृतस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीकृतः सोऽस्ति। तद्ग्रहणेन तु देवीभागवते स्वसम्मतिर्द्दर्शितेति युक्तमेव। अनन्तरञ्च तत्रैव पुराणदानप्रस्तावे।

"ददाति सूर्य्यभक्ताय यस्तु भागवतं द्विजाः ।
सर्व्वपापविनिर्म्मुक्तः सर्व्वव्याधिविवर्ज्जितः ॥
जीवेद्वर्षशतं साग्रमन्ते वैवस्वतं पदम् ॥"

इति पठितम् ॥

अत्र च स्वसम्मतं भागवतमेव ग्रहीतुमुचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव स्वरसतः सङ्गच्छते। प्रथमश्लोके एकादशद्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधानसहस्रनामादेः कथनात् सूर्य्यस्य गायत्रीदेवतात्वात्। तद्भागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति। किञ्च

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति। वेदे त्रिपदा गायत्रीति गायत्रीलक्षणं श्रूयते। तेन च त्रिपाच्छन्दोऽधिकृत्य यत्र धर्म्मविस्तरो वर्ण्यते तद्भागवतमिति तदर्थः। त्रिपाच्छन्दश्च देवीभागवते प्रथमश्लोके।

"सर्व्वचैतन्यरूपां तामाद्यां विद्याञ्च धीमहि ।
बुद्धिं या नः प्रचोदयात् ॥" इति श्रूयते।

न विष्णुभागवते तच्छब्दोऽस्ति मुख्यार्थसम्भवे गायत्रीपदस्य लक्षणया धीमहीत्यर्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु साहसमेव। क्वचित्पुराणेषु यदि तादृशान्येव विष्णुभागवतपराणि वचनानि सन्ति। तत्र गत्यन्तराभावादस्तु लक्षणा। उदासीने मात्स्य वाक्ये तु मुख्यविषयसम्भवे सानुचिता। यद्यप्याधुनिकपुस्तकेषु क्वचित्तच्चरणश्लोकोऽपि दृश्यते तथापि सम्प्रदायी शुभवर्मटीकाकारादिभिश्छिपातश्लोकस्यैव व्याख्यातत्वेन स एव साम्प्रदायिकः पाठ इति बोध्यम्। यत्तु गायत्र्यर्थश्च विष्णुध्यानं न तु शिवशक्तिसूर्यादि ध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव।

"मैत्रायणीयानां भर्गो वै रुद्रः।" इति श्रुतौ प्रपञ्चसारादितन्त्रेषु पुराणादिषु च शिव सूर्यशक्त्यादिरूपार्थस्योक्तत्वाच्च तदुदाहृतमात्स्यवाक्यस्य विरोधत्वे नापेक्ष्यं स्यादसति ह्यनुमानमिति न्यायात् खादकमेवेति। किञ्च।

"हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः॥"

इति पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकम्। तथा हि हयग्रीवनामासुरो देवीभागवते प्रथमस्कन्धे प्रसिद्धस्तेनोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदेवत्यो मन्त्रः। सा विद्या यत्र वर्णते तद्भागवतमित्यर्थः। स दैत्यस्तदुपासिता विद्या चेत्युभयमपि तत्रैव प्रथमस्कन्धे दर्शितम्।

"जपन्नेकाक्षरं मन्त्रं मायाबीजात्मकं मम॥"
इत्यादिना॥

ननु विष्णुभागवते पञ्चमस्कन्धेऽपि हयग्रीव मन्त्रस्य सत्त्वादिदं वचनमुभयभागवतसाधारण मिति चेन्न। नारदीये शारदातिलकादिनिबन्धेषु च।

"मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः
स्मृताः॥"

इत्यादिवचनैः स्त्रीदेवत्यमन्त्रेष्वेव विद्यापदप्रयोगो न पुंदेवत्यमन्त्रेष्विति प्रतिपादनात्। क्वचित् पुंदेवत्यमन्त्रे तथाप्रयोगस्तु गौणः। न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पयितुमुचितम्। लक्षणारूपदोषापत्तेः। तस्मात् तद्वचनमुभयसाधारणमिति देवीभागवतस्यैव महापुराणत्वं बोधयति। किञ्च सारस्वतस्य कल्पस्येति मात्स्यवचनादपि देवीभागवतमेव महापुराणम्। अत्र ह्येव प्रकरणशुद्धिः।

ऋषय ऊचुः।

"पुराणसंख्यामाचक्ष्व सूत। विस्तरतः क्रमात्।"

इति मुनिप्रश्नोत्तरं ब्रह्मणाभिहितं पूर्व्वं यत्तद्ब्राह्मं पद्मकल्पवृत्तान्ताश्रयं पाद्मं वाराहकल्पवृत्तान्ताश्रयं वैष्णवं श्वेतकल्पवृत्तान्ताश्रयं वायवीयमित्येवं तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरम्।

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥" इति॥

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शितानि। पश्चादुप पुराणकथनार्थमुपभेदान् प्रवक्ष्यामीति प्रतिज्ञाय पद्मपुराणान्नारसिंहं निर्गतमेवं नन्दिसाम्बादित्यसंज्ञकान्युक्त्वा अन्योपपुराणान्यपि महापुराणेभ्य एव निर्गतानीति।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतम्॥"

इति वचनेन सूतऋषिरुक्तवान्॥ ततः।

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च॥"

इत्यादिना पुराणलक्षणान्युक्त्वा,—

"सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः।
राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः।
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च।
सङ्कीर्णेषु सरस्वत्याः पितृणां च निगद्यते॥"

इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितृणां माहात्म्यसम्बन्धात् कल्पानां सात्त्विकराजसतामसत्वसङ्कीर्णत्वभेदेश्चातुर्विध्यत्वमुक्तवानिति। तत्र कल्पानां तत्तद्देवतासम्बन्धश्चागन्तु तत्तत्कल्पाश्रिततत्तत्पुराणप्रतिपाद्यमुख्यदेवतात्वानेनैव बोध्यम्। अन्यप्रकारस्य क्वचिदपि पुराणेष्वनुपलम्भात्तत्रैवं सति।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इति वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु यथा गारुड़कल्प इत्यत्र गरुडस्यायं गारुडः। यथा वा वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तिः प्रसिद्धा। तद्वदेव सरस्वत्या अयं सारस्वत इति विग्रहः।

"सरस्वत्यास्तथा कल्पो गौरीकल्पस्तथैव च॥"

इति कल्पनामसु सरस्वतीकल्पत्वेनैव कथितत्वाच्च। मात्स्यपुराणे उपन्याध्याये।

"सङ्कीर्णेषु सरस्वत्याः पितृणां कल्प उच्यते॥"

इति वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राणां कल्पवद्गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थप्राप्तत्वाच्च तादृशसारस्वतकल्पसम्बन्धिनो ये देवमनुष्यास्तद्वृत्तान्तस्योद्भव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः। तद्वृत्तान्तप्रदर्शकं यत् पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तत्तन्नाम्ना व्यवह्रियन्ते। एतच्च तत्तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवताया एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितकूर्म्मपुराणादिषु सर्व्वत्र प्रसिद्धमेव। तथा च मुख्यत्वेन सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत् तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतकल्प इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं सङ्कीर्णेषु सरस्वत्या इति वचनेनैश्वरप्रेरणां विनापि गृहीतमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं वन्ध्यापुत्रोपममेव। तत्र मुख्यत्वेन सरस्वत्याविर्भावस्यासत्त्वात। विष्णुभागवते द्वितीयस्कन्धे। "पाद्मं कल्पमथो शृणु।" इति वचनेन स्वमुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वस्योक्तत्वात्। तद्विरोधाच्च न च पाद्मकल्प एव सारस्वतः। सरस्वान् समुद्रस्तस्माज्जातं कमलं सारस्वतं तस्य कल्प इति व्युत्पत्तेरिति वाच्यम्।

"पद्मकल्पस्य वृत्तान्तं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातम्॥"

इति पूर्व्वोदाहृतशिवपुराणवचनेन।

"एतदेव यदा पद्ममभूद्धैरण्मयं जगत्।
तद्वृत्तान्ताश्रयं तद्वत पाद्ममित्युच्यते बुधैः॥
पाद्मं तत् पञ्चपञ्चाशत्सहस्राणीह कथ्यते॥"

इति मात्स्यपुराणवचनेन।

"सारस्वतस्य कल्पस्य मध्ये येस्युर्नरामराः।"

इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्कथनात्। किञ्च सारस्वतकल्पपाद्मकल्पयोरेकत्वे पद्मकल्पस्य प्रतिपादकं पुराणद्वयं पाद्मं भागवतञ्चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तान्तमित्यत्राभिव्यक्तपदार्थो ये स्वतन्त्रा लोकविश्रुता इति न्यायेन पूर्व्वं बुद्ध्यारूढं प्रसिद्धं पाद्मशब्दं विहायाप्रसिद्धं सारस्वतशब्दं पाद्मशब्दस्य वाचकं कृत्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च सरस्वत्यास्तथा कल्प इत्यादेः। पूर्व्वोक्तस्य सारस्वतपदनिरुक्त्यर्थकस्य वचनसमूहस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे त्रिंशत्कल्पेषु मत्स्यपुराणान्तिमाध्याये कीर्त्तितेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम्। प्रभासखण्डे त्रिंशत्कल्पेषु विष्णुजकल्पाग्नेयकल्पसुपुमानुकल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्यान्तिमाध्याये न ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात्। यदि तेषां पर्य्यायत्वेन कुत्रचिदन्तर्भावः क्रियते तर्ह्यस्यापि कुत्रचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रबन्धटीकाकारेण पितृकल्प एव पूर्व्वार्द्धान्ते पद्मस्योद्भवात् पितृकल्पपदेन पाद्मसंग्रहो वेदितव्य इत्युक्तम्। पुराणकल्पकथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्व्वथा न ग्रहणम्। वस्तुतस्तु त्रिंशत्कल्पा ब्रह्मणस्त्रिंशत्तिथ्यात्मकाः त्रिंशत्तिथिषु प्रतिपदादिषूत्पद्यन्ते। भूर्भुवःस्वः भूर्भुवःस्व इत्यादयस्त्रयस्त्रिंशत्कल्पाः। पाद्मादयश्च वायुपुराणोक्ता दिनकल्पा ब्रह्मणः प्रति दिवसेषूत्पद्यन्ते इति दिनकल्पतिथिकल्पानां सुतरां भेदात्तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः।

यत्तु विष्णुभागवतस्यारम्भतः पाद्मकल्पाश्रयत्वेऽपि कृष्णजन्मखण्डस्यैव सारस्वतकल्पभवत्वेन तस्य च दशमस्कन्धे सत्त्वात्।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामरा: ॥"

इति वचनस्य विष्णुभागवतं विषयोऽस्तीत्यादुक्तद्वत् । हयग्रीवब्रह्मविद्याख्यानस्य सारस्वतकल्पभवत्वप्रतिपादकानां वचनानां निर्मूलत्वात् सकलत्वेऽपि यस्मिन् पुराणे यस्य कल्पस्य प्रथमत: प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियम: सर्व्वपुराणे तथा दृष्टत्वात् । तथा च हयग्रीवब्रह्मविद्याख्यानस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथाया अभावात्पाद्मकल्पकथाया: प्रथमतो विद्यमानत्वस्य सर्व्वैरेवोक्तत्वाच्च । न सारस्वतस्य कल्पस्येति वचनस्य विष्णुभागवतं विषय: । किञ्च हयग्रीवब्रह्मविद्याख्यानस्य यथा दशमस्कन्धे कथनं तदा सर्व्वपुराणेषु तत्कथनं वर्त्तत एवेति सर्व्वपुराणानां तद्वचनविषयत्वं स्यात्तथा च सर्व्वपुराणानि भागवतपदवाच्यानि स्युस्तस्मात्सारस्वतकल्पस्य यत्र प्रथमत: प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्तादृशञ्च देवीभागवतमेवास्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति । किञ्च शिवपुराणे उमासंहितायाम् ।

"ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने ।
महाविद्या जगद्धात्री सर्व्वविद्याधिदेवता ॥
द्वादश्यां फाल्गुनस्यैव शुक्लायां समभून्नृप ! ॥"

इति वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिने एव सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ कल्पश्राद्धप्रकरणे नागरखण्डे ।

"सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य
च ।" इति ॥

तथा च सरस्वत्या: कल्प इत्यर्थकस्य ।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामरा: ॥"

इति वचनस्य सर्व्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यम् । किञ्च तस्य ग्रहणे तस्य हरिमाहात्म्यप्रतिपादकत्वात् । तदाश्रितकल्पस्य सात्त्विकत्वमेवायास्यति ।

"सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरे: ।"

इति वचनात् । ततश्च संकीर्णेषु सरस्वत्या इति वचनेन सारस्वतकल्प इति नाम्ना च पारमहंस्यसामग्र्येव कर्णेया स्यात् । अतो विष्णुभागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽनिच्छतापि वक्तव्यस्तस्मात् सारस्वतस्य कल्पस्येति वचनाद्देवीभागवतमेव महापुराणम् । अस्ति चात्र सरस्वत्याविर्भावप्रतिपादकं वचनम् । तदुक्तं देवीभागवते प्रथमस्कन्धे ।

"तस्यास्तु सात्त्विकी शक्ती राजसी तामसी
तथा ।
महालक्ष्मी: सरस्वती महाकालीति ता: स्त्रिय: ।
तासां तिसृणां शक्तीनां देहाङ्गीकारलक्षण: ।
कल्पार्थञ्च समाख्यात: सर्ग: शास्त्रविशारदै: ॥"
इति ।

"अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु ।"

इति वचनमपि शुकाय प्रोक्तमिति व्युत्पत्त्या देवीभागवतपरमपि सङ्गच्छते । भवति हि देवीभागवतं शुकायैव प्रोक्तं व्यासेनेति । किञ्च

"अष्टादशपुराणानि कृत्वा सत्यवतीसुत: ।
भारताख्यानमखिलं चक्रे तदुपबृंहणम् ॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति । अष्टादशपुराणोत्तरं भारतस्य जातत्वात् । भारतोत्तरञ्च विष्णुभागवतस्य जातत्वात् । भारतोत्तरकालं निर्व्विण्णो व्यासश्चकारेति विष्णुभागवते एवोक्तत्वात् । ननु

"वेदशाखा: पुराणानि वेदान्तं भारतन्तथा ।
कृत्वा सम्मोहसंमूढोऽभवं राजन् । मन-
स्यपि ॥"

इति देवीभागवते तृतीयस्कन्धे एवोक्तत्वात्तत्रापि सविरोधस्तदवस्थ एवेति चेन्न । मन्यते तदानीं ग्रन्थो नैव जात: किन्तु जनमेजयं प्रति एवं वक्तास्मीति ज्ञानचक्षुषा ज्ञात्वा भारतात् पूर्व्वमेव देवीभागवतं कृतमित्यर्थस्य कल्पनात् । त्वन्मते तु तथा कल्पयितुं न शक्यते । चतु:श्लोकीभागवतोपदेशस्य जायमानत्वात् । उपदेशात् पूर्व्वं तज्ज्ञानाभावस्यावश्यं कल्पनीयत्वात् । यदि तत्रापि पूर्व्वं व्यासस्य ज्ञानमस्तीति स्वीक्रियते तदा वक्ष्यमाण: सर्व्वोप्यर्थवाद: स्यात् । ततश्च ग्रन्थसारस्यभङ्गप्रसङ्ग इत्यास्तां तावत् । वस्तुतस्तु वेदशाखा: पुराणानीति पाठोऽसङ्गत इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोध: । यत्तु पाद्मे भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसङ्गे ।

"वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राणि संहिता: ।
दशसप्तपुराणानि षट्शास्त्राणि समाययु: ॥"

इत्युक्तम् । तत्र व्यासकृतपुराणानामष्टादशत्वादष्टादशेति वक्तव्ये सप्तदशत्वोक्ति: श्रीमद्भागवतस्याष्टादशत्वं गमयति तस्याष्टादशान्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे चाष्टादशानां श्रोतृत्वसम्भवेन श्रोतुमागतानां पुराणानामष्टादशत्वानुक्तेर्निर्बीजत्वप्रसङ्गात् । एवं पाद्मे

"सप्तदशपुराणानि कृत्वा सत्यवतीसुत: ।
नाप्तवान्मनसा तोषं भारतेनापि भामिनि । ॥
चकार संहितामेतां श्रीमद्भागवतीं पराम् ॥"

इति सप्तदशत्वोक्ति: श्रीमद्भागवतस्यैवैतां संहितामिति निर्द्दिष्टस्याष्टादशत्वं गमयति । देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्यनुक्तेर्निर्बीजत्वप्रसङ्गादित्याद्युक्तद्वत् । तेषामेव वचनैर्विष्णुभागवतस्याष्टादशपुराणान्तर्गतत्वं न सिध्यति । किन्तु देवीभागवतस्यैवेति चाहुर्धिकत्वं कुर्व्वाणो मूलमेव विनाशितवानिति न्याय आगत: । तथा हि भारतं व्याससुखाच्छ्रुत्वा तत्र सन्दिहान: क्रौष्टुकिर्मार्कण्डेयं प्रत्यागत्य सन्देहं पृष्टवान् तस्मै मार्कण्डेयो मार्कण्डेयपुराणमुक्तवान् । तदुक्तं मार्कण्डेयपुराणे

"तदिदं भारताख्यानं बह्वर्थं श्रुतिविस्तरम् ।
तत्त्वतो ज्ञातुकामोऽहं भगवन्तमुपस्थित: ॥"
इति ।

तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत् । तथैव तदुत्तरोत्पन्नैव विष्णुभागवतमपि । तथा च भारतात् पूर्व्वं षोडशपुराणान्येव सिद्धानि । तथा च पूर्व्वोक्तवचनमध्ये षोडशेत्येव वक्तव्ये सप्तदशेत्युक्तत्वात् । देवीभागवतमेव महापुराणमन्यथा सप्तदशत्वपूर्त्तिर्न स्यात् । तस्मात्तद्वचनप्रामाण्याद्देवीभागवतमेव महापुराणमिति सिध्यति न तु विष्णुभागवतम् । भारतात् पूर्व्वं सप्तदश मदीयभागवतसहितानि मार्कण्डेयमष्टादशमुभयमतसिद्धमेव विष्णुभागवतस्य भारतोत्तरं जायमानत्वेन तन्मध्ये तस्यावस्थानस्याभावादित्येवं ज्ञापनेनापि दोषाभावादिति सुधियो विभावयन्तु । यत्तु किञ्च पाद्मे ।

"वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने । ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"

इत्युक्त्या च भागवतस्य सात्त्विकत्वमुक्तम् । सात्त्विकेषु पुराणेष्विति कौर्म्मोक्त्या च सात्त्विकपुराणानां विष्णुपरत्वमुक्तम् । अतो विष्णुपरमेव भागवतमष्टादशपुराणान्तर्गतं न तु देवीभागवतमिति । अपि च स्कान्दे प्रभासखण्डे ।

"चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा तथा रवि: ।
अष्टादशपुराणेषु शेषेषु भगवान् भव: ॥"

इत्युक्तम् । स्कान्दे सौरसंहितायाञ्च ।

"कथ्यते दशभिर्विप्रा: पुराणै: परमेश्वर: ।
चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा प्रकीर्त्तित: ॥
एकेनाग्निस्तथैकेन भगवांश्चण्डभास्कर: ॥"

इत्युक्तमतोऽपि विष्णुभागवतमष्टादशान्तर्गतत्वमवश्यमित्याद्युक्तद्वत । त्वन्मते मत्स्योक्तसात्त्विकराजसतामससङ्कीर्णपुराणेषु मध्ये त्रयाणां व्यवस्था पूर्व्ववचनैस्त्वयोक्ता । सङ्कीर्णपुराणानान्तु नोक्ता । तेषां केषु पुराणेष्वन्तर्भाव इति वद । करिष्यामि कुत्रचिदिति चेन्मम मतेऽपि श्रीभगवत्या विष्णुशक्तित्वाभिमानेन मन्त्राधिष्ठात्री देवता वेदमाता दुर्गा दुर्व्वोध ध्यानभाग् गुरुश्च इति श्रीक्रमदीपिकोक्तप्रकारेण विष्णुमन्त्राणां दुर्गाया: अधिष्ठातृत्वेन तयोरैक्याद्वा तत्प्रतिपादकभागवतस्य वैष्णवेष्वेवान्तर्भावात् । अतएव

"हरिद्वाभ्यां रविर्द्वाभ्यां द्वाभ्यां चक्रीविना-
यकौ ।
द्वाभ्यां ब्रह्मा समाख्यात: शेषेषु भगवान्
शिव: ॥"

इति वचनं सङ्गच्छते । वस्तुतस्तु द्वयोरपि भागवतयोरस्मन्मते प्रमाणत्वात् । विष्णुभागवतपक्षपातिनां वचनानामस्माकं विरोधाभावेन तत्खापने प्रयोजनाभाव एव । तथा च नारदीयादिपुराणमतेन श्रीविष्णुभागवतं महापुराणं तद्वचनानि प्रसिद्धान्येवेति न लिखितानि । देवीभागवतन्तु त्वन्मते उपपुराणम् । शैव-

माग्म्यपुराणादिमते तु देवीभागवतं महापुराणम्। विष्णुभागवतमर्थादुपपुराणमिति सिद्धम्। अथ केचिद्देवीभागवतसम्मतिलेन देवीयामलतन्त्रम्।

"श्रीमद्भागवतं नाम पुराणं वेदसम्मितम्।
पारीक्षितायोपदिष्टं सत्यवत्यङ्गजन्मना ॥
तत्र देव्यवताराश्च बहवः प्रतिपादिताः ॥"

इति।

तथा

"इदं रहस्यचरितं राधोपासनमुत्तमम्।
आख्याय मम भक्ताय प्रोक्तं पूर्व्वं मयाद्रिजे।॥
मत्तो रहस्यं ज्ञात्वैव राधामाहात्म्यमुत्तमम्।
एतस्य विस्तरं चक्रे श्रीमद्भागवते तथा ॥
नारदे ब्रह्मवैवर्त्ते लोकानां हितकाम्यया ॥"

इति।

सौभाग्यकल्पलतायां संहारभैरवतन्त्रस्थं वचनं लिखन्ति। तत्र परे विवदन्ते। तदुभयमपि गौरवभिया न लिख्यत इति॥ * ॥)

तत्र विष्णुभागवते प्रथमस्कन्धे परिच्छिन्नारदयोः कथाख्यानम्। विप्रशापात् परीक्षितस्य प्रायोपवेशः। शुकपरीक्षितसंवादश्च ॥१॥*॥ द्वितीयस्कन्धे। योगधारणयोत्क्रान्तिः। नारदाजयोः संवादः। अवताराणुगीतम्। महदादिक्रमेण सृष्टिश्च॥ २ ॥ * ॥ तृतीयस्कन्धे। विदुरोद्धवसंवादः। क्षत्तृमैत्रेययोः संवादः। पुराणसंहिताप्रश्नः। महापुरुषसंस्थितिः। प्राकृतिकः सर्गः। वैकृतिकाः सप्त सर्गाः। ब्रह्माण्डसम्भूतिः। विराट्पुरुषोत्पत्तिः। कालस्य स्थूलसूक्ष्मस्य गतिः। पाद्मसमुद्भवः। अम्भोधेर्भुव उद्धारणा। हिरण्याक्षवधः। ऊर्द्धतिर्य्यगर्वाक् सर्गः। रुद्रसर्गः। अर्द्धनारीनरस्य सर्गः। यतः स्वायम्भुवमनुः स्त्रीणां आद्या प्रकृतिः शतरूपा च। कर्द्दमप्रजापतेर्धर्म्मपत्नीनां सन्तानः। भगवत्कपिलावतारः। कपिलेन देवहूतिसंवादश्च ॥३॥*॥ चतुर्थस्कन्धे। नवब्रह्मसमुत्पत्तिः। दक्षयज्ञविनाशनम्। ध्रुवचरितम्। पृथोः प्राचीनबर्हिषश्च चरितम्। नारदस्य संवादश्च ॥४॥*॥ पञ्चमस्कन्धे। प्रियव्रतचरितम्। द्वीपसमुद्रादिवर्षनद्युपवर्णनम्। ज्योतिश्चक्रस्य संस्थानम्। पातालनरकस्थितिश्च ॥ ५ ॥ * ॥ षष्ठस्कन्धे। दक्षजन्म। तत्पुत्त्रीणां सन्ततिः। यतः देवासुरनरतिर्य्यङ्नागखगादयः। त्वाष्ट्रस्य जन्म च ॥ ६ ॥ * ॥ सप्तमस्कन्धे। दितेः पुत्त्रयोर्निधनम्। प्रह्लादचरितञ्च ॥ ७ ॥ * ॥ अष्टमस्कन्धे। मन्वन्तरानुचरितम्। गजेन्द्रविमोक्षणम्। मन्वन्तरावताराः। हयग्रीवादयोऽवताराः। जगत्पतेः कौर्म्ममात्स्यनारसिंहवामनरूपाणि। क्षीरोदमथनम्। देवासुरयुद्धञ्च ॥ ८ ॥ * ॥ नवमस्कन्धे। राजवंशानुकीर्त्तनम्। इक्ष्वाकुजन्म तद्वंशः। सुद्युम्नवंशः। इलोपाख्यानम्। तारोपाख्यानम्। सूर्य्यवंशानुकथनम्। शशादनृगसौकन्यखट्वाङ्गान्तिककुत्स्थमान्धातृसौभरिरामाणां चरितम्। निमेर्देहपरित्यागः। जनकानां सम्भवः। परशुरामजन्म। भुवो निःक्षत्त्रीकरणम्। ययातिनहुषभरतशान्तनुतत्सुतयदूनां वंशानुकीर्त्तनञ्च ॥ ९ ॥ * ॥ दशमस्कन्धे। श्रीकृष्णस्य वसुदेवगृहे जन्म। गोकुले तस्य वृद्धिः। तस्य पूतनापयःपानम्। शकटोच्चाटनम्। तृणावर्त्तवधः। बकवत्सयोर्वधः। अघासुरवधः। धात्रा वत्सपालावगूहनम्। भ्रात्रा सह धेनुकस्य वधः। प्रलम्बवधः। गोपालानां दावाग्नेः परित्राणम्। कालीयदमनम्। महाहेर्नन्दमोचनम्। कन्यानां व्रतचर्य्या। यज्ञपत्नीभ्यः प्रसादः। विप्राणामनुतापनम्। गोवर्द्धनोद्धारणम्। शक्रसुरभिकर्त्तृकतस्यास्य यज्ञाभिषेकः। रात्रिषु स्त्रीभिः क्रीड़ा। शङ्खचूड़स्य वधः। केशिवधः। अक्रूरागमनम्। रामकृष्णयोर्म्मथुराप्रस्थानम्। व्रजस्त्रीणां विलापः। मथुरालोकनम्। गजमुष्टिकचाणूरकंसादीनां वधः। सान्दीपनेर्मृत पुत्त्रानयनम्। उद्धवरामाभ्यां सह हरिणा यदुचक्रस्य प्रियकरणम्। जरासन्धसमानीतबहुसैन्यवधः। यवनेन्द्रस्य घातनम्। कुशस्थल्यां निवेशनम्। पारिजातहरणम्। रुक्मिण्युद्धरणम्। बाणेन सह युद्धम्। प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणम्। चैद्यपौण्ड्रकशाल्वदन्तवक्त्रशम्बरद्विविदपीठमुरपञ्चजनानां माहात्म्य वधश्च। वाराणस्या दाहः। पाण्डवान् निमित्तीकृत्य भूमेर्भारावतरणञ्च ॥ १० ॥ * ॥ एकादशस्कन्धे। विप्रशापापदेशेन स्वकुलसंहारः। उद्धवसंवादः। उद्धवाय आत्मविद्याकर्म्मविनिर्णयकथनम्। आत्मयोगानुभावतो मर्त्यपरित्यागश्च ॥ ११ ॥ * ॥ द्वादशस्कन्धे। युगलक्षणवृत्तिः। कलौ नृणामुपप्लवः। चतुर्विधप्रलयः। त्रिविधोत्पत्तिः। परिक्षितदेहत्यागः। व्यासकर्त्तृकशाखाप्रणयनम्। मार्कण्डेयस्य सत्कथा। सूर्य्यस्य विन्यासश्च ॥१२॥*॥ इति श्रीभागवते १२ स्कन्धे अनुक्रमणिकाध्यायः॥

भागवतः, त्रि, (भगवान् हरिः भगवती दुर्गा वास्य देवतेति। भगवत्+"सास्य देवता।" ४।२।२४। इति अण्।) भगवद्भक्तः। तस्य लक्षणम्। यथा,

"सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः।
तत्तदीयसेवायां स भागवत उच्यते ॥"

इति पाद्मोत्तरखण्डे ६६ अध्यायः ॥ * ॥

स च यमदूतैस्त्याज्यः। यथा,—

"ये तु भागवता लोके तच्चित्तास्तत्परायणाः।
पूजयन्ति सदा विष्णुं ते च त्याज्याः सुदूरतः ॥"

इति वह्निपुराणे दूतान् प्रति यमवचनम् ॥

स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

"दशमीशेषसंयुक्तं दिनं वैष्णववल्लभम्।
न्युपासते महीपाल। ते वै भागवता नराः ॥
प्राणात्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते ॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम्।
अर्च्चां तु साधयेद्यस्तु स वै भागवतो नरः ॥
भक्तिर्न विच्युता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः ॥
सदाचाररताः शिष्टाः सर्व्वभूतानुकम्पकाः।
मुक्तयक्षक्तरागा ये सदा भागवता हि ते ॥"

एकादशस्कन्धे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥
न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः ॥"

हरियोगेश्वरोत्तरे।

"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥"

बृहन्नारदीये।

"शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः ॥"

स्कान्दे।

"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः ॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः ॥"

लैङ्गे।

"भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः ॥"

गारुड़े।

"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः ॥"

बृहन्नारदीये।

"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः ॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृत्धृता येन्च ते वै भागवतोत्तमाः ॥
मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः ॥"

स्कान्दे।

"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति च।
हृष्यते मत्कथायाञ्च स वै भागवतोत्तमः ॥"

बृहन्नारदीये।

"मन्मानसाश्च मद्भक्ता मद्भक्तजनलोलुपाः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः ॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः ॥
अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः ॥"

स्कान्दे।

"येऽर्च्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते ॥"

लैङ्गे।

"विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान् ॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः ॥"

शाण्डोत्तरखण्डे ।
“तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः ।
अर्थपञ्चकविद् विप्रो महाभागवतो हि सः ॥
एकान्तेन सदा विष्णौ यस्मादेवे परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥”
एकादशस्कन्धे ।
“ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥
न कामकर्म्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥”
स्कान्दे ।
“यस्य त्वङ्गगतस्यापि केशवे रमते मनः ।
न विच्युता च भक्तिर्वै स वै भागवतो नरः ॥
आपन्नस्य यस्येह भक्तिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥”
हरियोगेश्वरोत्तरे ।
“विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥”
मध्यममाह तत्रैव ।
“ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥”
कनिष्ठञ्चैव ।
“अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥”
इति श्रीहरिभक्तिविलासे १० विलासः ॥

भागिकं, त्रि, (भाग+“भागाद्यच्च ।” ५।१।४६। इति पक्षे ठन् ।) वृद्ध्यर्थदत्तसुद्रादि । सुदी टाका इत्यादि भाषा । यथा । भागो वृद्ध्यादि-रस्मिन् दीयते भाग्यं भागिकं शतम् । भाग्या भागिका विंशतिः । इति सिद्धान्तकौमुदी ॥

भागिनेयः, पुं, (भगिन्या अपत्यम् । भगिनी+“स्त्रीभ्यो ढक् ।” ४।१।१२०। इति ढक् ।) भगिनीपुत्रः । तत्पर्य्यायः । स्वस्रीयः २ । इत्यमरः ।२।६।३२॥ स्वस्रियः ३ । इति शब्दरत्नावली ॥ स च सुख्यप्रतिनिधिः । यथा,—
“ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यावश्यपोष्यत्वम् यथा,—
“पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः ॥”
इत्यपुत्रधनाधिकारे दायभागः ॥ * ॥
भागिनेयदत्तककरणं शूद्रस्यैव न तु द्विजानाम् । यथा, दत्तकचन्द्रिकायां शौनकवचने ।
“दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥”
तन्मरणे मातुलस्य पक्षिण्यशौचम् । यथा ।
“पक्षिणी योनिसम्बन्धे बान्धवेषु तथैव च ।
योनिसम्बन्धे मातृष्वस्रीयपितृष्वस्रीयभागिनेयेषु ।
मातुलमरणे भागिनेयस्यापि पक्षिण्यशौचम् ।”
इति शुद्धितत्त्वम् ॥

भागिनेयी, स्त्री, (भगिनी+ढक् । स्त्रियां ङीप् ।) भगिन्याः स्त्र्यपत्यम् । भाग्नी इति भाषा । भगिनीशब्दात् स्त्र्यपत्यार्थे ढके विहिते ङीप्-प्रत्ययनिष्पन्ना । इति व्याकरणम् ॥

भागीरथी, स्त्री, (भगीरथस्येयम् । भगीरथ+अण् । ङीप् ।) गङ्गा । इत्यमरः ।१।१०।३१॥ पृथिव्यां तस्यावतरणम् । यथा,—
सूत उवाच ।
“ततो भगीरथो राजा तपः परमदुश्चरम् ।
कृत्वा सन्तोषयामास उमाकान्तं महेश्वरम् ॥
धारणायानुमत्वा तं जगाम ब्रह्मणोऽन्तिकम् ।
ततो भगीरथः प्राह गङ्गा ब्रह्मन् ! विसृज्यताम् ॥
स तच्छ्रुत्वा वचस्तस्य सम्मान्य विबुधप्रियम् ।
गङ्गां प्रस्थापयामास सा पतद्ब्रह्मणोऽन्तिकात् ॥
वायुना प्रेर्य्यमाणापि आकाशपथगा नदी ।
विख्याताकाशगङ्गेति तत्र संसेविता गणैः ॥
विष्णोः पदं समायाता तस्माद्विष्णुपदीति सा ।
पूज्यमाना सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥
सुरालयमनुप्राप्ता तस्माद्देवनदी तु सा ।
तस्मात् प्रपतिता गङ्गा शम्भोः शिरसि संस्थिता ॥
धृतैकेनैव तेनापि शम्भुना योगमायया ।
दिव्यं वर्षशतं साग्रं पुनराराधितेन वै ॥
मुक्ता भगीरथेनैव मलहन्त्री विनिर्गता ।
जटाजूटात् पपातोर्व्वीं मेरोस्तस्मात्ततोऽगमत् ॥
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम् ।
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम् ॥
तामायान्तीं तु रोधाय स्वर्णाङ्गो नाम दानवः ।
पार्व्वतं रूपमास्थाय वर्षाणाञ्च शतैर्द्विजाः ॥
ततो भगीरथो राजाराधयामास कौशिकम् ।
स तुष्टः प्रददौ नागं वाहनं वै भगीरथः ॥
तमारुह्यागमत्तत्र यत्र रुद्धा भगीरथी ।
तेन नागेन तं दैत्यं संविदार्य्य न सङ्गतः ॥
शतधा तां समाधाय मूर्द्धन्यैरावणो गजः ।
महीतलं समापेदे स यावन्नागसाह्वयम् ॥
तस्माद्वृषाघटनाद्विप्रा अभून्नागपुरं वरम् ।
प्लावयन्ती महीं गङ्गा जह्नोराश्रममभ्यगात् ॥
तां दृष्ट्वाथ पपौ सोऽपि प्रकृत्या कुपितो मुनिः ।
जह्नुना नाशितां दृष्ट्वा गङ्गां त्रिपथगां नदीम् ॥
सशोकस्तोषयामास जह्नुं भगीरथो मुनिम् ।
मुमोच कर्णरन्ध्रेण गङ्गां स दक्षिणेन ताम् ॥
एतस्माज्जाह्नवी भूता सुता तस्य मुनेस्तथा ।
ततः सा विविधान् देशान् पर्व्वतांश्च तथा-श्रमान् ॥
संप्लाव्य वारिणा भूयो जगाम पूर्व्वसागरम् ॥
यत्र तत्रोदकं तस्थौ तस्याः पुण्यमभूद्द्विजाः ।
सुतीर्थं सर्व्वमर्त्यानां तारणं पापनाशनम् ॥
ततः सम्पूरयामास समुद्रं सर्व्वतो दिशम् ।
प्रपन्नं सागरैः सर्व्वं ततः पातालमाविशत् ॥
सागराणां तमोध्वस्तात् संप्लाव्य वारिणा ततः
देवैः संपूज्यमानापि जगाम ब्रह्मणोऽन्तिकम् ॥
जग्मुस्ते सागराः स्वर्गं ब्रह्मणोपहताश्च ये ।
एवङ्काले विनिर्द्दिष्टा गङ्गाया ब्रह्मणा स्वयम् ॥
भवद्भिरनिशं नूनं कर्त्तव्यं विघ्ननाशनम् ॥
सूत उवाच ।
एतद्वः कथितं सर्व्वं यथावसरणं द्विजः ।
गङ्गायाश्चैव माहात्म्यं शृण्वतां गदतो मम ॥”
इत्याद्ये वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
तस्या मुख्यनामानि यथा,—
वराह उवाच ।
“धर्म्मस्तु द्रवरूपेण ब्रह्मणा निर्म्मितः पुरा ।
यदि गङ्गेति विख्याता शृणु स्तोत्रं वसुन्धरे ! ॥
किन्नैर्नामसहस्रैस्तु मुख्यासङ्ख्यैः सुविस्तरैः ।
यानि नामानि मुख्यानि तानि वक्ष्याम्यनुक्रमात् ॥
गङ्गा भागीरथी पुण्या जाह्नवी सुरनिम्नगा ।
विष्णुपादाब्जसम्भूता शम्भोः शिरसि संस्थिता ॥
सुमेरुशृङ्गसंस्पृष्टा हिमाचलजलाश्रया ।
शङ्खकुन्देन्दुधवला महापातकनाशिनी ॥
नदीश्वरी त्रिपथगा वैष्णवी सुरसुप्रिया ।
धर्म्मद्रवी भोगवती विन्ध्यपाषाणदारिणी ॥
क्षमा शान्तिः प्रजाशान्तिः पुण्यदा पूतिका शिवा ।
महानदी शतमुखी शुक्ला मकरवाहिनी ॥
ब्रह्महस्तात् परिभ्रष्टा सौम्यरूपातिशोभना ।
मुनिभिः पूजिता सर्व्वैः सर्व्वैर्देवैर्नमस्कृता ॥
महायज्ञमयी देवी मर्त्यानामुपकारिणी ।
सर्व्वत्र दुर्लभा गङ्गा त्रिभिः स्थानैर्विशेषतः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
इदं स्तोत्रं मया ख्यातं पूर्व्वमुक्तं स्वयम्भुवा ।
यः पठेत् प्रातरुत्थाय तस्य नश्यति दुर्गतिः ॥
यत् पापं यौवने बाल्ये कौमारे वार्द्धके च यत् ।
तत् सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
कीर्त्तिं प्रीतिं महालक्ष्मीमायुरारोग्यसन्ततिम् ।
ददाति जाह्नवी तुष्टा सर्व्वभावेन माधवि ! ॥”
इति वाराहे सर्व्वपापप्रशमनगङ्गास्तवः ॥
अपि च ।
ब्रह्मोवाच ।
“श्रोतुमिच्छामि देवेश ! लक्ष्मीकान्त ! जगत्प्रभो ! ।
विष्णो ! विष्णुपदीस्तोत्रं पापघ्नं पुण्यकारणम् ॥
श्रीनारायण उवाच ।
शिवसंगीतसंमुग्ध श्रीकृष्णाङ्गद्रवोद्भवाम् ।
राधाङ्गद्रवसंयुक्तां तां गङ्गां प्रणमाम्यहम् ॥
या जन्मसृष्टेरादौ च गोलोके रासमण्डले ।
सन्निधाने शङ्करस्य तां गङ्गां प्रणमाम्यहम् ॥
गोपैर्गोपीभिराकीर्णे शुभे राधामहोत्सवे ।
कार्त्तिकीपूर्णिमाजातां तां गङ्गां प्रणमाम्यहम् ॥
कोटियोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
समावृता या गोलोकं तां गङ्गां प्रणमाम्यहम् ॥
षष्टिलक्षयोजनां या ततो दैर्घ्ये चतुर्गुणा ।
समावृता या वैकुण्ठं तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या ततो दैर्घ्ये चतुर्गुणा ।

आवृता ब्रह्मलोकं या तां गङ्गां प्रणमाम्यहम् ॥
विंशल्लक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता शिवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
आवृता ध्रुवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये शतगुणा ततः ।
आवृता चन्द्रलोकं या तां गङ्गां प्रणमाम्यहम् ॥
षष्टिसहस्रयोजना या दैर्घ्ये दशगुणा ततः ।
आवृता सूर्य्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये च षड्गुणा ततः ।
आवृता सत्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
दशलक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता या तपोलोकं तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये दशगुणा ततः ।
आवृता जनलोकं या तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये सप्तगुणा ततः ।
आवृता या च कैलासं तां गङ्गां प्रणमाम्यहम् ॥
शतयोजनविस्तीर्णा दैर्घ्ये दशगुणा ततः ।
मन्दाकिनी येन्द्रलोके तां गङ्गां प्रणमाम्यहम् ॥
पाताले या भोगवती विस्तीर्णा दशयोजना ।
ततो दशगुणा दैर्घ्ये तां गङ्गां प्रणमाम्यहम् ॥
क्रोशैकमात्रविस्तीर्णा ततः क्षीणा च कुत्रचित् ।
क्षितौ चालकनन्दा या तां गङ्गां प्रणमाम्यहम् ॥
सत्ये या क्षीरवर्णा च त्रेतायामिन्दुसन्निभा ।
द्वापरे चन्दनाभा च तां गङ्गां प्रणमाम्यहम् ॥
जलप्रभा कलौ या च नान्यत्र पृथिवीतले ।
स्वर्गे च नित्यं क्षीराभा तां गङ्गां प्रणमाम्यहम् ॥
यस्याः प्रभावमतुलं पुराणे च श्रुतौ श्रुतम् ।
या पुण्यदा पापहर्त्री तां गङ्गां प्रणमाम्यहम् ॥
यत्तोयकणिकास्पर्शः पापिनाञ्च पितामह ! ।
ब्रह्महत्यादिकं पापं कोटिजन्मार्ज्जितं दहेत् ॥
इत्येव कथितं ब्रह्मन् ! गङ्गापद्यैकविंशतिः ।
स्तोत्ररूपञ्च परमं पापघ्नं पुण्यकारकम् ॥
नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ।
अश्वमेधफलं नित्यं लभते नात्र संशयः ॥
अपुत्त्रो लभते पुत्त्रं भार्य्याहीनो लभेत प्रियाम् ।
रोगात् प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥
अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पण्डितः ॥
यः पठेत् प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ॥
शुभं भवेत्तु दुःस्वप्ने गङ्गास्नानफलं लभेत् ॥”
इति गङ्गास्तोत्रम् ॥

नारायण उवाच ।
“भगीरथोऽनेन स्तोत्रेण स्तुत्वा गङ्गाञ्च नारद ! ।
जगाम तां गृहीत्वा च यत्र नष्टाश्च सागराः ।
वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ॥
भगीरथेन सानीता तेन भागीरथी स्मृता ।
इत्येवं कथितं सर्व्वं गङ्गोपाख्यानमुत्तमम् ॥
पुण्यदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्यानेऽध्यायः ॥

भागुरिः, पुं, स्मृतिव्याकरणादिकर्त्तृमुनिविशेषः । तत्पर्य्यायः । शतलुम्पकः २ । इति जटाधरः ॥ (यथा । “वष्टि भागुरिरल्लोपमवाप्योरुप-सर्गयोः ।” इति सिद्धान्तकौमुदी ॥)

भाग्यं, क्ली, (भज्यतेऽनेन इति । भज + “ऋहलो-र्ण्यत् ।” ३ । १ । १२४ । इति ण्यत् । “चजोः कु घिण्ण्यतोः ।” ७ । ३ । ५२ । इति कुत्वम् ।) प्राक्तनशुभाशुभकर्म्म । तत्पर्य्यायः । दैवम् २ दिष्टम् ३ भागधेयम् ४ नियतिः ५ विधिः ६ । इत्यमरः । १ । ४ । १८ ॥ प्राक्तनकर्म्म ७ भागः ८ भवितव्यता ९ । इति जटाधरः ॥ अदृष्टम् १० । इति शब्दरत्नावली ॥ फलोन्मुखीभूत-पूर्व्वदैहिकशुभाशुभं कर्म्म । इति मलमास-तत्त्वम् ॥ (यथा,—
“समुद्रमन्थने लेभे हरिर्लक्ष्मीं हरो विषम् ।
भाग्यं फलति सर्व्वत्र न विद्या न च पौरुषम् ॥”
इति प्राञ्चः ॥
उत्तरफल्गुनीनक्षत्रम् । यथा, बृहत्संहि-तायाम् । १० । १ ।
“भवणानिलहस्तार्द्रा-
भरणीभाग्योपगः सुतोऽर्कस्य ।
प्रचुरसलिलोपगूढां
करोति धात्रीं यदि स्निग्धः ॥”
भागो वृद्ध्यादिरस्मिन् दीयते इति । भाग + “भागाद्यच्च ।” ५ । १ । ४९ । इति यत् ।) भागिके, त्रि । इति सिद्धान्तकौमुदी ॥ (भाग-मर्हति । भाग + “दण्डादिभ्यो यत् ।” ५ । १ । ६६ । इति यत् ।) भागार्हम् । (भज + ण्यत् । भजनीयम् ॥)

भाङ्गीनं, त्रि, (भङ्गाया भवनं क्षेत्रमिति । “विभाषा तिलमाषोमाभङ्गाणुभ्यः ।”५।२।४ । इति पक्षे खञ् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गम् २ । इत्यमरहेमचन्द्रौ ॥ (यथा, शब्दरत्नावल्याम् ।
“एवं माषन्तु माषीणं कौद्रवं कोद्रवीणवत् ।
तथा भाङ्गञ्च भाङ्गीनमुम्यमौमीनमित्यपि ॥”)

भाज, त् क पृथक्कृत्याम् । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) अबभाजत् धनं भ्रातृवर्गः । इति दुर्गादासः ॥

भाजनं, क्ली, (भाज्यते इति । भाज पृथक्करणे + ल्युट् ।) पात्रम् । इत्यमरः । २ । ९ । ३३ ॥ (यथा, महाभारते । १३ । १११ । १०२ ।
“राजतं भाजनं हृत्वा कपोतः संप्रजायते ॥”) योग्यम् । इति मेदिनी । ने, १०१ ॥ (यथा, कथासरित्सागरे । ३४ । २०५ ।
“तन्मा भिन्नतात्मा राजा स्यादयुक्तदण्डो विशेष-वित् ।
प्रजानुरागादेवं हि स भवेद्भाजनं श्रियः ॥”)
“यः संवादयते नित्यं योऽभिवादांस्तितिक्षति ।
यच्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥”
इति मत्स्यपुराणम् ॥
आढकपरिमाणम् । इति वैद्यकपरिभाषा ॥

भाजितं, त्रि, (भाज्यते स्मेति । भाज + क्त ।) पृथक्कृतम् । विभक्तम् । इति भाजधातोःकर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (भाजि + क्त ।)

भाजी, स्त्री ॥ भाज्यते इति । भाज + कर्म्मणि घञ् । भाज + “जानपदकुण्डगोणस्थलभाज-नागेति ।” ४ । १ । ४२ । इति ङीष् ।) व्यञ्जन-विशेषः । अन्यच्च भाजा । इति ज्योतिष्टीकायां दुर्गादासः ॥

भाज्यं, त्रि, भागार्हम् । भाजनीयम् । इति भाज-धातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥

भाटकः, पुं,क्ली, (भटतीति । भट पोषणे + ण्वुल् ।) व्यवहारार्थं दत्तशकटादिवस्त्वधनम् । इति हलायुधः ॥ भाड़ा इति भाषा ॥ अथ गृहादि-भाटकम् ।
“परभूमौ गृहं कृत्वा भाटयित्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥
स्तोमं विना वसित्वा तु परभूमावनिच्छतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥”
कात्यायनः ।
“गृहवाप्यापणादीनि गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत्तावद्दाप्यः स भाटकम् ॥”
वापी परकृता प्रतिष्ठितेति विवक्षितम् ।
“हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः ॥
स्वामिनो नार्पयेद्यावत् तावद्दाप्यः स भाट-कम् ॥”
बृहस्पतिः ।
“यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति ।
भाटं न दद्याद्दाप्योऽसावनूढस्यापि भाटकम् ॥”
शकटं वृषनौकादेरप्युपलक्षणम् । अनूढस्या-वाहितस्यापि शकटादेः । इति विवादचिन्ता-मणिः ॥

भाणः, पुं, (भण्यतेऽत्रेति । भण + अधिकरणे घञ् ।) नाटकादिदशरूपकान्तर्गतरूपक-विशेषः । इति हेमचन्द्रः । २ । १९८ ॥ तस्य लक्षणादि यथा,—
“भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥
रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितैः ॥
सूचयेद्वीरशृङ्गारौ शौर्य्यसौभाग्यवर्णनैः ।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ॥
मुखनिर्व्वहणे सन्धी लास्याङ्गानि दशापि च ॥
अत्राकाशभाषितरूपं परवचनमपि स्वयमेवा-नुवदन्नुत्तरप्रत्युत्तरं कुर्य्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णनया सूचयेत् । प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति । उदाहरणं लीला-मधुकरः ।” इति साहित्यदर्पणे ६ परिच्छेदः ॥

भाण्डं, क्ली, (भणन्ते भवन्ति वेति । भण् शब्दे + “ञमन्ताड्डः ।” उणा० १ । ११३ । इति ड. । ततः प्रज्ञादित्वादण् ।) पात्रम् । (यथा, महा-भारते । १३ । ११ । १०२ ।
“हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ॥”) वणिङ्मूलधनम् । भूषा । अश्वभूषा । इति मेदिनी । डे, २१ ॥ (यथा, महाभारते । ७ । २६ । २३ ।

"विप्रविद्रुतयावन्नगाश्विसभाण्डाः परासवः ।
शारोष्ट्रास्तुरगाः पेतुर्मथिताः पार्थमार्गणैः ॥")
नष्टभाण्डस्य दण्डादिविधिर्यथा,—
"चराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ।
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥
भाण्डं व्यसनमागच्छेत् यदि वाहकदोषतः ।
दाप्यो यत् तत्र नश्येत्तु दैवराजकृताहते ॥"
इति मिताक्षरायां नारदः ॥
नदीकूलद्वयमध्यम् । इति हेमचन्द्रः । ४ । ६२ ॥
(भजते इति । भज्+अच् । भक्तस्तस्य भावः इत्यण् ।) भक्तवृत्तिः । इत्यजयपालः ॥ भाँड़ामि इति भाषा ॥

भाण्डः, पुं, गर्द्दभाण्डवृक्षः । इति शब्दचन्द्रिका ॥
भाण्डपुटः, पुं, (भाण्डे पुटा यस्य ।) नापितः । इति जटाधरः ॥
भाण्डपुष्पः, पुं, सर्पविशेषः । तत्पर्य्यायः । कौकुटिकन्दलः २ । इति त्रिकाण्डशेषः ॥
भाण्डागारः, पुं, (भाण्डानां पात्रादीनामागारः ।) गृहविशेषः । भाँड़ार इति भाषा ॥ तत्पर्य्यायः । मञ्जरः २ । इति शब्दमाला ॥ (यथा, महाभारते । १२ । ६८ । ५४ ।
"भाण्डागारायुधागारान् योधागारांश्च सर्व्वशः ।
अश्वागारान् गजागारान्बलाधिकरणानि च ॥")
भाण्डारी, [न्] पुं, (भाण्डारोऽधिकारित्वेनास्त्यस्येति । भाण्डार+इनिः ।) भाण्डाराध्यक्षः । भाँड़ारी इति भाषा । यथा, व्यवहारप्रदीपे ।
"क्षुधितस्तृषितः कामी विद्यार्थी क्षपिकारकः ।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥
भाण्डिः, पुं, (भड्+इन् । पृषोदरादित्वात् साधुः ।) नापितस्य क्षुराद्याधारः । भाँड़ि इति भाषा । इति भाण्डिवाहशब्ददर्शनात् ॥
भाण्डिलः, पुं, (भाण्डिरस्त्यस्येति । भाण्डि+लच् ।) नापितः । इति शब्दमाला ॥
भाण्डिवाहः, पुं, (भाण्डिं क्षुराद्याधारं वहतीति । वह्+अण् ।) नापितः । इति शब्दमाला ॥
भाण्डीरः, पुं, (भण्ड+ईरच् । पृषोदरादित्वात् साधुः ।) वटवृक्षः । इति जटाधरः ॥ व्रजमण्डलान्तरे षोडशवटवनमध्ये द्वितीयवटवनम् । यथा,—
"सङ्केतवटमादौ तु भाण्डीराख्यं वटं द्वयम् ॥"
इति नारायणभट्टकृतव्रजभक्तिविलासः ॥
भातं, क्ली, (भा दीप्तौ+क्तः ।) प्रभातम् । इति शब्दमाला ॥ (भा+भावे क्तः ।) दीप्तिः ॥ तद्वति, त्रि ॥
भातिः, स्त्री, (भा+क्तिन् ।) शोभा । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ८ । १८ । १२ ।
"यत्तद्वपुर्भातिविभूषणायुधै-
रव्यक्तचिद्व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः
संपश्यतोर्दिव्यगतिर्यथा नटः ॥")
भानुः, पुं, (भातीति । भा+"दाभाभ्यां नुः ।" उणा० ३ । ३२ । इति नुः ।)

सूर्य्यः । इति त्रिकाण्डशेषः ॥ दीप्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥
भाद्रः, पुं, (भाद्री पौर्णमास्यस्मिन्निति । भाद्री+"साऽस्मिन् पौर्णमासीति ।" ४ । २ । २१ । इत्यण् ।) भाद्रपदनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे सः । वैशाखादिद्वादशमासान्तर्गतपञ्चममासः । तत्पर्य्यायः । नभस्यः २ प्रौष्ठपदः ३ भाद्रपदः ४ । इत्यमरः । १ । ४ । १७ ॥ स च द्विविधः सिंहस्थरविकालः सौरः । १ । सिंहस्थरवावश्यशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः । कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणचान्द्रः । २ । इति मलमासतत्त्वम् ॥ * ॥ तत्र जातफलम् ।
"नभस्यमासे खलु जन्म यस्य
धीरो मनोज्ञश्च वराङ्गनानाम् ।
रिपुप्रमाथी कुटिलोऽतिमर्म्मा
प्रपन्नभर्त्ता स भवेत् सहासः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
तत्र गोः प्रसवे नारदः ।
"भानौ सिंहगते चैव यस्य गौः सम्प्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"
व्याहृतिभिश्चायं होमः ।
"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
इति ॥
तथा ।
"सिंहराशौ गते सूर्य्ये गोः प्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ।
तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै शान्तिकं चरेत् ॥
अस्य वामेतिसूक्तेन तद्विष्णोरिति मन्त्रतः ।
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ॥
त्र्यम्बकविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ॥
मध्यरात्रौ निशीथे वा यदा गौः क्रन्दते तदा ।
ग्रामे वास्य गृहे वापि शान्तिकं पूर्व्ववद्दिशेत् ॥"
संक्रमणोत्तरषोडशदण्डात्मकपुण्यकालाभ्यन्तरे गोः प्रसवे विप्रसम्प्रदानकगोप्रदानपूर्व्वकशान्तिः कार्य्या इति विशेषः । तदतिरिक्तसिंहस्थरवौ गोः प्रसवे शान्तिमात्रं कर्त्तव्यं न गोः प्रदानम् । निर्णयसिन्धुधृताद्भुतसागरग्रन्थीयवचनजातमीमांसानुसारादिति ॥ * ॥ अथ भाद्रकृत्यम् । तत्र जन्माष्टमीव्रतप्रमाणमन्यत्र(?)ऽनुसन्धेयम् । श्रावणपौर्णमास्यनन्तरितभाद्रकृष्णाष्टम्यां रात्रिमध्ये मुहूर्त्ताष्टमीरोहिणीयोगरूपजयन्तीलाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्यां उभयदिने रोहिणीयुताष्टमीलाभे परदिने । रोहिण्यलाभे तु निशीथसम्बन्धिन्यामष्टम्याम् । उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति ।

तत्र प्रयोगः पूर्व्वदिने संयमं विधाय तद्दिने कृतप्रातःस्नानादिराचान्तः । ॐ सूर्य्यः सोम इति पठित्वा ॐ तद्विष्णोः परमं पदमित्यादिमन्त्रेण नारायणं संस्मृत्य ॐ तत् सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तस्ताम्रपात्रे कुशतिलजलान्यादाय ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा विष्णुलोकप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं करिष्ये इति संकल्पयेत् । यत्तूपवासदिने प्रातः सप्तमी तदाष्टम्यां तिथौ इत्यत्र सप्तम्यां तिथावारभ्य इति वक्तव्यम् । ततः सामगस्तु ॐ देवो वो द्रविणोदा पूर्णां विवष्ट्वासिचं उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते । इति पठेत् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य
"ॐ वासुदेव समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्द त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
इति पठेत् ।
ततः आह्निकं समाप्यार्द्धरात्रे तत्तत्प्रतिमासु पटादिषु वा आवाहनविसर्ज्जनसहितं शालग्रामे घटादिस्थजले वा आवाहनविसर्ज्जनरहितं पूजयेत् । ततो ध्यानम् ।
"मात्रापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षःपूर्णाङ्गं नीलोत्पलदलच्छविम् ॥"
इति ध्यात्वा श्रीकृष्ण स्वागतं इति पृच्छेत् ।
इदमासनं ॐ कृष्णाय नमः । इत्यासनं दत्त्वा एतत् पाद्यम् ॐ श्रीकृष्णाय नमः ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य इदमर्घ्यम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । ततो दधिमधुघृतात्मकं मधुपर्कमानीय एष मधुपर्कः ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । लौकिकचतुराधिकशतचयतोलकपरिमितान्यूनं जलमानीय ॐ योगाय योगेश्वराय योगपतये योगसम्भवाय गोविन्दाय नमो नमः । इदं स्नानीयजलम् ॐ श्रीकृष्णाय नमः । इदं वस्त्रं इदमाभरणम् एष गन्धः इदं पुष्पम् एष धूपः एष दीपः इदं नैवेद्यम् ॐ विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः । इत्यनेन नैवेद्यं दद्यात् स्नापयेच्च । ततो नमो देव्यै श्रियै नमः । इति मन्त्रेण श्रियं पूजयेत् । ततः स्वगृह्योक्तविधिनाग्निं संस्थाप्य घृततिलाभ्याम् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय

गोविन्दाय नमो नमः स्वाहा। इत्यनेनाष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात्। ततो गुडघृतेन वसोर्धारां भित्तौ दद्यात्। ततो नाडीच्छेदं भावयेत्। ॐ षष्ठ्यै नम इति षष्ठीं पूजयेत्। ततो भगवतः श्रीकृष्णस्य नामकरणान्नप्राशनचूडाकरणोपनयनगोदानसंस्कारान् भावयेत्। ततः प्रणवादिनमोऽन्तेन तत्तन्नामभिः पूजयेत्। ॐ देवक्यै नमः एवं वसुदेवाय यशोदायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय दक्षाय गर्गाय चतुर्भुजाय इत्यनेन यथाशक्ति षष्ठोपचारैः पूजयेत्। ततः शङ्खेन कुशपुष्पचन्दनजलान्यादाय भूमौ जानुनी पातयित्वा,

ॐ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव!।

गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥

ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय गोविन्दाय नमो नमः। इत्यर्घ्यं दद्यात्। ततः प्रणमेत्।

“ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः।

नमस्ते रोहिणीकान्त। सुधावास नमोऽस्तु ते ॥

नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः।

कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे ॥”

ततश्च।

“अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।

वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥

वराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्।

दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥

गोविन्दमच्युतं देवमनन्तमपराजितम्।

अधोक्षजं जगद्वीजं स्वर्गस्थित्यन्तकारिणम् ॥

अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।

नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥

पीताम्बरधरं नित्यं वनमालाविभूषितम्।

श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम्।

प्रपद्येऽहं सदा देवं सर्व्वकामप्रसिद्धये ॥”

इति स्तवः ॥

ततः प्रणमेत्।

“प्रणमामि सदा देवं वासुदेवं जगत्पतिम्।

त्राहि मां सर्व्वदेवेश हरे। संसारसागरात् ॥”

ततः प्रार्थयेत्।

“ॐ त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवाद्धरे।।

सर्व्वलोकेश्वर त्राहि पतितं मां भवार्णवे ॥

देवकीनन्दन श्रीश हरे संसारसागरात्।

त्राहि मां सर्व्वदुःखघ्न रोगशोकार्णवाद्धरे। ॥

दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत्।

सोऽहं देवातिदुर्वृत्तस्त्राहि मां दुःखसागरात् ॥

पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे।

त्राहि मां देवदेवेश। त्वत्तो नान्योऽस्ति रक्षिता ॥”

इति प्रार्थयेत् ॥

“यद्बाल्ये यच्च कौमारे वार्द्धक्ये यच्च यौवने।

तत् पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध। ॥”

इति वदेत् ॥

ततो नृत्यगीतवादित्रस्तवैः कालं नयेत्। परदिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्य्यः। ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात् सुवर्णादि यत् किञ्चिदिष्टतमं श्रीकृष्णो मे प्रीयतामिति।

“ॐ यं देवं देवकी देवी वसुदेवादजीजनत्।

भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥

सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च।

शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा विसर्ज्जयेत् ॥”

ततश्चोपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम्। यदा तु महानिशायाः पूर्व्वमेकतरस्यावसानं अन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणम्। यदा तु महानिशायामुभयस्थितिः तदा उत्सवान्ते पारणं कुर्य्यात्। तत्र मन्त्रः। ॐ सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः। पारणानन्तरन्तु समापनमन्त्रः। ॐ भूताय भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय नमो नमः। इत्यनेन व्रतं समापयेत् ॥ * ॥

भाद्रशुक्लपञ्चमीमधिकृत्य भविष्योत्तरे।

“तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः।

यस्त्वालिख्य नरो भक्त्या कृष्णवर्णादिवर्णकैः।

पूजयेद्गन्धपुष्पैश्च सर्पिर्गुग्गुलुपायसैः ॥

तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः।

आसप्तमात् कुलात्तस्य न भयं सर्पतो भवेत्।

तस्मात् सर्व्वप्रयत्नेन नागान् संपूजयेन्नरः ॥

इयमेवाशेषनागपञ्चमीति वाचस्पतिमिश्राः।

आशेषनागाः कर्कोटकादयः पूर्व्वलिखिताः

पूजा च श्रावणपञ्चमीविहितेति बोध्यम् ॥ * ॥

अथ हरेः पार्श्वपरिवर्त्तनम्। तत्र द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे। आभाकासितपक्षेषु शयनावर्त्तनादिकमिति ब्रह्मपुराणात् ॥ भाद्रशुक्लद्वादश्यां श्रवणमध्ययुक्तायां सन्ध्यासमये द्वादश्यान्तरभावे एकादश्यादिषु पादयोगे तदभावेऽपि द्वादश्यां केवलायां वा कृताह्निकः सायं सन्ध्यायां देवं संपूज्य।

“ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव।

पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव। ॥”

इति प्राञ्जलिः पठेत् ॥

“त्वयि सुप्ते जगन्नाथ। जगत् सुप्तं भवेदिति।

प्रबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥”

इत्यनेन पूजयेत् ॥ * ॥

अथ सिंहार्के चतुर्थीचन्द्रदर्शनप्रायश्चित्तम्।

सिंहार्कमधिकृत्य ब्रह्मपुराणम्।

“नारायणोऽभिशप्तस्तु निशाकरमरीचिषु।

स्थितश्चतुर्थ्यामद्यापि मनुष्याणांपतेच्च सः ॥

अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्वीक्ष्य मानव।

पठेद्वाक्यमिदं वाक्यं प्राङ्मुखो वाप्युदङ्मुखः ॥”

अभिशापो मिथ्यापरीवादविषयीभूतः। सोऽभिशापः अद्यापि मनुष्यान् पतेत्। ततश्च प्राङ्मुख उदङ्मुखो वा कुशतिलजलान्यादाय

ॐ अद्येत्यादि सिंहार्कचतुर्थीचन्द्रदर्शनजन्यपापक्षयकामो धात्रेयीवाक्यमहं पठिष्ये। इति संकल्प्य।

“ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।

सुकुमारक। मा रोदीस्तव ह्येष स्यमन्तकः ॥”

इति विष्णुपुराणोक्तं धात्रेयीवाक्यं पठेत् ॥ * ॥

अथानन्तव्रतम्। तच्च यद्दिने पूर्व्वाह्णलाभस्तद्दिने व्रतम्। उभयदिने चेत् परदिने शुभमात। व्रतानुष्ठानविधिस्तु मदनन्ते द्रष्टव्यः ॥ * ॥ अथागस्त्यार्घ्यदानम्। प्रमाणन्तु तिथितत्त्वेऽगस्त्यमध्येयम्। सिंहस्थरविकर्न्यागतेन सौरमासादरः। कन्यार्कसंक्रान्तिपूर्व्वदिनत्रयाभ्यन्तरे कृतस्नानादिकृताह्निकस्तिलकुशजलान्यादाय ॐ तत् सदित्युच्चार्य्य ॐअद्येत्यादि सर्व्वाभिलषितसिद्धिकामोऽगस्त्यपूजनमहं करिष्ये इति संकल्प्य शालग्रामे जले वा दक्षिणामुखः एतत् पाद्यम् ॐ अगस्त्याय नमः। सितपुष्पाक्षतयुक्तं जलं शङ्खेन गृहीत्वा इदमर्घ्यम्।

ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव।

मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥

ॐ अगस्त्याय नमः। एवमाचमनीयस्नानीयगन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात्।

ॐ आतापिर्भक्षितो येन वातापिश्च महासुरः।

समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥”

इति प्रार्थयेत् ॥ इति कृत्यतत्त्वम् ॥

भाद्रपदः, पुं, (भाद्रपदानक्षत्रयुक्ता पौर्णमासी भाद्रपदी सा यत्र मासे सः। भाद्रपदी + अण्।) भाद्रमासः। इत्यमरः।१।४।१७॥ (यथा,—

“ते तु भाद्रपदाद्येन हिमासिकेन व्याख्याताः।

तद्यथा। भाद्रपदाश्वयुजौ वर्षाः।” इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥)

भाद्रपदा, स्त्री, पूर्व्वभाद्रपदानक्षत्रम्। उत्तरभाद्रपदानक्षत्रम्। तत्पर्य्यायः। प्रौष्ठपदा २। इत्यमरः। १। ३। २२ ॥

भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति। भद्रमातृ + “मातुरुत्संख्यासम्भद्रपूर्व्वायाः।” ४। १। ११५। इति अण्। “उकाराकारादेशः।” इति काशिका।) सतीतनयः। “सत्यास्तु तनये साम्मातुरभद्रादमातुरः।” इति हेमचन्द्रः। ३। २१०॥

भानुः, पुं, (भाति चतुर्दशभुवनेषु स्वप्रभया दीप्यते इति। भा + “दाभाभ्यां नुः।” उणा० ३। ३२। इति नुः।) सूर्य्यः। (यथा, महाभारते। ३। ३। २४।

“अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः।”)

विष्णुः। यथा, तत्रैव। १३। १४९। ७१।

“सर्व्वगः सर्व्वविद्भानुर्विष्वक्सेनो जनार्द्दनः ॥”

प्राधायाः पुत्रभेदः। यथा, तत्रैव।१।६५।४८।

“विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा।

इत्येता देवगन्धर्व्वाः प्राधायाः परिकीर्त्तिताः ॥”

आङ्गिरःस्वस्तपसः पुत्रभेदः। यथा, तत्रैव। ३। २२०। ८।

"तत्प्रवक्ष्ये महत् पुत्रं भानुस्त्वाप्यङ्गिराः सृजत् ॥"
यादवविशेषः । यथा, हरिवंशे । १४७ । २ ।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप ।
जहारात्मवधाकाङ्क्षी निकुम्भो नाम दानवः ॥")
किरणः । (यथा, ऋग्वेदे । ६ । ६४ । २ ।
"भद्रा ददृक्ष उर्विया विभास्युत्ते शोचिर्भानवो द्यामपप्तन् ॥"
"भानवो रश्मयः ।" इति तद्भाष्ये सायनः ॥)
अर्कवृक्षः । इत्यमरः । २ । ४ । ३३ ॥ प्रभुः ।
राजा । इति धरणिः ॥ दृत्ताईन्पितृविशेषः ।
इति हेमचन्द्रः । ० । १४ ॥
भानुः, स्त्री, (भातीति । भा + नुः) भानुमती ।
इति शब्दरत्नावली ॥ (दक्षकन्याभेदः । यथा,
मत्स्यपुराणे । ५ । १५ ।
"शृणुध्वं देवमातृणां प्रजाविस्तरमादितः ।
मरुत्वती वसुर्यामी लम्बा भानुररुन्धती ॥")
भानुफला, स्त्री, (भानुरिव दीप्तिमत् फलमस्याः ।)
कदली । इति जटाधरः ॥
भानुमती, स्त्री, (भानु + मतुप् + ङीप् ।) विक्रमादित्यराजपत्नी । यथा,—
"देवगुरोः प्रसादेन जिह्वाग्रे मे सरस्वती ।
तेनाहं नृप ! जानामि भानुमत्यास्तिलं यथा ॥"
इति वररुचिः ॥
(कृतवीर्य्यस्य दुहिता । सा च अहंयातेः पत्नी ।
"यथा, महाभारते । १ । ९५ । १५ ।
"अहंयातिः खलु कृतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम । तस्यामस्य जज्ञे सार्व्वभौमः ॥"
अङ्गिरसः प्रथमा सुता । यथा, महाभारते ।
३ । २१७ । ३ ।
"प्रजासु तासु सर्व्वासु रूपेणाप्रतिमाभवत् ।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता ॥"
यादवभानोः कन्या । यथा, हरिवंशे । १४७ । १ ।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप ! ॥"
दुर्य्योधनपत्नी । यथा, वेणीसंहारनाटके २ अङ्के ।
"आर्य्य ! एषा भानुमती देवी प्रभुः समरविजयाशंसया निर्व्वर्त्तितगुरुपादवन्दनाद्यप्रभृति आरब्धनियमा बालोद्याने तिष्ठतीति ॥"
गङ्गा । यथा, काशीखण्डे । २९ । १२९ ।
"भुक्तिमुक्तिप्रदा भव्या भक्तस्वर्गापवर्गदा ।
भागीरथी भानुमती भाग्यं भोगवती भृतिः ॥")
भानुमान्, [त्] पुं (भानवः सन्त्यस्येति । भानु + मतुप् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा,
कुमारसम्भवे । ३ । ६५ ।
"अथोपनिन्ये गिरिशाय गौरी
तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखै-
र्मन्दाकिनीपुष्करबीजमालाम् ॥"
कलिङ्गदेशजनृपतिविशेषः । यथा, महाभारते ।
६ । ५४ । २३ ।
"भानुमांस्तु ततो भीम शरवर्षेण दारयन् ।
ननाद बलवन्नादं नादयानो नभस्तलम् ॥"
केशिध्वजस्य पुत्रः । यथा भागवते । ९ । १३ । २१ ।
"भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥")
दीप्तियुक्ते, त्रि ॥ (यथा, महाभारते । १ । ३० । ४७ ।
"चर्म्माण्यपि च गात्रेषु भानुमन्ति दृढानि च ॥")
भानुवारः, पुं, (भानोर्वारः ।) रविवारः । यथा,—
"अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥
अत्र स्नानं जपो होमो देवतानाञ्च पूजनम् ।
उपवासस्तथा दानमेकैकं पावनं स्मृतम् ॥"
इति तिथितत्त्वे सम्बत्सरवचनम् ॥
भानेमिः, पुं, (भानां प्रभाचक्राणां नेमिरिव ।)
सूर्य्यः । इति त्रिकाण्डशेषः ॥
भाम, ङ क्रोधे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ, भामते । इति दुर्गादासः ॥
भाम, न क कोपने । इति कविकल्पद्रुमः ॥ अदन्तचुरा०-पर० अक०-सेट् ।) अबभामत् । इति दुर्गादासः ॥
भामः, पुं, (भामनमिति । भाम क्रोधे + घञ् ।)
क्रोधः । (यथा, ऋग्वेदे । ५ । २ । १० ।
"मदेचिदस्य प्ररुजन्ति भामा
न वरन्ते परिबाधो अदेवीः ॥"
"भामाः क्रोधा दीप्तयो वा ।" इति तद्भाष्ये सायनः ॥ भातीति । भा + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदीति ।" उणा० १ । १३९ । इति मन् ।) सूर्य्यः । (भा + भावे मन् ।) दीप्तिः । इति मेदिनी । मे, २१ ॥ भगिनीपतिः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ६ । १६ । ४९ ।
"गुरुं मित्रं तथा भामं पुत्रञ्च भगिनीं तथा ॥")
भामकः, पुं, (भाम एव । स्वार्थे कन् ।) भगिनीपतिः । इति शब्दरत्नावली ॥
भामा, स्त्री, (भामते इति । भाम् + अच् + टाप् ।)
कोपना स्त्री । इति शब्दरत्नावली ॥
भामिनी, स्त्री (भामते इति । भाम् + णिनिः + ङीप् ।) कोपना स्त्री । इत्यमरः । २ । ६ । ४ ॥
कामातुरा । इति राजनिर्घण्टः ॥ (यथा,
भागवते । ९ । १८ । ६ ।
"एकदा दानवेन्द्रस्य शर्म्मिष्ठा नाम कन्यका ।
सखी सहस्रसंयुक्ता गुरुपुत्त्री च भामिनी ॥"
तुनयनामकगन्धर्व्वस्य दुहिता । यथा, मार्कण्डेयपुराणे । १२८ । ७ ।
"राजपुत्त्र ! सुतेयं मे भामिनी नाम मानिनी ।
अभिशापादगस्त्यस्य विशालतनयाभवत् ॥")
भामिनीविलासः, पुं, (भामिन्या विलासो यत्र ।)
जगन्नाथमिश्रपण्डितराजकृतकाव्यग्रन्थविशेषः ।
तस्याद्यश्लोकोऽयम् ।
"दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥"
तस्य पुष्पिका । इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलासे प्रास्ताविकः प्रथमो विलासः । शृङ्गारवर्णनं द्वितीयो विलासः । श्रीकृष्णगुणानुवर्णनं तृतीयो विलासश्च ॥
भामी, [न्] त्रि, (भामः क्रोधोऽस्त्यस्येति । भाम + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनि ।)
क्रोधी । (तेजस्वी । यथा, ऋग्वेदे । १ । ७७ । १ ।
"कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ॥"
"भामिने तेजस्विने ।" इति तद्भाष्ये सायनः ॥)
भारः, पुं, (भ्रियते इति । भृञ् भरणे + "अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति घञ् ।) विंशतितुलापरिमाणम् । इत्यमरः ॥ तत्तु अष्टसहस्रतोलकात्मकमिति यावत् ।
बीवधः । यथा,—
"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात् ॥"
इति चाणक्यम् ॥ * ॥
विष्णुः । इति मेदिनी । रे, १२ ॥ गुरुत्वञ्च ॥
(गुरुत्वगुणवद्वस्तु ॥)
भारण्डः, पुं, उत्तरकुरुदेशजशकुनपक्षी । इति पुराणम् ॥
भारतं, क्ली, (भरतान् भरतवंशीयानधिकृत्य कृतो ग्रन्थ इत्यण् । यद्वा, भारं चतुर्वेदादिशास्त्रेभ्योऽपि सारांशं तनोतीति । तन् + डः ।)
ग्रन्थभेदः । इति मेदिनी । ते, १३८ ॥ तत्तु व्यासप्रणीतलक्षश्लोकात्मकमहाभारतसंज्ञकेतिहासः । तस्य श्रवणादिफलं यथा,—
"भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुबहुश्रुताय ।
पुण्याञ्च भारतकथां शृणुयाच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव ॥
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ।
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ।
यथैतानीतिहासानां तथा भारतमुच्यते ॥
यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ।
भ्रूणहत्याकृतञ्चापि पापं जह्यादसंशयः ॥"
इति महाभारतम् ॥ * ॥
तद्वृत्तान्तो यथा,—
मत्स्य उवाच ।
"भारतं संप्रवक्ष्यामि भारावतरणं भुवः ।
चक्रे कृष्णो युध्यमानः पाण्डवादिनिमित्ततः ॥
विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्त्रोऽत्रिरत्रितः ।
सोमस्ततो बुधस्तस्मादैलश्चासीत् पुरूरवाः ॥
तस्मादायुस्ततस्य पुत्रोऽभूद्ययातिर्भरतः कुरुः ।
शान्तनुस्तस्य वंशेऽभूद्गङ्गायां शान्तनोः सुतः ॥

भीष्मः सर्व्वगुणैर्युक्तो ब्रह्मवेदार्थपारगः ।
शान्तनोः सत्यवत्याश्च द्वौ पुत्त्रौ संबभूवतुः ॥
चित्राङ्गदन्तु गन्धर्व्वः पुत्त्रं चित्ररथोऽवधीत् ।
अन्यो विचित्रवीर्य्योऽभूत् काशिराजसुतापतिः ॥
विचित्रवीर्य्ये स्वर्यांते व्यासात्तत्क्षेत्रजोऽभवत् ।
धृतराष्ट्रोऽम्बिकापुत्त्रः पाण्डुरम्बालिकासुतः ॥
भुजिष्यायान्तु विदुरो गान्धार्य्यां धृतराष्ट्रतः ।
दुर्य्योधनप्रधानास्तु शतसंख्या महाबलाः ॥
पाण्डोः कुन्त्याश्च माद्र्याश्च पञ्च पुत्त्राः प्रजज्ञिरे ।
युधिष्ठिरो भीमसेनः अर्ज्जुनो नकुलस्तथा ।
सहदेवश्च पञ्चैते महाबलपराक्रमाः ॥
कुरुपाण्डवयोर्वैरं दैवयोगाद्बभूव ह ।
दुर्य्योधनेन वीरेण पाण्डवाः समुपद्रुताः ।
दग्धा जतुगृहे वीरास्ते मुक्ताः स्वधियामलाः ॥
ततस्त एकचक्रायां ब्राह्मणस्य निवेशने ।
विप्रवेशा महात्मानो निहत्य वकराक्षसम् ॥
ततः पाञ्चालविषये द्रौपद्यास्ते स्वयंवरम् ।
विज्ञाय वीर्य्यशुल्कां तां पाण्डवा उपयेमिरे ॥
द्रोणभीष्मानुमत्या च धृतराष्ट्रः समानयत् ।
अर्द्धं राज्यं ततः प्राप्ता इन्द्रप्रस्थे पुरोत्तमे ॥
राजसूयं ततश्चक्रुः सभां कृत्वा यतव्रताः ।
अर्ज्जुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् प्रियाम् ॥
वासुदेवस्य भगिनीं मित्रं देवकिनन्दनम् ॥
गाण्डीवं नाम तद्दिव्यं त्रिषु लोकेषु विश्रुतम् ।
अक्षयान् शायकांश्चैव तथाभेद्यञ्च दंशनम् ॥
स तेन धनुषा वीरः पाण्डवो जातवेदसम् ।
कृष्णद्वितीयो वीभत्सुरतर्पयत वीर्य्यवान् ॥
नृपान् दिग्विजये जित्वा रत्नान्यादाय वै ददौ ।
युधिष्ठिराय महते भ्रात्रे नीतिविदे मुदा ॥
युधिष्ठिरोऽपि धर्म्मात्मा भ्रातृभिः परिवारितः ।
जितो दुर्य्योधनेनैव मायाद्यूतेन पापिना ।
कर्णदुःशासनमते स्थितेन शकुनेर्मते ।
अथ द्वादशवर्षाणि वने तेपुर्म्महत्तपः ॥
सधौम्या द्रौपदीसत्या मुनिवृन्दाभिसंवृताः ।
ययुर्विराटनगरं गुप्तरूपेण संस्थिताः ॥
वर्षमेकं महाप्राज्ञा गोग्रहादिमपालयन् ।
ततो ज्ञाताः स्वकं राष्ट्रं प्रार्थयामासुराहृताः ॥
पञ्च ग्रामानर्द्धराज्यं वीरा दुर्य्योधनं नृपम् ।
नाप्तवन्तः कुरुक्षेत्रे युद्धञ्चक्रुर्बलान्विताः ॥
अक्षौहिणीभिर्दिव्याभिः सप्तभिः परिवारिताः ।
एकादशभिरुद्युक्तास्तेऽपि दुर्य्योधनादयः ॥
आसीद्युद्धं स्वर्गमार्गं देवासुररणोपमम् ।
भीष्मः सेनापतिरभूदादौ दौर्य्योधने बले ॥
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ।
शक्त्याशक्तिमहाघोरं दशरात्रं शराशनिः ॥
शिखण्ड्यर्ज्जुनबाणैश्च भीष्मः शरशतैश्चितः ।
उत्तरायणमीक्ष्याथ ध्यात्वा देवं गदाधरम् ॥
उक्त्वा धर्म्मान् बहून् सर्व्वांस्तर्पयित्वा पितॄन्
बहून् ।
आनन्दे तु पदे लीनो विमले मुक्तकिल्विषे ॥
ततो द्रोणो ययौ योद्धुं धृष्टद्युम्नेन वीर्य्यवान् ।
दिनानि पञ्च तद्युद्धमासीत् परमदारुणम् ॥
ये सर्व्वे पृथिवीपाला हताः पार्थाश्रसागरे ।
शोकमासाद्य पुत्त्रेण द्रोणोऽपि स्वर्गमाप्नुयात् ॥
ततः कर्णो ययौ योद्धुमर्ज्जुनेन महात्मना ।
दिनद्वयं महद्युद्धं कृत्वा पार्थास्त्रसागरे ॥
निमग्नः सूर्य्यलोकन्तु ततः प्राप स वीर्य्यवान् ।
ततः शल्यो ययौ योद्धुं धर्म्मराजेन धीमता ॥
दिनार्द्धेन हतः शल्यो बाणैर्ज्वलनसन्निभैः ।
दुर्य्योधनोऽथ वेगेन गदामादाय वीर्य्यवान् ॥
अभ्यधावत वै भीमं कालान्तकयमोपमम् ।
अथ भीमेन वीरेण गदया विनिपातितः ॥
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि ।
जघान बाहुवीर्य्येण पितुर्व्वधमनुस्मरन् ॥
धृष्टद्युम्नं जघानाथ द्रौपदेयांश्च वीर्य्यवान् ।
द्रौपद्यां रोदमानायामश्वत्थाम्नः शिरोमणिम् ।
ऐषीकास्त्रेण तं जित्वा जग्राहार्ज्जुन उत्तमम् ॥
युधिष्ठिरः समाश्वास्य स्त्रीजनं शोकसङ्कुलम् ।
स्नात्वा सन्तर्प्य देवांश्च पितॄनथ पितामहान् ।
आश्वासितोऽथ भीष्मेण राज्यञ्चैवाकरोन्महत् ॥
विष्णुमीजेऽश्वमेधेन विधिवद्दक्षिणावता ।
राज्ये परिक्षितं स्थाप्य यादवानां विनाशनम् ॥
श्रुत्वा तु मौषले राजा जप्त्वा नामसहस्रकम् ।
विष्णोः स्वर्गं जगामाथ भीमाद्यैर्भ्रातृभिर्युतः ॥”
इति गारुडे १५० अध्यायः ॥*॥
वर्षभेदः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतनवमवर्षः । तद्विवरणं यथा,—
“उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः ॥
अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च ।
तिर्य्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ! ॥
इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते ॥
भारतस्यास्य वर्षस्य नव भेदान्निशामय ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ॥
ब्राह्मणाः क्षत्त्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुद्धवणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः ॥
शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः ।
वेदस्मृतिमुखाद्याश्च पारिपात्रोद्भवा मुने ! ॥
नर्म्मदासुरसाद्याश्च नद्यो विन्ध्याद्विनिःसृताः ।
तापी पयोष्णी निर्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।
त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥
ऋषिकुल्या कुमार्य्याद्याः शुक्तिमत्पादसम्भवाः ।
आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ॥
तास्विमे कुरुपाञ्चालमध्यदेशादयो जनाः ।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ॥
ओड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्व्वशः ।
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्ब्बुदाः ॥
मारुका मालवाश्चैव पारिपात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः ॥
मद्रा रामास्तथाम्बष्ठाः पारसीकादयस्तथा ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
समीपतो महाभाग ! हृष्टपुष्टजनाकुलाः ।
चत्वारि भारते वर्षे युगान्यत्र महामुने ! ॥
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ।
तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः ॥
दानानि चात्र दीयन्ते परलोकार्थमादरात् ।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ॥
यज्ञैर्यज्ञपतिर्विष्णुरन्यद्वीपेषु चान्यथा ।
तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ॥
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति ॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ॥
नववर्षन्तु मैत्रेय । जम्बुद्वीपमिदं मया ।
लक्षयोजनविस्तारं संक्षेपात् कथितं तव ॥
जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय । वलयाकारः स्थितः क्षारोदधिर्बहिः ॥”
इति श्रीविष्णुपुराणे २ अंशे ३ अध्यायः ॥*॥
अस्मिन् वर्षे जन्मकारणं तत्साफल्यञ्च यथा,—
“शतजन्मतपः कृत्वा जन्मेदं भारते लभेत् ।
करोति सफलं जन्म श्रुत्वा हरिकथामृतम् ॥
अर्च्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ।
करोति सफलं जन्म कृत्वैतानि च भारते ॥”*।
अस्य पुण्यस्थलत्वं कर्म्मभूमित्वं परिमाणञ्च यथा,—
“कर्म्मणां फलभोगश्च सर्व्वेषां सुरसुन्दरि ! ।
नैव स्वर्गे न पाताले नान्यद्वीपे श्रुतौ श्रुतम् ॥
कृत्वा शुभाशुभं कर्म्म पुण्यक्षेत्रे च भारते ।
अन्यत्र तत्फलं भुङ्क्ते कर्म्मी कर्म्मनिबन्धनात् ॥

हिमालयाद्यासमुद्रं पुण्यक्षेत्रञ्च भारतम् ।
श्रेष्ठं सर्व्वस्थानानाञ्च मुनीनाञ्च तपःस्थलम् ॥
लब्ध्वा तत्र जन्म जीवो वञ्चितो विष्णुमायया ।
यत्न करोति विषयं विहाय सेवनं हरेः ॥
कृत्वा तत्र महत् पुण्यं स्वर्गं गच्छति पुण्यवान् ।
गृहीत्वा स्वर्गकन्याञ्च चिरं स्वर्गे प्रमोदते ॥
स्वर्गमागच्छति नरो विहाय मानवीं तनुम् ॥"
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे ।१।५६। अध्यायौ ॥

भारतः, पुं, (भरतस्य मुनेरयमिति । भरत + अण् ।) नटः । इति जटाधरः ॥ अग्निः । इति त्रिकाण्डशेषः ॥ (भरतस्य गोत्रापत्यमिति । भरत + अण् ।) भरतस्य गोत्रापत्यम् ॥ (यथा, महाभारते । १ । ११ । ७४ ।
"तत्राश्चर्य्यमहच्चैतत् कर्म्म भीमस्य भारत !॥")

भारतवर्षं, क्ली, (भारतं भरतसम्बन्धि वर्षमिति ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । यथा,—
"हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥"
तस्य नव भागा यथा,—
"भारतस्यास्य वर्षस्य नवभेदान्निबोध मे ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वो वारुणस्तथा ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज ! ॥
इज्यायुद्धवणिज्याद्यैः कर्म्मभिः कृतपावनाः ।
तेषां संव्यवहारश्च एभिः कर्म्मभिरिष्यते ॥
स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तथा ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ॥
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥
विस्तारोच्छ्रयिणो रम्या विपुलाश्चित्रसानवः ।
कोलाहलः सवैभ्राजो मन्दरो दर्दुराचलः ॥
वातन्धमो वैद्युतश्च मैनाकः सुरसस्तथा ।
तुङ्गप्रस्थो नागगिरिर्गोधनः पाण्डुराचलः ॥
पुष्पवीर्य्यजयन्तौ च रैवतोऽर्व्वुद एव च ।
ऋष्यमूकः सगोमन्तः कूटशैलः कृतस्मरः ॥
श्रीपर्व्वतश्चकोरश्च शतशोऽन्येऽत्र पर्व्वताः ।
तैर्व्विमिश्रा जनपदा म्लेच्छाश्चार्य्याश्च भागशः ।
तैः पीयन्ते सरिच्छ्रेष्ठा यास्ताः सम्यङ्निबोध मे ॥
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापगा ।
यमुना च शतद्रुश्च वितस्तैरावती कुहूः ॥
गोमती धूतपापा च वाहुदा च दृषद्वती ।
विपाशा देविका वङ्क्षुर्विशाला गण्डकी तथा ।
कौशिकी चापरा विप्र ! हिमवत्पादनिःसृताः ॥
वेदस्मृतिर्वेतसिनी त्रासिनी सिन्धुरेव च ।
वेण्णा च स्यन्दना चैव सदानीरा मही तथा ॥
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥
शोणो महानदश्चैव नर्म्मदा सुरसा क्रिया ।
मन्दाकिनी दशार्णा च चित्रकूटा तथापगा ॥
चित्रोत्पला च तमसा करतोया पिशाचिका ।
तथान्या पिप्पला श्रोणी विपाशा वञ्जुला नदी ॥
सरोजना शुक्तिमती मञ्जुली त्रिदिवा क्रतुः ।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ॥
शिप्रा पयोष्णी निर्व्विन्ध्या तापी च निषधावती ।
वेण्णा वैतरणी चैव शिनीवाली कुमुद्वती ॥
तोया चैव महागौरी दुर्गा चान्तःशिवा तथा ।
विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥
गोदावरी भीमरथी कृष्णवर्णा तथापगा ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्य्यथापगा ।
सह्यपादविनिष्क्रान्ता इमास्ताः सरिदुत्तमाः ॥
कृतमाला ताम्रपर्णी पुष्पजात्युत्पलावती ।
मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः ॥
पितृसोमर्षिकुल्या च इक्षला त्रिदिवालया ।
लाङ्गुलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥
ऋषिका च कुमारी च मन्दगा मन्दवाहिनी ।
कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥
सर्व्वाः पुण्याः सरस्वत्यः सर्व्वा गङ्गाः समुद्रगाः ।
विश्वस्य मातरः सर्व्वाः सर्व्वाः पापहराः स्मृताः ॥
अन्याः सहस्रशः प्रोक्ताः क्षुद्रनद्यो द्विजोत्तम ! ।
प्रावृट्कालवहाः सन्ति सर्व्वकालवहाश्च याः ॥
मत्स्याः कुशूलाः कुल्याश्च कुन्तलाः काशिकोशलाः ॥
अर्व्वुदाश्च पुलिङ्गाश्च समकाश्च वृकैः सह ।
मध्यदेशा जनपदाः प्रायशोऽमी प्रकीर्त्तिताः ॥
सह्यस्य चोत्तरेश्चैव यत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः ॥
गोवर्द्धनपुरं रम्यं भार्गवस्य महात्मनः ।
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ॥
अपरान्ताश्च शूद्राश्च पह्लवाश्चर्म्मखण्डिकाः ।
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥
शतद्रुदा ललित्थाश्च पारदाहारमूषिकाः ।
माठरा रथहलकाः कैकया दशमानिकाः ॥
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ।
काम्बोजा दरदाश्चैव वर्व्वरा ह्यङ्गलौकिकाः ॥
चीनाश्चैव तुषाराश्च पह्लवा वाह्यतोदराः ।
आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः ॥
लम्पकाः स्तनकाराश्च चूलिका जाङ्गवैः सह ।
अपथाश्चालिमद्राश्च किरातानाञ्च जातयः ॥
तामसा हंसमार्गाश्च काश्मीरास्तङ्गणास्तथा ।
चूलिका हुहुकाश्चैव ऊर्णा दार्व्वास्तथैव च ॥*॥
एते देशा ह्युदीच्यास्तु प्राच्यान् देशान्निबोध मे ।
अन्ध्रवाका सुजरका अन्तर्गिरिवहिर्गिराः ॥
तथा प्रवङ्गा वङ्गेया मलदा मलवर्त्तिकाः ।
ब्रह्मोत्तराः प्रविजया भार्गवाङ्गेयमर्द्दकाः ॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः ।
मल्ला मगधगोमेदाः प्राच्या जनपदाः स्मृताः ॥
अथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥
सेतुका मूषिकाश्चैव कुमारा वानवासिकाः ।
महाराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्व्वशः ॥
आभीराः सह चैषीका आटव्याः शवराश्च ये ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ।
तैलिकाः कुन्तला अन्ध्रा उद्भिदा नलकारकाः ॥*॥
दाक्षिणात्यास्त्विमे देशा अपरान्तान्निबोध मे ।
सौर्पारकाः कालनदा दुर्गास्तालीयकैः सह ॥
कारस्करा लोहजङ्घा वानेया राजभद्रकाः ।
तोसलाः कोशलाश्चैव त्रैपुरा विदिशास्तथा ॥
तुषारास्तुम्बराश्चैव पाटचो नैषधैः सह ।
पुलिन्दाश्च सुशीलाश्च रूपपास्तामसैः सह ॥
तथा कुरुमिणश्चैव सर्व्वे चैव करस्कराः ।
नासिक्याद्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः ।
मारुकच्छाः समाहेयाः सर्व्वे सारस्वतैः सह ।
कच्छीयाश्च सुराष्ट्राश्च आवन्त्याश्चार्व्वुदैः सह ॥
इत्येते ह्यपरान्ताश्च शृणु विन्ध्यनिवासिनः ।
मलजाश्च करूषाश्च मेकलाश्चोत्कलैः सह ॥
उत्तमर्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ।
अनूपास्तुण्डिकेराश्च वीरहोत्रा ह्यवन्तयः ॥
एते जनपदाः सर्व्वे विन्ध्यपृष्ठनिवासिनः ॥
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ॥*॥
निहारा हंसमार्गाश्च कुपथास्तङ्गणाः खसाः ।
कुथाः प्रावरणाश्चैव ऊर्णा दर्व्वाः सहुहुकाः ॥
त्रिगर्त्ता मालवाश्चैव किरातास्तामसैः सह ।
कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ॥*॥
एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितम् ॥
दक्षिणे परतो ह्यस्य पूर्व्वेण च महोदधिः ।
हिमवानुत्तरेणास्य कार्म्मुकस्य यथा गुणः ॥
तदेतद्भारतं वर्षं सर्व्वबीजं द्विजोत्तम ! ।
देवत्वममरेशत्वं दैवत्वं मर्त्यता तथा ॥
मृगपश्वप्सरश्चरा योनीस्तद्वत् सरीसृपाः ।
स्थावराणाञ्च सर्व्वेषामतो ब्रह्मन् ! शुभाशुभैः ॥
प्रयान्ति कर्म्मभूर्ब्रह्मन्नान्यलोकेषु विद्यते ।
देवानामपि विप्रर्षे ! सदैवैष मनोरथः ॥
अपि मानुषमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ ।
मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः ॥
स्वकर्म्मनिगडग्रस्तैः स्वकर्म्मक्षपणोत्सुकैः ।
न किञ्चित् क्रियते कर्म्म सुखलेशोपबृंहितैः ।"
इति श्रीमार्कण्डेयपुराणे भारतखण्डवर्णननामाध्यायः ॥ ५७ ॥ * ॥ अपि च ।
"भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः ।
मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः
कूटकः कोल्लः सह्यो देवगिरिर्ऋष्यमूकः
श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः
शुक्तिमानृक्षगिरिः पारिपात्रो द्रोणश्चित्रकूटो
गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुखः

इन्द्रकील: कामगिरिरिति चान्ये शतसहस्रश: शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याता:। एतासामपो भारत्य: प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्ध: शोणश्च नदौ महानदी वेदस्मृतिऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोघवती सप्तवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्य:। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभि: शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्व्येण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्चापि भवति। योऽसौ भगवति सर्व्वभूतात्मनि अनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्ग:। एतदेव हि देवा गायन्ति।

"अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरि:।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकं स्पृहा हि न: ॥
किं दुष्करैर्न: क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कज-
स्मृति: प्रमुष्टातिशयेन्द्रियोत्सवात् ॥
कल्पायुषां स्थानजयात् पुनर्भवात्
क्षणायुषां भारतभूजयो वर:।
क्षणेन मर्त्त्येन कृतं मनस्विन:
संन्यस्य संयान्त्यभयं पदं हरे: ॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रया:।
न यत्र यज्ञेशमखा महोत्सवा:
सुरेशलोकोऽपि न वै स सेव्यताम् ॥
प्राप्ता नृजातिन्त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम्।
न वै यतेरन्न पुनर्भवाय ते
भूयो वनौका इव यान्ति बन्धनम् ॥
यै: श्रद्धया बर्हिषि भागशो हवि-
र्निरुप्तमिष्टं विधिमन्त्रवस्तुत:।
एक: पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्ण: स्वयमाशिषां प्रभु: ॥
सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यत:।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम् ॥
यद्यत्र न: स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्म न: स्या-
द्वर्षे हरिर्यद्भजतां शं तनोति ॥

श्रीशुक उवाच। जम्बूद्वीपस्य च राजन्नुपद्वीपा नष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान्। तद्यथा। स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिण: पाञ्चजन्य: सिंहलो लङ्केति। एवं तव भारतोत्तमजम्बुद्वीपवर्षविभागो यथोपदेशमुपवर्णित.।" इति श्रीभागवते महापुराणे ५ स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्याय:॥ (विष्णुपुराणे च। २ अंशे ३ अध्याये।

"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र सन्तति: ॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने।।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥"२॥

अपरञ्च।

"अत: संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यत: पुरुषा मुने ! ॥४॥
इत: स्वर्गञ्च मोक्षञ्च मध्यमन्तञ्च गम्यते।
न खल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते ॥"५॥

अपि च।

"चत्वारि भारते वर्षे युगान्यत्र महामुने !।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ॥१९॥
तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विन:।
दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥"२०॥
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने।।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमय: ॥२२॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम !।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥२३॥
गायन्ति देवा: किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूय: पुरुषा: सुरत्वात् ॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंल्लयं ये त्वमला: प्रयान्ति ॥२५॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम्।
प्राप्स्याम धन्या: खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीना: ॥"२६॥)

भारती, स्त्री, (भृ + अतच्। स्त्रियां ङीप्।) वचनम्। (यथा, कुमारे। ६। ७९।
"समर्थमिव भारत्या सुतया योक्तुमर्हसि ॥")
सरस्वती। (यथा, कालिदास:।
"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि। नमस्ते ॥")
पक्षिभेद:। वृत्तिभेद:। इति मेदिनी। ते, १३८ ॥ यथा,—
"शृङ्गारे कौशिकी वीरे सात्त्वत्यारभटी पुन:।
रसे रौद्रे च वीभत्से वृत्ति: सर्व्वत्र भारती ॥"
भारती वृत्तिस्तु भारती संस्कृतप्रायो वाग्व्यापारो नराश्रय:। इति साहित्यदर्पणस्य ६ परिच्छेद: ॥ ब्राह्मी। इति राजनिर्घण्ट: ॥ (शङ्कराचार्य्यशिष्यतोटकस्य शिष्याणामन्यतमस्य उपाधिविशेष:। यथा, शाक्तोविश्वानन्दधूतप्रकरणे।
"विद्याभारेण सम्पूर्ण: सर्व्वभारं परित्यजेत्।
दु:खभारं न जानाति भारती परिकीर्त्तिता ॥"
नदीविशेष:। यथा, महाभारते। ३।२२१।७५।
"भारती सुप्रयोगा च कावेरी मुर्म्मुरा तथा ॥")

भारद्वाजं, क्ली, अस्थि। इति हेमचन्द्र:।३।२८९॥

भारद्वाज:, पुं, (भरद्वाजस्य अपत्यं गोत्रापत्यमिति वा। भरद्वाज + "अनृष्यानन्तर्य्ये विदादिभ्योऽञ्।" ४।१।१०४। इति अञ्।) द्रोणाचार्य्य:।(यथा, महाभारते।७।६। २३।
"तत: प्रयाते सहसा भरद्वाजे महारथे।
आर्त्तनादेन घोरेण वसुधा समकम्पत ॥")
ऋषिभेद:। इति मेदिनी। जे, ३४ ॥ अगस्त्यमुनि:। इति शब्दरत्नावली ॥ मङ्गलग्रह:। इति मलयमासतत्त्वम् ॥ व्याघ्राटपक्षी। बृहस्पतिपुत्र:। इति हेमचन्द्र: ॥ (देशभेद:। यथा, "लकणपर्वाद्भारद्वाजे।" ४। २। १४५। इति सूत्रे "भारद्वाजशब्दोऽपि देशवचन एव नगोत्रशब्द:।" इति काशिका ॥ भरद्वाजवंशीये, त्रि ॥ यथा, महाभारते। १। १३१। ३।
"इति सञ्चिन्त्य गाङ्गेयस्तदा भरतसत्तम।।
द्रोणाय वेदविदुषे भारद्वाजाय धीमते।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ। ॥')

भारद्वाजी, स्त्री, वनकार्पासी। इति शब्दरत्नावली ॥ (नदीभेद:। यथा, महाभारते। ६। ९। २९।
"शोणाञ्च पिच्छिलाञ्चैव भारद्वाजीञ्च निम्नगाम्।
कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम् ॥")

भारय: पुं, (भां दीप्तिं रयते प्राप्नोतीति। रय गतौ + पचाद्यच्।) भारद्वाजपक्षी। इति शब्दचन्द्रिका ॥ भारइ इति भाषा ॥

भारयष्टि:, स्त्री, (भारस्य यष्टि:।) भारवहनदण्ड:। वाँक इति भाषा। तत्पर्य्याय:। विहङ्गिका २। इत्यमर:। २। १०। ३० ॥

भारव, क्ली, (भारं वातीति। भार + वा + "आतोऽनुपेति।" ३। २। ३। इति क:।) धनुर्गुण:। इति त्रिकाण्डशेष: ॥

भारवाह:, पुं, (भारं वहतीति। वह् + "कर्म्मण्यण्।" ३। २। १। इत्यण्।) भारिक:। इत्यमर:। ३।१०। १५ ॥ (यथा, महाभारते। ३। १३३। १।
"अन्धस्य पन्था बधिरस्य पन्था:
स्त्रियाश्च पन्था भारवाहस्य पन्था: ॥")

भारवाही, स्त्री, (भारवाह + गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्ट: ॥

भारविः, पुं, कविविशेषः। स च किरातार्ज्जुनीय-नामकाव्यकर्त्ता। तत्पर्य्यायः। श्वसुपुष्पः २। इति त्रिकाण्डशेषः॥ तस्य ग्रन्थस्य प्रथम-श्लोकोऽयम्।

"श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥"

भारहणः, पुं, कार्य्योनामकगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

भारहरः, पुं, (हरतीति। हृ+पचाद्यच्। भारस्य हरः।) भारवाहकः। इति शब्दरत्नावली॥

भारहारः, पुं, (भारं हरतीति। हृ+अण्।) भारवाहकः। इति शब्दरत्नावली॥

भारिः, पुं, (इभस्य अरिः। पृषोदरादित्वात् इलोपः।) सिंहः। इति हेमचन्द्रः॥

भारिकः, पुं, (भारोऽस्त्यस्य वाह्यतयास्य। "अत इनिठनौ।" ५।२।११५। इति ठन्।) भार-वाहकः। भारी इति ख्यातः। तत्पर्य्यायः। भारवाहः २। इत्यमरः। २।१०।१५॥ भारहरः ३ भारहारः ४। इति शब्दरत्ना-वली॥ (यथा, कथासरित्सागरे। २७। ५६।

"तत्र चायाग्रताः केचित् तत्रत्युः काष्ठ-भारिकाः॥")

भारिटः, पुं, पक्षिविशेषः। तत्पर्य्यायः। श्याम-चटकः २ शोशिरः ३ कणभक्षकः ४। इति राजनिर्घण्टः॥

भारी, [न्] पुं, (भारोऽस्त्यस्यास्मिन् वेति। भार+इनिः।) भारवाहकः। इत्यमरटीकायां रमा-नाथः॥ (यथा, मनौ। २। १३८।

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च॥")

भारयुक्ते, त्रि॥

भारौही, स्त्री, (भारं वहतीति। वह+णिन्। स्त्रियां ङीप्। ततः प्रसादावनात् ऊठ्।) भारवाहिका। इति मुग्धबोधव्याकरणम्॥

भार्गवः, पुं, (भृगोरपत्यम् तद्गोत्रापत्यमिति। भृगु+अण्।) परशुरामः। शुक्राचार्य्यः। (यथा, महाभारते। १। ६६। ४५।

"तत्रिनियुक्ते विधिना योगक्षेमाय भार्गवे।
अभ्यसून्पादयामास पुत्रं भृगुरनिन्दितम्॥")

धन्वी। गजः। इति मेदिनी। वे, ४५॥ भारत-वर्षमध्ये प्राच्यदेशान्तर्गतदेशविशेषः। यथा,—

"भद्रोत्तराः प्रविजया भार्गवा ज्ञेयमर्द्दकाः॥"
इति मार्कण्डेयपुराणम्॥

(कुलालः। यथा, महाभारते। १। १६२। १।

"गत्वा तु तां भार्गवकर्म्मशालां
पार्थौ पृथां प्राप्य महानुभावौ॥"

"भृगुः सघटकृत्तिः जीविकार्थं भृगुणा यव-हरतीति भार्गवः कुलालः।" इति तट्टीकायां नीलकण्ठः॥ मार्कण्डेयः। यथा, महाभारते। १३। २९। १५।

"इत्युक्ते ते अमराम् चत्वारोऽमिततेजसः।
पृथिवीकाश्यपचाग्निः प्रजानाथश्च भार्गवः॥"

शौनकः। यथा, महाभारते। १। १९। ६।

"तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गवः॥"

भृगुवंशीये, त्रि॥ (यथा, महाभारते। ३। ९९। ४१।

"श्रृणु रामस्य राजेन्द्र। भार्गवस्य च धीमतः॥")

भार्गवप्रियः, पुं, (भार्गवस्य प्रियः।) हीरकः। शुक्राधिष्ठातृदेवताकत्वात्॥

भार्गवी, स्त्री, (भार्गव+ङीप्।) पार्व्वती। (भृगोरपत्यं स्त्री। भृगु+अण्+ङीप्।) लक्ष्मीः। (अस्या भृगुसुतात्वमुक्तं यथा, विष्णु-पुराणे। १। ९। १४६।

"एतत् ते कथितं ब्रह्मन्। यन्मां त्वं परि-पृच्छसि।
क्षीराब्धौ श्रीर्यथा जाता पूर्व्वं भृगुसुता सती॥")

दूर्व्वा। इति मेदिनी। वे, ४५॥ (यथा, वैद्यक-रत्नमालायाम्।

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी रुहा॥")

नीलदूर्व्वा। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।

"नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ (भृगुवंशीय-स्त्रीमात्रे। यथा, महाभारते। १। ७३। ३३।

"कस्माच्चिरायितोऽसीति पृष्टस्तामाह भार्गवीम्।
इतोऽहमिति चावज्यौ पृष्टो ब्राह्मण-कन्यया॥")

भार्गी, स्त्री, (भ्रस्ज्+घञ्। भर्गोऽस्त्यस्या इति। "ज्योत्स्नादिभ्य उपसंख्यानम्।" ५।२।१०३। इत्यस्य वार्त्ति०। इति अण्। ततो ङीप्।) क्षुपविशेषः। वामनहाटी इति भाषा। तत्-पर्य्यायः। ब्रह्मयष्टी २ फञ्जी ३ अङ्गार-वल्लरी ४ ब्राह्मी ५ ब्राह्मणयष्टिः ६ वात्नारिः ७ भञ्जना ८ पद्मा ९ यष्टिः १० भारङ्गी ११ वातारिः १२ कासजित् १३ सुरूपा १४ भ्रमरेष्टा १५ शक्रमाता १६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कासश्वास-शोफव्रणक्रिमिदाहज्वरनाशित्वञ्च। इति राज-निर्घण्टः॥ अन्यत् ब्राह्मणयष्टिकाशब्दे द्रष्टव्यम्॥

भार्द्वाजी, स्त्री, (भारद्वाजी। पृषोदरादित्वात् साधुः।) भारद्वाजी। वनकार्पासी। इति शब्दरत्नावली॥

भार्य्या, स्त्री, (भरणीया इति। भृ+"ऋहलो-र्ण्यत्।" ३।१।१२४। इति ण्यत्। टाप्। यद्वा भया दीप्त्या आर्य्या।) वेदविधा-नेनोढा। विधिपूर्व्वकविवाहिता। तत्पर्य्यायः। पत्नी २ पाणिगृहीती ३ द्वितीया ४ सह-धर्म्मिणी ५ जाया ६ दाराः ७ सहधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० कलत्रम् ११ कलत्रकम् १२॥ इति शब्दरत्नावली॥ अस्याः प्रशंसा यथा,—

"सा भार्य्या या प्रियं ब्रूयात् स पुत्त्रो यत्र जीवति।
स जीवति गुणो यस्य धर्म्मो यस्य स जीवति॥
गुणधर्म्मविहीनो यो निष्फलं तस्य जीवनम्॥
सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा॥
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-व्रता।
नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी॥
अल्पभुक् स्वल्पभाषी च सततं मङ्गलैर्युता।
सततं धर्म्मबहुला सततञ्च पतिप्रिया॥
सततं प्रियवक्त्री च सततं ऋतुकामिनी।
पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी॥
यस्येदृशी भवेद्भार्य्या देवेन्द्रो न स मानुषः॥"

अस्या दोषा यथा,—

"यस्य भार्य्या विरूपाक्षी कश्मला कलहप्रिया।
उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा॥
यस्य भार्य्याश्रितान्यत्र परवेश्माभिकाङ्क्षिणी।
कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा॥"
"यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी।
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया॥
दुष्टा भार्य्या शठं मित्रं भृत्याश्चोत्तरदायकाः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः।
आपत्सु मित्रं जानीयात् युद्धे शूरं वने शुचिम्।
भार्य्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्॥"

इति गारुडे नीतिसारे १०८।१०९ अध्यायौ॥ (तथा च महाभारते। १। ७४। ३९—४५।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता॥
अर्द्धं भार्य्या मनुष्यस्य भार्य्या श्रेष्ठतमः सखा।
भार्य्यामूलं त्रिवर्गस्य भार्य्यामूलं तरिष्यतः॥
भार्य्यावन्तः क्रियावन्तः सभार्य्या गृहमेधिनः।
भार्य्यावन्तः प्रमोदन्ते भार्य्यावन्तः श्रियान्विताः॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः।
पितरो धर्म्मकार्य्येषु भवन्त्यार्त्तस्य मातरः॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः॥
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम्।
भार्य्यैवान्वेति भर्त्तारं सततं या पतिव्रता॥
प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते।
पूर्व्वं मृतञ्च भर्त्तारं पश्चात् साध्व्यनुगच्छति॥")

दक्षसंहितायाञ्च।

"यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
सुशीला सुन्दरी शान्ता गता यस्य गृहोदरात्।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
भावानुरक्ता वनिता सुता यस्य च शान्तुका।

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
देवनापहृता यस्य पतिसाध्वी पतिव्रता ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
प्रियाशून्यं गृहं यस्य पूर्णं चौधनबन्धुभि: ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
भार्य्याशून्या वनसमा: सभार्य्याश्च गृहा गृहा: ।
गृहिणी च गृहं प्रोक्तं न गृहं गृहमुच्यते ॥
अशुचि: स्त्रीविहीनश्च दैवे पैत्रे च कर्म्मणि ।
यदह्रा कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
दाहिकाशक्तिहीनश्च यथा वह्नो हुताशन: ।
प्रभाहीनो यथा सूर्य्य: शोभाहीनो यथा शशी ॥
शक्तिहीनो यथा जीवो यथात्मा च तनुं विना ।
विनाधारं यथा धियो यथेश: प्रकृतिं विना ॥
न च शक्तो यथा यज्ञ: फलदो दक्षिणां विना ।
कर्म्मिणां च फलं दातुं सामग्रीमूलमेव च ॥
विना स्वर्णं स्वर्णकारो यथाशक्त: स्वकर्म्मणि ।
यथाशक्त: कुलालश्च मृत्तिकाञ्च विना द्विजा: ॥
तथा गृही न शक्तश्च सन्ततं सर्व्वकर्म्मणि ।
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा ॥
भार्य्यामूलं सुखं शश्वद्गृहस्थानां गृहे सदा ।
भार्य्यामूल: सदा हर्षो भार्य्यामूलश्च मङ्गलम् ॥
भार्य्यामूलश्च संसारो भार्य्यामूलश्च सौरतम् ।
यथा रथश्च रथिनां गृहिणाञ्च तथा गृहम् ।
सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया ॥
सर्व्वरत्नप्रधानश्च स्त्रीरत्नं दुष्कुलादपि ।
सा गृहीता गृहस्थेनेत्याह कमलोद्भव: ॥
यथा जलं विना पद्मं पद्मं शोभां विना यथा ।
तथैव च गृहं शश्वद्गृहिणां गृहिणीं विना ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्याय: ॥
तस्या अत्याज्यत्वं यथा,—
“अनपत्याञ्च युवतीं कुलजाञ्च पतिव्रताम् ।
त्यक्त्वा भवेद्य: सन्न्यासी ब्रह्मचारी यतीति वा ॥
वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति य: ।
तीर्थाय तपसे वापि मोक्षार्थं जन्म खण्डितुम् ॥
न मोक्षस्तस्य भवति धर्म्मस्य स्खलनं ध्रुवम् ।
अभिशापेन भार्य्याया नरकञ्च परत्र च ॥
इहैव च यशोनाश इत्याह कमलोद्भव: ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अ: ॥
बहुभार्य्यस्यैकस्या भजने दोषादि यथा,—
“गदतो यत् श्रुतं पूर्ब्बं नारदाय पितुर्मुखे ।
एषस्य धर्म्मशास्त्रार्थं तत् ब्रवीम्य निशापते ॥
बहुदार: पुमान् यस्तु रागादेकां भजेत् स्त्रियम् ।
स पापभाक् स्त्रीजितश्च तस्याशौचं सनातनम् ॥
यद्दु:खं जायते स्त्रीणां स्वाम्यसम्भोगजं यथा ।
न तस्य सदृशं दु:खं किञ्चिदन्यद्धि विद्यते ॥
सतीमनुमतीं जायां यो नेयात पुरुषाधम: ।
ऋतुघस्रेषु शुद्धेषु भ्रूणहा स हि जायते ॥
भार्य्या स्वादृयावदाशेयी तावत् कालं विरोधकम् ।
तत्राम्भु सद्गमे किञ्चित् विहितश्चापि नाचरेत् ॥
बहुभार्य्यस्य भार्य्याणामृतुमैथुननाशनम् ।
न किञ्चिद्विद्यते कर्म्म शास्त्रेष्वापि यदीरितम् ॥
तोषयेत् सततं भार्य्या विधिवत् पाणिपीडिता: ।
तासां तुष्ट्या तु कल्याणमकल्याणमतोऽन्यथा ॥
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
यया विरुध्यते स्वामी सौभाग्यमदह्मया ।
सपत्नीसङ्गमं कर्त्तुं सा स्यादेश्या भवान्तरे ॥
इहापि लोके वाच्यत्वमधर्म्मञ्चापि विन्दति ।
न च पितृकुलं स्वामिकुलं तस्या: प्रमोदते ॥
विरुध्यमाने पत्यौ यत् सपत्न्या वा प्रवर्त्तिते ।
अतीव दु:खं भवति तदकल्याणलक्षयो: ॥”
इति कालिकापुराणे २० अध्याय: ॥
रजस्वला भार्य्या अत्याज्या । यथा,—
“न धिनोतीह यो दारान् रजसा कलुषीकृत: ।
प्रेतपैत्र्याहृते कुक्षे रेतसाश्च पिबत्यसौ ॥
यो जहाति रज: स्नात्वा पित्रं स्वं तेजसा नर: ।
साऽश्नाति फलमप्येवं यो न दद्याद्दतुं पुन: ॥
यो बिभर्त्ति स मत्तो वै बहूनां रजसि स्थित: ।
रेत: पिबति तन्नमो पितृभ्यो योऽप्यपिकद: ॥
यो जहाति हि निर्दोषां भार्य्यामेव रजस्वलाम् ।
शुद्धिमान् संवृत: सततगर्भस्य दुरितं वहेत् ॥”
इति वह्निपुराणम् ॥
कालविशेषे तद्गमननिषेधो यथा,—
“न दिवापि स्त्रियं गच्छेत् कदाचिदिच्छयापि च ।
न पर्व्वसु न सन्ध्यासु नाद्यस्तुचतूरात्रिषु ॥
नोदक्यां न दिवा गच्छेत् न सगर्भां न प्रतस्थिताम् ।
अभिगच्छेदविद्वान् यस्तदायु:क्षयमेव च ॥
वन्ध्याऽष्टमे परित्याज्या नवमे च मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
न वक्रेऽभिगमं कुर्य्यात् पाणिग्राही तु योषित: ।
कुर्य्याचेत् पितरस्तस्य पतन्ति रेतसोभुज: ॥
भार्य्याधीनं सुखं पुंसां भार्य्याधीनो धनागम: ।
भार्य्याधीना मखोत्पत्तिभार्य्याधीन: सुखोदय: ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनो गृहे वसेत् ।
न गृहेण गृहस्थ: स्यात् भार्य्यया कथ्यते गृही ॥”
इति पराशरस्मृति: ॥
भार्य्याट:, पुं, (भार्य्यया अटति वर्त्तते इति । अट गतौ + पचाद्यच् ।) अन्यार्थं स्वस्त्रीदाता । इति त्रिकाण्डशेष: ॥
भार्य्याटिक:, पुं, (अट गतौ + भावे घञ् । भार्य्यया आटो मतिभ्रमणं वा अस्यास्तीति । भार्य्याट + ठन् ।) स्त्रीजित: । हरिणविशेष: । इति मेदिनी । के, २०५ ॥ (मुनिविशेष: । इति हेमचन्द्र: ॥)
भार्य्यापती, पुं, (भार्य्या च पतिश्च तौ । “राजदन्तादिषु परम् ।” २ ।२ । ३१ । इति साधु: ।) योषित्पती । नित्यद्विवचनान्तोऽयं शब्द: । तत्पर्य्याय: । दम्पती २ जम्पती ३ जायापती ४ । इत्यमर: । २ । ६ । ३८ ॥
भार्य्यारुक:, पुं, (भार्य्या ऋच्छतीति । ऋ गतौ + उक् ।) मृगभेद: । क्रीडया परभार्य्यायां पुत्रोत्पादक: । शैलभेद: । इति मेदिनी । रे, १६२ ॥
भार्य्यावृक्ष:, पुं, (भार्य्यावत् प्रियो वृक्ष: ।) पतङ्गवृक्ष: । इति राजनिर्घण्ट: ॥
भालं, क्ली, (भाल दीप्तौ + भावे क्विप् । भां लाति गृह्णातीति । ला + “आतोऽनुपसर्गे क: ।” ३ । २ । ३ । इति क: ।) भ्रुवोरूर्द्ध्वभाग: । कपाल इति भाषा । तत्पर्य्याय: । ललाटम् २ अलिकम् ३ गोधि ४ । इति राजनिर्घण्ट: ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
“स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥”)
तेज: । इति मेदिनी । ले, ४२ ॥
भालदर्शनं, क्ली, (भाले ललाटे दर्शनमस्येति ।) सिन्दूरम् । इति शब्दचन्द्रिका ॥
भालदृक्, [श्] पुं, (भाले ललाटे दृक् नेत्रं यस्य ।) शिव: । इति हेमचन्द्र: । २ । ११० ॥
भालाङ्क:, पुं, (भालस्येव अङ्को यस्य भाले अङ्को यस्येति वा ।) करपत्रम् । शाकभेद: । रोहितमत्स्य: । महालक्षणसम्पन्नपुरुष: । कच्छप । हर: । इति मेदिनी । के, १३३ ॥ (भालस्य अङ्क: ।) ललाटचिह्नञ्च ॥
भाललोचन:, पुं, (भाले ललाटे लोचनं नेत्रं यस्य ।) शिव: । इति भालदृक्शब्ददर्शनात् ॥ (यथा, काशीखण्डे । २६ । १३० ।
“भाललोचनभावज्ञा भूतभव्यभवत्प्रभु: ॥”)
भालुक:, पुं, (भलते हिनस्ति प्राणिन: इति । भल हिंसायाम् + बाहुलकात् उक: । तत: प्रज्ञाद्यण् ।) भल्लूक: । यथा, भरतधृतकोषान्तरे ।
“भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुक: ॥”
भालूक:, पुं, (भलते हिनस्ति जीवानिति । भल + “उलूकादयश्च ।” उणा० । ४ । ४१ । इति ऊक: । तत: प्रज्ञाद्यण् ।) भल्लूक: । यथा,—
“भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुक: ॥”
इति भरतधृतकोषान्तरम् ॥
भाल्लुक:, पुं, भल्लुक: । इत्यमरटीकायां भरत: ॥
भाल्लूक:, पुं, भल्लूक: । इत्यमरटीकायां भरत: ॥
भाव:, पुं, (भावयति चिन्तयति पदार्थानिति । भू + णिच् + पचाद्यच् । भवतीति । भू + “भव तस्येति वक्तव्यम् ।” इति काशिकोक्त्यैर्ण वा ।) नाट्योक्तौ विद्वान् । मानसविकार: । सत्ता । (यथा, श्रीमद्भगवद्गीतायाम् । २ । १६ ।
“नासतो विद्यते भावो नाभावो विद्यते सत: ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभि: ॥”)
स्वभाव: । अभिप्राय: । (यथा, रामायणे । २ । २ । १६ ।

"तस्य धर्म्मार्थविदुषो भावमाज्ञाय सर्व्वशः ।
आज्ञया बलमुख्याश्च पौरजानपदैः सह ॥")
चेष्टा । आत्मा । जन्म । इत्यमरः ।३।३।२१६ ॥
(चित्तम् । यथा, मनुः । ४ । २२७ ।
"दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम् ।
परितुष्टेन भावेन पात्रमासाद्य शक्तितः ॥")
क्रिया । लीला । पदार्थः । (यथा, रघुः ।३।४१।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥")
विभूतिः । बुधः । जन्तुः । रत्यादिः। इति मेदिनी । वे, २१ ॥ गौरवितः । अभिनयान्तरम् । इति त्रिकाण्डशेषः ॥ (विषयः । यथा, हितोपदेशे ।
"अवश्यम्भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥"
पर्य्यालोचना । यथा मनुः । ६ । ८० ।
"यदा भावेन भवति सर्व्वभावेषु निस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥"
प्रेम । यथा, गीतायाम् । १० । ८ ।
"इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥")
धात्वर्थः । (यथा, मुग्धबोधे वोपदेवः ।
"देशाध्वकालभावं वाटैः ।" क्रियान्तरापेक्षि क्रियाविशिष्टः तत्र सप्तमी विहिता तथा च मुग्धबोधटीकायां रामतर्कवागीशः । "यस्य क्रियया क्रियान्तरमपेक्ष्यते स इह भावः ॥")
योनिः । उपदेशः । इति धरणिः ॥ संसारः । इत्यनेकार्थकोषः ॥ नवग्रहाणां शयनादिद्वादश-चेष्टाः । यथा,—
"शयनञ्चोपवेशञ्च नेत्रपाणिः प्रकाशनम् ।
गमनं गमनेच्छा च सभायां वसतिस्तथा ॥
आगमनं भोजनञ्च नृत्यलिप्सा च कौतुकम् ।
निद्रा ग्रहाणां भावाश्च द्वादशैते प्रकीर्त्तिताः ॥"
भावानयनक्रमो यथा,—
"यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत् ।
पुनरंशेन संपूर्य्य स्वर्क्षं तत्र नियोजयेत् ॥
जातदण्डं तथा लग्नमेकीकृत्य सदा बुधैः ।
रविणा भागहारेण शेषं कार्य्यं नियोजयेत् ॥
अंशेन नवसंख्यया । स्वर्क्षं ग्रहाणां जन्म-नक्षत्रम् । तद्यथा,—
"विशाखानलतोयानि वैष्णवं भगदैवतम् ।
पुष्या पौष्णा यमः सर्पो जन्मभान्यर्कतः क्रमात् ॥"
ऋक्षो राशिः । यदा मेषे ग्रहस्तदा १ एक-पूरितग्रहसंख्याङ्कः । यदा वृषे ग्रहस्तदा २ द्विपूरितो ग्रहसंख्याङ्कः कार्य्यः ॥ * ॥ जाया-सुतमृत्युतुङ्गस्वगृहत्रिकोणस्थानस्थितपापग्रहाणां निद्राशयनभावयोः फलम् ।
"निद्रायाञ्च यदा पापो जायास्थाने शुभं वदेत् ।
यदि पापः शुभैर्दृष्टो नाशुभञ्च कदाचन ॥
यदि वा शत्रुगेही स्याच्छयने यदि वीक्षितः ।
तदा नारीसमं तस्य नाशो भवति निश्चितम् ॥
शुभाशुभैर्यदा दृष्टः शुभग्रहसमन्वितः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥
सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदाशुभं भवेत्तस्य नात्र कार्य्या विचारणा ॥
तुङ्गस्थाने स्वगृहे वा त्रिकोणे वा यदा भवेत् ।
अपत्यस्य तदा नाशो जायते नात्र संशयः ॥
शुभग्रहो यदा तत्र क्रूरो वा यदि वेक्षितः ।
तदा प्रथमापत्यस्य नाशो भवति निश्चितम् ॥
मृत्युस्थाने स्थितः पापो निद्रायां शयनेऽपि वा ।
तदात्मनोऽपमृत्युः स्यादाजन्मनोऽपरतोऽपि वा ॥
शुभग्रहो यदा तत्र मृत्युस्थानेऽपि संस्थितः ।
तदा च मरणं तस्य मृत्युस्थाने विशेषतः ॥
पापग्रहैर्यदा दृष्टः शुभो वा शत्रुवीक्षितः ।
तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः ॥
एवं क्रमेण बोद्धव्यं ग्रहभावे सुबुद्धिना ।
बलाबलविचारेण जायते च शुभाशुभम् ॥
ज्योतिर्वित्सु च सर्व्वेषु परिहारः कृतो मया ।
शयनादिकभावेषु ज्ञातव्यश्चोपदेशतः ॥
एकादशे वा दशमालये वा
धनालये वा यदि वा विलग्ने ।
पापेन युक्तो न शुभग्रहश्चे-
त्तथापि सिद्धिं महतीं वदन्ति ॥"
फलं यथा,—
"मन्दाग्निः पित्तशूली च जायते शयने नरः ।१।
उपवेशे भवेच्छिल्पी श्यामवर्णस्तथा नरः ॥२॥
नेत्रपाणौ भवेत् क्रूरो जलदोषो भवेन्नरः ।३।
पुण्यवान् धार्म्मिकश्चैव धनवांश्च प्रकाशने ॥४॥
गमने च रवेर्जातः कृपणो धनसंयुतः ।
बहुभाषी चमी क्रोधी लुब्धचित्तः सदा भवेत ॥ ५ ॥
अल्पभोक्ता शीघ्रगामी दीर्घायुर्नृपवल्लभः ।
शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः ॥६॥
सभायाञ्च रवेर्जातः खलो दाता चमी भवेत् ।
दयालुः पण्डितो धीमान् गुणवान् पण्डित-प्रियः ॥ ७ ॥
आगमने भवेन्मूर्खः कुरूपो धनवान् भवेत् ।८।
भोजने भक्षको मांसलुब्धो महावपुर्बली ॥९॥
नृत्यलिप्सौ सुन्दरो वाग्मी पण्डितस्य गृहा-धिपः ।१०।
उत्साही च महाभोगी कौतुके च दिवाकरे ॥११॥
दाता भोक्ता प्रियः पुत्रकलत्राणां न संशयः ।
लिङ्गे देहे करे चैव गुदे रोगी तथैव च ।
निद्रायाञ्च भवेद्भानोः क्रोधनो रक्तनेत्रकः ॥१२॥
इति रवेस्तुङ्गातुङ्गे बलाबले वा बोध्यम् ॥*॥
"शयने च विधौ क्रोधी दरिद्रो बहुलम्पटः ।१।
उपवेशे महारोगी धनवांश्च भवेन्नरः ॥ २ ॥
नेत्रपाणौ नेत्ररोगी श्लीपदी बहुभाषकः ।
क्रूरः खलोऽतिशूरश्च जायते च विधौ सदा ॥३॥
प्रकाशने निशानाथे धनवांश्च भवेन्नरः ।
दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ॥४॥
अरोगी वित्तहा चैव क्रूरकर्म्मा धनान्वितः ।
शिरोरोगी दन्तशूली जायते गमने विधौ ॥५॥
नानामतिर्महाक्रोधी सम्पदी च भवेन्नरः ।
गमनेच्छुर्विधौ जातो धनहीनो भवेत्तदा ॥६॥
दाता च धार्म्मिकश्चैव राजमान्यो भवेत् सदा ।
सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः ॥७॥
नित्यक्रोधी महादुःखी भवेदागमने विधौ ।८।
भोजने च भवेल्लुब्धो भक्षकश्च महातुरः ॥९॥
यो जातो नृत्यलिप्सायां गुणवान् धार्म्मिको भवेत् ।
बहुमान्यो धनी दाता जायते नात्र संशयः॥१०॥
कौतुके च भवेद्योगी नानाविद्यासु तत्परः ।
उत्साही च महाक्रोधी जायते च सुनिश्चितम् ॥११॥
निद्रायां दद्रुरोगी स्यात् क्लेशपापरुजान्वितः ।
पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम्॥१२
इति चन्द्रस्य ॥ * ॥
शयने च कुजे जातो लक्ष्मीबहुक्षरङ्गकः ।
चण्डक्रोधी महादक्षः कृपणो जायते नरः ॥१॥
उपवेशे यदा भौमे जायते च नराधमः ।
धनवान् क्रूरकर्म्मा च निष्ठुरो जातिवर्ज्जितः॥२॥
नेत्रपाणौ च यो जातः अग्निरोगी भवेन्नरः ।
पुत्रदारधनैर्युक्तो दारिद्र्येणैव दह्यते ॥ ३ ॥
प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥ ४॥
गमने च यदा जातः प्रवासी नित्यदुःखितः ।
शरीरे च भवेद्रोगः कण्ड्वादिकुष्ठदद्रुकः ॥५॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः ।
धनहीनः कुकर्म्मा च जायते क्षितिजस्य च ॥६
सभायाञ्च यदा जातो धार्म्मिको बहुसम्पदः ।
गुणवांश्च महादाता शिरोरोगी भवेद्ध्रुवम् ॥७
कुजस्यागमने नित्यं खञ्जो भवति नान्यथा ।
कर्णरोगी पित्तशूली जायते च नराधमः ॥८॥
भोजने भूमिजस्यापि यो जातो मांसलुब्धकः ।
दृढकायो महाक्रोधी नित्योत्साही धना-न्वितः ॥ ९ ॥
कुजस्य नृत्यलिप्सायां यो जातो धनवान् भवेत् ।
दाता भोक्ता सदा मानी राजमान्यो भवेच्च सः ॥ १० ॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः ।
नानाधनेन संयुक्तो बहुपुत्रो द्विभार्य्यकः ॥११॥
निद्रायां भूमिपुत्रस्य यो जातो मूर्ख एव सः ।
कलहो बान्धवैः सार्द्धं शोकक्लेशरुजान्वितः॥१२
इति मङ्गलस्य ॥
"बुधस्य शयने जातो धनवान् क्षुधितः सदा ।
अङ्गच्छेदो भवेद्वापि खञ्जो भवति नान्यथा ॥१॥
उपवेशे च यो जातः प्रवासी जायते ध्रुवम् ।
कवितागुणधीयुक्तो गौरवर्णो महाशयः ॥२॥
नेत्रपाणौ च यो जातः श्लीपदादिरुजान्वितः ।
चक्षूरोगी विशेषात् स्यात् पुत्रनाशी भवेद्-ध्रुवम् ॥ ३ ॥
प्रकाशने भवेज्जातो राजमान्यो धनान्वितः ।
नानाधनेन संयुक्तो जायते वेदपारगः ॥ ४ ॥
गमने यो नरो जातः प्रवासी नित्यदुःखितः
शरीरे क्षतमाप्नोति नित्यमृत्यो भवेच्च सः ॥५॥
यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः ।
क्लीवश्च दुष्टभार्य्यश्च कामुको बहुभाषकः ॥ ६॥

सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः ।
धनवान् धार्म्मिकश्चैव चिररोगी भवेत्तु सः ॥७॥
क्रूरः खलो हतमूर्खः पापशीलो भवेन्नरः ।
बुधस्यागमने नित्यं जायते च नराधमः ॥८॥
भोजने च भवेत् सौख्य धनहीनो भवेन्नरः ।
परद्वेषी प्रवासी च शोषगात्रव्ययान्वितः ॥९॥
यो जातो कृत्यलिप्सायां धनवान् पण्डितः कविः ।
उत्साही च महाहृष्टो भुनक्ति सुख-
मद्भुतम् ॥ १० ॥
कौतुके च यदा जातो भवेत् सर्व्वजनप्रियः ।
अर्शोरोगी दस्युक्तो धनवानल्पशस्यकः ॥११॥
निद्रायाञ्च यदा जातः सर्व्वदुःखैकपात्रताम् ।
नानाक्लेशमवाप्नोति रोगशोकभयमद्भयम् ॥१२॥"
इति बुधस्य ॥ * ॥
"धनवान् लम्पटः श्यामः स्थूलो व्रणरुजान्वितः ।
जीवस्य शयने जातो मानवो नात्र संशयः ॥१॥
उपवेशे गुरोर्जातो बहुभाषी च रोगवान् ।
पशुघाती महाशिल्पी श्लीपदी रोगसंयुतः ॥२॥
नेत्रपाणौ गुरोर्जातः कासरोगी धनी भवेत् ।
वातादिचरषो नित्यं जायते नात्र संशयः ॥३॥
गुरोः प्रकाशे धनवान् लिङ्गगुह्ये रुजान्वितः ।
दत्तो लम्पटपापी च श्यामवर्णो रुजान्वितः ॥४॥
सर्पभीतो गूढकर्म्मा साहसी गमनोन्मुखे ।
परवित्तेन धनवान् पुमान् भवति वाक्पतौ ॥५॥
गुरोश्च गमनेच्छायां जातो भवति मानवः ।
स्थूलो धनी प्रवासी च सेवाकर्म्मणि तत्परः ॥६॥
वक्ता दाता च धनवान् राजसेवान्वितो नरः ।
मूत्ररोगी भवेन्नित्यं सभायां वाक्पतौ स्थिते ॥७॥
धार्म्मिकस्तीर्थविज्ञानी धनी चागमने गुरोः ।
परदारेषु संलुब्धो जायते नात्र संशयः ॥८॥
भोजने बहुसौख्याढ्यो मांसलुब्धो महासुरः ।
कामुकः प्रियवाक्यश्च जायते नात्र संशयः ॥९॥
कृत्यलिप्से शठो वाग्मी धनवान् सात्त्विकस्तथा ।
महदैश्वर्य्यसंयुक्तो जीवस्य च भवेन्नरः ॥१०॥
कौतुके च गुरोर्जातो धनवान् धार्म्मिकः सदा ।
कृष्योत्साही महत्सङ्गी भुनक्ति सुखमद्-
भुतम् ॥ ११ ॥
निद्रायाञ्चैव यो जातश्चक्षूरोगी भवेच्च सः ।
कृपणो बहुभाषी च दुःखितो भ्रमते
महीम् ॥ ११ ॥"
इति गुरोः ॥ * ॥
"शुक्रस्य शयने जातो लम्पटो बहुभाषकः ।
दन्तरोगी महाक्रोधी नीचो भवति नित्यशः ॥१॥
उपवेशे तथा जातो बलवान् दाम्भिकः सदा ।
नित्यप्रवासी रोगी च जायते नीचसंस्थिते ॥२॥
नेत्रपाणौ भृगोर्दुःखी रोगशोकसमन्वितः ।
धनहीनो महारोगी मानवः स्यान्न संशयः ॥३॥
भृगोः प्रकाशने जातो विद्याधनसमन्वितः ।
दाता च धार्म्मिकश्चैव कीर्त्तिमान् जायते नरः ॥४॥
शुक्रस्य गमने जातः पादमूले रुजान्वितः ।
नित्योत्साही महाशिल्पी भवेत्तीर्थगतौ
रतः ॥ ५ ॥
गमनेच्छौ यदा जातो भ्रातृनाशो भवेद्ध्रुवम्
माता च म्रियते तस्य शैशवे व्याधिसंयुतः ॥६॥
सभायाञ्च भृगोर्जातो राजमान्यो महाधनी ।
कुलशीलो महादक्षः केवलं मूत्ररोगवान् ॥७॥
भृगोरागमने जातो दुःखितो बहुलम्पटः ।
दद्रुरोगी पुत्रशोकी जायते च नराधमः ॥८॥
शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा ।
महाधनी भवेन्नित्यं वाणिज्येन विशेषतः ॥९॥
यो जातो कृत्यलिप्सायां स वाग्मी जायते ध्रुवम् ।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥
यदि चैव भवेन्नीचे मूर्खो भवति निश्चितम् ।
तुङ्गस्थाने विशेषेण राजमान्यो महाधनी ॥
कामुको बहुकान्तश्च परयोषित्प्रियः सदा ।
श्यामवर्णस्तथा मानी याज्ञिको बहुभा-
षकः ॥१०॥
शुक्रस्य कौतुके जातो धनवान् सात्त्विकः सदा ।
महाहृष्टो महाबन्धुः कौतुकी च भवेत् सदा ॥
बहुपुत्रकलत्रश्च नानासुखसमन्वितः ।
नीचे तद्विपरीतः स्यात् दुःखशोकसम-
न्वितः ॥ ११ ॥
निद्रायाञ्च भृगोर्जातो भवेद्रोगी स निश्चितम् ।
नित्यक्लेशी महादुःखी जायते नात्र संशयः ॥
जायायाञ्च सुतस्थाने यदि निद्रा भृगोर्भवेत् ।
तदा सर्व्वविनाशः स्यादिष्युणा परिकी-
र्त्तितः ॥१२॥"
इति शुक्रस्य ॥ * ॥
"शयने च शनेर्जातो लम्पटो बहुभाषकः ।
गुह्यस्थाने भवेद्रोगी कोषवृद्धिश्च जायते ॥
जन्मात् सप्ताष्टमे चैव शयनस्थः शनैश्चरः ।
तदा नित्यप्रवासी स्याच्चक्षुश्चयी भवेच्च सः ॥१॥
उपवेशे यदा जातः श्लीपदी दद्रुसंयुतः ।
धनहीनो भवेत्तस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाणौ यदा जातो मूर्खो भवति पण्डितः ।
धनवान् धार्म्मिकश्चैव द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो राजमान्यो भवेच्च सः ।
नानागुणेन गुणवान् धार्म्मिकः पण्डितः शुचिः ॥"
मतान्तरे ।
जायास्थाने च लग्ने च प्रकाशने यदा शनिः ।
तदा सर्व्वविनाशः स्याज्ज्ञातिध्वंसो भवेद्
ध्रुवम् ॥ ४ ॥
गमने च यदा जातः पादमूले रुजान्वितः ।
तीर्थे च गतिमान्नित्यं पुत्रदारैर्विवर्ज्जितः ॥५॥
यो जातो गमनेच्छायां श्लीपदी रोगसंयुतः ।
दन्ताघाती महाक्रोधी कृपणः परनिन्दकः ॥६॥
सभायाञ्च शनेर्जातः पुत्रदारधनैर्युतः ।
सर्व्वत्र लभते वित्तं नानारत्नसमन्वितम् ॥७॥
आगमने यदा जातो महाक्रोधी रुजान्वितः ।
सर्पादिभिश्च संदष्टो भ्रातृनाशो भवेद्ध्रुवम् ॥८॥
भोजने चैव यो जातो मन्दाग्निश्च महानपि ।
अर्शोरोगी तथा स्थूलो चक्षूरोगी भवेच्च सः ॥९॥
यो जातो कृत्यलिप्सायां नर्त्तको बहुभाषकः ।
जीवनो दुःखितश्चैव प्रवासी परसेवकः ॥१०॥
कौतुके च शनेर्जातो राजपुत्रो महाशय ।
दाता भोक्ता महादक्षो धार्म्मिकः पण्डितः
शुचिः ॥ ११ ॥
निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः ।
चक्षूरोगी पित्तशूली द्विभार्य्यो बहुपुत्रकः ॥
विशेषतश्च धर्म्मस्थे कर्म्मस्थे च कदाचन ।
यदि दैवाद्भवेन्निद्रा नाशो भवति निश्चितम् ॥
कर्म्मनाशो धर्म्मनाशः क्षुधार्त्तो दुःखितः सदा ।
नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे ॥
स्वमित्रगेहे षष्ठे वा केन्द्रे वा स्वगृहे पुनः ।
तदा सर्व्वं विचार्य्यैव वैपरीत्येन चिन्तनम् ॥
जायायाञ्च सुतस्थाने यदि निद्रा भवेत् पुनः ।
तदा सर्व्वं शुभं विद्याद्विष्णुना परि-
कीर्त्तितम् ॥ १२ ॥
इति शनेः ॥*॥
शयने च यदा राहोर्जन्म यस्य भवेत् पुनः ।
तस्य क्लेशो महादुःखं जायते च न संशयः ॥१॥
उपवेशे च यो जातः श्लीपदी रोगसंयुतः ।
बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाणौ यदा जातश्चक्षूरोगी भवेद्ध्रुवम् ।
सर्पाघातो महाभीतिर्द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो धनवान् धार्म्मिकः पुनः ।
नित्यप्रवासी चोत्साही सात्त्विको धार्म्मिकः
शुचिः ॥ ४ ॥
गमने चैव यो जातो नानारोगैर्धनक्षयः ।
दन्ताघाती महाक्रोधी पिशुनः परनिन्दकः ॥५॥
यो जातो गमनेच्छायां बहुपुत्रो महाधनः ।
पण्डितो गुणवान् दाता जायते च नरोत्तमः ॥६॥
सभायाञ्च यदा जातः कृपणो धनसंयुतः ।
नानागुणेन गुणवान् धार्म्मिकः पण्डितः
शुचिः ॥ ७ ॥
आगमने च यो जातो लम्पटो बहुभाषकः ।
सुहृद्बन्धुविनाशः स्यान्नानाक्लेशश्च जायते ॥८॥
भोजने च महादुष्टो मन्दाग्निश्च रुजान्वितः ।
कृपणः कलहाढ्यश्च दुःखितो नित्यसेवकः ॥९॥
यो जातो कृत्यलिप्सायां खञ्जो भवति नान्यथा ।
पुत्रनाशो भवेत्तस्य जायानाशो भवेद्ध्रुवम् ॥१०॥
कौतुके च यदा जातो गुणैः सर्व्वैः समन्वितः ।
नानाधनेन धनवान् राजसेवासु तत्परः ॥
यदि दैवाद्भवेत्तुङ्गी स्वगृही वा कदाचन ।
तदा सर्व्वं वैपरीत्यं जायते च न संशयः ॥११॥
यो जातो राहुनिद्रायां दुःखितः सर्व्वतस्तथा ।
नानास्थाने गतो वापि धनपुत्रविवर्ज्जितः ॥
जायायाञ्च सुतस्थाने यदि निद्रा विधुन्तुदः ।
तदा सर्व्वं वैपरीत्यं शतजायासमन्वितः ॥१२॥
नानाशास्त्रं समालोक्य क्रियते ग्रन्थसंग्रहः ।
बलाबलविचारेण युक्त्या सञ्चिन्तयेद्बुधः ॥"
इति ग्रहाणां शयनादिद्वादशभावविवेकः
समाप्तः ॥ इति जातरत्नः कोष्ठीप्रदीपश्च ॥
अथ तन्वादिद्वादशभावाः ।
ते च नराणां जन्मलग्नावधिकद्वादशस्थानानि ।
यथा,—

"सामर्थ्यं तनु कल्पते सहृदये वित्तं कुटुम्बं ततो विक्रान्तिं सहजं तृतीयभवने योधश्च सञ्चिन्तयेत् ।
बन्धुं वाहसुखालयानपि ततो धीमन्त्रपुत्रांस्ततः षष्ठेऽथ क्षतविद्विषौ मदगृहे कामं स्त्रियं वर्त्म च ॥
रन्ध्रायुर्न्तयोऽष्टमे गुरुतपो भाग्यानि चिन्त्यास्ततो मानाज्ञास्पदकर्म्मणां दशमभे कुर्य्यात्ततश्चिन्तनम् ।
प्राप्त्यायावथ चिन्तयेद्भवगृहे व्यये तु मन्त्रिव्ययौ सौम्यस्वामियुतीक्षणैरुपचयस्तेषां चातिक्षयथा ॥
इति द्वादशभावविवेकः ॥
अरातिरन्ध्रयोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः ।
व्ययस्य द्वादशस्थाने वैपरीत्येन चिन्तनम् ॥"
अरात्यादिभावापवादः ॥
अथ तन्वादिद्वादशभावस्थग्रहफलम् ।
"लग्ने सूर्य्येऽल्परोगी शशिनि बलयुतो रूपवान् वित्तयुक्तो भौमे चण्डः सुवाग्मी शशधरतनये सर्व्वशास्त्रार्थवेत्ता ।
जीवे दाता पवित्रः सुकविरथ गते भार्गवे मन्त्रवेशः शौरौ कण्डूतिगात्रस्तमसि च नियतं वञ्चितो धर्म्महीनः ॥ १ ॥
वित्तेऽर्के चैव रोगी सततगदयुतो रात्रिनाथे धनाढ्यो भौमे नित्यं प्रवासी कृषिसुतधनवान् सोमपुत्रे प्रधानः ।
जीवे लक्ष्मीप्रमोदी विलसति भृगुजे दर्पितः स्त्रीनिकेतः शौरौ दीनोऽति नित्यं तमसि च नियतं चौरिकावित्तजीवी ॥ २ ॥
भ्रातर्य्यर्के सधर्म्मः स भवति नियतं भ्रातृहा रात्रिनाथे हिंस्रो भौमेऽनुजानां सपदि वधकरो भूमिकावृत्तिजीवी ।
सौम्ये सत्यस्य हन्ता भवति सुरगुरौ कामदेवस्वरूपः शुक्रे राज्याधिकारी रविजदनुजयोर्भ्रातृहन्ता धनाढ्यः ॥ ३ ॥
अर्के बन्धौ सुदुःखी स्वजनपरिहृतः शीतगौ जानुरोगी भौमे कुग्रामवासी भवति शशिसुते भ्रातृपुत्रान्वितोऽपि ।
जीवे रत्नोपभोगी त्रिदशरिपुगुरौ सर्व्वसौख्याधिकारी शौरौ गेहे निवासी भवति शशिरिपौ मन्दकर्म्मा कुचेलः ॥ ४ ॥
पुत्रस्थेऽर्के नरोऽसौ प्रथमसुतहतः शीतरश्मौ सुपुत्रः भौमे सर्व्वाधिकारी भवति धरणिजे पुत्रशोकाकुलोऽसौ ।
सौम्ये स्वस्थः सुदेहः प्रचुरधनयुतो देवपूज्ये सुपुत्रः कन्यायुक्तो हि शुक्रे रविजदनुजयोः पुत्रपौत्रैर्विहीनः ॥ ५ ॥
षष्ठेऽर्के शत्रुहन्ता रिपुगणरहितः क्षीणचन्द्रे गतायुः पूर्णे शत्रुश्च हन्याद्भवति धरणिजे हीनदेहोऽतिदीनः ।
सौम्ये शास्त्रार्थयुक्तस्त्रिदशपतिगुरौ राज्यसौख्योपभोगी दैत्याचार्य्येऽतिरोगी रविजदनुजयोः पापभुङ् नित्यदुःखी ॥ ६ ॥
पत्नीधामर्के च जायापतिरतिविमुखो शीतरश्मौ सुपुत्रः सुखी भूयान्नरोऽसौ भवति धरणिजे हीनभार्य्यश्च नूनम् ।
सौम्ये सुस्थः सुदेहस्त्रिदशपतिगुरौ शास्त्रवेत्ता श्रुतायुः शुक्रे पुत्रप्रमोदी रविजदनुजयोर्हीनभार्य्यश्च नूनम् ॥ ७ ॥
मृत्यौ चार्के सन्मृत्युर्भवति च नियतं शीतरश्मौ गतायुर्भूमेः पुत्रे सुरोगी शशधरतनये मूलरोगी विकर्म्मा ।
जीवे तीर्थे च मृत्युर्भवति भृगुसुते धार्म्मिकस्तीर्थगोऽसौ शौरौ मूर्खो गतायुर्भवति विधुरिपौ वेदसक्तो गतायुः ॥ ८ ॥
धर्म्मे चार्के नरोऽसौ विविधधनयुतः शीतगौ पुण्यकर्म्मा लक्ष्मीवान् पुण्यचेता भवति धरणिजे देववित्तापहारी ।
सौम्ये धर्म्मात् सुशीलस्त्रिदशपतिगुरौ राजतुल्यः सुकर्म्मा शुक्रे तीर्थानुरागी रविजदनुजयोः पापशीलः सुदुःखी ॥ ९ ॥
कर्म्मण्यर्के प्रतापी प्रचुरधनयुतः शीतरश्मौ क्रोधहृष्टिः सोमे श्रेयान्वितोऽसौ विविधधनयुतो भूमिजे बन्धुहीनः ।
नित्योत्साही च सौम्ये प्रचुरधनयुतो देवपूज्येऽभिमानी दिव्यस्त्रीशोऽपि शुक्रे नृपतिसमधनः शौरिदैत्ये सुखी च ॥ १० ॥
आये चार्के नरोऽसौ पितृधनसहितः शीतगौ चारुशीलो भौमे नित्यं स रोगी शशधरतनये सर्व्वदा क्रोधयुक्तः ।
जीवे श्रीमान् प्रदाता करितुरगपतिर्भार्गवे शास्त्रविज्ञः स्त्रीरत्नादियुक्तो रविजदनुजयोः क्रूरकर्म्मा कुचेलः ॥ ११ ॥
अर्के वंशे व्ययेऽसौ पुरधनरहितः सर्व्वरोगी सुदुःखी सोमे खेदान्वितोऽसौ भवति धरणिजे धूर्त्तरक्तो विबुद्धिः ।
सौम्ये धर्म्मार्थकारी दिनकररहिते देवपूज्येऽभिमानी शुक्रे शास्त्रानुरागी रविजदनुजयोः क्रूरकर्म्मा कुचेलः ॥ १२ ॥
इति ज्योतिस्तत्त्वम् ॥*॥
स्त्रीणां यौवनकाले स्वभावजाष्टाविंशत्यलङ्कारान्तर्गताङ्गजप्रथमालङ्कारः । यथा,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥"
तत्र भावः ।
"निर्व्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥"
जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः । यथा,—
"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥"
इति साहित्यदर्पणे तृतीयपरिच्छेदः ॥*॥
भावस्य लक्षणान्तरं यथा,—
"शरीरेन्द्रियवर्गस्य विकाराणां विधायकाः ।
भावा विभावजनिताश्चित्तवृत्तय ईरिताः ॥
पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः ।
समानार्थतया चात्र द्वयमेकेन लक्ष्यते ॥"*॥
पूर्व्वोक्तमानसविकाररूपभावस्य विवरणं यथा, रजःसत्त्वतमोमयश्चित्तविकारो भावः । चित्तवृत्तिविशेषो भाव इत्यन्ये । अतएव मनोविकारो रत्यादिर्भाव उक्तः । भावयति जनयति रसान् भावः अच् । तथा च भरतः ।
"नानाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाटकोक्तिषु ॥"
भावाश्च त्रिविधाः स्थायिनो व्यभिचारिणः सात्त्विकाश्च । तत्र स्थायिनो यथा,—
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥
व्यभिचारिणो यथा,—
"निर्व्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहो धृतिः स्मृतिः ॥
व्रीडा चपलता हर्ष आवेगो जड़ता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः प्रयान्ति रससंस्थितम् ॥"
सात्त्विका यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता इति ॥
रत्यादयः स्थायिनोऽष्टौ निर्व्वेदाद्या व्यभिचारिणस्त्रयस्त्रिंशत् स्वेदादयः सात्त्विका अष्टौ चेति ऊनपञ्चाशद्भावाः पञ्चाशद्भावा इत्यन्ये । इत्यमरटीकायां भरतः ॥

(प्रधानव्यभिचारिप्रभृतयो भावशब्देनोच्यन्ते। यदुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे।
"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥")
भगवद्भावो यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक्।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥"
इति भक्तिरसामृतसिन्धुः ॥ *॥

भावकः, पुं, (भाव एव स्वार्थे कन्।) भावः। मानसो विकारः। इति हलायुधः ॥ (भवतीति। भू + कर्त्तरि ण्वुल्।) सत्ताश्रये, त्रि। इति संक्षिप्तसारः ॥

भावतः, त्रि, (भवत अयमिति। भवत् + अण्।) भवदीयः। प्रथमान्तभवच्छब्दादण्प्रत्ययनिष्पन्नः। इति सिद्धान्तकौमुदी ॥

भावत्कः, त्रि, (भवतामयमिति। भवत् + "भवतष्ठक्छसौ।" ४। २। ११५। इति ठक्।) भवदीयः। भवच्छब्दात् ठक्प्रत्ययनिष्पन्नः। इति सिद्धान्तकौमुदी ॥ यथा, भट्टिः पञ्चमसर्गे।
"भावत्कं इदवत्स्वेतदस्माकमधि सुजीवितम् ॥"

भावनं, क्ली, (भू + णिच् + ल्युट्।) भवनम्। इति राजनिर्घण्टः ॥ चालता इति भाषा ॥ (भावे ल्युट्।) भावना। इति मेदिनी। ने, १०१ ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे।
"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ॥"
भावयतीति। भू + णिच् + ल्युः। उत्पादके, त्रि। यथा, महाभारते। १। २२४। ४५।
"दृष्ट्वैव च स राजानं शङ्करो लोकभावनः।
उवाच परमप्रीतः श्वेतकिं नृपसत्तमम् ॥")

भावना, स्त्री, क्ली, (भू + णिच् + युच्।) ध्यानम्। (यथा, गीतायाम्। २। ६६।
"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥")
पर्य्यालोचनम्। अधिवासनम्। इति मेदिनी। ने, १०१ ॥ त्रिविधा भावना यथा,—
"त्रिविधा भावना विप्र ! विश्वमेतन्निबोध मे।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका ॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिकापरा।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः।
कर्म्मभावनया चान्ये देवाद्याः स्थावराचराः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
त्रिविधभावनाश्रयजीवात्मकत्वात्तदुपचारेण त्रिविधा भावनेत्युच्यते। एतद्धि हरेः स्थूलं रूपम्। अतः पररूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः सम्बार्य्यमिति भावः। भावना नाम ध्यानविशेषजा वासना। तां त्रिविधामपि संख्यामाहिश्यति ब्रह्माख्येति। तामेव विषयत्रैविध्येन विविनक्ति ब्रह्मभावनात्मिकेति। भावभावना भावो वस्तु तद्विषया भावना त्रिविधा। तत्र वयं ब्रह्मैव भावयामः। वयं कर्म्मैव कुर्म्मः। वयमुभयमिदमनुसन्दध्म इत्येवं त्रिविधा भावना। भावनायुक्तान् जीवानुदाहरति सनन्दनादय इति द्वाभ्याम्। इति तट्टीका ॥

भावबोधकः, पुं, (भावस्य रत्यादेर्बोधकः अनुभावकः।) अनुभावः। इत्यमरः। २। ७। २१ ॥ भावस्य रत्यादेर्बोधकः सूचको गुणक्रियादिरनुभावः। अनुभाव्यते प्रतीतियोग्यतां नीयते रत्यादिरनेनेति अनुभावः घञ्। तत्र रतेरनुभावाः लोचनचातुर्य्यभ्रूक्षेपादयः। हासस्य च कपोलाकुञ्चनानासौत्फुल्लनादयोऽनुभावा एवं अन्यत्रानुसन्तव्यम्। किंवा भावाननुभावयतीति अनुः अनुभावो सुखरागादिः। इति तट्टीकायां भरतः ॥

भाववृत्तः, पुं, (भावः सत्ता वृत्तः प्रवृत्तोऽस्मादिति। यद्वा, भावः सृष्टिः तत्र वृत्तः प्रवृत्तः।) ब्रह्मा। इति सन्ध्याव्याख्यायां स्मृतिः ॥

भावाटः, पुं, (भावं भावेन वाटतीति। अट् + अण् अच् वा।) भावकः। साधुः। निवेशः। कामुकः। नटः। इति मेदिनी। टे, ५२ ॥

भावानुगा, स्त्री, (भावं मूर्त्तपदार्थमनुगच्छतीति। अनु + गम् + डः। टाप्।) छाया। इति राजनिर्घण्टः ॥ (भक्त्यादिना अनुगते, त्रि ॥)

भावालीना, स्त्री, (भावेषु मूर्त्तपदार्थेषु आलीना।) छाया। इति राजनिर्घण्टः ॥

भावितः, त्रि, (भाव्यते स्मेति। भू + णिच् + क्तः।) वासितः। प्राप्तः। इति मेदिनी। ते, १४० ॥ विशोधितः। (यथा, महाभारते। १३। १६। ३८।
"ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविताः।
तेषामेवात्मनात्मानं दर्शयत्येष हृच्छयः ॥")
चिन्तितः। मिश्रितः। भू क शुद्धिचिन्तयोर्मिश्रणे च इत्यस्मात् ण्यन्तात् क्तप्रत्ययनिष्पन्नोऽयम् ॥ (समर्पितः। यथा, महाभारते। १। ५। ३२।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्।
यदीश्वरे भगवति। कर्म्म ब्रह्मणि भावितम् ॥"
"भगवति भावितं समर्पितम्।" इति तट्टीकायां श्रीधरस्वामी ॥ सिक्तः। यथा, सुश्रुते चिकित्सितस्थाने। ९ अध्याये।
"भल्लातकान् वासयेत्तु चारं प्राक्क्षत्र-
भावितम् ॥")

भावित्रं, क्ली, (भवतीति। भू + "भूवादिगृभ्यो णित्रन्।" उणा० ४। १७०। इति णित्रन्।) त्रैलोक्यम्। स्वर्गमर्त्यपातालम्। इत्युणादिकोषः ॥

भाविनी, स्त्री, स्त्रीविशेषः। इत्यमरः ॥ भावः शृङ्गारचेष्टाविशेषो विद्यतेऽस्याः भाविनी। इति तट्टीकायां भरतः ॥ (यथा, हरिवंशे। ११७। ३६।
"सा हि तस्याभवज्ज्येष्ठा पत्नी लघ्यस्य भाविनी।
पतिव्रता गुणोपेता रूपशीलगुणान्विता ॥")
कामिनी। इति राजनिर्घण्टः ॥ (स्कन्दस्य मातृगणानामन्यतमा। यथा, महाभारते। ९। ४६। ११।
"शुतवक्त्रा शुतानन्दा भगनन्दा च भाविनी
वपुष्मती चन्द्रशीता भद्रकाली च भारत ! ॥")
वर्त्तमानप्रागभावप्रतियोगिनी च ॥

भावी, [न्] त्रि, (भविष्यतीति। भू + "भुवश्च।" उणा० ४। ८। इति इनिः। स च णिद्भवति।) भविष्यत्कालादिः। वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकः। यथा,—
"वीरप्रतिपदा नाम तव भावी महोत्सवः ॥"
इति कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम्। इति तिथ्यादितत्त्वम् ॥

भावुकं, क्ली, (भवतीति। भू + "लषपतपदस्थाभूवृषेति।" ३।२। १५४। इति उकञ्।) मङ्गलम्। (यथा, प्रद्युम्नविजये १ अङ्के।
"शक्र ! सर्व्वत्र कुशलमस्माकम्। अपि भावुकं वः सुराणाम् ॥")
तद्वति, त्रि। इत्यमरः। १। ४। २६ ॥

भावुकः, पुं, (भू + उकञ्।) नाट्योक्तौ भगिनीपतिः। इति हेमचन्द्रः ॥

भावुकः, त्रि, भवनाश्रयः। भवति यः। इति कर्त्तरि भूधातोर्णुकप्रत्ययेन निष्पन्नः ॥ रसविशेषभावनाचतुरः। इति श्रीधरस्वामी ॥ यथा,—
"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥"
इति श्रीभागवते। १। १। ३ ॥
लषपतितप्रियाद्यस्थूलसुभगाढ्यशब्दोपपदभूधातोरभूततद्भावार्थे कर्त्तरि वाच्ये खुकञ्प्रत्ययेन लषम्भावुक इत्यादयश्च निष्पन्नाः ॥

भाव्यं, क्ली, अवश्यभवितव्यम्। इति भूधातोरवश्यम्भावार्थे भावे ण्यत्प्रत्ययेन निष्पन्नम्। यथा। विप्रेण शुचिना भाव्यम्। इति मुग्धबोधव्याकरणम् ॥ प्रयोगदर्शनात् कर्त्तरि च तत्र त्रि। यथा —
"स्नातस्य करणं नास्ति देवाधिष्ठितकर्म्मणः।
भावीत्यवश्यं यद्भाव्यं तत्र ब्रह्माप्यबाधकः ॥"
इति कालिकापुराणे ३८ अध्यायः ॥

भाष, ङ व्यक्ते वाचि। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, भाषते। ऋ, अबीभषत् अबभाषत्। इति तट्टीकायां दुर्गादासः ॥

भाषणं, क्ली, (भाष् + भावे ल्युट्।) कथनम्। यथा। "संलापो भाषणं मिथः।" इत्यमरः ॥ (यथा, सर्व्वदर्शनसंग्रहे। आर्हतदर्शने।
"हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
आलोच्य भाषणेनापि भावयेत् सूनृतं व्रतम् ॥")

भाषा, स्त्री, (भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते इति। भाष् + "गुरोश्च हलः।" ३। ३। १०२। इत्यप्रत्ययः। टाप्।) रागिणीविशेषः। इति हलायुधः ॥ वाक्यम्। वाग्देवता। तत्पर्य्यायः। ब्राह्मी २ भारती ३ गीः ४ वाक् ५ वाणी ६ सरस्वती ७ व्याहारः ८ उक्तिः ९ लपितम् १० भाषितम् ११ वचनम् १२ वचः

१३। इत्यमरः।१।६।१॥ अथोदश्च वचने। पूर्व्ववन्मकं वागधिष्ठातायां देवतायाञ्च। इति तट्टीकायां भरतः॥ शास्त्रीयाष्टादशभाषा यथा। संस्कृतम् १ प्राकृता २ उदीची ३ महाराष्ट्री ४ मागधी ५ मिश्रार्द्धमागधी ६ शकाभीरी ७ अवन्ती ८ द्राविडी ९ ओड्रीया १० पाश्चात्या ११ प्राच्या १२ बाह्लीका १३ रन्तिका १४ दाक्षिणात्या १५ पैशाची १६ आवन्ती १७ शौरसेनी १८। एतासां लक्षणोदाहरणानि प्राकृतलङ्केश्वर-व्याकरणे द्रष्टव्यानि॥

अथ भाषाविभागः।

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्॥
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारि-
णाम्॥
चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शकारायां शकादीनां शाकारीं संप्रयोजयेत्॥
बाह्लीकभाषा दिव्यानां द्राविडी द्रविडादिषु।
आभीरेषु तथाभीरी चाण्डाली पुक्कशादिषु॥
आभीरी शावरी चापि काष्ठपत्त्रोपजीविषु।
तथैवाङ्गारकारादौ पैशाची स्यात् पिशाच-
वाक्।
चेटीनामप्यनीचानामपि स्यात् शौरसेनिका॥
बालानां षण्ढकानाञ्च नीचग्रहविचारिणाम्।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं
क्वचित्॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपस्कृतस्य च।
भिक्षुबन्धधरादीनां प्राकृतं संप्रयोजयेत्॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम्॥
यद्देशं नीचपात्रन्तु तद्देशं तस्य भाषितम्।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः॥
योषित्सखीबालवेश्याकितवाप्सरसां तथा।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतञ्चान्तरान्तरा॥
एषामुदाहरणान्याकारेषु बोद्धव्यानि। भाषा-लक्षणानि भाषार्णवे। इति साहित्यदर्पणे ६ परिच्छेदः॥

अथ भाषापादः।

तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती।
"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्म्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिर्व्वमुक्तं साध्यं साधना-र्थाभिमतं पक्षं विदुः। अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात्। अतएवोक्तम्।

"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
अवक्षरेण वक्तव्ये व्यवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत्॥"
उत्तरो विजयी। यद्यप्यत्र साध्यं तद्-विशिष्टधर्म्माधर्म्मो पक्ष इति भेदः तथाप्यत्र वाक्प्रतार्य्यर्थादिधर्म्मविशेषविशिष्टतया धर्म्मि-णोऽधमर्णपदेनैव साध्यत्वात् साध्यपक्षयोरभेदा-भिधानम्। उपसंहारे च एवंविधः पक्ष इति। मिताक्षरायान्तु। भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थस्तत्र भाषास्वरूप-प्रपञ्चमाह। स्वल्पाक्षर इति। निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः। तत्र।
"द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥"
इति गृह्यसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत्॥ *॥ तच्छोधनमाह बृहस्पतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्॥"
फलकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत्॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनां वचः।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभावोक्तमकृत्रिमम्। एतच्च स्वरविशेषादिना सुज्ञेयम्। अतएव याज्ञवल्क्यः।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥"
भूतं तत्त्वार्थसम्बन्धम्। नारदः।
"भूतं तत्त्वार्थसम्बन्धं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधु वा।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते॥"
सर्व्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसी-दति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थ-विवादग्रहणादन्युत्कृतविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थाद्धीयत इति गम्यते। यथाह-मनेन शिरसि पादेन ताड़ितः इत्यभिधाय केवलं हस्तेन ताड़ितः इति वदन् केवलं दण्ड्यः पराजीयते च। ततश्च त्वं मद्यमक्यं धारयसि मत्त ऋणत्वेन गृहीततावद्धनकत्वादिति भाषा-शरीरम्। एतच्च संस्कृतदेशभाषान्यतरेण यथा-बोधं वक्तव्यं लेख्यं वा। मूर्खाणामपि वादिप्रति-वादितादर्शनात्। अतएवाध्यापनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे।

"संस्कृतैः प्राकृतैर्व्वाक्यैः शिष्यमनुरूपतः।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः॥
इति व्यवहारतत्त्वम्॥

भाषापरिच्छेदः, पुं, विश्वनाथन्यायपञ्चाननकृत-न्यायपरिभाषाग्रन्थः। अस्य प्रथमश्लोकः।
"नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय॥"
तस्यायमन्त्यश्लोकः
"सोऽयं स इति बुद्धिस्तु साजात्यमवलम्बते।
तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात्॥"
अस्य टीका सिद्धान्तमुक्तावली॥

भाषापादः, पुं, (भाषाया: पादः।) चतुष्पाद्व्य-वहारान्तर्गतप्रथमपादः। तस्य लक्षणं यथा,—
"अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च॥
वर्षर्त्तुमासपक्षाहोवेलादेशप्रदेशवत्।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम्॥
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च।
परात्मपूर्व्वजानेकराजनामभिरङ्कितम्॥
क्षमालिङ्गात्मपीडावत्कथिताहर्त्तृदायकम्।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते॥"
इति मिताक्षरायां व्यवहाराध्यायः॥
अस्य विवरणं भाषाशब्दे द्रष्टव्यम्॥

भाषितं, क्ली, (भाष्यते इति। भाष्+भावे क्तः।) वचनम्। इत्यमरः।१।६।१॥ (यथा, मनौ।८।२६।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥"
भाष्यते स्मेति। भाष्+कर्म्मणि क्तः।) कथिते त्रि॥ (यथा, कामन्दकीये नीतिसारे।५।२३।
"प्रविश्य सानुरागस्य चित्तं चित्तज्ञसम्मतः।
समर्थयंश्च तत्पक्षं साधु भाषेत भाषितः॥")

भाष्यं, क्ली, (भाष्यते विस्ततया वर्ण्यते इति। भाष+ण्यत्।) चूर्णिः। इति स्वामी॥ सूत्र-विवरणग्रन्थः। तस्य लक्षणम्।
"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"
इति लिङ्गादिसंग्रहटीकायां भरतः॥ सूत्रो-क्तार्थप्रपञ्चकम्। इति हेमचन्द्रः॥ (भाष्यते अनेनेति। ण्यत्।) गृहविशेषः। इति माध-वीति मथुरेशः॥ (भाष्+ण्यत्।) कथ-नीये त्रि॥

भाष्यकारः, पुं, (भाष्यं चूर्णिं करोतीति। कृ+ "कर्म्मण्यण्।" ३।२।१। इत्यण्।) महा-भाष्यकर्त्ता मुनिः। तत्पर्य्यायः। गोनर्दीयः २ पतञ्जलिः ३ चूर्णिकृत् ४। इति त्रिकाण्डशेषः॥
"अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ।
नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः॥"
इति दुर्गसिंहः॥

भास ऋ ङ भासि। दीप्तौ। इति कविकल्प-द्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ

अवीभसत् अबभासत्। उ भासते। इति दुर्गादासः॥

भास्, स्त्री, (भासते इति। भास+"भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।" ३। २। १७७। इति क्विप्।) प्रभा। अस्य शब्दस्य प्रथमान्तरूपं भाः। इत्यमरः। १। ४। ३४॥ मयूखः। इति मेदिनी। से, ७॥ इच्छा। इति धरणिः॥

भासः, पुं, (भास्यते इति। भास+भावे घञ्।) दीप्तिः। (यथा, महाभारते। ८। ५८। ३९।
"चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः।")
(भासन्ते गावोऽत्र। भास+आधारे घञ्।) गोष्ठम्। (भासते दीप्यते इति। भास्+कर्त्तरि अच्।) कुक्कुटः। गृध्रः। इति विश्वः। खगामच्छातपक्षिविशेषः। तत्पर्य्यायः। शकुन्तः २। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १३४। ७०।
"कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम्।
अभिज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत्॥"
पर्व्वतभेदः। यथा, महाभारते।१४।४३।४॥
"हिमवान् पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान्।
श्वेतो नीलश्च भासश्च कोष्ठवांश्चैव पर्व्वतः॥")
(स्त्रियां ङीप्। प्राधायाः कन्या। यथा, महाभारते। १। ६५। ४६।
"अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम्।
अनूपां सुभगां भासीमिति प्राधा व्यजायत॥")

भासः, [स्,] क्ली, (भास्+असुन्।) दीप्तिः। इति द्विरूपकोषः॥

भासन्तः, पुं, (भासते इति। भास्+"तॄभूवहिवसिभासीति।" उणा० ३।१२८। इति झच्।) सूर्य्यः। चन्द्रः। इत्युणादिकोषः॥ भासपक्षी॥ इति मेदिनी।ते,१३८॥ नक्षत्रम्। इति हेमचन्द्रः॥

भासन्तः, त्रि, (भासते इति। भास+झच्।) सुन्दराकारः। इति मेदिनी। ते, १३८॥

भासन्ती, स्त्री, (भासन्त। गौरादित्वात् ङीष्।) नक्षत्रम्। इत्युणादिकोषः॥

भासुः, पुं, (भास्+बाहुलकादुन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥

भासुरं, क्ली, (भासते इति। भास्+"भञ्जभासमिदो घुरच्।" ३। २। १६१। इति घुरच्।) कुष्ठौषधम्। इति जटाधरः॥

भासुरः, पुं, (भास+घुरच्।) स्फटिकः। इति त्रिकाण्डशेषः॥ वीरः। इति धरणिः। कर्त्तरि घुरप्रत्ययनिष्पन्नत्वेन दीप्तियुक्ते, त्रि॥ (यथा, किरातार्ज्जुनीये। ५। ५।
"मणिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तलतागृहाः॥")

भासुरपुष्पा, स्त्री, (भासुराणि पुष्पाण्यस्याः। टाप्।) वृश्चिकाली। इति राजनिर्घण्टः॥

भास्करं, क्ली, (भाः करोतीति। कृ+"दिवाविभानिशाप्रभाभास्करान्तानन्तादीति।" ३।२। २१। इति टः।) सुवर्णम्। इति राजनिर्घण्टः॥

भास्करः, पुं, (भाः करोतीति। कृ+"दिवा विभेति। ३। २। २१। इति टः।) सूर्य्यः। (यथा, मनौ। २। ४८।
"प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि॥")
अग्निः। इति मेदिनी। रे, १६९॥ वीरः। इति धरणिः॥ अर्कवृक्षः। इति राजनिर्घण्टः॥ भास्कराचार्य्यः। स च सिद्धान्तशिरोमण्यादिज्योतिर्ग्रन्थकर्त्ता॥

भास्करप्रियः, पुं, (भास्करस्य प्रियः।) पद्मरागमणिः। इति केचित्। चुणि इति भाषा॥

भास्करेष्टा, स्त्री, (भास्करस्य इष्टा।) आदित्यभक्ता। इति राजनिर्घण्टः॥

भास्वरं, क्ली, (भासते इति। भास्+"स्थेशभासपिसकसो वरच्। ३। २। १७५। इति वरच्।) कुष्ठौषधम्। इति शब्दचन्द्रिका॥

भास्वरः, पुं, (भासते इति। भास्+"स्थेशभासपिसकसो वरच् ।३।२।१७५। इति वरच्।) दिनम्। इति राजनिर्घण्टः॥ सूर्य्यः। इति केचित्। दीप्तियुक्ते, त्रि। इति मुग्धबोधव्याकरणम्॥ (यथा, महाभारते।१।११।११।
"स डौण्डुभं परित्यज्य रूपं विप्रर्षभस्तदा।
स्वं रूपं भास्वरं भूयः प्रतिपेदे महायशाः॥"
सूर्य्यस्यानुचरविशेषः। स च भगवता सूर्य्येण तारकासुरवधसाहाय्यार्थं स्कन्दाय दत्तः। यथा, महाभारते। ६। ४५। ३०।
"सुभ्राजो भास्करश्चैव यौ तौ सूर्य्यानुयायिनौ।
तौ सूर्य्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान्॥")

भास्वान्, [त्] पुं, (भासः सन्त्यस्येति। भास्+"तदस्यास्त्यस्मिन्निति मतुप्।" ५।२।९४। इति मतुप्। मस्य वः।) सूर्य्यः। (यथा, मार्कण्डेयपुराणे। १०१। १६।
"यथा चाराधितो देव्या सोऽदित्या कश्यपेन च।
आराधितेन चोक्तं यत् तेन देवेन भास्वता॥")
अर्कवृक्षः। इत्यमरः॥ दीप्तिः। इति हेमचन्द्रः॥ वीरः। इति मेदिनी॥ दीप्तिविशिष्टे, त्रि॥ (यथा, कुमारसम्भवे। १। २।
"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥"
प्रकाशकः। यथा, मनौ। १। ७७।
"वायोरपि विकुर्व्वाणाद्विरोचिष्णु तमोनुदम्।
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते॥"
"भास्वत् प्रकाशकम्।"इति तट्टीकायां कुल्लूकभट्टः॥)

भिक्ष, ङ लाभार्थलोभोक्तिक्लिशि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-याचने द्विक०-लाभे लोभोक्तौ च सक०-क्लिशि अक०-सेट्।) अर्थो याचनम्। लोभाद्धुक्तिर्लोभोक्तिः। ङ, भिक्षते भूमिं नृपात् पण्डितः। लभत इत्यर्थः। भिक्षते दातारं धनं भिक्षुः। याचत इत्यर्थः। भिक्षते दातारं दीनः। लोभाद्वदतीत्यर्थः। भिक्षते जनः। क्लिश्यतीत्यर्थः। इति दुर्गादासः॥

भिक्षा, स्त्री, (भिक्ष याचनादौ+"गुरोश्च हलः।" ३। ३। १०२। इति अः। ततष्टाप्।) लोभयाचनम्। चाञ्चोया इति मागा इति च भाषा। तत्पर्य्यायः। याच्ञा २ अर्थना ३ अर्द्दना ४। इत्यमरः। ३। २। ६॥ प्रार्थनम् ५ याचना ६। इति शब्दरत्नावली॥ (तदुक्तम्।
"वाणिज्ये वसते लक्ष्मीस्तदर्द्धं कृषिकर्म्मणि।
तदर्द्धं राजसेवायां भिक्षायां नैव नैव च॥")
सेवा। भृतिः। इति नानार्थे अमरः॥ भिक्षितवस्तु। इति मेदिनी॥ (सा च ग्रासप्रमाणा। ग्रासमात्रा भवेद्भिक्षेति शातातपवचनात्॥ यथा, मनुः। ३। ९४।
"कृत्वैतद्बलिकर्म्मैवमतिथिं पूर्व्वमाशयेत्।
भिक्षाञ्च भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे॥")
उपनीतस्य भिक्षाविधिर्यथा,—
"भिक्षामाहृत्य शिष्टानां गृहेभ्यः प्रयतोऽन्वहम्।
निवेद्य गुरवेऽश्नीयाद्वाग्यतस्तदनुज्ञया॥
भवत्पूर्व्वञ्चरेद्भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्॥
मातरं वा स्वसारं वा मातुर्व्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥
सजातीयगृहेष्वेव सार्व्ववर्णिकमेव वा।
भैक्षस्याचरणं प्रोक्तं पतितादिविवर्जितम्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्जयेत्॥
सर्व्वद्वारि चरेद्भैक्षं पूर्व्वं क्तानामसम्भवे।
नियम्य प्रयतो वाचं दिशस्त्वनवलोकयन्॥
समाहृत्य तु तद्भैक्षं यावदर्थममायया।
भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥"
इति कूर्म्मपुराणे उपविभागे १२ अध्यायः॥ *॥
सायं प्रातर्भिक्षाटनाभावो यथा,—
"कारयित्वा तु कर्म्माणि कारुभ्यश्चान्न वञ्चयेत्।
सायं प्रातर्गृहद्वारान् भिक्षार्थं नावघट्टयेत्॥"
इति तत्रैव १५ अध्यायः॥ * ॥
सा त्रिविधा यथा,—
"हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः।
दद्यादतिथये नित्यं बुद्ध्येत परमेश्वरम्॥
भिक्षामाहुर्ग्रासमात्रमग्रन्तस्याच्चतुर्गुणम्।
पुष्कलं हन्तकारान्तं तच्चतुर्गुणमुच्यते॥
गोदोहमात्रं कालं वै प्रतीक्ष्योऽदतिथिः स्वयम्।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे।
दद्यादन्नं यथाशक्ति त्वर्थिभ्यो लोभवर्जितः॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयेत्॥"
इति तत्रैव १७ अध्यायः॥

भिक्षाकः, पुं, (भिक्षते इति । भिक्ष+"जल्प-भिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २ । १५५ । इति षाकन् ।) भिक्षुकः । इति सिद्धान्तकौमुदी ॥

भिक्षाकी, स्त्री, (भिक्षाक+षित्वात् ङीष् ।) भिक्षुकी । इति मुग्धबोधव्याकरणम् ॥

भिक्षाचरः, पुं, स्त्री, (भिक्षां चरतीति । भिक्षा+चर+"भिक्षासेनादायेषु च ।" ३ । २ । १७ । इति टः ।) भिक्षुकः । इति सिद्धान्तकौमुदी ॥ (स्वनामख्यातो भोजनरपतेः पुत्रः । यथा, राजतरङ्गिण्याम् । ८ । १७ ।
"राज्ञां विभवमत्वा यं भोजो हर्षनृपात्मजः ।
जातं ज्ञातद्विविपुत्रान्तरं गुरुभिः शिशुम् ।
आयुष्कामैस्तमावद्वाभव्यभिक्षाचराभिधम् ॥")

भिक्षाटनं, क्ली, (भिक्षार्थमटनं गमनम् ।) भिक्षार्थगमनम् । यथा,—
"अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं हरस्याहृतं
देवेत्थं जगतीतले स्मरहराभावः समुन्मीलति ।
गङ्गा वारिधिमम्बरं शशिकला नागाधिपः
क्ष्मातलं
सर्व्वज्ञत्वमधीश्वरत्वमगमत् त्वां माञ्च भिक्षाटनम् ॥"
इत्युद्भटः ॥

भिक्षाशित्वं, क्ली, (भिक्षाशिनो भिक्षुकस्य भावः । भिक्षाशिन्+त्व ।) पैशुन्यम् । इति हारावली ॥

भिक्षाशी, [न्] त्रि, (भिक्षां अश्नातीति । अश+णिनिः ।) भिक्षुकः । इत्युणादिकोषः ॥ यथा,—
"भिक्षाशी विचरेद्ग्रामं वन्यैर्यदि न जीवति ॥"
इति प्रायश्चित्तविवेकः ॥

भिक्षुः, पुं, (भिक्षणशीलः । भिक्ष याचने+"सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) ब्रह्मचार्य्याद्याश्रमचतुष्टयान्तर्गतचतुर्थाश्रमी । आश्रमशब्दोऽयं धर्म्मिपरो धर्म्मपरश्च । इति भरतः ॥ तत्पर्य्यायः । परिव्राट् २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ इत्यमरः । २ । ७ । ४२ ॥ परिव्राजकः ६ पराशरी ७ व्रजकः ८ । इति शब्दरत्नावली ॥ तस्य धर्म्मो यथा,—
"भिक्षोर्धर्म्मं प्रवक्ष्यामि तन्निबोधत सत्तमाः ।
वनाद्गृहाद्वा कृत्वेष्टिं सर्व्ववेदसदक्षिणाम् ॥
प्राजापत्यां तदन्ते तु अग्निमारोप्य चात्मनि ।
सर्व्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥
सर्व्वारामं परित्यज्य भिक्षार्थी ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नातिलक्षितः ॥
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ।
भवेत् परमहंसो वा एकदण्डी यमादिमान् ॥
सिद्धयोगस्त्यजन् देहममृतत्वमिहाप्नुयात् ।
योगमभ्यस्य मितभुक् परां सिद्धिमवाप्नुयात् ॥
दातातिथिप्रियो ज्ञानी गृही श्राद्धेऽपि मुच्यते ।"
इति गारुडे १०३ अध्यायः ॥ * ॥
अपि च ।
"चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ! ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ॥
त्रैवर्गिकांस्त्यजेत सर्व्वानारम्भानवनीपते ! ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राण्निर्म्ममो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च मुखे जुहोति ।
विप्रस्तु भैक्ष्योपगतैर्हविर्भि-
श्चिताग्निना स व्रजति स्म लोकान् ॥
मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥"
इति विष्णुपुराणे ३ अंशे ९ अध्यायः ॥ * ॥
बुद्धभेदः । इति जटाधरः ॥ श्रावणीक्षुपः । इति राजनिर्घण्टः ॥ कोकिलाक्षः । इति भावप्रकाशः ॥

भिक्षुकः, पुं, स्त्री, (भिक्षुरेव । भिक्षु+स्वार्थे कन् । यद्वा, भिक्षते इति । भिक्ष+उक ।) भिक्षोपजीवी । तत्पर्य्यायः । मार्गणः २ याचनकः ३ वनीयकः ४ याचकः ५ । इति जटाधरः ॥ अर्थी ६ । इत्यमरः ॥ (यथा, मनुः । ३ । २४३ ।
"ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् ।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥"
पारिभाषिकभिक्षुका यथा, अत्रिः ।
"ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥")

भिक्षुसंघाटी, स्त्री, (भिक्षुं संघटते इति । भिक्षु+सम्+घट+अण् । गौरादित्वात् ङीष् ।) चीवरम् । इति हेमचन्द्रः ॥ यथा, सुश्रुते उत्तरतन्त्रे ३३ अध्याये ।
"पुरीषं कौक्कुटं केशांश्चर्म्मसर्पत्वचन्तथा ।
जीर्णाञ्च भिक्षुसंघाटीं धूपनायोपकल्पयेत् ॥")

भिण्डः, पुं, (भण्यते इति । भण्+डः । पृषोदरादित्वात् साधुः ।) भिण्डाक्षुपः । इति राजनिर्घण्टः ॥

भिण्डकः, (भिण्ड । स्वार्थे कन् ।) भिण्डाक्षुपः । इति राजनिर्घण्टः ॥

भिण्डा, स्त्री, (भिण्ड+अजादित्वात् टाप् ।) क्षुपविशेषः । भिण्डी इति ख्याता । तत्पर्य्यायः । भिण्डीतकः २ भिण्डः ३ भिण्डकः ४ क्षेत्रसम्भवः ५ चतुष्पदः ६ चतुःपुण्ड्रः ७ सुशाकः ८ अम्लपत्रकः ९ करपर्णः १० वृत्तबीजः ११ । अस्या गुणाः । अम्लरसत्वम् । उष्णत्वम् । ग्राहित्वम् । रुचिकरत्वञ्च । इति राजनिर्घण्टः ॥

भिण्डीतकः, पुं, (भिण्डी सती तकति हसतीति । तक्+अच् ।) भिण्डाक्षुपः । इति राजनिर्घण्टः ॥

भित्तं, क्ली, (भिद्यते स्मेति । भिद्+क्तः । "भित्तं शकलम् ।" ८ । २ । ५९ । इति निष्ठातकारस्य नत्वाभावो निपात्यते ।) खण्डम् । इत्यमरः । १ । ३ । १६ ॥

भित्तिः, स्त्री, (भिद्यते इति । भिद्+क्तिन् ।) गृहादेर्मृदिष्टकादिमयी वृतिः । कोँथ इति भित् इति च ख्याता । तत्पर्य्यायः । कुड्यम् २ । इत्यमरः । २ । २ । ४ ॥ भित्तिका ३ कुड्यम् ४ कुड्यकम् ५ । इति शब्दरत्नावली ॥ (यथा, विश्वकर्म्मप्रकाशे । पञ्चमाध्याये ।
"मानेनानेन विस्तारो भित्तीनान्तु विधीयते ।
पादे पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ॥")
प्रभेदः । सम्विभागः । अवकाशः । इति विश्वः । प्रदेशः । इति शब्दरत्नावली ॥ (यथा, रघौ । ५ । ४३ ।
"अथोपरिष्टाद् भ्रमरैर्भ्रमद्भिः
प्राक् सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिः
वन्यः सरितो गज उन्ममज्ज ॥")

भित्तिका, स्त्री, (भिद्यते भिनत्ति वेति । भिदिर् विदारणे+"हनिभिदिजनिभ्यः कित् ।" उणा० ३ । १४७ । इति तिकन् । कित् स्यात् ।) कुड्यम् । इति शब्दरत्नावली ॥ पल्ली । इति हेमचन्द्रः ॥

भित्तिचौरः, पुं, (चोरयतीति । चुर+अच् । चोर एव स्वार्थे अण् । चौरः । भित्त्या कुड्यादिभेदेन चौरः ।) चौरविशेषः । सिँदाल चोर इति भाषा । तत्पर्य्यायः । खानिलः २ कुड्यच्छित् ३ । इति शब्दरत्नावली ॥

भित्तिपातनः, पुं, (पातयतीति । पत+णिच् । कर्त्तरि ल्युः । भित्तीनां पातनः ।) महामूषकः । इति राजनिर्घण्टः ॥

भित्, [द्] स्त्री, (भिद्यते इति । भिद्+"सत्सूद्विषद्रुहदुहयुजविदभिदेति ।" ३ । २ । ६१ । इति क्विप् ।) प्रभेदः । इति जटाधरः ॥ (भिनत्तीति । भिद्+तच्छीलादिषु "अन्यतोऽपि दृश्यते ।" इति क्विप् ।) भेदकर्त्तरि त्रि ॥ (यथा, ऋग्वेदे । ७ । १०४ । ८ ।
"भिनत्पुरो न भिदो अदेवीर्नमो वधरदेवस्य पीयोः ॥")

भिद इर् औ ञ ध भिदि । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) भित् क्रियदवयवविदारणम् । ञ ध भिनत्ति भिन्ते कूलं नदी । औ भेत्ता । इर् अभिदत् अभैत्सीत् । इति दुर्गादासः ॥

भिदकं, क्ली, (भिनत्तीति । भिद्+"बहुलमन्यत्रापि ।" उणा० २।३७। इति क्वुन् ।) वज्रम् । खड्गे, पुं । इत्युणादिकोषः ॥

भिदा, स्त्री, (भेदनमिति भिद्+"षिद्भिदादिभ्योऽङ् ।" ३।३।१०४। इति । अङ् । टाप् ।) वस्त्रादेर्विदारणम् । चेरा इति भाषा । तत्पर्य्यायः । विदरः २ स्फुटनम् ३ । इत्यमरः । ३।२।५॥ धन्याकम् । इति शब्दचन्द्रिका ॥ भेदः । यथा । प्रायश्चित्तस्य पूर्व्वाह्णत्वं वाक्यभिदा तथा । इति प्रायश्चित्ततत्त्वम् ॥

भिदिः, पुं, (भिनत्तीति । भिद्+"कृगॄशॄपॄकुटिभिदिच्छिदिभ्यश्च ।" उणा०४।१४२। इति इः । स च कित् ।) वज्रम् । इति द्विरूपकोषः ॥

भिदिरं, क्ली, (भिनत्ति विदारयतीति । भिद्+"इषिमदिमुदिखिदिच्छिदिभिदिमन्दीति ।" उणा० १।५२। इति किरच् ।) वज्रम् । इत्यमरटीकायां भरतः त्रिकाण्डशेषश्च ॥

भिदुः, पुं, (भिनत्ति विदारयतीति । भिद्+"पॄभिदिव्यधिगृधिधृषिविडम्बिभ्यः ।" उणा० १ । २४ । इति कुः ।) वज्रम् । इति त्रिकाण्डशेषः ॥

भिदुरं, क्ली, (भिनत्तीति । भिद्+"विदिभिदिच्छिदेः कुरच् ।"३।२।१६२। इति । कुरच् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥ प्लक्षवृक्षे पुं । इति राजनिर्घण्टः ॥

भिद्यः, पुं, (भिनत्ति कूलमिति । भिद्+"भिद्योद्ध्यौ नदे ।"३ । १ । ११५ । इति क्यप् । निपातितश्च ।) नदः । इति हेमचन्द्रः ॥ मुग्धबोधव्याकरणञ्च ॥ (यथा, भट्टौ । ६ । ५८ ।
"समुत्तरन्तावथ यौ नदान् भिद्योद्धासन्निभान् ।
सिद्धमाराममिव स्फातां शवरीमापतुर्वने ॥")

भिन्द्रः, पुं, स्त्री, (भिनत्तीति । भिद् "स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपीति ॥" उणा० २ । १३ । इति रक् ।) वज्रम् । इति त्रिकाण्डशेषः उणादिकोषश्च ॥

भिन्दिपालः, पुं, (भिन्दि+इन् । भिन्दिं विदारणं पालयतीति पालि+अण् ।) हस्तप्रमाणकाष्ठः । नालिकास्त्रमिति ख्यातम् । इति भरतः ॥ हस्तक्षेप्यलगुडः । इति स्वामी ॥ तत्पर्य्यायः । सृगः २ । इत्यमरः । २ । ८ ।९१॥ (यथा, वैशम्पायनसंहितायाम् । ३ ।
"भिन्दिपालस्तु वक्राङ्गो नम्रशीर्षो बृहच्छिराः ।
हस्तमात्रोत्सेधयुक्तः करसम्मितमण्डलः ॥"
भिन्दिवालः भिन्दिवालश्चापि इत्येवं पाठद्वयं दृश्यते ।)

भिन्नः, त्रि, (भिद्यते स्मेति । भिद्+क्तः ।) भेदविशिष्टः । भाङ्गा इति भाषा । तत्पर्य्यायः । दारितः २ । भेदितः ३ । इत्यमरः । ३।१।१००॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । भविष्यपर्व्वणि । ५३ । १६ ।
"आक्रान्तमुद्भ्रान्तमाविद्धं प्रविद्धं बहुनिःसृतम् ।
आकरं विकरं भिन्नं निर्मर्य्यादममानुषम् ॥")

सङ्गतः । अन्यः । फुल्लः । इति मेदिनी । ने, १४॥ क्षतरोगविशेषः । तल्लक्षणं यथा,—
"शक्तिकुन्तेषु खड्गाग्रविषाणैराशयो हतः ।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥"
आशयः कोष्ठः । तस्यौषधं यथा,—
"छिन्ने भिन्ने तथा विद्धे क्षते वाऽसृगतिस्रवेत् ।
रक्तक्षयात्तत्र रुजः करोति पवनो भृशम् ॥
स्नेहपानपरीषेकलेपास्तत्रोपनाहनम् ।
कुर्व्वीत स्नेहवस्तिञ्च मारुतघ्नौषधैर्भिषक् ॥
खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।
माक्षिकवीजपूरस्तैः सद्यः स्यान्निर्वेदनः ॥
कषायमधुराः शीताः क्रियाः सर्व्वाः प्रयोजयेत् ।
सद्यो व्रणानां सप्ताहात् पश्चात् पूर्व्वोक्तमाचरेत् ॥
आमाशयस्थे रुधिरे विदध्याद्वमनं नरः ।
तस्मिन् पक्वाशयस्थे तु गृह्णीयात् सविरेचनम् ॥
क्वाथो वंशत्वगेरण्डश्वदंष्ट्राश्मभिदा कृतः ।
हिङ्गुसैन्धवसंयुक्तः कोष्ठस्थं स्रावयेदसृक् ॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
भुञ्जीतान्नं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥
जातीनिम्बपटोलपत्रकटुकादार्व्वीनिशाशारिवा
मञ्जिष्ठाभयतिक्ततुत्थमधुकैर्नक्ताह्ववीजैः समैः ।
सर्पिःसिद्धमनेन सूक्ष्मवदना मर्म्माश्रिताः स्राविणो
गम्भीराः सरुजो व्रणाः सगतिकाः शुध्यन्ति रोहन्ति च ॥
इदं वैद्योपदेशेन पारम्पर्य्योपदेशतः ।
जातीघृतं तु संविद्धं श्रेष्ठं सिकथकं बुधैः ॥"
जात्यादिघृतम् । इति भावप्रकाशः ॥ * ॥
(अथोपाङ्गचिकित्सा ।
"छिन्नं भिन्नं तथा भग्नं क्षतं पिच्छितमेव च ॥
दग्धमेषां प्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ॥)

भिन्नकः, पुं,(भिन्न+संज्ञायां कन् ।) बौद्धः । यथा,
"भिन्नकः क्षपणोऽश्लीको बौद्धो वैनायिकः स्मृतः ॥"
इति त्रिकाण्डशेषः ॥
(भिन्न+"अनत्यन्तगतौ क्तात् ।" ५ । ४ । ४ । इति कन् । ईषद् भिन्ने, त्रि ।)

भिन्नगात्रिका, स्त्री, (भिन्नं गात्रमस्याः । कप् । टाप् । अत इत्वम् ।) कर्कटी । इति शब्दचन्द्रिका ॥

भिन्नभिन्नात्मा, [न्] पुं, (भिन्नभिन्नो भेदयुक्त आत्मा यस्य ।) चणकः । इति शब्दचन्द्रिका ॥

भिन्नयोजनी, स्त्री, (भिन्नं योजयतीति । युज्+णिच्+णिनिः । ङीप् ।) पाषाणभेदकवृक्षः । इति भावप्रकाशः ॥

भिन्नार्थकः, त्रि, (भिन्नोऽर्थो यस्य । कप् ।) अन्यः । इत्यमरः । ३ । १ । ८२ ॥

भिया, स्त्री, (भीयते इति । भी+"षिद्भिदादिभ्योऽङ् ।"३ । ३ । १०४ । इति अङ् । इयङ् । टाप् ।) भयम् । इति हेमचन्द्रः । २ । २०१ ॥

भिरिण्टिका, स्त्री, श्वेतगुञ्जा । इति राजनिर्घण्टः ॥

भिल्ल, पुं, (भेलयति भिनत्तीति वा । भिल्+बाहुलकात् । लक् ।) म्लेच्छजातिविशेषः । भील इति भाषा । यथा, हेमचन्द्रे ।
"माला भिल्लाः किराताश्च सर्व्वेऽपि म्लेच्छजातयः ॥"
अपि च ।
"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥"
इति प्रायश्चित्ततत्त्वम् ॥
स च ब्राह्मणकन्यायां तीवराज्जातः । यथा,—
"पुलिन्दमेदभिल्लाश्च पुत्त्रो मल्लश्च धावकः ।
कुन्दकारो डोम्बलो वा म्लतयो हस्तिपस्तथा ।
एते वै तीवराज्जाताः कन्यायां ब्राह्मणस्य च ॥"
इति पराशरपद्धतिः ॥

भिल्लगवी, स्त्री, (भिल्लानां गवी ।) गवयी । इति राजनिर्घण्टः ॥

भिल्लतरुः, पुं, (भिल्लप्रियस्तरुः । लोध्रपुष्पेण हि भिल्लादयोऽङ्गभूषणादिकं कुर्व्वन्तीति प्रसिद्धेरस्य तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिल्ली, स्त्री, (भिल्ल+ङीप् । भिल्लानां प्रियत्वादस्यास्तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिष्, रुग्जये । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भिषक् भेषजं भेषति । इति दुर्गादासः ॥

भिषक्, [ज्] बिभेति रोगो यस्मादिति । भीति भीत्याम्+"भियः षुक् ह्रस्वश्च ।" उणा० १ । १३७ । इति अजिः षुगागमो ह्रस्वत्वञ्च ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ (अस्य प्राशस्त्यादिकं यथा,—
"भिषग्बुभूषुर्मतिमान् अतः स्वगुणसम्पदि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्याद् यथा नृणाम् ॥
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥
सम्यक्प्रयोगं सर्व्वेषां सिद्धिराख्याति कर्म्मणाम् ।
सिद्धिराख्याति सर्व्वैश्च गुणैर्युक्तं भिषक्तमम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
"एतदवश्यमध्येयमधीत्य च कर्म्माप्यवश्यमुपासितव्यमुभयज्ञो हि भिषग्राजार्हो भवति ॥"
यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरम्प्राप्य प्राप्य भीरुरिवाहवम् ॥
यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि ।
अर्द्धवेदधरावेतावेकपक्षाविव द्विजौ ॥
ओषध्योऽमृतकल्पास्तु शस्त्राशनिविषोपमाः ।
भवन्त्यज्ञैरुपहृतास्तस्मादेतौ विवर्ज्जयेत् ॥
छेद्यादिष्वनभिज्ञो यः स्नेहादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्म निर्वोढुं द्विचक्रः स्यन्दनो यथा ॥"
इति सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ॥)

दृष्टनीयभिषग् यथा,—
"अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित् ।
रोगिभ्योऽर्थं समादत्ते स दण्ड्यश्चौरवद्भिषक् ॥"
इति ज्योतिस्तत्त्वम् ॥
तस्याऽन्नस्याभोज्यत्वं यथा,—
"शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः ।
चिकित्सकस्य क्रूरस्य तथा स्त्रीन्द्रगजीविनाम् ॥
शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासं व्रती भवेत् ॥"
व्रती यावकेन । तत्र धेनुद्वयम् । इति प्रायश्चित्तविवेकः ॥ अपि च ।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥"
इति मानवे ४ अध्यायः ॥
(शतधन्वनः चैत्रजः पुत्रः । यथा, हरिवंशे । ३८ । ६ ।
"शतवर्म्माग्निजस्तेषां शतधन्वा तु मध्यमः ।
दैवर्षेश्च्यवनात् तस्य भिषग्वैतरणश्च यः ॥"
औषधम् । यथा, ऋग्वेदे । १ । २४ । ९ ।
"शतं ते राजन् भिषजः सहस्रमुर्व्वी
गभीरा सुमतिष्टे अस्तु ॥"
"हे राजन् ! वरुण ! ते तव शतं भिषजः सहस्रं बन्धनिवारकाणि शतसहस्रसंख्याकान्यौषधानि वैद्या वा सन्ति ॥" इति तद्भाष्ये सायनः ॥)

भिषक्प्रिया, स्त्री, (भिषजः प्रिया ।) गुडूची । इति राजनिर्घण्टः ॥
(विवृतिरस्या गुडूचीशब्दे ज्ञातव्या ॥)

भिषग्जितं, क्ली, (भिषजा जितम् ।) औषधम् । इति त्रिकाण्डशेषः ॥ (चिकित्सा ॥ यथास्य पर्य्यायः ।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्-
जितम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

भिषग्भद्रा, स्त्री, (भिषजि औषधे वैद्ये वा भद्रा शुभदायिका ।) भद्रदन्तिका । इति राजनिर्घण्टः ॥

भिषङ्माता, [ऋ] स्त्री, (भिषजां मातेव ।) वासकः । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायः ।
"वासको वाशिका वासा भिषङ्माता च
सिंहिका ।
सिंहास्यो वाजिदन्ता स्यादाटरूषोऽटरूषकः ॥
आटरूषो वृषस्ताम्रः सिंहपर्णश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भिस्सटा, स्त्री, (भिस्सामन्नं टीकते इति । टीक गतौ + "अन्येभ्योऽपीति डः । ततः पृषोदरादित्वात् साधुः ।) दग्धान्नम् । इत्यमरः । २ । ९ । ४९ ॥ अस्य रूपान्तरम् । भिस्सिटा । भिश्चिटा । भिश्चिटा । भिश्चिका । इति तट्टीकासारसुन्दरी ॥

भिस्सा, स्त्री, (बभस्तीति । भस दीप्तौ + बाहुलकात् सः । छन्दसि बहुलमितीत्वम् । आस्तत्र-भिस्सेति भाष्यप्रयोगाल्लोकेऽपि । यद्वा, भेदनमिति भित् । भिद् + क्विप् । भिदं स्यतीति । सो + "आतोऽनुपसर्गे कः ।" इति कः । पृषोदरादित्वात् साधुः ।) अन्नम् । इत्यमरः । २ । ९ । ४८ ॥ (अस्याः पर्य्यायो यथा,—
"भक्तमन्नं तथान्धश्च क्वचित् कूरश्च कीर्त्तितम् ।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि-
भाषितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

भिस्सिटा, स्त्री, (भिस्सामन्नं टीकते इति । टीक गतौ + डः । पृषोदरादित्वात् साधुः ।) दग्धान्नम् । इत्यमरटीकासारसुन्दरी ॥

भी, ञ ि भृत्या च । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) ञ, भीनाति । ि, भिनाति । भीनः भीनिः । णिनैव ह्रादित्वसिद्धौ णत्वग्रहणं प्वादित्वविकल्पार्थं चकारात् भीत्या च । इति दुर्गादासः ॥

भी, ञि लि भीत्याम् । इति कविकल्पद्रुमः ॥ (ह्वा०-पर०-अक०-अनिट् ।) ञि, भीतोऽस्ति । लि, बिभेति । इति दुर्गादासः ॥

भीः, स्त्री, (भी भीत्याम् + सम्पदादित्वात् क्विप् ।) भयम् । इत्यमरः । १ । ७ । २१ ॥ (यथा, आर्य्यासप्तशत्याम् । ३८७ ।
"पूर्व्वाधिको गृहिण्याम् बहुमानः प्रेमनर्म्म-
विश्वासः ।
भीरधिकेयं कथयति रागं बालाविभक्तमिव ॥")

भीतं, क्ली, (भी लि भीत्याम् + क्तः ।) भयम् । भययुक्ते, त्रि । इति मेदिनी । ते, ४० ॥ (यथा, मनुः । ७ । ९४ ।
"यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्व्वं प्रतिपद्यते ॥")

भीतिः, स्त्री, (भी + क्तिन् ।) भयम् । इत्यमरः । १ । ७ । २१ ॥ (यथा, मार्कण्डेये । ८४ । १६ ।
"दुर्गे ! स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥")
कम्पः । इति विश्वः ॥

भीमं, त्रि, (बिभेत्यस्मादिति । भी + "भियः षुग्वा ।" उणा० १ । १४७ । बिभेतेर्मक् धातोर्वा षुगागमश्च । इति मक् ।) भयहेतु. । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भयानकम् ७ भयङ्करम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ (यथा, रघुः । १ । १६ ।
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥")

भीमः, पु, (बिभेत्यस्मादिति । भी + मक् ।) भयानकरसः । यथा,—
"भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥"
इत्यमरटीकायां भरतः ॥
शिवः । (यथा, मार्कण्डेये । ५२ । ७ ।
"भवं सर्व्वं तथेशानं तथा पशुपतिं प्रभुः ।
भीममुग्रं महादेवमुवाच स पितामहः ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ५२ ।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥")
मध्यमपाण्डवः । (यथा, महाभारते । १ । १२३ । १३ ।
"तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः ॥"
अस्य विवरणादिकं भीमसेनशब्दे द्रष्टव्यम् ॥)
अम्लवेतसः । इति मेदिनी । मे, २१ ॥ महादेवस्याष्टमूर्त्त्यन्तर्गताकाशमूर्त्तिः । यथा । भीमाय आकाशमूर्त्तये नमः । इति तिथ्यादितत्त्वे शिवपूजाप्रयोगः ॥ (गन्धर्व्वविशेषः । यथा, महाभारते । १ । ६५ । ४३ ।
"भीमश्चित्ररथश्चैव विख्यातः सर्व्वविद्वशी ॥"
पुरुवंशीयस्य ईलिनस्य पुत्रः । यथा, तत्रैव । १ । ९४ । १८ ।
"ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान् ।
दुष्मन्तं शूरभीमौ च प्रवसुं वसुमेव च ॥")

भीमनादः, पुं, (भीमो भैरवो नादो यस्य ।) सिंहः । इति शब्दचन्द्रिका ॥ (भीमो नादः शब्दः । इति विग्रहे भयानकशब्दः । यथा, चातकाष्टके । १ ।
"वातैर्विधूनय विभीषय भीमनादैः
सञ्चूर्णय त्वमथवा करकाभिघातैः ।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद ! चातकस्य ॥"
भयानकशब्दविशिष्टे, त्रि । यथा, महाभारते । १ । १५६ । ३१ ।
"भीमनादं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महा-
रवम् ॥")

भीमरथः, पुं, (भीमो भयानको रथोऽस्य ।) तामसमनुवंशजातासुरविशेषः । स च कूर्म्मरूपिणा हरिणा हतः । यथा,—
"हरिणा कूर्म्मरूपेण हतो भीमरथोऽसुरः ॥"
इति गारुडे गयामाहात्म्ये ८६ अध्यायः ॥
(धृतराष्ट्रस्य पुत्रभेदः । यथा, महाभारते । १ । ११७ । ११ ।
"उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः ॥")

भीमरथी, स्त्री, जनानामवस्थाविशेषः । यथा,—
"सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी ।
रात्रिर्भीमरथी नाम नराणां दुरतिक्रमा ॥"
इति शब्दमाला ॥
अपि च ।
"सप्तसप्ततिवर्षाणां सप्तमे मासि सप्तमी ।
रात्रिर्भीमरथी नाम नराणामतिदुस्तरा ।
तामतीत्य नरो योऽसौ दिनानि यानि जीवति ॥
क्रतुभिस्तानि तुल्यानि सुवर्णशतदक्षिणैः ।
गतिः प्रदक्षिणं विद्यार्जनमल्पमन्नभाषणम् ।
ध्यानं निद्रा सुधा चान्नं भीमरथ्याः फलश्रुतिः ॥"
इति वैद्यकम् ॥
नदीभेदः । यथा राजनिर्घण्टे ।
मलापहा भीमरथी च पद्मगा
पथ्या च कृष्णा जलसाम्यगा गुणैः ॥"

(इयं हि सह्यपर्व्वतोद्भवा । यथा, विष्णुपुराणे । २ । ३ । ११ ।

"गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।

सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥")

भीमविक्रान्तः, पुं, (भीमश्चासौ विक्रान्तश्चेति ।) सिंहः । इति त्रिकाण्डशेषः ॥ भयानकविक्रमविशिष्टे, त्रि ॥

भीमशासनः, पुं, (भीमं शासनं यस्य ।) यमः । इति शब्दरत्नावली ॥

भीमसेनः, पुं, मध्यमपाण्डवः । स च कुन्तीगर्भे पवनाज्जातः । तत्पर्य्यायः । भीमः २ वीरवेणुः ३ वृकोदरः ४ वकजित् ५ कीचकजित् ६ किर्म्मीरजित् ७ जरासन्धजित् ८ हिड़िम्बजित् ९ कटव्रणः १० नागबलः ११ गुणाकरः १२ । इति शब्दरत्नावली ॥ तस्य जन्मविवरणं यथा,

"धार्म्मिकस्तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत् ।

प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु ॥

ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा ।

तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः ॥

तमप्यतिबलं जातं वागुवाचाशरीरिणी ।

सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत ! ॥

इदमत्यद्भुतञ्चासीज्जातमात्रे वृकोदरे ।

यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत् ॥

कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल ।

नान्वबुध्यत तं सुप्तमुत्सङ्गे स्वे वृकोदरम् ॥

वज्रसंहननः सोऽथ कुमारो न्यपतद्गिरौ ।

पतता तेन शतधा शिला गात्रैर्विचूर्णिता ॥"

इति महाभारते आदिपर्व्वणि पाण्डवोत्पत्ति नामाध्यायः ॥

(गन्धर्व्वविशेषः । यथा, महाभारते ।१।१२३।५२।

भीमसेनोग्रसेनौ च ऊर्णायुरनघस्तथा ॥")

कर्पूरभेदः । यथा,—

"पीताभो भीमसेनस्तदनु शितकरः शङ्करावाससंज्ञः

पांशुः पिञ्जोऽब्जसारस्तदनु हिमयुता वालुका जूटिका च ।

पश्चादस्यास्तुषारस्तदुपरि सहिमः शीतलः पत्रिकाख्या

कर्पूरस्येति भेदा गुणरसमहसा वैसदृश्येन दृश्याः ॥"

इति राजनिर्घण्टः ॥

भीमहासं, क्ली, (भीमे ग्रीष्मादौ हासः प्रकाशो यस्य ।) इन्द्रतूलम् । इति शब्दरत्नावली ॥ वुढ़िर सुता इति भाषा ॥ ग्रीष्महासमपि पाठः ॥

भीमा, स्त्री, (भी+मक्+स्त्रियां टाप् ।) दुर्गा । इति शब्दरत्नावली ॥ रोचनाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ कशा । इति शब्दमाला ॥ (नदीविशेषः । तद्यथा,—

"कावेरी वीरकान्ता च भीमा चैव पयोष्णिका ।

विभावरी विशाला च गौरीदा मदनस्वसा ॥

पार्व्वती चापरा नद्यो दक्षिणादिग्गमा इमाः ॥"

इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥)

भीमादेवी, स्त्री, दुर्गा । यथा,—

"पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ।

रक्षांसि क्षययिष्यामि मुनीनां त्राणकारणात् ॥

तदा मां मुनयः सर्व्वे स्तोष्यन्त्यानम्रमूर्त्तयः ।

भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

भीमैकादशी, स्त्री, (भीमेनोपासिता एकादशी । शाकपार्थिवादिवत् समासः ।) भैमी । सा च माघशुक्लैकादशी । भीमद्वादशीत्वेन ख्याता च । यथा,—

मत्स्य उवाच ।

"पुरा रथन्तरे कल्पे परिपृष्टो महात्मना ।

मन्दरस्थो महादेवः पिनाकी ब्रह्मणा स्वयम् ॥

ब्रह्मोवाच ।

कथमारोग्यमैश्वर्य्यमनन्तममरेश्वर ! ।

स्वल्पेन तपसा देव ! भवेन्मोक्षोऽथ वा नृणाम् ॥

त्वमयातं मया देव ! त्वत्प्रसादादधोक्षज ! ।

स्वल्पकेनापि तपसा महत् फलमिहोच्यते ॥

मत्स्य उवाच ।

इति पृष्टः स विश्वात्मा ब्रह्मणा लोकभावनः ।

उमापतिरुवाचेदं मनसः प्रीतिकारकम् ॥

ईश्वर उवाच ।

अस्मादथन्तरात् कल्पात् त्रयोविंशतिमो यदा ।

वाराहो भविता कल्पस्तस्य मन्वन्तरे शुभे ॥

वैवस्वताख्ये संजाते सप्तमे सप्तलोकधृक् ।

द्वापराख्यं युगं तस्मिन् सप्तविंशतिमे तदा ॥

तस्यान्ते स महातेजा वासुदेवो जनार्द्दनः ।

भारावतरणार्थाय त्रिधा विष्णुर्भविष्यति ॥

द्वैपायनो मुनिस्तद्वद्रौहिणेयोऽथ केशवः ।

कंसादिदर्पमथनः केशवः शोकनाशनः ॥

पुरी द्वारवती नाम सांप्रतं या कुशस्थली ।

दिव्यानुभावसंयुक्तामधिवासाय शार्ङ्गिणः ॥

त्वष्टा ममाज्ञया ब्रह्मन् ! करिष्यति जगत्पतेः ॥

तस्यां कदाचिदासीनः सभायाममितद्युतिः ।

भार्य्याभिर्वृष्णिभिः सार्द्धं भूभृद्भिर्भूरिदक्षिणैः ॥

कुरुभिर्देवगन्धर्व्वैरभितः कैटभार्द्दनः ।

प्रवृत्तासु पुराणेषु धर्म्मसम्बन्धिनीषु च ॥

कथासु भीमसेनेन परिपृष्टः प्रतापवान् ।

त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदकृत् ॥

भविता स तदा ब्रह्मन् ! कर्त्ता चैव वृकोदरः ।

प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुपुत्त्रो महाबलः ॥

तस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः ।

मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः ॥

अतीवाशनदीप्तश्च नागायुतबलो महान् ।

भविष्यत्यजरः साक्षात् कन्दर्प इव बुद्धिमान् ॥

धार्म्मिकस्याप्यशक्तस्य तीव्राग्नित्वादुपोषणे ।

इमं व्रतमशेषाणां व्रतानामधिकं यतः ॥

कथयिष्यति विश्वात्मा वासुदेवो जगद्गुरुः ।

अशेषयज्ञफलदमशेषाघविनाशनम् ॥

अशेषदुष्टशमनमशेषसुरपूजनम् ॥

पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम् ।

भविष्यञ्च भविष्याणां पुराणानां पुरातनम् ॥

वासुदेव उवाच ।

यद्यष्टमीचतुर्द्दश्यां द्वादशीष्वथ भारत ! ।

अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम् ॥

ततः पुण्यामिमां भीम ! तिथिं पापप्रणाशिनीम् ।

उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ॥

माघमासस्य दशमी यदा शुक्ला भवेत्तदा ।

घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत् ॥

तथैव विष्णुमभ्यर्च्य नमो नारायणाय च ।

कृष्णाय पादौ संपूज्य शिरः सर्व्वात्मनेति च ॥

वैकुण्ठायेति वै कण्ठमुरः श्रीवत्सधारिणे ।

शङ्खिने चक्रिणे तद्वद्वरदाय वै ॥

सर्व्वं नारायणस्यैवं संपूज्या बाहवः क्रमात् ।

दामोदरायेत्युदरं मेढ्रं पञ्चशराय वै ॥

ऊरू सौभाग्यनाथाय जानुनी भूतधारिणे ।

नमो नीलाय वै जङ्घे पादौ विश्वसृजे पुनः ॥

नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रियै ।

नमः पुष्ट्यै नमस्तुष्ट्यै धृष्ट्यै हृष्ट्यै तथा श्रियै ॥

नमो विहङ्गनाथाय वायुवेगाय पक्षिणे ।

विषप्रमाथिने नित्यं गरुड़ञ्चाभिपूजयेत् ॥

एवं संपूज्य गोविन्दमुमापतिविनायकौ ।

गन्धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैस्तथा ॥

गव्येन पयसा सिद्धां कृशरामथ वाग्यतः ।

सर्पिषा सह भुक्त्वा च गत्वा शतपदं बुधः ॥

न्यग्रोधदन्तधावनमथवा खादिरं बुधः ।

गृहीत्वा धावयेद्दन्तानाचान्तः प्रागुदङ्मुखः ॥

ब्रूयात् सायन्तनीं कृत्वा सन्ध्यामस्तमिते रवौ ।

नमो नारायणायेति त्वामहं शरणं गतः ॥

एकादश्यां निराहारः समभ्यर्च्य च केशवम् ।

रात्रिञ्च सकलां स्थित्वा स्नानञ्च पयसापि च ॥

सर्पिषा विश्वदहनं हुत्वा ब्राह्मणपुङ्गवैः ।

सहैव पुण्डरीकाक्ष ! द्वादश्यां क्षीरभोजनम् ॥

करिष्यामि यतात्माऽहं निर्विघ्नेनास्तु तच्च मे ।

एवमुक्त्वा स्वपेद्भूमावितिहासकथां पुनः ॥ * ॥

श्रुत्वा प्रभाते संजाते नदीं गत्वा विशाम्पते ! ।

स्नानं कृत्वा मृदा तद्वत् पाखण्डानभिवर्जयेत् ॥

उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम् ।

प्रणम्य च हृषीकेशमशेषजगतीश्वरम् ॥

गृहस्य पुरतो भक्त्या मण्डपं कारयेद्बुधः ।

दशहस्तमथाष्टौ वा करान् कुर्य्याद्विशाम्पते ! ॥

चतुर्हस्तां शुभां कुर्य्याद्वेदीमरिनिसूदन ! ।

चतुर्हस्तप्रमाणञ्च विन्यसेत्तत्र तोरणम् ॥

आरोप्य कलसं तत्र दिक्पालान् पूजयेत्ततः ।

माषमात्रेण संपूर्णमधःकृष्णाजिने स्थितः ॥

तस्य धाराञ्च शिरसा धारयेत् सकलां निशाम् ।

धाराभिर्भूरिभिर्भूरिफलं वेदविदो विदुः ॥

यस्मात्तस्मात् कुरुश्रेष्ठ ! धारा धार्य्याः स्वशक्तितः ।

तथैव विष्णोः शिरसि क्षीरधाराः प्रपातयेत् ॥

अरत्निमात्रं कुण्डञ्च कृत्वा तत्र त्रिमेखलम् ।

योनिवक्त्रञ्च तं कृत्वा ब्राह्मणैर्यवसर्पिषी ॥

तिलांश्च विष्णुदैवत्यैर्मन्त्रैरेकाग्निवत्तदा ।

कृत्वा च वैष्णवं सम्यक् चरुं गोक्षीरसंयुतम् ॥
निष्पावार्द्धप्रमाणां वै धारामाज्यस्य पातयेत् ।
जलकुम्भान् महावीर । स्थापयित्वा त्रयोदश ।
भक्ष्यैर्नानाविधैर्युक्तान् सितवस्त्रैरलङ्कृतान् ।
युक्तानौदुम्बरैः पात्रैः पञ्चरत्नसमन्वितान् ॥
चतुर्भिर्बह्वृचैर्होमस्तत्र कार्य्य उदङ्मुखैः ।
रुद्रजापश्चतुर्भिश्च यजुर्व्वेदपरायणैः ॥
वैष्णवानि च सामानि चतुरः सामवेदिनः ।
अरिष्टवर्गसहितान्यभितः परिपाठयेत् ॥
एवं द्वादश तान् विप्रान् वस्त्रमाल्यानुलेपनैः ।
पूजयेदङ्गुलीयैश्च कटकैर्हेमसूत्रकैः ॥
वासोभिः शयनीयैश्च वित्तशाठ्यविवर्जितः ।
एवं क्षपातिवाह्या वै गीतमङ्गलनिःस्वनैः ।
उपाध्यायस्य च पुनर्द्विगुणं सर्व्वमेव तु ॥ * ॥
ततः प्रभाते विमले समुत्थाय त्रयोदश ।
गा वै दद्यात् कुरुश्रेष्ठ । सौवर्णमुखसंयुताः ॥
पयस्विनीः शीलवतीः कांस्यदोहनसंयुताः ।
रौप्यखुराः सवत्साश्च चन्दनेनाभिषेचिताः ॥
तांस्तु तेषां ततो भक्त्या भक्ष्यभोज्येन तर्पितान् ।
कृत्वाथ ब्राह्मणान् सर्व्वानन्नैर्नानाविधैस्तथा ॥
भुक्त्वा चाक्षारलवणमात्मना च विसर्जयेत् ॥
अनुगम्य पदान्यष्टौ पुत्रभार्य्यासमन्वितः ।
प्रीयतामत्र देवेशः केशवः क्लेशनाशनः ॥
शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः ।
यथान्तरं न पश्यामि तथा मे स्वस्ति चायुषः ॥
एवमुच्चार्य्य तान् कुम्भान् गाश्चैव शयनानि च ।
वासांसि चैव सर्व्वेषां गृहाणि प्रापयेद्बुधः ॥
अभावे बहुशय्यानामेकामपि सुसंस्कृताम् ।
शय्यां दद्याद्गुरौ भीम । सर्व्वोपस्करसंयुताम् ॥
इतिहासपुराणानि वाचयित्वातिवाहयेत् ।
तद्दिनं नरशार्दूल । य इच्छेद्विपुलां श्रियम् ॥
तस्मात्त्वं सत्त्वमालम्ब्य भीमसेन । विमत्सरः ।
कुरु व्रतमिदं सम्यक् स्नेहाद्गुह्यतमं मया ।
त्वया कृतमिदं वीर । त्वन्नामाख्यं भविष्यति ।
सा भीमद्वादशी ह्येषा सर्व्वपापहरा शुभा ।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते ॥"

त्वमादिकर्त्ता भव शौकरेऽस्मिन्
कल्पे महावीरवरप्रधान । ।
यस्याः स्मरणकीर्त्तनमप्यशेषं
विनष्टपापस्त्रिदशाधिपः स्यात् ॥
दृष्ट्वा च यामप्सरसामपीशा-
वेश्याकृतामप्यभवान्तरेषु ।
आभीरकन्येति कुतूहलेन
सैवोर्व्वशी संप्रति नाकपृष्ठे ॥
जाताथ सा वैश्यकुलोद्भवापि
पुलोमकन्या पुरुहूतपत्नी ।
तत्रापि तस्याः परिचारिकेयं
मम प्रिया संप्रति सत्यभामा ॥
स्नातः पुरा मण्डलमेष तद्व-
त्तेजोमयं देवशरीरमाप ।
अस्याश्च कल्याणतिथौ विवस्वान्
सहस्रधारेण सहस्ररश्मिः ॥
इदमेव कृतं महेन्द्रमुख्यै-
र्वसुभिश्चैव पुरा सुरादिभिश्च ।
फलमत्र न शक्यतेऽभिवक्तुं
यदि जिह्वाकोटयो मुखे स्युः ॥
कलिकलुषविदारिणीमनन्ता-
मिति कथयिष्यति यादवेन्द्रसूनुः ।
अपि नरकगतान् पितॄनशेषा-
नलमुद्धर्त्तुमिहैव यः करोति ॥
य इदमनघं शृणोति चातिभक्त्या
परिपठतीह परोपकारहेतोः ।
तिथिमिह सकलार्थभाङ्नरेन्द्र-
स्तव चरणेन स साम्यतामुपैति ॥
कल्याणिनी नाम पुरा बभूव
या द्वादशी माघदिनेऽभिपूज्या ।
सा पाण्डुपुत्रेण कृता भविष्य-
त्यनन्तपुण्यानघ । भीमपूर्व्वा ॥"

इति मत्स्यपुराणे भविष्यद्व्रतोद्देशे भीमद्वादशी नाम ६५ अध्यायः ॥

भीरुः, त्रि, (बिभेतीति । भी भये + "भियः क्रुक्लुकनौ ।" ३ । २ । १७४ । इति क्रुः ।) भयशीलः । (यथा, मनौ । ७ । ६२ ।
"तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥")
तत्पर्य्यायः । त्रस्नुः २ भीरुकः ३ भीलुकः ४ । इत्यमरः । ३ । १ । २६ ॥ भीलुः ५ । इति शब्दरत्नावली ॥

भीरुः, स्त्री,(बिभेतीति । भी + "भियः क्रुक्लुकनौ ।" ३ । २ । १७४ । इति क्रुः ।) भयशीला स्त्री । भयप्रकृतिका । इत्यमरभरतौ ॥ (यथा, विष्णुपुराणे । १ । १५ । ३३ ।
"सत्यं भीरु । वदस्येतत् परिहासोऽथवा शुभे । ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥")
शतावरी । इति धरणिः, अमरश्च ॥ (यथा,—
"बहुपुत्री वरा भीरुः शतमूली शतावरी ।
महापुरुषदन्ता च पीवरीन्दीवरी वरी ॥"
इति वैद्यकरत्नमालायाम् ॥)
कण्टकारी । इति शब्दचन्द्रिका ॥ शतपादिका । इति शब्दरत्नावली ॥ अजा । छाया । स्त्री । इति राजनिर्घण्टः ॥

भीरुः, पुं, (बिभेतीति । भी + क्रुः ।) शृगालः । इति शब्दमाला ॥ व्याघ्रः । इति राजनिर्घण्टः ॥ इक्षुभेदः । इति रत्नमाला ॥ अस्य गुणाः । श्लेष्मकारित्वम् । स्वादुत्वम् । अविदाहित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

भीरुकं, क्ली, (भीरु + संज्ञायां कन् ।) वनम् । इति शब्दरत्नावली ॥

भीरुकः, पुं, (भीरु + स्वार्थे संज्ञायां वा कन् ।) पेचकः । इति शब्दरत्नावली ॥ इक्षुभेदः । भोररी इति हिन्दीभाषा ॥ (यथा, सुश्रुते सूत्रस्थाने । ४५ अध्याये ।
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥")
अस्य गुणाः । यथा, भावप्रकाशे ।
"वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुशीतो बृंहणो बल्यः पौण्ड्रको भीरुकस्तथा ॥"

भीरुकः, त्रि,(बिभेतीति । ञिभी भये + "भियः क्रुकन् ।" उणा० २ । ३१ । इति क्रुकन् ।) भययुक्तः । इत्यमरः ॥ कातरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भीरुपत्री, स्त्री,(भीरूणीव पत्राण्यस्याः । गौरादित्वात् ङीष् ।) शतमूली । इत्यमरः ।२।४।१०१॥

भीरुहृदयः, पुं, (भीरु हृदयमस्य ।) मृगः । इति जटाधरः ॥

भीरूः, स्त्री, (भीरु + "ऊङुतः ।" ४ । १ । ६६ । इति ऊङ् ।) भयशीला नारी । इत्यमरटीकायां भरतः ॥

भीलभूषणा, स्त्री, (भूषयतीति । भूष + कर्त्तरि ल्युः । टाप् । भीलानां भूषणा ।) गुञ्जा । इति राजनिर्घण्टः ॥

भीलुः, त्रि, (बिभेतीति । भी + क्लु ।) भीरुः । भयशीलः । इति शब्दरत्नावली ॥

भीलुकः, पुं, (बिभेतीति । भी + "भियः क्रुक्लुकनौ । ३ । २ । १७४ । इति क्लुकन् ।) भीरुः । इत्यमरः । ३ । १ । २६ ॥ (यथा, कथासरित्सागरे । ३७ । ५२ ।
"एतदेवानिमित्तं नः किमन्यन्नाथभीलुक । ।
यत्त्वमस्माभिरानीतः काकशङ्की पदे पदे ॥")
भल्लुकः । इति शब्दरत्नावली ॥

भीषणः, पुं, (भीषयते इति । भी + णिच् + "भियो हेतुभये षुक ।" ७ । ३ । ४० । इति षुक् । भीषिधातुस्ततो नन्द्यादित्वात् ल्युः ।) भयानकरसः । इत्यमरटीकायां भरतः, मेदिनी च ॥ कुन्दुरुकः । कपोतः । हिन्तालः । इति राजनिर्घण्टः ॥ शिवः । इति शब्दरत्नावली । शल्लकी इति मेदिनी ॥ (भयोत्पादने क्ली, । यथा, महाभारते । १५ । ७ । ४ ।
"व्यसनं भेदनञ्चैव शत्रूणां कारयेत्ततः ।
कर्षणं भीषणञ्चैव युद्धे चैव बलक्षयम् ॥")

भीषणः, त्रि, (भीषयते इति । भी + णिच् + ततो नन्द्यादित्वात् ल्युः । षुगागमश्च ।) गाढः । दारुणः । इति मेदिनी । णे, ६८ ॥ (यथा, रघौ । १२ । ४० ॥
"पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥")

भीष्मं, त्रि, (बिभेत्यस्मादिति । भी + "भियः षुग् वा ।" उणा० । १ । १४७ । इति मक् । वा षुगागमश्च ।) भयानकम् । इत्यमरः ।१।७।२०॥ (यथा, शतपथब्राह्मणे । ११ । ६ । १ । ३ ।
"सहोवाच भीष्मं वत भोः पुरुषान् वा ।"
"भीष्मं भयङ्करं ।" इति तद्भाष्ये महीधरः ॥)

भीष्मः, पुं, (बिभेत्यस्मादिति । भी + मक् । षुग् वेति पक्षे षुक् ।) भयानकरसः । इत्यमरटीकायां भरतः ॥ शिवः । राक्षसः । इति हेमचन्द्रः ॥ गाङ्गेयः । स च शान्तनुराज-

चन्द्रवर्म्मिणो गङ्गायां भार्य्यायां जातः। स परम-धर्म्मात्मा महावीरः। येन पितुर्दासकन्या-विवाहार्थे पितृराज्यं त्यक्तं, यश्च स्वस्य विवाहं त्यक्त्वा ऊर्द्ध्वरेता जातः। इति श्रीभागवतम् ॥ तस्योत्पत्तिर्यथा,—

"अथ तामष्टमे जाते पुत्रे प्रहसतीमिव।
उवाच राजा दुःखार्त्तः परीप्सन् सुतमात्मनः ॥
मा वधीः कासि कस्यासि किञ्च हंसि सुता-
निति।
पुत्रघ्नि! सुमहत् पापं संप्राप्तं ते सुगर्हितं! ॥"
स्त्र्युवाच।
"पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतांवर!।
जीर्णस्तु मम वासोऽयं यथा स समयः कृतः ॥
अहं गङ्गा जह्नुसुता महर्षिगणसेविता।
देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह ॥
अष्टौ ये वसवो देवा महाभागा महौजसः।
वशिष्ठशापदोषेण मानुषत्वमुपागताः ॥
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते।
मद्विधा मानुषी धात्री लोके नास्ति कदाचन ॥
तेषाञ्च जननीहेतोर्मानुषत्वमुपागता।
जनयित्वा वसूनष्टौ जिता लोकास्त्वयाक्षयाः ॥
देवानां समयश्चैष वसूनां संश्रुतो मया।
जातं जातं मोचयिष्ये जन्मतो मानुषादिति ॥
तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः।
स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महा-
व्रतम् ॥
एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः।
मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम् ॥"
इत्यादिपर्व्वणि भीष्मोत्पत्तिनाम १०८ अध्यायः ॥

भीष्मजननी, स्त्री, (भीष्मस्य जननी माता।) गङ्गा। इति राजनिर्घण्टः ॥

भीष्मपञ्चकं, क्ली, (भीष्मेण कृतमुपदिष्टं वा पञ्चकं एकादश्यादिपूर्णिमान्तपञ्चतिथिकर्त्तव्यम्।) कार्त्तिकशुक्लपक्षीयैकादश्यादिपूर्णिमान्तपञ्च-तिथिकर्त्तव्यव्रतविशेषः। यथा,—

श्रीनारद उवाच।
"भगवन्! यत् त्वया प्रोक्तं भीष्मस्य च दिनं
महत्।
माहात्म्यं श्रोतुमिच्छामि तस्य मे कथय प्रभो! ॥
कथं स्नानञ्च किं दानं को विधिः कस्य पूजनम्।
किं फलं केन वाकारि तन्मे कथय विस्तरात् ॥"
ब्रह्मोवाच।
तद्भीष्मपञ्चकस्येदं माहात्म्यं विधिपूर्व्वकम्।
वक्ष्यामि फलसंयुक्तं येनेदञ्च कृतं पुरा ॥
अयोध्या नगरी या च कलिकल्मषनाशिनी।
वैष्णवी स्वर्गरम्या च कलिकल्मषनाशिनी ॥
हस्त्यश्वरथपत्त्याढ्या विष्णुचक्रप्रतिष्ठिता।
तस्यामासीन्नरवरः सूर्य्यवंशोद्भवो मुने! ॥
अतिथिर्नाम देवर्षे! धर्म्मात्मा नैकयज्ञकृत्।
तेन दत्तं पुरा राज्ञा कृतं यज्ञमनन्तकम् ॥
भार्य्यया चन्द्रभाविन्या सार्द्धं भीष्मस्य पञ्चकम्।
चिकीर्षुः परिपप्रच्छ वशिष्ठं तद्विधिं द्विज! ॥"

वशिष्ठ उवाच।
"शृणु राजन्! प्रवक्ष्यामि व्रतं सौभाग्य-
दायकम्।
रहस्यं भीष्मपञ्चाख्यं विष्णुतुष्टिप्रदायकम् ॥
कार्त्तिके मासि राजेन्द्र! प्रारभ्यैकादशीतिथिम्।
यावत् पञ्चदशी रम्या भविता चन्द्रपूर्णिता।
पञ्चभीष्ममिति ख्यातं तिथयः पुण्यदाः स्मृताः ॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि।
स्नात्वा सभार्य्यः पुरुषो नद्यादौ विमले जले ॥
तर्पयेद्भीष्मवर्म्माणं कुरुवंशपितामहम्।
पितृभिस्तिलयुक्तैश्च जलाञ्जलिभिरद्भुतैः ॥
वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
तिलतोयाञ्जलिं तस्मै प्रयच्छेद्भीष्मवर्म्मणे ॥
सन्तर्प्य कौरवश्रेष्ठं कुर्य्यादाचमनं ततः।
अर्च्चयित्वा विधानेन चन्दनादिभिरादृतः।
अर्घ्यं दद्याद्यतात्मा च मन्त्रेणानेन भूपते! ॥
वसूनामवताराय शान्तनोरात्मजाय च।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे ॥
इत्थं समापयेद्व्रतम्। भीष्मपञ्चविधिं नरः।
नियमेनोपवासेन पञ्चगव्येन वा पुनः ॥
पयोमूलफलाहारैर्हविष्यैर्नानाविधैरपि।
नरो वा यदि वा नारी मुक्तपापो दिवं व्रजेत् ॥
भुङ्क्ते स विपुलान् भोगान् कार्त्तिकं न
त्यजेद्धि यः।
अतोऽशक्तो नयेत् पञ्चभीष्माख्यं हरिपूर्णितम् ॥
श्रुत्वेतद्विष्णुभक्तोऽसौ भक्त्या त्वचलया सह।
दम्पती च यथा भीष्मं लब्ध्वा तौ तु महाफलम् ॥
स्वल्पायासेन विप्रेन्द्र! कृतं ताभ्यां हि तत् पुरा।
प्राप्तं राज्यं महीमेतां समुद्रवलयान्विताम् ॥
प्रभुज्य प्रचुरान् कामान् व्रतकामौ यथा मुने!।
दिव्याम्बराभरणौ तौ दिव्यमाल्यानुलेपितौ ॥
दिव्यदेहविमानेन सर्व्वकिन्नरसेवितौ।
अप्सरोगीतनृत्येन स्तुतौ देवमहर्षिभिः।
सम्प्राप्तौ विष्णुलोकञ्च भीष्मपञ्चव्रतान्मुने! ॥"
ब्रह्मोवाच।
"इत्येतत् कथितं वत्स! माहात्म्यं कार्त्तिको-
द्भवम्।
भीष्मपञ्चकमाहात्म्यं ह्येतिहासं पुरातनम् ॥
तत् सर्व्वं कुरु विप्रेन्द्र! यदि ते भक्तिरच्युते।
निश्चलः कायमनसा वचसा सुमनोभव ॥"
"इत्थमन्ति मर्त्याश्च पठन्ति ये वै
भूरवतमव्ये भगवद्गुणान् सुने!।
मतिञ्च लब्ध्वा भगवत्प्रशंसन:
कथासुपेन्द्रस्य पुरं प्रयान्ति ॥
कलिमलमपहृत्य प्राणिनो देवदेव
सुभगसकलभोगान् भोजयित्वा च यान्ति।
हरिपुरममरेशैर्गीतवाद्यैर्विशालै-
र्विहितसकलकृत्यास्तोषयन्तो हरिं ये ॥
एतत् कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः।
सर्व्वपापविनिर्म्मुक्तः स मुक्तिं लभते रतिम् ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमहात्म्ये १३२ अध्यायः ॥

अपि च।
"सदा हरेर्व्रतं श्रेष्ठं ततः स्यादृश्चिकायने।
चातुर्म्मास्ये ततस्तस्मात् कार्त्तिके भीष्मपञ्चकम् ॥
ततः श्रेष्ठतमं शुक्ला एकादश्यां समाचरेत्।
स्नायास्त्रिकालं पित्रादीन् यवाद्यैरर्च्चयेद्धरिम् ॥
यजेन्मौनी घृताद्यैस्तु पञ्चगव्येन वारिभिः।
स्नापयित्वाथ कर्पूरमुखैश्चैवानुलेपयेत् ॥
घृताक्तगुग्गुलोर्धूपं द्विजः पञ्चदिनं दहेत्।
नैवेद्यं परमान्नन्तु जपेदष्टोत्तरं शतम् ॥
ॐ नमो वासुदेवाय घृतव्रीहितिलोदकम्।
षडक्षरेण मन्त्रेण स्वाहान्तेन तु होमयेत् ॥
प्रथमेऽह्नि हरेः पादौ यजेत् पद्मैर्द्वितीयके।
विल्वपत्रैर्जानुदेशं नाभिं भृङ्गेण चापरे ॥
स्कन्धौ विल्वैर्जवाभिश्च पञ्चमेऽह्नि शिरोऽर्च्चयेत्।
मालत्या भूमिशायी स्याद्गोमयं प्राशयेत्
क्रमात् ॥
गोमूत्रक्षीरदधि च पञ्चमे पञ्चगव्यकम्।
नक्तं कुर्य्यात् पञ्चदश्यां व्रती स्याद्भुक्तिमुक्ति-
भाक् ॥"
इति गारुडे भीष्मपञ्चादिव्रतं नाम १२३ अध्यायः ॥
वकपञ्चकम्। यथा,—
"आरभ्यैकादशीं पञ्च दिनानि व्रतमाचरेत्।
भगवत्प्रीतये भीष्मपञ्चकं यदि शक्नुयात् ॥
तथा धात्रीव्रतं पौर्णमास्यां कुर्व्वीत कार्त्तिके।
तथा नवम्यां शुक्लायामक्षयं नवमीव्रतम् ॥
पैतामहादिकृच्छ्राणि मासोपोषणमेव च।
समर्थः कार्त्तिके कुर्य्यात् ज्ञात्वा पाद्मादितो
विधिम् ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥

भीष्मरत्नं, क्ली, (भीष्मं भयानकं रत्नं दुर्लभत्वात्।) हिमालयोत्तरदेशजातशुक्लवर्णप्रस्तरविशेषः। तस्योत्पत्त्यादि यथा,—

सूत उवाच।
"हिमवत्युत्तरे देशे वीर्य्यं पतितं सुरद्विषस्तस्य।
सम्प्राप्तमुत्तमानामाकरतां भीष्मरत्नानाम् ॥
शुक्लाः शङ्खाब्जनिभाः स्योनाकसन्निभाः
प्रभावन्तः।
प्रभवन्ति ततस्तस्या वज्रनिभा भीष्मपाषाणाः।
हिमाद्रिप्रतिबद्धं शुद्धमपि श्रद्धया बिभर्त्ति यः।
भीष्ममणिं ग्रीवादिषु स सम्पदं सर्व्वदा लभते ॥
गुणयुक्तस्य तस्यैव धारणान्मुनिपुङ्गव!।
विषाणि तानि नश्यन्ति सर्व्वाण्येव महीतले ॥"
विपमानावाधन्ते ये तमरण्यनिवासिनः समी-
पेऽपि।
द्वीपिवृकशरभकुञ्जरसिंहव्याघ्रादयो हिंस्राः ॥
तस्योत्कवलितकृत्तनं भवन्ति भयं न चापि
समुपास्यतम्।
भीष्ममणिर्गुणयुक्तः सम्यक् संप्राप्ताङ्गुलिव्रितयः।
पितृतर्पणे पितृणां तृप्तिर्बहुवार्षिकी भवति ॥
शाम्यन्त्युद्भूतान्यपि सर्पाखुजाखुवृश्चिक-
विषाणि।
सलिलाग्निवैरितस्करभयानि भीमानि नश्यन्ति ॥

शैवलवलाहकाभं मलिनं पीतप्रभं प्रभाहीनम् ।
मलिनद्युतिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः ॥
मूल्यं प्रकल्पमेषां विबुधवरैर्देशकालविज्ञानात् ।
दूरे भूतानां बहु किञ्चिन्निकटप्रसूतानाम् ॥”
इति गारुडे भीष्मरत्नपरीक्षा नाम ७६ अः ॥

भीष्मसूः, स्त्री, (भीष्मं सूते प्रसूते इति । सू प्रसवे + क्विप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥

भीष्माष्टमी, स्त्री, (भीष्मस्य अष्टमी भीष्मनाशिका अष्टमी वा ।) माघशुक्लाष्टमी । तत्र भीष्मस्य तर्पणादिकं कर्त्तव्यम् । यथा, भविष्योत्तरे ।
“शुक्लाष्टम्यान्तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥”
धवलधृता स्मृतिः ।
“अष्टम्यान्तु सिते पक्षे भीष्माय तु तिलोदकम् ।
अन्नञ्च विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः ॥”
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणशूद्रयोरप्यधिकारः । द्विजातय इति सम्बोधनम् ॥ स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम् ।
“मध्याह्नव्यापिनी ग्राह्या श्राद्धे भीष्माष्टमी तिथिः ।
स्नाने च तर्पणे दाने ग्राह्या सूर्य्योदयी परा ॥
यदा कदाचित् शुक्लायां गता सूर्य्योदयी परा ।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं श्राद्धमेव च ॥
यदेकस्मिन् भवेन्मासि कदाचिन्माकरी द्वयम् ।
भीष्माष्टमी द्वयं वापि तदा ग्राह्या परा तिथिः ॥
ब्राह्मणक्षत्त्रियवर्णानां यः करोत्यौर्द्धदैहिकम् ।
तद्वर्षात्तमसौ याति इह लोके परत्र च ॥”
इति मरीचिवचनन्तु भीष्मकृत्येतरपरम् ॥
तथा च स्मृतिः ।
“ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति ॥
असवर्णजलदाननिषेधस्तु प्रकरणबलादपि श्राद्धादिविषय इति श्रीदत्तः ॥ तर्पणमन्त्रस्तु ।
“वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च ।
अपुत्त्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥
भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्त्रपौत्त्रोचितां क्रियाम् ॥”
इत्याद्यंसामन्त्रः । पुत्त्रपौत्त्रोचितामित्यभिधानात् पितृकर्म्मरीत्या । ब्राह्मणः पितृतर्पणानन्तरं क्षत्त्रियस्तु तत्पूर्व्वं तर्पयेत् । इति संवत्सरप्रदीपाद्यः ॥ इति तिथ्यादितत्त्वम् ॥

भुक्तं, त्रि, (भुज् + कर्म्मणि क्तः ।) भक्षितम् । इत्यमरः । ३ । २ । ११ ॥ (यथा, मनुः । २ । ५५ ।
“पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति ।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम् ॥”
उपभुक्तम् । यथा, रघुः । ४ । ७ ।
“मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरा ॥”
भावे क्तः ।) भक्षणे, क्ली । इति त्रिकाण्डशेषः ॥
(यथा, रामायणे । २ । ५८ । १२ ।
“आचितं ग्रथितं भुक्तं सूत ! रामस्य कीर्त्तय ।
जीविष्याम्यहमेतेन ययातिरिव साधुषु ॥”)

भुक्तसमुज्झितं, त्रि, (आदौ भुक्तं पश्चात् समुज्झितं परित्यक्तम् । स्नातानुलिप्तवत्समासः ।) पूर्व्वं भुक्तं तत् शेषं पश्चात् समुज्झितं त्यक्तम् । तत्पर्य्यायः । फेला २ । इत्यमरः । २ । ९ । ५६ ॥ पिण्डम् ३ फेलिः ४ । इति भरतधृतरभसः ॥

भुक्तिः, स्त्री, (भुज् + क्तिन् ।) भोजनम् । इति शब्दरत्नावली ॥ भोगः । यथा,—
“भुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
आहर्त्ता शोधयेद्भुक्तिमागमञ्चापि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्त्रादिषु न किञ्चन ॥”
इति दायतत्त्वम् ॥
(यथा, मनुः । ८ । २५२ ।
“एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च ॥”)
रविभुक्तिर्यथा,—
“सार्द्धसप्तभसं मेषे वसुः सार्द्धो घटे वृषे ।
दशैव मकरे द्वन्द्वे पलानि प्रतिवासरम् ।
कुलीरसिंहप्रमदातुलालिकार्म्मुकेषु च ।
पलान्येकादश तथा रविभुक्तिं प्रचक्षते ॥”
इति ज्योतीरत्नमाला ॥
भोगः । दखल इति पारस्यभाषा । स च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः । यथा । लिखिताद्यभावे दिव्यमाह याज्ञवल्क्यः ।
“प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥”
इति व्यवहारतत्त्वम् ॥
तद्विवरणं यथा । अथ भुक्तिः । तत्र याज्ञवल्क्यः ।
“पश्यतोऽब्रुवतो हानिर्भूमेर्व्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥”
विवादमकुर्व्वतः समक्षं भूस्वामिनः परेणासपिण्डादिना भुज्यमानाया भूमेर्व्विंशतिवर्षनिर्वृत्ता स्वत्वहानिः । अत्र लोकव्यवहारकर्म्मत्वाद्वर्षगणना सावनेन । यथा च विष्णुधर्म्मोत्तरम् ।
“सत्रायणप्राश्यायन सावनेन
लौकञ्च यत् स्याद्व्यवहारकर्म्म ॥”
तत्रैव ।
“सावने च तथा मासि त्रिंशत् सूर्य्योदयाः
स्मृताः ॥”
इति ॥
विशेषयति व्यासः ।
“वर्षाणि विंशतिं यस्य भूर्भुक्ता तु परैरिह ।
सति राज्ञि समर्थस्य तस्य सेह न विद्यति ॥”
समर्थस्य बालत्वादिदोषरहितस्य । धनस्य दशवर्षनिर्वृत्ता स्वत्वहानिः । तथा च मनुनारदौ ।
“यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥”
यत्किञ्चिद्धनजातं समक्षमेव प्रीत्यादियति-रैकेण परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न रचयति नासौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यतीत्यर्थः । गोतमः । अजडापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति । जडो विकलेन्द्रियः । पौगण्डः पूतोऽनुत्पन्नश्मश्रुगण्डः कपोलो यस्य सः । तदाह नारदः—
“बाल आषोडशाद्वर्षात् पौगण्डश्चापि
शब्द्यते ॥”
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम् । तत्पाठेऽपि अपौगण्डस्तु पौगण्ड इति द्विरूपकोषाद्विरोधः । तस्माद्याजनादेरिव वचनाद्दशवर्षविंशतिवर्षादिकालीनभोग एव स्वत्वं जनयति । यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरवश्च कुसुममिति । स्वामिना चापरित्यक्तेऽपि प्राक्प्रोक्तकालीनभोगात् स्वाम्यमन्यस्य भवति । यथा जयेन राज्ञः परराष्ट्रधन इति । एवमेव श्रीकरबालोकजोल्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचण्डेश्वरवर्द्धमानोपाध्यायप्रभृतयः ॥ व्यवहारोऽप्येतादृशेव । एतद्विरुद्धवचनान्यन्यथा व्याख्येयानि । तत्रोपेक्षया स्वत्वहानिं भुक्त्या च स्वत्वमाह नारदः—
“भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते ।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे ॥”
व्यक्तमाह बृहस्पतिः—
“स्थावरं सिद्धिमाप्नोति भुक्त्या हानिमुपेक्षया ।”
उपेक्षया क्षमया । तत्कारणञ्च स्वामिनः सुशीलत्वमहैष्कृत्वदयालुत्वादि । एवञ्च विंशतिवर्षात् पूर्व्वं स्वकृतिसाध्यकर्षणपालनाद्यैस्तत्पन्नस्य एव स्वत्वम् । एवं दशवर्षात् पूर्व्वं स्वकृतिसाध्यदोहनपालनाद्यैस्तत्पन्नदुग्धादौ एव स्वत्वम् । तत्तत्कालपरतस्तु भूमौ गवादिधने च स्वत्वमिति । पूर्व्वं तत्तन्नाशकभोगे तु चौर्य्यदोषो भवत्येव ॥ * ॥ भोगे तु स्वत्वहानिमाध्यादीनां व्यावर्त्तयति पश्यतोऽब्रुवत इत्यभिधाय याज्ञवल्क्यः—
“आधिसीमोपनिःक्षेपजडबालधनैर्व्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥”
आधिर्बन्धकद्रव्यम् । उपनिःक्षेपः ।
वासनस्थमनाख्याय समुद्रं यन्निधीयते ॥”
इति नारदोक्तेः ॥
वासनस्थं निःक्षेपाधारभूतसम्पुटादिस्थम् । समुद्रं ग्रन्थ्यादियुतम् । जडो बुद्धिविकलः । बालोऽप्राप्तषोडशवर्षः । उपनिधिः प्रीत्या भोगायसमर्पितः । ततश्च आध्यादिभिर्जडादिधनैश्च विना अन्यानि धनानि उक्तभोगकालेन स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति ॥ * ॥ मिताक्षरायां स्मृतिः—
“द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया ।
भुक्तिरेव तु गुर्व्वी स्यान्न दिव्यं न च साक्षिणः ॥”

याज्ञवल्क्यः ।
"आगमोऽभ्यधिको भोगाद्विना पूर्व्वक्रमागतात् ।
आगमः कारणं तत्र भुक्तिः स्तोकापि यत्र नो ॥
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विना कृता ॥"
भूम्यादावागमः पूर्व्वपुरुषक्रमादागतभोगाद्-बलवान् । अतः क्रमागतभोग आगमाद्बलवान् ।
तथा च बृहस्पतिः,—
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
अव्याहता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
त्रिपुरुषभोगमाह व्यासः,—
"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तम् ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः ॥"
आगमोऽपि बलवान्न भवति यत्र स्तोकापि भुक्तिर्नास्ति । तथा च नारदः ।
"विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु ।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् ॥"
इति दीपकलिका ॥
यत्र वादिनौ स्वस्वागमबलप्रवृत्तौ आगमयोश्च पूर्व्वापरभावो न निर्णीयते तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न त्वन्यस्येत्यर्थ इति मिताक्षरा ॥ अर्थात् यत्रागमपौर्व्वापर्य्यनिश्चयस्तत्र ।
"सर्व्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा ॥"
इति याज्ञवल्क्यवचनान्निर्णयः ॥
आगमस्विति आ सम्यग् गम्यते प्राप्यते स्वं भवति येन क्रयादिना स आगम इति व्यवहारमातृका ॥ आगमः साक्षिपत्रादिकमिति याज्ञवल्क्यदीपकलिका ॥ आगमो धनोपार्ज्जनोपायः क्रयादिरिति मैथिलाः ॥ तत्रान्येनाभियुक्त आगमकर्त्ता तत्कृतमुद्धरेत्तत्पुत्रपौत्रौ नागमसुद्धरेतां किन्तु भुक्तिरेव तत्र प्रमाणम् । विशेषयति बृहस्पतिः ।
"आहर्त्ता शोधयेद्भुक्तिमागमञ्चापि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्रादिषु न किञ्चन ॥"
इति शूलपाणिधृतम् ॥
तत्पुत्रादौ न किञ्चनेति मैथिलधृतम् ॥ आहर्त्ता अर्ज्जनकर्त्ता । अत्र पुत्रस्य भुक्तिशोधनमात्रम् । भुक्तिशोधनमाहतुर्व्यासकात्यायनौ ।
"आगमो दीर्घकालश्च निश्छिद्रोऽन्यरवोज्झितः ।
प्रत्यर्थिसन्निधानञ्च पञ्चाङ्गो भोग इष्यते ॥"
प्रमाणमिति शेषः । आगमः क्रयादियुक्तः । एष च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः । योऽभियुक्त इति यो भोगे क्रियमाणे परेणाभियुक्तः परेतो मृतः स्यात्तागमस्तत्कृतवान् तदा तत्पुत्रादिरेव तमुद्धरेत् । तथाह नारदः ।
"अथारूढ़विवादस्य प्रेतस्य व्यवहारिणः ।
पुत्त्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत् ॥
भोगः केवलभोगः । तथा च स एव । आदौ तु कारणं दानं पश्चाद्भुक्तिस्तु सागमेति । एष च विवादभोगः षष्ट्यब्देतरपरः । तथाविधभोगस्यागमं विनापि प्रामाण्यात् । तथा च व्यासः ।
"वर्षाणि विंशतिं भुक्ता स्वामिनाव्याहता सती ।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी ॥
त्रिपौरुषी तु त्रिगुणा न तत्रान्विष्य आगमः ॥"
एतद्वचनमसमक्षभोगविषयकमिति समक्षविंशतिवर्षभोगविषयकवचनेनाविरुद्धम् । एतादृक्स्मृत्युक्तकाश एव कात्यायनः ।
"स्मार्त्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
अस्मार्त्ते त्वागमाभावात् क्रमात्त्रिपुरुषागता ॥"
षष्टिवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिव्यपदेशस्य फलमाह न तत्रेत्यादि । अतएव नारदः ।
"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः ।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतम् ॥"
अन्यायेनेत्यनागममिति शूलपाणिधृतपाठः । तुरप्यर्थः । पित्रा सह पितरमादाय त्रिभिरित्यर्थः । यत्तु ।
"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥"
इति दण्डविधायकव्यासवचनं तद्धर्म्मशास्त्रविरोधात् न सुख्यार्थपरम् । तदाह स एव ।
"यत्र विप्रतिपत्तिः स्याद्धर्म्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रार्थमुत्सृज्य धर्म्मशास्त्रार्थमाचरेत् ॥"
एवमेव शूलपाणिः । वस्तुतस्तु अनागममिति दण्डविधायकवचनं स्त्रीधननरेन्द्रधनपरम् ।
"स्त्रीधनञ्च नरेन्द्राणां न कदाचन जीर्य्यति ।
अनागमं भुज्यमानमपि वर्षशतैरपि ॥"
इति स्वत्वनिषेधकनारदवचनैकवाक्यत्वात् । यत्र विप्रतिपत्तिः स्यादिति वचनस्याप्येतदुदाहरणम् । यत्रैकस्य जयेऽवधार्य्यमाणे मित्रलब्धिरपरस्य जयेऽवधार्य्यमाणे धनलब्धिस्तत्र ।
"हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्ताविति वेदविदां मतम् ॥"
इति याज्ञवल्क्योक्तार्थशास्त्रमुत्सृज्य क्रोधलोभविवर्ज्जित इति धर्म्मशास्त्रमवलम्ब्य व्यवहारं पश्येत् । अतएव ।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः ॥"
इति कात्यायनोक्तमिति । भवदेवस्तु व्यासवचनन्तु प्रतिवादिनोऽसन्निधाने पुरुषैकदयभोगाभिप्रायं त्रैपुरुषिकभोगस्य तत्रापि प्रमाणत्वादित्याहुः ॥
अथ भुक्तिस्वत्वापवादः ।
तत्र बृहस्पतिः ।
"भुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
अस्वामिना च यद्भुक्तं गृहक्षेत्रापणादिकम् ।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते ॥
विवाह्य श्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च ।
सुदीर्घेणापि कालेन तेषां तत्तु न सिद्ध्यति ॥"
आपणो विक्रयस्थानम् । विवाह्यो जामाता । इति च व्यवहारतत्त्वम् ॥

भुक्तिप्रदः, पुं, (भुक्तिं भोगं प्रददातीति । प्र+दा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) मुद्गः । इति राजनिर्घण्टः ॥ भोगदातरि, त्रि ॥

भुग्नः, त्रि, (भुज मोटने+क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) रोगादिना कुटिलीकृतः । तत्पर्य्यायः । रुग्णः २ । इत्यमरः । ३ । १ । ६१ ॥ वक्रः । इति भुजधात्वर्थदर्शनात् । (यथा,—
"ताम्रुणी कलुषे रक्ते भुग्ने स्फुलितपक्ष्मणी ।
अक्षिणी पिल्लिकापार्श्वेन्द्रहं पर्व्वास्थिरुग्भ्रमः ॥"
इति वाभटे निदानस्थाने द्वितीयेऽध्याये ॥
यथा, च भट्टिः । ११ । ८ ।
"पीने भटस्योरसि वीक्ष्य भुग्नां
स्तनुत्वचः पाणिरुहान् सुमध्या ॥")

भुज, ओ श औ वक्रणे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) वक्रणमिति वक्रं करोतीति णौ रूपम् । ओ, भुग्नः । श, भुजति लतां वायुः । औ, भोक्ता । इति दुर्गादासः ॥

भुज, ध औ पाले । भक्षे । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-अनिट् ।) ध, भुनक्ति । औ, अभौक्षीत् । आद्यं पालनम् उपभोगश्च तस्मात् पालने परस्मैपदम् । इति बोध्यम् । भुनक्ति पृथिवीं राजा पालयतीत्यर्थः । उपभोगे तु वृद्धो जनो दुःखशतानि भुङ्क्ते इति । दिवं मरुत्वानिव भोक्ष्यते महीमिति रघुः । एवं सुखमुपभुङ्क्ते इत्यादि च बोध्यम् । भुजोऽशने इत्यत्र भक्षणमात्रस्य ग्रहणेऽपि उपभोगस्य भक्षणजन्यतृप्तिजनकत्वविवक्षया सिद्धिरिति विद्यानिवासः । इति दुर्गादासः ॥

भुजः, पुं स्त्री, (भुजति वक्रो भवतीति । भुज+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । यद्वा, भुज्यतेऽनेनेति । भुज+"हलश्चेति ।" ३ । ३ । १२१ । इति घञ् । इत्यत्र काशिकोक्तेः घञ् । "भुजन्युब्जौ पाण्युपतापयोः ।" ७ । ३ । ६१ । इति घञि गुणाभावः कुत्वाभावश्च निपात्यते ।) तत्पर्य्यायः । बाहुः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० ॥ बाहः ५ बाहा ६ भुजा ७ दोषः ८ दोषा ९ । इत्यमरटीकायां भरतः ॥ करः १० । इति मेदिनी । जे, १३ ॥ (यथा, रघुः । २ । ७४ ।
"भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥")
तस्य शुभाशुभलक्षणम् यथा,—
"कक्षा चाम्बुदला श्रेष्ठा सुगन्धिर्मूढरोमिका ।
अन्यथा अर्थहीनानामसौ निःस्वस्य रोमशौ ॥
निर्म्मांसौ चैव शुष्काक्षौ ह्रस्वौ च विपुलौ भुजौ ।

आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
निःस्वानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ,।"
इति गारुडे ६६ अध्यायः ॥

(हस्तिशुण्डः । यथा, महाभारते ।३।२७०।२१।
"मत्तमत्तस्य नागस्य समीपपरिवर्त्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ॥")
ग्रहस्फुटीकरणार्थं राशित्रयादूनकेन्द्रग्रहादिः ।
राशित्रयादधिकनवपर्य्यन्तषड्भान्तरितावशेषः ।
नवराशिभ्योऽधिकं चेत् तदा द्वादशराशिभ्यः
शोध्यश्च भुजः स्यात् । यथा,—
"दोस्त्रिभोनं त्रिभोर्द्धं विशोध्यं रसै-
श्चक्रतोऽङ्काधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैकं त्रित्रिभैः स्यात् पदं
सूर्य्यमन्दोच्चमध्याद्रयोऽंशा भवेत् ॥"
इति ग्रहलाघवम् ॥

क्षेत्रस्य परिमाणविशेषः । यथा,—
"कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटिं दोः कर्णतः कोटिश्रुतिभ्याञ्च भुजं वद ॥
त्र्यस्रो बाहुयः स्यात्तद्वर्हिन्यां दिशीतरो बाहुः ।
त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णः दोः कर्णवर्गयोर्विवरात् ।
मूलं कोटिः कोटिश्रुतिकृत्योरन्तरात् पदं बाहुः ॥"
इति लीलावत्यां क्षेत्रव्यवहारः ॥

भुजकोटरः, पुं, (भुजस्य कोटर इव ।) कक्षः ।
इति हेमचन्द्रः । ५ । २५३ ॥

भुजगः, पुं, (भुजं वक्रं गच्छतीति । गम् + डः । ३ ।
२ । ३८ । इत्यत्र "खच डिद्वाच्यः ।" वार्त्तिकोक्तेः
डित् । ततः टिलोपः ।) सर्पः । इत्यमरः ।
१ । ८ । ६ ॥ (यथा, मेघदूते । ६२ ।
"तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता ।
क्रीडाशैले यदि च विचरत् पादचारेण गौरी ॥")

भुजगदारणः, पुं, (भुजगं दारयतीति । दॄ +
णिच् + ल्युः ।) गरुडः । इति राजनिर्घण्टः ॥

भुजगाभोजी, [न्] पुं, (भुजगं आ सम्यक्प्रकारेण
भुङ्क्ते इति । भुजग + आ + भुज + णिनिः ।)
मयूरः । इति राजनिर्घण्टः ॥

भुजगान्तकः, पुं, (भुजगस्य अन्तकः ।) गरुडः ।
इति राजनिर्घण्टः ॥

भुजगाशनः, पुं, (भुजगमश्नातीति । अश + ल्युः
भुजगः अशनं यस्येति वा ।) गरुडः । इति
त्रिकाण्डशेषः ॥

भुजङ्गः, पुं, (भुजं वक्रं गच्छतीति । गम + खच् ।
"खच डिद्वाच्य" इति वार्त्तिं डित्त्वपक्षे टिलोपः ।)
सर्पः । (यथा, रघुः । ९ । ७९ ।
"आक्रान्तपूर्व्वमिव मुक्तविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥")
विड्गः । इत्यमरः । १ । ८ । ६ । मेदिनी च ॥
(सीसम् । तद्यथा,—
"सीसं वप्रञ्च वप्रञ्च योगेष्टं नागनामकम् ॥"
नागनामकम् । नागः भुजङ्ग इत्यादि ।)
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अपरञ्च तदर्थे ।
"त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ॥
शुद्धतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनाद्द्वयम् ।
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ॥"
इति वाभटे उत्तरतन्त्रे त्रयोदशेऽध्याये ॥)

भुजङ्गघातिनी, स्त्री, (भुजङ्गं सर्पं तद्विषं वा
हन्तीति । हन + णिनिः । स्त्रियां ङीप् ।
दृष्टविशेषः । कङ्कालिका इति ख्यातः । तत्-
पर्य्यायः । ह्रारिः २ सर्पाक्षी ३ क्षुद्रकरी ४
क्षुद्रा ५ । इति शब्दचन्द्रिका ॥ सर्पनाशिनी च ॥

भुजङ्गजिह्वा, स्त्री, (भुजङ्गस्य जिह्वेव आकृति
र्यस्याः ।) महासमङ्गा । इति राजनिर्घण्टः ॥
(भुजङ्गस्य जिह्वा ।) सर्परसना च ॥ (विवरण-
मस्या महासमङ्गाशब्दे ज्ञातव्यम् ॥)

भुजङ्गप्रयातं, क्ली, (भुजङ्गवत्प्रयातं गतिरिव
भङ्गीमान् शब्दविन्यासो यस्य ।) द्वादशाक्षर-
पादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
"यदाद्यचतुर्थन्तथा सप्तमञ्चेत्
तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥"
(अधिकन्तु छन्दःशब्दे ज्ञातव्यम् ।)

भुजङ्गभुक्, [ज्] पुं, (भुजङ्गं भुङ्क्ते इति । भुज् +
क्विप् ।) गरुडः । इति शब्दरत्नावली ॥ मयूरः ।
इत्यमरः । २ । ५ । ३० ॥ (मयूरार्थे पर्य्यायो
यथा,—
"मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो वर्हा शिखण्डी नीलकण्ठकः ॥
शुक्लापाङ्गः कलापी च मेघनादः कलाप्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

भुजङ्गभोजी, [न्] पुं, (भुजङ्गं भुङ्क्ते इति ।
भुज + णिनिः ।) राजसर्पः । इति हेमचन्द्रः ॥

भुजङ्गमः, पुं, (भुज कौटिल्ये + इगुपधेति कः ।
भुजः कुटिलीभवन् गच्छतीति । भुज +
गम् + "गमेः सुपि वाच्यः ।" ३ । २ । ३८ ।
इत्यस्य वार्त्तिकात् खच् । "खच्डिद्वाच्यः ।" इति
डिद्भावे टिलोपाभावः ।) सर्पः । इत्य-
मरः । १ । ८ । ६ । (यथा, रघुः । ६ । ७७ ।
"आरूढ़मद्रीनुदधीन् वितीर्णं
भुजङ्गमानां वसतिं प्रविष्टम् ॥")
सीसके, क्ली । इति राजनिर्घण्टः ॥

भुजङ्गलता, स्त्री, (भुजङ्गवत् कुटिला तत्प्रिया
वा लता ।) नागवल्ली । इति राजनिर्घण्टः ॥

भुजङ्गहा, [न्] पुं, (भुजङ्गं हन्तीति । हन् +
क्विप् ।) गरुडः । इति त्रिकाण्डशेषः ॥

भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पुष्पं यस्याः ।
"अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।
गौरादित्वात् ङीप् ।) रास्ना । इत्यमरः ।
२ । ४ । ११५ ॥ (रास्ना भेदनाद इति लोके ।
तथास्याः पर्य्यायान्तरम् ।
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भुजङ्गाख्यः, पुं, (भुजङ्गस्य आख्या आख्या यस्य ।)
नागकेशरः । इति शब्दमाला वर्णनामके,
त्रि ॥

भुजशिरः, [स्] क्ली, (भुजस्य शिर इव ।)
स्कन्धः । इत्यमरः ॥ २ । ६ । ७८ ॥

भुजा, स्त्री, (भुज + टाप् ।) बाहुः । करः । इति
मेदिनी । जे,१३॥ (यथा, शिशुपालवधे ।७।७१।
"अविरलकुसुमावचायखेदा
न्निहितभुजालतयैकयोपकण्ठम् ॥")

भुजाकण्टः, पुं, (भुजायाः करस्य कण्ट इव ।)
हस्तनखः । इति हेमचन्द्रः ॥

भुजादलः, पुं, (भुजाया बाहोर्दल इव ।) हस्तः ।
इति त्रिकाण्डशेषः ॥

भुजान्तरं, क्ली, (भुजयोरन्तरं मध्यम् ।) क्रोड़म् ।
इत्यमरः ।२।६।७७॥ (वक्षः । यथा, रघुः।३।५४।
"दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्व्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥"
भुजस्यान्तरं प्रभेदः ।) हस्तप्रभेदश्च ॥

भुजिः, पु, (भुनक्ति भुङ्क्ते वा सर्व्वानिति ।
भुज + "भुजेः किच्च ।" उणा० ४ । १४१ । इति
इः । स च कित् । सर्व्वभक्षकत्वादस्य तथा
त्वम् ।) वह्निः । इत्युणादिकोषः ॥ (भुज + भावे
इः । भोगः । यथा, ऋग्वेदे । ८ । ६१ । ६ ।
"आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥"
"सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव
भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च
समुद्र वाससमग्निं आहुवे आह्वयामि ।" इति
तद्भाष्ये सायनः ॥ * ॥ भोक्तरि, त्रि । यथा,
ऋग्वेदे । ८ । ८ । २ ।
"भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥"
"हे भुजी हविषां भोक्तारौ ।" इति तद्भाष्ये
सायनः ॥)

भुजिष्यः, पुं, (भुङ्क्ते स्वाम्युच्छिष्टमिति भुज्यते
इति वा भुज + "रुचिभुजिभ्यां किष्यन् ।"
उणा० ४ । १७८ । इति किष्यन् ।) स्वतन्त्रः ।
हस्तसूत्रम् । दासः । इति मेदिनी । ये,६८ ॥
(यथा, माघे । १५ । ६३ ।
"किमहो नृपाः समममीभि-
रुपपतिसुतैर्न पञ्चभिः ।
वध्यमभिहत भुजिष्यमसुं
सह चानया स्थविरराजकन्यया ॥")
रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भुजिष्या, स्त्री, (भुजिष्य + टाप् ।) दासी ।
(यथा, रघुः । ६ । ५३ ।
"अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं
बालामबालेन्दुमुखीं बभाषे ॥")
गणिका । इति मेदिनी । ये, ६८ ॥

भुज्युः, पुं, (भुज्यतेऽनेनेति । भुज भक्षणे + "भुजिमृङ्भ्यां युक्त्युकौ ।" उणा० ३ । २१ । इति युक् ।) भाजनम् । इत्युणादिकोषः । २ । २०३ ॥ भाजनम् । (भुङ्क्ते सर्व्वानिति । भुज + कर्त्तरि युक् ।) अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (स्वनामख्यातराजविशेषः । यथा, ऋग्वेदे । ४ । २७ । ४ ।

"ऋजिप्य ईमिन्द्रावतो न भुज्युं
श्येनो जभार बृहतो अधिष्णोः ॥"

भुनक्ति पालयतीति । भुज पालने + युक् । रक्षके, त्रि । यथा, ऋग्वेदे । ८ । २२ । २ ।
"पूर्व्वायुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्व्यम् ॥"
"भुज्युं भुजपालने सर्व्वस्य रक्षकम् ॥" इति तद्भाष्ये सायनः ॥)

भुञ्जन्, [त्] त्रि, (भुज् + शतृ ।) भोगकर्त्ता । भुजधातोः शतृप्रत्ययनिष्पन्नोऽयम् ॥

भुञ्जानः, पुं, (भुज् + शानच् ।) भोगकर्त्ता । यथा,—
"भुञ्जानो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(तथा च ।
"अग्नितश्चोदकं युक्त्या भुञ्जानश्चान्तरा पिबेत् ॥"
इति सुश्रुते सूत्रस्थाने । ४६ अ, ॥)

भुरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति । भृञ् + "भृञ उच्च ।" उणा० २ । ७२ । इति इजिः । धातोरुकारान्तादेशः ।) पृथिवी । इत्युणादिकोषः ॥ (द्विवचनान्तत्वे । बाहू । द्यावापृथिव्यौ च । यथा, ऋग्वेदे । ४ । २ । १४ ।

"रथं न क्रन्तो अपसा भुरिजो
ऋतं येमुः सुध्य आशुषाणाः ॥"

"भुरिजोः बिभ्रतः कर्म्मकरणसामर्थ्यं पदार्थान् वेति भुरिजौ बाहू तयोः । यद्वा, भुरिजोः देवान् मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ ।" इति तद्भाष्ये सायनः ॥)

भुवनं, क्ली, (भवन्त्यस्मिन् भूतानीति । भू + "भूसूधूभ्रस्जिभ्यश्छन्दसि ।" उणा० २ । ८० । इत्यत्र बहुलवचनाद्भाषायामपि प्रयुज्यते ।" इत्युज्ज्वलदत्तोक्त्या क्युन् ।) जगत् । (यथा, भट्टिः । १ । १ ।

"गुणैर्व्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम् ॥")

सलिलम् । गगनम् । जनः । इति मेदिनी । ने, १०२ ॥ चतुर्द्दशभुवनानि यथा,—
"चतुर्द्दशविधं ह्येतद् भूतसर्गं प्रकीर्त्तितम् ।
भूर्भुवः स्वर्म्महश्चैव जनश्च तप एव च ॥
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ।
जम्बूः शाकः कुशः क्रौञ्चः शाल्मली मेदपुष्करः ।
सप्तद्वीपाः प्रधानानि ह्युपद्वीपैस्तु संयुताः ॥
लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः ।
सुरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत् ।
चत्वारः सागराः ख्याताः पुष्करिण्यश्च ताः स्मृताः ॥
उत्तराः कुरवो रम्यं वर्षं हैमवतं तथा ।
भद्राश्वं केतुमालञ्च तथा वर्षमिलावृतम् ॥
भारतं हरिवर्षञ्च तथा किंपुरुषावृतम् ।
एतान्यष्टौ तु वर्षाणि पुण्यानि कथितानि तु ॥
इन्द्रद्युम्नः कसेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागवीथी तथा सौम्यो गान्धर्व्वो वारुणस्तथा ॥
सागराख्यस्तु नवमो भेदभारतवार्षिकः ।
इदन्तु भारतं वर्षं कर्म्मभूमिरिति स्मृतम् ॥
शेषाणि द्वीपवर्षाणि भोगस्थानानि सन्त्यपि ।
भागीरथी पावनी च ह्रादिनी ह्लादिनी तथा ॥
सीता वंक्षुश्च सिन्धुश्च सप्त गङ्गाः प्रकीर्त्तिताः ।
सुप्रभा काञ्चनी चैव विशाला सुमनोह्रदाः ॥
सरस्वत्योघनादा च सुवेणुर्विमलोदका ।
एता गङ्गास्तु विख्याताः सप्त पुण्यप्रदाः शुभाः ॥
हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः ।
श्वेतश्च शृङ्गवांश्चैव माल्यवान् गन्धमादनः ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारिपात्रश्च कैलासो मन्दरस्तथा ॥
लोकालोको महाशैलस्तथैवोत्तरमानसः ।
एते विंशतिर्विख्याताः पर्व्वतास्तूत्तमा वराः ॥
अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् ।
महातलं रसातलं पातालं सप्तमं स्मृतम् ॥
कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम् ।
रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि ॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् ।
सुषिरं तानि कथ्यन्ते भुवनानि चतुर्द्दश ॥"
इति वह्निपुराणम् ॥

(भूतजातम् । यथा, ऋग्वेदे । १ । १५७ । ५ ।
"युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।"
तथा च वाजसनेयसंहितायाम् । ६ । ५ ।
"यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत् ॥" * ॥ भावनम् । यथा, ऋग्वेदे । १० । ८८ । १ ।
"तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त ॥" * ॥ पुं, मुनिविशेषः । यथा, महाभारते । १३ । २६ । ८ ।
"नितम्भूर्भुवनो धौम्यः शतानन्दोऽकृतव्रणः ॥")

भुवनको(श)ष, पुं, (भुवनस्य कोष इव ।) भूगोलः । (अस्य विवरणं श्रीभागवते पञ्चमस्कन्धे । १६ । १७ । १८ । अध्याये द्रष्टव्यम् ॥ तथा च ।

"जम्बुप्लक्षशाल्मलकुशक्रौञ्च-
शाकपुष्करसंज्ञाः सप्त द्वीपाः ।
लक्षयोजनप्रमाणाज्जम्बु-
द्वीपादुत्तरोत्तरद्विगुणाः ॥ १ ॥

लवणसुरासर्पिर्दधिदुग्धस्वच्छोदकसंज्ञैः परस्परद्विगुणैः ।
सप्तसमुद्रैर्वलयाकारैस्ते द्वीपाः परिधिष्ठिताः ॥
योऽसौ मनुपुत्त्रः प्रियव्रतो नाम स सप्तद्वीपाधिपतिर्बभूव । तस्य अग्नीध्रादयो दश पुत्त्रा बभूवुः ॥३॥ त्रयः प्रव्रजिताः । शिष्टानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः । तत्र जम्बुद्वीपाधिपतेराग्नीध्रस्य नव पुत्त्रा जाताः ॥४॥

नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्मयश्चैव कुरुभद्रश्च केतुमान् ॥५॥

नववर्षाणि विभज्य पुत्त्रेभ्यः पित्रा दत्तानि वनं प्रविशता । अग्नीध्रेऽयं हिमाह्वयम् । यस्याधिपतिर्नाभिः ऋषभः पुत्त्रो बभूव ॥६॥ ऋषभाद्भरतो भरतेन चिरकालं धर्म्मेण पालितत्वादिदं भारतं वर्षमभूत् । इलावृतस्य मध्ये मेरुः सुवर्णमयश्चतुरशीतिसहस्राणि योजनानि तस्योच्छ्रायः । षोड़शसहस्रमप्यधस्तादवगाढ़ः तद्द्विगुणो मूलविस्तारः ॥६॥ तन्मध्ये ब्रह्मणः पुरी । ऐन्द्र्यामिन्द्रस्य चामरावती । आग्नेय्यामग्नेस्तेजोवती । याम्यां यमस्य संयमनी । नैरृत्यां निरृतेर्भयङ्करी । वारुण्यां वरुणस्य विश्वावती । वायव्यां वायोर्गन्धवती । उदीच्यां सोमस्य विभावरीति नववर्षान्वितं जम्बूद्वीपं पुण्यपर्वतैः पुण्यनदीभिरन्वितम् ॥७॥ किंपुरुषादीन्यष्टवर्षाणि पुण्यवतां भोगस्थानानि साक्षाद्भारतवर्षमेकं कर्मभूमिश्चातुर्वर्ण्ययुतम् ॥ ८ ॥

तत्रैव कर्म्मभिः स्वर्गं कृतैः प्राप्नुवन्ति मानवाः ।
मुक्तिश्चात्रैव निष्कामैः प्राप्यते ज्ञानकर्मभिः ॥९॥
अधोगतिमितो विप्र ! यान्ति वै पापकारिणः ।

ये पापकारिणस्तान् विद्धि पातालतले नरके कोटिसमन्वितान् ॥ १० ॥ अथ सप्तकुलपर्वताः कथ्यन्ते । माहेन्द्रः । मलयः शुक्तिमान् ऋष्यमूकः सह्यपर्वतः विन्ध्यः पारियात्रः । इत्येते भारते कुलपर्वताः ॥ ११ ॥ नर्मदासुरसाऋषिकुल्याभीमरथीकृष्णावेणीचन्द्रभागाताम्रपर्ण्यौ इत्येताः सप्त नद्यः गङ्गायमुनागोदावरीतुङ्गभद्राकावेरीसरयूरित्येता महानद्यः पापघ्न्यः ॥ १२ ॥

जम्बुनाम्ना च विख्यातं जम्बुद्वीपमिदं शुभम् ।
लक्षयोजनविस्तीर्णमिदं श्रेष्ठं तु भारतम् ॥१३॥

प्लक्षद्वीपादिपुण्या जनपदाः निष्कामा ये स्वधर्म्मेण नरसिंहं यजन्ति ते तत्र निवसन्ति अधिकारक्षयात् मुक्तिं च प्राप्नुवन्ति ॥१४॥ जम्बाद्याः स्वादूदकान्ताः सप्त पयोधयः । ततः परा हिरण्मयी भूमिः । ततो लोकालोकपर्वतः एष भूर्लोकः ॥ १५ ॥ अस्योपरि अन्तरिक्षलोकः खेचराणां रम्यस्तदूर्ध्वं स्वर्गलोकः ॥१६॥

स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे ।
भारते कृतपुण्यानां देवानामपि चालयम् ॥१७॥
मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः ।
योजनानां सहस्राणि चतुरशीतिसुच्छ्रितः ॥१८॥
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः ।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः ॥ १९ ॥
तस्य शृङ्गत्रयं मूर्ध्नि स्वर्गो यत्र प्रतिष्ठितः ।
नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम् ॥२०॥
मध्यमं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि त्रीणि वै ।
मध्यमं स्फाटिकं शृङ्गं वैदूर्य्यमणिकामयम् ॥२१॥
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम् ।
योजनानां सहस्राणि नियुतानि चतुर्द्दश ॥२२॥
उच्छ्रितं मध्यमं शृङ्गं स्वर्गो यत्र त्रिविष्टपः ।
अप्रभान्तरितं शृङ्गं मूर्ध्नि कृष्णातिक्षितम् ।

पूर्व्वोत्तरस्य शृङ्गाणां अन्तरं मध्यमस्य च ।
त्रिविष्टपो नाकपृष्ठे ह्यप्सराः सन्ति निर्वृताः ॥ २४ ॥
आनन्दोऽथ प्रमोदश्च स्वर्गशृङ्गे तु मध्यमे ।
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ ॥ २५ ॥
आह्लादः स्वर्गराजा वै स्वर्गशृङ्गे तु पश्चिमे ।
निर्म्ममो निरहङ्कारः सौभाग्यश्चातिनिर्म्मलः ॥ २६ ॥
स्वर्गाश्चैव द्विजश्रेष्ठ । पूर्व्वशृङ्गे समाश्रिताः ।
एकविंशानि स्वर्गा वै निविष्टा मेरुमूर्द्धनि ॥ २७ ॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा ।
तेषु निवसन्ति ते जनाः क्रोधविवर्ज्जिताः ॥ २८ ॥
जलप्रवेशे चानन्दं प्रमोदं वह्निसाहसे ।
भृगुप्रपाते सौख्यं च रणे चैवास्य निर्म्मलम् ॥ २९ ॥
अनाशके तु संन्यासे मृतो गच्छेत्त्रिविष्टपम् ।
क्रतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृ-
तिम् ॥ ३० ॥
तडागकूपकर्त्ता च लभते पौष्टिकं द्विजः ।
सुवर्णदायी सौभाग्यं लभन् स्वर्गतपःफलम् ॥ ३१ ॥
शीतकाले महावह्निं प्रज्वालयति यो नरः ।
सर्व्वसत्त्वहितार्थाय स्वर्गं सोऽप्सरसं लभेत् ॥ ३२ ॥
हिरण्यगोप्रदाने हि निरहङ्कारमाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥ ३३ ॥
रौप्यदानेन स्वर्गं तु निर्म्मलं लभते नरः ।
अश्वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥ ३४ ॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचते ॥ ३५ ॥
कपिलागोप्रदानेन परमार्थे महीयते ।
गोवृषस्य प्रदानेन स्वर्गं मन्मथमाप्नुयात् ॥ ३६ ॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्रोपानहदाता च स्वर्गं यात्युपशोभनम् ॥ ३७ ॥
देवतायतनं कृत्वा द्विजशुश्रूषकस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्त्यो नक्तभोजी च नित्यशः ।
उपवासी त्रिरात्राद्यैः शान्तः स्वर्गं शुभं
लभेत् ॥ ३९ ॥
सरित्स्नायी जितक्रोधो ब्रह्मचारी दृढव्रतः ।
निर्म्मलं स्वर्गमाप्नोति यथाभूतहिते रतः ॥ ४० ॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥ ४१ ॥
तत्तत्स्वर्गमवाप्नोति यद्यदिच्छति मानवः ।
चत्वारि अतिदानानि कन्या गौर्भूः सरस्वती ॥ ४२ ॥
नरकादुद्धरन्त्येते जपवाहनदोहनात् ।
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्यः प्रय-
च्छति ॥ ४३ ॥
संप्राप्य न निवर्त्तेत स्वर्गं शान्तमनामयम् ।
शृङ्गे तु पश्चिमे यत्र ब्रह्मा तत्र स्थितः स्वयम् ॥ ४४ ॥
पूर्व्वशृङ्गे स्वयं विष्णुः मध्ये चैव शिवः स्थितः ।
अतः परं तु विप्रेन्द्र । स्वर्गाख्यानमिमं शृणु ॥ ४५ ॥
विमलं विपुलं शुद्धसुपर्य्युपरिसंस्थितम् ।
प्रथमे तु कुमारस्तु द्वितीये मातरः स्थिताः ॥ ४६ ॥
तृतीये सिद्धगन्धर्व्वा तुर्य्ये विद्याधरा द्विज ।
पञ्चमे नागराजा च षष्ठे तु विनतासुतः ॥ ४७ ॥
सप्तमे दिव्यपितरो धर्म्मराजस्तथाष्टमे ।
नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥ ४८ ॥
भूर्लोकाच्छतसाहस्रादूर्द्ध्वं चरति भास्करः ।
योजनानां सहस्रे द्वे विष्कम्भनसमं ततः ॥ ४९ ॥
त्रिगुणं परिणाहेन सूर्य्यबिम्बं प्रमाणतः ।
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां तदा तिष्ठति भास्करः ॥ ५० ॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्करः ।
तदा संयमने याम्ये तत्रोद्यंस्तु प्रदृश्यते ॥ ५१ ॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येव सविता सदा ।
ध्रुवाधारस्तथोत्तिष्ठन् वालखिल्यादिभिः
स्तुतः ॥ ५२ ॥
इति श्रीनरसिंहपुराणे भुवनकोषे त्रिंशो-
ऽध्यायः ॥ ३० ॥)
भुवन्युः, पुं, (भवतीति । "कन्युच् क्षिपेश्च ।"
उणा० ३ । ५१ । इति चकारात् भूधातोरपि
कन्युच् ।) सूर्य्यः । वह्निः । चन्द्रः । इति मेदिनी ।
ये, ६८ ॥ प्रभुः । इत्युणादिकोषः ॥
भुवर्लोकः, पुं, (भुवश्चासौ लोकश्चेति ।) भूरादि-
सप्तलोकान्तर्गतद्वितीयलोकः । यथा,—
"भूमिसूर्य्यान्तरं यच्च सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम । ॥"
इति विष्णुपुराणे । २ अंशे ७ अध्यायः ॥
(यथा च भागवते । २ । ५ । ८ ।
"भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य
नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥")
भुवः, [स्] व्य, (भवतीति । भू+"भूरञ्जिभ्यां
कित् ।" उणा० ४ । २१६ । इति असुन् स च
कित् ।) आकाशः । इति हेमचन्द्रः ॥
(महाव्याहृतिभेदः । यथा, मनुः । २ । ७६ ।
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयान्निरदुहत् भूर्भुवः स्वरितीति च ॥")
भुविः, [स्] क्ली, (भवतीति भवत्यस्मिन् रत्नादीनि
वा । भू+"भुवः कित् ।" उणा० २ । ११३ ।
इति इसिन् । स च कित् ।) समुद्रः । इत्यु-
णादिकोषः ॥
भू, सत्तायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-अक०-सेट् ।) सत्ता च द्विविधा । उत्पत्ति-
र्विद्यमानता च । भवति मनुष्योऽथवा विष्णुः ।
इति दुर्गादासः ॥
भू, क शुद्धिचिन्तयोः । मिश्रणे । इति कविकल्प-
द्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, स्त्र्य-
वद्भावयति द्विजः सर्व्वान् । चयोऽर्थाः । इति
दुर्गादासः ॥
भू, क ङ प्राप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-
आत्म०-सक०-सेट् ।) क ङ, भावयते । इति
दुर्गादासः ॥
भू, ञ प्राप्तौ । इति कविकल्पद्रुमः । (भ्वा०-उभ०
सक०-सेट् ।) ञ, भवति भवते धनं धीरः ।
भवत्येव सत्तायां प्राप्तिसम्पत्तजल्लाञ्छति भङ्ग-
मल्लः । भवति दुरितक्षयं यथोक्तक्रतुभिर्भावयते
च नाकलोकमिति हलायुधः । केचित्तु
आत्मनेपदिनं मत्वा प्राप्तौ परस्मैपदं सत्तार्थ-
त्वेनानेकार्थत्वात् समाधत्ते । इति दुर्गादासः ॥
भू, व्य, (भू+क्विप् ।) रसातलम् । इति हेमचन्द्रः ॥
भूः, स्त्री, (भवत्यस्मिन्निति । भू+अधिकरणे
क्विप् ।) पृथिवी । इत्यमरः । २ । १ । २ ॥ (यथा,
मनुः । ७ । ६ ।
"न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षि-
तुम् ॥"
यथा च वैद्यकरत्नमालायामस्याः पर्य्यायः ।
"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः ।
क्षितिरुर्व्वी मही क्षौणी क्ष्मा धरा कुर्व्वसु-
न्धरा ॥")
स्थानमात्रम् । इति मेदिनी । भे, १ ॥ (यथा,
भागवते । ६ । ४ । ३१ ।
"यच्छक्तयो वदतां वादिनां वै
विवादसंवादभुवो भवन्ति ॥"
यज्ञाग्निः । इति जटाधरः ॥
भूकं, क्ली, (भवतीति । भू+"इण्भीकापाशल्यतिमर्चिभ्यः
कन् ।" उणा० ३ । ४१ । इति कक् ।) छिद्रम् ।
कालः । इति मेदिनी । के, ३० ॥
भूकः, पुं, (भू+कक् ।) अन्धकारः । इति शब्द-
माला ॥
भूकदम्बः, पुं, (भुवि कदम्ब इव ।) अलम्बुषदृक्षः ।
इति रत्नमाला ॥ कोकसीम । इति भाषा ॥
भूकदम्बकः, पुं, (भूकदम्ब+संज्ञायां कन् ।)
यवानी । इति राजनिर्घण्टः ॥ (विवृतिविशेषो-
ऽस्य यवानीशब्दे ज्ञातव्यः ॥)
भूकन्दः, पुं, (भुवः पृथिव्याः कन्द इव ।) महा-
श्रावणिका । इति राजनिर्घण्टः ॥ गुलकुण्डी ।
इति भाषा ॥
भूकम्पः, पुं, (भुवः पृथिव्याः कम्पः ।) भूमि-
कम्पनम् । स च अद्भुतविशेषः । यथा,
अद्भुतसागरे ।
"मेषे वृश्चिकभे गजः प्रचलति व्याघादिभिः
कम्पते
चापे मीनकुलीरभे च वृषभे सत्यं चलेत् कच्छपः ।
युक्ते कुम्भधरे मृगेन्द्रमिथुने कन्याङ्गने पन्नग-
स्तेषामेकतमो यदि प्रचलति क्षौणी तदा
कम्पते ॥
"कच्छपे मरणं ज्ञेयं मरणञ्चापि पन्नगे ।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे ॥
प्रथितनरेश्वरमरणं व्यसनान्याग्नेयमारुतयोः ।
क्षुद्भयमतिवृष्टिभिरपपोच्यन्ते जनाश्चापि ॥
त्रिचतुर्थपञ्चमदिने मासे पक्षे त्रिपक्षके ।
भवति यदा भूकम्पः प्रधाननृपनाशनं कुरुते ॥"
स च भूमिजोत्पातविशेषः । यथा,—
"चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् ।
जलाशयानां वैकृत्यं भौमन्तदपि कीर्त्तितम् ॥
भौमं चाल्पफलं ज्ञेयं चिरेण परिपच्यते ।"
इति ज्योतिस्तत्त्वम् ॥
भूकर्ब्बुदारकः पुं, वृक्षविशेषः । छोटालसोड़ा
इति हिन्दी भाषा । तत्पर्य्यायः । श्लेष्मा-

लकः २ भूशिम्बुः ३ लघुशिम्बुः ४ लघुपिच्छिलः ५ लघुशीतः ६ रूक्षपत्रः ७ लघुभूतद्रुमः ८ भूकर्बुदारः ९ । अस्य गुणाः । मधुरत्वम् । कृमिमूत्रनाशित्वम् । वातप्रकोपकत्वम् । किञ्चित् शीतत्वम् । श्लेष्मकारकत्वञ्च । इति राजनिर्घण्टः ॥

भूजलः, पुं, (भुवः पृथिव्याः जलः ।) दुर्विनीताश्वः । इति राजनिर्घण्टः ॥

भूकश्यपः, पुं, (भुवि पृथिव्यां कश्यप इव भुवः कश्यप इति वा ।
"तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः ।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले ॥"
इति हरिवंशीयवचनेनास्य कश्यपांशसम्भूतत्वात् तथात्वम् ।) वसुदेवः । इति त्रिकाण्डशेषः ॥

भूकाकः, पुं, (भुवि ख्यातः काकः ।) स्वल्पकङ्कः । क्रौञ्चः । नीलकपोतः । इति शब्दरत्नावली ॥

भूकुम्भी, स्त्री, (भुवि कुम्भीव ।) भूपाटली । इति राजनिर्घण्टः ॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव ।) विदारी । इति राजनिर्घण्टः ॥

भूकेशः, पुं, (भुवः पृथिव्याः केश इव ।) शैवलः । वटः । इति मेदिनी । शे, २६ ॥

भूकेशा, स्त्री, (भूकेश + टाप् ।) राक्षसी । इति शब्दरत्नावली ॥

भूकेशी, स्त्री, (भूकेश + स्त्रियां ङीप् ।) अवल्गुजः । इति मेदिनी । शे, २७ ॥

भूक्षित्, पुं, (भुवं क्षितिं क्षिणोतीति + क्षिद + क्विप् ।) शूकरः । इति त्रिकाण्डशेषः ॥

भूखर्ज्जूरी, स्त्री, (भूसंलग्ना खर्ज्जूरी । शाकपार्थिववादिवत् समासः ।) क्षुद्रखर्ज्जूरी । तत्पर्य्यायः । भूयुक्ता २ वसुधाखर्ज्जूरिका ३ भूमिखर्ज्जूरी ४ । अस्या गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥

भूगरं, क्ली, (भुवः पृथिव्या गरम् ।) विषम् । इति राजनिर्घण्टः ॥

भूगर्भः, पुं, भवभूतिः । स च मालतीमाधवादिनाटककर्त्ता । इति जटाधरः ॥ (भूः सर्व्वभूताश्रयभूता पृथ्वी गर्भे कुक्षौ यस्येति । विष्णुः । यथा, महाभारते । १३ । १४९ । २१ ।
"हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥")

भूगोलः, पु, (भूर्गोलो मण्डलमिव ।) भुवनकोषः । (यदुक्तं सूर्य्यसिद्धान्ते ।
"मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति ।
बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् ॥")

तस्य विवरणम् । यथा,—
"प्रकृतेस्तु महान् जातोऽहङ्कारो महतः पुनः ।
तस्माच्चापि ह्यहङ्कारात् शब्दः स्पर्शोऽथ रूपकम् ॥
रसो गन्धश्च पञ्चैव गुणा नाम प्रकीर्त्तिताः ।
पञ्चेमानि महाभाग ! महाभूतानि संग्रहात् ।
तेभ्य एव प्रजातानि सर्व्वाणि गुणवन्ति च ॥
भूमिरापस्तथा वायुरग्निराकाशमेव च ।
गुणोत्तराणि सर्व्वाणि तेषां भूमिः प्रधानतः ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
भूमावेते गुणाः प्रोक्ता ह्रसन्ति परतः क्रमात् ॥
चत्वारोऽप्सु गुणा ब्रह्मन् ! गन्धस्तत्र न वर्त्तते ।
शब्दः स्पर्शश्च रूपञ्च त्रय एव हि तेजसि ॥
शब्दः स्पर्शोऽथ वायोस्तु आकाशे शब्द एव हि ।
एते पञ्च गुणाः प्रोक्ता महाभूतेषु पञ्चसु ॥
वर्त्तन्ते सर्व्वभूतेषु येषु लोकाः प्रतिष्ठिताः ।
अन्योन्यं नातिवर्त्तन्ते साम्यम्भवति वै तदा ॥
यदा तु विषमं भावमाविशन्ति परस्परम् ।
तदा देहवियोगः स्याद्देहिनां नान्यथा द्विज ! ॥
अनुपूर्व्वा विनश्यन्ति जायन्ते चापि सर्व्वशः ।
सर्व्वाण्यपरिमेयाणि तदेषां रूपमैश्वरम् ॥
तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः ।
तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥*॥
जम्बुद्वीपं प्रवक्ष्यामि वात्स्यायन महात्मने ! ॥
परिमण्डलो महाभाग ! द्वीपोऽसौ चक्रवत् स्थितः ।
नदीगिरिप्रतिच्छन्नो विविधैः पत्तनैरपि ॥
वनैर्जनपदैर्वृक्षैस्तथा पुष्पफलोपगैः ।
लवणेन समुद्रेण समन्तात् परिवारितः ॥
प्रागायता महाभाग । षडेते रत्नपर्व्वताः ।
अवगाढा ह्युभयतः सागरौ पूर्व्वपश्चिमौ ॥
हिमवान् हेमकूटश्च निषधश्च नगोत्तमः ।
नीलः श्वेतः शृङ्गवांश्च रत्नधातुविचित्रिताः ॥
अयुतानि योजनानि उच्छ्रायास्तेषु कीर्त्तिताः ।
पृथुत्वे च द्विसाहस्रयोजनास्ते च पर्व्वताः ॥
तेषामन्तरविष्कम्भो नवसाहस्रयोजनः ।
वर्षे वर्षे प्रमाणन्तु वर्षाणि नौणि दक्षिणे ॥
तत्र पुण्या जनपदास्तेषु वर्षेषु तापस ! ।
वसन्ति तेषु सर्व्वाणि सत्त्वानि विविधानि च ॥
दक्षिणे भारतं वर्षमुत्तरे लवणोदधेः ।
कूलादेव महाभाग ! तस्य सीमा हिमालयः ॥
ततः किंपुरुषं वर्षं हेमकूटादधस्ततः ।
हरिवर्षं ततो ज्ञेयं निषधोऽवधिरुच्यते ॥
एवमेवोत्तरे त्रीणि वर्षाणि च तपोधन ! ।
कुरुवर्षं सिन्धुकूलात् शृङ्गवानवधिः स्मृतः ॥
हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते ।
रम्यकञ्च ततो वर्षं नीलस्तस्यावधिः स्मृतः ॥
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ।
प्रागायतो महाभाग ! माल्यवान्नाम पर्व्वतः ॥
पश्चिमे तु तथैवास्ते पर्व्वतो गन्धमादनः ॥
पूर्व्वे समुद्रकूलात्तु भद्राश्वं नाम वर्षकम् ॥
माल्यवानवधिस्तस्य केतुमालञ्च पश्चिमे ।
गन्धमादनसीमान्तं नवसाहस्रयोजनम् ॥*॥
परिमण्डलयोर्म्मध्ये मेरुः कनकपर्व्वतः ।
आदित्यतरुणाभासो विधूम इव पावकः ॥
लक्षयोजन उच्छ्रायो न्यूनं चापि तु षोडश ।
योजनानां सहस्राणि मूले चापि तु षोडश ॥
विस्तृतः स महाभाग ! भूमिष्ठं मूलमस्य तु ।
प्रविष्टमन्तर्भूम्यां वै षोडशैव सहस्रकम् ॥
ऊर्द्धमन्तश्च तिर्य्यक् च लोकानावृत्य तिष्ठति ।
तस्य पीतावृतं वर्षं सर्व्वतः परिकीर्त्तितम् ॥
विहगः सुमुखो यस्तु सुपर्णस्यात्मजः किल ।
स वै विचिन्तयामास सौवर्णान् प्रेक्ष्य वायसान् ॥
मेरुरुत्तममध्यानामधमानाञ्च पक्षिणाम् ।
अविशेषकरो यस्मात्तस्मादेनं त्यजाम्यहम् ॥
तमादित्योऽनुपर्य्येति सततं ज्योतिषां वरः ।
चन्द्रमाश्च सनक्षत्रो वायुश्चैव प्रदक्षिणम् ॥
स पर्व्वतो महाभाग । दिव्यपुष्पसमन्वितः ।
भवनैरावृतः सर्व्वैर्जाम्बूनदमयैः शुभैः ॥
तत्र देवगणा ब्रह्मन् ! गन्धर्व्वासुरराक्षसाः ।
अप्सरोगणसंयुक्ताः शैले क्रीडन्ति सर्व्वदा ॥
अवष्टम्भकरास्तस्य मन्दरो मेरुमन्दरः ।
सुपार्श्वः कुमुदश्चेति चतुर्दिक्षु स्थिता द्विज ! ॥
अयुतयोजनोत्साहास्तावद्विस्तारसंयुताः ।
चतुर्ष्वेतेषु धर्म्मज्ञ ! चूतजम्बूकदम्बकाः ॥
न्यग्रोधश्चापि चत्वारः पादपा ब्राह्मणर्षभ ! ।
सहस्रयोजनोत्साहास्तावद्विटपविस्तृताः ॥
केतुभूताः पर्व्वतानां विशालाः शतयोजनम् ।
ह्रदाश्च तत्र चत्वारः पयोमध्विक्षुवारिदाः ॥
देवोद्यानानि चत्वारि ह्रे चैत्ररथनन्दने ।
सर्व्वतोभद्रमित्येवं तथा वैभ्राजकं वनम् ॥
तेषु देवस्त्रियो नित्यं विहरन्ति सुरैः सह ।
गन्धर्व्वाः किन्नराश्चैव तथान्ये सिद्धचारणाः ॥
गायन्तो मधुरं दिव्यं स्त्रीभिः क्रीडन्ति तापस ! ।
चूतो यो मन्दरोत्सङ्गेऽयुतयोजनसुच्छ्रितः ॥
फलान्यमृतकल्पानि पतन्त्यस्य सुदूरतः ।
तेषां विशीर्य्यमाणानां रसैर्जाता या नदी ॥
अरुणोदा नाम सैव वहते मन्दराचलात् ।
यक्षाः सर्व्वे मानवा भवानीप्रियपार्षदाः ॥
रसदेहसौरभेणापि समन्तादृशयोजनम् ।
सुगन्धयन्ति वातेन वात्स्यायन ! तदद्भुतम् ॥
एवं जम्बूफलानाञ्च पततां मेरुमन्दरे ।
हस्तिकायप्रमाणानां रसैर्जाता महानदी ॥
सैव जम्बूनदी नाम दक्षिणेन इलावृतम् ।
तीरयोरुभयोरेव जम्बूरसपरिप्लुता ॥
मृत्तिकैव सुवर्णं स्यात् वाय्वर्कैकिरणान्वयात् ।
तच्च जाम्बूनदं हेम नानाभरणसंस्थितम् ॥
देवोपदेवगन्धर्व्वा धारयन्ति सह स्त्रिया ।
यो वै महाकदम्बश्च सुपार्श्वोपरि तापस ! ॥
तत्कोटरेभ्यः पञ्चैव मधुधाराः स्रवन्ति वै ।
पञ्चायामपरीणाहाः पश्चिमेन इलावृतम् ॥
यासां रसांश्च भुञ्जानाः सुमुखोद्गारवायुना ।
सुगन्धयन्ति धर्म्मज्ञ ! समन्तात् शतयोजनम् ॥
कुमुदाग्रनिरूढो यः शतवल्शो वटो महान् ।
स्कन्धेभ्यस्तस्य नद्यस्तु उत्तरेण इलावृतम् ॥
पयस्विनीदधिक्षीराज्यमधुस्रवाः ।

गुह्यकेति पञ्चैव यावां दर्शनविवर्ज्जनात् ॥
वलीपलितदौर्गन्ध्यजरादोषो न विद्यते ।
कुरङ्गकुरवः प्रश्नः कुसुम्भः शिखरस्तथा ॥
वैकङ्कश्च त्रिकूटश्च पर्व्वतौ वपकर्षभौ ॥
पतङ्गनिषधौ नागश्चितिवासत्रिकूटकाः ।
हंसवैदूर्य्यकपिला द्वौ कालञ्जरजारुधी ॥
गिरयो मूलदेशे तु सुमेरोः परिकल्पिताः ॥
जठरो देवकूटश्च द्वौ नगौ मेरुपूर्व्वतः ।
अष्टादशसहस्राणि योजनान्युदगायतौ ॥
पृथुतुङ्गौ द्विसाहस्रयोजनं तापसर्षभ ! ।
पवनः पारियात्रश्च मेरोः पश्चिमतः स्थितौ ॥
तथा प्रमाणौ कैलासकरवीरौ तु दक्षिणे ।
प्रागायतावुत्तरेण त्रिशृङ्गमकरौ तथा ॥
अष्टाभिरेतैर्गिरिभिर्भाति काञ्चनपर्व्वतः ।
मेरोर्मूर्द्धनि विप्राग्र्य ! मध्ये विश्वसृजः पुरी ।
चतुरस्रा शातकौम्भी योजनायतविस्तृता ॥
दिक्‌पालानां तथा पूर्य्यः पूर्व्वादिषु यथाक्रमम्
ब्रह्मपुर्य्याश्चतुर्थेन भागेन परिकल्पिता ॥
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः ।
समेत्य विविधैर्यज्ञैर्यजन्ते भूरिदक्षिणैः ॥
तुम्बुर्नारदश्चैव विश्वावसुर्हाहाहूहूः ।
अभिगम्यामरश्रेष्ठं स्तुवन्ति विविधैः स्तवैः ॥
सप्तर्षयो महात्मानः कश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्व्वणि पर्व्वणि ॥
तस्यैव मूर्द्धन्युशना काव्यो दैत्यैर्महीयते ।
तस्य हैमानि रत्नानि तस्येमे रत्नपर्व्वताः ॥
तस्मात् कुवेरो भगवांश्चतुर्थं भागमश्नुते ।
ततः कलांशं वित्तस्य मनुष्येभ्यः प्रयच्छति ॥
पार्श्वे तस्योत्तरे दिव्यं सर्व्वर्त्तुकुसुमान्वितम् ।
कर्णिकारवनं रम्यं शिलाजालसमुद्गतम् ॥
तत्र साक्षान्महादेवो भौमैर्भूतैः समावृतः ।
पार्व्वत्या सह देवेशो रमते भूतभावनः ॥
कर्णिकारमयीं मालां दधदापादलम्बिनीम् ॥
तस्य शैलस्य शिखरात् क्षीरधारा महामते ! ।
विश्वरूपा परिमिता भीमनिर्घातनिस्वना ॥
पुण्या पुण्यतमैर्जुष्टा गङ्गा भागीरथी शुभा ।
तां धारयामास तदा दुर्द्धरां पर्व्वतैरपि ॥
शतं वर्षसहस्राणां शिरसैव पिनाकधृक् ।
मेरोस्तु शिखराद्देवी भिद्यमाना चतुर्विधा ॥
सीता चालकनन्देति वङ्क्षुर्भद्रेति कीर्त्तिता ।
सीता तु ब्रह्मसदनात् केशरादिमहाचलान् ॥
अतिक्रम्य प्रस्रवन्ती गन्धमादनमूर्द्धसु ।
पतित्वा द्विज ! वर्षञ्च भद्राश्वं पुनती क्रमात् ।
प्राच्यां दिशि महाभाग ! प्रविष्टा लवणोदधिम् ॥
माल्यवच्छिखराद्वङ्क्षुः पतित्वा केतुमालके ।
प्रतीच्यां दिशि विप्रेन्द्र ! प्रविवेश सरित्पतिम् ॥
भद्रा चोत्तरतो मेरुशिखरात् पतिता गिरीन् ।
अतिक्रम्य शृङ्गवतः शृङ्गाद्वेगेन पातुका ।
उत्तरांश्च कुरून् प्राप्य प्रविष्टा लवणार्णवम् ॥
तथैवालकनन्दा च पतन्ती गिरिमूर्द्धसु ।
हिमालयं विनिर्भिद्य भारतं वर्षमेत्य च ।
लवणाम्बुधिमभ्येति दक्षिणस्यां दिशि द्विज ! ॥

मेरोस्तु पश्चिमे पार्श्वे केतुमालो महामते ! ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ॥
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ।
वीतरोगशोकभया नित्यमानन्दवर्त्तिनः ।
जायन्ते मानवास्तत्र तप्तकनकप्रभाः ॥ * ॥
गन्धमादनशृङ्गेषु कुवेरः सह राक्षसैः ।
अप्सरोगणगन्धर्व्वैर्मोदते गुह्यकाधिपः ॥
गन्धमादनपार्श्वे तु गण्डशैलाः सहस्रशः ।
एकादशसहस्राणि वर्षाणां परमायुषः ॥
तत्र हृष्टा नराः सर्व्वे बलवीर्य्यपराक्रमाः ।
स्त्रियश्चोत्पलपत्राभाः सर्व्वाः सुप्रियदर्शनाः ॥
उत्तराः कुरवश्चैव भारतश्च महामते ! ।
धनुःसंस्थे महाभाग ! द्विवर्षे दक्षिणोत्तरे ॥
इलावृतं मध्यमन्तु पञ्चवर्षाणि चैव हि ।
उत्तरोत्तरमेतेभ्यो वर्षमुद्रिच्यते गुणैः ॥
अपरेषु च वर्षेषु सर्व्वेषु भारतं विना ।
आयुःप्रमाणं लोकानां दशवर्षसहस्रकम् ॥
एवमेषा महाभाग ! पृथिवी पर्व्वतैश्चिता ॥”
इति पद्मपुराणे भूमिखण्डे भूगोलवर्णने १२८ अध्यायः ॥

शेष उवाच ।

“नवस्वेतेषु वर्षेषु भगवान् भूतभावनः ।
अनुग्रहाय लोकानामास्ते मायावपुर्हरिः ॥
इलावृते तु भगवान् भव एकः सहोमया ।
आस्ते विहारनिरतो नान्यस्तत्र पुमान् द्विज ! ॥
भवानीशापतो ब्रह्मन् ! प्रविशेन्न कदाचन ।
यत्र प्रविष्टो मोहेन सुतो वैवस्वतस्य वै ॥
इलः स्त्रीभावमापन्नो यस्यां जातः पुरूरवाः ।
तत्र सङ्कर्षणं देवं कलां विष्णोर्महात्मनः ।
भवो भवान्या सहितः स्तौति भक्तिसमन्वितः ॥
भद्राश्वे द्विज ! वर्षे तु हयग्रीवाकृतिर्हरिः ।
वसते वर्षपुरुषास्तं स्तुवन्ति जगद्गुरुम् ॥ * ॥
हरिवर्षे तु भगवान्नरसिंहवपुर्धरः ।
स्तूयते दैत्यपतिना प्रह्लादेन महात्मना ॥
केतुमाले च भगवान् कामदेवस्वरूपवान् ।
प्रजापतेर्दुहितृभिः सहैव रमया मुदा ॥
स्तूयते परया भक्त्या जगन्मोहनरूपधृक् ॥ * ॥
रम्यके भगवानास्ते मत्स्यरूपी दयापरः ।
मनुर्वैवस्वतस्तञ्च स्तौति भक्त्या स्तुतैः स्तवैः ॥ * ॥
हिरण्मये तु भगवानास्ते कूर्म्मतनुं दधत् ।
पितृाधिराजस्तं स्तौति भक्त्या परमया युतः ॥
कुरुवर्षे च भगवान् वराहः संवसेत् जनैः ।
तं देवी यं क्षितिः स्तौति तद्धर्म्मपतिभिः सह ॥
वर्षे किंपुरुषे ब्रह्मन् ! भगवानादिपूरुषः ।
सीतया विहरन्नास्ते सततं लक्ष्मणाग्रजः ॥
तत्र किंपुरुषैः सार्द्धं भक्त्या मारुतनन्दनः ।
मार्ष्टिषेणेन च सह स्तौति भक्त्या विभावितः ॥
भारते च तथा वर्षे नरनारायणावृषी ।
नारदः स्तौति भगवान् भगवन्तौ कृताञ्जलिः ॥
द्वीपेऽस्मिन् बहवः सन्ति गिरयः सरितस्तथा ।
देशाश्च बहवो ब्रह्मंस्तांस्ते वक्ष्याम्यनुक्रमात् ॥
मेरोरुत्तरतः सर्व्वान् पर्य्यायेण ब्रवीम्यहम् ।

दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ॥
उत्तराः कुरवो नाम पुण्याः सिद्धनिषेविताः ।
तत्र वृक्षा मधुफला नित्यं पुष्पफलोपगाः ॥
सुगन्धीनि च पुष्पाणि फलानि रसवन्ति च ।
सर्व्वे कामदुघा वृक्षा लताः कामप्रपूरिकाः ॥
अपरे क्षीरिणो नाम तरवो मुनिपुङ्गव ! ।
ये स्रवन्ति सदा क्षीरं रसैरमृतसन्निभम् ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्व्वा मणिमयी भूमिः सूक्ष्महाटकवालुका ॥
सर्व्वर्त्तुसुखदा नित्यं पङ्कशर्करवर्ज्जिता ।
स्वर्गभोगावशेषेण जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्व्वे चारुसुखाम्बुजाः ।
मिथुनानि च जायन्ते स्त्रियः सुरसुतोपमाः ॥
तेषान्ते क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम् ।
मिथुनं जायते काले समन्ताच्च प्रवर्द्धते ॥
तुल्यरूपगुणोपेतं तुल्यवेशवयस्तथा ।
निरामया निराबाधाः सदानन्दविवर्त्तिनः ॥
एकादशसहस्राणि तत्र वर्षाणि वै जनाः ।
जीवन्ति ते महाभाग ! न चान्योन्यं त्यजन्ति च ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
तान्निर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च ॥
उत्तराः कुरवो ब्रह्मन् ! व्याख्यातास्ते समासतः । * ।
हिरण्मये रम्यके च एष धर्म्मः प्रकीर्त्तितः ॥
मेरोः पार्श्वमहं पूर्व्वं वक्ष्ये ब्रह्मन् ! यथातथम् ।
भद्राश्वे भद्रश्रवा नाम तत्र ब्रह्मन् ! महीपतिः ॥
भद्रसालवनं यत्र कालाम्रश्च महाद्रुमः ।
कालाम्रो नाम वृक्षोऽसौ सिद्धचारणसेवितः ॥
योजनैकसमुत्सेधो नित्यपुष्पफलः शुभः ।
तत्र ते पुरुषाः श्वेतास्तेजोयुक्ता महाबलाः ॥
कुमुदाभाः स्त्रियस्तत्र चारुगात्राः सुलोचनाः ।
चन्द्राभचारुरूपाश्च पूर्णचन्द्रनिभाननाः ॥
नृत्यगीतकलाभिज्ञाश्चन्द्रशीतलकान्तयः ।
दशवर्षसहस्राणि तत्रायुर्मानवर्षभ ! ॥
कालाम्ररसपानेन नित्यं सुस्थिरयौवनाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
सर्व्वकामफलः पुण्यः सिद्धचारणसेवितः ॥
द्वीपख्यातिकरः श्रीमान् सहस्रयोजनोच्छ्रितः ।
अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ॥
परिणाहस्तु वृक्षस्य रसानां रसभेदिनाम् ।
तरुणादित्यवर्णाश्च जायन्ते तत्र मानवाः ॥ * ॥
तथा माल्यवतः शृङ्गे दृश्यते हव्यवाहनः ।
नाम्ना सम्वर्त्तको नाम कालाग्निः प्रलयेऽन्तकृत् ॥
तथा माल्यवतः शृङ्गे पूर्व्वे पूर्व्वानुगण्डिकाः ।
योजनानां सहस्राणि पञ्चषण्माल्यवान् द्विज ! ॥
महारजतसङ्काशा जायन्ते तत्र मानवाः ।
ब्रह्मलोकच्युताः सर्व्वे जायन्ते तत्र वै नराः ॥
तपस्तप्यन्ति ते तीव्रं भवन्ति ह्यूर्द्धरेतसः ।
रक्षणार्थन्तु भूतानां न विशन्ति दिवाकरम् ॥
षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अरुणस्याग्रतो यान्ति परिवार्य्य दिवाकरम् ॥

षष्टिं वर्षसहस्राणि षष्टिमेव शतानि च ।
आदित्यतपसस्ते सर्व्वे विशन्ति शशिमण्डलम् ॥"
इति पाद्मे भूमिखण्डे भूगोले १२८ अध्यायः ॥*॥
शिव उवाच ।
दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु ।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः ।
दशवर्षसहस्राणि शतानि दश पञ्च च ॥
जीवन्ति ते महाभाग ! नित्यं मुदितमानसाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
वर्षं हिरण्मयं नाम तत्र हैमन्वती नदी ।
तत्र चायं महाभाग ! पक्षिराट् पन्नगोत्तमः ॥
यक्षानुगाश्च बहवो धनिनश्च महाबलाः ।
एकादशसहस्राणि वर्षाणां ते महामते ! ॥
आयुःप्रमाणं जीवन्ति शतानि दश पञ्च च ।
शृङ्गाणि च विचित्राणि त्रीण्येव ब्राह्मणर्षभ ! ॥
एकं मणिमयं तत्र द्वितीयं रौक्ममद्भुतम् ।
सर्व्वरत्नमयञ्चैव तृतीयं तत्र शोभते ॥
यत्र स्वयम्प्रभा देवी नित्यं वसति शाण्डिली ।
हेमकूटस्तु सुमहान् कैलासो नाम पर्व्वतः ॥
यत्र वै यवनो राजा गुह्यकैः सह मोदते ।
अस्त्युत्तरेण कैलासं मैनाकं पर्व्वतं प्रति ॥
हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः ।
तस्य पार्श्वे महद्दिव्यं शुभ्रकाञ्चनवालुकम् ॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ।
दृष्ट्वा पुण्यापगां गङ्गामुवास बहुलाः समाः ॥
यूपा मणिमयास्तत्र चैत्याश्चापि हिरण्मयाः ।
तत्रेष्ट्वा तु गतः सिद्धिं सहस्राक्षो महायशाः ॥
स्रष्टा भूतपतिर्यत्र सर्व्वलोकैः सनातनः ।
उपास्यते तिग्मतेजा यत्र भूतैः समन्ततः ॥
नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः ।
तत्र दिव्या त्रिपथगा प्रथमन्तु प्रतिष्ठिता ॥
ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते ।
वस्वोकसारा नलिनी पावनी च सरस्वती ॥
जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी ।
अचिन्त्या दिव्यसङ्काशा प्रभावेण समन्विता ॥
उपासते यत्र सत्रं सहस्रयुगपर्य्यये ।
दृश्यादृश्या च भवति तत्र तत्र सरस्वती ॥
एता दिव्याः सप्त गङ्गास्त्रिषु लोकेषु विश्रुताः ।
रक्षांसि वै हिमवति हेमकूटे तु गुह्यकाः ॥
सर्पा नागाश्च निषधे गोकर्णञ्च तपोवनम् ।
देवासुराणां सर्व्वेषां श्वेतपर्व्वत उच्यते ॥
गन्धर्व्वा निषधे नित्यं नीले ब्रह्मर्षयस्तथा ।
शृङ्गवांश्च महाभाग ! देवानां प्रतिसञ्चरः ।
इत्येतानि महाभाग ! सप्त वर्षाण्यनुक्रमात् ॥
भूतान्यपि निविष्टानि गतिमन्ति ध्रुवाणि च ।
तेषामृद्धिर्बहुविधा दृश्यते दैवमानुषी ।
अशक्या परिसंख्यातुं श्रद्धेया तु बुभुत्सुना ॥
इलावृते तु भगवान् भवान्या सह मोदते ।
इत्येवमष्टौ वर्षाणि कथितानि तवानघ ! ॥*॥
कर्म्मचैवं महापुण्यं भारतं शृणु साम्प्रतम् ।
प्रियमिन्द्रस्य देवस्य मनोर्वैवस्वतस्य च ॥

पृथोस्तु ब्रह्मन् ! वैण्यस्य तथेक्ष्वाकोर्महात्मनः ।
ययातेरम्बरीषस्य मान्धातुर्नहुषस्य च ॥
तथैव मुचुकुन्दस्य शिवेरौशीनरस्य च ।
सोमकस्य च राजर्षेर्गाधेश्चैव महात्मनः ॥
ऋषभस्य तथैलस्य दिलीपस्य महात्मनः ।
कुशिकस्य च धर्म्मज्ञ ! नृगस्य नृपतेस्तथा ॥
अन्येषाञ्च महाभाग ! क्षत्रियाणां बलीयसाम् ।
शृणु मे गदतो ब्रह्मन् ! सर्व्वपापप्रणाशनम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्व्वताः ॥
तेषां सहस्रशो ब्रह्मन् ! गिरयस्तु समीपतः ।
धातुश्चित्राः सत्त्ववन्तो महान्तश्चित्रसानवः ॥
आर्य्या म्लेच्छाश्च धर्म्मज्ञ ! तैर्मिश्राः पुरुषा द्विज ! ।
नदीं पिबन्ति विपुलां गङ्गां सिन्धुं सरस्वतीम् ॥
शतद्रुं चन्द्रभागाञ्च विपाशां स्थूलवालुकाम् ।
गोदावरीं नर्म्मदाञ्च यमुनाञ्च महानदीम् ॥
दृषद्वतीं विपाशाञ्च बाहुदां सरितां वराम् ।
नदीं वेत्रवतीञ्चैव पयोष्णीं देविकामपि ॥
वेदस्मृतिं वेदशिनीं चित्रसेनाञ्च निम्नगाम् ।
करीषिणीं चित्रवहां कृष्णवेण्वां सुपुण्यदाम् ॥
इरावतीं वितस्ताञ्च त्रिदिवामिक्षुलां कृमिम् ।
गोमतीं धूतपापाञ्च त्रिचितां लोहितारणीम् ॥
कौशिकीं त्रिदिवां कृत्यां सरयूञ्च महामते ! ।
चर्म्मण्वतीं वेत्रवतीं चन्द्रनाञ्च महानदीम् ॥
रहस्यां शतकुम्भाञ्च शान्तसोमां दिशन्तथा ।
शरावतीं पयोष्णीञ्च वाजिनीं पुरमालिनीम् ॥
पूर्व्वाभिरामां धीराञ्च वापीं शीतवनीमपि ।
पलाशिनीं पापहरां सुप्रयोगां महामते ! ॥
कावेरीञ्चुलुकाञ्चापि वेण्वां भीमरथीमपि ।
रहस्यां शतकुम्भाञ्च कृष्णवीरां महानदीम् ॥
पलाशिनीं पापहरां हेमां छत्रवतीं तथा ।
मरुतीं प्रवरां मेनां महेन्द्रां पाटलावतीम् ॥
पुरावतीमनुष्णाञ्च कृष्णधारां महानदीम् ।
सदानीरामहव्याञ्च तथा चीरवतीमपि ॥
करीषिणीमसिक्नीञ्च विपुलां सहिरण्मयीम् ।
सदाकान्तां शिवाञ्चैव पञ्चमीञ्च महानदीम् ॥
विर्ण्णां वीरकराञ्चापि विश्वामित्रां कपिञ्जलाम् ।
वसुं सुवर्ण्णां गौरीञ्च कुवेरामम्बुवाहिनीम् ॥
रथचित्रां ज्योतिरथां तुङ्गवेण्णां महानदीम् ।
वैलन्दीं पिङ्गलाञ्चैव तुङ्गवेण्णां महानदीम् ॥
विदिशां कृष्णवेण्णाञ्च हविःस्रावां महापगाम् ।
सन्ध्यां समाद्यां वेदाश्वीं भारद्वाजीञ्च निम्नगाम् ॥
शोणाञ्च पिच्छिलाञ्चैव कौशिकीं निम्नगामपि ।
दुर्गां मल्लशिलाञ्चैव ब्रह्ममेध्यां दृषद्वतीम् ॥
परोक्षामथ रोहीञ्च सामान्यां वरणामसिम् ।
सुरसां तमसां दासीं पर्णाशाञ्च महानदीम् ॥
मालवीं वृषभां भासां ब्रह्ममेध्यां दृषद्वतीम् ।
एताश्चान्याश्च बहवो वै महानद्यो द्विजर्षभ ! ॥
सदा निरामया कृष्णा मन्दगा मन्दवाहिनी ।
चित्रोपला चित्ररथा दुर्गापि पापहारिणी ॥
ब्रह्माणी च महागौरी कोषा चापि महानदी ।

शुक्तिमती मनङ्गा च मञ्जुला वाहिनी तथा ।
कुमारी ऋषिकुल्या च नदी मन्दाकिनी तथा ।
सुवर्णा च तथा गङ्गा मारिषा च सरस्वती ॥
लौहित्यं करतोया च तथैव वृषकाह्वया ।
विश्वस्य मातरश्चैताः सर्व्वाश्चैव महाफलाः ॥
तथा नद्यस्त्वप्रकाशाः शतशश्च सहस्रशः ।
इत्येताः सरितो ब्रह्मन् ! समाख्याता यथानघ ! ॥
वक्ष्यामि पर्व्वतांश्चापि भारते सन्ति ये द्विज ! ।
मलयो मङ्गलप्रस्थो मैनाकश्च त्रिकूटकः ॥*॥
ऋषभः कूटकः कोलः सह्यो देवगिरिस्तथा ।
श्रीशैलो ऋष्यमूकश्च शुक्तिमानृक्ष एव च ॥
द्रोणश्च पारिपात्रश्च रैवतः ककुभस्तथा ।
गोवर्द्धनश्चित्रकूटो नीलो गोकर्ण एव च ॥
कोकामुख इन्द्रकीलस्तथा कामगिरिर्द्विज ! ।
अतःपरं जनपदान् वक्ष्यामि द्विजसत्तम ! ॥
विख्याताः कुरुपाञ्चालाः शाल्वा माद्रेय-जाङ्गलाः ।
मत्स्याः कुशट्टा सौगन्ध्या भोजाः सिन्धुपुलिन्दकाः ॥
शूरसेनाः पुलिन्दाश्च कुन्तयः कौशिकोशलाः ।
पाञ्चालाः कौशलाश्चैव बोधा मालास्तथैव च ॥
चेदिमत्स्यकरूषाश्च नैकपृष्ठा युगन्धराः ।
उत्तमाश्च दशार्णाश्च काशयोऽपरकाशयः ॥
कुन्तयोऽवन्तयश्चैव मलजा विजयास्तथा ।
आधिराज्याः सकुट्टाश्च चक्रवक्रातयः शकाः ॥
मानवास्योपवाहाश्च यक्षलोमान एव च ।
वार्क्षीका वाटधानाश्च शकुलाशर्म्मचक्रकाः ॥
मल्लाः सुदेष्णाः प्रह्लादा माहिषाः शशिकास्तथा ।
अपरान्ताः परान्ताश्च आभीराः कालतोयकाः ॥
अटवीशिखराश्चैव मेरुभूताश्च मारिष ! ।
उपवित्त्यानुवित्त्याश्च अङ्गाः कुरुवर्णकाः ॥
कुट्टाः परान्ता माहेया मागधा मालवच्छटाः ।
अन्ध्राश्च बहवो ब्रह्मन् ! कच्छाः सामुद्रनिष्कुटाः ॥
वहिर्गिर्य्योऽङ्गमलदा अन्तर्गिर्य्यस्तथैव च ।
बह्युत्तराः प्राड्वेयाः सुदेष्णा यामुनास्तथा ॥
शका निषादा निषधा भार्गवाश्च द्विजर्षभ ! ।
पुण्ड्रा भोगाः किराताश्च तथैवानर्त्तनैर्ऋताः ॥
तीरग्रहाः शूरसेनाः कुन्तलाः कुशलास्तथा ।
तिलभारा मशावाश्च गान्धारा दर्शकास्तथा ॥
काश्मीराः सिन्धुसौवीरा दरदिका कच्छकागताः ।
अभीसाहा कुलूताश्च मधुमत्ताः कुकुन्दकाः ॥
इलवट्टाश्च धर्म्मज्ञ ! सौबला बाह्लिकास्तथा ।
दर्व्वीवरा जता दर्व्वाः सुदामानः सुमल्लिकाः ॥
वनायवो दशाः पार्श्वरोमाणः कुशिकास्तथा ।
इलवट्टाश्च धर्म्मज्ञ ! वाद्ययामरथोरगाः ॥
रम्भाः करीषकाश्चापि कुलिन्दोपत्यकास्तथा ।
कच्छा गोपालकच्छाश्च मूषिका वानवासिकाः ॥
किराता वर्व्वराः सिद्धाः पार्व्वतीयाश्च मारिष ॥

कोङ्कणेस्था: स्वैरिन्ध्रा वैदेहास्ताम्रलिप्तका: ।
तथापरे जनपदा दक्षिणा ब्राह्मणर्षभ ।।
द्रविडा: केरला: प्राच्या विकल्पन्तवकास्तथा ॥
कोवेट्टकास्तथा चोला: सौन्दरा मलका मला: ।
अविन्युत्तमसंकेता कोङ्कवेङ्कटमालवा: ॥
दक्षका: कोरका: प्राच्या: कुक्कुराङ्गार-
मारिका: ।
तथैव विन्ध्यचूलिकास्त्रिगर्त्ता: शाल्वसेनय: ॥
समङ्गा: कनकाश्चैव तथैवापरवर्त्तका: ।
नवकास्तनवालाश्च पुलिन्दा वर्व्वरै: सह ॥
सुनिवाटा: शिवाटाश्च नरा वेगवशास्तथा ।
विदर्भा ऋषिका: काकणनाश्च ब्राह्मणर्षभ ।॥
यवनाश्च शकाम्भोजास्तङ्गना: परतङ्गना: ।
सक्रद्दहा: कुलत्याश्च दारवा म्लेच्छजातय: ॥
उत्तराश्चापरे म्लेच्छा हूना: पारसिकै: सह ।
तथैव च मलाश्चीना दशार्णा दशमालिका: ॥
अङ्गवङ्गकलिङ्गाश्च पह्लवा गिरिगह्वरा: ।
खासीकाश्चान्तचाराश्च वैश्यशूद्रकुलानि च ॥
शूद्राभीराश्च दरदा ये चान्ये म्लेच्छभूमय: ।
आत्रेयाश्च भरद्वाजास्तथैव स्तनपोषका: ॥
द्रवकाश्च कलिङ्गाश्च किरातानाश्च जातय: ।
तोमरा हन्यमानाश्च तथैव करभञ्जका: ॥
एते चान्ये जनपदा: प्राच्योदीच्यास्तथैव च ।
उद्देशेन मया देशास्तव संकीर्त्तिता द्विज ।॥
वर्षे तु भारते ब्रह्मन् ! त्रिवर्गस्य फलं भवेत् ।
दुह्यते कामधुग्धेनुर्भूमि: सम्यगनुष्ठिता ॥
तस्मिन् शुभाशुभं कर्म्म यथोक्तफलदं नृणाम् ।
अन्यानि यानि वर्षाणि भूमिस्वर्गाणि तानि वै ।
भारते विहितं कर्म्म यागध्यानादिलक्षणम् ।
फलं जनयते सम्यक् विकर्म्म नरकाण्यपि ॥
तत्र विद्वा नरा ब्रह्मन् ! तपसाराधनेन च ।
प्रयान्ति परमं लोकमपवर्गञ्च मारिष ।॥
कृतं त्रेता द्वापरश्च कलिश्च ब्राह्मणर्षभ ।।
भारते तु क्रमेणैव भवन्ति हि युगानि वै ॥
चत्वारि च सहस्राणि वर्षाणां ब्राह्मणर्षभ ।।
आयु:संख्या कृतयुगे संख्याता भारते द्विज ।॥
त्रीण्येव तु सहस्राणि त्रेतायां भारत नृणाम् ।
द्वे सहस्रे द्वापरं तु शतमेकं कलौ स्मृतम् ॥
तथापि च स्थितिर्नास्ति कलौ ब्राह्मणसत्तम ! ।
गर्भस्थाश्च म्रियन्ते च तथा जाता म्रियन्ति च ॥
महाबला महासत्त्वा ज्ञानिनो धर्म्मतत्परा: ।
तपस्विनो ध्याननिष्ठा: कृते जायन्ति मानवा: ॥
त्रेतायां सर्व्ववर्णाश्च स्वधर्म्मनिरता: सदा ।
द्वापरे च महाभाग । क्रूराश्च परहिंसका: ॥
लुब्धाश्चानृतिकाश्चैव क्रोधना दुष्कृते रता: ।
कलौ खलु भविष्यन्ति भारते तापस ! प्रजा: ॥
सर्व्वेषामपि वर्षाणां भारतं प्रवरं द्विज ! ।
सिध्यन्ति मानवा यत्र हरिभक्तिपरायणा: ॥
प्रायो भागवता: सर्व्वे भारते द्विजसत्तम ! ।
नानारूपाणि तीर्थानि फलदानि नृणामपि ॥*।
जम्बूद्वीपो मया प्रोक्तो लक्षयोजनविस्तृत: ।
समानेन प्रमाणेन वेष्टितो लवणाम्भसा ॥

अष्टावत्र उपद्वीपा मुनिभि: परिकीर्त्तिता: ।
सिन्धुमध्ये महाभाग । नानाविधजनाश्रिता: ॥
नामानि तेषां वक्ष्यामि शृणु वात्स्यायन
द्विज ।।
सगरस्य सुतैरश्वान्वेषणे परितो महीम् ॥
खनद्भि: कल्पिता विप्र ! द्वीपा अष्टौ महार्णवे ।
स्वर्णप्रस्थश्चन्द्रशुक्ल: सिंहलावर्त्तनौ यथा ॥
पञ्चजन्यस्तथा मन्दहरिणो रमणकाह्वय: ।
लङ्केति कथिता विप्र । जम्बुद्वीपस्य तेऽन्तरा ॥”
इति पाद्मे भूमिखण्डे भूगोलवर्णने १३०
अध्याय: ॥ * ॥

शेष उवाच ।
“प्लक्षद्वीपं प्रवक्ष्यामि शृणु वात्स्यायन द्विज ।।
यन्मानं जम्बुद्वीपस्य तथैव लवणोदधे: ॥
ततो द्विगुणमानोऽसौ प्लक्षद्वीपो महामते ! ।
जम्बुद्वीपस्य च यथा वेष्टनं लवणाम्भसा ॥
समानेन प्रमाणेन पुर: परिखया यथा ।
परिखाया उपवनं यथा भवति वेष्टनम् ॥
प्लक्षद्वीपस्तथैवासौ संवेष्ट्य लवणोदधिम् ।
द्विलक्षयोजनायामो वर्त्तते द्विजसत्तम ।॥
तत्र जम्बूप्रमाणोऽस्ति द्वीपख्यातिकरस्तरु: ।
प्लक्षो नाम महाभाग । स्वर्णवर्णोऽग्निधाम च ॥
तत्र वर्षाणि सप्तैव सुभद्रं यवसं शिवम् ।
अन्तताश्वमशान्तानि क्रमादभयमित्यपि ॥
सप्तैव सीमागिरयो नद्य: सप्त च कीर्त्तिता: ।
मणिकूटो वज्रकूटो ज्योतिष्मानिन्द्रसेनक: ॥
हिरण्यष्ठीवो मेघमाल: सुपर्णा: संतुशैलका ।
अरुणानृमणा चैव साविश्यासिवमौ तथा ॥
सत्यम्भवा सुप्रभा च वात्स्यायन ! धृतम्भवा ।
एता: सप्त महानद्यो दर्शनादेव पावना: ॥
वर्णानां ब्राह्मणादीनां तत्र नामान्यनुक्रमात् ।
हंसश्चैव पतङ्गश्चोर्द्धायनश्च तृतीयक: ॥
सत्याङ्गश्च चतुर्थो वै सर्व्वे धर्म्मार्थकोविदा: ।
अन्ये च पर्व्वतास्तत्र नद्यश्चैव महाफला: ॥
प्राणायतो महाभाग ! मलयो नाम पर्व्वत: ।
ततो मेघा: प्रवर्त्तन्ते प्रभवन्ति च सर्व्वत: ॥
तत: परेण विप्रेन्द्र ! जलधारस्तु पर्व्वत: ।
तस्माद्गृह्णाति वै तोयं वासव: पृथिवीकृते ॥
वर्षासु हि ततो वृष्टिस्तत: शस्यसमुद्भव: ।
रैवतो नाम तत्राथ गिरिर्यत्र प्रतिष्ठित: ॥
रैवती नाम नक्षत्रं दृश्यते दिवि मोदिता ।
उत्तरेण तु तस्याथ श्यामो नाम गिरिर्महान् ॥
प्रांशु: श्रीमान्महामेघप्रभयोज्ज्वलविग्रह: ।
यस्य श्रिया श्यामवर्णा: प्रजास्तत्र महामते ।॥
अत:परं महाभाग । दुर्गो नाम महागिरि: ।
केशरी केशरयुतो यस्माद्वात: प्रवर्त्तते ॥
प्लक्षो नाम महाद्वीपो यत्र पूज्यस्तु शङ्कर: ।
तत्र गच्छन्ति सिद्धाश्च चारणा देवतानि च ॥
धार्म्मिकाश्च प्रजा ब्रह्मन् । जरामृत्युविवर्ज्जिता: ।
दीर्घायुष: सत्यपरा वर्द्धन्ते भोगवर्द्धिता: ॥
नद्यश्चान्या महापुण्या गङ्गा च बहुधा मता ।
महानदी मणिजला सीतासी वेणिका तथा ।

सहस्राणां शतान्येव नद्य: संख्या न शक्यते ॥
तत्र पुण्या जनपदाश्चत्वारो लोकसम्मता: ॥
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥
मगा ब्राह्मणभूयिष्ठा: स्वकर्म्मनिरता द्विज ।।
मशकेषु तु राजन्या धार्म्मिका: सर्व्वकामदा: ।
मानसे च महाभाग ! वैश्यधर्म्मनिषेविण: ।
मन्दगेषु तथा शूद्रा: शूरा धर्म्मार्थनिश्चिता: ॥
न तत्र राजा विप्रेन्द्र । न दण्डो न च दण्डाता ।
स्वधर्म्मेणैव ते सर्व्वे रक्षन्ति च परस्परम् ॥*॥
प्लक्षद्वीपसमानेन समुद्रेण ततो बहि: ।
इक्षुरसजलेनैव नानारत्नवता द्विज ।॥
शाल्मलोऽपि तथा द्वीप: प्लक्षाद्विगुणमानत: ।
चतुर्लक्षयोजनेन सुरोदेनावृतो महान् ॥
यत्र वै शाल्मली नाम द्विलक्षयोजनोच्छ्रिता ।
द्वीपख्यातिकरो वृक्ष: सुपर्णेन कृतालय: ॥
तत्र वर्षाणि सप्तैव कथ्यन्तेऽत्र सुरोचनम् ।
सौमनस्यं रमणकं देववर्षमिति क्रमात् ॥
पारिभाद्रमाप्यायनमभिज्ञातमिति द्विज ! ।
सेतुशैलाश्च सप्तैव सुरस: शतशृङ्गक: ॥
वामदेवश्च कुन्दश्च कुमुद: पुष्पवर्षक: ।
सहस्रश्रुतिरिति ब्रह्मन् । नद्य: सप्तैव कीर्त्तिता: ॥
अनुमति: सिनीवाली नन्दा राका सरस्वती ।
रजनी च कुहूश्चैव महानद्य: सुपुण्यदा: ॥
तत्र विप्रादयो वर्णा: क्रमान्नामानि बिभ्रति ।
आद्य: श्रुतधरो वर्णस्ततो वीर्य्यधर: स्मृत: ।
वसुन्धरस्तृतीयस्तु चतुर्थस्तु इषुन्धर: ।
सर्व्वे ते सोममात्मानं भगवन्तं यजन्ति हि ॥
सुरोदं परिवेष्ट्याथ ततो द्विगुणमानक: ।*।
कुशद्वीपो घृतोदेन समानेनावृतो द्विज ।॥
कुशस्तम्बो महांस्तत्र द्वीपख्यातिं करोति च ।
जाज्वल्यमानो दीप्त्यैव महाज्वलनराशिवत् ॥
तत्र वर्षाणि सप्तैव समानानि प्रमाणत: ।
वसुदानं दृढरुचिर्नाभिगुप्तं महामते ।॥
सत्यव्रतं विप्रनाम देवनामेति सप्तमम् ।
सप्तैव सीमागिरय: कीर्त्तिता द्विजसत्तम ।॥
वभ्रुश्चैव चतु:शृङ्ग: कपिलश्चित्रकूटक: ।
देवानीक ऊर्द्धरोमा द्रविणश्चेति सप्तम: ॥
महानद्यश्च सप्तैव सर्व्वपापप्रणाशना: ।
रसकुल्या मधुकुल्या मित्रविन्दा च मानद ।॥
श्रुतविन्दा देवगर्भा मन्त्रमाला घृतच्युता ।
तत्र विप्रादयो वर्णा नामान्तरभृतो द्विज ।॥
कुशल: प्रथमो वर्ण: कोविदस्तु द्वितीयक: ।
अभियुक्तस्तृतीयस्तु चतुर्थ: कुलक: स्मृत: ॥
ते सर्व्वे ज्ञानसम्पन्ना जातवेदस्वरूपिण: ।
भजन्ति भगवन्तं वै कर्म्मकौशलयाजिन: ॥*॥
घृतोदाच्च तथा द्वीपो द्विगुण: क्रौञ्चसंज्ञक: ।
क्षीरोदेन समानेन वेष्टितो ब्राह्मणर्षभ ।॥
क्रौञ्चो नाम गिरिर्यत्र द्वीपख्यातिकरो महान् ।
महासेनशराघातकृतच्छिद्रो महामते ।॥
क्षीरोदेनाभिषिक्तश्च सततं वीचिसञ्चयै: ।
वर्षाणि तत्र सप्तैव तेषां नामानि मे शृणु ॥
आम्रो मधुवहो मेघपृष्ठश्चापि वनस्पति: ।

'लोहितार्णः सुधामा च आनिरुद्धश्चापि सप्तमः।
गिरयश्चापि सप्तैव वर्षसीमाकरा द्विज!।
मुञ्जोऽथ वर्द्धमानश्च भोजन उपवर्हणः॥
नन्दनो नन्दनश्चैव सर्व्वतोभद्र इत्यपि।
सप्त तत्र महानद्यः पावना ब्राह्मणर्षभ।॥
अभया चामृतौघा च ह्यमितरूपवती तथा।
तीर्थवत्यार्यिका मुक्ता पवित्रवत्यपि स्मृता॥
विप्राद्यस्तथा वर्णाः ख्याता नामान्तरेण तु।
पुरुषः प्रथमो वर्णो द्वितीयो ऋषभः स्मृतः॥
तृतीयो द्रविणो नाम देवसंज्ञश्चतुर्थकः।
मूर्त्तिं जलमयीं विष्णोर्ध्यायन्ति च यजन्ति च॥*॥
एवं परस्तात् क्षीरोदात् शाकद्वीपो द्विजर्षभ।।
आयामेन स विज्ञेयो द्वात्रिंशल्लक्षयोजनः॥
दधिमण्डोदकेनैव समानेन स सिन्धुना।
परीतो भाति तत्रास्ति शाको नाम महीरुहः॥
द्वीपख्यातिकरः श्रीमान् वासयन् द्वीपमेव सम्।
वर्षाणि तत्र सप्तैव पुरोजवमनोजवौ॥
धूम्रानीको वेपमानो विश्वाधारश्च मारिष।।
बहुरूपश्चित्ररेफो गिरयोऽपि च सप्त वै॥
ईशान उरुशृङ्गश्च बलभद्रो महाबलः।
शतकेशरनामा च सहस्रस्रोत एव च॥
देवपालोऽपि सप्तैते वर्षसीमप्रवर्त्तकाः।
नद्यः सप्तैव विख्याता आयुर्दाप्यनघा द्विज।॥
सहस्रुतिः पञ्चनदी निरुद्धा निरपराजिता।
विख्यातोभयसृष्टिश्च महापुण्या महाफलाः॥
विप्राद्यस्तथा वर्णा ख्याता नामान्तरेण तु।
आद्यो ऋतव्रतो नाम ततः सत्यव्रतः स्मृतः॥
दानव्रतानुव्रतौ च तृतीयश्च चतुर्थकः।
भगवन्तं वायुरूपं भजन्ते च यजन्ति च॥*॥
तथैव दधिमण्डोदात् परस्तात् पुष्करो महान्।
द्विगुणेन प्रमाणेन द्वीपः स्वादूदकेन तु॥
परिवीतः समानेन सिन्धुना ब्राह्मणर्षभ!।
यत्र पुष्करमत्युच्चं ज्वलज्ज्वलनसन्निभम्॥
द्वीपख्यातिकरं पत्रसहस्रायुतशोभितम्।
यदाहुरासनं विश्वस्रष्टुस्तस्य प्रजापतेः॥
द्वीपमध्येऽवधिगिरिरेक एव महामते।।
स मानसोत्तरो नाम प्राकार इव वेष्टकः॥
तस्य पूर्व्वापरौ पार्श्वौ द्वे वर्षे! तत्र मारिष।।
सिन्धोर्वेष्टनमत्रैकं गिरेर्वेष्टनकं परम्॥
रमणकं धातकञ्च द्वे वर्षे नामतः स्मृते।
मानं तस्य गिरेर्विप्रायुतयोजनमुच्छ्रितम्॥
तावदेव तथायामस्तस्योपरि पुराणि च।
चत्वारि लोकपालानामिन्द्रादीनां द्विजर्षभ।॥
यः परिक्रममाणस्य मेरुं विप्र। विवस्वतः।
ऊर्द्ध्वं विभर्त्ति शैलेन्द्रश्चक्रं सम्वत्सरात्मकम्॥
अध्यासते च द्वौ पार्श्वौ प्रजास्तस्य महाबलाः।
तत्र संख्यान्तरं नास्ति वर्णानां ब्राह्मणर्षभ।॥
स्वादूदकस्य परतो लोकालोकाचलो महान्।
लोकस्य चाप्यलोकस्य मध्ये गिरिवरः स्थितः॥
प्राकार इव संवेष्ट्य लोकान् सर्व्वान्महामते।।
लोकालोकाचलो नाम तत्रासौ परिकीर्त्तितः॥
मानसोत्तरमेर्व्वोस्तु अन्तरे यावती मही।
तावती काञ्चनी भूमिर्लोकालोकात् परे द्विज!॥
यत्र प्रणिहितं वस्तु कथञ्चिन्नोपलभ्यते।
सौवर्णी कान्तिरद्दीप्ता सर्व्ववर्णप्रमाथिनी॥
अतः सर्व्वाणि सत्त्वानि तां भूमिं वर्जयन्ति हि।
लोकालोको गिरिर्यस्तु लोकान्ते वर्त्तते महान्॥
आवृणोति स तेजांसि सूर्य्यादीनामपि द्विज!।
तमतिक्रम्य ज्योतींषि चमन्ते न प्रवर्त्तितुम्॥
तावदुन्नाहवान् अश्मन्नायामेन च तादृशः।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना॥
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः।
तस्योपरिष्टाच्चत्वारो गजेन्द्राः सुमहाबलाः॥
नियुक्ता ब्रह्मणा भूमिं करैराक्रम्य संस्थिताः।
भगवानपि तत्रैव विष्वक्सेनादिभिर्वृतः॥
पार्षदप्रवरैश्चैव। भुजैर्बहुभिरच्छ्रितैः।
धारयन् जगतीमास्ते आकल्पमपि मारिष।॥
योऽन्तर्विस्तार एतस्या भूम्यास्ते परिवर्णितः।
तावती भूरलोकाख्या सान्द्रसन्तमसावृता॥
ततो योगेश्वरगतिर्योगिनां प्राप्यमुत्तमम्।
स्थानं भगवतः साक्षात् श्वेतद्वीप इतीर्य्यते॥
इति ते कथितं ब्रह्मन्। भूगोलस्योपवर्ण-
नम्॥

व्यास उवाच।

य इदं शृणुयात् सूत। भूगोलस्यानुवर्णनम्।
प्रदक्षिणीकृता तेन सशैलवनकानना।
ससागरा च सद्वीपा सवर्षा च वसुन्धरा॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम
१३१ अध्यायः॥*॥ ज्योतिषशास्त्रोक्तभूगोलम्॥
यथा,—
"सिद्धिं साध्यमुपैति यत्स्मरणतः क्षिप्रं
प्रसादात्तथा
यस्याश्चित्रपदाऽलङ्कृतिरलं लालित्यलीला-
वती।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती
भारती
तं तञ्च प्रणिपत्य गोलममलं बालावबोधं
ब्रुवे॥"
गोलग्रन्थकथने कारणमाह।
'मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं
विना
प्रौढ़िं प्रौढ़सभासु नैति गणको निःसंशयो न
स्वयम्।
गोले सा विमला करामलकवत् प्रत्यक्षतो
दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः॥'
अथ गोलप्रशंसया गोलानभिज्ञगणकोपहास-
माह।
'भोज्यं यथा सर्व्वरसं विनाज्यं
राज्यं यथा राजविवर्ज्जितञ्च।
सभा न भातीव सुवक्तृहीना
गोलानभिज्ञो गणकस्तथैव॥
वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः
सभां
जल्पन्नल्पमतिः स्मयात् पटुबटुभ्रूभङ्गवक्रो-
क्तिभिः।
ह्रीतः सन्नुपहासमेति गणको गोलानभिज्ञ-
स्तथा
ज्योतिर्वित् सदसि प्रगल्भगणकप्रश्नप्रपञ्चो-
क्तिभिः॥'
अथ गोलस्वरूपमाह।
'दृष्टान्त एवावनिभग्रहाणां
संस्थानमानप्रतिपादनार्थम्।
गोलः स्मृतः क्षेत्रविशेष एव
प्राज्ञैरतः स्याद्गणितेन गम्यः॥'
अथ गणितप्रशंसामाह।
'ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम्।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न
ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं
ज्ञास्यति॥'
अथ ज्योतिषशास्त्रश्रवणाधिकारिलक्षणमाह।
'द्विविधगणितमुक्तं व्यक्तमव्यक्तसंज्ञं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नाधिकारी॥'
व्याकरणवर्णनमाह।
'यो वेद वेदवदनं सदनं हि सम्यग्-
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥'
अथ गोलग्रन्थस्य प्रशस्तार्थमन्योक्तप्रकारेणाह।
'गोलं श्रोतुं तव यदि मतिर्भास्करीयं शृणु त्वं
नो संक्षिप्तो न च बहु वृथा विस्तरः शास्त्र
तत्त्वम्।
लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्मा-
द्विद्वन्! विद्वत्सदसि पठतां पण्डितांस्ते व्यनक्ति॥'
अथ भूसंस्थानं प्रश्नश्लोकद्वयेन आह।
'भ्रमद्भचक्रचक्रान्तर्गगने गगनेचरैः।
वृता धृता धरा केन येन नैयमियादधः॥
किमाकारा कियन्माना नानाशास्त्रविचार-
णात्।
कीदृग्द्वीपकुलाद्रीन्द्रसमुद्रैर्भिद्यतोच्यताम्॥'
अथ ग्रहस्फुटीकरणोपपत्तिप्रश्नं श्लोकद्वयेनाह।
'संसिद्धो द्युगणाद्युगादिभगणैः खेटोऽनु-
पातेन यः
स्यात्तस्यास्फुटता कथं कथमभूत् सद्दोर्ज्ज्यकानि-
र्णैकधा।
किं देशान्तरमुन्नमान्तरमहो बाह्वन्तरं किञ्चरं
किञ्चोद्भवं भद्र चचलञ्च तदिदं कस्मात्। पातः
स्मृतः।
किं केन्द्रं किमु केन्द्रजं किमु चलं किञ्चाचलं
तत्फलं
कस्मात्तत्सहितः क्रमश्च रहितः खेटस्फुटो
जायते।

किं दृक्कर्म तथोदयास्तसमये द्वेधा विदध्युर्बुधा:
सर्वं मे विमलं वदामलमलं गोलं विजानासि चेत् ॥'

अथ त्रिप्रश्नोदितदिनमानभेदप्रश्नं श्लोकद्वयेनाह ।

'मध्यदेश: किमहो रजनी तनुर्दिनमणौ मकरोत्तरगोलगे ।
ननु तनुर्दिवसो महती निशा वद विचक्षण । दक्षिणदिग्गते ॥
भवति किं द्युनिशं द्युनिवासिनां द्युमणिवर्षमितञ्च सुरद्विषाम् ।
पितृषु किं शशिमासमितं तथा युगसहस्रयुगं द्रुहिणस्य किम् ॥'

अथ राश्युदयमानकालभेदप्रश्नमाह ।

'भवलयस्य किलार्कलवा: समा: किमसमै: समयै: खलु राशय: ।
समुपयान्त्युदयं किमु गोलवित् प्रविषयेष्वखिलेष्वपि ते समा: ॥'

अथ द्युज्याकुज्यादिसंस्थानप्रश्नं वृत्तार्द्धेनाह ।

'द्युज्याकुज्यापमसमनराग्राचलम्बादिकानां विद्वन् । गोले वियति हि यथा दर्शय चेत्र संस्थाम् ॥'

अथ चन्द्रार्कग्रहणयो: दिक्कालभेदाद्युपपत्तिप्रश्नान् श्लोकोत्तरार्द्धेनाह ।

'तिथ्यन्ते चेत् ग्रह उडुपते: किन्न भानोस्तदानीं इन्दो: प्राच्यां भवति हि रवे: प्रग्रह: किं प्रतीच्याम् ॥'
लम्बनं वद किं का च नतिर्मतिमतां वर । ।
तत्संस्कृतितिथौ वा या किं ते सिद्धे कुत: कुत: ॥'

अथ शृङ्गोन्नतौ चन्द्रस्य शुक्लस्य चयवृद्धिप्रश्नमाह ।

'शुक्लस्य द्विजराज एष महसो हान्या: कुतस्त: कुत:
सद्वृत्तत्वगतोऽप्यहो भ्रमवशाद्दोषातिसङ्गादिव ।
संप्राप्याथ पुनश्चयीतनुमतस्तस्याश्रये नैव किं
शुक्लस्य क्रमशस्तथैव महसो वृद्धिर्गति सद्वृत्तताम् ॥'

अथ प्रथमप्रश्नस्य पृथिवीसंस्थानोपपत्तेरुत्तरं विवक्षुरादिसर्गे पृथिव्यादीनां तत्त्वानामादितत्त्वं निखिलजगज्जननैकबीजं परं ब्रह्म मनसा प्रणिपत्यादौ तावत् तज्जयमाह ।

'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भेऽहंकारोऽभूत् खकाग्निजलोर्व्यस्तत: संहतेश्च ।
ब्रह्माण्डं यज्जठरगमहीपृष्ठनिष्ठो विरिञ्चिर्विश्वं शश्वत् सृजति परमं ब्रह्म तत्तत्त्वमाद्यम् ॥'

अथ भूमे: स्वरूपमाह ।

भूमे: पिण्ड: शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा
वृत्तैर्वृत्तो वृत:सन्मृदनिलसलिलव्योमतेजोमयोऽयम् ।
नान्याधार: स्वशक्त्या वियति च नियतं तिष्ठतीहास्य पृष्ठे
निष्ठं विश्वञ्च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात् ॥
सर्वत: पर्वतारामग्रामचैत्यचयैश्चित: ।
कदम्बकुसुमग्रन्थि: केशरप्रकरैरिव ॥'

अथ पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह ।

'मूर्त्तो धर्त्ता चेद्धरित्र्यास्तदन्यस्तस्याप्यन्योऽप्येवमत्रानवस्था ।
अन्त्ये कल्प्या चेत् स्वशक्ति: किमाद्ये किं नो भूमि: साष्टमूर्त्तेश्च मूर्त्ति: ॥'

अथ कथमियं भूमे: स्वशक्तिरित्याशङ्कां परिहरन्नाह ।

'यथोष्णतार्कानलयोश्च शीतता विधौ द्रुति: के कठिनत्वमश्मनि ।
मरुच्चलो भूरचला स्वभावतो यतो विचित्रा: खलु वस्तुशक्तय: ॥
आकृष्टशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत् पततीव भाति समे समन्तात् कुरियं यत: खे ॥'

अथ बौद्धानां युक्तिमाह ।

'भपञ्जरस्य भ्रमणावलोकादाधारशून्या कुरिति प्रतीति: ।
खस्थं न दृष्टं गुरु च क्षमात: खेऽध: प्रयातीति वदन्ति बौद्धा: ॥
द्वौ द्वौ रवीन्दू भगणौ च तद्वदेकान्तरौ तावुदयं व्रजेताम् ।
यदब्रुवन्नेवमनर्थवादान् ब्रवीम्यतस्तान् प्रतियुक्तियुक्तम् ॥'

अथ तेषां युक्तिभङ्गमाह ।

'भू: खेऽध: खलु यातीति बुद्धिर्बौद्ध । मुधा कथम् ।
यातायातञ्च दृष्ट्वापि खे यत् क्षिप्तं गुरु क्षितिम् ॥

अथ जिनानां युक्तिभङ्गमाह ।

'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथाश्रया: ।
भार्केन्दूनां विलोक्याह्ना ध्रुवमत्स्यपरिभ्रमम् ॥'

भूगोलस्य समतां निराकर्त्तुमाह ।

'यदि समा मुकुरोदरसन्निभा भगवती धरणी तरणि: क्षित: ।
उपरि दूरगतोऽपि परिभ्रमन् किमु नरैरमरैरिव नेक्ष्यते ॥
यदि निशाजनक: कनकाचल: किमु तदन्तरग: स न दृश्यते ।
उदगयं ननु मेरुरथांशुमान् कथमुदेति स दक्षिणभागत: ॥'

अथ प्रत्यक्षविरोधशङ्कां निरस्यन्नाह ।

'समो यत: स्यात् परिधे: शतांश: पृथ्वी च पृथ्वी नितरां तनीयान् ।
नरश्च तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यत: सा ॥'

भूगोल:

श्लोकस्य भूपरिधिप्रमाणस्य उपपत्तिमाह ।

'पुरान्तरं चेदिदमुत्तरं स्यात् तदक्षविश्लेषलवैस्तदा किम् ।
चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधे: प्रमाणम् ॥'

तदेव द्रढीकुर्वन्नाह ।

'निरक्षदेशात् क्षितिषोडशांशे भवेदवन्ती गणितेन यस्मात् ।
तदन्तरं षोडशसंगुणं स्याद् भूमानमस्माद्बहु किं तदुक्तम् ॥
शृङ्गोन्नतिग्रहयुतिग्रहणोदयास्तच्छायादिकं परिधिना घटतेऽमुना हि ।
नान्येन तेन जगुरुक्तमहीप्रमाणप्रामाण्यमन्वययुजा व्यतिरेककेण ॥'

अथ भूगोलपुरनिवेशमाह ।

'लङ्का कुमध्ये यमकोटिरस्या: प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्तत: सिद्धपुरं सुमेरु: सौम्येऽथ याम्ये बडवानलश्च ॥
कुवृत्तपादान्तरितानि तानि स्थानानि षड्गोलविदो वदन्ति ।
वसन्ति मेरौ सुरसिद्धसंघा और्वे च सर्वे नरका: सदैत्या: ॥
यो यत्र तिष्ठत्यवनीतलस्थमात्मानमस्या उपरिस्थितञ्च ।
स मन्यतेऽत: कुचतुर्थसंस्था मिथश्च ते तिर्यगिवामनन्ति ॥
अध:शिरस्का: कुदलान्तरस्थाश्छाया मनुष्या इव नीरतीरे ।
अनाकुलास्तिर्यगध:स्थिताश्च तिष्ठन्ति ते तत्र वयं यथात्र ॥'

अथ द्वीपानां समुद्राणाञ्च संस्थानमाह ।

'भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्या: ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेश: ॥
लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतमथनरश्मि: श्रीश्च यस्माद्बभूव ।
महितचरणपद्म: पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र ॥
दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्य: ।
स्वादूदकान्तर्बडवानलोऽसौ पातालLोका: पृथिवीपुटानि ॥
चञ्चत्फणा मणिगणांशुकृतप्रकाशा एतेषु सासुरगणा: फणिनो वसन्ति ।
दीव्यन्ति दिव्यरमणीरमणीयदेहै: सिद्धाश्च तत्र हि लसत्कनकावभासै: ॥
शाकं तत: शाल्मलमत्र कौशं क्रौञ्चञ्च गोमेदकपुष्करं च ।
द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति ॥'

अथ जम्बुद्वीपमध्ये गिरिनिवेशवशेन नवखण्डान्याह ।

‘लङ्कादेशाद्धिमगिरिरुदक् हेमकूटश्च तस्मात्तस्मात्ताभ्यो निषध इति तं सिन्धुपर्यन्तदैर्घ्याः ।

एवं सिद्धादुदगपि पुरात् शृङ्गवच्छुक्लनीलावर्षाख्येषां जगुरिह बुधा अन्तरे क्षौणिदेशान् ॥

‘भारतवर्षमिदं तुदगस्मात्
किन्नरवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्माद्-
विद्धि हिरण्मयरम्यकवर्षे ॥
माल्यवांश्च यमकोटिपत्तनाद्-
रोमकाच्च किल गन्धमादनः ।
नीलशैलनिषधावधी च तौ
अन्तरालमनयोरिलावृतम् ॥
माल्यवज्जलधिमध्यवर्त्ति
यत्तत् भद्रतुरगं जगुर्बुधाः ।
गन्धशैलजलराशिमध्यगं
केतुमालकमिला कलाविदः ॥
निषधनीलसुगन्धसुमाल्य-
कैरलमिलावृतमावृतमाबभौ ।
भ्रमरकेलिकुलाय समाकुलं
रुचिरकाञ्चनचित्रमहीतलम् ॥’

अथ मेरुसंस्थानमाह ।

‘इह हि मेरुगिरिः किल मध्यगः
कनकरत्नमयस्त्रिदशालयः ।
द्रुहिणजन्मकुपद्मजकर्णि-
केति च पुराणविदः समवर्णयन् ॥
विष्कम्भशैलाः खलु मन्दरोऽस्य
सुगन्धशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात् सन्ति च केतुवृक्षाः
कदम्बजम्बूवटपिप्पलाख्याः ॥
जम्बूफलामलगलद्रसतः प्रवृत्ता
जाम्बूनदीरसयुता न्वदभूत सुवर्णम् ।
जाम्बूनदं हि तदतः सुरसिद्धसंघाः
शश्वत् पिबन्त्यमृतपानपराङ्मुखास्ते ॥
वनं तथा चैत्ररथं विचित्रं
तैभ्राजनन्दनन्दनञ्च ।
धृत्याकरं यत् धृतिकृत्र सुराणां
भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् ॥
सरांस्यथैतेष्वरुणञ्च मानसं
महाह्रदं श्वेतजलं यथाक्रमम् ।
सरःसु रामारमणभ्रमालसाः
सुरा रमन्ते जलकेलिलालसाः ॥
सप्तकाञ्चनमयं शिखरत्रयञ्च
मेरौ सुरारिकपुरारिपुराणि तेषु ।
तेषामधः शतमखज्वलनान्तकानां
रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ ॥’

अथ अन्यविशेषमाह ।

‘विष्णुपदीविष्णुपदात् पतिता मेरौ चतुर्द्धासीन्
विष्कम्भाचलमस्तकशुक्लसरः संगता गता वियति ।

सीताख्या भद्राश्वं चालकनन्दा च भारतं वर्षम्
चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून् याता ॥

या कीर्त्तिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता ।
उक्ता स्मृता स्तुता वा पुनाति बहुधापि मापिनः पुरुषान् ॥

यां चलिते दलिताखिलबन्धो
गच्छति बलगति तत्पितृसंघः ।
प्राप्तटो विजितान्तकदूतो
याति नरो निरयात् सुरलोकम् ॥’

अथ भारतवर्षमध्ये नव खण्डानि सप्त कुलाचलांश्चाह ।

‘ऐन्द्रं कसेरुसकलं किल ताम्रपर्ण-
मन्यद्गभस्तिमदतश्च कुमारिकाख्यम् ।
नागञ्च सौम्यमिह वारुणमन्त्यखण्डं
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥
वर्णव्यवस्थितिरिहैव कुमारिकाख्ये
शेषेषु चान्त्यजजना निवसन्ति सर्व्वे ।
माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः ॥’

अथ लोकव्यवस्थामाह ।

‘भूर्लोकाख्यो दक्षिणे व्यक्षदेशा-
दस्मात् सौम्योऽयं भुवः स्वश्च मेरुः ।
लभ्यः पुण्यैः खे महः स्याज्जनोऽतो-
ऽनल्पानल्पैः स्वैस्तपः सत्यमन्त्यः ॥’

दिनव्यवस्थामाह ।

‘लङ्कापुरेऽर्कस्य यदोदयः स्या-
त्तदा दिनार्द्धं यमकोटिपुर्य्याम् ।
अधस्तदा सिद्धपुरेऽस्तकालः
स्याद्रोमके रात्रिदलं तदैव ॥
यत्रोदितोऽर्कः किल तत्र पूर्व्वा
तत्रापरा यत्र गतः स चास्तम् ।
तन्मध्यतोऽन्ये च ततोऽखिलाना-
मुदक्स्थितो मेरुरिति प्रसिद्धम् ॥’

अथ विशेषमाह ।

‘अवन्त्यिन्याः कुचतुर्थभागे
प्राच्यां दिशि स्याद्यमकोटिरेव ।
ततश्च पश्चान्न भवेदवन्ती
लङ्कैव तस्याः ककुभि प्रतीच्याम् ॥
तथैव सर्व्वत्र यतो हि यत् स्यात्
प्राच्यां ततस्तन्न भवेत् प्रतीच्याम् ।
निरक्षदेशादिनरश्च तस्मात्
प्राचीप्रतीच्यौ च विचित्रसंस्थे ॥’

अथ भचक्रभ्रमणव्यवस्थामाह ।

‘निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत्तथा
भ्रमद्भचक्रं निजमस्तकोपरि ॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा स्वान्नतमृक्षमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः ॥
योजनसंख्या भांशैः ३६०गुणिता
कुपरिधिहृता ४९६७ भवन्त्यंशाः ।
भूमौ कक्षायां वा
भागेभ्यो योजनानि च व्यस्तम् ॥’

अथ देवदैत्यानां ध्रुवदर्शनसंस्थानमाह ।

‘सौम्यं ध्रुवं मेरुगताः खमध्ये
याम्यञ्च दैत्या निजमस्तकोर्द्धे ।
सव्यापसव्यं भ्रमदृक्षचक्रं
विलोकयन्ति क्षितिजप्रसक्तम् ॥’

उत्तरगोले क्षितिजादूर्द्धे परितो भ्रमन्तमादित्यम् ।

सव्यं त्रिदशाः सततं पश्यन्त्यसुरा अपसव्यं याम्ये ॥

वृन्दान्तमारोहति यैः क्रमेण
तैरेव दृक्तैरवरोहती नः ।
यत्रैव दृक् प्रथमं स दैवे-
स्तत्रैव तिष्ठन्न विलोक्यते किम् ॥
दिनं सुराणामयनं यदुत्तरं
निशेतरत् संहितिकैः प्रकीर्त्तितम् ।
दिनोन्मुखेऽर्के दिनमेव तन्मतं
निशा तथा तत्फलकीर्त्तनाय वै ॥
विधूर्द्ध्वभागे पितरो वसन्तः
स्वाधःसुधादीधितिमामनन्ति ।
पश्यन्ति तेऽर्कं निजमस्तकोर्द्धे
दर्शे यतोऽस्माद् द्युदलं तदेषाम् ॥
कृष्णे दले पश्चदलेऽभ्युदेति
शुक्लेऽस्तमेत्य तत एव सिद्धम् ।
भार्द्धान्तरत्वान्न विधोरधःस्थं
तस्मान्निशीथः खलु पौर्णमास्याम् ॥
यदतिदूरगतो द्रुहिणः क्षितेः
सततमाप्रलयं रविमीक्षते ।
भवति तावदयं शयितस्य तद्-
युगसहस्रयुगं द्युनिशं विधेः ॥’

अथ भूपरिधिमानं प्राक्कथितमपि विशेषार्थमाह ।

‘प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धय ४९६७

स्तद्व्यासः कुभुजङ्गसायकभुवः सिद्धांशके

नाधिकः । १५८१।२४

पृष्ठक्षेत्रफलं यथा युगगुणत्रिंशच्छराष्टामयो ७८५३०३४

भूमेः कन्दुकजालवत् कुपरिधिव्यासाहतेः प्रस्फुटम् ॥’

भूपृष्ठफलस्य लल्लोक्तस्य दूषणमाह ।

‘दृष्टं कन्दुकपृष्ठजालवदिदं गोले फलं अक्षितं लल्लेनास्य शतांशकोऽपि न भवेद्यस्मात् फलं वास्तवम् ।

तत् प्रत्यक्षविरुद्धमुक्तमिदं नैवास्तु वा चास्तु वा हे प्रौढ़ा गणका विचारयत तत्पक्षपातोज्झिता भूयम् ॥’

अथ तद्युक्तिमाह ।
'यत् परिध्यर्द्धविष्कम्भं हतं कृत्वा किलामुकम् ।
तेनार्द्धं छाद्यते गोलः किञ्चिदन्यच्च शिष्यते ॥
गोलक्षेत्रफलाद्यस्मादन्यत्क्षेत्रफलं यतः ।
सार्द्धद्विगुणितासन्नं तावदेवापरे इते ॥
एव पञ्चगुणात क्षेत्रफलात् पृष्ठफलं खलु ।
नाधिकं जायते तेन परिधिघ्नं कृतः कृतम् ॥
वृत्तक्षेत्रफलं यस्मात् परिधिघ्नं न युक्तिमत् ।
दृष्टत्वाद्गणितस्यास्य दुष्टं भूपृष्ठजं फलम् ॥"
अथान्यथा प्रतिपाद्यते ।
'गोलस्य परिधिः कल्प्यो वेदसंख्यामितैर्मितः ।
मुखयुग्मरेखाभिर्यद्वदामलके स्थितः ॥
दृश्यन्ते वप्रकास्तद्वत प्रागुक्तपरिधेर्मितान् ।
ऊर्द्धाधःकृतरेखाभिर्गोले वप्रान् प्रकल्पयेत् ॥
तत्रैकवप्रकक्षेत्रफलं खण्डैः प्रसाध्यते ।
सर्वखण्डैक्यं त्रिभज्यार्द्धहीनं त्रिज्यार्द्धभाजितम् ॥
एव वप्रफलं तत स्याद्गोलशामसमं यतः ।
परिधिश्वाससघातोऽतो गोलपृष्ठफलं स्फुटम् ॥'
अथ भूमेः प्रलयभेदात् प्रलयञ्चाह ।

'हानिर्विशेषैर्हि भुवः समन्तात
स्याद्योजनं भूभवभूतिपूर्व्वैः ।
ब्राह्म लये योजनमात्रवृद्धे-
र्नाशो भुवः प्राकृतिकेऽखिलायाः ॥
दिने दिने यन्म्रियते हि भूतै-
र्दैनन्दिनं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले
भूतानि यद्ब्रह्मतनुं व्रजन्ति ॥
ब्रह्मात्ययं यत् प्रकृतिं प्रयान्ति
सर्व्वाश्रयतः प्राकृतिकं कृतीन्द्राः ।
लीनाव्ययतः कर्म्मपुटान्तरत्वात
पृथक् क्रियन्ते प्रकृतेर्विकारैः ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा
मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्ति निवृत्तिमस्मा-
दात्यन्तिकं चेति लयश्चतुर्द्धा ॥'

अथ ब्रह्माण्डगोलमाह ।
'भभूधरत्रिदशदानवमानवाद्या
ये यान्ति धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकत्रयस्थितिरुपर्य्यपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथान्योदित ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रस-
ङ्गादनुवदति स्म ।
कोटिघ्नैर्नखनन्दषट्कनखभूभृद्भुजङ्गेन्दुभि-
र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां
योजनैः १८७१२०६९२००००००००० ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं
केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः
सूरयः ॥

करतलकलितामलक-
वदमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहत-
तमसो नभसः परिधिरुदितस्तैः ॥

ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोषः
समाप्तः ॥

भूच्छायं, क्ली, स्त्री, (भुवश्छाया । "विभाषासेना-
सुराच्छायाशालानिशानाम् ।" २ । ४ । २५ । इति
तत्पुरुषे विभाषया नपुंसकम् । छायाबाहुल्ये
तु केवलं क्लीवत्वं) अन्धकारः । इति शब्दमाला ॥

भूजम्बुः, पुं, (भुवो जम्बुरिव ।) उपरसविशेषः । इति
राजनिर्घण्टः ॥ (विशेषोऽस्य भूनागशब्दे
द्रष्टव्यः ॥)

भूजम्बूः, स्त्री, (भुवो जम्बूरिव साहश्यात्) विकङ्कत
फलम् । गोधूमः । इति मेदिनी । बे, १४ ॥
भूमिजम्बूः । इति राजनिर्घण्टः ॥

भूतं, क्ली, (भू + क्तः ।) युक्तम् । न्यायः । क्ष्मादिः ।
पृथिव्यप्तेजोवाय्वाकाशपञ्चकम् । (यथा, मनुः ।
१२ । १४ ।
"तावुभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञ एव च ॥
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥"
"स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति ।
भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चत-
न्मात्राण्युत्पद्यन्ते । तद्यथा । शब्दतन्मात्रं स्पर्श
तन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्र-
मिति । तेषां विशेषाः शब्दस्पर्शरूपरसगन्धा-
स्तेभ्यो भूतानि व्योमानिलानलजलोर्व्व्यः ।"इति
सुश्रुते शारीरस्थाने प्रथमेऽध्याये ।)
ऋतम् । सत्यम् । इत्यमरभरतौ ॥ पिशाचादि ।
(यथा, श्रीभागवते । ३ । १४ । २३ ।
"एषा घोरतमा वेला घोराणां घोरदर्शना ।
चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥")
जन्तुः । इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा,
मनुः । ६ । ८ ।
"स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समा-
हितः ।
दाता नित्यमनादाता सर्व्वभूतानुकम्पकः ॥"
स्थावरजङ्गमात्मकं द्रव्यम् । यथा, मनुः ।८।३०६।
"रक्षन् धर्म्मेण भूतानि राजा वध्यांश्च घात-
यन् !
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥")
वस्तुतत्त्वम् । यथा,—
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥
छलं प्रमादाभिहितम् । निरस्य परित्यज्य ।
भूतेन वस्तुतत्त्वानुसरणेन । व्यवहारान्नयेदन्तं
नृप. । यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्त-
मनभिहितं हीयते हानिमुपगच्छति व्यवहारतो
व्यवहारेण साक्ष्यादिभिः । तस्माद्भूतानुसरणं
कर्त्तव्यम् । यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा
सभ्यैन सभापतिना यतितव्यं सामादिभिरुपायै-
स्तथा सति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भव-
तीति ॥ अथ सर्व्वथापि भूतानुसरणं न शक्यते
कर्त्तुं तथा सति साक्ष्यादिभिर्निर्णयः कार्य्य-
इत्यनुकल्पः । यथोक्तम् । भूतच्छलानुसारि
त्वाद्द्विगतिः समुदाहृता । भूतन्तत्त्वार्थसंयुक्तं यत्
प्रमादाभिहितं छलमिति ॥ तत्र भूतानुसारी
व्यवहारो मुख्यः । छलानुसारी त्वनुकल्पः ।
इति मिताक्षरायां व्यवहाराध्यायः ॥

भूतं, त्रि, (भाव्यते स्मेति । "आधृषाद्वेति णिज-
भावः । भू + क्तः । भूतिरस्यास्तीति वा । अर्श-
आदित्वात् अच् । अभवदिति वा । भुवो गत्यर्थ
इति । भूतार्थे कर्त्तरि क्तः ।) प्राणी । जन्तुः ।
(यथा, ऋग्वेदे । ३ । ३१ । ६ ।
"धिया चक्रे वरेण्यो भूतानां गर्भमादधे ॥"
यथा च चरके शारीरस्थाने तृतीयेऽध्याये ॥
"भूतानाञ्चतुर्व्विधा योनिर्जरायुजाण्डस्वेदोद्भिदः ।")
अतीतम् । (यथा, कथासरित्सागरे ।१।२४।
"भूतं भवद्भविष्यद्वा किं तत् स्यात् जगति
प्रिये ।
भवती यन्न जानीयादिति शर्व्वोऽप्युवाच ताम् ॥")
वृत्तम् । (यथा, सुश्रुते चिकित्सितस्थाने । १०
अध्याये ।
"गोशकृद्भूतानां वा यवानां शक्तून् कार-
यित्वा ।")
समम् । सदृशम् । इत्यमरभरतौ ॥ प्राप्तम् ।
(यथा, महाभारते । १३ । ३४ । १५ ।
"यद् ब्राह्मणमुखात् प्राप्तं प्रतिगृह्णन्ति वै वचः ।
भूतात्मानो महात्मानस्ते न यान्ति परा-
भवम् ॥"
"भूतः प्राप्तो वशीकृत आत्मा चित्तं यैस्ते ॥"
इति तट्टीकायां नीलकण्ठः ।) सत्यम् ।
इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा शाकु-
न्तले । प्रथमाङ्के । "सूत्रधारः । सक्रितम् ।
आर्य्ये । कथयामि ते भूतार्थम् ।") भूतकालस्य
पर्य्यायो यथा । वृत्तम् २ अतीतम् ३ व्यतीतम् ४
निभृतम् ५ गतम् ६ । इति राजनिर्घण्टः ॥
उत्तरपदस्थ एव भूतशब्दः समार्थ इति
शाब्दिकाः । यथा देवभूतोऽयम् । इति भरतः ॥
(उत्तरपदस्थ भूतशब्दः स्वरूपार्थोऽपि । यथा,
मनुः । १ । ५ ।
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥")

भूतः, पुं, (भू + कर्त्तरि क्तः ।) देवयोनिविशेषः ।
स च अधोमुखोर्द्धमुखादिः पिशाचभेदो रुद्रा-
नुचरो बालग्रहः । इत्यमरभरतौ ॥ (यथा,
मार्कण्डेयपुराणे । ५१ । ५३ ।
"विच्चिपेज्जुहुयाच्चैवानलं मित्रञ्च कीर्त्तयेत् ।
भूतानां मातृभिः सार्द्धं बालकानान्तु शान्तये ॥")
कुमारः । इति मेदिनी । ते, ४१ ॥ योगीन्द्रः ।
इति शब्दरत्नावली ॥ कृष्णचतुर्द्दशी । इति
त्रिकाण्डशेषः ॥ * ॥ भूतनाशकौषधम् । यथा,
"श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा ।
तेन नस्यप्रदानं स्याद्भूतग्रस्तस्य निग्रहम् ॥

अगस्त्यपुष्पनस्यो वै समरीचश्च भूतहृत् ।
भुजङ्गवर्म्मे वै हिङ्गु निम्बपत्राणि वै यथा: ।
गौरसर्षप एभि: स्यात्सेयो भूतज्वर: क्षत: ॥
गोरोचना मरीचानि पिप्पली सैन्धवं मधु ।
अञ्जनं क्षतमेभि: स्याद् यद्भूतज्वरं शिव ! ॥
अपि च ।
"यथा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रं नावनवर्त्तिनम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥"
इति गारुडे १९२ । १९९ अध्याय: ॥
शम्भुगणभूता यथा,—
"हते वराहस्य गर्भे भर्गमासाद्य ते गणा: ।
चतुर्भागा: स्वयं भूत्वा भूतं कर्म्मेति वै जगु: ॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा ।
वचनात् शङ्करात्तस्य भूतग्रामास्ततो मता: ॥
ये लोकविदिता: पूर्व्वं भूतग्रामश्चतुर्विध: ।
यस्तेभ्योऽधिका यत्नैस्तद्भूतग्राम उच्यते ॥
इति व: सर्व्वमाख्यातं भूता: शम्भुगणा यथा ।"
इति कालिकापुराणे २९ अध्याय: ॥
(वसुदेवस्य पौरवीगर्भजातद्वादशपुत्राणां ज्येष्ठ-
तम: । यथा, भागवते । ९ । २४ । ४९ ।
"पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ।")
भूतकेश:, पुं, (भूतस्य केश इव ।) स्वनामख्यात-
वृक्षम् । तत्पर्य्याय: । गोलोमी २ । इत्य-
मर: । २ । १० । १११ ॥ भूतकेशी ३ अल्प-
केशी ४ केशी ५ । इति रत्नमाला ॥ भूतानां
केश इव भूतकेश: स्त्रीवर्त्तीति केचित । स्त्री
चेत्यन्ये । अथ द्वयोर्भूतकेशो गोलोमी भूत-
केशिकेति वाचस्पति: । इति भरत: ॥
भूतकेशी, स्त्री, (भूतकेश+गौरादित्वात् ङीष् ।)
भूतकेश: । इति रत्नमाला ॥ (यथा, सुश्रुते
उत्तरतन्त्रे । ६० अध्याये ।
"गोलोमी वाजलोमी च भूतकेशी जटा
तथा ॥")
शेफालिका । नीलसिन्धुवार: । इति राजनिर्घण्ट: ॥
भूतकान्ति:, स्त्री, (भूतानां कान्ति: ।) भूतांकुश: ।
इति राजनिर्घण्ट: ॥
भूतगन्धा, स्त्री, (भूत: मर्द्दनं विनापि प्रकटितो-
गन्धोऽस्या: ।) मुरानामगन्धद्रव्यम् । इति जटा-
धर: ॥
भूतघ्न:, पु, (भूतं हन्तीति । हन्+टक् ।)
उष्ट्र: । इति हेमचन्द्र: ॥ लशुन: । भूर्ज्जवृक्ष: ।
इति राजनिर्घण्ट: ॥ भूतनाशके त्रि ॥ (यथा,
तन्त्रसारे ।
"भूतघ्नेस्तु विकोषैस्तैर्विद्भिर्दिग्ना: क्रूरचेतस: ।
भूतप्रेतपिशाचाश्च वेताला भैरवादय: ॥")
भूतघ्नी, स्त्री, (भूतं हन्तीति । हन्+टक्+
ङीप् ।) तुलसी । इति राजनिर्घण्ट: ॥ मुण्डि-
तिका । इति रत्नमाला ॥

भूतचतुर्द्दशी, स्त्री, (भूतप्रिया भूतोद्देशी क्रिया
कर्त्तव्या वा चतुर्द्दशी । मध्यपदलोपी समास: ।)
गौणकार्त्तिककृष्णचतुर्द्दशी । सा एव यमचतु-
र्द्दशी । तत्कृत्यं यथा, पाद्मे ।
"चतुर्द्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नत: ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभि: ॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नर: ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशय: ॥"
स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्द्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभि: ॥
किञ्च पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभि: ।
जीवत्पिता न कुर्व्वीत तर्पणं यमभीष्मयो: ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ॥
देवत्वञ्च पितृत्वञ्च यमस्यास्ति द्विरूपता ॥
नक्तं यमचतुर्द्दश्यां य: कुर्य्याच्छिवसन्निधौ ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा शैवतपोधनान् ।
राजसूयफलं तेन प्राप्यते नात्र संशय: ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्द्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नर: ॥
किञ्च ।
अमावास्याचतुर्द्दश्या: प्रदोषे दीपदानत: ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नर: ॥"
इति श्रीहरिभक्तिविलास: ॥
अपि च । लैङ्गे ।
"कार्त्तिके कृष्णपक्षे च चतुर्द्दश्यां दिनोदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभि: ॥
अपामार्गपल्लवञ्च भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभि: ॥
नरकाय प्रदातव्यो दीप: संपूज्य देवता: ।
नरकाय नरकनिवृत्तये ।
अर्थोऽभिधेयो वै वस्तु प्रयोजननिवृत्तिषु ॥
इति निवृत्तावपि तादर्थ्ये इत्यनेन चतुर्थीविधा-
नात् । अपामार्गभ्रामणमन्त्र: ।
शीतलोष्णसमायुक्तसकण्टकदलान्वित ।
हर पापमपामार्ग ! भ्राम्यमाण: पुन: पुन: ॥
तत: प्रदोषसमये दीपान् दद्यात् प्रयत्नत: ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥
भविष्ये ।
कार्त्तिके भौमवारे च चित्रा कृष्णचतुर्द्दशी ।
तस्यामाराधित: स्थाणुर्नयेच्छिवपुरं ध्रुवम् ॥
यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम् ,
यमुनायां विशेषेण नियतस्तर्पयेद्यमान् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नम: ॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्तु दद्याज्जलाञ्ज-
लीन् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥"

आचारादस्यां चतुर्द्दश्यां शाकभक्षणं कर्त्तव्यम् । तच्च
निर्णयामृतम् ।
"ओलं केमुकवास्तुकं सरषपं कालञ्च निम्बं जयां
शालिञ्चीं हिलमोचिकाञ्च पटुकं शौलफं
गुडूचीन्तथा ।
भण्टाकीं सुनिषण्णकं शिवदिने खादन्ति ये
मानवा:
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते
तिथौ ॥"
जयां जयन्तीं पटुकं पटोलं शौलफं शुलफा
इति ख्यातम् । सुनिषण्णकं सुषणिया इति
ख्यातम् । इति तिथ्यादितत्त्वम् ॥
भूतजटा, स्त्री, (भूतस्य जटेव तत्सदृशत्वात् ।)
जटामांसी । इति शब्दमाला ॥ (पर्य्यायो यथा,
"जटामांसी भूतजटा जटिला च तपस्विनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गन्धमांसी । इति राजनिर्घण्ट: ॥
भूतद्रावी, [न्] पुं, (भूतान् पिशाचान् द्रावयतीति ।
द्रु+णिच्+णिनि: ।) भूताङ्कुशवृक्ष: । रक्त-
करवीर: । इति राजनिर्घण्ट: ॥
भूतद्रुम:, पुं, (भूतप्रियो द्रुम: ।) श्लेष्मान्तकवृक्ष: ।
इति राजनिर्घण्ट: ॥
भूतधात्री, स्त्री, (भूतानि धरतीति । धृ+तृच् ।
+ङीप् ।) पृथिवी । इति त्रिकाण्डशेष: ॥
(यथा, बृहत्संहितायाम् । ८ । ३० ।
"निष्पन्नशालीक्षुयवादिशस्यां
भयैर्विमुक्तामुपशान्तवैराम् ।
संहृष्टलोकां कलिदोषमुक्तां
क्षत्रं तदा शास्ति च भूतधात्रीम् ॥")
भूतनाथ:, पुं, (भूतानां नाथ: ।) शिव: । इति
शब्दरत्नावली ॥ (यथा, रघु: । २ । ५८ ।
"तद्भूतनाथानुग ! नार्हसि त्वं ॥")
भूतनायिका, स्त्री,(भूतानां नायिका नियामिका ।)
दुर्गा । इति हेमचन्द्र: ॥
भूतनाशनं, क्ली, (भूतानि प्राणिजातानि नाशयत्य-
नेनेति । नश्+णिच्+ल्युट् ।) रुद्राक्षम् ।
इति राजनिर्घण्ट: ॥
भूतनाशन:, पु, (भूतान् नाशयतीति ॥ नश+
णिच्+ल्यु: ।) भल्लातक: । इति रत्नमाला ॥
सर्षप: । इति राजनिर्घण्ट: ॥
भूतपत्री, स्त्री, (भूत इव कृष्णं पत्रं यस्या: । ङीप् ।)
तुलसी । इति राजनिर्घण्ट: ॥
भूतपुष्प:, पुं, (भूतयुक्तं प्राणिविशिष्टं पुष्पं यस्य ।)
श्योनाकवृक्ष: । इति रत्नमाला ॥
भूतपूर्णिमा, स्त्री, (भूतानां पूर्णिमा ।) आश्विनी
पूर्णिमा । तत्पर्य्याय: ॥ शारदी २ कौमुदी ३
आश्वयुजी ४ शतपर्व्वा ५ रङ्गभूति: ६ कोजा-
गरा ७ । इति शब्दरत्नावली ॥
भूतब्रह्मा, [न्] पु, (भूतात्मको ब्रह्मा ब्राह्मण: ।)
देवल: । इति शब्दमाला ॥
भूतभावन:, पुं, (भूतानि शिवादीनि भावयति
जनयतीति । भू+णिच+ल्यु: ।) विष्णु: ॥

(यथा, महाभारते । १३ । १४९ । १४ ।
"भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥"
महादेवः । यथा, महाभारते ।१३।१७।३३ ।
"अभिवाद्यो महाकर्म्मा तपस्वी भूतभावनः ॥")
वटुकभैरवः । इति [ ] तन्त्रोक्तं तस्याष्टो-
त्तरशतनामान्तर्गतनाम ॥ (भूतानि भावयति
पालयतीति । भूतपालके, त्रि । इति श्रीधर-
स्वामी ॥ यथा गीतायाम् । ९ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥")

भूतभृत्, पुं, (भूतानि बिभर्त्तीति । भृ + क्विप् । तुगागमश्च) विष्णुः । यथा, महाभारते ।१३।१४९।१४।
भूतकृत् भूतभृद्भावो भूतात्मा भूतभावनः । इति तस्य सहस्रनामस्तोत्रम् ॥ (भूतधारके, त्रि । यथा, गीतायाम् । ९ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥")

भूतमारी, स्त्री, (भूतानि मारयतीति । भूत + मृ + णिच् + णिनिः ।) चीडानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

भूतयज्ञः, पुं, (भूतार्थो यज्ञः । भूतानि काकादिप्राणिजातानि तान्युद्दिश्य यो यज्ञ इति वा नित्यं गार्हस्थ्याकरणीय पञ्चयज्ञेषु यज्ञभेदः ।) भूतबलिः । ते तु पञ्चमहायज्ञान्तर्गतबलिवैश्वदेवकर्म्मणी । यथा, भूतेभ्यो बलिहरणं भूतयज्ञः । इति हारीतसूत्रम् ॥ अस्यानुष्ठानं बलिशब्दे द्रष्टव्यम् । (यथा, मनुः । ४ । २१ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत ॥")

भूतलिका, स्त्री, (भूतलं पृथ्वीतलं आधारत्वेन अस्त्यस्या इति । भूतल + ठन् टाप् ।) पृक्का । इति राजनिर्घण्टः ॥

भूतवासः, पुं, (भूतानां वासो यत्र ।) कलिद्रुमः । इत्यमरः । २ । ४ । ५८ ॥ (तथा च पर्य्यायः ।
"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमेभागे ॥
महादेवः । यथा, हरिवंशे उत्तरभविष्ये । १५ । ३३ ।
"भूतवास ! नमस्तुभ्यं सर्व्वावास ! नमोऽस्तु ते ॥")

भूतविक्रिया, स्त्री, (भूतानामिव विक्रियास्याम् ।) अपस्माररोगः । इति राजनिर्घण्टः ॥

भूतवृक्षः, पु, (भूतप्रियो वृक्षः ।) शाखोटवृक्षः । श्योनाकवृक्षः । इति मेदिनी । षे, ५६ ॥

भूतवेशी, स्त्री, (भूतानामिव वेशोऽस्याः । गौरादित्वात् ङीष् ।) श्वेतशेफालिका । इत्यमरः । २ । ४ । ७१ ॥ (विशेषोऽस्याः श्वेतशेफालिकाशब्दे ज्ञेयः ॥)

भूतशुद्धिः, स्त्री, (भूतानां देहारम्भकपृथिव्यादिपञ्चभूतानां शुद्धिः शोधनम् ।) पूजादौ बीजविशेषद्वारावामकुक्षिस्थितपापपुरुषदहनपूर्व्वकशरीरशोधनम् । तत्प्रयोगो यथा । रमिति जलधारया वह्निप्राकारं विचिन्त्य स्वाङ्के उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपुरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्र वाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपचतुर्व्विंशतितत्त्वानि लीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य तस्य षोडशवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थकृष्णवर्णपापपुरुषेण सह देहं संशोष्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत् । दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोडशवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारोत्थितवह्निना दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत् । ठमिति चन्द्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा तस्य षोडशवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटस्थचन्द्राद्गलितसुधया मातृकावर्णात्मिकया समस्तदेहं विरचय्य लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत् । मात्रासङ्ख्यया वा ॥*॥ तदुक्तं गौतमीये ।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिवस्थाने परमात्मनि देशिकः ॥
धूम्रवर्णं ततो वायुबीजं षड्बिन्दुलाञ्छितम् ।
पूरयेदिडया वायुं सुधीः षोडशमात्रया ॥
मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्नया ।
द्वात्रिंशन्मात्रया मन्त्री रेचयेत पिङ्गलाख्यया ॥
पूरयेदनया चैव सञ्चिन्त्य नीलमारुतम् ।
रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितम् ॥
तेन पूरकयोगेन मात्रया षोडशाख्यया ।
चतुःषष्ट्या मात्रया च निर्द्दहेत कुम्भकेन च ।
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गि पदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाणं रक्तश्मश्रु विलोचनम् ।
खड्गचर्म्मधरं क्रुद्धमेव कुक्षौ विचिन्तयेत् ॥
मूलाधारोत्थितेनैव वह्निना निर्द्दहेच्च तम् ।
एवं संदह्य परितो द्वात्रिंशन्मात्रया ततः ॥
भस्मना सहितं मन्त्री रेचयेदिडया पुनः ।
वामनासां चन्द्रबीजं कुन्देन्दुधवलप्रभम् ॥
भालेन्दुराजे संयोज्य ततः षोडशमात्रया ।
सुधया चतुःषष्टिमात्रया तोयबीजकम् ॥
ध्यात्वाऽमृतमयीं वृष्टिं पञ्चाशद्वर्णरूपिणीम् ।
तया देहं विचिन्त्यैवं मनसा पिङ्गलाध्वना ॥

द्वात्रिंशन्मात्रया मन्त्री लं बीजेन दृढं नयेत् ।
स्वस्थाने हंसमन्त्रेण पुनस्तेनैव वर्त्मना ॥
जीव तत्त्वानि चानीय स्वस्थाने स्थापयेत्ततः ।
इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत् ॥*
संक्षेपभूतशुद्धिर्यथा । पुरश्चरणचन्द्रिकायाम् ।
"अथवान्यप्रकारेण भूतशुद्धिर्विधीयते ।
धर्म्मकन्दसमुद्भूतं ज्ञाननालसुशोभनम् ॥
ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकम् ।
स्वीयहृत्कमले ध्यायेत् प्रणवेन विकासितम् ॥
कृत्वा तत्कर्णिकासंस्थं प्रदीपकलिकानिभम् ।
जीवात्मानं हृदि ध्यात्वा मूले सञ्चिन्त्य कुण्डलीम् ।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत् ॥"
इति तन्त्रसारः ॥

भूतसञ्चारः, पुं, (भूतस्य सञ्चारः ।) भूतोन्मादरोगः । तत्पर्य्यायः । आवेशः २ भूतक्रान्तिः ३ ग्रहागमः । इति राजनिर्घण्टः ॥

भूतसञ्चारी, [न्] पुं, (भूतेषु सञ्चरति इति भूत + सम् + चर णिनिः ।) दावानलः । इति शब्दमाला ॥

भूतसर्गः, पु, (सृज्यते इति । सृज + भावे घञ् । भूतानां सर्गः ।) भूतसृष्टिः । (यथा, मार्कण्डेयपुराणे । ४७ । ३१ ।
"प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ॥")
"ब्राह्मं प्राजापत्यीयञ्च सौम्यमैन्द्रन्तथैव च ।
गान्धर्व्वमथ कौवेरं रक्षःपैशाचमासुरम् ॥
स्थावरं पाशव मार्गं सार्पं शाकुनिकन्तथा ।
चतुर्द्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम् ॥"
इति वह्निपुराणोक्तं कौवल्यमार्षम् ॥

भूतसारः, पुं, (भूतः गतः सारो यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

भूतहन्त्री, स्त्री, (भूतानि हन्तीति हन + तृच् + ङीप् ।) बन्ध्याककर्कोटकी । नीलदूर्व्वा । इति राजनिर्घण्टः ॥

भूतहरः, पुं, (भूतानि हरतीति हृ + अच् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

भूतहारि, [न्] क्ली, (भूतानि हरतीति हृ + णिनिः ।) देवदारु । इति राजनिर्घण्टः ॥

भूता, स्त्री, (भूत + टाप् ।) कृष्णचतुर्द्दशी । यथा, स्कान्दे ।
"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतायां पारणे कृते ॥"
अपि च ।
"शिवरात्रिव्रतं भूतां कामविद्धां विवर्ज्जयेत् ॥"
इति तिथ्यादितत्त्वम् ॥

भूताङ्कुशः, पुं, (भूतानामङ्कुश इव निवारकत्वात् ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः । चवकः २ क्षुरकः ३ तीक्ष्णः ४ क्रूरः ५ चवः ६ राक्षोघ्नसंज्ञः ७ भूतद्रावी ८ ग्रहाङ्कुशः ९ । अस्य गुणाः । तीव्रगन्धत्वम् । उत्कटत्वम् । उष्णत्वम् । कटुत्वम् । भूतग्रहादिदोषघ्नत्वम् । कफवातनिकृन्तनत्वञ्च । इति राजनिर्घण्टः ॥

भूतात्मा, [न्] पुं, (भूतानामात्मा ।) देहः । (यथा, मनुसंहितायाम् । १२ । १२ ।
"यः करोति तु कर्म्माणि स भूतात्मोच्यते बुधैः ॥"
"यः पुनरेष व्यापारान् करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पठिते-च्यते ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)
परमेष्ठी । इति मेदिनी । ते, २०० ॥ शिवः । युद्धम् । इति शब्दरत्नावली ॥ विष्णुः । यथा,
"भूतकृत् भूतभृत भावो भूतात्मा भूतभावनः ॥"
इति महाभारते दानधर्म्मः ॥
(जीवात्मा । यथा, मनुसंहितायाम् ।५।१०९।
"अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥"
यथा च चरके शारीरस्थाने प्रथमेऽध्याये ।
तस्मिंश्चरमसंन्यासे समूलाः सर्व्ववेदनाः ।
ससंज्ञा ज्ञानविज्ञाना निवृत्तिं यान्त्यशेषतः ॥
अतःपरं ब्रह्मभूतो भूतात्मा नोपलभ्यते ।
निःसृतः सर्व्वभावेभ्यश्चिह्नं यस्य न विद्यते ॥
गतिर्ब्रह्मविदां ब्रह्म तच्चाक्षरमलक्षणम् ।
ज्ञानं ब्रह्मविदाञ्चात्र नाज्ञस्तज्ज्ञातुमर्ह-तीति ॥")

भूतारि,क्ली, (भूतानां अरिः तन्निवारकत्वात् अभि-धानात् क्लीवत्वम् ।) हिङ्गु । इति राजनिर्घण्टः ॥

भूतार्त्तः, त्रि, (भूतेन ऋतः) भूताविष्टः । इति हेमचन्द्रः । ३ । १५५ ॥

भूताली, स्त्री, (भूतानामालीव) भूपाटली । सुषली । इति राजनिर्घण्टः ॥

भूतावासः, पुं, (भूतानामावासः) विभीतकवृक्षः । इति राजनिर्घण्टः ॥ विष्णुः । यथा,—
"भूतावासो वासुदेवः सर्व्वासुनिलयो लयः ॥"
इति महाभारते दानधर्म्मः ॥ (शरीरम् । यथा, मनुसंहितायाम् । ६ । ७७ ।
"जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥"
शाखोटः । तत्पर्य्यायो यथा,—
"शाखोटः पीतफलको भूतावासः खरच्छदः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भूताविष्टः, त्रि, (भूतेन आविष्टः) पिशाचग्रस्तः । तज्ज्ञापकचक्रम् यथा,—
"पञ्चरेखाः समुल्लिख्य तिर्य्यगूर्द्ध्वक्रमेण हि ।
पदानि षड्दशापाद्य लिकमाद्ये सुनौ त्रयम् ॥
नवमे सप्त दद्यात्तु वाणं पञ्चदशे तथा ।
द्वितीयेऽष्टावष्टमे षट् दिशि द्वौ षोडशे श्रुतिः ॥
एकादिना समं शेयमिच्छाङ्कार्हं विकोष्ठके ।
तदा द्वाविंशदादिः स्याच्चतुष्कोष्ठेषु सर्व्वतः ॥
दर्शनाद्वारवातासां शुभं स्यादिषु कर्म्मसु ।
द्वात्रिंशत् प्रसवे नार्य्याश्चतुस्त्रिंशत्क्रमे मृत्याम् ॥
भूताविष्टेषु पञ्चाशन्नृत्तनापत्यासु वै शतम् ।
द्वाषष्टिस्तु वन्ध्यायां चतुःषष्टी रणाध्वनि ॥
विषे विंशो धान्यकीटेष्वष्टाविंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिताः ॥"
इति ज्योतिस्तत्त्वम् ॥

१	८	१८	२३
२०	२१	३	६
७	२	२४	१७
२२	१६	५	४
५०	५०	५०	५०

भूताविष्टः, त्रि, (भूतेन आविष्टः ।) भूतक्रान्तः । भूतादिना रोगग्रस्तः । (यथा,—
"भूताविष्टेषु पञ्चाशन्नृत्तनापत्यासु वै शतम् ।"
इत्यादि ज्योतिस्तत्त्वम् ॥ भूतविशेषाणामावेश-समयाः । यथा,—
"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥
कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्द्दश्यां विशन्ति च ॥
दर्पणादीन् यथाच्छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्करार्च्चिश्च यथा देहञ्च देहभृत् ॥
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम् ।"
इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ॥)

भूतावेशः, पुं, (भूतानामावेशः) भूतसञ्चारः । भूत पाओया इति भाषा । अस्य पर्य्याय-आवेशशब्दे द्रष्टव्यः ॥

भूतिः, स्त्री, (भवत्यनयेति । भू+"क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति क्तिच् ।) महादेवस्य अणिमाद्यष्टप्रकारवैभवम् । इत्य-मरः । १ । १ । ३८ ॥ शम्भुधृतभस्म । इत्यमर-टीकायां भरतः ॥ भस्म ॥ (यथा, शिशुपाल-वधे । १ । ४ ।
"नवं घनोनद्धमृणालकुत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ॥")
सम्पत्तिः । (उत्तरोत्तरवृद्धिः । यथा, भगवद्-गीतायाम् । १८ । ७८ ।
"यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥")
हस्तिशृङ्गारः । इति मेदिनी ते, ४० ॥ (हस्ति-शृङ्गारोऽत्र गजमण्डनम् । यथा, मेघदूते ।१९।
"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् ।
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥")
जातिः । इति विश्वः ॥ (पितृगणभेदः । यथा, मार्कण्डेयपुराणे । ९६ । ४३ ।
"विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ।
भूतिदो भूतिकृद् भूतिः पितॄणां ये गणा नव ॥"
लक्ष्मीः । यथा, भागवते । ४ । १ । ४ ।
"यस्तयोः पुरुषः साक्षाद् विष्णुर्यज्ञस्वरूपधृक् ।
या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ॥"
भूतेर्लक्ष्म्याः । इति तट्टीकायां श्रीधरस्वामी ॥)
वृद्धिनामौषधम् । रोहिषतृणम् । भूतृणम् । इति राजनिर्घण्टः ॥ (भवनमिति । भू+क्तिन्) उत्पत्तिः । सत्ता । इति भूधातोर्भावे क्तिप्रत्य-येन निष्पन्नम् ॥

भूतिकं, क्ली, (भू+क्तिच । संज्ञायां कन् ।) भूनिम्बः । कत्तृणम् । इत्यमरः । २ । ४ । ८ ।
कट्फलम् । यमानी । घनसारः । इति हेम-चन्द्रः ।

भूतिकः पुं, (भूति । संज्ञायां कन् ।) यमानी । इति रत्नमालाराजनिर्घण्टौ ॥

भूतिकामः, पुं, (भूतिं कामयते इति । कम्+ "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) राज-मन्त्री । बृहस्पतिः । इति केचित् । ऐश्वर्य्याभि-लाषिणि, त्रि । यथा । वायव्यं श्वेतमालभेत भूतिकामः । इत्यधिकरणमालायां द्वितीयपादे काम्यपशुकाण्डे विध्यर्थवादबोधिका श्रुतिः ॥

भूतिकीलः, पुं, (भूतेः शस्यादिसम्पत्तेः कील इव जलदत्वात् ।) भूखातः । इति शब्दमाला ॥ खाना इति भाषा ॥

भूतिगर्भः, पुं, (भूतिः कवित्वसम्पत्तिर्गर्भेऽन्तर्यस्य । यद्वा भूतिशब्द उपाधिनाम्नोऽन्तर्यस्य ।) भवभूतिकविः । इति भूरिप्रयोगः ॥

भूतिनिधानं, क्ली, (निधीयतेऽस्मिन्निति । नि+धा +अधिकरणे+ल्युट् । ततः भूत्या निधानमिति, षष्ठीसमासः ।) धनिष्ठानक्षत्रम् । इति जटा-धरः ॥

भूतिमान्, [त्] त्रि, ऐश्वर्य्ययुक्तः । भूतिरस्त्यस्य । इत्यर्थे मतुप्रत्ययेन निष्पन्नः ॥ (यथा, महा-भारते । ३ । २०३ । ४३ ।
"आयुष्मान् भूतिमांश्चैव स्नात्वा भवति पर्व्वसु ॥")

भूतीकं, क्ली, (भूतिक । पृषोदरात् साधुः ।) भूनिम्बः । यमानी । भूस्तृणम् । कत्तृणम् । इति मेदिनी । कं,१३५ ॥ (यथा, सुश्रुते उत्तर-तन्त्रे । ३९ अध्याये ।
"वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम् ॥"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा ।
भूतीकं ध्यामपौरञ्च श्यामकं धूमगन्धिकम् ॥")

भूतृणं, क्ली, (भुवस्तृणम् ।) गन्धतृणम् । गन्धखड इति भाषा । तत्पर्य्यायः । गन्धखेडम् २ रौहि-षम् ३ गोमयप्रियम् ४ । इति रत्नमाला ॥ पटम् ५ रामकर्पूरम् ६ कत्तृणम् ७ शरम् ८ श्याम-कम् ९ ध्यामकम् १० पौरम् ११ देवजग्धकम् । इति रत्नमालान्तरम् ॥ (यथास्य पर्य्यायः ।
"गुह्यबीजन्तु भूतीकं सुगन्धं जम्बुकप्रियम् ।
भूतृणन्तु भवेच्छत्रा मालातृणकमित्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूतृणः, पुं, (भुवस्तृणः ।) भूस्तृणम् । सुगन्ध रोहिष इति परिमलद्रव्यविशेषे च अन्यदेशे प्रसिद्धः । तत्पर्य्यायः । रोहिषः २ भूतिः ३ भूतिकः ४ कुटुम्बकः ५ मालातृणः ६ समालम्बी ७ छत्रः ८ अतिच्छत्रकः ९ गुह्यबीजः १० सुगन्धः ११ गुच्छालः १२ पुंस्त्वविग्रहः १३ वधिरः १४ अतिगन्धः १५ शृङ्गरोहः १६ करे-रुकः १७ । अस्य गुणाः । कटुत्वम् । तिक्त-त्वम् । वातश्लेष्मभूतग्रहावेशदारणविषदोष-नाशित्वञ्च । इति राजनिर्घण्टः ॥

भूतेशः, पुं, (भूतानां प्राण्यादीनां प्रमथादीनां वालग्रहादीनाञ्च ईशः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, राजतरङ्गिण्याम् । १ । १०७ ।

"स्वच्छैः सच्छ्रादिते देशे स तदुच्छित्तये नृपः । तपः सन्तोषिताल्लेभे भूतेशात् सुव्रतो सुतम् ॥")

भूत्तमं, क्ली, (भुवि उत्तमम् ।) सुवर्णम् । इति हेमचन्द्रः । ४ । १० ॥

भूदरीभवा, स्त्री, (भूदर्य्यां भूविवरे भवतीति । भू + अच् । टाप् ।) आखुपर्णी । इति भावप्रकाशः ॥

भूदारः, पुं, (भुवं दारयतीति । दॄ + कर्म्मण्यण् । ३ । २ । १ । इत्यण् ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

भूदेवः, पुं, (भुवो भुवि वा देवः ।) ब्राह्मणः । इत्यमरः । ३ । ७ । ६ ॥

भूधनः, पुं, राजा । भूरेव धनं यस्य सः । इति केचित् ॥

भूधरः, पुं, (धरतीति । धृ + पचाद्यच् । भुवां धरः इति षष्ठीसमासः ।) पर्व्वतः । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । ५७ । ११ ।

"तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥")

यन्त्रभेदः । यथा,—

"जलकच्छपपातालदोलाभूधरवालुकाः ।

वकाद्या यन्त्रभेदाः स्युर्वक्ष्यन्तेऽथ क्रमेण वै ॥"

इति शब्दचन्द्रिका ॥

(यथास्य व्यवहारः ।

"द्विपलं शुद्धसूतस्य सुसार्द्धं गन्धकस्य च ।

कन्यानीरेण संमर्द्य दिनमेकं निरन्तरम् ॥

बद्ध्वा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटे ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥

शिवः । यथा, महाभारते ।१३।१४।१५१।

"भूधरो नागमौञ्जी च नागकुण्डलकुण्डली ॥"

कृष्णः । यथा, भागवते । ३ । १३ । ४० ।

"दंष्ट्राग्रकोट्या भगवंस्त्वया धृता

विराजते भूधर ! भूः सभूधरा ।

यथा वनान्निःसरतो दता धृता

मतङ्गजेन्द्रस्य सपत्त्रपद्मिनी ॥")

भूधात्री, स्त्री, (भूजाता धात्री ।) भूम्यामलकी । इति राजनिर्घण्टः ॥ (यथास्य गुणाः ।

"भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।

पिपासाकासपित्तास्रकफकण्डूक्षतापहा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वटुकभैरवः । इति विश्वसारतन्त्रे तस्य शत-नामस्तोत्रम् ॥

भूधः, पुं, (भुवं धरतीति । धृ + मूलविभुजादित्वात् । ३ । २ । ५ । इत्यस्य वार्त्तिकोक्त्या कः ।) पर्व्वतः । इति हेमचन्द्रः । ४ । ६३ ॥

भूनागः, पुं, उपरसविशेषः । तत्पर्य्यायः । क्षितिनागः २ भूजन्तुः ३ रक्तजन्तुकः ४ क्षितिजः ५ क्षितिजन्तुः ६ रक्तसुरुकः ७ । अस्य गुणाः । वज्रमारकत्वम् । नानाविज्ञानकारकत्वम् । रसजारकत्वम् । तत्सत्त्वस्य विशापहत्वञ्च । इति राजनिर्घण्टः ॥

भूनिम्बः, पुं, क्षुपविशेषः । चिराता इति भाषा । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।

"मधुकभूनिम्बगुडिका इति समभागाः कल्कः स्यात् ।")

तत्पर्य्यायः । अनार्य्यतिक्तः २ कैरातः ३ रामसेनकः ४ किरातनिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८ । इति राजनिर्घण्टः ॥ कटुतिक्तः ९ । इति भावप्रकाशः ॥ (तथा चास्य पर्य्यायान्तरम् । वैद्यकरत्नमालायाम् ।

"किराततिक्तं कैरातं भूनिम्बः काण्डतिक्तकः ॥")

अस्य गुणाः । वातिकत्वम् । तिक्तत्वम् । कफपित्तज्वरापहत्वम् । व्रणसंरोपणत्वम् । पथ्यत्वम् । कुष्ठकण्डूतिशोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"किराततिक्तो नेपालः सोऽर्द्धतिक्तो ज्वरान्तकः ।

किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥

सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।

कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ॥"

इति भावप्रकाशः ॥

अस्य गुणपर्य्यायान्तरं किराततिक्तशब्दे द्रष्टव्यम् ॥

भूनीपः, पुं, (भूमिजातो नीपः । शाकपार्थिवादिवत् समासः ।) भूमिकदम्बः । इति राजनिर्घण्टः ॥

भूनेता, [ऋ] पुं, (भुवो नेता नायकः ।) राजा । इति केचित् ॥

भूपः, पुं, (भुवं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) राजा । इत्यमरः । २ । ८ । १ ॥ अर्थलोभेन प्रजादण्डकरणे तस्य पापं यथा ।

"अर्थलोभेन यो भूपः प्रजादण्डं करोति च ।

वृश्चिकानाञ्च कुण्डे स तल्लोमाब्दं वसेद्ध्रुवम् ॥

ततो वृश्चिकजातिश्च सप्तजन्मसु भारत ।

ततो नरश्चाङ्गहीनो व्याधी शुद्धो भवेन्नरः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

भूपतिः, पुं, (भुवः पतिः ।) वटुकभैरवः । यथा,

"भूधरो भूधराधीशो भूपतिर्भूधरात्मकः ।"

इति विश्वसारतन्त्रोक्तभैरवस्तोत्रम् ॥

राजा । यथा,—

भूपुत्री यस्य पत्नी स तु भवति कथं भूपती रामचन्द्रः ।

इति रामायणे कैकयीवाक्यम् ॥

ऋषभौषधम् । इति राजनिर्घण्टः ॥

भूपदः, पुं, (भुवि पदानि मूलान्यस्य ।) वृक्षः । इति शब्दचन्द्रिका ॥

भूपदी, स्त्री, (भुवि पदं यस्याः । गौरादित्वात् ङीष् ।) मल्लिका । इत्यमरः । २ । ४ । ७० ॥ (यथास्याः पर्य्यायः ।

"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूपलाशः, पुं, (भुवि पलाशमस्य ।) तृणभेदः । विश्वाली इति भाषा । यथा,—

"अश्वोरुकः सुकर्णश्च भूपलाशो विशल्यकृत् ।"

इति रत्नमाला ॥

भूपाटली, स्त्री, (भुवि जाता पाटलीव ।) वृक्षविशेषः । भूयातालि इति लोकभाषा इति च हिन्दीभाषा । तत्पर्य्यायः । भूकुम्भी २ भूताली ३ रक्तपुष्पिका ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । पारदे प्रयोजकत्वञ्च । इति राजनिर्घण्टः ॥

भूपालः, पुं, (भुवं पालयतीति । पालि रक्षणे + "कर्म्मण्यण् । ३ । २ । १ । इत्यण् ।) राजा । इति शब्दमाला ॥ (यथा, मार्कण्डेये ।१८।३।

"यदर्थं गृह्यते शुल्कं तदनिष्पादयन् वृथा ।

प्रजानां द्वादशं भागं भूपालाय वणिग्जनः ॥"

सोमपालस्य पुत्त्रः । यथा, राजतरङ्गिण्याम् । ८ । ३४९५ ।

"सोमपालात्मजो भूभृद् भूपालः प्राक्तनस्तथा ॥")

भूपुत्त्री, स्त्री, (भुवः पुत्त्री ।) सीता । इति शब्दरत्नावली ॥ [रामचन्द्रः ॥"

("भूपुत्त्री यस्य पत्नी स भवतु कथं भूपती इति रामायणम् ॥)

भूपेष्टः, पुं, (भूपानामिष्टः ।) राजादनीवृक्षः । इति राजनिर्घण्टः ॥

भूभर्त्ता, [ऋ] पुं, (भुवो भर्त्ता । "याजकादिभिश्च ।" २ । २ । ९ । इति षष्ठीसमासः ।) पृथिवीपतिः । इति सिद्धान्तकौमुद्यां तत्पुरुषसमासः ॥ (यथा, राजतरङ्गिण्याम् ।३।१९९।

"तस्मिन्नहनि भूभर्त्ता शोकाग्निःश्वसिताजिरम् ॥")

भूभुक्, [ज्] पुं, (भुवं भुनक्ति पालयतीति । भुज + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) राजा । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । ४ । ६१ ।

"आपदाराणि दुर्गाणि सुधः कान्यजाङ्गला । निवासाय प्रशस्यन्ते भूभुजां भूतिमिच्छताम् ॥")

भूभृत्, पुं, (भुवं बिभर्त्तीति । भृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् । ६ । १ । ७१ । इति तुगागमश्च ।) राजा । (यथा, रघौ । ११ । ८१ ।

"तेन भूमिनिहितैककोटि तत्

कार्म्मुकञ्च बलिनाधिरोपितम् ।

निष्प्रभश्च रिपुरास भूभृताम्

धूमशेष इव धूमकेतनः ॥")

पर्व्वतः । इति मेदिनी । ते, १४० ॥ (यथा, कुमारसम्भवे । ६ । १ ।

"अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् ।

दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥")

भूमयी, स्त्री, (भू + मयट् + ङीप् ।) छाया । सा तु सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ बहा-लके, त्रि ॥

भूमा, [न्] पुं, बहुत्वम्। यथा। "भूयोभूम भूयिष्ठाः।" बहोरीयसिमन् इष्ठान्तस्य एते निपात्यन्ते। इति मुग्धबोधव्याकरणम्॥ ईयसोर्यस् ईयसादौ बहोर्भूरादेशः। ईयसिमनोरादिलोपः। इष्ठे यकारागमश्च निपात्यन्ते। अतिशयेन बहुः भूयान्। बहोर्भावः भूमा। अतिशयेन बहुः भूयिष्ठः। इति तट्टीकायां दुर्गादासः॥ बहुत्वविशिष्टः। तत्र वाच्यलिङ्गः। यथा। भूयः भूम। इति प्रभूतशब्दपर्य्याये अमरटीकायां रमानाथः॥*॥ विराट्पुरुषः। यथा। "यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मनित्यत्वं सत्यसुखस्य प्रतिभाति। इति वेदान्तसारटीका॥

भूमिः, स्त्री, (भवन्ति भूतान्यस्यामिति। भू + "भुवः किन्।" उणा० ४। ४५। इति मिः। स च कित्।) पृथिवी। स्थानमात्रम्। इति मेदिनी। मे, ७० ॥ (यथास्या पर्य्यायः।
"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः।
क्षितिरुर्व्वी मही क्षोणी क्ष्मा धरा कुवसुन्धरा॥"
इति वैद्यकरत्नमालायाम्॥) जिह्वा। इति संक्षिप्तसारोणादिवृत्तिः॥ योगिनामवस्थाविशेषः। यथा,—
"निरुद्धे चेतसि पुरा सविकल्पसमाधिना।
निर्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः॥
व्युत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधितः।
अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः॥
एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति॥"
इति गीतागूढार्थदीपिकायां मधुसूदनसरस्वती॥ भूमेः पर्य्यायादयः पृथिवीशब्दे द्रष्टव्याः। अस्या गुणाः।
"भूमेः स्थैर्य्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता।
गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः॥"
इति महाभारते मोक्षधर्म्मः॥ अस्यार्थः। स्थैर्य्यमचाञ्चल्यम् १। गुरुत्वं पतनप्रतियोगी गुणः २। काठिन्यम् ३। प्रसवार्थता धान्याद्युत्पत्तिहेतुता ४। गन्धः ५। गुरुत्वं पिण्डपुष्टिः ६। शक्तिः गन्धग्रहणसामर्थ्यम् ७। संघातः श्लिष्टावयवत्वम् ८। स्थापना मनुष्याद्याश्रयम् ९। धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः। इति तट्टीका॥*॥ भूमिदानमाहात्म्यं यथा,—
"सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन्! विप्रायाकिञ्चनाय वै॥
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः।
न भूमिदानसदृशं पवित्रमिह विद्यते॥
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति।
उभौ तौ पुण्यमापन्नौ नियतं स्वर्गगामिनौ॥
यत्किञ्चिद्भूमिदानन्तु सर्व्वदानोत्तमोत्तमम्।
महीपते। नरः कोऽपि भूमिदो भूमिमाप्नुयात्॥
भूमिदानसमं दानं नास्त्यत्र पृथिवीतले।
तस्माद्दत्त्वमनन्तश्चैव भुक्तिमुक्तिसुखप्रदम्॥
यथा तथा प्रकारेण भूमिदाता तु भूमिपः।
सुखी स्यात् सर्व्वकालेषु चान्ते स्वर्गमवाप्नुयात्॥
इष्टदत्त्वात्तरं वापि भूमिदानं महत्तमम्।
यः कश्चिद्ब्राह्मणो दत्त्वा भवतीह महीपतिः॥
सर्व्वथा सर्व्वदा देया धरित्री ब्राह्मणस्य तु।
प्राणान्तेनैव न क्वापि हरणीया जनैरपि॥
कृत्वा खातादिकं कर्म्म विप्रभूमिं नरो बलात्।
करोति यदि राजेन्द्र! तत् सर्व्वं निष्फलं भवेत्॥
ब्राह्मणाद्दानग्रहणं विनानुज्ञाञ्च पार्थिव!।
तथा तत्परितोषञ्च तत्तन्मूल्यादिकं विना॥
विप्रभूमौ भूसुरोऽपि दैवं पैत्रं तथाध्वरम्।
हरिसद्म तथारामप्रासादमण्डपं गृहम्॥
खातादिखननं सेतुबन्धनं भवनं गवाम्।
सद्धान्यफलमूलादिशाकादिसेचनमेव च॥
पञ्चाम्रवपनं पुष्पोद्यानं तृणादिरोपणम्।
सवटाश्वत्थतुलसीधात्रीबिल्वादिरोपणम्॥
नित्यं नैमित्तिकं काम्यं स्नानसन्ध्यादिकं तथा।
पञ्चयज्ञं तर्पणाद्यमेतच्चापरम्॥
श्रीकृष्णसेवनं भक्तभक्तियोऽश्रुपूर्व्वकम्।
का कथा वैतरेषान्तु न कुर्य्यात् पारमार्थिकः॥
यः कर्म्मफलकामेप्सुर्न करोत्यत्र कर्म्म च।
कुरुते मत्ततामोहाद्ज्ञानाद्वा प्रमादतः।
नृपते। कुर्व्वतामेतत् सर्व्वं स्यान्निष्फलं ध्रुवम्॥
यद्भूमिरथवा तस्य सम्पूर्णं फलमेव च।
अतो लोके हि धर्म्मात्मा ज्ञानी च सर्व्वधर्म्मवित्॥
विवेकी धर्म्मशास्त्रज्ञः पुराणागमवेदवित्।
वेदान्तज्ञो मुनिः साधुः कार्य्यादिर्वा महीपते।।
न कुर्य्याद्भूमिहरणं ब्राह्मणीहरकल्मषम्॥"
इति पाद्मोत्तरखण्डे ४८ अध्यायः॥*॥ अपि च। बृहस्पतिः।
"षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
उच्छेत्ता चानुमन्ता च तावन्ति नरके वसेत्॥
तथा।
भूमिं दत्त्वा तु यः पत्रं कुर्य्याच्चन्द्रार्ककालिकम्।
अनाच्छेद्यमनाहार्य्यं दानलेख्यन्तु तद्विदुः॥
महाभारते।
अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः।
पृथिवीं नान्यदिच्छन्ति पावनीं जननीं यथा॥
नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम्।
दाने वाप्यथवादाने नामास्याः परमं प्रियम्॥"
दानादानकाले यत् प्रियदत्ता नामास्याः परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य्य दानया प्रतिग्रहीतव्या च। भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमिर्विष्णुदेवताका। षष्टिवर्षसहस्रावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणमात्रम्। भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम्। इति शुद्धितत्त्वम्॥*॥ आर्द्राद्यपादगे रवौ भूमौ रजोयुक्ता भवति तत्काले पाठादिनिषेधो यथा ज्योतिषे।
"रजोयुक् स्यादम्बुवाची च रौद्राद्यपादगे रवौ।
तस्यां पाठो बीजवापो नाद्विभीर्दुःखमागतः।"
रजोयुक् क्ष्मा ऋतुमती पृथ्वी। ज्योतिषे।
धर्म्मिन् वारे सहस्रांशुर्यत्काले मिथुनं व्रजेत्।
अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः॥"
मलमासतत्त्वे।
"धरण्याम्ब्रुमत्याञ्च भूमिकम्पे तथैव च।
अम्बुवाचीगमने चैव विद्या नैव पठेद्बुधः॥"
इति तिथ्यादितत्त्वम्॥*॥
"न स्वाध्यायं वषट्कारं न देवपितृपूजनम्।
हलानां योजनञ्चैव बीजानां वपनं तथा।
दिनत्रयं न कुर्व्वीत यावत् पृथ्वी रजस्वला॥
यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा।
अम्बुवाचीदिनेनैव पाकं कृत्वा न भक्षयेत्॥
स्वपाकं परपाकं वा अम्बुवाचीदिने तथा।
भक्षणं नैव कुर्व्वीत चाण्डालान्नसमं स्मृतम्॥"
इति राजमार्त्तण्डः॥
अशुद्धां भूमिमाह देवलः।
'सा अमेध्या मलिना दुष्टा एतस्त्रिविधाप्यमना भवति।' तत्रामेध्या यथा,—
"प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः॥
विण्मूत्रोपहतं यत्तु कृमयो यत्र दृश्यते।
एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते॥"
कुणपः शवः। दुष्टा यथा,—
"कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी।
दष्टापकर्षणैः क्लिन्नैर्वान्तैश्च दुष्टतां व्रजेत्॥"
दष्टा चर्मीभूतश्लेष्मा। मलिना यथा,—
"नखदन्ततनूजत्वक्तुषपांशुरजोमलैः।
भस्मपङ्कतृणैर्वापि प्रच्छन्ना मलिना भवेत्॥"
तासाञ्च शुद्धिमाह।
"दहनं खननं भूमेरुपलेपनवापने।
पर्य्यन्यवर्षणञ्चैव शौचं पञ्चविधं स्मृतम्॥"
वापनं मृदन्तरेण पूरणम्। अत्रामेध्याया चतुष्कं पञ्चकं वा। दुष्टायाः द्विकं त्रिकं वा। मलिनायाः दहनादीनामेकधा शोधनमाह देवलः।
"पञ्चधा वा चतुर्द्धा वा भूरमेध्या विशुध्यति।
द्विधा दुष्टा त्रिधा वापि शुध्यते मलिनैकधा॥'
अन्यपञ्चप्रकारमाह मनुः।
"सम्मार्ज्जनेनाञ्जनेन सेकेनोल्लेखनेन च।
गवाञ्च परिवासेन भूमिः शुद्ध्यति पञ्चधा॥'
सम्मार्ज्जनं तृणाद्यपनयनम्। अञ्जनं गोमयेनोपलेपनम्। सेको जलेन प्रक्षालनम्। उल्लिखनं तक्षणम्। परिवासो गवोपस्थापनम् अत्र सेकपरिवासयोर्मिलित्वा एकविषयत्वम् अन्येषाममेध्यत्वविषयत्वम्। ब्रह्मपुराणे।
"ग्रामाद्दशगतं त्यक्त्वा नगराच्च चतुर्गुणम्।
भूमेः सर्व्वत्र शुद्धिः स्याद्यत्र लोको न विद्यते॥'
इदं चतुर्द्दश्वः। नगरं महाग्रामः। इति गोपालपञ्चाननकृतशुद्धिनिर्णयः॥*॥ भूमौ वर्णलेखनादिनिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तके लिखेत्।

न सुप्ता पुस्तकं स्थाप्यं न सुप्तमाहरेत् तत् ॥
भूकम्पे ग्रहणे चैव अपरं वाथ पुस्तकम् ।
भूमौ तिष्ठति देवेशि ! जन्मजन्मसु मूर्खता ।,
तदा भवति देवेशि ! तस्मात्तत् परिवर्जयेत् ॥”

इति योगिनीतन्त्रे द्वितीयभागे ७ पटलः ॥

भूमिकदम्बः, पु, (भूमिजातः कदम्बः । शाकपार्थिवादिवत् समासः ।) कदम्बविशेषः । तत्पर्य्यायः । भूनीपः २ भूमिजः ३ भृङ्गवल्लभः ४ लघुपुष्पः ५ वृत्तपुष्पः ६ विषघ्नः ७ व्रणहारकः ८ । अस्य गुणाः यथा, राजनिर्घण्टे ।
“त्रिकदम्बाः कटूष्णाश्च तृष्णा दोषहरा हिमाः ।
कषायतिक्ताः पित्तघ्ना वीर्य्यवृद्धिकराः पराः ॥”

भूमिका, स्त्री, (भूमिरिव कायतीति । कै + कः । स्त्रियां टाप् । यद्वा । भूमिरेव स्वार्थे कन् । टाप् ।) रचना । वेशान्तरपरिग्रहः । इति मेदिनी ॥
पात्राणि नाट्येऽधिकृतास्तत्तद्वेशास्तु भूमिकाः ।
इति हेमचन्द्रः ॥

भूमिः । भूमिरेव भूमिका स्वार्थे कप्रत्ययेन निष्पन्ना । इति व्याकरणम् ॥ वेदान्तमते चित्तस्यावस्थाविशेषः । यथा । क्षिप्तं मूढं विक्षिप्तं एकाग्रं निरुद्धं इति पञ्चभूमयः । आसुरसम्पल्लोकशास्त्रदेहवासनासु वर्त्तमानं चित्तं क्षिप्तभूमिका । १ । निद्रातन्द्रादिग्रस्तं चित्तं मूढभूमिका । २ । कदाचिद्ध्यानयुक्तं चित्तं क्षिप्ताद्विशिष्टतया विक्षिप्तभूमिका । ३ । तत्र क्षिप्तमूढयोः समाधित्वशङ्कैव नास्ति विक्षिप्ते तु समाधित्वशङ्का तद्भिन्नत भूमिद्वयं समाधिः । एकाग्रे मनसि सम्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्म्मबन्धनानि श्लथयति निरोधमभिमुखीकरोतीति सः प्रज्ञातो योग एकाग्रभूमिका । ४ । सर्व्ववृत्तिनिरोधरूपा संप्रज्ञातसमाधिर्निरुद्धभूमिका । ५ । इति वेदान्तसंज्ञानिरूपणग्रन्थः ॥

भूमिखर्ज्जूरिका, स्त्री, (भूमिजाता खर्ज्जूरिका ।) क्षुद्रखर्ज्जूरी । तत्पर्य्यायः । स्वाद्वी २ दुरारोहा ३ मृदुच्छदा ४ । अस्या भेदाः गुणाश्च ।
“भूमिखर्ज्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा ।
अथ स्कन्धफला काककर्क्कटी स्वादुमस्तका ॥
पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता ॥
जायते पश्चिमे देशे सा छोहारेति कीर्त्तिता ॥
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ।
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ॥
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम् ।
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् ॥
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारणम् ।
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ॥
महतीभ्यां गुणैरल्पा स्वल्पखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥”
इति भावप्रकाशः ॥

भूमिखर्ज्जूरी, स्त्री, (भूमिजाता खर्ज्जूरी ।) भूमिखर्ज्जूरिका । इति राजनिर्घण्टः । अस्या गुणपर्य्यायाः भूखर्ज्जूरीशब्दे द्रष्टव्याः ॥

भूमिचम्पकः, पुं, (भूमिजातचम्पकः ।) पुष्पवृक्षविशेषः । भूँइचाँपा इति भाषा । तत्पर्य्यायः । ताम्रपुष्पः २ सन्धिबन्धः ३ द्रवणः ४ । इति शब्दचन्द्रिका ॥ अस्य मूलं व्रणपाककारकम् ॥

भूमिजं, क्ली, (भूमेर्जायते इति । जन् + डः ।) गौरसुवर्णम् । इति राजनिर्घण्टः ॥

भूमिजः, पु, (भूमेः पृथिव्या जायते इति । जन् + डः ।) मङ्गलग्रहः । नरकराजः । इति मेदिनी । जे, २७ ॥ भूमिकदम्बः । मनुष्यः । इति राजनिर्घण्टः ॥ (भूमिजाते, त्रि । यथा, विष्णुधर्म्मोत्तरे ।
“चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् ॥”)

भूमिजगुग्गुलु, पु, (भूमिजो गुग्गुलुः ।) आशापुरगुग्गुलु । तत्पर्य्यायः । दैत्यमेदजः २ दुर्गाहः ३ आशापुरसम्भवः ४ मन्सारः ५ मेदजः ६ महिषासुरसम्भवः ७ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कफवातनाशित्वम् । उमाप्रियत्वम् । भूतघ्नत्वम् । मेध्यत्वम् । सौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बुः, स्त्री, (भूमिजाता जम्बुः ।) क्षुद्रजम्बु । तत्पर्य्यायः नादेयिका २ नादेयी ३ भूजम्बु ४ भूमिजम्बुका ५ । इति शब्दरत्नावली ॥ काकजम्बुः ६ शीतपल्लवा ७ । इति रत्नमाला ॥ नादेयिका च नादेयी भूजम्बुर्भूमिजम्बुका । भूमिजम्बुलतायां स्यात् केचित्तु भूमिचम्पके ॥ इति शब्दरत्नावली ॥

भूमिजम्बूः, स्त्री, (भूमिजाता जम्बूरिति मध्यपदलोपी समासः ।) भूजम्बूः । क्षुद्रजम्बूः । तत्पर्य्यायः । ह्रस्वफला २ भृङ्गवल्लभा ३ ह्रस्वा ४ भूजम्बूः ५ भ्रमरेष्टा ६ पिकभक्षा ७ काष्ठजम्बूः ८ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । श्लेष्मपित्तनाशित्वम् । रुच्यत्वम् । संग्राहित्वम् । हृत्कण्ठदोषनाशित्वम् । वीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बुका, स्त्री, (भूमिजम्बू + स्वार्थे कन् । टाप् ।) भूमिजम्बुः । इत्यमरः । २ । ४ । ३८ ॥

भूमिजा, स्त्री, (भूमेर्जायते इति । जन् + डः । टाप्) सीता । इति त्रिकाण्डशेषः मेदिनी च । जे, २७ ॥

भूमिजीवी, [न्] पुं (भूम्या तत्कर्षणादिना जीवतीति । जीव् + णिनिः ।) वैश्यः । इति शब्दरत्नावली ॥

भूमिदेवः, पुं, (भूमौ देव इव भूम्या देवो वा ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, किरातार्ज्जुनीये । ३ । ६ ।
“अद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः सम्प्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जात
स्त्वय्यागते यद्बहुमानपात्रम् ॥”)

भूमिपः, पुं, (भूमिं पाति रक्षतीति । पा + “आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) राजा । इति जटाधरः ॥ (यथा, महाभारते । १ । १०० । ८ ।
“वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः ।
पतिं भारतगोप्तारं समपद्यन्त भूमिपाः ॥”)

भूमिपक्षः, पुं, (भूमिः पक्ष इव यस्य ।) वाताश्वः । इति हारावली ॥

भूमिपिशाचः, पुं, (भूमौ पिशाच इव तद्वदाकृतिमत्त्वात् ।) तालवृक्षः । इति हारावली ॥ (विषयोऽस्य तालवृक्षशब्दे ज्ञेयः ॥)

भूमिमण्डः, पुं (भूमिं मण्डयति भूषयतीति । मडि + अण् ।) अष्टपादिका । इति रत्नमाला ॥ मदनलालीति छापरमालो इति च भाषा ॥

भूमिमण्डपभूषणा, स्त्री, (भूमिमण्डपं भूषयतीति । भूषि + ल्युः + टाप् ।) माधवीलता । इति राजनिर्घण्टः ॥

भूमिरक्षकः, पुं, (रक्षतीति । रक्ष + ण्वुल् । भूमेः रक्षकः । गमनकाले भूमेरुपरि पादाप्रदानात् तथात्वम् ।) वाताश्वः । इति भूरिप्रयोग. ॥

भूमिलाभः, पुं, (भूमेर्लाभोऽत्र ।) मृत्युः । इति भूरिप्रयोगः ॥ (भूमेर्लाभ. ।) भूमिप्राप्तिश्च ॥

भूमिलेपनं क्ली, (भूमिर्लिप्यतेऽनेनेति । लिप + ल्युट ।) गोमयम् । इति हेमचन्द्रः । ४ । ३३८ ॥ (भूमेर्लेपनम्) भूमेर्लेपश्च ॥

भूमिवर्द्धनः पुं, क्ली, (भूमिर्वर्द्धतेऽनेनेति । वृध + णिच् + ल्युट् । स्वोपपादितधान्यप्रदानेन भूमेर्वर्द्धनादस्य तथात्वम् ।) शवः । इति हेमचन्द्र. ॥

भूमिसम्भवा, स्त्री, (भूमेः सम्भव उत्पत्तिर्यस्याः ।) सीता । इति जटाधरः ॥

भूमिस्पृक्, [श] पु. (भूमिं स्पृशतीति । स्पृश + “स्पृशोऽनुदके क्विन् ।” ३।२।५८। इति क्विन् ।) मानुषः । वैश्यः । इति मेदिनी । शे, १८ ॥ चौरविशेषः । अन्धः । खञ्जः । इति शब्दरत्नावली ॥

भूमी, स्त्री, (भूमिः । “कृदिकारादक्तिनः ।” इति पक्षे ङीष् ।) भूमिः । इति भरतद्विरूपकोष. ॥

भूमीन्द्रः, पुं (भूम्यामिन्द्र इव । भूमेः इन्द्र ईश्वरो वा ।) राजा । इति शब्दरत्नावली ॥

भूमीरुहः, पु, (भूम्यां रोहतीति । रुह + कः ।) वृक्षः । यथा,—
“दौर्वात्तापयुता यथा विरहिणीश्वासास्तथा वासरा
यामिन्यश्चपला यथा कुलवधूदृष्टिः सरोषा प्रिये ।।
छाया वाञ्छितमा नवोढवनितावाणीव भूमीरुहा
निष्पन्दाः सुचिराद्यथा मिलितयोर्यूनोर्मिथो हृदयः ॥”
इत्युद्भटः श्लोकः ॥

भूमीसहः, पुं, (भूमेः सहते उत्सहते उत्पद्यते इति सह + अच् । वृक्षविशेषः । भूंरसह इति

हिन्दी भाषा। तत्पर्य्यायः। दारदातुः २ वरदातुः ३ खरच्छदः ४। अस्य गुणाः। शिशिरत्वम्। रक्तपित्तप्रसादनत्वञ्च। इति भावप्रकाशः॥

भूम्यामलकी, स्त्री, (भूमिलग्ना आमलकी शाक पार्थिवादित्वात् समासः) क्षुपविशेषः। भूँइ आमला इति भाषा। तत्पर्य्यायः। बहुपुष्पी २ जटा ३ अध्यण्डा ४ तालिः ५ तामलकी ६ अजटा ७ क्षुद्रफला ८ क्षेत्रामलकी ९। इति रत्नमाला॥ वितुन्नकः १० झटा ११ अमला १२ अजझटा १३ ताली १४ शिवा १५। इत्यमरः। २।४।१२७॥ भाटा १६ मला १७ भाटामला १८ अमलाजझटा १९। इत्यमरटीकायां भरतः॥ भूम्यामलकिका २० शिवामलकी २१ बहुपत्रा २२ बहुफला २३ बहुवीर्य्या २४ भूधात्री २५। अस्या गुणाः। वातकारित्वम्। तिक्तत्वम्। कषायत्वम्। मधुरत्वम्। हिमत्वम्। पिपासाकासपित्तास्रकफपाण्डुक्षतनाशित्वञ्च। इति भावप्रकाशः॥

भूम्यामली, स्त्री, (भूम्या आमलते आत्मानं धारयतीति। आ+मल+अच्।) भूम्यामलकी। अवनैली इति हिन्दी भाषा। भूँइ आमला इति वङ्गभाषा। तत्पर्य्यायः। तमाली २ ताली ३ तमालिका ४ उच्चटा ५ हड़पारी ६ वितुन्ना ७ वितुन्निका ८ भूधात्री ९ चारटी १० दृष्या ११ विषघ्नी १२ बहुपत्रिका १३ बहुवीर्य्या १४ अहिभयदा १५ विश्वपर्णी १६ हिमालया १७ अजझटा १८ वीरा १९। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। पित्तमेहदाहनाशित्वम्। शिशिरत्वम्। मन्त्रदोषार्त्तिशमनत्वञ्च। इति राजनिर्घण्टः॥

भूम्याहुल्य, क्ली, (भूमिमाहोलति आच्छादयतीति। आ+हुल+कः। ततः यत्।) क्षुपविशेषः। भूमितखड़ इति हिन्दी भाषा। तत्पर्य्यायः। कुष्ठकेतु २ मार्कण्डीयम् ३ महौषधम् ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। ज्वरकुष्ठामविषनाशित्वञ्च। इति राजनिर्घण्टः॥

भूयः, [स्] व्य, (भुवे भावाय यस्यति यतते इति। भू+यस्+क्विप्।) पुनरर्थम्। इति शब्दरत्नावली॥ (यथा, विष्णुपुराणे।१।४।२४।

"यन्नोक्तं यच्च नैवोक्तं मयात्र परमेश्वर!।
तत् सर्व्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥"

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुरिति बहु+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "बहोर्लोपो भू च बहोः।" ६।४।१५८। इतीयसुन ईलोपः भूरादेशश्च।) बहुतरः। इति मेदिनी। से, ३०॥ (यथा, मनुसंहितायाम् ।२।१३७।

"पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च।"

भूयिष्ठं, त्रि, (अयमेषामतिशयेन बहुरिति। बहु+इष्ठन्। "इष्ठस्य यिट् च।" ६।४।१५९। इति यिडागमो बहोः स्थाने भूरादेशश्च।) प्रचुरः। इत्यमरः।३।१।६३॥ (यथा, ऋग्वेदे। ८।८५।३।

"इन्द्रस्य यत्र आयासो निमिश्र इन्द्रस्य बाहोर्भूयिष्ठमोजः॥")

भूयुक्ता, स्त्री, (भुवा+युक्ता।) भूमिखर्ज्जूरी। इति राजनिर्घण्टः॥

भूरि, क्ली, (भवति भूयते वेति। भू+"अदिशदिभूशुभिभ्यः क्रिन्।" उणा० ।४।६५। इति क्रिन्।) स्वर्णम्। इत्यमरः। ३।१।६३॥

भूरिः, पुं, (भवतीति। भू+"अदिशदिभूशुभिभ्यः।" उणा० ४।६५। इति क्रिन्।) विष्णुः। ब्रह्मा। शिवः। इति मेदिनी। रे, ७३॥ वासवः। इति शब्दरत्नावली॥ (सोमदत्तस्य पुत्रभेदः। यथा, महाभारते।१।१८७।१४।

"कौरवः सोमदत्तश्च पुत्राश्चास्य महारथाः।
समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः॥")

प्रचुरं, त्रि। इत्यमरः। ३। १। ६३॥ (यथा, ऋग्वेदे। ७। ४। २।

"संयोवनायुवते शुचिदन्भूरि
चिदन्नासमिदत्ति सद्यः॥")

भूरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति भृञ्। भृञ उच्च।" उणा० २। ७२। इति इजिः स च कित् धातोरुकारान्तादेशश्च। पृषोदरादित्वात् साधुः।) पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भूरिगन्धा, स्त्री, (भूरिः प्रचुरो गन्धोऽस्याः। ततष्टाप्।) मुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (गन्धाढ्यायाञ्च, त्रि॥)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति। भूरि+गम+"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) गर्द्दभः। इति राजनिर्घण्टः॥

भूरिदावा, [न्] पुं, भूरि ददाति यः। (भूरि+दा+वनिप्। प्रचुरदाता। इति मुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे। २। २७। १७।

"माहं मघोनो वरुणप्रियस्य भूरिदाव्न
आविदं शूनमापेः॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्य्यासा यस्याः।) वृश्चिकाली। इति राजनिर्घण्टः॥ (गुणादयोऽस्या वृश्चिकालीशब्दे ज्ञातव्याः॥)

भूरिपत्रः, पुं, (भूरीणि पत्राण्यस्य।) उखर्ब्बलतृणम्। इति राजनिर्घण्टः॥

भूरिपलितदा, स्त्री, (भूरि पलितं केशपाकं दायति शोधयति इति दैप्+कः। टाप्।) पाकुरपर्णी। इति राजनिर्घण्टः॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः।) शतपुष्पा। इति राजनिर्घण्टः॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेयस्त्वं यस्य।) चक्रवाकः। इति राजनिर्घण्टः॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः।) सप्तलाह्वयः। इत्यमरः। २। ४। १४६॥ चामारकषा इति भाषा॥

भूरिबला, स्त्री, (भूरि बलं यस्याः।) अतिबला। इति राजनिर्घण्टः॥

भूरिमल्ली, स्त्री, (भूरि मल्लते इति। मल्ल+अच् ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥

भूरिमायः, पुं, स्त्री, (भूरी माया यस्य।) शृगालः। इत्यमरः। २। ५। ५॥

भूरिशः, [स्] व्य, बहुशः। बह्वल्पार्थात् कारकात् शस् वेति कारकभूरिशब्दात् शस्प्रत्ययनिष्पन्नोऽयं शब्दः। इति मुग्धबोधव्याकरणम्॥ (भूरीणि भूरीणि इति वीप्सायां शस्। (यथा, महानिर्व्वाणतन्त्रे। १। ५२।

"बहुपद्मासनादीनि गदितान्यपि भूरिशः॥")

भूरिश्रवाः, [स्] पुं, (भूरि श्रवो यज्ञादिजनितयशो यस्य सः।) चन्द्रवंशीयसोमदत्तराजपुत्रः। यथा, महाभारते। १। १८७। १४।

"समवेतास्त्रयः शूराः भूरिर्भूरिश्रवाः शलः॥")

स तु अर्ज्जुनसात्यकिभ्यां हतः। इति महाभारतम्॥ (बहुयशोविशिष्टे, त्रि॥)

भूरुण्डी, स्त्री,(भुवं पृथिवीं रुणद्धि भुवि रोहतीति वा। भू+"रुध+वा रुह+कः। पृषोदरादित्वात् नकार डकारौ गौरादित्वात् ङीष्।) श्रीहस्तिनी क्षुपः। इत्यमरः।२।४।५६॥ (भूरुण्डीति च सर्व्वानन्दः।) हातिशुँड़ा इति भाषा॥

भूरुहः, पुं, (भुवि रोहति प्रादुर्भवतीति भू+रुह+कः।) वृक्षः। इति शब्दमाला॥ (यथा, माघे। ७। ५०।

"इदमिदमिति भूरुहाम्प्रसूनैः।")

भूर्जः, पुं, (ऊर्ज्ज+घञ्। भूः ऊर्ज्जो बलं यस्य। भुवि ऊर्ज्जयति इति भू+ऊर्ज्ज+अच् वा।) स्वनामख्यातवृक्षविशेषः। भोजपत्र इति हिन्दी भाषा। (यथा, रघौ। ४। ७३।

"भूर्ज्जेषु मर्म्मरीभूताः कीचकध्वनिहेतवः।")

तत्पर्य्यायः। वल्कद्रुमः २ भूर्जः ३ सुचर्म्मा ४ भूर्जपत्रकः ५ चित्रत्वक् ६ बिन्दुपत्रः ७ रक्षापत्रः ८ विचित्रकः ९ भूतघ्नः १० मृदुपत्रः ११ शैलेन्द्रस्थः १२। इति राजनिर्घण्टः॥ भूर्जपत्रः १३ चर्म्मी १४ बहुलवल्कलः १५। इति भावप्रकाशः॥ छत्रपत्रः १६ शिवः १७ स्थिरच्छदः १८। इति रत्नमाला॥ मृदुत्वक् १९। इत्यमरः।२।४।४६॥ पत्रपुष्पकः २०। इति भरतधृतमधुः॥ मुजः २१ बहुपटः २२ बहुलत्वक् २३ मृदुच्छदः २४। इति भरतधृतस्वामी॥ अस्य गुणाः। बलकारित्वम्। कफरक्तनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। कषायत्वम्। उष्णत्वम्। भूतरक्षाकरत्वम्। त्रिदोषशमनत्वम्। पथ्यत्वम्। दुष्टकौटिल्यनाशित्वञ्च। इति राजनिर्घण्टः॥ कर्णरोगपित्तरक्तसमेदविषहरत्वञ्च। इति भावप्रकाशः॥ (यथा, वाभटे शारीरस्थाने प्रथमेऽध्याये॥

"भूर्जलाङ्गलिकीतुम्बीसर्पत्वक्कुष्ठसर्षपैः।
पृथक् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम्॥")

भूर्ज्जकण्टक:, पुं, वर्णसङ्करजातिविशेष:। इति जटाधर: ॥ (यथा, मनौ। १०। २१।
"व्रात्यात्तु जायते विप्रात् पापात्मा भूर्ज्ज-कण्टक: ॥")

भूर्ज्जपत्र:, पुं, (भुवि ऊर्ज्जस्वलेभ्य: उपदेवजातिभ्य: पत्राण्यस्य।) भूर्ज्जद्रुम:। इति रत्नमाला ॥ (यथा, रामायणे। २। ६४। ७४।
"कुष्ठस्थगरपुन्नागभूर्ज्जपत्रोत्तरच्छदान् ॥")
तथा चास्य पर्य्याय:।
"भूर्ज्जपत्र: स्मृतो भूर्ज्जश्चर्म्मी बहुलवल्कल: ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

भूर्णि:, स्त्री, (बिभर्त्ति सर्व्वमिति। भृ+"घृणिपृश्नि-पार्ष्णिचूर्णिभूर्णि:।" उणा० ४। ५२। इति नि: निपातनादूत्वञ्च।) पृथिवी। मरुभूमि:। इत्युणादिकोष: ॥ (भर्त्ता। यथा, ऋग्वेदे।७।८७।२।
"आत्मा ते वातो रज आनवीनोत्-पशुर्न भूर्णिर्यवसे स सवान् ॥"
"भूर्णिर्जगतो भर्त्ता।" इति तद्भाष्ये सायन: ॥)

भूर्लोक:, पु, (भू: संज्ञको लोक:। शाकपार्थिवादिवत् समास:।) अन्तरीक्षादधो लोक:। मर्त्य-लोक:। तस्य लक्षणं यथा,—
"पादगम्यञ्च यत्किञ्चित् वस्त्वस्ति पृथिवीमयम्।
स भूर्लोक: समाख्यातो विस्तारोऽस्य मयो-दित: ॥"
इति विष्णुपुराणे। २ अंशे ५ अध्याय: ॥
चरणसञ्चारयोग्यं गिरिशिखरादि यावत् ताव-दुत्तोधो भूर्लोक इत्यर्थ:। विस्तारो मयोदित: सर्व्वतो लोकालोकावधि: पञ्चविंशतिकोटि-प्रमाण:। इति तट्टीकायां स्वामी ॥ अस्य विव रणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोल-शब्दे च द्रष्टव्यम् ॥ (यथा, भागवते। २। ५। ३८।
भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य नाभित: ॥")

भूलग्ना, स्त्री, (भुवि लग्ना।) शङ्खपुष्पी। इति राजनिर्घण्ट: ॥

भूलता, स्त्री, (भुवि लता इव।) किञ्चुलुक:। इति हेमचन्द्र:। ४। २६६ ॥

भूवदरी, स्त्री, (भूलग्ना वदरी शाकपार्थिवादिवत् समास:।) क्षुद्रकोली। झड़बेर इति हिन्दी-भाषा। तत्पर्य्याय:। क्षितिवदरी २ वल्लीवदरी ३ वदरवल्ली ४ बहुफलिका ५ लघुवदरी ६ वदरफली ७ सूक्ष्मवदरी ८। अस्या गुणा:। मधुराम्लत्वम्। कफवातविकारहारित्वम्। पथ्यत्वम्। दीपनत्वम्। पाचनत्वम्। किञ्चित् पित्तास्रकारित्वम्। रुच्यत्वञ्च। इति राज-निर्घण्ट: ॥

भूशय:, पु, (भुवि शेते इति। भू+शीङ्+ "अधिकरणे शेते:।" ३। २। १५। इति अच्।) नकुलगोधादि:। एतेषां मांसगुणा:। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वायुनाशि-त्वम्। शुक्रकारित्वञ्च। इति राजवल्लभ: ॥ विष्णु:। यथा,—
"भूशयो भूषणो भूतिर्विशोक: शोकनाशन: ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥

भूशेलु:, पुं, (भुवि ख्याता शेलु: शाकपार्थिवादि-वत् समास:।) भूकर्व्वुदारक:। इति राज-निर्घण्ट: ॥

भूष कि भूषणे। इति कविकल्पद्रुम: ॥ (चुरा०-पर० सक०-सेट्।) कि भूषयति भूषति हारो जनम्। इति दुर्गादास: ॥

भूषणं, क्ली, (भूष्यते अनेनेति। भूष+करणे ल्युट्।) अलङ्कार:। इति हेमचन्द्र:।३।३१३॥ (यथा, चाणक्यसंग्रहे। ८।
"नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पति: ॥")
देवदेयभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि शृणुष्व मे।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका ॥
तालपत्रञ्च हारञ्च ग्रैवेयकमथोर्म्मिका।
प्रालम्बिका रत्नसूत्रसुतुङ्गोऽथर्द्धमालिका ॥
पार्श्वद्योतो नखद्योतो ह्यङ्गुलीच्छादकस्तथा।
कटिलग्नं माणवको मूर्द्धतारा ललन्तिका ॥
अङ्गदो बाहुवलय: शिखाभूषणमिङ्गिका।
शाणबन्धं तदूर्भाणं नाभिपूरोऽथ मालिका ॥
सप्तकी शृङ्खलञ्चैव दन्तपत्रञ्च वर्णक:।
ऊरुसूत्रञ्च मौवी च सुष्टिबद्धं प्रकोष्ठकम् ॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका।
सुखपट्टमिति प्रोक्ता अलङ्कारा: सुशोभना: ॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदा:।
अलङ्कारा: प्रदानेन चतुर्व्वर्गप्रदायका: ॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये।
तेषां दैवतमुच्चार्य्य पूजयेत्तु विचक्षण: ॥
शिरोगतानि चादद्यात् सौवर्णानि तु सर्व्वदा।
चूडारत्नादिकानीह भूषणानि तु भैरव। ॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा।
निवेदयेत्तु देवेभ्यो नान्यतैजससम्भवम् ॥
रीतिवङ्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्ज्जन्तु भूषणं न कदाचन ॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्याद् यस्मात्तदुपभूषणम् ॥
सर्व्वं ताम्रमयं दद्याद्यत्किञ्चिद्भूषणादिकम्।
सर्व्वत्र स्वर्णवत्ताम्रमर्घ्यपात्रे ततोऽधिकम् ॥
पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम्।
औडुम्बरं सदा विष्णो: प्रीतिदं तोषदं तदा ॥
ताम्रे देवा: प्रमोदन्ते ताम्रे देवा: सदा स्थिता:।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत् ॥
स्वोपयोगे नर: कुर्य्याद्देवानामपि भैरव।।
सीवोद्वेदेशे रौप्यन्तु न कदाचिच्च भूषणम् ॥
प्रावार: पानपात्रञ्च शेखकं गृहमेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम् ॥
अयोमयन्तत्र कांस्यन्तत्र यद्भूषणं भवेत्।
स्वर्णरौप्यस्य चाभावे त्वध:काये नियोजयेत् ॥
एतेषां भूषणादीनां यद्दातुं शक्यते नरै:।
तत्तद्दद्यात् सम्भवं तु सर्व्वमेव प्रदापयेत् ॥
चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम्।
तुष्टिपुष्टिप्रीतिकरं यथाशक्त्यैव दापयेत् ॥
इदं ते भूषणं प्रोक्तं सर्व्वदेवस्य तुष्टिदम्।"
इति कालिकापुराणे ६८ अध्याय: ॥
अथालङ्कारयुक्ति:। तद्धारणादिनमुच्यते।
"रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु।
गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम् ॥
अनिष्टेष्वपि निर्द्दिष्टं वस्त्रालङ्कारधारणम्।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मतं ॥
शिरस्यं मुकुटं हार: कुण्डलञ्चाङ्गदन्तथा।
कङ्कणं वालकञ्चैव मेखलाद्याविति क्रमात् ॥
प्रधानभूषणान्येषु यथा स्वं याति निश्चय:।'
पद्मरागञ्च वज्रञ्च विजयो गोविदस्तथा ॥
मुक्ताविदूर्य्यनीलञ्च यथा मरकतं क्रमात्।
आदित्यादिदशानानां सर्व्वसम्पत्तिदायका: ॥
सुवर्णनापि घटना सर्व्वेषामुपयुज्यते।
प्रधानभूषणेष्वेवमप्रधाने न निर्णय: ॥
प्रधानभूषणं प्राय: शिरसो ह्यभिधीयते।
तस्य प्रधानभूतत्वादित्याह भृगुनन्दन:।'
सुखदा मणय: शुद्धा दु:खदा दोषशालिन: ॥"
इति युक्तिकल्पतरु: ॥
तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानत:।
शुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम् ॥
ग्रहदृष्टिहरं पुष्टिकरं दु:स्वप्ननाशनम्।
पापदौर्भाग्यशमनं रत्नाभरणधारणम् ॥
माणिक्यं तरणे: सुजात्यममलं मुक्ताफलम् शीतगो-
र्माहेयस्य च विद्रुमो निगदित: सौम्यस्य गारुत्मतम्।
देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शने-र्नीलं निर्म्मलमन्ययोश्च गदिते गोमेदवैदूर्य्यके ॥
वाम: सगगन्धरत्नानां धारणं प्रीतिवर्द्धनम्।
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमम् ॥"
इति भावप्रकाश: ॥

भूषण:, पुं, (भूषयति भक्तहृन्दमिति भूष्यतेऽनेनेति वा। भूष+ल्यु: वा ल्युट्।) विष्णु:। यथा,—
"भूशयो भूषणो भूतिर्विशोक: शोकनाशन:।"
इति तस्य सहस्रनामस्तोत्रम् ॥
(राजविशेष:। यथा, कथासरित्सागरे। ४७। १३।
"वसुदत्तादयश्चैते राजानोऽर्थरथा इमे।
अङ्कुरो सुविशालश्च दृष्टिभूषणसोमिला: ॥")

भूषा, स्त्री, (भूष+भावे अ: टाप् च।) अल-ङ्क्रिया। इत्यमर:। २। ६। १०१ ॥ (यथा, भागवते। ३। २२। २२।
"दम्पत्यो: पर्य्यदात् प्रीत्या भूषावास:परि-च्छदान् ॥")

भूषित:, त्रि, (भूष+क्त:।) अलङ्कृत:। इत्य-मर:। २। ६। १०० ॥ (यथा, भट्टि:।६।७३।
"भृङ्गालीकोकिलक्रुड्भिर्वाशनै: पश्य लक्ष्मण।।
रौचनैर्भूषितां पम्पामस्माकं हृदयाविधम् ॥")

भूष्णुः, त्रि, (भू + ग्स्नु ।) भवनशीलः । तत्-
पर्य्यायः । भविष्णुः २ भविता ३ । इत्यमरः ।
३ । १ । २९ ॥ साधुभवनशीलः । इति
तट्टीकायां रायमुकुटः ॥ (यथा, मनौ । ४ ।
१३५ ।
"क्षत्त्रियं चैव सर्पं च ब्राह्मणञ्च बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥"
"भूष्णुः, धनायुरादिना वर्द्धनशीलः ।" इति
तट्टीकायां कुल्लूकभट्टः ॥)

भूसुतः, पुं, (भुवः पृथिव्याः सुतः ।) मङ्गलग्रहः: ।
इति शब्दमाला ॥ (यथा, सूर्य्यसिद्धान्ते ।
२ । ५५ ।
"महत्त्वाच्छीघ्रपरिधेः सप्तमे भृगुभूसुतौ ॥")
सीतायाम् स्त्री ॥

भूस्तृणं, क्ली, (भूम्यां तृणं भुवस्तृणमिति वा ।
पारस्करादित्वात् सुट् ।) भूतृणम् । इत्यमरः ।
२ । ४ । १६७ ॥ (यथा, मनौ । ६ । १४ ॥
"वर्जयेन्मधुमांसञ्च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥")
अस्य पर्य्यायगुणा यथा,—
"गुह्यबीजञ्च भूतीकं सुगन्धं गोमयप्रियम् ।
भूस्तृणन्तु भवेच्छत्रा मालातृणकमित्यपि ॥
भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं
लघु ।
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अवृष्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम् ॥"
इति भावप्रकाशः ॥

भूस्पृक्, [श्] पुं, (भुवं स्पृशतीति स्पृश् + क्विन् ।)
मनुष्यः । इति हेमचन्द्रः । ३ । १ ॥

भूस्वर्गः, पुं, (भुवि स्वर्ग इव अमरलोकधार-
णात् ।) सुमेरुपर्व्वतः । इति जटाधरः ॥

भृञ्, } भृतिपुष्ट्योः । इति कविकल्प-
भृ लि टु डु ञ } द्रुमः ॥ (भ्वा०-उभ०-सक०-
अनिट् । लि-क्रा० उभ०-सक०-अनिट् ।) भृति
भरणं पुष्टिः पोषणम् । लि ञ "बिभर्त्ति शिशुं
शम्भुर्बिभृते जनकः सुतम् । टु भरथुः । डु
भृत्रिमम् । भ्वादिपक्षे भृतिः पूरणम् । ञ भरति
कुम्भमम्भिर्जनः । भरते । इति दुर्गादासः ॥

भृकुंशः, पु, (कुंस + अच् । कुंसो भावदीपनम् ।
पृषोदरादित्वात् सस्य शत्वम् । भ्रुवा कुंशो भाव-
प्रकाश इङ्गितज्ञापनं यस्य । निपातनात् सम्प्र-
सारणम् ।) भृकुंशः । स्त्रीवेशधारी नट-
पुरुषः । इत्यमरटीकायां रमानाथः ॥

भृकुंसः पुं, (चुरादौ पट पुटेत्यादि दण्डकोक्तः
कुंसिर्भाषार्थः । स्त्रीवेशं धारयित्वा भ्रुवः कुंस-
यति पुरुषत्वमिति संज्ञात्वादुकारस्य अकारः
ह्रस्वश्च वा । कुंसि + अच् । यद्वा भ्रुवा कुंसः
इङ्गितप्रकाशो यस्य । निपातनात् सम्प्रसार-
णम् ।) भृकुंशः । स्त्रीवेशधारी नटपुरुषः ।
इत्यमरटीकायां रमानाथः ॥

भृकुंसकः, पु, (भृकुंस एवेति स्वार्थे कन् ।)
भृकुंशः । इति शब्दरत्नावली ॥

भृकुटिः, स्त्री, (कुट कौटिल्ये इति कुट + इन् ।
भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसार-
णम् ।) भ्रुकुटिः । यथा,—
"रचितभृकुटिबन्धं नन्दिना द्वारि दृष्टे ।"
इति भरतधृतहरविलासः ॥

भृकुटी, स्त्री, (भृकुटि । कृदिकारादिति ङीष् ।)
भ्रुकुटिः । इत्यमरटीकायां भरतः ॥ भृकुटी-
कुटिलाननौ । इति मार्कण्डेयपुराणे देवी-
माहात्म्यञ्च ॥

भृगुः, पुं, (तपसा भृज्यते पच्यतपादिभिर्वेति ।
भ्रस्ज + "प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलो-
पश्च ।" उणा० १ । २९ । इति कुः सम्प्रसारणं
सलोपः, न्यङ्क्वादित्वात् कुत्वञ्च । यद्वा भृज्जतीति
क्विप् । भृक् ज्वाला तया सहोत्पन्न इति उः ।)
मुनिविशेषः । स तु ब्रह्मणस्त्वचो जातः ।
(यथास्योत्पत्तिर्नामनिरुक्तिश्च महाभारते ।
१३ । ८५ । १०५—१०६ ।
"पुरुषा वपुषा युक्ताः स्वैः स्वैः प्रसवजैर्गुणैः ।
भृगित्येव भृगुः पूर्व्वमङ्गारेभ्योऽङ्गिराभवत् ॥
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् ।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः
स्मृतः ॥")
अस्य भार्य्या कर्द्दममुनिकन्या ख्यातिः । पुत्त्रः
धाता विधाता च । कन्या श्रीः । इति श्रीभाग-
वतम् ॥ अपि च ।
मुनय ऊचुः ।
"कथितस्ते यदा सर्गः पृष्टः सूत त्वयाधुना ।
भृगुसर्गात् प्रभृत्येष सर्गो नः कथ्यतां पुनः ॥"
सूत उवाच ।
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वमुदधेः
पुनः ।
तथा धाता विधाता च तस्यां जातौ भृगोः
सुतौ ॥
आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभोः ।
धातुर्विधातुस्ते भार्य्ये ययोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः ॥
ततो वंशो मुनिश्रेष्ठा विस्तरं भार्गवो गतः ।
इत्याद्ये वह्निपुराणे वरसर्गनामाध्यायः ॥*॥
शिवः । शुक्रग्रहः । इति मेदिनी । गे, १५ ॥
सानुः । यमदग्निः । इति हेमचन्द्रः ॥ अरण्य-
कण्टकव्याप्तगिरिपार्श्वोच्चदेशः । निरवलम्बन-
पर्व्वतादिपार्श्वः । आरड़ि इति ख्यातम् ।
यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति ।
अतएव भृगुपतनमित्यादिप्रयोगो दृश्यते । इति
भरतः ॥ तत्पर्य्यायः । प्रपातः २ अतटः ३ ।
इत्यमरः ।२।३।४॥ दरट् ४ । इति जटाधरः ॥
पतनस्थानम् ५ । इति शब्दरत्नावली ॥

भृगुपतिः, पुं, (भृगूनां तद्वंशीयानां पतिः ।)
परशुरामः । इति शब्दरत्नावली ॥ (यथा,
गीतगोविन्दे । १ । १० ।
"केशवधृतभृगुपतिरूप ! जय जगदीश ! हरे !।
तथा च मेघदूते । १ । ५९ ।
"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्च-
रन्ध्रम् ।")

भृगुसुतः, पुं, (भृगोः सुतः ।) शुक्रः । इति शब्द-
रत्नावली ॥ परशुरामश्च ॥

भृगुलापतिः, पुं, परशुरामः । इति शब्दरत्नावली ॥
भृगूणाम्पतिरित्यपि पाठः ॥

भृङ्गं, क्ली, (बिभर्त्तीति । डु-भृञ् भरणे ।"भृञः
कित् नुट् च ।"उणा० १ । १२४ । इति
गन् । स च कित् नुडागमश्च ।) त्वचम् ।
गुड़त्वक् इति ख्यातम् । इत्यमरः । २ । ४ ।
१६ ॥ (यथा,—
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गं चोचन्तथोत्-
कटम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अभ्रकम् । इति राजनिर्घण्टः ॥

भृङ्गः, पुं, (बिभर्त्त्यनुरागमिति । भृञ् + "भृञः
कित् नुट् च ।" उणा० १ । १२४ । इति गन् ।
स च कित् नुट् च ।) भ्रमरः । कलिङ्गपक्षी ।
इत्यमरः । २ । ५ । १६ । फिङ्गा इति भाषा ॥
(अस्य पर्य्याया धूम्याटशब्दे द्रष्टव्याः ।) अस्य
मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफशुक्र-
विवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ षिड़्गः ।
भृङ्गराजः । इति मेदिनी गे, १५ ॥ (यथास्य
पर्य्यायः ।
"भृङ्गराजः केशराजो भृङ्गः पतङ्ग मार्कवम्
इति वैद्यकरत्नमालायाम् ॥
तथा च पर्य्यायान्तरम् ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भृङ्गारः । भृङ्गरोलः । इति शब्दरत्नावली ॥

भृङ्गकः, पु, (भृङ्ग । संज्ञायां कन् ।) राजवासन-
पक्षी । यथा,—
"अथ भृङ्गो भृङ्गराजो भृङ्गको राजवासनः ॥"
इति शब्दरत्नावली ॥

भृङ्गजं, क्ली, (भृङ्ग इव जायत इति । जन
+ डः ।) अगुरु । इति रत्नमाला ॥ (गुणा-
श्चास्यागुरुशब्दे विहिताः ॥)

भृङ्गजा, स्त्री, (भृङ्गज + स्त्रियां टाप् ।) भार्गी ।
इति राजनिर्घण्टः ॥

भृङ्गपर्णिका, स्त्री, (भृङ्ग इव कार्ष्ण्यात् भृङ्गवर्णं
पर्णमस्याः इति ङीष् । ततः स्वार्थे कन् टाप् ।
अत इत्वञ्च । ईकारस्य ह्रस्वत्वम् ।) सूक्ष्मैला ।
इति शब्दचन्द्रिका ॥

भृङ्गप्रिया, स्त्री, (भृङ्गाणां प्रिया । प्रचुर-
मधुत्वात ।) माधवीलता । इति राज-
निर्घण्टः ॥

भृङ्गमूलिका, स्त्री, (भृङ्गस्य भृङ्गराजस्येव मूल-
मस्याः कः । अजातिवचनत्वात् टाप् । कापि
अत इत्वञ्च ।) भ्रमरच्छल्ली । इति राज-
निर्घण्टः ॥

भृङ्गरजः, पुं, (भृङ्गान् रञ्जयतीति अन्तर्भूत-णार्थाद् रञ्जेरच्। पृषोदरादित्वात् न लोपः ।) भृङ्गराजः । इति भावप्रकाशः ॥ (यथा,—

"भृङ्गरजत्रिफलोत्पलशारि-
लौहपुरीषसमन्वितकारि ॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्राधिकारे ॥)

भृङ्गरजाः, [स्] पुं, (रजयतीति । अन्तर्भूत-णार्थात् रञ्जे "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८। इति असुन् । ततो "रजेश्च ।" ६।४।२६। इति नलोपः । ततो भृङ्गाणां रजाः रञ्जकः । अथवा भृङ्ग इव कृष्णवर्णं रजः परागोऽस्य ।) भृङ्गराजः । इत्यमरटीकायां भरतः ॥

भृङ्गराजः, पुं, (भृङ्ग इव राजते इति । भृङ्ग+राज्+अच् । तद्द्वारेण भृङ्गवत् केशकृष्णीकरणा-त्तथात्वम् ।) क्षुपविशेषः । केसुरिया इति वङ्ग-भाषा । भँगरिया इति हिन्दीभाषा । तत्-पर्य्यायः । केशराजः २ भृङ्गः ३ पतङ्गः ४ मार्कवः ५ । इति रत्नमाला ॥ भृङ्गाह्वः ६ केश-रञ्जनः ७ पितृप्रियः ८ अङ्गारकः ९ केश्यः १० कुन्तलवर्द्धनः ११ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफा-मशोफश्वित्रनाशित्वम् । तत्र नीला रसायनः । इति राजनिर्घण्टः ॥ अपि च ।

"भृङ्गराजो भृङ्गरजः मार्कवो भृङ्ग एव च ।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहृत् ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्ति-
जित् ॥"

इति भावप्रकाशः ॥

पक्षिविशेषः । (यथा, महाभारते ।३।१०८।७।

"शकुनैश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः ।
भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः ॥")

भ्रमरः । इति मेदिनी । जे, ३४ ॥ यक्षभेदः । इति धरणिः ॥

भृङ्गरिटिः, पुं, (भृङ्ग इव रटति इति । भृङ्ग+रट+इन् । पृषोदरादित्वादिकारागमः ।) शिव-द्वारपालः । इति भूरिप्रयोगः ॥

भृङ्गरीट, पुं, (भृङ्गरिटि । पृषोदरात् ईत्वम् ।) शिवद्वारपालः । इति भूरिप्रयोगः ॥

भृङ्गरोलः, पुं, (भृङ्ग इव रौति । भृङ्ग+रु+बाहुलकात् ओलच् । अस्य भृङ्गतुल्यशब्दत्वा-त्तथात्वम् ।) कीटविशेषः । भीमरुल इति भाषा । तत्पर्य्यायः । विषघटिका २ वरोलः ३ लघुषट्पदः ४ । इति त्रिकाण्डशेषः ॥

भृङ्गवल्लभः, पुं, (भृङ्गाणां वल्लभः प्रियः ।) धारा-कदम्बः । भूमिकदम्बः । इति राजनिर्घण्टः ॥

भृङ्गवल्लभा, स्त्री, (भृङ्गाणां वल्लभा ।) भूमिजम्बूः । इति राजनिर्घण्टः ॥

भृङ्गसोदरः, पुं, (भृङ्गाणां सोदरस्तुल्यः ।) केश-राजः । इति त्रिकाण्डशेषः ॥

भृङ्गानन्दा, स्त्री, (भृङ्गाणामानन्दो यस्याः पञ्चमी तत्पुरुषः । भृङ्गाणां आनन्दा आनन्द-करी वा ।) यूथिका । इति राजनिर्घण्टः ॥

भृङ्गाभीष्टः, पुं, (भृङ्गाणां अभीष्टः प्रियः । मधु बाहुल्यात् ।) आम्रवृक्षः । इति राज-निर्घण्टः ॥ तन्मुकुलफलयोः क्ली ॥

भृङ्गारं, क्ली, (डुभृञ् धारणपोषणयोरिति । भृ+ "शृङ्गारभृङ्गारौ ।" उणा० ३ । १२६ । इति आरन् निपातनात् नुम् गुक् च ।) लवङ्गम् । सुवर्णम् । इति राजनिर्घण्टः ॥

भृङ्गारः, पुं, (भृ+आरन् नुम् गुक् च । अथवा "भृङ्गं जलमियर्त्त्यनेनेति ।" भृङ्गं+ऋ+करणे घञ् । इत्यमरटीकायां रघुनाथः ॥ स्वर्णघटित-वारिपात्रम् । (यथा मार्कण्डेयपुराणे ।८।२०३।

"नाद्य पश्यामि ते छत्रं भृङ्गारमथवा पुनः ॥")

तत्पर्य्यायः । कनकालुका २ इत्यमरः ॥ गुहुकः ३ गडुकः ४ । इति शब्दरत्नावली ॥ भृङ्ग-राजः । इति जटाधरः ॥ अथ भृङ्गारोद्देशः ।

"राज्ञोऽभिषेकपात्रं यद्भृङ्गार इति तत्स्मृतम् ।
तदष्टधा तस्य मानमाकृतिश्चापि चाष्टधा ॥
सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च ।
चान्दनं लौहजं शाङ्गमेतदष्टविधं मतम् ॥
भानुदिङ्नवसप्ताष्टरुद्रलोकसुराङ्गुलाः ।
अष्टावष्टौ समाख्याता आयामपरिणाहयोः ॥
द्विचतुर्गुणवेदाब्धिबाणसप्ताष्टकीर्त्तिता ।
यथाक्रमं समुद्दिष्टमादित्यादिदशां भुवाम् ॥
पद्मरागस्तथा वज्रं वैदूर्य्यमौक्तिकन्तथा ।
नीलं मारकतञ्चैव मुक्ता च रूप्य कीर्त्तिताः ॥
भृङ्गारसम्पर्के व्याख्या न भौमो मणिमर्हति ।
काञ्चनं स्फटिकमयं वापि सर्व्वथानुपयुज्यते ॥
काञ्चनन्तु क्षितीशानां स्फटिकमयं सार्व्वयौगिकम् ।
शङ्खपद्मेन्दुकर्कारं प्रयत्नं विन्यसेत् क्रमात् ॥
चतुर्व्विधानां भूपानां चान्द्रः सर्व्वत्र शस्यते ।
श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते ।
एतेषां सलिलैः सेकश्चतुर्णां स्यान्महीभुजाम् ॥
मक्षौ पद्मश्च नीलश्च तथा कृष्णापराजिता ।
एषां पुष्पाणि केशेषु चतुर्जातिमहीभुजाम् ॥
हीरकं पद्मरागश्च वैदूर्य्यं नीलमेव च ।
चत्वारो मणयो धेयाश्चतुर्णां सेचनाम्भसि ॥
इत्थं निश्चित्य यः कुर्य्यात् नृपतिः सेकमात्मनः ।
स चिरायुर्भवेद्भोगी इतोऽन्यस्त्वन्यथाचरन् ॥"

इति युक्तिकल्पतरौ भृङ्गारोद्देशः ॥

भृङ्गारिः, स्त्री, (भृङ्गं भृङ्गवद्गन्धमृच्छतीति । ऋ+इन् ।) केतकापुष्पम् । इति राजनिर्घण्टः ॥

भृङ्गारिका, स्त्री, (भृङ्ग+ऋ । "कर्म्मण्यण्" ३ । २ । १ । इति अण् । भृङ्गारः ततः कन् । टाप् अत इत्वञ्च ।) झिल्लिका । यथा,—

"झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका
च सा ।"

इति हेमचन्द्रः । ४ । ८२ ॥

भृङ्गारी, स्त्री, (भृङ्गमियर्त्ति रूपेणानुकरोति "कर्म्मण्यण् ।"३।२।१। इति अण् । भृङ्गार-त्वम् गौरादित्वात् ङीष् । इस्य लत्वे भृङ्गाली च ।) झिल्ली इत्यमरः । २ । ५ । २८ ॥

भृङ्गाह्वः, पुं, (भृङ्गमाह्वयते स्पर्द्धते इति । आ+ह्वे+कः ।) जीवकः । भृङ्गराजः । इति राज-निर्घण्टः ॥ (विवृतिरस्य जीवकभृङ्गराजशब्द-योर्ज्ञातव्या ॥

भृङ्गाह्वा, स्त्री, (भृङ्गमाह्वयते स्पर्द्धते । भृङ्ग+आ+ह्वे+कः स्त्रियां टाप् ।) भ्रमरच्छल्ली । इति राजनिर्घण्टः ॥

भृङ्गिः, पुं, (बिभर्त्तीति । भृ+बाहुलकात् गिक् नुट् च ।) भृङ्गी । यथा,—

"शाप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति
स्मृतः ।"

इति वामनपुराणे ४५ अध्यायः ॥

भृङ्गिणी, स्त्री, (भृङ्गवत् वर्णो अस्या अस्तीति इनिः । ङीप् ।) वटीवृक्षः । इति राज-निर्घण्टः ॥

भृङ्गी, स्त्री, (भृ+गक्+नुट्+गौरादित्वात् ङीष् ।) अतिविषा । इति राजनिर्घण्टः ॥

भृङ्गी, [न्] पुं, (भृङ्गः भृङ्गवद्वर्णोऽस्यास्तीति । इनिः ।) वटवृक्षः । इति राजनिर्घण्टः ॥ शिव-द्वारपालविशेषः । तत्पर्य्यायः । भृङ्गिरिटिः २ भृङ्गरीटः ३ शृङ्गः ४ नाडीदेहः ५ अस्थिविग्रहः ६ । इति त्रिकाण्डशेषः ॥ भृङ्गरिटिः ७ । इति भूरिप्रयोगः ॥ तस्य जन्मकारणं यथा,—

ईश्वर उवाच ।

"रतिमात्रेण नोमायां मत्पुत्त्रः संभविष्यति ।
महामैथुनसंत्यागात् स्यादपुत्त्री च पार्व्वती ॥
तस्मादहन्तु देवानां वचनाद्ब्रह्मणस्तथा ।
त्यक्ष्ये महामैथुनन्तु किन्त्वेकं कथनामराः ॥
येन मे सुमहत्तेजो महामैथुनकारणम् ।
धार्य्यं तेजस्विनं देवमानयन्त्वमरास्तु तम् ॥
यो निष्कम्पो निर्व्विकारो भूत्वा तेजो ग्रही-
ष्यति ।
तस्मै यच्छन्तु त्रिदशास्त्यक्ष्ये तेजः शरीरजम् ॥"

श्रीऔर्व्व उवाच ।

"वृषध्वजवचः श्रुत्वा देवा ब्रह्मपुरोगमाः ।
हरतेजोग्रहायाथ वीतिहोत्रं ययुर्श्रिया ॥
अथ ब्रह्मागमामन्त्र्य तथानुज्ञाप्य पावकम् ।
सेन्द्रा देवगणाः सर्व्वे हरमूचुरिदं वचः ॥"

श्रीदेवा ऊचुः ।

"एष वैश्वानरः श्रीमान् भूरितेजोमयो वशी ।
महामैथुनबीजन्तु त्वत्तश्च संग्रहीष्यति ॥
इत्युक्ता त्रिदशाः सर्व्वे वीतिहोत्रं पुरःस्थितम् ।
तस्मै निर्द्देशयामासुः शम्भवे सर्व्वदैवतं ॥
ततः षडङ्गं स्वं रेतो वाह्निं दहनात्मनं ।
उत्ससर्ज महाबाहुर्महामैथुनकारणम् ॥
अमायुनस्त्यमानस्य तेजसः शशभृद्भृतः ।
अणुद्वयमतिस्वल्पं गिरिप्रस्थे पपात ह ॥
तयोः कारणयोः सद्यः सम्भूतौ शङ्कराज्ञया ।
एको भृङ्गसमः कृष्णो भिन्नाञ्जननिभोऽपरः ॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत् ।

महालयैकरूपस्य महाकालेति लोकभृत् ॥
ततस्तौ लालयामास शङ्करः प्रमथोत्करैः ।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमाप्रतिपालितौ ।
क्रमाद्गणेशौ कृत्वा तौ हरो द्वारि न्ययोजयत् ॥”
इति कालिकापुराणे ४५ अध्यायः ॥
तस्य वानरमुखत्वकारणं तच्छापेन हरपार्व्वत्योश्चापिमनुष्यजन्मग्रहणं यथा,—
“यदा सा नर्म्मणे याता गौरी स्मरहरान्तिकम् ।
तदा भृङ्गिमहाकालौ द्वाःस्थौ द्वारि प्रतिष्ठितौ।
नर्म्मावसाने सा देवी मुक्तधम्मिल्लबन्धना ।
निःसृता रतिसङ्केतशालाया जलजानना ॥
तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम् ।
अयोग्यां वीक्षितुं चान्यैर्पश्चजन्तं प्रियम् ॥
ददर्शतुर्महात्मानौ नातिहृष्टात्ममानसौ ।
भृङ्गी चापि महाकाल प्राप्तकालश्च कोपतः ॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधोमुखौ ।
चिन्ताञ्च जग्मतुस्तीव्रां निश्वसन्तुरुत्तमम् ॥
तौ पश्यन्तौ तदा देवी ददर्श हिमवत्सुता ।
चुकोप च तदापर्णा वाक्यञ्चैतदुवाच ह ॥
एवम्भूतान्तु मां कस्मादसम्बद्धामपश्यताम् ।
भवन्तौ तनयौ शुद्धौ श्रीमर्य्यादाविवर्जितौ ॥
तस्मादिमाममर्य्यादां भवन्तौ निरपत्रपौ ।
अकुर्व्वतां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषीं योनिमासाद्य ममावेक्षणदोषतः ।
भविष्यतो भवन्तौ तु शाखामृगमुखौ भुवि ॥
तौ प्राप्तदुःखौ तु तदा विमनस्कौ हरात्मजौ ।
शापं तस्या न सेहाते प्रोचतुश्चेदमद्रिजाम् ॥
नियोजितौ यथा द्वारि महेशेन त्वया सह ।
तथा नियोगं कुर्व्वन्तौ तिष्ठावो द्वारि संयतौ ।
हठान्निःसरणं गेहात्तवैव न हि युज्यते ॥
तस्मात्तव प्रतीकारं शृणु मातरनिन्दिते ।।
त्वं मानुषी क्षितौ भूया हरो भवतु मानुषः ॥
मानुषस्य हरस्यावां जायायां हरतेजसा ।
भवत्याश्चापि मानुष्या भविष्यावस्तयोदरे ॥
अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्भावि कर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्दक्षो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषादयोऽभवन् ॥
पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
तस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शेषे वयसि संप्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥
ब्रह्मोवाच ।
शृणु पौष्य ! यथा भावी पुत्रस्तव कुलोद्वहः ।
तदहं ते वदिष्यामि भार्य्याभिस्तत् समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ।।
अजार्णं बहुषे काले प्राप्तेऽपि सुरसं सदा ॥
फलमेतत् समादाय यावत् संवत्सरद्वयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभाषते भर्गः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन् ! भार्य्याभिस्तिसृभिः सह॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
हरं यष्टुं समारेभे भक्त्या परमया युतः ॥
स तु वर्षद्वयेऽतीते महादेवो जगत्पतिः ।
पौष्यस्य नृपतेः सम्यक् प्रससादार्थसिद्धये ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥
ईश्वर उवाच ।
इदं फलं ब्रह्मदत्तं विभज्य नृपते ! त्रिधा ।
भोजयैस्ताः स्वजायास्त्वं प्रहृष्टः सुस्थमानसः ॥
एकस्या जठरे शीर्षं भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ।
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति॥
ततः खण्डत्रयं भूप । यथास्थानं पृथक् पृथक् ।
योजयिष्यति पश्चात्ते पुत्र एको भविष्यति ॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ।
तत्क्षणात् तत् फलं भूतं त्रिभागं स्वयमेव हि ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल ! गर्भाश्चाप्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ॥
एकं पिण्डं चकाराशु तत्र पुत्रो व्यजायत ।
तस्य शीर्षं तदा राजन् ! सहजेन्दुकला शुभा ॥
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमप्रभः ॥
एव तिसृणामम्बानां गर्भे जातो यतो हरः ।
अतस्त्र्यम्बकनामाभूत् प्रथितो देवलोकयोः ॥”
इति कालिकापुराणे ४६ अध्यायः ॥
“अवतीर्णे महादेवे पौष्यजायासु स्वेच्छया ।
मानुषेण प्रमाणेन तेन सम्वत्सरद्वये ।
गिरिजापि ककुत्स्थस्य राज्ञो भार्य्यास्वजायत॥”
“इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्रिका ॥
सा मनोन्मथिनी नाम्ना पूजिता पतिवल्लभा ।
पुत्रो न विद्यते तस्यास्तदर्थं सा गृहान्तरे ।
निभृतं स्थण्डिलं कृत्वा चण्डिकां समपूजयत् ॥
पूज्यमाना महादेवी चण्डिका राजभार्य्यया ।
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह ॥
सा मनोन्मथिनी देवी सुषुवे तनयां शुभाम् ।
तां दृष्ट्वा हारसंयुक्तां शरज्ज्योत्स्नोपमां शुभाम् ॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत् ॥
तेनैव हारचिह्नेन तस्यां तारावतीति वै ।
नामाकरोत् पिता काले यथोक्ते नृपसत्तम ।।
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह ।
ककुत्स्थः कारयामास समयेऽथ स्वयम्बरम् ।
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम् ॥
इति स्वयं महादेवो मानुषीं योनिमाश्रितः ।
पार्व्वती च स्वयं जाता नरयोनावनिन्दिता ॥
यथा भृङ्गी महाकाल एतयोरभवत् सुतः ।
तथा त्वं शृणु राजेन्द्र । कथयामि समुद्भवम् ॥
अथोमया समं देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप ।॥
ददर्शाथ चरन्तीं तामुमायाः सदृशीं गुणैः ।
सर्व्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
तां दृष्ट्वा व्यगदद्देवीं गौरीं वृषभकेतनः ।
इयं ते मानुषी मूर्त्तिः प्रिये । तारावतीति या ॥
भृङ्गी महाकालयोस्ते जनने विहिता स्वयम् ।
त्वत्तो ह्यनन्यकान्तोऽहं नान्यां गन्तुमिहोत्सहे ॥
त्वमिदानीं स्वयच्चास्यां मूर्त्तौ प्रविश भाविनि ! ।
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम् ॥
श्रीदेव्युवाच ।
ममैव मानुषी मूर्त्तिरियं वृषभकेतन ।।
विशामि तेऽत्र वचनादुत्पादय सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः सापर्णयाविष्टा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभवन्मुदा ॥
कामावसाने तस्यान्तु सद्योजातं सुतद्वयम् ।
अभवन् नृपशार्दूल । तथा शाखामृगाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनात् नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः ॥
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः ॥
अन्यांश्च सर्व्वसंस्कारान्नारदो मुनिसत्तमः ।
चकार क्रमशो वाक्याच्चन्द्रशेखरभूभृतः ॥”
इति कालिकापुराणे ४७ । ४८ । ४९ अध्यायेभ्यः संकलितम् ॥ तस्य जन्मनः प्रकारान्तरं यथा,
दैत्य उवाच ।
प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥
अथैनमब्रवीद्देवस्त्रैलोक्याधिपतिर्भवः ।
आश्वासनकरञ्चास्य वाक्यविद्वाक्यमुत्तमम् ॥
अहो तुष्टोऽस्मि ते राजन् । स्तवेनानेन सुव्रत ! ।
बहुनात्र किमुक्तेन मत्समीपे वसिष्यसि ॥
उषित्वा सुचिरं कालं मम गात्रोद्भवः पुनः ।
असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत् ॥
हिरण्याक्षगृहे जन्म प्राप्य वृद्धिं गमिष्यसि ।
पूर्व्वाधर्म्मेण घोरेण वेदनिन्दाकृतेन च ॥
साभिलाषो जगन्मातुर्भविष्यसि यदा तदा ।
देहं शूलेन हत्वा ते पातयिष्यामि साध्विमम् ॥
तत्राप्यकल्मषो भूतः स्तुत्वा मां भक्तितः पुनः ।
प्राप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः ।
मत्सन्निधाने स्थित्वा त्वं ततः सिद्धिं गमिष्यसि ॥”
ततः कालान्तरे अन्धककृतस्तवानन्तरं महादेववाक्यम् यथा,—
“सिद्धोऽसि दानवपते ! परितुष्टोऽस्मि तेऽन्धक ।।
वरं वरय भद्रं ते यमिच्छसि विनाम्बिकाम् ॥

अन्धक उवाच ।

अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥
वरदोऽसि यदीशान । तद्यातु विलयं मम ।
शारीरं मानसं वाग्जं दुष्कृतं दुर्विचिन्तितम् ॥
तथा मे दानवो भावो व्यपयातु महेश्वर ।
स्थिरा स्यात्तव भक्तिस्तु वरमेतं प्रयच्छ मे ॥

महेश्वर उवाच ।

एवं भवतु दैत्येन्द्र ! पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भृङ्गी गणपतिर्भव ॥
इत्येवमुक्त्वा वरदः शूलाग्रादवतार्य्य तम् ।
निर्म्माज्य निजहस्तेन चक्रे निर्व्रणमन्धकम् ॥
ततः स्वदेहगो देवान् ब्रह्मादीनाजुहाव सः ।
ते निश्चेरुर्महात्मानो नमस्यन्तस्त्रिलोचनम् ॥
गणान् स नन्दी चाहूय सन्निवेश्य तदग्रतः ।
भृङ्गिणं दर्शयामास ब्रुवन्नेषोऽन्धकेति हि ॥
तं दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम् ।
गणाधिपत्यमापन्नं प्रशशंसुर्वृषध्वजम् ॥"

इति वामनपुराणे ।४४।४५।६७ अध्यायेभ्यः सङ्कलितम् ॥

भृङ्गीफलः, पुं, (भृङ्ग्याः अलिविशेषायाः फलमिव फलं यस्य ।) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥

भृङ्गीशः, पुं, (भृङ्गिणो भृङ्गेर्वा ईशः ।) महादेवः । इति शब्दरत्नावली ॥

भृङ्गेरिटिः, पुं, (भृङ्गे भृङ्गविषये रिटति । अभिलषतीति । भृङ्ग+रिट् कर्त्तरि इः । अलुक् समासः ।) भृङ्गी । इति त्रिकाण्डशेषः ॥

भृङ्गेष्टा, स्त्री, (भृङ्गाणामिष्टा ।) घृतकुमारी । भार्गी । तरुणी । काकजम्बूः । इति राजनिर्घण्टः ॥

भृज ई ङ भर्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) भर्जनं पाकविशेषः । ई भृक्तः । ङ भर्जते तण्डुलान् जनः । इति दुर्गादासः ॥

भृज्जनं, पुं, (भृज्यन्ते तण्डुलादयोऽस्मिन्निति । भ्रस्ज + "भूसूधूभ्रस्जिभ्यश्छन्दसि ।" उणा० ७ । ८० । इति क्युन् ।) अम्बरीषः । इति उणादिकोषः । भाजना खोला इति भाषा ॥

भृतः, त्रि, भरणीयः । इत्याह्निकतत्त्वम् । पुष्टः । इति भृधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

भृतकः, पुं, (भ्रियते इति । भृ+कर्म्मणि क्तः । ततः स्वार्थे कन् । यद्वा, भृतेन वेतनेन उपजीवतीति कन् ।) वेतनोपजीविकर्म्मकर्त्ता । तत्पर्य्यायः । भृतिभुक् २ कर्म्मकरः ३ वैतनिकः ४ । इत्यमरः । २।१०।१५ ॥ (यथा, मनौ ।३।१५६।
"भृतकाध्यापको यश्च भृताध्यापितस्तथा ॥")

भृतिः, स्त्री, (भ्रियते अनयेति । भृ+क्तिन् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ मूल्यम् । भरणम् । इति मेदिनी । ते, ४२ ॥ भृतिर्वेतनं तत्कर्म्मणो दत्तम् । तत्तु सप्तविधदत्तान्तर्गतदत्तविशेषः । यथा नारदेन च । दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम् ।

"पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥"

इति मिताक्षरा ॥

भृतिभुक्, [ज्] पुं, (भृत्या भुङ्क्ते उपजीवतीत्यर्थः । भुज्+कर्त्तरि क्विप् ।) भृतकः । इत्यमरः । २ । १० । १५ ॥

भृत्यः, पुं, (भ्रियते इति । भृ+"भृञोऽसंज्ञायाम् ।" ३ । १ । ११२ । इति क्यप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) दासः । इत्यमरः । २ । १० । १७ ॥ (तथास्य पर्य्यायान्तरम् ।

"परिकर्म्मा परिचरः सहायः परिचारकः ।
प्रेष्यो भृत्य उपस्थाता सेवकोऽभिसरोऽनुगः ॥"

इति वैद्यकरत्नमालायाम् ॥)

तस्य लक्षणं यथा,—

सूत उवाच ।

"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्म्मसु ॥
भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तमिमं संप्रवक्ष्यामि यद्यदा कथितानि च ॥
यथा चतुर्भिः कनकं परीक्ष्यते
तुलाघर्षणच्छेदनतापनेन ।
तथा चतुर्भिर्भृतकः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्म्मणा ॥"

कुलशीलगुणोपेतः सत्यधर्म्मपरायणः ।
रूपेण सुप्रसन्नश्च राज्याध्यक्षो विधीयते ॥
मूल्यरूपपरीक्षाकृद्भवेद्रत्नपरीक्षकः ।
बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी प्रमाथी च प्रतीहारः स उच्यते ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रसमालोकी ह्येष साधुः स लेखकः ॥
बुद्धिमान् मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च एष दूतो विधीयते ॥
समस्तस्मृतिशास्त्रज्ञः पण्डितोऽथ जितेन्द्रियः ।
शौर्य्यवीर्य्यगुणोपेतो धर्म्माध्यक्षो विधीयते ॥
पितृपैतामहो दक्षः शास्त्रज्ञः सत्यवाचकः ।
शौचयुक्तः सदाचारी सूपकारः स उच्यते ॥
आयुर्वेदकृताभ्यासः सर्व्वज्ञः प्रियदर्शनः ।
आर्य्यशीलगुणोपेतो वैद्य एव विधीयते ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादपरो नित्यमेष राजपुरोहितः ॥

इति गारुडे ११२ अध्यायः ॥

भृत्या, स्त्री, (भ्रियतेऽनया भरणमिति वा । भृ+"संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥" ३ । ३ । ९९ । इति क्यप् । स्त्रियां टाप् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ (भरणक्रिया । यथा, ऋग्वेदे । १ । ८४ । १६ ।

"आसन्निषून् हृत्स्वसो मयोभून्
य एषां भृत्यामृणधत् स जीवात् ॥")

भृमिः, पुं, (भ्रमति भ्राम्यति वेति । भ्रम्+"भ्रमेः संप्रसारणञ्च ।" उणा० ४।१२० । इति इन् कित् सम्प्रसारणञ्च ।) वायुविशेषः । घूरणा वातास इति भाषा । जलादिभ्रमणम् । इत्युणादिकोषः ॥ (त्रि, कर्म्मनिर्व्वाहकः । यथा, ऋग्वेदे । १ । ३१ । १६ ।

"आपिः पिता प्रमतिः सोम्यानां
भृमिरस्यृषिकृन्मर्त्यानाम् ॥"

"भृमिर्भ्रामकः कर्म्मनिर्व्वाहक इत्यर्थः ।" इति तद्भाष्ये सायनः ॥ भ्रमणशीलः । यथा, ऋग्वेदे । ३ । ६२ । २ ।

"इमा उवां भृमयो मन्यमाना
युवावते न तुज्या अभूवन् ॥"

"भृमयः भ्रमणशीलाः ॥" इति तद्भाष्ये सायनः ॥ वीणाविशेषे स्त्री । यथा, ऋग्वेदे ।२।३४।१ ।
"अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ॥"
"यद्वा, भृम्याख्यो वीणाविशेषस्तं धमन्तो वादयन्तः ॥" इति तद्भाष्ये सायनः ॥)

भृश, इर् य उ अधःपते । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) इर् अभृशत् अभर्शीत् । पुषादित्वादिन्व ङ इत्यन्ये । य भृश्यति भृश्यत्यरिपताकिनीति हलायुधः ॥ उ भर्शित्वा भृष्ट्वा । इति । दुर्गादासः ॥

भृशं, क्ली, (भृश्यति प्राचुर्य्येण वर्त्तते इति भृश+कः ।) अतिशयः । तद्वति, त्रि । इत्यमरः १ । ७० ॥ (यथा, भारवौ । ११ । ४६ ।
"भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥"

भृशम्, व्य, (भृश+कः ।) प्रकर्षार्थः । मुहुरर्थः । शोभनम् । इति शब्दरत्नावली ॥

भृषत्, [द्] पुं, पाषाणः । इति शब्दरत्नावली ॥

भृष्टः, त्रि, (भ्रस्ज+कर्म्मणि क्तः ।) जलोपसेकं विना पक्वः । इति हेमचन्द्रः ॥ भाजा इति भाषा ॥

भृष्टतण्डुलः, पुं, (भृष्टश्चासौ तण्डुलश्चेति कर्म्मधारयः ।) भर्जनविशिष्टधान्यनिकरः । चाल भाजा इति भाषा ॥ अस्य गुणाः ।
"सुगन्धिः कफहा रूक्षः पित्तलो भृष्टतण्डुलः ॥"

इति राजवल्लभः ॥

भृष्टयव, पुं, (भृष्टश्चासौ यवश्चेति ।) भर्ज्जनविशिष्टयवः । यव भाजा इति भाषा । तत्पर्य्यायः । धानाः १ । इत्यमरः ॥ वाट्टकम् २ । इति शब्दचन्द्रिका ॥ अस्य गुणा धानाशब्दे द्रष्टव्याः ॥

भृष्टान्नं, क्ली, (भृष्टं अन्नम् ।) भृष्टतण्डुलः । मुडि इति भाषा । तत्पर्य्यायः । कुहरम् २ त्वाच्यम् ३ । इति शब्दचन्द्रिका ॥

भृष्टिः, स्त्री, (भ्रस्ज्+भावे क्तिन् ।) भर्जनम् । शून्यवाटिका । इति मेदिनी । टे, ७५ ॥

भॄ श भर्त्तौ । भर्त्सि । भर्त्से । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) श भृणाति भूर्णः । भूर्णिः । भृज भर्जने । इति दुर्गादासः ॥

भेकः, पुं, (बिभेति इति। भी+"इण्भीकापाशल्यतीति।" उणा०। ३। ४३। इति कन्।) जन्तुविशेषः। व्याङ् इति भाषा। तत्पर्य्यायः। मण्डूकः २ वर्षाभूः ३ शालूरः ४ प्लवः ५ दर्दुरः ६। इत्यमरः।१।१०।२४॥ हरिभूः ७ शालुरः ८। इति तट्टीका॥ प्लवङ्गमः ९ व्यङ्गः १० प्लवगः ११ शल्लः १२ नन्दनः १३ गूढ़वर्च्चाः १४ अजिह्मः १५ जिह्ममोहनः १६। इति शब्दरत्नावली॥ नन्दकः १७ लूतालयः १८ रेकः १९। इति त्रिकाण्डशेषः॥ मण्डः २० हरिः २१ लुलुकः २२। क्वचित् पुस्तके लूलकोऽपि पाठः। शालूकः २३ कटुरवः २४। अस्य मांसगुणाः। सद्योबलकरत्वम्। श्रमतृड्दाहप्रमेहचयकुष्ठच्छर्द्दिनाशित्वञ्च। इति राजनिर्घण्टः॥ मेघः। इति मेदिनी। के, ३०॥ (यथा, आर्य्यासप्तशत्याम्। ४५१।
"संशुष्यतेऽद्रीशुरधिर्निदाघनद्यो न भेकमपि॥")

भेकटः, पुं, (भेक इव टलति। भेक+टल+डः।) मत्स्यभेदः। यथा। तुल्यौ भेकटवेकटौ। इति द्विरूपकोषः॥

भेकनिः, पुं, मत्स्यविशेषः। भाङ्गन इति भाषा। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। हृद्यत्वम्। श्लेष्मकरत्वम्। गुरुत्वञ्च। इति राजवल्लभः। भेकलिः। इति च पाठः॥

भेकपर्णी, स्त्री, (भेकाकृति पर्णमस्याः। ङीष्।) मण्डूकपर्णी। इति केचित्॥ (यथा,—
"ततस्त्वं कन्यकाद्रावैर्मर्द्दयेद्भावयेत्तथा।
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं हिताम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे वृहत्सोमनाथरसे॥)

भेकभुक् [ज्] पुं, (भेकं भुङ्क्ते इति। भुज्+क्विप्।) सर्पः। इति त्रिकाण्डशेषः॥

भेकी, स्त्री, (भेक+"जातेरस्त्रीविषयादयोपधात्।" ४। १। ६३। इति ङीष्।) भेकप्रिया। तत्पर्य्यायः। शिली २ गण्डूपदी ३ वर्षाभ्वी ४ इत्यमरः। १। १०। २४॥ अन्येऽपीवन्तभेकपर्य्याया एतद्वाचकाः। मण्डूकपर्णीश्च। इति रत्नमाला॥ (यथास्याः पर्य्यायान्तरम्।
"भेकी मण्डूकपर्णी च मण्डूकी मूलपर्ण्यपि॥"
इति रत्नमालायाम्॥)

भेडः, पुं, (भी+बाहुलकात् डः। अस्येत्वम् न गुणत्वं च।) मेषः। इति हेमचन्द्रः।४।३४३। अस्य भाषा भेड़ा॥

भेड़ी, स्त्री, (भेड़+ङीष्।) भेडभार्य्या। अवी। अस्या दुग्धगुणाः।
"आविकं लवणं स्वादु स्निग्धोष्णञ्चाश्मरीप्रणुत्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्॥
गुरुकासेऽनिलोद्भूते केवले चानिले वरम्।"
इति भावप्रकाशः॥

भेत्ता, [ऋ] त्रि, (भिनत्तीति। भिद्+तृच्।) भेदकर्त्ता। यथा, व्यवहारतत्त्वे।
"कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपतः॥"

भेदः, पुं, (भिद्+घञ्।) शत्रुवशीकरणोपायचतुष्टयान्तर्गततृतीयोपायः। तत्पर्य्यायः उपजापः २। इत्यमरः। २। ८। २१॥ परतो विश्लेष्य आत्मसात् करणं भेदः। इति भरतः॥ तद्विशेषो यथा,—
मत्स्य उवाच।
"परस्परन्तु ये दुष्टाः क्रुद्धा भीतावमानिताः।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः॥
ये तु येनैव दोषेण परस्मान्नापि बिभ्यति।
ते तु तद्दोषपातेन भेदनीया भृशं ततः॥
आत्मीयां दर्शयेदाशां परस्माद्दर्शयेद्भयम्।
एवं हि दर्शयेद्भिन्नान् यथावद्वशमानयेत्॥
संहता हि विना भेदं शक्रेणापि सुदुःसहाः।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः॥
स्वमुखेनाश्रयेद्भेदं भेदं परमुखेन च।
परीक्ष्य साधु मन्येत भेदं परमुखाच्छ्रुतम्॥
भेद्याः स्वकार्य्यमुद्दिश्य कुशलैर्ये हि भेदिताः।
भेदितास्ते विनिर्द्दिष्टा नैव राजार्थवादिभिः॥
अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम्।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम्॥
सामन्तकोपो बाह्यस्तु कोपः प्रोक्तो मनीषिभिः।
महिषीयुवराजाभ्यां तथा सेनापतेर्नृप!॥
अमात्यमन्त्रिणाञ्चैव राजपुत्रात्तथैव च।
अन्तःकोपो विनिर्द्दिष्टो दारुणः पृथिवीक्षिताम्॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः।
शुद्धान्तस्तु महाभाग! शीघ्रमेव जयी भवेत्॥
अपि शक्रसमो राजा अन्तःकोपेन नश्यति।
सोऽन्तःकोपः प्रयत्नेन तस्माद्रक्ष्यो महीक्षिता॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा।
ज्ञातीनां भेदनं कार्य्यं परेषां विजिगीषुणा॥
रक्ष्यश्चैव प्रयत्नेन ज्ञातिभेदस्तथात्मनः।
ज्ञातयः परितप्यन्ते सततं परितप्य यम्॥
तथापि तेषां कर्त्तव्यं सुगम्भीरेण चेतसा।
ग्रहणं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः॥
न ज्ञातिरनुगृह्णाति न ज्ञातिर्दग्धुमिच्छति।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः॥
भिन्ना हि शक्या रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुमाजौ।
सुसंहतानां हि ततस्तु भेदः
कार्य्यो रिपूणां नयशास्त्रविद्भिः॥"
इति मात्स्ये राजधर्म्मे २२२ अध्यायः॥*॥
द्वैधः। विशेषः। विदारणम्। इति मेदिनी। ने, १२॥ (तथा च कामन्दकीये। १५। १६।
"पुरश्च पश्चाच्च यदा समर्थ-
स्तदाभियायाच्छहते फलाय।
पुनः प्रसर्पन्नविशुद्धपृष्ठः
प्राप्नोति तीव्रं खलु पार्ष्णिभेदम्॥")
विरेकः। यथा, हास्यार्णवनाटके।
"कार्श्यं धूमस्तुषाणां बलवति मरुते स्वेदभेदोपवासा वह्न्यम्भोभ्यां च पिष्टं सपिशितमनिशं वारिपानं कफघ्नौ॥"

भेदकः, त्रि, (भिद्+ण्वुल्।) विदारकः। यथा, मनौ। ९। २८५।)
("संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः।
प्रतिकुर्य्याच्च तत् सर्व्वं पञ्च दद्याच्छतानि च॥")
विरेचकौषधादिः। (विरेचकौषधार्थे विषयो यथा,
"नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या वीक्ष्य देहमलादिकम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे विरेकाधिकारे॥)
पृथक्कारकः। यथा। "भेदयति अन्यपदार्थं पृथक् करोतीति भेदकं नाम्ना शिवः गोत्रेण गार्ग्यः।" इति कारकटीकायां दुर्गादासः॥ अपि च।
"भेद्यभेदकयोः श्लिष्टं सम्बन्धोऽन्योन्यमिष्यते।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्॥"
इति कलापटीकाधृतभर्त्तृहरिकारिका॥
("सामान्यस्य भेदको विशेषः प्रकारः।" इति च ५। ३। ६९। इत्यस्य। काशिकावृत्तिः॥)

भेदनं, क्ली, (भिद्यतेऽनेनेति भिद्+ल्युट्।) हिङ्गु। इति राजनिर्घण्टः॥ विदारणम्। इति भिद्धातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥ (भेदकारके, त्रि॥ यथा, भागवते। ३। २६। २।
"यदाहुर्वर्णये तत् ते हृदयग्रन्थिभेदनम्।
"अहङ्कारनिवर्त्तकमिति स्वामिव्याख्यानम्॥"
विरेचनकारके च। यथा च सुश्रुते।१।१८८।१४॥
सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम्।
भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम्॥")

भेदनः, पुं, ("भिद्यतेऽनेनेति।" भिद्+ल्युट्।) अम्लवेतसः॥ (भिनत्ति भूमिमिति। ल्युः॥ शूकरः। इति राजनिर्घण्टः॥

भेदितः, त्रि, (भिद्+णिच्+कर्म्मणि क्तः।) भिन्नः। दारितः। इत्यमरः। ३। १। १००॥

भेदी, [न्] पुं, (भेत्तुं शीलमस्येति। भिद्+णिनिः।) अम्लवेतसः। इति राजनिर्घण्टः॥ (गुणादयोऽस्याम्लवेतसशब्दे विज्ञेयाः॥)
भेदकर्त्तरि तद्विशिष्टे च त्रि॥ (यथा भागवते। ३। १५। ३३।
"अनुपादितं ह्युदरभेदि भयं यतोऽस्य॥")

भेदुरं, क्ली, (भिदुर+पृषोदरादित्वात् साधुः।) भिदुरम्। वज्रम्। इति द्विरूपकोषः॥

भेरः, पुं, (बिभेत्यस्मादिति। भी+ऋज्रेन्द्राग्रवज्रेति। उणा०। २। २८। इति रन्।) पटहः। भेरी। दुन्दुभिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भेरिः, स्त्री, (बिभ्यति शत्रवोऽस्या इति। भी+"वङ्क्र्यादयश्च।" उणा०।४।६६। इति क्रिन्। बाहुलकात् गुणः।) ढक्का। तत्पर्य्यायः। आनकः २ दुन्दुभिः ३। इत्यमरः। १।७।६॥ भेरी ४ आनकदुन्दुभिः ५ आनकदुन्दुभी ६। इति तट्टीकायां भरतः॥ (यथा, "अतो भेरिवंशवीणामृदङ्गतालपटहशङ्खकाहलादिभेदेन शब्दा अनेकविधाः।" इति पञ्चतन्त्रे प्रथमतन्त्रम्॥)

भेरी, स्त्री, (बिभ्यति शत्रवोऽस्या इति । भी + क्रिन् । कृदिकारादिति पक्षे ङीष् ।) भेरी इत्यमरटीकायां भरतः ॥

वराह उवाच ।

"भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरो जायते भूमे ! जन्मैकञ्च न संशयः ॥
तस्य वक्ष्यामि सुश्रोणि । प्रायश्चित्तं मम प्रियम्
किञ्चिद्याद् येन मुच्येत भेरीताडनमोहितः ॥
यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशीम् ।
आकाशशयनं कृत्वा शीघ्रं मुच्येत किल्बिषात् ॥
य एतेन विधानेन वसुधे ! कर्म्म कारयेत ।
अपराधं न गच्छेत मम लोकाय गच्छति ॥"

इति वराहपुराणे भेरीताडनापराधप्रायश्चित्तम् ॥

(यथा च, सुश्रुते । २ । २७६ । ६ ।
"एतेन भेर्य्यः पटहाश्च दिग्धा
नानद्यमाना विषमाशु हन्युः ॥")

भेरुण्डं, क्ली, गर्भधारणम् । भयानकं, त्रि । इति शब्दरत्नावली ॥

भेरुण्डा, स्त्री, (भेरुण्ड + टाप् ।) देवताविशेषः यक्षिणीभेदः । इति मेदिनी । डे, ३४ ॥ सा देवता काली । यथा,—

"त्रिकोणनिलया नित्या परमामृतरञ्जिता ।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥"

इति कालीकुलसर्व्वस्वे श्रीशिवपरशुरामसंवादे आद्यायाः सहस्रनामस्तोत्रम् ॥

भेलं, त्रि, (भी + "ऋजेन्द्राग्रवज्रेति ।" उणा० २ । २८ । इति रन् रस्य लत्वम् ।) भीरुः । मूर्खः । इति मेदिनी । ले, ४३ ॥ चञ्चलः । इति शब्दरत्नावली ॥

भेलः, पुं, (भी + रन् लत्वम् ।) प्लवः । मुनिविशेषः । इति मेदिनी । ले, ४३ ॥ भेलकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

भेलकः, पुं, क्ली, (भेल + स्वार्थे कन् ।) नद्यादितरणसाधनवस्तु । भेला इति भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ उडुपम् ४ उडुपम् ५ तरणः ६ तारणः ७ तारकः ८ । इति शब्दरत्नावली ॥ तरीषः ९ । इति जटाधरः ॥

भेष, ऋ ञ भये । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सेट् ।) ऋ अबिभेषत् । ञ भेषति भेषते बिभेषि । इति दुर्गादासः ॥

भेषजं, क्ली, (भिषजो वैद्यस्येदमित्यण् निपातनादेत्वम् । यद्वा, भेषं रोगं जयतीति । जि + डः । औषधम् । इत्यमरः । २ । ६ । ५० ॥ ("अस्ति भेषजोजलाषः ।" इति ऋक्संहिता । २ । ३३ । ७ ।) अथ भेषजभक्षणसमयाः ।

"भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः ।
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः ॥
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम् ।
किञ्चित् सूर्य्योदये जाते तथा दिवसभोजने ।
सायन्तने भोजने च मुहुश्चापि तथा निशि ॥"

तत्र प्रथमः कालः ।

'प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः ।
लेखनार्थे च भैषज्यं प्रभाते नान्नमाहरेत् ॥'

अथ द्वितीयः कालः ।

'भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते ।
अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् ॥
समानवाते विगुणे मन्देऽग्नौ वह्निदीपनम् ।
दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ॥
व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत् ।
हिक्काक्षेपककम्पेषु पूर्व्वमन्ते च भोजनात् ॥'

अथ तृतीयः कालः ।

'उदाने कुपिते वाते स्वरभङ्गादिकारिणि ।
ग्रासग्रासान्तरे देयं भैषज्यं साध्यभोजने ॥
प्राणे प्रदुष्टे साध्यस्य भुक्तस्यान्ते प्रदीयते ।
औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः ॥'

अथ चतुर्थः कालः ।

मुहुर्मुहुश्च तृट्छर्द्दिहिक्काश्वासगरेषु च ।
सान्नञ्च भेषजं दद्यादिति कालचतुर्थकः ॥'

अथ पञ्चमः कालः ।

'ऊर्द्ध्वजत्रु विकारेषु लेखने बृंहणे तथा ।
पाचने शमने देयमनन्नं भेषजं निशि ॥'

इति पञ्चमः कालः ॥

निरन्नस्य भेषजस्य गुणमाह ।

'वीर्य्याधिकं भवति भेषजमन्नहीनं
हन्यात्तदामयमसंशयमाशु चैव ॥
तद्बालवृद्धयुवतीमृदुभिश्च पीतं
ग्लानिं परां नयति चाशु बलक्षयञ्च ॥'

सान्नस्य भेषजस्य गुणमाह ।

'शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं न च मुहुर्वदनान्निरेति ।
एतद्धितं स्थविरबालकशाङ्गनाभ्यः
प्राग्भोजनाद्यदशितं किल तच्च तद्वत् ॥'

तद्वत् अन्नावृतवत् भेषजमिति शेषः ।

'औषधशेषे भुक्तं भोजनशेषे यदौषधं पीतम् ।
न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च ॥'

पीतमित्युपलक्षणम् । लीढ़ादि च ।

'अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णासुमनः क्लमः ।
लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः ॥
क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छाशिरोरुजः ।
अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥'

अथ भेषजभक्षणविधिमाह चरकः ।

'देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रणम्य च ।
आशिषश्च समादाय श्रद्धया भेषजं भजेत् ॥
रसायनमिवर्षीणां देवानामिव चामृतम् ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
ऋषयः सौषधिग्रामा भूमिदेवाश्च पान्तु वः ॥'

इत्याद्याशिषः ॥

'औषधं हेमरजतमृद्भाजनपरिस्थितम् ।
पिबेदासनमस्थाग्रे प्रसन्नवदनेक्षणः ॥
प्रशान्तस्वपविश्राय पीत्वा पात्रमधोमुखम् ।
निःक्षिप्याचम्य सलिलं ताम्बूलाद्युपयोजयेत् ॥'

अथ भेषजानां विधानानि ।

'स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥'

तत्रादौ स्वरसविधिः ।

'आहतात्तत्क्षणाकृष्टात् द्रव्यात् क्षुण्णात् समुद्भवे ।
वस्त्रनिष्पीडितो यश्च स्वरसो रस उच्यते ॥'

अथ कल्कविधिः ।

'द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।
प्रक्षिप्य गालयेद्वस्त्रे तत्कल्कं कर्षसम्मितम् ॥
कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ।
सितां गुडं समं दद्याद्द्रवा देयाश्चतुर्गुणाः ॥'

अथ क्वाथविधिः ।

'पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम् ॥
कर्षादौ तु पलं यावद्दद्यात् षोड़शिकं जलम् ॥
षोडशिकं षोडशगुणम् ॥ * ॥

अथ हिमविधिः ।

'क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशोषितं हिमः स स्यात्तथा शीतकषायकः ॥'

अथ फाण्टविधि. ।

'क्षुण्णद्रव्यपले सम्यक जलमुष्णं विनिःक्षिपेत ।
मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत् पुटात ॥
स स्यात् चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम् ।
चौद्रं सिता गुड़ादींस्तु कर्षमात्रान् विनिःक्षिपेत् ॥' * ॥

अथ तण्डुलजलविधिः ।

'कण्डितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत् ।
भावयित्वा जलं ग्राह्यं देयं सर्व्वत्र कर्म्मसु ॥'

अथ मन्थविधिः ।

'जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ।
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विगुणं पिबेत ॥'

अथ चूर्णविधिः ।

'अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् ।
तत् स्याच्चूर्णं रजःक्षोदस्तन्मात्राकर्षसम्मिता ॥
चूर्णे गुडः समो देयः शर्करा द्विगुणा मता ।
चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत् ॥'

अथ भावनाविधिः ।

'द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत् ।
भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः ॥'

अथ पुटपाकविधिः ।

'पुटपक्वस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपञ्च द्व्यङ्गुलं स्थूलं कुर्य्याद्द्व्यङ्गुष्ठमात्रकम् ॥
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥'

अथ शोधनकविधिः ।

'अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।

अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत् ॥'
अथ क्षीरपाकविधिः ।
'क्षीरमष्टगुणं दद्यात् क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत् ॥'
अथावलेहविधिः ।
'क्वाथादीनां पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहश्च तन्मात्रा स्यात् पलोन्मिता ॥'

अथ वटिकाविधिः ।
'वटिका अथ कथ्यन्ते तन्नामवटिका वटी ।
मोदको गुटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ॥
लेहवत् साध्यते वह्नौ गुडो वा शर्करा्थवा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी ॥'
अथ सन्धानविधिः ।
'द्रवेषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचितम् ॥'
अथ धातूनां शोधनमारणविधिः । [तत्र शोधनविधिः ।
'पत्तलीकृत्य पत्राणि हेम्नो वह्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ॥'*॥
अथ स्वर्णस्य मारणविधिः ।
'स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्द्दयेत् ।
तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ॥
गोलकञ्च ततो रुद्धा शरावदृढसंपुटे ।
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्द्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥"
अथ स्नेहपानविधिः ।
स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा ।
मज्जा च तत् पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ ॥
अथ पञ्चकर्म्माणि ।
प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्म्माणि निरूहेणोत्तरं तथा ॥
अथ फलवर्त्तिविधिः ।
घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा स्वाङ्गुष्ठसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥
अथ नस्यग्रहणविधिः ।
नस्यं तत् कथ्यते धीरैर्नासाग्राह्यं यदौषधम् ।
नावनं नस्तकर्म्मेति तस्य नाम द्वयं मतम् ॥
अथ धूमपानविधिः ।
धूमस्तु षड्विधः प्रोक्तः शमनो वृंहणस्तथा ।
रेचनः कासहा चैव वामनो व्रणधूपनः ॥
अथ गण्डूषकवलप्रतिसारणविधिः ।
तत्र गण्डूषः ।
स्नेहक्षीरकषायादिद्रवैः सम्यग्गमाननम् ।
आपूर्य्य क्षीयते तावद्विधिर्गण्डूषधारणे ॥
अथ कवलः ।
वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे ।
अर्द्धं निःक्षिप्य संचर्व्य निष्ठीवेत् कवले विधिः ॥
अथ प्रतिसारणम् ।
दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहकैः ।
घर्षणं शनैरङ्गुल्या तदुक्तं प्रतिसारणम् ॥
अथ स्वेदविधिः ।
स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ।
उपनाहो द्रवः स्वेदः सर्व्वे वातार्त्तिहारिणः ॥
अथ कर्णपूरणविधिः ।
स्वेदयेत् कर्णदेशन्तु किञ्चित्तु पार्श्वशायिनः ।
मूत्रैः स्नेहै रसैरुष्णैः कोष्णैः श्रोत्रं प्रपूरयेत् ॥
कर्णञ्च पूरितं रक्षेच्छतं पञ्चशतानि वा ।
सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे ॥
रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥*॥
अथालेपविधिः ।
अथालेपस्य नामानि लेपलेपनलिप्तयः ।
दोषघ्नो विषहा वर्ण्यः स च लेपस्त्रिधा मतः ।
न रात्रौ लेपनं कुर्य्यात् शुष्यमाणं न धारयेत् ॥
अथ शोणितस्रावणविधिः ।
शोणितं स्रावयेज्जन्तोरामयं प्रसमीक्ष्य च ।
प्रस्थं प्रस्थार्द्धमथवा प्रस्थार्द्धार्द्धमथापि वा ॥
शरत्काले स्वभावेन शोणितं स्रावयेन्नरः ।
त्वग्दोषग्रन्थिशोथाद्या न स्यू रुधिरपातनात् ॥
अथाश्च्योतनविधिः ।
क्वाथक्षीद्रासवस्नेहविन्दूनां यत्तु पातनम् ।
द्व्यङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्च्योतनं हितम् ॥
अथ विडालकविधिः ।
विडालको बहिर्लेपो नेत्रे पक्ष्मविवर्ज्जिते ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥
अथ तर्पणविधिः ।
वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोषयोः ।
पूरयेद्घृतमण्डेन विलीनेन सुखोदके ॥
अथाञ्जनविधिः ।
"अथ सव्यगदोषस्य प्राप्तमञ्जनमाचरेत्।
अञ्जनं क्रियते नेत्रे तद्द्रव्यञ्चाञ्जनं मतम् ॥
अथ प्रत्यञ्जनविधिः ।
गतदोषमपेतास्रु प्रपश्यन् सव्यगाम्भसा ।
प्रत्याख्याति यथादोषं कार्य्यं प्रत्यञ्जनं ततः॥
इति भावप्रकाशः ॥*॥
अथ भेषजकरणभक्षणादिनम् । तत्र तिथयः रिक्ताभिन्नाः शोभनाः । वाराः रविसोमबुधवृहस्पतिशुक्राणाम् । नक्षत्राणि पूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदमघाभरण्यश्लेषाविशाखार्द्राभिन्नानि । जन्मर्क्षञ्च निषिद्धम् ।
"लग्नानि मिथुनकन्याधनुर्मीनसंज्ञकानि ।
तत्र गुरुबुधचन्द्रशुक्रेषु सत्सु प्रशस्तानि ॥"
इति ज्योतिषतत्त्वम् ॥
(करणं पुनर्भेषजम् । भेषजं नाम तत् यदुपकरणाय उपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायान्तेभ्यः । तद्द्विविधं व्यपाश्रयभेदात् दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च दृष्टफलाः ।
'एतच्चैव भेषजमङ्गभेदादपि द्विविधं द्रव्यभूतमद्रव्यभूतञ्च, तत्र यदद्रव्यभूतं तदुपायाभिप्लुतम् । उपायो नाम भयदर्शनविस्मापनविस्मारणक्षोभणहर्षणभर्त्सनवधबन्धस्वप्नसंवाहनादिरमूर्त्तो भावः यथोक्ताः सिद्ध्युपायाश्च । यत्तु द्रव्यभूतं तद्वमनादिषु योगमुपैति । तस्यापीयं परीक्षा, इदमेवं प्रकृत्या एवंगुणमेवंप्रभाव मस्मिन् देशे जातमस्मिन् ऋतौ एवं गृहीतमेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् व्याधौ एवंविधस्य पुरुषस्यैतावन्तन्दोषमपकर्षयति उपशमयति वा अन्यदपि चैवंविधं भेषजमभूच्चानेनानेन वा विशेषेण युक्तमिति ।
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

भेषजाङ्गं, क्ली, (भेषजस्य औषधस्य अङ्गमवयव इव ।) अनुपानम् । इति शब्दचन्द्रिका ॥

भैक्षं, क्ली, (भिक्षाणां समूह इति । भिक्षा + "भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) भिक्षासमूहः । इत्यमरः । २ । ७ । ४७ ॥
अपि च ।
"भिक्षाशनमनुद्योगात् प्राक्केनाप्यनिमन्त्रितम् ।
अयाचितन्तु तद्भैक्षं भोक्तव्यं मनुरब्रवीत् ॥"
इति प्रायश्चित्ततत्त्वधृतोशनसो वचनम् ॥
(भिक्षैव स्वार्थे अण् । भिक्षा ॥ भिक्षाभवे भिक्षालब्धे वा त्रि॥)

भैक्षजीविका, स्त्री, (भैक्षेण जीविका ।) भिक्षया जीवनोपायः । तत्पर्य्यायः । पैक्ष्यम् २ । इति त्रिकाण्डशेषः ॥

भैक्षभुक् [ज्] त्रि, भैक्षाशी । भिक्षाशी । भैक्षं भुङ्क्ते यः । इति कर्त्तरि क्विप्प्रत्ययेन । निष्पन्नं ॥ (यथा, महाभारते ।१४ । ४६ । ३ ।
"गुरुणा समनुज्ञातो भुञ्जीतान्नमकुत्सयन् ।
हविष्यभैक्ष्यभुक् चापि स्थानासनविहारवान् ॥")

भैमी, स्त्री, (भीमेनोपासिता भीमस्य इयं वेति । भीम + अण् ङीप् ।) भीमैकादशी । यथा, अथ भैमी । विष्णुधर्म्मोत्तरे ।
"मृगशीर्षे शशधरे माघे मासि प्रजापते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते॥
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥"

मत्स्यपुराणे ।
"यद्यष्टम्यां चतुर्द्दश्यां द्वादश्यामथ भारत ! ।
अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम् ॥
ततः पुण्यामिमां भीमतिथिं पापप्रणाशिनीम् ।
उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ॥
भीमतिथिं भैमीत्येन ख्याता एकादशीम् ॥
इत्येकादशीतत्त्वम् ॥*॥

अपि च ।

पितामह उवाच ।

“माघमासि शुक्लपक्षे हृक्षर्क्षेण युता पुरा ।
एकादशी तथा चैषा भीमेन समुपोषिता ॥
आश्चर्य्यन्तु व्रतं कृत्वा पितॄणामनृणो भवेत् ।
भीमद्वादशीति विख्याता प्राणिनां पुण्यवर्द्धिनी ॥
नश्चैव विनाप्येषा ब्रह्महत्यादि नाशयेत् ।
विनिहन्ति महापापं कुनृपो विषयं यथा ।
कुपुत्रस्तु कुलं यद्वत् कुभार्य्या च पतिं यथा ।
अधर्म्मश्च यथा धर्म्मः कुमन्त्री च यथा नृपम् ॥
अज्ञानेन यथा ज्ञानं शौचमशौचता यथा ।
अश्रद्धया यथा श्राद्धं सत्यञ्चैवानृतैर्यथा ॥
हिमं यथोष्णमादित्यादनर्थश्चार्थसञ्चयः ।
यथा प्रकीर्त्तनाद्दानं तपो वै विस्मयाद्यथा ॥
अशिक्षया यथा पुत्रो गावो दूरगतैर्यथा ।
क्रोधेन च यथा शान्तं यथा वित्तमवर्द्धनात् ॥
यथा समीहनाज्ज्ञानं फलानाञ्च यतव्रताः ।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
युगपद्दुपजातानि नहि हन्ति त्रिपुष्करम् ॥
न चापि नैमिषक्षेत्रं कुरुक्षेत्रं प्रभासकम् ।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती ॥
न चैव सर्व्वतीर्थानि एकादश्याः समानि च ।
न दानं न जपो होमो न चान्यसुकृतं क्वचित् ॥
एकतः पृथिवीदानमेकतो हरिवासरः ।
ततोऽप्येका महापुण्या इयमेकादशी परा ॥
अस्मिन् वराहवपुषः कृत्वा देहन्तु हाटकम् ।
घटोपरि नवं पात्रं कृत्वा वै ताम्रभाजनं ॥
सर्व्वबीजन्तु ते विप्राः सितवस्त्रावगुण्ठिते ।
सहिरण्यप्रदीपाद्यैः कृत्वा पूजां प्रयत्नतः ॥
वराहाय नमः पादौ क्रोडाकृति नमः कटिम् ।
नाभिं गम्भीरघोषाय उरःश्रीवत्सधारिणे ॥
बाहु सहस्रशिरसे ग्रीवां सर्व्वेश्वराय च ।
मुखं सर्व्वात्मने पूज्य ललाटं प्रभवाय च ।
केशाः शतमयूखाय पूज्या देवस्य चक्रिणः ॥
विधिना पूजयित्वा तु कृत्वा जागरणं निशि ।
श्रुत्वा पुराणं देवस्य माहात्म्यप्रतिपादकम् ॥
प्रातर्विप्राय दत्त्वा तु याचकाय शुभाय च ।
कनकक्रोडसहितं सन्निवेद्य परिच्छदम् ॥
पश्चात्तु पारणं कुर्य्यान्नातिहृष्टः सुहृद्वृतः ।
एवं कृत्वा नरो विप्रा न भूयः स्तनपो भवेत् ॥
उपोष्यैकादशीं पुण्यां मुच्यते वै ऋणत्रयात् ।
मनोऽभिलषितावाप्तिः कृत्वा सर्व्वव्रतादिकम् ॥”

इति गारुडे एकादशीमाहात्म्ये १२७ अध्यायः ॥ (भीमस्य राज्ञः अपत्यं अण् ङीप् । भीमराजनन्दिनी दमयन्ती । यथा, महाभारते । ३ । ६४ । ११ ।

“नाविन्दत् सा नृपसुता भैमी तत्राथ कस्य-
चित् ।”)

भैरवं, त्रि, (भीरोरिदं नावकत् । भीरु+अण् ।) भयानकम् । इत्यमरः । १ । ७ । २० । (यथा, महाभारते । १ । १६४ । २७ ।

“सर्व्वेण च कटीदेशे गृह्य वाससि पाण्डवः ।
ननर्दो द्विगुणं चक्रे रवन्तं भैरवं रवम् ॥”)

अस्य पर्य्यायाः भयङ्करशब्दे द्रष्टव्याः ॥

भैरवः, पुं, (भीर्भयङ्करो रवो यस्य । इति भीरव । ततः स्वार्थे अण् ।) शङ्करः । इति मेदिनी । वे ४६ ॥ भयानकरसः । इत्यमरटीकायां भरतः ॥ नदविशेषः । इति शब्दरत्नावली ॥ रागभेदः । इति हेमचन्द्रः ॥*॥ अष्टभैरवाणामुत्पत्तिर्यथा,

“दैत्याधिपः समुत्पत्य हरोरसि गदां क्षिपन् ।
संस्थितस्तु महायोगी सर्व्वाधारः प्रजापतिः ॥
गदापातक्षताद्भूरि चतुर्धाऽऽसृगथापतत् ।
पूर्व्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः ॥
विद्याराजेति विख्यातः पद्ममालाविभूषितः ।
तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः ॥
कामराजेति विख्यातः कृष्णाञ्जनसमप्रभः ।
नागराजेति विख्यातश्चक्रमालाविभूषितः ॥
क्षतजाद्रुधिराज्जातो भैरवः शूलभूषितः ।
स्वच्छन्दराजेति विख्यात इन्द्रायुधसमप्रभः ॥
भूमिष्ठाद्रुधिराज्जातो भैरवः फलभूषितः ।
ख्यातो लम्बितराजेति शोभाञ्जनसमप्रभः ॥
ततोऽभूद्देवराजेति भैरवः क्षतजादथ ।
उग्रराजो बभूवाथ क्षतजाद्भैरवोऽपरः ॥
एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ! ।
विघ्नराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ॥”

इति वामनपुराणे अन्धकवरप्रदाने भैरवप्रादुर्भावे ६७ अध्यायः ॥ * ॥ शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,

“आदौ महाभैरवञ्च संहारभैरवं तथा ।
असिताङ्गभैरवञ्च रुरुं भैरवमेव च ॥
ततः कालं भैरवञ्च क्रोधभैरवमेव च ।
ताम्रचूडं चन्द्रचूडं अन्ते च भैरवद्वयम् ॥
एतान् संपूज्य मध्ये च नवशक्तीश्च पूजयेत् ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे दुर्गोपाख्याने ६१ अध्यायः ॥

ताम्रचूडचन्द्रचूडयोः स्थाने कपालभैरवरुद्रभैरवौ ज्ञेयौ । इति तत्रैव गणपतिखण्डे ४१ अध्यायः ॥*॥ अपि च ।

“असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥”

इति तन्त्रसारः ॥*॥

शिवगणाधिपभैरवो यथा,—

“नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
अङ्गं भूत्वा महेशस्य वीतभीतास्तपोधनाः ॥
येमांशुमच्छरीरेण प्रापिरे तपसो बलात् ।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम् ॥”

इति कालिकापुराणे ४३ अध्यायः ॥*॥

करवीरपुरराजचन्द्रशेखरपत्नीतारावतीगर्भे महादेवाज्जातपुत्त्रः । स च पुरा भृङ्गी बभूव पार्व्वतीशापात् वानरमुखो भूत्वा भैरव इति नाम्ना ख्यातः । यथा,—

“प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपशार्दूल ! तथा शाखामृगाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनान्नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्त्रो भयङ्करः ।
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ॥”

इति कालिकापुराणे ४९ अध्यायः ॥*॥

अपि च ।

“योऽसौ भृङ्गी हरसुतो महाकालोऽपि भर्गजः ।
तावेव गौरीशापेन सम्भूय नरयोनिजौ ॥
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।
यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु ।
योऽसौ महाभैरवाख्यः सकायः शरभो हरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ॥”

इति कालिकापुराणे ४५ अध्यायः ॥*॥

दुर्जयाख्यगिरिस्थभैरवो यथा,—

“तन्मध्ये भैरवो देवो भर्गसङ्गमसम्भवः ।
दुर्जयाख्ये वरगिरौ स्वर्गस्योपमभूमिगः ॥
योऽसौ शरभरूपस्य मध्यखण्डादिभैरवः ।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मस्तकैः ।
संपूज्य तत्र मतिमान् स याति शिवलोकताम् ॥”

इति कालिकापुराणे ८२ अध्यायः ॥*॥

भैरवस्य मन्त्रो यथा,—

“कवलः सपरो हादिः षष्ठस्वरसमन्वितः ।
चन्द्रबिन्दुसमायुक्तं हयग्रीवस्य बीजकम् ॥
भैरवं पाण्डुनाथन्तु वनमालिस्वरूपिणम् ।
वाराहेण तु बीजेन पूजयेत्तु विधानतः ॥
सपरौ द्वावनुस्वारविसर्गाभ्यां समन्वितौ ।
महाभैरवमन्त्रोऽयं भैरव तेन पूजयेत् ॥”

इति कालिकापुराणे ६२ अध्यायः ॥*॥

अस्य ध्यानं यथा,—

“भैरवः पाण्डुनाथश्च रक्तगौरश्चतुर्भुजः ।
गदां पद्मञ्च शक्तिञ्च चक्रञ्चापि करेण च ।
बिभ्रद्देव्याः पुरोभागे पूज्योऽयं विष्णुरूपधृक् ॥”

इति तत्रैव ६० अध्यायः ॥*॥

अस्य गायत्त्री यथा,—

“महाभैरव विद्महे केलिरूपाय धीमहि ।
तन्नः कामो भैरवस्तु देवो नित्यं प्रचोदयात् ॥
एषा भैरवरूपस्य गायत्त्री मे प्रतिष्ठिता ।
यथेष्टमांसमद्यादिभोजनाय मया धृतः ॥
महाभैरवरूपोऽयं तथा कौरतिसङ्गमे ।
अयन्तु वाच्यभावेन पूज्यो मद्यादिभिः सदा ॥”

इति कालिकापुराणे ७७ अध्यायः ॥

अथ महाविद्यादीनां भैरवनिरूपणं यथा,—

शिव उवाच ।

“शृणु चार्व्वङ्गि शुभगे ! कालिकायाश्च भैरवम् ।
महाकालं दक्षिणाया दक्षभागे प्रपूजयेत् ॥
महाकालेन वै सार्द्धं दक्षिणा रमते सदा ।
तारायाः दक्षिणे भागे अक्षोभ्यं परिपूजयेत् ॥
समुद्रमथने देवि ! कालकूटं समुत्थितम् ।
सर्व्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः ॥
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम्
अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः ॥

तेन सार्द्धं महामाया तारिणी रमते सदा ।
महात्रिपुरसुन्दर्य्या दक्षिणे पूजयेत् शिवम् ॥
पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रे सुरेश्वरि ।।
तेन सार्द्धं महादेवी सदा कामकुतूहला ॥
अतएव महेशानि । पञ्चमीति प्रकीर्त्तिता ।
श्रीमद्भुवनसुन्दर्य्या दक्षिणे त्र्यम्बकं यजेत ॥
स्वर्गे मर्त्त्ये च पाताले या चाद्या भुवनेश्वरी ।
एतया रमते तेन त्र्यम्बकस्तेन कथ्यते ॥
सशक्तिश्च समाख्यात: सर्व्वतन्त्रे प्रपूजित: ।
भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञकम् ॥
पूजयेत् परयत्नेन पञ्चवक्त्रं तमेव हि ।
छिन्नमस्तादक्षिणांशे कबन्धं पूजयेत शिवम् ॥
कबन्धपूजनाद्देवि । सर्व्वसिद्धीश्वरो भवेत् ।
धूमावती महाविद्या विधवारूपधारिणी ॥
वगलाया दक्षभागे एकवक्त्रं प्रपूजयेत् ।
महारुद्रेति विख्यातं जगत्संहारकारकम् ॥
मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम् ।
तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम् ॥
कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम् ।
पूजयेत् परमेशानि । स सिद्धो नात्र संशय: ॥
पूजयेदन्नपूर्णाया दक्षिणांशे च रूपकम् ।
महामोक्षप्रदं देव दशवक्त्रं महेश्वरम् ॥
दुर्गाया दक्षिणे देशे नारदं परिपूजयेत् ॥
नकार: स्थितिकर्त्ता च दकार: पालक: सदा ।
रेफ: संहाररूपत्वान्नारद: परिकीर्त्तित: ॥
अन्यासु सर्व्वविद्यासु ऋषिर्य. परिकीर्त्तित: ॥
स एव तस्या भर्त्ता च दक्षभागे प्रपूजयेत् ॥”
इति तोडलतन्त्रप्रथमपटल: ॥
(भैरवबलिविषय: । यथा, कालिकापुराणे ।
पक्षिण: कच्छपाग्राहा मत्स्या नवविधा मृगा: ।
महिषा गोधिका गावश्छागो वभ्रुश्च शूकर: ।
खड्गश्च कृष्णसारश्च गोधिका शरभो हरि: ।
शार्द्दूलश्च नरश्चैव स्वगात्ररुधिरन्तथा ॥
चण्डिकाभैरवादीनां बलय: परिकीर्त्तिता: ।
बलिभि: साध्यते मुक्तिर्बलिभि: साध्यते दिवम् ॥)
अथ भैरवरागस्य विवरणम् । हनूमन्मते षड्-
रागमध्ये प्रथमराग: । महादेवमुखान्निर्गत: ।
अस्य जाति: औडव: । अर्थात् धैवतनिषाद-
षड्जगान्धारमध्यममिति पञ्चस्वरमिलित: ।
अस्य ग्रहं धैवतस्वर: । शरदृतौ प्रात:काल:
अस्य गानसमय: । रागमालायाम् अस्या-
कार: महादेवाकारवत । अर्थात सुन्दर-
सन्न्यासी । भस्मन्लिप्तवदन: । जटामस्तक: ।
जटापतद्गङ्गाजल: । कङ्कणभूषितहस्त: । लला-
टार्द्धचन्द्र: । त्रिनेत्र: । सर्पवेष्टितस्कन्धबाहु: ।
भालतिलक: । स्कन्धस्थहस्तिचर्म्मा । अथवा
द्वीपिचर्म्मोपविष्ट: । गलमुण्डमाल: । त्रिशूल-
हस्त: । अथवा सम्मुखप्रोथितत्रिशूल: ।
पार्श्वस्थवृषश्च । अस्य रागिण्य: पञ्च । यथा ।
भैरवी वैराटी मधुमाधवी सिन्धवी वङ्गाली
च । अस्याष्टौ पुत्रा: । यथा । हर्ष: तिलक:
पुरीय: माधव: सूहः बलनेह: मधु: पञ्चमश्च ।
कल्लिनाथमते तु भैरवश्चतुर्थराग: । अस्य
रागिण्य: षट् । यथा । भैरवी गुर्ज्जरी भाषा
वेलावली कर्णाटी रक्तहंसा वड़हंसीति च
केचित । एतन्मते पूर्व्ववत् अष्टौ पुत्रा: । किन्तु
तिलकपुरीयपञ्चमसूहस्थानेषु देवशाखललित-
मालकौशविलावला लिखिता: । सोमेश्वर-
मतेऽपि रागिण्य: षट् । यथा । भैरवी गुर्ज्जरी
रेवा गुणकली वङ्गाली वहुली च । तन्मते
रागिण्या सहास्य गानसमयो ग्रीष्मर्त्तु: ॥
भरतमते तु अस्य रागिण्य: पञ्च यथा । मधु-
माधवी ललिता वरारी वाहाकली भैरवी च ।
तन्मतेऽपि अस्याष्टौ पुत्रा: । यथा देवशाख:
ललित: हर्ष: विलावल: माधव: वङ्गाल:
वैभास: पञ्चमश्च । एषामष्टौ भार्य्या यथा ।
सूहा वेलावली सोरठी कुम्भारी अन्दाही
वहुलगुर्ज्जरी पटमञ्जरी मिरवी च । इति सङ्गीत-
शास्त्रम् ॥ * ॥ मतान्तरे भैरवरागस्य भार्य्या
यथा । भैरवी वङ्गाली वरारी मध्यमा मधु-
माधवी सिन्धवी च । तत्पुत्रा यथा । कोशक:
अजयपाल: श्याम: खरताप: शुद्ध: ढोलश्च ।
तत्पुत्रवध्वो यथा । अष्टौ रेवा वहुला सोहिनी
रम्भिली सूहा च । अत्र शोभा इति साधु:
पाठ: । इति नारदपुराणम् ॥
(नागभेद: । यथा, महाभारते ।१।५७।१६।
“भैरवो मुण्डवेदाङ्ग: पिशङ्गश्चोद्रपारक: ॥”)

भैरवी, स्त्री, (भैरव + ङीप् ।) चामुण्डा । यथा,
“चामुण्डा चर्च्चिका चर्म्मसुण्डा मार्ज्जारकर्णिका ।
कर्णमोटी महागन्धा भैरवी च कपालिनी ॥”
इति हेमचन्द्र: ।२।१२०॥
भैरवीविशेषा यथा । त्रिपुरभैरवी १ सम्पत्-
प्रदा भैरवी २ कौलेशभैरवी ३ सकलसिद्धिदा
भैरवी ४ भयविध्वंसिनी भैरवी ५ चैतन्यभैरवी
६ कामेश्वरी भैरवी ७ षटकूटा भैरवी ८ नित्या
भैरवी ६ रुद्रभैरवी १० भुवनेश्वरी भैरवी ११
त्रिपुरबाला भैरवी १२ नवकूटा भैरवी १३
अन्नपूर्णा भैरवी १४ । आसां मन्त्रा यथा,—
अथ त्रिपुरभैरवी ।
“वियद्भृगुहुताशस्थो भौतिको बिन्दुशेखर: ।
वियत्तदादिकेन्द्राग्निस्थितं वामाक्षिबिन्दुमत् ॥
आकाशभृगुवह्निस्थो मनु: सर्गेन्दुखण्डवान् ।
पञ्चकूटात्मिका विद्या वेद्या त्रिपुरभैरवी ॥”१॥
अथ सम्पत्प्रदा भैरवी ।
यथासौ त्रिपुरा बाला तथा त्रिपुरभैरवी ।
सम्पत्प्रदा नाम तस्या: शृणु निर्म्मलमानसे ॥
शिवचन्द्रौ वह्निसंस्थौ वाग्भव तदनन्तरम् ।
कामराजं तथा देवि । शिवचन्द्रान्वितं तत: ॥
पृथ्वीबीजात्मवह्न्याढ्यं तार्त्तीयं शृणु वल्लभे ।।
शक्तिबीजे महेशानि । शिवबह्नी नियोजयेत ॥
कुमार्य्या: परमेशानि । हित्वा सर्गन्तु बैन्दवम् ।
त्रिपुरा भैरवी देवी महासम्पत्प्रदा प्रिये । ॥२॥
अथ कौलेशभैरवी ।
सम्पत्प्रदाभैरवीवद्विद्धि कौलेशभैरवीम् ।
हसाद्या चैव देवेशि ! त्रिषु बीजेषु पार्व्वति ।।
इयन्तु सहराद्या स्यात् पूजाध्यानादिकं
तथा ॥ ३ ॥
अथ सकलसिद्धिदा भैरवी ।
एतस्या एव विद्याया आद्यन्ते रेफवर्जिते ।
तदेयं परमेशानि । नाम्ना सकलसिद्धिदा ।
सम्पत्प्रदाभैरवीवत् ध्यानपूजादिकं तथा ॥४॥
अथ भयविध्वंसिनी भैरवी ।
सम्पत्प्रदा भैरवी आद्यन्ते रेफरहिता चेत्तदा
भयविध्वंसिनी भैरवी भवति । दक्षिणामूर्त्तौ
तथादर्शनात् । पूजादिकन्तु सम्पत्प्रदावत् ॥ ५ ॥
अथ चैतन्यभैरवी ।
“वाग्भवं बीजमुच्चार्य्य जीवप्राणसमन्वितम् ।
सकला भुवनेशानी द्वितीयं बीजमुद्धृतम् ॥
जीव प्राणं वह्निसंस्थं शक्रस्वरसमन्वितम् ।
विसर्गाढ्यं महेशानि । विद्या त्रैलोक्यमातृका ॥”
ऋष्यादिन्यास: । शिरसि दक्षिणामूर्त्तये ऋषये
नम: । मुखे पङ्क्तिश्छन्दसे नम: । हृदि
चैतन्यभैरव्यै देवतायै नम: ॥ ६ ॥
अथ कामेश्वरी भैरवी ।
“कामेश्वरी च रुद्राणां पूर्व्वसिंहासने स्थिता ।
एतस्या एव विद्याया बीजद्वयमुदाहृतम् ॥
तदन्ते परमेशानि । नित्यक्लिन्ने मदद्रवे ।
एतस्या एव तार्त्तीयं रुद्राणां परमेश्वरि । ॥७॥
अथ षट्कूटा भैरवी ।
डाकिनी राकिणी बीजे लाकिनी काकिनी-
युगम् ।
शाकिनी हाकिनी बीजे आहृत्य सुरसुन्दरि । ॥
आद्यमैकारसंयुक्तमन्यदीकारमण्डितम् ।
शक्रस्वरान्वितं देवि । तार्त्तीयं बीजमालिखेत ।
बिन्दुनादकलाक्रान्तं त्रितयं शैलसम्भवे । ॥ ८ ॥
अथ नित्या भैरवी ।
एतस्या एव विद्याया: षड्वर्णान् क्रमश: स्थितान् ।
विपरीतान् वद प्रौढ़े । विद्येयं भोगमोक्षदा ।
न्यासपूजादिकं सर्व्वमस्या: पूर्व्ववदाचरेत् ॥ ६ ॥
अथ रुद्रभैरवी ।
शिवचन्द्रौ मादनान्तं फान्तं वह्निसमन्वितम् ।
शक्तिभिन्नं बिन्दुनादकलाढ्यं वाग्भवं प्रिये । ॥
सम्पत्प्रदाया भैरव्या: कामराजं तदेव हि ।
सदाशिवस्य बीजन्तु महासिंहासनस्य च ।
एषा विद्या महेशानि । वर्णितुं नैव शक्यते॥१०
अथ भुवनेश्वरी भैरवी ।
हसाद्यं वाग्भवञ्चाद्यं हसकान्ते सुरेश्वरि ।।
भूबीजं भुवनेशानी द्वितीयं बीजमुद्धृतम् ।
शिवचन्द्रौ महेशानि । भुवनेशी च भैरवी॥११॥
अथ त्रिपुरबाला भैरवी ।
अधरो बिन्दुनामाद्यं ब्रह्मेन्द्रस्य: शशी युत. ।
द्वितीयं भृगुसर्गाढ्यो मनुस्तार्त्तीयमीरितम् ।
एषा बालेति विख्याता त्रैलोक्यवशकारिणी॥१२
अथ नवकूटा बाला ।
बालाबीजत्रयं देवि । कूटत्रयं नवाक्षरी ।
वियत्कूटत्रयं देवि । भैरव्या नवकूटकम् ॥१३॥

अथान्नपूर्णा भैरवी
प्रणवं भुवनेशानि । श्रीबीजं कामबीजकम् ।
हृदन्तं भगवत्यन्ते माहेश्वरिपदं ततः ।
अन्नपूर्णे ठद्वयान्तं विद्येयं विंशदक्षरी ॥ १४ ॥"
इति तन्त्रसारे भैरवीमन्त्रपरिच्छेदः ॥ रागिणी विशेषः । सा च भैरवरागस्य पत्नी । यथा,—
"भैरवी कौशिकी चैव भाषा वेलावली तथा ।
बङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"
मतान्तरे मालवरागस्य पत्नी । यथा,—
"धानसी मालसी चैव रामकीरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥"
अस्या ध्यानं यथा,—
"सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्चयन्ती ।
तालप्रयोगप्रतिबद्धगीति-
र्गौरीतनुर्नारद भैरवीयम् ॥"
अस्या गानसमयः पूर्व्वाह्णकालः । यथा,—
"विभाषा ललिता चैव कामोदी पठमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुर्ज्जरी ॥
देशाकारी च सुभगा पञ्चमी च गड़ा तुडी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एताः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥"
इति सङ्गीतदामोदरः ॥ * ॥
हनुमन्मते एषा सम्पूर्णजातिः । अस्याः सप्तस्वरविन्यासक्रमः मध्यमपञ्चमधैवतनिषादषड्जर्षभगान्धाराख्यः । अस्या ग्रहं मध्यमस्वरः । शरदृतौ प्रभाते अस्या गानसमयः । रागमालायां अस्याः स्वरूपम् । अल्पवयस्का । सुरूपा । सुनेत्रा । विस्तारवदना । पिङ्गलकेशा । कोमलाङ्गी । रक्तवर्णा । श्वेतवसना । गलशोभितचम्पकमाला । प्रफुल्लपद्मरक्तपद्मचन्दनगृहायां शिवपूजापरायणा । तत्र मञ्जीरवादका गायन्ति च ॥ * ॥ कल्लिनाथसोमेश्वरभरतमतेष्वेवम् ॥

भैरजं क्ली, (भिषजमेव संज्ञायां स्वार्थे वा अण् ।) लावकपक्षी । इति जटाधरः ॥ भैषजञ्च ॥

भैषज्यं, क्ली, (भेषजमेवेति । भेषज+"अनन्तावसथेतिहभेषजाञ्ञ्यः ।" ५ । ४ । २३ । इति ञ्यः ।) औषधम् । इत्यमरः । २ । ६ । ५० ॥
(अस्य पर्य्यायो यथा,—
"भैषज्यं भेषजञ्चायुर्द्रव्यमगदमौषधम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।"
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

भोः, [स्] अ, (भातीति । भा+बाहुलकाड्डोसिः ।) सम्बोधनम् । तत्पर्य्यायः । प्याट् २ पाट ३ अङ्ग ४ हे ५ है ६ । इत्यमरः । ३ । ४ । ७ ॥ हंहो ७ हुम् ८ हो ९ अरे १० अये ११ अयि १२ । इति भरतः ॥ (यथा, मार्कण्डेये । ३ । ५२ ।
"भो भो विप्रेन्द्र । त्वयस्व बुद्धा बोध्यं बुधात्मक ।।")
प्रश्नः । विषादः । इति शब्दरत्नावली ॥

भोक्तव्यं त्रि, (भुज+कर्म्मणि तव्यत् ।) भोजनीयम् । भोज्यम् । यथा,—
"यत्रैव भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।"
इति तिथ्यादितत्त्वम् ॥
"अलाव वर्त्तुलाकारा वार्त्ताकी दुग्धवर्त्तिका ।
प्रणान्तेऽपि न भोक्तव्या दुग्धवर्णा कलम्बिका ॥"
इति कर्म्मलोचनञ्च ॥
(कर्म्मजन्यं अनुभवनीये । यथा च देवीभागवते । ११ । १ । १८ ।
"प्रारब्धं किल भोक्तव्यं शुभं वाप्यथवा शुभम् ।
उद्यमस्तद्वशो नित्यं कारयत्येव सर्व्वथा ॥")

भोक्ता [ऋ] त्रि (भुज+कर्त्तरि तृच् ।) भोजनकर्त्ता । यथा,—
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।"
इति श्राद्धप्रयोगतत्त्वम् ॥
सुखादिभोगकर्त्ता यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
अथ भोक्तृलक्षणं यथा, पाकराजेश्वरे ।
"स्नातः सुधौतस्वदुमुन्दरशुक्लवासा-
स्तत्कालधौतचरणः सह पुत्त्रमित्त्रैः ।
स्वस्थो प्रसन्नहृदयो रमयाकवत्र्यां
भोक्ता विशेच्च मननं हि महाशनेन्द्रैः ॥
स्वदुन्नमये स्थले चारुवस्त्रावगुण्ठिते ।
आसने प्राङ्मुखो भोक्तोपविशेद्दाप्युदङ्मुखः ॥"
(भोजनकर्त्तर्थे यथा,—
"यदा कारणमासाद्य भोक्तॄणां छन्दतोऽपि वा ।
अन्नं कदर्य्यानित्यादिकास्ततस्तान् विनिर्द्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
"भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ।
सुगन्धिपुष्परचिते रम्ये देशेऽथ भोजयेत ॥"
इति च तत्रैव तदध्याये ॥
यथा च सांख्यशास्त्रे भोक्ता भोगकर्त्ता पुरुषः । सति भोगज्ञाने भोक्तृज्ञानं भवतीति तत्सूत्रमाह । "चिदवसानो भोगः ।" इति सांख्यसूत्रम् । १ । १०४ ॥ पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्येतादृशो भोग सिद्धिरित्यर्थः । राज्ञो भृत्यवर्गः यथा, स्वामिने भोग्यजातमर्पयति, तथा, इन्द्रियाणि विषयजातं स्वस्वशक्त्या गृहीत्वा अन्तःकरणप्रतिबिम्बिताय पुरुषाय अर्पयन्ति, स च पुरुषः प्रतिबिम्बग्रहणमात्रेण विषयजातं भुङ्क्ते प्रकाशयतीत्यर्थः । पुरुषस्य भोगः प्रतिबिम्बादानमात्रं अन्यथापत्तेः पृष्टादि । ईदृशः परिणामरूपो भोगः पुरुषे निषिध्यते । "बुद्धेर्भोग इवात्मनि ।" इत्यादिभिरिति । एतादृक् तया पुरुषः भोगकर्त्ता वा भोक्ता ॥" इति तद्भाष्ये विज्ञानभिक्षुः ॥

भोक्ता [ऋ] पुं, (भुङ्क्ते भीवरूपेणेति, भुनक्ति पालयतीति वा भुज+तृच् ।) विष्णुः । यथा,—
"आत्मयोनिर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
भर्त्ता । इति हेमचन्द्रः । ३ । ८१ ॥

भोगः, पुं, (भुज्यतेऽसौ इति । भुज+घञ् ।) सुखम् । स्त्र्यादिभृतिः । पण्यस्त्रीणां भृतिभाटिः । आदिना हस्त्यश्वादिकर्म्मकराणाञ्च भृतिः । सर्पस्य फटा । सर्पशरीरम् । इत्यमरभरतौ । ३ । ३ । २३ ॥ (यथा, रघौ । ११ । ५९ ।
"लक्ष्यते स्म तदनन्तरं रविः
बद्धभीमपरिवेषमण्डलः ।
वैनतेयशमितस्य भोगिनः
भोगवेष्टित इव च्युतो मणिः ॥")
धनम् । (यथा, ऋग्वेदे । ३ । ३४ । ९ ।
"हिरण्ययमुत भोगं ससान हत्वी दस्यून् प्रार्य्यं वर्णमावत ॥"
"हिरण्ययं सुवर्णमयं भोगं धनम् ॥" इति तद्भाष्ये सायनः ॥) गृहम् । (यथामुत्रैव मन्त्रे । "भोगशब्दस्याख्याने भुज्यतेऽस्मिन्निति भोगो गृहं वा ससान अर्थिभ्यो ददौ ।" इति सायनः ॥) पालनम् । अभ्यवहारः । इति मेदिनी । गे, १६ ॥ सर्पः । देहः । मानम् । इति शब्दरत्नावली ॥ * ॥ पुण्यपापजन्यतद्योग्यकालः । यथा,—
"अतीतानागतो भोगो नाद्यः पञ्चदश स्मृतः ॥"
इति तिथ्यादितत्त्वे संक्रान्तिप्रकरणम् ॥
(पुरम् । यथा, ऋग्वेदे । ५ । २८ । ६ ।
"नव यदस्य नवतिञ्च भोगान्
साकं वज्रेण मघवा विवृश्चत् ।"
भोगान् पुराणि । इति तद्भाष्ये सायनः ।)
भूम्यादीनां भोगो यथा । त्रिपुरुषभोगमाह व्यासः ।
"प्रपितामहेन यद्भुक्तं तत्पुत्त्रेण विना च तत् ।
तौ विना यस्य पित्रा च तस्य भोगक्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः ॥
नारदः ।
तथारूढ़विवादस्य प्रेतस्य व्यवहारिणः ।
पुत्त्रेण सोऽर्थः संशोध्यो न तं भोगो निवर्त्तयेत ॥"
इति व्यवहारतत्त्वम् ॥
विभवभेदः । यथा —
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
(व्यूहभेदः । यथा, कामन्दकीयनीतिसारे । १९ । अध्याये । ४१ । ४८ । ५४ । श्लोकेषु ॥
"यदि स्याद्दण्डबाहुल्यं तदा चापः प्रकीर्त्तितः ।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः ॥
गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा ।
भोगभेदाः समाख्यातास्तथा पारिपतन्तकः ॥
असंहतास्तु षड्व्यूहा भोगव्यूहाश्च पञ्चधा ॥")

भोगगृहं, क्ली, (भोगार्थं गृहम् ।) वासगृहम् । यथा,—
"वासागारं भोगगृहं कन्यापत्नाटनिष्कुटा. ।"
इति हेमचन्द्रः ॥

भोगदेहः, पुं, (भोगहेतुको भोगसाधको वा देहः ।) स्वर्गनरकभोगार्थं सूक्ष्मशरीरम् । यथा,—
"कृते सपिण्डीकरणे नरः संवत्सरात् परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥"
इति श्राद्धतत्त्वम् ॥

अपि च ।
"शृणु देहविवरणं कथयामि यथागमम् ।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् ।
देहिनां देहबीजञ्च स्रष्टुः सृष्टिविधौ परम् ॥
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत् ।
स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह ॥
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः कृतः ।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगदेहके ॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये ।
जले न नष्टो देही वा प्रहारे सुचिरे कृते ॥
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा ।
तप्तद्रवे तप्तलौहे तप्तपाषाण एव च ॥
प्रतप्तप्रतिमाश्लेषेऽप्यत्युच्चपतनेऽपि च ।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च ।
कथितं देहवृत्तान्तं कारणञ्च यथागमम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः ॥

भोगपालः, पुं, (भोगं भोगसाधनमश्वादिकं पालयतीति । भोग + पालि + अण् । अश्वरक्षकः । इति शब्दमाला ॥ भोगरक्षके त्रि ॥

भोगपिशाचिका, स्त्री, (भोगे पिशाचिका इव, तद्दत्कष्टप्रदत्वात् ।) क्षुधा । इति हारावली ॥

भोगभूमिः, स्त्री, (भोगार्थैव भूमिः ।) सुखस्थानम् । भारतवर्षातिरिक्तवर्षम् । यथा,—
"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ॥"
इति विष्णुपुराणे २ अंशे ३ अध्यायः ॥

भोगवती, स्त्री, (भोगः सर्पशरीरं भूम्ना अस्त्यस्या इति । भोग + मतुप् मस्य वः । "शार्ङ्गरवाद्यञो ङीन् ।" ४ । १ । ७३ । इति ङीन् ।) पातालगङ्गा । नागपुरी । इति मेदिनी । ते, २१४ ॥ (नागपत्नी । यथा महाभारते । १ । १७२ । ६२ ।
"न च भोगवतीं मन्ये न गन्धर्व्वीं न मानुषीम् ।"
गङ्गा । यथा, च काशीखण्डे । २६ । १२८ ॥
"भद्रा भोगवती भद्रा भवानी भूतभाविनी ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८५ । ७५ ॥
"तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः ।")

भोगवान्, [त्] पुं, (भोगः फणः कायो वा भूम्ना अस्त्यस्येति । भोग + मतुप् मस्य च वत्वम् ।) सर्पः । इति मेदिनी । त, २१४ ॥ नाट्यम् । गानम् । इति त्रिकाण्डशेषः ॥ भोगविशिष्टे त्रि ॥

भोगसद्म, [न्] क्ली, (भोगार्थं उपभोगार्थं सद्म ।) वासगृहम् । यथा,—
"गर्भागारं वासगृहं भोगसद्मापवाधकम् ।"
इति शब्दरत्नावली ॥

भोगार्हं, क्ली, (भोगाय अर्हतीति इति अर्ह + "अर्हलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) धान्यम् । इति राजनिर्घण्टः ॥

भोगावली, स्त्री, (भोगानां आवली श्रेणिर्यस्याम् ।) स्तुतिपाठकस्य स्तुतिः । इति जटाधरः ॥ (यथा माघे । ५ । ६७ ।
"भोगावलीः कलगिरोऽवसरेषु पेठुः ।"
भोगावलीः प्रबन्धान् । इति तट्टीकायां मल्लिनाथः ॥) नागपुरी । इति हेमचन्द्रः ॥

भोगावासः, पुं, (आवसत्यस्मिन् इति । आ + वस् + अधिकरणे घञ् । भोगार्थो वा आवासः ।) वासगृहम् । इति हारावली ॥

भोगिकः, पुं, (भोगे अश्वभोगे नियुक्त इति । भोग + बाहुलकात् ठन् ।) अश्वरक्षकः । इति शब्दमाला ॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः ।) वायुः । इति त्रिकाण्डशेषः ॥

भोगिनी, स्त्री, (भोगः अस्या अस्तीति । भोग + इनिः । ङीप् ।) महिषीभिन्नमृपपत्नी । इत्यमरः । २ । ६ । ५ ॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम् ।) चन्दनम् । इति राजनिर्घण्टः ॥

भोगी, [न्] पुं, (भोगोऽस्यास्तीति । भोग + इनिः ।) सर्पः । इत्यमरः । १ । ८ । ८ । (यथा, विष्णुपुराणे । १ । ३ । २३ ।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः ॥"
भोगयुक्तः । यथा, आर्य्यासप्तशत्याम् । ४१४ ।
"भवनालिङ्गि भुजङ्गो जातः किल भोगिचक्रवर्त्ती त्वम् ॥")
ग्रामपात्रः । नृपः । इति मेदिनी । न, १०२ । नापितः । इति त्रिकाण्डशेषः ॥ वैयावृत्तिकरः । इति हेमचन्द्रः ॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोगीशः, पुं (भोगिनामीशः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोग्यं, क्ली, (भुज + ण्यत् ।) धनम् । धान्यम् । इति राजनिर्घण्टः ॥ भोगमर्हतीति । भोग + यत् । भोगार्हे त्रि ॥ (यथा, कामन्दकीये । ५ । ८१ ।
"यथा रक्षेच्च निपुणं शस्यं कण्टकिशाखया ।
फलाय लगुडः कार्य्यस्तद्वद्भोग्यमिदं जगत् ।")
आधिभेदः । यथाह नारदः ।
"विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च ।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः ॥
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा ।
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च ॥"
गोप्यो रक्षणीयः । भोग्यस्यार्थः फलभोग्यपदं द्रष्टव्यः । तद्यथा,—
"काले कालकृतो नश्येत् फलभोग्यो न नश्यति ।"
फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति । इति मिताक्षरायां 'व्यवहाराध्याय' ॥

भोग्या, स्त्री (भुज + कर्म्मणि ण्यत् टाप् ।) वेश्या । इति राजनिर्घण्टः ॥ भोग्या भूः । इति वोपदेवः ॥ (तत्र त्रि ।)

भोजः, पुं, (भोजस्येदमिति । भोज + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । अणो लोपः ।) स्वनामख्यातदेशः । भोजपुर इति भाषा । तत्पर्य्यायः । भोजकटः २ । इति शब्दरत्नावली ॥ धारानगरस्य राजविशेषः । तस्य वृत्तान्तो यथा । धारानामनगर्य्यां सिन्धुलसंज्ञो राजा आसीत् । तस्य राज्ञी सावित्री, तयोर्वृद्धावस्थायां भोजनामपुत्त्रो जातः । स यदा पञ्चवर्षवयस्कस्तदा तत्पिता आत्ममरणकालं विदित्वा भ्रात्रे मुञ्जाय राज्यं ददौ, तदनुसङ्गे भोजञ्च समीपे । ततो राज्ञि परलोकं प्राप्ते कियत्कालानन्तरं सभायां कश्चिद्दैवज्ञो ब्राह्मणः प्राह राजन् । भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि न समर्थः कोऽहं वराक उदरम्भरिर्ब्राह्मणः तथापि वदामि भोजमितः प्रेषय । ततो राजाज्ञया भोजेऽध्ययनशालां प्राप्ते आह यथा,—
"पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।
भोगराजेन भोक्तव्यं सगौडं दक्षिणापथम् ॥"
इति श्रुत्वा मुञ्जराजोऽचिन्तयत्, यदि राजलक्ष्मीर्भोजं गमिष्यति ततोऽहं जीवन्नपि मृतः । ततो राजा मन्त्रयित्वा वङ्गालाधीश्वरं महाबलं वत्सराजमाहूय निर्जने तं प्राह, वत्सराज । त्वया भोजस्त्रिभुवनेश्वरीविपिने हन्तव्यः । वत्सराजः भोजकुमारोपाध्यायमाहूय प्राह, विप्र । भोजमानय । ततो विदितवृत्तान्तो भोजः कुपितः प्राह, आः पाप । राज्ञः कुमारं बहिरानेतुं तव का शक्तिः, ततो वामचरणपादुकामादाय भोजेन भालदेशे हतो वत्सराजः प्राह, भोजकुमार । वयं राजादेशकारिणः । इत्युक्त्वा वधार्थं बलात् वत्सराजेन निशायां विपिनं भोजे नीते वत्सराजस्य भ्राता भोजस्य वधोद्यमसमये ।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यच्च गच्छति ॥"
इत्युक्तं निशम्य वत्सराजो वैराग्यमापन्नो भोजं क्षमस्वेत्युक्त्वा प्रणम्य तं रथे निवेश्य गृहमागत्य भूमिगृहान्तरे भोजं रक्षित्वा कृत्रिमं भोजमस्तकं कारयित्वा राजानमागत्य नत्वा प्राह श्रीमता यदादिष्टं तन्मया कृतम् । राजपुत्त्रवधं ज्ञात्वा राजा तं प्राह वत्सराज ! पुत्त्रेण खड्गप्रहारावसरे किमपि उक्तम् । वत्सराजः प्राह देव । किमपि पत्रं प्रेषितमस्ति तदिदं गृहाण शिरश्च दर्शयति । ततो भोजमस्तकं दृष्ट्वा राजा रुरोद ।

"मान्धाता च महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते !
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥"

इति भोजकृतश्लोकं पठित्वा प्रपात च । ततो राजा पण्डितमानीय मया पुत्त्रो हतः प्रायश्चित्तमुच्यतामित्युवाच । ततस्ते ऊचुः राजन् । सवासा वह्निमाविश । ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्त्तां श्रुत्वा कृपद्वारमागत्य वत्सराजो बुद्धिसागरं प्राह तात । मया भोजो न मारितः बुद्धिसागरश्च तस्य कर्णे किमपि कथयति । ततो वत्सराजो निष्क्रान्तः । ततस्तन्मुहूर्त्तेन साक्षान्महेश्वर इव एकः कापालिक आगतः । तं वीक्ष्य बुद्धिसागरः प्राह योगिन् । कुत आगम्यते कापालिकं त्वयि जगच्चमत्कारी कलाविशेषश्चौषधविशेषो वा अस्ति । ततो राजाप्याह मया सहसा हतं पुत्त्रं रक्ष । कापालिकः प्राह राजन् । मा भैषीः पुत्त्रस्ते नाथप्रसादेन न मरिष्यति प्रातस्तव गृहं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागरमन्त्रिणा सह होमद्रव्यं प्रेषय । कापालिकेन यदुक्तं तत सर्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततश्च रात्रौ गूढतया वत्सराजगृहात् भोजस्तत्र नदीपुलिनं नीतः योगिना भोजकुमारो जीवित इति किम्वदन्ती सर्व्वतोऽप्यजायत । ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः । ततस्तमालिङ्ग्य रुदन्तं मुञ्जं निवार्य्य भोजः स्तौति । ततो राजा लज्जावनतग्रीवः सन् निजसिंहासने भोजमुपवेश्य राज्यं दत्त्वा वनं गतः । ततो मुञ्जे वनं प्राप्ते बुद्धिसागरं मुख्यामात्यं विधाय भोजः स्वयं राज्यसुखं बुभुजे । ततो राजसभायां सहस्रशो बुधवरा दिग्भ्यः समागमुः ततो राजा अमात्यमाह ।

'लक्षं महाकवेर्देयं तदर्द्धं विबुधस्य च ।
देयं ग्राम्यकवेस्तस्य तस्याप्यर्द्धं त्वयान्वहम् ॥"

इति ॥

ततः क्रमेण वररुचिसुबन्धुबाणामररामदेवहरिवंशशङ्करकलिङ्गकर्पूरविनायकमदनविद्याविनोदकोकिलतारेन्द्रप्रमुखाः सर्व्वशास्त्रविचक्षणाः सर्व्वज्ञा इव राजसभामहर्निशमलंकुर्व्वन्ति । कियत्कालानन्तरं कालिदासकवौ समागते तेन सार्द्धं राज्ञः परमा प्रीतिरजायत । अन्ये विद्वांसः कालिदासं वेश्यालम्पटं विदित्वा सर्व्वभावेन वैरश्चक्रुः न कश्चित् सभायां स्पृशति न कोऽपि वदति । किन्तु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव । अन्येषां पण्डितानामागमनं तेषां पद्यानि समस्यापूरणानि तेभ्यो बहुलधनप्रदानादिवर्णनञ्च ग्रन्थशेषपर्य्यन्तमस्ति । तद्ग्रन्थविस्तरभयात न लिखितम् । इति भोजप्रबन्धपुस्तकात सङ्कलितम् ॥*॥ ऐन्द्रजालिकविद्यां भोजविद्यां वदन्ति ॥

भोजकटः, पुं, भोजदेशः । इति शब्दरत्नावली ॥ (रुक्मिनिर्म्मिते पुरे, क्ली । यथा, विष्णुपुराणे । ५ । २६ । १३ ।

"इत्युक्ते न परित्यक्तः कृष्णगाक्लिष्टकर्म्मणा ।
रुक्मी भोजकटं नाम पुरं कृत्वावसत्तदा ॥")

भोजनं, क्ली, (भुज + "ल्युट च ।" ३ । ३ ।११५ । इति भावे ल्युट् ।) भक्षणम् । कठिनद्रव्यस्य गलाधःकरणम् । तत्पर्य्यायः । जग्धः २ जेमनम् ३ लेपः ४ आहारः ५ निघसः ६ न्यादः ७ । इत्यमरः ।२ । ९ । ५५ ॥ जमनम् ८ विघसः ९ । इति तट्टीका ॥ अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ स्वदनम् १३ निगरः १४ । इति राजनिर्घण्टः ॥ * ॥

अथ भोजनगुणविधानादि ।

"भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम् ॥
आयुर्वेदे गुडे रोगा स्त्वधुलानो विदाहिषु ।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च ॥
अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥
घृताद्दशगुणं तैलं मर्द्दनान्न च भक्षणात ।
आहारः प्रीणनः सद्यो बलकृद्देहधारणः ॥*॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥
कुक्षेरर्द्धेन भागौ द्वावेकं पानेन पूरयेत् ।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत् ॥
हस्तौ चावगतं चान्नं सौचिनेवाहरेज्जलैः ।
कुर्य्याद्दन्तगतं तद्धि मुखस्यानिष्टगन्धताम् ॥
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत् ।
भुक्तं महेन्द्रदत्तेन वैश्वानरसुखेन च ॥
गरुडस्य च कण्ठेन समुद्रस्य च वह्निना ।
वातापिर्भक्षितो येन पीतो येन महोदधिः ॥
यन्मया खादितं पीतं तदगस्त्यो जरिष्यति ।
पठित्वैतत् सुखासीनः क्षणं तिष्ठेदनाकुलः ॥
भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् ।
एवं जठरगतं चान्नं सुखं तिष्ठति जीर्य्यति ॥
भुक्त्वोपविशतस्तुन्दं शयानस्य वपुर्भवेत् ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥"

इति राजवल्लभः ॥ * ॥

अपि च ।

"ततो भोजनवेलायां कुर्य्यान्मङ्गलदर्शनम् ।
तस्य प्रदक्षिणं नित्यमायुर्धर्म्मविवर्द्धनम् ॥
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
पादुकारोहणं कुर्य्यात् पूर्व्वं भोजनतः परम् ।
पादरोगहरं वृष्यं चक्षुष्यं चायुषे हितम् ॥*॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा ।
बुभुक्षा च पिपासा च सुषुप्सा सुरतस्पृहा ॥
भोजनेच्छाविघातात् स्यादङ्गमर्द्दोऽरुचिः श्रमः ।
तन्द्रा लोचनदौर्ब्बल्यं धातुदाहो बलक्षयः ॥
विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत् ।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा ॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम् ।
अङ्गमर्द्दस्तथा तन्द्रा स्यादन्नापाक एव च ॥
बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात् ।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥
आहारं पचति शिखी दोषानन्नाहारः पचति ।
दोषक्षये च धातून् पचति धातुक्षये प्राणान् ॥
आहारः प्रीणनः सद्यो बलकृद्देहधारणः ।
स्मृत्यायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः ॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि ॥"

उभयोः कालयोः प्रातः सायञ्च । तथा च ।

"सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम् ।
नान्तरा भोजनङ्कुर्य्यादग्निहोत्रसमो विधिः ॥"

प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक् । तथा च ।

"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥"

अन्यच्च ।

"शुद्ध सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"

रसादीनां पाकं ज्ञातुमाह ।

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च यदा कालः स भोजने ॥"

स्थानमाह ।

"आहारं विजने कुर्य्यान्निर्हारमपि सर्व्वदा ।
उभाभ्यां लक्ष्मयुक्तः स्यात् प्रकाशे हीयते श्रिया ॥

निर्हारो मलमूत्रोत्सर्गः । अन्यच्च ।

"आहारनिर्हारविहारयोगाः
सदैव सद्भिर्विजने विधेया इति ॥" * ॥

भोजने येषां दृष्टिर्निवारणीया तानाह ।

"हीनदीनक्षुधार्त्तानां पापषण्ढैणरोगिणाम् ।
कुक्कुटादिशुना दृष्टिर्भोजने नैव शोभना ॥"

येषां दृष्टिः शुभदा तानाह ।

"पितृमातृसुहृद्वैद्यपाचकहंसवर्हिणाम् ।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा ॥"

कथञ्चित्तदुष्टदृष्टिपाते तद्दोषशान्तये अन्नादीन् स्मरेत् । तद्यथा,—

"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः ।
इति सञ्चिन्त्य भुञ्जानो दृष्टिदोषो न बाधते ॥
अञ्जनाशमसम्भूतं कुमारं ब्रह्मचारिणम् ।
दृष्टिदोषविनाशाय हनुमन्तं स्मराम्यहम् ॥"

भाजनमाह ।

"दोषघ्नं दृष्टिदं पथ्यं हैमं भोजनभाजनम् ।
रौप्यं भवति चक्षुष्यं पित्तहृत् कफवातकृत् ॥

कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम् ।
पैत्तलं वातकृद्रूक्षमुष्णं कृमिकफप्रणुत् ॥
आयसे कान्तपात्रे च भोजनं सिद्धिकारकम् ।
शोथपाण्डुहरं बल्यं कामलापहमुत्तमम् ॥
शैलजे मृण्मये पात्रे भोजनं श्रीनिवारणम् ।
दारुजे च विशेषेण रुचिदं श्लेष्मकारि च ॥
पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत् ॥
जलपात्रन्तु ताम्रस्य तदभावे मृदो हितम् ॥
पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत् ।
काचेन रचितं तद्वत्तथा वैदूर्य्यसम्भवम् ॥ * ॥
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥"
लवणं सैन्धवं ज्ञेयम् । आर्द्रकन्तु कटुकमपि न पित्तविरोधि मधुरपाकित्वात् ॥
"अश्नीयात्तन्मना भूत्वा पूर्व्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥
फलान्यादौ समश्नीयात् दाडिमादीनि बुद्धिमान् ॥
विना मोचाफलं तद्वद्वर्ज्जनीया च कर्क्कटी ॥
मृणालबिसशालूककन्देक्षुप्रभृतीन्यपि ।
पूर्व्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन ॥
गुरु पिष्टमयं द्रव्यं तण्डुलान् पृथुकानपि ।
न जातु भुक्तवान् खादेन्मात्रां खादेद्बुभुक्षितः ॥
घृतपूर्व्वं समश्नीयात् कठिनं प्राक् ततो मृदु ।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति ॥"
अयमर्थः । प्राक् घृतपूर्व्वं कठिनं समश्नीयात् । यथा काश्यादिवासिनः प्रथमं सव्यञ्जनां घृतपूर्व्वां रोटिकां भुञ्जते । ततो मृदुसूपादिकमोदनं भुञ्जते । अन्ते पुनर्द्रवाशी भोजनान्ते दधितक्रदुग्धादि भुञ्जत ।
"यद्यत् स्वादुतरं तत्तद्विदध्यादुत्तरोत्तरम् ।
भुक्त्वा यत् प्रार्थ्यते भूयस्तदुक्तं स्वादु भोजनम् ॥"
स्वादन्नस्य गुणमाह ।
"सौमनस्यं बलं पुष्टिमुत्साहं रसनासुखम् ।
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्य्ययम् ॥
अत्युष्णान्नं बलं हन्ति शीतं शुष्कञ्च दुर्ज्जरम् ।
अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम् ॥
अतिद्रुताशिताहारो गुणान् दोषांश्च विन्दति ।
भोज्यं शीतमतुष्णञ्च स्याद्विलम्बितमश्नतः ॥"
गुरु त्रिविधं तन्निवारयन्नाह ।
"मन्दानलो नरो द्रव्यं मात्रागुरु विवर्ज्जयेत् ।
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु ॥
मात्रागुरुस्तु मुद्गादिर्माषादिः प्रकृतेर्गुरुः ।
संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ॥ * ॥
आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम् ॥"
चूष्यं इक्षुदाडिमादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाक्वथितादि । क्वथिता कढी इति लोके । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि ॥
स्वभावगुरुसंस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह ।

"गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते ।"
अयमर्थः । माषपिष्टान्नादिभिरर्द्धं सौहित्यं कर्त्तव्यं मुद्गादिभिः स्वाभाविक्या मात्रया तृप्तिः कर्त्तव्येत्यर्थः ।
"द्रवो द्रवोत्तरश्चापि न मात्रागुरुरिष्यते ।"
द्रवः पेयादि । द्रवोत्तरः तक्राद्यधिक ओदनादिर्मात्रातोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः । पेयस्य सर्व्वतो लघुत्वात् । उक्तञ्च सुश्रुतेन । पेयलेह्यान्नभक्ष्याणां गुरु विद्याद्यथोत्तरमिति । पेयं पय आदि । लेह्यं रसालादि । अद्यं ओदनसूपादि । भक्ष्यं मोदकादि ।
"द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते ।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति ॥"
अयमर्थः । शुष्कमपि स्रोतोरोधकरमपि द्रवाढ्यं सम्यक् पाकं याति । केवलस्य शुष्कस्यान्नस्य दोषमाह । विशुष्कमन्नमित्यादि ॥
अपक्वं तत् किं भवतीत्यपेक्षायामाह ।
"पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति ।"
पिण्डीकृतं अष्ठीलावद्घनम् । असंक्लिन्नं असम्यगार्द्रम् । विदाहमुपगच्छति विदग्धं भवतीत्यर्थः ॥ शुष्कादीनां वैगुण्यमाह ।
शुष्कं विरुद्धं विष्टम्भि वह्निव्यापादमावहेत् ।"
शुष्कं चिपिटादि । विरुद्धं क्षीरमत्स्यादि । विष्टम्भि चणकमसूरादि वह्निमान्द्यं कुर्य्यात् ।
"न भुक्त्वा न हरेद्भिक्षां न निशायां न वा बहून् ।
न जलान्तरितांश्च द्विः शक्तून्नद्याच्च केवलान् ॥
पुनर्दानं पृथक् पानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्णञ्च सप्त शक्तुषु वर्ज्जयेत् ॥"
विषमाशनस्य लक्षणमाह ।
"बहुस्तोकमकाले वा ज्ञेयं तद्विषमाशनम् ।"
बहुलाल्पस्य भक्षितस्य दोषमाह ।
"आलस्यगौरवाटोपशब्दांश्च कुरुतेऽधिकम् ।
हीनमात्रं तनोः कार्श्यं करोति च बलक्षयम् ॥"
अधिकं अन्नम् ॥ अकाले भुक्तस्य दोषमाह ।
"अप्राप्तकालं भुञ्जानोऽप्यसमर्थतनुर्नरः ।
तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति ॥"
अप्राप्तकालः कालादतिप्राक् भुञ्जानोऽसमर्थशरीरो भवति । तथा सति तांस्तान् व्याधीन् शिरोव्यथाविसूचिकालसकविलम्बिकादीन् प्राप्नोति । तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः ।
"कालेऽतीतेऽश्नतो जन्तोर्व्वायुनोपहतेऽनले ।
कृच्छ्रादिपच्यते भुक्तं न स्याद्भोक्तुं पुनः स्पृहा ॥
कुक्षेर्भागद्वयं भोज्यैस्तृतीयं वारि पूरयेत् ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥
रसेनान्नस्य रसना प्रथमेनोपतर्पिता ।
न तथा स्वादुमाप्नोति ततः सेव्याम्बुनान्तरा ॥
अत्यम्बुपानान्न विपच्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्मुहुर्व्वारि पिबेदभूरि ॥

भुक्तस्यादौ जलं पीतं काश्यमन्दाग्निदोषकृत् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥"
अन्यच्च ।
"समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः ।"
इति वाग्भटः ॥ भुक्तं भोजनम् ।
"तृषितस्तु न चाश्नीयात् क्षुधितो न पिबेज्जलम् ।
तृषितस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी ॥"
ननु शिष्टा भोजनान्ते दुग्धं पिबन्ति तत् कथं सुचितम् । यतस्त्रिधा विभक्तस्य भोजनकालस्य प्रथमो भागो वातस्य द्वितीयः पित्तस्य तृतीयः कफस्य । अतएवाह ।
"अश्नीयात्तन्मना भूत्वा पूर्व्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥"
अस्यायमभिप्रायः । भोजने पूर्व्वं भुक्तो मधुरो रसो बुभुक्षितस्य वातपित्तयोः शमको भवति ।
"भोजनमध्ये भुक्तावम्ललवणौ
पित्ताशये च वह्निवृद्धिं कुरुतः ।
भोजनान्त्यसमये भुक्ताः कटुतिक्त
कषाया रसा कफं शमयन्तीति ।"
अतो भोजनावसानसमयस्य कफकालत्वात्तत्र कथं श्लेष्मजनकं दुग्धं पातुमुचितं भवति । यत उक्तम् ।
"दुग्धं स्वादुरसं स्निग्धमोजस्यं धातुवर्द्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलमिति ॥"
उच्यते ।
"विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥"
अतएव ब्रह्मपुराणे ।
"कुर्य्यात् क्षीरान्नमाहारं दध्यन्नं न कदाचनेति ॥
लवणाम्लकटूष्णानि विदाहीन्यपि यानि तु ।
तद्दोषं हर्त्तुमाहारं मधुरेण समापयेत् ॥"
भोजनावसानसमये दुग्धादिमधुरभोजनेनैव वर्द्धितकफो लवणाम्लकटुभोजनजनितां पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन कफस्यापि वृद्धिरुपक्षीणा भवति क्षीणकफवृद्धिरग्निमान्द्यादीन् व्याधीन् उत्पादयितुं न शक्नोति ॥
"एवं भुक्त्वा समाचामेत् कृतदन्तविशोधनपूर्व्वकम् ।
भोजनं दन्तलग्नानि निर्हृत्याचमनञ्चरेत् ॥
दन्तलग्नमनिर्हार्य्यं लेपं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्य्याद्यत्नं निर्हरणं प्रति ॥
आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत् ।
भुक्त्वा पाणितले घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन् सुखावहान् ।
विष्णुरात्मा तथैवान्नं परिणामश्च वै यथा ।
सत्येन तेन यद्भुक्तं जीर्य्यत्वन्नमिदं तथा ॥
अगस्तिरग्निर्वडवानलश्च
भुक्तं ममान्नं जरयत्वशेषम् ।
सुखञ्च मे तत् परिणामसम्भवं
यच्छन्त्वरोगं मम चास्तु देहे ॥
अङ्गारकमगस्तिञ्च पावकं सूर्य्यमश्विनौ ।
यश्चैतान् संस्मरेन्नित्यं भुक्तं तस्याशु जीर्य्यति ॥

भोजनं
भोजनं

इत्युच्चार्य्य स्वहस्तेन परिमार्ज्य तथोदरम् ।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः ॥”
अतन्द्रितः आग्रसितेन तु सुप्यात् । भुक्त-
मात्रस्य तु स्वप्नात्मन्दाग्निः कुपितः कफ इति
वचनात् ।
“जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेधते ।
भुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि ॥”
विदग्धे किञ्चिदपक्वे पित्तमेधते किञ्चिदपक्वे कफः ॥
भुक्तमात्रे संजातकफस्य प्रतीकारमाह ।
“धूमेनापोह्य तद्वैर्वा कषायकटुतिक्तकैः ॥
पूगकर्पूरकस्तूरी लवङ्गसुमनःफलैः ।
फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः ।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः ॥”
धूमेन अगुर्व्वादिधूमेन । अपोह्य कफं दूरी-
कृत्य । कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरी-
लवङ्गादिभिः । पूगैः क्रमुकैः । सुमनःफलैः
जातीफलैः ॥ फलैः एलाहरीतक्यादिफलैः ।
“रते सुप्तोत्थिते स्नाते भुक्ते वान्ते च सङ्गरे ।
सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलभक्षणम् ॥
भुक्त्वा शतपदं गच्छेच्छनैस्तेन तु जायते ।
अन्नसंघातशैथिल्यं ग्रीवाजानुकटीसुखम् ॥
भुक्त्वोपविशतस्तुन्दं शयानस्य तु पुष्टता ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥”
चंक्रममाणस्य पदशतं शनैर्गच्छतः ॥ * ॥
“श्वासानष्टौ समुत्तानस्तान् द्विः पार्श्वे तु दक्षिणे ।
ततस्तद्द्विगुणान् वामे पश्चात् सुप्यात् यथासुखम् ।
वामदिक्शायामनलो नाभेरूर्द्ध्वेऽस्ति जन्तुनाम् ।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम् ॥
त्रिदोषशमनी खट्वा तूली वातकफापहा ।
भूशय्या वृंहणी वृष्या काष्ठपट्टी तु वातला ॥”
इति भावप्रकाशः ॥ * ॥

अन्यच्च ।
“स्नातो यथावत् कृत्वा च देवर्षिपितृतर्पणम् ।
प्रशस्तरत्नपाणिस्तु भुञ्जीत प्रयतो गृही ॥
कृते जप्ये हुते वह्नौ शुद्धवस्त्रधरो नृप ।।
दत्त्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रिताय तु ॥
पुण्यगन्धधरः शस्तमाल्यधारी नरेश्वर ! ।
नैकवस्त्रधरोऽथार्द्रपाणिपादो नरेश्वर । ॥
विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः ।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः ॥”
“अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः ।
न कुत्सिताहृतञ्चैव जुगुप्सावदसंस्कृतम् ॥
दत्त्वा तु भक्तं शिष्येभ्यः क्षुधितेभ्यस्तथा गृही ।
प्रशस्तशुद्धपात्रेषु भुञ्जीताकुपितो नृप । ॥
नासन्दीसंस्थिते पात्रे नादेशे च नरेश्वर । ।
नाकाले नातिसङ्कीर्णे दत्त्वाग्रञ्च नरोऽग्नये ॥
आसन्दी दारुमयत्रिपदी ।
“मन्त्राभिमन्त्रितं शस्तं न च पर्य्युषितं नृप । ।
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥
तद्वद्धरितकेभ्यश्च गुडपक्वेभ्य एव च ।
भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर ! ॥”
हरितकेभ्यः अपक्वेक्ष्वादिभ्यः ॥

“नाशेषं पुरुषोऽश्नीयादन्यत्र जगतीपते । ।
मध्वम्बुदधिसर्पिभ्यः शक्तुभ्यश्च विवेकवान् ॥
अश्नीयात्तन्मयो भूत्वा पूर्व्वन्तु मधुरं रसम् ।
लवणाम्ले तथा मध्ये कटुतिक्तादिकांस्ततः ॥
प्राक् द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनम् ।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति ।
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन् ।
पञ्चग्रासं महामौनं प्राणाद्याप्यायनादि तत ॥
भुक्त्वा सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा ।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य मूलतः ॥
स्वस्थः प्रशान्तचित्तश्च कृतासनपरिग्रहः ।
अभीष्टदेवतानाञ्च कुर्व्वीत स्मरणं नरः ॥
अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः ।
दत्तावकाशं नभसा जरयत्वस्तु मे सुखम् ॥
अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च ।
भवत्वेतत्परिणतौ ममास्त्वव्याहतं सुखम् ॥
प्राणापानसमानानामुदानव्यानयोस्तथा ।
अन्नं पुष्टिकरञ्चास्तु ममास्त्वव्याहतं सुखम् ॥
अगस्तिरग्निर्वडवानलश्च
भुक्तं मयान्नं जरयत्वशेषम् ।
सुखञ्च मे तत्परिणामसम्भव
यच्छत्वरोगं मम चास्तु देहे ॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः ।
सत्येन तेनाशमशेषमेतत्
दारोग्यदं मे परिणाममेतु ॥
विष्णुरत्ता तथैवान्नं परिणामश्च वै तथा ।
सत्येन तेन मे भुक्तं जीर्य्यत्वन्नमिदं तथा ॥
इत्युच्चार्य्य स्वहस्तेन परिमृज्य तथोदरम् ।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः ॥
सच्छास्त्रादिविनोदेन सन्मार्गादविरोधिना ।
दिनं नयेत्ततः सन्ध्यामुपतिष्ठेत् समाहितः ॥”
इति विष्णुपुराणे ३ अंशे ११ अध्यायः ॥ * ॥

अपरञ्च ।
“भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः ।
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ॥
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ।
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ॥
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः ।
अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत् परिवर्जयेत् ॥
प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा
नाद्यादुदङ्मुखो नित्यं विधिरेष सनातनः ॥
प्रक्षाल्य पाणी पादौ च भुञ्जानो द्विरुपस्पृशेत्
शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेत् ॥
नाश्नीयाद्भार्य्यया सार्द्धं नैनामीक्षेत मेहतीम् ।
न भक्षयेदभक्ष्याणि नापेयं वा पिबेद्द्विजः ॥”
अभक्ष्याणि तु भक्ष्यशब्दे द्रष्टव्यम् ॥ * ॥
“भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन्
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तम ।
भुञ्जीत चेत्स मूढात्मा तिर्य्यग्योनिं स गच्छति ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षया ।
नाशयत्याशु पापानि देवानामर्च्चनन्तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्च्चनम् ।
भुङ्क्ते स याति नरकान् सूकरेष्वभिजायते ॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः ।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥”
इति कौर्म्मे उपविभागे १७ अध्यायः ॥ * ॥

व्यास उवाच ।
“प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा ।
आसीनस्त्वासने शुद्धे भूम्यां पादौ निधाय तु ॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ॥
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥
पञ्चार्द्रो भोजनं कुर्य्याद्भूमौ पात्रं निधाय तु ।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः ॥
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ ।
आचम्यार्द्राननोऽक्रोधः पञ्चार्द्रो भोजनञ्चरेत ॥
महाव्याहृतिभिस्त्वन्नं परिधायोदकेन तु ।
अमृतोपस्तरणमसीत्यापोशानक्रियाञ्चरेत ॥
स्वाहाप्रणवसंयुक्तां प्राणायाद्याहुतिन्ततः ।
अपानाय ततः कृत्वा व्यानाय तदनन्तरम् ॥
उदानाय ततः कुर्य्यात् समानायेति पञ्चमीम् ।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः ॥
शेषमन्नं यथोक्तञ्च भुञ्जीत व्यञ्जनैर्युतम् ।
ध्यात्वा तन्मनसा देवमात्मानं वै प्रजापतिम् ॥
अमृतापिधानमसीत्युपरिष्टादपः पिबेत ।
आचान्तः पुनराचामेदायं गौरीतिमन्त्रतः ॥
द्रुपदां वा त्रिरावृत्त्य सर्व्वपापप्रणाशिनीम् ।
प्राणानां ग्रन्थिरसीत्यालभेद्धृदयन्ततः ॥
आचम्याङ्गुष्ठमात्रेति पादाङ्गुष्ठेऽथ दक्षिणे ।
निःस्रावयेद्धस्तजलं मूर्द्धहस्तः समाहितः ॥
हुत्वानुमन्त्रणं कुर्य्यात् सन्ध्यायामिति मन्त्रतः ।
अथाक्षरेण स्वात्मानं योजयेद्ब्रह्मणेति हि ॥
सर्व्वेषामेव योगानामात्मयोगः परः स्मृतः ।
योऽनेन विधिना कुर्य्यात् स याति ब्रह्मणः
क्षयम् ॥
यज्ञोपवीती भुञ्जीत स्रग्गन्धालङ्कृतो नरः ।
सायं प्रातर्नान्तरा वै सन्ध्यायान्तु विशेषतः ॥
नाद्यात् सूर्य्यग्रहात् पूर्व्वमह्नि सायं शशिग्रहात् ।
ग्रहकाले तु नाश्नीयात् स्नात्वाश्नीयात्तु मुक्तयोः ।
मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा ॥
अमुक्तयोरस्तं गतयोः स्नात्वा दृष्ट्वा परेऽहनि ।
नाश्नीयात् प्रेक्षमाणानामप्रदायैव दुर्म्मतिः ॥
नायज्ञशिष्टमद्याद्वा न क्रुद्धो नान्यमानसः ॥
आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम् ।
वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम् ॥
यद्भुङ्क्ते वेष्टितशिरा यच्च भुङ्क्ते उदङ्मुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
नार्द्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक् ।
न च भिन्नासनगतो न शयानः स्थितोऽपि वा ॥
न भिन्नभाजने चैव न भूम्यां न च पाणिषु ।
नोच्छिष्टो घृतमादद्यान्न मूर्द्धानं स्पृशेदपि ॥
न ब्रह्म कीर्त्तयेद्वापि न निःशेषं न भार्य्यया ।
नान्धकारे च नाकाशे न च देवालयादिषु ॥

नैकवस्त्रस्तु भुञ्जीत न च यानस्थितोऽपि वा ।
न पादुकानुगतो वा न हसन् विलपन्न हि ॥
भुक्त्वैवं सुखमास्थाय तदन्नं परिणामयेत् ॥”
इति कूर्म्मे उपविभागे १८ अध्यायः ॥ * ॥
अपरञ्च ।

“हुत्वा च हुत्वा पितृदेवताभ्यो
भृत्यातिथीन् भृत्यजनावशिष्टम् ।
तुष्टः शुचिः श्रद्दधानोऽत्ति योऽन्नं
तस्यान्नतं स्यान स पुमान् भुनक्ति ॥

नायं प्रातर्मनुष्याणामशनं देवनिर्म्मितम् ।
वैदिके लौकिकेऽग्नौ तु प्रत्यक्षे जाठरं तथा ॥
उपलिप्ते समे देशे शुचिः श्रद्धासमन्वितः ।
पात्रेष्वर्थानुरूपेषु पुत्त्रशिष्यादिभिर्वृतः ॥
सुसंस्कृतं हितं स्निग्धं भुञ्जीतान्नमकुत्सयन् ।
यवगोधूमशाल्याद्यं मांसशाकादिभिर्युतम् ॥
कटूम्ललवणैस्तिक्तैर्व्यञ्जनैस्तु सुगन्धिभिः ।
भक्ष्यप्रकारान् विविधान् कन्दमूलफलानि च ॥
पात्रं भूमौ प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः ।
भोजने भोजने चैव त्रिरात्रफलमश्नुते ॥
यत्नेन धारयेद्विप्रः पवित्रं दक्षिणे करे ।
भुञ्जानस्तु विशेषेण अन्नदोषैर्न लिप्यते ॥
यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा ।
घ्नन्ति केवलमन्नस्य मण्डलस्य विवर्ज्जनात् ॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः ।
मण्डलान्युपजीवन्ति तस्मात कुर्व्वीत मण्डलम् ॥
चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्त्रियस्य तु ।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा ॥
न लौहे न्यस्ये पात्रे भिन्नेऽश्नीयात कटेऽम्बरे ।
आपः पुनन्त्विति मन्त्रेण भुवा स्तीर्य्य समासनम् ॥”
भुवा द्यौरित्युपविश्य पात्रं प्रक्षाल्य भक्ष्यान्नं
दिवोऽरर्तिमितिपात्रमभिमन्त्र्य भूम्याश्रयत्वायनेति
भूमौ पात्रं प्रतिष्ठापयेत् । आच्छन्नवासाः शुक्ल-
वासा वा पवित्रात्मा शान्तात्मा प्राङ्मुख
आसीनः पाणौ प्रक्षाल्य दशहोतारमिति गद्येति
ध्यायेदव्यक्तं पुरुषम् । तत ओजोऽसीत्यन्नाद्य-
माह्रियमाणं प्रतिपत्तयेत् । ओजोसीत्यादिना
प्रतिगृह्य अन्नमस्माभिरशौत्युभ्यामभिमन्त्रयेत ।
उद्बुध्यस्वेति जाठराग्निमन्तरस्थं प्रबोधयेत् ।
भूतपतये नमः भुवनपतये नमः भूतानां पतये
नमः इति नमस्कारान्ते बलित्रयं भूमौ दद्यात् ।
अथान्नेवात्मानं चिन्तयेत् ।
“प्राणस्य हृदयं स्थानमपानस्य गुदं स्तनम् ।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥
पञ्चमः स तु विज्ञेयो व्यानः सर्व्वाङ्गसन्धिषु ।
राजीवसदृशः प्राणो हृदये नित्यमंस्थितः ॥
तस्याधस्तादपानस्तु स वै गोक्षीरसन्निभः ।
नाभ्या मध्ये समानस्तु विद्युज्ज्वालासमप्रभः ॥
प्राणस्योपर्य्युदानस्तु इन्द्रनीलसमप्रभः ।
उभाभ्यामथ शाखाभ्यामधराधिकशाखया ।
अस्पृश्यं पात्रं कुर्व्वीत एवं ह्यानिर्न जायते ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख । ।
त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णोः परमं पदम् ॥”

अमृतोपस्तरणमसीत्यपः स्पृष्ट्वोपस्थाय वाचं
नियच्छेत् । व्यस्तं महाव्याहृतिभिरद्भिः प्रदक्षिणं
परिषिच्य सव्येन पाणिना पात्रमविमुञ्चन्नमृतो-
पस्तरणमसीति पुरस्तादपः पीत्वा पञ्चभिस्तैः
प्राणाहुतीर्जुहोति । प्राणे निविष्टोऽमृतं जुहोमि
शिवोमाविशाप्रदाहाय प्राणाय स्वाहा ।
अपाने निविष्टोऽमृतं जुहोमि शिवोमाविशा-
प्रदाहायापानाय स्वाहा । व्याने निविष्टोऽमृतं
जुहोमि शिवोमाविशाप्रदाहाय समानाय
स्वाहा । इति तूष्णीं भूयो व्रतयेत् । प्रजापतिं
मनसा ध्यायेत् ॥ * ॥ प्राणाय स्वाहेति प्राण-
स्तृप्यति । प्राणे तृप्यति चक्षुस्तृप्यति । चक्षुषि
तृप्यति आदित्यस्तृप्यति । आदित्ये तृप्यति
द्यौस्तृप्यति । दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौ-
श्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं अनु
तृप्यति । व्यानाय स्वाहेति व्यानस्तृप्यति ।
व्याने तृप्यति श्रोत्रं तृप्यति । श्रोत्रे तृप्यति चन्द्र-
मास्तृप्यति । चन्द्रमसि तृप्यति दिशस्तृप्यन्ति ।
दिक्षु तृप्यन्तीषु यत्किञ्चिद्दिशः खं चन्द्रमा-
श्चाधितिष्ठन्ति । तत्तृप्यति तस्यानुतृप्तिं अनु-
तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्च-
सेनेति । अपानाय स्वाहेत्यपानस्तृप्यति । अपाने
तृप्यति वाक् तृप्यति । वाचि तृप्यन्त्यां अग्नि-
स्तृप्यति । अग्नौ तृप्यति पृथिवी तृप्यति ।
पृथिव्यां तृप्यन्त्यां यत्किञ्चित् पृथिवी चाग्नि-
श्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं अनुतृप्यति ।
तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्च-
सेनेति । समानाय स्वाहा इति समानस्तृप्यति ।
समाने तृप्यति मनस्तृप्यति । मनसि तृप्यति
पर्य्यन्यस्तृप्यति । पर्य्यन्ये तृप्यति विद्युत्तृप्यति ।
विद्युति तृप्यन्त्यां यत्किञ्चिद्विद्युत्पर्य्यन्यश्चाधि-
तिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं अनुतृप्यति
प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ।
उदानाय स्वाहेति उदानस्तृप्यति । उदाने
तृप्यति वायुस्तृप्यति । वायौ तृप्यति आकाश-
स्तृप्यति । आकाशे तृप्यति यत्किञ्चिद्वायु-
श्चाकाशश्चाधितिष्ठतस्तत्तृप्यति । तस्यानुतृप्ति-
मनुतृप्यति प्रजया पशुभिरन्नाद्येन तजसा
ब्रह्मवर्च्चसेनेति ॥ * ॥
“भुक्तेऽन्ने केचित काङ्क्षन्ति भुक्तशेषं भुवि क्षिपेत् ।
केचित काङ्क्षन्त्यनाजीवाः केचित् कर्म्मवशा-
नुगाः ॥
भुञ्जन्तु मम चोत्सृष्टं पात्रे वाथ भुवि स्थित ।
अमृतापिधानमसीत्युपरिष्टात् पयः पिबेत ॥
अद्भि पूर्व्वापरिष्टाच्च वक्त्र प्राणस्य निर्णयेत् ।
भुक्त्वा पीत्वा च यः कश्चित् शून्यं पात्रं समुत्
सृजेत् ॥
स पुनः क्षुत्पिपासार्त्तो भवेज्जन्मनि जन्मनि ।
अमृतापिधानमसीत्युपरिष्टादप. पिबेत् ॥”
अपः पीत्वाचान्तः प्राणस्थानान्यद्भिः स्पृशति ।
प्राणानां ग्रन्थिरसीति हृदयमालभ्य जपति
प्राणानां ग्रन्थिरसि इति प्राणदेशम् । विष्णो-

र्जठरमसीतिनाभिदेशम् । यो देवानामधि-
पतीति पुनरपि हृदयदेशमालभ्य जपति ।
,सावित्रीश्चानुभाष्य त्रिरापो रसानां रसभुक
तन्त्रात्मा कर्म्मभिः प्रीयतां विश्वभुगिति ध्यायेद
व्यक्तं पुरुषम् ॥ * ॥
“आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिद्ध्यन्ति नैषां सिद्धिरनश्नताम् ॥
गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु तपश्चरेत ।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत् सः ॥
अन्तराप्रातराशञ्च सायमाशन्तथैव च ।
सदोपवासी भवति यो न भुङ्क्ते कदाचन ॥
प्राणाग्निहोत्रमन्त्राणां निरुद्धे भोजने जपेत ।
त्रेधाग्निहोत्रमन्त्रांस्तु द्रव्यालाभेन तर्पयेत् ॥
यथाहि तूलमैषीकमग्निप्रोतं प्रदूयते ।
तद्वत सर्व्वाणि पापानि निर्दहत्यात्मयाजिनः ॥
यथेह क्षुधिता बाला मातरं पर्य्युपासते ।
एव सर्व्वाणि भूतानि अग्निहोत्रमुपासते ॥”
इति ॥ * ॥
“भोजनस्य निषेधन्तु प्रवक्ष्याम्यनुपूर्व्वशः ।
नोच्छिष्टो भक्षयेत् किञ्चिन्न गच्छन् वा कदाचन ॥
खट्वारूढो न भुञ्जीत न पाणिस्थं कदाचन ।
चन्द्रसूर्य्योपरागे च ग्रस्तास्ते चन्द्रसूर्य्ययोः ॥
गोब्राह्मणोपवासेन न वार्जीर्णे तु भोजनं ।
निर्ग्रीष्मे नैकवासास्तु न लग्नोच्छिष्टभाजनं ॥
न रात्रौ तिलसम्बद्धं दधि शक्तून्न माक्षिकम् ॥
कोविदारवटाश्वत्थफलानि न कदाचन ।
शणकञ्च कौसुम्भं करमथितञ्च यद्दधि ॥
वेद्या बहिः पुरोडाशं तुल्यं गोमांसभक्षणे ।
नोच्छिष्टेन घृतं ग्राह्यं शक्तून् वापद्गतोऽपि सन् ।
पलाण्डुं लशुनं वापि भुञ्जंस्तत्पापमाप्नुयात् ॥
नानार्द्रमुखपाणिस्तु चन्द्रतारार्कमीक्षयेत् ।
भुञ्जन् कुर्व्वन् स्वमूत्राणि स्पृशेद् ब्रह्म न कीर्त्तयेत् ॥
नार्द्रवासाः शिरःस्नातः संपानतको निरासनः ।
शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकम् ॥
नाश्नीयान्न पिबेच्चैव कृत्वा पर्य्यस्तिकां नरः ।
पादप्रसारणं कृत्वा न च वेष्टितमस्तकः ॥
न च आहृत्य यच्छिष्टं गृहे पर्य्युषितञ्च यत् ।
दम्पत्योर्भुक्तशेषन्तु न भुञ्जीत कदाचन ॥
नातिचरितमश्नीयात् भुक्त्वा शेषं विवर्ज्जयेत् ।
न भक्षयेत्तु निःशेषमन्यत्र दधिसर्पिषोः ॥
पयसो मधुशक्तूनां तिलानामोदनस्य च ।
न चैको मिष्टमश्नीयान्न बहूनाञ्च पश्यताम् ॥
बहवस्तु न भुञ्जन्ति तथा चैकस्य पश्यतः ।
ओष्ठौ च न लिहन् पाणिं नाङ्गुलिं पात्रमेव च ॥
शून्यालयेऽग्निशालायां देवागारे तथैव च ।
आयुर्निरस्यते तस्य मिष्टैकस्य बुभुक्षतः ॥
अदत्त्वा गोऽग्निविप्रेभ्यः कुमारायानुयायिषु ।
एकोऽन्नं मिष्टमश्नाति ततोऽन्यो नास्त्यपुण्यकृत् ॥
यस्त्वेकपङ्क्त्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वार्थहेतोः ।
वेदेषु दृष्टाभ्यृषिभिस्तु गीतां
तां ब्रह्महत्यां मुनयो वदन्ति ॥

एकपङ्क्त्युपविष्टानां दुष्कृतानां दुरात्मनाम् ।
सर्व्वेषां तत्समं तावद्यावत् पङ्क्तिर्न भिद्यते ॥
एवं यो ब्राह्मणो भुङ्क्ते सन्तर्प्य पितृदेवताः ।
स हि कुले समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥"
इति वह्निपुराणे भोजनविधानम् ॥ * ॥
त्रिविधभोजनं यथा,—
"उच्छिष्टमवशिष्टं वा पथ्यं पूतमभीप्सितम् ।
भक्तानां भोजनं विष्णोर्नैवेद्यं सात्त्विकं मतम् ॥
इन्द्रियप्रीतिजननं शुक्रशोणितवर्द्धनम् ।
भोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥
अतः परं तामसानां कट्वम्लोष्णविदाहिकम् ।
पूतिपर्य्युषितं ज्ञेयं भोजनं तामसप्रियम् ॥"
इति कल्किपुराणे ७५ अध्यायः ॥ * ॥
श्राद्धादिषु निमन्त्रितस्यान्यत्र भोजने दोषो यथा,—
"निमन्त्रितोऽन्यतो भुङ्क्ते श्राद्धे दैवे सपैतृके ।
स द्विजो नरके वासं लभते नात्र संशयः ॥"
देवतादिष्वभुक्तवत्सु भोजने दोषा यथा,—
"देवतापितृमर्त्त्येषु मनुष्येषु आश्रमेषु च ।
अभुक्तवत्सु येऽश्नन्ति बालपित्रग्निमातृषु ॥
दुष्टान्ते पूयनिचये निपात्यन्तेऽधमाधमाः ।
सूचीमुखाश्च जायन्ते क्षुधार्त्ताः किरिविग्रहाः ॥"
"एकपङ्क्त्युपविष्टाश्च समुत्थाय प्रयान्ति ये ।
विड्भोजनं राक्षसेन्द्र ! नरकन्ते प्रयान्ति हि ॥
एकसार्थप्रयाताश्च तथान्यप्रार्थितं नराः ।
असंविभज्य भुञ्जन्ति ते यान्ति श्लेष्मभोजनम् ॥
पायसं कृशरं मांसं वृथा भुक्ताश्च येर्नरैः ।
तेषामयोगुडास्तप्ताः क्षिप्यन्ते वदनेऽद्भुताः ॥"
इति वामनपुराणे १२ अध्यायः ॥ * ॥
औषधातिरिक्तकिञ्चिद्भोजनवतो नित्यनैमित्तिकक्रियानिषेधो यथा,—
"इषं भुक्ते त्वजीर्णे च नैव भुक्त्वा च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
कणादिपिप्पल्यन्तञ्च फलं भुक्त्वा न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनाद्भेषजादृते ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥"
इति कालिकापुराणे ५४ अध्यायः ॥
भोजने पाकविधौ दिङ्नियमो यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अपराशाभिमुखे पक्त्वा अम्लतान्नं विजानीहि ।
पूर्व्वामुखो धर्म्मकामः शोकहानिश्च दक्षिणे ॥
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्त्वा दरिद्रो जायते नरः ॥"
पाकपात्रनिरूपणं यथा,—
"यदा तु आयसे पात्रे पक्त्वा अश्नाति वै द्विजः
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्त्वा चतुर्व्वर्णनिर्मणौ भवति वै चयः ।
पितृभ्यां पक्वमन्नञ्च पितृयेण यशस्विनि ! ॥
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ।
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं शोणितं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च ।
पक्वपात्रे च यत पक्वं तत् सर्व्वं निष्फलं भवेत् ॥"
पाककाष्ठनिरूपणं यथा,—
"उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्द्देन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत् ॥"
निषिद्धान्नं यथा,—
"गर्हितान्नमवीरान्नं भुक्त्वा चान्द्रायणञ्चरेत ।
अप्रजा या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कालचण्डातकस्यैव वज्रवारणकस्य च ॥
भेरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥"
पाकपात्रत्यागकालो यथा,—
"यदा मृण्मयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टासु तत्पात्रं विसृजेद् गृही ॥
धनुःपाके तथा सिंहे मीने चैव वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! कृच्छ्रेणैव विशुद्ध्यति ॥"
पाकार्थजलदानं यथा,—
"एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"
भोजनस्थानादि यथा,—
"उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः ।
प्राङ्मुखोऽश्नाति भुञ्जीत शुचिः पीठमवस्थितः ॥"
पीठनिरूपणं यथा,—
"सार्द्धहस्ते चतुष्कोणे सहकारविनिर्मिते ।
चामभद्रारुमये प्रादेशोच्छ्रायसंयुते ॥
वरुणासने भवेद्वृद्धिर्भद्रके श्रियमाप्नुयात् ।
चाम्रे धनविवृद्धिः स्याद्धर्म्मवृद्धिस्तु भद्रके ।
शालासने कर्णिकारे किंशुके मरणं भवेत् ॥"
भोजने दीपनिरूपणं यथा,—
"घृतदीपेन यज्ञफलं तैले धेनुफलं लभेत् ॥"
भोजने चाण्डालादिदृष्टिनिषेधो यथा,—
"यदा भोजनकाले तु चाण्डालैः पतितैस्तथा ।
श्वकुक्कुटवराहैश्च शकुनैश्च अन्त्यजैरपि ।
अन्नं वाप्यथ पानं वा दृष्टमात्रं परित्यजेत् ॥"
"रजस्वलायाः संस्पृष्टौ वापि श्रुत्वा प्रमादतः ।
व्रतस्थो वर्ज्जयेद्देवि ! अव्रते शौचमाचरेत ॥
देवालये तथा तीर्थे सिद्धक्षेत्रे च शङ्करि ! ।
ब्राह्मणानां समाजे तु भुक्त्वा क्रतुफलं लभेत् ॥
आचान्तो भोजनं कुर्य्यादनामायां हिरण्ययुक् ।
सुवर्णेन स्पृष्टमन्नं तदन्नञ्चामृतं विदुः ॥
रजःस्पृष्टं यदन्नञ्च भुक्त्वा भवति किल्बिषी ।
पौष्णकेण स्पृष्टमन्नं विष्ठासमं भवेत ॥
वैदूर्य्येण माणिक्येन स्फाटिकेन स्पृष्टमपि ।
स्वर्णेन संस्पृष्टमन्नं तदन्नं शुचितामियात् ॥"
भोजने दिङ्नियमो यथा,—
"आयुष्यं प्राङ्मुखो भुङ्क्ते रात्रौ चैव उदङ्मुखः ।
यशस्वी दक्षिणे चैव पश्चिमे तु विवर्ज्जयेत् ॥"
भोजने मण्डलानि यथा,—
"मण्डलं भोजने काले चतुष्कोणं द्विजस्य च ।
क्षत्रियस्य भवेद्दैर्घं वैश्यस्य कूर्म्मपृष्ठकम् ।
स्त्रीशूद्राणां भवेद्वृत्तं शकटाकारमेव वा ॥"
अथ भोजनकालः ।
"सायं प्रातर्द्विजातीनामशनं देवनिर्म्मितम् ।
नित्यमह्नि नमस्विन्यां सार्द्धप्रहरयामतः ॥
रात्रौ यामत्रयान्ते च सन्ध्ययोर्न कदाचन ।
अकालभोजनं कृत्वा प्राणायामेन शुद्ध्यति ।
अहोरात्रस्य सन्ध्यायां भुक्त्वा कृच्छ्रं समाचरेत् ॥"
मोदकादिभक्षणानन्तरमन्नभोजनविधिर्यथा,—
मोदकं कन्दपक्वञ्च गव्यादि घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति ।
त्रिसन्ध्यं भुक्तवान् यस्तु न स स्वार्थं द्विजः क्वचित् ॥
भुक्त्वा रात्रिमुपगमे कृच्छ्रेणैकेन शुद्ध्यति ॥
कोलं हरिद्रा सौवीरं मरीचं जातिकोषकम् ।
ग्रन्थिपर्णादिकं सर्व्वं गन्धद्रव्यं तथौषधिः ।
प्रशस्तमेषामामान्नं स्विन्नञ्चापि न दुष्यति ॥
कुटुम्बभरणार्थाय पाकं पश्चान्निवेदयेत् ।
वैश्वदेवान्नमुद्धृत्य भोजयेन्न विचारयेत ॥
नाश्नीयात् केवलं रात्रौ पिल्लञ्चैव तथा दधि ।
अर्केन तृणगुच्छेन काष्ठखण्डेन वह्निना ॥
पदक्षिभेदं ततः कुर्य्यात पश्चाद्भुञ्जीत वाग्यतः ।
हस्तदत्तं यदन्नञ्च शूद्रादत्तं न भक्षयेत् ॥
घृततैलञ्च लवणं पानीयं पायसं दधि ।
रविवारे तथा षष्ठ्यां भौमवारे दिनक्षये ।
पर्व्वकाले च द्वादश्यां द्विजस्तित्तं न भक्षयेत ॥
न वामेन पिबेत्तोयं न रसं तक्रमेव च ।
भेकाखुशिशुमार्ज्जारैस्तथा पारावतैरपि ॥
कलविङ्कैः पक्षिणैश्च पाके स्पृष्टेऽपि सुन्दरि ! ।
गोधया वनमार्ज्जारैः पाकं न विसृजेत् क्वचित् ॥
स्वर्णरौप्यमये पात्रे पाषाणे अश्मपत्रके ।
सकृद्भुक्त्वा तु देवेशि ! नराकस्य फलं लभेत् ॥
पूर्व्वायां स्वर्णपात्रे च भोजनं यः समाचरेत् ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
स्वर्णपात्रे पश्चिमायां उत्तराभिमुखेन वा ।
तदन्नं शौकरं मांसं भुक्त्वा चान्द्रायणञ्चरेत् ॥
सर्व्वकामः स्वर्णपात्रे यशस्वी खर्परेषु च ।
पद्मपत्रे भवेत पुष्टिर्द्दिव्याशी तु पुण्यवान् ॥
चर्य्यो भवति ताम्रे च काचपात्रे दरिद्रता ।
तूनपत्रे भवेदायुः कदले कीर्त्तिमाप्नुयात् ॥
मधूपत्रे च रोगः स्याद्वटपत्रे तु वैष्णवः ।
शालपत्रे भवेत्कामी पनसे चैव स्वर्गतिः ।
निशापत्रे परोद्दे च पुनः संस्कारमर्हति ॥"
इति मत्स्यसूक्ततन्त्रे ४२ पटलः ॥
अथ स्मृत्युक्तभोजनविधिः । बहिःप्रक्षालितपाणिपादवदनो रक्तपाणिर्द्दिवासा हिराचान्तो गोमयोपलिप्ते प्रावृते देशे शुद्धः शुद्धनीचासनोपविष्टो धर्म्मवृद्धिकामः प्राङ्मुख उदङ्मुखो वा यशस्कामो जीवत्पितृमातृकेतरो दक्षिणामुखो धनकामः प्रत्यङ्मुखो भूमिस्पृष्टदक्षिणपाद आसनारूढमध्यपादोऽन्तर्जानुकरो दक्षि-

वामदिक्कृतपानीयपात्री दक्षिणावर्त्तेन चतु-
ष्कोणमण्डलं कृत्वा लौहमात्रव्ययमयभवादि-
दुष्टभस्मकांस्यकदल्यादिपत्रपृष्ठपद्मपलाशपत्रेतर-
पात्रं विधाय प्रक्षाल्य च आत्मानं पात्रञ्च
दक्षिणक्रमेण जलेन वेष्टयित्वा तदुपरि लौहे-
तरपात्रान्तरेण हस्ताभ्यां प्रतिपिहितमन्ना-
दिकं स्थापयित्वा अन्नं दृष्ट्वा प्रहृष्येत्। अस्माकं
नित्यमेवास्तु इत्यभिलप्य संप्रोक्ष्य आधाराच्चतु-
ष्कोणमण्डलाभ्यन्तरे जललिखितचक्रोपरि ॐ
नारायणाय नम इत्यन्नं सजलं मध्ये दद्यात्।
तत्पार्श्वे ॐ भुवः पतये स्वाहा ॐ भुवनपतये
स्वाहा ॐ भूतानां पतये स्वाहा। इति बलि-
चतुष्टयं दद्यात्। तच्चेदं सोपकरणमन्नं ॐ
विष्णवे नम इत्युत्सृज्य तदग्रं किञ्चित ॐ
विष्वक्सेनाय नम इति दत्त्वा अन्नोपरि विष्णु-
निर्म्माल्यतुलसीपत्रं प्रक्षिप्य विष्णुपादोदकं पुरा
न गृहीतञ्चेदिदानीम्।
"ॐ कृष्ण कृष्ण महाबाहो भक्तानामार्त्ति-
नाशन।।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे॥"
इति गृहीत्वा इष्टदेवतानामपरंरितं श्रुत्वा
स्वयं निरुच्चार्य्य वा ॐ अमृतोपस्तरणमसि
स्वाहा इत्यनेन पीत्वा।
"ॐ अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥"
इत्यनेन पादोदकशेषं शिरसि दद्यात्।
"ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण हिरण्याक्षो निपातितः॥"
इत्युक्त्वा अङ्गुष्ठानामिकाभ्यां घृतप्लुतस्तोकमन्न-
मादाय महामौनी साङ्गुष्ठसर्व्वाङ्गुलिभिर्व्वा ॐ
प्राणाय स्वाहा इत्यनेन मुखे दत्त्वा अदन्तच्छिन्नं
निगिरेत्। एवं ॐ अपानाय स्वाहा ॐ समा-
नाय स्वाहा ॐ उदानाय स्वाहा ॐ
व्यानाय स्वाहा। ततो वीर्य्यकामो मौनी
भुञ्जीत। ततः प्रथमं द्रवयुक्तमधुरं मध्ये कठि-
नाम्ललवणानि अन्ते द्रवयुक्तकटुतिक्तानि
यथालाभं चौराद्यं साङ्गुष्ठैश्चकरसर्व्वाङ्गु-
लिभिः अनतिल्पं भुञ्जीत। पश्चादधिकं जला-
दिकं न पातव्यम्। जलक्षीरदधिघृतमधुशाक-
शक्तुमांसतरद्रव्याणां शेषं रक्षणीयम्। भोजनं
संपूर्णं तु मांसभोजने करं प्रक्षाल्य तदभोजनं
तु करमप्रक्षाल्यैव सार्द्रेण हस्तेन जलं गृहीत्वा
ॐ अमृतापिधानमसि स्वाहा इति जलगण्डूषं
गृहीत्वा सान्नं तज्जलशेषं ॐ रौरवेऽपुण्य-
निलये पद्मार्व्वुदनिवासिनाम्। उच्छिष्टभागि-
नामन्नमक्षय्यमुपतिष्ठतामिति भूमौ निक्षिपेत्।
भोजनकाले तु विड़ालकर्म्मकस्पर्शे त्यागः।
विड़ालकर्णकस्पर्शे न दोषः। ततः स्थानान्तरं
न गच्छेत्। परावृत्य मृद्भिर्मुखहस्तलेपमपनीय
तृणादिना शिक्षाचर्व्वणायोग्यं दन्तेभ्यो गृहीत-
रसद्रव्यं रक्तपातघनादिकं विना अपनयेत्।
यत्ने कृते यदि न निःसरति तदा न दोषः।

ततो शिक्षाच संहृष्य जलगण्डूषैर्मुखाभ्यन्तरं
संशोध्य पाणी पादौ च प्रक्षाल्य आसनस्य एव
भूमौ पादौ दत्त्वा द्विराचम्य सुखं तुलसी-
पत्रादिना संशोध्य दक्षिणपादाङ्गुष्ठे दक्षिण-
हस्तेन--
"ॐ अङ्गुष्ठमात्रपुरुषो ह्यङ्गुष्ठञ्च समाश्रितः।
ईशः सर्व्वस्य जगतः प्रभुः प्रीणातु विश्वभुक्॥"
इति मन्त्रेण जलं दद्यात्। ततो महीमार्ज्जना-
भावे अशुचित्वादविलम्बमेव भोजनपात्रमुद्धृत्य
तत् स्थानं उच्छिष्टमपनीय गोमयोदकाभ्यां
संलिप्य सिञ्चेत्। सुस्थः प्रशान्तचित्त आसने
उपविश्याभीष्टदेवतानाम स्मृत्वा—
"ॐ अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः।
दत्तावकाशो नभसा जरयत्वस्तु मे सुखम्॥
अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च।
भवत्वेतत्परिणतौ ममास्त्वव्याहतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं पुष्टिकरञ्चास्तु ममास्त्वव्याहतं सुखम्॥
अगस्तिरग्निर्व्वड़वानलश्च
भुक्तं ममान्नं जरयत्वशेषम्।
सुखं ममैतत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु॥
विष्णुरत्ता तथैवान्नं परिणामश्च वै यथा।
सत्येन तेन मद्भुक्तं जीर्य्यत्वन्नमिदं तथा॥"
इत्युच्चार्य्य वामहस्तेनोदरं परिमृज्जेत। ततः
पादशतव्रजनानन्तरं वामपार्श्वेन किञ्चित्कालं
शयितव्यम्। ततस्ताम्बूलादि सुखवासद्रव्यं
भोक्तव्यम्। इत्याह्निकाचारं पञ्चमयामार्द्ध-
कृत्यम्॥ * ॥ अथ भोजनादिदानफलम्।
"भोजनाच्छादनं दत्त्वा दत्त्वा चोपानहौ द्विज।।
स स्वर्गलोकं संभुज्य सर्व्वकामोऽत्र जायते॥
विद्यां भक्त्या प्रयच्छेद्यः परब्रह्मण्यसौ विशेत्।
विद्यार्थिने च विप्राय यो दद्याद्भोजनं नरः॥
अन्नं प्राणो जलं प्राणः प्राणश्चौषधमुच्यते।
तस्मादौषधदानेन दत्ताः स्युरसवो द्विजाः॥
इति पराशरस्मृतिः॥
भोजने प्रतिषेधो यथा,—
"ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम्।
दुग्धे च लवणं दद्यात् सद्यो गोमांसभक्षणम्॥
यः शूद्रेण समाहूतो भोजनं कुरुते द्विजः।
सुरापश्च स विज्ञेयः सर्व्वधर्म्मबहिष्कृतः॥
स्नानं रजकतीर्थेषु भोजनं गणिकालये।
शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने॥"
इति कर्म्मलोचनम्॥
अथ शिशूनां प्रथमान्नभोजनदिनादि। यथा,
यमः।
"ततोऽन्नप्राशनं मासि षष्ठे कार्य्यं यथाविधि।
अष्टमे वाथ कर्त्तव्यं यद्वेष्टं मङ्गलं कुले॥"

षष्ठ इति मुख्यः कल्पः प्रागुक्तन्यायात्। ज्योति-
श्चिन्तामणौ।
"अन्नस्य प्राशनं प्रोक्तं मासि षष्ठेऽष्टमे बुधैः।
स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ मुनिः॥
द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्व्वसु।
बलमायुर्यशो हन्यात् शिशूनामन्नभोजनम्॥"
भुजबलभीमे।
"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वै
तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णेतरे।
प्राजेशादितिपौष्णवैष्णवयुगे हस्तादिषट्कोत्तरे-
राग्नेयाप्यतिमित्रभेषु नितरामन्नादिभक्तं
शुभम्॥"
युगेरिति प्राजेशादौ प्रत्येकं सम्बध्यते अत्रापि
तिथ्यृक्षादिविद्धं विवर्जयेत्।
"वृषद्वन्द्वधनुर्मीनकन्यालग्नेऽन्नभक्षणम्।
त्रिकोणाष्टकयुक्तान्यग्रहा यद्वत्तथा फलम्॥
दुष्टः शशधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे॥"
मार्कण्डेयपुराणम्।
"देवतापुरतस्तस्य पितुरङ्कगतस्य च।
अलङ्कृतस्य दातव्यमन्नं पात्रे च काञ्चने॥
मध्वाज्यकनकोपेतं प्राशयेत् पायसन्ततः।
कृतप्राशनमुत्सङ्गे मातुर्बालन्तु तं त्यजेत्॥
देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्व्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम्॥
प्रथमं यत् स्पृशेद्बालः शिल्पभाण्डं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति॥"
सोमवारे दोषमाह भोजराजः।
"वाचालो बलवान् दिने दिनपतेरत्यन्तदीप्ता-
नलो
देही क्षीणहुताशनः शिशिरगौ कौजे रुजा
पीड़ितः।
बौधे भोगसुखोदयो प्रथमभुग्जीवे चिरायुः
सुखी
शुक्रे सौख्यबलान्वितोऽतिसुभगो मन्दे च
मन्दानलः॥"
इति ज्योतिस्तत्त्वम्॥
तद्वैदिकपर्य्यायाः। आवयति १ भर्वति २ बभस्ति
३ वेति ४ वेवेष्टि ५ अविष्यन् ६ वप्सति ७
भसथः ८ बभ्राम् ९ करति १०। इति दशात्ति-
कर्म्माणः। इति वेदनिघण्टौ २ अध्यायः॥
(तथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
"वक्ष्याम्यतः परं कृत्स्नमाहारस्योपकल्पनाम्।
घृतं कार्ष्णायसे देयं पेया देया तु राजते॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्वैदलेषु च।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत्॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत्।
कट्वराणि खडांश्चैव सर्व्वान् शैलेषु दापयेत्॥
दद्यात्ताम्रमये पात्रे सुशीतं सुशृतं पयः।
पानीयं पानकं मद्यं मृन्मयेषु प्रदापयेत्॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च।
दद्याद्वैदूर्य्यपात्रेषु रागषाड़वसट्टकान्॥

पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खड़ान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुड़विकारांश्च रागषाड़वसट्टकान् ।
पुरस्तात् स्थापयेत्प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ॥
सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् ।
पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ ॥
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
आदौ फलानि भुञ्जीत दाड़िमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततःपरम् ।
घनपूर्व्वं समश्नीयात् केचिदाहुर्विपर्य्ययम् ॥
आदावन्ते च मध्ये च भोजनस्य तु शस्यते ।
अतीवायतयामास्तु क्षपा येष्वृतुषु स्मृताः ॥
तेषु तत्प्रत्यनीकाढ्यं भुञ्जीत प्रातरेव तु ।
येषु चापि भवेयुश्च दिवसा भृशमायताः ॥
तेषु तत्कालविहितमपराह्णे प्रशस्यते ।
रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः ॥
कृत्वासममहोरात्रं तेषु भुञ्जीत भोजनम् ।
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्ज्जितम् ।
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ॥"

भोजनपात्रं, क्ली, (भोजनस्य पात्रम् ।) भक्ष्यद्रव्याधारः । यथा,—
"तिष्ठन्ति यत्र नवकाञ्चननिर्म्मितानि
श्रेणीकृतानि परितस्तु कटोरकाणि ।
राकाशशाङ्कनवमण्डलभास्करं यत्
स्थौणीभृतां रजतनिर्म्मितथालकं स्यात् ॥
यद्योर्ध्वप्रतिमादर्शिकांस्यमादर्शवत् शुचि ।
पात्रं दृढ़ं सुविस्तीर्णं स्थीणामत्यन्तदुर्लभम् ॥
पत्रावली भवति वा नृपभोजनाय
निर्जन्तुजालरहितामलवारिधौता ।
पालाशभूरुहदलैरचिता मनोज्ञा
ताहग्विपर्णकगणैः परिवेष्टिता च ॥"
इति पाकराजेश्वरः ॥

भोजपतिः, पुं (भोजानां भोजवंशीयानां पतिः ।) कंसराजः । यथा,—
"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो
मूर्त्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता
स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराड़विदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥"
इति श्रीभागवते १० स्कन्धे ४३ अध्याये १७ श्लोकः ॥

भोजपुरं, क्ली, (भोजस्य भोजराजस्य पुरम् ।) स्वनामख्यातदेशः ।
"आजिरभूद्भोजपुरे साकमसुरवरैः ।
दूरे रेवापारे सवको नूनं त लघीयांस ॥"
इति विदग्धमुखमण्डनम् ॥

भोजयिता, [ऋ] त्रि, (भुज् + णिच् + कर्त्तरि तृच् ।) भोजनकारयिता । भोगप्रयोजकः । यथा,
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता
सदा ।
भोगो विभवभेदश्च निष्कृतिर्म्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याये ॥

भोजाधिपः, पुं, (भोजस्य अधिपः ।) कंसराजः इति शब्दरत्नावली ॥

भोज्यं, त्रि, (भुज्यते इति । भुज + कर्म्मणि + ण्यत् । "भोज्यं भक्ष्ये ।" ७ । ३ । ६९ । इति निपातनात् न कुत्वम्) भोजनीयद्रव्यम् । यथा
"भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥"
इति चाणक्ये ५१ श्लोकः ॥
अपि च ।
"आहारं षड़्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम् ॥"
चूष्यं इक्षुदण्डादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाक्वथितादि । भोज्यं भक्तसूपादि भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि । इति भावप्रकाशः ॥ (पितॄणां तृप्तार्थं देये अन्नादौ च ॥)

भोज्यदानस्येतिकर्त्तव्यता यथा । ॐ अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्म्मण एकोद्दिष्टविधिकसांवत्सरिकश्राद्धवासरे अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽक्षयस्वर्गकाम इदं सघृतसवस्त्रोपकरणामान्नभोज्यमर्च्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । ततो दक्षिणा । ॐ अद्येत्यादि कृतैतत्सघृत सवस्त्रोपकरणामान्नभोज्यदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनमूल्यं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्माच्छिद्रमस्तु । इति श्राद्धप्रयोगतत्त्वम् ॥

भोज्यसम्भवः, पुं, (सम्भवत्यस्मादिति सम्भव उत्पत्तिकारणम् । भोज्यं सम्भवोऽस्य ।) शरीरस्थ-रसधातुः । इति शब्दचन्द्रिका ॥

भोटाङ्गः, पुं, (भोटस्यभ्यतिरङ्गमस्य ।) देशविशेषः । इति शब्दरत्नावली । भोटान् इति भाषा ॥ (भोटान्तोऽपि पाठः ॥)

भोभो, अ, सम्बोधनम् । इति हलायुधः ॥ (यथा, महानाटके । १ । १४ ।
"भोभो भुजङ्ग । तरुपल्लवलोलजिह्व ।॥")

भोलानाथः, पुं, शिवः । यथा,—
"भक्तायो वचनं श्रुत्वा भोलानाथः कृपानिधिः ।
संस्तुत्य तां महाज्वालां सगणोऽन्तरगात्मने ॥"
इति श्रीशिवपुराणोत्तरखण्डे तुण्डिवामदेवसंवादे वाराणसीमाहात्म्ये पञ्चक्रोशीयात्रायां महाकालगणोत्पत्तिर्नाम २५ अध्यायः ॥ * ॥
पुस्तकान्तरे भोलानाथ इत्यत्र महादेव इति पाठः ॥

भौलिः, पुं, उष्ट्रः । इति त्रिकाण्डशेषः ॥

भौतः, पुं, (भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः । भूत + अण् ।) भूतयज्ञः । बलिकर्म्म । यथा,—
"होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इत्याह्निकतत्त्वम् ॥ देवलः । इति शब्दमाला ॥
(भिक्षादिभ्योऽण् । भूतसङ्घः । तस्येदमित्यण् ।) भूतसम्बन्धिनि, त्रि ॥

भौतिकं, क्ली, (भूतानां विकार इति ठक् ।) मुक्ता । इति राजनिर्घण्टः ॥ त्रि, भूतसम्बन्धि ॥
(भूतानि क्षित्यादीनि तद्विकारश्च गोघटादयः ।
"आहङ्कारिकत्वश्रुतेर्न भौतिकानि ।" इति । २ । २० । सांख्यसूत्रम् ॥ सृष्टिविशेषश्च । तथाच । "ईश्वरकृष्णकृतसांख्यकारिकायाम् ।
अष्ट विकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥
अत्र च सर्गे चैतन्योत्कर्षापकर्षविशेषात् तारतम्यम् । यथा, तत्रैव । ऊर्द्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः । मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥

भौतिकः, पुं, महादेवः । इति त्रिकाण्डशेषः ॥
(उपद्रवः । व्याध्यादिः । चक्षुरादि । शरीरादि ॥ (भूतेषु महदादिषित्यन्तेषु आत्मबुद्ध्या उपासकाः भौतिकाः । बौद्धविशेषाः ।
"भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः ॥"
इति पातञ्जलयोगसूत्रव्यासभाष्यटीकायां वाचस्पतिमिश्रधृतवचनम् । १ । १९ ॥)

भौती, स्त्री, (भूतानां भूतयोनीनामियमिति । भूत + अण् । ङीप् । तस्यां भूतानामधिकारित्वविद्यमानत्वात्तथात्वम् ।) रात्रिः । इति हेमचन्द्रः । १४२ ॥

भौत्यः, पुं (भूतेरपत्यं पुमान् । भूतिः + अपत्यार्थे ष्यञ् ।) भूतिमुनिपुत्रश्चतुर्द्दशो मनुः । यथा,—
मार्कण्डेय उवाच ।
"अतः परन्तु भौत्यस्य त्वमुत्पत्तिं निशामय ।
देवानृषींस्तथा पुत्रांस्तथैव वसुधाधिपान् ॥
बभूवाङ्गिरसः पुत्रो भूतिर्नाम्नातिकोपनः ।
तस्य भ्राता सुवर्चाभूद् यज्ञे तेन निमन्त्रितः ॥
यियासुः शान्तिनामानं शिष्यमाह महामुनिः ।
सदोद्युक्तं सदाचारमुदारं मुनिसत्तमम् ॥
भूतिरुवाच ।
अहं यज्ञं गमिष्यामि भ्रातुः शान्ते । सुवर्चसः ।
तेनाहूतस्त्वया चेह यत् कर्त्तव्यं शृणुष्व तत् ॥
अतिजागरणं वह्नेस्त्वया कार्य्यं ममाश्रमे ।
तथा तथाप्रमत्तेन यथाग्निर्न शमं व्रजेत् ।
इत्यादिष्टे तथेत्युक्तः स तु शिष्येण शान्तिना ।
जगाम यज्ञं तं भ्रातुराहूतः सह यवीयसा ॥
प्रशान्तस्तावदनलो योऽसौ भूतिपरिग्रहः ।
तं दृष्ट्वा सोऽनलं शान्तं शान्तिरत्यन्तदुःखितः ।
भीतश्च भूतेर्बहुधा चिन्तयन् स महाद्युतिः ॥

मार्कण्डेय उवाच ।
बहुधैवं विचिन्त्यासौ भौतस्तस्य तदा गुरोः ।
ययौ मतिमतां श्रेष्ठः शरण्यं जातवेदसम् ॥
स चकार ततः स्तोत्रं सप्तार्च्चिषेऽनमानसः ।
भूत्वैकचित्तो मेदिन्यां न्यस्तजानुः कृताञ्जलिः ॥
स एवं संस्तुतस्तेन भगवान् हव्यवाहनः ।
ज्वालामालाहृतनतुस्तस्यासीद्यतो मुने । ॥
परितुष्टोऽस्मि ते विप्र । भक्त्या यत्ते स्तुतिः कृता ।
वरं ददामि भवतः प्रार्थितां यत्तवेप्सितम् ॥
भगवन् । कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणम् ।
तथापि भक्तिनम्रस्य भगवन् । श्रूयतां मम ॥
ममापराधात् संत्यक्तं यत्तेऽधिष्ठं विभावसो !
तत्त्वयाधिष्ठितं सोऽद्य पूर्ववत् पश्यतां द्विजः ॥
तथान्यदपि मे देव । प्रसादं कुरुषे यदि ।
पुत्त्रो विशिष्टो भवतु निरपत्यस्य मे गुरोः ॥
यथा च मैत्रीं तनये स करिष्यति मे गुरुः ।
तथा समस्तसत्त्वेषु भवत्वस्य मनो मृदु ॥

अग्निरुवाच ।
गुरोरर्थं त्वया ब्रह्मन् । याचितं यद्वरद्वयम् ।
नात्मार्थं तेन मे प्रीतिस्त्वय्यतीव महामुने । ॥
भविष्यत्येतदखिलं गुरोर्थेन प्रार्थितं त्वया ।
मैत्री समस्तभूतेषु पुत्त्रस्तस्य भविष्यति ॥
मन्वन्तराधिपः पुत्त्रो भौत्यो नाम भविष्यति ।
महाबलो महावीर्य्यो महाप्राज्ञो गुरोस्तव ॥
इत्युक्त्वा भगवानग्निः पश्यतस्तस्य वै मुने । ।
बभूवादर्शनः सद्यः प्रदीपो निर्हृतो यथा ॥
एतस्मिन्नन्तरे सोऽपि गुरुस्तस्य महात्मनः ।
भ्रातुर्यवीयसो यज्ञाद्दाजगाम स्वमाश्रमम् ॥
तस्यागतस्य शिष्योऽसौ चक्रे पादाभिवन्दनम्
गृहीतासनपूजश्च तमाह स तदा गुरुः ॥
वत्सातिहार्द्दं त्वयि मे तथान्येष्वपि जन्तुषु ।
न वेद्मि किमिदं त्वद्वेहनसैतत कथयाशु मे ॥
ततः स शान्तिस्तत् सर्व्वमाचार्य्याय महात्मने ।
अग्निनाशादिकं विप्र । समाचष्ट यथातथम् ॥
तच्छ्रुत्वा स परिष्वज्य स्नेहार्द्रनयनो गुरुः ।
शिष्याय प्रददौ वेदान् साङ्गोपाङ्गान् महात्मने
भौत्यो नाम मनुस्तस्य पुत्त्रो भूतेरजायत ।
तस्य मन्वन्तरे देवानृषीन् भूपांश्च मे शृणु ॥
भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात् ।
देवेन्द्रो यत्र भविता तस्य विख्यातकर्म्मणः ॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भ्राजिरास्तथा ।
रणोऽल्काश्च इत्येते पञ्च देवगणाः स्मृताः ॥
शुचिरिन्द्रस्तथा तेषां त्रिदशानां भविष्यति ।
महाबलो महावीर्य्यः सर्व्वैरिन्द्रगुणैर्युतः ॥
अग्नीध्रश्चाग्निबाहुश्च शुचिर्युक्तोऽथ माधवः ।
शुक्रो जितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रध्नश्च भरताऽनुग्र एव च ।
अभिमानी च प्रवीरश्च विष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्द्दशं मयैतत्ते मन्वन्तरमुदाहृतम् ॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णननामाध्यायः ॥

भौमः, पुं, (भूमेरपत्यं । भूमि + शिवादित्वादण् ।) मङ्गलग्रहः । (यथा, बृहत्संहितायाम् ।५।६०।
"पश्यन् ग्रस्तं सौम्यो
घृतमधुतैलक्षयाय राज्ञां च ।
भौमः समरविमर्द्द
शिखिकोपं तस्करभयञ्च ॥")
नरकराजः । (यथा, हरिवंशे । १२० । १४ ।
"तासां पुरवरं भौमोऽकारयन्मणि-
पर्व्वतम् ॥")
तस्येदमित्यण् । भूमिभवे, त्रि । इति मेदिनी । मे, २२ ॥ (यथा, महाभारते । १ । १३६ । २० ।
"भौमेन प्राविशद्भूमिं पार्थ्वेनाभवद्गिरिः ।
अन्तर्धानेन चाक्षेण पुनरन्तर्हितोऽभवत् ॥")
अम्बरः । इति धरणिः ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

भौमजलं, क्ली, (भूमि + अण् ।) भूमिसम्बन्धि-सलिलम् । तत् त्रिविधं यथा,—
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तकु ।
वह्निकृत कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निकृत् कफकृन्नित्यं विकारान् कुरुते बहून् ॥
साधारणन्तु मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥"
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तहृत् ॥
नद्यः शीघ्रवहा लघ्व्यः सर्व्वा याश्चामलोदकाः ।
गुर्व्व्यः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ॥
नदीसरस्तडागस्थं कूपप्रस्रवणादिजं ।
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
इति भावप्रकाशः ॥

भौमनः, पुं, (आदिसर्गे भवतीति भू + कर्त्तरि मन् । भूमा ब्रह्मा । तस्यापत्यम् । अण् । मन्नन्तत्वात् न टेर्लोपः ।) विश्वकर्म्मा । इति पुराणम् ॥ (यथा, महाभारते । १।२२६ । १२ ।
"ससर्ज्ज यं सुतपसा भौमनो भुवनप्रभुः ।
प्रजापतिरनिर्द्देश्यं यस्य रूपं रवेरिव ॥"

भौमरत्नं, क्ली, (भूमौ जातं । भूमि + अण् । ताहृशं रत्नम् ।) प्रवालम् । इति राजनिर्घण्टः ॥

भौमिकः, त्रि, भूम्यधिकारी । भूमिमधिकरोति यः । इत्यर्थे ष्णिकप्रत्ययेन निष्पन्नः ॥ (भूमिस्थितः । यथा, मनौ । ५ । १४२ ।
"स्पृशन्ति विन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥")

भौमी, स्त्री, (भूम्यां जाता । भूमि + अण् + स्त्रीत्वात् ङीप् ।) सीता । इति शब्दरत्नावली ॥

भौरिकः, पुं, (भूरि सुवर्णमधिकरोतीति ठक ।) कनकाध्यक्षः । इत्यमरः । २ । ७ ॥

भ्रन्श, ऋ ण टु ङ भासि । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-सेट् ।) ऋ अबभ्रन्शत् । ण भेन्शे बभ्रन्शे । टु भ्रन्शथुः । ङ भ्रन्शते । इति दुर्गादासः ॥

भ्रन्श, य ङ भासि । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-अक०-सेट् ।) य ङ भ्रन्श्यते । इति दुर्गादासः ॥

भ्रन्स, ऋ ण ङ टु भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्० ।) ऋ अबभ्रन्सत । ण भेन्से बभ्रन्से । ङ भ्रन्सते । टु भ्रन्सथुः । इति दुर्गादासः ॥

भ्रन्स, य ङ भासि । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक-०सेट् ।) य ङ भ्रन्स्यते । इति दुर्गादासः ॥

भ्यस, ङ भये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) अन्तःस्थाद्ययुक्तः । ङ भ्यसते । इति दुर्गादासः ॥

भ्रंशः, पु, (भ्रन्श + भावे घञ् ।) अधःपतनम् । यथा । भ्रंषो भ्रंशो यथोचितात् । इत्यमरः । २ । १८६ । २३ ॥ यथोचितात् यथाप्राप्तात् भ्रंशोऽधःपतनम् । इति भ्रेषशब्दटीकायां भरतः ॥ (यथा, कामन्दकीये नीतिसारे ।२।३६।
"उद्दण्डनादधर्म्मस्तु तस्माद् भ्रंशो महीपतेः ॥"
नाशः । यथा, बृहत्संहितायाम् । ४६ । २५ ।
"शाखाभङ्गेऽकस्मात्
वृक्षाणां निर्द्दिशेद्रणोद्योगम् ।
हसने देशभ्रंशं
रुदिते च व्याधिबाहुल्यम् ॥")

भ्रकुंशः, पुं, (भ्रुवा कुंशो भाषणं यस्य । पृषोदरादित्वात् सस्य शः ।) स्त्रीवेशधारी नर्त्तकपुरुषः । इत्यमरटीकायाम् ॥ (अस्य विशेषो भ्रकुंसशब्दे द्रष्टव्यः ॥)

भ्रकुंसः, पुं, (भ्रुवा कुंसो भाषणं शोभा वा यस्य सः ।६। ३ । ६१ । इत्यस्य "भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ।" इति वार्त्तिकोक्त्या उकारस्यात्वम् ।) स्त्रीवेशधारी नर्त्तकपुरुषः । तत्पर्य्यायः । भ्रुकुंसः २ भ्रूकुंसः ३ । इत्यमरः । १।७।१४॥ भ्रकुंसः ४ भ्रकुंशः ५ । इति तट्टीका ॥

भ्रकुटिः, स्त्री, (भ्रुवोः कुटिः कौटिल्यम् । "भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ।" ६।३।६१ । इत्यस्य वार्त्तिकोक्त्या । उकारस्यात्वम् ।) क्रोधादिना भ्रुवः कौटिल्यम् । इत्यमरः ।१।७। ३७ ॥ अस्या रूपान्तराणि । भ्रुकुटिः । भ्रूकुटिः । भृकुटिः । भ्रकुटी । भ्रुकुटी । (यथा, माघे ।१५।८।
"भ्रुकुटीकठोरितललाटमाननम् ।")
भ्रूकुटी । भृकुटी । इति भरतः ॥

भ्रश, शुब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफयुक्तः । भ्रशति । इति दुर्गादासः ॥

भ्रन्श, इर् य उ अधःपते । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) भ्रश्यति । इर् अभ्रशत् । अभ्रंशीत् ॥

भ्रन्श, ल उ ङ अधःपते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०सेट् ।) ल्ह अभ्रशत् । उ भ्रंशित्वा भ्रष्ट्वा । ङ भ्रंशते । इति दुर्गादासः ॥

भ्रम, इर् चाले । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) इर् अभ्रमत् अभ्रमीत् । इति दुर्गादासः ॥

भ्रम, भ य चाले । इति कविकल्पद्रुमः ॥ 'दिवा०-पर०-अक०-सेट् ।) भ य भ्राम्यति । इति दुर्गादासः ॥

भ्रम उ ज ण चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० अक०-सेट् ।) उ भ्रमित्वा भ्रान्त्वा । ज भ्रामः भ्रमः । ज्वलादित्वाण्प्रत्ययेऽपि अनवध इत्यादिना ह्रस्वे भ्रम इत्येव । तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादय. । वस्तुतस्तु । ज्वलादिपाठसामर्थ्यान्न ह्रस्वः । ण भ्रेमतुः बभ्रमतुः । य भ्राम्यति भ्रमति । चाल इह पादविहरणम् ।

"न जाने को हेतुर्भ्रमति विपिने भिक्षुक इव ।"

भ्रमः शिलोच्चयान् भीमानित्यत्र गत्यर्थविवक्षया सकर्म्मकत्वम् । इति दुर्गादासः ॥

भ्रमः, पु, (भ्रमु अनवस्थाने इति । भ्रम+भावे घञ् ।) मिथ्याज्ञानम् । (यथा, राजतरङ्गिण्याम् । ३ । ४२३ ।

"देवी जगाद तं भद्र । कोऽयं ते मनसि भ्रमः ॥")

तत्पर्य्यायः । भ्रान्तिः २ मिथ्यामतिः ३ । इत्यमरः । १ । ५ । ४ । अम्बुनिर्गमः । कुन्दः । (यथा, रघौ । ६ । ३२ ।

"अवन्तिनाथोऽयमुदग्रबाहु-
विशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णतेजाः
त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥"

"चक्रभ्रमं चक्राकारशस्त्रोत्तेजनयन्त्रम् ।
भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके ॥"
इति तट्टीकायां मल्लिनाथः ॥)

भ्रमणम् । इति मेदिनी । मे, २० ॥ (यथा, कथासरित्सागरे । २७ । ४६ ।

"एव क्लिष्टा यदृच्छत् तं भ्रमाय वणिक्-सुतम् ।")

न्यायमते भ्रमस्य नामान्तरं अप्रमा । भ्रमो द्विविधः । विपर्य्यासः संशयश्च । आद्यो यथा । देहे आत्मबुद्धिः । शङ्खादौ पीततामतिः । सा निश्चयरूपा । द्वितीयो यथा । किंस्विन्नरो वा स्थाणुर्वा इत्यादिबुद्धिः । तस्य कारणम् । पित्तदूरत्वमोहभयादिनानाविधदोषः । यथा,

"अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते ।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः ।
आद्यो देहे यात्मबुद्धिः शङ्खादौ पीततामतिः ॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते ।
किंस्विन्नरो वा स्थाणुर्व्वेत्यादिबुद्धिस्तु संशयः ॥
तदभावप्रकारा धीस्तत्प्रकारा तु निश्चयः ।
स संशयो भवेद् या धीरेकत्राभावभावयोः ॥
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम् ।
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ॥
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ।"
इति भाषापरिच्छेदः । १२७—१३२ ॥

(भ्रमणशीले, त्रि ॥ यथा, ऋग्वेदे । ६ । ६ । ४ ।

"अधभ्रमस्त उर्व्विया विभाति
यातयमानो अधिसानुपृश्नेः ॥"

"भ्रमो भ्रमणशीलो ज्वालासमूहः ॥" इति तद्भाष्ये सायनः ॥ रोगविशेषः । तद्यथा,—

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्व्वदा ।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः ॥"
इति वैद्यकमाधवकृतरुग्विनिश्चये मूर्च्छाधिकारे ॥

तथाचास्य चिकित्सा ॥

"शतावरी बलामूलद्राक्षासिद्धं पयः पिबेत् ।
ससितं भ्रमनाशाय बीजं वाट्यालकस्य च ॥
पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ।
त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा ॥
इति वैद्यकचक्रपाणिसंग्रहे मूर्च्छाद्यधिकारे ॥)

भ्रमणं, क्ली, (भ्रम+भावे ल्युट् ।) गमनविशेषः । पर्य्यटनम् । (यथा, भाषापरिच्छेदे ।७।

"भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च ॥"

पुनःपुनर्गमनम् । यथा, देवीभागवते ।१।१४।६३॥

"संसारेऽस्मिन्महाघोरे भ्रमणं नभचक्रवत् ॥"

तथाच, कामन्दकीये । १४ । २४ ।

"नवाग्निधूमसंरोधो दिङ्मोहो भ्रमणानि च ॥"

"भ्रमणानि दिग्भ्रमात् दुर्गमप्रदेशेषु चंक्रमणानि ।"

भ्रमत्यस्मिन्ननेनेति वा । भ्रम+ल्युट् ।) मण्डलम् । यथा, सूर्य्यसिद्धान्ते । १२ । ७६ ।

"कालेनाल्पेन भ्रमणं भुङ्क्तेऽल्पभ्रमणाश्रितः ।
ग्रहः कालेन महता मण्डले महति भ्रमन् ॥"

अल्पभ्रमणं स्वल्पपरिधिमण्डलमानमित्यर्थः । उत्तरपदे मण्डले महतीति दर्शनात् ॥")

हस्त्यश्वरथदोलादिद्वारा भ्रमणगुणाः । वातकोपनत्वम् । अङ्गस्थैर्य्यकरत्वम् । बलाग्निविवर्द्धनत्वञ्च । इति राजवल्लभः ॥

भ्रमणी, स्त्री, (भ्राम्यति अनयेति भ्रम+करणे ल्युट् । ङीप् ।) कारण्डिका । अधीशितु. क्रीडाख्या । इति मेदिनी । ने, ६६ ॥

भ्रमत्कुटी, स्त्री, (भ्रमन्ती चलन्ती कुटी क्षुद्रगृहमिव ।) तृणादिच्छत्रम् । तत्पर्य्यायः । कावारी २ जङ्गलकुटी । इति त्रिकाण्डशेषः ॥

भ्रमरः, पु, (भ्रमति प्रतिकुसुममिति ॥ अर्त्तिकमीत्यादिना । "उणा० ३।१३२। इति अरः ।) कीटविशेषः । (यथा, रघुवंशे । ८ । ३८ ।

"भ्रमरैः कुसुमानुसारिभिः ।")

तत्पर्य्यायः । मधुव्रतः २ मधुकरः ३ मधुलिट् ४ मधुपः ५ अली ६ द्विरेफः ७ पुष्पलिट् ८ भृङ्गः ९ षट्पदः १० अलिः ११ । इत्यमरः । २ । ५ । २९ ॥ कलालापः १२ शिलीमुखः १३ पुष्पन्धयः १४ मधुलत् १५ द्विपः १६ भसरः १७ चञ्चरीकः १८ सुकाण्डी १९ मधुलोलुपः २० इन्दिन्दिरः २१ मधुमारकः २२ । इति राजनिर्घण्टः ॥ मधुपरः २३ लम्बः २४ पुष्पकीटः २५ मधुसूदनः २६ भृङ्गराजः २७ मधुलेही २८ रेणुवासः २९ । इति शब्दरत्नावली ॥ कामुकः । इति मेदिनी । रे, १९१ ॥

भ्रमरकः, पु, (भ्रमर इवेति भ्रमर+"इवे प्रतिकृतौ ।" ५ । ३ । ९६ । 'इति कन् ।) ललाटलम्बितचूर्णकुन्तलः । इत्यमरः । २ । ६९६ ॥ (स्वार्थे कन् । भृङ्गः । बालक्रीडकः । इति । मेदिनी । के, २०४ ॥ अम्बुभ्रमः । इति विश्वः ॥

भ्रमरकीटः, पु, (भ्रमर इव कीटः ।) कीटविशेषः । कुमुरे पोका इति भाषा ॥ यथा,—

"जीवन्मुक्तिस्तु तद्विद्वान् पूर्व्वोपाधिगुणांस्त्यजेत् ।
सच्चिदानन्दधर्म्मत्वाद् भजेद् भ्रमरकीटवत् ॥"
इत्यात्मबोधः ॥

भ्रमरच्छल्ली, स्त्री, (भ्रमरान् छलयतीति । छलि+अच् । गौरादित्वात् ङीष् ।) लताविशेषः । तत्पर्य्यायः । भृङ्गाह्वा २ भ्रमरा ३ भृङ्गमल्लिका ४ । अस्या गुणाः । यथा, राजनिर्घण्टे ।

"भृङ्गच्छल्ली च कटुका तिक्ता दीपनरोचनी ।"

भ्रमरप्रियः, पु, (भ्रमरस्य प्रियः ।) धाराकदम्बः । इति रत्नमाला ॥

भ्रमरमारी, स्त्री, (भ्रमरान् मारयति गन्धोत्कर्षेण व्याकुलयतीति । मृ+णिच्+अण् । गौरादित्वात् ङीष् ।) मालवदेशप्रसिद्धपुष्पवृक्षविशेषः । तत्पर्य्यायः । भ्रमरारिः २ भृङ्गारिः ३ भृङ्गमारी ४ मांसपुष्पिका ५ कुष्ठारिः ६ भ्रमरी ७ यष्टिलता ८ । अस्या गुणाः । तिक्तत्वम् । पित्तश्लेष्मज्वरनाशित्वम् । शोफकण्डूतिकुष्ठव्रणदोषत्रिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

भ्रमरा, स्त्री, (भ्रमर+अजादित्वात् टाप् ।) भ्रमरच्छल्ली । इति राजनिर्घण्टः ॥

भ्रमरातिथिः, पु, (भ्रमरः अतिथिरभ्यागतो यस्य ।) चम्पकः । इति राजनिर्घण्टः ॥

भ्रमरानन्दः, पु, (मधुबाहुल्यात् भ्रमराणामानन्दो यस्मात् सः ।) वकुलः । अतिमुक्तकः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

भ्रमरालकः, पु, (भ्रमर इव अलति भूषयतीति । अल+ण्वुल् ।) ललाटस्थितचूर्णकुन्तलः । तत्पर्य्यायः । भ्रमरकः २ कुरलः ३ । इति हेमचन्द्रः । ३ । २३३ ॥

भ्रमरी, स्त्री, (भ्रमर+ङीष् ।) जतुका । पुत्रदात्री । षट्पदी । इति राजनिर्घण्टः ॥

भ्रमरेष्टः, पु, (भ्रमराणामिष्टः ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

भ्रमरेष्टा, स्त्री, (भ्रमराणामिष्टा ।) भार्गी । भूमिजम्बूः । इति राजनिर्घण्टः ॥

भ्रमरोत्सवा, स्त्री, (भ्रमराणां उत्सवः प्रमोदो यस्याः ।) माधवी । इति राजनिर्घण्टः ॥

भ्रमासक्तः, पुं, (भ्रमे भ्रमणे आसक्तः युक्तः ।) शस्त्रमार्जकः । इति हेमचन्द्रः । ३ । ५८० ॥

भ्रमिः, स्त्री, (भ्रम + बाहुलकात् इः ।) भ्रमणम् । तत्पर्य्यायः । भ्रमः २ । इत्यमरः ।३।२।६॥ भ्रमी ३। इति भरतः ॥ (मण्डलाकारगतिः ४ । तथाच नैषधचरिते । १ । ७३ ।

"अयीकरत्वारुहयेन या भ्रमी-
र्निजातपत्रस्य तलस्थले नलः ।")

मण्डलाकारसैन्यरचना । यथा,—

"वीरान् सहस्रशो दृष्ट्वा भ्रमिभिः पर्य्यवस्थितान् ।
लवो लवेन सन्धाय शरान् रोषप्रपूरितः ॥
भ्रमिराद्या सहस्रेण द्वितीयायुतसञ्ज्ञया ।
तृतीयायुतयुग्मेन तुरीयायुतपञ्चभिः ॥
पञ्चमी लक्षयोधानां षष्ठी योधायुताधिकैः ।
सप्तमी लक्षयुग्मेन सप्तभिर्भ्रमिभिर्वृतान् ॥
मध्ये लवो भ्रमिव्याप्तः सञ्चरन् वह्निवत्तदा ।
दाहयामास सर्व्वान् वै सैनिकान् भ्रमिकारकान् ॥"

इति पाद्मे पातालखण्डे ६१ अध्यायः ॥

भ्रमी, [न्] त्रि, (भ्रम + इनि ।) भ्रमविशिष्टः । भ्रमो विद्यते अस्येति अस्त्यर्थे इन्प्रत्ययेन निष्पन्नः ॥

भ्रंश उ अधःपतने । इति कविकल्पद्रुमः ॥ (दिवां-परं०-अकं०-सेट् ।) य भ्रश्यति । उ भ्रंशित्वा भ्रष्ट्वा । इति दुर्गादासः ॥

भ्रष्टं, त्रि, (भ्रंश् + कर्त्तरि + क्तः ।) च्युतम् । अस्य पर्य्याया गलितशब्दे द्रष्टव्याः ॥

"अर्थाद्भ्रष्टस्तीर्थयात्रान्तु गच्छेत्
सत्याद्भ्रष्टो रौरवं वै व्रजेच्च ।
योगभ्रष्टः सत्यधृतिञ्च गच्छेत्
राज्याद्भ्रष्टो मृगयां वै व्रजेच्च ॥"

इति गारुडे नीतिसारे १०६ अध्यायः ॥

भ्रस्ज, औ श पाके । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) रेफयुक्तादिदन्त्योपधः । क्विपि संयोगादिलोपे भृट् । पाक इह भर्ज्जनम् । श भृज्जति भृज्जते मत्स्यं सूपकारः । औ अभ्राक्षीत् । इति दुर्गादासः ॥

भ्राज, ऋ ङ क टु भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्, ।) रेफयुक्तः । ऋ भ्राजते ङ भ्रेजे बभ्राजे । अनुबन्धबलात् संयोगादित्वेऽप्याकारस्याप्येत्वम् ॥ क अबिभ्रजत् अबभ्राजत् । टु भ्राजथुः । इति दुर्गादासः ॥

भ्राजकं, क्ली, (भ्राज् + "ण्वुल् तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) पित्तम् । इति शब्दचन्द्रिका ॥

भ्राजिष्णुः, त्रि, (भ्राज् + इष्णुच् ।) अलङ्कारादिना दीप्तियुक्तः । इत्यमरः । २ । ६ । १०१ ॥ (यथा, भागवते । २ । ६ । १२ ।

"भ्राजिष्णुभिर्यः परितो विराजते
लसद्विमाना वलिभिर्महात्मनाम् ॥")

विष्णौ, पुं । यथा, तस्य सहस्रनामस्तोत्रे ।

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥

भ्रातरौ, पुं, (भ्राता च भगिनी च । भ्रातृस्वसोरित्यादिना एकशेषः ।) भ्रातृभगिन्यौ । नित्यद्विवचनान्तोऽयम् । इत्यमरः । २ । ६ । ३६ ॥

भ्राता, [ऋ] पुं, (भ्राजते इति । भ्राज + "नप्तृनेष्टृत्वष्टृहोतृ" इति । उणा० । २ । ६६ । इति तृन् । निपात्यते च ।) एकगर्भजातः । "भाइ" इति भाषा । तत्पर्य्यायः । सहोदरः २ समानोदर्य्यः ३ सोदर्य्यः ४ सगर्भः ५ सहजः ६ सोदरः ७ । इति हेमचन्द्रः ॥ पितरि मृते ज्येष्ठभ्रातुः पितृतुल्यत्वम् । यथा,—

"ज्येष्ठो भ्राता पितृतुल्यो मृते पितरि शौनक ।
सर्व्वेषां स पिता हि स्यात् सर्व्वेषामनुपालकः ॥
कनिष्ठस्तेषु सर्व्वेषु समत्वेनानुवर्त्तते ।
समोपभोगजीवेषु यथैव तनयस्तथा ॥"

इति गारुडे ११४ अध्यायः ॥

तस्य भार्य्याहरणे तस्मै दायादाने च दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्याये ।

"भ्रातृजायापहारी च मातृगामी भवेन्नरः ।
ब्रह्महत्यासहस्रञ्च लभते नात्रसंशयः ॥
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ ।
तस्मादुत्तीर्य्य पापी च विष्ठायां जायते कृमिः ॥
वर्षकोटिसहस्राणि तत्र स्थित्वा च पातकी ।
ततो भवेन्महापापी वर्षकोटिसहस्रकम् ॥
पुंश्चलीयोनिगर्भे च कृमिश्चैव पुरन्दर ! ।
गृध्रः कोटिसहस्राणि शतजन्मानि कुक्कुरः ।
भ्रातृजायापहरणात् शतजन्मानि शूकरः ॥"
"यो ददाति न दायञ्च बलिष्ठो दुर्ब्बलाय च ।
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ ॥"

भ्रातुरन्वेषणे भ्राता न गच्छेत् । यथा,—

नारद उवाच ।

"हे हर्य्यश्वा महावीर्य्याः प्रजा यूयं करिष्यथ ।
ईदृशो लक्ष्यते यत्नो भवतां श्रूयतामिदम् ॥
बालिशा बत यूयं ये नास्या जानीत वै भुवः ।
अन्तरूर्द्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः ॥
ऊर्द्ध्वं तिर्य्यगधश्चैव यदाप्रतिहता गतिः ।
तदा कस्माद्भुवो नान्तं सर्व्वे द्रक्ष्यथ बालिशाः ॥
ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥
हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः ।
वैरिण्यामथ पुत्राणां सहस्रमसृजद्विभुः ॥
विवर्द्धयिषवस्ते तु सबलाश्वाः प्रजाः पुनः ।
पूर्व्वोक्तं वचनं ब्रह्मन्नारदेन प्रचोदिताः ॥
अन्योन्यमूचुस्ते सर्व्वे सम्यगाह महामुनिः ।
भ्रातॄणां पदवी चैव गन्तव्या नात्र संशयः ॥
ज्ञात्वा प्रमाणं पृथ्व्यास्तु प्रजाः स्रक्ष्यामहे पुनः ।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥
ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज ! ।
प्रयातो नश्यति तथा तन्न कार्य्यं विजानता ॥"

इति विष्णुपुराणे १ अंशे १५ अध्यायः ॥

अपि च, मात्स्ये ५ अध्याये ।

"ततः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति ।
अन्विष्यन् दुःखमाप्नोति तेन तं परिवर्जयेत् ॥"

ज्येष्ठभ्रातुर्गुरुत्वं यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ।
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

विभक्तानां तेषां धर्म्मवृद्धिर्यथा,—

व्यासः ।

"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते ।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते ॥
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा ।
स निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम् ॥"

ज्येष्ठभ्रातृप्रशंसा यथा,—

"बिभृयाद्वेच्छतः सर्व्वान् ज्येष्ठो भ्राता यथा पिता ।
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुलं स्थितिः ॥
कुटुम्बार्थेषु चोद्युक्तस्तत्कार्य्यं कुरुते तु यः ।
स भ्रातृभिर्बृहणीयो ग्रासाच्छादनवाहनैः ॥
अन्योन्यभेदो भ्रातॄणां सुहृदां वा बलान्तक ।
भवत्यागन्तव्य ! द्विषतां नात्र संशयः ॥" *॥

भ्रातृसंस्कारस्यावश्यकत्वम् । यथा, नारदः ।

"येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात् ॥
अविद्यमाने पित्र्यर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः ॥"

विभक्तानां तेषां साक्षित्वादि यथा,—

"साक्षित्वं प्रतिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"

इति दायतत्त्वम् ॥

भ्रातृकः, त्रि, (भ्रातुरागत इति । भ्रातृ + "ऋतष्ठञ् ।" ४ । ३ । ७८ । इति ठञ् । भ्रातुरागत धनादि ।) भ्रातृयोग्यः । इति सिद्धान्तकौमुदी ॥

भ्रातृजः, पुं, (भ्रातुः सहोदरात् जायते इति । जन् + "पञ्चम्यामजातौ ।" ३।२।६८। इति डः ।) भ्रातुरपत्यम् । तत्पर्य्यायः । भ्रात्रीयः २ । इत्यमरः । २ । ६ । ३६॥ भ्रातृव्यः ३ भ्रातृपुत्रः ४ । इति शब्दरत्नावली॥ (स्त्रियां टाप् । भ्रातृजा । भ्रातृपुत्त्राम् ॥)

भ्रातृजाया, स्त्री, (भ्रातुर्जाया ।) भ्रातृभार्य्या । (यथा, मेघदूते । १ । १० ।

"अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।")

तत्पर्य्यायः । प्रजावती २ । इत्यमरः ।२।६।३०॥

भ्रातृद्वितीया, स्त्री, (भ्रातृमङ्गलार्थं भ्रातृभोजनार्था वा द्वितीया इति मध्यपदलोपी कर्म्मधारयः ।) कार्त्तिकशुक्लद्वितीया । तद्विवरणं यथा । यमद्वितीया तु प्रतिपद्युता ग्राह्य-

युक्तं निर्णयामृतादौ । यमद्वितीया मध्याह्न-व्यापिनी पूर्व्वविद्धा चेति हेमाद्रिः । अत्र विशेषो हेमाद्रौ स्कान्दे ।

"ऊर्ज्जे शुक्लद्वितीयायामपराह्णेऽर्च्चयेत् यमम् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ॥
ऊर्ज्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ।
वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वाञ्छितम् ॥"

तथा भविष्ये ।

"प्रथमा श्रावणी मासि तथा भाद्रपदेऽपरा ।
तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिके भवेत् ॥
श्रावणी कलुषा नाम तथा भाद्रे च गोमती ।
आश्विने प्रेतसञ्चारा कार्त्तिके याम्यका मता ॥"

इत्युक्ता प्रथमायां व्रतं द्वितीयायां सरस्वती-पूजा तृतीयायां श्राद्धमुक्ता चतुर्थ्यामुक्तम् ।

"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्व्वं भोजितः स्वगृहेऽर्च्चितः ॥
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ।
अस्यां निजगृहे विप्र ! न भोक्तव्यं ततो नरैः ॥
स्नेहेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ॥
स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः ।
सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः ॥
प्रतिपन्ना मामाभगिन्य इति हेमाद्रिः ॥
पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर ! ।
मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप ! ॥
पितुर्म्मातुः स्वसुः कन्ये तृतीयायां तयोः करात् ।
चतुर्थ्यां सहजायाश्च भगिन्या हस्ततः परम् ।
सर्व्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनम् ॥
यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिजगत्स्वसृसौहृदेन ।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥

गौड़ास्तु ।

यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥

मन्त्रस्तु ।

एह्येहि मार्त्तण्डज । पाशहस्त !
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥"

ज्येष्ठाग्रजातेति वदेदिति स्मार्त्ताः ॥ इत्यन्न-दानमित्यप्याहुः । ब्रह्माण्डपुराणेऽपि ।

"या तु भोजयते नारी भ्रातरं युग्मके तिथौ ।
अर्च्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् ॥
भ्रातुरायुःक्षयो राजन् । न भवेत्तत्र कर्हिचित् ॥"

इति निर्णयसिन्धौ २ परिच्छेदः ॥

भ्रातृपत्नी, स्त्री, (भ्राता पतिर्यस्या इति भ्रातुः पत्नीति वा । नत्रेभ्यो ङीप् । इति ङीप् । ततः + "नित्यं सपत्न्यादिषु ।" इति नान्तादेशः ।) भ्रातृजाया । इति शब्दरत्नावली ॥

भ्रातृपुत्त्रः, पुं, स्त्री, (भ्रातुः पुत्त्रः ।) भ्रातृजः । इति शब्दरत्नावली । भाइपो इति भाषा ॥

भ्रातृभगिन्यौ, स्त्री, (भ्राता च भगिनी च । इति इतरेतरद्वन्द्वसमासः ।) भ्रातरौ । द्विवचना-न्तोऽयम् । इत्यमरः । २ । ६ । ३६ ॥

भ्रातृव्यः, पुं, (भ्रातुरपत्यमिति । "भ्रातुर्व्यच ।" ४ । १ ।१४४ । इति व्यत् ।) भ्रातृपुत्त्रः । (यथा, राजतरङ्गिण्याम् । ८ । २८४२ ।

"जयराजानुजं राज्ञा यशोराजं निवेशितम् ।
तस्मतेनावचस्कन्द भ्रातृव्यं राजकाभिधः ॥")

भ्रातृ + "व्यन् सपत्ने ।" ४ । १ । १४५ । इति व्यन् ।) शत्रुः । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । ११ । १७ ।

"भ्रातृव्यमेतं तमदभ्रवीर्य्य-
मुपेक्षयाध्येधितमप्रमत्तः ॥"

"तस्मात् भ्रातृव्यम् शत्रुम् ।" इति तट्टीकायां स्वामी ॥)

भ्रातृश्वशुरः पुं, (पत्युर्ज्येष्ठभ्राता श्वशुर इव पूज्य-त्वात् ।) पतिज्येष्ठभ्राता । भाशुर इति भाषा । तत्पर्य्यायः । श्वशुरकः २ । इति शब्दरत्ना-वली ॥ (भ्रातुः श्वशुरः ।) भ्रातुःपत्न्याः पिता च ॥

भ्रात्रीयः, पुं, (भ्रातुरपत्यं पुमानिति । भ्रातृ + "भ्रातुर्व्यच ।" ४ । १ । १४४ । इत्यत्र 'चकारा-च्छश्च ।' इति काशिकोक्तेः छ. ।) भ्रातृपुत्त्रः । इत्यमरः । २ । ६ । ३६ ॥ भ्रातृसम्बन्धिनि, त्रि ॥

भ्रान्तः, त्रि, भ्रमणयुक्तः । भ्रान्तिविशिष्टः । (अतीन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठाने ॥" इति सांख्यसूत्रम् । २ । २३ ॥)

भ्रमधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः ॥ भ्रमणे, क्ली । यथा, वाभटपशुपतिभ्यां व्याख्यातम् ।

"भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलम् ।"

भ्रान्तः, पुं, (भ्रम् + कर्त्तरि क्तः । "अनुनासिक-स्येति । ६ । ४ । १५ । इति दीर्घः ।) राज-धुस्तूरः । मत्तहस्ती । इति राजनिर्घण्टः ॥

भ्रान्तिः, स्त्री, (भ्रम् + क्तिन् । "अनुनासिकस्य क्विझलोः क्ङिति ।६। ४ ।१५ । इति दीर्घः ।) भ्रमः । इत्यमरः । १ । ५।४ ॥

("युक्तिहीनप्रकाशत्वाद् भ्रान्तेर्नह्यस्ति लक्षणम् ।
यदि स्याल्लक्षणं किञ्चिद्भ्रान्तिरेव न सिध्यति॥"

इति तार्किकाः ॥)

सा तु नराणां षष्ठमासे जायते । यथा,—

"षाण्मासिके तु संप्राप्ते भ्रान्तिः संजायते यतः ।
धात्राक्षराणि दृष्टानि पत्राक्तढान्यत. पुरा ॥"

इति ज्योतिस्तत्त्वम् ॥

भ्रमणम् । इति मेदिनी ॥ अनवस्थितिः । इति विश्वः ॥

भ्रान्तिहरः, पुं, (भ्रान्तिं हरतीति । हृ + कर्म्मणि पचाद्यच् ।) मन्त्री । इति शब्दमाला ॥ भ्रम-नाशके, त्रि ॥

भ्रामकः, पु, (भ्रामयति भ्रमं जनयतीति । भ्रम् + णिच् । "ण्वुल् तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) शृगालः । धूर्त्तः । सूर्य्यावर्त्तः । प्रस्तरभेदः । इति मेदिनी । के, १३३ ॥ चुम्बक पाथर इति भाषा । भ्रमजनके, त्रि ॥

भ्रामरं, क्ली, (भ्रमरैः कृतं सम्भृतमिति । भ्रमर + "क्षुद्राभ्रमरवटरपादपादञ् ।" ४।३। ११९। इति अञ् ।) मधु । इति मेदिनी । रे, १६१ ॥ तत्तु भ्रमरजमधु । तस्य गुणाः । पिच्छलत्वम् । रूक्षत्वम् । मधुरत्वम् । मुखजाड्यनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

पैच्छिल्यात् स्वादु भूयस्त्वात् भ्रामरं गुरु कीर्त्तितम् ।"

इति राजवल्लभः ।

अन्यच्च ।

"किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभि-श्चितम् ।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छलं हिमम् ॥"

इति भावप्रकाशः ॥

नृत्यविशेषः । तत्पर्य्यायः । रासः २ मण्डल-नृत्यम् ३ हल्लीसम् ४ । इति शब्दमाला ॥ भ्रमरसम्बन्धिनि त्रि । यथा,—

"नानाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम् ।"

इति देवीमाहात्म्यम् ॥

(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये । मध्वर्थे लक्षणं गुणाश्च ।

"शीतं कषायं मधुरं लघु स्यात्
सन्दीपनं लेखनमेव शस्तम् ।
संशोधनन्तु व्रणशोधनञ्च
संरोपणं हृद्यतमञ्च बल्यम् ॥
त्रिदोषनाशं कुरुते च पुष्टिं
कासे क्षये वा ज्वतने च छर्द्दौ ।
हिक्काभ्रमे शोषविसर्पकासानां
रक्तप्रमेहे च तथातिसारे ॥
रक्तातिसारे च सरक्तपित्ते
दुष्टोद्धृत्पार्श्वगदेऽपि शस्तम् ।
नेत्रामये वा ग्रहणीगदे वा
विषे प्रशस्तं भ्रमरैश्चितं यत् ॥
भ्रामरं सघनं जाड्यं भूयिष्ठं मधुरञ्च यत ।
रूक्षं विशदनो ज्ञेयं शीतलं लघुलेखनम् ॥')

भ्रामरः पुं, (भ्रामयति लौहमिति । भ्रामि + "अर्त्तिकमिभ्रमिदेवीति ।" उणा० ३ । १३२ । इति अरः । बाहुलकात् दीर्घश्च ।) प्रस्तरभेदः । मेदिनी । रे, १६१॥ चुम्बक पाथर इति भाषा ॥ (अपस्माररोगः । इति भ्रामरी त्रि । यथा, मनौ । ३ । १६१ ।

"भ्रामरी गण्डमाली च श्वित्र्यथो पिशुन-स्तथा ॥"

"भ्रामरी अपस्मारी ।" इति तद्भाष्ये मेधा-तिथिः ॥)

भ्रामरी, स्त्री, (भ्रमरस्यायं भ्रामरो भ्रमरवद्-वर्णः । सोऽस्या अस्तीति । अर्श आद्यच् ।

ङीप्।) पार्व्वती। इति त्रिकाण्डशेषः॥ यथा, मार्कण्डेये। ९१। ४७-४९।

"यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्व्वतः॥"

भ्राश, ऋ ङ ण टु } भासि। इति कविकल्पद्रुमः॥
भ्लाश, य ङ } (भ्वा०-आत्म०-अक० सेट्। द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ङ भ्राश्यते। ऋ अबभ्राशत्। स्वमते अनयोर्भ्राडिद्भ्वविकल्पनेऽपि सप्तमस्वरानुबन्धोऽन्येषामनुरोधात्। ण भ्रेशे बभ्राशे। टु भ्राशथुः। ङ भ्राशते। भासि दीप्तौ। इति दुर्गादासः॥

भ्राष्टं, क्ली, (भ्रस्ज+ष्ट्रन्।) आकाशम्। अम्बरीषम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भ्राष्ट्रः, पुं, (भृज्ज्यते अत्रेति। भ्रस्ज+"भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च।" उणा०। ४। १५९। इति। ष्ट्रन्।) यत्र कलायचणकादिकं भृज्यते सः। भाजना खोला इति ख्यातः। (यथा, नैषधचरिते। ३। १२८।

"रौद्रे चक्षुषि तज्ज्वलत्स्मरममुम्भ्राष्ट्रं च य-
श्चिक्षिपे॥"

"अनुभ्राष्ट्रं भर्ज्जनपात्रसदृशेन।" इति तट्टीका।) तत्पर्य्यायः। अम्बरीषम् २। इत्यमरः।२।९।३०॥

भ्लाश, ऋ ङ श टु } भासि। इति कविकल्पद्रुमः॥
भ्लास, य ङ } भ्वा० आत्म० अक०-सेट्। द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ङ भ्लास्यते। ङ भ्लासते। ऋ अबभ्लासत्। ण भ्लेसे बभ्लासे। टु भ्लासथुः। इति दुर्गादासः॥

भ्रुकुंसः, पुं, (भ्रकुंसः। भ्रुकुंसः। भ्रकुंसः। भ्रूकुंसः। इति रूपचतुष्टयम्। "चुरादौ पठपुटेत्यादिदण्डके कुसिर्भाषार्थः। यः स्त्रीवेशं धारयित्वा भ्रुवः कुंसयतीति। एरच् प्रत्ययः। ह्रस्वश्च वा। इति अमरटीकायां रघुनाथचक्रवर्त्ती॥) स्त्रीवेशधारिनर्त्तकपुरुषः। इत्यमरः।१।७।११॥

भ्रुकुटिः, स्त्री, (भ्रुवः कुटि कौटिल्यमिति षष्ठीसमासः। अभ्रुकुंसादीनामिति वा ह्रस्वः।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, महाभारते।७। ७६२।

बद्धा च भ्रुकुटिं वक्त्रे क्रोधस्य परिलक्षणम्॥")

भ्रुकुटी, स्त्री, (भ्रुकुटि। कृदिकारादिति पक्षे ङीष्।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, माघे। १५। ६।

"भ्रुकुटीकटोरितललाटमाननम्॥")

भ्रूः, स्त्री, (भ्राम्यति नेत्रोपरि इति। भ्रम्+"भ्रमेश्च डूः।" उणा० २। ६८। इति डूः।) दृगूर्द्ध्वभागः। तत्पर्य्यायः। चिल्लिका २ नयनोर्द्ध्वभागरोमराजी३। इति राजनिर्घण्टः॥ तल्लक्षणम् यथा, गारुड़े ६६ अध्याये।

"विशालोन्नता सुखिनि दरिद्रा विषमभ्रुवः।
धनी दीर्घा संसक्तभ्रूर्बालेन्दुनतसभ्रुवः।
आशा निस्वश्च खण्डाभ्रूर्मध्याश्च विनतभ्रुवः॥"

अत्र षट्चक्रान्तर्गताज्ञाख्यचक्रमस्ति। तत्तु हक्षवर्णद्वययुक्तद्विदलपद्माकारम्। तन्मध्ये मनस्तिष्ठति। यथा,—

"आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यान-
धामप्रकाशं
हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं
सुशुभ्रम्।
तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं
दधाना
विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती
शुद्धचित्ता॥
एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं
प्रसिद्धम्॥"

इति श्रीतत्त्वचिन्तामणौ षष्ठप्रकाशः॥

(विषयोऽस्या यथा,—

"भ्रुवोर्वा यदि वा मूर्द्ध्नि सीमन्तावर्त्तकान् बहून्।
अपूर्व्वानकृतान् व्यक्तान् दृष्ट्वा मरणमादिशेत्॥
षाडमेतं न जीवन्ति लक्षणेनातुरा नराः।
अरोगाणां पुनस्त्वेतत् षड्रात्रं परमुच्यते॥"

इति चरके इन्द्रियस्थाने अष्टमेऽध्याये॥

कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनवृषपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विशल्लिरक्तुलयः। इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

भ्रूकुंसः, पुं, (भ्रू+कुंस+अच्। स्त्रीवेशधारी नर्त्तकपुरुषः। इत्यमरः। १। ७। ११।

भ्रूकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यम्। क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः॥

भ्रूण, क ङ आशाविशङ्कयोः। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) रेफयुक्तमूर्द्धन्यणकारवान्। क ङ भ्रूणयते भद्रं लोकः। आशाविषयं करोतीत्यर्थः। इति दुर्गादासः॥

भ्रूणः, पुं, (भ्रूणयते आशास्यते इति। भ्रूण+घञ्।) बालकः। स्त्रीगर्भः। इत्यमरः २।६।३९॥ (स्त्रीवर्णपि। यथा, ऋग्वेदे। १०। १५५। २।

"चत्तो इतश्चत्तामुतः सर्व्वाभ्रूणान्यारुषी॥")

अथ गर्भाधानदिनम्। रजोदर्शनावधिषोडशदिनपर्य्यन्तं ऋतुकालः। तत्राद्यास्तस्रो निशाः परित्यज्य चतुर्दश्यष्टमी अमावास्या पूर्णिमा सूर्य्यसंक्रान्तिः पर्व्वाण्येतानि परित्यज्य च अन्यासु रात्रिषु चन्द्रादिशोभने काले भार्य्यामुपगच्छेत्। युग्मरात्रिषु गमने पुत्त्रो भवेत्। अयुग्मरात्रिषु गमने कन्या भवेत्। तत्र प्रशस्तनक्षत्राणि पुष्यः हस्ता मृगशिरा आर्द्रा पुनर्व्वसुः पूर्व्वाषाढा उत्तराषाढा श्रवणा पूर्व्वभाद्रपदुत्तरभाद्रपत्। तत्र निषिद्धनक्षत्राणि। ज्येष्ठाश्लेषा मघा मूला रेवती कृत्तिकाश्विनी उत्तरफल्गुनी। तत्र तिथयः नन्दा भद्राः प्रशस्ताः। रिक्ता निषिद्धाः। तत्र रविमङ्गलबृहस्पतिवाराः प्रशस्ताः। इति समयप्रदीपः॥

भ्रूणहत्या, स्त्री, (हननं हत्या। हन्+भावे क्यप्। भ्रूणस्य हत्या इति षष्ठीसमासः।) गर्भस्थबालकहननम्। यथा,—

"त्रिविवाहं कृतं येन न करोति चतुर्थकम्।
कुलानि पातयेत् सप्त भ्रूणहत्याव्रतञ्चरेत्॥"

इत्युद्वाहतत्त्वम्॥

भ्रूणहा, [न्] त्रि, (भ्रूणं हन्तीति। भ्रूण+हन्+"ब्रह्मभ्रूणवृत्रेषु।" ३। २। ८७। इति क्विप्।) गर्भस्थबालकहन्ता। भ्रूणं हन्ति इति भ्रूणशब्दोपपदहनधातोष्टप्रत्ययेन निष्पन्नः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, महाभारते। १। ८३। ३४।

"ऋतुं वै याचमानाया न ददाति पुमानृतुम्।
भ्रूणहेत्युच्यते ब्रह्मन्। स इह ब्रह्मवादिभिः॥")

तस्य प्रायश्चित्तम्। तत्र पुंस्त्वेन ज्ञाते पुंवधप्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः।

"हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्।
गर्भहा च यथावर्णं तथात्रेयीनिसूदनः॥"

इति प्रायश्चित्तविवेकः॥

(ब्रह्महन्ता। यथा, मनुः। ८। ३१७।

"अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी॥"

"भ्रूणहा ब्रह्महा।" इति तद्भाष्ये मेधातिथिः॥)

भ्रूभङ्गः, पुं, (भ्रुवो भङ्गः।) भ्रुवः कौटिल्यम्। यथा,

"क्षुद्राः सन्त्रासमेते विजहत हरयो भिन्नशक्रेभ
कुम्भा
युष्मद्देहेषु लज्जां दधति परममी शायका
निष्पतन्तः।
सौमित्रे तिष्ठ पात्रं त्वमपि नहि रुषां नन्वहं
मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वे-
षयामि॥"

इति काव्यप्रकाशः॥

भ्रेज, ऋ ङ भासि। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-अक०-सेट्।) रेफयुक्तः। ऋ अबिभ्रेजत्। ङ बिभ्रेजे। इति दुर्गादासः॥

भ्रेष, ऋ ञ चले। भये। इति कविकल्पद्रुमः॥ (भ्वा० उभ०-अक०-सेट्।) रेफयुक्तः। ऋ अबिभ्रेषत्। ञ भ्रेषति भ्रेषते धर्म्मात् खलः। बिभ्रेषे। इति दुर्गादासः॥

भ्रेषः, पुं, (भ्रेष् चलने+भावे घञ्।) तथाच यथोचितादुभ्रंशः। इत्यमरः॥ (यथा, पातञ्जलभाष्ये। ३।१२। "आसमाधिभ्रेषात्।" इति।) चलनम्। इति भ्रेषधात्वर्थदर्शनात्॥

भ्रेषणं, क्ली, (भ्रेष+भावे ल्युट्।) चलनम् इति भ्रेषधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥

भ्लुच, ञ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ० सक०सेट।) अन्तःस्थलतीयोपधः। ञ भ्लुचति भ्लुचत। लस्थाने सप्तमस्वर इति दुर्गसिंहः। इति दुर्गादासः॥

म

म मकार:। स तु पञ्चविंशतितमव्यञ्जनवर्ण:। अस्योच्चारणस्थानमोष्ठ:। इति व्याकरणम्॥ ("उपूपध्मानीयानामोष्ठौ।" इति सिद्धान्तकौमुदी॥) अस्य स्वरूपं यथा,—
"मकारं शृणु चार्व्वङ्गि। स्वयं परमकुण्डली।
तरुणादित्यसङ्काशं चतुर्व्वर्गप्रदायकम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।"
इति कामधेनुतन्त्रम्॥

(वङ्गीयाक्षरे:) अस्य लेखनप्रकार:। यथा,—
"ऊर्द्धाध:क्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव तत ऊर्द्ध्वगता पुन:।
ब्रह्मा शम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति॥"
अस्य ध्यानं यथा,—
"कृष्णां दशभुजां भीमां पीतलोहितलोचनाम्
कृष्णाम्बरधरां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्॥"
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंयुक्तं हृदिस्थं प्रणमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥

तस्य नामानि।
"म: काली कीलित: कालो महाकालो महान्तक:।
वैकुण्ठो वसुधा चन्द्री रवि: पुरुषराजक:॥
कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञक:।
जठरश्च भ्रमा मानं लक्ष्मीर्मातीशबन्धनौ॥
विषं शिवो महावीर: शशिप्रभा जनेश्वर:।
प्रमत्त: प्रियस्त रुद्र: सर्व्वाङ्गो वह्निमण्डलम्।
मातङ्गमालिनी बिन्दु: श्रवणा भरणो वियत्॥"३६॥
इति तन्त्रोक्तवर्णाभिधानम्॥

म:, पु, (माति निर्म्माति जगदिति। मा+क:।) शिव:। चन्द्रमा:। ब्रह्मा। इत्येकाक्षरकोष:॥ यम:। समय:। विषम्। मधुसूदन:। इति मेदिनी। मे, १॥

मक, इ ङ भूषे। गतौ। इति कविकल्पद्रुम:। (भ्वा०-आत्म०-सक०-सेट्।) इ मङ्क्यते। ङ मङ्कते हारो जनम्। गत्यर्थोऽप्ययमिति राम:। इति दुर्गादास:॥

मकर:, पु, (मृणातीति। मृ हिंसायाम्। मृ+अच्। तत: मनुष्याणां कर: हिंसक:। यद्वा, सुखं किरतीति। सुख+कृ+क:। उभयत्रापि पृषोदरादित्वात् साधु:। इति अमरटीकायां रघुनाथचक्रवर्त्ती।) जलजन्तुविशेष:। इत्यमर:। १। १०। २०॥ (पादिनां गणान्तर्गतो जलजन्तुविशेष:।
"कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कव:।
घण्टिक: शिशुमारश्चेत्यादय: पादिन: स्मृता:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे। यथास्य गुणा:।
"मत्स्यानां मकर: श्रेष्ठो दीपनो वातनाशन:।
रुचिप्रद: शुक्रकरो ग्राही शोथविकारहा।
मूत्राश्मरीणां शमनो गुल्मातीसारनाशन:॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये॥) मकर इति गङ्गाया वाहनत्वेन ख्यात:। इति सारसुन्दरी। यथा। सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रामित्यादि स्मृत्युक्तगङ्गाध्यानम्॥ स च कामदेवस्य ध्वजचिह्नम्। मकरध्वज इत्यमरकोषदर्शनात्। मेषादिद्वादशराश्यन्तर्गतो दशमराशि:। तत्पर्य्याय:। आकोकेर:७। अस्य अधिष्ठातृदेवता मृगास्यमकर:। उत्तराषाढाया: शेषपादत्रयं श्रवणासमुदाय: धनिष्ठाया: पूर्व्वार्द्धं एतन्नवपादेन भवति। स च पृष्ठोदय: भूमिराशि: अर्द्धशब्दकर: दक्षिणदिक्स्वामी पिङ्गलवर्ण: चर: भूमिचारी शीतलस्वभाव: अल्पसन्तान: अल्पस्त्रीसङ्ग: वातप्रकृति: वैश्यवर्ण: श्लथाङ्गश्च। अत्र जातस्य फलम्। सदानन्द:। पितृमातृभक्त: श्रवणामकरजातश्चेत् बहुविवाह:। इति जातकादय:॥ अथ, रवियुक्तमकरजातफलम्।
"सदाटनो मित्रगणो विपश्चितां
प्रयाति नूनं धनवर्ज्जित: स्यात्।
यदुष्णरश्मिर्मकरोपग: स्यात्
प्रसूतिकाले स तु भाग्यहीन:॥"
अथ चन्द्रयुक्तमकरजातफलम्।
"कलितशीतभय: किल गीतवित्
तमरुषा सहितो मदनातुर:।
निजकुलोत्तमशक्तिकर: परं
हिमकरे मकरे पुरुषो भवेत्॥"
अथ मङ्गलयुक्तमकरजातफलम्।
"पराक्रमप्राप्तवर: प्रतिष्ठ:
सदङ्गनाप्राप्तिवराङ्गन: स्यात्।
श्रिया समेतो मकरे महीजे
प्रसूतिकाले कुलपालकश्च॥"
अथ बुधग्रहस्थितमकरजातफलम्।
"रिपुभयेन युत: कुमतिर्नर:
स्मरविहीननर: परकर्म्मठ:।
मकरगे सति शीतकरात्मजे
व्यसनत: स नत: पुरुषो भवेत्॥"
अथ गुर्व्वाश्रितमकरजातफलम्।
"न मनोरथसिद्धिमुपैति नरो
वचसामधिपे मकरोपगते।
भययुक् कुमति: परकर्म्मरतो
बहुतापयुतो मदनापहृत:॥"
अथ शुक्राश्रितमकरजातफलम्।
"अतिरतिर्जनने त्वजननं वृथा
व्ययभयं कृशता बहुचिन्तया।
भृगुसुते मृगराशिगते सदा
कविजने विजनेऽपि मतिर्भवेत्॥"
अथ शनिग्रहस्थितमकरजातफलम्।
"मकरोपगत: खलु भानुसुत:
कृपया सहितो शुभमानयुत:।
वरगन्धविभूषणभूषितगात्र-
स्तरुणीरमण: पङ्कजनेत्र:॥"
इति कोष्ठीप्रदीप:॥
(व्यूहभेद:। यथा, कामन्दकीये नीतिसारे। १८। ४८।
"यायाद्व्यूहेन महता मकरेण पुरो भये॥")

मकरकुण्डलं, क्ली, (कुण्डलम् मकर इवेत्युपमितसमास:।) मकराकृतिकर्णभूषणम्। यथा,
"वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभ:।
महाकिरीटकटक: स्फुरन्मकरकुण्डल:॥"
इति श्रीभागवते ६ स्कन्धे ४ अध्याय: ३७ श्लोक:॥ स्फुरती मकरकुण्डले यस्य स:। इति तट्टीकायां श्रीधरस्वामी॥

मकरकेतन:, पुं, (मकरेण चिह्नितं केतनं ध्वजो यस्य।) कन्दर्प:। इति मीनकेतनशब्दटीकायां भरतेन सङ्कलितम्॥

मकरध्वज:, पु, (मकरेण चिह्नितो ध्वजो यस्य।) कामदेव:। इत्यमर:। १। १। २७॥ (यथा, माघे। ३। ६१।
"शरीरिणा जैत्रशरेण यत्र
निश्शङ्कमूषे मकरध्वजेन॥")
रससिन्दूरविशेष:। तस्य नामान्तरं चन्द्रोदय:। तस्य करणप्रकारो यथा,—
"पलं मृदु स्वर्णदलं रसेन्द्रं
पलाष्टकं षोडशगन्धकस्य।
शोणै: सुकार्पासभवप्रसूनै:
सर्व्वं विमर्द्याथ कुमारिकाद्भि:॥
तत् काचकुम्भे निहितं सुगाढ़े
मृत्कर्पटैस्तद्दिवसत्रयञ्च।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे
ततो रज: पल्लवरागरम्यम्॥
निगृह्य चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव।
जातीफलं शोषणमिन्द्रपुष्पं
कस्तूरिकाया इह शाण एक:॥
चन्द्रोदयोऽयं कथितोऽस्य माषो
भुक्तोऽहिवल्लीदलमध्यवर्त्ती॥"
अस्य गुणा:।
"मदोन्मदानां प्रमदाशतानां
गर्व्वाधिकत्वं श्लथयत्यकाण्डे।
दृढ़ं घनीभूतमतीव दग्धं
मृदूनि मांसानि समस्तकानि।
मांसानि मिष्टानि भवन्ति पथ्य-
मानन्ददायीन्यपराणि चात्र॥
वलीपलितनाशनस्तनुभृतां वयस्तम्भन:
समस्तगदखण्डन: प्रचुरयोगपञ्चानन:।
गृहेषु रसराडयं भवति यस्य चन्द्रोदय:
स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभ:॥"
इन्द्रपुष्पं लवङ्गम्। उक्तपरिमाणलघुसुपलक्षणम्। दाक्षिणात्या: शोणकार्पासपुष्पद्रवमेव गृह्णन्ति। पाश्चात्या: निर्द्दन्ततत्पुष्पैरेव यावदार्द्रत्वं मर्द्दयन्ति। उभयथैव निष्पत्तिरदोष:।

तथैवेति सर्व्वेषान्वयः ।*। शास्त्रान्तराद्विशेषो लिख्यते ।
"रतिकाले रतान्ते च पुनः सेव्यो रसोत्तमः ।
स्थावरं जङ्गमविषं जङ्गमं विषवारि वा ।
न विकाराय भवति साधकेन्द्रस्य वत्सरात् ॥
न्त्यक्षयो यथाभ्यासात् न्त्यं जयति देहिनः ।
तथाय साधकेन्द्रस्य जरामरणनाशनः ॥"
शास्त्रान्तरे मकरध्वजो नाम । इति चन्द्रोदयः ।
इति रसेन्द्रचिन्तामणिः ॥

मकरन्दः, पु, (मकरमपि अन्दति बध्नाति धारयतीति वा । अदि बन्धने + अण् ततः शकन्ध्वादित्वात् साधुः ।) पुष्परसः । इत्यमरः । २ । ४ । १७ ॥ (यथा, रघौ । ४ । ८८ ॥
"प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥")
कुन्दपुष्पवृक्षः । किञ्जल्कं क्ली । इति राजनिर्घण्टः ॥

मकरन्दवती, स्त्री, (मकरन्दस्तत्सम्बन्धोऽस्या अस्तीति । मकरन्द + मतुप् । मस्य वः ङीप् ।) पाटलापुष्पम् । इति शब्दचन्द्रिका ॥ मधुविशिष्टे त्रि ॥

मकरव्यूहः, पु, (मकरः मकराकारः व्यूहः ।) मकराकारसैन्यविन्यासः । इति महाभारतम् ॥

मकराकरः, पु, (मकराणामाकरः । षष्ठीतत्पुरुषः ।) समुद्रः । इति हेमचन्द्रः । १०७४ ॥ (यथा, कथासरित्सागरे । ४३ । १३७ ।
"मकराकरमुल्लङ्घ्य प्राप तत्तीरवर्त्ति सः ॥")

मकराकारः, पुं, (मकरस्येवाकारो यस्य ।) षड्ग्रन्थः । इति शब्दचन्द्रिका ॥ कॉटाकरञ्ज । इति भाषा ॥ मकरसदृशाकृतिश्च ॥

मकराङ्कः, पु, (मकरस्तदाकारोऽङ्कश्चिह्नं यस्य ।) कामदेवः । (मकरा अङ्केऽस्य ।) समुद्रः । इति जयपालः ॥

मकरालयः, पु (आलीयन्ते अस्मिन्निति आलयः । मकराणामालयः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १४ । ७६ । १२ ॥
"ततस्तं वारणं क्रुद्धं शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥")

मकरी, [न्] पु, समुद्रः । मकरोऽस्यास्तीति-व्युत्पत्त्या इनुप्रत्ययनिष्पन्नोऽयम् ॥

मकुटं, क्ली, (मङ्कते अनेनेति । मकि भूषणे + बाहुलकात् उटः । आगमशास्त्रस्यानित्यत्वात् न नुम् ।) मुकुटम् । इति भरतधृतद्विरूपकोषः ॥

मकुतिः, स्त्री, (मकि + उतिः । पृषोदरादित्वात् साधुः ।) शूद्रशासनम् । इति त्रिकाण्डशेषः ॥

मकुरः, पु, (मङ्कत इति । मकि + "मकुरदर्दुरौ ।" उणा० । १ । ४१ । इति उरच् ।) कुलालदण्डः । वकुलः । कोरकः । आदर्शः । इति हेमचन्द्रः । ३ । ३४८ ॥

मकुलः, पु, क्ली, (मङ्कते भूषयति इत्यम् । मकि + बाहुलकादुलच् ।) वकुलः । मकुलं । इति शब्दरत्नावली ॥

मकुष्ठकः, पुं, (मकि भूषायां + उः । पृषोदरादित्वात् साधुर्मकुः । मकुं भूषां स्तकति प्रतिहन्तीति । स्तक + पचाद्यच् ।) वनजातमुद्गः । मोठ इति हिन्दी भाषा ॥ मुगानि इति वङ्गभाषा । तत्पर्य्यायः । मयष्ठः २ वनमुद्गः ३ सर्मीलकः ४ अमृतः ५ अरण्यमुद्गः ६ वल्लीमुद्गः ७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । रक्तपित्तज्वरदाहहरत्वम् । पथ्यत्वम् । रुचिकारित्वम् । सर्व्वदोषजयकारित्वञ्च । इति राजनिर्घण्टः ॥
"मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके क्रमिकृज्ज्वरनाशनः ॥"
इति भावप्रकाशः ॥

मकुष्ठः, पु, (मङ्कते मङ्क्यते इति वा । बाहुलकात् उः मकुः । तिष्ठतीति स्था + कः स्थः । मकुश्चासौ स्थश्चेति मकुष्ठः । पूर्व्वपदादिति । ८ । ३ । १०६ । षत्वम् ।) व्रीहिभेदः । मन्थरे त्रि । इति मेदिनी । ठे, १६ ।
"मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ।
(व्रीहिभेदार्थे यथा, पर्य्यायो गुणाश्च ।
मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके क्रमिकृज्ज्वरनाशनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मकुष्ठकः, पु, (मकुष्ठ + स्वार्थे कन् ।) वनमुद्गः । इति भरतः ॥ (तथाच पर्य्यायाः ॥
मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्य गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अः ।
"मकुष्ठकाः क्रिमिकराः कलायाः प्रचुरानिलाः ॥")

मकूलकः, पु, (मकि मण्डने + पिच्छादित्वादूलच् बाहुलकादनुषङ्गलोपः । स्वार्थे कन् ।" इत्यमरटीकायां रघुनाथः ।) मुकूलकः । दन्तीवृक्षः । इत्यमरटीकायां रमानाथः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।
वाराही चैव कथिता निकुम्भस्य मकूलकः ॥")

मक्क ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) कोपधः । ङ मक्कते । इति दुर्गादासः ॥

मक्कल्लः, पु, (मक्कं गमनं आत्यन्तिकगतिं मरणं लाति आदत्ते योजयतीत्यर्थः । ला + कः पृषोदरात् लकारागमे साधुः ।) शूलरोगविशेषः । यथा,
"सूतायाः हृच्छिरोवस्तिशूलं मक्कल्लसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा ॥"
इति चक्रपाणिदत्तः ॥

मक्कुलं, क्ली, (मक्क + उलच् ।) शिलाजतु । इति शब्दरत्नावली ॥
(विवरणमस्य शिलाजतुशब्दे ज्ञातव्यम् ॥)

मक्कोलः, पु, खटिका । यथा,—
"मक्कोलो वर्णलेखा च कठिनी कक्खटी खटी ।
इति शैलवर्गे त्रिकाण्डशेषः ॥

मक्ष, रोषे । संघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मक्षति । इति दुर्गादासः ॥

मक्षः, पुं, (मक्ष + घञ् ।) स्वदोषाच्छादनम् । इति हारावली ॥ क्रोधः । समूहः । इति पूर्व्वोक्तधात्वर्थदर्शनात् ॥

मक्षवीर्य्यः, पुं, (मक्षं निविडं वीर्य्यमस्य ।) प्रियालवृक्षः । इति राजनिर्घण्टः ॥

मक्षिका, स्त्री, (मशति शब्दायते इति । मश + "हनिमशिभ्यां सिकन् ।" उणा० । ४ । १५३ । इति सिकन् ।) कीटविशेषः । माछि इति भाषा ॥ (यथा, भागवते । ५ । १४ । ४२ ।
"आर्षभस्येह राजर्षेर्मनसापि महात्मनः ।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥")
तत्पर्य्यायः । मक्षीका २ भम्भः ३ माचिका ४ गन्धलोलुपा ५ पतङ्गिका ६ पत्तिका ७ । इति शब्दरत्नावली ॥ अमृतोत्पन्ना ८ वमनीया ९ पलङ्कषा १० । इति राजनिर्घण्टः ॥ नीला मक्षिका वर्व्वणा ११ । इत्यमरः । २ । ५ । २६ ॥ तन्नाशकधूपो यथा,—
"त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ।
लाक्षासर्ज्जरसश्चैव विडङ्गश्चैव गुग्गुलुः ।
एतैर्धूपैर्मक्षिकाणां मशकानां विनाशनम् ॥"
इति गारुडे १८१ अध्याय. ॥

मक्षिकामलं, क्ली, (मक्षिकाणां मधुमक्षिकाणां मलम् ।) सिक्थकम् । इति राजनिर्घण्टः ॥ (विशेषोऽस्य सिक्थशब्दे ज्ञेयः ॥)

मक्षीका, स्त्री, (मक्षिका । पृषोदरात् दीर्घः ।) मक्षिका । इति राजनिर्घण्टः ॥ (रोगविशेषेणास्या अरिष्टत्वं यथा,—
"स्नातानुलिप्तगात्रेऽपि यस्मिन् गृध्यन्ति
मक्षिकाः ।
स प्रमेहेण संस्पर्शं प्राप्यते नैव हन्यते ॥"
इति चरके इन्द्रियस्थाने पञ्चमेऽध्याये ॥)

मख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मखति ॥

मखि, इ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ मङ्खत इति दुर्गादास. ॥

मखः, पु, (मखन्ति गच्छन्ति देवा अत्रेति । मख सर्पणे + "हलश्च ।" ३।३।१२१ । इति घञ् । संज्ञापूर्व्वकत्वान्न वृद्धिः । यद्वा, पुंसीति घः ।) यज्ञः । इत्यमरः । २ । ७ । १३ ॥ यथा, देवीभागवते । १ । १६ । २३ ।
"कृत्वा तस्य मखं पूर्णं करिष्यामि तवापि वै ।"

मखत्राता, [ऋ] पु, (त्रायते रक्षतीति कर्त्तरि तृच् । मखस्य त्राता । विश्वामित्रमखरक्षणात्तथात्वम् ।) रामः । यथा,—
"रावणारिर्मखत्राता सीतायाः पतिरित्यपि ।"
इति शब्दरत्नावली ॥

मखवह्निः, पु, (मखस्य वह्निः मखाराध्यो वह्निरिति यावत् ।) यज्ञाग्निः । इति जटाधरः ॥

मखानलः, पुं, (मखस्य अनलः मखमाध्योऽनल इत्यर्थः।) यज्ञाग्निः। तत्पर्य्यायः। महावीरः २। इति त्रिकाण्डशेषः॥

मखान्नं, क्ली, (मखे मखकाले भोज्यमन्नम्।) खाद्यबीजभेदः। माखाना इति भाषा॥ तत्पर्य्यायः। पद्मबीजाभम् २ पानीयफलम् ३।
"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्द्दिशेत्।"
इति भावप्रकाशः॥

मखासुहृत्, [द्] पुं, शिवः। मखस्य दक्षयज्ञस्य असुहृत् शत्रुः नाशक इत्यर्थः। इति हेमचन्द्रः। २००॥

मग इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, मङ्गति। इति दुर्गादासः॥

मगधः, पुं, (मगि+अच्। पृषोदरादित्वान्निपातनः। मगं दोषं दधाति। धा+"आतोऽनुपसर्गे।" ३।२।३। इति कः। यद्वा, कन्द्वादिमगध+अच्।) कीकटदेशः। अधुना बेहाराख्यदेशस्य दक्षिण भागः। तद्देशस्थे पु भूम्नि। इति शब्दरत्नावली॥ (यथा, महाभारते। ८।४५।४८।
"इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोशलाः।
अर्द्धोक्ताः कुरुपाञ्चालाः शाल्वाः कृत्स्नानुशासनाः॥")
बन्दी। इति हेमचन्द्रः। ७८५॥

मगधा, स्त्री, (मगधस्तन्नामा देश उत्पत्तिस्थानत्वेनास्त्यस्याः इत्यर्थे आदित्वादच्। स्त्रियां टाप्।) पिप्पली। इति रत्नमाला॥ (यथा, सुश्रुते कल्पस्थाने सप्तदशाध्याये।
"हरेणुमगधाजास्थि मञ्जलायज्ञदन्तिनम्॥")

मगधेश्वरः, पुं (मगधस्य तदाख्यदेशस्येश्वरः।) जरासन्धराजः। इति हेमचन्द्रः॥ मगधदेशाधिपमात्रे च॥ (यथा, रघौ। ६। २०।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥")

मगधोद्भवा, स्त्री, (मगधे उद्भवो यस्याः।) पिप्पली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते कल्पस्थाने एकादशाध्याये।
"फलं ह्यत्वा मगधोद्भवाना-
मादाय कल्कं फलपाककाले।")
मगधदेशजाते त्रि॥

मग्नः, त्रि, (मस्ज+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातकारस्य नत्वम्। "स्कोः संयोगाद्योरन्ते च।" ८।२।२९। इति सलोपः। "चोः कुः।") स्नातः। जलान्तःप्रविष्टः। डोबा इति भाषा॥ (यथा, देवीभागवते।१।६।७५।
"केन त्वं कथं जातं मग्नावावां जले स्थितौ॥")
मस्जधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥

मघ, इ ङ भूषे। कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक० सेट्।) इ, मङ्घते। इति दुर्गादासः॥

मघ, इ ङ कैतवाद्यार्थयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-द्यूतक्रीडादौ अक०-गतौ निन्दायां आरम्भे च सक०-सेट्।) कैतवमिह कितवक्रिया अक्षक्रीडनादि। इ मङ्घते ङ मङ्घते अक्षैः कितवः। अध्यर्थो गतिनिन्दारम्भणवाः। कैतवजवयोरेवायमिति केचित्। इति दुर्गादासः॥

मघः, पुं, (मघि+अच्। पृषोदरात् साधुः।) द्वीपविशेषः। इति मेदिनी। घ, ४॥ देशविशेषः। स तु मग्नामकम्लेच्छानां स्थानम्॥ पुष्पविशेषे स्त्री। इति शब्दरत्नावली॥ (क्ली मंहनीयं धनम्। यथा, ऋग्वेदे। ७।२१।७।
"इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्तसातौ॥"
"मघानि मंहनीयानि धनानि।") इति तद्भाष्ये सायनः।)

मघवती, स्त्री, (मघवन्+ङीप्। इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मघवा, [न्] पुं, (मह्यते पूज्यते इति। मह पूजायाम्। "श्वन्नुक्षन् पूषन् प्लीहन्निति।" उणा०। १। १५८। इति कनिन्। निपातनात् हस्य घः अवुगागमश्च।) इन्द्रः। इत्यमरः। १।१।४४॥ (यथा, रघौ। १। २६।
दुदोह गां स यज्ञाय शस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥")
जिनानां द्वादशचक्रवर्त्त्यन्तर्गतचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥ (सप्तमद्वापरस्य व्यासः। यथा, देवीभागवते। १।३।२८।
"मघवा सप्तमे प्राप्ते वशिष्ठश्चाष्टमे स्मृतः।")

मघवान्, [त्] पुं, (मघवन्। "मघवा बहुलम्।" ६।४।१२८। इति पक्षे तृ-आदेशः। ऋदन्।) इन्द्रः। इत्यमरटीकायां रमानाथः। व्याकरणञ्च॥ (यथा महाभारते। ३।४५।१०।
"एका वै रचिता चैव त्रिदिवे मघवानिव॥"
दनोः पुत्त्रभेदः। यथा, मात्स्ये। ६। १८।
"मरीचिर्मघवांश्चैव इरागर्भशिराश्च या।")

मघा, स्त्री, (मह+घः। हस्य घत्वम्।) औषधविशेषः। इति धरणिः॥ अश्विन्यादिसप्तविंशनक्षत्रान्तर्गतदशमनक्षत्रम्। तत्तु लाङ्गलाकृति पञ्चतारात्मकम्। गृहाकृति। इति केचित्। अस्याधिष्ठातृदेवता पितृगणः। यथा,—
"लाङ्गलाकृतिनि पञ्चतारके
चारुकर्णि पितृभे शिरोगते।
नीलनीरदविनिन्दिलोचने।
दंशिकादिगलितं कलाशतम्।१।४०॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम्॥
तत्र जातफलम्।
कठोरचित्तः पितृमातृभक्त
स्तीव्रस्वभावश्चनवशविद्यः।
मत्कृभं यस्य मघानघः स्या-
न्मतिः सदारातिविनाशदक्षा॥"
इति कोष्ठीप्रदीपः॥
मघाशब्दो बहुवचनान्तोऽपि दृश्यते। यथा,—
"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धं पुण्यैरवाप्यते॥
अपि च।
नवोदके नवान्ने च गृहप्रच्छादने यथा।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च॥"
इति तिथ्यादितत्त्वम्॥
एकवचनान्तप्रयोगो यथा,—
"मघायां पिण्डदानेन ज्येष्ठपुत्त्रो विनश्यति।"
इति मलमासतत्त्वम्॥
(अस्यां व्याधिजननेऽरिष्टत्वं यथा,—
"मघा भरण्याश्लेषासु मूले वा ज्वरितोऽपि वै।
स्वल्पमापद्यते सोऽपि नात्र कार्य्या विचारणा॥
"नवरात्रं तथाश्लेषा मघास्विति यमालयम्॥"
इति हारीते द्वितीये स्थाने चतुर्थेऽध्याये॥)

मघात्रयोदशी, स्त्री, (मघा दशमनक्षत्रम्। मघायुक्ता त्रयोदशी। इति मध्यपदलोपी कर्म्मधारयः।) मघानक्षत्रयुक्तभाद्रकृष्णत्रयोदशी। यथा। प्रौष्ठपद्यां कृष्णत्रयोदश्यां मघायुक्तायां अनिषिद्धयत्किञ्चिद्द्रव्येण श्राद्धमावश्यकम्। श्राद्धादिविधिवाक्येषु नक्षत्रविशिष्टस्तुतेः। ततश्च केवलत्रयोदशी केवलमघा श्राद्धार्थवादा अपि कल्पविशिष्टविधिप्रापककर्म्मणो नित्यत्वबोधका न तु केवलविध्यन्तरकल्पका गौरवात्। तथा च शङ्खः।
"प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्।
प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च॥"
मनुः।
"यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च॥"
विष्णुधर्म्मोत्तरे।
"प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"
शातातपः।
"पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च।
तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च॥"
अत्रान्नमात्रश्रुतेः मनुवचने यत्किञ्चित् श्रुतेश्च शाकोऽपायसः फलातिशयार्थः गुणविशेषे फलविशेषः स्यादिति न्यायात्। यत्तु विष्णुधर्म्मोत्तरे।
"मघायुक्ता च तत्रापि शस्ता राजंस्त्रयोदशी।
तत्राक्षयं भवेत् श्राद्धं मधुना पायसेन च।
तत्र अपराह्णकृष्णपक्षे। अत्र यत् श्राद्धं तन्मधुयोगेन वा अक्षयं भवेत्। अतएव मनुवचने यत्किञ्चिन्मधुना मिश्रमित्यनेन मधुमात्रयुक्तत्वमुक्तम्। अतोऽत्र सुतरां शूद्रस्याधिकारः॥ *॥ अत्र गजच्छायायोगे फलातिशयः। तथा कृत्यचिन्तामणौ स्मृतिः।
"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धं पुण्यैरवाप्यते॥"
करे हस्तानक्षत्रे। कन्यादशमांशोपरि सपाद त्रयोविंशांशः इति यावत्॥ *॥ अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम्। यथा, श्राद्धचिन्तामणौ स्मृतिः।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैविकम्।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना॥"

अदैविकं प्रत्याब्दिकैकोद्दिष्टम् । अन्यत्र छाया-मघादौ नाधिकारः न नित्याधिकारः सपिण्डी-करणान्तानि यानि श्राद्धानि षोडश । पृथङ्-नैव सुताः कुर्य्युः पृथग्द्रव्या अपि क्वचिदित्य-र्थापिना समुच्चितस्याप्यपृथग्द्रव्यस्य पुत्रः सपिण्डी-करणान्तानीति विशेषणात्तदुत्तरश्राद्धानां पृथक्त्वमपि प्रतीयते ॥ * ॥ मघात्रयोदशी-निमित्तके श्राद्धे पुत्रवता पिण्डा न देयाः ।

"भौजङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम् ।
तत्रापि महती पूजा कर्त्तव्या पितृदैवते ।
कृते पिण्डप्रदानन्तु ज्येष्ठपुत्त्री विवर्जयेत् ॥"

इति देवीपुराणात् । भौजङ्गी पञ्चमी । चन्द्रार्क-सङ्गमोऽमावास्या । पितृदैवतं ऋक्षं मघायाम् ।

शातातपः ।

"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते ॥
अक्षय्यं दक्षिणा स्वस्ति सौमनस्यं यथास्थिति ।"

इति तिथ्यादितत्त्वम् ॥

मघाभवः, पुं, (मघायां भवः ।) शुक्रग्रहः । इति हेमचन्द्रः ॥ मघानक्षत्रजाते त्रि ॥

मघाभूः, पुं, (मघायां मघासमीपस्थपूर्व्वफल्-गुन्यां भवतीति भू + क्विप् ।) शुक्राचार्य्यः । इति त्रिकाण्डशेषः ॥

मघी, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारण-तयास्त्यस्या इति । मघा + अर्श आद्यच् । गौरा-दित्वात् ङीष् ।) धान्यभेदः । इति मेदिनी । घे, ३ ॥

मघोनी, स्त्री, (मघोनः पत्नीति । मघवन् + स्त्रियां ङीप् । वकारस्य च सम्प्रसारणम् ।) इन्द्राणी । इति मुग्धबोधव्याकरणम् ॥

मङ्कुरः, पु, (मङ्कयति भूषयतीति । मकि + बाहु-लकादुरच् ।) मुकुरः । इत्यमरटीकायां भरतः ॥

मङ्क्ता, [क्तृ] त्रि, (मज्जति स्नाति इति । मस्ज् + तृच् । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् ।) स्नानकर्त्ता । इति मस्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम् ॥

मङ्गः, पुं, (मङ्गति सर्पतीति मगि + अच् ।) नौकाशिरः । इति हेमचन्द्रः ॥

मङ्गलं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनास्माद्वेति । मगि + "मङ्गेरलच् ।" उणा० ५ । ७० । इत्यलच् ।) अभिप्रेतार्थ-सिद्धिः । इति तिथ्यादितत्त्वम् ॥ तद्वति, त्रि । इत्यमरः ॥ यथा, रामायणे । २ । २३ । ३० ।

"मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव ॥"

तत्पर्य्यायः । भावुकम् २ भव्यम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६ । क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ श्रेयसम् १० शिवम् ११ अरिष्टम् १२ कुशलम् १३ रिष्टम् १४ मद्रम् १५ शस्तम् १६ । इति शब्दरत्नावली ॥ (यथा, भागवते । ५ । १४ । ३४ ।

"मङ्गलाय च लोकानां क्षेमाय च भवाय च ।"

"कल्याणं मङ्गलं क्षेमं शातं शर्म्म शिवं शुभम् ।"

इति वैद्यकरत्नमालायाम् ॥

शिखिशतपत्रगजगोधा रासभो भृङ्गराजो
मुखरपिककपोतो पोतकी शूकरी वा ।
तदनु विहगराजो मङ्गलाशंसिनः स्यु-
र्वदति शकुनवेत्ता वामतो निर्गमे वः ॥"

इति हारीते द्वितीयस्थाने सप्तमेऽध्याये ।) सर्व्वार्थरक्षणम् । इति मेदिनी । ले, १२० ॥ * ॥

मङ्गललक्षणं यथा,—

"प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम् ।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥"

इत्येकादशीतत्त्वम् ॥ * ॥

मङ्गलजनकद्रव्याणि । यथा,—

"पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यञ्च दर्पणम् ।
दध्याज्यं मधु लाजञ्च पुष्पं दूर्व्वाक्षतं सितम् ॥
वृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम् ।
पक्वाश्च परिपक्वानि फलानि विविधानि च ॥
पतिपुत्त्रवतीं नारीं प्रदीपं मणिमुत्तमम् ।
मुक्तां प्रसूनमालाञ्च सद्योमांसञ्च चन्दनम् ॥
ददर्शैतानि वस्तूनि मङ्गलानि पुरो मुने । ।
शृगालं नकुलं चासं शवं वामे शुभावहम् ॥
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम् ।
पारावतं शङ्खचिल्लं चक्रवाकञ्च मङ्गलम् ॥
कृष्णसारञ्च सुरभीं चमरीं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च पताकां दक्षिणे शुभाम् ॥
नानाप्रकारवाद्यञ्च शुश्राव मङ्गलध्वनिम् ।
हरिशब्दस्य सङ्गीतं घण्टाशङ्खध्वनिन्तथा ।
दृष्ट्वा श्रुत्वा स जगाम हर्षेण तात ! मन्दिरम् ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः ॥ * ॥ अपि च ।

"ददर्श वर्त्मन्येवञ्च मङ्गलार्हं शुभप्रदम् ।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलसूचकम् ॥
वामे शवं शिवां पूर्णकुम्भं नकुलमेव च ।
पतिपुत्त्रवतीं साध्वीं दिव्याभरणभूषिताम् ॥
शुक्लपुष्पञ्च माल्यञ्च धान्यञ्च खञ्जनं शुभम् ।
दक्षिणे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम् ॥
वत्सप्रयुक्तां धेनुञ्च श्वेताश्वं राजहंसकम् ।
वेश्याञ्च पुष्पमालाञ्च पताकां दधि पायसम् ॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमीप्सितम् ।
सद्योमांसं चन्दनञ्च माध्वीकं घृतमुत्तमम् ॥
कृष्णसारं फलं लाजान् सिद्धान्नं दर्पणन्तथा ।
विचित्रितं शिवालञ्च सुदीप्तां प्रतिमान्तथा ॥
चाषं ददर्श हंसं तं पञ्चवक्त्रं त्रिलोचनम् ।
शुद्धस्फटिकसङ्काशं नागराजैर्विराजितम् ॥
शुक्लोत्पलं पद्मवनं शङ्खचिल्लञ्च कोरकम् ।
मार्जारं पर्व्वतं मेघं मयूरशुकसारसम् ॥
शङ्खकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम् ।
विचित्रं कृष्णसङ्गीतं हरिशब्दं जयध्वनिम् ॥
एवंभूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः ।
प्रविवेश हरिं स्मृत्वा पुण्यं वृन्दावनं वनम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः ॥

अन्यच्च ।

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्च्चयेत्ततः ।
प्रदक्षिणञ्च कुर्व्वीत तथा चायुर्न हीयते ॥
दूर्व्वा दधि सर्पिरथोदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम् ।
मृद्गोमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाञ्च ॥
श्वेतानि पुष्पाणि तथा शमीञ्च
हुताशनं चन्दनमर्कबिम्बम् ।
अश्वत्थवृक्षञ्च समालभेत
ततश्च कुर्य्याद्द्विजजातिधर्म्मम् ॥"

इति मत्स्यसूक्तमहातन्त्रे ४३ पटलः ॥

वर्णभेदे मङ्गलप्रश्नभेदो यथा,—

"ब्राह्मणान् कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

मङ्गलः, पु, (मगि + "मङ्गेरलच् ।" उणा० ५ । ७० । इति अलच् ।) ग्रहविशेषः । तत्प-र्य्यायः । अङ्गारकः २ भौमः ३ कुजः ४ वक्रः ५ महीसुतः ६ वर्णार्च्चिः ७ लोहिताङ्गः ८ खोल्मुकः ९ ऋणान्तकः १० । इति शब्दरत्नावली ॥ आरः ११ क्रूरदृक् १२ आवनेयः १३ । इति ज्योतिष-तत्त्वम् ॥ स च रक्तगौरमिश्रितवर्णः । दक्षिण-दिक्पुरुषक्षत्त्रियजातिसामवेदतमोगुणतिक्त-रसमेषराशिप्रबालावन्तिदेशानामधिपतिः । मेषवाहनः । चतुरङ्गुलप्रमाणः । आरक्तमाल्य-वसनः । भरद्वाजमुनिसन्तानः । चतुर्भुजः । शक्तिवराभयगदाधारी । सूर्य्याभिमुखः । अस्याधिदेवता कार्त्तिकेयः । प्रत्यधिदेवता पृथिवी । स तु पित्तप्रकृतिः । युवा । क्रूरः । वनचारी । मध्याह्नकाले प्रबलः । गैरिकादि-धातुस्वामी । चतुष्पदानां प्रभुः । चतुष्कोणा-कृतिः । सुवर्णकारादीनां स्वामी । ज्वलित-भूमिचारी । किञ्चिदङ्गहीनः । कटुरसप्रियः । ताम्रवर्णरक्तद्रव्यस्वामी च । इति ग्रहयागतत्त्व-लघुजातकादयः ॥ * ॥ अस्योत्पत्तिर्यथा,—

"उपेन्द्रवीर्य्यात् पृथ्व्यान्तु मङ्गलः समजायत ।
वसुन्धरायां बलवान् तन्मे व्याख्यातुमर्हसि ॥

सौतिरुवाच ।

उपेन्द्ररूपमालोक्य कामार्त्ता च वसुन्धरा ।
विधाय सुन्दरीवेशमचला प्रौढयौवना ॥
सस्मिता तस्य तल्पे च सहसा समुपस्थिता ।
सुरम्यां मालतीमालां ददौ तस्मै वराङ्गना ॥
उपेन्द्रस्तन्मनो ज्ञात्वा कामी मन्मथपीडितः ।
नानाप्रकारशृङ्गारं चकार च तया सह ॥
तदङ्गसङ्गमासक्ता मूर्च्छां प्राप सती तदा ।
रतेव निद्रिता वासौ वीर्य्याधानकृते हरौ ॥
विहाय तत्र रहसि जगाम पुरुषोत्तमः ।
उर्व्वशी पथि गच्छन्ती बोधयामास तां मुने ॥
सा च पप्रच्छ वृत्तान्तं कथयामास भूश्च ताम् ।
वीर्य्यं सम्भरणं कर्त्तुं सा चाशक्ता च दुर्ब्बला ॥
प्रवालस्याकरे न्यस्ता वीर्य्यन्यासं चकार सा ।

तेन प्रवालवर्णश्च कुमारः समजायत ।
तेजसा सूर्य्यसदृशो नारायणसुतो महान् ॥"
इति ब्रह्मवैवर्त्तपुराणे, ६ अध्यायः ॥

अपि च ।
"ततोऽङ्गारकलोको हि वसत्यत्र महीसुतः ।
उत्पत्तिश्चास्य वक्ष्यामि यथायं भूसुतोऽभवत् ॥
पुरा हि भ्रमतो विष्णोः स्वेदबिन्दुः पपात ह ।
महीतले ततः कुमारोऽसौ लोहिताङ्गो महौ-
तलात् ॥
जातः स्नेहेन मेदिन्या वर्द्धितः पृथिवीपते ! ।
तपसाराध्य ब्रह्माणं ग्रहत्वमुपसेदिवान् ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥

अपरञ्च ।
"पुरा दक्षविनाशाय कुपितस्य त्रिशूलिनः ।
अपतद्भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः ॥
भित्त्वा समस्तपातालानदहत् सप्त सागरान् ।
अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः ॥
वीरभद्र इति ख्यातः करपादायुतैर्युतः ।
कृत्वा स यज्ञमथनं पुनर्भूतलसम्भवः ॥
त्रिजगन्निर्द्दहन् भूयः शिवेन विनिवारितः ।
कृतं त्वया वीरभद्र ! दक्षयज्ञविनाशनम् ॥
इदानीमलमेतेन लोकदाहेन कर्म्मणा ।
शान्तिप्रदानात् सर्व्वेषां ग्रहाणां प्रथमो भव ॥
प्रेक्षिष्यन्ति जनाः पूजां करिष्यन्ति मतं मम ।
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज ! ॥
देवलोके द्वितीयञ्च तव रूपं भविष्यति ।
ये च त्वां पूजयिष्यन्ति चतुर्थ्यां त्वद्दिने नराः ।
रूपमारोग्यमैश्वर्य्यं तेष्वनन्तं भविष्यति ॥
एवमुक्तस्तदा शान्तिमगमत् कामरूपधृक् ।
संजातस्तत्क्षणाद्राजन् ! ग्रहत्वमगमत् पुनः ॥'
इति मत्स्यपुराणे अङ्गारकव्रतं नाम ६८ अः ॥

कल्पभेदे अन्धकासुरवधकाले तस्योत्पत्तिर्यथा,
"यो भूम्यां न्यपतद्विप्र । स्वेदबिन्दुः शिवान-
नात् ।
तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥
स बालस्तृषितोऽत्यर्थं पपौ रुधिरमान्धकम् ।
कन्या चोत्स्वेदसंजाता साक्षिविलिलिहेऽद्भुता
ततस्तामाह बालार्कप्रभां भैरवमूर्त्तिमान् ।
शङ्करो वरदो लोकश्रेयोऽर्थाय वचो महत् ॥
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरस्तथा ।
यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि ! ॥
त्वां स्तोष्यन्ति सदा देवि ! बलिपुष्पोत्करैः करैः ।
चर्च्चिकेति शुभं नाम यस्माद्रुधिरचर्च्चिता ॥
इत्येवमुक्ता वरदेन चर्च्चिका
भूतानुयाता हरिचर्म्मवासिनी ।
महीं समन्ताद्विचचार सुन्दरी
स्थलं गता हैङ्गुलमाद्यमुत्तमम् ॥
तस्यां गतायां वरदः कुजस्य
प्रादाद्वरं सर्व्ववरोत्तमं यतः ।
ग्रहाधिपत्यं जगतः शुभाशुभं
भविष्यति त्वद्वशगं महात्मनाम्॥
इति वामनपुराणे ६७ अध्यायः ॥

अस्य स्तोत्रं यथा,—
"धरणीगर्भसंभूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥"
इति व्यासोक्तनवग्रहस्तोत्रान्तर्गतम् ॥

ऋणपरिशोधनार्थस्तोत्रं यथा,—
"मङ्गलो भूमिपुत्त्रश्च ऋणहर्त्ता धनप्रदः ।
स्थिरासनो महाकायः सर्व्वकर्म्माविरोधकः ॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूमिजो भूमिनन्दनः ॥
अङ्गारको यमश्चैव सर्व्वरोगापहारकः ।
सृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रदः ॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनमाप्नोति पुष्कलम् ॥
रक्तपुष्पैश्च गन्धैश्च धूपदीपादिभिस्तथा ।
मङ्गलं पूजयेद्भक्त्या मङ्गलेऽहनि सर्व्वदा ॥
ऋणरेखाः प्रकर्त्तव्या अङ्गारेण सदा बुधैः ।
प्रोञ्छयेद्वामपादेन ऋणं तस्य विनश्यति ॥
मङ्गलाय नमस्तुभ्यं नमस्ते ऋणहारिणे ।
पुत्त्रपौत्त्रप्रदात्रे च मङ्गलाय नमो नमः ॥
ऋणार्थे त्वत्प्रपन्नोऽहमनृणं कुरु मे विभो ! ।
एतत् कृत्वा न सन्देहो ऋणं हत्वा धनी भवेत्
इति स्कन्दपुराणम् ॥ * ॥

मङ्गलवारे जातस्य फलं यथा,—
"उग्रः प्रतापी क्षितिपालमन्त्री
रणप्रियो वक्रवचाः सरोषः ।
सत्त्वान्वितः शूरगणाग्रगण्यो
कुजस्य वारे प्रभवो मनुष्यः ॥"
इति कोष्ठीप्रदीपः ॥

मङ्गलचण्डिका, स्त्री, (मङ्गला मङ्गलदायिका चासौ चण्डिका चेति । यद्वा सृष्टौ मङ्गला प्रलये चण्डिका । अथवा मङ्गले चण्डिका दक्षा ।) मङ्गलचण्डी । यथा, कालिकापुराणे ।
"एषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तपद्मासनस्था च रत्नकुण्डलमण्डिता ।
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ॥
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ।
उमया भाषितं मन्त्रं यत् पूर्व्वं त्र्यक्षरम् ।
मन्त्रमस्यास्तु तच्चैव तेन देवीं प्रपूजयेत् ॥"
एकमक्षरं शक्तिबीजरूपम् ।
"अष्टम्याञ्च नवम्याञ्च पूजा कार्य्या विवृद्धये ।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकाम् ॥
यः पूजयेद्भौमदिने शुभदं वाञ्छितैः शुभाम् ।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात् ॥ * ॥
मङ्गलवारे कृष्णाष्टमीचतुर्द्दश्यौ चेत् पुण्यतरे भवतः । यथा,—
"शनैश्चरस्य वारेण वारेणाङ्गारकस्य च ।
कृष्णाष्टमीचतुर्द्दश्यौ पुण्यात् पुण्यतरे स्मृते ॥ * ॥
मङ्गलवारे शुक्ला चतुर्थी चेदक्षया भवति ।
यथा,—
"सोमवारेऽप्यमावास्या आदित्याहे च सप्तमी ।
चतुर्थ्यङ्गारके वारे त्वष्टमी च बृहस्पतौ ॥

अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः ।
षष्टिवर्षसहस्राणि प्रतिजन्म तदक्षयम् ॥"
इति तिथ्यादितत्त्वम् ॥

मङ्गलचण्डी, स्त्री, (मङ्गला चासौ चण्डी चेति यद्वा, देवानां मुन्यादिभक्तानां मङ्गलाय दुर्जया-सुरादिमारणे चण्डी अत्यन्तकोपना । मङ्गल-चण्डी इतीति वा । अथवा सृष्टौ मङ्गला प्रलये चण्डी । भागवतेऽस्या नामनिरुक्ति-र्यथा,—
"सृष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥")
दुर्गा । यथा,—
नारायण उवाच ।
"कथितं दक्षोपाख्यानं ब्रह्मपुत्त्र ! यथागमम् ।
देवी मङ्गलचण्डी या तदाख्यानं निशामय ॥
तस्याः पूजादिकं सर्व्वं धर्म्मवक्त्रेण यत्कृतम् ।
श्रुतिसम्मतमेवेष्टं सर्व्वेषां विदुषामपि ॥
दक्षायां वर्त्तते चण्डी कल्याणेषु च मङ्गलम् ।
मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका ॥
पूज्यायां वर्त्तते चण्डी मङ्गलेऽपि महीसुतः ।
मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका ॥
मङ्गलो मनुवंशश्च सप्तद्वीपधरापतिः ।
तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका ॥
मूर्त्तिभेदेन सा दुर्गा मूलप्रकृतिरीश्वरी ।
कृपारूपातिप्रत्यक्षा योषितामिष्टदेवता ॥
प्रथमे पूजिता सा च शङ्करेण पुरः पुरा ।
त्रिपुरस्य वधे घोरे विष्णुना प्रेरितेन च ॥
ब्रह्मन् । ब्रह्मोपदेशेन दुर्गप्रस्थेन सङ्कटे ।
आकाशात् पतिते याने दैत्येन पातिते रुषा ॥
ब्रह्मविष्णूपदिष्टश्च दुर्गां तुष्टाव शङ्करः ।
सा च मङ्गलचण्डी च बभूव रूपभेदतः ॥
उवाच पुरतः शम्भोर्भयं नास्तीति ते विभो ! ।
भगवान् वृषरूपश्च सर्व्वेशश्च बभूव ह ॥
युद्धशक्तिस्वरूपाहं भविष्यामि तदाज्ञया ।
मयात्मना च हरिणा सहायेन वृषध्वज ! ॥
जहि दैत्यञ्च शत्रुञ्च सुराणां पदघातकम् ।
इत्युक्त्वान्तर्हिता देवी शम्भोः शक्तिर्बभूव सा ॥
विष्णुदत्तेन शस्त्रेण जघान तमुमापतिः ।
मुनीन्द्र ! पतिते दैत्ये सर्व्वे देवा महर्षयः ॥
तुष्टुवुः शङ्करं देव भक्तिनम्रात्मकन्धराः ।
सद्यः शिरसि शम्भोश्च पुष्पवृष्टिर्बभूव च ।
ब्रह्मा विष्णुश्च सन्तुष्टो ददौ तस्मै शुभाशिषम् ॥
ब्रह्मविष्णूपदिष्टश्च सुस्नातः शङ्करः शुचिः ।
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम् ॥
पाद्यार्घ्याचमनीयैश्च बलिभिर्विविधैरपि ।
पुष्पचन्दननैवेद्यैर्भक्त्या नानाविधैर्मुने ! ॥
छागैर्मेषैश्च महिषैर्गण्डैर्मायातिभिस्तथा ।
वस्त्रालङ्कारमाल्यैश्च पायसैः पिष्टकैरपि ॥
मधुभिश्च सुधाभिश्च पक्वैर्नानाविधैः फलैः ।
संगीतैर्नर्त्तनैर्वाद्यैरुत्सवैः कृष्णकीर्त्तनैः ॥
ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन भक्तिपूर्व्वकम् ।
ददौ द्रव्याणि मूलेन मन्त्रेणैव च नारद ! ॥

ॐ ह्रीं श्रीं क्लीं सर्व्वपूज्ये देवि मङ्गलचण्डिके ।
हुं हुं फट् स्वाहेत्येवञ्चाप्येकविंशाक्षरो मनुः ॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्व्वकामदः ।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ।
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्व्वकामदः ॥
ध्यानञ्च श्रूयतां ब्रह्मन् । वेदोक्तं सर्व्वसम्मतम् ॥
देवीं षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम् ।
सर्व्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम् ॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम् ।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥
बिभ्रतीं कवरीभारं मल्लिकामाल्यभूषितम् ।
बिम्बोष्ठीं सुदतीं शुद्धां शरत्पद्मनिभाननाम् ॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम् ।
जगद्धात्रीञ्च दात्रीञ्च सर्व्वेभ्यः सर्व्वसम्पदाम् ।
संसारसागरे घोरे पोतरूपां वरां भजे ॥
देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने ! ।
प्रयतः सङ्कटग्रस्तो येन तुष्टाव शङ्करः ॥
श्रीशङ्कर उवाच ।
रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके ! ।
हारिके विपदां राशेर्हर्षमङ्गलदायिके ! ॥
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके ! ।
शुभे मङ्गलदक्षे च शुभे मङ्गलचण्डिके ! ॥
मङ्गले मङ्गलार्हे च सर्व्वमङ्गलमङ्गले ! ।
सतां मङ्गलदे देवि ! सर्व्वेषां मङ्गलालये ! ॥
पूज्ये ! मङ्गलवारे च मङ्गलाभीष्टदेवते ! ।
पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम् ॥
मङ्गलाधिष्ठातृदेवि ! मङ्गलानाञ्च मङ्गले ! ।
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि ! ॥
सारे च मङ्गलाधारे पारे च सर्व्वकर्म्मणाम् ।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे ! ॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम् ।
प्रतिमङ्गलवारे च पूजां कृत्वा गतः शिवः ॥
देव्याश्च मङ्गलं स्तोत्रं यः शृणोति समाहितः ।
तन्मङ्गलं भवेत् शश्वन्न भवेत्तदमङ्गलम् ॥
प्रथमे पूजिता देवी शिवेन सर्व्वमङ्गला ।
द्वितीये पूजिता देवी मङ्गलेन ग्रहेण च ॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च ।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता ॥
मङ्गले मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका ।
पूजिता प्रतिविश्वेषु विश्वेशपूजिता सदा ॥
ततः सर्व्वत्र संपूज्या सा बभूव सुरेश्वरी ।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने ! ॥
वर्द्धते तत्पुत्त्रपौत्त्रो मङ्गलञ्च दिने दिने ॥”
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मङ्गलचण्डिकोपाख्यानं तत्स्तोत्रकथनं नाम ४१ अध्यायः ॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलजनिका छाया यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

मङ्गलनीराजनं, क्ली, (मङ्गलं मङ्गलकरं मङ्गलाय वा नीराजनम् ।) आरात्रिकम् । भगवदारात्रिकम् । मङ्गल आरती इति भाषा ॥ यथा,—
“प्रतिलभ्य प्रियान् श्लोकान् महावादित्रनिःस्वनैः ।
प्रभोर्नीराजनं कुर्य्यान्मङ्गलाख्यं जगद्धितम् ॥
नीराजनमिदं सर्व्वैः कर्त्तव्यं शुचिविग्रहैः ।
परमब्रह्मयोत्थाय दृष्टव्यञ्च सदा नरैः ॥
स्तोत्रं पुमांश्च सर्व्वधामैतत् सर्व्वेष्टपूरकम् ।
समस्तदैन्यदारिद्र्यदुरितान्यपि नाशकृत् ॥”
इति श्रीहरिभक्तिविलासे ६ विलासः ॥

मङ्गलपाठकः, पुं, (पठतीति । पठ + ण्वुल् । मङ्गलस्य पाठकः ।) वन्दी । इति हेमचन्द्रः । ३ । ६४ ॥ (यथा, वेणीसंहारनाटके । १, अङ्के । ‘आः पाप ! दुरात्मन् ! वृथामङ्गलपाठक ! ।’

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति । प्र + दा + “आतश्चोपसर्गे ।” ३ । १ । १३६ । इति कः । टाप् ।) हरिद्रा । इति केचित् ॥ मङ्गलदातरि त्रि ॥

मङ्गला, स्त्री, (मङ्गलमस्या अस्तीति । मङ्गल + अर्श आद्यच् । टाप् ।) पार्व्वती । शुक्लदूर्व्वा । पतिव्रता । इति शब्दरत्नावली ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ हृताक्षिकाहृविशेषः । इति हेमचन्द्रः ॥ हरिद्रा । नीलदूर्व्वा । इति राजनिर्घण्टः ॥

मङ्गलागुरु, क्ली, (मङ्गलञ्च तत् अगुरु चेति । नित्यकर्म्मधारयः ।) अगुरुचतुष्टयान्तर्गतागुरुविशेषः । यथा, राजनिर्घण्टः ।
“मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः ।
मङ्गल्या गुरुशिशिरा गन्धाढ्या योगवाहिका ॥”

मङ्गल्यं, क्ली, (मङ्गलाय साधु इति । मङ्गल + “तत्र साधुः ।” ४ । ४ । ९८ । इति यत् ।) दधि । इति मेदिनी । ये, १०१ ॥ चन्दनम् । मङ्गल्यागुरु । स्वर्णम् । सिन्दूरम् । इति राजनिर्घण्टः ॥

मङ्गल्यं, त्रि, (मङ्गलाय साधु । मङ्गल + यत् ।) शिवकरम् । इति मेदिनी । ये, १०१ ॥ (यथा, उत्तरचरिते । ७ म अङ्के ।
“पापेभ्यश्च पुनाति वर्द्धयति च श्रेयांसि सेयं कथा ।
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ॥”
यथाच, महाभारते । १ । १ । २४ ।
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥”) रुचिरम् । इति हेमचन्द्रः ॥ साधुः । इति धरणिः ॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः । मङ्गल + “तत्र साधुः ।” ४ । ४ । ९८ । इति यत् ।) त्रायमाणा । अश्वत्थः । बिल्वः । मसूरकः । इति मेदिनी । ये, १०० ॥ जीवकः । नारिकेलः । कपित्थः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (जीव इति ख्यातः शाकविशेषः । तत्पर्य्यायो यथा,—
“जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मङ्गल्यकः, पुं, (मङ्गल्य + संज्ञायां कन् । यद्वा मङ्गलस्य मङ्गलग्रहस्य प्रियः इति यत् । ततः स्वार्थे कन् ।) मसूरः । इत्यमरः । २ । ९ । १७ ॥ (तथास्य पर्य्यायः ।
“मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मङ्गल्यकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः ।) शङ्खपुष्पी । इति भावप्रकाशः ॥

मङ्गल्यनामधेया, स्त्री, (मङ्गलं मङ्गलजनकं नामधेयं यस्याः ।) जीवन्ती । इति जटाधरः ॥

मङ्गल्या, स्त्री, (मङ्गलाय साधुरिति यत् । टाप् ।) मल्लिकागन्धयुक्तागुरु । इत्यमरः । २।६।१२७ ॥ शमी । अधःपुष्पी । मिश्री । शुक्लवचा । रोचना । इति मेदिनी । ये, १०० ॥ प्रियङ्गुः । शङ्खपुष्पी । इति हेमचन्द्रः ॥ माषपर्णी । जीवन्ती । ऋद्धिः । वचा । हरिद्रा । चोरा । इति राजनिर्घण्टः ॥ दूर्व्वा । इति रत्नमाला ॥ दुर्गा । यथा,—
“शोभनानि च श्रेष्ठानि या देवी ददते हरे ।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता ॥”
इति देवीपुराणे ४४ अध्यायः ॥
(वचार्थे पर्य्यायो यथा,—
“तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा ।
षड्ग्रन्थोग्रा च रक्षोघ्नी सिता हैमवती तु सा ॥”
मिश्यर्थे यथा,— [मिसौ ॥”
“अवाक्पुष्पी च छत्रा स्यान्मङ्गल्या मधुरा हैमपुष्पी । तत्पर्य्यायो यथा,—
“अवाक्पुष्पी त्वधःपुष्पी मङ्गल्यामरपुष्पिका ॥”
इति च वैद्यकरत्नमालायाम् ॥
रोचनार्थे पर्य्यायो यथा,—
“गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना ।”
शम्यर्थे पर्य्यायो यथा,—
“शमी शक्तुफला तुङ्गा केशहन्त्री फला शिवा ।
मङ्गल्या च तथा लक्ष्मीः शमीरः शाक्तिका स्मृता ॥”
मसूरः । तत्पर्य्यायो यथा,—
“मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मङ्गिनी, स्त्री, (मङ्गो नौशिरस्तदस्या अस्तीति इनिः ङीप् च ।) नौका । इति हेमचन्द्रः ॥

मङ्गुष्टं, क्ली, (मङ्क्षु अस्तेनेति । मङ्क्षु + स्था + कः ।) अङ्गाचालम् । इति हारावली । १६८ ॥

मङ्क्षु, य, मज्जतीति । मस्ज् + बाहुलकात् सुः । “मस्जिनशोर्झलि ।” ७ । १ । ६० । इति नुम् । “स्कोः संयोगाद्योरन्ते च ।” ८ । २ । २९ । इति सलोपः ।) द्रुतम् ! इत्यमरः । ३ । ४ । २ । (यथा, माघे । ५ । ३७ ।
“यद्वाजिनः कटकटाहतटान्मिमङ्क्षो-
र्मङ्क्षूदपाति परितः पटलैरलीनाम् ॥”)
भृशार्थम् । इति मेदिनी अव्यये । षे, ३६ ॥

मड्डुकं, क्ली, (मड्डुक। पृषोदरादित्वात् साधुः।) वाद्यभाण्डम्। इति त्रिकाण्डशेषः॥

मच, इ ङ उक्त्यायथ्यकथाभासु। इति कवि-कल्पद्रुमः॥ (भ्वा०-आत्म०-इतौ अर्थौयाच्य स्क०-दीप्तौ उच्चीभावे च अक०-सेट।) इ मञ्चते। ङ मचते। उक्त्याय उच्चीभावः। इति दुर्गादासः॥

मच, ङ च कल्कने। दम्भे। शाठ्ये। इति कवि-कल्पद्रुमः॥ (भ्वा०-आत्म०-दम्भे शाठ्ये च। अक०-कल्कने-सक०-सेट्।) कल्कनमिति कल्कं करोतीति णौ रूपं चूर्णीकरणमित्यर्थः। ङ मचते तण्डुलं शिला चकारात् मचि ङ। इति दुर्गादासः॥

मचर्चिका, स्त्री, (मं शम्भुं चर्चयतीवेति। चर्च+ण्वुल्। टाप्। अत इत्वम्। वस्तुतस्तु रूढ़ोऽयं शब्दः।) प्रशस्तम्। इत्यमरः।१।४।२७॥(यथा, प्रशस्तो ब्राह्मणो ब्राह्मणमचर्चिका। "प्रशंसा-वचनैश्च। २।१।६६। इति समासः।)

मच्छः, पुं, (माद्यति सलिलेनेति। मद्+क्विप्। तथा सन् शेते इति। शी+डः।) मत्स्यः। इति शब्दरत्नावली॥

मज्जकृत्, क्ली, (मज्जानं करोतीति। कृ+क्विप्। तुगागमश्च।) अस्थि। इति हेमचन्द्रः॥

मज्जनं, क्ली, (मस्ज्+ल्युट।) स्नानम्। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्।३।४७। आस्तृप्तिमज्जनप्रीतिं न जानन्ति मरुस्थिताः॥")

मज्जा। इति शब्दचन्द्रिका॥

मज्जसमुद्भवं, क्ली, (मज्जा समुद्भव उत्पत्ति-स्थानं यस्य।) शुक्रम्। इति हेमचन्द्रः॥

मज्जा, [न्] पुं, (मज्जति अस्थिष्विति। मस्ज्+"श्वन् उक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्द्धन् मज्जन्नित्यादि।" उणा०।१।१५८। इति कनिन् निपात्यते च।) हृदादेस्तत्तमस्थिरभागः। सार इति ख्यातः। इत्यमरभरतौ॥ फलमज्जगुणौ यथा,—

"यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम्।
तस्य तस्यैव वीर्य्येण मज्जानमभिनिर्द्दिशेत्॥"

इति राजवल्लभः॥

अस्थिमध्यस्थस्नेहविशेषः। तत्पर्य्यायः। कौशिकः २ शुक्रकरः ३ अस्थिस्नेहः ४ अस्थिसम्भवः ५। इति हेमचन्द्रः।६।१६॥ अस्थिसारः६ तेजः ७ बीजम् ८ अस्थिजम् ९ जीवनम् १० देहसारः ११। इति राजनिर्घण्टः॥ अथ मज्जस्वरूप-माह।

"अस्थि यत् स्वाग्निना पक्वं तस्य सारो द्रवो घनः।
यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते॥"

अथ मज्जस्थानमाह।

"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः।"

इति भावप्रकाशः॥

अस्य गुणाः।

"बलशुक्ररसश्लेष्ममेदोमज्जविवर्द्धनः।
मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः॥"

इति चरकः॥

मज्जाशब्द आबन्तोऽपि। यथा। शृगालसी-मूलकशिग्रुसिद्धैः पियालमज्जासहितैश्चिति सुश्रुतः॥ इयमेवाह त्रिकाण्डे भागुरिः॥

"तज्जावद्राजवन्मज्जा मांससाराऽस्थिसारयोः।"

इत्यमरटीकायां भरतः॥

मज्जा, स्त्री, (मज्जतीति। मस्ज्+अच्। अजादित्वात् टाप्।) अस्थिसारः। इत्यमर-टीकायां भरतः॥ अस्य गुणाः। वातनाशि-त्वम्। बलपित्तकफप्रदत्वम्। मांसतुल्यगन्धरूप-त्वञ्च। कुम्भीरमहिषमज्जागुणाः। मधुरत्वम्। बृंहणत्वम्। बल्यत्वञ्च। मज्जसत्त्वगुणौ यथा। शैत्यम्। उष्णत्वञ्च। इति राजवल्लभः॥

मज्जाजः, पुं, (मज्जाया जायते इति। जन्+डः।) भूमिजगुग्गुलुः। इति राजनिर्घण्टः॥

मज्जारसः, पु, (मज्जाया रसः।) शुक्रम्। इति राजनिर्घण्टः॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य।) जाती-फलम्। इति राजनिर्घण्टः॥

मज्जूषा, स्त्री, (मज्जन्ति द्रव्याण्यत्र। मस्ज्+ऊषन्। टाप् निपा०।) मञ्जूषा। इत्यमर-टीकायां रायमुकुटः॥

मञ्चः, पुं, (मञ्चति। उच्चीभवतीति। मचि+घञ्।) खट्वा। इत्यमरः।२।७।१३८॥ कर्णीरथः। माचा इति भाषा॥ इति हारा-वली॥ उच्चमण्डपविशेषः। यथा,—

"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम्।
रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥"

इति पुराणम्॥

मञ्चकः, पुं (मञ्च+स्वार्थे कन्।) खट्वा। इति हेमचन्द्रः।६।८३॥ (यथा, कथासरित्-सागरे।२७।६१।

"वारिधानी तु कुम्भश्च मार्ज्जनी मञ्चकस्तथा।
अहञ्च मत्पतिश्चेति युग्मत्रितयमेव नौ॥")

इन्द्रकोषः। उच्चमण्डपः। इति त्रिकाण्ड-शेषः॥

मञ्चकाश्रयः, पुं, (मञ्चकः खट्वादिराश्रयो यस्य।) मत्कुणः। इति राजनिर्घण्टः॥

मञ्चमण्डपः, पुं, (मञ्चो मण्डप इव।) शस्य-रक्षार्थकुटिरम्। टं इति भाषा॥ तत्पर्य्यायः। कुदङ्गः। इति हारावली॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति। मन्ज्+अरप्रत्ययः।) मुक्ता। तिलकवृक्षः। वल्ली। इति शब्दरत्नावली॥

मञ्जरिः, स्त्री, वल्लरिः। इत्यमरः।२।४।१३॥ वल्लते वृणोति तरुं वल्लरिः वलमि वल्ल ङ स्तृनौ नाम्नीति अरिः। मञ्जु मनोज्ञतां रातीति मञ्जरिः पूर्ब्बेण ङिः मनीषादित्वाडुकारस्य अकारः पाक्षोणादीति ईपि मञ्जरी वल्लरी च। वल्लरिर्मञ्जरिर्द्वयोरिति शाब्दिकः॥ वल्लि-र्मञ्जिश्चाव।

"मञ्जरिर्मञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी।
वल्लरं त्रिषु वल्लिश्च वल्लरिः पत्रमालिका॥"

इति रुद्रचन्द्रः॥

लतामात्रेऽपि वल्लरिः। अतो बाहुवल्लरीति प्रयोग इति मुकुटादयः॥ वल्लरीमञ्जर्योर्भेद-मप्याहुः। यथा अभिनवनिर्गता आयता सुकु-मारा सकुसुमा अकुसुमा च मञ्जरिः। यथा चूतमञ्जरिः कदलीमञ्जरिः। वल्लरिः पुनश्चिर-भूतापि। यथा तालमञ्जरिः गुवाकवल्लरिरिति इयमेव नवे चिरन्तनेऽपीति क्षयस्वामी। इति भरतः॥

मञ्जरी, स्त्री, (मञ्जरि। कृदिकारादिति पक्षे ङीष्।) मुक्ता। तिलकवृक्षः। लता। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्।१।२०७।

"निर्गते मञ्जरीकुञ्जादपश्यन् पुरतस्ततः।
कन्ये नीलनिचोलिन्यौ स कैश्चिच्चारुलोचने॥")

मञ्जरिः। इत्यमरटीकायां भरतः॥ (यथा, आर्य्यासप्तशत्याम्।५३३।

"वापीकच्छे वासः कण्टकवृत्तयः सनागरा भ्रमराः।
केतकविटप किमेतन्ननु वारय मञ्जरीगन्धम्॥")

तुलसी। इति राजनिर्घण्टः॥

मञ्जरीनम्रः, पु, (मञ्जर्य्यां मञ्जर्य्यवस्थायामपि नम्रः।) वेतसवृक्षः। इति राजनिर्घण्टः॥

मञ्जा, स्त्री, (मजि+पचाद्यच्। टाप्।) छागी। इति त्रिकाण्डशेषः॥ मञ्जरी। इति हेमचन्द्रः।११।२२॥

मञ्जिः, पुं, (मजि+इन्।) मञ्जरी। इति त्रिकाण्डशेषः॥

मञ्जिका, स्त्री, (मञ्जयतीति। मञ्ज+ण्वुल्। टाप्। अत इत्वञ्च।) वेश्या। इति हारावली॥

मञ्जिफला, स्त्री, (मञ्जिर्मञ्जरी फलेऽस्याः।) कदली। इति त्रिकाण्डशेषः॥

मञ्जिष्ठा, स्त्री, (अतिशयेनेयं मञ्जिमती। मञ्जि-मती+इष्ठः। मतुपो लोपः स्त्रियां टाप्।) स्वनामख्यातरक्तवर्णलताविशेषः। मजीठ इति हिन्दी भाषा। तत्पर्य्यायः। विकसा २ जिङ्गी ३ समङ्गा ४ कालमेषिका ५ मण्डूक-पर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९। इत्यमरः।२।४।९०॥ कालमेषी १० काला ११ जिङ्गिः १२ मण्डूरी १३ भण्डिका १४ भण्डिः १५। इति शब्दरत्नावली॥ हरिणी १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वप्रा २० रोहिणी २१ चित्रलता २२ चित्रा २३ चित्राङ्गी २४ जननी २५ विजया २६ मञ्जूषा २७ रक्तयष्टिका २८ क्षत्रिणी २९ रागाढ्या ३० कालभाण्डिका ३१ अरुणा ३२ ज्वरहन्त्री ३३ छत्रा ३४ नागकुमारिका ३५ भण्डीरलतिका ३६ रागाङ्गी ३७ वस्त्रभूषणा ३८। (पर्य्या-यान्तरं यथा —

"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि।

ताम्रवल्ली चित्रपर्णी कान्तारी रक्तयष्टिका ॥”
इति रत्नमाला ॥)

अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषमेत्रामयनाशित्वञ्च । सा चतुर्व्विधा । चोलः१ योजनी२ कौली ३ सिंहली च ४ । इति राजनिर्घण्टः ॥ कुष्ठस्वरभङ्गशोथनाशित्वम् । वर्णाग्निकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।
“मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत् ।
गुरूष्णा विषश्लेष्मघ्नी शोथयोन्यक्षिकर्णरुक् ।
रक्तातिसारकुष्ठास्रविसर्पव्रणमेहनुत् ॥”
इति भावप्रकाशः ॥

मञ्जी, स्त्री, (मञ्जयति शोभ्यते इति । मञ्जि + इन् । कृदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः त्रिकाण्डशेषश्च ॥

मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति मञ्ज ध्वनौ सौत्रधातुः + बाहुलकात् ईरन् ।) नूपुरः । इत्यमरः । २ । १०९ ॥ मञ्जीरोऽस्त्री स नूपुरः । इति रभसः ॥ (यथा, गीतगोविन्दे । ५ । ११ ।
“मुखरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥”)

मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मन्थानदण्डरज्जुबन्धनार्थस्तम्भः । तत्पर्य्यायः । विष्कम्भः २ कुटरः ३ । इति हेमचन्द्रः ॥

मञ्जु, त्रि, (मञ्जतीति । मञ्ज ध्वनौ सौत्रधातुः । “मृगय्वादयश्च ।” उणा० । १ । ३८ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, पदाङ्कदूते । १ ।
“त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥”)

मञ्जुकेशी, [न्] पुं, (मञ्जवो मनोहराः केशाः सन्त्यस्य । इनि ।) श्रीकृष्णः । इति हलायुधः ॥ सुन्दरकेशविशिष्टे त्रि ॥

मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) हंसी । इति राजनिर्घण्टः ॥ सुन्दरगामिनि त्रि ॥

मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) पूर्व्वजिनभेदः । इति त्रिकाण्डशेषः ॥ उपास्यदेवताविशेषः । अस्य मन्त्रादि यथा,—
“जाड्यौघतिमिरध्वंसी संसारार्णवतारकः ।
श्रीमञ्जुघोषो जयतां साधकानां सुखावहः ॥”
तन्त्रागमोत्तरे ।
“मातृकादि समुद्धृत्य वह्निबीजं समुद्धरेत् ।
वामांसं कूर्म्मसंयुक्तं ततो मेषेशमुद्धरेत् ॥
मौनेशञ्च ततः कुर्य्यात् वामनेत्रेन्दुसंयुतम् ।
षडक्षरो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥
इयन्तु दीपनी प्रोक्ता मूलमन्त्रस्तु कथ्यते ।
अङ्कुशं शक्तिबीजञ्च रमाबीजं ततः प्रिये ! ॥
बाजत्रयात्मको मन्त्रो जाड्यौघध्वान्तनाशनः ।
शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये ! ॥
विद्या श्रुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ।
हकारो वह्निमारूढ़ो वामनेत्रेन्दुभूषितः ।
प्रोक्ता सार्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुश्च वा ।
तदा मन्त्रो भवेद्भक्त्या शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने सलिले चैव भोजने भाजने तथा ।
गोमये तु बहिर्द्देशे मैथुने रमणीकुचे ॥
गोष्ठे च निशि गोमुखे यन्त्रं डमरुसन्निभम् ।
विलिख्य मन्त्रवर्णांश्च त्रिश ऊर्द्ध्वं अधस्तथा ।
लिखेच्चन्दनलेखन्या प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेद्यन्त्रं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वावदूकः स्याद्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुचे श्रुतिधरो नित्यं गोमुखे च महाकविः ॥
गोमूत्रं बदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याष्टधा जप्त्वा तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद्भक्तितत्परः ।
वरं प्राप्य च तस्माद्धि विहरेत्तु यथासुखम् ॥
नान्यदेवार्च्चनं स्नानं प्रणवोच्चारणं न तु ।
वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा ॥
रात्रिवासो न सुक्षेत न शुचिः स्यात् कदाचन ।
एवं ज्ञात्वा प्रयत्नेन ज्ञात्वा गुरुमुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासेनैव ईश्वरः ।
त्रिभिर्मासैर्भवेन्मर्त्यः सर्व्वशास्त्रविशारदः ॥
पुत्त्रार्थी लभते पुत्त्रं धनार्थी विपुलं धनम् ।
आयुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥
ततः कराङ्गन्यासौ ।
चां शां अङ्गुष्ठाभ्यां नमः । इत्यादि एवं हृदयादिषु । तथा च तन्त्रे ।
“सम्वर्त्तको वक्रेशश्च द्वौ वर्णौ कथितौ प्रिये ।
षड्दीर्घभाग्भ्यामेताभ्यां षडङ्गानि समाचरेत् ॥
सम्वर्त्तः चकारः वक्रेशः शकारः ॥ * ॥ ध्यानम् ।
“शशधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरमुख्यं पद्मपत्रायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं नमामि ॥
पीठपूजां ततः कुर्य्यादाधाराद्यादिशक्तितः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
आनन्दात्रे नमः पाद्यं बुद्धिकर्त्रे तथाचमम् ।
जाड्यनाशाय गन्धः स्यादर्घ्यं स्याद्द यच्चपाय वै ॥
सर्व्वसिद्धिप्रदायेति पुष्पं दद्याद्विचक्षणः ।
कुन्दपुष्पं समादाय भैरवान् पूजयेत्ततः ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो धूपादिकं दत्त्वा प्रसूनानि विसर्जयेत् ।
तैः पुष्पैः पूजयेदष्टौ यक्षिणीश्च विशेषतः ॥
सुरारिसुन्दरी चैव मनोहारिण्यनन्तरम् ।
कनकावती तथा कामेश्वरी च रतिकर्ण्यथ ॥
पद्मिनी च नटी चैव अमुरागिण्यनन्तरम् ।
पूज्या एतास्तु योगिन्यो हूंक्षंबीजपूर्व्विकाः ॥
एवं संपूज्य देवेशं लक्षषट्कं जपेच्छुभम् ।
घृताक्तकुन्दपुष्पैश्च एकादशशतानि च ॥
जुहुयाद्दधिते वह्नौ कान्तारे पितृवेश्मनि ।
एवं सिद्धमनुर्मन्त्री महायोगीश्वरो भवेत् ॥”
इति तन्त्रसारः ॥
प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥

मञ्जुपाठकः, पुं, (मञ्जु मनोहरं पठतीति पठ + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥ सुन्दरपाठकर्त्तरि त्रि ॥

मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वव्यापकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥

मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुघोषः ४ कुमारः ५ अष्टारचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्द्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥

मञ्जुलं, क्ली, (मञ्जु मञ्जुत्वमस्त्यस्येति । “सिध्मादिभ्यश्च ।” ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाच्चलम् । निकुञ्जम् । इति मेदिनी । ले, ९ । २२ । ॥ शैवलः । इति विश्वः ॥

मञ्जुलः, पुं, (मञ्जु मञ्जुत्वमस्यास्तीति । मञ्जु + सिध्मादित्वात् लच् ।) जलरङ्कुपक्षी । इति मेदिनी । १ । २० ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४८अध्याये ।
“मञ्जुलं यौवनोद्भिदं प्राप श्रीरिव माधवे ।”
नदीभेदे स्त्री । यथा, महाभारते । ६ । ९ । ३४ ।
“चित्रोपलां चित्ररथां मञ्जुलां वाहिनीं तथा ॥”)

मञ्जुश्रीः, पुं, (मञ्जुर्मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

मञ्जुषा, स्त्री, (मञ्जूषा । पृषोदरादित्वात् ह्रस्वः ।) मञ्जूषा । पेंट्‌रा इति भाषा । यथा,—
“मञ्जुषापि च मञ्जूषा पेटा च पेटिकेत्यपि ।”
इति शब्दरत्नावली ॥

मञ्जूषा, स्त्री (मज्जति द्रव्यमस्मिन् । “मसृजेर्नुम् च ।” उणा० । ४ । ७७ । इति मस्ज + ऊषन् । नुम् च स चाचोऽन्त्यात् परः । ततो जश्त्वचुत्वे मध्यमस्य लोपात् साधुः ।) पिटकः । इत्यमरः । २ । १० । ३० ॥ (यथा, देवीभागवते । २ । ६ । ३३ ।
“मञ्जुषायां सुतं कुन्ती सुषन्ती वाक्यमब्रवीत् ॥”) पाषाणः । इत्युणादिकोषः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (मञ्जिष्ठार्थे पर्य्यायो यथा,—
“मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मट, सादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सौत्रधातुरयम् । अस्य प्रयोगः । मटच्चः । इति दुर्गादासः ॥

मटची, स्त्री, (मटनं मटः । मट् अवसादे+भावे अप् मटः चीयते प्रचीयते यभिरिति । मट+चि+बाहुलकात् डिः । मटचिः । ततः कृदि-कारादिति पक्षे ङीष् ।) सर्व्वेषामवसादकत्वा दस्यास्तथात्वम् ।) रक्तवर्णक्षुद्रपक्षिविशेषः । पाषाणवृष्टयः । यथा, गोविन्दभाष्यधृत-च्छान्दोग्ये । १ । १० । १ ॥ ("मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ इति ॥)

मटस्फटिः, पुं, (मटं अवसादं स्फटति निरा करोति । स्फट्+इः ।) दर्पारम्भः । इति जटाधरः ॥

मट्टकं, क्ली, (मठति वसत्यत्रेति । मठ+अप् । पृषोदरादित्वात् टागमे साधुः । मट्टः । मट्टस्य कं शिरः ।) गृहस्य शिरोभागः । इति केचित् । मटका इति भाषा ॥

मठ वासमर्द्दयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-वासे अक०-मर्द्दने सक०-सेट् ।) मठति । वासो निवासः । मर्द्दः केचिन्न मन्यते । इति दुर्गादासः ॥

मठ, इ ड आध्याने । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट् ।) इ मण्ठ्यते । आध्यानं स्मृ म औत्के इत्यत्र व्याख्यातम् । इति दुर्गादासः ॥

मठः, पु, छात्रादिनिलयः । इत्यमरः । २ । २ । ८ ॥ मठन्ति वसन्ति छात्रादयोऽत्र मठः । मठ वासमर्द्दयोः अल् । छत्रशीला विद्यार्थिनश्छात्राः । छत्रेण गुरुसेवा लक्ष्यते गुरुदोषच्छादनेन छत्रं तच्छीलत्वात् छात्रः विकारसंघेति णः । आदिना परिव्राजकक्षपणकादीनां ग्रहः । छात्रादीनां निलयो गृहं छात्रादिनिलयः । अर्थकथनमेतत् । नामाप्येतदिति केचित् । छात्रशाला प्रतिश्रय-स्थानेव । इति भरतः ॥ गन्त्रीरथः । इति हारावली ॥ * ॥ अथ मठादिप्रतिष्ठाप्रयोगः ।

यदि तद्दिने प्रतिमादिप्रतिष्ठा क्रियते तदा तत्तेषां वृद्धिश्राद्धादिकं विधाय देवप्रतिष्ठातन्त्रोक्त-विधिना देवप्रतिष्ठां विधाय गृहप्रतिष्ठा कर्त्तव्या । यदि गृहप्रतिष्ठामात्रं तदा प्रातः कृतनित्यक्रियः प्रक्षालितपाणिपाद आचान्तः प्राङ्मुख उदङ्मुखो वा कुशयुक्तासने उपविश्य ब्राह्मणत्रयं गन्धादिना परितोष्य अस्मिन् विष्णुवेश्मप्रतिष्ठा-कर्म्मणि ॐ पुण्याहं भवन्तोऽधिब्रुवन्तु इति त्रिः श्रावयेत् । ॐ पुण्याहमिति त्रिस्तैरुक्ते अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ स्वस्ति भवन्तोऽधि-ब्रुवन्तु इति त्रिः श्रावयेत् । ॐ स्वस्तीति त्रिस्तैरुक्ते अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ ऋद्धिं भवन्तोऽधिब्रुवन्तु इति त्रिः श्रावयेत् । ॐ ऋद्ध्यतामिति त्रिर्वदेयुः । यजुर्वेदिनां ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पति-र्दधातु । इत्यनेनाचारात् त्रिपेत् । सामगानान्तु । ॐ स्वस्ति सोमोऽयं सुतः । पिबन्त्वस्य मरुतः । उतस्वराजो अश्विना । ॐ स्वस्ति सोमोऽयं सुतः । पिबन्त्वस्य मरुतो इहाइ । उतस्वराजो वा इहाइ नो इहाइ । इति गीयमानेनाचारात् त्रिपेत् । गानाशक्तौ त्रिधा स्वरं वाचयेत् । ततः ।

"सूर्य्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा । पवनो दिक्पतिर्भूमिराकाशं खचरामराः । ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ॥"

इति पठित्वा । तत ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । इति विष्णुं स्मृत्वा नारायणं नमस्कृत्य ॐ तत सदित्यु-च्चार्य्य कुशत्रयजलफलपुष्पाण्यादाय ॐ अद्या-मुके मासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपर माणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहि-तत्वकामः श्रीविष्णुप्रीतिकामो विष्णुलोकप्राप्ति-कामो वा विष्णुवेश्मप्रतिष्ठामहं करिष्ये । इति संकल्पयेत इष्टकादिमये तु एतदिष्टकादिमय वेश्मपरमाणुसमसंख्यकवर्षसहस्रदशगुणकाला-वच्छिन्नस्वर्गलोकमहितत्वकाम इति विशेषः । पाषाणवेश्मनि तु तद्दशगुणकालावच्छिन्नस्वर्ग लोकेति विशेषः । देवतान्तरगृहप्रतिष्ठायान्तु तदुद्देन प्रयोगः ॥ * ॥ ततः संकल्पसूक्तं पठेत् । सामवेदोक्तं तद्यथा ॐ देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् । उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते ॥ यजुर्वेदोक्तं यथा,—

"ॐ यज्जाग्रतो दूरमुदैति दैवं
तदु सुप्तस्य तथैवेति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु ॥"

ततः सगणाधिपगौर्य्यादिषोडशमातृकापूजा-वसोर्धारासम्पातनायुष्यमन्त्रजपाभ्युदयिकश्रा-द्धानि कर्त्तव्यानि ॥*॥ आयुष्यमन्त्रो यथा । ॐ आयुरसि विश्वायुरसि विश्वमायुरसि । महि प्रजान्त च्छाराधिनिधे ह्यस्मे शतं जीवेम शरदो वयन्ते ॥ ॐ आयुर्यो मे पवस्व वर्चसो मे पवस्व विदः पृथिव्या दिवो जनित्राः शृण्वन्त्वापोऽधः क्षरन्तो सोमाश्चोद्गाय ममायुषे मम ब्रह्मवर्च्च-साय यजमानस्यर्द्ध्यै अमुकस्य राज्याय ॥ * ॥ तत्र विष्णुवेश्मप्रतिष्ठाभ्युदयार्थमिति वाक्ये विशेषः । गतमन्यवेश्मनि । ततः उत्तराभि-मुखं ब्राह्मणमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमानः प्राञ्जलिर्वदेत् । ॐ साधु भवानास्ताम् । ॐ साध्वहमासे इति प्रतिवचनं दत्त्वा तदासने उदङ्मुख उपविशति । ततो यजमानः ॐ अर्च्चयिष्यामो भवन्तं इति वदेत् । ॐ अर्च्चयेति प्रतिवचनम् । ततो गन्धपुष्पताम्बूला-लङ्कारैरभ्यर्च्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्ये-त्यादि अमुकगोत्रममुकप्रवरममुकदेवशर्म्माणं भवन्तं अस्मिन् सङ्कल्पितविष्णुवेश्मप्रतिष्ठा कर्म्माङ्गभूतहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्ध पुष्पताम्बूलालङ्कारवस्त्रैरहं वृणे । ॐ वृतो-ऽस्मीति प्रतिवचनम् । यथाविहितं ब्रह्मकर्म्म कुरु । ॐ यथाज्ञानं करवाणीति प्रतिवचनम् । स्वयं होमासामर्थ्ये होतुर्वरणमपि तथैव कार्य्यम् । तत्सदाचारकत्वेन आचार्य्यस्यापि तथैव कार्य्यम् । एतेन सदस्यस्यापि । गुरोर्वरणे तु संकल्पितेऽस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणीति वक्तव्यम् ॥ * ॥ ततो यजमानः गुरोः पादौ धृत्वा पठेत् ।

"नारायणस्वरूपस्त्वं संसारात्त्राहि मां प्रभो । त्वत्प्रसादात् गुरो ! यज्ञं प्राप्नोमि यज्ञयोदितम् ॥
त्राहि नाथ । प्रपन्नं मां भीतं संसारसागरात् ।
देवतास्थापने ह्यद्य मम शान्तिं कुरु प्रभो ॥"

ततो गुरुः ।
ॐ उत्तिष्ठ वत्स भद्रन्ते मत्प्रसादात्त्वयानघ । प्राप्स्यसे धर्म्मकामार्थं दुष्प्रापं यत् सुरासुरैः ॥*॥

ततो गुरुः ।
ॐ पावमानीः स्वस्त्ययनीः स्वदुघा हि घृत-श्चुतः ।
ऋषिभिः सम्भृतो रसो ब्राह्मणे ष्वमृतं हितम् ॥
इति पावमानीसूक्तम् ॥

"अमपत्रं पुरस्तात्: शिवं दक्षिणतः कृधि । अभयं सततं पश्चात् भद्रमुत्तरतो गृहे ॥"
इति शाकुनसूक्तम् ॥

ॐ रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वलगहनोऽवनयामि वैष्णवान् रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवान् । रक्षोहणौ वलगहनावुपदधामि वैष्णवी । रक्षोहणौ वलगहनौ पर्य्यूहामि वैष्णवमसि वैष्णवाः स्थः ।
इति रक्षासूक्तम् । इति पठित्वा ।

"वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः । अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ॥
विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पिशिताशनाश्च ।
सिद्धार्थकैर्वज्रसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु ॥"

इति श्वेतसर्षपान् विकीर्य्य स्वैः स्वैर्मन्त्रैः पञ्च-गव्यं शोधयेत् ॥ * ॥ तच्छोधनमन्त्रा यथा ।
ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ।
इति गोमूत्रम् ।
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियम् ॥
इति गोमयम् ।
ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं
भवावाजस्य सङ्गथे ।
इति दुग्धम् ।
ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य
वाजिनः ।
सुरभिणो मुखाकरत् प्रणतायूंषि तारिषत् ॥
इति दधि ।

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामनाधृष्टं देवयजनमसि ॥

इति घृतम् ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमाददे । इति कुशोदकम् ॥ ॐ वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् । यूपेन यूप आप्यते प्रणीतो अग्निरग्निना । इति मन्त्रेण वेदीं संप्रोक्ष्य पञ्च घटान् घटस्थापनक्रमेण संस्थाप्य ॥ * ॥ घटस्थापनमन्त्रा यथा । सामगानाम् । ॐ महित्रीणामवोऽस्तु द्युक्षं मित्रस्यार्य्यम्णः दुराधर्षं वरुणस्य । इति भूमेः । ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनं इन्द्र प्रातर्ज्जुषस्व नः । इति धान्यस्य । ॐ आविशं कलसं सुतो विश्वा अर्षन्नभिश्रिय इन्दुरिन्द्राय धीयते । इति कलसस्य ।

"ॐ अयमूर्ज्जावतो वृक्ष उर्ज्जीव फलिनी भव । पर्णं वनस्पते नु त्वा नु त्वा च सूयतां रयि ॥"

इति पल्लवस्य ।

ॐ आनोमित्रावरुणा घृतैर्गव्युतिमुक्षतं मध्वा रजांसि सुक्रतु । इति जलस्य । ॐ इन्द्रनरो नेमधिता हवन्ते यत्पार्य्या युनयते धियस्ताः शूरो नृषाता श्रवसश्च काम आगोमति व्रजे भजात्वन्नः । इति फलस्य । ॐ सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते । इति सिन्दूरस्य । ॐ त्वावतः पुरूवसो वयमिन्द्र प्रणेतः स्मसि स्थातर्हरीणाम् । इति स्थिरीकरणस्य । ॐ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् (?) ... अभिर्वाजसातमः । दधात्स्तोत्रे सुवीर्य्यम् । इति पुष्पस्य ॥ * ॥ यजुषाम् । ॐ भूरसि भुवनस्य दितिरसि विश्वस्य धाया विश्वस्य भुवनस्य धर्त्रीम् । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः । इति भूमेः । ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यम् । इति धान्यस्य । ॐ आजिघ्र कलसं मह्या त्वा विशन्त्विन्दवः पुनरूर्ज्जा निवर्त्तस्व सा नः । सहस्रं धुक्ष्वोरुधारा पयस्वती माविशताद्रयि । इति घटस्य । ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनीस्थः वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद । इति जलस्य । ॐ धन्वनागा धन्वना जिजयेम धन्वना तीव्राः समदो जयेम । धनुःशत्रोरपकामं कृणोतु धन्वना सर्व्वाः प्रदिशो जयेम । इति पल्लवस्य । ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः । इति फलस्य ।

"ॐ सर्व्वतीर्थमयं वारि सर्व्वदेवसमन्वितम् । इमं घटं समारुह्य तिष्ठ देवगणैः सह ॥"

इति जलं दद्यात् । ॐ स्थिरो भव विड्वङ्ग आशुर्भव वाज्यर्व्वन् पृथुर्भव सुसदस्त्वमग्ने पुरीषवाहनः । इति स्थिरीकरणस्य । ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः । पतयन्ति यह्वा घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः इति सिन्दूरस्य । ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपं अश्विनौ व्यात्तं इष्णन्निषाण सर्व्वलोकं मनीषाण । इति पुष्पस्य ॥ * ॥ ततः फलपुष्पयुतं वितानम् । ॐ विमान एष दिवो मध्य आस्त आपप्रवान् रोदसी अन्तरीक्षम् । सविश्वाचीरभिचष्टे घृताचीरन्तरा पूर्व्वमपरञ्च केतुम् ॥ सामगानान्तु । ॐ ऊर्द्ध्व ऊषु ण ऊतये तिष्ठा देवो न सविता ऊर्द्ध्वो वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्विह्वयामहे । इति मन्त्रेण बध्नीयात् । * ।

"ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम । इति मन्त्रेण मण्डलमध्ये सुवर्णपद्मं दत्त्वा स्वर्णशलाकया दलान्युत्कीर्य्य मण्डलमध्ये राजतीं प्रतिमां ॐ सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्म्माणमदितिं सुप्रणीतिम् । दैवीं नावं स्वरित्रामानागसमस्रवन्तीमारुहेमा स्वस्तये । इति मन्त्रेण निःक्षिप्य घटेषु देवान् पूजयेत् । * । प्रथमघटे गणेशं सूर्य्यं द्वितीयघटे शिवं दुर्गां तृतीयघटे विष्णुं लक्ष्मीं सरस्वतीं चतुर्थे अग्निं वास्तुपुरुषं क्षेत्रपालान् कार्त्तिकेयमश्विनीकुमारौ पञ्चमे ग्रहान् लोकपालांश्च स्वैः स्वैर्मन्त्रैरावाह्य पूजयेत् ।*। ततो गुरुदेवं प्रतिमायां शालग्रामे वा यथोक्तविधिना स्नापयेत् ।

"ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥"

इति मन्त्रेण निवेश्य ॐ एतोन्विन्द्रꣳस्तवाम शुद्धं शुद्धेन साम्ना । शुद्धै रुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु । इति मन्त्रेण शुद्धोदकेन स्नापयेत् । ॐ घृतवतीति घृतेनाभ्यज्य । ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः । इति मसूरचूर्णेनोद्वर्त्तनम् । ॐ सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयः सप्त धामप्रियाणि सप्त होत्राः सप्तधा त्वा यजन्ति । सप्त योनीरापृणस्वा घृतेन । इति उष्णोदकेन क्षालयेत् । ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः इति चन्दनेनानुलिप्य ॐ आपो हि ष्ठा मयो भुवः स्तान ऊर्ज्जे दधातन महेरणाय चक्षसे । इति नदीतोयेन स्नापयेत् । ॐ शन्नो देवीरभिष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः । इति तीर्थस्तनकलसेन स्नापयित्वा गावत्र्या गन्धयुक्तजलेन स्नापयेत् । ॐ हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भन्दधिरे विरूपास्तान् आपः शꣳस्योना भवन्तु ॥ इति पञ्चमृत्तिकया । ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमम् सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया इति मन्त्रेण सिकताजलेन । ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । इति वल्मीकतोयेन । ॐ या ओषधी सोमराज्ञीर्विष्ठिताः पृथिवीमनु । तासान्त्वमस्युत्तमा ... प्रणो जीवातवे सुव । (?) इति सर्व्वौषधिजलेन । ॐ यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे । प्रप्रवयमन्तञ्जातवेदसं प्रियं मित्रन्न शꣳसिषम् । इति कषाययुक्तजलेन । पञ्चगव्येन स्वैः स्वैर्मन्त्रैः सेचयेत् । ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाम् । पयस्वतीः प्रदिशः सन्तु मह्यं सम्मा सृजामि पयसा घृतेन सम्मा सृजाम्यप ओषधीभिः ॥ इति पञ्चगव्येन । ॐ तस्माद्यज्ञात् सर्व्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ इति पञ्चामृतेन । ॐ याः फलिनीति फलोदकेन । ॐ सहस्रशीर्षेति वक्ष्यमाणमन्त्रेण सहस्रधारया । ॐ एतोन्विन्द्रमिति पूर्व्वोक्तमन्त्रेण तुलसीचन्दनयुक्तजलेन । ॐ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥ इत्यनेन वेदादिचतुष्टयेन । तद्यथा ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम् ।१। ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणे ।२। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि ।३। ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः । ४ । वक्ष्यमाणपुरुषसूक्तेन च एकाशीतिघटैः स्नापयेत् । अशक्तौ अष्टाविंशतिघटैरष्टघटैर्वा स्नापयित्वा धौतवाससा जलमपनीय यथोपचारैः संपूज्य मण्डले आधारशक्त्यादीनि पूजयेत् । * । ॐ आधारशक्तये नमः । एवं सर्व्वत्र प्रणवादिनमोऽन्तेन । प्रकृत्यै कूर्म्माय अनन्ताय पृथिव्यै क्षीरसमुद्राय रत्नद्वीपाय रत्नोज्ज्वलसहितमहामणिमण्डपाय कल्पवृक्षाय रत्नवेदिकायै रत्नसिंहासनाय । आग्नेय्यां धर्म्माय नैरृत्यां ज्ञानाय वायव्यां वैराग्याय ऐशान्यां ऐश्वर्य्याय पूर्व्वस्यां अधर्म्माय पश्चिमायां अवैराग्याय उत्तरस्यां अनैश्वर्य्याय । मध्ये अं अर्कमण्डलाय उं सोममण्डलाय मं वह्निमण्डलाय । सं सत्वाय रं रजसे तं तमसे । आं आत्मने अं अन्तरात्मने पं परमात्मने ह्रीं ज्ञानात्मने । पूर्व्वादिकेशरेषु प्रादक्षिण्येन ॐ विमलायै नमः । एवं उत्कर्षिण्यै ज्ञानायै क्रियायै योगायै प्रह्व्यै सत्यायै ईशानायै । कर्णिकायां अनुग्रहायै । कर्णिकोपरि ॐ नमो भगवते विष्णवे सर्व्वभूतात्मने वासुदेवाय सर्व्वात्मसंयोगयोगपीठात्मने नमः ॥ * ॥ ततो मण्डले देवं संस्थाप्य पौराणिकमन्त्रेण पुरुषसूक्तेन वा षोडशोपचारैः पूजयेत् । तद्यथा । ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्व्वतो स्पृत्वा अत्यतिष्ठद्दशाङ्गुलम् ।१।

सर्व्वत: स्थाने विश्वतो हत्वा स्थाने स्पृष्ट्वा इत्यपि पाठ:। इति पठित्वा भगवन् विष्णो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निरुद्धस्व मम पूजां गृहाण। ततो यथाविधानमानीय वर्म्मेति वरुणबीजेनार्घ्यम्भसा संप्रोक्ष्यासनम् अर्घ्यं ॐ पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २। इति पठित्वा इदमासनं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे नम:। एवं सर्व्वत्र दाने। ॐ भगवन् विष्णो स्वागतम्। इति स्वागतप्रश्न:। ततस्ताम्रपात्रस्थं पद्मश्यामाकदूर्व्वापराजितादि युक्तं जलं गृहीत्वा ॐ एतावानस्य महिमातो ज्यायांश्च पूरुष: पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३। इति पठित्वा इदं पाद्यं पूर्व्ववन्मूलेन पादयोर्द्दद्यात्। ततो गन्ध-पुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्व्वायुक्तजलं शङ्खादिपात्रे कृत्वा ॐ त्रिपादूर्द्ध्व उदैत् पुरुष: पादोऽस्येहाभवत् पुन:। ततो विष्वङ्व्यक्रामत् साशनानशने अभि ४॥ तत: स्थाने तस्मा-दित्यपि पाठ:। इति पठित्वा सामगानामिद मर्घ्यमन्येषामेष: अर्घ: इति शिरसि दद्यात्। जातीलवङ्गककोलयुक्तं केवलं वा पात्रस्थं जलं गृहीत्वा ॐ ततो विराडजायत विराजोऽधि-पुरुष: स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुर:५॥ इति पठित्वा इदमाचमनीयं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वधा इति दद्यात्। तत: कांस्यपात्रस्थं दधिमधुघृतात्मकं कांस्येन पिहितं मधुपर्कं गृहीत्वा ॐ तस्माद्-यज्ञात् सर्व्वहुत: संभृतं पृषदाज्यं पशूंस्तां-श्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६॥ इति पठित्वा एष मधुपर्क: ॐ नमो भगवते वासु-देवाय श्रीविष्णवे स्वाहा इति दद्यात्। तत: पूर्व्वमन्त्रं पठित्वा पुनराचमनीयञ्च दद्यात्। कर्पूरवासितजलं गृहीत्वा ॐ तस्माद्यज्ञात् सर्व्वहुत ऋच: सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७॥ इति पठित्वा इदं स्नानीयजलं मूलेन दद्यात्। पूर्व्ववत् पुनराचमनीयं दत्त्वा वस्त्रं गृहीत्वा ॐ तस्मादश्वा अजायन्त ये के चोभयादत:। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावय: ८॥ इति पठित्वा इदं वस्त्रं मूलेन दद्यात्। एव-मुत्तरीयवस्त्रं यज्ञोपवीतं पूर्व्ववदाचमनीयं दत्त्वा आभरणं गृहीत्वा ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रत:। तेन देवा अयजन्त साध्या ऋषयश्च ये ९। इति पठित्वा मूलेन दद्यात्। ॐ यत्पुरुषं व्यदधु: कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते १०। ऋग्वेदस्याश्वलायनशाखायान्तु मुखं किमस्य कौ बाहू कावूरू पादा उच्येते इति भेद:। इति पठित्वा मूलेन गन्धं दद्यात्। ॐ ब्राह्मणो ऽस्य मुखमासीद् बाहू राजन्य: कृत:। ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत ११॥

इति पठित्वा मूलेन पुष्पं दद्यात्। ॐ चन्द्रमा मनसो जातश्चक्षो: सूर्य्यो अजायत। श्रोत्रा-द्वायुश्च प्राणश्च मुखादग्निरजायत १२॥ मुखा-दिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत इति च पाठ:। इति पठित्वा मूलेन धूपं दद्यात्। ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौ: समवर्त्तत। पद्भ्यां भूमिर्द्दिश: श्रोत्रात्तथा लोकानकल्पयन् १३॥ इति पठित्वा मूलेन दीपं दद्यात्। ततो नैवेद्यो-परि मत्स्यमुद्रया मूलमन्त्रं दशधा जप्त्वाभ्यर्च्य धेनुमुद्रां प्रदर्श्य ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्म: शरद्धवि: १४॥ इति पठित्वा नैवेद्यं मूलेन दद्यात्। ॐ सप्तास्यासन् परिधयस्त्रि: सप्त समिध: कृता:। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् १५॥ इति पठित्वा कर्पूरादि-वासितं पानीयं ताम्बूलं पुनराचमनीयं दर्पणञ्च दद्यात्। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। ते ह नाकं महि-मान: सचन्त यत्र पूर्व्वे साध्या: सन्ति देवा: १६। इति पठित्वा अञ्जलित्रयं पुष्पं दत्त्वा छत्रचामरादीनि संपूज्य मूलमन्त्रं यथाशक्ति जप्त्वा प्रणमेत्। *। ऋग्वेदस्याश्वलायनशाखा-यान्तु यत्पुरुषेण हविषा इत्यादिना स्नानीयं ६ तं यज्ञं बर्हिषीत्यादिना वस्त्रं ७ तस्मात् यज्ञात् सर्व्वहुत: संभृतमित्यादिना यज्ञोपवीतम् ८ तस्मात् यज्ञात् सर्व्वहुत ऋच: सामानीत्यादिना चन्दनम् ९ तस्मादश्वा अजायन्त इत्यादिना पुष्पं १० यत्पुरुषं व्यदधुरित्यादिना धूपम् ११ ब्राह्मणोऽस्य मुखमासीदित्यादिना दीपम् १२ चन्द्रमा मनसो जात इत्यादिना नैवेद्यम् १३ नाभ्या आसीदन्तरिक्षमित्यादिना ताम्बूलम् १४ सप्तास्यासन् परिधय इत्यादिना नीराजनम् १५ इति भेद: अन्यत् समानम्। *। ततो गुरु: कुण्डपश्चिमे उपविश्य कुण्डे स्थण्डिले वा ब्राह्म-विधिना तदशक्तौ स्वगृह्योक्तविधिना साहस-नामानमग्निं संस्थाप्य अग्निस्थापनानन्तरं अभि-षेकार्थं ऐशान्यां नवसप्तपञ्चान्यतमं वहिर्द्देश्यचत्त-भूमितं चतुरश्रमन्यग्रोधोडुम्बरप्रचम्पकवञ्जुल-मुखं फलवस्त्रयुतं अन्त:क्षिप्तपञ्चरत्नं निर्म्मल-जलपूर्णं दृढकलसं आतनानामुपरि ॐ आजिघ्र कलसमित्यादिमन्त्रेण स्थापयेत्। तत्र वरुणस्यो-त्तम्भनमसीति वरुणं न्यसेत्।

“ॐ गङ्गाद्या: सरित: सर्व्वा: समुद्राश्च सरांसि च।

सर्व्वे समुद्रा: सरितस्तीर्थानि जलदा नदा:।
आयान्तु यजमानस्य दुरितक्षयकारका:॥”

इति तीर्थानि च न्यसेत्। तत्रैव कलसे अश्व-स्थानाद्गजस्थानात् वल्मीकात् सङ्गमात् ह्रदात्। गोकुलात् रथ्याया आनीय सप्त मृद: क्षिपेत्॥ सर्व्वौषधीश्च॥ *॥ ततश्चरुश्रपणं कुर्य्यात्। अग्नेरुत्तरे द्वादशाङ्गुलविस्तारायां प्रादेशपरिमि-तोडुम्बरनिर्म्मितदर्व्व्यां साङ्गुष्ठविस्ताराय-

प्रादेशपरिमितोडुम्बरनिर्म्मितमेक्षणं चरुस्थाली आज्यस्थाली उदूखलमुषले सुवं पूर्णपात्रार्थं सुवं समिधं आज्यादीनि उदगग्राणि प्राक्सं-प्राक्सं विनियोगक्रमेणासादयति। संस्थाप्य यवान् व्रीहीन् वा तदभावे तण्डुलान् शूर्पे निधाय। साधक:। ॐ विष्णवे त्वा जुष्टं निर्व्व-पामि। इति यवादिप्रस्थमितमेकां चरुस्थाल्यां कृत्वा उदूखलमध्ये स्थापयेत्। यजुर्व्वेदी तु ॐ विष्णवे त्वा जुष्टं गृह्णामि ॐ विष्णवे त्वा जुष्टं निर्व्वपामि चमसस्थजलेन ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति त्रयं कुर्य्यात्। ऋग्वेदी तु ॐ विष्णवे त्वा जुष्टं निर्व्वपामि ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति निर्व्वापप्रोक्षणमात्रम्। यस्य गृहप्रतिष्ठा तस्यादौ जुह्वयनम्। एवं सर्व्वत्र। एवमग्न्यादिषु। ॐ अग्नये त्वा जुष्टं निर्व्वपामि एवं वायवे सूर्य्याय हि: विष्णवे हि: अग्नये वायवे पुनरग्नये वरुणाय पुनरपि अग्नये सूर्य्याय प्रजापतये अन्तरीक्षाय द्यवे ब्रह्मणे पृथिव्यै महाराजाय सोमाय इन्द्राय अग्नये यमाय नैर्ऋताय वरुणाय वायवे कुबेराय ईशानाय ब्रह्मणे अनन्ताय आदित्याय सोमाय मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्य इत्थं नवत्रिंशत् प्रसृती: स्थाप-येत्। दिक्स्वामी उपरिकृतदक्षिणवामसुष्टिभ्यां मुषलेनावहत्य शूर्पेण प्रस्फोटयेत्। एवमपर-वारद्वयमवहत्य शूर्पेण प्रस्फोटयेत्। तथा कर्त्तव्यं यथा वारत्रयेण तण्डुलनिष्पत्तिर्भवति। तदशक्तौ संस्कारमात्रार्थं तण्डुलैर्व्वेवम्। ततस्तण्डुलान् त्रि: प्रक्षाल्य चरुस्थाल्याममलकं क्षालितरायां पवित्रं नि:क्षिप्य तत्र तण्डुलान् निधाय कपि-लाया दुग्धं नि:क्षिप्य तदभावे अन्यधेनो-दुग्धं नि:क्षिप्य दक्षिणा प्रागादिप्रदक्षिणमीष-दूर्द्ध्वमवघट्टयंस्तथा पचेत यथा दाहकाठिन्यानि-शैथिल्यमवगालनरहितोऽन्तरुष्मपक्वश्चरुर्भवति ज्वलदुल्मुकेन स्थालीमध्यस्थं चरुं दृष्ट्वा ॐ तद्विष्णो: परमं पदं सदा पश्यन्ति सूरय: दिवीव चक्षुराततमित्यनेन मन्त्रेण ओमित्यनेन च घृतेन सिक्त्वा दक्षिणा दक्षिणावर्त्तेन संमिश्र-येत्। ततोऽग्निरुत्तरतोऽवतार्य्य पुनर्ज्वलदुल्मु-केन स्थालीमध्यस्थं दृष्ट्वा पुनर्घृतेनाभिघारयेत्। तत: पर्य्युक्षणान्तां कुशण्डिकां समाप्य सामगस्तु काम्यकर्म्मत्वेन तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्त्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा विरूपाक्षजपं कुर्य्यात्। तत: प्रकृतं कर्म्मणि।

“ॐ पिङ्गभ्रूश्मश्रुकेशाक्ष: पीनाङ्गजठरोऽरुण:।
छागस्थ: साक्षसूत्रोऽग्नि: सप्तार्चि: शक्ति-
धारक:॥”

इत्यादित्यपुराणीयं ध्यात्वा विष्णुवेश्मप्रतिष्ठा-कर्म्मणि अयं त्वं साहसनामासीति नाम कृत्वा-वाह्य संपूज्य प्रादेशप्रमाणां घृताक्तां समिधं

तूष्णीमग्नौ हुत्वा मेघणीन चरुं गृहीत्वा ॐ तद्विष्णोरित्यादिस्वाहान्तेन जुहुयात् सर्व्वत्र साममार्गा मन्त्रान्ते देवतोद्देशो नास्ति। अन्येषां इदं विष्णवे इति। ॐ भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्य्याय ॐ भूर्भुवः स्वः तत् सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात स्वाहा इदं सूर्य्याय। ॐ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदं स्वाहा इदं विष्णवे। ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् संबाहुभ्यां धमति संपतत्रैर्द्यावा भूमी जनयन् देव एकः स्वाहा इदं विष्णवे। ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं स्वाहा इदमग्नये। ॐ इषेत्वोर्जेत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणे स्वाहा इदं वायवे। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि स्वाहा इदमग्नये। ॐ शन्नो देवीरभीष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा इदं वरुणाय। ॐ भूरग्नये स्वाहा ॐ सूर्य्याय स्वाहा ॐ प्रजापतये स्वाहा ॐ अन्तरीक्षाय स्वाहा ॐ द्यौः स्वाहा ॐ ब्रह्मणे स्वाहा ॐ पृथिव्यै स्वाहा ॐ महाराजाय स्वाहा एष्वपि साममार्गेतरैस्तत्तद्देवतोद्देशः पश्चात् कार्य्यः। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय ॥ ॥ ततो दिक्पालहोमः। ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्तिनो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं स्वाहा इदमग्नये। ॐ नाके सुपर्णमुपयत् पतन्तं हृदावेनन्तो अभ्यचक्षत त्वा हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्यं स्वाहा इदं यमाय। ॐ वेत्था हि निर्ऋतीनां वज्रहस्तः परिव्रजं अहरहः सिन्धुपरिपदामिव स्वाहा इदं निर्ऋताय। ॐ घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरिरेतसा स्वाहा इदं वरुणाय। ॐ वात आवातु भेषजं शम्भुमयो भुवो हृदे प्रण आयूंषि तारिषत् स्वाहा इदं वायवे। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय। ॐ अभित्वा शूरणोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। सुबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ गर्भणाधृतं मघवानसकृष्यामिन्द्रं गिरो बृहतीरभ्यनूषत वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवे दिवे स्वाहा। इदमनन्ताय। इति साममार्गो जुहुयात्। तत्तद्देवतोद्देशस्तु न कर्त्तव्यः। तत्तद्देवताप्रकाशनाय च देवताविशेषा उक्ताः ॥ ॥

यजुर्व्वेदी तु। ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रं हुवेनु शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ वैश्वानरो न उतय आप्रयातु परावतः अग्निरुक्थेन वाहसा उपयामगृहीतोऽसि वैश्वानराय द्वेषते योनिर्व्वैश्वानराय त्वा स्वाहा इदमग्नये। ॐ असियमोऽस्यादित्योऽर्व्वन्नसित्रितो गुह्येन व्रतेन असि सोमेन समयाविपृक्त आहुस्ते त्रीणि दिवि बन्धनानि स्वाहा इदं यमाय। ॐ यस्ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवासु विमृत्यं तत्ते विषाम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः। नमो भूत्यै एदञ्चकारस्वाहा। इदं निर्ऋतये। शाखान्तरे तु ॐ यत्ते देवी निर्ऋतिराबबन्ध दामग्रीवास्वविच अर्त्यं इदन्ते तद्विष्याम्यायुषो न मध्यादथा जीवः पितुमद्धि प्रमुक्त स्वाहा इदं निर्ऋतये। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थः वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनो मासीद स्वाहा इदं वरुणाय। ॐ वातो वावो मनो वा गन्धर्व्वाः सप्तविंशतिस्तेऽग्रे समयुञ्जꣳस्तेऽस्मिन् यवमादधुः स्वाहा इदं वायवे। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्व्वं वियूयम्। इहे हैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं न जग्मुः स्वाहा इदं कुवेराय। ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्नमवसे हूमहे वयम्। पूषाणो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धस्वस्तये स्वाहा इदमीशानाय। ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्च्चसी जायता माराष्ट्रे राजन्य शूर इषव्योति व्याधी महारथो जायतां स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ये अन्तरीक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदमनन्ताय ॥ ॥

ऋग्वेदी तु। ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्र ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे देवा आसादयादिह स्वाहा इदमग्नये। ॐ यमाय सोमं सुनुत यमाय जुहुता हविः यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः स्वाहा इदं यमाय। ॐ यघते निर्ऋतेभागस्तं जुषस्व स्वाहा अग्निनेत्रेभ्यो देवेभ्यः पुरः सद्भ्यः स्वाहा यमनेत्रेभ्यो दक्षिणासद्भ्यः विश्वदेवनेत्रेभ्यः देवेभ्यः स्वाहा पश्चात सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो देवामादावय्य उत्तरा सद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्य उपरिषद्भ्यो दुरः सद्भ्यः स्वाहा इदं निर्ऋताय। आश्वलायनशाखायान्तु ॐ मोषुणः परापरा निर्ऋतिर्दुर्हणावधीत्। पदीष्ट तृष्णया सह स्वाहा इदं नैर्ऋताय। ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणे हवोध्युरुशं समान आयुः प्रमोषी स्वाहा इदं वरुणाय। ॐ वातो वावो मनो वा गन्धर्व्वाः सप्तविंशतिस्तेऽग्रेऽश्वमयुञ्जꣳस्तेऽस्मिन् यवमादधुः स्वाहा। इद वायवे। आश्वलायनशाखायान्तु ॐ तव वाय ऋतस्पते त्वष्टुर्ज्जामातरद्भुत। अवांस्या वृणीमहे स्वाहा इदं वायवे। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्व्वं वियूय इहे हैषां कृणुहि भोजनानि ये बर्हिषो नमो उक्तिं न जग्मुः स्वाहा इदं कुवेराय। ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्नमवसे हूमहे वयं पूषाणो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धस्वस्तये स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः सुबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु येऽन्तरीक्षे ये दिवि तेभ्यः सर्पेभ्यो नम स्वाहा इदमनन्ताय ॥ ॥ ततो नवग्रहहोमः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषसश्चित्रं राधोऽमर्त्य आदाशुषे जातवेदो वहा त्वमद्या देवां उषर्बुधः स्वाहा। ॐ बृहस्पते परिदीया रथेन रक्षोहा मित्रां अपबाधमानः प्रभञ्जन्सेना प्रमृणो युधा यजन्नस्माकमेध्यविता रथानां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि विश्वा हि माया अवसि स्वधावन् भद्राते पूषन्निह रातिरस्तु स्वाहा। ॐ शन्नो देवीरभीष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुव दूती सदा वृधः सखा कया सचिष्ठया वृता स्वाहा। ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे समुषद्भिरजायथाः स्वाहा। यजुर्व्वेदी तु। ॐ आकृष्णेनेत्यादि इदं सूर्य्याय। ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय इममसुमस्य पुत्रममुष्याः पुत्रमस्यै विश स्वाहा। इदं सोमाय। ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। इदं मङ्गलाय। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय। ॐ बृहस्पते अति यदर्य्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस

ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रं स्वाहा। इदं इन्द्राग्नये। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयःसोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धसः। इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय। ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं शनैश्चराय। ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राहवे। ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे समुषद्भिरजायथाः स्वाहा। इदं केतुभ्यः। ऋग्वेदी तु एभिरेव मन्त्रैर्जुहुयात्॥ * ॥ ततो मेक्षणमग्नौ प्रक्षिपेत्। एवं चरुहोमं समाप्य चरुशेषेण दिग्भ्यो बलिन्दद्यात्। तद्यथा। एष पायसबलिः ॐ प्राच्यै दिशे नमः। एवमाग्नेय्यै अवाच्यै निरृत्यै प्रतीच्यै वायव्यै उदीच्यै ऐशान्यै ऊर्द्धदिशे अधोदिशे॥ * ॥ ततो घृताक्तपलाशसमिधा अष्टोत्तरशतं जुहुयादनेन मन्त्रेण। ॐ तद्विष्णोरित्यादि स्वाहा इदं विष्णवे। ततः पूर्व्वोक्तैश्चरुहोममन्त्रैस्तत्तद्देवताभ्यः स्रुवेणाज्याहुतीर्जुहुयात्। तत आज्येन पुरुषसूक्तगतैर्भिर्म्मन्त्रैः सामगो जुहुयात्। यथा। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं स मूढमस्य पांशुले स्वाहा। १। ॐ प्रत्नस्य विष्णो रुरुमस्य नूसहः प्रमाणोपं विदथा जातवेदस, वैश्वानराय मतिर्नव्यसि शुचिः सोम इव पवत चारुरग्नये स्वाहा। २। ॐ प्रकाव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् स्वाहा। ३। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्व्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं स्वाहा। ४। ॐ त्रिपादूर्द्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वं व्यक्रामत् साशनानशने अभि स्वाहा। ५। ॐ पुरुष एवेदं सर्व्वं यद्भूतं यच्च भव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा। ६। ॐ एतावानस्य महिमातो ज्यायांश्च पुरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा। ७। ॐ ततो विराडजायत विराजो अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः स्वाहा। ८। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता स्वाहा। ९। * । यजुर्वेदी तु। षोडशोपचारपूजोक्तपुरुषसूक्तषोडशमन्त्रैराज्येन षोडशाहुतीर्जुहुयात्। ऋग्वेदिनामप्येवम्॥ * ॥ तत आज्यमिश्रितान् तिलान् गृहीत्वा ॐ इरावती धेनुमती हि भूतं सूयवसिनी मनवे दशस्या व्यस्तभ्ना रोदसी विष्णुदेतेराधत्त पृथिवीमभितो मयूखैः स्वाहा। इदं विष्णवे। इति सकृत् जुहुयात्। ॐ ब्रह्मानुयायिभ्यः स्वाहा। ॐ विष्णुनुयायिभ्यः स्वाहा। ॐ ईशानानुयायिभ्यः स्वाहा। एवं पूर्व्वोक्तैर्नवग्रहमन्त्रैर्दशदिक्पालमन्त्रैश्च सकृत् सकृत् जुहुयात्। एवं पर्व्वतेभ्यः स्वाहा। ॐ नदीभ्यः स्वाहा। ॐ समुद्रेभ्यः स्वाहा। एव तिलहोमं समाप्य स्रुवेण महाव्याहृतिभिराज्यं जुहुयात्। * । ततः प्रायश्चित्तहोमसङ्कल्पं कृत्वा ॐ अग्ने त्वं विधुनामासीति नाम कृत्वा आवाह्य पूजयित्वा परिभाषासिद्धं स्वशाखोक्तं प्रायश्चित्तहोमादि कृत्वा पूर्णाहुत्यै मृडनामानमग्निं पूजयित्वा घृतपूर्णस्रुचा उत्थाय यजमानेनान्वारब्धः ॐ तद्विष्णोः परममित्यादि वौषट् इत्युच्चार्य्य पूर्णाहुतित्रयं दद्यात्। तत आचारात् ऐशान्यां पृथ्वि त्वं शीतला भव इत्युच्चार्य्य दुग्धादि क्षिप्त्वा स्रुवलग्नभस्मना ॐ कश्यपस्य त्र्यायुषं इति शिरसि। ॐ यमदग्नेस्त्र्यायुषं कण्ठे। ॐ यद्देवानां त्र्यायुषं बाहुमूलयोः। ॐ तन्नोऽस्तु त्र्यायुषं हृदि। अन्यकर्तृकपक्षे तु तत्तेऽस्तु त्र्यायुषमिति विशेषः। ततो यजमानः पञ्चगव्यं चरुशेषञ्च प्राश्य स्नात्वा वा पूर्णपात्रादिकां दक्षिणां ब्रह्मणे दद्यात् ततो हेमयुक्तं सवस्त्रतिलपात्रं अलङ्कृतगावीं तन्मूल्यं वा एतद्धोमकर्म्मप्रतिष्ठार्थमाचार्य्याय दद्यात्। अन्यहोतृपक्षे होत्रे दद्यात्। एतत्कृतकर्म्मणा प्रीयतां भगवान् विष्णुरिति विष्णवे समर्पयेत्।*। ततः प्रासादसम्मुखे ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यजन्तस्ते महे उपप्रयान्तु मरुतः सुदानव इन्द्र, प्राशुर्भवासचा इतिमन्त्रेण देवतामानीय विष्णुगृहस्य सम्मुखे गरुडं शिवगृहस्य वृषं दुर्गागृहस्य सिंहं स्थापयेत्। ततो गन्धमाल्यवस्त्रादिना स्थापितं परितोष्य ॐ इदं विष्णुर्विचक्रमे इत्यादि पठित्वा ॐ चक्राय नम इति चक्रं संपूज्य गृहोपरि यथायोग्यं चक्रादिकं विन्यस्य गृहं वस्त्रेणाच्छाद्य गृहद्वारानुरूपं तोरणं विधाय गृहानुरूपवराटचामरकिङ्किणीजालवर्हिपत्रोपेतं सवस्त्रयष्टिसमेतं ध्वजं गृहस्येशानकोणे वायुकोणे वा स्थापयेत्। * । ततो विष्णुं शालग्रामादौ यथार्हं गृहसमीपे नीत्वा पञ्चत्रिंशन्निघटैर्नारिकेलोदकैः पञ्चगव्यपञ्चामृतैस्तीर्थोदकैः स्नानं कारयित्वा षोडशोपचारादिभिः पूजयेत्। वक्ष्यमाणमन्त्राणां पौराणिकत्वेन शूद्राणामप्यधिकारः। अत्रार्घ्यपात्राम्भसा प्रोक्षितं आसनं गृहीत्वा इदमासनं ॐ सर्व्वान्तर्यामिणे देव सर्व्वबीजमयं ततम्। आत्मस्थाय परं शुद्धमासनं कल्पयाम्यहम्॥ ॐ विष्णवे नम इति मूलेन दद्यात् १। ततः कृताञ्जलिः।

"ॐ यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये।
तस्मै ते परमेशाय स्वागतं स्वागतञ्च मे॥
कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम।
आगतो देवदेवेश। सुस्वागतमिदं वपुः॥"

विष्णो स्वागतमिति स्वागतप्रश्नः २। ताम्रपात्रस्थं श्यामाकदूर्व्वापद्मापराजितायुक्तजलं गृहीत्वा।

"ॐ यद्भक्तिलेशसम्पर्कात् परमानन्दसम्भवः।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये॥"

इत्युच्चार्य्य मूलेन पादयोर्दद्यात् ३। इदमासनमितीव मन्त्रस्य पूर्व्वमेतत् पाद्यमिति प्रयोज्यमेवमुत्तरत्र यथायोग्यमूह्यः। गन्धपुष्पाक्षतयवकुशाग्रतिलश्वेतसर्षपदूर्व्वात्मकं अर्घ्यं शङ्खस्थं गृहीत्वा।

"ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम्।
तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम्॥"

इति मूलेन शिरसि दद्यात् ४। जातीलवङ्गकक्कोलयुक्तं केवलं वा जलं गृहीत्वा।

"ॐ देवानामपि देवाय देवानां देवतात्मने।
आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे॥"

इति मूलेन दद्यात् ५। कांस्यस्थं दधिमधुघृतात्मकं कांस्यपिहितं मधुपर्कं गृहीत्वा।

"ॐ सर्व्वकल्मषहीनाय परिपूर्णसुखात्मने।
मधुपर्कमिमं देव कल्पयामि प्रसीद मे॥"

इति मूलेन दद्यात् ६। पुनराचमनीयं गृहीत्वा।

"ॐ उच्छिष्टोऽप्यशुचिर्व्वापि यस्य स्मरणमात्रतः।
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम्॥"

इति मूलेन दद्यात् ७। लौकिकमधुराधिकशतत्रयतोलकान्यूनं तीर्थजलं गृहीत्वा।

"ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये।
साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश ते॥"

ॐ तद्विष्णोरिति मूलेन दद्यात् ८। पूर्व्वरीत्या पुनराचमनीयञ्च दद्यात्। अर्घ्याम्भसा प्रोक्षितं वस्त्रं गृहीत्वा।

"ॐ मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे।
निरावरणविज्ञाय वासस्ते कल्पयाम्यहम्॥"

इति मूलेन दद्यात् ९। उत्तरीयवस्त्रं गृहीत्वा।

"ॐ यमाश्रित्य महामाया जगत्संमोहिनी
सदा।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम्॥"

इति मूलेन दद्यात् ९। ततः पूर्व्ववत् पुनराचमनीयञ्च दद्यात्। सुवर्णाद्याभरणमर्घ्याम्भसा प्रोक्ष्य।

"ॐ स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते।
भूषणानि विचित्राणि कल्पयाम्यमरार्च्चित॥"

इति मूलेन दद्यात् १०। प्रोक्षितं गन्धं गृहीत्वा।

"ॐ परमानन्दसौरभ्यपरिपूर्णदिगन्तर।
गृहाण परमं गन्धं कृपया परमेश्वर॥"

इति मूलेन दद्यात् ११। तत्तद्देवताप्रियपुष्पमादाय।

"ॐ तुरीयवनसम्भूतं नानागुणमनोहरम्।
आनन्दसौरभं पुष्पं गृह्यतां परमेश्वर॥"

इति मूलेन दद्यात् १२। धूपं प्रोक्ष्य घण्टां संपूज्य।

"ॐ वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्व्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥"

इत्युच्चार्य्य वामहस्तेन घण्टां वादयन् मूलेन दद्यात् १३। ततो घृतादिप्रदीपमादाय।

"ॐ सुप्रकाशो महादीपः सर्व्वतस्तिमिरापहः।

सवाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥”
इति मन्त्रेण दद्यात् १४। ओङ्कितनानाविध
नैवेद्योपरि मत्स्यमुद्रया मूलं दशधा जप्त्वा-
भ्यर्च्य धेनुमुद्रयामृतीकृत्य।
“ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम्।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥”
इति मन्त्रेण दद्यात् १५। जलमादाय।
“ॐ समस्तदेवदेवेश सर्व्वतृप्तिकरं परम्।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम् ॥”
इति मन्त्रेण दद्यात् १५। पूर्व्ववत् पुनराच-
मनीयञ्च। ताम्बूलं गृहीत्वा।
“ॐ ताम्बूलं देवदेवेश कर्पूरादिसुवासितम्।
कल्पयामि तवेशान वदनाम्भोजभूषणम् ॥”
इति मन्त्रेण दद्यात् १५। ततस्तद्देवतानम-
स्कारमन्त्रैर्वन्दनं कुर्य्यात्। १६। उपचारद्रव्या-
धारदाने साधारत्वेनोल्लेखः पृथग्वा तद्दानम्।*।
तत ॐ विष्णवे नमः इति त्रिः संपूज्य घण्टा-
वितानतोरणयुक्तं वस्त्रादिच्छादितं वेश्म प्रोक्ष्य
ॐ विष्णवे नमः इति त्रिः संपूज्य ॐ तद्विष्णो-
रित्यनेन विष्णुं स्तुत्वा ॐ तत् सवितुरित्यर्घ्यं
वामहस्तेन धृत्वा कुशतिलजलान्यादाय अद्ये-
त्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृण-
काष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्राव-
च्छिन्नस्वर्गलोकमहितत्वकामः श्रीविष्णुप्रीति-
कामो वा एतत्तृणकाष्ठादिमयवेश्म विष्णुदैवतं
विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृजेत्। इष्ट-
कादिमये तु एतदिष्टकादिमयवेश्मपरमाणुसम
संख्यवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोक-
महितत्वकाम एतदिष्टकादीतिविशेषः। एतत्-
प्रतिष्ठार्थं सुवर्णं तन्मूल्यं वा दक्षिणां विष्णवे
दद्यात्। पश्चादाचार्य्यादौ प्रतिपत्तिः।*।
ततो देवं स्वयं गृहीत्वा गृहप्रदक्षिणं कारयित्वा
ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये-
माक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्य-
शेम देवहितं यदायुः। इत्यनेनाभिमन्त्रितं देवं
गृहं प्रवेशयेत्। ॐ देवस्य त्वा सवितुः प्रसवे-
ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमाददे
इति मन्त्रेण पिण्डिकोपरि न्यसेत। ॐ स्थिरो
भव वीड्वङ्ग आशुर्भव वाज्यर्व्वन् पृथुर्भव सुषदस्त्व-
मग्नेः पुरीषवाहनः। इत्यनेन स्थिरीकुर्य्यात्।
पुनर्देवं संपूज्य यथाशक्ति चामरघण्टावितान
गोहिरण्यग्रामवाद्यभाण्डादिकं दद्यात्। तत
ॐ यावद्धराधरो देवो यावत्तिष्ठति मेदिनी।
तावदत्र जगन्नाथ सन्निधीभव केशव ॥ इति
मन्त्रं पठेत्। ततो ध्वजसमीपं गत्वा संप्रोक्ष्य
समारोपयेदनेन मन्त्रेण ॐ एह्येहि भगवन्नी-
श्वरविनिर्म्मित उपरिचरवायुमार्गानुसारिन्
श्रीकर श्रीनिवास रिपुध्वंसकर सुजनाधिलय
सर्व्वदेवतासम्मत कुरु शान्तिं स्वस्त्ययनञ्च मे
भवतु सर्व्वविघ्नान् हर हर स्वाहा ॐ ध्वजाय
नम इति ध्वजं संपूज्य ॐ विष्णवे नम इति
त्रिरभ्यर्च्य ध्वजं संप्रोक्ष्य वामहस्तेन स्पृष्ट्वा
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा
महापातकादिबहुपापक्षयकामो विष्णुप्रीति-
कामो वा विष्णुवेश्मनि इमं ध्वजं विष्णुदैवतं
विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृज्य एतत्-
प्रतिष्ठार्थं दक्षिणां विष्णवे दद्यात्। पश्चादा-
चार्य्यादौ प्रतिपत्तिः। ततो गरुडस्तम्भं समा-
रोप्य ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो
गायत्त्रं चक्षुर्वृहद्रथन्तरे पक्षौ। स्तोम आत्मा
छन्दांस्यङ्गानि यजूंषि नाम साम ते तनुर्वाम-
देव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुप-
र्णोऽसि गरुत्मान्दिवं गच्छ स्वःपत। यजु
र्वेदी तु। ॐ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते
शिरो गायत्त्रं चक्षुःस्तोम आत्मा साम ते तनु-
र्वामदेव्यं वृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं
छन्दांस्यङ्गानि धिष्ण्याः शफाः यजूंषि नाम।
सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुरः पत इति
पठित्वा। ॐ गरुडाय नम इति त्रिःसंपूज्य
ॐ नमस्ते पन्नगश्रेष्ठ पन्नगान्तकर प्रभो। त्वत्-
प्रसादान्महाबाहो मोदेयं दिवि देववत् ॥
यथा त्वं संपुटकरः सततं नतकन्धरः। तथैव
पुरतो विष्णोस्त्वत्प्रसादाद्भवाम्यहम् ॥ इति
पुटाञ्जलिः प्रार्थयेत् ॥*॥ तत. पिष्टप्रदीपा-
दिना निर्म्मञ्छनं कुर्य्यात्। ततो विप्रान्यून-
ब्राह्मणेभ्यो भोज्यानि दद्यात्। दीनानाथकृपण-
बधिरेभ्यो यथाशक्ति दद्यात्। ततः प्रीयतां
पुण्डरीकाक्षसर्व्वयज्ञेश्वरो हरिः। तस्मिंस्तुष्टे
जगत्तुष्टं प्रीणिते प्रीणितं जगत् ॥ ततो नृत्य-
गीतवादित्रनिस्वनमहोत्सवं कृत्वा अच्छिद्रा-
वधारणं कृत्वा वैगुण्यसमाधानार्थं तद्विष्णो
रिति विष्णुं स्मरेत्।*। एवं रुद्रादिमठादि-
प्रतिष्ठायां आसनादिकन्तु तत्तन्मन्त्रं विहाय
केवलं प्रणवादिनमोऽन्तेन तत्तन्नाम्ना दत्त्वा
यथायोग्यं तत्तत्कर्म्मशेषं समापयेत्।*। एवं
गोपथादि प्रतिष्ठायां तत्समीपे वेदिकां कृत्वा
तत्तत्फलकामो विष्णुप्रीतिकामो वा तत्तत्-
प्रतिष्ठां करिष्ये इति सङ्कल्प्य वृद्धिश्राद्धादिकं
विधाय प्रागुक्तविधिनाभिस्थापनादि एतत्-
कर्म्मणा प्रीयतां भगवान् विष्णुरित्यन्तं कर्म्म
कृत्वा कूपादिवत् सर्व्वभूतेभ्य उत्सृज्य दक्षिणां
दद्यात्।*। नियमव्रतादिप्रतिष्ठायान्तु विष्णु
रित्यन्तं कर्म्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणा-
दिकं कुर्य्यात्।*। ततो घटस्थजलेन यजमान-
मभिषिञ्चेत। तद्यथा,—
“ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥
आखण्डलोऽग्निर्भगवान् यमो वै नैरृतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः शेषो दिक्पालाः पान्तु ते सदा ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः पुष्टिश्च मातरः।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च ॥
देवपत्न्योऽप्सरा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशास्त्राणि राजानो वाहनानि च ॥
औषधानि विचित्राणि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एतास्त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये ॥”*॥

इति मठादिप्रतिष्ठाप्रयोगतत्त्वं समाप्तम् ॥

(पक्वखाद्यवस्तुविशेषः। अस्य पाकप्रकारो यथा,
“समिता मर्द्दयेदम्बुजलेनापि च सन्नयेत।
तस्यास्तु वटिकां कृत्वा पचेत् सर्पिषि नीरसम् ॥
एला लवङ्गकर्पूरमरीचाद्यैरलङ्कृते।
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत् ॥
अयम्प्रकारः संसिद्धो मठ इत्यभिधीयते ॥”
[सन्नयन्मर्द्दयेत्] तथास्य गुणाः ॥
“मठस्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मठरः, पुं, (मन्यते मनुतेऽवबुध्यते इत्यर्थः। मन +
“वचिमनिभ्यां चिच्च।” उणा० ५। ३६। इति
अरच्चित ठश्चान्तादेशः।) मुनिविशेषः। इत्यु-
णादिकोषः ॥ (शौण्डः। मठरो मुनिशौण्डयो-
रित्युज्ज्वलदत्तः ॥)

मठ इ क मोदे। इति कविकल्पद्रुमः ॥ (चुरा०
पर०-अक०-सेट्।) इ मण्ठयति। इति दुर्गा
दासः ॥

मठ इ कि भूषे। इति कविकल्पद्रुमः ॥ (चुरा०
पक्षे भ्वा०-पर०-सक०-सेट्।) मण्डयति मण्डति
हारो जनम्। इ मण्ड्यते। इति दुर्गादासः ॥

मठ इ ङ विभागे। वेष्टे। इति कविकल्पद्रुमः ॥
(भ्वा०-आत्म०-सक०-सेट्।) इ मण्डते ङ
मण्डते। इति दुर्गादासः ॥

मड्कः, पु, (मण्डयति भूषयति क्षेत्रमिति। मडि
+“कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।” उणा०
२। ३२। इति कुन्। पृषोदरादित्वान्नलोपः।)
शस्यभेदः। मेडुया इति भाषा। इति जटा-
धरः ॥

मड्डुः, पुं, वाद्यविशेषः। इत्यमरः। १। ७। ८ ॥
पुष्कर इति ख्यातः। विपुलो डमरुर्मड्डु-
रिति कोषः ॥ मड् इति रौति इति
मड्डुः पूर्व्ववद्गौतेर्डुः मनीषादित्वाड्डिपस्य डत्वम्।
मज्जन्ति शब्दा अत्रेति मज्जेर्निपातो वा।
इति भरतः ॥

मड्डुकः, पुं, (मड्डुरेवेति मड्डु + स्वार्थे कन्।)
मड्डुवाद्यम्। इति त्रिकाण्डशेषः ॥

मण कूजे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
अक०-सेट्।) मणति। कूजोऽव्यक्तशब्दे। इति
दुर्गादासः ॥

मणिः, पुं, स्त्री, (मण + “सर्व्वधातुभ्य इन्।”
उणा० ४। ११७। इतीन्।) अश्मजातिः।

(यथा, रघौ । १ । ४ ।
"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।")
मुक्तादिकम् । तत्पर्य्यायः । रत्नम् २ मणी ३ ।
इत्यमरः । २ । ९ । ९३ । (तथाचास्य पर्य्यायः ।
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अस्य गुणाः ।
"मणिरत्नं परं शीतं कषायं स्वादु लेखनम् ।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम् ॥"
इति राजवल्लभः ॥
(तथाचास्य गुणाः ।
"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादयः ।
चक्षुष्या मणयः शीता लेखना विषसूदनाः ।
पवित्रा धारणीयाश्च पाप्मालक्ष्मीमलापहाः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ।)
अजायाः कण्ठस्थितस्तनः । लिङ्गाग्रम् । अलि-
ञ्जरः । इति मेदिनी । २४ ॥ योन्यग्रभागः । इति
शब्दरत्नावली ॥ नागविशेषः । इति जटाधरः ॥
मणिबन्धः । इति हेमचन्द्रः ॥ (मुनिभेदः । यथा,
महाभारते । २ । ११ । २२ ।
"असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित् ।
ऋषभो जितशत्रुश्च महावीर्य्यस्तथा मणिः ॥")
मणिकं, क्ली, (मणिरेवेति मणि + "यावादिभ्यः
कन् ।" ५ । ४ । २९ । इति स्वार्थे कन् ।
अलिञ्जरः । इत्यमरः । २ । ९ । ३१ ॥ (यथा,
माघे । १ । ७१ ।
"स तमादाय मणिके प्राश्चिपज्जलचारि-
णाम् ॥")
मणिकर्णः, पुं, कामरूपस्थशिवलिङ्गभेदः । यथा,
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः ।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः ॥
स सद्योजातरूपस्तु मणिकर्ण ईरितः ।
सद्योजातस्य मन्त्रेण पूजितव्यः सदा शिवः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
मणिकर्णिका, स्त्री, (कर्णे भवा इति । कर्ण + "कर्ण
ललाटात् कनलङ्कारे ।" ४।३।६५ । इति कन् ।
टाप् । अकारस्य इत्वम् । मणिमयी कर्णिका
शाकपार्थिवादिवत् समासः । सा विद्यते यत्रेति
वा । विष्णोस्तपस्याश्चर्य्यदर्शनात् विस्मिततया
शिवस्य मणिमयकुण्डलपतनादस्यास्तथात्वम् ।)
काशीस्थतीर्थविशेषः । तदुत्पत्तिर्यथा । विष्णुं
प्रति शिववाक्यम् ।
"त्वदीयस्यास्य तपसो महोपचयदर्शनात् ।
यन्मयान्दोलितो मौलिरहिश्रवणभूषणः ॥
तदान्दोलनतः कर्णात् पपात मणिकर्णिका ।
मणिभिः खचिता रम्या ततोऽस्तु मणि-
कर्णिका ॥
चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम् ।
त्वया चक्रेण खननाच्छङ्खचक्रगदाधर ॥
मम कर्णात् पपातेयं यदा च मणिकर्णिका ।
तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका ॥

श्रीविष्णुरुवाच ।
मुक्ताकुण्डलपातेन तवादितनयाशिवम् ।
तीर्थानां परमं तीर्थं मुक्तिक्षेत्रमिहास्तु वै ॥
काशतेऽत्र यतो ज्योतिस्तदनाख्येयमीश्वर ।
अतो नामापरञ्चास्तु काशीति प्रथितं विभो ॥
अन्यं वरं वरे देव । देयः सोऽप्यविचारितम् ।
स ते परोपकारार्थं जगदद्यामयी शिव ॥
आब्रह्मस्तम्बपर्य्यन्तं यत्किञ्चिज्जन्तुसंज्ञितम् ।
चतुर्षु भूतग्रामेषु काश्यां तन्मुक्तिमाप्नुयात् ॥
तस्मिंस्तीर्थवरे शम्भो । मणिश्रवणभूषणे ।
सन्ध्यां स्नानं जपं होमं वेदाध्ययनमुत्तमम् ॥
तर्पणं पिण्डदानञ्च देवतानाञ्च पूजनम् ।
गोभूतिलहिरण्याश्वदीपान्नाम्बरभूषणम् ॥
कन्यादानं प्रयत्नेन सप्ततन्तूननेकशः ।
व्रतोत्सर्गं वृषोत्सर्गं लिङ्गादिस्थापनं तथा ॥
करोति यो महाप्राज्ञो ज्ञात्वायुः क्षणगत्वरम् ।
विपत्तिं विपुलाश्चापि सम्पत्तिमतिभङ्गुराम् ॥
अन्यथा मुक्तिरेकास्तु विपाकस्तस्य कर्म्मणः ।
अन्यच्चापि शुभं कर्म्म यद्दत्तं श्रद्धया हुतम् ॥
विनात्मघातमीशान त्यक्ता प्रायोपवेशनम् ।
नैःश्रेयस्याः श्रियो हेतुस्तदस्तु जगदीश्वर ॥
नानुशोचति नाख्याति कृत्वा कालान्तरेऽपि
यत् ।
तदिहाक्षयतामेतु तस्येश । त्वदनुग्रहात् ॥
तव प्रमादात्सर्व्वेह सर्व्वमक्षयमस्तु तत् ।
यदस्ति यज्ञविघ्नञ्च यज्ञतश्च सदाशिव ॥
तस्मादेतच्च सर्व्वस्मात् क्षेत्रमस्तु शुभोदयम् ।"
इति काशीखण्डे मणिकर्णिकाख्यानं नाम २६
अध्यायः ॥
मणिकर्णेश्वरः, पुं, (मणिकर्ण्या मणिकर्ण्या वा
ईश्वरः ।) काशीस्थशिवलिङ्गविशेषः । यथा,—
"ओङ्कारं प्रथमं पश्यन् मत्स्योदर्य्यां कृतो-
दकः ।
त्रिविष्टपमहादेव ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णेश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।"
इति काशीखण्डे १०० अध्यायः ॥
मणिकर्णेश्वरः, पुं, (मणिकर्णस्तदाख्य ईश्वरः ।)
कामरूपस्थशिवलिङ्गविशेषः । यथा,—
"सर्व्वतीर्थजले स्नात्वा स्पृष्ट्वा चन्द्रं सवासवम् ।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिभूक्कायतां गते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
मणिकाननं, क्ली, (मणीनां काननमिव । बहु-
मणिधारणादस्य तथात्वम् ।) कण्ठः । इति
शब्दरत्नावली ॥ रत्नवनञ्च ॥
मणिकारः, पुं, (मणिं करोतीति । कृ + अण् ।)
मणिनिर्म्मितालङ्कारादिकर्त्ता । जौहरि इति
भाषा । तत्पर्य्यायः । वैकटिकः २ । इति
हेमचन्द्रः ॥ न्यायचिन्तामणिकर्त्ता च ॥

मणिकूटः, पुं, (मणयः मणिमयानि कूटानि
शिखराणि यस्य सः ।) कामरूपस्थपर्व्वतभेदः ।
यथा,—
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः ।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
"मणिकूटस्याथ गिरेर्गन्धमादनकस्य च ।
मध्ये स्रवति लौहित्यो ब्रह्मपुत्रः समास्थितः ॥
हत्वा ज्वरं तथा विष्णुस्तत्र वासमथाकरोत् ।
नरदेवासुरादीनां यथा भवति वै हितम् ॥
ज्वरेणापीडिततनुर्ज्वरं हत्वा महासुरम् ।
सर्व्वलोकहितार्थाय सोऽगदस्नानमाचरत् ॥
अगदस्नानसंभूतं संजातञ्च महासरः ।
तस्य स्वयं नाम चक्रे हयग्रीवोऽपुनर्भवम् ॥
न पुनर्जायते यस्मात् ततः स्नात्वा नरोत्तमः ।
अपुनर्भवसंज्ञं तत् सरस्तु परिकीर्त्तितम् ॥
मणिकूटाचले विष्णुर्हयग्रीवस्वरूपधृक् ।
स च व्यामप्रमाणेन विस्तारेणैव संस्थितः ॥"
इति कालिकापुराणे ८० अध्यायः ॥
मणिखनिः, पुं, (मणीनां खनिः ।) मण्याकरः ।
यथा । मणेः खनिः ॥ इति मुग्धबोधव्याकरणम् ॥
मणिग्रीवः, पुं, (मणयो ग्रीवायां कन्धरायां यस्य ।)
कुवेरपुत्रः । इति शब्दरत्नावली ॥ रत्नकन्धरे
त्रि ॥ (यथा, ऋग्वेदे । १ । १२२ । १४ ।
"हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो
विश्वे वरिवस्यन्तु देवाः ॥"
"मणिग्रीव रत्नाद्युपेतकण्ठम् ।" इति तद्भाष्ये
सायनः ॥)
मणिच्छिद्रा, स्त्री, (मणेरिव छिद्रमस्याम् ।) मेदा-
नामौषधम् । ऋषभाख्यौषधम् । इति मेदिनी ।
रे, २९० ॥ (तथास्याः सलक्षणपर्य्यायः ।
"महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते ।
शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत् ॥
यः स मेदेति विज्ञेयो जिज्ञासातत्परैर्जनैः ।
शल्यपर्णी मणिच्छिद्रा मेदा मेदोभवाध्वरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
मणितं, क्ली, (मण + भावे क्तः ।) मैथुनकालीन
वाक्यम् । "स्वनितमणितादि सुरते ।" इति
साहित्यदर्पणे ।) तत्पर्य्यायः । रतकूजितम् १ ।
इति हेमचन्द्रः ॥ (यथा, शिशुपालवधे ।१०।७५।
"सानुकूलानि मणितं करुणोक्तिः
स्निग्धमुक्तमलमर्थवचांसि ॥")
मणितारकः, पुं, (मणेरिव दीप्तिमती तारका
यस्य ।) सारसपक्षी । इति राजनिर्घण्टः ॥
मणिद्वीपः, पुं, क्ली, (मणिप्रचुरो द्वीपः ।) क्षीर-
समुद्रमध्ये पद्मरागादिमणिमयान्तरीपः । स च
त्रिपुरसुन्दरीवासस्थानम् । यथा,—
"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिसरे
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्य्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥"
इत्यानन्दलहरी ॥

मणिपर्व्वतः, पुं, (मणीनां पर्व्वतः ।) गिरि-विशेषः । यथा, —

"ततोऽपश्यद्गिरिश्रेष्ठमभितो मणिपर्व्वतम् ।
तत्र पुण्या वबुर्वाता ह्यभवंश्चामलाः प्रभाः ॥
मणीनां हेमवर्णानामभिभूय दिवाकरम् ।
तत्र वैदूर्य्यवर्णानि ददर्श मधुसूदनः ॥
तस्योरणपताकानि द्वाराणि शिखराणि च ।
विद्युद्ग्रथितमेघाभः प्रबभौ मणिपर्व्वतः ॥
हेमचित्रवितानैश्च प्रासादैरुपशोभितः ।
तत्र ता हेमवर्णाभा ददर्श मधुसूदनः ॥
गन्धर्व्वासुरमुख्यानां प्रिया दुहितरस्तथा ।
ददर्श पृथुलश्रोणीः संरुद्धा गिरिकन्दरे ॥
नरकेण समानीता रक्ष्यमाणाः समन्ततः ॥"

इति महाभारते हरिवंशे नरकवधाध्यायः ॥

मणिपूरं, क्ली, षट्चक्रान्तर्गतनाभिमध्यस्थतृतीय-चक्रम् । यथा,—

"तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ।
मणिवद्भिन्नं तत्‌ पद्मं मणिपूरं तथोच्यते ॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम् ॥"

इति तन्त्रम् ॥

तत्तु स्वाधिष्ठानपद्मस्योर्द्ध्वदेशे तिष्ठति । यथा,—

"एतत्पद्मस्योर्द्ध्वदेशे महापद्मं सुदुर्लभम् ।
दशपत्रं नीलवर्णं सजलं घोररूपकम् ।
डादिफान्तैः सचन्द्रैश्च पत्रकन्यानिशोभनम् ॥
तन्मध्ये बीजकोषे निवसति सततं वह्निबीजं सुसिद्धं
बाह्ये तत्त्रिपुराख्यं गवतपनिभं स्वस्तिकं तन्निभागे ॥
स्वर्णाकाख्यमिदं देवि । सर्व्वदेवप्रपूजितम् ।
साकारं वह्निबीजञ्च सदैव मेघवाहनम् ॥
रुद्राणयं हि तत्रैव महामोहस्य नाशनम् ।
भद्रकाली महाविद्या वामभागे सुशोभिता ॥"

इति निर्व्वाणतन्त्रे ६ पटलः ॥

तत्र देवतीर्थं यथा, रुद्रयामले ।

मणिपूरे देवतीर्थं पञ्चकुण्डं सरोवरम् ।
तत्र श्रीकामनातीर्थं स्नाति यो मुक्तिमिच्छति ॥"

(मणीनां पूरोऽत्र ।) स्वनामख्यातदेशश्च ॥ (यथा, महाभारते १ । २१८ । २३ ।

"चित्राङ्गदां पुनर्द्रष्टुं मणिपूरपुरं ययौ ॥")

मणिबन्धः, पुं, (मणिर्बध्यते यत्र । अधिकरणे घञ् ।) प्रकोष्ठपाण्योः सन्धिस्थानम् । इत्यमरटीकायां भरतः । कजा इति भाषा ॥ स च करस्यादिभागः । (यथा, अभिज्ञानशकुन्तले ३ अङ्कः ।

"मणिबन्धाद्गलितमिदं संक्रान्तोशीरपरिमलं तस्याः ।")

तत्पर्य्यायः । मणिः २ । इति हेमचन्द्रः ॥ कर-ग्रन्थिः ३ करग्रन्थिकः ४ । इति शब्दरत्ना-वली ॥ तस्य शुभाशुभलक्षणं यथा,—

"मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ।
हृपा हीनैः करच्छेदैः सशब्दैर्धनवर्ज्जिताः ॥"

इति गारुडे ६५ अध्यायः ॥

मणिभद्रः, पुं, (मणिषु भद्रः, यद्वा मणिभिर्भद्रमस्य । मणिमुक्तादिधनाधिक्यादस्य तथात्वम् ।) जिनानां पूर्व्वयक्षविशेषः । तत्पर्य्यायः । जम्भलः २ पूर्व्वयक्षः ३ जलेन्द्रः ४ । इति त्रिकाण्डशेषः ॥ (प्रधानयक्षभेदः । यथा, महाभारते । ३ । ६४ । १२७ ।

"यतो त्वां मानुषीं मर्त्त्या न पश्यामि महावने ।
तथा मे यक्षराड़द्य मणिभद्रः प्रसीदतु ॥"

यथा च कथासरित्सागरे । १३ । १६५ ।

"अस्मद्देशे पुरस्यान्तर्मणिभद्र इति श्रुतः ।
पूर्व्वैः कृतप्रतिष्ठोऽस्ति महायक्षः प्रभावितः ॥")

मणिभूमिः, स्त्री, (मणीनां भूमिः आकरः । मणिमयी भूमिरिति वा ।) रत्नस्य खनिः । तत्-पर्य्यायः । कुट्टिमम् २ । इति शब्दरत्नावली ॥

मणिमण्डपः, पुं, (मणिमयः मण्डपः ।) रत्नमय-गृहम् । यथा, रुद्रयामले वगलास्तोत्रे ।

"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥"

मणिमन्थं, क्ली, (मणिरिव मथ्यते इति मणि+मन्थ+कर्म्मणि घञ् ।) सैन्धवलवणम् । इति राजनिर्घण्टः ॥ (मणयः मथ्यन्ते उपलान् विदार्य्य गृह्यन्ते अत्रास्मादिति । मन्थ+अधिकरणादौ घञ् ।) पर्व्वतविशेषः । इति मणिमन्थशब्दटीकायां भरतः ॥ (यथा, महाभारते । १३ । १८ । ३३ ।

"मणिमन्थेऽथ शैले वै पुरा सम्पूजितो मया ॥")

मणिमान्, [त्] त्रि, मणिविशिष्टः । रत्नभूषितः । (यथा, भागवते । ३ । १५ । ४१ ।

"विद्युत्स्फुरन्मकरकुण्डलमण्डनार्ह-
गण्डस्थलोन्नसमुखं मणिमत्किरीटम् ॥")

मणिरस्तीति मतुप्प्रत्ययेन निष्पन्नः ॥ (पु, नाग-विशेषः । यथा, महाभारते । २ । ९ ।

"मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥"

राक्षसभेदः । स च कुवेरस्य सखा । यथा, महाभारते । ३ । १६० । ५७ ।

"सखा वैश्रवणस्यासीन्मणिमान्नामराक्षसः ॥"

पश्चिमस्थदेशभेदः । यथा, वृहत्संहितायाम् । १४ । २० ।

"अपरस्यां मणिमान् मेघवान् वनौघः क्षुरा-र्पणोऽस्तगिरिः ॥"

स्त्री, पुरभेदः । यथा, महाभारते । ३ । ९६ । ४ ।

"इल्वलो नाम दैतेय आसीत् कौरवनन्दन ।
मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः ॥")

मणिमाला, स्त्री, (मणिनिर्म्मिता माला शाक-पार्थिवादिवत् समासः ।) हारः । दन्तक्षत-विशेषः । इति मेदिनी । ले, १६० ॥ (मणि-निर्म्मिता माला यस्याः ।) लक्ष्मीः । इति शब्द-रत्नावली ॥ दीप्तिः । इतिशब्दमाला ॥ (छन्दो-भेदः । यथा, छन्दोमञ्जर्य्याम् । "त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ।" अधिकन्तु छन्दः-शब्दे द्रष्टव्यम् ॥)

मणिरागं, क्ली, (मणेरिव रागो वर्णोऽस्य कमस्य ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ (मणेः रागः ।) मणेर्वर्णे पु ॥ (गुणादयोऽस्य हिङ्गुलशब्दे विधेयाः ॥)

मणित्रः, पुं, नागविशेषः । मणिशब्दात्स्वार्थे त्रप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

मणिबीजः, पुं, (मणिरिव दर्शनीयं बीजं यस्य ।) दाडिम्बवृक्षः । इति राजनिर्घण्टः ॥

मणिसरः, पुं, (मणिभिः स्रियते गम्यते ग्रथ्यते इतिभावः । सृ+कर्म्मणि अप् ।) मुक्ताहारः । यथा, गीतगोविन्दे ७ सर्गः ।

"घटयति सघने कुचयुगगगने मृगमदरुचि-रूषिते ।
मणिसरममलं तारकपटलं नखदशशशि-भूषिते ॥"

मणी, स्त्री, (मणि+कृदिकारादिति पक्षे ङीष् ।) मणिः । इति भरतद्विरूपकोषः ॥

मणीचकं, क्ली, (मणीम् चकते प्रतिहन्ति दीप्त्या इति । चक+अच् ।) चन्द्रकान्तमणिः (read: चन्द्रवर्णरूप्यम्) । तत्-पर्य्यायः । इन्दुकान्तः २ । इति त्रिकाण्डशेषः ॥ (शाकद्वीपस्य वर्षविशेषः । यथा, मात्स्ये । १२१ । २३ ।

"श्यामपर्व्वतवर्षं तु मणीचकमिति स्मृतम् ॥")

मणीचकः, पुं, (मणी+चक्+अच् ।) मत्स्य-रङ्गपक्षी । यथा,—

"झम्पाशी मत्स्यरङ्गः स्याज्जलमद्गुर्मणीचकः ।"

इति हारावली ॥

मणीव, व्य, मणितुल्यम् । मणिशब्देन सह इव-शब्दस्य षष्ठीतत्पुरुषसमासः । प्रथमाद्विवच-नान्तमणिशब्दात् इवार्थवशब्देन वाशब्देना-प्येव रूपम् यथा,—

"मणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो या बोध्यः ।"

इति सिद्धान्तकौमुदी ॥

मणीवकं, क्ली, (मणीव+संज्ञायां कन् ।) पुष्पम् । इति हेमचन्द्रः ॥

मण्टपी, स्त्री, (मण्टमुन्मादं पाति रक्षतीति मण्ट+पा+कः । जातौ संज्ञायां वा ङीष् ।) क्षुद्रोपोदकी । इति राजनिर्घण्टः ॥

मण्ठः, पुं, (मण्ठते इति मठि+अच् ।) वटक-विशेषः । माँडा इति हिन्दी भाषा । यथा,—

"समितां मर्द्दयेदाज्यैर्जलेनापि च सन्नयेत् ।
अस्यास्तु वटकं कृत्वा पचेत् सर्पिषि नीरसम् ॥
एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते ।
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत् ।
अयं प्रकारः संसिद्धो मण्ठ इत्यभिधीयते ॥"

अस्य गुणाः ।

"मण्ठस्तु वृंहणो वृष्यो बल्यः सुमधुरो गुरुः ।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥"

प्रकारान्तरं यथा,—
"समिता शर्करासर्पिर्भिर्मिता अपरेऽपि ये ।
प्रकारा अमुना तुल्यास्तेऽपि चैतद्गुणाः स्मृताः ॥"
इति राजनिर्घण्टः ॥

मण्डं, क्ली, पुं, (मन्यते ज्ञायते अनेन अन्नादिक मिति । मन + "अमन्तात् डः ।" उणा० १।११३। इति डः ।) सर्व्वेषामन्नदध्यादीनामग्ररसः । इत्यमरभरतौ । माड् इति मात इति च भाषा ॥ (यथा, उत्तररामचरिते ४ अङ्के । १ ।
"नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-पीतादप्यधिकं तपोवनमृगः पर्य्याप्तमाचामति ॥")
सारः । पिच्छम् । इति मेदिनी । डे, ११ ॥

मण्डं, क्ली, (मण्डतीति । मडि भूषादौ + अच् ।) मस्तु । इति मेदिनी । डे, ११ ॥ (यथा, भागवते । ५ । २० । २४ ।
"समानेन दधिमण्डोदेन परितः ॥")

मण्डः, पुं, (मण्डयति क्षेत्रं भूषयतीति मडि + अच् ।) एरण्डवृक्षः । शाकभेदः । इति मेदिनी । डे, ११ ॥ मस्तु । भूषा । सारः । पिच्छम् । हेमचन्द्रः ॥ (मण्डति वर्षागमे हृष्यतीति मडि + अच् ।) दर्द्दुरः । भक्तादिभवरसः तस्य लक्षणम् ।
"भक्तैर्विना द्रवो मण्डः पेयं भक्तसमन्वितम् ।'
इति राजनिर्घण्टः ॥
("तक्राल्लघुतरो मण्डः ।" इति च, सुश्रुते सूत्रस्थाने ४५ अध्यायः ।) अथ मण्डस्य लक्षणं विधिर्गुणाश्च ।
"तण्डुलानां सुसिद्धानां चतुर्द्दशगुणे जले ।
रसः सिक्थैर्व्विरहितो मण्ड इत्यभिधीयते ॥
"शुण्ठी सैन्धवसंयुक्तो दीपनः पाचनश्च सः ।
अन्नस्य सम्यक् सिद्धत्वं ज्ञेया मण्डस्य सिद्धता ॥
पेया यूषयवागूनां विलेपीभक्तयोरपि ॥"
तस्य गुणाः ।
"मण्डो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत् ।
ज्वरघ्नस्तर्पणो वल्यः पित्तश्लेष्मश्रमापहः ॥"
इति भावप्रकाशः ॥

अपि च ।
"क्षुद्बोधनो वस्तिविशोधनश्च
प्राणप्रदः शोणितवर्द्धनश्च ।
ज्वरापहारी कफपित्तहन्ता
वायुं जयेदष्टगुणो हि मण्डः ॥
लाजमण्डोऽग्निजननो दाहतृष्णानिवारणः ।
ज्वरातीसारशमनोऽशेषदोषामपाचनः ॥
वाट्यमण्डोऽग्निजननः शूलानाहविनाशनः ।
पाचनो दीपनो हृद्यः पित्तश्लेष्मानिलापहः ॥"
वाट्यमण्डो भृष्टयवमण्डः । इति राजवल्लभः ॥
(धान्यादिकृतमण्डगुणाः । क्लीवत्वं विवर्ज्जितम्
"धान्यमण्डं पित्तहरं श्रमतृष्णाश्मरीहरम् ।
वातलं रक्तशमनं ग्राहि सन्दीपनं परम् ॥"
इति धान्यमण्डगुणाः ॥
"युगन्धराणां मण्डस्तु श्लेष्मलदाहलं समम् ।
पित्तसंशमनीयश्च मूत्रलं ग्राहकश्च तत् ॥"
इति युगन्धरमण्डगुणाः ॥
"रक्तशाल्युद्भवं मण्डं मधुरं ग्राहि शीतलम् ।
प्रमेहाश्मरीं हन्ति वातलं पित्तहृत्तथा ॥"
इति रक्तशालिमण्डगुणाः ॥
"मधुरं शीतलं किञ्चित् श्लेष्मलं शोषनाशनम् ।
अश्मरीमेहसंछेदी वातलं श्वेततण्डुलम् ॥"
इति श्वेततण्डुलमण्डगुणाः ॥
"यवमण्डं कषायं स्यात् ग्राहि चोष्णं विपाकि च ।"
इति यवमण्डगुणाः ॥
"तद्वत् गोधूमसंभूतं मधुरं पित्तवारणम् ।"
इति गोधूममण्डगुणाः ॥
"ग्लानिमूर्च्छाकरं सद्यः कोद्रवाद्युतनं लघु ।"
इति कोद्रवमण्डगुणाः ॥
"तद्वच्च क्षुद्रधान्यानां वातलं पित्तकारकम् ।
करोति शोषदं गुल्मं प्रतिश्यायादिकोपनम् ॥"
इति क्षुद्रधान्यमण्डगुणाः ॥
इति मण्डवर्गः ॥
इति हारीते प्रथमे स्थाने नवमेऽध्याये ॥
"मण्डस्तु दीपयत्यग्निं वातञ्चाप्यनुलोमयेत् ।
मृदूकरोति स्रोतांसि स्वेदं सञ्जनयत्यपि ॥
लङ्घितानां विरिक्तानां जीर्णे स्नेहे च तृष्यताम् ।
दीपनत्वाल्लघुत्वाच्च मण्डः स्यात् प्राणधारणः ॥
तृष्णातीसारशमनो धातुसाम्यकरः शिवः ।
लाजमण्डोऽग्निजननो दाहमूर्च्छानिवारणः ॥
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम् ।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः ।
क्षुत्पिपासासहः पथ्यः शुद्धानाञ्च मलापहः ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः ।
वातानुलोमनो हृद्यः पिप्पलीनागरायुतः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

मण्डकः, पुं, (मण्डेन कृतः इति । मण्ड + संज्ञायां कन् ।) पिष्टकविशेषः । माँडा इति हिन्दी भाषा ॥ यथा,—
"गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः ।
शोधिता यन्त्रनिष्पिष्टाश्चालिताः समिताः स्मृताः ॥
वारिणा कोमलां कृत्वा समितां साधु मर्द्दयेत् ।
हस्तचालेन या तस्या लोप्त्री सम्यक् प्रसारयेत् ॥
अधोमुखघटस्यैतांस्ततं प्रक्षिपेद्बहिः ।
मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते ॥'
लोप्त्री लेची इति लोके ।
"दुग्धेन खाण्डखण्डेन मण्डकं भक्षयेन्नरः ।
अथवा सिद्धमांसेन सतक्रवटकेन वा ॥"
तस्य गुणाः ।
"मण्डको वृंहणो वृष्यो वल्यो रुचिकरो भृशम् ।
पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः ॥"
इति भावप्रकाशः ॥
(माधवीलता । तत्पर्य्यायो । यथा,—
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गीताङ्गविशेषः । यथा,—
"जयप्रियः कलापश्च कमलः सुन्दरस्तथा ।
मङ्गलो वल्लभश्चेति मण्डकाः षट् प्रकीर्त्तिताः ॥
जयप्रियो हंसनादे लघुमध्ये यदा गुरुः ।
ऊनविंशत्यक्षरैर्युक्तो रसे वीरे स वर्ण्यते ।
लघुर्गुरुर्लघुर्यत्र हंसतालः स उच्यते ॥ १ ॥
कलापो रङ्गतालेन युक्तो रौद्ररसे हि सः ।
द्वाविंशत्यक्षरैर्युक्तो लघुरादौ गुरुद्वयम् ।
लघुरादौ गुरुद्वन्द्वं रङ्गताल इतीरितः ॥ २ ॥
लघुद्वन्द्वं गुरुश्चैकोऽनिलोऽत्र सगणात्मकः ।
पञ्चविंशत्यक्षरैः स्यात् कमलः शान्तहास्ययोः ॥३
गुरुरेको लघुद्वन्द्वं त्रिपुटे भगणात्मके ।
अष्टाविंशत्यक्षरैस्तु शृङ्गारे सुन्दरे मतः ॥ ४ ॥
आदौ गुरुर्लघुर्मध्ये प्लुतोऽन्ते भङ्गतालके ।
एकविंशत्यक्षरैस्तु वीरे मङ्गलमण्डकः ॥ ५ ॥
षट्पितापुत्रके ताले गलसागलगात्मके ।
चतुस्त्रिंशदक्षरोऽयं वल्लभो रौद्रके रसे ॥ ६ ॥
इति सङ्गीतदामोदरः ॥

मण्डनं, क्ली, (मण्ड्यते अनेन इति । मडि भूषि + करणे ल्युट् ।) भूषणम् । यथा, अभिज्ञानशकुन्तले । १ । १४ ।
"किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।"
अलङ्करिष्णौ त्रि । इति मेदिनी । ने, १०५ ।
"चतुर्धा मण्डनं वासोभूषामाल्यानुलेपनैः ।"
इति महाभारत मोक्षधर्म्मः ॥

मण्डपः, पु क्ली, (मडि + भावे घञ् मण्डः । मण्डं पाति । पा + कः ।) जनविश्रामगृहम् । तत्पर्य्यायः । जनाश्रयः २ । इत्यमरः । २ । २ । ८ ॥
(यथा, देवीभागवते । ७ । ११ । ५० ।
"गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः ।
कुर्व्वन्तु मण्डपं स्वस्याः शतस्तम्भं मनोहरम् ॥")
देवादिदत्तवेश्म । इति शब्दरत्नावली ॥ (यथा, विश्वकर्म्मप्रकाशे ६ अध्याये ।
"प्रदक्षिणायास्तु समन्ततो मण्डपो भवेत् ।
तस्य चार्द्धेन कर्त्तव्यमग्रतो मुखमण्डपः ॥"
इत्यादिमण्डपविवरणम् तत्रैव विस्तरशो द्रष्टव्यम् ॥ मण्डं पिबतीति । पा + कः ।) मण्डपानकर्त्तरि त्रि ॥

मण्डपा स्त्री, निष्पावी । इति राजनिर्घण्टः ॥ (मण्डपीत्यपि दृश्यते ।)

मण्डयन्तः, पु, (मण्डयति भूषयतीति । मडि + "तॄभूवहिवसिभासिसाधिगडि मण्डिजि, नन्दिभ्यश्च ।" उणा० । ३ । १२८ । इति झच् स च चित् ।) अन्नम् । वधूसंघः । नटः । अलङ्कारः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मण्डयन्ती, स्त्री, (मण्डयतीति । मडि + झच् स्त्रियां ङीप् ।) योषित् । इति त्रिकाण्डशेषः ॥

मञ्जरी, स्त्री, (मञ्जयति भूषयतीति । मजि + अरप्रत्ययः । स्त्रियां ङीप् ।) घुर्घुरी । इति हारावली ॥

मण्डलं, क्ली, (मण्डयति भूषयतीति । मडि + "कलस्तृपश्च ।" उणा० । १।१०६ । इति कलः ।) चन्द्रसूर्य्ययोर्बहिर्व्वेष्टनम् । चन्द्रसूर्य्ययोर्वातजनितरश्मिमण्डलम् । यथा,—

"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः ।
मालाभा व्योम्नि तन्वन्ते परिवेशः प्रकीर्त्तितः ॥"
इति साहसाङ्कः ॥

तत्पर्य्यायः । परिवेशः २ परिधिः ३ उपसूर्य्यकम् ४ । इत्यमरः । १ । ३ । ३२ ॥ परिवेषः मूर्द्धन्यान्तोऽपि । यथा,—

"पुंलिङ्गः परिवेषः स्यात् परिधौ परिवेषणे ।"
इति मूर्द्धन्यान्ते रुद्रः ॥

सूर्य्यमुपगतं उपसूर्य्यं स्वार्थे कः उपसूर्य्यकम् । चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं इवार्थे कः । इति भरतः ॥ * ॥ चक्रवालम् । इत्यमरः । १ । ३ । ६ ॥ तत्तु मण्डलाकारेण परिणतं वस्तुमात्रम् । मण्डलाकारदिक्समूहः । इति माधवी ॥ चक्रस्येव वालो वलनमस्य चक्रवालं वलेर्घञि वालः मनीषादित्वात् लस्य डत्वे चक्रवाडञ्च । किंवा चक्रेण चक्राकारेण वाडते चक्रवाडं वाडृ आप्लाव्ये अल् । इति भरतः ॥ * ॥ कोठरोगः । द्वादशराजकम् । इति मेदिनी । १ ले, ७१ ॥ (उक्तञ्च तद्विवरणं कामन्दकीये नीतिसारे । ८ । १—२२ ।

"उपेतः कोषदण्डाभ्यां सामात्यः सह मन्त्रिभिः ।
दुर्गस्थश्चिन्तयेत्साधु मण्डलं मण्डलाधिपः ।
रथी विराजते राजा विशुद्धे मण्डले चरन् ।
अशुद्धे मण्डले सर्पन् शीर्य्यते रथचक्रवत् ॥
रोपयेत् सर्व्वभूतेभ्यः शश्वीवाखण्डमण्डलः ।
सम्पूर्णमण्डलस्तस्माद्विजिगीषुः सदा भवेत् ॥
अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चमः ।
एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः ॥
एताः पञ्च तथा मित्रं सप्तमः पृथिवीपतिः ।
सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः ॥
सम्पन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः ।
जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः ॥
कौलीनं दृढसंविस्वमुत्साहः स्थूललक्षता ।
चित्रज्ञता बुद्धिमत्त्वं प्रागल्भ्यं सत्यवादिता ॥
अदीर्घसूत्रताऽक्षौद्रं प्रश्रयः स्वप्रधानता ।
देशकालज्ञता दार्ढ्यं सर्व्वक्लेशसहिष्णुता ॥
सर्व्वविज्ञानिता दाक्ष्यं सदा संवृतमन्त्रता ।
अविसंवादिता शौर्य्यं भक्तिज्ञत्वं कृतज्ञता ॥
शरणागतवात्सल्यममर्षित्वमचापलम् ।
अकर्म्मकरणाभावः कृतित्वं दीर्घदर्शिता ॥
जितश्रमित्वं धर्म्मित्वमक्रूरपरिवारता ।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः ॥
सर्व्वैर्गुणैर्विहीनोऽपि स राजा यः प्रतापवान् ।
प्रतापयुक्ता त्रस्यन्ति परान् सिंहं मृगा इव ॥
प्रतापसिद्धो नृपतिः प्राप्नोति महतीं श्रियम् ।
तस्मादुत्थानयोगेन प्रतापं जनयेत्परम् ॥
एकार्थाभिनिवेशित्वमविलक्षणमुच्यते ।
दारुणस्तु स्मृतः शत्रुर्विजिगीषुगुणान्वितः ॥
लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखच्छेद्यो रिपुः स्मृतः ॥
अरिर्मित्रमरेर्मित्रं मित्रमित्रमतःपरम् ।
तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्थिताः ॥
पार्ष्णिग्राहः स्मृतः पश्चादाक्रन्दस्तदनन्तरम् ।
आसारावनयोश्चैव विजिगीषोस्तु मण्डलम् ॥
अरेश्च विजिगीषोस्तु मध्यमो भूम्यनन्तरः ।
अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे ॥
मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः ।
अनुग्रहे संहतानां व्यस्तानाञ्च वधे प्रभुः ॥
न्मनप्रकृतयश्चैताश्चतस्रः परिकीर्त्तिताः ।
आहैव मनुकुशलश्चतुष्कं मण्डलं मयः ॥
विजिगीषुररिर्मित्रं पार्ष्णिग्राहोऽथ मध्यमः ।
उदासीनः पुलोमेन्द्रौ षट्कं मण्डलमूचतुः ॥
उदासीनो मध्यमश्च विजिगीषोस्तु मण्डलम् ।
उशना मण्डलमिदं प्राह द्वादशराजकम् ॥")

देशः । स च देशः समन्ताद्विंशतियोजनं चत्वारिंशद्योजनं वा । इति केचित् ॥ गोलम् । इत्यनेकार्थकोषः ॥ चक्रम् । इति त्रिकाण्डशेषः ॥ संघातः । इति हेमचन्द्रः ॥ नखाघातः । इति शब्दमाला ॥ धन्विनां स्थानपञ्चकान्तर्गतस्थितिविशेषः । यथा,—

"मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"
इति शब्दरत्नावली ॥

व्याघ्रनखाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ व्यूहविशेषः । यथा,—

"तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ।
मण्डलं सर्व्वतोवृत्तिः पृथग्वृत्तिरसंहतः ॥"
इति भरतधृतकामन्दकिः ॥

(अस्य पुंस्त्वमपि । यथा, महाभारते । ६ । ७८ । ७० ।

"भीष्मेण धार्त्तराष्ट्राणां व्यूढः प्रत्यङ्मुखो ययौ ।
मण्डलः सुमहाव्यूहो दुर्भेद्योऽमित्रघातिनाम् ॥"

यथा च, कामन्दकीये । १८ । ४१ ।

"मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः ॥")

ग्रहादीनां मण्डलसंस्थानं तत्परिमाणञ्च यथा,

"सर्व्वेषाञ्च ग्रहाणां वै अधस्ताच्चरते रविः ।
रवेरूर्द्ध्वं स्थितः सोमः सोमान्नक्षत्रमण्डलम् ॥
नक्षत्रेभ्यो बुधस्तूर्द्ध्वं बुधादूर्द्ध्वञ्च भार्गवः ।
तस्मादङ्गारकश्चोर्द्ध्वं तस्य चोर्द्ध्वं बृहस्पतिः ॥
तस्मात् शनैश्चरश्चोर्द्ध्वं तस्योर्द्ध्वं स्त्वृषिमण्डलम् ।
ऋषिभ्यश्च ध्रुवश्चोर्द्ध्वमायान्तं त्रिदिवं ध्रुवं ।
आदित्यनिलयो राहुः कदाचित् सोममार्गतः ॥
सूर्य्यमण्डलसंस्थस्तु नित्यं केतुः प्रसर्पति ।
नवयोजनसहस्राणि विस्तारो भास्करस्य तु ॥
विस्ताराद्द्विगुणश्चास्य परिणाहे तु मण्डलम् ।
द्विगुणः सूर्य्यविस्ताराद्विस्तारः शशिनः स्मृतः ॥
द्विगुणं मण्डलञ्चास्य यथैव सवितुस्तथा ।
चन्द्रतः षोड़शो भागो भार्गवस्य विधीयते ॥
भार्गवात् पादहीनस्तु विज्ञेयो वै बृहस्पतिः ।
बृहस्पतेः पादहीनौ वक्रसौरावुदाहृतौ ॥
विस्तारमण्डलाभ्याञ्च पादहीनस्तयोर्बुधः ।
बुधतुल्यानि ऋक्षाणि सर्व्वे तूक्ष्माणि यानि तु ॥
योजनार्द्धप्रमाणानि तेभ्यो ह्रस्वं न विद्यते ।
राहुः सूर्य्यप्रमाणस्तु कदाचित् सोमसन्नितः ।
तस्मात् ग्रहप्रमाणस्तु केतुश्चनियतः स्मृतः ॥"
इति देवीपुराणे ग्रहगतिर्नामाध्यायः ॥

स्नानमण्डलविधिर्यथा,—

"चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत् ।
मण्डलं तत्र कर्त्तव्यमत ऊर्द्धं न कारयेत् ॥
विमलं विजयं भद्रं विमानं शुभदं शिवम् ।
वर्द्धमानञ्च देवञ्च लताद्यं कामदायकम् ।
रुचकं स्वस्तिकाख्यञ्च द्विदशं इति मण्डलाः ॥
सितादिहरितान्ताश्च रजाः कार्य्याः सुशोभनाः ।
शालिषष्टिककौसुम्भरजनीहरिचन्दजाः ॥
मणिविद्रुमरागाश्च भस्मना अभिमन्त्रिताः ।
सितसर्षपधूपाढ्या रजाः कृत्वा तु पातयेत् ॥
अक्षराणं यमन्त्रो सम्भवति पदं पि वा ।
समोत्थानं शुभं कृत्वा गोमयेनोपलेपितम् ॥
चन्दनागुरुकर्पूरक्षोदधूपाधिवासितम् ।
भूभागं सुमितं सिद्धं पूर्व्वपश्चिमकोत्तरम् ॥
याम्यं स्वस्तिकमत्याङ्गैः सूत्रैर्वीणाङ्कपत्रजैः ।
पञ्चपञ्चाशकं मन्ये द्विगुणं त्रिगुणं पि वा ॥
द्वाराणि समसूत्राणि कर्णिकाकेशरोज्ज्वलम् ।
पद्मं तथावशेषाणि स्वस्तिकान्युत्पलानि च ॥
यथावलम्बहस्तस्तु रजःपातं समाचरेत् ।
मध्यमानामिकाङ्गुष्ठैरुपरिष्टाद्दृयथेप्सया ॥
अधोमुखाङ्गुलिं कृत्वा पातयेत्तु विचक्षणः ।
समा रेखा तु कर्त्तव्याविच्छिन्ना पुष्टिवर्द्धिता ॥
अङ्गुष्ठपञ्चनेपुण्या समा कार्य्या विजानता ।
संसक्तं विषमं स्थूलं विच्छिन्नं कृशराहृतम् ॥
पर्य्यन्तसर्पितं सूक्ष्ममालिखेन्न कदाचन ।
संसक्ते कलहं विद्याद्व्यरेखे तु विग्रहम् ॥
अतिस्थाने भवेद्व्याधिर्नित्यं पीडा विमिश्रते ।
विन्दुभिर्भयमाप्नोति शत्रुपक्षात् संशयः ॥
कृशायामर्थहानिः स्यात् विच्छिन्ने मरणं ध्रुवम् ।
वियोगाच्च भवेत्तस्य इष्टदयसुतस्य वा ॥
अविदित्वा लिखेद्यस्तु मण्डलञ्च यथेप्सया ।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ॥"
इति देवीपुराणे पुष्पाभिषेकश्चन्तानामाध्यायः ॥

सूर्य्यमण्डले देवानां स्थितिर्यथा,—

"अर्च्चयन् पूजयन् देवं जपंश्च रविमण्डले ।
आदित्यमण्डले देवं ध्यात्वा विष्णुरुपैति तम् ॥"

भोजनमण्डलं यथा,—

"यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा ।
घ्नन्ति केवलमन्नस्य मण्डलस्य विवर्ज्जनात् ॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः ।
मण्डलान्युपजीवन्ति तस्मात् कुर्व्वन्ति मण्डलम् ॥

चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा ॥”
इत्याद्ये वह्निपुराणे आह्निकतर्पणनामाध्यायः ॥

मण्डलं, त्रि, बिम्बम्। इत्यमरः।१।३।१५॥ हि चन्द्रस्य शरीरे उपचारादादित्यस्य च। वेति शोभते बिम्बः शीलकान्तिगत्यादौ गाम्नोति बिम्बः। बिम्बति भाति बिम्बः। सौत्रोऽयमिति स्वामी। मण्डयति मण्डलं गाम्नोति अलः स्त्रियां नदादित्वात् मण्डली च। इति भरतः॥

मण्डलः, पु, (मण्डं लाति गृह्णातीति। ला + कः।) कुक्कुरः। इति मेदिनी। ले, १२१॥ सर्पविशेषः। इति विश्वः॥ (देहस्याष्टप्रकारसन्ध्यन्तर्गतसन्धिविशेषः। “स एते सन्धयोऽष्टविधाः। कोरोदूखल-सामुद्ग-प्रतर-तुन्नसेवनी-वायसतुण्ड-मण्डल-शङ्खावर्त्ताः।” ‘कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः।’ इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

मण्डलकं, क्ली, (मण्डल। स्वार्थे कन्।) बिम्बम्। कुष्ठभेदः। दर्पणम्। इति मेदिनी। कं, २०७॥ मण्डलाकारव्यूहः। इति जटाधरः॥

मण्डलकः, पुं, (मण्डल। स्वार्थे कन्।) कुक्कुरः। इति धरणिः॥

मण्डलनृत्यं क्ली, (मण्डलेन मण्डलाकारेण प्रवर्त्तितं नृत्यमिति नित्यसमासः।) मण्डलाकारनृत्यम्। तत्पर्य्यायः। हल्लीष.२॥ इति शब्दमाला॥

मण्डलपत्रिका, स्त्री, (मण्डलं मण्डलाकारं पत्रं यस्याः। कन्। टाप्। अत इत्वञ्च।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या रक्तपुनर्नवाशब्दे ज्ञातव्याः॥)

मण्डलाग्रः, पु, (मण्डलं गोलाकारं अग्रं यस्य।) खड्गः। इत्यमरः। २। ८। ८८॥ (यथा, सुश्रुते सूत्रस्थाने अष्टमेऽध्याये॥ तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च।)

मण्डलायित, क्ली, (मण्डलवदाचरितमिति। मण्डल + क्यङ्। दीर्घः। मण्डलाय नामधातुः क्तः।) वर्त्तुलम्। इति शब्दरत्नावली॥

मण्डलाधीशः, पु, (मण्डलस्य अधीशः।) मण्डलेश्वरः। तत्पर्य्यायः। मध्यमः २। इति हेमचन्द्रः॥

मण्डली, [न्] पुं, (मण्डलं कुण्डलनं कुण्डलाकारेण शरीरवेष्टनमस्यास्तीति। मण्डल + इनि।) सर्पः। इति त्रिकाण्डशेषः॥ विडालः। इति शब्दमाला॥ जाहकः। इति हेमचन्द्रः॥ खट्टाश इति भाषा॥ वटवृक्षः। गोनाशसर्पः। इति राजनिर्घण्टः॥

मण्डली, स्त्री, (मण्डलमस्त्यस्या इति। अर्श आद्यच्। गौरादित्वात् ङीष्।) दूर्व्वा। इति हारावली॥ (स्त्री, गुडूची॥ तत्पर्य्यायो यथा,
“गुडूची मधुपर्णी स्यादमृताम्रतवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिकाधीरा विशल्या च रसायनी॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मण्डलेशः, पु, (मण्डलस्य ईशः।) मण्डलेश्वरः। तत्पर्य्यायः। एकजन्मा २ भयापहः ३। इति त्रिकाण्डशेषः॥

मण्डलेश्वरः, पुं, (मण्डलस्य ईश्वरः।) भूम्येकदेशाधिपः। अन्यो भूम्येकदेशाधिपो मण्डलेश्वरः स्यात् मण्डलस्य अरिमित्रादिरूपस्य देशस्य ईश्वरो मण्डलेश्वरः। एकदेशाधिप इत्यर्थः। स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च। इति विश्वः॥ इत्यमरटीकायां भरतः॥ तस्य लक्षणान्तरम्।
“चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च।
यो राजा तत्कृतगुणः स एव मण्डलेश्वरः॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः॥

मण्डहारकः, पु, (मण्डं हरति आहरति गृह्णातीति। हृ + “ण्वुल्तृचौ।” ३। १। १३३। इति ण्वुल्। सुरासम्पादनार्थं मण्डग्रहणादस्य तथात्वम्।) शौण्डिकः। इत्यमरः। १। २। १०॥

मण्डा, स्त्री, (मण्डः कारणत्वेनास्ति अस्या इति अर्शआदिभ्योऽच्। टाप्।) सुरा। इति हारावली॥ (मण्डयतीति। मडि + अच्। टाप्।) आमलकी। इति मेदिनी। डे, २७॥

मण्डितः, पु, बौद्धगणाधिपविशेषः। इति हेमचन्द्रः। (मडि + कर्म्मणि क्तः।) भूषिते त्रि। इत्यमरः। ६। २। १००॥ (यथा, गीतगोविन्दे। २। ७।
“मणिमयमकरमनोहर-
कुण्डलमण्डितगण्डमुदारम्।”)

मण्डूकः, पु, (मण्डयति भूषयति जलाशयमिति मडि + “शलिमण्डिभ्यामूकण्” उणा० ४। ४२। इति ऊकण्।) भेकः। इत्यमरः। १। १०। २४॥ (यथा, मनु. । ४। १२६।
“पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभिः।
अन्तरागमने विद्यादनध्यायमहर्निशम्॥”
भेकार्थे पर्य्यायो गुणाश्च यथा,—
“मण्डूकः प्लवगो भेको वर्षाभूर्द्दर्दुरो हरिः।
मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥) श्योणाकः। मुनिविशेषः। इति मेदिनी। कं, १२६॥ गाढतेजाः। इति शब्दरत्नावली॥ बन्धविशेषे क्ली। इति विश्वः॥ (अश्वजातिभेदः। यथा, महाभारते। २। २८। ६।
“तत्र तित्तिरिकल्माषान् मण्डूकाख्यान् हयोत्तमान्।”)

मण्डूकपर्णः, पुं, (मण्डूकाकृति पर्णमस्य। यद्वा, मण्डूक इवोत्तानोदरं पर्णमस्य।) श्योनाकवृक्षः। इत्यमरः। ४। २। ५६॥ (तथाचास्य पर्य्यायः॥
“श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकः।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः॥
दीर्घवृन्तोरलुश्चापि पृथुशिम्बः कटम्भरः॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।) शोणकः। इति मेदिनी। णे, ११५॥

मण्डूकपर्णी, स्त्री, (मण्डूकपर्ण। गौरादित्वात् ङीष्।) मञ्जिष्ठा॥ (यथास्याः पर्य्यायः।
“मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी॥”)
ब्राह्मणी इति मेदिनी। णे, ११५॥ आदित्यभक्ता। इति राजनिर्घण्टः॥ ओषधिविशेषः। थुलकुडी इति भाषा। तत्पर्य्यायः। भेकी २ मण्डूकी ३ त्वष्टी ४। इति रत्नमाला॥ मण्डूकपर्णिका ५। अस्या गुणाः। मण्डूकपर्णिका लघ्वी स्वादुपाका रसा हिमा। (महौषध्यर्थे पर्य्यायान्तरं यथा,—
“मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी।”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
तथाचास्या गुणाः॥
कषाया तु हिता पित्ते स्वादुपाकरसा हिमा।
लघ्वी मण्डूकपर्णी तु तद्वज्जालिकिका मता॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)
पाठान्तरम्। मण्डूकपर्णिका लघ्वी कृष्णा वातविबन्धनुत्। इति राजवल्लभः॥

मण्डूकमाता, [ऋ] स्त्री, (मण्डूकस्य मातेव मण्डूकपोषकत्वादस्यास्तथात्वम्।) ब्राह्मी। इति राजनिर्घण्टः॥ भेकमाता च॥

मण्डूका, स्त्री, (मण्डूक + स्त्रियां टाप्।) मञ्जिष्ठा। यथा, शब्दमालायाम्।
“मण्डूका च लता यष्टिर्हेमपुष्पी च भण्डिरी।”

मण्डूकी, स्त्री, (मण्डूक + स्त्रियां ङीष्।) मण्डूकपर्णी। इति मेदिनी। कं, १३७॥ आदित्यभक्ता। ब्राह्मी। इति राजनिर्घण्टः॥ क्षुपविशेषः। इति रत्नमाला॥ थुलकुड़ी। इति भाषा। दुष्टयोषित। इति शब्दरत्नावली॥

मण्डूरं, क्ली, पु, लौहमलम्। तत्पर्य्यायः। शिङ्घाणम् २। इत्यमरः। २। ६। ६८॥ सिंहानं ३। सिंहाण ४। मण्डते लौहं वेष्टत अभिदार्ह लौहाङ्गिभजते वा मण्डयति भूषयति औषधत्वाद्रोगिणमिति वा मण्डूरं कि मडि भूषे मडि ड विभागे वंहे गाच्छीति ऊरः। इति तट्टीकायां भरतः॥ अस्य गुणः। लौहगुणतुल्यः। शतवर्षीयं मण्डूरमुत्तमम्। अशीतिवर्षीयं मध्यमम्। षष्टिवर्षीयमधमम्। अतो न्यूनं विषतुल्यम्। यथा,—
“यल्लौहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणम्।
शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्॥
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥”
इति रसेन्द्रचिन्तामणिः॥
(तथा चास्य पर्य्यायान्तरम्। मण्डूरं लौहजं किट्टम्। इति वैद्यकरत्नमालायाम्॥ अस्य उत्पत्तिर्गुणाश्च यथा,—

"ध्मायमानस्य लौहस्य मलं मण्डूरमुच्यते ।
लौहसिंहानिका किट्टी सिंहाणञ्च निगद्यते ॥
यल्लौहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात सर्व्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥"
अथास्य मारणविधिर्यथा,—
"दग्ध्वाक्षकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्ण्य लीढं मधुनाचिरेण
कुम्भाह्वयं पाण्डुगदं निहन्ति ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणा-
धिकारे ॥)

मण्डोदकं, क्ली, (मण्ड इव उदकमस्य मण्डमिश्रित-
मुदकमत्रेति वा ।) चित्तरागः । विचित्रवर्णः ।
आनर्पणम् । आलिम्पना । इति मेदिनी । कं,
१०७॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमि-
श्रितान् ।
मण्डोदकार्थे क्वाथञ्च दद्यात तत्सर्व्वमेकतः ॥")

मत् च अनहमहम् । अतं त्वं भवति त्वद्भवति
अनहमहं मद्भवतीति संचित्तप्रसारणाकरणम् ॥
अस्मच्छब्दाच्चिप्रत्यये कृते तल्लुकि अस्मच्छब्दस्य
मदादेशान्निष्पन्नम् । इति तट्टीकायां गोयी-
चन्द्रः ॥

मतं, क्ली, (मन्+भावे क्तः ।) सम्मतम् । तत्-
पर्य्यायः । छन्दः २ अभिप्रायः ३ आकूतम् ४
भावः ५ आशयः ६ । इति हेमचन्द्रः ॥

मतः, त्रि, (मन्+कर्म्मणि क्तः ।) सम्मतः ।
ज्ञातः । इति मेदिनी । ते, ४२ ॥ (यथा,
रघौ । २ । ५७ ।
"किमप्यहिंस्यस्तव चेन्मतोऽहं
यशःशरीरे भव मे दयालुः ॥")
अर्च्चितः । इति हेमचन्द्रः ॥

मतङ्गः, पुं, (माद्यति माद्यत्यनेन वेति । मद्+
"मदोभिर्य्यन्ति हर्षे । इत्युणादिकोष टीकोक्त-
सूत्रादङ्गच् । दस्य तः ।) मुनिभेदः । (यथा,
रघौ । ५ । ५३ ।
"मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ॥")
मेघः । इत्युणादिकोषः । १ । २७ ॥

मतङ्गजः, पुं, (मतङ्गः मेघ इव जायते तदाख्य-
मुनेर्जातो वेति । जन+ड ।) हस्ती । इत्यमरः ।
२।८।३४॥ (यथा, कामन्दकीये नीतिसारे ।१५।७।
"ग्रीष्मे प्रभूताम्बुवनेन यायात्
निर्वासनार्थं करिणां यथा तु ।
कृतेऽध्वनो ग्रीष्मकृतात् प्रतापात्
भवन्ति कुष्ठानि मतङ्गजानाम् ॥")

मतल्लिका, स्त्री, प्रशस्तम् । इत्यमरः । १ ।४।२७॥

मतिः, स्त्री, (मन्यतेऽनयेति । मन्+क्तिन् ।)
बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, देवी-
भागवते । १ । १७ । २६ ।
"मतिस्तु द्विविधा लोके युक्तायुक्तेति सर्व्वथा ।")
इच्छा । स्मृतिः । इति मेदिनी । ते, ४३ ॥
आर्य्यम् । शाकभेदः । इत्यजयपालः ॥ * ॥
"विप्रेन्द्र ! का प्रशंसेयं जन्म ते ब्रह्ममानसे ।
यस्य यत्र कुले जन्म तन्मतिस्ताद्दशी भवेत ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
मतिकरौषधम् । यथा,—
"पाठा द्वे जीरके कुष्ठमश्वगन्धाजमोदकम् ।
वचा त्रिकटुकञ्चैव लवणं चूर्णमुत्तमम् ॥
ब्राह्मीरसैर्भावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्यादैश्वर्य्यं मतिं
पराम् ॥"
इति गारुडे १९८ अध्यायः ॥

मतिदा, स्त्री, (मतिं ददातीति । दा+कः ।)
ज्योतिष्मती । शिम्बड़ीक्षुपः । इति राज-
निर्घण्टः ॥ (मतिदातरि, त्रि ।)

मतिभ्रमः, पुं, (मतेर्बुद्धेर्भ्रमः ।) बुद्धिभ्रंशः ।
("अस्थान एवास्य मतिभ्रमः ।" इति पातञ्जल
योगसूत्रभाष्ये वेदव्यासः ।) तत्पर्य्यायः । भ्रमः २
मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्ना-
वली ॥

मतिभ्रान्तिः, स्त्री, (मतेर्बुद्धेर्भ्रान्तिः ।) बुद्धि
भ्रंशः । तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३
भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिविभ्रंशः, पुं, (मतेर्बुद्धेर्विभ्रंशः ।) उन्माद
रोगः । इति राजनिर्घण्टः ॥

मतिष्ठः, त्रि, (अयमनयोरयमेषामतिशयेन मति-
मान् वेति । मतिमत्+इष्ठन् । मतुपो
लोपः ।) अतिशयबुद्धिमान् । इति मुग्धबोध-
व्याकरणम् ॥

मत्कः, पु, (माद्यतीति । मद+क्विप् । ततः
स्वार्थे कन् ।) मत्कुणः । इति शब्दमाला ॥
(मम अयम् । अस्मद् शब्दादिदमर्थे कन् ।
मदादेशश्च ।) मत्सम्बन्धिनि त्रि । इति व्याक-
रणम् ॥ (यथा, भट्टिः । ३ । ३२ ।
"नेनष्मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ शपथानशप्यत् ॥")

मत्कुणः, पुं, (माद्यतीति । मद्+क्विप् कुणति
इति कुण+क । ततः । मच्चासौ कुणश्चेति ।)
कीटविशेषः । छारपोका इति भाषा ॥ तत्-
पर्य्यायः । रक्तपायी २ रक्ताङ्गः ३ मञ्च-
काश्रयः ४ । इति राजनिर्घण्टः ॥ उद्दंशः ५ ।
(यथा, शिशुपालवधे । १४ । ६८ ।
"मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षणम् ॥")
निर्व्विषाणहस्ती । निःश्मश्रुपुरुषः । माकुन्धा
इति भाषा॥ नारिकेलः । इति मेदिनी । णं,
७० ॥ जङ्घात्राणम् । इति हेमचन्द्रः ।४।७७५॥

मत्कुणा, स्त्री, अजातलोमभगम् । इति शब्द-
रत्नावली ॥

मत्कुणारिः, पुं (मत्कुणस्य अरिः । मत्कुण-
नाशकत्वादस्य तथात्वम् ।) इन्द्राशनः । सिद्धि
'इति भाषा । इति शब्दमाला ॥
(विवृतिरस्य इन्द्राशनशब्दे विहिता ॥)

मत्तः, पुं, (माद्यतीति । मद्+कर्त्तरि क्तः ।)
चरन्मदहस्ती । मातवोयाला हाती इति
भाषा ॥ तत्पर्य्यायः । प्रभिन्नः २ गर्ज्जितः ३ ।
इत्यमरः । २ ।८।३६॥ मतङ्गः ४ चरन्मदः ५ ।
इति शब्दरत्नावली ॥ धुस्तूरः । कोकिलः ।
महिषः । इति राजनिर्घण्टः ॥

मत्तः, त्रि, मत्तताविशिष्टः । सुरापाने विक-
लान्तःकरणः । तत्पर्य्यायः । शौण्डः २ उत्-
कटः ३ क्षीवः ४ । इत्यमरः । ३ । १ । २३॥
मदोत्कटः ५ । इति जटाधरः ॥ (यथा, देवी-
भागवते । २ । ८ । ४ ।
"ते पीत्वा मदिरां मत्ताः कृत्वा युद्धं पर-
स्परम् ।"
यथाच माधवकृतरुग्विनिश्चये मदात्ययाद्यधिकारे।
"मद्येन मत्तः पुरुषो मदेन ।")
हृष्टः । मदोभिर्य्यन्ति हर्षे क्तः । इत्यमर-
भरतौ ॥ अविवेकी । (यथा रामायणे । १ ।
४४ ।१० । "बलान्मत्तो महाबलः ।"
"मत्तोऽविवेकी ।" इति तट्टीकाकृद्रामानुजः ॥)

मत्तकाशिनी, मत्तकासिनी, स्त्री, उत्तमस्त्री । इत्यमरः ।
२ ।६।४॥ मत्त इव क्षीव इव
कसति गच्छति मत्तकासिनी कस च गतौ
ग्रहादित्वाण्णिन् इत्यमध्या । मत्तेव काशते
भाति मत्तकाशिनी तालव्यमध्यापि । इति
भरतः ॥ (यथा, महाभारते । १ । १७३।३६ ।
"न तासां सदृशीं मन्ये त्वामहं मत्त-
काशिनि ! ।")

मत्तकीशः, पुं, (मत्तः सन् कीशो वानर इव ।)
हस्ती । इति शब्दमाला ॥

मत्तरः, पुं, मत्ताधिकः । मत्तोऽतिशयः । अस्म-
च्छब्दात् तरप्प्रत्ययेन निष्पन्नः । इति
सिद्धान्तकौमुदी ॥

मत्तवारणं, क्ली, (मत्तं वारयतीति । वृ+णिच्
ल्युः ।) प्रासादवीथीनां वरण्डः । कोठार
बाराण्डा इति भाषा ॥ (यथा, कुट्टनीमते ।६।
"दिव्यधराधरभूरिव राजति मत्तवारणोपेता॥"
"प्रासादवीथीनां वरण्डकः ।" इति तट्टीका ॥)
अपाश्रयः । प्राङ्गणावरणम् । इति हेमचन्द्रः ।
४ । ७८ । विश्वश्च ॥ प्रासादवीथीनां कुञ्जरच-
हृतिः । कुन्दरचहृति इति च पाठः । इति
मेदिनी ।णे,११४॥ पूगचूर्णः । इति शब्दमाला ॥

मत्तवारणः, पु, (वार्य्यते संयम्यते शृङ्खलादिभिः
इति वारणः । वृ+णिच् कर्म्मणि ल्युट् । मत्त-
श्चासौ वारणश्चेति ।) प्रक्षिप्तकटकुञ्जरः ।
मत्तहस्ती ; इति मेदिनी । णे, ११४ । हेम-
चन्द्रश्च । ४ । ७८ ॥

मत्ता, स्त्री, (माद्यति मादयतीति । अन्तर्भूत-
ण्यर्थान्मदधातोः+क्तः+स्त्रियां टाप् ।) मदिरा ।

इति राजनिर्घण्टः ॥ (पदस्यान्तर्गतः दशाक्षरः छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।

"ज्ञेया मत्ता मभसगयुक्ता ।"

अधिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मत्तालम्बः, पुं, (आलम्ब्यते असावित्यालम्बः । आ + लम्ब + कर्म्मणि घञ् । मत्तस्यालम्बः आश्रयः ।) प्राङ्गणावरणम् । तत्पर्य्यायः । अपाश्रयः २ प्रग्रीवः ३ मत्तवारणम् ४ । इति हेमचन्द्रः । ४ । ७८ ॥

मत्तेभगमना, स्त्री, (मत्तेभस्य गमनमिव गमनं यस्याः ।) स्त्रीविशेषः । मत्तगजगामिनी । इति हेमचन्द्रः । ३ । १७० ॥

मत्यं, क्ली, (मतं ज्ञानं तस्य करणमिति । मत + "मतजनहलात् करणजल्पकर्षेषु ।" ४ । ४ । ९७ । इति यत् । लष्टस्य क्षेत्रस्य समीकरणादिसाधनफलकम् । यथा, ताण्ड्यमहाब्राह्मणे १२ । ९ । २ ।

"आलय्यवांस्तथैव यथा समाप्यितेन मत्येन । मतीकरोत्येव पाप्मानं भ्रातृव्यं प्रकृन्ति ॥"

"मत्यं नाम लष्टस्य क्षेत्रस्य समीकरणादिसाधनफलकम् ।" इति तद्भाष्ये सायनः ॥)

दारुादीनां मुष्टिः । तत्पर्य्यायः । वटः २ । इति हेमचन्द्रः । ३ । ५५६ ॥

मत्र, इ ङ क गुप्तोक्तौ । इति कविकल्पद्रुमः ॥ (चुरा० आत्म०-सक०-सेट ।) दन्त्यवर्गाद्योपधः । इ क ङ इति धुव मन्त्रयते गुप्तोऽयमिति मरारिः ॥ मन्त्र इत्यनेनैवेष्टसिद्धौ इदनुबन्धो वेदेतकारणभेदार्थः । इति दुर्गादासः ॥

मत्सः, पु, (माद्यतीति । मद् + बाहुलकात् सन् ।) मत्स्यः । इत्युणादिकोषः ॥

मत्सगण्टः, पु, (मत्स्यानां गण्डोऽत्र पृषोदरादित्वात् साधुः ।) व्यञ्जनविशेषः । मत्स्यघण्ट इति ख्यातः । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्सरः, पु, (माद्यते इति मद् + "कृधूमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् । यद्वा । मदा सरतीति अमरटीका ।) अन्यशुभद्वेषः । इत्यमरः । १ । ३ । १७ ॥ (यथा, कथासरित्सागरे । ४२ । ६५ ।

"शौर्य्याल्लाङ्घयामास द्वितीयमपि तत्फलम् । निसर्गसिद्धो नारीणां सपत्नीषु हि मत्सरः ॥")

क्रोधः । इति मेदिनी । रे, १९३ ॥

मत्सरः, त्रि, (माद्यतीति । मद् हर्षे + "कृधूमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् ।) असह्यपरसम्पत्तिः । मात्सर्य्ययुक्तः । (यथा, महानिर्व्वाणतन्त्रे । १ । २६ ।

"न मत्सरा नातिरुष्टा नातिलुब्धा न कामुकाः ।")

कृपणः । इत्यमरमेदिनीकरौ ॥ आत्माधिकारविशेषः । यथा, —

"निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् ।

इत्यात्मनि भवेद्यस्तु धिक्कारः स च मत्सरः ॥"

इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥

मत्सरा, स्त्री, (मद् + सरन् । स्त्रियां टाप् ।) मक्षिका । इति मेदिनी । रे, १९३ ।

मत्सरी, [न्] त्रि (मत्सरोऽन्यशुभद्वेषोऽस्यास्तीति मत्सर + इनिः ।) अन्यशुभद्वेष्टा । तत्पर्य्यायः । कर्णेजपः २ दुर्ज्जनः ३ पिशुनः ४ सूचकः ५ नीचः ६ द्विजिह्वः ७ खलः ८ । इति हेमचन्द्रः ॥ (यथा, मनौ । २ । २०१ ।

"परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥")

मत्स्यः, पु स्त्री, (माद्यन्ति लोका अनेनेति । मद् + "ऋतन्यञ्जीति ।" उणा० । ४ । २ इति स्यन् ।) स्वनामख्यातजलजन्तुः । माछ इति भाषा ॥ तत्पर्य्यायः । पृथुरोमा २ झषः ३ मीनः ४ वैसारिणः ५ अण्डजः ६ विसारः ७ शकली ८ । इत्यमरः । १ । १० । १७ ॥ शल्कली ९ झषः १० आत्माशी ११ संवरः १२ मकः १३ जलेशयः १४ कण्टकी १५ शल्की १६ मत्कः १७ अनिमिषः १८ । इति शब्दरत्नावली ॥ शुक्ली १९ । इति जटाधरः ॥ तस्य गुणाः । बृंहणत्वम् । गुरुत्वम् । शुक्रवर्द्धनत्वम् । बलत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधुरत्वम् । कफपित्तकरत्वम् । व्यायामाध्वरतदीप्ताग्नीनां पूजितत्वम् । वातरोगहरत्वञ्च ॥ * ॥ वृहन्मत्स्यगुणाः । गुरुत्वम् । शुक्रलत्वम् । मलबद्धकारित्वञ्च ॥ * ॥ क्षुद्रमत्स्यगुणाः । लघुत्वम् । ग्राहित्वम् । ग्रहणीरोगे हितत्वञ्च ॥ * ॥ कृशमत्स्यगुणाः । लघुत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । वह्निवर्द्धनत्वञ्च ॥ * ॥ पाकरमत्स्यगुणाः । दोषलत्वम् । स्निग्धत्वम् । गुरुत्वम् । मलभेदित्वञ्च ॥ * ॥ कथितमत्स्यस्य अर्थात् पूतिमत्स्यस्य गुणः । दोषलत्वम् ॥ * ॥ शुष्कमत्स्यगुणौ । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ लवणभावितमत्स्यगुणाः । कफपित्तकरत्वम् । सारकत्वम् ॥ सामुद्रमत्स्यगुणाः । लघुत्वम् । वृष्यत्वम् । मधुरत्वम् । स्वल्पमलकारित्वञ्च ।

"सामुद्रा गुरवो वृष्याः स्निग्धोष्णा वातनाशनाः ।"

इति पाठान्तरम् ॥ * ॥

(तथास्य पर्य्यायाः गुणाश्च ।

"मत्स्यो मीनो विसारश्च झषो वैसारिणोऽण्डजः । शकुलः पृथुरोमा च स सुदर्शन इत्यपि ॥ रोहिताद्यास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।

मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥ वातघ्ना बृंहणा वृष्या रोचका बलवर्द्धनाः । मद्यव्यवायसक्तानां दीप्ताग्नीनाञ्च पूजिताः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

"मत्स्या रोहितपाठीनकूर्म्मकुम्भीरकर्कटाः । शुक्तिशङ्खोद्रशम्बूकशफरीवर्म्मिचन्द्रिकाः ॥ चुलकीनक्रमकरशिशुमारतिमिङ्गिलाः । राजीवाः चिलिचिमाद्याश्च ॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥

मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः । रोहित-पाठीन-पाटला-राजीव-वर्म्मिगोमत्स्य कृष्णमत्स्य-वागुञ्जार-मुरल-सहस्र-दंष्ट्रप्रभृतयो नादेयाः ॥

"नादेया मधुरा मत्स्या गुरवो मारुतापहाः । रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः ॥ कषायानुरसस्तेषां शष्पशैवालभोजनाः । सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः । महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः ।"

तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः ॥

"सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः । उष्णावातहरा वृष्या वर्च्चस्याः श्लेष्मवर्द्धनाः ॥ बलावहा विशेषेण मांसाशित्वात् समुद्रजाः । तेषामप्यनिलघ्नत्वाच्चौण्टाकौप्यौ गुणोत्तरौ ॥ स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाप्या गुणोत्तराः ।

नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः । सरस्तडागजानान्तु विशेषेण शिरो लघु ॥ अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः । किञ्चिन्मुक्ता शिरोदेशमत्यर्थं गुरवस्तु ते ॥ अधस्तद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः । उरो विचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतम् ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

नादेयमत्स्यगुणाः । श्लेष्मलत्वम् । वृष्यत्वम् । मधुरत्वम् । अल्पमलभेदकत्वञ्च ॥ * ॥ सरस्तडागभवमत्स्यगुणौ । स्निग्धत्वम् । स्वादुरसत्वम् ॥ * ॥ महाह्रदभवमत्स्याः बलिनः । अल्पजलभवाः अबलाः ॥ * ॥ दग्धमत्स्यगुणाः । गुरुत्वम् । वृष्यत्वम् । बृंहणत्वम् । बलवर्द्धनत्वञ्च ॥ तैललवणयुक्तदग्धमत्स्यगुणाः । क्षीणशुक्रभग्नजर्ज्जरितनित्यस्त्रीसेविक्षीणतेजसां हितकारित्वञ्च ॥ * ॥ पलालवेष्टितकर्द्दमलेपिताङ्गारदग्धलवणवेशवारपुरस्कृतसार्द्रकटुतैलसन्तोलितमत्स्यगुणाः । स्वादुत्वम् । कफवातहरत्वम्, शुक्रलत्वम् । बलवर्द्धनत्वञ्च ॥*॥ शाकमत्स्याख्यव्यञ्जनगुणाः । हृद्यत्वम् । वृष्यत्वम् । पुष्टिदत्वञ्च ॥ मत्स्यघण्टगुणाः । बलकरत्वम् । वातहरत्वम्, अतिशयरोचनत्वञ्च ॥ शिरसि खड्गकेशधारिमत्स्यगुणाः । मुखप्रियत्वम् । हृद्यत्वम् । पुंस्त्वघातकत्वञ्च । इति राजवल्लभः ॥* ॥ अपि च ।

"निःशल्का निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः ।

वपुःस्थैर्य्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः ॥ ह्रदकूलाजलनिर्झरतडागवापीजलेषु ये मत्स्याः । तेऽतिजडा नादेया यथोत्तरं लघुतरास्तु नादेयाः ॥

धाराम्बुमत्स्या गुरवो विदाहिनो विष्टम्भदास्ते जनयाणवादिना । नानाश्रिताः स्वादुजलस्थिता अपि ज्ञेया जडास्तेऽपि तथाश्रिता इमे ॥"

इति राजनिर्घण्टः ॥

अथ क्षुद्रमत्स्यगुणाः ।
"क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकराः सर्व्वदा ते हिता मताः ।
अथातिक्षुद्रमत्स्यगुणाः ।
अतिसूक्ष्माः पुंस्त्वहरा रुच्याः कासानिलापहाः ।
अथ मत्स्याण्डगुणाः ।
मत्स्यगर्भो भृशं वृष्यः स्निग्धः पुष्टिकरो गुरुः ।
कफमेदप्रदो बल्यो ग्लानिकृन्मेहनाशनः ॥
अथ शुष्कमत्स्यगुणाः ।
शुष्कमत्स्या न बल्याः स्युर्दुर्जरा विड्विबन्धिनः ॥
अथ दग्धमत्स्यगुणाः ।
दग्धमत्स्यो गुणैः श्रेष्ठः पुष्टिकृद्बलवर्द्धनः ॥
अथ कूपजादिमत्स्यगुणाः ।
कूपमत्स्याः शुक्रमूत्रकृच्छ्रश्लेष्मविवर्द्धनाः ।
सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः ॥
नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा वृष्याः स्निग्धोष्णाः स्वल्पवर्च्चसः ॥
चौड्याः पित्तहराः स्निग्धा मधुरा लघवो हिमाः ।
नाडागा गुरवो वृष्याः शीतला बलमूत्रदाः ।
नाडागवन्निर्झरजा बलायुर्मतिदृक्कराः ॥
अथ ऋतुविशेषे मत्स्यविशेषगुणाः ।
हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ते तु नादेया ग्रीष्मे चौड्यसमुद्भवाः ॥
तड़ागजाता वर्षासु तासु पथ्या नदीभवाः ।
निर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥"
इति भावप्रकाशः ॥

मत्स्योत्पत्तिकारणं यथा,—
"ततस्तु मित्रावरुणौ भ्रातरौ ब्रह्मचारिणौ ।
तन्तु देशं गतौ देवौ विचरन्तौ यदृच्छया ॥
ताभ्यां तत्र तदा दृष्टा उर्व्वशी तु वराप्सराः ।
स्नायन्ती सहितान्याभिः सखीभिः सा वराङ्गना ॥
गायन्ती च हसन्ती च विश्वस्ता निर्जने वने ॥
गौरी कमलगर्भाभा स्निग्धकृष्णशिरोरुहा ।
पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी ॥
शङ्खकुन्देन्दुधवलैर्दन्तैरविरलैः समैः ।
सुभ्रूः सुनासा सुमुखी सुललाटा मनस्विनी ॥
सिंहवत् क्षाममध्याङ्गी पीनोरुजघनस्तनी ।
मधुरालापचतुरा सुमध्या चारुहासिनी ॥
रक्तोत्पलकरा तन्वी सुपदी विनयान्विता ।
पूर्णचन्द्रनिभा बाला मत्तद्विरदगामिनी ॥
दृष्ट्वा तस्यास्तु तद्रूपं तौ देवौ विस्मयं गतौ ।
यस्या हास्येन लास्येन स्मितेन ललितेन च ॥
मृदुना वायुना चैव शीतानिलसुगन्धिना ।
मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च ॥
सुस्वरेण हि गीतेन उर्व्वश्या मधुरेण च ।
ईक्षितौ च कटाक्षेण स्कन्दतुस्तावुभावपि ॥
तन्निधा पतितं रेतः कमलेऽथ स्थले जले ।
कमलेऽथ वशिष्ठस्तु जातो हि मुनिसत्तमः ॥
स्थले त्वगस्त्यः सम्भूतो जले मत्स्यो महामते ! ॥"
इति नारसिंहपुराणे ६ अध्यायः ॥

मत्स्यभक्षणनिषेधो यथा,—
"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विवर्ज्जयेत् ॥
इति मानवे ५ अध्यायः ॥
जलस्थलचरा ये च प्राणिनस्तान् मृतानपि ।
न भक्षेन्मानवो ज्ञानी हन्ता तेषां भवेन्न हि ॥
हत्वा हत्वा तु मत्स्याशी सर्व्वेषां यो विशेषतः ।
मांसादः प्राणिनां सोऽपि तस्मान्मत्स्यं परित्यजेत् ॥"
इति पाद्मोत्तरखण्डे १०५ अध्यायः ॥

वर्ज्जनीयमत्स्या यथा,—
"शृणु देवि ! प्रवक्ष्यामि मांसभेदान्निबोध मे ।
नादेयं तित्तकमठं पशुशृङ्गिणमेव च ॥
गोमीनं चक्रशकुलं वहालं राघवं तथा ।
वामीनं चलकञ्चैव सचक्रं पेङ्गमेव च ॥
भूविलञ्चानिरुद्धञ्च गाङ्गेयानि विवर्ज्जयेत् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥

रविवारे मत्स्यभक्षणनिषेधो यथा,—
"आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्द्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥"
इति भविष्यपुराणम् ॥
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः ॥"
इति तिथ्यादितत्त्वम् ॥

कार्त्तिके मत्स्यभक्षणनिषेधो यथा,—
"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चण्डालो जायते राजन् ! कार्त्तिके मांसभक्षणात् ॥"
इति नारदीयपुराणम् ॥

माघवैशाखयोर्हविष्यब्रह्मचर्य्यविधानात् मत्स्यभक्षणं नितरां निषिद्धमिति तत्तत्तत्त्वदर्शनात् ॥

जन्मतिथौ मत्स्यभक्षणनिषेधो यथा,—
"आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥"
अपि च ।
"भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः ॥"
इति तिथ्यादितत्त्वम् ॥

शैवस्य मत्स्यभक्षणनिषेधो यथा,—
"क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्च्चनम् ।
मत्स्यमांसरतानां वै दूरं तिष्ठति शङ्करः ॥"
इति काशीखण्डम् ॥

मा भक्ष्यं नैवेद्यार्थे भक्ष्येष्वजामहिषीक्षीरं वर्ज्जयेत् । पञ्चनखमत्स्यवराहमांसानि च । इत्याह्निकतत्त्वधृतविष्णुसूत्रम् ॥ * ॥ विन्ध्यपर्व्वतस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा,—
"विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः ।"
इति पुराणम् ॥

कामतो मत्स्यभक्षणप्रायश्चित्तं यथा,—
"मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ॥"
अज्ञानतस्तदर्द्धम् । इति प्रायश्चित्तविवेकः ॥

मत्स्यभक्षणप्रतिप्रसवो यथा,—
"मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
सपरं सिंहतुण्डञ्च तथा पाठीन-रोहितौ ।
मत्स्याश्चैते समुद्दिष्टा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
अपि च ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥"
इति मानवे ५ अध्यायः ॥
"अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यद्भवेत् ।
अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम् ॥"
इत्याह्निकतत्त्वम् ॥

प्रेतश्राद्धे मत्स्यदानविधिर्यथा,—
"सपिण्डीकरणं यावत् प्रेतश्राद्धानि षोडश ।
पक्वान्नेनैव कर्त्तव्यं सामिषेण द्विजातिभिः ॥"
इति श्राद्धतत्त्वधृतकामधेनुवचनम् ॥

मत्स्यः, पुं, (जलं प्राप्य माद्यतीति मद् + "ऋतन्यञ्जीति ।" उणा० । ४।२ । इति स्यन् ।) मीनविशेषः । विराटदेशः । नारायणः । इति हेमचन्द्रः । ४।४०६ ॥ देशविशेषे बहुवचनान्तः । इति मेदिनी । ये, ४५ ॥ द्वादशराशिः । यथा,
"मत्स्यौ घटी नृमिथुनं सगदं सवीणम् ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥

अष्टादशपुराणान्तर्गतपुराणविशेषः ॥ (मत्स्यरूपेणावतीर्णेन भगवता उक्तत्वात् अस्य तदाख्या ।) यथा,—
"पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः ।
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥"
इति मत्स्यपुराणे १ अध्यायः ॥

दशावतारान्तर्गतप्रथमावतारः । यथा,—
सूत उवाच ।
"पुरा राजा मनुर्नाम चीर्णवान् विपुलं तपः ।
पुत्त्रे राज्यं समारोप्य क्षमावान् रविनन्दनः ॥
मलयस्यैकदेशे तु सर्व्वात्मगुणसंयुतः ।
समदुःखसुखो वीरः प्राप्तवान् योगमुत्तमम् ॥
बभूव वरदश्चास्य वर्षायुतशते गते ।
वरं वृणीष्व प्रोवाच प्रीतः स कमलासनः ॥
एवमुक्तोऽब्रवीद्राजा प्रणम्य स पितामहम् ।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम् ॥
भूतग्रामस्य सर्व्वस्य स्थावरस्य चरस्य च ।
भविता रक्षणे यानं प्रलये समुपस्थिते ॥
एवमस्त्विति विश्वात्मा तत्रैवान्तरधीयत ।
पुष्पवृष्टिश्च महती खात् पपात सुरार्पिता ॥
कदाचिदाश्रमे तस्य कुर्व्वतः पितृतर्पणम् ।
पपात पाण्योरुपरि शफरी जलसंयुता ॥
दृष्ट्वा तच्छफरीरूपं स दयालुर्महीपतिः ।
रक्षणायाकरोद्यत्नं स तस्मिन् करकोदरे ॥
अहोरात्रेण चैकेन षोडशाङ्गुलविस्तृतः ।
सोऽभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत् ॥
स तमादाय मणिके प्राक्षिपज्जलचारिणम् ।
तत्रापि चैकरात्रेण हस्तत्रयमवर्द्धत ॥

पुन: प्राहार्णवादेव सहस्रकिरणात्मजम् ।
स मत्स्य: पाहि पाहीति त्वामहं शरणं गत: ॥
तत: स कूपे तं मत्स्यं प्राहिणोद्रविनन्दन: ।
यदा न माति तत्रापि कूपे मत्स्य: सरोवरे ॥
क्षिप्तोऽसौ पृथुतामागात् पुनर्योजनसम्मित: ।
तत्राप्याह पुनर्दीन: पाहि पाहि नृपोत्तमम् ॥
तत: स मनुना क्षिप्तो गङ्गायामप्यवर्द्धत ।
यदा तदा समुद्रे तं प्राक्षिपन्मेदिनीपति: ॥
यदा समुद्रमखिलं व्याप्यासौ समुपस्थित: ।
तदा प्राह मनुर्भीत: कोऽपि त्वमसुरेश्वर: ॥
अथवा वासुदेवस्त्वमन्य ईदृक् कथं भवेत् ।
योजनायुतविंशत्या कस्य तुल्यं भवेद्वपु: ॥
ज्ञातस्त्वं मत्स्यरूपेण मां खेदयसि केशव ।
हृषीकेश ! जगन्नाथ ! जगद्धाम ! नमोऽस्तु ते ॥
एवमुक्त: स भगवान् मत्स्यरूपी जनार्द्दन: ।
साधु साध्विति चोवाच सम्यक् ज्ञातस्त्वयानघ ।॥
अचिरेणैव कालेन मेदिनी मेदिनीपते ।
भविष्यति जले मग्ना सशैलवनकानना ॥
नौरियं सर्व्वदेवानां निकायेन विनिर्म्मिता ।
महाजीवनिकायस्य रक्षणार्थं महीपते ।॥
स्वेदाण्डजोद्भिज्जो ये वै ये च जीवा जरायुजा: ।
अस्यां निधाय सर्व्वांस्तानन्नाथान् पाहि
सुव्रत ।॥
युगान्तवाताभिहता यदा भवति नौ नृप ।
शृङ्गेऽस्मिन् मम राजेन्द्र ! तदेमां संयमिष्यसि ॥
ततो लयान्ते सर्व्वस्य स्थावरस्य चरस्य च ।
प्रजापतिस्त्वं भविता जगत: पृथिवीपते ।॥
एवं कृतयुगस्यादौ सर्व्वज्ञो धृतिमान् नृप: ।
मन्वन्तराधिपश्चैव देवपूज्यो भविष्यसि ॥”
इति मत्स्यपुराणे मनुविष्णुसंवादे प्रथमे सर्गे प्रथमोऽध्याय: ॥ विस्तारस्तु श्रीभागवत ८ स्कन्धे २४ अध्याये द्रष्टव्य: ॥*॥ तस्य मन्त्रध्यानपूजादि यथा,—

शङ्कर उवाच ।

“एक एवाभवन्मत्स्यावतार: कल्प आदिमे ।
तस्य मन्त्रं प्रवक्ष्यामि भुक्तिमुक्तिप्रदायकम् ॥
तारो नमो भगवते मं मत्स्याय रमां वदेत् ।
द्वादशाक्षरमन्त्रोऽयं मुनिर्ब्रह्मा समीरित: ॥
गायत्री छन्द उदितं देवता मीनविग्रह: ।
भगवान् शर्व्वरीनाथो बीजं श्रीपञ्चकीलकम् ॥
नाभ्यधो रोहितसम आकण्ठञ्च नराकृति: ।
घनश्यामश्चतुर्ब्बाहु: शङ्खचक्रगदाधर: ॥
शृङ्गीमत्स्यनिभो मूर्द्ध्ना लक्ष्मीवक्षोविराजित: ।
पद्मचिह्नितसर्व्वाङ्ग: सुन्दरश्चारुलोचन: ॥
जपेद्द्वादशसाहस्रं त्रिसन्ध्यासु जितेन्द्रिय:।
प्रत्यहं तद्दशांशेन वैशाखे कार्त्तिके तथा ।
माघे च मार्गशीर्षे च हविष्याशी जितेन्द्रिय: ॥
आरभ्य भाद्रशुक्लमष्टं वा षोडशाहकम् ।
लक्षमेकं जपेन्नित्यमिदञ्चापि कलाशनम् ॥
तथैव होम: कर्त्तव्यस्तथान्यद्दिवसेषु तु ।
तर्पयेद्द्वादशाशतं तिलतण्डुलचन्दनै: ॥
आज्येनाथ घृताद्यैश्च तर्पयेच्च तथा श्रियम् ।
रक्तोत्पलैर्वा पद्मैर्वा मालत्याद्यै: सुगन्धिभि: ।
एवं कृते वर्षमेकं मन्त्रसिद्धि: प्रजायते ॥
नित्यं द्वादशविप्रांश्च श्रीरूपाश्च सुवासिनीम् ।
भोजयेत् पूजनञ्चास्य चरणौ व्याशयेत् सदा ॥
षट्पत्रकर्णिकायाञ्च श्रीयुतं देवमर्च्चयेत ।
षट्पत्रेषु षडङ्गानि यजेद्वाह्यचतुर्द्दले ॥
मत्कूर्कं मकरं कूर्म्मं शिशुमारञ्च पूर्व्वत: ।
तद्वाह्येऽष्टदले पूज्या: तारादा: सप्त सिन्धव: ॥
तद्वाह्येऽष्टदले पूज्या वासुक्याद्या: फणीश्वरा: ।
तस्य वाह्ये शक्रदले रत्नानि तु चतुर्द्दश ॥
समुद्रजानि पूज्यानि लक्ष्मीकौस्तुभकानि च ।
गङ्गाद्या: षोड़श ततो महानद्य: प्रपूजयेत् ॥
ततश्चाष्टदले वेदानुपवेदसमन्विताम् ।
दिगीशांश्च तदस्त्राणि सावरणपूजनम् ।
एवं सिद्धमनुर्मन्त्री जायते सिद्धिभाजनम् ॥
एतद्दशशतं मन्त्रं जपेदष्टोत्तरं शतम् ।
तद्देवतादिने सिद्ध: पुस्तकादेव जायते ॥
अकुण्ठितप्रयोगेषु न पुनस्तस्य संस्कृति: ।
एतत्पञ्चविना मन्त्रा मम सिद्धाश्च पार्व्वति ।॥
एतत्संपुटिता: सर्व्वे वैदिका: सिद्धिदा: कलौ ।
अनेन ग्रथिता जप्ता: कलेश्च दत्तसिद्धिदा. ॥”

इति मेरुतन्त्रे २६ प्रकाश: ॥

मत्स्यकरण्डिका, स्त्री, (मत्स्यस्य करण्डिकेव) मत्स्यरक्षणपात्रम् । खालुइ इति भाषा । तत्पर्य्याय: । मत्स्यधानी २ कुवेणी ३ । इति जटाधर: ॥

मत्स्यगन्धा, स्त्री, (मत्स्यस्येव गन्धो यस्या: । छान्दसादित्वाभाव. ।) लाङ्गलीवृक्ष: । स च जलपिप्पली । इति जटाधर: राजनिर्घण्टश्च ॥ व्यासमाता ॥ (अस्या उत्पत्तिकथा यथा, एकदा चेदीश्वरो वसुराज: पितृगणनियोजितो म्रगयेच्छुर्वनं गत्वा स्वपत्नीं गिरिकां ऋतुस्नातां स्मरन् आस्ते । इत्यवसरे कामोद्दीपकवसन्तवायुना प्रेर्य्यमाणस्य तस्य रेत: प्रचस्कन्द । ततस्तद्वीर्य्यं सपत्रपुटे स्थापितवान् । एतत् मया न स्खलितमिति निश्चित्य अभिमन्त्र्य च तत् स्वपालित श्येनेन प्रियायै प्रेषयामास । तदादाय उड्डीयमानस्य अन्येन च श्येनेन सह विहायसि युध्यतस्तस्य पदात् भ्रष्टं कालिन्दीजले पपात वीर्य्यम् । अथ तद्दिन: ब्रह्मशापान्मत्स्यरूपिणी अद्रिका नाम्नी काचिदप्सरा भक्षितवती धीवरास्तु तां पूर्णगर्भां मत्स्यीं बबन्धु: ततस्तेतु तस्या उदरात् एकां स्त्रियमेकञ्च पुरुषमुज्जह्रु: । तयोस्तु पुरुषो मत्स्यो नाम राजा,सा कन्या च मत्स्यगन्धेति ख्यातासीत् ॥ हवुषा । तत्पर्य्यायो यथा,—

“तत्रान्ये प्रथमं फलं मत्स्यमहिषं विस्रगन्धं द्वितीय मत्स्यफलसदृशं मत्स्यगन्धं तयोर्नामानि ।
“हवुषा पुष्पवक्ता च परा स्वल्पफला मता ।
मत्स्यगन्धा प्रोहवली विपघ्नी ध्वाङ्क्षनाशिनी॥”
मत्स्याक्षी ॥ तत्पर्य्यायो यथा,—
“मत्स्याक्षी वाह्लिका मत्स्यगन्धा मत्स्यादनीति च ।”
जलपिप्पल्यर्थे पर्य्यायो यथा,—
“जलपिप्पल्यभिहिता शारदी शकुलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गल्यपि
कीर्त्तिता ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

मत्स्यघण्ट:, पु, (मत्स्यानां घण्ट: विमिश्रणं यत्र स: ।) स्वनामख्यातमत्स्यव्यञ्जनम् । तत्पर्य्याय: । गलग्रह: २ । इति शब्दचन्द्रिका ॥

मत्स्यजालं, क्ली, (मत्स्यधारणार्थं जालं शाकपार्थिववत् समास: ।) आनाय: । इति हेमचन्द्र: । ३ ।५६३ । माछधरा जाल इतिभाषा ॥

मत्स्यण्डिका, स्त्री, (मदं मधुररसं स्यन्दते इति । स्यन्द + ण्वुल् + टाप् । अत इत्वञ्च । पृषोदरादित्वात् साधु: । शर्कराविशेष: । मिछरि इति भाषा । यथा,—
“लसीकाफाणितगुडखण्डमत्स्यण्डिकासिता: ।
निर्म्मला लघवो ज्ञेया: शीतवीर्य्या यथोत्तरम् ।
यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा ॥”

इति राजवल्लभ: ॥

राव इति हिन्दीभाषा । तस्य लक्षणं यथा, –
“इक्षोरसो य: संपक्वो घन: किञ्चिद्द्रवान्वित: ।
मन्दं यत स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते ॥”
अस्य गुणा: ।
“मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा ।
मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता ॥”

इति भावप्रकाश: ॥

मत्स्यण्डी, स्त्री, खण्डविकार: । इत्यमर: ।२।९।४३॥ इक्षुविशेषस्य रसपाके खण्डयोग्ये सारभूत या गुडिकाकारा जायते सा मत्स्यण्डी । खण्डशालूकं मिछरि इति ख्याते तवात इति ख्यातापि मत्स्यण्डीति केचित् । मत्स्याण्डाकारत्वात् मत्स्यण्डी गौरादित्वाद्ङीष् तदादित्वादपि मत्स्यमर्तिति मत्स्यण्डी अत शाकन्धु: इत्यन्ये । मदं स्यन्दते मत्स्यण्डीति केचित् । इति भरत: ॥ (यथास्या लक्षणं गुणाश्च ॥ रावकाकव खण्डराव इति लोके ।
“इक्षो रसो य: सम्पक्वो घन: किञ्चिद्द्रवान्वित: ।
मन्दं यत स्यन्दते यस्मात्तन्मत्स्यण्डी निगद्यते ॥
मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिला-
पहा ।
मधुरा बृंहणी वृष्या रक्तदोषपहा स्मृता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

मत्स्यधानी, स्त्री, (मत्स्या धीयन्ते । यत्रेति मत्स्य + धाञ् + ल्युट् ङीप् ।) मत्स्यरक्षार्थपात्रम् । खारयी इति खालुइ इति च भाषा । तत्पर्य्याय: । कुवेणी २ । इत्यमर: । १ । १० । १६ ॥ मत्स्यकरण्डिका३ खारयिका४ मत्स्यबन्धनी ५ कुवणि: ६ कुवेणा ७ कुपिनी८ कुपिनि: ९ । इतिभरत: ॥ सा स्वल्पा चेत् कुपिनी भवेत् इति शब्दरत्नावली ॥

मत्स्यनाशकः, पुं, (नाशयतीति नश् + णिच् + ण्वुल् । मत्स्यानां नाशकः । सदैव मत्स्यभक्षकत्वादस्य तथात्वम् ।) कुररपक्षी । इति भूरिप्रयोगः ॥ मत्स्यनाशककर्त्तरि त्रि ॥

मत्स्यनाशनः, पुं, (नाशयतीति नश + णिच् ल्युः । मत्स्यस्य नाशनः ।) कुररपक्षी । इति हेमचन्द्रः । ४ । ४०१ ॥

मत्स्यपित्ता, स्त्री, (कटुरोहिणी । इत्यमरः । २ । ४ । ८६ ॥ (तथा चास्याः पर्य्यायाः ।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मत्स्यबन्धी, [न्] पुं, (मत्स्यान् बन्धुं धर्त्तुं शीलमस्य । मत्स्य + बन्ध + इनिः ।) धीवरः । यथा,
"कैवर्त्तो धीवरो दाशो मत्स्यबन्धी च जालिकः ॥"
इति हलायुधः ॥"
("अथान्येद्युर्ऋक्षैर्यमकिङ्कराभैर्मत्स्यबन्धिभिः
प्रभात आगत्य जालैश्चक्रादितो ह्रदः ।"
इति पञ्चतन्त्रे । ५ । २८ ।)

मत्स्यबन्धिनी, स्त्री, (मत्स्यबन्धिन् + स्त्रियां ङीप् ।) मत्स्यधानी । इति हलायुधः ॥

मत्स्यरङ्कः, पुं, (मत्स्यरङ्ग । पृषोदरादित्वात् साधुः ।) मत्स्यरङ्गपक्षी । इति भूरिप्रयोगः ॥

मत्स्यरङ्गः, पु, (मत्स्यान् रङ्गति भक्षणार्थं तत्समीपं गच्छतीति । मत्स्य + रगि + अच् ।) पक्षिविशेषः । माछराङ्गा इति भाषा । (यथा,
"त्रिभुवनविदितो हा मत्स्यरङ्गे कलङ्कः ॥"
इत्युद्भटः ॥)
तत्पर्य्यायः । झम्पाशी २ जलमद्गुः ३ मत्स्यचकः ४ । इति हारावली ॥ मत्स्याशनः ५ मीनरङ्कः ६ मत्स्यरङ्कः ७ सुचित्रकः ८ । इति शब्दरत्नावली ॥

मत्स्यराजः, पुं, (मत्स्येषु राजा श्रेष्ठः समासान्तष्टच् ।) रोहितमत्स्यः । इति त्रिकाण्डशेषः ॥ विराटराजः ।
("तस्य तद्वचनं श्रुत्वा मत्स्यराजः प्रतापवान् ।"
इति महाभारते । ४ । ६८ । २१ ।)

मत्स्यविन्ना, स्त्री, कटुका । इति वैद्यकम् ॥

मत्स्यवेधनं, क्ली, (मत्स्योविध्यतेऽनेनेति मत्स्य + विध + करणे ल्युट् । मत्स्यानां वेधनमिति वा ।) वडिशम् । इत्यमरः । १ । १० । १६ ॥

मत्स्यवेधनी, स्त्री, (मत्स्यवेधन + ङीप् ।) मद्गुपक्षी । इति जटाधरः ॥ वडिशम् । इति शब्दरत्नावली ॥

मत्स्यसन्तानिकः, पु, (मत्स्यानां सन्तानिकात्र ।) मत्स्यव्यञ्जनविशेषः । यथा,—
"दग्धेऽङ्गारे सलवणो वेशवारेरुपस्कृतः ।
साम्लकः कटुतैलेन मत्स्यसन्तानिको भवेत् ॥"
इति शब्दचन्द्रिका ॥

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षीणीव अक्षीणि पुष्परूपाणि चक्षूंषि यस्याः । मत्स्याक्षि +
"बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" ५ । ४ । ११३ । इति षच् ङीष् च ।) ब्राह्मी । इत्यमरः । २ । ४ । १३७ ॥ सा च सोमलतायाम् । ब्राह्मीशाके इति केचित् । इति भरतः ॥ यथा,
"ब्राह्मी वयस्था मत्स्याक्षी मीनाक्षी सोमवल्लरी ।
मत्स्याक्षी शिशिरा वश्या शकदोषक्षयापहा ॥"
इति राजनिर्घण्टः ॥
गण्डदूर्व्वा । इति राजनिर्घण्टः ॥
हिलमोचिका । ब्राह्मीशाकः । इति रत्नमाला ॥
(गण्डदूर्व्वार्थे पर्य्यायो यथा,—
"गण्डदूर्व्वा तु गण्डाली मत्स्याक्षी शकुलाक्षकः ॥"
मत्स्यादनी ॥ तत्पर्य्यायो गुणाश्च यथा । मछेछी छकमछरी आइनिच । इति लोके ।
"मत्स्याक्षी वाह्लिका मत्स्यगन्धा मत्स्यादनीति च ।
मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित् ॥
लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मत्स्याङ्गी, स्त्री, (मत्स्यानां अङ्गमिवाङ्गं यस्याः ।) हिलमोचिका । इति त्रिकाण्डशेषः ॥

मत्स्यादनी, स्त्री, (मत्स्यैरद्यते इति मत्स्य + अद + ल्युट् गौरादित्वात् ङीष् ।) जलपिप्पली । इति राजनिर्घण्टः ॥ (तथा च पर्य्यायः ॥
"जलपिप्पल्यभिहिता शारदी शकलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता ॥"
मत्स्याक्षी । मछेछी इति लोके ॥ तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"मत्स्याक्षी वाह्लिकामत्स्यगन्धा मत्स्याद-नीति च ।")

मत्स्याशनः, पुं, (मत्स्यानश्नातीति मत्स्य + अश + ल्युः ।) मत्स्यरङ्गपक्षी । इति त्रिकाण्डशेषः ॥ मत्स्यभक्षके त्रि ॥

मत्स्यी, स्त्री, (मत्स्य + जातौ ङीष् ।) स्त्रीमत्स्यजातिः । इति मुग्धबोधव्याकरणम् ॥

मत्स्योदरी, स्त्री, (मत्स्यस्य उदरं उत्पत्तिस्थानं यस्याः । मत्स्यगर्भे जातत्वादस्यास्तथात्वम् ।) सत्यवती सा च व्यासमाता । इति जटाधरः ॥
(यथा देवीभागवते । २ । १ । ३८ ।
"कालिका वसुना दत्ता तरसा जालजीविने ।
नाम्ना कालीति विख्याता तथा मत्स्योदरीति च ॥")
(मत्स्या उदरे गर्भे यस्याः ।) काशीस्थतीर्थविशेषः ॥ यथा,—
"कैलासाद्रिं समायाताः सप्तकोटिमिताः प्रभो ! ।
दुर्गाणि तैः कृतानीह सप्तस्वर्गसमानि च ॥
सद्वाराणि सयन्त्राणि कवाटविकटानि च ।
कोटिकोटिभटाढ्यानि सर्व्वहेतिसहितान्यपि ॥
ततः शैलं महादुर्गं तैः काशीपरितः कृतम् ।
परिखा निर्म्मितास्तिस्त्रो मत्स्योदर्य्या जलाविलाः ॥
मत्स्योदरी द्विधा जाता बहिरन्तश्चरा पुनः ।
तस्य तीर्थं महत् ख्यातं मिलितं गाङ्गवारिणि ॥
यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह
तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात् ॥
सूर्य्याचन्द्रमसोः पर्व्व तदा कोटिगुणं शतम् ।
सर्व्वपर्व्वाणि तत्रैव सर्व्वतीर्थानि तत्र वै ।
तत्रैव सर्व्वलिङ्गानि गङ्गा मत्स्योदरी यतः ॥
मत्स्योदर्य्यास्च ये स्नाता यत्र कुत्रापि मानवाः ।
कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः ॥
अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात् ।
परितः स्वर्द्धुनीवारि संसारे परिवीक्षते ॥
मत्स्योदर्य्यां कृतस्नाना ये नरास्ते नरोत्तमाः ।
कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् ॥
किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः ।
यदि मत्स्योदरीं स्नाताः कुतो गर्भभयं ततः ॥
यत्र यत्र हि लिङ्गानि वृद्देवर्षिकृतान्यपि ।
तत्र मत्स्योदरीं प्राप्य सुस्नातो मोक्षभाजनम् ॥
सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि ।
न समानि परं तानि कोट्यंशेनापि निश्चितम् ॥
इत्थं तीर्थं कृतं तेन विभो । कैलासवासिना ।
गणाधिपेन सुमहत् सुमहोदरकर्म्मणा ॥"
इति काशीखण्डे ६८ अध्यायः ॥

मथ इ कुन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-वधे-सकं०-क्लेशे अक०-सेट् ।) इ मन्थति । कुन्थो वधक्लेशौ । इति दुर्गादासः ॥

मथ ज ए गात्रे । इति कविकल्पद्रुमः ॥ भ्वा०-पर०सक०-सेट् ।) ज मत्थः मथः । ए अमथीत् । इति दुर्गादासः ॥

मथन, क्ली, (मथ्यते इति मथ + भावे ल्युट् ।) विलोडनम् । मन्थया इति भाषा । यथा,—
"क्वाहं मन्दमतिः क्वेदं मथनं क्षीरवारिधेः ।
किं तत्र परमाणुर्वै यत्र मज्जति मन्दरः ॥"
इति भागवते । १।१।१ । टीकायां श्रीधरस्वामी ॥
अस्त्र विशेषः । यथा, हरिवंशे । २३६।१० ।
"ऐषीकमस्त्रमैन्द्रञ्च आग्नेयं शैशिरं तथा ।
वायव्यं मथनं नाम कापालमथ किङ्करम् ॥")

मथनः, पु, (मथ्नाति रोगानिति मथ + कर्त्तरि ल्युः ।) गणिकारिकावृक्षः । इति रत्नमाला ॥ (मथनकारके, त्रि । केशिमथनसुखमथन्यादिदर्शनात् ।)

मथितं, क्ली, (मथ + क्तः ।) निर्जलघोलम् । इत्यमरः । २।९।५३ ॥ यथा, उत्तरहितायाम् । ५० । २६ ।
"क्षारे कदल्यामथितेन युक्ते
दिनोषिते पायितमायसं यत् ॥")
अस्य गुणाः । कफपित्तनाशकत्वम् । रोचनत्वम् । धातुपुष्टिदत्वञ्च । इति राजवल्लभः ॥ विलोडिते, त्रि ॥ (तथा च पर्य्यायान्तरं प्रकारान्तरञ्च यथा,—
"घोलन्तु मथितं तक्रमुदश्विच्छच्छिकापि च ।

ससरं निर्ज्जलं घोलं मथितन्त्वसरोदकम् ॥
तक्रं पादजलं प्रोक्तमुदाश्विच्चार्द्धवारिकम् ।
छच्छिका सारहीना स्यात् स्वच्छा प्रचुर-,
वारिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
"ससरं निर्जलं घोलं मथितं सरवर्ज्जितम् ।"
इति च हारीते प्रथमस्थाने अष्टमेऽध्याये ॥)
मथुरा, स्त्री, (मथ्यते पापराशिर्यया इति । मथ+
"मन्दिवाशीत्यादि ।" उणा० । १ । ३६ ।
इति उरच् ।) स्वनामख्यातपुरी । अधुना
आगरा इति ख्यातस्याग्रवणस्य नगरम् ।
(यथा, रघौ । ६ । ४८ ।
"यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति ॥")
तत्पर्य्यायः । मधुपघ्नम् २ । इति त्रिकाण्डशेषः ॥
मधुपुरी ३ मधुरा ४ । इति शब्दरत्नावली ॥
सा च मोक्षदायकतीर्थम् । यथा,—
"अयोध्या मथुरा माया काशी काञ्ची अव-
न्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
अयोध्या रामनगरी मथुरा कृष्णपालिता ।
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ॥
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी ।
मथुरा केशवोत्कृष्टसुदर्शनविधारिता ॥"
इत्यादिभूतशुद्धितन्त्रम् ॥ * ॥
तत्र विष्णुदर्शनमाहात्म्यं यथा,
"ज्यैष्ठामूलशुक्लद्वादश्यां स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम । ।
ज्यैष्ठामूलामले पक्षे द्वादश्यामुपवासकृत ॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः ।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम् ॥
कश्चिदस्मत्कुले जातः कालिन्दीसलिलाप्लुतः ।
अर्च्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥
ज्यैष्ठामूलसिते पक्षे येनैव वयमप्युत ।
परामृद्धिमवाप्स्यामस्तारिताः स्वकुलोद्भवैः ॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः ॥ * ॥
तस्या माहात्म्यं यथा,—
वराह उवाच ।
"न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समत्वं मथुराया हि प्रियं मम वसुन्धरे ! ॥"
सूत उवाच ।
"तच्छ्रुत्वा वचनं तस्य प्रणम्य शिरसा तदा ।
पुण्यानां परमं पुण्य पृथ्वी वचनमब्रवीत् ॥
पृथिव्युवाच ।
पुष्करं नैमिषं चैव पुरी वाराणसी तथा ।
एता हित्वा महाभाग । मथुरां किं प्रशंससि ॥
वराह उवाच ।
शृणु कार्त्स्न्येन वसुधे । कथ्यमानं मयानघे । ।
मथुरेति च विख्यातं नास्ति क्षेत्रं परं मम ।
सा रम्या च सुशस्ता च जन्मभूमिः प्रिया मम ॥
शृणु देवि ! यथा स्तौमि मथुरां पापहारि-
णीम् ।
तन्निवासी नरो याति मोक्षं नास्त्यत्र संशयः ॥
महामाध्यां प्रयागे तु यत् फलं लभते नरः ।
तत् फलं लभते देवि । मथुरायां दिने दिने ॥
कार्त्तिक्याञ्चैव यत् पुण्यं पुष्करे तु वसुन्धरे । ।
तत् फलं लभते देवि । मथुरायां दिने दिने ॥
पूर्णे वर्षसहस्रे तु वाराणस्यान्तु यत् फलम् ।
तत् फलं लभते देवि । मथुरायां क्षणेन हि ॥
मथुराञ्च परित्यज्य योऽन्यत्र कुरुते रतिम् ।
मूढो भ्रमति संसारे मोहितो मायया मम ॥
यः शृणोति वरारोहे । माथुरं मम मङ्गलम् ।
अन्येनोच्चारितं शंसन् सोऽपि पापैः प्रमुच्यते ॥
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
मथुरायां गमिष्यन्ति सुप्ते चैव जनार्द्दने ॥
मथुरां समनुप्राप्य श्राद्धं कृत्वा यथाविधि ।
तृप्तिं यान्तीह पितरो यावत् स्थित्यन्तजन्मनः ॥
ये वसन्ति महाभागे । मथुरामितरं जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥
कुजाम्रके शौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मुच्यते नात्र संशयः ॥
मथुरायां महापुण्यां ये वसन्ति शुचिव्रताः ।
बलिभिक्षाप्रदातारो ये वा ते नरविग्रहाः ॥
भविष्यामि वरारोहे । द्वापरे युगसंस्थिते ।
ययातिभूपर्यवंशाच्च क्षत्रियः कुलवर्द्धनः ॥
भविष्यामि वरारोहे । मथुरायां न संशयः ।
मूर्त्तिं चतुर्व्विधां कृत्वा स्थास्यामि ऋषिभिः
स्तुतः ॥
स्थास्यामि वत्सरशतं युद्धेषु कृतनिश्चयः ।
एका चन्दनसङ्काशा द्वितीया कनकप्रभा ॥
अशोकसदृशा चान्या अन्या चोत्पलसन्निभा ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ॥
पुण्यानि च पवित्राणि संसारोच्छेदनानि च ।
यत्राहं घातयिष्यामि द्वात्रिंशति वसुन्धरे । ॥
दैत्यान् घोरान् महाभागे ! कंसादीन् घोर-
दर्शनान् ।
यमुना यत्र सुवहा नित्यं सन्निहिता ध्रुवम् ॥
वैवस्वतस्वसा रम्या यमुना यत्र विश्रुता ।
तां नदीं यमुनां गङ्गां प्रयागे सङ्गविश्रुताम् ॥
गङ्गाशतगुणा पुण्या मथुरे मम मण्डले ।
यमुना विश्रुता देवि । नात्र कार्य्या विचारणा ॥
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे । ।
येषु स्नानपरो देवि । मम लोके महीयते ॥
अत्रान्न मुच्यते प्राणान् मम कर्म्मपरायणः ।
न जायते स मर्त्त्येषु जायते च चतुर्भुजः ॥
अविमुक्ते नरः स्नातो मुक्तिं प्राप्नोत्यसंशयम् ।
तथात्र मुच्यते प्राणान्मम लोकं स गच्छति ।
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
सर्व्वतीर्थेषु यत् स्नानं सर्व्वतीर्थेषु यत् फलम् ।
तत् फलं लभते देवि ! दृष्ट्वा देवं गतश्रमम् ॥
न च यज्ञैर्न तपसा न ध्यानैर्न च संयमैः ।
तत् फलं लभते देवि ! स्नातो विश्रान्तिसंज्ञके ॥
कालत्रयन्तु वसुधे ! यः पश्यति गतश्रमम् ।
कृत्वा प्रदक्षिणी दे तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत् परं गुह्यं सर्व्वसंसारमोक्षणम् ।
यस्मिन् स्नातो नरो देवि । मम लोके महीयते ॥
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
तस्मिन् स्नातो नरो देवि । अग्निष्टोमफलं लभेत् ॥
इन्द्रलोकं समासाद्य नरो वै तत्र मोदते ।
अथात्र मुच्यते प्राणान् मम लोकं स गच्छति ॥
तथा कनखलं तीर्थं नाम गुह्यं परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥
अस्ति क्षेत्रं परं गुह्यं तिन्दुकं नाम नामतः ।
तस्मिन् स्नातो नरो देवि । मम लोके महीयते ॥
अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे । ।
पाञ्चालविषये देवि । काम्पिल्यञ्च पुरोत्तमम् ॥
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ।
तस्मिंस्तु वसते देवि । तिन्दुको नाम नामतः ॥
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बः क्षयमागतः ॥
क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीडितः ।
सर्व्वसङ्गपरित्यागी यो गच्छन् मथुरापुरीम् ।
ब्राह्मणावसथे सोऽपि वसमानो वसुन्धरे । ॥
तत्र कर्म्मशतं कृत्वा स्नात्वैव यमुनां नदीम् ।
तत्र दानञ्च कुरुत नित्यकालं दृढव्रतः ॥
ततः कालेन महता पञ्चत्वं समुपागतः ।
तस्य तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तमः ॥
तस्मिन् वरगृहे देवि । ब्राह्मणो योगिनां वरः ।
जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे । ॥
तस्य तीर्थप्रभावेण प्राप्ता मुक्तिः सुदुर्लभा ॥
ततः परं सूर्य्यतीर्थं सर्व्वपापप्रमोचनम् ।
वैरोचनेन बलिना सूर्य्यस्त्वाराधितः पुरा ॥
भ्रष्टराज्येन बलिना धनकामेन वै पुरा ।
ऊर्द्ध्वबाहुर्निराहारस्तप्तवानुत्तमं तपः ॥
साग्रं संवत्सरं देवि । ततः काममवाप्नुयात् ।
तस्य प्रसन्नो भगवान् द्युमणिः प्रत्यभाषत ॥
किं कार्य्यं वत्से । ब्रूहि तपस्यसि महत्तपः ॥"
बलिरुवाच ।
"भ्रष्टराज्योऽस्मि देवेश । पाताले निवसाम्यहम् ।
वित्तेनापि विहीनस्य कुटुम्बभरणं कुतः ॥
मुकुटात्तस्य वै सूर्य्यो ददौ चिन्तामणिं ततः ।
चिन्तामणिं समासाद्य पातालमगमत्तदा ॥
तस्मिंस्तीर्थे नरः स्नात्वा सर्व्वपापैः प्रमुच्यते ।
तत्रापि मुच्यते प्राणान् मम लोकं स गच्छति ॥
आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः ।
तस्मिन् स्नातो नरो देवि । राजसूयफलं लभेत् ॥
यत्र ध्रुवेण सन्तप्तं इच्छया परमं तपः ।
अत्र वै स्नानमात्रेण ध्रुवलोके महीयते ॥
तत्रापि मुच्यते प्राणान् मम लोके महीयते ॥
ध्रुवतीर्थे च वसुधे यः श्राद्धं कुरुते नरः ।
पितॄन् सन्तारयेत् सर्व्वान् पितृपक्षे विशेषतः ॥
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्त्तितम् ।

तस्मिन् स्नातो नरो देवि ! मम लोके महीयते
तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥
तद्दक्षिणे महादेवि ! ऋषितीर्थं परं मम ।
तत्र स्नातो नरो देवि ! ऋषिलोकं प्रपद्यते ॥
अथात्र मुञ्चते प्राणान्मम लोके महीयते ।
दक्षिणे ऋषितीर्थस्य मोक्षतीर्थं परं मम ॥
स्नानमात्रेण वसुधे ! मोक्षं प्राप्नोति मानवः ।
तत्राथ मुञ्चते प्राणान् मम लोके महीयते ॥
तत्रैव कोटितीर्थं हि तीर्थानामपि दुर्लभम् ।
तत्र स्नानेन दानेन मम लोके महीयते ॥
कोटितीर्थे नरः स्नातः सन्तर्प्य पितृदेवताः ।
तारिताः पितरस्तेन तथैव प्रपितामहाः ॥
कोटितीर्थे नरः स्नातो ब्रह्मलोके महीयते ।
तत्रैव वायुतीर्थन्तु पितॄणामपि दुर्लभम् ॥
पिण्डं दद्यात्तु वसुधे ! पितृलोकं स गच्छति ।
गयापिण्डप्रदानेन यत् फलं लभते नरः ॥
तत् फलं लभते देवि ! ज्यैष्ठे दानान्न संशयः ।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च ॥
स्नानं दानं जपो होमः सहस्रगुणितं भवेत् ।
एषां स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते ॥
श्रुत्वा तीर्थस्य माहात्म्यं सर्व्वान् कामानवा-
प्नुयात् ॥”

इत्यादि वराहपुराणे मथुरातीर्थप्रभावः ॥ * ॥
इतः प्रभृति सप्तविंशाध्यायेषु मथुरामाहात्म्यं
ज्ञेयम् ॥

मथुरेशः, पुं, (मथुराया ईशः ।) श्रीकृष्णः । इति
शब्दरत्नावली ॥

मथुरा, स्त्री, (मथ् + बाहुलकात् उरः टाप् ।)
मथुरा । इति द्विरूपकोषः ॥

मद, इ ङ स्वप्ने । जाड्ये । मदे । मोदे । स्तुतौ ।
गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-
स्वप्ने जाड्ये मद मोदे अक०-स्तुतौ गतौ च
सक०-सेट् ।) मन्द्यते । ङ मन्दते जनः स्वपिति
जडो भवति माद्यति मोदते स्तौति गच्छति
वा इत्यर्थः । इति दुर्गादासः ॥

मद, ई भ य इर् ञि हर्षे । इति कविकल्पद्रुमः ॥
दिवा०-पर०-अक० सेट् ।) ई ञि मत्तोऽस्ति ।
भ य माद्यति । इर् अमदत् अमादीत् ।
अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति
दुर्गादासः ॥

मद, क ङ तृप्तियोगे । इति कविकल्पद्रुमः ॥
(चुरा०-आत्म०-सक०-सेट् ।) क ङ मनो माद-
यते यस्य शास्त्राभ्यासरसायनात् । इति दुर्गा-
दासः ॥

मद म गर्व्वे । क्लेपने । इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-अक०-सेट् ।) गर्व्वोऽहङ्कारः ।
क्लेपनं दैन्यम् । म मदयति नीचं सम्पत्तिः ।
मदयति शत्रुं शूरः । इति दुर्गादासः ॥

मदः, पुं, (मदयतीति । मद् + अच् ।) हस्ति-
गण्डजलम् । (यथा, भारवौ । २ । १८ ।
“मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्त्तयते स्वयं हतैः ।”)

तत्पर्य्यायः । दानम् २ ॥ (मद्यते इति । मद् +
“मदोऽनुपसर्गे ।” ३ । ३ । ६७ । इति अप् ।)
हर्षः । (यथा, ऋग्वेदे । १ । ४ । २ ।
“उप नः सवनागहि सोमपाः पिब गोदा इद्रेवतो
मदः ॥” “मदो हर्षः ।” इति तद्भाष्ये सायनः ।)
तत्पर्य्यायः । आमोदः २ । इत्यमरः । ३ ।
२ । १७ ।) रेतः । कस्तूरी । (पर्य्यायो यथा,—
“मृगनाभिर्मृगमदो मदः कस्तूरिकाण्डजः ॥”
इति वैद्यकरत्नमालायाम् ॥
रोगविशेषः । उन्मादस्य प्रथमावस्थायां यथा,
“स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च ।”
इति माधवकृतरुग्विनिश्चये उन्मादाधिकारे ॥
विशेषोऽस्य यथा —
यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः ॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः ।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा ॥
मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः ।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु ॥
दुर्ब्बलश्चेतसः स्थानं यदा वायुः प्रपद्यते ।
मनो विक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा ॥
पित्तमेव कफश्चैव मनो विक्षोभयन् नृणाम् ।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते ॥
सप्रानल्पद्रुताभाषचलस्खलितचेष्टितम् ।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिम् ॥
सक्रोधपरुषाभाषं संप्रहारकलिप्रियम् ।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताकृतिम् ॥
स्वल्पसम्बन्धवचनं तन्द्रालस्यसमन्वितम् ।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परम् ॥
सर्व्वाण्येतानि रूपाणि सन्निपातकृते मदे ।
जायन्ते शाम्यति त्वाशु मदो मद्यमदाकृतिः ॥
यश्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः ।
सर्व्व एते मदास्तर्त्ते वातपित्तकफाश्रयात् ॥”
इति चरके सूत्रस्थाने चतुर्व्विंशोऽध्याये ॥)
गर्व्वः । इति मेदिनी । दे, १२ ॥ (यथा,
भारवौ । २ । ४८ ।
“मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढ़ता ॥”)
मद्यम् । क्षैव्यम् । मत्ततेति यावत् । इति हेम-
चन्द्रः । २ । ७७६ ॥ (यथा, मनौ । ७ । ४७ ।
“मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।”
“तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥”)
नदः । कल्याणवस्तु । इति धरणिः ॥ * ॥
मदलक्षणं यथा,—
“अहं महात्मा धनवान् मत्तुल्यः कोऽस्ति भूतले ।
इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः ॥”
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥
तस्य उत्पत्तिर्यथा ।
“बुद्धेर्मोहः समभवदहङ्काराद्भून्मदः ।”
इति मात्स्ये ३ अध्यायः ॥
(दानवभेदः । यथा, हरिवंशे । ३ । ८६ ।
“असिलोमा सुकेशी च शठश्च बलको मदः ॥”

मदकटः, पुं, (मदं कटति प्रकटयतीति । कट +
अच् ।) षण्डः । षाँड़् इति भाषा ॥ यथा,
“इड्चरो इट्वरो गोपतिः षण्ढो वृषो मदकटो
हलः । इति हेमचन्द्रः । ४ । ३०५ ॥

मदकलः, पुं, (मदेन कलोऽव्यक्तमधुरध्वनिर्यस्य ।)
मत्तहस्ती । तत्पर्य्यायः । मदोत्कटः २ । इत्य-
मरः । २ । ८ । ३५ ॥ अव्यक्तप्रलापी । इति
शब्दरत्नावली ॥ मदाव्यक्तवाणिनि त्रि । इति
मेदिनी । ले, १५६ ॥ (यथा, उत्तरचरिते २ अङ्के ।
“मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि ।”)

मदगन्धः, पुं, (मदस्य दानस्येव गन्धोऽस्य ।)
सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य
सप्तच्छदशब्दे ज्ञेयम् ।)

मदगन्धा, स्त्री, (मदः मादनः गन्धोऽस्याः ।)
मदिरा । अतसी । इति राजनिर्घण्टः ॥

मदघ्नी, स्त्री, (मदं मत्ततां हन्तीति । मद् + हन्
टक् ङीप् ।) पूतिका । इति जटाधरः ॥

मदनः, पुं, (मदयतीति । मद् + णिच् ल्युः ।)
कामदेवः । इत्यमरः । १ । १ । २६ ॥
तस्य नाम्नां व्युत्पत्तिर्यथा । ऋषय ऊचुः ।
“यस्मात् प्रमथ्य चेतस्त्वं जातोऽस्माकं तथा विधेः ।
तस्मान्मन्मथनाम्ना त्वं लोके गेयो भविष्यसि ॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते ।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव ! ॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः ।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि ॥”
इति कालिकापुराणे २ अध्याय. ॥
ब्रह्मणस्तस्योत्पत्तिर्यथा,—
“प्रहृष्टमानसः पुत्रं कन्यकाञ्च ससर्ज्ज ह ।
हृष्टस्य कामिनः पुत्रः कामदेवो बभूव ह ॥
कन्या षोड़शवर्षीया रत्नभूषणभूषिता ॥
उवाच पुत्रं स विधिः सुदीप्तं पुरतः स्थितम् ।
दुर्न्निवार्य्यं मत्कलांशं स्वात्मारामं मनोहरम् ॥
ब्रह्मोवाच ।
स्त्रीपुंसोः क्रीड़नार्थाय सुदा त्वञ्च विनिर्म्मितः ।
हृदि योगेन सर्व्वेषामधिष्ठानं करिष्यसि ॥
सम्मोहनं समुद्वेगबीजं स्तम्भनकारणम् ।
उन्मत्तबीजं ज्वलनं शश्वचेतनहारकम् ॥
प्रगृह्णैताञ्छया दत्तान् सर्व्वान् सम्मोहनं कुरु ।
दुर्निवार्य्यो मम वराञ्च वत्स ! भवेषु च ॥
बाणान्स्त्रैवसुक्रा च प्रहृष्टश्च जगद्विधिः ।
दृष्ट्वा वाचं दुहितरं वरं दातुं समुद्यतः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः ॥
(योगाचार्य्यरूपः शिवस्यावतारविशेषः ।
यथा, शिवपुराणे वायुसंहितायाम् । २ । १० ।
१—२ ।
श्रीकृष्ण उवाच ।
“युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु ।
अवताराणि सर्व्वस्य शिवस्याथ भगवन् । वद ॥”
उपमन्युरुवाच ।
“श्वेतः सुतारो मदनः सुहोत्रः कंक एव च ॥”
महादेवः । मदयति भक्तानां मनः इति

मद+ल्युः। मनसि आनन्दजनकत्वादस्य तथात्वम्। यथा, महाभारते। १३।१७।६८।
"उन्मादो मदनः कामो ध्यानग्रहोऽर्थकरो यशः॥"
मत्तता। वरारोहाणां कामिनीनां भावविशेषः इति यावत्। यथा, महाभारते। १। ४६।१३।
"सीधुपानेन चाप्येन तुतोष मदनेन च।
विलासनैश्च विविधैः प्रेक्षणीयतराभवत्॥")
वसन्तः। धुस्तूरः। सिक्थकम्। इति मेदिनी। ने।१०३॥ वृक्षभेदः। मयना इति भाषा। तत्पर्य्यायः। पिण्डुकः२ सुपुकुन्दः३ कण्टकी४। इति रत्नमाला॥ पिण्डीतकः ५। (तथाचास्य पर्य्यायान्तरं गुणाश्च।
"मदनः छर्द्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः॥"
धुस्तूरार्थे पर्य्यायो यथा,—
"धत्तूरधूर्त्तधुस्तूरा उन्मत्तः कनकाह्वयः।
देवता कितवस्तूरी महामोहः शिवप्रियः॥
मातुलो मदनश्चास्य फले मातुलपुत्त्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मरुवकः६ श्वसनः ७ करहाटकः ८ शल्यः ९। इत्यमरः। २।४।५२—५३॥ भ्रमरः। इति जटाधरः॥ माघः। इति हेमचन्द्रः॥ खदिरवृक्षः। इति शब्दचन्द्रिका॥ मङ्कोठवृक्षः। वकुलवृक्षः। वृक्षविशेषः। मयनाफल इति भाषा। तत्पर्य्यायः। शल्यकः २ कैटर्य्यः ३ पिण्डः ४ धाराफलः ५ नगरः ६ करहाटः ७ पिण्डीतकः ८ श्वसनः ९ मरुवकः १०। अस्य गुणाः। वमिकारकत्वम्। तिक्तत्वम्। उष्णवीर्य्यत्वम्। लेखनत्वम्। लघुत्वम्। रूक्षत्वम्। कुष्ठकफानाहशोफगुल्मव्रणापहत्वञ्च। इति राजनिर्घण्टः॥ आलिङ्गनविशेषः। तल्लक्षणम्। नायको नायिकायाः कण्ठे हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्यदेशे दत्त्वा यदाश्लिषति। इति कामशास्त्रम्॥ ("अथ मयनम्।" मम् इति भाषा।
"मयनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम्।
मध्वाधारो मदनकं मधूषितमपि स्मृतम्॥
मदनं मृदुसुस्निग्धं भूतघ्नं व्रणरोपणम्।
भग्नसन्धानकृद्वातकुष्ठवीसर्परक्तजित्॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
मण्डलिसर्पान्तर्गतसर्पविशेषः॥ "शिशुको मदनः पालिहिरः इत्यादि।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये॥)

मदनकः, पुं, (मदयतीति मद+णिच्+ल्युः स्वार्थे कः।) दमनकवृक्षः। इति रत्नमाला॥ (सिक्थकार्थे क्ली। तत्पर्य्यायो यथा,—
"मयनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम्।
मध्वाधारो मदनकं मधूषितमपि स्मृतम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मदनकाकुरवः, पु, (मदनेन हेतुना काकुः कामजन्यो विकृतो रवः अस्फुटध्वनिर्यस्य।) पारावतः। इति राजनिर्घण्टः॥

मदनगोपालः पुं, (मदनश्चासौ गोपालश्चेति। भक्तचित्तोन्मादकारित्वादस्य तथात्वम्।) श्रीकृष्णः। यथा,—
"वन्दे मदनगोपालं कैशोराकारमद्भुतम्।"
इति पाद्मे पातालखण्डे ९ अध्यायः॥

मदनचतुर्द्दशी, स्त्री, (मदनोत्सवात्मिका चतुर्द्दशी।) चैत्रशुक्लचतुर्द्दशी। यथा। अथ मदनचतुर्द्दशी तत्र मदनस्य पूजा कार्य्या। स्कन्दपुराणसौरागमयोः।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्द्दशी।
प्रोक्ता मदनभञ्जीति सिद्धिदा तु महोत्सवे॥
पूजयिष्यन्ति ये मर्त्त्यास्तदङ्गभवपल्लवैः।
ते यान्ति परमं स्थानं मदनस्य प्रभावतः॥
चैत्रे मासि चतुर्द्दश्यां मदनस्य महोत्सवः।
जुगुप्सितोक्तिभिस्तत्र गीतवाद्यादिभिर्नृणाम्।
भगवांस्तुष्यते कामः पुत्त्रपौत्त्रसमृद्धिदः॥
वलिं प्रति भगवद्वाक्यम्।
न मानयन्ति ये पर्व्व मादनं मानवाधमाः।
तेषां पुण्यं फलं दत्तं मया त चैत्रमासिकम्॥
देवलः।
चैत्रशुक्लचतुर्द्दश्यां यः स्नायाच्छिवसन्निधौ।
पिशाचत्वं न तस्य स्यात् गङ्गायाश्च विशेषतः॥"
इति तिथितत्त्वम्॥

मदनत्रयोदशी, स्त्री, (मदनपूजार्था त्रयोदशी।) चैत्रशुक्लत्रयोदशी। तत्र मदनस्य व्रतं कर्त्तव्यम्। यथा भविष्ये।
"चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकम्।
कृत्वा संपूज्य विधिवद्वीजयेद्व्यजनेन तु॥
तत्र सन्धुक्षितः कामः पुत्त्रपौत्त्रविवर्द्धनः।
कामदेवत्रयोदश्यां पूजनीयो यथाविधि।
रतिप्रीतिसमायुक्तो ह्यशोकमणिभूषितः॥"
दमनो दमनकवृक्षः। सन्धुक्षितः प्रीणितः।
कामदेवध्यानन्तु।
"चापेषुहस्त कामदेवो रूपवान् विश्वमोहनः।"
तत्र स्तुतिमन्त्रः।
"पुष्पधन्वन्! नमस्तेऽस्तु नमस्ते मीनकेतन!।
मुनीनां लोकपालानां धैर्य्यच्युतिकृते नमः॥
माधवात्मज! कन्दर्प! सम्बरारे! रतिप्रिय!।
नमस्तुभ्यं जिताशेषभुवनाय मनोभुवे॥
आधयो मम नश्यन्तु व्याधयश्च शरीरजाः।
सम्पद्यतामभीष्टं मे सम्पदः सन्तु मे स्थिराः॥
नमो माराय कामाय देवदेवस्य मूर्त्तये।
ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय च॥
एवं यः कुरुते पूजामनङ्गस्य महात्मनः।
भवन्ति नापदस्तस्य तस्मिन्नब्दे कदाचन॥"
इति तिथितत्त्वम्॥

मदनद्वादशी, स्त्री, (मदनपूजाविषयिणी द्वादशी।) चैत्रशुक्लद्वादशी। अत्र मदनव्रतं कार्य्यम्। यथा,
ऋषय ऊचुः।
"श्रोतुमिच्छामहे सूत! मदनद्वादशीव्रतम्।
सुतानेकोनपञ्चाशत् येन लेभे दितिः पुनः॥
सूत उवाच।
यद्वशिष्ठादिभिः पूर्व्वं दितेः कथितमुत्तमम्।
विस्तरेणैतदेवेदं मत्सकाशान्निबोधत॥
चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः।
स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितम्॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम्।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्च्चितम्॥
नानाभक्ष्यफलोपेतं सहिरण्यञ्च शक्तितः।
ताम्रपात्रं गुडोपेतं तस्योपरि निवेदयेत्॥
तस्मादुपरि कामन्तु कदलीदलसंस्थितम्।
कुर्य्याच्छर्करयोपेतां रतिं तस्य च वामतः॥
गन्धधूपं ततो दद्यात् गीतवाद्यञ्च कारयेत्।
तदभावे कथां कुर्य्यात् कामकेशवयोर्नरः॥
कामनाम्ना हरेरर्च्चां स्नापयेद् गन्धवारिणा।
शुक्लपुष्पाक्षततिलैरर्च्चयेन्मधुसूदनम्॥
कामाय पादौ संपूज्य जंघे सौभाग्यदाय च।
ऊरू स्मरायेति पुनर्मन्मथायेति वै कटिम्॥
स्वच्छोदरायेत्युदरं अनङ्गायेत्युरो हरेः।
मुखं पद्ममुखायेति बाहू पञ्चशराय वै॥
नमः सर्व्वात्मने मौलिमर्च्चयेदिति केशवम्।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत्॥
ब्राह्मणान् भोजयेद्भक्त्या स्वयञ्च लवणाहृते।
भुक्त्वाथ दक्षिणां दद्यादिमं मन्त्रमुदीरयेत्॥
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः।
हृदये सर्व्वभूतानामानन्दो यो विधीयते॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत्।
उपवासी त्रयोदश्यामर्च्चयेद् विष्णुमव्ययम्॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत्।
ततस्त्रयोदशे मासि घृतं धेनुसमन्वितम्॥
शय्यां दद्यादनङ्गाय सर्व्वोपस्करसंयुताम्।
काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम्॥
वासोभिर्द्विजदाम्पत्यं पूज्य शक्त्या विभूषणैः।
शय्यां गवादिकं दद्यात् प्रीयतामित्युदीरयेत्॥
होमं शुक्लतिलैः कुर्य्यात् कामनामानि कीर्त्तयन्।
गव्येन सर्पिषा चैव पायसेन च धर्म्मवित्॥
विप्रेभ्यो भोजनं दद्याद्वित्तशाठ्यविवर्ज्जितः।
इक्षुदण्डानथो दद्यात् पुष्पमालाश्च शक्तितः॥
यः कुर्य्याद्विधिनानेन मदनद्वादशीमिमाम्।
सर्व्वपापविनिर्मुक्तः प्राप्नोति हरिसाम्यताम्।
इह लोके वरान् पुत्त्रान् सौभाग्यञ्च समश्नुते॥"
इति मत्स्यपुराणे ७ अध्यायः॥

मदनपाठकः, पुं, (मदनं तदुद्दीपकं पठतीति। पठ+ण्वुल्। स्वरेण कामोद्दीपनात्तथात्वम्।) कोकिलः। इति राजनिर्घण्टः॥

मदनमोहनः पु, (मदन उन्मादकश्चासौ मोहनश्चेति कर्म्मधारयः। मुह+णिच् ल्यु।) श्रीकृष्णः। यथा,—

"वन्दे मदनगोपालं कैशोराकारमद्भुतम् ।
यमाहुर्यौवनोद्दिष्टे श्रीमन्मदनमोहनम् ॥"
इति पाद्मे पातालखण्डे ६ अध्यायः ॥

मदनशलाका, स्त्री, (मदनोद्दीपिका शलाकेव। अस्याः कामोद्दीपकत्वात्तथात्वम् ।) कामोद्दीपकौषधम् । सारिकापक्षी । इति मेदिनी । के, २३५ । कोकिला । इति शब्दरत्नावली ॥

मदनसारिका, स्त्री, (मदनोद्दीपनाय सारिका ।) पक्षिभेदः । सालिक इति भाषा ॥ तत्पर्य्यायः । शलाका २ सारिका ३ चित्रलोचना ४ कुशपी ५ । इति जटाधरः ॥

मदना, स्त्री, (मदयति मत्ततां जनयतीति । मद्+णिच्+ल्युः । यद्वा, माद्यति अनया । मद्+ल्युट् । स्त्रियां टाप् ।) सुरा । इति हेमचन्द्रः । ३ । ५६७ ॥

मदनाङ्कुशः, पुं, (मदनस्य कामस्य अङ्कुश इव ।) लिङ्गम् । इति त्रिकाण्डशेषः ॥ नखम् । इति कामाङ्कुशशब्ददर्शनात् । यथा,—
"कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे ।"
इति श्रुतबोधे कालिदासः ॥

मदनायकः, पुं, (मदं उन्मादकं अयं शिरोभागो यस्य ।) कोद्रवः । इति राजनिर्घण्टः ॥ (विवरणमस्य कोद्रवशब्दे ज्ञातव्यम् ॥)

मदनायुधः, पुं, (मदनस्यायुधः ।) भगम् । इति शब्दचन्द्रिका ॥

मदनायुनः, पुं, (मदनस्यायुर्जीवनं इव समासान्तोऽच् । निपातनात् साधुः ।) कामवर्द्धकत्वात्तथात्वम् । कामवृद्धिक्षुपः । इति राजनिर्घण्टः ॥

मदनालयः, पुं, (आलीयतेऽस्मिन्निति आ+ली+अधिकरणे अच् । मदनस्यालयः ।) षष्ठीसमासः ।) भगम् । मदनपर्य्यायकशब्दोत्तरगृहपर्य्यायकशब्देन भगस्योक्तत्वात् । यथा,—
"स्वपुष्पैराकीर्णे कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम् ॥"
इति कर्पूरस्तवः ॥

जम्बूद्वीपावधिसप्तमस्थानम् । तत्तु जायास्थानम् । यथा —
"सूर्य्यात्सुखात् क्रियद्रव्यगत्तौजूलीरात्मयुके दिवसौख्यद्युतिविनशयात् सप्तवेश्मस्थे विशात् ।
अङ्गानेतान् वदति यवनज्योतिषज्ञान् सुतुङ्गान् तानेवांशात् मदनभवनेत्थाह मौथान् सुनीथान् ॥"
इति दीपिकायां मदनभवनशब्ददर्शनात् ॥

मदनावस्था, स्त्री, (मदनस्यावस्था ।) कामावस्था । सा तु उद्वेगरूपा । विरह इति यावत् । यथा । ततः प्रविशति मदनावस्थो राजा निःश्वस्य ।
"जाने तपसो वीर्य्यं सा बाला परवतीति मे
विदितम् ।
न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम् ॥"
इत्यभिज्ञानशकुन्तले ३ अङ्कः ॥ मदनावस्था इति राघोऽत्र उद्वेगरूपा पञ्चमी कामावस्था । यदाह भरतः । उद्वेगः पञ्चमः प्रोक्त इति । सचिन्तमिति केनोपायेन मम शकुन्तलालाभो भविष्यति । इति तट्टीका ॥

मदनी, स्त्री, (माद्यति अनया इति । मद्+करणे ल्युट् । स्त्रियां ङीप् ।) सुरा । इति हारावली ॥ कस्तूरी । अतिमुक्तकः । इति राजनिर्घण्टः ॥

मदनेच्छाफलः, पुं, (मदनेच्छां फलति जनयतीति अच् ।) बहुरसालः । इति राजनिर्घण्टः ॥

मदनोत्सवः, पुं, (मदनाय उत्सवः ।) उत्सवविशेषः । होलाका इति ख्याता । तत्पर्य्यायः । सुवसन्तकः २ । इति हारावली ॥

मदनोत्सवा, स्त्री, (मदनाय उत्सवो यस्याः ।) स्वर्गवेश्या । इति शब्दरत्नावली ॥

मदप्रयोगः, पुं, (मदस्य प्रयोगः ।) करिणां मदोद्गमः । तत्पर्य्यायः । अस्तारमृः । इति त्रिकाण्डशेषः ॥

मदभञ्जिनी, स्त्री, (मदं उन्मत्ततां भनक्ति दूरी करोतीति । मद+भन्ज्+"नन्द्यादिग्रहिपचादिभ्यो ल्युणिन्यचः ।" ३ । १ । १३४ । इति णिनिः । स्त्रियां ङीप् ।) शतमूली । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्याः शतमूलीशब्दे ज्ञातव्याः ॥)

मदयन्तिका, स्त्री, (मदयन्ती+तनः कन् टाप् । पूर्व्व ह्रस्वश्च ।)मल्लिका । इति शब्दरत्नावली ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"त्रिफलात्वक् त्रिकटुका सुरसा मदयन्तिका ।
वायस्यारग्वधाभाच तुलां कुर्य्यात् पृथक्
पृथक् ॥")

मदयन्ती, स्त्री, (मद्+णिच्+शतृ+ङीप् ।) वनमल्लिका । इति रत्नमाला ॥ काटमल्लिका इति भाषा ॥ मल्लिका । इतिराजनिर्घण्टः ॥ (तथाचास्याः पर्य्यायो यथा,—
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ।"
इतिभावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"मदयन्त्यङ्कुरः क्वाथस्तद्वत् समधुशर्करः ।"
इति च वैद्यकचक्रपाणिसंग्रहे रक्तपित्ताधिकारे ॥)

मदयित्नु, स्त्री, (मदयतीति । मद्+णिच् । "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।"उणा० ३ । २९ । इति मदि+इत्नुच् । "अयामन्ताल्वाय्येत्न्विष्णुषु ।" ६ । ४ । ५५ । इति णेरयादेशः ।) मद्यम् ।इति मेदिनी । ने, १०२॥

मदयित्नुः, पु, (मदयतीति । मद्+णिच् । "स्तनीति ।" उणा० । ३ । २९ । इति इत्नुच् । णेरयादेशश्च ।) कामदेवः । शौण्डिकः । इति शब्दरत्नावली ॥ मदयुक्तः । इति मेदिनी । ने, १०२ ॥ मेघः । इति त्रिकाण्डशेषः ॥

मदविक्षिप्तः, पुं, (मदेन विक्षिप्तश्चलितमनाः ।) मत्तहस्ती । इति शब्दचन्द्रिका ॥

मदशाकः, पुं, (मदकरः शाकोऽस्य ।) उपोदकी । इति राजनिर्घण्टः ॥

मदसारः, पुं, (मदं सारयति दूरीकरोतीति । इति मद+सृ+णिच्+अण् ।) तूलवृक्षः । इति राजनिर्घण्टः ॥

मदहस्तिनी, स्त्री, (मदेन हस्तिनीव ।) महाकरञ्जः । इति राजनिर्घण्टः ॥

मदहेतुः, पुं, (मदस्य हेतुः कारणम् ।) धातकी । इति वैद्यकम् । मत्तताकारकश्च । (मदरोगस्य हेतुः यथा,—
"यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता
मलाः ॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः ।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा ॥
मदमूर्च्छाय संन्यासास्तेषां विद्याद्विचक्षणः ।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु ॥"
इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये ॥)

मदस्थलं, स्त्री, (मदस्य स्थलम् ।) मदस्थानम् । यथा, शब्दरत्नावली ।
"अवदंशः सुरापानं शुण्डापानं मदस्थलम् ।"

मदस्थानं,स्त्री, (मदस्य स्थानम् ।) मद्यपानस्थानम् । तत्पर्य्यायः । शुण्डापानम् २ । इत्यमरः ।२।१०।४१।

मदाढ्यः, पुं, (मदेन मदजनकरसेन ताडीति ख्यातेन आढ्यः युक्तः ।) तालवृक्षः । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्य तालशब्दे ज्ञातव्या ॥) मदयुक्ते, त्रि ॥

मदाढ्या, स्त्री, (मदेन आढ्या ।) लोहितभिण्टी । इति शब्दचन्द्रिका ॥

मदातङ्कः, पुं, (मदजनितः आतङ्कः रोगः ।) मदात्ययरोगः । इति राजनिर्घण्टः ॥

मदात्ययः, पु, (मदेन अत्ययो नाशोऽनुखत्वात् ।) मद्यपानादिजन्यरोगविशेषः । तत्पर्य्यायः । मदातङ्कः२ पानात्ययः३ मदव्याधिः ४ मदः ५ । इति राजनिर्घण्टः ॥ अथ मदात्ययादीनां निदानमाह ।
"विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपनाः ।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः ॥
तस्मादविधिपीतेन तथा मात्राधिकेन च ।
युक्तेन चाहितैरन्नैरकाले सेवितेन च ॥
मद्येन खलु जायन्ते मदात्ययमुखा गदाः ॥"
अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह ।
"विभक्तमेकान्तत एव मद्यं
निषेव्यमाणं मनुजेन नित्यम् ।
उत्पादयेत् कष्टतमान् विकारा-
नुत्पादयेच्चापि शरीरभेदम् ॥
एकान्ततो नैरन्तर्य्येण विकारान् मदात्ययादीन् । शरीरस्य भेदं नाशम् ॥ * ॥ मदात्ययादीनां हेतुन्तरमप्याह ।

"क्रुद्धेन भीतेन पिपासितेन
शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि ॥
अत्यम्लभक्ष्यावततोदरेण
साजीर्णभुक्तेन तथाबलेन ।
उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान् ॥"

तानेव विकारान् विवृणोति ।
"पानात्ययं परमदं पानाजीर्णमथापि वा ॥"
पानविकारान् विवृणोति ।
"पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणम् ।"
तत्र मदात्ययस्य सामान्यं लक्षणमाह ।
"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा ।
अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः ॥
शिरःपार्श्वास्थिसन्धीनां वेदना विद्यते यथा ।
जायतेऽतिबलात् जृम्भा स्फुरणं वेपनं श्रमः ॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः ।
शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः ॥
छर्द्दिविड्भेदहृत्क्लेशो वातपित्तकफात्मकः ।
भ्रमः प्रलापो रूपाणामसताञ्चैव दर्शनम् ॥
तृणभस्मलतापर्णपांशुभिश्चावपूरितम् ।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते ॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च ।
मदात्ययस्य रूपाणि सर्व्वाण्येतानि लक्ष-
येत् ॥"

अथ मदात्ययस्य वातिकस्य निदानमाह ।
"स्त्रीशोकभयभाराध्वकर्म्मभिर्योऽतिकर्षितः ।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया ॥
रूक्षं परिणतं मद्यं निशि निद्रां निहन्ति च ।
करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम् ॥"
तत मद्यम् ॥ * ॥ अथ तस्य लक्षणमाह ।
"हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥"
अथ पैत्तिकस्य निदानमाह ।
"तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते ।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः ।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः ॥"
अथ तस्य लक्षणमाह ।
"तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥"
अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह ।
"मधुरस्निग्धगुर्व्वाशी यः पिबत्यतिमात्रया ।
अव्यायामदिवास्वप्नशय्यासनसुखे रतः ।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम् ॥"
अथ तस्य लक्षणमाह ।
"छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥"
अथ सान्निपातिकस्य मदातयस्य निदानं
लक्षणञ्चाह ।
"त्रिदोषहेतुभिः सर्व्वैः सर्व्वैर्लिङ्गैर्मदात्ययः ॥"
अथ परमदमाह ।

"श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥"

तन्द्रिस्तन्द्रा ॥ * ॥ पानाजीर्णमाह ।

"आध्मानमुग्रमथवोद्गिरणं विदाहः
पाने त्वजीर्णमुपगच्छति लक्षणानि ।"

उद्गिरणं वान्तिः उद्गारो वा । पीयत इति
पानं मद्यम् ॥ * ॥ पानविभ्रममाह ।

"हृद्गात्रतोदकफसंस्रवकण्ठधूम-
मूर्च्छावमीज्वरशिरोरुजनप्रदेहाः ।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेषु धीराः ॥"

कण्ठधूमः कण्ठाद्धूमनिर्गम इव । प्रदेहः कफेन
लिप्तास्यता । द्वेषः सुरान्नविकृतेषु सुरावि-
कारेषु अन्नविकारेषु च द्वेषः ।
अखिलेषु मद्यविकारेषु ॥ * ॥ असाध्यानां
मदात्ययादीनां लक्षणमाह ।

"हीनोत्तरोष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमतिपानहतं त्यजेच्च ।
जिह्वौष्ठदन्तमसितन्त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च ॥
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं त्यजेत्तम् ॥"

अथ मदात्ययादीनां चिकित्सा ।
"मदोत्थानान्तु रोगाणां मद्यमेव हि भेषजम् ।
यथा दहनदग्धानां दहनस्वेदनं हितं ।
मिथ्यातिहीनमद्येन यो व्याधिरुपजायते ।
समेनैव निपीतेन मद्येन स हि शाम्यति ॥
बीजपूरकवृक्षाम्लकोलदाडिमसंयुतम् ।
यवानीहबुषाजाजीशृङ्गवेरावचूर्णितम् ॥
सर्व्वैः शाकभिर्युक्तमवदंशैश्च रोचितम् ।
दद्यात् सलवणं मद्यं पैष्टिकं वातशान्तये ॥
मद्यं सौवर्च्चलव्योषयुक्तं किञ्चिज्जलान्वितम् ।
जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥
चव्यं सौवर्च्चलं हिङ्गु पूरकं विश्वदीप्यकम् ।
चूर्णं मद्येन पातव्यं पानात्ययरुजापहम् ॥
लावतित्तिरिदक्षाणां रसैश्च शिखिनामपि ।
पक्षिणां न्वगमत्स्यानामानूपानां तथोदनैः ॥
स्निग्धोष्णलवणाम्लैश्च वेसवारैर्मुखप्रियैः ।
स्निग्धैर्गोधूमिकैरन्नैर्व्वातमद्यात्ययं जयेत् ॥
नारीणां यौवनोष्णानां निर्द्दयैरुपगूहनैः ।
श्रोण्यूरुकुचभारैश्च संरोधोष्णसुखप्रदैः ॥
शयनाच्छादनैरुष्णैरुष्णैश्चान्तर्गृहैः सुखैः ।
उत्पन्नो मारुतात् शीघ्रं प्रशाम्यति मदा-
त्ययः ॥
पित्तपानात्यये योज्याः सर्व्वतश्च क्रिया हिमाः ।
सितामाक्षिकसंयुक्तं मद्यमर्द्धोदकं पिबेत् ॥
मद्यं खर्ज्जूरमृद्वीकापरूषकरसैर्युतम् ।
सदाडिमरसं शीतं शक्तुभिश्चावचूर्णितम् ॥
सशर्करं वा माध्वीकं संयुक्तमथवापरम् ।
दद्यात् बहूदकं काले पातुं पित्तमदात्यये ॥
शशान् कपिञ्जलानेणान् लावानसितपुच्छकान् ।
मधुराम्लान् प्रयुञ्जीत भोजने शालिषष्टिकान् ॥
पटोलयूषमिश्रं वा छागलं कल्पयेद्रसम् ।
सतीलं मुद्गमिश्रं वा दाडिमामलकान्वितम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन च ।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधात्म-
कान् ॥
शीतानि चान्नपानानि शीतशय्यासनानि च ।
शीतवातजलस्पर्शाः शीतान्युपवनानि च ॥
क्षौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च ।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः ।
रूक्षतर्पणसंयुक्तं यवानीयोगसंयुतम् ।
यवगोधूमकं चान्नं रूक्षयूषेण भोजयेत् ॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा ।
प्रभूतकटुसंयुक्तं यावान्नं वा प्रदापयेत् ॥
छागमांसरसं रूक्षमल्पं वा जाङ्गलं रसम् ।
शीधुयूषं मनागम्लं पिबेत् कफमदात्यये ॥
स्थाल्यामथ कपाले वा भृष्टं कृत्वा तु नीरसम् ।
कटुम्ललवणं मांसं खादेत् कफमदात्यये ॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम् ।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम् ॥
यदिदं कर्म्म निर्द्दिष्टं वातपित्तकफान् प्रति ।
सर्व्वजे सर्व्वमेवेदं प्रयोक्तव्यं चिकित्सकैः ॥"

इति भावप्रकाशः ॥

गरुडपुराणोक्तमदात्ययनिदानादिकं तत्रैव
१६० अध्याये द्रष्टव्यम् ॥ (तथाचास्य सकारण-
लक्षणचिकित्सादिकं यथा,—

"हालाहलाहलसमं भजते वियोगात्
सैव्यं न शिष्यमनुजैः कथितं मुनीन्द्रैः ।
तृष्णा वमिः श्वसनमोहनदाहतृष्णा
संजायतेऽतिसरणं विकलेन्द्रियत्वम् ॥
ये नित्यसेवनाद्दुष्टा मद्यस्य मनुजा भृशम् ।
विषमाहारसदृशी सुरा मोहनकारिणी ॥
यथा विषं प्राणहरं वियोगाद्
योगेन तच्चाप्यमृतं वदन्ति ।
तथा सुरा योगयुता हिता स्या-
दयोगतश्चारभतेऽनिकष्टम् ॥
क्षुधातुरे तृषाक्रान्ते सुरा वा भोजनं विना ।
न च शाकैर्विना भक्ता विनाहारातिपानकम् ॥
अत्यशनेऽप्यजीर्णेऽपि सुरा पीता रुजाकरी ।
यस्य प्रलपनञ्चापि न च वातमदात्ययः ।
दाहमूर्च्छातिसारश्च ज्वरः पित्तमदात्यये ॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवम् ।
शीतता च प्रतिश्यायः कफजे च मदात्यये ।
त्रिषु दोषेषु समता लिङ्गैर्येषामुपक्रमः ।
स त्रिदोषसमुद्भूतो मदमूर्च्छा भिषग्वर ! ॥
वमनञ्च प्रशस्तञ्च निद्रासंसेवनं पुनः ।
स्नानं हितं पयःपानं भोजने सगुडं दधि ॥
मस्तुखण्डं सखर्ज्जूरं मृद्वीका दाडिमाम्लिका ।
आमला च परूषञ्च लेहो हन्ति मदात्ययम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन वा ।
कल्कयेत् पयसा तत्र पानं सर्व्वमदात्यये ॥

पथ्या क्वाथेन संयुक्तं पयःपानं मदात्यये ।”
इति मदात्ययचिकित्सा ॥
अथ पूगीफलमदात्ययचिकित्सारभ्यते ।
“पूगीफलमदे कम्पो मोहो मूर्च्छा क्लमस्तमः ।
प्रस्वेदो विधुरत्वञ्च लालास्रावश्च जायते ॥
भ्रमक्लमपरीतत्वं विज्ञेयं पूगमूर्च्छिते ।
मानवो लक्षणैरेभिर्ज्ञेयः पूगविमूर्च्छितः ॥
तस्य शीतं जलं पीतं वस्तिवातहितं भवेत् ।
शर्कराभक्षणे देया मुक्ता वा शर्करान्विता ॥
कोद्रवाणां भवेन्मूर्च्छा देयं चीरं सुशीतलम् ।
धुस्तूरकमदे देयं शर्करासहितं दधि ॥
फलिनी करवीरञ्च मोहिनी मद्यन्तिका ।
अन्येषामपि कन्दानां वमनञ्चाशु कारयेत् ॥
पाययेत् शर्करायुक्तं क्षीरं वा दधि शर्कराम् ।”
इति श्रीमदृष्यात्रेयभाषिते हारीतोत्तरे तृतीयस्थाने मदात्ययचिकित्सानाम सप्तदशोऽध्यायः ॥)

मदाम्नातः, पुं, (मदाय मत्ततोद्रेकाय आम्नायते वाद्यते ऽसौ इति । आ + म्ना + कर्म्मणि क्तः ।) गजढक्का । इति हारावली । २०४ । हातीर उपरेर डङ्का इति भाषा ॥

मदाम्बरः, पु, (मदो दानवारि अम्बरमिवास्याच्छादकत्वात् ।) मत्तहस्ती । इति त्रिकाण्डशेषः ॥

मदारः, पु, (माद्यति मत्तो भवतीति । मद् + “अङ्गिमदिमन्दिभ्य आरन् ।” उणा० । ३ । १३४ । इति आरन् ।) हस्ती । धूर्त्तः । इति विश्वः ॥ शूकरः । कामुकः । गन्धभेदः । मत्तहस्ती । नृपभेदः । इत्युणादिकोषः ॥

मदाम्बुदः, पुं, (मदाम्बु मदजन्यं अम्बु नेत्ररोमविशेषं ददातीति । दा + कः ।) फलकमत्स्यः । इति त्रिकाण्डशेषः ॥

मदालापी, [न्] पु, (मदेन मत्ततया आलपतीति । आ + लप् + णिनिः ।) कोकिलः । इति शब्दमाला ॥

मदाङ्कः, पु, (मदो मृगमद आङ्काख्या यस्य । ह्रस्वः ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मदिरः, पुं, (मद् + किरच् ।) रक्तखदिरः । इति शब्दचन्द्रिका ॥ मदकरे, त्रि । यथा, ऋग्वेदे । ५ । ६१ । ११ ।
“य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु ॥”
“मदिरं मदकरं मधु ।” इति तद्भाष्ये सायनः ।)

मदिरा, स्त्री (माद्यतीति । मद् + किरच् । अजादित्वात् टाप् ।) मत्तखञ्जनः । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले । ३ । ५ ।
“यदि मदिरायतनयनां
तामधिकृत्य प्रहरतीति ।”
माद्यत्यनयेति । मद् + “इषि मदीति । उणा० । १ । ५२ । इति किरच् ।) मादकद्रव्यविशेषः । मद् इति भाषा ॥ (यथा,—
“हिक्का-श्वास-प्रतिश्याय-काम वर्च्चोग्रहारुचौ ।
वम्यानाहविबन्धेषु वातघ्नी मदिरा हिता ॥”
इति चरके सूत्रस्थाने १७ अध्यायः ॥
यथाच शान्तिशतके । ४ । २४ ।
“पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ।”)

तत्पर्य्यायः । सुरा २ हलिप्रिया ३ हाला ४ परिस्रुत् ५ वरुणात्मजा ६ गन्धोत्तमा ७ प्रसन्ना ८ इरा ९ कादम्बरी १० परिस्रुता ११ कश्यम् १२ मद्यम् १३ । इत्यमरः । २ । १० । ४० ॥ मानिका १४ । इति शब्दरत्नावली ॥ कपिशी १५ गन्धमादनी १६ माधवी १७ कत्तोयम् १८ मदः १९ कापिशायनम् २० । इति जटाधरः ॥ वारुणी २१ मत्ता २२ सीता २३ चपला २४ कामिनी २५ प्रिया २६ मदगन्धा २७ माध्वीकम् २८ मधु २९ सन्धानम् ३० आसवः ३१ अमृता ३२ वीरा ३३ मेधावी ३४ मदनी ३५ सुप्रतिभा ३६ मनोज्ञा ३७ विधाता ३८ मोदिनी ३९ हली ४० गुणारिष्टम् ४१ सरकः ४२ मधूलिका ४३ मदोत्कटा ४४ महानन्दा ४५ । इति राजनिर्घण्टः ॥ सीधुः ४६ मैरेयम् ४७ बलवल्लभा ४८ । इति भावप्रकाशः ॥ कारणम् ४९ । तत्त्वम् ५० इति कैवल्यतन्त्रम् ॥ मदिष्ठा ५१ परिप्लुता ५२ कल्यम् ५३ स्वादुरसा ५४ शुण्डा ५५ हारहूरम् ५६ मार्द्वीकम् ५७ मदना ५८ देवसृष्टा ५९ कापिशम् ६० अब्धिजा ६१ । इति हेमचन्द्रः । ३ । ५६६ ॥ सा द्वादशविधा यथा,—
“माध्वीकं पानसं द्राक्षं खार्ज्जूरं तालमैक्षवम् ।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् ॥
मुख्यमन्नविकारोत्थं मद्यानि द्वादशैव च ॥”
इति जटाधरः ॥

अस्याः सामान्यगुणाः । सुमधुराम्लत्वम् । कफमारुतनाशनत्वम् । लघुत्वम् । पुष्टिकरत्वम् । हृद्यत्वम् । सारकत्वम् । मदावहत्वञ्च ॥ * ॥ धातकीरसगुडादिकृता मदिरा गौडी । तद्गुणा यथा । तीक्ष्णत्वम् । उष्णत्वम् । मधुरत्वम् । वातनाशित्वम् । पित्तबलकारित्वम् । दीपनत्वम् । पथ्यत्वम् । कान्तिदृप्तिकारित्वञ्च ॥ पुष्पद्रवादिमधुसारमयी मदिरा माध्वी । तद्गुणा यथा । मधुरत्वम् । नात्युष्णत्वम् । पित्तवातनाशित्वम् । पाण्डुकामलगुल्मार्शःप्रमेहशमनत्वञ्च ॥ * ॥ विविधधान्यजाता मदिरा पैष्टी । तद्गुणा यथा । कटुत्वम् । अम्लत्वम् । तीक्ष्णत्वम् । गौडीसमत्वम् । वातहरत्वम् । कफकरत्वम् । ईषत्पित्तकरत्वम् । मोहनञ्च ॥ तालादिरसनिर्यासकृता मदिरा सैन्धी हाला च । तद्गुणा यथा । शीतत्वम् । कषायत्वम् । अम्लत्वम् । पित्तहरत्वम् । वातदातृत्वञ्च ॥ * ॥ सर्व्वतृणद्रुमनिर्यासरूपमदिरागुणाः । शीतलत्वम् । गुरुत्वम् । मोहनत्वम् । बलदत्वम् ॥ हृद्यत्वम् । तृष्णासन्तापनाशकत्वञ्च ॥ * ॥ नानाद्रव्यकदम्बकृता मदिरा कादम्बरी । तद्गुणायथा । सुमधुरत्वम् । पित्तश्रमहरत्वम् । मदकारित्वञ्च ॥ * ॥ ऐक्षवमदिरागुणौ । शिशिरत्वम् । मदोत्कटत्वञ्च ॥ * ॥ यवधान्यकृतमदिरागुणौ । गुरुत्वम् । विष्टम्भदायकत्वञ्च ॥ शर्कराधातकीतोयकृतमदिरागुणौ । शीतलत्वम् । मनोहरत्वञ्च ॥ * ॥ शार्करमद्यगुणाः । दृष्यत्वम् । दीपनत्वम् । मोहनत्वञ्च । इति नानामद्यगुणाः ॥ * ॥ ऋतुविशेषे पेयमदिरा यथा,
“गौडी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः ।
शरद्ग्रीष्मवसन्तेषु माध्वी ग्राह्या न चान्यथा ॥
कादम्बरीशर्करजादिमद्यं
सुशीतलं हृष्यकरं मदाढ्यम् ।
माध्वीसमं स्यात् तृणवृक्षजातं
मद्यं सुशीतं गुरु तर्पणञ्च ॥
अन्यथा कुरुते पानं मद्यं सन्तापशोषदम् ।
अस्रदोषमदात्यादिकारकं मूर्च्छनञ्च यत् ॥”
नवजीर्णमद्ययोर्गुणाः ।
“मद्यं नवं सर्व्वविकारहेतुः
सर्व्वन्तु वातादिकदोषदायि ।
जीर्णन्तु सर्व्वं सकलामयघ्नं
घर्णप्रदं हृष्यकरञ्च दीपनम् ॥”
अन्यच्च ।
“पर्य्युषितमल्पमेलनमम्लं वा पिच्छिलं विगन्धं वा ।
दोषावहमविशेषान्मद्यं हृद्यं विवर्ज्जयेत् ॥
मद्यप्रयोगं कुर्व्वन्ति शूद्रादिषु महार्त्तिषु ।
द्विजैस्त्रिभिस्तु न ग्राह्यं यद्यप्युज्जीवयेन्मृतम् ॥”
इति मद्यवर्ज्यावर्ज्यम् ॥ * ॥
“अन्ये द्वादशधा मद्यभेदानाहुर्मनीषिणः ।
उक्तेष्वान्तर्भवन्तीति नान्येषां पृथगीरितम् ॥”
इति राजनिर्घण्टे मद्यप्रकरणम् ॥
अथ मतान्तरे मद्यस्य लक्षणं गुणाश्च ।
“पेयं यन्मादकैर्लोकैस्तन्मद्यमभिधीयते ।
यथारिष्टं सुरा सीधुरासवाद्यमनेकधा ॥
मद्यं सर्व्वं भवदुष्णं पित्तकृत् वातनाशनम् ।
भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम् ॥
अम्लञ्च दीपनं रुच्यं पाचनं चाशुकारि च ।
तीक्ष्णं सूक्ष्मञ्च विशदं व्यवायि च विकाशि च ॥”
अथारिष्टस्य लक्षणं गुणाश्च ।
“पक्वौषधाम्बुसिद्धं यन्मद्यं तत् स्यादरिष्टकम् ।”
अरिष्टं मद्यमिति लोके । यथा, द्राक्षारिष्टम् । दशमूलारिष्टम् । बब्बूलारिष्टमिति ।
“अरिष्टं लघुपाकेन सर्व्वं तत्र गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥”
अथ सुराया लक्षणं गुणाश्च ।
“शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता ।
सुरा गुर्व्वी बलस्तन्यपुष्टिमेदःकफप्रदा ।
ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥”
अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च ।
“पुनर्नवाशिलापिष्टैर्व्विहिता वारुणी स्मृता ।
संहितैस्तालखर्ज्जूररसैर्या सापि वारुणी ॥
सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् ॥”
सुरातो भेदार्थं लघ्वीति ॥ * ॥
अथ सीधुद्वयस्य लक्षणं गुणाश्च ।
“इक्षोः पक्वै रसैः सिद्धः सीधुः पक्वरसश्च सः ।

आमैक्षवैरेव यः सीधुः स च शीतरसः स्मृतः ॥
सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरो हृद्यः स्नेहनो रोचनो हरेत् ॥
विबन्धमेदःशोषार्शःशोफोदरकफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥”
अथासवस्य लक्षणं गुणाश्च ।
“यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥”
अथ नवपुराणमद्यगुणाः ।
“मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥
जीर्णं तदेव रोचिष्णु कृमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धि गुणवल्लघु स्रोतोविशोधनम् ॥”
अथ सात्त्विकानां मद्यं पिबतां चेष्टाविशेषाः ।
सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्म्माणि निद्राञ्च मदिराचरत् ॥”
आचरत् कुर्य्यात् ।
“विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥
किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् ।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥”
अथ मद्यगन्धनाशनोपायः ।
“सुस्फोलबालगदजीरकधान्यकैला-
यष्ट्यर्च्चयन् सदसि वाचमभिव्यनक्ति ।
स्वाभाविकं सुखजमुजभाति पूतिगन्धं
गन्धञ्च मद्यलशुनादिभवञ्च नूनम् ॥”
इति भावप्रकाशः ॥
अपि च ।
“प्रकृत्या मद्यमम्लोष्णमम्लञ्चोक्तं विपाकतः ।
सर्व्वसामान्यतस्तस्य विशेष उपदेक्ष्यते ॥
कृशानां सक्तमूत्राणां ग्रहण्यर्शोविकारिणाम् ।
सुरा प्रशस्ता वातेषु रक्तपित्तक्षयेषु च ॥
प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥”
जगलो ग्राहिरूक्षोष्णः शोथघ्नो भक्तपाचनः ।
शोथार्शोग्रहणीदोषान् हन्त्यरिष्टः कफामयान् ॥”
अरिष्टो मद्यविशेषः ॥
“प्रायशोऽभिनवं मद्यं गुरु दोषसमीरितम् ।
स्रोतसां शोधनं जीर्णं दीपनं लघु रोचनम् ॥
हर्षणं प्रीणनं बल्यं मद्यं शोकश्रमापहम् ।
प्रागल्भ्यप्रतिभापुष्टिवीर्य्यतुष्टिस्वरप्रदम् ॥”
इति राजवल्लभः ॥
अन्यत् मद्यशब्दे द्रष्टव्यम् ॥
(वसुदेवपत्नी । यथा, श्रीमद्भागवते । ९ । २४ । ४५ ।
“पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥”)
मदिराक्षी, स्त्री, (मदिरे इव अक्षिणी यस्याः इति अक्षि + “अक्ष्णोऽदर्शनात् ।” ५।४।७६ । इति अच् । स्त्रियां ङीष् ।) मत्तलोचना । यथा,—
“अविदितसुखदुःखं निर्गुणं वस्तु किञ्चि
ज्जडमतिरिह कश्चिन्मोक्ष इत्याचचक्षे ।
मम तु मतमनङ्गस्मेरतारुण्यघूर्ण-
न्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥”
इत्युद्भटः ॥
(पुं, विराटराजस्य भ्राता । यथा, महाभारते । ४ । ३० । ११—१२ ।
सवज्रायसगर्भन्तु कवचं तप्तकाञ्चनम् ।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहार-
यत् ॥
सर्व्वपारशवं वर्म्म कल्याणपटलं दृढम् ।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥)
मदिरागृहं, क्ली, (मदिराया गृहम् ।) मद्यस्य गृहम् । मद्यसन्धानगृहम् । तत्पर्य्यायः । गञ्जा २ इत्यमरः । २ । २ । ८ ॥ शुण्डा ३ । यथा,—
“भाण्डागारे विदुर्गञ्जं खनौ खञ्जा सुरागृहे ।
मद्यभाण्डे स्मृता गुञ्जा गुञ्जा स्यात् काक-
कुञ्चिका ॥”
इति भरतधृतचन्द्रः ॥
मदिरासखः, पुं, (मदिरायाः सखा सगन्धत्वादिति । मदिरा + सखि + “राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) आम्रवृक्षः । इति जटाधरः ॥
मदिष्ठा, स्त्री, (मदोऽस्या अस्तीति । मद् + इनिः । इयमतिशयेन मदिनीति । इष्ठन् । इनोलोपः ।) मदिरा । इति हेमचन्द्रः । ३ । ५६६ ॥
मदी, स्त्री, (माद्यति चूर्णीकरोति कृष्टक्षेत्र-लोष्टादिकमिति । मद्-इन् । कृदिकारादिति पक्षे ङीष् । पृषोदरादित्वात् साधुः ।) चषक-वस्तु । इति नानार्थे हेमचन्द्रः ॥ कृषकवस्तु । इति वैश्यवर्गे जटाधरः ॥
मदीयं, त्रि, मम इदम् । आमार इति भाषा ॥ अस्मच्छब्दादीयप्रत्यये एकवचनार्थे मदादेशेन निष्पन्नमिदम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । २८ । ६० ।
“हे देवतात्मपोषेण मदीयेनैव भूपतिः ॥”)
मदोत्कटः, पु, (मदेन दानवारिणा उत्कटः ।) मत्तहस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ३ । ६५ । ८ ।
“ते तान् ग्राम्यगजान् दृष्ट्वा सर्व्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥”)
मदोत्कटा, स्त्री, (मदेन मत्ततया उत्कटः उद्भेदः अस्याः । स्त्रियां टाप् ।) मदिरा । इति राजनिर्घण्टः ॥ (मदेन गर्व्वादिना उत्कटः । मदोन्मत्ते, त्रि ।)
मदोद्धतः, त्रि, (मदेन मत्ततया उद्धतः ।) मत्तः । इति जटाधरः ॥ (यथा, वेणीसंहारे १ अङ्के ।
“सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धता-
रम्भाः ॥”)
मदोदग्रा, स्त्री (मदेन उदग्रा ।) नारी । इति शब्द-माला ॥ (मदोद्धते, त्रि । यथा रघौ ।४।२२।
“मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।”)
मद्गुः, पु, (मज्जतीति । मस्ज + “भृमृशीतृ-चरित्सरितनिधनिमिमस्जिभ्य उः ।” उणा० । १ । ७ । इति उः ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३४ ॥ पानकौडि इति भाषा ॥ अस्य मांसगुणाः । वायुनाशित्वम् । स्निग्ध-त्वम् । भेदकत्वम् । शुक्रकारित्वम् । रक्तपित्त-नाशित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ (पर्णमृगभेदः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
“मद्गुमूषिकवृक्षशायिका वकुशपूतिघासवानर-प्रभृतयः पर्णमृगाः ॥”)
मद्गुरः, पुं, (माद्यति जलं प्राप्य हृष्यतीति । मद् + “मद्गुरादयश्च ।” उणा० । १ । ४२ । इति उरच् निपातितश्च ।) मत्स्यविशेषः । इत्यमरः । १ । १० । १८ ॥ मागुर इति भाषा । (यथा । ललितविस्तरे । २० । ७ ।
“श्रमणो गौतमः श्यामको वत भो
श्रमणो गौतमो मद्गुरच्छविः ।”)
अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । संग्रा-हित्वम् । शुक्रत्वम् । गुरुत्वञ्च । इति राज-वल्लभः ॥ यथाच भावप्रकाशपूर्व्वखण्डे द्वितीय-भागे ।
“मद्गुरो वातहृद्वल्यो वृष्यः कफकरो लघुः ॥”
वर्णसङ्करजातिविशेषः । यथा, महाभारते । १३ । ४८ । ८३ ।
“निषादं मद्गुरं सूते दाशं नावोपजीविनम् ।”
“मद्गून् मीनविशेषान् राति आदत्ते इति रा + कः । तम् ।” इति तट्टीकायां नीलकण्ठः ।)
मद्गुरकः, पु, (मद्गुरः + स्वार्थे कन् ।) मद्-गुरमत्स्यः । इति शब्दरत्नावली ॥
मद्गुरसी, स्त्री, (मद्गौ पक्षिविशेषे रसो यस्याः ङीप् ।) शृङ्गी मत्स्यः । इति शब्दरत्नावली ॥
मद्यं, क्ली, (माद्यति जनोऽनेन । मद् + “गदमद-चरयमश्चानुपसर्गे ।” ३ । १ । १०० । इति करणे यत् ।) सुरा । इत्यमरः । २ । १० । ४० ॥
(यथा, साहित्यदर्पणे ।
“भिक्षो । मांसनिषेवणं प्रकुरुषे किं तेन मद्यं
विना
मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः
सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा,
एतावानपि संग्रहोऽस्ति भवतो नष्टस्य कान्या
गतिः ॥”)
अस्य गुणपर्य्यायौ मदिराशब्दे द्रष्टव्यौ ॥ * ॥
तत् द्वादशविधं यथा पुलस्त्यः ।
“पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम् ।
माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ।
द्वादशन्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम् ॥”
अनेन एकादशानां सुरात्वं निषेधयति मद्यशब्दो मदहेतुद्रव्यवचनः । अस्मादेव वचनात् नतु मद्यमात्रं सुराशब्दार्थः । यथा बृहस्पतिः ।
“गौडीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समा-
चरेत् ।

तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्रमात् ॥"
अथासां सुराणां क्रमेण प्रायश्चित्तत्रयं न स्यात्। तथा भविष्ये।
"सुरा तु पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे।"
पैष्टीति तण्डुलविकारमात्रोपलक्षणं इतरे गौड़ीमाध्व्यौ अतोऽन्नविकार एव सुराशब्दस्य मुख्यत्वान्न त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वज्ञापनार्थम्। तेन एतत्पानेऽपि महापातकत्वमतिदिशति यथैवैका तथा सर्व्वा इति पैष्ट्यां पूर्व्वप्रसिद्धिं दर्शयति। यथा पैष्टी सुरा तथा सर्व्वा गौड़ी माध्वी चेति पूर्व्ववचनोक्ता तु पैष्टी दृष्टान्तत्वेनात्र दर्शिता। न पातव्या द्विजोत्तमैरिति ब्राह्मणैरित्यर्थः। त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात् बहुवचनानर्थक्यपरीहारार्थमुत्तमप्रातिपदिकानर्थक्यमयुक्तं अतो ब्राह्मणस्य त्रिविधैव सुरा महापातकहेतुः। क्षत्त्रियवैश्ययोस्तु सुरा वै मलमन्नानामिति वचनेन पैष्ट्येव इति स्थितम्। अतएव।
"एका माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा।
द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित् ॥"
इति यमवचने द्विजातिपदं ब्राह्मणपरमेव। अत एव द्विविधसुरापाने न क्षत्त्रियादीनां महापातकम् ॥*॥ तावदस्तु। दोषाभावमेवाह वृद्धयाज्ञवल्क्यः।
"कामादपि हि राजन्यो वैश्यो वापि कथञ्चन।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥"
तदेव पैष्टीनिषेधस्त्रैवर्णिकानां गौड़ीमाध्वीनिषेधस्तु ब्राह्मणानामेव ॥ * ॥ तज्जातेः स्त्रीणामपि सुरापाननिषेधः। यथा भविष्ये।
"तस्मान्न पेयं विप्रेण सुरा मद्यं कथञ्चन।
ब्राह्मण्यापि न पेया वै सुरा पापभयावहा ॥"
"या ब्राह्मणी सुरापी स्यात्
न तां देवाः पतिलोकं नयन्ति ॥"
इति श्रुतिः ॥
"पतत्यर्द्धशरीरेण भार्य्या यस्य सुरां पिबेत्।
पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते ॥"
न चैवं क्षत्त्रियवैश्यस्त्रीणामनिषेधः। ब्राह्मणीपदस्य निषिद्धसुरापानकर्तृभार्य्योपलक्षणत्वात् भार्य्या यस्य सुरां पिबेदिति सामान्यवचनाच्च ॥ पानञ्च द्रवीभूतस्याभ्यवहारः। स च कण्ठदेशादधोनयनं न तु वक्त्रमात्रप्रवेशः। निष्ठीवनार्थं कपोलधारणे पानशब्दप्रसङ्गात्। यथोक्तम्।
"जिघ्रन्नपि सुरां कश्चित् पिबतीत्यभिधीयते।
यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम् ॥"
अत्र गण्डूषप्रमाणं अविवक्षितम्। गण्डूषार्द्धपानेऽपि लोके पानशब्दप्रयोगात्। अतएव मुखप्रवेशनं अत्राविवक्षितं किन्तु मुखप्रवेशे कण्ठादधोनयनं भवति अतस्तदेवोपलक्षयति। अतएव ओष्ठमात्रलेपे न पाननिष्पत्तिः। अतस्तत्रोत्तमाङ्गस्पर्शप्रायश्चित्तम् ॥ * ॥
अथ सुरापानप्रायश्चित्तम्। तत्र मनुः।

"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया सकाये निर्दग्धे मुच्यते किल्बिषात्ततः ॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वामरणात् गोशकृद्रसमेव वा ॥"
अग्निवर्णां अग्निसमस्पर्शाम्। पयो घृतं गोरेव आदावन्ते च गोः कीर्त्तनात्। मोहशब्दोऽत्र बुद्धिपरः। देवलः। सुरापाने ब्राह्मणो रूप्यताम्रसीसकानामन्यतममग्निकल्पं पीत्वा शरीरत्यागात् पूयते। रूप्यादयोऽत्र द्रवीभूताः पीत्वेति निर्द्देशात्। स्वयमशक्तावन्यैरपि मुखे सेचनीया। यथा गौतमः। सुरापस्य ब्राह्मणस्य उष्णामासिञ्चेयुः सुरामास्ये मृतः शुध्येत। अतएव न सेचकानां वधो विहितत्वात् स्वयं पान इव। एतच्च मरणप्रायश्चित्तं कामकृते। यथा, बृहस्पतिः।
"सुरापाने कामकृते ज्वलन्तीं तां विनिःक्षिपेत्।
मुखे स हि विनिर्द्दग्धो मृतः शुद्धिमवाप्नुयात् ॥"
कथञ्चिदिति सकृदित्यर्थः। अङ्गिराः।
"सुरापानं सकृत् कृत्वा योऽग्निवर्णां सुरां पिबेत्।
स पावयेदथात्मानमिह लोके परत्र च ॥"
भविष्ये।
"मतिपूर्व्वं सुरापाने प्राणान्तिकमुदाहृतम्।
पैष्टीपाने तु ऋषिभिर्न्नराणां कथञ्चन ॥
शृणुष्वापि महाबाहो। प्रायश्चित्तमुदाहृतम्।
सुरायाः कामतः पाने मुख्यायाः प्राणनाशनम् ॥"
पुनःपुनःपैष्टीविषयत्वाभिधानम्। त्रिविधा सुरा मुख्या इति भ्रमनिरासार्थम्। कथञ्चन सकृदित्यर्थः। । * । इतरासां असुराणां गौड़ीमाध्वीप्रभृतीनां ज्ञानतः सकृत्पाने मरणान्तिकं न भवति गौड़ीमाध्व्योस्तु ज्ञानतोऽभ्यस्तपाने गौड़ीमाध्वीव्यतिरिक्तायास्त्वसुराया अत्यन्ताभ्यस्तपाने मरणमुक्तं भविष्ये।
"गौड़ीमाध्व्योस्तथाभ्यासे प्राणान्तिकमुदाहृतम्।
अभ्यासे त्वसुरायास्तु तामेवाग्निनिभां पिबेत् ॥"
तथेति ज्ञानत इत्यर्थः। अतएव।
"असकृत् ज्ञानतः पीत्वा वारुणीं पतति द्विजः।
मरणं तस्य निर्द्दिष्टं प्रायश्चित्तं विधीयते ॥"
इति यमवचनमपि एतद्विषयमेव अत्राभ्यासे मरणविधानात् द्वितीयवार एव मरणं कार्य्यम्। गौड़ीमाध्व्योः कामतः सकृत्पाने भविष्ये।
"असुरामद्यपाने तु कृते विप्रस्तु कामतः।
चान्द्रायणं समभ्यस्येत् शुद्धिकामः स्वशुद्धये ॥
यद्यस्मिन्नेव विषये मानवीयं प्रकल्पयेत्।
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ॥
सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी।"
पिण्याकं खलिम् ॥ * ॥ उत्तमसुरापानं आयसेन पात्रेण इत्याह यमः।
"आयसे भाजने तप्तां ब्राह्मणीं वारुणीं पिबेत् ॥"
गोवालचीरवाससा तत् कर्त्तव्यं आह उशनाः। गोवालचीरवासाः सुरापः सुरामग्निवर्णां पीत्वा पूतो भवति ॥ * ॥ अज्ञानतः सकृत्-

पैष्टीपाने ब्राह्मणस्य द्वादशवार्षिकम्। यथा ब्रह्महत्याव्रतानुवृत्तौ यमः।
"चरेतामेतदेवोभौ सुरापगुरुतल्पगौ।
सगोघ्नादूषकश्चैव सुवर्णस्तेयतत्परः ॥"*॥
भविष्ये।
"अकामतः सुरां पीत्वा पैष्टीं मत्कुलनन्दन।
तप्तकृच्छ्रातिकृच्छ्रौ कृत्वा वै पुनःसंस्कारतः शुचिः ॥
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ॥"
सुरापानमात्रापनेयरोगस्य रोगिणोऽज्ञानतः पानविषयमिदं इत्युक्तं भविष्ये। यथा,—
"तथास्मिन्नेव विषये वाशिष्ठं परिकीर्त्तितम्।
यदि रोगी भवेद्व्यो नेतरस्य कदाचन ॥
कृच्छ्रञ्चात्र सुरश्रेष्ठ! तप्तकृच्छ्र उदाहृतः।"
कृच्छ्रातिकृच्छ्राविति च कृच्छ्रपदं न प्राजापत्यपरं किन्तु तप्तकृच्छ्रपरम्। । * । अज्ञानतो गौड़ीमाध्व्योः सकृत्पाने उक्तं भविष्यपुराणे।
"सकृत् पीत्वा तथा गौड़ीमज्ञानात् सुरसत्तम।
कृच्छ्रातिकृच्छ्रौ विहितौ घृतप्राशनमेव च ॥"
अज्ञानाभ्यासे तत्रैवोक्तम्।
"गौड़ीमज्ञानतः पीत्वा ब्राह्मणो ब्राह्मणप्रिय।
तप्तकृच्छ्रन्तु वै कृत्वा पुनःसंस्कारतः शुचिः ॥
माध्वीं पीत्वा महाबाहो! अज्ञानाद् द्विजसत्तमः।
शुद्ध्येत तप्तकृच्छ्रेण विकर्म्माभ्यासमात्तथा ॥
रेतोमूत्रपुरीषाणां गौड़ीमाध्व्योश्च प्राशने।
क्रव्यादपशुविष्ठानां संस्काराच्छुद्धिरिष्यते ॥"
प्राणान्तिके च पादहानेरसम्भवात् क्षत्त्रियवैश्ययोरपि यथोक्तं मरणान्तिकं प्रायश्चित्तमेव। द्वादशवार्षिकादौ पादपादहानिरभ्यस्यभक्षणे क्षत्त्रियादीनां ह्रासदर्शनात्।
"विप्रे तु सकलं देयं पादोनं क्षत्त्रिये मतम्।
वैश्येऽर्द्धं पादशेषन्तु शूद्रजातिषु शस्यते ॥"
पानसादिमद्यपाने तु कामनाकृतानेकसमयाभ्यस्ते प्राणान्तिकं युक्तं ब्राह्मणस्य कामतया सकृत्कृते तु पराशरः।
"अगम्यागमने चैव मद्यगोमांसभक्षणे।
शुद्ध्यै चान्द्रायणं कुर्य्यात् नदीं गत्वा समुद्रगाम् ॥
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्।
अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ॥"
अकामतः सकृत्पाने विष्णुः।
"पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः।
कारयेत् पुनःसंस्कारं भक्त्या विप्रांश्च भोजयेत् ॥"
कामतोऽकामतश्चाभ्यासे व्रतार्त्तिमाह यमः।
"गोमूत्रवह्निहितः कृच्छ्रचान्द्रायणमथापि वा।
अभ्यासे तु तयोर्भूयस्ततः शुद्धिमवाप्नुयात् ॥"
अपर्य्युषितपानसाद्यैकादशविधमद्यपाने त्रिरात्रम्। पानसं द्राक्षमाधूकमित्याद्यभिधाय पुलस्त्यः।
"द्राक्षेक्षुटङ्कखर्ज्जूरपनसादेश्च यो रसः।
सद्योजातन्तु तं पीत्वा त्र्यहात् शुद्ध्येत् द्विजोत्तमः ॥"

प्रयोजकादीनां पादपादह्वानिर्द्देष्टव्या। बालवृद्धस्त्रीणामर्द्धादिकं प्रायश्चित्तम्। इति प्रायश्चित्तविवेक:॥ * ॥ अथ पुराणे ब्राह्मणस्य मद्यपानादिनिषेधो यथा,—

"अपेयञ्चाप्यपेयञ्च तथैवास्पृश्यमेव च।
द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम्॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत।
पीत्वा पतति कर्म्मभ्यस्त्वसम्भाष्यो द्विजोत्तम:॥
भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विज:।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यध:॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नत:।
अपेयानि च विप्रो वै पीत्वा सद्याति रौरवम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्याय:॥
मद्यपस्य विष्णोरुपसर्पणे दोषादि यथा,—

वराह उवाच।

"मद्यं पीत्वा वरारोहे। यस्तु मामुपसर्पति।
तस्य दोषं प्रवक्ष्यामि शृणु सुन्दरि। तत्त्वत:॥
इत्वा वर्षसहस्राणि दरिद्रो जायते पुन:।
ततो भवेत् स पूतात्मा मद्भक्तश्च न संशय:॥
यस्तु भागवतो भूत्वा कामरागेण मोहित:।
दीक्षितो पिबते मद्यं प्रायश्चित्तं न विद्यते॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।।
अग्निवर्णां सुरां पीत्वा तेन मुच्येत किल्विषात्॥
एवन्त्वपराधानि येन मुच्यन्ति किल्विषात्।
य एतेन विधानेन प्रायश्चित्तं समाचरेत।
न स लिप्यति पापेन संसारञ्च न गच्छति॥
इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम्॥

अपि च।

"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुद्ध्यत्याचान्द्रायणाद्विप्र: प्राजापत्येन भूमिप:।
वैश्य: सान्तपनाच्छूद्र: पञ्चाहोभिर्व्विशुद्ध्यति॥"

इति गारुडे २२ अध्याय॥

एतद्गौडीमाध्व्यो: कामत: सकृत्पानविषयमिति प्रायश्चित्तविवेकदर्शनात्॥*॥ द्विजस्य पूजादौ मद्यदानविध्यनुकल्पनिषेधा यथा,—

"मदिरां पृष्ठतो दद्यात् अग्रत: पानन्तु वामत:।
अवश्यं विहितं यत्र मद्यं तत्र द्विज: पुन:॥
नारिकेलजलं कांस्ये ताम्रे च विसृजेन्मधु।
नापद्यपि द्विजो मद्यं कदाचित् विसृजेदपि॥
ऋते पुष्पासवाद्वक्ताद्राक्षनाद्वा विशेषत:।
राजपुत्रस्तथा मर्त्त्य: सचिव: सौप्तिकादय:॥
दद्युर्नरबलिं भूपसम्मत्या विभवाय च।
भूपालाननुमते मद्यं ददत् पापमवाप्नुयात्॥"

इति कालिकापुराणे ६६ अध्याय:॥

अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा,

वैशम्पायन उवाच।

"सुरापानाद्वञ्चनां प्राप्य विद्वान्
संज्ञानाशं प्राप्य चैवातिघोरम्।
दृष्ट्वा कचञ्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षु:।
काव्य: स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्क:॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धि:।
अपेतधर्म्मा ब्रह्महा चैव स स्या-
दस्मिंल्लोके गर्हित: स्यात् परे च।
मया चैमां विप्रधर्म्मोक्तिसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्रा: शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्व्वे॥"

इति महाभारते आदिपर्व्वणि ७६ अध्याय:॥

अथ तन्त्रे मद्यपाननिषेधो यथा,—

"नारिकेलञ्च खार्ज्जूरं पानसञ्च तथैव च।
ऐक्षवं मधुकं टाङ्कं तालञ्चैव च माक्षिकम्॥
द्राक्षन्तु दशमं ज्ञेयं गौडं चैकादशं स्मृतम्।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम्॥
मध्यमं मधुजं गौडं शेषञ्चोत्तममिष्यते।
एतत् द्वादशकं मद्यं न पातव्यं द्विजै: क्वचित्।
क्षत्रियादि: पिबेत् सर्व्वं पैष्टीमेकान्तु वर्ज्जयेत्॥
सुरां पीत्वा द्विजो मोहात् कामात् तक्रादि-
मिश्रिताम्।
त्रैवार्षिकं व्रतं कुर्य्यादीषन्मिश्रे तु वार्षिकम्॥
तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा ह्यकामत:।
कृच्छ्राब्दपादमुच्चार्य्य पुन: संस्कारमर्हति॥
सुखप्रवेशमात्रन्तु प्रायश्चित्तार्द्धमाचरेत।
अनुपनीतो देवेशि। व्रतं त्रैवार्षिकं चरेत॥
चतुर्थकालाहारी स्याद्ब्रह्मचर्य्यमथापि वा।
आ पञ्च वर्षं शूद्रं वा ज्ञानादर्द्धं विनिर्द्दिशेत्॥
शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत्।
स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत्॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते।
माध्वीगौडीसुरापाने द्वादशाब्दं विधीयते॥
इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु।
राजन्यवैश्ययोश्चापि गौडी माध्वी न शस्यते।
मोहात् क्षत्रश्च वैश्यश्च पीत्वा कृच्छ्रद्वयं चरेत्॥
शूद्रोऽपि गौडीं पैष्टीञ्च न पिबेद्धीनसत्कृताम्।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्॥
चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्द्दिशेत्॥
ज्ञानादभ्यासयोगे तु चान्द्रायणत्रयं स्मृतम्।
नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु।
क्षत्रियश्चैव वैश्यश्च प्राणायामेन शुध्यति॥
अपक्कं पनसञ्चैव आम्रञ्च वदरं तथा।
स्थापयित्वा घटे नित्यं दद्याद्दामपय:पलम्॥
त्रैलोक्यविजयाञ्चैव मातुलङ्गं तथैव च।
सप्तमेऽहनि ततो दद्यात् सन्धानात् सत्वमीरितम्॥
दधि मधु घृतञ्चापि माक्षिकं तिक्तकं तथा।
अनुपाने तु देवेशि। द्राक्षमद्यं सुनिश्चितम्॥
विडङ्गं शालवो मूलं——————।
मधुना सह संस्थाप्य शेषपाकं समाचरेत्॥
पिप्पलीलवणं दद्या मधुना मद्यमीरितम्।
पानसं पक्कखर्ज्जूरं आर्द्रं सोमलतारसम्।
एकीकृत्याग्निसन्धानात् खार्ज्जूरं मद्यमीरितम्॥
पक्कतालं हस्तिशाकं ककुभञ्च तथैव च।
एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम्॥
इक्षुदण्डं मरीचञ्च वदरञ्च तथा दधि।
शेषे तु लवणं दत्त्वा इक्षुमद्यं प्रकीर्त्तितम्॥
नवं मधु तथा विल्वं पक्कं शर्करया सह।
सन्धानाज्जायते मद्यं माध्वीकं शरतो रसम्॥
शतावरी टङ्कमूलं लवणं पद्ममेव च।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम्॥
तालमूलं वदरी शर्करा च तथैव च।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम्॥
इन्द्रजिह्वा पक्कधात्री नारिकेलजलन्तथा।
कदलीफलसन्धानान्मद्यं तन्नारिकेलजम्॥
दधि त्रैलोक्यविजया तथैव च करीकणा।
गुडेन सह सन्धानात् गौडीमद्यं प्रकीर्त्तितम्॥
शस्कुलीमहिसिद्धान्नपूर्णोदकसमन्वितम्।
वह्नौ सन्तापयेत किञ्चित् स्थापयित्वा दिनद्वयम्॥
शेषेऽहनि तु संप्राप्ते जीवनं तत्र नि:क्षिपेत्।
शृङ्गवेरं मरीचञ्च मातुलङ्गं तथैव च।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्॥"

इति श्रीमत्स्यसूक्ते महातन्त्रे चतुर्व्विंशतिसाहस्रे ३६ पटल:॥ * ॥ अपि च।

"सिद्धमन्त्रो भवद्वीरो न वीरो मद्यपानत:।
कलौ तु भारते वर्षे लोका भारतवासिन:॥
गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि॥"

इति उत्पत्तितन्त्रे ६४ पटल:॥ * ॥

"दिव्यवीरमयो भाव: कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥ * ॥

श्रीक्रमे।

"न दद्यात् ब्राह्मणो मद्यं महादेव्यै कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्॥

भैरवतन्त्रे।

"नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु।
राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन॥
एव प्रदानमात्रेण क्षीणायुर्ब्राह्मणो भवेत्।

इति आगमतत्त्वविलास:॥ * ॥

स्मृतौ कलौ मद्यपानादिनिषेधो यथा, याज्ञवल्क्यदीपकलिकायां ब्रह्मपुराणम्।

"नराश्वमेधौ मद्यञ्च कलौ वर्ज्ज्या द्विजातिभि:॥"

निषेधविषयं स्पष्टयति उशना:। "मद्यमदेयमपेयमनिग्राह्यम्।" अनिग्राह्यमस्वीकार्य्यमिति कल्पतरु:॥ कालिकापुराणेऽपि।

"स्वगात्ररुधिरं दत्त्वा आत्महत्यामवाप्नुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥"

स्मृति:।

"ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम्।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥
अतो मद्यप्रतिनिधिदानमपि न युक्तम्। इति तिथ्यादितत्त्वम्॥ * ॥ मद्यतुल्यं यथा,—

"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं
मधु।

गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥”

इति कर्म्मलोचनः ॥ * ॥

अथ मद्यपानां तुष्ट्यर्थं कौलानां मद्यपानविधिर्लिख्यते ।

“कुलाचाररतो वीरः कुलसङ्गी सदा भवेत् ।
मदिरासेवनं कुर्य्यात् सोमपानं महेश्वरि ! ॥
सर्व्वथा कुरुते देवि ! वीरश्चोह्लतमानसः ।
दिव्यस्तु देवताप्रायश्चन्दनागुरुलेपनैः ॥
रक्तचन्दनगन्धैश्च सुदिग्धो नात्र संशयः ।
भस्माङ्गधूसरो वीर उन्मत्तवद्विचेष्टितः ॥
सुरापानरतो नित्यं बलिपूजापरायणः ।
नरश्छागश्च महिषो मेषः शूकर एव च ॥
शशकः शल्लकी गोधा खड्गी कूर्म्मो दश स्मृताः ।
वानरश्च खरश्चैव गजाश्वादिविहङ्गमाः ॥
इत्यादैस्तु बलेद्दानैः पूजयेत् स्वेष्टदेवताम् ।
नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने ॥
कुलवारे कुलर्क्षे च तिथौ च कुलके तथा ।
भैरव्याः कल्पितं चक्रं संस्थाप्य पूर्व्ववत् प्रिये ! ।
सुराणां शोधनं कुर्य्याद्यथावत् परमेश्वरि ! ॥
प्रवृत्ते भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमाः ।
निवृत्ते भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक् ॥
विजयाञ्चानुकल्पञ्च द्विजो दद्याद्युगे युगे ॥”

इति उत्पत्तितन्त्रे ६३ पटलः ॥

“द्रव्याभावे चानुकल्पैः पूजयेत् परदेवताम् ।
सुराभावे च गोक्षीरं द्विजो दद्याद्युगे युगे ॥”

इति निरुत्तरतन्त्रे ५ पटलः ॥ * ॥

“असंस्कृतां सुरां पीत्वा ब्राह्मणो ब्रह्महा भवेत् ।
संस्कृतान्तु सुरां पीत्वा ब्राह्मणो ज्वलदग्निवत् ॥
सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यत्र कामतः पीत्वा ब्राह्मण्यादेव हीयते ॥”

इति उत्पत्तितन्त्रम् ॥ * ॥

“ब्राह्मणस्य महामोक्षं मद्यपाने प्रियंवदे ! ।
ब्राह्मणः परमेशानि ! यदि पानादिकं चरेत् ।
तत्क्षणात् शिवरूपोऽसौ सत्यं सत्यं हि शैलजे ! ॥
तोये तोयं यथा लीनं तैजसं तैजसे यथा ।
घटे भग्ने यथाकाशं वायौ वायुर्यथा प्रिये ! ॥
तथैव मद्यपानेन ब्राह्मणो ब्रह्मणि प्रिये ! ।
लीयते नात्र सन्देहः परमात्मनि शैलजे ! ॥
सायुज्यादिमहामोक्षं नियुक्तं क्षत्रियादिषु ।
मद्यपानं विना देवि ! तज्ज्ञानं न लभ्यते ॥
अतएव हि विप्रस्तु मद्यपानं समाचरेत् ॥
वेदमाताजपेनैव ब्राह्मणो नहि शैलजे ! ।
ब्रह्मज्ञानं यदा देवि ! तदा ब्राह्मण उच्यते ॥
देवानाममृतं ब्रह्म तदेव लौकिकी सुरा ।
सुरत्वं भोगमात्रेण सुरा तेन प्रकीर्त्तिता ॥
मन्त्रत्रयं सदा पाठ्यं ब्रह्मशापादिमोचनम् ।
प्रकुर्य्यात्तु हि यत्नेन तदा ब्रह्ममयी सुरा ॥
हविरारोपमात्रेण वह्निर्दीप्तो यथा भवेत् ।
शापमोचनमात्रेण सुरा मुक्तिप्रदायिनी ।
अतएव हि देवेशि ! ब्राह्मणः पानमाचरेत् ॥
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
बहु किं कथ्यते देवि ! स एव निर्गुणात्मकः ॥
मुक्तिमार्गमिदं देवि ! गोप्तव्यं पशुसङ्कटे ।
प्रकाशात् सिद्धिहानिः स्यात् निन्दनीयो न चान्यथा ॥”

इति मातृकाभेदतन्त्रे ३ पटलः ॥ * ॥

“कुलस्त्रीसेवनं कुर्य्यात् सर्व्वथा परमेश्वरि ! ।
रमते युवतीं रम्यां कामोन्मत्तविलासिनीम् ॥
नटीं कापालिकां वेश्यां रजकीं नापितीं वराङ्गनाम् ।
शूद्राणीं स्वेच्छरमणीं जवनीं परमेश्वरि ! ॥
मातृयोनिविचारोऽस्ति मातृयोनिं विना प्रिये ! ।
कुलाचारपरो वीरः कुलपूजापरायणः ॥
भगलिङ्गसमायोगादाकृष्य जपमाचरेत् ।
निश्चलन्तु भवेच्चित्तं कोटिसूर्य्यग्रहेण किम् ॥
चले चित्ते भवेद्व्याधिर्निश्चले निश्चलं यथा ।
शवानां साधनं देवि ! लतासाधनमुत्तमम् ॥
चितायाः साधनं देवि ! सिद्धिरस्ति कलौ युगे ॥”

इत्युत्पत्तितन्त्रम् ॥

“कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम् ।
न करोति नरो यस्तु स कलौ पतितो भवेत् ॥
वैदिकं तान्त्रिकं चैव जपहोमबहिष्कृतः ।
अब्राह्मणः स एवोक्तः स एव हस्तिमूर्खकः ॥
शुनोमूत्रसमं तस्य तर्पणं यत् पितृष्वपि ।
कालीतारामनुं प्राप्य वीराचारं करोति न ॥
शूद्रत्वं तच्छरीरेण प्राप्नुयात् स न चान्यथा ॥”

इति कामाख्यातन्त्रे ५ पटलः ॥

मद्यशोधनप्रकारो यथा । शिव उवाच ।

“शृणु पार्व्वति ! वक्ष्यामि तेषां वै शोधनक्रियाम् ।
पद्मासनेन संविश्य करपुटं समाचरेत् ॥
वामे गुरुं नमस्कृत्य दक्षिणे गणपतिं स्मरेत् ।
मध्ये देवीं नमस्कृत्य प्राणायामत्रयञ्चरेत् ॥
शरीरे मातृकां न्यस्य ऋष्यादिन्यासमाचरेत् ।
स्वकल्पोक्तविधानेन षडङ्गन्यासमाचरेत् ॥
पश्चाद्भूमौ त्रिकोणं वा षट्कोणं वा महेश्वरि ! ।
विलिख्य मण्डलं शुद्धं तस्योपरि घटं न्यसेत् ॥
बहुधा प्रोक्षणं कृत्वा फट्कारेण पुनः पुनः ।
ततस्तस्मिन् कारणन्तु मूलेनैव च स्थापयेत् ॥
मातृकार्णेन देवेशि ! विपरीतेन चैव हि ।
पुनः फट्कारमन्त्रेण प्रोक्षणं कारयेत् सुधीः ॥
ततो वियद्भृगुबीजं चतुर्द्दशस्वरान्वितम् ।
नादबिन्दुयुतं कृत्वा तस्योपरि शतं जपेत् ॥
ततो मूलं जपेन्मन्त्रं मायाबीजं ततः परम् ।
धेनुं योनिं गालिनीञ्च त्रिखण्डं शोभनं ततः ।
दर्शयित्वा वरारोहे ! घटं धृत्वा पठेन्मनुम् ॥
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे ।
अमाबीजमये देवि ! शुक्रशापाद्विमुच्यताम् ॥
ॐ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ! ब्रह्महत्यां व्यपोहतु ॥
ततः षडङ्गयुक्तञ्च वकारं बिन्दुसंयुतम् ।
एवं सकारकञ्चापि वर्णाद्यरसमन्वितम् ॥
जप्त्वा मन्त्री ततो ध्यायेत् स्वमन्त्रं कुलसुन्दरि ! ।
आनन्दभैरवं ध्यायेद्यथा तन्त्रानुसारतः ॥
रक्तवर्णं चतुर्बाहुं त्रिनेत्रं वरदं शिवम् ।
जटाजूटधरं देव वासुकीकण्ठभूषितम् ॥
डमरुञ्च कपालञ्च मुद्गरं पाशमुत्तमम् ।
धारिणं तं यजेद्देव व्याघ्रचर्म्माम्बरं शिवम् ॥
एवं ध्यात्वा महेशानि ! तस्य मध्ये प्रपूजयेत् ।
मायाबीजं ततो हुं फट्मन्त्रेणानेन संस्पृशेत् ॥
ततस्तस्मिन्महेशानि ! आनन्दभैरवीं स्मरेत् ।
आनन्दभैरवीं देवीं वराभयलसत्कराम् ॥
घोररूपां वरारोहां त्रिनेत्रां रक्तवाससम् ।
रक्तवर्णां महारौद्रीं सहस्रभैरवान्विताम् ॥
ब्रह्मविष्णुमहेशाद्यैः स्तूयमानां शिवां भजे ।
इति ध्यात्वा महेशानि ! तेनैव मनुना यजेत् ॥
तयोरैक्यं विभाव्यैव गायत्रीं दशधा जपेत् ।
भैरवं ङेऽन्तकञ्चोक्त्वा विद्महे तदनन्तरम् ॥
सुधादेव्यै ततः पश्चाद्धीमहीति ततो वदेत् ।
तन्नो देवी ततः पश्चात्तदन्ते च प्रचोदयात् ॥
इति ते कथिता देवी गायत्री परमाद्भुता ।
तस्याः स्मरणमात्रेण द्रव्यशुद्धिश्च जायते ॥
तस्य प्रसादाद्देवेशि ! सत्यं सत्यं न संशयः ।
तस्य मध्ये मूलमन्त्रं विलिखेद्दण्डलिङ्गवत् सकृत् ।
रक्तवस्त्रेण संपूज्य सुधां वस्त्रेण गोपयेत् ॥ * ॥
धर्म्मार्थकाममोक्षाणां विषयाणाञ्च पार्व्वति ! ।
सर्व्वेषां कारणं यस्मात् कारणं परिकीर्त्तितम् ॥
अस्माकञ्च महेशानि ! शरीरकारणं हि तत् ।
मृत्युञ्जयोऽहं वीरेशि ! वीरकार्य्यप्रसादतः ॥
निर्व्विकारेण देवेशि ! निर्व्विकल्पेन चेतसा ।
सेव्यमानं कुलं भद्रे ! भुक्तिमुक्तिप्रदायकम् ॥
निर्व्विकल्पो महेशानि ! मुक्तिभागी न संशयः ।
सविकल्पो वरारोहे ! रौरवं याति निश्चितम् ॥”

इति कैवल्यतन्त्रे २ पटलः ॥

(वैद्यकोक्तदोषादि यथा,—

“तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवायाशुकरं लघु ।
विकाशि विशदं मद्यमोजसोऽस्माद्विपर्य्ययः ॥
तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः ।
जीविताग्नाय जायन्ते विषे तूत्कर्षवृत्तितः ॥
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान् ।
दशभिर्दशसंक्षोभ्य चेतो नयति विक्रियाम् ॥
आद्ये मदे द्वितीये स प्रमादायतनं स्थितः ।
दुर्व्विकल्पहतो मूढः सुखमित्यधिमुच्यते ॥
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः ।
निरङ्कुश इव व्यालो न किञ्चिन्नाचरेज्जडः ॥
इयं भूमिरवद्यानां दौःशील्यस्येदमास्पदम् ।
एकोऽयं बहुमार्गाया दुर्गतेर्देशिकः परम् ॥
निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः ।
मरणादपि पापात्मा गतः पापतरां दशाम् ॥
धर्म्माधर्म्मसुखं दुःखमर्थानर्थं हिताहितम् ।
यदासक्तो न जानाति कथं तच्छीलयेद्बुधः ।
मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संश्रिताः ।

मोहादमदमूर्च्छाया: सापस्मारापतानकाः ॥
यत्रैकः स्मृतिविभ्रंशस्तत्र सर्व्वमसाधु यत् ।
अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ॥
मद्यं त्रिवर्गधीधैर्य्यलज्जादेरपि नाशनम् ।
नाति माद्यन्ति बलिनः कृताहारा महाशनाः ॥
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः ।
मेदःकफाधिकामन्दवातपित्ता दृढ़ाग्नयः ॥
विपर्य्ययेऽतिमाद्यन्ति विस्रब्धाः कुपिताश्च ये ।
मद्येन चाम्लरूपेण साजीर्णं बहु नाति च ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)
एतानि श्रुतिस्मृतिविरुद्धत्वात् मोहनार्थानि शिष्टैः
कदाचिदपि नाचरणीयानि ॥

मद्यद्रुमः, पुं, (मद्योत्पादको द्रुमः ।) माड़वृक्षः ।
इति राजनिर्घण्टः ॥

मद्यपङ्कः, पुं, (मद्यानां पङ्क इव ।) सुराकल्कः ।
मेथा इति भाषा ॥ तत्पर्य्यायः । मेदकः २
जगलः ३ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यपाशनं, क्ली, (मद्यपैरश्यते भुज्यते इति । अश्
+कर्म्मणि ल्युट् ।) पानरुचकभक्ष्यम् । तत्-
पर्य्यायः । उपदंशः २ अवदंश ३ चक्षणम् ४ ।
इति हेमचन्द्रः । ३ । १७१ ॥

मद्यपुष्पा, स्त्री, (मद्यानि मदसाधनानि पुष्पा-
ण्यस्याः ।) धातकी । इति राजनिर्घण्टः ॥
(गुणादिविवृतिरस्या धातकीशब्दे ज्ञातव्या ॥)

मद्यमण्डः, पुं, (मद्यस्य मण्डः ।) मद्यफेनः । तत्-
पर्य्यायः । कारोत्तमः २ । इति हेमचन्द्रः । ३ ।
५६८ ॥ कारोत्तरः ३ सुरामण्डः ४ । इत्यमरः ।
२ । १० । ४३ ॥

मद्यवासिनी, स्त्री, (मद्यानामिव वासो गन्धोऽस्या
अस्तीति । इनिः ङीष् ।) धातकीवृक्षः । इति
रत्नमालाराजनिर्घण्टौ ॥

मद्यबीजं, क्ली, (मद्यस्य बीजम् ।) नानाद्रव्यकृत-
सुराबीजम् । तत्पर्य्यायः । किण्वम् २ नग्नहूः
३ नग्नहुः ४ । इति हेमचन्द्रः । ३ । ५६८ ।
वाखर इति भाषा ॥

मद्यसन्धानं, क्ली, (मद्यस्य सन्धानमुत्पादनार्थं
आयोजनम् ।) सुरासन्धीकरणम् । यवाङ्कुर-
फलादीन् बहुकालं सन्धाय यत् क्रियते तत् ।
तत्पर्य्यायः । आसुतिः २ आसवः ३ अभिषवः
४ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यामोद, पुं, (मदस्येवामोदो गन्धो यस्य ।)
वकुलवृक्षः । इति राजनिर्घण्टः ॥

मद्रः, पुं, (मन्दते इति । मदि मोदादौ+"स्फायि
तञ्चीति ।" उणा० २ । १३ । इति रक् ।) देश-
विशेषः । हर्षः । इत्युणादिकोषः ॥ तद्देशविव-
रणं यथा,—
"वैराटपाण्ड्ययोर्मध्ये पूर्व्वदक्षक्रमेण तु ।
मद्रदेशः समाख्यातो माद्री तत्र तिष्ठति ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥
(भद्रे, क्ली । यथा, चतुर्थी चाशिष्यायुष्य मद्र-
भद्रकुशलसुखार्थहितैः । २ । ३ । ७३ । इत्यत्र
सूत्रे । मद्रं देवदत्तस्य भूयात् । इति काशिका ।
मद्रभद्रयोः पर्य्यायत्वादन्यतरो न पठनीयः ।
इति सिद्धान्तकौमुदी च ॥)

मद्रकः, त्रि, (मद्रेषु जात इति । मद्र+"मद्रवृज्योः
कन् ।" ४ । २ । १३१ । इति कन् ।) मद्रदेश-
भवः । इति सिद्धान्तकौमुदी ॥ (देशभेदः ।
यथा, मत्स्यपुराणे । ११३ । ४१ ॥
"गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥")

मद्रकारः, त्रि, (मद्रं करोतीति । कृ+"क्षेम-
प्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति पक्षे
अण् ।) मद्रङ्करः । यथा क्षेमप्रियमद्रात् कुर्व्वति
मुग्धबोधव्याकरणम् ॥

मद्रङ्करः, त्रि, (मद्रं भद्रं करोतीति । कृ+"क्षेम-
प्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति चकारात्
खच् । मुम् च ।) मङ्गलकारकः । यथा क्षेम
ङ्करोऽरिष्टतातिः स्यान्मद्रङ्करशङ्करौ । इति
त्रिकाण्डशेषः ॥

मद्रसुता, स्त्री, (मद्रस्य सुता ।) मद्रराजकन्या ।
सा पाण्डुराजस्य द्वितीया भार्य्या नकुलसहदेव-
जननी च । इति शब्दरत्नावली ॥

मद्रागीणः, मद्रागीयः, मद्रार्य्यः, त्रि, (मद्रागस्यायमिति । "अशब्दे
यत् खावन्यतरस्याम् ।" ४ । ३ । ६४ ।
इतिक्रमेण खछयत्प्रत्ययाः ।)
मद्रागसम्बन्धी । इति सिद्धान्तकौमुदी ॥

मद्वा, [न्] पुं, (माद्यतीति । मद्+"स्ना-
मदिपद्यर्त्तिपॄशकिभ्यो वनिप् ।" उणा० ४ ।
११२ । इति वनिप् ।) शिवः । इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः ॥ (मदनशीलो, त्रि ।
यथा, ऋग्वेदे । ८ । ८१ । १६ ।
"इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः ॥")
"मद्वने मदनशीलाय ।" इति तद्भाष्ये सायनः ॥

मधु, क्ली, (मन्यन्ते विशेषेण जानन्ति जना
यस्मिन् । मन्+"फलिपाटिनमिमनिजनां गुक्
पटिनाकिधतश्च । उणा० १ । १८ । इति उः
धश्चान्तादेशः ।) मद्यम् । (यथा, आर्य्यासप्त-
शत्याम् । ४२५ ।
"मधुमदवीतव्रीड़ा यथा यथा लपति सम्मुखं
बाला ॥")
क्षीरम् । जलम् । इति विश्वः हेमचन्द्रश्च ॥
रसभेदः । मधुररसः इति यावत् । इति शब्द-
रत्नावली ॥ पुष्परसः । फुलेर मौ इति भाषा ॥
तत्पर्य्यायः । मकरन्दः २ । इत्यमरः । २।४।१७॥
मरन्दः ३ मरन्दकः ४ । इति शब्दरत्नावली ॥
क्षुद्राभिर्मक्षिकाभिः कृतम् । मौ इति भाषा ।
क्षौद्रम् २ माक्षिकम् ३ । इत्यमरः । २।९।१०७॥
मार्कीकम् ४ कुसुमासवम् ५ पुष्पासवम् ६
पवित्रम् ७ पित्र्यम् ८ पुष्परसाह्वयम् ९ । इति
राजनिर्घण्टः ॥ माध्वीकम् १० सारघम् ११
मक्षिकावान्तम् १२ वरटीवान्तम् १३ भृङ्ग-
वान्तम् १४ पुष्परसोद्भवम् १५ । इति भाव-
प्रकाशः ॥ (तथास्य पर्य्यायः ।
"मधु पुष्परसं क्षौद्रं मकरन्दश्च माक्षिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥

मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्नि-
दीपनं वर्ण्यं बल्यं लघु सुकुमारं लेखनं हृद्यं
सन्धानं शोधनं रोपणं वाजीकरणं संग्राहि
चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदो-
मेहहिक्काश्वासकासातिसारच्छर्द्दितृष्णाकृमि-
विषप्रशमनं ह्लादि त्रिदोषप्रशमनञ्च तत्तु लघु-
त्वात् कफघ्नं पैच्छिल्यान्माधुर्य्यात् कषायभावाच्च
वातपित्तघ्नम् ।
"बृंहणीयं मधु नवं नातिश्लेष्महरं सरम् ।
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥
दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत् ।
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥"
तत्तु नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां
पुष्परसानां सविषमक्षिकासम्भवत्वाच्चानुष्णो-
पचारम् ।
"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णं वा तं निहन्ति यथा विषम् ॥
तत् सौकुमार्य्याच्च तथैव शैत्या-
न्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च
तथान्तरीक्षेण जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितम् ।
अपाकादनवस्थानान्न विरुध्येत पूर्व्ववत् ॥
मध्वामात् परतस्त्वन्यदामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सद्यो हन्ति यथा विषम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
अस्य सामान्यगुणाः । शीतत्वम् । रूक्षत्वम् ।
स्वादुत्वम् । त्रिदोषव्रणनाशित्वम् । कषायानु-
रसत्वम् । रूक्षत्वम् । चक्षुष्यत्वम् । श्वासकास-
नाशित्वञ्च ॥ * ॥ तदष्टविधं यथा । पौत्तिकम् १
भ्रामरम् २ क्षौद्रम् ३ माक्षिकम् ४ छात्रम् ५
आर्घ्यम् ६ औद्दालकम् ७ दालम् ८ । एतेषां
लक्षणानि यथा,—
"पिङ्गला मक्षिका स्थूला महत्यस्या च सा द्विधा ।
महती पुत्तिकानाम्नी स्वल्पा क्षुद्रेति कथ्यते ॥
मध्यमा मक्षिका नीला माक्षिकेत्यभिधीयते ।
पुत्तिकाभ्रमरक्षुद्रामक्षिकासम्भव मधु ॥
पौत्तिकाद्युच्यते छात्रं वरटीच्छत्रसम्भवम् ।
तपोवने जरत्कारीरर्घ्यं मधुतरूद्भवम् ॥
औद्दालकन्तु वल्मीककारिकीटविनिर्म्मितम् ।
दालमित्यभिनिर्द्दिष्टं वृक्षकोटरकीटजम् ॥"
एतेषां वर्णा यथा,—
"माक्षिकं तैलवर्णं स्यात् घृतवर्णन्तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छ्वेतं भ्रामरमुच्यते ॥"
एतेषां गुणा यथा,—
पौत्तिकं तत्र वीर्य्योष्णं कषायानुरसान्वयात् ।
वातासृक्पित्तकृच्छेदि विदाहि मदकृन्मधु ॥
"पैच्छिल्यात् स्वादुभूयस्त्वाद् भ्रामरं गुरु
कीर्त्तितम् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।

श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ॥
छात्रं श्वित्रिक्रिमिहरं रक्तपित्तहरं गुरु ।
आर्घ्यं चक्षुष्यमायुष्यं कफपित्तामवातजित् ॥
औद्दालकं कषायोष्णं कटुकुष्ठविषापहम् ।
दालं कफहरं रूक्षं दीपनं छर्द्दिमेहनुत ॥
उष्णमुष्णार्त्तमुष्णैश्च हन्त्यान्मधु विषान्वयात ।
मधुन्युष्णैर्विरुध्यन्ते वर्ज्जयित्वार्य्यसंज्ञितम् ॥”
उष्णैः रौद्रैः करणैः उष्णं मधु उष्णार्त्तं रौद्रपीड़ितं जनं विषान्वयात विषतुल्यत्वात् हन्यात ॥ * ॥ नवपुराणमधुगुणाः ।
“बृंहणीयं मधु नवं वातश्लेष्महरं परम् ।
पुराणं लघु संग्राहि निर्हर्षि स्थौल्यनाशनम् ॥
दोषत्रयहरं पक्कमाममम्लं त्रिदोषकृत् ॥”
अत्र केचिन्मधुनोऽग्निसंयोगाभावात् कालपक्कतामाहुः ॥ * ॥ मधुजातशर्करागुणाः ।
“मधुजा शर्करा रूक्षा तृष्णाच्छर्द्यतिसारजित् ।”
इति राजवल्लभे मधुवर्गः ॥ * ॥
अपि च ।
“माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
नानापुष्परसाहाराः कपिला वनमक्षिकाः ।
याः स्थूलास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ॥
ये स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः ।
भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ॥
पिङ्गला मक्षिकाः सूक्ष्माः क्षुद्रा इति हि विश्रुताः ।
ताभिरुत्पादितं यत्तु तत् क्षौद्रं मधु कथ्यते ॥
महत्यो मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धीमद्भिः पौत्तिकं समुदाहृतम् ॥
छत्राकारन्तु पटलं सरघाः पीतपिङ्गलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधुच्छात्रकमीरितम् ॥
मक्षिकास्तीक्ष्णतुण्डा याः पीताः षट्पदसन्निभाः ।
तदुद्भूतं यदर्घ्यांहि तदार्घ्यं मधु भण्यते ॥
उद्दालाः कपिलाः कीटा भूमेरुहलताः स्मृताः ।
वल्मीकान्तस्तदुत्पन्नमौद्दालकमुदीर्य्यते ॥
इन्द्रनीलदलाकाराः सूक्ष्माश्चिन्वन्ति मक्षिकाः ।
यद्वृक्षकोटरान्तस्तन्मधु दालमिदं क्रमात् ॥
इत्येतस्याष्टधा भेदैरुत्पत्तिः कथिता क्रमात् ।
अथ वक्ष्याम्यहं तेषां वर्णवीर्य्यादिकं क्रमात् ॥”
तद्यथा,—
माक्षिकं तैलवर्णं स्यात् श्वेतं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतसन्निभम् ॥
आपीतवर्णं छात्रं स्यात् पिङ्गलञ्चार्घ्यनामकम् ।
औद्दालं स्वर्णसादृश्यमापीतं दालमुच्यते ॥
माक्षिकं मधुरं रूक्षं लघु श्वासादिदोषनुत् ।
भ्रामरं पिच्छिलं रूक्षं मधुरं मुखजाड्यजित् ॥
क्षौद्रन्तु शीतं चक्षुष्यं पिच्छिलं पित्तवातहृत् ।
पौत्तिकं मधु रूक्षोष्णं ह्यस्रपित्तदाहकृत् ॥
श्वित्रमेहक्रिमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ।
अर्घ्यं मध्वतिचक्षुष्यं कफपित्तादिदोषहृत् ॥
औद्दालकन्तु कुष्ठादिदोषघ्नं सर्व्वसिद्धिदम् ।
दालं कटु कषायाम्लं मधुरं पित्तदायि च ॥
नवं मधु भवेत् स्थौल्यं नातिश्लेष्महरं परम् ।
देहस्थौल्यापहं ग्राहि पुराणं मधु लेखनम् ॥
पक्कं दोषत्रयघ्नं मधु विविधरुजानाशनिष्कामयादि-
ध्वंसं धत्ते च रुच्यं बलमतिपुष्टिदं वीर्य्यवृद्धिं विधत्ते ।
आमच्छेदामगुल्मामयपवनरुजापित्तदाहास्रदोष-
नाशं न्यूनं विशेषं जनयति नयति ध्वंसमभ्युच्चहृद्धिः ॥
व्रणशोधनसन्धाने व्रणसंरोपणादिषु ।
साधारणाम्मधु हितं तज्जाता मधुशर्कराः ॥
उष्णं सहोष्णं काले वा स्वयमुष्णमथापि वा ।
आमं मधु मनुष्याणां विषवत्तापदायकम् ॥
कीटकादियुतमम्लदूषितं
यच्च पर्य्युषितकं मधु स्वतः ।
काष्ठकोटरगतञ्च मेचकं
तच्च गेहजनितञ्च दोषकृत् ॥
दण्डमिहत्य यदुपात्तमपास्य दंशा-
स्तादृग्विधं मधु रसायनयोगयोग्यम् ।
हिक्कागुदाङ्कुरविशोफकफव्रणादि-
दोषापहं भवति दोषदमन्यथा चेत् ॥
माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणास्तस्य शर्कराः ।
विशेषाद्बलदृष्या च तर्पणं क्षीणदेहिनाम् ॥”
इति राजनिर्घण्टः ॥ * ॥ * ॥
मतान्तरे मधुगुणाः ।
“मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्यं व्रणशोधनरोपणम् ॥
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ॥
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ।
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलम् ॥” * ॥
अथ मधुभेदाः ।
“माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥” * ॥
अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
“मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ॥” * ॥
अथ भ्रामरस्य ।
“किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः पुष्पेभ्यः अलिभिश्चितम् ।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् ॥ * ॥”
अथ क्षौद्रस्य ।
“मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥”
अथ पौत्तिकस्य ।
“याः कृष्णा मशकोपमा लघुतराः प्रायो महापिच्छितं
वृक्षाणां तरुकोटरान्तरगताः पुष्पासवं कुर्व्वते ।
तास्तज्ज्ञैरिह पुत्तिका निगदितास्ताभिः कृत सर्पिषा
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्त्तितं पौत्तिकम् ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत ।
विदाहि मेहकृच्छ्रघ्नं ग्रन्थ्यादिक्षतशोषि च ॥”
अथ छात्रस्य ।
“वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत् तर्पणञ्च गुणाधिकम् ॥”
अथार्घ्यस्य ।
“मधूकवृक्षा निर्यासं जरत्कार्व्वाश्रमोद्भवाः ।
स्रवन्त्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः ॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः ॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ॥” * ॥
अथौद्दालकस्य ।
“प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः ।
कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ॥” * ॥
अथ दालस्य ।
“संस्रुत्य पतित पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं छर्द्दिप्रमेहजित् ॥
अधिकं मधुरं स्निग्धं बृंहणं गुरुभारिकम् ॥”
लघु पाके । गुरुभारिकं तुलितम् ॥ * ॥ अथ नवपुराणमधुगुणाः ।
“नवं मधु भवेत् पुष्ट्यै नातिश्लेष्महरं सरम् ।
पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुडस्यापि विशेषतः ।
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ॥”
अथ मधुनः शीतस्य गुणाधिक्यमुष्णताया निषेधः ।
“विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्व्वन्ति तच्छीतं गुणवन्मधु ॥

त्रिफलाद्यैश्च पञ्चाद्यैः द्रव्यैर्योगेन वा सह ।
उष्णार्त्तस्योष्णकाले च सूतं विषसमं मधु ॥”
इति भावप्रकाशः ॥

मधुः, पुं, (मन्+उ । नस्य धः ।) मधुद्रुमः । मौलगाछ इति भाषा ॥ वसन्तर्त्तुः । (यथा, कुमारसम्भवे । ३ । ३७ ।
“निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥”)
दैत्यभेदः । (यथा, देवीभागवते । १ । ६ । २५ ।
“मधुश्च कुपितस्तत्र हरिणा सह संयुगे ॥”)
इमं हत्वा विष्णुर्मधुसूदनोऽभूत् ॥ चैत्रमासः । इति मेदिनी । धे, १२ ॥ (यथा, रघुः । ११ । ७ ।
“रेजतुर्गतिवशात् प्रवर्त्तिनौ
भास्करस्य मधुमाधवाविव ॥”)
अशोकवृक्षः । इति हेमचन्द्रः । ७ । १५३ ॥ यष्टि-मधु । इति शब्दरत्नावली ॥ असुरविशेषः । (यथा, भागवते । ६ । ११ । १४ ।
“शत्रुघ्नश्च मधोः पुत्त्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥”)
स च शत्रुघ्नेन हतः । यस्य नाम्ना मथुरा मधु-पुरीति ख्याता ॥

मधुः, स्त्री, (मन्+उ । नस्य धः ।) जीवन्तीवृक्षः । इत्यमरः । २ । ४ । १४७ ॥

मधुकं, क्ली, (मध्विवेति । मधु+“संज्ञायां च ।” ५ । ३ । ८७ । इति कन् । यद्वा, मधु मधुरं कायतीति । कै+कः ।) यष्टिमधुका । इत्यमरः । २ । ४ । १०९ ॥ (यथास्य पर्य्यायः ।
“यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्थलेजाता जलजातिरसा पुरा ॥”
इति वैद्यकरत्नमालायाम् ॥)
त्रपु । इति हेमचन्द्रः ॥

मधुकः, पुं, (मधु मधुरं कायतीति । कै+कः ।) वन्दिभेदः । यष्ट्याह्वः । विहगान्तरः । इति विश्वः ॥

मधुकण्ठः, पुं, (मधुर्मधुरः कण्ठः कण्ठस्वरो यस्य ।) कोकिलः । इति त्रिकाण्डशेषः ॥

मधुकरः, पुं, (करोति सञ्चिनोतीति । कृ+अच् । मधुनः करः ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, श्रीमद्भागवते । ४ । १८ । २ ।
“सर्व्वतः सारमादत्ते यथा मधुकरो बुधः ॥”)
कामी । इति धरणिः ॥ भृङ्गराजवृक्षः । इति शब्दमाला ॥

मधुकर्कटिका, स्त्री, (मधुर्मधुरा कर्कटिकेव ।) मधुरजम्बीरविशेषः । मउकट्टी इति भाषा । तत्पर्य्यायः । कृष्णा २ । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्या गुणाश्च यथा,—
“बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥

मधुकर्कटी, स्त्री, (मधुर्मधुरा कर्कटी) मधुबीज-पूरः । इति राजनिर्घण्टः ॥

मधुका, स्त्री, (मधुक+टाप् ।) मधुयष्टिका । इत्यमरः । २ । ४ । १०९ ॥ मधुपर्णीवृक्षः । इति मेदिनी । के, १३५ ॥ श्यामावर्णकङ्गुनी । इति हेमचन्द्रः । ४ । २४३ ॥

मधुकुक्कुटिका, मधुकुक्कुटी, } स्त्री, (मधुः मधुरा कुक्कुटीव । मधुकुक्कुट+स्त्रियां ङीप् । स्वार्थे कन् । स्त्रियां टाप् । पूर्व्वस्य ह्रस्वत्वञ्च ।) जम्बीरविशेषः । मखुर इति मकूर इति च भाषा । तत्पर्य्यायः । मातुलुङ्गा २ सुगन्धा ३ गिरिजा ४ पूतिपुष्पिका ५ अत्यम्ला ६ देव-दूती ७ । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । स्वादुत्वम् । गुरुत्वम् । स्निग्धत्वम् । वातपित्तविनाशित्वञ्च । इति राजवल्लभः ॥

मधुकृत्, पुं, (मधु करोति सञ्चिनोतीति । कृ+क्विप् तुगागमश्च ।) भ्रमरः । इति हेमचन्द्रः ॥ (यथा, छान्दोग्योपनिषदि । ३ । १ । २ ।
“अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो यजुर्व्वेद एव पुष्पं ता अमृता आपः ॥”)

मधुकेशटः, पुं, (मधुनः पुष्परसस्य के शिरसि अग्रभागे शटति गच्छतीति । शट्+कर्म्मणि अच् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

मधुकैटभौ, पुं, (मधुश्च कैटभश्च तौ । इतरेतर-द्वन्द्वः ।) असुरविशेषौ । तयोरुत्पत्त्यादि यथा,
“दैनन्दिने तु प्रलये प्रसुप्ते गरुडध्वजे ।
तस्य श्रवणविड्जातावसुरौ मधुकैटभौ ॥
कूर्म्मपृष्ठगता पृथ्वी विलीनेवाभवज्जलैः ।
तां विशीर्णां योगनिद्रा महामाया व्यलोकयत् ॥
तां वै दृढतरां कर्त्तुं पृथ्वीं प्रति तदेश्वरी ।
उपायं चिन्तयामास कथं पृथ्वी भवेद्दृढा ॥
इदानीमाप्यवत् पृथ्वी प्रश्लथा कोमला जलैः ।
सृष्टिकाले जगत् वोढुं कथं शक्ता भविष्यति ॥
इति सञ्चिन्त्य सा माता जगतां सृष्टिकारिणी ।
उपगम्य तदा विष्णुमासमाद सुनिद्रितम् ॥
तस्य सुप्तं समासाद्य जगन्नाथं जगत्पतिम् ।
वामहस्तकनिष्ठाग्रं तस्य कर्णे न्यवेशयत ॥
निवेश्य नखराग्रेण प्रोद्धृत्य श्रावणं मलम् ।
चकार सा देवी योगनिद्रा जगत्प्रसूः ॥
तत्कर्णमलचर्णेभ्यो मधुनामासुरोऽभवत् ।
ततो दक्षिणहस्तस्य कनिष्ठाग्रन्तु दक्षिणे ॥
कर्णे न्यवेशयद्देवी तस्मादप्युद्धृतं मलम् ।
तच्चापि चोदयामास करशाखाग्रजेन तु ॥
ततोऽभूत् कैटभो नाम बलवानसुरो महान् ॥
उत्पन्नः स च पानार्थं यस्मात् स्यन्दितवान्मधु ।
अतस्तस्य महादेवी मधुनामाकरोत्तदा ॥
उत्पन्नः कीटवद्यानि महामायाकरे यतः ।
अतस्तं कैटभाख्यन्तु स्वयं देवी तदाकरोत् ॥
तावुवाच महामाया युध्यतां हरिणा सह ।
युवानौ अद्यैवात्र भवन्तौ निहनिष्यति ॥
यदा युवां प्रभावेषे आवां विष्णो । वधान तौ ।
तदैवायं युवां हन्ता नान्यथा हरिरप्यथ ॥
महामायामोहितौ तौ विष्णुनाभे तदा स्थितौ ।
भ्रममाणौ ददृशतुर्नाभिपद्मस्थितं विधिम् ॥
तमूचतुस्तौ धातारं हनिष्यावोऽत्र नामितम्
त्वं जागरय वैकुण्ठं यदि जीवितुमिच्छसि ॥
ततो ब्रह्मा महामायां योगनिद्रां जगत्प्रसूम् ।
प्रसादयामास तदा स्तुतिभिर्नतिभिर्भिया ॥
चिरं स्तुताथ सा देवी ब्रह्मणा जगदात्मना ।
प्रसन्नाभवदत्यर्थमुवाच च तथा विधिम् ॥
किमर्थं संस्तुता चाहं किं करिष्याम्यहं तव ।
तद्वद त्वं महाभाग । करिष्याम्यहमद्य ते ॥
ततस्तेन महामाया प्रोक्ता धात्रा महात्मना ।
प्रबोधय जगन्नाथं यावन्नो मां हनिष्यतः ।
संमोहयेतौ दुर्द्धर्षावसुरौ मधुकैटभौ ॥
इत्युक्ता सा तदा देवी ब्रह्मणा जगदात्मना ।
बोधयामास वैकुण्ठं मोहयामास तौ तदा ॥
ततः प्रबुद्धः क्षणाः स ददर्श भयशालिनम् ।
ब्रह्माणं तौ तदा घोरावसुरौ मधुकैटभौ ॥
ततस्ताभ्यां स युयुधे ह्यसुराभ्यां जनार्द्दनः ।
नाशकद्वाधितुं वीरावसुरौ मधुकैटभौ ॥
अनन्तोऽपि फणाग्रेण तान्नो धर्त्तुं क्षमोऽभवत् ।
युध्यमानान्महावीरान् वैकुण्ठमधुकैटभान् ॥
अथ ब्रह्मा शिलारूपां स्थितिशक्तिं तदाकरोत् ।
अर्द्धयोजनविस्तीर्णां सार्द्धयोजनमायताम् ॥
तस्यां शिलायां वैकुण्ठो युयुधे नृपसत्तम ।
सह ताभ्यां शिला सा तु प्रविवेश जलान्तरम् ॥
तस्यान्तु शक्त्यां मग्नायां तोयेषु युयुधे हरिः ।
पञ्चवर्षसहस्राणि बाहुयुद्धैर्निरन्तरम् ॥
यदा नैवाशकद्धन्तुं तौ विष्णुर्जगतां पतिः ।
परां चिन्तां तदावाप विधातापि भयातुरः ॥
ततस्तावेव तं विष्णुमूचतुर्व्वलदर्पितौ ।
पुनः पुनस्तौ गर्जन्तौ महामायाविमोहितौ ॥
तुष्टौ स्वस्त्वद्युद्धेन वरं वरय माधव ॥
तवेदं संप्रदास्यावः सत्यमेतद्वदाधुना ॥
तयोस्तद्वचनं श्रुत्वा भगवान् गरुडध्वजः ।
उवाच तौ युवां वध्यौ भवेतां मे महाबलौ ।
इति देहि वरं मह्यं दातव्यं यदि विद्यते ॥
तौ तदा प्राह युष्माभिर्योग्यौ नौ शोभनो वधः ।
तत्रावां जहि नो यत्र तोयं सम्प्रति विद्यते ॥
तयोस्तद्वचनं श्रुत्वा माधवो जगतां पतिः ।
ब्रह्माणं माह शीघ्रेण प्राहृदावात्मसंज्ञया ॥
ब्रह्मशक्तिशिलां शीघ्रमुद्धृत्य धीयतां यथा ।
तत्र स्थित्वा महाधारं हनिष्यामि महाबलौ ॥
ततो ब्रह्मा त्वहश्चैव उद्दधार शिलान्तु ताम् ॥
तस्या मध्ये पूर्व्वभागे त्र्यहं पर्व्वतरूपधृक् ।
ऊर्द्धं स्थित्वा शिलां भित्वा प्रविवेश रसातलम् ॥
ऐशान्यामभवत् कूर्म्मः पर्व्वतश्चाग्रहीत् शिलाम् ।
वायव्याञ्च तथानन्तो नैरृत्याञ्च सुरेश्वरी ॥
महामाया जगद्धात्री शैलरूपप्रधारिणी ।
आग्नेय्याञ्च स्वयं विष्णुरेकरूपेण संस्थितः ॥
ब्रह्मशक्तिशिलां गृह्णन् भगवान् परमेश्वरः ।
मध्ये ब्रह्मा त्वहश्चैव वराहश्च तथापरः ॥
ततो वराहपृष्ठस्य चरमे जगतां पतिः ।
स्थित्वा शिलामवष्टभ्य ब्रह्मशक्तिमधोगताम् ॥

वामे स्वजघने यत्नादारोप्य शिरसी तयोः ।
जगदाधारभूतः स सर्व्वयत्नेन संयुतः ॥
सर्व्वैर्बलैः समाक्रम्य चिच्छेद स पृथक् पृथक् ।
मधुकैटभयोः सम्यक् वीरयोः पृथिवीन्तले ॥
तस्य चाक्रम्य संक्रामादुत्तमशक्तिरधोगता ।
धियमाणापि देवीवैर्य्यत्नादपि मुहुर्मुहुः ॥
ततस्तयोस्तु क्षतयोः शरीरे जगतां पतिः ।
स्वशक्तिं समुद्धृत्य यथास्तस्थौ प्रयत्नतः ।
उद्धृतायां पृथिव्यान्तु तयोर्म्मेदोविलेपनैः ।
मुदृढामकरोत् पृथ्वीं कोदितां तोयराशिभिः ॥
मेदोविलेपिता यस्माद् गीयते मेदिनीति सा ।
अद्यापि पृथिवी देवी देवमानुषराक्षसैः ॥"
इति कालिकापुराणे ६१ अध्यायः ॥
(अनयोर्नामनिरुक्तिर्यथा, महाभारते । १२ । ३४७ । २४—२६ ।
"सत्वस्थः परमेष्ठी स ततो भूतगणान् सृजन् ।
पूर्व्वमेव च पद्मस्य पत्रे सूर्य्यांशुसप्रभे ॥
नारायणकृतौ बिन्दू अपामास्तां गुणोत्तरौ ।
तावपश्यत् स भगवाननादिनिधनोऽच्युतः ॥
एकस्तत्राभवद्बिन्दुर्म्मध्वाभो रुचिरप्रभः ।
स तामसो मधुर्जातस्तदा नारायणाज्ञया ।
कठिनस्त्वपरो बिन्दुः कैटभो राजसस्तु सः ॥")
मधुकोषः, पुं, (मध्वर्थं कृतः कोषः मध्वाधारः कोषो वा ।) मधुमक्षिकाकृतकोषः ॥ मौचाक् इति भाषा । तत्पर्य्यायः । मधुक्रम.२ । इति शब्दचन्द्रिका ॥ (यथा,—
"भ्रमरैरिव मयायं व्याख्यामधुकोष आरब्धः ।"
इति वन्दिनिवयटीकाकृदिजयेन लिखितम् ॥)
छागसुब्ब इति मोसाशिनो वदन्ति ॥
मधुक्रमः, पुं, (मधुनः क्रमः ।) पुनः पुनर्म्मधुपानक्रमः । तत्पर्य्यायः । मधुवारः २ । इत्यमरः । २ । १० । ४१ ॥ मधुकोषः । इति शब्दचन्द्रिका ॥
मधुचोरः, पुं, (मधुवत् चोरं निर्य्यासोऽस्य ।) खर्ज्जूरवृक्षः । इति हारावली ॥
मधुखर्ज्जूरिका, स्त्री, (मधुर्मधुरा खर्ज्जूरी । ततः कन् टाप् । पूर्व्वस्य ह्रस्वत्वम् ।) खर्ज्जूरविशेषः । तत्पर्य्यायः । मधुकर्क्कटिका २ कोलकर्क्कटिका ३ कण्टकिनी ४ मधुफलिका ५ माध्वीमधुरा ६ मधुरखर्ज्जूरी ७ मधुखर्ज्जूरी ८ । अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । सन्तापपित्तशान्तिकारित्वम् । शिशिरत्वम् । जन्तुकर्तृत्वम् । बहुवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥
मधुगायनः, पुं, (मधु गायतीति । गै + "ण्युट् च ।" ३ । १ । १४७ । इति ण्युट् । यद्वा, मधौ वसन्ते गायन इति सप्तमीसमासः ।) कोकिलः । इति राजनिर्घण्टः ॥
मधुगुञ्जनः, पु, (मधु मधुरं गुञ्जनमस्य । पवनेरितशुष्कफलशब्दस्यास्य मधुरत्वात् तथात्वम् ।) शोभाञ्जनवृक्षः । इति शब्दमाला ॥
मधुघोषः, पु, (मधुर्मधुरो घोषो यस्य ।) कोकिलः । इति शब्दमाला ॥
मधुच्छदा, स्त्री, (मधुः मधुरश्छदः पर्णमस्याः । यद्वा मधु छादयति रसाधिक्येन पराभवतीति छद + णिच् । घः । धे ह्रस्वश्च ।) मयूरशिखा । इति भावप्रकाशः ॥ (तथास्या गुणाः ।
"नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुजं, क्ली, (मधुनो जातम् इति । जन् + डः ।) शिक्थकम् । इति राजनिर्घण्टः ॥
मधुजम्बीरः, पुं, (मधुर्मधुरो जम्बीरः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥
मधुजा, स्त्री, (मधोः मधुमेदसो जाता प्रादुर्भूता इति । जन् + डः टाप् ।) पृथिवी । इति शब्दचन्द्रिका ॥ (मधुनो जायते स्म इति । जन + ड ।) सिता । तत्पर्य्यायः । महाश्वेता २ । इति त्रिकाण्डशेषः ॥
मधुजित्, पुं, (मधुं मधुनामानं दैत्यं जितवानिति । जि + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते ।१।५।६७।
"शिवे ! किं वा कृत्वा विविदिषसि शक्तिं
मधुजितः ॥")
मधुतृणं, क्ली, (मधुरं तृणम् ।) इक्षुः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य इक्षुशब्दे ज्ञातव्याः ॥)
मधुतृणः, पुं, (मधुर्मधुरस्तृणः ।) इक्षुः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"महारसोऽसिपत्रः स्यान्मृत्युपुष्पो मधुतृणः ।
इक्षुर्वंशककान्तारभिरुपौण्ड्रादिभेदवान् ॥"
इति वैद्यकरत्नमालायाम् ॥
"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
मधुत्रयं, क्ली, (मधूनां मधुरद्रव्याणां त्रयम् ।) मधुरत्रयम् । इति राजनिर्घण्टः ॥ (मधुघृतसितात्रयम् ॥)
मधुदीपः, पुं, (मधौ वसन्ते दीप्यत इति । दीप् + कः ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥
मधुदूतः, पु, (मधोर्वसन्तस्य दूत इव । वसन्तागमनात् प्रागस्य मुकुलोद्गमदर्शनात् तथात्वम् ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥ (तथास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुदूती, स्त्री, (मधोर्वसन्तस्य दूतीव ।) पाटलावृक्षः । इति भावप्रकाशः ॥ (पर्य्यायादि विवरणमस्याः पाटलाशब्दे द्रष्टव्यम् ॥)
मधुद्रः, पु, (मधुने द्राति पुष्पात् पुष्पं गच्छतीति । द्रा + कः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥
मधुद्रवः, पुं, (मधुर्मधुरो द्रवो निर्य्यासोऽस्य ।) रक्तशिग्रुः । इति शब्दरत्नावली ॥
मधुद्रुमः, पुं, (मध्वर्थं मद्यार्थं मधूत्पादको वा द्रुमः । तत् पुष्पेभ्यो मद्यसम्भवादस्य तथात्वम् ।) वृक्षविशेषः । मौलगाछ इति भाषा ॥ तत्पर्य्यायः । मधूकः २ गुडपुष्पः ३ । इत्यमरः ।२।४।२७॥ (पर्य्यायान्तरमस्य यथा, वैद्यकरत्नमालायाम् ।
"मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुमः ॥")
मधुधातुः, पुं, (मधुना तत्पर्य्यायनाम्ना प्रसिद्धो धातुः ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुधूलिः, स्त्री, (मधुर्मधुरा धूलिरिव ।) खण्डः । इति हेमचन्द्रः । ३ । ६ ॥ खाँड् इति भाषा ॥
मधुधेनुः, स्त्री, (मधुरचिता धेनुः ।) दानार्थमध्वादिनिर्म्मितसवत्सा गौः । यथा,—
होतोवाच ।
"मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं मधुमयीं कृत्वा संपूर्णां घटषोडशैः ।
चतुर्थेन तथांशेन वत्सकं परिकल्पयेत् ॥
सौवर्णन्तु मुखं कृत्वा शृङ्गाण्यगुरुचन्दनैः ।
पृष्ठं ताम्रमयं कृत्वा सास्नां पट्टमयीं तथा ॥
पदानिक्षुमयान् कृत्वा सितकम्बलकम्बलाम् ।
मुखं गुडमयं कृत्वा जिह्वां शर्करया तथा ।
ओष्ठौ पुष्पमयौ तस्या दन्ताः फलमयाः स्तनाः ।
दर्भरोमधरा देवी रौप्यक्षुरविभूषिता ॥
प्रशस्तपत्रश्रवणा प्रमाणात् परितस्ततः ।
सर्व्वलक्षणसंयुक्ता सप्तधान्यान्विता तथा ॥
चत्वारि तिलपात्राणि चतुर्द्दिक्षुपि स्थापयेन ।
छादितां वस्त्रयुग्मेन घण्टाभरणभूषिताम् ।
कांस्योपदोहनां कृत्वा गन्धपुष्पैस्तु धूपिताम् ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
संक्रान्त्यासुपरागे च सर्व्वकालं यदृच्छया ॥
द्रव्यब्राह्मणसम्पत्तिं दृष्ट्वा तान्तु प्रदापयेत् ।
ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये ॥
आर्य्यावर्त्ते समुत्पन्ने वेदवेदाङ्गपारगे ।
तादृशाय प्रदातव्या मधुधेनुर्नरोत्तम । ॥
पुच्छदेशोपविष्टस्तु गन्धधूपादिपूजिताम् ॥
आच्छाद्य वस्त्रयुग्मेन मुद्रिकाकर्णपत्रकैः ॥
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः ।
जलपूर्व्वन्तु कर्त्तव्यं पश्चाद्दानं समर्पयेत् ॥
रसना सर्व्वदेवानां सर्व्वभूतहिते रता ।
प्रीयन्तां पितृदेवाश्च मधुधेनो ! नमोऽस्तु ते ॥
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
अहं गृह्णामि त्वां देवि ! कुटुम्बार्थे विशेषतः ।
कामं कामदुघे कामां मधुधेनो ! नमोऽस्तु ते ॥
मधुवातेतिमन्त्रेण दद्यादाशु त्रिकेण तु ।
दत्त्वा धेनुं महाराज ! छत्रकोपानहौ तथा ॥
एव यः कुरुते भक्त्या मधुधेनुं नराधिप ! ।
दत्त्वा दानं पायसेन मधुना च दिनं नयेत् ॥
ब्राह्मणोऽपि त्रिरात्रन्तु मधुपायससंयुतम् ।
एवं कृते तु यत् पुण्यं तन्निबोध नराधिप ! ॥
यत्र नद्यो मधुवहा यत्र पायसकर्द्दमाः ।

ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
तत्र भोगानथो भुक्त्वा ब्रह्मलोके स तिष्ठति ।
क्रीडित्वा सुचिरं कालं पुनर्म्मर्त्त्यमुपागतः ।
स भुक्त्वा विपुलान् भोगान् विष्णुलोकं स गच्छति ॥
दशपूर्व्वान् दशपरानात्मानञ्चैकविंशतिम् ।
नयते विष्णुसायुज्यं मधुधेनुप्रसादतः ॥
य इदं श्रद्धयायुक्त्या श्रावयेदपि मानवः ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति ॥"
इत्यादि वराहपुराणे श्वेतोपाख्याने मधुधेनुमाहात्म्यम् ॥

मधुनालिकेरकः, पुं, (मधुर्म्मधुरो नारिकेलः स्वार्थे कन् । रलयोरैक्यात् रस्य लत्वं लस्य च रत्वम् ।) मधुनारिकेलः । हरनारिकेल इति कोकणे प्रसिद्धम् । मोहानारल इति च ख्यातम् । तत्पर्य्यायः । माध्वीकफलः २ मधुफलः ३ अधिनतफलः ४ माचिकफलः ५ मृदुफलः ६ बहुकूर्च्चः ७ दृढफलः ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहतृष्णार्त्तिपित्तहारित्वम् । बलपुष्टिस्नेहकान्तिकारित्वम् । वीर्य्यविवर्द्धनत्वम् । रुच्यत्वञ्च । अपि च ।
"माध्वीकं नारिकेरं फलमतिमधुरं दुर्ज्जरं जन्तुकारि
स्निग्धं वातातिसारश्रमशमनमथ ध्वंसनं वह्निदीप्तेः ।
आमश्लेष्मप्रकोपं जनयति कुरुते चारुकान्तिं बलञ्च
स्थैर्य्यं देहस्य धत्ते घनमदनकलावर्द्धनं पित्तनाशम् ॥"
इति राजनिर्घण्टः ॥

मधुनी, स्त्री, क्षुपविशेषः । माकड छाना इति माकड़ चाउली इति च भाषा ॥ तत्पर्य्यायः । हुतमक्षा २ वायसोली ३ सुमङ्गला ४ । इति रत्नमाला ॥

मधुनेता, [ऋ] पुं, (मधु नयति पुष्पेभ्यः संगृह्णातीति । णीञ् + तृच् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

मधुपः, पुं, (मधु पिबतीति । पा + कः ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४०९ ।
"गव्यूतिमात्रमासन्ने देवीधामनि धैर्य्यवान् ।
धुन्वन् कराभ्यां मधुपान् धावति स्म स धीरधीः ॥"
मधु जलं पातीति । पा + कः । वारिरक्षके, त्रि । यथा, ऋग्वेदे । ५ । ४३ । ८ ।
"त्वं चिद्दर्शं मधुपं शयानमसिन्वं वव्रं मह्या ददुग्रः ।"
"मधुपं मधुनोऽम्भसः पातारं पालयितारम् ।"
इति तद्भाष्ये सायनः ॥ मधुपानकर्त्तरि च, त्रि । यथा, ऋग्वेदे । १ । १८० । २ ।
"स्वसा यद्वां विश्वगूर्त्तीभराति वाजायेट्टे मधुपाविषे च ।" "हे मधुपौ मधुरस्य सोमरसस्य पातारौ ।" इति तद्भाष्ये सायनः ॥)

मधुपर्कं, क्ली, (पृच् + घञ् । मधुना पर्क्को योगोऽत्र ।) दधिसंयुक्तमधु । तत्पर्य्यायः । महोदयः २ । इति हेमचन्द्रः । ३ । ४९७ ॥ अपि च ।
"मधुपर्कं दधिमधुघृतमपिहितं कांस्येनेति ।
अपिहितमाच्छादितम् ।" इत्येकादशीतत्त्वे कात्यायनसूत्रम् ॥

मधुपर्कः, पुं, (पृची + घञ् । मधुना पर्कः सम्पर्को यस्य मधुना संयोजनात् तथात्वम् ।) षोडशोपचारपूजान्तर्गतषष्ठोपचारः । तस्य प्रमाणं यथा,—
"दधि सर्पिर्ज्जलं क्षौद्रं सितैताभिस्तु पञ्चभिः ।
प्रोच्यते मधुपर्कस्तु सर्व्वदेवौघतुष्टये ॥
जलन्तु सर्व्वतः स्वल्पं सिता दधि घृतं समम् ।
सर्व्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत् ॥
तद्दद्यात् कांस्यपात्रेण रौक्मेनैतभवेन वा ।
ज्योतिष्टोमाश्वमेधादौ पूर्त्ते चेष्टे प्रपूजने ॥
मधुपर्कः प्रतिष्ठोऽयं सर्व्वदेवौघतुष्टिदः ।
धर्म्मार्थकाममोक्षाणां साधकः परिकीर्त्तितः ॥
मधुपर्कः सौख्यभोग्यतुष्टिपुष्टिप्रदायकः ॥"
इति कालिकापुराणे ६७ अध्यायः ॥
अपि च ।
"आज्यं दधिमधुमिश्रं मधुपर्कं विदुर्बुधाः ॥"
इति तन्त्रसारः ॥
तद्दाने मुद्रा यथा,—
"संयुक्तानामिकाङ्गुष्ठा तिस्रोऽन्याः संप्रसारिताः ।
मधुपर्के च सा मुद्रा विद्वद्भिः परिकीर्त्तिता ॥"
इति हरिभक्तिविलासः ॥

मधुपर्णिका, स्त्री, (मध्विव हितं पर्णमस्याः । ततः स्वार्थे कन् टाप् । अत इत्वञ्च ।) गम्भारीवृक्षः ।
(अस्याः पर्य्यायो यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ॥
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च ॥")
नीलीवृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्यायो यथा,—
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥")
वराहक्रान्ता । इति शब्दचन्द्रिका ॥ गुडूची । सुदर्शना । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्याये ।
"पृश्निपर्णी बलाशिग्रुश्वदंष्ट्रा मधुपर्णिका ॥"
अस्याः पर्य्यायो यथा,—
"सुदर्शना सोमवल्ली चक्राङ्का मधुपर्णिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुपर्णी, स्त्री, (मधु इव हितं पर्णं यस्याः । गौरादित्वात् ङीष् ।) गुडूची । इत्यमरः । २ । ४ । ८४ ॥ (अस्याः पर्य्यायो रत्नमालायां यथा,
"वत्सादनी छिन्नरुहा मधुपर्ण्यमृतामरा ।
कुण्डल्यमृतवल्ली च गुडूची चक्रलक्षणा ॥")
गम्भारीवृक्षः । नीलीवृक्षः । इति मेदिनी । ने १०५ ॥ मधुवीजपूरः । इति राजनिर्घण्टः ॥
(विकङ्कतवृक्षः । तत्पर्य्यायो यथा,—
"विकङ्कतः स्वादुकण्टः स्रुग्दारु मधुपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुपाका, स्त्री, (पाकेन मधुर्म्मधुरा । राजदन्तादित्वात् पूर्व्वनिपातः । टाप् ।) मधुसुता । इति राजनिर्घण्टः ॥

मधुपायी, [न्] पुं,(मधु पिबतीति । पा + णिनिः । ततः "आतोयुक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) भ्रमरः । इत्यमरटीकायां रामाश्रमः ॥ मधुपानकर्त्तरि, त्रि ॥

मधुपालिका, स्त्री, (मधु पालयतीति । पालि + ण्वुल् । टाप् । अत इत्वम् ।) गम्भारी । इति शब्दमाला ॥ (विवृतिरस्या गम्भारीशब्दे द्रष्टव्या ॥)

मधुपीलुः, पुं, (मधुर्म्मधुरः पीलुः ।) महापीलुः । इति राजनिर्घण्टः ॥

मधुपुरी, स्त्री, (मधोस्तन्नाम्नो दैत्यस्य पुरी ।) मथुरा । इति शब्दरत्नावली ॥ (यथा, भागवते । ७ । १४ । ३१ ।
"नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥")

मधुपुष्पः, पुं, (मधुप्रचुराणि पुष्पाण्यस्य ।) मधुद्रुमः । इति रत्नमाला ॥ (मधूकः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥")
शिरीषवृक्षः । अशोकवृक्षः । बकुलवृक्षः । इति राजनिर्घण्टः ॥

मधुपुष्पा, स्त्री, (मधुपुष्प + स्त्रियां टाप् ।) दन्तीवृक्षः । नागदन्तीवृक्षः । इति राजनिर्घण्टः ॥

मधुप्रियः, पुं, (मधु मद्यं प्रियमस्य ।) बलरामः । इति त्रिकाण्डशेषः ॥ भूमिजम्बुः । यथा,—
"नादेयी स्त्री नागरङ्गस्त्वकसुगन्धो मधुप्रियः ॥"
इति जटाधरः ॥ (मद्यप्रिये, त्रि ॥)

मधुफलः, पुं, (मधु मधुरं फलमस्य । यद्वा, मधु मद्यं फलाद् यस्य ।) मधुनारिकेलः । इति राजनिर्घण्टः ॥ विकङ्कतवृक्षः । इति शब्दचन्द्रिका ॥ (मधुरफलविशिष्टे, त्रि ॥)

मधुफलिका, स्त्री, (मधु मधुरं फलं यस्याः । मधुफल + संज्ञायां कन् । टाप् । अत इत्वञ्च ।) मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या मधुखर्ज्जूरिकाशब्दे ज्ञातव्याः ॥)

मधुबहुला, स्त्री, (मधुना मधौ वा बहुला ।) वासन्तीलता । इति राजनिर्घण्टः ॥

मधुभित्, [द्] पुं, (मधुं तन्नामानं दैत्यं भिनत्ति नाशयतीति । भिद् + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भागवते । ४ । २९ । ४० ।

"तस्मिन् मधुमत्तमुखरिता मधुभिश्चरित्र-
पीयूषपेषसरितः परितः स्रवन्ति ॥")

मधुमक्षिका, स्त्री, (मधुसञ्चायिका मक्षिका ।) कीटविशेषः । मौमाछी इति भाषा । तत्पर्य्यायः । सरघा २ । इत्यमरः । २ । ५ । २६ ॥

मधुमज्जा, [न्] पु, (मधुर्मधुरो मज्जा यस्य ।) आखोटवृक्षः । इति राजनिर्घण्टः ॥

मधुमती, स्त्री, (मधुर्मधुररसोऽस्त्यस्येति मतुप् । ङीप् ।) काश्मीरोत्तरः । नदीविशेषः । तस्या जलगुणाः । यथा, राजनिर्घण्टे ।

"चन्द्रभागागुणसाम्यदं जलं
किञ्च माधुमतमग्निदीपनम् ॥"

तपास्यनायिकाविशेषः । यथा,—
"तया मधुमती सिद्धिर्जायते नात्र संशयः ।
देवचेटी शतशतं तस्य वश्या भवन्ति ह ॥
स्वर्गे मर्त्ये च पाताले स यत्र गन्तुमिच्छति ।
तत्रैव चेटिकाः सर्व्वा नयन्ति नात्र संशयः ॥"
इति तन्त्रकलासदीपिकायां ३ पटलः ॥

(छन्दोभेदः । अस्या लक्षणं यथा, छन्दोमञ्जर्य्याम् । २ । १ ।
"ननगि मधुमती ।" अधिकं छन्दःशब्दे द्रष्टव्यम् ॥ समाधिसिद्धिभेदः । यथा, सर्व्वदर्शनसंग्रहे पातञ्जलदर्शने । "तत्र मधुमती नामाभ्यासवैराग्यादिवशादपास्तरजस्तमोलेशसुखप्रकाशमयसत्त्वभावनयाननवद्यवैशारद्यविद्योतनरूपक्तम्भरप्रज्ञाख्या समाधिसिद्धिः ॥ गङ्गा । यथा, काशीखण्डे । २६ । १३३ ।
"महोदया मधुमती महापुण्या सुदाकरी ॥"
इक्ष्वाकुपुत्त्रहर्य्यश्वस्य भार्य्या सा च मधोर्दैत्यस्य सुता । यथा, हरिवंशे । ९३ । १२—१३ ।
"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भवः ।
हर्य्यश्व इति विख्यातो महेन्द्रसमविक्रमः ॥
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता ।
देवी मधुमती नाम यथेन्द्रस्य शची तथा ॥"
मधुररसविशिष्टे, त्रि । यथा, ऋग्वेदे ।७।६९।३।
"स्वश्वायशसायातमर्व्वाग्दस्रानिधिं मधुमन्तं
पिबाथः ॥")

मधुमथनः, पु, (मधुं तन्नामानं दैत्यं मथ्नातीति । मन्थ+ल्यु ।) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । ६ । ९ । ३९ ।
"सर्व्वात्मनि निरतनिष्ठितमनसः कथमुह वा एतं मधुमथन ! पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्य्यावर्त्तः ॥")

मधुमल्ली, स्त्री, (मधुप्रधाना मल्ली ।) मालती । इति शब्दमाला ॥

मधुमस्तकं, क्ली, (मधुर्मधुररसः मस्तके उपरिभागे यस्य ।) पिष्टकविशेषः । यथा,—
"मधुनैलघृतैर्मध्ये वेष्टिताः समिताश्च याः ।
मधुमस्तकमुद्दिष्टं तस्याश्चापरिमार्जनम् ॥"
इति शब्दचन्द्रिका ॥
अस्य गुणाः पिष्टशब्दे द्रष्टव्याः ॥

मधुमाध्वीकं, क्ली, (मधु माधुर्य्ययुक्तं माध्वीकम् ।) मद्यम् । इत्यमरटीकायां भरतः ॥

मधुमारकः, पुं, (मधूनां मारकः । भक्षकत्वात्तथात्वमस्य ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुमूलं, क्ली, (मधु मधुरं मूलम् ।) आलुकम् । इति शब्दचन्द्रिका । मौ आलु इति भाषा ॥

मधुयष्टिः, स्त्री, (मधुर्मधुरा यष्टिः ।) इक्षुः । इति शब्दचन्द्रिका ॥

मधुयष्टिका, स्त्री, (मधुर्मधुरा यष्टिः । ततः कन् टाप् ।) यष्टिमधु । तत्पर्य्यायः । मधुकम् २ क्लीतकम् ३ यष्टिमधुका ४ । इत्यमरः । २ । ४ । १०९ ॥ मधुयष्टी ५ । इति भरतः ॥ (तथास्याः पर्य्यायान्तरम् ।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्थले जाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुयष्टी, स्त्री, (मधुयष्टि । कृदिकारादिति पक्षे ङीष् ।) मधुयष्टिका । इति शब्दमाला ॥

मधुरं, क्ली, (मधु+रः ।) वङ्गम् । इति राजनिर्घण्टः ॥ विषम् । इति मेदिनी । रे, १९५ ॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम् ॥)

मधुरः, पुं, (मधु माधुर्य्यं रातीति । रा+कः । यद्वा, मधुमाधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्कमधो रः ।"५।२।१०७ । इति रः ।) मिष्टरसः । इत्यमरः । १ । ५ । ९ ॥ स च इक्ष्वादौ लक्ष्यते । तत्पर्य्यायः । गौल्यः २ । इति राजनिर्घण्टः ॥ रसज्येष्ठः ३ गुल्यः ४ स्वादुः ५ मधूलकः ६ । इति हेमचन्द्रः । ६।२४ ॥ तस्य गुणाः । प्रीणनत्वम् । बल्यत्वम् । बृंहणत्वम् । वायुपित्तनाशित्वम् । रसायनत्वम् । गुरुत्वम् । स्निग्धत्वम् । चक्षुष्यत्वम् । तर्पणत्वम् । सरत्वञ्च । अन्यच्च ।
"रसो मधुरकः शीतो धातुस्तन्यबलप्रदः ।
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्यकफक्रिमीन् ॥
सोऽतियुक्तो ज्वरश्वासगलगण्डादिरोगकृत् ॥"
इति राजवल्लभः ॥
अपि च ।
"मधुरस्तु रसश्चिनोति केशान्
वपुषः स्थैर्य्यबलौजोवीर्य्यदायी ।
अतिसेवनतः प्रमेहशैत्य-
जडतामान्द्यमुखान् करोति दोषान् ॥"
इति राजनिर्घण्टः ॥
(यथा च वाभटे सूत्रस्थाने दशमेऽध्याये ॥
"रसान् मिति रूपाणि कर्म्माणि मधुरो रसः ।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम् ।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥
प्रशस्तो बृंहणो कण्ठ्यः स्तन्यसन्धानकृद्गुरुः ।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ॥
कुरुतेऽत्युपयोगेन समेदःकफजान् गदान् ।
स्थौल्याग्निसादसंन्यासमेहगण्डार्व्वुदादिकान् ॥"
अपिच ।
"तत्र मधुरो रसः शरीरसात्म्याद्रसरुधिरमांसमेदोऽस्थिमज्जौजः शुक्राभिवर्द्धन आयुष्यः षडिन्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नस्तृष्णाप्रशमनः त्वच्यः केश्यः कण्ठ्यः प्रीणनो जीवनस्तर्पणः स्नेहनः स्थैर्य्यकरः क्षीणक्षतसन्धानकरः घ्राणमुखकण्ठोष्ठतालुप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकानामिष्टतमः स्निग्धः शीतो गुरुश्च ।
स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानः स्थौल्यं मार्द्दवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाषमग्नेर्दौर्बल्यमास्यकण्ठमांसाभिवृद्धिं श्वासकासप्रतिश्यायालसकशीतज्वरानाहास्यमाधुर्य्यवमथुसंज्ञास्वरप्रणाशगलगण्डमालाश्लीपदगलशोफवस्तिधमनीगुदोपलेपाक्ष्यामयानभिष्यन्दमित्येवंप्रभृतीन् कफजान् विकारानुपजनयन्ति ।
"स्नेहनप्रीणनाह्लादमार्द्दवैरुपलभ्यते ।
मुखस्थो मधुरश्चास्यं व्याप्नुवँल्लिम्पतीव च ॥"
इति चरके सूत्रस्थाने २६ अध्याये ॥)
जीवकः । रक्तशिग्रुः । राजाम्रः । रक्तेक्षुः । गुडः । शालिः । इति च राजनिर्घण्टः ॥ (बीजपूरविशेषः । तत्पर्य्यायो यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
स्कन्दस्य सैनिकभेदः । यथा महाभारते । ९ । ४५ । ६९ ।
"मधुरः सुप्रसादश्च किरीटी च महाबलः ॥")

मधुरः, त्रि, (मधु माधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्कमधो रः ।" ५ । २ । १०७ । इति रः ।) मधुररसविशिष्टः । स्वादुः । (यथा, हितोपदेशे । १ । ७९ ।
"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः ॥")
प्रियः । इति मेदिनी । रे, १९५ ॥ पारिभाषिकमधुराणि यथा । विदग्धोक्तिः । प्रियाधरकुचादिः । शशी । स्त्रियः । बालोक्तिः । इति कविकल्पलता ॥

मधुरकः, पु, (मधुर+संज्ञायां कन् ।) जीवकवृक्षः । इत्यमरः । २ । ४ । १४२ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ४ अध्याये ।
"विपचेन्मधुरकप्रतीवापम् ॥")

मधुरकण्टका, स्त्री, (मधुराः कण्टका यस्याः ।) मत्स्यविशेषः । तत्पर्य्यायः । कञ्चली २ कञ्चला ३ अनन्ता ४ माध्वी ५ । इति शब्दरत्नावली ॥

मधुरजम्बीरः, पुं, (मधुरो जम्बीरः । नित्यकर्म्मधारयः ।) मधुजम्बीरः । तत्पर्य्यायः । मधुजम्भः २ मधुजम्भलः ३ रसद्रावी ४ शर्करकः ५ पित्तद्रावी ६ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । कफपित्तशोफश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

मधुरत्वचः, पुं, (मधुरा त्वचा यस्य ।) धववृक्षः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य धवशब्दे ज्ञातव्याः ॥)

मधुरत्रयं, क्ली, (मधुराणां त्रयम् ।) सिता माक्षिकं सर्पिश्च । इति राजनिर्घण्टः ॥

मधुरत्रिफला, स्त्री, (मधुरा त्रिफला ।) द्राक्षा-फलं काश्मर्य्यफलं खर्ज्जूरीफलञ्च । इति राज-निर्घण्टः ॥

मधुरनिस्वना, स्त्री, (मधुरो निस्वनो यस्याः ।) मधुरस्वरयुक्ता नारी । इति त्रिकाण्डशेषः ॥

मधुरफलः पुं, (मधुरं फलमस्य ।) राजवदरः । इति राजनिर्घण्टः ॥

मधुरवल्ली, स्त्री, (मधुरा वल्लीति नित्यकर्म्म-धारयः ।) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुरसः, पुं, (मधुर्म्मधुरो रसोऽस्य ।) इक्षुः । इति शब्दमाला ॥ तालः । इति राज-निर्घण्टः ॥

मधुरसा, स्त्री, (मधुर्म्मधुरो रसो यस्याः ।) मूर्व्वा । इत्यमरः । २।४। ८३ ॥ (अस्याः पर्य्यायो यथा,
"तेजनी पिलुनी देवी निक्तवल्ली पृथक्त्वचा ।
मधुश्रेणी मधुरसा स्रुवा गिरिहनीति च ॥"
इति वैद्यकरत्नमालायाम् ॥
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
द्राक्षा ॥ (तत्पर्य्यायो यथा,—
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि
कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दुग्धिका । इति मेदिनी । से, ६० ॥ गम्भारी । इति भावप्रकाशः ॥

मधुरस्रवा, स्त्री, (मधुरस्य मधुररसस्य स्रवो यस्याः ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्टः ॥

मधुरा, स्त्री, (मधुर+टाप् ।) शतपुष्पा । (अस्याः पर्य्यायो यथा,—
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहिता छत्रिकापि च ।
छत्रा शालेयशालीनौ मिश्रेया मधुरा मिशिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मिश्रेया । मथुरानगरी । मधुकर्कटिका । मेदा । मधूली । मधुयष्टिका । इति मेदिनी । रे, १६४ ॥ काकोली । शतावरी । बृहज्जीवन्ती । पालङ्क-शाकम् । इति राजनिर्घण्टः ॥

मधुराम्लकः, पुं, (मधुरश्चासौ अम्लश्चेति नित्य-कर्म्मधारयः । ततः स्वार्थे कन् ।) आम्रातकः । इति शब्दचन्द्रिका ॥

मधुराम्लफलः, पुं, (मधुरं मिष्टं आम्लवत् फलं यस्य ।) रेफलः । तत्पर्य्यायः । आरः २ । इति रत्नमाला ॥

मधुरालापा, स्त्री, (मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः ।) शारिका । इति राज-निर्घण्टः ॥

मधुरालाबुनी, स्त्री, (अलाबू+बाहुलकात् नक् । पृषोदरादित्वात् ह्रस्वः ङीप् च । ततः मधुरा चासौ अलाबुनी चेति नित्यकर्म्मधारयः ।) राजालाबुः । इति राजनिर्घण्टः ॥

मधुरिका, स्त्री, (मधुर+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च ।) क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । शालेयः २ शीतशिवः ३ छत्रा ४ मिशी ५ मिश्रेया ६ । इत्यमरः । २।४।१०५ ॥ सालेयः ७ मिसिः ८ मिभी ९ मिशिः १० । इति तट्टीका ॥ अवाक्पुष्पी ११ मङ्गल्या १२ मधुरा १३ । इति रत्नमाला ॥ मधुरी १४ । इति शब्द-रत्नावली ॥ अस्या गुणाः । रोचकत्वम् । शुक्र-कारित्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मधुरिपुः, पुं, (मधोरसुरविशेषस्य रिपुर्नाश-कत्वात् ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा गीतगोविन्दे । २ । ९ ।
"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपु-
रूपम् ॥)

मधुरेणुः, पुं, (मधुर्म्मधुरो रेणुरस्य ।) कटभी-वृक्षः । इति राजनिर्घण्टः ॥

मधुरोदकः, पुं, (मधुराणि उदकानि यस्य ।) जलसमुद्रः । स तु स्वादूदकमयः पुष्करद्वीप-वेष्टितः सप्तसमुद्राणां शेषसमुद्रः । इति जटाधरः ॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति । ला+कः ।) मद्यम् । इति शब्द-चन्द्रिका ॥ (निर्व्विषीकर्त्र्यां मधुविद्यायां स्त्री । यथा, ऋग्वेदे । १ । १९१ । १० ।
"सोचिन्नुनमरातिनो वयं मरामारे
अस्य योजनं हरिष्ठामधुत्वामधुला चकार ॥"
"हे विष । त्वा त्वां मधु अमृतं चकार विषस्य विषभावदूरीकरणेनामृतीचकारेति एषैव मधुला मधुदात्री निर्विषीकर्त्री मधुविद्या यद्वा- तदादित्यस्य मण्डले विषयोजनं तेन चामृती-करणं यदस्ति एषा मधुविद्या ॥" इति तद्भाष्ये सायनः ॥)

मधुलग्नः, पुं, (मधुर्म्मधुररसो लग्नोऽस्य ।) रक्त-शोभाञ्जनः । इति रत्नमाला ॥

मधुलता, स्त्री, (मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः ।) शूलीतृणम् । इति राज-निर्घण्टः ॥

मधुलिका, स्त्री, (मधुल+संज्ञायां कन् । टाप् अत इत्वञ्च ।) राजिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या राजिका शब्दे ज्ञातव्या ॥ स्कन्धा-नुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । १९ ।
"पृथुवक्त्रा मधुलिका मधुकुम्भा तथैव च ॥")

मधुलिट्, [ह्] पुं, (मधु लेढ़ि आस्वादयतीति । लिह्+क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, रघुवंशे । ९ । २९ ।
"मधुलिहां मधुदानविशारदा
कुरवका रवकारणतां ययुः ॥")

मधुलेही, [न्] पुं, (मधु लेढ़ीति । मधु+लिह् +णिनिः ।) भ्रमरः । इति शब्दरत्नावली ॥ (यथा, भट्टिकाव्ये । २ । ७ ।
"इत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ॥")

मधुलोलुपः, पुं, (मधुनि लोलुपः ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुवनं, क्ली, (मधुना तन्नाम्ना दैत्येन कृतं वनम् । मध्यपदलोपी कर्म्मधारयः ।) मथुराया वनविशेषः । यथा, श्रीभागवते ४ । ८ । ४२ ।
"तत्तात । गच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"
(मधुप्रधानं वनमिति ।) किष्किन्धायां सुग्री-वस्य वनविशेषः । इति रामायणे किष्किन्धा काण्डम् ॥ (यथा, महाभारते । ३ । २८२ । ७७ ।
"वालिना रक्षितं यत्तत् स्फीतं मधुवनं महत् ।
त्वया च प्लवगश्रेष्ठ । तद्भुङ्क्ते पवनात्मजः ॥")

मधुवनः, पुं (मधौ वनति शब्दायते इति । वन+अच् ।) कोकिलः । इति शब्दचन्द्रिका ॥

मधुवल्ली, स्त्री, (मधुप्रधाना वल्ली ।) यष्टी-मधु । क्लीतनकम् । इति राजनिर्घण्टः ॥ (कार-वेल्लकम् । तत्पर्य्यायो यथा,—
"तोयवल्ली राजवल्ली मधुवल्ली कारवेल्लकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुवारः, पुं, (मधुनो मद्यस्य वारः समयः पर्य्यायो वा ।) मधुक्रमः । इत्यमरः ।२।१०।४१॥ स च पुनः पुनर्मद्यपानपरिपाटी । इति तट्टी-कायां भरतः ॥

मधुवीजः, पुं, (मधु मधुरं वीजं यस्य ।) दाडिमः । इति राजनिर्घण्टः ॥ (गुणादिविवरणमस्य दाडिमशब्दे द्रष्टव्यम् ॥)

मधुवीजपूरः, पुं, (मधूनां मधुपूर्णानां वीजानां पूरः समूहो यत्र ।) मधुकर्कटिका । मीठा बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । मधुपर्णी २ मधुरकर्कटी ३ मधुरवल्ली ४ मधु-कर्कटी ५ मधुरफला ६ महाफला ७ वर्द्ध-माना ८ । अस्य गुणाः । मधुरत्वम् । शिशि-रत्वम् । दाहनाशित्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । पथ्यत्वम् । गुरुत्वम् । दुर्ज्जरत्वञ्च । इति राजनिर्घण्टः ॥

मधुव्रतः, पुं, (मधु मधुसञ्चयो व्रतं व्रतमिव सत-तानुशीलनीयं यस्य । यद्वा, मधु व्रतयति नियतं भुङ्क्ते इति । व्रति+अण् ।) भ्रमरः । इत्य-मरः ।२।५।२९ ॥ (यथा, भागवते ।३।२८।२८ ।
"मालां मधुव्रतवरूथगिरोपघुष्टाम् ॥"
मध्वर्थं व्रतं कर्म्म यस्य । उदकार्थकर्म्मणि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ५ ।
"मधुनो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ॥"
"मधुव्रते उदकार्थकर्म्माणौ ।" इति तद्भाष्ये सायनः ॥)

मधुशर्करा, स्त्री, (मधुजाता शर्करा ।) मधुजात-शर्करा । सिताखण्ड इति भाषा ॥ यथा,—

"माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणा तस्य शर्करा।
विशेषाद्दाहतृष्णा च तर्पणं क्षौददेहिनाम् ॥"

इति राजनिर्घण्टः ॥

("मधुशर्करा पुनश्छर्द्यतीसारहरी रूक्षाच्छेदनी प्रह्लादनी कषायमधुरा मधुरविपाका च।"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

मधुशाख:, पुं, (मधुर्माधुर्य्ययुक्ता शाखा यस्य।) मधुष्ठील:। इति शब्दचन्द्रिका ॥ (मधुरशाखाविशिष्टे, त्रि। यथा, वाजसनेयसंहितायाम्। २८। २०। "मधुशाख: सुपिप्पल:।"

"मधुरा रसवती शाखा यस्य।"

इति तद्भाष्ये महीधर: ॥)

मधुशिग्रु: पुं, (मधुप्रधान: शिग्रु:।) रक्तशोभाञ्जनवृक्ष:। इत्यमर:। २। ४। ३१ ॥ (शजिना। इति ख्यात:। यथा, सुश्रुते।१।३७। "वरुणार्त्तगलशिग्रुमधुशिग्रुतर्कारीत्यादि।"

तत्पर्य्यायो यथा,—

"सुरङ्गा स्वादुगन्धा स्यान्मधुशिग्रु: शोभाञ्जन: ॥"

इति वैद्यकरत्नमालायाम् ॥

तद्गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"मधुशिग्रु: सरस्तिक्त: शोफघ्नो दीपन: कटु:।")

मधुशेषं, क्ली, (मधुन: शेषो यत्र।) शिक्थकम्। इति राजनिर्घण्ट: ॥

मधुश्रेणी, स्त्री, (मधूनां मधुररसानां श्रेणिर्यत्र।) मूर्व्वा। इत्यमर: ।२।४।८४ ॥ (अस्या: पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥")

मधुश्वासा, स्त्री, (मधुर्मधुर: श्वासोऽस्मात्।) जीवन्तीवृक्ष:। इति राजनिर्घण्ट: ॥ (विवरणमस्या जीवन्तीशब्दे ज्ञातव्यम् ॥)

मधुष्ठील:, पु, (मधु मकरन्दं ष्ठीवति नि:क्षिपतीति। ष्ठीव् + इगुपधत्वात् क:। पृषोदरादित्वाद्वस्य लत्वम्।) मधूकवृक्ष:। इत्यमर:। २। ४। २८ ॥ (अस्य पर्य्यायो यथा,—

"मधूको गुडपुष्प: स्यान्मधुपुष्पो मधुद्रुम:।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलक: ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुसख:, पुं, (मधोर्वसन्तस्य सखा इति। "राजाह:-सखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कामदेव:। इति हलायुध: ॥

मधुसारथि:, पु, (मधुर्वसन्त: सारथिर्यस्य।) कामदेव:। इति त्रिकाण्डशेष: ॥

मधुसिक्थक:, पुं, (सिच्यतीति सिचे: थक। स्वार्थे कन्। मधु मधुमयं सिक्थकं यस्य।) स्थावरविषभेद:। इति हेमचन्द्र:। ४। २६४ ॥

मधुसुहृत्, [द्] पुं, (मधोर्वसन्तस्य सुहृत्।) कामदेव:। इति केचित् ॥

मधुसूदन:, पुं, (मधु पुष्परसं सूदयति भक्षयतीति। सूद् + णिच् + ल्यु:।) भ्रमर:। इति जटाधर: ॥ (मधुं तन्नामानं असुरं सूदयति नाशयतीति। सूद् + णिच् + ल्यु:।) श्रीकृष्ण:। इत्यमरटीकायां भरत: ॥ (पञ्चदये एक: श्लिष्टश्लोको यथा, छन्दोमञ्जर्य्याम्। ११। ३।

"वनेषु कृत्वा सुरभिप्रचारं
प्रकामसुग्धो मधुवासरेषु।
गायन् कलं क्रीडति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ ॥")

श्रीकृष्णपक्षे व्युत्पत्तिर्यथा,—

"सूदनं मधुदैत्यस्य यस्मात् स मधुसूदन:।
इति सन्तो वदन्तीशं वेदेभिन्नार्थमीप्सितम् ॥
मधु क्लीवञ्च माध्वीके कृतकर्म्मशुभाशुभे।
भक्तानां कर्म्मणाञ्चैव सूदनं मधुसूदन: ॥
परिणामाशुभं कर्म्म भ्रान्तानां मधुरं मधु।
करोति सूदनं यो हि स एव मधुसूदन: ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११०अध्याय: ॥

तस्य स्मरणफलम्।

"महाविपत्तौ संसारे य: स्मरेन्मधुसूदनम्।
विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्कर: ॥"

तत्रैव प्रकृतिखण्डे ३४ अध्याय: ॥

(सरस्वत्युपनामक: कविविशेष:। यथा, श्रीमद्भगवद्गीताटीकायाम्। "व्याख्यातं भगवत्पदै: प्रतिपदं श्रीशङ्कराख्यै: पुनर्व्विस्पष्टं मधुसूदनेन मुनिना स्वज्ञानसिद्ध्यै कृतम् ॥" अयं हि अद्वैतसिद्धिप्रस्थानभेदभगवद्गीताटीकामहिम्नस्तवटीकासिद्धान्तबिन्दुटीकाद्यनेकग्रन्थकर्त्ता ॥)

मधुसूदनी, स्त्री, (मधु सूदयतीति। मधु + सूद् + णिच् + ल्यु:। स्त्रियां ङीप्।) पालङ्कशाकम्। इति हेमचन्द्र:। ४। २५२ ॥

मधुस्रव:, पुं, (मधूनां मकरन्दानां स्रव: क्षरणं यस्मादिति।) मधूकवृक्ष:। मोरटलता। इति राजनिर्घण्ट: ॥

मधुस्रवा, स्त्री, (मधुन: स्रवो यस्या:।) मधुयष्टिका। इति जटाधर: ॥ जीवन्ती। इति शब्दचन्द्रिका ॥ (अस्या: पर्य्यायो यथा,—

"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) मूर्व्वा। हंसपदी। इति राजनिर्घण्ट: ॥

मधुस्रवा:, [स्] पु, (मधूनि स्रवति नि:क्षिपतीति। स्रु + कर्त्तरि असुन्।) मधूकवृक्ष:। इति जटाधर: ॥

मधुस्वर:, पुं, (मधुर्मनोहर: स्वरो ध्वनिर्यस्य।) कोकिल:। इति शब्दरत्नावली ॥

मधुहा, [न्] पुं, (मधुं तन्नामानमसुरं हन्तीति। हन् + क्विप्।) विष्णु:। इति हेमचन्द्र: ॥ (मधु हन्तीति। हन् + क्विप्। मधुनाशके, त्रि। यथा, महाभारते। ३। ३३। ६८।

"सर्व्वथा संहतैरेव दुर्व्वलैर्बलवानपि।
अमित्र: शक्यते हन्तुं मधुहा भ्रमरैरिव ॥"

प्रसहजातिपक्षिविशेष: ॥ यथा,—

"शशघ्नी भासकुररश्येनोलूककुलिङ्गका:।
धूमिका मधुहा चेति प्रसहा व्यापक्षिण: ॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)

मधूकं, क्ली, (मह्यतीति। मह् + "उलूकादयश्च।" उणा० ४। ४१। इति ऊक: निपातितश्च।) यष्टिमधु। इति राजनिर्घण्ट: ॥ (गुणादयोऽस्य यष्टिमधुशब्दे विज्ञेया: ॥)

मधूक:, पुं, (मह्यते मन्यते वेति। मह् + मन् वा + "उलूकादयश्च।" उणा० ४। ४१। इति ऊकप्रत्ययो निपातितश्च।) वृक्षविशेष:। महुल इति मौल इति महुया इति च भाषा ॥ तत्पर्य्याय:। गुडपुष्प: २ मधुद्रुम: ३ वानप्रस्थ: ४ मधुष्ठील: ५। इत्यमर:। २। ४। २८ ॥ मधुक: ६ मधु: ७ मधुपुष्प: ८। इति शब्दरत्नावली ॥ मधुस्रव: ९। इति जटाधर: ॥ मधुवृक्ष: १० रोधपुष्प: ११ माधव: १२। (यथा, महाभारते। १५। २५। ११।

"चित्राङ्गदा चैव नरेन्द्रकन्या
येषा सवर्णाश्रमधूकपुष्पै: ॥")

अस्य गुणा:। मधुरत्वम्। शीतत्वम्। पित्तदाहश्रमापहत्वम्। वातलत्वम्। जन्तुदोषघ्नत्वम्। वीर्य्यपुष्टिविवर्द्धनत्वञ्च। अस्य पुष्पगुणा:। मधुरत्वम्। हृद्यत्वम्। हिमत्वम्। पित्तविदाहकारित्वञ्च। अस्य फलगुणा:। वातामयपित्तनाशित्वम्। ज्ञेयं मधूकद्वयमेवमेतत्। इति राजनिर्घण्ट: ॥ अपि च।

"मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम्।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत्।
अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षत-
क्षयान् ॥"

इति भावप्रकाश: ॥

अपरञ्च।

"मधूकपुष्पञ्चाहृद्यं तर्पणं बृंहणं परम्।
मधूकस्य फलं पक्वं वातपित्तप्रणाशनम् ॥"

तन्मज्जगुणास्तत्फलगुणवत्। यथा,—

"यस्य यस्य फलस्यैव वीर्य्यं भवति यादृशम्।
तस्य तस्यैव वीर्य्येण मज्जानमभिनिर्द्दिशेत् ॥"

तस्य त्वग्गुणा:।

"मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम् ॥"

इति राजवल्लभ: ॥

मधूच्छिष्टं, क्ली, (मधुन: उच्छिष्टमवशिष्टम्।) मधवशिष्टम्। मोम इति भाषा ॥ (यथा, चरकसंहितायाम्। १६। २५।

"शैलेयकमांसीतगरकुष्ठरसैन्धवादिवञ्जीजम्।
मधुररसमधूच्छिष्टानि चोरकश्चेति जीवस्य ॥")

तत्पर्य्याय:। सिक्थकम् २। इत्यमर:। २। ९। १०७ ॥ शिक्थकम् ३ शिक्थम् ४। इति शब्दरत्नावली ॥

मधूत्थितं, क्ली, (मधुन: उत्थितम्।) सिक्थकम्। इति राजनिर्घण्ट: ॥

मधूत्सवः, पुं, (मधोश्चैत्रस्य उत्सवो यत्र ।) चैत्री पूर्णिमा । इति जटाधरः ॥ (यथाभिज्ञानशकुन्तले । ६ ।

"कञ्चुकी । प्रविश्य । सक्रोधम् । मा तावत् नात्मने ! देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ॥")

मधूपघ्नं, क्ली, (मधोस्तन्नाम्नो दैत्यस्य उपघ्नः आश्रयः । अभिधानात् क्लीवत्वम् ।) मथुरा । इति हेमचन्द्रः । ४ । ४४ ॥

मधूपघ्नः, पुं, (मधोस्तन्नाम्नो दैत्यस्य उपघ्नः आश्रयः ।) मथुरा । इति जटाधरः ॥ (यथा, रघुवंशे । १५ । १५ ।

"स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः । वनात् करमिवादाय सत्वराशिमुपस्थितः ॥")

मधूलः, पुं, (मधु उरति प्राप्नोतीति । मधु+उर गतौ सौत्रधातुः+कः । रस्य लत्वम् ।) जलजगिरिजमधूकवृक्षौ । इति जटाधरः ॥ (अस्य पर्यायो यथा, वैद्यकरत्नमालायाम् ।

"गौरशाको मधूलोऽब्धो गिरिजः स्वल्पपत्रकः ॥")

मधूलकः, पुं, (मधूल+स्वार्थे कन् ।) जलजमधूकवृक्षः । तत्पर्यायः । दीर्घपत्रकः २ । इति जटाधरः ॥ गौरशाकः ३ मधूलः ४ स्वल्पपत्रकः ५ । इति रत्नमाला ॥

"स्यान्मधूके तु जलजे गिरिजेऽपि मधूलकः ॥" इति शब्दरत्नावली ॥

(पर्यायान्तरमस्य यथा,—

"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः । वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

अस्य गुणाः । मधूकगुणतुल्याः । मधुररसः । इति हेमचन्द्रः ।४।२४॥ (क्लीवलिङ्गेऽपि दृश्यते । यथा, अथर्व्ववेदे । १ । ३४ । २ ।

"जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ॥") तद्वति, त्रि ॥

मधूलिका, स्त्री, (मधूल+कन् । स्त्रियां टाप् अत इत्वञ्च ।) मूर्व्वा । इत्यमरः । २।४। ८४ ॥ (अस्याः पर्य्यायो यथा,—

"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा । मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥" यष्टीमधु । तत्पर्य्यायो यथा,—

"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा । अन्यत्क्लीतनकन्तत् भवेत्तोये मधूलिका ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधूली, स्त्री, (मधूल+गौरादित्वात् ङीष् ।) क्लीतनकम् । मधुकर्कटी । आम्रः । इति राजनिर्घण्टः ॥

मध्यं, क्ली, (मन्यते इति । मन+"अघ्न्यादयश्च ।" उणा० ४।११२। इति यक्प्रत्ययेन निपातितः ।) दशान्त्यसंख्या । शतखारबसंख्या । इति हेमचन्द्रः ॥ (यथा, महाभारते । २ । ६१ । ४ ।

"मध्यश्चैव परार्द्धञ्च सपरञ्चात्र पण्यताम् ॥")

अवसानम् । तत्पर्य्यायः । विरामः २ । इति त्रिकाण्डशेषः ॥ मन्दत्वशीघ्रत्वोभयेतरलययुक्तनृत्यविषयकगमनविशेषः । इति भरतः ॥ लयविशेषः । इति मधुः ॥ मध्यमावृत्तिः । इति शाङ्गः ॥ यथा, अमरे । १ । ६ । ७६ ।

"विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ॥"

मध्यः, पु, क्ली, (मन+यक् । नस्य च धः ।) देहमध्यभागः । माजा इति भाषा ॥ तत्पर्य्यायः । मध्यमम् २ अवलग्नम् ३ । इत्यमरः । २ । ६ । ७६ ॥ विलग्नम् ४ । इति मेदिनी । मे, ५४ ॥ (यथा,भट्टिकाव्ये । ३ । १६ ।

"दधाना वलिभं मध्यं कर्णजाहविलोचना ॥" मध्यभागमात्रम् । यथा, मनुः । ४ । ३७ ।

"नैवेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन । नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥"

"आयुष्कालस्य मध्यमावस्थाविशेषः कालः । षोड़शसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति । तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्ध्वमीषत् परिहाणिर्य्यावत् सप्ततिरिति ॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यः, पुं, (मन+यक् । नस्य धः ।) ग्रहस्फुटसाधकाङ्कविशेषः । स च अहर्गणजाततद्देशान्तरादिसंस्काररहिताङ्करूपग्रहः । इति ज्योतिषम् ॥

मध्यः, त्रि, (मन्यते इति । मन+यक् । नस्य च धः ।) न्याय्यः । अन्तरः । अधमः । इति शब्दरत्नावली ॥ मध्यमः । यथा,—

"उत्तमाधममध्यानि बुद्ध्वा कार्य्याणि पार्थिव । उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥" इति मात्स्ये ८८ अध्यायः ॥

मध्यगन्धः, पुं, (मध्ये फलाभ्यन्तरे गन्धोऽस्य ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मध्यतः, [स्] व, (मध्य+तसिल् ।) मध्यात् । मध्ये । इति सिद्धान्तकौमुदी ॥ स्यादेः स्थाने तसादयो ये आदेशास्तेषामदन्तत्वमव्ययत्वमिति प्राञ्चः । तेन कुतः कुतः आगतं कौतस्कुतम् । इत्यत्राव्ययत्वात् टिलोपः । इति दुर्गादासः ॥

मध्यदेशः, पुं, (मध्यश्चासौ देशश्चेति ।) देशविशेषः । तत्पर्य्यायः । मध्यमः २ । इत्यमरः ॥ तस्य सीमा यथा, मनुः । २ । २१ ।

"हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥" विनशनं तीर्थभेदः । मां ध्यायति स्मरतीति कंसति मह्यां इकारवानिति शाङ्गे । मनो धश्चेति यप्रत्यये नस्य धे सति चतुर्थमात्रवानिति रूपरत्नाकरः । इति तट्टीकायां भरतः ॥

मध्यदेश्यः, त्रि, (मध्यदेशे भवः इति यत् ।) मध्यदेशोद्भवः । यथा, वामनपुराणे १३ अः ॥

"शुकाश्चैव संसयका मध्यदेश्या जनास्त्विमे ॥"

मध्यन्दिनः, पुं, (दिनस्य मध्यं राजदन्तादित्वात् मध्यशब्दस्य पूर्व्वनिपातः । पृषोदरादित्वात् मकारागमः । मध्यन्दिनं पुष्पविकासकालेनास्त्यस्तीति । अच् ।) बन्धूकवृक्षः । इति राजनिर्घण्टः ॥ (मध्याह्ने, क्ली, यथा, मनुः ।४।१३१।

"मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ॥")

मध्यपञ्चमूलकं, क्ली, (मध्यं मध्यमं पञ्चमूलकम् ।) पञ्चमूलपाचनविशेषः । यथा,—

"बला पुनर्नवैरण्डसूर्पपर्णीद्वयेन तु । एकत्र योजितैनैव स्यान्मध्यं पञ्चमूलकम् ॥" इति राजनिर्घण्टः ॥

मध्यमं, पुं, क्ली, (मध्ये भवः । मध्य+"मध्यान्मः ।" ४ । ३ । ८ । इति मः ।) देहमध्यभागः । इत्यमरः । २ । ६ । ७६ ॥

मध्यमः, पु, (मध्ये भवः । मध्य+मः ।) सप्तस्वराणां मध्ये पञ्चमस्वरः । इत्यमरः ।१।७।१ ॥ गानशास्त्रमते चतुर्थस्वरः । स तु क्रौञ्चस्वरतुल्यः । अस्योच्चारणस्थानं वक्षः । व्याकरणमते अधरः । अयं विप्रवर्णः । अस्य संज्ञा अन्तरः । अर्थात्चतुःस्वरमिलितः । तस्य नामाश्चतुर्विंशतिः तेषां प्रत्येकं द्वात्रिंशद्भेदेन ७६८ तानाः भवन्ति । इति संगीतशास्त्रम् ॥ उपपतिभेदः । तस्य लक्षणम् । प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः । यथा,—

"आस्यं यद्यपि हास्यवर्जितमिदं लास्येन हीनं वचो नेत्रे शोणसरोजकान्तिरुचिरे क्वापि चर्च्चा क्षीयते । मालायाः करगोचरे मकरिकारम्भः कुचाम्भोजयोर्धूपः कुन्तलधोरणीषु सुमनोः सायन्तनो दृश्यते ॥" इति रसमञ्जरी ॥

मध्यदेशः । इत्यमरः ॥ ग्रहाणां सामयिकसंज्ञाविशेषः । यथा,—

"दृग्वरचक्रहृतो दिनसञ्चयः क्व च हृतो भगणादिफलं ग्रहः । दशशिरःपुरमध्यमभास्करे क्षितिजसन्निधिगे सति मध्यमः ॥" इति सिद्धान्तशिरोमणिः ॥

ग्रामभेदः । रागभेदः । इति धरणिः ॥

मध्यमः, त्रि, (मध्ये भवः । मध्य+"मध्यान्मः ।४। ३ । ८ । इति मः ।) मध्यभवः । इति मेदिनी । मे, ४६ ॥ (यथा, मनौ । ८ । ११२ ।

"तनोऽर्द्धं मध्यमस्य स्यात् तुरीयन्तु यवीयसः ॥") तत्पर्य्यायः । माध्यमम् २ मध्यमीयम् ३ माध्यन्दिनम् ४ । इति हेमचन्द्रः ॥ (वयोमध्यसमयः ।

"वयश्चतुर्व्विधं प्रोक्तं मध्यमाधममुत्तमम् । हीनञ्च हारीत तथा च तानि वक्ष्यामि साम्प्रतम् ॥

पञ्चिमान्तः अमघोषः बालश्रीः सुकुमारकः ।
एतेषां मध्यमा संज्ञा प्रोच्यते वैद्यकागमे ।
मध्यमः सप्ततिं यावत् परतो वृद्ध उच्यते ॥”
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥
“बाल्ये विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥”
इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यमपाण्डवः, पुं, (मध्यमश्चासौ पाण्डवश्चेति । तस्य पूर्व्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात्तथात्वम् ।) अर्ज्जुनः । इति जटाधरः ॥ (यथा, किरातार्ज्जुनीये । १ । ४६ । श्लोकस्य टीकायां मल्लिनाथः ।
“नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजः ॥”)

मध्यमलोकः, पुं, (मध्यमश्चासौ लोकश्चेति कर्म्मधारयः ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । २ । १६ ।
“तां देवतां पित्रतिथिक्रियार्था-
मन्वग् ययौ मध्यमलोकपालः ॥”
“मध्यमलोकपालः भूपालः ।” इति तट्टीकायां मल्लिनाथः ॥)

मध्यमभृतकः, पुं, (मध्यमश्चासौ भृतकश्चेति ।) कृषीबलभृतकः । कृषाण इति भाषा ॥ यथा,—
“उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीबलः ।
अधमो भारवाही स्यादित्येष त्रिविधो भृतः ॥”
इति मिताक्षरा ॥

मध्यमसंग्रहः पुं, (मध्यमश्चासौ संग्रहश्चेति ।) स्त्रीसंग्रहणाख्यविवादविशेषः । स तु गन्धमाल्यवस्त्रभूषादिप्रेरणरूपः । यथा । प्रथमसाहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विवृतम् ।
“त्रिविधं तत् समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकालभाषाभिर्निर्जने च परस्त्रियाः ।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम् ॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ।
प्रलोभनञ्चान्नपानैर्मध्यमं समुदाहृतम् ॥
सहासनं विविक्तेषु परस्परमपाश्रयः ।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम् ॥”
इति मिताक्षरायां स्त्रीसंग्रहणप्रकरणम् ॥

मध्यमसाहसं, क्ली, (सहसा क्रियमाणं कृतं वा । सहसा + अण् । मध्यमञ्च तत् साहसञ्चेति ।) बलदर्पितेन वासःपश्वन्नपानादीनामङ्गाक्षेपोपमर्दादिरूपं सहसा क्रियमाणं कर्म्म । यथा,
“फलमूलोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गाक्षेपोपमर्द्दाद्यैः प्रथमं साहसं स्मृतम् ॥
वासःपश्वन्नपानानां गृहोपकरणस्य च ।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥”
इति मिताक्षरा ॥

मध्यमसाहसः, पुं, (मध्यमश्चासौ साहसश्चेति ।) दण्डविशेषः । स तु पञ्चशतपणरूपः । यथा,—
“पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः ॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् ।
भयाद्वौ मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम् ॥”
इति मानवे साक्षिप्रकरणे ८ अध्यायः ॥

मध्यमा, स्त्री, (मध्यम + टाप् ।) दृष्टरजस्का नारी । कर्णिका । अङ्गुलिभेदः । चापरस्कन्दः । इति मेदिनी । मे, ५० ॥ हृदयोत्थित बुद्धियुक्तनादरूपवर्णः । यथा, अलङ्कारकौस्तुभः ॥
“पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।”
स्वीयाद्यन्तर्गतनायिकाभेदः । तस्या लक्षणम् । हिताहितकारिण्यपि प्रियतमे हिताहितकारिणी या सा । अस्यास्तु व्यवहारानुसारिणी चेष्टा । इति रसमञ्जरी ॥ (जम्बुभेदः । तत्पर्य्यायो यथा,—
“सूक्ष्मकृष्णफलाजम्बुर्दीर्घपत्रा च मध्यमा ॥”
इति वैद्यकरत्नमालायाम् ॥)

मध्यमिका, स्त्री, (मध्यमैव । कन् टापि अत इत्वञ्च ।) दृष्टरजस्का नारी । इति रत्नावली ॥

मध्यमीयं, त्रि, (मध्यमे भवं मध्यमस्येदं वेति । “गहादिभ्यश्च ।” ४ । २ । १३८ । इति छः ।) मध्यमम् । इति हेमचन्द्रः । ६ । ८६ ॥

मध्यमेश्वरः, पुं, (मध्यमस्य स्थानस्य ईश्वरः ।) काशीस्थशिवलिङ्गविशेषः । यथा,—
“धन्यास्तु खलु ते विप्रा मन्दाकिन्यां कृतोदकाः ।
अर्च्चयन्ति महादेवं मध्यमेश्वरमीश्वरम् ॥
स्नानं दानं तपः श्राद्धं पिण्डनिर्व्वापणं त्विह ।
एकैकशः कृतं विप्राः पुनन्त्यासप्तमं कुलम् ॥
सन्निहत्या उपस्पृश्य राहुग्रस्ते निशाकरे ।
यत् फलं लभते मर्त्यस्तस्माद्दशगुणं त्विह ॥
एवमुक्ता महायोगी मध्यमे शान्तिकं प्रभुः ।
उवास सुचिरं कालं पूजयन् वै महेश्वरम् ॥”
इति कौर्म्मे ३१ अध्यायः ॥

मध्ययवः, पुं, (मध्यो मध्यमो यवः ।) षट्श्वेतसर्षपपरिमाणम् । इति केचित् ॥

मध्यरात्रः, पुं, (मध्यं रात्रेः “पूर्व्वापराधरेति ।” २ । २ । १ । इति समासः । “अहःसर्व्वैकेति ।” इति ५ । ४ । ८७ । समासान्तोऽच् पुंस्त्वञ्च ।) निशीथः । अर्द्धरात्रः । इति हलायुधः ॥ (यथा मनौ । ४ । १०९ ।
“उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने ।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् ॥”)

मध्यलोकः, पुं, (मध्यश्चासौ लोकश्चेति ।) पृथिवी । मर्त्यलोक इति यावत् । वक्ष्यमाणशब्दार्थदर्शनात् ॥

मध्यलोकेशः, पुं, (मध्यलोकानां मर्त्यानां ईशः ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥

मध्यस्थः, त्रि, (मध्ये वादिप्रतिवादिनोरन्तरे तिष्ठतीति । स्था + कः ।) मध्यस्थायी । तत्पर्य्यायः । निष्टुः २ । इति त्रिकाण्डशेषः ॥ (यथा कथासरित्सागरे । १० । १९१ ।
“निषिद्धवत्या मध्यस्थात् दस्युनाकन्दपूर्णया ।
स श्रीदत्तस्तया सार्कं तन्मन्दिरमथाविशत् ॥”
यथा च भागवते । ६ । १६ । ५ ।
“बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ।
सर्व्व एव हि सर्व्वेषां भवन्ति क्रमशो मिथः ॥”)
उभयपक्षहीनः । यथा,—
“श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः ।
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥”
इति श्रीभागवते १० स्कन्धे ७८ अध्यायः ॥
स्वार्थाविरोधेन परार्थघटकः । यथाह प्राचः ।
“ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥”

मध्यस्थलं, क्ली, (मध्यं स्थलम् । शरीरमध्यवर्त्तित्वात्तथात्वम् ।) कटिदेशः । यथा,—
“कुचौ मरिचसन्निभौ सुरजमध्यमध्यस्थली ।
अहो तिमिरमञ्जरी सहचरी नरीनृत्यते ॥”
इत्युद्भटः ॥

मध्या, स्त्री, (मध्य + टाप् ।) मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ नायिकाविशेषः । अस्या लक्षणम् । समानलज्जामदना । एषैव चाति-प्रश्रयादतिविश्रब्धनवोढा ॥ अस्याश्चेष्टा । सागसि प्रेयसि धैर्य्ये वक्रोक्तिरधैर्य्ये परुषवाक् । यथा,—
“स्वापे प्रियाननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः ।
इत्थं सरोरुहमुखी परिचिन्तयन्ती
स्वापं विधातुमपि हातुमपि प्रपेदे ॥”
मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे । धीरा अधीरा धीराधीरा चेति । इति रसमञ्जरी ॥

मध्याह्नः, पुं, (मध्यं अह्नः समासान्तः टच् । “अह्नोऽह्न एतेभ्यः ।” ५ । ४ । ८८ । इत्यह्नादेशः पुंस्त्वञ्च ।) अह्नोऽष्टममुहूर्त्तात्मकमध्यभागः । स च कुतपकालस्य संज्ञाविशेषः । यथा,—
“अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा ।
तत्राष्टमो मुहूर्त्तो यः सः कालः कुतपः स्मृतः ।
मध्याह्ने सर्व्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥
मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम् ।
रौप्यं दर्भास्तिला गावो दौहित्रं चाष्टमः स्मृतः ॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।
अष्टावेते यतस्तस्मात् कुतपा इति संस्मृताः ॥”
इति मत्स्यपुराणे श्राद्धकल्पे २२ अध्यायः ॥
त्रिधाविभक्तदिनमध्यभागः । स च दशदण्डात् परं दशदण्डरूपः । इति शब्दयुक्तः अमरोक्तञ्च ॥ पञ्चधाविभक्तदिनतृतीयभागः । स तु द्वादश-

दङ्कात् परवह्रदङ्कात्मकः । इति मार्कण्डेयमहा-पुराणम् ॥ अत्र नियमस्त्रिंशद्दण्डदिनाभिप्रायेण न्यूनाधिके न्यूनाधिककालो ज्ञेयः ॥ * ॥ मध्याह्न-कृत्यं यथा,—

"ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् ।
पुष्पाक्षतं कुशतिलान् गोमयं शुद्धमेव च ॥
नदीषु देवखातेषु तडागेषु सरित्सु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
परकीयनिपानेषु न स्नायाद्वै कदाचन ।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा सम्भवे पुनः ॥
मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि ।
अधश्च तिसृभिः कार्य्यं पादौ षड्भिस्तथैव च ॥
मृत्तिका च समुद्दिष्टा त्वार्द्रामलकमात्रिका ।
गोमयस्य प्रमाणन्तत्तेनाङ्गं लेपयेत्ततः ॥
लेपयित्वाथ तीरस्थस्तल्लिङ्गैरेव मन्त्रतः ।
प्रक्षाल्याचम्य विधिवत्ततः स्नायात् समाहितः ॥
अभिमन्त्र्य जलं मन्त्रैस्तल्लिङ्गैर्वारुणैः शुभैः ।
भावपूतस्तदव्यक्तं ध्यायन् वै विष्णुमव्ययम् ॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः ॥
प्रेक्ष्य ओँकारमादित्यं त्रिर्निमज्जेज्जलाशये ।
पुनः पुनरथाचामेत् मन्त्रेणानेन मन्त्रवित् ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृ-तम् ॥
द्रुपदां वा त्रिरभ्यस्येत् व्याहृतिप्रणवान्विताम् ।
सावित्रीं वा जपेद्विद्वांस्तथा चैवाघमर्षणम् ॥
ततः सम्मार्ज्जनं कुर्य्यादापोहिष्ठामयो भुवः ।
इदमापः प्रवहत व्याहृतिभिस्तथैव च ॥
ततोऽभिमन्त्र्य तत् तोयमापोहिष्ठादिमन्त्रकैः ।
अन्तर्ज्जले त्रिरावर्त्त्य सर्व्वपापात् प्रमुच्यते ॥
अपः पाणौ समादाय जप्त्वा वै मार्ज्जने कृते ।
विन्यस्य मूर्द्ध्नि तत्तोयं मुच्यते सर्व्वपातकैः ॥
यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदनम् ॥
अथोपतिष्ठेदादित्यं मूर्द्ध्नि पुष्पान्विताञ्जलिम् ।
प्रक्षिप्यालोकयेद्देवमूर्द्ध्वं यं वेदिकं परम ॥
उदुत्यं चित्रं देवानामित्यादिभिरनन्यधीः ।
हंसः शुचिषदेतेन सावित्र्या च विशेषतः ॥
अन्यैश्च वैदिकैर्मन्त्रैः सौरैः पापप्रणाशनैः ।
सावित्रीं वै जपेत् पश्चाज्जपयज्ञः स वै स्मृतः ॥
विविधानि पवित्राणि गुह्यविद्यास्तथैव च ।
शतरुद्रियमथर्व्वशिरः सौरमन्त्रांश्च शक्तितः ॥
प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः ।
तिष्ठंश्चेदीक्षमाणोऽर्कं जाप्यं कुर्य्यात् समा-हितः ॥
स्फाटिकेन्द्राक्षरुद्राक्षपुत्त्रजीवसमुद्भवैः ।
कर्त्तव्या त्वक्षमाला वा उत्तरादुत्तमा स्मृता ॥
जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः ।
न कम्पयेच्छिरोग्रीवां दन्तान्नैव प्रकाशयेत् ॥
गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभं यतः ।
एकान्तेषु शुभे देशे तस्माज्जप्यं समाचरेत् ॥
चण्डालाशौचपतितान् दृष्ट्वाचम्य पुनर्जपेत् ।
तैरेव भाषणं कृत्वा स्नात्वा चैव जपेद्बुधः ॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान् मन्त्रान् शक्तितो वै पावमानीस्तु कामतः ॥
यदि स्यात् क्लिन्नवासा वै वारिमध्यगतो जपेत्
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥
प्रदक्षिणं समावृत्य नमस्कृत्वा ततः क्षितौ ।
आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाच-रेत् ॥
ततः सन्तर्पयेद्देवानृषीन् पितृगणान् क्रमात् ।
आदावोङ्कारमुच्चार्य्य नमोऽन्ते तर्पयामि च ॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः ।
तिलोदकैः पितॄन् भक्त्या स्वसूत्रोक्तविधानतः ॥
अन्वारब्धेन सव्येन पाणिना दक्षिणेन च ।
देवर्षीं स्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄन् ॥
यज्ञोपवीती देवानां निवीती ऋषितर्पणम् ।
प्राचीनावीती पित्रे तु स्वेन तीर्थेन भावतः ॥
निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः ।
स्वैर्मन्त्रैरर्च्चयेद्देवान् पुष्पैः पत्रैरथाम्बुभिः ॥
ब्रह्माणं शङ्करं सूर्य्यं तथैव मधुसूदनम् ।
अन्यांश्चाभिमतान् देवान् भक्त्या चाक्रोधनोऽत्वरः ॥
प्रदद्याद्वाथ पुष्पाणि सूक्तेन पुरुषेण तु ।
आपो वा देवताः सर्व्वास्तेन सम्यक् समर्च्चिताः ॥
नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक् ।
न विष्ण्वाराधनात् पुण्यं विद्यते कर्म्म वैदिकम् ।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥
तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण तु ।
नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि ॥
निवेदयेत् स्वमात्मानं विष्णावमलतेजसि ।
तदात्मा तन्मनाः शान्तस्तद्विष्णोरितिमन्त्रतः ॥
अथवा देवमीशानं भगवन्तं सनातनम् ॥
आराधयेन्महादेवं भावपूतो महेश्वरम् ॥
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः ।
ईशानेनाथवा रुद्रैस्त्र्यम्बकेन समाहितः ॥
पुष्पैः पत्रैरथाद्भिश्च चन्दनाद्यैर्महेश्वरम् ।
उक्त्वा नमः शिवायेति मन्त्रेणानेन योजयेत् ॥
नमस्कुर्य्यान्महादेवमृतं सत्यमितीश्वरम् ।
निवेदयीत स्वात्मानं यो ब्रह्मणमितीश्वरे ॥
प्रदक्षिणं द्विजः कुर्य्यात् पञ्च ब्रह्माणि वै जपन् ।
ध्यायेत देवमीशानं व्योममध्यगतं शिवम् ॥
अथावलोकयेदर्कं हंसः शुचिषदित्यृचा ।
कुर्य्यात् पञ्च महायज्ञान् गृहं गत्वा समाहितः ॥
देवयज्ञं पितृयज्ञं ऋषियज्ञं तथैव च ।
मानुष्यं ब्रह्मयज्ञञ्च पञ्चयज्ञान् प्रचक्षते ॥
यदि स्यात् तर्पणादर्व्वाक् ब्रह्मयज्ञः कृतो न हि ।
कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत् ।
अग्नेः पश्चिमतो देशे भूतयज्ञान्त एव वा ।
कुशासनसमासीनः कुशपाणिः समाहितः ॥
शालाग्नौ लौकिकाग्नौ वा जले भूम्यामथापि वा ।
वैश्वदेवन्निमित्तं वै देवयज्ञः स वै स्मृतः ॥
यदि स्याल्लौकिके पक्वं ततोऽन्नं तत्र हूयते ।
शालाग्नौ तत्र देवान्नं विधिरेष सनातनः ॥
देवेभ्यश्च हुतादन्नात् शेषात् भूतबलिं हरेत् ।
भूतयज्ञः स वै ज्ञेयो भूतिदः सर्व्वदेहिनाम् ॥
श्वभ्यश्च श्वपचेभ्यश्च पतितेभ्यो नित्यमेव च ।
दद्याद्भूमौ बलिं त्वन्नं पक्षिभ्योऽथ द्विजोत्तमः ॥
सायं चान्नस्य सिद्धस्य कुर्य्याद्देवमतन्द्रितः ।
भूतयज्ञः स्वयं नित्यं सायं प्रातर्विधीयते ॥
एकन्तु भोजयेद्विप्रं पितृनुद्दिश्य सत्तमम् ।
अथवान्नं यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत् ॥
पूजयेदतिथिं नित्यं नमस्येदर्च्चयेद्द्विजम् ।
मनोवाक्कर्म्मभिः शान्तमागतं स्वगृहन्तु तम् ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुद्ध्वा तं परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रं स्यात् तच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥
गोदोहमात्रं कालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम् ।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा ॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति त्वर्थिभ्यो लोभवर्ज्जितः ॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयन् ।
भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन् ॥
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तमाः ।
भुञ्जीत चेत् सुमूढात्मा तिर्य्यग्योनिं स गच्छति ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि देवानामर्च्चनं तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्च्चनम् ।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः ।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥"

इति कौर्म्मे उपरिभागे १७ अध्यायः ॥
अत्र भोजनविधिर्भोजनशब्दे द्रष्टव्यः ॥

मध्वलः, (मधु तत्पर्य्यायं अलतीति । अल् + अण् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः ।) मधुवारः । इति शब्दचन्द्रिका ॥

मध्वालु, क्ली, (मधु मधुरं आलु । मधुवत् मिष्टत्वा-त्तथात्वम् ।) मूलविशेषः । मौ आलु इति भाषा ॥ अस्य गुणाः । रक्तपित्तनाशित्वम् । गुरुत्वम् । स्वादुत्वम् । शीतलत्वम् । स्तन्यशुक्र-कारित्वञ्च । इति राजवल्लभः ॥

मध्वालुकं, क्ली, (मध्वालु + स्वार्थे कन् ।) कन्द-विशेषः । इति शब्दचन्द्रिका ॥ मौ आलु इति भाषा ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "विदारीकन्दशतावरीविसमृणालशृङ्गाटक-कशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठा-लुकशृङ्गालुकरक्तालुकेन्दीवरोत्पलकन्द-प्रभृ-तीनि ॥")

मध्वासवः, पुं, (मधु मधूकपुष्परसः तेन कृत आसवः ।) मधूकपुष्पकृतमद्यम् । तत्पर्य्यायः ।

माधवकः २ मधु ३ माध्वीकम् ४ । इत्यमरः । २ । १० । ४१ ॥ (यथा, सुश्रुते ९।४५ अध्याये ।
"सुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः ।
मधु मध्वासवच्छेदी मेहकुष्ठविषापहः ॥"
विवरणमस्य माध्वीकशब्दे ज्ञातव्यम् ॥)

मध्वासवनिकः, पुं (मध्वासवनमुत्पादनत्वेनास्यास्तीति । मध्वासवन + ठन् ।) शौण्डिकः । इति शब्दमाला ॥

मध्विजा, स्त्री, (मधु ईजते प्राप्नोति कारणत्वेनेति । ईज + कः । पृषोदरादित्वात् ह्रस्वः ।) मदिरा । इति हेमचन्द्रः । ३ । ५६७ ॥ (गुणादिविषयोऽस्या मदिराशब्दे ज्ञातव्यः ॥)

मन, अर्च्चे । गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-गर्व्वे अक०-सेट् ।) मनति । इति दुर्गादासः ॥

मन, क ङ गर्व्वके । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-स्तम्भने सक०-सेट् ।) क ङ, मानयते । गर्व्वकोऽहङ्कारः । मनस्तम्भने । इति प्राञ्चः । मानयते शत्रुं बली स्तम्भनातीत्यर्थः । इति रमानाथः । इति दुर्गादासः ॥

मन, त् क धृतौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) दन्त्यनोपधः । मनयति । इति दुर्गादासः ॥

मन, द ङ बोधे । इति कविकल्पद्रुमः ॥ (तना०-आत्म० सक०-सेट् ।) द ङ, मनुते । इति दुर्गादासः ॥

मन, य औ ङ बोधे । इति कविकल्पद्रुमः ॥ (दिवा-आत्म०-सक०-अनिट् ।) य ङ, मन्यते । औ, अमंस्त । इति दुर्गादासः ॥

मनआपः, त्रि, (आप्नोतीति । आप् + अच् । मनस आपः ।) मनोज्ञः । इति त्रिकाण्डशेषः ॥

मनः, पु, (मन्यते सुरभित्वादिगुणेन आद्रियत इति । मन् + घः ।) जटामांसी । इति शब्दचन्द्रिका ॥

मनः, [स्] क्ली, (मन्यते बुध्यतेऽनेनेति । मन् + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति असुन् ।) लिङ्गशरीरावयवविशेषः । यथा । सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्म्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति । मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः । मनस्तु कर्म्मेन्द्रियैः सहितं सत् मनोमयकोशो भवति । इति वेदान्तसारः ॥ ज्ञानेन्द्रियविशेषः । तत्तु बुद्धीन्द्रियाणां षष्ठं प्रधानं श्रीकृष्णविभूतिश्च । यथा,—
"इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥"
इति भगवद्गीता ॥
तच्च गर्भस्थस्य सप्तमे मासि जायते । इति सुखबोधः ॥ ("पञ्चमे मनः प्रतिबुद्धतरं भवति ।" इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये ॥ * ॥) तत्पर्य्यायः । चित्तम् २ चेतः ३ हृदयम् ४ स्वान्तम् ५ हृत् ६ मानसम् ७ । इत्यमरः । १ । ४ । ३१ ॥ अनङ्गकम् ८ अङ्गम् ९ । इति शब्दरत्नावली ॥ अपि च ।
"मनो महान् मतिर्ब्रह्मा पूर्ब्बुद्धिः ख्यातिरीश्वरः ।
प्रज्ञा संवित् चितिश्चैव स्मृतिश्च परिपठ्यते ।
पर्य्यायवाचकाः शब्दा मनसः परिकीर्त्तिताः ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥
न्यायमते अस्य गुणाः । परत्वम् । अपरत्वम् । संख्या । परिमितिः । पृथक्त्वम् । संयोगः । विभागः । वेगश्च । मनोग्राह्याणि यथा । सुखम् । दुःखम् । इच्छा । द्वेषः । मतिः । यत्नश्च । इदं परमाणुस्वरूपम् । शिरोमणिमते वायवीयपरमाणुरूपम् । यथा,—
"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे ।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥"
इति भाषापरिच्छेदः ॥
जन्यज्ञानसामान्यं प्रति त्वङ्मनोयोगः कारणम् । यथा, तत्रैव ।
"त्वचो योगो मनसा ज्ञानकारणम् ॥"
तस्य नवगुणा यथा,—
"धैर्य्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा ।
सदसच्चाशुता चैव मनसो नव वै गुणाः ॥"
इति मोक्षधर्म्मः ॥
अस्य व्याख्या । धैर्य्यम् १ उपपत्तिः ऊहापोहकौशलम् २ व्यक्तिः स्मरणम् ३ विसर्गः विपरीतसर्गो भ्रान्तिः ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ सत् वैराग्यादि ७ असत् रागद्वेषादि ८ आशुता अस्थिरत्वम् ९ । इति तट्टीका ॥ * ॥
अस्य चातुर्विध्यं यथा,—
"मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी ॥"
इति वेदान्तः ॥
तस्य अध्यात्मत्वादि यथा,—
"अध्यात्मं मन इत्याहुः पञ्चभूतात्मधारकम् ।
अधिभूतञ्च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
तस्य स्वरूपं यथा,—
"अनिरूप्यमदृश्यञ्च ज्ञानभेदं मनः स्मृतम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
तस्य प्राशस्त्याप्राशस्त्यानुमापकानि यथा,—
"जनानां हृदयं सद्यः सुव्यक्तं वचनेन वै ।
शिष्ये कलत्रे कन्यायां दौहित्रे बान्धवेऽपि च ॥
पुत्रे पौत्रे च वचसि प्रतापे यशसि श्रियाम् ।
बुद्धौ वारिणि विद्यायां ज्ञायते हृदयं नृणाम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
तस्य बन्धमोक्षहेतुत्वं यथा,—
"मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य विषयासङ्गि मुक्त्यै निर्व्विषयं तथा ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
("अतीन्द्रियं पुनर्मनः सत्त्वसंज्ञकं चेत्याहुरेके तदर्थात्मसम्पदायत्तचेष्टम् । चेष्टाप्रत्ययभूतमिन्द्रियाणाम् । स्वार्थेन्द्रियार्थसङ्कल्पव्यभिचरणाच्चानेकमेकस्मिन् पुरुषे सत्त्वरजस्तमः सत्त्वगुणयोगाच्च न चानेकत्वं नानेकं ह्येककालमनेकेषु प्रवर्त्तते ॥ तस्मान्नैककाला सर्व्वेन्द्रियप्रवृत्तिः । यद्गुणञ्चाभीक्ष्णं पुरुषमनुवर्त्तते सत्त्वं तत्सत्त्वमेवोपदिशन्ति ऋषयो बाहुल्यानुशयात् ॥ मनःपुरःसराणीन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति ॥"
"मनसस्तु चिन्त्यमर्थः । तत्र मनसो बुद्धेश्च त एव समानातिहीनमिथ्यायोगाः प्रकृतिविकृतिहेतवो भवन्ति ॥" इति चरके सूत्रस्थाने अष्टमेऽध्याये ॥
"लक्षणं मनसो ज्ञानस्याभावो भाव एव वा ।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षेण वर्त्तते ॥
वैवृत्त्यान्मनसो ज्ञानं सान्निध्यात्तच्च वर्त्तते ।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ ॥
चिन्त्यविचार्य्यमूह्यञ्च ध्येयं सङ्कल्प्यमेव च ।
यत्किञ्चिन्मनसो ज्ञेयं तत् सर्व्वं ह्यर्थसंज्ञकम् ॥
इन्द्रियाभिग्रहः कर्म्म मनसस्तस्य निग्रहः ।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते ॥
इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते ।
कल्प्यते मनसाप्यूर्द्ध्वं गुणतो दोषतो यथा ॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।
व्यवस्यते तया वक्तुं कर्त्तुं वा बुद्धिपूर्ब्बकम् ॥
या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते ।
याति सा तेन निर्द्देशं मनसा च मनोभवा ॥
बुद्धीन्द्रियमनोर्थानां विद्याद् योगधरं परम् ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
सत्त्वगुणयुक्तस्य मनसो गुणा यथा,—
"आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचो
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानञ्च निर्द्दम्भता ।
कर्म्मानिन्दितमस्पृहश्च विनयो धर्म्मः सदैवादरा-
देते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ॥"
अस्ति धर्म्ममोक्षपरलोकादिकमिति बुद्ध्या चरतीत्यास्तिकस्तस्य भाव आस्तिक्यं अनुतापः अक्रोधः धृतिः भूतप्रेतस्मरक्रोधलोभाद्यावशराहित्यं ज्ञानमात्मज्ञानम् । निर्द्दम्भता कपटाभावः कर्म्म अनिन्दितं अस्पृहं निष्कामञ्च ॥ रजोगुणयुक्तस्य मनसो गुणा यथा,—
"क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेच्छाधिका
दम्भः कामुकताप्यलीकवचनं चाधीरताहङ्कृतिः ।
ऐश्वर्य्यादभिमानिताितशयितानन्दोऽधिकञ्चाटनं
प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः ॥"

अलीकवचनं मिथ्याकथनं अटनं पृथ्वीपरिभ्रमणम् ॥ अथ तमोगुणयुक्तस्य मनसो गुणा यथा —

"नास्तिक्यं सुविषण्णतातिशयितालस्यञ्च दुष्टा मतिः
प्रीतिर्निन्दितकर्म्मशर्म्मणि सदा निद्रालुताहर्निशम् ।
अज्ञानं किल सर्व्वतोऽपि सततं क्रोधान्धता मूढ़ता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥*॥ सर्व्वे सान्ता अदन्ताश्चेति प्रमाणात् अकारान्तमनशब्दोऽप्यस्ति । यथा, उत्तरगीतायाम् । १३ अध्याये ।

"मनस्थं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिद्ध्यन्ति योगिनः ॥")

मनःशिलः, पुं, (मनो मानसं शिलति आकर्षति स्वगन्धेनेति । शिल + कः ।) मनःशिला । यथा,
"टङ्कैर्मनःशिलगुहैरविदार्य्यमाणा ॥"
इत्यमरटीकायां भरतः ॥

मनःशिला, स्त्री, (मनः शिलति आदत्ते आकर्षति गन्धेनेति । शिल + कः । स्त्रियां टाप् । यद्वा, मनःप्रसादिका शिला धातुविशेषः ।) रक्तवर्णधातुविशेषः । मन्छल इति भाषा ॥ (यथा, कुमारे । १ । ५५ ।
"मनःशिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु ॥")

सा तु लक्ष्मीवीर्य्यम् । इति वैद्यकम् ॥ तत्पर्य्यायः । कुनटी२ मनोगुप्ता३ नागजिह्विका ४ । इत्यमरः । २ । ६ । १०८ ॥ नेपाली ५ शिला ६ । इति रत्नमाला ॥ मनोज्ञा ७ नेपालिका ८ मनोगुप्ता ९ कल्याणिका १० रोगशिला ११ । इति राजनिर्घण्टः ॥ गोला १२ दिव्यौषधिः १३ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । लेखनत्वम् । विषभूतावेशभयोन्मादनाशित्वम् । वश्यकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । तिक्तत्वम् । कफनाशित्वम् । सारकत्वम् । छर्द्दिकारित्वम् । कुष्ठज्वरपाण्डुकासश्वासनाशित्वम् । शुक्रमङ्गलकारित्वञ्च । इति राजवल्लभः ॥ अन्यच्च ।

"मनःशिला गुरुर्व्वर्ण्या सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥
मनःशिला मन्दबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण ।
मलानुबन्धं किल मूत्ररोधं
सशर्करं कृच्छ्रगदञ्च कुर्य्यात् ॥"

इति भावप्रकाशः ॥

(अस्याः पर्य्यायः शोधनं गुणाश्च यथा,—
"मनःशिला च नेपाली शिलाह्वा नागजिह्विका ।
मनोज्ञा कुनटी गोली करञ्जी करवीरिका ॥
मनोह्वा ओड्रपुष्पाभा शस्यते सर्व्वकर्म्मसु ॥"
"जयन्ती भृङ्गराजोत्थे रक्तागस्त्यरसैः शिला ॥
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके ।
क्षालयेदारनालेन सर्व्वरोगेषु योजयेत् ॥"
मतान्तरे मनःशिलाशुद्धिर्यथा,—
"अगस्त्यपत्रतोयेन भाविता सप्तवासरम् ।
शृङ्गवेररसैर्वापि विशुध्यति मनःशिला ।
कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा ।
भूतावेशभयं हन्ति कासश्वासहरा शुभा ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

मननं, क्ली, (मन्यत इति । मन् + ल्युट् ।) श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिः अनवरतमनुचिन्तनम् । इति वेदान्तसारः ॥ बोधनम् । (यथा, गायत्रीतन्त्रे । १ । ४ ।
"मननात् पापतस्त्राति मननात स्वर्गमश्नुते ।
मननात मोक्षमाप्नोति चतुर्व्वर्गमयो भवेत ॥")
धारणम् । इति मनधात्वर्थदर्शनात् । बुद्धिः । इति राजनिर्घण्टः ॥

मनसा, स्त्री, (मनः भक्ताभीष्टपूरणाय मननं अस्त्यस्या इति । मनस् + अर्श आदित्वादच् । ततष्टाप् । यद्वा, मनं मननमहङ्कारमिति यावत् स्यति नाशयतीति । सो + कः ।) देवीविशेषः । तत्पर्य्यायः । कद्रुः २ मनसादेवी ३ विषहरी ४ । इति जटाधरः ॥ अस्याः प्रणाममन्त्रः ।
"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा ।
जरत्कारुमुनेः पत्नी मनसादेवि ! नमोऽस्तु ते ॥"
इति तस्याः पूजापद्धतिः ॥

तस्या नाम्नां व्युत्पत्तिर्यथा,—

श्रीनारायण उवाच ।

"श्रूयतां मनसाख्यानं यत् श्रुतं धर्म्मवक्त्रतः ।
कन्या सा च भगवती कश्यपस्य च मानसी ॥
तेनेयं मनसादेवी मनसा या च दीव्यति ।
मनसा ध्यायते या वा परमात्मानमीश्वरी ॥
तेन सा मनसादेवी योगेन तेन दीव्यति ।
आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी ॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः ।
जरत्कारुशरीरञ्च दृष्ट्वा यत् क्षीणमीश्वरः ॥
गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभुः ।
वाञ्छितञ्च ददौ तस्यै कृपया च कृपानिधिः ॥
पूजाञ्च कारयामास चकार च पुनः पुनः ।
स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकतः ॥
भृशं जगत्सु गौरी सा सुन्दरी च मनोहरा ।
जगद्गौरीति विख्याता तेन सा पूजिता सती ॥
शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता ।
विष्णुभक्तातीव शश्वद्वैष्णवी तेन नारद ! ॥
नागानां प्राणरक्षित्री यज्ञे जन्मेजयस्य च ।
नागेश्वरीति विख्याता सा नागभगिनीति च ॥
विषं संहर्त्तुमीशा सा तेन विषहरीति सा ।
सिद्धं योगं हरात् प्राप तेनासिसिद्धयोगिनी ।
महाज्ञानञ्च गोप्यञ्च मृतसञ्जीवनीं पराम् ।
महाज्ञानयुतां ताञ्च प्रवदन्ति मनीषिणः ॥
आस्तीकस्य मुनीन्द्रस्य माता सा च तपस्विनः ॥
आस्तीकमाता विख्याता जगत्सु सुप्रतिष्ठिता ॥
प्रिया मुनेर्जरत्कारोर्मुनीन्द्रस्य महात्मनः ।
योगिनो विश्वपूज्यस्य जरत्कारुप्रिया ततः ॥
जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी ।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥
जरत्कारुप्रियास्तीकमाता विषहरीति च ।
महाज्ञानयुता चैव सा देवी विश्वपूजिता ॥
द्वादशैतानि नामानि पूजाकाले च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
नागभीते च शयने नागग्रस्ते च मन्दिरे ।
नागक्षते महादुर्गे नागवेष्टितविग्रहे ।
इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशयः ।
नित्यं पठेद् यस्तं दृष्ट्वा नागवर्गः पलायते ॥
दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ।
स्तोत्रसिद्धिर्भवेद्यस्य स विषं भोक्तुमीश्वरः ॥
नागौघभूषणं कृत्वा स भवेन्नागवाहनः ।
नागासनो नागतल्पो महासिद्धोभवेन्नरः ॥"

इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मनसोपाख्याने मनसास्तोत्रं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ * ॥ तस्याः पूजामन्त्रादि यथा,—

श्रीनारायण उवाच ।

"पूजाविधानं स्तोत्रञ्च श्रूयतां मुनिपुङ्गव ! ।
ध्यानञ्च सामवेदोक्तं देवीपूजाविधानकम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
वह्निशुद्धांशुकाधानां नागयज्ञोपवीतिनीम् ॥
महाज्ञानयुताञ्चैव प्रवरां ज्ञानिनां सतीम् ।
सिद्धाधिष्ठातृदेवीञ्च सिद्धां सिद्धिप्रदां भजे ॥
इति ध्यात्वा तु तां देवीं मूलेनैव प्रपूजयेत् ।
नैवेद्यैर्विविधैर्दीपैः पुष्पधूपानुलेपनैः ॥
मूलमन्त्रश्च वेदोक्तो भक्तानां वाञ्छितप्रदः ।
मुने ! कल्पतरुर्नाम सुसिद्धो द्वादशाक्षरः ॥
ॐ ह्रीं श्रीं क्लीं ऐं मनसादेव्यै स्वाहेति कीर्त्तितः ।
पञ्चलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥
मन्त्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले ।
सुधासमं विषं तस्य धन्वन्तरिसमो भवेत् ॥
ब्रह्मन्नाषाढसंक्रान्त्यां गूढशाखासु यत्नतः ।
आवाह्य देवीमीशान्तां पूजयेद् यो हि भक्तितः ॥
पञ्चम्यां मनसाख्यायां देव्यै दद्याच्च यो बलिम् ।
धनवान् पुत्त्रवांश्चैव कीर्त्तिमांश्च भवेद्ध्रुवम् ॥
पूजाविधानं कथितं तदाख्यानं निशामय ।
कथयामि महाभाग ! यत् श्रुतं धर्म्मवक्त्रतः ॥"

तस्या जन्मकारणं यथा,—

"पुरा नागभयाक्रान्ता बभुवुर्मानवा भुवि ।
यान् यान् खादन्ति नागाश्च ते न जीवन्ति नारद ! ॥
मन्त्रांश्च ससृजे भीतः कश्यपः ब्रह्मणार्थितः ।
वेदबीजानुसारेण चोपदेशेन ब्रह्मणः ॥

मन्त्राधिष्ठातृदेवीन्तां मनसां सद्रुजे ततः ।
तपसा मनसा तेन बभूव मनसा च सा ॥”
तस्यास्तपस्यादि यथा,—
“कुमारी सा च सम्भूय जगाम शङ्करालयम् ।
भक्त्या संपूज्य कैलासे तुष्टाव चन्द्रशेखरम् ॥
दिव्यं वर्षसहस्रञ्च तं सिषेवे मुनेः सुता ।
आशुतोषो महेशश्च ताञ्च तुष्टो बभूव ह ॥
महाज्ञानं ददौ तस्यै पाठयामास साम च ।
कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं मुने ! ॥
लक्ष्मीमाया कामबीजं ङेन्तं कृष्णपदन्तथा ।
त्रैलोक्यमङ्गलं नाम कवचं पूजनक्रमम् ॥
सर्व्वपूज्यञ्च स्तवनं ध्यानं भुवनपावनम् ।
पुरश्चर्य्याक्रमञ्चापि वेदोक्तं सर्व्वसम्मतम् ॥
प्राप्य मृत्युञ्जयाज्ज्ञानं परं मृत्युञ्जयं सती ।
जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया ॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः ।
सिद्धा बभूव सा देवी ददर्श पुरतः प्रभुम् ॥
दृष्ट्वा कृशाङ्गीं बालाञ्च कृपया च कृपानिधिः ।
पूजाञ्च कारयामास चकार च स्वयं हरिः ॥
वरञ्च प्रददौ तस्यै पूजिता त्वं भवे भव ।
वरं दत्त्वा च कल्याण्यै सहसान्तर्दधे विभुः ॥
प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
द्वितीये शङ्करेणैव कश्यपेन सुरेण च ॥
मनुना मुनिना चैव नागेन मानवादिना ।
बभूव पूजिता सा च त्रिषु लोकेषु सुव्रता ॥”
तस्या विवाहः स्वामिकर्त्तृकत्यागश्च यथा,—
“जरत्कारुमुनीन्द्राय कश्यपस्तां ददौ पुरा ।
अयाचितो मुनिश्रेष्ठो जग्राह ब्रह्मणाज्ञया ॥
कृत्वोद्वाहं महायोगी विश्रान्तस्तपसा चिरम् ।
सुष्वाप देव्या जघने वटमूले च पुष्करे ॥
निद्रां जगाम च मुनिः स्मृत्वा निद्रेशमीश्वरम् ।
जगामास्तं दिनकरः सायंकाल उपस्थितः ॥
संचिन्त्य मनसा तत्र मनसा सा पतिव्रता ।
धर्म्मलोपभयेनैव चकारालोचनं सती ॥
अकृत्वा पश्चिमां सन्ध्यां नित्याञ्चैव द्विजन्मनाम् ।
ब्रह्महत्यादिकं पापं लभिष्यति पतिर्मम ॥
नोपतिष्ठति यः पूर्व्वां नोपास्ते यस्तु पश्चिमाम् ।
स च स्नाताशुचिर्नित्यं ब्रह्महत्यादिकं लभेत् ॥
वेदोक्तमपि सञ्चिन्त्य बोधयामास तं मुनिम् ।
स च बुद्धा मुनिश्रेष्ठश्चुकोप तां दृष्ट्वा मुनिः ॥

जरत्कारुरुवाच ।

कथं मे सुव्रते ! साध्वि ! निद्राभङ्गः कृतस्त्वया ।
व्यर्थं व्रतादिकं तस्या या भर्त्तुश्चापकारिणी ॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् ।
भर्त्तुरप्रियकारिण्याः सर्व्वं भवति निष्फलम् ॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् ॥
सर्व्वदानं सर्व्वयज्ञः सर्व्वतीर्थनिषेवणम् ।
सर्व्वं व्रतं तपः सर्व्वमुपवासादिकञ्च यत् ॥
सर्व्वधर्म्मश्च सत्यञ्च सर्व्वदेवप्रपूजनम् ।
तत्सर्व्वं स्वामिसेवायाः कलां नार्हन्ति षोड-
शीम् ॥

सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः
शतम् ॥
विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् ।
असत्कुलप्रजाता या तत्फलं श्रूयतां सति ! ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्रविवर्जिता ॥
इत्युक्त्वा च मुनिश्रेष्ठो बभूव स्फुरिताधरः ।
चकम्पे मनसा साध्वी भयेनोवाच तं पतिम् ॥

मनसोवाच ।

सन्ध्यालोपभयेनैव निद्राभङ्गः कृतस्तव ।
कुरु शान्तिं महाभाग ! दुष्टाया मम सुव्रत ! ॥
शृङ्गाराहारनिद्राणां यश्च भङ्गं करोति च ।
स व्रजेत् कालसूत्रञ्च स्वामिनश्च विशेषतः ॥
इत्युक्त्वा मनसादेवी स्वामिनश्चरणाम्बुजे ।
पपात भक्त्या भीता च रुरोद च पुनः पुनः ॥
कुपितञ्च मुनिं दृष्ट्वा श्रीसूर्य्यः शप्तुमुद्यतम् ।
तत्राजगाम भगवान् सन्ध्यया सह नारद ! ॥
तत्रागत्य मुनिश्रेष्ठमुवाच भास्करः स्वयम् ।
विनयेन च भीतश्च तया सह यथोचितम् ॥

श्रीसूर्य्य उवाच ।

सूर्य्यास्तसमयं दृष्ट्वा धर्म्मलोपभयेन च ।
बोधयामास त्वां विप्र ! नाहमस्तं गतस्तदा ॥
क्षमस्व भगवन् ! ब्रह्मन्मां शप्तुं नोचितं मुने ! ॥
ब्राह्मणानाञ्च हृदयं नवनीतसमं सदा ।
तेषां क्षणार्द्धं क्रोधश्च ततो भस्म भवेज्जगत् ॥
पुनः स्रष्टुं द्विजः शक्तो न तेजस्वी द्विजात्
परः ।
ब्राह्मणो ब्रह्मणो वंशः प्रज्वलन् ब्रह्मतेजसा ॥
श्रीकृष्णं भावयेन्नित्यं ब्रह्मज्योतिः सनातनम् ।
सूर्य्यस्य वचनं श्रुत्वा द्विजः शान्तो बभूव ह ॥
सूर्य्यो जगाम स्वस्थानं गृहीत्वा ब्राह्मणाशिषम् ।
तत्याज मनसां विप्रः प्रतिज्ञापालनाय च ॥
रुदन्ती शोकयुक्ता च हृदयेन विदूयता ।
सा सस्मार गुरुं शम्भुमिष्टदेवं हरिं विधिम् ॥
कश्यपं जन्मदातारं विपत्तौ भयकर्षिता ।
तत्राजगाम भगवान् गोपीशः शम्भुरेव च ।
विधिश्च कश्यपश्चैव मनसा परिचिन्तितः ॥
दृष्ट्वा विप्रोऽभीष्टदेवं निर्गुणं प्रकृतेः परम् ।
तुष्टाव परया भक्त्या प्रणनाम मुहुर्मुहुः ॥
नमश्चकार शम्भुञ्च ब्रह्माणं कश्यपन्तदा ।
कथमागमनं देवा इति प्रश्नं चकार सः ॥
ब्रह्मा तद्वचनं श्रुत्वा सहसा समयोचितम् ।
समुवाच नमस्कृत्य हृषीकेशपदाम्बुजम् ॥

ब्रह्मोवाच ।

यदि त्यक्ता धर्म्मपत्नी धर्म्मिष्ठा मनसा सती ।
कुरुष्वास्यां सुतोत्पत्तिं स्वधर्म्मपालनाय वै ॥
यतौ वा ब्रह्मचारी वा भिक्षुर्व्वनचरोऽपि वा ।
जायायाञ्च सुतोत्पत्तिं कृत्वा पश्चात् त्यजेन्मुने ! ॥
अकृत्वा तु सुतोत्पत्तिं वैरागी यस्त्यजेत् प्रियाम् ।
स्रवेत्तपस्तत्पुण्यञ्च चालन्याश्च यथा जलम् ॥”
तस्याः पुत्त्रोत्पत्तिर्यथा,—

मनसा

“ब्रह्मणो वचनं श्रुत्वा जरत्कारुर्मुनीश्वरः ।
चकार तन्नाभिस्पर्शं योगेन मन्त्रपूर्व्वकम् ॥
तस्यै शुभाशिषं दत्त्वा ययुर्देवा मुदान्विताः ।
मुदान्विता च मनसा जरत्कारुर्मुदान्वितः ॥
मुनेः करस्पर्शमात्रात् सद्यो गर्भो बभूव ह ।
मनसाया मुनिश्रेष्ठ ! मुनिश्रेष्ठ उवाच ताम् ॥”

जरत्कारुरुवाच ।

गर्भेणानेन मनसे ! तव पुत्त्रो भविष्यति ।
जितेन्द्रियाणां प्रवरो धार्म्मिको वैष्णवाग्रणीः ।
तेजस्वी च तपस्वी च यशस्वी च गुणान्वितः ।
वरो वेदविदाञ्चैव ज्ञानिनां योगिनान्तथा ॥
स च पुत्त्रो विष्णुभक्तो धार्म्मिकः कुलमुद्धरेत् ।
नृत्यन्ति पितरः सर्व्वे यज्जन्ममात्रतो मुदा ॥
पतिव्रता सुशीला या सा प्रिया प्रियवादिनी ।
धर्म्मिष्ठपुत्त्रमाता च कुलजा कुलपालिका ॥
हरिभक्तिप्रदो बन्धुस्तमिष्टं तत्सुखप्रदम् ।
यो बन्धच्छित् स च पिता हरेर्वर्त्म प्रदर्शकः ॥
सा गर्भधारिणी या च गर्भवासविमोचनी ।
विष्णुमन्त्रप्रदाता च स गुरुर्विष्णुभक्तिदः ॥
गुरुश्च ज्ञानदाता च तज्ज्ञानं कृष्णभावनम् ।
आब्रह्मस्तम्बपर्य्यन्तं यतो विश्वं चराचरम् ॥
आविर्भूतं तिरोभूतं किं वा ज्ञानं तदन्यतः ।
वेदजं योगजं यद्यत्तत्सारं हरिसेवनम् ॥
तत्त्वानां सारभूतञ्च हरेरन्यद्विडम्बनम् ।
दत्तं ज्ञानं मया तुभ्यं स स्वामी ज्ञानदो हि यः
ज्ञानात् प्रमुच्यते बन्धात् स रिपुर्यो हि बन्धदः ।
विष्णुभक्तियुतं ज्ञानं न ददाति हि यो गुरुः ।
स रिपुः शिष्यघाती च यो हि बन्धान्न मोचयेत् ।
जननीगर्भजात् क्लेशाद् यमताड़नजात्तथा ।
न मोचयेद् यः स कथं गुरुस्तातो हि बान्धवः ।
परमानन्दरूपञ्च कृष्णमार्गमनश्वरम् ।
न दर्शयेद् यः स कथं कीदृशो बान्धवो नृणाम् ।
भज साध्वि ! परं ब्रह्माच्युतं कृष्णञ्च निर्गुणम्
निर्मूलञ्च पुरा कर्म्म भवेद् यत्सेवया ध्रुवम् ॥
मया च्छलेन त्वं त्यक्ता क्षम देवि ! मम प्रिये ! ।
क्षमायुतानां साध्वीनां सत्त्वात् क्रोधो न विद्यते ।
पुष्करं तपसे यामि गच्छ देवि ! यथासुखम् ।
श्रीकृष्णचरणाम्भोजध्यानविच्छेदकातरः ॥
धनादिषु स्त्रियां प्रीतिः प्रवृत्तिवर्त्म गच्छताम् ।
श्रीकृष्णचरणाम्भोजे निस्पृहाणां मनोरथाः ॥
जरत्कारुवचः श्रुत्वा मनसा शोककातरा ।
सा साश्रुनेत्रा विनयादुवाच प्राणवल्लभम् ॥

मनसोवाच ।

दोषेणाहं त्वया त्यक्ता निद्राभङ्गेन ते प्रभो ! ।
यत्र स्मरामि त्वां बन्धो ! तत्र मामागमिष्यसि ॥
बन्धुभेदः क्लेशतमः पुत्त्रभेदस्ततः परः ।
प्राणेशभेदः प्राणानां विच्छेदात् सर्व्वतः परः ॥
पतिः पतिव्रतानान्तु शतपुत्त्राधिकः स्मृतः ।
सर्व्वस्मात्तु प्रियः स्त्रीणां प्रियस्तेनोच्यते बुधैः ॥
पुत्त्रे यथैकपुत्त्राणां वैष्णवानां यथा हरौ ।
नेत्रे यथैकनेत्राणां तृषितानां यथा जले ॥
क्षुधितानां यथान्ने च कामुकानां यथा स्त्रियाम् ।

यथा परस्वे चौराणां यथा जारे कुयोषिताम् ॥
विद्वांश्च यथा शास्त्रे वाणिज्ये वणिजां यथा ।
तथा शश्वन्मनः कान्ते साध्वीनां योषितां प्रभो ॥
इत्युक्त्वा मनसा देवी पपात स्वामिनः पदे ।
क्षणं चकार क्रोडे तां कृपया स कृपानिधिः ॥
नेत्रोदकेन मनसां स्नापयामास तां मुनिः ।
साश्रुणा च मुनेः क्रोडं सिषेच भेदकातरा ॥
तदा ज्ञानेन तौ द्वौ च विशोकौ च बभूवतुः ।
स्मारं स्मारं पदाम्भोजं कृष्णस्य परमात्मनः ॥
जगाम तपसे विप्रः स्वकान्तां सम्प्रबोध्य च ।
जगाम मनसा शम्भोः कैलासं मन्दिरं गुरोः ॥
पार्व्वती बोधयामास मनसां शोककर्षिताम् ।
शिवश्चातीव ज्ञानेन शिवेन च शिवालये ॥
सुप्रशस्तदिने साध्वी सुषुवे मङ्गलक्षणे ।
नारायणांशं पुत्रञ्च ज्ञानिनां योगिनां गुरुम् ॥
गर्भस्थितो महाज्ञानं श्रुत्वा शङ्करवक्त्रतः ।
स बभूव च योगीन्द्रो योगिनां ज्ञानिनां गुरुः ॥
जातकं कारयामास वाचयामास मङ्गलम् ।
वेदांश्च पाठयामास शिवाय च शिवः शिशोः ॥
रत्नत्रिकोटिलक्षञ्च ब्राह्मणेभ्यो ददौ शिवः ।
पार्व्वती च गवां लक्षं रत्नानि विविधानि च ॥
शम्भुश्च चतुरो वेदान् वेदाङ्गानीतराणि च ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥
भक्तिरस्ति स्वकान्ते चाभीष्टदेवे गुरौ हरौ ।
यस्यास्तेन तत्पुत्रो बभूवास्तीक एव च ॥
जगाम तपसे विष्णोः पुष्करं शङ्कराज्ञया ।
संप्राप्य च महामन्त्रं तपश्च परमात्मनः ॥
दिव्यं वर्षत्रिलक्षञ्च तपस्तप्त्वा तपोधनः ।
आजगाम महायोगी नमस्कर्त्तुं शिवं प्रभुम् ॥
शङ्करञ्च नमस्कृत्य स्तुत्वा च बालकं पुरः ।
सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥
तां सपुत्रां सुतां दृष्ट्वा मुदं प्राप प्रजापतिः ।
शतलक्षञ्च रत्नानां ब्राह्मणेभ्यो ददौ मुने ! ॥
ब्राह्मणान् भोजयामास सोऽसंख्यान् श्रेयसे शिशोः ।
अदितिश्च दितिश्चान्या मुदं प्रापुः परन्तथा ॥
सा सपुत्रा च सुचिरं तस्थौ तातालये तदा ।
तदीयं पुनराख्यानं वक्ष्यामि तन्निशामय ॥"
तस्या माहात्म्यं यथा,—
"अथाभिमन्युतनयं ब्रह्मशापः परीक्षिते ।
बभूव सहसा ब्रह्मन् ! दैवदोषेण कर्म्मणा ॥
सप्ताहे समतीते तु तक्षकस्त्वाञ्च भोक्ष्यति ।
शशाप शृङ्गी नृपतिं कौशिक्याश्च जलेन च ॥
राजा श्रुत्वा तत्प्रवृत्तिं गङ्गाद्वारं जगाम सः ।
तत्र तस्थौ च सप्ताहं शुश्राव धर्म्मसंहिताम् ॥
सप्ताहे समतीते तु गच्छन्तं तक्षकं पथि ।
धन्वन्तरिर्नृपं मोक्तुं ददर्श गामुको नृपम् ॥
तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ।
धन्वन्तरिर्मणिं प्राप तक्षकः स्वेच्छया ददौ ॥
स ययौ तं गृहीत्वा च तुष्टः प्रहृष्टमानसः ।
तक्षको भक्षयामास नृपञ्च मञ्चकास्थितम् ॥
राजा जगाम वैकुण्ठं स्मारं स्मारं हरिं गुरुम् ।
सत्कारं कारयामास पितुर्जन्मेजयः शुचा ॥
राजा चकार यज्ञञ्च सर्पसत्रं ततो मुने ! ।
प्राणांस्तत्याज सर्पाणां समूहो ब्रह्मतेजसा ॥
स तक्षकश्च भीतश्च महेन्द्रं शरणं ययौ ।
सेन्द्रञ्च तक्षकं हन्तुं विप्रवर्गः समुद्यतः ॥
अथ देवाश्च मुनयश्चाययुर्मनसान्तिकम् ।
तान्तुष्टाव महेन्द्रश्च भयकातरविह्वलः ॥
तत आस्तीक आगत्य यज्ञञ्च मातुराज्ञया ।
महेन्द्रतक्षकप्राणान् ययाचे भूमिपं वरम् ॥
ददौ वरं नृपश्रेष्ठः कृपया ब्राह्मणाज्ञया ।
यज्ञं समाप्य विप्रेभ्यो दक्षिणाञ्च ददौ मुदा ॥
विप्राश्च मुनयो देवा गत्वा च मनसान्तिकम् ।
मनसां पूजयामासुस्तुष्टुवुश्च पृथक् पृथक् ॥
शक्रः सम्भृतसम्भारो भक्तियुक्तः सदा शुचिः ।
मनसां पूजयामास तुष्टाव परमादरम् ॥
दत्त्वा षोडशोपचारं बलिञ्च तत्प्रियं तदा ।
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवाज्ञया ॥
संपूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ।
इत्येवं कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥"
इन्द्रकृतमनसापूजास्तोत्रं यथा,—

नारद उवाच ।

"केन तुष्टाव स्तोत्रेण महेन्द्रो मनसां सतीम् ।
पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥

श्रीनारायण उवाच ।

सुस्नातः शुचिराचान्तो धृत्वा धौते च वाससी ।
रत्नसिंहासने देवीं वासयामास भक्तितः ॥
स्वर्गगङ्गाजलेनैव बहुकुम्भस्थितेन च ।
स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥
वाससी वासयामास वह्निशुद्धे मनोहरे ।
सर्व्वाङ्गे चन्दनं दत्त्वा पाद्यार्घ्यं भक्तिसंयुतः ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्यादौ देवषट्कं पूजयामास तां सतीम् ॥
ॐ ह्रीं श्रीं मनसादेव्यै स्वाहेत्येवञ्च मन्त्रतः ।
दशाक्षरेण मन्त्रेण ददौ सर्व्वं यथोचितम् ॥
दत्त्वा षोडशोपचारं दुर्लभं दुर्लभं हरिः ।
भक्त्या च पूजयामास ब्रह्मणा प्रेरितो मुदा ॥
वाद्यं नानाप्रकारञ्च वादयामास तत्र वै ।
बभूव पुष्पवृष्टिश्च नभसो मनसोपरि ॥
देवविप्राज्ञया तत्र ब्रह्मविष्णुशिवाज्ञया ।
तुष्टाव साश्रुनेत्रश्च पुलकाञ्चितविग्रहः ॥

महेन्द्र उवाच ।

देवि ! त्वां स्तोतुमिच्छामि साध्वीनां प्रवरां वराम् ।
परात्पराञ्च परमां नहि स्तोतुं क्षमोऽधुना ॥
स्तोत्राणां लक्षणं वेदे स्वभावाख्यानतत्परम् ।
न क्षमः प्रकृतं वक्तुं गुणानां तव सुव्रते ! ॥
शुद्धसत्त्वस्वरूपा त्वं कोपहिंसाविवर्ज्जिता ।
न च शप्तो मुनिस्तेन त्यक्तया च त्वया यतः ॥
त्वं मया पूजिता साध्वी जननी च यथादितिः ।
दयारूपा च भगिनी क्षमारूपा यथा प्रसूः ॥
त्वया मे रक्षिताः प्राणाः पुत्रदाराः सुरेश्वरि ! ।
अहं करोमि त्वां पूज्यां प्रीतिश्च वर्द्धतां मम ।
नित्या यद्यपि पूज्या त्वं भवेऽत्र जगदम्बिके ! ।
तथापि तव पूजाञ्च वर्द्धयामि च सर्व्वतः ॥
ये त्वामाषाढ़संक्रान्त्यां पूजयिष्यन्ति भक्तितः ।
पञ्चम्यां मनसाख्यायामीशां त्वां वा दिने दिने ॥
पुत्रपौत्रादयस्तेषां वर्द्धन्ते च धनानि च ।
यशस्विनः कीर्त्तिमन्तो विद्यावन्तो गुणान्विताः ॥
ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः ।
लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा ॥
त्वं स्वयं स्वर्गलक्ष्मीश्च वैकुण्ठे कमलालया ।
नारायणांशो भगवान् जरत्कारुर्मुनीश्वरः ॥
तपसा तेजसा त्वाञ्च मनसा ससृजे पिता ।
अस्माकं रक्षणायैव तेन त्वं मनसाभिधा ॥
मनसा देवितुं शक्ता स्वात्मना सिद्धयोगिनी ।
तेन त्वं मनसादेवी पूजिता वन्दिता भवे ॥
यां भक्त्या मनसा देवाः पूजयन्त्यनिशं भृशम् ।
तेन त्वां मनसां देवीं प्रवदन्ति पुराविदः ॥
सत्त्वरूपा च देवि ! त्वं शश्वत्सत्त्वनिषेवया ।
यो हि यद्भावयेन्नित्यं स तत् प्राप्नोति तत्समः ॥
इन्द्रश्च मनसां ज्ञात्वा गृहीत्वा भगिनीञ्च ताम् ।
प्रजगाम स्वभवनं भूषावासःपरिच्छदाम् ॥
पुत्रेण सार्द्धं सा देवी चिरं तस्थौ पितुर्गृहे ।
भ्रातृभिः पूजिता शश्वन्मान्या वन्द्या च सर्व्वतः ॥
गोलोकात् सुरभी ब्रह्मन् ! तत्रागत्य सुपूजिताम् ।
तां स्नापयित्वा क्षीरेण पूजयामास सादरम् ॥
ज्ञानञ्च कथयामास गोप्यं सर्व्वसुदुर्लभम् ।
तया देव्या पूजिता सा स्वर्लोकञ्च पुनर्ययौ ॥
इदं स्तोत्रं पुण्यबीजं तां संपूज्य च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
विषं भवेत् सुधातुल्यं सिद्धस्तोत्रो यदा भवेत् ।
पञ्चलक्षजपेनैव सिद्धस्तोत्रो भवेन्नरः ।
सर्पशायी भवेत् सोऽपि निश्चितं सर्पवाहनः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः ॥
धन्वन्तरिकृतमनसाध्यानपूजादि यथा,—

धन्वन्तरिरुवाच ।

"इहागच्छ जगद्गौरि ! गृहाण मम पूजनम् ।
पूज्या त्वं त्रिषु लोकेषु परा कश्यपकन्यके ! ॥
त्वया जितं जगत् सर्व्वं देवि ! विषस्वरूपया ।
तेन तेऽस्त्रप्रयोगश्च न कृतो रणभूमिषु ॥
इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकन्धरः ।
गृहीत्वा शुक्लकुसुमं ध्यानं कर्त्तुं समुद्यतः ॥
चारुचम्पकवर्णाभां सर्व्वाङ्गसुमनोहराम् ।
ईषद्धास्यप्रसन्नास्यां शोभितां सूक्ष्मवाससा ॥
कबरीभारशोभाढ्यां रत्नाभरणभूषिताम् ।
सर्व्वाभयप्रदां देवीं भक्तानुग्रहकातराम् ॥
सर्व्वविद्याप्रदां शान्तां सर्व्वविद्याविशारदाम् ।
नागेन्द्रवाहिनीं देवीं भजे नागेश्वरीं पराम् ॥
ध्यात्वेव कुसुमं दत्त्वा नानाद्रव्यसमन्वितम् ।
दत्त्वा षोडशोपचारं पूजयामास तां प्रिये ! ॥
स्तोत्रञ्चकार भक्त्या च पुलकाञ्चितविग्रहः ।
पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥#॥

धन्वन्तरिरुवाच ।
नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः ।
नमः कश्यपकन्यायै वरदायै नमो नमः ॥
नमः शङ्करकन्यायै शङ्करायै नमो नमः ।
नमस्ते नागवाहिन्यै नागेश्वर्य्यै नमो नमः ॥
नमो नागभगिन्यै च योगिन्यै च नमो नमः ।
नमोऽस्तौकजनन्यै च जनन्यै जगतां नमः ॥
नमो जरत्कारुकान्ते जरत्कारुस्त्रियै नमः ॥
नमश्चिरं तपस्विन्यै सुखदायै नमो नमः ।
नमस्तपःस्वरूपायै फलदायै नमो नमः ॥
सुशीलायै च साध्व्यै च शान्तायै ते नमो नमः
इत्येवमुक्त्वा भक्त्या च प्रणनाम प्रयत्नतः ॥
तुष्टा देवी वरं दत्त्वा सत्वरं स्वालयं ययौ ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे धन्वन्तरिदर्प-भङ्गमनसाविजयो नाम ५१ अध्यायः ॥ * ॥
(कामरूपस्थितनदीविशेषः । यथा, कालिका-पुराणे । ७४ । ३३ ।
"ततस्तु मनसा नाम नदी पुण्यतमा परा ।
चरित्वा मनसाख्या तु लग्नबिन्दुवतारिता ॥
वैशाखं सकलं मासं यस्यां स्नात्वा नरोत्तमः ।
विष्णुलोकमवाप्यैव ततो मोक्षमवाप्नुयात् ॥")

मनसादेवी, स्त्री, (मनसा चासौ देवी चेति । यद्वा, मनसा दीव्यतीति । दिव् + अच् । ङीप् । "मनसः संज्ञायाम् ।" ६ । ३ । ४ । इति विभक्त्यलुक् च ।) मनसा । इति जटा-धरः ॥ (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।४६।११८।
"सम्पूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ॥")
अस्या विवरणं मनसाशब्दे द्रष्टव्यम् ॥

मनसिजः, पुं, (मनसि जायत इति । जन् + डः । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ६ । इत्यलुक् ।) कामदेवः । इत्यमरः । १।१ ।२७ ॥ (यथा, शाकुन्तले द्वितीयाङ्के ।
"कामं प्रिया न सुलभा मनस्तु तद्भावदर्शना-श्वासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥")
मनोजाते, त्रि ॥

मनसिशयः, पुं, (मनसि शेते इति । शी + "अधिकरणे शेते ।"३। २ । १५ । इति अच् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ ।६। इत्यलुक् ।) कामदेवः । इति हलायुधः ॥

मनस्कारः, पुं, (मनसि मनसो वा कारो निश्चय इति । यद्वा, कृ + भावे घञ् । मनसः कारो-विकारः करणमिति वा ।) मनसः सुखादिः । तत्पर्य्यायः । चित्ताभोगः २ । इत्यमरः । १ । ५ । ५ ॥ हे मनसः सुखादौ तत्परत्वे एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिराभोगः । आभोगस्तात्पर्य्यमिति सर्व्वानन्दः । स्थैर्य्य-मित्यन्ये । व्यापार इत्यपरे । वाञ्छितवस्तु-प्राप्त्या चित्तस्य निराकाङ्क्षता । आभोगः परिपूर्णतेति परे । अनागतचिन्तनादिरूपो मनस्कार इत्यपरे । मनसो मनसि वा कारो निश्चयो मनस्कारः सेतु कखेति सः । मनसि करणं मनसि कारः इत्यपि दृश्यते अत्र बाहु-ल्यात् सप्तम्या अलुक् । इति तट्टीकायां भरतः ॥

मनस्तापः, पुं, (मनसः तापः पीड़ा ।) मनः-पीडा । यथा, गारुडे १११ अध्याये ।
"मनस्तापं न कुर्व्वीत आपदं प्राप्य पार्थिवः ।
समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेत् ॥"
अनुतापः । यथा, प्रायश्चित्ततत्त्वे ।
"ब्राह्मणेन यदा दैवात् छिन्नं यज्ञोपवीतकम् ।
मनस्तापेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥"

मनस्तालः, पुं (तल्यत इति । तल प्रतिष्ठायाम् + घञ् । मनसि तालः प्रतिष्ठा यस्य ।) दुर्गायाः सिंहः । इति त्रिकाण्डशेषः ॥ (हरितालः । तत्र क्लीवत्वमपि । यथा, वैद्यकरत्नमालायाम् ।
"हरितालं मनस्तालं वर्णकं नटभूषणम् ॥")

मनस्थं, त्रि, (मने मनसि वा तिष्ठतीति । स्था + कः । पक्षे विसर्गस्य लोपः ।) मनोऽवच्छिन्नम् । अन्तःकरणस्थितम् । यथा,—
"मनस्थं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिद्ध्यन्ति योगिनः ॥"
इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ब्रह्मनिरूपणं नाम १ अध्यायः ॥ "तादृशब्रह्मापरोक्षेण मुच्यते इत्याह मनस्थमित्यादि । मनस्थं मनोऽव-च्छिन्नम् । मनमध्यस्थं मनःसाक्षीभूतम् । मध्यस्थं सर्व्वसाक्षीभूतम् । मनवर्ज्जितं सङ्कल्पविक-ल्पादिरहितम् । मनमवबोधात्मकम् । तदेव मनसा परिशुद्धान्तःकरणेन । आलोक्य तद्गोचरापरोक्षचरमवृत्तिं लब्ध्वा । योगिनः ज्ञानिनः । स्वयमेव सिद्ध्यन्ति निवृत्ताविद्यका मुक्ता भवन्तीत्यर्थः ।" इति श्रीमदुत्तरगीतायाः सुबोधिन्यां टीकायां श्रीगौड़पादाचार्य्यविर-चितायां १ अध्यायः ॥ * ॥ सर्व्वे सान्ता अद-न्ताश्चेति प्रमाणादत्र मनशब्दोऽकारान्तः । मनःस्थितम् । यथा,—
"आजन्मं मन्मनस्थं यदपि मम मनोमध्यतः क्वापि नाभूत्
तत्ते पुण्यप्रतापादिह शरदि सतः सिद्धमाभूत् सुखेन ॥"
इत्युद्भटः ॥

मनस्विनी, स्त्री, (प्रशस्तं मनोऽस्त्यस्याः इति । मनस् + विनि । ङीप् ।) प्रशस्तमनाः स्त्री । यथा, कुमारसम्भवे । ३ । ३२ ।
"मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥"
मृकण्डोः पत्नी । यथा, मार्कण्डेयपुराणे ।५२।१७।
"प्राणस्यैव मृकण्डुश्च पिता मम महायशाः ।
मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ॥"
प्रजापतिपत्नी । सा च सोमस्य वसोर्जननी । यथा, महाभारते । १ । ६६ । १८ ।
"धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ।
चन्द्रमास्तु मनस्विन्याः श्वसायाः श्वसनस्तथा ॥")

मनस्वी, [न्] पुं, (प्रशस्तं मनोऽस्त्यस्येति । मनस् + विनिः ।) शरभः । इति राजनिर्घण्टः ॥ प्रशस्तमनोयुक्ते, त्रि । यथा,—
"मनस्विगर्हितः पन्थाः समारोढुमसाम्प्रतम् ॥"
इति कारकटीकायां दुर्गादासः ॥

मनाक्, व्य, (मन्यते इति । मन ज्ञाने + बाहुल-कात् आक्प्रत्ययः ।) अल्पम् । इत्यमरः । ३ । ४।८॥ (यथा, भागवते । १ । १० । ३५ ।
"मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आनर्त्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्-विभुः ॥")
मन्दः । इति मेदिनी । अव्यय-के, ११ ॥

मनाका, स्त्री, (मन्यत इति । मन + "बलाका-दयश्च ।" उणा० ४ । १४ । इत्याकः । टाप् ।) हस्तिनी । इत्युणादिकोषः ॥

मनाकरं, क्ली, (मनाक् यथा तथा करोतीति । कृ + अच् ।) मङ्गल्या । मल्लिकागन्धयुक्तागुरु । इति शब्दचन्द्रिका । (मनाक् अल्पस्य करः ।) इषत्कारके, त्रि ॥

मनायी, स्त्री, (मनोः पत्नीति । मनु + "मनोरौ वा ।" ४।१।३८। इति ङीप् उदात्तैकारश्च ।) मनोः पत्नी । इति जटाधरः ॥

मनावी, स्त्री, (मनोः स्त्री । मनु + "मनोरौ वा ।" ४ । १। ३८ । इति ङीप् औकारश्चान्तादेशः ।) मनुपत्नी । इति मुग्धबोधव्याकरणम् ॥ (यथा, शतपथब्राह्मणे । १ । १ । ४ । १६ ।
"सा मनोरेव जायां मनावीं प्रविवेश ॥")

मनितं, त्रि, (मन बोधे + क्तः ।) ज्ञातम् । इत्य-मरः । ३ । १ । १० ॥

मनीकं, क्ली, (मन्यते शोभार्थमाद्रियते इति । मन् + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधु ।) अञ्जनम् । इत्युणादिकोषः ॥

मनीषा, स्त्री, (ईष् + अ. । टाप् । मनस ईषा गमनम् । "शकन्ध्वादिषु पररूपं वाच्यम् ।" १ । १ । ६४ । इत्यस्य वार्त्तिकोक्त्या साधुः ।) बुद्धिः । इत्यमरः । १ । ७ । ५ ॥ (यथा, ऋग्वेदे । १ । ५४ । ८ ।
"असमं क्षत्रमसमा मनीषा ॥"
स्तुतिः । यथा, ऋग्वेदे । ५ । ८३ । १० ।
"उत प्रजाभ्योऽविदो मनीषाम् ॥"
"मनीषां स्तुतिमविद प्राप्तवानसि ॥" इति तद्भाष्ये सायनः ॥)

मनीषी, [न्] पुं, (मनीषा अस्त्यस्येति । मनीषा + व्रीह्यादित्वात् इनिः ।) पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा च मनौ । १ । १७ ।
"यन्मूर्त्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥")
बुद्धियुक्ते, त्रि ॥ (यथा, ऋग्वेदे ।१।१६४।४५ ।
"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ॥"
"मनीषिणो मेधाविनः ।" इति तद्भाष्ये सायनः ॥)

मनुः, स्त्री, (मन् + "शॄस्वृस्निहीति ।" उणा० १ । ११ । इति उः ।) एक्का । इति राजनिर्घण्टः ॥ (मनोः पत्नीति । मनु + "मनोरौ वा ।" ४ । १ । ३८ । इत्यत्र "वा ग्रहणेन ङावपि विकल्प्यते । तेन त्रैरूप्यं भवति । मनोः स्त्री मनायी मनावी मनुः ।" इति काशिकोक्तेः पक्षे ङीवभावः ।) मनुपत्नी । इति लिङ्गादिसंग्रहे अमरः ॥

मनुः, पुं, (मन्यते इति । मन + "शॄस्वृस्निहीति ।" उणा० १ । ११ । इति उः ।) ब्रह्मणः पुत्त्रः । स च प्रजापतिर्धर्म्मशास्त्रवक्ता च । इति लिङ्गादिसंग्रहे अमरः ॥ मनुष्यः । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । ८ । ४७ । ४ ।

"मनोर्विश्वस्य घेदिम आदित्याराय ईशते-
ऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥"

"मनोः मनुष्यस्य ।" इति तद्भाष्ये सायनः ॥) जिनभेदः । इति त्रिकाण्डशेषः ॥ मन्त्रः । इति जटाधरः ॥ (यथा, गौतमीयमन्त्रे । ७ । ५ ।

"गां हिरण्यकवस्त्राद्यैस्तोषयेद् गुरुमात्मनः ।
यथा ददाति सन्तुष्टः प्रसन्नवदनो मनुम् ॥" * ॥)

प्रतिकल्पे चतुर्द्दश मनवो भवन्ति तेषां नामानि यथा । स्वायम्भुवः १ स्वारोचिषः २ उत्तमः ३ तामसः ४ रैवतः ५ चाक्षुषः ६ एते गताः । वैवस्वतः ७ । वर्त्तमानोऽयम् । सावर्णिः ८ दक्षसावर्णिः ९ ब्रह्मसावर्णिः १० धर्म्मसावर्णिः ११ रुद्रसावर्णिः १२ देवसावर्णिः १३ इन्द्रसावर्णिः १४ एते भविष्यन्ति । इति श्रीभागवते ८ स्कन्धे १ अध्यायः ॥ * ॥ एतेषामुत्पत्तिर्यथा,—

"आद्यो मनुर्ब्रह्मपुत्त्रः शतरूपापतिर्व्रती ।
धर्म्मिष्ठानां वरिष्ठश्च गरिष्ठो मनुषु प्रभुः ॥
स्वायम्भुवः शम्भुशिष्यो विष्णुव्रतपरायणः ।
जीवन्मुक्तो महाज्ञानी भक्तः प्रपितामहः ॥
संप्राप कृष्णदास्यञ्च गोलोकञ्च जगाम सः ।
दृष्ट्वा सुतं स्वपुत्त्रञ्च प्रहृष्टश्च प्रजापतिः ॥
तुष्टाव शङ्करं तुष्टः सद्गणे मनुमन्यकम् ।
स च स्वयम्भूपुत्त्रश्च पुरः स्वायम्भुवो मनुः ॥
स्वारोचिषो मनुश्चैव द्वितीयो वह्निनन्दनः ।
राजा वदान्यो धर्म्मिष्ठः स्वायम्भुवसमो महान् ॥
प्रियव्रतसुतावन्यौ द्वौ मनू धर्म्मिणां वरौ ।
तौ तृतीयचतुर्थौ च वैष्णवौ तामसोत्तमौ ॥
तौ च शङ्करशिष्यौ च कृष्णभक्तिपरायणौ ।
धर्म्मिष्ठानां वरिष्ठश्च रैवतः पञ्चमो मनुः ॥
षष्ठश्च चाक्षुषो ज्ञेयो विष्णुभक्तिपरायणः ।
श्राद्धदेवः सूर्य्यसुतो वैष्णवः सप्तमो मनुः ॥
सावर्णिः सूर्य्यतनयो वैष्णवो मनुरष्टमः ।
नवमो दक्षसावर्णिर्विष्णुव्रतपरायणः ॥
दशमो ब्रह्मसावर्णिर्ब्रह्मज्ञानविशारदः ।
ततश्च धर्म्मसावर्णिर्मनुरेकादशः स्मृतः ॥
धर्म्मिष्ठश्च वरिष्ठश्च वैष्णवानां सदा व्रती ।
ज्ञानी च रुद्रसावर्णिर्मनुश्च द्वादशः स्मृतः ॥
धर्म्मात्मा देवसावर्णिर्मनुरेव त्रयोदशः ।
चतुर्द्दशो महाज्ञानी चेन्द्रसावर्णिरेव च ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥ अपि च । स्वायम्भुवः १ । स च गायत्त्र्यां ब्रह्मणो जातः । अस्य पुत्त्राः दश । अग्निध्रः । अग्निबाहुः । रिफ्फः । सबलः । ज्योतिष्मान् । द्युतिमान् । हव्यः । मेधाः । मेधातिथिः । वसुश्च । स्वारोचिषः २ । अस्य पुत्त्राश्चत्वारः । नभः । नभस्यः । प्रसृतिः । भावनश्च । औत्तमिः ३ । अस्य पुत्त्राः दश । ईषः । ऊर्ज्जः । भूर्ज्जः । शुचिः । शुक्रः । मधुः । माधवः । नभस्यः । नभः । सहश्च । तामसः ४ । अस्य पुत्त्राः दश । अकल्मषः । तपोधन्वी । तपोमूलः । तपोधनः । तपोरतिः । तपस्यः । तपोद्युतिः । परन्तपः । तपोभागी । तपोयोगी च । रैवतः ५ । तस्य पुत्त्राः दश । अरुणः । तत्त्वदर्शी । वित्तवान् । हव्यपः । कपिः । मुक्तः । निरुत्सुकः । सत्त्वः । निर्म्मोहः । प्रकाशकश्च । चाक्षुषः ६ । स च ध्रुवपौत्त्रात् रिपुञ्जयात् ब्रह्मदौहित्र्यां वीरणकन्यायां वैरिण्यां जातः । तस्य भार्य्या नड्वला । तस्य पुत्त्राः दश । उरुः । पुरुः । शतद्युम्नः । तपस्वी । सत्यवाक् । कविः । अग्निष्टुप् । अतिरात्रः । सुद्युम्नः । अभिमन्युश्च । वैवस्वतः ७ । स च सूर्य्यात् संज्ञायां जातः । तस्य पुत्त्राः दश । इलः । इक्ष्वाकुः । कुशनाभः । अरिष्टः । रिष्टः । नरिष्यन्तः । करूषः । शर्य्यातिः । पृषध्रः । नाभागश्च । सावर्णिः ८ । स च सूर्य्यात् छायायां जातः । तस्य पुत्त्राः दश । धृतिः । वरीयान् । यवसः । सुवर्णः । धृष्टिः । चरिष्णुः । ईड्यः । सुमतिः । वसुः । शुक्रश्च । रौच्यः ९ । असौ रुचेः प्रजापतेः पुत्त्रः । भौत्य. १० । असौ भूतिनामकप्रजापतेः पुत्त्रः । मेरुसावर्णिः ११ । असौ ब्रह्मणः पुत्त्रः । ऋतुः १२ । ऋतुधामा १३ । विष्वक्सेनः १४ । इति मात्स्ये नवमाध्यायावधि एकविंशत्यध्यायपर्य्यन्तम् ॥ क्रमशस्तेषां विवरणानि यथा, १ स्वायम्भुवः । यथा, मार्कण्डेये ५३ अध्याये ॥

"मनोः स्वायम्भुवस्यासन् दश पुत्त्रास्तु तत्समाः ।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता ।
ससमुद्रा करवती प्रतिवर्षं निवेशिता ॥"

२ स्वारोचिषः । यथा, तत्रैव ६७ अध्याये ।

मार्कण्डेय उवाच ।

"ततः स्वारोचिषं नाम्ना द्युतिमन्तं प्रजापतिम् ।
मनुञ्चकार भगवांस्तस्य मन्वन्तरं शृणु ॥
तत्रान्तरे तु ये देवा मुनयस्तत्सुताश्च ये ।
भूपालाः क्रौष्टुके । ये तान् गदतस्त्वं निशामय ॥
देवाः पारावतास्तत्र तथैव तुषिता द्विज ।।
स्वारोचिषेऽन्तरे चेन्द्रो विपश्चिदिति विश्रुतः ॥
ऊर्ज्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा ।
निश्चरश्चार्व्वरीवांश्च तत्र सप्तर्षयोऽभवन् ॥
चैत्र-किंपुरुषाद्याश्च सुतास्तस्य महात्मनः ।
सप्तासन् सुमहावीर्य्याः पृथिवीपरिपालकाः ॥
तस्य मन्वन्तरं यावत्तावत्तद्वंशविस्तरे ।
भुक्तेयमवनिः सर्व्वा द्वितीयं वै तदन्तरम् ॥
स्वरोचिषस्तु चरितं जन्म स्वारोचिषस्य च ।
निशम्य मुच्यते पापैः श्रद्दधानो हि मानवः ॥"

अस्याप्यद्विवरणं तत्रैव ६१ अध्यायमारभ्य ६६ अध्यायपर्य्यन्तं द्रष्टव्यम् ॥ ३ औत्तमः । यथा, तत्रैव ७३ अध्याये ।

मार्कण्डेय उवाच ।

"मन्वन्तरे तृतीयेऽस्मिन् औत्तमस्य प्रजापतेः ।
देवानिन्द्रनृषीन् भूपान् निबोध गदतो मम ॥
स्वधामानस्तथा देवा यथानामानुकारिणः ।
सत्याख्यश्च द्वितीयोऽन्यस्त्रिदशानां तथा गणः ॥
तृतीये तु गणे देवाः शिवाख्या मुनिसत्तम ।।
शिवाः स्वरूपतस्ते तु श्रुताः पापप्रणाशनाः ॥
प्रतर्द्दनाख्यश्च गणो देवानां मुनिसत्तम ।।
चतुर्थस्तत्र कथित औत्तमस्यान्तरे मनोः ॥
वशवर्त्तिनः पञ्चमेऽपि देवास्तत्र गणे द्विज ।।
यथाख्यातस्वरूपास्तु सर्व्व एव महामुने ।॥
एते देवगणाः पञ्च स्मृता यज्ञभुजस्तथा ।
मन्वन्तरे मनुश्रेष्ठे सर्व्वे द्वादशका गणाः ॥
तेषामिन्द्रो महाभागस्त्रैलोक्ये स गुरुर्भवेत् ।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः ॥
यस्योपसर्गनाशाय नामाक्षरविभूषिता ।
अद्यापि मानवैर्गाथा गीयते तु महीतले ॥
सुशान्तिर्देवराट् कान्तः सुशान्तिं स प्रयच्छति ।
सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिनः ॥
अजः परशुचिर्दिव्यो महाबलपराक्रमाः ।
पुत्त्रास्तस्य मनोरासन् विख्यातास्त्रिदशोपमाः ॥
तत्सूतिसम्भवैर्भूमिः पालिताभून्नरेश्वरैः ।
यावन्मन्वन्तरं तस्य मनोरुत्तमतेजसः ॥
चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः ।
कृतत्रेतादिसंज्ञानां यान्युक्तानि युगे मया ॥
स्वतेजसा हि तपसो वशिष्ठस्य महात्मनः ।
तनयाश्चान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन् ॥
तृतीयमेतत्कथितं तव मन्वन्तरं मया ॥"

अस्याप्यद्विवरणं तत्रैव ६८ अध्यायमारभ्य ७२ अध्यायपर्य्यन्तं द्रष्टव्यम् ॥ ४ तामसः । यथा, तत्रैव ७४ अध्याये ।

"तामसाख्यो मनुरभूत्तस्य मन्वन्तरं शृणु ।
ये देवा यत्पतिर्यश्च देवेन्द्रो ये तथर्षयः ।
ये पुत्त्राश्च मनोस्तस्य पृथिवीपरिपालकाः ॥
सत्यास्तथान्ये सुधियः सुरूपा हरयस्तथा ।
एते देवगणास्तत्र सप्तविंशतिका मुने ।॥
महाबलो महावीर्य्यः शतयज्ञोपलक्षितः ।
शिखिरिन्द्रस्तथा तेषां देवानामभवद्विभुः ॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्बलकस्तथा ।
पीवरश्च तथा ब्रह्मन् । सप्त सप्तर्षयोऽभवन् ॥
नरः क्षान्तिः शान्तदान्तजानुजङ्घादयस्तथा ।
पुत्त्रास्तु तामसस्यासन् राजानः सुमहाबलाः ॥"

अस्याप्यद्विवरणं तत्रैव द्रष्टव्यम् ॥ ५ रैवतः । यथा, तत्रैव ७५ अध्याये ।

मार्कण्डेय उवाच ।

"तामादाय ततो भूपः स्वमेव नगरं ययौ ।
तस्मादजायत सुतो रेवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्म्मैर्म्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥
तस्य मन्वन्तरे देवान् मुनिदेवेन्द्रपार्थिवान् ।
कथ्यमानान्मया ब्रह्मन् ! निबोध सुसमाहितः ॥
सुमेधसस्तत्र देवास्तथा भूपतयो द्विज ! ।
वैकुण्ठश्चामिताभश्च चतुर्द्दश चतुर्द्दश ॥
तेषां देवगणानान्तु चतुर्णामपि चेश्वर ! ।
नाम्ना विभुरभूदिन्द्रः शतयज्ञोपलक्षकः ॥
हिरण्यलोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः ।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः ॥
बलबन्धुर्म्महावीर्य्यः सुयष्टव्यस्तथापरः ।
सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः ॥
रैवतान्तास्तु मनवः कथिता ये मया तव ।
स्वायम्भुवाश्रया ह्येते स्वारोचिषमृते मनुम् ॥"
अस्याप्यद्विवरणं तत्रैव द्रष्टव्यम् ॥ ६ चाक्षुषः ।
यथा, तत्रैव ७६ अध्याये ।

"तस्य मन्वन्तरेशस्य येऽन्तरत्रिदशा द्विज ! ।
ये चर्षयस्तथैवेन्द्रो ये सुताश्चास्य तान् शृणु ॥
आद्या नाम सुरास्तत्र तेषामेकोऽष्टको गणः ।
प्रख्यातकर्म्मणां विप्र ! यज्ञे हव्यभुजामयम् ॥
प्रख्यातबलवीर्य्याणां प्रभामण्डलदुर्द्दृशाम् ।
द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥
तथैवाष्टक एवान्यो भव्याख्यो देवतागणः ।
चतुर्थश्च गणस्तत्र यूथगाख्यस्तथाष्टकः ॥
लेखसंज्ञास्तथैवान्ये तत्र मन्वन्तरे द्विज ! ।
पञ्चमे च गणे देवास्तन्नामानो ह्यमृताशिनः ॥
शतं क्रतूनामाहृत्य यस्तेषामधिपोऽभवत् ।
मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥
सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
ऊरुपुरुशतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
अस्याप्यद्विवरणं तत्रैवाध्याये द्रष्टव्यम् ॥ ७ वैवस्वतः । यथा, तत्रैव ७६ अध्याये ।

मार्कण्डेय उवाच ।

"आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च वसवो विश्वे धर्म्मपुत्त्रगणास्त्रयः ॥
भृगोस्तु भृगवो देवाः पुत्त्रा ह्यङ्गिरसः सुताः ।
एष सर्गश्च मारीचो विज्ञेयः साम्प्रताधिपः ॥
ऊर्ज्जस्वी नाम चैवेन्द्रो महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्त्तन्ते साम्प्रतञ्च ये ॥
सर्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व एव पुरन्दराः ॥
मघवन्तो वृषाः सर्वे शृङ्गिणो गजगामिनः ।
ते शतक्रतवः सर्व भूताभिभवतेजसः ॥
धर्म्माद्यैः कारणैः शुद्धैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ! ॥
भूर्लोकोऽयं स्मृता भूमिरन्तरीक्षं दिवः स्मृतम् ।
दिव्याख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च काश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्त्रो भगवानृचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते मुनयोऽत्र तथान्तरे ॥
इक्ष्वाकुर्नाभगश्चैव धृष्टशर्म्मातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभगो दिष्ट एव च ॥
करूषश्च पृषध्रुश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्त्राः प्रकीर्त्तिताः ॥
वैवस्वतमिदं ब्रह्मन् ! कथितन्ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ! ।
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥"
अस्याप्यद्विवरणं ७७-७८ अध्याययोर्द्रष्टव्यम् ॥
८ सावर्णिः । यथा, तत्रैव ८० अध्याये ।

मार्कण्डेय उवाच ।

"कथितस्तव सावर्णिश्छायासंज्ञासुतश्च यः ।
पूर्व्वजस्य मनोस्तुल्यः स मनुर्भवितास्टमः ॥
रामो व्यासो गालवश्च दीप्तिमान् कृप एव च ।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन् ॥
सुतपाश्चामिताभाश्च मुख्याश्चैव त्रिधा सुराः ।
विंशकः कथिताश्चैषां त्रयाणां त्रिगुणो गणः ॥
तपस्तपश्च शक्रश्च द्युतिर्ज्योतिः प्रभाकरः ।
प्रभासो दयितो धर्म्मस्तेजोरश्मिश्च वक्रतुः ॥
इत्यादिकस्तु सुतपा देवानां विंशको गणः ।
प्रभुर्विभुर्विभासाद्यस्तथान्यो विंशको गणः ॥
सुराणाममितानान्तु तृतीयमपि मे शृणु ।
दमो दान्तो ऋतः सोमो वित्ताद्याश्चैव विंशतिः ॥
मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः ॥
मारीचस्यैव ते पुत्त्राः काश्यपस्य प्रजापतेः ॥
भविष्याश्च भविष्यन्ति सावर्णस्यान्तरे मनोः ।
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्म्मुने ! ।
पाताल आस्ते योऽद्यापि दैत्यः समयबन्धनः ।
विरजाश्चार्व्ववीरश्च निर्मोहः सत्यवाक् कृतिः ॥
विष्ण्वाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः ॥"
अस्याप्यद्विवरणं तत्रैव ८१-९३ अध्यायेषु द्रष्टव्यम् ॥ ९ दक्षसावर्णिः । यथा, तत्रैव ९४ अध्याये ।

"दक्षपुत्त्रश्च सावर्णो भावी यो नवमो मनुः ।
कथयामि मनोस्तस्य ये देवा मुनयो नृपाः ॥
पारामरीचिभर्गाश्च सुधर्म्माणस्तथा सुराः ।
एते त्रिधा भविष्यन्ति सर्व्वे द्वादशका गणाः ॥
तेषामिन्द्रो भविष्यस्तु सहस्राक्षो महाबलः ।
साम्प्रतं कार्त्तिकेयो यो वह्निपुत्त्रः षडाननः ॥
अद्भुतो नाम शक्रोऽसौ भावी तस्यान्तरे मनोः ।
मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा ॥
सप्तर्षयोऽन्यः सबलस्तथान्यो हव्यवाहनः ।
धृष्टकेतुर्बर्हकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवास्तथार्च्चिष्मान् भूरिद्युम्नो बृहद्भयः ॥
एते नृपसुतास्तस्य दक्षपुत्त्रस्य वै नृपाः ॥"

१० ब्रह्मसावर्णिः । यथा, तत्रैव ९४ अध्याये ।

"मनोस्तु दशमस्याथ शृणु मन्वन्तरं द्विज ! ॥
मन्वन्तरे च दशमे ब्रह्मपुत्त्रस्य धीमतः ।
सुखासीना निरुद्धाश्च त्रिःप्रकाराः सुराः स्मृताः ।
शतसंख्या हि ते देवा भविष्या भाविनो गणाः ।
यत प्राणिनां शतं भावि तद्देवानां तदा शतम् ॥
शान्तिरिन्द्रस्तथा भावी सर्व्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा ॥
आपोमूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च ।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तम. ॥
सुक्षेत्रश्चोत्तमौजाश्च भूमिसेनश्च वीर्य्यवान् ।
शतानीकोऽथ वृषभो ह्यनमित्रो जयद्रथः ॥
भूरिद्युम्नः सुपर्व्वा च तस्यैते तनया मनोः ॥"
११ धर्म्मसावर्णिः । यथा, तत्रैव ।

"भविष्या धर्म्मपुत्त्रस्य सावर्णस्यान्तरं शृणु ॥
विहङ्गमाः कामगाश्च निर्म्माणरतयस्तथा ।
त्रिःप्रकारा भविष्यन्ति एकैकस्त्रिंशतो गणाः ॥
मासर्त्तुदिवसा ये तु निर्म्माणपतयस्तु ते ।
विहङ्गमा रात्रयोऽथ मौहूर्त्ताः कामगा गणाः ॥
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः ।
हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः ॥
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः ।
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः ॥
सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरूद्वहः ।
हेमधन्वा दृढायुश्च भाविनस्तत्सुता नृपाः ॥"
१२ रुद्रसावर्णिः । यथा, तत्रैव ।

"द्वादशे रुद्रपुत्त्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्णाख्यस्य ये देवा मुनयश्च शृणुष्व तान् ॥
सुधर्म्माणः सुमनसो हरिता रोहितास्तथा ।
सुवर्णाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
तेषामिन्द्रस्तु विज्ञेय ऋतधामा महाबलः ।
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु ॥
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ।
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ॥
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रविन्दश्च भाविनस्तत्सुता नृपाः ॥"
१३ रौच्यः । यथा, तत्रैव ।

"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान् ।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय ॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरं ।
सुशर्म्माणः सुरा ह्येते समस्ता मुनिसत्तम ! ॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः ।
भविष्यानथ सप्तर्षीन् गदतो मे निशामय ॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः ।
निर्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः ॥
चित्रसेनो विचित्रश्च नयतिर्निर्भयो दृढः ।
सुनेत्रः क्षत्त्रबुद्धिश्च सुव्रतश्चैव तत्सुताः ॥"
१४ भौत्यः । यथा, तत्रैव १०० अध्याये ।

"भौत्यो नाम मनुस्तस्य पुत्त्रो भूतेरजायत ।
तस्य मन्वन्तरे देवानृषीन् भूपांश्च मे शृणु ॥

भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात् ।
देवेन्द्रो यश्च भविता तस्य विख्यातकर्म्मणः ॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भ्राजिरास्तथा ।
धाराष्टकाश्च इत्येते पञ्च देवगणाः स्मृताः ॥
शुचिरिन्द्रस्तदा तेषां त्रिदशानां भविष्यति ।
महाबलो महावीर्य्यः सर्व्वैरिन्द्रगुणैर्युतः ॥
अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा ।
स्त्रीमानी च प्रतीरश्च विष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्दश मयैतत्ते मन्वन्तरमुदाहृतम् ॥”
मन्वन्तरकथाश्रवणफलमाह तत्रैव१०० अध्याये ।
“श्रुत्वा मन्वन्तराणीत्थं क्रमेण मुनिसत्तम ।।
पुण्यमाप्नोति मनुजस्तथाख्यानानि सन्ततिम् ॥
श्रुत्वा मन्वन्तरं पूर्व्वं धर्ममाप्नोति मानवः ।
स्वारोचिषस्य श्रवणात् सर्व्वकामानवाप्नुते ॥
औत्तमेर्धनमाप्नोति ज्ञानञ्चाप्नोति तामसे ।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते स्त्रियम् ॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलम् ।
गुणवत्पुत्त्रपौत्त्रन्तु सूर्य्यसावर्णिके श्रुते ॥
माहात्म्यं ब्रह्मसावर्णौ धर्म्मसावर्णिके शुभम् ।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम् ॥
ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते ।
निशातयत्यरिबलं रौच्यं श्रुत्वा नरोत्तम ।॥
देवप्रसादमाप्नोति भौत्ये मन्वन्तरे श्रुते ।
तथाग्निहोत्रं पुत्त्रांश्च गुणयुक्तानवाप्नुते ॥
सर्व्वाण्यनुक्रमाद्यस्तु शृणोति मुनिसत्तम ।।
मन्वन्तराणि तस्यापि श्रूयतां फलमुत्तमम् ॥
तत्र देवानृषीनिन्द्रान्मनून् तत्तनयान्नृपान् ।
वंशांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते ॥
देवर्षीन्द्रनृपाश्चान्ये ये तन्मन्वन्तराधिपाः ।
त प्रीयन्ते तथा प्रीताः प्रयच्छन्ति शुभां मतिम् ॥
ततः शुभां मतिं प्राप्य कृत्वा कर्म तथा शुभम् ।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्द्दश ॥
सर्व्वे स्युर्ऋतवः सौम्याः सर्व्वे सौम्यास्तथा ग्रहाः ।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम् ॥”*॥
विष्णुः । यथा, महाभारते । १३ । १४६ । ७६ ।
“विश्वकर्म्मा मनुस्त्वष्टा स्थविष्ठो स्थविरो ध्रुवः ॥”
मननप्रधानो विद्वान् । यथा, वाजसनेयसंहितायाम् । १५ । ४६ ।
“तस्मिन्नहं निदधे नाकेऽग्निं यमाहुर्मनवस्तीर्णबर्हिषम् ॥”
“मनवः मननप्रधाना विद्वांसः ॥” इति तद्भाष्ये महीधरः ॥*॥ अन्तःकरणम् । यथा, भागवते । ६ । ४ । २५ ।
“देहोऽसवोऽक्षा मनवो भूतमात्रा
नात्मानमन्यञ्च विदुः परं यत् ॥”
“मनवोऽन्तःकरणानि ।” इति तट्टीकायां श्रीधरः ॥
कृशाश्वस्य पुत्त्रभेदः । यथा, भागवते । ६ । ६ । २० ।
“कृशाश्वोऽर्च्चिषि भार्य्यायां धूमकेतुमजीजनत् ।
धिषणायां वेदशिरः देवलं वयुनं मनुम् ॥”)

मनुजः, पुं, (मनोर्जात इति । जन्+डः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा विष्णुपुराणे । १ । ६ । १० ।
“स्वर्गापवर्गौ मानुष्यात् प्राप्नुवन्ति नरा मुने ।।
यथाभिरुचितं स्थानं तद्यान्ति मनुजा द्विज । ॥”)
मनुजी, स्त्री, (मनुज+गौरादित्वात् ङीष् ।) मानुषी । इति जटाधरः ॥ (टाप् इत्येके । यथा, हरिवंशे । १७६ । २३ ।
“विद्याधराणां नारीषु साध्वीषु मनुजासु च ॥”)
मनुभूः, पुं, (मनोर्भवतीति । भू+क्विप् । मनुर्भूरुत्पत्तिस्थानं यस्येति वा ।) मनुष्यः । इति शब्दचन्द्रिका ॥
मनुराट्, [ज्] पुं, (मनुः मानव इव राजते इति । राज्+क्विप् । मनुष्यवदाचारनत्त्वादस्य तथात्वम् ।) कुवेरः । इति त्रिकाण्डशेषः ॥
मनुषी, स्त्री, (मनुष्यस्य स्त्री । मनुष्य+“हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः ।”४ । १ । ६३ । इत्यस्य वार्त्तिकोक्त्या ङीष् । “हलस्तद्धितस्य ।” ६ । ४ । १५० । इति यलोपः ।) मानुषी । इति शब्दरत्नावली ॥
मनुष्यः, पु, (मनोरपत्यमिति । मनु+“मनोर्जातावञ्यतौ षुक् च ।” ४ । १ । १६१ । इति यत् षुगागमश्च ।) मनोरपत्यम् । तत्पर्य्यायः । मानुषः २ मर्त्यः ३ मनुजः ४ मानवः ५ नरः ६ । इत्यमरः । ३ । ६ । १ ॥ भूमिजः ७ द्विपदः ८ चेतनः ६ भूस्थः १० । इति राजनिर्घण्टः ॥ मनुः ११ पञ्चजनः १२ पुरुषः १३ पूरुषः १४ पुमान् १५ ना १६ । इति शब्दरत्नावली ॥ मर्त्तः १७ विट् १८ । इति जटाधरः ॥ * ॥ (यथा, मनुः । १ । ४३ ।
“रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥”)
स तु अर्व्वाक्स्रोतो ब्रह्मणो नवमः सर्ग एकविधश्च । यथा,—
“अर्व्वाकस्रोतस्तु नवमः चत्तरेकविधो नृणाम् ।
रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः ॥”
इति श्रीभागवते । ३ । १० । २४ ।
अपि च ।
“तस्यापि ध्यायतः सर्गं सत्याभिध्यायिनस्ततः ।
प्रादुर्ब्बभूव चाव्यक्तादर्व्वाक्स्रोतस्तु साधकः ॥
यस्मादर्व्वाक् प्रवर्त्तन्ते ततोऽर्व्वाक्स्रोतसस्तु ते ।
ते च प्रकाशबहुलास्तमोद्रिक्तरजोऽधिकाः ॥
तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः ।
प्रकाशा बहिरन्तश्च मनुष्याः साधकास्तु ते ॥”
इति वह्निपुराणे सर्गकथननामाध्यायः ॥*॥
मनुष्यजन्ममुक्तिकारणं यथा,--
“विमुक्तिहेतुकान्या तु नरयोनिः कृतात्मनाम् ।
नामुञ्चन्ति हि संसारं विभ्रान्तमनसो गताः ॥
जीवा मानुष्यतां मर्त्ये जन्मनामयुतैरपि ।
तदीदृक् दुर्लभं प्राप्य मुक्तिद्वारं विचेतसः ॥
पतन्ति भूयः संसारे विष्णुमायाविमोहिताः ।
सुदुस्तरापि दुःसाध्या माया कृष्णस्य मोहिनी ॥”
इति तत्रैव मुक्तिवतनामाध्यायः ॥*॥
“मनुष्याणां पिता माता भ्राता च श्रीहरिर्यथा ।
विशेषतो मनुष्याणां पिता माता जनार्द्दनः ।
भ्राता च सर्व्वलोकानां वात्सल्यगुणसागरः ॥”
इति पाद्मोत्तरखण्डे ७८ अध्यायः ॥*॥
स त्रिविधो यथा,—
“यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥
इति श्रीभगवद्गीतायां १७ अध्यायः ॥
“ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥”
इति तत्रैव १४ अध्यायः ॥
(त्रि, स्तुतिकारकः । यथा, ऋग्वेदे । १ । ५६ । ४ ।
“होता मनुष्यो न दक्षः ॥”
“मनुष्यो लौकिको बन्दी दातारं प्रभुं बहुविधया स्तुत्या स्तौति ।” इति तद्भाष्ये सायनः ॥
मनुष्यसम्बन्धी । यथा, ऋग्वेदे । १ । ६२ । ११ ।
“प्रमिनती मनुष्या युगानि ॥”
“मनुष्या मनुष्याणां सम्बन्धीनि युगानि कृतत्रेतादीनि प्रमिनती स्वगमनागमनाभ्यां प्रकर्षेण हिंसन्ती ॥” इति तद्भाष्ये सायनः ॥ मनुष्यहितः । यथा, ऋग्वेदे । ७ । १८ । १ ।
“दशारित्रो मनुष्यः स्वर्षाः ॥”
“मनुष्यो मनुष्याणां हितः स्वर्षाः स्वर्गस्य दाता ।” इति तद्भाष्ये सायनः ॥)
मनुष्यधर्म्मा, [न्] पुं, (मनुष्यस्येव धर्म्म आचारो यस्य । “धर्म्मादनिच् केवलात् ।” ५ । ४ । १२४ । इति समासान्तोऽनिच् ।) कुवेरः । इत्यमरः । २ । ६ । १ ॥
मनुष्ययज्ञः, पु, (मनुष्येभ्यो मनुष्यार्थं यो यज्ञः ।) अतिथिपूजनम् । इति गृहस्थशब्ददर्शनात् ॥ (यथा, शतपथब्राह्मणे । ११ । ५ । ६ । १ ।
“तान्येव महासत्त्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति ॥”)
मनुष्यी, स्त्री, (मनुष्य+गौरादित्वात् ङीष् । योपधप्रतिषेधे “हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः ।” इति ङीषि यलोपाभावः ।) मानुषस्त्रीजातिः । तत्पर्य्यायः । मानुषी २ नारी ३ मानवी ४ । इति शब्दरत्नावली ॥ मर्त्यी ५ मनुजी ६ नरी ७ । इति जटाधरः ॥
मनोगुप्ता, स्त्री, (मनसा मनःशब्देन गुप्तेव ।) मनःशिला । इत्यमरः । २ । ६ । १०८ ॥
मनोजन्मा, [न्] पु, (मनसो जन्म यस्य ।) कन्दर्पः । इति त्रिकाण्डशेषः ॥
मनोजवः, पु, (मनस इव जवोऽस्य । एकदैव सर्व्वगामित्वात् तथात्वम् ।) विष्णुः । यथा, महाभारते दानधर्म्मे सहस्रनामस्तोत्रम् । १३ । १४६ । ८७ ।
“मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ॥”
(मनसाश्चत्तस्य जवः ।) मनसो वेगः । इति व्याकरणम् ॥ (अनिलपत्न्याः शिवायाः पुत्त्रः । यथा, हरिवंशे । ३ । ४८ ।

"अनिलस्य शिवा भार्य्या यस्याः पुत्त्रो मनोजवः ॥")

वसन्तस्य पुत्त्रभेदः । यथा, मार्कण्डेये । ५२ । ११ ।
"शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८३ । ८५ ।
"मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥"
षष्ठमन्वन्तरस्येन्द्रः । यथा, मार्कण्डेये । ७६।५३।
"मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥"
मेधातिथेः पुत्त्रभेदः । यथा, भागवते ।५ ।२० ।
२५ । "तस्य प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्त्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥")

मनोजवः, त्रि, (मनो जवं वेगवद्यस्मिन् । यद्वा, मनो जवति पितायमिति ज्ञात्वा धावत्यस्मिन् इति । जु सौत्रधातुः + अच् ।) पितृतुल्यः । तत्पर्य्यायः । पितृसन्निभः २ । इत्यमरः । ३।१।१३॥ अतिशयवेगवान् । (यथा, मार्कण्डेये ।२१ । ८ ।
"तमन्वधावद्वेगेन तुरगोऽसौ मनोजवः ॥")

मनोजवसः, त्रि, (मनो जवत्यस्मिन् । जु + बाहुलकात् असच् ।) पितृसन्निभः । इत्यमरटीकायां स्वामी । ३ । १ । १३ ॥

मनोजवा, स्त्री, (मनो जवत्यनेति । जु + अच् टाप् ।) अग्निजिह्वाभेदः । इति जटाधरः ॥ (गुणादिविवृतिरस्या अग्निजिह्वाशब्दे ज्ञातव्या॥ वह्निजिह्वाविशेषः । यथा, मार्कण्डेये । ९९।५४।
"मनोजवा च या जिह्वा लघिमा गुणलक्षणा ।
तया नः पाहि पापेभ्य ऐहिकाच्च महा
भयात् ॥"
स्कन्दस्य मातृगणभेदः । यथा, महाभारते । ९ । ४६ । १६ ।
"मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥"
क्रौञ्चद्वीपस्य नदीविशेषः । यथा, मात्स्ये । १२१ । ८७ ।
"गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ॥"
मन इव जवो यस्याः । वेगविशिष्टायां स्त्रियाम् । यथा, महाभारते । १ । १५६ । १८ ।
"अहःसु विहरानेन यथाकामं मनोजवा ॥")

मनोजवृद्धिः, पुं, (मनोजस्य कामस्य वृद्धिर्यस्मात् ।) कामवृद्धिक्षुपः । इति राजनिर्घण्टः ॥

मनोज्ञं, क्ली, (मनो जानाति ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थं ज्ञा + कः ।) सरलकाष्ठम् । इति रत्नमाला ॥

मनोज्ञं, त्रि, (मनसा जानातीति । ज्ञा + कः । यद्वा, मनः ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थज्ञाधातोः कः ।) मनोहरम् । तत्पर्य्यायः । सुन्दरम् २ रुचिरम् ३ चारु ४ सुषमम् ५ साधु ६ शोभनम् ७ कान्तम् ८ मनोरमम् ९ रुच्यम् १० मञ्जु ११ मञ्जुलम् १२ । इत्यमरः । ३ । १ । ५२ ॥ मनोहरम् १३ बन्धुरम् १४ वन्धूरम् १५ पेशलम् १६ पेलवम् १७ सुभगम् १८ वामम् १९ अभिरामम् २० नन्दितम् २१ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ४६ । अध्याये ।
"मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितम् ।
पूर्व्वं मधुरमश्नीयात् मध्येऽम्ललवणौ रसौ ॥")

मनोज्ञा, स्त्री, (मनोज्ञ + स्त्रियां टाप् ।) मनःशिला । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे त्रयोदशाध्याये ।
"स्विन्नं मनोज्ञाकासीसयोषाञ्जनकसैन्धवैः ॥")
राजपुत्त्री । इति जटाधरः ॥ वन्ध्याकर्कोटकी । आवर्त्तकी । स्थूलजीरकः । जाती । मदिरा । इति राजनिर्घण्टः ॥

मनोभवः, पुं (मनसः मनसि वा भवतीति । भू + अच् । मनसः भव उत्पत्तिर्यस्येति वा ।) कन्दर्पः । इति हलायुधः ॥ (यथा, मार्कण्डेये । १८ । ४१ ।
"तं तां दृष्ट्वागतो दैत्याः साभिलाषा मनोभवम् ।
न शेकुरुद्धतं धैर्य्यान्मनसा वोढुमातुराः ॥"
मनोजन्ये, त्रि । यथा, भागवते । ६ । १५।२४।
"दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः ।
कर्म्मभिर्ध्यायतो नाना कर्म्माणि मनसोऽभवन् ॥")

मनोभूः, पुं, (मनसः मनसि वा भवतीति । भू + क्विप् ।) कामदेवः । इति शब्दरत्नावली ॥ (यथा, कलाविलासे । १ । ३३ ।
"श्यामा शुशुभे शशिना तया मनोभूर्मधूत्सवस्तेन ।
मदमुदितमानसानां तेनापि न्यगीदृशां
लीला ॥")

मनोयोनिः, पुं, (मन एव योनिरुत्पत्तिस्थानमस्य ।) कामदेवः । इति हेमचन्द्रः ।२।१४२॥

मनोरथः, पुं, (मनसः रथ इव । मन एव रथोऽत्रेति वा) इच्छा । इत्यमरः । १ । ७ ।२७॥ (यथा, रघौ । ११ । ५९ ।
"इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥"
कविविशेषः । यथा, राजतरङ्गिण्याम् ।४।४९६।
"मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥")

मनोरमं, त्रि, (मनो रमयतीति । रम् + णिच् + अण् ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, सुश्रुते । १ । ४६ । अध्याये ॥
"पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥")

मनोरमा, स्त्री, (मनोरम + स्त्रियां टाप् ।) गोरोचना । इति राजनिर्घण्टः ॥ बुद्धशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्दा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्डशेषः ॥ (इन्दीवराख्यविद्याधरस्य कन्या । यथा च मार्कण्डेये । ६२ । १३ ।
"अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै ।
नाम्ना मनोरमा जाता सुतायां मरुधन्वनः ॥"
सप्तसरस्वतीनामेकतमा । यथा, महाभारते । ९ । ३८ । ४ ।
"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा ।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥"
तथा च तत्रैव । ९ । ३८ । २४—२५ ।
"उद्दालकेन यजता पूर्व्वं ध्यात्वा सरस्वती ।
आजगाम सरिच्छ्रेष्ठा तं देशमृषिकारणात् ॥
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोरमेति विख्याता सा हि तैर्मनसाकृता ॥"
छन्दोविशेषः । नरजगसदाहरणञ्च यथा, छन्दोमञ्जर्य्याम् ।
"नरजगैर्भवेन्मनोरमा ।"
"तरणिजातटे विहारिणी व्रजविलासिनी
विलासतः ।
सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥")

मनोहतः, त्रि, (मनसा मनसि वा हतः ।) प्रतिहतः । इत्यमरः । ३ । १ । ४१ ॥

मनोहरं, त्रि, (हरतीति । हृ + अच् । मनसो हरमिति ।) मनोज्ञम् । इति शब्दरत्नावली ॥ (यथा, मनौ । २ । ३३ ।
"स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ॥"
यथा च मार्कण्डेये । ११२ । ३ ।
"स ददर्श तदा तत्र होमधेनुं मनोहराम् ॥")
कुन्दवृक्षे, पुं । सुवर्णे, क्ली । इति राजनिर्घण्टः ॥

मनोहरा, स्त्री, (मनोहर + टाप् ।) जाती । स्वर्णयूथी । इति राजनिर्घण्टः ॥ (धरस्य वसोः पत्नी । यथा, विष्णुपुराणे । १ । १५ । ११४ ।
"मनोहरायाः शिशिरः प्राणोऽथ वरुणस्तथा ॥"
अप्सरोविशेषः । यथा, महाभारते ।१३।१९।४५।
"मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ॥")

मनोहर्त्ता, [ऋ] त्रि, (मनो हरतीति । हृ + तृच् ।) मनोहरणकर्त्ता । यथा,—
"असनं तेऽपनेष्यामि त्रिलोक्यां यदि भाव्यते ।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥"
इति श्रीभागवते १० स्कन्धे ६२ अध्यायः ॥

मनोहारि, [न्] त्रि, (मनो हरति मनो हर्त्तुं शीलमस्येति वा । हृ + णिनिः ।) मनोहरम् । इत्यमरटीकायां स्वामी । तथाहि ।
"गाङ्गं वारि मनोहारि मुरारिचरणच्युतम् ।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥"
इति वाल्मीकिकृतगङ्गास्तोत्रम् ॥

मनोह्वा, स्त्री, (मनः ह्वयति आह्वयतीवेति । ह्वे + "आतोऽनुपसर्गे कः ।"३।२।३। इति कः । टाप् ।) मनःशिला । इत्यमरः । २ । ९ । १०८॥ (अस्याः पर्य्यायो यथा,—

"मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका।
नैपाली कुनटी गोला शिला दिव्यौषधिः
स्मृता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मन्तव्यं, त्रि, (मन्यते इति । मन + तव्य ।) मननीयम् । भाव्यम् । यथा । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" इत्यादि छान्दोग्योपनिषत् ॥

मन्ता, [ऋ] त्रि, (मन्यते जानातीति । मन् + "बहुलमन्यत्रापि ।" उणा० २ । ९५ । इति तृच ।) विद्वान् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (मननकर्त्ता । यथा । "स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यः गुणी ग्रहणं प्राधान्यमव्यक्तं जीवो ज्ञः प्रकुलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥)

मन्तुः, पु, (मन्यते इति । मन् + "कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० । १ । ७३ । इति तुन् ।) अपराधः । (यथा, नैषधचरिते । ६ । ११० ।

"सतीव्रतैस्तीव्रमिमन्तु मन्तु-
मन्तर्वरं वच्मि मामिंतासि ॥")

मनुष्यः । प्रजापतिः । इति मेदिनी । ते, ४३ ॥ द्वात्रिंशदपराधा यथा । भगवद्भक्तानां चत्रियसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा अस्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वा अस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा अस्नात्वा विष्णुगृहप्रवेशनम् ५ मानव शवं स्पृष्ट्वा अस्नात्वा विष्णुसन्निधाववस्थानम् ६ विष्णुं स्पृशतः पायुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरीषत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपस्पर्शनम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ कुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्णोरर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ कृष्णं वस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोहृतवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० जालपादशरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोः स्पर्शनं कर्म्माचरणं वा २२ श्मशानं गत्वा अस्नात्वा विष्णोरुपसर्पणम् २३ पिण्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय स्पृष्ट्वा पीत्वा वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वा वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पं अप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारुह्य विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णोः प्रबोधनम् ३१ अजीर्णे सति विष्णोरुपसर्पणम् ३२। एतदप्युपलक्षणं तथा च नरसिंहपुराणे ।

"अपराधसहस्राणि अपराधशतानि च ।
पद्मनेकेन देवेशः क्षमते हेलयाच्चितः ॥"

इत्याह्निकाचारतत्त्वे चतुर्थयामार्द्धकृत्यम् ॥
अपि च ।

वराह उवाच ।

"भुक्त्वा तु परकीयान्नं तनपरस्तन्निवर्त्तनः ।
प्रथमस्यापराधोऽयं धर्म्मविघ्नाय वै भवेत् ॥
अभुक्त्वा दन्तकाष्ठानि यस्तु मामुपसर्पति ।
द्वितीयस्यापराधस्तु कर्म्मविघ्नाय विद्यते ॥
गत्वा मैथुनसंयोगं योऽनु मां स्पृशते नरः ।
तृतीयमपराधन्तु कल्पयामि वसुन्धरे । ॥
स्पृष्ट्वा रजस्वलां नारीमस्माकं यः प्रपद्यते ।
चतुर्थमपराधन्तु इष्टे नैव क्षमाम्यहम ॥
स्पृष्ट्वा तु मृतकञ्चैव असंस्कारकृतन्तु वै ।
पञ्चमस्यापराधञ्च न क्षमामि वसुन्धरे । ॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम् ।
षष्ठकस्यापराधन्तु न क्षमामि वसुन्धरे । ॥
मामेवार्च्चनकाले तु पुरीषं यस्य गच्छति ।
सप्तमस्यापराधन्तु कल्पयामि वसुन्धरे । ॥
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते ।
अष्टमस्यापराधन्तु कल्पयामि वसुन्धरे । ॥
मामेवार्च्चनकाले तु यस्त्वसत्यं प्रभाषते ।
नवमस्यापराधन्तु न रोचामि वसुन्धरे । ॥
अविधानेन मां स्पृष्ट्वा यस्तु मां प्रतिपद्यते ।
दशमस्यापराधन्तु मम चाप्रियकारकम् ॥
क्रुद्धस्त्वन्यानि कर्म्माणि कुरुते कर्म्मकारकः ।
एकादशापराधन्तु कल्पयामि वसुन्धरे । ॥
अकर्म्मण्यानि पुष्पाणि यस्तु मामुपकल्पयेत् ।
द्वादशस्यापराधन्तु कल्पयामि वसुन्धरे । ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ।
त्रयोदशापराधन्तु कल्पयामि वसुन्धरे । ॥
अन्धकारेऽपि मां देवि । यः स्पृशेत कदाचन ।
चतुर्द्दशापराधन्तु कल्पयामि वसुन्धरे । ॥
यस्तु कृष्णेन वस्त्रेण मम कर्म्माणि कारयेत् ।
पञ्चदशापराधन्तु कल्पयामि वरानने । ॥
अधौतेन च वस्त्रेण यस्तु मामुपकल्पते ।
षोड़शन्त्वपराधानां कल्पयामि वरानने । ॥
स्वयमन्नन्तु यो दद्यादन्नाम्नाय च माधवि । ।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे । ॥
यस्तु मत्स्यानि मांसानि भक्षयित्वा वरानने । ।
अष्टादशापराधानि अनुजानानि माधवि । ॥
जालपादं भक्षयित्वा यस्तु मामुपसर्पति ।
एकोनविंशापराधं प्रतिजानामि सुन्दरि । ॥
यस्तु मे दीपकं स्पृष्ट्वा यो मां स्पृशति माधवि । ।
विंशकस्यापराधानां कल्पयामि वरानने ॥
श्मशानं यस्तु वै गत्वा यो मामेवाभिगच्छति ।
एकविंशापराधानि कल्पयामि वसुन्धरे । ॥
पिण्याकं भक्षयित्वा तु यो मामेवोपचक्रमे ।
द्वाविंशत्यपराधानां ताम्यहं चोपकल्पये ॥
यस्तु वाराहमांसानि प्रापणेनोपपादयेत् ।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे । ॥
सुरां पीत्वापि यो मर्त्यः कदाचिदुपसर्पति ।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे ! । ॥
यः कुसुम्भञ्च मे शाकं भक्षयित्वोपचक्रमे ।
अपराधं पञ्चविंशं कल्पयामि वसुन्धरे ! ॥
परप्रावरणेनैव यस्तु मामुपसर्पति ।
अपराधेषु षड्विंशं कल्पयामि वरानने । ॥
नवान्नं यस्तु भक्षेत न स देवान् पितॄन् यजेत् ॥
सप्तविंशापराधानि कल्पयामि गुणान्विते । ॥
उपानद्भ्यां च प्रपदे तथा मे चोपचक्रमे ।
अष्टाविंशापराधानि कल्पयामि गुणान्विते । ॥
शरीरं मण्डयित्वा तु यो मामाप्नोति माधवि । ।
एकोनत्रिंशमपराधं स स्वर्गेषु न गच्छति ॥
अजीर्णेन समाविष्टो यस्तु मामभिगच्छति ।
त्रिंशकस्यापराधानां कल्पयामि वसुन्धरे । ॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति ।
एकत्रिंशापराधन्तु कल्पयामि यशस्विनि । ॥
विना भेर्य्यादिशब्देन द्वारस्योद्घाटनं मम ।
महापराधं विद्यात तद्वात्रिंशापराधकम् ॥"

इति वाराहे द्वात्रिंशदपराधाध्यायः ॥

(त्रि, ज्ञाता । यथा, ऋग्वेदे । १० । ६३ । ८ ।

"य ईशिरे भुवनस्य प्रचेतसो
विश्वस्य स्थातुर्जगतश्च मन्तवः ।"

"मन्तवः सर्व्वस्य वेदितारः ।" इति तद्भाष्ये सायनः ॥ मननीयः । यथा, ऋग्वेदे । १ । १५२ । १ ।

"युवोरच्छिद्रा मन्तवो ह सर्गाः ।"

"मन्तवोह मननीयाश्च ।" इति सायनः ॥)

मन्त्रः, पुं, (मन्त्र्यते गुप्तं परिभाष्यते इति । मत्रि गुप्तभाषणे + घञ् । यद्वा, मन्त्रयते गुप्तं भाषते इति । मत्रि गुप्तभाषणे + अच् ।) वेदभेदः । स च मन्त्रस्वरूपभागः ॥ (यथा, ऋग्वेदे । ६७ । ४ । ७४ ।

"प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थम् ॥"

यथा च मनुः । २ । १६ ।

"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य
कस्यचित् ॥"

तन्त्राद्युक्तमन्त्रभागश्च । यथा, मनौ । ७ । २१७ ।

"सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥")

गुप्तवादः । स तु रहसि कर्त्तव्यावधारणं मन्त्रणमिति ख्यातम् । इत्यमरभरतौ ॥ परामर्शः । मन्त्रणा । (यथा, माघे । २ । २९ ।

"मन्त्रो योध इवाधीरः सर्व्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥")

अङ्गादिभ्यो मन्त्रग्रहणस्य निषेधो यथा,—

"अङ्गाङ्गहीना वधिराः कुयोनिषु रताश्च ये ।
तेषां मन्त्रो न सुखदः प्रोक्तः कविभिरेव च ॥
कामुकानां जड़ानाञ्च स्त्रीजितानां तथैव च ।
श्वशुरस्य गृहे नित्यं जामाता कर्म्मकारक

तस्यापि न भवेन्मन्त्रः कार्य्यसिद्धौ कदाचन ॥”
इति जैमिनिभारते आश्वमेधिकपर्व्वणि ९ अः ॥
अन्यत् मन्त्रणाशब्दे द्रष्टव्यम् ॥ * ॥ देवादीनां साधनम् । इति मेदिनी । रे, ७४ ॥
“तन्मन्त्राद्यषट्कर्णीनं यत्र तृतीयाद्यगोचरम् ।
रहस्यालोचनं मन्त्रो रहश्छन्नमुपह्वरम् ॥”
इति हेमचन्द्रः ॥

मन्त्रव्याख्यातृदेकनवत्यृषयो यथा,—
“एते मन्त्रकृतः सर्व्वे कृत्स्नशस्तु निबोधत ।
भृगुः काश्यः प्रचेताश्च दधीचो ह्यात्मवानपि ॥
और्व्वोऽथ जमदग्निश्च विदः सारस्वतस्तथा ।
आर्ष्टिषेणो च्यवनश्च वीतहव्यः सवेधसः ॥
वैण्यः पृथुर्दिवोदासो ब्रध्न्यश्वो गृत्सशौनकः ।
एकोनविंशतिर्ह्येते भृगवो मन्त्रकृत्तमाः ॥१९॥
अङ्गिरा वेधसश्चैव भरद्वाजो गभात्मकः ।
तथा स्तगधरो गर्द्दः सिति, सुकृतिरेव च ॥
गुरुवीतश्च मान्धाता अम्बरीषस्तथैव च ।
युवनाश्वः पुरुकुत्सः सुमद्युः सदस्युवान् ॥
अजमीढो ह्युदार्य्यश्च तचकः कविरेव च ।
पृषदश्वो विरूपश्च काव्यश्चैवाथ सुद्गलः ॥
उतथ्यश्च शरद्वांश्च तथा वाजिश्रवा अपि ।
अयस्योऽथ सुचित्तिश्च वामदेवस्तथैव च ॥
औशिजो बृहच्छुक्तिश्च ऋषिर्दीर्घतपा अपि ।
काचीवांश्च त्रयस्त्रिंशत् स्मृता ह्याङ्गिरसा वराः ॥ ३३ ॥
एते मन्त्रकृतः सर्व्वे काश्यपांस्तु निबोधत ।
काश्यपः सहवत्सारो निध्रुवो वेद्य एव च ।
असितो देवलश्चैव षडेते ब्रह्मवादिनः ॥ ६ ॥
अत्रिर्वद्धस्वनश्चैव श्यावाश्वोऽथ गविष्ठिरः ।
वर्णातको ऋषिः सिद्धस्तथा पूर्व्वातिथिश्च यः ॥
इत्येते अत्रयः प्रोक्ता मन्त्रकृतस्तु महर्षयः ॥४॥
वशिष्ठश्चैव शक्तिश्च तृतीयश्च पराशरः ।
ततस्तु इन्द्रप्रमतिः पञ्चमस्तु भरद्वसुः ॥
षष्ठस्तु मित्रावरुणिः सप्तमः कुण्डिनस्तथा ।
इत्येते सप्त विज्ञेया वाशिष्ठा ब्रह्मवादिनः ॥७॥
विश्वामित्रश्च गाधेयो देवरातस्तथोद्वलः ।
तथा विद्वान् मधुच्छन्दो ऋषिश्चान्योऽघमर्षणः ॥
अष्टको लोहितश्चैव भूतकीलश्च तावुभौ ।
देवश्रवा देवरातः पुराणश्च धनञ्जयः ॥
शिशिरश्च महातेजाः सालङ्कायन एव च ।
त्रयोदशैते विज्ञेया ब्रह्मिष्ठाः कौशिका वराः ॥१३॥
अगस्त्योऽथ दृढ़द्युम्न इन्द्रवाहुस्तथैव च ।
ब्रह्मिष्ठागस्तयो ह्येते त्रयः परमकीर्त्तयः ॥ ३ ॥
मनुर्वैवस्वतश्चैव ऐलो राजा पुरूरवाः ।
क्षत्त्रियाणां वरा ह्येते विज्ञेया मनुवादिनः ॥३॥
भलन्दश्चैव भत्सश्च वत्सलश्चैव ते त्रयः ।
एते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः स्मृताः ॥३
इत्येकनवतिः प्रोक्ता मन्त्रा यैश्च बहिष्कृताः ।
ब्राह्मणाः क्षत्त्रिया वैश्या ऋषिपुत्त्रास्तथा स्मृताः ।
ऋषीणाञ्च सुता ह्येते ऋषिपुत्त्राः श्रुतर्षयः ॥”
इति मात्स्ये १०१ अध्यायः ॥

कृष्णमन्त्रमाहात्म्यं यथा,—
“तावन्निबद्धः संसारकारागारे विधेर्जनः ।
न यावत् कृष्णमन्त्रञ्च प्राप्नोति गुरुवक्त्रतः ॥
कृतकर्म्मभोगरूपनिगडोच्छेदकारणम् ।
मायाजालोच्छेदकरमाशापाशनिकृन्तनम् ॥
गोलोकमार्गसोपानं निस्तारबीजकारणम् ।
भक्त्यङ्कुरस्वरूपञ्च नित्यं दृढ़मनश्वरम् ॥
सारञ्च सर्व्वतपसां योगानाञ्च तथैव च ।
सिद्धीनां वेदपाठानां व्रतादीनाञ्च निश्चितम् ॥
दानानां तीर्थस्नानानां यज्ञादीनां पुरन्दर ! ।
जपानामुपवासानामित्याह कमलोद्भवः ॥
पुंसां लक्षं पितृणाञ्च शतं मातामहस्य च ।
पूर्व्वं परञ्च तत्संख्यं पितरं मातरं गुरुम् ॥
सहोदरं कलत्रञ्च बन्धुं शिष्यञ्च किङ्करम् ।
समुद्धरेच्च श्वशुरं श्वश्रूं कन्याञ्च तत्सुतम् ॥
आत्मानञ्च सतीर्थ्यञ्च गुरुपत्नीं गुरोः सुतम् ।
उद्धरेद्बलवान् भक्तो मन्त्रग्रहणमात्रतः ॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ।
तत्स्पर्शपूततीर्थैश्च सद्यः पूता वसुन्धरा ॥
अनेकजन्मपर्य्यन्तं दीक्षाहीनो भवेन्नरः ।
तदाप्यदेवमन्त्रञ्च लभते पुण्यशेषतः ॥ * ॥
सप्तजन्मोपदेवानां कृत्वा सेवां स्वकर्म्मतः ।
लभते च रवेर्मन्त्रं साक्षिणः सर्व्वकर्म्मणाम् ॥
जन्मत्रयं भास्करञ्च निषेव्य मानवः शुचिः ।
लभेद्गणेशमन्त्रञ्च सर्व्वविघ्नहरं परम् ॥
जन्मत्रयं तं निषेव्य निर्व्विघ्नश्च भवेन्नरः ।
विघ्नेशस्य प्रसादेन दिव्यज्ञानं लभेन्नरः ॥
तदा ज्ञानप्रदीपेन समालोक्य महामतिः ।
अज्ञानान्धतमो हित्वा महामायां भजेन्नरः ॥
विष्णुमायाञ्च प्रकृतिं दुर्गां दुर्गतिनाशिनीम् ।
सिद्धिदां सिद्धिरूपाञ्च परमां सिद्धयोगिनीम् ॥
वाणीरूपाञ्च पद्माञ्च भद्रां कृष्णप्रियात्मिकाम् ।
नानारूपां तां निषेव्य जन्मनां शतकं नरः ॥
तत्प्रसादाद्भवेत् ज्ञानी ज्ञानानन्दं ततो भजेत् ।
कृष्णज्ञानाधिदेवञ्च महाज्ञानं सनातनम् ॥
शिव शिवस्वरूपञ्च शिवदं शिवकारणम् ।
परमानन्दरूपञ्च परमानन्ददायिनम् ॥
सुखदं मोक्षदञ्चैव दातारं सर्व्वसम्पदाम् ।
अमरत्वप्रदञ्चैव दीर्घायुष्ट्वप्रदं परम् ॥
इन्द्रत्वञ्च मनुत्वञ्च दातुं शक्तञ्च लीलया ।
राजेन्द्रत्वप्रदञ्चैव ज्ञानदं हरिभक्तिदम् ॥
जन्मत्रयं समाराध्य चाशुतोषप्रसादतः ।
सर्व्वदस्य वरेणैव निर्म्मलं ज्ञानमालभेत् ॥
निर्म्मलज्ञानदीपेन सुप्रदीपेन तत्त्ववित् ।
ब्रह्मादितृणपर्य्यन्तं सर्व्वं मिथ्यैव पश्यति ॥
दयानिधेः प्रसादेन शङ्करस्य महात्मनः ।
वरदस्य वरेणैव हरिभक्तिं लभेत ध्रुवम् ॥
तदा तद्भक्तसंसर्गात् कृष्णमन्त्रं लभेत् ध्रुवम् ।
तदा निवृत्तिमाप्नोति मायाकारां परात्पराम् ॥
यत्र देहे लभेन्मन्त्रं तद्देहावधि भारते ।
तत् पाञ्चभौतिकं त्यक्त्वा बिभर्त्ति दिव्यरूपकम् ॥
करोति दास्यं गोलोके वैकुण्ठे वा हरेः पदे ।
परमानन्दसंयुक्तो मोक्षादिषु विवर्ज्जितः ॥
न विद्यते पुनर्जन्म पुनरागमनं सुर ! ।
पुनश्च न पिबेत् क्षीरं श्रुत्वा माहात्म्यं परम् ॥
विष्णुमन्त्रोपासकानां गङ्गादितीर्थसेविनाम् ।
स्वधर्म्मिणाञ्च भिक्षूणां पुनर्जन्म न विद्यते ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥

शिवमन्त्रा यथा,—
“प्रथमं श्रृणु तन्मन्त्रं ततोऽनुध्यानगोचरम् ।
ततः क्रमन्तु पूजायाः क्रमाद्वित्तं नरर्षभौ ॥
समस्तानां स्वराणान्तु दीर्घाः शेषाः सबिन्दुकाः ।
ऋ ऌ क् शून्याः सार्द्धचन्द्रा उपान्ते नाभिसंहिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रः पञ्चवक्त्रस्य कीर्त्तितः ।
क्रमात् सम्मदसन्दोहमादगौरवसंज्ञकाः ॥
प्रासादस्तु भवेत् शेषः पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं समुदितं कृत्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ।
सम्मदादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ॥
शम्भोः प्रसादनेनैव यस्माद्दृष्टस्तु मन्त्रकः ।
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ।
आमोदकारकः शम्भोर्म्मन्त्रः सम्मद उच्यते ।
मनःप्रपूरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
एतद्व्यस्तं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
युवां तेनैव मन्त्रेण आराधय तमीश्वरम् ॥”
इति कालिकापुराणे ५० अध्याये वेतालभैरवौ प्रति वशिष्ठवाक्यम् ॥ * ॥

मन्त्रस्य त्रिविधजपो यथा,—
“वाचिकश्च उपांशुश्च मानसश्च त्रिधा स्मृतः ।
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः ॥
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ।
मन्त्रमुच्चारयेद्वाक्तं जपयज्ञः स वाचिकः ॥
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।
किञ्चित् शब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः ॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
तेन स्वरादिसुव्यक्तवर्णोच्चारणवान् वाचिकः ।
स्वयंशब्दग्रहणमात्रयोग्यकिञ्चिच्छब्दवानुपांशुः ।
जिह्वौष्ठचालनमन्तरेण वर्णानुसन्धानात्मको-मानसः ॥”* ॥
वाचिकेऽप्युच्चैर्जपनिषेधमाह शङ्खः ।
“नोच्चैर्जप्यं बुधः कुर्य्यात् सावित्र्यास्तु विशेषतः ।”
योगियाज्ञवल्क्यः ।
“न चंक्रमन् न विहसन् न पार्श्वमवलोकयन् ।
नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥
न पदा पादमाक्रम्य न वै बहिः करौ स्मृतौ ।
नैवंविधं जप कुर्य्यात न च संश्रावयेज्जपम् ॥
उत्तिष्ठन् वाच्यमाणोऽक्रमासीनः प्राङ्मुखो जपेत् ।
प्राक् कुशेष्वेवमासीनो वसानो वाससी शुभे ॥”

वृहन्मनुः ।
"यदि स्यात् क्लिन्नवासा वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां कुशोपरि समाहितः ॥"
व्यासः ।
"जपकाले न भाषेत व्रतहोमादिकेषु च ।
एतेष्वेवावशक्तस्तु यद्यागच्छेत् द्विजोत्तमः ।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्त्तयेत् ॥"
योगियाज्ञवल्क्यः ।
"यदि वाग्यमलोपः स्यात् जपादिषु कदाचन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥"
गोतमः ।
"क्रोधं मोहं क्षुतं निद्रां निष्ठीवनविजृम्भितम् ।
दर्शनं श्वनिनानाञ्च वर्ज्जयेज्जपकर्म्मणि ।
आचामेत् सम्भवे चैषां स्मरेद्विष्णुं सुरार्च्चितम् ॥"
बौधायनः ।
"नाभेरधश्च संस्पर्शं कर्म्मकाले विवर्ज्जयेत् ॥"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
मन्त्रशब्दस्य व्युत्पत्तिर्यथा,—
"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः ॥"
मन्त्रदीक्षारहितानां दोषो यथा, मत्स्यसूक्ते ।
"अदीक्षितानां मर्त्यानां दोषं शृणु वरानने ।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम् ।
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम् ॥"
शूद्रस्य मन्त्रविशेषनिषेधमाह तत्त्वे ।
"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्म्मन्त्रं मन्त्रं चाजपसंज्ञकम् ॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः ।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ॥"
स्मृतिरपि ।
"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति ।
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छति ।"
विशेषमाह वाराहीये ।
"गोपालस्य मनुर्देयो महेशस्य तु पादजे ।
तत्पत्नाश्चापि सूर्य्यस्य गणेशस्य मनुस्तथा ॥
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत् ॥"
मन्त्रदीक्षाप्रशंसा यथा, गोविन्दवृन्दावने ।
"अदीक्षितस्य मरणे प्रेतत्वं न च मुञ्चति ॥"
नवरत्नेश्वरे ।
"सर्व्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम् ।
अविरोधाद्भवन्त्येव प्रासङ्गिक्यस्तु भक्तयः ॥"
तथा ।
"उपपातकलक्षाणि महापातककोटयः ।
क्षणाद्दहति देवेशि । दीक्षा हि विधिना कृता ॥"
अत्राप्यनुकूलमन्त्रं दीक्षेत ।
"स्वनाम्नराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥"
वाराहीये ।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत् ॥"
इति प्राधान्यतया बोध्यम् ॥
तथा च ।
"धनिमन्त्रन्तु गृह्णीयादनुकूलन्तथैव च ।"
इत्यादिदर्शनात्तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते । सिद्धसारस्वते ।
"तत्र नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत् ॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च त्र्यक्षरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत् ॥"
मालामन्त्रस्तु वाराहीये ।
"विंशत्यर्णाधिका मन्त्रा मालामन्त्राश्च कीर्त्तिताः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत् ॥
तथा । एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति । ।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥"
तथा चामुण्डातन्त्रे ।
"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चामित्रादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि । दुःखसाध्यं कथञ्चन ॥"
पृथिव्यां पूर्णफलप्रदा महाविद्या । यथा, मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फलैः सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली वाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः ।
तथा नैता महाविद्याः कलिदोषात्र वाधिताः ॥"
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदं प्रशंसापरम् । सर्व्वत्र विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिद्वैरिमन्त्रस्य स्वप्नादौ प्राप्तौ तत्तद्दोषस्य दृष्टत्वात् । इति तु साम्प्रदायिकाः ॥ * ॥ मन्त्रोद्धारार्थषट्चक्रप्रमाणानि चक्रशब्दे द्रष्टव्यानि । तेषां लेखनप्रकारा यथा,

कुलाकुलचक्रम् ।

वायुः	अग्निः	भूमिः	जलम्	आकाशः
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	क्ष	ळ	स	ह
वायुः	अग्निः	भूमिः	जलम्	आकाशः

अकथहचक्रम् ।

अ क थ ह	उ ड प	आ ख द	ऊ च फ
ओ ड व	ऌ झ म	औ ढ श	ॡ ञ य
ई घ न	ॠ ज भ	इ ग ध	ऋ छ ब
अः त स	ऐ ठ ल	अं ण ष	ए ट र

अकडमचक्रम् ।

राशिचक्रम् ।

नक्षत्रचक्रम् ।

अ आ १ देवः	इ २ मानुषः	ई उ ऊ ३ राक्षसः	ऋ ॠ ऌ ॡ ४ मानुषः	ए ५ देवः	ऐ ६ मानुषः	ओ औ ७ देवः	क ८ देवः	ख ग ९ राक्षसः
घ ङ १० राक्षसः	च ११ मानुषः	छ ज १२ मानुषः	झ ञ १३ देवः	ट ठ १४ राक्षसः	ड १५ देवः	ढ ण १६ राक्षसः	त थ द १७ देवः	ध १८ राक्षसः
न प फ १९ राक्षसः	ब २० मानुषः	भ २१ मानुषः	म २२ देवः	य र २३ राक्षसः	ल २४ राक्षसः	व श २५ मानुषः	ष स ह २६ मानुषः	अं अः ळ क्ष २७ देवः

ऋणिधनिचक्रम् ।

६	६	६	०	३	४	४	०	०	०	३
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१

देवताभेदे चक्रविचारस्यावश्यकत्वमाह वारा-
हीतन्त्रे यामलादौ च ।
“तारशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च ।
राशिशुद्धिश्चक्रेपुरे च गोपालेऽकडमः स्मृतः ॥
अकडमो वामने च गणेशे च तथैव च ।
कोष्ठचक्रं वराहस्य महालक्ष्म्याः कुलाकुलम् ॥
नामादिचक्रे सर्व्वेषां भूतचक्रे तथैव च ।
त्रैपुरं तारचक्रे तु शुद्धमन्त्रं जपेद्बुधः ॥”
तथा ।
“वैष्णवं राशिसंशुद्धं शैवञ्चाकडमं स्मृतम् ।
कालिकायाश्च तारायास्तारचक्रं शुभावहम् ॥
चण्डिकायास्तारकोष्ठे गोपालेऽकडमः स्मृतः ।
हरचक्रे सर्व्वमन्त्रं धनाधिक्ये न चाश्रयेत् ॥
ऋणाधिक्ये शुभं विद्यान् धनाधिक्ये च नो
विधिम् ।
दोषान् संशोध्य गृह्णीयात्मध्यदेशोद्भवस्य च ॥
मन्त्रऋणी शुभफलोऽप्यशुभो धनी च
तुल्यं यदा समफलः कथितो मुनीन्द्रैः ॥”
अन्यत्रापि ।
“शून्ये मृत्युमवाप्नोति धने च विफलं भवेत् ।
ऋणे च प्राप्तिमाप्नोति सर्व्वसिद्धिस्तु जायते ॥”
अथ मन्त्राणां दश संस्काराः । गौतमीये ।
“जननं जीवनं पश्चात् ताडनं बोधनन्तथा ।
अथाभिषेको विमलीकरणाप्यायने पुनः ॥
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ।
स्वर्णादिपात्रे संलिख्य मातृकायन्त्रमुत्तमम् ।
काश्मीरचन्दनेनापि भस्मना वाथ सुव्रत । ॥
काश्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनौ ।
शैवे भस्म समाख्यातं मातृकायन्त्रलेखने ॥
मन्त्राणां मातृकायन्त्रादुद्धारो जननं स्मृतम् ।
पंक्तिक्रमेण विधिना सुनिभिस्तच्च निश्चितम् ॥१॥
व्योमेन्दो रसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्
केशरं
वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम् ।
आशास्वश्रिषु लान्तलाङ्गलियुजा चोर्व्वीपुरं-
याङ्कितं
यन्त्रं वर्णतनोः परं निगदितं सौभाग्यसम्पत्-
करम् ॥”
यन्त्रस्य दिक्षु वं विदिक्षु ठं लिखेत् । तथा च
गौतमीये ।
“कादिमान्ताः पञ्चवर्गा दिक्षु पूर्व्वादितो
न्यसेत् ।
यादिवान्ताः शादिहान्ता लक्षमीशे प्रविन्यसेत्॥
चतुरस्रं चतुर्द्वारं दिक्षु वं ठं विदिक्षु च ॥”
इति मातृकायन्त्रम् ॥
“प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः ।
प्रत्येकं शतवारन्तु जीवनन्तदुदाहृतम् ॥ २ ॥
मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा ।
प्रत्येकं वायुबीजेन पूर्व्ववत्ताडनं मतम् ॥ ३ ॥
विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः ।
तन्मन्त्रवर्णसंख्याकैर्हन्यात्तेनैव बोधनम् ॥” ४ ॥
“तत्तन्मन्त्रोक्तविधिना अभिषेकः प्रकीर्त्तितः ।”
तन्त्रान्तरे ।
“मन्त्रस्य चामुकं वर्णमभिषिञ्चामि तु हृतम् ।”
इति वचनात प्रत्येकमभिषिञ्चेत् ।
“अश्वत्थपल्लवैः सिञ्चेत मन्त्री मन्त्रार्णसंख्यया ॥५॥
सञ्चिन्त्य मनसा मन्त्रं सुषुम्णामूलमध्यतः ।
ज्योतिर्मन्त्रेण विधिवत् दहेन्मलत्रयं यतौ ॥
तारं व्योमाग्निमनुयुक् दण्डी ज्योतिर्मनुर्मतः ॥”
तारं प्रणवः व्योम हकारः अग्नी रेफः मनु-
रौकारः दण्डी अनुस्वारः ॥ ६ ॥
“स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा ।
तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः ॥७॥
मन्त्रेण वारिणा मन्त्रे तर्पणं तर्पणं मतम् ।
मधुना शक्तिमन्त्रेषु वैष्णवे चन्दमज्जलैः ॥
शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितम् ॥”
अभिषेकेऽपि तथा ॥ ८ ॥
“तारमायारमायोगो मनोर्दीपनमुच्यते ॥ ९ ॥
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥१०॥
संस्कारा दश संप्रोक्ताः सर्व्वतन्त्रेषु गोपिताः ।
यान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नु-
यात् ।”
मलत्रयमिति आनवं मायिकं कार्म्मणञ्च ।
प्रपञ्चसारे ।
“मायिकं नाम योषोत्थं पौरुषं कार्म्मणं मलम् ।
आनवं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्रयम् ॥”
न नवं अनव तस्य भावः आनवं वृद्धत्वमित्यर्थः ।
तारमायारमायोग इति । तारमायारमा-
बीजपुटितम् मन्त्रमष्टोत्तरशतं जपेत् इत्यर्थः ।
तथा च विश्वसारे ।
“तारमायारमाबीजपुटितेन मनुं जपेत् ।
शतमष्टोत्तरञ्चैव दीपयेत् साधकोत्तमः ॥” * ॥
अथ दुर्गामन्त्रः ।
“अथ दुर्गामनुं वक्ष्ये इष्टादृष्टफलप्रदम् ।
मायादिः कर्णबिन्द्वाढ्यो भूयोऽसौ सर्गवान्
भवेत ॥
पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ।
तारादिहृदयान्तोऽयं मन्त्रो वस्वक्षरात्मकः ॥”
आदिर्दकारः । कर्ण उकारः । पञ्चान्तको
गकारः । प्रतिष्ठा आकारः । मारुतो यकारः ।
भौतिक ऐकारः । ॐ ह्रीं दुं दुर्गायै नमः ॥*॥
अथ विष्णुमन्त्रः ।
“तारं नमःपदं ब्रूयात नरौ दीर्घसमन्वितौ ।
पवनो णायमन्त्रोऽयं प्रोक्तो वस्वक्षरः परः ॥”
ॐ नमो नारायणाय ॥ * ॥ अथ शिवमन्त्रः ।
“सान्तमौकारसंयुक्तं बिन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनुः॥”
हौं ॥ * ॥ अथ गणेशमन्त्रः ।
“पञ्चान्तकं शशिधरं बीजं गणपतेर्व्विदुः ॥”
पञ्चान्तको गकारः । गं ॥*॥ अथ सूर्य्यमन्त्रः ।
“तारो घृणिर्भृगुः पश्चाद्वामकर्णविभूषितः ।
वह्न्यासनो मरुत्शेषः सनेत्रोऽदित्यपश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥”
ॐ घृणि सूर्य्य आदित्य ॥ * ॥
पञ्चदेवतानामेक एको मन्त्रो लिखितः ।
एतासामन्यासाञ्चान्यमन्त्रा ग्रन्थविस्तारभयान्न
लिखिताः ॥ कलावागमोक्तमन्त्रजपविधि-
र्यथा,—
“आगमोक्तविधानेन कलौ मन्त्रं जपेत् सुधीः ।
नहि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥”
तथा ।
“कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः ॥
मन्त्राणां देवताः प्रोक्ता देवता गुरुरूपिणी ।
तेषां भिदा न कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥”
पित्रादितो मन्त्रग्रहणनिषेधो यथा,—
“पितुर्मन्त्रं न गृह्णीयात तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥
न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ।
शक्तित्वेन वरारोहे । न च सा कन्यका भवेत् ॥”
तथा गणेशविमर्षिण्याम् ।
“यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणां दीक्षा न सा कल्याण-
दायिका ॥”
इत्यादिनिषेधवचनादिभ्यो मन्त्रं न गृह्णीयादि-
त्यर्थः । इति तन्त्रसारः ॥ (ज्वरादिनाशक-
मन्त्रो यथा,—
“वानराकृतिमालिख्य खटिकाभिः पुनः प्रयात् ।
गन्धपुष्पाद्यनैर्धूपैरर्च्चयेद्गर्भजा वर ॥
मन्त्रः ।
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय
सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्व्याहिक-
त्र्याहिक चातुर्थिक-महाज्वर-भूतज्वर-भय-
ज्वर शोकज्वर-क्रोधज्वर-वेलाज्वर-प्रभृति-
ज्वराणां दह दह हन हन पच पच अवतर
अवतर किलिकिलि वानरराजज्वराणां बन्ध
बन्ध ह्रां ह्रीं हूं फट स्वाहा ।” इति हारीते
चिकित्सितस्थाने द्वितीयेऽध्याये ॥)
मन्त्रकृत्, पुं, (मन्त्रं कृतवान् । मन्त्र + कृ +
क्विप् । तुगागमश्च ।) मन्त्री । मन्त्रणाकारकः ।
इति सिद्धान्तकौमुदी ॥ (दौत्यकारी । यथा,
श्रीमद्भागवते । ३ । १ । २ ।
“यदा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ।
पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥”
“मन्त्रकृत दौत्यकर्मा सन् ।” इति तट्टीकायां
श्रीधरस्वामी ॥*॥ त्रि, मन्त्रप्रयोगकारी । यथा,
रघुवंशे । १ । ६१ ।
“तव मन्त्रकृतो मन्त्रैर्दूरात प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥”
“मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुर्वा ।” इति
तट्टीकायां मल्लिनाथः ॥)
मन्त्रगण्डकः, पुं, (मन्त्रप्रधानो गण्डकः मध्य-
पदलोपी कर्म्मधारयः ।) विद्या । इति हारा-
वली । १८६ ॥

मन्त्रगूढः, पुं, (मन्त्रे मन्त्रणाविषये गूढः गुप्तः ।) चरः । इति शब्दरत्नावली ॥

मन्त्रगृहं, क्ली, (मन्त्रस्य मन्त्रणायाः गृहम् ।) मन्त्रणागारम् । (यथा, महाभारते । १५ । ५ । २२ ।

"सुसंवृतं मन्त्रगृहं स्थलं चारुह्य मन्त्रयेः ।
अरण्ये निःशलाके वा न च रात्रौ कथञ्चन ॥")

मन्त्रजा, स्त्री, (मन्त्रात् जायते इति । मन्त्र + जन् + डः । टाप् ।) मन्त्रशक्तिः । इति पुराणम् ॥

मन्त्रजिह्वः, पुं, (मन्त्र एव जिह्वा यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६४ ॥ (यथा, माघः । २ । १०७ ।

"आहुतं नाम यत् मन्त्रो मन्त्रजिह्वेषु जुह्वति ।
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥")

मन्त्रज्ञः, पुं, (मन्त्रं जानातीति । मन्त्र + ज्ञा + कः ।) चरः । इति हलायुधः ॥ मन्त्रज्ञातरि, त्रि । (यथा, मनुसंहितायाम् । ८ । ४ ।

"व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ॥")

मन्त्रणं, क्ली, (मन्त्र + ल्युट् ।) मन्त्रणा । मन्त्रधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, मार्कण्डेयपुराणे । ५० । ८१ ।

"अपस्करं मन्त्रणञ्च यच्चैतदुपकल्पतम् ॥")

मन्त्रणा, स्त्री, (मन्त्र + भावे युच् । टाप ।) रहसि कर्त्तव्यावधारणम् । इति मन्त्रशब्दटीकायां भरतः ॥ मन्त्रः । यथा,—

"वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्ज्जनः सुजनति क्षिप्रानुगः खञ्जति ।
गर्व्वी खर्व्वति सर्व्वविच्च जडति त्वन्मन्त्रणायन्त्रितः
श्रीनित्ये बगलामुखि । प्रतिदिनं कल्याणि तुभ्यं नमः ॥"

इति तन्त्रसारे बगलास्तोत्रम् ॥ * ॥

मन्त्रणायां वर्ज्जनीयानि यथा,—

"मन्त्रे पञ्चाङ्गताशक्तिषाड्गुण्योपायनिह्नवः ।
उदयाच्चिन्तनीयाश्च स्थैर्य्यांमत्यादिरक्षणः ॥"

इति कविकल्पलता ॥ * ॥

अक्षिश्रयादिज्ञातमन्त्रणायां दोषो यथा,—

"षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णश्च धार्य्यते ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तो न बुध्यते ॥"

इति गारुड़े ११४ अध्यायः ॥

राज्ञा विद्यादिगुणयुक्तविप्रा मन्त्रिणः कार्य्याः । यथा,—

"मन्त्रिणस्तु नृपः कुर्य्यात् विप्रान् विद्याविशारदान् ।
विनीतांश्च कुलीनांश्च धर्म्मार्थकुशलानृजून् ॥
मन्त्रयेत्तैः समं कार्य्ये नात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥
अस्तेनैव समस्तैश्च वाच्यस्य यथर्दशतः ।
स्वयं हृतं मन्त्रगृहं स्थूल आरुह्य मन्त्रयेत् ॥
अरण्ये निःशलाके वा न यामिन्यां कदाचन ।
शिशून् शाखामृगान् पक्षान् शुकान् वैशारिकांस्तथा ॥
वर्जयेन्मन्त्रगेहेषु मनुष्यानुद्धतांस्तथा ।
दूषणं मन्त्रभेदेषु नृपाणां यत्र जायते ॥
न तत् सम्यक् समाधातुं दृश्यैर्नृपशतैरपि ॥"

इति कालिकापुराणे ८५ अध्यायः ॥

अथ मन्त्रनिर्णयः ।

"मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम् ।
कुर्य्याद्राजा सदा मन्त्रान् कर्म्मणामाफलोदयात् ॥
अर्थानर्थौ हि यत्रोभौ संशयश्च परीक्ष्यते ।
स मन्त्र इति विज्ञेयः शेषाश्च खलु विभ्रमाः ॥
एकमेव विषं हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सम्पदं हन्ति राजानं मन्त्रविप्लवः ॥
करिष्यन् न प्रभाषेत कृतान्येव तु दर्शयेत ।
धर्म्मार्थकामकार्य्याणि कृतो मन्त्रो न भिद्यते ॥
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ।
अपथे निःशलाके वा तत्र मन्त्रो विधीयते ॥
तत्र साम प्रयोक्तव्यं कार्य्येषु गुणवत्स्वपि ।
दानं लुब्धेऽपि भेदश्च शक्तितेष्वपि निश्चयः ॥
जड़मूकान्धबधिरान् तिर्य्यग्योनीन् वयोऽधिकान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले निषेधयेत् ।
इति सम्यनतः प्रोक्ता राजनीतिरियं मया ॥
यत्त्रिवर्गाविरुद्धं स्याद्राजनीतिस्तदुच्यते ॥"

इति युक्तिकल्पतरौ नीतियुक्तिः ॥

मन्त्रतः, [स्] व्य, (मन्त्रादिति । मन्त्र + "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति पञ्चमीस्थाने तसिल् ।) मन्त्रात् । इति सिद्धान्तकौमुदी ॥

मन्त्रदः, पुं, (मन्त्रं ददातीति । मन्त्र + दा + कः ।) शिष्यकर्णे तदिष्टदेवमन्त्रप्रदानकर्त्ता । मन्त्रदातृगुरुः । यथा,—

"परापरगुरूणाञ्च निर्णयं शृणु पार्व्वति ! ।
आदौ मन्त्रत्र देवेशि । मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"

इति बृहन्नीलतन्त्रे २ पटलः ॥ * ॥

तत्पित्रादीनामपि परमगुरुत्वादिर्यथा,—

"मानवस्य महेशानि ! सङ्क्षेपान्निगदामि ते ।
गुरुः परमगुरुश्चैव परापरगुरुस्तथा ।
स्वगुरुः परमेशानि । साक्षाद्ब्रह्म न संशयः ॥
तत्पिता परमगुरुः स्वयं विष्णुः क्षितौ सदा ।
तत्पिता परापरगुरुर्म्महेश्वरसमः सदा ॥"

इति शाक्तानन्दतरङ्गिणीधृतमहिषमर्द्दिनीतन्त्रम् ॥

मन्त्रदाता, [ऋ] त्रि, (मन्त्रं ददातीति । मन्त्र + दा + तृच् ।) मन्त्रदानकर्त्ता । गुरुः । यथा,—

"सर्व्वेषाञ्च गुरूणाञ्च जन्मदाता परो गुरुः ।
पितुः शतगुणैर्माता पूज्या वन्द्या गरीयसी ॥
विद्यादाता मन्त्रदाता ज्ञानदो हरिभक्तिदः ।
पूज्यो वन्द्यश्च सेव्यश्च मातुः शतगुणैर्गुरुः ॥
मन्त्रसुधीरणेनैव गुरुरित्युच्यते बुधैः ।
अन्यो वन्द्यो गुरुरयमन्यश्चारोपितो गुरुः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
आदौ चितस्य मूर्खस्य निष्कृतिर्नास्ति निश्चितम् ।
सर्व्वकर्म्मसु गर्हस्य नरके तत्पशोः स्थितिः ॥
जन्मदाताऽन्नदाता वा माताप्यं गुरवस्तथा ।
पारं कर्त्तुं न शक्तास्ते घोरे संसारसागरे ॥
विद्यामन्त्रज्ञानदाता निपुणः पारकर्म्मणि ।
न शक्तः शिष्यमुद्धर्त्तुमीश्वरश्चेश्वरोऽपरः ॥
गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः ।
गुरुर्धर्म्मो गुरुः शेषः सर्व्वात्मा निर्गुणो गुरुः ॥
सर्व्वतीर्थाश्रमश्चैव सर्व्वदेवाश्रयो गुरुः ।
सर्व्ववेदस्वरूपश्च गुरुरूपी हरिः स्वयम् ॥
अभीष्टदेवे रुष्टे च गुरुः शक्तो हि रक्षितुम् ।
गुरौ रुष्टेऽभीष्टदेवो नहि शक्तश्च रक्षितुम् ॥
सर्व्वे ग्रहाश्च यं रुष्टा यं रुष्टा देवब्राह्मणाः ।
तमेव रुष्टो भवति गुरुरेव हि दैवतः ॥
न गुरोश्च प्रियश्चात्मा न गुरोश्च प्रियः सुतः ।
धनं प्रियं न च गुरोर्न च भार्य्या प्रिया तथा ॥
न गुरोश्च परो धर्म्मो न गुरोश्च परन्तपः ।
न गुरोश्च परं सत्यं न पुण्यञ्च गुरोः परम् ॥
गुरोः परो न शास्ता च नहि बन्धुर्गुरोः परः ।
देवो राजा च शास्ता च शिष्याणाञ्च सदा गुरुः ॥
यावत् शक्तो दातुमन्नं तावत् शास्ता तदन्नदः ।
गुरुः शास्ता च शिष्याणां प्रति जन्मनि जन्मनि ।
मन्त्रो विद्यागुरुर्देवः सर्व्वलब्धो यथा पतिः ।
प्रतिजन्मनिबन्धेन सर्व्वेषामुपरि स्थिताः ॥
पिता गुरुश्च वन्द्यश्च यत्र जन्मनि जन्मदः ।
गुरवोऽप्ये तथा माता गुरुश्च प्रतिजन्मनि ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे शचीकृतगुरुस्तोत्रकथनं नाम ५६ अध्यायः ॥ अपि च ।

"मान्यः पूज्यश्च सर्व्वेभ्य, सर्व्वेषां जनको भवेत् ।
अहो यस्य प्रसादेन सर्व्वान् पश्यति मानवः ॥
जनको जन्मदाता च रक्षणाच्च पिता नृणाम् ।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः ॥
पितुः शतगुणैर्माता पोषणाद्गर्भधारणात् ।
वन्द्या पूज्या च मान्या च प्रत्यक्षरूपा वसुन्धरा ॥
मातुः शतगुणैर्वन्द्यः पूज्यो मान्योऽन्नदायकः ।
यद्विना नश्वरो देहो विष्णुश्च कलयान्नदः ॥
अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥
अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुखं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
सर्व्वं जयति सर्व्वत्र विद्यया गुरुदत्तया ।
तस्मात् पूज्यो हि जगति को वा बन्धुस्ततोऽधिकः ॥
विद्यान्धो वा धनान्धो वा यो मूढ़ो न भजेद्गुरुम् ।
ब्रह्महत्यादिभिः पापैः स लिप्तो नात्र संशयः ॥

दरिद्रं पतितं क्षुद्रं नर-वृन्दाचरेद्गुरुम् ।
सोऽशुचिस्तीर्थजातोऽपि नाधिकारी च कर्म्मसु ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापथ्यात् स महापातकी
प्रिय ।॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म गुरुर्भास्कररूपधृक् ॥
गुरुश्चन्द्रश्च धर्म्मश्च वायुश्च वरुणोऽनलः ।
सर्व्वरूपो हि भगवान् परमात्मा स्वयं गुरुः ॥
नास्ति वेदात् परं शास्त्रं नहि कृष्णात् परः
सुरः ।
नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीपरम् ॥
नास्ति क्षमावती भूमेः पुत्त्रान्नास्ति परः प्रियः ।
न च दैवात् परा शक्तिर्न्नं नैकादशीं विना ॥
शालग्रामात्परो यन्त्रो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वतीपरा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥”
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४
अध्यायः ॥

मन्त्रदीधितिः, पुं, (मन्त्रेण दीधितिर्दीप्तिर्यस्य ।)
वह्निः । इति त्रिकाण्डशेषः ॥

मन्त्रपूतः, त्रि, (मन्त्रेण पूतः ।) मन्त्रेण पवित्री-
कृतः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ।
८८ । ३६ ।
“ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥”

मन्त्रपूतात्मा, [न्] पुं, (मन्त्रेण पूतः आत्मा
यस्य ।) गरुडः । इति धरणिः ॥

मन्त्रविद्, [द्] (पुं, मन्त्रं पञ्चाङ्गमन्त्रणां वेत्तीति ।
विद् + क्विप् ।) चरः । इति हेमचन्द्रः । ३ ।
३९७ ॥ (यथा, महाभारते । ५ । १९३ । ५ ।
“एतत् श्रुत्वा द्रुपदो यज्ञसेनः
सर्व्वं तत्त्वं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राजन् ।
यथायुक्तं रक्षणे वै प्रजानाम् ॥”)
मन्त्रज्ञानरि, त्रि ॥ (यथा, छान्दोग्योपनिषदि ।
७ । १ । ३ ।
“सोऽहं भगवतो मन्त्रविदेवास्मि ॥”
मन्त्रं वेदार्थं वेत्तीति । विद् + क्विप् । वेदार्थ-
वित् । यथा, मनौ । ३ । १३१ ।
“सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते ।
एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः ॥”)

मन्त्रसृक्, [श्] त्रि, (मन्त्रेण सृजतीति ।
“सृजोऽसुदके क्विन् ।” ३।२।५८ । इति क्विन् ।)
मन्त्रकरणकसर्जनकर्त्ता । इति सिद्धान्तकौमुदी ॥

मन्त्रितः, त्रि, मन्त्रेण संस्कृतः । अभिमन्त्रितः ।
मन्त्रोऽस्य जातः । इति मन्त्रिधातोः क्तप्रत्ययेन
मन्त्रशब्दात् इतप्रत्ययेन च निष्पन्नः ॥ (यथा,
मिताक्षरे ।
“प्रियं खल्वहं वेदान्तमुपाञ्चिस्तुपमेवेशयेत् ।

मन्त्रितं प्रोक्षणीतोयैः प्राक्तिकुम्भजलेन्तथा ।
सूक्ष्ममन्त्रेणाद्यमतं मन्त्रितैरभिषेचयेत् ॥”)

मन्त्री, [न्] पुं, (मन्त्रो गुप्तभाषणमस्यास्ति ।
मन्त्र + इनिः । यद्वा, मन्त्रयते इति । मन्त्र +
“नन्द्यादिभ्यो इति ।” ३।१।१३४ । इति णिनिः ।)
मन्त्रजातकर्त्तव्यनिश्चयकर्त्ता । तत्पर्य्यायः ।
धीसचिवः २ अमात्यः ३ । इत्यमरः । २।८।४ ॥
सचिवः ४ धीसखः ५ सामवायिकः ६ । इति
हेमचन्द्रः । ३ । ३८३ ॥ तस्य लक्षणं यथा,—
“मन्त्री भक्तः शुचिः शूरोऽलुब्धो बुद्धिमान्
क्षमी ।
आन्वीक्षिक्यादिकुशलः परिच्छेदी सुदेशजः ॥”
इति कविकल्पलता ॥
“बहुभिर्म्मन्त्रयेत् कामं राजा मन्त्रं पृथक्
पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्रप्रकाशनम् ॥
न क्वचित् कस्य विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य्ये एकेन सूरिणा ॥
भवेद्वा निश्चयावाप्तिः परबुद्ध्युपजीवनात् ।
एकस्यैव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥”
इति मत्स्यपुराणे १८८ अध्यायः ॥

मन्थ, कुन्थे । गाहे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) मन्थति । कुन्थः क्लेशः । केचित्तु
मन्थते । इति दुर्गादासः ॥

मन्थ, ग गाहे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-
सक०-सेट् ।) गाहो विलोडनम् । ग, मथाति
दधि वल्लवी । रथं ममन्थ मन्थयम् । इति दुर्गा-
दासः ॥

मन्थः, पुं, (मथ्यतेऽनेन । मन्थ + करणे घञ् ।)
मन्थदण्डकः । इत्यमरः । २।६।७४ ॥ (यथा,
महाभारते । १२ । ३४३ । ११ ।
“व्यासश्च मतिमन्थेन मथ्नोदधिमनुत्तमम् ।
नवनीतं यथा दध्नो मलयाच्चन्दनं यथा ॥”
मथ्यते विलोड्यते इति । मन्थ + कर्म्मणि घञ् ।)
साक्तवः । (मथ्नाति स्वकरेण त्रिभुवनं पीडय-
तीति । मन्थ + अच् ।) दिवाकरः । इति
मेदिनी । थे, ११ ॥ साक्तवो यथा,—
“सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः ।
नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते ॥”
इति राजनिर्घण्टः ॥
पेयविशेषः । तस्य विधिर्यथा,—
“जले चतुष्पले शीते क्षुण्णं द्रव्यं पलं क्षिपेत् ।
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं
पिबेत् ॥”
क्षुण्णं चूर्णीकृतम् । मन्थयेत् मर्द्दयेत् । इति
भावप्रकाशः ॥ (मन्थ + भावे घञ् ।) मारणम् ।
इति त्रिकाण्डशेषः ॥ नेत्रमलम् । इति धरणिः ॥
नेत्रामयः । इति विश्वः ॥ अंशुः । इति शब्द-
रत्नावली ॥ क्षुब्धनम् । विलोडनम् । इति
मन्थधात्वर्थदर्शनात् ॥ (यथा, रघौ । १० । ३ ।
“अतिष्ठन् प्रत्ययापेक्षसन्ततिः स चिरं नृपः ।
प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥”)

मन्थजं, क्ली, (मन्थेन मन्थनेन जायते इति ।
जन् + डः ।) नवनीतम् । इति रत्नमाला ॥
(विवरणमस्य नवनीतशब्दे ज्ञातव्यम् ॥)

मन्थदण्डकः, पुं, (मन्थाय मन्थनाय यो दण्डः ।
ततः स्वार्थे कन् ।) मन्थानदण्डः । छाँचुनी इति
घोलमौनी इति खड़ेन इति च भाषा ॥ तत्-
पर्य्यायः । वैशाखः २ मन्थः ३ मन्थानः ४
मन्था ५ । इत्यमरः । २ । ९ । ७४ ॥ कर-
हर्षकः६ मन्थनः ७ मल्लाटः ८ । इति शब्द-
रत्नावली ॥ तक्राटः ९ । इति जटाधरः ॥

मन्थनं, क्ली, (मन्थ + ल्युट् ।) विलोडनम् । क्षुब्ध-
नम् । इति मन्थधातोर्भावे अनट्प्रत्ययेन
निष्पन्नम् ॥ (यथा, महाभारते ।१। १८ । १० ।
“चिरारब्धमिदञ्चापि सागरस्यापि मन्थ-
नम् ॥”)

मन्थनः, पुं, (मथ्यतेऽनेनेति । मन्थ + करणे ल्युट् ।
यद्वा, मथ्नातीति । मन्थ + ल्युः ।) मन्थानदण्डः ।
इति शब्दरत्नावली ॥ (यथा, हरिवंशे ।८७।३६।
“गोभिश्च समकीर्णासु व्रजनिर्य्याणभूमिषु ।
मन्थनावर्त्तपूर्णेषु गर्गरेषु नदत्सु च ॥”)

मन्थनघटी, स्त्री, (मन्थो घटः । अल्पार्थे
ङीष् । मन्थनार्था मन्थनस्य वा घटी ।) दधि-
मन्थनपात्रम् । यथा,—
“कलशी मन्थनघटी मन्थनी चापि गर्गरी ॥”
इति जटाधरः ॥

मन्थरं, क्ली, (मन्थति क्लेशयतीति । मन्थ + बाहुल-
कात् अरन् ।) कुसुम्भी । इति मेदिनी ।रे,१८८॥

मन्थरः, पुं, (मन्थ + बाहुलकात् अरन् ।) कोषः ॥
फलम् । बाधः । मन्थानः । इति मेदिनी । रे,
१८८ ॥ सूचकः । इति विश्वः ॥ मन्दगामि-
योद्धा । इति चत्रियवर्गे अमरः । २ । ८ ।७२ ।
कोपः । इत्यजयः ॥

मन्थरः, त्रि, (मन्थति पादाविति । मथि +
अरन् ।)मन्दः । (यथा, साहित्यदर्पणे ।३।६८
“इत्तं सालसमन्थरं भुवि पदं निर्याति नान्तः-
पुरात् ॥”)
पृथुः । वक्रः । इति मेदिनी । रे, १८८ ॥
(निश्चलः । यथा, आर्य्यासप्तशत्याम् । ४८८ ।
“राज्याभिषेकसलिलक्षालितमौलेः कथासु
कृष्णस्य ।
गर्व्वभरमन्थराक्षी पश्यति पदपङ्कजं राधा ॥”)
जडः । इति शब्दरत्नावली ॥ नीचः । इति
हेमचन्द्रः । ६ । ६५ ॥ (मन्दगामी । इति
हेमचन्द्रः । ३ । १५६ ॥)

मन्थरा, स्त्री, (मन्थर + स्त्रियां टाप् ।) कैकय्या
दासी । यथा,—
“रामाभिषेके विघ्नार्थं यतस्व ब्रह्मवाक्यतः ।
मन्थरां प्रविशस्वादौ कैकेयीञ्च ततः परम् ॥”
इत्यध्यात्मरामायणे अयोध्याकाण्डे २ अध्यायः॥

मन्थरुः, पुं, (मन्थ + बाहुलकात् अरुः ।)
चामरवातः । तत्पर्य्यायः । कुठेरः २ । इति
त्रिकाण्डशेषः ॥

मन्थशैलः, पुं, (मन्थाय समुद्रमन्थनाय कल्पितः शैलः ।) मन्दरपर्व्वतः । इति जटाधरः ॥

मन्था, स्त्री, (मथ्यते इति । मन्थ + घञ् । ततः स्त्रियां टाप् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे ।
"वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ॥")

मन्थाः, [थिन्] पुं, (मन्थ + "मन्थः ।" उणा० ४ । ११ । इति इनिः । स च कित् ।) मन्थानदण्डः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, किरातार्ज्जुनीये । ४ । १६ ।
"मुहुः प्रणुन्नेषु मथां विवर्त्तने-
र्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥")

मन्थानः, पुं, (मथ्यते अनेनेति । मन्थ + बाहुलकात् आनच् ।) मन्थदण्डकः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, देवीभागवते । १ । १० । २५ ।
"मन्थानारणिसंयोगान्मन्थनाच्च समुद्भवः ।
पावकस्य यथा तद्वत् कथं मे स्यात् सुतोद्भवः ॥")
आरग्वधः ॥ इति राजनिर्घण्टः ॥ (समुद्रमन्थनदण्डकत्वादस्य तथात्वम् । मन्दरपर्व्वतः । यथा, रामायणे । १ । ४५ । २७ ।
"प्रविवेशाथ पातालं मन्थानः पर्व्वतोत्तमः ॥"
महादेवः । यथा, महाभारते । १३ । १७ । १२८ ।
"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः ॥")

मन्थानकः, पुं, (मन्थान इवेति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) तृणभेदः । तत्पर्य्यायः । हरितः २ दृढ़मूलः ३ तृणाढ्यः ४ । अस्य गुणाः । स्निग्धत्वम् । दोग्ध्रीणां प्रियत्वम् । मधुरत्वम् । बहुवीर्य्यदत्वञ्च । इति राजनिर्घण्टः ॥

मन्थिनी, स्त्री, (मन्थो मन्थनमस्त्यस्याम् । मन्थ + इनिः । ङीप् ।) दधिमन्थनपात्रम् । तत्पर्य्यायः । गर्गरी २ कलसी ३ । इति हेमचन्द्रः । ४ । ८८ ॥

मन्थोदधिः, पुं, (मथ्यतेऽसौ । मन्थ + कर्म्मणि घञ् । मन्थश्चासौ उदधिश्चेति । मन्थाय उदधिरिति वा ।) क्षीरसमुद्रः । इति केचित् ॥

मन्दः, पुं, (मन्दते इति । मदि + अच् ।) शनिः । (यथा, ज्योतिषे ।
"शुक्रेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥")
हस्तिजातिविशेषः । इति मेदिनी । दे, १३ ॥ यमः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ३२ । १५५ ।
"तत्र मन्दमिवालोक्य साभिप्रायः स मां नृपः ।
पप्रच्छ रे किमीदृक् त्वं सञ्जातः कथ्यतामिति ॥")
प्रलयः । इत्यजयः ॥ (जठरानलविशेषः । यथा, हारीते चिकित्सितस्थाने ६ अध्याये ।
"तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥")

मन्दः, त्रि, (मदि + अच् ।) अतीक्ष्णः । मूर्खः । (यथा, रघुवंशे । १ । ३ ।
"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ॥")
स्वैरः । अभाग्यः । रोगी । अल्पः । इति मेदिनी । दे, १३ ॥ (यथा, मेघदूते । १ । ४ ।
"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् ॥"
अलसः । यथा, श्रीमद्भागवते । १ । १ । १० ।
"प्रायेणाल्पायुषः सभ्य ! कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥"
"मन्दाः अलसाः ।" इति तट्टीकायां श्रीधरस्वामी ॥)
मद्यरतः । खलः । इति हेमचन्द्रः । ३ । ४८ ॥

मन्दगः, त्रि, (मन्दं अल्पं गच्छतीति । गम् + डः ।) मृदुगामी । यथा,—
"मन्दगाश्च शनिश्चानिष्टपट्टसगजस्त्रियः ॥"
इति कविकल्पलता ॥
(पुं शाकद्वीपस्थजनपदभेदः । यथा, महाभारते । ६ । ११ । ३३ ।
"तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ।
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥")

मन्दगामी, [न्] त्रि, (मन्दं गच्छतीति । गम् + णिनिः ।) मृदुगमनशीलः । तत्पर्य्यायः । मन्थरः २ । इत्यमरः । २ । ८ । ७२ ॥ स्वैरगामी ३ मन्दः ४ । इति शब्दरत्नावली ॥

मन्दजननी, स्त्री, (मन्दस्य शनेर्जननी माता ।) शनैश्चरमाता । सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥

मन्दटः, पुं, (मन्दमटतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः ।) पारिभद्रवृक्षः । इति शब्दरत्नावली ॥

मन्दता, स्त्री, (मन्दस्य भावः । मन्द + भावार्थे तल् । स्त्रियां टाप् ।) आलस्यम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने ।
"दुर्म्मेधत्वं मन्दता च स्वप्ने मैथुननित्यता ।
निराकरिष्णुता चैव विज्ञेयाः पाशवा गुणाः ॥")
मन्दत्वम् । (यथा, चन्द्रालोके । १ । १ ।
"उच्चैरस्यतु मन्दतामरसतामिति ॥"
क्षीणता । यथा, साहित्यदर्पणे । ३ । ९८ ।
"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां
दूरं यात्युदरञ्च रोमलतिका नेत्रार्ज्जवं धावति ॥")

मन्दनं, क्ली, (मन्दते स्तौति अनेन । मन्द + "स्पृहृजिमन्दिनिधाञः क्युः । उणा० २।८१। इति करणे क्युः ।) स्तोत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मन्दरः, पुं, (मन्द् + बाहुलकात् अरः ।) मन्थशैलः । (यथा, महाभारते । १ । १८ । १३ ।
"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ॥")
मन्दारपादपः । इति मेदिनी । रे, १६६ ॥ स्वर्गः । हारभेदः । इति हेमचन्द्रः । ९ । ६६ ॥ मुकुरः । इति शब्दरत्नावली ॥ (कुशद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ६१ ।
"मन्दरः सैव विज्ञेयः सर्व्वधातुमयः शुभः ।
मन्द इत्येष यो धातुरपामर्थे प्रकाशकः ॥
अपां विदारणात् चैव मन्दरः स निगद्यते ॥")

मन्दरः, त्रि, (मन्द् + अरः ।) बहुलः । मन्दः । इति मेदिनी । रे, १६६ ॥

मन्दसानः, पुं, (मन्दते स्तुत्यादिकं प्राप्नोतीति । मन्द + "ऋञ्जिवृधिमन्दिसहिभ्यः कित् ।" उणा० २ । ८७ । इति असानच् ।) अग्निः । प्राणः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ निद्रा । इत्युणादिकोषः ॥ (त्रि, मोदमानः । यथा, ऋग्वेदे । १ । १०० । १४ ।
"मन्दसानो मरुत्वान् ।"
"मन्दसानो मोदमानः सन् ॥" इति तद्भाष्ये सायनः ॥)

मन्दसानुः, पुं, (मन्दं मन्दतां सनोति ददातीति । मन्द + सन् + बाहुलकात् उण् ।) स्वप्नः । जीवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मन्दा, स्त्री, (मन्द + स्त्रियां टाप् ।) संक्रान्तिविशेषः । सा उत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदारोहिणीनक्षत्रेषु रविसंक्रान्तिश्चेत्तदा भवति । तस्याः सन्निहितदण्डत्रयस्य पुण्यतमत्वम् । यथा,—
"मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षीं विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरैर्म्महोदरी ज्ञेया क्रूरैर्ऋक्षैस्तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रैर्ऋक्षैस्तु संक्रमः ॥"
इत्येतेषां द्वादशस्वेव संक्रान्तिषु ध्रुवादिनक्षत्रयोगात् मन्दादिरूपतया सप्तधा भिन्नासु त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च । क्रमेण घटिका ह्यतीतास्तु पुण्यं पारमार्थिकमिति देवीपुराण एव त्रिचतुरादिघटिकानां पुण्यत्वमुक्तम् । इति तिथ्यादितत्त्वम् ॥

मन्दाकं, क्ली, (मन्दम् अक्यते इति । मन्द + बाहुलकात् आकः ।) स्रवनम् । इत्युणादिकोषः ॥ (स्रोतः । इत्युज्ज्वलदत्तः । ४ । १३ ॥)

मन्दाकिनी, स्त्री, (मन्दाकानि स्रोतांसि सन्त्यस्याः इति । मन्दाक + णिनिः । यद्वा, "मन्दमकितुं शीलमस्याः । णिनिः । यद्वा, मन्दनाम्नः सरसः अकति गच्छतीति । नयनानन्दः ।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।) स्वर्गगङ्गा । तत्पर्य्यायः । वियद्गङ्गा २ स्वर्णदी ३ सुरदीर्घिका ४ । इत्यमरः । १ । १ । ५२ ॥ स्वर्गङ्गा ५ देवभूतिः ६ स्वर्णपद्मा ७ सुरेश्वरी ८ । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ६ । ८२ ।
"मन्दाकिनीनन्दनयोर्विहारे
देवे भवद्वेवरि माधवे वा ॥")
तस्या विवरणं यथा,—

"प्रधानधारा या स्वर्गे सा च मन्दाकिनी स्मृता ।
योजनायुतविस्तीर्णा प्रस्थेन योजना स्मृता ॥
क्षीरतुल्यजला शश्वदत्युत्तुङ्गतरङ्गिणी ।
वैकुण्ठाद्ब्रह्मलोकञ्च ततः स्वर्गं समागता ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे जाह्नवी-जन्मप्रस्तावे ३४ अध्यायः ॥ * ॥ संक्रान्ति-विशेषः । अस्य प्रमाणं मन्दाशब्दे द्रष्टव्यम् ॥ (चित्रकूटस्थनदीविशेषः । यथा, महाभारते । ३ । ८५ । ५८ ।
"ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते ।
मन्दाकिनीं समासाद्य सर्व्वपापप्रणाशिनीम् ॥"
द्वारकास्थनदीविशेषः । यथा, महाभारते । हरिवंशपर्व्वणि । १५५ । २२ ।
"वैदूर्य्यपत्रैर्व्वलजैस्तथा मन्दाकिनी नदी ।
भाति पुष्करिणी रम्या पूर्व्वस्यां दिशि भारत ।॥"
छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"न न र र-घटिता तु मन्दाकिनी ॥"
उदाहरणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मन्दाक्रान्ता, स्त्री, (मन्दं यथा तथा आक्रान्ता ।) छन्दोविशेषः । यथा,—
"चत्वारः प्राक् सुतनु गुरवो द्वौ दशैकादशौ चे-ल्लघ्वौ वर्णौ तदनु कुसुदामोदिनि ! द्वादशान्त्यौ ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते । विरामो मन्दाक्रान्तां प्रवरकवयस्तन्वि ! तां संगिरन्ते ॥"
इति श्रुतबोधः ॥
(अस्याक्रान्ता । यथा,—
"मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः समग्रम् ॥"
इत्युद्भटः ॥)

मन्दाक्षं, क्ली, (मन्दे सङ्कुचिते अक्षिणी नेत्रे यस्मात् । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति समासान्तः अच् ।) लज्जा । इत्यमरः । १।७।२३ ॥ (यथा, नैषधचरिते । ३ । ६१ ।
"मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा
तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्चन संशयालु-
र्गिरा मुखाम्भोजमयं युयोज ॥")

मन्दाग्निः, पुं, (मन्दः पाचनासमर्थश्चासावग्नि-श्चेति ।) कफद्वाराख्यजठरानलः । तस्य निदानादि यथा,—
"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः ।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥
विषमो वातजान् रोगांस्तीक्ष्णः पित्तसमुद्भवान् ।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥
समा समाग्नेरशिता मात्रा सम्यग्विपच्यते ।
स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते ॥"
इति माधवकरः ॥ * ॥
तस्यौषधं यथा,—
"चित्रकस्याष्टभागानि शूरणस्य च षोडश ।
शुण्ठ्याश्चत्वारि भागानि मरीचानां द्वयं तथा ॥
पिप्पली पिप्पलीमूलं विडङ्गानां चतुष्टयम् ।
अष्टौ मुसलिभागाश्च त्रिफलायाश्चतुष्टयम् ॥
द्विगुणेन गुडेनैषां मोदकानि हि कारयेत् ।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम् ।
अतिशोथितमन्दाग्निप्लीहाद्यांश्च निवारयेत् ॥"
इति गारुडे १६८ अध्यायः ॥ * ॥
अथ जठराग्निविकाराधिकारः । तत्र सन्नि-कृष्टनिदानपूर्व्वकान् उदराग्निविकारानाह ।
"कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ॥"
तत्र मन्दस्याग्नेर्लक्षणमाह ।
"स्वल्पापि नैव मन्दाग्नेर्मात्रा भुक्तापि पच्यते ।
छर्द्दिदाहः प्रसेकः स्याच्छिरोगौरवजाठरम् ॥"
मन्दाग्निजन्यान् विकारानाह ।
"मन्दोऽग्निर्द्देहिनां कुर्य्याद्विकारान् कफसम्भवान् ॥" * ॥
अथ चिकित्सा ।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा ।
सैन्धवेन युता वा स्यात सातत्येनाग्निदीपनी ॥१॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्यातृतीयामथ दाडिमं वा ।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चोविबन्धेषु च नित्यमद्यात् ॥२॥
शोषं दन्ति त्रिवृच्चित्रं कृष्णामूलं विचर्णितम् ।
तच्चूर्णं गुडसमिश्रं भक्षयेत प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम बलवर्णाग्निवर्द्धनम् ।
शोथोदावर्त्तशूलघ्नं प्लीहपाण्ड्वामयापहम् ॥"
सर्व्वचूर्णसमो गुडो देयः । गुडाष्टकम् ॥ ३ ॥
"दहनाजमोदसैन्धवनागरमरिचानि चाम्लतक्रेण ।
समाहाराग्निकरं पाण्डुशोनाशनं परमम् ॥" ४ ॥
वैश्वानरः चारः ।
"सामुद्रलवणं ग्राह्यमष्टकर्षमितं बुधैः ।
सौवर्च्चलं पञ्चकर्षं विडसैन्धवधान्यकम् ॥
पिप्पली पिप्पलीमूलं पत्रकं कृष्णजीरकम् ।
तालीशं केशरं चव्यमम्लवेतसकं तथा ।
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्-बुधः ॥ ५ ॥
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम् ।
दाडिमं स्याच्चतुष्कर्षं त्वगेला चार्द्धकर्षके ।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधम् ॥
भक्षयेच्छाणमानं तत् तक्रमस्तुककाञ्जिकैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम् ॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरम् ।
शूलं शोथं श्वासकासावामदोषञ्च हृद्रुजम् ॥
अश्मरीं शर्कराञ्चापि पाण्डुरोगं कृमीनपि ।
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम् ॥
हिताय सर्व्वलोकानां भास्करेणोदीरितम् ।
हन्यात् सर्व्वाण्यजीर्णानि भुक्तमात्रमसंशयम् ॥
निम्बुरसादिकं दत्त्वा गुटिकामप्येके कुर्व्वन्ति ॥६॥
टङ्कणं रसगन्धौ च समं भागं त्रयं विषात् ।
कपर्द्दः सर्ज्जिकाक्षारो मागधी विश्वभेषजम् ॥
पृथक् पृथक् कर्षमात्रं वसुभागमिहौषणम् ।
जम्बीराम्लैर्दिनं घृष्टं भवेदग्निकुमारकः ॥
विशूचीशूलवातादिवह्निमान्द्यप्रशान्तये ॥"
चारो यवक्षारः । अग्निकुमारो रसो विशु-च्याद्यजीर्णे ॥ ७ ॥
"पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं
निम्बुजीफलरसेन मर्द्दितम् ॥
वह्निमान्द्यदशवक्त्रनाशनो
रामबाण इति विश्रुतो रसः ।
संग्रहग्रहणिकुम्भकर्णकं
सामवातखरदूषणञ्जयेत् ॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः ।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः ॥"८॥
पारदभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः २ जातीफलभागः ॥० । रामबाणो रसोऽजीर्णे । इति भावप्रकाशः ॥ (विवरणमस्य यथा,—
"अग्निश्चतुर्व्विधः प्रोक्तः समो विषमतीक्ष्णकः ।
मन्दस्तदापरः प्रोक्तः शृणु चिह्नानि साम्प्रतम् ॥
वातपित्तकफे साम्यात् समत्वं जायतेऽनलः ।
तेनैव विषमं प्राप्ते विषमो जायतेऽनलः ॥
तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥"
इति हारीते चिकित्सितस्थाने षष्ठेऽध्याये ॥
"अन्नमण्डं पिबेदुष्णं हिङ्गुसौवर्च्चलान्वितम् ।
विषमोऽपि समस्तेन मन्दो दीप्येत पावकः ॥"
"सिन्ध्वत्थहिङ्गुत्रिफलायमानी-
व्योषैर्गुडांशैर्गुडिकां प्रकुर्य्यात् ।
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे ॥
मन्दः अग्निर्यस्येति । अल्पाग्निविशिष्टे, त्रि । यथा, मार्कण्डेये । १५ । १६६ ।
"सोऽजीर्णव्याधिदुःखार्त्तो मन्दाग्निः संप्रजायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मावघट्टनम् ॥")

मन्दायुः, [स्] त्रि, (मन्दमल्पमायुर्यस्य ।) अल्पायुः । यथा, श्रीभागवते । १ । १६ । १० ।
"मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्म्मभिः ॥"

मन्दारः, पु, (मन्द्यते स्तूयते प्रशस्यते वेति । मदि + "अङ्गिमदिमन्दिभ्य आरन् ।" उणा० ३ । १३४ । इति आरन् ।) स्वर्गीयपञ्चवृक्षान्तर्गतदेवतरुविशेषः । यथा, अमरकोषे ।१।१।५३।
"पञ्चैते देवतरवो मन्दारः पारिजातकः ।

सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥”
(यथा, अभिज्ञानशकुन्तले ७ अङ्के ।
“अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दार-माला हरिणा पिनद्धा ॥”)
पारिभद्रवृक्षः । पालिता मादार इति भाषा ।
यथा, अमरकोषे । २ । ४ । २६ ।
“पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥”
अर्कवृक्षः । आकन्द इति भाषा । यथा,—
“अर्काह्ववसुकास्फोतगणरूपविकीरणाः ।
मन्दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ ॥”
इत्यमरः । २ । ४ । ८१ ॥
हस्तः । धूर्त्तः । इति मेदिनी । रे, १८७ ॥
तीर्थविशेषः । यथा,—
वराह उवाच ।
“शृणु सुन्दरि ! यत्नेन यन्मां त्वं परिपृच्छसि ।
कथयिष्यामि ते गुह्यां मन्दारस्य महाक्रियाम् ॥
क्रीडमानोऽस्म्यहं तत्र दृष्ट्वा मन्दारपुष्पितम् ।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि ॥
तत्रैकादशकुण्डानि निःसृतानि गिरौ धरे ।
विन्ध्ये च मत्प्रभावेन मन्दारस्य महाद्रुमः ॥
स्थितोऽहं तत्र सुभगे ! भक्तानुग्रहकाम्यया ।
दर्शनीयतमं स्थानं मनोज्ञं तु शिलातलम् ॥
यत्र तिष्ठाम्यहं देवि ! मन्दारद्रुममाश्रितः ।
चित्रं शृणु सुश्रोणि ! मन्दारेऽस्मिन् द्रुमे तथा ॥
द्वादश्याञ्च चतुर्दश्यां स पुष्प्यति द्रुमोत्तमः ।
तत्र मध्याह्नवेलायां वीक्ष्यमाणो जनैस्ततः ।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन ॥
तस्मिन् मन्दारकुण्डे तु एकभक्तोषितो नरः ।
स्नानं करोति शुद्धात्मा स गच्छेत् परमां गतिम् ॥
अथ प्राणान् प्रमुच्येत कुण्डे मन्दारसंस्थिते ।
तपः कृत्वा वरारोहे ! मम लोकाय गच्छति ॥
तस्य चोत्तरपार्श्वे तु प्रापणं नाम तं गिरिम् ।
तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः ॥
स्नानकुण्डमिति ख्यातं तस्मिन् क्षेत्रे परं मम ।
दक्षिणे पतते धारा श्रवते चोत्तरामुखम् ॥
तत्र स्नातो वरारोहे ! एकरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे तस्मिन् मेरौ शिलोच्चये ॥
तत्राथ मुच्यते प्राणान् मम कर्म्मपरायणः ।
सर्व्वं सङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
नाकपृष्ठं समासाद्य मोदते दैवतैः सह ।
तथात्र मुच्यते प्राणान् कृतकृत्यः सुनिश्चितः ।
तारयित्वा कुलं सर्व्वं मम लोकं प्रपद्यते ॥
तस्य दक्षिणपूर्व्वेण समश्रोणी वराङ्गने ! ।
पतते विन्ध्यशृङ्गेषु अगाधश्च महाह्रदः ॥
तत्र स्नानन्तु यः कुर्य्यादेकभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये ॥
अथात्र मुच्यते प्राणान् मम चित्तव्यवस्थितः ।
छित्त्वा वै सर्व्वसंसारं मम लोकाय गच्छति ॥
मन्दारस्य तु पूर्व्वेण गुह्यं कोटरसंस्थितम् ।
यत्र धारा पतत्येका सुघोषेण समन्विता ॥
तत्र स्नानं प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन् मेरौ शिलोच्चये ॥
तत्राथ मुच्यते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं समुत्सृज्य मम लोकञ्च गच्छति ॥
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम् ।
पञ्च धाराः पतन्त्यत्र सुघोषेण समन्विताः ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे महामेरौ शिलोच्चये ॥
अथात्र मुच्यते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि ! ।
तत्र धारा पतत्येका आदित्यसमतेजसा ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते पश्चिमे भागे ध्रुवो यत्र प्रवर्त्तते ॥
अथात्र मुच्यते प्राणान् मम कर्म्मव्यवस्थितः ।
सर्व्वपापविनिर्म्मुक्तो मम लोके च मोदते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम् ।
चक्रावर्त्त इति ख्यातमगाधश्च महाह्रदः ॥
स्नानं करोति यस्तत्र पञ्चभक्तोषितो नरः ।
मोदते सर्व्वशृङ्गेषु स्वच्छन्दगमनालयः ॥
अथ वै मुच्यते प्राणान् चक्रावर्त्ते महायशाः ।
शृङ्गान् सर्व्वान् परित्यज्य मोदते मम सन्निधौ ॥
देशं वायव्यमाश्रित्य तस्मिन् विन्ध्यशिलोच्चये ।
तिस्रो धाराः पतन्त्यत्र मुषलाकृतयः शुभाः ।
तत्र स्नानं प्रकुर्व्वीत मम चित्तव्यवस्थितः ।
मोदते सर्व्वशृङ्गेषु एकचित्तसमाश्रितः ।
तथात्र मुच्यते प्राणांश्चास्मिन् गुह्ये यशस्विनि ! ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥
तस्य चित्रकोणमाश्रित्य दक्षिणां दिशमाश्रितः ।
गुह्यं गम्भीरकं नाम अगाधश्च महाह्रदम् ॥
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते सर्व्वद्वीपेषु सर्व्वत्र गमनालयः ॥
अथैवं मुच्यते प्राणान् मम कर्म्मव्यवस्थितः ।
सर्व्वद्वीपान् परित्यज्य मम लोकं प्रपद्यते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं मे परमं महत् ।
सप्त धाराः पतन्त्यत्र अगाधश्च महाह्रदः ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते शक्रलोकन्तु स्वच्छन्दगमनालयः ॥
अथ वै मुच्यते प्राणान् स्वकर्म्मपरिनिष्ठितः ।
सर्व्वसङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
मङ्गलं तस्य क्षेत्रस्य कथ्यमानं मया शृणु ।
स्यमन्तपञ्चकश्चैव मन्दारस्य गिरौ मम ॥
तत्र तिष्ठामि सुश्रोणि ! विन्ध्यस्य गिरिमूर्द्धनि ।
मन्दारे परमं गुह्यं तस्मिन् गुह्यशिलोच्चये ॥
दक्षिणे संस्थितं चक्रं वामे स्थाने च वै गदा ।
लाङ्गलं मुषलञ्चैव शङ्खं तिष्ठति चाग्रतः ॥
य एतत् शृणुयान्नित्यं गुह्यं मन्दारसंस्थितम् ।
तव चैव प्रियार्थाय मम भक्तसुखावहम् ॥
एतन्न जानते कश्चिन्मम मायाविमोहितः ।
मुक्त्वा भागवतान् शुद्धान् ये च वाराहसंश्रितान् ॥”
इत्यादि वाराहपुराणे भगवच्छास्त्रे मन्दारगुह्यवर्णनं नामाध्यायः ॥
मन्दाक्षं, क्ली, (मन्दं आक्षमक्षादिति ।) लज्जा । इति शब्दरत्नावली ॥
मन्दिकुक्कुरः, पुं, मत्स्यविशेषः । इति भूरिप्रयोगः ॥ ग्रन्थान्तरे मन्दिकुक्कुरोऽपि पाठः ॥
मन्दिरं, क्ली, (मन्द्यते सुप्यतेऽत्र मन्द्यते स्तूयते इति वा । मदि ङ स्वपने स्तुतौ +“इषिमदिमुदीति ।” उणा० १।१५० । इति किरच् ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ “मन्द्यते सुप्यतेऽत्र मन्दिरम् । मदि ङ स्वपने जाड्ये मदे मोदे स्तुतौ गतौ चान्मीति इरः । नगरं मन्दिरं पुरमिति पुंनपुंसकयोरत्नपाल पठ्यते । स्त्रियां मन्दिरा च प्रयोगश्च मन्दिराधाक्षरावाणिति मधुसुकुटादयः ।” इति तट्टीकायां भरतः ॥ * ॥
अथ भगवन्मन्दिरनिर्म्माणमाहात्म्यम् ।
“यः कारयेन्मन्दिरं केशवस्य
पुण्यांल्लोकान् स जयेच्छाश्वतान् वै ।
दत्त्वावासान् पुष्पफलाभिपन्नान्
भोगान् भुङ्क्ते कामतः श्लाघनीयान् ॥
आसप्तमं पितृकुलं तथा मातृकुलं नरः ।
तारयेदात्मना सार्द्धं विष्णोर्म्मन्दिरकारकः ॥
इमाश्च पितरो दैत्यगाथा गायन्ति योगिनः ।
पुरतो यदुसिंहस्य शुनशस्य तपस्विनः ॥
अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति ।
हरिमन्दिरकर्त्ता यो भविष्यति शुचिव्रतः ॥”
इति वामने शेषाध्यायः ॥ * ॥
अपि च । अग्निपुराणे ।
“ये ध्यायन्ति सदा बुद्ध्या करिष्यामो हरेर्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥”
किञ्च ।
“समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयेद्यो हरेर्गृहम् ॥”
किञ्च ।
“लक्षेणाथ सहस्रेण शतेनार्द्धेन वा हरेः ।
तुल्यं फलं समाख्यातमीश्वरदरिद्रयोः ॥”
विष्णुधर्म्मोत्तरे तृतीयकाण्डे ।
“कृत्वा वासगृहं तस्य देवस्य परमेष्ठिनः ।
राजसूयाश्वमेधानां फलेन सह युज्यते ॥
प्रासादे न्मृण्मये पुण्यं मयैतत् कथितं द्विजाः ।
तस्माद्दारुमये पुण्यं कृते शतगुणं भवेत् ॥
ततो दशगुणं पुण्यं तथा शैलमये भवेत् ।
ततो दशगुणं लौहे ताम्रे शतगुणं ततः ॥
सहस्रगुणितं रौप्ये तस्मात् फलमवाप्नुते ।
ततः शतसहस्रं वै सौवर्णे द्विजसत्तमाः ॥
अनन्तं फलमाप्नोति रत्नचित्रे मनोहरे ॥”
स्कान्दे ।
“आरम्भे क्षयाधिष्ण्यस्य सप्तजन्मनि यत् कृतम्
पापं विलयमाप्नोति नरकादुद्धरेत् पितॄन् ॥
प्रासादपादे न्यासस्य यावत्तिष्ठन्ति रेणुकाः ।

तावद्वर्षसहस्राणि वसति विष्णुसद्मनि ॥
प्रासादे कृष्णदेवस्य चित्रकर्म्म करोति यः ।
वसते विष्णुलोके तु यावत्तिष्ठन्ति सागराः ॥”
नारसिंहे ।
“यः कुर्य्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकमवाप्नुयात् ॥”
हयशीर्षे ।
“देवागारं करोमीति मनसा यस्तु चिन्तयेत् ।
तस्य कायगतं पापं तदह्ना विप्र ! नश्यति ।
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥
अष्टेष्टकासमायुक्तं यः कुर्य्याद्वैष्णवं गृहम् ।
न तस्य फलसम्पत्तिर्व्वक्तुं शक्येत केनचित् ॥
अनेनैवानुमेयन्तु फलं प्रासादविस्तरात् ।
मरणञ्च प्रशस्तो यः कृत्वा प्रथमेष्टकाम् ॥
स समाप्तस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥”
विष्णुरहस्ये ।
“बाल्ये च क्रीड़माना ये पांशुभिर्भवनं हरेः ।
वासुदेवस्य कुर्व्वन्ति तेऽपि तल्लोकगामिनः ॥”
आदिपुराणे ।
“लेपनाच्छादनञ्चैव यः करोति पुनर्नरः ।
देवस्यायतनं कृत्वा न भवेत् कीटजं भयम् ॥”
अथ मन्दिरनिर्म्माणकालः । मात्स्ये ।
“चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
पत्नीनाशश्चाश्वयुजे कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करजं भयम् ।
लाभन्तु बहुशो विद्यादग्निं माघे विनिर्द्दिशेत् ॥
काञ्चनं फाल्गुने पुत्त्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरा-त्रयमैन्दवम् ॥
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जञ्च सर्व्वे वाराः शुभावहाः ॥
वज्रव्याघातशूलानि व्यतीपातातिगण्डके ।
विष्कम्भगण्डपरिघान् वर्ज्ज्यं योगेषु कारयेत् ॥
श्वेतमैत्रे च माहेन्द्रे गान्धर्व्वाभिजिद्रौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि प्रकर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥”
हयशीर्षे ।
“वास्तुकर्म्म न चारभ्यं वर्षाकाले विजानता ।
कृष्णपक्षे त्रिभागान्ते शुक्लपादौ द्वितीयके ॥
चतुर्थी नवमी वर्ज्ज्या तिथिश्चापि चतुर्द्दशी ।
भौमस्य तु दिनं वर्ज्ज्यं करणं विष्टिसंज्ञितम् ॥
क्षित्यन्तरीक्षदिव्योत्थैरुत्पातैर्भयपीडितम् ।
उपसृष्टं ग्रहैर्भञ्च व्यतिपातहतं तथा ॥
चन्द्रताराऽनुकूले च कार्य्यं कर्म्म विजानता ।
ध्रुवाणि चात्र शस्तानि नैरृतं शक्रदैवतम् ॥
पुष्यं पौष्णञ्च सावित्रं वायव्यं वैष्णवं तथा ।
स्थिरांशे च स्थिरे लग्ने कर्त्तुश्चोपचयात्मके ॥
केन्द्रे सौम्यग्रहो यस्य त्रिकोणे तु सुरोत्तम ! ।
पापश्चोपचयस्थाने तदा कार्य्यं समारभेदिति ॥”

अथ प्रासादस्थानम् । हयशीर्षे ।
“पूर्व्वं देवकुलं वीक्ष्य प्रासादं स्वल्पकन्तथा ।
समं वाप्यधिकं वापि न कर्त्तव्यं विजानता ॥
उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रायसंमि-
ताम् ।
प्रासादं कारयेदन्यं नोभयं पीडयेद्बुधः ॥”*॥
अथ स्थानशोधनानि । देवीपुराणे ।
“देवो विष्णुस्तथा रुद्रो ब्रह्माद्याः सुरसत्तमाः ।
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः ॥
गर्त्तादिलक्षणा धात्री गन्धस्वादेन या भवेत् ।
वर्णेन च सुरश्रेष्ठ ! सा मही सर्व्वकामदा ॥”
मात्स्ये ।
“पूर्व्वं भूमिं परीक्षेत पश्चात् वास्तुं प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ॥
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्त्रियस्य च ॥
कषाये कटुका तद्वद्वैश्यशूद्रेषु शस्यते ।
अरत्निमात्रे वै गर्त्ते स्वनुलिप्ते च सर्व्वतः ॥
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीक्षार्थं पूर्णं तत्र सर्व्वदिङ्मुखम् ॥
दीप्त्या पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः समहितो नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
अरत्निमात्रकं गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके श्रियमाप्नोति न्यूने हानिं समे समम् ।
फालकृष्टेऽथवा देशे सर्व्वबीजानि रोपयेत् ॥
त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठा मध्या कनिष्ठा भूर्व्वर्ज्जनीयेतरा सदा ॥”
हयशीर्षे ।
“सुरभीणां रतिर्यत्र मनत्मानां वृषैः सह ।
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ! ॥
राज्ञां पूर्व्वं गृहं यत्रामात्यानां यज्विनां तथा ।
काश्मीरचन्दनामोदा कर्पूरागुरुगन्धिनी ॥
कमलोत्पलगन्धा च जातीचम्पकगन्धिनी ।
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ॥
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ।
सुगन्धिर्व्रीहिगन्धा च शुभदस्वना च या ॥
सर्व्वेषां वर्णानां भूमिः सर्व्वसाधारणा मता ।
दुर्गन्धा दुःस्वना या च नानावर्णा च दुर्भगा ॥
वृत्तार्द्धचन्द्रसदृशा विस्ताराद्द्विगुणायता ।
त्रिवर्णा वर्णहीना च वक्रा शूचिमुखी तथा ॥
द्विवर्णा सर्पसदृशी गोमुखी च त्रिकोणिका ।
षडस्रा शूलसदृशी दन्तिपृष्ठोपमा च या ॥
सरीसृपसमा या च दिङ्मुखा शकटाकृतिः ।
एवं प्रकारा या भूमिर्व्वर्ज्ज्या यत्नेन देशिकैः ॥
किञ्च ।
“प्रासादस्य विशेषेण प्रोक्ता भूमिश्चतुर्व्विधा ।
सुपद्मा भद्रिका पूर्णा धूम्रा रागिणयथापरा ॥
तिलकैर्नारिकेलैश्च वहिःकाशैश्च शोभिता ।
पद्मेन्दीवरसंयुक्ता सा सुपद्मेति विश्रुता ॥
नदीसमुद्रायतनतीर्थपर्य्यन्तशोभिता ।
पुष्पवृक्षसमाकीर्णा क्षीरवृक्षोपशोभिता ॥

वनोद्यानलतागुल्मफुल्लस्तम्बसमावृता ।
यज्ञीयवृक्षसुक्षेत्रयुक्ता भद्रेति कीर्त्तिता ॥
वकुलाशोकबहुला तथा कृष्णाम्रलोहितैः ।
माधवीवेष्टिता या च मुद्गनिष्पावकोद्रवैः ॥
शूकधान्यैश्च पुन्नागैर्गिरिपार्श्वगता च या ।
तोयञ्च स्वल्पकं यस्यां सा पूर्णा परिकीर्त्तिता ॥
विल्वार्कस्नुहिपीलूनां वनैर्य्या परितो वृता ।
सशर्करा च कठिना युक्ता कण्टकिभिर्द्रुमैः ॥
गृध्रगोमायुकाकानां श्येनानां या कुलाकुलैः ।
धूम्रेति कीर्त्तिता सा तु तां यत्नात् परिवर्ज्जयेत् ॥
ततो भूमिं परीक्षेत पूर्व्वोदक्प्रवणां शुभाम् ।
असङ्कटां तथाच्छन्नामल्पतोयां परिस्नुताम् ॥
संपूर्य्यमाणे खाते तु तथाधिकरजं शुभाम् ।
कुसुम्भसदृशं वर्णं यस्यां न म्लानिमृच्छति ॥
न निर्व्वाति तथा दीपस्तोयं शीघ्रं न जीर्य्यते ।
श्वेतारुणा पीतकृष्णा विप्रादीनां प्रशस्यते ॥
आज्यसद्गन्धमद्यानां तुल्यगन्धा तु या भवेत् ।
मधुरा च कषाया च अम्ला च कटुका च या ॥
कुशैः शरैस्तथा काशैः दूर्व्वाभिर्या च सन्तता ।
तस्यां पुण्येऽथ नक्षत्रे कुर्य्याद्भूमिपरिग्रहम् ॥”
अथ भूमिपरिग्रहः । तत्रैव ।
“प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ।
माषं हरिद्राचूर्णञ्च सलाजं दधिशक्तवः ॥
एभिर्भूतबलिं दत्त्वा मन्त्रमष्टाक्षरेण तु ।
पातयित्वा ततः शङ्कूनष्टदिक्षु निवेशयेत् ॥
राक्षसाश्चापि भूताश्च येऽस्मिंस्तिष्ठन्ति भूतले ।
ते सर्व्वे व्यपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥
इत्यनुज्ञाप्य भूतादीन् तां भूमिं परिशोधयेत् ।
आदित्यादिग्रहाणाञ्च लोकपालैः समं कृती ॥
कार्य्यमिष्टविधानेन ततो वै होममाचरेत् ।
चतुर्होमं ततः कुर्य्यान्मूलमन्त्रेण देशिकः ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषडन्तेन देशिकः ।
वृषभौ कपिलौ गृह्य सवर्णौ वा विचक्षणः ।
योजनार्थं हलस्यैव गृह्णीयादसनोद्भवम् ॥
प्राङ्मुखं योज्य मन्त्रज्ञो वस्त्रालङ्कारभूषितः ।
आमन्त्र्य पश्चिमादाय द्वादशाक्षरविद्यया ॥
संमर्द्देन समीकृत्य शुभवीजानि वापयेत् ।
संप्राप्ते शुभकाले तु गोभिस्तान् खादयेद्बुधः ।
पुनस्तं कर्षयित्वा तु समीकृत्य गृहं गुरुः ॥”
मात्स्ये च ।
“हीनाधिकाङ्गतां वास्तोः सर्व्वतः परिवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैव विवर्ज्जयेत् ॥”*॥
अथ दिक्साधनम् । हयशीर्षे ।
“वाद्यवास्तु समं कृत्वा चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम् ॥
द्वादशाङ्गुलमानेन चाष्टौ वारांस्तु भ्रामयेत् ।
मध्ये सुनिश्चलं शङ्कुं स्थाप्य छायां निरी-
क्षयेत् ॥
प्रवेशे निष्क्रमे तस्यां शङ्कुच्छायां निरूपयेत् ।
वैपत्रे विमले व्योम्नि शङ्कुना साधयेद्दिशम् ॥
शरद्वसन्तयोरेवमादित्यात् साधयेद्दिशम् ।
प्राचीं वा पुष्यवेधेन विचित्रामन्तरेण वा ॥

उदीचीं ध्रुववेधेन मध्ययोगेन चोभयेत् ।
चतुरस्रां शिलां न्यस्य इष्टकां वा सुशोभनाम् ॥
चतुर्द्दिक्षु निवेश्याथ सूत्रचिह्नन्तु कारयेत् ।
एवं कृत्वा सूत्रचिह्नं ब्राह्मणांस्तत्र भोजयेत् ।
वैष्णवान् पायसेनान्नान् द्वादशैव समाहितः ॥”
अथ शल्योद्धरणम् । मात्स्ये ।
“गृहारम्भेति कण्डूतिः स्वाम्यङ्गे यत्र जायते ।
शल्यन्त्वपनयेत्तत्र प्रासादे भवनेऽथवा ।
सशल्यं भयदं यस्मादशल्यं भयनाशनम् ॥”
हयशीर्षे ।
“आदिशेद्दारुण: शल्यं गृहिणोऽङ्गविकारतः ।
शकुनो दृश्यते वापि यस्य वा श्रूयते ध्वनिः ।
कीर्त्त्यते यस्य वै नाम शल्यं तस्य विनिर्द्दिशेत् ॥”
अथ वास्तुमण्डलम् । मात्स्ये ।
“पञ्चगव्यौषधिजलैः परीक्षित्वावसेचयेत् ।
एकाशीतिपदं कुर्य्याद्रेखाभिः कनकेन तु ॥
पश्चात्पिष्टेन चालिप्य सूत्रेणालोक्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ॥
सर्व्ववास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ॥
पदस्थान् पूजयेद्देवान् त्रिंशत् पञ्चदशैव च ।
द्वात्रिंशद्वाह्यतः पूज्याः पूज्याश्चान्ते त्रयोदश ॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोध
मे ।
ईशकोणादिषु सुरान् पूजयेच्च विधानतः ॥
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगाः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगोऽहिर्म्मुख्य एव च ॥
भल्लाटः सोमसूर्य्यौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्च सुरान् शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगाः ।
सर्व्वानेकोत्तरान् विद्यात् पूर्व्वादीन्नामतः शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः
क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्द्दितिस्तथा ॥
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्व्विंशद्द्विपदास्ते तु सर्व्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनन्तथा ॥
मुख्याद्भृशं तथा शोषाद्वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् भृङ्गात् पर्ज्जन्यमेव च ॥

एते वंशाः समाख्याताः क्वचिदन्यत्र एव तु ।
एतेषां यस्तु सम्पातः पदमध्यं समं तथा ॥
समं चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोत्सृष्टोपघातादि वर्ज्जयेद्यत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्द्दिष्टः पितृवंशोत्तरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समास्थितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले त्वापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्द्दितिपर्ज्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ तु पूजनीयौ प्रयत्नतः ।
सूर्य्यः सोमादयस्तद्वाह्वोः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तं समाश्रितौ ॥
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्म्मणिबन्धने ॥
तथैवासुरशोषौ च वामपार्श्वं समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥
ऊर्व्वोर्य्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ स्फिक्स्थो दौवारिको मृगः ॥
जयः शक्रस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये तु स पूज्यते ॥
चतुःषष्टिपदो वास्तु प्रासादे ब्रह्मणः स्मृतः ।
ब्रह्मा चतुष्पदस्तद्वत् कोणेष्वेकपदास्तथा ॥
बहिःकोणेषु चाष्टौ तु सार्द्धाश्चोभयतः स्मृताः ।
विंशतिर्द्विपदास्तेषां चतुःषष्टिपदे स्मृतः ॥”*॥
हयशीर्षे ।
“वास्त्वङ्गं सूत्रयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेतगन्धानुलिप्ताङ्गः सर्व्वालङ्कारभूषितः ॥
चतुःषष्टि तु प्रासादे एकाशीति गृहे सदा ।
चतुरस्रीकृते क्षेत्रे अष्टधोभयभाजिते ॥
कोणरेखां ततो दत्त्वा सुरभागांस्तु कल्पयेत् ।
शिवः कोणार्द्धतो ज्ञेयः पर्ज्जन्यः पदसंस्थितः ॥
द्विपदस्थो जयो ज्ञेयः सुरेशश्चैकपादिकः ।
भास्करस्तु पदे ज्ञेयो द्विपदः सत्य इष्यते ॥
भृशः पदस्थो विज्ञेयो व्योमश्चैव पदार्द्धगः ।
हुताशनः पदार्द्धश्च पूषा च पदसंस्थितः ॥
वितथो द्विपदस्थश्च पदैकश्च गृहक्षतः ।
वैवस्वतः पदैकस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदे स्थितः ।
पितरश्चार्द्धतो ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवश्च पदे ज्ञेयो द्व्येकस्थः पुष्पदन्तकः ।
यादसाम्पतिरेकस्थो ह्यसुरस्तु द्वि संस्थितः ॥
शोषश्चैकपदे ज्ञेयो ह्यर्द्धगः पाप इष्यते ।
रोगश्चार्द्धपदे ज्ञेयो नागश्चापि पदे स्थितः ॥
मुख्यश्च द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ।
यक्षेश्वरः पदे ज्ञेयो नागस्तु द्विपदे स्थितः ।
पदस्था श्रीमहादेवी अदितिश्चार्द्धसंस्थिता ।
आपो ज्ञेयास्तु पदगा वत्सो द्विपदसंस्थितः ॥
चतुष्पदस्था विज्ञेयस्त्वर्य्यमा पूर्व्वमध्यगः ।
सविता तु पदे ज्ञेयः सावित्री च पदे स्थिता ॥
ततो विवस्वान् विज्ञेयश्चतुष्टयपदे स्थितः ।

इन्द्रश्चन्द्रो जयश्चैव एकैके संव्यवस्थिताः ॥
मित्रश्चतुष्पदस्थश्च पश्चिमे तु व्यवस्थितः ॥
रुद्रः पदैकसंस्थो वै यक्ष्मा चैकपदे स्थितः ।
धराधरश्च विज्ञेयो ह्युत्तरे च चतुष्पदः ।
चतुर्मुखश्चतुष्कस्थो मध्ये ज्ञेयः प्रजापतिः ॥”
अथ वास्तुपूजा । मात्स्ये ।
“अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयम् ।
वास्तौ परीक्षिते सम्यग्वास्तुदेहविचक्षणाः ॥
वास्तूपशमनं कुर्य्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ॥
होमश्चिमेखले कार्य्यः कुण्डे हस्तप्रमाणके ।
यवैः कृष्णतिलैस्तद्वत् समिद्भिः क्षीरवृक्षजैः ॥
पालाशैः खादिरैर्व्वापि मार्गोदुम्बरसम्भवैः ।
कुशदूर्व्वामयैश्चापि मधुसर्पिःसमन्वितैः ॥
कार्य्यस्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेशे बलिं हरेत् ॥
तद्वद्विशेषनैवेद्यमिदं दद्यात् क्रमेण तु ।
ईशकोणे घृताक्तन्तु शिखिनं विनिवेदयेत् ॥
ओदनं सफलं दद्यात् पर्ज्जन्याय घृतान्वितम् ।
जयन्ताय ध्वजं पीतं पिष्टं कूर्म्मञ्च संत्यजेत् ॥
इन्द्राय पञ्च रत्नानि पिष्टकं कुलिशं तथा ।
वितानकञ्च सूर्य्याय धूम्रं रक्तं तथैव च ॥
सत्याय घृतगोधूमं मत्स्यान् दद्याद्भृशाय च ।
शष्कुलीं चान्तरीक्षाय दद्यात्सक्तुञ्च वायवे ॥
पूष्णे लाजांस्तु दातव्या वितथे चणकौदनम् ।
गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥
गन्धौदनञ्च गन्धर्व्वे भृङ्गे मेषस्य शृङ्गकम् ।
मृगाय यावकं दद्यात् पितृभ्यः कृशरा मताः ॥
दौवारिके दन्तकाष्ठं पिष्टं कृष्णं बलिं तथा ।
सुग्रीवे पूपकं दद्यात् पुष्पदन्ताय पायसम् ॥
कुशस्तम्बेन सहितं दद्यात् पद्मञ्च वारुणे ।
पिष्टं हिरण्मयं दद्यादसुराय सुरा मता ॥
घृतौदनं च शोषाय गोधा वै पापयक्ष्मणे ।
घृतलड्डुकाश्च रोगाय नागे पुष्पं फलान्वि-
तम् ॥
सर्पिर्म्मुखाय दातव्यं मुद्गौदनमतः परम् ।
भल्लाटाय ततो दद्यात् सोमाय घृतपायसम् ॥
सर्पाय पिष्टं शालूकमदित्यै लोपिकास्तथा ।
दित्यै तु पूरिकां दद्यात् इत्येवं बाह्यतो बलिम् ॥
क्षीरमापाय दातव्यमापवत्साय वै दधि ।
सवित्रे लड्डुकान् दद्यात् समरीचान् कुशौ-
दनम् ।
सवितुर्गुडपूपांश्च जयाय घृतचन्दनम् ।
विवस्वते तथा दद्यात् रक्तचन्दनपायसम् ॥
हरितालौदनं दद्यादिन्द्राय घृतसंयुतम् ।
घृतौदनञ्च मित्राय रुद्राय घृतपायसम् ॥
आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे ।
पृथ्वीधराय मांसानि कुष्माण्डाय च दापयेत् ॥
सशर्करान्नं संदद्यादर्य्यम्णे सर्व्वतः क्रमात् ।
नमस्कारान्तयुक्तेन मन्त्रेण पुनरेव च ॥
पञ्चगव्यं यवांश्चैव तिलाक्षतहविश्चरून् ।
भक्ष्यं भोज्यञ्च विविधं ब्रह्मणे विनिवेदयेत् ॥

एवं सम्पूजिता देवाः शान्तिं कुर्व्वन्ति ते सदा।
सुरेभ्यः काञ्चनं दद्याद्ब्रह्मणे गां पयस्विनीम् ॥
राक्षसीनां बलिर्देयः अपि याहक् तथा शृणु।
मांसौदनं घृतं पद्मं केशरं हरिद्रान्वितम्।
ईशानभागमाश्रित्य चरक्यै विनिवेदयेत् ॥
दध्योदनं सरुधिरमस्थिखण्डैश्च संयुतम्।
पीतरक्तबलिं दद्यात् पूतना या तु राक्षसी ॥
वायव्ये पापराक्षस्यै मत्स्यमांससुरासवम्।
पायसं वापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात्।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्व्वतः ॥ "* ॥
ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत्।
द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्वास्तुपशमनं कृत्वा कर्म्म समारभेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ॥
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये।
इति वास्तुपशमनं कृत्वा सूत्रेण वेष्टयेत् ॥
रक्षोघ्नपवमानेन सूक्तेन भवनादिकम्।
नृत्यमङ्गलवाद्येन कुर्य्याद्ब्राह्मणवाचनम् ॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
गृहे वायतने कुर्य्यान्न स दुःखमवाप्नुयात् ॥
न च व्याधिभयं तस्य न च बन्धुधनक्षयः।
जीवेद्वर्षशतं स्वर्गे कल्पमेकं वसेन्नरः ॥ " * ॥
हयशीर्षपञ्चरात्रे।
"एवं प्रगृह्य काष्ठानि रजसापूर्य्य देशिकः।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥
ईशानाय प्रदातव्यं पायसं मधुना सह।
पर्ज्जन्याय जलं देयं पुष्पगन्धादिवासितम् ॥
जयन्ताय प्रदातव्या पताका पीतवर्णिका।
सुरेशाय च रत्नानि भास्कराय घृतं तथा ॥
धम्रकं पीतवर्णं वा सत्ये दद्याद्वितानकम्।
दद्याद्भृशे पश्चिमांसं व्योमाय त्वचमग्नये ॥
पूष्णे धानाः सलाजास्तु सुवर्णं वितथे तथा।
गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥
गन्धं गन्धर्व्वदेवाय भृङ्गे दद्यात्तु शाकुनम्।
मृगे तिलयवांश्चैव पितृभ्यः कृशरं तथा ॥
दौवारिके दन्तकाष्ठं सुग्रीवे यावकं तथा।
पुष्पदन्ते कुशा देया वरुणे पद्ममुत्पलम् ॥
असुरायैव देयं रसं शोषे घृतौदनम्।
यवास्तु देयाः पापाय रोगाय घृतमण्डकम् ॥
नागाय नागपुष्पाणि भक्ष्यान् मुख्याय दापयेत्।
चित्रौदनञ्च भल्लाटे सोमाय मधुपायसम् ॥
नागाय चापि शालूकं श्रिये सरसपायसम्।
अदित्यै पूरिका देया चीरं चाङ्गो ददेद्बलिम्॥
दधि चीरं चापवत्साय अर्य्यम्णे लड्डुकं बलिम्।
कुशोदकं सवित्रे च सावित्र्यै गुडपूर्व्वकम् ॥
विवस्वते रक्तपुष्पं रक्तचन्दनमेव च।
हरिद्रान्नं तथेन्द्राय साज्यामन्नं जयाय च ॥
घृतपूरन्तु मित्राय रुद्राय गुड़पायसम्।
आमपक्वानि मांसानि प्रदद्याद्राजयक्ष्मणे ॥
पृथ्वीधरायाममांसं खड्गिमांसं बलिं हरेत्।
साघृतं सलिलञ्चैव पञ्चगव्यं तथा चरुम् ॥
कुशान् गन्धं तथा पुष्पं ब्रह्मस्थाने निवेशयेत्।
आममांसं पूर्व्वभागे सर्व्वस्कन्धे तुषोदकम् ॥
तिलपद्मं घृतं मांसं विदार्य्यै चाम्पिकोणके।
कृशं वा पूपकं मांसमर्य्यमृण्यैव दक्षिणे ॥
पिङ्गञ्चैव तथा रक्तं पूतन्यै नैरृते तथा।
साढ्मांसं प्रदातव्यं जृम्भकायैव पश्चिमे ॥
अस्थिखण्डेन सहितं रक्तपिण्डेन मिश्रितम्।
प्रदेयं पापराक्षस्यै वायव्यां मांसमेव च ॥
उत्तरे पिलिपिच्छायै सान्द्रं रक्तं बलिं हरेत्।
वाराह्यै छागमांसानि ऐशान्यां दिशि दापयेत्॥
ततो भूतगणानान्तु राक्षसानां सुरोत्तम।।
पिशाचानां गणानान्तु बलिर्देयस्तु कामिकः ॥
एतान् वा पूजयेत् सर्व्वान् कुशपुष्पाक्षतैर्बुधः।
एवं संपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा।
तस्मादेतांस्तु संपूज्य गन्धपुष्पैर्मनोहरैः।
प्रासादं कारयेद्विद्वान् गृहं वा सुरसत्तम।॥"
अथ प्रासादमूलारम्भः। तत्रैव।
"ब्रह्मस्थाने ततः कुर्य्याद्वासुदेवस्य पूजनम्।
श्रियः संपूजनं कुर्य्यात् तुर्य्यांकशगणस्य च ॥
पूजनन्तु ततः कुर्य्याद्वासुदेवगणस्य च।
गन्धाद्यैःपुष्पनैवेद्यधूपदीपैः सुरोत्तम। ॥
ततः संपूजयेत्तस्मिन् सर्व्वलोकधरां महीम्।
सुरूपां प्रमदारूपां विद्याभरणभूषिताम् ॥
ध्यात्वा समर्च्चयेद्देवीं परितुष्टां स्मिताननाम्।
ततः प्रणम्य विज्ञाप्य तन्मयत्वेन चिन्तयेत् ॥
ततः स्वनाममन्त्रेण सर्व्वदेवमयं परम्।
ध्यात्वा समर्च्चयेत्तत्र यत्तद्वास्तुमयं नरः ॥
ब्रह्मस्थाने ततो विद्वान् कुर्य्यादाधारमक्षतैः।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूजि-
तम् ॥
हैमं वा राजतं वापि ताम्रमयं वा दृढ़ं नवम्।
सर्व्वबीजौषधीयुक्तं सुवर्णरत्नान्वितम् ॥
रत्नगर्भं सुसंपूर्णं वस्त्रपूतेन वारिणा।
प्रशस्तपल्लवोपेतं चन्दनचर्च्चितम् ॥
पुष्पैः सुमालितं कृत्वा गन्धपुष्पैर्व्विधूपितम्।
आहतेन च शुक्लेन वस्त्रयुग्मेन वेष्टितम् ॥
ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत्।
तस्मिंश्चतुर्मुखं देवं प्रजेशं मन्त्रविग्रहम् ॥
गन्धपुष्पैश्च नैवेद्यैः पूजयेत् सुमनोहरैः।
ततो मण्डलबाह्ये तु प्राच्यां वा प्राङ्मुख-
स्थितः ॥
आचार्य्यो गृह्य संभारान् ग्रहादींस्तर्पयेत्
सुरान्।
घृतैस्तैलैर्यवैर्म्मन्त्रैर्ब्रह्मादींस्तर्पयेत्ततः ॥
प्रजेशं तर्पयेद्विद्वानाहुतीनां शतेन च।
इतरान् दशभिर्द्देवानाहुतिभिः प्रतर्पयेत ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषडन्तेन मन्त्रवित्।
तत्र प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥
प्रगृह्य कर्करीं मन्त्री मण्डलन्तु प्रदक्षिणम्।
सूत्रमार्गेण दिश्येन तोयधारान्तु भ्रामयेत् ॥
पूर्व्ववत्तेन मार्गेण सप्तबीजानि भ्रामयेत्।
सुशोभनं शुभं स्थानं तथा खातस्य कारयेत् ॥
ततो गर्त्तं खनेन्मध्ये हस्तमात्रप्रमाणकम्।
चतुरङ्गुलमात्रं तदधः खन्यात् सुखान्वितम् ॥
गोमयेनोपलिप्याथ चन्दनेन च भूषयेत्।
मध्ये दत्त्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतु-
र्भुजम्।
तूर्य्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ। कुम्भतोयेन मन्त्रवित्।
प्रगृह्य कर्करीं तावत्कुम्भं प्रपूरयेज्जलैः ॥
सर्व्वरत्नसमाकीर्णैर्व्विमलैः सुसुगन्धिभिः।
तस्मिन् शुक्लानि पुष्पाणि प्रक्षिपेदीमिति
स्मरन् ॥
तदावर्त्तं परीक्षेत वेदाद्येनाक्षतं क्षिपेत्।
शुभं स्याद्दक्षिणावर्त्तेऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवादीनां तं गर्त्तं पूरयेद्बुधः।
चन्दनाभिः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं पुष्पाद्यविधिना चार्घ्यदानं सुरोत्तम।।
सुवर्णं गां वस्त्रयुगमाचार्य्याय निवेदयेत् ॥
कालज्ञस्थपती पूज्यौ वैष्णवान् शक्तितोऽर्च्चयेत। -
ब्राह्मणान् भोजयित्वा च गेयनृत्यादि कारयेत् ॥
ततस्तं खानयेद्यत्नाज्जलान्तं यावदेव तु।
पुरुषाधः स्थितं शल्यं न गृहे दोषदं भवेत् ॥
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम्।
तस्मात् प्रासादिकी भूमिः शोध्या यावज्जला-
न्तिकम् ॥
शिवान्तं कर्कशान्तं वा यावद्वा भूः कुमारिका।
आकोत्थनं समीकृत्य ततो योगं समाचरेत॥"
किञ्च।
"पूरयेत् खातकं यत्नात् पादं पादं यथाक्रम्।
आढ़ाकुलं मृत्तिकया स्वस्तिकं चेष्टिकादिभिः ॥
सिक्ता सिक्ता तु तोयेन कलसैः काञ्चनादिभिः।
आकोटनं ततः कुर्य्यात् मुद्गरैर्ब्रहत्तजैः ॥
पादोनं पूरयेत् खातं सुषमं चैव कारयेत।
देशिकः पञ्चगव्येन तां भूमिं प्रोक्षयेद्बुधः ॥
सुवर्णब्रीहिगर्भेण चूतपल्लवशोभिना।
तीर्थतोयसुपूर्णेन स्वर्णताम्रमयेण वा ॥
सेचयेदभिजप्तेन वारिणा कलसेन तु।
ततः शुद्धा भवेद्भूमिर्दोषयुक्तापि या भवेत् ॥"
अथ शिलालक्षणं मात्स्ये।
"आदावेव समासेन शिलालक्षणमुत्तमम्।
शिलान्यासविधानञ्च प्रोच्यते तदनन्तरम्।
शिला वाथेष्टका वापि चतस्रो लक्षणान्विताः।
प्रासादादौ विधानेन न्यस्तव्याः सुमनोहराः ॥
चतुरस्राः समाः कृत्वा समन्तादथ वेष्टकाः।
शिलारूपाः स्मृता विज्ञा नन्दाद्याश्चेष्टका-
त्मिकाः ॥
संपूर्णाः सुतलाः स्निग्धाः सुषमा लक्षणा-
न्विताः।
कुशदूर्व्वाङ्किता धन्याः सध्वजच्छत्रचामराः ॥
साङ्कुशास्तोरणोपेताः कूर्म्ममत्स्यफलान्विताः।
दर्पणा हस्तिवक्त्राङ्काः प्रशस्तदयताङ्किताः ॥
प्रशस्तपक्षिमृगाङ्काश्च वृषाङ्काः सर्व्वदा हिताः।

स्वस्तिका वेदिका मुक्ता नन्द्यावर्त्तकलाञ्छिता: ॥
पद्मादिलक्षणोपेता: शिला: सर्व्वार्थसिद्धिदा: ।
तथा गोवाजिपादाङ्का: शिला धन्या: सुखा-
वहा: ॥
क्रव्यादमृगपादाङ्का न शस्ता: पक्षिणस्तथा ।
दिङ्मूढ़ा द्विविहीनाश्च दीर्घह्रस्वा: क्षता-
न्विता: ॥
विवर्णा: स्फुटिता भग्ना: संत्याज्या लक्षणच्युता: ।
प्रशस्तपाणिरूपाङ्का: प्रशस्तद्रव्यलाञ्छिता: ॥
यथोक्तलक्षणोपेता: शिला नित्यहितावहा: ॥"
अथ इष्टकालक्षणम् । तत्रैव ।
"इष्टकानां समासेन लक्षणं शृणु साम्प्रतम् ।
एकवर्णा: सुपक्वाश्च सुप्रमाणा मनोरमा: ॥
नन्द्याश्चेष्टका: कार्य्याश्चतुरस्रा: सुसंमिता: ।
अस्थ्यङ्गारान्विता नेष्टा: कृष्णवर्णा: सशर्करा: ॥
मन्दपक्वा विपक्वाश्च बहुदिग्धाश्च वर्ज्जिता: ।
भग्नाश्च विषमा हीना वर्ज्जनीया: प्रयत्नत: ॥"
हयशीर्षपञ्चरात्रे ।
"इष्टकानां प्रमाणञ्च लक्षणं साम्प्रतं शृणु ।
सुनला लक्षणोपेता द्वादशाङ्गुलसम्मिता: ॥
सुविस्तारविभागेन नैपुण्येन च सम्मिता: ।
सुपक्वा: सुप्रमाणास्ता एकवर्णा मनोहरा: ।
विमला इष्टका: कार्य्याश्चतुरस्रा: सुसम्मिता: ।
छिन्नकर्णाश्चाप्रशस्ता: पाणिपादविवर्ज्जिता: ॥
सशर्करा: कृष्णवर्णा अस्थ्यङ्गारचिताश्च या: ।
विवर्णा मन्दगन्धाश्च या: पीना: पिण्डिकाश्च
या: ॥
हीनाश्च विषमा भग्ना जर्ज्जराश्च विवर्ज्जिता: ॥"
अथ शिलादिन्यासव्यवस्था । मात्स्ये ।
"शिलान्यासस्तु कर्त्तव्य: प्रासादे तु शिलामये ।
इष्टकानान्तु विन्यास: प्रासादे चेष्टकामये ॥
शैलजे शैलज: पीठ ऐष्टिके ऐष्टिक: स्मृत: ।
शिलान्यासादिको भद्रे मलपादो विधीयते ॥"
हयशीर्षपञ्चरात्रे ।
"कर्त्तव्यश्चेष्टकान्यास: प्रासादे चेष्टकामये ।
शैले शिलानां विन्यास: कार्क्करे कर्क्करा न्यसेत् ॥
कृत्वा शिलादिन्यासं च प्राक्शिलाभ्यधिवा-
सनम् ।
इष्टकानां प्रतिष्ठाञ्च गर्भाधानञ्च कारयेत् ॥
गुरवे दक्षिणां दत्त्वा पीठबन्धञ्च साधयेत् ।
त्वय श्रीहयशीर्षेण प्रोक्तस्तत्तद्विधि: स्फुटम् ॥"
अथ पीठबन्धनम् । हयशीर्षे ।
"पीठबन्धं तत: कुर्य्यात्तत्प्रासादमानत: ।
पीठोत्तमं चोच्छ्रयेण प्रासादस्यार्द्धमानत: ॥
पादहीनं मध्यमं स्यात् कन्यसं चार्द्धमानत: ।
उत्तमं वासुदेवस्य कुर्य्यात् पीठं विचक्षण: ॥
अथ प्रासादलक्षणानि । मात्स्ये ।
एवं वास्तुबलिं कृत्वा भजेत् षोडशभागिकम् ।
तस्य मध्ये चतुर्भिस्तु भागैर्गर्भञ्च कारयेत् ॥
भागद्वादशकं तत्र भित्त्यर्थं परिकल्पयेत् ।
चतुर्भागेन भित्तीनामुच्छ्राय: स्यात् प्रमा-
णत: ॥

द्विगुण: शिखरोच्छ्रायो भित्त्युच्छ्रायात् प्रमा-
णत: ।
शिखरार्द्धस्य चार्द्धेन विधेया तु प्रदक्षिणा ॥
चतुर्दिक्षु तदा ज्ञेयो निर्गमस्तु तथा बुधै: ।
गर्भसूत्रद्वयं भागो विस्तारो मण्डपस्य तु ॥
आयत: स्यात्त्रिभिर्भागैर्भद्रयुक्त: सुशोभन: ।
पञ्चभागेन संभज्य गर्भमानं विचक्षण: ॥
भागमेकं गृहीत्वा तु प्राग्ग्रीवं कल्पयेद्बुध: ।
गर्भसूत्रसमो भागादग्रतो मुखमण्डप: ।
एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ॥
किञ्च ।
मेरुमन्दरकैलासकुम्भसिंहमृगास्तथा ।
विमानच्छन्दकस्तद्वच्चतुरस्रोऽथ मृगाधिप: ॥
वलभिच्छन्दकस्तद्वद्वर्त्तुल: सर्व्वभद्रक: ।
गजश्च नन्दनश्चैव नन्दिवर्द्धन एव च ॥
हंसो वृष: सुपर्णश्च पद्मकोऽथ समुद्गक: ।
प्रासादा नामत: प्रोक्ता विभागं शृणुत द्विजा: ॥
शतशृङ्गश्चतुर्द्वारो भूमिकाषोडशोच्छ्रित: ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश: प्रोक्त: कैलासो दशभूमिक: ।
विमानच्छन्दकस्तद्वदनेकशिखरागत: ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धन: ।
विंशाण्डकसमायुक्तो नन्दन: समुदाहृत: ॥
षोडशाण्डकसंयुक्तो नानारूपसमन्वित: ।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥
चन्द्रशालासमोपेतो विज्ञेय: पञ्चभूमिक: ।
वलभिच्छन्दकस्तद्वच्छुकनासात्रयान्वित: ॥
वृषस्योच्छ्रयतस्तुल्यो मण्डलश्चास्रिवर्ज्जित: ।
सिंह: सिंहगतिर्ज्ञेयो मृगो मृगसमस्तथा ॥
कुम्भ: कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रय: ।
अङ्गुलीपुटसंस्थानपञ्चाण्डकविभूषित: ॥
षोडशास्र: समन्तात्तु विज्ञेय: स समुद्गक: ।
पार्श्वयोश्चन्द्रशालस्य उच्छ्रायो भूमिकाद्वयम् ।
षोडशास्र: स विज्ञेयो विचित्रशिखर: शुभ: ।
मृगराजस्तु विख्यातश्चन्द्रशालाविभूषित: ॥
प्राग्ग्रीवेण विशालेन भूमिकासु षडुन्नत: ।
अनेकचन्द्रशालस्तु गज: प्रासाद उच्यते ॥
पर्य्यन्तगह्वराभो वै गरुडो नाम नामत: ।
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वित: ॥
भूमिकाषडशीतिस्तु बाह्यत: सर्व्वतो भवेत् ।
तथान्यो गरुडस्तद्वदुच्छ्रायाद्दशभूमिक: ॥
पद्मक: षोडशास्रस्तु भूमिद्वयसमन्वित: ।
पद्मतुल्यप्रमाणेन श्रीवृक्षक इति स्मृत: ॥
पञ्चाण्डकाश्चभूमिस्तु गर्भे हस्तचतुष्टयम् ।
वृषो भवति नाम्ना य: प्रासाद: सर्व्वकामिक: ॥
सप्तार्द्धौ पञ्चकाश्चैव प्रासादा ये मयोदिता: ।
सिंहस्य ते समा ज्ञेया ये चान्ये तत्प्रमाणत: ॥
चन्द्रशालै: समोपेता: सर्व्वे प्राग्ग्रीवसंयुता: ।
इष्टका दारवाश्चैव शैला वा स्यु: सतोरणा: ॥
मेरु: पञ्चाशद्धस्त: स्यात् मन्दर: पञ्चहीनक: ।
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानक: ॥
नन्दिवर्द्धनकस्तद्वद्द्वात्रिंशत् समुदाहृत: ।

त्रिंशता नन्दन: प्रोक्त: सर्व्वतोभद्रकस्तथा ॥
वर्त्तुल: पद्मकश्चैव विंशद्धस्त उदाहृत: ।
मृग: सिंहश्च कुम्भश्च वलभिच्छन्दकस्तथा ॥
एते षोड़शहस्ता: स्युश्चत्वारो देववल्लभा: ।
श्रीवृक्षो मृगराजश्च समुद्गकगजौ तथा ॥
एते द्वादशहस्ता: स्युरेतेषां हंसक: सम: ।
गरुडोऽष्टकरो ज्ञेयो वृषो दश उदाहृत: ॥
एवमेते प्रमाणेन कर्त्तव्या: शुभलक्षणा: ।
यक्षराक्षसनागानां मालहस्त: प्रशस्यते ॥
तथा मेर्व्वादय: सप्त ज्येष्ठलिङ्गे सुखावहा: ।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य उदाहृता: ॥
तथा हंसादय: पञ्च कन्यसे सुभदा मता: ॥"
हयशीर्षपञ्चरात्रे ।
"प्रासादं संप्रवक्ष्यामि सर्व्वसाधारणं शृणु ।
चतुरस्रीकृतं क्षेत्रं भवेत् षोडशधा पुन: ॥
मध्ये तस्य चतुर्भिस्तु कुर्य्यादायसमन्वितम् ।
द्वादशैव तु भागानि भित्त्यर्थं परिकल्पयेत् ॥
जङ्घोच्छ्रायस्तु कुर्व्वीत चतुर्भागेन चायतम् ।
जङ्घयोर्द्विगुणोच्छ्रायं मञ्जर्य्या: कल्पयेद्बुध: ।
चतुर्भागेन मञ्जर्य्या: कार्य्या सम्यक् प्रदक्षिणा ।
तन्मानं निर्गमं कार्य्यमुभयो: पार्श्वयो: समम् ॥
शिखरेण समं कार्य्यमग्रे जगति विस्तरम् ।
त्रिगुणेनापि कर्त्तव्यं यथाशोभानुरूपत: ॥
विस्तरं मण्डपस्याग्रे गर्भसूत्रद्वयेन तु ।
दैर्घ्यात् पादाधिकं कुर्य्यान्मध्ये स्तम्भैर्व्विभूषि-
तम् ॥
प्रासादगर्भमानं वा कुर्व्वीत मुखमण्डपम् ।
एकाशीतिपदैर्वास्तुं यष्ट्वा मण्डपमारभेत् ॥
शुकाङ्घ्रद्वारि विन्यासे पादान्तस्थान् यजेत्
सुरान् ।
तथा प्राकारविन्यासे यजेद्द्वात्रिंशदन्तगान् ॥
सर्व्वसाधारणञ्चैतत् प्रासादस्य तु लक्षणम् ।
मानेन प्रतिमाया वा प्रासादमपरं शृणु ॥
प्रतिमाया: प्रमाणेन कर्त्तव्या पिण्डिका शुभा ।
गर्भस्तु पिण्डिकार्द्धेन गर्भमानास्तु भित्तय: ॥
भित्तेरायाममानेन उच्छ्रायन्तु प्रकल्पयेत् ।
भित्त्युच्छ्रायात्तद्विगुणं शिखरं कल्पयेद्गुरु: ।
शिखरस्य तु तुर्य्येण भ्रमणं परिकल्पयेत् ॥
शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम् ।
अष्टकांशेन गर्भस्य रथकानान्तु निर्गम: ॥
परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत् ।
तत्तृतीयेन वा कुर्य्याद्रथकानान्तु निर्गमम् ॥
वामत्रयं स्थापनीयं रथकत्रितये सदा ।
शिखरार्थञ्च सूत्राणि चत्वारि विनिपातयेत् ॥
शिखरस्यार्द्धभागस्थं सिंहं तत्र च कारयेत् ।
शुकनासां स्थिरीकृत्य मध्यसन्धौ विवर्ज्जयेत् ।
अपरे च तथा पार्श्वे तद्वत् सूत्रं निधापयेत् ॥
तदर्द्धन्तु भवेदंश: कण्ठे स्यामलसारवान् ।
स्कन्धभग्नन्तु कर्त्तव्यं विकरालं तथैव च ।
ऊर्द्धन्तु वेदिकामानात् कलसं परिकल्पयेत् ॥"
किञ्च ।
"गरुत्मन्तं तथा कुर्य्यादुपरिष्टाच्चतुर्गुणम्

कुर्य्याद्दिक्प्रतिमायामान् दिक्षु चाष्टासु चोपरि ॥
महावराहमैन्द्र्यान्तु नरसिंहन्तु दक्षिणे ।
प्रतीच्यां श्रीधरं देवमुदीच्यां हयशीर्षकम् ॥
आग्नेय्यां वामदग्न्यञ्च नैर्ऋते राममेव च ।
वामनञ्चैव वायव्यां वासुदेवमथापरं ॥” * ॥
किञ्च ।
“पूर्व्वभूमौ तु शयनं द्वितीये चासनं भवेत् ।
स्थानमेव तृतीये तु चतुर्थे यानमेव च ॥
पञ्चमे योगनिद्रा तु षष्ठे योगासनं भवेत् ।
स्थानं योगसमायुक्तं सप्तमे परिकल्पयेत् ॥
नानागवाक्षकैर्यन्तात् पत्रवल्ल्यादिभूषितम् ।
नानाप्रकारपुष्पाद्यैर्य्यथाशोभं प्रकल्पयेत् ॥
कनिष्ठमध्यज्येष्ठानां प्रासादानां यथाक्रमम् ।
वसुभागा च ऋत्विग्भिः प्रदेया रचना बुधैः ॥
द्वारस्य चाष्टमे युक्ते नवमे दशमे तथा ।
ललाटवेधो नैवं स्यादायस्य शृणु साम्प्रतम् ॥
यावद्धस्तैरभिप्रेतः प्रासादकर्णगानघ ।।
तावद्भिरङ्गुलैरायो वसुभागेन वा भवेत् ॥
एकस्तम्भो ध्वजो ज्ञेयो द्विस्तम्भा वेदिका मता ।
दशभूम्यन्तरे नित्यं चतुस्तम्भं प्रकल्पयेत् ॥” * ॥
अथ मण्डपलक्षणविशेषः । मात्स्ये ।
“अथातः सम्प्रवक्ष्यामि मण्डपानान्तु लक्षणम् ।
मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥
त्रिविधा मण्डपाः कार्य्या ज्येष्ठमध्यकनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ।।॥
पुष्पकः पुष्पभद्रश्च सुवृत्तो मृतनन्दनः ।
कौशल्यो बुद्धिसङ्कीर्णो राजभद्रो जयावहः ॥
श्रीवृक्षो विजयश्चैव वास्तुकीर्णः श्रुतिं धरः ।
यज्ञभद्रो विशालश्च संश्लिष्टः शत्रुमर्द्दनः ।
भागपञ्चो नन्दनश्च मानवो मानभद्रकः ।
सुग्रीवो हर्षणश्चैव कर्णिकारः पदार्द्धकः ॥
सिंहश्च श्यामभद्रश्च सुभद्रश्च तथैव च ।
सप्तविंशतिर्व्याख्याता लक्षणं शृणुत द्विजाः ॥
स्तम्भा यत्र चतुःषष्टिः पुष्पकः स उदाहृतः ।
द्वाषष्टिः पुष्पभद्रस्तु षष्टिः सुवृत्त उच्यते ॥
अष्टपञ्चाशकस्तम्भ. कथ्यते मृतनन्दनः ।
कौशल्यः षट्पञ्चाशच्चतुःपञ्चाशता पुनः ॥
नाम्ना तु बुद्धिसङ्कीर्णो द्विहीनो राजभद्रकः ।
जयावहस्तु पञ्चाशच्छ्रीवृक्षस्तु द्विहीनकः ॥
विजयस्तद्द्विहीनः स्यात् वास्तुसङ्कीर्णकस्तथा ।
द्वाभ्यामेव प्रहीयेत ततः श्रुतिधरोऽपरः ॥
चत्वारिंशद्द्वयज्ञभद्रो द्विहीनोऽथ विशालकः ।
षट्त्रिंशच्चैव संश्लिष्टो द्विहीनः शत्रुमर्द्दनः ॥
द्वात्रिंशद्भागपञ्चस्तु त्रिंशता नन्दनः स्मृतः ।
अष्टाविंशन्मानवस्तु मानभद्रो द्विहीनकः ॥
चतुर्व्विंशस्तु सुग्रीवो द्वाविंशद्धर्षणो मतः ।
विंशतिः कर्णिकारः स्यादष्टादशः पदार्द्धकः ।
सिंहो भवेद्द्विहीनश्च श्यामभद्रो द्विहीनकः ॥
सुभद्रस्तु तथा प्रोक्तो द्वादशस्तम्भसंवृतः ।
मण्डपाः कथिता ह्येते यथावल्लक्षणान्विताः ।
त्रिकोणं वृत्तमर्द्धेन्दुमष्टकोणं द्विरष्टकम् ॥
चतुष्कोणञ्च कर्त्तव्यं संस्थानं मण्डपस्य तु ।
राज्यञ्च विजयञ्चैवमायुर्वर्द्धनमेव च ॥
पुत्त्रलाभः श्रियः पुष्टिस्त्र्यस्रादिषु भवेत् क्रमात् ।
एवन्तु शुभदाः प्रोक्ता अन्यथा तु भयावहाः ॥” ;
अथ तत्र द्वारनिर्णयः । हयशीर्षपञ्चरात्रे ।
“ग्राममध्ये च पूर्व्वे च प्रत्यग्द्वारं प्रकल्पयेत् ।
विदिशासु च सर्व्वासु तथा प्रत्यङ्मुखं भवेत् ॥
दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं भवेत् ॥”
किञ्च ।
“विस्ताराद्द्विगुणं द्वारं कर्त्तव्यन्तु सुशोभनम् ।
जातरूपं सरजतं तद्वदुडुम्बरैर्वृतम् ॥
औडुम्बरोर्द्धतः स्वर्णं दत्त्वा शाखां न्यसेद्बुधः ।
तूर्य्यमङ्गलघोषेण ब्राह्मणान् स्वस्तिवाच्य च ॥
द्वारस्य च चतुर्थांशे कार्य्यौ चण्डप्रचण्डकौ ।
दण्डहस्तौ तु कर्त्तव्यौ विष्वक्सेनोपमावुभौ ॥
शाखोर्द्ध्वे न्यस्य रत्नानि न्यसेदूर्द्ध्वमुडुम्बरम् ।
तस्य मध्ये स्थिता देवी साक्षाल्लक्ष्मीः सुरेश्वरी ॥
कर्त्तव्या दिग्गजैः सा तु स्नाप्यमाना घटैस्तु ।
शाखोडुम्बरकौ कार्य्यौ पत्रवल्ल्यादिभूषितौ ॥
एकशाखं त्रिशाखं वा षट्शाखं द्वारमिष्यते ।
नवशाखञ्च कुर्व्वीत अत ऊर्द्ध्वं न कारयेत् ।
विष्णुतनारूपाद्यैः शाखां रत्नेन भूषयेत् ॥”
मात्स्ये ।
“चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत ।
विस्ताराद्द्विगुणोच्छ्रायस्त्रिभागा कटिर्भवेत् ॥
विस्तारार्द्धं भवेद्गर्भो भित्तयोऽन्याः समन्ततः ।
गर्भपादेन विस्तीर्णं द्वारं द्विगुणमायतम् ॥
उच्छ्रायात् पादविस्तीर्णा शाखा तद्वदुडुम्बरः ।
विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥
त्रिपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्यते ।
कनिष्ठं मध्यमं ज्येष्ठं यथायोगं प्रकल्पयेत ॥
अङ्गुलानां शतं सार्द्धं चत्वारिंशद्भिरुत्तमम् ।
धन्यमुत्तममायुष्यं धनधान्यदमेव च ॥
शतं चाशीतिसहितं वातनिर्गमनं भवेत् ।
अधिकं दशभिस्तद्वत्तथा षोडशभिः शतम् ॥
शतमानं द्वितीयन्तु भवत्यशीतिभिस्तथा ।
दशद्वाराणि चैतानि क्रमेणोक्तानि सर्व्वदा ॥
अन्यानि वर्ज्जनीयानि मानसोद्वेगदानि तु ।
द्वारवेधन्तु यत्नेन सर्व्ववास्तुषु वर्ज्जयेत् ॥
वृक्षकोणाश्च भूद्वारान स्तम्भकूपध्वजादपि ।
कुल्याम्भसा वा विद्धं न द्वारं शुभदं भवेत् ॥
क्षयश्च दुर्गतिश्चैव प्रवासः क्षुद्भयं तथा ।
दौर्भाग्यं बन्धनं रोगो दारिद्र्य कलहं तथा ।
विरोधश्चार्थनाशश्च सर्व्वं वेधे भवेत क्रमात ॥”
अथ प्राकारादिनिर्णयः । हयशीर्षपञ्चरात्रे ।
“प्रासादस्य चतुर्भागैः प्राकारस्योच्छ्रयो भवेत् ।
पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका ॥
तस्मात्तु द्विगुणः प्रोक्तः पा गरुडमण्डपः ।
एकहस्तादि कुर्व्वीत त्रिंशद्धस्तान्तमेव च ॥”
अथ वृक्षरोपणनिर्णयः । मात्स्ये ।
“पूर्व्वेण फलिनो वृक्षाः क्षीरवृक्षास्तु दक्षिणे ।
पश्चिमेन जलं श्रेष्ठं पद्मोत्पलविभूषितम् ॥
उत्तरेण सलैस्तालैः शुभा स्यात् पुष्पवाटिका
सर्व्वतस्तु जलं श्रेष्ठं स्थिरमस्थिरमेव च ॥
सर्व्वतश्चापि कर्त्तव्यं परिखावलयादिकम् ।
याम्ये तपोवनस्थानमुत्तरे मातृकागृहम् ॥
महानसं तथाग्नेये नैर्ऋते तु विनायकः ।
वारुणे श्रीनिवासश्च वायव्ये गृहमालिका ॥
उत्तरे यज्ञशाला तु निर्म्माल्यस्थानमुत्तरे ।
वारुणे सोमदेवत्ये बलिनिर्व्वपणं स्मृतम् ॥
पुरतो गरुडस्थानं तथान्येषां यथोचितम् ।
एवमायतनं कुर्य्यात्शुभमण्डपसंयुतम् ॥

घण्टावितानकसतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन साद्धम् ।
यः कारयेत् सुरगृहं विविधध्वजाढ्यं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥”

अथ जीर्णोद्धारः । विष्णुधर्म्मे तृतीयकाण्डे ।
“यस्य राष्ट्रस्तु विषये देववेश्म विशीर्य्यते ।
तस्य सीदति तद्राष्ट्रं देववेश्म यथा तथा ॥
कृत्वा जीर्णस्य संस्कारं तथा देवेशवेश्मनः ।
द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा ॥”
विष्णुरहस्ये ।
“पतितस्य च यः कर्त्ता पतमानस्य रक्षिता ।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक् ॥”
अग्निपुराणे ।
“पतितं पतमानन्तु तथार्द्धस्फुटितं नरः ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥”
देवीपुराणे ।
“मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः ।
तस्मात सर्व्वप्रयत्नेन जीर्णस्योद्धारमाचरेत् ॥”
हयशीर्षपञ्चरात्रे ।
“वापीकूपतडागानां सुरधाम्नां तथानघ ।।
प्रतिमानां सभानाञ्च संस्कर्त्ता यो नरो भुवि ।
पुण्यं शतगुणं तस्य भवेन्मूलान्न संशयः ॥
प्रतिष्ठाया विधि. कार्य्यस्तथा मन्दिरनिर्म्मिते ।
प्रायः श्रीहयशीर्षोक्तेरनुसारेण वैष्णवैः ॥
देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम् ।
श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विशेषतः ॥”
इति श्रीहरिभक्तिविलासे २० विलासः ॥

मन्दिरं, क्ली पु (मन्दन्ते मोदन्ते लोका यत्र । मदि + “इषिमदिमुदीति ।” उणा० १ । ५२ । इति किरच् ।) नगरम् । इति मेदिनी । रे, १६० ॥ पुंलिङ्गोऽप्ययं शब्दः । यथा । नगरं मन्दिरं पुरमिति पुनपुंसकयोरकाणे पठ्यते । इत्यमरटीकायां भरतः ॥ (अम्बजानुपश्चिमभागः । यथा, अश्ववैद्यके । २ । २१ ।
“अधरं च ततो जानु निर्द्दिष्टं शास्त्रकोविदैः । मन्दिरं पश्चिमो भागः कलापो जानुनोऽग्रिमः ॥”)
मन्दिरः, पु, (मदि + किरच् ।) समुद्रः । इति मेदिनी । रे, १६० ॥ जानुपश्चाद्भागः । इति हेमचन्द्रः । ३ । २७८ ॥
मन्दिरपशुः, पु, (मन्दिरचरः मन्दिरपालितो वा पशुः । मध्यपदलोपी कर्म्मधारयः ।) बिडालः । इति शब्दचन्द्रिका ॥

मन्दिरा, स्त्री, (मन्दिर + स्त्रियां टाप् ।) मन्दिरम् । यथा, मन्दिरायाश्चरावाणिति मधुसुकुटादयः ॥

मन्दुरा, स्त्री, (मन्दन्ते स्वपन्ति मोदन्ते वा अश्वा यत्र । मन्द् + "मन्दिवाशिमथीति ।" उणा० १ । ३६ । इति उरच् । स्त्रियां टाप् ।) वाजिशाला । इत्यमरः । २ । २ । ७ ॥ (यथा, नैषधचरिते । १ । ५७ ।

"उपाहृतमन्मभावचक्षौः
खुराञ्चलैः क्षोभितमन्दुरोदरम् ॥")

शयनीयार्थवस्तु । इति मेदिनी । रे, २०० ॥ मादुर इति भाषा ॥

मन्दोदरी, स्त्री, (मन्दं उदरं यस्याः । स्त्रियां ङीष् ।) रावणमहिषी । सा तु मयदानवकन्या । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८० । १६ ।

"भार्य्या मे भव सुश्रोणि ! यथा मन्दोदरी तथा ॥"

कुमारानुचरमातृगणभेदः । यथा, महाभारते । ६ । ४६ । १७ ।

"मन्दोदरी तुण्डी च कोटरा मेघवाहिनी ॥")

मन्दोदरीशः, पुं, (मन्दोदर्य्याः ईशः पतिः ।) रावणः । इति त्रिकाण्डशेषः ॥

मन्दोदरीसुतः, पुं, (मन्दोदर्य्याः सुतः ।) इन्द्रजित् । इति जटाधरः ॥

मन्दोष्णं, क्ली, (मन्दं अल्पं च तदुष्णञ्चेति ।) ईषदुष्णम् । तद्वति, त्रि । इत्यमरः । १ । ४ । ७५ ॥

मन्द्रः, पुं, (मन्द्यते बुध्यते अनेन । मदि + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) गम्भीरध्वनिः । इत्यमरः । १ । ७ । २ ॥ (यथा, मेघदूते । १०० ।

"मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥")

वाद्यविशेषः । तत्पर्य्यायः । मजुः २ मृदङ्गकः ३ । इति शब्दरत्नावली ॥ (त्रि, हृष्टः । यथा, ऋग्वेदे । १ । ५ । ७ ।

"होता मन्द्रो वरेण्यः ॥"

"मन्द्रो हृष्टः ।" इति तद्भाष्ये सायनः ॥ मादनशीलः । यथा, ऋग्वेदे । १ । १४४ । ७ ।

"अग्ने ! जुषस्व प्रतिहर्य्य तद्वचो
मन्द्र स्वधावऋतजात सुक्रतो ॥"

"मन्द्र ! मादनशील ! ।" इति तद्भाष्ये सायनः ॥)

मन्मथः, पुं, (मनो मथ्नाति विकरोतीति । मथ् + पचाद्यच् । पृषोदरादित्वात् साधुः । अस्य नामनिरुक्तिर्यथा, ब्रह्मवैवर्त्ते । १ । ४ । ७ ।

"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनाम् ।
तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः ॥")

कामदेवः । (यथा, नैषधचरिते । ८ । ७६ ।

"न मन्मथस्त्वं स हि नास्तिमूर्त्तिः ॥")

कपित्थवृक्षः । इत्यमरः । १ । ४ । २१ ॥ कामचिन्ता । इति मेदिनी । थे, २२ ॥ * ॥ कामदेवस्योत्पत्तिर्यथा,—

"एवं चिन्तयतस्तस्य ब्रह्मणो मुनिसत्तमाः ।
मनसः पुरुषो वल्गुरात्मभूर्मूर्त्तो विनिःसृतः ॥
काञ्चनीचूर्णपीताभः पीनोन्नतसुनासिकः ।
सुवृत्तोरुकटीजङ्घो नीलावक्लितकेशकः ॥
लग्नभ्रूयुगलो लोलः पूर्णचन्द्रनिभाननः ।
कपाटविस्तीर्णहृदि रोमराजीविराजितः ॥
शुभ्रमातङ्गकरवत्पीननिस्तलबाहुकः ।
आरक्तपाणिनयनमुखपादकरोद्भवः ॥
क्षीणमध्यश्चारुदन्तः प्रमत्तगजकन्धरः ।
प्रफुल्लपद्मपत्राक्षः केशरघ्राणतर्पणः ॥
कम्बुग्रीवो मीनकेतुः प्रांशुर्मकरवाहनः ।
पञ्चपुष्पायुधो वेगी पुष्पकोदण्डमण्डितः ॥
कान्तः कटाक्षपातेन भ्रामयन्नयनद्वयम् ।
सुगन्धिमारुताभ्यक्तं शृङ्गाररससेवितम् ॥
वीक्ष्य तं तादृशं दक्षप्रमुखा मानसाश्च ते ।
मरीच्याद्या द्रष्ट ततो विस्मयाविष्टचेतसः ॥
औत्सुक्यं परमं जग्मुराप्पूर्व्वैकारिकं मनः ।
स चापि वेधसं वीक्ष्य स्रष्टारं जगतां पतिम् ।
प्रणम्य पुरुषः प्राह विनयानतकन्धरः ॥

श्रीपुरुष उवाच ।

किं करिष्याम्यहं कर्म्म ब्रह्मंस्तत्र नियोजय ।
मानाय्यः पुरुषो यस्मादुचिते शोभिते विधे ॥
अभिधानञ्च यद्योग्यं स्थानं पत्नी च या मम ।
तन्मे कुरुष्व लोकेश ! स्रष्टा त्वं जगतां यत ॥

मार्कण्डेय उवाच ।

एवं तस्य वचः श्रुत्वा पुरुषस्य महात्मनः ।
क्षणं न किञ्चित् प्रोवाच स्वस्रष्टापि विस्मितः ॥
ततो मनः सुसंयम्य सम्यगुत्सृज्य विस्मयम् ।
उवाच पुरुषं ब्रह्मा तत्कर्म्मोद्दिशमावहन् ॥

ब्रह्मोवाच ।

अनेन चारुरूपेण पुष्पबाणैश्च पञ्चभिः ।
मोहयन् पुरुषांस्त्रीश्च कुरु सृष्टिं सनातनीम् ॥
न देवा न च गन्धर्व्वा न किन्नरमहोरगाः ।
नासुरा न च दैत्या वा न विद्याधरराक्षसाः ॥
न यक्षा न पिशाचाश्च न भूता न विनायकाः ।
न गुह्यका न सिद्धाश्च न मनुष्या न पक्षिणः ॥
पशवो न मृगाः कीटाः पतङ्गा जलजाश्च ये ।
न ते सर्व्वे भविष्यन्ति न लक्ष्या ये शरस्य ते ॥
अहं वा वासुदेवो वा स्थाणुर्वा पुरुषोत्तम ! ।
भविष्यामस्तव वशे किमन्यैः प्राणधारिभिः ॥
प्रच्छन्नरूपो जन्तूनां प्रविशन् हृदये सदा ।
सुखहेतुः स्वयं भूत्वा कुरु सृष्टिं सनातनीम् ॥
त्वत्पुष्पबाणस्य सदा सुखं लक्ष्यं मनोऽस्तु च ।
सर्व्वेषां प्राणिनां नित्यं मदमोदकरो भवान् ॥
इति ते कर्म्म कथितं सृष्टिप्रावर्त्तकं पुनः ।
नामानि च वदिष्यामि यत्ते योग्यं भविष्यति ॥

मार्कण्डेय उवाच ।

इत्युक्त्वाथ सुरश्रेष्ठो मानसानां मुखानि च ।
आलोक्य चासने पद्मे स्वपविष्टोऽभवत् क्षणात् ॥"

इति कालिकापुराणे कामप्रादुर्भावो नाम १ अध्यायः ॥

मार्कण्डेय उवाच ।

"ततस्ते मुनयः सर्व्वे तदभिप्रायवेदिनः ।
चक्रुस्तदुचितं नाम मरीचिप्रमुखास्तदा ॥
मुखावलोकनादेव ज्ञात्वा दृत्तान्तमन्यतः ।
दक्षादयश्च स्रष्टारः स्थानं पत्नीञ्च ते ददुः ॥
ततो निश्चित्य नामानि मरीचिप्रमुखा द्विजाः ।
ऊचुः सङ्गतमेतस्मै पुरुषाय द्विजोत्तमाः ॥

ऋषय ऊचुः ।

यस्मात् प्रमथ्य चेतस्त्वं जातोऽस्माकं तथा विधेः ।
तस्मान्मन्मथनाम्ना त्वं लोके गेयो भविष्यसि ॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते ।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव ॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः ।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि ॥
त्वदाशुगानां यद्वीर्य्यं तद्वीर्य्यं न भविष्यति ।
वैष्णवानाञ्च रौद्राणां ब्राह्माणाञ्च तादृशम् ॥
स्वर्गे मर्त्त्ये च पातालं ब्रह्मलोकः सनातनः ।
अवस्थानानि सर्व्वाणि सर्व्वव्यापी भवान् यतः ॥
किंवा चापि विशेषेण सामान्ये नास्ति ते समः ।
यत्र यत्र भवेत् प्राणी शाङ्गलास्तरणोऽथवा ॥
तत्र तत्र तव स्थानमस्त्वाब्रह्मसदोदयम् ।
दक्षोऽयं भवतः पत्नीं स्वयं दास्यति शोभनाम् ॥"

इति कालिकापुराणे २ अध्यायः ॥

मन्मथानन्दः, पुं, (मन्मथं आनन्दयतीति । आ + नन्द + णिच् + पचाद्यच् । कामवर्द्धकत्वादस्य तथात्वम् ।) महाराजचूतः । इति राजनिर्घण्टः ॥

मन्मथालयः, पुं, (मन्मथस्य आलय इव । कामवर्द्धकत्वादेवास्य तथात्वम् ।) आम्रः । इति राजनिर्घण्टः ॥

मन्मनः, पुं, गद्गदध्वनिः । इति त्रिकाण्डशेषः ॥ (दम्पत्योः कथनविशेषः । यथा, चिन्तामणिधृतवचनम् ।

"सुरते कर्णमूले तु निजदेशीयभाषया ।
दम्पत्योः कथनं यत्तु मन्मनं तं विदुर्बुधाः ॥")

मन्या, स्त्री, (मन्यते ज्ञायते स्कन्धः स्वादिकमनया । मन + करणे क्यप् । स्त्रियां टाप् ।) ग्रीवायाः पश्चात् शिरा । इत्यमरः । २ । ६ । ६५ ॥ (यथा, सुश्रुते उत्तरतन्त्रे २५ अध्यायः ।

"दोषास्तु दुष्टास्त्रय एव मन्यां
संपीड्य घाटां सुरुजां सुतीव्राम् ।
कुर्व्वन्ति साक्षिभ्रुवशङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु ॥")

मन्याका, स्त्री, (मन्येवेति । मन्या + स्वार्थे कन् । स्त्रियां टाप् । सुकन्याक इति वत् न विभाषया ह्रस्वः ।) मन्या । इति शब्दरत्नावली ॥

मन्युः, पुं, (मन्यते ज्ञायतेऽसौ । मन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३ । २० । इति युच् ।) शोकः । (यथा, भट्टिकाव्ये । ६ । ३० ।

"मन्युर्मन्ये ममासम्भोद्विषादोऽसमद्युतिम् ॥")

दैन्यम् । क्रतुः । (यथा, राजतरङ्गिण्याम् । १ । १७३ ।
"आविर्बभूवाभिमन्युः शतमन्युरिवापरः ॥")
क्रोधः । इत्यमरः । ३ । ३ । १५३ ॥ (यथा, महाभारते । १ । ७९ । ५ ।
"यः सन्धारयते मन्युं योऽतिवादांस्तितिक्षते ।
यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥")
अहङ्कारः । इति शब्दरत्नावली ॥ (क्रोधाभिमानिदेवः । यथा, ऋग्वेदे । १० । ८३ । १ ।
"यस्ते मन्यो ! विधद्वज्र सायक
सह ओजः पुष्यति विश्वमानुषक् ॥"
वितथपुत्रः । यथा, भागवते । ९ । २१ । १ ।
"वितथस्य सुतान् मन्योर्बृहत्क्षत्रो जयस्ततः ॥"
रुद्रदेवः । यथा, भागवते । ४ । ५ । ५ ।
"आशाम एव कुपितेन मन्युना
स देवदेवं परिचक्रमे विभुम् ॥")

मन्वन्तरं, क्ली, (मनोरन्तरमस्मिन्निति ।) दिव्यानां युगानामेकसप्ततिः । इत्यमरः । १ । ४ । २२ ॥ देवमानेनैकसप्ततियुगानि मन्वन्तरमुच्यते मनोरन्तरमवकाशोऽवधिर्वा अस्मिन्निति मन्वन्तरम् ।
"एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते ॥"
इति लिङ्गपुराणम् ॥
मनवः स्वायम्भुवादयस्तेषामन्तरमवकाशोऽवधिर्वा मन्वन्तरमिति वा । एकसप्ततिरिति यद्यपि गणनया अर्द्धयुगेनाधिका ।
"दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम् ।
मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश ॥"
तत्किञ्चिदधिका दिव्ययुगानामेकसप्ततिरिति नामविधाने सर्व्वज्ञनारायणेनोक्तत्वात् तथापि अल्पत्वादिह नोक्तम् । मन्वन्तरस्य संख्यातवर्षाणि यथा,—
"त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण द्विजोत्तमाः ।
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु ॥
विंशतिस्तु सहस्राणि कालो यः साधिकां विना ।
मन्वन्तरस्य संख्यैषा लिङ्गेऽस्मिन् कथिता द्विजाः ॥"
एतदङ्का यथा, ३०६,७२०,००० । एवं चतुर्दशमन्वन्तरैर्ब्रह्मदिनम् । युगानि यथा लैङ्गे ।
"पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरश्च कलिश्चैव युगान्येतानि सुव्रताः ॥"
युगमानानि यथा,—
"चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः ॥"
इति ॥
अन्यच्च ।
"चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥"
इति ॥
अस्यार्थः । दैवमाने सत्यस्य वर्षाणि ४००० चतुःसहस्राणि सन्ध्यावर्षाणि ४०० चत्वारि शतानि सन्ध्यांशवर्षाणि ४०० चत्वारि शतानि । एवं दैवमाने सत्यस्य वर्षाणि अष्टशताधिकचतुःसहस्राणि ४८०० एवं त्रेतायाः षट्शताधिकत्रिसहस्रं ३६०० एवं द्वापरस्य चतुःशताधिकं द्विसहस्रम् २४०० एवं कलेः शतद्वयाधिकमेकसहस्रम् १२०० समुदायेन द्वादशसहस्राणि १२००० । मानुषमानेन सत्यादीनां मानं यथा, ज्योतिषे ।
"वस्वश्विमैत्रा कृतुरन्ध्रमासा
वेदा रसाष्टौ भुजवह्निवेदाः ।
एतानि शून्यत्रयलाञ्छितानि
युगाब्दसंख्याः परिकीर्त्तितानि ॥"
एतदङ्केष्वङ्कः शते सत्यस्य यथा, १,७२८,००० । त्रेताया यथा, १,२९६,००० । द्वापरस्य यथा, ८६४,००० । कलेर्यथा, ४३२,००० । समुदायेन ४,३२०,००० । अपरं ब्राह्मवर्षादिमानं बाहुल्यभिया नोक्तम् । इति तट्टीकायां भरतः ॥
अपि च । ब्रह्मणो दिनमध्ये चतुर्द्दशमन्वन्तराणि भवन्ति । एको मनुर्यावदधिकारी भवति स कालो मन्वन्तरसंज्ञको भवति । तत्र मनूनां नामानि । प्रथमः स्वायम्भुवो मनुः । द्वितीयः स्वारोचिषो मनुः । तृतीय उत्तमो मनुः । चतुर्थस्तामसो मनुः । पञ्चमो रैवतो मनुः । षष्ठश्चाक्षुषो मनुः । सप्तमो वैवस्वतो मनुः । वर्त्तमानोऽयम् ॥ अष्टमः सावर्णिर्मनुः । नवमो दक्षसावर्णिर्मनुः । दशमो ब्रह्मसावर्णिर्मनुः । एकादशो धर्म्मसावर्णिर्मनुः । द्वादशो रुद्रसावर्णिर्मनुः । त्रयोदशो देवसावर्णिर्मनुः । चतुर्दश इन्द्रसावर्णिर्मनुः । प्रतिमन्वन्तरं भगवदवतारेन्द्रदेवगणसप्तर्षिमनुमनुपुत्रादयः पृथक् पृथग्भवन्ति । यथा । स्वायम्भुवे मन्वन्तरे यज्ञोऽवतारः स एवेन्द्रः । यमादयो देवाः । मरीचिप्रभृतयः सप्तर्षयः । स्वायम्भुवो मनुः । प्रियव्रतोत्तानपादौ मनुपुत्रौ ॥ १ ॥ स्वारोचिषे विभुरवतारः । रोचन इन्द्रः । देवास्तुषितादयः । ऊर्ज्जस्तम्भादयः सप्तर्षयः । अग्निसुतः स्वारोचिषो मनुः । द्युमत्सेनरोचिष्मत्प्रमुखा मनुपुत्राः ॥ २ ॥ उत्तमे सत्यसेनोऽवतारः । सत्यजिदिन्द्रः । सत्यवेदश्रुतभद्रादयो देवाः । वशिष्ठसुताः सप्तर्षयः प्रमदादयः । प्रियव्रतसुत उत्तमो मनुः । पवनसृञ्जययज्ञहोत्राद्यास्तत्सुताः ॥ ३ ॥ तामसे हरिरवतारः । त्रिशिख इन्द्रः । वैधृतादयो देवाः । ज्योतिर्धामादयः सप्तर्षयः । तामसो मनुः । वृषख्यातिनरादयस्तत्सुताः ॥ ४ ॥ रैवते विकुण्ठोऽवतारः । विभुरिन्द्रः । भूतरयादयो देवाः । हिरण्यरोमादयः सप्तर्षयः । रैवतो मनुः । बलिविन्ध्यादयस्तत्सुताः ॥ ५ ॥ चाक्षुषे अजितोऽवतारः । मन्त्रद्रुम इन्द्रः । आप्यादयो देवाः । हविष्मद्वीरकादयः सप्तर्षयः । चाक्षुषो मनुः । पुरुपूरुसुद्युम्नादयस्तत्सुताः ॥ ६ ॥ वैवस्वते वामनोऽवतारः । पुरन्दर इन्द्रः । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणा अश्विनावृभव इत्याद्या देवाः । कश्यपोऽत्रिर्वशिष्ठो विश्वामित्रो गौतमो जमदग्निर्भरद्वाज एते सप्तर्षयः । वैवस्वतो मनुः । इक्ष्वाकुः नृगः शर्य्यातिः दिष्टः धृष्टः करूषकः नरिष्यन्तः पृषध्रः नाभागः कविः एते मनुपुत्रा दश ॥ ७ ॥ अथ भविष्याणि । सावर्णिके सार्व्वभौमोऽवतारः । बलिरिन्द्रः । सुतपसो विरजा अमृतप्रभा देवाः । गालवः दीप्तिमान् परशुरामः अश्वत्थामा कृपः ऋष्यशृङ्गः व्यासः एते सप्तर्षयः । सावर्णिर्मनुः । निर्म्मोकविरजस्काद्यास्तत्सुताः ॥ ८ ॥ दक्षसावर्णिके ऋषभोऽवतारः । अद्भुत इन्द्रः । पारमरीचिगर्भाद्या देवाः । द्युतिमदाद्याः सप्तर्षयः । दक्षसावर्णिर्मनुः । भूतकेतुदीप्तिकेत्वाद्यास्तत्सुताः ॥ ९ ॥ ब्रह्मसावर्णिके विष्वक्सेनोऽवतारः । शम्भुरिन्द्रः । सुरसेनविरुद्धाद्या देवाः । हविष्मदाद्याः सप्तर्षयः । ब्रह्मसावर्णिर्मनुः । भूरिसेनाद्यास्तत्सुताः ॥ १० ॥ धर्म्मसावर्णिके धर्म्मसेतुरवतारः । वैधृत इन्द्रः । विहङ्गमकामगमाद्या देवाः । अरुणादयः सप्तर्षयः । धर्म्मसावर्णिर्मनुः । सत्यधर्म्मादयस्तत्सुताः ॥ ११ ॥ रुद्रसावर्णिके । सुधामाख्योऽवतारः । ऋतधामा इन्द्रः । हरितादयो देवाः । तपोमूर्त्याद्यः सप्तर्षयः । रुद्रसावर्णिर्मनुः । देववदुपदेवादयस्तत्सुताः ॥ १२ ॥ देवसावर्णिके योगेश्वरोऽवतारः । दिवस्पतिरिन्द्रः । सुकर्म्मसुत्राद्या देवाः । निर्म्मोकतत्त्वदर्शाद्याः सप्तर्षयः । देवसावर्णिर्मनुः । चित्रसेनविचित्राद्यास्तत्सुताः ॥ १३ ॥ इन्द्रसावर्णिके बृहद्भानुरवतारः । शुचिरिन्द्रः । पवित्रचाक्षुषादयो देवाः । अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः । इन्द्रसावर्णिर्मनुः । उरुगम्भीरबुद्धाद्यास्तत्सुताः ॥ १४ ॥ अथैतेषां कर्म्मोच्यते । इन्द्रो देवराट् यथावर्षी च । मनुरादौ पृथिव्यां राजा भवति तत्पुत्रपौत्रादयो मन्वन्तरसमाप्तिपर्य्यन्तं राजानो भवन्ति । देवताः प्रजानां यज्ञादिकर्म्मतुष्टास्तत्फलं प्रयच्छन्ति । सप्तर्षयो धर्म्मशास्त्राणि प्रकाशयन्ति । भगवदवतारा एतान् स्वस्वकर्म्मणि नियोजयन्ति दैत्यराक्षसादीन् धर्म्मद्रुहो घ्नन्ति च । चतुर्द्दशमन्वन्तरैर्ब्रह्मण एकं दिनं भवति तन्मनुष्यमानेनैकः कल्पः । त्रिंशत्कल्पैर्ब्रह्मण एको मासो भवति । इति श्रीभागवतमतम् ॥ * ॥ अन्यच्च ।
"वर्षलक्षाणि चत्वारि भवेत् कलियुगं क्रमे ।
द्वात्रिंशत्या सहस्रैस्तु सहितान्यपि संख्यया ॥
चतुःषष्टिसहस्राणि लक्षाण्यष्टौ च संख्यया ।
वर्षाणां द्वापरं प्रोक्तं युगं पूर्व्वनिदर्शनात् ॥
त्रेता द्वादशलक्षाणि वर्षाणां परिकीर्त्तिता ।
षण्णवत्या सहस्रैस्तु संयुक्तानि भवन्ति हि ॥
दश सप्त च लक्षाणां वर्षाणाञ्च कृतं युगम् ।

मन्वन्तरैरविंशत्या संयुतान्यपि संख्यया ॥
त्रिचत्वारिंशल्लक्षाणि सहस्राणि च विंशतिः ।
मानुषेण प्रमाणेन भवेत् चातुर्थगं क्रमात् ॥
सप्तषष्टिश्च लक्षाणि त्रिंशत्कोट्यस्तथैव च ।
विंशतिश्च सहस्राणि मन्वन्तरमिहोच्यते ॥
चतुर्थगैकसप्तत्या मन्वन्तरमिति श्रुतिः ।
कल्पो मन्वन्तरैरेभिश्चतुर्द्दशभिरुच्यते ॥
कोट्यो द्वादश षट्त्रिंशल्लक्षाणि तु भवन्ति च ।
अष्टाशीतिसहस्राणि जीवेत् स्वायम्भुवो मनुः ॥"
इति वह्निपुराणम् ॥

अपरञ्च ।

मार्कण्डेय उवाच ।

"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति श्रुतम् ॥
तदेकसप्ततियुगैर्देवानामिह जायते ।
तैश्चतुर्द्दशभिः कल्पो दिनमेकन्तु वेधसः ॥"
इति कालिकापुराणे २७ अध्यायः ॥

अन्यदपि ।

"मन्वन्तराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात् ।
मन्वन्तराधिपांश्चैव शक्रदेवपुरोगमान् ।
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ।॥

श्रीपराशर उवाच ।

अतीतानागतानीह यानि मन्वन्तराणि वै ।
तान्यहं भवतः सम्यक् कथयामि समासतः ॥
स्वायम्भुवो मनुः पूर्व्वं मनुः स्वारोचिषस्तथा ।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥
षडेते मनवोऽतीताः साम्प्रतन्तु रवेः सुतः ।
वैवस्वतोऽयं यस्यैतत् सप्तमं वर्त्ततेऽन्तरम् ॥
स्वायम्भुवन्तु कथितं कल्पादावन्तरं मया ।
देवास्तत्रर्षयश्चैव यथावत् कथिता मया ॥ १ ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ।
मन्वन्तराधिपान् सम्यग्देवर्षींस्तत्सुतांस्तथा ॥
पारावताः सतुषिता देवाः स्वारोचिषेऽन्तरे ।
विपश्चित्तत्र देवेन्द्रो मैत्रेयासीन्महाबलः ॥
ऊर्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा ।
निश्चरश्चार्व्वरीवांश्च तत्र सप्तर्षयोऽभवन् ॥
चैत्रकिंपुरुषाद्याश्च सुताः स्वारोचिषस्य तु ।
द्वितीयमेतद्व्याख्यातमन्तरं शृणु चोत्तमम् ॥२॥
तृतीयेऽप्यन्तरे ब्रह्मन्नौत्तमिर्नाम यो मनुः ।
सुशान्तिर्नाम तत्रेन्द्रो मैत्रेयाभूत् सुरेश्वरः ॥
सुधामानस्तथा सत्याः शिवाश्चाथ प्रतर्द्दनाः ।
वशवर्त्तिनश्च पञ्चैते गणा द्वादशकाः स्मृताः ॥
वशिष्ठतनयास्तत्र सप्त सप्तर्षयोऽभवन् ।
अजः परशुदिव्याद्यास्तथौत्तमिमनोः सुताः ॥३॥
तामसस्यान्तरे देवाः स्वरूपा हरयस्तथा ।
सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥
शिविरिन्द्रस्तथा चासीच्छतयज्ञोपलक्षणः ।
सप्तर्षयश्च ये तत्र तेषां नामानि मे शृणु ॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्व्वनक-
स्तथा ।
पीवरश्चर्षयो ह्येते सप्त तत्रापि चान्तरे ॥
नरः ख्यातिः शान्तहयो जानुजङ्घादयस्तथा ।
पुत्रास्तु तामसस्यासन् राजानः सुमहा-
बलाः ॥ ४ ॥
पञ्चमे चापि मैत्रेय । रैवतो नाम नामतः ।
मनुर्विभुश्च तत्रेन्द्रो देवांश्चैवान्तरे शृणु ॥
अमिताभा भूतरया वैकुण्ठाश्च सुमेधसः ।
एते देवगणास्तत्र चतुर्द्दश चतुर्द्दश ॥
हिरण्यरोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्ज्जन्यश्च महामुनिः ।
एते सप्तर्षयो विप्र । तत्रासन् रैवतान्तरे ॥
बलबन्धुः सुसम्भाव्यः सत्यकामाश्च तत्सुताः ।
नरेन्द्राः सुमहावीर्य्या बभूवुर्मुनिसत्तम । ॥
स्वारोचिषश्चौत्तमिस्तु तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवः स्मृताः ॥
विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ।
मन्वन्तराधिपानेतान् लब्धवानात्मवंशजान् ॥५॥
षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तदा मनुः ।
मनोजवस्तथैवेन्द्रो देवानपि निबोध मे ॥
आर्य्याः प्रसूता भव्याश्च पृथुगाश्च दिवौकसः ।
महानुभावा लेखाश्च पञ्चैतेऽप्यष्टका गणाः ॥
सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
ऊरुः पूरुः शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥६॥
विवस्वतः सुतो विप्र । श्राद्धदेवो महाद्युतिः ।
मनुः स वर्त्तते धीमान् साम्प्रतं सप्तमेऽन्तरे ॥
आदित्यवसुरुद्राद्या देवाश्चात्र महामुने ! ।
पुरन्दरस्तथैवात्र मैत्रेय । त्रिदशेश्वरः ॥
वशिष्ठः काश्यपोऽथात्रिर्जमदग्निः सगौतमः ।
विश्वामित्रभरद्वाजौ सप्त सप्तर्षयोऽत्र च ॥
इक्ष्वाकुश्चैव नाभागो धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभ उदिष्ट एव च ॥
करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्रास्तु धार्म्मिकाः ॥७॥
विष्णुशक्तिरनौपम्या सत्त्वोद्रिक्ता स्थितौ स्थिता ।
मन्वन्तरेष्वशेषेषु देवत्वेनाधितिष्ठति ॥
अंशेन तस्य यज्ञोऽसौ जज्ञे स्वायम्भुवेऽन्तरे ।
आकूत्यां मानसो देव उत्पन्नः प्रथमेऽन्तरे ॥
ततः पुनः स वै देवः प्राप्ते स्वारोचिषेऽन्तरे ।
तुषितायां समुत्पन्नो ह्यजितस्तुषितैः सह ॥
औत्तमेऽन्तरे चापि तुषितस्तु पुनः स वै ।
सत्यायामभवत् सत्यः सत्यैः सह सुरोत्तमैः ॥
तामसस्यान्तरे चैव संप्राप्ते पुनरेव हि ।
हर्य्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥
रैवतेऽप्यन्तरे देवः सम्भूत्यां मानसोऽभवत् ।
सम्भूतो राजसैः सार्द्धं देवैर्देववरो हरिः ॥
चाक्षुषे चान्तरे देवो वैकुण्ठः पुरुषोत्तमः ।
विकुण्ठायामसौ जज्ञे वैकुण्ठैर्दैवतैः सह ॥
मन्वन्तरं तु संप्राप्ते तथा वैवस्वते द्विजः ।
वामनः काश्यपाद्विष्णुरदित्यां संबभूव ह ॥
त्रिभिः क्रमैरिमान् लोकान् जित्वा येन महा-
त्मना ।
पुरन्दराय त्रैलोक्यं दत्तं निहतकण्टकम् ॥

मन्वन्त

इत्येतास्तनवस्तस्य सप्तमन्वन्तरेषु वै ।
सप्तस्वेवाभवन् विप्र । याभिः संरक्षिताः प्रजाः ॥
यस्माद्विष्टमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्मात् संप्रोच्यते विष्णुर्व्विशेर्धातोः प्रवेशनात् ॥
सर्व्वे च देवा मनवः समस्ताः
सप्तर्षयो ये मनुसूनवश्च ।
इन्द्रश्च यो यस्त्रिदशेशभूतो
विष्णोरशेषास्तु विभूतयस्ताः ॥"
इति विष्णुपुराणे ३ अंशे मन्वन्तराख्यानं नाम
१ अध्यायः ॥ * ॥

श्रीमैत्रेय उवाच ।

प्रोक्तान्येतानि भवता सप्त मन्वन्तराणि वै ।
भविष्याण्यपि विप्रर्षे ! ममाख्यातुं त्वमर्हसि ॥

श्रीपराशर उवाच ।

"छायासंज्ञासुतो योऽसौ द्वितीयः कथितो
मनुः ।
पूर्व्वजस्य सवर्णोऽस्य सावर्णिस्तेन कथ्यते ॥
तस्य मन्वन्तरं ह्येतत् सावर्णिकमथाष्टमम् ।
तच्छृणुष्व महाभाग । भविष्यं कथयामि ते ॥
सावर्णिस्तु मनुर्योऽसौ मैत्रेय ! भविता ततः ।
सुतपाश्चामिताभाश्च मुख्याश्चापि तदा सुराः ॥
तेषां गणस्तु देवानामेकैको विंशकः स्मृतः ।
सप्तर्षीनपि वक्ष्यामि भविष्यानथ सप्त च ॥
दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ।
मत्पुत्रश्च तथा व्यास ऋष्यशृङ्गश्च सप्तम. ॥
विष्णुप्रसादादनघः पातालान्तरगोचरः ।
विरोचनसुतस्तेषां बलिरिन्द्रो भविष्यति ॥
विरजाश्चार्व्वरीवांश्च निर्मोहाद्यास्तथापरे ।
सावर्णस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥८॥
नवमो दक्षसावर्णिर्मैत्रेय । भविता मनुः ।
पारा मरीचिगर्भाश्च सुधर्म्माणस्तथा त्रिधा ॥
भविष्यन्ति तदा देवा एकैको द्वादशो गणः ।
तेषामिन्द्रो महावीर्य्यो भविष्यत्यद्भुतो द्विज । ॥
सवनो द्युतिमान् भव्यो वसुर्मेधातिथिस्तथा ।
ज्योतिष्मान् सप्तमः सत्यस्तत्रैते च महर्षयः ॥
धृतिकेतुर्दीप्तिकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाद्याश्च तथा दक्षसावर्णिकात्मजाः ॥९॥
दशमो ब्रह्मसावर्णिर्भविष्यति मुने ! मनुः ।
सुधामानोऽनिरुद्धाश्च शतसंख्यास्तथा सुराः ॥
तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः ।
सप्तर्षयो भविष्यन्ति ये तदा तान् शृणुष्व च ॥
हविष्मान् सुकृतिः सत्यो ह्यपां मूर्त्तिस्तथापरः ।
नाभागो प्रतिमौजाश्च सत्यकेतुस्तथैव च ॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणादयो दश ।
ब्रह्मसावर्णिपुत्राश्च रक्षिष्यन्ति वसुन्धराम् ॥१०॥
एकादशश्च भविता धर्म्मसावर्णिको मनुः ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ॥
गणास्त्वेते तदा मुख्या देवानां हि भविष्यताम् ।
एकैकस्त्रिंशकस्तेषां गणश्चेन्द्रश्च वै वृषः ॥
निश्चरश्चाग्नितेजाश्च वपुष्मान् घृणिवारुणिः ।
हविष्माननघश्चैव भाव्याः सप्तर्षयस्तथा ॥
सर्व्वगः सर्व्वधर्म्मा देवानीकादयस्तथा ।

भविष्यन्ति मनोस्तस्य तनयाः पृथिवीश्वराः॥११॥
रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो मनुः।
ऋतधामा च तत्रेन्द्रो भविता शृणु मे सुरान्।
हरिता लोहिता देवास्तथा सुमनसो द्विज।
सुकर्म्माणः सुरापाश्च दशकाः पञ्च वै गणाः॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्द्युतिश्चान्यः सप्तमस्तु तपोधनः॥
देववानुपदेवश्च देवश्रेष्ठादयस्तथा।
भविष्यन्ति मनोस्तस्य महावीर्य्याः सुता नृपाः॥१२॥
त्रयोदशो रौच्यनामा भविष्यति सुने। मनुः।
सुत्रामणिः सुकर्म्माणः सुधर्म्मागस्तथापरः॥
त्रयस्त्रिंशद्विभेदास्ते देवानां ये तु वै गणाः।
दिवस्पतिर्महावीर्य्यस्तेषामिन्द्रो भविष्यति॥
निर्मोहस्तत्त्वदर्शी च निष्प्रकम्प्यो निरुत्सुकः।
धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः॥
सप्तर्षयस्त्विमे तस्य पुत्रानपि निबोध मे।
चित्रसेनविचित्राद्या भविष्यन्ति महीक्षितः॥१३॥
भौत्यश्चतुर्दशश्चात्र मैत्रेय! भविता मनुः।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च शृणुष्व तान्॥
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिनस्तथा।
वाचावृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु॥
अग्निबाहुः शुचिः शुक्रो मागधोऽग्नीध्र एव च।
युक्तस्तथाजितश्चान्यो मनुपुत्रानतः शृणु॥
उरुगम्भीरबुध्न्याद्या मनोस्तस्य सुता नृपाः।
कथिता मुनिशार्द्दूल। पालयिष्यन्ति मेदिनीम्॥१४॥
चतुर्युगान्ते वेदानां जायते किल विप्लवः।
प्रवर्त्तयन्ति तानेत्य भुवि सप्तर्षयो दिवः॥
कृते कृते स्मृतेर्विप्र। प्रणेता जायते मनुः।
देवा यज्ञभुजस्ते तु यावन्मन्वन्तरन्तु तत्॥
भवन्ति ये मनोः पुत्रा यावन्मन्वन्तरं हि ते।
तदन्वयोद्भवैश्चैव तावद्भूः परिपाल्यते॥
मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः।
मन्वन्तरे भवन्त्येते शक्रश्चैवाधिकारिणः॥
चतुर्द्दशभिरेतैस्तु गतैर्म्मन्वन्तरैर्द्विज।
सहस्रयुगपर्य्यन्तः कल्पो निःशेष उच्यते।
तावत्प्रमाणा च निशा ततो भवति सत्तम।॥"
इति विष्णुपुराणे ३ अंशे २ अध्यायः॥*॥
मन्वन्तरश्रवणफलं यथा,—
"श्रुते मन्वन्तरे पूर्व्वे धर्म्ममाप्नोति मानवः।
स्वारोचिषस्य श्रवणात् सर्व्वान् कामानवाप्नुयात्॥
औत्तमे धनमाप्नोति ज्ञानमाप्नोति तामसे।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते स्त्रियम्॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलम्।
गुणवत् पुत्रपौत्रांश्च सूर्य्यसावर्णिके श्रुते॥
माहात्म्यं ब्रह्मसावर्णे धर्म्मसावर्णिके शुभाम्।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम्॥
ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
विघ्नानयत्यखिलं रौच्यं श्रुत्वा मनूत्तमम्॥
देवप्रसादमाप्नोति भौत्ये मन्वन्तरे श्रुते।
तथाग्निहोत्रं पुत्रांश्च गुणयुक्तानवाप्नुते॥
सर्व्वाण्येतान्यनुक्रमाद्यस्तु शृणोति मुनिसत्तम!।
मन्वन्तराणि तस्यापि श्रूयतां फलमुत्तमम्॥
तत्र देवानृषीन् विप्रानिन्द्रान् मनुगणान् नृपान्।
इन्द्रांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते॥
देवेन्द्रर्षिनृपाश्चान्ये ये मन्वन्तराधिपाः।
ते प्रीयन्ते तथा प्रीताः प्रयच्छन्ति शुभां मतिम्॥
ततः शुभां मतिं प्राप्य कृत्वा कर्म्म तथा शुभम्।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्द्दश॥
सर्व्वे स्युर्ऋतवः सौम्याः सर्व्वे सौम्यास्तथा ग्रहाः।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम्॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णनं नामाध्यायः॥

मपष्टः, पुं, (मयुष्टकः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः।२।९।१७॥

मपष्टकः, पुं, (मपष्ट एव। मपष्ट+स्वार्थे कन्।) वनमुद्गः। इत्यमरटीकायां भरतः।२।९।१७॥

मपुष्टकः, पुं, (मयुष्टकः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः।२।९।१७॥

मभ्र, गतौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गचतुर्थोपधः। मभ्रति। इति दुर्गादासः॥

मम, त्र, मदीयम्। आमार इति भाषा। यथा,
"ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्वपि।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम।॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
"तेषु अस्मदीयत्वं जानतोऽपि मम यथाज्ञस्य अज्ञस्येव राज्यादिषु ममत्वमेतत् किं किं निबन्धनमित्यर्थः।" इति तट्टीकायां नागोजीभट्टः॥
अस्यायमर्थ अस्मत्प्रमाणं ममत्वमुक्तं इत्ययम्। अस्मच्छब्दस्य षष्ठ्येकवचनान्तस्येदं रूपं तत्पदं त्रिषु लिङ्गेषु सदृशम्॥

ममता, स्त्री, (मम+भावे तल्। टाप्।) दर्पः। अभिमानः। इति हेमचन्द्रः। २। २३१॥ ममत्वम्। यथा,—
"तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः॥"
इति देवीमाहात्म्यम्॥
(उतथ्यपत्नी। सा तु दीर्घतमसो माता। यथा, ऋग्वेदे। ६।१०।२।
"क्षोमं यमस्ते ममतेव शुष्पं
पूतं न शुचि ममयः पवन्ते॥"
"ममता नाम ब्रह्मवादिनी दीर्घतमसो माता।"
इति तद्भाष्ये सायनः॥)

ममतायुक्तः, पुं, (ममतया युक्तः।) लम्पकः। इति शब्दमाला॥ अभिमानादिविशिष्टे, त्रि॥

ममत्वं, क्ली, (मम+भावे त्व।) मदीयत्वम्। यथा, मार्कण्डे यपुराणे।
"दुःखायतनभूतो हि ममत्वालम्बनो गृही॥"
स्नेहः। यथा,—
"सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।"
इति देवीमाहात्म्यम्॥
"ममत्वेन स्नेहेन आकृष्टा चेतना मतिर्यस्य। ममेति षष्ठ्यन्तरूपमव्ययं तस्य भावः ममत्वम्॥"
इति तट्टीकायां काशीरामः॥

ममापतालः, पुं, (मयति बध्नाति जनानिति। मय बन्धने+"मयतेर्यलोपो ममापतुट् चालः।" उणा० ५। ५०। इति आलप्रत्ययः। धातोर्यलोपः मकारश्चान्तस्य प्रत्ययस्यापतुडागमश्च।) विषयः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

मय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, मयते। इति दुर्गादासः॥

मयः, पु, (मयते द्रुतं गच्छतीति। मय्+पचाद्यच्।) उष्ट्रः। इत्यमरः।२।९।७५॥ अश्वतरः। दानवविशेषः। स तु देवानां शिल्पी। इति मेदिनी। ये, ४४॥ (अयं हि युधिष्ठिरस्य राज्ञः सभां विरचितवान्। यथा, शिशुपालवधे।१३।५०।
"उपनीय बिन्दुसरसो मयेन या
मणिदारुचारु किल वार्षपर्व्वणम्।
विदधेऽवधूतसुरसद्मसम्पदं
समुपासदत् सपदि संसदं स ताम्॥")
तस्य सन्तापत्यानि यथा, वह्निपुराणे।
"मयस्य जाता हेमायां पुत्राः सप्त महाबलाः।
मायावी दुन्दुभिश्चैव वृषभ्च महिषस्तथा।
बालिका वज्रकन्या च कन्या मन्दोदरी तथा॥"
(सुखम्। त्रि, गन्ता। यथा, वाजसनेयसंहितायाम्। २२। १९।
"कयोऽस्यायोऽसि मयोऽस्यर्व्वासि।" "मयोऽसि मयनं गच्छति मयः मय गतौ पचाद्यच्। यद्वा मय इति सुखनाम सुखरूपोऽसि।" इति तद्भाष्ये महीधरः॥)

मयटः, पु, (मयते गच्छत्यत्रेति। मय+"शकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) तृणयुक्तहर्म्यः। इति हारावली॥ तत्स्वरूपेऽर्थे तद्भूयार्थे प्राचुर्य्यार्थे च मयट् इति प्रत्ययो भवति॥

मयष्टकः, पुं, (मयुष्टकः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः॥

मया, स्त्री, (मयते गच्छति रोगोऽनया। मय्+कः। स्त्रियां टाप्।) चिकित्सा। इति शब्दचन्द्रिका॥ त्रि, तृतीयैकवचनान्तास्मच्छब्दस्य रूपम्॥ (यथा, हितोपदेशे। १। २२१।
"इहैव हस्तानि मयैव तानि
जन्मान्तराणीव दशान्तराणि॥")

मयी, स्त्री, (मय+"पुंयोगादिति।" ४।१।४८। इति ङीष्।) मयस्य स्त्रीजातिः। उष्ट्री। इति व्याकरणम्॥

मयुः, पु, (मयङ् गतौ+मृग्वादित्वात् कुः। इत्यमरटीकायां रघुनाथः॥ यद्वा, मिनोति शुभ्रशब्दं करोतीति। मि+"भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः।" उणा०।१।७। इति उः।)

किन्नरः। इत्यमरः। १।१।७४॥ म्लगः। इति मेदिनी। मे, ४३॥ (यथा, वाजसनेयसंहितायाम्। १३। ४७।

"मयुं पशुं मेधमग्ने। जुषस्व
तेन चिन्वानस्तन्वो निषीद।"

"मयुं पशुं तुरङ्गवदनं किम्पुरुषं पशुं मयुं लघ्वग्रं वा जुषस्व।" इति तद्भाष्ये महीधरः॥)

मयुराजः, पुं, (मयूनां किन्नराणां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।६१। इति टच्।) कुबेरः। इति शब्दरत्नावली॥

मयुष्टकः, पुं, (मयून् म्लगान् स्तकति प्रतिघातयतीति। स्तक + अच्। यत्वम्।) वनमुद्गः। इत्यमरटीका॥

मयूखः, पुं, (मापयन् गगनं प्रमाणयन् ओखति गच्छतीति। पृषोदरादिः। इत्यमरटीकायां रघुनाथः। यद्वा, माति परिमातीव। मा + "माङ ऊखो मय च।" उणा० ५। २५। इति ऊखः। मयादेशश्च।) किरणः। (यथा, महाभारते। ३। ३८। ४३।

"अदृश्यन्त तथा राजन्। मयूखानिव
भास्करः॥")

दीप्तिः। ज्वाला। इत्यमरः। १। ४। ३३॥ (यथा, रघौ। २। ४६।

"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन्।
भूयः स भूतेश्वरपार्श्ववर्त्ती
किञ्चिद्विहस्यार्थपतिं बभाषे॥")

शोभा। इति मेदिनी। खे, ११॥ कीलः। इत्यजयः॥ (पर्व्वतः। यथा, ऋग्वेदे।७।९९।३।

"दाधर्थ पृथिवीमभितो मयूखैः॥"

"मयूखैः पर्व्वतैः।" इति तद्भाष्ये सायनः॥")

मयूरः, पुं, (मयुरिव राति शब्दायते इति। रा + कः। पृषोदरादित्वात् साधुः। यद्वा, मीनाति हन्ति सर्पानिति। मी + "मीनातेरूरन्।" उणा० १।६८। इति ऊरन्।) स्वनामख्यातपक्षिविशेषः। तत्पर्य्यायः। बर्हिणः २ बर्ही ३ नीलकण्ठः ४ भुजङ्गभुक् ५ शिखावलः ६ शिखी ७ केकी ८ मेघनादानुलासी ९। इत्यमरः। २। ५।३०॥ प्रचलाकी १० चन्द्रकी ११ सिताङ्गापाङ्गः १२। इति शब्दरत्नावली॥ ध्वजी १३ मेघानन्दी १४ कलापी १५ शिखण्डी १६ चित्रपिच्छकः १७ भुजगभोगी १८ मेघनादानुलासकः १९। तस्य पक्षस्य विचित्रताकारणं यथा,—

"प्रविष्टायां हुताशन्तु वेदवत्यां स रावणः।
पुष्पकन्तु समारुह्य परिचक्राम मेदिनीम्॥
ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः।
उशीरबीजमासाद्य ददृशे स तु रावणः॥
संवर्त्तो नाम ब्रह्मर्षिः साक्षाद्भ्राता बृहस्पतेः।
याजयामास धर्म्मज्ञः सर्व्वैर्देवगणैर्वृतः॥
दृष्ट्वा देवास्तु तद्रक्षो वरदानेन दुर्जयम्।
तिर्य्यग्योनिं समाविष्टास्तस्य धर्षणभीरवः॥
इन्द्रो मयूरः संवृत्तो धर्म्मराजस्तु वायसः।
कृकलासो धनाध्यक्षो हंसश्च वरुणोऽभवत्॥"
इत्यादि॥

"हर्षात्तदाब्रवीदिन्द्रो मयूरं नीलबर्हिणम्।
प्रीतोऽस्मि तव धर्म्मज्ञ! भुजगाद्धि न ते
भयम्॥
इदं नेत्रसहस्रन्तु यत्तद्बर्हे भविष्यति।
वर्षमाणे मयि मुदं प्राप्स्यसे प्रीतिलक्षणम्॥
एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः।
नीलाः किल पुरा बर्हा मयूराणां नराधिप।।
सुराधिपाद्वरं प्राप्य गताः सर्व्वे विचित्रताम्॥"

इत्युक्तं वाल्मीकीये रामायणे उत्तरकाण्डे १८ सर्गः॥ अस्य मांसगुणाः।

"मयूरः श्रोत्रनेत्राग्निमेधावर्णस्वरायुषाम्।
हितो बल्यो गुरुः स्निग्धो वातघ्नः शुक्रमांसदः॥
हेमन्तकाले शिशिरे वसन्ते
सेव्यं हि मायूरमुशन्ति मांसम्।
उष्णं हि बर्हं विषभोजनेषु
वर्षाशरद्ग्रीष्मसुखेष्वपथ्यः॥"
इति राजनिर्घण्टः॥

तन्मांसमेरण्डतैलभृष्टं विषतुल्यम्। इति राजवल्लभः॥*॥ मयूरशिखाक्षुपः। तत्पर्य्यायः। खराश्वा २ कारवी ३ दीपः ४ लोचमस्तकः ५। इत्यमरः। २। ४। १११॥ अपामार्गः। इति मेदिनी। रे, १९९॥ (यथा, सुश्रुते चिकित्सितस्थाने २३ अः। "पिप्पलीपिप्पलीमूलचव्यचित्रकमयूरवर्षाभूसिद्धं वा क्षीरं पिबेत्॥") असुरविशेषः। यथा, महाभारते।१।६७।३६।

"मयूर इति विख्यातः श्रीमान् यस्तु महासुरः।
स विश्व इति विख्यातो बभूव पृथिवीपतिः॥"

सुमेरोरुत्तरजातः पर्व्वतविशेषः। यथा, मार्कण्डेये। ५५। १४।

"स्वर्णशृङ्गो शातशृङ्गो पुष्पको मेघपर्व्वतः।
विरजाश्वो वराहाद्रिर्मयूरो दारुधिस्तथा॥"

कविविशेषः। स च मयूरभट्ट इति लोके प्रसिद्धः। अयं खलु बाणभट्टस्य श्वशुरः उज्जयिन्यां वृद्धभोजमहीपतेः सभायामासीदिति मानतुङ्गाचार्य्यप्रणीतभक्तामराख्यस्तोत्रटीकाप्रारम्भे मेरुतुङ्गप्रणीतप्रबन्धचिन्तामणौ च समुपलभ्यते। प्रबन्धचिन्तामणौ बाणभट्टो मयूरस्य भगिनीपतिरासीदित्युक्तमस्ति। अथ च।

"अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकरः।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः॥"

इति शार्ङ्गधरपद्धत्यादिप्रसिद्धराजशेखरपद्येनापि बाणमयूरयोः समकालत्वं प्रतीयते। अयं हि कुष्ठरोगग्रस्तः सूर्य्यमाराध्य सूर्य्यशतकं नाम स्तोत्रग्रन्थं प्रणीय ततः सम्यक् निष्कृतिमवाप। सूर्य्यशतकस्यान्तिमः श्लोको यथा,—

"श्लोका लोकस्य भूत्यै शतमिति रचिताः
श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद् यः सकृदपि पुरुषः सर्व्वपापै-
र्विमुक्तः।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुः-
प्रकर्षं
विद्यामैश्वर्य्यमर्थं सुखमपि लभते सोऽत्र सूर्य्य-
प्रसादात्॥")

मयूरकं, क्ली, (मयूरः मयूरग्रीवेव प्रतिकृतिरिति मयूर + "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्। अस्य मयूरकण्ठकान्तितुल्यद्युतित्वात्तथात्वम्।) अञ्जनविशेषः। तुतिया इति भाषा। तत्पर्य्यायः। तुत्थाञ्जनम् २ शिखिग्रीवम् ३ वितुन्नकम् ४। इत्यमरः। २। ९। १०१॥ (यथा, भावप्रकाशे। १।

"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम्॥")

मयूरकः, पुं, (मयूर + इवार्थे कन्।) अपामार्गः। इत्यमरः। २। ९। १०१॥ (यथा, सुश्रुते सूत्रस्थाने। ३६। १६।

"मयूरको राजवृक्षो निम्बः कोषातकी
तिलाः॥")

तुत्थकम्। (स्वार्थे कन्।) मयूरः। इति विश्वः॥ मयूरशिखा। इति जटाधरः॥

मयूरग्रीवकं, क्ली, (मयूरस्य ग्रीवायाः कन्धरस्य वर्ण इव वर्णो यस्य। बहुव्रीहौ कन्। ह्रस्वश्च।) तुत्थम्। इति राजनिर्घण्टः॥

मयूरचटकः, पुं, (मयूर इव चटकः।) गृहकुक्कुटः। इति हारावली। ९०॥

मयूरचूडं, क्ली, (मयूरस्येव चूडा अग्रभागो यस्य तत्।) स्थौणेयकम्। इति राजनिर्घण्टः॥

मयूरचूडा, स्त्री, (मयूरस्य चूडेव चूडा शिखा यस्याः।) मयूरशिखा। इति वैद्यकम्॥

मयूरजङ्घः, पुं, (मयूरस्य जङ्घेव जङ्घा यस्य।) श्योनाकः। इति राजनिर्घण्टः॥

मयूरतुत्थं, क्ली, (मयूर इव तुत्थम्। मयूरवर्णत्वादस्य तथात्वम्।) तुत्थम्। इति राजनिर्घण्टः॥

मयूरपदकं, क्ली, (मयूरस्येव पदकं स्थानम्।) नखाघातः। यथा, शब्दमालायाम्।

"तथार्द्धचन्द्रकोलौ च नखाघाते तु लक्षणम्।
मयूरपदकं व्याघ्रनखकोत्पलपत्रकं॥"

मयूरविदला, स्त्री, (मयूरान् विशेषेण दलति स्वपुष्पादिशोभया तिरस्करोतीति। वि + दल + अच्। स्त्रियां टाप्।) अम्बष्ठा। इति वैद्यकम्॥

मयूरशिखा, स्त्री, (मयूरस्य शिखेव शिखा अग्रं यस्याः।) स्वनामख्यातक्षुपविशेषः। तत्पर्य्यायः। बर्हिचूडा २ शिखिनी ३ शिखालुः ४ सुशिखा ५ शिखा ६ शिखावला ७ केकिशिखा ८। अस्या गुणाः। रसे स्वादुत्वम्। मूत्रकृच्छ्रबालग्रहादिदोषनाशित्वम्। वश्यकर्म्मणि प्रशस्तत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"मयूराख्या शिखा प्रोक्ता सहस्राङ्घ्रिर्मधुच्छदा।
नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित्॥"
इति भावप्रकाशः॥

मयूरिका, स्त्री, (मयूरवत् वर्णोऽस्त्यस्याः । मयूर + ठन् । टाप् ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

मयूरी, स्त्री, (मयूर + स्त्रियां ङीप् ।) मयूरस्त्रीजातिः । इति व्याकरणं लिङ्गादिसंग्रहश्च ॥ (यथा, उत्तररामचरिते । ३ । ८ ।
"किमयत्नोऽसि शिवदे कुतस्त्येऽपि त्वमीदृशी ।
लगयिन्नोर्मयूरीव चकितोत्कण्ठिता स्थिता ॥")

मरकः, पुं, (म्रियन्ते जना यस्मात् । मृ + अपादाने अप् । ततः स्वार्थे संज्ञायां वा कन् । यद्वा, मृ + भावे अप् । मरो मरणमिति शब्देन कायति शब्दायते इति । कै + कः ।) मारिः । इति हेमचन्द्रः । २ । २३६ ॥ मड़क इति भाषा । तत्पर्य्यायः । मारी २ मारकः ३ । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । १३ । ७८ ।
"हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा ।
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥")
तस्य कारणादि यथा,—
"यावन्मार्त्तण्डसूनुर्गवि धनुषि भसे मन्मथे वास्ति नार्य्यां
तावद्दुर्भिक्षपीड़ा भवति च मरकं संक्षयं यान्ति लोकाः ।
हाहाकारा तथोर्व्वी मनुजभयकरी फेरवावैश्च भीमैः
शून्यग्रामा भवेयुर्नरपतिरहिता भूरिकङ्कालमाला ॥
वक्रं करोति रविजो धरणीसुतो वा
मूलाद्यहस्तमघरेवतिमैत्रभेषु ।
छत्रोपभङ्गपतनानि च सैनिकानां
सर्व्वत्र लोकमरणं जलधौतदेशः ॥
मांसास्थीनि समादाय श्मशानाद्गृध्रवायसाः ।
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत् ॥
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ।
चौरेण हन्यते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रसूयन्ते तस्य देशस्य विद्रवः ॥"
इति ज्योतिस्तत्त्वम् ॥
अपि च ।
"सार्द्धिव्यभिभयं गैरिकरूपे च युद्धानि ।
दूर्व्वाकाण्डश्यामे हारिद्र चापि निर्द्दिशेत् मरकम् ॥"
इति ग्रहयागप्रकरणे तिथ्यादितत्त्वम् ॥
अन्यदपि ।
"रवाविन्दौ गजारूढ़ा शन्यङ्गारे तुरङ्गमे ।
नौकया गुरुशुक्राभ्यां दोलया बुधवासरे ॥
गमे च जलदा देवी छत्रभङ्गस्तुरङ्गमे ।
नौकायां शस्यवृद्धिः स्यात् दोलायां मरकं भवेत् ॥"
इति पत्रिकाप्रवेशफलकथने ज्योतिषम् ॥ * ॥
अस्य शान्तिः । देवीमाहात्म्यपाठः । वटुकभैरवस्तवपाठः । तुलस्या विष्णुपूजनञ्च । यथा,
"उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥"
इति मार्कण्डेयपुराणम् ॥
"मारीभये राजभये तथा चौराग्निजे भये ।
औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने ।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पः ॥
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ! ॥
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तान्यशेषतः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अथ ब्रह्मपुराणीयो मन्त्रः ।
"ॐ नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहेति ।"
इति ज्योतिस्तत्त्वम् ॥
(जातिविशेषः । यथा, मार्कण्डेये । ५८ । ५१ ।
"दार्व्वादा मरकाश्चैव कुरटाश्चान्नदारकाः ।
एकपादाः खशा घोषाः स्वर्गभौमानवद्यकाः ॥")

मरकतं, क्ली, (मरकं मारिभयं तरन्त्यनेन । तॄ + डः । यद्वा, मरकं मरणं तरतीति । लोभान्मरणमनादृत्य तस्मिन् रत्ने प्रवर्त्तन्ते इति मरकतमिति स्मरन्तीति वृद्धाः । इत्यमरटीकायां भरतः ।) हरिद्वर्णमणिविशेषः । पान्ना इति भाषा ॥ तस्य देवता बुधः । इति ज्योतिषम् ॥ तत्पर्य्यायः । गारुत्मतम् २ अश्मगर्भम् ३ हरिन्मणिः ४ । इत्यमरः । २ । ९ । ९२ ॥ मरक्तम् ५ राजनीलम् ६ गरुडाङ्कितम् ७ । इति शब्दरत्नावली ॥ रौहिणेयम् ८ सौपर्णम् ९ गरुडोद्गीर्णम् १० बुधरत्नम् ११ अश्मगर्भजम् १२ गरलारिः १३ वापनीलम् १४ गारुडम् १५ । कुत्रचित् पुस्तके गरुडोद्गीर्णस्थाने गरुड़ोत्तीर्णं वापनीलस्थाने वाप्रवालं इति च पाठः ॥ अस्य गुणाः । विषघ्नत्वम् । शीतलत्वम् । रसे मधुरत्वम् । आमपित्तहरत्वम् । रुच्यत्वम् । पुष्टिदत्वम् । भूतनाशकत्वञ्च ॥ * ॥ अस्य लक्षणम् ।
"स्वच्छञ्च गुरु सच्छायं स्निग्धं गात्रञ्च मार्द्दवसमेतम् ।
अव्यङ्गं बहुरङ्गं शृङ्गारी मरकतं शुभं बिभृयात् ॥"
तस्य कुलक्षणम् ।
"शर्करिलकलिलरूक्षं मलिनं लघु हीनकान्ति कल्माषम् ।
त्रासयुतं विकृताङ्गं मरकतममरोऽपि नोपभुञ्जीत ॥" * ॥
तस्य परीक्षा ।
"यच्चैवालशिखण्डिशाद्वलहरित्काचैश्च चाषच्छदैः
खद्योतेन च बालकीरवपुषा शैरीषपुष्पेण च ।
छायाभिः समतां दधाति तदिदं निर्द्दिष्टमष्टात्मकं
जात्यं यत्तपनातपेष्वपरितो गारुत्मतं रञ्जयेत् ॥"
इति राजनिर्घण्टः ॥ * ॥
ग्रन्थान्तरे तस्य परीक्षादि यथा,—
सूत उवाच ।
"दानवाधिपतेः पित्तमादाय भुजगाधिपः ।
द्विधा कुर्व्वन्निव व्योम सत्वरं वासुकिर्ययौ ॥
स तदा स्वशिरोरत्नप्रभादीप्ते नभोऽम्बुधौ ।
राजतः स महानकः स्वकसेतुरिवाबभौ ॥
ततः पक्षनिपातेन संहरन्निव रोदसी ।
गरुत्मान् पन्नगेन्द्रस्य प्रहर्त्तुमुपचक्रमे ॥
सहसैव मुमोच ततू फणीन्द्रः
सुरसाद्युत्ततुरुष्कपादपायाम् ।
नलिकावनगन्धवासितायां
वरमाणिक्यगिरेरुपत्यकायाम् ॥
तस्य प्रपातसमनन्तरकालमेव
तद्द्वहरालयमतीत्य रमासमीपे ।
स्थानं क्षितेरुपपयोनिधितीरलेखं
तत्प्रत्ययान्मरकताकरतां जगाम ॥
तत्रैव किञ्चित् पततस्तु पित्ता
दुत्पाद्य जग्राह ततो गरुत्मान् ।
मूर्च्छापरीतः सहसैव घोणा-
रन्ध्रद्वयेन प्रमुमोच सर्व्वम् ॥
तत्राकठोरशुककण्ठशिरीषपुष्प-
खद्योतपृष्ठचरशाद्वलशैवलानाम् ।
कह्लारशष्पकभुजङ्गभुजाश्च पत्र-
शान्तित्विषो मरकताः शुभदा भवन्ति ॥
यद्यत्र भोगीन्द्रभुजा विमुक्तं
पपात पित्तं दितिजाधिपस्य ।
तस्याकरस्यातितरां स देशो
दुःखोपलभ्यश्च गुणैश्च युक्तः ॥
तस्मिन्मरकतस्थाने यत्किञ्चिदुपजायते ।
तत्सर्व्वं विषरोगाणां प्रशमाय प्रकीर्त्तितं ॥
सर्व्वमन्त्रौषधिगणैर्यन्न शक्यं चिकित्सितुम् ।
महाहिदंष्ट्राप्रभवं विषन्तत्तेन शाम्यति ॥
अन्यमप्याकरं तत्र यद्दोषैरुपवर्ज्जितम् ।
जायते तत पवित्राणामुत्तमं परिकीर्त्तितम् ॥
अत्यन्तहरितवर्णं कोमलमर्च्चिर्व्विभेदजटिलञ्च ।
काञ्चनचर्णस्यान्तःपूर्णमिव लक्ष्यते यच्च ॥
युक्तं संस्थानगुणैः समरागं गौरवेण विहीनम् ।
सवितुः करसंस्पर्शाच्छुरयति सर्व्वाश्रमं दीप्त्या ॥
हित्वा च हरितभावं यस्यान्तर्व्विनिहिता भवेद्दीप्तिः ।
अचिरप्रभाप्रभाहतनवशाद्वलसन्निभा भाति ॥
यच्च मनसः प्रसादं विदधाति निरीक्षितमति मात्रम् ।
तन्मरकतं महागुणमिति रत्नविदां मनोवृत्तिः ॥
यस्तु भास्करसंस्पर्शात् हन्त्यन्ततो महामणिः ।
रत्नार्थदात्मपादैस्तु महामरकतं हि तत् ॥
चतुर्धा जातिभेदस्तु महामरकते मणौ ।
छायाभेदेन विज्ञेया चतुर्व्वर्णस्य लक्षणैः ॥" * ॥

अथ छाया।
"भवेदष्टविधच्छाया मणेर्मरकतस्य च।
बर्हिपुच्छसमाभासा चासपत्रसमापरा ॥
हरिकाचनिभा चान्या तथा शैवालसन्निभा।
खद्योतपृष्ठसंकाशा बालकीरसमा तथा ॥
नवशाद्वलसच्छाया शिरीषकुसुमोपमा।
एवमष्टौ समाख्याताश्छाया मरकताश्रयाः ॥
छायाभिर्युक्तमेताभिः श्रेष्ठं मरकतं भवेत्।
पद्मरागगतः स्वच्छो जलबिन्दुर्यथा भवेत्।
तथा मरकतच्छाया श्यामला हरितामला ॥"
अथ दोषगुणाः।
"दोषाः सप्त भवन्त्यस्य गुणाः पञ्चविधो मतः।
अस्निग्धं रूक्षमित्युक्तं व्याधिस्तस्य धृते भवेत् ॥
विस्फोटः स्यात् सपिडके तत्र शस्त्रहतिर्भवेत्।
सपाषाणे भवेद्दिष्टनाशो मरकते धृते ॥
त्रिच्छायं मरकतं प्राहुर्वर्ज्यं तन्न तु धार्य्यते।
शर्करं कर्करायुक्तं पुत्रशोकप्रदं धृतम् ॥
जठरं कान्तिहीनन्तु दंष्ट्रिवह्निभयावहम्।
कुल्माषवर्णं धवलं ततो मृत्युभयं भवेत् ॥
इति दोषाः समाख्याता वर्ण्यन्तेऽथ महा-
गुणाः।
निर्म्मलं कथितं स्वच्छं गुरु स्याद्गुरुतायुतम् ॥
स्निग्धं रूक्षविनिर्मुक्तमरजस्कमरेणुकम्।
सुरागं रागबहुलं मणेः पञ्च गुणा मताः ॥
एतैर्युक्तं मरकतं सर्व्वपापभयापहम्।
गजवाजिरथान्दत्त्वा विप्रेभ्यो विस्तराद्धि मे ॥
तत् फलं समवाप्नोति शुद्धे मरकते धृते।
धनधान्यादिकरणे तथा सैन्यक्रियाविधौ ॥
विषरोगोपशमने कर्म्मस्वाथर्व्वणेषु च।
शस्यते मुनिभिर्यस्मादयं मरकतो मणिः ॥"
तथा च।
"स्वच्छता गुरुता कान्तिः स्निग्धत्वं पित्तकार
णम्।
हरिन्निरङ्गकत्वञ्च सप्त मरकते गुणाः ॥"
अथ कृत्रिमाकृत्रिमपरीक्षा।
"कृत्रिमत्वं सहजत्वं दृश्यते सूरिभिः क्वचित्।
घर्षयेत् प्रस्तरे वज्रकाचस्फटिकादिपद्धति ॥
लेखयेल्लौहभृङ्गेण चर्णनाथ विलेपयेत्।
सहजः कान्तिमाप्नोति कृत्रिमो मलिनायते ॥
वर्णस्यातिबहुलात् यस्यान्तः स्वच्छकिरण-
परिग्रहणम्।
सान्द्रस्निग्धविशुद्धं कोमलबर्हप्रभादिसमकान्ति।
चलोज्ज्वलया कान्त्या सान्द्राकारं विभासया
भाति।
तदपि गुणवत्त्वंस्नामाप्नोति हि यादृशी पूर्व्वम् ॥
सकलकठोरं मलिनं रूक्षं पाषाणकर्करोपितम्।
दिग्धञ्च शिलाजतुना मरकतमेवंविधं विगुणम् ॥
यत्सन्धिश्लेषितं रत्नमन्यन्मरकताद्भवेत्।
श्रेयस्कामैर्न तद्धार्य्यं क्रेतव्यं वा कथञ्चन ॥
भल्लातकपुत्रिका च तद्वर्णसमयोगतः।
मणेर्मरकतस्यैते लक्षणीया विजातयः ॥
क्षौमेण वाससा घृष्टा दीप्तिं त्यजति पुत्रिका।
लाघवेनैव काचस्य शक्या कर्त्तुं विभावना ॥
कस्यचिदनेकरूपैर्मरकतमगुणच्छतोऽपि गुण-
वर्णैः।
भल्लातकस्य निर्णेतुर्वैशद्यमुपैति वर्णस्य ॥
वज्राणि मुक्ताः सन्त्यन्ये ये च केचिद्विजातयः।
तेषामप्रतिबद्धानां भा भवत्यूर्द्ध्वगामिनी ॥
ऋजुत्वाच्चैव केषाञ्चित् कथञ्चिदुपजायते।
तिर्य्यगालोक्यमानानां सन्त्यर्थैव प्रणश्यति ॥
स्नानाचमनजप्येषु रक्षामन्त्रक्रियाविधौ।
दद्भिर्गोहिरण्यानि कुर्व्वद्भिः साधनानि च ॥
दैवपित्र्यातिथेयेषु गुरुसंपूजनेषु च।
बाध्यमानेषु विषमैर्दोषजातैर्विषोद्भवैः ॥
दोषैर्हीनं गुणैर्युक्तं काञ्चनप्रतियोजितम्।
संग्रामे विचरद्भिश्च धार्य्यं मरकतं बुधैः ॥"
अथ मूल्यम्।
"तुलया पद्मरागस्य यन्मूल्यमुपजायते।
लभतेऽभ्यधिकं तस्मात् गुणैर्मरकतं स्फुटम् ॥
तथा च पद्मरागाणां दोषैर्मूल्यं प्रणीयते।
ततोऽप्याप्यधिका हानिर्दोषैर्मरकते भवेत् ॥
गुणपिण्डसमायुक्ते हरितश्यामभास्वरे।
मूल्यं द्वादशकं प्रोक्तं जातिभेदेन सूरिभिः ॥
यवैकेन शतं पञ्चसहस्रं द्वितये यवे।
त्रिभिश्चैव सहस्रे द्वे चतुर्भिश्च चतुर्गुणम् ॥"
इति गारुड़े मरकतपरीक्षा ७१ अध्यायः
युक्तिकल्पतरुश्च ॥

मरकतपत्री, स्त्री, (मरकतमिव पत्रं यस्याः। ङीष्। तद्वर्णसादृश्यादेवास्यास्तथात्वम्।) पाची। इति राजनिर्घण्टः ॥

मरक्तं, क्ली, (मरकतम्। पृषोदरादित्वात् साधुः।) मरकतमणिः। इति शब्दरत्नावली ॥

मरणं, क्ली, (म्रियतेऽनेनेति। मृ + करणे ल्युट्।) वत्सनाभः। इति राजनिर्घण्टः ॥ (भावे ल्युट्।) विजातीयात्ममनःसंयोगध्वंसः। इति न्यायमतम् ॥ तत्पर्य्यायः। पञ्चता २ कालधर्म्मः ३ दिष्टान्तः ४ प्रलयः ५ अत्ययः ६ अन्तः ७ नाशः ८ मृत्युः ९ निधनम् १०। इत्यमरः। २। ८। ११६ ॥ भूमिलाभः ११ निपातः १२ आत्ययिकम् १३ मृतिः १४। इति शब्दरत्नावली ॥ कीर्त्तिशेषः १५ महानिद्रा १६ महाप्रयाणः १७ संस्थानम् १८। इति जटाधरः ॥ मरणदुःखान्याह।
"मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि।
श्लथग्रीवाङ्घ्रिहस्तोऽथ व्याप्तो वेपथुना नरः ॥
मुहुर्ग्लानिः परवशो मुहुर्ज्ञानबलान्वितः।
हिरण्यधान्यतनयभार्य्याभृत्यगृहादिषु।
एते कथं भविष्यन्तीत्यतीवममताकुलः ॥
मर्म्मभिद्भिर्महारोगैः क्रकचैरिव दारुणैः।
शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥
विवर्त्तमानताराक्षिहस्तपादं मुहुः क्षिपन्।
संशुष्यमाणताल्वोष्ठपुटो घुरघुरायते ॥
निरुद्धकण्ठो दोषौघैरुदानश्वासपीडितः।
तापेन महता व्याप्तस्तृषा चार्त्तस्तथा क्षुधा ॥
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीड़ितः।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते।
एतान्यन्यानि चोग्राणि दुःखानि मरणे
नृणाम् ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥ * ॥
मुमूर्षुमरणश्रावणनिषेधो यथा,—
"अग्नौ न निक्षिपेदग्निं नाद्भिः प्रशमयेत्तथा।
मुमूर्षुमरणमार्त्तिं वा न स्वयं श्रावयेत् परान् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥
अथ धार्म्मिकमरणलक्षणम्।
सोमशर्म्मोवाच।
"धर्म्मो हि कीदृशो मृत्युर्जन्म चैव वदस्व मे।
उभयोर्लक्षणं कान्ते! त्वमेवं हि वदस्व मे ॥
सुमनोवाच।
सत्यं शौचं क्षमा शान्तिस्तीर्थं पुण्यादिकं तथा।
धर्म्मश्च पालितं येन तस्य मृत्युं वदाम्यहम् ॥
रोगो न जायते तस्य न च पीड़ा कलेवरे।
न श्रमो वै न च ग्लानिर्न च स्वेदो भ्रमस्तथा ॥
दिव्यरूपधरा भूत्वा गन्धर्व्वा ब्राह्मणास्तथा।
वेदपाठसमायुक्ता गतिज्ञानविशारदाः ॥
तस्य पार्श्वं समायान्ति स्तुतिं कुर्व्वन्ति चातु-
लाम्।
सुस्थो हि आसने युक्तो देवपूजारतः किल ॥
तीर्थञ्च लभते प्राज्ञः स्नानार्थं धर्म्मतत्परः।
अग्न्यागारे च गोष्ठे च देवतायतनेषु च ॥
आरामे च तड़ागे च यत्राश्वत्थो वटस्तथा।
ब्रह्मवृक्षं समाश्रित्य श्रीवृक्षन्तु तथा पुनः ॥
अश्वस्थानं समाश्रित्य गजस्थानं ततो नरः।
अशोकं चूतवृक्षञ्च समाश्रित्य यदा स्थितः ॥
सन्निधिं ब्राह्मणानाञ्च राजवेश्मगतोऽपि वा।
रणभूमिं समाश्रित्य पुरा यत्र मृता भटाः ॥
मृत्युस्थानानि पुण्यानि केवलं धर्म्मकारणम्।
गोग्रहन्तु समं प्राप्य तथा समरसङ्कटम् ॥
शुद्धधर्म्मकरो नित्यं धर्म्मतो धर्म्मवत्सलः।
एवं स्थानं समाप्नोति यदा मृत्युं समाश्रितः ॥
मातरं पश्यते पुण्यं पितरञ्च नरोत्तमम्।
भ्रातरं श्रेयसा युक्तमन्यं स्वजनबान्धवम् ॥
वह्निजनं तथा पुण्यं स्तूयमानं पुनः पुनः।
पापिष्ठं नैव पश्येत मातृपित्रादिकं पुनः ॥
गीतं गायन्ति गन्धर्व्वाः स्तुवन्ति स्तावकाः स्तवैः
मन्त्रपाठैस्तथा विप्रा माता स्नेहेन पूजयेत् ॥
पिता स्वजनवर्गश्च धर्म्मात्मानं महामतिम्।
एवंभूताः समाख्याताः पुण्यस्थानानि ते
विभो ॥
प्रत्यक्षान् पश्यते भूतान् हास्यस्नेहसमाविलान्।
न च स्वप्नेन मोहेन क्लेशरक्तेन वै वत ॥
धर्म्मराजो महाप्राज्ञो दूरात्तन्तु समाह्वयेत्।
एह्येहि त्वं महाभाग! यत्र धर्म्मः स तिष्ठति ॥
तस्य मोहो न च भ्रान्तिर्न ग्लानिर्न च
विक्रिया।
जायते नात्र सन्देहः प्रसन्नात्मा प्रतिष्ठते ॥
ज्ञानविज्ञानसम्पन्नः स्मरन्नेवं जनार्द्दनम्।

तेन सार्द्धं प्रयात्येवं सन्तुष्टो हृष्टमानसः ॥
दशमद्वारमाश्रित्य आत्मा तस्य हि गच्छति ।
शिविका तस्य चायाति सुयानं सुमनोहरम् ॥
विमानैरेव यात्येव वायोर्वेगेन चोत्तमः ॥
छत्रेण ध्रियमाणेन चामरव्यजनैस्तथा ।
वीज्यमानः स धर्म्मात्मा पुण्यैरेव समन्ततः ॥
गीयमानस्तु धर्म्मात्मा स्तूयमानस्तु पण्डितैः ।
वन्दिभिश्चामरैर्दिव्यैर्ब्राह्मणैर्वेदपारगैः ॥
साधुभिः स्तूयमानस्तु सर्व्वसौख्यसमन्वितः ।
यथादानप्रभावेण फलमाप्नोति तत्र सः ॥
आरामवाटिकामध्ये स प्रयाति सुखेन वै ।
अप्सरोभिः समाकीर्णो दिव्याभिर्मङ्गलैर्युतः ॥
देवैस्तु स्तूयमानस्तु धर्म्मराजं प्रपश्यति ।
देवाश्च धर्म्मसंयुक्ता जग्मुः सांमुख्यमेव ते ॥
एह्येहि त्वं महाभाग ! भुङ्क्ष्व भोगान्मनो-
रमान् ।
एवं संपश्यते धर्म्मं सौम्यरूपं महामतिः ॥
अस्य पुण्यस्य भावेन भुङ्क्ते स्वर्गमनुत्तमम् ।
भोगक्षयात् स धर्म्मात्मा पुनर्जन्म प्रयाति च ॥
निजधर्म्मप्रसादात् स कुलं पुण्यं प्रयाति च ।
ब्राह्मणस्य सुपुण्यस्य क्षत्त्रियस्य तथैव च ॥
धनाढ्यस्य सुपुण्यस्य वैश्यस्य च महामते ! ।
धर्म्मेण मोदते भद्रं पुन. पुण्यं करोति सः ॥”
इति श्रीपद्मपुराणे भूमिखण्डे सुमनोपाख्याने
१५ अध्यायः ॥ * ॥

अथ पापिनां मरणलक्षणम् ।

सोमशर्म्मोवाच ।

“पापिनां मरणं भद्रे ! कीदृशैर्लक्षणैर्युतम् ।
तन्मे त्वं विस्तराद्ब्रूहि यदि जानासि भाविनि ! ॥

सुमनोवाच ।

श्रूयतामभिधास्यामि तस्मात् सिद्धात् श्रुतं मया ।
पापिनां मरणं कान्त ! यादृशं लिङ्गमेव च ॥
महापातकिनाञ्चैव स्थानमेषां वदाम्यहम् ।
छिन्नाममेध्यसंक्लेदैर्भूमिं पापसमन्विताम् ॥
स तां प्राप्य सुदुष्टात्मा प्राणान् दुःखेन मुञ्चति ।
चाण्डालभूमिं संप्राप्य मरणं याति दुःखितः ॥
गर्द्दभाचरितां भूमिं वेश्यागारं समाश्रितः ॥
मद्यपानगृहं गत्वा नैधन्यमुपगच्छति ।
अस्थिचर्म्मनखैः पूर्णामाश्रितां पापकिल्बिषैः ॥
तामवाप्य स दुष्टात्मा मृत्युं प्राप्नोति निश्चितम् ।
अन्यां पापसमाचारां प्राप्य मृत्युं स गच्छति ॥
अथ चेष्टां प्रवक्ष्यामि दूतानां प्रिय ! निश्चि-
ताम् ॥
भैरवान् दारुणान् घोरानतिकृष्णान्महोदरान् ।
पिङ्गाक्षान् पीतनीलांश्च अतिश्वेतान्महो-
दरान् ॥
अत्युच्चांश्च करालांश्च शुष्कमांसत्वचोपमान् ।
रौद्रदंष्ट्राकरालांश्च सिंहास्यान् सर्पहस्तकान् ॥
स तान् दृष्ट्वा प्रकम्पेत खिद्येत च मुहुर्मुहुः ।
शिवासंवादवद्घोरान्महारावान्महामते ! ॥
मुञ्चन्ति दूतकाः सर्व्वे कर्णमूले तु तस्य हि ।
गले पाशप्रबद्धास्ते कण्ठे बद्धास्तथोदरे ॥
समाकृष्य नयन्त्येते हाहेति वदतो मुहुः ।
म्रियमाणस्य या चेष्टा तामेवं प्रवदाम्यहम् ॥
परद्रव्यापहरणं परभार्य्याविडम्बनम् ।
कृतं परस्य सर्व्वस्वं गृहीतं यैस्तु पापिभिः ॥
पुनर्नैव प्रदत्तं हि लोभास्वादविमोहितैः ।
अन्यदेव महापापं कुप्रतिग्रहमेव च ॥
कण्ठमायान्ति ते सर्व्वे म्रियमाणस्य तस्य च ।
यानि कानि च पापानि पूर्व्वमेव कृतानि च ॥
आयान्ति कण्ठमूलं हि महापापस्य नान्यथा ।
दुःखमुत्पादयन्त्येते कफबन्धेन दारुणम् ॥
पीड़ाभिर्दारुणाभिश्च कण्ठो घुरघुरायते ।
रोदते कम्पतेऽत्यर्थं मातरं पितरं पुनः ।
स्मरति भ्रातरं तत्र भार्य्यां पुत्रं पुनः पुनः ॥
पुनर्विस्मरणं याति महापापेन मोहितः ।
तस्य प्राणा न गच्छन्ति बहुपीडासमाकुलाः ॥
पतते कम्पते चैव मूर्च्छते च पुनः पुनः ।
एवं पीड़ासमायुक्तो दुःखं भुङ्क्तेऽतिमोहितः ॥
तस्य प्राणा सुदःखेन महाकष्टैः प्रचालिताः ।
अपानं मार्गमाश्रित्य यदा कान्त ! प्रयान्ति ते ॥
एवंप्राया दुरात्मानो लोभमोहसमन्विताः ।
नीयन्ते च महाभूतैस्तेषां दुःखं वदाम्यहम् ॥”
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापिमरणं
नाम १६ अध्याय. ॥ * ॥

पापिनां यमालयगमननानायोनिप्राप्तिविवरणं
यथा,—

सुमनोवाच ।

“अङ्गारसञ्चये मार्गे दह्यमानो हि नीयते ।
दह्यमानः स दुष्टात्मा चेष्टमानः पुनः पुनः ॥
यत्रातपो महातीव्रो द्वादशादित्यतापितः ।
नीयते तेन मार्गेण सन्तप्तः सूर्य्यरश्मिभिः ॥
पर्व्वतेष्विव दुर्गेषु छायाहीनेषु दुर्म्मतिः ।
नीयते तेन मार्गेण क्षुधातृष्णादिपीड़ितः ॥
स दूतैर्हन्यमानस्तु यदा दण्डैः परश्वधैः ।
कशाभिस्ताड्यमानस्तु निन्द्यमानस्तु दूतकैः ॥
ततः शीतमये मार्गे वायुना सेव्यते पुनः ।
तेन शीतेन दुःखी स भूत्वा याति न संशयः ॥
आकृष्यमाणो दूतैस्तु नानादुःखेन नीयते ।
एवं पापी स दुष्टात्मा देवब्राह्मणनिन्दकः ॥
सर्व्वपापसमायुक्तो नीयते यमकिङ्करैः ।
यमं पश्यति दुष्टात्मा कृष्णाञ्जनचयोपमम् ।
तमुग्रं दारुणं भीमं यमदूतैः समावृतम् ।
सर्व्वव्याधिसमाकीर्णं चित्रगुप्तसमन्वितम् ॥
आरूढ़महिषं देव धर्म्मराजं द्विजोत्तम ! ।
दंष्ट्राकरालमत्युग्रं लम्बास्यं कालसन्निभम् ॥
पीतवासं महाहस्तं रक्तगन्धानुलेपनम् ।
रक्तमालाकृताभूषं गदाहस्तं भयङ्करम् ॥
एवंविधं महाकायं यमं पश्यति दुर्म्मतिः ।
तं दृष्ट्वा समनुप्राप्तं सत्यधर्म्मबहिष्कृतम् ॥
यमः पश्यति तं दुष्टं पापिष्ठं धर्म्मकण्टकम्
शासयेत्तु महादुःखैः पीडाभिर्दारुणैरैः ॥
यावद्युगसहस्रान्तं तावत् कालं प्रपच्यते ।
नानानरककुण्डेषु पच्यते च पुनः पुनः ॥
नरकञ्च प्रयात्येवं कृमिकीटेषु पापकृत् ।
अमेध्ये पच्यते नित्यं हाहाभूतो विचेतनः ॥
मरणञ्चैव पापात्मा एवं याति सुनिश्चितम् ।
एवं पापस्य सम्भोगं भुङ्क्ते चैव सुदुर्म्मतिः ॥
पुनर्जन्म प्रवक्ष्यामि यासु योनिषु जातिषु ।
श्वयोनिं समनुप्राप्य भुङ्क्ते पातकं पुनः ॥
व्याघ्रो भवति दुष्टात्मा रासभं याति वै पुनः ।
मार्ज्जारशौकरीं योनिं सर्पयोनिस्तथैव च ॥
नानाभेदासु सर्व्वासु तिर्य्यक्षु च पुनः पुनः ।
पापयोनिषु संयाति अन्यासु गर्हितासु च ।
चाण्डालभिल्लजातिषु पुलिन्देषु याति पाप-
कृत् ॥
एतत्ते सर्व्वमाख्यातं पापिनां जन्म चैव हि ।
पापपुण्यसमाचारस्तवाग्रे कथितो मया ॥”
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पाप-
पुण्यविवेको नाम १७ अध्यायः ॥ * ॥

शालग्रामशिलास्पर्शे मरणफलम् । यथा,—

राजान ऊचुः ।

“युवां नारायणस्यास्य कस्कैः श्वशुरतां गतौ ।
वयं नृपा इमे लोका ऋषयो ब्राह्मणाश्च ये ॥
प्रेक्ष्य भक्तिवितानं वां हरौ विस्मितमानसाः ।
पृच्छामस्त्वामियं भक्तिः क लब्धा परमात्मनः ॥
कस्य वा शिक्षिता राजन् ! किं वा नैसर्गिकी
तव ।
श्रोतुमिच्छामहे राजन् ! त्रिजगज्जनपावनीम् ।
कथां भागवतीं त्वत्तः संसाराश्रमनाशिनीम् ॥

शशिध्वज उवाच ।

स्त्रीपुंसोरावयोर्यूयं श्रूयतामोघविक्रमाः ।
वृत्तं यज्जन्मकर्म्मादिस्मृतिं तद्भक्तिलक्षणाम् ॥
पुरा युगसहस्रान्ते गृध्रोऽहं पूतिमांसभुक् ।
गृध्रीयं मे प्रियारण्ये कृतनीड़ौ वनस्थितौ ॥
चकार कामं सर्व्वत्र वनोपवनसंकुले ।
मृतानां पूतिपललैः प्राणिनां तृप्तिकारकौ ॥
एकदा लुब्धकः क्रूरो लुलोभ पिशिताशिनौ ।
आवां वीक्ष्य गृहे पुष्टं गृध्रं तत्राप्ययोजयत् ॥
तं वीक्ष्य जातविश्रम्भौ क्षुधया परिपीड़ितौ ।
स्त्रीपुंसौ पतितौ तत्र मांसशोणितचेतसौ ॥
बद्धावावां वीक्ष्य शिघ्रा हर्षादागत्य लुब्धकः ।
जग्राह कण्ठे तरसा चञ्च्वाघातप्रपीड़ितः ॥
आवां गृहीत्वा गण्डक्याः शिलायां सलिला-
न्तिके ।
मस्तिष्कं चूर्णयामास लुब्धकः पिशिताशनः ॥
चक्राङ्कितशिलासङ्गान्मरणादपि तत्क्षणात् ।
ज्योतिर्म्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ॥
प्राप्तौ वैकुण्ठनिलयं सर्व्वलोकनमस्कृतम् ।
ततः स्थित्वा युगशतं ब्रह्मणो लोकमागतौ ॥
ब्रह्मलोके पञ्चशतं युगानामुपभुज्य वै ।
देवलोके कालवशाद्गतं युगचतुःशतम् ॥
ततो भुवि नृपावास्तावन् बहुस्मरहं स्मरन् ।
हरेरनुग्रहं लोके शालग्रामशिलाश्रयम् ॥
जातिस्मरत्वं गण्डक्याः किं तस्याः कथया-
म्यहम् ।

यज्जलस्पर्शमात्रेण माहात्म्यं महदद्भुतम् ॥
चक्राङ्कितशिलास्पर्शे मरणस्येदृशं फलम् ।
न जाने वासुदेवस्य सेवया किं भविष्यति ॥"
इति कल्किपुराणे २५ अध्यायः ॥ * ॥
मरणजनकवस्तूनि यथा,—
"अभिरामः स्त्रियो मत्स्याः सर्पा राजकुलानि च ।
नित्यं परोपसेव्यानि सद्यःप्राणहराणि षट् ॥"
इति गारुडे ११४ अध्यायः ॥
("मरणं प्राप्नुयात्तत्र शुक्रस्यागमते ज्वरे ।
शेफसः स्तब्धता मोहः शुक्रस्य तु विशेषतः ॥"
इति माधवकरकृतरुग्विनिश्चये ज्वराधिकारे ॥
"अपानः कर्षति प्राणं प्राणोऽपानञ्च कर्षति ।
स्थानिनी तु यदा भिन्ना तदैव मरणं ध्रुवम् ॥"
इति वैद्यकम् ॥)

मरतः, पुं, (मृ प्राणत्यागे + "भृमृदृशियजीति ।" उणा० ३ । ११० । इति अतच् ।) मरणम् । इत्युणादिकोषः ॥

मरन्दः, पुं, (मरं मरणं द्यति खण्डयति अमराणां जीवनहेतुत्वात् । दो + कः । यद्वा, मकरन्दः । पृषोदरादित्वात् साधुः ।) मकरन्दः । इति शब्दरत्नावली ॥ (यथा,—
"माकन्दमुकुलस्यन्दि मरन्दस्यन्दिमन्दिरे ।
केलितल्पे मुकुन्देन कुन्दरन्देन मण्डिता ॥"
इति रसावली ॥)

मरन्दकः, पुं, (मरन्दः । स्वार्थे कन् ।) मकरन्दः । इति शब्दरत्नावली ॥

मराकाली, स्त्री, (मरं मरणदुःखं अकति प्राप्नोत्यनेनेति । अक् + करणे घञ् । स इव अलति पर्य्याप्नोतीति । अल + अच् । गौरादित्वात् ङीष् ।) हस्तिकाली । इति रत्नमाला । विछाटी इति भाषा ॥ (विवृतिरस्या हस्तिकालीशब्दे ज्ञातव्या ॥)

मरारः, पुं, (मरं मरणमलति निवारयतीति । अल + अण् । लस्य रत्वम् ।) शस्यरक्षणस्थानम् । इति जटाधरः । मराइ इति भाषा ॥

मरालः, पुं, (मृ + आलच् ।) राजहंसः । इति जटाधरः ॥ (यथा, नैषधे । ६ । ७२ ।
"भैमीसमीपे स निरीक्ष्य यत्र
ताम्बूलजाम्बूनदहंसलक्ष्मीम् ।
जनप्रियाद्रूत्यमहोपकार-
मरालमौह्यद्रढिमानमन्हे ॥")
कज्जलम् । कारण्डवः । तुरङ्गमः । वारिवाहः । दाडिमीविपिनम् । खलः । इति सारस्वतः ॥
मसृणे, त्रि । इति त्रिकाण्डशेषः ॥

मरालकः, पुं, (मराल इव प्रतिकृतिरिति । मराल + कन् ।) कलहंसः । इति राजनिर्घण्टः ॥

मरिचं, क्ली, (म्रियते नश्यति श्लेष्मादिकमनेनेति । मृ + बाहुलकात् इचः ।) कक्कोलकम् । स्वनामख्यातवर्त्तुलाकारकटुद्रव्यविशेषः । तत्पर्य्यायः । पवितम् २ श्यामम् ३ कोलम् ४ वल्लीजम् ५ ऊषणम् ६ यवनेष्टम् ७ वृत्तफलम् ८ शाकाङ्गम् ९ धर्म्मपत्तनम् १० कटुकम् ११ शिरोवृत्तम् १२ वीरम् १३ कफविरोधि १४ रूक्षम् १५ सर्व्वहितम् १६ लघ्वम् १७ वेल्लजम् १८ । (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये ।
"पिप्पलीमरिचशृङ्गवेराणि त्रिकटुकम् ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । लघुत्वम् । श्लेष्मविनाशित्वम् । समीरकृमिहृद्रोगहरत्वम् । रुचिकारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम् ।
मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् ॥
उष्णं पित्तहरं रूक्षं श्वासशूलकृमीन् हरेत् ।
तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरु ॥
किञ्चित्तीक्ष्णगुणं श्लेष्मप्रसेकि स्यादपित्तलम् ॥"
इति भावप्रकाशः ॥
(अपि च ।
"स्वादुपाक्यार्द्रमरिचं गुरुश्लेष्मप्रसेकि च ।
कटूष्णं लघु तच्छुष्कमवृष्यं कफवातजित् ॥
नात्युष्णं नातिशीतञ्च वीर्य्यतो मरिचं सितम् ।
गुणवत्तद्विशेषेण चक्षुष्यञ्च विशेषतः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

मरिचः, पुं, (म्रियते नश्यतीति । मृ + इचः ।) मरुवकवृक्षः । इति राजनिर्घण्टः ॥

मरिचपत्रकः, पुं, (मरिचस्य पत्राणीव पत्राणि यस्येति । बहुव्रीहौ कः ।) सरलवृक्षः । इति राजनिर्घण्टः ॥

मरिमा, [न्] पुं, (म्रियते इति । मृ + "जनिमृङ्भ्यामिमनिन् ।" उणा० ४ । १४८ । इति इमनिन् ।) मृत्युः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मरीचं, क्ली, (मृ + बाहुलकात् ईचः ।) स्वनामख्यातकटुद्रव्यविशेषः । तत्पर्य्यायः । वेल्लजम् २ कोलकम् ३ कृष्णम् ४ ऊषणम् ५ धर्म्मपत्तनम् ६ । इत्यमरः । २।९।३६ ॥ मरिचम् ७ श्यामम् ८ वरिष्ठम् ९ । इति जटाधरः ॥ आर्द्रस्य तस्य गुणाः । पाके स्वादुत्वम् । गुरुत्वम् । श्लेष्मप्रसेकित्वञ्च । शुष्कस्य तस्य गुणाः । रुच्यत्वम् । अग्निदत्वम् । रूक्षत्वम् । कटुत्वम् । उष्णत्वम् । लघुत्वम् । शुक्रनाशित्वञ्च । इति राजवल्लभः ॥ अन्यत् मरिचशब्दे द्रष्टव्यम् ॥

मरीचिः, पुं, (म्रियते पापराशिर्य्यस्मिन्निति । मृ + "मृकणिभ्यामीचिः ।" उणा० ४ । ७० । इति ईचि । तपःप्रभावादस्य तथात्वम् ।) मुनिविशेषः । स तु ब्रह्मणो ज्येष्ठमानसपुत्रः । अस्य भार्य्या कर्द्दममुनिकन्या कला, पुत्रः कश्यपः पूर्णिमासश्च । इति श्रीभागवतम् ॥ (अस्य भार्य्या सम्भूतिरिति नाम्नापि ख्याता । यथा, मार्कण्डेये । ५२ । १९ ।
"पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ॥")
कृपणः । इति हेमचन्द्रः ॥ (दनुपुत्रः । यथा, हरिवंशे । ३ । ८२ ।
"मरीचिर्मघवा चैव इरा शङ्कुशिरा हकः ॥"
मरुद्गणानामन्यतमः । यथा, श्रीभगवद्गीतायाम् । १० । २१ ।
"मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥"
प्रियव्रतवंशीयस्य सम्राजः पुत्रः । यथा, श्रीमद्भागवते । ५ । १५ । १४—१५ । "चित्ररथादूर्णायां सम्राडजनिष्ट । ततः उत्कलायां मरीचिर्मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत । तस्मात् सरघायां मधुनामाभवत् ॥")

मरीचिः, पुं, स्त्री, (म्रियन्ते नश्यन्ति सूक्ष्मजन्तवः समीपे यानेन । मृ + ईचिः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा, रघौ । १३ । ४ ।
"गर्भं दधत्यर्कमरीचयोऽस्माद्
विवृद्धिमत्राश्नुवते वसूनि ॥"
यथा च ।
"मरीचीनसतो मेघान् मेघान् वाप्यसतोऽम्बरे ।
विद्युतो वा विना मेघैः पश्यन् मरणमृच्छति ॥"
इति चरके इन्द्रियस्थाने चतुर्थेऽध्याये ॥)
षट्त्रसरेणुपरिमाणम् । इति वैद्यकपरिभाषा ॥ (स्त्री, म्रियन्ते इव देवा यद्दर्शनादिति । मृ + ईचिः । अप्सरोविशेषः । यथा, महाभारते । १ । १२३ । ५९ ।
"मरीचिः शुचिका चैव विद्युत्पर्णा तिलोत्तमा ।
अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा ॥"
म्रियते वारिभ्रमेण जीवा यस्याः । मृ + अपादाने ईचिः । मरीचिका । यथा, कथासरित्सागरे । ५७ । ६१ ।
"वेश्याप्रेमणि सद्भावो यदस्मिन् बुध्यते त्वया ।
सत्यं भवति किं जातु जलं मरुमरीचिषु ॥")

मरीचिका, स्त्री, (मरीचिरेव । स्वार्थे कन् । टाप् ।) मृगतृष्णा । इत्यमरः । १ । ३ । ३५ ॥ (यथा, प्रबोधचन्द्रोदये । १ । १ ।
"मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः ॥")
"मरीचिरिव मरीचिका स्वार्थे संघे इत्यादिना इवार्थे कः । ग्रीष्मे मरुदेशसिकतादावर्ककराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति तन्मरीचिका मृगतृष्णेति टीकाकारः । उत्कटरविरश्मिजन्यचितिवाष्पजालं मरीचिका । दूरमूर्द्ध्वं यच्छ्यखे जलमिव दृश्यते इत्यपरे ।" इति भरतः ॥

मरुः, पुं, (म्रियतेऽस्मिन्निति । मृ + "भृमृशी" इति ।" उणा० १ । ७ । इति उः ।) निर्जलदेशः । (यथा, महाभारते । १३ । ५४ । २१ ।
"अदृश्या गच्छ भीरु । त्वं सरस्वति । मरुं प्रति ॥")
पर्व्वतः । इत्यमरः । ३ । ३ । १६२ ॥ यथा, महाभारते । ५ । ६३ । १८ ।
"तत्रापश्याम वै सर्व्वे मधु पीतममाक्षिकम् ।
मरुप्रपाते विषमे निविष्टं कुम्भसम्मितम् ॥"
दशेरकदेशः । तत्पर्य्यायः । धन्वा २ । इत्यमरः । २ । १ । ५ ॥ यथा, हेमचन्द्रः ।
"प्राच्यास्तु कारकुक्षीया मरवस्तु दशेरकाः ॥"

मरुवकवृक्षः। इति भावप्रकाशः॥ (निमि-वंशीयहर्य्यश्वपुत्रः। यथा, श्रीमद्भागवते। ९। १३। १५।

"तस्माद्बृहद्रथस्तस्य महावीर्य्यः सुधृत्पिता। सुधृतेर्धृष्टकेतुर्वै हर्य्यश्वोऽथ मरुस्ततः॥")

सूर्य्यवंशीयभाविराजविशेषः। तस्य विवरणं यथा,—

"रामात् कुशोऽभूदतिथिस्ततोऽभून्निषधास्नभः। तस्मादभूत् पुण्डरीकः क्षेमधन्वाभवत्ततः॥ देवानीकस्ततो हीनः पारियात्रोऽथ हीनतः। बलाह्वकस्ततोऽर्कश्च रजनाभस्ततोऽभवत्॥ खगणाद्विधृतस्तस्माद्धिरण्यो नाभसंज्ञितः। ततः पुष्यात् ध्रुवस्तस्मात् सुदर्शनोऽथाग्निवर्णकः॥ तस्मात् शीघ्रोऽभवत् पुत्त्रः पिता मेऽतुलविक्रमः। तस्मात् मरुं मां केऽपीह बुधश्चापि सुमित्रकम्॥ कलापग्राममासाद्य विद्धि सत्तपसि स्थितम्। तवावतारं विज्ञाय व्यासात् सत्यवतीसुतात्॥ प्रतीक्ष्य कालं लक्षाब्दं कालप्राप्तस्तवान्तिकम्।

कल्किरुवाच।

मरो। त्वामभिषेक्ष्यामि निजायोध्यापुरेऽधुना। हत्वा म्लेच्छानधर्म्मिष्ठान् प्रजाभूतविहिंसकान्॥ विशाखयूपभूपालस्तनयां विनयान्विताम्। विवाहे रुचिरापाङ्गीं सुन्दरीं त्वां प्रदा-स्यति॥"

इति कल्किपुराणे १८ अध्यायः॥

(वसूनामन्यतमः। यथा, हरिवंशे।१६६।१७।

"वासवानुगता देवी जनयामास वै सुतान्। मरुं वै प्रथमं देवं द्वितीयं भुवमव्ययम्॥")

मरुजः, पुं, (मरौ निर्ज्जलदेशे जायते इति। जन्+डः।) नखीनामगन्धद्रव्यम्। इति शब्द-चन्द्रिका॥ (वंशाङ्कुरे, क्ली। तत्पर्य्यायो यथा, "करीरं मरुजं फलम् ———।"

इति वैद्यकरत्नमालायाम्॥)

मरुदेशजाते, त्रि॥

मरुजा, स्त्री, (मरुज+स्त्रियां टाप्।) ल्पृ-क्कः। इति राजनिर्घण्टः॥

मरुटा, स्त्री, उच्चललाटयुक्तस्त्री। इति शब्द-रत्नावली॥

मरुण्डा, स्त्री, उच्चललाटा नारी। इति त्रिकाण्डशेषः॥

मरुतः, पुं, (म्रियन्ते प्राणिनो यदभावादिति। मृ+बाहुलकात् उत।) वायुः। (यथा, अभिज्ञान-शकुन्तले।

"तदेनां सुखमरुतेन विग्रहां करवाणि॥")

देवः। इति भरतधृतव्याडिः॥ घण्टापाटलि-वृक्षः। इति शब्दचन्द्रिका॥

मरुत्, पुं, (म्रियते प्राणी यस्याभावादिति। मृ+"म्रेरुतिः।" उणा० १। ९४। इति उत्।) वायुः। इत्यमरः। १। १। ६५॥ (यथा, नैषधचरिते। २। ५६।

"भृशतापभृता मया भवान् मरुदासादि तुषारसायकात्॥")

मरुवकः। इति भावप्रकाशः॥ (अस्य गुणा यथा,—

"मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णःपित्तलो लघुः। वृश्चिकादिविषश्लेष्मवातकुष्ठक्रिमिप्रणुत्। कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

देवः। (यथा, रघुः। १२। १०१।

"मरुतां पश्यतां तस्य शिरांसि पतितान्यपि। मनो नातिविशश्वास पुनः सन्धानशङ्किनाम्॥"

साध्यविशेषः। यथा, हरिवंशे। १६६। ४५।

"धर्म्मात् कामोऽद्भवः कामः साध्या साध्यान् व्यजायत।

प्रभवं च्यवनञ्चैव मरीशानं सुरभीं तथा। अरणं मरुतञ्चैव विश्वावसुबलध्रुवौ॥")

भ्रातृवत्सलदेवताविशेषः। यथा,—

"भ्रातृणां प्रायणं भ्राता योऽनुतिष्ठति धर्म्मवित्।

स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते॥"

इति श्रीभागवते ६ स्कन्धे ५ अध्यायः॥

"प्रायणं प्रकृष्टं गमनम्। पुण्यमेव बन्धुर्यस्य मरुद्भिर्भ्रातृवत्सलैर्देवैः।" इति तट्टीकायां श्रीधरस्वामी॥ (हिरण्यम्। इति निघण्टुः। १। २॥ ऋत्विक्। इति तत्रैव। ३। १८॥) ग्रन्थिपर्णे, क्ली। इति मेदिनी। ते, १४३॥ पृक्कायां, स्त्री। इति शब्दरत्नावली॥

मरुत्करः, पुं, (करोतीति। कृ+अच्। मरुतो-ऽपानवायोः करः।) राजमाषः। इति शब्द-चन्द्रिका॥ (मरुत्कारिणि, त्रि। यथा,—

"कषायमधुराः शीताः कटुपाका मरुत्कराः। बद्धमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

मरुत्क्रिया, स्त्री, (मरुतः क्रिया।) अपानेन-सर्गः। वातकर्म्म इति ख्यातः। इति केचित्॥

मरुत्तः, पुं, (मरुदस्त्यस्येति। मरुत्+"तप् पर्व्वमरुद्भ्याम्।" ५। २।१२२। इत्यत्र काशि-कोक्त्या तप्।) चन्द्रवंशीयराजविशेषः। स च अवीक्षिद्राजपुत्त्रः। यथा,—

क्रोष्टुकिरुवाच।

"अवीक्षितस्य नृपतेर्मरुत्तस्य महात्मनः। श्रोतुमिच्छामि चरितं श्रूयते सोऽतिचेष्टितः॥ चक्रवर्त्ती महाभागः शूरः कान्तो महामतिः। धर्म्मविद्धर्म्मकृच्चैव सम्यक् पालयिता भुवः॥

मार्कण्डेय उवाच।

स पित्रा समनुज्ञातो राज्यं प्राप्य पितामहात्। धर्म्मतः पालयामास प्रजाः पुत्त्रानिवौरसान्॥ इयाज सुमहायज्ञान् यथावत् प्राज्यदक्षिणान्। ऋत्विक्पुरोहितादेशादनिर्विण्णो महीपतिः॥ तस्याप्रतिहतं चक्रमासीद्द्वीपेषु सप्तसु। गतयश्चाप्यविच्छिन्नाः स्वःपातालजलादिषु॥"

इति मार्कण्डेयपुराणे १०३ अध्यायः॥

(यदुवंशीयः करन्धमपुत्त्रः। यथा, श्रीमद्भाग-वते। ९। २३। १७।

"त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः। मरुत्तस्तत्सुतोऽपुत्त्रः पुत्त्रं पौरवमन्वभूत्॥"

शिखिपुराजपुत्त्रः। यथा, महाभारते। हरि-वंशपर्व्वणि। ३२। ७।

"शिखिपुरभवत् पुत्त्र उशनः शत्रुतापनः। मरुत्तस्तस्य तनयो राजर्षिरभवन्नृप॥")

मरुत्तकः, पु, (मरुदिव तकति हसतीति। तक् हासे+अच्।) मरुवकः। इति भावप्रकाशः॥

मरुत्पथः, पु, (मरुतां पन्थाः। "ऋक्पूरब्धूः पथामानक्षे।" ५। ४। ७४। इत्यः।) आका-शम्। इति हेमचन्द्रः॥

मरुत्पालः, पुं, (मरुतो देवान् पालयतीति। पालि+अण्। देवराजत्वादस्य तथात्वम्।) इन्द्रः। इति केचित्॥

मरुत्पुत्त्रः, पुं, (मरुतो वायोः पुत्त्रः।) भीमसेनः। इति हेमचन्द्रः। ७०१॥ (अस्य मरुत्पुत्त्रत्व-विवरणम्। यथा। पुरा किल पाण्डुर्नाम महीपतिर्मृगयार्थं वनं गत्वा आश्रमैकं मृग-रूपधारिणं ऋषिणीं रममाणं काममोहितं जघान। ततस्तेनाभिशप्तो निजपत्न्यो रन्तुमशक्तो न शक्तः। अथ गच्छति काले कुन्ती पुत्त्र-कामस्य स्वभर्त्तुः पाण्डुराजस्यानुज्ञया इन्द्रादीन् देवानाहूय तैस्त्वरमसौत्। तेषां मरुतो भीम-सेनो जात इति पौराणिकी वार्त्तानुसन्धेया। अस्य विशेषस्तु महाभारते।१।१२८—१३३। अध्यायेषु द्रष्टव्यः॥) हनूमांश्च॥

मरुत्प्लवः, पुं, (मरुदिव प्लवते द्रुतं गच्छ-तीति। प्लु+अच्।) सिंहः। इति त्रिकाण्ड-शेषः॥

मरुत्फलं, क्ली, (मरुतां वायूनां फलमिव।) घनोपलः। इति शब्दमाला॥

मरुत्वान्, [त्] पुं, (मरुतो देवाः पालनीयत्वेन सन्त्यस्य इति। मरुत्+"मध्वादिभ्यश्च।"४।२। ८६। इति मतुप् मस्य वः। संज्ञायां प्रत्यय-वकारे परे न तस्य दः।) इन्द्रः। इत्यमरः। १।१।४४॥ (यथा, रघौ। ३। ४।

"दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः॥"

धर्म्मपुत्त्रदेवगणभेदः। यथा, महाभारते।१२। २०७। २३।

"धर्म्मस्य वसवः पुत्त्रा रुद्राश्चामिततेजसः। विश्वे देवाश्च साध्याश्च मरुत्वन्तश्च भारत॥"

मरुज्जनकत्वेनास्त्यस्येति। मतुप्। मस्य वः।) हनूमान्। इति शब्दरत्नावली॥ (वायु-विशिष्टे, त्रि। सर्व्वोदाहरणं यथा, भट्टौ। १०। २९।

"बभौ मरुत्वान् विकृतः समुद्रो बभौ मरुत्वान् विकृतः समुद्रः। बभौ मरुत्वान् विकृतः समुद्रो बभौ मरुत्वान् विकृतः समुद्रः॥"

स्त्री, दक्षस्य प्रचेतसः कन्या। सैव धर्म्मस्य पत्नी। यथा, भागवते। ६। ६। ४।

"भानुर्लम्बाकृद्यामिविम्बा बाध्या मरुत्वती ।
वसुर्मुहूर्त्ता सङ्कल्पा धर्म्मपत्न्यः सुतान्
शृणु ॥")

मरुत्सखः, पुं, (मरुतां देवानां सखा । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) इन्द्रः । इति धरणिः ॥ (मरुतो वायोः सखा ।) अग्निः । वायुसख इत्यमरदर्शनात् ॥ (वायुसखे, त्रि । यथा, रघौ । ११ । ३ ।
"तावदाशु विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः ॥")

मरुदान्दोलः, पुं, (मरुत् वायुरान्दोल्यतेऽनेनेति । आन्दोलि+करणे घञ् ।) धवित्रम् । इति शब्दमाला ॥

मरुदिष्टः, पुं, (मरुतां देवानामिष्टः प्रियः ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य गुग्गुलुशब्दे ज्ञातव्यः ॥)

मरुदूलं, क्ली, (मरुतस्तु वायुशु ध्वजः पताकेव । नभसि वायुवशाच्चलितत्वादस्य तथात्वम् ।) वाततूलम् । बुड़ीर सुता इति भाषा । यथा,—
"शौम्रहासं वम्रकथं वाततूलं मरुदूलम् ॥"
इति हारावली । २३ ॥

मरुद्भवा, स्त्री, (मरुद्वायुरेव उत्पत्तिकारणं यस्याः ।) ताम्रमूलाक्षुपः । इति रत्नमाला । खिराइ इति भाषा ॥

मरुद्रथः, पुं, (मरुद्वायु रथो यानमिवास्य । ऊर्द्ध्वं लोकं वियति वहुतरं गच्छतीति तथात्वम् ।) अश्वः । इति त्रिकाण्डशेषः ॥ देवरथः । इति हेमचन्द्रः । ३ । ४१६ ॥

मरुद्रुमः, पुं, (मरौ निर्ज्जलदेशस्य द्रुमः । मरुजातो द्रुमो वा ।) विट्खदिरः । इति रत्नमाला ॥

मरुद्वर्त्म, क्ली, (मरुतां वायूनां देवानां वा वर्त्म पन्थाः ।) आकाशम् । इति त्रिकाण्डशेषः ॥

मरुद्वाहः, पुं, (मरुता वायुना उह्यतेऽसौ इति । वह+कर्म्मणि घञ् । यद्वा, मरुद्वायुर्वाह इव यस्य ।) धूमः । इति त्रिकाण्डशेषः ॥ अग्निः । इति शब्दमाला ॥

मरुद्विपः, पुं, (मरौ निर्ज्जलदेशे द्विपो हस्तीव ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

मरुन्माला, स्त्री, (मरुद्भिर्म्मल्यते धार्य्यते इति । मल धारणे+कर्म्मणि घञ् । टाप् ।) स्पृक्का । इत्यमरः । २ । ४ । १३३ ॥ पिड़िंशाक इति भाषा ॥ (पर्य्यायोऽस्य यथा,—
"स्पृक्कासृक् ब्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

मरुप्रियः, पुं, (मरुर्निर्ज्जलदेशः प्रियोऽस्य ।) उष्ट्रः । इति हेमचन्द्रः । ४ । ३१८ ॥

मरुभूः, स्त्री, (मरुर्निर्ज्जला भूर्भूमिः ।) दाशेरकदेशः । इति त्रिकाण्डशेषः ॥ मारवाड़ इति भाषा ॥ निर्ज्जलभूमिश्च ॥

मरुभूरुहः, पुं, (मरुष्वपि रोहति जायते इति । रुह्+"इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) करीरवृक्षः । इति भावप्रकाशः ॥ मरुभूमिजाते, त्रि ॥ (यथा, आर्य्यासप्तशत्याम् । ६७६ ।
"सततमुखो मरुभूरुह इव जीवनमात्रमाशास्यम् ॥")

मरुलः, पुं, (म्रियते जलं विनेति । मृ+उलः ।) कारण्डवपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

मरुवः, पुं, (मरुं निर्ज्जलदेशं वाति प्राप्नोतीति । वा+कः ।) वृक्षविशेषः । मरुया इति नागदाना इति च भाषा ॥ तत्पर्य्यायः । खरपत्रः २ गन्धपत्रः ३ फणिज्झकः ४ बहुवीर्य्यः ५ शीतलकः ६ सुराहः ७ समीरणः ८ जम्बीरः ९ प्रस्थकुसुमः १० मरुवकः ११ आजन्मसुरभिपत्रः १२ मरिचः १३ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । क्रमिकुष्ठविड्बन्धाध्मानशूलमान्द्यत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मरुवको मरुवको मरुबकोऽपि स्मृतः ।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥
मरुवोऽग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः ।
वृश्चिकादिविषश्लेष्मवातकुष्ठक्रिमिप्रणुत् ।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥"
इति भावप्रकाशः ॥

मरुवकः, पुं, (मरुव+स्वार्थे इवार्थे वा कन् ।) कण्टकिवृक्षविशेषः । मयना इति भाषा । तत्पर्य्यायः । पिण्डीतकः २ श्वसनः ३ करहाटकः ४ शल्यः ५ मदनः ६ । (पर्य्यायान्तरं यथा,—
"मदनश्छर्द्दनः पिण्डो नटः पिण्डीतकस्तथा ।
करहाटो मरुवकः शल्यको विषपुष्पकः ॥")
खरपत्रतुलसी । तत्पर्य्यायः । समीरणः २ प्रस्थपुष्पः ३ फणिज्झकः ४ जम्बीरः ५ । इत्यमरः । २ । ४ । ७८ ॥ (एतत्पर्य्यायो यथा,—
"मरुवको मरुवको मरुबकोऽपि स्मृतः ।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
जम्बीरभेदः । इत्यमरटीकायां भरतः ॥ पुष्पवृक्षविशेषः । मरुयाफुल इति भाषा । तत्पर्य्यायः । शुक्लपुष्पः २ तिलकः ३ क्षुरकः ४ । क्षुपविशेषः । नागदाना इति भाषा । तत्पर्य्यायः । खरपत्रः २ गन्धपत्रः ३ । इति रत्नमाला ॥ व्याघ्रः । राहुः । भयानके, त्रि । इति जटाधरः ॥

मरुसम्भवं, क्ली, (मरुः सम्भव उत्पत्तिस्थानमस्य ।) चाणक्यमूलकम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् ।
शालमर्कटकं विप्रं शालेयं मरुसम्भवम् ॥
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका ।
नेपालमूलकञ्चान्यत् तद्भवेद्गजदन्तवत् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

मरुसम्भवा, स्त्री, (मरौ सम्भवो यस्याः । टाप् ।) महेन्द्रवारुणी । क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

मरुस्था, स्त्री, (मरौ तिष्ठतीति । स्था+कः । स्त्रियां टाप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

मरूकः, पुं, (म्रियते इवेति । मृ+"उलूकादयश्च ।" ... "मूकोकादयः ।" उणा० ४ । ४१ । इति ऊक । भयशीलत्वादस्य तथात्वम् ।) मृगविशेषः । इत्युणादिकोषः ॥ मयूरः । शटी । इति संक्षिप्तसारोणादिवृत्तिः ॥

मरूद्भवा, स्त्री, (मरौ धन्वप्रदेशे उद्भवतीति । उत्+भू+अच् । स्त्रियां टाप् ।) कार्पासी । यवासः । क्षुद्रखदिरः । इति राजनिर्घण्टः ॥

मरूलिः, पुं, (मरौ निर्ज्जलदेशे लीयते म्रियते इति । मरु+ली+इन् । पृषोदरादित्वात् साधुः ।) मकरः । यथा,—
"जलरूपस्तु मकरो मरूलिरसिदंष्ट्रकः ॥"
इति त्रिकाण्डशेषः ॥

मरूलिकः, पुं, (मरूलि+स्वार्थे कन् ।) मकरः । इति शब्दरत्नावली ॥

मर्क, सर्पे । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्कटः । इति दुर्गादासः ॥

मर्कः, पुं, (मर्चति चेष्टते इति । मर्च+"इण्भीकापाशल्यतिमर्चिभ्यः कन् ।" उणा० ३ । ४३ । इति कन् । यद्वा, मर्कति सर्पतीति । मर्क+अच् ।) देहः । वायुः । इत्युणादिकोषः ॥ (शुक्रपुत्रः । यथा, वाजसनेयसंहितायाम् । ७ । १६ ।
"उपयामगृहीतोऽसि मर्काय त्वा ॥"
"मर्कः शुक्रपुत्रोऽसुरपुरोहितः ।" इति तद्भाष्ये महीधरः ॥) वानरः । इति शब्दरत्नावली ॥ (यथा, श्रीमद्भागवते । १० । ८ । २९ ।
"मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भाण्डं भिनत्ति ॥"
"मर्कान् मर्कटान् ।" इति तट्टीकायां श्रीधरस्वामी ॥ त्रि, मार्ज्जयिता । यथा, ऋग्वेदे । १० । २७ । २० ।
"स्तरश्च मर्क उपरो बभूवान् ॥"
"मर्को मार्ज्जयिता ।" इति तद्भाष्ये सायनः ॥)

मर्ककः, पुं, (मर्क+इवार्थे संज्ञायां वा कन् ।) गलगण्डपक्षी । इति शब्दरत्नावली ॥ हाड़गिला इति भाषा ॥

मर्कटः, पुं, (मर्कति गच्छतीति । मर्क+"शकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) वानरः । इत्यमरः । २ । ५ । ३ ॥ (यथा, वाजसनेयसंहितायाम् । २४ । ३० ।
"यमाय कृष्णो मनुष्यराजाय मर्कटः ॥")
ऊर्णनाभः । (यथा आर्य्यासप्तशत्याम् । ३२२ ।
"अयमुदयस्थितवल्मिशः कर्कट इव मर्कटः पुरतः ॥"

"मर्कटी लूता ॥" इति तट्टीका ॥) स्थावरविष-भेदः । इति हेमचन्द्रः ॥ गवेगकपक्षी । इति त्रिकाण्डशेषः ॥ काड़गिल इति भाषा ॥

मर्कटकः, पुं, (मर्कट + स्वार्थे संज्ञायां वा कन् ।) वानरः । लूता । शस्यभेदः । इति मेदिनी । के, ७०८॥ (यथा, विष्णुपुराणे । १ । ६ । २५ ।
"श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ।
तथा वेणुयवाः प्रोक्तास्तद्वत् मर्कटका मुने ।॥")

मत्स्यभेदः । दैत्यः । इति शब्दरत्नावली ॥

मर्कटतिन्दुकः, पुं, (मर्कटप्रियस्तिन्दुकः । मध्य-पदलोपी कर्म्मधारयः ।) कुपीलुः । इति भावप्रकाशः ॥

मर्कटपिप्पली, स्त्री, (मर्कटस्य पिप्पलीव ।) अपामार्गः । इति राजनिर्घण्टः ॥ (विवरण-मस्या अपामार्गशब्दे ज्ञातव्यम् ॥)

मर्कटप्रियः, पुं, (मर्कटस्य प्रियः ।) क्षीरवृक्षः । इति शब्दमाला ॥

मर्कटवास', पुं, (मर्कटः ऊर्णनाभस्तस्य वासः आवासस्थानम् ।) लूतातन्तुः । माकड़शार-जाल इति भाषा ॥ तत्पर्य्यायः । आशावन्धः २ । इति शब्दरत्नावली ॥

मर्कटशीर्षं, स्त्री, (मर्कटस्य शीर्षमिव तद्वर्णत्वा-देवास्य तथात्वम् ।) हिङ्गुलम् । इति रत्न-माला ॥ (यथा, वैद्यकरत्नमालायाम् ।
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥")

मर्कटास्यं, स्त्री, (मर्कटस्य आस्यमिव तद्वर्णत्वा-देवास्य तथात्वम् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ ॥ (मर्कटस्यास्यम् ।) वानरमुखम् । (मर्कटस्यास्यमिवास्यं यस्य ।) वानरमुखे, त्रि ॥

मर्कटी, स्त्री, (मर्कति वायुवेगेन द्रुतस्तनो गच्छतीति । मर्क + अटन् । स्त्रियां ङीप् ।) कपिकच्छुः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कपिकच्छुरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजरा कण्डुरा चण्डा दुःस्पर्शा प्रावृषायणी ॥
जाङ्गली शूकशिम्बी च सैव प्रोक्ता मह-र्षिभिः ॥")

अपामार्गः । (यथा,—
"अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अजमोदा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ३३ । ५ ।
"कुक्कुटीं मर्कटीं शिम्बीमनन्ताञ्चापि धारयेत् ।
मांसमामं तथा पक्वं शोणितञ्च चतुष्पथे ॥")
करञ्जभेदः । इत्यमरः । २ । ४ । ८७ ॥ माकड़ा करञ्जा इति भाषा ॥ (यथास्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"उदकीर्य्यस्तृतीयोऽन्यः षड्ग्रन्था हस्तिवारुणी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ॥"
मर्कट + ङीष् ।) वानरी च ॥

मर्कटेन्दुः, पुं, (मर्कटे खगविशेषे इन्दुरिव ।) काकतिन्दुकवृक्षः । यथा,—
"काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके ।
मर्कटेन्दुः सिन्धुपुष्पो द्वावेतौ तत्र कीर्त्तितौ ॥"
इति शब्दचन्द्रिका ॥

मर्करः, स्त्री, (मर्कति गच्छतीति । मर्क + बाहुल कात् अरः ।) भृङ्गराजः । इति शब्दरत्नावली ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)

मर्करा, स्त्री, (मर्कर + स्त्रियां टाप् ।) दरी । भाण्डम् । सुरङ्गा । निष्कला स्त्री । इति विश्वः ॥

मर्च, क शब्दे । सौत्रोऽयं धातुः । इति कविकल्प द्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्य-वर्गप्रथमान्तः । मर्कः । इति दुर्गादासः ॥

मर्ज्जूः, स्त्री, (मृज्यते इति । मृज् शुद्धौ + "मृजेर्गुणश्च ।" उणा० १ । ८१ । इति ऊः । गुणश्च ।) शुद्धिः । इति मेदिनी । जे, १३ ॥

मर्ज्जूः पुं, (मार्ष्टि शोधयति वसनमिति । मृज् + ऊः ।) रजकः । इति हेमचन्द्रः ॥ पीठमर्द्दः । इति शब्दरत्नावली ॥

मर्त्तः, पुं, (म्रियतेऽसौ इति । मृ + "हसिमृग्रि-णिति ।" उणा० ३ । ८६ । इति तन् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, मार्कण्डेये । १०० । १८ ।
"पौर्णमास्याममावस्यां पर्व्वस्वन्येषु प्रस्तवः ।
ममैष संश्रुतो मर्त्तैर्भविता पापनाशनः ॥")
माणवकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (म्रियतेऽत्रेति । भूलोकः । इत्युज्ज्वलदत्तः । ३ । ८६ ॥)

मर्त्यः, पुं, (म्रियतेऽत्रेति । मर्त्तो भूलोकस्तत्र भवः । मर्त्त + यत् । यद्वा, मर्त्त एव यदित्यमर-टीकायां भरतः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । ७६ ।
"गृहे च गृहलक्ष्मीश्च मर्त्त्यानां गृहिणां तथा ॥")
मध्यमलोकः । इति जटाधरः ॥ (क्ली, शरीरम् । यथा, भागवते । ३ । ३३ । ३१ ।
"तस्यास्तद्योगविधुतमार्त्त्यं मर्त्त्यमभूत् सरित् ॥")

मर्द्दनं, क्ली, (मृद् + भावे ल्युट् ।) अङ्गमर्द्दनम् । गाटेपा इति भाषा ॥ तत्पर्य्यायः । संवाह-नम् २ । इत्यमरः ।३।२।२७॥ सम्वलम् ३ । इति शब्दरत्नावली ॥ (यथा, "यत् पुनर्बहिःस्पर्शना-श्रित्याभ्यङ्गस्वेदप्रदेहपरिषेकोन्मर्द्दनाद्यैरामयान् प्रमार्ष्टि तद्बहिः परिमार्ज्जनम् ॥" इति चरके सूत्रस्थाने ११ अध्यायः ॥) अस्य गुणाः । श्रम-हरत्वम् । निद्राशुक्रसुखप्रदत्वम् । मांसरक्त-त्वक्प्रसन्नकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ चूर्णनम् । इति मृदधात्वर्थदर्श नात् ॥ (कदनम् । यथा, भागवते । ३ । ४ । २ ।
"तेषां मैरेयदोषेण विषमीकृतचेतसाम् ।
निम्लोचति रवावासीत् वेणूनामिव मर्द्दनम् ॥"
मृद् + ल्युः । मर्द्दनकारके, त्रि । यथा, महा-भारते । १३ । १४ । ३७२ ।
"द्रष्टे चितिजसङ्घानां मर्द्दनं त्रिदशेश्वरम् ॥")

मर्द्दलः, पुं, (मर्द्दं मर्द्दनं लातीति । ला + कः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ ॥ मादल इति भाषा । तत्पर्य्यायः । मुरजः २ । इति शब्द-रत्नावली ॥ (यथा, महाभारते । ८ । ४४ । १६ ।
"मृदङ्गानकशङ्खानां मर्द्दलानाञ्च निस्वनैः ।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ॥")

मर्द्दितं, त्रि, (मृद् + कर्म्मणि क्तः ।) ग्रन्थितम् । इति विशेष्यनिघ्नवर्गटीकायां भरतः ॥ चूर्णि-तम् । यथा,—
"तिन्तिड़ीफलरसेन मर्द्दितो
रामबाण इति विश्रुतो रसः ॥"
इति भावप्रकाशः ॥

मर्ब्ब, गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्ब्बति । इति दुर्गादासः ॥

मर्म्म, [न्] क्ली, (मृ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) स्वरूपम् । तत्त्वम् । यथा, नैषधे । २ । ६ ।
"मृगया न विगीयते नृपै-
रपि धर्म्मागममर्म्मपारगैः ।
स्मरसुन्दर । मां यदत्यज
स्तव धर्म्मः सदयो दयोज्ज्वलः ॥"
सन्धिस्थानम् । इति लिङ्गादिसंग्रहे अमर-भरतौ ॥ जीवस्थानम् । इति राजनिर्घण्टः ॥*॥
अथ मर्म्माणि ।
"सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः ।
मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ॥
सप्तोत्तरं शतं सन्ति देहे मर्म्माणि देहिनाम् ।
तान्येकादश मांसे स्युरस्थ्यवस्थिष्ट सन्ति हि ॥
सन्धीनां विंशतिस्तानि स्नायूनां सप्तविंशतिः ।
चत्वारिंशत्तथैकञ्च शिरामर्म्माणि तत्र तु ॥
द्वाविंशतिः सक्थियुगे तावन्त्येव भुजद्वये ।
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्द्दश ॥
ग्रीवाया ऊर्द्ध्वभागे तु सप्तत्रिंशन्मतानि हि ॥
मर्म्माणि तानि सन्ति पञ्चधा भवन्ति ।
तान्याह ।
सद्यःप्राणहराणि स्युर्मर्म्माण्येकोनविंशतिः ।
मर्म्मदेशास्त्रयस्त्रिंशत् स्युः कालान्तरमारकाः ॥
चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
मर्म्माष्टकं रुजाकारि विशल्यघ्नं त्रिकं मतम् ॥
शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठसिरागुदम् ।
हृदयं वस्तिनाभ्यौ च सद्यो घ्नन्ति हतानि चेत् ॥
शृङ्गाटकानि घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां शिरामुखानां शिरसो मध्ये संयोगस्थानं तानि चत्वारि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि हतानि सन्ति सद्योमारकाणि । अधिपतिः । मस्तकस्याभ्यन्तरे सन्धिसिरयोः सन्निपात उपरिष्टाद्रोमावर्त्तः स एकः सन्धिमर्म्मेदं अर्द्धा-ङ्गुलप्रमाणं सद्योमारकम् । शङ्खौ भ्रुवोरन्तोपरि कर्णललाटमध्ये ते द्वे अस्थिमर्म्मणी अर्द्धा-ङ्गुले सद्योमारके । कण्ठशिराः मातृकाः ग्रीवाया उभयपार्श्वयोश्चतस्रश्चतस्रः शिराः अष्टौ शिरामर्म्माणि चतुरङ्गुलानि सद्योमार-

काणि। गुदं प्रविष्टमेकं मांसमर्म्म चतुरङ्गुलं सद्योमारकम्। हृदयं स्तनयोर्म्मध्यमामाशयद्वारमेकं शिरामर्म्म चतुरङ्गुलं सद्योमारकम्। वस्तिः नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसां मध्ये वस्तिस्तनुत्वक् एकद्वारो ह्यधोमुखः स्नायुःमर्म्मेदं चतुरङ्गुलं सद्योमारकम्। नाभिः प्रसिद्धा। शिरामर्म्मेदं चतुरङ्गुलं सद्योमारकम्॥

वक्षोमर्म्माणि सीमन्तास्तलक्षिप्रेन्द्रवस्तयः।
बृहत्यौ पार्श्वजौ सन्धी कटीकतरुणे च ये।
नितम्बाविति चैतानि कालान्तरहराणि तु॥

वक्षोमर्म्माणि स्तनमूलस्तनरोहितापलापापस्तम्भाः: स्तनमूले स्तनयोरधस्ताद्द्व्यङ्गुलं यावत् द्वे शिरामर्म्मणी द्व्यङ्गुले कफपूर्णकोष्ठतया कालान्तरमारके। स्तनरोहिते स्तनयोरुपरि द्व्यङ्गुलं यावत् द्वे मांसमर्म्मणी रक्तपूरितकोष्ठतया कालान्तरमारके। अपलापौ अंशकूटयोरधस्तात् पार्श्वयोरुपरि द्वौ शिरामर्म्मणी अर्द्धाङ्गुले रक्तेन पूयताङ्गते न कालान्तरमारके। अपस्तम्भौ उरस उभयतो नाड्यौ वातवहे शिरामर्म्मणी अर्द्धाङ्गुले वातपूर्णकोष्ठतया कासश्वासाभ्याञ्च कालान्तरमारके। सीमन्ताः शिरसि पञ्च सन्धयः सन्धिमर्म्माणि चतुरङ्गुलानि उन्मादभयचित्तविनाशैः कालान्तरमारकाणि। तलानि मध्याङ्गुलिमनुक्रम्य हस्तमध्यं तलं एवमपरस्य हस्तस्य पादयोश्च चत्वारि तलानि मांसमर्म्माण्यर्द्धाङ्गुलानि रुजाभिः कालान्तरमारकाणि। क्षिप्राणि अङ्गुष्ठाङ्गुल्योर्म्मध्यं क्षिप्रं तच्च हस्तयोर्द्वे पादयोर्द्वे एवञ्चत्वारि स्नायुमर्म्माण्यर्द्धाङ्गुलान्याक्षेपकेण कालान्तरमारकाणि। इन्द्रवस्तयः प्रकोष्ठयोर्म्मध्ये द्वे जङ्घयोर्म्मध्ये द्वे एवं चत्वारि मांसमर्म्माणि द्व्यङ्गुलानि शोणितक्षयेण कालान्तरमारकाणि। बृहत्यौ स्तनमूलादुभयतः पृष्ठवंशं यावत् शिरामर्म्मणी अर्द्धाङ्गुले शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैः कालान्तरमारके। पार्श्वसन्धी जघनपार्श्वयोः सन्धी शिरामर्म्मणी अर्द्धाङ्गुले शोणितपूर्णकोष्ठतया कालान्तरमारके। कटीकतरुणे त्रिकसन्निधाने उभयतः श्रोणिकाण्डं लग्नोत्क्षयास्थिनी अस्थिमर्म्मणी अर्द्धाङ्गुले शोणितक्षयात् पाण्डुविवर्णरूपं कृत्वा कालान्तरमारके। नितम्बौ प्रसिद्धौ। द्वे अस्थिमर्म्मणी अर्द्धाङ्गुले अधःकायशोषेण दौर्ब्बल्येन च कालान्तरमारके॥ * ॥

लोहिताक्षाणिजान्वूर्वीकूर्च्चाविटपकूर्परा:।
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके॥
अंसांसफलकापाङ्गा नीले मन्ये फणौ तथा।
वैकल्यकारकाण्याहुरावर्त्तौ द्वौ तथैव च॥

लोहिताक्षाणि ऊर्व्वोरूर्द्ध्वमधोवङ्क्षणसन्धेर्लोहिताक्षं तच्च द्वे बाह्वोर्द्वे ऊर्व्वोरेवं तानि चत्वारि शिरामर्म्माण्यर्द्धाङ्गुलानि वैकल्यकारकाणि तत्र शोणितक्षयेण पक्षाघातः सक्थिशोषो वा। जानुनः जङ्घोरुभयोः पार्श्वयोस्त्र्यङ्गुला एकस्मिन् जानुनि द्वे अपरस्मिन् द्वे एवं चतस्रः स्नायुमर्म्माण्यर्द्धाङ्गुला वैकल्यकर्य्यः तत्र शोथाभिवृद्धिः सक्थिस्तम्भश्च। जानुनी जङ्घोर्व्वोः सन्धी सन्धिमर्म्मणी त्र्यङ्गुले वैकल्यकरे। तत्र खञ्जता। ऊर्व्व्यः द्वे ऊर्व्वोर्म्मध्ये द्वे प्रगण्डयोर्म्मध्ये एवं चतस्रः शिरामर्म्माण्येकाङ्गुला वैकल्यकर्य्यः तत्र शोणितक्षयात् सक्थिशोषः। कूर्च्चाः पादयोरङ्गुष्ठाङ्गुल्योर्म्मध्ये तयोरूर्द्ध्वमधश्च एवं चत्वारः। स्नायुमर्म्माणि वैकल्यकराणि तत्र पादयोर्भ्रमणवेपनं भवतः। विटपे द्वे वङ्क्षणवृषणयोर्म्मध्ये स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र षाण्ड्यमल्पशुक्रता वा। कूर्परौ कफोणी तौ द्वौ सन्धिमर्म्मणी त्र्यङ्गुलौ वैकल्यकरौ तत्र बाहुमध्ये सङ्कोचः। कुकुन्दरे नितम्बकूपके द्वे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च। कक्षधरे वक्षःकक्षयोर्म्मध्ये द्वे स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र पक्षाघातः। विधुरे कर्णपृष्ठतोऽधःसंश्रिते किञ्चिन्निम्नाकारे द्वे स्नायुमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र वाधिर्य्यम्। कृकाटिके शिरोग्रीवयोरुभयतः सन्धी द्वे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र शिरःकम्पः। अंसौ स्कन्धौ स्नायुमर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्र बाहुस्तम्भः। अंसफलके पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बन्धे ग्रीवाया अंसद्वयस्य च संयोगो यत्र तत्त्रिकं अस्थिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाह्वोः शून्यता शोषश्च। अपाङ्गौ नेत्रयोरन्तौ शिरामर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्रान्ध्यं दृष्ट्युपघातो वा। नीले मन्ये च कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे मन्ये तत्र एका नीला एका मन्या एकस्मिन् पार्श्वे। अन्या मन्या अन्या नीला अपरस्मिन् पार्श्वे। द्वे द्वे शिरामर्म्मणी द्व्यङ्गुले द्व्यङ्गुले वैकल्यकरे तत्र मूकता विकृतस्वरता रसाग्राहिता च। फणौ घ्राणमार्गमुभयतः अभ्यन्तरे शिरामर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र गन्धाज्ञानम्। आवर्त्तौ भ्रुवोरुपरि निम्नयोः सन्धिमर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्राप्यान्ध्यं दृष्ट्युपघातो वा॥ * ॥

गुल्फौ द्वौ मणिबन्धौ द्वौ तथा कूर्च्चशिरांसि च।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान्॥

गुल्फौ घुटिके सन्धिमर्म्मणी द्व्यङ्गुलौ रुजाकरौ तत्र रुजा पादस्तम्भः खञ्जता वा। मणिबन्धौ हस्तप्रकोष्ठसन्धौ सन्धिमर्म्मणी द्व्यङ्गुलौ रुजाकरौ तत्र हस्तयोः क्रियाराहित्यम्। कूर्च्चशिरांसि गुल्फसन्धेरध उभयतः एकस्मिन् पादे द्वे द्वे च द्वितीये एवं चत्वारि स्नायुमर्म्माण्येकाङ्गुलानि रुजाकराणि तत्र रुजा शोफश्च॥ * ॥ विशल्यघ्नानि।

उत्क्षेपौ स्थपनी चैव विशल्यघ्नं त्रिकं मतम्।

उत्क्षेपौ शङ्खयोरुपरि केशान् यावत् स्नायुमर्म्मणी अर्द्धाङ्गुलौ तयोर्विद्धयोः सशल्यो जीवेत् पाकात् पतितशल्यो वा उद्धृतशल्यस्तु म्रियेत अतएव विशल्यस्तुहृतशल्यं हन्तीति विशल्यघ्नं मर्म्म। स्थपनी एका भ्रुवोर्म्मध्ये शिरामर्म्मेदमर्द्धाङ्गुलं विशल्यघ्नम्।

सप्तरात्रान्तरे हन्युः सद्यः प्राणहराणि हि।
कालान्तरप्राणहरं पक्षे मासे च मारकम्॥
सद्यःप्राणहरं चान्ते विद्धं कालेन मारयेत्।
कालान्तरप्राणहरमन्ते विद्धन्तु दुःखदम्॥

अन्ते मर्म्मसमीपे।

मर्म्माण्यधिष्ठाय हि ये विकारा
मूर्च्छन्ति काये विविधा नराणाम्।
प्रायेण ते कृच्छ्रतमा भवन्ति
वैद्येन यत्नैरपि साध्यमानाः॥"

इति भावप्रकाशः॥ * ॥

मर्म्मस्पर्शनिषेधो यथा,—

"परक्षेत्रे गां चरन्तीं न चाचक्षीत कस्यचित्।
न संवसेत् सूतके च न कं वै मर्म्मणि स्पृशेत्॥"

इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥

("सप्तोत्तरं मर्म्मशतम्। तानि मर्म्माणि पञ्चात्मकानि। तद्यथा मांसमर्म्माणि। शिरामर्म्माणि। स्नायुमर्म्माणि। अस्थिमर्म्माणि। सन्धिमर्म्माणि चेति। न खलु मांसशिरास्नाय्वस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते॥ तत्रैकादशमांसमर्म्माणि। एकचत्वारिंशत्शिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सप्तोत्तरं मर्म्मशतम्॥" इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये॥)

मर्म्मकीलः, पुं, (मर्म्म कीलति विध्यतीति। कील + कः। यद्वा, मर्म्मणि गूढ़विषये कीलः शङ्कुरिव।) भर्त्ता। इति जटाधरः॥

मर्म्मज्ञः, त्रि, (मर्म्म तत्त्वं जानातीति। ज्ञा + कः।) मर्म्मवित्। तत्त्वज्ञः। मर्म्म स्वरूपं सन्धिस्थानं वा तज्जानाति यः सः॥ (यथा, महाभारते। ७। ३५। २०।
"तेषामापततां वीरः शीघ्रं पूर्व्वमथो दृढ़म्।
क्षिप्रास्त्रो न्यवधीद्व्रातान्मर्म्मज्ञो मर्म्मभेदिभिः॥")

मर्म्मरः, पुं, (मर्म्म तत्त्वं मर्म्मव्यक्तशब्दं वा रातीति। रा + कः।) वस्त्रस्य पत्रस्य च ध्वनिः। इत्यमरः। १। ७। २३॥ मड़मड़ शब्द इति भाषा॥ (यथा, रघुवंशे। ४।५६।
"अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः।
मर्म्मरः पवनोद्धूतराजतालीवनध्वनिः॥")

मर्म्मरी, स्त्री, (मर्म्मर + गौरादित्वात् ङीष्।) पीतदारु। दारुहरिद्रा इति ख्याता। इति मेदिनी। रे, २०॥

मर्म्मरीकः, पुं, (म्रियत इवासाविति। मृ + "फर्फरीकादयश्च।" उणा० ४। २०। इति ईकन् प्रत्ययेन निपातनात् साधुः।) दीनः। इत्युणादिकोषः॥

मर्म्मवित्, [द्] पुं, (मर्म्म वेत्तीति । विद् + क्विप् ।) मर्म्मज्ञः । तत्पर्य्यायः । कार्पटिकः २ । इति त्रिकाण्डशेषः ॥ मर्म्मिकः ३ मर्म्मवेदी ४ । इति जटाधरः ॥ (यथा, कथासरित्सागरे । ६३ । ८० ।
"वक्रनासस्ततोऽवादीदस्त्योऽयं परमर्म्मवित् ॥")

मर्म्मवेदी, [न्] पुं, (मर्म्म वेत्तीति । विद् + णिनिः ।) मर्म्मवित् । तत्त्वज्ञः । इति जटाधरः ॥

मर्म्मस्पृक् [श्] त्रि, (मर्म्म स्पृशतीति । स्पृश् + "स्पृशोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मर्म्मपीडकः । तत्पर्य्यायः । अरुन्तुदः २ । इत्यमरः । ३ । १ । ८३ ॥ व्यथकः ३ । इति हेमचन्द्रः । ६ । १६५ ॥

मर्म्माविध्, मर्म्माविद् [ध्] त्रि (मर्म्म विध्यतीति । मर्म्म + व्यध + क्विप् । "ग्रहिज्येति ।" ६ । १ । १६ । इति सम्प्रसारणम् । "नहि-वृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६।३।११६ । इति दीर्घत्वम् ।) सन्धिस्थानवेधकर्त्ता । मर्म्मज्ञः । यथा, भट्टिकाव्ये । ५ । ५८ ।
"चिरं क्लिशित्वा मर्म्माविदामो विलुभितप्लवम् ।
शब्दायमानमव्यक्तोऽह्वयदं चक्रदारुणम् ॥"
"मर्म्माणि विध्यतीति क्विप् जिः वीरुद्धो घट-कावित्ति दीर्घनिर्द्देशान् क्वचित् क्विबन्ते पूर्व्व-पदर्दीर्घत्वं स्यादिति सूचितं आड्पूर्व्वस्य रूपं वा मर्म्माविन् मर्म्मज्ञो वा वेत्ति रूपम् ।" इति तट्टीकायां भरतः ॥

मर्म्मिकः, त्रि, (मर्म्म वेत्तीति । मर्म्म + ठक् ।) मर्म्मवित् । इति जटाधरः ॥

मर्य्या, स्त्री, (म्रियतेऽवधिर्य्यत्रेति । मृ + यत् । टाप् ।) सीमा । इति मर्य्यादाशब्दट्टीकायां रायमुकुटः ॥

मर्य्यादकः, त्रि, मर्य्यादाकर्त्ता । मर्य्यादां करोतीति कर्त्तरि ण्वुः कादिति कप्रत्यये ऽकः स्वो चेतु वेति आकारस्य ह्रस्वे निष्पन्नोऽयं शब्दः ॥

मर्य्यादा, स्त्री, (मर्य्या + दा + अङ् । न्यायपथ-स्थितिः । (यथा, महाभारते । १५ । २२ । ७५ ।
"मर्य्यादायां स्थितो धर्म्मः शमश्चैवास्य लक्षणम् ॥")
तत्पर्य्यायः । संस्था २ धारणा ३ स्थितिः ४ । इत्यमरः । २ । ८ । २६ ॥ "मर्य्यादीयते मर्य्यादा मर्य्याङ्पूर्व्वात् दाञो ङः निपातनात् यस्य मः ।" इति तट्टीकायां भरतः ॥ "मर्य्येति सीमार्थे अव्ययं तत्र दीयते मर्य्यादेति स्वामी ।" इति रायमुकुटः ॥ "म्रियन्तेऽत्रेति मर्य्या तां ददातीति मर्य्यादा ।" इति सारसुन्दरी ॥ सीमा । इति जटाधरः ॥
कूलम् । इति हेमचन्द्रः । ४ । १४३ ॥ (यथा, प्रबोधचन्द्रोदये । १ । ६ ।
"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः ।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः ॥"
देवातिथिः पर्त्नी । यथा, महाभारते । १ । ६५ । २३ । [नाम ॥")
"देवातिथिः खलु वैदेहीमुपयेमे मर्य्यादां

मर्य्यादागिरिः पुं. (मर्य्यादा सीमा तज्ज्ञापको गिरिः ।) कुलाचलः । वर्षसीमापर्व्वतः । यथा ।
"उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादा-गिरयः प्रागायताः । उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्व-स्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति । एवं दक्षिणेनेलावृतं निषधो हेम-कूटो हिमालय इति प्रागायता यथा नीला-दयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुष-भारतानां यथासंख्यम् । तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ।" इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥

मर्व्व, पूर्त्तौ । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) मर्व्वति पयसा कुम्भं चेटी । इति दुर्गादासः ॥

मर्ष, पुं, क्षान्तिः । मृषधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥ (यथा, किरातार्ज्जुनीये । १ । ३३ ।
"अ-मर्षशून्येन जनस्य जन्तुना
न जातहार्द्देन न विद्विषादरः ॥")

मर्षणं, क्ली, (मृष + ल्युट्) क्षमा । मृषधातो-र्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (धर्षणम् । यथा, महाभारते । ३ । ३१३ । २८ ।
"न चाप्यधर्म्मं न सुहृद्विभेदने
परस्वहारे परदारमर्षणे ।
कदर्य्यभावे च रमेन्मनः सदा
नृणां सदाख्यानमिदं विजानताम् ॥"
मर्षयतीति । मृष + णिच् + ल्युः । मर्षक. त्रि । यथा, श्रीमद्भागवते । ४ । ७ । ५८ ।
"इदं पवित्रं परमीशचेष्टितं
यशस्यमायुष्यमघौघमर्षणम् ॥")

मर्षितः, त्रि, क्षमायुक्तः । क्षान्तिविशिष्टः । मृष धातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः ॥ (यथा, श्रीमद्भागवते । १ । ७ । ५१ ।
"तन्नाह्वामर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः । न भर्त्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा ॥")
भावे क्त, क्ली । (मर्षणम् ॥)

मर्षितवान्, त्रि, क्षान्तः । मृषधातोः कर्त्तरि क्तवतुप्रत्ययेन निष्पन्नः ॥

मल, ङ धृतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट् ।) ङ मलते । इति दुर्गादासः ॥

मलः, पुं, क्ली, (मृज्यते शोध्यते इति । मृज + "मृजेष्टिलोपश्च ।" उणा० १ । १०६ । इति अलच् टिलोपश्च । यद्वा, मलते धारयति व्याध्यादिदौर्गन्ध्यमिति । मल + अच् ।) पापम् । (यथा,मनुः । २ । १०२ ।
"पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ॥"
"दिवार्ज्जितं पापं निहन्ति ।" इति तट्टीकायां कुल्लूकभट्टः ॥ ॥) विट् । (यथा, मनुः । ४ । २२० ।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥"
"विष्ठा मलमेकमेव च ।" इति तट्टीकायां मेधा-तिथिः ॥) किट्टम् । इत्यमरः । २ । ६ । ६५ ॥
(यथा, अभिज्ञानशकुन्तले । ६ ।
"छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥")
"पापं किल्विषम् । विट् । विष्ठा । किट्टं कलङ्को मण्डूरादि स्वेदादि च एषु मलः ।
'वसा शुक्रमसृङ्मज्जा मूत्रं विट्कर्णविण्नखाः ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ॥'
इति स्मृतिः ।" इति तट्टीकायां भरतः ॥ कर्पूरम् । इति शब्दचन्द्रिका ॥ वातपित्तकफाः । यथा,—
"सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥"
इति माधवकरः ॥
(पारिभाषिकमलं यथा, महाभारते । ८ । ४५ । २३ ।
"ब्राह्मणस्य मलं भैक्ष्यं ब्राह्मणस्यान्नं मलम् ।
मलं पृथिव्या वाह्लीकाः स्त्रीणां मद्रस्त्रियो मलम् ॥")

मलघ्नः, पुं, (मलं हन्तीति । हन + टक् ।) शाल्मली कन्दः । इति राजनिर्घण्टः ॥ मलनाशके, त्रि ॥

मलघ्नी, स्त्री, (मलघ्न + स्त्रियां ङीष् ।) नाग-दमनी । इति राजनिर्घण्टः ॥

मलजं, क्ली, (मलाज्जायते इति । जन् + डः ।) पूयः । इति शब्दचन्द्रिका ॥ मलोद्भवे, त्रि ॥

मलदूषितं, त्रि, (मलेन दूषितम् ।) मलिनम् । इत्यमरः । ३ । १ । ५५ ॥

मलद्रावी, [न्] पुं, (मलं विष्ठां द्रावयति चाल-यतीति । द्रु + णिच् + णिनिः ।) जयपालः । इति राजनिर्घण्टः ॥

मलनं, क्ली, (मल्यते मर्द्यते इति । मल + ल्युट् ।) मर्द्दनम् । इति मेदिनी । ने, १०४ ॥

मलनः, पुं, (मलते धारयति हस्तिनापौ । मल धृतौ + ल्युः ।) पटवासः । इति मेदिनी । ने, १०४ । ताँबु इति भाषा ॥

मलपूः, स्त्री, (मलात् पापात् पुनातीति । पू + क्विप् ।) काकोडुम्बरिका । इत्यमरः । २ । ४ । ६१ ॥ (यथा, भावप्रकाशे ।
"विभीतकत्वं मलपूजटानां
क्वाथेन स्नात्वा गुडसंयुतेन ॥")

मलभुक्, [ज्] पुं, (मलं भुङ्क्ते इति । भुज् + क्विप् ।) काकः । इति शब्दरत्नावली ॥

मलभेदिनी, स्त्री, (मलं भिनत्तीति । भिद् + णिनिः । स्त्रियां ङीप् ।) कटुका । इति राज-निर्घण्टः ॥

मलमासः, पुं, (मलो मलिनश्चासौ मासश्चेति कर्म्मधारयः ।) अधिकमासः । तत्पर्य्यायः ।

मलिम्लुच: २ अधिमास: ३ असंक्रान्तमास: ४ नपुंसक: ५ । तस्य लक्षणं यथा । रविसंक्रान्त्य-भावविशिष्टचान्द्रमासत्वं मलमासत्वम् । इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कार: ॥ अपि च । ज्योतिषे ।

"अमावस्याद्वयं यत्र रविसंक्रान्तिवर्ज्जितम् ।
मलमास: स विज्ञेयो विष्णु: स्वपिति कर्कटे ॥

अमावस्याद्वयम् अमावस्याद्वयान्तचान्द्रद्वयम् । रविसंक्रान्तिभ्यां रविक्रियोत्पत्तिरूपोत्तर संयोगरूपाभ्यां यथाक्रमं वर्ज्जितं तेन दर्श-द्वयान्तचान्द्रद्वयपूर्व्वापरयोरेव रवे: क्रियोत्प त्त्युत्तरसंयोगाभ्यां यथाक्रमं योगेनाधिमास: । संक्रान्तेरेकक्षणे क्रियोत्पत्तिरपरक्षणे पूर्व्व-संयोगनाश: उत्तरसंयोगोत्पत्तिश्चेति क्षणद्वय-वृत्तित्वमिति मीमांसकसिद्धान्तात् । ब्रह्मपरि-शिष्टज्योति:पराशरौ ।

रविणा लङ्घितो मासश्चान्द्र: ख्यातो मलि-
म्लुच: ।
तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत् ॥

पराशर: ।

पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात् सितासिते ।
तदा तन्मासविहितमुत्तरे मासि कारयेत् ॥

अत्र लङ्घनमसंक्रमणञ्च रवेस्तदा भवति यदा तन्मासतत्पूर्व्वमासान्तक्षणयोरेकराश्यवस्थितस्य रवेस्तन्मासान्तरमेव राश्यन्तरसंयोग: नत्वेक-राशिस्थितस्य मासव्यापनमात्रं तथात्वे चतु-र्द्दश्यामेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणे-ऽपरराशौ तत्परराशौ च द्वितीयायां प्रतिपदि वा रवे: संयोगेऽपरस्यापि मलमासता स्यात् अतएव ज्योतिषे ।

अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्ज्जितम् ।
मलमासं विजानीयाद्गर्हितं सर्व्वकर्म्मसु ॥
तस्यार्को दर्शकक्ष्यैकराशौ दर्शद्वयातिग: ॥
अत्रैकराशिस्थस्यार्कस्य दर्शद्वयातिगत्वमुक्तम् ॥

एतच्च पूर्व्वापरदर्शान्तयोर्मासयो: पूर्व्वस्यैव सम्भ-वति न परस्य ॥*॥ मलमासकारणन्तु ज्योतिषे ।

दिवसस्य हरत्यर्क: षष्टिभागमृतौ तत: ।
करोत्येकमहश्छेदं तथैवैकञ्च चन्द्रमा: ॥
एवमर्द्धतृतीयानामब्दानामधिमासकम् ।
ग्रीष्मे जनयत: पूर्व्वं पञ्चाब्दान्ते तु पश्चिमम् ॥

तेन दिवसस्य तिथे: षष्टिभागं दण्डमेकं रवि हरति छेदयति उत्तरे छेदमित्यभिधानात् । ततश्च ऋतौ मासद्वये षष्टिदण्डोच्छेदादह-स्तिथिच्छेदमाकर्षणं करोति । एवं चन्द्रोऽपि । एवमुक्तक्रमेण वर्षे द्वादशतिथ्यात्मककाला कर्षा-दर्द्धतृतीयानामब्दानामन्ते अर्द्धं तृतीयं येषां ते तथा ग्रीष्मे माधवादिषट्के पूर्व्वं माधवादि-त्रिकपतितं पञ्चाब्दान्ते तु पश्चिमं श्रावणादि-त्रिकपतितं मलमासं चन्द्रार्कौ जनयत: । ग्रीष्मे माधवादिषट्के इति यदुक्तं तत् व्यक्तमाह मिहिर: ।

माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढ: स विज्ञेय: शेते तु श्रावणेऽच्युत: ॥

द्विराषाढो द्विराषाढादि: । श्रावणे सौर-श्रावणे । तथा च ज्योतिषे ।

मिथुनस्थो यदा भानुरमावस्याद्वयं स्पृशेत् ।
द्विराषाढ: स विज्ञेय: विष्णु: स्वपिति कर्कटे ॥

अमावस्याद्वयं तदन्तचान्द्रद्वयं स्पृशेत् संयुज्यात् न तन्मध्ये राश्यन्तरसंयोग इत्यर्थ: ॥ * ॥ ननु कर्कटादित्रिके अधिमासपाते तत्पूर्व्वं मिथुन एव हरिशयनं तत् कथं माधवादिषट्कमासे कर्कटे तत् । तत्राह राजमार्त्तण्ड: ।

कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत् ।
आगामिनि तदा वर्षे कुलीरे माधव: स्वपेत् ॥

माधवादित्रिकश्रावणादित्रिकाधिमासविवेचन-मप्येतदर्थम् । इदन्तु सार्द्धवर्षद्वयाधिमासपात-मौचित्यक्रमादुक्तं क्वचित्तिथीनां ह्रासवाहुल्येन दण्डमध्याधिकन्यूनदर्शनादुक्तकालन्यूनाधिकका लेऽपि मलमासो भवतीति समयप्रकाशकृत् वस्तुतस्तु वैपरीत्यं यतो न्यूनदण्डतिथे: प्रायि-कत्वे तत्र तिथिचयस्य झटित्युपलभ्यमानत्वात् स्वल्पकालेन तिथ्यन्तरसम्बन्धात् शीघ्रं रवि-लङ्घनप्रतीते: शीघ्रमेव मलमासो भवतीति अधिकदण्डतिथे: प्रायिकत्वे तत्र तिथिचयस्य झटित्यनुपलभ्यमानत्वेनाधिकेनैव कालेन तिथ्य-न्तरसम्बन्धात् विलम्बेनैव रविलङ्घनप्रतीतेश्चिरे-णैव मलमासो भवतीति । तथा च विष्णु-धर्म्मोत्तरम् ।

सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ।
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन । ॥
समाद्वये साष्टमासे तत्राप्यासोऽतिरिच्यते ।
स चाधिमासक: प्रोक्त: काम्यकर्म्मसु गर्हित: ॥

इदन्तु नियतमेकस्मादधिमासात्तृतीयाब्दे अधि-मासान्तरमिति । यद्यपि ।

यां तिथिं समनुप्राप्य तुलां गच्छति भास्कर: ।
तयैव सर्व्वसंक्रान्तिर्यावन्मेषं न गच्छति ॥

इति राजमार्त्तण्डवचनात्तुलादिषण्मासे तिथि-वृद्ध्यभावाद्वर्षे द्वादशतिथिवृद्धिरनुपपन्ना-तथापि ।

मध्ये विषुवतोर्भानुर्याव्यहानि तु वर्द्धयेत् ।
तै: सम्भृयाधिको मास: पतत्येव त्रयोदश: ॥

इति ब्रह्मपरिशिष्टवाक्ये विषुवतोर्मेषतुलासं-क्रान्त्योर्मध्ये मेषादिषण्मास एव तिथिवृद्धि रुक्ता । अहर्गणे मेषादिषण्मासे मन्दभुक्त्या सप्तदिनवृद्धिस्तुलादौ शीघ्रभुक्त्या दिनद्वयह्रास इति । तथा च ज्योति:शास्त्रम् ।

मेषादीनामहर्वृन्दं मध्यां सप्ताष्टचक्रकम् ।
तुलादीनामष्टसप्तचक्रकन्तु लिखेत् पृथक् ॥

चक्र एक: । अङ्कस्य वामा गतिरित्यङ्कविदां समयात् व्युत्क्रमेण अङ्का बोध्या: । तेन दिन-वृद्धिक्रमसक्षयाभ्यां मेषादिषट्क एव एका-दशादितिथिवृद्धि: । एवञ्च ।

गतेऽब्दद्वितये सार्द्धे पञ्चपक्षे दिनद्वये ।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासक: ॥

इति राजमार्त्तण्डोक्त: सप्तदशदिनाधिकाष्ट-मासाधिकवर्षद्वये अधिमास: । स सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासलङ्घनासम्भवात् सावनमानेन ज्ञेय: । तथा च विष्णुधर्म्मोत्तर प्रथमकाण्डम् ।

सौरेणाब्दस्तु मानेन यदा भवति भार्गव । ।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते ॥

सौरसंवत्सरे दिनषट्काधिक: सावनसंवत्सरो भवतीति । सौरमासाष्टकाधिकवर्षद्वये सप्तदश दिनानि वर्द्धन्ते सावनक्रमेणेति पूर्व्वोक्तविष्णु-धर्म्मोत्तरोक्तसमानविषयतास्येति ॥" "ज्योतिषे ।

दशानां फाल्गुनादीनां प्रायो माघस्य च
क्वचित् ।
नपुंसकत्वं भवति न पौषस्य कदाचन ॥

नपुंसकत्वं मलमासत्वम् । तथा चोक्तम् ।

असंक्रान्तो हि यो मास: कदाचित्तिथि-
वृद्धित: ।
कालान्तरात् समायाति स नपुंसक इष्यते ॥

शाकिल्योऽपि ।

प्रायशो न शुभ: सौम्यो ज्यैष्ठाषाढकस्तथा ।
मध्यमौ चैत्रवैशाखावधिकोऽन्य: सुभिक्षकृत् ॥
सौम्यो मार्गशीर्ष: । अधिकोऽधिमास: ॥"*॥

"तदयं संक्षेप: । शुक्लप्रतिपदादिरमावास्यान्तो रविलङ्घितो मासो मलमास: । स च माधवादौ औत्सर्गिक: कदाचित् कार्त्तिकादावपि । अयञ्चा-निष्टकृत् माधवादि कार्त्तिकादिषट्कयोरपि तल्लक्षणयोगे माधवादावेव तुलादिषट्क एवो-भयमासे तल्लक्षणयोगे पूर्व्व एव । आश्विन-वैशाखयोस्तल्लक्षणयोगे पर एव मलमास: तद्भिन्नस्तु भानुलङ्घित: । मलमासे आषाढा-दीहितम् । भानुलङ्घिते तु नैतदिति विस्तर: ॥*॥ मलमासे निषिद्धानि यथा, काठकगृह्यम् ।

चूडां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यञ्च न कुर्य्यादधिमासके ॥
चूडां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यञ्च न कुर्य्याद्भानु-
लङ्घिते ॥

महालयं कन्यार्कश्राद्धम् । भीमपराक्रमेऽपि ।

अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते
मासि ।
चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहञ्च ॥

दिनपाते दिनक्षये ।

अधिमासे विवाहं यात्रां चूडां तथोपनय-
नादि ।
कुर्य्यान्न सावकाशं माङ्गल्यं न तु विशेषे-
ण्याम् ॥ इति ॥

अत्र विवाहादिकीर्त्तनं निरवकाशत्वेऽपि निषे-धार्थम् । अन्यथा सावकाशमित्यनेनैव सिद्धे: । सावकाशञ्च सम्भवत्कालान्तरं कर्म्म अतो निरवकाशस्यानन्यगतिकस्य प्रतिप्रसवोऽर्थात् सूचित: । तथा च मलमासाधिकारे काठक-गृह्यम् ।

कालेऽनन्यगतिं नित्यां कुर्य्यान्नैमित्तिकीं
क्रियाम् ॥”
इति मलमासतत्त्वम् ॥*॥

अपि च।
“अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च।
देवव्रतवृषोत्सर्गचूडाकरणमेखलाः।
माङ्गल्यमभिषेकञ्च मलमासे विवर्ज्जयेत् ॥”
इति गारुडे १२८ अध्यायः ॥*॥

अथ मलमासकर्त्तव्यव्रतादि। “चातुर्मास्यव्रतमाषाढ़ाद्युल्लेखेन विहितं तदप्यारब्धं श्रावणादिमलमासेऽपि कर्त्तव्यं आषाढ़ादिप्रतिदिनकर्त्तव्यत्वेन निरवकाशत्वात्।
‘षष्ठ्या तु दिवसैर्मासः कथितो बादरायणैः ॥’
इति ज्योतिःशास्त्रे पितामहेन एकमासत्वाभिधानाच्च। यच्च।
‘संवत्सरन्तु यः पूर्णमेकभक्तेन तिष्ठति।’
इत्यादौ माघाद्युल्लिखितसंवत्सरव्रतमारब्धं तन्मलमासेऽपि कर्त्तव्यम्।
‘क्वचित्त्रयोदश मासाः संवत्सर इति श्रुतेः ॥’
यच्च प्रतिमासविहितं न माघाद्युल्लेखेन तन्मलमासेऽपि कर्त्तव्यम्। तथा च रम्भातृतीयाव्रतं शिवरहस्यम्।
‘मासे मलिम्लुचेऽप्येव यजेद्देवीं सशङ्कराम्।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान् शिवः ॥’
उद्यापनं प्रतिष्ठा। व्रतारम्भोऽपि निषिद्धः। पूर्व्वोक्तकाशीखण्डवचनात्। ज्यैष्ठादिमासविशेषविहितं सावित्रीव्रतादिकन्तु सावकाशत्वान्मलमासे न कार्य्यम्। किन्तु प्रशस्त एव ज्यैष्ठादौ कर्त्तव्यमिति। बृहस्पतिः।
‘नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥’
नित्यमहरहः पुरश्चारविहितं स्नानसन्ध्यापञ्चमहायज्ञादि काम्यमपि तथाविधं संकल्पितं यत्किञ्चिद्द्रव्यदानशिवपूजादि। यत्तं भविष्ये।
‘कुर्य्यात् प्रात्यहिकं कर्म्म प्रयतः सन् मलिम्लुचे।
नैमित्तिकञ्च कुर्व्वीत सावकाशं न यद्भवेत् ॥’
कालमाधवीये मत्स्यपुराणम्।
‘वर्षे चाहरहः श्राद्धं दानञ्च प्रतिवासरम्।
गोभूतिलहिरण्यानां मासेऽसि स्यान्मलिम्लुचे ॥’
काठकगृह्यपरिशिष्टम्।
‘प्रवृत्तं मलमासात् प्राक् यत् कर्म्म न समापितम्।
आगते मलमासेऽपि तत् समाप्यमसंशयम् ॥’
ब्रह्मसिद्धान्ते।
‘आरब्धं कर्म्म यत्किञ्चित्तत्कार्य्यं हि मलिम्लुचे ॥’
नैमित्तिकं माससंवत्सरदिवसादिविशेषनियमशून्यावश्यकर्त्तव्यकादाचित्कनिमित्तोत्पन्नम् ॥
जातकर्म्माद्यपि मलमासे कार्य्यम्।
‘जातकर्म्मान्त्यकर्म्माणि नवश्राद्धं तथैव च।
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोड़श ॥
चन्द्रसूर्य्यग्रहे स्नानं दानश्राद्धक्रियादिकम्।
कार्य्यं तन्मलमासेऽपि नित्यं नैमित्तिकं तथा ॥’
स्मृतिः।
‘श्राद्धजातकनामानि ये च संस्कारमाश्रिताः।
मलिम्लुचेऽपि कर्त्तव्याः काम्या इष्टीश्च वर्ज्जयेत् ॥’
संस्कारा अन्नप्राशननिष्क्रमणादयः। इति माधवाचार्य्यः। अन्त्यकर्म्माणि वहनदहनोदकदानपिण्डदानास्थिसञ्चयादीनि। नवश्राद्धम्।
‘चतुर्थे पञ्चमे चैव नवमैकादशे तथा।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥’
इति यमोक्तम् ॥
अत्र चतुर्थाहादिग्रहणं मरणादिनावधीति। बालग्रहभूतग्रहनराधिपप्रबलशत्रुदुःसहरोगाभिभवाद्भुतदुःस्वप्नग्रहदौस्थ्यादिनिमित्तं शान्तिकर्म्मापि मलमासेऽपि कर्त्तव्यम्। विष्णुना शान्तिस्वस्त्ययनैर्दैवोपघातान् शमयेत् परचक्रोपघातांश्च इत्युक्तम्।” इति मलमासतत्त्वम् ॥

मलयः, पुं, (मलते धरति चन्दनादिकमिति। मल्+“वलिमलितनिभ्यः कयन्।” उणा० ४। ९९। इति कयन्।) स्वनामख्यातपर्व्वतः। तत्पर्य्यायः। आषाढ़ः २ दक्षिणाचलः ३। इति हेमचन्द्रः।४।९५॥ चन्दनाद्रिः ४ मलयाचलः ५। इति शब्दरत्नावली॥ (स च सप्तकुलाचलान्तर्गतः। यथा, मार्कण्डेये।५७। १०—११।
“महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः॥”)
शैलाङ्गम्। देशविशेषः। (यथा, मात्स्ये। ११३। ४४।
“अङ्गा वङ्गा मद्गुरका अन्तर्गिरिबहिर्गिरी।
ततः प्रवङ्गमातङ्गमलयामलवर्णिकाः॥”)
आरामः। इति मेदिनी। ये, ९९॥ नन्दनवनम्। इति धरणिः॥ अष्टादशोपद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला॥ ऋषभदेवस्य शतपुत्रान्तर्गतपञ्चमपुत्रः। (यथा, श्रीभागवते। ५। ४। १०। “तमनु कुशावर्त्त इलावर्त्तो ब्रह्मावर्त्तो मलयः केतुर्भद्रसेन इन्द्रस्पृक् विदर्भः कीकट इति नव नवतिप्रधानाः॥” गरुड़वंशीयानामन्यतमः। यथा, महाभारते। ५। १०१। १४।
“सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च।
मलयो मातरिश्वा च निशाकरदिवाकरौ॥”)

मलयगन्धिनी, स्त्री, (मलयस्य गन्धः अस्त्यस्याः। मलयगन्ध+इनिः। स्त्रियां ङीप्।) उमासखीविशेषः। इति शब्दमाला॥

मलयजं, पुं, क्ली, (मलयात् जायते इति। जन्+डः।) चन्दनम्। इत्यमरः। २। ६। १३१॥ (यथा, गीतगोविन्दे। ३। ११।
“हृदि विसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः॥
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग ! क्रुधा किमु
धावसि॥”
मलयजाते, त्रि। यथा, महाभारते। १। २७। ६।
“उत्पतद्भिर्दिशाकाशं वृक्षैर्मलयजैरपि॥”)
यथा च।
“राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथार्च्चयेत्॥”
इति ग्रहयज्ञतत्त्वम्॥

मलया, स्त्री (मल+कयन्। टाप्।) त्रिवृता। इति मेदिनी। ये, ९९॥

मलयाचलः, पुं, (मलयश्चासावचलश्चेति।) मलयपर्व्वतः। इति शब्दरत्नावली॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४७ अध्याये।
“पुन्नागनागकरवीरकृतोपकारे
तस्मिन् गृहे कमलरेणुकणे शयीत।
यत्राहतानिलविकम्पितपुष्पदाम्नि
हैमन्तविन्ध्यहिमवन्मलयाचलानाम्॥”)

मलयानिलः, पु, (मलयस्यानिलः।) वसन्तकालीनवायुः। तत्पर्य्यायः। वासन्तः २। इति त्रिकाण्डशेषः॥ (यथा, साहित्यदर्पणे।१।१०६।
“स एव सुरभिः कालः स एव मलयानिलः।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते॥”)

मलयूः, स्त्री, (मलपूः। पृषोदरादित्वात् पस्य यत्वम्।) मलपूः। इति शब्दरत्नावली॥

मलयोद्भवं, क्ली, (मलयः उद्भव उत्पत्तिकारणं यस्य।) चन्दनम्। इति राजनिर्घण्टः॥

मलविनाशिनी, स्त्री, (मलं विनाशयतीति। वि+नश्+णिच्+णिनिः। स्त्रियां ङीप्।) शङ्खपुष्पी। इति राजनिर्घण्टः॥

मलहन्ता, [ऋ] पुं, (मलं हन्तीति। हन्+तृच्।) शाल्मलीकन्दः। इति राजनिर्घण्टः॥

मला, स्त्री, (मल+अच्। टाप्।) भूम्यामलकी। इति शब्दचन्द्रिका॥

मलाकर्षी, [न्] पु, (मलं विष्ठां आकर्षति स्थानात् स्थानान्तरं नयतीति। आ+कृष्+णिनिः।) हड़िकः। इति शब्दमाला। हाड़ि इति भाषा॥

मलाका, स्त्री, (मलेन मनोमालिन्येन अकति कुटिलं गच्छतीति। अक्+अच्। स्त्रियां टाप्।) कामिनी। हस्तिनी। दूती। इति संक्षिप्तसारोणादिवृत्तिः॥

मलापकर्षणं, क्ली, (अप+कृष्+भावे ल्युट्। मलस्यापकर्षणम्।) पापमोचनम्। मलदूरीकरणम्। इति केचित्॥

मलापहा, स्त्री, (मलमपहन्तीति। अप+हन्+डः। स्त्रियां टाप्।) नदीविशेषः। यथा,—
“मलापहा भीमरथी च चङ्गा
यथा च कृष्णा जलसाम्यगा गुणैः।
मलापहाचङ्गयोस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम्॥”
इति राजनिर्घण्टः॥

मलावहं, क्ली, (मलं आवहतीति। आ+वह्+अच्।) नवविधपापान्तर्गतपापविशेषः। यथा, मानवे। ११। ७१।

"क्रमिकीटवयोहत्या मद्यानुगतभोजनम्।
फलैधःकुसुमस्तेयमधैर्य्यञ्च मलावहम्॥"

मलारिः, पुं, (मलस्यारिर्नाशको रेचकत्वात्।) सर्ज्जक्षारः। इति राजनिर्घण्टः॥

मलिनं, त्रि, (मलते धारयतीति। मल + "बहुलमन्यत्रापि।" उणा० २। ४८। इति इनच्। यद्वा, "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इत्यत्र। "मलशब्दादिनज्मीमसचौ प्रत्ययौ निपात्येते।" इति काशिकोक्त्या इनच्।) मलयुक्तवस्तु। तत्पर्य्यायः। मलीमसम् २ कच्चरम् ३ मलदूषितम् ४। इत्यमरः। ३। १। ५५॥ (यथा, महानिर्व्वाणतन्त्रे। १। ४३।
"परस्त्रीहरणे पापशङ्काभयविवर्ज्जिताः।
निर्धना मलिना दीना दरिद्राश्चिररोगिणः॥")
दूषितम्। (यथा, आर्य्यासप्तशत्याम्। ४०२।
"परपट इव रजकीभिर्मलिनो भुक्तापि निर्दयं ताभिः।
अर्थग्रहणेन विना जघन्य। मुक्तोऽसि कुलटाभिः॥")
कृष्णम्। इति मेदिनी। ने, १०४॥ नित्यनैमित्तिकक्रियात्यागी। इति मार्कण्डेयपुराणम्॥ (निकृष्टम्। यथा, शिशुपालवधे। ६। २३।
"द्युतिमग्रहीद्गुणज्ञ्गणो लघवः
प्रकटीभवन्ति मलिनाश्रयतः॥"
"मलिनाश्रयतः निकृष्टाश्रयणात्।" इति तट्टीकायां मल्लिनाथः॥)

मलिनं, क्ली, (मलते धरति दोषमिति। मल + इनच्।) घोलम्। इति शब्दचन्द्रिका॥ दोषः। इति हेमचन्द्रः॥ टङ्कणः। इति राजनिर्घण्टः॥

मलिनमुखः, पुं, (मलिनं मुखमग्रभागो यस्य।) अग्निः। गोलाङ्गूलः। इति मेदिनी। खे, १८॥ प्रेतः। इति हेमचन्द्रः॥

मलिनमुखः, त्रि, (मलिनं दूषितं मुखं यस्य।) क्रूरः। खलः। इति मेदिनी। खे, १८। हेमचन्द्रश्च॥ म्लानवदनश्च॥

मलिनाम्बु, क्ली, (मलिनं कृष्णवर्णं अम्बु।) मसी। इति हेमचन्द्रः। ३। ४८॥

मलिनास्यः, त्रि, (मलिनं दूषितमास्यं यस्य।) खलः। इति शब्दमाला॥

मलिनी, स्त्री, (मलमस्या अस्तीति। मल + इनिः। स्त्रियां ङीप्।) रजस्वला नारी। इत्यमरः। २। ६। २०॥

मलिम्लुचः, पुं, (मली सन् म्लोचतीति। म्लुच् इर् गत्याम् + कः।) मलमासः। यथा,—
"समतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः॥
यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्व्वमासान्तयदर्शादिराशिस्थः सन् सूर्य्योऽतिवाह्य गच्छेत् मासान्तरे राश्यन्तरसंयोगं गच्छेत् तदा आद्योऽतिक्रान्तमासो मलिम्लुचो ज्ञेयः। मली सन् म्लोचति गच्छतीति मलिम्लुचः। द्वितीयस्तु प्रकृतः शुद्धः कर्म्मार्हत्वात्।" इति मलमास-तत्त्वम्॥ अग्निः। चौरः। इति मेदिनी। चे, २१। (यथा, माघे। १६। ५२।
"प्रहितः प्रधनाय माधवा-
नहमाकारयितुं महीभृता।
न परेषु महौजसश्छला-
दपकुर्व्वन्ति मलिम्लुचा इव॥")
वायुः। इति शब्दमाला॥ (पञ्चयज्ञपरिभ्रष्टः। इति हेमचन्द्रः। ३। ५२२॥)

मलिष्ठा, स्त्री, (अतिशयेन मलिनी। मलिनी + इष्ठः। स्त्रियां टाप्।) रजस्वला नारी। इति त्रिकाण्डशेषः॥

मलीमसं, क्ली, (मलमस्यास्तीति। मल + "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति ईमसच् प्रत्ययेन निपातितः।) लौहम्। पुष्पकासीसम्। इति मेदिनी। से, ५८॥

मलीमसः, त्रि, (मलमस्यास्तीति। मल + ईमसच्। निपात्यते।) मलिनः। इत्यमरः। ३। १। ५५॥ (यथा, माघे। १। ३८।
"उपप्लुतं पातुमदो मदोत्कटैः
त्वमेव विश्वम्भर। विश्वमीशिषे।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः॥"
कृष्णवर्णः। यथा, श्रीकण्ठचरिते। ६। ३८।
"मलीमसश्रीर्मधुपानसक्तो
भेजे लताः पुष्पवतीः स्फुटं यः।
स एव चैत्रेण वने द्विरेफः
पुष्पेषुराज्ये विहितः पुरोधाः॥")

मलूकः, पुं, (मल + बाहुलकात् ऊकः।) क्रमिविशेषः। इत्युणादिकोषः॥

मल्ल, ङ धृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, मल्लते। इति दुर्गादासः॥

मल्लः, पुं, (मल्लते धरति बलमिति। मल्ल + अच्।) बाहुयोधी। इत्यमरभरतौ। माल इति भाषा॥ (यथा, श्रीमद्भागवते। १०। ४३। १७।
"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्॥")
वर्णसङ्करजातिविशेषः। माला इति भाषा। स च व्रात्यक्षत्रियात् सवर्णायां जातः। इति मानवे १० अध्याये॥ स च लेटात् तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ तन्नवायां कुन्दकाराज्जातः। इति पराशरपद्धतिः॥ पात्रम्। कपोलम्। मत्स्यभेदः। इति मेदिनी। ले, ४४॥ देशविशेषः। यथा,—
"दशार्णा नवराष्ट्रञ्च मल्लाः शाल्वा युगन्धराः॥"
इति विराटपर्व्वणि १ अध्यायः॥

मल्लकः, पुं, (मल्ल इव। मल्ल + कन्। दृढत्वादस्य तथात्वम्। यद्वा, मल्ल धारणे + ण्वुल्।) दन्तः। इति हेमचन्द्रः। ३। २८४॥ (ब्राह्मणविशेषः। यथा, राजतरङ्गिण्याम्। ८। २३२०।
"विलोक्य नैकलावन्यां बद्धौ तौ स्वामिनौ तथा।
कृष्टासिर्धनुरुत्तस्थौ द्विजन्मा मल्लकाभिधः॥")

मल्लकः, पुं, स्त्री, (मल्लते धारयति प्रदीपमिति। मल्ल + ण्वुल्।) दीपाधारः। नारिकेलफलावयवनिर्म्माणविशेषः। माला इति भाषा। स्त्रियां मल्लिका। इत्यमरभरतौ॥ प्रदीपः। इति मधुरेशः॥

मल्लजं, क्ली, (मल्ले तदाख्यदेशे जायते इति। जन् + डः।) मरिचम्। इति जटाधरः॥

मल्लतूर्य्यं, क्ली, (मल्लैर्वाद्यमानं तूर्य्यम्। मल्लाय तूर्य्यमिति वा।) वाद्यविशेषः। तत्पर्य्यायः। महाक्षनः २। इति त्रिकाण्डशेषः॥

मल्लनागः, पुं, (नागो हस्तीव मल्लः। पूर्व्वनिपातः।) वात्स्यायनमुनिः। (मल्लो बलीयान् नागः।) ऐरावतः। इति मेदिनी। गे, ४७॥ (मल्लो नाग इव।) लेखहारः। इति शब्दरत्नावली॥ कामशास्त्रविशेषः। इति धरणिः॥

मल्लभूः, स्त्री, (मल्लानां भूर्भूमिः।) मल्लभूमिः। इति जटाधरः॥

मल्लभूमिः, स्त्री, (मल्लानां भूमिः स्थानम्।) मल्लक्रीडास्थानम्। तत्पर्य्यायः। अक्षवाटः २ रङ्गभूमिः ३ रणस्थली ४। इति शब्दरत्नावली॥ मल्लभूः ५ अक्षपाटः ६। इति जटाधरः॥ देशविशेषश्च॥ (यथा,—
"अयःपात्रे पयःपानं शालपत्रे च भोजनम्।
शयनं तालपत्रे च मल्लभूमेरियं गतिः॥"
इत्युद्भटः॥)

मल्लयात्रा, स्त्री, (मल्लानां यात्रा।) मल्लानां युद्धार्थयात्रा। तत्पर्य्यायः। मालवी २। इति हारावली॥

मल्लयुद्धं, क्ली, (मल्लानां युद्धम्।) मल्लानां संग्रामः। तत्पर्य्यायः। नियुद्धम् २ बाहुयुद्धम् ३। इति शब्दरत्नावली॥ तत्प्रकारो यथा,—
"अथ सूदेन तं मल्लं योधयामास मल्लराट्।
चोद्यमानस्ततो भीमो दुःखेनैवाकरोन्मतिम्॥
नहि शक्नोति विवृतं प्रत्याख्यातुं नराधिपम्।
ततः स पुरुषव्याघ्रः शार्दूलशिथिलञ्चरन्॥
प्रविवेश महारङ्गं विराटमभिपूजयन्।
बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनान्॥
ततस्तं वृत्रसङ्काशं भीमो मल्लं समाह्वयत्॥
जीमूतं नाम तं मल्लं तत्र प्रख्यातविक्रमम्।
तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ॥
मत्ताविव महाकायौ वारणौ षष्टिहायनौ।
ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतुः॥
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ।
आसीत् सुभीमः सम्पातो वज्रपर्व्वतयोरिव॥१०॥
उभौ परमसंहृष्टौ बलेनातिबलावुभौ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ॥
उभौ परमसंहृष्टौ मत्ताविव महागजौ।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः॥११॥
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा।
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः॥
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च।
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः॥

जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टितैः ।
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ॥
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ।
अरज्यत जनः सर्व्वः सोत्कृष्टनिनदोत्थितः ।
बलिनो संयुगे राजन् ! वृत्रवासवयोरिव ।
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ॥
आकर्षतामथान्योन्यं जानुभिश्चाभिजघ्नतुः॥१२
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ॥
बाहुभिः समसज्जेतामायसैः परिघैरिव ।
चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा ॥
विनदन्तमभिक्रोशन् शार्दूल इव वारणम् ।
तमुद्यम्य महाबाहुर्भ्रामयामास वीर्य्यवान् ॥
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ।
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनम् ।
प्रत्यपिंषन्महाबाहुर्म्मल्लं भुवि वृकोदरः ॥१३॥
तस्मिन् विनिहते मल्ले जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्बान्धवैः सह ॥
स हर्षात् प्रददौ वित्तं बहु राजा महामनाः ॥'
इति विराटपर्व्वणि १२ अध्यायः ॥

अस्य टीका यथा ।"दृ खेन स्वप्रकटनराजाज्ञा-लङ्घनद्वन्द्वेन । विहृतं लोकसमक्षम् । शार्दूल-शिथिलः सिंह इव व्याघ्र इव वा शिथिलः सावज्ञः । स्यात् सिंहेऽपि च शार्दूल इति दर्शनात् । कक्षां कक्षम् । सम्पातः संघर्ष. ॥ १०॥ सकङ्कटैः कङ्कटः करघर्षणजः किणः कडा इति प्रसिद्धः । कृतप्रतिकृतैः परप्रयुक्तप्रति-कृतैः । चित्रैर्विचित्रैर्बन्धैरिति शेषः ॥ ११ ॥ सन्निपातेत्यादि । एते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसंघातैरवधूतैर्बहुमुष्टिभुजा-घातैः प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः अन्तरीक्षे भुजाभ्यां मथनैः । चेपणैः स्थानात् प्रच्यावनैः । बद्धाङ्गुलिकरो मुष्टिः ।
'अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः ।
चिप्तस्य शब्दः स भवेद्वराहोद्धृतनिस्वनः ॥
तर्ज्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः ।
संप्रहारस्तलाख्यस्तु संग्रहो वज्रमिष्यते ॥'
अर्द्धचन्द्रतुल्यमल्लमुष्टिवज्रमित्यर्थः ।
'प्रहृताङ्गुलिहस्तेन प्रहृष्टिः प्रहृतिः स्मृता ।
द्विगुणीकृतबाहुर्यस्तदीयार्थं यथाबलम् ॥
प्रहारः सशलाका स्यात् पादोद्धृतः पदा-हतम् ॥'
जानुभिश्चाश्मनिर्घोषै.पाषाणघोषसदृशध्वनिभिः करणैर्य्यन्यवघट्टनानि तैः । बलप्राणेन बलो-त्कर्षेण । सोत्कृष्टनिनदोत्थितः उत्क्रोशन निनदोत्थानसहितः । प्रकर्षणं बाहुसंमुखा-नयनं प्रहृष्टाकर्षणं तदेवाकर्षणमीषत्सम्मुखा-नयनम् । अभ्याकर्षः समन्ततः कर्षणम् । विकर्षणं पश्चात् नयनं तदेव विपरीतकर्षण-मुच्यते उपसर्गभेदादर्थभेदोऽपीति ॥ १२ ॥ शत गुणं शतवारम् ॥ १३ ॥" इत्यर्ज्जुनमिश्रकृत-भारतार्थदीपिका ॥

मल्ला, स्त्री, (मल्लते धारयति विलासादिकमिति । मल्ल धारणे+अच् । स्त्रियां टाप् ।) नारी । पत्रवल्ली । मल्लिका । इति शब्दरत्नावली ॥ (लोठनराजपत्नी । यथा, राजतरङ्गिण्याम् । ८ । १६१७ ।
"तमेव पुत्रा शोचन्ती शोकशङ्कुहताशया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥")

मल्लारः, पु, (मल्लं ऋच्छति प्राप्नोतीति । ऋ+अण् ।) रागविशेषः । स तु षण्णां रागाणां मध्ये द्वितीयः । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिल्लोलश्चाथ कर्णाट एते रागाः प्रकी-र्त्तिताः ॥"
अस्य षट्रागिण्यो यथा,—
"वेलावली पूरवी च कानडा माधवी तथा ।
कोडा केदारिका चैव मल्लारस्य प्रिया इमाः॥"
अस्य गानसमयः ।
"मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥"
अस्य स्वरूपं यथा,—
"शङ्खावदातं पलितं दधानः
प्रलम्बकर्णः कुमुदेन्दुवर्णः ।
कौपीनवासाः सविहारचारी
मल्लाररागः शुचिशान्तमूर्त्तिः ॥"
इति सङ्गीतदामोदरः ॥
(तथा च सङ्गीतदर्पणे रागाध्याये ।
"भैरवः पञ्चमो नाटो मल्लारो गौडमालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यते लोकविश्रुताः ॥"
"मेघमल्लारिका मालकौशिकः पटमञ्जरी ।
आशावरीति विज्ञेया रागा मल्लारसंश्रयाः ॥"
इति रागार्णवमतम् ॥)

मल्लारी, स्त्री (मल्लार+ङीप् ।) वसन्तरागस्य रागिणी । यथा,—
"आन्दोलिता च देशाख्या लोला प्रथम-मञ्जरी ।
मल्लारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥"
इति सङ्गीतदामोदरः ॥
मेघरागस्य रागिणी । इति हलायुधः ॥ (अस्या उदाहरणादिकं यथा संगीतदर्पणे ।
"मल्लारी मपहीना स्यात् ग्रहांशन्यासधैवता ।
औडवा पौवरीयुक्ता वर्षासु सुखदा सदा ॥"
ध नि रि ग म ध । अस्या ध्यानं यथा,—
"गौरी कृशा कोकिलकण्ठनादा
गीतच्छलेनात्मपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती
मल्लारिका यौवनदूनचित्ता ॥")

मल्लिः, पु, (मल्लते धारयति विज्ञानमिति । मल्ल+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) चतुर्विंशतिरर्हतां मध्ये ऊनविंश-जिनः । इति हेमचन्द्रः ।१ । २८ ॥

मल्लिः, स्त्री, (मल्ल+इन् ।) मल्लिका । इति शब्दरत्नावली ॥

मल्लिकः, पुं, (मल्लते धार्य्यतेऽसौ । मल्ल+इन् । स्वार्थे कन् ।) मलिनचञ्चुचरणयुक्तहंसः । मलिनैः किञ्चिद्धूसरवर्णैरालोहितैश्चञ्चुचरणै-रुपलक्षितः शुक्लहंसः । इत्यमरभरतौ ॥ कृष्णामुपाधिविशेषश्च ॥ (यथा, भरतमल्लिकः । तथा च भट्टिकाव्यटीकारम्भे मङ्गलाचरण-श्लोकः ।
"नत्वा शङ्करमव्यक्तगौराङ्गमल्लिकात्मजः ।
भट्टिटीकां प्रकुरुते भरतो मुग्धबोधिनीम् ॥")

मल्लिका, स्त्री, (मल्लिरेवेति । मल्लि+स्वार्थे कन् । स्त्रियां टाप् । यद्वा, मल्लिहंस इव शुक्ल-त्वात । मल्लि+इवार्थे कन् ।) स्वनामख्यात पुष्पवृक्षः । वेलफुल इति भाषा ॥ (यथा, काव्यादर्शे । २ ।
"मल्लिकामुकुले चण्डि । भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥")
तत्पर्य्यायः । तृणशून्यम् २ भूपदी ३ शीतभीरुः ४ । इत्यमरः । २ । ४ । ६६ ॥ तृणशून्या ५ शीतभीरुः ६ । इति भरतः ॥ भद्रवल्ली ७ गौरी ८ वनचन्द्रिका ९ प्रिया १० सौम्या ११ नारीष्टा १२ गिरिजा १३ सिता १४ मल्ली १५ मदयन्ती १६ चन्द्रिका १७ मोदिनी १८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । मुखपाककुष्ठविस्फोटकक्षति-विषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफ-नाशित्वम् । इति राजवल्लभः ॥ उष्णत्वम् । लघुत्वम् । वृष्यत्वम् । वातपित्तास्रगव्याध्य-रुचिनाशित्वञ्च । इति भावप्रकाशः ॥ * ॥ अस्या उत्पत्तिर्यथा,—
"विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाद् ध्मातदृशा हरः ।
स्मरमालोकयामास शिखाग्राच्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् । पादादारभ्य कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदासीन्मुष्टिबन्धं तद्रुक्मपृष्ठं महाप्रभम् ।
स च कल्पतरुज्जातः सुगन्धाढ्यो गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्वज्रभूषितम् ।
तज्जातं केशराराग्यं बकुलं नामतो नगः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजविभूषिता ॥
नाहोपरि तथा मुष्टौ स्थानं चन्द्रमणिप्रभम् ।
पञ्चगुल्माभवज्जातौ शशाङ्ककिरणोज्ज्वला ॥
ऊर्द्ध मुष्ट्या अधः कोट्याः स्थानं विद्रुमभूषितम् ।
तस्माद्बहुपुटा मल्ली सञ्जाता विविधा मुने । ॥"
इति वामनपुराणे ६ अध्यायः ॥
मत्स्यविशेषः । मृत्पात्रभेदः । इति मेदिनी । के, १३७ ॥ पानपात्रम् । इति हेमचन्द्रः ॥

मल्लिकाक्षः, पुं, (मल्लिकापुष्पमिव अक्षिणी यस्येति । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ ।

इति अच् ।) मलिनचञ्चुचरणयुक्तहंसः । इति हेमचन्द्रः । ४ । ४१९ ॥ धूम्रवर्णवेष्टितचञ्चुचरणयुक्तहंसः । इति हलायुधः ॥ (यथा, हरिवंशे । २४१ । २५—२६ ।
"मल्लिकाक्षान् विरूपाक्षान् क्रौञ्चवर्णान् मनोजवान् ।
अश्वसैन्यं महाबाहुस्तदप्रतिमपौरुषः ।
निसूदयामास बली गदया भीमविक्रमः ॥")

मल्लिकाक्षः, पुं, मलिनचञ्चुचरणयुक्तहंसः । इत्यमरटीका ॥ ते सिता हंसा मलिनैः किञ्चित्कृष्णवर्णैरालोहितैश्चञ्चुचरणैरन्विता मल्लिकाक्षा मल्लिकनामानः । मल मल्ल ङ धृतौ लान्तः गात्यौति इकः । मल्लिको हंसभेदे स्यात्तद्गमूयक्तु मल्लिका । इति रुद्रः । शुक्लाकृत्यामल्लिकापुष्पमिव अक्षि येषां ते मल्लिकाक्षा इति स्वामी । इति भरतः ॥ (यथा, उत्तररामचरिते । १ । २६ ।
"यस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
वाष्पाम्भःपरिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो भुवो विभागाः ॥")

मल्लिकाख्या, स्त्री, (मल्लिकेति आख्या यस्याः ।) त्रिपुरमालीपुष्पम् । तत्पर्यायः । मोहिनी २ वटपत्रा ३ मोदना ४ । इति रत्नमाला ॥

मल्लिकागन्धं, क्ली, (मल्लिकाया इव गन्धो यस्य ।) मङ्गल्यागुरु । इति राजनिर्घण्टः ॥

मल्लिकापुष्पः, पुं, (मल्लिकाया पुष्पमिव पुष्पं यस्य ।) कुटजवृक्षः । इति राजनिर्घण्टः ॥ करचवृक्षः । इति हेमचन्द्रः । करया गेंड़ु इति भाषा ॥ स्वनामख्यातपुष्पवृक्षश्च ॥

मल्लिगन्धि, क्ली, (मल्लेरिव गन्धो यस्य तत् । "उपमानाच्च ।" ५ । ४ । १३८ । इति इकारादेशः ।) अगुरु । इति शब्दचन्द्रिका ॥

मल्लिपत्रं, क्ली, (मल्लेः पत्रमिव पत्रं यस्य ।) छत्राकः । इति त्रिकाण्डशेषः ॥

मल्ली, स्त्री, (मल्लि + कृदिकारादिति पक्षे ङीष् ।) मल्लिका । इति राजनिर्घण्टः शब्दरत्नावली च ॥ (यथा, राजेन्द्रकर्णपूरे । ४८ ।
"किं राकेन्दुकरच्छटाभिरुदितं किं मौक्तिकैर्वृहतं
किं मल्लीमुकुलैः स्मितं विकसितं किं मालतीकुड्मलैः ॥")

मल्लीकरः, त्रि, (अमल्लमपि आत्मानं मल्लमिव करोतीति । कृ + अच् ।) चौरः । इति शब्दरत्नावली ॥

मल्लु, पुं, (मल्लते भयं धारयतीति । मल्ल + बाहुलकात् उः ।) भालुकः । इति शब्दचन्द्रिका ॥

मव, बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) बन्धो बन्धनम् । मवति चौरं लोकः । इति दुर्गादासः ॥

मवितः, त्रि, (मव + कर्म्मणि क्तः ।) बद्धः । इत्यमरटीकायां स्वामी ॥

मव्य, बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) मव्यति चौरं राजा । यदयाम्योऽयमित्येके । इति दुर्गादासः ॥

मश, ध्वनौ । कोपे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) मशति मशकः । इति दुर्गादासः ॥

मशकः, पुं, (मशति ध्वनतीति । मश् + अच् । संज्ञायां कन् ।) कीटविशेषः । मशा इति भाषा ॥ तत्पर्यायः । वज्रतुण्डः २ सूच्यास्यः ३ सूच्यमश्चिकः ४ रात्रिजागरदः ५ । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ३ । ३१ । २७ ।
"तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः ।
रुदन्तं विगतज्ञानं क्रमयः क्रमिकं यथा ॥")
तन्नाशकधूपो यथा,—
"त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ।
लाक्षासर्ज्जरसश्चैव विडङ्गश्चैव गुग्गुलुः ।
एतैर्धूपैर्म्मक्षिकाणां मशकानां विनाशनम् ॥"
इति गारुडे १९१ अध्यायः ॥
चर्म्मभेदः । स तु स्वनामख्यातचर्म्मनिर्म्मितकोषादिपात्रम् । रोगविशेषः । माशा इति हिन्दी । आँचिल इति वङ्गभाषा ॥ इति शब्दरत्नावली ॥ * ॥ मशकरोगमाह ।
"अवेदनं स्थिरञ्चैव यस्तु गात्रे प्रदृश्यते ।
माषवत् कृष्णमुत्सन्नं मलिनं मशकं दिशेत् ॥"
स्थिरं अचलम् । अस्य चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकांस्तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् चाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥
अपि च
"लशुनानान्तु चूर्णस्य घर्षो मशकनाशनः ।"
इति गारुडे १७५ अध्यायः ॥

मशकी, [न्] पुं, (मशकाः सन्त्यस्यामिति । मशक + इनिः ।) उडुम्बरवृक्षः । इति हेमचन्द्रः । ४ । १९८ ॥

मशहरी, स्त्री, (मशं मशकं हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इति अच् । स्त्रियां ङीष् ।) मशकनिवारकप्रावरणविशेषः । मशारि इति भाषा । चतुष्की २ । इति जटाधरः ॥

मशुनः, पुं, (मे समये शयति वर्त्तते इति । शि + बहुलवचनात् नक् । ततः निपातितः ।) कुक्कुरः । इति शब्दमाला ॥

मष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) मषति । इति दुर्गादासः ॥

मषिकूपी, स्त्री, (मषेः कूप इव । मषिकूप + अल्पार्थे ङीष् ।) मस्याधारः । इति हेमचन्द्रः ॥ ३ । १४८ ॥

मषिधानं, क्ली, (धीयतेऽस्मिन्निति । धा + अधिकरणे ल्युट् । मषेर्धानं स्थानम् ।) मस्याधारः । इति हेमचन्द्रः । ३ । १४८ ॥

मषीलेख्यदलः, पुं, (मषीभिर्लेख्यं लेखनयोग्यं दलं यस्य ।) श्रीतालवृक्षः । इति राजनिर्घण्टः ॥

मस, ईर् य ई परिमाणे । परिणामे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् । निष्ठायामनिट् ।) ईर्, अमसत् अमासीत् अमसीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, मस्यति धान्यं वृद्धो । परिमातीत्यर्थः । ई, मस्तः । परिणामं कश्चिदत्रुरीधात् । इति दुर्गादासः ॥

मसकः, पुं, (मस्यते परिमीयतेऽसौ । मस + कर्म्मणि घः । अल्पार्थे कन् ।) क्षुद्ररोगविशेषः । माषा इति लोके प्रसिद्धः । तल्लक्षणं यथा,—
"अवेदनं स्थिरञ्चैव यस्तु गात्रे प्रदृश्यते ।
माषवत् कृष्णमुत्सन्नं मलिनं मसकं दिशेत् ॥"
अवेदनं वेदनारहितम् । स्थिरम् अचलम् ॥ तच्चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मसकांस्तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् चाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

मसनं, क्ली, (मस्यते इति । मस + ल्युट् ।) सोमराजीवृक्षः । इति शब्दचन्द्रिका ॥

मसरा, स्त्री, (मस + बाहुलकात् अरच् । स्त्रियां टाप् ।) मसूरः । इति जटाधरः ॥

मसारः, पुं, (मस + भावे क्विप् । मसं परिमाणं ऋच्छतीति । ऋ + अण् ।) इन्द्रनीलमणिः । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ९ । १०४ ।
"चकास्ति बिन्दुच्युतकातिचातुरी-
घनाश्रुबिन्दुस्रुतिकैतवात्तव ।
मसारताराक्षि ! ससारमात्मना
तनोषि संसारमसंशयं यतः ॥")

मसारकः, पुं, (मसार + स्वार्थे कन् ।) इन्द्रनीलमणिः । इति शब्दरत्नावली ॥

मसिः, स्त्री, पुं, (मस्यते परिणमते इति । मस + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) लिपिप्रयोजना । लेखनद्रव्यम् । इत्यमरटीकायां भरतः ॥ तत्पर्यायः । मसिजलम् २ पत्राञ्जनम् ३ । इति त्रिकाण्डशेषः ॥ मेला ४ काली ५ अञ्जनम् ६ मसी ७ । इति शब्दरत्नावली ॥ रञ्जनी ८ । इति स्वामी ॥ मलिनाम्बु ९ मषी १० । इति हेमचन्द्रः । ३ । १४८ । शेफालिकाफलम् । इति रुद्रः शब्दरत्नावली च ॥

मसिका, स्त्री, शेफालिका । इति शब्दरत्नावली ॥ मलिका इति ग्रन्थान्तरे पाठः ॥

मसिधानं, क्ली, (मसेर्धानं आधारः ।) मस्याधारः । इति शब्दरत्नावली ॥

मसिधानी, स्त्री, (मसेर्धानी ।) मस्याधारः । दोयात इति भाषा ॥ तत्पर्यायः । मसिमणिः २ मेलाम्बुः ३ वर्णकूपिका ४ मेलानन्दा ५ मेलाम्बु ६ मसिधानम् ७ । इति शब्दरत्नावली ॥ मषिकूपी ८ । इति हेमचन्द्रः ॥ मषिकूपिका ९ । इति जटाधरः ॥

मषिणं, क्ली, (मस्यति परिमीयते अवनयेति । मस् + "बहुलमन्यत्रापि ।" उणा० २ । ४८ । इति इनच् ।) मषिलम् २ । इत्युणादिकोषः ॥

मषिपण्यः, पुं, (मषिः काली पण्यमस्य ।) लेखकः । इति त्रिकाण्डशेषः ॥

मषिप्रसूः, स्त्री, (मषिं प्रकर्षेण सूते उद्गिरतीति । प्र + सू + क्विप् ।) मस्याधारः । इति हारावली ॥ लेखनी । इति केचित् ॥

मषिमणिः, स्त्री, (मस्याधारो मणिरिवेति ।) मस्याधारः । इति शब्दरत्नावली ॥

मषिवर्द्धनं, क्ली, (मषिं वर्द्धयतीति । वृध् + णिच् + ल्युः ।) रसगन्धः । इति त्रिकाण्डशेषः ॥

मषी, स्त्री, (मषि + कृदिकारादिति ङीष् ।) काली । (यथा, नैषधचरिते । ६ । ६१ ।

"त्वदाख्ये निर्ययत्कलीकदुर्यशो-
मषीमयं बल्लिपिरूपभागिव ।")

शेफालिकादलम् । इति शब्दरत्नावली ॥

मषीजलं, क्ली, (मष्या जलम् । राहोः शिर इतिवत् अभेदे षष्ठी ।) मषी । काली । इति त्रिकाण्डशेषः ॥

मषीधानी, स्त्री, (मष्या धानी पात्रम् ।) मस्याधारः । इति त्रिकाण्डशेषः ॥

मषीना, स्त्री, (मस् + "बहुलमन्यत्रापि ।" उणा० २ । ४८ । इति इनच् । पृषोदरादित्वाद्दीर्घः । स्त्रियां टाप् ।) स्वनामख्यातक्षुपम् । यथा, शब्दचन्द्रिकायाम् ।

"मषीना चालसी चिक्का स्नुमोमामालिका मिता ॥"

मसुरः, पुं, (मस्यति परिमीयतेऽसौ । मस् + "मसेश्च ।" उणा० १ । ४४ । इति । उरन् ।) मसूरकलायः । इति त्रिकाण्डशेषः ॥

मसुरा, स्त्री, (मस्यति पण्यत्वेन परिमाणमत्रासाविति । मस् + उरन् । स्त्रियां टाप् ।) वेश्या । व्रीहिप्रभेदः । इति मेदिनी । रे, २०१ ॥

मसूरः, पुं स्त्री, (मस्यते परिमीयतेऽसौ । मस् + "मसेरूरन् ।" उणा० ५ । ३ । इति ऊरन् ।) व्रीहिभेदः । मसुरी कलाइ इति भाषा ॥ (अस्याधिपतिर्मेषराशिः । यथा, बृहत्संहितायाम् । ४१ । २ ।

"वस्त्राविककुतुपानां
मसूरगोधूमरालकयवानाम् ।
स्थलसम्भवौषधीनां
कनकस्य च कीर्त्तितो मेषः ॥")

तत्पर्य्यायः । मङ्गल्यकः २ । इत्यमरः । २।९।१७॥ मसुरः ३ व्रीहिकाञ्चनः ४ । इति त्रिकाण्डशेषः ॥ मसूरा ५ मसुरा ६ । इति मेदिनी । रे, २०१ ॥ रागदालिः ७ मङ्गल्या ८ पृथुबीजकः ९ सूरः १० कल्याणबीजः ११ गुडबीजः १२ मसूरकः १३ । इति राजनिर्घण्टः ॥ मङ्गल्या १४ मसूरका १५ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । संग्राहित्वम् । कफपित्तनाशित्वम् । वातामयकरत्वम् । मूत्रकृच्छ्रहरत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ अस्रहरत्वम् । रूक्षत्वम् । ज्वरनाशित्वञ्च । इति भावप्रकाशः ॥ तस्य यूषगुणाः । संग्राहित्वम् । स्वादुपाकित्वम् । प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च । इति राजनिर्घण्टः ॥

मसूरकः, पुं, (मसूर इव प्रतिकृतिरिति । मसूर + कन् । संज्ञायां कन् वा ।) उपधानविशेषः । गोल बालिश इति भाषा । तत्पर्य्यायः । चतुरः २ चातुरः ३ अङ्कुरः ४ चक्राङ्कः ५ । इति शब्दरत्नावली ॥ (क्लीवेऽपि दृश्यते । यथा, बृहत्संहितायाम् । ४३ । ४३ ।

"अष्टाश्रि नीलरक्तं
तृतीयमिन्द्रस्य भूषणं दत्तम् ।
असितं यमस्य तु च
मसूरकं कान्तिमदयच्छत् ॥")

मसूरविदला, स्त्री, (मसूरस्येव विशिष्टं दलमस्याः । स्त्रियां टाप् ।) श्यामात्रिवृत् । इत्यमरः । २ । ४ । १०९ ॥ (यथा, राजतरङ्गिण्याम् । ६ । १८७ ।

"मसूरविदलाकारतूलाक्लिन्नकलेवरः ।
पौषे चाब्दे चतुस्त्रिंशे नवमेऽब्दे सिते न्तः ॥")

श्यामलता । इति रत्नमाला ॥

मसूरा, स्त्री, (मस्यति परिणमतीति । मस् + ऊरन् । स्त्रियां टाप् ।) वेश्या । मसूरकलायः । इति मेदिनी । रे, २०१ ॥

मसूरिका, स्त्री, (मसूरेव । मसूरा + कन् । स्त्रियां टाप् । अत इत्वञ्च ।) कुट्टनी । इति शब्दमाला ॥ * ॥ वसन्तरोगः । तस्योत्पादनक्रिया टीका इति ख्याता । सा तु गोस्तनज-नरगात्रज-मसूरिकापूयेन भवति । यथा,—

"धेनुस्तन्यमसूरिका नराणाञ्च मसूरिका ।
तज्जलं बाहुमूलाच्च शस्त्रान्तेन गृहीतवान् ॥
बाहुमूले च शस्त्राणि रक्तोत्पत्तिकराणि च ।
तज्जलं रक्तमिलितं स्फोटकज्वरसम्भवम् ॥"
इति धन्वन्तरिकृतशाक्तेयग्रन्थः ॥

तत्पर्य्यायः । पापरोगः २ रक्तवटी ३ मसूरी ४ । इति शब्दरत्नावली ॥ * ॥ अथ मसूरिकाधिकारः । "तत्र मसूरिकाविप्रकृष्टनिदानपूर्व्विकां संप्राप्तिमाह ।

'कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः ।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्भवाः ।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः ॥
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः ॥'

क्षारो यवक्षारः । विरुद्धाध्यशनाशनैः कट्वादिविरुद्धान्नानामशनैः । अत्र च अध्यशनाशनं अधिकमशनं अध्यशनम् । दुष्टनिष्पावशाकाद्यैः दुष्टैर्निष्पावशाकाद्यैः । आद्यशब्दान्मध्वालुकादितैः । प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् । क्रूरग्रहेक्षणाच्चापि देशे देशे क्रूरग्रहा राहुशनैश्चरादयस्तेषामीक्षणाद्दृष्टेः यस्मिन् देशे क्रूरग्रहदृष्टिः तत्रापि मसूरिकोत्पत्तिरित्यर्थः । मसूराकृतिसंस्थाना मसूरस्य या आकृतिस्तद्वत् संस्थानमाकृतिर्यासां ताः ॥ * ॥ अथ पूर्व्वरूपमाह ।

'तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः ।
त्वचि शोथः सवैवर्ण्यो नेत्ररागस्तथैव च ॥'

वातजामाह ।

'स्फोटाः श्यावारुणा रूक्षास्तीव्रवेदनयान्विताः ।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः ॥
'सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः ।
शोषस्ताल्वोष्ठजिह्वानां तृष्णा चारुचिसंयुता ॥'

पैत्तिकामाह ।

'रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्रवेदनाः ।
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः ॥
'विड्भेदश्चाङ्गमर्द्दश्च दाहस्तृष्णारुचिस्तथा ।
मुखपाकोऽक्षिपाकश्च ज्वरस्तीव्रः सुदारुणः ॥'

रक्तजामाह ।

'रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः ॥'

अथ कफजामाह ।

'श्वेताः स्निग्धाः भृशं स्थूलाः कण्डुरा मन्दवेदनाः ।
मसूरिकाः कफोद्भूताश्चिरपाकाः प्रकीर्त्तिताः ॥
कफप्रसेकः स्तैमित्यं शिरोरुग्गात्रगौरवम् ।
हृल्लासः सारुचिर्निद्रा तन्द्रालस्यसमन्विताः ॥'

सान्निपातिकीमाह ।

'नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः ।
पूतिस्रावाश्चिरं पाकाः प्रभूताः सर्व्वदोषजाः ॥'

सप्तधातुगतामाह ।

'मसूरिकात्वचं प्राप्तास्तोयबुद्बुदसन्निभाः ।
स्वल्पदोषाः प्रजायन्ते भिन्नास्तोयं स्रवन्ति च ॥'

त्वचं प्राप्ताः त्वक्शब्देनात्र रस उच्यते रसाश्रयत्वात् ॥ * ॥ रक्तस्थामाह ।

'रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः ।
साध्या नात्यर्थदुष्टास्तु भिन्ना रक्तं स्रवन्ति च ॥'

साध्या रक्तस्था इत्यर्थः । नात्यर्थदुष्टास्तु अत्यर्थदुष्टशोणिताः पुनर्न साध्याः किन्तु कष्टसाध्याः ॥ * ॥ मांसस्थामाह ।

'मांसस्थाः कठिनाः स्निग्धाश्चिरपाकास्तनुत्वचः ।
गात्रशूलानिशं कण्डूर्मूर्च्छादाहतृषान्विताः ॥'

मेदस्थामाह ।

'मेदोजा मण्डलाकारा मृदवः किञ्चिदुन्नताः ।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः ।
सम्मोहारतिसन्तापाः कश्चिदाभ्यो विनिस्तरेत् ॥'

अस्थिमज्जागते प्राह ।

'क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः ।
मज्जस्था भृशसम्मोहवेदनारतिसंयुताः ॥
भ्रमरेणेव विद्धानि कुर्व्वन्त्यस्थीनि सर्व्वतः ।
छिन्दन्ति मर्म्मधामानि प्राणानाशु हरन्ति ताः ॥'

गात्रसमाः गात्रतुल्यवर्णाः । चिपिटाः चिपिटाकाराः । मज्जाग्रहणेनास्थ्नोऽपि

तदाधारत्वात्। अतएवाग्रे अमरेणैव विद्रधानि कुर्व्वन्त्यशौंसि सर्व्वत इति। मर्म्मधामानि मर्म्मस्थानानि ॥ * ॥ शुक्रगतामाह।
'पक्वाभाः पिडकाः स्निग्धाः सूक्ष्माश्चात्यर्थवेदनाः।
स्तैमित्यारतिसम्मोहदाहोन्मादसमन्विताः ॥
शुक्रजाया मसूर्य्यास्तु लक्षणानि भवन्ति हि।
निर्द्दिष्टं केवलं चिह्नं जीवनन्तु न दृश्यते ॥'
पक्वाभाः पक्वाकाराः न तु पक्वाः। सूक्ष्माः कोमलाः। निर्द्दिष्टं केवलं चिह्नं मतस्याचिकित्स्या शुक्रा यतो जीवनं न दृश्यते। सप्तापि ता दोषहेतुं विना न भवन्ति। दोषमन्तरेण रसादिदुष्टेरभावादित्यत आह।
'दोषमिश्रास्तु सप्तैता द्रष्टव्या दोषलक्षणैः ॥'
चर्म्मजामाह।
'कक्षरोधारुची तन्द्रा प्रलापारतिसंयुताः।
दुश्चिकित्स्याः समुद्दिष्टाः पिडकाश्चर्म्मसंज्ञिताः ॥'
रोमान्तिकामाह।
'रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः।
कासारोचकसंयुक्ता रोमान्त्यो ज्वरपूर्व्विकाः ॥'
साध्याः प्राह।
'त्वग्गता रक्तगाश्चैव पित्तजाः श्लेष्मजास्तथा।
श्लेष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः।
एता विनापि क्रियया प्रशाम्यन्ति शरीरिणाम् ॥'
त्वग्गता रसगताः ॥*॥ कष्टसाध्यतमाः प्राह।
'वातजा वातपित्तोत्था वातश्लेष्मकृताश्च याः।
कष्टसाध्यतमास्तास्तु यत्नादेता उपाचरेत् ॥'
असाध्याः प्राह।
'असाध्याः सन्निपातोत्थास्तासां वक्ष्यामि लक्षणम्।
प्रवालसदृशाः काश्चित् काश्चिज्जम्बुफलोपमाः।
लोहजालसमाः काश्चिदतसीफलसन्निभाः ॥
आसां बहुविधा वर्णा जायन्ते दोषभेदतः ॥'
प्रवालसदृशा इत्यादि। आसां प्रवालजम्बुफललोहगुटिकातसीफलसादृश्यं वर्णेन। अनुक्तवर्णसंग्रहार्थमाह। आसां बहुविधा वर्णा इति ॥ * ॥ अपराश्चासाध्याः प्राह।
'कासो हिक्का प्रमोहश्च ज्वरस्तीव्रः सुदारुणः।
प्रलापारतिमूर्च्छाश्च तृष्णा दाहोऽतिघूर्णता ॥'
दाहश्चाग्रे दौर्गन्ध्य इति च पाठः।
'मुखेन प्रस्रवेद्रक्तं तथा घ्राणेन चक्षुषा।
कण्ठे घुर्घुरकं कृत्वा श्वसित्यत्यर्थदारुणम् ॥
मसूरिकाभिभूतस्य यस्यैतानि भिषग्वरैः।
लक्षणानीह दृश्यन्ते न दद्यात्तत्र भेषजम् ॥'
मसूरिकास्वरिष्टमाह।
'मसूरिकाभिभूतो यो भृशं घ्राणेन निश्वसेत्।
स भृशं त्यजति प्राणान् तृष्णार्त्तो वायुदूषितः ॥'
वायुदूषितः अपतानकादिवातव्याधिदूषितः ॥
मसूरिकान्तेतुकं शोथविशेषमाह।
'मसूरिकान्ते शोथः स्यात् कूर्परे मणिबन्धके।
तथांसफलके वापि दुश्चिकित्स्यः सुदारुणः ॥'
दुश्चिकित्स्यः कष्टसाध्यः। दुःसाध्योऽयं निषिद्धे तेनासाध्य इत्येके।
'काश्चिद्विनापि यत्नेन सिध्यन्त्याशु मसूरिकाः।
दुष्टाः कष्टतराः काश्चित् काश्चित् सिध्यन्ति वा न वा ॥
काश्चिन्नैव तु सिध्यन्ति साध्यमानाः प्रयत्नतः ॥'
अथ मसूरिकायाश्चिकित्सा।
'मसूरिकायां कुष्ठोक्ता लेपनादिक्रिया हिता।
पित्तश्लेष्मविसर्पोक्तक्रिया चात्र प्रशस्यते ॥
श्वेतचन्दनकल्कोक्तं हिलमोचीभवं द्रवम्।
पिबेन्मसूरिकारम्भे नैव वा केवलं रसम् ॥'
हिलमोचिका शाकविशेषः। हुरहुर इति लोके।
'द्वे पञ्चमूल्यौ रास्ना च धान्यशीरं दुरालभा।
सामृतं धान्यकं मुस्तं जयेद्वातमसूरिकाम् ॥
मञ्जिष्ठा बहुपात्रन्यग्रोधशिरीषोदुम्बरत्वचः।
वातजायां मसूर्य्यां स्यात् प्रलेपः सघृतो हितः ॥'
बहुपादटः।
'गुडूची मधुकं द्राक्षा मोरटं दाडिमैः सह।
पाककाले प्रदातव्यं भेषजं गुडसंयुतम् ॥
तेन कुप्यति नो वायुः पाकं यान्ति मसूरिकाः।
मसूरिकासु सर्व्वेषु शालीन् मुद्गान् मसूरकान् ॥
रसं मधुरमेवाद्यात् सैन्धवञ्चाल्पमात्रकम्।
पटोलमूलं क्वथितं मोरटं सुरसं तथा ॥'
पटोलमूलं क्वथितमित्यत्र पटोलं क्वथितमेवेति वा पाठः।
'आदावेव मसूर्य्यान्तु पित्तजायां प्रयोजयेत्।
निम्बपर्पटकः पाठा पटोलश्चन्दनद्वयम् ॥
उशीरं कटुका धात्री तथा वासा दुरालभा।
एषां पानं शुभं शीतं सुसमं शर्करान्वितम्।
मसूर्य्यां पित्तजायान्तु प्रयोक्तव्यं विजानता ॥
दाहे ज्वरे विसर्पे च शये पित्ताधिकेऽपि च।
मसूर्य्यो रक्तजा नाशं यान्ति शोणितमोक्षणैः ॥
वासामुस्तकभूनिम्बत्रिफलेन्द्रयवासकम्।
पटोलारिष्टकं वापि क्वाथयित्वा समाक्षिकम्।
पिबेत्तेन प्रशाम्यन्ति मसूर्य्यः कफसम्भवाः ॥'
इन्द्रः इन्द्रयवः ॥ * ॥
'शिरीषोडुम्बराश्वत्थैः खदिरारिष्टजैर्जलैः।
कफोत्थासु मसूरीषु लेपः पित्तोत्थितासु च ॥'*॥
निम्बपर्पटकः पाठा पटोलः कटुरोहिणी।
चन्दने द्वे उशीरञ्च धात्री वासा दुरालभा ॥
एष निम्बादिकः क्वाथः पीतः शर्करयान्वितः।
मसूरीं सर्व्वजां हन्ति ज्वरवीसर्पसंयुताम् ॥*॥
उत्थिता प्रविशेद्या या च तां पुनर्ब्बाह्यतो नयेत्।
काञ्चनारत्वचः क्वाथः ताप्यचूर्णावचूर्णितः ॥'
ताप्यं सुवर्णमाक्षिकम्।
'धात्रीफलं समधुकं क्वथितं मधुसंयुतम्।
मुखे कण्ठे व्रणं जातं गण्डूषाच्च प्रशाम्यति ॥*॥
जम्ब्वाः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना।
गवेधुर्गवेधुका। गडगुया इति लोके।
मधुकं त्रिफला मूर्व्वा दार्व्वी त्वक् नीलमुत्पलम्।
उशीरलोध्रमञ्जिष्ठा प्रलेपाश्चोत्तमे हिताः।
नश्यन्त्यनेन हग्जाता मसूर्य्यो न भवन्ति च ॥
प्रलेपं चक्षुषोर्दद्यादुडुम्बरस्य वल्कलैः।
पञ्चवल्कलचूर्णेन क्लेदिनीमवधूनयेत्।
भस्मना केचिदिच्छन्ति केचिद्गोमयरेणुना ॥
सुषवीपत्रनिर्य्यासं हरिद्राचूर्णसंयुतम्।
रोमजज्वरसंयुक्तव्रणानां शान्तये पिबेत् ॥'
निर्य्यासं द्रवम् ॥ * ॥ अथ मसूरिकाभेदस्य शीतलाया अधिकारः। तत्र शीतलाया रूपमाह।
'देवी शीतलयाक्रान्ता मसूर्य्येव हि शीतला।
ज्वर एव तथा भूताधिष्ठितो विषमज्वरः।
सा च सप्तविधा ख्याता तासां भेदान् प्रचक्षते॥
ज्वरपूर्व्वा बृहत्स्फोटैः शीतला बृहती भवेत्।
सप्ताहान्निःसरत्येषा सप्ताहात् पूर्णतां व्रजेत् ॥
ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्।
तासां मध्ये यदा काचित् पाकं गत्वा स्फुटं स्रवेत् ॥
तत्रावधूननं कुर्य्याद्दग्धगोमयभस्मना।
निम्बसत्पत्रशाखाभिर्मक्षिकामपसारयेत् ॥
जलञ्च शीतलं दद्यात् ज्वरेऽपि न तु दापयेत्।
स्थापयेत्तं शुचौ पूते रम्ये रहसि शीतले ॥
नाशुचिः संस्पृशेत्तत्र न च तस्यान्तिकं व्रजेत्।
बहवो भिषजो नात्र भेषजं योजयन्ति हि ॥
केचित् प्रयोजयन्त्येव मतमेषामथ ब्रुवे ॥ * ॥
ये शीतलेन सलिलेन विपिष्य सम्यक्
चिञ्चाजबीजसहितां रजनीं पिबन्ति।
तेषां भवन्ति न कदाचिदपीह देहे
पीडाकरा जगति शीतलिका विकाराः ॥
मोचारसेन सहितं सितचन्दनेन
वासारसेन मधुकं मधुकेन वाथ।
आदौ पिबन्ति सुमनाःस्वरसेन मिश्रं
ते नाप्नुवन्ति भुवि शीतलिकाविकारान् ॥'
मोचारसेन कदलीकाण्डजलेन। मधुकेन वाथ अथवा मधुना। आदौ पूर्व्वरूपे ज्वरागमनमात्रे। सुमनाःस्वरसेन जातीपत्ररसेन।
'शीतलासु क्रिया कार्य्या शीतला रक्षया सह।
वर्णीयान्निम्बपत्राणि परितो भवनान्तरे ॥
कदाचिदपि नो कार्य्यमुच्छिष्टस्य प्रवेशनम्।
स्फोटेष्वधिकदाहेषु रक्षारेणूत्करो हितः ॥
तेन ते शीघ्रमायान्ति प्रपाकं न भवन्ति च।
रक्षारेणूत्करः शुष्कगोमयभस्मचूर्णतः ॥
चन्दनं वासको मुस्तं गुडूची द्राक्षया सह।
एषां शीतकषायस्तु शीतलाज्वरनाशनः ॥'
शीतकषायो हिमः।
'जपहोमोपहारैश्च दानस्वस्त्ययनार्च्चनैः।
विप्रगोगुरुगौरीणां पूजनैस्तां समं नयेत् ॥
स्तोत्रञ्च शीतलादेव्याः पठेत् शीतलिनोऽन्तिके।
श्रावकः श्रद्धया युक्तस्तेन शाम्यति शीतला ॥
स्कन्द उवाच।
भगवन्! देवदेवेश! शीतलायाः स्तवं शुभम्।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम् ॥

ईश्वर उवाच ।
नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्ज्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥
वन्देऽहं शीतलां देवीं सर्व्वरोगभयापहाम् ।
यामासाद्य निवर्त्तेत विस्फोटकभयं महत् ॥
शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः ।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥
यस्त्वामुदकमध्ये तु ध्यात्वा संपूजयेन्नरः ।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
शीतले ज्वरदग्धस्य पूतिगन्धगतस्य च ।
प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥
शीतले तनुजान् रोगान् नृणां हरसि दुस्तरान् ।
विस्फोटकविशीर्णानां त्वमेकाऽमृतवर्षिणी ॥
गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम् ।
त्वदनुध्यानमात्रेण शीतले यान्ति ते क्षयम् ॥
न मन्त्रो नौषधं किञ्चित् पापरोगस्य विद्यते ।
त्वमेका शीतले ! धात्री नान्यां पश्यामि देवताम् ॥
मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम् ।
यस्त्वां विचिन्तयेद्देवीं तस्य मृत्युर्न जायते ॥
अष्टकं शीतलादेव्या यः पठेन्मानवः सदा ।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
श्रोतव्यं पठितव्यञ्च नरैर्भक्तिसमन्वितैः ।
उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥
शीतलाष्टकमेतद्धि न देयं यस्य कस्यचित् ।
दातव्यं हि सदा तस्मै भक्तिश्रद्धान्वितो हि यः ॥'
इति श्रीस्कन्दपुराणे काशीखण्डे शीतलाष्टकस्तोत्रं समाप्तम् ॥" इति भावप्रकाशे मध्यखण्डे चतुर्थो भागः ॥

मसरिका, स्त्री, मशहरी । मशारि इति भाषा । यथा—
"दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत् ।
मसूरिकाभिः प्रावृत्य मञ्चशायिनमच्युतम् ॥"
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥

मसूरी, स्त्री, (मसूर + स्त्रियां ङीष् ।) पापरोगः । इति मेदिनी । रे, २०१ ॥ स तु वसन्तरोग इति प्रसिद्धः । त्रिवृत् । रक्तत्रिवृत् । इति राजनिर्घण्टः ॥

मसृणं, त्रि, (मस्यतीति दीप्यते इति । मसु दीप्तौ + इगुपधेति कः । पृषोदरादित्वात् साधुः ।) अकर्कशम् । स्निग्धम् । इति मेदिनी । णे,७० ॥ (यथा, रघुवंशटीकारम्भे मल्लिनाथः ।
"करुणामसृणैः कटाक्षपातैः
कुरु मामम्ब ! कृतार्थसार्थवाहम् ॥")

मसृणा, स्त्री, (मसृण + स्त्रियां टाप् ।) उमा । इति मेदिनी । णे, ७० । मसीना इति भाषा ॥

मस्क, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) दन्त्यमध्य इति दुर्गसिंहः । क्विपि संयोगादिर्लोपे मक् । मूर्द्धन्यमध्य इत्येके । क्विपि संयोगान्तलोपे मट् । ङ, मस्कते । इति दुर्गादासः ॥

मस्करः, पुं, (मस्कते गच्छत्यनेनेति । मस्क + बाहुलकादरः । यद्वा, मकर + "मस्करमस्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति सुट् निपात्यते । इति काशिका ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ रन्ध्रवंशः । इति राजनिर्घण्टः ॥

मस्करी, [न्] पुं, (मस्कते इतस्ततो गच्छत्यनेनेति । मस्क + बाहुलकादरः । मस्करो दण्डः सोऽस्त्यस्येति । मस्कर + इनिः । यद्वा, मा कर्त्तुं कर्म्म निषेद्धुं शीलमस्य । "मस्करमस्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति इनिर्निपात्यते ।) भिक्षुः । इत्यमरः । २ । ७ । ४७ ॥ (यथा, भट्टिकाव्ये । ५ । ६३ ।
"अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम् ।
वदन् कमण्डलुस्फोटं भ्रूक्षेपञ्च विलोकयन् ॥")
चन्द्रः । इति शब्दचन्द्रिका ॥

मस्ज, ओ श टु ओ स्नाने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-अनिट् ।) दन्त्यमध्यः क्विपि संयोगादिलोपे मक् । ओ, मग्नः । श, मज्जती मज्जन्ती । टु, मज्जथुः । अमाङ्क्षीत् । स्नायतेऽनेनेति स्नानमिह जलान्तःप्रवेशः । मज्जति प्रस्तरो जले । इति दुर्गादासः ॥

मस्तं, क्ली, (मस्यते परिमीयते । मस् परिमाणे + क्तः ।) मस्तकम् । इति द्विरूपकोषः ॥ (यथा, अमरटीकायां मनुष्यवर्गे । ६५ । रघुनाथ चक्रवर्त्तिधृतश्लोकः ॥
"दण्डकमण्डलुमण्डितहस्तः
सुललिततिलकविभूषितमस्तः ॥")

मस्तकः, पु, क्ली, (मस्यते परिमीयते । मस् + 'इष्यशिभ्यां तकन् ।" उणा० ३ । १४८ । इत्यत्र । "बाहुलकात् मस्यतेरपि तकन् ।" इत्युज्ज्वलदत्तोक्त्या तकन् ।) प्रधानाङ्गम् । माथा इति भाषा ॥ (यथा, मार्कण्डेयपुराणे । १४ । ७८ ।
"बिभ्रन् क्लेशमवाप्नोति सोऽप्येव शिरसा शिलाम् ।
क्षुत्क्षामोऽहर्निशं भारपीडाव्यथितमस्तकः ॥")
तत्पर्य्यायः । उत्तमाङ्गम् २ शिरः ३ शीर्षम् ४ मूर्द्धा ५ । इत्यमरः । २ । ६ । ९४ ॥ मुण्डम् ६ शिरम् ७ । इति शब्दरत्नावली ॥ वराङ्गम् ८ । इति जटाधरः ॥ कम् ९ पुण्ड्रम् १० मौलिः ११ कपालम् १२ कंशभूः १३ । इति राजनिर्घण्टः ॥ (मस्तम् १४ । इति द्विरूपकोषः ।) तस्य शुभाशुभलक्षणं यथा,—
"छत्राकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
चिपिटैश्च पितुर्मृत्युर्नाराद्याः परिमण्डलैः ॥
घटमूर्द्धा पापरुचिर्धनाढ्यैः परिवर्ज्जितः ॥"
इति गारुडे ६६ अध्यायः ॥
मस्तके अधोमुखसहस्रदलकमलमस्ति तत्कर्णिकायां परमात्मा तिष्ठति । यथा । स्वाङ्के उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुसम्णावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्येत्यादि तन्त्रसारः ॥ तथा च ।
"सुसुम्णावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिरःस्थाने परमात्मनि देशिकः ॥"
इति गौतमीयतन्त्रम् ॥

मस्तकस्नेहः, पुं, (मस्तकस्य स्नेहः ।) शिरोमज्जा । यथा,—
"गोदस्तु मस्तकस्नेहो मस्तिष्को मस्तुलुङ्गकः ॥"
इति हेमचन्द्रः । ३ । २८९ ॥

मस्तकाख्यः, पुं, (मस्तकमिति आख्या यस्य ।) वृक्षशिरः । इति शब्दचन्द्रिका ॥

मस्तदारु, क्ली, (मस्तं मस्तकमिव उच्चं दारु ।) देवदारु । इति भावप्रकाशः ॥

मस्तमूलकं, क्ली, (मूलमेव मूलकं स्वार्थे कन् । मस्तस्य मूलकम् ।) शिरोऽग्रः । इति शब्दचन्द्रिका । घाड़ इति भाषा ॥

मस्तिष्कं, क्ली, (मस्तं मस्तकं इष्यति स्वाधारत्वेन प्राप्नोतीति । इष गतौ + कः । पृषोदरादित्वात् साधुः ।) मस्तकभवघृताकारस्नेहः । मगज इति पारस्यभाषा ॥ तत्पर्य्यायः । गोदः २ । इत्यमरः । ३ । ६ । ६५ ॥ गोदम् ३ मस्तकस्नेहः ४ मस्तुलुङ्गकः ५ । इति हेमचन्द्रः । ३ । २८९ ॥ (यथा, ऋग्वेदे । १० । १६३ । १ ।
"यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ॥")

मस्तु, क्ली, (मस्यति परिणमतीति । मस् + "सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ।" उणा० १ । ७० । इति तुन् ।) दधिभवमण्डम् । दधिर मात् इति भाषा ॥ इत्यमरः । २ । ९ । ९४ ॥ दधिजलम् । द्विगुणवारियुतं दधि । अस्य गुणाः ।
"उष्णाम्लं रुचिपित्तदं श्रमहरं बल्यं कषायं सरं
भुक्तिच्छन्दकरं तृषोदरगदप्लीहार्शसां नाशनम् ।
स्रोतःशुद्धिकरं कफानिलहरं विष्टम्भशूलापहं
पाण्डुश्वासविकारगुल्मशमनं मस्तु प्रशस्तं लघु ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत् ।
स्रोतोविशोधनं ह्लादि कफतृष्णानिलापहम् ॥
अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसंग्रहम् ॥"
इति भावप्रकाशः ॥

मस्तुलुङ्गः, पु, (मस्तु इव लिङ्गं सादृश्यमस्य । पृषोदरादित्वात् इकारस्य उकारः ।) मस्तिष्कम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते सूत्रस्थाने २३ अध्याये । "भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं त्रिदोषलिङ्गप्रादुर्भावः काशश्वासौ वा यस्येति ॥")

महत्कुङ्कुमकः, पुं, (महत्कुङ्कुम+स्वार्थे कन् ।) मञ्जिष्ठम् । इति हेमचन्द्रः । ३ । २८६ ॥

मह, पूजे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) महति । इति दुर्गादासः ॥

मह, इ क त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ क, मंहयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

मह, इ ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, मंह्यते । ङ, मंहते । इति दुर्गादासः ॥

मह, न् क पूजे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) महयति । इति दुर्गादासः ॥

महः, पुं, (मह्यते पूज्यतेऽस्मिन्निति । मह + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । मह + अच् इत्युज्ज्वलदत्तः ।४।१८८ ।) उत्सवः । इत्यमरः । १ । ७ । १८८ ॥ (यथा, माघे । ६ । १६ ।

"न खलु दूरगतोऽप्यतिवर्त्तते
महमसाविति बन्धुतयोदितैः ॥"

महते पूज्यते इति ।) तेजः । इति मेदिनी । हे, ७ ॥ यज्ञः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ७१ । १८ ।

"तस्मात् प्रावृषि राजानः सर्व्वे शक्रं मुदा युताः ।
महैः सुरेशमर्च्चन्ति वयमन्ये च मानवाः ॥")

महिषः । इति हेमचन्द्रः ॥ (त्रि, महत् । यथा, ऋग्वेदे । १० । ६१ । ८ ।

"महे यत्ते नाभ्यं त्वन् ॥"

"महे महति ।" इति तद्भाष्ये सायनः ॥)

महः, [स्] क्ली, (मह्यते पूज्यतेऽस्मिन्निति । मह + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४।१८८ । इति असुन् ।) उत्सवः । (मह्यते पूज्यते इति । मह + असुन् ।) तेजः । इति मेदिनी । से,३० ॥ (यथा, रघुटीकारम्भे मल्लिनाथः ।

"अन्तरायतिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः ॥"

मह्यन्ते पूज्यन्ते देवादयोऽस्मिन्निति । मह + असुन् ।) यज्ञः । इति शब्दरत्नावली ॥ (उदकम् । इति निघण्टुः ।१।१२॥ पूज्यमाने, त्रि । यथा, वाजसनेयसंहितायाम् । २० । ६ ।

"जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराट्
भामः ॥"

"वाक् वागिन्द्रियं महः पूज्यमानास्तु ।" इति तद्भाष्ये महीधरः ॥ महति । यथा, ऋग्वेदे । ८ । २३ । १६ ।

"महो राये तमु त्वा समिधीमहि ।" "महो महते राये धनाय ।" इति तद्भाष्ये सायनः ॥)

महकः, पुं, (महः कायति प्रकाशयतीति । महस् + कै + कः । पृषोदरादित्वात् साधुः ।) बहुलामोदः । इति जटाधरः ॥

महत्, क्ली, (मह् + अति । निपातितश्च ।) राज्यम् । इति मेदिनी । ते, १४० ॥ (यथा, छान्दोग्योपनिषदि । ५ । २ । ४ ।

"अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्या रात्रौ इत्यादि ॥" ब्रह्म । यथा, महाभारते । ३ । ३१२ । ४४ ।

"श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ॥"

उदकम् । इति निघण्टुः । १ । १२ ॥)

महत्, त्रि, (मह्यते पूज्यतेऽसौ इति । मह् + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा० २ । ८४ । इति अतिः निपात्यते ।) महान् । महती । वहत् । इति मेदिनी । ते, १४० ॥ तत्पर्य्यायः । विशङ्कटम् २ पृथु ३ बृहत् ४ विशालम् ५ पृथुलम् ६ बृहत् ७ उरु ८ । विपुलम् ९ । इत्यमरः । २ । १ । ६० ॥ पुलम् १० विस्तीर्णम् ११ । इति शब्दरत्नावली ॥ (यथा, रघौ । १२ । ४० ।

"तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम् ॥")

तद्वैदिकपर्य्यायः । भ्रः २ ऋष्वः ३ बृहत् ४ उक्षितः ५ तवसः ६ तविषः ७ महिषः ८ अभ्वः ९ ऋभुक्षाः १० उक्षा ११ विहायाः १२ यहः १३ ववक्षिथ १४ विवक्षसे १५ अम्भृणः १६ माहिनः १७ गभीरः १८ ककुहः १९ रभसः २० व्राधन् २१ विरप्शी २२ अद्भुतम् २३ वंहिष्ठः २४ बर्हिषत् २५ । इति पञ्चविंशतिर्महन्नामानि । इति वेदनिघण्टौ ३ अध्याय. ॥ * ॥ (प्रकृतेराद्योविकारः । यथा, सांख्यसूत्रम् । १ । ६१ ।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारः ॥" इति ॥) महच्छब्दस्य शङ्खादिशब्दविशेषणायां पूर्व्वं प्रयोगनिषेधो यथा,—

"शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"

इति भट्टिप्रथमसर्गीयचतुर्थश्लोकटीकायां भरतः ॥

महती, स्त्री, (महत् + ङीष् ।) वल्लकीभेदः । इति मेदिनी । ते,१४० ॥ नारदवीणा । इत्यत्-प्रमाणा । इत्यमरटीकायां भरतः ॥ (यथा, शिशुपालवधे । १ । १० ।

"स्फुटीभवद्ग्रामविशेषमूर्च्छना-
मवेक्षमाणं महतीं मुहुर्मुहुः ॥")

बृहती । वार्त्ताकी । इति राजनिर्घण्टः॥ (कुशद्वीपस्थनदीविशेषः । यथा, मात्स्ये । १२१ । ७४ ।

"महती सप्तमी प्रोक्ता पुनश्चैषा धृतिः स्मृता ।
अन्यास्ताभ्योऽपि सञ्जाता शतशोऽथ सह-
स्रशः ॥"

पारिपात्रनिर्गतनदीविशेषः । यथा, मात्स्ये । ११३ । २३—२४ ।

"वर्णाशा चन्दना चैव कावेरी महती तथा ।
पारा चर्म्मण्वती पुण्या विदुषा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती कुन्ती च पारिपात्राश्रिताः
स्मृताः ॥")

महतीद्वादशी, स्त्री, (महतीति ख्याता द्वादशी ।) श्रवणद्वादशी । यथा,—

"मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ॥"

इति गारुडे १४१ अध्यायः ॥

महत्तत्त्वं, क्ली, (महच्च तत् तत्त्वञ्चेति ।) चतुर्विंशतितत्त्वान्तर्गतद्वितीयतत्त्वम् । तत्तु प्रकृतेरुत्पन्नम् । समष्टिबुद्धिस्वरूपम् । तत्पर्य्यायः । यथा,—

"महानात्मा मतिर्विष्णुर्जिष्णुः शम्भुश्च वीर्य्य-
वान् ।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः ।
पर्य्यायवाचकैः शब्दैर्महानात्मा विभाव्यते ।
तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधि-
गच्छति ॥"

इति महाभारते आश्वमेधिकपर्व्व ॥

अपि च ।

"एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः ।
सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते ॥
महानिति यतः ख्यातिर्लोकानां जायते सदा ।
अहङ्कारश्च महतो जायते मानवर्द्धनः ॥"

इति मात्स्ये २ अध्यायः ॥

महत्तरः, पुं, स्त्री, (अयमनयोरतिशयेन महान् । महत् + तरप् ।) शूद्रः । यथा,—

"शूद्रः स्यात् पादजो दासो ग्रामकूटो मह-
त्तरः ।"

इति त्रिकाण्डशेषः ॥

(यथा, कथासरित्सागरे । ५ । ३४ ।

"केनायं रचितोऽत्रेति सोऽपृच्छच्च महत्तरान् ।
ते च न्यवेदयंस्तस्मै कर्त्तारं तिलकस्य माम् ॥")

अतिशयमहति, त्रि ॥ (यथा, महाभारते । ७ । १६६ । ५६ ।

"ददर्श भृशदुर्दर्शं सर्व्वदेवैरभिष्टुतम् ।
अणीयांसमणुभ्यश्च बृहद्भ्यश्च महत्तरम् ॥")

महत्त्वं, क्ली, (महत् + त्व ।) महतो भावः । यथा, भाषापरिच्छेदे ।

"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥"

"महत्त्वं षड्विध इति । द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम् । द्रव्यसमवेतानां गुणकर्म्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन । द्रव्यसमवेतसमवेतानां रूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणम् ।" इति सिद्धान्तमुक्तावली ॥ (श्रेष्ठत्वम् । यथा, रामायणे । १ । १ । १०१ ।

"जनश्च शूद्रोऽपि महत्त्वमीयात् ॥"

"महत्त्वं श्रेष्ठत्वम् ।" इति तट्टीका ।)

महर्लोकः, पु, (महश्चासौ लोकश्चेति । कर्म्मधारयः ।) भूरादिसप्तलोकान्तर्गतचतुर्थलोकः यथा,—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ।
चतुर्मुखदिनस्यान्ते जगदेतच्चराचरम् ॥

तदा हि दह्यते सर्व्वं त्रैलोक्यं भूर्भुवादिकम् ।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः ॥"
इति वह्निपुराणम् ॥
"चतुर्थे तु महर्लोके तिष्ठन्ति कल्पवासिनः ॥"
इति देवीपुराणम् ॥

महर्षभी, स्त्री, (महती चासौ ऋषभी चेति कर्म्मधारयः ।) कपिकच्छुः । इति राजनिर्घण्टः ॥

महर्षिः, पुं, (महांश्चासौ ऋषिश्चेति ।) व्यासादिः । इति त्रिकाण्डशेषः ॥ अस्य व्युत्पत्त्यादिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतैः ।
एष सन्निचयो यस्माद् ब्रह्मणश्च ततस्त्वृषिः ॥
निवृत्तिसमकालन्तु बुद्ध्या व्यक्तिन्त्वृषिस्त्वयम् ।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः ॥
गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम् ।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता ॥
तेनेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः ।
निवर्त्तमानैस्तैर्बुद्ध्या महान् परिगतः परः ॥
यस्मादृषिः परत्वेन महांस्तस्मान्महर्षयः ।
ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वै ॥
ऋषयस्तत्परत्वेन भूतादिऋषयस्ततः ।
ऋषिपुत्त्रा ऋषीकास्तु मैथुनाद्गर्भसम्भवात् ॥
परत्वेनर्षयस्ते वै भूतादिऋषिकास्ततः ।
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्त्रकाः ॥
श्रुत्वा ऋषं परत्वेन नाम तस्मात् श्रुतर्षयः ।
अव्यक्तात्मा महानात्माहङ्कारात्मा तथैव च ॥
भूतात्मा चेन्द्रियात्मा च तेषान्तु ज्ञानमुच्यते ।
इत्येवमृषिजातिस्तु पञ्च तान् नामभिः शृणु ॥
भृगुर्म्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः ।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश ॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः ।
परत्वेनर्षयस्तस्मान्मतास्तस्मान्महर्षयः ॥"
इति मात्स्ये १२० अध्यायः ॥

महल्लकः, पुं, (महतः स्त्रीरक्षादिरूपान् विपुलान् भारानित्यर्थः लाति गृह्णातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ततः स्वार्थे कन् । यद्वा, महान्तं चरित्रगुणं लकति आस्वादयतीति । लक् आस्वादने + अच् ।) अन्तःपुररक्षकः । तत्पर्य्यायः । सौविदल्लः २ कञ्चुकी ३ स्थापत्यः ४ सौविदः ५ विदाङ्कः ६ । इति जटाधरः ॥ सौविदल्लकः ७ अन्तर्वंशिकः ८ । इति शब्दरत्नावली ॥

महल्लिकः, पुं, (महान्तं चरित्रगुणं लिखतीवेति । महत् + लिख + कः । पृषोदरादित्वात् साधुः ।) अन्तःपुररक्षकः । खोजा इति भाषा ॥ तस्य लक्षणं यथा,—
"शुष्कमूत्त्रोऽनुपस्थो यः स्त्रीस्वभावो महल्लिकः ॥"
इति शब्दमाला ॥

महसं, क्ली, (मह्यते पूज्यतेऽनेनेति । मह + "अत्यविचमितमिनमीति ।" उणा० ३।११७ । इति असच् ।) ज्ञानम् । प्रकारः । इत्युणादिकोषः ॥

मही, स्त्री, (मह्यते पूज्यते इति । मह् + घ । स्त्रियां टाप् ।) गोपवल्ली । इति शब्दचन्द्रिका । गोरक्षचाकुलिया इति भाषा ॥ स्त्रीगवी । इति शब्दरत्नावली ॥

महाकच्छः, पुं, (महान् विपुलः कच्छो जलप्रायदेशोऽस्य ।) समुद्रः । वरुणः । इति मेदिनी । छे, ६ ॥ पर्व्वतः । इति शब्दरत्नावली ॥

महाकण्टकिनी, स्त्री, (महती चासौ कण्टकिनी चेति ।) विम्बसारकम् । इति शब्दचन्द्रिका । फणिमनसा इति भाषा ॥

महाकन्दः, पु, (महांश्चासौ कन्दश्चेति ।) रसोनकः । इत्यमरः । २ । ४ । १४८ ॥ मूलकम् । इति शब्दरत्नावली ॥ चाणक्यमूलकम् । रक्तलशुनम् । राजपलाण्डुः । इति राजनिर्घण्टः ॥

महाकपित्थः, पुं, (महांश्चासौ कपित्थश्चेति ।) विल्ववृक्षः । इति त्रिकाण्डशेषः ॥

महाकरञ्जः, पुं, (महांश्चासौ करञ्जश्चेति ।) करञ्जविशेषः । वड करञ्जा इति भाषा ॥ तत्पर्य्यायः । षड्ग्रन्था २ हस्तिचारिणी ३ उदकीर्य्यः ४ विषघ्नी ५ काकघ्नी ६ मदहस्तिनी ७ शारङ्गेष्टा ८ मधुमती ९ रसायनी १० हस्तिरोहणकः ११ हस्तिकरञ्जकः १२ सुमनाः १३ काकभाण्डी १४ मधुमत्ता १५ । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । कटुत्वम् । विषकण्डूविचर्च्चिकाकुष्ठत्वग्दोषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

महाकर्णिकारः, पुं, (महांश्चासौ कर्णिकारश्चेति ।) आरग्वधः । इति राजनिर्घण्टः ॥

महाकायः, पु, (महान् कायोऽस्य ।) नन्दी । स च शिवद्वारपालः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १३ । १५० । २४ ।
"नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः ॥")
हस्ती । इति केचित ॥ (महान् कायः शरीरमिति ।) बृहत् शरीरम् ॥ तद्वति, त्रि ॥ (यथा, महाभारते । १ । १५६ । ३२ ।
"महाजवं महाकायं महामायमरिन्दमम् ॥"
स्त्रियां टाप् । कुमारानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । २४ ।
"रोहिताक्षी महाकाया हरिपिण्डा च भूमिप । ॥")

महाकार्त्तिकी, स्त्री, (महती चासौ कार्त्तिकी चेति ।) रोहिणीनक्षत्रयुक्ता कार्त्तिकी पूर्णिमा । यथा,—
"प्राजापत्यं यदा ऋक्षं तथैतस्यां नराधिप ।।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ॥"
इति पाद्मे २ खण्डे ३ अध्यायः ॥

महाकालः, पुं, (महांश्चासौ कालश्चेति ।) विष्णुस्वरूपाखण्डदण्डायमानसमयः । यथा । कालो घटवान् महाकालत्वात् । इति सिद्धान्तलक्षणम् ॥ महादेवः । (नन्दिवत्तिर्यथा महानिर्व्वाणतन्त्रे । ४ । ३१ ।
"कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः ।
महाकालस्य कलनात् त्वमाद्या कालिका परा ॥")
प्रमथगणविशेषः । इति मेदिनी । ले, १५९ ॥ (उज्जयिनीस्थशिवलिङ्गविशेषः । यथा, कथासरित्सागरे । ११ । ३१—३२ ।
"अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः ।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥
यस्यां वसति विश्वेशो महाकालवपुः स्वयम् ।
शिथिलीकृतकैलासनिवासव्यसनो हरः ॥"
तीर्थविशेषः । यथा, महाभारते । ३।८२।४७ ।
"महाकालं ततो गच्छेत् नियतो नियताशनः ।
कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत् ॥")
लताविशेषः । माकाल इति भाषा ॥ तत्पर्य्यायः । उरुकालः २ किम्पाकः ३ काकमर्द्दकः ४ । इति रत्नमाला ॥ काकमर्द्दः ५ देवदालिका ६ दाला ७ दालिका ८ जलजः ९ घोषकाकृतिः १० । इति राजनिर्घण्टः ॥ (यथा,
"अन्तर्मलिनदेहेन वहिराह्लादकारिणा ।
महाकालफलेनेव कः खलेन न वञ्चितः ॥"
इत्युद्भटः ॥)
शिवपुत्त्रविशेषः । तस्य जन्मवृत्तान्तं यथा,—
श्रीदेवा ऊचुः ।
"एष वैश्वानरः श्रीमान् भूरितेजोमयो वशी ।
महामैथुनबीजन्तु त्वत्तेजः संग्रहीष्यति ॥
इत्युक्ता त्रिदशाः सर्व्वे वीतिहोत्रं पुरःस्थितम् ।
तस्मै निदेशयामासुः सम्भवे सर्व्वहेतवे ॥
ततः षडङ्गं स्वं रेतो वादिते दहनानने ।
उत्ससर्ज्ज महाबाहुर्म्महामैथुनकारणम् ॥
अम्नावुनक्षत्यमानस्य तेजसः शशभृद्भृतः ।
अणुद्वयमनिस्वल्पं गिरिप्रस्थे पपात ह ॥
तयोः कारणयोः सद्यः संभूतौ शङ्करात्मजौ ।
एको भृङ्गसमः कृष्णो भिन्नाञ्जननिभोऽपरः ॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत् ।
महाकृष्णैकरूपस्य महाकालेति लोकभृत ॥
ततस्तौ पालयामास शङ्करः प्रमथोत्करैः ।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमाप्रतिपालितौ ।
क्रमाद्गणेशौ कृत्वा तौ हरो द्वारि न्ययोजयत् ॥"
इति कालिकापुराणे ४५ अध्यायः ॥
तस्य वानरमुखकारणं जन्मान्तरञ्च यथा,—
"अथैकदोमया सार्द्धं निगूढे रतिमन्दिरे ।
नर्म्माकरोन्महादेवो मोदयुक्तो रतिप्रियः ॥
यदा सा नर्म्मणो याता गौरी स्मरहरान्तिकम् ।
तदा भृङ्गिमहाकालौ द्वास्थौ द्वारि प्रतिष्ठितौ ॥
नर्म्मावसाने सा देवी मुक्तधम्मिल्लबन्धना ।
शिथिलीनगलद्गात्रा वस्त्रमात्रैकपाणिना ॥
व्यस्तहारा गन्धपुष्पैराकुलैर्नातिशोभना ।
विलुप्तकुङ्कुमा दष्टदशनच्छदविभ्रमा ॥
निःसृता रतिसङ्केतशालाया जलजानना ।
ईषद्घूर्णनयना निचिता स्वेदबिन्दुभिः ॥

तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम् ।
अयोग्यां वीक्षितुं चान्यैर्यच्चजल्पते प्रियम् ॥
दृष्टवन्तुर्महात्मानौ नातिस्पष्टात्ममानसौ ।
भृङ्गी चापि महाकालः प्राप्तकालश्च कोपनः ॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधोमुखौ ।
चिन्ताचाजग्मतुस्तीव्रां निःश्वस्य तु चलम् ॥
तौ पश्यन्ती तदा देवी ददर्श हिमवत्सुता ।
चुकोप च तदापर्णा वाक्यञ्चैतदुवाच ह ॥
एवंभूतान्तु मां कस्मादसम्भ्रामपश्यताम् ।
भवन्तौ तनयौ शुद्धौ स्त्रीमर्य्यादाविवर्ज्जितौ ॥
तस्मादिमाममर्य्यादां भवन्तौ निरपत्रपौ ।
अकुर्व्वातां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषीं योनिमासाद्य मातुरीक्षणदोषतः ।
भविष्यतो भवन्तौ तु शाखामृगमुखौ भुवि ॥
इति तावुमया शप्तौ हरपुत्रौ महामती ॥”
“अथोमया समं देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप । ॥
ददर्शाथ चरन्तीं तामुमायाः सदृशीं गुणैः ।
सर्व्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
तां दृष्ट्वा व्यगदद्देवीं गौरीं वृषभकेतनः ।
स्मितप्रसन्नवदनः प्रहसन्निव भाविनीम् ॥
ईश्वर उवाच ।
इयं ते मानुषी मूर्त्तिः प्रिये तारावतीति या ।
भृङ्गीमहाकालयोस्ते जन्मने विहिता स्वयम् ॥
त्वत्तो ह्यनन्यकामोऽहं नान्यां गन्तुमिहोत्सहे ।
त्वमिदानीं स्वयं चास्यां मूर्त्त्यां प्रविश्य
भाविनि । ॥
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम् ॥
श्रीदेव्युवाच ।
ममैव मानुषी मूर्त्तिरियं वृषभकेतन । ।
विशामि तेऽत्र वचनादुत्पादय सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः सापर्णयाविष्टा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभजन्मुदा ॥
तस्मिन् कालेऽभवद्गर्भः कापाली चास्थिमाल-
धृक् ।
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपशार्दूल ! तथा शाखामृगाननम् ॥”
इति कालिकापुराणे ४६—४८ अध्यायाः ॥
बाणासुरस्य महाकालत्वं यथा,—
ऋषय ऊचुः ।
“कथितो भवता सर्गः सशापा अपि शातिताः ।
त्वत्प्रसादान्महाभाग ! कृतकृत्या वयं गुरो । ॥
भूयश्च श्रोतुमिच्छामो वयमेतद्द्विजोत्तम । ।
कोऽन्यो भृङ्गी महाकालो जातौ वेतालभैरवौ ॥
वेतालश्च महाकालं भैरव भृङ्गिणं तथा ।
प्रश्नो मे द्विजशार्दूल । कथमेषां चतुष्टयम् ॥
मार्कण्डेय उवाच ।
भुवं गते महाकाले मानुषत्वे च भृङ्गिणि ।
वेतालभैरवाख्ये च तथाभूते द्विजोत्तमाः ॥
वरलब्धे च वेताले भैरवे तेन संगते ।
अन्धकं तपसा युक्तं भृङ्गिणञ्चाकरोद्धरः ॥
अन्धकस्तु हरं पूर्व्वं विरुध्यापदमागतः ।
पश्चाद्धरं समाराध्य पुत्रोऽभूत्तस्य सोऽसुरः ॥
भृङ्गित्वेहादृभृङ्गिणं तं संज्ञया चाकरोद्धरः ।
स्नेहेन तु महाकालं बाणं बलिसुतं हरः ॥
विष्णुना छिन्नबाहुं तं महाकालमथाकरोत् ।
एवं मुनिवरास्तेषां संजातञ्च चतुष्टयम् ॥
वेतालो भैरवो भृङ्गी महाकालस्त्वनुक्रमात् ॥”
इति कालिकापुराणे ८५ अध्यायः ॥ * ॥
तस्य ध्यानादि यथा,—
“महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिशुम् ॥
व्याघ्रचर्म्मावृतकटिं तुन्दिलं रक्तवाससम् ।
त्रिनेत्रमूर्द्ध्वकेशञ्च मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखण्डमुग्रं ज्वलन्निभम् ॥
तथा च कुमारीकल्पे ।
देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत् ।
हुं च्चौं यां रां लां वां क्रों महाकालभैरव
सर्व्वविघ्नान्नाशय नाशय ह्रीं श्रीं फट् स्वाहा ।
इत्यनेन पाद्यादिभिराराध्य त्रिस्तर्पयित्वा मूलेन
देवीं पञ्चोपचारैः पूजयेत् । तथा च काली-
तन्त्रे ।
महाकालं यजेद्यत्नात् पश्चाद्देवीं प्रपूजयेत् ।
कालीकल्पे ।
कवचं च्चौं समुद्धृत्य यां रां लां वाञ्च क्रोंन्ततः ।
महाकालभैरवेति सर्व्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुद्धरेत् ।
फट् स्वाहया समायुक्तो मन्त्रः सर्व्वार्थसाधकः ॥”
इति तन्त्रसारः ॥

महाकाली, स्त्री, (महाकाल + पत्न्यर्थे ङीष् ।) महाकालस्य पत्नी । सा तु पञ्चवक्त्राष्टभुज-कालीविशेषः । इति तन्त्रम् ॥ (इयमेव पराशक्ते-स्तामसी शक्तिः । यथा, देवीभागवते ।१।२।२०।
“तस्यास्तु सात्त्विकी शक्ती राजसी तामसी
तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः
स्त्रियः ॥”)
अथ महाकालीमन्त्रः ।
“ॐ फ्रें फ्रें क्रों क्रों पशून् गृहाण हूं फट् स्वाहा । श्मशानभैरवीमन्त्रेण यावत् क्रूर-कर्म्मणि प्रयोगः कर्त्तव्यः । अथ महाकाली-मन्त्रप्रयोगः । तत्र न्यासमुद्रादिकं न कर्त्त-व्यम् । तथा च ।
न्यासमुद्रादिकं किञ्चिन्मात्र कार्य्या विचारणा ।
स्नानतोयेन संपूर्णं स्नानकुम्भेऽथ कालिकाम् ॥
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रत्रिलोचनाम् ।
शक्तिशूलधनुर्बाणखड्गखेटवराभयान् ॥
दधानां दशभुजैर्देवीं बिभ्राणां भूरिभूषणाम् ।
ध्यात्वैवं साधकः साध्यं साधयेन्मनसेप्सितम् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री चामुण्डा चण्डिका-
ष्टमी ।
पूर्व्वादीशानपर्य्यन्तं कुम्भस्याग्रे स्थिता इमाः ॥
तत्र क्रमः । देवीं ध्यात्वा यथाविध्युपचारैः संपूज्य ब्राह्म्याद्यष्टशक्तीः पूर्व्वादिक्रमेण पूज-येत् । तथा ।
नामोच्चारणसंरब्धं वह्नौ प्रज्वलितेऽनले ।
जुहुयाद्वैरिणां मुक्तौ देवीमन्त्रं जपंस्तथा ॥
समिधः पिचुमर्द्दस्य तथा विभीतकाह्विकाः ।
एषधूमश्मशानास्थिविभीताङ्गारहोमतः ॥
सप्ताहाद्वैरिणं हन्ति कालिकामन्त्रयोगतः ।
उच्चाटनं चापराह्णे सन्ध्यायां मारणं तथा ॥
दक्षिणस्यां दिशि स्थित्वा श्मशानादेर्दक्षिणा-
मुखः ॥”
इति तन्त्रसारः ॥
जिनानां चतुर्विंशतिशासनदेवतान्तर्गतदेवी-विशेषः । इति हेमचन्द्रः ॥ * ॥

महाकाव्यं, क्ली, (महच्च तत्काव्यञ्चेति ।) काव्य-शास्त्रविशेषः । तत्पर्य्यायः । सर्गबन्धः २ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
“सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्व्वेऽपि रसाः सर्व्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्व्वा वस्तुनिर्द्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम् ।
एकवृत्तमयः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥”
इति साहित्यदर्पणे ६ परिच्छेदः ॥ * ॥
महाकाव्यग्रन्था यथा, कालिदासकृतकुमार-सम्भवरघुवंशप्रभृतयः । भर्त्तृहरिकृतभट्टि-काव्यम् । भारविकृतकिरातार्ज्जुनीयम् । श्रीहर्ष-कृतनैषधीयचरितम् । माघकृतशिशुपालवध-श्चेत्यादयः ॥

महाकुमुदा, स्त्री, (महती चासौ कुमुदा चेति ।) काश्मरी । इति राजनिर्घण्टः ॥

महाकुम्भी, स्त्री, (महती चासौ कुम्भी चेति ।) कट्फलः । इति राजनिर्घण्टः ॥

महाकुलः, त्रि, (महत् कुलं वंशोऽस्य ।) उत्तम-कुलजातः । तत्पर्य्यायः । कुलीनः २ आर्य्यः ३ सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ । ७ । ३ ॥ कुल्यः ७ अभिजातः ८ कौलेयक, ९

जालः। १०। इति हेमचन्द्रः। ३। १६६॥ महाकुलः ११ कौलेयः १२ कौलेयकः १३। इत्यमरटीका॥ कुलजः १४ साधुजः १५। कुलश्रेष्ठः १६। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्। १७। ४।
"भेदे इतिविनाशो भेदः सुहृदां महाकुलानाञ्च॥"

क्ली, उत्तमं कुलम्। यथा, राजतरङ्गिण्याम्। ३। ९१।
"द्वयोराजोचितं चित्रं जन्मैकस्मिन् महाकुले॥")

महाकुलीनः, त्रि, (महाकुलस्य अपत्यम्। महाकुल+"महाकुलादञ्खञौ।" ४।१।१४१। इति पक्षे खः।) महाकुलः। यथा,—
"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम्॥"
इति भट्टिः। ५। ७१ श्लोकः॥
(स्त्रियां टाप्। यथा, रामायणे।२।२८।३।
"सीते! महाकुलीनासि धर्म्मे च निरता सदा॥")

महाकुष्ठं, क्ली, (महच्च तत् कुष्ठञ्चेति।) बृहत्कुष्ठरोगः। तत् सप्तविधं यथा,—
"पूर्ब्बत्रिकं तथा सिध्मं ततः काकणकं तथा।
पुण्डरीकर्च्चर्षजिह्वे तु महाकुष्ठानि सप्त च॥
पूर्ब्बत्रिकं कपालौडुम्बरमण्डलाख्यम्। सिध्मशब्दोऽकारान्तो नपुंसकलिङ्गः। ननु कथं सिध्मस्य महाकुष्ठेषु गणना सुश्रुतेन क्षुद्रकुष्ठेषूक्तत्वात्। उच्यते। त्वङ्मात्रगता सिध्मपुष्पिका सुश्रुतेन च क्षुद्रकुष्ठेषूक्ता धातुषु प्रविष्टन्तु सिध्मं महाकुष्ठमेव। एवंविधस्य सिध्मस्य चरकेण महाकुष्ठेषु दर्शितत्वात्। एषां महाकुष्ठत्वञ्च शीघ्रमुत्तरोत्तरधात्ववगाहनात् उत्पन्नदोषत्वात् चिकित्साबाहुल्याच्च।" इति भावप्रकाशः॥ (एषां चिकित्सा क्षुद्रकुष्ठशब्दे द्रष्टव्या॥)

महाकूपः, पुं, (महांश्चासौ कूपश्चेति।) बृहत्कूपः। तत्पर्य्यायः। अन्धुः २। इति जटाधरः॥

महाकूलः, पुं, (महत् कूलमस्य।) महाकुलः। सत्कुलः। इति त्रिकाण्डशेषः।

महाकोशफला, स्त्री, (महान् कोशः फले यस्याः।) देवदाली लता। इति राजनिर्घण्टः॥

महाकोशातकी, स्त्री, (महती चासौ कोशातकी चेति।) हस्तिघोषा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

महागदः, पु, (महांश्चासौ गदश्चेति।) ज्वरः। इति राजनिर्घण्टः॥ (महारोगः। यथा, सुश्रुते। १। ३३ अध्याये।
"वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः।
अश्मरी मूढगर्भश्च तथैवोदरमष्टमम्।
अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदाः॥"
औषधविशेषः। यथा, सुश्रुते कल्पस्थाने ५ अध्याये।
"एषोऽगदो हन्ति विषं प्रयुक्तः
पानाञ्जनाभ्यञ्जननस्ययोगैः।
अवार्य्यवीर्य्यो विषवेगहन्ता
महागदो नाम महाप्रभावः॥"
महती गदास्येतिविग्रहे महागदाविशिष्टे, त्रि। यथा, श्रीमद्भागवते। ३। १८। ६।
"परानुषक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम्।
मर्म्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः
प्रचण्डमन्युः प्रहसंस्तं बभाषे॥")

महागन्धं, क्ली, (महान् गन्धोऽस्य।) हरिचन्दनम्। बोलम्। इति राजनिर्घण्टः॥ (महागन्धयुक्ते, त्रि। यथा, हरिवंशे। १४३। ४४।
"तत्र कण्ठे समासज्य महागन्धं नराधिप।
आययावन्धको यत्र दुरात्मा बलदर्पितः॥")

महागन्धः, पु, (महान् गन्धोऽस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ जलवेतसः। इति शब्दचन्द्रिका॥

महागन्धा, स्त्री, (महान् गन्धो यस्याः। स्त्रियां टाप्।) नागबला। केविकापुष्पम्। इति राजनिर्घण्टः॥ चामुण्डा। यथा, हेमचन्द्रः।२।१२०।
"चामुण्डा चर्च्चिका चर्म्ममुण्डा मार्ज्जारकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"

महागवः, पुं, (महांश्चासौ गौश्चेति। "गोरतद्धितलुकि।" ५।४।९२। इति समासान्तष्टच्। गोसदृशत्वादस्य तथात्वम्।) गवयः। यथा,—
"वनगौर्गवयः प्रोक्तो बलभद्रो महागवः॥"
इति राजनिर्घण्टः॥

महागिरिः, पु, (महान् गिरिस्तदाख्योपाधिर्यस्य। यद्वा, महान् गिरिरिव।) बौद्धभेदः। यथा—
"महागिरिः सुहस्त्याद्या वज्रान्ता दशपूर्व्विणः॥"
इति हेमचन्द्रः। १। ३४॥
महान् गिरिः पर्व्वतः।) बृहत्पर्व्वतश्च॥ (यथा, महाभारते। ३। ११०। १५।
"नातप्ततपसा शक्यो द्रष्टुमेष महागिरिः।
आरोढुं वापि कौन्तेय। तस्मान्नियतवाग्भव॥"
दानवविशेषः। यथा, हरिवंशे। ३। ८६।
"कृत्यश्चैव निचन्द्रश्च उर्णनाभो महागिरिः॥")

महागुरुः, पु, (महांश्चासौ गुरुश्चेति।) अतिगुरुः। स च पुरुषस्य पिता माता आचार्य्यश्च। स्त्रियाः पतिः। अदत्तकन्यायाः पिता माता च। यथा। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति। इति विष्णुसूत्रम्॥ पत्युर्महागुरुत्वमाह रामायणे।
"नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियाः।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च॥"
शातातपः।
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गुरुः॥"
एकपदेन इतरस्त्रीणां पितृमात्रादयाणवृत्तिः॥ * ॥
सपिण्डमरणे प्रक्रम्य आश्वलायनः। त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रं महागुरुषु। आचार्य्यश्च उपनीय वेदमाचार्य्यः स उदाहृतः। इति याज्ञवल्क्योक्तः। तस्य रात्रौ त्रिरात्राशौचनिमित्तेन नैताहृङ्नियमः॥ आश्वलायनः। नैतस्यां रात्रावन्नं पचेयुः। अन्नं न पचेयुरित्यनेनोपवासः सूचितः। अथ वत्सरे ब्राह्मणमन्नं आसीरन् इति वचनमागवचनात्। अधस्तरः कटादिः। अक्षारलवणं क्षारलवणितकादिसमलवणाभिन्नं तत्र सैन्धवं साम्भरि च। इति शुद्धितत्त्वम्॥ * ॥ महागुरुमरणे संवत्सरपर्य्यन्तं निषिद्धकर्म्माणि यथा, कर्म्मलोचने।
"महागुरुनिपाते च काम्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मयज्ञञ्च यावत् पूर्णो न वत्सरः॥
अन्यश्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम्।
वर्ज्जयेद्गुरुपाते च यावत् पूर्णो न वत्सरः॥
तीर्थयात्रां विवाहञ्चाध्यापनं तपस्तथा।
संवत्सरं न कुर्व्वीत महागुरुनिपातने॥"
अपि च।
"विशेषतः शिवापूजां प्रकृतपितृको द्विजः।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवयुतञ्च यत्॥"
इति कालिकापुराणे ५४ अध्यायः॥

महागुल्मा, स्त्री, (महान् गुल्मो यस्याः।) सोमवल्ली। इति राजनिर्घण्टः॥

महागुहा, स्त्री, (महती गुहा यस्याः।) पृश्निपर्णी। इति राजनिर्घण्टः॥

महागोधूमः, पुं, (महांश्चासौ गोधूमश्चेति।) बृहद्गोधूमः। वड गम इति भाषा॥ यथा,—
"गोधूमः सुमनोऽपि स्यात्त्रिविधः स च
कीर्त्तितः।
महागोधूम इत्याख्यः पश्चाद्देशात् स
चागतः॥
मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्सरः॥
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत्॥"
कफप्रदो नवीनो न तु पुराणः। पुराणयवगोधूमक्षौद्रजाङ्गलमूल्पशृङ्गिति वाग्भटेन वसन्ते गृहीतत्वात्।
"मधूली शीतला स्निग्धा पित्तघ्नी मधुरा
लघुः।
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखा स्मृता॥"
इति भावप्रकाशः॥

महाग्रीवः, पुं, (महती दीर्घा ग्रीवा कन्धरा यस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (शिवः । यथा, महाभारते । १३ । १७ । ८६ ।
"महानासो महाकम्बुर्महाग्रीवः श्मशान-
भाक् ॥"
शिवानुचरभूतविशेषः । यथा, हरिवंशे भविष्य-पर्व्वणि । १४ । ३ ।
"कुक्षोदरो महाग्रीवः स्थूलजिह्वो द्विबाहुकः ।
पार्श्ववक्त्रः सिंहमुख उन्नतांसो महाहनुः ॥"
देशविशेषः । यथा, मार्कण्डेये । ५८ । १७ ।
"आम्रग्रीवा महाग्रीवा स्त्रैपुरा श्मश्रु-
धारिणः ॥")
वृहद्ग्रीवायुक्ते, त्रि ॥

महाघासः, पुं, महतो देशस्य महत्या भूमेर्वा-घासः । इति मुग्धबोधव्याकरणटीकायां दुर्गा-दासः ॥

महाघूर्णा, स्त्री, (महती घूर्णा शरीरभ्रमणं यस्याः ।) सुरा । इति शब्दचन्द्रिका ॥ (महती-चासौ घूर्णा चेति ।) अतिशयभ्रमिश्च ॥

महाघोरः, त्रि, (महांश्चासौ घोरश्चेति ।) अतिशयभयानकः । यथा, शुद्धितत्त्वे ।
"यमद्वारे महाघोरे तप्ता वैतरणी नदी ।
ताञ्च तर्त्तुं ददाम्येनां कृष्णां वैतरणीञ्च गाम् ॥"

महाघोषं, क्ली, (महान् घोषः कोलाहलो यस्मिन् ।) हट्टम् । इति मेदिनी । षे, ५६ ॥ वृहच्छब्दयुक्ते, त्रि ॥ यथा, महाभारते । १ । २२१ । ११ ।
"तेषां श्रुत्वा सभापालो भेरीं सान्नाहिकीं तथा ।
समाजघ्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥")

महाघोषः, पुं, (महांश्चासौ घोषश्चेति ।) अति-घोषणम् । इति मेदिनी । षे, ५६ ॥

महाघोषा, स्त्री, (महान् घोषो यस्याः । टाप् ।) कर्कटशृङ्गी । इति मेदिनी । षे,५६ ॥ कुन्दुरुकी । इति शब्दचन्द्रिका ॥

महाङ्गः, पुं, (महान्ति दीर्घाणि अङ्गान्यस्य ।) उष्ट्रः । इत्यमरः । २ । ६ । ७५ ॥ गोक्षुरकः । रक्तचित्रकः । इति राजनिर्घण्टः ॥ वृहदव-यवयुक्ते, त्रि ॥ (यथा, महाभारते ।१३।१७।८३।
"स्कन्दः स्कन्दिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ॥")

महाचञ्चुः, स्त्री, (महती चञ्चुरग्रमस्याः ।) शाक-विशेषः । तत्पर्य्यायः । वृहच्चञ्चुः २ विषारिः ३ सुचञ्चुका ४ स्थूलचञ्चुः ५ दीर्घपत्री ६ विश्व-गन्धा ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । गुल्मशूलो-दरार्शोऽसिविषनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ पु, वृहच्चञ्चुयुक्तपक्षी च ॥

महाचक्रः, पु, (महांश्चासौ चक्रश्चेति ।) यम-भृत्यः । इति हेमचन्द्रत्रिकाण्डशेषौ ॥ प्रचण्डे, त्रि ॥

महाच्छदः, पु, (महान् छदः पत्रमस्य ।) देव-ताड़वृक्षः । इति रत्नमाला ॥ वृहत्पत्रञ्च ॥

महाच्छायः, पुं, (महती छायास्य ।) वटवृक्षः । इति राजनिर्घण्टः ॥ वृहच्छायायुक्ते, त्रि ॥

महाच्छिद्रा, स्त्री, (महच्छिद्रमस्याः ।) महामेदा । इति राजनिर्घण्टः ॥ वृहच्छिद्रयुक्ते, त्रि ॥

महाजः, पुं, (महांश्चासौ अजश्चेति ।) वृह-च्छागः । (महतो जायत इति । महत्+जन्+कर्त्तरि डः । पृषोदरादित्वात् साधुः ।) महाकुलोद्भवे, त्रि ॥

महाजटा, स्त्री, (महती जटास्याः ।) रुद्रजटा । इति राजनिर्घण्टः ॥ (महती जटा ।) वृह-ज्जटा च ॥

महाजनः, पुं, (महांश्चासौ जनश्चेति ।) साधुः । यथा, महाभारते । ३ । ३१० । ११२ ।
"वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
मन्वादिः । यथा,—
"प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्व्वत माययालम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्म्मणि युज्यमानः ॥"
इति श्रीभागवते षष्ठस्कन्धे अजामिलोपाख्याने यमवाक्यव्याख्याने श्रीधरस्वामी ॥ (धनी । यथा, मृच्छकटिके । १ ।
"सत्यं नैव हि कश्चिदस्य कुरुते सम्भाषते
नादरात्
संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापात-
कम् ॥")

महाजवः, पुं, (महान् जवो वेगो यस्य ।) गवयः । श्रीकारी मृगः । इति राजनिर्घण्टः । अति-वेगयुक्ते, त्रि ॥ (यथा, श्रीमद्भागवते । ७।८।२८।
"ललाटहासं स्वरसुनस्वमोत्स्वणं
निमीलिताक्षं जगृहे महाजवः ॥"
स्त्री, कुमारानुचरगणविशेषः । यथा, महा-भारते । ६ । ४६ । २२ ।
"शशोलूकमुखी कृष्णा खरजङ्घा महाजवा ॥")

महाजम्बुः, स्त्री, (महती चासौ जम्बुश्चेति ।) वृहज्जम्बुवृक्षः । यथा,—
"महाजम्बुर्महापत्रा राजजम्बुर्वृहत्फला ॥"
इति रत्नमाला ॥

महाजम्बूः, स्त्री, (महती चासौ जम्बूश्चेति ।) वृहज्जम्बुः । तत्पर्य्यायः । राजजम्बुः २ स्वर्ण-माता ३ महाफला ४ पिकप्रिया ५ कोकिलेष्टा ६ महानीला ७ वृहत्फला ८ । अस्य गुणाः । उष्णत्वम् । मधुररसत्वम् । कषायत्वम् । श्रम-हरत्वम् । अटिव्यास्यजडिमनाशित्वम् । स्वर-करत्वम् । विष्टम्भित्वम् । शोषशमनत्वम् । श्रमातीसारार्त्तिवर्द्धकत्वम् । श्वसितकफकास-प्रशमनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"फलेन्द्रः कथितो नन्दो राजजम्बुर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ॥"
इति भावप्रकाशः ॥

महाजातिः, स्त्री, (महती जातिरस्या इति । यद्वा, महती जातिरिव तदाकृतित्वात् ।) वासन्ती लता । इति राजनिर्घण्टः ॥ (महती जातिरिति ।) श्रेष्ठवर्णश्च ॥

महाजातीयः, त्रि, (महत्+"प्रकारवचने जातीयर् ।" ५ । ३ । ६९ । इति जातीयर् । ततः । "आन् महतः समानाधिकरणजाती-ययोः ।"६।३।४६। इति महतः आकारादेशः ।) महतः प्रकारः । इति व्याकरणम् ॥

महाजाली, स्त्री, (जालयति आच्छादयतीति । जाल आच्छादने+पचाद्यच् । स्त्रियां ङीष् । ततः । महती चासौ जाली चेति । यद्वा, महांश्चासौ जालश्चेति स अस्या अस्ति अर्शं आद्यच् ततः ङीष् । इत्यमरटीकायां रमसः ।) पीतवर्णघोषा । इत्यमरः । २ । ४ । ११७ ॥ राजकोशातकी । इति राजनिर्घण्टः ॥ वृह-ज्जालवाहके, त्रि ॥

महाज्यैष्ठी, स्त्री, (महती चासौ ज्यैष्ठी चेति ।) नक्षत्रविशेषादियुक्तज्यैष्ठीपूर्णिमा । सा पञ्चधा । यथा, ब्रह्मपुराणे ।
"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता ॥
ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्याम् ॥ १ ॥
विना गुरुवारेणापि ।
ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥२॥
अनुराधास्थगुरावपि ।
ऐन्द्रे मैत्रे यदा जीवस्तत्पश्चदशके रविः ।
पूर्णिमा शक्रचन्द्रेण महाज्यैष्ठी प्रकीर्त्तिता ॥३॥
अनुराधास्थे चन्द्रेऽपि । वाग्भूतिः ।
ऐन्द्रर्क्षे त्वथवा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥४॥
राजमार्त्तण्डे ।
ज्यैष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा ।
ज्येष्ठाभेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता ॥५॥
ज्यैष्ठसंवत्सरश्च ।
ज्येष्ठामूलोपगे जीवे वर्षं स्यात् शक्रदैवतम् ।
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः ।
न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्यैष्ठ इति वर्षविशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यादिति पाठः काल्पनिकः ॥ * ॥
महाज्यैष्ठ्यान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ॥"
इति तिथ्यादितत्त्वम् ॥

महाज्योतिष्मती, स्त्री, (महती चासौ ज्योतिष्मती चेति ।) लताविशेषः । बड़ी मालकङ्गनी इति हिन्दी भाषा । तत्पर्य्यायः । तेजोवती २ बहु-रसा ३ कनकप्रभा ४ तीक्ष्णा ५ सुवर्णनकुली ६

लवणा ७ अग्निदीप्ता ८ तेजस्विनी ९ सुरलता १० अग्निफला ११ अग्निगर्भा १२ कङ्गुनी १३ शैलसुता १४ सुतैला १५ सुवेगा १६ वायसी १७ तीव्रा १८ काकाण्डी १९ वायसादनी २० गौर्लता २१ श्रीलता २२ सौम्या २३ ब्राह्मी २४ लवणकिंशुका २५ पारावतपदी २६ पीता २७ पीततैला २८ यशस्विनी २९ मेध्या ३० मेधावती ३१ धीरा ३२। अस्या गुणाः। तिक्ततरत्वम्। रूक्षत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वम्। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञाकारित्वञ्च। इति राजनिर्घण्टः॥

महाज्वालः, पुं, (महती ज्वाला शिखास्य।) होमाग्निः। इति हेमचन्द्रः।३।५००॥ (नरकविशेषः। यथा, विष्णुपुराणे। २। ६। १२।

"कुर्वा सुताञ्चापि गत्वा महाज्वाले निपात्यते॥"

महादेवः। यथा, महाभारते।१३।१७।८१।

"अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः॥")

महाज्वाला, स्त्री, (महती ज्वाला दीप्तिर्यस्याः।) जिनानां विद्याधरीविशेषः। इति हेमचन्द्रः। ३।५००॥ (महती ज्वाला।) वृहदग्निशिखा च॥

महाढ्यः, पुं, (महान् आढ्यः शोभासम्पन्नः।) कदम्बः। इति राजनिर्घण्टः॥ (महानाढ्यः।) अतिशयधनवति, त्रि॥ (यथा, कथासरित्सागरे। ७५। ११८।

"ततः प्रभृति चैतस्यां वाराणस्यामुवास सः। अभ्यर्थितो महाढ्यस्य तस्यैव वणिजो गृहे॥")

महातमःप्रभा, स्त्री, (महती तमसां प्रभा प्रकाशोऽस्याम्।) नरकविशेषः। स चातिशयान्धकारमयः। यथा, हेमचन्द्रः। ५। ३।

"घनोदधिघनवाततनुवातनभःस्थिता।
रत्नशर्कराबालुकापङ्कधमतमःप्रभाः॥
महातमःप्रभा वेत्यधोऽधो नरकभूमयः॥"

महातरुः, पुं, (महांश्चासौ तरुश्चेति।) स्नुही वृक्षः। इति हेमचन्द्रः। ४। २०६॥ (महाकवेः कालिदासस्य स्नुहीवृक्षमुद्दिश्य वक्रोक्तिप्रयोगो यथा,—

"तरवः पारिजाताद्याः स्नुहीवृक्षो महातरुः॥")

वृहद्वृक्षश्च॥

महातलं, क्ली, (महच्च तत्तलञ्चेति।) पातालविशेषः। यथा, शब्दमालायाम्।

"अतलं वितलञ्चैव नितलञ्च तलातलम्।
महातलञ्च सुतलं सप्तमञ्च रसातलम्॥"

(यथा च श्रीमद्भागवते। २। १। २६।

"पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जङ्घे॥")

महातारा, स्त्री, (तारयति संसारादिति। तॄ+णिच्+अच्। स्त्रियां टाप्। ततो महती तारेति कर्म्मधारयः।) जिनानां देवीविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ शङ्खिनी १८ वसुधारा १९ धनंददा २० त्रिलोचना २१ लोचना २२। इति हेमचन्द्रः॥

महाताली, स्त्री, (महान् अनेकस्तालो यत्र। स्त्रियां ङीष्।) आवर्त्तकी। इति राजनिर्घण्टः॥

महातिक्तः, पु, (महानतिशयस्तिक्तस्तिक्तरसो यत्र।) महानिम्बः। इति राजनिर्घण्टः॥ अतिशयतिक्तरसयुक्ते, त्रि॥

महातिक्ता, स्त्री, (महती गुरुतरा तिक्ता।) यवतिक्ता। इति राजनिर्घण्टः॥ (यथा, गोविन्दविशारदकृतभैषज्यरत्नावल्याम्।

"आपु जिङ्गी महातिक्ता विशाला कृपिपत्रकम्॥")

पाठा। इति शब्दचन्द्रिका॥

महातीक्ष्णा, स्त्री, (महती तीक्ष्णा।) भल्लातकवृक्षः। इति राजनिर्घण्टः॥ अतिशयतीक्ष्णे, त्रि॥

महातेजः, [स्] क्ली, (महदतिशयं तेजोऽस्य।) पारदः। इति राजनिर्घण्टः॥

महातेजाः, [स्] पु (महदतिशयं तेजो बलमस्य।) कार्त्तिकेयः। इति हलायुधः। अग्निः। इति शब्दचन्द्रिका॥ (महादेवः। यथा, महाभारते। १३। १७। ५६।

"उग्रतेजा महातेजा जन्यो विजयकालवित्॥")

अतिशयतेजस्विनि, त्रि॥ (यथा, मनुः।१।६२।

"स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा।
चाक्षुषश्च महातेजा विवस्वत्सुत एव च॥")

महात्मा, [न्] त्रि, (महानात्मा स्वभावोऽस्य।) उत्तमस्वभावयुक्तः। (यथा, कामन्दकीयनीतिसारे। ३। ११।

"महावातातुलभ्रान्तिमेघमालातिपेलवैः।
कथं नाम महात्मानो ह्रियन्ते विषयारिभिः॥")

तत्पर्य्यायः। महेच्छः २ उद्भटः ३ उदारः ४ उदात्तः ५ उदीर्णः ६ महाशयः ७ महामनाः ८। इति हेमचन्द्रः। ३। ३१॥ (पुं, परमात्मा। यथा, मनुः। १। ५४।

"युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः॥"

"तस्मिन् परमात्मनि।" इति तट्टीकायां कुल्लूकः॥ महत्तत्त्वम्। यथा, श्रीमद्भागवते। ९। ७। ७५।

"मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत्।
खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि॥"

"महात्मनि महत्तत्त्वे।" इति तट्टीकायां श्रीधरस्वामी॥ पितृगणविशेषः। यथा, मार्कण्डेये। ९३। ४६।

"महान् महात्मा महितो महिमावान् महाबलः॥"

महादेवः। यथा, महाभारते। १३।१७।३४।

"महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्व्वभूतात्मा विश्वरूपो महाहनुः॥")

महादण्डः, पुं, (महान् दण्डस्ताडनसाधनमस्य।) यमदूतप्रभेदः। इति वृहद्धर्म्मपुराणे ५६ अध्यायः॥ (महान् दण्डः।) वृहद्दण्डश्च॥ (यथा, महाभारते। ५। १९४। ३७।

"यस्माज्जानन् स मन्दात्मा मामसौ नोपसर्पति।
तस्मात्तस्मै महादण्डो धार्य्यः स्यादिति मे मतिः॥")

महादन्तः, पुं, (महांश्चासौ दन्तश्चेति।) गजदन्तः। तत्पर्य्यायः। ईशादन्तः २। इति त्रिकाण्डशेषः॥ वृहद्दन्तमात्रञ्च॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥"

महान् दन्तोऽस्य।) तद्वति, त्रि॥

महादानं, क्ली, (महच्च तद्दानञ्चेति।) श्रेष्ठदानम्। तत्तु तुलापुरुषादिषोडशप्रकारम्। यथा, मत्स्यपुराणे।

"अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्॥"

इत्यभिधाय।

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम्॥
कल्पपादपदानञ्च गोसहस्रन्तु पञ्चमम्।
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च॥
पञ्चलाङ्गलकं तद्वद्धरादानन्तथैव च।
हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम्।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च।
महाभूतघटस्तद्वत् षोड़शः परिकीर्त्तितः॥"*॥

अत्र सामान्यलक्षणम्। सकलजपाङ्गकदानं महादानम्। विनायकादिपञ्चाशद्देवताहोमाङ्गकं वा। तथा मत्स्यपुराणम्।

"विनायकादिग्रहलोकपाल-
वस्वष्टकादित्यमरुद्गणानाम्।
ब्रह्माच्युतेशानवृहस्पतीनां
स्वमन्त्रतो होमचतुष्टयं स्यात्॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथास्वरूपम्॥"

इत्यादिना सूक्तजपहोमरूपाङ्गयोर्व्विधानं प्रत्येकं षोड़शतुलापुरुषप्रधानान्युद्दिश्योक्तं तत्तु महादानत्वेनोद्दिश्येति। अतो नेतरेतराश्रयः। न तु कृष्णमृगपतिकर्षयतायोगित्वं निरुक्तीयलक्षणम्। अचलदानेऽपि गतत्वात्। एवञ्च।

"कनकाश्वतिला गावो दासी रथमही गृहाः।
कन्या च कपिला धेनुर्म्महादानानि वै दश॥"

इति कूर्म्मपुराणोक्तदानपद गं ाम्॥ अन्यथा बहुशक्तिकल्पनापत्तः कनक-नादि-

साधारणानुगतैकरूपाभावाच्च । अतो न वैपरीत्यमिति ।
"सर्व्वेषामेव दानानामेकजन्मानुगं फलम् ॥"
इति मलमासतत्त्वम् ॥

महादारु, क्ली, (महत् दारु अस्य ।) देवदारु । इति जटाधरः ॥ (महत् दारु ।) बृहत्काष्ठञ्च ॥

महादेवः, पुं, (महांश्चासौ देवश्चेति । यद्वा, महतां देवादीनां देवः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ अष्टमूर्त्त्यन्तर्गतसोममूर्त्तिरयम् । यथा, महादेवाय सोममूर्त्तये नमः । इति शिवपूजापद्धतिः ॥ * ॥ अस्य व्युत्पत्तिर्यथा—
"ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम् ।
तेषाञ्च महतां देवो महादेवः प्रकीर्त्तितः ॥
महती पूजिता विश्वे मूलप्रकृतिरीश्वरी ।
तस्या देवः पूजितश्च महादेवः स च स्मृतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥
तस्य पञ्चवक्त्रत्रिनेत्रत्वकारणं यथा,—
"अतीव कमनीयाङ्गं किशोरं श्यामसुन्दरम् ।
अहो निर्व्वचनीयञ्च दृष्ट्वा रूपमनुत्तमम् ।
न बभूव वितृप्तश्च लोचनाभ्यां त्रिलोचनः ॥
पश्यन्निमेषरहित इति मत्वा स्वमानसे ।
भक्त्युद्रेकान्महाभक्तो रुरोद प्रेमविह्वलः ॥
सहस्रवदनोऽनन्तो भाग्यवांश्च चतुर्म्मुखः ।
बहुभिर्लोचनैर्दृष्ट्वा तुष्टाव बहुभिर्मुखैः ॥
पश्यामि किं वा किं स्तौमि संप्राप्य नाथ मीदृशम् ।
चास्त्येकेन लोचनाभ्यां चतुर्धा स पुनः पुनः ॥
स्वमानसे कुर्व्वतीदं शङ्करे च तपस्विनि ।
तद्बभूव चतुर्व्वक्त्रं पूर्व्वेण सह पञ्चमम् ॥
एकैकवक्त्रं शुशुभे लोचनैश्च त्रिभिस्त्रिभिः ।
बभूव तेन तन्नाम पञ्चवक्त्रस्त्रिलोचनः ॥
चत्वारि गुणरूपाणि तस्य ब्रह्मस्वरूपिणः ।
सत्त्वं रजस्तम इति तस्य हेतुं निशामय ॥
सत्त्वांशेन हृशा शम्भुः पश्यन् पाति च सात्त्विकान् ।
राजसेन राजसिकान् तामसेन च तामसान् ॥
चक्षुषस्तामसात् पश्चात् ललाटस्थाद्धरस्य च ।
महारकाले संहर्त्तुरग्निराविर्भवेत् क्रुधा ॥
कोटितालप्रमाणश्च सूर्य्यकोटिसमप्रभः ।
लेलिहानो दीर्घशिखस्त्रैलोक्यं दग्धुमीश्वरः ॥"
तस्य भस्मधारणकारणं यथा,—
"विभूतिगात्रः स विभुः सतीसत्कारभस्मना ।
धत्ते तस्या अस्थिमालां प्रेमभावेन भक्त च ॥
स्वात्मारामो यद्यपीशस्तथापि पूर्णमन्दकम् ।
सतीशव गृहीत्वा च भ्रामं भ्रामं रुरोद ह ॥
शवाङ्गाङ्गश्च तस्याश्च पपात यत्र यत्र च ।
सिद्धपीठस्तत्र तत्र बभूव मन्त्रसिद्धिकृत् ॥
तदा शवावशेषञ्च कृत्वा वक्षसि शङ्करः ।
पपात मूर्च्छितो भूत्वा सिद्धक्षेत्रे च राधिके ।
तदा गत्वा महेशान्तं कृत्वा क्रोडे प्रबोध्य च ।
अददं दिव्यमन्त्रञ्च तस्मै शोकहरं परम् ॥
तदा शिवश्च सन्तुष्टः स्वलोकञ्च जगाम ह ।
मन्वन्तरेण कालेन तां संप्राप प्रियां सतीम् ॥"
तस्य दिगम्बरत्वजटाधारित्वकारणं यथा,—
"दिव्यवस्त्रधारी योगेन नेच्छाऽनित्ये पटे विभोः ।
जटास्तपस्याकालीना धत्तेऽद्यापि विवेकतः ॥
न चेच्छा केशसंस्कारे स्वाङ्गवेशेन योगिनः ।
समता चन्दने पङ्के लोष्ट्रे रत्ने मणीश्वरे ॥"
तस्य नागभूषणत्वबृषवाहनत्वकारणं यथा,—
"गरुडद्वेषिणो नागाः शङ्करं शरणं ययुः ।
बिभर्त्ति कृपया स्वाङ्गे तानेव शरणागतान् ॥
वाहनं बृषरूपोऽहमनन्तस्तं वोढुमक्षमः ।
त्रिपुरस्य वधे पूर्व्वं मत्कलांशसमुद्भवः ॥"
तस्य धुस्तूरपुष्पविल्वपत्रप्रियत्वव्याघ्रचर्म्मधारित्वश्मशानस्थायित्वकारणं यथा,—
"पारिजातादिकं पुष्पं सुगन्धिचन्दनादिकम् ।
मयि संन्यस्य तेष्वेव प्रीतिर्नास्ति कदाचन ॥
धुस्तूरं तत् सदा प्रीतिर्व्विल्वपत्रानुलेपने ।
गन्धहीने प्रसूने च योगेन्द्रे व्याघ्रचर्म्मणि ॥
दिव्यलोके दिव्यतल्पे जनतायां न तन्मनः ।
श्मशानेऽतीवरहसि ध्यायते मामहर्निशम् ॥"
तस्य महिमादि यथा,—
"आब्रह्मस्तम्बपर्य्यन्तं स्वप्नवन्मन्यते शिवः ।
ममानिर्व्वचनीयञ्च रूपं तन्ममनामसम् ॥
ब्रह्मणः पतनेनापि शूलपाणेः क्षणो भवेत् ।
तस्यायुषः प्रमाणञ्च नाहं जानामि का श्रुतिः ॥
ज्ञानं मृत्युञ्जयं शूलं धत्ते मत्तेजसा समम् ।
विना मया न कश्चित्तं शङ्करं जेतुमीश्वरः ॥
शङ्करः परमात्मा मे प्राणेभ्योऽपि परः शिवः ।
त्र्यम्बके मन्मनः शश्वत् प्रियो मे भवात् परः ॥
न संवसामि गोलोके वैकुण्ठे तव वक्षसि ।
सदाशिवस्य हृदये निवद्धः प्रेमपाशतः ॥
स्रष्टुं शक्तो हि नष्टुञ्च भ्रूभङ्गलीलया हि यः ।
ब्रह्माण्डनिकरं योगात् योगी शङ्करात् परः ॥
दिव्यज्ञानेन यः स्रष्टुं नष्टुं भ्रूभङ्गलीलया ।
मृत्युकालादिकं शक्तो न ज्ञानी शङ्करात् परः ॥
मम भक्तिञ्च दास्यञ्च मुक्तिञ्च सर्व्वसम्पदम् ।
सर्व्वसिद्धिं दातुमीशो न दाता शङ्करात् परः ॥
पञ्चवक्त्रेण मन्नाम यशो गायत्यहर्निशम् ।
मद्रूपं ध्यायते शश्वत् भक्तः शङ्करात् परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥
शिवनैवेद्यभक्षणदोषकारणादिकं यथा,—
राधिकोवाच ।
"एवंभूतस्य च विभोः सर्व्वेशस्य महात्मनः ।
न शस्तं कथमुच्छिष्टं ब्रूहि सन्देहभञ्जन ॥
श्रीकृष्ण उवाच ।
शृणु देवि । प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पापेन्धनानां दहनं ज्वलदग्निशिखोपमम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श भुक्तवन्तञ्च नाथं नारायणं द्विजः ॥
तुष्टाव गद्गदः स्तोत्रैश्च प्रणम्य भक्तितो मुदा ।
अवशेषं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव भुक्तं तनापि किञ्चन ।
किञ्चिदरक्ष बन्धूनां भक्षणाय च दुर्लभम् ॥
सिद्धाश्रमे च तद्दत्तं गुरवे शूलपाणिने ।
भक्त्युद्रेकाच्च तत् सर्व्वं भुक्तञ्च शम्भुनाऽऽत्मना ॥
भुक्त्वा सुदुर्लभं वस्तु ननर्त्त प्रेमविह्वलः ।
पपात दुर्मदर्क्षात् ह्रद्गञ्च व्याघ्रचर्म्म च ॥
स्वयं निपत्य पश्चाच्च वदनमूर्च्छामवाप च ।
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ॥
मुदा जगाम शीघ्रं तत्प्रसन्नवदनेच्छया ।
वदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वाणी पप्रच्छ कुमारं शूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
श्रुत्वा मनोहर स्तोत्रं न शशाप शिवं शिवा ।
दुष्टं चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥
सुचिरञ्च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चिताहं कथं विभो । ॥
यतो न दत्तं नैवेद्यं विष्णोर्मह्यं त्वयाधुना ।
अतो मत्तो गृहाणैतत् फलमेव महेश्वर ! ॥
अद्य प्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते जन्मैकं सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती मानाद्रुरोद पुरतो विभोः ।
हरिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
अपूर्व्वं तव नैवेद्यं जन्ममृत्युजराहरम् ।
कृतं दुष्टं यतस्तस्मात् पश्य देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तद्देवाग्राह्यमीश्वर ! ।
सुपवित्रं भवेत्तच्च विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येव कथितं सर्व्वं त्वया पृष्टं सुरेश्वरि ! ।
अभिशस्तं शङ्करस्य निर्म्माल्यं येन हेतुना ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३७ अध्यायः ॥
तस्यावतारा यथा,—
सूत उवाच ।
"वेदव्यासावताराणि द्वापरे कथितानि तु ।
महादेवावताराणि कलौ शृणुत सुव्रताः ॥
आद्ये कलियुगे श्वेते देवदेवो महाद्युतिः ।
नाम्ना हिताय विप्राणामभूद्वैवस्वतेऽन्तरे ॥
हिमवच्छिखरे रम्ये छगले पर्व्वतोत्तमे ।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः ॥
श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वेतलोहितः ।
चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः ॥
सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा ।
लोकाक्षिरथ योगीन्द्रो जैगीषव्यस्तु सप्तमे ॥
अष्टमे दधिवाहुः स्यान्नवमे बृषभः प्रभुः ।
भृगुस्तु दशमे प्रोक्तस्तस्मादुग्रपरः स्मृतः ॥
द्वादशेऽत्रिः समाख्यातो वाली चाथ त्रयोदशे ।
चतुर्द्दशे गौतमस्तु वेदशीर्षा ततः परम् ॥
गोकर्णश्चाभवत्तस्माद्गुहावासः शिखण्ड्यथ ।
जटामाल्यट्टहासश्च दारुको लाङ्गली क्रमात् ॥
श्वेतस्तथा परः शूली निण्डी मुण्डी च वै क्रमात् ।
सहिष्णुः सोमशर्म्मा च कुलीशो चान्तिमे प्रभुः ॥
वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिशूलिनः ।
अष्टाविंशतिविख्याता ह्यन्ते कलियुगे प्रभोः ।
तीर्थकार्य्यावतारः स्याद्देवेशो नकुलीश्वरः ॥"
इति कौर्म्मे ५० अध्यायः ॥ * ॥

तस्याष्टषष्टिनामानि क्षेत्राणि च यथा,—
मनुरुवाच ।
"मन्दरस्थं महादेवं ब्रह्मा पृच्छति शङ्करम् ।
केषु केषु च स्थानेषु द्रष्टव्योऽसि मया प्रभो ।"॥
ईश्वर उवाच ।
वाराणस्यां महादेवं प्रयागे तु महेश्वरम् ।
नैमिषे देवदेवञ्च गयायां प्रपितामहम् ॥
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिभूषणम् ।
पुष्करे तु अपोगन्धिं विश्वञ्च विमलेश्वरे ॥
अट्टहासे महानादं महेन्द्रे तु महाव्रतम् ।
उज्जयिन्यां महाकालमाकोटे तु महोत्कटम् ॥
शङ्कुकर्णे महातेजं गोकर्णे च महाबलम् ।
भैरवे भैरवाकारं भवं वस्त्रापदे विदुः ॥
उग्रं कनखले चैव भद्रकर्णाह्रदे शिवम् ।
देवदारुवने दिव्यं चण्डीशं मध्यमङ्गले ॥
ऊर्द्ध्वरेतं स्थले तु सकलाख्ये कपर्द्दिनम् ।
कृत्तिवाससमेकाम्रे सूक्ष्मं ताम्रातिकेश्वरे ॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं मण्डलेश्वरे ।
ध्यानं सिद्धेश्वरे योगी गायत्रीं स्थाणुरेश्वरे ॥
विजयं नाम काश्मीरे जयन्तं मरुकेश्वरे ।
हरिश्चन्द्रे हरिश्चैव पुरिश्चन्द्रे तु शङ्करम् ॥
जटावासेश्वरं विद्यां सौम्यं कुक्कुटकेश्वरे ।
भूतेश्वरे भस्मगात्रं जललिङ्गं जलेश्वरम् ॥
मित्रकं कर्णिकायान्तु वाराहं विन्ध्यपर्व्वते ।
ताम्रं पश्चिमसन्ध्यायां विरजायां त्रिलोचनम् ॥
हर्षेश्वरे त्रिशूलन्तु श्रीपर्व्वते त्रिपुरान्तकम् ।
जललिङ्गं विदुः कालिं कापालिं करवीरके ॥
दीप्तचक्रेश्वरं वेदं नेपाले पशुपतिं पतिम् ।
श्रीकारारोहणे कूटं देविकायामुमापतिम् ॥
गङ्गायां सागरे त्वमरमोङ्कारममरकण्टके ।
सप्तगोदावरे भीमं स्वयम्भुं नकुलेश्वरे ॥
कर्णिकारे गणाध्यक्षं कैलासे च गणाधिपम् ।
हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने ।
सिद्धेश्वरन्तु आकाशे पाताले हाटकेश्वरम् ॥
अष्टषष्टिञ्च नामानि देवदेवस्य धीमतः ।
पुराणे चोपगीतानि ब्राह्मणस्य स्वयम्भुवा ॥
यः पठेत् प्रातरुत्थाय स्नातो वा यदि वा
शुचिः ।
मुच्यते सर्व्वपापेभ्यः शिवलोकं स गच्छति ॥"
इत्यादि देवीपुराणे अष्टषष्टिनामानि महादेवस्य ॥ * ॥ तस्य द्वादशनामस्तोत्रम् ।
"प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः ।
तृतीयः शङ्करो ज्ञेयश्चतुर्थो वृषभध्वजः ॥
पञ्चमः कृत्तिवासाश्च षष्ठः कामाङ्गनाशनः ।
सप्तमो देवदेवेशः श्रीकण्ठश्चाष्टमः स्मृतः ॥
ईश्वरो नवमो ज्ञेयो दशमः पार्व्वतीपतिः ।
रुद्र एकादशश्चैव द्वादशः शिव उच्यते ॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
कृतघ्नश्चैव गोघ्नश्च ब्रह्महा गुरुतल्पगः ॥
स्त्रीबालघातकश्चैव सुरापो वृषलीपतिः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति ॥"
इति स्कन्दपुराणम् ॥ * ॥

तन्नामोच्चारणफलं यथा,—
"कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्त्तनात् ॥
महादेव महादेव महादेवेति वादिनम् ।
वत्सं गौरिव गौरीशो धावन्तमनुधावति ॥"
इति पुराणम् ॥ * ॥
तस्य प्रणाममन्त्रः ।
"नमस्ये त्वां महादेव । लोकानां गुरुमीश्वरम्
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥"
इति श्रीभागवतम् ॥
"महादेवं महात्मानं महायोगिनमीश्वरम् ।
महापापहरं देव मकाराय नमो नमः ॥"
इति तन्त्रम् ॥ * ॥
तस्य कालरूपवर्णनं यथा,—
नारद उवाच ।
"कालरूपी त्वया ख्यातः शम्भुर्गगनगोचरे ।
लक्षणञ्च स्वरूपञ्च सर्व्वं व्याख्यातुमर्हसि ॥
पुलस्त्य उवाच ।
स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः ।
अश्विनी भरणी चैव कृत्तिका प्रथमांशकम् ॥
मेषकं हि विजानीयात कुजक्षेत्रमुदाहृतम् ।
आग्नेयांशास्त्रयो ब्रह्मन् । प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम् ।
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यगृहन्त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ।
आदित्यांशश्च पुष्यञ्च अश्लेषा शशिनो गृहम् ॥
राशिः कर्कटको नाम पार्श्वेन खविलासिनः ।
पित्र्यं भगदैवत्यं उत्तरांशश्च केशरी ॥
सूर्य्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम् ।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका त्विदम् ॥
सोमपुत्त्रस्य सद्मैतत् द्वितीयं जठरं विभोः ।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम् ॥
द्वितीयं शुक्रसदनं तुलानाभिरुदाहृतम् ।
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम् ॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ।
मूलं पूर्व्वोत्तरांशश्च देवाचार्य्यगृहं धनुः ॥
ऊरुयुगलमीशस्य अमरर्षे । प्रगीयते ।
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मतः ॥
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते ।
धनिष्ठार्द्धं शतभिषा प्रौष्ठपद्यांशकत्रयम् ॥
सौरं सद्मापरमिदं कुम्भो जङ्घे च विश्रुते ।
प्रौष्ठपद्यांशमेकन्तु उत्तरा रेवती तथा ॥
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥
एवं कृत्वा कालरूपं त्रिनेत्रो
यज्ञं क्रोधान्मार्गणैराजघान ।
विद्धश्चासौ वेदनाबुद्धियुक्तः
खे सन्तस्थौ तारकाभिश्चिताङ्गः ॥"
इति वामनपुराणे ५ अध्यायः ॥
महादेवी, स्त्री, (महादेवस्य पत्नीति । पत्न्यर्थे ङीप् । यद्वा, महती चासौ देवी चेति ।) दुर्गा । यथा,
"अपर्णा स्यान्महादेवी गिरिजा गिरिकात्मजा ॥"
इति हलायुधः ॥

तस्या व्युत्पत्तिर्यथा,—
"पूज्यते या सुरैः सर्व्वैर्महाश्चैव प्रमाणतः ।
धातुर्महेति पूजायां महादेवी ततः स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
राज्ञी । पाटराणी इति भाषा । तत्पर्य्यायः ।
महिषी १ पट्टराज्ञी २ पट्टदेवी ३ । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ५ । ७८ ।
"आलिखन् स महादेवीं योगनन्दञ्च तं पटे ।
सजीवमिव तच्चित्रं वाक्चेष्टारहितं त्वभूत ॥",)
महादैत्यः, पुं, (महांश्चासौ दैत्यश्चेति ।) भौत्यमन्वन्तरीयदैत्यविशेषः । यथा,—
"चतुर्द्दशस्य भौत्यस्य शृणु पुत्त्रान्मनोर्मम ।"
इत्युपक्रम्य ।
"शुचिरिन्द्रो महादैत्यो रिपुहन्ता हरिः
स्वयम् ॥"
इति गारुडे ८८ अध्यायः ॥
महाद्रावकः, पुं, (द्रावयति रोगानिति । द्रु + णिच् + ण्वुल् । महांश्चासौ द्रावकश्चेति ।) औषधविशेषः । द्रविक इति भाषा । यथा,—
"यवक्षारस्य भागौ द्वौ स्फटिकारस्त्रयो मताः ।
एकीकृत्य प्रपिष्यापि सूत्रैर्व्वस्त्रतरीभवैः ॥
शुष्कं कृत्वा क्षिपेत् पात्रे सैसकं वस्त्रलेपिते ।
अन्यमीसकपात्रन्तु द्विमुखं मेलयेद्बुधः ॥
हठवैद्योपदेशेन पचेत् पात्रस्थमौषधम् ।
ततो ज्वालाधतः स्थाप्यं पात्रान्यं लभते
रसम् ॥
ततो रसं विनिष्कृष्य स्थापयेत् स्निग्धभाजने ।
लवङ्गेन वर्त्तीं कुर्य्यादथवा स्तनमात्रकैः ॥
प्लीहादिस्थलरोगेषु दापयेत् रक्तिकां भिषक् ।
द्रवीकरोति रोगांश्च महाद्रावकसंज्ञकः ॥
श्वित्रे च दद्रुरोगे च प्रलेपं द्रावकस्य च ।
वह्निवल्लभकं तस्य दधि दत्त्वा प्रलेपयेत् ॥" * ॥
अपि च ।
"वृषश्चित्रमपामार्गं शिग्रु कुष्माण्डनाडिका ।
स्नुही तालस्य पुष्पञ्च वर्षाभूश्चैतसं तथा ॥
एतेषां क्षारमाहृत्य निम्बार्कस्वरसेन च ।
क्षालयित्वा क्षारतोयं वस्त्रपूतञ्च कारयेत् ॥
सहातपेन संशोष्य ग्राह्यं तद्द्रवकांचितम् ।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम् ॥
स्फटिकारिपलश्चैव नरसारपलं तथा ।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम् ॥
कासीसं तोलकश्चैव मुद्राशङ्खञ्च तोलकम् ।
दारुमोचं कषकञ्च तोलं समुद्रफेनकम् ॥
सर्व्वमेकत्र संगृह्य वकयन्त्रेण साधयेत् ।
महाद्रावकमेतद्धि योज्यञ्च रसजारणे ।
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च ॥" * ॥
इति भैषज्यरत्नावली ॥
(तथाप्यत्र ।
'शुद्धं काञ्चनमाक्षिकं स्फुटतरं कांस्याभिधेयन्तथा
सिन्धूत्थं विमलं रसाञ्जनवरं फेनं सवर्ण्णोपलः ।

चारौ सर्ज्जिकसम्भवौ सुविमलौ भागात्स-
मौषौ समाः
सम्मर्द्दा मद्यम्तु टङ्कणमिह लघ्वौ कृवारः
स्मृतः ॥
गन्धाल्या स्फटिकारिका त्रिसहयः शुद्धो यव-
क्षारजः
कार्य्योग्निहितयं यवाग्रजसमं सञ्चूर्ण्य सर्व्वं
न्यसेत् ।
पात्रे काचमये न्दन्मतस्ते सोऽयं महाद्रावको
नो वक्तुं प्रभवेदमुष्य नितरां सम्यग्गुणं भूतले ॥
गन्धल्लचतुष्टयं पिबेदथो गुञ्जा लवङ्गेन वा
तत्पश्चात् परिवासितं बहुगुणं ताम्बूलकं
भक्षयेत ।
ग्रासमग्रात् कथयामि ते प्रवरा गुणान् कांश्च-
नथान्यान् परान्
निःशेषं विनिहन्ति तानि चिरजान्यप्युदराणि
ध्रुवम् ॥
गुल्मं पाण्डुहलीमकं सुकठिनामष्ठीलिकां
कामलां
मन्दाग्निं विषमाग्निता बहुविधान् शोथांश्च
शूलान्यपि ॥"*॥
इति वैद्यककशायसंग्रहे शौद्दाधिकारे ॥)

महाद्रुमः, पु, (महांश्चासौ द्रुमश्चेति ।) अश्वत्थ-
वृक्षः । इति शब्दचन्द्रिका ॥ इहद्रुमश्च ॥
(यथा, हरिवंशे । २२३ । ७२ ।
"चकोराः शतपत्राश्च मत्तकोकिलसारसाः ।
पुष्पितान् फलितांश्चैव संपतन्ति महाद्रुमान् ॥"
शाकद्वीपपतेर्भव्यस्य सप्तमः पुत्रः । यथा, मार्क-
ण्डेये । ५३ । २१ ।
"जलदश्च कुमारश्च सुकुमारो मनीवकः ।
कुशोत्तरोऽथ मेधावी सप्तमस्तु महाद्रुमः ॥")

महाद्रोणा, स्त्री, (महती चासौ द्रोणा चेति ।)
वृक्षविशेषः । बड़ो द्रोणपुष्पी इति हिन्दी
भाषा । तत्पर्य्यायः । देवद्रुकुम्भा २ दिव्यपुष्पा
३ महाद्रोणी ४ देवी ५ कान्ती ६ देवद्रोणा
७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् ।
मेध्यत्वम् । भूतान्निवातकफाग्निमान्द्यनाशित्वम् ।
युक्त्या पारदशोधनत्वञ्च । इति राजनिर्घण्टः ॥

महाद्रोणी, स्त्री, (महती चासौ द्रोणी चेति ।)
महाद्रोणाक्षुपः । इति राजनिर्घण्टः ॥

महाद्वन्द्वः, पु, (महान् द्वन्द्वः कोलाहलो यत्र ।)
युद्धवाद्यम् । इति शब्दरत्नावली ॥ अतिशय-
कलहश्च ॥

महाधनं, क्ली, (महत् अनेकं धनं मूल्यमस्य ।)
बहुमूल्यवसनम् । इत्यमरः । २ । ६ । ११३ ॥
सुवर्णम् । सिह्लकम् । इति मेदिनी । ने, २०१ ॥
चारुवस्त्रम् । इति हेमचन्द्रः ॥ कृषिः । इति
शब्दरत्नावली ॥ (महद्धनं धनमस्मात् ।
संग्रामः । इति निघण्टुः । २ । १७ ॥ यथा,
ऋग्वेदे । ८ । ६४ । १२ ।
"मा नो अस्मिन्महाधने परावर्ग्भारभृद्
यथा ॥"
"महाधने संग्रामे ।" इति तद्भाष्ये सायनः ॥
महच्च तद्धनञ्चेति । प्रभूतधनम् । यथा, ऋग्-
वेदे । १ । ७ । ५ ।
"इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ॥"
"महाधने प्रभूतधननिमित्तम् ।" इति तद्भाष्ये
सायनः ॥ बहुमूल्ये, त्रि । यथा, किरातार्ज्जु-
नीये । १ । १८ ।
"पुराधिरूढ़ः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य संस्थलीं
जहासि निद्रामशिवैः शिवारुतैः ॥")
अतिशयधनयुक्ते, च त्रि ॥

महाधातुः, पुं (महांश्चासौ धातुश्चेति ।) स्वर्णम् ।
इति शब्दचन्द्रिका ॥

महाध्वनिकः, पुं, (अध्वनि गच्छतीति । अध्वन् +
ठक् । महांश्चासौ आध्वनिकश्चेति ।) पुण्यार्थं
हिमालयावधिकमहापथगमनेन सन्यासित-
मरणः । यथा, "भ्रष्टाग्निजलसंग्रामदेशान्तरस्थ-
संन्यासानशनाशनिमहाध्वनिकानां सद्यःक्रिया
कार्य्या सद्यःशौचं भवतीति ।" इति शुद्धितत्त्व-
धृतसुमन्तुवचनम् ॥

महान्, [त्] त्रि, (महते पूज्यते वेति । मह +
"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा०
२ । ८४ । इति अतिः । निपात्यते ।) वृहत् ।
इत्यमरः । ३ । १ । ६० ॥ (यथा, मनौ । ८ । २८६ ।
"प्राणभृत्सु महत्स्वेषु गोगजोष्ट्रहयादिषु ॥")
अस्य पर्य्यायः महच्छब्दे द्रष्टव्यः ॥

महान्, पुं, (महते सेव्यते आश्रीयते गमना-
येति । मह + अतिः ।) उष्ट्रः । इति राज-
निर्घण्टः ॥ दुर्गा । यथा,—
"महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृति-
र्म्मता ।
स्तुतिः संसारवाहेषो नियन्ती च नियामता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
महत्तत्त्वम् । यथा —
"सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते ।
महानिति यतः ख्यातिर्लोकानां जायते सदा ॥"
इति मात्स्ये ३ अध्यायः ॥
(महादेवः । यथा, महाभारते । १३ । १७ । ४२ ।
"अशनी शतघ्नी खड्गी पट्टिशी चायुधी
महान् ॥")
महच्छब्दप्रयोगनिषेधो यथा —
"शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"
इति भट्टिप्रथमसर्गीयचतुर्थश्लोकटीकायां भरतः ॥

महानटः, पु, (महांश्चासौ नटो नर्त्तकश्चेति ।
उद्धतनर्त्तकत्वादस्य तथात्वम् ।) शिवः । इति
त्रिकाण्डशेषः ॥

महानदी, स्त्री, (महती चासौ नदी चेति ।)
पुरुषोत्तमक्षेत्रान्तर्गतकटकस्योत्तरदेशस्थनदी-
विशेषः । तस्या नामान्तरं चित्रोत्पला । यथा,
"नदी तत्र महापुण्या विन्ध्यपादविनिर्गता ।
चित्रोत्पलेति विख्याता सर्व्वपापहरा शुभा ।
चित्रोत्पला महानदी ।" इति पुरुषोत्तम
तत्त्वम् ॥ गङ्गा । यथा,—
"अम्बुजमम्बुनि जातं
जातु न जायते अम्बुजादम्बु ।
सुरहर । तव विपरीतं
पादाम्भोजान्महानदी जाता ॥"
इत्युद्भटः ॥

महानन्दः, पुं, (महानानन्दोऽत्र ।) मुक्तिः ।
इति हलायुधः ॥ (महान् आनन्दः ।) अति-
शयाह्लादश्च ॥ (नृपतिविशेषः । यथा, मार्क-
ण्डेये । १३४ । ४० ।
"इत्युक्त्वा तान् महीपालान् महानन्दसखान्
वशी ।
अथाब्रवीत्तदा सर्व्वान् महारिदमनो दमः ॥"
वेणुविशेषः । यथा, सङ्गीतदामोदरे ।
"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तरवंशा मातङ्गमुनिसम्मताः ॥")

महानन्दा, स्त्री, (महानानन्दोऽस्याः ।) सुरा ।
इति राजनिर्घण्टः ॥ माघशुक्ला नवमी । यथा,
भविष्ये ।
"माघमासस्य या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्च्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः ॥"
इति तिथ्यादितत्त्वम् ॥
नदीविशेषः । सा पद्मायाः विनिःसृता राम-
पुराख्यग्रामात् पश्चिमतः उत्तरदिग्गता ॥
(दक्षिणदेशीयो नदीभेदः । यथा, महाभारते ।
१३ । २५ । ४३ ।
"पुनरावर्त्तनन्दाञ्च महानन्दाञ्च सेव्य वै ।
नन्दने सेव्यते दान्तस्त्वप्सरोभिरहिंसकः ॥")

महानन्दिः, पु, (आ सम्यक् नन्दतीति । आ +
नन्द + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ ।
इति इन् । ततः । महानानन्दिरिति ।)
नन्दिवर्द्धनराजपुत्रः । यथा,—
"चत्वारिंशत्तथा भाव्यो राजा वै नन्दिवर्द्धनः ।
चत्वारिंशत्त्रयश्चैव महानन्दिर्भविष्यति ॥
महानन्दिसुतश्चापि शूद्रायां कलिकांशजः ।
उत्पत्स्यते महापद्मः सर्व्वक्षत्रान्तको नृपः ॥
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
एकराट् स महापद्म एकच्छत्रो भविष्यति ॥"
इति मत्स्यपुराणे २७६ अध्यायः ॥
अपि च ।
"महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महा-
पद्मानन्दः परशुराम इवापरोऽखिलक्षत्रि-
यान्तकारी भविता ततः प्रभृति शूद्रा भूपाला
भविष्यन्ति । तेन महानन्दिपर्य्यन्तं क्षत्रिय
आसीत् ।" इति शुद्धितत्त्वधृतविष्णुपुराणम् ॥

महानरकः, पुं, (महानतिशययातनाप्रदो
नरकः ।) अतिशययातनाप्रकारयातनास्थानम् ।
इति पुराणम् ॥ (यथा, मनुः । ४ । ८८ ।

"तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रञ्च महानरकमेव च ॥")

महानलः, पुं, (महांश्चासौ नलश्चेति ।) देवनलः । इति राजनिर्घण्टः ॥ (महांश्चासौ अनलश्चेति ।) हुतवहश्च ॥

महानवमी, स्त्री, (महती चासौ नवमी चेति ।) आश्विनशुक्लनवमी । यथा,—

श्रीभगवानुवाच ।
"दुर्गातन्त्रेण मन्त्रेण कुर्य्युर्दुर्गामहोत्सवम् ।
महानवम्यां शरदि बलिदानं नृपादयः ॥
आश्विने शुक्लपक्षस्य भवेद्या अष्टमी तिथिः ।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा ॥
ततोऽनु नवमी या स्यात् सा महानवमी स्मृता ।
सा तिथिः सर्व्वलोकानां पूजनीया शिवाप्रिया ॥"
इति कालिकापुराणे ५७ अध्यायः ॥

अपि च ।
"प्रावृट्काले विशेषेण आश्विने त्वष्टमीषु च ।
महाशब्दो नवम्यान्तु लोके ख्यातिं गमिष्यति ॥"
इति तिथ्यादितत्त्वम् ॥

महानसं, क्ली, (महच्च तत् अनश्चेति । + "अनोऽश्मायःसरसां जातिसंज्ञयोः ।" ५ । ४ । ६४ । इति संज्ञायां टच् । "आन्महतः समानाधिकरणजातीययोः ।" ६ । ३ । ४६ । इति महत आकारादेशः ।) रन्धनगृहम् । तत्पर्य्यायः । रसवती २ पाकस्थानम् ३ । इत्यमरः । २ । ९ । २७ ॥ (तथास्य लक्षणं यथा,—
"प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि ।
सजालकं गवाक्षाढ्यमाप्तवर्गनिषेवितम् ॥
विकक्षवस्तुसंवृत्तं सवितानं कृतार्च्चनम् ।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम् ॥
तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम् ।
शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः ॥
संविभक्ताः सुमनसो नीचकेशनखाः स्थिराः ।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयुताः ॥
तस्य चाज्ञा विधेयाः स्युर्व्विविधाः परिकर्म्मिणः ।
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः ॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत् ।
माहानसिकवोढारः सौपौदनिकपौपिकाः ॥
भवेयुर्वैद्यवशगा ये चाप्यन्ये तु केचन ॥"
इति सुश्रुते कल्पस्थाने प्रथमेऽध्याये ॥)

तद्विवरणं यथा,—
"आग्नेय्यां दिशि कर्त्तव्यमावासस्य महानसम् ।
गवाक्षजालमार्गाय धूमभित्तुपवेपितम् ॥
चुल्ली तत्र प्रकर्त्तव्या पूर्व्वपश्चिममायता ।
स्वच्छयादीनि भाण्डानि क्षालितानि च वारिणा ॥
येषु यत् पच्यते द्रव्यं गुणवत् सर्व्वसम्मतम् ।
तदभावे पचेल्लौहे चतुरश्रोऽविकारजित् ॥
काञ्चने पाचितं यद्धि तद्धितं मतिदं शुचि ।
यच्च ताम्रमये सिद्धं न रुच्यं तन्नपित्तलत् ॥
सौवर्णे राजते पाच्यमाढ्यभूमिभृतां गृहे ।
तत्पात्रं सर्व्वदोषघ्नं धिषणोत्सवदायकम् ॥"
अथ महानसोपयोग्योपकरणानि ।
"वस्तूनि भोजनार्हाणि विविधानि पुनः पुनः ।
सर्व्वाणि गुणयुक्तानि स्थापितानि महानसे ॥
दारुप्रमार्ज्जनी वाढा पूतदर्व्वी सुकूर्च्चिका ।
कर्त्तरी वैणव पात्रं जलपूर्णश्च लिञ्जरः ॥
वह्निसंजननो ग्रावः कुद्दालं सुकुठारकः ।
दारुखण्डानि शुष्काणि हस्तमात्राणि चेन्धनम् ॥
अजीर्णान्यनतिस्थूलान्यजन्तन्यमलानि च ।
तिलयुक्षालनी पीठी मुषलं चाप्युदूखलम् ॥
सूर्पलोहशिला दर्व्वी चतुरस्रावपट्टिका ।
संदंशकन्तु युगलं वस्त्रखण्डचतुष्टयम् ॥
नालिका क्षुरिका चैव सुमूलं सुकटाहकम् ॥
वह्निसञ्चालनार्थाय दर्व्वी दीर्घा सुलौहजा ॥
तन्दूरझर्झरी स्रावा तप्तकं दृढवेष्टनी ।
इत्यादि वस्तुजातं हि युज्यते च महानसे ॥"
इति पाकराजेश्वरः ॥

तत्र रक्षणीया जना यथा,—
"वृद्धशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ।
सर्व्वे महानसे धार्य्या लूनकेशनखा जनाः ॥"
इति मात्स्ये १८८ अध्यायः ॥

महानसोऽपि पुंसि । इत्यमरटीकायां रमानाथः ॥

महानाटकं, क्ली, (महच्च तत् नाटकञ्चेति ।) नाटकविशेषः । तस्य लक्षणं यथा,—
"एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम् ।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ॥
एतदेव नाटकम् । यथा, बालरामायणम् ।"
इति साहित्यदर्पणः ॥ स्वनामख्यातहनूमद्रचितरामचरितग्रन्थविशेषः । यथा,—
"एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ।
मिश्रश्रीमधुसूदनेन कविना सन्दर्भ्य सज्जीकृते
स्वर्गारोहणनामकोऽत्र नवमो यातोऽङ्क एवेत्यसौ ॥"
इति तस्यान्तिमः श्लोकः ॥

महानाडी, स्त्री, (महती चासौ नाडी चेति ।) कण्डरा । इति राजनिर्घण्टः ॥ (विवरणमस्याः कण्डराशब्दे ज्ञेयम् ॥)

महानादः, पुं, (महान् नादोऽस्य ।) हस्ती । वर्षुकमेघः । (महांश्चासौ नादश्चेति ।) महाशब्दः । इति मेदिनी । दे, ५१ ॥ (यथा, महाभारते । ५ । ९६ । २ ।
"इदमद्भिः समं प्राप्ता ये केचिद्भुवनङ्गमाः ।
प्रविशन्तो महानादं नदन्ति भयपीडिताः ॥"
सिंहः । कर्णः । इति हेमचन्द्रः ॥ उष्ट्रः । शङ्खः । इति राजनिर्घण्टः ॥ काहलवाद्यम् । इति हारावली ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ४८ ।
"निशाचरः प्रेतचारी भूतचारी महेश्वरः ।
कालयोगी महानादः सर्व्वकामचतुष्पथः ॥"
महाशब्दयुक्ते, त्रि । यथा, रामायणे । ४ । ४० । ३८ ।
"तत्कालमेव प्रतिमं महोरगनिषेवितम् ।
अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥")

महानिद्रा, स्त्री, (महती सुदीर्घा चासौ निद्रा चेति ।) मरणम् । इति जटाधरः ॥

महानिम्बः, पुं, (महांश्चासौ निम्बश्चेति ।) निम्बवृक्षविशेषः । घोडा निम इति भाषा । तत्पर्य्यायः । कैटर्य्यः २ पवनेष्टः ३ पार्व्वतः ४ । इति रत्नमाला ॥ (यथा,—
"स्वतन्तुनाभ्रनागञ्च स्वर्णं तुल्यं प्रकल्पयेत् ।
महानिम्बस्य चूर्णन्तु चतुर्भिः सममाहरेत् ।
मधुना लेहयेन्मासं नानामेहप्रशान्तये ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)
अस्य गुणाः । परमग्राहित्वम् । कषायत्वम् । अम्लत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥ (तथास्य पर्य्यायान्तरं गुणाश्च ।
"महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः ।
केशमुष्टिर्निम्बकश्च कार्म्मुको जीव इत्यपि ॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ।
कफपित्तभ्रमच्छर्द्दिकुष्ठहृल्लासरक्तजित् ।
प्रमेहश्वासगुल्मार्शो मूषिकाविषनाशनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महानिशा, स्त्री, (महती घोरा निशा ।) निशामध्यभागः । तत्पर्य्यायः । निशार्द्धः २ निशीथः ३ । इति हेमचन्द्रः । २ । ५९ ॥ * ॥ स्मृत्युक्तमहानिशा सार्द्धप्रहरोपरि प्रहरद्वयम् ।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तत्र स्नानं न कुर्व्वीत काम्यनैमित्तिकादृते ॥"
इति रघुनन्दनभट्टाचार्य्यधृतवचनात् ।
महानिशापरकालस्य नाडीचतुष्टयस्य परदिनादित्वेन तदानीं पूर्व्वदिवसीयभोजनानुपपत्तेः । तद्दिनकृत्यलोपापत्तेश्चेति निश्चितत्वीयलिखनस्वरसाच्च ॥ * ॥ तत्र भक्षणनिषेधो यथा,—
"यन्मुहूर्त्तं यमीते तु रात्रावेव महानिशा ।
लभते ब्रह्महत्याञ्च तत्र भुक्ता च नारद ! ॥
गोमांसविप्रभक्षसमं ताम्बूलञ्च फलं जलम् ।
पुंसामभक्ष्यं शुद्रायामोदनस्यापि का कथा ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

तत्र पारणनिषेधो यथा —
"न रात्रौ पारणं कुर्य्यादृते वै रोहिणीव्रतात् ।
निशायां पारणं कुर्य्याद्वर्ज्जयित्वा महानिशाम् ॥
महानिशायां प्राप्तायां तिथिभान्तं यदा भवेत् ।
तृतीयेऽह्नि मुनिश्रेष्ठ । पारणं कुरुते व्रती ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥
देवलोक्ता महानिशा रात्रिमध्यमदण्डद्वयात्मिका । सा द्वितीयप्रहरशेषदण्डतृतीयप्रहर-

प्रथमदण्डरूपा ॥ तस्यां शिवलिङ्गोद्भवो यथा,
"माघकृष्णचतुर्द्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः ॥"
अथ ।
"महानिशा द्वे घटिके रात्रेर्म्मध्यमयामयोः ॥"
इति देवलोक्ता महानिशा ॥
घटिका दण्डरूपा । इति तिथ्यादितत्त्वम् ॥
तान्त्रिकमहानिशा यथा, तन्त्रसारे ।
"गते तु प्रथमे यामे तृतीयप्रहरावधि ।
महानिशायां जप्तव्यं रात्रिशेषे जपेन्न तु ॥"
अपि च ।
"निशा तु परमेशानि । सूर्य्ये चास्तमुपागते ।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये ।
महानिशा समाख्याता ततश्चानिमहानिशा ॥
अर्द्धरात्रे गते देवि । पशुभावेन पूजयेत् ।
दण्डद्वये तु या पूजा तत् सर्व्वमक्षयं भवेत् ॥
षष्ठकोषे महेशानि । तत् सर्व्वमन्नतोपमम् ।
सप्तमकोषके देवि । सर्व्वं क्षीरोपमं भवेत् ॥
अष्टमकोषके देवि ! दध्यतुल्यं न संशयः ।
अतःपरं महेशानि । विषतुल्यो न संशयः ॥
एतत् सर्व्वं महेशानि । पशुभावे मयोदितम् ।
दिव्यवीरमते देवि ! तत्त्वज्ञानेन पूजयेत् ॥
पञ्चतत्त्वं समानीय यदि पूजापरो भवेत् ।
कालाकालं महेशानि । विचारं तत्र वर्ज्जयेत् ॥
अर्द्धरात्रगते देवि । कुलपूजा प्रकीर्त्तिता ।
भवेत्तस्यानुरूपेण सर्व्वं पूजादिकञ्चरेत् ॥
अतिच्छेदेन देवेशि । तव स्थाने प्रकाशितम् ।
पशोरग्रे कदाचिद्वै प्रकाशं नैव कारयेत् ॥"
इति गुप्तसाधनतन्त्रे ६ पटलः ॥

महानीचः, पुं, (महानतिशयो नीचः ।) रजकः । इति शब्दमाला ॥ अतिशयनीचवर्णश्च ॥

महानीलः, पुं, (महान् नीलः नीलवर्णः ।) भृङ्गराजः । नागविशेषः । मणिविशेषः । इति मेदिनी । ले, १६१ ॥ (यथा, शिशुपालवधे । १ । १६ ।
"महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरं ॥"
"सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृताः ॥
इति भगवानगस्त्यः ॥" इति तट्टीकायां मल्लिनाथः ॥) तस्य लक्षणं यथा,—
"यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तद्गुणात् सर्व्वं महानीलः स उच्यते ॥"
इति गारुडे ७२ अध्यायः ॥
(गुग्गुलुजातिभेदः । तद्यथा,—
"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ।
महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
सुमेरोर्द्दक्षिणपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५ । ४ ।
"शीतार्त्तश्चक्रमुञ्जश्च कुलीरोऽथ सुकङ्कवान् ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥")

महानीला, स्त्री, (महती चासौ नीला नीलवर्णा चेति ।) महाजम्बूः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य महाजम्बूशब्दे विज्ञेयः ॥)

महानीली, स्त्री, (नील + "नीलादोषधौ ।" ४ । १ । ४२ । इति वार्त्तिकोक्त्या ङीष् । ततः । महती चासौ नीली चेति ।) नीलापराजिता । वृहन्नीली । तत्पर्य्यायः । अमरा २ जनिनीलिका ३ तुत्था ४ श्रीफलिका ५ मेला ६ केशार्हा ७ भर्त्तृसफलिका ८ । अस्या गुणाः । गुणाढ्यत्वम् । रङ्गश्रेष्ठत्वम् । सुवर्णदातृत्वम् । नीलिकामपेक्ष्य सर्व्वकर्म्मसु सगुणत्वम् । इति राजनिर्घण्टः ॥

महानुभावः, त्रि, (महाननुभावो माहात्म्यमस्य ।) महाशयः । यथा,—
"सुकृती पुण्यवान् धन्यो धर्म्मी च धर्म्मवानपि ।
महाशयो महेच्छः स्यान्महानुभाव इत्यपि ॥"
इति शब्दरत्नावली ॥
(महात्मा । यथा, शिशुपालवधे । १ । १७ ।
"गृहीतुमार्य्यान् परिचर्य्यया मुहु-
र्म्महानुभावा हि नितान्तमर्थिनः ॥")

महान्तः, पुं, (महत् + प्रथमावहुवचनरूपम् ।) नवधाभक्तियुक्तकृष्णभक्ताः । ते शिवशेषधर्म्मादयः । यथा,—
"शिवः शेषश्च धर्म्मश्च ब्रह्मा विष्णुर्म्महान् विराट् ।
सनत्कुमारः कपिलः सनकश्च सनन्दनः ॥
वोढुः पञ्चशिखो दक्षो नारदश्च सनातनः ।
भृगुर्म्मरीचिर्द्दुर्वासाः कश्यपः पुलहोऽङ्गिराः ॥
मेधसो लोमशः शुक्रो वशिष्ठः क्रतुरेव च ।
वृहस्पतिः कर्द्दमश्च शक्तिरत्रिः पराशरः ॥
मार्कण्डेयो बलिश्चैव प्रह्लादश्च गणेश्वरः ।
यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः ॥
अकूपार उलूकश्च नाडीजङ्घश्च वायुजः ।
नरो नारायणः कूर्म्म इन्द्रद्युम्नो विभीषणः ॥
नवधाभक्तियुक्ताश्च कृष्णस्य परमात्मनः ।
एते महान्तो धर्म्मिष्ठा भक्तानां प्रवरास्तथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः ॥

महापञ्चमूलं, क्ली, (पञ्चानां विल्वादिमूलानां समाहारः । ततः महच्च तत् पञ्चमूलञ्चेति ।) वृहत् पञ्चमूलम् । तद्यथा,—
"विल्वोऽग्निमन्थः श्योनाकः काश्मर्य्यः पाटला तथा ।
सर्व्वैस्तु मिलितैरेतैः स्यान्महापञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥
(यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"विनिर्गमार्थं वायोश्च स्वेदयेत्तु मुहुर्म्मुहुः ।
क्षीरं महापञ्चमूलं मूषिकां चान्त्रवर्ज्जिताम् ॥")

महापञ्चविषं, क्ली, (पञ्चानां विषाणां समाहारः । ततो महच्च तत् पञ्चविषञ्चेति ।) वृहद्विषपञ्चकम् । तद्यथा,—
"शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः ।
शङ्खकर्णीति योगोऽयं महापञ्चविषाभिधः ॥"
इति राजनिर्घण्टः ॥

महापैत्रा, स्त्री, (महान्ति पत्राण्यस्याः ।) महाजम्बूः । इति रत्नमाला ॥ वृहत्पत्रयुक्ते, त्रि ॥

महापथः, पुं, (महांश्चासौ पन्थाश्चेति । "आन्महत इति ।" ६।३।४६ । इति महत आकारादेशः । "ऋक् पूरब्धूःपथामानक्षे ।" ५।४।७४ । इति समासान्तोऽकारः ।) प्रधानपथः । तत्पर्य्यायः । घण्टापथः २ संसरणम् ३ श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रमणम् ६ उपनिष्करम् ७ । इति हेमचन्द्रः । ४ । ५३ ॥ (यथा, रामायणे । २ । ८० । १६ ।
"पताका शोभिताः सर्व्वे सुनिर्म्मितमहापथाः ॥"
यथा च महाभारते । ५ । ६४ । २० ।
"संन्दृष्टसंविक्तरजः प्रतिपेदे महापथम् ॥"
मृत्युपथः । "याचायां पथि निद्रायां मद्यच्छन्दो न दीयते ।" इत्यस्य प्रतिप्रसूतार्थवत्त्वात् तथात्वम् । यथा, कथासरित्सागरे । २ । ४३ ।
"तच्छोकादिन्द्रदत्तस्य पिता यातो महापथम् ॥"
सुषुम्ना । यथा, हठयोगप्रदीपिकायाम् ।३।४।
"सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
श्मशानं शाम्भवी मध्यमार्गश्चेत्येकवाचकाः ॥")

महापथगमः, पुं, (महापथस्य महापथे वा गमः गमनम् ।) मरणम् । इति जटाधरः ॥

महापद्मः, पुं, (महत् पद्मं ताद्दृशं चिह्नं शिरसि यस्य ।) अष्टनागान्तर्गतनागभेदः । तत्पर्य्यायः । अतिशुक्लः २ दशविन्दुकमस्तकः ३ । इति हेमचन्द्रः । ४ । ३७५ ॥ (यथा, हरिवंशे । ३ । ११२ ।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥"
दर्व्वीकरान्तर्गतसर्पविशेषः । तद् यथा । "कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकोपोतो वलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति ॥" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥) कुवेरस्य नवनिध्यन्तर्गतनिधिविशेषः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६४ । १५ ।
"यस्या वत्से ! प्रभावेण विद्यायास्तां यहाण मे ।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥"
पुरभेदः । यथा, महाभारते ।१२।३५३।१।
"आसीत् किल नरश्रेष्ठ ! महापद्मे पुरोत्तमे ।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः ॥"
दैत्यभेदः । यथा, हरिवंशे । २३२ । ३ ।
"महापद्मो निकुम्भश्च पुर्णाकुम्भश्च वीर्य्यवान् ॥"
हस्तिभेदः । यथा, महाभारते । ६ ।६१।५१ ।

"तस्य चान्येऽपि दिङ्नागा बभुवुरनुयायिनः ।
अञ्जनो वामनश्चैव महापद्मश्च सुप्रभः ॥")
क्ली, लक्षकोटिसंख्या ॥ इति लीलावती ॥ (यथा, महाभारते । २ । ६१ । ३ ।
"अयुतं प्रयुतं चैव पद्मं खर्व्वमथार्व्वुदम् ।
शङ्खञ्चैव महापद्मं निखर्व्वं कोटिरेव च ॥")
शुक्लपद्मम् । इति रत्नमाला ॥

महापातकं, क्ली, (महदतिशयितं पातकम् ।) पापविशेषः । तत्तु पञ्चविधम् । यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥"
इति मानवे ११ अध्यायः ॥
"महापातकजं चिह्नं सप्तजन्मसु जायते ।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः समः ॥"
इति शातातपीयकर्म्मविपाकः ॥
"तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥"
इति मलमासतत्त्वम् ॥
"शृणोति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति राजेन्द्र ! महापातककोटयः ॥"
इति पुराणम् ॥

महापातकी, [न्] त्रि, (महापातकमस्यास्तीति । महापातक + इनिः ।) पञ्चप्रकारमहापातकयुक्तः । स च पतितः । यथा,—
"महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ।
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ॥
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ।
एतानि पतितानान्तु यः करोति विमोहितः ॥
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥"
इति शुद्धितत्त्वधृतविष्णुपुराणवचनम् ॥
पारिभाषिकमहापातकी यथा,—
"कृतप्राणप्रतिष्ठाञ्च शीर्णेयां प्रतिमां द्विज ! ।
दुर्गां न प्रणमेद्यस्तु स महापातकी स्मृतः ॥"
इति देवीपुराणे व्यासनारदसंवादः ॥
अपि च ।
"पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कार्पण्यात् स महापातकी शिव ! ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
(यथा च महानिर्व्वाणतन्त्रे । ३ । ८२ ।
"जातिभेदो न कर्त्तव्यः प्रसादे परमात्मनः ।
योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत् ॥")

महापापं, क्ली, (महच्च तत् पापञ्चेति ।) महापातकम् । यथा,—
"महापापेषु सर्व्वं स्यात् तदर्द्धमुपपातके ।
दद्यात् पापेषु षष्ठांशं ज्ञात्वा व्याधिबलाबलम् ॥"
इति मलमासतत्त्वम् ॥

महापारेवतं, क्ली, (महच्च तत् पारेवतञ्चेति ।) फलवृक्षविशेषः । बड़ा पारेवत इति हिन्दी भाषा ॥ तत्पर्य्यायः । स्वर्णपारेवतम् २ साम्राणिजम् ३ खारिकम् ४ रक्तरैवतकम् ५ दृढत्पारेवतम् ६ द्वीपजम् ७ द्वीपखर्ज्जूरम् ८ । अस्य गुणाः । मधुरत्वम् । बलकारित्वम् । पुष्टिवर्द्धनत्वम् । वृष्यत्वम् । मूर्च्छाभ्रमनाशित्वम् । पारेवतादधिकगुणत्वञ्च । इति राजनिर्घण्टः ॥

महापाशः, पुं, (महान् पाशोऽस्य ।) यमदूतविशेषः । इति वृहद्धर्म्मपुराणे ५६ अध्यायः ॥ (महांश्चासौ पाशश्चेति ।) वृहत्पाशश्च ॥

महापासकः, पुं, (पसति बाधते निराकरोति परकालेश्वरादिकमिति । पस् + ण्वुल् । ततः महांश्चासौ पासकश्चेति ।) बुद्धभिक्षुकः । तत्पर्य्यायः । चैलुकः २ श्रामणेरः ३ प्रव्रजितः ४ गोभीनः ५ । इति त्रिकाण्डशेषः ॥ (महोपासक इति पाठः क्वचित् दृश्यते ॥)

महापिण्डीतकः, पुं, (पिण्डीं तनोतीति । तन् + डः संज्ञार्थे कन् । ततः महांश्चासौ पिण्डीतकश्चेति । पिण्डाकारफलत्वादस्य तथात्वम् ।) कृष्णवर्णमहामदनवृक्षः । तत्पर्य्यायः । वाराहः २ । अस्य गुणाः । श्रेष्ठत्वम् । कटुतिक्तरसान्वितत्वम् । छर्द्दनत्वम् । कफहृद्रोगपक्वामाशयशोधनत्वञ्च । इति राजनिर्घण्टः ॥

महापिण्डीतरुः, पुं, (महांश्चासौ पिण्डीतकश्चेति ।) वृक्षविशेषः । पेंडिरा इति हिन्दी भाषा । तत्पर्य्यायः । श्वेतपिण्डीतकः २ करहाटः ३ क्षुरः ४ शल्ककोषतरुः ५ शरः ६ पिण्डीतरुः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । त्रिदोषशमनत्वम् । चर्म्मरोगापहत्वम् । विशेषात् रक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

महापीलुः, पुं, (पीलति प्रतिष्टभते विषपित्तादिकमिति । पील + "मृगय्वादयश्च ।" उणा० १ । ३८ । इति कुः । ततो महान् पीलुरिति कर्म्मधारयः ।) पीलुवृक्षविशेषः । तत्पर्य्यायः । वृहत्पीलुः २ महाफलः ३ राजपीलुः ४ महावृक्षः ५ मधुपीलुः ६ । अस्य फलगुणाः । मधुरत्वम् । वृष्यत्वम् । विषनाशित्वम् । पित्तप्रशमनत्वम् । रुच्यत्वम् । आमघ्नत्वम् । दीपनीयकत्वञ्च । इति राजनिर्घण्टः ॥

महापुराणं, क्ली, (महच्च तत् पुराणञ्चेति ।) एकादशलक्षणयुक्तव्यासप्रणीताष्टादशसंख्यकपुराणविशेषः । तस्य लक्षणं यथा,—
"सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ।
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः ॥
(अष्टादशमहापुराणानां विशेषविवरणलक्षणादिकं पुराणशब्दे द्रष्टव्यम् ॥)

महापुरुषः, पुं, (महांश्चासौ पुरुषश्चेति ।) श्रेष्ठनरः । (यथा, श्रीमद्भागवते । ६ । १७ । १० ।
"भवानतापीन्नार्था वै वैष्णवी जनमोहिनीम् ।
यद्भिक्षयासुरं भावं महापुरुषतां गतः ॥")
नारायणः । यथा,—
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम् ॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधाव-
वन्दे महापुरुष ! ते चरणारविन्दम् ॥"
इत्याह्निकतत्त्वधृतश्रीभागवतम् ॥

महापुरुषदन्ता, स्त्री, (महापुरुषस्य दन्ता इव मूलानि यस्याः ।) शतमूली । इति रत्नमाला ॥ (विवरणमस्याः शतमूलीशब्दे ज्ञातव्यम् ॥)

महापुरुषदन्तिका, स्त्री, (महापुरुषदन्ता + स्वार्थे कन् । स्त्रियां टाप् अत इत्वञ्च ।) महाशतावरी । इति राजनिर्घण्टः ॥

महापुष्पा, स्त्री, (महत् प्रशस्तं पुष्पमस्याः । स्त्रियां टाप् ।) अपराजिता । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते उत्तरतन्त्रे ५४ अध्याये ।
"दर्भपुष्पा महापुष्पा प्रसूनाश्चिपिटास्तथा ॥"
महापुष्पविशिष्टे, त्रि ॥)

महापृष्ठः, पुं, (महत् विपुलं पृष्ठमस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥ त्रि, वृहत्पृष्ठश्च ॥

महाप्रकृतिः, स्त्री, (महती श्रेष्ठा प्रकृतिर्जगन्मूलकारणम् ।) दुर्गा । यथा,—
"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्म्मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

महाप्रभः, त्रि, महती प्रभा यस्येति । अतिशयदीप्तियुक्तः । (यथा, हरिवंशे भविष्यपर्व्वणि । ३८ । १२ ।
"ततश्चक्रं महाघोरं सहस्रारं महाप्रभम् ॥")

महाप्रभा, स्त्री, (महती चासौ प्रभा चेति ।) महती दीप्तिः । यथा । महाप्रभात्वावच्छिन्नाभावोऽन्धकारः । इति सामान्यलक्षणायां जगदीशः ॥

महाप्रभुः, पुं, (महांश्चासौ प्रभुश्चेति ।) परमेश्वरः । यथा,—
"वन्देऽनन्ताद्भुतैश्वर्य्यं श्रीचैतन्यं महाप्रभुम् ।
नीचोऽपि यत्प्रसादात् स्यात् सदाचारप्रवर्त्तकः ॥"
इति हरिभक्तिविलासे ३ विलासः ॥
"अनन्तमद्भुतञ्चाचिन्त्यं ऐश्वर्य्यं प्रभावो यस्य तं यतो महाप्रभुं परमेश्वरम् ।" इति तट्टीकायां जीवगोस्वामी ॥ श्रीचैतन्यः । यथा,—
"सोऽयं नीलगिरीश्वरः सविभवो यात्रा च सा गुण्डिचा

ते ते दिग्विदिगागताः सुमतिरलास्ता
दिङ्मार्गेयः ।
आरामश्च स एव नन्दनवनश्रीणां तिरस्कारिणः
सर्व्वाण्येव महाप्रभुं वत विना शून्यानि मन्या-
महे ॥”
इति चैतन्यचन्द्रोदयनाटकम् ॥

महाप्रलयः, पुं, (महांश्चासौ प्रलयो जगता-
मवसानश्चेति ।) त्रिलोकनाशः । तत्पर्य्यायः ।
संहारः २ । इति हलायुधः ॥ तस्य विवरणं
यथा,—
श्रीमार्कण्डेय उवाच ।
“मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति श्रुतम् ।
तदेकसप्ततियुगैर्द्दैवानामिह जायते ।
तैश्चतुर्द्दशभिः कल्पो दिनमेकन्तु वेधसः ॥
दिनान्ते वेधसो जाते सुषुप्सा तस्य जायते ।
योगनिद्रा महामाया समायाति पितामहम् ॥
नाभिपद्मं प्रविश्याथ विष्णोरमिततेजसः ।
सुखं स शेते भगवान् ब्रह्मा लोकपितामहः ॥
ततो विष्णुः स्वयं भूत्वा रुद्ररूपी जनार्द्दनः ।
पूर्व्ववन्नाशयामास स सर्व्वं भुवनत्रयम् ॥
वायुना वह्निना सर्व्वं दाहयामास वै यथा ।
महाप्रलयकालेषु तथा सर्व्वं जगत्त्रयम् ॥
जनं यान्ति प्रतापार्त्ता महर्लोकनिवासिनः ।
त्रैलोक्यं दाहयामास पीडिता दारुणाग्निना ॥
ततः कालान्तकैर्म्मेघैर्नानावर्णैर्म्महास्वनैः ।
समुत्पाद्य महावृष्टिमापूर्य्य भुवनत्रयम् ॥
चलत्तरङ्गैस्तोयौघैराप्लुत्यस्थानसङ्गतैः ।
निधाय जठरे लोकानिमांस्त्रीन् स जनार्द्दनः ॥
नागपर्य्यङ्कशयने शेते स परमेश्वरः ।
शयानं नाभिकमले ब्रह्माणं स जगत्प्रभुः ॥
संस्थाप्य त्रीनिमांल्लोकान् दग्ध्वा दग्ध्वा श्रिया
सह ।
शेते स भोगिशय्यायां ब्रह्मा नारायणात्मकः ॥
योगनिद्रावशं यातस्त्रैलोक्यग्राससंहितः ॥
त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा ।
अनन्तः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः ॥
तेन त्यक्ता तु पृथिवी चाकमाचादधो गता ।
पतिता कूर्म्मपृष्ठे तु विशीर्णैव तदाभवत् ॥
कूर्म्मोऽपि महतो यत्नाद्बलन्तीं पृथिवीं जले ।
ब्रह्माण्डं पद्भिराक्रम्य पृष्ठे दध्रे धरां तदा ॥
ब्रह्माण्डखण्डसंयोगाच्चूर्णिता पृथिवी भवेत् ।
इति तां परिजग्राह कूर्म्मरूपी जनार्द्दनः ॥
चलज्जलौघसंसर्गाच्चलन्त्या धरया तदा ।
कूर्म्मपृष्ठं बहुतरैर्व्रणैर्विततोल्वणम् ॥
अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः ।
तत्र स्वयं श्रिया युक्तं सुषुप्सन्तं जनार्द्दनम् ॥
फणया मध्यया दध्रे त्रैलोक्यग्राससंहितम् ।
पूर्व्वं फणां विततोर्द्ध्वं पद्मं कृत्वा महाबलः ।
विष्णुमाच्छादयामास शेषाख्यः परमेश्वरः ॥
तस्योपधानमकरोदनन्तो दक्षिणां फणाम् ।
उत्तरां पादयोश्चक्रे उपाधानं महाबलः ॥
तालवृन्तं तदा चक्रे स शेषः पश्चिमां फणाम् ।
स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम् ॥
शङ्खं चक्रं नन्दकासिमिषुधी द्वे महाबलः ।
ऐशानयाथ फणया स दध्रे गरुडं तदा ॥
गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम् ।
यानि चान्यानि तस्यासन्नाग्नेय्या फणया दधौ ॥
एवं कृत्वा स्वकं कायं शयनीयं तदा हरेः ।
पृथ्वीमधरकायेन मणामाक्रम्य चाम्भसि ॥
त्रैलोक्यग्राससहितं सलक्ष्मीकं जनार्द्दनम् ।
सोपासङ्गजगद्वीजं जगत्कारणकारणम् ॥
नित्यानन्दं वेदमयं ब्रह्मण्यं परमेश्वरम् ।
जगत्कारणकर्त्तारं जगत्कारणकारणम् ॥
भूतभव्यभवन्नाथं परापरपतिं हरिम् ।
दधार शिरसानन्तः स्वयमेव स्वकां तनुम् ॥
एव ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः ।
सन्ध्याञ्च समधिप्राप्य शेते नारायणोऽव्ययः ॥
यस्मादयन्तु प्रलयो ब्रह्मणः स्यादहर्दिने ।
तस्मादहैनन्दिनमिति ख्यापयन्ति पुराविदः ॥
व्यतीतायां निशायान्तु ब्रह्मा लोकपितामहः ।
त्यक्त्वा निद्रां समुत्तस्थौ स पुनः सृष्टये स्थितः ॥”
इति कालिकापुराणे २७ अध्यायः ॥
न्यायमते जन्यभावानधिकरणकालः । स च
चरमध्वंसरूपः ॥

महाप्रसादः, पुं, (महांश्चासौ प्रसादश्चेति ।)
विष्णुनैवेद्यादिः । यथा,—
“पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः ।
महाप्रसाद इत्युक्त्वा ग्राह्यं विष्णोः प्रयत्नतः ॥”
इत्येकादशीतत्त्वधृतमत्स्यसूक्तवचनम् ॥
श्रीजगन्नाथस्य महाप्रसादमाहात्म्यं जगन्नाथ-
शब्दे द्रष्टव्यम् ॥ अतिशयप्रसन्नता च । (महान्
प्रसादोऽस्य । शिवः । यथा, महाभारते ।१३।
१७ । १३६ ।
“महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥”)

महाप्रस्थानगमनं, क्ली, (प्रस्थीयते अस्मिन्निति ।
प्र + स्था + ल्युट् । महत् प्रस्थानं महापथः ।
तत्र गमनम् ।) महापथगमनम् । तत्तु मरणो-
द्देशेन हिमालयपर्य्यन्तप्रयाणम् । तच्च कलौ
निषिद्धम् । यथा, बृहन्नारदीये ।
“समुद्रयातुःस्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्व्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैव कन्यायाः पुनर्द्दानं परस्य च ।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधञ्च तथा मखम् ।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनी-
षिणः ॥”
इत्युद्वाहतत्त्वम् ॥

महाप्राणः, पुं, (महान्तो दीर्घकालस्थायिनः
प्राणा यस्य सः ।) द्रोणकाकः । इति राज-
निर्घण्टः ॥ वर्णविशेषः । ख घ । छ झ ठ
ढ थ ध फ भ श ष स ह रूपः । यथा,—
“वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ
य र ल वाश्चाल्पप्राणाः । अन्ये महाप्राणा
इत्यर्थः ।” इति सिद्धान्तकौमुदी ॥ (महाबलं,
त्रि । यथा, श्रीमद्भागवते । ६ । ११ । ६ ।
“एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥”)

महाफलः, पुं, (महत् पूजादौ प्रशस्तं पूज्यं वा
फलमस्य ।) विल्ववृक्षः । इति रत्नमाला ॥
(महच्च तत् फलञ्चेति ।) बृहत्फले, क्ली ॥ (यथा,
मनौ । ३ । १२८ ।
“श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः ।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥”)

महाफला, स्त्री, (महत् फलं आरोग्यादिकं
यस्याः ।) इन्द्रवारुणी । इति जटाधरः ॥
(अस्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे
प्रथमे भागे ।
“ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
वारुणी च पराप्युक्ता सा विशाला महाफला ॥
श्वेतपुष्पा मृगाक्षी च मृगेर्वारुर्मृगादनी ॥”
राजजम्बूः । तत्पर्य्यायो यथा, तत्रैव ।
“फलेन्द्राकथितानन्दो राजजम्बूर्म्महाफला ॥”
कटुतुम्बी । तत्पर्य्यायो यथा, तत्रैव ।
“इक्ष्वाकुः कटुतुम्बी स्यात् सा तुम्बी च महा-
फला ॥”
महाकोशातकी । तत्पर्य्यायो यथा, तत्रैव ।
“महाकोशातकी प्रोक्ता हस्तिघोषा महा-
फला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥”)

महापेशा, स्त्री, (महती पेशा ।) हिण्डीरः ।
इति शब्दचन्द्रिका ॥

महाबलं, क्ली, (महदतिशयितं बलं सामर्थ्यमस्मात् ।
महत् बलमस्येति वा ।) सीसकम् । इति
हेमचन्द्रः ॥ (तथास्य पर्य्यायः ।
“नागं महाबलं चीनं पिष्टं योगेष्टसीसकम् ॥”
इति वैद्यकरत्नमालायाम् ॥)

महाबलः, पुं, (महदतुलं बलं ऐश्वर्य्यं यस्य ।)
बुद्धः । इति त्रिकाण्डशेषः ॥ (पितृगणविशेषः ।
यथा, मार्कण्डेये । ९६ । ४६ ।
“महान् महात्मा महितो महिमावान् महा-
बलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥”)
वायुः । बलीयसि, त्रि । इति हेमचन्द्रः । ४ ।
१७३ ॥ (यथा, रामायणे । १ । १ । ३४ ।
“नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ॥”)

महाबला, स्त्री, (महद्बलमस्याः ।) बलाभेदः ।
पीतवाट्यालकः । तत्पर्य्यायः । भद्रप्रोक्ता २
अतिबला ३ पीतपुष्पी ४ । इति रत्नमाला ॥
(अस्याः पर्य्यायो यथा,—
“वाट्या वाट्यालिका वाट्या सैव वाट्यालकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

(तथाख्या गुणा: ।
"हरेत्महावला सर्व्वं भवेद्वातानुलोमनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महाबोधि:, पुं, (बुध्यते सर्व्वं जानातीति । बुध् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ततो महांश्चासौ बोधिश्चेति ।) बुद्ध: । इति हेमचन्द्र: । २ । १४६ ॥

महाब्राह्मण:, पुं, (महानतिशयनिन्दित: ब्राह्मण: । "वैद्ये ज्योतिषिके द्विजे ।" इति निषेधवचनस्मरणादेवास्य तथात्वम् ।) निन्दितब्राह्मण: । इति पाणिनिव्याकरणम् ॥
अस्मिन् देशे अयं अग्रदानित्वेन प्रसिद्ध: ॥
(यथा, मृच्छकटिके १ अङ्के ।
"विट: । महाब्राह्मण ! मर्षय मर्षय ॥")

महाभट, पुं, (महांश्चासौ भटश्चेति ।) अतिशययोद्धा । यथा,—
"तदोजसा दैत्यमहाभटार्पितं
चकासदन्त: ख उदीर्णदीधिति ।
चक्रेण चिच्छेद निशाननेमिना
हरिर्यथा तार्क्ष्यपतत्त्रमुज्झितम् ॥"
इति श्रीभागवते ३ स्कन्धे १९ अध्याय: ॥

महाभद्रा, स्त्री, (महत् भद्रं मङ्गलं यस्या: ।) गङ्गा । इति शब्दमाला । काश्मरी । इति राजनिर्घण्ट: ॥ (मेरोरुत्तरपार्श्वस्थसरोवरे, स्त्री । यथा, मार्कण्डेये । ५५ । ३ ।
"अरुणोदं सर: पूर्व्वं मानसं दक्षिणे तथा ।
शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे ॥")

महाभारतं, स्त्री, (महत् भारतम् । यद्वा, महान्तं भारं तनोतीति । महाभार + तन् + ड: ।) व्यासप्रणीतेतिहासशास्त्रम् । तन्नामकारणं यथा,—
"एकतश्चतुरो वेदा भारतञ्चैतदेकत: ।
पुरा किल सुरै: सर्व्वै: समस्य तुलया धृतम् ॥
चतुर्भ्य: सरहस्येभ्यो वेदेभ्योऽभ्यधिकं यदा ।
तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते ॥
महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते ॥"
इति महाभारते आदिपर्व्व ॥*॥
लोकविशेषेषु तस्य श्लोकसंख्या वाचकाश्च यथा,
"षष्टिं शतसहस्राणि चकारान्यां स संहिताम् ।
त्रिंशच्छतसहस्रञ्च देवलोके प्रतिष्ठितम् ॥
पित्र्ये पञ्चदश प्रोक्तं रक्षोयक्षे चतुर्द्दश ।
एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम् ॥
नारदोऽश्रावयद्देवानसितो देवल: पितॄन् ।
गन्धर्व्वयक्षरक्षांसि श्रावयामास वै शुक: ॥
अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान् ॥"
इति महाभारते १ पर्व्वणि अनुक्रमणिकाध्याय: ॥*॥ तस्य शतपर्व्वाणि तेष्वष्टादश मुख्यानि यथा,—
"आदिसभाविपिनानि विराट-
श्चोद्यमभीष्मगुरुर्क्षणि च कर्ण: ।
शल्यकसौप्तिकपर्व्व तथा स्त्री-
शान्त्यनुशासितुरङ्गममेधा: ॥
आश्रममौषलयानिकनाका:
पर्व्वणि पर्व्वणि नाम विशेषा: ॥
इति भारतटीका ॥*॥
हरिवंशसहितोनविंशतिपर्व्वणामन्तर्गतशतपर्व्वविभागस्तेषामध्यायश्लोकसंख्या च यथा,—
१ आदिपर्व्वणि १९ पर्व्वाणि २२७ अध्याया: ८९८४ श्लोका: ॥ २ सभापर्व्वणि ९ पर्व्वाणि ७८ अध्याया: ७५११ श्लोका: ॥ ३ आरण्यकपर्व्वणि १६ पर्व्वाणि २६९ अध्याया: ११६६४ श्लोका: ॥ ४ विराटपर्व्वणि ४ पर्व्वाणि ६७ अध्याया: २०५० श्लोका: ॥ ५ उद्योगपर्व्वणि ११ पर्व्वाणि १८६ अध्याया: ६६९८ श्लोका: ॥ ६ भीष्मपर्व्वणि ५ पर्व्वाणि ११७ अध्याया: ५८८४ श्लोका: ॥ ७ द्रोणपर्व्वणि ८ पर्व्वाणि १७० अध्याया: ९९०९ श्लोका: ॥ ८ कर्णपर्व्वणि १ पर्व्व ६९ अध्याया: ४९६४ श्लोका: ॥ ९ शल्य पर्व्वणि ४ पर्व्वाणि ५९ अध्याया: ३२२० श्लोका: ॥ १० सौप्तिकपर्व्वणि ३ पर्व्वाणि १८ अध्याया: ८७० श्लोका: ॥ ११ स्त्रीपर्व्वणि ५ पर्व्वाणि २७ अध्याया: ७७५ श्लोका: ॥ १२ शान्तिपर्व्वणि ४ पर्व्वाणि ३३९ अध्याया: १४७३२ श्लोका: ॥ १३ अनुशासनपर्व्वणि १ पर्व्व १४६ अध्याया: ८००० श्लोका: ॥ १४ अश्वमेध पर्व्वणि २ पर्व्वणी १०३ अध्याया: ३३२० श्लोका: ॥ १५ आश्रमवासपर्व्वणि ३ पर्व्वाणि ४२ अध्याया: १५०६ श्लोका: ॥ १६ मौषलपर्व्वणि १ पर्व्व ८ अध्याया: ३०० श्लोका: ॥ १७ महाप्रास्थानिकपर्व्वणि १ पर्व्व ३ अध्याया: ३२० श्लोका: ॥ १८ स्वर्गपर्व्वणि १ पर्व्व ५ अध्याया: २०० श्लोका: । १९ हरिवंशे आश्चर्य्यपर्व्वणि १ पर्व्व २४४ अध्याया: १२००० श्लोका: ॥ हरिवंशे भविष्यपौष्करप्रादुर्भावे १ पर्व्व ११२ अध्याया: ३४४८ श्लोका: ॥ इति महाभारते आदिपर्व्वणि पर्व्वसंग्रहनामक: २ अध्याय: ॥*॥ तच्छ्रवणविध्यादि यथा,—

जनमेजय उवाच ।
"भगवन् ! केन विधिना श्रोतव्यं भारतं बुधै: ।
फलं किं के च देवाश्च पूज्या वै पारणेष्विह ॥
देयं समाप्ते भगवन् । किञ्च पर्व्वणि पर्व्वणि ।
वाचक: कीदृशश्चात्र एष्टव्यस्तद् ब्रवीहि मे ॥*॥

वैशम्पायन उवाच ।
शृणु राजन् । विधिमिमं फलं यच्चापि भारतात् ।
श्रुताद्भवति राजेन्द्र । यत्त्वं मामनुपृच्छसि ॥
दिवि देवा महीपाल । क्रीडार्थमवनिं गता: ।
कृत्वा कार्य्यमिदञ्चैव ततश्च दिवमागता: ॥
हन्त यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहित: ।
ऋषीणां देवतानाञ्च सम्भवं वसुधातले ॥
अत्र रुद्रास्तथा साध्या विश्वेदेवाश्च शाश्वता: ।
आदित्या अश्विनौ देवौ लोकपाला महर्षय: ॥
गुह्यकाश्च सगन्धर्व्वा नागा विद्याधरास्तथा ।
सिद्धा धर्म्म: स्वयम्भुश्च मुनि: कात्यायनो वर: ॥
गिरय: सागरा नद्यस्तथैवाप्सरसां गणा: ।
ग्रहा: संवत्सरश्चैव अयनान्यृतवस्तथा ॥
स्थावरं जङ्गमञ्चैव जगत् सर्व्वं सुरासुरम् ।
भारते भरतश्रेष्ठ । एकस्थमिह दृश्यते ॥
तेषां श्रुत्वा प्रतिष्ठानं नामकर्म्मानुकीर्त्तनात् ।
कृत्वापि पातकं घोरं सद्यो मुच्येत मानव: ॥*॥
इतिहासमिमं श्रुत्वा यथावदनुपूर्व्वश: ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारत । ॥
तेषां श्राद्धानि देयानि श्रुत्वा भारत । भारतम् ।
ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ । ॥
महादानानि देयानि रत्नानि विविधानि च ।
गाव: कांस्योपदोहाश्च कन्याश्चैव स्वलङ्कृता: ॥
सर्व्वकामगुणोपेता यानानि विविधानि च ।
भवनानि विचित्राणि भूमिर्व्वासांसि काञ्चनम् ॥
वाहनानि च देयानि हया मत्ताश्च वारणा: ।
शयनं शिविकाश्चैव स्यन्दनाश्च स्वलङ्कृता: ॥
यद्यद्गृहे वरं किञ्चित् यद्यदस्ति महद्वसु ।
तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनव: ॥
श्रद्धया परया दत्तं क्रमशस्तस्य पारग: ।
शक्तित: सुमना हृष्ट: शुश्रूषुरविकत्थन: ॥*॥
सत्यार्ज्जवरतो दान्त: शुचि: शौचसमन्वित: ।
श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु ॥
शुचि: शीलान्विताचार: शुक्लवासा जितेन्द्रिय: ।
संस्कृत: सर्व्वशास्त्रज्ञ: श्रद्दधानोऽनसूयक: ॥
रूपवान् सुभगो दान्त: सत्यवादी जितेन्द्रिय: ।
दानमानगृहीतश्च कार्य्यो भवति वाचक: ॥
अविलम्बमनायस्तमद्रुतं धीरमूर्जितम् ।
असंसक्ताक्षरपदं रसभावसमन्वितम् ॥
त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमन्वितम् ।
वाचयेद्वाचक: स्वस्थ: स्वासीन: सुसमाहित: ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ईदृशाद्वाचकाद्राजन् । श्रुत्वा भारत । भारतम् ।
नियमस्थ: शुचि: श्रोता शृण्वन् स फलमश्नुते ॥
पारणं प्रथमं प्राप्य द्विजान् कामैश्च तर्पयेत् ।
अग्निष्टोमस्य यागस्य फलं वै लभते नर: ॥
अप्सरोगणसङ्कीर्णं विमानं लभते महत् ।
प्रहृष्ट: स तु देवैश्च दिवं याति समाहित: ॥
द्वितीयं पारणं प्राप्य अतिरात्रफलं लभेत् ।
सर्व्वरत्नमयं दिव्यं विमानमधिरोहति ॥
दिव्यमाल्याम्बरधरो दिव्यगन्धविभूषित: ।
दिव्याङ्गदधरो नित्यं देवलोके महीयते ॥
तृतीयं पारणं प्राप्य द्वादशाहफलं लभेत् ।
वसत्यमरसङ्काशो वर्षाण्ययुतशो दिवि ॥
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलम् ।
उदितादित्यसङ्काशं ज्वलन्तमनलोपमम् ॥
विमानं विबुधै: सार्द्धमारुह्य दिवि गच्छति ।
वर्षायुतानि भवने शक्रस्य दिवि मोदते ॥
षष्ठे द्विगुणमस्तीह सप्तमे त्रिगुणं फलम् ।
कैलासशिखराकारं वैदूर्य्यमयवेदिकम् ॥
परिक्षिप्तञ्च बहुधा मणिविद्रुमभूषितम् ।
विमानं समधिष्ठाय कामगं साप्सरोगणम् ॥

सर्व्वान् लोकान् विचरते द्वितीय इव भास्करः
अष्टमे राजसूयस्य पारणे लभते फलम् ॥
चन्द्रोदयनिभं रम्यं विमानमधिरोहति ।
चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ॥
सेव्यमानो वरस्त्रीणां चन्द्रात् कान्ततरैर्मुखैः ।
मेखलानां निनादेन नूपुराणाञ्च निस्वनैः ॥
अङ्के परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ! ॥
काञ्चनस्तम्भनिर्य्यूहं वैदूर्य्यकृतवेदिकम् ।
जाम्बूनदमयैर्दिव्यैर्गवाक्षैः सर्व्वतो वृतम् ॥
सेवितं चाप्सरःसङ्घैर्गन्धर्व्वैर्द्दिवि चारिभिः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः ।
मोदते दैवतैः सार्द्धं दिवि देव इवापरः ॥
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च ।
किङ्किणीजालनिर्घोषं पताकाध्वजशोभितम् ॥
रत्नवेदिकसंकाशं वैदूर्य्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रवालवड़भीमुखम् ॥
गन्धर्व्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुकृतावासं सुखेनैवोपपद्यते ॥
मुकुटेनार्कवर्णेन जाम्बूनदविभूषिणा ।
दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः ।
दिव्यान् लोकान् विचरति दिव्यैर्भोगैः सम-
न्वितः ।
विबुधानां प्रसादेन श्रिया परमया युतः ॥
अथ वर्षगणानेवं स्वर्गलोके महीयते ॥
अथ गन्धर्व्वसहितः सहस्राण्येकविंशतिम् ।
पुरन्दरपुरे रम्ये शक्रेण सह मोदते ॥
दिव्ययानविमानेषु लोकेषु विविधेषु च ।
दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ॥
ततः सूर्य्यस्य भवनं चन्द्रस्य भवनं तथा ।
शिवस्य भवने राजन् ! विष्णोर्याति सलोक-
ताम् ॥
एवमेतन्महाराज ! नात्र कार्य्या विचारणा ।
श्रद्दधानेन वै भाव्यमेवमाह गुरुर्मम ॥ · ॥
वाचकस्य तु दातव्यं मनसा यद्यदिच्छति ।
हस्त्यश्वरथयानानि वाहनञ्च विशेषतः ॥
कटकं कुण्डलञ्चैव ब्रह्मसूत्रं तथापरम् ।
वस्त्रञ्चैव विचित्रञ्च गन्धञ्चैव विशेषतः ।
देववत् पूजयेत्तन्तु विष्णुलोकमवाप्नुयात् ॥ * ॥
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमाने तु विप्रेभ्यो राजन् ! पर्व्वणि पर्व्वणि ॥
जातिं देशञ्च सत्यञ्च माहात्म्यं भरतर्षभ ! ।
धर्म्मंवृत्तिञ्च विज्ञाय क्षत्रियाणां नराधिप ! ॥
स्वस्तिवाच्य द्विजानादौ ततः कार्य्यं प्रवर्त्तते ।
समाप्ते पर्व्वणि ततः स्वशक्त्या पूजयेत् द्विजान् ॥
आदौ तु वाचकन्तत्र वस्त्रगन्धसमन्वितम् ।
विधिवद्भोजयेद्राजन् ! मधु पायसमुत्तमम् ॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आस्तीके भोजयेद्राजन् ! दद्याच्चैव गुड़ौदनम् ॥
अपूपंश्चैव पूपैश्च मोदकैश्च समन्वितम् ।
सभापर्व्वणि राजेन्द्र ! हविष्यं भोजयेद् द्विजान् ॥

आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरणीपर्व्व चासाद्य जलकुम्भान् प्रदापयेत् ॥
तर्पणानि च मुख्यानि रम्यमूलफलानि च ॥
सर्व्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत्
विराटपर्व्वणि तथा वासांसि विविधानि च ।
उद्योगे भरतश्रेष्ठ ! सर्व्वकामगुणान्वितम् ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ॥
भीष्मपर्व्वणि राजेन्द्र ! दत्त्वा यानमनुत्तमम् ।
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ॥
द्रोणपर्व्वणि विप्रेभ्यो भोजनं परमार्च्चितम् ।
शराश्च देया राजेन्द्र । चापान्यसिवरास्तथा ॥
कर्णपर्व्वण्यपि तथा भोजनं सार्व्वकामिकम् ।
विप्रेभ्यः संस्कृतं सम्यक् दद्यात् संयतमानसः ॥
शल्यपर्व्वणि राजेन्द्र । मोदकैः सगुड़ौदनैः ।
अपूपैस्तर्पणैश्चैव सर्व्वमन्नं प्रदापयेत् ॥
गदापर्व्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥
स्त्रीपर्व्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्ताच्च ऐषीके दापयेत् पुनः ॥
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिपर्व्वण्यपि तथा हविष्यं भोजयेद्
द्विजान् ॥
आश्वमेधिकमासाद्य भोजनं सार्व्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यम्भोजयेत् द्विजान् ॥
मौषले सार्व्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत् सर्व्वकामगुणान्वितम् ॥
स्वर्गपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशे पर्व्वणि च पायसं तत्र भोजयेत् ॥
पारणे पारणे राजन् । यथावद्भरतर्षभ ! ।
समाप्य सर्व्वाः प्रयतः संहिताः शास्त्र-
कोविदः ॥ * ॥
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ।
शुक्लाम्बरधरः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः ॥
अर्च्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकान् राजन् । प्रयतः सुसमा-
हितः ॥
भक्ष्यैर्म्माल्यैश्च पेयैश्च कामैश्च विविधैः शुभैः ।
हिरण्यञ्च सुवर्णञ्च दक्षिणामथ दापयेत् ॥
देवताः कीर्त्तयेत् सर्व्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान् ॥
तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
प्राप्नुयाच्च क्रतुफलं तथा पर्व्वणि पर्व्वणि ।
वाचको भरतश्रेष्ठ । व्यक्ताक्षरपदस्वरः ॥
भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ ! ।
भुक्तवत्सु द्विजेन्द्रेषु यथावत् संप्रदापयेत् ॥
वाचकं भरतश्रेष्ठ । भोजयित्वा स्वलङ्कृतम् ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्व्वदेवताः । * ।
ततो हि वरणं कार्य्यं द्विजानां भरतर्षभ ! ॥
सर्व्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ।
इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर ! ॥
श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि ।

भारतश्रवणाद्राजन् पारणे च नृपोत्तम ! ॥
सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता ॥ * ॥
भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥
भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेव्यते देवैर्भारतं परमं पदम् ॥
भारतं सर्व्वशास्त्राणामुत्तमं भरतर्षभ ! ।
भारतात् प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते ॥
महाभारतमाख्यानं क्षितिं गाञ्च सरस्वतीम् ।
ब्राह्मणान् केशवञ्चैव कीर्त्तयन्नावसीदति ॥
वेदे रामायणे पुण्ये भारते भरतर्षभ ! ।
आदौ चान्ते च मध्ये च हरिः सर्व्वत्र गीयते ॥
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः ।
तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता ॥
एतत् पवित्रं परममेतद्धर्म्मनिदर्शनम् ।
एतत् सर्व्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥"
इति महाभारते हरिवंशे सर्व्वपर्व्वानुकीर्त्त-
नम् ॥ * ॥ त्रिषष्टिवर्णसंयुक्तमित्यत्र त्रिषष्टि
वर्णाः । अ इ उ ऋ ऌ इति ह्रस्वपञ्चकम् ।
आ ई ऊ ॠ ॡ इति दीर्घपञ्चकम् । आ३ ई३
ऊ३ ॠ३ ॡ३ इति प्लुतपञ्चकम् । ए ओ ऐ औ च
दीर्घाः । प्लुतत्वेनापरचतुष्टयम् । अं अः ꣵक ꣵ
प४ इति चत्वारः । ॠ ॡ इति अपसंज्ञकौ
द्वौ । अनुनासिकश्चैकः । तथा कादिमावसानाः
पञ्चविंशतिवर्णाः । अन्तःस्थाश्चत्वारः । उष्म-
चतुष्टयमिति त्रिषष्टिः । इति ॥ * ॥ वर्णानां
किलाष्टौ स्थानानि भवन्ति तानि यथा,—
"उरः कण्ठः शिरस्तालु जिह्वादन्तौष्ठ-
नासिकाः ।
अष्टौ स्थानानि वर्णानां ये विदुस्ते हि
पाठकाः ॥" * ॥
पारणं यथा,—
"भारतं शतपर्व्वोक्तं मुनिना तत्त्वदर्शिना ।
पर्व्वभिर्दशभिश्चैषां पर्व्वणां पारणं स्मृतम् ॥"
इति विक्रमादित्यः ॥
"द्यूतान्तं प्रथमं प्रोक्तं द्वितीयं वनवासिकम् ।
उद्योगान्तं तृतीयन्तु भीष्मान्तञ्च तुरीयकम् ॥
पञ्चमं द्रोणपर्व्वान्तं कर्णान्तं पारणं ततः ।
विशोकान्तं सप्तमन्तु शान्तिपर्व्वान्तमष्टमम् ॥
नवमं स्वर्गपर्व्वान्तमाश्वमेधान्तमतः परम् ॥"
इति च भारतटीकायां अर्ज्जुनमिश्रः ॥
(अन्यत्सर्व्वं भारतशब्दे द्रष्टव्यम् ॥)
महाभीता, स्त्री, (महत्यधिका भीतेव ।) लज्जालु-
वृक्षः । यथा, शब्दचन्द्रिकायाम् ।
"स्पर्शलज्जा महाभीता वशिनी च महौ-
षधिः ॥"
(महानतिशयो भीतः ।) अतिशयभययुक्ते, त्रि ॥
महाभीमः, पुं, (महानतिशयो भीमः । भीषणा-
कृतित्वात् शिवांशसम्भूतत्वाच्च तथात्वम् ।)
शान्तनुराजः । इति जटाधरः ॥ भृङ्गिनामक-
शिवद्वारपालः । इति त्रिकाण्डशेषः ॥ अति-
शयभयानके, त्रि ॥

महाभीरुः, पुं, (महानतिशयो भीरुः ।) गोपालिकाख्यकीटविशेषः । इति हेमचन्द्रः । ४ । २३४ ॥ अतिभयशीले, त्रि ॥

महाभीष्मः, पुं, (महानतिशयो भीष्मः ।) शान्तनुराजः । इति त्रिकाण्डशेषः ॥

महाभूतं, क्ली, (महत् भूतम् । पञ्चतन्मात्रेभ्यः स्थौल्यादस्य तथात्वम् ।) पृथिव्यादिपञ्चभूतम् । यथा,—

"महाभूतानि पञ्चैव खानिलाग्न्यम्बुभूमिभिः ॥"

इति शब्दचन्द्रिका ॥

(अस्य विवृत उत्पत्तिश्च यथा,—

"तन्मात्रेभ्यो वियद्वायुर्वह्निर्नीरवसुन्धराः ।

एतानि पञ्च जायन्ते महाभूतानि तत्क्रमात् ॥"

एकोत्तरपरिवृद्ध्या वियदादयो जायन्त इत्यर्थः । तद्यथा । शब्दतन्मात्राच्छब्दगुणं वियज्जायते । शब्दतन्मात्रसहितात् स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुर्जायते । शब्दतन्मात्रस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शरूपगुणो वह्निर्जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रसहिताद्रसतन्मात्राच्छब्दस्पर्शरूपरसगुणं वारि जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रसहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा वसुन्धरा जायते ।"इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ "मानुजादयोऽप्यस्य महाभूतविकारा एव तत्रास्याकाशात्मकं शब्दः श्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च । वाय्वात्मकं स्पर्शः स्पर्शनञ्च रौक्ष्यं प्रेरणं धातुव्यूहनं चेष्टाश्च शारीर्य्यः । अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यञ्च । अबात्मकं रसो रसनं शैत्यं मार्द्दवं स्नेहः क्लेदश्च । पृथिव्यात्मको गन्धः घ्राणं गौरवं स्थैर्य्यं मूर्त्तिश्च ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये । शिवादयः महाप्राणिन. । यथा, महाभारते । १ । ११८ । ४८ ।

"रममाणो महाभूतैः सिद्धैश्च परमर्षिभिः ।")

महाभृङ्गः, पुं, (महांश्चासौ भृङ्गश्चेति ।) नीलभृङ्गराजः । इति राजनिर्घण्टः ॥

महाभैरवः, पुं, (महान् भैरवः ।) शरभरूपी हरः । यथा,—

"योऽसौ महाभैरवाख्यः सकायः शारभो हरः ।

भैरवः एषणैवायं गणाध्यक्षो हरात्मजः ॥"

इति कालिकापुराणे ४६ अध्यायः ॥

(क्ली, विद्याविशेषः । तथा च प्रबोधचन्द्रोदये । ३ । २४ । "तन्महाभैरवीं विद्यां धर्म्मश्रद्धयोराहरणाय प्रस्थापयामः ॥")

महाभोगा, स्त्री, (महान् आभोगः परिपूर्णतास्याः । यद्वा, महान् भोगः सुखरूपमस्याः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्यायः ।

"महार्थसाधनी देवी महाभोगा ततः स्मृता ॥"

(महानाभोगो विशालतास्य । महाविशालताविशिष्टे, त्रि । यथा, कथासरित्सागरे ।१७।१०६।

"ततस्तत्र महाभोगं सच्छायस्कन्धसुन्दरम् ।

शुद्धचक्रो ददर्शाग्रावेकं न्यग्रोधपादपम् ॥")

महामक्कुः, पुं, (महान् मक्कुः ।) पीतमक्कुः । इति राजनिर्घण्टः । सोनावेङ् इति भाषा ॥

महामतिः, त्रि, (महती मतिर्यस्य ।) अतिबुद्धिमान् । यथा,—

"किमेतन्नाभिजानामि जानन्नपि महामते ।।

यत् प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

महामदः,पुं,(महान् मदोयस्य ।) मत्तहस्ती । इति शब्दरत्नावली ॥ (महान् मदः ।) अतिशयहर्षः । अतिशयमत्तता च । तद्युक्ते, त्रि ॥

महामनाः, [स्] त्रि, (महत् प्रशस्तं मनो यस्य ।) महाशयः । यथा,—

"महेच्छे तु स्थूललक्ष्यः उदारोदात्तोदीर्णमहाशयाः ।

महामना महात्मा च-

इति हेमचन्द्रः । ३ ।३१ ॥

(यथा, ऋग्वेदे । १० । १०३ । ८ ।

"इन्द्रस्य वृष्णो वरुणस्य राज्ञ

आदित्यानां शर्ध उग्रम् ।

महामनसां भुवनच्यवानां

घोषो देवानां जयतामुदस्थात् ॥"

"महामनसां उदारमनसाम् ।" इति तद्भाष्ये सायनः ॥ महाशालपुत्रः । यथा, हरिवंशे । ३१ । ३० ।

"महामना नाम सुतो महाशालस्य धार्म्मिकः ॥")

महामहावारुणी, स्त्री, (महती चासौ महावारुणी चेति ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रशुभयोगयुक्तचैत्रकृष्णत्रयोदशीरूपः । यथा,—

"शुभयोगसमायुक्ता शनौ शतभिषा यदि ।

महामहेति विख्याता त्रिकोटिकुलसुद्धरेत् ॥"

इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

महामांसं, क्ली, (महत् गर्हितं मांसम् । अत्र मांसशब्दस्य पूर्व्वप्रयुक्ततया महच्छब्दस्य गर्हितार्थत्वम् ।

"शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे ।

यात्रायां पथि निद्रायां महच्छब्दो न दीयते॥"

इति स्मरणात् ।)

नरादिपिशितम् । यथा,—

"अस्थ्यां रुधिरैर्म्मांसैर्महामांसैः सुगन्धिभिः ।

पूजयेद्बहुजातीयैर्व्बलिभिर्भोजनैः शिवाम् ॥"

इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥

अन्यच्च ।

"गोनरैभाश्वमहिषवराहोष्ट्रोरगोद्भवम् ।

महामांसाष्टकं देवि । देवताप्रीतिकारकम् ॥"

इति कौलावलीदीपिका ॥

महामात्रः, पुं, (महती मात्रा मर्य्यादापरिमाणं यस्य ।) प्रधानः । इत्यमरः । ३ । ८ । ५ ॥ सेनापत्यादिषु महती मात्रा धनं परिच्छदो वा येषां ते तथा । इति तट्टीकायां भरतः ॥ (यथा, रामायणे । २ । ३६ । १८ ।

"तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ।

शुचिर्व्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥"

सम्बुद्धः । (यथा, महाभारते । २ । ३१ । ६०

"राज्ञे भोजकटस्थाय महामात्राय धीमते ॥")

अमात्यः । (यथा, कामन्दकीये । ८ । ६६ ।

"दूषिते हि महामात्रे रिपुस्थोऽपि धीमता ।

स्वपक्षे यस्य विश्वास इत्यंभूतस्य निष्क्रियः ॥")

हस्तिपकाधिपः । इति मेदिनी । रे, १६० ।

(यथा च कथासरित्सागरे । १३ । १० ।

"इत्यञ्च महामात्रो द्विरदेङ्गितवित्तदा ।

मदेन यौवनं नेयो नैतच्चेतयते यथा ॥"

महादेवः । यथा, महाभारते । १३।१७।७५ ।

"महारूपो महामात्रो महानेत्रो निशालयः ॥")

महामात्री, स्त्री, (महामात्र । ङीष् ।) आचार्य्यपत्नी । इति जटाधरः ॥ महामात्रपत्नी च ॥

महामानसी, स्त्री, (महत् मानसं भक्तान् प्रति सदयं चेतो॰ यस्याः ।) जिनानां विद्यादेवीभेदः । इति हेमचन्द्रः । २ । १५४ ॥

महामाया, स्त्री, (अघटनघटनापटीयस्त्वेन विसदृशप्रतीतिसाधनं माया । महती चासौ माया चेति । यद्वा, महती माया विश्वनिर्म्माणशक्तिर्यस्याः सा ।) दुर्गा । इति शब्दरत्नावली ॥ तस्याः स्वरूपं यथा,—

"गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं सूतिमारुतैः ।

उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम् ॥

पूर्व्वातिपूर्व्वसंस्कारसंस्कारेण नियोज्य च ।

आहारादौ ततो मोहं ममत्वं ज्ञानसंशयम् ॥

क्रोधोपरोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः ।

पश्चात् कामे नियोज्याशु चिन्तायुक्तमहर्निशम् ॥

आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या ।

महामायेति सा प्रोक्ता तेन सा जगदीश्वरी ॥"

इति कालिकापुराणे ६ अध्यायः ॥

(यथा च देवीभागवते । १ । ८ । ४० ।

"नमो देवि । महामाये ! सृष्टिसंहारकारिणि ! ॥"

गङ्गादेवी । यथा, काशीखण्डे । २८ । १३६ ।

"महाविद्या महामाया महामेधा महौषधम् ॥"

महती माया च ॥ (यथा, मार्कण्डेये ।८१।४१।

"महामाया हरेश्चैतत् तया संमोह्यते जगत् ॥")

महामायी, स्त्री, (महती मायास्याः । स्त्रियां ङीष् ।) दुर्गा । इति शब्दरत्नावली ॥

महामारी, स्त्री, (महतः दुर्द्दान्तान् दानवादीन् मारयति इति । मृ + णिच् + अण् । ङीष् ।) महाकाली । यथा,—

"व्याप्तं तयैतत् सकलं ब्रह्माण्डं मनुजेश्वर ।

महाकाल्या महाकाले महामारीस्वरूपया ॥

सैव काले महामारी सैव सृष्टिर्भवत्यजा ।

स्थितिं करोति भूतानां सैव काले सनातनी ॥"

इति मार्कण्डेयपुराणम् ॥

(म्रियन्ते प्राणिनो यस्या इति । मृङ्+घञ् । ङीष् । महती मारी ।) अतिशयमरकश्च ॥

महामाषः, पुं, (महांश्चासौ माषश्चेति ।) राजमाषः । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते सूत्रस्थाने २१ अध्याये । "माषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायससंस्तुविकारानूपौदकमांसवसाविसमृणालकशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ॥" तथास्य पर्य्यायो गुणाश्च ।
"राजमाषो महामाषश्चपलश्चवनः स्मृतः ।
श्वेतो रक्तस्तथा कृष्णस्त्रिविधः स प्रकीर्त्तितः ॥
यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महामुखः, पुं, (महत् मुखमस्य ।) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१६ ॥ (महत् मुखम् ।) वृहन्मुखे, क्ली । (यथा, वृहत्संहितायाम् । ६७ । ५४ ।
"वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समञ्च भूपानाम् ।
विपरीतं क्लेशभुजां महामुखं दुर्भगानाञ्च ॥"
महत् मुखं यस्य ।) तद्वति, त्रि ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८७ ।
"महादन्तो महादंष्ट्रो महाजिह्वः महामुख ॥"
सिन्धुराजस्य सैनिकभेदः । यथा, महाभारते । ३ । २७० । १६ ।
"नकुलन्त्वभिसन्धाय क्षेमङ्करमहामुखौ ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ॥")

महामुनिः, पुं, (महांश्चासौ मुनिश्चेति ।) अगस्त्यः । बुद्धः । इति शब्दरत्नावली ॥ कृपाचार्य्यः । कालः । इत्यजयपालः ॥ व्यासः । (श्रीनारायणः ।) यथा, श्रीभागवते ।१।१।२।
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किंवापरैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥
(महामुनिः श्रीनारायणः । इति तट्टीकायां श्रीधरः ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

महामुनि, क्ली, (महान् मुनिरिवेति । सर्व्वोपकारित्वात्तथात्वम् । अभिधानात् क्लीवत्वम् ।) औषधम् । इति शब्दरत्नावली ॥ धन्याकम् । इति जटाधरः ॥

महामूर्द्धा, [न्] पुं, (महान् मूर्द्धा यस्य । व्यापकत्वात् तथात्वम् ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ वृहन्मस्तकयुक्ते, त्रि ॥

महामूलः, पुं, (महत् स्थूलं मूलं यस्य ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥ (क्षिलिहिण्टः ॥ यथास्य पर्य्यायः ।
"क्षिलिहिण्टो महामूलः पातालगरुडाह्वय ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महामूल्यं, क्ली, महार्घम् । बहुमूल्यम् । महच्च तन्मूल्यं चेति कर्म्मधारयसमासनिष्पन्नम् । (महत् मूल्यं यस्य ।) तद्युक्ते, त्रि ॥

महामूषिकः, पुं, (महान् मूषिकः ।) वृहदुन्दुरुः । तत्पर्य्यायः । मूषी २ विघ्नेशवाहनः ३ महाखुः ४ शस्यमारी ५ भूफलः ६ भित्तिपातनः ७ । इति राजनिर्घण्टः ॥

महामृगः, पुं, (महान् मृगः पशुः ।) हस्ती । इति हेमचन्द्रः ।४।२८३॥ शरभः । इति राजनिर्घण्टः ॥

महामृत्युञ्जयः, पुं, (महामृत्युं यमं जयतीति । जि+खच् मुम् च ।) शिवस्य मन्त्रविशेषः । यथा,—

देव्युवाच ।
"यदि मे महती प्रीतिस्तवास्ति कुलभैरव ! ।
कथयस्व विशेषेण महामृत्युञ्जयाभिधम् ॥
भैरव उवाच ।
शृणु देवि । प्रवक्ष्यामि महामृत्युञ्जयाभिधम् ।
आयुर्वृद्धिकरं पुंसां मृत्योर्मृत्युकरं परम् ॥
यस्य विज्ञानमात्रेण चिरजीवी निरामयः ।
नित्यमष्टशतं जप्त्वा मृत्युं मृत्युपथं नयेत् ॥"
इति मृत्युञ्जयतन्त्रम् ॥

महामेघः, पुं, (महान् मेघ इव ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् मेघः ।) अतिशयमेघश्च ॥ (यथा, महाभारते । १२ । ११७ । ४ ।
"महामेघनिभं दृष्ट्वा स भीतो ह्यभवत् गजः ॥"
क्षत्त्रियराजविशेषः । यथा, महाभारते । ७ । ४७ । १५ ।
"शत्रुञ्जयं चन्द्रकेतुं महामेघं सुवर्च्चसम् ।
सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम् ॥")

महामेदः, पुं, (मेदयति स्निग्धीकरोतीति । मिद्+णिच्+अच् । महान् मेदः ।) अष्टवर्गे प्रसिद्धौषधविशेषः । तत्पर्य्यायः । पुरोद्भवः २ । इति रत्नमाला ॥ वृहन्मेदश्च ॥

महामेदा, स्त्री, (मेदयतीति । मिद्+णिच्+अच् । टाप् । महती मेदा ।) अष्टवर्गे प्रसिद्धौषधविशेषः ॥ तत्पर्य्यायः । वसुच्छिद्रा २ जीवनी ३ पांशुरागिणी ४ देवेष्टा ५ सुरामेदा ६ दिव्या ७ देवमणिः ८ देवगन्धा ९ महाच्छिद्रा १० दृष्टाङ्गा ११ । अस्याः गुणाः । हिमत्वम् । वृष्यत्वम् । कफशुक्रवृद्धिकारित्वम् । दाहास्रपित्तक्षयवातज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अथ मेदमहामेदयोरुत्पत्तिलक्षणनामगुणाः ।
"महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते ।
महामेदा वनौमेदा स्यादित्युक्तं मुनीश्वरैः ॥
शुक्लार्द्रकनिभः कन्दो लताजातः स पाण्डुरः ।
महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते ॥
शुक्लकन्दो नखच्छेद्यो मेदो धातुरिव स्रवेत् ।
यः स मेदेति विज्ञेया जिज्ञासातत्परैर्जनैः ॥
स्वल्पपर्णी मणिच्छिद्रा मेदा मेदोभवाध्वरा ।
महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः ॥
मेदायुग्मं गुरु स्वादु वृष्यं स्तन्यकफापहम् ।
वृंहणं शीतलं पित्तरक्तवातज्वरप्रणुत् ॥"
इति भावप्रकाशः ॥

महामैत्रः, पुं, (मित्रस्य भावः । मित्र+अण् । मैत्रम् । महद्भिः सह महद्वा हृदि मैत्रमस्येति ।) बुद्धभेदः । इति हेमचन्द्रः ।२।१४६।

महामोहः, पुं, (मोहः भ्रान्तिज्ञानम् । अतथाभूतवस्तुनि तथात्वज्ञानमित्यर्थः । महान् मोहः ।) भोगेच्छारूपाज्ञानम् । इति केचित् ॥ संसारमूलकारणरागरूपमोहः । (महान् मोहो यस्मादिति च ।) महामोहजनककामराजबीजम् । इति चण्डीप्रथममाहात्म्यटीकायां नागोजीभट्टः ॥ अपि च ।
"ससर्ज्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् ।
महामोहञ्च मोहञ्च तमश्चाज्ञानवृत्तयः ॥"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥
अग्र इति ब्रह्मा स्रष्टौ प्रथममविद्यावृत्तीः ससर्ज्ज तत्र तमो नाम स्वरूपाप्रकाशः । मोहो देहाद्यहंबुद्धिः । महामोहो भोगेच्छा । तामिस्रः तत्प्रतिघाते क्रोधः । अन्धतामिस्रः तन्नाशे अहमेव मृतोऽस्मीति बुद्धिः । तदेवोक्तं वैष्णवे ।
"तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः ।
महामोहश्च विज्ञेयो ग्राम्यभोगसुखैषणा ॥
मरणं ह्यन्धतामिस्रं तामिस्रं क्रोध उच्यते ।
अविद्या पञ्चपर्व्वा या प्रादुर्भूता महात्मनः ॥"
इति तट्टीकायां श्रीधरस्वामी ॥

महाम्लं, क्ली, (महत् अम्लं अम्लरसयुक्तम् । यद्वा, महान् अम्लः अम्लरसो यस्मिन् ।) तिन्तिडीकम् । इति जटाधरः ॥ (अत्यम्लरसविशिष्टे, त्रि ॥)

महायक्षः, पुं, (यक्षयते पूजयति इति । यक्ष+अच् । महान् यक्षः ।) अर्हदुपासकविशेषः । इति हेमचन्द्रः । १ । ४१ ॥

महायज्ञः, पुं, (महान् यज्ञः ।) वेदपाठादिरूपपञ्चप्रकारयज्ञः । यथा,—
"पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः ॥"
इत्यमरः । २ । ७ ।१४ ॥
अपि च ।
"दिव्यो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च ।
एतैः पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ॥
ब्राह्मणानां हितार्थाय इतरेषाञ्च तन्मुखाः ।
इतरेषान्तु वर्णानां ब्राह्मणैः कारिताः शुभाः ॥
एवं कृत्वा नरो भुक्तास्त्वाहरिन्त्रि ! विशुध्यति ।
अन्यथा भौहयोऽप्येते एकैके नरपातिकाः ॥
मन्तया दारुभोक्तृणां महामांसन्तु तत् स्मृतम् ॥"
इति वराहपुराणम् ॥
(यथा च मनौ । २ । २८ ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥")

महायशस्कः, त्रि, (महत् यशो यस्य । “शेषा-द्विभाषा ।” ५ । ४ । १५४ । इति समासान्त कप्प्रत्ययः ।) अतिशययशोविशिष्टः । इति पाणिनिव्याकरणम् ॥

महायशाः, [स्] पुं, (महत् यशो यस्य विभाषा ग्रहणात् न कप् ।) भूतार्हद्विशेषः । इति हेमचन्द्रः । १ । ५० ॥ (शिवः । यथा, महाभारते । १३ । १७ । ३४ ।
“महारूपो महाकायो वृषरूपो महायशाः ॥”
स्त्री, स्कन्दमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । २८ ।
“पशुदा वित्तदा चैव सुखदा च महायशाः ॥”)
अतिशययशोयुक्ते, त्रि ॥ (यथा, महाभारते । ३ । ४२ । ४१ ।
“एवं स संक्रमंस्तत्र स्वर्गलोके महायशाः ।
ततो ददर्श शक्रस्य पुरीन्तामभरावतीम् ॥”)

महारजतं, क्ली, (महच्च तद्रजतञ्चेति ।) सुवर्णम् । (यथा, मार्कण्डेये । ६० । ४ ।
“महारजतसङ्काशा जायन्ते तत्र मानवाः ॥”)
धुस्तूरः । इत्यमरः ।२।६।६५॥ इहद्दीपश्च ॥

महारजनं, क्ली, (रज्यतेऽनेनेति । रञ्ज+करणे ल्युट् । ततः । “अनिदितामिति ।” ६।४।२४ । इत्यत्र “रजकरजनरजःसूपसंख्यानं कर्त्तव्यम् ।” इति काशिकोक्त्या नलोपः । महच्च तद्रजनञ्चेति कर्म्मधारयः ।) कुसुम्भपुष्पम् । इत्यमरः । २ । ६ । १०६ ॥ स्वर्णम् । इति मेदिनी । ने, २४४ ॥

महारण्यं, क्ली, (महत् अरण्यम् ।) इहद्वनम् । (यथा, रामायणे । ३ । १ । १ ।
“प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ।
रामो ददर्श दुर्द्धर्षस्तापसाश्रममण्डलम् ॥”)
तत्पर्य्यायः । अरण्यानी २ । इत्यमरः ।२।४।१॥
कान्तारः ३ । इति जटाधरः ॥

महारथः, पुं, (रमन्ते लोका यस्मिन्निति । रम+ “हनिकुषिनीरमिकाशिभ्यःक्थन् ।” उणा० २ । २ । इति क्थन् । महांश्चासौ रथश्चेति ।) शिवः । इति महाभारते तस्य सहस्रनाम-स्तोत्रम् ।१३।१७।१२१ ॥ (महान् रथोऽस्य ।) अयुतधन्विभिः सहास्त्रशस्त्रनिपुणयोद्धा । यथा,
“एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् ।
अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः ॥”
इति भगवद्गीताटीकायां श्रीधरस्वामी ॥
(महान् रथः ।) इहद्रथश्च । (यथा, महाभारते । १ । ४२ । १७ ।
“नातप्ततपसा साध्य एष दिव्यो महारथः ॥”
राजविशेषः । यथा, मार्कण्डेये ।११८।२६ ।
“महारथस्य वाशिष्ठः पुरोधाभून्महीभृतः ॥”)

महारम्भं, क्ली, (महान् आरम्भो प्रस्तुतकरणे यतो यस्य ।) गडलवणम् । इति राजनिर्घण्टः ॥ (महारम्भविशिष्टे, त्रि । यथा, कामन्दकीये । ४ । ५४ ।
“स्वाजीवो भूगुणैर्युक्तः सारूपः पर्व्वताश्रयः ।
शूद्रकारुवणिक्प्रायो महारम्भकृषीवलः ॥”)

महारसं, क्ली, (महान् अधिको रसोऽस्य । रुचि-प्रदत्वात् तथात्वम् ।) काञ्जिकम् । इति जटाधरः ॥ (गुणादयोऽस्य काञ्जिकशब्दे द्रष्टव्याः । महारसविशिष्टे, त्रि । यथा, महाभारते । ३ । १११ । १४ ।
“तान्युष्यभक्षस्य महारसानि
भृशं सुरूपाणि रुचिं दधुर्हि ॥”)

महारसः, पु, (महानतिमिष्टो रसोऽस्य ।) खर्ज्जूरः । कोषकारः । कशेरु । इति मेदिनी । से, ५६ ॥ इक्षुः । इति जटाधरः ॥ (अस्यपर्य्यायो यथा,—
“महारसोऽसिपत्रः स्यान्मत्युपुष्पो मधुतृणः ।
इक्षुर्वंशककान्तारभीरुपौण्ड्रादिभेदवान् ॥”
इति वैद्यकरत्नमालायाम् ॥
(महान् रसः धातुद्रवः ।) पारदः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।
“पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यश्च रसः सूतः शिवाह्वयः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महारसाष्टकं, क्ली, (महारसानां अष्टकम् ।) अष्टधातुविशेषाः । यथा,—
“दरदः पारदः सस्यो वैक्रान्तं कान्तमभ्रकम् ।
माक्षिकं विमलञ्चेति स्युरेतेऽष्टौ महारसाः ॥”
इति राजनिर्घण्टः ॥

महाराजः, पुं, (महांश्चासौ राजा प्रभाव-विशेषवानिति ।) पूर्व्वजिनविशेषः । (महत्या दीप्त्या राजतेऽङ्गुलिषु शोभत इति । राज्+अच् ।) नखः । इति हेमचन्द्रः ।३।२५८। (महान् राजा । सर्व्वत्र “राजाहःसखिभ्यष्टच् ।५।४।९१। इति समासान्तष्टच् ।) श्रेष्ठराजः । यथा,—
“अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज । बद्धोऽस्म्यर्थेन कौरवैः ॥”
इति महाभारते उद्योगपर्व्व ॥

महाराजकः, पुं, (राजते इति । राज+वुन् । महांश्चासौ राजकश्चेति ।) महाराजिकगणः । इत्यमरटीकायां रामाश्रमः ॥

महाराजचूतः, पु, (महता मिष्टादिगुणेन राजते आद्रियते । इत्यच् ततः कर्म्मधारयः ।) उत्तमाम्रः । तत्पर्य्यायः । महाराजाम्रकः२ स्थूलाम्रः ३ मन्मथानन्दः ४ कन्दः ५ नीलकपित्थकः ६ कामायुधः ७ कामफलः ८ राजपुत्रः ९ नृपाम्रजः १० महाराजफलः ११ कामः १२ महाचूतः १३ । कोमलस्य तस्य गुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदाहृत्वञ्च । सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबल-प्रदत्वञ्च । इति राजनिर्घण्टः ॥

महाराजद्रुमः, पु, (महाराजोऽतिश्रेष्ठो द्रुमः ।) आरग्वधः । इति राजनिर्घण्टः ॥ (गुणादि-विशेषोऽस्यारग्वधशब्दे ज्ञातव्यः ॥)

महाराजिकः, पु, (महती राजिः पङ्क्तिरस्य “शेषाद्विभाषा ।” ५ । ४ । १५४ । इति कप् । गणदेवताविशेषः । स तु विंशत्यधिकशतद्वय-संख्यकः । इत्यमरभरतौ । १ । १ । १० ॥

महाराजोपचारः, पुं, (महाराजानां उपचारः । महाराजानामुपचारो वा ।) राजार्हपूजोप-करणम् । तद्यथा,—
“ततश्च चामरच्छत्रपादुकादीन् परानपि ।
महाराजोपचारांश्च दत्त्वादर्शं प्रदर्शयेत् ॥”
विष्णुधर्म्मोत्तरे ।
“यथादेशं यथाकालं राजलिङ्गं सुरालये ।
दत्त्वा भवति राजैव नात्र कार्य्या विचारणा ॥”
तत्र चामरमाहात्म्यं विष्णुधर्म्मोत्तरे ।
‘तथा चामरदानेन श्रीमान् भवति भूतले ।
मुच्यते च तथा पापैः स्वर्गलोकञ्च गच्छति ॥’
छत्रस्य तत्रैव ।
‘छत्रं बहुशलाकञ्च भास्वरीवस्त्रसंयुतम् ।
दिव्यवस्त्रेण संयुक्तं हेमदण्डसमन्वितम् ॥
यः प्रयच्छति लघ्वस्य छत्रच्छायानैर्वृतः ।
प्रार्थ्यते सोऽमरैः सर्व्वैः क्रीडते पितृभिः सह ॥’
तत्रैवान्यत्र ।
‘राजा भवति लोकेऽस्मिन् छत्रं दत्त्वा द्विजो
त्तमाः ।
नाप्नोति रिक्तं दुःखं संग्रामे निर्जनश्येत् ॥’
‘उपानत्संप्रदानेन विमानमधिरोहति ।
यथेष्टं तेन लोकेषु विचरत्यमरप्रभः ॥’
ध्वजस्य तत्रैव ।
‘लोकेषु ध्वजभूतः स्याद्दत्त्वा विष्णोर्वरं ध्वजम् ।
शक्रलोकमवाप्नोति बहुनब्दगणान्नरः ॥’
किञ्च ।
‘युक्तं पीतपताकाभिर्निवेद्य गरुडध्वजम् ।
केशवाय द्विजश्रेष्ठाः शक्रलोके महीयते ॥
यत्प्रासादे ध्वजारोपमाहात्म्यं लिखितं पुरा ।
तदत्राप्यखिलं ज्ञेयं तत्रात्रत्यमिदन्तथा ॥’
किञ्च । भविष्ये ।
‘विष्णोर्ध्वजे तु सौवर्णदण्डं कुर्य्याद्विचक्षणः ।
पताका चापि पीता स्यात् गरुडस्य समीपगा ॥’
व्यजनस्य । विष्णुधर्म्मोत्तरे ।
‘तालवृन्तप्रदानेन निर्वृतिं प्राप्नुयात् पराम् ॥’
वितानस्य तत्रैव ।
‘वितानकप्रदानेन सर्व्वपापैः प्रमुच्यते ।
परां निर्वृतिमाप्नोति यत्र यत्राभिजायते ॥’
खड्गादीनाम् ।
‘दत्त्वा निस्त्रिंशकान् मुख्यान् शत्रुभिर्नाभि
भूयते ।
दत्त्वा तद्बन्धनं मुख्यमग्राधेयफलं लभेत् ॥’
किञ्च ।
‘पतद्ग्रहं तथा दत्त्वा शुभगत्वभिजायते ।
पादपीठप्रदानेन स्थानं सर्व्वत्र विन्दति ॥’
‘दर्पणस्य प्रदानेन रूपवान् दर्पवान् भवेत्
मार्ज्जयित्वा तथा तच्च सुभगत्वभिजायते ॥
यत्किञ्चिद्देवदेवाय दद्याद्भक्तिसमन्वितः ।
तदेवाक्षयमाप्नोति स्वर्गलोकं स गच्छति ॥’
किञ्च । वामनपुराणे श्रीबलिं प्रति प्रह्लादोक्तौ ।
‘श्रद्धानैर्भक्तिपरैर्यान्युद्दिश्य जनार्दनम् ।
बलिदानानि दीयन्ते अक्षयाणि विदुर्बुधाः ॥

अत्रापि केचिदिच्छन्ति दत्त्वा पुष्पाञ्जलित्रयम् ।
पूर्व्वोक्ता दश शक्त्याद्या मुदाः सन्तर्पयेदिति ॥”
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

महारात्रिः, स्त्री, (महत्यां प्रलयावस्थायां राति आत्मस्वरूपं ददाति सुषुप्त्या सर्व्वान् जीवान् आत्मरूपेणावस्थापयति जायते पञ्चपर्व्वलक्षणाया अविद्याया सकाशात् रचतीति । रा + क ।) ब्रह्मलयोपलक्षिता महाप्रलयरात्रिः । इति चण्डीटीकायां नागोजीभट्टः ॥ महत ईश्वरस्य रात्रिः । ब्रह्ममरणोपलक्षिता रात्रिरित्यर्थः । इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥ अपि च ।
“ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप ! ।
प्रकीर्त्तिता महारात्रिः सा एव च पुरातनैः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः ॥
(दुर्गा । यथा च मार्कण्डेये । ८१ । २० ।
“महारात्रि ! महाविद्ये ! नारायणि ! नमोऽस्तु ते ॥”)
अर्द्धरात्रात् परं मुहूर्त्तद्वयम् । यथा,—
“अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमुच्यते ।
सा महारात्रिरुद्दिष्टा तद्दत्तमक्षयं भवेत् ॥”
इति तन्त्रम् ॥
आश्विनशुक्लाष्टमी । नवरात्रम् । यथा,—
“शुक्लाष्टमी चाश्विनस्य नवरात्रं तु तस्य वै ।
महारात्रिर्महेशानि ! कालरात्रिं घृणु प्रिये ! ॥”
इति शक्तिसङ्गमतन्त्रम् ॥

महाराष्ट्रः, पुं, (महान् भूयान् प्रशस्तो वा राष्ट्रः । महत् राष्ट्रं यत्रेति वा ।) देशविशेषः । मारहाट्टा इति भाषा ॥ यथा,—
“नैर्ऋते द्रविडानर्त्तमहाराष्ट्राश्च रैवतः ।
जवनः पह्लवः सिन्धुः पारसीकादयो मताः ॥”
इति ज्योतिषतत्त्वे कूर्म्मचक्रम् ॥

महाराष्ट्री, स्त्री, (महाराष्ट्रस्तद्देश उत्पत्तिस्थानत्वेनास्त्यस्या इत्यच् । गौरादित्वात् ङीष् ।) जलपिप्पली । इति राजनिर्घण्टः ॥ शाकभेदः । माराटी इति भाषा । अस्या गुणाः । कफवायुनाशित्वम् । इति राजवल्लभः ॥ (विषयोऽस्या यथा,—
‘जयन्ती सुषिरी वासा हस्ती च गुडूचिका ।
महाराष्ट्री जम्बुरसैस्तथा नीलोत्पलद्रवैः ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे मूलाधिकारे पञ्चामृतरसे ॥ महाराष्ट्राणामियमिति । महाराष्ट्र । अण् ङीप् ।) अष्टादशभाषान्तर्गतभाषाविशेषः । यथा, साहित्यदर्पणे ६ परिच्छेदे ।
‘आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ॥”

महारिष्टः पुं, (महान् अरिष्टः ।) महानिम्बविशेषः । तत्पर्य्यायः । कैटर्य्यः २ रामणः ३ रमणः ४ गिरिनिम्बः ५ शुक्रसालः ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । शीतलत्वम् । लघुत्वम् । वन्तापशोषकुष्ठास्रक्रिमिभूतविषापहत्वञ्च । इति राजनिर्घण्टः ॥

महारुद्रः, पुं, (रुद्राणां महान् स्वयं ईश्वर इत्यर्थः इति महारुद्रः ।) महादेवः । यथा,—
“महाकाल्या महाकालश्चैककाकाररूपतः ।
माययाच्छादितात्मा च तन्मध्ये समभागतः ॥
महारुद्रः स एवात्मा महाविष्णुः स एव हि ॥”
इति निर्व्वाणतन्त्रम् ॥

महारूपः, पुं, (महत् महत्तत्त्वादिरूपमस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । ३४ ॥ (महद्रूपं यस्य ।) अतिशयरूपयुक्ते, त्रि ॥

महारूपकं, क्ली, (महत् रूपकं यत्र ।) नाटकम् । इति त्रिकाण्डशेषः ॥

महारोगः, पुं, (महान् घोरानिष्टकारकः रोगः । यद्वा, महा जन्मान्तरीणभुक्तावशिष्टातिशयपातकेन जनितः रोगः ।) पापरोगः । स चाष्टविधो यथा । उन्मादः १ त्वग्दोषः २ राजयक्ष्मा ३ श्वासः ४ मधुमेहः ५ भगन्दरः ६ उदरः ७ अश्मरी ८ । इति शुद्धितत्त्वे नारदः ॥ (यथा च आश्वलायने । २ । ७ । १७ ।
“महारोगेण वाभितप्तः प्राश्नीयादन्यतरां गतिं गच्छति ॥”
“महारोगेण क्षयकुष्ठादिनेति” तद्वृत्तौ गार्ग्यनारायणः ॥ विषयोऽस्य यथा,—
“महारोगाष्टके कासे ज्वरे श्वासातिसारके ॥”
अस्य व्याख्यायां यथा,—
“वातव्याध्यश्मरीकुष्ठमेदोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्मणि रत्नगर्भपोट्टलीटीका ॥)

महारोगी, [न्] पुं, (महा रोगः क्षयादिरस्यास्तीति । महारोग + इनिः । महारोगयुक्तः । यथा,—
“क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्म्मरणान्तमशौचकम् ॥”
इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम् ॥

महारोमा, [न्] पुं, (महान्ति रोमाणि वृक्षादिरूपाणि विराट्रूपे यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । ८८ ॥ (महान्ति रोमाण्यस्य ।) बृहद्रोमयुक्ते, त्रि ॥ (कृतिरातस्य पुत्रविशेषः । यथा, भागवते । ६ । १३ । १७ ।
“मरोः प्रतीपकस्तस्माज्जातः कृतरथो यतः ।
देवमीढस्तस्य पुत्रो विश्रुतोऽथ महाधृतिः ॥
कृतिरातस्ततस्तस्मान्महारोमा च तत्सुतः ॥”)

महारौरवः, पुं, (रुरूणामयं इति । रुरु + अण् । महान् रौरवः । तत्र गता जीवाः क्रव्यान्नामकैः रुरुभिः पीड्यन्ते अत एवास्य तथात्वम् ।) नरकविशेषः । इत्यमरः । १ । ९ । १ ॥ महान् रौद्रो रवोऽत्र महारौरवः मनीषादित्वात् दलोपः । इति भरतः ॥ अपि च ।
“महारौरवसंज्ञन्तु अधोऽर्द्धं ताम्रसंपुटम् ।
धम्यते खदिराङ्गारैर्गुरुदारापनायकः ॥
देवद्रव्यापहारी च पच्यते कालमक्षयम् ॥”
इति वह्निपुराणे पापनाशनदशदानाध्यायः ॥

महार्घं, त्रि, (महान् अधिकः अर्घो मूल्यमस्य ।) महामूल्यम् । इति मेदिनी ॥ घे, १० । (यथा, कथासरित्सागरे । १२ । १४५ ।
“ततस्तस्मै महार्घाणि रत्नानि सुवर्णानि च ।
विभीषणो ददाति स्म मथुरां गन्तुमिच्छते ॥”)

महार्घः, पुं, (महान् अर्घो मूल्यमादरो वास्य ।) लावकपक्षी । इति विश्वः ॥

महार्णवः, पुं, (महान् सुविशालः अर्णवः ।) महासमुद्रः । यथा,—
“आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥”
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
(महान् अर्णव इव । प्रसादादिगुणबाहुल्यात् तथात्वम् ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (कूर्म्मरूपिभगवन्नारायणस्य दक्षपदोद्भवः जनपदः । यथा, मार्कण्डेये । ५८ । ३२ ।
“सौराष्ट्रा दरदाश्चैव द्राविडाश्च महार्णवाः ।
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ॥”)

महार्द्रः, पुं, (महान् विपुलोऽर्द्रोऽस्य ।) वृक्षविशेषः । इति शब्दचन्द्रिका । महाजा इति भाषा ॥

महार्द्रकं, क्ली, (महत् आर्द्रकम् ।) वनार्द्रकम् । अस्य गुणाः । अग्निदीपनत्वम् । धारकत्वम् । रूचत्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥

महार्बुदं क्ली, (महत् अर्बुदम् ।) दशार्बुदम् । शतकोटिसंख्या । इति ज्योतिषम् ॥

महार्हं, क्ली, (महान् अर्हः मूल्यं मर्य्यादा वास्य ।) श्वेतचन्दनम् । इति राजनिर्घण्टः ॥ (महामूल्यवति, त्रि । यथा, महाभारते ।१।२१०।२६।
“महार्हाभरणोपेतौ विरजोऽम्बरधारिणौ ॥”)
महापूजायोग्यम् । यथा, रामायणे ।२।६६।१०।
“यस्माद्भागार्थिनो भागान् नाकल्पयत मे सुराः ।
वराङ्गाणि महार्हाणि धनुषा शातयामि वः ॥”
“महार्हाणि महापूजायोग्यानि ।” इति तट्टीकायां रामानुजः ॥)

महालयः, पुं, (महतां जैनानामालयः । महान् आलय इति वा ।) विहारः । (महतां योगिप्रभृतीनामालयः ।) तीर्थः । (महदादीनां लयो यस्मिन् ।) परमात्मा । इति मेदिनी । ये, १२५ ॥ सौराश्विनीयकृष्णपक्षः । यथा, भविष्ये ।
“येयं दीपान्विता राजन् ! ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये ॥”
महालये कन्यागतापरपक्षे । इति तिथ्यादितत्त्वम् ॥

महालक्ष्मीः, स्त्री, (महती लक्ष्मीः ।) राधा । नारायणशक्तिः । यथा,—
“यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः ।

वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ॥
यद्वामाङ्गा महालक्ष्मीः प्रिया नारायणस्य च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
अथ महालक्ष्मीमन्त्रः ।
"तारो वाग्भवं माया रमाकामः ह्स्रौ-
र्जगत्प्रसूत्यै नमः ॥"
तथा च ।
"वाग्भवं शम्भुवनिता रमा मकरकेतनः ।
तार्त्तीयञ्च जगत्यार्णो वह्निबीजसमुज्ज्वलः ॥
अर्द्धीशाढ्यो भृगुर्ध्येये स्मृतोऽयं द्वादशाक्षरः ।
महालक्ष्म्याः समुद्दिष्टस्ताराद्यः सर्व्वसिद्धिदः ॥"
तस्या ध्यानं यथा, तन्त्रसारे ।
"बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारो-
ज्ज्वलां
रत्नाकल्पविभूषितां कुचनतां शालैः करैर्म्मञ्ज-
रीम् ।
पद्मौ कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां
फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत् परा-
म्बिकाम् ॥"
(अस्या बीजम् । ॐ ऐँ ह्रीँ श्रीँ क्लीँ ह्सौँ
जगत्प्रसूत्यै नमः ।)

महालिकटभी, स्त्री, (महान्तः अलयः । तेषां कटभी आश्रयभूतवृक्षः ।) श्वेतकिणिही-वृक्षः । इति राजनिर्घण्टः ॥

महालिङ्गः, पुं, (महान् पूज्यतमो विपुलो वा लिङ्गोऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (यथा, राजतरङ्गिण्याम् । २ । १६७ ।
"अकरोत् स महाहर्म्यैर्म्महालिङ्गैर्म्महाश्रमैः ।
महात्रिशूलैर्म्महतीं महामाहेश्वरीं महीम् ॥"
महत् दृढलिङ्गमस्य ।) दृढलिङ्गयुक्तश्च ॥

महालीलसरस्वती, स्त्री, (लीलया सरस्वती । महती लीलसरस्वतीति कर्म्मधारयः ।) ताराविशेषः ।
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती ।
ताराष्टरहिता त्र्यर्णा महालीलसरस्वती ॥"
इति तन्त्रसारः ॥

महालोध्रः, पुं, (महान् लोध्रः ।) लोध्रविशेषः । इति रत्नमाला । पाटियालोध इति भाषा ॥

महालोलः, पु, (महदतिशयं लोलं लौल्यमस्य ।) काकः । इति राजनिर्घण्टः ॥ अतिचपले, त्रि ॥

महालोहं, क्ली, (महत् अतिशयगुणवत् लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥

महावनं, क्ली, (महत् विपुलं वनम् ।) दृहद्वनम् । तत्पर्य्यायः । अरण्यानी २ महारण्यम् ३ महाटवी ४ । इति राजनिर्घण्टः ॥ (यथा, रामायणे ।
"निरस्ताः पथि धावन्ति त्रयस्ते यन्महावने ॥")
वृन्दावनस्यचतुरशीतिवनान्तर्गतवनविशेषश्च ॥

महावपः, पुं, (महती वपा यस्य । यद्वा, महान्तं धातुश्रेण्यादिकं वपतीति । वप+अच् ।) महामेदः । इति शब्दचन्द्रिका ॥

महावरा, स्त्री, (व्रियते असौ देवादिभिरिति । वृ+अप् । टाप् । महती वरा ।) दूर्व्वा । इति शब्दरत्नावली ॥

महावराहः, पुं, (महानीश्वरोऽपि सन् वराहः । महांश्चासौ वराहश्चेति वा ।) वराहरूपी भगवान् । यथा,—
"महावराहो गोविन्दः सुषेणः कनकाङ्गदी ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (राजविशेषः ।यथा, कथासरित्सागरे ।५२।६२।
"अस्ति शूरपुरं नाम यथार्थं नगरं भुवि ।
महावराह इत्यासीद्राजा तत्रातिदुर्म्मदः ॥")

महावरोहः, पुं, (महान् अवरोहः शिफानां अधोऽवतरणं यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य प्लक्षशब्दे ज्ञातव्यः ॥)

महावल्ली, स्त्री, (महती चासौ वल्ली चेति ।) माधवीलता । इति शब्दचन्द्रिका ॥ (उत्तमा लता च । यथा, कथासरित्सागरे । ३३ । ८५ ।
"उपायरससंसिक्ता देशकालोपबृंहिता ।
सेयं नीतिमहावल्ली किं नाम न फलेत् फलम् ॥")

महावसः, पुं, (महती वसा वपास्य । इस्वः ।) शिशुमारः । इति हेमचन्द्रः । ४ । ४१६ ॥

महावक्षाः, [स्] पु, (महत् वक्षः विराड्देहेऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । ८६ ॥ (महत् वक्षोऽस्य ।) दृहद्वक्षोयुक्ते, त्रि ॥

महावाक्यं, क्ली, (महत् वाक्यम् ।) योग्यताकाङ्क्षासत्तियुक्तवाक्यसमूहः । इति साहित्यदर्पणः । २ । २ ॥ न्यायमते तु । स्वघटकानेकनामलभ्यतात्पर्य्यार्थकम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थबोधं प्रत्यययोग्यवाक्यं वा । इति शब्दशक्तिप्रकाशिका ॥ (महत् महदर्थप्रकाशकं वाक्यम् ।) तत्त्वमसीति आदिवाक्यम् । प्रतिष्ठादावुत्सर्गवाक्यञ्च ॥

महावारुणी, स्त्री, (वरुणो देवतास्याः । वरुण +अण् । ङीप् । महती वारुणी ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रयुक्तशौणचान्द्रचैत्रकृष्णत्रयोदशीरूपः । यथा,—
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

महाविद्या, स्त्री, (विद्यते ज्ञायते इति । विद्+क्यप् । टाप् । महती विद्या ज्ञानं तत्त्वसाक्षात्कारो वा यस्याः ।) देवीविशेषः । सा दशधा । यथा चामुण्डातन्त्रे ।
"काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चामित्रादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि । दुःखसाध्यं कथञ्चन ॥"
मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फलैः सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः ।
अथ चैता महाविद्याः कलिदोषान्न वाधिताः ॥"
इति तन्त्रसारः ॥ * ॥
तासां दशावतारत्वं यथा,—
"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः ।
एव प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश ॥
कृष्णरूपा कालिका स्यात् रामरूपा च
तारिणी ।
वगला कूर्म्ममूर्त्तिः स्यान्मीनो धूमावती भवेत् ॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी ।
सुन्दरी यामदग्न्यः स्याद्वामनो भुवनेश्वरी ॥
कमला बौद्धरूपा स्यात् दुर्गा स्यात् कल्कि-
रूपिणी ।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्व्रजे ॥"
इति मुण्डमालातन्त्रम् ॥
(गङ्गा । यथा, काशीखण्डे । २९ । १३९ ।
"महाविद्या महामाया महामेधा महौ-
षधम् ॥")

महाविराट्, [ज्] पु, (विशेषेण राजते प्रकाशते । इति । वि+राज्+क्विप् । महांश्चासौ विराट् चेति ।) महाविष्णुः । यथा,—
सुनिरुवाच ।
"विश्वानां गोलोकं राजन् ! विस्तृतञ्च नभः-
समम् ।
शश्वन्नित्यं डिम्बरूपं श्रीकृष्णेच्छासमुद्भवम् ॥
जलेन परिपूर्णञ्च कृष्णस्य सुखबिन्दुना ।
स्वष्ट्रात्मुखस्यादिसर्गे परिश्रान्तस्य क्रीडतः ॥
प्रकृत्या सह युक्तेन कलया निजया नृप ! ।
तत्राधारो महाविष्णोर्विश्वाधारस्य विस्तृतः ॥
प्रकृतीगर्भसंभूतडिम्बोद्भूतस्य भूमिप ! ।
सुविस्तृतं जलाधारं शयानश्च महान् विराट् ॥
राधेश्वरस्य कृष्णस्य षोडशांशः प्रकीर्त्तितः ।
दूर्व्वादलश्यामरूपः सस्मितश्च चतुर्भुजः ।
वनमालाधरः श्रीमान् शोभितः पीतवाससा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥

महाविलं, क्ली (महच्च तत् विलञ्चेति ।) आकाशम् । इति जटाधरः ॥ दृहच्छिद्रञ्च ॥

महाविषः, पु, (महत् अत्युत्कटं विषमस्य ।) द्विमुखसर्पः । यथा,—
"महाविषः कालसर्पो राजाहिर्द्विमुखोरगः ।"
इति जटाधरः ॥

(महाविषविशिष्टे, त्रि। यथा, सुश्रुते कल्प-स्थाने ८ अध्याये।
"त्रिविधा वृश्चिका: मन्दमध्यमहाविषा:।"
(महद् विषम्। महाविषि, क्ली। यथा, सुश्रुते कल्पस्थाने २ अध्याये।
"महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशम्।")
महाविषुवं, क्ली, (विषु साम्यमस्त्यत्रेति। विषु+ "वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्।" ५।२।१०९। इत्यस्य वार्त्तिकात् वप्रत्यय:। महच्च तत् विषुवञ्चेति। अस्मिन् समये दिवा-रात्र्यो: समत्वात्तथात्वम्।) मेषसंक्रान्ति:। यथा,—
"महाविषुवमाख्यातं क्रान्तिभिश्चैवचिह्नितम्॥"
इति शब्दरत्नावली॥
तस्मिन् मधुरनिम्बपत्रद्वयभक्षणम्। यथा, कृत्य-चिन्तामणौ।
"मधुरं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ।
अपि रोषान्वितस्तस्य तक्षक: किं करिष्यति॥"
तत्र शक्त्वादिदानं यथा,—
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी॥"
वारिपूर्णघटदानमन्त्रादि यथा,—
"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मक:।
अस्य प्रदानात् सफला मम सन्तु मनोरथा:॥
वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
ददाति सुरराजेन्द्र। स याति परमां गतिम्॥"
महार्णवे।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान्।
पितृनुद्दिश्य विप्रेभ्य: सर्व्वपापै: प्रमुच्यते॥"
तत्र छत्रपादुकादानं यथा,
"विप्रेभ्य: पादुकाच्छत्रं पितृभ्यो विषुवे शुभम्।"
पितृभ्य: पितृनुद्दिश्येत्यर्थ:। इति तिथ्यादि-तत्त्वम्॥
महाविषुवचक्रं, क्ली, (महाविषुवस्य चक्रम्।) नक्षत्रघटितनराकारचक्रम्। यथा,
"न्यसेद्ध सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत्।
त्रितयं हस्तपादेषु महाविषुवभक्रमात्॥
मस्तके भूपते: सौख्यं वदने पटुता स्मृते।
हृदये च धनाध्यक्षोऽर्थप्राप्तिर्दक्षिणे करे॥
वामे करे महद्दु:खं सुखं पादे च दक्षिणे।
भ्रमणं वामपादे च कथितं विषुवत्फलम्॥"
इति ज्योतिषतत्त्वम्॥
महाविष्णु:, पुं, (महांश्चासौ विष्णु: सर्व्वव्यापकश्चेति।) महाविराट्। यथा। 'यस्य जले कोटिकोटि-ब्रह्माण्डानि महाविष्णुरोमकूपगतानि तस्या विरजाया: परिखाभूताया उपरि महावैकुण्ठ-लोक:। तस्योर्द्ध्वभागे गोलोक:। तस्य नाथ: कृष्णो देवलील: स परिवारेण वर्त्तते। इति भागवतामृतकणिका। स च श्रीकृष्णस्य कला-विशेष:। यथा,—
"विष्णुर्महान् स इह यस्य कलाविशेषो गोविन्दमादिपुरुषं तमहं भजामि॥"
इति भागवतामृतपूर्व्वखण्ड:॥

महावीचि:, पुं (न विद्यते वीचि: सुखं यत्र। महानवीचिरत्र।) नरकविशेष:। यथा, मनु:।
"नरकं कालसूत्रञ्च महानरकमेव च।
सञ्जीवनं महावीचिं तपनं संप्रतापनम्॥"
यातीति पूर्व्ववचनस्थमनुवर्त्तते।
"महावीचिर्यत्र महाकल्पेन तु नीयते॥"
इति प्रायश्चित्तविवेक:॥
महावीर्य्यं, क्ली, (वीराय साधु इति यत्। महत् वीर्य्यम्।) विटपम्। तत् मुष्कवङ्क्षणयोरन्त-रम्। इति हेमचन्द्र:॥
महावीर:, पुं, (वीन् पक्षिण ईरयतीति। ईर+ क:। ततो महांश्चासौ वीरश्चेति।) गरुड:। वीरयतीति। वीर+क:। महान् वीर इति कर्म्मधारय:। वज्र:। सिंह:। यज्ञानल:। (स च मनुपुत्रविशेष:। यथा, श्रीभागवते। ५।१।२५।
"अग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतो-घृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति॥")
वज्र:। श्वेततुरङ्ग:। यज्ञागपक्षी। इति मेदिनी। रे, २८९॥ अन्तिमजिन:। (अयमेव सिद्धार्थस्य त्रिशलागर्भजात: पुत्र:। तद्विवरणं यथा, अरिष्टनेमिपुराणान्तर्गतजैनहरिवंशे।
"सर्व्वार्थश्रीमतीजन्मा तस्मिन् सर्व्वार्थदर्शन:।
सिद्धार्थोऽभवदर्काभो भूप: सिद्धार्थपौरुष:॥
यत्र पाति धरित्रीयमभूदेकत्रदोषिणी।
धर्म्मार्थिन्योऽपि यत्राक्तपरलोकभया: प्रजा:॥
कस्तस्य तान् गुणानुद्दामरस्तुलयितुं क्षम:।
वर्द्धमानगुरुत्वं यै: प्रापित: स नराधिप:॥
उच्चै: कुलाद्रिसम्भूता सहजस्नेहवाहिनी।
महिषी श्रीसमुद्रस्य तस्यासीत् प्रियकारिणी॥
चेतश्चेटकराजस्य यास्ता: सप्तशरीरजा:।
अतिस्नेहाकुलच्छक्तास्त्वाद्या प्रियकारिणी॥
कर्त्ता योजयितुं शक्तः क्षिप्रशक्ता गुणवर्णनै:।
या स्वपुण्यैर्महावीरप्रसवाय नियोजिता॥
सर्व्वतोऽथ नमन्तीषु सर्व्वासु सुरकोटिषु।
प्रभावासिपन्नीषु नभसो वसुवृष्टिषु॥
वीरेऽवतरति त्रातुं धरित्रीमसुधारिण:।
तीर्थनाथ्युतकल्पोर्द्ध्वे: पुष्पोत्तरविमानत:॥
सा तं षोडशसुस्वप्नदर्शनोत्सवपूर्व्वकम्।
दध्रे गर्भेश्वरं गर्भे श्रीवीरं प्रियकारिणी॥
पञ्चसप्ततिवर्षाष्टमाससमासार्द्धशेषक:।
चतुर्थस्तु तदा कालो दु:खम: सुखमोत्तर:॥
आषाढ़शुक्लषष्ठ्यान्तु गर्भावतरणोऽर्हत:।
उत्तराफाल्गुनीनीड़मुडुराजेऽभिजग्मुष:॥
दिक्कुमारीजनाभिख्यां योनिमूर्त्तिधनस्तनीम्।
प्रच्छन्नो भासयन्नर्भक्ता रवि: प्रावृषं यथा॥
नवमास्यत्यतीतेषु स जिनोऽष्टदिनेषु च।
उत्तराफाल्गुनीष्विन्दौ वर्त्तमानेऽजनि प्रभु:॥
ततोऽस्य जिनमाहात्म्यात्कुण्ठत्पीठकिरीटका:।
प्रणेमुरवधिज्ञानदृष्टवान्ता: सुरेश्वरा:॥
शङ्खभेरीहरिध्वानघण्टानिर्घोषघोषणम्।

समाकर्ण्य सुराः सूर्ख्यं घूर्णितार्णवराविण:॥
सप्तानीकमहाभेदा: सकलीका: कृतभूषणा:।
सेन्द्राश्चतुर्णिकायास्ते प्रापु: कुण्डपुरं पुरम्॥
त्रि:परीत्य पुरं देवा: पुरन्दरपुर:सरा:।
जिनमिन्द्रसुखं देवं तद्गुरू च ववन्दिरे॥
मातु: शिशुं विक्रत्यान्यं सुमाया: सुरमायया।
इन्द्राणी प्रणता नीत्वा जिनेन्द्रं हरये ददौ॥
गृहीत्वा करपद्माभ्यां तमभ्यर्च्य चिरं हरि:।
चक्रे नेत्रसहस्रोरुपुण्डरीकवनार्च्चितम्॥
ततश्चन्द्रावदाताङ्गमिन्द्रस्तुङ्गमतङ्गजम्।
घनगौघमिव हेमाद्रेर्मुक्ताधो मदनिर्भरम्॥
गण्डस्थलमदामोदभ्रमद्भ्रमरमण्डलम्।
तमिवाधित्यकावल्लनमालवनमण्डितम्॥
कर्णान्तरततासक्तरक्तचामरसंहतिम्।
तं यथाधित्यकाधीनरक्ताशोकमहावनम्॥
सुवर्णरचया चार्व्वा परिवेष्टितविग्रहम्।
तमेव च यथोपात्तकणत्कनकमेखलम्॥
अनेकरदसंहृत्तकृत्यसङ्गीतपोषितम्।
तमिवोत्तुङ्गघनागच्छत्यप्रायत्सुराङ्गनम्॥
सुवृत्तदीर्घसच्चारिकररुद्धदिगन्तरम्।
तमिवात्यायतिस्थूलस्फुरद्भोगभुजङ्गमम्॥
ऐशानधारितस्फीतधवलातपवारणम्।
तमिवोर्द्ध्वस्थिताभ्यर्ण्णसम्पूर्णशशिमण्डलम्॥
चामरेन्द्रभुजोत्क्षिप्तचलच्चामरहारिणम्।
तं यथा चमरीक्षिप्तबालव्यजनवीजितम्॥
ऐरावतं समारोप्य जिनेन्द्रं तस्य मण्डनम्।
देवै: सह गत: प्राप मन्दरं स पुरन्दर:॥
तं पाण्डुकवने रम्ये मन्दरस्य जिनं हरे:।
पाण्डुकायां प्रसिद्धायां शिलायां सिंहविष्टरे॥
संस्थाप्य त्रिबुधानीतक्षीरसागरवारिभि:।
शातकुम्भमयै: कुम्भैरभिषिच्य समं सुरै:॥
वस्त्रालङ्कारमालाद्यैरलङ्कृत्य कृतस्तुति:।
आनीयमातुरुत्सङ्गे जिनं कृत्वा कृतोचित:॥
सिद्धार्थप्रियकारिण्यो: सममानन्ददायकम्।
वर्द्धमानाख्यया स्तुत्वा स देवो वासवोऽगमत्॥
मासान् पञ्चदशाजन्मद्युम्नधारा दिने दिने।
या: पूर्व्वमापतंस्ताभिस्तर्पितोऽर्थी जनोऽखिल:॥
वर्द्धमान: सुरै: सेव्यो ववृधे स यथा यथा।
पितृबन्धुत्रिलोकानामनुरागस्तथा तथा॥
सुरासुरनराधीशमौलिमालार्च्चितक्रम:।
त्रिंशद्वर्षप्रमाणोऽभूद्वीरो भोगै: परिष्कृत:॥
शुद्धवृत्तं न भोगेषु चित्तं तस्य चिरं स्थिरम्।
कुटिलेषु यथा सिंहनखरन्ध्रेषु मौक्तिकम्॥
शान्तचित्तं कदाचित्तं स्वयं बुद्धमबोधयत्।
मत्वा सारस्वतादित्यमुख्यालौकान्तिका: सुरा:॥
सौधर्म्माद्यै: सुरैरेत्य कृतोऽभिषवपूजन:।
आरुह्य शिविकां दिव्यामुह्यमानां सुरेश्वरै:॥
उत्तराफाल्गुनीष्वेव वर्त्तमाने निशाकरे।
कृष्णस्य मार्गशीर्षस्य दशम्यामगमद्वनम्॥
अपनीय तत: सर्व्वं वस्त्रमाल्यादिभूषणम्।
पञ्चमुष्टिभिरुद्धृत्य मूर्द्धजानभवन् मुनि:॥
केशकुन्तलसङ्घातं जिनस्य भ्रमरासितम्।

प्रतिगृह्य सुराधीशो निदधौ दुग्धवारिधौ ॥
इन्द्रनीलचयेनेव क्षिप्तेनेन्द्रेण चाप्यभात् ।
जिनेन्द्रकेशपुञ्जेन रञ्जितः क्षीरसागरः ॥
जिननिष्क्रमणं दृष्ट्वा तुष्टाः सर्व्वे नरामराः ।
कृत्वा तृतीयकल्याणपूजाम्नगुर्यथायथम् ॥
मनःपर्य्ययपर्य्यन्तचतुर्ज्ञानमहेक्षणः ।
तपो द्वादशवर्षाणि चकार द्वादशात्मकम् ॥
विहरन्नथ नाथोऽसौ गुणग्रामपरिग्रहः ।
ऋजुकूलापगाकूले जृम्भिकग्राममीयिवान् ॥
तत्रातापनयोगस्थः शालाभ्याशशिलातले ।
वैशाखशुक्लपक्षस्य दशम्यां षष्ठमाश्रितः ॥
उत्तराफाल्गुनौ प्राप्ते शुक्लध्यानी निशाकरे ।
निहत्य घातिसङ्घातं केवलज्ञानमाप्तवान् ॥
केवलस्य प्रभावेण सहसा चलितासनाः ।
आगत्य महिमां चक्रुस्तस्य सर्व्वे सुरासुराः ॥
षट्षष्टिदिवसान् भूयो मौनेन विहरन् विभुः ।
आजगाम जगत्ख्यातं जिनो राजगृहं पुरम् ॥
आरुरोह गिरिं तत्र विपुलं विपुलश्रियम् ।
प्रबोधार्थं स लोकानां भानुमानुदयं यथा ॥
ततः प्रवृद्धहृत्तान्तैरापतद्भिरितस्ततः ।
जगत्सुरासुरैर्व्यापि जिनेन्द्रस्य गुणैरिव ॥
सौधर्म्माद्यैस्तदा देवैः परीतोऽभात् स भूधरः
नाभेयाधिष्ठितः पूर्व्वं यथाष्टापदपर्व्वतः ॥
चतुराशासुखद्वारस्थितद्वादशगोपुरम् ।
कृतं रत्नमयं देवैः प्राकारवलयत्रयम् ॥
जाते योजनविस्तीर्णे शुभे समवादिके ।
त्रिभागा द्वादशाभासन्नभःस्फाटिकभित्तयः ॥
प्रातिहार्य्यैर्युतोऽष्टाभिश्चतुस्त्रिंशन्महाद्भुतैः ।
तत्र देवेन्द्रैर्नतोऽभासीज्जिनश्चन्द्र इव ग्रहैः ॥
इन्द्राग्निवायुभूत्याख्याः कौण्डिन्याद्याश्च
पण्डिताः ।
इन्द्रनोदनयायाताः समवस्थानमर्हतः ॥
प्रत्येकं सहिताः सर्व्वे शिष्याणां पञ्चभिः शतैः ।
त्यक्ताम्बरादिसम्बन्धाः संयमं प्रतिपेदिरे ॥
सुता चेटकराजस्य कुमारी चन्दना तदा ।
धौतैकाम्बरसंवीतायातार्य्याणां पुरःसरी ॥
श्रेणिकोऽपि च संप्राप्तः सेनया चतुरङ्गया ।
सिंहासनोपविष्टं तं प्रणनाम जिनेश्वरम् ॥
छत्रचामरभृङ्गारैः कलसध्वजदर्पणैः ।
व्यजनैः सुप्रतीकैश्च प्रसिद्धैरष्टमङ्गलैः ॥
स्रगाचक्रदुकूलाब्जगजसिंहवृषध्वजैः ।
गरुडध्वजसंयुक्तैरष्टभेदैर्महाध्वजैः ॥
मानस्तम्भैस्तथा स्तूपैश्चतुर्भिश्च महावनैः ।
वाप्यम्भोजखण्डैश्च वल्लीवनलतागृहैः ॥
तैस्तैर्दैवैः कृतैः सर्व्वैरन्यैश्चातिशयैस्तथा ।
यथा स्थानस्थितैर्जैनी समवस्थानभूरभूत् ॥
अथेन्द्रोरिव शुक्राद्या निमग्ना गुर्व्वधिष्ठिताः ।
साधवोऽभाञ्जिनस्यान्ते जातरूपाश्च विग्रहाः ॥
ततः कल्पनिवासिन्यो देव्यः कल्पलताभुजः ।
मेरोरिव जिनस्यान्ते ता बभुर्भोगभूमयः ॥
ततोऽलङ्कृतनारीभिरार्यिकाततिराबभौ ।
स्फुरद्विद्युद्विराजिष्ठा शारदीव घनावली ॥

महावी

ज्योतिर्देवस्त्रियो तत्र रेजुरुज्ज्वलमूर्त्तयः ।
तास्तारा इव संक्रान्ताः समवस्थानसागरे ॥
कान्ताव्यन्तरदेवानां ततस्तत्र विरेजिरे ।
करकुड्मलधारिण्यः साक्षादिव वनश्रियः ॥
ततो नागकुमारादिदेव्यो नागफणोज्ज्वलाः ।
नागलोकसमायाता नागवल्ल्य इवा बभुः ॥
ततोऽप्यग्निकुमाराद्याः देवाः पातालवासिनः ।
ज्वलितोज्ज्वलनेशास्ते दशभेदा बभासिरे ॥
ततः किन्नरगन्धर्व्वयक्षकिंपुरुषादयः ।
षोडशाष्टविकल्पास्ते व्यन्तराश्च चकासिरे ॥
सप्रकीर्णकनक्षत्रसूर्य्याचन्द्रमसोग्रहाः ।
पञ्चभेदास्तदानल्पवपुषो ज्योतिषो बभुः ॥
मौलिकुण्डलकेयूरप्रालम्बकटिसूत्रिणः ।
हारिणः कल्पवृक्षाभास्ततोऽभान् कल्प-
वासिनः ॥
सपुत्रानमितानेकविद्याधरपुरःसराः ।
म्यर्षीदन्तानुषा नानाभाषावेशकचत्ततः ॥
ततो हि नकुलेभेन्द्रहर्यश्वमहिषादयः ।
जिनानुभावसम्भूतविश्वासाः स्वामिनो बभुः ॥
इति द्वादशभेदेषु परीतिं विभुतिं नतिम् ।
गणेषु प्रथमं कृत्वा स्थितेषु परितो जिनम् ॥
प्रत्यक्षीकृतविश्वार्थं कृतदोषत्रयक्षयम् ।
जिनेन्द्रं गौतमोऽपृच्छत्तीर्थार्थं पापनाशनम् ॥
स दिव्यध्वनिना विश्वसंशयच्छेदिना जिनः ।
दुन्दुभिध्वनिधीरेण योजनान्तरयायिना ॥
श्रावणस्यासिते पक्षे नक्षत्रेऽभिजिति प्रभुः ॥
प्रतिपद्यह्नि पूर्व्वाह्णे शासनार्थमुदाहरन् ॥
आचाराङ्गस्य तत्त्वार्थं तथा सूत्रकृतस्य च ।
जगाद भगवान् वीरः स्थानसमवाययोः ॥
व्याख्याप्रज्ञप्तिहृदयं ज्ञातृधर्म्मकथाश्रितम् ।
श्रावकाध्ययनस्यार्थमन्तकृद्दशगोचरम् ॥
अनुत्तरदशस्यार्थं प्रश्नव्याकरणस्य च ।
तथा विपाकसूत्रस्य पवित्रार्थं ततः परम् ॥
त्रिषष्टिः त्रिशती यत्र दृष्टीनामभिधीयते ।
दृष्टिवादस्य तस्यार्थं पञ्चभेदस्य सर्व्वदृक् ॥
जगाद जगतां नाथः प्रथमं परिकर्म्मणः ।
सूत्रस्याद्यानुयोगस्य तथा पूर्व्वगतस्य च ॥
उत्पादपूर्व्वपूर्व्वस्य परमार्थं ततः परम् ।
अग्रायणीयपूर्व्वार्थमग्रणीरभणद्विदाम् ॥
वीर्य्यप्रवादपूर्व्वार्थमस्तिनास्तिप्रवादजम् ।
ज्ञानसत्यप्रवादार्थमात्मकर्म्मप्रवादयोः ॥
प्रत्याख्यानस्य विद्यानुवादकल्याणपूर्व्वयोः ।
प्राणावायस्य पूर्व्वस्य तत्त्वार्थं तदनन्तरम् ॥
क्रियाविशालपूर्व्वस्य विशालार्थमशेषवित् ।
सल्लोकबिन्दुसारार्थं चूलिकार्थं सवस्तुकम् ॥
अङ्गप्रविष्टतत्त्वाथ प्रतिपाद्य जिनेश्वरः ।
अङ्गबाह्यमवोचत्तत्प्रतिपाद्यार्थरूपतः ॥
सामायिकं यथार्थाख्यं स चतुर्विंशतिस्तवम् ।
वन्दनाञ्च ततः पूतां प्रतिक्रमणमेव च ॥
वैनयिकं विनेयेभ्यः कृतिकर्म्म ततोऽवदत् ।
दशवैकालिकां एथ्वीमुत्तराध्ययनं तथा ॥
तं कल्पव्यवहारञ्च कल्पाकल्पं * * *

महावी

कल्पञ्च पुण्डरीकञ्च सुमहापुण्डरीककम् ॥
तथा निषद्यकां प्रायः प्रायश्चित्तोपवर्णनम् ।
जगत्त्रयगुरुः प्राह प्रतिपाद्यं हितोद्यतः ॥
मत्यादि केवलान्तस्य स्वरूपं विषयं फलम् ।
अपरोक्षपरोक्षत्व ज्ञानस्योवाच संख्यया ॥
मार्गणास्थानभेदैश्च गुणस्थानविकल्पनैः ।
जीवस्थानप्रभेदैश्च जीवद्रव्यमुपादिशत् ॥
सत्संख्याद्यनुयोगैश्च सन्नामाद्यैः किमादिभिः ।
द्रव्यं स्वलक्षणैर्भिन्नं पुद्गलादिविलक्षणम् ॥
द्विविधं कर्म्मबन्धञ्च सहेतुं सुखदुःखदम् ।
मोक्षं मोक्षस्य हेतुञ्च फलं चाष्टगुणात्मकम् ॥
बन्धमोक्षफलं यत्र भुज्यते तन्निधानकम् ।
अन्तःस्थितं जगौ लोकमलोकञ्च बहिःस्थितम् ॥
अथ सर्व्वर्षिसम्पन्नं श्रुतार्थं जिनभाषितम् ।
द्वादशाङ्गश्रुतं स्कन्धं सोपाङ्गं गौतमो व्यधात् ॥
त्रैलोक्यं संसदि स्पष्टं जिनार्कवचनांशुभिः ।
सुप्तमोहमहानिद्रं सुप्तोत्थितमिवाबभौ ॥
जिनभाषाधरस्पन्दमन्तरेण विजृम्भिता ।
तिर्य्यग्देवमनुष्याणां दृष्टिमोहमनीनशत् ॥
ततो जिनोक्ततत्त्वार्थमार्गश्रद्धा च लक्षणम् ।
शङ्काकाङ्क्षानिदानादिकलङ्कविगमोज्ज्वलम् ॥
सम्यग्दर्शनसद्रत्नं ज्ञानालङ्कारनायकम् ।
स्वकर्णहृदयेष्वेकं पिनद्धमखिलाङ्गिभिः ॥
कायेन्द्रियगुणस्थानजीवस्थानकुलायुषाम् ।
भेदाद्यो निर्व्विकल्पाश्च निरूप्यागमचक्षुषा ॥
क्रियासु स्थानपूर्व्वासु वधादिपरिवर्ज्जनम् ।
सर्व्वा जीवनिकायानामहिंसाद्यं महाव्रतम् ॥
चक्षुर्गोचरजीवौघान् परिहृत्य यतेर्यतः ।
ईर्य्यासमितिराद्या सा व्रतशुद्धिकरी मता ॥
त्यक्ता कार्कश्यपारुष्यं यतेर्यत्नवतः सदा ।
भाषणं धर्म्मकार्य्येषु भाषासमितिरिष्यते ॥
पिण्डशुद्धिविधानेन शरीरस्थितये तु यत् ।
आहारग्रहणं स्यादेषणा समितिर्यतेः ॥
निक्षेपणं यदा दानमौचित्या योग्यवस्तुनः ।
समितिः सा तु विज्ञेया निक्षेपादाननामिका ॥
शरीरान्तर्म्मलत्यागं प्रगतासु सुभूमिषु ।
यत्तत्समितिरेषा तु प्रतिष्ठापनिका मता ॥
एवं समितयः पञ्च गोप्यास्तिस्रस्तु गुप्तयः ।
वाङ्मनःकाययोगानां शुद्धरूपा प्रवृत्तयः ॥
चित्तेन्द्रियनिरोधश्च षडावश्यकसत्क्रियाः ।
शौचत्यागैकभक्तञ्च स्थितभुक्तिरचेलता ॥
भूमिशय्याव्रतं दन्तमलमार्ज्जनवर्ज्जनम् ।
तपः संयमचारित्रं परीषहजयः परः ॥
अनुप्रेक्षाश्च धर्म्मश्च क्षमादिदशलक्षणः ।
ज्ञानदर्शनचारित्रतपोविनयसेवनम् ॥
इति श्रमणधर्म्मोऽयं कर्म्मनिर्म्मोक्षहेतुकः ।
सुरासुरनराभ्यर्च्यं जिनोक्तस्तं तदा नराः ॥
संसारभीरवः शुद्धजातिरूपकुलादयः ।
सर्व्वसङ्गविनिर्मुक्ताः शतशः प्रतिपेदिरे ॥
सम्यग्दर्शनसंशुद्धाः शुक्लैकवसनावृताः ।
सहस्रशो दधुः शुद्धा नार्य्यस्त्वार्य्यिकाव्रतम्
पञ्चधाणुव्रतं केचित् त्रिविधञ्च गुणव्रतम् ।

ध्रियाव्रतं चतुर्भेदं तत्र श्रीपुरुषा दधुः ॥
तिर्य्यञ्चोऽपि यथाशक्ति नियमेव्वनलाश्चिरे ।
देवाः सद्दर्शनप्रागजिनपूजासु रेमिरे ॥
श्रेणिकेन तु यत् पूर्व्वं बह्वारम्भपरिग्रहात् ।
परस्त्रिनिक्रमारब्धं नारकायुश्महत्तमे ॥
तत्तु क्षायिकसम्यक्त्वात् स्वस्थितिं प्रथमस्थितौ ।
प्रापत् वर्षसहस्राणामशीतिं चतुरुत्तराम् ॥
चयस्त्रिंशत् सहस्रा क्व क्व पेयमपरास्थितिः ।
अहो क्षायिकसम्यक्त्वप्रभावोऽयमनुत्तरः ॥
अक्रूरो वारिषेणो यो यो भयः स तथापरे ।
कुमारा मातरश्चैषां पराश्चान्तःपुरस्त्रियः ॥
सम्यक्त्वं शीलसद्दानं प्रोषधं जिनपूजनम् ।
प्रतिपद्य विनेमुस्तं जिनेन्द्रं त्रिजगद्गुरुम् ॥
ततः प्रणम्य देवेन्द्रा जिनेन्द्रं स्तोत्रपूर्व्वकम् ।
यथायथं ययुर्युक्ता निजवर्गैर्निजास्पदम् ॥
श्रेणिकोऽपि गुणश्रेणीसुखकैरभिकृद्वान् ।
अभिवन्द्य जिनं नत्वा प्राविशद्राजधीपुरम् ॥
निःसरद्भिर्विशद्भिश्च सभा जैनी जनोर्म्मिभिः ।
चुक्षोभ क्षुभितैर्वेला नदीपूरैरिवाम्बुधिः ॥
आकीर्णमेव तैर्नित्यं सभामण्डलमर्हतः ।
क्षीयते वा कदा स्फीतिं भानुभिर्भानुमण्डलम् ॥
नोदयास्तमितं तत्र ज्ञायते भ्रममण्डलम् ।
धर्म्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ॥
तत्र तीर्थकरः कुर्व्वन् प्रत्यहं धर्म्मदेशनम् ।
सेवितः श्रेणिकेनास्य न हि तृप्तिस्त्रिवर्गजा ॥
गौतमश्च समासाद्य तदा तद्दुपदेशतः ।
सर्व्वानुयोगमार्गेषु प्रवीणः स कृपोऽभवत् ॥
ततो जिनगृहैस्तुङ्गैराजा राजगृहं पुरम् ।
शतमन्त्रैर्विद्यापनमसं महिमोत्सवैः ॥
कृतः सामन्तसंघातैर्म्महामन्त्रिपुरोहितैः ।
प्रजाभिर्जिनगेहाढ्यो मगधो विषयोऽखिलः ॥
पुरेषु ग्रामघोषेषु पर्व्वताग्रे स्थलेष्वपि ।
नदीतटवनान्तेषु तदा रेजुर्जिनावली ॥
निष्कम्प महोदये विघटयन्नोद्यान्धकारोन्नतं
प्रागदेशप्रजया विधाय मगधादेशं प्रबुद्धप्रजम् ।
तद्दृत्वा एष्वदेशमध्यमगमन्मध्यन्दिनश्रीधरं
मिथ्याज्ञानहिमान्तकृज्जिनरविर्बोधप्रभा-
मण्डलः ॥")
कोकिलः । इति हेमचन्द्रः ॥ धनुर्धरः । इति शब्दरत्नावली ॥ एकवीरदृचः । इति राजनिर्घण्टः ॥ लक्ष्मणः । यथा,—
"लक्ष्मणश्च महावीरं पतितं रणभूतले ॥"
अङ्गदादिः । यथा,—
"अङ्गदाद्यैर्म्महावीरैर्वेष्टितं वङ्गरूपिणम् ॥"
इति तन्त्रसारे हनुमद्ध्यानम् ॥
हनूमान् स्वयमपि महावीरत्वेन प्रसिद्धः ॥
महावीरा, स्त्री, (महावीर + टाप् ।) क्षीरकाकोली । इति रत्नमाला ॥
महावीर्य्यः, पु, (महत् विश्वसृष्टये विपुलं वीर्य्यमस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (महत् वीर्य्यं तपोबलमस्य ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥

(वितथस्य पुत्त्रभेदः । यथा, भागवते । ९ । २१ । १ ।
"वितथस्य सुतान्मन्योर्वृहत्क्षत्रो जयस्ततः ।
महावीर्य्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥")
अतिशयबलयुक्ते, त्रि ॥ (यथा, महाभारते । ५ । १७६ । ४६ ।
"ततः किल महावीर्य्यो भीष्मः शान्तनवो नृपान् ।
अधिक्षिप्य महातेजास्त्रिसः कन्या जहार ताः ॥"
विराजः पुत्त्रः । यथा, विष्णुपुराणे ।२।१।३८।
"नरो गयस्य तनयस्तत्पुत्त्रोऽभूद्विराट् ततः ।
तस्य पुत्त्रो महावीर्य्यो धीमांस्तस्मादजायत ॥")
महावीर्य्या, स्त्री, (महत् वीर्य्यमस्याः टाप् ।) संज्ञा । सा च सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ वनकार्पासी । इति शब्दरत्नावली ॥ महाशतावरी । इति राजनिर्घण्टः ॥
महावृहती, स्त्री, (महती वृहती ।) वार्त्ताकी । इति त्रिकाण्डशेषः ॥
महावृक्षः, पु, (महान् वृक्षः ।) स्नुहीवृक्षः । इति हलायुधः ॥ (यथास्य पर्य्यायः ।
"वज्रद्रुमो महावृक्षः स्नुही स्नुक् सुधा गुडा ॥"
यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"महावृक्षपयःपीतैर्यवागस्त्वकले: क्वता ।
पीता विरेचयत्याशु गुडेनोत्कारिका कृता ॥")
वृहद्वृक्षश्च ॥
महावेगः, पुं, (महान् अमोघो दुर्व्वारो वा वेगो यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् वेगः ।) अतिजवः । (महान् वेगोऽस्य ।) तद्युक्ते, त्रि ॥ (यथा, महाभारते । १ । १५५ । १२ ।
"विकर्षन्तौ महावेगौ गर्ज्जमानौ परस्परम् ।
पश्य त्वं युधि विक्रान्तावेतौ च नरराक्षसौ ॥")
महाव्याधिः, पुं, (महांश्चासौ व्याधिश्चेति ।) महारोगः । स तु कुष्ठादिः । यथा,—
"सर्व्वव्याधिविनिर्मुक्तो महाव्याधिविवर्जितः ।
पठनात् संप्रयत्नेन जीवन्मुक्तो भवेन्नरः ॥"
इति अन्नदाकल्पे गायत्रीकवचम् ॥
महाव्याहृतिः, स्त्री, (महती चासौ व्याहृतिश्चेति ।) प्रणवस्वाहायुक्तव्याहृतित्रयम् । यथा । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा । इति भवदेवभट्टः ॥ (यथा, मनौ । २ । ८१ ।
"ओङ्कारपूर्व्विकास्तिस्रः महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")
महाव्रतं, स्त्री, (महच्च तद्व्रतञ्चेति ।) दुरव्रतम् । मालो वा इति भाषा । यथा,—
"कुर्य्यात् चम्पकशाखं तथाष्टाङ्ग्मकं प्रिये ।।
महाव्रतविमोचाय विंशाब्दं पठेन्नरः ॥"
इति तिथ्यादितत्त्वधृतवाराहीतन्त्रवचनम् ॥
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) द्वादशवार्षिकव्रतम् । यथा । 'तेन वधकालादूर्द्ध्वं विंशत्यधिकशतस्य यावदवशिष्टं तावत्परि-

माणमहाव्रतानुरूपा धेनवो दातव्याः ।' इति प्रायश्चित्तविवेके भवदेवभट्टमतम् ॥ प्रहरकालीनदुर्गापूजनम् । यथा,—
"महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितैः ॥"
इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ॥
अरुणोदयकालीनमाघस्नानम् । यथा,—
"वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेद माघस्नानं महाव्रतम् ॥"
इति मलमासतत्त्वधृतपद्मपुराणवचनम् ॥
(महाव्रतधारिणि, त्रि । यथा, महाभारत । १३ । ५४ । २१ ।
"ततोऽपश्यतिन् वनोद्देशे पुनरेव द्विजर्षभं नृप ।
कौशिकीं हर्ष्यां समासीनं जपमानं महाव्रतम् ॥")
महाव्रती, [न्] पु, (महाव्रतं योगनियमानुष्ठानादिकमस्त्यस्येति । व्रत + इनिः ।) शिवः । इति हेमचन्द्रः ।२।१११॥ उदरस्फोटः । इति त्रिकाण्डशेषः ॥ महाव्रतयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे । ३७ । ५८ ।
"एतत्कुलापि सावधानास्ते महाव्रतिनस्तदा ।
ऊचुर्निश्चयदस्तं ते चत्वारः सहयायिनः ॥")
महाशक्तिः, पुं, (महत्यः शक्तयः मातृगणादयो महद्वा सामर्थ्यञ्च यस्य ।) कार्त्तिकेयः । इति शब्दमाला ॥ (महती शक्तिः ।) अतिशयपराक्रमः । महती शक्तिरस्य तद्युक्ते, त्रि ॥
महाशङ्खः, पुं, (महान् शङ्ख इव हृदयकुम्भलात् ।) मानुषास्थि । संख्याविशेषः । स च दशनिखर्व्वः । ललाटम् । इति मेदिनी । खे, १६ ॥ (महान् महार्घः शङ्खः ।) निधिविशेषः । इति विश्वः ॥ कर्णनेत्रयोर्म्मध्यगतास्थि । यथा,—
"कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ।"
तस्य मालया जपविधिर्यथा,—
"महाशङ्खमयी माला नीलसारस्वते विधौ ।
तूललाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला ताराविद्याजपे प्रिये ।।"
इति तन्त्रसारधृतमुण्डमालातन्त्रम् ॥
(महान् शङ्खः ।) हृहच्छङ्खः । यथा,—
"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ।"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
(सर्पभेदः । यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पाताले नागलोकपतयोवासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति ।")
महाशठः, पुं, राजधत्तूरः । इति राजनिर्घण्टः ॥ (महांश्चासौ शठश्चेति ।) अतिधूर्त्ते, त्रि ॥
महाशणपुष्पिका, स्त्री, (अल्पं पुष्पं इति अल्पार्थे ङीष् । ततः स्वार्थे कन् स्त्रियां टाप् पूर्व्वस्य ह्रस्वश्च । शणस्येव पुष्पिका यस्याः । महती चासौ शणपुष्पिका चेति ।) वृहच्छणपुष्पी ।

तत्पर्य्यायः। दन्तपर्णी २ श्वेतपुष्पा ३ महासिता ४ महाश्वेतघण्टी ५ महाश्वेता ६। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। शुक्लत्वम्। रसनियामकत्वम्। कुतूहलमोहनस्तम्भनादिषु प्रोक्तत्वञ्च। इति राजनिर्घण्टः॥

महाशता, स्त्री, (महत् शतञ्च मूलानि यस्याः। टाप्।) महाशतावरी। इति राजनिर्घण्टः॥

महाशतावरी, स्त्री, (महती चासौ शतावरी चेति।) बृहच्छतावरी। तत्पर्य्यायः। शतवीर्य्या २ सहस्रवीर्य्या ३ सुरसा ४ महापुरुषदन्तिका ५ वीरा ६ तुङ्गिनी ७ बहुपुत्त्रिका ८ ऊर्द्ध्वकण्टी ९ महावीर्य्या १० फणिजिह्वा ११ महाशता १२ सुवीर्य्या १३। अस्या गुणाः। वृष्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। हिमत्वम्। मेहकफवातघ्नत्वम्। तिक्तत्वम्। श्लक्ष्णत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"महाशतावरी त्वन्या शतमूल्यूर्द्ध्वकण्टिका।
सहस्रवीर्य्याहेरञ्च ऋष्यप्रोक्ता महोदरी॥
महाशतावरी मेध्या हृद्या वृष्या रसायनी।
शतवीर्य्या निहन्त्यर्शोग्रहणीनयनामयान्॥"
इति भावप्रकाशः॥

महाशयः, त्रि, महान् आशयोऽभिप्रायो मनो वा यस्य सः। इति भरतः॥ तत्पर्य्यायः। महेच्छः २। इत्यमरः। ३। १। ३॥ महानुभावः ३। इति शब्दरत्नावली॥ उदात्तः ४ महामनाः ५। इति जटाधरः॥ उद्भटः ६ उदारः ७ उदीर्णः ८ महात्मा ९। इति हेमचन्द्रः। ३। १३१॥ (यथा, कथासरित्सागरे। ७२। १२८।

"दैवात्प्रबुद्धः शुश्राव स वराहो महाशयः॥"

महान् आशयो जलानामाधारः।) समुद्रे, पुं। इति शब्दरत्नावली॥

महाशय्या, स्त्री, (महती चासौ शय्या चेति।) राजशय्या। इति हेमचन्द्रः। ३। ३८०॥ बृहच्छय्या च॥

महाशरः, पुं, (महांश्चासौ शरश्चेति।) स्थूलशरः। इति राजनिर्घण्टः॥

महाशल्कः, पुं, (महान् बृहन् शल्को यस्य।) चिङ्गटमत्स्यः। इति हारावली।१८७॥ (यथा, मनुः। ३। २७२।

"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः॥"

(महान् शल्कः।) बृहच्छल्कश्च। तद्युक्ते, त्रि॥

महाशाकं, क्ली, (महच्च तत् शाकञ्च।) बृहच्छाकविशेषः। इति केचित्॥

महाशाखा, स्त्री, (महती शाखा यस्याः।) नागबला। इति राजनिर्घण्टः॥

महाशालिः, पुं, (महांश्चासौ शालिश्च।) स्थूलशालिः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। सुगन्धिकः २। इति हेमचन्द्रः। ४। २४५॥ (स च धान्यविशेषः। तद्यथा,—

"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्द्दमको महाशालिश्च दूषकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महाशिवः, पुं, (महांश्चासौ शिवकल्याणरूपी च।) महादेवः। यथा,—

"रत्नसिंहासनस्थञ्च महाभूषणभूषितम्।
महाशिवं शिवकरं शिवबीजं शिवाश्रयम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २९ अध्यायः॥

महाशीता, स्त्री, (महत्यधिका शीता शीतवीर्य्या।) शतमूली। इति शब्दचन्द्रिका॥ (महत् शीतं शीतगुणोऽस्य।) अतिशीतवीर्य्ययुक्ते, त्रि॥

महाशुक्तिः, स्त्री, (महती शुक्तिः। मुक्ताकरत्वेनास्या महत्त्वम्।) मुक्तामाता। सा च शुक्तिः। इति राजनिर्घण्टः॥ (महती स्थूला शुक्तिः।) बृहच्छुक्तिश्च॥

महाशुक्ला, स्त्री, (महती चासौ शुक्ला शुक्लवर्णा च।) सरस्वती। इति भूरिप्रयोगः॥ अतिशुक्लवर्णयुक्ते, त्रि॥

महाशुभ्रं, क्ली, (महान् शुभ्रो वर्णोऽस्य।) रजतम्। इति राजनिर्घण्टः॥ अतिशुभ्रवर्णयुक्ते, त्रि॥

महाशूद्रः, पु, (महान् शूद्रः।) आभीरः। इति महाशूद्रीशब्ददर्शनात्॥

महाशूद्री, स्त्री, (महाशूद्रस्य भार्य्या इति। "अजाद्यतष्टाप्।" ४। १। ४। इत्यत्र। "महत्पूर्व्वस्य प्रतिषेधः।" इति काशिकोक्त्या पुयोगलक्षणा ङीष्।) आभीरी। इत्यमरः। २। ६। १३॥

महाशोणी, स्त्री, (महती चासौ शोणी च।) श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥

महाश्मशानं, क्ली, (महच्च तत् श्मशानञ्च। अत्र हि जीवानां मरणे समूलकर्म्मनाशनः पुनर्जन्ममरणाद्यभावादस्यातथात्वम्।) काशी। इति काशीखण्डम्॥

महाश्यामा, स्त्री, (महती चासौ श्यामा च।) श्यामालता। इति रत्नमाला॥ शिंशपावृक्षः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये। "श्यामामहाश्यामात्रिवृद्दन्तीत्यादि॥" वृक्षपादिवृक्षः। तत्पर्य्यायो यथा,

"कण्टकाख्या महाश्यामा वृक्षपादीति
वक्ष्यते॥"
इति गारुडे २०८ अध्याये॥)

महाश्रमणः, पुं, (महान् श्रेष्ठश्चासौ श्रमणो बौद्धभिक्षुश्चेति।) बुद्धविशेषः। स च शाक्यमुनिः। तत्पर्य्यायः। सर्व्वार्थसिद्धः २ कुलिशासनः ३ गोपेशः ४। इति हेमचन्द्रः॥

महाश्रावणिका, स्त्री, (महती चासौ श्रावणिका च।) क्षुपविशेषः। बड थुलकुडी इति भाषा। तत्पर्य्यायः। महामुण्डी २ लोचनी ३ कदम्बपुष्पी ४ विकचा ५ क्रोडा ६ चोडा ७ पलङ्कषा ८ नदीकदम्बः ९ मुण्डाख्या १० महामुण्डनिका ११ माना १२ स्थविरा १३ लोमनी १४ भूकदम्बः १५ अलम्बुषा १६। अस्य गुणाः। उष्णत्वम्। तिक्तत्वम्। ईषन्मधुरत्वम्। वायुशमनत्वम्। स्वरप्रत्वम्। रेचनत्वम्। श्रमघ्नत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"मुण्डी भिक्षुरपि प्रोक्तः श्रावणी च तपोधना।
श्रवणाह्वा मुण्डितिका तथा श्रवणशीर्षिका॥
महाश्रावणिकान्या तु सा स्मृता भूकदम्बिका।
कदम्बपुष्पिका च स्यादव्यथा तु तपस्विनी॥
मुण्डितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः।
मेध्या गण्डापचीकृच्छ्रक्रिमियोन्यर्त्तिपाण्डुनुत्॥
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्त्तिहृत्।
महामुण्डी च मुण्डी च गुणैरुक्ता महर्षिभिः॥"
इति भावप्रकाशः॥

महाश्रीः, स्त्री, (महती श्रीरिव।) बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ ओङ्कारा ३ स्वाहा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥

महाश्वेता, स्त्री, (महत्यतिशया श्वेता। महान् श्वेतो वर्णो यस्या वा।) सरस्वती। इति त्रिकाण्डशेषः॥ क्षणभूमिकुष्माण्डः। तत्पर्य्यायः। क्षीरविदारी २ ऋष्यगन्धिका ३। इत्यमरः। २। ४। ११०॥ क्षीरविदारिका ४ क्षीरवल्ली ५ क्षीरकन्दा ६। इति जटाधरः॥ क्षीरिका ७। इति शब्दरत्नावली॥ श्वेतापराजिता। इति रत्नमाला॥ (पर्य्यायोऽस्या यथा,—

"गिरिकर्णी महाश्वेता स्थूलपुष्पा सिता
क्वचित्॥"
इति वैद्यकरत्नमालायाम्॥)

सिता। तत्पर्य्यायः। मधुजा २। इति त्रिकाण्डशेषः॥ श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"कटभी किणिही श्वेता महाश्वेता च
रोहिणी॥")

दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"श्वेतं शुक्लं शिवस्थानं यस्माच्चेह समागता।
महाभावसमुत्पन्ना महाश्वेता ततः स्मृता॥"

(किम्पुरुषवर्षस्थितहंसनामकगन्धर्व्वराजस्य गौरीगर्भोत्पन्ना कन्या। तत्कथा कादम्बर्य्यां विस्तरशो द्रष्टव्या॥)

महाषष्ठी, स्त्री, (महती चासौ षष्ठी च। महामङ्गलदात्री षष्ठी वा।) दुर्गा। यथा,

ॐ दुं दुं दुं दुर्गे दुर्गे नाशय नाशय हन हन दह दह मथ मथ वधवधसर्व्वहिंसान् महाषष्ठीरूपेण बालकं रक्ष रक्ष चिरजीविनं कुरु कुरु श्रीं ह्रीं हूं फट् स्वाहा।" इति योगिनीतन्त्रे महाषष्ठीकवचम्॥

महाष्टमी, स्त्री, (महत्या महादेव्या अष्टमी। महती अष्टमीति वा।) आश्विनशुक्लाष्टमी। यथा,—
"आश्विने शुक्लपक्षस्य भवेद् या अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥"
इति कालिकापुराणे ५८ अध्यायः॥
तस्यां पूजाविधिः पुत्त्रवत उपवासनिषेधश्च यथा,—
"अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम्॥
सिन्दूरैः पट्टवासैश्च नानाविधविलेपनैः।
पुष्पैरनेकजातीयैः फलैर्बहुविधैरपि॥
उपवासं महाष्टम्यां पुत्त्रवान्न समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्॥
पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्जयेद्दशम्यान्तु श्रवणे सावरोत्सवैः॥"
इति तत्रैव ६०, अध्यायः॥
तत्राहोरात्रपूजा। यथा,—
"कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत्।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः॥
पूजां समारभेद्देव्या नवम्यां वारुणेऽपि वा।
पशुघातश्च कर्त्तव्यो गवलाजवधस्तथा॥"
इति देवीपुराणवचने वारुणपदेन पूर्व्वाषाढ़ोच्यते। इति तिथ्यादितत्त्वम्॥

महासन्नः, पुं, (महानतिशयः सन्नो विषण्णः कुदेहवत्त्वात्। यद्वा, महतो हिमाद्रेर्महादेवस्य वा आसन्नः निकटवर्त्ती।) कुवेरः। इति शब्दमाला॥ (महदतीवासन्नः) अतिनिकटश्च॥

महासफरः, पुं, (महांश्चासौ सफरश्च।) इहत्प्रोष्ठीमत्स्यः। अस्य गुणाः। यथा,—
"महासफरसंज्ञस्तु तिक्तः पित्तकफापहः।
शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः॥"
इति भावप्रकाशः॥

महासमङ्गा, स्त्री, (महती चासौ समङ्गा च।) वृक्षविशेषः। कगहिया इति हिन्दीभाषा। तत्पर्य्यायः। ओदनिका २ ओदनाह्वया ३ वृक्षा ४ वृषा ५ इड्बला ६ तक्कुला ७ भुजङ्गजिह्वा ८ शीतपाकिनी ९ शीतबला १० शीता बला ११ बलोत्तरा १२ बला १३ खिरहिट्टी १४ बालजिह्वा १५। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। दोषत्रयनाशित्वम्। युक्त्या युक्ता प्रयोगे ज्वरदाहनाशित्वञ्च। इति राजनिर्घण्टः॥

महासर्ज्जः, पुं, (महांश्चासौ सर्ज्जश्च।) पनसः। असनवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"अजकर्णो वनेसर्ज्जो महासर्ज्जोऽसनस्तु सः॥")

महासहः, पुं, (सहते इति। सह + अच्। महान् सहः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥ (बाणपुष्प इति गौड़ादौ प्रसिद्धः। यथास्य पर्य्यायः।
"अम्लातोऽम्लाटनः प्रोक्तस्तथाम्लातक इत्यपि।
कुरण्टको वर्णपुष्पः स एवोक्तो महासहः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासहा, स्त्री, (महासह + स्त्रियां टाप्।) माषपर्णी। (पर्य्यायोऽस्या यथा,—
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा।
कृष्णवृन्ता च काम्बोजी पाण्डुलोमशपर्णिनी॥"
इति वैद्यकरत्नमालायाम्॥
पर्य्यायान्तरं यथा,—
"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अम्लानवृक्षः। इत्यमरः।२।४।७३।(कुब्जकः। तत्पर्य्यायो यथा,—
"कुब्जको भद्रतरुणी वृहत्पुष्पोऽतिकेशरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासान्तपनं, क्ली, (महत् सान्तपनम्।) व्रतविशेषः। यथा। अथ महासान्तपनम्। तत्र सप्ताहसाध्यसान्तपनमुक्ता याज्ञवल्क्यः।
"पृथक्सान्तपनैर्द्रव्यैः षड़हः सोपवासकः।
सप्ताहेनैव कृच्छ्रोऽयं महासान्तपनः स्मृतः॥
एतत् सप्ताहसाध्यम्। जावालः।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकैकं क्रमशोऽश्नीयादहोरात्रमभोजनम्॥
कृच्छ्रः सान्तपनो नाम सर्व्वपापप्रणाशनः।
एकैकमेतद्देव हि त्रिरात्रमुपयोजयेत्॥
त्र्यहञ्चोपवसेदन्त्यं महासान्तपने विधिः॥"
एतत् सप्ताहसाध्यसान्तपनमुक्ता एकविंशतिदिनसाध्यं महासान्तपनमुक्तम्। महासान्तपनं धेनुषट्कदानसमम्। जावालोक्तमहासान्तपनस्य एकविंशतिदिनसाध्यत्वेन सप्ताहसाध्यसान्तपनात् त्रिगुणत्वान्महासान्तपने धेनुषट्कं देयम्। इति प्रायश्चित्तविवेकः॥

महासारः, पुं, (महान् सारः स्थिरांशो यस्य।) दुष्खदिरः। इति राजनिर्घण्टः॥

महासाहसं, क्ली, (महच्च तत् साहसञ्च।) अतिबलात्कारकृतकार्य्यम्। अतिशयदण्डः। इति साहसशब्दार्थे मेदिनी। से, ४५॥ (महत् साहसमत्र।) अतिदुष्कृतकर्म्म। अतिशयदण्डः। इति साहसशब्दार्थे हेमचन्द्रः। ३। ४००॥

महासाहसिकः, त्रि, (महानतिशयः साहसिकः।) चौरः। इति केचित्॥ अतिसाहसयुक्तश्च। बलपूर्व्वापहारकः। यथा,—
"चाटतस्करदुर्व्वृत्तमहासाहसिकादिभिः।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः॥"
इति याज्ञवल्क्यवचनम्॥
चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणः तस्कराः। दुर्व्वृत्ताः इन्द्रजालिककितवादयः। सहो बलं सहसा बलेन कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः। इति मिताक्षरायामाचाराध्यायः १॥

महासिंहः, पुं, (महान् सिंह इव।) शरभः। इति राजनिर्घण्टः॥ (महांश्चासौ सिंहश्च।) इहत्सिंहः। स च देवीवाहनम्। यथा,—
"उत्थाय च महासिंहं देवी चण्डमधावत।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

महासुखं, क्ली, (महत् सुखमस्मिन्।) शृङ्गारः। इति त्रिकाण्डशेषः॥ (महच्च तत् सुखञ्च। अतिशयानन्दः। महत् सुखमस्य तद्वति, त्रि॥)

महासुखः, पुं, (महत् सुखं ईश्वरानन्दोऽस्य अस्माद् वा।) बुद्धः। इति त्रिकाण्डशेषः॥

महासुगन्धा, स्त्री, (महान् सुगन्धोऽस्याः।) गन्धनाकुली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे २६ अध्याये।
"महासुगन्धामथवा पालिन्दीञ्चाञ्जनेऽपि सताम्।
शीताञ्चात्र परीषेकान् प्रदेहांश्च योजयेत्॥")
अतिसुगन्धयुक्ते त्रि॥

महासूक्ष्मा, स्त्री, (महदतीव सूक्ष्मा।) बालुका। इति राजनिर्घण्टः॥ अतिशयसूक्ष्मे, त्रि॥

महासेनः, पुं, (महती सेना यस्य।) कार्त्तिकेयः। इत्यमरः।१।१।४१॥ (यथा अनर्घराघवे ।४।३२।
"महासेनो यस्य प्रमदयमदंष्ट्रासहचरैः
शरैर्मुक्तो जीवन्निदिव शरजन्मा समभवत्।
इमाञ्च चत्वारो भुजवनमहादुर्गविषमा
मयं वीरो वाराणजयदुपविशन् वसुमतीम्॥"
महती सेना अनुचरोऽस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ महासेनापतिः। इति मेदिनी। ने, २०१॥ (यथा महाभारते। ५। १६१। ११।
"स च राजा दशार्णेषु महानासीत् सुदुर्ज्जयः।
हिरण्यवर्म्मा दुर्द्धर्षो महासेनो महामनाः॥")
इत्याहैत्पितृविशेषः। इति हेमचन्द्रः। राजविशेषः। यथा, कथासरित्सागरे ।११।३४॥
"जयसेनस्य तस्याथ पुत्त्रोऽप्रतिमदोर्बलः।
समुत्पन्नो महासेननामा नृपतिकुञ्जरः॥")

महास्कन्धा, स्त्री, (महान् स्कन्धः शाखावधि भागो यस्याः।) जम्बूवृक्षः। इति राजनिर्घण्टः॥ (महान् स्कन्धोऽस्य॥) इहत्स्कन्धयुक्ते त्रि॥

महास्थली, स्त्री, (स्थल + "जानपदकुण्डगोणस्थलेत्यादि।" ४। १। ४२। इति ङीष्। महती स्थली।) पृथिवी। इति शब्दमाला॥ श्लेष्यागश्च॥

महास्नायुः, पुं, (महती स्नायुः अस्थिबन्धननाड़ी।) कण्डरा। इति हेमचन्द्रः। ३। २६५॥

महास्रग्वी, [न्] पुं, (महती स्रक् अस्थिमाला सा अस्यास्तीति विनिः।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम् ।१३।१७।१३४।

महास्वनः, पुं, (महान् स्वनः शब्दो यस्य।) मन्त्रतूर्य्यम्। इति त्रिकाण्डशेषः॥ (महान् स्वनः।) इहच्छब्दः। तद्युक्ते, त्रि॥ (यथा, महाभारते। ५। १५। ५।

"अमर्षवश कौन्तेयो दृढवैरश्च पाण्डव: ।
अनन्तभावी सोऽन्यादर्शयत्प्रियो महा-
स्वन: ॥")

महाहनु:, पुं, (महती हनुर्यस्य ।) शिव: । इति महाभारते तस्य सहस्रनामस्तोत्रम् ।१३।१७।१३४॥ दृहद्धनुयुक्ते, त्रि ॥ (सर्पविशेष: । यथा, महाभारते । १ । ५७ । १० ।
"मुद्गर: शिशुरोमा च सुरोमा च महाहनु: ।
एते तक्षकजा नागा: प्रविष्टा हव्यवाहनम् ॥")

महाहवि:, [स्] क्ली, (महत् सुप्रशस्तं हवि: ।) गव्यघृतम् । यथा,—
"गव्यायामथवा पिष्टं खड्गमांसं महाहवि: ।
कालशाकं तिलाढ्यं वा क्षीरं मासद्वये ॥"
इति मार्कण्डेयपुराणे श्राद्धकल्प: ॥
(तदात्मतया सर्वं जगत् हूयतेऽस्मिन् । यद्वा, महान्ति हवींषि आज्यपुरोडाशादिरूपाणि यस्य ।) विष्णु: ॥ इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान्ति हवींष्यत्र । बृहद्यागविशेष: । यथा, शतपथब्राह्मणे । २ । ५ । ३ । २० ।
"अथातो महाहविष एव तद् यथा महाहविषस्तथो तस्य ॥"
"शाकमेधेषु प्रधानभूताया महाहविराख्याया इष्टेरारम्भं प्रतिजानीते अथात इति ।" इति तद्भाष्यम् ॥")

महाहास:, पुं, (महानुच्चैर्हास: ।) अट्टहास: । इति शब्दरत्नावली ॥

महाहिगन्धा, स्त्री, (अहेर्गन्धो लेश ईषद्हिंसारूप: सम्पर्कोऽस्यस्यामिति । गन्ध + अर्श आदित्वात् अच् टाप् च । महती अहिगन्धा ।) गन्धनाकुली । इति राजनिर्घण्ट: ॥

महाह्रस्वा, स्त्री, (महती चासौ ह्रस्वा च ।) कपिकच्छु: । इति शब्दमाला ॥ अतिखर्वे त्रि ॥

महि:, स्त्री, (मह्यते इति । मह पूजायां अदन्तचुरादि: + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७। इति इन् ।) पृथिवी । इति शब्दमाला ॥ (महत् । यथा, ऋग्वेदे । २ । २४ । १४ ।
"सत्रो मन्यमहि कर्म करिष्यत: ॥"
"महि महत् कर्म्म करिष्यत: ।" इति तद्भाष्ये सायन: ॥ महिमा । यथा, भागवते ।८ ।८।४।
"तत ऐरावतो नाम वारणेन्द्रो विनिर्गत: ।
दन्तैश्चतुर्भि: श्वेताद्रेर्हरन् भगवतो महिम् ॥"
"महिं महिमानम् ।" इति तट्टीकायां श्रीधर: ॥ महत्त्वम् । यथा, भागवते । २ । १ । ३५ ।
"विज्ञानशक्तिं महिमामनन्ति ॥"
"महिं महत्त्वम् ।" इति तट्टीकायां श्रीधर: ॥)

महिका, स्त्री, (मह + "कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणा० ।२।३२। इति कुन् टाप् । अत इत्वम् ।) हिमम् । इत्यमर: ।१ । ३ ।१८ ॥

महितं, त्रि, (मह्यते स्मेति । मह पूजायाम् + "मतिबुद्धिपूजार्थेभ्यश्च ।" ३ । २ । १८८ । इति क्त: ।) पूजितम् । यथा, भट्टि: । १० । २ ।
"रणपण्डितोऽग्र्यविबुधारिपुरे
कलहं स राममहित: कृतवान् ।
ज्वलदग्निरावणगृहञ्च बलात्
कलहंसराममहित: कृतवान् ॥"
(पितृगणविशेष: । यथा, मार्कण्डेये । ९६ । ४६ ।
"महान्महात्मा महितो महिमावान्महाबल: ।
गणा: पञ्च तथैवैते पितृणां पापनाशना: ॥"
स्त्रियां टाप । नदीभेद: । यथा, महाभारते । ६ । ९ । २१ ।
"नीवारां महिताञ्चापि सुप्रयोगां जना-
धिप । ॥")

महिनं, क्ली, (महति मह्यते वा । मह पूजायां + "महेरिनण् च ।" उणा० । २ । ५६ । इति चकारादिनन् प्रत्यय: इनन् ।) राज्यम् । इत्युणादिकोष: ॥ (पूजनीये, त्रि ॥ यथा, ऋग्वेदे । ६ । २६ । ८ ।
"वयं तेऽस्यामिन्द्र द्युम्नहूतौ सखाय: स्याम महिन । प्रेष्ठा: ।"
"हे महिन पूजनीय इन्द्र ।" इति तद्भाष्ये सायन: ॥)

महिमा, [न्] पुं,(महतो भाव: । महत् + "पृथ्वादिभ्य इमनिज् वा ।" ५।१।१२२। इति इमनिच् । तत: "टे: ।" ६ । ४ । १५५ । इति टिलोप: ।) शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेष: । इति हेमचन्द्र: । २ । ११६ ॥ स च महत्त्वं येन चतुर्दश भुवनान्यस्योदरे वर्त्तन्ते । इत्यमरटीकायां भरत: ॥ (तदुक्तं यथा,—
"अणिमा लघिमा प्राप्ति: प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥"
माहात्म्यम् । यथा, भागवते । ८ । ५ । १३ ।
"त्वया संकथ्यमानेन महिम्ना सात्वतां पते: ।
नातितृप्यति मे चित्तं सुचिरं तापतापितम् ।")
उत्कर्ष: । यथा, पुराणम् ।
"अधोऽध: पश्यत: कस्य महिमा नोपजायते ।
उपर्य्युपरि पश्यन्त: सर्व्व एव दरिद्रति ॥"
(मन्त्रिविशेषस्य सुत: । यथा, राजतरङ्गिण्याम् । ६ । २२० ।
"सम्भय चक्रुर्दराज्यं महिम्न: पक्षमाश्रिता: ॥")

महिर:, पुं, (मह्यते पूज्यते इति । मह + "सलिकल्यनिमहीति ।" उणा० । १ । ५५ । इति इलच् । लस्य रत्वम् ।) सूर्य्य: । इति त्रिकाण्डशेष: ॥

महिला, स्त्री, (मह्यत इति । मह पूजायाम् + "सलिकल्यनिमहीति ।" उणा० । १ । ५५ । इति इलच् टाप् ।) स्त्रीमात्रम् । प्रियङ्गुलता । इत्यमर: ।२ । ६ ।२ ॥ रेणुकानामकगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥ मदमत्ता स्त्री । इति शब्दरत्नावली ॥

महिलाह्वया, स्त्री, (महिला इत्याह्वयो यस्या: ।) प्रियङ्गुलता । इत्यमर: ।२।४। ५५ । (यथास्या: पर्य्याय: ।
"प्रियङ्गु: फलिनी कान्ता लता च महिलाह्वया ।
गुन्द्रा गुन्द्रफला श्यामा विष्वक्सेनाङ्गनाप्रिया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महिष:, पुं, (मंहति पूजयति देवाननेनेति । महि + "अविमह्योष्टिषच् ।" उणा० । १ । ४६ । इति टिषच् ।) स्वनामख्यातपशुविशेष: । तत्पर्य्याय: । लुलाप: २ वाहद्विषन् ३ कासर: ४ सैरिभ: ५ । इत्यमर: । २ । ५ । ४ । यमवाहन: ६ विषज्वरन् ७ वंशभीरु: ८ रजस्वल: ९ । इति शब्दरत्नावली ॥ आनूप: १० रक्ताक्ष: ११ अश्वारि: १२ । इति जटाधर: ॥ क्रोधी १३ कलुष: १४ मत्त: १५ विषाणी १६ गवली १७ धर्मी १८ । तस्य परीक्षा यथा,—
"विपक्षे हयसन्त्रासं कुरुते येन हेतुना ।
भारं वहति वा दूरं महिषोऽस्मान्निरूप्यते ॥
ब्रह्मक्षत्त्रियविट्शूद्रान्त्यजभेदेन पञ्चधा ॥"
तद्यथा ।
'भृशं कृष्णा: पवित्राश्च दृढदृढघनघोणका: ।
बह्वाशिनो भारकाश्च महिषा ब्रह्मजातय: ॥१॥
केकरा: कामला: स्थूला भृशं क्रुद्धाश्च मारका: ।
बह्वाशिना बहुबला महिषा: क्षत्त्रजातय: ॥२॥
स्थूलाङ्गा: क्षीणशृङ्गाश्च सुक्रुद्धा भारवाहिन: ।
अमारका बहुबला महिषा वैश्यजातय: ॥३॥
क्षीणा: क्षीणबला: क्षीणशृङ्गघोणारवाश्च ये ।
अल्पाशिनो भारसहा महिषा: शूद्रजातय: ॥४॥
सर्व्वदा जलमिच्छन्ति येऽल्पसत्त्वा महौजस: ।
भारसहा: कृशशृङ्गाश्च तेऽन्त्यजा महिषा
मता: ॥ ५ ॥
एषां दोषा गुणा वापि शृषवल्लक्षयेद्बुध: ।
पोषणञ्चापि सस्थानं शृषतुल्यं तथा मतम् ॥"
इति युक्तिकल्पतरु: ॥
वनमहिषमांसगुणा: । दोषकारित्वम् । लघुत्वम् । दीपनत्वम् । बलदायित्वञ्च ॥ ग्रामीणमहिषमांसगुणा: । स्निग्धत्वम् । मलिनकरत्वम् । पित्तहरत्वञ्च । इति राजनिर्घण्ट: ॥ तर्पणत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधुरत्वम् । गुरुत्वम् । निद्रापुंस्त्वस्तन्यवर्द्धनत्वम् । मांसदार्ढ्यकृत्त्वञ्च । इति राजवल्लभ: ॥ अपि च ।
"महिषो घोटकारि: स्यात् कासरश्च रजस्वल: ।
पीनस्कन्ध: कृष्णकायो लुलापो यमवाहन: ॥
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम् ।
निद्राशुक्रबलस्तन्यतनुदार्ढ्यकरं गुरु ॥
तृष्यञ्च दृढशिश्नमत्त्वं वातपित्तास्रनाशनम् ।"
इति भावप्रकाश: ॥
श्मश्रुधारिक्षत्त्रजातिविशेष: ॥ स च पुरा क्षत्त्रिय आसीत् सगरराजेनास्य वेदयागादावनधिकारो वेशान्यत्वं धर्म्मनाशश्च कृत: । यथा, हरिवंशे ।
"सगरस्तां प्रतिज्ञाञ्च गुरोर्व्वाक्यं निशम्य च ।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह ॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत् ।
यवनानां शिर: सर्व्वं काम्बोजानां तथैव च ॥
पारदा मुक्तकेशाश्च पह्लवा: श्मश्रुधारिण: ।

निःस्वाध्यायवषट्कारा: क्षत्रास्तेन महात्मना ॥
शका यवनकाम्बोजा: पारदा: पह्लवास्तथा ।
कोलिसर्पा: समहिषा दार्व्वाश्चोला: सकेरला: ।
वशिष्ठवचनाद्राजन् ! सगरेण महात्मना ॥”
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
अर्हद्ध्वजविशेष: । इति हेमचन्द्र: । ४ । ३४७ ॥
महिषासुर: । यथा, मार्कण्डेये । ८२ । १-२ ।
“महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ।
तत्रासुरैर्म्महावीर्य्यैर्देवसैन्यं पराजितम् ॥
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुर: ॥”
(देवगणभेद: । यथा, निरुक्ते । ७ । २६ । “अपा-
मुपस्थे महिषा अगृभ्णत विशो राजानमुपतस्थु
ऋग्मियम् ।” महिषा: माध्यमिका देवगणा: ।
अथवा महिषा: त एव “महान्त: ।” इति
तट्टीकायाम् दुर्गाचार्य्य: ॥ कुशद्वीपस्थपर्व्वत-
विशेष: । यथा, मात्स्ये । १२१ । ५६ ।
“षष्ठस्तु पर्व्वतस्तत्र महिषो मेघसन्निभ: ॥”
अग्निविशेष: । यथा, तत्रैव । १२१ । ६० ।
“तस्मिन् सोऽग्निर्निवसति महिषो नाम योऽप्-
सुज: ।”
कुशद्वीपस्य वर्षविशेष: । यथा, तत्रैव । १२१ ।
६८ ।
“महिषं महिषस्यापि पुनश्चापि प्रभाकरम् ॥”
कृताभिषेक: भूपाल: ।
‘कृताभिषिक्ते भूपाले लुलापे महिष: स्मृत: ॥’
इत्यमरटीकायां भरत: ॥ देशभेद: । यथा, वृहत्-
संहितायाम् । ६ । १० ।
“भरणीपूर्व्वं मण्डलमेतच्चतुष्कं सुभिक्षकर-
माद्यम् ।
यन्नाङ्गमहिषवाङ्गिककलिङ्गदेशेषु भयजन-
नम् ॥”
अनुह्रादस्य पुत्रभेद: । यथा, भागवते । ६ ।
१८ । १६ ।
“अनुह्रादस्य सूर्य्यायां वास्कलो महिषस्तथा ॥”
साध्यापुत्र: । यथा, हरिवंशे । १६६ । ४५ ।
“महिषश्च ननूजश्च विज्ञानमनसावपि ॥”)

महिषकन्द:, पुं, (महिषाख्यया प्रसिद्ध: कन्द: ।)
महाकन्दविशेष: । तत्पर्य्याय: । शुभ्रालु: २
लुलापकन्द: ३ शुक्लकन्द: ४ महिषीकन्द: ५ ।
अस्य गुणा: । कटुत्वम् । उष्णत्वम् । कफवाता-
मयापहत्वम् । सुखगात्रहरत्वम् । रुच्यत्वम् ।
असितश्चेत् महासिद्धिकरत्वञ्च । इति राज-
निर्घण्ट: ॥

महिषघ्नी, स्त्री, (महिषं महिषासुरं हन्तीति ।
हन्+बाहुलकात् टक् । ङीप् ।) दुर्गा ।
यथा, दुर्गोत्सवपद्धतौ ।
“महिषघ्नि ! महामाये चामुण्डे मुण्ड-
मालिनि ! ।
आयुरारोग्यविजयं देहि देवि ! नमोऽस्तु ते ॥”
अपि च । देवीपुराणे ।
“सिंहमारुह्य कन्यान्ते निहतो महिषो यथा ।
महिषघ्नी ततो देवी कन्या वै सिंहवाहिनी ॥”

महिषध्वज:, पुं, (महिषो ध्वजचिह्नं वाहनत्वेन
यस्य ।) यम: । अर्हद्विशेष: । इति हेमचन्द्र: ।
२ । ६६ ॥

महिषमर्द्दिनी, स्त्री, (महिषं महिषाख्यमसुरं
मर्द्दयतीति । मर्द्द+णिनि: । ङीप् ।) दुर्गा ।
इति शब्दरत्नावली ॥ अस्या मन्त्रो यथा, शार-
दायाम् ।
“मान्तं वियत् सनयनं श्वेतो मर्द्दिनि ठद्वयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ॥”
नारायणीतन्त्रे ।
“विषं हि मज्जा कालोऽग्निरद्रिरस्थो निठ-
द्वयम् ॥”
विषं मकार: । हि स्वरूपम् । मज्जा षकार: ।
कालो मकार: । अग्नी रेफ: । अद्रिर्दकार: ।
इस्थ इति वचनादिकारयुक्तो दकार: । अयं
मन्त्रस्तारादिर्मायादि: कामादिर्वाग्भवादि-
र्व्वधूबीजादि: कवचादिश्च नवाक्षर: । तथा च
विश्वसारे ।
“प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधी: ।
वधूबीजादिकां वापि कवचाद्यां जपेत्तथा ॥
सर्व्वकालेषु सर्व्वत्र कामाद्यां प्रजपेत् सुधी: ।
वाग्भवाद्यां जपेत्तान्तु देवीं वाक्यविशुद्धये ॥
अस्या ध्यानम् । गारुडोपलसन्निभां मणिमय-
कुण्डलमण्डितां नौमि भालविलोचनां महिषो-
त्तमाङ्गनिषेदुषीम् । शङ्खचक्रकृपाणखेटकबाण-
कार्म्मुकशूलकान् तर्ज्जनीमपि बिभ्रतीं निज-
बाहुभि: शशिशेखराम् ॥ इति तन्त्रसार: ॥

महिषवल्ली, स्त्री, (महिषशब्दवाच्या वल्ली ।
शाकपार्थिवादिवत् समास: ।) लताविशेष: ।
छिरहिट्टी इति हिन्दी भाषा ॥ तत्पर्य्याय: ।
सौम्या २ प्रतिसोमा ३ अमृतवल्लिका ४ खण्ड-
शाखा ५ । अस्या गुणा: । रसवीर्य्यविपाके
सोमवल्लीसमत्वम् । इति राजनिर्घण्ट: ॥

महिषवाहन:, पु, (महिषो वाहनं यस्य ।) यम: ।
इति शब्दरत्नावली ॥

महिषासुर:, पुं, (महिष एव महिषाख्यो वा
असुर: ।) रम्भासुरपुत्र: । तस्य उत्पत्तिर्यथा,—
श्रीऔर्व्व उवाच
“आराधितो महादेवो रम्भेण सुरवैरिणा ।
चिरेण स च सुप्रीतस्तपसा तस्य शङ्कर: ॥
अथ तुष्टो महादेव: प्रत्यक्षं रम्भमुक्तवान् ।
प्रीतोऽस्मि ते वरं रम्भ ! वरयस्व यथेप्सितम् ॥
एवमुक्त: प्रत्युवाच रम्भस्तं चन्द्रशेखरम् ॥
अपुत्त्रोऽहं महादेव ! यदि ते मय्यनुग्रह: ।
मम जन्मत्रये पुत्त्रो भवान् भवतु शङ्कर ! ॥
अवध्य: सर्व्वभूतानां जेता च त्रिदिवौकसाम् ।
चिरायुश्च यशस्वी च लक्ष्मीवान् सत्यसङ्गर: ॥
एवमुक्तस्तु देवेन प्रत्युवाच वृषध्वज: ।
भवत्वेतदाङ्क्षितन्ते भविष्यामि सुतस्तव ॥
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत ।
रम्भोऽपि यात: स्वस्थानं हर्षोत्फुल्लविलो-
चन: ॥
पथि गच्छन् स रम्भोऽथ ददर्श महिषीं
शुभाम् ।
त्रिहायणीं चित्रवर्णां सुन्दरीं ऋतुशालिनीम् ॥
स तां दृष्ट्वाथ महिषीं रम्भ: कामेन मोहित: ।
दोर्भ्यां गृहीत्वा च तदा चकार सुरतोत्सवम् ॥
तयो: प्रवृत्ते सुरते सा तदा तस्य तेजसा ।
दधार महिषी गर्भं तदाभून्महिषासुर: ॥
तस्यां स्वाङ्गेषु गिरिशस्तत्पुत्रत्वमवाप्तवान् ।
ववृधे स तदा वाग्भि: शुक्लपक्षे यथोडुराट् ॥”
तस्य योषिद्वध्यत्वं यथा,—
“तत्तु कात्यायनमुनि: शप्तवान् महिषासुरम् ।
दुर्णयं वीक्ष्य शिष्यार्थे शिष्यानुग्रहकारक: ॥
कात्यायनेन शप्तं तं विज्ञाय महिषासुरम् ।
प्राह प्रणयपूर्व्वन्तु चण्डिकां चन्द्रशेखर: ॥”
ईश्वर उवाच ।
“देवि ! कात्यायनेनापि शप्तोऽयं महिषा-
सुर: ।
योषिद्विनाशकर्त्रीति भवितेति जगन्मयि ! ।
नि:संशयन्त्वयैवास्य भविष्यति न संशय: ॥
मदीयो माहिष: कायस्त्वया देवि ! जगन्मयि ! ।
हन्तव्य: सततं योगयुक्त: पूर्व्वं परेऽपि च ॥
हरिर्हरिस्वरूपेण त्वां वोढुमक्षमोऽधुना ।
ममायं माहिष: कायस्तव वोढा भविष्यति ॥
इति पूर्व्वं महादेवो देवीं प्रार्थितवान् पुरा ॥
तेन देवी महादेवं जग्राह महिषासुरम् ॥
त्रिषु जन्मसु पुत्त्रोऽभूत् रम्भस्य भगवान्
शिव: ।
हरिश्चायं स रम्भोऽपि रम्भ एव व्यजायत ॥
असुरस्ताडशस्तेपे तप: परमदारुणम् ।
तथैवाराधित: शम्भु: पुत्त्रार्थे प्रददौ वरम् ॥
तथैव महिषीं भेजे प्रथमं सुरताय स: ।
तस्यां तथाभवद्घोरो दानवो महिषासुर: ।
तथैव शेपे भगवान् मुनि: कात्यायनस्तु तम् ॥
इति प्रवृत्ते पूर्व्वस्मिन् परस्मिन् स तु जन्मनि ।
महिष: पूजयित्वाथ देवीं वरमयाचत ॥
तृतीये जन्मनि वरं प्राप्य कल्पान्तशेषत: ।
नेह मे जन्म भवितेत्येवं वरमयाचत ॥
तेन देवीपदतले निलयेऽसोऽसुरोऽधुना ।
नोत्पत्तिरपि तस्यास्ति संवर्त्तांस्तान् बहून्
नृप ! ॥
एवं देवीप्रसादेन महादेवाङ्गसम्भव: ।
पराभवाप सततं प्रतिपत्तिं महासुर: ॥
इति ते कथितं राजन् ! यथा स महिषा-
सुर: ।
देवीपादतलं प्राप्य यथा सोऽद्यापि मोदते ॥”
इति कालिकापुराणे ५६ अध्याय: ॥ * ॥
अपि च ।
नारद उवाच ।
“कस्त्वासौ महिषो नाम रक्तबीजादयश्च के ।
कासौ कात्यायनी नाम या जघ्ने महिषा-
सुरम् ।
एतान् विस्तरतस्तात ! यथावद्वक्तुमर्हसि ॥”

पुलस्त्य उवाच ।
“शृणुत्व संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ।
सर्व्वदा वरदा दुर्गा सेयं कात्यायनी मुने ॥
सुरासुरवरौ रौद्रौ जगत्क्षोभकरावुभौ ।
रम्भश्चैव करम्भश्च द्वावास्तां सुमहाबलौ ॥
तावपुत्त्रौ च देवर्षे । पुत्त्रार्थं तेपतुस्तपः ।
बहुवर्षगणान् दैत्यौ स्थितौ पञ्चनदे जले ॥
तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमी ।
करम्भश्चैव रम्भश्च यक्षं मालवटं प्रति ॥
एकं निमग्नं सलिले ग्राहरूपेण वासवः ।
चरणाभ्यां समादाय निजघान यथेच्छया ॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः ।
वह्नौ स्वशीर्षं संछिद्य होतुमैच्छन्महाबलः ॥
ततः प्रगृह्य केशेषु खड्गञ्च रविसंप्रभम् ।
छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः ॥
उत्तिष्ठासुर । मा मैवं नाशयात्मानमात्मना ।
दुस्तरा परवध्यापि स्ववध्याप्यतिदुस्तरा ॥
यच्च प्रार्थयसे वीर । तद्ददामि यथेप्सितम् ।
मा म्रियस्व मृतस्येह नष्टा भवति वै कथा ॥
ततोऽब्रवीद्वचो रम्भो वरं चेन्मे ददासि हि ।
त्रैलोक्यविजयी पुत्त्रः स्यान्मे त्वत्तेजसाधिकः ॥
अजेयो दैवतैः सर्व्वैः पुंभिर्दैत्यैश्च पावक । ।
महाबलो वायुरिव कामरूपी कृतास्त्रवित् ॥
तं शर्व्वाच कविर्ब्रह्मन् । वाढ़मेवं भविष्यति ।
यस्यां चित्तं समालम्बि करिष्यसि ततोऽसुर । ॥
इत्येवमुक्तो देवेन वह्निना दानवो ययौ ।
यष्टुं सुनिवटं यक्षं यक्षैश्च परिवारितम् ॥
तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः ।
गजाश्च महिषाश्चाश्वा गावोऽजाविपरिप्लुताः ॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः ।
महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन । ॥
समागच्छच्च दैत्येन्द्रं कामयन्ती तरस्विनं ।
स चाभिगमनं चक्रे भवितव्यप्रचोदितः ॥
तस्यां समभवद्गर्भस्तां प्रगृह्याथ दानवः ।
पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥
दृष्टश्च दानवैः सर्व्वैः परित्यक्तश्च बन्धुभिः ।
अकार्य्यं कारयत्येवं भूयो मालवटं गतः ॥
सापि तेनैव पतिना महिषी चारुदर्शना ।
समं जगाम तत्पुण्यं यक्षमण्डलमुत्तमम् ॥
ततस्तु वसतस्तस्य श्यामा सा सुषुवे सुते ! ।
अजीजनत् सुतं शुभ्रं महिषं कामरूपिणम् ॥”
इति वामनपुराणे १७ अध्यायः ॥ * ॥
अन्यच्च । धरण्युवाच ।
“या सा माया शरीरात्तु ब्रह्मणोऽव्यक्तजन्मनः ।
गायत्र्यष्टभुजा भूत्वा वेत्रासुरमयोधयत् ॥
सैव नन्दाभवद्देवी देवकार्य्यचिकीर्षया ।
महिषाख्यासुरवधं कुर्व्वती शङ्करीरिता ॥
वैष्णवी च हतो देव । कथमेतद्धि संशयः ॥
वराह उवाच ।
इयं जगद्धिता देवी गङ्गा शङ्करसुप्रिया ।
काचित् किञ्चि भवेद्दृष्टं सपदं वेद सर्व्ववित् ।
स्वायम्भुवे हतो दैत्यो वैष्णव्या मन्दरे गिरौ ॥
महिषाख्योऽपरः पश्चात् स वै चेत्रासुरः पुनः ।
नन्दया निहतो विन्ध्ये महाबलपराक्रमः ॥
अथवा ज्ञानशक्तिः सा महिषोऽज्ञान-
मूर्त्तिमान् ।
अज्ञानं ज्ञानसाध्यन्तु भवतीति न संशयः ॥
मूर्त्तिपक्षे चेतिहाससमूर्त्तं चैकवद्धृदि ।
ध्यायते वेदवाक्यैस्तु इह सा वेदवादिभिः ॥”
इति वराहपुराणम् ॥
महिषासुरसम्भवः, पुं, (महिषासुरात् तत्क्लेदः सम्भवतीति । सम्+भू+अच् ।) भूमिज-गुग्गुलुः । इति राजनिर्घण्टः ।
महिषासुरहन्त्री, स्त्री, (हन्+तृच्+ङीप् । महिषासुरस्य हन्त्री ।)दुर्गा । यथा,—
“महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने ।”
इति प्रतिष्ठातत्त्वधृतपद्मपुराणवचनम् ॥
महिषाक्षः, पुं, (महिषस्य अक्षीवेति । “अक्ष्णो-ऽदर्शनात् ।”५।४।७६। इति समासान्तोऽच ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
“जटायुः कालनिर्य्यासः कौशिको गुग्गुलुः
पुरः ।
देवधूपः सर्व्वसहो महिषाक्षः पलङ्कषा ॥”
इति वैद्यकरत्नमालायाम् ॥
अस्य व्यवहारविषयो यथा,—
“महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ॥
कदाचिन्महिषाक्षश्च वनः कैश्चिन्नृणामपि ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
महिषाक्षकः, पु, (महिषाक्ष । स्वार्थे कन् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥
महिषी, स्त्री, (महिषस्य कृताभिषेकस्य नृपस्य पत्नी । “पुंयोगादाख्यायाम् ।” ४ । १ । ४८ । इति ङीष् ।) कृताभिषेका राजपत्नी । इत्य-मरः । २ । ६ । ५ ॥ (यथा, रघौ । २ । २५ ।
“इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥”)
सैरिन्ध्री । औषधिभेदः । इति मेदिनी । षे,४३॥
महिषयोषित् । तत्पर्य्यायः । मन्दगमना २ महाक्षीरा ३ पयस्विनी ४ तुलापकान्ता ५ कलुषा ६ तुरङ्गद्विषणी ७ ॥ अस्याः क्षीर-गुणाः । मधुरत्वम् । विपाके शीतलत्वम् । गुरुत्वम् । बलपुष्टिप्रदत्वम् । वृष्यत्वम् । पित्तदाहास्रनाशित्वञ्च ।
“माहिषं मधुरं गव्यात् स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम् ॥
तस्या दधिगुणाः । मधुरत्वम् । स्निग्धत्वम् । श्लेष्मकारित्वम् । रक्तपित्तनाशित्वम् । बलास-वर्द्धनत्वम् । बल्यत्वम् । श्रमघ्नत्वम् । शोधन-त्वञ्च ।
“माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वस्रदूषणम् ॥*॥”
अस्या नवनीतगुणाः । कषायत्वम् । मधुर-रसत्वम् । शीतत्वम् । वृष्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । तुन्ददत्वञ्च ।
“नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥”
अस्या घृतगुणाः । उत्तमत्वम् । धृतिकरत्वम् । सुखदत्वम् । कान्तिदत्वम् । वातश्लेष्मनाशित्वम् । बलकरत्वम् । वर्णप्रदाने क्षमत्वम् । दुर्नाम ग्रहणीविकारशमनत्वम् । मन्दानलोद्दीप-नत्वम् । चक्षुष्यत्वम् । गव्यतो न श्रेष्ठत्वम् । हृद्यत्वम् । मनोहारित्वञ्च ।
“माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते ॥”
इति भावप्रकाशः ॥ * ॥
अस्या मूत्रगुणाः । आनाहशोफगुल्मदोष-नाशित्वम् । कटुत्वम् । उष्णत्वम् । कुष्ठ-कण्डूनिर्मूलोदररोगनाशित्वञ्च । इति राज-निर्घण्टः ॥ (अस्या दुग्धगुणाश्च यथा चरके, सूत्रस्थाने २७ अध्याये ।
“महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहान्न्यूनमनिद्राय हितमत्यग्नये च तत् ॥”
महिषीप्रिया, स्त्री, (महिषीणां प्रिया ।) मूला-तृणम् । इति राजनिर्घण्टः ॥
मही, स्त्री, (मह्यते इति । मह+अच् । मह +“गौरादिभ्यश्च । ४ । १ । ४१ । इति ङीष् । यद्वा, महि । कृदिकारादिति ङीष् ।) पृथिवी । इत्यमरः । २ । १ । ३ । (यथा विष्णुपुराणे । १ । ४ । २६ ।
“उत्तिष्ठतस्तस्य जलार्द्रकुक्षे
र्महावराहस्य महीं विधार्य्य ।
विधून्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयो जपन्ति ॥”)
नदीविशेषः । सा च मालवदेशे वर्त्तते । इति मेदिनी । हे, । ७ ॥ तज्जलगुणाः ।
“महीजलन्तु सुस्वादु बल्यं पित्तहरं गुरु ।”
इति राजनिर्घण्टः ॥
गौः । इति जटाधरः ॥ हिलमोचिका । इति त्रिकाण्डशेषः ॥ (लोकः । यथा, ऋग्वेदे । ३ । ५६ । २ ।
“तिस्रो महीरुपरास्तस्थुः ॥”
“महीः लोकाः ।” इति तद्भाष्ये सायनः ॥)
महीक्षित्, पु, (मह्यां क्षयति ईष्टे । क्षि+क्विप् । तुक् च ।) राजा । इत्यमरः । २ । ८ । १ ॥ (यथा, महाभारते । ७ । ४४ । २४ ॥
“रथचर्य्यास्त्रमायाभिर्मोहयित्वा परन्तपः ।
बिभेद शतधा राजन् । शरीराणि महो-
क्षिताम् ॥”)
महीजं, क्ली, (मह्यां जायते इति । जन+डः ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ भूमि जाते । त्रि ॥ (यथा, महाभारते ।६।८७।३-४ ।
“आरट्टानां महीजानां सिन्धुजानाञ्च सर्व्वशः ।

नानायुधानां शुभ्राणां तथा पर्व्वतवासिनाम् ।
वाजिनां बहुभिः संघैः समन्तात् पर्य्यवारयन् ॥”)

महीजः, पुं, (मह्यां जातः । जन+डः ।) मङ्गलग्रहः । यथा, समयप्रदीपे ।

“रवौ रसाश्वी सितगौ हयाश्वी
वयं महीजे विधुजे शराद्रौ ।
गुरौ शराद्री भृगुजे हतीयं
शनौ रसाब्धमिति चपायाम् ॥”

महीध्रः, पुं, (महीं धरतीति । धृ+कः ।) पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (यथा, श्रीभागवते । २ । ७ । ३२ ।

“गोपैर्मखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्त्तोच्छिलीन्ध्रमिव सप्तदिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥”

महीं धरति उद्धरतीति । धृ+कः । महेन्द्रहर्त्ता । यथा, तत्रैव । ३ । १३ । २६ ।

“उत्क्षिप्तवालः खचरः कठोरः
सटा विधुन्वन् खररोमशत्वक् ।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान् महीध्रः ॥”

“महीध्रः पृथिव्या उद्धर्त्ता ।” इति तट्टीकायां स्वामी ॥)

महीपालः, पुं, (महीं पालयतीति । पाल+अण् ।) राजा । यथा, मार्कण्डेयपुराणे । ८८ । ६१ ।

“स पपात महीपृष्ठे शस्त्रसंघसमाहतः ।
नीरक्तश्च महीपाल ! रक्तवीजो महासुरः ॥”

(राजविशेषः । यथा, कथासरित्सागरे । ५६ । ७ ।

“चन्द्रस्वामिन् ! महीपालो नाम्ना कार्य्यः सुतस्त्वया ।
राजा भूत्वाचिरं यस्मात् पालयिष्यत्ययं महीम् ॥”)

महीप्राचीरं, क्ली, (मह्याः प्राचीरमिव । सर्व्वदिक्षु स्थितत्वात्तथात्वम् ।) समुद्रः । इति त्रिकाण्डशेषः ॥

महीभृत्, पुं, (महीं बिभर्त्ति धरतीति । भृ+क्विप् । “ह्रस्वस्य पिति कृति तुक् ।” ६ । १ । ७१ । इति तुगागमश्च ।) पर्व्वतः । यथा, कुमारसम्भवे । १ । २७ ।

“महीभृतः पुत्त्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा ॥”

(महीं बिभर्त्ति पालयतीति । भृ+क्विप् ।) राजा । यथा, मार्कण्डेयपुराणे । ८१ । १३ ।

“ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्व्वन्त्यन्यमहीभृताम् ॥”

महीमयः, त्रि, (मह्या विकारोऽवयवो वेति । मही+मयट् ।) मृत्तिकानिर्म्मितः । यथा, मार्कण्डेयपुराणे । ८३ । ७ ।

“तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं महीमयीम् ।
अर्हणाञ्चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥”

महीरुहः, पुं, (मह्यां रोहति जायते इति । रुह+कः ।) वृक्षः । इत्यमरः । २ । ४ । ५ । (यथा, विष्णुपुराणे । १ । १५ । १ ।

“तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥”)

शाकवृक्षः । इति राजनिर्घण्टः ॥

महीलता, स्त्री, (मह्या लतेव ।) किञ्चुलुकः । इत्यमरः । १ । १० । २१ ॥ (विशेषोऽस्याः किञ्चुलुकशब्दे ज्ञातव्यः ॥)

महीसुतः, पुं, (मह्याः सुतः ।) मङ्गलः । इत्यमरः । १ । ३ । २५ ॥ (यथा, बृहत्संहितायाम् । १०४ । १४ ।

“रिपुजनकोपभयानि पञ्चमे
तनयकृताश्च शुचो महीसुते ।
द्युतिरपि नास्य चिरं भवेत् स्थिरा
शिरसि कपेरिव मालती लता ॥”)

महेच्छः, पुं, (महती इच्छा यस्य । इत्यस्य सामासिकः ।) महाशयः । इत्यमरः । ३ । १ । ३ ॥ (यथा, बृहत्संहितायाम् । १६ । ६८ ।

“प्रत्यन्तनृपमहेच्छव्यवसायपराक्रमोपेताः ॥”)

महेन्द्रः, पुं, (महांश्चासाविन्द्रश्च ऐश्वर्य्यवानित्यर्थः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ शक्रः । (यथा, भागवते । ६ । १३ । ३ ।

“ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रवीत् ॥”)

जम्बुद्वीपस्य पर्व्वतविशेषः । इति मेदिनी । रे, २०० ॥ (स च सप्तकुलाचलानामन्यतमः । यथा, मार्कण्डेये । ५७ । १० ।

“महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥”)

महेन्द्रकदली, स्त्री, (महेन्द्रसम्भवा तद्वर्णा वा कदली ।) कदलीभेदः । इति राजनिर्घण्टः ॥

महेन्द्रनगरी, स्त्री, (महेन्द्रस्य नगरी ।) अमरावती । इति शब्दरत्नावली ॥

महेन्द्रवारुणी, स्त्री, (महेन्द्रवरुणयोरियं प्रियत्वात् । अण् । ङीप् ।) लताविशेषः । वड़ माकाल इति भाषा ॥ तत्पर्य्यायः । चित्रवल्ली २ महाफला ३ महेन्द्री ४ चित्रफला ५ अपुसी ६ अपुसा ७ आत्मरक्षा ८ विशाला ९ दीर्घवल्ली १० मधुफला ११ महद्वारुणी १२ वृहत्फला १३ इन्द्रवारुणी १४ सौम्या १५ गजचिर्भिटा १६ चित्रदेवी १७ धनुःश्रेणी १८ आत्मकर्णी १९ मरुसम्भवा २० । अस्या गुणाः । इन्द्रवारुणीगुणभागित्वम् । रसे वीर्य्ये विपाके च किञ्चिद्गुणाधिकत्वञ्च । इति राजनिर्घण्टः ॥

महेन्द्राणी, स्त्री, (महेन्द्रस्य भार्य्येति । महेन्द्र । “पुंयोगादाख्यायाम् ।” ४ । १ । ४८ । इति ङीष् । “इन्द्रवरुणेति ।” ४ । १ । ४९ । इति आनुगागमः ।) इन्द्रभार्य्या । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ४१ । १३ ।

“ततो मुहूर्त्ताद्भगवानैरावतशिरोगतः ।
आजगाम महेन्द्राण्या शक्रः सुरगणैर्वृतः ॥”)

महेरणा, स्त्री, (महत् ईरणं प्रेरणमस्याः । यद्वा, महं गजोत्सवमीरयतीति । ईर+ल्युः । टाप् ।) शल्लकीवृक्षः । इत्यमरः । २ । ४ । १४ ॥ महेरुणा इत्यपि पाठः । इत्यमरटीकायां भरतः ॥ (यथास्याः पर्य्यायः ।

“शल्लकी गजभक्ष्या च सुवहा सुरभीरसा ।
महेरणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महेला, स्त्री, (महाते पूज्यते इति । मह+ “सलिकल्यनिमहीति ।” उणा० १ । ५५ । इति इलच् । पृषोदरादित्वादिकारस्यैकारः । यद्वा महस्योत्सवस्य इला भूमिः ।) नारी । इति शब्दरत्नावली ॥ (यथा, नलोदये । २ । ५८ ।

“ससमुद्रमहेलाभिस्फुरित-
गुणाभिस्ततसारमहेलाभि
श्रीः प्रवरमहेलाभिस्त्वचैव
युवपंक्तिभिः परमहेलाभिः ॥”)

महेलिका, स्त्री, (महेल+स्वार्थे कन् । टाप् । अकारस्येत्वम् ।) नारी । इति शब्दरत्नावली ॥

महेशः, पुं, (महान् ईशः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, शिवध्यानम् ।

“ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम् ॥”)

महेशबन्धुः, पुं, (महेशो बध्यते वशीक्रियते येन तत्पत्त्रार्पणजन्यत्वात् ।) श्रीफलवृक्षः । इति शब्दचन्द्रिका ॥

महेश्वरः, पुं, (महांश्चासावीश्वरश्च कर्त्तुमकर्त्तुमन्यथाकर्त्तुं वा समर्थः । यद्वा, महत्या महामायया ईश्वरः ।) शिवः । इत्यमरः । १ । १ । ३२ ॥ अस्य व्युत्पत्तिर्यथा,—

“विश्वस्थानाञ्च सर्व्वेषां महतामीश्वरः स्वयम् ।
महेश्वरञ्च तेनेमं प्रवदन्ति मनीषिणः ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥

अस्य विवाहस्मरणफलं यथा,—

“महेश्वरसमायुक्तमोढ्रशं यः स्मरेत् सदा ।
सततं तस्य कल्याणं वाञ्छितञ्च भविष्यति ॥”

इति कालिकापुराणे शिवविवाहे ४२ अध्यायः ॥

(परमेश्वरः । तदुक्तं न्यायशास्त्रे ।

वायोर्नवैकादश तेजसो गुणा
जलक्षितिप्राणभृतां चतुर्द्दश ।
दिक्कालयोः पञ्च षडेव चाम्बरे
महेश्वरेऽष्टौ मनसस्तथैव च ॥”

महान् ईश्वरः प्रजानां प्रभुः । ऐश्वर्य्यशाली राजा । यथा, महाभारते । १ । १९८ । २६ ।

“ततः शकोऽतिसंक्रुद्धस्त्रिदशानां महेश्वरः ।
पाकरं गजमास्थाय तावुभौ समुपाद्रवत् ॥”)

महेश्वरकरच्युता, स्त्री, (महेश्वरस्य करात् च्युता ।) करतोया नदी । इति केचित् ॥ गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्

करस्य तोयं विद्यतेऽत्रेति करतोया। इत्यमरटीकायां भरतश्च ॥

महेश्वरी, स्त्री, (महेश्वरस्य स्त्री। महेश्वर+ ङीष्। महती चासौ ईश्वरी महदादीनां नियन्त्रीति वा।) महेश्वरपत्नी। यथा,—

"ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम्।
श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी॥"

इति तन्त्रसारे भुवनेश्वरीकवचम्॥

अपराजिता। इति शब्दचन्द्रिका॥ कांस्यम्। इति हेमचन्द्रः। ४। ११४॥ राजरीतिः। इति राजनिर्घण्टः॥

महैरण्डः, पुं, (महांश्चासावेरण्डश्च।) स्थूलैरण्डः। इति राजनिर्घण्टः॥

महैला, स्त्री, (महती चासावेला च।) स्थूलैला। इति राजनिर्घण्टः॥ (गुणादिविषयोऽस्याः स्थूलैलाशब्दे द्रष्टव्यः॥)

महोक्षः, पुं, (महान् उक्षा। "अचतुरविचतु-रेति।" ५। ४। ७७। इति समासान्तः अच्। निपातितश्च।) वृहद्वृषः। इत्यमरः। २। ९। ६१॥ तत्पर्य्यायः। वृषभः २ वृषः ३ पुङ्गवः ४ बली ५ गोनाथः ६ ऋषभः ७ गोप्रियः ८ उक्षा ९ गोपतिः १०। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। ६०। ६६।

"महोक्षः स त्वया दृष्टः संख्यस्य कृतो यदि।
तदिहानय तं युक्त्या तावत् पश्यामि
कीदृशः॥")

महोटिका, स्त्री, (महान्तः फलेभ्यः स्थूला उटाः पत्राण्यस्याः। ततः स्वार्थे कन्। टाप्। अकारस्येत्वम्।) वृहती। इति राजनिर्घण्टः॥

महोटी, स्त्री, (महान्त उटाः पत्राणि यस्याः।) वृहती। इति भावप्रकाशः॥ वृहद्गुत्पलश्च॥

महोत्क, स्त्री, (महान् उत्कः दर्शनोत्सुको लोको यस्याः।) विद्युत। इति केचित्॥

महोत्पलं, क्ली, (महच्च तत् उत्पलञ्च।) पद्मम्। सारसपक्षी। इत्यमरः। १। १०। ३६॥

महोत्सवः, पुं, (महांश्चासावुत्सवश्च।) अतिशयसुखजनककर्म्म। यथा,—

"सर्व्वैश्च जन्मदिवसे स्नातैर्म्मङ्गलपाणिभिः।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः॥
स्वनक्षत्रञ्च पितरौ तथा देवप्रजापतिः।
प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः॥"

इति तिथ्यादितत्त्वे ब्रह्मपुराणवचनम्॥

अपि च। कालिकापुराणे ६९ अध्याये।

"दुर्गातन्त्रेण मन्त्रेण कुर्य्याद्दुर्गामहोत्सवम्।
महानवम्यां शरदि बलिदानं नृपादयः॥"

महोत्साहः, त्रि, (महान् उत्साहो यस्य।) अतिशयोत्साहयुक्तः। (यथा, महाभारते।५।५१।१।

"सर्व्व एते महोत्साहा ये त्वया परिकीर्त्तिताः।
एकतस्त्वेव ते सर्व्वे समेता भीम एकतः॥")

तत्पर्य्यायः। महोद्यमः २। इत्यमरः। ३।१।३॥ (विष्णुः। यथा, महाभारते।१३।१४९।११।

"अतीन्द्रियो महामायो महोत्साहो महाबलः॥")

महोत्साहः, पुं, (महान् उत्साहो यस्य।) राज्याङ्गप्राप्तराजपुरुषः। यथा,—

"सम्पन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः॥"

इति शब्दमाला॥

अतिशयोद्यमश्च॥

महोदधिः, पुं, (महांश्चासावुदधिश्च।) समुद्रः। यथा, महानाटके।

"लङ्का दग्धा वनं भग्नं लङ्घितश्च महोदधिः।
यत् कृतं रामदूतेन स रामः किं करिष्यति॥"

महोदयं, क्ली, (महान् उदय उन्नतिर्यस्मिन्।) पुरविशेषः। तत्पर्य्यायः। कान्यकुब्जम् २ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुशस्थलम् ६। इति हेमचन्द्रः॥

महोदयः, पुं, (महान् उदयः समुन्नतिर्यस्मिन्।) कान्यकुब्जदेशः। आधिपत्यम्। (महान् उदय उत्कर्षो यस्मिन्।) अपवर्गः। इति मेदिनी। ये, १२६॥ (महान् उदय उत्कर्षो यस्य।) स्वामी। इति हेमचन्द्रः। ३। ४९७॥ (महान् उदयः फलं यस्मिन् यस्माद्वा। महाफले, त्रि। यथा, मनौ। ७। ५५।

"अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥"

"महोदयं महाफलम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

महोदया, स्त्री, (महानुदयो यस्याः। टाप्।) नागबला। इति राजनिर्घण्टः॥

महोदरी, स्त्री, महाशतावरी। इति भावप्रकाशः॥ (महत् उदरमस्य।) वृहदुदरयुक्ते, त्रि॥ (महच्च तदुदरञ्च। वृहदुदरं, क्ली। यथा, श्रीभागवते। ९। ७। १७।

"पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम्।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत॥"

पुं, नागविशेषः। यथा, महाभारते। १। ३५। १६।

"कर्कराककरौ नागौ कुण्डोदरमहोदरौ॥"

दानवविशेषः। यथा, तत्रैव। १। ६५। ५५।

"एकपादेकचक्रश्च विरूपाक्षमहोदरौ॥"

धृतराष्ट्रस्य पुत्रविशेषः। यथा, तत्रैव। १। ६७। ९७।

"सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ।")

महोद्यमः, त्रि, (महान् उद्यमो यस्य।) महोत्साहः। इत्यमरः। ३। १। ३। (यथा, राजतरङ्गिण्याम्। ५। १४१।

"अथ निर्ज्जित्य दायादांस्तथा लक्ष्मीं क्षितीश्वरः।
जिगीषुर्द्दिग्विजयं कर्त्तुं श्रीमानासीन्महोद्यमः॥"

महानुद्यमः।) अतिशयोद्योगे, पुं॥

महोन्नतः, पुं, (महानतिशय उन्नतः।) तालवृक्षः। इति भावप्रकाशः॥ अत्युन्नतियुक्ते, त्रि॥

महोन्नतिः, स्त्री, (महती चासावुन्नतिश्च।) अतिशयवृद्धिः। यथा,—

"भूयात्ते महदैश्वर्य्यं पुत्रादीनां महोन्नतिः।
अव्याधिना शरीरेण चिरं जीव सुखी भव॥"

इत्युद्भटः॥

महोन्मदः, पुं, (महानतिशय उन्मदः।) मत्स्यविशेषः। फलुइ इति भाषा। यथा,—

"राजग्रीवश्चित्रफलः फलकी च महोन्मदः॥"

इति शब्दरत्नावली॥

अत्युन्मत्ते त्रि॥

महोरगं, क्ली, (महान् उरग इव।) तगरमूलम्। इति रत्नमाला॥

महोरगः, पुं, (महांश्चासावुरगश्च।) सर्पगणविशेषः। इति हेमचन्द्रः। २। ४॥ वृहत्सर्पमात्रञ्च॥ (यथा, भागवते। ८। १०। ४७।

"महोरगाः समुत्पेतुः दन्दशूकाः सवृश्चिकाः॥")

महोल्का, स्त्री, (महती चासावुल्का च।) उल्काविशेषः। यथा,—

"विद्युत्स्तनितनिर्घातमहोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥
महोल्कानाञ्च संप्लवं इतस्ततोऽनेकमहोल्कानां सन्निपाते। उल्कालक्षणमाह बृहद्वशिष्ठः।
"बृहच्छिखा च रक्ताग्रा रक्तनीलशिखोज्ज्वला।
पौरुषी च प्रमाणेन उल्का नानाविधा
स्मृता॥"

इति तिथ्यादितत्त्वम्॥

महौजाः, [स्] त्रि, अतितेजोयुक्तः। महदोजो यस्येति विग्रहे बहुव्रीहौ प्रथमैकवचने अत्वसोऽश्वावित्यनेन दीर्घे कृते महौजा इतिपदं निष्पन्नम्॥ (यथा, मनौ। १। ६१।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे।
सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः॥"

कालेयपुत्रासुरविशेषः। यथा, महाभारते १। ६७। ५३।

"पञ्चमस्तु बभूवैषां प्रवरो यो महासुरः।
महौजा इति विख्यातो बभूवेह परन्तपः॥")

महौषधं, क्ली, (महत् औषधम्।) भूम्याहुल्यम्। शुण्ठी। (पर्य्यायो यथा,—

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

लशुनम्। (पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

वाराहीकन्दः। वत्सनाभः। इति राजनिर्घण्टः॥ पिप्पली। इति शब्दचन्द्रिका॥ अतिविषा। इत्यमरः।२।९।३८॥ (महाभेषजम्। यथा, कथासरित्सागरे। ६६। ९९।

"स्वभर्त्तॄन् प्रेष्य तेषाञ्च महासत्त्वान्महौषधैः।
चिकित्सां कारयामासुर्गीतसुखञ्च तद्गतिकान्॥")

महौषधिः, स्त्री, (महती ओषधिः ।) दूर्व्वा । लज्जालुक्षुपः । इति शब्दचन्द्रिका ॥ महा-प्राणीयद्रव्यविशेषः । यथा,—
"सहदेवी तथा व्याघ्री बला चातिबला तथा ।
शङ्खपुष्पी तथा सिंही अष्टमी च सुवर्च्चला ॥
महौषध्यष्टकं प्रोक्तं महास्नाने नियोजयेत् ॥"
इति गोविन्दानन्दधृतमत्स्यपुराणवचनम् ॥
अपिच ।
"पृश्निपर्णी श्यामलता भृङ्गराजः शतावरी ।
गुडूची सहदेवी च महौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥
श्रेष्ठौषधिश्च । (यथा, महाभारते ।३।२८८।६।
"विशल्यौ चापि सुग्रीवः चकारैतौ चकार ह ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया ॥"
सञ्जीवनी । यथा, रघौ । १२ । ६१ ।
"इष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥"
"महौषधीः सञ्जीवनी लतेव ।" इति तट्टीकायां मल्लिनाथः ॥)

महौषधी, स्त्री, (महौषधि + ङीप् ।) श्वेतकण्ट-कारी । ब्राह्मी । (पर्य्यायोऽस्या यथा,—
"ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कटुका । अतिविषा । इति राजनिर्घण्टः ॥ हिलमोचिका । इति त्रिकाण्डशेषः ॥

मा ङ य माने । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) ङ य मायते । इति दुर्गादासः ॥

मा ङ लि शब्दे । माने । इति कविकल्पद्रुमः ॥ (ह्वा०-आत्म०-सक०-अनिट् ।) ङ लि मिमीते । श्रुत्वा धर्म्मं मिमीते यः । इति हलायुधः ॥ इति तट्टीकायां दुर्गादासः ॥

मा ल माने । इति कविकल्पद्रुमः ॥ (अदा० पर०-सक०-अनिट् ।) ल माति भूमिं नतेन राजा ।
न मान्ति मानिनो यस्य यशस्त्रिभुवनोदरे ॥"
इति हलायुधः ॥ इति दुर्गादासः ॥

मा, व्य (मा + क्विप् ।) वारणम् । (यथा रामायणे । १ । २ । १५ ।
"मा निषाद । प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥")
विकल्पः । इति मेदिनी । अव्ययवर्गे, ४८ ॥

मा, स्त्री, (मा + क्विप् । यद्वा, मा + क । तत-ष्टाप् ।) लक्ष्मीः । इति मेदिनी । मे, १ । माता । (यथा, साहित्यदर्पणे । १० म ।
"मारमा सुषमा चारुरुचा मारवधूत्तमा ।
मात्तधूर्त्तनमावासा सा वामा मेऽस्तु मा रमा ॥")
मानम् । इत्येकाक्षरकोषः शब्दरत्नावली च ॥

मा, } त्रि, (अस्मद् + द्वितीयैकवचने । "त्वा
मां } मौ द्वितीयायाया ।" ८ । १ । २३ । इति मामित्यस्य स्थाने विकल्पेन मादेशः ।) मदीया कर्म्मता । आमाके इति भाषा ॥ अस्मच्छब्दात् द्वितीयैकवचननिष्पन्नं पदम् । इति व्याकरणम् ॥ (यथा, देवीभागवते । १ । ५ । ६६ ।
"सिन्धोः पुत्त्रीं रोषिता किं त्वमाद्ये ।
कस्मादेनां प्रेक्षसे नाथहीनाम् ।
क्षन्तव्यस्ते स्वांशजातापराधो
वृत्याप्येनं मोदितां मां कुरुष्व ॥")

मांसं, क्ली, (मन्यते इति । मन ज्ञाने + "मने-र्दीर्घश्च ।" उणा० ३ । ६४ । इति सः दीर्घश्च ।) रक्तजधातुविशेषः । मास् इति भाषा ॥ स तु गर्भस्थबालकस्याष्टभिर्मासैर्भवति । इति सुख-बोधः ॥ भागवतमते चतुर्भिर्मासैर्भवति । तत्प-र्य्यायः । पिशितम् २ तरसम् ३ पललम् ४ क्रव्यम् ५ आमिषम् ६ पलम् ७ । इत्यमरः ।२।६।६३॥ असजम् ८ जाङ्गलम् ९ कीरम् १० । सर्व्वमांस-गुणाः । वातनाशित्वम् । वृष्यत्वम् । बल्य-त्वम् । रुच्यत्वम् । बृंहणत्वम् । देशस्थानसात्म्य-संस्थास्वभावैर्भूयो नानारूपत्वञ्च ॥ * ॥ प्रसह-भूशयानूपवारिजवारिचारिमांसगुणाः । गुरु-त्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । शुक्रबर्द्धनत्वञ्च ॥ * ॥ विष्किर-प्रतुदजाङ्गलमांसगुणाः । लघुत्वम् । शीतत्वम् । मधुरत्वम् । कषायत्वम् । नृणां हितत्वञ्च ॥ * ॥ अङ्गविशेषमांसगुणाः ।
'एकदेहेऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम् ।
सर्व्वेषाञ्च शिरःस्कन्धश्रोणिचर्म्मयकृद्धृदम् ॥
पादपुच्छान्तमस्तिष्कमुष्कक्रोडाश्च मेहनाः ।
धातवः शोणिताद्याश्च गुरवः स्युर्यथोत्तरम् ॥
प्रशस्ताप्रशस्तमांसं यथा,—
'वयस्थं निर्व्विषं सद्योहतं मांसं प्रशस्यते ॥
मृतञ्च व्याधितं शुष्कं वृद्धं बालं विषैर्हतम् ।
अगोचरहतं व्याड्सूदितं मांसमुत्सृजेत् ॥'
अष्टविधा मांसयोनिर्यथा । प्रसहाः १ प्रसह्य-भक्षणात् कुररश्येनादयः । भूशयाः २ बिल-शायित्वात् नकुलगोधादयः । आनूपाः ३ खड्गमहिषवराहादयः । जलजाः ४ कुम्भीरा-दयः । जलेचराः ५ हंसवकप्रभृतयः । जाङ्गलाः ६ हरिणच्छागादयः । विष्किराः ७ विकीर्णचरणात् तित्तिरमयूरकुक्कुटादयः । प्रतुदाः ८ प्रतुद्यचरणात् कपोतपारावतादयः । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
'मांसं वातहरं सर्व्वं बृंहणं बलपुष्टिकृत् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥' * ॥
अथ तद्भेदाः ।
'मांसवर्गो द्विधा ज्ञेयो जाङ्गलानूपभेदतः ॥'
तत्र जाङ्गलस्य लक्षणं गुणाश्च ।
'मांसवर्गोऽत्र जङ्घाला विलस्थाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किराः प्रतुदा अपि ॥
प्रसहा अपि च ग्राम्या अष्टौ जाङ्गलजातयः ।
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ॥
बल्यास्ते बृंहणा वृष्या दीपना दोषहारिणः ।
मूकता मिन्मिनत्वञ्च गद्गदत्वार्द्दितं तथा ॥
बाधिर्य्यमरुचिं छर्द्दिं प्रमेहमुखजान् गदान् ।
श्लीपदं गलगण्डञ्च नाशयन्त्यनिलामयान् ॥' * ॥
अथानूपस्य लक्षणं गुणाश्च ।
'कूलेचराः प्लवाश्चापि कोषस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ।
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः ॥' * ॥
अथ जाङ्गलानां गणना विशिष्टा गुणाश्च ।
'हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गल-संज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋष्यो नीलाण्डको लोके सरोहः इति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ।
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ।
जङ्घालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥'
अथ विलेशयानां गणना गुणाश्च ।
'गोधाशशभुजङ्गाखुशल्लक्याद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ।
बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः ॥'
अथ गुहाशयानां गणना गुणाश्च ।
'सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा ।
बभ्रुजम्बुकमार्ज्जारा इत्याद्यास्तु गुहाशयाः ॥
स्थूलपुच्छो रक्तनेत्रो बभ्रुभेदः सनाकुलः ।
गुहाशया वातहरा गुरूष्णमधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविका-रिणाम् ॥'
अथ पर्णमृगाणां गणना गुणाश्च ।
'वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥
स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे हिताः ।
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥'
अथ विष्किराणां गणना गुणाश्च ।
'वर्त्तकालावविकिरकपिञ्जलकतित्तिराः ।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥
विकीर्य्य भक्षयन्त्येते यस्मात् तस्माद्धि विष्किराः ।
कपिञ्जला इति प्राज्ञैः कथिता गौरतित्तिराः ॥
विष्किरा मधुराः शीताः कषायाः कटुपाकिनः ।
बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥'
अथ प्रतुदानां गणना गुणाश्च ।
'कालकण्ठकहारीतकपोतशतपत्रकाः ।
सारिका खञ्जरीटश्च पिकाद्याः प्रतुदाः स्मृताः ॥
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ।

कपोतो धवलः पाण्डुः शतपत्रो हरिच्छुकः ।
प्रतुदा मधुराः पित्तकफघ्नास्तु वरा हिमाः ।
लघवो बद्धवर्च्चस्काः किञ्चिद्वातकराः स्मृताः ॥'
अथ प्रसहानां गणना गुणाश्च ।
'काको गृध्र उलूकश्च चिल्लश्च शशघातकः ।
चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः ।
प्रसहाः कीर्त्तिता एते प्रसह्याच्छिद्य भक्षणात् ।
प्रसहाः खलु वीर्य्योष्णाः तन्मांसं भक्षयन्ति ये ॥
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि ॥'
शशघातकस्थाने शतघातकोऽपि पाठः । बाज इति लोके ॥*॥ अथ ग्राम्याणां गणना गुणाश्च ।
'छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धनाः ॥'
अथ कूलेचराणां गणना गुणाश्च ।
'लुलापगण्डवाराहचमरीवारणादयः ।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यमी ॥
कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः ।
मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः ॥'
अथ प्लवानां गणना गुणाश्च ।
'हंससारसकाचाक्षवकक्रौञ्चशरारिकाः ।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः ॥
स्थूला कठोरा वृत्ता च यस्याश्चञ्चुपरिस्थिता ।
गुटिका चञ्चुसदृशी ज्ञेया नन्दीमुखीति सा ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥'
अथ कोषस्थानां गणना गुणाश्च ।
'शङ्खः शङ्खनखश्चापि शुक्तिशम्बूककर्कटाः ।
जीवा एवम्विधाश्चान्ये कोषस्थाः परिकीर्त्तिताः ॥
कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
बृंहणा बहुवर्च्चस्का वृष्याश्च बलवर्द्धनाः ॥'
अथ पादिनां गणना गुणाश्च ।
'कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः ॥'
इति भावप्रकाशः ॥

अन्यच्च ।
'मांसं वातहरं वृष्यं बृंहणं बलवर्द्धनम् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥'
तस्योत्पत्तिस्थानमष्टविधं यथा,—
'प्रसह्य भक्षयन्त्यन्यं प्रसहास्तेन कीर्त्तिताः ।
भूशया बिलशायित्वादानूपोऽनूपसंश्रयात् ॥
जले निवासाज्जलजा जले चर्य्याज्जलेचराः ।
स्थलजा जाङ्गलाः प्रोक्ता मृगा जङ्गलचारिणः ॥
विकीर्य्य विष्किराश्चैव प्रतुद्य प्रतुदास्तथा ।
योनिरष्टविधा त्वेषां मांसानां संप्रकीर्त्तिता ॥'
'प्रसहा भूशयानूपवारिजा वारिचारिणः ।
गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः ॥
लावाद्यो वैष्किरो वर्गः प्रतुदा जाङ्गला मृगाः ।
लघवः शीतमधुराः सकषाया हिता नृणाम् ॥'
अथ मांसयूषगुणाः ।

'रसो मांसस्य चक्षुष्यो बृंहणः प्राणवर्द्धनः ।
वृष्यो वातविकारघ्नः स्मृत्योजःस्वरवर्द्धनः ।
भग्नविश्लिष्टसन्धीनां चतानां क्षयिणां हितः ॥'
अथ तैलपक्वमांसगुणाः ।
'मांसं यत्तलमंसिद्धं वीर्य्योष्णं पित्तलं कटु ।
अग्निसन्दीपनं रुच्यं दृष्टिनुत् पुष्टिकृद्गुरु ॥'
घृतपक्वमांसगुणाः ।
'मांसन्तु घृतसंसिद्धं हृद्यं रुच्यं पटु लघु ।
प्रीणनं सर्व्वधातूनां विशेषाच्चक्षुषोर्हितम् ॥'
परिशुष्कप्रदिग्धमांसयोर्लक्षणं गुणाश्च ।
मांसं बहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥
परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौजःशुक्रवर्द्धनम् ॥
तदेव घनतक्राम्लं प्रदिग्धं मन्त्रिणानकम् ।
प्रदिग्धं बलमांसाग्निवर्द्धनं वातपित्तजित् ॥'
शूल्यकापक्वमांसगुणाः ।
'मांसन्तु शूल्यकाप्रोतमङ्गारेण विपाचितम् ।
ज्ञेयं गुरुतरं वृष्यं दीप्ताग्नीनां सदा हितम् ॥'
वेशवारमांसस्य लक्षणं गुणाश्च ।
'निरस्थि पिशितं पिष्टं सिद्धं गुडघृतान्वितम् ।
कृष्णामरिचसंयुक्तं वेशवार इति स्मृतम् ॥
वेशवारो गुरुः स्निग्धो बलोपचयवर्द्धनः ।
द्रव्येण येन येनेह युक्तं मत्स्यमांसयोः ।
तस्य तस्य तयोश्चैतद्गुणदोषैर्विभावयेत् ॥'
एकत्र सर्व्वमांसभक्षणदोषो यथा,—
'एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥'
मांसस्य गुरुत्वं यथा,—
'अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनान्न च भक्षणात् ॥'
इति राजवल्लभः ॥

वर्ज्जनीयमांसानि यथा,—
'क्रव्यादपक्षिदात्यूहशुकमांसानि वर्जयेत् ।
सारसैकशफान् हंसान् बलाकाबकटिट्टिभान् ॥
कुररं जालपादञ्च खञ्जरीटमृगद्विजान् ।
ग्रामान् मातस्यान् रक्तपादान् जग्ध्वा वै
कामतो नरः ॥
बन्धुरं कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।'
इति गारुडे ९६ अध्यायः ॥
मांसभक्षणे दोषो यथा,—
'लोभात् स्वभक्षणार्थाय जीविनं हन्ति यो नरः ।
मज्जाकुण्डे वसेत् सोऽपि तल्लोमाब्दवर्षकम् ॥
ततो भवेत् स शशको मीनश्च सप्तजन्मसु ।
ढगादयश्च कर्म्मभ्यस्ततः शुद्धिं लभेद्ध्रुवम् ॥'
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
अपि च ।
'बलाकं हंसदात्यूहं कलविङ्कं शुकं तथा ।
कुररञ्च चकोरञ्च जालपादञ्च कोकिलम् ॥
चाषञ्च खञ्जरीटञ्च श्येनं गृध्रं तथैव च ।
उलूकं चक्रवाकञ्च भासं पारावतन्तथा ॥
कपोतं टिट्टिभञ्चैव ग्रामटिट्टिभमेव च ।
सिंहव्याघ्रञ्च मार्ज्जारं श्वानं शूकरमेव च ॥
शृगालं मर्कटञ्चैव गर्द्दभञ्च न भक्षयेत् ।
न भक्षयेत् सर्व्वमृगान् पक्षिणोऽन्यान् वने-
चरान् ॥
जलेचरान् स्थलेचरान् प्राणिनश्चेति धारणा ॥'
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
अन्यच्च ।
'नाद्यादविधिना मांसं विधिज्ञो नापदि द्विजः ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ।
यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥
कुर्य्याद्घृतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्ज्जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्य पितॄन् देवान् ततोऽन्यो नास्त्य-
पुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात् ॥
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विव-
र्ज्जयेत् ॥'
इति मानवे ५ अध्यायः ॥
अन्यच्च । श्रीभागवतपञ्चमस्कन्धगद्यम् । 'ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते । याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशवो इह निहता यमसदने यातयन्तो रक्षोगणाः । सौनिका इव स्वधितिना वदायासृक् पिबन्तीति ॥'
ब्रह्मपुराणम् ।
'पशोस्तु मार्गमाणस्य न मांसं खादयेत् क्वचित् ।
पृष्ठमांसं गर्भशय्यां शुष्कमांसमथापि वा ॥'
महाभारतम् ।
'रोगार्त्तोऽभ्यर्थितो वापि यो मांसं नात्ति
लोलुपः ।
फलमाप्नोत्ययत्नेन सोऽश्वमेधशतस्य च ॥'
नन्दिपुराणम् ।
'यस्त्वोपदेशं कुरुते परस्य तु महात्मनः ।
मांसस्य वर्ज्जनफलं सोऽमांसादफलं लभेत् ॥'
भविष्यपुराणम् ।
'आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥'

विष्णुपुराणम् ।
‘चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥’
इति तिथ्यादितत्त्वम् ॥

अथ मांसभक्षणविधिः ।
‘श्राद्धे देवान् पितॄन् प्रार्च्य खादन् मांसं
न दोषभाक् ।
वसेत् स नरके घोरे दिनानि पशुरोमभिः ॥
सम्मितानि दुराचारो यो हन्त्यविधिना पशून् ।
मांसं संत्यज्य संप्राप्य कामान् याति ततो
हरिम् ॥’
इति गारुडे ९६ अध्यायः ॥

अपि च ।
‘गोधा कूर्म्मः शशः खड्‌गी शल्यकश्चेति
सत्तमाः ।
भक्ष्यान् पञ्चनखान्नित्यं मनुराह प्रजापतिः ॥
मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
मायूरं तैत्तिरञ्चैव कापोतञ्च कपिञ्जलम् ।
वाध्रीनसं वकं भक्ष्यं मीनहंसं पराजिताः ॥
सफरः सिंहतुण्डश्च तथा पाठीनरोहितौ ।
मत्स्याश्चैते समुद्दिष्टा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तश्च प्राणानामपि चात्यये ॥
भक्षयन्नपि मांसानि शेषभोजी न लिप्यते ।
औषधार्थमशक्तौ वा नियोगाद्यज्ञकारणात् ॥
आमन्त्रितस्तु यः श्राद्धे दैवे वा मांसमुत्सृजेत् ।
यावन्ति पशुरोमाणि तावतो नरकान् व्रजेत् ॥
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥

अपि च ।
‘मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्ज्जने ।
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया ॥
यथाविधिनियुक्तस्तु प्राणानामेव चात्यये ।
प्राणस्यान्नमिदं सर्व्वं प्रजापतिरकल्पयत् ॥
स्थावरं जङ्गमञ्चैव सर्व्वं प्राणस्य भोजनम् ।
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः ॥
अहस्ताश्च सहस्तानां शूराणाञ्चैव भीरवः ।
नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि ॥
धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ।
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ॥
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ।
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा ।
देवान् पितॄंश्चार्च्चयित्वा खादन् मांसं न दुष्यति ॥
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥’
इति मानवे ५ अध्यायः ॥ * ॥

देवीपुराणम् ।
‘अष्टमीं समुपोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ।
तेनैव विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा ॥’
याज्ञवल्क्यः ।
‘प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।
देवान् पितॄन् समभ्यर्च्च्य खादन् मांसं न
दोषभाक् ॥’

यमः ।
‘भक्षयेत् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया ।
दैवे नियुक्तः श्राद्धे वा नियमे च विवर्ज्जयेत् ॥’
इति तिथ्यादितत्त्वम् ॥ * ॥

भक्तामिषं यथा,—
‘गोवर्ज्ज्यमामिषं क्षीरं फले जम्बीरमामिषम् ।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम् ॥’
गोवर्ज्ज्यमामिषं क्षीरमित्यत्र पञ्चानामामिषं
पर्णमिति च पाठः । इति कर्म्मलोचनः ॥
(अस्योत्पत्तिर्यथा,—
‘रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते ॥’
इति सुश्रुते सूत्रस्थाने १४ अध्याये ॥)

मांसः, पुं (मन + सः । दीर्घश्च ।) काचः ।
कीटः । इति शब्दरत्नावली ॥ (वर्णसङ्करजाति
विशेषः । यथा, महाभारते । १३ । ४८ । २२ ।
“चतुरो मागधो सूते क्रूरान्मायोपजीविनः ।
मांसं स्वादुकरं चौद्रं सौगन्धमिति विश्रुतम् ॥”)

मांसकारि, क्ली, (मांसं करोतीति । कृ + णिनिः ।)
रक्तम् । इति हेमचन्द्रः । ३ । २८६ ॥

मांसच्छदा, स्त्री, (मांस इव छदः पर्णमस्याः ।
तद्रूपरिणामोत्पत्तिरस्यास्तथात्वम् ।) मांस-
रोहिणीविशेषः । तत्पर्य्यायः । मांसी २ मांस-
रोही ३ रसायनी ४ सुलोमा ५ लोमकरिणी
६ । इति राजनिर्घण्टः ॥

मांसजं, क्ली, (मांसाज्जायते इति । जन् + डः ।)
मेदः । इति हेमचन्द्रः । ३ । १८८ ॥ (मांस-
जाते, त्रि ॥)

मांसतेजः, [स्] क्ली, (मांसात् तेजोऽस्य ।)
मेदः । इति हेमचन्द्रः । ३ । १८८ ॥

मांसदलनः, पुं, (मांसं ग्रीहात्मकं दलति लघूी-
करोतीति । दल + ल्युः ।) ग्रीहवृक्षः । इति
शब्दचन्द्रिका ॥

मांसद्रावी, [न्] पुं, (मांसं द्रावयति शिथिली-
करोतीति । द्रु + णिच् + णिनिः ।) अम्लवेतसः ।
इति राजनिर्घण्टः ॥ (विशेषोऽस्याम्लवेतस-
शब्दे ज्ञेयः ॥)

मांसपचनं, क्ली, (मांसस्य पचनम् ।) मांसपाकः ।
तस्य रूपान्तरं मांसाकः । इति व्याकरणम् ॥

मांसपेशी, स्त्री, (मांसस्य पेशी ।) गर्भस्यावयव-
विशेषः । यथा,—
“बुद्‌बुदः सप्तरात्रेण मांसपेशी भवेत्ततः ।
द्विसप्ताहात् भवेत् पेशी रक्तमांसचिता दृढा ॥
बीजस्येवाङ्कुराः पेश्यः पञ्चविंशतिरात्रतः ॥”
इति मुग्धबोधः ॥ * ॥

अथ मांसस्य पेशीराह ।
यथार्थमूष्मणा युक्तो वायुः स्रोतांसि दारयेत् ।
अनुप्रविश्य पिशितं पेशीर्व्विभजते तथा ॥”
यथार्थं यथाप्रयोजनम् ॥ * ॥ मांसपेशीनां
संख्यामाह ।
“मांसपेश्यः समाख्याता नृणां पञ्चशतानि च
तासां शतानि चत्वारि शाखासु कथितान्यथ ।
कोष्ठे षट्‌षष्टिरुक्ताः कथिता मुनिपुङ्गवैः ।
ग्रीवाया ऊर्द्ध्वगास्तासु चतुस्त्रिंशत् प्रकी-
र्त्तिताः ॥”
ताः शाखागताः प्राह । एकैकस्यां पादाङ्गुल्यां
तिस्रस्तिस्रस्ताः पञ्चदश १५ पादाग्रे दश १०
पादोपरि कूर्च्चसन्निविष्टा दश १० गुल्फतलयोः
द्वेदश १० गुल्फजानुनोः अन्तरे विंशतिः २०
जानुनि पञ्च ५ ऊरौ विंशतिः २० वंक्षणे
दश १० एवमेकस्मिन् सक्थिनि शतम् १००
भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ ।
अथ कोष्ठगताः प्राह । गुदे तिस्रः शेफ
स्येका १ सेवन्यामेका १ वृषणयोर्द्वे २ स्फिचोः
पञ्च पञ्च ५ । ५ वस्तिमूर्द्धनि द्वे २ उदरे पञ्च ५
नाभौ एका १ पृष्ठोर्द्ध्वसन्निविष्टा उभयतः पञ्च
पञ्च दीर्घाः ५ । ५ पार्श्वयोः षट् ६ वक्षसि
दश १० अक्षकांसौ प्रति समन्तात् सप्त ७ ।
अक्षकौ अंसुया इति लोके । अंसौ स्कन्धौ ।
हृदि द्वे २ यकृति द्वे २ प्लीह्नि द्वे २ उण्डुके
द्वे २ ॥ * ॥ अथ ग्रीवोर्द्ध्वगा आह । ग्रीवायां
चतस्रः ४ हन्वोरष्टौ ८ कण्ठमणौ घण्टिकाया-
मिति यावत् एका १ गले एका १ तालुनि
द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां
द्वे ललाटे चतस्रः ४ शिरस्येका १ एवं मांस-
पेश्यः पञ्चशतानि भवन्ति ॥ * ॥
“स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तराः ।
गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि ॥”
एताः पञ्चशतानि मांसपेश्यः । अधिका
विंशतिर्यथा । गर्भाशये तिस्रः ३ गर्भच्छिद्र
संस्थिताः । शुक्रार्त्तवप्रवेशिन्यां तिस्रः ३ योना-
वभ्यन्तरतो मुखाश्रिते प्रवृत्ते द्वे २ योनावेव
बहिर्निर्गतस्रोतःपार्श्वद्वयस्थिते वर्त्ते योनि-
कर्णिके इति यावत् द्वे २ स्तनयोः पञ्च पञ्च
५ । ५ यौवने तासां वृद्धिर्भवति ।
“पुंसां पेश्यः पुरस्तात् याः प्रोक्ता मेहन-
मुष्कजाः ।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥”
अस्यायमर्थः । पुंसां मेहनमुष्कयोश्च याश्चिसो
मांसपेश्यः पूर्व्वमुक्तास्ताः स्त्रीणां मेहनमुष्का-
भावात् फलं गर्भाशयं आवृत्य तिष्ठन्ति । गय-
दासस्त्वाह । स्त्रीणां मांसपेश्यस्तिभिर्हीनानि
पञ्चशतानि । तथा च भोजः ।
“पञ्चपेशीशतान्येव स्त्रीवर्ज्जं विद्धि भूमिप ।
अतश्च तिस्रो हीयन्ते स्त्रीणां शेफसि मुष्कयोः ॥
अथ मांसपेशीनां कर्म्माण्याह ।
“शिरास्नाय्वस्थिपर्व्वाणि सन्धयश्च शरीरिणाम् ।
पेशीभिः संवृतान्येव बलवन्ति भवन्ति हि ॥”
इति भावप्रकाशः ॥

(यथा, महाभारते । १ । ११५ । १२ ।
"ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता ॥")

मांसफला, स्त्री, (मांसमिव फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

मांसभक्षः, त्रि, (मांसं भक्षयतीति । भक्ष + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) मांसभक्षण-कर्त्ता । मांसं भक्षयतीति ग्रात् भक्षिति कर्म्मणि अण्प्रत्ययेन निष्पन्नः ॥ (दानवविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । २३२ । ६ ।
"मांसपो मांसभक्षश्च वेगवान् केतुमानपि ॥")

मांसमासा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥

मांसरोहिणी, स्त्री, (मांसं रोपयतीति । रुह + णिच् + णिनिः । ङीप् । न पुक् ।) सुगन्धिद्रव्यभेदः । तत्पर्य्यायः । अग्निरुहा २ वृत्ता ३ चर्म्मकषा ४ वसा ५ विकषा ६ मांसरोही ७ । अस्या गुणाः । वृष्यत्वम् । सारकत्वम् । दोषत्रयनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथाचास्याः पर्य्यायो गुणाश्च ।
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी कृशा ।
प्रहारवल्ली विकषा वीरवत्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मांसलं, क्ली, (मांसं तद्वत् पुष्टिकरो गुणोऽस्य स्यास्मिन् वा । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) काव्यस्य गौडीरीत्य-न्तर्गतस्य ओजोगुणस्याङ्गविशेषः । यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ॥"
इति काव्यचन्द्रिका ॥

मांसलः, त्रि, (अतिशयमांसमस्त्यस्येति । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) बलवान् । इत्यमरः । ३ । ६ । ४४ । स्थूलः । यथा, गारुडे ६६ अध्याये ।
"निम्नाश्च वक्षुरंसाः स्युर्निर्द्रव्याश्चिबुकैः कृशैः ।
मांसलैश्च धनोपेतैरवक्रैरधरैर्नृपाः ॥"
(मांसयुक्तः । यथा, बृहत्संहितायाम् । ६८ । २८ ।
"हृदयं समुन्नतं पृथु न वेपनं मांसलञ्च
नृपतीनाम् ॥"
अतिबहुलः । यथा, नैषधे । ६ । २७ ।
"हृदस्य हंसावलिमांसलश्रियो
बलाकयेव प्रबला विडम्बना ॥")

मांसलफला, स्त्री (मांसलं फलमस्याः ।) वृन्ताकी । इति राजनिर्घण्टः ॥

मांसविक्रयी, [न्] त्रि, (मांसविक्रयोऽस्यास्तीति । मांसविक्रयेण जीवति वेति इनिः ।) आमिष-विक्रयकर्त्ता । इति हलायुधः ॥ तत्पर्य्यायः । वैतंसिक. २ कौटिकः ३ मांसिकः ४ । इत्य-मरः । २ । १० । १४ ॥ शौनिकः ५ । इति जटाधरः ॥ कौटकिकः ६ । इति शब्दरत्ना-वली ॥ (यथा मनौ । ३ । १५१ ।
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥")

मांससारः, पुं, (मांसस्य सारः ।) मेदः । इति राज-निर्घण्टः ॥ (मांसेष्वपि सारो बलं यस्य । सबल-स्थूलकायः । यथा, चरकसंहितायाम् ।६८।१००।
"उपचितदेहो विद्वान् धनी सुरूपश्च मांस-
सारो यः ।
सह्याज इति च सुश्लिष्टसन्धिता सुखभुग्
ज्ञेयाः ॥")

मांसस्नेहः, पुं, (मांसानां स्नेहः ।) मेदः । इति राजनिर्घण्टः ॥

मांसहासा, स्त्री, (मांसेन हासः प्रकाशो यस्याः ।) चर्म्म । इति शब्दरत्नावली ॥

मांसाष्टका, स्त्री, (मांसेन सम्पाद्या अष्टका । मांसप्रधाना अष्टका वा ।) गौणचान्द्रमाघ-कृष्णाष्टमी । तत्र मांसोपकरणकश्राद्धमावश्य-कम् । यथा । अथाष्टकाश्राद्धम् ।
"पित्र्यदानाय मूले स्युरष्टकास्तिस्र एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
मूलं प्रधानस्थानं । अमावास्या हि श्राद्धस्य प्रधानकालः तद्दिनेति यावत् । ऐन्द्री सा मे दिन्द्रदेवताकयागसम्बन्धात । एवं प्राजापत्या वैश्वदेविकी च । मांसैः पशोः । तथा च गोभिलः । यद्युवाल्पतरसंभारः स्यात् तदा पशुनैव कुर्य्यादिति । यद्युवेति निपातसमुदायो यद्यर्थे । पशुरपि छाग एव । छागोऽनादेशे पशुरिति गौतमात् । न च तैष्या ऊर्द्ध्व अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात् कथमनु-पदिष्टत्वमिति वाच्यम् । तदसम्भवे पशुने-त्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुप-दिष्टत्वात् । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः ।
"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय मृगं हत्वा महाबल ।'
इत्यादिना मृगमांसबोधनात् ॥ पश्वभावे स्थाली-पाकेन । यथा, गोभिलः । अपि वा स्थाली-पाकं कुर्व्वीतेति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पिकम् ।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु ॥"
इति छन्दोगपरिशिष्टीयं ग्राह्यम् ॥ अन्विति ओदनचरोः पश्चात् । अतएव ।
"पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥"
इति शातातपेनोक्तम् ॥ तस्मादन्नं प्रधानं पूपादिकन्तु उपकरणत्वेन शक्तानामावश्यकं सदेति श्रवणात् । इति श्राद्धतत्त्वम् ॥

मांसिकः, पुं, (मांसाय प्रभवति "तस्मै प्रभवति सन्तापादिभ्यः ।"५। १। १०१ । इति । मांस ठञ् । मांसेन जीवतीति ठञ् वा । मांसं पण्य-मस्य ।"तदस्य पण्यम् ।"४।४ । ५१ । इति ठक् वा । अथवा, मांसं नियुक्तमस्मै दीयते । इति "श्राणामांसौदनाट्टिठन् ।"४। ४ । ६७ । इति टिठन् ।) मांसविक्रयी । इत्यमरः ।२।१०।१४॥

मांसिनी, स्त्री, (मांसवत् पदार्थोऽस्यामस्तीति । इनिः । ङीप् ।) जटामांसी । इति राज-निर्घण्टः ॥

मांसी, स्त्री, (मांसवत् पदार्थोऽस्त्यस्यामिति । मांस + अर्श आदित्वादच् । गौरादित्वात् ङीष् ।) जटामांसी । कक्कोली । इति मेदिनी । से, ८ । मांसच्छदा । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेशी मांसी तपस्विजटा जटी ॥")

मांसेष्टा, स्त्री, (मांसमिष्टं प्रियमस्याः ।) वल्गुली । इति राजनिर्घण्टः ॥

माकन्दः, पुं, (मातीति । मा + क्विप । माः परि-मितः सुघटितः कन्द इव फलमस्य ।) आम्र-वृक्षः । इति मेदिनी । दे, ३८ ॥ (यथा, गीतगोविन्दे ।
"माकन्द । क्रन्द कान्ताधर । धरणितलं
गच्छ यच्छन्ति यावद्
भावं श्रृङ्गारसारस्वतमिह जयदेवस्य विष्व-
ग्वचांसि ॥".
तथास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

माकन्दी, स्त्री, (माकन्द + ङीष् ।) आमलकी । नगरभेदः । इति मेदिनी । दे, ३८ ॥ (यथा, महाभारते । ५ । ७२ । १५ ।
"————————पञ्चग्रामा वृता मया ।
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ।
अवसानञ्च गोविन्द । कञ्चिदेवात्र पञ्चमम् ॥")
पीतचन्दनम् । इति शब्दमाला ॥ मादाणी इति माङ्गनी इति च हिन्दी भाषा । तत्-पर्य्यायः । बहुमूली २ मादनी ३ गन्धमूलिका ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मधु-रत्वम् । दीपनत्वम् । रुच्यत्वम् । अल्पवात-कारित्वम् । पथ्यत्वम् । वर्षासु न सिताधिक-त्वञ्च । एका विशदमूली च श्यामला च तथा-परा । इति राजनिर्घण्टः ॥

माकरी, स्त्री, (मकरयुक्ता पौर्णमास्यत्रेति । मकर + अण् + ङीप् ।) माघशुक्लसप्तमी । अत्र स्नानादिविधिर्यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समाः ॥"
कोटिभास्करा कोटिसप्तमीतुल्या सप्तम्या भास्करदेवताकत्वात् । सूर्य्यग्रहणफलं स्नान-जम् । सन्निहिते वृद्धिरन्तरङ्गत्वान्यायात् । तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्य-फलसमफलमत्र ज्ञेयम् ॥ * ॥ स्नानपरिपाटी

माघ शुक्लसप्तम्यां विष्णुः । सप्तबदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय,—
"ॐ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी ॥"
इत्युच्चार्य्य स्नायादिति शेषः । रोगं छिद्रम् । तिथितत्त्वस्य पौर्णमास्यन्तमासाङ्गत्वात् माकरीपदं मकरार्कारब्धचान्द्रमासीयतिथिपरम् । तिथितत्त्वे च रथ्यादिं प्रति शुक्लादिमेव च । विवाहादौ च चौरादिं मासं तत्त्वे विनिर्द्दिशेदिति ब्रह्मपुराणात् मन्वन्तरादित्वेन तथा युक्तत्वाच्च । यथा, मत्स्यपुराणम् ।
"मन्वाद्यन्तरादौ तु रथमापुर्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी ॥
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ।"
अतएव नारसिंहे रथाख्यायामित्युक्तम् ॥ * ॥
अर्घ्यदानपरिपाटी यथा,—
"अर्कपत्रैः सबदरैर्द्दूर्व्वाक्षतसचन्दनैः ।
अष्टाङ्गविधिनार्घ्यं दद्यादादित्यतुष्टये ।
अष्टाङ्गमर्घ्यमापूर्य्य भानोर्म्मूर्द्ध्नि निवेदयेत् ॥
अर्घ्यमन्त्रस्तु ।
जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥
प्रणाममन्त्रस्तु ।
सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तम्याच नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यां सूर्य्यमुद्दिश्य रथयात्राफलं यथा,—
"माघमासस्य सप्तम्यां देवं शाम्बपुरं नराः ।
रथयात्रां प्रकुर्व्वन्ति सर्व्वद्वन्द्वविवर्जिताः ॥
गच्छन्ति तत्पदं शान्तं सूर्य्यमण्डलभेदकम् ।
एतत्ते कथितं देवि ! शाम्बशापसमुद्भवम् ।
पापप्रशमनाख्यानं महापातकनाशनम् ॥"
इति वराहपुराणम् ॥

माघ, ङ वृद्धि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ङ माङ्क्ति नमध्यपाठेनैवेष्टसिद्धे ङकारानुबन्धो वेदमूच्चारणभेदार्थः । इति दुर्गादासः ॥

माक्षिकं, क्ली, (मक्षिकाभिः कृतम् । मक्षिका + "संज्ञायाम् ।" ४ । ३ । ११७ । इति ठक् ।) मधु । इत्यमरः । २ । ९ । १०७ ॥ नीलवर्णमध्यममक्षिकाकृततैलवर्णमधु । अस्य गुणाः । क्षौद्रात् लघुतरत्वम् । रूक्षत्वम् । श्रेष्ठत्वम् । श्वासादिरोगे विशेषतः प्रशस्ततरत्वञ्च । इति राजवल्लभः ॥ धातुविशेषः । धातुमाक्षी इति हिन्दीभाषा । तद्द्विविधम् । स्वर्णमाक्षिकं रौप्यमाक्षिकञ्च । तत्पर्य्यायः । माक्षीकम् २ पीतकम् ३ धातुमाक्षिकम् ४ तापिच्छम् ५ ताप्यकम् ६ ताप्यम् ७ आपीतम् ८ पीतमाक्षिकम् ९ आवर्त्तम् १० मधुधातुः ११ क्षौद्रधातुः १२ माक्षिकधातुः १३ । इति राजनिर्घण्टः ॥ कदम्बः १४ चक्रनाम १५ अजनामकम् १६ । इति हेमचन्द्रः । ४ । १२० ॥ अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । अम्लत्वम् । कफश्रमहृल्लासमूर्च्छार्त्तिश्वासकासविषापहत्वञ्च ।
"माक्षिकं द्विविधं प्रोक्तं हेमाख्यं तारमाक्षिकम् ।
भिन्नवर्णविशेषत्वाद्रसवीर्य्यादिकं पृथक् ॥
तारपादादिके तारमाक्षिकञ्च प्रशस्यते ।
देहे हेमाभकं शस्तं रोगघ्नं बलपुष्टिदम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"लेखनो माक्षिको धातुः सुवर्णरजतद्युतिः ।
जराजित् पाण्डुरोगघ्नः क्षयकुष्ठज्वरापहः ॥
मधुरोऽम्लः कटुः पाके किञ्चिदुष्णोऽन्तलोपमः ॥"
इति कश्चिद्राजवल्लभः ॥
(उपधातुविशेषः । यथा, सुश्रुतबोधे ।
"माक्षिकं तुत्थिताभ्रे च नीलाञ्जनशिलालकाः ।
रसकश्चेति विज्ञेया एते सप्तोपधातवः ॥")

माक्षिकजं, क्ली, (माक्षिकात् जातम् । जन + डः ।) शिक्थकम् । इति राजनिर्घण्टः ॥

माक्षिकफलः, पुं, (माक्षिकवत् मधुरं फलमस्य ।) मधुनालिकेरिकः । इति राजनिर्घण्टः ॥

माक्षिकाश्रयं, क्ली, (माक्षिकाणामाश्रयः । अभिधानात् क्लीवत्वम् ।) शिक्थकम् । इति राजनिर्घण्टः ॥

माक्षीकं, क्ली, (मक्षिकाभिः कृतमित्यण् । निपातनाद्दीर्घत्वम् ।) मधु । इति राजनिर्घण्टः ॥ (धातुविशेषः । यथा, कथासरित्सागरे । ७६ । ३ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि योऽद्यात् ।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव ॥")

माक्षीकशर्करा, स्त्री, (माक्षीकजाता शर्करा शाकपार्थिवादिवत् समासः ।) सिताखण्डः । इति राजनिर्घण्टः ॥

मागधः, पुं, (मगधस्य तद्देशस्यापत्यम् । "द्व्यञ्मगधकलिङ्गसूरमसादण् ।" ४ । १ । १७० । इति । अण् ।) पाणिखनकः । इति महाभारतम् ॥ वंशक्रमेण महत्त्ववेदिराजाग्रस्तुतिकारी । तत्पर्य्यायः । मधुकः २ वन्दी ३ स्तुतिपाठकः ४ । इत्यमरभरतौ । २ । ८ । ९७ । तस्योत्पत्तिर्यथा,—
ततोऽस्य दक्षिणं हस्तं ममन्थुस्ते तदा द्विजाः ।
मथ्यमाने च तत्राभूत् पृथुर्वैण्यः प्रतापवान् ॥
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे ।
सूतः सुत्यां समुत्पन्नः सौत्येऽहनि महामते ! ॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ ॥
स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान् ।"
सुत्यामिति सूतिरभिषुतिः अभिषूयते कण्ड्यते सोमोऽस्यामिति सुतिः सोमाभिषवभूमिस्तस्याम् । सौत्येऽहनि तस्मिन्नेव दिने । इति विष्णुपुराणे १ अंशे ४१ अध्यायस्तट्टीका च ॥ (यथा, महाभारते । १३ । ४८ । १२ ।
"वन्दी तु जायते वैश्यान्मागधो वाक्यजीवनः ।")
वर्णसङ्करजातिविशेषः । (यथा, मानवे । १० । ११ ।
"क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥")
स तु क्षत्रियायां वैश्याज्जातः । भाट् इति ख्यातः । मगधेषु भवो मागधः त्रिः इत्यमरभरतौ । २ । १० । २ । जरासन्धराजः । तथा,—
"मागधो न च हन्तव्यो भूयः कर्त्ता बलोद्यमम् ।"
इति श्रीभागवते १० स्कन्धः ॥
शुक्लजीरकः । मगधदेशोद्भवे त्रि । इति मेदिनी । धे, ३४ ॥ (यथा, महाभारते । ६ । ९ । ४९ ।
"अन्ध्राश्च बहवो राजन्नन्तर्गिर्य्यास्तथैव च ।
बहिर्गिर्य्याङ्गमलदा मागधा मानवर्ज्जकाः ॥")

मागधादेवी, स्त्री, राधिका । यथा,—
"तासान्तु मागधादेवी तप्तचामीकरप्रभा ।
वृन्दावनेश्वरी राधा नाम्ना धात्वर्थकारणात् ॥"
इति पाद्मे पातालखण्डे ९ अध्यायश्लोकार्द्धद्वयम् ॥

मागधी, स्त्री, (मागधे जाता । मगध + अण्, ङीप् ।) यूथिका । पिप्पली । इत्यमरमेदिनीकरौ । धे, । ३४ । २ । ४ । ९६ । (यथास्याः पर्य्यायः ।
"पिप्पली च पलाशीर्षी वैदेही मागधी-कणा ।
उपकुल्या मागधी कोलाख्या तिक्ततण्डुला ॥"
इति वैद्यकरत्नमालायाम् ॥)
त्रुटिः । गुजराटी एलाचि इति भाषा । इति शब्दचन्द्रिका ॥ शर्करा । इति जटाधरः ॥ भाषाविशेषः । इति हेमचन्द्रः ॥ यथा च साहित्यदर्पणे । ६ । १६० ।
"अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ॥"
(तद्देशभवे, त्रि । यथा, महाभारते ।१।९५।४२।
"अनन्ता खलु मागधीमुपयेमे अन्तरी नाम तस्यामस्य जज्ञे परीक्षित् ॥)

माघः, पुं, श्रीदत्तकसूनुशिशुपालवधमहाकाव्यकर्त्ता । इति तद्ग्रन्थशेषपुष्पिका ॥ स्वनामख्यातमहाकाव्यम् । यथा,—
पुष्पेषु जाती नगरेषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः ।
नदीषु गङ्गा नृपतौ च रामः
काव्येषु माघः कविकालिदासः ॥"
इति प्राचीनाः ॥
वैशाखादिद्वादशमासान्तर्गतदशममासः । मघायुक्ता पौर्णमासी यत्र मासे सः ॥ तत्पर्य्यायः । तपाः २ । इत्यमरः । ४।१।४।१५ ॥ स च त्रिविधः । मकरस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः १ । कृष्णप्रति-

यद्यादिपौर्णमास्यन्तो गौणचान्द्रः २। मकरस्थ-रविकः सौरः ३। इति मलमासतत्त्वीयलिखन-स्वरसात्॥ तत्र जातफलम्।

"विद्याविनीतः स्वकुलप्रधानः
सदा सदाचारयुतः प्रवीणः।
योगानुरक्तो विषयेष्वसक्तो
माघेऽथ मासि प्रभवाभिवेशः॥"
इति कोष्ठीप्रदीपः॥ * ॥

अथ, माघस्नानम्। पाद्मे।
"स्वर्गलोके चिरं वासो येषां मनसि वर्त्तते।
यत्र क्वापि जले तैस्तु स्नातव्यं मृगभास्करे॥"
मृगो मृगास्यत्वेन मकरः। तत्स्थे भास्करे। तत्र सङ्कल्पः। अरुणोदयकाले जले मज्जनं कृत्वा आचम्य उत्तराभिमुखः ॐ तत् सदित्युच्चार्य्य कुशकुसुमतिलजलान्यादाय ओमद्य माघे मासि अमुकपक्षे अमुकतिथावारभ्य मकरस्थ-रविं यावत् प्रत्यहममुकगोत्रोऽमुकदेवशर्म्मा स्वर्गलोके चिरकालवासकामो विष्णुप्रीतिकामो वा प्रातःस्नानमहं करिष्ये इति संकल्प्य गङ्गाव्यतिरिक्तजलमात्रेऽपि स्नानं कर्त्तव्यम्। प्रतिदिनसङ्कल्पे तु आरभ्य मकरस्थरविं यावत् प्रत्यहमिति न वक्तव्यं किन्तु मासगन्तरं मकरस्थे रवावित्यधिकं वक्तव्यम्। चान्द्रस्नानवाक्यन्तु विशाखस्नत्येऽनुसन्धेयम्। तत्र सङ्कल्पं कृत्वा यथोक्तविधिना स्नानेति कर्त्तव्यतां विधाय,—
"ॐ दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम्॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव।
स्नानेनानेन मे देव। यथोक्तफलदो भव॥"
इत्युच्चार्य्य स्नायात्। ततो वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः॥
"ॐ दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम्॥"
चान्द्रस्नाने मकराकाङ्क्षकाले मकरस्थे रवावित्यस्य न पाठः। असमवेतार्थत्वात्। तीर्थे तु।
"माघमासमिमं पुण्यं स्नाम्यहं देव माधव।
तीर्थस्यास्य जले नित्यं प्रसीद भगवन् हर॥"
इति पठित्वा दुःखदारिद्र्यनाशायेत्यादिकं पठितव्यम्। गङ्गायान्तु पद्मपुराणे।
"दिने दिने सहस्रन्तु सुवर्णानां विशाम्पते।।
तेन दत्तं हि गङ्गायां यो माघे स्नाति माधव॥"
मानव इति क्वचित् पाठः। एकदा सङ्कल्पे तु प्रतिदिनसहस्रसुवर्णदानजन्यफलसमफलप्राप्ति-कामः श्रीविष्णुप्रीतिकामो वा माघमासं यावत् प्रत्यहं गङ्गायां प्रातःस्नानमहं करिष्ये। इति वाक्ये विशेषः। प्रतिदिनसंकल्पे तु सहस्रसुवर्ण-दानजन्यफलसमफलप्राप्तिकामो विष्णुप्रीति-कामो वा गङ्गायां प्रातःस्नानमहं करिष्ये इति यथोक्तविधिना स्नानेतिकर्त्तव्यतां विधाय।
"ॐ माघमासमिमं पुण्यं स्नाम्यहं देव माधव।
तीर्थस्यास्य जले नित्यं प्रसीद भगवन् हरे॥
दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम्॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव।
स्नानेनानेन मे देव यथोक्तफलदो भव॥"
इति पठित्वा स्नायात्। ततः
वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः॥
"दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम्॥"
इति पठेत्॥ * ॥

स्कन्दपुराणम्।
"सम्प्राप्ते मकरादित्ये पुण्ये पुण्यप्रदे शुभे।
कर्त्तव्यो नियमः कश्चिद्व्रतरूपी नरोत्तमैः॥"
तत्तत्पुण्यकामः श्रीविष्णुप्रीतिकामो वा इति वाक्ये विशेषः॥ * ॥ पौष्याः पौर्णमास्या ऊर्द्ध्वं माघपौर्णमासीपर्य्यन्तं मदिरातुल्यत्वान्मूलकं न भोक्तव्यम्॥ * ॥ पौष्या ऊर्द्ध्वं माघकृष्णाष्टम्यां छागमांसेन श्राद्धं कर्त्तव्यम्। मांसाभावे पायसोपकरणेन। तदभावे केवलान्नेन वा श्राद्धं कर्त्तव्यम्॥ * ॥ अथ रटन्तीचतुर्द्दशी।
"माघे मास्यसिते पक्षे रटन्त्याख्यचतुर्द्दशी।
तस्यामुदयवेलायां स्नाता नावेक्षते यमम्॥"
उदयवेलायां अरुणोदयवेलायाम्।
"अनर्काभ्युदिते काले माघे कृष्णचतुर्द्दशी।
सतारव्योमकाले तु तस्यां स्नानं महाफलम्॥
स्नात्वा सन्तर्प्य तु यमान् सर्व्वपापैः प्रमुच्यते।"
अत्र तिथिकृत्यत्वान्नोपचान्द्रादरः। तत्रोभय-दिने अरुणोदयसतारकाले मुहूर्त्तान्यनचतुर्द्दशी-लाभे पूर्व्वदिने स्नानं यमतर्पणञ्च। एकदिन-मात्रे तल्लाभे तद्दिने। माघस्नानकालाभ्यन्तरं तादृशचतुर्द्दशीलाभे माघप्रातःस्नायिना तन्त्रेण द्वयं कार्य्यम्। तत्र ॐ तत् सदद्य माघे मासि कृष्णे पक्षे रटन्त्यां चतुर्द्दश्यां तिथौ अरुणोदय-वेलायां अमुकगोत्रः श्रीअमुकदेवशर्म्मा यमा-दर्शनकामो गङ्गायां स्नानमहं करिष्ये इति सङ्कल्प्य यथाविधि स्नानं प्रागुक्तं चतुर्द्दशयम-तर्पणञ्च कुर्य्यात्॥

अथ श्रीपञ्चमी।
'तत्रोभयदिने पूर्व्वाह्णे पञ्चमीलाभे पूर्व्वदिने लक्ष्मीसरस्वत्योः पूजनं युग्मात्। एकदिनप्राप्ते तद्दिने। एवं षड्वर्ष शुक्लपञ्चमीव्रतेऽपि। ततश्च ॐ तत सदित्युच्चार्य्य ॐमद्येत्यादि लक्ष्मी-प्रीतिकामो लक्ष्मीपूजनमहं करिष्ये इति सङ्कल्प्य शालग्रामे जले वा पूजयेत। ॐ पाशाक्षमालिकाम्भोजसृणिभिर्याम्यसौम्ययोः।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम्॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम्॥
रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु॥
इत्यनेन ध्यात्वा एतत् पाद्यं ॐ लक्ष्म्यै नमः।
इत्यादिना नैवेद्यान्तेन पूजयेत्।
ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये।।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्॥
इत्यनेन पुष्पाञ्जलित्रयेण प्रणमेत्॥ * ॥ ॐ तत् सदित्युच्चार्य्य ओमद्येत्यादि सरस्वतीप्रीतिकामः सरस्वतीपूजनमहं करिष्ये इति सङ्कल्प्य शाल-ग्रामे घटादिस्थजले वा पूजयेत्।
"ॐ तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः॥"
इति ध्यात्वावाह्य एतत् पाद्यं ॐ सरस्वत्यै नमः।
इत्यादिना नैवेद्यान्तेन पूजयेत्। ततः
"ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च स्वाहा॥"
इति ब्रह्मपुराणीयेन पुष्पाञ्जलिना त्रिः पूजयेत। मत्स्यसूक्ते। सरस्वतीं संपूज्य।
"ॐ यथा न देवो भगवान् ब्रह्मा लोकपिता-महः।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत्।
न विहीनं त्वया देवि। तथा मे सन्तु सिद्धयः॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति।॥"
इति मत्स्यपुराणीयैः प्रार्थ्य प्रणमेत्॥ * ॥
"बन्धुजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत्।
आचारात् पुस्तकञ्च पूजयेत्। ॐ मस्याधाराय नमः। इति मस्याधारं पूजयेत्। ॐ लेखन्यै नमः। इति लेखनीं पूजयेत्॥ * ॥

अथ माघसप्तमी।
तत्रोभयदिने अरुणोदयकाले सप्तमीलाभे पूर्व्व दिने एकदिने तल्लाभे तद्दिने। अरुणोदयकाले सामान्यजले ॐ अद्येत्यादि सूर्य्यग्रहणकालीन-गङ्गास्नानजन्यफलसमफलप्राप्तिकाम आयुरा-रोग्यसम्पत्कामो वारुणोदयवेलायां स्नानमहं करिष्ये। इति सङ्कल्प्य यथाविधि स्नानेति कर्त्तव्यतां विधाय सप्तवदरपत्राणि सप्तार्क-पत्राणि च शिरसि निधाय।
"ॐ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी॥"
इत्युच्चार्य्य स्नायात्। ततो यथाकालं सप्त-वदरीफलार्कपत्रशालितिलदूर्व्वाक्षतचन्दनयुक्त जलमादाय ओमद्येत्यादि आयुरारोग्यसम्पत-कामः श्रीसूर्य्यायार्घ्यमहं ददे। इति सङ्कल्प्य
'ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने॥'
इत्यनन्तरम्।
"ॐ जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि। नमस्ते रविमण्डले॥"
इति पठित्वा इदमर्घ्यं श्रीसूर्य्याय नम इत्यर्घ्यं दत्त्वा।
"ॐ सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे॥
इत्यनेन प्रणमेत्। शूद्रेणापि स्नानं तूष्णीं विधा-नात् स्नानमन्त्रं विना अर्घ्यप्रणाममन्त्राः पाठ्याः पौराणिकत्वात्। गङ्गायान्तु बहुशतसूर्य्यग्रहण-कालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकामो

गङ्गायां स्नानमहं करिष्ये इति वाक्ये विशेषः। अथार्घ्यदानमन्त्रं एतत् स्नानादेव माघप्रातःस्नानं तत्रैव विध्यति ॥ * ॥

अथ विधानसप्तमीव्रतम्।

प्रथमतो ब्राह्मणान् स्वस्तिवाच्य ॐ सूर्य्यः सोम इत्यादि पठित्वा ताम्रादिपात्रे कुशतिलजलान्यादाय ॐ तत् सदित्युच्चार्य्य ओमद्य माघे मासि शुक्ले पक्षे सप्तम्यान्तिथावारभ्य प्रतिमासीयशुक्लसप्तम्यां पौषसप्तमीं यावत् आरोग्यसम्पत्कामोऽभीष्टतत्तत्फलकामो वा अर्कामाद्यौतरभोजनविच्छित्तिविधानेन सप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य संयमपारणसहितं तत्तन्मासि तत्तन्नियमं कुर्य्यात्। तत्र माघे अर्काग्रमात्रं भुञ्जीत। फाल्गुने अन्तरीक्षगृहीतं कपिलाविड्यवमात्रप्रमाणं तदभावे अन्यगोमयमपीति। चैत्रे मरीचमेकम्। वैशाखे किञ्चिज्जलम्। ज्यैष्ठे अपक्वकदलीफलमध्यकणामात्रम्। आषाढ़े स्वच्छायद्विगुणसमये यवप्रमाणं कुशमूलम्। श्रावणे नक्तं काले अत्यल्पहविष्यौदनम्। भाद्रे शुद्धोपवासः। आश्विने पञ्चमार्द्धयामे मयराक्षप्रमाणं हविष्यान्नम्। कार्त्तिके अर्द्धप्रसृतिमात्रं कपिलाक्षीरं तदभावे क्षीरान्तरम्। मार्गशीर्षे प्राङ्मुखो वायुप्राशनम्। पौषे स्वल्पं घृतम्। तदनन्तरञ्च।

"ब्राह्मणान् भक्षयेत भक्त्या गुडक्षीरनिरामिषैः।
विप्राय दक्षिणा देया विभवस्यानुरूपतः ॥
अष्टम्यां पारणं कुर्य्यात् कट्वम्लरहितेन च।
मुद्गमाषतिलादीनि घृतञ्चैव विवर्ज्जयेत् ॥
एकलिङ्गं भक्ष्यमुक्तमर्कतन्त्रानुसारतः ॥"

चान्द्रमासविशेषोल्लेखवत् अनन्तादिव्रतवन्मलमासेतरे तत्तु कर्त्तव्यम् ॥ * ॥

अथारोग्यसप्तमी।

तत्र पूर्व्ववत् सप्तम्यान्तिथावारभ्य ऐहिकारोग्यधनधान्यपारलौकिकशुभस्थानप्राप्तिकामः संवत्सरं यावत् आरोग्यसप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य प्रतिमासशुक्लसप्तम्यां शालग्रामे घटादिस्थजले वा पूजयेत्। रक्ताम्बुजासनमिति ध्यात्वा एतत् पाद्यं ॐ सूर्य्याय नम इत्यादिभिः संपूज्य।

"आदित्य भास्कर रवे भानो सूर्य्य दिवाकर।
प्रभाकर नमस्तेऽस्तु रोगादस्मान् प्रमोचय ॥"

इति त्रिःपूजयेत्। एवं संवत्सरे पूर्णे दक्षिणां दद्यात्। ब्राह्मणांश्च भोजयेत्। विशेषमासानुद्देशादमावास्याव्रतवत् मलमासेऽपि कर्त्तव्यम् ॥

अथ भीष्माष्टमी।

अष्टम्यां ब्राह्मणः पितृतर्पणं कृत्वा

"ॐ वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥"

इति पितृवत् भीष्मं तर्पयेत् ॥ ततः कृताञ्जलिः।

"भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥"

इत्यनेन प्रार्थयेत्। क्षत्रियादिभिः पितृतर्पणात् पूर्व्वं एतत् कर्त्तव्यम् ॥ * ॥ भैम्यामेकादश्यामुपोष्य द्वादश्यां तिलोद्वर्त्तनमावश्यकं कर्त्तव्यम्। स्नानतर्पणमहादानभोजनादि यथालाभं कुर्य्यात् ॥ * ॥ माघपौर्णमास्यां युगाद्यात्वेन पार्व्वणविधिना श्राद्धं कर्त्तव्यम्। अनन्तफलकामनया स्नानदानञ्च कर्त्तव्यम्।

तस्यां दानप्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम् ॥

इति कृत्यतत्त्वम् ॥ * ॥ * ॥

अथ माघस्नानफलम्।

"व्रतदानैस्तपोभिश्च न तथा प्रीयते हरिः।
माघमज्जनमात्रेण यथा प्रीणाति केशवः ॥
न समं विद्यते किञ्चित् तेजः सौरेण तेजसा।
तद्वत् स्नानेन माघस्य न समाः क्रतुजाः क्रियाः ॥
प्रीतये वासुदेवस्य सर्व्वपापादिमुक्तये।
माघस्नानं प्रकुर्व्वीत स्वर्गलाभाय मानवः ॥
किं रक्षितेन देहेन सुपुष्टेन बलीयसा।
अध्रुवेणाशु हेयेन माघस्नानं विना भवेत् ॥
मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ।
कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत् ॥
ब्रह्महा हेमहारी च सुरापो गुरुतल्पगः।
माघस्नायी विपापः स्यात्तत्संसर्गी च पञ्चमः ॥
उपपातकानि सर्व्वाणि पातकानि महान्ति च।
भस्मीभवन्ति सर्व्वाणि माघस्नायिनि मानवे ॥
पावका इव दीप्यन्ते माघस्नाता नरोत्तमाः।
विमुक्ताः सर्व्वपापेभ्यो मेघेभ्य इव चन्द्रमाः ॥
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्म्मभिः कृतम्।
माघस्नानं दहेत् सर्व्वं पावकः समिधो यथा ॥
प्रामादिकञ्च यत् पापं ज्ञानाज्ञानकृतञ्च यत्।
स्नानमात्रेण तन्नश्येत मकरस्थे दिवाकरे ॥
निष्पापास्त्रिदिवं यान्ति पापिष्ठा यान्ति शुद्धताम्।
सन्देहोऽत्र न कर्त्तव्यो माघस्नाने नराधिप। ॥
सर्व्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप।।
सर्व्वेषां स्वर्गदो माघः सर्व्वेषां पापनाशनः ॥
एतदेव परो मन्त्रो ह्येतदेव परं तपः।
प्रायश्चित्तं परञ्चैव माघस्नानमनुत्तमम् ॥
नृणां जन्मान्तराभ्यासात् माघस्नानमतिर्भवेत्।
अध्यात्मज्ञानकौशल्यं जन्माभ्यासाद्यथा नृप! ॥
संसारकर्द्दमालेपप्रक्षालनविशारदम्।
पावनं पावनानाञ्च माघस्नानं परन्तप। ॥
स्नाता माघे च ये राजन्। सर्व्वकामफलप्रदे।
ते तांश्च भुञ्जते लोकांश्चन्द्रसूर्य्यग्रहोपमान् ॥"

इति श्रीपद्मपुराणे उत्तरखण्डे ४ अध्यायः ॥

माघवती, स्त्री, (मघवान् देवताऽस्याः यद्वा मघवन् इयमिति। मघवत्+अण्। "मघवा बहुलम्।" ६।४।१२८। इति आदेशः। ङीप्।) पूर्व्वदिक्। इति राजनिर्घण्टः ॥

माघवनं, क्ली, इन्द्रसम्बन्धि वस्तु। मघवत इदमित्यर्थे अप्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम् ॥ (मघवन्+अण्। "मघवा बहुलम्।" ६।४।१२८। इति विकल्पात्तादेशः। त्रि, यथा, माघे। ६।२५।

"वसुधान्तनिःसृतमिवाहिपतेः
पटलं फणामणिसहस्ररुचाम्।
स्फुरदंशुजालमथ शीततरुचः
ककुभं समस्कुरुत माघवनीम् ॥")

माघी, स्त्री, (मघया युक्तः कालः अस्यां इति। मघा+"नक्षत्रेण युक्तः कालः।" ४।२।३। इत्यण् ङीप्।) मघायुक्ता पौर्णमासी। यथा,

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥"

इत्यमरः। १।४।१३ ॥ माघी पूर्णिमा। यथा, अयोध्याकाण्डे भरतशपथे।

"आषाढ़ी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः।
अप्रदानवतो यान्तु यस्यार्य्योऽनुमतो गतः ॥"

विष्णुधर्म्मोत्तरे।

"पौर्णमासी तथा माघी श्रावणी च नरोत्तम।।
प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ॥
एतास्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ॥"

सा च कलियुगाद्या। यथा,—

"अथ भाद्रपदे कृष्णे त्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम् ॥"

अस्यां कर्म्मणोऽनन्तफलं यथा, मात्स्ये।

"शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये।
विषुवे शतसाहस्रमा का मा वैध्वनन्तकम् ॥"

आ का मा वैषु आषाढ़ीकार्त्तिकीमाघीवैशाखीषु। इति तिथ्यादितत्त्वम् ॥ माघ्यां मघायोगाभावे सिंहस्थगुरावकालप्रतिप्रसवो यथा, शातातपः।

"माघ्यां यदि मघा नास्ति सिंहे गुरुरकारणम् ॥"

राजमार्त्तण्ड इचः।

"गुरौ हरिस्थे न विवाहमाहुर्हारीतगर्गप्रमुखा मुनीन्द्राः।
यदा न माघी मघसंयुता स्यात्तदा च कन्योद्वहनं वदन्ति ॥"

इत्यत्र माघ्यां मघायोगाभावेऽपि श्रुतिवैधादिमघास्थेऽपि गुरौ भवति विवाहस्तु गुरोर्मघापरित्यागादेव। इति मलमासतत्त्वम् ॥

माघोनी, स्त्री, (मघवान् देवताऽस्याः। मघोन इयमिति वा। इति मघवन्+अण् ङीप्।) पूर्व्वा दिक्। इति राजनिर्घण्टः ॥ (इन्द्रसम्बन्धिनि, त्रि। यथा, ऋग्वेदे। १०।६६।२।

"मरुद्गणे वृजने मन्म धीमहि
माघोने यज्ञं जनयन्त सूरयः ॥"

"माघोने मघवत इन्द्रस्य सम्बन्धिनि मखार्थे।" इति तद्भाष्ये सायनः ॥)

माघ्यं, क्ली, (माघे जातमिति । माघ+“तत्र जातः । ४ । ३ । २५ । इति यत् ।) कुन्दपुष्पम् । इत्यमरः । २ । ४ । ७२ ॥

माङ्गल्यं, त्रि, (मङ्गलाय हितमिति । मङ्गल+ष्यञ् ।) मङ्गलाय हितम् । यथा, राजमार्त्तण्डे ।
“माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः ॥”
इत्युद्वाहतत्त्वम् ॥

अपि च । भीमपराक्रमे ।
“अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते मासि ।
चक्रिणि सुप्ते कुर्य्यान्न माङ्गल्यं विवाहञ्च ॥”
इति मलमासतत्त्वम् ॥

(मङ्गलस्य भावः । “मङ्गलेर्लत्व ।” उणा० ५ । ७० । इत्यस्य वृत्तौ “भावे ष्यञि माङ्गल्यम् ।” इत्युज्ज्वलदत्तः ॥)

माङ्गल्यार्हा, स्त्री, (माङ्गल्यस्य अर्हा ।) त्रायमाणा लता । इति राजनिर्घण्टः ॥

माचः, पुं, (मा अञ्चतीति । अन्च+कः ।) पन्थाः । इति शब्दरत्नावली ॥

माचलः, पुं, (मा चलति भोगमदत्वाचिरेणैव त्यागं न कुरुतेति । चल+अच् ।) ग्रहः । रोगः । (मा चलति स्वच्छन्दं न प्रसरतीति । चल+अच् ।) । बन्दी । चौरः । इति शब्द-रत्नावली ॥ मेदिन्यां ग्रहस्थाने ग्राह इति पाठः ॥

माचिका, स्त्री, (मा अञ्चति चलादिकं लक्षा न गच्छतीति । अन्च+कः । ततः कन् । टाप् । अत इत्वम् ।) मक्षिका । इति त्रिकाण्ड-शेषः ॥ अम्बष्ठा । इति राजनिर्घण्टः ॥

माचिरं, व (मा चिरम् ।) शीघ्रम् । यथा,—
“अथाब्रवीत्तदा मत्स्यस्तावृषीन् प्रहसन् शनैः ।
अस्मिन् हिमवतः शृङ्गे नावं बध्नीत माचिरम् ॥”
इति वनपर्व्वणि मात्स्योपाख्यानम् ॥

माचीपत्रं, क्ली, सुरपर्णम् । इति राजनिर्घण्टः ॥

माजलः, पुं, (मा जलमित्यभिप्रायोऽस्य । वर्षणवारिभ्योऽस्य पक्षयोर्भारजडत्वात् तथात्वम् ।) चाषपक्षी । यथा, शब्दचन्द्रिकायाम् ।
“माजलश्चाषकः कुक्षी किङ्किरो किङ्किरेश्चकः ।”

माञ्जिष्ठं, क्ली, (मञ्जिष्ठया रक्तम् । “तेन रक्तं रागात् ।” ४ । २ । ४ । इत्यण् ।) लोहितवर्णः । (यथा, बृहत्संहितायाम् । ३० । २६ ।
“कक्षावबभ्रुकपिलाविचित्रमाञ्जिष्ठहरितशबलाभाः ।”
तद्वति, त्रि । इति हेमचन्द्रः ॥

माटाक्षकः, पुं, (माटाक्ष आस्यः । ततः कन् ।) वृक्षभेदः । यथा,—
“वन्ध्याङ्गी कर्कटीर्ज्यो शेटुमाटाक्षको शमी ।”
इति भूरिप्रयोगः ॥

माठरः, पुं, सूर्य्यपार्श्वपरिवर्त्तिविशेषः । यथा,—
“माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ।”
इत्यमरः । १ । ३ । ३१ ॥
मठति निवसति सूर्य्यसमीपे माठरः मठ वास-मदयोः गायतीति अरन् मठरस्यापत्यं माठर इति स्वामी ॥ पिङ्गलवर्णत्वात् पिङ्गलः । दण्ड-कारित्वाद्दण्डः । इति स्वामी ॥ परितः पार्श्वे वर्त्तन्ते पारिपार्श्विकाः ठञ् कादिति ष्णिकः । सूर्य्यः कातर्त्तिकत्वाद्देवानां वरं दास्यतीति धिया इन्द्रादयोऽष्टादशनामान्तरेण प्रच्छन्ना अस्य पार्श्वेषु स्थिताः । अत्र प्राधान्यात्त्रयो ऽभिहिताः । अत्र माठरनामा यमः । पिङ्गलनामा वह्निः । दण्डनामा शक्रः । तथाचागमः ।
“तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः ।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः ॥
यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञकः ।”
एवमपरे चरगुप्तादयः कुल्माषपक्ष्यादिसंज्ञकाः पूर्व्वद्वारादिषु स्थिताः । इति तट्टीकायां भरतः ॥ व्यासः । इति मेदिनी । रे, २०३ ॥ विप्रः । इति हेमचन्द्रः । ३ । ५१० ॥ शौण्डिकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

माडः, पुं, वृक्षविशेषः । माडवेनी इति कोकणे प्रसिद्धः । तत्पर्य्यायः । माडाहमः २ दीर्घः ३ ध्वजवृक्षः ४ वितानकः ५ मद्यद्रुमः ६ । अस्य गुणाः । मोहकारित्वम् । श्रमहरत्वम् । श्लेष्मकारकत्वञ्च । इति राजनिर्घण्टः ॥

माडवः, पुं, वर्णसङ्करजातिविशेषः । यथा,—
“लेटलीवरकन्यायां जनयामास षट्सुतान् ।
माल्लं मल्लं माडवञ्च भडं कोलञ्च कन्दरम् ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
पुस्तकान्तरे माडवस्थाने मातर इति पाठः । कन्दरस्थाने कलन्दर इति पाठः ॥

माड्डुकः, पुं, (मड्डुकवादनं शिल्पमस्येति । “मड्डुकझर्झरादणन्यतरस्याम् ।” ४ । ४ । ५६ । इति अण् ।) माड्डुकिकः । मड्डुवादकः । इति सिद्धान्तकौमुदी ॥

माढिः, स्त्री, (माढतीति । माढ+“अन्येभ्योऽपि दृश्यन्ते ।” उणा० ४ । १०५ । इति क्तिन् ।) दन्तवेष्टभेदः । पत्रशिरा । इति रत्नकोषः ॥ दन्तभेदः । इति केचित् । इत्यमरटीकायां भरतः ॥ पत्रभङ्गम् । दैन्यप्रकाशनम् । इति मेदिनी । ढ, २ ॥ शब्दरत्नावली च ॥ माढिर्दैन्ये पत्रशिरायां मङ्घल्लिते जड़े । इति हेमचन्द्रः । ४ । १६० ॥

माढी, स्त्री, (माढि+कृदिकारादिति ङीष् ।) दलशिरा । इति शब्दरत्नावली ॥

माणकं, क्ली, (मीयते पूज्यते परिमीयते वेति । मान मा वा+घञ् । स्वार्थे कन् । निपातनात् णत्वम् ।) कन्दविशेषः । माणकचु इति भाषा । अस्य गुणाः । स्वादुत्वम् । शीतलत्वम् । गुरुत्वम् शोथहरत्वम् । कटुत्वञ्च । इति राजवल्लभः ॥ यथा सुश्रुते सूत्रस्थाने । ४६ अध्याये ।
‘माणकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम् ॥”)

माणकः, पुं, (मान्+घञ् । ततः कन् निपातनात् णत्वञ्च ।) स्वनामख्यातवृक्षः । माणकचुगाछ इति भाषा । तत्पर्य्यायः । स्थूलपत्रः २ इति रत्नमाला ॥ माणः ३ हस्तिच्छदः ४ कुम्भपत्रः ५ । इति केचित् ॥ (यथा, सुश्रुते सूत्रस्थाने ४७ शः ।
“स्थूलसूरणमाणकप्रभृतयः ॥”)

माणवः, पुं, (मनोरपत्यं पुमान् । मनु+अपत्यविवक्षायां अण् ।
“अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणवः ॥”
४ । १ । १६१ । इत्यस्य काशिकावृत्तिः ।) मनुष्यः । बालकः । इति शब्दरत्नावली ॥ षोडशयष्टिकहारः । इति हेमचन्द्रः । ३ । ३२४ । ४ ॥

माणवकः, पुं, (अल्पो माणवः । “अल्पे ।” ५ । ३ । ८५ । इति कन् ।) बालकः । स च षोडश-वर्षपर्य्यन्तप्रथमवयस्कः ॥ (यथा, श्रीभागवते । ८ । १८ । ३२ ।
“एष ते स्थानमेष्टव्यं श्रियं तेजोयशः श्रुतम् ।
दास्यत्याच्छिद्य शक्राय मायामाणवको
हरिः ॥”
माणवको बालः स इव ।) हारभेदः । स तु विंशतियष्टिकः । विशनरहार इति भाषा । इत्यमरभरतौ । २ । ६ । १०६ ॥ (बृहत्संहितामते तु षोडशयष्टिको हारः । यथा, तत्रैव । ८१ । ३३ ।
“द्वात्रिंशता तु गुच्छो विंशत्या कीर्त्तितोऽर्द्धगुच्छाख्यः ।
षोडशभिर्माणवको द्वादशभिश्चार्द्धमाणवकः ॥”)
कुपुरुषः । इति मेदिनी । के, २०६ ॥ वटुः । इति हेमचन्द्रः ॥

माणवीनं, त्रि, माणवसम्बन्धि । माणवस्येदमित्यर्थे खञ्प्रत्ययेन निष्पन्नम् ॥ (माणवाय हितं । “माणवचरकाभ्यां खञ् ।” ५ । १ । ११ । इति माणव+खञ् ।)

माणव्यं, क्ली, शिशुसमूहः । इत्यमरः । ३ । २ । ४१ ॥ माणवानां समूहो माणव्यं विकारसंघेति यात् । माणवो बालः मूर्द्धन्यमध्यः दन्त्यमध्य इत्येके । इति तट्टीकायां भरतः ॥ (माणवानां समूहः । “ब्राह्मणमाणववाडवाद्यत् ।” ४ । २ । ४२ । इति यत् ।)

माणिका, स्त्री, (माणक+टाप् अकारस्येत्वम् ।) अष्टपलपरिमाणम् । इति शब्दमाला ॥

माणिक्यं, क्ली, (मणिप्रकारः । मणि“+स्थूलादिभ्यः प्रकारवचने कन् ।” ५ । ४ । ३ । इति प्रशंसायां कन् । ततो मणिकमेवेति । मणिक+“चातुर्वर्ण्यादीनामुपसंख्यानम् ।” ५ । १ । १२४ । इति वार्त्तिकबलात् ष्यञ् ।) रत्नविशेषः । माणिक इति भाषा । तत्पर्य्यायः । शोणरत्नम् २ रत्नराट् ३ रविरत्नकम् ४ शृङ्गारी ५ रङ्गमाणिक्यम् ६ तरलम् ७ रत्ननायकम् ८ रङ्गमाणिक्यम् रागयुक् ९ पद्मरागः १० रत्नम् ११ शोणोपलः १२ सौगन्धिकम् १३ लोहितकम् १४ कुरुविन्दम् १५ । अस्य गुणाः । मधुरत्वम् ।

स्निग्धत्वम्। वातपित्तनाशित्वम्। रसप्रयोगे प्रधानत्वम्। परं रसायनकारित्वञ्च। तस्य लक्षणं यथा,—

"स्निग्धं गुरुत्वगात्रयुतं दीप्तं स्वच्छं समाङ्गञ्च
सुरङ्गदञ्च॥"

इति जात्यमाणिक्यं कल्याणं धारणात् कुरुते॥

तस्य दोषो यथा,—

"द्विच्छायमभ्रपिहितं कर्कशं शार्कीरिलं
भिन्नं धूम्रञ्च।
विरूपं रागविमलं लघुमाणिक्यं न धारये-
द्धीमान्॥"

तस्य चतुर्विधा जातिर्यथा।

"तद्रक्तं यदि पद्मरागमथ तत्पीतातिरक्तं द्विधा।
जानीयात् कुरुविन्दकं यदरुणं स्यादेष सौग-
न्धिकम्।
तन्नीलं यदि नीलगन्धिकमिति ज्ञेयं चतुर्धा बुधैः
माणिक्यं कथयन्त्यथोऽप्यविकलं रागेण जात्यं
जगुः॥"

इति राजनिर्घण्टः॥ * ॥

मतान्तरे तस्य दोषा यथा,—

"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः
द्विच्छायञ्च द्विरूपञ्च सम्भेदः कर्करस्तथा॥
अशोभनं कोकिलञ्च जलं धूम्राभिधञ्च वै।
गुणाश्चत्वार आख्यातास्छायाः षोडश
कीर्त्तिताः॥"

छायास्तु पूर्व्वोक्ता एव तास्तु पद्मरागशब्दे द्रष्टव्याः।

"छायाद्वितयसम्बन्धाद्विच्छायं बन्धुनाशनम्।
द्विरूपं द्विपदं तेन माणिक्येन पराभवः॥
सम्भेदो भिन्नमित्युक्तं शस्त्रघातविधायकम्।
कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत्॥
दुग्धेनेव समालिप्तमथवा नीपुटसुप्रभं।
अशोभनं समुद्दिष्टं माणिक्यं बहुदुःखकृत्॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम्।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत्॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत्।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत्॥"

तथा।

"शोभाद्वितयवन्तो ये मणयः क्षतिकारकाः।
उभयञ्च पदं येषां तेन च स्यात् पराभवः॥
भिन्नेन युद्धे मृत्युः स्यात् कर्करन्धननाशकृत्।
दुग्धेनेव समालिप्तः पुटके यस्तु सम्भवेत॥
दुःखकृत् स समाख्यातो न नृपे रत्नवीयकः।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता।
तथाच बहुभेदाः स्युर्न ते धार्य्या कदाचन॥"

अथ गुणाः।

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता।"

तथा च।

"वर्णाधिकं गुरुत्वञ्च स्निग्धता च तथाच्छता।
अर्च्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः॥"

फलम्।

"ये कर्करान्वितमयोऽपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः।
न ते प्रशस्ता मणयो भवन्ति
समाश्रितो जातिगुणैः समस्तैः॥
दोषोपसृष्टं मणिमप्रबोधाद्
बिभर्त्ति यः कश्चन कश्चिदेकम्।
तं बन्धुदुःखामयबन्धुवित्त-
नाशादयो दोषगणा भजन्ते॥
सपत्नमध्येऽपि कृताधिवासं
प्रमादवृत्तावपि वर्त्तमानम्।
न पद्मरागस्य महागुणस्य
भर्त्तारमापत् समुपैति काचित्॥
दोषोपसर्गप्रभवाश्च ये तं
नोपद्रवास्तं समभिद्रवन्ति।
गुणैः समस्तैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति॥
बालार्ककरसंस्पर्शात् यः शिखां लोहितां
वमेत्।
रञ्जयेदाश्रमं वापि स महागुण उच्यते॥
दुग्धे शतगुणे क्षिप्तो रञ्जयेद्यः समन्ततः।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात्।
पद्मरागवरो ह्येष देवानामपि दुर्लभः॥
सर्व्वारिष्टप्रशमनाः सर्व्वसम्पत्तिदायकाः।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम्॥
यो मणिर्दृश्यते दूराज्ज्वलदग्निसमच्छविः।
वह्निकान्तिः स विज्ञेयः सर्व्वसम्पत्तिदायकः॥
पञ्चसप्तनवविंशतिराग-
सम्भृतोऽपि सकलः खलु वर्ज्ज्यः।
वर्णयन्नमति वा करजालं
उत्तरोत्तरमहागुणिनस्ते॥
नीलीरसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विशतप्रमाणम्।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः॥
गुञ्जाफलप्रमाणस्तु दशपञ्चत्रिगुञ्जकान्।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः॥
क्रोष्टुकोलफलाकारो द्वादशाष्टाब्धिगुञ्जकान्।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः॥
बदरीफलतुल्यो यः स्वरदिक्समामाषकः।
तथा धात्रीफलश्चित्रंशतुर्विंशतिद्वादशमाषकः॥
तथाम्रफलतुल्यो यो वह्निपञ्चैकमाषकः।
ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः।
बिम्बीफलसमाकारो वसुषड्दशतोलकः॥
अतःपरं प्रमाणेन मानेन च न लभ्यते।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात्॥
केचिच्चारनराः सन्ति जात्यानां प्रतिरूपकाः।
विजातयः प्रयत्नेन विद्वांस्ता मूल्यमाहरन्॥
कालकाः सिंहलदेशोत्थमुक्तमालीयाः।
श्रीपर्णिकाश्च सदृशा विजातयः पद्मरागाणाम्॥
तुम्बुपसञ्ज्ञाद्वलनाभिधानं
मणिः स्वभावादपि तुम्बुरुत्थः।
काण्णीस्तथा सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात्।
श्रीपर्णकं दीप्तिनिराकृतत्वा-
द्विजातिलिङ्गाश्रयमेद एषः॥ * ॥"

तथा च।

"स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम्।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाणामिव चूर्णमध्यः॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रमृष्टः प्रजहाति दीप्तिम्।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति॥
संप्राप्य तथ्योऽपि कथं स्वरत्नं
बिभर्त्ति यः सर्व्वगुणानतीव।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः।
प्राप्यापि नानाकरदेशजातं
ज्ञात्वा बुधो जातिगुणेन लक्षेत्॥
अत्राश्मनि सन्देहे शिलायां परिघर्षयेत्।
दृष्ट्वा योऽत्यन्तशोभावान् परिमाणं न मुञ्चति॥
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः।
स्वजातकं संमुखेन विलिखेद्वा परस्परम्॥
वज्रं वा कुरुविन्दं वा त्रिमुच्यान्योन्यकेन चेत।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः॥
गुणोपपन्नेन सहावबन्धो
मणिस्वजात्यो विगुणेन जातः।
मुखं न कुर्य्यादपि कौस्तुभेन
विद्वान् विजातिं न भयाद्बुधस्तम्॥
चण्डाल एकोऽपि तथाभिजातान्
समेत्य दूरानपहन्ति यत्नात्।
तथा मणीन् भूरिगुणोपपन्नान्
शक्तोऽतिविद्रावयितुं विजातः॥" * ॥

अथ मूल्यम्।

"बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम्।
तत्र कान्तिविभागेन छायाभागं विनिर्द्दिशेत्॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुत्थापितगौरवस्य।
तत् पद्मरागस्य गुणान्वितस्य
स्यान्माषकाख्यातुलितस्य मूल्यम्॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम्।
तावन्मूल्यं तथा शुद्धे कुरुविन्दे विधीयते॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम्।
तावन्मूल्यं चतुर्थांशहीनं स्याद्वै सुगन्धिके॥
यावन्मूल्यं समाख्यातं वैश्रवर्णे च सूरिभिः।
तावन्मूल्यचतुर्थांशं हीयते मूढजन्मनि॥
पद्मरागः पणं यस्तु धत्ते लाक्षारसप्रभः।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः॥
इन्द्रगोपकसङ्काशः कर्षन्नयश्चतो मणिः।
द्वाविंशतिसहस्राणि तस्य मूल्यं विनिर्द्दिशेत्॥
एकोनो नृपते यस्तु जवाकुसुमसन्निभः।

कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाड़िमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिस्तु क्रमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं कविभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णाद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषो गुणो वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
न भ्रमच्छिद्रवैशाल्याच्चतुर्द्धा ये प्रकीर्त्तिताः ॥
चतुर्व्विधैर्नृपतिभिर्द्धार्य्याः सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्याद्रोगशोकभयव्ययम् ॥”
इति युक्तिकल्पतरुः ॥
(यथा, कथासरित्सागरे । २६ । ४४ ।
“सोऽपि प्राप्तस्तदद्राक्षीन्माणिक्यस्तम्भभास्वरम् ।
सौवर्णभित्ति सङ्केतकेतनं सम्पदामिव ॥”
कदलीविशेषः । तद्यथा,—
“माणिक्यमर्त्त्याम्रतचम्पकाद्या
भेदाः कदल्या बहवोऽपि सन्ति ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

माणिक्या, स्त्री, (माणिक्य + टाप ।) ज्येष्ठी । तत्पर्य्यायः । मुषली २ गृहगोधिका ३ गृहगोलिका ४ भित्तिका ५ पल्ली ६ कुड्यमत्स्यः ७ गृहोलिका ८ । इति हेमचन्द्रः । ४ । ३६४ ॥

माणिबन्धं, क्ली, (मणिबन्धे गिरौ भवम् । मणिबन्ध + अण् ।) सैन्धवलवणम् । इत्यमरटीकायां स्वामी ॥

माणिमन्थं, क्ली, (मणिमन्थगिरौ भवम् । मणिमन्थ + अण् ।) सिन्धुलवणम् । इत्यमरः । २।९।४२॥ (अस्य पर्य्यायः । [लम् ॥”
“सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धु-
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मातङ्गः, पुं, (मतङ्गस्येदं । मतङ्गस्यापत्यं पुमान् वा । मतङ्ग + अण् ।) हस्ती । इत्यमरः ।२।८। ३४ ॥ (यथा, रामायणे । १ । ६ । २३ ।
“विन्ध्यपर्व्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥”)
अश्वत्थवृक्षः । किरातजातिविशेषः । इति तट्टीकायां मथुरेशः ॥ श्वपचः । इति मेदिनी । गे, ४७ ॥ (यथा, कथासरित्सागरे । ७३ । २ ।
“सुदूरमन्वगायातं कार्य्याय कृतसंविदम् ।
सख्या दुर्गपिशाचेन मातङ्गपतिना युतम् ॥”)
अर्हदुपासकविशेषः । इति हेमचन्द्रः ।४।२८३।

मातङ्गमकरः, पुं, (मातङ्गाकारो मकरः ।) महामत्स्यभेदः । इति राजनिर्घण्टः ॥

मातङ्गी, स्त्री, (मतङ्गस्य मुनेरपत्यं स्त्री । मातङ्ग + अण् ङीष् ।) दशमहाविद्यान्तर्गतनवमविद्या । अथ मातङ्गीमन्त्रः । वामकेश्वरतन्त्रे ।
“अथ वक्ष्ये महादेवीं मातङ्गीं सर्व्वसिद्धिदाम् ।
अस्योपासनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥
प्रणवञ्च ततो मायां कामवीजञ्च कूर्च्चकम् ।
मातङ्गी ङेयुता चास्त्रं वह्निजायावधिर्म्मनुः ॥
ऋषिः स्याद्दक्षिणामूर्त्तिर्व्विराट् छन्दः प्रकीर्त्तितम् ।
मातङ्गीदेवता देवी सर्व्वसिद्धिप्रदायिनी ॥
अङ्गन्यासकरन्यासौ कुर्य्यान्मन्त्री समाहितः ।
षड्दीर्घभाजा वीजेन प्रणवाद्येन कल्पयेत् ॥
षट्कोणाष्टदलं पद्मं लिखेद्यन्त्रं मनोरमम् ।
तत्र पूजा प्रकर्त्तव्या जपापुष्पैश्च मन्त्रवित् ॥
अष्टशक्तीश्चाष्टदले पूजयेत् सुसमाहितः ।
रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च शक्तयः ॥
अनङ्गकुसुमानङ्गमदना मदनालसा ।
इत्यष्टशक्तीः संपूज्य उपहारसमन्वितः ॥
ततो देवीं परां ध्यायेत् साधकः स्थिरमानसः ॥
श्यामाङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासनस्थिताम् ।
वेदैर्वाहुदण्डैरसिखेटकपाशाङ्कुशधराम् ॥
एवं ध्यात्वा महादेवीं गन्धपुष्पैर्मनोरमैः ।
नैवेद्यन्तु महादेव्यै पायसं शर्करान्वितम् ॥
पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत् ।
तद्दशांशं जुहुयाद्दाज्यैः शर्करामधुभिः सह ॥
अश्वत्थोद्भवैः काष्ठैः साधकः शक्तिभिः सह ।
एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥
चतुष्पथे श्मशाने वा वनमध्ये च मान्त्रिकः ।
मत्स्यं मांसं पायसञ्च दद्यादूपञ्च गुग्गुलुम् ॥
रात्रियोगेन कर्त्तव्यं सदा पूर्णश्च साधकः ।
एवं प्रयोगमात्रेण कविता जायते ध्रुवम् ॥
अग्निस्तम्भं जलस्तम्भं वाक्स्तम्भं कारयेत् ध्रुवम् ।
मन्त्री जयति शत्रूंश्च तार्क्ष्यो भोगिकुलं यथा ॥
शास्त्रे वादे कवित्वे च वृहस्पतिरिवापरः ।
अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ॥
नग्नं तद्गृहमागत्य कुवेरो दीयते वसु ।
विना मत्स्यैर्व्विना मांसैर्नार्च्चयेत् परदेवताम् ॥”
इति तन्त्रसारः ॥

मातरपितरौ, पुं, (माता च पिता च । “मातरपितरावुदीचाम् ।” ६ । ३ । ३२ । इत्यारङादेशो मातृशब्दस्य निपात्यते ।)तातजनयित्र्यौ । नित्यद्विवचनान्तौ । इत्यमरः । २ । ६ । ३७ ॥

मातरिश्वा, पु, (मातरि अन्तरीक्षे श्वयति वर्द्धते इति । यद्वा, मातरि जनन्यां श्वयति वर्द्धते सप्तसप्तकत्वादिति । श्वि + “श्वन् उक्षन्निति ।” उणा० १ । १५८ । इति कनिन् । नाम्नि सप्तम्या अलुक् । धातोरिकारलोपश्च निपातितः ।) वायुः । इत्यमरः । २ । ४ ।६४। (यथा, ऋग्वेदे । १ । ९३ । ६ ।
“आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परिश्येनो अद्रेः ॥”
“मातरिश्वा वायुः ।” इति तद्भाष्ये सायनः ॥
मातर्य्यन्तरिक्षे श्वसिति चेष्टते इति । श्वस् + कनिन् । अग्निभेदः । यथा, ऋग्वेदे ।३।२९।११।
“तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि
वातस्य सर्गो अभवत् सरीमणि ॥”
“यदाग्निररण्योर्गर्भरूपतया वर्त्तते तदा तनूनपान्नामको भवति यदान्तरिक्षे विद्योतते तदा मातरिश्वनामको भवति ।” इति तद्भाष्ये सायनः ॥)

मातलिः, पुं, (मतं लातीति । ला + कः । पृषोदरादित्वात् साधुः । मतलस्यापत्यं पुमानिति वा । मतल + “अत इञ् ।” ४ । १ । ९५ । इतीञ् ।) इन्द्रसारथिः । इत्यमरः ।१।१।३८॥ (यथा, महाभारते । ५ । ९७ । ११ ।
“मतस्त्रिलोकराजस्य मातलिर्नाम सारथिः ।
तस्यैकैव कुले कन्या रूपतो लोकविश्रुता ॥”)

माता, [ऋ] स्त्री, मान्यते पूज्यते या सा । मान ऌ पूजायां मान्नोति छान्दस इति भरतः॥ (यद्वा, “नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।” उणा० २ । ९६ । इति तृच् । निपातितश्च । स्वस्रादित्वाट्टाप् निषेधः ।) मा इति भाषा । तत्पर्य्यायः । जनयित्री २ प्रसूः ३ जननी ४ । इत्यमरः । २ । ६ । २९ ॥ सवित्री ५ जनिः ६ जनी ७ जनित्री ८ अक्का ९ अम्बा १० अम्बिका ११ अम्बालिका १२ । इति शब्दरत्नावली ॥ मातृका १३ । इति जटाधरः ॥ * ॥ षोड़शप्रकारा मातरो यथा,—
“स्तनदात्री गर्भधात्री भक्ष्यदात्री गुरुप्रिया ।
अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका ॥
सगर्भजा या भगिनी पुत्त्रपत्नी प्रियाप्रसूः ।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥
मातुः पितुश्च भगिनी मातुलानी तथैव च ।
जनानां वेदविहिता मातरः षोड़श स्मृताः ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकेयसंवादे १५ अध्यायः ॥ तस्या गौरवं यथा,—
“जनको जन्मदातृत्वात् पालनाच्च पिता स्मृतः ।
गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने ॥
विनान्नमश्वरो देहो न नित्यः पितुरुद्भवः ॥
तयोः शतगुणे माता पूज्या मान्या च वन्दिता ।
गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥”
इति तत्रैव ४० अध्यायः ॥
अपि च ।
“स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।
उपनीय ददद्वेदमाचार्य्यः स प्रकीर्त्तितः ॥
एकादेशमुपाध्यायः ऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथापूर्व्वमेभ्यो माता गरीयसी ॥”
इति गारुड़े ९४ अध्यायः ॥

अन्यच्च ।

"न पितुर्व्वचनं कार्य्यं यथा मातुः सुतेन हि ।
पिता च पतितस्त्याज्यो न माता वत्सुतेन हि ।
गर्भधारणपोषाभ्यां ततो माता गरीयसी ॥
दशविप्रानुपाध्यायो गौरवेणातिरिच्यते ।
तेभ्यः पिता दशभ्यस्तु माता चैव गरीयसी ।
मातृतोऽन्यो न देवोऽस्ति तस्मात पूज्या सदा सुतैः ॥
मातुश्च यद्धितं किञ्चित् कुरुते भक्तितः पुमान् ।
तद्धर्म्मं हि विजानीयादेवं धर्म्मविदो विदुः ॥"

इति वह्निपुराणम् ॥

अपरञ्च ।

"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्त्रगुणैर्यदि ।
स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसापि वा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

मातृशब्दसम्भाषया मातृतुल्यत्वम् यथा,—

"मातरित्येव शब्देन याञ्च संभाषते नरः ।
सा मातृतुल्या सत्येन धर्म्मः साक्षी सतामपि ॥
तया सहितसङ्गारे कालसूत्रं प्रयाति सः ।
तत्र घोरे वसत्येव यावद्वै ब्रह्मणो वयः ॥
प्रायश्चित्तं पापिनश्च तस्य नैव श्रुतौ श्रुतम् ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

शिवस्य परिवारविशेषः । स च असुरमारणे ब्रह्मादीनां देहनिर्गतत्वात् अष्टशक्तिदेवता-रूपो यथा,—

"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा चर्च्चिकेत्यष्ट मातरः ॥"

सप्तविधोऽपि यथा,—

"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौवेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥"

इत्यमरटीकायां भरतः ॥

गौर्य्यादिषोडशमातृकाः । यथा,—

"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"

इति आह्निकतत्त्वे वृद्धवशिष्ठपरिशिष्टम् ॥

वैष्णवपूज्या मातृगणा यथा,—

"यत्र मातृगणाः पूज्यास्तत्र त्वेताः प्रपूजयेत् ।
सदा भागवती पौर्णमासी पद्मान्तरङ्गिका ॥
गङ्गाकलिन्दतनयागोपीवृन्दावतीस्तथा ।
गायत्त्रीतुलसीवाणीपृथिवीगाश्च वैष्णवीः ॥
श्रीयशोदादेवहूतीदेवकीरोहिणीमुखाः ।
श्रीसीता द्रौपदी कुन्ती त्वपरा या महर्षयः ।
रुक्मिण्याद्यास्तथा चाष्ट महिषीर्याश्च ता अपि ॥"

इति पाद्मे उत्तरखण्डे ७८ अध्यायः ॥

सप्त मातरो यथा,—

"आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
गावी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥"

इति केचित् पठितम् ॥

मातृतुल्या यथा ।

"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"

इति दायभागः ॥

गौः । भूमिः । इति मेदिनी । ते, ४३ ॥ (निरुक्ते च ।८।३ । "यदूर्द्ध्वस्तिष्ठा द्रविणेह धत्ताद्यदा-क्षयो मातुरस्या उपस्थे ।" "मातुः अस्याः पृथिव्याः ।" इति तट्टीकायां दुर्गाचार्य्यः ।) विभूतिः । इति शब्दरत्नावली ॥ लक्ष्मीः । इति हेमचन्द्रः । ३।३९१ । रेवती । इत्यजयपालः ॥ आखुकर्णी । इन्द्रवारुणी । महाश्रावणी । जटा-मांसी । इति राजनिर्घण्टः ॥ परिमाणकर्त्तरि, त्रि । अस्मिन्नर्थे परिमाणार्थमाधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥ (निर्म्माणकर्त्तरि च । यथा, ऋग्वेदे । १ । ६१ । ७ ।
"अस्येदु मातुः सवनेषु सद्योमहः ।"
"मातुः दृष्टिद्वारेण सकलस्य जगतो निर्मातुः ।"
इति तद्भाष्ये सायनः ॥)

माता, स्त्री, (मान्यते पूज्यते इति । मान पूजायां + तृन् नलोपश्चापि निपातनात् साधुः ।) जननी । यथा 'विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ।' इति शिवरहस्ये दुर्गास्तवदर्शनात् आवन्तोऽयं शब्दः ॥

मातापितरौ, पुं, (माता च पिता च । "आनङ् ऋतो द्वन्द्वे ।" ६ । ३ । २५ । इत्यानङादेशः ।) जननीजनकौ । तत्पर्य्यायः । पितरौ २ मातर-पितरौ ३ तातजनयितारौ ४ । इत्यमरभरतौ । २ । ६ । ३७ ॥ नित्यद्विवचनान्तोऽयम् ॥ (यथा, मनौ । ३ । १५७ ॥
"अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ॥")

मातामहः, पुं, (मातुः पिता । "पितृव्यमातुल मातामहपितामहाः ।" ४ । २ । ३६ । इति डामहच् निपातितश्च ।) मातुः पिता । इत्य-मरः । २ । ६ । ३३ ॥ दौहित्रस्य मातामह-साधर्म्म्यं यथा,—

"आग्नीध्रश्चोदरः कृपचिन्हो यज्ञशीलो दृढ़व्रतः ।
यजनः सुमहत्कालादेव एकोऽभवत्ततः ॥
त्वष्टोः कन्या सुनीथा या मातुर्दुःशीलकारणात् ।
क्रूरा बुद्धिरभूत्तस्य जगतोऽस्यापि पीड़ने ॥
तपस्विनां कुले जाता क्रोधीयाश्च यशस्विनाम् ।
सगुणां निर्गुणां वापि यान्ति मातामहीं तनुम् ॥"

इत्यग्निपुराणम् ॥

तन्मरणे त्रिरात्राशौचं यथा । मातामहानां मरणे त्रिरात्रं स्यादशौचकम् । इति शुद्धितत्त्वे कूर्म्मपुराणम् ॥ * ॥ दुहितृपर्य्यन्ताभावे तस्य श्राद्धे दौहित्रस्याधिकारो यथा,—

"मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे ।
तं च तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वदा ॥"

इति शुद्धितत्त्वम् ।

दुहितृपर्य्यन्ताभावे तस्य धने दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः ।

"पौत्त्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"

इति मनुवचने पौत्त्रतुल्याभिधानेन यथा पुत्त्राभावे पौत्त्रस्तथा दुहित्रभावे दौहित्रः । अतएव गोविन्दराजधृतो विष्णुः ।

"अपुत्त्रपौत्त्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्त्रदौहित्रकाः समाः ॥"

इति दायतत्त्वम् ॥

मातामही, स्त्री, (मातामहस्य पत्नीति । "पुंयो-गादाख्यायाम् ।" ४ । १ । ४८ । इति + ङीष् ।) मातामहपत्नी । मातृमाता । आइ इति भाषा । यथा,—

"मातामही मातृमाता मातृतुल्या च पूजिता ।
प्रमातामहीति विज्ञाता प्रमातामहकामिनी ।
वृद्धप्रमातामही ज्ञेया तत्पितुः कामिनी तथा ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

तन्मरणे पक्षिण्यशौचं यथा,—

"मातुले श्वशुरे मित्रे गुरौ गुर्व्वङ्गनासु च ।
अशौचं पक्षिणीं रात्रिं मृता मातामही यदि ॥"

इति शुद्धितत्त्वम् ॥

दुहितृपर्य्यन्ताभावे तच्छ्राद्धे दौहित्रस्याधि-कारो यथा । तदभावे दौहित्रः । प्रागुक्तब्रह्म-पुराणे तथादर्शनात् ।

"पौत्त्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"

इत्यनेन यथा पुत्त्राभावे पौत्त्रस्तथा दुहित्रभावे दौहित्रः । इति प्रागेवोक्तत्वात् ।

"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्म्मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ॥"

इति वृद्धशातातपवचनेन मातामह्याश्च साध्वा-दौहित्रेण पिण्डदानश्रुतेः धनाधिकारित्वाच्च । इति शुद्धितत्त्वम् ॥ * ॥ तस्या अयौतुकधने पौत्त्रपर्य्यन्ताभावे दौहित्राधिकारः । यौतुकधने तु पुत्त्रपर्य्यन्ताभावे दौहित्राधिकारो यथा ।

"दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्त्रवत् ॥"

इति मनुवचने दौहित्रे पौत्त्रधर्म्मातिदेशात् पुत्त्रेण परिणीतदुहितुर्बाधात् बाधकपुत्त्रेण बाध्यदुहितृपुत्त्रबाधस्य न्याय्यत्वात् । इति दाय तत्त्वम् ॥ पुत्त्राभावे दौहित्रोऽधिकारी । पुत्त्रा

धिकारात् शास्त्रदुहितृधिकारस्मृतेः तद्वाधिकाया दुहितुः पुत्रेण बाध्यपुत्रबाधस्येव न्याय्यत्वात् । इति दायक्रमसंग्रहश्च ॥

माताली, स्त्री, (मातुः आली । पृषोदरादित्वात् अकारलोपः । यद्वा, मातायाः आली ।) मातुः सखी । इति शब्दमाला ॥

मातुलः, पुं, (मातुर्भ्राता । "पितृव्यमातुलेति ।" ४।२।३६। इति निपातने । तत्र "मातुर्डुलच् ।" इति वार्त्तिकात् डुलच् ।) मातृभ्राता । पितृश्यालकः । इत्यमरः । २ । ६ । ३१ । मामा इति भाषा ॥ तन्मरणे भागिनेयस्य पक्षिण्यशौचम् । यथा, शुद्धितत्त्वे ।
"मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ।"
न च मातामहपर्य्यन्तरहितस्य मृतस्य प्रेतक्रियाद्यधिकारी । यथा,—
"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।"
इति शातातपीयपाठक्रमात् । इति शुद्धितत्त्वम् ॥
(मात्यते खार्थ्यादिना मीयते । मान + बाहुलकात् डुलच् ।) व्रीहिभेदः । मदनद्रुमः । (मादयतीति । मद + णिच् + बाहुलकात् उलच् पृषोदरात् दस्य तकारत्वञ्च ।) धुस्तूरः । इति मेदिनी । ले, १२३ ॥ पर्य्यायो यथा,—
"धत्तूर धूर्त्त धुस्तूरा उन्मत्तः कनकाह्वयः ।
देवता कितवस्तूरी महामोहः शिवप्रियः ।
मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
मा विद्यते तुला तुलना यस्य ।) सर्पविशेषः । इति हेमचन्द्रः । ३ । २१६ ॥

मातुलकः, पुं, (मातुल + स्वार्थे कन् ।) धुस्तूरवृक्षः । इति राजनिर्घण्टः ॥ (मातुलः । यथा, पञ्चतन्त्रे । १ । २४१ ॥
"सोऽपि तव मातुलको न समायातः ॥")

मातुलपुत्रकः, पुं, (मातुलस्य धुस्तूरस्य पुत्रकः ।) धुस्तूरफलम् । इत्यमरः । २ । ४ । ७८ ॥ (यथास्य पर्य्यायः ।
"मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
मातुलतनयः । इति मेदिनी । के, २३५ ॥

मातुला, मातुलानी, } स्त्री, (मातुल + टाप् । मातुलस्य स्त्री । "इन्द्रवरुणेति । ४।१।४९। ङीष् आनुक् च ।) मातुलपत्नी । इत्यमरभरतौ ।२।६।३०। मामी इति भाषा ॥ तन्मरणे पक्षिण्यशौचम् । यथा,—
"श्वशुरयोर्भगिन्याश्च मातुलान्याश्च मातुले ।
पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम् ॥"
इति शुद्धितत्त्वम् ॥

मातुलानी, स्त्री, (मा निषेधे तुलां नयति प्राप्नोतीति । नी + क्विप् । ङीष् ।) कलायः । भङ्गा । इति मेदिनी । ने, २०३ ॥ (यथास्याः पर्य्यायः । भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ॥")
शणः । इति हेमचन्द्र. । ४ । २४५ ॥ प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

मातुलाहिः, पु, (मा तुल्यतेऽसौ इति । तुल + मूलविभुजादित्वात् कः । मातुलश्चासौ अहिश्च ।) सर्पविशेषः । मालुया साप इति पेशुयाटी इति च भाषा । अयं खड्गाकृतिः आयतदेहः दीर्घलाङ्गूलः चतुष्पात् । इति मधुमाधवादयः ॥ तत्पर्य्यायः । मालुधानः २ । इत्यमरः ।१ ।८।४॥

मातुली, स्त्री, (मातुलस्य स्त्री । "मातुल + इन्द्रवरुणभवेति ।" ४ ।१।४९ । इति ङीष् "मातुलोपाध्याययोरानुग् वा ।" इति वार्त्तिकोक्तेः पक्षे आनुगभावः ।) मातुलपत्नी । इत्यमरः । २ । ६ । ३० ॥ भङ्गा इति शब्दचन्द्रिका ॥

मातुलुङ्गः, पुं, (मा न तुलं गच्छतीति । गम + डः । पृषोदरादित्वात् अकारस्योकारः मुम् च ।) बीजपूरः । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम् ।
शर्कराडाडिमाभ्यां वा दाक्षाखर्ज्जूरयोस्तथा ॥"
(तथास्य पर्य्यायः ।
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
लुङ्गुषः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ।
तथास्य गुणाः ।
स्यान्मातुलुङ्गः कफवातहन्ता
हन्ता क्रिमीणां जठरामयघ्नः ।
स दोषरक्तादिविकारपित्त-
सन्दीपनः शूलविकारहारी ॥
श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनम् ।
दीपनं लघु रुच्यञ्च मातुलुङ्गमुदाहृतम् ॥
त्वक् तिक्ता दुर्ज्जरा तस्य कृमिवातकफापहा ।
स्वादु शीता गुरुः स्निग्धा तन्मांसं वातपित्तजित् ॥
मेध्यं शूलानिलच्छर्द्दिकफारोचकनाशनम् ।
दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केशरम् ॥
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम् ।
शूलाजीर्णादिरोगेषु मन्दाग्नौ कफमारुते ॥
अरुचिश्वासकासेषु स्वरसोऽस्योपदिश्यते ।
रसोऽतिमधुरो हृद्यो वीर्य्यपित्तानिलापहः ॥
कफकृद्दुर्ज्जरः पाके मातुलुङ्गस्य कल्ककः ।
तिक्तं पुष्पन्तु बीजञ्च गुल्मशुल्यात्तथापरम् ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
"त्वक् तिक्ता कटुका स्निग्धा मातुलुङ्गस्य वातजित् ।
बृंहणं मधुरं मांसं वातपित्तहरं गुरु ॥
लघु तत्केसरं श्वासकासहिक्कामदात्ययान् ।
आस्यशोषानिलच्छर्द्दिविबन्धच्छर्द्दारोचकान् ॥
गुल्मोदरार्शः शूलानि मन्दाग्नित्वञ्च नाशयेत् ॥"
इति च वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)

मातुलुङ्गकः, पुं, (मातुलुङ्ग + संज्ञायां स्वार्थे वा कन् ।) जोलङ्गवृक्षः । तत्पर्य्यायः । फलपूरः २ बीजपूरः ३ रुचकः ४ । इत्यमरः ।२। ४ ।७८ ॥ मातुलुङ्गः ५ अम्लफलः ६ फलपूरकः ७ लुङ्गुषः ८ पूरकः ९ पूरः १० बीजपूर्णः ११ अम्लकेशरः १२ जोलङ्गः १३ । इति रत्नमाला ॥ अस्य गुणाः । हृद्यत्वम् । अम्लत्वम् । लघुत्वम् । अग्निदीपनत्वम् । आध्मानगुल्मप्लीहहृद्रोगोदावर्त्तनाशित्वम् । विबन्धहिक्काशूलच्छर्दिरोगे प्रशस्तत्वञ्च । अस्य त्वग्गुणाः । तिक्तत्वम् । दुर्ज्जरत्वम् । कफवातनाशित्वम् । विगतरसत्वञ्च । तन्मांसगुणाः । स्वादुत्वम् । शीतत्वम् । गुरुत्वम् । वायुपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मातुलुङ्गा, स्त्री, (मातुलुङ्ग + टाप् ।) मधुकुक्कुटी । यथा,—
"मातुलुङ्गा सुगन्धाढ्या गिरिजा पूतिपुष्पिका ।
अत्यम्ला देवदूती च सा कचिन्मधुकुक्कुटी ॥"
इति रत्नमाला ॥

मातुलुङ्गिका, स्त्री, (मातुलुङ्ग + संज्ञायां कन् । टाप् अकारस्येत्वम् ।) वनबीजपूरः । इति राजनिर्घण्टः ॥

मातृकच्छिदः, पु, (मातुः कं शिरश्छिनत्तीति । छिद + कः । पित्रादेशात् मातृशिरश्छेदनादस्य तथात्वम् ।) परशुरामः । इति केचित् ॥

मातृका, स्त्री,(मातेव । मातृ + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् टाप् ।) धातृका ॥ (यथा, बृहत्संहितायाम् । ४३ । ६६ ।
"इन्द्रध्वजच्छेदने बालपीडा
राज्ञो मातुः पीडनं मातृकायाः ॥"
मातेव । मातृ + स्वार्थे कन् ।) माता । देवीभेदः । वर्णमाला । इति मेदिनी । के, १६८॥ करणम् । स्वरः । उपमाता । इति हेमचन्द्रः । मातृकागणोत्पत्तिर्यथा,—
"तत्र देवोऽप्यसौ दैत्यं त्रिशूलेनाहनद्भृशम् ।
तस्याहतस्य यद्रक्तमपतद्भूतले किल ॥
तस्मादन्धका असंख्याता बभूवुरपरे भृशम् ।
तद्दृष्ट्वा महदाश्चर्य्यं रुद्रः शूलेऽन्धकं दधे ॥
गृहीत्वा त्रिशिखाग्रेण ननर्त्त परमेश्वरः ।
इतरेऽप्यन्धकाः सर्व्वे चक्रेण परमेष्ठिना ॥
नारायणेन निहतास्तत्र येऽन्ये समुत्थिताः ।
अस्रधारासुरारेस्तु शूलप्रोतस्य चासकृत् ॥
अनारतं समुत्तस्थुः ततो रुद्रो दयान्वितः ।
तस्य क्रोधेन महता मुखाज्ज्वाला विनिर्ययौ ॥
तद्रूपधारिणीं देवीं यान्तां योगेश्वरीं विदुः ।
स्वस्वरूपधारिणी चान्या विष्णुनापि विनिर्म्मिता ॥
ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च ।
वाराहेण च देवेन विष्णुना परमेष्ठिना ॥
पातालोद्धरणं रूपं तस्या देव्या विनिर्ममे ।
माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः ॥
कारणं यस्य यत् प्रोक्तं चेन्नानावधारितम् ॥
शरीरादेव नाम्ना तु तदिदं कीर्त्तितं मया ।

काम: क्रोधस्तथा लोभो मदो मोहोऽथ पञ्चम: ॥
मात्सर्य्यं षष्ठमित्याहु: पैशुन्यं सप्तमं तथा ॥
असूयाचाष्टमी ज्ञेया इत्येता अष्ट मातर: ॥
कामं योगेश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ॥
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ।
मोह: स्वयम्भु कौमारी मात्सर्य्यं चैन्द्रजां विदु: ॥
यामी दण्डधरा देवी पैशुन्यं स्वयमेव च ।
असूया वराहाख्या इत्येता: परिकीर्त्तिता: ॥
कामादिगण एषोऽयं शरीरं परिकीर्त्तितम् ।
अस्याह मूर्त्तिनु यथा तथा ते कीर्त्तितं मया ॥
एताभिर्देवताभिश्च तस्य रक्ते तु शोषिते ।
क्षयं गतासुरी माया स च सिद्धोऽन्धकोऽभवत् ॥
एतत्ते सर्व्वमाख्यानमात्मविद्यामृतं मया ।
य एतच्छृणुयान्नित्यं मातृणामुद्भवं शुभम् ॥
तस्य ता: सर्व्वदा रक्षां कुर्व्वन्त्यनुदिनं नृप ।
यश्चैतत् पठते जन्म मातृणां पुरुषोत्तम ॥
स धन्य: सर्व्वदा लोके शिवलोकञ्च गच्छति ।
तासाञ्च ब्रह्मणा दत्ता अष्टमी तिथिरुत्तमा ॥
एता: संपूजयेद्भक्त्या बिल्वाहारो नर: सदा ।
तस्य ता: परितुष्टाश्च क्षेमारोग्यं ददन्ति च ॥"
इत्यादि वाराहपुराणे कामादिमातृगणोत्पत्ति-नामाध्याय: ॥ अपि च ।
"ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तय: ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययु: ॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलु: ।
आयाता ब्रह्मण: शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरे: ।
शक्ति: साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपु: ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहति: ॥
वज्रहस्ता तथैवैन्द्री गजराजोपरिस्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
तत: परिवृतस्ताभिरीशानो देवशक्तिभि: ।
हन्यन्तामसुरा: शीघ्रं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥"
इति मार्कण्डेयपुराणम् ॥
मातृवर्गो यथा,—
"गुरो: पत्नी राजपत्नी विप्रपत्नी च या सती ।
पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्प्रसू: ॥
प्रसू: पित्रोस्तयोर्भ्रातु: पत्नी श्वश्रू: स्वकन्यका ।
जननी तनुसपत्नी च भगिनी सुरभी तथा ॥
स्वामीष्टसुरपत्नी च धात्री कान्ताप्रदायिका ।
गर्भधात्रीस्तनाढ्यौ च भयात्रातुश्च कामिनी ॥
एता वेदप्रणीताश्च सर्व्वेषां मातर: स्मृता: ।
एतास्वपि च सर्व्वासु न्यूनता नास्ति कासु च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्याय: ॥
षोडश मातरो यथा,—
"गुरुपत्नी राजपत्नी देवपत्नी तथा वधू: ।
पितु: स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ॥
पितृपत्नी भ्रातृपत्नी श्वश्रूश्च भगिनीसुता ।
गर्भधात्रीष्टदेवी च पुंस: षोडश मातर: ॥"
इति तत्रैव ५८ अध्याय: ॥
अथ मातृकान्यास: ।
भगवानुवाच ।
"मातृकान्यासमधुना शृणु वेतालभैरव ।
येन देवत्वमायान्ति नरोऽपि विहितेन वै ॥
वागब्रह्माणीसुता देव्यो मातृका: परिकीर्त्तिता: ।
तासां मन्त्राणि सर्व्वाणि व्यञ्जनानि स्वरास्तथा ॥
चन्द्रबिन्दुप्रयुक्तानि सर्व्वकामप्रदानि च ।
ऋषिस्तु मातृमन्त्राणां ब्रह्मैव परिकीर्त्तित: ॥
प्रोक्ता छन्दस्तु गायत्री देवता च सरस्वती ।
शरीरशुद्धिप्रमुखसर्व्वकामार्थसाधने ॥
विनियोग: समुद्दिष्टो मन्त्राणां न्यूनपूरणे ।
अकारेण समं कादिवर्गो य: प्रथम: स्मृत: ॥
तैश्चन्द्रबिन्दुसंयुक्तैस्तन्मस्वैरन्तरैर्बहि: ।
आकारञ्च तथोच्चार्य्य अङ्गुष्ठाभ्यां नमस्तथा ।
प्रथमं मातृकामन्त्रमङ्गुष्ठद्वयतो न्यसेत् ॥
परे वर्गा: स्वरै: सार्द्धं ये वाच्या न्यासकर्म्मणि ।
ते सर्व्वे चन्द्रबिन्दुभ्यां युक्ता: कार्य्यास्तु सर्व्वत: ॥
ह्रस्वेकारञ्च वर्गेण दीर्घकारान्तगेन तु ।
तर्ज्जन्योर्विन्यसेत् सम्यक् स्वाहान्तेन तु पूर्व्ववत् ॥
ह्रस्वोकारश्च वर्गेण दीर्घोकारान्तगेन तु ।
मध्यमायुगले सम्यक् वषडन्तेन विन्यसेत् ॥
एकारादितवर्गान्त ऐकारान्तेन चैव हुम् ।
न्यसेदनामिकायुग्मे नियतं तत्र भैरव ! ॥
ओकारादिपवर्गन्तु औकारान्तेन शोभितम् ।
वौषडन्तं कनिष्ठायां विन्यसेत् कार्य्यसिद्धये ॥
अंकारादियकारादिवर्गेण चान्तकेन च ।
अ: इत्यन्तेन तलयोर्विन्यसेत् पाणिपृष्ठयो: ॥
वषट्कारं शेषभागे मन्त्रन्यासे नियोजयेत् ।
हृदयादिषडङ्गेषु पूर्व्ववत् क्रमतो न्यसेत् ॥
अङ्गुष्ठाद्युक्तवर्गैस्तु क्रमात् षड्भिस्तथाविधै: ।
पुनस्तथा पादजानुसक्थिगुह्ये तु पार्श्वयो: ।
वक्षौ च विन्यसेन्मन्त्रान् क्रमात् पूर्व्ववदक्षरै: ॥
बाह्वो: पाण्योस्तथा कण्ठे नाभौ च जठरे तथा ।
स्तनयोरपि विन्यासं तथा षड्भि: समाचरेत् ॥
वक्त्रे च चिबुके गण्डे कर्णयोश्च ललाटके ।
अंसे कर्णे च षड्वर्गै: पूर्व्ववन्न्यासमाचरेत् ॥
रोमकूपे ब्रह्मरन्ध्रे गुह्ये जङ्घायुगे तथा ।
नखेषु पादपार्ष्ण्योश्च तथा पूर्व्ववदाचरेत् ॥
एवन्तु मातृकान्यासं य: कुर्य्यान्नरसत्तम: ।
स धर्म्मयज्ञे पूजासु पूतो योग्यश्च जायते ॥
नान्य: परतरं मन्त्रं विद्यते क्वचिदेव हि ।
य: सर्व्वकामदं पुण्यं चतुर्व्वर्गफलप्रदम् ॥
वागदेवतां हृदि ध्यात्वा न्यस्य सर्व्वाक्षराणि च ॥
त्रिधा च मातृकामन्त्रै: संक्रमेण पिबेज्जलम् ।
स वाग्मी पण्डितो धीमान् जायते च वर: कवि: ॥
चन्द्रबिन्दुसमायुक्तान् स्वरान् पूर्व्वान् पठेद्बुध: ।
व्यञ्जनानि च सर्व्वाणि केवलानि पठेत्तत: ॥
अकारादिक्षकारान्तान्येवं न्यासैस्तु पूर्व्वकै: ।
जलं करतले न्यस्य पठित्वाक्षरसंचयम् ॥
अभिमन्त्र्य तु तत्तोयं प्रथमं पूरकै: पिबेत् ।
कुम्भकेन द्वितीयन्तु तृतीयन्त्वथ रेचकै: ॥
एवं सप्तत्रिवारन्तु पीत्वा तोयं विचक्षण: ।
दृढाङ्ग: पण्डितो भूयात् पुत्त्रपौत्त्रसमन्वित: ॥
त्रिसन्ध्यमथ पीत्वैव मातृकामन्त्रमन्त्रितम् ।
तोयं कवित्वमाप्नोति सर्व्वान् कामांस्तथैव च ॥
सततं कुरुते यस्तु मातृकामन्त्रमन्त्रितम् ।
तोयपानं महाभाग: पूरकस्तम्भरेचकै: ॥
स सर्व्वकामान् संप्राप्य पुत्त्रपौत्त्रसमृद्धिमान् ।
भूत्वा महार्कविर्लोके बलवान् सत्यविक्रम: ॥
सर्व्वत्र वल्लभो भूत्वा चान्ते मोक्षमवाप्नुयात् ।
राजानमथवा राजभार्य्यां पुत्त्रमथापि वा ॥
वशीकरोति न चिरात् मातृकामन्त्रपालक: ।
न्यासक्रमे क्रम: प्रोक्तो वर्गक्रम इहैव तु ॥
अक्षराणां क्रमेणाथ तोयपानं समाचरेत् ।
ये ये मन्त्रा देवतानामन्येषामथ रक्षसाम् ॥
ते मन्त्रा मातृकामन्त्रे नित्यमेव प्रतिष्ठिता: ।
सर्व्वमन्त्रमयश्चायं सर्व्वदेवमयस्तथा ॥
चतुर्व्वर्गप्रदश्चायं मातृकामन्त्र उच्यते ।
इति ते कथित: पुत्त्र ! मातृकान्यास उत्तम: ॥"
इति श्रीकालिकापुराणे मातृकान्यास: ७६ अ: ॥
अथ तस्य प्रयोग: ।
अस्य मातृकामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो मातृकासरस्वती देवता हलो बीजानि स्वरा: शक्तयो मातृकान्यासे विनियोग: । शिरसि ॐ ब्रह्मणे ऋषये नम: । मुखे ॐ गायत्रीच्छन्दसे नम: । हृदि ॐ मातृकासरस्वत्यै देवतायै नम: । गुह्ये ॐ व्यञ्जनेभ्यो बीजेभ्यो नम: । पादयो: ॐ स्वरेभ्य: शक्तिभ्यो नम: । तथा च शारदायां ।
"मातृकां शृणु देवेशि ! न्यसेत् पापनिकृन्तनीम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रीच्छन्द उच्यते ॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम् ।
शक्तयस्तु स्वरा देवि ! षडङ्गन्यासमाचरेत् ॥"
तत: षडङ्गन्यास: । अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नम: । इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा । उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् । एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम् । ओं पं फं बं भं मं औं कनिष्ठाभ्यां वौषट् । अं यं रं लं वं शं षं सं हं लं

यं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु।
अं कं ५ आं हृदयाय नमः। इत्यादि। तथा
च ज्ञानार्णवे।
"अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम्॥
ओं औं मध्ये पवर्गन्तु बिन्दुयुक्तं न्यसेत् प्रिये।।
अनुस्वारविसर्गान्तर्यशवर्गौ सलक्षकौ॥
हृदयञ्च शिरो देवि। शिखा कवचकं तथा।
नेत्रमस्त्रं न्यसेत् मेऽन्तं नमः स्वाहा क्रमेण तु॥
वषट् हुं वौषडन्तञ्च षडङ्गं योजयेत् प्रिये।।
षडङ्गोऽयं मातृकायाः सर्व्वपापहरः स्मृतः॥*॥
अथान्तर्म्मातृकान्यासः।
अकारादिषोडशस्वरान् सबिन्दून् षोडशदल-
कमले कण्ठमूले न्यसेत्। ककारादिद्वादश-
वर्णान् सबिन्दून् द्वादशदलकमले हृदये न्यसेत।
डकारादिदशवर्णान् सबिन्दून् दशदलकमले
नाभौ न्यसेत। बकारादिषड्वर्णान् सबिन्दून्
षड्दलकमले लिङ्गमूले न्यसेत्। वकारादि-
चतुरो वर्णान् सबिन्दून् चतुर्दलकमले मूला-
धारे न्यसेत्। हक्षवर्णद्वयं सबिन्दुं द्विदलपद्म-
भ्रूमध्ये न्यसेत्। तथा च ज्ञानार्णवे।
"द्व्यष्टपत्राम्बुजे कण्ठे स्वरान् षोडश विन्यसेत्।
द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत्॥
दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे बकारादींन्यसेच्च षट्॥
आधारे चतुरो वर्णान्न्यसेद्वादीन् चतुर्द्दले।
हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये।॥"
अगस्त्यसंहितायाम्।
"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये।।
एवमन्तः प्रविन्यस्य मनसातो बहिर्न्यसेत्॥"*॥
वैष्णवे तु।
एकैकवर्णमुच्चार्य्य मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥
अथान्तर्म्मातृकान्यासो मूलाधारे चतुर्द्दले।
सुवर्णाभे व श ष स चतुर्वर्णविभूषिते॥
षड्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि।
ब भ मैर्य्य र लैर्युक्ते वर्णैः षड्भिश्च सुव्रते।॥
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिफान्तदलैर्युक्ते बिन्दुद्वासितमस्तकैः॥
अनाहते द्वादशारे प्रवालरुचिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे॥
विशुद्धे षोडशदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाञ्छिते॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादित्रिरेखात्म ह ल क्ष त्रयभूषिते॥
तन्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्न्यासोऽयमान्तरः॥"
ततो बाह्यमातृकाध्यानम्।
"पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ता-
म्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-
माश्रये॥"
एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिनियमस्तन्त्रे।
"ललाटेऽनामिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्ज्जनीमध्यमानामा वृद्धानामे च नेत्रयोः॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमाञ्चोष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके।
मुखेऽनामां मध्यमाञ्च हस्तपादे च पार्श्वयोः॥
कनिष्ठानामिकामध्याः कास्तु पृष्ठे च विन्यसेत्।
ताः साङ्गुष्ठा नाभिदेशे सर्व्वाः कुक्षौ च
विन्यसेत्॥
हृदये च तलं सर्व्वं अंसयोश्च ककुत्स्थले।
हृत्पूर्व्वं हस्तपत्कुक्षि मुखेषु तलमेव च॥
एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः।
अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य
निष्फलः॥'
गौतमीये।
"ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोःपत्सन्ध्यग्रकेषु च॥
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽसके।
ककुद्यंसे च हृत्पूर्व्वं पाणिपादयुगे तथा।
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात्॥"
तद्यथा। अं नमो ललाटे। आं नमो मुख-
वृत्ते। इं ईं चक्षुषोः। उं ऊं कर्णयोः।
ऋं ॠं नसोः। ऌं ॡं गण्डयोः। एं ओष्ठे।
ऐं अधरे। ओं ऊर्द्ध्वदन्ते औं अधोदन्ते। अं
ब्रह्मरन्ध्रे। अः मुखे। कं दक्षबाहुमूले। खं
कूर्परे। गं मणिबन्धे। घं अङ्गुलिमूले। ङं
अङ्गुल्यग्रे। एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु।
एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु। एवं तं ५
वामपादमूलसन्ध्यग्रकेषु। पं दक्षिणपार्श्वे। फं
वामपार्श्वे। बं पृष्ठे। भं नाभौ। मं जठरे।
यं हृदि। रं दक्षबाहुमूले। लं ककुदि।
वं वामबाहुमूले। शं हृदादिदक्षहस्ते। षं
हृदादिवामहस्ते। सं हृदादिदक्षपादे। हं
हृदादिवामपादे। लं हृदाद्युदरे। क्षं हृदादि-
मुखे। सर्व्वत्र नमोऽन्तेन न्यसेत्। तथा च।
"ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दु-
वर्ज्जितः।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः॥"
इति भट्टः॥*॥
अथ संहारमातृकान्यासः।
तस्या ध्यानं यथा,—
"अक्षस्रजं हरिणपोतमुदग्रटङ्कं
विद्याः करैरविरतं दधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिमरुणामरविन्दरामां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम्॥
न्यासस्तु क्षकाराद्यकारान्तः। यथा क्षं नमो
हृदादिमुखे इत्यादि॥*॥ अपरञ्च।
"चतुर्धा मातृका प्रोक्ता केवला बिन्दुसंयुता।
सविसर्गा सोभया च रहस्यं शृणु कथ्यते॥
विद्याकरी केवला च सोभया भुक्तिदायिनी।
पुत्रदा सविसर्गा तु सबिन्दुर्वित्तदायिनी॥"
त्रिपुरेश्वरे।
वाग्भवाद्या च वाक्सिद्ध्यै रमाद्या श्रीप्रहृष्टये।
हृल्लेखाद्या सर्व्वसिद्ध्यै कामाद्या लोकवश्यदा।
श्रीकण्ठाद्यानिमान्न्यस्येत् सर्व्वमन्त्रः प्रसीदति॥"
श्रीविद्याविषये नवरत्नेश्वरे।
"वाग्भवाद्या नमोऽन्ताश्च न्यस्तव्या मातृका-
क्षराः।
श्रीविद्याविषये मन्त्री वाग्भवाद्यष्टसिद्धये॥"
इति तन्त्रसारः॥
(मातृ+"ऋतष्ठञ्।"४।३।७८। इति ठञ्।
ङि। मातुरागतम्। यथा, महाभारते। ६।
८७। ६७।
"योऽन्वयो मातृकस्तस्य स एनमभिपेदि-
वान्॥")
मातृकेशटः, पुं, (मातृके कुले शटति पुत्ररूपेण
गच्छतीति। शट+अच्।) मातुलः। इति
त्रिकाण्डशेषः॥
मातृनन्दनः, पुं, (मातॄणां नन्दनः पुत्र आनन्द-
वर्द्धनो वा।) कार्त्तिकेयः। यथा,—
"कथं त्वं कृत्तिकापुत्रस्तथावान् तं सुरं गुहम्।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः॥"
इत्यादि वाराहपुराणे स्कन्दोत्पत्तिर्नामाध्यायः॥
मातृमण्डलं, क्ली, (मातॄणां मण्डलम्।) नेत्रयो-
र्मध्यम्। तत्तु आसन्नमृत्युर्न पश्यति। यथा,
काशीखण्डे ४२ अध्याये।
"अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते।
विष्णोः पदानि भ्रूमध्यं नेत्रयोर्म्मातृमण्डलम॥"
(यथा च वृहत्संहितायाम्। "मातृगणमपि
मातृमण्डलविदो विप्रान् विदुर्ब्रह्मणः॥")
मातृमुखः पुं, जडः। इति हेमचन्द्रः। ३। १६॥
मातृबन्धुः, पुं, (मातुर्बन्धुः।) मातृबान्धव.।
यथा। बन्धवस्त्रिविधाः। आत्मबन्धवः पितृ-
बन्धवो मातृबन्धवश्चेति। यथोक्तम्।
"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवाः॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥"
इति मिताक्षरा॥
मातृबान्धवः, पुं, (मातुर्बान्धवः।) मातृबन्धुः।
स च मातामहभगिनीपुत्रः। मातामही-
भगिनीपुत्रः। मातृमातुलपुत्रश्च। यथा,—
"मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥"
इत्युद्वाहतत्त्वम्॥
मातृवाहिनी, स्त्री, (मातरं वहतीति। वह+
णिनिः।) वल्गुलापक्षी। इति राजनिर्घण्टः॥

मातृशासितः, पुं, (मात्रा शासितः । स्नेहाधिक्यात् केवलं मात्रैव शासितः न तु पित्राचार्य्यादिभिरिति भावः ।) मूर्खः । इति हेमचन्द्रः । ३ । १६ ॥

मातृष्वसा, स्त्री, (मातुः स्वसा । "मातृपितृभ्यां स्वसा ।" ८ । ३ । ८४ । इति षत्वम् ।) मातृभगिनी । मासी इति भाषा । सा मातृतुल्या यथा,—

"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥

मातृष्वसेयः, पुं, (मातृष्वसुरपत्यं पुमान् । मातृष्वसृ + "मातृष्वसुश्च ।" ४ । १ । १३४ । इत्यत्र "छण्प्रत्ययो ढकि लोपश्च ।" इति काशिकोक्तेः ढक् ।) मातृष्वसृपुत्रः । मासितुता भाइ इति भाषा । तत्पर्य्यायः । मातृष्वस्रीयः २ । इति हेमचन्द्रः । ३ । २०८ ॥

मातृष्वसेयी, स्त्री, (मातृष्वसुरपत्यं स्त्री । मातृष्वसृ + "मातृष्वसुश्च ।" ४ । १ । १३४ । इति ढक् । ढकि लोपश्च । ङीप् ।) मातृभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी । इति भाषा ॥ (टावन्तोऽप्ययं शब्द. । यथा, महाभारते । ३ । २२३ । ५ ।
("मम मातृष्वसेया त्वं माता दाशार्हणी मम ॥")

मातृष्वस्रीयः, स्त्री, (मातृष्वसुरपत्यं पुमान् । मातृष्वसृ + "मातृष्वसुश्च ।" ४ । १ । १३४ । इति छण् ।) मातृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ । मासितुता भाइ इति भाषा ॥

मातृष्वस्रीया, स्त्री, (मातृष्वस्रीय + टाप् ।) मातृभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी इति भाषा ॥

मातृसिंही, स्त्री, वासकः । इति शब्दरत्नावली ।

मात्रं, क्ली, (मीयत इति । मा + त्रन् ।) कार्त्स्न्यम् । अवधारणम् । इत्यमरः ।३।३।१७७ ॥ कार्त्स्न्ये यथा जीवमात्रं न हिंसेत । अवधारणे यथा पयोमात्रं भुङ्क्ते । इति तट्टीकायां भरतः ॥

मात्रा, स्त्री, (मीयते अनया । मा + "हुयामाश्रुभसिभ्यस्त्रन् ।"उणा० ४।१६८ इति त्रन् टाप् ।) परिच्छदः । अल्पः । परिमाणम् । इत्यमरः । ३।३।१७७ ॥ परिच्छदो छत्त्रचामरादिः । अल्पे यथा । शाकमात्रा । परिमाणे यथा । किञ्चिन्मात्रोऽङ्कुशः । इति तट्टीकायां भरतः ॥ (यथा, बृहत्संहितायाम् ।५८।२॥ "अङ्गुलमेकं भवति मात्रा ।") कर्णभूषा । वित्तम् । अक्षरावयवः । इति मेदिनी । रे, ७५ ॥*॥ (छन्दसां ह्रस्वदीर्घादिप्रभेदः । यथा, श्रुतबोधे ।
"यस्याः पादे प्रथमे द्वादश मात्रा तथा तृतीयेऽपि ॥")

कालविशेषः । यथा,—

"कालेन यावता पाणिः पर्य्येति जानुमण्डले ।
सा मात्रा कविभिः प्रोक्ता ह्रस्वदीर्घप्लुते मता ॥
इति प्राचीनाः ॥

अपि च ।

"वामजानुनि तद्धस्तभ्रमणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"
इति तन्त्रसारः ॥

इन्द्रियवृत्तिः । यथा,—

"मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥"
इति भगवद्गीता ॥

"मीयन्ते आभिर्विषयाः मात्रा इन्द्रियवृत्तयः ।"
इति तट्टीकायां श्रीधरस्वामी ॥

इन्द्रियम् । इति पूर्व्वोक्तश्लोकटीकायां मधुसूदनसरस्वती ॥ अंशः । यथा,—

"न योषिद्भ्यः पृथग्दद्यादवसानदिनाहृते ।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥"
इति श्राद्धतत्त्वम् ॥

(धनोच्चयः । यथा, ऋग्वेदे । ३ । ४ । ६ । ३ ।
"प्र मात्राभी रिरिचे ।"
"मात्राभिः मीयन्ते परिच्छिद्यन्त इति मात्राः धनोच्चयाः ।"इति तद्भाष्ये सायनः ॥ शक्तिः । यथा, पञ्चतन्त्रे । १ । ३५८ ।"का मात्रा समुद्रस्य यो मम प्रसूतिं दूषयिष्यति ॥" अवयवः । यथा, मनौ । ७ । ४ ।
"चन्द्रवित्तेशयोश्चैव मात्रानिर्हृत्य शाश्वतीः ॥"
"मात्रा अवयवाः ।" इति तट्टीकायां मेधातिथिः ॥ रूपम् । यथा, भागवते । २ ।५।२५ ॥
"तस्य मात्रा गुणः शब्दः ॥" "मात्रा स्वरूपं रूपम् ।" इति तट्टीकायां स्वामी ॥)

मात्सर्य्यं, क्ली, (मत्सर + ष्यञ् ।) मत्सरस्य भावः । परशुभद्वेषः । यथा,—

"मागाश्चिरायैकचरः प्रमादं
वसन्नसम्बाधशिवेऽपि देशे ।
मात्सर्य्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥"
इति भारवौ ३ अध्यायः ॥

मात्स्यिकः, त्रि, (मत्स्योऽस्य पण्यम् । "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति मत्स्य + ठक् ।) जालिकः । मत्स्यघातकः । इति सिद्धान्तकौमुदी ॥

माथ ऋ कुन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, माथ्यति । कुन्थो वधक्लेशौ । इति दुर्गादासः ॥

माथः, पुं, (माथ्यते पीड्यते जनः अस्मिन् । माथ + घञ् । ज्वलादित्वात् णो वा । निपातनात् गुणाभावः ।) पन्थाः । इति त्रिकाण्डशेषः ॥ (मथ + भावे घञ् ।) मन्थनम् । इति शब्दरत्नावली ॥

माथुरः, पुं, (मथुरा + अण् ।) मथुराया आगतः । इति मुग्धबोधव्याकरणम् ॥ (तत्र जात इत्यण् वा । मथुराजातः । यथा, कथासरित्सागरे । ३६ । ७३ ।

"ततः स इष्टबहुलमेघस्तां पुत्रमोऽब्रवीत् ।
मुग्धे ! पवनसेनाख्यो वणिक्पुत्रोऽस्मि माथुरः ॥"

अन्येन कृता माथुरेण प्रोक्ता । "तेन प्रोक्तम् ।" ४ । ३ । १०१ । इति अण् ङीप् । माथुरी-वृत्तिः । इति व्याकरणम् ॥)

मादः, पुं, (माद्यन इति मद + घञ् । गुणभावः ।) दर्पः । इत्यमरः । ३ । २ । १२ ॥ हर्षः । इति तट्टीकायां भरतः । मत्तता । इति शब्दरत्नावली ॥

मादकः, पुं, (माद्यति वर्षागमे हृष्यतीति । मद + ण्वुल् ।) दात्यूहपक्षी । इति शब्दमाला ॥ (मादयति स्वगुणेन भूतानीति । मद + णिच् ण्वुल् ।) मदकारकद्रव्ये, त्रि ॥ (यथा, देवीभागवते । १ । १४ । ६४ ।
"इन्द्रियाणि महाभाग ! मादकानि सुनिश्चितम् ।
अदारस्य दुरन्तानि पञ्चैव मनसा सह ॥")

मादनं, क्ली, (मादयति विरहिणः । इति मद + णिच् + ल्युः ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ (मादयतीति मद + णिच् + ल्युः ।) हर्षकारयितरि, त्रि ॥)

मादनः, पुं, (मादयति चित्तविकारमुत्पादयतीति । मद + णिच् + ल्युः ।) कामदेवः । मदनवृक्षः । धुस्तूरः । इति केचित् ॥

मादनी, स्त्री, (मादन + स्त्रियां ङीप् ।) माकन्दी । इति राजनिर्घण्टः ॥ विजया । इति भावप्रकाशः ॥

मादृशः, त्रि, (अहमिव दृश्यत इति । दृश + "त्यदादिषु दृशोऽनालोचने कञ्च ।" ३।२।६० । इति कञ् ।) मत्सदृशः । इति व्याकरणम् ॥ (यथा, महाभारते । ७ । १०८ । ८६ ।
"तस्य त्वं पदवीं गच्छ गच्छेयुर्यादृशा यथा ।
मादृशस्त्वेदृशे काले मादृशैरभिचोदितः ॥
कथं नु भार्य्या पार्थानां तव कृष्ण ! सखी विभो ! ।
धृष्टद्युम्नस्य भगिनी सभां नीयेत मादृशी ॥")

माद्री, स्त्री, (मद्रे जाता । मद्र + अण् ङीप् । भर्गादित्वात् न प्रत्ययलुक् ।) पाण्डुराजपत्नी । सा मृगीभूतस्य मुनेः शापात् मैथुनरहितस्य स्वामिन आज्ञया अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास । इति महाभारतश्रीभागवतमतम् ॥ (यथा, महाभारते ।१।६७।१५८।
"कुन्ती माद्री च जज्ञाते मतिश्च सुबलात्मजा ।")
अतिविषा । इति राजनिर्घण्टः ॥

माद्रीपतिः, पुं, (माद्रयाः पतिः ।) पाण्डुराजः । इति शब्दरत्नावली ॥

माधवः, पुं, (यदुपुत्रस्य मधोरपत्यं पुमान् । इति मधु + अण् । मा लक्ष्मीस्तस्याः धवः । माया विद्याया धव इति वा ।) विष्णुः । तस्य व्युत्पत्तिर्यथा,—

"मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ।

नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
(यथा, महाभारते । ५ । ७० । ४ ।
"मौनाद्ध्यानाच्च योगाच्च विद्धि भारत । माधवम् ।")
तन्नाममाहात्म्यं यथा,—
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"
इति वह्निपुराणम् ॥
(मधोर्वसन्तस्यायम् मधूनि मधुमन्ति कुसुमानि अस्मिन् वा । मधु+"मधोर्ञ च ।" ४ । ४ । १२९ । इति ञः ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, मार्कण्डेये । ११७।२७ ।
"स तेन सख्या सहितो जगामाभ्रवणं वनम् ।
पत्नीभिः स समं रन्तुं माधवे मासि पार्थिव ।॥"
(मधु+स्वार्थे अण् ।) वसन्तः । इति विश्वः ॥ (यथा, सुश्रुते । १ । १६ । ६ । "मधुमाधवौ वसन्तः ।"
"माधवप्रथमे मासि नभस्यप्रथमे पुनः ॥"
इति चरके सूत्रस्थाने सप्तमेऽध्याये ॥
"माधवनभस्यसहस्यानां यथासंख्यं वैशाखभाद्रपौषाणां सूत्रतोऽभिहितत्वात् तेषां प्रथमे उपेयवर्त्तिनि मासि चैत्रादौ विषय इति निष्कर्षः । इति चरकटीकाकृदभिप्रायः ॥)
मधुकद्रुमः । खदिरः । इति राजनिर्घण्टः ॥
(भौत्यमन्वन्तरीयसप्तर्षीणामन्यतम ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अग्नीध्रश्चाभिबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥"
सायनाचार्य्यस्य भ्राता । यथा, सायनकृतधातुवृत्तौ । इति पूर्व्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमराजमहामन्त्रिणा सायनपुत्रेण माधवसहोदरेण सायनाचार्य्येण विरचिता माधवीया धातुवृत्तिः ॥)
माधविका, स्त्री, (माधवी+कन् टाप् । पूर्ब्बह्रस्वश्च ।) माधवीलता । इत्यमरटीकायां भरतः ॥
माधवी, स्त्री, (मधौ साधुपुष्यति । मधु+"कालात् साधुपुष्प्यत्पच्यमानेषु ।" ४ । ३ । ४३ । इत्यण् । ङीप् ।) स्वनामख्यातपुष्पलता । तत्पर्य्यायः । अतिमुक्तः २ पुण्ड्रकः ३ वासन्ती ४ लता ५ । इत्यमरः । २ । ४ । ७२ ॥ अतिमुक्तकः ६ माधविका ७ माधवीलता ८ । इति तट्टीकायां भरतः ॥ चन्द्रवल्ली ९ सुगन्धा १० भ्रमरोत्सवा ११ भृङ्गप्रिया १२ भद्रलता १३ भूमिमण्डपभूषणा १४ वसन्तदूती १५ । इति जटाधरः ॥ लतामाधवी १६ । इति शब्दरत्नावली ॥ (यथा देवीभागवते । ९ । १२ । ७ ।
"आलेपेर्मेधुकेच माधवीमण्डपाद्दृताम् ।")
अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । मदगन्धित्वम् । पित्तकासव्रणदाहशोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"माधवी स्यात् वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा ।"
इति भावप्रकाशः ॥
सितिः । मधुशर्करा । कुट्टनी । (मधुनो विकार इत्यण् ङीप् ।) मदिरा । इति मेदिनी । वे, ४६—४७ ॥ (यथा, महाभारते । ४ । १५ । ३ ।
"अस्ति मे शयनं दिव्यं त्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥"
माधवस्येयमित्यण् ङीप् । तत्प्रियत्वात्तथात्वम् ।) तुलसी । इति शब्दमाला ॥ (मधौ वसन्ते संपूज्या च र्चनीयेति अण् ।) दुर्गा । इति शब्दरत्नावली ॥ माधवस्य पत्नी च ॥ (मधुवंशजा कन्या । यथा, महाभारते । १।९५।१७ । 'जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् ॥')
माधवीलता, स्त्री, (माधवाख्या लता ।) स्वनामख्यातपुष्पलता । इत्यमरटीकायां भरतः ॥
माधवेष्टा, स्त्री, (माधवस्य इष्टा ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥
माधवोचितं, क्ली, (माधवस्योचितम् । सुगन्धित्वात् तथात्वम् ।) कक्कोलकम् । इति राजनिर्घण्टः ॥ (विशेषोऽस्य कक्कोलशब्दे ज्ञातव्यः ॥)
माधवोद्भवः, पु, (माधवाद्द्भवोऽस्य ।) राजादनी । इति राजनिर्घण्टः ॥
माधुकः, पु, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ (यथा, महाभारते । १३ । ४८ । २० ।
"मैरेयकञ्च वैदेहः सम्प्रसूतेऽथ माधुकम् ॥")
माधुमतः, पु, (मधुमतस्य भवाः । मधुमत+"कच्छादिभ्यश्च ।" ४ । २ । १३३ । इत्यण् ।) काश्मीरदेशभवाः । इति हेमचन्द्रः ।४।२४॥
माधुरं, क्ली, (मधु अस्ति अस्य अस्मिन् वेति । मधु+"ऊषसुषिमुष्कमधो रः ।" ५।२।१०७। इति रः । ततः स्वार्थेऽण् ।) मल्लिका । इति त्रिकाण्डशेषः ॥ (मधुरात् सम्भवतीत्यण् ।) मधुरसम्भवे, त्रि ॥
माधुरी, स्त्री, (माधुर+गौरादित्वात् ङीप् ।) मद्यम् । इति भूरिप्रयोगः ॥ माधुर्य्यम् । यथा,
"तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्द्धते ॥"
इति गीतगोविन्दे ३ सर्गः ॥
माधुर्य्यं, क्ली, ('मधुरस्य भावः : मधुर+"वर्णदृढादिभ्यः ष्यञ् च ।"५।१।१२३। इति ष्यञ् ।) मधुरस्य भावः । मधुरत्वम् । इति हेमचन्द्रः । ३ । १०३ । (यथा, सुश्रुते सूत्रस्थाने एकादशाध्याये ।
"माधुर्य्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति ॥")
लावण्यम् । यथा,—
"रूपं किमप्यनिर्व्वाच्यं तनोर्माधुर्य्यमुच्यते ।"
इत्युज्ज्वलनीलमणिः ॥
पाञ्चालीरीतिविशिष्टकाव्यगुणः । यथा,—
"मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ।"
इति साहित्यदर्पणे ६ परिच्छेदः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ८ परिच्छेदे ।
"चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥
मूर्द्ध्नि वर्गान्त्यवर्णेन युक्तान् ट ठ ड ढान् विना ।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।"
(नायिकानामयत्नजोऽलंकारविशेषः । यथा, साहित्यदर्पणे । ३ । १२६ ।
"सर्व्वावस्थाविशेषेषु माधुर्य्यं परिकीर्त्तितम् ।"
सात्त्विकनायकगुणभेदः । यथा, तत्रैव ।३।६१।
"सर्व्वावस्थाविशेषेषु माधुर्य्यं रमणीयता ।")
माध्यन्दिनं, त्रि, (मध्ये भवम् । मध्य+"अन्तःपूर्व्वपदात् ठञ् ।" ४।३।६० । इत्यत्र काशिका वृत्तौ "मध्यो मध्यं दिनण् चास्मात् ।" इति दिनण् ।) मध्यमम् । इति हेमचन्द्रः । ६ । ६६ ॥ (मध्यन्दिनसम्बन्धि । यथा, ऋग्वेदे । ३ । २८ । ४ ।
"माध्यन्दिने सवने जातवेदः पुरोडाशमिह कवे ! जुषस्व ।"
"माध्यन्दिने मध्यन्दिनसम्बन्धिनि" तथा "माध्यन्दिनं मध्यं दिनस्येदमित्यर्थे उत्सादित्वादञ् जिलादादिवृद्धिः जिलादेर्वादुदात्तत्वम् ।" इति च तद्भाष्ये सायनः ॥ मध्यन्दिनेन प्रोक्ताधीता वा । इत्यण् ङीप् । शुक्लयजुर्वेदस्य शाखाभेदः । यथा, आश्वलायनीयश्रौतसूत्रे । ५ । ५ । १६ ।
"पिबा सोममभिसुतमदः इति तिस्रोऽर्वाचीः सोमकामं त्वाहुस्त्वयायं सोमस्त्वमेह्यर्वाङितिमाय सोमाः प्र दिवो विदाना आ पूर्वो अस्य कलशः स्वाहेति माध्यन्दिन्यः ।")
माध्यमं, त्रि, (मध्ये भवं । मध्य+"अन्तःपूर्व्वपदाट्ठञ् ।" ४ । ३ । ६० । इत्यस्य काशिकावृत्तौ "मम्मीयौ च प्रत्ययौ वक्तव्यौ ।" इति मः ।) मध्ये भवम् । यथा,—
"मध्यमं माध्यमं मध्यमीयं माध्यन्दिनञ्च तत् ।"
इति हेमचन्द्रः । ६ । ६६ ॥
माध्यस्थं, क्ली, (मध्यस्थ+ष्यञ् ।) मध्यस्थस्य भावः । मध्यस्थकरणम् । यथा, कुमारसम्भवे । १ । ५२ ।
"अयाचितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।

अध्यर्थनाभङ्गभयेन साधु-
माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थे ॥”

माध्वकं, क्ली, (माध्वीक । पृषोदरादित्वादीकारस्याकारः ।) माध्वीकम् । इत्यमरटीकायां भानुदीक्षितः ॥

माध्वी, स्त्री, (मधुनो विकारः । मधु + अण् । ङीप् । “सत्वन्वाख्यवाख्यमाध्वीति ।” ६ । ४ । १७५ । अस्य स्त्रियां यणादेशो निपात्यते ।) मद्यम् । इति त्रिकाण्डशेषः ॥ मध्वादिकृता सुरा । इति राजनिर्घण्टः ॥ (यथा, मनौ । ११ । ९५ ।

“गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।”

मधु मधुररसोऽस्त्यस्य कण्टकावच्छेदे अण् ।) मधुरकण्टकमत्स्यः । इति शब्दरत्नावली ॥ (मधुमति, त्रि । यथा, ऋग्वेदे । १ । ७१ । २ ।

“दिवानक्तं माध्वी आसीर्या नः ॥”

हे माध्वी ! मधुमत्यौ ॥ इति तद्भाष्ये सायनः ॥ नदीविशेषः । यथा, मात्स्ये । १२० । ७१ ।

“तेभ्यः प्रान्ता च माध्वी च द्वे नद्यौ सम्प्रसूयाताम् ।”)

माध्वीकं, क्ली, (माध्वी + स्वार्थे कन् ।) मधूकपुष्पजातमद्यम् । तत्पर्य्यायः । मध्वासवः २ माधवकः ३ मधु ४ । इत्यमरः । २ । १० । ४१ ॥ मधुमाध्वीकमित्येकं नामेति केचित् ॥ पूर्व्वौ द्वौ पुष्पमद्ये । (यथा, महाभारते । ३ । २७७ । ३८ ।

“कथं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम् ।
लोभं सौवीरके कुर्य्यान्नारी काचिदिति स्मरे ॥”)

परौ द्वौ द्राक्षाविकारे । इति भरतः ॥ मार्द्वीकमिति वा पाठः । इति रमानाथः । माध्वीकस्थाने माध्वकमिति भानुदीक्षितः ॥ (मधु । यथा, नैषधे । १८ । ३३ ।

“धयतु नलिने माध्वीकं वा न वाऽभिनवागतः ।
कुसुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः ।
इह तु लिहते राजीलघं रथाङ्गविहङ्गमा
मधु निजवधूवक्राम्भोजेऽधुनाऽधरनामकम् ॥”

“माध्वीकं मकरन्दम् । इति तट्टीकायां नारायणः ॥) तत्पर्य्यायो यथा,—

“मधुमार्च्चीकमाध्वीकर्च्चौद्रसारघ्यमीरितम् ।
मक्षिकावरटीभृङ्गवातपुष्परसोद्भवम् ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

माध्वीकफलः, पु, (माध्वीकं मधुमत् फलमस्य ।) मधुनालिकेरिकः । इति राजनिर्घण्टः ॥

माध्वीमधुरा, स्त्री, (माध्वीमदनएव मधुरेति ।) मधुरखर्ज्जूरिका । इति राजनिर्घण्टः ॥

मान, क अर्च्चे । इति कविकल्पद्रुमः ॥ (चु०-पक्षे भ्वा०-पर०-सक०-सेट् ।) क मानयति मानति । इति दुर्गादासः ॥

मान, ङ विचारे । अर्च्चे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ मीमांसते शास्त्रं धीरः । अर्च्चायां तिवादयो न स्युरिति रमानाथः । इति दुर्गादासः ॥

मानं, क्ली, (मीयतेऽनेनेति । मा + करणे ल्युट् ।) परिमाणम् । तत्पर्य्यायः । पौतवम् २ द्रुवयम् ३ पाय्यम् ४ पौतवम् ५ । तत्तु तुलाङ्गुलिप्रस्थैस्त्रिविधं भवति । तत्र तुलाग्रहणेनोन्मानमुपलक्ष्यते । अङ्गुल्या हस्तादि । प्रस्थेन द्रोणादि । इत्यमरभरतौ ।२।९।८५॥ प्रमाणम् इति मेदिनी । ने, १५ ॥ यत्र तालो विरमति तत् । तदेव ग्रहमुच्यते । तच्चतुर्विधम् । समं विषमं अतीतं अनागतञ्च । इति सङ्गीतशास्त्रम् ॥ * ॥

अथ मानपरिभाषा ।

“न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया ॥
चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः ।
विहाय सर्व्वमानानि मागधं मानमुच्यते ॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः ।
त्रसरेणुस्तु पर्य्यायनाम्ना वंशीति गद्यते ॥
जालान्तरगतैः सूर्य्यकरैर्वंशी विलोक्यते ।
षड्वंशीभिर्म्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥
षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधानकौ ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ॥
टङ्कः स एव कथितस्तद्द्वयं कोलमुच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥
कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः पाणिमानिकः ।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम् ॥
विडालपदकञ्चैव तथा षोड़शिका मता ।
करमध्यो हंसपदं सुवर्णं कवलग्रहम् ॥
उदुम्बरञ्च पर्य्यायैः कर्ष एव निगद्यते ।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा ।
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ।
प्रकुञ्चः षोडशी विल्वं पलमेवात्र कीर्त्त्यते ॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते ।
प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः ॥
अष्टमानञ्च स ज्ञेयः कुड़वाभ्याञ्च मानिका ।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढ़कः ।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलश्च सः ॥
चतुर्भिराढ़कैर्द्रोणः कलशो नल्वणोऽर्म्मणः ।
उन्मानश्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः ।
शूर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च सा स्मृता ॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ।
चतुःसहस्रपलिका षण्णवत्यधिका च सा ॥
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः ।
तुलापलशतं ज्ञेया सर्व्वत्रैवैष निश्चयः ॥
माषटङ्काक्षविल्वानि कुड़वः प्रस्थमाढ़कम् ।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणा ॥” * ॥

मागधपरिभाषायां षड्रक्तिको माषश्चतुर्व्विंशतिरक्तिकष्टङ्कः षण्णवतिरक्तिकः कर्षः । अयं चरकसम्मतः ॥ सुश्रुतमते । पञ्चरक्तिको माषो विंशतिरक्तिकष्टङ्कोऽशीतिरक्तिकः कर्षः । अयमेव कलिङ्गपरिभाषायामपि । यतस्तत्राष्टरक्तिको माषो द्वात्रिंशद्रक्तिकष्टङ्कः । सार्द्धटङ्कद्वयमितः कर्षः ।

“गुञ्जादिमानमारभ्य यावत् स्यात् कुड़वस्थितिः ।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ॥
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः ।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम् ॥
मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम् ।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुड़वं वदेत् ॥”

इति मागधमानम् ॥ * ॥

अथ कालिङ्गमानम् ।

“यतो मन्दाग्नयो ह्रस्वा हीनसत्त्वा नराः कलौ ।
अतस्तु मात्रा तद्योग्या प्रोच्यते सुश्रुसम्मता ॥
यवो द्वादशभिर्गौरैः सर्षपैः प्रोच्यते बुधैः ।
यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते ।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित् ॥
चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च ।
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषिकः ॥
चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः ।
चतुःपलैश्च कुड़वः प्रस्थाद्याः पूर्व्ववन्मताः ॥
स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलम् ।
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ॥
नाल्पं हन्त्यौषधं व्याधिं यथाम्भोऽल्पं महानलम् ।
अतिमात्रञ्च दोषाय यथा शस्ये बहूदकम् ॥”

इति मानपरिभाषा । इति भावप्रकाशः ॥

मानः, पुं, (मन्यते बुद्ध्यतेऽनेन इति । मन + घञ् ।) चित्तसमुन्नतिः । इत्यमरः । १ । ७ । २२ ॥ चित्तस्य समुन्नतिरत्युद्धता मानः । सान्ते धनादुत्कर्षेणात्मनि चित्तोन्नतिर्मान इति । मन्यमो नास्तीति मननं मानः । इति तट्टीकायां भरतः ॥ (यथा, मनौ । ४ । १६३ ।

“दम्भं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥”)

आत्मनि पूज्यताबुद्धिः । इति नीलकण्ठः ॥ अनुरक्तयोर्दम्पत्योर्भावविशेषः । यथा,—

“दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः ।
स्वाभीष्टाश्लेषवीक्षादिनिरोधो मान उच्यते ॥”

इत्युज्ज्वलनीलमणिः ॥ पूज्यत्वम् । यथा,—

“अधमाः कलिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः ।

उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥
मानो हि मूलमर्थस्य माने म्लाने धनेन किम् ।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां
धनम् ॥"

इति गारुडे ११५ अध्यायः ॥

प्रियापराधसूचिका चेष्टा मानः । स च लघु-मध्यमो गुरुश्चेति । अल्पापनेयो लघुः । कष्टापनेयो मध्यमः । कष्टतमापनेयो गुरुः । असाध्यस्तु रसाभासः । अपरस्त्रीदर्शनादिजन्मा लघुः । गोत्रस्खलनादिजन्मा मध्यमः । अपरस्त्रीसम्भोगदर्शनादिजन्मा गुरुः । अन्यथासिद्ध-कुतूहलाद्यपनेयो लघुः । अन्यथावादशपथाद्यपनेयो मध्यमः । चरणपातभूषणदानाद्यपनेयो गुरुः । अपरस्त्रीदर्शनादिजन्मा यथा,—

"स्वेदाम्बुभिः क्वचन पिच्छिलमङ्गभूमौ
श्यामोदरि क्वचन कण्टकितत्वकान्ति ।
अन्यां विलोकयति भासयति प्रियेऽपि
मानः क्व धास्यति पदं तव तन्न विद्मः ॥"

गोत्रस्खलनादिजन्मा यथा,—

"यद्गोत्रस्खलनं तत्तु भ्रमो यदि न मन्यते ।
रोमालिव्यालसंस्पर्शं शपथं तन्वि । कारय ॥"

अपरस्त्रीसम्भोगदर्शनादिजन्मा यथा,—

"दयितस्य निरीक्ष्य भालदेशं
चरणालक्तकपिञ्जरं सपत्न्याः ।
सुदृशो नयनस्य कोणभासः
श्रुतिमुक्ताः शिखरोपमा बभूवुः ॥"

इति रसमञ्जरी ॥

ग्रहः । इति मेदिनी । ने, १५ ॥ (परिच्छेदके, त्रि । यथा, ऋग्वेदे । ७ । ८८ । ५ ।

"इहन्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्ते ।"

"मान्त्यस्मिन् सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः ।" इति तद्भाष्ये सायनः ॥ पुं, मन्त्रः । यथा, ऋग्वेदे । १ । १८९ । ८ ।

"अवोचाम निवचनान्यस्मिन्मानस्य सूनुः
सहसाने अग्नौ ।"

"मीयत इति मानो मन्त्रः तस्य सूनुरग्निः मन्त्रेणोत्पद्यमानत्वात् सप्तम्यर्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥ निर्माता । यथात्रैव । १० । १४४ । ५ ।

"यं ते श्येनश्चारुमवृकं पदाभरदरुणं मान-
मन्धसः ।"

"मानं यागद्वारा निर्मातारम् ।" इति तद्भाष्ये सायनः ॥)

मानकं, क्ली, पुं, (मानं इयत्तुपरिमाणमस्य । "शेषाद्विभाषा ।" ५ । ४ । १५४ । इति कप् ।) माणकम् । माणकचु इति भाषा ।

"कच्वी तु पिच्छिला प्रोक्ता विस्तीर्णपर्णमानके ।"

इति शब्दचन्द्रिका ॥

"स्थूलकन्दो ग्राम्यकन्दः स्थूलपत्रस्तु मानकः ।"

इति रत्नमाला ॥

अस्य गुणाः ।

"मानकं स्वादु शीतञ्च गुरु शोथहरं कटु ।"

इति राजवल्लभः ॥

अपि च ।

"मानकः स्यात्महापत्रः कथ्यते तद्गुणा अथ
मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥"

इति भावप्रकाशः ॥

(विषयोऽस्य यथा, —

"पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यसेत पायसन्तु तत ॥
हन्तु वातोदरं शोथं ग्रहणीं पाण्डुतामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥"

इति वैद्यकचक्रपाणिसंग्रह उदराधिकारे ॥)

मानग्रन्थिः, पुं, (मानस्य ग्रन्थिरिव । बाधकत्वात् ।) अपराधः । इति हारावली ॥ (मानस्य ग्रन्थिः । अभिमानवर्द्धनम् । यथा, छन्दोमञ्जर्याम् । ५ । ७ ।

"केशववंशजगीतिर्लोकमनोऽन्तर्गतहारिणी जयति।
गोपीमानग्रन्थिर्विमोचनी दिव्यगायनाचर्या ॥")

मानधानिका, स्त्री, कर्कटी । इति शब्दमाला ॥

माननीयं, त्रि, (मान्यते पूज्यत इति । मान + अनीयर् ।) मान्यम् । यथा,—

"मानो मान्योऽसि शक्रेषु माननीयः सुरा-
सुरैः ।
स्थापयामि महादेवीं मानं देहि गृहे मम ॥"

इति दुर्गोत्सवपद्धतिः ॥

मानरन्ध्रा, स्त्री, (मानार्थं समयपरिमाणज्ञापकं रन्ध्रमस्याम् ।) ताम्री । तामी । इति भाषा । यथा,—

"यामघोषोऽथ ताम्री स्यान्मानरन्ध्रा त्रिका-
लिका ।"

इति त्रिकाण्डशेषः ॥

मानवः, पुं, (मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान् । मनु + अण् ।) मनोरपत्यम् । मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, महाभारते । १ । ७५ । १०—१३ ।

"मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥")

बालः । इति शब्दरत्नावली ॥ (मनुना प्रोक्तम् । मनु + अण् ॥ उपपुराणविशेषः । यथा, देवी-भागवते । १ । ३ । १३—१४ ।

"सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।
नारदीयं शिवञ्चैव दौर्वाससमनूत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम् ॥")

मानवर्जितः, त्रि, (मानेन वर्ज्जितः ।) मान-रहितः । यथा, महाभारते । ३ । ४६ । ४८ ।

"तस्मात् त्वं नर्त्तनः पार्थ । स्त्रीमध्ये मान-
वर्ज्जितः ।")

नीचः । इति धरणिः ॥

मानवी, स्त्री, (मानव + स्त्रीत्वात् ङीप् ।) मनुष्य-स्त्रीजातिः । तत्पर्य्यायः । मानुषी २ मानुषी ३ नारी ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । ९ । ४१ ।

"दिवौकसं कामयते न मानवी
नवौकसम्भावि तवाननादिदम् ।")

शासनदेवताविशेषः । इति हेमचन्द्रः ।२।४५॥ स्वायम्भुवमनुकन्या । इति महाभारतम् ॥ (यथा, भागवते । ३ । २३ । ३ ।

"स वै देवर्षिवर्य्यस्तां मानवीं समनुव्रताम् ।")

मानवौघः, पुं, (मानवानां ओघः यस्मिन् ।) तारा-विद्यायाः पीठस्य उत्तरे वायव्यादीशपर्य्यन्तं पूज्यगुरुपङ्क्तिविशेषः । यथा । तारावत्यम्भानु-मत्यम्बजयाम्बविद्याम्बमहोदर्य्यम्बसुखानन्दनाथ-परानन्दनाथपारिजातानन्दनाथकुलेश्वरानन्द-नाथविरूपाक्षानन्दनाथफेरव्यम्बाः पूजयेत् । एते मानवौघाः । तथा च तन्त्रे ।

"अथ तारागुरून् वक्ष्ये इष्टादृष्टफलप्रदान् ।
ऊर्द्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स । सिद्धौघान् शृणु
यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्-
गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाक्षः फेरवी च कथितं तारिणीकुलम् ॥
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकी-
र्त्तिताः ॥"

इति तन्त्रसारः ॥

मानव्यं, क्ली, (मानवानां समूहः इति । "ब्राह्मण-माणववाडवाद्यन् ।" ४ ।२ ।४२ । इति यत् ।) मानवसमूहः । माणवानां समूहो माणव्यं विकारसंघेति ण्यः माणवो बालः । कृष्णाय-मध्यः इत्यमध्य इत्यके । इत्यमरटीकायां भरतः॥ (मनोर्गोत्रापत्यं । "मनु + गोत्रादिभ्यो यञ् ।" ४ । १ । १०५ । इत्यनेन यञ् । मनु-वंशीये, त्रि ॥)

मानसं, क्ली, (मन एव । मनस् "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) मनः । इत्य-मरः ।१।४।३१ ॥ (यथा, मार्कण्डेये । १५ । ६१ ।

"यच्चादानतपांसीह परत्र च न भूतये ।
भवन्ति तस्य यस्यात्मपरित्राणे न मानसम् ॥")

तस्य गुणा यथा,—

"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे "

इति भाषापरिच्छेदः ॥

(मनसि भवो जातो वा । मनस् + अण् ।) मनोभवे, त्रि । यथा, सङ्कल्पः कर्म्ममानसम् ॥ इत्यमरः । १ । ५ । २ ॥

"विपर्य्ययेऽत्रसंरागो मानसो मल उच्यते ।"

इत्येकादशीतत्त्वम् ॥

"अनूढ़ानङ्गपीड़ेव ममेयं मानसी व्यथा ॥"
इति प्राञ्चः ॥

मानसतापो यथा,—
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्या मात्सर्य्यादिभयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ । तापो भवति नैकधा ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥
त्रिविधमानसकर्म्म । यथा,—
"परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

मानसरोगा यथा,—
कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्य-
विषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथवा ।
उन्मादापस्मारमूर्च्छाभ्रमतमःसंन्यासप्रभृतयः ।
इति भावप्रकाशः ॥*॥ (मनसा सङ्कल्पेन कृत-
मित्यण् ।) सरोवरविशेषः । इति मेदिनी ।
से, ३१ ॥ स च कैलासे ब्रह्मणा निर्म्मितः ।
यथा,—
"कैलासश्चापि दुष्कम्पो दानवेन्द्रेण कम्पितः ।
यक्षराक्षसगन्धर्व्वैर्नित्यं सेवितकन्दरः ॥
श्रीमाञ्चमनोहरश्चैव नित्यं पुष्पितपादपः ।
हेमपुष्करसंछन्नं तेन वैखानसं सरः ॥
कम्पितं मानसञ्चैव राजहंसनिषेवितम् ॥"
इति महाभारते हरिवंशे नारसिंहे २२८ अः ॥
अपि च ।
"कैलासपर्व्वते राम । मनसा निर्म्मितं परम् ।
ब्रह्मणा नरशार्दूल ! तेनेदं मानसं सरः ॥
तस्मात् सुस्राव सरसः सायोध्यामुपगूहते ।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥"
इति रामायणे आदिकाण्डे २४ सर्गः ॥*॥
(पुं, नागविशेषः । यथा, महाभारते ।१।५७।१६।
"अमाहठः कामठकः सुषेणो मानसो व्ययः ।"
शाल्मलीद्वीपस्य वर्षविशेषः । यथा, मात्स्ये ।
५३ । २३ ।
"श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥"
पुष्करद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये ।
"द्वीपार्द्धस्य परिक्षिप्तः पश्चिमे मानसो गिरिः ।")
मानसजपः, पुं, (मानसेन कृतो जपः ।) धिया
वर्णश्रेण्युच्चारणम् । यथा,
"धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ।
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥
तज्जपे नियमो नास्त्येव । तथा च ।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वप-
न्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव समभ्यसन् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
इति तन्त्रसारः ॥
मानसतीर्थं, क्ली, (मानसं तीर्थमिव । रागाद्य-
भावात् तथात्वम् ।) रागादिरहितं मनः ।
यथा,
सूत उवाच ।
"तीर्थानि कथितान्येवं भौमानि मुनिसत्तम ! ।
मानसानीह तीर्थानि फलदानि विशेषतः ॥
मनो निर्म्मलतीर्थं हि रागादिभिरनाविलम् ॥"
इति नारसिंहपुराणे ४६ अध्यायः ॥
मानसपूजा, स्त्री, (मानसकृता पूजा । शाक-
पार्थिववत् समासः ।) मनोरचितद्रव्यकरणक-
सपर्य्या । यथा, हृत्पद्ममध्ये देवीं विभाव्य
कुण्डलीपाशसंस्थेन सहस्रारान्तेन पाद्यं देया-
श्चरणे दद्यात् । ततो मनश्चार्घ्यं दत्त्वा सहस्र-
दलपद्मभ्रष्टङ्गारलसितपरमामृतजलेन आचम-
नीयं मुखे । पञ्चविंशति तत्त्वेन गन्धञ्च ।
अहिंसां विज्ञानं क्षमां दयां अलोभं अमोहं
अमात्सर्य्यं अमायां अनहङ्कारं अरागं अद्वेषं
इन्द्रियाणि द्वादश एतानि पुष्पाणि च प्रदाप-
येत् । ततस्तेजोरूपं दीपं वायुरूपं धूपं दद्यात्
अम्बरं चामरं दर्पणं सूर्य्यं चन्द्रं छत्रं पद्मानु
मेखलां आनन्दं हारसुत्तमं अनाहतध्वनिमयीं
घण्टां निवेदयेत् । ततः सुधारसाम्बुधिं मांस-
पर्व्वतं मत्स्याण्डपूरितं पायसञ्च दत्त्वा ।
"मनोनर्मसत्तालैः शृङ्गारादिरसोद्भवैः ।
नृत्यैर्गीतैश्च वाद्यैश्च तोषयेत् परमेश्वरीम् ॥"
एवं संपूज्य अभेदेन जपः कार्य्यः । इति तन्त्र-
सारे त्रिपुराप्रकरणम् ॥ * ॥ मानसेगुरुपूजा
यथा, नीलतन्त्रे ।
"ततो मानसगन्धाद्यैः पूजयेन स्वस्वमुद्रया ।
कनिष्ठा पृथिवीतत्त्वं तद्द्वयोर्गन्धयोजनम् ॥
अङ्गुष्ठो गगनं तत्त्वं तेनैव पुष्पयोजनम् ।
तर्ज्जनी वायुतत्त्वं स्याद्धूपं तेनैव योजयेत् ॥
अनामा जलतत्त्वं स्यात्तेनैव योजयेच्च कम् ।
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥
जपं समर्प्य भक्त्या च प्रणमेद्दण्डवद्भुवि ॥"
अपि च ।
"मिथुनं चिन्तयित्वा तु मानसैरुपचारकैः ।
भौतिकैः पूजयेद्विद्वान् मुद्रामन्त्रसमन्वितैः ॥
भूम्याकाशमरुद्वह्निवारिमन्त्रैः सबिन्दुकैः ।
कनिष्ठाङ्गुलितर्ज्जन्यौ मध्यमानामिके तथा ॥
अङ्गुष्ठेन समायोगान्मुद्राः पञ्च प्रकीर्त्तिताः ।
पृथिव्यात्मकगन्धः स्यादाकाशात्मकपुष्पकम् ॥
धूपो वाय्वात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः ।
रसात्मकञ्च नैवेद्यं पूजा पञ्चोपचारिका ॥
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥"
इत्यन्नदानकल्पः ॥

अन्यच्च ।
"मानसैरुपचारैश्च संपूज्य कल्पयेन्मुदा ।
गन्धं भूम्यात्मकं दद्याद्भावपुष्पं ततः परम् ॥
धूपं वाय्वात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यममृतं दद्यात् पानीयं वरुणात्मकम् ॥
अम्बरं मुकुरं दद्याच्चामरं छत्रमेव च ।
ततस्तु मुद्राविधानेन संपूज्यात्मगुरुं जपेत् ॥
यथाशक्ति जपं कृत्वा समाप्य कवचं पठेत् ॥"
इति कङ्कालमालिनीतन्त्रम् ॥
पूजाक्रमस्तु । निजगुरुं ध्यात्वा सुकानन्दनाथा-
सुकशक्त्याम्बाश्रीपादुकां पूजयामीति मानसै-
र्गन्धाक्षतकुसुमैरर्च्चयेत् । कनिष्ठाभ्यां लं पृथि-
व्यात्मकं गन्धं समर्पयामि नमः । अङ्गुष्ठाभ्यां हं
आकाशात्मकं पुष्पं समर्पयामि नमः । तर्ज्ज-
नीभ्यां यं वाय्वात्मकं धूपं समर्पयामि नमः ।
मध्यमाभ्यां रं वह्न्यात्मकं दीपं समर्पयामि
नमः । अनामिकाभ्यां वं अमृतात्मकं नैवेद्यं
समर्पयामि नमः । इति कुलकुलावतारकल्प-
सूत्रटीकायां तृतीयकाण्डम् ॥
मानसव्रतं, क्ली, (मानसकृतं व्रतम् । शाकपार्थिव-
वत् समासः ।) अहिंसादि । यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥"
इति वराहपुराणम् ॥
मानसालयः, पुं, (मानसे आलयो यस्य ।) हंसः ।
इति राजनिर्घण्टः ॥
मानसिकं, त्रि, (मानस+ठञ् ।) मनोभवम् ।
मानसशब्दात् ष्णिकप्रत्ययेन निष्पन्नम् ॥ (पुं,
विष्णुः । यथा, महाभारते । १२ । ३६८ ।४।
"नमस्ते देवदेवेश ! निष्क्रिय !
निर्गुण ! मानसिक ! नामनामिक ! ।")
मानसी, स्त्री, (मानस+स्त्रीत्वात् ङीप् ।) विद्या-
देवीविशेषः । इति हेमचन्द्रः ।२।१५॥ मनो-
भवा च ॥ (यथा, विष्णुपुराणे । १ । ७ । १ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ॥")
मानसूत्रं, क्ली, (मानस्य गात्रप्रमाणस्य तन्
मानार्थं वा सूत्रम् ।) स्वर्णादिनिर्म्मितकटि-
सूत्रम् । इति धनञ्जयः । गोट् इति भाषा ॥
मानसौकाः, [स्] पुं, (मानसं सर ओको वासस्थानं
यस्य ।) हंसः । इत्यमरः । २ । ५ । २३ ।
(यथा, महाभारते । ८ । ४१ । १३ ।
"वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।")
मानिका, स्त्री, (मानयति गर्व्वीकरोतीति । मन+
णिच्+ण्वुल् टाप् अकारस्येत्वञ्च ।) मद्यम् ।
इति शब्दरत्नावली ॥ (माने प्रभवतीति । मान
+ठक् ।) शरावः । इति वैद्यकपरिभाषा ।
पोर इति भाषा ॥
मानिनी, स्त्री, फलो वृक्षः । इति मेदिनी । ने,
१०६॥ (मानं अस्त्यस्याः । मान+इनिः । ङीप् ।
मानवती च ॥ (यथा, गीतगोविन्दे । ६ । २ ।
"हरिरभिसरति वहति मृदुपवने ।
किमपरमधिकसुखं सखि ! भवने ॥
माधवे माकुरु मानिनि ! मानमये ॥"
अभिमानवती च । यथा, कुमारे ।५।५३।
"इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्य्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥"
"मानिनीन्द्राणीप्रभृतीरतिशय्य वर्त्तितव्यमित्यभि-
मानवती ।" इति तट्टीकायां मल्लिनाथः ॥)
राज्यवर्द्धनस्य पत्नी । यथा, मार्कण्डेये ।१०६।१०।

"विदूरथस्य तनया दाक्षिणात्यस्य भूभृतः ।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")

मानी, [न्] त्रि, (मानोऽस्यास्तीति । मान + इनिः ।) मानविशिष्टः । इति मेदिनी । ने, १६६ ॥ (यथा, मार्कण्डेये । १२१ । २२ ।
"ततस्ते भूभृतः सर्व्वे बहुशस्तेन मानिना ।
निराकृताः मुनिविंप्राः प्रोचुरन्योन्यमाकुलाः ॥")
सिंहः । इति राजनिर्घण्टः ॥

मानुषः, पुं. (मनोर्जातः । मनु + "मनोर्जातावञ् यतौ षुक् च ।" ४ । १ । १६१ । इत्यञ् षुगागमश्च ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, मनौ । ८ । २८४ ।
"चिकित्सकानां सर्व्वेषां मिथ्याप्रचरतां दमः ।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥"
मनुष्यस्येदम् । अण् । मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १३ । ६ । २० ।
"अकृत्वा मानुषं कर्म्म यो दैवमनुवर्त्तते ।
वृथा श्राम्यति संप्राप्य पतिं क्लीवमिवाङ्गना ॥")

मानुषिकं, त्रि, (मनुष्यस्य भावः कर्म्म वा । मनुष्य + ठञ् ।) मनुष्यस्य कर्म्मादि । मनुष्यस्येदमितीदमर्थे णिकप्रत्ययेन निष्पन्नम् ॥

मानुषी, स्त्री, (मानुषस्य स्त्री । मानुष + जातित्वात् ङीष् ।) मनुष्यस्त्रीजातिः । यथा,—
मनुष्यी मानुषी नारी मानवी मानुषस्त्रियाम् ।
इति शब्दरत्नावली ॥
(मनुष्य + अण् + ङीप् ।) चिकित्साविशेष. । यथा,—
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता ।"
इति शब्दचन्द्रिका ॥

मानुष्यं, क्ली, (मनुष्यस्य भावः । मनुष्यस्येदमिति वा । मनुष्य + अण् ।) मनुष्यस्य भावः । मनुष्यत्वम् । (यथा, भागवते । ४ । २३ । २८ ।
"स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ।
लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥")
मनुष्यशरीरम् । यथा,—
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वे याज्ञवल्क्यवचनम् ॥
(मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १ । १५३ । ११ ।
"गन्धः आनीहि कं न्वेते पीरते वनमाश्रिताः ।
मानुष्यो बलवान् गन्धो घ्राणं तर्पयतीव मे ॥")

मानुष्यकं, क्ली, (मनुष्याणां समूहः । मनुष्य + "गोत्रोक्षोष्ट्रोरभ्र"इति ।"४।२।३९। इति वुञ् ।) मनुष्यसमूहः । इत्यमरः ।३।२।४३। (मनुषस्येदं मानुष + यत् । स्वार्थे कन् । (मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ७७ । ८ ।
"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम् ।
कृतं मानुष्यकं कर्म्म दैवेनापि विरुध्यते ॥")

मानोज्ञकं, क्ली, (मनोज्ञस्य भावः कर्म्म वेति । "द्वन्द्वमनोज्ञादिभ्यश्च ।" ५ । १ । १३३ । इति वुञ् ।) मनोज्ञता । मनोज्ञस्य भाव इत्यर्थे कञ् प्रत्ययेन निष्पन्नम् ॥

मान्द्यं, क्ली, (मन्दस्य भावः कर्म्म वा । मन्द + "पत्यन्तपुरोहितादिभ्यो यक् ।"५।१।१२८। इति यक् ।) रोगः । इति हेमचन्द्रः ॥ मन्दता च । (यथा, कथासरित्सागरे । २४ । १३५ ।
"विश्वस्ते च ततस्तस्मिन् पुरोधसि चकार सः ।
मान्द्यमल्पतराहारकृशीकृततनुर्न्नृपः ॥")

मान्धाता, [ऋ] पुं, (मां धास्यतीति । धेट् + तृच ।) युवनाश्वराजपुत्र । तत्पर्य्यायः । युवनाश्वजः २ । इति हेमचन्द्रः । ३ । ३६४ । तद्विवरणं यथा । 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत् । तस्य च पुत्त्रस्यातिनिर्व्वेदात् मुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता । तस्याञ्चार्द्धरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलसं वेदीमध्ये निवेश्य ते मुनयः सुषुपुः । सुप्तेषु च तेषु तीव्रतृट्परीतः स भूपालस्तमाश्रममण्डलं विवेश । सुप्तांश्च तानृषीन् नैवोत्थापयामास ॥ तच्च कलसजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ । प्रबुद्धाश्च ऋषयः पप्रच्छुः । केनैतन्मन्त्रपूतं वारि पीतम् । अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्त्रं जनयिष्यति । इत्याकर्ण्य स राजा अजानता मया पीतमित्याह । गर्भश्च युवनाश्वोदरेऽभवत् । क्रमेण च ववृधे । प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्चक्राम । न चासौ राजा ममार । जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः । अथागम्य देवराडब्रवीत् । मामयं धास्यति । ततोऽसौ मान्धाता नामतोऽभवत् । वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ । ताञ्चामृतस्राविणीमास्वाद्याह्नैवैकेन स व्यवर्द्धत । स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे । भवति चात्र श्लोकः ।
"यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"
मान्धाता शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे । पुरुकुत्समम्बरीषं मुचुकुन्दञ्च तस्यां पुत्त्रत्रयमुत्पादयामास । पञ्चाशच्च दुहितरस्तस्यामेव तस्य नृपतेर्बभूवुः ।" इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः, त्रि, (मान्यत इति । मान + कर्म्मणि ण्यत् ।) अर्च्यः । तत्पर्य्यायः । पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५ । इति जटाधरः ॥ (यथा च मनौ । २ । १३९ ।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।"
प्रार्थनीयः । यथा रामायणे । २ । ८ । १८ ।
"यथा वै भरतो मान्यस्तथा भूयोऽपि राघव ।
कौशल्यातोऽतिरिक्तञ्च मम शुश्रूषते बहु ॥"
"मान्यः प्रार्थनीयः श्रेयस्करः । तथा तद्वत् ।"
इति तट्टीकायां रामानुजः ॥)

मान्यस्थानं, क्ली, (मान्यस्य स्थानं ।) पूज्यत्वकारणम् । यथा,—
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥"
इति मानवे २ अध्यायः । कौर्म्मे ११ अध्यायेऽप्येवम् ॥

मान्या, स्त्री, (मान्य + स्त्रियां टाप् ।) मरुन्माला । यथा,—
"अनिर्माल्या तु मान्या च मरुन्माला च मोहना ॥"
इति शब्दमाला ॥
पूज्या च ॥

मापत्यः, पुं, (मा विद्यतेऽपत्यमस्य ।) कामः । इति हलायुधः ॥

मापनः, पु, (मापयति स्वर्णादिकमनेनेति । मा + णिच् + करणे ल्युट् ।) तुलः । इति शब्दचन्द्रिका ॥ परिमाणि, क्ली ॥ (क्रियामप्यत्र । यथा, महाभारते । १ । ५१ । १५ ।
"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता ॥")

मामकं, त्रि, (ममेदम् । अस्मद् + "तवकममकावेकवचने ।" ४ । ३ । ३ । इति अण् ममकादेशश्च ।) मदीयम् । इति मेदिनी । कं, १३८ ॥ (यथा, महाभारते । १ । १०५ । १२ ।
"ततो मामाह स मुनिर्गर्भस्थस्तनुजं मामकम् ॥")
ममतायुक्तः । इति शब्दमाला ॥ यथा च महाभारते । ४ । ५० । १७ ।
"अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते ॥")

मामकः, पुं, (भाम + स्वार्थे कन् ।) मातुलः । इति मेदिनी ॥ कं, १३८ ॥ ममायं वा ममेदमिति बुद्धिर्यस्य । कप् ।) कृपणः । इति शब्दमाला ॥

मामकीनं, त्रि, (ममेदम् । अस्मद् + "तवकममकावेकवचने ।"४। ३ । ३। इति खञ् । ममकादेशश्च ।) मदीयम् । ममेदमित्यर्थे गोत्रे स्त्रीलिङ्गे अस्मद् एकत्वात्मदादेशे अस्य च ममकादेशे कृते मामकीनम् । इति दुर्गादासः ॥ (यथा, कथासरित्सागरे । ३२ । १४५ ।
"एतच्च मे कियत् किं हि न बुद्ध्या साधयाम्यहम् ।
प्रज्ञानं मामकीनं च श्रूयतां वर्णयामि ते ॥")

मायः, पु (माया अस्यास्तीति । माया + अर्श आदित्वादच् ।) पीताम्बरः । (यथा, महाभारते । १३ । २४ । १११ ।
"नमो विश्वाय मायाय चिन्त्याचिन्त्याय वै नमः ॥")
(मयस्यापत्यं पुमान् । मय + अण् ।) असुरः । इति मेदिनी ॥ ये, ४६ ॥

माया, स्त्री, (मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति । मा + "माच्छाससिसूभ्यो यः ।" उणा० ४ । १०९ । इति यः टाप् ।) इन्द्रजालादिः ।

तत्पर्य्यायः। शाम्बरी २। इत्यमरः। २।१०।
११॥ इन्द्रजालिः ३ कुहकम् ४ कुहनिः ५
शाम्बरिः ६। इति जटाधरः। साम्बरी ७।
इति शब्दरत्नावली॥ माति विश्वमस्यां मनो-
मादिः। शम्बरस्य दैत्यस्य इयं शाम्बरी तेन
प्रादुर्निर्म्मितत्वात्। इति भरतः॥ *॥ बुद्धिः।
इति मेदिनी। ये, ४६। (मीमिते जानाति
संख्यात्यनयेति। मा+यः टाप्।) कृपा।
दम्भः। इति नानार्थे हेमचन्द्रः॥ शठता।
यथा,—
"माया तु शठता शाठ्यं कुसृतिर्निकृतिश्च सा॥"
(प्रज्ञा। यथा, ऋग्वेदे। २। १७। ५।
"अधारयत् पृथिवीं विश्वधायस मस्तभ्नात्
मायया द्यामवस्रसः।"
"मायया प्रज्ञया।" इति तद्भाष्ये सायनः॥)
राज्ञां क्षुद्रोपायविशेषः। यथा,—
"मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः॥"
लक्ष्मीः। इति च हेमचन्द्रः॥ बुद्धमाता।
इत्यमरकोषे मायादेवीसुतशब्ददर्शनात्।
दुर्गा। यथा,—
"दुर्गे शिवेऽभये माये नारायणि सनातनि।
जये मे मङ्गलं देहि नमस्ते सर्व्वमङ्गले॥
राजन्। श्रीवचनो माश्च याश्च प्रापणवाचकः।
तां प्रापयति या सद्यः सा माया परिकीर्त्तिता॥
माश्च मोहार्थवचनो याश्च प्रापणवाचकः।
तं प्रापयति या नित्यं सा माया परिकीर्त्तिता॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः॥
अपि च।
"विचित्रकार्य्यकारणा अचिन्तितफलप्रदा।
स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥ *॥
विषद्वयप्रतीतिसाधनं माया। इति नागोजी-
भट्टः॥ अघटनघटनपटीयसी माया। इति
केचित्॥ ईश्वरशक्तिः। तस्या नामान्तरं यथा।
प्रकृतिः २ अविद्या ३ अज्ञानम् ४ प्रधानम् ५
शक्तिः ६ अजा ७। सृष्टिकाले भगवान् आद्यां
मायां प्रकाशयामास। सा द्रष्टृदृश्यानुसन्धानरूपा
कार्य्यकारणरूपा च। सत्त्वरजस्तमोगुणमयी।
तस्याः शक्तिद्वयं आवरणं विक्षेपश्च। तस्या
मायाया महत्तत्त्वं जातम्। तस्मादहङ्कारः।
तस्मात् पञ्चभूतम्। तस्मात् ब्रह्माण्डम्। इति
श्रीभागवतमतम्॥ (मायास्वरूपम्। यथा च
पञ्चदश्याम्। ६। १२२—१४१।
"तत्त्वनिश्चयकामेन न्यायागमविचारिणाम्।
एकैव प्रतिपत्तिः स्यात् साप्यत्र स्फुटमुच्यते॥
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्।
अस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत्॥
इति श्रुत्यनुसारेण न्यायो निर्णय ईश्वर।
तथा सत्यविरोधः स्यात् स्थावरान्तप्रवादिनाम्॥
माया चेयं तमोरूपा तापनीये तदीरणात्।
अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम्॥
जड़ं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः।
आबालगोपं स्पष्टत्वादानन्त्यं तस्य साब्रवीत्॥
अचिदात्मघटादीनां यत स्वरूपं जड़ं हि तत्।
यत्र कुण्ठीभवेद् बुद्धिः स मोह इति लौकिकाः॥
इत्थं लौकिकदृष्ट्यैतत् सर्व्वैरप्यनुभूयते।
युक्तिदृष्ट्या त्वनिर्व्वाच्यं नासदासीदिति श्रुतेः॥
नासदासीद् विभातत्वान्नो सदासीच्च बाधनात्।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः॥
तुच्छानिर्व्वचनीया च वास्तवी चेत्यसौ त्रिधा।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः॥
अस्य सत्त्वमसत्त्वञ्च जगतो दर्शयत्यसौ।
प्रसारणाच्च सङ्कोचात् यथा चित्रपटस्तथा॥
अस्वतन्त्रा हि माया स्यादप्रतीतेर्व्विना चितिम्।
स्वतन्त्रापि तथैव स्यादसङ्गस्यान्यथाकृतेः॥
कूटस्थासङ्गमात्मानं जड़त्वेन करोति सा।
चिदाभासस्वरूपेण जीवेशावपि निर्म्ममे॥
कूटस्थमनपाकृत्य करोति जगदादिकम्।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः॥
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि।
मायाया दुर्घटत्वञ्च स्वतः सिध्यति नान्यथा॥
न वेत्ति मायिनं लोको यावत् तावच्चमत्कृतिम्।
धत्ते मनसि पश्चात्तु मायैवेत्युपशाम्यति॥
प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु।
न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः॥
चोद्येऽपि यदि चोद्यं स्यात् त्वच्चोद्ये चोद्यते मया।
परिहार्य्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम्॥
विस्मयैकशरीराया मायायाश्चोद्यरूपतः।
अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः॥
मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु।
लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम्॥
न निरूपयितुं शक्या विस्पष्टं भासते च या।
सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे॥")
विष्णुमायास्वरूपं यथा,—
"यामेतां भाषसे देव! मम मायेति नित्यशः।
का माया कीदृशी विष्णो! किं वा मायेति चोच्यते।
ज्ञातुमिच्छामि मायार्थं रहस्यं परमुत्तमम्॥
ततस्तस्या वचः श्रुत्वा विष्णुर्मायाकरण्डकः।
प्रहस्य मधुरं वाक्यं प्रत्युवाच वसुन्धराम्॥
भूमे! मा पृच्छ मायां मे यत्त्वं पृच्छसि सादरम्।
वृथा क्लेशं किमर्थं त्वं प्राप्स्यसे मद्विलोकनात्।
अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहाः॥
मम माया विशालाक्षि! किं पुनस्त्वं वसुन्धरे!॥
पर्ज्जन्यो वर्षते यत्र तज्जलेन प्रपूर्य्यते।
देशो निर्ज्जलतां याति एषा माया मम प्रिये!॥
सोमोऽपि क्षीयते पक्षे पक्षे वापि विवर्द्धते।
अमायां स न दृश्येत मायेयं मम सुन्दरि!॥
हेमन्ते सलिलं कूपे उष्णं भवति तत्त्वतः।
भवच्च शीतलं ग्रीष्मे मायेयं मम तत्त्वतः॥
पश्चिमां दिशमास्थाय यदस्तं याति भास्करः।
उदेति पूर्व्वतः प्रातर्मायेयं मम सुन्दरि!॥
शोणितञ्चैव शुक्रञ्च उभे प्राणिषु संस्थिते।
गर्भे च जायते जन्तुर्मम मायैव चोत्तमा॥
जीवः प्रविश्य गर्भे तु सुखदुःखानि विन्दति।
जातश्च विस्मरेत् सर्व्वमेषा माया ममोत्तमा॥
आत्मकर्म्माश्रितो जीवो नष्टसंज्ञो गतस्पृहः।
कर्म्मणा नीयतेऽन्यत्र मायैषा मम चोत्तमा॥
शुक्रशोणितसंयोगाज्जायन्ते यदि जन्तवः।
अङ्गुल्यश्चरणौ चैव भुजौ शीर्षं कटिस्तथा॥
पृष्ठं तथोदरञ्चैव दन्तौष्ठपुटनासिका।
कर्णौ नेत्रकपोलौ च ललाटं जिह्वया सह॥
एतया मायया युक्ता जायन्ते यदि जन्तवः।
तस्यैव जीर्य्यते जन्तोर्भुक्तं पीतञ्च वह्निना।
अयञ्च स्रवते जन्तुरेषा माया ममोत्तमा॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।
अस्मात् प्रवर्त्तते जन्तुरेषा माया मम प्रिये!॥
सर्व्वेषु निराकारः स्थावरे जङ्गमे तथा।
तत्त्वं न ज्ञायते तस्य मायैषा मम सुन्दरि!॥
आपो दिव्यास्तथा भौमा आपो येषु प्रतिष्ठिताः।
न च वृद्धिं प्रयान्त्यत्र मायैषा परमा मम॥
दृष्टौ बहूदकाः सर्व्वे पल्वलानि सरांसि च।
ग्रीष्मे सर्व्वाणि शुष्यन्ति एतन्मायाबलं मम॥
हिमवच्छिखरान्मुक्ता नाम्ना मन्दाकिनी नदी।
गाङ्गता सा भवद्गङ्गा मायैषा मम कीर्त्तिता॥
मेघा गृह्णन्ति सलिलं लवणात् सलिलार्णवात्।
वर्षन्ति मधुरं लोके सर्व्वं मायाबलं मम॥
रोगार्त्ता जन्तवः केचित् भक्षयन्ति महौषधम्।
तस्य वीर्य्यं समाश्रित्य मायां तु विहनाम्यहम्॥
औषधं दीयमानं तु जन्तुः पञ्चत्वमेति यत्।
निर्वीर्य्यमौषधं कृत्वा कालो भूत्वा हराम्यहम्॥
प्रथमं जायते गर्भः पश्चाज्जायते वै पुमान्।
जायते मध्यमं रूपं ततोऽपि जरया पुनः।
तत इन्द्रियनाशश्च एतन्मायाबलं मम॥
एकबीजात् प्रकीर्णानि जायन्ते तानि भूरिशः।
तत्रान्तरं विहनामि मायायोगेन माधवि!॥
लोक एवं विजानाति गरुड़ो वहतेऽच्युतम्।
भूत्वा वेगेन गरुड़ो वहाम्यात्मानमात्मना॥
या एता देवताः सर्व्वा यज्ञभागेन तोषिताः।
मायामेतामहं कृत्वा तोषयामि दिवौकसः॥
लोकाः सर्व्वे विजानन्ति देवा नित्यं मखाशिनः।
मायामेतामहं कृत्वा यक्ष्यामि त्रिदशान् सदा॥
सर्व्वोऽपि यजते लोको यष्टारश्च इहस्थितम्।
मायामाङ्गिरसीं कृत्वा याजयामि दिवौकसः॥
सर्व्वे लोका विजानन्ति वरुणः पाति सागरम्।
मायान्तु वारुणीं कृत्वाहं रक्षामि महोदधिम्॥
सर्व्वे लोका विजानन्ति कुवेरोऽयं धनेश्वरः।
कुवेरमायामादाय अहं रक्षामि तद्धनम्॥
एवं लोका विजानन्ति वृत्रः शक्रेण सूदितः।
शाक्रीं मायां समास्थाय मया वृत्रो निसूदितः॥
एवं लोका विजानन्ति आदित्यश्च ध्रुवो महान्।
मेरुं मायामयं कृत्वा वहाम्यादित्यमेव च॥
एवं चाभाषत लोको जलं किमप्यतेऽखिलम्।
वड़वामुखमास्थाय पिबामि तदहं जलम्॥
वायुं मायामयं कृत्वा मेघेषु विहनाम्यहम्।
यदिदं भाषते लोकः क्लिन्नेव तिष्ठते जलम्॥

देवा अपि न जानन्ति अन्तरं कुत्र तिष्ठति ।
मम मायानियोगेन तिष्ठते स्यौषधं वने ॥
लोको ह्येवं विजानाति राजा पालयते प्रजाः ।
राजमायामहं कृत्वा पालयामि वसुन्धराम् ॥
ये तु वै द्वादशादित्या उदेष्यन्ति युगक्षये ।
प्रविश्य तानहं भूमे ! मायां लोके सृजाम्यहम् ॥
वर्षेण पांशुना भूमिर्लोकेषु पतते सदा ।
मायां पांशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥
वर्षते यत्र संवर्त्तो धाराभिर्मुषलाकृति ।
मायां सांवर्त्तिकीं कृत्वा पूरयाम्यखिलं जगत् ॥
यत् स्वपामि वरारोहे ! शेषस्योपरि वारिणि ।
अनन्तमायया चाहं धारयामि स्वपामि च ॥
वराहमायामादाय भूमे ! जानामि किन्न वै ।
देवा यत्र विलीयन्ते सा माया मम कीर्त्तिता ॥
तथापि वैष्णवीं मायां कृत्वा जानासि किन्न
तत् ।
धारितासि च सुश्रोणि ! वाराहं रूपमेव तु ॥
माया तु मम देवीयं कृत्वा लोकार्णवां महीम् ।
मम मायाबलं ह्येतद्‌द्वयेन तिष्ठाम्यहं जले ॥
प्रजापतिं शतं चाहं सृजामि च हरामि च ।
तेऽपि मायां न जानन्ति मम मायाविमो-
हिताः ॥
अथ पितृगणाश्चैव ये एते सूर्य्यवर्चसः ।
मायां पितृमयीं ह्येतां सृजामि हि च तत्त्वतः ।
किन्तु मायैव सुश्रोणि ! अन्यच्च शृणु
सुन्दरि ! ॥"
इति वाराहे मायाचक्रम् ॥ * ॥

अथ मायास्तोत्रम् ।
शौनक उवाच ।
"शशिध्वजो महाराजः स्तुत्वा मायां गतः
कुतः ।
का वा मायास्तुतिः सूत । वद तत्त्वविदांवर ! ।
या त्वत्कथा विष्णुकथा वक्तृणां सा विशुद्धये ॥"
सूत उवाच ।
"शृणुध्वं मनयः सर्व्वे मार्कण्डेयाय पृच्छते ।
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥
तत् शृणुष्व प्रवक्ष्यामि यथाधीतं यथाश्रुतम्
सर्व्वकामप्रदं नृणां पापतापविनाशनम् ॥"
शुक उवाच ।
"भल्लाटनगरं त्यक्त्वा विष्णुभक्तः शशिध्वजः ।
आत्मसंसारमोक्षाय मायास्तवमलं जगौ ॥"
शशिध्वज उवाच ।
"ॐ ह्रीङ्कारां सत्त्वसारां विशुद्धां
ब्रह्मादीनां मातरं वेदबोध्याम् ।
तन्वीं स्वाहां भूततन्मात्रकक्षां
वन्दे वन्द्यां देवगन्धर्व्वसिद्धैः ॥
लोकातीतां द्वैतभीतां समोऽर्द्धं
भूतैर्भव्यां व्यासमासादिकार्थैः ।
नानारूपैर्देवतिर्य्यङ्मनुष्यै-
स्तामाधारां ब्रह्मरूपां नमामि ॥
यस्या भासा त्रिजगद्भाति भूतै-
र्न भात्येतत्तदभावे विधातुः ।
विद्युद्वीतां कालकल्लोललोलां
लीलापाङ्गीं छिन्नसंसारदुर्गाम् ॥
पूर्णां प्राप्यां द्वैतलभ्यां शरण्या-
माद्ये शेषे मध्यतो या विभाति ।
कालो दैवं कर्म्म सोपाधयो ये
तस्या नाम्ना तां विशिष्टां नमामि ॥
भूमौ गन्धो रसतापस्तु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृशत्वम् ।
खे शब्दो वै यच्छिदा भाति नाना
तामाद्यां तां विश्वरूपां नमामि ॥
सावित्री त्वं ब्रह्मरूपा भवानी
भूतेशस्य श्रीपतेः श्रीस्वरूपा ।
शची शक्रस्यापि नाकेश्वरस्य
पत्नी श्रेष्ठा भासि माये ! जगत्सु ॥
बाल्ये बाला युवती यौवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगैश्च धर्म्यौ
भक्त्या वै त्वं कामवत्सा विभासि ॥
वरेण्या त्वं वरदा लोकसिद्धा
साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादेशे रूपवेशैर्विभासि ॥
तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्त्या ।
श्रुतियुगकुहरे वा संश्रुतं धर्म्मसम्पत्
शुकवनमतिमहत् हृत्सरोजे स्मरन्ति
जनयति जगदाद्ये सर्व्वसिद्धिञ्च तेषाम् ॥
मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादवाप्यापि सिद्धिं लेभे शशिध्वजः ॥
कोकामुखे तपस्तप्त्वा हरिं ध्यात्वा वना-
न्तरे ।
सुदर्शनेन निहतो वैकुण्ठशरणं ययौ ॥"
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये माया-
स्तव कनविंशोऽध्यायः ॥ (शक्तिः सामर्थ्य वा ।
यथा, ऋग्वेदे । ४ । ३ । २१ ।
"दासानामिन्द्रो मायया ।"
"मायया स्वकीयया शक्त्या ।" इति तद्भाष्ये
सायणः ॥)

मायाकारः, पुं, (मायां इन्द्रजालव्यापारं करो-
तीति । कृ + अण् ।) ऐन्द्रजालिकः । वाजी-
कर इति भाषा । तत्पर्य्यायः । प्रातिहारिकः
२ । इत्यमरः । २ । १० । ११ ॥ मायां स्थल-
जलादौ जलस्थलादिज्ञानं करोतीति माया-
कारः यण । प्रतिहरणं प्रतिहारो व्याजः भावे
घञ् स प्रयोजनमस्य प्रातिहारिकः ठिञ्क
ठिञ्वे ञ्रिरिति वृद्धिः । प्रतिहारक इत्यपि
पाठः । तत्र प्रति प्रथमं सह मनो नयने च
हरति ज्ञानं न किञ्चिदिति प्रतिहारकः ॥
णकान्तात् स्वार्थे णौ प्रातिहारकश्च घञि प्रति-
हारश्च । इति तट्टीकायां भरतः ॥

मायाकृत्, पुं, (मायां स्थलजलादौ जलस्थलादि
ज्ञानं करोति कारयतीति । कृ + क्विप् । तुगा-
गमश्च । करोतिरन्तर्भूतण्यर्थः ।) माया-
कारः । यथा,—
"शाम्बरी शाम्बरी माया मायाकृत् भिक्षुके
नटे ।"
इति शब्दरत्नावली ॥

मायाजीवी, [न्] पुं, (मायया इन्द्रजालविद्यया
जीवति जीवनयात्रां सम्पादयति इति ।
जीव + णिनिः ।) प्रातिहारिकः । इति हेम-
चन्द्रः । ३ । ५८६ ॥

मायातिः, पुं, (मायया सह अतति । यद्वा, मा
अततीति । अत + "अत्यविभ्यां च ।" उणा०
४।१३०। इति इण ।) नरबलिः । यथा,—
"मायातीनाञ्च निर्णीतं श्रूयतां मुनिसत्तम ! ।
यच्चाप्यथर्व्ववेदोक्तं फलहानिर्व्यतिक्रमे ॥
पितृमातृविहीनञ्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिकं विशुद्धञ्च सच्छूद्रं मूलकं वरम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मत्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मो संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा चरद्वारेण यत्नतः ।
वर्षान्ते च समुत्सृज्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येव कथितं सर्व्वं बालदानप्रसङ्गतः ॥
बलिं दत्त्वा च स्तुत्वा च धृत्वा च कवचं बुधः ।
प्रणम्य दण्डवद्भूमौ दद्याद्विप्राय दक्षिणाम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः ॥

मायादः, पुं, (मायया छलेन छलेनेत्यर्थः अत्ति
भक्षयतीति । अद + अच् ।) कुम्भीरः । इति
त्रिकाण्डशेषः ॥

मायादेवीसुतः, पुं, (मायादेव्याः सुतः ।) बुद्धः ।
इत्यमरः । १ । १ । १५ ॥

मायाफलं, क्ली, फलविशेषः । माइफल इति
भाषा । तत्पर्य्यायः । मायिफलम् २ मायिकम् ३
छिद्राफलम् ४ मायि ५ । अस्य गुणाः । वात
हरत्वम् । कटुत्वम् । उष्णत्वम् । शैथिल्यसङ्को-
चकरकेशकार्ष्ण्यदातृत्वञ्च । इति राजनिर्घण्टः ॥

मायामोहः, पुं, (मायया मोहयति असुरानिति ।
मुह + णिच् । अच् । माया च मोहश्च तौ
यस्येति वा ।) विष्णुदेहनिर्गतासुरमोहक-
पुरुषविशेषः । यथा,—
श्रीपराशर उवाच ।
"इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥"
श्रीभगवानुवाच ।
"मायामोहोऽयमखिलान् दैत्यांस्तान्
मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥
स्थितौ स्थितस्य मे वध्या यावन्तः परिपन्थिनः ।
ब्रह्मणो येऽधिकारस्य देवदैत्यादिकाः सुराः ॥
तद्गच्छत न भीः कार्य्या मायामोहोऽयमग्रतः ।
गच्छन्नद्योपकाराय भवतां भविता सुराः ॥"

श्रीपराशर उवाच ।
"इत्युक्ता प्रणिपत्यैनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महा-
सुराः ॥"

इति विष्णुपुराणे ३ अंशे १७ अध्यायः ॥

मायावती, स्त्री, (मायास्त्यस्या इति । माया + मतुप् । मस्य वः । उगितश्चेति ङीप् ।) रतिः । कामपत्नी । इति जटाधरः ॥ तस्या नामकारणं यथा,—

श्रीपराशर उवाच ।
"एतस्मिन्नन्तरे प्राप्तः सह कार्ष्णिन नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥
एष ते तनयः सुभ्रु ! हत्वा शम्बरमागतः ।
हृतो येनाभवद्बालो भवत्याः सूतिकागृहात् ॥
इयं मायावती भार्य्या तनयस्यास्य ते सती ।
शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम् ॥
मन्मथे तु गते नाशं तदुद्भवपरायणा ।
शम्बरं मोहयामास मायारूपेण रूपिणी ॥
बिवाहाद्युपभोगेषु रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥"

इति विष्णुपुराणे ५ अंशे २७ अध्यायः ॥
(विद्याधरीविशेषः । यथा, कथासरित्सागरे । १३ । ३५ ।
"अहं मायावती नाम राजन् ! विद्याधराङ्गना ।
इयन्तं कालमभवं शापदोषेण हस्तिनी ॥"
राजकन्याविशेषः । यथात्रैव । ११२ । ११२ ।
"अभूत्मलयसिंहाख्यो राजा राजगृहे पुरा ।
तस्य मायावतीत्यासीद्रूपेणाप्रतिमा सुता ॥")

मायावसिकः, त्रि, (मायया वसं आच्छादनं करोतीति ठन् ।) परप्रतारकः । इति शब्द-माला ॥ (मायारसिक इति वा पाठः ॥)

मायावान्, [त्] पुं, (माया अस्त्यस्य । माया + 'अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति पक्षे मतुप् । मस्य वः ।) कंसराजः । इति शब्दरत्नावली ॥ मायायुक्ते, कपटयुक्ते च त्रि । (यथा, ऋग्वेदे । ४ । १६ । ६ ।
"जनिभिस्त्वमियर्षी दामकृतो नि मायावान-
ब्रह्मा दस्युरर्त ।"
"मायावान् कपटवान् ।" इति, तद्भाष्ये सायणः ॥)

मायावी, [न्] पुं, (प्रशस्ता मायाकापट्यमस्त्य-स्येति । माया + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) मायाकारः । तत्पर्य्यायः । शंसकः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ७७ । ७ ।
"मायावी दानवः सोऽथ मुनिरूपं समाश्रितः ।
स प्राह राजपुत्रं तं पूर्व्ववैरमनुस्मरन् ॥")
विडालः । इति राजनिर्घण्टः ॥ (मोहन-शक्तियुक्तः परमात्मा । यथा, पञ्चदश्याम् ।६।४।
"सर्व्वान्तर्यामी तु मायावी सम्यक्संवृतः ।
सूत्रात्मा स्थूलदेहोऽत्र विराडित्युच्यते परः ॥")

मायासीता, स्त्री, (मायाकल्पिता सीता ।) योगेन अग्निकृतसीताप्रतिकृतिः । यथा,—

अग्निरुवाच ।
"भगवन् ! श्रूयतां वाक्यं कालेन यदुपस्थितम् ।
सीताहरणकालोऽयं तवैव समुपस्थितः ॥
दैवञ्च दुर्निवारञ्च न च दैवात् परं बलम् ।
मत्प्रसूं मयि संन्यस्य छायां रक्षान्तिकेऽधुना ॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम ।
देवैः प्रस्थापितोऽहञ्च न च विप्रो हुता-
शनः ॥"
रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ।
स्वीचकार च स्वच्छन्दं हृदयेन विदूयता ॥
वह्निर्योगेन सीताया मायासीतां चकार सः ।
तद्रूपगुणसर्व्वाङ्गीं ददौ रामाय नारद ! ॥
सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषिध्य च ।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥
लङ्कां गत्वा रघुश्रेष्ठो जघान रावणं च ।
सबान्धवं रावणञ्च सीतां संप्राप दुःखिताम् ॥
ताञ्च वह्निपरीक्षाञ्च कारयामास सत्वरम् ।
हुताशस्तत्र काले च वास्तवीं जानकीं ददौ ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता ।
करिष्यामीति किमहं तदुपायं वदस्व मे ॥"

वह्निरुवाच ।
"त्वं गच्छ तपसे देवि ! पुष्करञ्च सुपुण्यदम् ।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः ।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह ॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ।
कामिनी पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा ॥
कृते युगे वेदवती कुशध्वजसुता शुभा ।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा ॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ।
त्रिहायणीति सा प्रोक्ता विद्यमाना युगत्रये ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

मायासुतः, पुं, (मायायाः मायादेव्याः सुतः ।) बुद्धः । इति हेमचन्द्रः । २ । १५१ ॥

मायिकं, क्ली, (माया मोहनगुणः विद्यतेऽस्मिन् । माया + "व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाफलम् । इति राजनिर्घण्टः ॥ ग्रन्थान्तरे मायिका मादका इत्यपि पाठः ॥

मायिकः, पुं, (माया अस्त्यस्य । माया + "व्रीह्यादि-भ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) माया-कारः । इति जटाधरः ॥ (यथा, देवीभाग-वते । ४ । १६ । ४ ।
"अज्ञायामोहितश्चाहं सदा वर्त्ते पराजितः ।
परवान् दारुपाञ्चाली मायिकस्य यथा वशे ॥"
मायाविशिष्टे, त्रि ॥)

मायी, [न्] पुं, (मायाऽस्त्यस्य । माया + "व्रीह्यादिभ्यश्च ।"५ । २ । ११६ । इति इनिः ।) मायाकारः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ शंसकः ४ कुहकः ५ ऐन्द्रजालिकः ६ जालिकः ७ । इति हेमचन्द्रः । ३ । ४१ ॥ (मायायुक्ते, त्रि । यथा, कुमारे । ७ । ४६ ।
"यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥"
मायोपाधिके परमेश्वरे च । यथा, पञ्चदश्याम् । ६ । १०३ ।
"मायान्तु प्रकृतिं विद्यान्मायिनन्तु महे-
श्वरम् ॥")

मायु, पुं, (मिनोति प्रक्षिपति देहे उष्माणमिति । मिञ् प्रक्षेपणे + "कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "मीनाति मिनोतिदीङां ल्यपि च ।" ६ । १ । ५० । इत्या-त्वम् । "आतो युक् चिण्कृतोः ।"७ । ३ । ३३ । इति युक् ।) पित्तम् । इत्यमरः । २ । ६ । ६२ ॥ (शब्दः । यथा, ऋग्वेदे ।१।१६४।२८।
"सृक्वाणं घर्म्ममभिवावशाना मिमाति मायुं
पयते पयोभिः ।"
"मायुं शब्दं मिमाति निर्म्मीणाति करोति ।" इति तद्भाष्ये सायणः ॥ वाक् । इति निरुक्ते ।१।११।)

मायुराजः, पुं, कुवेरपुत्त्रः । इति त्रिकाण्डशेषः ॥

मायूरं, क्ली, (मयूराणां समूहः । मयूर + "प्राणि-रजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इत्यञ् ।) मयूरसमूहः । इत्यमरः । २ । ५ । ४३ ॥ (मयूराणामिदमित्यण् ।) तत्सम्बन्धिनि, त्रि ॥ यथा, महाभारते । १३ । १०४ । ६० ।
"आजं गव्यं तथा मांसं मायूरञ्चैव वर्ज्जयेत् ॥)

मायूरिकः, पुं, (मयूरं हन्ति । मयूर + "पक्षि-मत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् । मयूरघाती । इति सिद्धान्तकौमुदी ॥

मायूरी, स्त्री, अजमोदा । इति राजनिर्घण्टः ॥

मारः, पुं, (मृ + भावे घञ् ।) मृतिः । (यथा, हरिवंशसंहितायाम् । ३ । ३१ ।
"कुम्भारस्तद्घटनिभः खण्डो भूपतञ्च विदो-
षितिभयदः ।")
म्रियन्ते प्राणिनोऽनेन । मृ + घञ् ।) काम-देवः । (यथा, नैषधे । ४ । ७९ ।
"असुमभार न मार ! कथं नु सा
रतिरतिप्रथितापि पतिव्रता ।
विरहिणीगणघातनपातकी
दयितयापि तयासि किमुज्झितः ॥")
विघ्नः । इति मेदिनी । रे,७६ ॥ (मृ + णिच् + घञ् ।) मारणम् । इति हेमचन्द्रः । २ । ३६ ॥ धुस्तूरः । इति शब्दचन्द्रिका ॥ मारस्योत्पत्ति-र्यथा,—

मार्कण्डेय उवाच ।
"मनोभवस्य वचनं श्रुत्वाथ चतुराननः ।
विवस्तुरपि तद्वाक्यं श्रुत्वानुमतिकारकम् ॥
सर्व्वस्य मोहने ब्रह्मा चिन्ताविष्टोऽभवत्तदा ।
समर्थो मोहितुमिति निश्वासं तमुर्मुहुः ॥
निश्वासमारुतात्तस्य नानारूपा महाबलाः ।
जाता गणा लोलजिह्वा लोलाश्चातिभयङ्कराः ॥
तुरङ्गवदनाः केचित् केचिद्गजमुखास्तथा ।
सिंहव्याघ्रमुखाश्चान्ये श्वखराखखराननाः ॥

ऋक्षमार्जारवदना: शरभास्या: शुकानना: ।
प्लवगोमायुवक्त्राश्च वराहमुखा: परे ॥
गोरूपा गोमुखा: केचित्तथा पक्षिमुखा: परे ।
महादीर्घा महाह्रस्वा महास्थूला महाकृशा: ॥
पिङ्गाक्षा विरलाक्षाश्च तथैकाक्षा महो-
दरा: ।
एककर्णास्त्रिकर्णाश्च चतुष्कर्णास्तथापरे ।
शङ्कुकर्णा दीर्घकर्णा बहुकर्णा विकर्णका: ।
दीर्घाक्षा स्थूलनेत्राश्च सूक्ष्मनेत्रा विहङ्गय: ॥
चतुष्पादा: पञ्चपादास्त्रिपादैकपदास्तथा ।
ह्रस्वपादा दीर्घपादा: स्थूलपादा महापदा: ॥
एकहस्ताश्चतुर्हस्ता द्विहस्तास्त्रिशयास्तथा ।
विहस्ताश्च विरूपाक्षा गोधिकाननस्तथा परे ॥
मनुष्याननस्तथा: केचित् शिशुमारमुखा: परे ।
क्रौञ्चाकारा बकाकारा हंससारसरूपिण: ॥
तथैव मद्गुरबककङ्ककाकमुखास्तथा ।
अर्द्धनीला अर्द्धरक्ता: कपिला: पिङ्गलास्तथा ॥
नीला: शुक्लास्तथा पीता हरिताश्चित्ररूपिण:।
अवादयन्त ते शङ्खान् पटहान् परिवादिन: ॥
मृदङ्गान् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा ।
सर्व्वे जटाभि: पिङ्गाभिस्तुङ्गाभिश्च कराम्बिता: ॥
निरन्तराभिर्व्विप्रेन्द्रा गणा: स्यन्दनगामिन: ।
शूलहस्ता: पाशहस्ता: खड्गहस्ता धनुर्धरा: ॥
शक्त्यङ्कुशगदाबाणपट्टिशप्रासपाणय: ।
नानायुधा महानादं कुर्व्वन्तस्ते महाबला: ॥
मारय च्छेदयेत्युच्चैस्तस्य: पुरतो गणा: ।
तेषान्तु वदतां तत्र मारय च्छेदयेत्युत ।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे ॥
अथ ब्रह्मायमाभाष्य तान् दृष्ट्वा मदनो गणान् ।
उवाच वारयन् वक्तुं गणानामग्रत: स्मर: ॥
मदन उवाच ।
किं कर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा
विधे ।।
किं नामधेया एते वा तत्रैतान् विनियोजय ॥
नियुज्यैतान् निजे कृत्ये स्थानं दत्त्वा च नाम च ।
कृत्वा पश्चान्महामायाप्रभावं कथयस्व मे ॥”
मार्कण्डेय उवाच ।
“अथ तदावमाकर्ण्य सर्व्वलोकपितामह: ।
गणान् समदनानाह तेषां कर्म्मादिकं दिशन् ॥
ब्रह्मोवाच ।
“एते तूत्पन्नमात्रा हि मारयेति यदब्रुवन् ।
मुहुर्मुहुरतोऽमीषां नाम मारेति जायताम् ॥
मारात्मकत्वादप्येते मारा: सन्तु च नामत: ।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनार्च्चनम् ।
तवानुगमनं कर्म्म मुख्यमेषां मनोभव । ॥
यत्र यत्र भवान् याता स्वकर्म्मार्थं यदा यदा ।
मन्तारस्तत्र तत्रैते साहाय्याय तदा तदा ॥
चित्तोद्भ्रान्तिं करिष्यन्ति त्वदस्त्रवशवर्त्तिनाम् ।
ज्ञानिनां ज्ञानमार्गञ्च विघ्नयिष्यन्ति सर्व्वदा ॥
यथा सांसारिकं कर्म्म सर्व्वे कुर्व्वन्ति जन्तव: ।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वत: ॥
इमे स्थास्यन्ति सर्व्वत्र वेगिन: कामरूपिण: ।
त्वमेवैषां गणाध्यक्ष: पञ्चयज्ञाङ्गभोजिन: ।
नित्यक्रियावतां तोयभोगिनोऽपि भवन्त्विमे ॥”
इति कालिकापुराणे ६ अध्याय: ॥

मारक:, पुं, (म्रियन्ते प्राणिन: यस्मिन् येनेति वा । मृ + घञ् । तत: संज्ञायां कन् ।) मरक: । तत्पर्य्याय: । मारि:२ उत्पात:३ । इति त्रिकाण्डशेष: ॥ पक्षिविशेष: । बाज् इति भाषा । तत्पर्य्याय: । घातिपक्षी २ ग्राहक: ३ । इति भूरिप्रयोग: ॥ मारणकर्त्तरि त्रि ॥

मारजित्, पुं, (मारं कामं जितवान् । जि + क्विप् । तुगागम: ।) बुद्ध: । इत्यमर: । १ । १ । १३ ॥

मारणं, क्ली, (मार्य्यते इति । मृ + णिच् + भावे ल्युट् ।) वध: । इत्यमर: । २ । ८ । ११४ ॥ (यथा, मनौ । ५ । ३८ ।
“यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्न: प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥”)
अभिचारविशेष: । यथा,—
“एवन्तु मारणं देवि । विशेषात् कथयामि
ते ।
सान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
कूर्च्चयुग्मं ततो देवि । अमुकं मारय मारय ।
चतुर्दशाक्षरो मन्त्रो स्वाहान्त: शत्रुनाशक: ॥
खदिराङ्गारमादाय कृष्णाष्टम्यां विशेषत: ।
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहपत्रके ॥
निशायां मस्तके नेत्रे ललाटे हृदये करे ।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये ॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत् ।
संहारमुद्रां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम् ॥
दीर्घाकारां कृष्णवर्णां सदाहं स्तनमस्तकाम् ।
मुसलयुगलं हस्तं चर्व्वयन्तीं दिगम्बरीम् ॥
शत्रुनाशकरीं देवीं ध्यायेत शत्रुक्षयाय च ।
एवं ध्यात्वेष्टिकाचूर्णैर्व्वामहस्तेन शङ्करि । ॥
ॐ शत्रुनाशकर्य्यै नम: इति दत्त्वा महेश्वरि ।।
हरिद्राचूर्णसहितां धारां दद्यादनेन तु ॥
अमुकस्य शोणितं पिब पिबेति ततपरम् ।
मांसं खादय खादय ह्रीँ नम इति मन्त्रम् ॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा शताष्टकम् ।
जपेदेकादशाहे च रोग: स्यान्नात्र संशय: ॥
द्वादशाधिकैकविंशाहे मृत्युरेव रिपोर्भवेत् ॥ * ॥
अथवान्यप्रकारेण शत्रुक्षयमहं वदे ।
पुंगोशकृत समादाय पूजयेदुष्णवारिणा ॥
विपरीतक्रमेणैव जपपूजादिकं चरेत् ।
महादेवाय नम इति पुंगोशकृत् समाहरेत ॥
शिवाय नम इति मन्त्रेण घटनञ्च समाचरेत् ।
पशुपतये नम इति प्राणान् संस्थापयेत्तत: ॥
लौहपात्रे महेशानि । खदिराङ्गारयोगत: ।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेत् शिवम् ॥
ततो ध्यायेन्महारुद्रं ध्यानन्तु सुसमाहित: ।
शत्रोर्व्वक्ष:स्थितं रुद्रं ज्वलदग्निसमप्रभम् ॥
वामहस्तधरं केशं दक्षिणं शावकर्षणम् ।
नरचर्म्माम्बरं देव महाज्वालादिवेष्टितम् ॥
पिनाकधृक् हरागच्छागच्छ इत्यादिनावाह्य
यत्नत: ।
मूलपाणये नम इति स्नापयेत् साधकोत्तम: ॥
महेश्वराय नम इति पाद्यादिना प्रपूजयेत् ।,
ईशानादिस्तथा मूर्त्तिर्नक्रमेण प्रपूजयेत् ॥
अग्निकोणादिपर्य्यन्तं पूर्व्वरीत्या महेश्वरि ।।
नम: शिवायेति मूलमष्टाविंशति संजपेत् ।
हुँ चमस्केति वामेन करेण तु विसर्ज्जयेत् ॥
अजित केशव विष्णो हरे सत्य जनार्द्दन ।
हंस नारायण स्वाहा मन्त्रमेव सञ्जपेत् ॥
हुँ नमो भगवते वासुदेवाय स्वाहा नम इत्यपि
सञ्जपेत् ।
एवमेकादशाहेन शत्रुश्छेदनमञ्जसा ।
अवश्यं जायते देवि । सत्यं सत्यं त्रिलोचनि । ॥”
इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटल: ॥
अपि च ।
“शस्त्रास्त्रैश्च नवास्त्रैश्च मूर्च्छनिर्म्मोक्षमेव च ।
अरयो निखनेत् द्वारे पञ्चत्वमुपयाति स: ॥”
इति गारुडे १८६ अध्याय: ॥

मारि:, स्त्री, (मार्य्यते इति । मृ + णिच् + इन् ।) मारणम् । वध: । इति मेदिनी । रे, ७१ ॥ जनक्षय: । तत्पर्य्याय: । मारक: २ मरक: ३ उत्पात: ४ । इति त्रिकाण्डशेष: ॥

मारिचिकं, त्रि, (मरिच + “संस्कृतम् ।” ४।४।३ इति ठक् ।) मरिचेन संस्कृतम् । इति सिद्धान्तकौमुदी ॥

मारित:, पुं, (मार्य्यते नाश्यते भस्मीक्रियत इति । मृ + णिच् + कर्म्मणि क्त: ।) मृतौजस: । भस्मीकृत: । यथा, भावप्रकाशे ।
“अमृत्युकमारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत् ।
करोति रोगान् मृत्युञ्च तद्धन्यात् यत्नतस्तत: ॥”
अपि च ।
“पूर्व्वं वङ्गसमं तालं निम्बाम्लेन विमर्द्दयेत् ।
ततो गजपुटे पक्का पुनरम्लेन मर्द्दयेत ॥
तालेन दशमांशेन याममेकं तत: पुटेत् ।
एवं दशपुटै: पक्वं वङ्गं भवति मारितम् ॥”
अपरञ्च ।
आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥”

“शुद्धो रसो भवेद्ब्रह्मा मूर्च्छितस्तु जनार्द्दन: ।
मारितो रुद्ररूपी स्यात् बद्ध: साक्षात् सदा-
शिव: ॥”
इति वैद्यदर्पण: ॥

मारिव्यसनवारक:, पुं,(मारिजन्यं व्यसनं तद्वारयतीति । वृ + णिच् + अण् ।) राजर्षिविशेष: । यथा,—
“कुमारपालश्चौलुक्यो राजर्षि: परमार्हत: ।
मृतस्वमोक्ता धर्म्मात्मा मारिव्यसनवारक: ॥”
इति हेमचन्द्र: । ३ । ३७७ ॥

मारिष:, पुं, (मर्षति दोषानिति । मृष + अच् । निपातनात् सिद्धम् । यद्वा, मा रिष्यति हिनस्ति

कश्चिद्रषीति । रिष+कः ।) श्राव्योक्ती मेष: । इत्यमरः । १ । ७ । १४ ॥ (क्वचित् पुराणादावपि । यथा, देवीभागवते । १ । ११ । ६५ ।
"साहाय्यं ते करिष्यामि मन्त्रशक्त्या महामते ।।
भविता यदि संग्रामस्तव चेन्द्रेण मारिष ! ॥"
तथा च महाभारते । ७ । ५६ । १२ ।
"हार्य्यमाणाचम्नूं दृष्ट्वा भगदत्तेन मारिष । ॥")
तण्डुलीयशाकविशेषः । मरषा इति हिन्दी भाषा । तत्पर्य्यायः । कन्धरः २ मार्षिकः ३ । (शाकार्थे पर्य्यायो गुणाश्च यथा ॥ [अथ श्वेतमरषा । लोहितमरषा नवडा इति च लाके ।]
"मारिषो वास्तुको मार्ष. श्वेतो रक्तश्च स स्मृत:।
मारिषो मधुरः शीतो विष्टम्भी पित्तनुद्गुरुः ॥
वातश्लेष्मकरो रक्तपित्तनुद्विषमग्निजित् ।
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मारिषा, स्त्री, (मारिष+टाप् ।) दक्षमाता । इति मेदिनी । षे, ४४ ॥ (यथा, मत्स्यपुराणे । ४ । ४८ ।
"सोमकन्याभवत् पत्नी मारिषा नाम विश्रुता ।
तेभ्यस्तु दक्षमेकं सा पुत्त्रमग्र्यमजीजनत् ॥"
अस्या जन्मवृत्तान्तो यथा, विष्णुपुराणे । प्रथमांशे १५ अध्याये ।
"कण्डुर्नाम मुनिः पूर्व्वमासीद्वेदविदांवरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥"
इत्यारभ्य—
"यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद्गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं खिन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज्ज तरुपल्लवैः ॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोमाञ्च स्वेदरूपी तदङ्गतः ॥
तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वराङ्गना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम्॥
कण्डोरपत्यमेव सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचातनया च सा ॥"
शूरस्य पत्नी । यथा, भागवते । ६ । २४ । २७ ।
"देवमीढ़स्य शूरस्य मारिषा नाम पत्न्यभूत ॥")

मारी, स्त्री, (मारि+कृदिकारादिति पक्षे ङीष् ।) चण्डी । जनक्षयः । इति मेदिनी । रे, ७६ ॥ माहेश्वरी शक्तिः । यथा,—
"मारी त्रिशूलेन जघान चान्यान्
खट्वाङ्गपातैरपराश्च कौशिकी ।"
इति वामने ५२ अध्यायः ॥

मारीचः, पुं, (मरीचेरपत्यं पुमान् । मरीचि+अण् ।) राक्षसविशेषः । स च ताड़काराक्षसीपुत्त्रः रावणस्यानुचरः सीताहरणकाले मायामृगरूपोऽसौ श्रीरामेण हतश्च । इति रामायणम् ॥ अस्य विवरणं यथा,—
"एतस्मिन्नन्तरे रामो ददर्श कनकं मृगम् ।
सीता तं प्रेरयामास तदर्थं यत्नपूर्व्वकम् ॥
संन्यस्य लक्ष्मणं रामो जानक्या रक्षणे वने ।
स्वयं जगाम तूर्णं तं विव्याध शायकेन च ॥
हा लक्ष्मणेति शब्दञ्च कृत्वाथ मायया मृगः ।
प्राणांस्तत्याज सहसा पुरो दृष्ट्वा हरिं स्मरन् ॥
मृगदेहं परित्यज्य दिव्यं देहं विधाय च ।
रत्ननिर्म्माणयानेन वैकुण्ठं स जगाम ह ॥
वैकुण्ठद्वारे द्वावास्तां किङ्करौ द्वारपालयोः ।
जयश्च विजयश्चैव बलवांश्चाजिताभिधः ॥
शापेन शनकादीनां संप्राप्य राक्षसीं तनुम् ।
पुनर्जगाम च द्वारमादौ च द्वारपालयोः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः ॥
कश्यपः । यथा,—
"इति संचिन्त्य भगवान् मारीचः कुरुनन्दन ।
उवाच किञ्चित् कुपित आत्मानञ्च विगर्हयन् ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(तथा च महाभारते । १३ । ८५ । १०७ ।
मरीचिभ्यो मरीचिस्तु मारीच. कश्यपोऽह्यभूत ॥")
कक्कोलकम् । याजकब्राह्मणः । इति मेदिनी । चे, १७ ॥ राजहस्ती । इति जटाधरः ॥

मारीची, स्त्री, (मरीचेरियम् । इत्यण् । ङीप् ।) देवताभेदः । इति मेदिनी । चे, १७॥ सा तु मायादेवी । तत्पर्य्यायः । त्रिमुखा २ वक्रकालिका ३ विकटा ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

मारुण्डः पु, सर्पाण्ड । पन्थाः । गोमयमण्डलम् । इति मेदिनी । डे, ३५ ॥

मारुतः, पु, (मरुदेव । मरुत्+"प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थेऽण् ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ म्रियतेऽनेन क्रुद्धेन नास्तीति म्र ट उत मरुत् मरुदेव मारुतः स्वार्थे ष्णः । इति तट्टीकायां भरत. ॥
(यथा, मनौ । ४ । १२२—१२३ ।
"अतिथिञ्चाननुज्ञाप्य मारुते वाति वा भृशम् ।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥)
अस्योत्पत्तिर्यथा,—
कश्यप उवाच ।
"पुत्त्रस्ते भविता भद्रे । इन्द्रहा देवबान्धवः ।
संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि ॥"
अञ्जो यथावत् ।
"संवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ।
धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥
वाढ़मित्यभ्युपेत्याथ दिती राजन् । महामनाः
कश्यपाद्गर्भमाधत्त व्रतञ्चाञ्जो दधार सा ।
मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद ।॥
शुश्रूषणेनाश्रमस्थां दितिं पर्य्यचरत् कविः ।
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ।॥
प्रेप्सुः पर्य्यचरज्जिह्मो मृगहेव मृगाकृतिः ।
नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ।।
चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्षिता ।
अस्पृष्टवार्य्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ।
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः ।
दितेः प्रविष्ट उदरं योगेशो योगमायया ॥
चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम् ॥
रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः ।
तमूचुः पाट्यमानास्ते सर्व्वे प्राञ्जलयो नृप ।॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ।
अनन्यभावान् पार्षदानात्मनो मरुतां गणान् ।
न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ॥
बहुधा निकृत्तोऽपि यदा सम्बभूवुर्दितेर्गर्भः ...
सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यताम् ।
[illegible]

कृच्छ्रिणा पञ्चाशत् देवास्ते मरुतोऽभवन् ।
व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ।
दितिरुत्थाय ददृशे कुमाराननलप्रभान् ।
इन्द्रेण सहितान्देवी पर्य्यतुष्यदनिन्दिता ॥
अथेन्द्रमाह ताताहमादित्यानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतं सुदुष्करम् ॥
एकः सङ्कल्पितः पुत्त्रः सप्तसप्ताभवन् कथम् ।
यदि ते विदितं पुत्त्र । सत्यं कथय मा मृषा ॥
इन्द्र उवाच ।
अम्ब । तेऽहं व्यवसितमुपधार्य्यागतोऽन्तिकम् ।
लब्ध्वान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्म्मदृक् ॥
कृत्तो मे सप्तधा गर्भ आसन् सप्त कुमारकाः ।
तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥
ततस्तत्परमाश्चर्य्यं वीक्ष्य व्यवसितं मया ।
महापुरुषपूजायाः सिद्धिः काप्यानुषङ्गिकी ॥
तदिदं मम दौर्ज्जन्यं बालिशस्य महीयसि ।।
क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ।
श्रीशुक उवाच ।
इन्द्रस्तयाभ्यनुज्ञातः शुद्धभावेन तुष्टया ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥'
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(जनपदविशेषः । यथा, महाभारते । ६ । ४७ । ४९—५० ।
"मारुता धेनुकाश्चैव तङ्गणाः परतङ्गणाः ।
वाह्लीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत ॥
एते जनपदा राजन् ! दक्षिणां पथमाश्रिताः ॥"
अग्निभेदः । यथा, गृह्यसंग्रहपरिशिष्टे । १।८ ।
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ।'
मरुत्सम्बन्धिनि, त्रि । यथा, ऋग्वेदे ।२।११।१४

"राखि चयं राखि मिथमस्मे राखि ग्रघं हव्य मारुतं नः ॥"
"मारुतं मरुतां देवविशां सम्बन्धि ।" इति तद्भाष्ये सायणः ॥)

मारुतव्रतं, क्ली, (मारुतस्य व्रतमिव व्रतं नियमोऽत्र ।) राजधर्म्मविशेषः । यथा,—
"प्रविश्य सर्व्वभूतानि यथा चरति मारुतः ।
तथा चरैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥"
इति मात्स्ये २०० अध्यायः ॥

मारुतात्मजः, पुं, (मारुतस्यात्मजः ।) हनूमान् । इति जटाधरः ॥ (भीमश्च ॥)

मारुतापहः, पुं, (मारुतमपहन्ति । हन + डः ।) वरुणवृक्षः । इति राजनिर्घण्टः ॥ वायुनाशके, त्रि ॥

मारुताशनः, पुं, (मारुतोऽशनमस्य । अश्नातीति । अश + ल्युः । मारुतानां अशनो भक्षकः ।) सर्पः । पवनाशन इत्यमरदर्शनात् । (यथा, महाभारते । ५ । १०६ । १३ ।
"भक्षः प्रयत्नः मह्यां वै बाहुभ्यां संशितव्रतः ।
स्थितः स्थाणुरिवाभ्यासे निश्चेष्टो मारुताशनः ॥")
वायुमात्रभक्षके, त्रि ॥ (कार्त्तिकेयसैनिकविशेषः । यथा, महाभारते । ९ । ४५ । ६० ।
"विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥")

मारुतिः, पुं, (मारुतस्यापत्यं पुमान् । मरुत + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) हनूमान् । इति शब्दरत्नावली ॥ (यथा, रघौ । १२ । ६० ।
"प्रवृत्तावुपलब्धायां तस्याः सम्पातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्म्ममः ॥")
भीमसेनः । इति जटाधरः ॥ (यथा, देवीभागवते । २ । ७ । २१ ।
"तच्छ्रुत्वा वचनं भ्रातुर्ज्येष्ठस्यामिततेजसः ।
संग्रहेऽस्य महाबाहुर्मारुतिः कुपितोऽब्रवीत् ॥")

मार्कः, पुं, भृङ्गराजः । इति रत्नमाला ॥

मार्कण्डः, पुं, (मृकण्डोरपत्यम् । मृकण्डु + अण् ।) मार्कण्डेयमुनिः । इति शब्दरत्नावली ॥

मार्कण्डिका, स्त्री, लताविशेषः । भूइ खखसा इति हिन्दीभाषा ॥ सा तु काकरोलभेदः । तत्पर्य्यायः । भूमिचरी २ मार्कण्डी ३ मृदुरेचनी ४ । अस्या गुणाः । कुष्ठहरत्वम् । ऊर्द्धाधःकायशोधनत्वम् । विषदुर्गन्धकासगुल्मोदरनाशित्वञ्च । इति भावप्रकाशः ॥

मार्कण्डीयं, क्ली, भूम्याहुल्यम् । इति राजनिर्घण्टः ॥

मार्कण्डेयः, पुं, (मृकण्डोरपत्यं । मृकण्डु + शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) मृकण्डुमुनिपुत्त्रः । जन्मतिथ्यादौ पूजायां तस्य ध्यानं यथा,
"द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेच्च चिरायुषम् ॥"
तस्य प्रार्थनामन्त्रः ।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग ! सप्तकल्पान्तजीवन ! ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
इति तिथ्यादितत्त्वम् ॥
तस्योत्पत्त्यादिर्यथा,
मार्कण्डेय उवाच ।
"देवौ धातृविधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ।
भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ।
मनस्विन्यामहं तस्मात् पुत्त्रो वेदशिरा मम ॥
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥"
इति श्रीमार्कण्डेयपुराणे रुद्रसर्गाध्यायः ॥
अपि च ।
पुलस्त्य उवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डोत्पत्तिमुत्तमाम् ।
पुरा कल्पे मुनिः पूर्व्वं मृकण्डुर्नाम विश्रुतः ॥
भृगोः पुत्त्रो महाभागः सभार्य्यस्तप्तवांस्तपः ।
तस्य पुत्त्रस्तदा जातो वसतस्तु वनान्तरे ॥
स पञ्चवर्षको जातो बाल एव गुणान्वितः ।
ज्ञानिना स तदा दृष्टो भ्रमित्वा लघुपाङ्गणे ॥
स्थित्वा स सुचिरं कालं जीवनञ्च ततो दिनम् ।
वीक्ष्य चिन्तापरो ज्ञानी किं वर्षो बालकस्तव ॥
दिनं स्वल्पितम् ।
संख्यया षाड्वर्षाणि जानामीति न्यवेदयत् ।
मृकण्डुनैव मुक्तस्तु स ज्ञानी वाक्यमब्रवीत् ॥
माममायुश्च पुत्त्रस्य तेऽवशिष्टं मुनीश्वर ! ।
नैव शोकस्त्वया कार्य्यः सत्यमेतदुदाहृतम् ॥
एतत् श्रुत्वा वचो भीष्म ! ज्ञानिना यदुदाहृतम् ।
व्रतोपनयनं चक्रे बालकस्य पिता तदा ॥
आह चैनं पिता पुत्त्रं यं पश्यसि त्वमभिवादय ।
एवमुक्तः स वै पित्रा ऋषिं भक्त्या ननाम सः ॥
एतस्मिन्नन्तरे तत्र प्रदीप्ताः पावकोपमाः ।
मार्गेणापि समायाताः सप्तर्षयोऽमलाः ॥
बालेन तत्र दृष्टास्ते सर्व्वे समभिवादिताः ।
आयुष्मान् भव तैरुक्तः स जन्तो दण्डमेखलाम् ॥
उक्तास्ते च पुनस्तेषां पश्यन्तः क्षीणजीविनम् ।
दिनानि पञ्च ते चायुर्ज्ञात्वा भीतास्तदा भवन् पुनः ॥
तमनुनीय ब्राह्मणा वै गतास्ते ब्रह्मणोऽन्तिकम् ।
प्रतिमुच्य च तं बालं प्रणिपत्य पितामहम् ॥
आयुष्मान् भव इत्याह तत् ब्रह्माभिवादितः ।
चिरायुर्ब्रह्मणा बालः प्रोक्तः स ऋषिसन्निधौ ॥
ततस्ते मुनयः प्रीताः श्रुत्वा वाक्यं पितामहात् ।
पितामहस्तु सम्प्रश्नौ दृष्ट्वा प्रोवाच विस्मितान् ॥
कार्य्येण येन वा याताः कोऽयं बालो निवेद्यताम् ।
ततः सप्तर्षयो राजन् ! सर्व्वं तस्मै न्यवेदयन् ॥
भृगोः सुतुर्मृकण्डुस्तु योगायुक्तस्य बालकः ।
अल्पायुस्ततस्तस्य बद्धास्तेनास्य मेखला ॥
यज्ञोपवीतं दण्डश्च दत्त्वा तेन प्रबोधितः ।
यं कञ्चित् पश्यसि लोके भ्रमन्तं भूतले जनम् ॥
तस्याभिवादनं कार्य्यमेवमाह पितामह ! ।
तावद्वयमनेनाथ क्षितौ दृष्टाः परिभ्रमन् ॥
एकत्वमागम् ।
तीर्थयात्राप्रसङ्गेन दैवयोगात् पितामह ! ।
चिरायुर्भव वै विप्र ! बालोऽयमस्माभिरीरितम् ॥
कथं चिरायुः स्यादिप्रबालकः साम्प्रतं प्रभो ! ।
कथं नानृतिनो देव ! भवामो भवता वयम् ॥
एवमुक्तस्तदा तैस्तु ब्रह्मा लोकपितामहः ।
ऋतवाचो भविष्यामः सर्व्व एव वयं स्थिताः ॥
मत्समश्चायुषा बालो मार्कण्डेयो भविष्यति ।
ऋषीणां मुख्यमस्त्रामौ मत्सहायो भविष्यति ।
कल्पस्यादौ तथा चान्ते हरौ मुनिभिरुत्तमैः ॥
एवम्भे सुमथो वाक्यं ब्रह्मा लोकपितामहः ।
कल्पोध्य प्रेषयामास भूयोऽप्येव परन्तप ! ॥
तीर्थयात्रां गता विप्रा मार्कण्डेयो निजं गृहम् ।
जगाम गत्वा तं विप्रं पितरं स तथाब्रवीत् ॥"
इति पाद्मे स्वर्गखण्डे ३० अध्यायः ॥
अपरञ्च ।
व्यास उवाच ।
"मार्कण्डेयेन मुनिना यथा मृत्युः पराजितः ।
तथा ते कथयिष्यामि शृणु वत्स ! महामते ! ॥
भृगोः पौत्रो महाभागो बालत्वे च महामुनिः ।
ववृधे चक्षुषो बालः पिता तस्य कृतक्रियः ॥
स तस्मिन् वै जातमात्रे ज्योतिर्ज्ञो कश्चिदब्रवीत् ।
वर्षे द्वादशमे पूर्णे मृत्युरस्य भविष्यति ॥
श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः ।
तौ दृष्ट्वा दुःखसम्पन्नौ मार्कण्डेयो महामतिः ॥
उवाच वचनं तत्र किमर्थं दुःखमीदृशम् ।
वक्तुमर्हसि दुःखस्य कारणं मम पृच्छतः ॥
कथयामास तत् सर्व्वमादेशौ यदुवाच ह ।
तत् श्रुत्वा तौ मुनिः प्राह मातरं पितरं पुनः ॥
पिता माता त्वया मातर्न कार्य्यं दुःखमल्पकम् ।
अपनेष्यामि मे मृत्युं तपसा नात्र संशयः ।
यथा चाहं चिरायुः स्यां तथा कुर्य्यामहं तपः ॥
सूत उवाच ।
इत्युक्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात् ।
तत्र विष्णुं प्रतिष्ठाप्य गन्धपुष्पादिभिः क्रमात् ।
पूजयामास देवेशं मार्कण्डेयो महामुनिः ॥
पूजयित्वा हरिं तत्र तपस्तेपे सुदुष्करम् ।
निराहारो मुनिस्तत्र यथाक्रमतन्द्रितः ॥
मासोक्तमरणासन्नदिने तत्र महामतिः ।
स्नात्वा यथोक्तविधिना कृत्वा विष्णोश्चार्च्चनम् ॥
हृदि कृत्वेन्द्रियग्रामं विशुद्धेनान्तरात्मना ।
आसनं स्वस्तिकं बद्ध्वा कृत्वासौ प्राणसंयमम् ॥
ॐकाराद्यक्षरयोगाद्भीमान् हृदि पद्मं विकाशयन् ।
तन्मध्ये रविसोमाग्निमण्डलानि यथाक्रमम् ॥
कल्पयित्वा हरेः पीठं तस्मिन्नेव सनातनम् ।
पीताम्बरधरं विष्णुं शङ्खचक्रगदाधरम् ।
ब्रह्मरूपं हरिं ध्यायंस्ततो मधुसूदनम् ॥
इत्थं ध्यायतस्तस्य मार्कण्डेयस्य धीमतः ।
मनस्यत्रैव सततं देवदेवजगत्पतौ ॥

ततो यमालयात्तत्र आगता यमकिङ्कराः ।
पाशहस्तास्तु तं नेतुं विष्णुदूतैस्तु ते हताः ॥
सुवर्णैर्हन्यमानास्ते इतस्ततः पुनः पुनः ।
वयं निहता गच्छामो मृत्युरेवागमिष्यति ॥
आगत्य स्वयमेवाथ मृत्युः पार्श्वं महात्मनः ।
मार्कण्डेयस्य बभ्राम विष्णुकिङ्करशङ्कया ॥
ते चाप्युद्गम्य सुवर्णाभ्ययुर्विष्णुकिङ्कराः ।
विष्ण्वाज्ञया हनिष्यामो मृत्युमस्येति संस्थिताः ॥
ततो विष्ण्वर्पितमना मार्कण्डेयो महामतिः ।
तुष्टाव प्रणतो भूत्वा देवदेवं जनार्द्दनम् ॥
विष्णुनैवोपदिष्टन्तु स्तोत्रं कर्णौ महात्मनः ।
सम्भावितेन मनसा तेन तुष्टाव माधवम् ॥
ॐ नमो भगवते वासुदेवाय ।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किन्नो मृत्युः करिष्यति ॥
गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति ॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
शङ्खचक्रधरं देवं छन्नरूपिणमव्ययम् ।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
वाराहं वामनं विष्णुं नारसिंहं जनार्द्दनम् ।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
पुरुषं पुष्करं बीजं क्षेमबीजं जगत्पतिम् ।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
सहस्रशिरसं देवं व्यक्ताव्यक्तं सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
इत्युदीरितमाकर्ण्य स्तोत्रं तच्च महात्मनः ।
अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीडितः ॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम् ॥
मृत्यष्टकमिदं पुण्यं मृत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥"
श्रीभगवानुवाच ।
"य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥"
व्यास उवाच ।
"हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्य्यादपि राजमानो
मृत्युं स योगी जितवांस्तदैव ॥"
इति नारसिंहपुराणे मार्कण्डेयमृत्युञ्जयो नाम ७ अध्यायः ॥ (मार्कण्डेयेन प्रोक्तम् । मार्कण्डेय + अण् । पुराणविशेषः । यथा, देवीभागवते । १ । ३ । १—३ ।
"शृण्वन्तु संप्रवक्ष्यामि पुराणानि मुनीश्वराः ।"
इत्यारभ्य—
तथा नवसहस्रन्तु मार्कण्डेयं महाद्भुतम् ॥")
मार्करः } पु, भृङ्गराजः । इत्यमरः ।२।४।१५१।
मार्कवः } मर्कति केशरञ्जनार्थं गच्छति मर्कवः । मर्क सर्पे गत्यामिति अचः निपातनाद्वृद्धिः । मार्कवोऽन्तःस्थचतुर्थान्तः मर्केविंशादित्वाद्दः पृषोदरादित्वादकारागमो दीर्घश्चेति परेषु साधितत्वात् । (यथा, सुश्रुते चिकित्सितस्थाने ।१७अः।
"स्यान्मार्कवस्य च रसेन निहन्ति तैलं
नाड्यौ कफानिलकृतामपचीं व्रणांश्च ।")
मार्करो रेफान्त इति केचित् । इति तट्टीकायां भरतः ॥ (अथानयोः पर्य्याया यथा,—
"भृङ्गराजः केशराजो भृङ्गः पतङ्गमार्कवम् ।
इति वैद्यकरत्नमालायाम् ॥
भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
मार्करः केशराजश्च भृङ्गराजो निगद्यते ॥"
इति गारुडेऽष्टाधिकद्विशततमेऽध्याये ॥)

मार्ग, क संस्कारे । सर्पणे । इति कविकल्पद्रुमः ॥ (चु०-पर०-सक०-सेट् ।) क मार्गयति । इति दुर्गादासः ॥

मार्ग कि अन्वेषे । इति कविकल्पद्रुमः ॥ (चु०-पक्षे भ्वा०-पर०-सक०-सेट् ।) अन्वेषः प्रतिसन्धानम् । कि मार्गयति मार्गति गुणं गुणी । मार्गन्ते हे देहभावान्नित्यात्मनेपदं गणकृतानित्यत्वात् । इति दुर्गादासः ॥

मार्गः, पुं, (मार्ग्यते संस्क्रियते पादेन मृज्यते गमनायान्विष्यते इति वा । मार्ग वा मृज + घञ् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ तत्परिमाणं यथा,—
"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः ।
विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दशविस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।
त्रिकरास्त्वोपरथ्यास्तु द्विकराप्युपरथ्यका ॥
जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
वृतीपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परिवारः पादमात्रः समन्ततः ।
प्रावृट्काले तु प्रावृत्तो कर्त्तव्या अन्यथा नहि ॥
इति देवीपुराणे त्रैलोक्याभ्युदये गोपुरद्वारलक्षणाध्यायः ॥*॥ (यथा, महाभारते । ३ । ६७ । १७ ।
"एका बालानभिज्ञा च मार्गाणामतथोचिता ।
क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥")
गुदम् । तत्पर्य्यायः । पायुः २ तनुह्रदः ३ । इति त्रिकाण्डशेषः ॥ अपानम् ४ । इत्यमरः । २ । ६ । ७३ ॥ मृगमदः । (मृगस्येदम् । मृग + अण् । मृगसम्बन्धिनि, त्रि । यथा, सुश्रुते । शारीरे ३ अः ।
"मार्गाद्विक्रान्तजङ्घालं सदा वनचरं सुतम् ।"
यथा च मार्कण्डेये । ३२ । १७ ॥
"नद्यश्च सलिलं तात । सदैव पितृकर्म्मणि ।
मार्गमाविककर्म्मादृश्च सर्व्वमेकशफञ्च यत् ॥"
(मृगो मृगशिरास्तद्युक्ता पौर्णमास्यत्र । मृग + अण् ।) मार्गशीर्षमासः । अन्वेषणम् । इति मेदिनी ॥ गे, १७ । मृगशिरो नक्षत्रम् । इति हेमचन्द्रः ॥ विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ (यथा, महाभारते ।१३।१४९।५३।
"विस्तारो रोहितो मार्गो हेतुर्दामोदरः सहः ॥")

मार्गकः, पुं, (मार्ग । स्वार्थे कन् ।) अग्रहायणमासः । इति शब्दमाला ॥

मार्गणं, क्ली, (मार्ग्यते अन्विष्यत इति । मार्ग + भावे ल्युट् ।) अन्वेषणम् । तत्पर्य्यायः । अन्वेषणम् २ विचयनम् ३ मृगणा ४ मृगः ५ इत्यमरः । ३ । २ । ३० ॥ याचना । इति मेदिनी ॥ णे, ७१ । प्रणयः । इति जटाधरः ॥ (मार्गयतीति । मार्ग + ल्युः ।) याचके, त्रि । इत्यमरः । ३ । १ । ४८ ॥

मार्गणः, पुं, (मार्गयति लक्ष्यमिति । मार्ग + ल्युः ।) शरः । इत्यमरः । २ । ८ । ८७ ॥ यथा, महाभारते । ६ । ११५ । ४४ ।
"ते सर्व्वे दृढधन्वानः संयुगेष्वपलायिनः ।
बहुधा भीष्ममानर्च्छुर्मार्गणैः कृतमार्गणैः ॥
मार्गयति धनार्थं दातारमिति । मार्ग + ल्युः ।) याचकः । इति मेदिनी । णे, ७१ ॥

मार्गणकः, पुं, (मार्गण + स्वार्थे कन् ।) याचकः । इति हलायुधः ॥

मार्गधेनुः, पुं, (मार्गस्य धेनुः परिमाणम् ।) योजनपरिमाणम् । इति शब्दमाला ॥

मार्गधेनुकं, क्ली, (मार्गधेनु + स्वार्थे कन् ।) योजनम् । इति त्रिकाण्डशेषः ॥

मार्गपाली, स्त्री, (मार्गं पालयति हिंस्रेभ्यो रक्षतीति । पाल + अच् । गौरादित्वात् ङीष् ।) स्तम्भः । यथा,
"ततोऽपराह्णसमये पूर्व्वस्यां दिशि नारद ! ।
मार्गपालीं प्रबध्नीयाद्दुर्गस्तम्भे च पादपे ॥
कुशकाशमयीं दिव्यां संस्कारैर्बहुभिर्मुदा ।
भूषयित्वा गजानश्वान् कुङ्कुमाद्यैश्च संयुतान् ॥
गोवृषान् महिषांश्चैव घण्टाभरणभूषितान् ।
भेरीमृदङ्गपटहवादित्रध्वनिनादितान् ।
तस्याः स्थाने नयेत् सायं शान्तिपाठादिनन्दितः ॥
मार्गपालि नमस्तुभ्यं सर्व्वानन्दप्रवर्द्धिके ।
तले तव सुखेनाश्वा गजा गावः प्रयान्तु मे ॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ।
मार्गपालीं समासाद्य वार्त्ताः स्युश्च सदैव हि ॥
ततो गावश्च संपूज्या गन्धपुष्पादिभिः क्रमात् ।
आत्मनः श्रेयसे भूप इति पूजां करोति हि ॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे सर्व्वतः सन्तु गवां मध्ये वसाम्यहम् ॥
या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥
या कामधेनुर्भवने च विष्णो-
र्या कामधेनुर्यमदग्निगेहे ।
या सौरभेयी तु वशिष्ठगेहे
सा कामधेनुर्वरदा ममास्तु ॥

इतेनम् सर्वमासव्रताची देवप्रतवेवे:।
पूर्वा प्रत्वा ततः प्रश्चात् सव्यमदूतं समारमेत् ॥”
इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये
१२४ अध्यायः ॥

मार्गशिरः, पुं, (मृगशिरानक्षत्रयुक्ता पौर्ण-
मास्यत्र। मृगशिरा+अण्।) मार्गशीर्ष-
मासः। इति शब्दरत्नावली ॥ (यथा, भाग-
वते। ६। १८। २।
“शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सर्वकामिकमादितः ॥”)

मार्गशीर्षः, पुं, (मार्गशीर्षी+अण्।) अग्र-
हायणमासः। मृगशीर्षेण युक्ता पौर्णमासी
मार्गशीर्षी सास्मिन् मासे भवति मार्गशीर्षः
च। इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः।
सहाः २ मार्गः ३ आग्रहायणिकः ४। इत्य-
मरः। १। ४। १४ ॥ मार्गशिरः ५ सहः ६।
इति शब्दरत्नावली ॥ वृश्चिकस्थरविप्रारब्ध-
शुक्लप्रतिपदादिदर्शान्तोऽयं मुख्यचान्द्रः। एता-
दृशमुख्यचान्द्रमासीयपौर्णमास्यन्त. अयं गौण-
चान्द्रः। वृश्चिकराशिस्थरविकोऽयं सौरः। इति
स्मृतिः ॥ * ॥ तत्र जातफलम्।
“यस्य प्रसूतिः खलु मार्गमासे
तीर्थे प्रवासे सततं मतिः स्यात्।
परोपकारी भृशसाधुवृत्तिः
सदृश्लितियुक्तो ललनाभिलाषी ॥”
इति कोष्ठीप्रदीपः ॥ * ॥
(तथास्य विषयः॥ कार्त्तिकमार्गशीर्षौ शरत्।
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥)

अथ मार्गशीर्षकृत्यम्।
आश्विनशुक्लपक्षे नवान्नश्राद्धाकरणे मार्ग-
शीर्षस्य विंशतिदण्डाधिकत्रयोविंशतिदिनाभ्य-
न्तरे शुक्लपक्षे तत् श्राद्धं कर्त्तव्यम्। तत्र मार्ग-
शीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयेतरेषु
कृजशनिशुक्रवारेतरेषु नन्दारिक्तात्रयोदशीतर-
तिथिषु जन्माष्टमचन्द्रजन्मतिथिजन्मनक्षत्रय-
पञ्चमताराश्रयेतरेषु पूर्व्वाश्रयमघाभरण्यश्लेषा-
द्रेतरेषु नक्षत्रेषु श्राद्धं तच्छेषभोजनञ्च कुर्य्यात्।
श्राद्धानधिकारिणा तु प्रागुक्तकाले देवादिभ्यो
नवान्नं दत्त्वा भोक्तव्यम्। किन्तु अयनैधाक्रान्तिका-
व्यतीपातमलापूर्व्वभादपदर्क्षेषु अपि नवान्नभोजनं
न कर्त्तव्यम्। चन्द्रताराद्यशुद्धौ प्रतीकारमाह
देवलः।
“कर्म्म कुर्य्यात फलावाप्त्यै चन्द्रादिष्वशुभे बुधः।
सुत्यकाले त्विदं सर्व्वं मार्गः कालमपेक्षते ॥
चन्द्रे च शङ्खं लवणञ्च तारे
तिथावभद्रे सितकुम्भकाञ्च।
धान्यञ्च दद्यात् करणर्क्षवारे
योगे तिलान् हेमभयञ्च लग्ने ॥
राजमार्त्तण्डे ताराभद्राक्षयपरिमाणमाह।
“एकत्रिपञ्चसप्त च द्विजाय दद्यात् पलानि
लवणस्य।
क्रमशो जन्मविपत्प्रत्यरिमरयाख्यतारासु ॥

पतनम् लौकिकैर्मार्गैः साधरत्तिदिमावकम्।
तोलकत्रितयं श्रेयं ज्योतिर्विः स्मृतिसम्मतम् ॥
तत एव दध्याज्यसंयुक्तं नव विप्राभिमन्त्रितम्।
मन्त्राणदैश्च गायन्त्रीति गायत्र्याभिमन्त्रितम् ॥
नवमन्नं श्राद्धगाशुन्नं गृहीत्वा प्राश्नीयात।
ततनधान्यासम्भवे पुरातनेनापि श्राद्धं कर्त्तव्यम्।
वृश्चिके शुक्लपक्षे तत्करणे हरिशयनात् पूर्व्वं
मीनधनुस्थरवौतरत्र माघादौ कर्त्तव्यम् ॥ * ॥
वृश्चिकस्थरवौ शुक्लचतुर्द्दश्यां सौभाग्यकामः
पाषाणाकारपिष्टकैर्गौरीं पूजयेत् तदपि भक्षये-
त्तत्तम् ॥ * ॥ अग्रहायण्यां पौर्णमास्यां पार्व्वण-
विधिना श्राद्धमावश्यकम् ॥ * ॥ भविष्यपुराणे।
“रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥”
इति कृत्यतत्त्वम् ॥
(स्त्रियां आग्रहायणी पूर्णिमा। यथा, महा-
भारते। ३। ८३। २६।
“मार्गशीर्ष्यामतीतायां पुष्येण प्रययुस्ततः ॥”)

मार्गिकः, त्रि, (मृगान् हन्तीति। मृग+“पक्षि-
मत्स्यमृगान् हन्ति।”४।४।३५। इति ठक्।)
मृगहन्ता। (मार्गो गमनेनास्त्यस्य। ठन्।)
पथिकः। इति सिद्धान्तकौमुदी ॥

मार्गितं, त्रि, (मार्ग अन्वेषणे+क्तः।) अन्वे-
षितम्। इत्यमरः। ३। १। १०५ ॥

मार्ग्यं, त्रि, (मृज्यते इति। मृज+“मृजे-
र्विभाषा।” ३। १। ११३। इति पक्षे यत्।
वृद्धिश्च। “चजोः कुधिण्ण्यतोः।” ७। ३। ५२।
इति कुत्वम्।) मार्ज्जनीयम्। इति सिद्धान्त-
कौमुदी ॥ (यथा, भट्टिकाव्ये। ६। ५६।
“मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च
तेन ते।”)

अन्वेषणीयश्च ॥

मार्ज्ज क माज्जने। ध्वनौ। इति कविकल्पद्रुमः ॥
(चुरा०-पर०-सक०-सेट्।) क मार्ज्जयति।
इति दुर्गादासः ॥

मार्ज्जः, पुं, (मार्ज्जयति पापमलं प्रक्षाल्य उद्धरति
जनानिति। मार्ज्ज+णिच्+अच्।) विष्णुः।
इति हेमचन्द्रः। २। ४४ ॥ (मार्ज्जयति वसन-
मलमिति। मार्ज्ज+अच्।) रजकः। इति
शब्दमाला ॥ मार्ज्जनम्। इत्यमरटीकायां
भरतः ॥

मार्ज्जनं, क्ली, (मार्ज्ज्यते इति। मार्ज्ज+भावे
ल्युट्।) प्रोञ्छनादिना अङ्गनिर्म्मलीकरणम्।
माजा इति भाषा। तत्पर्य्यायः। माष्टिः २
मार्ष्टिः ३ मार्ज्जना ४ मृजा ५। इति शब्द-
रत्नावली ॥ मार्ज्जः ६ मार्ज्जा ७। इत्यमर-
टीकायां भरतः ॥ (यथा, श्रीमद्भागवते। ९।
४। १८।
“स वै मनः कृष्णपदारविन्दयो-
र्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्ज्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये ॥”)

स्नानकाले शरीरमार्ज्जनगुणाः।
“दौर्गन्ध्यं गौरवं तन्द्रां कण्डूं मलमरोचकम्।
स्वेदं बीभत्सतां हन्ति शरीरपरिमार्ज्जनम् ॥
इति राजवल्लभः ॥

देवीगृहमार्ज्जनफलं यथा,—
“देव्या गृहन्तु यः शुक्ले संमार्ज्जयति नित्यशः।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः ॥
देव्या गृहन्तु यः शुक्ले। गामयेनानुलेपयेत्।
स्त्रियो वा यदि वा पुंसः वत्सरान्तु निरन्तरम्।
स लभेदीप्सितान् कामान् देव्या लोकञ्च
गच्छति ॥”
इति देवीपुराणे ४२ अध्यायः ॥

अथ भगवन्मन्दिरमार्ज्जनमाहात्म्यम्।
“नरसिंहगृहे नित्यं यः संमार्ज्जनमाचरेत्।
सर्व्वपापविनिर्मुक्तो विष्णुलोके स मोदते ॥”
इति नृसिंहपुराणम् ॥

“संमार्ज्जनन्तु यः कुर्य्यात् पुरुषः केशवालये।
रजस्तमोभ्यां निर्मुक्तः स भवेन्नात्र संशयः ॥
पांशूनां यावतां, राजन्। कुर्य्यात् संमार्ज्जनं
नरः।
तावन्त्यब्दानि स सुखी नाकमासाद्य मोदते ॥”
इति विष्णुधर्म्मोत्तरम् ॥

“यावन्त्यानि प्रवाहाणि भूमिसंमार्ज्जिते इह।
तावद्वर्षसहस्राणि शाकद्वीपे महीयते ॥
जायते मम भक्तश्च सर्व्वधर्म्मसमन्वितः।
शुचिर्भागवतः शुद्धो ह्यपराधविवर्जितः ॥
ततो भक्त्या सर्व्वभोगान् तीर्त्वा संसारसागरम्।
शाकद्वीपात् परिभ्रष्टः स्वर्गलोकं स गच्छति ॥
नन्दनं वनमाश्रित्य मोदते चाप्सरैः सह।
नन्दनाच्च परिभ्रष्टो मम कर्म्मव्यवस्थितः।
सर्व्वसङ्गान् परित्यज्य मम लोकन्तु गच्छति ॥”
इति वराहपुराणम् ॥ * ॥

स्नानविशेषः। यथा। आतुराणाम्।
“अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु
कर्म्मिणाम्।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥”
इति जाबालवचनाच्छिरो विहाय गात्रप्रक्षा-
लनं तदशक्तौ सर्व्वगात्रमार्ज्जनं आर्द्रेण वाससा
कुर्य्यात्। इत्याह्निकाचारतत्त्वम् ॥ * ॥ वैदिक-
सन्ध्योपासनान्तर्गतमार्ज्जनं यथा। छन्दोगपरि-
शिष्टम्।
“शिरसो मार्ज्जनं कुर्य्यात् कुशैः सोदक-
बिन्दुभिः।
प्रणवो भूर्भुवः स्वश्च गायत्री च तृतीयिका ॥
अब्दैवत्यं त्र्यृचश्चैव चतुर्थमिति मार्ज्जनम् ॥”
ओङ्कारो भूरादिव्याहृतित्रयं तृतीया च गायत्री
चतुर्थमापोहिष्ठेति ऋक्त्रयम्। इत्यादं मार्ज्जन
मार्ज्जनक्रियाकरणमित्यर्थः। रामायणम्।
“कुशाग्रैर्मार्ज्जनं कुर्य्यात् पादाभ्यां वा समाहितः।
आपोहिष्ठेत्यृचा कार्य्यं मार्ज्जनन्तु कुशोदकैः ॥
प्रतिप्रणवसंयुक्तं क्षिपेद्वारि पदं पदे।
त्र्यृचस्यान्तेऽथवा कुर्य्यादेषोवा मार्ज्जनम् ॥

"आपोहिष्ठेतिमन्त्रस्य सिन्धुद्वीप ऋषिः स्मृतः ।
आपो वै देवता छन्दो गायत्री मार्जनं
स्मृतम् ॥"
इत्याह्निकाचारतत्त्वम् ॥

मार्ज्जनः, पुं, (मार्ज्ज्यतेऽनेनेति । मार्ज्ज + ल्युट् ।) लोधवृक्षः । इत्यमरः । २ । ४ । ३३ ॥ श्वेतलोधः । इति सुभूतिः ॥ रक्तलोधः । इति स्वामी ॥

मार्जना, स्त्री, (मार्ज्ज्यत इति । मार्ज्ज + भावे युच् ।) मार्जनम् । इत्यमरः । २ । ६ । १२१ ॥ मुरजध्वनिः । इति हेमचन्द्रः । ३ । ३०० ॥

मार्जनी, स्त्री, (मार्ज्ज्यते अनयेति । मार्ज्ज + करणे ल्युट् + स्त्रियां ङीप् ।) सम्मार्जनी । झाँटा इति भाषा । यथा,—
"नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्जनीकलसोपेतां शूर्पालङ्कृतमस्तकाम् ॥"
इति स्कान्दे शीतलास्तोत्रम् ॥

मार्जनीयः, त्रि, (मार्ज्ज्यते इति । मृज + अनीयर् ।) मार्जनयोग्यः । मार्ज्यः ॥ इति मृजधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नः । अग्निः । शोधनम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

मार्जारः, पुं, (मृज् + "कञ्जिमृजिभ्यां चित् ।" उणा० ३ । १३७ । इति आरन् चित् । "मृजेर्वृद्धिः ।" इत्युज्ज्वलदत्तोक्तेर्वृद्धिश्च ।) रक्तचित्रकः । इति राजनिर्घण्टः ॥ विडालः । इत्यमरः । २ । ५ । ६ ॥ (यथा, महाभारते । ५ । १५८ । १६ ।
"मार्ज्जारः किल दुष्टात्मा निश्चेष्टः सर्व्व-
कर्म्मसु ॥")
खट्टासः । इति हेमचन्द्रः । ४ । ३६७ ॥ * ॥
मार्जारस्पर्शने दोषो यथा,—
"अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटान् ।
पतितापविद्धचण्डालमृतहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यते स्नानादुदक्याग्रामसूकरौ ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥ * ॥
पारिभाषिकमार्जारो यथा,—
"स्वार्थं जपनं यश्च तप्यते यजते तथा ।
न परार्थसमुद्युक्तो मार्जारः परिकीर्त्तितः ॥"
तस्यान्नमभोज्यं यथा,—
'अभोज्याः सूतिकाषण्डमार्जाराखुश्वकुक्कुटाः ॥'
इति वामनपुराणे १५ अध्यायः ॥

मार्जारकः, पुं, (मृज् + आरन् वृद्धिश्च । "संज्ञायां कन् ।" ४ । ३ । १४७ । इति कन् च ।) मयूरः । इति त्रिकाण्डशेषः ॥ (मार्ज्जार + स्वार्थे कन् । विडालः । यथा, महाभारते । १ । २३३ । ७४ ।
"इमे मार्ज्जारकाः शुक्र । नित्यमुद्वेजयन्ति
नः ॥")

मार्जारकण्ठः, पुं, (मार्ज्जारस्येव कण्ठः कण्ठस्वरो यस्य । यद्वा, मार्ज्जारो मत्स्यः कण्ठो यस्य ।) मयूरः । इति शब्दरत्नावली ॥

मार्जारकर्णिका, स्त्री, (मार्ज्जारस्य कर्णौ इव कर्णौ यस्याः । स्त्रियां ङीप् स्वार्थे कन् । टाप् पूर्व्वस्य ह्रस्वत्वञ्च ।) चामुण्डा । यथा,—
"चामुण्डा चर्च्चिका चर्म्ममुण्डा मार्जार-
कर्णिका ॥"
इति हेमचन्द्रः ॥

मार्जारकर्णी, स्त्री, मार्ज्जारस्येव कर्णावस्याः । ङीप् । चामुण्डा । यथा,—
"मार्जारकर्णी चामुण्डा कर्णमोटिश्च चर्च्चिका ॥"
इति त्रिकाण्डशेषः ॥

मार्जारगन्धा, स्त्री, (मार्ज्जारस्येव गन्धोऽस्याः ।) मुद्गपर्णीविशेषः । इति रत्नमाला ॥

मार्जारगन्धिका, स्त्री, (मार्ज्जारगन्ध । कन् । टाप् । अत इत्वञ्च ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिका सहा ।
काकमुद्गा च सा प्रोक्ता तथा मार्जारगन्धिका ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्जारी, स्त्री, (मार्ष्टि शोधयति केशादिकमनया । मृज् + आरन् । स्त्रियां ङीष् ।) कस्तूरी । जन्तुविशेषः । गन्धगकुला इति खाटाशी इति च भाषा । तत्पर्य्यायः । पूतिका २ पूतिकजः ३ गन्धचेलिका ४ । अस्या गुणाः । वान्तिधारकत्वम् । चक्षुष्यत्वम् । कफवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

मार्जारीयः, पुं, (मार्ज्जारस्यायम् । मार्जार + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) विडालः । शूद्रः । कायशोधनम् । इति मेदिनी । ये, १०७ ॥

मार्जालः, पु, मार्जारः । रलयोरेकत्वात् ॥

मार्जालीयः, पुं, (मृज् + "स्थाचतिमृजेरालच् वालच्चालीयचः ।" उणा० १।११५ । इति आलीयच् ।) विडालः । शूद्रः । कायशोधनम् । इति हेमचन्द्रः ॥ (महादेवः । यथा, महाभारते । ३ । ३९ । ७७ ।
"ललाटाक्षाय सर्व्वाय मीढुषे शूलपाणये ।
पिनाकगोप्त्रे सूर्य्याय मार्जालीयाय वेधसे ॥")

मार्जिता, स्त्री, (मार्ज्यते शुध्यते पाणिनेति । मृज् + णिच् + कर्म्मणि क्तः । स्त्रियां टाप् ।) रसाला । इत्यमरः । २ । ९ । ४४ ॥ सा तु दधिखण्डमधुसर्पिर्मरिचादिकृतकर्पूरादिवासितसद्भक्ष्यविशेषः । इत्यमरटीकायां भरतः ॥ (गुणादयोऽस्या रसालाशब्दे ज्ञातव्याः ॥) शोधिते, त्रि ॥

मार्त्तण्डः, पु, (मृतश्चासौ अण्डश्चेति । मृताण्डे भवतीति । मृताण्ड + "तत्र भवः ।" ४ । ३ । ५३ । इति अण् ।) सूर्य्यः । (तन्निरुक्तिश्च । यथा,—
"अभिव्यक्तेषु गात्रेषु पुत्त्रं दृष्ट्वा पिताब्रवीत् ।
मार्त्तण्डं भव मार्त्तण्डेति मार्त्तण्डस्तेन स स्मृतः ॥"
यथा, मार्कण्डेये । ७७ । १ ।
"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः ।
संज्ञा नाम महाभाग तस्यां भानुरजीजनत् ॥"
अर्कवृक्षः । इत्यमरः ॥ शूकरः । इति मेदिनी । ते, ३५ ॥ मार्त्तण्डोत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"एवं सा नियता देवी चक्रे स्तोत्रमहर्निशम् ।
निराहारा विवस्वन्तमाराराधयिषुर्मुने ॥
ततः कालेन महता भगवांस्तपनो मुने ।
प्रत्यक्षतामगात्तस्या दाक्षायण्या द्विजोत्तम ॥
सा ददर्श महाकूटं तेजसोऽम्बरसंस्थितम् ।
भूमौ च संस्थितं भास्वज्ज्वालामालातिदुर्दृशम् ॥
तच्च दृष्ट्वा ततो देवी साध्वसं परमं गता ।
जगादाद्य ! प्रसीदेति न त्वां पश्यामि गोपते ॥
यथा दृश्वती पूर्व्वमम्बरस्थं सुदुर्दृशम् ।
संघातं तेजसस्तस्मादिह पश्यामि भूतले ॥
प्रसादं कुरु पश्येयं यद्रूपं ते प्रभाकर ! ।
भक्तानुकम्पन ! विभो ! भक्ताहं पाहि मे
सुतान् ॥"
श्रीमार्कण्डेय उवाच ।
"ततः स तेजसस्तस्मादाविर्भूतो विभावसुः ।
अदृश्यत तदादित्यस्तप्तताम्रोपमप्रभः ॥
अथ तां प्रणतां देवीं तस्य सन्दर्शनान्मुने ।
प्राह भास्वान् वृणुष्वेष्टं वरं मत्तो यमिच्छसि ॥
प्रणता शिरसा सा च जानुपीडितमेदिनी ।
प्रत्युवाच विवस्वन्तं वरदं समुपस्थितम् ॥
देव । प्रसीद पुत्त्राणां हृतं त्रिभुवनं मम ।
यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः ॥
तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते ।
अंशेन तेषां भ्रातृत्वं गत्वा नाशय तद्रिपून् ॥
यथा मे तनया भूयो यज्ञभागभुजः प्रभो ।
भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर ॥
तथानुकम्पां पुत्त्राणां सुप्रसन्नो रवे ! मम ।
कुरु प्रसन्नार्त्तिहर । स्थितिकर्त्ता त्वमद्य मे ॥"
मार्कण्डेय उवाच ।
"ततस्तामाह भगवान् भास्करो वारितस्करः ।
प्रणतामदितिं विप्र ! प्रसादसुमुखो विभुः ॥
सहस्रांशेन ते गर्भे सम्भूयाहमशेषतः ।
तत्पुत्त्रशत्रूनदिते ! नाशयाम्याशु निर्वृता ॥
इत्युक्त्वा भगवान् भास्वानन्तर्द्धानमुपागमत् ।
निवृत्ता सापि तपसः संप्राप्ताखिलवाञ्छिता ॥
ततो रश्मिसहस्रान्तः सुषुम्नाख्यो रवेः करः ।
विप्रावतारं संचक्रे देवमातुरथोदरे ॥
कृच्छ्रचान्द्रायणादीनि सा चक्रे सुसमाहिता ।
शुचिः सन्धारयाम्येनं दिव्यं गर्भमिति द्विज ॥
ततस्तां कश्यपः प्राह किञ्चित्कोपप्लुताक्षरम् ।
किं मारयसि गर्भाण्डमिति नित्योपवासिनी ॥
सा च तं प्राह गर्भाण्डमेतत् पश्येति कोपना ।
न मारितं विपक्षाणां मृत्यवे यद्भविष्यति ॥
इत्युक्त्वा तं तदा गर्भमुत्ससर्ज्ज सुरारणिः ।
जाज्वल्यमानं तेजोभिः प्रत्युवाच न कोपिता ॥
तं दृष्ट्वा कश्यपो गर्भमुद्यद्भास्करवर्चसम् ।
तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात् ॥
संस्तूयमानः स तदा गर्भाण्डात् प्रकटोऽभवत् ।
पद्मपत्त्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः ॥
अथान्तरीक्षादाभाष्य कश्यपं मुनिसत्तमम् ।
सतोयमेघगम्भीरा वागुवाचाशरीरिणी ॥

मानितश्च यत: प्रोक्तमेतदक्कं त्वयादितिम् ॥
तस्मात्सुते ! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥
सूर्य्याधिकारश्च विभुर्जगत्येव करिष्यति ।
इतिध्यग्नसुरांश्चायं यज्ञभागहरानरीन् ॥
देवा निशम्येति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजस: ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतु: ।
सह देवैर्मुदायुक्तो दानवाश्च तमाययु: ॥
तेषां युद्धमभूद्घोरं देवानामसुरै: सह ।
शस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिता: ।
तेजसा दह्यमानास्तु भस्मीभूता महासुरा: ॥
तत: प्रहर्षमतुलं प्रापु: सर्व्वे दिवौकस: ॥
तुष्टुवुस्तेजसां योनिं मार्त्तण्डमदितिं तथा ॥
स्वाधिकारं तत: प्राप्य यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्ड: स्वाधिकारमथाकरोत् ॥
कदम्बपुष्पवद्भास्वानधश्चोर्द्ध्वञ्च रश्मिभि: ।
वृतोऽग्निपिण्डसदृशो दधे नातिस्फुटं वपु: ॥”
इति मार्कण्डेयपुराणे सूर्य्यमाहात्म्ये मार्त्त-
ण्डोत्पत्तिनामाध्याय: ॥

मार्त्तण्डवल्लभा, स्त्री, (मार्त्तण्डस्य वल्लभा प्रिया यद्वा, मार्त्तण्डो वल्लभ: प्रियोऽस्या: ।) आदित्यभक्ता । इति राजनिर्घण्ट: ॥ सूर्य्यपत्नी च ॥

मार्त्तिक:, पुं, (मृत्तिकाया विकार इति । मृत्तिका+“तस्य विकार: ।” ४ । ३ । १३४ । इति ठक् ।) शराव: । इति शब्दरत्नावली ॥ मृत्तिकानिर्म्मिते, त्रि ॥

मार्द्दङ्गं, क्ली, (मृदङ्ग अङ्गमस्य । तत: स्वार्थे अण् ।) पत्तनम् । इति हारावली ॥ (मृदङ्गवादनं शिल्पमस्येति । अण् ।) मृदङ्गवादके, त्रि ॥

मार्द्दङ्गिक:, त्रि, (मृदङ्गवादनं शिल्पमस्य । मृदङ्ग+“शिल्पम् ।” ४ । ४ । ५५ । इति ठक् ।) मृदङ्गवादक: । तत्पर्य्याय: । मौरजिक: २ । इत्यमर: । २।१०।१३ ॥ मार्द्दङ्क: ३ मौर्द्दिक: ४ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ८१ । ४८ ।
“विबभ्रा मार्द्दङ्गिका आसंश्चक्र्यागाद्धा विभौतका: ।
अभ्यस्या नर्त्तकाश्चासन् भरद्वाजस्य तेजसा ॥”)

मार्द्दवं, क्ली, (मृदोर्भाव इति । मृदु+“पृथ्वादिभ्य इमनिज् वा ।”५।१।१२२। इत्यण् । “वाचकनमकादे: समावेशार्थम् ।” इति काशिकोक्तेश्च ।) परदु:खप्रदर्शनात् पीडाबुद्धि: । मृदुता । यथा,—
“मार्द्दवं कोमलस्यापि संस्पर्शासहतोच्यते ।
उत्तमं मध्यमं प्रोक्तं कनिष्ठञ्चेति तत्त्रिधा ॥”
उत्तमं यथा,—
“अभिनवमालिकामियं माधव-
नववशिराधिका विशिखी ।
न कुसुमपटलं दरापि जग्मौ
सदृगुभवात्तनुरेव सन्नमासीत् ॥”

मध्यमं यथा,—
“चित्रं धनिष्ठे नतुवाससोऽपि
चौनस्य पीनस्तनि । सङ्गमेन ।
लिप्तेन नक्तोल्लिखचन्दनेन
त्वमिन्दिदूना सखि । लाञ्छितासीत् ॥
कनिष्ठं यथा,—
रससुधाकरे आमोदमामोदन-
माद्धानं मिलीनर्म्मालालकचञ्चरीकम् ।
चापेन पद्मामखपद्ममासीत्
त्विषा रवे: कोमलयापि ताभ्रम् ॥”
इत्युज्ज्वलनीलमणि: ॥
(अकाठिन्यम् । यथा, रघौ । ८ । ४३ ।
“विललाप सवाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु ॥”)

मार्द्दव:, पुं, (मार्द्दवं मृदुत्वमस्यास्तीति । मार्द्दव+अर्श आद्यच् ।) वर्णसङ्करजातिविशेष: ।
“माधुको मार्द्दवश्चक्कुकारश्च क्षिक्षिकादय: ।”
इति जटाधर: ॥

मार्ष:, पुं, (मृष्यति चमते जनानिति । मृष+“इगुपधज्ञाप्रीकिर: क: ।” ३ । १ । १३५ । इति क: । मृष: । तत: । स्वार्थे अण् ।) नाट्योक्तौ श्रेष्ठ: । इति हेमचन्द्र: । २ । २४ ॥ मारिषशाक: । इत्यमरटीकायां भरत: ॥ (शाकार्थे पर्य्यायो यथा,—
“मारिषो वाष्पको मार्ष: श्वेतो रक्तश्च स स्मृत: ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्षिक:, पुं, (मार्ष+ठक् ।) मारिषशाक: । इति राजनिर्घण्ट: ॥

मार्ष्टि:, स्त्री, (मृज्+क्तिन् । “मृजेर्वृद्धि: ।” ७ । २ । ११४ । इति वृद्धिश्च ।) मार्ज्जनम् । इत्यमर: । २।६ । १२१ ॥ तैलाभ्यङ्गम् । यथा,
“तैलमल्पं यदङ्गेषु न भवेत् बाहुमङ्गनम् ।
सा मार्ष्टि: पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तित: ॥”
इत्याह्निकतत्त्वम् ॥

मालं, क्ली, (माति मानहेतुर्भवतीति । मा+“कृञ्भ्रोगर्ब्बत्यादि ।”उणा०१ । १०८ । इति रण् । पृषोदरादित्वादस्य लत्वम् ।) क्षेत्रम् । इति मेदिनी ॥ ले, ४५ । (यथा, मेघदूते ।१६।
“सद्य: सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥”) कपटम् । वनम् । इति हेमचन्द्र: ॥ (हरितालम् । यथा,—
“हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जकं रोमहरणं तालकं पातमित्यपि ॥”
इति वैद्यकरत्नमालासरोजे सारसुन्दरे हरिताद्यधिकारे ।)

माल:, पुं, (मातीति । मा+रन् । रस्य लत्वम् । जातिविशेष: । इति मेदिनी ॥ ले, ४५ । स च म्लेच्छजाति: । यथा,— [जातय: ॥”
“माला भिल्ला: किराताश्च सर्व्वेऽपि

(यथा, महाभारते । ६ । ६ । ३६ ।
“तथैमे कुरुपाञ्चाला: शाल्वा माद्रेयजाङ्गला: ।
शूरसेना: पुलिन्दाश्च बोधा मालास्तथैव च ॥”)
जन: । इति च हेमचन्द्र: । ३ । ५८८ ॥ देशविशेष: । स च मेदिनीपुरप्रदेशे मालभूमिरिति ख्यात: । विष्णु: । यथा,—
‘मां लक्ष्मीं लातीति मालो विष्णु: तं अततीति मालती ।’
इति मालतीशब्दटीकायां भरत: ॥

मालकं, क्ली, (मलते धारयति शोभामिति । मलधारणे+ण्वुल् ।) स्थलपद्मम् । इति जटाधर: ॥

मालक:, पुं, (मलते धारयत्युग्रवीर्य्यं रोगनाशने इति । मलधारणे+ण्वुल् ।) निम्बवृक्ष: । इत्यमर: । २ । ४ । ६२ ॥ (निम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मालका, स्त्री, (मलते धारयति शोभाम् । मल+ण्वुल् । स्त्रियां टाप् ।) माल्यम् । इति शब्दरत्नावली ॥

मालकोश: पुं, (मालस्य हरे: कोशात् कण्ठाभिर्गत इति । अण् ।) रागविशेष: । तस्य नामान्तरं कौशिक: । स च हनूमन्मते षड्रागाणां मध्ये द्वितीयराग: । हरस्य हरिणवं कण्ठाभिर्गत: । अस्य जाति: सम्पूर्णा तत्र सप्तस्वरक्रम: ष ऋ ग म प ध नि । अस्य षड्जस्वर: । शरदृतौ रात्रिशेषे गानसमय: । रागमालायामस्य स्वरूपम् । पाटलवर्णपुरुष: । नीलपरिच्छद: । यष्टिहस्त: । यौवनमदमत्त: स्त्रीभि: सह हास्यकौतुकान्वित: शुभ्रमस्तकमाल्यगलोऽथवा हृद्गतमुक्तामाल्यगल: । अस्य रागिण्य: पञ्च यथा । टोड़ी १ गौरी २ गुणकरी ३ खम्भावती ४ कोकभा ५ । अस्याष्टौ पुत्रा यथा । मारु: १ मेवाड़: २ प्रचण्डः ३ प्रबल: ४ चन्द्रक: ५ नन्द: ६ भ्रमर: ७ खुखर: ८ अत्र मिश्राङ्गोऽपि पाठ: । भरतमते तस्य रागिण्य: पञ्च यथा । गौरी १ दयावती २ देवदाली ३ खम्भावती ४ कोकभा ५ । तस्याष्टौ पुत्रा यथा । गान्धार: १ शुद्ध: २ मकर: ३ चिञ्चक: ४ सहान: ५ शुक्रवल्लभ: ६ मालीगौड़: ७ कामोद: ८ । अष्टपुत्रभार्य्या यथा । धनाश्री: १ मालश्री: २ जयतश्री: ३ सुघोषायां ४ दुर्गा ५ गान्धारी ६ भीमपलाश्री ७ कामोदी ८ । इति सङ्गीतशास्त्रम् ॥

मालचक्रकं, क्ली, (माला सम्बद्ध: अस्मात्सम्प्लवतीति । अर्श आदित्वादच् । स चक्रमिवेति । कन् ।) सक्थ्युरुपर्व्वसन्धि: । इति शब्दचन्द्रिका । मालाइचाकि इति भाषा ॥

मालती, स्त्री, (मलते शोभां धारयतीति । मल+“भृदृशियजीत्यादि ।”उणा० ३ । ११० । इत्यच “बाहुलकात् मलतेरतच् । गौरादित्वात् ङीष् । उपधाया दीर्घत्वम् ।” इत्युज्ज्वलदत्तोक्ते: अतच् उपधाया दीर्घत्वम् ङीष् च । मां लक्ष्मीं

लातीति मालो विष्णुः तं अलतीति। अच्। इत्यमरटीकायां भरतः॥) स्वनामख्यात-पुष्पलता। तत्पर्य्यायः। सुमना २ जातिः ३। इत्यमरः॥ सुमनाः ४ जाती ५। इति भरतः॥ (यथा, शिशुपालवधे। ११। १७।
"ज्वलयति मदनाग्निं मालतीनां रजोभिः।")
अस्या गुणाः। कफपित्तमुखरोगव्रणक्रिमिकुष्ठ-नाशित्वम्। इति राजवल्लभः॥ तस्या उत्-पत्तिर्यथा,—

आद्याशक्तिरुवाच।

'अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ति च ताः सुराः॥

नारद उवाच।

इत्याकर्ण्य तां वाचमन्तर्द्धानमगाच्च सः।
देवानां विस्मयोत्फुल्लनेत्राणाञ्च तदा नृप।॥
ततः सर्व्वेऽपि ते देवा गत्वा तद्वाक्यचोदिताः।
गौरीं लक्ष्मीं स्वधाञ्चैव प्रणेमुर्भक्तितत्पराः॥
तास्तदा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्सलाः।
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तथा॥

देव्य ऊचुः।

इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठति।
निर्व्वपध्वं ततः कार्य्यं भवतां सिद्धिमेष्यति॥

नारद उवाच।

ततः प्रहृष्टाः सुरसिद्धसंघाः
प्रगृह्य बीजानि विचित्रपुष्पं।
विन्दारिकाभूमितले स यत्र
विष्णुः सदा तिष्ठति सौख्यवृत्तिः॥

नारद उवाच।

निक्षिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्यस्त्रयोऽभवन्।
धात्री च मालती चैव तुलसी च नृपोत्तम!॥
धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता।
गौरीभवा च तुलसी रजःसत्त्वतमोगुणा॥"
इति पाद्मे उत्तरखण्डे १४८।१५० अध्यायौ॥*॥
युवती। कामताली। विशाल्या। ज्योत्स्ना। निशा। नदीविशेषः। इति हेमचन्द्रः।४।१३। (सुवर्णैला मालतीत्वर्णः। तत्पर्य्यायो यथा,—
"चम्पको मालती भीमा रुद्रपत्नी सुवर्णैला॥"
पुष्पार्थे पर्य्यायो यथा,—
"मालती सुमना जातिः।" इत्युभे वैद्यकरत्न-मालायाम्॥ तथाच।
जातिर्जाती च सुमना मालती राजपुत्त्रिका।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मालतीतीरजः, पुं, (मालती नदाख्या नदी तस्याः तीरे जायते इति। जन् + ड।) टङ्कणः। इति हेमचन्द्रः। ४। १०॥
मालतीतीरसम्भवं, क्ली, (मालत्याः तीरे सम्भवो-ऽस्य।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥
मालतीपत्त्रिका, स्त्री, (मालत्याः पत्त्रीव। मालती-पत्त्र + प्रतिकृतौ कन् टाप् अत इत्वम्।) जातीपत्त्री। इति राजनिर्घण्टः॥ (जाती-पत्त्रीशब्देऽस्य विषयो ज्ञेयः॥)
मालतीफलं, क्ली, (मालत्याः फलम्।) जाती-फलम्। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"जातीफलं जातिकोषं मालतीफलमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मालयः, पुं, (मा शोभा तस्याः लयः आश्रयः।) चन्दनवृक्षः। इति त्रिकाण्डशेषः॥ मलय-सम्बन्धिनि, त्रि॥ (यथा, नलोदये। २। ३७।
"तगुच्छटोत्तमालया तया भुवोत्तमालया।
अहारि शीतमालयानिलावधूतमालया॥"
क्ली, अभिसारस्थानभेदः। यथा, साहित्य-दर्पणे। ३। अभिसारिकाप्रकरणे।
"क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम्।
मालयश्च श्मशानश्च नद्यादीनां तटी तथा॥")
मालवः, पुं, (माल: उन्नतक्षेत्रमस्त्यत्र। माल + "केशाद्वोऽन्यतरस्याम्।" ५।२।१०९। इत्यत्र "अन्येभ्योऽपि दृश्यन्ते।" इति काशिकोक्तेः वप्रत्ययः।) अवन्तिदेशः। इति हेमचन्द्रः। ४। २७॥ मालओया इति हिन्दीभाषा॥ (यथा, मात्स्ये। ११३। ४४॥
"अङ्गा वङ्गा मद्गुरका अन्तर्गिरि बहि-र्गिरी।
सुह्मोत्तराः प्रविजया मार्गवागेयमालवाः॥"
मालवेषु जात इत्यण्। तद्देशजे, त्रि॥) रागविशेषः। स च षड्रागाणां मध्ये प्रथम-रागः। मतान्तरे भैरवरागोऽयम्। यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम्॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकी-र्त्तिताः॥

तस्य स्वरूपं यथा,—

"नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः॥"

इति सङ्गीतदामोदरः॥
(मालव्यां तन्नामिकायां सावित्रीमातरि जातः इत्यण्। अश्वपतेराज्ञो मालव्यां जातः पुत्त्र-गणः। यथा, महाभारते। ३। २९६। ५८।
"पितुश्च ते पुत्त्रशतं भविता तव मातरि।
मालव्यां मालवा नाम शाश्वताः पुत्त्रपौत्त्रिणः॥
भ्रातरस्ते भविष्यन्ति क्षत्त्रियास्त्रिदशोपमाः॥"
स्त्री, नदीविशेषः। यथा, महाभारते। १३। १६५। २५।
"हिरण्वती वितस्ता च तथा प्लक्षवती नदी।
वेदस्मृतिर्वेदवती मालवाथाश्ववत्यपि॥")
मालविका, स्त्री, (मालवेषु जाता। मालव। ठक् टाप्।) त्रिवृत्। इति राजनिर्घण्टः॥
मालश्री, स्त्री, (मल + स्वार्थे अण्। मलं श्रिय-नाशयति। शो + कः। ङीप्।) कैशपुष्पवृक्षः। यथा,—
'मालश्री दुर्गपुष्पी च बालाग्नी केशधारिणी॥'
इति शब्दचन्द्रिका॥
रागिणीविशेषः। सा तु मालवरागस्य पत्नी। यथा,—
"धानुषी मालश्री रामकिरी च सिन्धुड़ा तथा।
आसावारी भैरवी च मालवस्य प्रिया इमाः॥"
इति हारीतः॥
मतान्तरे मेघरागस्य पत्नी। यथा,—
"ललिता मालश्री गौरी नाटी देवकिरी तथा।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः॥"
तस्याः स्वरूपं यथा,—

"नीलारविन्दस्य दलानि बाला
विधारयन्ती तनुदेहयष्टिः।
मालूरवृक्षस्य तले निषण्णा
शंसन्ति सद्भिर्मालसिका प्रदिष्टा॥"

तस्या गानसमयो यथा,—
"इन्द्रोत्थानात् समारभ्य यावद्दुर्गामहोत्सवम्।
गेया भवेद्बुधैर्नित्यं मालश्री सा मनोहरा॥"
अपि च।
"गान्धारी दीपिका चैव कल्याणी पुरवी तथा।
अश्ववारी कानड़ा च गौरी केदारपाहिड़ा॥
माधवी मालश्री नाटी भूपाली सिन्धुड़ा तथा।
सायाह्ने रागिणीरेताः प्रगायन्ति चतुर्द्दश॥"
इति सङ्गीतदामोदरः॥
माला, स्त्री, (माति मानहेतुर्भवतीति। मा + "कर्म्मेन्नाग्रनर्म्म।" उणा० ३।२८। इति रन् रस्य लत्वम् टाप् च। यद्वा, मां शोभां लाति इति। ला + कः टाप्।) श्रेणी। तत्पर्य्यायः। राजिः २ लेखा ३ तती ४ वीथी ५ आली ६ आवलिः ७ पङ्क्तिः ८ धारणी ९। इति हेमचन्द्रः।३।३२५। मूर्द्ध्नि न्यस्तपुष्पदाम। अन्यत्राप्युपचारात्॥ तत्पर्य्यायः। माल्यम् २ स्रक् ३। इत्यमरः।२। ६।१३५॥ मालिका ४ मालाका ५ मालका ६। इति शब्दरत्नावली॥ गणिका ७ गुणा-न्विका ८। इति वराहपुराणम्॥ सा त्रिविधा यथा,—
"माला तु त्रिविधा देवि। वर्णाक्षपर्व्वभेदतः।"
इति मत्स्यसूक्तवचनम्॥ *॥
अथ मालानिर्णयः। तत्र करमाला। सनत्-कुमारसंहितायाम्।
'तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात्॥
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्॥
क्रममाह।
अनामामध्यमारभ्य कनिष्ठादित एव च।
तर्ज्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत्॥
तथा,—
अनामामूलमारभ्य कनिष्ठादित एव च।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत्॥

एतद्वचनन्तु अष्टोत्तरशतादिविषयम् ॥ * ॥
शक्तिविषये पुनः । श्रीक्रमे ।
अनामिकात्रयं पर्व्व कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्वणि ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत् ॥
हंसपारमेश्वरे ।
पर्व्वद्वयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत् ॥
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्व्वति ! ।
शक्तिमाला समाख्याता सर्व्वतन्त्रप्रदीपिका ॥
तथा ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
मध्यमामूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥ * ॥
श्रीविद्यायामयं विशेषः ।
अनामाया मध्यमाया मूलाग्रञ्च द्वयं द्वयं ।
कनिष्ठायाश्च तर्ज्जन्याश्चयं पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्याद्द्वितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेत्त्रिपुरसुन्दरीम् ॥”
इति यामलवचनात् ॥

मुण्डमालातन्त्रे ।
“अनामिका द्वयं पर्व्वप्रादक्षिण्यक्रमेण तु ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्ज्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥”
इदमपि अष्टोत्तरशतादिविषयम् ॥ * ॥
अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अन्यत्रापि ।
अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत्सर्व्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत्तज्जपं यतः ।
गृह्णन्ति राक्षसास्तेन गणयेत् सर्व्वथा बुधः ॥
तत्राङ्गुलिजपं कुर्व्वन् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
साङ्गुष्ठेन विना कर्म्म कृतं तदफलं भवेत् ॥
विश्वसारे ।
जपसंख्या तु कर्त्तव्या नासंख्यातं जपेत् सुधीः ।
असंख्याकारकस्यास्य सर्व्वं भवति निष्फलम् ॥
तन्त्रे ।
हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥
इति करमाला ॥ * ॥
जपसंख्यायां निषिद्धद्रव्यमाह यामले ।
नाक्षतैर्हस्तपर्व्वैर्वा न धान्यैर्नच पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां न कारयेत् ॥
विहितद्रव्यमाह ।
लाक्षाकुशीदसिन्दूरगोमयञ्च करीषकम् ।
एभिर्निर्म्माय गुटिकां जपसंख्यान्तु कारयेत् ॥
अथ वर्णमाला । सनत्कुमारे ।
क्रमोत्क्रमगतैर्मालामातृकार्णैः क्षमेरुकैः ।
सबिन्दुकैः साष्टवर्गैरन्तर्यजनकर्म्मणि ॥
आदिकचुटुतुपयुशवर्गाः वर्गाः प्रकीर्त्तिताः ।
तद्यथा । अकारादिवर्णान् सबिन्दून् प्रत्येकं कृत्वा शतं संजप्य अकारादीनां वर्णानां कवर्गादीनाञ्चान्तिमं वर्णं सानुस्वारं कृत्वा पूर्व्वमुच्चार्य्य शेषाष्टवारमन्त्रजपः कार्य्यः । अनेन प्रकारेण अष्टोत्तरशतसंख्यो जपो भवति ।
अन्तर्यजनेत्युपलक्षणम् । तथा ।
सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेद्बुधः ।
अकारादिलकारान्तं बिन्दुयुक्तं विभाग च ।
वर्णमाला समाख्याता अनुलोमविलोमतः ॥
इति नारदवचनात् ।
विशुद्धेश्वरे ।
अनुलोमविलोमेन वर्णाष्टकविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितान्
मनून् ।
कुर्य्याद्वर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ॥ * ॥
मालिनीविजये तत्रनियमः ।
अन्तर्विद्रुमभासमानभुवर्णांतचोतवर्णांन्ततलाम् ।
आरोहप्रतिरोहतः शतमयीं वर्णाष्टकाष्टोत्त-
राम् ॥
इति वर्णमाला ॥ * ॥
अथाक्षमाला । तत्र मालायां मणिनिर्णयः ।
पद्मबीजादिभिर्माला बहिर्य्यागे प्रशस्यते ।
रुद्राक्षशङ्खपद्माक्षपुत्त्रजीवकमौक्तिकैः ॥
स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा ।
राजतैः कुशमूलैश्च गृहस्थस्याक्षमालिका ॥ * ॥
अङ्गुलीगणनादेकं पर्व्वण्यष्टगुणं भवेत् ।
पुत्त्रजीवैर्दशगुणं शतं शङ्खैः सहस्रकम् ॥
प्रवालैर्मणिरत्नैश्च दशसाहस्रकं मतम् ।
तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशलक्षं स्यात् सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या कोटिशतं रुद्राक्षैः स्यादनन्तकम् ॥
सर्व्वैर्विरचिता माला नृणां मुक्तिफलप्रदा ।
कालिकापुराणे ।
रुद्राक्षैर्यदि जपेत इन्द्राक्षैः स्फाटिकैस्तथा ।
नान्यमध्ये प्रयोक्तव्यं पुत्त्रजीवादिकञ्च यत् ॥
यद्यन्यत्तु प्रयुञ्जीत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
मुण्डमालायाम् ।
श्मशानधुस्तूरैर्माला ज्ञेया धूमावतीविधौ ।
नराङ्गुल्यस्थिभिर्माला ग्रथिता सर्व्वकामदा ॥
तस्या संग्रथनं कार्य्यं रक्तेन वाससा प्रिये ! ।
सदा गोप्या प्रयत्नेन जनन्या जारवत् प्रिये ! ॥
कामनाविशेषे तु ।
पद्माक्षैर्विहिता माला शत्रुनाशकरी मता ।
कुशग्रन्थिमयी माला सर्व्वपापप्रणाशिनी ॥
पुत्त्रजीवफलैः कॢप्ता कुरुते पुत्त्रसम्पदम् ।
निर्म्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा ।
प्रवालैर्विहिता माला प्रयच्छेत विपुलं धनम् ॥
भैरवीतिस्रायामन्त्र वाराहीतन्त्रे ।
सुवर्णमणिभिर्म्मालां स्फाटिकीं शङ्खनिर्म्मि
ताम् ।
प्रवालैर्वा कुर्य्यात पुत्त्रजीव विवर्ज्जयेत् ।
पद्माक्षैरेव रुद्राक्षमिन्द्राक्षञ्च निषेधतः ॥ * ॥
त्रिपुरामन्त्रजपादौ तु रक्तचन्दनबीजादिभि-
रतिप्रशस्ता । तथा च तन्त्रराजे ।
रक्तचन्दनमाला तु भोगदा मोक्षदा भवेत् ॥
तथा ।
वैष्णवे तुलसीमाला गजदन्तैर्गणाननं ।
त्रिपुराया जपे शस्ता रुद्राक्षै रक्तचन्दनैः ॥ * ॥
कुमारीकल्पे ।
रुद्राक्षैः शक्तिमन्त्रञ्च मन्त्री यः प्रजपेत् प्रिये ! ।
स दुर्गतिमवाप्नोति निष्फलस्तस्य तज्जपः ॥
कालिका छिन्नमस्ता च त्रिपुरा तारिणी तथा ।
एताः सत्या न दुष्यन्ति जपे रुद्राक्षमालया ॥
दिवा नैव प्रजपेच्च रुद्राक्षमालयापि च ।
पुरश्चर्य्यास्वनं चात्र दूषणन्तु वरानने ! ॥
महाशङ्खमयी माला नीलसारस्वत विधौ ।
कृकलाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला ताराविद्याजपे प्रिये ! ।
कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ॥
मणिनियमस्तु मुण्डमालायाम् ।
अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ।
कीटादिभिरदुष्टानि न जीर्णानि नवानि वै ॥
तथा गौतमीये ।
पञ्चाशल्लिपिभिर्माला विहिता सर्व्वकर्म्मसु ।
अकारादिलकारान्ता वर्णमाला प्रकीर्त्तिता ॥
क्षार्ण मेरुमुखं तत्र कल्पयेत्तु निषक्षम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥ * ॥
चामुण्डातन्त्रे ।
नित्यं जपं करे कुर्य्यात् न तु काम्यमथोद्यतान् ।
काम्यमपि करे कुर्य्यात् मालाभावेऽपि सुन्दरि ! ॥
तेन मालायाः प्राधान्यम् ॥ * ॥ कामनाभेदे तु
गौतमीये ।
समासेनाक्षसूत्रस्य विधानमिह कथ्यते ।
पञ्चविंशतिभिर्मोक्षं त्रिंशद्भिर्धनसिद्धये ॥
सर्व्वार्थाः सप्तविंशत्या पञ्चदशयभिचारके ।
पञ्चाशद्भिः काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः ।
अष्टोत्तरशतैः सर्व्वसिद्धिरुक्ता मनीषिभिः ॥
अथ मालासंस्कारः । तत्र सनत्कुमारीये ।
कार्पाससम्भवं सूत्रं धर्म्मकामार्थमोक्षदम् ।
तत्र विप्रेन्द्रकन्याभिर्निर्म्मितञ्च सुशोभनम् ॥’
यद्वा ।
‘शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा ।
शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजयेषु च ॥
शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् ।
सर्व्वेषामेव वर्णानां रक्तं सर्व्वेप्सितप्रदम् ॥
आश्रमेषु तथा चैव रक्तं सर्व्वसुसिद्धिदम् ।
त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् शिल्पशास्त्रतः ॥
एकैकं मातृकावर्णं सतारं प्रजपन् सुधीः ।
मणिमादाय सूत्रेण ग्रथयेन्मध्यमध्यतः ॥
ब्रह्मग्रन्थिं विधायैत्थं मेरुञ्च ग्रन्थिसंयुतम् ।
ग्रथयित्वा पुरो मालां ततः संस्कारमारभेत् ॥
कस्यचिन्मते मूलविद्यया ग्रथयेत् । तथा च
एकवीराकल्पे ।
‘मातृकामन्त्रतो ग्रन्थिं विद्यया वाथ कारयेत् ।

सुवर्णादिगुणैर्वापि ग्रथयेत् साधकोत्तमः ॥
ब्रह्मग्रन्थिं ततो दद्यान्नागपाशमथापि वा ।
कवचेनाववध्नीयान्मालां ध्यानपरायणः ॥
सर्व्वशेषं ततो मेरुं सूत्रद्वयसमन्वितम् ।
ग्रथयेत्तारयोगेण बध्नीयात् साधकोत्तमः ।
एवं निष्पाद्य देवेशि ! प्रतिष्ठाञ्च समाचरेत् ॥
गौतमीये ।
'मुखे मुखन्तु संयोज्य पुच्छे पुच्छं नियोजयेत्
गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा ।
एवं निर्म्माय मालां वै शोधयेन्मुनिसत्तमः ॥
अश्वत्थपत्रनवकैः पद्माकारन्तु कारयेत् ।
तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन् ।
क्षालयेत् पञ्चगव्येन सद्योजातेन सज्जलैः ॥'
सद्योजातन्तु ।
'ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवेऽभवेऽनादिभवे भजस्व मां भवोद्भवाय नमः ॥
चन्दनागुरुकर्पूरैर्वामदेवेन घर्षयेत् ॥'
वामदेवमन्त्रस्तु । ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्व्वभूतदमनाय नमो मनोन्मनाय नमः । धूपयेत्तामघोरेण । अघोरमन्त्रस्तु । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः । लेपयेत्तत्पुरुषेण तु । तत्पुरुषमन्त्रस्तु । ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।
'मन्त्रयेत् पञ्चमेनैव प्रत्येकन्तु शतं शतम् ।
मेरुञ्च मन्त्रयेत्तेन मनुना च शतं शतम् ॥'
मन्त्रस्तु । ॐ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शिवो मेऽस्तु सदाशिवोम् । प्रत्येकन्तु सकृत् सकृत् । इति वा । तथा च तत्रैव ।
'प्रत्येकं मन्त्रयेन्मन्त्री पञ्चमेन सकृत् सकृत ।'
तथा च गौतमीये समुदायमालामधिकृत्य ।
'पञ्चमेनैव सूत्रेण शतात्मनेन मन्त्रयेत् ।'
इति दर्शनान्मालायां वा शतजपः ।
तत्रावाह्य यजेद्देवं यथाविभवविस्तरैः ।
मालायाः प्राणप्रतिष्ठामन्त्रैर्देवता पूजयेत् ॥
तथा सनत्कुमारे ।
'संस्कृत्यैव बुधो मालां तत्प्राणांस्तत्र स्थापयेत् ।
मूलमन्त्रेण तां मालां पूजयेद्द्विजसत्तम ! ॥'
वाराहीतन्त्रे ।
'माले माले महामाले सर्व्वतत्त्वस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
मायाबीजादिकां कृत्वा रक्तपुष्पैः समर्च्चयेत् ॥'
इति शाक्तविषये ॥
विष्णुविषये तु रुद्रयामले ।
वाग्भवञ्च तथा लक्ष्मीमत्रादिमालिकां ततः ।
ङेऽन्तां हृदयवर्णान्ता मन्त्रेणानेन पूजयेत् ॥
मन्त्रयेन्मूलमन्त्रेण क्रमेणानेन क्रमयोगतः ।
तथैव मातृकावर्णमन्त्रयेत्तान्तु मन्त्रवित् ॥'

माला

योगिनीतन्त्रे ।
'होमकर्म्म ततः कुर्य्याद्देवताभावसिद्धये ।
अष्टोत्तरशतं हुत्वा सम्पाताज्यं विनिःक्षिपेत् ।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ॥
नान्यमन्त्रं जपेन्मन्त्री कम्पयेन्न विधूनयेत् ।
कम्पनात् सिद्धिहानिः स्याद्धूननं बहुदुःखदम् ॥
शब्दे जाते भवेद्रोगः करभ्रष्टा विनाशिका ।
छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ॥
जपान्ते कर्णदेशे वा उच्चदेशे तथा न्यसेत् ।
त्वं माले सर्व्वभूतानां सर्व्वसिद्धिप्रदा मता ॥
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ।
इत्युक्त्वा परिपूज्याथ गोपयेद्यत्नतो बुधः ॥'
मालासंस्कारस्य नित्यतामाह रुद्रयामले ।
'अप्रतिष्ठितमालाभिर्मन्त्रं जपति यो नरः ।
सर्व्वं तद्विफलं विद्यात् क्रुद्धा भवति देवता ॥'
कामनाभेदे तु अङ्गुलिनियमः । गौतमीये ।
'तर्ज्जन्यङ्गुष्ठयोगेन शत्रूच्चाटनमुत्तमम् ।
अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता ॥
अङ्गुष्ठानामिकायोगादुच्चाटोन्मादने मते ।
ज्येष्ठाकनिष्ठायोगेन शत्रूणां नाशनं मतम् ॥
वैशम्पायनसंहितायाम् ।
'अङ्गुष्ठमध्यमाभ्याञ्च चालयेन्मध्यमध्यतः ।
तर्ज्जन्या न स्पृशेदेनां मुक्तिदो गणनक्रमः ॥
जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत् ।
प्रमादात् पतिता हस्तात् शतमष्टोत्तरं जपेत् ॥
जपेन्निगिह्नसंस्पर्शे क्षालयित्वा यथोदितम् ।
छिन्नेऽप्यष्टोत्तरशतजपः कार्य्यः । करभ्रष्टच्छिन्नयोस्तुल्यत्वात् ॥*॥ प्रकारान्तरं आगमकल्पद्रुमे ।
'भूतशुद्ध्यादिकां पूजां समाप्य तत्र पूजयेत् ।
गणेशसूर्य्यविष्णूशान् दुर्गामावाह्य मन्त्रवित् ॥
पञ्चगव्ये ततः क्षिप्त्वा हंसमन्त्रेण मन्त्रवित् ।
तस्मादुत्तोल्य तां मालां स्वर्णपात्रे विधाय च ॥
पयोदधिघृतक्षौद्रशर्करादैरनुक्रमात् ।
तोयधूपान्तरैः कृत्वा पञ्चामृतविधिं बुधः ॥
क्रमादेवैव संस्थाप्य स्थापयेच्छीतले जले ॥
ततश्चन्दनसौगन्धिकस्तूरीकुङ्कुमादिभिः ।
तामालिप्य हंसमन्त्रमष्टोत्तरशतं जपेत ॥
तस्यां नवग्रहांश्चैव दिक्पालांश्च प्रपूजयेत् ।
ततः संपूज्य च गुरुं गृह्णीयान्मालिकां शुभाम् ॥
अक्षमालाञ्च मुद्राञ्च गुरोरपि न दर्शयेत् ।
भूतराक्षसवेतालाः सिद्धगन्धर्व्वचारणाः ।
हरन्ति प्रकटं यस्मात्तस्माद्गुप्तं समाचरेत् ॥'
इति अक्षमाला । इति तन्त्रसारः ॥
अपि च ।
'विद्याधरः पिशाचाश्च विबुधासुरराक्षसाः ।
भूतानि किन्नराः सिद्धाः प्रेताश्च चारणादयः ॥
हरन्ति जपफलान्येते यानि तानि च नारद ! ।
अतूर्णौ वेदविज्ञानु चान्द्रवासादिभिर्जपेत् ॥
इन्द्राक्षबीजनमयी तुलसीकाष्ठसम्भवा ।
हस्ताङ्गुलिमयी हैमी दर्भग्रन्थिमयी तथा ॥
भद्राक्षेन्द्राक्षरुद्राक्षपद्मबीजभवाप्यथ ।

माला

धात्रीपुत्रजीवफलैर्माला या परिकीर्त्तिता ॥
मुक्तामणिमयी रौप्या स्फाटिकी वैद्रुमी तथा ।
जपकर्म्मसु सर्व्वेषु चाक्षमाला प्रकीर्त्तिता ॥*॥
संग्राममन्त्रजपे माला इन्द्राक्षसमुद्भवा ।
गाप्या माला अनन्यानां हस्ताङ्गुलिमयी विना ॥
हैमी मणिमयी माला प्रशस्ता कमलाजपे ।
सरस्वत्या मन्त्रजपे रौप्या मुक्ताविनिर्म्मिता ॥
प्रजापतिजपे माला पुत्रजीवसमुद्भवा ।
पुत्रकामनराणाञ्च सदा पुत्रप्रदा तु सा ॥
राममन्त्रजपे माला पद्मबीजसमुद्भवा ।
धात्रीफलमयी माला विष्णोः कामनया जपे ॥
रुद्राक्षेन्द्राक्षभद्राक्षदृक्षबीजसमुद्भवा ।
महेशानमन्त्रजपे त्वेता मालाः फलप्रदाः ॥
कुशग्रन्थिमयी शुद्धा गायत्री वैष्णवी जपे ।
स्फाटिकी सर्व्वदेवानामथवा तरणेर्जपे ।
श्रीहरेरङ्गुलिमयी जपे माला द्विजन्मनाम् ॥'
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
अपरञ्च ।
'जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ।
निधाय मण्डलस्यान्तः सव्यहस्तगताञ्च वा ॥
ॐ मां माले महामाये सर्व्वशक्तिस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे ।
मध्यमाया मध्यभागे वर्ज्जयित्वा तु तर्ज्जनीम् ॥
अनामिकाकनिष्ठाभ्यां युताया नम्रभावतः ।
स्थापयित्वा तत्र मालामङ्गुष्ठाग्रेण तद्गतम् ॥
प्रत्येकं बीजमादाय जपं कुर्य्यात्तु भैरव ! ।
प्रतिवारं पठेन्मन्त्रं शनैरोष्ठं न चालयेत् ॥
मालाबीजन्तु जपयं स्पृशेन्न हि परस्परम् ।
पूर्व्वजापप्रयुक्तेनैवाङ्गुष्ठाग्रेण भैरव ! ॥
पूर्व्वबीजं जपन् यस्तु परबीजन्तु संस्पृशेत् ।
अङ्गुष्ठेन भवेत्तस्य निष्फलस्तस्य तज्जपः ॥
मालां स्वहृदयासन्ने धृत्वा दक्षिणपाणिना ।
देवीं विचिन्तयन् जप्यं कुर्य्याद्वामेन न स्पृशेत् ॥
स्फाटिकेन्द्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः ।
सुवर्णमणिभिः सम्यक् प्रवालैरथवाब्जकैः ॥
अक्षमाला तु कर्त्तव्या देवी प्रीतिकरा परा ।
जपेदुपांशु सततं कुशग्रन्थ्या तु पाणिना ॥
नानाबीजेषु सर्व्वेषु रुद्राक्षो मत्प्रियात्प्रियः ।
रुद्रप्रीतिकरो यस्मात्तस्माद्रुद्राक्षको बली ॥
प्रवालैरथवा कुर्य्यादष्टाविंशति बीजकैः ।
पञ्चपञ्चाशता वापि न न्यूनैर्नाधिकैश्च वा ॥
रुद्राक्षैर्यदि जप्येत इन्द्राक्षैः स्फाटिकैस्तथा ।
नान्यं मध्ये प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यदन्यत् प्रयुज्येत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
जन्मान्तरे जायते स वेदवेदाङ्गपारगः ।
मित्रीभावं तदा याति चाण्डालैः पापकर्म्मभिः ॥
एको मेरुस्तत्र देयः सर्व्वेभ्यः स्थूलसम्भवः ।
आद्यं मूलं ततस्तस्मात् न्यूनं न्यूनतरं तथा ॥
विन्यसेत् क्रमतस्तस्मात् सर्पाकारा हि सा यतः ।
ब्रह्मग्रन्थियुतं कुर्य्यात् प्रतिबीजं यथा स्थितम् ॥

अथवा ग्रन्थिरहितं दृढ़रज्जुसमन्वितम् ।
ग्निराहृत्याथ मध्येनैवाह्यहृत्याग्निर्दिशत: ॥
ग्रन्थि: प्रदक्षिणावर्त्त: स प्रशस्तस्तु सत्तक: ।
तालगा योजयेन्मालां नामन्तो योजयेद्बुध: ॥
दृढ़ं सूत्रं नियुञ्जीत जपे त्रुट्यति नो यथा ।
यथा हस्तान्न च्यवते जपत: स्रक् तथाचरेत् ।
हस्ताच्युतायां विघ्न: स्याच्छिन्नायां मरणं
भवेत् ।
एवं य: कुरुते मालां जप्यं च मयकोदितम् ।
स प्राप्नोतीप्सितं कामं हीने स्यात् विपर्य्यय: ॥
अन्यत्रापि जपेन्मालां जप्यं देवमनोहरम् ।
ईदृशं साधक: कुर्य्यात् नान्यथा तु कदाचन ॥
यथाशक्ति जपं कुर्य्यात् संख्ययैव प्रयत्नत: ।
असंख्यातन्तु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ।
जप्ता मालां शिरोदेशे प्रांशुस्थानेऽथवा न्यसेत् ॥
इति कालिकापुराणे ५४ अध्याय: ॥*॥ ·॥
अथ मालादिधारणम् ।
तत: कृष्णार्पिता माला धारयेत्तुलसीदलै: ।
पद्माक्षैस्तुलसीकाष्ठै: फलैर्धात्र्याश्च निर्म्मिता ॥
धारयेत्तुलसीकाष्ठभूषणानि च वैष्णव: ।
मस्तके कर्णयोर्बाह्वो: करयोश्च यथारुचि ॥*॥
अथ मालाधारणविधि: ।
स्कान्दे ।
संनिवेद्यैव हरये तुलसीकाष्ठसम्भवाम् ।
मालां पश्चात् स्वयं धत्ते स वै भागवतोत्तम: ॥
हरये नार्पयेद्यस्तु तुलसीकाष्ठसम्भवाम् ।
मालां धत्ते स्वयं मूढ़: स याति नरकं ध्रुवम् ॥
क्षालितां पञ्चगव्येन मूलमन्त्रेण मन्त्रिताम् ।
गायत्र्या चाष्टकृत्वो वै मन्त्रितां धूपयेच्च ताम् ।
विधिवत् परया भक्त्या सद्योजातेन पूजयेत् ॥
तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये ।
बिभर्म्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ।
तथा मां कुरु देवेशि । नित्यं विष्णुजनप्रियम् ॥
दाने मा धातुरहितो लासि मां हरिवल्लभे ।
भक्तेभ्यश्च समस्तेभ्यस्तेन माला निगद्यसे ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णगलेऽर्पिताम् ।
धारयेद्वैष्णवो यो वै स गच्छेद्वैष्णवं पदम् ॥"*॥
अथ मालाधारणनित्यता ।
तत्रैव स्कान्दे कार्त्तिकप्रसङ्गे ।
"धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि ।
वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥"
गारुड़े ।
"धारयन्ति न ये मालां हैतुका: पापबुद्धय: ।
नरकान्न निवर्त्तन्ते दग्धा: कोपाग्निना हरे: ॥"
अतएव स्कान्दे तत्रैव ।
"न जह्यात्तुलसीमालां धात्रीमालां विशेषत: ।
महापातकसंहन्त्रीं धर्म्मकामार्थदायिनीम् ॥*॥
अथ मालामाहात्म्यम् ।
अगस्त्यसंहितायाम् ।
"निर्म्माल्यतुलसीमालायुक्तो यश्चार्चयेद्धरिम् ।
यद्यत् करोति तत् सर्व्वमनन्तफलदं भवेत् ॥
य: कुर्य्यात्तुलसीकाष्ठैरक्षमालास्वरूपिणीम् ।
कण्ठमालाञ्च यत्नेन कृतं तस्याक्षयं भवेत् ॥"
नारदीये ।
"ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये वा ललाटफलके लसदूर्द्ध्वपुण्ड्रा: ।
ये बाहुमूलपरिचिह्नितशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥"
किञ्च ।
"भुजयुगमपि चिह्नैरङ्कितं यस्य विष्णो:
परमपुरुषनाम्नां कीर्त्तनं यस्य वाचि ।
ऋजुतरमपि पुण्ड्रं मस्तके यस्य कण्ठे
सरसिजमणिमाला यस्य तस्यास्मि दास: ॥"
विष्णुधर्म्मोत्तरे श्रीभगवदुक्तौ ।
"तुलसीकाष्ठमालाञ्च कण्ठस्थां वहते तु य: ।
अप्यशौचोऽप्यनाचारो मामेवैति न संशय: ॥"
स्कान्दे ।
"धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ।
दृश्यते यस्य देहे तु स वै भागवतो नर: ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु य: ।
विष्णूत्तीर्णां विशेषेण स नमस्यो दिवौकसाम् ॥
तुलसीदलजा माला धात्रीफलकृतापि वा ।
ददाति पापिनां भुक्तिं किं पुनर्विष्णुसेविनाम् ॥
तत्रैव कार्त्तिकप्रसङ्गे ।
य: पुनस्तुलसीमालां कृत्वा कण्ठे जनार्द्दनम् ।
पूजयेत् पुण्यमाप्नोति प्रतिपुष्पं गवायुतम् ॥
अयुतसंख्यगोदानफलमित्यर्थ: ।
यावल्लुठति कण्ठस्था धात्रीमाला नरस्य हि ।
तावत्तस्य शरीरे तु प्रीत्या लुठति केशव: ॥
स्पृशन्ति यानि लोमानि धात्रीमाला कलौ
नृणाम् ।
तावद्वर्षसहस्राणि वसते केशवालये ॥
यावद्दिनानि वहते धात्रीमालां कलौ नर: ।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुग्मञ्च यो नित्यं धात्रीतुलसिसम्भवम् ।
वहते कण्ठदेशे च कल्पकोटिं दिवि वसेत् ॥"
तुलसिसम्भवमिति ह्रस्वश्छान्दस: । गारुड़े च
मार्कण्डेयोक्तौ ।
"तुलसीदलजां मालां कृष्णोत्तीर्णां वहेत्तु य: ।
पदे पदेऽश्वमेधानां दशानां लभते फलम् ॥*॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नर: ।
फलं यच्छति दैत्यारि: प्रत्यहं द्वारकोद्भवम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ।
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दन: ॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नर: ।
प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे ।
तुलसीकाष्ठसम्भूतां यो मालां वहते नर: ।
तुलसीकाष्ठसम्भूतं शिरसो बहुभूषणम् ।
बाह्वो: करे च मर्त्यस्य देहे तस्य सदा हरि: ।
तुलसीकाष्ठमालाभिर्भूषित: पुण्यमाचरेत् ।
पितॄणां देवतानाञ्च कृतं कोटिगुणं कलौ ॥
तुलसीकाष्ठमालान्तु प्रेतराजस्य दूतका: ।
दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथादलम् ॥
तुलसीकाष्ठमालाभिर्भूषितो भ्रमते यदि ।
दु:स्वप्नं दुर्निमित्तञ्च न भयं शत्रुजं क्वचित् ॥"
गौतमीये पुरश्चरणप्रसङ्गे ।
"तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितै: ।
इत्यादि ॥*॥ तत्रैव ।
पुण्डरीकभवा माला गोपालमनुसिद्धिदा ।
आमलकीभवा माला सर्व्वसिद्धिप्रदा मता ।
तुलसीसम्भवा या तु मोक्षं वितनुतेऽचिरात् ॥
इति हरिभक्तिविलास: ॥*॥*॥
अथ रुद्राक्षमालाधारणफलादि ।
लिङ्गपुराणे ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रद: ॥
संवाममप्रदीपे ।
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥
यद्यप्येकादिचतुर्द्दशमुखरुद्राक्षेषु मन्त्रफल-
विशेषा: सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य
फलमत्राभिधीयते । यथा, स्कान्दे ।
"पञ्चवक्त्र: स्वयं रुद्र: कालाग्निर्नाम नामत: ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्य: पञ्चवक्त्रस्य धारणात् ॥"
इति तिथ्यादितत्त्वम् ॥
मालाकण्टः, पुं, (मालाकारा: कण्टा: कण्टका
अस्य ।) अपामार्ग: । इति राजनिर्घण्ट: ॥
मालाकन्द:, पु, (माला गण्डमाला नाशक: कन्द: ।
शाकपार्थिववत् मध्यपदलोपी ।) मूलविशेष: ।
तत्पर्य्याय: । आलिकन्द: २ त्रिशिखिदला ३
ग्रन्थिदला ४ पादिकन्द: ५ कन्दलता ६ । अस्य
गुणा: । सुतीक्ष्णत्वम् । गण्डमालानाशित्वम् ।
दीपनत्वम् । गुल्मकारित्वम् । वातश्लेष्मापकर्ष-
कारित्व । इति राजनिर्घण्ट: ॥
मालाका, स्त्री, (माला एव । माला + स्वार्थे कन्
टाप् ।) माला । इति शब्दरत्नावली ॥
मालाकार , पु, (मालां करोतीति । कृ + अण् ।)
वर्णसङ्करजातिविशेष: । मालिक: । माली
इति ख्यात: । तत्पर्य्याय: । मालिक: २ । इत्य-
मर: । २ । १० । ५ । मालाकर: ३ पुष्पा-
जीवी ४ तनाकीक: ५ पुष्पलाव: ६ । इति जटा-
धर: ॥ पुष्पलावक: ७ । इति शब्दरत्नावली ॥
स तु शूद्रायां विश्वकर्म्मणो जात: । इति ब्रह्म-
वैवर्त्तपुराणम् ॥ अपि च ।
"तैलिकात् कर्म्मकाराच्च मालाकारस्य सम्भव: ॥
इति पराशरपद्धति: ॥
तद्गृहस्थितपुष्पस्य पर्य्युषितदोषाभावो यथा,
"न पर्य्युषितदोषोऽस्ति तुलसीबिल्वचम्पके ।
जलजे बकुलेऽगस्त्ये मालाकारगृहेषु च ॥"
इति मेरुतन्त्रे ५ प्रकाश: ॥
। यथा, बृहत्संहितायाम् । १० । ६ ।
"हन्त नापितचाक्रिक-
चौरभिषक्शाक्रिकधौराहा: ।

बन्धक: कौशलका मालाकाराश्च पौरुषे॥"
स्त्रियां ङीप्। यथा तत्रैव। ७८। ६।
"भिक्षुणिका प्रव्रजिता दासी धात्री कुमारिका रजिका।
मालाकारी दुष्टाङ्गना सखी नापिनी दूत्य:।")
मालाग्रन्थि:, पुं, (मालेव ग्रन्थिरस्य।) मालादूर्वा। इति राजनिर्घण्ट:॥
मालातृणं, क्ली, (मालाकारं तृणम्।) भूतृणम्। इति राजनिर्घण्ट:॥
मालातृणकं, क्ली (मालातृण। स्वार्थे कन्।) भूस्तृणम्। इत्यमर:।२।४।१६७॥ हे गन्धखड इति ख्याते। मालारूपं तृणं मालातृणं स्वार्थे क:। भुवस्तृणं भूतृणत्वात भूस्तृणं मनीषादित्वात सागम:। मालातृणकभूस्तृणे। इति क्लीवे। इति सुभूत्यादय:॥ मालातृणकभूस्तृणाविति पुंसि पठन्ति केचित॥ स्वामी तु। छत्रातिच्छत्रादिभूस्तृणान्तं पर्य्यायमाह यथा,—
"भूस्तृणो रौहिषो भूतिर्भूमिकोऽथ कुटुम्बक:।
मालातृणश्च पालघ्नश्छत्रातिच्छत्रकस्तथेति॥"
नामकर्पूरं बहुपत्रकाख्यं कर्पूरसुगन्धि।
इदन्तु शतपुष्पिकावदुत्कटगन्धं भूतृणञ्च भवतीत्यनयोर्भेद:। इति तट्टीकायां भरत:॥ (तथास्य पर्य्याय:।
"गुह्यबीजन्तु भूतीकं सुगन्धं जम्बुकप्रियम्।
भूतृणन्तु भवेच्छत्रं मालातृणकमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मालादूर्व्वा, स्त्री, (माला इव ग्रन्थियुक्ता दूर्वा।) दूर्वाविशेष:। गाटिया दूर्व्वा इति भाषा। तत्पर्य्याय:। वल्लिदूर्व्वा २ अलिदूर्व्वा ३ मालाग्रन्थि: ४ ग्रन्थिला ५ ग्रन्थिदूर्व्वा ६ मूलग्रन्थि: ७ वल्लरी ८ ग्रन्थिमला ९ रोहत्पर्व्वा १० पर्व्ववल्ली ११ शिवाह्वा १२। अस्या गुणा:। सुमधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। पित्तदोषप्रशमनत्वम्। कफवाभिलषापहत्वञ्च। इति राजनिर्घण्ट:॥
मालारिष्टा, स्त्री, पाठा। इति राजनिर्घण्ट:॥
मालालिका, स्त्री, (मालां अलतीति। अल + ण्वुल टाप अत इत्वञ्च।) पृक्का। इति राजनिर्घण्ट:॥
मालाली, स्त्री, (मालामलति। अल + अच्। ङीप्।) पृक्का। इति राजनिर्घण्ट:॥
मालि:, पु, सुकेशराक्षसपुत्त्र:। यथा,—
"ग्रामणीर्नाम गन्धर्व्वो विश्वावसुसमप्रभ:।
तस्य देववती नाम द्वितीया श्रीरिवात्मजा॥
त्रिषु लोकेषु विख्याता रूपयौवनशालिना।
तां सुकेशाय धर्म्मात्मा ददौ रक्ष:श्रियं यथा॥
वरदानकृतैश्वर्य्यं सा तं प्राप्य पतिं प्रियम्।
आसीद्देववती तुष्टा धनं प्राप्येव निर्द्धन:॥
स तया सह संयुक्तो रराज रजनीचर:।
तत: काले सुकेशस्तु जनयामास राघव।॥
त्रीन् पुत्त्रान् जनयामास त्रेताग्निसमविग्रहान्।
माल्यवन्तं सुमालिञ्च मालिञ्च बलिनांवरम्॥"
इति रामायणे उत्तरकाण्डे ५ सर्ग:॥
मालिक:, पु, (मालास्य पण्यम्। माला + "तदस्य पण्यम्।" ४। ४। ५१। इति ठक्। यद्वा, मालाग्रथनं शिल्पमस्येति। "शिल्पम्।" ४। ४। ५५। इति ठक्।) मालाकार:। इत्यमर:।२।१०।५॥ (यथा, राजतरङ्गिण्याम्।६।१९।
"निदाघे पुष्पताम्बूलीपर्णादृयत्रातिशीतले।
न्यस्यद्भिर्मालिकैर्दत्तान् सा जीवेद्वाटकादिति॥")
पक्षिभेद:। इति मेदिनी। के, १३९॥ रञ्जक:। इति शब्दरत्नावली॥
मालिका, स्त्री, (मालेव। माला + कन् टाप् अत इत्वञ्च।) सप्तला। पुत्त्री। ग्रीवालङ्करणम्। पुष्पमाल्यम्। नदीविशेष:। इति मेदिनी। के, १३९॥ सुरा। इति हारावली॥ क्षुमा। इति शब्दचन्द्रिका॥
मालिनी, स्त्री, (माला सुकमालास्त्यस्या: अस्यां वा। माला + "व्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनि: ङीप्।) मालकाभेद:। वृत्तभेद:। (मालिन् + ङीष्।) मालिकपत्नी॥ गौरी। चम्पानगरी। (यथा, महाभारते।१२। ५। ६—७।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ।
अङ्गेषु नरशार्द्दूल। स राजासीत् सपत्नजित्॥
पालयामास चम्पाञ्च कर्ण: परबलार्द्दन:॥")
मन्दाकिनी। नदीभेद:। इति मेदिनी॥ (यथा, महाभारते। १। ७२। ८।
"जनयामास मुनिर्मेनकायां शकुन्तलाम्।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम्।")
अग्निशिखावृक्ष:। दुरालभा। इति शब्दचन्द्रिका॥ स च वृत्तभेद: पञ्चदशाक्षरपादच्छन्द:। यथा,—
"न न म य य युतेयं मालिनी भोगिलोकै:।
व्रजगमदकृतचर्च्चा पीतकौशेयवासा
रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा।
अनृजुनिहितमंसे वंशमुत्क्वाणयन्ती
धृतमधुरिपुलीला मालिनी पातु राधा॥"
इति छन्दोमञ्जरी॥
अप्सरोविशेष:। यथा, कथासरित्सागरे। ४५। ३५२।
"पिङ्गला च गणाख्याता दशमी केशरावली।
एकादशी मालिनीति नाम्ना कम्बलनन्दिनी॥
स्कन्दमातृणामन्यतमा। सैव शिशुमातृणामन्यतमा। यथात्रैव। ३। २२७। १०।
"काकी च हलिमा चैव मालिनी बृंहिला तथा।
आर्य्या पलाला वैमित्रा सप्तैता: शिशुमातर:॥"
मालाग्रथनं शिल्पमस्या:। इनि:। ङीप्। द्रौपद्या नामान्तरम्। यथा, महाभारते। ४। ८। २१।
"मालिनीत्येव मे नाम स्वयं देवि चकार सा।
साहमभ्यागता देवि! सुदेष्णे! त्वन्निवेशनम्॥"
राक्षसीभेद:। सा च विभीषणस्य माता। यथा, महाभारते। ३। २७४। ३—८।
"स राजराजो लङ्कायां निवसन्नरवाहन:।
राक्षसी: प्रददौ तिस्र: पितुर्वै परिचारिका:॥
ता: सदा तं महात्मानं सन्तोषयितुमुद्यता:।
ऋषिं भरतशार्द्दूल! नृत्यगीतविशारदा:॥
पुष्पोत्कटा च राका च मालिनी च विशाम्पते।।
अन्योन्यस्पर्द्धया राजन्। श्रेयस्कामा सुमध्यमा:॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्त्रानेकैकस्या यथेप्सितान्॥
पुष्पोत्कटाया जज्ञाते द्वौ पुत्त्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि॥
मालिनी जनयामास पुत्त्रमेकं विभीषणम्।
राकायां मिथुनं यज्ञे खर: शूर्पणखा तथा॥"
रौच्यमनुमाता। यथा, मार्कण्डेये।९८।५—७।
"तथेति तेन साप्युक्ता तस्मात्तोयाद्दपुष्पतीम्।
उज्जहार तत: कन्यां मालिनीं नाम नामत:॥
नद्याश्च पुलिने तस्मिन् स रुचिर्मुनिसत्तम:।
जग्राह पाणिं विधिवत् समानाय्य महामुनीन्॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामति:।
रौच्योऽभवत् पितुर्नाम्ना ख्यातोऽत्र वसुधातले॥"
श्वेतकर्णस्य पत्नी। यथा, हरिवंशे।१८५।७।
"तस्माद्वनगतादगर्भं यादवी प्रत्यपद्यत।
सुचारोर्द्दुहिता सुभ्रूर्मालिनी भ्रातृमालिनी॥")
मालिन्यं, क्ली, (मलिन + "गुणवचनब्राह्मणादिभ्य: कर्म्मणि च।" इति। "वर्णदृढादिभ्य: ष्यञ्च" ४।२।८०। इति संकाशादित्वात ण्यप्रत्यय:।) मलिनत्वम्। मलिनस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, राजतरङ्गिण्याम्। १। १७८।
"भोगयोगेन मालिन्यं नेतुं मध्यगतोऽपि स:।
न शक्यते स्म पङ्केन प्रतिमेन्दुरिवामल:॥")
माली, [न्] पुं, (माला पण्यत्वेनास्त्यस्य। माला + "व्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनि:।) मालाकार:। इति मालिनीशब्ददर्शनात॥ सुकेशराक्षसपुत्त्र:। यथा,—
"सुकेशपुत्त्रैर्भगवन्। पितामहवराहतै:।
अहं विष्णुरहं रुद्रो ब्रह्माहं देवराडहम्॥
अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम्।
इति माली सुमाली च माल्यवांश्चैव राक्षस:।
बाधन्ते समरोद्धर्षा ये च तेषां पुर:सरा:॥"
इति रामायणे उत्तरकाण्डे ६ सर्ग:॥
(अस्थिमाला अस्त्यस्येतीनि:। महादेव:। यथा, महाभारते। १३। १७। ६०।
"व्यालरूपो गुहावासी गुहो माली तरङ्गवित्।"
माला अस्त्यस्येतीनि:। मालायुक्ते, त्रि। यथा, रामायणे। २। ५६। ६।
"आदीप्तानिव वैदेहि। सर्व्वत: पुष्पितान्नगान्।
स्वै: पुष्पै: किंशुकान् पश्य मालिन: शिशिरात्यये॥")
मालु:, पुं, (मृ + "त्रो रश्च ल:।" १। ५। इत्यत्र बाहुलकात् णुण्। इत्युज्ज्वलदत्तोक्त्या णुण्।) पत्रलता। नारी। इति मेदिनी। वे, ४५॥

मालुधान:, पुं, (मालु मरणं विदधातीति । धा + ल्यु: ।) मातुलाहि: । इत्यमर: । १ । ८ । ६ । मालुया साप इति भाषा ॥ अष्टनागान्तर्गत-नागविशेष: । यथा,—
"मालुधानश्चिश्रवर्ण महापद्मोऽपि दृश्यते ।"
इति हारावली ॥

मालुधानी, स्त्री, लताभेद: । इति मेदिनी । ने, २०३ ॥

मालक:, पुं, लघ्वाणक: । इति राजनिर्घण्ट: ॥

मालूर:, पुं, (मां परेषां वृक्षान्तराणां श्रियं प्रभाव लुनातीति । लूञ् + बाहुलकात् र: ।) बिल्ववृक्ष: । इत्यमर: । २ । ४ । ३२ ॥ (यथा, नैषधे । १ । ६४ ।
"स वारनारीकुचसञ्चितोपमं
ददर्श मालूरफलं पचेलिमम् ।")
कपित्थवृक्ष: । इति राजनिर्घण्ट: ॥ (बिल्व-वृक्षार्थे पर्यायो यथा,—
बिल्वो महाकपित्थाख्य: श्रीफलो गोहरीतकी ।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"बिल्व: शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च ॥)

मालेया, स्त्री, (मल + ढक् टाप् ।) स्थूलैला । इति रत्नमाला ॥ (स्थूलैलाशब्देऽस्या विशेषो ज्ञेय: ॥)

माल्यं, क्ली, (मालेव । माला + चतुर्व्वर्णादित्वात् ष्यञ् ।) पुष्पम् । पुष्पस्रक् । इति मेदिनी । ये, ४५ ॥ पुष्पार्थकमाल्यशब्दस्य प्रयोगो यथा,
"यथा चाल्पेन माल्येन वासितं तिलसर्षपम् ।
न मुञ्चति स्वकं गन्धं तद्वत् सूक्ष्मस्य दर्शनम् ॥"
इति महाभारते मोक्षधर्म्मे १०५ अध्याय: ॥
मूर्द्धि न्यस्तपुष्पदाम । इत्यमर: । २ । ६ । १३५ ॥
अस्य पर्य्यायादिर्मालाशब्दे द्रष्टव्य: ॥ * ॥
(पुष्पस्रगर्थे गुणा यथा,—
"वृष्यं सौगन्ध्यमायुष्यं काम्यं पुष्टिबलप्रदम् ।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिषेवणम् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥)
माल्यदानफलं यथा,—
"गन्धमाल्यैरलङ्कारैस्तुष्टा हृष्टाश्च नित्यश: ।
गन्धमाल्यप्रदा ये तु दाननिश्चयतत्परा: ॥
धर्म्मज्ञा: सत्यशीलाश्च सर्व्वदु:खविवर्ज्जिता: ।
सुचिरं दैवतै: सार्द्धं क्रीडन्ति हि महासुने ।॥"
इति वह्निपुराणम् ॥
अपि च । नारसिंहे ।
"जातीपुष्पसहस्रेण यश्चैकमालां सुशोभनाम् ।
वैष्णवो विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रम: ॥
जातीपुष्पकृतां मालां कर्पूरपटवासिताम् ।
निवेद्य देवदेवाय यत्फलं प्राप्नुयान्नर: ।
न तद्वर्णयितुं शक्यमपि वर्षशतैरपि ॥
स्कान्दे ।
मालतीकलिकामालामीषद्विकसितां हरे: ।
दत्वा शिरसि विप्रेन्द्र । वाजिमेधफलं लभेत् ॥
तत्रैव ।
मालतीमालया विप्र: पूजितो येन कार्त्तिके ।
पापापनरक्षतां मालां पटात् सौरि: प्रमार्ज्जति ॥
सौरिर्यम: । विष्णुरहस्ये ।
स्वर्णलक्षाधिकं पुष्पं माला कोटिगुणाधिका ॥
इति श्रीहरिभक्तिविलासे ७ विलास: ॥ * ॥
मालागलस्य बहिर्गमननिषेधो यथा,—
"बहिर्माल्यं बहिर्गन्धं भार्य्यया सह भोजनम् ।
विगृह्य वादं कृत्वा वा प्रवेशञ्च विवर्ज्जयेत् ॥"
इति कूर्म्मपुराणे उपविभागे १५ अध्याय: ॥ * ॥
स्वयं माल्यापकर्षणनिषेधो यथा,—
"नाश्नीयात् सन्धिवेलायां न गच्छेन्नापि संवि-
शेत् ।
न चैव प्रलिखेद्भूमिं नात्मनोपहरेत् स्रजम् ॥"
इति मानवे ४ अध्याय: ॥
न च मालां धृतां स्वयमेवापनयेत् । अर्था-दन्येनापनयेदित्युक्तम् । इति कुल्लूकभट्ट: ॥ * ॥
केशवाह्ये माल्यधारणनिषेधो यथा,—
"नहि गर्ह्यकथां कुर्य्यात् बहिर्माल्यं न धार-
येत् ।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥"
इति च मानवे ४ अध्याय: ॥
केशकलापाद्बहिर्माल्यं न धारयेदिति कुल्लूक-भट्ट: ॥ * ॥ स्वयं माल्यधारणनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्टञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥
इति कर्म्मलोचनम् ॥ * ॥
माल्यचन्दनदानविधिर्यथा,—
"आमन्त्रयित्वा यो विप्रान् गन्धमाल्यैश्च मानव: ।
तर्पयेच्छ्रद्धया युक्त: स मामर्च्चयते सदा ॥"
इति वह्निपुराणम् ॥

माल्यपुष्प:, पुं, (माल्याकाराणि पुष्पाण्यस्य ।) शणवृक्ष: । इति राजनिर्घण्ट: ॥

माल्यपुष्पिका, स्त्री, (माल्यपुष्प + कन् टाप् । अत इत्वञ्च ।) शणपुष्पी । इति राजनिर्घण्ट: ॥ (गुणादयोऽस्या: शणपुष्पीशब्दे ज्ञेया: ॥)

माल्यवान्, [त्] पुं, (माल्य + मतुप् । मस्य व: ।) पर्व्वतविशेष: । इत्यमर: । २ । ३ । ३ ।
माल्यं मालाकारता विद्यतेऽत्र माल्यवान् वतु ।
इति तट्टीकायां भरत: ॥ स च केतुमालेलावृत-वर्षयो: सीमापर्व्वत: । नीलनिषधपर्व्वतपर्य्यन्त-विस्तार: । इति सिद्धान्तशिरोमणि: ॥ (यथा, महाभारते । ३ । १५८ । ३५ ।
"उपतस्थुर्महाभागा माल्यवन्तं महागिरिम् ।")
राक्षसविशेष: । स च सुकेशराक्षसात् ग्रामणी-नामकगन्धर्व्वस्य कन्यायां देववत्यां जात: । अस्य भ्राता सुमाली तस्य कन्यायां निकषायां पुलस्त्य-पुत्त्रविश्रवसो रावणो जात: । इति रामायणे उत्तरकाण्डे ५ सर्ग: ॥ (मालाविशिष्टे, त्रि । यथा, महाभारते । १ । १७१ । ३१ ।
"शिरोवहेषु जग्राह माल्यवत्सु धनञ्जय: ।"
स्त्रियां ङीप् । नदीभेद: । यथा, रामायणे २ । ५६ । ३५ ।
"सुरम्यमासाद्य तु चित्रकूटं
नदीञ्च तां माल्यवतीं सुतीर्थाम् ।
ननन्द हृष्टो मृगपक्षिजुष्टां
जहौ च दु:खं पुरविप्रवासात् ॥")

माल्ल:, पुं, (मल्ल + चातुरर्थिकत्वात् अण् ।) वर्ण-सङ्करजातिविशेष: । स च लेटात्तीवरकन्यायां जात: । इति ब्रह्मवैवर्त्तपुराणम् ॥

माल्लवी, स्त्री, (मल्ल + स्वार्थेऽण् । तस्य वी गमनं यत्र ।) मल्लयात्रा । इति हारावली ॥

माशब्दिक:, त्रि, (मा इत्याहेति । माशब्द + "प्राग्वहतेष्ठक् ।" ४ । ४ । १ । इत्यत्र । "तदाहेति माशब्दादिभ्य उपसंख्यानम् ।" इति वार्त्तिकात् ठक् ।) निषेधकर्त्ता । तत्-पर्य्याय: । प्रतिषेद्धा २ । इति त्रिकाण्ड-शेष: ॥

माष:, पु (माषस्य फलम् । माष + अण् । "लुप् च ।" ४ । ३ । १६६ । इत्यस्य "फलपाकशुषा-मुपसंख्यानम् ।" इति काशिकोक्तेरणो लुप् । यद्वा, मस + घञ् पृषोदरादित्वात् साधु: ।) व्रीहिभेद: । माषकलाइ इति उरिद् इति च भाषा । तत्पर्य्याय: । कुरुविन्द: २ धान्य-वीर: ३ वृषाकर: ४ मांसल: ५ बलाढ्य: ६ पित्र्य: ७ पितृभोजन: ८ । अस्य गुणा: । स्निग्धत्वम् । बहुमलकरत्वम् । शोषणत्वम् । शैत्यकारित्वम् । अनुष्णवीर्य्यत्वम् । झटिति-रक्तपित्तप्रकोपणत्वम् । वातहरत्वम् । गुरु-त्वम् । बलकरत्वम् । रोचकत्वम् । स्वादुत्वम् । श्रमसुखवतां नराणां नित्यं सेवनीयत्वम् । इति राजनिर्घण्ट: ॥ अपि च ।
"माषो गुरु: स्वादुपाक: स्निग्धो रुच्योऽनिला-
पह: ।
उष्ण: सन्तर्पणो बल्य: शुक्रलो बृंहण: पर: ॥
भिन्नमूत्रमलस्तन्यमेदपित्तकफप्रद: ।
गुदकीलार्द्दितश्वासपंक्तिशूलानि नाशयेत् ॥"
इति ।
कफपित्तकरा माषा: । इति च भावप्रकाश: ॥
अन्यच्च ।
"माषो बहुमलो वृष्य: स्निग्धोष्णो मधुरो
गुरु: ।
वातघ्नस्त्रंसनो रुच्यो बल्यो मेदोमांसकफप्रद: ॥"
इति राजवल्लभ: ॥
माषसूपेन मूलकभक्षणं निषिद्धं यथा,—
"मूलकं माषसूपेन मधुना च न भक्षयेत् ॥"
इति च राजवल्लभ: ॥
चतुर्द्दश्यां रविवारे च माषभक्षणनिषेधो यथा,
चिररोगी च माषके । इति ।
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद्यो रवेर्वारे सप्तजन्मन्यपुत्त्रक: ॥"
इति च तिथ्यादितत्त्वम् ॥ * ॥
परिमाणविशेष: । माषा इति भाषा । तत्-

पर्य्यायः। माषकः २ मासः ३। इत्यमरभरतौ॥ हेमः ४ धानकः ५। स च मागधमाने सुश्रुतमते ५ गुञ्जापरिमाणम्। चरकमते ६।८ गुञ्जापरिमाणम्। कालिङ्गमाने सुश्रुतमते ५।७।८ गुञ्जापरिमाणम्। इति भावप्रकाशः॥ वैद्यकान्तरे १० गुञ्जापरिमाणम्। यथा,—

"गुञ्जाभिर्दशभिर्माषः शाणो माषचतुष्टयम्।"

इति वैद्यकपरिभाषा॥

(माषार्थे यथा,—

"द्वात्रिंशन्माषकैर्माषैश्चरकस्य तु तैः पलम्।

चरकार्द्धपलोन्मानं चरके दशरक्तिकैः।

माषैः पलं चतुःषष्ट्या यद्गृहीतन्तथेरितम्॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।)

ज्योतिस्तत्त्वमते १० गुञ्जापरिमाणम्। यथा,

"पलं तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम्।

तोलकाचितयं ज्ञेयं ज्योतिज्ञैः स्मृतिसम्मतम्॥"

इति तिथ्यादितत्त्वधृतवचनेन पलं अष्टरक्तिकाधिकमाषद्वयाधिकतोलकत्रयम्। एतेन माषकपरिमाणं द्वादशरक्तिकं भवति॥ *॥ मूर्खः। त्वग्दोषभेदः। इति मेदिनी षे, २१॥

माषकः, पुं, (माषप्रकारः। माष+"स्थूलादिभ्यः प्रकारवचने कन्।" ५।४।३। इति कन्।) मासकः। पञ्चरक्तिकपरिमाणम्। यथा। गुञ्जाः पञ्चाद्यमाषकः। इत्यमरः॥

"दशार्द्धगुञ्जं प्रवदन्ति माषं

माषाह्वयैः षोडशभिश्च कर्षम्॥"

इति लीलावती च॥

"षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधानकौ।

माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्॥"

इति भावप्रकाशः॥

(व्रीहिविशेषः। तदर्थे विषयो यथा,—

"द्वात्रिंशन्माषकैर्माषः।"

परिमाणार्थे यथा,—

"————————सुश्रुतस्य तु माषकः।

द्वादशभिर्धान्यमाषैश्चतुःषष्ट्या तु तैः पलम्॥"

इत्युभे वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

माषकलायः, पु, (माषसंज्ञः कलायः शाकपार्थिववत् समासः।) स्वनामख्यातशस्यम्। यथा। कलायशब्दो विशेषे सामान्ये च अत एव माषकलाय इत्यादि प्रयोगः। इत्यमरटीकायां भरतः॥

माषपर्णी, स्त्री, (माषस्य पर्णमिव पर्णं यस्याः। ततो ङीष्।) वनमाषः। माषाणी इति भाषा। तत्पर्य्यायः। हयपुच्छी २ काम्बोजी ३ महासहा ४। इत्यमरः। २।४।१३८॥ सिंहपुच्छी ५ ऋषिप्रोक्ता ६ कृष्णवृन्ता ७ पाण्डुलोमशपर्णिनी ८। इति रत्नमाला॥ आर्द्रमाषा ९ मांसमाषा १० मङ्गल्या ११ हयपुच्छिका १२ हंसमाषा १३ अश्वपुच्छा १४ पाण्डुरा १५ माषपर्णिका १६ कृष्णाणी १७ वज्रभर्त्री १८ शालिपर्णी १९ विसारिणी २० आत्मोद्भवा २१ बहुफला २२ स्वयम्भूः २३ सुलभा २४ घना २५ सिंहविन्ना २६ विशाखिका २७। अस्या गुणाः। तिक्तरसत्वम्। वृष्यत्वम्। दाहज्वरापहत्वम्। शुक्रवृद्धिकारित्वम्। बल्यत्वम्। शीतलत्वम्। पुष्टिवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ अपि च भावप्रकाशे।

"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।

पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा॥

माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलाशकृत्।

मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित्॥"

माषभक्तबलि., पुं, (माषश्च भक्तञ्च तद्युक्तो बलिः।) माषतण्डुलदधिमिश्रितपूजोपहारविशेषः। अत्र केचित् हरिद्राघृतमध्वपि मिश्रयन्ति। यथा। एष माषभक्तबलिः।

"ॐ जय त्वं कालि। सर्व्वेशि सर्व्वभूतसमावृते।

रक्ष मां निजभूतेभ्यो बलिं गृह्ण शिवप्रिये।॥"

ॐ काल्यै नमः। प्रार्थनामन्त्रो यथा,—

"ॐमातर्मातर्व्वरे दुर्गे सर्व्वकामार्थसाधिनि।।

अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे॥"

इति कृत्यतत्त्वम्॥

भूतेभ्योऽप्ययं बलिर्देयः॥

माषवर्द्धकः पुं, (माषं वर्द्धयतीति। वृध+णिच् ण्वुल्।) स्वर्णकारः। इति शब्दमाला॥

माषशः, [स्] व्य, प्रतिमाषम्। माषं माषं ददाति इत्यर्थे शस्प्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥

माषादः, पु, (माषमत्तीति। अद+अण्।) कच्छपः। इति शब्दरत्नावली॥ माषभक्षके, त्रि॥

माषीणं, माष्यं, } क्ली, (माषाणां भवनं क्षेत्रम्। माष+"विभाषा तिलमाषोमाभङ्गाणुभ्यः।" ५।२।४। इति यत् पक्षे खञ्।) माषक्षेत्रम्। यथा,—

"तिल्यतैलीनवन्माषोमाणुभङ्गाद्विरूपता।"

इत्यमरः॥

यथा तिलस्य क्षेत्रं तिल्यं तैलीनञ्च भवति तथा माषादीनामपि द्विरूपता द्वैरूप्यं भवति। इति तट्टीकायां भरतः॥

मास्, पु, (माङ+माने "सर्व्वधातुभ्योऽसुन्।" ४।१८८। इत्यसुन्।) चन्द्रः। (यथा, ऋग्वेदे। १०।१२।७।

"सूर्य्ये ज्योतिरदधुर्मास्यक्तून्

परिद्योतनिं चरतो अजस्रा॥"

"मासि चन्द्रमसि।" इति तद्भाष्ये सायणः॥

मीयतेऽनेनेति। मा+"चन्द्रे मो डित्।"उणा० ४।२२७। इत्यत्र "बाहुलकात् केवलादपि मोऽसिः।" इत्युज्ज्वलदत्तोक्तेरसिः।) मासः। इति मेदिनी। से, ७॥ अस्य प्रथमैकवचनान्तरूपं माः॥ (यथा, मनौ। २।३४।

"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्

षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले॥"

मांसे, क्ली। यथा, ऋग्वेदे। ५।७६।८।

"श्रीयच्छता महिषाणामघो

मास्त्रीसरांसि मघवा सोम्यापाः।"

"माः मांसानि।" इति तद्भाष्ये सायणः॥)

मासः., पुं, (मस् परिमाणे+भावे घञ्।) माषपरिमाणम्। इत्यमरटीकायां भरतः। माष इति भाषा॥ (मस्यते परिमीयते असावनेनवेति मस्+घञ्।) शुक्लकृष्णपक्षद्वयात्मकः कालः। स च पौषमाघादिद्वादशसंज्ञकः। इत्यमरः। १।४।१२॥ माश्चन्द्रस्तस्यायं मासः। अण्। चान्द्रमासस्येयं व्युत्पत्तिः। सौरादिषु तु मस्यते परिमीयतेऽनेनासौ वा मासः। मसियं ई परिमाणे घञ्। माः सान्तोऽपि। मास्तु मासोऽपि दृश्यते। इति वृत्तुः। इति भरतः॥*॥ स्मृतिमतेऽपि पौषादिद्वादशसंज्ञकः। यथा,—

"चक्रवत् परिवर्त्तेत सूर्य्यः कालवशाद्यतः।

अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम्॥

मासचिह्नन्तु कर्त्तव्यं पौषमाघादमेव हि।

यतस्तत्र विधानेन स मासः परिकीर्त्तितः॥"

इति लघुहारीतः॥

कार्त्तिकादिद्वादशसंज्ञकोऽपि। यथा,—

"अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः।

शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया॥"

स च चैत्रादिद्वादशसंज्ञकश्च। यथा यत्तं ब्रह्मपुराणम्।

"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि।

शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति॥

प्रवर्त्तयामास तदा कालस्य गणनामपि।

ग्रहान्नागानृतून् मासान् वत्सरान् वत्सराधिपान्।

इत्यनेन मासस्संवत्सरायां चान्द्रत्वमुक्तम्।

ब्रह्मसिद्धान्तेऽपि।

"चैत्रसितादेरुदयाद्भानोर्दिनमासयुगकल्पाः।

सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनेऽर्कस्य॥"

चैत्रसितादेश्चैत्रशुक्लप्रतिपदस्तामारभ्येत्यर्थः॥

अपि च।

"मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे।

भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः॥"

चान्द्रसावनसौरनाक्षत्रभेदेन स च चतुर्व्विधः। शुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। तत्र चान्द्रोऽपि द्विविधः। शुक्लप्रतिपदादिदर्शान्तो मुख्यः। कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः। यत्किञ्चित्त्रिंशत्तिथ्यात्मकश्चेति द्विविधो गौणः। त्रिंशदहोरात्रात्मकः सावनः। आदित्यैकराशिभोगावच्छिन्नः सौरः। सप्तविंशतिनक्षत्रावच्छिन्नत्रिंशन्नाक्षत्रदिनात्मकश्च नाक्षत्रः। तथा च ब्रह्मसिद्धान्ते।

"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।

एकराशौ रविर्यावत् कालं मासः स भास्करः॥

सर्व्वर्त्तुपरिवर्त्तैस्तु सावन इति चोच्यते ॥”

सूर्य्यसिद्धान्ते ।

“नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते ।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते ॥”

तत्त्रिंशता नाक्षत्रदिनत्रिंशता मासो नाक्षत्रमासः । तथा त्रिंशता ॥ * ॥ स्मार्त्तमूलपाणिमते मुख्यचान्द्र एव मासपदशक्य । जीमूतवाहनमते सौर एव शक्य. । चान्द्रप्रमाणं प्रागुक्तम् । सौरप्रमाणन्तु । सौराश्च माघाद्यो द्वादश एव मीनाः । तथा च श्रुतिः । तप स्तपस्यौ शैशिरावृतुः । मधुश्च माधवश्च वासन्तिकावृतुः । शुक्रश्च शुचिश्च ग्रैष्मावृतु. । अथैतदुदगयनं देवानां दिनम् । नभाश्च नभस्यश्च वार्षिकावृतुः । इषश्च ऊर्ज्जश्च शारदावृतुः । सहाश्च सहस्यश्च हैमन्तिकावृतुः । अथैतद्दक्षिणायनं देवानां रात्रिरिति । अत्रायनस्य सौरत्वेन तद्घटकतपस्तपस्यादीनामपि सौर परतेति । अतो भूयसामनुरोधेन वैशाखादय. सौरचान्द्रोऽवधार्य्यन्ते । इति मलमासतत्त्वम् ॥

अपि च ।

“मेषस्थिते रवेर्मासो वैशाखोऽब्दमुखः स्मृतः ।”

इति सङ्कल्पकौमुदी ॥

अथ कर्म्मविशेषे मासविशेषादिः । तत्र पितामहः ।

“आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥”

प्रथमादिपदं यात्रागृहचारपरम् । यत् कर्म्म सूर्य्यभोग्यराश्युल्लेखेन यच्च शिशिरोदगयनादिविहितं तत्परञ्च अयनस्य सौरमासघटितत्वात् । तच्च चूडोपनयनादि । द्वि..यादिपदं सत्रभृतिवृद्धिप्रायश्चित्तायुर्दायाशौचगर्भाधानपुंसवनसीमन्तोन्नयननामकरणान्नप्राशननिष्क्रमणचूडादिपरम् । तथा च विष्णुधर्म्मोत्तरे ।

“अध्यायनञ्च व्यवहारकर्म्म
सौरेण मासेन सदाध्यवस्येत् ।
सत्राण्युपास्यान्यथ सावनेन
लौक्यञ्च यत् स्याद्व्यवहारकर्म्म ॥”

अध्यायनं अध्यगमनं यात्रेति यावत् ॥ * ॥

अथ सौरादिमासविहितकर्म्माणि ।

“विवाहोत्सवयज्ञेषु सौरं मासं प्रशस्यते ।
पार्व्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिकं ॥”

अत्र यज्ञपदमुदगयनादिविहितपरग्यगाभिप्रायं पितामहोक्तन्तु विष्णुधर्म्मोत्तरोक्तसत्रपरम् । गर्गः ।

“आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा ।
सावनेन तु कर्त्तव्या मन्त्राणामुपासना ॥”

सूर्य्यसिद्धान्ते ।

“सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता ॥”

मध्यमग्रहभुक्तिर्ज्योतिर्गणना प्रसिद्धा ॥ * ॥ नाक्षत्रमासप्रयोजनं विष्णुधर्म्मोत्तरे ।

“नक्षत्रसत्राण्ययनानि चन्द्रो-
र्म्मासेन कुर्य्याद्गगणाश्च तेन ।”

नक्षत्रसत्राणि मासमाध्ययाशेषनक्षत्ररूपाणि याज्ञिकप्रसिद्धानि । इन्दोरयनानि सोमायनाख्यसत्राणि । इति समयप्रकाश. ॥ एव जन्मनक्षत्रे शनिभौमवारे फलं नाक्षत्रमासेन योग्यत्वात् । यथा, मलमासतत्त्वे ।

“जन्मर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ ।
स मासः कल्मषो नाम मनोद्वेगप्रदायकः ॥”

मलनामविवरणं मलमासशब्दे द्रष्टव्यम् ॥ * ॥

अथ मासकृत्यम् ।

“आषाढशुक्लैकादश्यां कुर्य्यात् स्वापं महोत्सवम् ।
आषाढे च रथं कुर्य्यात श्रावणे श्रवणाविधिम् ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् ।
प्रसुप्तस्य पारिवर्त्तमाश्विने मासि कारयेत् ॥
उत्थानं श्रीहरेः कुर्य्यादन्यथा विष्णुद्रोहकृत् ।
शुभे चैवाश्विने मासि महामायाञ्च पूजयेत ॥
कार्त्तिके मासि यत कृत्यं श्रृणु, देवि वरानने । ।
सप्तवर्त्या: प्रमाणेन दीपः स्याच्चतुरङ्गुलः ॥
पश्चान्ते च प्रकर्त्तव्या दीपमाला बलिः शुभा ।
मार्गशीर्षे सित पक्षे षष्ठ्याञ्च सितवस्त्रकैः ॥
पूजयेज्जगदीशञ्च तूलवस्त्रैर्विशेषतः ।
पौषे पुष्याभिषेकञ्च वर्ज्जयेच्चन्दनं तथा ॥
संक्रान्त्यां माघमासे च साधिवासितत्लुलान् ।
निवेद्य विष्णव भक्त्या इमं मन्त्रमुदीरयेत ॥
जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो । ।
तच्छायाल्लीनता प्राप्ता त्वयैव जनिता प्रभो । ॥
कर्पूरासुतनिद्रयाणि घृताक्तानि निवेदयेत ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरःस्थितान् ॥
अभ्यर्च्य भगवद्भक्त्या द्विजांश्च भगवद्धिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भोजितः ॥
विप्रभोजनमात्रेण यज्ञं साङ्गं भवेद्ध्रुवम् ।
पञ्चम्यां शुक्लपक्षे तु स्नापयित्वा च केशवम् ॥
पूजयेद्भगवद्भक्त्या चतपक्वसमन्वितैः ॥
फलगुच्छैश्च विविधैर्वासितैः पटवासितम् ।
काननं रमणीयञ्च प्रदीप्तदीपदीपितम् ॥
द्राक्षेक्षुरम्भाजम्बीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्री च वंशतालहरीतकी ॥
अन्यैश्च वृक्षवर्गैश्च सर्व्वर्त्तुकुसुमान्वितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्वारिपूर्णघटैस्तथा ।
चूतशाखोपशाखाभिः शोभितं छत्रचामरैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्द्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ ।
पूजयेद्विधिवद्भक्त्या फलगुचूर्णैश्चतुर्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राक्षारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अर्च्चयित्वा रङ्गरम्यैश्च शोभयेत् परमेश्वरम् ॥
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ।
पञ्चाहानि ब्राह्मणि स्यूर्दोलोत्सवो विधीयते ॥
दक्षिणाभिमुखं कृष्णं दोलयानं सकृन्नराः ।
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥
निर्म्माप्य जलमात्रे तु मासे माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा मृण्मयेऽपि वा ॥
तोयस्थं योऽर्च्चयेद्देव शालग्रामसमुद्भवम् ।
गत्यहं मां महाभागे । तस्य पुण्यं न गण्यते ॥
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणे भाद्रे कर्त्तव्यञ्च तदर्पणम् ॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात मण्डले वा गृहाङ्गणे ॥
सुगन्धचन्दनैर्गाङ्गसुपुष्पाङ्गो दिने दिने ।
यथा प्रयत्नतः कार्य्यः कृष्णाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुष्ठं कुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि हरेरङ्गानि लेपयेत् ॥
दृष्टश्च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमुच्यते ॥
अस्मिन् काले तु या भक्त्या ये प्रपश्यन्ति मानवा' ॥
न तथा पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिभिश्चैतत्तोयैः स्नापयित्वा जगद्गुरुम् ।
अथवा पुष्पमध्ये च स्थापयेज्जगदीश्वरम् ॥
वृन्दावन तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तद्विशेषतः ॥
नारिकेलफलं नीरं कोषञ्चोद्धृत्य दापयेत ।
कण्टाफलञ्च पनसं कोषमुद्धृत्य दीयते ॥
यथा पक्वं तथा दद्याद्यथाशक्ति नियोगतः ।
दध्ना विमिश्रितञ्चान्नं घृतनामुत्य दापयेत् ॥
पाचितं पिष्टकं मातुरसादम घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं शुक्लञ्च दापयेत ॥
यद्यदिष्टं चात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीनादद्यात कथञ्चन ।
त्यक्तव्यं विष्णुमुद्दिश्य तद्भक्तेभ्यो विशेषतः ॥
इति ते कथित किञ्चित् समासेन महेश्वरि । ।
गोमयञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति । ॥”

इति पाद्मे पातालखण्डे १२ अध्याय. ॥

मासकः, पु, माषकपरिमाणम् । यथा । गुञ्जाः पञ्चाद्यमासकः । इत्यमरः ॥ पञ्चगुञ्जाः कृष्णलाः आद्यः प्रथमो मासकः । दशगुञ्जापेक्षया आद्यत्वम् । शास्त्रीयत्वात् मुख्यो माष इत्यर्थो वा । मस्यत परिमीयतेऽनेन मासः मसियं इं परिमाणे परीणामे घञ् स्वार्थे कः मासोऽयं दन्त्यान्तः । मष हिंसायां मूर्द्धन्यान्तस्तस्माद् घञ् तत मार्षो मूर्द्धन्यान्त इति जिनेन्द्रप्रभृतयः । इत्यमरटीकायां भरतः ॥

मासज्ञः, पु, दात्यूहपक्षी । इति शब्दरत्नावली ॥ (मासं जानातीति । ज्ञा + कः ॥) मासज्ञातरि, त्रि ॥

मासनं, क्लो, सोमराजी । इति शब्दचन्द्रिका ॥

मासमानः, पु, (मासैर्द्वादशभिर्मानमस्य ।) वत्सरः । इति त्रिकाण्डशेषः ॥ (मासस्य मानम् ॥) मासपरिमाणे, क्ली ॥

मासरः, पुं, (मस + णिच् + बाहुलकात् अरन् ।) भक्तसमुद्भवमण्डः । तत्पर्य्यायः । आचामः २ निस्रावः ३ । इत्यमरः । २ । ९ । ४९ ॥

मासवर्त्तिका, स्त्री, सर्षपीपक्षिविशेषः । इति शब्दमाला ॥

मासान्तः, पुं, (मासस्यान्तः ।) अमावस्या । यथा,—
'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम् ।'
इति समयप्रदीपः ॥
संक्रान्तिदिनम् । यथा,—
"मासान्ते म्रियते कन्या तिथ्यन्ते स्यादपुत्त्रिणी ।
नक्षत्रान्ते च वैधव्यं विद्धौ मृत्युर्द्वयोर्भवेत् ॥
मासान्ते दिनमेकन्तु तिथ्यन्ते घटिकाद्वयम् ।
घटिकात्रितयं भान्ते विवाहे परिवर्जयेत् ॥"
इति रत्नमाला ॥

मासिकं, क्ली (मासे भवम् । मास + "कालाट्ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) प्रेतस्य संवत्सराभ्यन्तरे प्रतिमासीयमृततत्सजातीयतिथि कर्त्तव्यश्राद्धम् । प्रतिमासकर्त्तव्यदर्शपदनिमित्तक श्राद्धम् । तत्पर्य्यायः । अन्वाहार्य्यम् २ । इत्यमरः । ३ । ७ । ३१ ॥ मासि भवं मासिकं पार्व्वणश्राद्धं तत्र अन्वाहार्य्यं वर्त्तते । पक्षक्षये अमावास्यायां देयत्वात् । अनु पश्चाद्ध्रियते अन्वाहार्य्यं हृत्यासोरिति घ्यण् स्वार्थे के अन्वाहार्य्यकञ्च । असत्तसपिण्डीकरणस्य वत्सराभ्यन्तरे प्रतिमासं यत् श्राद्धं तत्रान्वाहार्य्यमिति केचित् । इत्यमरटीकायां भरतः ॥ तयोः प्रमाणम् ।
"षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्व्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि च ॥"
इति पैठीनसिः ॥
'पितॄणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः ।
तच्चामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः ॥'
इति मनुः । ३ । १२३ ॥ * ॥
मासिककरणस्य व्यवस्था यथा । पीठच्छत्रोपानहरहितानि इहलोकं परित्यज्य इत्यादि सर्व्वः सुगन्ध इत्यादि श्रिया देया इत्यादि वनखनिरस इत्यादिमन्त्रचतुष्टयरहितानि च आद्यैकोद्दिष्टवत् मृताहे मृताहे द्वादश मासिकानि कार्य्याणि । एकादशमासाभ्यन्तरे मलमासपाते त्रयोदशमासिकानि । षष्ठमासाभ्यन्तरे मलमासपातेऽपि षष्ठमासिकपूर्व्वतिथावेव प्रथमषाण्मासिकम् । तथा त्रयोदशमासिकस्य पूर्व्वतिथौ द्वितीयषाण्मासिकम् । एव षाण्मासिकोल्लेखे प्रथमषाण्मासिकद्वितीयषाण्मासिकत्वेनोल्लेखः । एषां मध्ये यत् पतितं तत् कृष्णैकादश्यां अमावस्यायां मासिकान्तरतिथौ वा कृत्वा प्रकृतं कर्त्तव्यम् । अशौचपतितञ्चेत्तदशौचान्ते कर्त्तव्यम् । एकादशाहादिश्राद्धानि कतिचित् कृत्वा यदि मृतस्तदा शेषाण्यन्येनाधिकारिणा समाप्यानि ॥ * ॥ अथ मासिकैकोद्दिष्टश्राद्धप्रयोगः । पूर्व्वदिने निरामिषैकभक्तः परदिने स्नानादिकं कृत्वा एकोद्दिष्टश्राद्धविहितकाले भोज्यसन्नद्ध्य कुशब्राह्मणं स्थापयित्वा वास्तुपुरुषादि पूजयित्वा भूस्वामिपितृभ्यः श्राद्धाग्रभागं दत्त्वा दक्षिणामुखः अनुज्ञां कुर्य्यात् । यथा अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः प्रथममासिकैकोद्दिष्टश्राद्धं दर्भमयब्राह्मणेऽहं करिष्ये । ॐ कुरुष्वेत्युत्तरम् । ततो गायत्त्रीं जपेत् । देवताभ्य इत्यादि त्रिधा पठेत् । ततः पुण्डरीकाक्षं स्मृत्वा सजलेन आत्मीयद्रव्य प्रोक्षयेत् । रक्षार्थमुदकपूर्णपात्रमेकदेशे स्थापयेत् । ततः ॐ अमुकगोत्र प्रेत अमुकदेवशर्म्मन्नेतत्ते दर्भासनं स्वधा । इत्यनेन ब्राह्मणवामपार्श्वे दद्यात् । अपहतेत्यादिना तिलान् विकीर्य्य जलं स्पृष्ट्वा ब्राह्मणाग्रभूमौ कुशपत्रमेकं पातयित्वा तदुपरि अर्घ्यपात्रं संस्थाप्य ॐ पवित्रासि वैष्णवीत्यनेनानखच्छिन्नं ॐ विष्णोर्मनसा पूतमसीत्यनेन प्रोक्षितमेकदलं पवित्रं तत्पात्रे निधाय ॐ शन्नोदेवीरित्यादिमन्त्रेण जलं दद्यात् । ततः ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः । प्रत्नमद्भिः पृक्तः स्वधया प्रेतान् लोकान् प्रीणाहि नः स्वाहा । इत्यनेन तिलान् दत्त्वा गन्धपुष्पादिना अर्घ्यं निर्म्माय कुशान्तरेणाच्छाद्य तत् कुशमुद्घाट्य ब्राह्मणे पवित्रं दत्त्वा जलान्तरञ्च दत्त्वा पुष्पान्तरेण शिरःप्रभृतिसर्व्वगात्रेभ्यो नम इति संपूज्य तत् पात्रं वामहस्ततले विन्यस्य दक्षिणहस्तेनाच्छाद्य ॐ या दिव्या इति पठित्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्तेऽर्घ्यं स्वधा । ततः ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतानि ते गन्धपुष्पधूपदीपाच्छादनानि स्वधा । इत्यनन्तरञ्च एष ते गन्धः एतत्ते पुष्पं एष ते धूप एष ते दीपः एतत्ते आच्छादनम् । ततो ब्राह्मणाग्रभूमौ कुशान्तिकमपनीय नैर्ऋतिमारभ्य दक्षिणाग्रान्तरेखया वामावर्त्तेन जलेन चतुष्कोणमण्डलं कृत्वा तत्र भोजनपात्रं निदध्यात् । तत्र सामिषं सर्व्वमन्नादिकं परिवेष्य ॐ इदं विष्णुरित्यादिमन्त्रेण अन्नादावनखाङ्गुष्ठं निक्षिप्य ॐ अपहतेत्यादिना तिलान् विकीर्य्य ब्राह्मणे जलगण्डूषं दत्त्वा गायत्त्रीं जप्त्वा अन्ने मधु दत्त्वा तदभावे गुडं दत्त्वा घृतं दत्त्वा ॐ मधुवातेत्यादि मधु मधु मध्विति च पठित्वा अन्नमभिमन्त्र्य प्रोक्ष्य ब्राह्मणे जलगण्डूषं दत्त्वा वामहस्तेनान्नपात्रं धृत्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते सामिषान्नं सोपकरणं स्वधेत्युत्सृजेत् । इदं सामिषान्नं इदं हविः इमा गङ्गाया आपः एतान्युपकरणानि यथासुखं वाग्यतः सद । इत्यनेन जलगण्डूषं दद्यात् । ततो गायत्त्रीं त्रिः सकृद्वा ॐ मधुवाता इत्यादि मधु मधु मध्विति ॐ अन्नहीनमित्यादि च पठेत् । कुशब्राह्मणपक्षे पुनर्गायत्त्र्यादि पठेत् । ॐ यज्ञेश्वरो हव्य इत्यादि ॐ योगीश्वरमित्यादि याज्ञवल्क्यश्लोकत्रयं ॐ सविष्णोरित्यादि ॐ दुर्य्योधन इत्यादि ॐ युधिष्ठिर इत्यादि सर्व्वं पठेत् । ततो दक्षिणाग्रान् कुशान् भूमौ संस्थाप्य भूमिं प्रोक्ष्य सर्व्वप्रकारमन्नमुद्धृत्य सतिलमेकीकृत्य वारिणाप्लुत्य ॐ अग्निदग्धा इत्यादिमन्त्रद्वयेन कुशोपरि विकिरेत् । ततो हस्तौ प्रक्षाल्याचम्य दक्षिणकर्णं स्पृष्ट्वा वा हरिं स्मृत्वा ब्राह्मणाय जलगण्डूषं दत्त्वा पूर्व्ववद्गायत्त्रीं मधुवाता इत्यादिकं मधु मधु मध्विति च जप्त्वा ॐ शेषमन्नं क देयमित्यनुज्ञाप्य ॐ इष्टाय दीयतामित्युत्तरं गृहीत्वा ॐ पिण्डदानमहं करिष्ये ॐ कुरुष्वेत्युक्ते ब्राह्मणसम्मुखे ॐ निहन्मीत्यादिना नैर्ऋतिमारभ्य दक्षिणाग्ररेखया जलेन वामावर्त्तेन चतुष्कोणमण्डलं कृत्वा पवित्रं वामहस्ताद्दक्षिणहस्तेन गृहीत्वा वामहस्तान्वारब्धदक्षिणपाणिना दक्षिणाग्रां रेखां मण्डलमध्यस्थाने ॐ अपहतेत्यादिनिहन्मीत्यादिमन्त्राभ्यां कुर्य्यात् । तद्दर्भमुत्तरस्यां दिशि क्षिपेत् । रेखोपरि समूलान् साग्रान् कुशानास्तीर्य्य ॐ देवताभ्य इति पठित्वा ॐ एहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्विणेभिर्देह्यस्मभ्यं द्रविणेह भद्रं रयिञ्च नः सर्व्ववीरं नियच्छ इत्यावाह्य तिलांश्चास्तीर्णकुशेषु विकिरेत् । ततो वामहस्तेन सतिलजलं गृहीत्वा वामहस्ताद्दक्षिणहस्तेन संगृह्य ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नवने निक्ष्व स्वधा इत्यनेन दद्यात् ततः श्राद्धशेषमन्नं सव्यञ्जनं मध्वाज्यतिलसंयुक्तं सामिषं गृहीत्वा पिण्डं कृत्वा ॐ मधुवातेत्यादि ऋक्त्रयं अन्नहीनमित्यादि च पठित्वा बिल्वप्रमाणं पिण्डं सतिलं द्विगुणभुग्नकुशत्रयसहितं वामहस्तस्थितपात्राद्दक्षिणहस्तेन गृहीत्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेष ते सामिषपिण्डः स्वधा इत्यवनेजनस्थाने वामहस्तान्वारब्धदक्षिणहस्तेन दद्यात् । ततः आचम्य हरिं स्मृत्वा पिण्डपात्रं प्रक्षाल्य वामहस्ताद्दक्षिणहस्तेन गृहीत्वा प्रक्षालितजलं ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नवने निक्ष्व स्वधा इति पिण्डोपरि दद्यात् । ततः ॐ अत्र प्रेत मादयस्व यथाभागमा वृषायस्व इति जप्त्वा वामावर्त्तेनोदङ्मुखो भूत्वा आगमनाच्छ्वासं धृत्वा तेनैव पथा परावर्त्तमानः प्रेतं भास्वरमूर्त्तिं ध्यायन् ॐ अमीमदत प्रेत यथाभागमा वृषायिष्ट इति दक्षिणाभिमुखो भवन् जपेत् । ततः श्वासं त्यजेत् । ॐ नमस्ते प्रेत प्रेत नमस्ते इति कृताञ्जलिर्जपेत् । ॐ गृहान्नः प्रेत देहि इति गृहिणीं पश्येत् । ॐ सदस्ते प्रेत देष्म इति पिण्डं पश्येत् । ततो नवमनवं वा शुक्लवस्त्रदशाभवं सूत्रं वामहस्ताद्दक्षिणहस्तेन गृहीत्वा ॐ एतद्वः प्रेत वास इति पठित्वा पिण्डोपरि निदध्यात् । ततः ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते वासः स्वधा । इत्यनेनोत्सृजेत् । ततस्तूष्णीं पिण्डं संपूज्य ॐ वसन्तायेत्यादि-

मन्त्रेण यवतूलमस्तुर्य्यात्। तत ॐ सुसम्प्रोक्षित-मस्तु इति ब्राह्मणाग्रभूमिमासिञ्चेत्। ॐ शिवा आपः सन्तु इति ब्राह्मणे जलं दद्यात्। ॐ सन्त्विति प्रतिवचनम्। ॐ सौमनस्यमस्त्विति पुष्पं ॐ अस्त्विति प्रतिवचनम्। ॐ अक्षत-ञ्चारिष्टञ्चास्तु इति यवान् दद्यात्। ॐ अस्त्व-क्षतरम्। ततस्तिलाम्बुमधुयुक्तं जलं गृहीत्वा ॐ अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणो दत्त-मिदमन्नपानादिकमुपतिष्ठताम्। ॐ उपतिष्ठ-तामिति प्रतिवचनम्। ॐ अघोरः प्रेतोऽस्तु इति वदेत्। ॐ अस्त्विति प्रतिवचनम्। ॐ गोत्रं नो वर्द्धतामिति वदेत। ॐ वर्द्धतामिति प्रतिवचनम्। ततः पिण्डोपरि सपवित्रकुशा-नास्तीर्य्य ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे प्रेतमित्य-नेन वारिधारया सिञ्चेत्। ततः ॐ अद्येत्यादि अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः कृतै-तत्प्रथममासिकैकोद्दिष्टश्राद्धकर्म्मणः प्रतिष्ठार्थं दक्षिणामिदं रजतं तन्मूल्यं वा विष्णुदैवतं यथा नामगोत्राय ब्राह्मणायाहं ददानीति दद्यात्। ततो दक्षिणां दिशं पश्यन् वरं याचेत। नात्र पात्रमालभ्य जपेत्। नाशिषः प्रार्थयेदिति प्रचेतोवचनादाशिषं न प्रार्थयेत्। ततः ॐ देव-ताभ्य इति त्रिः पठेत्। ॐ अभिरम्यतामिति विसर्ज्जनम्। ॐ अभिरतोऽस्मीति प्रतिवचनम्। ॐ आमावाजेति प्रदक्षिणवारिधारया वेष्टयेत पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा क्षिपेत्। श्राद्धीयद्रव्यं ब्राह्मणाय दद्यात् जले वा क्षिपेत्। ततो वामदेव्यं गायेत अच्छिद्रावधारणं दीपाच्छादनं विष्णुस्मरणञ्च कुर्य्यात्। एवं प्रकारेण द्वितीयादिमासिकं कर्त्त-व्यम्। इति स्मार्त्तभट्टाचार्य्यकृतश्राद्धप्रयोग-तत्त्वम्॥ * ॥ अन्यत् श्राद्धशब्दे द्रष्टव्यम्॥

मासिकः, त्रि, माससम्बन्धी। मासि भव इत्यर्थे ष्ठिक्प्रत्ययेन निष्पन्नः॥ (यथा, मनौ।७।१२६।
"पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम्।
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु
मासिकः॥")

मासुरी, स्त्री, (मसुर+अण् ङीप्।) श्मश्रुः। इति हेमचन्द्रः। ३। २२७॥ (मातृभग्नी। यथा, ब्रह्मवैवर्त्ते। १। १०। १४५।
"पितृष्वसा पितुर्भग्नी मातृभग्नी च मासुरी।")

माक्ष, व्य, (मा च स्म च तयोः समाहारः।) वारणम्। तत्पर्य्यायः। मा २ अलम् ३। इत्य-मरः।३।४।११। (यथा, रामायणे।२।१२।६७।
"माक्ष मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः।")

माह ऋ ञ माने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ अममाहत्। ऋदनु-बन्धस्थाने षष्ठस्वरानुबन्ध इत्येके। ञ माहति माहते। इति दुर्गादासः॥

माहाकुलः, त्रि, (महाकुलस्यापत्यमिति।) "महाकुलादञ्खञौ।" ४।१।१४१। इति अञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहाकुलीनः, त्रि, (महाकुलस्यापत्यमिति। "महाकुलादञ्खञौ।" ४।१।१४१। इति खञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहात्म्यं, क्ली, (महात्मनो भावः इति। महा-त्मन्+ष्यञ्।) महात्मता। महिमेति यावत्। यथा, तिथ्यादितत्त्वे।
"माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्ततः॥"

माहानामिकः, } पुं, ("तदस्य ब्रह्मचर्य्यम्।"
माहानाम्निकः, } ५।१।९४। इत्यत्र। "महा-नाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्॥" महा-नाम्न्यो नाम विदामघवन्।' इत्याद्या ऋचः। तासां ब्रह्मचर्य्यमस्य इति ठञ्। हरदत्तस्तु "भस्याढे।" इति पुंवद्भावात् माहानामिक इत्याह। इति सिद्धान्तकौमुदी।) महानाम्नी-ऋचाध्येता ब्राह्मणः। इति केचित्॥

माहिनं, क्ली, (मह्यते पूज्यते अस्मिन् इति। मह+"महेरिनण् च।" उणा०।२।५६। इति इनण्।) राज्यम्। इत्युणादिकोषः॥ (मंहनीये, त्रि। यथा, ऋग्वेदे।३।३६।६।
"इन्द्र। यत्ते माहिनं दत्रमस्ति।"
"माहिनं मंहनीयम्।" इति तद्भाष्ये सायणः॥ प्रवृद्धे च। यथा, तत्रैव।१।५६।६।
"इन्द्र। सदनेषु माहिनः।"
"माहिनः प्रवृद्धः।" इति तद्भाष्ये सायणः॥)

माहिरः, पु, (मह्यते पूज्यतेऽसौ। मह+बाहु-लकात् इरण्।) इन्द्रः। इति त्रिकाण्डशेषः॥

माहिषिकः, पुं (महिष्ये रोचतेऽसौ। महिषी+ठक्।) महिषीपतिः। व्यभिचारिण्यनुरक्त-पतिः॥ यथा,—
"महिषीत्युच्यते नारी या च स्याद्व्यभिचारिणी।
तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः॥"
इति स्कान्दे काशीखण्डम्॥

महिषोपजीवी॥ (महिषी नारी पण्यमस्येति। महिषी+"तदस्य पण्यम्।" ४।४।५१। इति ठक्।) भगदारोपार्ज्जितस्त्रीधनोपजीवी। यथा,
"महिषीत्युच्यते नार्य्या भगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः॥"
इति विष्णुपुराणे २।६।१५ श्लोकस्य टीकायां श्रीधरस्वामी॥

माहिष्यः, पुं, (महिष्यां साधुरिति महिषी+ष्यञ्।) वर्णसङ्करजातिविशेषः। स च क्षत्रियाद्वैश्यायां जातः। इत्यमरः।२।१०।३॥ (यथा, याज्ञवल्क्यसंहितायाम्।१।९२।
"वैश्याशूद्रोस्तु राजन्यात् माहिष्योग्रौ सुतौ स्मृतौ॥")

माहेन्द्रः, पुं, (महेन्द्रस्यायम्। महेन्द्र+अण्।) शुभदण्डविशेषः। रव्यादिसप्तवारेषु वायुवरुण-यममाहेन्द्राणामेकैकदण्डा भवन्ति। तत्र वरुण-माहेन्द्रयोर्द्दण्डौ शुभौ। वायुयमयोर्द्दण्डावशुभौ। यथा,—
"ख्यातं वा व यमा सूर्य्ये मा वा व य कला
निधौ।
व य मा वा कुजे श्रेया मा वा व य सुधौ
बुधे॥
गुरौ वा व य मा चैव मा वा व य तथा भृगौ।
सूर्य्यपुत्त्रे य मा वा व घटीयुग्मं शुभाशुभम्॥
माहेन्द्रे विजयो नित्यं वारुणे च धनागमः।
वायौ च भ्रमते नित्यं यमेऽपि मरणं ध्रुवम्॥")
इति सारसंग्रहः॥

(माहेन्द्रकायपुरुषस्य लक्षणं यथा,—
"माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रबुद्धिता।
भृत्यानां भरणञ्चापि माहेन्द्रं कायलक्षणम्॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥
महेन्द्रो देवतास्येति। महेन्द्र+"महेन्द्राद्-घाणौ च।" ४।२।२९। इति अण्। महेन्द्रदैवत्ये, त्रि। यथा, भट्टिकाव्ये।१५।९३।
"अविभ्रंशत ततःशक्रमैषीकं राक्षसो रणे।
तदप्यध्वंसदाधाय माहेन्द्रं लक्ष्मणेरितम्॥")
महेन्द्रसम्बन्धिनि च। (यथा, रघौ।१२।८६।
"मातलिस्तस्य माहेन्द्रं स्नामुमोच तनुच्छदम्॥")

माहेन्द्री, स्त्री, (महेन्द्रस्येयम्। महेन्द्र+अण्। स्त्रियां ङीप्।) इन्द्राणी। इति शब्दरत्नावली॥ गौः। इति राजनिर्घण्टः॥

माहेयः, त्रि, (मही+ढक्) मह्या अपत्यम्। इति मुग्धबोधव्याकरणम्॥ (जनपदभेदे, पुं। यथा, महाभारते।६।९।४८।
"कुन्द्राः परान्ता माहेयाः कक्षाः सामुद्र-
निष्कुटाः॥"
मङ्गलग्रहः। यथा, समयामृते।
"कफपित्तसमुद्भूता शिरःपीडा भयावहाम्।
माहेयः कुरुते शोकं बुधस्यान्तर्दशां गतः॥")

माहेयी, स्त्री, (मह्याः सुरभ्याः अपत्यमिति। मही+"नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक्। स्त्रियां ङीष्।) गौः। इत्यमरः।२।९।६७॥ (यथा, महाभारते।४।१६।१०।
"सर्व्वभूतेव माहेयी वनं जाता भिक्षायणी।
उपातिष्ठन पाञ्चाली वासितेव महावृषम्॥"
अस्याः पर्य्यायो यथा,—
"सुरभिः सौरभेयी च माहेयी गौरदाहृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

माहेशी, स्त्री, (महेशस्येयम्। महेश+अण्+स्त्रियां ङीष्।) दुर्गा। यथा,—
"महादेवात् समुत्पन्ना महामारीत्यतो यतः।
माहेश्वर्य्या तनुर्यस्या माहेशी तेन सा स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
(महेशेन कृतमित्यण्। स्त्री, व्याकरणविशेषः।
"यान्युज्जहार माहेशाद् व्यासो व्याकरणा-
र्णवात्।
तानि किं पदरत्नानि सन्ति पाणिनिगोष्पदे॥"
इत्युद्भट.॥)

माहेश्वरी, स्त्री, (महेश्वरस्येयम् । महेश्वर + अण् । ङीप् ।) यवतिक्ता । इति राजनिर्घण्टः । दुर्गा ॥ (यथा, महाभारते । १४ । ४३ । १४ ।
"भगदेवानुयातायां सर्व्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्व्वती हि सा ॥")
मातृभेदः । इति शब्दरत्नावली ॥ (यथा, मन्त्रकोषे । ६ । ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ।) विष्णुः । यथा,—
कन्या ऊचुः ॥
"कस्त्वं विभ्राजसे कान्त्या केयं वा नवविप्रभा ।
कोऽन्वयं भाति वपुषा पङ्कजायतलोचनः ॥
निशम्य तासां वचनं वृषेन्द्रवरवाहनः ।
व्याजहार महायोगी भूताधिपतिरव्ययः ॥
अयं नारायणो गौरी जगन्माता सनातनः ।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः ॥
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ॥
अहं हि निष्क्रियः शान्तः केवलो नित्यविग्रहः ।
मामेव केशवं देवमाहुर्देवीमथाम्बिकाम् ॥
एष धाता विधाता च कारणं कार्य्यमेव च ।
कर्त्ता कारयिता विष्णुर्भुक्तिमुक्तिफलप्रदः ॥
भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक् ।
स्रष्टा धाता वासुदेवो विश्वात्मा विश्वतोमुखः ॥
कूटस्थो ह्यक्षरो व्यापी योगी नारायणः स्वयम् ।
तारकः पुरुषो ह्यात्मा केवलं परमं पदम् ॥
एषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना ।
शान्ता सत्या सदानन्दा परं पदमिति श्रुतिः ॥
अस्याः सर्व्वमिदं जातमत्रैव लयमेष्यति ।
एषैव सर्व्वभूतानां गतीनामुत्तमा गतिः ॥"
इति कौर्म्मे १४ अध्यायः ॥
(पीठस्थानभेदः । इति देवीभागवते ।७।३०।७२।
महेश्वरेण कृतम् । महेश्वर + अण् । क्लौ । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १६ ।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम् ।
एतान्युपपुराणानि कथितानि महात्मभिः ॥"
महेश्वरसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । १०६ । ७१ ।
"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः ।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु ॥")
मि ञ् ग, न क्षेपे । इति कविकल्पद्रुमः ॥ (स्वा०-उभ०-सक०-अनिट् ।) ञ् मिन्निमम् । ग न मिनोति मिनुते । इति दुर्गादासः ॥
मिच्छ, श बाधे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) श मिच्छती मिच्छन्ती । बाधो विहतिः । इति दुर्गादासः ॥
मितः, त्रि, (मा + क्तः "द्यतिस्यतिमास्थामित्ति किति ।" ७ । ४ । ४० । इत्याकारस्येकारादेशः ।) परिमितः । शब्दितः । क्षिप्तः । इति माधातोर्मिधातोश्च क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ८ । १३ । ३६ ।
"राजंश्चतुर्द्दशैतानि त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्य्ययः ॥"
यथा च नैषधचरिते । ६ । ८ ।
"मितञ्च सारञ्च वचो हि वाग्मिता ॥")
मितङ्गमः, पुं, स्त्री, (मितं परिमितं गच्छतीति । गम + "प्रियवशे वदः खच् ।" ३।२।३८ । इत्यत्र "खच् प्रकरणे गमेः सुप्युपसंख्यानम् ।" इति काशिकोक्तेः खच् । मुम् च ।) हस्ती । इति सिद्धान्तकौमुदी ॥ परिमितगामिनि, त्रि ॥
मितद्रुः, पुं, (मितं द्रवतीति । द्रु + "हरिमितयोर्द्रुवः ।" उणा० १ । ३५ । इति कुः । स च डित् ।) समुद्रः । इति हेमचन्द्रः । ४ । १३९ ॥ (परिमितगतौ, त्रि । यथा, ऋग्वेदे ।४।६।५।
परित्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचा ऋतावा ।"
"मितद्रुः परिमितगतिः सन् ।" इति तद्भाष्ये सायणः ॥ मितमार्गे च । यथा, अत्रैव । १० । ६४ । ६ ।
"ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।"
"मितद्रवो मितमार्गाः अध्वानं परिच्छिन्दन्तः ।"
इति तद्भाष्ये सायणः ॥")
मितम्पचः, त्रि, कृपणः । इत्यमरः ॥ ३ । १ । ४८ ॥ (मितं परिमितं पचतीति । मित + पच् + "मितनखे च ।" ३ । २ । ३४ । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् च ।) परिमितपाककर्त्ता च ॥
मिताशनः, त्रि, परिमितभोजी । मितमश्नाति यः इति व्युत्पत्त्या कर्त्तरि (ल्यु) अनप्रत्ययेन निष्पन्नः ॥
मितिः, स्त्री, (मीयते इति । मा + भावे क्तिन् ।) मानम् । विज्ञानम् । अवच्छेदः । इति शब्दरत्नावली ॥ (यथा, कुसुमाञ्जलौ । ४६ । ४ ।
"मितिः सम्यक् परिच्छित्तिः ॥")
मित्रं, क्लौ, (मिनोति मानं करोति इति । "अमिचिमिदिशसिभ्यः क्त्रः ।" उणा० ४ । १६३ । इति क्त्रः ।) शत्रोः परम् । इत्यमरः । २ । ८ । ९ ॥ अतः शत्रोः परमवस्थितो राजा मित्रं उपकारित्वात् । मेद्यति स्निह्यतीति वाहुलकात् त्रः निपातनात् गुणाभावः । द्वितकारं एकतकारञ्चेत्येके । इति तट्टीकायां भरतः ॥ अपि च ।
"राजा शत्रुरिति ख्यात एकार्थाभिनिवेशतः ।
भूम्येकान्तरितो राजा स मित्रं मित्रकार्य्यतः ॥"
इति शब्दरत्नावली ॥
मित्रं, क्लौ, बन्धुः । मिता इति भाषा । तत्पर्य्यायः । सखा २ सुहृत् ३ । इत्यमरः । २ । ८ । १२ ॥ मायन्ति जानाति सर्व्वं मित्रं मौ कि गत्यां नाम्नीति द्वित्रः मित्रमजहल्लिङ्गम् । निपातनात्तस्य द्वित्वं द्वितकारश्च । इति तट्टीकायां भरतः ॥ तच्चतुर्व्विधम् । सहार्थः १ भजमानः २ सहजः ३ कृत्रिमः ४ । इति महाभारते राजधर्म्मः ॥ * ॥ मित्रलोत्पत्तिर्यथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥"
वर्ज्यमित्रं यथा,—
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्जयेत् ॥
कुमित्रे नास्ति विश्वासः कुराजे नास्ति जीवितम् ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं मायामयमरिन्तथा ॥"
विश्वस्तस्यैव मित्रत्वं यथा,—
"स श्रीर्यो न मदं कुर्य्यात् स सुखी तृष्णयोज्झितः ।
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुडे १३ । १४ । १५ । अध्यायाः ॥ * ॥
मित्रप्रशंसादिर्यथा,—
"यस्य मित्रेण संभाषो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥
यानि कानि च मित्राणि कर्त्तव्यानि शतानि च ।
पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥
अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्व्वशून्या दरिद्रता ॥"
इति हितोपदेशः ॥
मित्रः, पुं, सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥ (यथा, रामायणे । २ । २५ । २२ ।
"स्वस्ति मित्रः सहादित्यैः स्वस्ति रुद्रा दिशन्तु ते ॥")
द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५ ।
"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।"
मरुतामन्यतमः । यथा, हरिवंशे ।१६६।५२।
"मरुत्वती मरुत्वन्तो देवानजनयत् सुतान् ।
अग्निश्चक्षुर्हविर्ज्योतिः सावित्रो मित्र एव च ॥"
वशिष्ठस्य ऊर्ज्जागर्भजातः पुत्रभेदः । यथा, भागवते । ४ । १ । ३७ ।
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ।
उल्वणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे ॥")
मित्रयुः, त्रि, (मित्रं यातीति । या + "क्याच्छन्दसि ।" ३ । २ । १७० । इति उः ।) मित्रवत्सलः । इति हेमचन्द्रः । ३ । १५३ ॥
मित्रयुः, पुं, (मित्रं यातीति । या + "मृगय्वादयश्च ।" उणा० १ । ३८ । इति कुः । निपातितश्च ।) लोकयात्रिकः । इत्युणादिकोषः । संप्रसारणाभावादिश्चत्रित्यश्च ॥ (ऋषिभेदः सलोमहर्षणशिष्यः । यथा, विष्णुपुराणे । ३।६।१८ ।
"सुमतिश्चाग्निवर्च्चाश्च मित्रयुः शांशपायनः ॥")

मित्रयुद्धं, क्ली, (मित्रेण सह युद्धम्।) सुहृत्-संग्रामः। तत्पर्य्यायः। मैत्रेयिका २। इति त्रिकाण्डशेषः॥

मित्रलब्धिः, } स्त्री, पुं, (मित्रस्य लब्धिः। यद्वा। मित्रलाभः, } मित्रस्य लब्धिर्यस्मात्।) सुहृत्-प्राप्तिः। यथा, हितोपदेशे।

"मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च॥"

मित्रवत्सलः, त्रि, (मित्रस्य मित्रे वा वत्सलः।) मित्रप्रियः। तत्पर्य्यायः। मित्रयुः २। इति हेमचन्द्रः॥

मित्रशीः, [स्] त्रि, (मित्रं शास्ति इति। शास्+"शास इदङ्हलोः।" ६।४।३४। इत्यत्र "क्वौ च शास इत्वं भवतीति वक्तव्यम्।" इति काशिकोक्तेः क्विप् इत्वं ततो दीर्घश्च।) सुहृच्छास्ता। मित्रं शास्ति यः। इति मुग्ध-बोधव्याकरणम्॥

मित्रसप्तमी, स्त्री, (मित्राय मित्रजन्मने मित्रस्य वा सप्तमीति समासः।) मार्गशीर्षशुक्लसप्तमी। यथा,—

"अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः। मार्गशीर्षस्य मासस्य शुक्ले पक्षे शुभे तिथौ॥ सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी। तत्रोपवासः कर्त्तव्यो भक्ष्याणयथ फलानि वा॥"

इति श्रीगोविन्दानन्दाचार्य्यकृतसंवत्सरकौमुदी-धृतभविष्यपुराणवचनम्॥

मित्रा, स्त्री, (मित्र+स्त्रियां टाप्।) सुमित्रा। शत्रुघ्नजननी। इति शब्दरत्नावली॥ (अप्सरो-विशेषः। यथा, महाभारते। १३। १९। ४४।

"अलम्बुषा घृताची च मित्रा चित्राङ्गदा रुचिः॥"

पराशरशिष्यमैत्रेयजननी। यथा, श्रीमद्भाग-वते। ३। ४। ३५।

"कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ। प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः॥")

मिथ ऋ ञ वधे। मेधायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ अमिमेथत्। ञ मेथति मेथते शत्रुकार्थं शिष्यः धारयतीत्यर्थः। इति दुर्गादासः॥

मिथः, [स्] व्य, (मेथति इति मेथृ सङ्गमे असुन्। पृषोदरादित्वात् ह्रस्वः।) अन्योन्यम्। रहः। इत्यमरः। ३।४।२५५॥ (यथा, मनुः। १०।५३।

"व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥")

मिथिः, पुं, (मेथते हिनस्ति शत्रुकुलं इति। मिथ्+"सर्व्वधातुभ्य इन्।" उणा० ४।११७। इति इन्।) निमिराजपुत्त्रः। स तु जनकराजः। यथा। अपुत्त्रस्य तस्य निमेर्भूभुजः शरीरमराजक-भीरवस्ते मुनयः अरण्यां ममन्थुः। तत्र च कुमारो जज्ञे। जननाज्जनकसंज्ञां चावाप। अभूद्विदेहोऽस्य पितेति वैदेहः। मथ-नान्मिथिरभूत्। तस्योदावसुः पुत्त्रोऽभवत्। इति विष्णुपुराणे ४ अंशे ५ अध्यायः॥ (तथाच रामायणे। १। ७१। ४।

"निमिः परमधर्म्मात्मा सर्व्वसत्त्ववतां वरः। तस्य पुत्त्रो मिथिर्नाम जनको मिथिपुत्त्रकः॥")

मिथिला, स्त्री (मथ्यन्ते शत्रवो यस्याम्। मथ्+"मिथिलादयश्च" उणा० १।५८। इति इलच् अकारस्येत्वं निपात्यते।) स्वनामख्यातनगरी। सा तु जनकराजपुरी। यथा। विदेहा मिथिला प्रोक्ता। इति हलायुधः॥ (यथा, महाभारते। १। ११३। २८।

"ततः कोषं समादाय वाहनानि च भूरिशः। पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः॥")

अपिचास्य निरुक्त्यादिकं यथा,—

"गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे। विदेहभूः समाख्याता तैरभुक्ताभिधः स तु॥"

इति शक्तिसङ्गमतन्त्रे ७ पटलः। तैरभुक्ता त्रिहुत इति ख्याता॥ तन्नामकारणं यथा,—

"अराजकभयं नॄणां मन्यमाना महर्षयः। देहं ममन्थुः स्म निमेः कुमारः समजायत॥ जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः। मिथिलो मथनाज्जातो मिथिला येन निर्म्मिता॥"

इति श्रीमद्भागवते ९ स्कन्धे १३ अध्यायः॥

अपि च।

"निमेः पुत्त्रस्तु तत्रैव मिथिर्नाम महान् स्मृतः। प्रथमं भुजबलैर्येन तैरहूतस्य पार्श्वतः। निर्म्मितं स्वीयनाम्ना च मिथिलापुरमुत्तमम्॥ पुरीजननसामर्थ्यात् जनकः स च कीर्त्तितः॥"

इति भविष्यपुराणम्॥

मिथुनं, क्ली, (मेथतीति। मिथ्+"क्षुधिपिशि-मिथः कित्।" उणा० ३। ५५। इति उनन् कित्त्वाद्गुणाभावश्च।) स्त्रीपुंसयो-र्युग्मम्। तत्पर्य्यायः। द्वन्द्वम् २। इत्यमरः। २। ५। ३८॥ (यथा, रामायणे। १। २। १५।

"मानिषाद। प्रतिष्ठां त्वमगमः शाश्वतीः समाः। यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")

युगलम्। इति तट्टीकायां रामाश्रमः॥ मेषादि-द्वादशराश्यन्तर्गततृतीयराशिः। तत्पर्य्यायः। जितुमः २। तच्च द्विपदं ग्राम्यं समसंज्ञकम्। अस्योदयस्य स्थलमानं षट्पलाधिकपञ्चदण्डाः। इति ज्योतिषतत्त्वम्॥ अस्याधिष्ठातृदेवता गदाधारिपुरुषः वीणाधारिस्त्री च। मृगशिरः-शेषार्द्धं आर्द्रासमुदायः पुनर्व्वसोस्त्रिपादं एते-र्भवति। तत्तु शीर्षोदयं पश्चिमदिक्स्वामिवायु-प्रकृतिहारद्वर्णं वनस्थितं शूद्रवर्णं स्निग्धं मध्यस्त्रीसङ्गं मध्यमसन्तानञ्च। तत्र जातो जनः मृगचक्षुः मिष्टभाषी कृशः वञ्चकः धर्म्ममतिः विनयभाजनञ्च भवति। इति बृहज्जातकादयः॥

अथ मिथुनलग्नजातफलम्।

"मिथुनोदयसञ्जातो मानी स्वजनवत्सलः। त्यागी भोगी धनी कामी दीर्घसूत्रोऽरि-मर्द्दनः॥"

इति कोष्ठीप्रदीपः॥ * ॥

राशेस्तन्मनिरूपणं यथा,—

"इन्दुसंश्रयभवने भवाहता-वल्लभे लसदनन्तमध्यगे। कोमलाङ्गि। मिथुनोदयात् प्रिये! कालखानलकलाः प्रियेऽचलन्॥" ५।६।

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

मिथ्या, व्य, (मथते इति। मथविलोडने। मेथति हिनस्ति वेति। मथ वा मेथ+क्यप्। निपा-तनात् साधु।) असत्यम्। तत्पर्य्यायः। मृषा २ वितथः ३ अनृतम् ४। इति शब्दरत्नावली॥ मिछा इति भाषा॥ (यथा,-

"यदसद्भासमानं तन्मिथ्या स्वाप्नगजादिवत्।"

इति सांख्यप्रवचनभाष्यधृतम्॥

सा चाधर्म्मपत्नी। यथा,—

"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता। यया विना जगन्मुक्तमुच्छन्नं विधिनिर्म्मितम्॥ सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी। अर्द्धावयवरूपा च द्वापरे संवृता भिया॥ कलौ महाप्रमत्ता च सर्व्वत्र व्यापिका बलात्। कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः॥

अपि च।

"अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जार-लोचना। तस्याः पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः॥ स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम्। निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत्॥"

इति कल्किपुराणे १ अध्यायः॥

विषयभेदे मिथ्याभाषणे दोषाभावो यथा,—

शर्म्मिष्ठोवाच।

"न नर्म्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले। प्राणात्यये सर्व्वधनापहारे पञ्चानृतान्याहुरपातकानि॥"

मिथ्याकथने दोषो यथा,—

"पृष्टास्तु साक्ष्ये प्रवदन्ति येऽन्यथा भवन्ति मिथ्यापतिता नरेन्द्र। एकार्थतायान्तु समाहितायां मिथ्या वदन्तं ह्यनृतं हिनस्ति॥"

ययातिरुवाच।

"राज्ञा प्रमाणं भूतानां स विनश्येन्मृषा वदन्। अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे॥"

इति मात्स्ये ३१ अध्यायः॥

अथासत्याभिधानप्रायश्चित्तम्। तत्र सकृद-सत्यभाषणे कृच्छ्रानुसारेण प्रायश्चित्तम्। यथा, विष्णुपुराणम्।

"कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते। प्रायश्चित्तन्तु तस्यैकं कृच्छ्रानुसारणं परम्॥"

असत्याभ्यासे विष्णुः। निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम्। असत्यभाषणं शूद्र-सेवनमित्यपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति। अतिबहुतरकालाभ्यासे मनुः।

"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्।"

चातुर्व्वर्ण्यवधे साक्ष्येऽनृतभाषणेऽनुपातकत्वाभावात्तु प्रायश्चित्तमाह याज्ञवल्क्यः ।
"वर्णिनां हि वधो यत्र तत्र साक्ष्येऽनृतं वदेत् ।
तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः ॥"
शूद्रे तु विप्राः । तत्पावनाय कुष्माण्डीभिर्द्विजोऽग्निं जुहुयात् । शूद्रश्चैकोद्दिष्टं गोदशकस्य ग्रासं विदध्यात् । विषयविशेषेऽपवादमाह हारीतः । सोमविक्रयकन्याविवाहभयमैथुनबालकसंस्नपनं गोब्राह्मणहितञ्च कुर्व्वन् मिथ्या न लिप्यत इति । तथा च यमः ।

"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रैरवाक्यं न च मैथुनार्थे ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"

इति प्रायश्चित्तविवेकः ॥

मिथ्याचारः, त्रि, (मिथ्या आचारोऽस्य ।) कपटाचारः । दाम्भिक इत्यर्थः । इति वक्ष्यमाणश्लोकटीकायां श्रीधरस्वामी ॥ यथा,—
"कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥"
इति श्रीभगवद्गीतायां ३ अध्यायः ॥

मिथ्यादृष्टिः, स्त्री, (मिथ्या च सा दृष्टिश्चेति ।) कर्म्मफलापवादकशास्त्रम् । तत्पर्य्यायः । नास्तिकता २ । इत्यमरभरतौ । १ । ५ । ४ ॥ असत्यदर्शनञ्च ॥

मिथ्याध्यवसितिः, स्त्री, (मिथ्या असत्या च सा अध्यवसितिश्चेति ।) मिथ्याध्यवसायः । असत्योत्साहः । इति केचित् ॥

मिथ्यानिरसनं, क्ली, (मिथ्या असत्यं निरस्यते अनेन । निर् + अस् + करणे ल्युट् ।) शपथः । इत्यमरटीकायां भरतः ॥

मिथ्याभियोगः पुं, (मिथ्या असत्यमभियोगः ।) मिथ्यावादः । शतं मे धारयसीत्यादि मिथ्योद्भावनम् । तत्पर्य्यायः । अभ्याख्यानम् २ । इत्यमरभरतौ ॥

मिथ्याभिशंसनं, क्ली, (मिथ्या असत्यस्य अभिशंसनं कथनम् ।) स्वर्णस्तेयं त्वया कृतमित्यादि मिथ्यादूषणं वाक्यम् । तत्पर्य्यायः । अभिशापः २ । इत्यमरभरतौ ॥

मिथ्याभिशापः, पुं, (मिथ्या अभिशापः ।) मिथ्यापवादः । यथा, भोजराजः ।
"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तच्च तं ततः ॥"
इति तिथ्यादितत्त्वम् ॥

मिथ्यामतिः, स्त्री, (मिथ्या चासौ मतिश्चेति ।) भ्रान्तिः । इत्यमरः । १ । ५ । ४ ॥ असत्यबुद्धिश्च ॥

मिथ्यासाक्षी, [न्] त्रि, (मिथ्याभाषी साक्षी साक्षाद् द्रष्टा चेति ।) कूटसाक्षी । तस्य ज्ञानप्रकारमाह याज्ञवल्क्यः ।
"उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः ।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः ॥"
मिथ्यासाक्ष्यकथने दोषमाह याज्ञवल्क्यः ।
"ये पातककृतां लोका महापातकिनां तथा ।
अग्निदानाञ्च ये लोका ये च स्त्रीबालघातिनाम् ॥
एतान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ।
सुकृतं यत्त्वया किञ्चित् जन्मान्तरशतैः कृतम् ।
तत् सर्व्वं तस्य जानीहि यं पराजयसे मृषा ॥"
इति मिताक्षरा ॥

मिथ्योत्तरं, क्ली, (मिथ्या असत्यमुत्तरं ।) चतुर्थोत्तरान्तर्गतोत्तरविशेषः । तस्य लक्षणम् ।
"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥"
इति नारदः ॥
तच्चतुर्व्विधम् । मिथ्यैतत् १ अहं नाभिजानामि २ मम तत्र न सन्निधिः ३ तत्कालेऽहमजातः ४ । यथा, व्यासनारदौ ।
"मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्व्विधम् ॥"
इति व्यवहारतत्त्वम् ॥

मिद इ क स्निहि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ क मिन्दयति वर्त्तिका तैलेन । इति दुर्गादासः ॥

मिद इर् य ञा स्निहि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) इर अमिदत् अमेदीत् । य इति व्यायामशीलोऽसौ महाकायो न मेद्यतीति हलायुधः । ञा मेदितं मिन्नं तेन । इति दुर्गादासः ॥

मिद ऋ ञ वधमेधयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ अमिमेदत् । ञ मेदति मेदते शास्त्रार्थं शिष्यो धारयतीत्यर्थः । मिमिदुः मिमेदुः । इति दुर्गादासः ॥

मिद, ऌ ञा ञि ङ स्निहि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट ।) ऌ अमिदत् । ञि मिन्नोऽस्ति । ङ मेदते । इति दुर्गादासः ॥

मिद, क स्निहि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क मेदयति वर्त्तिका तैलेन । इति दुर्गादासः ॥

मिन्मिनः, त्रि, सानुनासिकवाग्विशिष्टः । खोना इति भाषा । तस्य निदानं यथा,—
"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान् ॥"
इति माधवकरः ॥
अक्रियकान् इत्यत्रावचनानिति च पाठः । अवचनान् अनेषदर्थे नञ् । तेन ईषद्वचनान् । स एव वायुः प्रबलश्चेत्तदा मूकान् अवचनान् । मिन्मिनान् सानुनासिकान् । गद्गदान् लुप्तपदव्यञ्जनाभिधायिनः करोतीत्यन्वयः । एषां समानकारणत्वेऽपि दुष्टत्वकर्षादिना अदृष्टवशाद्वा भेदो बोद्धव्यः ॥ ॥ अथ तेषां चिकित्सा ।
"प्रस्थं घृतस्य पलिकैः शिग्रुवचाजलवणधातकीलोध्रैः ।
आजे पयसि विपक्वं सिद्धं सारस्वतं नाम्ना ॥
विधिवदुपयुज्यमानं जड़गद्गदमूकतां जयति जित्वा ।
स्मृतिमतिमेधाप्रतिभाः कुर्य्यात् संवत्सरात् भवति ॥
सारस्वतं घृतम् ।
"सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम् ।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम् ॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ।
तच्चूर्णं सर्पिषालोड्य प्रत्यहं भक्षयेन्नरः ॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः ।
मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥"
इति भावप्रकाशस्य द्वितीये भागे मध्यखण्डे वातव्याध्यधिकारे ॥

मिल, श ञ श्लिषि । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-अक०-सेट् ।) श्लिषि सम्बन्धीभावे । श ञ मिलति मिलते लता वृक्षेण । अयं कुटादिरिति कुलचन्द्रः । तेन व्याजनिलयमिलनेन गरलमिव कलयति मलयसमीरम् । इति जयदेवः । मिलिष्यन्ति ।
"महापातकिनः पञ्च मिलितव्यं न तैः सह ।"
इति दुर्गादासः ॥

मिलितः, त्रि, मिलधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । श्लिष्टः । सम्बन्धविशिष्टः । युक्तः । (यथा, देवीभागवते । १ । ११ । ८० ।
"पुनर्विवादः सञ्जातो मिलिता देवदानवाः ।
युद्धार्थमागतास्तेषां समाजः समजायत ॥")

मिव, इ सेके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ मिन्वति । इति दुर्गादासः ॥

मिश, ध्वनौ । कोपे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० अक०-सेट् ।) मेशति । इति दुर्गादासः ॥

मिशिः, स्त्री, (मिश + इन् ।) मधुरिका । शतपुष्पा । इत्यमरटीकायां भरतः ॥ जटामांसी । इति शब्दरत्नावली ॥

मिशी, स्त्री, (मिशि + कृदिकारादिति पक्षे ङीष् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इत्यमरटीकायां भरतः ॥

मिश्र, त् क युक्त्याम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यमध्योऽयम् । दन्त्यमध्य इति वर्द्धमानाख्याम् । युतिः संयोजनम् । मिश्रयति मिश्रापयति घृतेनान्नं लोकः । इति दुर्गादासः ॥

मिश्रं, क्ली, (मिश्र + बाहुलकात् रक् ।) चाणक्यमूलकम् । इति राजनिर्घण्टः ॥ मिश्रितम् । यथा,—
"केचिदाहुः क्षचिद्देशे यावत्तु दिननाड़िकाः ।
तावदेव त्वनध्यायो न तन्मिश्रं दिनान्तरं ॥"
इति तिथ्यादितत्त्वम् ॥

मिश्रः, पुं, (मिश्र + बाहुलकात् रक् ।) गजजातिविशेषः । यथा, —
"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ।"
इति हेमचन्द्रः । ४ । २८४ ॥
श्रेष्ठः । यथा । गौरविताख्यार्य्यमिश्राः । इति भूरिप्रयोगः ॥ संयुक्ते, त्रि । यथा,—
"करम्बः कबरो मिश्रः संपृक्तः खचितः समाः ।
इति हेमचन्द्रः । ६ । १०५ ॥
उग्रादिसप्तग्रहाणामन्तर्गतसप्तमगणः । स तु कृत्तिकाविशाखाख्यो भवति । इति ज्योतिषतत्त्वम् ॥
मिश्रकं, क्ली, (मिश्र + कन् ।) देवोद्यानम् । इति जटाधरः ॥ औषरलवणम् । इति राजनिर्घण्टः ॥ (मिश्र + ण्वुल् । त्रि, मिश्रणकर्त्ता । यथा, मनौ । ११ । ५० ।
"पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम् ।
धान्यचौरोऽङ्गहीनत्वमातिरैक्यन्तु मिश्रकः ।"
तीर्थभेदः । यथा, महाभारते ।३।८३।८२।
"ततो गच्छेत धर्म्मज्ञ ! मिश्रकं लोकविश्रुतम् ।
तत्र तीर्थानि राजेन्द्र ! मिश्रितानि महात्मना ॥")
मिश्रकावणं, क्ली, (मिश्रकायां वनम् । "वनगिर्य्योः संज्ञायां कोटरकिंशुलकादीनाम् ।" ६ । ३ । ११७ । अकारस्याकारः "वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ।" ८ । ४ । ४ । इति णत्वम् ।) इन्द्रस्योद्यानम् । यथा,—
"नन्दनं नन्दसारं स्यान्मिश्रकावणमित्यपि ।"
इति त्रिकाण्डशेषः ॥
मिश्रजः, पुं, (मिश्रात् भिन्नजातीययोः सम्मेलनात् जात इति । जन + डः ।) खेसरः । इति राजनिर्घण्टः ॥
मिश्रणं, क्ली, मिश्रधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम् । संयोजनम् । एकत्रीकरणम् । (यथा, प्रबोधचन्द्रोदये । २ । ५ ।
"तदेतैर्वाक्प्रिश्रणमपि गुरुतरदुरितोदयाय ॥")
मिश्रपुष्पा, स्त्री, (मिश्राणि परस्परं संश्लिष्टानि पुष्पाण्यस्याः ।) मेथिका । इति राजनिर्घण्टः ॥
मिश्रवर्णं, क्ली, (मिश्रः मिलितः वर्णोऽस्य ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ नानावर्णयुक्ते, त्रि ॥
मिश्रवर्णफला, स्त्री, (मिश्रवर्णं फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥
मिश्रशब्दः, पुं, (मिश्रः मिलितः अश्वरासभयोरिव शब्दोऽस्य ।) खेसरः । इति राजनिर्घण्टः ॥
मिश्रितं, त्रि, (मिश्रः मिश्रत्वमस्य संजातम् । मिश्र + इतच् । यद्वा, मिश्र + क्तः ।) गौरवितम् । इति जटाधरः ॥ मिलितञ्च ॥
मिश्रिता, स्त्री, (मिश्रित + टाप् ।) मन्दादिसप्तधासंक्रान्त्यन्तर्गतसंक्रान्तिविशेषः । यथा,
"मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरे महोदरी ज्ञेया क्रूरेष्वपि तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षस्तु संक्रमे ॥"
इति तिथ्यादितत्त्वम् ॥
मिश्रेया, स्त्री, मधुरिका । इत्यमरः । २।४।१०५ ॥ मौरि इति भाषा ।
"मिश्रेया सुरसा पेया तृषाद्या स्कन्दबन्धना ।"
इति शब्दचन्द्रिका च ॥ शाकविशेषः । शतपुष्पा । शलुफा इति भाषा । तत्पर्य्यायः । तालपर्णी २ तालपर्णी ३ मिषिः ४ शालेया ५ शीतशिवा ६ शालीना ७ वनजा ८ अवाक्पुष्पी ९ मधुरिका १० छत्रा ११ संहितपुष्पिका १२ सुपुष्पा १३ सुरसा १४ बला १५ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । कटुत्वम् । परमकफहरत्वम् । वातपित्तोत्थदोषशोफशूलविनाशित्वञ्च । इति राजनिर्घण्टः । तत्पर्य्यायगुणाः ।
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिच्छत्रा सितच्छत्रा संहितच्छत्रिकापि च ॥
छत्रा शालेयशालिन्यौ मिश्रेया मधुरा मिसिः ।
शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ॥
उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत् ।
मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥
अग्निमान्द्यहरी हृद्या बद्धविट्‌कृमिशुक्रहृत् ।
रूक्षोष्णा पाचनी कासवमिश्लेष्मानिलान्
हरेत् ॥"
इति भावप्रकाशः ॥
मिष उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) उ मेषित्वा मिष्ट्वा । इति दुर्गादासः ॥
मिष श स्पर्द्धे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) स्पर्द्धः पराभिभवेच्छा । इति वोपदेवः ॥ श मिषति बली बलवन्तम् । इति दुर्गादासः ॥
मिषं, क्ली, (मिष् + कः ।) छलम् । इति मेदिनी । षे, ११ ॥ (यथा, नैषधे । १ । ११८ ।
"प्रियासु बालासु रतक्षमासु च
द्विपत्रितं पल्लवितञ्च बिभ्रतम् ।
स्मराज्जितं रागमहीरुहाङ्कुरं
मिषेण चञ्च्वोश्चरणद्वयस्य च ॥")
मिषः, पुं, (मिष् + कः ।) स्पर्द्धनम् । इति मेदिनी । षे, ११ ॥ (यथा, कथासरित्सागरे । ६४ । १७५ ।
"इति ध्यायन् मिषं कृत्वा तदैवास्फुटया गिरा ।
निर्गत्यैव विरक्तात्मा शनैर्दैगान्तिकं ययौ ॥")
मिषिः स्त्री, (मिष् + इन् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इति शब्दचन्द्रिका ॥ (यथास्य पर्य्यायः ।
"अवाक्‌पुष्पी च छत्रा स्याज्जङ्गल्या मधुरा
मिषिः ।"
इति वैद्यकरत्नमालायाम् ॥)
शतपुष्पा । इत्यमरटीकायां भरतः ॥
मिषिका, स्त्री, (मिषि + कन् + टाप् ।) जटामांसी । इति शब्दरत्नावली ।
मिष्टं, त्रि, सिक्तम् । स्विन्नम् । इति मिषधातोः क्तप्रत्ययेन निष्पन्नम् ॥
मिष्टः, पुं, (मिष् + क्तः ।) मधुररसः । यथा,
"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"
इति भावप्रकाशः ॥
"नूतनसर्षपशाकं नवौदनं पिच्छिलानि च
दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥"
इति छन्दोमञ्जरी च ॥
मिष्टपाकः, पुं, (मिष्टेन पाको यस्य ।) शर्करारसपक्वफलादिः । मोरब्बा इति पारस्यभाषा ॥ तदेकप्रकारो यथा । अपक्वाम्रं द्विखण्डं कृत्वा तदास्थि शलाकया छिद्रजालकरणान्तरं चूर्णमिश्रितजले दण्डचतुष्टयं स्थापयित्वा जलेन धौतं कुर्य्यात । ततो जलेन सिद्धं कृत्वा जलत्यागपूर्ब्बकमेकतारबद्धशर्करारसे मन्दकरणानन्तरं तापं दद्यात । रसे घनीभूते अर्द्धदण्डं यावत् तापेन निष्पन्नो भविष्यति । इति पाकराजेश्वरः ॥
मिष्टान्नं, क्ली, (मिष्टमन्नम् ।) मधुरद्रव्यम् । इति हलायुधः ॥ अपि च ।
"मिष्टान्नपानदाताय सततं श्रद्धयान्वितः ।
देवपूजापरो नित्यं न प्रेतो जायते नरः ॥"
इत्यग्निपुराणम् ॥
मिसिः, } स्त्री, (मस्यति परिणमतीति + इन्
मिसी, } बाहुलकादत इकारः । पक्षे ङीष् ।) मधुरिका । (यथास्य पर्य्यायः ।
"मिसिर्म्मधुरिका मता ।"
इति गारुडे । २०८ अः ॥) जटामांसी । शतपुष्पा । इत्यमरभरतौ ॥ (शतपुष्पार्थे पर्य्यायो यथा,—
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहितच्छत्रिकापि च ॥
छत्रा शालेयशालिन्यौ मिश्रेया मधुरा मिसिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
उशीरी । इति राजनिर्घण्टः ॥ अजमोदा । इति मेदिनी । से, ८ ॥
मिस्त न क युत्याम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यमध्योऽयम् । दन्त्यमध्य इति वर्णदेशनायाम् । युतिः संयोजनम् । मिस्नयति मिस्नापयति छत्रवान् लोकः । इति दुर्गादासः ॥
मिह औ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक० अनिट् ।) औ अमिक्षत् । इति दुर्गादासः ॥
मिहिका, स्त्री, (मेहति सिञ्चतीति । मिह + संज्ञायां कुन् टाप् अत इत्वम् ।) नीहारः । इति शब्दरत्नावली ॥ (यथा, नैषधे ।१६।३५ ।
"विग्लति युवतित्यागे राजीसुचं मिहिकावचम् ।
दिनमणिमणिं तापैश्चिन्तामणिर्णाय विग्लवयति ॥")

मिहिरः, पुं, (मेहयति सेचयति मेघजलेन भूमिमिति। मिह + "इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहीति।" उणा० १। ५२। इति किरच्।) सूर्य्यः। (यथा, मार्कण्डेये।१०७।७।
"भव तिमिरासवपानमदात्
भवति विलोहितविग्रहात्।
मिहिर। विभासि यतः सुतरां
त्रिभुवनभावनभानिकरैः॥")
अर्कवृक्षः। इत्यमरः। १। ३। ०८॥ वृद्धः। इति मेदिनीशब्दरत्नावल्यौ। रे, २०४॥ मेघः। इति हेमचन्द्रः। २। ११॥ वायुः। चन्द्रः। इति नानार्थरत्नमाला॥ विक्रमादित्यभूपस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नम्॥

मिहिराणः, पुं, (मिहिरेणाध्वण्यतेऽस्तूयते इति। अण + घञ्।) शिवः। इति त्रिकाण्डशेषः॥

मी ञो ग ञ वधे। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-सेट्।) ञो मीनः। ग ञ मीनाति मीनीते। इति दुर्गादासः॥

मी कि गत्याम्। मत्याम्। इति कविकल्पद्रुम.॥ (चुरा०-पक्षे भ्वा० सक०-अनिट्।) कि माययति मयति। इति दुर्गादासः॥

मी ङ य वधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) ङ य मीयते। इति दुर्गादासः॥

मीढं, त्रि, मूत्रितम्। इत्यमरः। ३। १। ८६॥ ढे कृतमूत्रोत्सर्गे। मिहौ सिचि मूत्रत् क प्रस्तावे आभ्यां धात्वर्थेनोपसंग्रहादकर्मकत्वात् कर्त्तरि क्तः। इति भरतः॥

मीढुष्टमः, पुं, (मीढुस् तमप्प्रत्ययेन पृषोदरादित्वात् साधुः।) शिवः। यथा,—
"तदा सर्व्वाणि भूतानि। श्रुत्वा मीढुष्टमोदितम्।
परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्॥"
इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥
"मीढुष्टमः शिवस्तेनोक्तम्।" इति तट्टीकायां श्रीधरस्वामी॥

मीढ्वान्, [स्] पुं, (मिह सेचने। "दाश्वान् साह्वान् मीढ्वांश्च।" ६। १। १२। इति छन्दसि क्वसुः। द्वित्वाभावः अनिट्त्वं उपधादीर्घत्वं ढत्वञ्च निपात्यते।) शिवः। यथा,—
"ततो मीढ्वांसमामन्त्र्य शुनासीराः सहर्षिभिः।
भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः॥"
इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥
"मीढ्वांसं शिवं मीढुषा वेधसा च वर्त्तमानाः।"
इति तट्टीकायां श्रीधरस्वामी॥ (वर्षितरि, त्रि। यथा, ऋग्वेदे। २। २४। १।
"यथा नो मीढ्वान् स्तवते सखा तव बृहस्पते।"
"मीढ्वान् सेक्ता स्तुतेर्वर्षिता।" इति तद्भाष्ये सायणः॥)

मीनः पुं, (मीयते इति मीङ् हिंसायाम्। "फेनमीनौ।" उणा० ३।३। इति नक् निपातितश्च।) मत्स्यः। इत्यमरः। १। १०। १७॥ (यथा, भागवते। ३। २। ८।
"दुर्भगो बत लोकोऽयं यदवो नितरामपि।
ये संवसन्तो न विदुर्हरिं मीन इवोडुपम्॥")
मेषादिद्वादशराश्यन्तर्गतान्तिमराशिः। तत्पर्य्यायः। अन्त्यभम् २। स च पूर्व्वभाद्रपदाशेषपादोत्तरभाद्रपदारेवतीसमुदायेन भवति। अस्याधिष्ठातृदेवता स्त्रीमत्स्यद्वयं स च कीटसंज्ञः। जलजः। सौम्यः। अङ्गना। युग्मः। समः। द्व्यात्मकः। भक्ष्यः। उत्तरदिङ्नाथः। गुरुक्षेत्रम्। दिनात्मकश्च। इति ज्योतिस्तत्त्वम्॥ अपि च। शीर्षपृष्ठोदयः। चरणरहितः। कफप्रकृतिः। जलचारी। निःशब्दः। पिङ्गलवर्णः। स्निग्धः। अत्यन्तस्त्रीसङ्गः। बहुसन्तानः। ब्राह्मणवर्णः। कृशाङ्गश्च। तत्र जातः अतिक्रोधनः। शीघ्रगतिः। अशुचिः। कर्म्मभोगी। प्रचुरविवाहश्च भवति। इति बृहज्जातकादयः॥ अपि च।
"मीनजन्मे ससुतपत्नी रत्नकाञ्चनपूरितः।
अल्परोमा महाप्राज्ञो दीर्घकालपरीक्षकः॥"
इति कोष्ठीप्रदीपः॥ * ॥
रात्रौ तल्लग्ननिरूपणं यथा। सूर्पाकारतारा-चतुष्टयात्मकपूर्व्वाषाढ़ानक्षत्रे मस्तकोपरि दृष्टे सति मीनलग्नस्य १। ४८ ऊनपञ्चाशत्पला-धिकैकदण्डो भवति। प्रकारान्तरे। सूर्पाकृति-ताराचतुष्टयात्मकोत्तराषाढ़ानक्षत्रे मस्तकोपरि उदिते सति मीनलग्नस्य २। ३६ षट्-त्रिंशत्पलाधिकदण्डद्वयं भवति। यथा,—
"सूर्पमूर्त्तिनि शिरोगते
चतुस्तारके करिकरोरुवारिभे।
अन्त्यभाद्दन्तवाणि। निर्गताः
खेचराम्बरशशाङ्कलिप्तिकाः॥ दं १।४८।
शीर्षभाजिभचतुष्टयाकृते
विश्वभे तरणि सूर्पकाकृतौ।
भ्रान्तिरस्कृतमनोजकार्मुके।
यान्ति कालतिथिलिप्तिका भषात्॥"
दं २। ३६॥
इति कालिदासकृतरात्रिलग्ननिरूपणम्॥ * ॥
भगवद्दशावतारान्तर्गतप्रथमावतारः। यथा,
"शेते स चित्तशयने मम मीन कूर्म्म-
कोलोऽभवन् नृहरिवामनजामदग्न्याः।
योऽभद्बभूव भरताग्रजकृष्णबुद्धः
कल्की सताञ्च भविता प्रहरिष्यतेऽरीन्॥"
इति मुग्धबोधव्याकरणम्॥
अस्य विवरणं मत्स्यशब्दे द्रष्टव्यम्॥ * ॥
विशेषस्त्वत्र कथ्यते।
"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश॥
कृष्णरूपा कालिका स्याद्रामरूपा च तारिणी।
वगला कूर्म्ममूर्त्तिः स्यान्मीनो धूमावती भवेत्॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी।
सुन्दरी जामदग्न्यः स्याद्वामनो भुवनेश्वरी॥
कमला बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम्॥
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्व्रजे।"
दुर्गा स्यात् कल्किरूपिणीति पाठान्तरम्।
इति मुण्डमालातन्त्रम्॥

मीनकेतनः, पुं, (मीनः केतने अस्य।) कन्दर्पः। इत्यमरः। १। १। २६॥ (यथा, दशकुमारचरिते। ५।
"अथ मीनकेतनसेनानायकेन।"

मीनगोधिका, स्त्री, (मीनगोधिकानामावासोऽत्र।) जलाशयः। यथा,—
'पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका।'
इति त्रिकाण्डशेषः॥

मीनघाती, [न्] पुं, (मीनं हन्तीति। हन + णिनिः।) वकः। इति राजनिर्घण्टः॥ मत्स्यघातके, त्रि॥

मीननेत्रा, स्त्री, (मीनस्य नेत्राकारा ग्रन्थिरस्याः।) गण्डदूर्व्वा। इति राजनिर्घण्टः॥

मीनरः, पुं, (मीनाः भक्ष्यत्वेन सन्त्यस्य। मीन + "वुञ् छण्कठजिलेति।" ४। २। ८०। इति अश्मादित्वात् रः।) हारकः। इति त्रिकाण्डशेषः॥ हाङ्गर इति भाषा॥

मीनरङ्कः, पुं, (मीनरङ्ग। पृषोदरादित्वात् साधुः।) मत्स्याशनपक्षी। इति त्रिकाण्डशेषः। माछराङ्गा इति भाषा॥ क्वचित् पुस्तके मत्स्यरङ्ग इत्यपि पाठः॥

मीना, स्त्री, उषाकन्या। सा तु कश्यपभार्य्या। यथा, वह्निपुराणे।
"उषायास्तु प्रवक्ष्यामि सर्गं पञ्च सुतास्ततः।
मीना मेना तथा वृत्ता अनुवृत्ता तथैव च॥
परिवृत्ता च विज्ञेया तासाञ्च शृणुत प्रजाः।"

मीनाक्षी, स्त्री, शर्करा। इति राजनिर्घण्टः॥ (विशेषोऽस्याः शर्कराशब्दे विधेयः॥)

मीनाण्डीणः, पुं, दर्दुराण्डः। खञ्जनः। इति मेदिनी। णे, १०५॥

मीनालयः, पु, (मीनानामालयः।) समुद्रः। इति धनञ्जयः॥

मीनाक्षी, स्त्री, (मीनस्याक्षिणी इव अक्षिणी अस्याः।) मत्स्याक्षी। गण्डदूर्व्वा। इति राजनिर्घण्टः॥ कुवेरकन्या। इति पुराणम्॥

मीम ऋ शब्दे गतौ। इति कविकल्पद्रुमः॥ (भ्वा० शब्दे अक०-गतौ सकं पर०-सेट्।) ऋ अमिमीमत्। इति दुर्गादासः॥

मीमांसकः, पुं, (मीमांसामधीते वेद वेत्ति। मीमांसा + "क्रमादिभ्यो वुन्।" ४। २। ६१। इति वुन्।) मीमांसाशास्त्रवेत्ता। तत्पर्य्यायः। सिद्धान्ती २। इति जटाधरः॥ मीमांसाशास्त्राध्येता च। (विषयोऽस्य यथा,—

"द्रव्यत्वं तमसोऽपि शोभनधियां मीमांसकानां मतम् ।"

छायायास्तमसश्चापि सम्बन्धातगुणकर्मणोः ।
द्रव्यत्वं केचिदिच्छन्ति मीमांसकमताश्रयाः ॥"

इति वैयाकरणवल्लभभञ्जनवादार्थदर्पणे प्रथमश्लोके ॥)

पूर्व्वमीमांसासूत्रकर्त्ता जैमिनिः । वृत्तिकर्त्ता कुमारिलभट्टः । भाष्यकर्त्ता शवरस्वामी । प्रभाकरः कुमारिलभट्टस्य छात्रः । स एव गुरुत्वेन भण्यते । तन्मतं गुरुमतम् तच्छिष्याः प्राभाकराः । अतएव स्मार्त्तभट्टाचार्य्येण प्राभाकरैरभिहितमित्युक्तम् । उत्तरमीमांसासूत्रकर्त्ता वेदव्यासः । तस्य भाष्यकर्त्ता शङ्कराचार्य्यः । स च अद्वैतवादी । रामानुजः विशिष्टाद्वैतवादी । माध्वः द्वैतवादी च ॥ (यथा, भक्तिरसामृतसिन्धौ । १ । १ । ३ ।

"मीमांसको वडवाग्नेः कठिनामपि कुण्ठयन्नसौ जिह्वाम् ॥")

मीमांसा, स्त्री, (मानविचारे + "मान् बधदान् शान्भ्यो दीर्घश्चाभ्यासस्य ।" ३ । १ । ६ । इति सन् । अः टाप् । अभ्यासस्येकारस्य दीर्घश्च ।) षड्दर्शनान्तर्गतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । विचारणा २ । इति हेमचन्द्रः । ७ । १६५ ॥ अस्या अध्याया विंशतिः । तत्र पूर्व्वमीमांसा द्वादशाध्यायात्मिका जैमिनिप्रणीता यज्ञादिकर्म्मकाण्डनिरूपिका । अस्या अन्तर्गतानि लोकव्यवहारनियमार्थं मनुयाज्ञवल्क्यादिभिः बहूनि धर्म्मशास्त्राणि कृतानि । तत्रोत्तरमीमांसा चतुरध्यायात्मिका वेदव्यासप्रणीता ब्रह्मनिरूपिका । अस्या नाम वेदान्तः । अपराध्यायचतुष्टयं सङ्कर्षणप्रणीतं उपासनाकाण्डं षड्दर्शनबहिर्भूतम् ॥ * ॥ प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम् । १ । द्वितीये यागदानादिकर्म्मभेदः । २ । तृतीये प्रयाजादीनां दर्शपूर्णमासार्थकत्वेन तच्छेषत्वम् । ३ । चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्त्या अनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्त्येत्येवमादयः । ४ । पञ्चमे क्रमनियतिविधेयत्वादयः । ५ । षष्ठे कर्त्तुरधिकारो नाध्यादेरित्यादयः । ६ । सप्तमे समानमितरच्छ्येनेन इत्यादि प्रत्यक्षवचनेनातिदेशोनामादिनानुमितवचनेन च सामान्यतोऽतिदेशः । ७ । अष्टमे सौर्य्यं चरुं निर्व्वपेदित्यत्र निर्व्वापस्तद्धितेन देवतानिर्द्देशः एकदेवतत्त्वमौषधद्रव्यकत्वमित्यादिना लिङ्गेनाग्नेयपुरोडाशातिकर्त्तव्यतानामस्त्येवमादिविशेषातिदेशः । ८ । नवमे प्रकृतावग्नये जुष्टं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण सूर्य्याय जुष्टं निर्व्वपामीत्येवमादिरूहः । ९ । दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्ब्बाधः । १० । एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम् । ११ । द्वादशे प्रधानस्य पशोरुपकाराय अनुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोडाशोऽप्युपकार इत्यादिप्रसङ्गः । १२ ॥ (एतदध्यायप्रतिपाद्यार्थानां विवरणं यथा,—

'प्रथमाध्यायस्य प्रथमे पादे विधिरूपं मानमीरितम् । द्वितीयेऽर्थवादरूपम् अर्थवादो मन्त्रस्याप्युपलक्षकः । तृतीये स्मृतिरूपम् । स्मृतिराचारमप्युपलक्षयति । चतुर्थे उद्भिच्चित्रादिनामरूपम् । द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकम् । अपूर्व्वसद्भाव इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः । द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः । तृतीये रथन्तरादीनां कर्म्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः ।

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता । द्वितीये लिङ्गम् । तृतीये वाक्यप्रकरणादि । चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसद्भावः । पञ्चमे प्रतिपत्तिकर्म्माणि । षष्ठेऽनारभ्याधीतानि । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि ।

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षादध्यानयनस्य प्रयोजकत्वादि प्रधानप्रयोजकत्वं विचारितम् । द्वितीये त्वप्रधानं वत्सापकरणं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम् । तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता । चतुर्थे राजसूयगतजघन्याङ्गाक्षद्यूतादिचिन्ता ।

पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः । द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादिक्रमविशेषः । तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकादशत्वमित्यादिवृद्धिः । अदाभ्यग्रहचित्रिण्योरनारभ्याविति ग्रहणीयत्याद्यनुष्ठानबाधश्च ? वृद्ध्यभावः । चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्ब्बलभावः ।

षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकारः । कर्त्तुरन्ध्यन्धादेर्नास्ति क्रिया अस्ति । योऽस्ति स च पत्या सहैत्येवमादिनाधिकारी निरूपितः । द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नं फलम् । दर्शपौर्णमासयोः कर्त्तव्यनियमः काम्यकर्म्मसमापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ताः । तृतीये द्रव्यस्य प्रतिनिधिरस्ति । देवादीनामग्न्यादीनामधिकारिणाञ्च स नास्तीत्यादिनिरूपणम् । चतुर्थे पदार्थलोपनं विचारितम् । अवदानाशे सत्याज्येन यजेत् । इडाद्यर्थनाशे सति शेषाद्ग्राह्यमित्यादिकम् । पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम् । ज्योतिष्टोमस्यैकादशीदीक्षाः । द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम् । षष्ठे समाधिकारिणास्तुल्यकल्पा एव सत्रं विप्रस्यैवेत्येवमादिकं चिन्तितम् । सप्तमे पित्रादिकं न देयम् । महाभूमिर्न देयेत्येवमादिदेयविचारः । अष्टमे लौकिकाग्नावुपनयनहोमः । स्थपतीष्टिरग्नावेवेत्येवमाद्यग्निविचारः कृतः ।

सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनातिदेशः । द्वितीये पूर्व्वोक्तातिदेशस्य शेषो विचारितः । तृतीयेऽग्निहोत्रनाम्नातिदेशः । चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः ।

अष्टमाध्यायस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः । तद्यथा सौर्य्यचरावतिदेशकाणि निर्वापस्तद्धितेन देवतानिर्द्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि । द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशः । तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते तच्च लिङ्गमस्पष्टम् । शेषं तद्वदुत्तरत्रानुपादानात् । तृतीये प्रबलेन लिङ्गेनातिदेशः । तद्यथा । आभिचारिकेष्टावाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु चित्रेण लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदेवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः । प्रबलञ्च द्विदेवत्यत्वम् । शब्दोच्चारणमात्रेण सहसा प्रतिभासात् । क्रमस्तु विलम्बितप्रतीत्या दुर्ब्बलः । चतुर्थे दर्व्विहोमेष्वतिदेशोऽपोद्यते ।

नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्व्वकमूहविचारप्रारम्भः । तत्र प्रयाजादयो धर्म्मा अपूर्व्वप्रयुक्ताः । अवघातमन्त्रादिष्वविवक्षितं व्रीह्यवत्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरूपोपोद्घातः । सवित्रग्निपूषशब्दानां विकृतिषु नास्त्यूहः । अग्निशब्दस्याप्यूह इत्यादि ऊहविचारारम्भः । द्वितीये सपरिकरः सामोहः । तृतीये मन्त्रोहः । चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः ।

दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः । तद्यथा स्वयं कृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुद्धननादीनां बाधः । कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः । द्वितीये संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः । तृतीये बाधकारणं कार्य्यैकत्वम् । तद्यथा प्रकृतौ गवाश्वादिदक्षिणायाः ऋत्विक्परिक्रयः कार्य्यम् । तथा विकृतिरूपे भूतार्म्मकादे धेनुरूपाया दक्षिणायास्तदेव कार्य्यम् । ततो धेन्वा गवाश्वादिदक्षिणाविकृतौ चोदकप्राप्ता बाध्यते । चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्त इत्यादिः समुच्चयः । पञ्चमे षोड़शिग्रहः प्रकृतिगामी । स चाग्रयण-

प्राधान्येव ग्रहीतव्य इत्यादिबाधप्रसङ्गागतो ग्रहादिविचारः। षष्ठे सामरूपे गेयमित्यादिबाधप्रसङ्गागतः सामविचारः। सप्तमे पञ्चहविष्षु हविर्भेदः। गृहमेधीयमपूर्व्वकर्म्मेत्यादिबाधप्रसङ्गागतः प्रकीर्णविचारः। अष्टमे नानुयाजेष्विति पर्य्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिर्बाधोपयुक्तो नञर्थविचारः।

एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संक्षेपेणोक्तौ। तृतीये तन्त्रमुदाहरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः।

द्वादशाध्यायस्य प्रथमे पादे पशुधर्म्माणां पशुपुरोडाशे प्रसङ्गः। सौमिकवेदिरुत्तरकालीनकर्म्मसु प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशोस्तन्त्रित्वम्। न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिणी न प्रकृतिः। अन्वारम्भणीया विकृतिष्वपि स्यात्। न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्वन्वासतोः समुच्चयः। आधारगतानामृजुत्वसन्ततत्वादीनां समुच्चय इत्यादिकं प्राधान्येन। यवव्रीह्योर्व्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चैन्द्रावार्हस्पत्ययाज्यानुवाक्ययुगलयोर्व्विकल्प इत्यादिकं प्राधान्येन। याज्यानुवाक्ययोः समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। तदेवं द्वादशाध्यायगतेषु षष्टिसंख्यकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः।"इत्यधिकरणमाला॥ उत्तरमीमांसाध्यायपादप्रतिपाद्यार्थो यथा,—

"शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्व्विधाः।
समन्वयाविरोधौ द्वौ साधनञ्च फलन्तथा॥
समन्वये स्पष्टलिङ्गमस्पष्टत्वेऽप्युपास्यगम्।
ज्ञेयगं पदमात्रञ्च चिन्त्यं पादेष्वनुक्रमात्॥
द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता।
भूतभोक्तृश्रुते लिङ्गश्रुतेरप्यविरुद्धता॥
तृतीये विरतिस्तत्त्वं पदार्थपरिशोधनम्।
गुणोपसंहृतिर्ज्ञानेबहिरङ्गादि साधनम्॥
चतुर्थे जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा।
ब्रह्मप्राप्तिर्ब्रह्मलोकाविति पादार्थसंग्रहः॥"

इति वैयासाधिकरणमाला॥ मीमांसाद्वयमतसंग्रहो यथा,—

अथ मीमांसकम्।

"मीमांसको द्विधा कर्म्मब्रह्ममीमांसकः स्मृतः।
वेदान्ती मनुते ब्रह्म कर्म्म भट्टप्रभाकरौ॥
प्रत्यक्षमनुमानञ्च वेदाश्चोपमया सह।
अर्थापत्तिरभावश्च भट्टानां षट्प्रमाण्यसौ॥
प्रभाकरमते पञ्चैतान्यभावस्य वर्ज्जनात्।
अद्वैतवादी वेदान्ती प्रमाणन्तु यथातथा॥
सर्व्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिनाम्।
आत्मन्येव लयो मुक्तिर्वेदान्तिकमते मता॥
अकुकर्म्मा सषट्कर्म्मा शूद्रान्नादिविवर्ज्जकः।
अजहत्रो द्विजो भट्टो गृहस्थाश्रमसंस्थितः॥
भगवन्नामधेयास्तु द्विधा वेदान्तदर्शने।
विप्रगेहभुजस्त्यक्तोपवीता ब्रह्मवादिनः॥
चत्वारो भगवद्भेदाः कुटीचरबहूदकौ।
हंसः परमहंसश्चाधिकोऽमीषु परः परः॥"

इति जिनदत्तकृतविवेकविलासः। सर्व्वदर्शनसंग्रहधृत जैमिनिमतसंग्रहो यथा। अथातो धर्म्मजिज्ञासा इति प्रथमाधिकरणसूत्रम्। तत्राधिकरणं पञ्चावयवमाचक्षते परीक्षकाः। अस्मिन् सूत्रे स्वाध्यायोऽध्येतव्य इतिश्रुतिवाक्यमाश्रित्य विषयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयरूपपञ्चाङ्गात्मकाधिकरणेन मीमांसाशास्त्रारम्भस्यावश्यकता प्रदर्शिता। मीमांसा हि वेदविचारशास्त्रं तदारम्भो निष्प्रयोजनः स्वाध्यायोऽध्येतव्य इतिश्रुत्या वेदाध्ययनं विहितं तत्र विश्वजिन्न्यायात् स्वर्गरूपं फलमक्षरग्रहणमात्रेणापि सम्भवति न तत्रार्थबोधापेक्षाप्यस्ति असत्याञ्च वेदार्थबोधापेक्षायां तदधीनाया विचारणाया अपि अनावश्यकत्वात् अथवा यागादिकर्म्मावबोधाय स्वाध्यायोऽध्येतव्यः तस्य चार्थबोधरूपं दृष्टमेवफलं ततश्च दृष्टार्थत्वेन तस्य वैधत्वाभावात् वेदार्थविचारस्यापि तदेकप्रयोजनस्य वैधत्वं नास्तीति तद्विचारशास्त्रमनारम्भणीयम्। स्वाध्यायाध्ययनानन्तरं विचारशास्त्रेऽध्येतव्यतया स्वीकृते वेदमधीत्य स्नायादितिविधिबोधितं वेदाध्ययनसमावर्त्तनयोरानन्तर्य्यं बाध्येत तस्मान्नविचारशास्त्रमारम्भणीयमितिपूर्व्वपक्षसद्भावः अध्ययनस्य दृष्टफलकत्वेऽपि अध्येतव्य इत्यत्र तव्यप्रत्ययेन भावनाप्रतिपादनात् अर्थबोधस्य तत्र भाव्यत्वेनान्वयादध्ययनविधेरवघातादिविधिवन्नियमापूर्व्वार्थत्वं। तथाच यथा दर्शपौर्णमासजन्यं परमापूर्व्वमवघातादिजन्यमवान्तरापूर्व्वं कल्पयति तथा समस्तक्रतुजन्यमपूर्व्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यमपूर्व्वं कल्पयिष्यति। अन्यथा अध्ययनविधेर्वैफल्यं स्यात्। अर्थबोधरूपदृष्टफलस्य सम्भवे विश्वजिन्न्यायान्न स्वर्गफलकल्पना इति सिद्धान्तितम्। यथा यागे यवादेर्नखादिनापि वितुषीकरणसम्भवे अवघातविधिना अवघातो नियम्यते तथा अध्ययनविधिना अध्ययनं नियम्यते। तथाच अध्ययनेन च वेदार्थे परिज्ञाते तत्र संशये तन्निर्णयार्थं विचारशास्त्रमवश्यमपेक्षितव्यमिति विचारशास्त्रमारम्भणीयमेवेति प्रथमाधिकरणनिष्कर्षः एवंरीत्या अधिकरणसहस्रात्मकं कर्म्ममीमांसाशास्त्रं जैमिनिना प्रणीतम्। अस्मिन् शास्त्रे वेदस्यापौरुषेयत्वम्। वर्णानां ककारादीनां नित्यत्वं तत्र सोऽयं क इत्यादिप्रत्यभिज्ञैव प्रमाणं कण्ठताल्वाद्यभिघात एव तदभिव्यञ्जकः। ततश्च वेदस्यापौरुषेयतया निरस्तसमस्तशङ्काकलङ्काङ्कुरत्वेन स्वतः सिद्धं धर्म्मे प्रामाण्यमिति सुस्थितम्।

प्रमाज्ञानस्य स्वतःप्रामाण्यम्। विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति॥

मीरः, पुं, (मिन्वन्ति प्रक्षिपन्ति नद्यो जलान्यत्रेति। मिञ्+"शुसिचिमिञां दीर्घश्च।" उणा० २।२५। इति क्रन् दीर्घत्वञ्च।) समुद्रः। इत्युणादिकोषः॥ पर्व्वतैकदेशः। सीमा। पानीयम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मील, ऋ निमेषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ अमिमीलत् अमीमिलत्। मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः॥

मीलं, क्ली, (मीलतीति। मील+कः।) वनम्। इति केचित्॥

मीलनं, क्ली, पक्ष्मभिरावरणम्। मीलधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

मीलितं, त्रि, (मील+क्तः।) अप्रफुल्लम्। तत्पर्य्यायः। सङ्कुचितम् २ निद्राणम् ३ मुद्रितम् ४। इति हेमचन्द्रः॥ (अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ११५।
("मीलितं वस्तुनो गुप्तिः केनचित् तुल्यलक्ष्मणा।")

मीव, पीवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मीवति। पीवः स्थूलीभावः। इति दुर्गादासः॥

मीवरः, त्रि, (मीनाति हिनस्तीति। मीञ्+"छित्वरछत्वरधीवरपीवरमीवरेति।" उणा० ३।१। इति ष्वरच् निपातितश्च। अन्ये-त्वनेन तु माधातोः ष्वरच् निपातितश्चेत्युच्यते स।) हिंस्रः। इत्युणादिकोषः॥ (मीयते इति। मा+ष्वरच्। निपातितः।) सेनानी। पूज्यः। इति संक्षिप्तसारोणादिवृत्तिः॥

मीवा, स्त्री, (मीनाति हिनस्तीति। मी+"ग्रीवायञ्जिह्वाग्रीवाप्वामीवाः।" उणा० १।१५४। इति वन् निपात्यते च।) उदरकृमिः। इत्युणादिकोषः॥ वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शीकरः। सारः। इति संक्षिप्तसारोणादिवृत्तिः॥

मुः, पुं, (मव्+बाहुलकात् डुन्। टिलोपश्च।) बन्धनम्। इत्येकाक्षरकोषः॥ महेशः। इति शब्दचन्द्रः॥

मुकुन्दकः, पुं, पलाण्डुः। केचित्तु मुकन्दकस्थाने मुकन्दक इति पठित्वा जवनानां मुदं हर्षं प्राप्य काम्यति आक्रयति कादि आक्राने रोदने च ण्वकः पृषोदरादित्वात् इलुक् मुकन्दक इति व्याचक्षते। इत्यमरटीकायां भरतः॥

मुकुः, पुं, (मुच्+बाहुलकात् कुः। पृषोदरादित्वात् साधुः।) मुक्तिः। यथा,—
"मुकुर्मुक्तौ महेशे मुः कुः पृथिव्यामशोभने।"
इति दुर्गादासधृतशब्दचन्द्रः॥

मुकुटं, क्ली, (मङ्कते मण्डयति। मकि+उटन् नलोपश्चेति न्यासः।) स्वनामख्यातशिरोभूषणम्। तत्पर्य्यायः। किरीटम् २। इत्यमरः।

८ । ६ । १०२ ॥ मौलिः ३ कोटीरम् ४ उष्णीषम् ५ । इति हेमचन्द्रः । ३।३१४ ॥ मकुटम् ६ मौलीकः ७ शेखरम् ८ अवतंसः ९ वतंसः १० उत्तंसः ११ उष्णीषकम् १२ कोटीरकम् १३ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ८६ । ७१ ।
"मुकुटञ्चापतत्तस्य काञ्चनो वज्रभूषितः ।"
तथा च महाभारते । १ । ३० । ३८ ।
"इत्येव मुकुटाग्रेषु सुस्थितानि ववर्षयन् ।"
टाप् । स्त्री, मालवगायविशेषः । यथाचैव । ८ । ४६ । २३ ।
"कालेष्टिका वामनिका मुकुटा चैव भारत ॥")

मुकुटी, स्त्री, अङ्गुलिमोटनम् । इति शब्दरत्नावली ॥

मुकुन्दः, पुं, विष्णुः । तस्य व्युत्पत्तिर्यथा,—
"मुकुमव्ययमाख्यञ्च निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः ॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११०अध्यायः ॥ निधिविशेषः । (यथा, मार्कण्डेये । ६८ । ५ ।
"यत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः ॥"
अस्य गुणादिकं निधिशब्दे उक्तम् ।) रत्नभेदः । कुन्दुरुः । इति मेदिनी । दे, ६८ ॥ (यथा च पर्य्यायः ।
"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पारदः । इति हेमचन्द्रः । २ । १२८ ॥

मुकुन्दकः, पुं, पलाण्डुः । केचित्तु मुकन्दकस्थाने मुकुन्दक इति पठित्वा जवनानां मुदं कन्दतीति पृषोदरादित्वात् दलुक् कन्देरन् उच्चति आचष्टे । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । ४६ ।
"विशेषो तत्र भूयिष्ठं वककः समुकुन्दकः ।")
षष्टिकभेदः । यथा, भावप्रकाशे ।
"षष्टिकः शतपुष्पश्च प्रमोदकमुकुन्दकौ ।
महाषष्टिक इत्याद्याः षष्टिकाः समुदाहृताः ॥"

मुकुन्दः, पुं, (मोचयति विषयान्तरानुरागमिति । अन्तर्भूतण्यर्थे मुच् + कः । न्यङ्क्वादित्वात् कुत्वम् । तं उन्दयतीदीकरोतीति । उन्द + उम् । पृषोदरादित्वात् साधुः ।) कुन्दुरुः । इत्यमरटीकायां मथुरानाथः ॥

मुकुम्, अ, निर्व्वाणम् । भक्तिरसः । प्रेम । यथा,
"मुकुमव्ययमाख्यञ्च निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः ॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अः ॥

मुकुरः, पुं, (मक + "मकुरदर्दुरौ ।" उणा० १।४१। इत्यत्र । बाहुलकादकारस्थाने उकारः इत्युज्ज्वलदत्तोक्तेः उरच् ।) दर्पणः । (यथा, नैषधे ।४।५८।
"कुरु करे गुरुमेकमयोघनं
बहिरितो मुकुरञ्च कुरुष्व मे ॥")
मकुलद्रुमः । कुलालदण्डः । इति मेदिनी । रे, २०३ ॥ मल्लिकापुष्पवृक्षः । इति विश्वः ॥ (यथा,
"मुकुरकुसुमभङ्गञ्चानतपत्रं ध्वजं वा
दधिफलमथ नौकामम्बुतामलवक्त्रम् ।
कमलकलसशङ्खं भृङ्गमं काञ्चनं वा
भवति सकलसिद्ध्यै श्रेयसे रोगिणाञ्च ॥"
इति हारीते द्वितीयस्थाने द्वितीयेऽध्याये ॥) कुड्मलः । इति शब्दरत्नावली ॥ कोरकः । इति हेमचन्द्रः ॥

मुकुलः, पुं, क्ली, (मुञ्चति कलिकात्वम् । मुच् + उलक् । इति भरतः । मुकेरुल । कलमुलखङ्गेति कले अकारस्योत्वे मुकुल इति रायः ।) ईषद्विकसितकलिका । तत्पर्य्यायः । कुड्मलः २ । इत्यमरः । २ । ४ । १६ ॥ (यथा, रघौ ।९।३१।
"उपहितं शिशिरापगमश्रिया
मुकुलजालमशोभत किंशुके ।")
मकुलः ३ पीटकोरक ४ । इति शब्दरत्नावली ॥ शरीरम् । आत्मा । इति धरणिः ॥ (राजपुत्रविशेषः । यथा, राजतरङ्गिण्याम् ।६।२५३।
"इत्थं लब्धजया राज्ञी तनूजमाग्यपञ्चहीहया ।
यशोधरं शुभधरं मुकुलञ्च सबान्धवम् ॥")

मुकुष्टः, पुं, वनमुद्गः । तत्पर्य्यायः । मपष्टः २ । इति रत्नमाला ॥ अस्य गुणाः । शीतलत्वम् । ग्राहित्वम् । कफपित्तज्वरनाशित्वञ्च । इति राजवल्लभः ॥

मुकुष्टकः, पुं, (मुकं स्तकति प्रतिहन्ति । स्तक + अच् पृषोदरादित्वात् साधुः ।) वनमुद्गः । मुगानी इति भाषा । तत्पर्य्यायः । मयष्टकः २ । इत्यमरः ।२।९।१७॥ मुकुष्टः ३ मयष्टः ४ । इति श्रीधरः । मपष्टकः ५ । इत्यन्ये । इति भरतः ॥ मुकुष्टकः ६ मकुष्टकः ७ मयुष्टकः ८ । इति टीकान्तरम् ॥ (तथास्य विषयः ॥
"विदलान्नानि वक्ष्यामि शृणु पुत्र । यथाक्रमम् ।
यवगोधूमचणका माषामुद्गाढकी तथा ॥
मुकुष्टकाः कुलत्थाश्च मसूरास्त्रिपुटास्तथा ।
निष्पावकाः कलायाद्या विदलान्नानि कीर्त्तयेत् ॥
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्टकान् ।
आहारकाले यूषार्थे ज्वरिताय प्रदापयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

मुकूलकः, पुं, (मुच् + बाहुलकादूलच् पृषोदरादित्वात् कुत्वम् । ततः संज्ञायां कन् ।) दन्तिवृक्षः । इत्यमरटीकायां रामाश्रमः ॥ (तथास्य पर्य्यायः ॥
"चित्रा दन्ती निकुम्भः स्यादुपचित्रा मुकूलकः ।
द्रावायणी विशल्या च तथोदुम्बरपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥
"दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः ।
द्रवन्ती नामतश्चित्राप्यथोषा मूषिकाह्वया ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

मुक्तः, त्रि, (मुच् + क्तः ।) प्राप्तमोक्षः । मोचितः । इति मेदिनी । ते, ४४ ॥ त्यक्तः । इति शब्दरत्नावली ॥ (नृपविशेषः । यथा, राजतरङ्गिण्याम् । ७ । १६७५ ।
"इदन्तस्य कनिष्ठस्य जलकाख्यस्य तत्सुतम् ।
मुक्तं नामान्तिकं प्राप्तं नृपतेरामताशयात् ॥"
ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अमोघाधाममिषाहश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥")

मुक्तकं, क्ली, (मुच्यते स्मेति । मुच् + क्तः । संज्ञायां कन् ।) क्षेपणीयास्त्रम् । इति केचित् । (काव्यविशेषः । यथा, साहित्यदर्पणे । ६ । ३१४ ।
"वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ॥")

मुक्तकञ्चुकः, पुं, (कञ्चुक इव कञ्चुकः मुक्तः कञ्चुको येन ।) अचिरत्यक्तत्वक्सर्पः । तत्पर्य्यायः । निर्मुक्तः २ । इत्यमरः । १ । ८ । ६ । उज्झितकञ्चुके, त्रि ॥

मुक्तचक्षुः, [स्] पुं, (मुक्तं सर्व्वतः क्षिप्तं चक्षुर्येन ।) सिंहः । इति शब्दमाला ॥ मुक्तनेत्रे, त्रि ॥

मुक्तरसा, स्त्री, (मुक्तः रसो यस्याः ।) रास्ना । इति रत्नमाला ॥ (विवरणमस्या रास्नाशब्दे ज्ञातव्यम् ।) त्यक्तरसे, त्रि ॥

मुक्ता, स्त्री, (मुच्यते स्म । मोच्यते निःसार्य्यते इति वा । मुच् + क्तः । टाप् ।) रास्ना । इति रत्नमाला ॥ रत्नविशेषः । मोती इति हिन्दी भाषा । अस्या अधिष्ठात्री देवता चन्द्रः । इति ज्योतिषम् ॥ तत्पर्य्यायः । मौक्तिकम् २ । इत्यमरः । २ । ९ । ९३ ॥ सौम्या ३ शौक्तिकेयम् ४ तारम् ५ तारा ६ मौतिकम् ७ नौतिकम् ८ अम्भःसारम् ९ शीतलम् १० नीरजम् ११ नक्षत्रम् १२ इन्दुरत्नम् १३ लक्ष्मीः १४ मुक्ताफलम् १५ बिन्दुफलम् १६ मुक्तिका १७ शौक्तेयकम् १८ शुक्तिमणिः १९ शशिप्रभम् २० स्वच्छम् २१ हिमम् २२ हिमवलम् २३ सुधांशुभम् २४ सुधांशुरत्नम् २५ । लक्ष्मीस्थाने लक्ष्मं शशिप्रभस्थाने शशिप्रियं हिमवलस्थाने हैमवतं सुधांशुभस्थाने भूरुहं इति च पाठः । इति राजनिर्घण्टः ॥ शौक्तिकम् २६ । इति भावप्रकाशः ॥ शुक्तिबीजम् २७ हारी २८ । इति शब्दरत्नावली ॥ कुवलम् २९ । इति जटाधरः ॥ अस्या गुणाः । सारकत्वम् । शीतलत्वम् । कषायत्वम् । स्वादुत्वम् । लेखनत्वम् । चक्षुष्यत्वञ्च । तद्धारणगुणः । पापालक्ष्मीविनाशित्वम् । इति राजवल्लभः । वृष्यत्वम् । बलपुष्टिदत्वञ्च । इति भावप्रकाशः ॥ * ॥ अपि च ।
"मौक्तिकञ्च मधुरं सुशीतलं
दृष्टिरोगशमनं विषापहम् ।
राजयक्ष्मपरिकोपनाशनं
क्षीणवीर्य्यबलपुष्टिवर्द्धनम् ॥"
अस्या लक्षणं यथा,—
"नक्षत्राभं सुवृत्तमत्यन्तमुक्तं
स्निग्धं स्थूलं निर्म्मलं निर्व्रणञ्च ।

यत्तं धत्ते गौरवं यत्तुलायां
तन्निर्मौल्यं मौक्तिकं सौख्यदायि ॥"

अस्या दोषलक्षणं यथा,—

"यद्विच्छायं मौक्तिकं यच्चकायं
शुक्तिस्पर्शं रक्तताञ्चापि धत्ते ।
मत्स्याक्ष्याद्यं कक्षसुत्तानकन्तं
नैतद्धार्य्यं धीमता दोषदायि ॥"

अवध्या मौक्तिकं यथा,—

"मातङ्गोरगमीनपोत्रिशिरसस्त्वक्सारशङ्खाम्बुभृ-
च्छुक्तीनामुदराच्च मौक्तिकमणिः स्पष्टं भवत्य-
ष्टधा ॥"

मौक्तिकविशेषो यथा,—

"छायाःपाटलनीलपीतधवलास्तत्रापि सामान्यतः
सप्तानां बहुशो न लब्धिरिति चेच्छौक्तेयकं
तूत्तमम् ॥"* ॥

मौक्तिकपरीक्षा यथा,—

"लवणक्षारक्षोदिनि पात्रेऽजगोमूत्रपूरिते
• • क्षिप्तम् ।
मर्द्दितमपि शालीतुषैर्यदविकृतं तन्मौक्तिकं
जात्यम् ॥"

इति राजनिर्घण्टः ॥ * ॥

तदुत्पत्तिस्थानानि यथा,—

"शङ्खो गजश्च क्रोडश्च फणी मत्स्यश्च दर्दुरः ।
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ॥"

इति भावप्रकाशः ॥ * ॥

अथ प्रकारान्तरमुक्तापरीक्षा ।

"द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके-
तेषान्तु शुक्त्युद्भवमेव भूरि ॥
वेध्यन्तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ।
मतङ्गजा ये तु विशुद्धवंश्या-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
उत्पद्यते मौक्तिकमेषु वृत्त-
मापीतवर्णं प्रभया विहीनम् ॥

वक्ष्ये गजपरीक्षायां गजजातिश्चतुर्व्विधा ।
मौक्तिकं तेषु जातं हि चतुर्व्विधमुदीर्य्यते ॥
ब्राह्मणं पीतशुक्लन्तु क्षत्त्रियं पीतरक्तकम् ।
पीतश्यामन्तु वैश्यं स्यात् शूद्रं स्यात् पीत-
नीलकम् ॥
काम्बोजकुम्भसम्भूतं धात्रीफलनिभं गुरु ।
अतिपिञ्जरसच्छायं मौक्तिकं मन्ददीधिति ॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः ।
दुर्लभं तन्मनुष्याणां देवैस्तत् ह्रियतेऽम्बरात् ॥
कुक्कुटाण्डसमं वृत्तं मौक्तिकं निविडं गुरु ।
घनजं भानुसङ्काशं दैवयोग्यममानुषम् ॥" * ॥

तथाहि गारुडे ।

"नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
आशाःप्रभानाशितदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रताराग्रहसम्भवञ्च ।
दिवा यथा दीप्तिकरन्तथैव
तमोऽवगाढ़ास्वपि तन्निशासु ॥
विचित्ररत्नद्युतिचारुतोय-
चतुःसमुद्रा भवनाभिरामा ।
मूल्यं न वा स्यादिति निश्चयो मे
तस्यास्य मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तल्लभते कथञ्चित्
विपाकयोगान्महतः शुभस्य ।
सपत्नहीनः पृथिवीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि जन्म तस्य ।
तद्योजनानां परितः शतस्य
सर्व्वाननर्थान् विमुखीकरोति ॥

जलज्योतिर्मरुज्जानां मेघानां त्रिविधं भवेत् ।
जलाधिकेऽधिकं स्वच्छं कोमलं पुरु कान्ति-
मत् ॥
ज्योतिर्भं कान्तिमद्वृत्तं दुर्निरीक्ष्यं रविप्रभम् ।
कान्तिमत् कोमल वृत्तं मारुतं विमलं लघु ॥

वराहदंष्ट्राप्रभवं वरिष्ठं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भुवः प्रदेशे
प्रजायते शूकरवद्वरिष्ठः ॥

ब्रह्मादिजातिभेदेन वराहोऽपि चतुर्व्विधः ।
तेषु जाता भवेन्मुक्ता समासेन चतुर्व्विधा ॥
ब्राह्मणः शुक्लवर्णस्तु शूद्रमन्तोऽस्य लक्ष्यते ।
क्षत्त्रियः शुक्लरक्तस्तु स्पर्शे कर्कश एव च ॥
वैश्यः स्यात् शुक्लपीतस्तु कोमलः कोलसन्निभः ।
शूद्रः स्याच्छुक्लनीलस्तु कर्कशः श्याम एव च ॥"

तथा च ।

"कोलजं कोलमदृशं तद्दंष्ट्रासदृशच्छवि ।
अलभ्यं मनुजै रम्यं मौक्तिकं पुण्यवर्ज्जितैः ॥* ॥

ये कम्बवः शार्ङ्गमुखावमर्ष-
पीतस्य शङ्खप्रवरस्य गोत्रे ।
स्यान्मौक्तिकानामिह तेषु जन्म
तल्लक्षणं संप्रति कीर्त्तयामः ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
शङ्खादुदृत्कोलफलप्रमाणम् ॥

तथा च ।

वर्णोपलसमं दीप्त्या पाञ्चजन्यकुलोद्भवम् ।
कपोताण्डप्रमाणं तदतिकान्ति मनोहरम् ॥* ॥

विशेषो यथा,—

"अश्विन्यादिकनक्षत्रे ये जाताः कम्बवः शुभाः ।
मौक्तिकं तेषु जातं हि सप्तविंशतिभेदभाक् ॥
शुक्लाशुक्लाः पीतरक्ता नीला लोहितपिञ्जराः ।
आकर्व्वुराः पाटलाश्च नववर्णाः प्रकीर्त्तिताः ॥
महन्मध्यलघुत्वानैः सप्तविंशतिधा भवेत् ।
क्रमशस्तेषु विज्ञेयं नक्षत्रेण मनीषिभिः ॥* ॥

पाठीनपृष्ठस्य समानवर्णं
मीनात् सुवृत्तं लघु नातिसूक्ष्मम् ।
उत्पाद्यते वारिचरानतेषु
मीनाश्च ते मध्यचराः पयोधेः ॥"

तथा च ।

"गुञ्जाफलकायस्थौल्यं मौक्तिकं तिमिजं
लघु ।
पाटलापुष्पसङ्काशमल्पकान्ति सुवर्त्तुलम् ॥
वातपित्तकफद्वन्द्वसन्निपातप्रभेदतः ।
सप्त प्रसूतयो मीने सप्तधा तेन मौक्तिकम् ॥
लघिष्ठमरुणं वातात् आपीतं मृदु पित्ततः ।
शुक्लं गुरु कफोद्रेकात् वातपित्तान्मृदुर्लघु ॥
वातश्लेष्मभवं स्थूलं पित्तश्लेष्मजमच्छकम् ।
सर्व्वलिङ्गप्रयोगेण सान्निपातिकमुच्यते ॥
एकशः शुभदाः प्रोक्तास्तथा वै सान्नि-
पातिकाः ॥* ॥

भौजङ्गमं नीलविशुद्धवर्णं
सर्व्वं भवेत् प्रज्वलवर्णशोभम् ।
निशातधौतप्रतिकल्पमान-
निस्त्रिंशधारासमवर्णशोभम् ॥
भुजङ्गमास्ते विषवेगदृप्ताः
श्रीवासुकेर्व्वंशभवाः पृथिव्याम् ।
क्वचित् कदाचित् खलु पुण्यदेशे
तिष्ठन्ति ते पश्यति तान्मनुष्यः ॥

फणिजं वर्त्तुलं रम्यं नीलच्छायं महाद्युति ।
पुण्यहीना न पश्यन्ति वासुकेः कुलसम्भवम् ॥

शृगालकोलामलकोलगुञ्जा-
फलप्रमाणास्तु चतुर्विधास्ते ।
स्युर्व्राह्मणाद्युद्भववैश्यशूद्र-
सर्पेषु जाताः प्रवरास्तु सर्व्वे ॥
प्राप्यापि रत्नानि धनं श्रियं वा
राजश्रियं वा महतीं दुरापाम् ।
तेजोऽन्विताः पुण्यकृतो भवन्ति
मुक्ताफलस्यास्य विधारणेन ॥
जिज्ञासया रत्नविनिश्चयज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रक्षाविधानं सुमहद्विधाय
हर्म्म्योपविष्टं क्रियते यदा तत् ।
तदा महद्दुन्दुभितूर्य्यघोषै-
र्घनैर्घनैराव्रियतेऽन्तरीक्षम् ॥
न तं भुजङ्गा न तु यातुधाना
न राक्षसा नापि च दुष्टलोकाः ।
हिंसन्ति यस्याहिशिरःसमुत्थं
मुक्ताफलं तिष्ठति कोषमध्ये ॥

भेकादिष्वपि जायन्ते मणयो ये क्वचित् क्वचित् ।
भौजङ्गममणेस्तुल्यास्ते विज्ञेया बुधोत्तमैः ॥

नक्षत्रमालेव दिवो विशीर्णा
दन्तावली तस्य महासुरस्य ।
विचित्ररूपेषु विचित्रवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ति-
र्भास्वत्प्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सुस्थितिमाप बीज-
मासन् पुराप्यन्यभवानि यानि ॥

यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारुमुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्तोयधरावकीर्णं
शुक्तौ स्थितं मौक्तिकतामवाप ॥ * ॥
सैंहलिकपारलौकिक-सौराष्ट्रिकताम्रपर्णीपार-
सवाः ।
कौवेरपाण्ड्यविराटमुक्ता इत्याकराश्चाष्टौ ॥
"स्वात्यां स्थिते रवौ मेघैर्ये मुक्ता जलबिन्दवः ।
शीर्णाः शुक्तिषु जायन्ते तैर्मुक्ता निर्म्मलत्विषः ॥
स्थूला मध्यास्तथा सूक्ष्मा बिन्दुमानानुसारतः ।
सुस्निग्धमधुरच्छायं मौक्तिकं सिंहलोद्भवम् ॥
पारलौकिकसम्भूतं मौक्तिकं निविडं गुरु ।
सौराष्ट्रिकभवं स्थूलं वृत्तं स्वच्छं सितं घनम् ॥
ताम्रपर्णीभवं ताम्रं पीतं पारसवोद्भवम् ।
ईषत् श्यामञ्च रूक्षञ्च कौवेरोद्भवमौक्तिकम् ॥
पाण्ड्यदेशोद्भवं पाण्डु सितं रूक्षं विराटजम् ।
हस्तिमण्याख्या तु या शुक्तिस्तत्प्रसूतिः सुदुर्लभा ॥
तत्र जातं सितं स्वच्छं जातीफलसमं वरम् ।
छायावद्वर्त्तुलं रम्यं निर्दोषं यदि लभ्यते ॥
अमूल्यं तद्विनिर्द्दिष्टं रत्नलक्षणकोविदैः ।
दुर्लभं नृपयोग्यं स्यादल्पभाग्यैर्न लभ्यते ॥"
अन्यच्चाह ।

"सर्व्वस्य तस्याकरजा विशेषात्
रूपप्रमाणे च यथैव विद्वान् ।
नहि व्यवस्थास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाकृतयो भवन्ति ॥

ब्रह्मादिजातिभेदेन मुक्तयोऽपि चतुर्व्विधाः ।
तासु सर्व्वासु जातं हि मौक्तिकं स्याच्चतुर्व्विधम् ॥
ब्राह्मणस्तु सितः स्वच्छो गुरुः शुक्लः प्रभान्वितः ।
आरक्तः क्षत्रियः स्थूलस्तथारुणविभान्वितः ॥
वैश्यश्चापीतवर्णोऽपि स्निग्धः श्वेतः प्रभान्वितः ।
शूद्रः शुक्लवपुः सूक्ष्मस्तथा स्थूलोऽसितद्युतिः ॥

वर्णोपलानां समवर्णशोभं
त्वकसारमध्यप्रभवं प्रदिष्टम् ।
तं वेणवो दिव्यजनोपभोग्यं
स्थाने प्ररोहन्ति न सार्व्वजन्ये ॥

वंशजं शशिसङ्काशं कक्कोलीफलमानकम् ।
प्राप्यते बहुभिः पुण्यैस्तदर्घ्यं वेदमक्तिनः ॥
पञ्चभूतसमुद्रेकाद्देशे पञ्चविधं भवेत् ।
मुक्ता पञ्चविधा तासां यथालक्षणमुच्यते ॥
पार्थिवी गुरुवृत्ता च तैजसी तेजसा लघुः ।
वायवी च मृदुः स्थूला गागनी कोमला लघुः ।
आप्याः स्निग्धा भृशं शुक्लाः पञ्चैताः प्रवरा
मताः ।
आसां धारणमात्रेण व्याधिः कोऽपि न
जायते ॥"* ॥
एवमन्यत्रापि ।
"गजाहिकोलमत्स्यानां शीर्षे मुक्ताफलोद्भवः ।
त्वक्सारशुक्तिशङ्खानां गर्भे मुक्ताफलोद्भवः ॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः ।
जीमूतं शुचिरूपञ्च गजं पाटलभास्वरम् ॥
मत्स्ये श्वेतञ्च निस्तेजः फणीन्द्रे नीलभास्वरम् ।
हरिच्छुतं तथा वंशे पीतश्वेतञ्च शूकरे ।
शङ्खशुक्त्युद्भवं श्वेतं मुक्तारत्नमनुत्तमम् ॥
चतुर्द्धा मौक्तिके छाया पीता च मधुरा सिता ।
नीला चैव समाख्याता रत्नतत्त्वपरीक्षकैः ॥
पीता लक्ष्मीप्रदा छाया मधुरा बुद्धिवर्द्धिनी ।
शुक्ला यशस्करी छाया नीला सौभाग्यदायिनी ॥
सिता छाया भवेद्विप्रः क्षत्रियश्चारुरश्मिवान् ।
पीतच्छाया भवेद्वैश्यः शूद्रः शबलर्चिष्मतः ॥*
अथ गुणाः ।
सुतारञ्च सुवृत्तञ्च स्वच्छञ्च निर्म्मलं तथा ।
घनं स्निग्धञ्च सच्छायं तथा स्फुटितमेव च ।
अष्टौ गुणाः समाख्याता मौक्तिकानामशेषतः ॥
तद्यथा,—
तारकाद्युतिसङ्काशं सुतारमिति गद्यते ।
सर्व्वतो वर्त्तुलं यच्च सुवृत्तं तन्निगद्यते ॥
स्वच्छं दोषविनिर्म्मुक्तं निर्म्मलं मलवर्ज्जितम् ।
गुरुत्वं तुलने यस्य तद्घनं मौक्तिकं वरम् ॥
स्नेहेनेव विलिप्तं यत्तत् स्निग्धमिति गद्यते ।
छायासमन्वितं यच्च सच्छायं तन्निगद्यते ॥
व्रणरेखाविहीनं यत्तत स्यादस्फुटितं शुभम् ॥
भ्राजिष्णु कोमलं कान्तं मनोज्ञं स्फुरतीव च ।
स्रवतीव च सत्त्वानि तनुमध्यारत्नसंज्ञितम् ॥
श्वेतकाचसमाकारं सभ्रांशुशतयोजितम् ।
शशिराजप्रतिच्छायं मौक्तिकं देवभूषणम् ॥"* ॥
गारुडे ।

त्वकसारनागेन्द्रतिमिप्रभूतं
यच्छङ्खजं यच्च वराहजातम् ।
प्रायो वियुक्तानि भवन्ति भासा
शस्तानि माङ्गल्यतया तथापि ॥
प्रमाणवद्गौरवरश्मियुक्तं
सितं सुवृत्तं समसूक्ष्मरन्ध्रम् ।
अक्रेतुरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।
न तस्य भर्त्तारमनर्थजात
एकोऽपि दोषः समुपैति सद्यः ॥

एवं सर्व्वगुणोपेतं मौक्तिकं येन धार्य्यते ।
तस्यायुर्व्वर्द्धते लक्ष्मीः सर्व्वपापं प्रणश्यति ॥
गुणवद्गुरु यद्गेहे मौक्तिकेकं हि तिष्ठति ।
चञ्चलापि स्थिरा भूत्वा कमला तत्र तिष्ठति ॥"
दोषो यथा,—
"चत्वारः सुमहादोषाः षट्चमध्यास्तु प्रकीर्त्तिताः ।
एवं दश समाख्यातास्तेषां वक्ष्यामि लक्षणम् ॥
यत्रैकदेशे संलग्न शुक्तिखण्डो विभाव्यते ।
शुक्तिलग्नः समाख्यातः स दोषः कुष्ठकारकः ॥
मीनलोचनसङ्काशो दृश्यते मौक्तिके तु यः ।
मत्स्याक्षः स तु दोषः स्यात् पुत्त्रनाशकरो ध्रुवम् ॥
दीप्तिहीनं गतच्छायं जठरं तद्विदुर्व्बुधाः ।
तस्मिन् सधारिते मृत्युर्जायते नात्र संशयः ॥
मौक्तिकं विद्रुमच्छायमतिरक्तं विदुर्व्बुधाः ।
दारिद्र्यजनकं यस्मात् तस्मात्तत् परिवर्ज्जयेत् ॥
उपर्य्युपरि तिष्ठन्ति वलयो यत्र मौक्तिके ।
त्रिवृत्तं नाम तत्प्रोक्तं सौभाग्यक्षयकारकम् ।
अवृत्तं मौक्तिकं यच्च चिपिटं यन्निगद्यते ।
मौक्तिकं म्रियते येन तस्याकीर्त्तिर्भवेत् सदा ॥
त्रिकोणं त्र्यस्रमाख्यातं सौभाग्यक्षयकारकम् ।
दीर्घं यत्तत् कृशं प्रोक्तं प्रज्ञाविध्वंसकारकम् ॥
निर्भ्रममेकतो यच्च कृशपार्श्वं तदुच्यते ।
सदोषं मौक्तिकं निन्द्यं निन्दायोगकरं हि
तत् ।
अवृत्तं पिडकोपेतं सर्व्वसम्पत्तिहारकम् ॥* ॥
यत्र कृत्रिमसन्देहः क्वचिद्भवति मौक्तिके ।
उष्णे सलवणे स्नेहे निशां तत्स्वासयेज्जले ॥
व्रीहिभिर्मर्द्दनीयं वा शुष्कवस्त्रोपवेष्टितम् ।
यत्तु नायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ॥* ॥
तथा हि ।
क्षिपेद्गोमूत्रभाण्डे तु लवणक्षारसंयुते ।
स्वेदयेद्वह्निना वापि शुष्कवस्त्रेण वेष्टयेत् ॥
हस्ते मौक्तिकमादाय व्रीहिभिश्चोपघर्षयेत् ।
कृत्रिमं भङ्गमाप्नोति सहजञ्चाति दीप्यते ॥

कृत्वा पचेत् सुपिहिते शुभदारभाण्डे
मुक्ताफलं निहितनूतनशुक्तिकाण्डम् ।
स्फोटन्तथा प्रणिदधीत ततश्च भाण्डात् ।
संस्थाप्य धान्यनिचये च समेकमासम् ॥
आदाय तत् सकलमेव ततोऽन्नभाण्डं
जम्बीरजातरसयोजनया विपक्वम् ।
घृष्टं ततो मृदुतनूतनपिष्टमूलैः
कुर्य्याद्यथेष्टमिह मौक्तिकमाशु विद्धम् ॥
मृत्स्निग्धमत्स्यपुटमध्यगतन्तु कृत्वा
पश्चात् पचेत्तदनु ततश्च विनाशपत्या ।
दुग्धे ततः पयसि तद्विपचेत् सुरायां
पक्वन्ततोऽपि पयसा शुचि चिक्कणेन ।
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यात् मौक्तिकं विमलसद्गुणकान्तिजालम् ॥"

अथ मूल्यम् ।
"पञ्चभिर्माषको ज्ञेयो गुञ्जाभिर्माषकैस्तथा ।
चतुर्भिः शाणमाख्यातं माषकैर्मणिवेदिभिः ॥

एकस्य शुक्तिप्रभवस्य शुद्ध-
मुक्तामणेः शाणकसम्मितस्य ।
मूल्यं सहस्राणि कपर्द्दकानि
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्माषकार्द्धेन ततो विहीनं
चतुःसहस्रं लभतेऽस्य मूल्यम् ।
यन्माषकांशेन विभर्त्याद्गुरुत्वं
हे तस्य मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकद्वौ वहतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ॥
अर्द्धाधिकमाषकसम्मितस्य
सपञ्चविंशं त्रितयं शतानाम् ।
यन्माषकोन्मापितमानमेकं
तस्याधिकं विंशतिभिः शतं स्यात् ॥

गुञ्जाश्च षड् धारयत: शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञा: ।
गुञ्जाश्चतस्रो विधृतं शताद्धा-
दूर्द्धं लभेताप्यधिकं त्रिभिर्व्वा ॥
अत: परं स्यादुरणप्रमाणं
संख्याविनिर्द्दिष्टविनिश्चयोक्ति: ।
त्रयोदशानां धरणं धृतानां
त्रिक्रीति नाम प्रवदन्ति तज्ज्ञा: ॥
अध्यर्द्धमानश्च शतं शतं स्यान्-
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि षोड़शभिर्भवेत् सुपूर्णं
धरणं तत्प्रवदन्ति दार्व्विकाख्यम् ॥
अधिकं दशभि: शतश्च मूल्यं
समवाप्नोत्यपि वालिशस्य हस्तात् ।
यदि विंशतिभिर्भवेत् सुपूर्णं
धरणं मौक्तिकजं वदन्ति तज्ज्ञा: ॥
नवसप्ततिमाप्नुयात स्वमूल्यं
यदि न स्याद्‌गुणयुक्तितो विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्येति परिकीर्त्त्यते ।
चत्वारिंशत्परं तस्य मूल्यमेव विनिश्चय: ॥
चत्वारिंशत् भवेत् शिक्या त्रिंशन्मूल्यं लभेत सा ।
पञ्चाशत्तु भवेत् सोमस्तस्य मूल्यन्तु विंशति: ॥
षष्टिर्निकरशीर्षं स्यात्तस्य मूल्यं चतुर्द्दश ।
अशीतिर्नवतिस्त्रीति कुप्यीति परिकल्प्यते ॥
एकादश स्युर्नव च तयोर्मूल्यमनुक्रमात् ।
शतमर्द्धाधिकं द्वे च चूर्णाऽयं परिकीर्त्तित: ॥
सप्त पञ्च त्रयश्चैव तेषां मूल्यमनुक्रमात् ॥
शतात् परं माषकमेकमेकं
यावद्विवर्द्धेत गुणैरपीदम् ।
मूल्येन तावद्विगुणेन योग-
माप्नोत्यनार्ष्टिहितेऽपि देशे ॥
सख्यातिसख्योत्तममध्यमानां
यन्मौक्तिकानामिह मूल्यमुक्तम् ।
तन्मानिमात्रेण न जातु कार्य्यं
गुणैर्विहीनस्य हि तत् प्रदिष्टम् ॥
यत् चन्द्रांशुसद्दशमीषद्विम्बफलाकृति ।
स्वमूल्यात् सप्तमं भागमष्टत्वाल्लभेत तत् ॥
पीतकस्य भवेदर्द्धमष्टस्तस्य त्रिभागत: ।
विषमस्यस्त्वजानीता षड्भागं मूल्यमादिशेत् ॥
अर्द्धरूपाणि सस्फोटात् पङ्कवर्णानि यानि च ।
असाराणि च यानि स्यु: करकाकारवन्ति च ॥
एकदेशप्रभावन्ति सकलाश्चिपितानि च ।
यानि चातकवर्णानि कांस्यवर्णानि यानि च ॥
मीननेत्रसवर्णानि ग्रन्थिभि: संवृतानि च ।
सदोषाणि च यानि स्युस्तेषां मूल्यं पदांशिकम् ॥
अन्यच्च तु ।
सप्ताली प्रोच्यते गुञ्जा सा तिस्रो रूपकं भवेत् ।
रूपकैर्दशभि: प्रोक्त: कलञ्जो नाम नामत: ॥
कलञ्जनामकं द्रव्यमेकदेशे निधापयेत ।
अन्यतो जलविन्दूंस्तु तोलनार्थं विनि:क्षिपेत् ॥
चत्वारि त्रीणि युग्मं वा तथैकं बहु वा स्थितम् ।
समं कलञ्जमानेन तुलामानादत: क्रमात् ॥
नवमात् पञ्चमं यावत् कलञ्जेन समं यदा ।
तत्क्रमादुत्तमं ज्ञेयं मौक्तिकं रत्नवेदिभि: ॥
चतुर्द्दशात् समारभ्य दशसंख्यावधिं क्रमात् ।
कलञ्जस्य समानं वा मौक्तिकं मध्यमं विदु: ॥
आरभ्य विंशतितमात् क्रमात् पञ्चदशावधि ।
लघुत्वास्ता: कथिता मुक्ता मूल्यञ्च तदनुक्रमात् ॥
कलञ्जद्वयमानेन यद्येकं मौक्तिकं भवेत् ।
न धार्य्यं नरनाथैस्तु देवयोग्यममानुषम् ॥
इत्थं विचार्य्य यो मुक्तां परिधत्ते नराधिप: ।
तस्यायुश्च यशो वीर्य्यं विपरीतमतोऽन्यथा ॥”
इति युक्तिकल्पतरु: ॥
(अथास्या: शोधनम् ।
“स्विन्नयेद्दोलिकायन्त्रे जयन्त्या: स्वरसेन च ।
मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥) अन्यत् मुक्ताफलशब्दे द्रष्टव्यम् ॥ * ॥ अथ
मुक्ताधारणादिनम् ।
“रेवत्यश्विधनिष्ठासु हस्तादिषु च पञ्चसु ।
शङ्खविद्रुममुक्तानां परिधानं प्रशस्यते ॥”
इति समयप्रदीप: ॥

मुक्ताकलाप:, पुं, (मुक्तानां कलाप: समूहोऽत्र ।) मुक्ताहार: । यथा,—
“हारो मुक्तात: प्रालम्बस्रक्कलापावलीलता: ।”
इति हेमचन्द्र: । ३ । ३२२ ॥
(यथा, कुमारसम्भवे । १ । ४२ ।
“कण्ठस्य तस्या: स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य
अन्योन्यशोभाजननाद्‌बभूव
साधारणो भूषणभूष्यभाव: ॥”)

मुक्तागारं, क्ली, (मुक्ताया आगारमिव । मुक्तोत्-पादनाधारत्वादस्य तथात्वम् ।) शुक्ति: । इति शब्दचन्द्रिका ॥ मौक्तिकगृहञ्च ॥

मुक्तापुष्प:, पु, (मुक्ता इव पुष्पाण्यस्य ।) कुन्द-वृक्ष: । इति राजनिर्घण्ट: ॥ (गुणादिविवृति-रस्य कुन्दशब्दे द्रष्टव्या ॥)

मुक्ताप्रसू:, स्त्री, (मुक्तां प्रकर्षेण सूते जनयतीति प्र + सू + क्विप् ।) शुक्ति: । इति राज-निर्घण्ट: ॥

मुक्ताप्रालम्ब:, पु, (मुक्तानां प्रालम्ब: हारभेद: ।) मुक्ताहार: । इति हेमचन्द्र: । ३ । ३२२ ॥

मुक्ताफलं, क्ली, (मुक्ताफलमिव ।) कर्पूरम् । (मुक्तेव फलमिव ।) मौक्तिकम् । (यथा, मुग्ध-बोधटीकायां कारके । ठिनार्थादित्यत्र । दुर्गा-दासधृतम् ।
“मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति भुजविक्रमलम्भनाय ॥”)
लवलीफलम् । इति मेदिनी । ले, १६६ ॥
(मौक्तिकार्थेऽस्य पर्य्याय: ।
“मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
यथास्य भस्मकरणविधि: ।
“मुक्ताफलानि शुद्धानि स्त्रत्वे पिष्ट्वा पुटेल्लघु ।
एवं भस्मत्वमाप्नोति——————— ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-कारे ॥) वोपदेवकृतग्रन्थविशेष: । यथा,—
“मुक्ताफलेन ग्रन्थेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यम्बुना मुग्धमार्कण्डेयशिशुश्रिया ॥
विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥”
इति तस्य चतुर्थोपान्त्यश्लोकद्वयम् ॥
अथ मुक्ताफल परीक्षा ।
“द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषाञ्च शुक्त्युद्भवमेव भूरि ॥
तत्रैव चैकस्य हि मूल्यमात्रा
निविश्यते रत्नपरस्य जातु ।
वेध्यन्तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञा: ॥
त्वक्सारनागेन्द्रतिमिप्रसूतं
यत् शङ्खजं यच्च वराहजातम् ।
प्रायो विमुक्तानि भवन्ति भासा
शस्तानि माङ्गल्यतया तथापि ॥
या मौक्तिकानामिह जातयोऽष्टौ
प्रकीर्त्तिता रत्नविनिश्चयज्ञै: ।
कम्बूद्भवं तेष्वधमम्प्रदिष्ट-
मुत्पद्यते यच्च गजेन्द्रकुम्भात् ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
शाङ्खं हृहत्कोलफलप्रमाणम् ।
उत्पद्यते वारणकुम्भमध्या-
दापीतवर्णं प्रभया विहीनम् ॥
ये कम्बव: शार्ङ्गमुखावमर्ष-
पीतस्य शङ्खप्रवरस्य गोत्रे
मतङ्गजाश्चापि विशुद्धवंशा-
स्ते मौक्तिकानां प्रभवा: प्रदिष्टा: ॥
पाठीनपृष्ठस्य समानवर्णं
मीनात् सुवृत्तं लघुनातिसूक्ष्मम् ।
उत्पद्यते वारिचराननेषु
मत्स्याश्च ते मध्यचरा: पयोधे: ॥
वराहदंष्ट्राप्रभवं प्रदिष्टं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित स भुव: प्रदेशे
प्रजायते सूकरवद्विशिष्ट: ॥
वर्षोपलानां समवर्णशोभं
त्वक्सारपर्व्वप्रभवम्प्रदिष्टम् ।
ते वेणवो दिव्यजनोपभोग्ये
स्थाने प्ररोहन्ति न सार्व्वजन्ये ॥
भौजङ्गमं मीनविशुद्धवृत्तं
संस्थानतोऽत्युज्ज्वलवर्णशोभम् ।
नितान्तधौतप्रविकल्प्यमान-
निस्त्रिंशधारासमवर्णकान्ति ॥
प्राप्यंति रत्नानि महाप्रभाणि
राज्यं श्रियं वा महतीं दुरापाम् ।

पार्श्वं हि नापुण्यकृतो भवन्ति
मुक्ताफलस्याहिशिरोभवस्य ॥
जिज्ञासया रत्नधनं विधिज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रक्षाविधानं सुमहद्विधाय
हर्म्म्योपरिस्थं क्रियते यदा तत् ॥
तदा महादुन्दुभिमन्द्रघोषै-
र्विद्युल्लताविस्फुरितान्तरालैः ।
पयोधराक्रान्तिविलम्बलम्बै-
र्घनैर्घनैर्वा ध्रियतेऽन्तरीक्षम् ॥
न तं भुजङ्गा न च यातुधाना
न व्याधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याहिशिरःसमुत्थं
मुक्ताफलं तिष्ठति पूज्यमानम् ॥
नार्ध्यन्ति मेघप्रभव धरित्र्यां
वियद्गतं तद्विबुधा हरन्ति ।
अर्च्चिःप्रभानाहृतदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजांसि तिरस्कृत्य हुताशनेन्दु-
नक्षत्रताराप्रभवं समग्रम् ।
दिवा यथा दीप्तिकरं तथैव
तमोऽवगाढ़ास्वपि तन्निशासु ॥
विचित्ररत्नद्युतिसारतोय-
चतुःसमुद्राभरणोपपन्ना ।
कृतस्ना न वा स्यादिति निश्चयो मे
मूल्यं मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तल्लभते कदाचिद्-
विपाकयोगात्सुकृतः शुभस्य ।
सपत्नहीनां स महीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि तस्य जन्म ।
यद्दूरयोजनानां परितः सहस्रं
सर्व्वाननर्थान् विमुखीकरोति ॥
नक्षत्रमालेव दिवो विशीर्णा
दन्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ति-
र्मांसप्रवेकस्य महागुणस्य ।
तच्छुक्तिमप्सु स्थितमापबीज-
मासन् पुराप्यन्यभवानि यानि ॥
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारु मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्तोयधरावकीर्णं
शुक्तौ स्थितं मौक्तिकतामवाप ॥
सैंहलिकपारलौकिकसौरा-
ष्ट्रिकताम्रपर्णपारसवाः ।
कौवेरपाण्ड्यहाटक-
हैमका इत्याकराख्वष्टौ ॥
शुक्त्युद्भवं नातिनिकृष्टवर्णं
प्रमाणसंस्थानगुणप्रभाभिः ।
उत्पद्यते वर्द्धनपारसीक-
पातालमौकान्तरसिंहलेषु ॥
चिन्त्या न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्थास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाकृतयो वसन्ति ॥
एकस्य शुक्तिप्रभवस्य मुक्ता-
फलस्य शाणेन समुन्मितस्य ।
मूल्यं सहस्राणि तु रूपकाणां
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्माषकार्द्धेन ततो विहीनं
तत्पञ्चभागद्वयहीनमूल्यम् ।
यन्माषकांस्त्रीन् बिभृयात सहस्रे
द्वे तस्य मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकौ द्वौ वहतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ॥
अर्द्धाधिकं माषकमुन्मितस्य
सपञ्चविंशत्रितयं शतानाम् ।
गुञ्जाश्च षड् धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ॥
अध्यर्द्धगुञ्जापकृतं शतं स्यात्
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि षोडशभिर्भवेदनूनं
धरणं तत्प्रवदन्ति दार्व्विकाख्यम् ॥
अधिकं दशभिः शतञ्च मूल्यं
समवाप्नोत्यपि वाणिशस्य हस्तात् ।
द्विगुणैर्दशभिर्भवेदनूनं
धरणं तद्भवकं वदन्ति तज्ज्ञाः ॥
नवसप्ततिमाप्नुयात स्वमूल्यं
यदि न स्याद्गुणसम्पदा विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्यं तस्येति कीर्त्यते ॥
चत्वारिंशद्भवेत्तस्याः परं मूल्यं विनिश्चयः ।
चत्वारिंशद्भवेत्क्किकयो विंशन्मूल्यं लभेत सा ॥
षष्टिनिकरशीर्ष स्यात्तस्य मूल्यं चतुर्द्दश ।
अशीतिर्नवतिश्चैव कुप्यति परिकीर्त्तिता ।
एकादश स्यान्नव च तयोर्मूल्यमनुक्रमात ॥
आदाय तत् सकलमेव ततोऽन्नभाक्तं
जम्बीरजातरसयोजनया विपक्वम् ।
घृष्टं ततो म्टदुतनक्रतपिष्टमूलैः
कुर्य्याद्यथेष्टमनु मौक्तिकमाशु विद्धम् ॥
म्टन्निप्रभत्स्यपुटमध्यगतन्तु कृत्वा
पश्चात् पचेत्तु ततश्च वितानपत्र्या ।
दुग्धे ततः पयसि तं निपचेत सुधायां
पक्वं ततोऽपि पयसा शुचि चिक्कणेन ॥
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यान्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
व्याडिर्जगाद जगतां हि महाप्रभाव-
सिद्धो विदग्धहिततत्परया दयालुः ॥
श्वेतकाचसमं तारं हेमांशशतयोजितम् ।
रसमध्ये प्रधार्य्येत मौक्तिकं देहभूषणम् ॥
एवं हि सिंहले देशे कुर्व्वन्ति कुशला जनाः ।
यस्मिन् कृत्रिमसन्देहः क्वचिद्भवति मौक्तिके ॥
उष्णे सलवणे स्नेहे निशां तद्दामयेज्जले ।
ब्रीहिभिर्मर्द्दनीयं वा शुष्कवस्त्रोपवेष्टितम् ॥
यत्तु नायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ॥
सितं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्म्मलम् ।
तेजोऽधिकं सुवृत्तञ्च मौक्तिकं गुणवत् स्मृतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
सितं सुवृत्तं समसूक्ष्मवेधम् ।
अक्रेतरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एव समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।
न तस्य भर्त्तारमनर्थजात
एकोऽपि कश्चित् समुपैति दोषः ॥"
इति गारुडे ६९ अध्यायः ॥

मुक्तामुक्तः, त्रि, (मुक्तश्च असुक्तश्चेति विशेषणयो-र्द्वन्द्वम् ।) शिलाशिलः । अस्य प्रयोगो अस्मि शास्त्रे च प्रायो वर्त्तते । इति हलायुधः ॥

मुक्तालता, स्त्री, (मुक्ताभिर्लतेव ।) मुक्ताहारः । इति हेमचन्द्रः । ३ । ३२७ ॥

मुक्तावली, स्त्री, (मुक्तानां आवल्यत्र) मुक्ता-हारः । इत्यमरः । २।६।१०५ ॥ (मुक्तानामा-वली ।) मौक्तिकश्रेणी च ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।
"लत्रयं सविरामान्तं नौ पुनः लत्रयं तथा ।
प्लुतौगः लयुगं गश्च यत्र मुक्तावली तु सा ॥")

मुक्तास्फोटः, पु, (मुक्तानां स्फोटः विकाशोऽत्र ।) शुक्तिः । इत्यमरः । १ । १० । २३ ॥

मुक्तास्फोटा, स्त्री, (मुक्तास्फोट + टाप ।) शुक्तिः । इति राजनिर्घण्टः ॥

मुक्तिः, स्त्री, (मुच । भावे क्तिन् ।) आत्यन्तिक-दुःखनिवृत्तिः । इति नैयायिकाः ॥ नित्यसुखा-वाप्तिः । इति वैदान्तिकाः । शरीरेन्द्रियाभ्यां आत्मनो मुक्तत्वं मुक्तिः । इति भरतः । मोक्षः । तत्पर्य्यायः । कैवल्यम् २ निर्व्वाणम् ३ श्रेयः ४ निःश्रेयसम् ५ अमृतम् ६ मोक्षः ७ अपवर्गः ८ । इत्यमरः । १।५।६ ॥ अपुनर्भवः ९ शिवः १० अक्षरम् ११ । इति जटाधरः ॥ सा पञ्चविधा । सार्ष्टिः १ सालोक्यम् २ सारूप्यम् ३ सायुज्यम् ४ निर्व्वाणम् ५ । यथा,—
सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"
इति श्रीभागवतम् ॥
"मुक्तिस्तु द्विविधा साध्वि । श्रुत्युक्ता सर्व्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥
हरिभक्तिस्वरूपाञ्च मुक्तिं वाञ्छन्ति वैष्णवाः ।
अन्ये निर्व्वाणरूपाञ्च मुक्तिमिच्छन्ति साधवः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २२ अध्यायः ॥*॥
मुक्तिकरयोगो यथा,—
"वक्ष्ये साङ्गमहायोगं भुक्तिमुक्तिकरं परम् ।
सर्व्वपापप्रशमनं भक्त्यानुपठितं ध्रुवम् ॥

ममेति मूलं दुःखस्य न ममेति च निर्वृतिः ।
एतावेधो ह्युत्कर्षाय इममाह महामतिः ॥
अहमित्यङ्कुरोत्पन्नौ ममेति स्कन्धवान् महान्
गृहक्षेत्रोपशाखश्च पुत्त्रदारादिपल्लवः ॥
धनधान्यमहापत्रोऽनेककालेहि वर्द्धितः ।
पुण्यापुण्यसपुष्पश्च सुखदुःखमहाफलः ।
विपिनन् सुखशान्त्यर्थं जातोऽज्ञानमहातरुः ॥
संसाराध्वपरिश्रान्ता येऽत्र च्छायां समा-
श्रिताः ।
भ्रान्तिज्ञानसुखासीनात्तेषामात्यन्तिकं कुतः ॥
यैस्तु सत्सङ्गपाषाणाभिशितेन महात्मभिः ।
छिन्नो विद्याकुठारेण ते गता लयमीश्वरे ॥
प्राप्य ब्रह्मरसं पीतं नीरजस्कमकण्टकम् ।
प्राप्नुवन्ति पराः प्राज्ञा ज्ञाननिर्वृतिमेव च ॥
भूतेन्द्रियमयं मूलं नत्वं राजा नचाप्यहम् ।
न तन्मात्रादिकं वापि नैवान्तःकरणन्तथा ॥
कं वा पश्यसि राजेन्द्र । प्रधानमिदमावयोः ।
ततः परेऽक्षि क्षेत्रज्ञः संजातोऽयं गुणात्मकः ॥
ममको दुःखमाप्नोति जातोऽन्यत्स्योऽम्भसा यथा।
एकत्वेऽपि पृथग्भावस्तथा क्षेत्रात्मनो नृप ! ॥
ज्ञानपूर्व्वाभियोगोऽनिज्ञानेन सह योगिनः ।
या मुक्तिर्ब्रह्मणा चैक्यमनैक्यं पुन्न । ते गुणैः ।
तद्गृहं यत्र वसतिस्तद्भोज्यं येन जीवति ॥”
इति गारुड़े २१० अध्यायः ॥*॥
अपि च ।
“हरिरात्मा न सन्देहो यदा तत् समजायत ।
तदा मुक्तः स संसारी विष्णोरवात्मतां व्रजेत् ।
नान्यथा मुच्यते चात्मा भ्रमन् वै घटियन्त्रवत् ॥
पूर्व्वकर्म्मनिबद्धोऽपि सर्व्वयं नित्य नित्यशः ।
कूटस्थः पशुतां याति आत्मज्ञानविवर्जितः ॥
कुर्व्वन्नहं ममेतीदमेव दुःखाय कल्पते ।
न्यहन्तोहिं यथा कार्य्यं लिप्यते वै न्वनीश्वरः ॥
जीराधानादिभिर्यद्वद्भाण्डं तद्वन्महानसे ।
चन्द्रकान्तमणिर्यद्वद् गृह्णीते सोपचान् गुणान् ।
सुखं दुःखं तथा क्षेमं संसरन् नृनमीश्वरः ॥
स्वप्ने यः पुरुषो नित्यमटते कर्म्मबन्धनात् ।
मन्यमानः सुखं दुःखं सोऽप्येव विप्र । मुच्यते ॥
जगन्मुक्तं न स्रष्टिः स्यादमुक्तं वर्द्धते सदा ।
तस्माज्जगन्मयं विद्यात् ज्ञानं नाधिकमेव च ॥
यत्र तत्र स्थितो ज्ञानी परमाक्षरवित् सदा ।
विषयान्तरसक्तो वा याति देहे न्हते हरिम् ॥
न तस्य प्रतिबन्धोऽस्ति यद्गनीहोऽपि लीलया ।
कुरुते गृह्यते नैव पद्मपत्रमिवाम्भसा ॥
यथा दुर्द्दिनसंघातं मेघवृन्दैर्व्यवस्थितम् ।
तद्दिक्कुनिर्मलावस्थो ज्ञानी विषयसंज्ञितः ॥
सर्व्वावस्थोऽपि मुच्येत भावयुक्तः परं पदे ।
जीवन्मुक्तः स मुक्तः स्यान्निद्राविरहितस्तु यः ॥
कर्त्ता हर्त्ता च भोक्ता च सर्व्वज्ञः सर्व्वगो
हरिः ।
एकं स्वच्छन्दलीलस्य मुक्तिरित्यभिधीयते ॥
जीवन्मुक्तिमजानन्तो मूर्च्छिताकारविग्रहाः ।
विषमुग्धा इवाभान्ति मूढ़ाश्चैतन्यवर्जिताः ॥
निर्गुणः स तु विज्ञेयः सुखदुःखमतीतवान् ।
जीवन्नाशो भवेद्यत्र तत् सुखं निष्प्रयोजनम् ॥
न्हत्पिण्डदक्षवल्लीवत्स्त्रीवत्तु भवेद्दृथा ।
तिष्ठन्ति काष्ठवद्ये च संवित्तिपरिवर्जिताः ॥
ते च मायोदरे लीना जड़ान्धवधिरोपमाः ।
आकाशवद्भवेदात्मा विदेहो निष्प्रचेतनः ॥
अलं ह्यनेन मोक्षेण चेतनारहितेन च ।
वरमेव च संसारी विषयासक्तचेतनः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
भुङ्क्तेऽऽत्मा उभौ पाशौ संसारे संव्यवस्थितः ॥
ईदृशं हि परं ज्ञानं वेदादीनामशेषतः ।
सुखस्य च फलं भुङ्क्ते स्वर्गे चैह द्विजोत्तम ! ॥
यत्र वासः परे स्थाने सुखदुःखविवर्जितः ।
केवलं जीवनाशोऽयं प्रोक्तज्ञानमजानता ॥
चेतनारहितो ज्ञानमाकाशस्थोऽप्यचेतनः ।
न्हत्पिण्डदक्षलोष्टादिशिलापट्टककुड्यवत् ॥
अथ श्रान्तो नरो यद्वत् सुप्तः सुखमश्नुते ।
बोध्यमानः सचेतापि सुखाद्वोद्धुं न मन्यते ॥*॥
केषां मुक्तमिदं मोक्षः सुखमत्यन्तकेवलम् ।
तदहं संप्रवक्ष्यामि शृणुष्व गदतो मम ॥
दुःखानामागमो नास्ति यत्र सौख्यं निरन्तरम्।
विद्यते तत् परं दृष्ट्वा योऽप्यानन्दसुखी भवेत् ॥
ब्रह्मज्ञानप्रविष्टाश्च स्वच्छन्दात्मबलान्विताः ।
न तेषां पुनरावृत्तिर्यान्ति विष्णुलयं बुधाः ॥
अस्ति देवो हरिः शान्तः कारणोपायवर्जितः ।
तं ज्ञात्वा तु भवेन्मुक्तिर्निर्म्मला काययोगिनः ॥
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्य्यादयः सुराः ।
न विभर्त्ति शरीरस्य यान्ति मुक्तिर्न विद्यते ॥
तस्मादाराधनीयोऽपि संयमेन्द्रियगोचरः ।
विष्णुर्मायापतिर्यो वै यदीच्छेन्मुक्तिमात्मनः ॥
नान्यत्र विद्यातपसो नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र सर्व्वसंत्यागात् मोक्षं विन्दति मानवः ॥
तस्माद्धर्म्मसुखो भूत्वा संयम्यात्मानमात्मना ।
धर्म्मं कुर्य्यादिहार्थेनो धर्म्मात्मा सुखमेधते ॥
धर्म्मादवाप्यते देहो दाराः पुत्त्रा धनं तथा ।
धर्म्मात् स्वर्गश्च मोक्षश्च यदन्यदपि दुर्लभम् ॥
ऋषयो देवगन्धर्व्वाः स्वधर्म्ममनुगामिनः ।
स्वर्गे तिष्ठन्ति विप्रर्षे । ततो यास्यन्ति सद्गतिम् ॥
धर्म्ममर्थञ्च कामञ्च मोक्षञ्च ऋषिसत्तम ।।
समाप्नोति पुमान्नित्यं नारायणपरायणः ॥”
इति वह्निपुराणम् ॥
(निरुक्तिर्यथा, सांख्यसूत्रम् । ६ । २० ।
“मुक्तिरन्तरायध्वस्तेर्न परः ।”
यथाच, अष्टावक्रसंहितायाम् । १ । २ ।
“मुक्तिमिच्छसि रे तात । विषयान् विषवत्त्यज ।
क्षमार्ज्जवदयातोषसत्यं पीयूषवद्भज ॥”)
मुक्तिदं, क्ली, (मुक्तिं ददातीति । मुक्ति+दा+
कः ।) भगवन्नामविशेषः । यथा,—
“अल्पाक्षरञ्च बह्वर्थं महासारञ्च मुक्तिदम् ।
नानासिद्धिप्रदातारं परं चित्तानुरञ्जकम् ॥
गुह्यात् गुह्यतरं चान्यन्नाम चाष्टाक्षरं परम् ।
मन्त्रं सुखसुसाध्यमशेषार्थप्रसाधकम् ॥
प्राह नारायणायेति नमोऽन्तान्नी नियोगतः ।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥”
इति वह्निपुराणम् ॥
मुक्तिदातरि, त्रि ॥ (यथा, देवीभागवते ।१।२।१०।
“तां ध्यात्वा सगुणां मायां मुक्तिदां निर्गुणा-
न्तथा ॥”)
मुक्तिमण्डपः, पुं, (मुक्तिदायकः मण्डपः । यद्वा
मुक्तेर्मण्डपः ।) विश्वेश्वरस्य दक्षिणपार्श्वस्थ-
मण्डपः । यथा,—
“निमेषमात्रं स्थितचित्तवृत्ता-
स्तिष्ठन्ति ये दक्षिणमण्डपेऽत्र ।
अनन्यभावा अपि गाढ़मानसा
न ते पुनर्गर्भदशामुपासते ॥”
इति काशीखण्डम् ॥
श्रीजगन्नाथमन्दिरदक्षिणपार्श्वस्थमण्डपश्च ॥
मुक्तिमुक्तः पुं, (मुक्त्या मोचनेन मुक्तः हीनः ।)
शिह्लकम् । इति रत्नमाला ॥
मुखं, क्ली, (खनति विदारयति अन्नादिकमनेन
खन्यते विधात्रा मुखमनेति वेति । खन्+“डित-
खनेर्मुट् चोदात्तः ।” उणा० । ५ । २० । इति
करणे अच् । स च डित मुडागमश्च ।)
शरीरावयवविशेषः । स तु मुखविवरम् ॥
(तन्निरुक्तिर्यथा,—
‘प्रजाद्वन्ना यतः खातं तस्मादाहुर्मुखं बुधाः ।’
इत्यमरटीकाधृतम् ।)
कवयस्तु तदुपलक्षिते समुदाये प्रयुञ्जते । इति
भरतः ॥ तत्तु गर्भस्थस्य पञ्चमासैर्भवति । इति
सुखबोधः ॥ तत्पर्य्यायः । वक्त्रम् २ आस्यम् ३
वदनम् ४ तुण्डम् ५ आननम् ६ लपनम् ७ ।
इत्यमरः । २ । ६ । ८९ ॥ (यथा, नैषधचरिते
९ । ४४ ।
“मुखं विमुच्य श्वसितस्य धारया
वृथैव नासापथधावनश्रमः ।”)
तस्य स्वरूपं यथा,—
‘ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते ॥’
इति भावप्रकाशः ॥
रतिक्रियायां स्त्रीसुखस्य स्नेहात् स्ववालक-
सुखस्य च चुम्बने शुद्धत्वं यथा,—
“मक्षिका सन्तता धारा मार्ज्जारो ब्रह्मबिन्दवः ।
स्त्रीमुखं बालकमुखं न दुष्टं मनुरब्रवीत् ॥”
इति कर्म्मलोचनम् ॥ * ॥
निःसरणम् । इत्यमरः । २ । ३ । १६ ॥ तत्तु
गृहस्य निष्क्रमणप्रवेशनवर्त्म । इति सर्व्वधरा-
दयः । गृहादिद्वारप्रवेशः । इति स्वामी । हट्ट-
मण्डपादेः प्रवेशनिर्गमः । इति कोकटः ।
गृहाङ्गणादिनिःसरणपथः । इति रमानाथः ।
इत्यमरटीकायां भरतः ॥ प्रारम्भः ॥ (यथा,
रघुवंशे । ३ । १ ।
“अथेप्सितं भर्त्तुरुपस्थितोदयं
सखीजनोद्वीक्षणकौमुदीमुखम् ।

निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौहृदलक्षणं दधौ ॥"
"कौमुद्याः मुखं प्रारम्भम् ।" इति तट्टीकायां मल्लिनाथः ।) उपायः ॥ सन्धिविशेषः ॥ (यथा, दशरूपके । १ । २३ ।
"मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा ।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥")
नाटकादेः शब्दः । इति मेदिनी । खे, ४ ॥ आद्यम् ॥ (यथा, रामायणे । २ । ५० । ७ ।
"अचक्षुर्विषयं प्रायाद् यथार्कः क्षणदामुखे ॥")
प्रधानम् ॥ (यथा, महाभारते । २ । ३८ । २७—२९ ।
"दाता मुखं मनुष्याणां नदीनां सागरो मुखम् ।
नक्षत्राणां मुखं चन्द्र आदित्यस्तेजसां मुखम् ॥
पर्व्वतानां मुखं मेरुर्गरुडः पततां मुखम् ।
सदेवकेषु लोकेषु भगवान् केशवो मुखम् ॥")
शब्दः । नाटकः । वेदः । इति शब्दरत्नावली ॥ (द्वारम् । यथा, रघुवंशे । ३ । २८ ।
"लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत् ॥"
"नद्या मुखं द्वारम् । मुखन्तु वदने मुख्यारम्भे द्वाराभ्युपाययोरिति यादवः ।" इति तट्टीकायां मल्लिनाथः ॥ अग्रभागः । यथा, हठयोगप्रदीपिकायाम् । ३ । ५ ।
"तस्मात् सर्व्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥")

मुखः, पुं, डहुः । यथा,—
'लकुचो लिकुचो गुप्तः स्वगवक्त्रो मुखो डहुः ।'
इति शब्दचन्द्रिका ॥

मुखगन्धकः, पुं, (मुखे गन्धः अस्मात् । कप् ।) पलाण्डुः । इति राजनिर्घण्टः ॥

मुखघण्टा, स्त्री, (मुखे घण्टेव शब्दसादृश्यात् ।) हुलहुलीध्वनिः । इति त्रिकाण्डशेषः ॥

मुखचीरी, स्त्री, (मुखस्य चीरं वस्त्रविशेष इव । मुखचीर+स्वार्थे ङीष् ।) जिह्वा । इति शब्दमाला ॥

मुखजः, पुं, (मुखात् जायते इति । जन्+डः ।) ब्राह्मणः । इति पुराणम् ॥ वक्त्रजाते त्रि ॥

मुखतीयं, त्रि, (मुखस्य इति । मुख+तसिल् । मुखतः । ततः "मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयप्रत्ययो वक्तव्यः ।" ४।३।६०। इत्यस्य वार्त्तिकोक्त्या ईयः । "मुखपार्श्वतसोर्लोपश्च ।" ४ । २ । १३८ । इत्यत्र काशिकोक्तेश्च टिलोपः ।) मुखसम्बन्धि । इति सिद्धान्तकौमुदी ॥

मुखदूषणः, पुं, (मुखं दूष्यते अनेनेति । दुष्+णिच्+करणे ल्युट् ।) पलाण्डुः । इति राजनिर्घण्टः ॥

मुखदूषिका, स्त्री, (मुखं दूषयति विवर्णं करोतीति । दुष+णिच्+ण्वुल् टाप् अत इत्वञ्च ।) मुखजातक्षुद्ररोगविशेषः । वयस्फोडा इति भाषा । तल्लक्षणमाह ।
"शाल्मलीकण्टकप्रख्याः कफमारुतपित्तजाः ।
जायन्ते पिडका यूनां यथास्ता मुखदूषिकाः ॥"
प्रख्याः सदृश्यः । एता यूनामेव मुखे भवन्ति स्वभावात् ॥ * ॥ अथ तच्चिकित्सा ।
"अङ्गुलस्य चतुर्थांशो मुखे लेपः कनिष्ठकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति ।
शुष्कस्तु गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
मुखलेपमाह ।
"लोध्रधान्यवचालेपस्तारुण्यपिडकापहः ।
तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनम् ॥
सिद्धार्थकवचालोध्रैः सैन्धवैश्च प्रलेपनम् ।
वमनञ्च निहन्त्याशु पिडकां यौवनोद्भवाम् ॥
केवलाः पयसा पिष्टास्तीक्ष्णाः शाल्मलिकण्टकाः ।
आलिप्तं त्र्यहमेतेन भवेत् पद्मोपमं मुखम् ॥"
इति भावप्रकाशः ॥

मुखधावनं, क्ली, (मुखस्य धावनं । धावुञ् जवे म्जि+ल्युट् ।) आस्यप्रक्षालनम् । मुखधोया इति भाषा । यथा, भावप्रकाशे ।
"पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो मुखधावने ॥"

मुखधौता, स्त्री, (मुखं धौतं मार्ज्जितमनेनेति । धाव्+कर्म्मणि+क्तः स्त्रियां टाप् ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥

मुखनिवासिनी, स्त्री, (मुखे निवसति या सा । नि+वस्+णिनिः स्त्रियां ङीप । वाणीरूपत्वादस्यास्तथात्वम् ।) सरस्वती । इति केचित् ॥

मुखनिरीक्षकः, पुं, (मुखं निरीक्षते इति । निर+ईक्ष्+ण्वुल् । उद्योगं विहायान्यमुखापेक्षितत्वावस्थानादस्य तथात्वम् ।) अलसः । इति शब्दरत्नावली ॥

मुखपूरणं, क्ली, (मुखं पूर्य्यते अनेनेति । पूर+करणे ल्युट् ।) गण्डूषः । इति वैद्यकम् ॥

मुखप्रियः, पुं, (मुखस्य प्रियः ।) नारङ्गः । इति भावप्रकाशः ॥ वक्त्ररोचके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"मुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशकः ।")

मुखभूषणं, क्ली (मुखं भूषयति रक्तिमालङ्करोतीति । भूष्+णिच्+ल्युः ।) ताम्बूलम् । इति वैद्यकम् ॥

मुखमण्डनकः, पु, (मुखं मण्डयति भूषयतीति । मडि+ल्युः स्वार्थे कन् ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ आस्यभूषके, त्रि । (मुखमण्डनमध्वन ॥)

मुखमोदः, पु, (मुखस्य मोदः हर्षः अस्मात् ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥

मुखयन्त्रणं, क्ली, (मुखं अश्वादीनां यन्त्र्यते सङ्कोच्यते येनेति यत्रि सङ्कोचने+करणे ल्युट् ।) कविका । यथा,—
"कवी खलीनं कविका कवियं मुखयन्त्रणम् ।"
इति हेमचन्द्रः । ४ । ३१६ ॥

मुखरः त्रि, (मुखं अस्यास्तीति । मुख+ऊषसुषिमुष्कमधो रः ।" ५ । २ । १०७ । इत्यत्र "रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् ।" इति काशिकोक्त्या मत्वर्थे रः । "निन्दितं मुखमस्यास्तीति रः ।" इत्यमरटीका ।) अप्रियवादी । तत्पर्य्यायः । दुर्मुखः २ अबद्धमुखः ३ । इत्यमरः । ३ । १ । ३६ ॥ (यथा,—
"एका भार्य्या प्रकृतिमुखरा चञ्चला च
द्वितीया ।"
इत्युद्भटः ॥
शब्दायमानः । यथा, मृच्छकटिकनाटके १ अङ्के ।
"त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं
गन्धश्च भीरु । मुखराणि च नूपुराणि ॥"
अग्रयायी । यथा, हितोपदेशे ।
"यदि कार्य्ये विपत्तिः स्यात् मुखरस्तत्र
हन्यते ॥")

मुखरः, पुं, (मुख+रः ।) काकः । शङ्खः । इति राजनिर्घण्टः ॥

मुखरोगः, पु, (मुखस्य रोगः ।) वक्त्रामयः । (यथा, मार्कण्डेये । १५ । ३५ ।
"पङ्गन्धो वधिरः कुष्ठी यक्ष्मणा च प्रपीडितः ।
मुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥")
तत्र मुखस्य स्वरूपमाह ।
"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु
च ।
गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते ॥"
अथ मुखरोगाणां संख्यामाह ।
'स्युरष्टावोष्ठयोर्दन्तमूले तु दश षट् तथा ।
दन्तेष्वष्टौ रसज्ञायां पञ्च स्युर्नव तालुनि ॥
कण्ठे त्वष्टादश प्रोक्तास्त्रयः सर्व्वसराः स्मृताः ।
एवं मुखामयाः सर्व्वे सप्तषष्टिर्मता बुधैः ॥'
मुखरोगाणां निदानमाह ।
'अनूपपिशितक्षीरदधिमाषादिसेवनात् ।
मुखमध्ये गदान् कुर्य्युः क्रुद्धा दोषाः कफोत्तराः ॥
तत्रौष्ठरोगाः ।
तेषां निदानपूर्व्विकां संख्यामाह ।
'पृथग्दोषैः समस्तैश्च रक्तेनो मांसजस्तथा ।
मेदोजश्चाभिघातोत्थ एवमष्टौष्ठजा गदाः ॥
तत्र वातिकस्य लक्षणमाह ।
कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥
परुषौ रूक्षौ । दाल्येते विदार्य्येते । परिपाट्येते किञ्चिद्विदीर्णत्वचौ क्रियेते ॥ पैत्तिकमाह ।
'चीयेते पिडकाभिस्तु सरुजाभिः समन्ततः ।
सदाहपाकपिडकौ पीताभासौ च पित्ततः ॥'
श्लैष्मिकमाह ।
सवर्णाभिस्तु चीयेते पिडकाभिरवेदनौ ।
कण्डूमन्तौ कफादोष्ठौ पिच्छिलौ शीतलौ गुरू ॥'
सान्निपातिकमाह ।
'सकृत् कृष्णौ सकृत् पीतौ सकृत् श्वेतौ तथैव च ।
सन्निपातेन विज्ञेयावनेकपिडकान्वितौ ॥'

दलनमाह ।
'खर्ज्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ ।
रक्तोपसृष्टौ रुधिरं स्रवन्तौ शोणितप्रभौ ॥'
मांसजमाह ।
'मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुद्गतौ ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात् ॥'
जन्तवः कृमयः । मूर्च्छन्ति वर्द्धन्ते । मुखादुभयतः सृक्कण्योः ॥ * ॥ मेदोजमाह ।
'सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू ।
स्वच्छस्फटिकसङ्काशमास्रावं स्रवतो भृशम् ॥'
अभिघातजमाह ।
'क्षतजाभौ विदीर्य्येते पाट्येते चाभिघाततः ।
ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥'
ग्रथितौ ग्रन्थिताविव । अतएव क्षतजाभौ रुधिराभाविति सङ्गतम् ॥ * ॥ अथौष्ठरोगाणां चिकित्सा ।
'गलदन्तमूलदशनच्छदेषु रोगाः कफास्र-
भूयिष्ठाः ।
तस्मादेतेष्वसकृद्रुधिरं विस्रावयेदुद्दृतम् ॥
'चतुर्विधेन स्नेहेन मधूच्छिष्टयुतेन च ।
वातजेऽभ्यञ्जनं कुर्य्यान्नाडीस्वेदञ्च बुद्धिमान् ॥'
चतुर्विधेन स्नेहेन तैलघृतवसामज्जरूपेण ।

वेधं शिराणां वमनं विरेकं
तिक्तस्य पानं रसभोजनञ्च ।
शीताः प्रदेहाः परिषेचनञ्च
पित्तोपसृष्टेष्वधरेषु कुर्य्यात् ॥

शिरोविरेचनं धूमः स्वेदः कवल एव च ।
हृते रक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मके ॥
मेदोजे स्वेदिते भिन्ने शोधिते कवलो हितः ।
प्रियङ्गु त्रिफला लोध्रं सक्षौद्रं प्रतिसार-
णम् ॥'
प्रतिसारस्य विधिमाह ।
'दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहनैः ।
शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
ओष्ठरोगेष्वशेषेषु दृष्ट्वा दोषमुपाचरेत् ।
तेषु व्रणत्वं यातेषु व्रणवत् समुपाचरेत् ॥'
अथ दन्तवेष्टरोगाः । तत्र दन्तवेष्टरोगाणां नामानि संख्याञ्चाह ।
'शीतादो गदितः पूर्व्वं दन्तपुप्पुटकस्तथा ।
दन्तवेष्टः शौषिरश्च महाशौषिर एव च ॥
ततः परिदरः प्रोक्तस्ततस्तूपकुशः स्मृतः ।
वैदर्भश्च ततः प्रोक्तः खलिवर्द्धन एव च ॥
अधिमांसकनामा च दन्तनाड्यश्च पञ्च च ।
दन्तविद्रधिरप्यत्र दन्तवेष्टेषु षोडश ॥'
तत्र शीतादस्य लक्षणमाह ।
'शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥'
दन्तवेष्टेभ्यः दन्तवेष्टनमांसेभ्यः । अकस्मात् अभिघातं विना शीर्य्यन्ते पतन्ति । पचन्ति च परस्परं पाकोन्मुखा मांसानि शोणितं पचन्ति शोणितं मांसानि पचति ॥ दन्तपुप्पुटमाह ।
'दन्तयोस्त्रिषु वा यत्र श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥'
दन्तवेष्टमाह ।
'स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥'
अत्र दन्तमूलानीति कर्त्तृपदमध्याहरणीयम् ॥
शौषिरमाह ।
'श्वयथुर्दन्तमूलेषु रुजावान् कफवातजः ।
लालास्रावी कण्डुरश्च विज्ञेयः शौषिरो गदः ॥
महाशौषिरमाह ।
'दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
यस्मिन् स सर्व्वजो व्याधिर्महाशौषिरसंज्ञकः ॥'
तालु चाप्यवदीर्य्यते चकारात् दन्तवेष्टौ चाप्यवदीर्य्येते । सप्तरात्रात् मारकश्चायं यत आह भोजः । महाशौषिर इत्येष सप्तरात्रात् निहन्त्यसून् ॥ * ॥ परिदरमाह ।
'दन्तमांसानि शीर्य्यन्ते यस्मिन् स्रवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥
उपकुशमाह ।
'वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति हि ।
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनम् ॥
आध्मायते स्रुते रक्ते मुखं पूति च जायते ।
यस्मिन्नुपकुशः स स्यात् पित्तरक्तसमुद्भवः ॥'
आघट्टिताः स्पृष्टाः ॥ * ॥ वैदर्भमाह ।
'घृष्टेषु दन्तमूलेषु संरम्भो जायते महान् ।
चलन्ति च रदा यस्मिन् स वैदर्भोऽभिघातजः ॥'
संरम्भः शोथः । चलन्ति चेति चकाराद्दाहपाकाः ॥ * ॥ खलिवर्द्धनमाह ।
'मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ संजाते रुक् प्रशाम्यति ॥'
सञ्जाते दन्ते ॥ * ॥ अधिमांसकमाह ।
'हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥'
हानव्ये हनुभवे पश्चिमे दन्ते ॥ * ॥ पञ्चदन्तनाडीराह ।
'दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।'
यथेरिता यथा नाडीव्रणा वातपित्तकफसन्निपातागन्तुनिमित्ताः पञ्चनाड्यः कथितास्तथात्रापीत्यर्थः ॥ * ॥ दन्तविद्रधिमाह ।
'दन्तमांसमलैः सास्रैर्बाह्यान्तःश्वयथुर्महान् ।
सदाहरुक् स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥'
दन्तमांसमलैः दन्तवेष्टगतदोषैः । सास्रैः सरक्तैर्हेतुभिः ॥ * ॥ अथ दन्तवेष्टरोगाणां चिकित्सा ।
'शीतादे हृतरक्ते तु तोये नागरसर्षपान् ।
निष्क्वाथ्य त्रिफलाञ्चापि कुर्य्याद्गण्डूषधारणम् ॥
'कासीसलोध्रकृष्णामनःशिलाप्रियङ्गुतेजोह्वाः ।
एषां चूर्णं मधुयुक् शीतादे पूतिमांसहरम् ॥'
तेजोह्वा तेजवल्कल इति लोके ।
'तैलं घृतं वा वातघ्नं शीतादे संप्रशस्यते ।' * ।
'दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ॥
सपञ्चलवणः क्षारः सक्षौद्रः प्रतिसारणम् ।
शिरोविरेकश्च हितो नस्यं स्निग्धञ्च भोजनम् ॥
विस्राविते दन्तवेष्टे व्रणांस्तु प्रतिसारयेत् ।
लोध्रपत्तङ्गमधुकलाक्षाचूर्णैर्मधूप्लुतैः ॥'
प्रतिसारयेत् अङ्गुल्या घर्षयेत् । पत्तङ्गं चोषकं इति लोके ।
'गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ।
चलदन्तस्थैर्य्यकरं कार्य्यं बकुलचर्व्वणम् ॥
भद्रमुस्ताभयाव्योषविडङ्गारिष्टपल्लवैः ।
गोमूत्रपिष्टैर्गुटिका छायाशुष्का प्रकल्पयेत् ॥
तां निधाय मुखे शोथमूलदन्तातुरो नरः ।
नातःपरतरं किञ्चिच्चलदन्तस्य भेषजम् ॥'
भद्रमुस्तादिवटिका ।

'तुला घृतं नीलसहाचरस्य
द्रोणाम्भसा संश्रपयेद्यथावत् ।
ततश्चतुर्भागरसेन तैलं
पचेच्छनैरर्द्धपलप्रमाणैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्ब्वाम्रयष्टीमधुकोत्पलानाम् ।
तत्तैलमाश्वेव धृतं मुखेन
स्थैर्य्यं द्विजानां विदधाति सद्यः ॥'

नीलसहाचरः नीलपुष्पकटसैया । अनन्ता दुरालभा तदलाभे यवासो ग्राह्यः । अरिमेदो दुर्गन्धखदिरः । सहाचराद्यतैलम् ॥ * ॥
'शौषिरे हृतरक्ते तु लोध्रमुस्तारसाञ्जनैः ।
सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ॥
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः ।
संशोध्योभयतः कायं शिरश्चोपकुशे तथा ॥
काकोडुम्बरिकापत्रैर्घृष्टं विस्रावयेद्भिषक् ।
लवणैः क्षौद्रयुक्तैश्च सव्योषैः परिसारयेत् ॥ * ॥
'शस्त्रेणोत्तस्य वै दर्भे दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च शीतलाः ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत् ।
क्रिमिदन्तकवच्चात्र विधिः कार्य्यो विजानता ॥'
इयं खलिवर्द्धनस्य चिकित्सा ॥ * ॥
'छित्त्वाधिमांसं सक्षौद्रैरेभिश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठास्वर्ज्जिकायावशूकजैः ॥'
तेजोवती तेजवल्कलं स्वर्णजीवन्तीति च ।
'क्षौद्रद्वितीयाः पिप्पल्यः कवले चात्र कीर्त्तिताः ।
पटोलनिम्बत्रिफलाकषायश्चात्र धावने ॥' * ॥
'नाडीव्रणहरं कर्म्म दन्तनाडीषु कारयेत् ।
यद्दन्तमध्ये जायेत नाडीदन्तं तदुद्धरेत् ॥
छित्त्वा मांसानि शस्त्रेण यदि नोपरितो भवेत् ।
उद्धृत्य च दहेच्चापि क्षारेण ज्वलनेन वा ॥
भिनत्त्युपेक्षितं दन्ते हन्वस्थिगतं ध्रुवम् ।
समूलं दशनं तस्मादुद्धरेद्भग्नमस्थि च ॥
उद्धृते तूत्तरे दन्ते शोणितं प्रस्रवेदति ।
रक्ताभिषेकात् पूर्व्वोक्ता घोरा रोगा भवन्ति हि ॥
काण्यः संजायते जन्तुरर्द्दितं तस्य जायते ।
चलमप्युत्तरं दन्तमतो नैवोद्धरेद्भिषक् ॥
धावनं जातिमदनस्वादुकण्टकखादिरैः ।”
कषायैरितिशेषः ।
कषायैर्जातिमदनकटुकी-स्वादुकण्टकैः ।

'मञ्जिष्ठालोध्रखदिरयष्ट्याह्वैश्चापि यत् कृतम्।
तैलं ततसाधितं तच्च हन्यात् दन्तगतां गतिम्॥'
जात्यादिचतुष्टयस्य कषायेण मञ्जिष्ठादिचतुष्टयस्य च कषायेण तैलमिदं पचेत। जातिः चमेली इति लोके। तस्याः पत्रं ग्राह्यम्। मदनो धुस्तूरस्तस्यापि पत्रमत्र ग्राह्यम्। कण्टकी इहतकटाइ तस्या मूलं ग्राह्यम्। स्वादुकण्टकोगोक्षुरः तस्य पञ्चाङ्गं ग्राह्यम्। जात्यादितैलम्॥ *॥
'विद्रध्युक्तं विधिं युक्तं विदध्याद्दन्तविद्रधौ।
शस्त्रकर्म्म नरस्तत्र कुशलेनैव कारयेत्॥'*॥
अथ दन्तरोगाः। तत्र रोगाणां नामानि संख्याञ्चाह।
'दालनः कथितः पूर्व्वं क्रिमिदन्तक एव च।
प्रोक्तो भञ्जनको दन्तहर्षो वै दन्तशर्करा॥
कपालिकात्र कथिता श्यावदन्तक एव च।
करालसंज्ञ इत्यष्टौ दन्तरोगाः प्रकीर्त्तिताः॥'
तत्र दालनस्य लक्षणमाह।
'दीर्य्यमाणेष्विव रुजा यत्र दन्तेषु जायते।
दालनो नाम स व्याधिः सदागतिनिमित्तजः॥'
क्रिमिदन्तकमाह।
'कृष्णश्छिद्रचलस्रावी ससंरम्भो महारुजः।
अनिमित्तरुजो वातात् स ज्ञेयः क्रिमिदन्तकः॥'
ससंरम्भः दन्तमूलशोथयुक्तः। तत्रैव स्रावो बोद्धव्यः। अनिमित्तरुजः व्यवघटनादिनिमित्तं विनैव महारुजावान्॥ *॥ भञ्जनकमाह।
'वक्त्रं वक्रं भवेद्यत्र दन्तभङ्गश्च जायते।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञकः॥'
दन्तहर्षमाह।
'शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः।
यत्र स्युर्वातपित्ताभ्यां दन्तहर्षः स कीर्त्तितः॥'
दन्तशर्करामाह।
'मलो दन्तगतो यस्तु कफवातानिलशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥'
शर्करा सिकता॥ *॥ कपालिकामाह।
'कपालेष्विव दीर्य्यतसु दन्तेषु समलेषु च।
कपालिकेति विज्ञेया दन्तच्छित् दन्तशर्करा॥'
कपालानि मृण्मयघटादिघटकानि तेष्विव। समलेषु दन्तेषु मलसहितदन्तावयवेषु दीर्य्यतसु या दन्तशर्करा सा कपालिकेति विज्ञेया। सा कपालिका दन्तच्छित् दन्तनाशिनी॥*॥
श्यावदन्तकमाह।
'योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः॥'
दग्धः दग्ध इव॥ *॥ करालमाह।
'शनैः शनैः प्रकुरुते यत्र दन्ताश्रितोऽनिलः।
करालान् विकटान् दन्तान् स करालो न सिध्यति॥'
करालान् भयानकान्। अयं सुश्रुतेनोक्तः। संग्रहकारेण गृहीतश्च॥*॥ अथ दन्तरोगाणां चिकित्सा।
'तैलं लाक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत्।
द्रव्यैः पलमितैरेतैः क्वाथैश्चापि चतुर्गुणैः॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥'
कट्फलस्थाने पतङ्ग इति च पाठः।
'दालनं दन्तचालञ्च दन्तमोक्षं कपालिकाम्।
शीतादं पूतिवक्त्रञ्च विरुचिं विरसास्यताम्॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥'
लाक्षाद्यतैलम्॥ *॥
'जयेत विस्रावणैः स्विन्नमचलं क्रिमिदन्तकम्।
तथावपीडैर्व्वातघ्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः।
क्रिमिदन्तापहं कोष्णं हिङ्गु दन्तान्तरे स्थितम्॥
बृहतीभूमिकदम्बीपञ्चाङ्गुलकण्टकारिकाक्वाथः।
गण्डूषस्तैलयुतः क्रिमिदन्तकवेदनाशमनः॥
नीली वायसजङ्घा कटुतुम्बी फलमेकैकम्।
सन्नाय्यं दशनविधृतं दशनक्रिमिपातनं प्राहुः॥
स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रैवृतस्य च।
निर्य्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्द्दनाः॥'
त्रैवृतस्य सर्पिषः त्रिवृता पक्वस्य सर्पिषः कवल इत्यर्थः।
'स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च।
पेया रसा यवाग्वश्च क्षीरमन्तानिकाद्घृतम्॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः।'
अत्र दन्तहर्षे।
'अच्छिन्दन् दन्तमूलानि शर्करामुद्धरेद् भिषक्।
लाक्षाचूर्णैर्मधुयुतैस्ततस्तां प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता॥'
अत्र दन्तशर्करायाम्। एषा क्रिया दन्तहर्षक्रिया॥ *॥
'फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत्॥'

अथ जिह्वारोगाः।

तत्र जिह्वारोगाणां निदाननामसंख्याः प्राह।
'वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः॥'
तत्र वातजस्य लक्षणमाह।

'जिह्वानिलेन स्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।'

स्फुटिता मनाग्विदीर्णा। प्रसुप्ता रसानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजो द्रुमस्तद्वत् कण्टकचिता॥ *॥ पित्तजमाह।

'पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपि कण्टकैश्च॥'

अयं रोगो लोके जलो इति ख्यातः॥ *॥
कफजमाह।

'कफेन गुर्व्वी बहला चिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाभैः।'

बहला स्थूला मांसोच्छ्रयैः मांसजकण्टकैः॥
अलासमाह।

'जिह्वातले यः श्वयथुः प्रगाढः
सोऽलाससंज्ञः कफरक्तमूर्त्तिः।
जिह्वां स तु स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम्॥'

प्रगाढः प्रकर्षेण गाढो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः। भृशपाकेन पित्तञ्च। अनन्तिदोषोऽयमसाध्यत्वञ्चास्य॥*॥
उपजिह्विकामाह।

'जिह्वाग्ररूपः श्वयथुर्हि जिह्वा-
मुन्नाम्य जातः कफपित्तयोनिः।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति॥'

जिह्वाग्ररूपो जिह्वाग्राकृतिः॥ *॥ अथ जिह्वारोगाणां चिकित्सा।
'जिह्वागतविकाराणां शस्तं शोणितमोक्षणम्।
गुडूचीपिप्पलीनिम्बकवलः कटुभिः सुखः॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम्।
कण्टकेष्वनिलोत्थेषु तत्कार्य्यं भिषजा खलु॥
पित्तजे परिघृष्टे तु निःसृते दुष्टशोणिते।
प्रतिसारणगण्डूषनस्यानि मधुरं हितम्॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये॥
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे॥
उपजिह्वाम्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥
योषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम्।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलञ्च पाचयेत्॥'
अथ तालुरोगाः। तत्र तालुरोगाणां नामानि संख्याञ्चाह।
'गलशुण्डी तुण्डिकेर्य्यध्रुषः कच्छप एव च।
ताल्वर्व्वुदञ्च कथितो मांससंघात एव च।
तालुपुप्पुटनामा च तालुशोषस्तथैव च॥
तालुपाकश्च कथितास्तालुरोगा अमी नव॥'
तत्र गलशुण्डीलक्षणमाह।

'श्लेष्मासृग्भ्यां तालुमूलात् प्रवृद्धो
दीर्घः शोथो ध्मातवस्तिप्रकाशः।
तृष्णाकासश्वासकृत्तं वदन्ति
वैद्या व्याधिं कण्ठशुण्डीति नाम्ना॥'

ध्मातवस्तिप्रकाशः वातपूरितचर्म्मपुटतुल्यः॥*॥
तुण्डिकेरीमाह।

'शोथः स्थूलस्तोददाहप्रपाकी
प्रागुक्ताभ्यां तुण्डिकेरी मता तु।'

प्रागुक्ताभ्यां श्लेष्मासृग्भ्याम्। तुण्डिकेरी वनकार्पासीफलं तत्तुल्यैति॥*॥ अध्रुषमाह।

'शोथस्तब्धो लोहितः शोणितोत्थो
ज्ञेयोऽध्रुषः सज्वरस्तीव्ररुक् च।'

कच्छपमाह।

'कूर्म्मोत्सन्नोऽवेदनोऽशीघ्रजन्मा
रोगो ज्ञेयः कच्छपः श्लेष्मणा स्यात्।'

कूर्म्मोत्सन्नः मध्ये प्रोच्चं प्रान्ते नतः॥ *॥
ताल्वर्व्वुदमाह।

'पद्माकारं तालुमध्ये तु शोथं
विद्याद्रक्ताद्‌र्व्वुदं पित्तलिङ्गम् ।'
पद्माकारं पद्मकर्णिकाकारैरिव पार्श्वतो दीर्घ-
मांसाङ्कुरैर्व्वेष्टितम् ॥ * ॥ मांससंघातमाह ।
'दुष्टं मांसं श्लेष्मणा नीरुजञ्च
ताल्वन्तस्थं मांससंघातमाह ।'
तालुपुप्पुटमाह ।
'नीरुक् स्थायी कोलमात्रः कफात्मा
मेदोयुक्तः पुप्पुटस्तालुदेशे ॥
तालुशोषमाह ।
'शोषोऽत्यर्थं दीर्य्यते चापि तालु
श्वासो वातात्तालुशोषोऽयमुक्तः ।'
तालुपाकमाह ।
'पित्तं कुर्य्यात् पाकमत्यर्थघोरं
तालुन्येनं तालुपाकं वदन्ति ॥'
अथ तालुरोगाणां चिकित्सा ।
'कुष्ठोषणवचासिन्धुकणापाठाप्लवैः सह ।
क्षौद्रैर्भिषजा कार्य्यं गलशुण्डीप्रघर्षणम् ॥'
प्लवः कैवर्त्तीमोथा गुन्द्रमोथा इति च लोके ।
'अङ्गुष्ठाङ्गुलिसन्दंशेनाकृष्य गलशुण्डिकाम् ।
छेदयेन्मण्डलाग्रेण जिह्वोपरि तु संस्थिताम् ॥'
मण्डलाग्रेण शस्त्रविशेषेण ।
'अतिच्छेदात् स्रवेद्रक्तं ततो हेतोर्म्रियेत च ।
हीनच्छेदाद्भवेच्छोथो लालास्रावो भ्रम-
स्तथा ॥
तस्मात् वैद्यः प्रयत्नेन दृष्टकर्म्मा विशारदः ।
गलशुण्डीं तु संछिद्य कुर्य्यात् प्राप्तामिमां
क्रियाम् ॥
पिप्पल्यतिविषाकुष्ठवचामरिचनागरैः ।
क्षौद्रयुक्तैः सलवणैस्ततस्तां प्रतिसारयेत् ॥
वचामतिविषापाठारास्नाकटुकरोहिणीः ।
निष्क्वाथ्य पिचुमर्द्दञ्च कवलं तत्र कारयेत् ॥
तुण्डिकेर्य्यध्रुषे कूर्म्मे संघाते तालुपुप्पुटे ।
एष एव विधिः कार्य्यो विशेषः शस्त्रकर्म्मणि ॥
तालुपाके तु कर्त्तव्यं विधानं पित्तनाशनम् ।
स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः ॥'
अथ गलरोगाः । तत्र गलरोगाणां नामानि
संख्याञ्चाह ।
'रोहिण्यो पञ्चधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलाससमेकवृन्दकः ॥
ततो वृन्दः शतघ्नी च शिलायुः कण्ठविद्रधिः ।
गलौघः स्वरघ्नश्च मांसतानस्तथैव च ॥
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥'
तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्ति-
माह ।
'गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरयं हि रोहिणी ॥'
अनिलः मूर्च्छितः प्रवृद्धः । पित्तकफौ च
मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः ।
ननु त्रयोऽपि मूर्च्छिताः पृथग्दोषजाया अपि-
वचनमायत्तात् ॥ * ॥ तत्र वातजाया लक्षण-
माह ।
'जिह्वासमन्ताद्भृशवेदनास्तु
मांसाङ्कुराः कण्ठनिरोधनाः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढ़युक्ता ॥'
समन्तात् जिह्वायाः सर्व्वतः । वातात्मकोपद्रव-
गाढ़युक्ता स्तम्भादिभिरतिशयेन युक्ता ॥ * ॥
पित्तजामाह ।
'क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ।'
श्लेष्मजामाह ।
'स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु ।'
स्रोतोऽत्र कण्ठस्रोतः ॥*॥ सन्निपातजामाह ।
'गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ।'
रक्तजामाह ।
'स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ।'
रक्तजेतरा संहारकालावधिमाह ।
'सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा ।
पञ्चाहात् पित्तसंभूता सप्ताहात् पवनोत्थिता ॥'
कण्ठशालूकमाह ।
'कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥'
कण्टकशूकभूतः कण्टकवच्छूकवच्च वेदनाजनकः ।
अधिजिह्वमाह ।
'जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादपि रक्तमिश्रात् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥'
अथवा मिश्रादित्यन्वयः ॥ * ॥ वलयमाह ।
'बलास एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥'
अलासमाह ।
'गले तु शोथं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेतदाहु-
रलाससंज्ञं भिषजो विकारम् ॥'
मर्म्मच्छिदं हृदयमर्म्मणि छेदमिव वेदनाजनकम् ॥
एकवृन्दमाह ।
'वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यमृदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्ब्बलासक्षतजप्रसूतः ॥'
अन्तः गलमध्ये । अपाकी ईषत्पाकी । अमृदुः
ईषन्मृदुः ॥ * ॥ वृन्दमाह ।
'समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति ।
तच्चापि पित्तक्षतजप्रकोपाद्-
विद्यात् सतोदं पवनात्मकन्तु ॥'
शतघ्नीमाह ।
'वर्त्तिर्घना कण्ठनिरोधिनी तु
चितातिमात्रं पिशितं प्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीसदृशी शतघ्नी ॥'
घना कठिना । अनेकरुक् वातपित्तकफजतोद-
दाहकण्ड्वादियुक्ता । शतघ्नीसदृशी लौहकण्टक-
संकुला शतघ्नी महती शिला तत्तुल्या यतः
प्राणहरी ॥ * ॥ शिलायुमाह ।
'ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः ।
संलक्ष्यते सक्तमिवाशितञ्च
स शस्त्रसाध्यस्तु शिलायुसंज्ञः ॥'
गलविद्रधिमाह ।
'सर्व्वं गलं व्याप्य समुत्थितो यः
शोथो रुजः सन्ति च यत्र सर्व्वाः ।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य ॥'
गलौघमाह ।
'शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ ॥'
वायुगतेर्निहन्ता उदानवायुगतिरोधकः ॥ * ॥
स्वरघ्नमाह ।
'यस्ताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥'
ताम्यमानस्तमः पश्यन् । शुष्कविमुक्तकण्ठ
शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः ।
अस्वाधीनता सुक्तं गिलितुमशक्यत्वात् । अनि-
लायनेषु वायुवर्त्मसु श्वसनात् वातात् ॥ * ॥
मांसतानमाह ।
'प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितावलम्बी
प्राणप्रणुत् सर्व्वकृतो विकारः ॥'
प्रतानवान् विस्तारवान् । सुकष्टः अतिशयेन
कष्टं यत्र सः ॥ * ॥
विदारीमाह ।
'सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥'
पार्श्वे विशेषात् स तु येन शेते स पुरुषो येन
पार्श्वेन विशेषाद्वाहुल्येन शेते तस्मिन् पार्श्वे सा
विदारी भवति इत्यर्थः ॥ * ॥

अथ गलरोगाणां चिकित्सा ।
'रोहिणीनान्तु साध्यानां हितं शोणितमोक्षणम् ।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म वा ॥
वातजान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियङ्गुभिः ।
घर्षयेत् कवलो द्राक्षापरूषैः क्वथितैर्हितः ॥
आगारधूमकटुकैः कफजां प्रतिसारयेत् ॥'
आगारधूम झुल इति लोके । कटुकानि शुण्ठी-पिप्पलीमरिचानि ।
'श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवले च कफोदये ॥'
श्वेता अपराजिता ।
'पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नं वा भुञ्जीत स्निग्धमल्पशः ।
उपजिह्वकवच्चापि साधयेदधिजिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ।
अमर्म्मस्थं सुसम्पक्वं छेदयेत गलविद्रधिम् ॥'
अथ सामान्यानां कण्ठरोगाणां चिकित्सा ।
'कण्ठरोगेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सा क्वचिकित्सा तु कुशलोऽत्र समाचरेत् ॥
क्वाथं दद्याच्च दार्व्वीत्वङ्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा हितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठामुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ॥
व्हीकाकटुकाव्योषदार्व्वीत्वक्त्रिफलाघनम् ।
पाठा रसाञ्जनं दारु तेजोह्वेति सुचूर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगास्त्वेते त्रयः प्रोक्ता वातपित्तकफापहाः ॥
यवाग्रजं तेजवतीञ्च पाठां
रसाञ्जनं दारु निशां सकृष्णाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां मुखेन
तां धारयेत् सर्व्वगलामयेषु ॥'
अथ समस्तमुखरोगाः । तत्र तेषां निदानं संख्याञ्चाह ।
'पृथग्दोषैस्त्रयो रोगाः समस्तमुखजाः स्मृताः ।'
तत्र वातिकस्य लक्षणमाह ।
"स्फोटैः सतोदैर्व्वदनं समन्ताद्-
यस्याचितं सर्व्वसरः स वातात् ॥*॥
पैत्तिकमाह ।
'रक्तैः सदाहैः पिडकैः सुपीतै-
र्यस्याचितं चापि स पित्तकोपात् ॥'*॥
श्लैष्मिकमाह ।
'अवेदनैः कण्डुयुतैः सवर्णै-
र्यस्याचितं चापि स वै कफेन ।'
अवेदनैः ईषद्वेदनैः । यत उक्तं सुश्रुतेन । अल्पवेदनैरिति ॥*॥ मुखरोगेष्वसाध्यानाह ।

'ओष्ठप्रकोपे वर्ज्याः स्युर्मांसरक्तत्रिदोषजाः ।
दन्तवेष्टेषु वर्ज्यौ तु त्रिलिङ्गगतिशौषिरौ ॥'
त्रिलिङ्गगतिः त्रिदोषजा नाडी । महाशौषिरश्च ।
'दन्तेषु च न सिध्यन्ति श्यावदालनभञ्जनाः ।
जिह्वारोगेष्वलासस्तु तालव्येष्वर्व्वुदं तथा ॥
स्वरघ्नो वलयो वृन्दो वलासः स हि दारुणः ।
गलौघो मांसतानश्च शतघ्नी रोहिणी गले ॥
असाध्याः कीर्त्तिता ह्येते रोगा दश नवोत्तराः ।
तेषु चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥'
अथ समस्तमुखरोगाणां चिकित्सा ।
'वातात् सर्व्वसरं चूर्णैर्लवणैः प्रतिसारयेत् ।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः ॥*॥
पित्तात्मके सर्व्वसरे शुद्धकायस्य देहिनः ।
सर्व्वपित्तहरः कार्य्यो विधिर्मधुरशीतलः ॥*॥
प्रतिसारणगण्डूषधूमसंशोधनानि च ।
कफात्मके सर्व्वसरे क्रमं कुर्य्यात् कफापहम् ॥*॥
मुखपाके सिरावेधः शिरसश्च विरेचनम् ।
मधुमूत्रघृतक्षीरैः शीतैश्च कवलग्रहः ॥१॥
जातीपत्रामृताद्राक्षायासदार्व्वीफलत्रिकैः ।
क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत् ॥२॥
कार्य्यश्च बहुधा नित्यं जातीपत्रस्य चर्व्वणम् ।
लघ्वाजीरककुष्ठेन्द्रयवचर्व्वणतस्त्र्यहात् ।
मुखपाकव्रणक्लेददौर्गन्ध्यमुपशाम्यति ॥३॥
पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो मुखधावने ॥४॥
पञ्चपल्लवजः क्वाथस्त्रिफलासम्भवोऽथवा ।
मुखपाके प्रयोक्तव्यः सक्षौद्रो मुखधावने ॥५॥
स्वरसः क्वथितो दार्व्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा ॥६॥
सप्तच्छदोशीरपटोलमुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥७॥'
राजद्रुमः धनवहेरा इति लोके ।
'तिला नीलोत्पलं सर्पिः शर्करा क्षीरमेव च ।
क्षौद्राद्यदिग्धकल्कस्य गण्डूषो मुखपाकनुत् ॥८॥
आम्रादिना सकृदपि मुखगन्धं सकलमपनयति ।
त्वग्बीजपूरफलजा पवनमबाधञ्च नाशयति ॥९॥
हरिद्रा निम्बपत्राणि मधुकं नीलमुत्पलम् ।
तैलमेभिर्व्विपक्तव्यं मुखपाकहरं परम् ॥१०॥
यष्टीमधुपलमेकं त्रिंशन्नीलोत्पलस्य तैलस्य ।
प्रस्थं तद्द्विगुणपयोविधिना पक्वं तु नस्येन ॥
निरि वदनस्य स्राव चपयति गात्रस्य दोषसंघातम् ।
कचखचित्वमरण्यं क्रमशोऽभ्यङ्गेन जन्तनाम् ॥११
इति मुखरोगाधिकारः । इति भावप्रकाशः ॥*॥
अपि च ।
तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ।
कामलादिहरं प्रोक्तं मुखरोगहरं तथा ॥१२॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।

शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्व्विपाचयेत् ॥
बाधिर्य्यं कर्णमूलञ्च पूयस्रावञ्च कर्णयोः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः स्थिताः
क्षिप्रं विनाशमायान्ति शशाङ्ककृतशेखर ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥१३॥"
इति गारुडे १८८।१९८ अध्यायौ ॥
(तथाचास्य सलक्षणचिकित्सितम् ।
"मुखामये मारुतजे तु शोष-
कार्कश्यरौक्ष्याणि चलारुजश्च ।
तथारुणं निष्पतनं सुशीतं
प्रसंसनस्पन्दनतोदभेदाः ॥
तृष्णाज्वरस्फोटकतालुदाहा-
धूमायनञ्चाप्यवदीर्णता च ।
पित्तात् समूर्च्छा विविधारुजश्च
वर्णाश्च मुक्तारुणवर्णवर्ज्ज्याः ॥
कण्डूर्गुरुत्वं सितविज्जलत्वं
क्लेदोऽरोचजाड्यकफप्रसेकौ ।
उत्क्लेशमन्दानिलता च तन्द्रा
रुजश्च मन्दाः कफवक्त्ररोगे ॥
सर्व्वाणि रूपाणि तु वक्त्ररोगे
भवन्ति यस्मिन् स तु सर्व्वजः स्यात् ।
संस्थानदूष्याकृतिनामभेदा-
च्चेते चतुःषष्टिविधा भवन्ति ॥
शालाक्यतन्त्रे विहितानि तेषां
निमित्तरूपाकृतिभेषजानि ।
यथाप्रदेशन्तु चतुर्व्विधस्य
क्रियां प्रवक्ष्यामि मुखामयस्य ॥'
इति मुखरोगः ॥*॥
'शुक्तितक्तकटुक्षौद्रकषायैः कवलग्रहः ।
धूमः प्रधमनं शुद्धिरधश्छर्द्दनलङ्घनम् ॥
भोज्यञ्च मुखरोगेषु यथास्वं दोषनुद्धितम् ।
पिप्पल्यगुरुदार्व्वीत्वग् यवक्षारो रसाञ्जनम् ॥
पाठा तेजोवती पथ्या समभागं सुचूर्णितम् ।
मुखरोगेषु सर्व्वेषु सक्षौद्रं तद्विधारयेत् ॥
सीधुमाधवमाध्वीकैः श्रेष्ठोऽयं कवलग्रहः ।
तेजोह्वामभयामेलां समङ्गां कटुकां घनम् ।
पाठां ज्योतिष्मतीं लोध्रं दार्व्वीं कुष्ठञ्च चूर्णयेत् ।
दन्तानां घर्षणञ्चैव स्रावकण्डूरुजापहम् ॥'
'गृहधूमो यवक्षारपाठाव्योषं रसाञ्जनम् ।
तेजोह्वा त्रिफला लोध्रं चित्रकश्चेति चूर्णितम् ॥
सक्षौद्रं धारयेदेतत् गलरोगविनाशनम् ॥'
इति कालकचूर्णम् ॥*॥
मनःशिला यवक्षारो हरितालं ससैन्धवम् ।
दार्व्वीत्वक् चेति तच्चूर्णं माक्षिकेण समायुतम् ॥
मूर्च्छितं घृतमण्डेन कण्ठरोगेषु धारयेत् ।
मुखरोगेषु च श्रेष्ठं पीतकं नामकीर्त्तितम् ॥'
इति पीतकचूर्णम् ॥*॥
'कटुकातिविषापाठा दार्व्वीमुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥
स्वरसः क्वथितो दार्व्व्या घनीभूतो रसक्रिया ।
सक्षौद्रमुखरोगासृग्दोषनाडीव्रणापहा ॥
तालुशोषे त्वतृष्णास्य सर्पिरौत्तरभक्तिकम् ॥

लावणं मधुराः स्निग्धाः शीताश्चैव रसा हिताः ।
मुखपाके शिराकर्म्म शिरःकायविरेचनम् ।
मूत्रतैलघृतक्षीरद्मूत्रैश्च कवलग्रहः ॥
सक्षौद्राश्चिफलापाठा म्हद्वीकाजातिपल्लवाः ।
कषायतिक्तकाः शीताः क्वाथाश्च मुखधावनाः ।
तुलां खदिरसारस्य द्विगुणामरिमेदसः ॥
प्रक्षाल्य जर्ज्जरीकृत्य चतुर्द्दोणेऽम्भसः पचेत् ।
द्रोणशेषं कषायन्तं पूत्वा भूयः पचेच्छनैः ॥
ततस्तस्मिन् घनीभूते चूर्णीकृत्याक्षभागिकम् ।
चन्दनं पद्मकोशीरं मञ्जिष्ठां धातकीं घनम् ॥
प्रपुण्डरीकं यष्ट्याह्वत्वगेलापत्रकेशरम् ।
लाक्षां रसाञ्जनं मांसीं त्रिफलां लोध्रवालकम् ॥
रजन्यौ फलिनीमेलां समङ्गां कट्फलं वचाम् ।
यवासमगुरुपत्तङ्गगैरिकाञ्जनमावपेत् ॥
लवङ्गनखकक्कोलजातिकोशान् पलोन्मितान् ।
कर्पूरकुडवञ्चापि पुनःशीतेऽवतारिते ॥
ततस्तु गुलिकाः कार्य्याः शुष्काश्चास्येन धारयेत् ।
तैलञ्चानेन कल्केन कषायेण च साधयेत् ॥
दन्तानाञ्चलनभ्रंशशौषिर्य्यक्रिमिरोगनुत् ।
मुखपाकास्यदौर्गन्ध्यजाड्यारोचकनाशनम् ॥
स्रावोपलंपपैच्छिल्यवैस्वर्य्यगलरोगनुत् ।
दन्तास्यगलरोगेषु सर्व्वेषां ततपरायणम् ॥”
इति खदिरादिगुटिकातैलञ्च ॥ इति मुखरोगचिकित्सा ॥ इति चरके चिकित्सास्थाने २६ अध्यायः ॥)

मुखलाङ्गलः, पु, (मुखं लाङ्गलमिव भूविदारकमस्य ।) शूकरः । इति जटाधरः ॥

मुखबन्धनं, क्ली, (मुखं प्रारम्भविषयः तस्य बन्धनं संग्रहोऽत्र ।) ग्रन्थारम्भे तत्र वक्तव्यकथनम् । तस्य नामान्तरम् । अनुक्रमणिका । भूमिका । इति छन्दोमञ्जर्य्यां मुखबन्धनाख्यप्रथमस्तवकः । इति तद्ग्रन्थकृद्गङ्गादासवैद्येन लिखितम् ॥

मुखवल्लभः, पु, (मुखस्य वल्लभः प्रीतिकरः ।) दाडिमवृक्षः । इति शब्दमाला ॥ मुखप्रिये, त्रि ॥

मुखवाचिका, स्त्री, (मुखं वाचयति शोधयतीति । वच + णिच् + ण्वुल् + स्त्रियां टाप । अत इत्वं च ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

मुखवाद्यं, क्ली (मुखेन वाद्यम् ।) वक्रनालवाद्यम् । वाँक इति भाषा । इति त्रिकाण्डशेषः ॥ मुखस्य मुखेन च वाद्यच । शिवपूजान्ते वम् इति शब्देन गालवाद्यम् । यथा,—
“लिङ्गं निर्म्माय विधिवत विधिवत् पूजयेच्च तम् ।
षडक्षरं जपित्वा वै मुखवाद्यं शुचिस्मिते । ॥”
इति लिङ्गार्च्चनतन्त्रे १५ पटलः ॥
अपि च ।
“मुखवाद्यं महत्वं हि कृत्वा तु परमेश्वरि । ।
मातृकामन्त्रसहितं मुखवाद्य सुदुर्लभम् ॥
अकारादिलकारान्तमनुलोमविलोमतः ।
उच्चार्य्य परमेशानि । मुखवाद्यं शुचिस्मिते । ॥
सबिन्दुं वर्णमुच्चार्य्य पञ्चाशन्मातृका प्रिये । ।
अनुलोमविलोमेन सर्व्वेण च वरानने ! ॥
अनेनेव विधानेन मुखवाद्यं करोति यः ।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः ।
मृत्युञ्जयोऽहं देवेशि । मुखवाद्यप्रसादतः ॥
यस्मिन् काले महेशानि । असुरो बलवान् भवेत् ।
तस्मिन् काले महेशानि । मुखवाद्यं करोम्यहम् ॥
तत् श्रुत्वा परमेशानि । असुरा राक्षसाश्च ये ।
पलायन्ते महेशानि । तत्श्रुत्वा परमेश्वरि । ॥
ये नरा भुवि तिष्ठन्ति मुखवाद्यं विना प्रिये । ।
स सर्व्वयातनाभोगी अन्ते कुम्भीरतां व्रजेत् ॥”
इति च लिङ्गार्च्चनतन्त्रे ८ पटलः ॥

मुखवासः, पु, (मुखस्य वासः सौरभ्यमस्मात् ।) गन्धतृणम् । इति राजनिर्घण्टः ॥

मुखवासनः, पुं, (मुखं वासयतीति । वस् + णिच् + ल्युः ।) मुखसद्गन्धकारकद्रव्यम् । तत्पर्य्यायः । आमोदी २ । इत्यमरः ।२।५।११॥ हे मुखवासनवटिकादौ आमोदयुक्तः कर्पूरादिरामोदी इत् । मुखं वासयति मुखवासनः नन्द्यादित्वाद्नः । नानाद्रव्यरचित एकैकश एव वा कर्पूरादिभिर्म्मुखोपयोग्यमुखवासनवटिरामोदीति सर्व्वस्वम् । शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्य कर्पूरादेः स आमोदीत्याहुरितिसुभूतिः । क्षीरस्वामिना तु समाकर्षादिचतुष्टयेन इष्टगन्धादिचतुष्टयेन च पर्य्यायद्वयमाख्यातम् । शब्दार्णवे तु ।
“कस्तूरिकायामामोदः कर्पूरे मुखवासनः ।
बकुले स्यात् परिमलश्चम्पके सुरभिस्तथा ।
गन्धा द्विर्षाद्दरष्वेते गुणिवृत्तौ त्रिलिङ्गका ॥”
इति भरतः ॥

मुखविलुण्ठिका, स्त्री, (मुखेन विलुण्ठयतीति । लुण्ठ + णिच ण्वुल । स्त्रियां टाप । अत इत्वं च ।) छागी । इति शब्दरत्नावली ॥

मुखविष्ठा, स्त्री, (मुखे विष्ठा मलमस्याः ।) तैलपायिका । यथा,—
“वल्गुलिका मुखविष्ठा परोष्णी तैलपायिका ।”
इति हेमचन्द्रः ॥

मुखशफः, पुं, (मुखं शफं क्षुर इव तीक्ष्णमस्य ।) दुर्म्मुखः । इति शब्दमाला ॥

मुखशुद्धिः, स्त्री (मुखस्य शुद्धिः ।) वक्त्रशोधनम् । यथा, आह्निकतत्त्वे ।
“अभाव दन्तकाष्ठानां प्रतिषिद्धदिने तथा ।
अपां द्वादशगण्डूषैर्म्मुखशुद्धिर्व्विधीयते ॥”

मुखशोधनं, क्ली, (मुखस्य शोधनम् ।) त्वचम् । इति राजनिर्घण्टः ॥

मुखशोधनः पुं, (मुखं शोधयत्यनेनेति । शुध + णिच् + करणे ल्युट् ।) कटुरस. । इति हेमचन्द्रः ॥

मुखशोधी, [न्] पु, (मुख शोधयतीति । शुध + णिच् + णिनिः ।) जम्बीरः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्याः ॥)

मुखष्ठीलः, त्रि, (मुखं ष्ठीवति निरस्यति विकृतं करोतीति भावः । ष्ठीव + इगुपधत्वात् कः पृषोदरादित्वात् वस्य लत्वम् ।) दुर्मुखः । इति शब्दमाला ॥

मुखसम्भवः, पुं, (मुखात् सम्भव उत्पत्तिरस्य ।) ब्राह्मणः । इति हेमचन्द्रः । ३ । ४७६ ॥

मुखसुरं, क्ली, (मुखस्य सुरा इति “विभाषा सेनासुराच्छायाशालानिशानाम् । २।४।२५ । इति षष्ठीसमासे सुराशब्दस्य क्लीबत्वम् ।) तालसुरा । इति त्रिकाण्डशेषः । ताडी इति भाषा ॥

मुखस्रावः, पुं, (स्रु भावे + घञ् । मुखात् स्रावः पतनमस्य ।) लाला । इति राजनिर्घण्टः ॥

मुखाग्निः, पु, (मुखं मुख्योऽग्निः ।) दावाग्निः । यथा,—
“हेमर्कलिर्द्दयोश्चाथ म्हदाकुः स्याद्दवानलः ।
मुखोल्का भूतसञ्चारो मुखाग्निर्भरत्सरः ॥”
इति शब्दमाला ॥
शवमुखे दत्तवह्निः । इति लोके । शास्त्रे तु शिरःस्थाने । यथा,—
“देवाश्चाग्निमुखाः सर्व्वे गृहीत्वा तु हुताशनम् ।
गृहीत्वा पाणिना चैव मन्त्रमेतदुदीरयेत् ॥
कृत्वा तु दुष्कृतं कर्म्म जानता वाप्यजानता ।
म्हत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम् ।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् ।
ज्वलमानं तथा वह्निं शिरः स्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्थानमेवं भवति पुत्रिके । ।”
इति शुद्धितत्त्वम् ॥

मुखामयः, पुं, (मुखस्यामयः ।) मुखरोगः । इति राजनिर्घण्टः ॥

मुखार्जकः, पु, अर्जकः । इति राजनिर्घण्टः ॥

मुखास्त्रः पु, (मुखं अस्त्रमिवास्य ।) कर्कटः । इति त्रिकाण्डशेषः ॥

मुखोल्का, स्त्री, (मुखं उल्केव यस्याः ।) दावानलः । इति शब्दमाला ॥

मुख्यः, पु, प्रथमः कल्पः । इत्यमरः । ३ । ३ ।४०॥ यागादिषु शास्त्रोक्तः प्रथमः कल्पो मुख्यः स्यात् । यथा, व्रीहिभिर्यजेतेत्यादिना उत्कृष्टत्वात् मुखमिव मुख्यः विकारसंघेत्यादिना इवार्थे यः । इति तट्टीकायां भरतः ॥

मुख्यः, त्रि, श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ (तथास्य पर्य्यायः ।
“प्रधानमुत्तमं रम्यं श्रेष्ठं मुख्यमनुत्तमम् ।
वरं वरेण्यं प्रमुखं परार्द्ध प्रवरन्तथा ॥”
इति वैद्यकरत्नमालायाम् ॥
यथा, भागवते । ४ । २५ । ३६ ।
“मुख्यानामपुरस्ताद्द्वास्तयापणबहूदनौ ॥”)

मुख्यसर्गः, पुं, (मुख्यानां सर्ग इति ।) स्थावरसृष्टिः । यथा,—
“मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ।”
इति वराहपुराणम् ॥

मुगूहः, पुं, दात्यूहपक्षी । इति भूरिप्रयोगः ॥

मुग्धः, त्रि, (मुह् + कर्त्तरि क्तः ।) मूढः । (यथा, ऋग्वेदे । ५ । ४० । ५ ।
"अक्षेत्रविद् यथा मुग्धो भुवनान्यदीधयुः ॥")
सुन्दरः । इति विश्वः ॥ (यथा, मेघदूते । १४ ।
"दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ॥")

मुग्धबोधं, क्ली, (मुग्धः सुन्दरः बोधः ज्ञानं पदपदार्थानां भवत्यस्मात् । यद्वा, मुग्धान् मूढान् अल्पबुद्धीन् जनान् बोधयतीति । मुग्धबोधम् । इति दुर्गादासः । मुग्ध + बुध् + "कर्म्मण्यण् । ३ । २ । १ । इति अण् ।) वोपदेवकृतव्याकरणविशेषः । यथास्याद्यश्लोकः ।
"मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते ।
मुग्धबोधं व्याकरणं परोपकृतये मया ॥"

मुग्धा, स्त्री, (मुग्ध + टाप् ।) नायिकाविशेषः । (सा च नायिका स्वीयापरकीयाभेदेन द्विविधा ।) तत्र स्वीयापि त्रिविधा । मुग्धा मध्या प्रगल्भा च । तत्राङ्कुरितयौवना मुग्धा । सा च ज्ञातयौवना अज्ञातयौवना च । सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा । सैव जातप्रश्रया विश्रब्धनवोढा । अस्याश्चेष्टा क्रिया मनोहरा । कोपे मार्द्दवं नवविभूषणे समीहा च ॥ मुग्धा यथा ।
"आश्रमं किल कामदेवधरणीपालेन काले शुभे वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यमेणीदृशः ।
दृष्ट्वा खञ्जनचातुरी सुखरुचा सौधाकरी माधुरी
वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्त्रते ॥" * ॥

अज्ञातयौवना यथा,—
"गौरात्तीरमुपागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः
श्रोणे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति ।
शैवालाङ्कुरशङ्कया शशिमुखी रोमावलीं प्रोञ्छति
आल्यालीति मुहुः सखीमविदितश्रोणीभरा पृच्छति ॥"

ज्ञातयौवना यथा,—
"स्वयम्भूः शम्भुरम्भोजलोचने त्वत्पयोधरः ।
नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति ॥"

नवोढा यथा,—
"हस्ते धृतापि शयने विनिवेशितापि
क्रोडे कृतापि यतते बहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वश्या
यः पारदं स्थिरयितुं क्षमते करेण ॥"

द्वितीया यथा,—
"वलाम्नीता पार्श्वं मुखमनुमुखं नैव कुरुते
धुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढा वोढारं रमयति च सन्तापयति च ॥"

विश्रब्धनवोढा यथा,—

"दरमुकुलितनेत्रपालिनीवी-
नियमितबाहुलतोरुयुग्मबन्धम् ।
करकलितकुचस्थलं नवोढा
स्वपिति समीपमुपेत्य कस्य धन्यः ॥"
इति रसमञ्जरी ॥

मुच इ ड } कल्कने । दम्भे । शाठ्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) द्वौ पञ्चमस्वरिणौ । इ मुञ्चते । ड मुचते ड मोचते । इति दुर्गादासः ॥
मुच ड

मुच ऌ श प ञ औ मोक्षे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-बन्धनरहितीभावे अक०-अनिट् ।) मोक्षस्त्यागः । ऌ अमुचत् । श प ञ मुञ्चति मुञ्चते धनं दाता । बन्धनरहितीभावे अकर्म्मकोऽयम् । आलानान्मुक्तो गजः कर्त्तरि क्तः । एवं पापान्मुक्त इत्यादौ पापबन्धनान्मुक्त इत्यर्थः । इति दुर्गादासः ॥

मुच क मोक्षे । इति कविकल्पद्रुमः ॥ (चुरा०-पर० सक०-सेट् ।) क मोचयति । मोक्षस्त्यागः । इति दुर्गादासः ॥

मुचिरः, त्रि, (मुञ्चति धनादिकं ददातीति । मुच् + "इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिसर्जिभ्यः किरच् ।" उणा० १ । ५२ । इति किरच् ।) दाता । इति त्रिकाण्डशेषः ॥

मुचिरः, पु, (मुच् + किरच् ।) धर्म्मः । वायुः । देवता । इति संक्षिप्तसारोणादिवृत्तिः ॥

मुचुकुन्दः, पु, (मुच् + बाहुलकात् कु । मुचुः कुन्द इवेति । राजदन्तादित्वात् पूर्ब्बनिपातः ।) पुष्पवृक्षविशेषः । मेकचन्द इति हिन्दी भाषा । (यथा, राजेन्द्रकर्णपूरे । १० ।
"आनन्दं मुचुकुन्दकन्दलि । भज त्वमद्यासि यामन्तिके ।")

तत्पर्य्यायः । क्षत्रवृक्षः २ चित्रकः ३ प्रतिविष्णुकः ४ । इति भावप्रकाशः ॥ बहुपुत्रः ५ सुदलः ६ हरिवल्लभः ७ सुपुष्पः ८ अर्घ्यार्हः ९ लक्षणकः १० रक्तप्रसवः ११ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कफवातनाशित्वम् । कण्ठकरत्वम् । त्वग्दोषशोफशमनत्वम् । जीर्णज्वरविनाशनत्वञ्च । इति राजनिर्घण्टः ॥ शिरःपीडापित्तास्रविषनाशित्वम् । इति भावप्रकाशः ॥ * ॥ मान्धातृराजपुत्त्रः । इति श्रीभागवतम् । ९ । ७ । ३८ ।
(यथा च देवीभागवते । ७ । १० । ४ ।
"तस्यामुत्पादयामास मान्धाता द्वौ सुतौ नृप ।
पुरुकुत्सं सुविख्यातं मुचुकुन्दं तथापरम् ॥")

मुचुटी, स्त्री, अङ्गुलिमोटनम् । आङ्गुलमट्कान इति भाषा । यथा,—
"मुचुटी सङ्कुटी चैव भवेदङ्गुलिमोटने ।"
इति शब्दरत्नावली ॥
मुष्टिः । मुठा इति भाषा । यथा,—
"सम्पिण्डिताङ्गुलिः पाणिर्मुष्टिर्मुस्तु मुचुट्यपि ।"
इति हेमचन्द्रः । ३ । २६१ ॥

मुज इ क } शब्दार्थः । इति कविकल्पद्रुमः ॥ (चुरा०-पर० मार्ज्जने सक०-ध्वनौ अक०-सेट् ।) द्वौ पञ्चमस्वरिणौ । इ क मुञ्जयति । क मोजयति । इति दुर्गादासः ॥
मुज क

मुञ्चकः, पु, (मुचिड + ण्वुल् ।) मुष्ककवृक्षः । इति राजनिर्घण्टः ॥

मुञ्जः, पुं, (मुञ्ज्यते मृज्यते अनेन । मुञ्ज + करणे अच् ।) तृणविशेषः । मुँज इति भाषा ॥ (यथा, पञ्चदश्याम् । १ । ४२ ।
"यथा मुञ्जादीषिकैवमात्मा युक्त्या समुद्धृतः ।
शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते ॥")
तत्पर्य्यायः । मौञ्जीतृणाख्यः २ ब्रह्मण्यः ३ तेजनाह्वयः ४ वाणीरकः ५ मुञ्जनकः ६ शरी ७ दर्भाह्वयः ८ दूरमूलः ९ दृढतृणः १० दृढमूलः ११ बहुप्रजः १२ रञ्जनः १३ शतुभङ्गः १४ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कफपित्तजदोषनाशित्वम् । ग्रहरक्षासु दीक्षासु च पावनत्वम् । भूतनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेधसः ।
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा ॥
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित् ।
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ॥"
इति भावप्रकाशः ॥
शरः । इति रत्नमाला । उपनयनकाले मुञ्जमेखलाधारणविधिर्यथा । अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं त्रिवृतं मुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति । इति भवदेवभट्टः ॥

मुञ्जकेशी [न्] पु, (मुञ्जा इव केशाः सन्त्यस्य । इनिः ।) विष्णुः । इति हेमचन्द्रः । २ । १३१ ॥

मुञ्जरं, क्ली, (मुञ्ज्यते प्रक्षाल्यते इति । मुञ्ज + बाहुलकात् अरन् ।) शालूकम् । इति शब्दमाला ॥

मुञ्जातकः, पु, (मुञ्जं अतति सततमादृश्यं प्राप्नोतीति । अत + अच् । ततः स्वार्थे कन् ।) पुष्पशाकभेदः । अस्य गुणाः । परं स्वादुत्वम् । वृष्यत्वम् । पित्तानिलापहत्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुत सूत्रस्थाने ३९ अध्याये ।
"हस्तिकर्णमुञ्जातकलाभञ्जकप्रभृतीनि ।")

मुट इ मर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट ।) पञ्चमस्वरी । इ मुण्टति । मर्द्दो मर्द्दनम् । इति दुर्गादासः ॥

मुट कि चुर्दि । इति कविकल्पद्रुमः ॥ (चुरा० पक्षे भ्वा०-सक०-सेट ।) चुर्दि चूर्णीकरणे । कि मोटयति तण्डुलं शिला । यस्तु दुर्गाच मोटतीति हलायुधः ॥

मुट शि आक्षेपे च । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट ।) पवर्गीयादिः । शि मुटति अमुटीत् मुमोट । चकारात् चुर्दि च । मुटति द्विषां दर्पं य इति हलायुधः । इति दुर्गादासः ॥

मुठ इ ङ पलायने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-पालने सक०-सेट्।) पवर्गशेषादिः। पञ्चमस्वरी। इ मुण्ठ्यते। ङ मुण्ठते चौरः। इति दुर्गादासः॥

मुड इ छिदि। मर्द्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ मुण्ड्यते। छेद इह लोमच्छेद एव। मुण्डति मुण्डं नापितः। लोमरहितं करोतीत्यर्थः। इति दुर्गादासः॥

मुड इ ङ मज्जे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) पवर्गशेषादिः। पञ्चमस्वरी। मर्ममिति मस्जधातोः क्ते रूपं मज्जनमित्यर्थः। इ मुण्ड्यते। ङ मुण्डते प्रस्तरो जले। चतुर्भुजस्तु मार्ज्जने इति पठित्वा मार्ज्जनं शुद्धिरिति व्याख्याय मुण्डते जलेन गात्रं लोक इत्युदाहृतवान्। इति दुर्गादासः॥

मुण ग्र प्रतिज्ञाने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट।) ग्र मुणति व्रतं लोकः। प्रतिजानातीत्यर्थः। मोणिता। इति दुर्गादासः॥

मुण्डं, क्ली, (मुण्ड्यन्ते उप्यन्ते केशा अस्मात् यद्वा, मुण्डति मज्जतीति। मुण्ड+अच्।) शिरः। इति नपुंसकलिङ्गसंग्रहे अमरः।३।५।३४॥ (यथा, मोहमुद्गरे। १५।

"अङ्गं गलितं पलितं मुण्डं
दन्तविहीनं यातं तुण्डम्।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डम्॥"

उपनिषद्विशेषः। तदुक्तं यथा,—

"ईशाकेनकठप्रश्नमुण्डमाण्डुक्यतित्तिरि।
छान्दोग्यं वृहदारण्यमैतरेयं तथा दश॥")

बोलम्। मुण्डायसम्। इति राजनिर्घण्टः॥

मुण्डः, पुं, (मुण्डनं मुण्डः केशापनयनं मुडि खण्डने भावे घञ्। ततः अर्श आद्यच् इत्यमरटीकायां रायमुकुटः।) बलिराजस्य सैनिकदैत्यविशेषः॥ (यथा, हरिवंशे भविष्यपर्व्वणि। २३२। ५।

"एकाक्ष एकपान्मुण्डो विद्युद्दन्तश्चतुर्भुजः।"

शुम्भसेनापतिदैत्यभेदः। यथा, मार्कण्डेयपुराणे। ८६। २८।

"हे चण्ड! हे मुण्ड! बलैर्बहुलैः परिवारितौ।")

मुण्डमेवावयवत्वेनास्त्यस्य। अच्।) राहुग्रहः। इति मेदिनी। डे, २२॥ (मुण्डं मुण्डनं जीविकात्वेनास्त्यस्य। अच्।) नापितः। इति जटाधरः॥ (मुण्डनं स्कन्धावच्छेदे खण्डनमस्त्यस्य। अच्।) स्थाणुवृक्षः। इति केचित्॥

मुण्डः, पु, क्ली, (मुण्ड+अच्।) मूर्द्धा। इति मेदिनी। डे, २२॥

मुण्डः, त्रि, मुण्डितः। इत्यमरः। २। ६। ४८॥ हे मुण्डितमुण्ड। मुडि खण्डने भावे घञि मुण्डो मुण्डनं केशापनयनं तद्योगात् अर्श आद्यचि मुण्डः पुमान् स्त्रियां मुण्डा। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १। ११६। ८।

'चरन् भैक्ष्यं मुनिर्मुण्डश्चरिष्यामि महीमिमाम्।')

मुण्डकं, क्ली, (मुण्डमेवेति मुण्ड+स्वार्थे कन्।) मस्तकम्॥ (उपनिषद्विशेषश्च॥)

मुण्डकः, पुं, (मुण्डयतीति। मुडि+ण्वुल्।) नापितः। इति हेमचन्द्रः। ३। २३०॥

मुण्डचणकः, पुं, (मुण्डित इव चणकः।) कलायः। इति राजनिर्घण्टः॥

मुण्डनं, क्ली, (मुण्ड+ल्युट्।) केशच्छेदनम्। तत्पर्य्यायः। भद्रकरणम् २ वपनम् ३ परिवापनम् ४ क्षौरम् ५। इति हेमचन्द्रः।३।५८१॥ (यथा, महाभारते। १२। २३। ४६।

"आतुरस्य हितं वाक्यं श्रृणु धर्म्मं सनातनम्।
दण्ड एव हि राजेन्द्र! क्षत्त्रधर्म्मो न मुण्डनम्॥")

मुण्डफलः, पुं, (मुण्डवत् फलमस्य।) नारिकेलवृक्षः। यथा,—

"तथा मुण्डफलश्चापि विश्वामित्रप्रियोऽपि च।"
इति शब्दरत्नावली॥

मुण्डशालिः, पुं, (मुण्डो मुण्डित इव शालिः।) शालिभेदः। तत्पर्य्यायः। मुण्डकः २ निःशूकः ३ अशूककः ४। अस्य गुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। बलप्रदत्वम्। रुचिकारित्वम्। दीपनत्वम्। पथ्यत्वम्। सुखजाड्यजापहत्वञ्च। इति राजनिर्घण्टः॥

मुण्डा, स्त्री, (मुण्ड+स्त्रियां टाप्।) मुण्डीरिका। इति मेदिनी। डे, २२॥ मुण्डिता स्त्री। इत्यमरटीकायां भरतः॥

मुण्डाख्या, स्त्री, (मुण्डेत्याख्यास्याः।) महाश्रावणिका। इति राजनिर्घण्टः॥

मुण्डायसं, क्ली, (मुण्डञ्च तत् अयश्चेति। मुण्ड+अयस्+"अनोश्मायः सरसां जातिसंज्ञयोः।" ५।४।९४। इति टच्।) लोहम्। इति राजनिर्घण्टः॥

मुण्डितं, क्ली, (मुण्ड्यते खण्ड्यते इति। मुडि खण्डने+कर्म्मणि क्तः।) लोहम्। इति राजनिर्घण्टः॥ वापितमुण्डे, त्रि। इत्यमरः। ३। १। ८५॥

मुण्डितिका, स्त्री, (मुण्डित+स्वार्थे कन्+स्त्रियां टाप् अत इत्वं।) वृक्षविशेषः। मुण्डीरी इति भाषा। तत्पर्य्यायः। अलम्बुषा २ श्रावणी ३ पलङ्कषा ४ कदम्बपुष्पा ५ श्रवणा ६ भूतघ्नी ७ कुम्भला ८ अरुणा ९। इति रत्नमाला॥

मुण्डी, [न्] पु, (मुण्डयति केशान् वपति इति। मुण्ड+णिनिः।) नापितः। इत्यमरः। २। १०। १०॥ (योगाचार्य्यविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। ५—६॥

'महाकालश्च शूली च दण्डी मुण्डी स एव
च।'

इत्यादावारभ्य।

'अष्टाविंशतिसंख्याता योगाचार्य्या युगक्रमात्।'

सम्पादितकेशच्छेदनः। यथा, महाभारते।१३। १४। ३७४।

"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः॥")

मुण्डीरिका, स्त्री, (मुण्डि+बाहुलकात् ईरच्। स्त्रियां ङीष् स्वार्थे कन्। स्त्रियां टाप् "केऽणः।" ७।४।१३। इति पूर्व्वस्य ह्रस्वः।) मुण्डितिका। इति जटाधरः॥

मुत्, स्त्री, (मोदतेऽनया इति। मुद्+क्विप्।) वृद्धिनामौषधम्। इति राजनिर्घण्टः॥

मुत्, [द्] स्त्री, (मोदनमिति। मुद्+भावे क्विप्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, रघुवंशे। ३। २५।

"उवाच धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः॥")

मुद क संसर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मोदयति घृतेनान्नं लोकः। इति दुर्गादासः॥

मुद ञि ङ हर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक० सेट्।) हर्षश्चित्तोत्साहः। ञि मुदितोऽस्ति। ङ मोदते धनी। इति दुर्गादासः॥

मुदा, स्त्री, (मुद्+घञर्थे कः ततष्टाप्।) हर्षः। यथा। सुखमानन्दथुर्मुदा। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ११६। ३०।

"तं मन्त्रं क्रियमाणं तु मन्त्रिभिस्तेन भूभृता।
तत्पार्श्ववर्त्तिनी कन्या शुश्रावाथ मुदावती॥")

मुदितः, त्रि, (मुद्+क्त। यद्वा, मुदा अस्य जाता। मुदा+इतच्।) आनन्दितः। यथा,—

"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
म्रियेत म्रियते या पत्यौ साध्वी ज्ञेया पतिव्रता॥"
इति शुद्धितत्त्वम्॥

आलिङ्गनविशेषः। तस्य लक्षणं यथा। नायिकया नायकस्य वामपार्श्वे उपविश्य वामपादं तस्योरुद्वयमध्ये स्थापयित्वा उभौ मिलित्वा यदवस्थानम्। इति कामशास्त्रम्॥

मुदिता, स्त्री, (मोदते इति मुद्+सर्व्वधातुभ्य इन् संज्ञापूर्व्वकविधेरनित्यत्वात् गुणाभावः। मुदिः तस्य भावः इति तल्+टाप्।) मुदा। हर्षः। इत्यमरटीकायां मथुरेशः॥ (यथा, पातञ्जलसूत्रम्। १। ३३।

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥")

मुदिरः, पुं, (मोदन्ते अनेन प्रजा इति। मुद्+"इषिमदिमुदीति।" उणा० १। ५२। इति किरच्।) मेघः। इत्यमरः।१।३।७॥ (यथा,— गीतगोविन्दे। २। ३।

"प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिर-
सुवेशम्।")

कामुकः। इति मेदिनी। रे, २०५। भेकः। इति कंचित्प्रवारोष्यादिदर्शितः॥

मुद्गः, पुं, (मोदते अनेन इति । मुद् + “मुदिग्रोर्गग्गौ ।” उणा० १ । १२७ । इति गक् ।) पक्षिविशेषः । तत्पर्य्यायः । जलवायसः २ । इति हेमचन्द्रः । ४ । ३३८ ॥ शमीधान्यभेदः । मुग इति भाषा । (यथा, मनुः । ८ । ३९ ।
“व्रीहयः शालयो मुद्गास्तिलामाषास्तथा यवाः ।”)
तत्पर्य्यायः । सूपश्रेष्ठः २ वर्णार्हः ३ रसोत्तमः ४ भुक्तिप्रदः ५ हयानन्दः ६ सुफलः ७ वाजिभोजनः ८ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । कफपित्तास्रजित्त्वम् । लघुत्वम् । ग्राहित्वम् । शीतलत्वम् । पाके कटुत्वम् । चक्षुष्यत्वम् । नातिवातलत्वञ्च । तद्यूषगुणाः । पित्तश्रमार्त्तिशमनत्वम् । लघुत्वम् । सन्तापहारित्वम् । अरोचकनाशित्वम् । तत्सैन्धवयुक्तश्चेत् रक्तप्रसादनत्वम् । सर्व्वरुजापहारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । रूक्षत्वम् । स्वादुत्वम् । अल्पानिलत्वम् । ज्वरघ्नत्वञ्च । इति भावप्रकाशः ॥*॥ वनमुद्गगुणाः ।
“मुकुष्ठः शीतलो ग्राही कफपित्तज्वरापहः ॥”
तद्विशेषा यथा, राजवल्लभे ।
“प्रधाना हरितास्तत्र वन्यमुद्गास्तु मुद्गवत् ।
कृष्णमुद्गा महामुद्गा गौरा हरितपीतकाः ।
श्वेता रक्ताश्च निर्द्दिष्टा लघवः पूर्व्वपूर्व्ववत् ॥”

मुद्गपर्णी, स्त्री, (मुद्गस्येव पर्णान्यस्याः मुद्गपर्ण + जातौ ङीष् ।) वनमुद्गः । मुगानी इति भाषा । तत्पर्य्यायः । काकमुद्गा २ सहा ३ । इत्यमरः ॥ क्षुद्रसहा ४ शिम्बी ५ मार्ज्जारगन्धिका ६ वनजा ७ रिङ्गिणी ८ ह्रस्वा ९ सूर्पपर्णी १० कुरङ्गिका ११ कोशिला १२ वनोद्भवा १३ वनमुद्गा १४ आरण्यमुद्गा १५ वन्या १६ । कुरङ्गिकास्थाने करङ्गिका इति च पाठः । अस्या गुणाः । हिमत्वम् । कासवातरक्तक्षयपित्तदाहज्वरनाशित्वम् । चक्षुष्यत्वम् । शुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । यथा, भावप्रकाशे ।
“मुद्गपर्णी काकपर्णी सूर्पपर्ण्यल्पपर्णिका ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ॥
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ।
चक्षुष्या क्षयशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारहृत् ॥”

मुद्गभुक्, [ज्] पुं, (मुद्गं भुङ्क्ते इति । भुज् + क्विप् ।) घोटकः । इति जटाधरः ॥

मुद्गभोजी, [न्] पुं, (मुद्गं भुङ्क्ते इति । भुज् + णिनिः ।) अश्वः । इति राजनिर्घण्टः ॥

मुद्गमोदकः, पुं, (मुद्गेन साधितो मोदकः ।) मोदकविशेषः । मतिचुर इति भाषा । यथा,—
“मुद्गानां धूमसीं सम्यग्घोलयेन्निर्म्मलाम्बुना ।
कटाहस्थघृतस्योर्द्ध्वे झर्झरं स्थापयेत्ततः ॥
धूमसीन्तु द्रवीभूतां प्रक्षिपेत् झर्झरोपरि ।
पतन्ति बिन्दवस्तस्मात्तान् सुपक्वान् समुद्धरेत् ।
सितापाकेन संयोज्य कुर्य्यात्तु युक्तेन मोदकान् ॥”
अस्य गुणाः । यथा, भावप्रकाशे ।
“लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ।
चक्षुष्यो ज्वरहृत् बल्यस्तर्पणो मुद्गमोदकः ॥”

मुद्गरं, क्ली, (मुदं आनन्दं गिरति विकिरतीति । गृ + अच् ।) मल्लिकाभेदः । लोष्टादिभेदने, पुं । इति मेदिनी । रे, २०४ ॥ (यथा, महाभारते । १ । २११ । ३ ।
“गदापट्टिशधारिण्या शूलमुद्गरहस्तया ।
प्रस्थितौ सहधर्म्मिण्या महत्या दैत्यसेनया ॥”)

मुद्गरः, पुं, (मुद् + गृ + अच् ।) कर्म्मारङ्गः । पुष्पवृक्षविशेषः । तत्पर्य्यायः । गन्धसारः २ सप्तपत्रः ३ अतिगन्धः ४ गन्धराजः ५ विटप्रियः ६ प्रियः ७ जनेष्टः ८ भृङ्गेष्टः ९ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । सुरभित्वम् । सौख्यदायकत्वम् । मनोज्ञकारित्वम् । मधुपानन्दकारित्वम् । पित्तप्रकोपनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्त्रविशेषः । मुगुर इति भाषा । तत्पर्य्यायः । द्रुघणः २ घनः ३ । इत्यमरः ॥ द्रुघनः ४ । इति भरतः ॥ प्रघणः ५ । इति जटाधरः ॥ मुद्गरः कोरकास्त्रयोः । इति हेमचन्द्रः ॥ (यथा, रघौ । १२ । ७३ ।
“पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ॥”)

मुद्गरकः, पुं, (मुद्गरमिवेति प्रतिकृतौ कन् ।) कर्म्मारः । इति राजनिर्घण्टः । कामराङ्गा इति भाषा ॥

मुद्गलं, क्ली, रोहिषतृणम् । इति राजनिर्घण्टः ॥

मुद्गलः, पुं, हर्य्यश्वराजपुत्त्रः । यथा,—
“सुशान्तिः पुरुजानुः तस्याचर्क्षः ततश्च हर्य्यश्वः हर्य्यश्वान्मुद्गलसृञ्जयबृहदिषुयवीनरकाम्पिल्यसंज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्त्रा इति पित्राभिहिता इति पञ्चालाः । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (मुद्गं लातीति । ला + कः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ।) गोत्रकारकमुनिविशेषः । तस्य भार्य्या इन्द्रसेना । इति पुराणम् ॥ (उपनिषद्विशेषः ॥)

मुद्गष्टः, पुं, वनमुद्गः । इति शब्दरत्नावली ॥

मुद्गष्टकः, पुं, (मुद्गष्ट + स्वार्थे कन् ।) वनमुद्गः । इत्यमरः । २ । ९ । १७ ॥

मुद्गार्द्रवटः, पुं, (मुद्गेनार्द्रः वटः ।) वटकविशेषः । आदावडा इति भाषा । यथा,—
“मुद्गपिष्टीविरचितान् वटकान्तैलपाचितान् ।
हस्तेन चूर्णयेत् सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत् ॥
भृष्टं हिङ्ग्वार्द्रकं सूक्ष्मं मरिचं जीरकं तथा ।
निम्बूरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत् ॥
मुद्गपिष्टीं पचेत् सम्यक् स्थाल्यामङ्गारकोपरि ।
तस्यास्तु गोलकं कुर्य्यात्तन्मध्ये पूरणं क्षिपेत् ॥
तैलै तान् गोलकान् पक्त्वा क्वथितायां निमज्जयेत् ।
गोलकाः पाचकैः प्रोक्तास्ते त्वार्द्रकवटा अपि ॥”
अस्य गुणाः । यथा, भावप्रकाशे ।
“मुद्गार्द्रकवटा रुच्या लघवो बलकारकाः ।
दीपनास्तर्पणाः पथ्याश्चिदोषेषु प्रपूजिताः ॥”

मुद्रा, स्त्री, (मोदते अनयेति । मुद् + “स्फायितञ्चीत्यादि ।” उणा० २ । १३ । इति रक् अतः टाप् ।) प्रत्ययकारिणी ॥ इति त्रिकाण्डशेषः । नामेर मोहर इति भाषा ॥ अङ्गुलिमुद्रा । इति शब्दरत्नावली ॥ छापेर आङ्गटी इति भाषा । स्वर्णरौप्यादिमुद्रिका च । (यथा, अभिज्ञानशाकुन्तले । २ ।
“इमां मुद्रां त्वदङ्गुलौ निवेशयता मया ।”
चिह्नम् । यथा, श्रीमद्भागवते । ३ । २४ । १७ ।
“ज्ञानविज्ञानयोगेन कर्म्मणामुद्धरन् जटाः ।
हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥”)
मोहर टाका इत्यादि भाषा । इति लोकप्रसिद्धिः ॥*॥ पञ्चधालिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—
“मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री शुभदा हर ॥”
इति वाराहीतन्त्रम् ॥
“लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च वत ।
शिल्प्यादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥
इति रुद्रयामालतन्त्रम् ॥*॥
पञ्चमकारान्तर्गतभृष्टद्रव्यविशेषः । यथा,—
“पृथुकास्तण्डुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि । मुद्रा मुक्तिप्रदायिनी ॥”
इति निर्व्वाणतन्त्रे ११ पटलः ॥
तस्याः शोधनं यथा,—
“ओँ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् । ओँ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदम् ।
इति मन्त्राभ्यां शोधनम् । इति स्वतन्त्रतन्त्रम् ॥
शरीरे धार्य्यभगवदायुधादिचिह्नम् । छाप इति भाषा । यथा, —
“ततो नारायणीं मुद्रां धारयेत् प्रीतये हरेः ।
मत्स्यकूर्म्मादिचिह्नानि चक्रादीन्यायुधानि च ॥
अथ मुद्राधारणनित्यता स्मृतौ ।
“अङ्कितः शङ्खचक्राभ्यामुभयोर्ब्बाहुमूलयोः ।
समर्च्चयेद्धरिं नित्यं नान्यथा पूजनं भवेत् ॥”
आदिपुराणे ।
“शङ्खचक्रोर्द्ध्वपुण्ड्रादिरहितं ब्राह्मणाधमम् ।
गर्द्दभं तु समारोप्य राजा राष्ट्रात् प्रवासयेत् ॥”
गारुडे श्रीभगवदुक्तौ ।
“सर्व्वकर्म्माधिकारश्च शुचीनामेव चोदितः ।
शुचित्वञ्च विजानीयान्मदीयायुधधारणात् ॥”
इति पाद्मे चोत्तरखण्डे ।
“शङ्खचक्रादिभिश्चिह्नैर्विप्रः प्रियतमैर्हरेः ।
रहितः सर्व्वधर्म्मेभ्यः प्रच्युतो नरकं व्रजेत् ॥”
श्रुतौ च यजुःकठशाखायाम् ।
“धृतोर्द्ध्वपुण्ड्रः कृतचक्रधारी
विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं
परात्परं यन्महतो महान्तम् ॥”

अथर्व्वणि च ।

'एभिर्व्वयमुरुक्रमस्य चिह्नै-

रङ्किता लोके सुभगा भवेम ।'

तद्विष्णोः परमं पदं ये गच्छन्ति लाञ्छिताः ।

इत्यादि ॥'

अतएव ब्रह्मपुराणे ।

'कृष्णायुधाङ्कितं दृष्ट्वा सम्मानं न करोति यः ।

द्वादशाब्दार्जितं पुण्यं तस्याफलतामुपगच्छति ॥'*॥

अथ मुद्राधारणमाहात्म्यम् ।

स्कान्दे श्रीसनत्कुमारमार्कण्डेयसम्वादे ।

'यो विष्णुभक्तो विप्रेन्द्र ! शङ्खचक्रादिचिह्नितः ।

स याति विष्णुलोकं वै दाहप्रलयवर्जितम् ॥'

तत्रैवान्यच्च ।

'नारायणायुधैर्नित्यं चिह्नितं यस्य विग्रहम् ।

पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥

शङ्खोद्धारे तु यत् प्रोक्तं वसतां वर्षकोटिभिः ।

तत् फलं लिखिते शङ्खे प्रत्यहं दक्षिणे भुजे ॥

यत् फलं पुष्करे नित्यं पुण्डरीकस्य दर्शने ।

शङ्खोपरिकृते पद्मे तत् फलं समवाप्नुयात् ॥

वामे भुजे गदा यस्य लिखिता दृश्यते कलौ ।

गदाधरो गयापुण्यं प्रत्यहं तस्य यच्छति ॥

यच्चानन्दपुरे प्रोक्तं चक्रस्वामिसमीपतः ।

गदाधो लिखिते चक्रे तत् फलं कृष्णदर्शने ॥'

श्रीभगवदुक्तौ च ।

'यः पुनः कलिकाले तु मत्पुरीसम्भवां मृदम् ।

मत्स्यकूर्म्मादिकं चिह्नं गृहीत्वा कुरुते नरः ॥

देहे तस्य प्रविष्टोऽहं जानन्तु त्रिदशोत्तमाः ।

तस्य मे नान्तरं किञ्चित् कर्त्तव्यं श्रेय इच्छता ।

ममावतारचिह्नानि दृश्यन्ते यस्य विग्रहे ।

मर्त्त्यैर्मर्त्त्यो न विज्ञेयः स नूनं मामकी तनुः ॥

पापं सुकृतरूपन्तु जायते तस्य देहिनः ।

ममायुधानि यस्याङ्गे लिखितानि कलौ युगे ॥

उभाभ्यामपि चिह्नाभ्यां योऽङ्कितो मत्स्य-

मुद्रया ।

कूर्म्मेणापि स्वकं तेजो निक्षिप्तं तस्य विग्रहे ॥

शङ्खञ्च पद्मञ्च गदां रथाङ्गं

मत्स्यञ्च कूर्म्मं रचितं स्वदेहे ।

करोति नित्यं सुकृतस्य वृद्धिं

पापक्षयं जन्मशतार्जितस्य ॥'

तत्रैव श्रीब्रह्मनारदसंवादे ।

'कृष्णशस्त्राङ्कितवपुः दुर्भेद्यं देवदानवैः ।

अधृष्यं सर्व्वभूतानां शत्रूणां रक्षसामपि ॥

लक्ष्मीः सरस्वती दुर्गा सावित्री हरवल्लभा ।

नित्यं तस्य वसेद्देहे यस्य शङ्खाङ्किता तनुः ॥

गङ्गा गया कुरुक्षेत्रं प्रयागं पुष्करादि च ।

नित्यं तस्य सदा तिष्ठेद्यस्य पद्माङ्कितं वपुः ॥

यस्य कौमोदकीचिह्नं भुजे चाथ कलिप्रिय ! ।

प्रत्यहं तत्र द्रष्टव्यो गङ्गासागरसङ्गमः ॥

सव्ये करे गदा यस्य दक्षिणे तु रथाङ्गकम् ।

कृष्णेन सहितं तत्र त्रैलोक्यं सचराचरम् ॥

अयोऽयमयस्त्रयो देवा विष्णोस्त्रीणि पदानि च ।

निवसन्ति सदा तस्य यस्य देहे सुदर्शनम् ॥'

किञ्च ।

'कृष्णायुधाङ्किता मुद्रा यस्य नारायणी करे ।

ब्रह्मलोकाधिकारी च स सूर्य्यस्येव पतिः ॥

कृष्णमुद्राप्रयुक्तस्तु दैवं पित्र्यं करोति यः ।

नित्यं नैमित्तिकं काम्यं प्रत्यहञ्चाक्षयं भवेत् ॥

पीडयन्ति न तत्रैव ग्रहा नक्षत्राणि राशयः ।

अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी करे ॥'

वाराहे श्रीसनत्कुमारोक्तौ ।

'कृष्णायुधाङ्कितं देहं गोपीचन्दनमृत्स्नया ।

प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यति ॥

यदा यस्य प्रपश्येत देहं शङ्खादिचिह्नितं ।

तदा तदा जगत्स्वामी तुष्टो हरति पातकम् ॥

भवते यस्य देहे तु अहोरात्रं दिने दिने ।

शङ्खचक्रगदापद्मं लिखितं सोऽच्युतः स्वयम् ॥

नारायणायुधैर्युक्तं कृत्वात्मानं कलौ युगे ।

कुरुते पुण्यकर्म्माणि मेरुतुल्यानि तस्य वै ॥

शङ्खाकिमाङ्कितो भक्त्या श्राद्धं यः कुरुते द्विजः ।

विधिहीनन्तु संपूर्णं पितॄणान्तु गयासमम् ॥

यथाग्निर्दहते कक्षं वायुना प्रेरितो भृशम् ।

तथा दहन्ति पापानि दृष्ट्वा कृष्णायुधानि वै ॥'

ब्राह्मे श्रीब्रह्मनारदसंवादे ।

'विष्णुनामाङ्कितां मुद्रां अष्टाक्षरसमन्विताम् ।

शङ्खादिकायुधैर्युक्तां स्वर्णरूप्यमयीमपि ॥

धत्ते भागवतो यस्तु कलिकाले विशेषतः ।

प्रह्लादस्य समो ज्ञेयो नान्यथा कलिवल्लभ ! ॥'

किञ्च ।

'शङ्खाङ्किततनुर्विप्रो भुङ्क्ते यस्य च वेश्मनि ।

तदन्नं स्वयमश्नाति पितृभिः सह केशवः ॥

कृष्णायुधाङ्कितो यस्तु श्मशाने म्रियते यदि ।

प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद ! ॥

कृष्णायुधैः कलौ नित्यं मण्डितं यस्य विग्रहम् ।

तत्राश्रयं प्रकुर्व्वन्ति विबुधा वासवादयः ॥

यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।

अपराधसहस्राणि नित्यं हरति केशवः ॥

कृत्वा काष्ठमयं बिम्बं कृष्णशस्त्रैस्तु चिह्नितम् ।

यो ह्यङ्कयति चात्मानं तत्समो नास्ति वैष्णवः ॥

पापकपतितवात्यैर्नास्तिकालापपातकैः ।

न लिप्यते कलिकृतैः कृष्णशस्त्राङ्कितो नरः ॥

किञ्च ।

'अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी भवेत् ।

शङ्खपद्मादिभिर्युक्ता पूज्यतेऽसौ सुरासुरैः ॥

धृता नारायणी मुद्रा प्रह्लादेन पुरा कृता ।

विभीषणेन बलिना ध्रुवेण च शुकेन च ॥

मान्धातृगाम्बरीषेण मार्कण्डप्रमुखैर्द्विजैः ।

शङ्खादिचिह्नितैः शस्त्रैर्देहे कृत्वा कलिप्रिय ! ।

आराध्य केशवान् प्राप्तं समीहितफलं महत् ॥'

किञ्च ।

'गोपीचन्दनमृत्स्नाया लिखितं यस्य विग्रहे ।

शङ्खपद्मादिचक्रं वा तस्य देहे वसेद्धरिः ॥'

तत्रैव श्रीसनत्कुमारोक्तौ ।

'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्निता ।

धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ॥

द्वादशाक्षरमन्त्रैस्तु नियुक्तानि कलेवरे ।

आयुधानि च विप्रस्य मत्समः स च वैष्णवः ॥'

किञ्च ।

'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्निता ।

सर्व्वाङ्गं चिह्नितं यस्य शस्त्रैर्नारायणोद्भवैः ॥

प्रवेशो नास्ति पापस्य कवचं तस्य वैष्णवम् ॥'

अन्यत्र च ।

'एभिर्भागवतैश्चिह्नैः कलिकाले द्विजातयः ।

भवन्ति मर्त्त्यलोके ते शापानुग्रहकारकाः ॥'*॥

अथ मुद्राधारणविधिः । गौतमीये ।

"ललाटे च गदा कार्य्या मूर्द्ध्नि चापः शरस्तथा ।

नन्दकञ्चैव हृन्मध्ये शङ्खचक्रं भुजद्वये ॥

शङ्खचक्राङ्कितो विप्रः श्मशाने म्रियते यदि ।

प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम ! ॥

चक्रञ्च दक्षिणे बाहौ शङ्खं वामेऽपि दक्षिणे ।

गदां वामे गदाधस्तात् पुनश्चक्रञ्च धारयेत् ॥

शङ्खोपरि तथा पद्मं पुनः पद्मञ्च दक्षिणे ।

खड्गं वक्षसि चापञ्च शरं शिरसि धारयेत् ॥

इति पञ्चायुधान्यादौ धारयेद्वैष्णवो जनः ।

मत्स्यञ्च दक्षिणे हस्ते कूर्म्मं वामकरे तथा ॥'

तथा चोक्तम् ।

'दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ।

सव्ये पद्मञ्चापरेऽथ शङ्खं कूर्म्मं गदां तथा ॥

साम्प्रदायिकशिष्टानामाचाराच्च यथारुचि ।

शङ्खचक्रादिचिह्नानि सर्व्वेष्वङ्गेषु धारयेत् ॥

भक्त्या निजेष्टदेवस्य धारयेल्लक्षणान्यपि ।

चक्रशङ्खौ च धार्य्येते संमिश्रावेव कैश्चन ॥'

यत उक्तं ब्रह्मवैवर्त्ते ।

'केवलं नोद्वहेच्छङ्खमादौ चासुरविग्रहम् ।

अतश्चक्रविमिश्रं तं बिभृयाद्वैष्णवः सदा ॥

श्रीगोपीचन्दनेनैवं चक्रादीनि बुधोऽन्वहम् ।

धारयेच्छयनादौ तु तप्तानि किल तानि हि ॥'

अथ चक्रादीनां लक्षणानि ।

'द्वादशाक्षरन्तु षट्कोणं वलयत्रयसंयुतम् ।

चक्रं स्याद्दक्षिणावर्त्तः शङ्खश्च श्रीहरेः स्मृतः ॥

गदापद्मादिकं लोकसिद्धमेव मतं बुधैः ।

मुद्रा च भगवन्नाम्नाङ्किता याष्टाक्षरादिभिः ॥'

इति श्रीहरिभक्तिविलासः ॥ * ॥

अपि च ।

'यथा मुद्रा शीतलाख्या तथा तप्ता न संशयः ।

तप्तायाः शीतलायाश्च विभेदो नैव वर्त्तते ॥

नामचिह्नादिना देहे वह्निना वा मृदाङ्कनम् ।

सा दीक्षा प्रोच्यते भूप ! वाह्यानां ज्ञानिना-

मपि ॥

वैष्णवैर्विष्णुभक्तैश्च ब्राह्मणैर्वेदपारगैः ।

सन्धार्य्या सतिला मुद्रा गोपीचन्दनसंयुता ॥'

इति नारदपञ्चरात्रम् ॥

'कृष्णनामाक्षरैर्गात्रमङ्कयेच्चन्दनादिना ।

स लोकपावनो भूत्वा विष्णुलोकमवाप्नुयात् ॥

अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।

अङ्कयित्वा जपेन्मन्त्रं संसारान्मोक्षमाप्नुयात् ॥'

इति पद्मपुराणम् ॥

‘तन्नाम्ना चाङ्कितं सर्व्वं वसनं भाजनादिकम् ।’
इति हारीतस्मृतिः ॥ * ॥
देवताविशेषप्रीतिजनिकाङ्गुलिरचना । यथा,
मुद्रापदव्युत्पत्तिमाह तन्त्रे ।
‘मोदनात् सर्व्वदेवानां द्रावणात् पापसन्ततेः ।
तस्मान्मुद्रेति सा ख्याता सर्व्वकामार्थसाधनी ॥
अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु कल्पिताः ।
याभिर्व्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥
अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि ।
स्नाने चावाहने शङ्खे प्रतिष्ठायाञ्च रक्षणे ॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्राः प्रदष्टव्याः स्वस्वलक्षणलक्षिताः ॥
आवाहनादिका मुद्रा नव साधारणा मताः ।
तथा षडङ्गमुद्राश्च सर्व्वमन्त्रेषु योजयेत् ॥
एकोनविंशतिर्म्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥
वनमाला तथा ज्ञानमुद्रा विल्वाह्वया तथा ।
गरुडाख्या परा मुद्रा विष्णोः सन्तोषवर्द्धिनी ॥
नारसिंही च वाराही हायग्रीवी धनुस्तथा ।
बाणमुद्रा ततः परशुर्ज्जगन्मोहनिका परा ॥
काममुद्रा पराख्याता शिवस्य दश मुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्यामालेष्टाभीत्मृगाह्वयाः ।
खट्वाङ्गा च कपालाख्या डमरुः शिवतोषदाः ॥
सूर्य्यस्यैकैव पद्माख्या सप्तमुद्रा गणेशितुः ।
दन्तपाशाङ्कुशा विघ्नपरशुलड्डुकसंज्ञिताः ।
बीजपूराह्वया मुद्रा विज्ञेया विघ्नपूजने ॥
पाशाङ्कुशवराभीतिखड्गचर्म्मधनुःशराः ।
मौषली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ॥
लक्ष्मीमुद्रार्च्चने लक्ष्म्या वाग्वादिन्याश्च पूजने ।
अक्षमाला तथा वीणाव्याख्यापुस्तकमुद्रिकाः ॥
सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने ।
मत्स्यमुद्रा च कूर्म्माख्या लेलिहा मुण्डसंज्ञिका ॥
महायोनिरिति ख्याता सर्व्वसिद्धिसमृद्धिदा ।
शक्त्यर्च्चने महायोनिः श्यामादौ मुण्डमुद्रिका ॥
मत्स्यकूर्म्मलेलिहाख्या मुद्रा साधारणी मता ।
तारार्च्चने विशेषास्तु कथ्यन्ते पञ्च मुद्रिकाः ॥
योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी ।
लेलिहानेति संप्रोक्ताः पञ्चमुद्राः प्रकाशिताः ॥
दशैका मुद्रिका ज्ञेयास्त्रिपुरायाः प्रपूजने ।
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ।
खेचरी बीजयोन्याख्या त्रिखण्डा परिकीर्त्तिता ॥
कुम्भमुद्राभिषेके स्यात् पद्ममुद्रासने तथा ।
कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ॥
गालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि ।
श्रीगोपालार्च्चने वेणुर्नृहरेर्नारसिंहिका ॥
वराहस्य च पूजायां वाराहाख्यां प्रयोजयेत् ।
हयग्रीवार्च्चने चैव हायग्रीवीं प्रदर्शयेत् ॥
रामार्च्चने धनुर्ब्बाणमुद्रे परशुस्तथार्च्चने ।
परशुरामस्य विज्ञेया जगन्मोहनसंज्ञिका ॥
वासुदेवाह्वया ध्याने कुम्भमुद्रा तु रक्षणे ।
सर्व्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥*॥
उद्देशानुक्रमादासामुच्यन्ते लक्षणान्यथ ।
हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्व्वणोः ॥
अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता ।१।
अधोमुखी त्वियं चेत् स्यात् स्थापनी मुद्रिका
स्मृता ॥ २ ॥
उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात् सन्निधापनी ।३।
अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधनी मता ॥४॥
उत्तानमुष्टियुगला संमुखीकरणी मता ।५।
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः॥६॥
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता ॥ ७ ॥
अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः ।
तथैव तर्ज्जनी मध्या धेनुमुद्रा प्रकीर्त्तिता ॥
अमृतीकरणं कुर्य्यात्तया साधकसत्तमः । ८ ।
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुली ॥
महामुद्रेयमुदिता परमीकरणे बुधैः ।
प्रयोजयेदिमा मुद्रा देवताह्वानकर्म्मणि ॥९॥*॥
वैष्णवीनान्तु मुद्राणां कथ्यन्ते लक्षणान्यथ ।
वामाङ्गुष्ठन्तु संगृह्य दक्षिणेन तु मुष्टिना ॥
कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ।
वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः स्युः प्रसारिताः॥
दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका । १ ।
हस्तौ तु संमुखौ कृत्वा सन्नतप्रोथिताङ्गुली ॥
तलान्तर्मिलिताङ्गुष्ठौ सुभुग्नौ सुप्रसारितौ ।
कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका ॥२॥
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली ।
अङ्गुल्यौ मध्यमे भूयः सुलग्ने सुप्रसारिते ॥
गदा मुद्रेयमुदिता विष्णोः सन्तोषवर्द्धिनी । ३ ।
हस्तौ तु संमुखौ कृत्वा सन्नतप्रोथिताङ्गुली ॥
तलान्तर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका । ४ ।
ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ॥
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ।
तर्ज्जनीमध्यमानामाः किञ्चित् संकुच्य चालिताः॥
वेणुमुद्रा भवत्येषा सुगुप्ता प्रेयसी हरेः । ५ ।
अन्योन्यपृष्ठकरयोर्मध्यमानामिकाङ्गुली ॥
अङ्गुष्ठेन तु बध्नीयात् कनिष्ठामूलसंस्थिते ।
तर्ज्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका ॥६॥
अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका ।
कनिष्ठयान्यया बद्ध्वा तर्ज्जन्या दक्षया तथा ॥
वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके ।
अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः पराः ॥
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका ।७।
स्पृशेत् कण्ठादिपादान्तं तर्ज्जन्याङ्गुष्ठया तथा ॥
करद्वयेन मालावत् मुद्रेयं वनमालिका । ८ ।
तर्ज्जन्यङ्गुष्ठकौ सक्तावग्रतो विन्यसेत् हृदि ॥
वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी ॥ ९ ॥
अङ्गुष्ठं वाममुद्दण्डितमितरकराङ्गुष्ठकेनापि
बद्ध्वा
तस्याग्रं पीडयित्वाङ्गुलिभिरपि च ता वाम-
हस्ताङ्गुलीभिः ।
बद्ध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्
मारबीजं
विल्वाख्या मुद्रिकैषा स्फुटमिह गदिता गोप-
नीया विधिज्ञैः ॥ १० ॥
हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके ।
मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥
मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत् ।
एषा गरुडमुद्रा स्याद्विष्णोः सन्तोषवर्द्धिनी ॥११॥
जानुमध्ये करौ कृत्वा चिबुकौष्ठौ समावुभौ ।
हस्तौ तु भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥
मुखं विवृतकं कुर्य्यात् लेलिहानाञ्च जिह्विकाम् ।
नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्द्धिनी ॥’
अथवा ।
‘अङ्गुष्ठाभ्यान्तु करयोस्तथाक्रम्य कनिष्ठिके ।
अधोमुखीभिः सर्व्वाभिर्म्मुद्रेयं नृहरेर्म्मता ॥१२॥
देवोपरि करं वामं कृत्वोत्तानमधः सुधीः ।
नमयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥’
यद्वा ।
‘दक्षहस्तस्योर्द्ध्वमुखं वामहस्तमधोमुखम् ।
अङ्गुल्यग्रन्तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥१३॥
वामहस्ततले दत्त्वा अङ्गुलीस्तास्त्वधोमुखीः ।
संरोप्य मध्यमां तासामुन्नम्याधो विकुञ्चयेत् ॥’
हयग्रीवप्रिया मुद्रा तन्मतैरनुकारिणी ।१४।
वामस्य मध्यमाग्रन्तु तर्ज्जन्यग्रेण योजयेत् ॥
अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीडयेत् ।
दर्शयेद्वामके स्कन्धे धनुर्म्मुद्रेयमीरिता ॥ १५ ॥
दक्षमुष्टेस्तु तर्ज्जन्या दीर्घैषा बाणमुद्रिका ।’१६।
यद्वा ज्ञानार्णवे ।
‘यथा हस्तगतं चापं तथा हस्तं कुरु प्रिये । ।
चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ॥१७॥
यथा हस्तगता बाणास्तथा हस्तं कुरु प्रिये । ।
बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥१८॥
ततो तलन्तु करयोस्तिर्य्यक् संयोज्य चाङ्गुलीः ।
संहताः प्रसृताः कुर्य्यात् मुद्रा परशुसंज्ञिका ॥१९
उच्छ्रिताङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी॥२०॥
हस्तौ तु संपुटौ कृत्वा प्रसृताङ्गुलिकौ तथा ।
तर्ज्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमाश्रितौ ।
काममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी ॥२१॥*॥
महादेवप्रियाणान्तु कथ्यन्ते लक्षणान्यथ ।
उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन वेष्टयेत् ॥
वामाङ्गुलीर्द्दक्षिणाभिरङ्गुलीभिश्च बन्धयेत् ।
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥१॥
मिथः कनिष्ठिके बद्ध्वा तर्ज्जनीभ्यामनामिके ।
अनामिकोर्द्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ॥
अङ्गुष्ठाग्रद्वयं न्यस्येत् योनिमुद्रेयमीरिता ।२।
अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा शिष्टाङ्गुलीत्रयम् ॥
प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ।३
अङ्गुष्ठतर्ज्जन्यग्रे तु ग्रथयित्वाङ्गुलित्रयम् ॥
प्रसारयेदक्षमाला मुद्रेयं परिकीर्त्तिता । ४ ।
अधःस्थितो दक्षहस्तः प्रसृतो वरमुद्रिका ॥५॥
ऊर्द्ध्वीकृतो वामहस्तः प्रसृतोऽभयमुद्रिका ।६। ।
मिलितानामिकाङ्गुष्ठं मध्यमाग्रे नियोजयेत् ॥
श्लिष्टाङ्गुल्युच्छ्रिते कुर्य्यात् मृगमुद्रेयमीरिता ।७
पञ्चाङ्गुल्यो दक्षिणास्तु मिलिता ऊर्द्ध्वसुमताः ॥

खट्वाङ्गमुद्रा विख्याता शिवस्यातिप्रिया मता ।८।
पाशवद्वामहस्तन्तु कृत्वाङ्के वामके तथा ॥
निधायोच्छ्रितवत् कुर्य्यात् मुद्रा कापालिकी
मता । ६ ।
मुष्टिञ्च शिथिलां बद्धा ईषदुच्छ्रितमध्यमाम् ॥
दक्षिणाङ्गुष्ठमुन्नम्य कर्णदेशे प्रचालयेत् ।
एषा मुद्रा डमरुका सर्व्वविघ्नविनाशिनी ॥१०॥*॥
तथा गणेशमुद्राणामुच्यन्ते लक्षणान्यथ ।
उत्तानोर्द्धमुखी मध्या सरला बद्धमुष्टिका ॥
दन्तमुद्रा समाख्याता सर्व्वागमविशारदैः ।१।
वामसुष्टेस्तु तर्ज्जन्या दक्षमुष्टेस्तु तर्ज्जनीम् ॥
संयोज्याङ्गुष्ठकाग्राभ्यां तर्ज्जन्यग्रे स्वके क्षिपेत् ।
एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्त्तिता ॥२॥
ऋज्वीञ्च मध्यमां कृत्वा तर्ज्जनीमध्यपर्व्वणि ।
संयोज्याकुञ्चयेत् किञ्चिन्मुद्रैषाङ्कुशसंज्ञिका ॥३॥
तर्ज्जनीमध्यमानामाकनिष्ठाङ्गुष्ठमुष्टिका ।
अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ॥४॥
परशुमुद्रा ५ निगदिता प्रसिद्धा लड्डुमुद्रिका ।६।
बीजपूराह्वया मुद्रा प्रसिद्धत्वादुपेक्षिता ॥७॥*॥
शाक्तेयीनाञ्च मुद्राणां कथ्यन्ते लक्षणान्यथ ।
पाशा १ ङ्कुश २ वरा ३ भीति ४ धनु ५
र्व्वाणाः समीरिताः ॥ ६ ॥
कनिष्ठानामिके बद्धा स्वाङ्गुष्ठेनैव दक्षत. ।
श्लिष्टाङ्गुली तु प्रहृते संश्लिष्टे खड्गमुद्रिका ॥७॥
वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसार्य्य च ।
आकुञ्चिताङ्गुलीः कुर्य्यात् चर्म्ममुद्रेयमीरिता ॥८
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् ।
कुर्य्यान्मुसलमुद्रेयं सर्व्वविघ्नविनाशिनी ॥ ६ ॥
मुष्टिं कृत्वा कराभ्याञ्च वामस्योपरि दक्षिणाम् ।
कृत्वा शिरसि संयोज्य दुर्गा मुद्रेयमीरिता ॥१०॥
चक्रमुद्रां तथा बद्धा मध्यमे द्वे प्रसार्य्य च ।
कनिष्ठिके तथानीय तदग्रेऽङ्गुष्ठकौ क्षिपेत् ॥
लक्ष्मीमुद्रा परा ह्येषा सर्व्वसम्पत्प्रदायिनी ॥१॥
वीणावादनवद्धस्तौ कृत्वा सञ्चालयेच्छिरः ।
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ।१।
वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका ।२।
दक्षिणाङ्गुष्ठतर्ज्जन्यावग्रलग्ने पराङ्गुलीः ॥
प्रसार्य्य संहतोत्ताना एषा व्याख्यानमुद्रिका ।३।
श्रीरामस्य सरस्वत्या अत्यन्तप्रियसी मता ॥*॥
मणिबन्धस्थितौ कृत्वा प्रसृताङ्गुलिकौ करौ ।
कनिष्ठाङ्गुष्ठयुगले मिलित्वान्तः प्रसारयेत् ॥
सप्तजिह्वाख्यमुद्रेयं वैश्वानरप्रियङ्करी ।१। * ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ॥
तर्ज्जनी मध्यमानामा संहता भुग्नवर्ज्जिता ।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता ॥
दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशामेकमुष्टिं कुर्य्यात सा कुम्भमुद्रिका ॥
मुष्ट्योरूर्द्धीकृताङ्गुष्ठौ तर्ज्जन्यग्रे तु विन्यसेत् ।
सन्त्रस्ताकरी ह्येषा दन्तमुद्रा प्रकीर्त्तिता ॥*॥
प्रसृताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ च संमुखौ ।।
कुर्य्यात् स्व हृदये सेयं मुद्रा प्रार्थनसंज्ञिका ॥*॥
अञ्जल्यञ्जलिमुद्रा स्याद्धासुदेवाह्वया च सा ।

अङ्गुष्ठावुन्नतौ कृत्वा मुष्ट्योः संलग्नयोर्द्वयोः ॥
तावेवाभिमुखौ कुर्य्यात् मुद्रैषा कालकर्णिका ।*।
दक्षिणा निविड़ा मुष्टिर्नासिकार्पिततर्ज्जनी ॥
मुद्रा विस्मयसंज्ञा स्यात् विस्मयावेशकारिणी ।
मुष्टिरूर्द्धीकृताङ्गुष्ठा दक्षिणा नादमुद्रिका ॥
तर्ज्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका । * ।
अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम् ॥
क्षिप्त्वाङ्गुलीरङ्गुलीभिः संग्रथ्य परिवर्त्तयेत् ।
एषा संहारमुद्रा स्यात् विसर्ज्जनविधौ स्मृता ॥
दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् ।
अङ्गुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी ॥
वामहस्तस्य तर्ज्जन्यां दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्जन्यां वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्यात् दक्षिणस्य करस्य च ॥
कूर्म्मपृष्ठसमं कुर्य्यात् दक्षपाणिञ्च सर्व्वतः ।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि ॥'
पृष्ठे क्रोडे ॥ * ॥
'अन्तराङ्गुष्ठमुष्टिन्तु कृत्वा वामकरस्य च ।
मध्यमाग्रं दक्षिणस्य तथालम्ब्य प्रयत्नतः ॥
मध्यमेनाथ तर्जन्यामङ्गुष्ठाग्रेण योजयेत् ।
दक्षिणं योजयेत् पाणिं वाममुष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुखमुद्रेयमुच्यते ॥ * ॥
तर्जनीमध्यमानामाः समं कुर्य्यादधोमुखम् ।
अनामायां क्षिपेद्वृद्धां ऋज्वीं कृत्वा कनि-
ष्ठिकाम् ॥
लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्त्तिता ।
तर्जन्यनामिकामध्याकनिष्ठाक्रमयोगतः ॥
करयोर्योजयच्चैव कनिष्ठामूलयोगतः ।
अङ्गुष्ठाग्रे तु निःक्षिप्य महायोनिः प्रकीर्त्तिता ॥'
ताराया योन्यादिमुद्रा—यथा । योनिमुद्रा च
वक्तव्या भूतिनी वक्तव्या बीजाख्यापि ॥
'परिवर्त्त्य करौ स्पृष्टौ कनिष्ठाकृष्टमध्यमे ।
अनामायुगलञ्चाधस्तर्जनीयुगलं पृथक् ॥
अन्योन्यं निविडं बद्धाङ्गुष्ठाग्रेऽनामिके ततः ।
दानवध्मकेत्वाख्या मुद्रैषा कथिता प्रिये । ॥
यस्यास्तु बन्धनान्मन्त्री बन्धनान्मुच्यते ध्रुवम् ॥
वक्त्रं विस्तारितं कृत्वाप्यधो जिह्वाञ्च चालयेत् ।
पार्श्वस्थं मुष्टियुगलं लेलिहानेति कीर्त्तिता ॥'
एषा ताराराधनेऽन्या लेलिहाना वक्तव्या ।
'योनिर्मायाधरः सन्ध्यैधः कूर्चः क्रमाद्बिदुः ।
बीजानि चोच्चरन् मन्त्री मुद्राबन्धनमाचरेत् ॥
तर्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ।
वामकेश्वरतन्त्रोक्ताः प्रकाश्यन्तेऽथ मुद्रिकाः ॥
शृणु देवि । प्रवक्ष्यामि मुद्राः सर्व्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु सान्निध्यं त्रैपूरं भवेत् ॥
परिवर्त्त्य करौ स्पृष्टावङ्गुष्ठौ कारयेत् समौ ।
अनामान्तर्गते कृत्वा तर्जन्यौ कुटिलाकृती ॥
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ! ।
त्रिखण्डेयं समाख्याता त्रिपुराध्यानकर्म्मणि ॥

मध्यमामध्यगे कृत्वा कनिष्ठेऽङ्गुष्ठरोधिते ।
तर्ज्जन्यौ दण्डवत् कृत्वा मध्यमोपर्य्यनामिके ।
एषा च प्रथमा मुद्रा सर्व्वसंक्षोभकारिणी ।
एतस्या एव मुद्राया मध्यमे सरले यदा ।
क्रियेते परमेशानि । सर्व्वविद्राविणी तदा ॥
मध्यमातर्जनीभ्याञ्च कनिष्ठानामिके समे ।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि । ॥
अङ्गुष्ठौ तु नियुञ्जीत कनिष्ठानामिकोपरि ।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षिणी परा ॥
पुटाकारौ करौ कृत्वा तर्जन्यावङ्कुशाकृती ।
परिवर्त्तक्रमेणैव मध्यमे तदधोगते ॥
क्रमेण देवि ! तेनैव कनिष्ठानामिके तथा ।
संयोज्य निविड़ाः सर्व्वा अङ्गुष्ठावग्रदेशतः ॥
मुद्रेयं परमेशानि ! सर्व्ववश्यकरी मता ।
सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेऽन्त्यजे ॥
अनामिके तु सरले तद्बहिस्तर्जनीद्वयम् ।
दण्डाकारौ तदङ्गुष्ठौ मध्यमानखदेशगौ ॥
मुद्रैषोन्मादिनी नाम्ना कर्षिणी सर्व्वयोषिताम् ।
अस्यास्त्वनामिकायुग्ममधः कृताङ्कुशाकृती ॥
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशा मुद्रा सर्व्वकामार्थसाधिनी ॥*॥
सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणम् ।
बाहुं कृत्वा महादेवि ! हस्तौ संपरिवर्त्त्य च ।
कनिष्ठेऽनामिके देवि । युक्ते तेन क्रमेण च ।
तर्जनीभ्यां समाक्रान्ते सर्व्वोर्द्धमपि मध्यमे ॥
अङ्गुष्ठौ तु महेशानि । सरलावपि कारयेत् ।
इयं सा खेचरी नाम्ना पार्थिवस्थानयोजिता ॥
परिवर्त्त्य करौ स्पृष्टावर्द्धचन्द्राकृती प्रिये ! ।
तर्जन्यङ्गुष्ठयुगलं युगपत् कारयेत्ततः ॥
अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्व्वाधस्तादनामिके ।
बीजमुद्रेयमचिरात् सर्व्वसिद्धिविवर्द्धिनी ।*।
मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते ॥
अनामिके मध्यगते तथैव हि कनिष्ठिके ।
सर्व्वा एकत्र संयोज्या अङ्गुष्ठपरिपीड़िताः ॥
एषा तु परमा मुद्रा योनिमुद्रेयमीरिता ।*।
एता मुद्रा महेशानि ! त्रिपुराया मयोदिताः ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
वामहस्तेन मुष्टिन्तु बद्धा कर्णप्रदेशके ।
तर्ज्जनीं सरलां कृत्वा भ्रामयेच्छत्रुवित्तमः ॥
सौभाग्यदण्डिनी मुद्रा न्यासकालेऽपि सूचिता ।
अन्तरङ्गुष्ठमुष्ट्या तु निरुध्य तर्जनीमिमाम् ॥
रिपुजिह्वाग्रहा मुद्रा न्यासकाले तु सूचिता ।
बद्धा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ॥
अङ्गुष्ठेन तदग्रे तु मुद्रेय भूतिनी मता ।*।
वाममुष्टिं विधायाथ तर्जनीमध्यमे ततः ॥
प्रसार्य्य तर्जनीमुद्रा निर्द्दिष्टा वज्रपाणिना ॥'
इति तन्त्रसारे मुद्राप्रकरणं समाप्तम् ॥*॥*॥
अपि च ।
'उक्ताः स्तवनमस्काराः शृणुतं पुरतो युवाम् ।
मुद्राणां परिसंख्यानं स्वरूपञ्च यथाक्रमम् ॥
धेनुश्च सम्पुटश्चैव प्राञ्जलिर्व्विल्वपद्मकौ ।

नाराचो मुष्टदण्डौ च योनिरर्द्धं तथैव च ।
वन्दनी च महामुद्रा महायोनिस्तथैव च ।
भगश्च पुटकश्चैव निःशङ्कोऽथार्द्धचन्द्रकः ॥
अङ्कुश द्विमुखश्चैव शङ्खमुद्राथ मुष्टिकः ।
वज्रश्चैव तथा बद्धं सयोनिर्विमलस्तथा ॥
घटः शिखरिणी तुङ्गः पुच्छोऽथ स्यार्द्धधेनुकः ॥
संमीलनी च कुक्कश्च चक्रं मूलं तथैव च ॥
सिंहवक्त्रं गोमुखश्च प्रोन्नामोन्नमनं तथा ।
विम्बं पाशुपतं शुद्धं त्यागोऽथ साधनी तथा ॥
प्रसाधनी चोग्रमुद्रा कुण्डली वृहमेव च ।
त्रिमुखश्चाग्निवक्त्री च योगो भेदोऽथ मोहनम् ॥
बाणो धनुश्च तूणीरं मुद्रा एतास्तु सत्तमाः ।
अष्टोत्तरशतं मुद्रा ब्रह्मणा याः प्रकीर्त्तिताः ॥
तासान्तु पञ्चपञ्चाशद्देताः शाम्भ्यास्तु पूजने ।
शेषास्तु यास्त्रिपञ्चाशन्मुद्रास्ताः समयेषु च ।
द्रव्यानयनसंकेतनटनादिषु ताः स्मृताः ॥
देवानां चिन्तने योगे ध्याने जप्ये विसर्ज्जने ।
आद्यास्तु पञ्चपञ्चाशन्मुद्रा भैरव । कीर्त्तिताः ॥
मुद्रां विना तु यज्जप्यं प्राणायामः सुरार्च्चनम् ।
योगो ध्यानासने चापि निष्फलानि च भैरव । ॥
प्रत्येकं लक्षणं तेषां शृणुतं तनयौ युवाम् ॥
दक्षिणामध्यमाग्रेण सव्यहस्तस्य तर्ज्जनीम् ।
योजयेत् सव्यमध्यान्तु तर्ज्जन्या दक्षिणेन वै ॥
तथा दक्षानामिकया वामहस्तकनिष्ठिकाम् ।
अनामिकान्तु वामस्य दक्षिणस्य कनिष्ठया ॥
योजयेद्भक्तिमान् सम्यक् दक्षिणावर्त्तनेन तु ।
धेनुमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥१॥
संयोज्य द्वौ तलौ सर्व्वाण्यङ्गुष्ठाग्राणि हस्तयोः ।
संयोज्य पार्श्वतोऽङ्गुष्ठौ संपुटः प्रोच्यते सुरैः ॥
सर्व्वेषामथ देवानां संपुटः शस्यते सदा ।
ध्यानसंपुटयोगाद्वै सम्पुटः शस्यते सदा ॥२॥
निकुञ्जयुगलं पार्श्वोः संयोज्यार्द्धेन एव च ।
मध्यशून्यः पुटाकारः प्राञ्जलिः परिकीर्त्तितः ॥३॥
अङ्गुष्ठमन्तरं कृत्वा पाण्योर्मुष्टिं विधाय च ।
संयोज्य विल्ववत्तत् तु विल्वमुद्रा प्रकीर्त्तिता ॥४॥
मणिबन्धादाकरभं संयोज्य करयोर्द्वयोः ।
अङ्गुष्ठे चापि संयोज्य तथैव च कनिष्ठिके ॥
निरस्तितौ द्वयोः पाण्योरङ्गुलीर्व्विरलास्ततः ।
पद्ममुद्रा समाख्याता चतुर्वर्गप्रदा नृणाम् ॥५॥
अङ्गुष्ठाग्रेण तर्ज्जन्याः संयोज्याधो रेखया ।
अन्याङ्गुलीस्तथानम्य नाराचः स्यात् प्रसा-
र्य्यते ॥
मम चैव शिवायाश्च प्रीतिदेयं प्रियङ्करी ।
नाराचमुद्रा सततं प्रीत्यै वेतालभैरव ! ॥६॥
अन्तराङ्गुष्ठमुष्टिञ्च कृत्वा वामकरस्य तु ।
मध्यमाभ्यां दक्षिणस्य तथानम्य प्रयत्नतः ॥
मध्याङ्गेनाथ तर्ज्जन्या अङ्गुष्ठाग्रान्नियोज्य च ।
दक्षिणं योजयेत् पाणिं वाममुष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुष्टमुद्रेयमिष्यते ।
इयन्तु गणनाथस्य प्रीतिदा मुद्रिकोत्तमा ॥
सर्व्वेषामपि देवानां तुष्टिदा सर्व्वकर्म्मसु ॥७॥
अङ्गुष्ठमध्यमादीश्च सम्यगानम्य तर्ज्जनीम् ॥
प्रसार्य्य दण्डमुद्रेति दक्षिणस्य करस्य तु ॥८॥
सर्व्वाङ्गुलीस्तु संयोज्य करयोरुभयोरपि ॥
संवेष्ट्य रज्जुवद्बद्धे तु पाण्योरपि कनिष्ठिके ।
वामस्य वाममूलेन तदग्रं विनियोजयेत् ॥
दक्षस्य मध्यमूलेन तथाग्रं वाममेव च ।
योजयेत् योजनात् पश्चादावर्त्त्य करशाखिकाः ॥
योन्याकारन्तु तन्मध्यं योनिमुद्रा प्रकीर्त्तिता ।
कामाख्यायाः पञ्चमर्त्तेर्दुर्गाया अपि भैरव ! ॥
प्रीतिदा योनिमुद्रेयं मम कामस्य च प्रिया ॥९॥
संयुक्ताश्चाङ्गुलीः सर्व्वाः प्रसार्य्याङ्गुष्ठपर्व्वणा ॥
अग्रेण च कनिष्ठाया अग्रेणापि च योज-
येत् ।
करस्य दक्षिणस्येयमर्द्धयोनिः प्रकीर्त्तिता ॥१०॥
संपुटं प्राञ्जलिं वापि यदि शीर्षे नियोजयेत् ।
वन्दनीया समाख्याता मुद्रा विष्णुप्रमोदिनी ॥११॥
सैव चेत् श्रवणासक्ता महामुद्रा प्रकीर्त्तिता ॥१२॥
दक्षिणाङ्गे तु सा सक्ता वैष्णवी परिकी-
र्त्तिता ॥ १३ ॥
महायोनिस्तु कथिता वैष्णवीतन्त्रगोचरे ।
द्वयोर्मूले त्वङ्गुष्ठाग्रमङ्गुलीश्च कनिष्ठयोः ॥
नियोज्य प्रहृतीकृत्य द्वे पाणी योजयेत् पुनः ।
भगमुद्रा च सा ख्याता लक्ष्मीवाणीशिवा-
प्रिया ॥ १४ ॥
सर्व्वाङ्गुलीनामग्रौघं दक्षिणस्य करस्य च ।
संयोज्यैकत्र पुरतो निर्द्दिष्टः पुटकः स्मृतः ॥१५॥
कनिष्ठानामिकाङ्गुष्ठाङ्गुलीनां योजयेद्बुधः ।
अग्राण्येकत्र मध्यान्तु तर्ज्जनीञ्च प्रसार्य्य वै ॥
कुब्जीकृत्य करद्वन्द्वं पृथगग्रे नियोजयेत् ।
निःशङ्को नाम मुद्रेयं नरसिंहवराहयोः ॥१६॥
कनिष्ठानामिकामध्यामाकुञ्च्य दक्षिणस्य च ।
करस्य तर्ज्जन्यङ्गुष्ठे प्रसार्य्य क्रियते तु या ॥
सा मुद्रा त्वर्द्धचन्द्राख्या ग्रहाणां प्रीतिदा-
यिनी ॥ १७ ॥
ऊर्द्धीकृत्य तथाङ्गुष्ठं दक्षिणस्य करस्य च ।
कृत्वा मध्यं तदङ्गुष्ठं वाममुष्टिं तयोर्द्धतः ।
ऊर्द्धाङ्गुष्ठं तथा कुर्य्यादङ्गमुद्रा प्रकीर्त्तिता ॥१८॥
एतस्या एव मुद्रायाः कनिष्ठादिविमोचनः ।
अष्टौ मुद्राः समाख्याता नाम तासां पृथक्
पृथक् ॥
द्विमुखश्चैव १९ मुष्टिश्च २० वज्र २१ माबद्ध २२
मेव च ।
विमलश्च २३ घटश्चैव २४ तुङ्गः २५ पुच्छ २६
स्तथैव च ॥
नवानां विष्णुमूर्त्तीनां सार्द्धमङ्गेन मुद्रिकाः ।
क्रमादत्र समाख्याता नायिकानां तथैव च ॥
संयोज्य करयोः पृष्ठे तथावर्त्त्य तु वै समम् ।
प्रसार्य्य तर्ज्जनीयुग्मं संयुक्तं सर्व्वतः पुनः ॥
अङ्गुष्ठौ च तथा सक्तौ शङ्खमुद्रा प्रकीर्त्तिता ॥२७॥
उत्तानमञ्जलिं कृत्वा अङ्गुष्ठे द्वे कनिष्ठयोः ॥
मूले निःक्षिप्य तु करौ संयोज्याथ प्रदर्शयेत् ।
सयोनिरिति सा ख्याता मुद्रा देवौघतुष्टिदा ॥२८॥
मुष्टिर्द्दक्षिणहस्तस्य यदोर्द्धाङ्गुष्ठिका भवेत् ।
सा स्यात् शिखरिणी मुद्रा शाणीकूर्म्मप्रिया
च सा ॥ २९ ॥
अनामिके कनिष्ठे तु संयोज्य ऋजुना पुनः ।
मध्यमातर्ज्जनीनान्तु धेनुमुद्रेव बन्धनम् ॥
सार्द्धधेनुरिति ख्याता चन्द्रप्रीतिविवर्द्धिनी ॥३०॥
करयोरङ्गुलीः सर्व्वाः सर्व्वाग्राण्येकतः स्थिता ॥
नियोज्यार्द्धतले चैव तदधोऽपि वियुज्य च ।
अग्रैरग्रं योजयेत्तु मुद्रा सम्मीलनी तु सा ॥३१॥
भौमभूमिसुनीशानामियं प्रीतिविवर्द्धिनी ।
सर्व्वाङ्गुलीस्तु संसक्ता दक्षिणस्य करस्य च ॥
कियद्भागं तथान्यस्य तलं कुर्य्यात्तु कुक्कवत् ।
समाख्याता कुक्कमुद्रा बुधवाणीशिवाप्रिया ॥३२॥
सर्व्वाङ्गुलीनां मध्येस्तु वामहस्तस्य चाङ्गुलीः ।
प्रसार्य्याङ्गुष्ठयुगलं संयोज्याग्रेण भैरव ! ॥
तदङ्गुष्ठद्वयं कार्य्यं सम्मुखं वितरेत्ततः ।
चक्रमुद्रा समाख्याता गुरुविष्णुशिवप्रिया ॥३३॥
अङ्गुष्ठं मध्यमाञ्चैव नामयित्वा करस्य च ।
दक्षिणस्यापरास्तिस्रो योजयेदग्रतः पुनः ॥
मूलमुद्रा समाख्याता मम शुक्रगुहप्रिया ॥३४॥
निकुञ्जीकृत्य तु करौ वामाङ्गुलिगणस्य तु ॥
अग्राणि योजयेन्मध्ये तलस्यासव्यहस्ततः ।
अधः कृत्वा वामहस्तं मुद्रा सिंहमुखी
स्मृता ॥ ३५ ॥
इयं प्रीत्यै तु दुर्गायाः सूर्य्यपुत्रस्य चक्रिणः ।
भगमुद्रा कर्णमूले गोमुखाख्या प्रकीर्त्तिता ॥
मम विष्णोस्तथा राहोः सर्व्वदा प्रीति-
दायिनी ॥ ३६ ॥
मुष्टिद्वयमधोत्तानं कृत्वा संयोज्य पार्श्वतः ॥
दक्षिणस्य कनिष्ठादीन् प्रसार्य्य क्रमतः पुनः ।
तथा वामकनिष्ठाभ्यामेकैकेन प्रसारयेत् ॥
अष्टौ मुद्राः समाख्याता नामतः क्रमतः शृणु ।
प्रोन्नामो ३७ न्नमन ३८ श्चैव विम्बं ३९ पाशु-
पतं ४० तथा ॥
शुद्धं ४१ त्यागः ४२ साधनी ४३ च तथा चैव
प्रसाधनी ४४ ।
आकुञ्च्य करशाखास्तु दक्षिणाः सा तु मुद्रिका ॥
उग्रमुद्रा समाख्याता स्वहस्तस्य विपर्य्ययात् ॥४५॥
इन्द्रादिलोकपालानां दश मुद्राः प्रकीर्त्तिताः ॥
सर्व्वेषामपि देवानां परमप्रीतिवर्द्धनाः ।
अङ्गुष्ठाग्रन्तु तर्ज्जन्या अग्रभागेण योजयेत् ॥
आकुञ्च्य मध्यमाभ्यान्तु दक्षहस्तस्य चाङ्गुलीः ।
दर्शयेत् कुण्डलाकारं कुण्डलीशक्तितुष्टिदम् ॥
सर्व्वेषामपि देवानां तथा तुष्टिकरं महत् ॥४६॥
अङ्गुष्ठतर्ज्जनीमध्या अग्रभागे नियोज्य च ॥
मध्यमाञ्च कनिष्ठाञ्च आकुञ्च्य दक्षिणे करे ।
त्रिमुखाख्या समाख्याता विश्वदेवप्रिया सदा ॥
केतोः प्रियेयं सततं मातृणामपि तुष्टिदा ॥४७॥
तर्ज्जन्यङ्गुष्ठयोरग्रभागौ संयोज्य चाङ्गुलीः ॥
अन्या आकुञ्चयेत् तिस्रः साग्निवक्त्री प्रकीर्त्तिता ।
पितॄणामथ साध्यानां रुद्राणां विश्वकर्म्मणः ॥
सर्व्वदा प्रीतिजननी अग्निवक्त्री प्रकीर्त्तिता ॥४८॥
पाणी तलाभ्यां संयोज्य तदङ्गुष्ठद्वयं ततः ॥

ऊर्द्ध्वं संयोजयेन्नाभौ अस्योपरि तथाञ्जलिः ।
योगमुद्रा समाख्याता योगिनां तत्त्वदायिनी ॥
सर्व्वेषामपि देवानां पूजने चिन्तने तथा ।
योगमुद्रा समाख्याता तुष्टिप्रीतिकरी सदा ॥४६॥
प्राञ्जलिर्नाम मुद्रा तु ऊर्द्ध्वाधोभावयोजिताम् ।
विभिद्य दर्शयेद्धस्तौ ऊर्द्ध्वाधः प्रसृतौ ततौ ॥
भेदमुद्रा समाख्याता मम विष्णोर्विधेः प्रिया ॥५०॥
अङ्गुष्ठे द्वे तु निःक्षिप्य करयोरुभयोस्तले ॥
अग्रेण योजयेत् पश्चात् कनिष्ठायुगलं ततः ।
उभयोर्हस्तयोश्चाप्यास्तर्ज्जन्याद्याश्च योजयेत् ॥
अग्राग्रैस्तु पृथक्कृत्य दर्शयेत्तत् कनिष्ठिकाम् ।
मुद्रा सम्मोहनं नाम कामदुर्गारमाप्रिया ॥
सर्व्वेषामपि देवानां मोहनं प्रीतिदं स्मृतम् ॥५१॥
आनम्य सव्यहस्तस्य मध्यमानामिके तथा ॥
तयोः पृष्ठे तु संयोज्य अङ्गुष्ठाग्रं ततः परम् ।
कनिष्ठां तर्ज्जनीञ्चैव अग्रेण योजयेत्ततः ॥
बाणमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥५२॥
सर्व्वाङ्गुलीस्तु सङ्कोच्य अङ्गुष्ठमथ तर्ज्जनीम् ॥
प्रसार्य्य करयोः पश्चादङ्गुष्ठाग्रन्तु योजयेत् ।
अङ्गुष्ठाग्रेण तर्ज्जन्या अग्रेणापि च तर्ज्जनीम् ॥
यथाशक्ति प्रसार्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ॥५३॥
सर्व्वाङ्गुलीनामग्राणि ब्राह्मतीर्थे नियोजयेत् ॥
अनामिकायाः पृष्ठे तु अङ्गुष्ठाग्रं नियोजयेत् ।
शृङ्गं तूणीरवत् कृत्वा तेषामन्तस्तु भैरव ! ।
तूणीरमुद्रा चाख्याता सर्व्वेषां प्रीतिवर्द्धिनी ॥५४॥
मुद्रासु संस्थिता पूजा मुद्रासु परिचिन्तनम् ।
मुद्रासु संस्थिता योगा मुद्रा मोदकरास्ततः ॥
यदा यदा पूजनेषु चिन्तने ध्यानकर्म्मणि ।
यज्ञादौ स्तवने वापि हस्तकृत्यं न विद्यते ।
तदा मुद्रायुतं कुर्य्याद्दिष्टापूर्त्ते करद्वयम् ॥
यत्नकृत्येषु चैकस्तो हस्तो मुद्रासु च क्षमः ।
तदा मुद्रां विधायैव तत्तु कृत्यं समाचरेत् ॥
मुद्राविमुक्तहस्तन्तु क्रियते कर्म्मदैविकम् ।
कृत्वा तन्निष्फलं यस्मात्तस्मान्मुद्रान्वितो भवेत् ॥
विसर्जने तु देवानां यस्य या परिकीर्त्तिता ।
मुद्रां तां पूजनादौ तु तस्य नैव प्रयोजयेत् ॥
विरुद्धाक्रान्तं मुद्रां मुद्रायुक्तः समाचरेत् ।
पूजनादि समस्तञ्च कर्म्म हस्तेन विचक्षणः ॥
ततो मुद्रा परं धाम मुद्रा पुण्यप्रदायिनी ।
देवानां मोददा मुद्रा तस्मात्तां यत्नतश्चरेत् ॥
अर्द्धयोनिर्म्महायोनिर्योनिर्न्नाक्षी च वैष्णवी ।
मुद्रा विसर्ज्जने प्रोक्ता शिवाशिवपुरयोः सदा ॥
दुर्गायाः सर्व्वरूपेषु मुद्रा एताः प्रकीर्त्तिताः ।
योनिश्च सम्पुटश्चैव महायोनिस्तथैव च ॥
वर्ज्जयित्वा यस्तभावादुक्तादन्यत्र योजयेत् ।
भवेयुस्तु विपश्चाशदन्या मुद्राः समन्ततः ॥
ता यस्तभावाद्वामाः स्युर्मुद्रा मोदकराः पराः ।
एवं वो कथिता मुद्राः पूजने पुण्यतुष्टिदाः ॥”

इति कालिकापुराणे ६५ अध्यायः ॥

मुद्राङ्कितः, त्रि, (मुद्रया अङ्कितः ।) मुद्रया चिह्नितः । छापाकरा मोहरकरा इत्यादि भाषा । यथा,—

“धाता विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरीभुजा-
श्लेषानन्दविघूर्णमाननयनो दक्षाध्वरध्वंसकृत् ।
दैत्यारिः कमलाकपोलमकरीमुद्राङ्कितोरःस्थलः
एतेऽप्याविलरेषु जन्तुषु पुनः का नाम शान्तेः
कथा ॥”

इति प्रबोधचन्द्रोदयनाटके १ अङ्कः ॥

मुद्रालिपिः, स्त्री, (मुद्रया लिपिः ।) पञ्चधालिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—

“मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री सुभगा हर ! ॥”

इति वाराहीतन्त्रम् ॥

अस्याः पाठ्यत्वं धार्य्यत्वञ्च यथा,—

“लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥”

इति खड्गमालातन्त्रम् ॥

मुद्रिका, स्त्री, (मुद्रा स्वार्थे कन् + स्त्रियां टाप् । पूर्व्वाकारस्य ह्रस्वत्वम् । अत इत्वं च ।) स्वर्णरूप्यादिनिर्म्मितमुद्रा । मोहर टाका इत्यादि भाषा । यथा,—

“सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोभिताम् ।
सलिलेन सहाहूतां प्रक्षिपेत् तत्र मुद्रिकाम् ॥”

इति मिताक्षरायां व्यवहाराध्यायः ॥

मुद्रितं, त्रि, (मुद्रा मुद्रणं अस्य जातेति । मुद्रा इतच् ।) अप्रफुल्लम् । मोदा इति भाषा । तत्पर्य्यायः । सङ्कुचितम् २ निद्राणं ३ मीलितम् ४ । इति हेमचन्द्रः ॥ मुद्राङ्कितञ्च ॥ (परित्यक्तम् । यथा, नैषधचरिते । ५ । १२ ।

“मुद्रिताज्यजनसंकथनः सन्
नारदं बलिरिपुः समवादीत ।”

“मुद्रितं परित्यक्तम् ।” इति तट्टीका ॥)

मुधा, व्य, (मुह्यतीति । मुह् + बाहुलकात् का । पृषोदरादित्वात् हस्य धः ।) व्यर्थकम् । इत्यमरः ।३।४।४। (यथा, महाभारते ।१४।३७।४।

“मुधा दानं मुधा दत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्म्मः स्यात् सोऽमृतत्वमश्नुते ॥”)

मुनिः, पुं, मनुते जानाति यः । (इति मन् + “मनेरुच्च ।” उणा० ४ । १२२ । इति इन् + अत उच्च ।) मौनव्रती । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । वाचंयमः २ । इत्यमरः ।२।७।४२। मौनी ३ व्रती ४ ऋषिः ५ शापाक्षः ६ सत्यवाक् ७ । इति जटाधरः ॥ (यथा, नैषधे ।१।१३३।

“फलेन मूलेन च वारिभूरुहां
मुनेरिवेत्थं मम यस्य वृत्तयः ॥”)

तस्य लक्षणं यथा,—

“दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥”

इति श्रीभगवद्गीता ॥*॥

तस्य धर्म्मो यथा,—

ब्रह्मोवाच ।

“मुनिभिश्चरिता धर्म्मा उक्ता व्यास ! मया तव ।
यैर्विष्णुस्तुष्यते देवः सुखादिपरिभाविकः ॥
तर्पणेन च होमेन सन्ध्यया वन्दनेन च ।
प्राप्यते भगवान् विष्णुर्धर्म्मकामार्थमोक्षदः ॥
धर्म्मो विष्णुर्व्रतो विष्णुः पूजा विष्णुस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं
हरिः ॥”

इति गारुडे २२६ अध्यायः ॥*॥

तस्याश्रमे वर्णनीयानि यथा । अतिथिपूजा १ हरिणविश्वासः २ हिंस्रजन्तुशान्तता ३ यज्ञधूमः ४ मुनिसुतः ५ द्रुमसेकः ६ वल्कलः ७ कुशश्च ८ । इति कविकल्पलता ॥*॥ मुनिविशेषाणां ब्रह्मणोऽङ्गविशेषादुत्पत्तिर्यथा,—

“पुलस्त्यो दक्षकर्णाच्च पुलहो वामकर्णतः ।
दक्षनेत्रात्तथात्रिश्च वामनेत्रात् क्रतुः स्वयम् ॥
अरणिर्नासिकारन्ध्रात् अङ्गिराश्च मुखाद्रुचिः ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥
छायायाः कर्द्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षसश्चैव वोढुश्च कण्ठदेशाच्च नारदः ॥
मरीचिः स्कन्धदेशाच्च आपस्तम्बस्तथा गलात् ।
वशिष्ठो रसनादेशात् प्रचेता अधरोष्ठतः ॥
हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
सृष्टिं विधातुञ्च विधिश्चकाराज्ञां सुतानपि ॥”

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ८ अध्यायः ॥*॥

गयासुरशरीरे यज्ञार्थं ब्रह्मणो मानसात् सृष्टा मुनयो यथा,—

“ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ।
अग्निशर्म्माणमव्यक्तं शौनकं जाबालिं मृदुम् ॥
कुसुरिं वेदकौण्डिन्यं हारीतं काश्यपं क्षमम् ।
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमव्ययम् ॥
वृद्धं पाराशरं कण्वं माण्डव्यं श्रुतिकेवलम् ।
श्वेतं सुतालं दमनं सुहोत्रं कङ्कमेव च ॥
लौगाक्षिञ्च महाबाहुं जैगीषव्यं तथैव च ।
दधिपञ्चमुखं विप्र ! ऋषभं कर्कमेव च ॥
कामायनं गोभिलञ्च मुनिमुग्रं महाव्रतम् ।
जटामालिनमव्यग्रं चाट्टहासञ्च दारुणम् ॥
आत्रेयञ्चाप्यङ्गिरसमौपमन्युं महाव्रतम् ॥
गोकर्णञ्च गुहावासं शिखण्डिनमुमाव्रतम् ॥
सुपालकं गौतमञ्च तथा वेदशिरो व्रतम् ।
एतानन्यांश्च विप्रेन्द्रान् ब्रह्मा लोकपितामहः ।
परिकल्प्याकरोद्यागं गयासुरशरीरके ॥”

इति वायुपुराणे गयामाहात्म्यम् ॥*॥

मुनिविशेषनाम्नां व्युत्पत्तिर्यथा,—

“कतिकल्पान्तरेऽतीते स्रष्टुः सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः ॥
विधेर्नरदनाच्च कण्ठदेशाद्बभूव सः ।
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना ॥
यः पुत्रश्चेतसो धातुर्बभूव मुनिपुङ्गवः ।
तेन प्रचेता इति तन्नाम चक्रे पितामहः ॥
बभूव धातुर्यः पुत्रः सहसा दक्षपार्श्वतः ।
सर्व्वकर्म्मणि दक्षश्च तेन दक्षः प्रकीर्त्तितः ॥

वेदेषु कर्द्दमः शब्दश्छायायां वर्त्तते स्फुटः ।
बभूव कर्द्दमाद्बालः कर्द्दमस्तेन कीर्त्तितः ॥
तेजोभेदं मरीचिश्च वेदेषु वर्त्तते स्फुटम् ।
जातः सद्योऽतितेजस्वी मरीचिस्तेन कीर्त्तितः ॥
क्रतुसंघश्च यागेन ततो जन्मान्तरेऽधुना ।
ब्रह्मपुत्त्रोऽपि तन्नाम्ना क्रतुरित्यभिधीयते ॥
प्रधानाङ्गं मुखं धातुस्ततो जातश्च बालकः ।
इरस्तेजस्विवचनोऽङ्गिरास्तेन प्रकीर्त्तितः ॥
अतितेजस्विनि भृगुर्व्वर्त्तते नाम्नि शौनक ! ।
जातः सद्योऽतितेजस्वी भृगुस्तेन प्रकीर्त्तितः ॥
वशीभूतश्च शिष्टश्च जातः सद्यो हि बालकः ।
अतिप्रियश्च धातुश्च वशिष्ठस्तेन कीर्त्तितः ॥
बालोऽप्युदग्रवर्गाश्च जातः सद्यो हि तेजसा ।
प्रज्वलन् पूर्व्वतपसा चारुगास्तेन कीर्त्तितः ॥
हंस आत्मा वशो यस्य योगेन योगिनो ध्रुवम् ।
बालः परमयोगीन्द्रस्तेन हंसः प्रकीर्त्तितः ॥
सन्ततं यस्य यत्नश्च तपःसु बालकस्य च ।
प्रकीर्त्तितो यतिस्तेन संयतः सर्व्वकर्म्मसु ॥
पुलस्तपःसु वेदेषु वर्त्तते ह स्फुटेऽपि च ।
स्फुटं तपःस्वरूपश्च पुलहस्तेन कीर्त्तितः ॥
पुलस्तपःसमूहश्च यस्यास्ति पूर्व्वजन्मनाम् ।
तपःसंघः समूहश्च पुलस्त्यस्तेन बालकः ॥
त्रिगुणायां प्रकृत्यां त्रिविंशावश्च प्रवर्त्तते ।
तयोर्भक्तिः समा यस्य तेन बालोऽत्रिरुच्यते ॥
जटाश्चाग्निशिखारूपाः पञ्च सन्ति च मस्तके ।
तपस्तेजोभवा यस्य स च पञ्चशिखः स्मृतः ॥
अपान्तरतमे देशे तपस्तेपेऽन्यजन्मनि ।
अपान्तरतमा नाम शिशोस्तेन प्रकीर्त्तितम् ॥
स्वयन्तपः समाप्नोति वाहयेत् प्रापयेत् परान् ।
ऋढुः समर्थस्तपसि वोढुस्तेन प्रकीर्त्तितः ॥
तपस्तेजसा बालो दीप्तिमान् स्मृतो मुने ! ।
तपःसु रोचते चित्तं रुचिस्तेन प्रकीर्त्तितः ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः ॥
वङ्गसेनतरुः । जिनः । इति मेदिनी । ने, १५ ॥
प्रियालवृक्षः । पलाशवृक्षः । इति हेमचन्द्रः ।
१ । ७६ ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥
(स्त्री, दक्षकन्या । सा च कश्यपपत्नीनामन्य-
तमा । यथा, महाभारते । १।६५।११-१२ ।
“मरीचेः कश्यपः पुत्त्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥
अदितिर्दितिर्दनुः काला दनायुः सिंहिका
तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला
मुनिः ॥”
अष्टवस्वन्तर्गतस्य आपनामकस्य वसोः पुत्त्रे,
पुं । यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ४० ।
“आपस्य पुत्त्रो वैतण्डः श्रमः श्रान्तो मुनि-
स्तथा ।”
क्रौञ्चद्वीपस्य देशविशेषः । यथा, मत्स्यपुराणे ।
१२१ । ८३-८५ ।
“क्रौञ्चस्य कुशलो देशो वामनस्य मनोऽनुगः ।
मनोऽनुगात् परे चोष्णस्तृतीयोऽपि स उच्यते ॥
उष्णात् परे पावनकः पावनादन्धकारकः
अन्धकारकदेशात्तु मुनिदेशस्तथापरः ॥”
(द्युतिमतः पुत्त्राणामन्यतमः । यथा, मार्कण्डेये ।
५३ । २२ ।
“तथा द्युतिमतः सप्तपुत्त्रास्तांश्च निबोध मे ।
मुनिश्च दुन्दुभिश्चैव सप्तमः परिकीर्त्तितः ॥”
कुरुपुत्त्रभेदः । यथा, महाभारते ।१।६४।४६॥
“अविक्षितमभिष्वक्तं तथा चैत्ररथं मुनिम् ॥”)
मुनिखर्ज्जूरिका, स्त्री, (मुनिप्रिया खर्ज्जूरिका इति
मध्यपदलोपी समासः ।) खर्ज्जूरीप्रभेदः । यथा
“मुनिखर्ज्जूरिका त्वन्या राजेष्टा स्तनसंमिता ॥”
इति राजनिर्घण्टः ॥
मुनिच्छदः, पुं, (मुनयः अत्र्यादयः सप्त तत्-
संख्यकाः छदाः पत्राण्यस्य ।) सप्तच्छदवृक्षः ।
इति राजनिर्घण्टः ॥ (स्त्री । मेथिका । यथा,
भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
‘मेथिका मेथिनी मेथी दीपनी बहुपुत्त्रिका ।’
इत्यादि ।
‘कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ।
इत्यन्तम् ॥)
मुनितरुः, पुं, (मुनेरगस्त्यस्य प्रियः तरुः । इति
मध्यपदलोपी समासः ।) वकवृक्षः । इति
रत्नमाला ॥
मुनिद्रुमः, पु, (मुनेरगस्त्यस्य प्रियः द्रुमः । इति
मध्यपदलोपी समासः ।) श्योनाकवृक्षः । इति
रत्नमाला ॥ श्योनाकप्रभेदः । वकवृक्षः । इति
राजनिर्घण्टः ॥ (यथा, नैषधचरिते ।१।८६।
“मुनिद्रुमः कोरकितः शितिद्युति-
र्वनेऽमुनाऽमन्यत सिंहिकासुतः ॥”
“मुनिद्रुमः वकवृक्षः ।” इति तट्टीका ॥ अस्य
पर्य्यायो यथा,—
“अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
“श्योनाको भूतपुष्पश्च पूतिवृक्षो मुनिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकः टुण्टुकोऽरलुः ॥”
इति वैद्यकरत्नमालायाञ्च ॥)
मुनिनिर्म्मितः, पु, (मुनिना निर्म्मितः ।) डिण्डिशः ।
यथा, भावप्रकाशे ।
“डिण्डिशो रोमशफलो मुनिनिर्म्मित इत्यपि ।
डिण्डिशो रुचिकृत् भेदी पित्तश्लेष्मापहः स्मृतः ।
सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥”
मुनिपित्तलं, क्ली, (मुनीनां पित्तलमिव ।) ताम्रम् ।
इति त्रिकाण्डशेषः ॥
मुनिपुङ्गवः, पु, (मुनिः पुङ्गव इव ।) मुनिश्रेष्ठः ।
इत्यमरटीका ॥ (यथा, रामायणे ।१।१।१।
“तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥”)
मुनिपुत्त्रः, पुं, (मुनीनां पुत्त्र इव । मुनिप्रियत्वादस्य
तथात्वम् ।) दमनकवृक्षः । इति भावप्रकाशः ॥
ऋषिसुतश्च ॥
मुनिपुत्त्रकः, पुं, खञ्जनः । इति त्रिकाण्डशेषः ॥
(यथा, तिथितत्त्वे कृत्यविधिप्रकरणे ।
“त्वं योगयुक्तो मुनिपुत्त्रकश्च
अदृश्यतामेषि शिखोद्गमेन ।
संदृश्यसे प्रावृषि निर्गतायाम्
त्वं खञ्जनाश्चर्य्यमयो नमस्ते ॥”)
मुनिपुष्पं, क्ली, (मुनिद्रुम इति । “ठाजा दावूर्द्ध्वं
द्वितीयादचः ।” ५ । ३ । ८३ । इत्यत्र “विनापि
प्रत्ययेन पूर्व्वोत्तरपदयोर्विभाषालोपो वक्तव्यः ।”
इति काशिकोक्तेः द्रुम इत्यस्य लोपे मुनिः तस्य
पुष्पम् ।) वकपुष्पम् ॥ (यथा, तिथितत्त्वे ।
“विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्त्तिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥”
वकवृक्षे, पुं । तत्पर्य्यायो यथा,—
“अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मुनिपुष्पकं, क्ली, (मुनिपुष्प + संज्ञायां कन् ।) वक-
पुष्पम् । यथा, योगिनीतन्त्रे ।
“विल्वपत्रञ्च माध्यञ्च तमालामलकीदलम् ।
कह्लारं तुलसीञ्चैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिका-
त्मकम् ॥”
इत्येकादशीतत्त्वम् ॥
मुनिपूगः, पुं, (मुनिप्रियः पूगः ।) गुवाकविशेषः ।
तत्पर्य्यायः । रामपूगः २ कामीनः ३ सुरे-
वटः ४ । इति त्रिकाण्डशेषः ॥
मुनिभेषजं क्ली, (मुनीनां भेषजम् ।) आगस्त्यः ।
हरीतकी । लङ्घनम् । इति मेदिनी । जे, ३६ ॥
मुनिसुव्रतः, पुं, (मुनिषु सुव्रतः ।) अर्हन् । स च
बुद्धविशेषः । इति हेमचन्द्रः । १ । ५१ ॥
मुनिस्थानं क्ली, (मुनीनां स्थानम् ।) आश्रमः ।
इति हेमचन्द्रः । ४ । ६७ ॥
मुनीन्द्रः, पु, (मुनीनां मननशीलानां योगिनामिन्द्रः
श्रेष्ठः ।) बुद्धः । इत्यमरः ।१ । १ । १४ ॥ ऋषि-
श्रेष्ठश्च ॥ (यथा कथासरित्सागरे ।७०।३०८।
“पतन्तमेव तस्माच्च पाणिभ्यां स तमग्रहीत् ।
मुनीन्द्रः प्रकटीभूय समाश्वास्य जगाद च ॥”
दानवभेदः । यथा, हरिवंशे । ७५ । ५ ।
“वृषपर्व्वा विरूपाक्षो मुनीन्द्रश्चन्द्रलोचनः ।”)
मुन् च उ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) पञ्चमस्वरी । ओष्ठ्यवर्ग-
शेषादिः । नोपधः । उ मुञ्चित्वा मुक्त्वा । इति
दुर्गादासः ॥
मुमुक्षुः, पु (मोक्तुमिच्छतीति । मुच् + सन् + उः ।)
मुक्तिमिच्छुः ॥ (यथा, श्रीमद्भगवद्गीतायाम् ।
४ । १५ ।
“एवं ज्ञात्वा कृतं कर्म्म पूर्व्वैरपि मुमुक्षुभिः ।
कुरु कर्म्मैव तस्मात्त्वं पूर्व्वैः पूर्व्वतरं कृतम् ॥”)
तत्पर्य्यायः । श्रमणः २ यतिः ३ वाचंयमः ४
व्रती ५ साधुः ६ अनगारः ७ ऋषिः ८ मुनिः ९
निर्ग्रन्थः १० भिक्षुः ११ । इति हेमचन्द्रः
१ । ७५ ॥ अथ मुमुक्षुलक्षणम् । मनुः ।
“इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्त्यते ।
निष्कामं ज्ञानपूर्व्वन्तु निवृत्तमुपदिश्यते ॥

प्रवृत्तं कर्म्म संसेव्य देवानामेति साष्टिताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥"
कामनापूर्व्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात प्रवृत्तं तदेव कर्म्म कामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्व्वकं संसारनिवृत्तिहेतुत्वान निवृत्तमुच्यते। साष्टितां समानगतितां ऋषिगत्यर्थत्वात् पञ्चभूतान्यत्येति अतिक्रामति मोक्षं प्राप्नोतीत्यर्थः। विष्णुपुराणे च ।६।७।३८। त्रिविधफलदा काम्या निष्कामाणाञ्च मुक्तिदा। भगवद्गीतापि।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥"
युक्तः ईश्वराय कर्म्माणि न फलाय इत्येव समाहितः। फलं त्यक्त्वा कर्म्माणि कुर्व्वन्निति शेषः। शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवाम्। सत्त्वशुद्धिः ज्ञानप्राप्तिः सर्व्वकर्म्मसंन्यासः ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। अयुक्तस्तद्बहिर्म्मुखः। कामकारेण कामप्रेरितत्या कामतः प्रवृत्तेरिति यावत्। फले सक्तः सन् फलायेदं कर्म्म करोमीत्येवं फले सक्तो नितरां बन्धं प्राप्नोति। तथा च अर्ज्जुनं प्रति भगवद्वाक्यम्।
"मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥"
संन्यस्य निःक्षिप्य समर्प्य इति यावत्। अध्यात्मचेतसा विवेकबुद्ध्या ईश्वराय भृत्यवत् करोमि इत्यनया बुद्ध्या निराशीस्त्यक्तकामसङ्कल्पः। अतएव निर्म्ममः ममतारहितः। विगतज्वरः विगतसन्तापः। उक्तमाह स एव।
"यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय! तत् कुरुष्व मदर्पणम् ॥"
विष्णुपुराणम्।
"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥"
कर्म्ममहीं भारतवर्षरूपाम्। एकादशस्कन्धे।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितुमीश्वरे।
नैष्कर्म्यां लभत सिद्धिं रोचनार्था फलश्रुतिः ॥"
वेदोक्तमेव कुर्व्वाणो न तु निषिद्धम्। ननु कर्म्मणि क्रियमाणे तस्मिन्नासक्तिनस्ततफलं स्यादेव न तु नैष्कर्म्यरूपा फलसिद्धिरत एवाह निःसङ्गोऽनभिनिवेशवान् ईश्वरेऽर्पितुं न तु फलोद्देशेन। अथ फलस्य श्रुतत्वात् कर्म्मणि कृते फलं भवत्येव इत्याह रोचनार्थेति कर्म्मणि रुच्युत्पादनार्था। अतएव तत्रैव।
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम् ॥
उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च ;
आसक्तमनसो मर्त्त्या आत्मनोऽनर्थहेतुषु ॥
न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि।
कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः॥
एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः।
फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ॥"
इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थपरा न भवति किन्तु बहिर्मुखानां नृणां मोक्षविवक्षया अवान्तरकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं यथा, भैषज्ये औषधे रुच्युत्पादनम्। यथा,—
"पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान्।
पित्रैवमुक्तः पिबति न फलं तावदेव तु ॥"
तत्रागदपानस्य न खलु खण्डादिलाभ एव प्रयोजनं किन्त्वारोग्यम्। तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते। ननु कर्म्मकाण्डे मोक्षस्य नामापि न श्रूयते कथमेवं व्याख्यायते यथाश्रुतस्यैव घटनात् इत्याह उत्पत्त्येति द्वाभ्याम्। उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्य्यादिषु स्वजनेषु पुत्त्रदारादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु अतस्तान् स्वार्थं परमसुखमविदुषः अजानतः अतो न तान् प्रकृतीभूतान् बुधो वेदो यद्बोधयति तदेव श्रेयः इति विश्वसितान् इत्यर्थः। तान् एवम्भूतान् वृजिना ध्वनि कामवर्त्मनि देवादियोनौ भ्राम्यतः ततः पुनस्तमोभूतवृक्षादियोनिं विशत इति। पशुकाम इति च सुखपुत्त्रादिकाम इति च कथं पुनस्तेष्वेव कामेषु अयं बुधो वेदो युञ्ज्यात् प्रवर्त्तयेत्। तथा सत्यनाप्तः स्यात् इति भावः। कथं तर्हि कर्म्ममीमांसकाः फलपरतां वदन्ति तत्राह। एवमिति व्यवसितं वेदस्याभिप्रायं अविज्ञाय कुसुमितामवान्तरफलरोचनया रमणीयां परमफलश्रुतिं वदन्ति कुतस्ते कुबुद्धयस्तत्राह हि यस्मात् वेदज्ञा व्यासादयः न तथा वदन्ति इति। अतएव निष्कामकर्म्मण आत्मज्ञानार्थतोक्ता यथा,—
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते ॥"
सोऽपि दुरितक्षयद्वारा न साक्षात्। तथा च।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥"
तथा श्रुतिः।
"तमेवं वेदार्थवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्य्येण तपसा श्रद्धया दानेन यज्ञेनानाशनेन चेति।"
तं आत्मतत्त्वसाक्षात्कारं अतएव यत्यादीनां ज्ञानशेषताञ्चावधार्य्य निष्कामेषु कर्म्मसु प्रवर्त्तते। पण्डितेनापि मूर्खः काम्ये कर्म्मणि न प्रवर्त्तयितव्य इत्याह षष्ठस्कन्धे।
"स्वयं निःश्रेयसं विद्वान्नवक्त्यज्ञाय कर्म्म हि।
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ॥"
राति ददाति इति समयप्रदीपे श्रीदत्तः॥
"दासीदाससमलङ्कारमन्नं षड्रससम्भवम्।
पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्व्वकालिकम् ॥
यद्यदिष्टतमं लोके यच्चाप्यस्ति गृहे शुचि।
तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रिणः ॥"
इदं दानं ब्राह्मणसम्प्रदानकमेव विष्णुप्रीतिमुद्दिश्य एवं सर्व्वत्र दाने। विष्णुप्रीतेः सामान्यतः श्रुतत्वात्। अथ विष्णुप्रीतौ देवताधिकरणन्यायविरोध इति चेन्न स्वर्गवदधिकारिविशेषणत्वेन तत्सत्त्वप्रसाधनात् इत्याहुः। ब्राह्मणसम्प्रदानकत्वे किं मानमिति चेत् वामनपुराणे तत्तन्मासभेदेन तत्तद्दानमभिधाय।
"विष्णुप्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वथ।
देयानि विप्रमुख्येभ्यो मधुसूदनतुष्टये ॥"
इत्यभिधाय दासीदासमित्यादिवचनद्वयाभिधानात्। तथा च विष्णुधर्म्मोत्तराग्निपुराणयोः।
"यत्र यत्र भवेत् प्रीतिर्विषयेभ्यो महामुने!।
तत्तदच्युतमुद्दिश्य विप्रेभ्यः प्रतिपादयेत् ॥"
विष्णुधर्म्मोत्तरतृतीयकाण्डे तु विष्णुसंप्रदानकमेव दानं यथा,—
'विष्णोः शङ्खप्रदानेन वारुणं लोकमाप्नुयात्।'
इत्यादिना।
"क्षीरपल्लवसंयुक्तान् कलसान् सुविभूषितान्।
दत्त्वा वै देवदेवाय वाजिमेधफलं लभेत् ॥"
इत्यन्तेन तत्तत् फलं तत्तद्दानमभिधायोक्तम्।
"अकामः सात्त्विको लोको यत्किञ्चिद्विनिवेदयेत्।
तेनैव स्थानमाप्नोति यत्र गत्वा न शोचति ॥
धर्म्मवाणिजिका मूढाः फलकामा नराधमाः।
अर्च्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्युत ॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥"
तथा।
"पद्भ्यां प्रतीच्छते देवः सकामेन निवेदितम्।
मूर्द्ध्ना प्रतीच्छते दत्तमकामेन द्विजोत्तमाः ॥"
उक्तवामनपुराणवचने सार्व्वकालिकमित्यनेन मलमासादावपि विष्णुप्रीत्यर्थं देयमिति। इति मलमासतत्त्वम् ॥
(तत्र मुमुक्षतामुदयनानि व्याख्यास्यामः। तत्र लोकदोषदर्शिनो मुमुक्षोरादित एवाचार्य्याभिगमनं तस्योपदेशानुष्ठानम्। अग्नेरेवोपचर्य्या धर्म्मशास्त्रानुगमनं तदर्थावबोधस्तेनावष्टम्भस्तत्र यथोक्ताः क्रियाः सतामुपासनमसतां परिवर्ज्जनं न सङ्गतिर्दुर्ज्जनेन सत्यं सर्व्वभूतहितमपरुषमनतिकाले परीक्ष्य वचनं सर्व्वप्राणिषु आत्मनीवावेक्षा सर्व्वासामस्मरणमसङ्कल्पनमप्रार्थना अनभिभाषणञ्च स्त्रीणां सर्व्वपरिग्रहत्यागः कौपीनं प्रच्छादनार्थं धातुरागनिवसनं कन्थासीवनहेतोः सूची पिप्पलकं शौचाधानहेतोः जलकुण्डिका दण्डधारणं भक्ष्यार्थचर्य्यार्थं पात्रं प्राणधारणार्थमेककालमग्राम्यो यथोपपन्न एवाभ्यवहारः। श्रमापनयनार्थं शीर्णशुष्कपर्णतृणास्तरणोपधानं ध्यानहेतोः कायनिबन्धनं वनेष्वनिकेतवासः तन्द्रानिद्रालस्यादिकर्म्मवर्ज्जनं इन्द्रियार्थेष्वनुरागोपतापनिग्रहः सुप्तस्थितगतप्रेक्षिताहारविहारप्रत्यङ्गचेष्टादिकेष्वारम्भेषु स्मृतिपूर्व्विका प्रवृत्तिः सत्कारस्तुतिगर्हावमानक्षमत्वं क्षुत्पिपासायासश्रम-

प्रीतोव्यथानवर्षासुखदुःखसंस्पर्शसहत्वं शोक-
दैन्यदैयमदमानलोभरागेर्ष्याभयक्रोधादिभिरस
ञ्चलनं अहङ्कारादिषूपसर्गसंज्ञा लोकपुरुषयोः
सर्गादिसामान्यावेक्षणं कार्य्यकालात्ययभयं
योगारम्भे सततमनिर्व्वेदः सत्त्वोत्साहोऽपवर्गाय
धीधृतिस्मृतिबलाधानं नियमनमिन्द्रियाणां
चेतसि चेतस आत्मन्यात्मनश्च धातुभेदेन शरी-
रावयवसंख्यानं अभीक्ष्णं सर्व्वं कारणवद्दुःख-
मस्वमनित्यमित्यभ्युपगमः। सर्व्वप्रवृत्तिषु दुःख-
संज्ञा सर्व्वसंन्यासे सुखमित्यभिनिवेशः एष
मार्गोऽपवर्गाय अतोऽन्यथा बध्यते इत्युदयनानि
व्याख्यातानि॥ इति चरके शारीरस्थाने पञ्चमे-
ऽध्याये ॥)

मुमुचानः, पुं, (मुञ्चति जलं इति। मुच् + "मुचि
युधिभ्यां सन्वच्च।" उणा०। २। ८९। इति
आनच्। कित् सन्वच्च। मेघः। इति संक्षिप्त-
सारोणादिवृत्तिः॥ (मुक्तः। यथा, सन्ध्यामन्त्रे।
"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।"
"स्विन्नो घर्म्मार्त्तो जनो मुमुचानो मुक्तो-
भवति।" इति तत्र गुणविष्णुटीका॥)

मुमूर्षुः त्रि, (मर्त्तुमिच्छुः। मृ + सन् + उः।)
आसन्नमृत्युः। (यथा श्रीमद्भागवते।७।८।११।
"व्यक्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे।
मुमूर्षूणां हि मन्दात्मन्! ननु स्युर्विक्लवा
गिरः॥")

अथ मुमूर्षुकृत्यानि। हारीतः।
'शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति॥'
शूद्रान्नं शूद्रस्वामिकान्नम्। तद्दत्तमपि भोजन-
काले तद्गृहावस्थितं यत् तदपि शूद्रान्नम्।
तदाहाङ्गिराः।
'शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।
निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥'
अपिशब्दात् साक्षात् तद्दत्ततण्डुलादि न तु
तद्दत्तकपर्द्दकादिना क्रीतमपि। स्वगृहागतं पुन-
रङ्गिराः।
'यथायतनतो ह्यापः शुद्धिं यान्ति नदीं गताः।
शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तु सदा शुचि॥'
प्रविष्टं सत्पाचकप्रतिग्रहादिना इति शेषः।
अतएव पराशरः।
'तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः।
द्विजातिकरसंस्पृष्टं सर्व्वं तद्धविरुच्यते॥'
स्पृशति प्रतिगृह्णाति इति कल्पतरुः॥ तच्च
संप्रोक्ष्य ग्राह्यमाह विष्णुपुराणम्।
'संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम्।'
तच्च पात्रान्तरे ग्राह्यमाह अङ्गिराः।
'स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः।
पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्॥'
एतेन स्वगृहमागतस्यैव शुद्धत्वम्।
तद्गृहगतस्य शूद्रान्नदोषभागित्वं प्रतीयते।
ततश्चैतादृगपि मुमूर्षुणा सर्व्वथा शूद्रान्नं न
भोक्तव्यम्॥*॥

पुराणरत्नाकरे।
'शालग्रामशिला यत्र तत्र सन्निहितो हरिः।
तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं
पदम्॥
लिङ्गपुराणे।
'शालग्रामसमीपे तु क्रोशमात्रं समन्ततः।
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः॥'
कीकटो मगधः॥*॥ वैशम्पायनः।
'तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्।
स निर्भर्त्स्य यमं पापी लीलयैव हरिं विशेत्॥
प्रयाणकाले यस्यास्ये दीयते तुलसीदलम्।
निर्व्वाणं याति पक्षीन्द्र। पापकोटियुतोऽपि सः॥'
कूर्म्मपुराणम्।
'गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले।
जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे॥'
स्कान्दे।
'गङ्गायां त्यजतः प्राणान् कथयामि वरानने।
कर्णे तत् परमं ब्रह्म ददामि मामकं पदम्॥'
तथा।
'तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते।
अत्र दानं जपो होमो गङ्गायां नात्र संशयः॥
अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥'
गव्यूतिः क्रोशयुगम्। तीर्थचिन्तामणौ ब्रह्म-
पुराणम्।
'अत्र दूरे समीपे च मध्ये योजनद्वयम्।
गङ्गायां मरणेनेह नात्र कार्य्या विचारणा॥'*॥
एवं गङ्गादिमरणेन प्राप्तब्रह्मलोकस्याप्यौर्द्ध-
दैहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्य-
त्वात्। तथा च श्रीमद्भागवते।
'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः।
आत्मन्यात्मानमावेश्य सोऽन्तःश्वासमुपारमत्॥
संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले।
सर्व्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥
तस्य निर्हरणादीनि संपरेतस्य भार्गव।।
युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत्॥'
कृष्णे आत्मनि परमात्मनि आत्मानं स्वीयात्मानं
निवेश्य एकीकृत्य स भीष्मः उपारमत् मुक्तिं
गतवान्। निष्कले निरुपाधौ ब्रह्मणि संपद्य-
मानं मिलितं आज्ञाय आलक्ष्य तस्य भीष्मस्य
निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक्
परेतस्य मुक्तस्यापि। भार्गवेति शौनकस्य
सम्बोधनम्। एवञ्च एतेषामपि तत्तत्कर्म्मणि
तत्तद्वचनोपात्तप्रेतपदस्य पितृपदस्य च मन्त्रा-
दिषु यथार्थं वाचनिकत्वात् प्रयोगः सङ्गच्छते।
'आसन्नमृत्युना देया गौः सवत्सा च पूर्व्ववत्।
तदभावे च गौरेका नरकोद्धारणाय वै॥
तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम्।
शक्तोऽन्योऽथवा तदा दत्त्वा श्रेयो दद्यान्-
मृतस्य च॥'
पूर्व्ववद्धेमशृङ्ग्यादिना।
अत्र मृतस्य चेति श्रवणात् एकादशाहेऽपि
वैतरणीदानाचारः। वचनञ्चेत्।

'माघः प्रवसतो मित्रं भार्य्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥"
वराहपुराणे।
"यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः।
पुण्यकालास्तदा सर्व्वे यदा मृत्युरुपस्थितः॥
गोभूतिलहिरण्यादि दत्तमक्षयतामियात्॥"
निरवकाशत्वादत्र मलमासादिदोषो नास्ति
सूतकमपि न। तथा च शुद्धिरत्नाकरे दक्षः।
"मुमूर्षुकाले त्विदं सर्व्वं सूतकं परिकीर्त्तितम्।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धितत्त्वम्॥

मुर, श वेष्टने। इति कविकल्पद्रुमः॥ (तुदा०-
पर०-सक०-सेट्।) पवर्गशेषादिः। श मुरति
दृषं लता। मोरिता। इति दुर्गादासः॥

मुरं क्ली, (मूर्य्यते इति। मुर् + अन्यत्रापीति
भावे कः।) वेष्टनम्। इत्यमरटीकायां मथुरेशः॥

मुरः, पुं, (मुरति वेष्टतेऽसौ। मुर् + इगुपधत्वात्
कर्त्तरि कः) दैत्यविशेषः। इति मेदिनी। रे,
७१॥ यं हत्वा विष्णुर्मुरारिनामाभूत्॥ (यथा,
श्रीमद्भागवते। ३। ३। ११।
"प्राग्ज्योतिषं द्विविदं बाणं मुरं बल्वलमेव च।
अन्यांश्च दन्तवक्रादीनवधीत् कांश्च घातयन्॥")

मुरगण्डः, पुं, (मुरं वेष्टनमिव गण्डति रजति
अनेन। गण्ड + अच्।) वरण्डः। इति जटा-
धरः। वर्णक इति भाषा॥

मुरजः, पुं, (मुरात् संवेष्टनात् जायतेऽसौ। मुर +
जन + डः।) मृदङ्गः। इत्यमरः। १। ७। ५॥
(यथा, रामायणे। २। ३८। ४१।
"मुरजपणवमेघघोषवद्-
दशरथवेश्म बभूव यत् पुरा।
विलपितपरिदेवनाकुलं
व्यसनगतं तदभूत् सुदुःखितम्॥")

मुरजफलः, पुं, (मुरजवत् फलमस्य।) पनसवृक्षः।
इति त्रिकाण्डशेषः॥

मुरण्डः, पुं, (मुरं वेष्टनेन अण्ड इव गोलाकृति-
रिव। शकन्ध्वादित्वादकारस्य पररूपम्।)
लम्पकदेशः। तद्देशस्थे, पुं भूम्नि। इति
हेमचन्द्रः। ४। २७॥

मुरन्दला, स्त्री, (मुरं वेष्टनं सेतुं दलति
भिनत्ति। दल् + अच् + स्त्रियां टाप्।) नर्म्मदा-
नदी। इति त्रिकाण्डशेषः॥

मुरमर्द्दनः, पुं, (मुरं तन्नामानमसुरं मृद्नाति
चूर्णीकरोतीति। मृद् + ल्युः।) विष्णुः। इति
पुराणम्॥

मुररिपुः, पुं, (मुरस्य रिपुः।) विष्णुः। इति
शब्दरत्नावली॥ (यथा, छन्दोमञ्जर्य्याम्। २।३।
'त्वरितगतिर्व्रजयुवतिस्तरणिसुता विपिनगता।
मुररिपुणा रतिगुरुणा सह मिलिता प्रमद-
मिता॥")

मुरला, स्त्री, (मुरं वेष्टनं लाति। ला + कः।)
नर्म्मदानदी। इति त्रिकाण्डशेषः॥ (यथा,
उत्तररामचरिते। ३।१॥ ततः प्रविशति नदीद्वयं

तमसा मुरला च। तमसा। अस्ति मुरले। किमपि सम्भ्रान्तेव। केरलदेशस्था काचिन्नदी। यथा च। रघुवंशे। ४। ५५।
"मुरलामारुतोद्धूतमगमत् कैतकं रजः।
तद्योधवारवाणानामयत्नपटवासताम्॥"
"मुरला नाम केरलदेशेषु काचिन्नदी।" इति तट्टीकायाम् मल्लिनाथः॥)

मुरली, स्त्री, (मुरं अङ्गुलिवेष्टनं लाति प्राप्नोतीति ला+कः+स्त्रियां ङीष्।) स्वनामख्यात-सुषिरवाद्यम्। तत्पर्य्यायः। वंशी २ वंशिका ३ वंशनालिका ४ सानेयिका ५ सानेयी ६ सानिका ७ मुरलिका ८। शेषचतुष्टयं स्त्रीनादि। इति शब्दरत्नावली॥ (यथा, राधातन्त्रे। २३।
"वादयन् मुरलीं तस्याः शृङ्गं वेणुं तथापरम्।
कात्यायनीं नमस्कृत्य हरिः पद्मदलेक्षणः॥")

मुरलीधरः, पुं, (धृ+अच्। मुरल्याः धरः।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, तन्त्रे।
"वैकुण्ठदक्षिणे भागे गोलोकं सर्व्वमोहनम्।
तत्रैव राधिका देवी द्विभुजो मुरलीधरः॥")

मुरहा, [न्] पुं, (मुरं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

मुरा, स्त्री, (मुरति सौरभेण वेष्टयति। मुर+इगुपधत्वात् कः टाप् च।) स्वनामख्यातगन्धद्रव्यम्। (यथा, गरुडपुराणे। १६०।
"तथा हिक्कां हरेत् पीता सौवर्चलसुतामुरा।"
तत्पर्य्यायः। तालपर्णी २ दैत्या३ गन्धकुटी ४ गन्धिनी ५। इत्यमरः। २। ४। १२३॥
(तथास्याः पर्य्यायान्तरं गुणाश्च।
"मुरा गन्धकुटी दैत्या सुरभिः शालपर्णिका।
मुरा तिक्ता हिमा स्वाद्वी लघ्वी पित्तानिलापहा।
ज्वरास्रगभूतरक्षोघ्नी कुष्ठकासविनाशिनी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तस्या लक्षणं यथा। मुरा पीता वरा प्रोक्ता। इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे॥) अस्या अनुलेपनगुणाः। अलक्ष्मीरक्षोज्वरनाशित्वम्। इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ मुराशब्दे द्रष्टव्यौ॥

मुरारिः, पु, (मुरस्यारिः।) श्रीकृष्णः। अस्य व्युत्पत्तिर्यथा,—
"मुरः क्लेशे च सन्तापे कर्म्मभोगे च कर्म्मिणाम्।
दैत्यभेदेऽप्यरिस्तेषां मुरारिस्तेन कीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
अस्य स्वरूपं यथा,—
श्रीनारद उवाच।
"कोऽसौ मुरारिर्देवर्षे! देवो यक्षो नु किं नर।
दैत्यो वा राक्षसो वापि पार्थिवो वा तदुच्यताम्॥"
पुलस्त्य उवाच।
"योऽसौ रजःसत्त्वमायागुणवांश्च तमोमय.।
निर्गुणः सर्व्वगो व्यापी मुरारिर्म्मधुसूदनः॥"
श्रीनारद उवाच।
"योऽसौ मुर इति ख्यातः कस्य पुत्त्रश्च गीयते।
कथञ्च निहतः संख्ये विष्णुना तद्वदस्व मे॥"
पुलस्त्य उवाच।
"श्रूयतां कथयिष्यामि सुरासुरनिवर्हणम्।
विचित्रमिदमाख्यानं पुण्यं पापप्रणाशनम्॥
कश्यपस्यौरसः पुत्त्रो मुरो नाम महाबलः।
स ददर्श रणे शस्त्रं दितिपुत्त्रोऽसुरोत्तमः॥
ततः स मरणाद्भीतस्तप्त्वा वर्षगणान् बहून्।
आराधयामास विभुं ब्रह्माणमपराजितम्॥
ततोऽस्य तुष्टो वरदः प्राह वत्स। वरं वृणु।
स च वव्रे तदा दैत्यो वरमेनं पितामहात्॥
यं यं करतलेनाहं स्पृशेयं समरे विभो!।
स स मद्धस्तसंस्पृष्टस्त्वमरोऽपि म्रियत्वत।॥
बाढ़मुक्त्वा स भगवान् ब्रह्मा लोकपितामहः।
ततोऽभ्यगान्महातेजा मुरः सुरगिरिं बली।
जगाम धर्म्मराजानं विजेतुं दण्डपाणिनम्॥"
मुर उवाच।
"यम। प्रजासंयमनान्निवृत्तिं कर्त्तुमर्हसि।
नो चेत्त्वाद्य हित्वाहं मस्तकं पातये भुवि॥
तमाह धर्म्मराड्वाक्यं यदि मां संयमेद्भवान्।
गोपितास्मि पुरा सत्यं करिष्ये वचनं तव॥
मुरस्तमाह भवतः कः संयन्ता वदस्व माम्।
अहं तस्य पराजित्य वारयामि न संशयः॥
यमस्तं प्राह मां विष्णुर्देवश्चक्रगदाधरः।
श्वेतद्वीपनिवासी यः स मां संयमतेऽव्ययः॥
इत्येव मुक्तो वचनं दुग्धाब्धिमगमन्मुरः॥
तमागतं प्राह मुने। मधुघ्नः
प्राप्तोऽसि केनासुर। कारणेन।
स प्राह युद्धं सह वै त्वयाद्य
तं प्राह भूयः सुरशत्रुहन्ता॥
यदीह मां योद्धुमुपागतोऽसि
तत् कम्पते ते हृदयं किमर्थम्।
ज्वरातुरस्येव मुहुर्मुहुर्व्वै
तन्नैव योत्स्ये सह कातरेण॥
इत्येवमुक्तो मधुसूदनेन
मुरस्तदा स्वे हृदये स्वहस्तम्।
कथं नु कम्पेति मुहुस्तदोक्त्वा
निपातयामास विपन्नबुद्धिः॥
हरिश्च चक्रं लघुलाघवेन
मुमोच तत्तस्य शिरस्तु शत्रोः।
चिच्छेद देवास्तु गतव्यथाभवन्
देव प्रशंसन्ति च पद्मनाभम्।
इतः प्रसिद्धं समुपाजगाम
मुरारिरित्येव हरिर्महात्मा॥"
इति वामने ५७। ५८ अध्यायौ॥ *॥
अनर्घराघवग्रन्थकर्त्ता। यथा। 'अस्ति मौद्गल्यगोत्रसमुद्भूतस्य महाकविभट्टश्रीवर्द्धमानात्मजस्य तनुमतीहृदयनन्दनस्य मुरारिनामधेयस्य कवेः कृतिरनर्घराघवं नाम नाटकं तत्प्रयुञ्जानाः सामाजिकानुपास्महे।' इति तन्नामनाटकगद्यम्॥

मुर्च्छ आ मोहे। उच्छ्राये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) पवर्गशेषादिः। मूर्च्छा। तेन क्विपि राल्लोप इति छलो मुरौ मुरः। आ मूर्च्छितं मूर्त्तं तेन। मोहो ज्ञानरहितीभावः। उच्छ्रायो वृद्धिः। मूर्च्छति रोगी। मुमूर्च्छ संख्यं रामस्य समानयमने हराविति रघुः। इति दुर्गादासः॥

मुर्भिणी, स्त्री, अङ्गारधानिका। इति शब्दचन्द्रिका॥

मुर्मुरः, पुं, तुषाग्निः॥ (यथा, माघे। ६। ६।
"स्फुरदुत्तानसमुर्मुरचूर्णितां
दधुरिवाक्रववणस्य रजःकणाः।
निपतिताः परितः पथिकव्रजा-
नुपरि ते परितेपुरतो भृशम्॥")
मन्मथः। रविवाजिः। इति मेदिनी। रे, २०५॥ (स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ३। २२१। २५।
"भारती सुप्रयोगा च कावेरी मुर्म्मुरा तथा।
तुङ्गवेणा कृष्णवेणा कपिला शोणा एव च॥")

मुर्व्व ई नहे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। निष्ठायामनिट्।) आद्यः पञ्चमस्वरी। मूः मुरौ मुरः। नहो बन्धनम्। ई मूर्णः। इति दुर्गादासः॥

मुल क रोपणे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्। जन्मार्थे भ्वा०-उभ०-अक०-सेट्।) रोपणं आरोपणम्। क मोलयति तृणं लोकः। गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्म इति व्याख्याति। इति दुर्गादासः॥

मुषटी, स्त्री, (मुष+अटन्। पृषोदरादित्वात् साधुः।) सितकङ्गुः। इति हेमचन्द्रः॥

मुष(ष)लिका, स्त्री, (मुष+"वृषादिभ्यश्चित्।" उणा० १।१०८। इति कलच्चित् स्यात्। टाप्। ततः संज्ञायां कन्। अकारस्येत्वम्।) पक्षी। तालमूली। तत्पर्य्यायः सुवहा २ तालपत्रिका ३ गोधापदी ४ हेमपुष्पी ५ भूताली ६ दीर्घकन्दिका ७ मुषली ८ तालिका ९ तालमूलिका १०। इति शब्दरत्नावली॥ अर्शोघ्नी ११। इति जटाधरः॥ अस्या गुणाः। मधुरत्वम्। शीतत्वम्। वृष्यत्वम्। पुष्टिबलप्रदत्वम्। पिच्छिलत्वम्। कफदत्वम्। पित्तदाहश्रमहरत्वञ्च।
"मुषली च द्विधा प्रोक्ता श्वेता चापरसंज्ञिका।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी॥"
इति राजनिर्घण्टः॥
"तालमूली तु विद्वद्भिर्म्मुषली परिकीर्त्तिता।
मुषली मधुरा वृष्या वीर्य्योष्णा बृंहणी गुरुः।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा॥"
इति भावप्रकाशः॥

मुष वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मोषति। इति दुर्गादासः॥

मुष श लुण्ठने। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-सेट्।) श मुष्णाति। इति दुर्गादासः॥

मुष य इर् छिदि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) छेद इह खण्डनम् । य मुष्यति विपक्षं चतुरः । इर् अमुषत् अमोषीत् अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

मुषलः, पुं, स्त्री, (मोषति मुष्यतेऽनेन वेति । मुष् + "वृषादिभ्यश्चित् ।" उणा० १ । १०८ । इति कलश्चित् स्यात् ।) अयोऽग्रम् । इत्यमरटीकायां भरतः ॥ दन्त्यमध्योऽपि ॥ (यथा, मार्कण्डेये । ११६ । १८ ।

"सुनन्दं नाम मुषलं त्वष्टा यन्निर्म्मितं पुरा । तज्जहार स दुष्टात्मा तेन हन्ति रणे रिपून् ॥"

विश्वामित्रसुतः । यथा, महाभारते ।१३।४।५२।

"बाहुलिर्मुषलश्चैव वज्रोग्रीवस्तथैव च ॥"

(तालव्यमध्योऽप्ययम् । "मुश् खण्डने मुशलः ।" उणा० १ । १०८ । इत्युज्ज्वलदत्तवृत्तिः ॥)

मुषली, स्त्री, (मुष्णत इति । मुष् + कलः ङीष् ।) तालमूलिका । गृहगोधिका । इति शब्द-रत्नावली ॥

मुषल्यः, त्रि, (मुषलमर्हतीति । मुषल + "दण्डादिभ्यो यः ।" ५ । १ । ६६ । इति यः ।) मुषल-वध्यः । इत्यमरटीकायां भरतः ॥

मुषा, स्त्री, (मुष् + कः टाप् ।) मूषा । इत्य-मरटीकायां रायमुकुटः । २ । १० । ३३ । मुचो इति भाषा ॥

मुषितं, त्रि, (मुष् + कर्म्मणि क्तः ।) चोरित-द्रव्यम् । तत्पर्य्यायः ॥ मूषितम् २ । इत्यमरः ।३। १।८८॥ (वञ्चितः । यथा भागवते ।१।१३।३७ ।

"नाहं वेद्मि व्यवसितं पित्रोर्वः कुलनन्दन ।। मात्धार्य्या वा महाबाहो । मुषितोऽस्मि महा-त्मभि. ॥"

"मुषितो वञ्चितोऽस्मि ॥" इति तट्टीकायां श्रीधरः ॥)

मुष्कः, पुं, (मुष्णाति वीर्य्यमिति । मुष् + "सृवृभूशुषिमुषिभ्यः कक् । उणा० ३ । ४१ । इति कक् ।) अण्डकोषः । इत्यमरः । २ । ६ । ६॥ (यथा, वाग्भटे निदानस्थाने नवमे अध्याये ॥

"स्थानानुगतमप्राप्तं हि मुष्कयोरन्तरेऽनिलः ॥")

मोक्षकवृक्षः । संघातः । इति मेदिनी । के, ३१ ॥ तस्करः । मांसलः । इति हेमचन्द्रः ।३।२७६॥

मुष्ककः, पुं, (मुष्क । संज्ञायां कन् ।) वृक्षविशेषः । घण्टापारुल इति वङ्गभाषा । मोखा इति हिन्दी भाषा । तत्पर्य्यायः । गोलीढ़ः २ झाटलः ३ घण्टापाटलिः ४ मोक्षः ५ । इत्य-मरः । २ । ४ । ३६ ॥ मोचकः ६ मुष्कः ७ मोक्षकः ८ मुषकः ९ गौलिकः १० मेहनः ११ क्षारवृक्षः १२ पाटली १३ विषापहः १४ जटालः १५ वनवासी १६ सुतीक्ष्णकः १७ । इति राजनिर्घण्टः ॥ गोलिहः १८ क्षार-श्रेष्ठः १९ घण्टा २० घण्टाकः २१ झाटः २२ । इति शब्दरत्नावली ॥ स तु पलाशवनपर्व्वत-वृक्षः । श्वेतकृष्णभेदेन द्विविधः । तस्य गुणाः । कटुत्वम् । तिक्तत्वम् । ग्राहित्वम् । उष्णत्वम् । कफवातकारित्वम् । विषमेदोगुल्मकण्डुवस्ति-रोगकृमिशुक्रनाशित्वञ्च । इति भावप्रकाशः ॥ रेचनत्वम् । पाचनत्वम् । प्लीहोदराग्निमान्द्यनाशि-त्वञ्च । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । चिकित्सितस्थाने । ६ अध्यायः ।

"जीर्णं पक्कं तद्धरिद्रादर्व्वीयुतं हन्यात् कुष्ठं मुष्कके चापि सर्पिः ॥")

मुष्करः, पुं, (प्रशस्तः मुष्कोऽस्यास्ति । मुष्क + "ऊषसुषिमुष्कमधो रः ।" ५।२।१०७। इति रः ।) प्रलम्बाण्डः । इति हेमचन्द्रः । ३ । १२१ ॥ (यथा, शतपथब्राह्मणे । ३ । ७ । २ । ८ ।

"रेतो विकरोति मुष्करो भवत्येष वै प्रजनयिता यत्मुष्करस्तस्मान्मुष्करो भवति तं न स ॥")

मुष्कशून्यः, पुं, (मुष्केण शून्यः ।) वृषणरहितः । स तु राज्ञोऽन्तःपुररक्षकः । खोजा इति भाषा । तत्पर्य्यायः । अनुपस्थः २ क्लीवभावः ३ महल्लिकः ४ । इति शब्दमाला ॥

मुष्टिः पु, स्त्री, (मुष + क्तिच् ।) पलपरिमाणम् । चारि तोला इति भाषा । (वैद्यके आठतोला इति प्रसिद्धि. ।

"स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा । शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ॥"

इति वैद्यकशार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥

'पलाह्वं शुक्तिमिच्छन्ति तथाऽष्टमाषकाह्विति ।' पलं विल्वञ्च मुष्टिः स्यात्—————————॥"

इति गारुडे अष्टाधिकद्विशततमेऽध्याये ।)

बद्धपाणिः । मुटा इति भाषा । तत्पर्य्यायः । सम्पिण्डिताङ्गुलिपाणिः २ मुस्तः ३ मुष्टी ४ । इति हेमचन्द्रः । ३ । २६१ ॥ त्सरु । इति मेदिनी । टे, २५ ॥ खड्गेर मुट् इति भाषा । (यथा, महाभारते । १ । १९ । १७ ।

"परिघैरायसैस्तीक्ष्णैः सन्निकर्षे च मुष्टिभिः । निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥")

कुक्षरभागः । छटाक इति भाषा । यथा —

"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलः ।"

इति प्रायश्चित्ततत्त्वम् ॥

(मुष् + क्तिन् ।) मोषणम् । इति मुषधात्वर्थ-दर्शनात् । प्रहारविशेषः । किल इति भाषा । यथा, मार्कण्डेयपुराणे । ८० । १५—१६ ।

"चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः । तथापि सोऽभ्यधावत्तां नष्टिमुद्यम्य वेगवान् ॥ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः । देव्यास्तञ्चापि सा देवी तलेनोरस्यताडयत ॥"

पथि क्षुधार्त्तस्य तिलादीनां मुष्टिग्रहणे चौर्य्या-भावः । यथा, कौर्म्मे उपविभागे १५ अध्याये ।

"तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः । क्षुधार्त्तैर्नान्यथा विप्र । धर्म्मविद्भिरिति स्थितिः ॥"

(मुष् स्तेये + अधिकरणे क्तिन् । शस्यगोपन-कालः । यथा, महाभारते । २ । ५ । ६५ ।

"कच्चिन्नवञ्च मुष्टिञ्च परराष्ट्रे परन्तप ।। अविहाय महाराज । निहंसि समरे रिपून् ॥"

"मुष्टिः शस्यानां गोपनकालः दुर्भिक्षमिति यावत् ॥" इति तट्टीकायां नीलकण्ठः ॥)

मुष्टिकः,पुं, (मुष्णाति परवीर्य्यमिति । मुष् + क्तिच् संज्ञायां कन् ।) कंसराजमल्लविशेषः । इति श्रीमद्भागवतम् ॥ (यथा च हरिवंशे ।४१।१६० ।

"नागं कुवलयापीडं चाणूरं मुष्टिकं तथा ।"

मुष्टिः प्रयोजनमस्य । मुष्टि + कन् ।) स्वर्ण-कारः ॥ इति हेमचन्द्रः । ३ । ५७७ ॥

मुष्टिकान्तकः, पुं, (मुष्टिकस्यान्तकः ।) बल-देवः । इति शब्दरत्नावली ॥

मुष्टिद्यूतं, स्त्री, (मुष्ट्या द्यूतं क्रीडितम् ।) द्यूत-क्रीडाविशेषः । पुरसुट् खेला इति भाषा । तत्पर्य्यायः । क्षुल्लकम् २ । इति शब्दमाला ॥

मुष्टिन्धयः, पुं, (मुष्टिं धयति पिबति । धेट् + "नासिकास्तनयोर्ध्माधेटोः ।" ३ । २ । ३० । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) बालकः । इति त्रिकाण्डशेषः ॥

मुष्टिबन्धः, पुं, मुष्टिबन्धनक्रिया । मुटावाँधा इति भाषा । तत्पर्य्यायः । संग्राहः २ । इत्यमरः । ३ । २ । १४ ॥ मुष्टिबन्धोऽङ्गुलिविन्यासो मुष्टि-बन्धः । मुष्टिना बन्धो दृढग्रहणं संग्राह इत्यपरे । मुष्ट्यामेव संग्रह इत्यन्ये । मुष्टिः क्रियाञ्च संग्रह इति वोपालितः । इति भरतः ॥

मुष्टीमुष्टि, व्य, मुष्टामुष्टि । मुष्टिभिर्मुष्टिभिः प्रहृत्य यद्युद्धं वृत्तं तत । किलाकिलि इति भाषा । इति मुग्धबोधव्याकरणम् ॥

मुष्ठकः, पुं, (मुष् + बाहुलकात् कथन् । ततः संज्ञायां कन् ।) राजसर्षपः । इति रत्नमाला ॥ यष्टक इति वा पाठः ॥

मुस य इर् छिदि । खण्डने । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) य मुस्यति विपक्षं चतुरः । इर् अमुसत् अमोसीत । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

मुसलः, पु, स्त्री, (मुस्यति खण्डयतीति । मुस् + "वृषादिभ्यश्चित ।" उणा० १।१०८। कलः चित् स्यात ।)स्वनामख्याततण्डुलादिकण्डनार्थनिर्म्मित-लौहाग्रयष्टि. । तत्पर्य्यायः । अयोऽग्रम् २ । इत्यमरः । २ । ९ । २५ ॥ मुषलम् ३ कण्डनी-दण्डः ४ । इति शब्दरत्नावली ॥ मुस्यति मुसल मुस यिर्च्छिदि मार्ज्जीति कलः । मुसलो दन्त्य-सकार. । एवं मुष्य इर्च्छिदीति मूर्द्धन्यान्तात् कलः मूर्द्धन्यषकारश्च । इत्यमरटीकायां भरतः ॥ (आयुधविशेषः । तत्प्रकारो यथा, वैशम्पायन-नोक्तधनुर्वेदे ।

"मुसलस्त्वग्निशीर्षाभ्यां करैः पादैर्विवर्ज्जितः । मूले चाग्रेऽतिसम्बन्धः पातनं पोथनं द्वयम् ॥")

यथा, मनौ । ८ । ३१५ ।

"स्कन्धेनादाय मुसलं लगुडं वापि खादिरम् । शक्तिञ्चाभयतस्तीक्ष्णामायसं दण्डमेव वा ॥")

मुसलामुसलि, व्य, मुसलैश्च मुसलैश्च प्रहृत्ययुद्धं वृत्तम् । इति सिद्धान्तकौमुदी ॥

मुसली, स्त्री, (मुसल+गौरादित्वात् ङीष् ।) तालमूलिका । गृहगोधिका । इत्यमरः । २ । ५ । १२ ।

मुसली, [न्] पुं, (मुसलं प्रहरणत्वेनास्यास्तीति । मुसल+इनिः ।) बलदेवः । इत्यमरः ।१।१।२५॥

मुसल्यः, त्रि, (मुसलमर्हतीति । मुसल+यः ।) मुसलेन वध्यः । इत्यमरः । ३ । १ । ४५ ॥

मुस्त क संहतौ । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-अकं-सेट् ।) पवर्गशेषादिः । क मुस्तयति । इति दुर्गादासः ॥

मुस्तः, पुं, (मुस्तयति एकत्र संहतीभवतीति । मुस्त+कः । एकशिफायामस्य बहुमूलसम्बद्धतया तथात्वम् ।) मुस्तकम् । इति हारावली ॥ (यथा वृहत्संहितायाम् । ७७ । ११ ।

"भागैश्चतुर्भिः सितशैलमुस्ताः
श्रीसर्ज्जभागौ नखगुग्गुलू च ।
कर्पूरबोधो मधुपिण्डितोऽयं
कोपच्छदो नाम नरेन्द्रधूपः ॥")

मुस्तकः, पुं क्ली, (मुस्त+स्वार्थे कन् ।) तृणमूलविशेषः । मुता इति भाषा । तत्पर्य्यायः । कुरुविन्दः २ मेघनामा ३ मुस्ता ४ । इत्यमरः । २ । ४ । १५६ ॥ मुस्तः ५ राजकसेरुः ६ । इति हारावली ॥ मेघाख्यम् ७ गाङ्गेयम् ८ भद्रमुस्तकम् ९ । इति रत्नमाला ॥ अभ्रनामकः १० श्रीभद्रा ११ भद्रकः १२ भद्रा १३ । इति शब्दरत्नावली ॥ अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । वायुनाशित्वम् । ग्राहित्वम् । दीपनत्वञ्च । इति राजवल्लभः ॥ अपि च ।

"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकः ।
कुरुविन्दश्च स ख्यातोऽपरः कोरकसंज्ञकः ॥
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः ।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम् ॥
कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुहृत् ।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम् ॥"
इति भावप्रकाशः ॥

मुस्तकः, पुं, (मुस्तयति संहतीकरोति रुधिरमिति । मुस्त+कः । ततः संज्ञायां कन् ।) स्थावरविषभेदः । इति हेमचन्द्रः । २ । २५६ ॥ (यथा, सुश्रुते कल्पस्थाने । २ ।
"चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते ॥")

मुस्ता, स्त्री, (मुस्त+टाप् ।) मुस्तकः । इत्यमरः । २ । ४ । १५६ ॥ (तथास्याः पर्य्यायः ।
"मेघाख्यं मुस्तकं मुस्ता गाङ्गेयं भद्रमुस्तकम् ।"
इति वैद्यकरत्नमालायाम् ॥
यथा सुश्रुते सूत्रस्थाने । ४४ ।
"दोषघ्ना ग्रहणीपाण्डुरोगार्शःकुष्ठनाशनाः ।
योगं त्रिजातकं मुस्ता विडङ्गामलके तथा ॥")

मुस्तादः, पुं, (मुस्तामत्तीति । अद+अण् ।) शूकरः । इति जटाधरः ॥

मुस्ताभं, क्ली, (मुस्तस्येवाभा यस्य ।) मुस्तकविशेषः । नागर मुता इति भाषा । तत्पर्य्यायः । कुटन्नटम् २ पुरम् ३ वन्यम् ४ परिपेलवम् ५ । इति रत्नमाला ॥ (गुणा अस्य कुटन्नटशब्दे ज्ञातव्याः ॥)

मुस्तुः, पुं, (मुस्यति खण्डयत्यनेन । मुस्+बाहुलकात् तुक् ।) मुष्टिः । इति हेमचन्द्रः ।३।२६१ ॥

मुस्रं, क्ली, मुसलम् । मुसधातोरौणादिकरक्प्रत्ययेन निष्पन्नम् । २ । १३ । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (नयनजलमित्युज्ज्वलः ॥)

मुह यउ ङ क्ति वैचित्त्ये । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् । वधादित्वाद्वेट् ।) वैचित्त्यं ज्ञानरहितीभावः । य, तेन मुह्यति चिराय मे मनः । इति मुरारिः । ऊ मोहिष्यति मोक्ष्यति । ङ अमुहत् । क्ति मुग्धः मूढोऽस्ति । इति । दुर्गादासः ॥

मुहिरः, पुं, (मुह्यति ज्ञानरहितीभवत्यनेन लोकः मुह्यति सभायामिति वा । मुह+"इषिमदीति उणा० ।" १ । ५२ । इति किरच् ।) कामः । मूर्खः । इति मेदिनी । रं, । २०५ ॥ (असभ्यः इत्युज्ज्वलदत्तः ॥)

मुहुः, [स्] व्य, (मुह+"मुहेः किच्च ।" उणा० २ । १२१ । इति उसिः किच्च ।) पुनः पुनः । इत्यमरः । ३ । ४ । १ ॥ (यथा, पञ्चदश्याम् । ७ । १७१ ।
"स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन् स्वजागरम् ।
चिन्तयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ॥")

मुहुर्भाषा, स्त्री, (मुहुः भाषा भाषणम् ।) पुनः पुनःकथनम् । तत्पर्य्यायः । अनुलापः २ । इत्यमरः । १ । ६ । १६ ॥

मुहूर्त्तः, पुं क्ली, (हूर्च्छतीति । "अञ्जिघृसिभ्यः क्तः ।" उणा० ३ । ८९ । इत्यत्र बाहुलकात् हुर्च्छेरपि इति उज्ज्वलदत्तः । मुडागमश्च प्राक् । "राल्लोपः ।" ६ । ४ । २१ । इति छकारस्य लोपः ।) द्वादशक्षणपरिमितकालः । इत्यमरः । १ । १ । ११३ ॥ घटिकाद्वयम् । इति राजनिर्घण्टः ॥ (अस्य विवृतिर्यथा । तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः । पञ्चदशाक्षिनिमेषाः काष्ठा ॥ त्रिंशत्काष्ठाः कला । विंशतिकलो मुहूर्त्तः कलादशभागश्च । त्रिंशन्मुहूर्त्तमहोरात्रम् । इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥) दिनपञ्चदशभागैकभागः । यथा,

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम् ॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु ॥"
इति तिथ्यादितत्त्वधृतवचनम् ॥*॥

कर्म्मविशेषे तस्य परिमाणं यथा । ननु व्रतोपवासस्नानादौ घटिकैकापि या भवेदित्यत्र घटिकापदं दण्डपरं मुहूर्त्तपरं वा स्नात्वाचारधृतचतुर्द्दण्डात्मकारुणोदयव्यापके चतस्रो घटिकाः प्रातररुणोदय उच्यते इत्यादौ प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम् । दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेदिति हलायुधधृतलिखितवचनमाथर्विणामामिति वचनयोरेकत्रत्वयोश्च उभयत्र प्रयोगदर्शनादिति संशयः । उच्यते । श्राद्धादावस्तगामिनीति घटिकानियामकवचनचतुर्थचरणे पार्व्वणयोग्यतया घटिकाया मुहूर्त्तात्मकत्वस्यावश्यमङ्गीकारात् तात्पर्य्यलाघवेन व्रतादावपि तथात्वम् ।

"घटिकैकाप्यमावास्याप्रतिपत्सु न चेद्यदा ।
सर्व्वं तदासुरं दानं दैवे कर्म्मणि चोदितम् ॥"

इति घटिकान्यूने निन्दामभिधाय घटिकालाभे कर्म्मार्हेति वक्तव्ये मुहूर्त्तमप्यमावास्याप्रतिपत्सु भवेद्यदा । तदाग्रमुत्तमं ज्ञेयं शेषं पूर्व्वं हि पूर्व्ववदित्यनेन मुहूर्त्तलाभे कर्म्मार्हत्वज्ञापनाच्च । तत्रापि मुहूर्त्तः किं तत्तद्दिवारात्रिपञ्चदशांश उत दण्डद्वयम् । नाद्यः प्रतिदिनदिवारात्र्योर्ह्रासवृद्धिभ्यां तद्भागानामपि न्यूनाधिक्यादिविभेदापत्तेः । नापि द्वितीयः दण्डद्वयस्य त्रिंशद्दण्डात्मकदिवारात्रिपञ्चदशांशस्य मुहूर्त्तत्वच दण्डद्वयाधिकन्यूनकालानामपि त्रिंशद्दण्डाधिकन्यूनदिवारात्रिपञ्चदशांशानां मुहूर्त्तत्वप्रतिपादनेन विनिगमनाविरहात् किन्त्वनन्तरङ्गतया कर्म्माङ्गदिवारात्र्यन्यतरपञ्चदशांशस्य ग्रहणप्रसक्तौ अयनांशक्रमेणोत्तरायणपूर्व्वाह्णदिनमानसपादषड्विंशतिदण्डानां पञ्चदशांशस्य पादोनदण्डद्वयस्य मुहूर्त्तत्वात्तद्विनविहितक्रियायां तावन्न्यूनकालस्यापि ग्रहणात् सर्व्वत्र न्यूनकालव्यवच्छेदे आवश्यकतया तस्यैव पादोनदण्डद्वयात्मकस्य मुहूर्त्तस्य ग्रहणं लाघवात् ।

"यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ॥"

इति कात्यायनोक्तस्य चतुर्द्दशीसम्बन्धिदिनचतुर्थयाममात्रव्याप्यमावास्यायां श्राद्धविधानस्य मत्स्यपुराणोक्तमुख्यापराह्णीयमुहूर्त्तबाधेन विषयलाभाय पादोनदण्डद्वयात्मकमुहूर्त्तग्रहणस्यावश्यकत्वाच्च । तादृशामावास्यायां तदधिकमुख्यापराह्णासम्भवात् । तत्र च मुख्यापराह्णीयपादोनदण्डद्वयात्मकदशलाभस्तु चत्वारिंशत्पलाधिकत्रयस्त्रिंशद्दण्डात्मकदिवस एव । अत एव स्मार्त्तभट्टाचार्य्यैरपि यदा चतुर्द्दशीयाममित्यस्य व्याख्याने तिथ्यादितत्त्वे तथा लिखितम् । न च निरूढलक्षणातो रूढशक्तेर्बलवत्त्वात् । तास्तु त्रिंशत्क्षणास्तु मुहूर्त्तो द्वादशाख्यायाम् । ते तु त्रिंशदहोरात्र इत्यमरोक्तो द्वादशक्षणात्मकः अहोरात्रत्रिंशांशो दण्डद्वयरूपमुहूर्त्तो लाघवतः सर्व्वत्रानुगततया न्यूनकालव्यवच्छेदको वक्तव्य इति वाच्यं निरूढलक्षणापि शक्तितुल्येति शाब्दिकस्मरणात् स्मार्त्तत्वनान्तरङ्गेति सन्निहिते बुद्धिरन्तरङ्गेतिन्यायाच्च निरूढलक्षणाया एव बलवत्त्वात् । दृष्टिगाः सपवित्रक इत्यत्र पवित्रपदस्य कुशगतकोशोक्तरूढिशक्त्यपेक्षया शिशिरकुशपत्रद्वयगतकात्यायनोक्तनिरूढलक्षणाया इव । निरूढलक्षणायाः शक्तितुल्यत्वन्तु रूढशक्तेरिव

शास्त्रार्थबाधस्यानं शास्त्रसम्बन्धज्ञानञ्च विना पदतात्पर्य्यज्ञानाशुपदमेव पदार्थोपस्थापकत्वात्। सा च निरूढलक्षणा कचित्तात्पर्य्यबोधकशास्त्रात् कचिच्चार्षप्रयोगतोऽनुमानादपि निर्णीयते। वस्तुतस्तु तुन्निशोः पञ्चदशांशात्मिकाल्पत्वयुक्तनिरूढमुहूर्त्तपदलक्षणा विनिगमनाविरहगौरवाभ्यामेव कुण्ठिता अतोऽत्यन्तन्यूनपादोनदण्डद्वयात्मकमुहूर्त्तग्रहणं अशक्यमेव। अथात्यन्तन्यूनतया सर्व्वानुगमाय तद्ग्रहणमिति चेत् अत्यन्ताधिकतया सपाददण्डद्वयात्मकमुहूर्त्तस्यैव कुतो न ग्रहणं स्यात् तस्मात्

"प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम्।
दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेत्॥"

इति लघुहारीतवचनत्रियामा रजनी प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम्। नाडीनान्तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञित इति ब्रह्मवैवर्त्तवचनयोरेकदण्डद्वयात्मककाले घटिकापदनिरूढलक्षणासिद्धौ तथा पर्य्यायद्वारा कोषोक्तरूढ्या च समञ्जसतः सार्व्वयोग्यदण्डद्वयात्मककाल एव घटिकापदादुपस्थाप्यते अतः सर्व्वसाधारण्येन न्यूनकालावच्छेदाय सैव ग्राह्या लाघवात्। अतएव यदा चतुर्द्दशीयामं तुरीयमनुपूरयेदत्र यदा यत्र दिने अमावास्या मुख्यापराह्णीय एकदण्डद्वयान्यूनकालव्यापनं यथा स्यात्तथैव चतुर्द्दशीयामं तद्युक्ततृतीययाममनुलक्षीकृत्य तत्र प्रहृत्य चतुर्थयामं पूरयेत् व्याप्नोतीत्यन्वयः। अन्यथा चतुर्द्दशमुहूर्त्ताधिकपूरणाभिधानं व्यर्थं स्यात्। एतेनैव दर्शश्राद्धेऽपि मुख्यापराह्णादरः कार्य्यः। प्रात.कालादिपञ्चधाविभागे कुतपादिसंज्ञायाश्च दिनमानपञ्चदशांशमुहूर्त्तस्यैव स्यैव ग्रहणम्। तद्बोधकशास्त्रसंवादात्। अत एकोद्दिष्टे दिनमानपञ्चदशांशमुहूर्त्ता योग्यतया च न्यूनकालावच्छेदको ग्राह्यः। कुतप रौहिणान्यतरमात्रग्राहकयुक्तेः। एवं विशेषाभिधानात् सुखरात्रौ दण्डमात्रं जन्माष्टम्यादशौर्द्वादशौषु च कलाकाष्ठारूपोऽपि प्रतिष्ठादौ तूक्तयुक्त्या स्वयोग्यकाल एव न्यूनकालावच्छेदको ग्राह्यः। ततश्च विशेषकालप्राप्तकर्म्मेतरकर्म्मणाः प्रशस्तादिकाले स्वयोग्यदण्डद्वयान्यूनकतिथिरेव ग्राह्येत्यनुगतविधिः सर्व्वेषामञ्जस्यादिति तत्त्वम्। इति चन्द्रशेखरवाचस्पतिकृतद्वैतनिर्णयः॥

मुहेरः, पु, (मुह्यति विचित्तोभवतीति। मुह + "मुहेरादयः।" उणा० १।६२। इति एरक्।) मूर्खः। इति संक्षिप्तसारोणादिवृत्तिः॥

मू ङ बन्धे। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक० सेट्।) पवर्गपञ्चमादिः। ङ मवते। इति दुर्गादासः॥

मूः, [र्] स्त्री, मूर्च्छा। इति मुर्च्छधातोर्भावे क्विपा निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

मूः, स्त्री, (मवते इति। मव + क्विप्। "ज्वरत्वरश्रिव्यविमवामुपधायाश्च।" ६।४।२०। इति साचोवकारस्योठ् इत्यादेशः।) बन्धनम्। इति सिद्धान्तकौमुदी॥

मूकः, त्रि, (मवते बध्यतेऽसौ। मव + बाहुलकात् कक्।" उणा० ३।४१। इति उपधाया वकारस्य चोठ्।) वाक्यरहितः। बोवा इति भाषा। तत्पर्य्यायः। अवाक् २। इत्यमरः। ३।१।३३। (यथा, महाभारते। २।५।१२५।

"कच्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ। तथा प्रव्रजितानपि॥"

अस्योत्पत्तिहेतुर्यथा, गर्भवैकल्यात्

"गर्भो वातप्रकोपेण दौहृदे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिन्मिन एव च॥"

इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥

रोगत्वेनास्य विषयो यथा,—

"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥"

इति च तत्र निदानस्थाने प्रथमेऽध्याये॥)

मूकः, पुं, (मवते बध्यते जालिकैरिति। मव + कक्। पूर्व्ववत्सर्व्वम्।) मत्स्यः। इति त्रिकाण्डशेषः॥ दैत्यः। इति मेदिनी। के, ३९॥ (दानवभेद.। यथा, महाभारते। ३।३८।७।

"स सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्म्मणः।
मूकं नाम दनोः पुत्त्रं ददर्शाद्भुतदर्शनम्॥")

दीनः। इति हेमचन्द्रः। ३।१३। (तक्षकपुत्त्रः। यथा, महाभारते। १।५७।१०।

"शिली शलकरो मूकः सुकुमारः प्रवेपनः।
मुद्गरः शिशुरोमा च सुरोमा च महाहनुः॥
एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम्॥")

मूढः, त्रि, (मुह + क्तः।) मूर्खः। इत्यमरः। ३।१।४८॥ (यथा, पञ्चदश्याम्। ७।१०।

"अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः।
एकीभूय भवेन्मुख्यस्तत्र मूढ़ं प्रयुज्यते॥")

बालः। तन्द्रितः। इति मेदिनी। ढे, ३॥ जडः। इति हेमचन्द्रः॥

मूतः, त्रि, (मव मू मवे वा क्तः।) बद्धः। इत्यमरः। ३।१।६५॥ (धान्यरक्षणार्थं तृणमय आधारविशेषः। यथा, शतपथब्राह्मणे। ७। ६।२।१७। "तान् द्वयोर्मूतकयोरुपनह्य वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत्॥" 'यत्र तृणमये आवपने धान्यं बध्यते तन्मूतं मूतमेव मूतकम्। वेणुमय्यां यष्ट्यामुभयत, बद्धा।' इति तद्भाष्ये महीधरः॥)

मूत्र, त क प्रस्रावे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-उभ०-सक०-सेट्।) दीर्घी। मूत्रयति मूत्रापयति। इति दुर्गादासः॥

मूत्रं, क्ली, (मूत्र्यते इति। मूत्र + घञ्। लोकाश्रयत्वात् क्लीवत्वम्। यद्वा, मुच्यते त्यज्यते इति। मुच + "षिविमुच्योष्टेरू च।" उणा० ४।१६२। इति ष्ट्रन् किद्भवति। टेरूकारादेशः।) उपस्थनिर्गतजलम्। तत्पर्य्यायः। प्रस्रावः २। इत्यमरः। २।६।६७॥ मेहनम् ३। इति जटाधरः॥ गुह्यनिस्यन्दः ४ स्रवणम् ५ स्रवः ६। इति राजनिर्घण्टः॥ *॥ (अस्योत्पत्तिविषयो यथा,—

"आहारस्य रसः सारः सारहीनो मलद्रवः।
शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात॥"

इति पूर्व्वखण्डे चतुर्थेऽध्याये शार्ङ्गधरेणोक्तम्॥

"वस्तिपूरणविक्लेदकृन्मूत्रम्।"

तथास्य चयवृद्धिलक्षणं यथा,—

"मूत्रक्षये वस्तितोदोऽल्पमूत्रता च।"
"मूत्रं मुहुर्मुहुः प्रवृत्तिं वस्तितोदमाध्मानञ्च।"

इति सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये॥

तथास्य दोषादि विकृतस्य परीक्षा लक्षणम्॥

"वातेन पाण्डुरं मूत्रं रक्तनीलञ्च पित्ततः।
रक्तमेव भवेद्रक्तात् धवलं फेनिलं कफात॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

तस्योत्सर्गविधिर्यथा,—

"दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्य्यान्मूत्रपुरीषे तु रात्रौ वै दक्षिणामुख.॥"

इति गारुडे ९४ अध्यायः॥

अपि च।

"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥"

इति मनुः। ४।५०॥

"कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्।
विण्मूत्रे च गृही कुर्य्याद् यद्वा कर्णे समाहितः॥"

इति यम॥

यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति। कर्णे दक्षिणकर्णे। इति शाङ्खायनः॥

"छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥*॥
न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
वाय्वग्निविप्रानादित्यमपः पश्यंस्तथैव गाः।
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्जनम्॥"

इति मनुः। ४।४५—४८॥*॥

"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्गुप्तिकार्य्याणि तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये॥"

इति वशिष्ठः॥

निर्हारो मूत्रपुरीषोत्सर्गः॥*॥

"सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न संमुखे।
कुर्य्यान् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः॥"

इति विष्णुपुराणम्॥

न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति। इत्यापस्तम्बः।

"करगृहीतपात्रेण कृत्वा मूत्रपुरीषके ।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत् ॥"
इति बृहन्मनुः ॥ * ॥
गृहीतजलपात्रस्य मूत्रोत्सर्गे दोषो यथा,—
"वारिपात्रं करे धृत्वा मूत्रं त्यजति यो नरः ।
सुरापात्रसमं पात्रं तज्जलं मदिरासमम् ॥"
इति कर्म्मलोचनम् ॥ * ॥
सशब्दमूत्रस्य दोषो यथा,—
"निःस्वाः सशब्दमूत्राः स्युर्नृपा निःशब्दधारया ।
भोगाढ्याः समजठरा निःस्वाः स्युर्घट-
सन्निभाः ॥"
इति गारुडे ६३ अध्यायः ॥ * ॥
"विष्णुक्रान्तजमूत्रेण चौर्य्याशादिरक्षणम् ।"
इति तत्रैव १८८ अध्यायः ॥ * ॥ अथ गोमूत्र-
गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । लवणत्वम् ।
पित्तकारित्वम् । कटुत्वम् । लघुत्वम् । रूक्ष-
त्वम् । गुल्मोदरानाहशोथार्शोविषकुष्ठनाशि-
त्वञ्च । इति राजवल्लभः ॥

मूत्रकृच्छ्रं, क्ली, (मूत्रे कृच्छ्रम् । मूत्रजन्य
कृच्छ्रमिति वा ।) रोगविशेषः । तत्पर्य्यायः ।
मूत्ररोधः २ अश्मरी ३ कृच्छ्रम् ४ । इति
राजनिर्घण्टः ॥ * ॥ अथ मूत्रकृच्छ्राधिकारः ।
तत्र मूत्रकृच्छ्रस्य विप्रकृष्टं निदानमाह ।
"व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गनृत्यद्रुतपृष्ठयानात् ।
आनूपमत्स्याध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥"
तीक्ष्णौषधं राजिकाशरणादियुक्तम् । रूक्षेति
मद्यविशेषणम् । प्रसङ्गः सततं सेवा । नृत्यं
नर्त्तनम् । नित्येति द्विविधः पाठः । द्रुतपृष्ठ-
यानात् अश्वादिना गमनात् । आनूपं प्रचुर-
जलदेशभवं भक्ष्यम् । अष्टौ वातिकपैत्तिक-
श्लैष्मिकसान्निपातिकशल्यजपुरीषजशुक्रजाश्मरी-
जानि । तस्य संप्राप्तिपूर्ब्बकं लक्षणमाह ।
"पृथङ्मलाः स्वैः कुपिता निदानैः
सर्व्वेऽथवा कोपमुपेत्य वस्तौ ।
मूत्रस्य मार्गं परिपीडयन्ति
यदा तदा मूत्रयतीह कृच्छ्रात् ॥"
तेषु वातिकमाह ।
"तीव्रा रुजो वङ्क्षणवस्तिमेढ्रे
स्वल्पं मुहुर्मूत्रयतीह वातात् ।"
तीव्रा मारणात्मिका वङ्क्षणवस्तिमेढ्राणामन्त-
रालवर्त्ती ॥ * ॥ पैत्तिकमाह ।
"पीतं सरक्तं सरुजं सदाहं
कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ।"
कृच्छ्रमिति क्रियाविशेषणम् ॥ श्लैष्मिकमाह ।
"वस्तेः सलिङ्गस्य गुरुत्वशोथौ
मूत्रं सपिच्छं कफमूत्रकृच्छ्रे ।"
सपिच्छं पिच्छिलम् ॥ सान्निपातिकमाह ।
"सर्व्वाणि रूपाणि च सन्निपातात्
भवन्ति तत् कृच्छ्रतमं हि कृच्छ्रम् ॥"
कृच्छ्रं मूत्रकृच्छ्रम् ॥ * ॥ शल्यजमाह ।
"मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणम् ॥
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्द्दिशेत् ।
मूत्रवाहिषु स्रोतःसु । शल्येन कण्टकेन । क्षतेषु
सक्षतीकृतेषु अथवा अभिहतेषु मुद्गरादिभि-
रभिहतेषु । तदाघातात् मूत्रमार्गाघातात्
मूत्रकृच्छ्रं जायते । भृशदारुणं मारकं तस्य
शल्यजस्य ॥ * ॥ पुरीषजमाह ।
"शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः ।
आध्मानं वातशूलञ्च मूत्रकृच्छ्रं करोति च ॥"
प्रतीघातात् निरोधात् । विगुणतां दुष्टताम् ॥
शुक्रजमाह ।
"शुक्रदोषैरुपहते मूत्रमार्गे विधारिते ।
सशुक्रं मूत्रयेत् कृच्छ्राद्वस्तिमेहनशूलवान् ॥"
उपहते दूषिते ॥*॥ अश्मरीजमाह । अश्मरी-
हेतुकञ्चापि मूत्रकृच्छ्रमुदाहृतम् । सुश्रुते
शर्कराजमपि मूत्रकृच्छ्रमुक्तमत्र तु तस्य नव-
संख्यानिरासार्थमश्मरीशर्करयोः साम्यमाह ।
"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे ।
विशेषणं शर्करायाः शृणु कीर्त्तयतो मम ॥"
सम्भवः कारणम् ।
"पच्यमानाश्मरी पित्ताच्छोष्यमाणा च
वायुना ।
विमुक्तकफसन्धाना क्षरन्ती शर्करा मता ॥"
पित्तेन पच्यमाना मूत्रशुक्रश्लेष्मसंहतिः प्रथमं
पित्तेन बन्धनकर्म्मणा पच्यमाना । पश्चाद्वातेन
शोषिता कफेनाश्लिष्टा अश्मरी । सैव विमुक्त-
कफसन्धाना त्यक्तकफाश्लेषा सती शर्कराख्या
मूत्रमार्गात् क्षरन्ती शर्करा मता । एतावता
किञ्चिदेव भेदः ॥*॥ शर्कराया उपद्रवानाह ।
"हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्ब्बलः ।
तया भवति मूर्च्छा च मूत्रकृच्छ्रञ्च दारुणम् ॥"
शूलं कुक्षावित्यन्वयः । तया शर्करया ॥ * ॥
अथ मूत्रकृच्छ्रस्य चिकित्सा ।
"त्रिकण्टकारग्वधदर्भकाश-
यवासधात्रीगिरिभेदपथ्याः ।
निघ्नन्ति पीता मधुनाश्मरीञ्च
समीपमृत्योरपि मूत्रकृच्छ्रम् ॥"
त्रिकण्टादिक्काथः ॥ १ ॥
"एलाश्मभेदकशिलाजतुगोक्षुराणा-
मेर्व्वारुबीजलवणोत्तमकुङ्कुमानाम् ।
चूर्णानि तण्डुलजले तुलितानि पीत्वा
प्रत्यग्रमृत्युरपि जीवति मूत्रकृच्छ्री ॥"
एलादिचूर्णम् ॥ २ ॥
"अयोरजः श्लक्ष्णपिष्टं मधुना सह योजितम् ।
मूत्रकृच्छ्रं निहन्त्याशु संलीढं दिवसत्रयात् ॥३॥
गुडेन मिश्रितं क्षीरं कदुष्णं कामतः पिबेत् ।
मूत्रकृच्छ्रेषु सर्व्वेषु शर्करायाश्च विशेषतः ॥४॥
धात्रीरसञ्चेक्षुरसं पिबेद्वा
कल्कं मरत्तं मधुना विमिश्रम् ।
शल्याभिघातोत्थितमूत्रकृच्छ्रे
कार्य्या क्रिया मारुतकृच्छ्रतुल्या ॥५॥
क्वाथो गोक्षुरबीजस्य यवक्षारसमन्वितः ।
पीतः प्रशमयत्येव कृच्छ्रं विड्धारणोत्थितम् ॥६॥
त्रिफलायाः सुपिष्टायाः कल्कं कोलसमन्वितम् ।
वारिणा लवणीकृत्य पिबेन्मूत्ररुजापहम् ॥"७॥
कोलं बदरम् ।
गुडमामलकं हृद्यं श्रमघ्नं तर्पणं प्रियम् ।
पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रहरं परम् ॥ ८ ॥
समादशाणतुलितो यवक्षारः सितायुतः ।
भक्षितो नाशयत्येव मूत्रकृच्छ्रं न संशयः ॥९॥
द्राक्षासितोपलाकल्कः पीतः कर्षमितो नरैः ।
मस्तुना पलमात्रेण मूत्रकृच्छ्रं व्यपोहति ॥१०॥
समूलगोक्षुरक्वाथः सितामाक्षिकसंयुतः ।
नाशयेन्मूत्रकृच्छ्राणि तथैवोष्णसमीरणम् ॥"११॥
उष्णसमीरणं उष्णवातं मूत्राघातविशेषम् ।
इति भावप्रकाशः ॥ (तथास्य चिकित्सा-
प्रकारान्तरम् ।
"सुशीतलं जलं कर्षमात्रं स्यात् मूत्रकृच्छ्रहृत् ।
दध्यम्बुना च संमिश्रमयश्चूर्णं सुखप्रदम् ॥
मूत्रकृच्छ्रे यवक्षारचूर्णं हिङ्गुप्रयोजितम् ।
कुशाकाशं समादाय शर्करासहितं पिबेत् ॥
यो हि त्रिदोषसम्भूतमूत्रकृच्छ्रनिवारणः ॥"
"आरग्वधफलं मूलं दुरालभा धान्यकशता-
वर्य्यः ।
पाषाणभेदपथ्ये क्वाथोऽयं मूत्रकृच्छ्रे स्यात् ॥"
इति हारीते चिकित्सितस्थाने २९ अध्याये ॥
अथात्र पथ्यानि ।
"अथो यथादोषमयं गणोऽपि
पुरातना लोहितशालयश्च ।
तक्रं पयो दध्यपि गांप्रसूतं
धन्वामिषं मुद्गरसाः सिता च ॥
पुराणकुष्माण्डफलं पटोलं
महार्द्रकं गोक्षुरकः कुमारी ।
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणाञ्च शिरांसि पथ्या ॥
तालास्थिमज्जात्रपुसं त्रुटिश्च
शीतानि पानान्यशनानि चापि ।
उशीरनीरं हिमवालुका च
मित्रं नृणां स्यात् सति मूत्रकृच्छ्रे
अथापथ्यानि ।
"मद्यं श्रमं निधुवनं गजवाजियानं
सर्व्वं विरुद्धमशनं विषमाशनञ्च ।
ताम्बूलमत्स्यलवणार्द्रकतैलभृष्टं
पिण्याकहिङ्गुतिलसर्षपवेगरोधान् ॥
माषान् करीरमतितीक्ष्णविदाहिरूक्ष-
मम्लञ्च मुञ्चतु जनः सति मूत्रकृच्छ्रे ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्रकृच्छ्राधि-
कारे ॥)

मूत्रदोषः, पुं, (मूत्रस्य दोषो यस्मात् ।) प्रमेहः ।
इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । सूत्र-
स्थाने ३८ अः ।
"वरुणकादिरित्येष गणोऽनिलविनाशनः ।
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः ॥"

मूत्राघातादिः। अस्य चिकित्सा यथा,—
"निदिग्धिकायाः स्वरसं पिबेत् कुडवसम्मितम्।
मूत्रदोषहरं कल्कमथवा क्षौद्रसंयुतम्॥",
"अत ऊर्द्ध्वं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम्।
स्नेहस्वेदोपपन्नानां हितमत्रेषु विरेचनम्॥
ततः संशुद्धदेहानां हिताश्चोत्तरवस्तयः॥"
"क्षौद्रार्द्धपात्रं दत्त्वा तु पात्रञ्च क्षीरसर्पिषोः।
स्वयङ्गुप्ताफलञ्चैव तथैव क्षुरकस्य च॥
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत्।
एतदेकध्यमानीय खजेनाभिप्रमन्थयेत्॥
तस्य पाणितलं चूर्णं लीढ्वा क्षीरं ततः पिबेत्।
एतत्सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा॥
मूत्रदोषान् जयेत् सर्व्वानन्ययोगैः सुदुर्ज्जयान्।
जयेत् शोणितदोषांश्च वन्ध्या गर्भं लभेत च।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते॥"
इत्युत्तरतन्त्रेऽष्टपञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम्॥)

मूत्रनिरोधः, पुं, (मूत्रस्य निरोधः। यद्वा मूत्रं निरुणद्धीति। रुध् + अण्।) मूत्रप्रतिबन्धक-रोगविशेषः। अस्य चिकित्सा यथा,—
"पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम्।
साधितं छागदुग्धेन पीतं शर्करयान्वितम्।
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्कराम्॥"
इति गारुडे १६१ अध्यायः॥
(चिकित्सान्तरं यथा,—
"तैलेन पद्मिनीकन्दं पक्वगोमूत्रमिश्रितम्।
पिबेन्मूत्रनिरोधे तु सतीव्रवेदनान्विते॥"
इति हारीते चिकित्सितस्थाने त्रिंशेऽध्याये॥)

मूत्रपतनः, पुं, (मूत्रस्य पतनमस्मात् पुरीष-निरोधकरणादस्य सततमूत्रपतनात् तथा-त्वम्।) गन्धमार्ज्जारः। इति राजनिर्घण्टः॥

मूत्रपुटं, क्ली, (मूत्रस्य पुटम्।) नाभेरधो भागः। यथा,—
"नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च।"
इति हेमचन्द्रः। ३। २७०॥

मूत्रफला, स्त्री, (मूत्रं मूत्रवर्द्धनं फलं परिणमन मस्याः।) कर्कटी। त्रपुषी। इति राजनिर्घण्टः॥
(कर्कटीत्रपुषीशब्दयोरस्या विषयो ज्ञेयः॥)

मूत्रलं, क्ली, (मूत्रं लाति आदत्ते वर्द्धयतीत्यर्थः। ला + कः।) त्रपुषम्। इति शब्दचन्द्रिका॥
मूत्रवर्द्धके, त्रि॥ (यथा, सुश्रुते। सूत्र-स्थाने। ४५ अः।
"जाम्बवो बहुनिस्यन्दस्तुवरो वातकोपनः।
तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत्॥")

मूत्रला, स्त्री, (मूत्रल + टाप्।) कर्कटी। इति त्रिकाण्डशेषः॥ वालुकी। इति राजनिर्घण्टः॥

मूत्राघातः, पुं, (मूत्रस्याघातो निरोधो येन।) प्रस्रावरोधकरोगविशेषः। अथ मूत्राघातस्य विप्रकृष्टं सन्निकृष्टञ्च निदानं संख्याञ्चाह।
"प्रायो मूत्रविघाताद्यैर्व्वातकुण्डलिकादयः।
जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश॥"
मूत्रविघाताद्यैरित्याद्यशब्देन पुरीषशुक्रादिवेग-विघातानां रूक्षाशनादीनाञ्च ग्रहणम्। मूत्र-विघाताद्यैः कुपितैर्दोषैरित्यन्वयः। ननु मूत्र-कृच्छ्रमूत्राघातयोः को भेदः। उच्यते। मूत्र-कृच्छ्रे कृच्छ्रमधिकं विबन्धोऽल्पः। मूत्राघाते तु विबन्धो बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः॥*॥
वातकुण्डलिकाया निदानं संप्राप्तिं लक्षणञ्चाह।
"रौक्ष्याद्वेगविघाताद्वा वायुर्व्वस्तौ सवेदनः।
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः॥
मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते।
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदा-रुणम्॥"
रौक्ष्यात् कायस्य। वेगविघातात् मूत्रादि-वेगनिरोधात् आविश्य प्राप्य रौक्ष्यादिभि-र्वेगविघातादिभिश्च विगुणो दुष्टः कुण्डलीकृतो वायुर्वस्तौ मूत्राशये चरति प्रतिधावति आवद्धत्वाद्भ्रमंस्तिष्ठति इत्यर्थः। वात्यावत्। मूत्रमिति तस्मान्मूत्रमल्पमल्पं सव्यथं प्रवर्त्तते। तद्व्याधिं वातकुण्डलिकामाहुः। सुदारुणम्। मारणात्मकत्वात्॥ १ ॥ * ॥ अष्ठीलामाह।
"आध्मापयन् वस्तिगुदं रुद्ध्वा वातश्चलोन्नताम्।
कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम्॥"
वातः वस्तिगुदं रुद्ध्वा अर्थात् तदन्तर्गतं मूत्रं मलञ्च निरुध्य वस्तिगुदं वस्तिं गुदञ्च आध्मा-पयन् आध्मानं कुर्व्वन् अष्ठीलां ष्ठीलातुल्यां व्याधिं कुर्य्यात्। चलोन्नतां चलां उन्नताञ्च॥२॥
वातवस्तिमाह।
"वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः।
निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः॥
मूत्रसङ्गो भवेत्तेन वस्तिकुक्षिनिपीडितः।
वातवस्तिः स विज्ञेयो व्याधिः कष्टप्रसाधनः॥"
अकुशलो मूर्खः। तस्य पुरुषस्य वस्तिमुखं निरुणद्धि वस्तिगतो वायुः। तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति वस्तिकुक्षिनिपी-डित इति वस्तौ कुक्षौ च निपीडितः संपी-ड़ितो वायुरिति सम्बन्धः॥३॥ मूत्रातीतमाह।
"चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥"
मेहमानस्य मूत्रमुत्सृजतः। मन्दं वा अल्पं वा॥ ४ ॥ * ॥ मूत्रजठरमाह।
"मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः।
अपानः कुपितो वायुरुदरं पूरयेद्भृशम्॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनाम्।
तं मूत्रजठरं विद्यादधोवस्तिनिरोधनम्॥"
तदुदावर्त्तहेतुक इति मूत्रवेगधारणजनितो-दावर्त्तनिदानमाध्मानं कुर्य्यात्। अधोवस्ति-निरोधनं वस्तेरधोदेशे विबन्धकारकम्॥ ५ ॥
मूत्रोत्सङ्गमाह।
"वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः।
मूत्रं प्रवृत्तं सज्येत सरक्तं वा प्रवाहतः॥
स्रवेच्छनैरल्पमल्पं सरुजं वाथ नीरुजम्।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः॥"
नाले मेढ्रे मणौ मेहनाग्रग्रन्थौ सज्येत निबद्धं स्यात् सरक्तं सत् वा प्रवर्त्तते। प्रवाहत इति कण्ठहृद्बलेन सशब्दं मूत्रपुरीषवातानामधः प्रेरणं प्रवाहनं तेन कुपितेन वायुना वस्त्यादि-भेदात् सरक्तं मूत्रं स्रवेदित्यर्थः॥ ६ ॥ मूत्रक्षय-माह।
"रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम्॥"
क्लान्तदेहस्य म्लानदेहस्य तदाह्वयं मूत्रक्षय-संज्ञम्॥ ७ ॥ मूत्रग्रन्थिमाह।
"अन्तर्व्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत्।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते॥"
अन्तर्व्वस्तिमुखे वस्तिमुखस्याभ्यन्तरे अल्पः क्षुद्रामलकप्रमाणः। ननु अश्मर्य्या सह को भेदः। उच्यते। अश्मरी क्रमशः सञ्चयेन स्यादयन्तु सहसा भवेदिति भेदः। अपरो भेदः। अश्मर्य्यां पित्तादिकं संहन्यते अत्र तु रक्तमेव। यत उक्तं तन्त्रान्तरे।
"रक्तं वातकफाद्दुष्टं वस्तिद्वारे सुदारुणम्।
ग्रन्थिं कुर्य्यात् स कृच्छ्रेण सृजेन्मूत्रं तदा-वृतम्॥" ८॥ इति॥
मूत्रशुक्रमाह।
"मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धृतम्।
स्थानच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते॥"
मूत्रितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उद्धृतं ऊर्द्ध्वं नीतम्। भस्मोदक-प्रतीकाशं भस्मसहितजलसदृशम्। ९ ॥ उष्ण-वातमाह।
"व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिला-वृतम्।
वस्तिं मेढ्रं गुदञ्चैव प्रदहन् स्रावयेदधः॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा।
कृच्छ्रं पुनः पुनर्ज्जन्तोरुष्णवातं वदन्ति तम्॥"
व्यायामादिविरोधत्वेन सौम्यधातुक्षयात् तेजो-वृद्ध्या पित्तवृद्धिः स्यात्तत् कुपितं पित्तं अनिलयुतं वस्तिं प्राप्य वस्त्यादिकं प्रदहत् मूत्रमधः स्रावयेत्। कीदृशं हारिद्रं अथवा सरक्तं ईषल्लोहितम्॥ १० ॥ मूत्रसादमाह।
"पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्।
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत्॥
सरक्तं रोचनाशङ्खचूर्णवर्णं भवेत्ततः।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति हि॥"
संहन्येत घनीक्रियेते। शुष्कं अल्पं समस्तवर्णं उक्तसकलवर्णयुक्तम्॥ ११ ॥ विड्विघातमाह।
"रूक्षदुर्ब्बलयोर्व्वातेनोदावृत्तं शकृद् यदा।
मूत्रस्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः॥
विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमा-दिशेत्॥"
उदावृत्तं ऊर्द्ध्वं नीतं विड्गन्धं वा। वाशब्दो-ऽत्र योजनीयः॥ १२ ॥*॥ वस्तिकुण्डलमाह।
"द्रुताध्वलङ्घनायासैरभिघातात् प्रपीडनात्।
स्वस्थानाद्वस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत्॥

मूत्रस्यन्दनदाहार्त्तो विन्दुविन्दुं स्रवत्यपि ।
पीड़ितस्तु क्षणेहारी संस्तम्भोद्वेष्टनार्त्तिमान्
वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् ।
पवनप्रबलं प्रायो दुर्निरोधमबुद्धिभिः ॥
तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
श्लेष्मणा गौरवं शोथो मूत्रं स्निग्धं घनं सितम् ॥”
द्रुताध्वलङ्घनं शीघ्रं मार्गचलनम् । उद्‌वृत्तः उत्थितः । स्पन्दनं किञ्चिच्चलनम् । घोरं मारकम् । शस्त्रविषोपमं शस्त्रं खड्‌गादि तद्वच्छीघ्रमारकम् । विषमत्र गरः तद्वत् विलम्बमारकम् । एतावता मारकमवश्यं शीघ्रं विलम्बेन वा ॥ १३ ॥ * ॥ तस्यैवासाध्यस्य च लक्षणमाह ।
“श्लेष्मरुद्धविलो वस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तविलः साध्यो न च यः कुण्डलीकृतः ॥
स्याद्वस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च ॥”
विलं वस्तिमुखरन्ध्रं पित्तोदीर्णः पित्तेनोत्कृतः । अविभ्रान्तविलः कफेनावृतविलः पश्चात् कुण्डलीकृतः स साध्यः । एतेन कुण्डलीभूतोऽसाध्यः । कुण्डलीभूतस्य लक्षणमाह । तृडित्यादि- कुण्डलीभूतस्यायमर्थः । कफेन विलावरोधात्तत्र वातः कुण्डलाकारेण तिष्ठतीत्यर्थः ॥ * ॥ अथ मूत्राघातस्य चिकित्सा ।
“नलकुशकाशेक्षुबलाक्वाथं प्रातः सुशीतलं सशितम् ।
पिबतो नश्यति नियतं मूत्रग्रह इत्युवाच कविः ॥”
कविः शुक्रः ।
“कर्पूररजसा युक्ता वर्त्तयर्त्तिः शनैः शनैः ।
मेढ्रमार्गान्तरे न्यस्ता मूत्राघातं व्यपोहति ॥
धान्यगोक्षुरकः क्वाथः कल्कसिद्धं हितं घृतम् ।
मूत्राघाते मूत्रकृच्छ्रे शुक्रदोषे च दारुणे ॥”
धान्यगोक्षुरकं घृतम् ।
“मूत्रकृच्छ्रेऽश्मरीरोगे भेषजं यत् प्रकीर्त्तितम् ।
मूत्राघातेषु सर्व्वेषु तत् कुर्य्याद्देशकालवित् ॥”
इति मूत्राघाताधिकारः । इति भावप्रकाशः ॥ गरुड़पुराणोक्तनिदानं तस्य १६३ अध्याये द्रष्टव्यम् ॥ (तथास्य विषयः ।
“वृक्षवस्तिशिरोमेढ्रकटीवृषणपायवः ।
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः ॥
अधोमुखोऽपि वस्तिर्हि मूत्रवाहिसिरामुखैः ।
पार्श्वेभ्यः पूर्य्यते सूक्ष्मैः स्यन्दमानैरनारतम् ॥
यैस्तैरेव प्रविश्यैनं दोषाः कुर्व्वन्ति विंशतिम् ।
मूत्राघातान् प्रमेहांश्च कृच्छ्रांस्तन्मर्मसमाश्रयान् ॥”
इति वाग्भटे निदानस्थाने नवमेऽध्याये ॥
अथास्य पथ्यापथ्यानि ।
“अभ्यञ्जनस्नेहविरेकवस्ति-
स्वेदावगाहोत्तरवस्तयश्च ।
पुरातना लोहितशालयश्च
मांसानि धन्वप्रभवानि मद्यम् ॥
तक्रं पयोदध्यपि माषयूषः
पुराणकुष्माण्डफलं पटोलम् ।
मत्स्याण्डकं तालफलास्थिमज्जा
हरीतकीकोमलनारिकेलम् ॥
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणामपि मस्तकानि ।
यथामलं सर्व्वमिदञ्च मूत्रा-
घातातुराणां हितमावहन्ति ॥
विरुद्धानि च सर्व्वाणि व्यायामं मार्गशीलनम् ।
रूक्षं विदाहिविष्टम्भिव्यायामं वेगधारणम् ।
करीरं वमनञ्चापि मूत्राघाती विवर्ज्जयेत् ॥”
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्राघाताधिकारे ॥)

मूत्राशयः, पुं, (मूत्रस्याशयः आधारः ।) नाभेरधोदेशः । तत्पर्य्यायः । मूत्रपुटम् २ वस्तिः ३ । इति हेमचन्द्रः । ३।२७० ॥ (अथास्य विषयः ।
“मूत्राशये वा गुदमुष्कयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ॥”
इति सुश्रुते उत्तरतन्त्रे ५५ अध्यायः ॥
यथा च तत्रैव निदानस्थाने ३ अध्याये ।
“एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः ।
मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥”)

मूत्रितः, त्रि, (मूत्रमस्य संजातम् । मूत्र + इतच् । यद्वा मूत्रयति स्म इति । मूत्र + क्तः ।) कृतमूत्रोत्सर्गः । तत्पर्य्यायः । मीढ़ः २ । इत्यमरः । ३ । १ । ८६ ॥

मूर्खः, पुं, (मुह् + “मुहेः खो मूर् च ।” उणा० ५।२२। इति खः धातोः मूरादेशश्च ।) माषः । इति त्रिकाण्डशेषः ॥ गायत्त्रीरहितः । यथा,
“क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥
क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः । मूर्खस्य गायत्त्रीरहितस्य । सार्थगायत्त्रीरहितस्येति रुद्रधरः ॥ महारोगिणः पापरोगाद्यकाम्यतमरोगवतः ते च उन्मादत्वग्‌दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः । उदरोऽश्मरीत्यष्टौ पापरोगा नारदोक्ताः । यथेष्टाचरणस्य द्यूतवेश्याद्यासक्तस्य । इति शुद्धितत्त्वम् ॥

मूर्खः, त्रि, (मुह् + खः । मूरादेशः ।) मुह्यति यः । तत्पर्य्यायः । अज्ञः २ मूढ़ः ३ यथाजातः ४ वैधेयः ५ वालिशः ६ । इत्यमरः । ३।१।४८ ॥ तस्य वशीकरणोपायो यथा,—
“मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं कार्य्येण द्विजमादरेण युवतीं प्रेम्णा शमैर्बान्धवान् ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं विद्याभी रसिकं रसेन सकलं शीलेन कुर्य्याद्वशम् ॥”
इति नवरत्नानि ॥
“पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥”
इति हितोपदेशः ॥

मूर्खता, स्त्री, (मूर्खस्य भावः । मूर्ख + “तस्य भावस्त्वतलौ ।” ५ । १ । ११९ । इति तल् टाप् ।) मूर्खत्वम् । यथा,—
“अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥”
इति चाणक्यम् ॥
“अष्टम्यां नारिकेलभक्षणे मूर्खत्वं यथा,—
“कलङ्की जायते विल्वे तिर्य्यग्‌योनिश्च निम्बके ।
ताले शरीरनाशः स्यान्नारिकेले च मूर्खता ॥”
इति तिथ्यादितत्त्वम् ॥

मूर्खभ्रातृकः, पुं, (मूर्खो भ्राताऽस्येति नित्यं कप् ।) मूर्खो भ्राता यस्य सः । इति सिद्धान्तकौमुदी ॥

मूर्च्छना, स्त्री, (मूर्च्छि + युच् । टाप् ।) गीताङ्गविशेषः । सा तु ग्रामस्य सप्तमभागः । तस्या लक्षणं एकविंशतिनामानि च यथा,—
“स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते ।
मूर्च्छनामिति तामाहुः कवयो ग्रामसम्भवाम् ॥
ललिता मध्यमा चित्रा रोहिणी च मतङ्गजा ।
सौवीरी षड्‌मध्या च षड्‌जमध्यमपञ्चमा ॥
मत्सरी मृदुमध्या च शुद्धान्ता च कलावती ।
तीव्रा रौद्री तथा ब्राह्मी वैष्णवी खेदरी सुरा ॥
नादावती विशाला च त्रिषु ग्रामेषु विश्रुताः ।
एकविंशतिरित्युक्ता मूर्च्छना चन्द्रमौलिना ॥
मूर्च्छनां कलयतो मुरशत्रो-
र्वंशिकाध्वनिविशेषवितानैः ।
मूर्च्छनां ययुरनङ्गशरौघै-
रङ्गना रतिपतेरिव सेनाः ॥”
इति सङ्गीतदामोदरः ॥
हनूमन्मते षड्‌जादिस्वरत ऋषभादिस्वरोत्थाने यत्र स्वरो विरमति सा मूर्च्छना । भरतमते वाद्यस्य गानस्य वा समये यत्र हस्तस्य गलस्य वा कम्पनं सा मूर्च्छना । सा एकविंशतिप्रकारा । तत्र षड्‌जग्रामस्य मूर्च्छना ललिता १ मध्यमा २ चित्रा ३ रोहिणी ४ मतङ्गजा ५ सौवीरी ६ षड्‌मध्या च ७ । मध्यमग्रामस्य मूर्च्छना पञ्चमा १ मत्सरी २ मृदुमध्या ३ शुद्धा ४ अन्ता ५ कलावती ६ तीव्रा च ७ ॥ गान्धारग्रामस्य मूर्च्छना रौद्री १ ब्राह्मी २ वैष्णवी ३ खेदरी ४ सुरा ५ नादावती ६ विशाला च ७ । इति सङ्गीतशास्त्रम् ॥

मूर्च्छा, स्त्री, (मूर्च्छ् + “गुरोश्च हलः ।” ३ । ३ । १०३ । इति अः टाप् ।) संमोहः । तत्पर्य्यायः । कश्मलम् २ मोहः ३ । इत्यमरः । २।८।१०९ ॥ मूर्च्छनम् ४ । इति शब्दरत्नावली ॥ मूर्च्छायः ५ । अथ मूर्च्छाधिकारः । तत्र मूर्च्छाया निदानपूर्व्विकां संप्राप्तिमाह ।
“क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभिघाताद्धीनसत्त्वस्य वा पुनः ॥
करणायतनेषूग्रा बाह्येष्वभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥”
बहुदोषस्य अधिकदोषस्य । न त्वनेकदोषस्य तदा मूर्च्छा त्रिदोषजैव स्यात् तच्चवास्तु को

दोषः तम। पृथग्दोषजानां मूर्च्छानां वक्ष्यमाणत्वात्। वेगाघातात् मस्तकादौ अभिघातात् लगुड़ादिना हीनसत्त्वस्य स्वल्पसत्त्वगुणस्य अर्थादधिकतमोगुणस्य यत उक्तं मूर्च्छा पित्ततमःप्रायेति करणायतनेषु करणं मनस्तस्यायतनेषु स्थानेषु वाह्येषु कर्म्मेन्द्रियेषु। अभ्यन्तरेषु बुद्धीन्द्रियेषु ॥ * ॥ सामान्यं लक्षणमाह।

"संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥"

तमोगुणः अज्ञानहेतुः। अभ्युपैति आगच्छति। सुखदुःखव्यपोहकृत् सुखदुःखज्ञाननाशकरम्। नष्टे सुखदुःखज्ञाने नरः काष्ठवत् पतति तां मोहो मूर्च्छेति प्राहुरित्यन्वयः। मूर्च्छाया मूर्च्छायोऽपि पर्य्यायः। यत उक्तम्।

"संज्ञोपघातो मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा।
कश्मलं प्रलयो मोहः संन्यासस्तु मृतोपमः ॥" इति ॥

षडपि मूर्च्छा विवृणोति।

"वातादिभिः शोणितेन मद्येन च विषेण च।
षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ॥"

यत उक्तम्। मूर्च्छा पित्ततमःप्रायेति ॥ * ॥ पूर्व्वरूपमाह।

"हृत्पीड़ा जृम्भणं ग्लानिः संज्ञादौर्ब्बल्यमेव च।
सर्व्वासां पूर्व्वरूपाणि यथास्वं ता विभावयेत् ॥"

तत्र वातिकं मूर्च्छायमाह।

"नील वा यदि वा कृष्णमाकाशमथवारुणम्।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते ॥
वेपथुश्चाङ्गमर्द्दश्च प्रपीड़ा हृदयस्य च।
कार्श्यं श्यावारुणा छाया मूर्च्छाये वातसम्भवे ॥"

नीलं नीलवर्णम्। कृष्णं कज्जलाभम्। अरुणं अव्यक्तरागम्। तमः प्रविशति मूर्च्छति। श्यावारुणा छाया गात्रस्य ॥ * ॥ पैत्तिकमाह।

"रक्तं हरितवर्णं वा वियत् पीतमथापि वा।
पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते ॥
सपिपासः ससन्तापो रक्तपीताकुलेक्षणः।
सम्भिन्नवर्च्चाः पीताभो मूर्च्छाये पित्तसम्भवे ॥"

श्लैष्मिकमाह।

"मेघसङ्काशमाकाशं तमोभिर्व्वा घनैर्वृतम्।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्म्मणा।
सप्रसेकः सहृल्लासो मूर्च्छाये कफसम्भवे ॥"

मेघसङ्काशं शुभ्रमेघसङ्काशमित्यर्थः। यत आह सुश्रुतः।

"कफेन पश्येद्रूपाणि श्वेताभ्रप्रतिमानि तु।"

घनैर्निविड़ैस्तमोभिः। गुरुभिरङ्गैरुपलक्षितः। सुश्रुतेन मूर्च्छायः षड्विध उक्तः ॥ * ॥ चरकस्तु सान्निपातिकमपि मूर्च्छायमाह।

"सर्व्वाकृतिः सन्निपातादपस्मार इवागतः।
स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥"

अपस्मार इव तेन महताभिघातेन पतति चिरेण प्रतिबुध्यते। तर्हि तयोः को भेद इत्यत आह। स सान्निपातिको मूर्च्छायः विना बीभत्सचेष्टितैः फेनवमनदन्तघट्टनाक्षिविकृत्यादिभिः विना पातयति ॥ * ॥ रक्तजाया मूर्च्छाया निदानमाह।

"पृथिव्यम्बुस्तमोरूपं रक्तगन्धस्तदन्वयः।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ॥"

तमोरूपं तमोबहुलम्। मानवाश्च ये तामसाः न तु सात्त्विका राजसाश्च। अन्ये के वदन्ति नैषा युक्तिः समीचीना तर्हि चम्पकादिगन्धे नापि मूर्च्छा प्रसज्येत तत्रापि गन्धस्य पार्थिवत्वात्। अत आह।

"द्रव्यस्वभाव इत्येके यद्दृष्ट्वापि विमुह्यति।"

अत्राह भोजः।

"दर्शनादस्य नस्तस्मादन्धाश्चैव प्रमुह्यति ॥"

रक्तेन मूर्च्छितस्य लक्षणमाह।

"स्तब्धाङ्गदृष्टिस्त्वसृजा गूढ़ोच्छ्वासस्तु मूर्च्छितः।"

मद्यजविषजयोर्निदानमाह।

"गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः।
त एव तस्मात्ताभ्यान्तु मोहौ स्यातां यथेरितौ ॥"

ये गुणा लघुरूक्षाशु विशदव्यवायितीक्ष्णाविकासिसूक्ष्मोष्णानिर्द्देश्यरसत्वादयः। तैलादौ द्रव्ये यस्तात् तीव्राश्च सन्ति त एव गुणाः विषमद्ययोस्तु तीव्रतरत्वेन स्थिताः। तत्रापि भेदः। त एव मद्ये दृश्यन्ते विषे तु बलवत्तरा इति ॥ * ॥ मद्यजाया मूर्च्छाया लक्षणमाह।

"मद्येन प्रलपन् शेते नष्टविभ्रान्तमानसः।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत् ॥"

नष्टविभ्रान्तमानसः नष्टं सर्व्वथा स्मृतिहीनं विभ्रान्तं रज्जौ सर्पज्ञानयुक्तं मानसं यस्य सः। जरां जीर्णताम्। तत् मद्यम् ॥ * ॥ विषजाया लक्षणमाह।

"वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणम् ॥"

विषस्य मूलकन्दफलपत्रक्षीरादिभेदभिन्नस्य यथा स्वकं स्वकं लक्षणमुक्तं सौश्रुते कल्पस्थाने तल्लक्षणं मद्यापेक्षया तीव्रतरं वेदितव्यम्। ननु संज्ञानाशेन साधर्म्म्यान्मूर्च्छाभ्रमतन्द्रादीनां को भेद इत्यत आह।

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥"

रजःपित्तानिलाद्भ्रम इति नात्र समुच्चयः। केवलपित्तज्वरे भ्रमस्योक्तत्वात्। भ्रमश्चक्रारूढस्येव भ्रमदस्तुज्ञानं स्वदेहस्य भ्रमत इव ज्ञानं वा ॥ * ॥ तन्द्राया लक्षणमाह।

"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्द्दिशेत् ॥"

इन्द्रियाणामर्थः प्रयोजनं येषु तेषु अर्थाद् विषयेषु असंवित्तिः असम्यक् ज्ञानम्। इति इन्द्रियार्थासम्यग्ज्ञानादि। निद्रायां प्रवृत्तस्य क्लमाभावस्तन्द्रायान्तु प्रबोधितस्यापि क्लम इत्यनयोर्भेदः ॥ * ॥ क्लमस्य लक्षणमाह।

"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ॥"

इन्द्रियार्थप्रबाधकः इन्द्रियाणां बुद्धीन्द्रियाणां कर्म्मेन्द्रियाणाञ्च अर्थः प्रयोजनं विषयग्रहणं तस्य प्रबाधकः आवरकेण ॥ * ॥ निद्रालक्षणमाह।

"यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः।
विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ॥"

क्लान्ते ग्लाने श्रान्ते इति यावत्। कर्म्मात्मानः कर्म्मेन्द्रियाणि ज्ञानेन्द्रियाणि च क्लमान्विताः श्रान्ताः ॥ * ॥ संन्यासस्य संप्राप्तिपूर्व्वकं लक्षणमाह।

"वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम् ॥"

आक्षिप्य विनाश्य संन्यस्यन्ति मूर्च्छयन्ति। प्राणायतनं हृदयम्। संन्यस्तः मूर्च्छितः। काष्ठीभूतः क्रियारहितः। अतएव मृतोपम इति। सद्यःफलां क्रियां सूचीव्यधनजनावपीड़नकपिकच्छुघर्षणवृश्चिकादिदंशनादिरूपाम् ॥ * ॥ संन्यासस्य मूर्च्छातो भेदमाह।

"दोषेषु मदमूर्च्छाया गतवेगेषु देहिनः।
स्वयमप्युपशाम्यन्ति संन्यासो नौषधैर्विना ॥"

मदमूर्च्छायाः मदः अप्रवृद्ध उन्मादः। मूर्च्छायाः मूर्च्छाः ॥ * ॥ अथ मूर्च्छायाश्चिकित्सा।

"सेकावगाहा मणयः सहाराः
शीता प्रदेहा व्यजनानिलाश्च।
शीतानि पानानि च गन्धवन्ति
सर्व्वासु मूर्च्छास्वनिवारितानि ॥"

मणयश्चन्द्रकान्तादयः। हाराः मुक्तादिहाराः। शीताः प्रदेहाः सकर्पूरचन्दनाद्यनुलेपनानि। शीतानि पानानि सितामलकादिपानकानि। गन्धवन्ति कर्पूरादिसुगन्धवन्ति। सर्व्वासु मूर्च्छास्वनिवारितानि। अस्यायमभिप्रायः। सेकादीन्यासु मूर्च्छासु हितान्येव किन्तु वातश्लेष्मजास्वपि मूर्च्छासु न निवारितानि। तत्रापि पित्तस्य प्राधान्यात्।

"सिद्धानि वर्गे मधुरे पयांसि
सदाड़िमा जाङ्गलजा रसाश्च।
तथा यवा लोहितशालयश्च
मूर्च्छासु पथ्याः सततीनमुद्गाः ॥"

सतीनः कलायः।

"कोलमज्जोषणोशीरं केशरं शीतवारिणा।
पीतं मूर्च्छां जयेल्लीढ़ा कृष्णा वा मधुसंयुता ॥
शीतेन तोयेन भृशं स्नपयेत्तं
कृष्णाश्च पथ्यां मधुनावलिह्यात्।

कुर्य्याच नासावदनावरोधं
क्षीरं पिबेद्वाप्यथ मानुषीणाम् ॥
द्राक्षासिताद्राडिमलाजवन्ति
कक्कारनीलोत्पलपद्मवन्ति ।
पिबेत् कषायाणि च शीतलानि
पित्तज्वरं यानि च यापयन्ति ॥
शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनशिलावचैः ॥”
अन्यच्च ।
“अञ्जनं सम्यगारब्धं मधुसिन्धुशिलोषणैः ।
प्रमोहदोषहृ भवति भाषितं भिषजांवरैः ॥”
शिला मनःशिला । उषणं मरीचम् ।
“मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबो-
धनम् ॥”
अथ रक्तजादीनां मूर्च्छानां चिकित्सा ।
“रक्तजायान्तु मूर्च्छायां हितः शीतक्रिया-
विधिः ।
मद्यजायां पिबेन्मद्यं निद्रां सेवेत वा सुखम् ।
विषजायां विषघ्नानि भेषजानि प्रयोजयेत् ॥”
अथ संन्यासस्य चिकित्सा ।
“प्रभूतदोषस्तमसोऽतिरेकात्
संमूर्च्छितो नैव विबुध्यते यः ।
संन्यस्तसंज्ञः स हि दुश्चिकित्स्यो
नरो भिषग्भिः परिकीर्त्तितोऽसौ ॥
अञ्जनान्यवपीड़श्च धमाः प्रधमनानि च ।
सूचीभिस्तोदनं शस्तं दाहः पीडा नखान्तरे ॥
लुञ्चनं केशलोम्नाञ्च दन्तैर्दंशनमेव च ।
आत्मगुप्तावघर्षश्च हितस्तस्य प्रबोधने ॥”
अवपीड़ः कल्कीकृतौषधरसस्य नासापुटे
दानम् । नस्य संन्यस्तस्य ॥ * ॥ अथ मूर्च्छायां
रसः ।
“कणामधुयुतं सूतं मूर्च्छायां प्राशयेद्भिषक् ।
शीतसेकावगाहादि सर्व्वाङ्गे पीड़नं हठात् ॥”
सूतं मारितम् ।
“ताम्रचूर्णं समोशीरं केशरं शीतवारिणा ।
पीतं मूर्च्छां द्रुतं हन्यात् तृणमिन्द्राशनिर्यथा ॥”
ताम्रचूर्णं मारितताम्रचूर्णम् ॥ * ॥ अथ भ्रमस्य
चिकित्सा ।
पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये ।
पथ्याक्वाथेन संसिद्धं घृतं धात्रीरसेन वा ॥
शुण्ठीकणाशताह्वानां साभयानां पलं पलम् ।
गुड़स्य षट् पलान्येषा गुटिका भ्रमनाशिनी ॥
ताम्रं दुरालभाक्वाथैः पीतन्तु घृतसंयुतम् ।
निवारयेद्भ्रमं शीघ्रं तं यथा शम्भुभाषितम् ॥”
अथ तन्द्राया अतिनिद्रायाश्चिकित्सा ।
“तुरङ्गलालालवणोत्तमेन्द्र-
मनःशिलामागधिकामधूनि ।
नियोजितान्यञ्जनविनिश्चयेन
तन्द्रां सनिद्रां विनिवारयन्ति ॥”
इन्दुः कर्पूरम् ।
“सैन्धवं श्वेतमरिचं सर्षपः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥”
श्वेतमरिचं सिग्रुबीजम् ।
“शुण्ठीकणानागरसोषणानि
नस्येन तन्द्राभिजयोत्थणानि ।
क्षुद्रान्ततापौष्करनागराणि
भार्गीशिवाभ्यां क्वथितानि पानात् ॥”
शिवा हरीतकी । इति मूर्च्छाभ्रमतन्द्राति-
निद्रासंन्यासाधिकारः । इति भावप्रकाशः ॥
(अथास्यां पथ्यविधिः ।
“सेकावगाहौ मणयः सहाराः
शीताः प्रदेहा व्यजनानिलश्च ।
शीतानि पानानि च गन्धवन्ति
धारागृहं शीतमरीचिरोचिः ॥
धूमोऽञ्जनं लावणमप्यमोघो
दाहश्च सूचीपरितोदनानि ।
रोम्णां कचानामपि कर्षणानि
नखान्तपीड़ा दशनोपदंशः ॥
नासासुखद्वारमरुन्निरोधो
विरेचनच्छर्दनलङ्घनानि ।
क्रोधो भयं दुःखकरी च शय्या
कथा विचित्रा च मनोहरा च ॥
छायानभोऽम्भःशतधौतसर्पि-
र्मृदूनि तिक्तानि च लाजमण्डः ।
जीर्णा यवा लोहितशालयश्च
कौम्भं हविर्मुद्गसतीनयूषाः ॥
धन्वोद्भवा मांसरसाश्च रागाः
सषाडवा गव्यपयः सिता च ।
पुराणकुष्माण्डपटोलमोच-
हरीतकीदाडिमनारिकेलम् ॥
मधूकपुष्पाणि च तण्डुलीय
उपोदिकान्नानि लघूनि चापि ।
शशीरनीरं सितचन्दनानि
कर्पूरनीरं हिमवालुकी च ॥
अत्युच्चशब्दोऽद्भुतदर्शनानि
गीतानि वाद्यान्यपि चोत्कटानि ।
श्रमः स्मृतिश्चिन्तनमात्मबोधा-
धैर्य्यञ्च मूर्च्छावति पथ्यवर्गः ॥”
अथापथ्यविधिः ।
“ताम्बूलं पत्रशाकानि दन्तघर्षणमातपम् ।
विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटुम् ।
छर्द्दिनिद्रयोर्वेगरोधं तक्रं मूर्च्छामयी त्यजेत् ॥”
इति वैद्यकपथ्यापथ्यविधौ मूर्च्छाधिकारे ॥)

मूर्च्छालः, त्रि, (मूर्च्छा अस्त्यस्येति । “सिध्मादि-
भ्यश्च ।”५ । २ । ९७। इति लच् ।) मूर्च्छितः ।
इत्यमरः । २ । ६ । ६१ ॥

मूर्च्छितः, त्रि, (मूर्च्छास्य संजाता । मूर्च्छा+
तारकादित्वात् इतच् ।) मूर्च्छायुक्तः । तत्-
पर्य्यायः । मूर्त्तः २ मूर्च्छालः ३ । इत्यमरः ।२।
६ । ६१ ॥ (यथा, भट्टौ । ६ । २३ ।
“तथाभ्यषिक्तवारीणि पितृभ्यः शोकमूर्च्छितः ।”)
उच्छ्रयः । मूढ़ः । इति मेदिनी ॥ वृद्धः । इत्य-
जयः ॥ (व्याप्तः यथा, रामायणे ।२।११४।१९-२०॥
“किं नु खल्वद्य गम्भीरो मूर्च्छितो न निशाम्यते ।
यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥
वारुणीमदगन्धश्च माल्यगन्धश्च मूर्च्छितः ।
चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥”)

मूर्णः, त्रि, (मुर्व्वबन्धे+क्तः ।) बद्धः । इति मूर्ण-
शब्दटीकायां रायमुकुटः ॥

मूर्त्तः, त्रि, (मूर्च्छ+क्तः “राल्लोपः ।”६।४।२१।
इति छलोपः । “न ध्याख्यापॄमूर्च्छिमदाम् ।”८।
२ । ५७ । इति निष्ठातकारस्य नत्वाभावः ।)
मूर्च्छितः । इत्यमरः । २ । ६ । ६१ ॥ कठिनः ।
मूर्त्तिमान् । इति मेदिनी । ते, ४५ ॥
न्यायमते पृथिवी जलं तेजः वायुः मनश्च ।
एषां गुणाः । रूपं रसः गन्धः स्पर्शः परत्वं
अपरत्वं गुरुत्वम् । स्नेहः वेगश्च । मूर्त्तामूर्त्त-
साधारणगुणाः । यथा, भाषापरिच्छेदे ।
संख्या परिमितिः पृथक्त्वं संयोगः विभागश्च ।
(यथा, मार्कण्डेये । २३ । ४७ ।
“यच्चामूर्त्तं यच्च मूर्त्तं समस्तं
यद्वा भूतेष्वेकमेकञ्च किञ्चित् ।
यद्दिव्यस्ति क्ष्मातले खेऽन्यतो वा
त्वत्सम्बन्धं त्वत्करैर्व्यञ्जनैश्च ॥”)

मूर्त्तिः, स्त्री, (मूर्च्छ+क्तिन् । “न ध्याख्येति ।”
८ । २ । ५७ । इत्यस्मान्न तकारस्य नत्वम् ।)
काठिन्यम् । शरीरम् । इत्यमरः । ३ । ३ ॥
६६ ॥ (यथा, मनौ । १२ । १२० ।
“खं सन्निवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गाञ्च मूर्त्तिषु ॥”)
प्रतिमा । इति हेमचन्द्रः ॥ स्वरूपः । यथा,—
“आचार्य्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः
प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्त्तिर्म्माता साक्षात् क्षिते-
स्तनूः ॥
दयाया भगिनी मूर्त्तिर्धर्म्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्त्तिः सर्व्वभूतानि चात्मनः ॥”
इति श्रीभागवते । ६ । ७ । २९—३० ॥
(ब्रह्मसावर्णिपुत्रविशेषः । यथा, तत्रैव । ८ ।
१३ । २१—२२ ।
“ततस्तुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ।
सुवासना विरुद्धाद्या जयो मूर्त्तिस्तदा द्विजाः ॥”)

मूर्त्तिमत्, क्ली, (मूर्त्तिः काठिन्यमस्यास्ति । मूर्त्ति+
मतुप् ।) शरीरम् । इति हेमचन्द्रः ।३।२२७॥

मूर्त्तिमान्, [त्] त्रि, (मूर्त्तिरस्यास्ति । मूर्त्ति+
मतुप् ।) मूर्त्तविशिष्टः । यथा,—
“मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो
मूर्त्तिमान् ।”
इत्यादि श्रीभागवतम् ॥ (यथा च रघौ ।१२।६४।
“हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत् ।”
कुशपुत्रः । यथा, हरिवंशे । २७ । १२ ।
“कुशपुत्रा बभूवुर्हि चत्वारो देववर्च्चसः ।
कुशिकः कुशनाभश्च कुशाम्बो मूर्त्तिमांस्तथा ॥”
स्त्रियां ङीप् । यथा, महाभारते ।३।१०८।१४ ।
“दर्शयामास तं गङ्गा तदा मूर्त्तिमती स्वयम् ।”)

मूर्द्धकः, पुं, (मूर्द्धन्यभिषिक्त इति । मूर्द्धन्+ संज्ञायां कन् ।) क्षत्त्रियः । इति शब्दरत्नावली ॥
मूर्द्धकर्णी, स्त्री, छत्त्रम् । इति हारावली ॥
मूर्द्धखोलं, क्ली, (मूर्द्धः खोल इव ।) छत्त्रम् । इति त्रिकाण्डशेषः ॥
मूर्द्धजः, पुं, (मूर्द्ध्नि जायते । जन+डः ।) केशः । इति जटाधरः ॥ (यथा, वृहत्संहितायाम् । ६८ । ८२ ।
"बहुमूलविषमकपिला
स्थूलस्फुटिताग्रपरुषह्रस्वाश्च ।
अतिकुटिलाश्चातिघनाश्च
मूर्द्धजा वित्तहीनानाम् ॥")
मूर्द्ध्नि जाते, त्रि ॥
मूर्द्धन्यः, त्रि, (मूर्द्धन्+यत् ।)मूर्द्धनि भवः । यथा । ऋटुरषाः ट ठ ड ढ ण र षा मूर्द्धन्याः । इति मुग्धबोधव्याकरणम् ॥ (यथा च भागवते ।१। ७ । ५५ ।
"अर्ज्जुनः सहसाज्ञाय हरेर्हार्द्दमथासिना ।
मणिं जहार मूर्द्धन्यं द्विजस्य सहमूर्द्धजम् ॥")
मूर्द्धपुष्पः, पुं, (मूर्द्ध्नि पुष्पमस्य ।) शिरीषवृक्षः । इति शब्दमाला ॥ (गुणादयोऽस्य शिरीषशब्दे विज्ञेयाः ॥)
मूर्द्धरसः, पुं, (मूर्द्धन्यग्रदुपरिस्थो रसः ।) भक्तफेनः । इति शब्दचन्द्रिका ॥
मूर्द्धवेष्टनं, क्ली, (मूर्द्ध्नः वेष्टनम् ।) उष्णीषः । इति हेमचन्द्रः । ३ । ३३१ ॥
मूर्द्धा, [न्] पुं, (मूर्व्वति बध्नाति यत्रेति । मुर्व्व+ "श्वन् उक्षन् पूषन् । उणा० १ । १५८ । इति कनिन् । उकारस्य दीर्घः वकारस्य धकारश्च ।) मस्तकः । इत्यमरः । २ । ६ । ९५ । (यथा, वृहत्संहितायाम् । ७१ । २ ।
"लोहे पात्रे तन्दुलान् कोद्रवाणां
शुक्तिं पक्वांश्चोच्चपूर्व्वेण साकम् ।
पिष्टान् कृत्वा मूर्द्ध्नि शुक्लाम्बरस्य
दत्त्वा निर्द्दिशेद्यथावार्कपर्व्वे ॥")
मूर्द्धाभिषिक्तः, पुं, क्षत्त्रियः । राजा । इत्यमरः । ३ । ३ । ९१ ॥ मूर्द्धन्यभिषिक्तो मूर्द्धाभिषिक्तः राज्याभिषेकसमये प्रथमः क्षत्त्रियो मूर्द्धाभिषिक्तः । तत्प्रभवत्वात् योग्यतयाऽनभिषिक्तोऽपि मूर्द्धाभिषिक्तः । (यथा, भागवते । ६।१५।४१ ।
"राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः ।
तीर्थसंसेवया चांहो जह्यात्राङ्गाच्युतचेतनः ॥")
वर्णसङ्करविशेषः । स तु विप्रात् क्षत्त्रियायां जातः ॥ प्रधानः । इति भरतः ॥ मन्त्री । इति मेदिनी । ते, २३२ ॥
मूर्द्धावसिक्तः, पुं, वर्णसङ्करभेदः । स तु क्षत्त्रियायां ब्राह्मणेनोत्पादितः । यथा,—
"स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
सदृशानेव तानाहुर्म्मातृदोषविगर्हितान् ॥"
इति मानवे १० अध्याये ६ श्लोकः ॥ * ॥
'स्त्रीष्विति आनुलोम्येन अव्यवहितवर्णजातीयासु भार्य्यासु द्विजातिभिर्य्ये उत्पादिताः पुत्राः । यथा । ब्राह्मणेन क्षत्त्रियायां क्षत्त्रियेण वैश्यायां वैश्येन शूद्रायाम् । तान् मातृहीनजातीयत्वदोषेण गर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वादय आहुः । पितृसदृशग्रहणात् मातृजातेरुत्कृष्टाः पितृजातितो निकृष्टा ज्ञेयाः । एतेषाञ्च नामानि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्यादिभिरुक्तानि । इत्यथैषामुशनसोक्ताः । हस्त्यश्वरथशिक्षास्त्रधारणञ्च मूर्द्धावसिक्तानाम् । नृत्यगीतनक्षत्रजीवनं शस्यरक्षा च माहिष्याणाम् । द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षा च पारशवोग्रकरणानामिति । इति तट्टीकायां कुल्लूकभट्टः ॥
मूर्द्धा, [न्] पुं, (मूर्व्व+कनिन् । वस्य धः दीर्घश्चोकारस्य ।) शिरः । यथा,—
"मूर्द्धा मूर्द्धा शिरोदेशे पुंसि स्यातामिमौ समौ ।"
इत्युणादिकोषः ॥
मूर्व्वी बद्धे मूर्द्धा मूर्द्धा च । अस्य धढ्ध्वढौ । इति तट्टीका ॥ (यथा, देवीभागवते ।२।७।०८।
"दृष्ट्वा वेणीं लतां मूर्द्ध्नि कज्जलं लोचने तथा ।
असिं गृहीत्वा तरसा छेत्स्याहं नान्यथा सुखम् ॥")
मूर्व्वा, स्त्री, (मूर्व्वति इति । मुर्व्व+अच् टाप् ।) लताविशेषः । धनुर्गुणोपयुक्ता मुरगा इति ख्याता । तत्पर्य्यायः । देवी २ मधुरसा ३ मोरटा ४ तेजनी ५ स्रवा ६ मधूलिका ७ धनुःश्रेणी ८ गोकर्णी ९ पीलुपर्णी १० । इत्यमरः । २ । ४ । ८३ ॥ स्रुवा ११ मूर्व्वी १२ । मधुश्रेणी १३ धनुः १४ श्रेणी १५ । इति तट्टीकायां भरतः ॥ सुरङ्गिका १६ । देवश्रेणी १७ पृथक्त्वचा १८ मधुस्रवा १९ अतिरसा २० पीलुपर्णिका २१ दिव्यलता २२ ज्वलिनी २३ गोपवल्ली २४ । अस्या गुणाः । अतितिक्तत्वम् । कषायत्वम् । उष्णत्वम् । हृद्रोगकफवातवमिप्रमेहकुष्ठविषमज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मूर्व्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत् ।
त्रिदोषतृष्णाहृद्रोगकण्डुकुष्ठज्वरापहा ॥"
इति भावप्रकाशः ॥
(तथाऽस्याः पर्य्यायः ।
"तेजनी पिशुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ॥
"मूर्व्वा मधुरसा ज्ञेया तेजनी तिक्तवल्कला ।"
इति गारुडे २०८ अध्याये ॥)
मूल क रोपणे । इति कविकल्पद्रुमः ॥ (चुरा० उभ०-सक०-सेट् ।) दीर्घी रोपणमारोपणम् । क मूलयति वृक्षं लोकः । गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं करोति व्याख्याति । इति दुर्गादासः ॥
मूल च प्रतिष्ठायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सेट् ।) पवर्गशेषादिरयम् । प्रतिष्ठा स्थितिरिति गोविन्दभट्टः । च मूलति मूलते वृक्षः । अयं परस्मैपदीत्यन्ये । इति दुर्गादासः ॥
मूलं, क्ली, (मवति बध्नाति वृक्षादिकमिति । मू+ "मूशक्यविभ्यः क्लः ।" उणा० ४।१०८ । इति क्लः ।) शिफा । शिकड़ इति भाषा । तत्पर्य्यायः । ब्रध्नः २ अङ्घ्रिनामकः ३ । इत्यमरः ।२।४।१२॥ कन्दः ४ व्रधः ५ । इति शब्दरत्नावली ॥ जटा ६ । इति जटाधरः ॥ (यथा, मनौ ।३।२२७ ।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ।
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥")
आद्यम् ॥ (यथा, महाभारते ।१।१६१।१।
"श्रुतोऽमूलमिदं दुःखं ज्ञातुमिच्छामि तत्त्वतः ।
विदित्वाप्यपकर्षेयं शक्यञ्चेदपकर्षितुम् ॥")
नक्षत्रविशेषः ॥ (यथा, मार्कण्डेये ।३३।१३।
"कुर्व्वन्त्यनुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यमुत्तमम् ॥"
निकुञ्जः । अन्तिकम् । इति विश्वः ॥ (यथा, मार्कण्डेये । ८६ । ६ ।
'जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ।)
मूलवित्तम् । इति भरतधृतमेदिनी ॥ (यथा, मनौ । ८ । २०२ ।
"अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः ।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥")
निजम् । इत्यजयपालः ॥ चरणम् । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । १० । ८७ । १० ।
"अधा मूलं यातुधानस्य वृश्च ।"
"मूलं पादम् ।" इति तद्भाष्ये सायणः ॥)
टीकाद्यग्रन्थः । यथा । ममाजवलेत्यादि मूलम् । इति सम्मतिपक्षे गदाधरभट्टाचार्य्यः । शरणम् । इति शब्दचन्द्रिका ॥ पिप्पलीमूलम् । पुष्करमूलम् । इति राजनिर्घण्टः ॥ विशेषमूलस्य अन्वेषणनिषेधो यथा,—
"नदीनामग्निहोत्राणां भारतस्य कुलस्य च ।
मूलान्वेषो न कर्त्तव्यो मूलाद्दोषो न हीयते ॥"
इति गारुडे ११६ अध्यायः ॥
(कारणम् । यथा, मनौ । ११ । ८४ ॥ *
"धर्म्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते ।
"मूलं कारणम् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)
मूलः, त्रि, (मूलतीति । मूलप्रतिष्ठायाम्+कः ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतोनविंशनक्षत्रजम् । यथा,—
"हस्ता स्वाती श्रवणा अश्लेषे मृगशिरो नपुंसि ।
स्यात् पुंसि पुनर्व्वसुपुष्यौ मूलञ्च स्त्रियां शेषाः ॥"
इति तिथ्यादितत्त्वम् ॥
"मूलमाद्ये शिफायाञ्च निकटे भे तु वाच्यि-याम् ।"
इति शब्दरत्नावली च ॥

स तु निर्ऋतिदेवताकः। इति ज्योतिस्तत्त्वम् ॥ सिंहपुच्छाकारः। इति सुहूर्त्तचिन्तामणिः ॥ शुभमूर्त्तिर्नवतारामयश्च। अस्मिन् मल्लकोपर्य्युदिते मीनजमस्त्यादौ पक्षानि गतानि भवन्ति। यथा,—

"मौलिभाजि नवतारकाङ्किते
मूलभे सुतनु! शुभमूर्त्तिनि।
लिप्तिकाष्टकमरालकुन्तले
निर्जगाम पृथुरोमलम्पतः ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

अस्मिन् नक्षत्रे जातस्य फलम्।

"मूलं विवहावयवं कमूलं
कुलं दहत्येव वदन्ति सन्तः।
चेदन्यथातः पुरुषा विशेषात्
सौभाग्यमायुश्च कुलाद्युवृद्धिः ॥"

इति कोष्ठीप्रदीपः ॥

अस्मिन् मांसभक्षणनिषेधो यथा,—

"चित्रासहस्ताश्रवणासु तैलं
क्षौरं विशाखाप्रतिपत्सु वर्ज्यम्।
मूले मृगे भाद्रपदासु मांसं
योषिन्मघाकृत्तिकयोत्तरासु ॥"

इति तिथ्यादितत्त्वम् ॥

मूलकं, क्ली, पुं, (मूल + संज्ञायां कन्।) कन्दविशेषः। मूला इति भाषा। तत्पर्य्यायः। राजालुकः २ महाकन्दः ३ हस्तिदन्तकः ४। इति हारावली ॥ नीलकण्ठम् ५ मूलाकम् ६ दीर्घमूलकम् ७ अत्र दीर्घपत्रकमपि पाठः। श्वेतक्षारम् ८ कन्दमूलम् ९ हस्तिदन्तम् १० सितम् ११ शुभ्रमूलम् १२ हरितपर्णम् १३ रुचिरम् १४ दीर्घकन्दकम् १५ कुञ्जरक्षारमूलम् १६। अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। कटूष्णगौर्य्यदीपकत्वम्। दुर्नामगुल्महृद्रोगवातनाशित्वम्। रुचिदत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः ॥ * ॥ अपि च।

"बालमूलकपत्री तु रोचनी वह्निदीपनी।
मूलकं गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत् ॥
तदेव स्निग्धसिद्धन्तु पित्तलं कफवातनुत्।
शुष्कं त्रिदोषशमनं शोथघ्नं गरजिल्लघु ॥
तत्पुष्पं कफपित्तघ्नं तत्फलं कफवातजित् ॥"

इति राजवल्लभः ॥

अन्यच्च।

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
शालामर्कटकं विस्रं शालेयं मरुसम्भवम् ॥
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका।
नैपालमूलकञ्चान्यत्तद्भवेद्गजदन्तवत् ॥
लघुमूलकमुष्णं स्याद्धृद्यं लघु च पाचनम्।
दोषत्रयहरं स्वर्य्यं ज्वरश्वासविनाशनम् ॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम्।
महत्तद्रूक्षमुष्णं गुरु दोषत्रयप्रदम्।
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ॥"

इति भावप्रकाशः ॥

(तथाचास्य गुणाः।

"बालं दोषहरं वृद्धं त्रिदोषं मारुतापहम्।
स्निग्धसिद्धं विशुष्कन्तु मूलकं कफवातजित् ॥"

इति चरके सूत्रस्थाने। २७ अध्यायः ॥)

सौरमाघे तद्भक्षणे दोषो यथा,—

"मकरे मूलकञ्चैव सिंहे चालाबुकन्तथा।
कार्त्तिके सूरणञ्चैव सद्यो गोमांसभक्षणम् ॥"

इति कर्म्मलोचनम् ॥

पौर्णमास्यान्तमाघमुपक्रम्य।

"पितृणां देवतानाञ्च मूलकं नैव दापयेत्।
ददन्नरकमाप्नोति भुञ्जीत ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम्।
अन्यथा याति नरकं चान्ते विट् शूद्र एव च ॥
तथा।
"वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत्।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥"

इति मलमासतत्त्वम् ॥

मूलकः, पुं, (मूले जातः। मूल + "पूर्व्वाह्णापराह्णार्द्रामूलप्रदोषावस्करादुवुन्।" ४। ३। २८। इति वुन्।) चतुर्स्त्रिंशत्स्थावरविषजातान्तर्गतविषभेदः। इति हेमचन्द्रः। ४। २६८ ॥ (मूलप्रकार इति। मूल + "स्थूलादिभ्यः प्रकारवचने कन्।" ५। ४। ३। इति कन्। मूलस्वरूपः। यथा, भागवते। ९। ९। ४१।
"नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥")

मूलकपर्णी, स्त्री, (मूलकस्य पर्णमिव समानत्वादं पर्णमस्याः। ङीष्।) शोभाञ्जनः। इति रत्नमाला ॥

मूलकर्म्म, क्ली, (मूलञ्च तत् कर्म्म चेति।) औषध्यादिमूलेन यत् उच्चाटनस्तम्भनवशीकरणादिकर्म्म। जो इति ख्यातम्। इति भरतः ॥ टोना इति मुकुटः ॥ तत्पर्य्यायः। कार्म्मणम् २। इत्यमरः। ३। २। ४ ॥ जनपदाशुद्धुपपातकान्तर्गतोपपातकविशेषः। यथा,—

"सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्।
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म्म च ॥"

इति मनुः। ११। ६४ ॥

"मन्त्रौषधादिना वशीकरणम्।" इति मूलकर्म्मशब्दव्याख्यायां कुल्लूकभट्टः ॥

मूलकमूला, स्त्री, (मूलकमिव मूलमस्याः।) चीरकञ्चुकीटचः। इति रत्नमाला ॥

मूलकारः, पुं, (मूलं करोतीति। कृ + कर्म्मण्यण्। इत्यण्।) मूलग्रन्थकर्त्ता। यथा। नायं गणकारः किन्तु मूलकारः। इति संक्षिप्तसारटीकायां गोयीचन्द्रः ॥

मूलकारिका, स्त्री, (मूलकारक + स्त्रियां टाप्। अकारस्येत्वम्।) चुल्ली। इति हारावली ॥ मूलग्रन्थार्थप्रकाशकपद्यम्। मूलधनस्य वृद्धिविशेषश्च ॥

मूलकृच्छ्रं, क्ली, (मूलेन तद्रसपानेन कृच्छ्रम्।) एकादशविधपर्णकृच्छ्रव्रतान्तर्गतव्रतविशेषः। यदा कथितानि तृणमूलानि मासं पीयन्ते तदा मूलकृच्छ्रव्यपदेशं लभते। यथाह मार्कण्डेयः।

"पत्रैर्मासेन कथितः पत्रकृच्छ्रो मनीषिभिः।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा ॥
मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ॥
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु ॥"

इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

(पुंलिङ्गोऽप्ययं मार्कण्डेयपुराणोक्तत्वात्।)

मूलजं, क्ली, (मूलात् जायते इति। जन + डः।) आर्द्रकम्। इति राजनिर्घण्टः ॥ (विशेषोऽस्यार्द्रकशब्दे ज्ञातव्यः ॥)

मूलजः, पुं, (मूलाद् जायते। जन + डः।) उत्पलादिः। इति हेमचन्द्रः। ४। २६६ ॥ मूलोद्भवे त्रि ॥

मूलत्रिकोणं, क्ली, (मूलञ्च तत्त्रिकोणञ्चेति।) अर्कादिग्रहाणां राशिरूपस्थानविशेषः। स तु रवेः सिंहः। चन्द्रस्य वृषः। कुजस्य मेषः। बुधस्य कन्या। गुरोर्धनुः। भृगोस्तुला। शनेः कुम्भः। यथा,—

"सिंहो वृषश्च मेषश्च कन्या धन्वी धटो घटः।
अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात् ॥"

अथ मूलत्रिकोणांशव्यवस्था।

"रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः।
नखरविदिक्तिथिमन्वरा शीतोर्दिग्भांशका स्वभात् ॥"

इति ज्योतिस्तत्त्वम् ॥

मूलदेवः, पुं, (मूलञ्चासौ देवो राजा चेति।) कंसराजः। इति त्रिकाण्डशेषः ॥

मूलद्रव्यं, क्ली, (मूलञ्च तद्द्रव्यञ्चेति।) मूलधनम्। इति हेमचन्द्रः। ३। ५३३ ॥

मूलधनं, क्ली, (मूलञ्च तद्धनञ्चेति।) आदिद्रव्यम्। पुँजी इति भाषा। तत्पर्य्यायः। परिपणम् २ नीवी ३। इत्यमरः। २। ९। ८० ॥

मूलपर्णी, स्त्री, (मूले पर्णमस्याः। ङीष्।) मण्डूकपर्णी। इति रत्नमाला ॥

मूलपुष्करं, क्ली, (मूले पुष्करमस्य। पुष्करमिव मूलमस्येति वा।) पुष्करमूलम्। इति राजनिर्घण्टः ॥

मूलपोती, स्त्री, (मूलप्रधाना पोती।) पूतिकाशाकभेदः। तत्पर्य्यायः। क्षुद्रवल्ली २ पोतिका ३ क्षुद्रपोतिका ४ क्षुपोपोदकनाम्नी ५ वल्लिशाकटपोतिका ६। अस्या गुणाः। त्रिदोषघ्नत्वम्। वृष्यत्वम्। बल्यत्वम्। लघुत्वम्। बलपुष्टिकारित्वम्। रुच्यत्वम्। जठरानलदीपनत्वञ्च। इति राजनिर्घण्टः ॥

मूलप्रकृतिः, स्त्री, (मूला चासौ प्रकृतिश्चेति।) आद्या शक्तिः। यथा,—

"सर्व्वप्रसूता प्रकृतिः श्रीकृष्णः प्रकृतेः परः।
न शक्तः परमेशोऽपि तां शक्तिं प्रकृतिं विना।

सृष्टिं विधातुं मायेशो न शक्तिर्मायया विना
सा च कृष्णे तिरोभूता सृष्टिसंहारकारके ।
आविर्भूता सृष्टिकाले सा च नित्या यथेश्वरः
कुलालश्च घटं कर्त्तुं यथाशक्तो मृदं विना ।
स्वर्णं विना स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥
सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया ।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी ।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
वागधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी ।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ।
मायया सृष्टिकाले च तद्विना न भवेद्भवः ॥
सृष्टिश्च प्रतिबिम्बं च ब्रह्मन् ! ब्रह्मोद्भवा सदा ।
पाता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४० अः ॥

मूलफलदः, पुं, (मूले च फलं ददातीति । दा + कः ।) पनसवृक्षः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विषयो ज्ञातव्यः ॥)

मूलभद्रः, पुं, (मूलश्चासौ भद्रश्चेति ।) कंसराजः । इति त्रिकाण्डशेषः ॥

मूलरसः, पुं, (मूले रसोऽस्याः ।) मोरटलता । इति रत्नमाला ॥

मूलशाकटः, त्रि, (मूलानां भवनं क्षेत्रम् । मूल + "भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ।" ५ । [illegible] । इत्यत्र वार्त्तिकबलात् शाकटः ।) मूल[illegible] क्षेत्रवाच्ये शाकटप्रत्ययेन निष्पन्नम् ॥

मूलशाकिनः, त्रि, (मूल + शाकिनः ।) क्षेत्रवाच्ये शाकिनप्रत्ययेन निष्पन्नम् ॥

मूला, स्त्री, (मूलानि बहुलानि सन्त्यस्याः । मूल + अर्श आदित्वादच् टाप् ।) शतावरी । इति राजनिर्घण्टः ॥ मूलनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, कालनाथविरचिते इन्द्रजाले १ अध्यायः ।
"द्वितीयां पञ्चमीमष्टम्यां कारयेत् शान्तिकर्म्म च ।
अश्विनीमृगमूलाश्च पुष्या पुनर्व्वसुस्तथा ॥")

मूलाधारः, पुं, (मूलानामाधारः । मूलं प्रधानं आधार इति वा ।) गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थानम् । स तु शरीरस्थसकलनाडीनां मूलस्थानम् । अत्र व श ष स सान्तरयुक्तस्वर्णवर्णचतुर्द्दलपद्ममस्ति । तन्मध्ये इच्छाज्ञानक्रियारूपत्रिकोणं वर्त्तते । तन्मध्ये कोटिसूर्य्यसमप्रभस्वयम्भुलिङ्गमस्ति । अत्र पृथिवी वर्त्तते । तत्रैव त्र्यावलरूपवत् सूक्ष्मसार्द्धत्रिवलयाकार स्वयम्भुलिङ्गवेष्टितविद्युत्तुल्यप्रभकुलकुण्डलिनी वर्त्तते । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे हेमवर्णाभं व स वर्णचतुर्द्दलम् ॥"
इति तन्त्रसारः ॥

"अथाधारपद्मं सुषुम्नास्यलग्नं
ध्वजाधो गुदोर्द्ध्वं चतुःशोणपत्रम् ।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥
अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि शूलाष्टकैरावृतं तत् ।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम् ॥
वज्राख्या वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत्त्रैपुराख्यं तडिदिव विलसत् कोमलं कामरूपम् ।
कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः ॥
तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः ।
विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपप्रकारः ॥
अस्योर्द्ध्वे बिसतन्तुसोदरलसत् सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं सञ्छादयन्ती स्वयम् ।
शङ्खावर्त्तनिभा नवीनचपलामाला विलासास्पदा
सुप्ता सर्पसमा शिवोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥"
इति श्रीतत्त्वचिन्तामणौ षट्चक्रभेदः ॥*॥

तत्रस्थतीर्थानि यथा, रुद्रयामले ।
"इड़ा मलस्थाननिवासिनी या
सूर्य्यात्मिका या यमुनाप्रवाहिका ।
तथा सुषुम्ना मलदेशगामिनी
सरस्वती रचति मज्जनात्मकम् ॥
मनोगतस्नानपरो मनुष्यो
मन्त्रक्रियायोगविशिष्टतत्त्ववित् ।
महौघतीर्थे त्रिमले जले सदा,
मूलाम्बुजे स्नाति समुक्तिभाग्भवेत् ॥
सर्व्वाणि तीर्थे सुरतीर्थपावनी
गङ्गा महासत्त्वविनिर्गता सती ।
करोति पापक्षयमेव मुक्तिं
ददाति साक्षादमलार्थपुण्यदा ॥"

मूलाह्वं, क्ली, (मूलमाह्वा आख्या यस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

मूली, [न्] पुं, (मूलमस्यास्तीति । मूल + इनिः ।) वृक्षः । इति शब्दचन्द्रिका ॥ (स्त्रियां ङीप् । ओषधिः । यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।
"चक्रकामोषधिं विद्याज्ज्वरात्तुनिवारिणीम् ।
मूलिनीपञ्चभिः पत्रैः सुरक्ताशुककोमलैः ॥")

मूली, स्त्री (मूल + गौरादित्वात् ङीष् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥ (नदीभेदः । यथा, मात्स्ये । ११४ । ३१ ।
"ताम्रपर्णी तथा मूली शरवा विमला तथा ॥")

मूलेरः, पुं, (मूलतीति । मूल + "मूलेरादयः ।" उणा० १ । ६२ । इत्येरक् । जटा । इत्युणादिकोषः ॥ राजा । इत्युज्ज्वलदत्तः ।)

मूल्यं, क्ली, (मूलेन आनाम्यते अभिभूयते मूलेन समं वा इति । मूल + "नौवयोधर्म्मेत्यादिना ।" ४ । ४ । ९१ । इति यत् ।) पटादीनामुत्पत्तिकारणम् । मूलं मूलेन क्रयविक्रयार्थमिदं ढघे काहिति यः । इति भरतः ॥ दर इति दाम इति च भाषा । तत्पर्य्यायः । वस्नः २ अवक्रयः ३ । इत्यमरः । २ । १० । ३६ ॥ (यथा, मनौ । ८ । ३२२ ।
"पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥")
मूल्यते अर्प्यते इदम् । माहिना इति भाडा इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः ५ भर्म्म ६ वेतनम् ७ भरण्यम् ८ भरणम् ९ निर्व्वेशः १० पणः ११ । इति च अमरः । २ । १० । ३८ ॥ (यथा, मिताक्षरायाम् ।
"मूल्येन यः कर्म्म करोति स भृतकः ।")

मूल्यं, त्रि, (मूलं रोपणमर्हतीति । मूल + यत् ।) प्रतिष्ठायोग्यः । रोपणयोग्यः । इति मूलधात्वर्थदर्शनात् ॥ (मूलत उत्पाद्यते इति । "मूलमस्यावर्हि ।" ४ । ४ । ८८ । इति यत् । मूलतउत्पाटनयोग्ये मुद्गादौ ॥)

मूष स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) षष्ठस्वरी । यो मूषति परद्रव्यम् । इति हलायुधः ॥ ह्रस्वीत्वे । मोषति । इति दुर्गादासः ॥

मूषः, पुं-स्त्री, (मोषति अपहरतीति । मूष + इगुपधत्वात् कः ।) मूषिकः ॥ (यथा, पञ्चतन्त्रे । ३ । २२९ । "एष प्रतिभाति ते मूषराजः ।") तैजसावर्त्तनी । इति शब्दरत्नावली ॥

मूषकः, पुं-स्त्री, (मूष + स्वार्थे कन् ।) उन्दुरुः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ३३ । १६ ।
"रजसाभ्यवकीर्णानि परित्यक्तानि दैवतैः ।
मूषकैः परिधावद्भिरुद्बिलैरावृतानि च ॥")

मूषककर्णी, स्त्री, (मूषिकस्य कर्णवत् पत्राण्यस्याः । ङीष् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

मूषकमारी, स्त्री, (मूषकं उन्दुरं मारयतीति, मृ+णिच्+“कर्म्मण्यण् ।” ३ । २ । १ । इति अण् । ङीष् ।) सुतश्रेणीवृक्षः । इति राजनिर्घण्टः ॥

मूषका, स्त्री, (मूषक+स्त्रियां टाप् । क्षिपकादित्वात् न अत इत्वम् ।) मूषिका । इति शब्दरत्नावली ॥

मूषकारातिः पुं, (मूषकाणां अरातिः घातकः ।) विडालः । इति राजनिर्घण्टः ॥ मूषिकारातिः । इति च पाठः ॥

मूषा, स्त्री, (मूषति गृह्णातीति । मूष+कः+स्त्रियां टाप् ।) स्वर्णाद्यावर्त्तनपात्रम् । मूची इति भाषा ॥ (यथा, पञ्चदश्याम् । ४ । २ ।

“मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥”)

तत्पर्य्यायः । तैजसावर्त्तनी २ । इत्यमरः । २ । १० । ३३ ॥ मुषा ३ मुषी ४ आवर्त्तनी ५ मूषी ६ । इति भरतः ॥

“इष्टङ्काके तुषैः पूर्णे मध्ये मूषां विधारयेत् ।
वह्निमाग्निं सुदद्याद्गोलकं तद्गोलकं पुटमुच्यते ॥”

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

मूषिका ७ । इति रमानाथः ॥ देवताडकः । इति शब्दचन्द्रिका ॥ मूषिकस्त्रीजातिः । इति शब्दरत्नावली ॥ गवाक्षः । यथा,—

“एकद्वित्र्यादिमूषावहनमितिमहो ब्रूहि मे भूमिभर्त्तुर्-
हर्म्म्ये रम्येऽष्टमूषे चतुरविरचिते श्लक्ष्णशाला-विशाले ।”

इत्यादि लीलावत्यां श्रेढीव्यवहारः ॥

मूषाकर्णी, स्त्री, (मूषायाः कर्णौ इव पत्राण्यस्याः ।) आखुकर्णी । इति शब्दरत्नावली ॥

मूषातुत्थं, स्त्री, (मूषाजातं तुत्थम् ।) नीलतुत्थम् । तत्पर्य्यायः । कांस्यनीलम् २ हेमतुत्थम् ३ वितुन्नकम् ४ । इति हेमचन्द्रः । ४ । ११८ ॥

मूषिकः, पुं (मुष्णाति द्रव्याणीति । मुष+“मुषेर्दीर्घश्च ।” उणा० २ । ४२ । इति किकन् दीर्घश्च ।) जन्तुविशेषः । इन्दुर इति भाषा । (यथा, हितोपदेशे मित्रलाभप्रकरणे । १३१ ।

“धनेन बलवान् सर्व्वो धनाद्भवति पण्डितः ।
पश्यायं मूषिकः पापः स्वजातिसमतां गतः ॥”)

तत्पर्य्यायः । उन्दुरः २ आखुः ३ । इत्यमरः । २ । ५ । १२ ॥ मूषः ४ मूषीकः ५ उन्दुरुः ६ वभ्रुः ७ वृषः ८ आखनिकः ९ वृषः १० । इति शब्दरत्नावली ॥ मूषकः ११ पिङ्गः १२ उन्दुरकः १३ नखी १४ खनकः १५ विलकारी १६ धान्यारिः १७ बहुप्रजः १८ । अस्य मांसगुणाः ।

“अहिनकुलशल्यगोधामूषकमुख्या विलेशयाः कथिताः ।
वातानिलकासहरं तन्मांसं पित्तदाहकरम् ॥
अन्ये विलेशया ये स्युः केकिङ्कोन्दुरुकादयः ।
गर्हितं तस्य मांसञ्च मधुगौरवदुर्ज्जरम् ॥”

इति राजनिर्घण्टः ॥

अपि च ।

“मूषिको मधुरः स्निग्धो व्यवायी बलवर्द्धनः ।”

इति राजवल्लभः ॥*॥

पारिभाषिकमूषिको यथा,—

“विभवे सति नैवात्ति न ददाति जुहोति च ।
तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुध्यति ॥”

इति मार्कण्डेयपुराणे आचाराध्यायः ॥

(जनपदविशेषः । यथा, महाभारते ।६।९।५८।

“द्रविडाः केरलाः प्राच्या मूषिका वनवासिकाः ॥”)

मूषिकपर्णी, स्त्री, (मूषिककर्णवत् पर्णानि यस्याः ।) जलजलताविशेषः । इँदुरकाणीपाना इति भाषा । (यथा, चरके विमानस्थाने सप्तमेऽध्याये ।

“मूषिकपर्णीं समूलाग्रप्रतानामपहृत्य ॥”)

तत्पर्य्यायः । चित्रा २ उपचित्रा ३ न्यग्रोधी ४ द्रवन्ती ५ शम्बरी ६ वृषा ७ प्रत्यक्श्रेणी ८ सुतश्रेणी ९ रण्डा १० । इत्यमरः । २।४।८८ ॥ पुत्रश्रेणी ११ आखुपर्णिका १२ वृषपर्णी १३ आखुपर्णी १४ मूषिका १५ फञ्जिपत्रिका १६ । इति रत्नमाला ॥ मूषिपर्णिका १७ सचित्रा १८ मूषीकर्णी १९ सुकर्णिका २० । इति शब्दरत्नावली ॥

मूषिका, स्त्री, (मूषिक+अजादित्वात् टाबित्युज्ज्वलदत्तः ।) मूषिकपर्णी । इति रत्नमाला ॥ उन्दुरः । इति शब्दरत्नावली ॥ मूषा । इत्यमरटीकायां रमानाथः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।

“चीरं महापञ्चमूलं मूषिकां चाम्रवर्ज्जिताम् ।”)

मूषिकाङ्कः, पुं, (मूषिकः उन्दुरुर्वाहनत्वेन अङ्कः चिह्नमस्य ।) गणेशः । इति जटाधरः ॥

मूषिकाञ्चनः, पुं, (मूषिकं अञ्चति स्ववाहनतया प्राप्नोतीति । अन्च्+ल्युः ।) गणेशः । इति त्रिकाण्डशेषः ॥

मूषिकारातिः पुं,(मूषिकाणामरातिः ।) विडालः । इति राजनिर्घण्टः ॥

मूषिकाह्वयः, पुं, (मूषिकस्य आह्वा आख्या यस्य ।) मूषिकपर्णी । इति जटाधरः ॥ (तथास्य पर्य्यायः ।

“दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः ।
द्रवन्तीनामतश्चित्रा न्यग्रोधा मूषिकाह्वयाः ॥”

इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

मूषिपर्णिका, स्त्री, (मूषिपर्णा+कन् टाप् अत इत्वम् ।) मूषिकपर्णी । इति शब्दरत्नावली ॥

मूषी स्त्री, (मूष्+कः । स्त्रियां ङीष् । मूषा । स्वर्णाद्यावर्त्तनपात्रम् । इत्यमरटीकायां भरतः ॥ महामूषिकः । यथा,—

“अन्यो महामूषिकः स्यान्मूषी विघ्नेशवाहनः ।
महाङ्गः शस्यमारी च भूफलो भित्तिपातनः ॥”

इति राजनिर्घण्टः ॥

मूषीकः, पुं, स्त्री, (मोषति इति । मुष+बाहुलकात् ईकन् ।) मूषिकः । इति शब्दरत्नावली ॥

मूषीककर्णी, स्त्री, (मूषीकस्य कर्णवत् पर्णमस्याः ।) मूषिकपर्णी । इति शब्दरत्नावली ॥

मूषीका, स्त्री, (मूषीक+टाप् ।) उन्दुरः । यथा,

“दीना मूषीका मूषा च मूषीका मूषिकेऽपि ।”

इति शब्दरत्नावली ॥

मूष्यायणः, त्रि, (मोषति अपहरतीति । मूष+कः चौरजारः । तस्यापत्यम् इति । मूष+फक् । बाहुलकात् वृद्ध्यभावः ।) अज्ञातपितृकः । गूढोत्पन्नः । इति केचित् ॥

मृ, ङ श मृतौ । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-अनिट् ।) मृतिः प्राणत्यागः । ङ श म्रियते प्राणी । ङित्त्वेऽप्यस्य मृ ङ शीङि ममिति नियमेन अन्यत्र परस्मैपदम् । ममार मर्त्ता मरिष्यति अमरिष्यत् । इति दुर्गादासः ॥

मृकण्डकः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरादित्वात् गलोपे मृकण्डुः मृकण्ड इति केचित् तत्र पठन्ति इत्युज्ज्वलदत्तः । ततः संज्ञायां कन् ।) मृकण्डुमुनिः । इति शब्दरत्नावली ॥

मृकण्डुः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरादित्वात् गलोपः । इत्युज्ज्वलदत्तः ।) मुनिविशेषः । (यथा, मार्कण्डेये । ५२ । १६ ।

“प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ।”)

तस्य पुत्रो मार्कण्डेयः । यथा,—

“मार्कण्डेयोऽपि मार्कण्डो मृकण्डुश्च मृकण्डकः ।”

इति शब्दरत्नावली ॥

मृग त् क ङ मार्गणे । (चुरा०-आत्म०-सक०-सेट् ।) ङ रामो मृगं मृगयते वनवीथिकासु । इति महानाटकम् । कातन्त्रादौ [illegible] अन्वेषणे इति दिवादिपरस्मैपदी [illegible] दृश्यते दुर्गत्रिलोचनयोरसम्मतत्वात् अनेनोपेक्षितः । मृग्यन्तः पदवीं तथाप्यकरुणा व्याधा न मुञ्चन्ति माम् । इति तु अकारान्तस्यैव भावे क्विपि अकारलोपे मृगं करोतीति कण्ड्वादित्वात् यकि साध्यम् । इति दुर्गादासः ॥

मृगः, पुं, (मृगयते अन्वेषयति तृणादिकं मृग्यते वा इति । मृग्+इगुपधत्वात् कर्त्तरि च कः ।) पशुमात्रम् । (यथा, मनुः । ५ । ९ ।

“आरण्यानाञ्च सर्व्वेषां मृगाणां माहिषं विना ।”

मृगशब्दोऽत्र महिषपर्य्युदासात् पशुमात्रपरः । इति तट्टीकायां कुल्लूकः ।) हस्तिविशेषः । नक्षत्रभेदः । (यथा, इन्द्रजालतन्त्रे ।

“अश्विनी मृगमूलाश्च पुष्या पुनर्व्वसुस्तथा ॥”)

अन्वेषणम् । (यथा, साहित्यदर्पणे । ४ । १७ ।

“जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।

कृतानकाभस्तैर्वेदनपरिपाटीमुपटना
मयापं रामत्वं कुशलवसुता न त्वधिगता ॥”
कनकस्य सुवर्णस्य मृगे अन्वेषणे । पक्षे ।
कनकमृगे हेममहरिणे वा तृष्णा इत्यर्थः ।)
याच्ञा । इति मेदिनी । गे, १८ ॥ मार्गशीर्ष-
मासः । यज्ञविशेषः । इत्यजयपालः ॥ मृग-
नाभिः । इत्यमरटीकायां भरतः ॥ मकर-
राशिः । यथा,—
“मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापराः ॥”
इति तिथ्यादितत्त्वम् ॥
स्वनामख्यातपशुविशेषः । मृग्यते अन्विष्यतेऽसौ
व्याधैः । (यथा, अभिज्ञानशाकुन्तले । १।१० ।
“न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।”)
तत्पर्य्यायः । कुरङ्गः २ वातायुः ३ हरिणः ४
अजिनयोनिः ५ । इत्यमरः ॥ सारङ्गः ६
चारुलोचनः ७ जिनयोनिः ८ कुरङ्गमः ९
ऋष्यः १० ऋश्यः ११ रिष्यः १२ रिश्यः १३
एणः १४ एणकः १५ । इति शब्दरत्नावली ॥
स नवविधः । यथा,—
“चमरो रोहितो न्यङ्कुकुरङ्गसदृशो रुरुः ।
एणश्च हरिणश्चेति मृगा नवविधा मताः ॥
पाठान्तरं यथा,—
“समूरू रोहितो न्यङ्कुः सम्बरो बभ्रुणो रुरुः ।
शशेणश्च हरिणश्चेति मृगा नवविधा मताः ॥
हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव ! ।
ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा ।
एते बलिप्रदाने च चर्म्मदाने च कीर्त्तिताः ॥”
इति कालिकापुराणे ६७ अध्यायः ॥ * ॥
अपि च । अथ जाङ्गलानां गणना ।
“हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुसम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋष्यो नीलाङ्गको लोके सरोजहरिति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किंयदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो
वृतः ।
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निग-
द्यते ॥”
अथ तेषां गुणाः ।
जाङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥”
इति भावप्रकाशः ॥
अथ मृगपरीक्षा ।
“मृगनाभिं समादातुं कौतुकार्थं तथा पुनः ।
मृगाः पोष्या महीन्द्राणां तेषां वक्ष्यामि,
लक्षणम् ॥
पृथिव्यब्वायुगगनात्तेजोऽधिकास्तु पञ्चधा ।
भिद्यन्ते नैकभेदास्तु समस्ता मृगजातयः ॥”

तद्यथा,—
‘ये गन्धिनः क्षीणशरीरकर्णा-
स्ते पार्थिवा गन्धमृगाः प्रदिष्टाः ।
सर्व्वाङ्गमेषां सुरभि प्रकामं
पुण्ये प्रदेशे प्रभवन्ति ते तु ॥
ये ये विशाला गुरुदीर्घशृङ्गा
अमांसलास्तीक्ष्णखुरप्रदेशाः ।
आप्यास्तु ते वै प्रसरन्ति भूरि
सर्व्वत्र देशे प्रभवन्ति चैव ॥
धावन्ति ये वातमिवान्तरीक्षे
दीर्घास्तु ते वातमृगाः प्रदिष्टाः ।
ते यत्र यत्रैव भवन्ति शस्ता-
स्तत्रैव सर्व्वाणि शुभानि सन्ति ॥
लघुप्रमाणा लघुवीर्य्यसत्त्वा
निर्गन्धदेहाश्छगलप्रमाणाः ।
ते गागना वेगकरा नराणां
स्पृश्या न ते नापि निरीक्षणीयाः ॥
ये कृष्णवर्णा गुरुदीर्घशृङ्गाः
क्रुद्धा भृशं यान्ति च वायुवेगाः ।
ते कृष्णसाराः खलु तैजसास्तु
पुण्यप्रदेशे प्रभवन्ति ते तु ॥’
भोजोऽप्याह ।
‘पार्थिवादिर्मृगः सर्व्वश्चतुर्जातिर्भवेत् पृथक् ।
सुशृङ्गास्तनुलोमानो ब्राह्मणा मृगजातयः ॥
क्रुद्धाः पश्चाद्दृढशृङ्गाश्च क्षत्रियाः खरलोमशाः ।
आवर्त्तशृङ्गास्तनवो हरिणा वैश्यजातयः ॥
कुशृङ्गा वाप्यशृङ्गा वा शूद्राः खरतनूरुहाः ।
अश्वानां ये गुणा दोषास्ते ज्ञेया हरिणेष्वपि ॥
तथापि दोषाः पञ्चामी वक्ष्यन्ते हरिणाश्रयाः ।
नेत्रयोरन्तरे यस्य लोमावर्त्ताः स पापकृत् ॥
विषमौ विक्रतौ शृङ्गौ यस्य स क्षेमनाशनः ।
आवर्त्तः पृष्ठतो यस्य आनाभिमभिविन्दति ॥
पश्चार्द्धे यस्य वावर्त्तौ त्याज्यौ भयकारकौ ।
वर्णनेत्रपदादीनां वैकृताद्धननाशनः ॥’
गार्ग्यः ।
‘दोषवन्मृगजातीनां विजातीनामथापि वा ।
दर्शनात् स्पर्शनाच्चैव गन्धादानाच्च पोषणात् ।
भवेयुर्व्विपदः सर्व्वास्तथा चैवाद्यपोषणात् ॥’
शक्रोऽपि ।
‘हरिणपोषणतो धरणीभुजां
नहि भवेन्नरकुञ्जरपीडनम् ।
न पविवह्निरुजारिपुजं भयं
तदव तं हरिणं गुणिनं नृप ! ॥’
इति मृगपरीक्षा ॥ इति युक्तिकल्पतरुः ॥
(अस्य गुणविशेषो यथा,—
“दूरे जनान्तनिलया दूरे पानीयगोचराः ।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो
मताः ॥
अतीवासन्ननिलयाः समीपोदकगोचराः ।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते ॥”
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)
मृगादिविकारोपशमो यथा,—

गर्ग उवाच ।
“प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति
जलोद्भवाः ॥
स्थलजाश्च जलं यान्ति घोरं रासन्ति
निर्भयाः ।
गृहं कपोतः प्रविशेत् क्रव्यादो मूर्द्ध्नि नीयते ॥
मधु वा मक्षिकाः कुर्य्युर्मृत्युं गृहपतेर्वदेत् ॥
मृगपक्षिविकारेषु कुर्य्याद्धोमं सदक्षिणम् ।
देवाः कपोते इति च जप्तव्याः पञ्चभिर्द्विजैः ॥
गावश्च देया विधिवत् द्विजानां
सकाञ्चना वस्त्रशुभोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वा विनिवेदितं यत् ॥”
इति मात्स्ये २११ अध्यायः ॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । तस्य लक्षणं
यथा,—
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ।
“शशके पद्मिनी तुष्टा मृगे तुष्टा च चित्रिणी ।
वृषभे शङ्खिनी तुष्टा हये तुष्टा च हस्तिनी ॥
पद्मिनीशशयोर्योनिमेढ्रकौ चतुरङ्गुलौ ।
चित्रिणीमृगयोर्योनिमेढ्रकौ च तथाविधौ ॥”
इति रतिमञ्जरी ॥
(अन्वेष्टा । यथा, ऋग्वेदे । १ । १५४ । २ ।
“मृगो न भीमः कुचरो गिरिष्ठाः ।”
“मृगः अन्वेष्टा ।” इति तद्भाष्ये सायणः ॥)
मृगक्षीरं, क्ली, मृगीदुग्धम् । तरादौ चेति चकार-
स्यानुक्तसमुच्चयार्थत्वात् मृग्याः क्षीरं मृगक्षीरं
मृग्याः पदं मृगपदं इत्यादिष्वपि पुंवद्भावः ।
इति मुग्धबोधटीकायां दुर्गादासः ॥
मृगगामिनी, स्त्री, (मृग इव गच्छतीति । गम+
णिनिः । ङीप् ।) विडङ्गा । इति राजनिर्घण्टः ॥
मृगसदृशगमनशीला च ॥
मृगचर्म्मजं, क्ली, (मृगचर्म्मात् मृगनाभिचर्म्मात्
मृगगन्धवत् जायते इत्यर्थः । जन्+डः ।)
जवादिनामकगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
मृगचर्म्मजाते, त्रि ॥
मृगचेटकः, पु, (मृगान् पशून् चेटयति प्रेरयति
स्वशब्देन रात्रिशेषं ज्ञापयतीति । चिट्+
णिच्+ण्वुल् ।) खट्टाशः । इति शब्दमाला ॥
मृगजालिका, स्त्री, (मृगाणां जालिका ।) मृग-
बन्धनार्थजालम् । तत्पर्य्यायः । वागुरा २ ।
इति हेमचन्द्रः । ३ । ५९२ ॥
मृगजीवनः, पुं, (मृगैः पशुभिः जीवतीति । जीव
+ल्युः ।) व्याधः । इति शब्दरत्नावली ॥
(यथा, महाभारते । ३ । ६३ । २८ ।
“निर्व्विचेष्टं भुजङ्गं तं विशस्य मृगजीवनः ।”)
मृगणा, स्त्री, (मृग+युच् ।) अपहृतद्रव्यस्यान्वे-
षणम् । यथा,—
“संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।”
इत्यमरः । ३ । २ । ३० ॥

मृगतृट्, [ष्] स्त्री, (मृगाणां तृट् पिपासा अत्र जलभावकत्वात् ।) मृगतृष्णा । इति शब्द रत्नावली ॥

मृगतृषा, स्त्री, (मृगाणां तृषा अस्यस्यामिति । अर्श आदित्वात् अच् । टाप् ।) मृगतृष्णा । इति शब्दरत्नावली ॥ (यथा, कामन्दकिनीतिसारे । १ । १३ ।
"जगन्मृगतृषातुल्यं वीक्ष्येदं क्षणभङ्गुरम् ।
स्वजनैः सङ्गतः कुर्य्यात् धर्म्माय च सुखाय च ॥")

मृगतृष्णा, स्त्री, जलाभावत्वात् मृगाणां तृष्णा विद्यतेऽस्याम् । ग्रीष्मे मरुदेशे सिकतादावर्क-कराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति सद्वाचिका । इति टीकाकारः ॥ उत्कटरवि-रश्मिजन्यचितिवाष्पजालं मरीचिका । दूर-शून्ये यत्सयूखैर्जलमिव दृश्यते इत्यपरे । इति भरतः ॥ तत्पर्य्यायः । मरीचिका २ । इत्य-मरः । १ । ४ । ३५ ॥ मृगतृष्णिका ३ । इति भरतः ॥ मृगतृट् ४ मृगतृषा ५ । इति शब्द-रत्नावली ॥

मृगतृष्णिका, स्त्री, (मृगतृष्णा+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च ।) मृगतृष्णा । इत्य-मरटीकायां भरतः ॥ (यथा, अभिज्ञान-शाकुन्तले । ६ ।
"स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे ! प्रणयवान् मृगतृष्णिकायाम् ॥")

मृगदंशकः, पु, (मृगान् पशून् दशति । दन्श्+ण्वुल् ।) कुक्कुरः । इत्यमरः ॥

मृगधूर्त्तः, पुं, (मृगेषु पशुषु धूर्त्तः । वञ्चकत्वात् ।) शृगालः । इति संक्षिप्तसारे समासपादः ॥

मृगधूर्त्तकः, पुं, (मृगधूर्त्त+स्वार्थे कन् ।) शृगालः । इत्यमरः । २ । १० । २१ ॥

मृगनाभिः, पुं, (मृगस्य नाभिः । तदभ्यन्तरे जातत्वात् तथात्वम् ।) कस्तूरी । तत्पर्य्यायः ।
"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् ।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ॥"
सा त्रिविधा यथा,—
'कामरूपोद्भवा कृष्णा नेपाली नीलवर्णयुक् ।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता ॥
कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत् ।
काश्मीरदेशसंभूता कस्तूरी ह्यधमा स्मृता ॥'
अस्या गुणाः ।
'कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः ।
कफवातविषच्छर्द्दिशीतदौर्गन्ध्यदोषहृत् ॥'
इति भावप्रकाशः ॥
अन्यत् कस्तूरीशब्दे द्रष्टव्यम् ॥ (तथास्य पर्य्यायान्तरम् ।
'मृगनाभिर्मृगमदो मदः कस्तूरिकाण्डजः ।'
इति वैद्यकरत्नमालायाम् ॥)

मृगनाभिजा, (स्त्री, मृगनाभेर्जायते । जन्+डः । स्त्रियां ङीष् ।) कस्तूरी । यथा,—
"घनसारः सिताभ्रश्च चन्द्रोऽथ मृगनाभिजा ।
मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि ॥"
इति हेमचन्द्रः । ३ । ३०७-८ ॥

मृगनेत्रा, स्त्री, (मृगनेत्र+"नेत्रच्च उपसंख्या-नम् ।" ५।४।११६। इत्यत्र काशिकोक्तेः अप् ।) मृगो मृगशिरा नेता प्रापयिता यस्या रात्रेः सा रात्रिः । इति मुग्धबोधटीकायां दुर्गादासः ॥ सा अग्रहायणस्य विंशतिदण्डाधिकत्रयोविंश-दिनावधिसंक्रान्तिपर्य्यन्तं प्रायः सम्भवति । तत्र नवान्नश्राद्धनिषेधो यथा । ब्रह्मपुराणे ।
"वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव कृतं भवेत् ॥
धनुषि यत् कृतं श्राद्धं मृगनेत्रासु रात्रिषु ।
पितरस्तन्न गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥"
अपरं कृष्णपक्षे । मृगो नेता प्रापयिता यासां रात्रीणामितिव्युत्पत्त्या नक्षत्रान्नेतुरित्यनेनाद्-विधानात्तत्पदं सिद्धम् । तनश्च मृगशिरःपूर्व्वा-र्द्धेन वृश्चिकशेषभागे रात्र्यारम्भाच्चत्वारिं-शद्दण्डाधिकषड्रात्रयो मृगनेत्राः । इति मल-मासतत्त्वम् ॥ (मृगस्य नेत्रे इव नेत्रे यस्य । मृग तुल्यनेत्रे, त्रि ॥)

मृगपतिः, पु, (मृगाणां पशूनां पतिः ।) सिंहः । इति हेमचन्द्रः ॥ (यथा, भागवते ।५।२५।१० ।
"यल्लीलां मृगपतिराददेऽनवद्या-
मादातुं स्वजनमनांस्युदारवीर्य्यः ।"
'मृगपतिः सिंहः ।' इति तट्टीकायां श्रीधर-स्वामी ॥ कामप्रदश्रेष्ठः । यथा तत्रैव टीकायाम् ।
"मृग्यन्त इति मृगाः कामप्रदास्तेषां पति-र्मुख्यः ॥")

मृगपिप्लुः, पुं, (अपिप्लवते भासते इति । अपि+प्लु+बाहुलकात् संज्ञायां डुः । अपेरल्लोपश्च । मृगः हरिणः पिप्लुरत्र ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

मृगप्रियं, क्ली, (मृगाणां प्रियम् ।) पर्व्वततृणम् । इति राजनिर्घण्टः ॥

मृगबधाजीवः, पुं, (मृगबधेन आजीवतीति । आ+जीव्+अच् ।) व्याधः । इत्यमरः ।२।१०।२१॥

मृगबन्धनी, स्त्री, (मृगः बध्यते अनयेति । बन्ध+ल्युट्+स्त्रियां ङीप् ।) मृगबन्धनार्थजालम् । तत्पर्य्यायः । वागुरा २ । इत्यमरः ।२।१०।२६॥

मृगभक्षा, स्त्री (मृगैर्भक्ष्यतेऽसौ । भक्ष+कर्म्मणि अप् टाप् ।) जटामांसी । इति राजनिर्घण्टः ॥

मृगमदः, पुं, (मृगाः माद्यन्ति अनेनेति । मद्+अप् ।) कस्तूरी । इत्यमरः । २ । ६ । १२८ । (यथा, छन्दोमञ्जर्य्याम् । २ । १५ । ४ ।
"मृगमदकृतचर्च्चापीतकौषेयवासा
रुचिरशिखिशिखण्डा बद्धधम्मिल्लपाशा ।"

मृगमदवासा, स्त्री, (मृगमदस्येव वासः सौरभो-ऽस्याः ।) कस्तूरीमल्लिका । इति राजनिर्घण्टः ॥

मृगया, स्त्री, (मृग्यन्ते पशवोऽस्यां इति । मृग+णिच् । "इच्छा ।" ३।३।१०१। इत्यत्र परिचर्य्या परिसर्य्यामृगयाटाट्यानामुपसंख्यानम् । इति वार्त्तिकोक्त्या शे यकि णिलोपः । इति सिद्धान्त-कौमुदी ॥) राज्ञां वनेषु मृगहननक्रिया । मृग्यन्ते अन्विष्यन्तेऽस्याम् । शिकार इति भाषा । तत्पर्य्यायः । आच्छोदनम् २ मृगव्यम् ३ आखेटः ४ । इत्यमरः ॥ तन्नियमविधिर्यथा,—
"चचार मृगयां तत्र दृप्त आत्तेषुकार्म्मुकः ।
विहाय जायामतदर्हां मृगव्यसनलालसः ॥५॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ।
न्यहनन् निशितैर्बाणैर्वनेषु वनगोचरान् ॥६॥
तीर्थेषु श्रुतिदृष्टेषु राजा मेध्यान् पशून् वने ।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥"७॥
इति श्रीभागवते ४ स्कन्धे २६ अध्यायः ॥
आत्ता गृहीता इषवो रागद्वेषादिरूपाः कार्म्मुकञ्च भोगाद्यभिनिवेशरूपं येन । जायां विवेकवतीं बुद्धिं विहाय । अतदर्हां त्यागान-र्हाम् । त्यागे हेतुः मृग्यन्ते इति मृगाः विषयाः तेषु व्यसनं भोगासक्तिस्तेन लालसा अतिस्पृहा यस्य ॥५॥ बाणै रागादिभिः । वनेषु भजनीय-देशेषु । वनगोचरान् भजनीयविषयान् । न्यहनत् भजनीयदेशादात्मसात् कृतवान् । कथापक्षे तु स्पष्टमेव ॥ ६ ॥ नन्वासुरीं वृत्ति-माश्रित्य इति किमिति मृगया निन्द्यते । कथापक्षे तावद्राज्ञो विहितैव सा । अध्यात्म-पक्षेऽपि जीवस्य विषयभोगो विहित एव इत्याशङ्क्याह तीर्थेष्विति त्रिभिः । अयं भावः । न हि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते । नियममेव षड्-विधं दर्शयति । यदि अलमत्यर्थं लुब्धो रागी सन् हन्यात् तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि श्रुतिदृष्टेषु प्रशस्तेष्वेव न नित्यश्राद्धादिषु । तत्रापि राजैव । मेध्यानेव । वन एव । यावदु-पयोगमेव इति । एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एव इत्यर्थः ॥ ७ ॥ इति तट्टीकायां श्रीधरस्वामी ॥ सा राज्ञां पापाय न स्यात् । यथा,—
"अवलस्वकुलाशिनो झषा-
न्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्दिनो मृगान्
मृगयाघाय न भूभृतां घ्नताम् ॥"
इति नैषधे २ सर्गे १० श्लोकः ॥
सा च कामजव्यसनविशेषः । यथा,—
"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥"
इति मलमासतत्त्वम् ॥

मृगयुः, पुं, (मृगं यातीति । मृग+"मृगय्वादयश्च ।" उणा० १।३८। इति कुः । निपात्यते च ।) ब्रह्मा । शृगालः । व्याधः । इति मेदिनी । ये, १०१ ॥ (यथा, भट्टिकाव्ये । ४ । ४४ ।
"मृगयुमिव मृगोऽथ दक्षिणोर्म्मा
दिशमिव दाहवतीं मरावुदन्यन् ।")

मृगरसा, स्त्री, (मृगस्य मृगमांसस्येव रसोऽस्याः ।) सहदेवी । इति राजनिर्घण्टः ॥

मृगराजः, पुं, (मृगाणां पशूनां राजा अधिपतिः। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्॥) सिंहः। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ६।३।

"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह॥"

व्याघ्रः। यथा, महाभारते। १।१४१।३४।
"शृणु मे त्वं महाबाहो। यद्वाक्यं मूषिकोऽब्रवीत्।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः।")

मृगराट, [ज्] पुं, (राजते दीप्यतेऽसौ राज्+क्विप्। ततः मृगाणां राट्।) सिंहः। इति शब्दरत्नावली॥ (यथा, शिशुपालवधे।९।१८।

"पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।")

मृगराटिका, स्त्री, (मृग+रट्+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च।) जीवन्ती। इति राजनिर्घण्टः॥

मृगरिपुः, पुं, (मृगाणां रिपुः।) सिंहः। इति हलायुधः॥

मृगरोमजं, त्रि, (मृगाणां रोमभ्यो जायते इति। जन्+डः।) पशुलोमजातवस्त्रादि। तत्पर्य्यायः। राङ्कवम् २। इत्यमरः। २।६।१११॥

मृगलाञ्छनः, पुं, (मृगः लाञ्छनं चिह्नमस्य।) चन्द्रः। इति शब्दरत्नावली॥

मृगवल्लभः, पुं, (मृगाणां वल्लभः प्रियः।) कुन्दरुत्रणम्। इति राजनिर्घण्टः॥

मृगवाहनः, पुं, (मृगो वाहनमस्येति।) वायुः। इति जटाधरः॥

मृगव्यं, क्ली, (मृगान् विध्यति अत्र इति। व्यध्+"अन्येष्वपि दृश्यते।" ३।२।४८। इति काशिकोक्त्या अधिकरणे डः।) मृगया। इत्यमरः। २।१०।२३॥ (यथा, मार्कण्डेये। १२७।१।

"कदाचिद्राजपुत्त्रोऽसौ मृगव्यमचरद्वने।")

मृगशिरः, [स्] क्ली, (मृगस्येव शिरोऽस्य।) सप्तविंशतिनक्षत्रान्तर्गतपञ्चमनक्षत्रम्। तत्पर्य्यायः। मृगशीर्षम् २ आग्रहायणी ३। इत्यमरः। १।३।२३॥ (यथा, बृहत्संहितायाम्। १०।५।

"मृगशिरसि वत्सयाजक-
यजमानार्य्यजनमध्यदेशाश्च।")

तत्तु विडालपदाकृति तारात्रयात्मकं चन्द्राधिदैवतम्। इति ज्योतिषम्॥ गगनमध्ये तस्योदये कन्यालग्नस्य द्वात्रिंशत्पलानि गतानि भवन्ति। यथा,—

"मृधिकाशनपदाकृतौ विधौ
व्योममध्यमिलिते त्रितारके।
शारदेन्दुमुखि! कन्यकोदया-
द्दीप्यमानलकलाः कलावति।॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

तत्र जातफलम्। यथा,—

"शरासनाभ्यासरतो विनीतः
सदानुरक्तो गुणिनां गुणेषु।
भक्तानुपक्षेऽहभरेण पूर्णः
सन्मार्गवर्त्ती मृगजन्मभागी॥"

इति कोष्ठीप्रदीपः॥

मृगशिरा, स्त्री, (सर्व्वे सान्ता अकारान्ताश्चेति मृगशिरोऽदन्तः। मृगशिर+टाप्।) मृगशिरोनक्षत्रम्। इति शब्दरत्नावली॥

मृगशिराः, [स्] पुं, (मृगस्येव शिरो यस्य।) मृगशिरोनक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥

मृगशीर्षं, क्ली, (मृगस्य शीर्षमिव शीर्षमस्य।) मृगशिरोनक्षत्रम्। इत्यमरः॥ (यथा, भागवते। ५।२३।६।

"तथैव मृगशीर्षादीन्युदगयनानि।")

मृगशीर्षः, पुं, (मृगस्येव शिर्षोऽस्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगशीर्षा, स्त्री, (मृगशीर्ष+टाप्।) मृगशिरोनक्षत्रम्। इति त्रिकाण्डशेषाभिधानः। इत्यमरटीकायां भरतः॥ (यथा, बृहत्संहितायाम्। २१।९।

"मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्ल-
जाताश्च।")

मृगशीर्षा, [न्] पुं, (शीर्षस्य शीर्षन् इत्यादेशः। ततो मृगस्येव शीर्षास्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगा, स्त्री, (मृगः मृगमांसतुल्यः रसोऽस्ति अस्याः अर्श आदिभ्योऽच्।) सहदेवीलता। इति राजनिर्घण्टः॥

मृगाक्षी, स्त्री, (मृगस्येव अक्षि तद्वत्पुष्पं अक्षिणी वा अस्याः। अक्षि+"अक्ष्णोऽन्यतरस्याम्।" ५।४।७६। इति अच्। स्त्रियां ङीष्।) विशाला॥ (यथास्याः पर्य्यायः।

"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी चामराप्युक्ता सा विशाला महाफला।
श्वेतपुष्पा मृगाक्षी च मृगेर्व्वारुर्मृगादनी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मृगलोचनतुल्यनेत्रा स्त्री। इति मेदिनी। षे, ४४॥ (यथा, छन्दोमञ्जर्य्याम्। २।११।८।

"वक्षववेशा सुररिपुमूर्त्ति-
र्गोपमृगाक्षीकृतरतिपूर्त्तिः।
वाञ्छितसिद्धै प्रणतिपरस्य
स्यादनुकूला जगति न कस्य॥")

मृगाङ्कः, पुं, (मृगः अङ्को यस्य।) चन्द्रः॥ (यथा, नैषधचरिते। १।७८।

"विनिद्रपत्त्रालिगतालिकैतवात्
मृगाङ्कचूडामणिवर्ज्जनार्ज्जितम्।")

कर्पूरः। इत्यमरः। १।३।१४॥ वायुः। इति विश्वः॥ मृगचिह्नम्। चन्द्रे तच्चिह्नकारणं यथा,—

"लोकच्छायामयं लक्ष्म तवाङ्के शशसंस्थितम्।
न विदुः सोमदेवापि ये च नक्षत्रयोगिनः॥"

इति महाभारते हरिवंशः॥

यथा, दर्पणं प्राप्य पराहृत्ता नयनरश्मयो ग्रीवास्थमेव मुखं दर्पणगतमिव पश्यन्ति एवं चन्द्रमण्डलं प्राप्य पराहृत्तास्ते दूरत्वदोषात् पृथिवीमध्यस्थरूपामिव चन्द्रमण्डलगतां पश्यन्ति स एव चन्द्रे कलङ्क इत्युपचर्य्यते। इति तट्टीका॥ यक्ष्मारोगस्य औषधविशेषः। यथा,

"स्यादसेन समं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः॥
सर्व्वं तद्गोलकं कृत्वा काञ्जिकेन विशोषयेत्।
भाण्डे लवणपूर्णेऽथ पचेद् यामचतुष्टयम्।
मृगाङ्कसंज्ञको ज्ञेयो रोगराजनिकृन्तनः॥"

अपि च।

'रसस्य भस्मनो हेम पिष्टीकृत्य प्रयोजयेत्।
गुञ्जाचतुष्टयञ्चाप्यमरिचैर्भक्षयेन्नरः॥'

इति मधुमती॥

(एतन्नामकौषधान्तरं यथा,—

"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं द्वयम्।
दीयं बहुलानुपानेन मृगाङ्कोऽयं क्षयापहः॥"*॥

इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे॥)

मृगाजीवः, पुं, (मृगैः आजीवतीति। जीव्+अच्।) व्याधः। इत्यमरः। २।१०।२१॥

मृगाण्डजा, स्त्री, (मृगाण्डात् जायते इति॥ जन्+डः+स्त्रियां टाप्।) कस्तूरी। इति राजनिर्घण्टः॥ (तथास्या विषयः।

"रसैः समस्तैर्द्विपलप्रमाणै-
रालोड्य सर्व्वं विधिना विपक्वम्।
कर्पूरकाश्मीरमृगाण्डजानां
चूर्णीकृतानां त्रिपलप्रमाणम्॥"

इति भैषज्यधन्वन्तरौ वातरोगे मध्यमनारायणतैले॥)

मृगात, [द्] पुं, स्त्री, (मृगान् अत्तीति। अद्+क्विप्।) व्याघ्रः। इति केचित्॥

मृगादनः, पुं, (अत्तीति। अद्+ल्युः। मृगस्य अदनः।) क्षुद्रव्याघ्रः। तत्पर्य्यायः। तरक्षुः २। इत्यमरः। २।५।१॥ तर्क्षुः ३ तरक्षुः ४ तरक्षकः ५। इति शब्दरत्नावली॥ हुण्डकुण्डाकारे कृष्णरेखाचित्रे नेकडा इति ख्याते। इति भरतः॥ चीता इति ख्याते। इत्यच्युतः॥

मृगादनी, स्त्री, (मृगैरद्यते भुज्यतेऽसौ इति॥ अद्+कर्म्मणि ल्युट्+स्त्रियां ङीष्।) इन्द्रवारुणी। सहदेवी। मृगेर्व्वारुः। इति राजनिर्घण्टः॥ (यथा,—

"शिरीषश्च महानिम्बा जरात्म्बी मृगादनी।"

इति गोविन्दविशारदकृतभैषज्यरत्नावल्याम् कुष्ठचिकित्सायाम्।) क्षुद्रव्याघ्री च॥

मृगान्तकः, पुं, (मृगाणां अन्तकः नाशकः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

मृगारातिः, पुं, (मृगाणां अरातिः।) कुक्कुरः। इति शब्दमाला॥ मृगशत्रुः। यथा,—

"मार्गं मार्गं मृगयति मृगारातिरामे विरामे
शोकं शोकं गतवति गते लक्ष्मणे लक्ष्मणेन।"

इति महानाटकम्॥

मृगारिः, पुं, (मृगाणामरिः ।) सिंहः । व्याघ्रः । इति मेदिनी । रे, २०६ ॥ कुक्कुरः । रक्तशिग्रुः । इति राजनिर्घण्टः ॥

मृगावित्, [ध्] पुं, (मृगान् विध्यति इति । व्यध् + क्विप् । "अन्येषामपि दृश्यते ।" ६ । ३ । १३७ । इति दीर्घश्च ।) व्याधः । इति जटाधरः ॥ (मृगावेधनशीलः । यथा, भट्टिकाव्ये ।५।८२।
"भ्रातरि व्यस्य यातो मां मृगाविन्मृगयामसौ ।")

मृगितः, त्रि, (मृग + क्तः ।) अन्वेषितः । इत्यमरः ॥

मृगी, स्त्री, (मृग + जातौ ङीष् ।) मृगजातिस्त्री । इति व्याकरणम् ॥ (यथाभिज्ञानशाकुन्तले ।६।
"शाखावलम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥")
अस्या दुग्धगुणाः छागीदुग्धगुणतुल्याः । यथा,
'मृगीणां जाङ्गलोत्थानां अजाक्षीरगुणं पयः ।'
इति भावप्रकाशः ॥
पुलहभार्य्या । सा कश्यपकन्या । तस्या अपत्यं हरिणादि । यथा,—
"क्रोधायां जज्ञिरे कन्या द्वादशैवात्मसम्भवाः ।
ता भार्य्याः पुलहस्यासन् मृगी मन्दा इरावती ॥
भूता च कपिला दंष्ट्रा कषा तिर्य्या तथैव च ।
श्वेता च सरमा चैव सरसा चेति विश्रुताः ॥
मृग्यास्तु हरिणाः पुत्त्रा मृगाश्चान्ये शशास्तथा ।
न्यङ्कवः शरभा ये च पुरवः पृषताश्च ये ॥"
इति वह्निपुराणम् ॥
त्र्यक्षरच्छन्दोविशेषः । यथा । रौ मृगी । 'सा मृगीलोचना । राधिका श्रीपतेः ॥' इमध्या । इति छन्दोमञ्जरी ॥ अपस्माररोगः । इति लोके ख्यातः ॥ (होमोक्तमुद्राविशेषः ॥)

मृगेक्षणा, स्त्री, (मृगैरीक्ष्यते प्रियत्वात् इति । ईक्ष् + ल्युट् + स्त्रियां टाप् ।) मृगेर्व्वारुः । इति राजनिर्घण्टः ॥ मृगनयना स्त्री च ॥ (यथा, बृहत्संहितायाम् । ४८ । १४ ।
"काञ्चीकलापनूपुरगुरुजघनोद्वहनविजित-पदाभिः ।
श्रीरिति मृगेक्षणाभिर्गृहेऽभ्यस्तवल्गुवच-नाभिः ॥")

मृगेन्द्रः, पुं, (मृगाणामिन्द्रः श्रेष्ठः ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ (यथा, श्रीमद्भागवते । १ । १२ । २२ ।
"मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ।
तितिक्षुर्व्वसुधेवासौ सहिष्णुः पितराविव ॥"
भगवद्विभूतिः । यथा, श्रीमद्भगवद्गीतायाम् । १० । ३० ।
"मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥"
छन्दोविशेषश्च ॥)

मृगेन्द्रचटकः, पुं, (मृगेन्द्र इव विक्रमी चटकः ।) श्येनपक्षी । इति जटाधरः ॥

मृगेन्द्राशी, स्त्री, (मृगेन्द्रेण अश्यते इति । अश् + घञ् + गौरादित्वात् ङीष् ।) वासकः । इति राजनिर्घण्टः ॥ (विशेषोऽस्या वासकशब्दे ज्ञातव्यः ॥)

मृगेर्व्वारुः, स्त्री, (मृगस्य प्रिया इर्व्वारुः ।) श्वेतेन्द्रवारुणी । सँधिनी इति हिन्दीभाषा ॥ तत्पर्य्यायः । मृगाक्षी २ श्वेतपुष्पा ३ मृगादनी ४ चित्रवल्ली ५ बहुफली ६ कपिलाक्षी ७ मृगेक्षणा ८ चित्रा ९ चित्रफला १० पथ्या ११ विचित्रा १२ मृगचिर्भिटा १३ मरुजा १४ कुम्भिनी १५ देवी १६ कटुफला १७ लघुचिर्भिटा १८ । अस्या गुणाः । दुर्ज्जरत्वम् । गुरुत्वम् । मन्दानलकारित्वम् । रक्तपित्तहारित्वञ्च । इति राजनिर्घण्टः ॥

मृगेष्टः, पुं, (मृगाणामिष्टः ।) मुद्गरवृक्षः । इति राजनिर्घण्टः ॥

मृग्यः, त्रि, (मृग्यते अन्विष्यते असौ । मृग् + कर्म्मणि यत् ।) मृगितव्यः । अन्वेषणीयः । इति व्याकरणम् ॥ (यथा, श्रीमद्भागवते । ७ । ७ । २३ ।
"देहस्तु सर्व्वसंघातो जगत्तस्थुरिति द्विधा ।
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ॥")

मृज ऊ श कि भूषे । शुद्धौ । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) ऊ अमार्जीत् अमार्क्षीत् । श मृजा । कि मार्जया-लेपनैर्द्विजाम् । यो मार्ज्जयति शास्त्रार्थमिति हलायुधः । इति दुर्गादासः ॥

मृज ल ऊ ष शुद्धौ । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च । ल मार्ष्टि तीर्थोदकैर्नित्यमिति हलायुधः । ऊ अमार्ज्जीत् भक्ततो मलम्, अमार्क्षीच्चासि पत्त्रादीनिति भट्टिः । ष मृजा । इति दुर्गादासः ॥

मृजः, पुं, (मृज्यतेऽसौ । इति मृज् + कृत्यल्युटो बहुलमिति कर्म्मणि कः ।) वाद्यविशेषः । मादल इति भाषा । यथा । मर्द्दलो दारुणो मृजः । इति शब्दरत्नावली ॥

मृजा, स्त्री, (मृज्यते इति । मृज् + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति अङ् + टाप् च ।) मार्जनम् । इत्यमरः । २।६।१२१ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये ।
"अभ्यङ्गो मार्द्दवकरः कफवातनिरोधनः ।
धातूनां पुष्टिजननो मृजावर्णबलप्रदः ।")

मृज्यं, त्रि, मृज्यते यत् इति । मृज् । "मृजेर्विभाषा ।" ३ । १ । ११३ । इति क्यप् ।) मार्ग्यम् । मार्जनीयम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टौ । ६ । ५६ ।
"मन्युस्त्वया मार्ग्यो मृज्यः शोकश्च तेन ते ॥")

मृड ग श मोदे । इति कविकल्पद्रुमः ॥ (क्र्या०-वा तुदा०-अक०-सेट् ।) मोद इह सुखीकरणम् । ग मृड्णाति सरस्वत्या च यः सदेति हलायुधः । श मृडति दीनं दाता । अमृडित्वा सहसाश्वमिति भट्टिः । मर्डिता । इति दुर्गादासः ॥

मृडः, पुं, (मृडति सुख्यतीति । मृड् + इगुपधत्वात् कर्त्तरि कः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, श्रीमद्भागवते । ४ । २ । ७ ।
"प्राङ्निषसं मृडं दृष्ट्वा नामृष्यत्तदनादृतः ।")

मृडङ्कणः, पुं, (मृड्णाति सुखयतीति । मृड् + "मृडः कीकन् कंकणौ ।" उणा० ४ । २४ । इति कंकणः ।) बालकः । इत्युणादिकोषः ॥

मृडा, } स्त्री, (मृड + टाप् ङीप् च ।) दुर्गा ।
मृडी, } इति हलायुधः ॥

मृडीकः, पुं, (मृडतीति । मृड् + "मृडः कीकन् कङ्कणौ ।" उणा० ४ । २४ । इति कीकन् ।) हरिणः ॥

मृण, श हिंसे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) मर्णिता । इति दुर्गादासः ॥

मृणालं, क्ली, पुं, मृणयते हिंस्यते भक्षणार्थं यत् । (मृण् + "तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् ।" उणा० १ । ११७ । इति कालन् । पङ्कजादीनां नालम् ।) मोलाम इति ख्यातम् । इति भरतः ॥ (यथा, नैषधचरिते । १ । १३७ ।
"मदर्थसन्देशमृणालमन्थरः
प्रियः कियद्दूर इति त्वयोदिते ।")
तत्पर्य्यायः । बिसम् २ । इत्यमरः ।१।१०।४२॥ बिशम् ३ । इति द्विरूपकोषः ॥ पद्मनालम् ४ मृणाली ५ मृणालिनी ६ पद्मतन्तुः ७ बिसिनी ८ नलिनीरुहम् ९ । अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । कषायत्वम् । पित्तदाहमूत्रकृच्छ्रविकाररक्तवान्तिहरत्वञ्च । इति राजनिर्घण्टः ॥ (शालूकविशेषः । तत्पर्य्यायो यथा,
"पद्मादिकन्दः शालूकं करहाटश्च कथ्यते ।
मृणालं मूलं भिशाकं लम्बाम्बुकश्च कथ्यते ॥"
तथास्य गुणाः । बिशार्थे शालूकार्थे च ॥
"मृणालं शीतलं वृष्यं पित्तदाहास्रजिद्गुरु ॥
दुर्ज्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मृणालं, क्ली, (मृण + कालन् ।) वीरणमूलम् । इति मेदिनी । ले, १२४ ॥ (अस्य पर्य्यायो यथा,
"मृणालमभयं सेव्यं लामज्जकसुशीरकम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"स्वादुशीरं मृणालञ्च सेव्यं लामज्जकन्तथा ॥"
इति गारुडे पूर्व्वखण्डे २०८ अः ॥)

मृणालिनी, स्त्री, (मृणालानि अस्याः सन्तीति । मृणाल + "पुष्करादिभ्यो देशे ।" ५।२।१३५ । इति इनिः । ङीप् च ।) पद्मिनी । इति जटाधरः ॥ सा तु पद्मयुक्तदेशः पद्मसमूहः पद्मलता च ॥ (यथा, रघुवंशे । १६ । ७ ।
"बिभर्षि चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम् ।")

मृणाली, स्त्री, (मृणाल+गौरादित्वात् ङीष् ।) मृणालम् । इति राजनिर्घण्टः ॥ (यथा, उत्तरचरिते । १ ।
"परिम्लायितमृणालीदुर्ब्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥")
(अल्पं मृणालं इति । मृणाल+अल्पार्थे ङीष् ।) स्वल्पमृणालजातिः । यथा,—
"स्तम्भं चन्दनमङ्कके वलयिताः पाण्यौ मृणाली-लताः ।
इति राजशेखरः । इत्यमरटीकायां भरतः ॥
मृणाली, [न्] पुं, (मृणालमस्यास्तीति । मृणाल+इनिः ।) पद्मः । इति केचित् ॥
मृत्,[द्] स्त्री, (मृद्नाति प्रलये चूर्णतया स्वकारणे लीयत इति । मृद्+कर्त्तरि क्विप् ।) मृत्तिका । इत्यमरः । २ । १ । ४ । (यथा, मनुसंहितायाम् । ४ । ३९ ।
"मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन् ॥"
(यथास्या गुणाः ।
"कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥
कोपयेन्मृदसादींश्च रौक्ष्याद्भुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ।
इन्द्रियाणां बलं हत्वा तेजोवीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥"
इति माधवकरकृतरुग्विनिश्चये पाण्डुरोगाधिकारे ।) तुवरी । इति राजनिर्घण्टः ॥ * ॥ मृत्तिकाशौचं यथा,—
"दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्य्यात् मूत्रपुरीषे तु रात्रौ वै दक्षिणामुखः ॥
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ।
गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रिताः ॥"
इति गारुडे ९४ अध्यायः ॥
मृतं, क्ली, (मृ+क्तः ।) याचितम् । इत्यमरः । २ । ९ । ३ ॥ याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतं भावे कर्म्मणि वा क्तः । इति भरतः ॥ मृत्युः । इति हेमचन्द्रः ॥
मृतं, त्रि, याचितवस्तु । गतप्राणः । मरा इति भाषा । तत्पर्य्यायः । परासुः २ प्राप्तपञ्चत्वः ३ परेतः ४ प्रेतः ५ संस्थितः ६ प्रमीतः ७ । इत्यमरः ।२।८।३॥ कलौ मृतस्य धन्यत्वं यथा,
"धर्म्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्च दूरे गतं
पृथ्वी मन्दफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः ।
मर्त्त्याः स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नता
हा कष्टं खलु जीवितं कलियुगे धन्या नरा ये मृताः ॥"
इति गारुडे ११५ अध्यायः ॥
(कार्य्यवशाज्जीवितावस्थायामपि मृतत्वं तद्यथा,—
"चतुर्थे तु मदे मूढो भग्नदार्व्विव निष्क्रियः ।
कार्य्याकार्य्यविभागाज्ञो मृतादप्यपरो मृतः ॥"
इति माधवकरकृतरुग्विनिश्चये पानात्ययाद्यधिकारे । यथा च ।
"उत्तिष्ठोत्तिष्ठ गच्छ त्वं वद मौनं समाचर ।
ये पराधीनतां यान्ति तेऽपि जीवन्ति के मृताः ॥"
इत्युद्भटः ॥)
मृतकं, क्ली, (मृत+स्वार्थे कन् ।) शवः । इति हेमचन्द्रः । ३ । २२९ ॥ मरणाशौचम् । यथा,
"यदि स्यात् सूतके सूतिर्मृतके च मृतिस्तथा ।
शेषेणैव भवेच्छुद्धिरहः शेषे द्विरात्रकम् ॥"
इति शुद्धितत्त्वम् ॥
मृतकल्पः, त्रि, (मृत+"ईषदसमाप्तौ कल्पप्-देश्यदेशीयरः ।" ५ । ३ । ६७ । इति कल्पप् ॥) मृतप्रायः । ईषदूनो मृतः । इति मृतशब्दादीषदूनार्थे कल्पप्रत्ययेन निष्पन्नम् ॥
मृतकान्तकः, पुं, (मृतकस्य अन्तकः नाशको भक्षकत्वात् ।) शृगालः । इति हारावली ॥
मृतजीवः, पुं, (मृतश्चासौ जीवश्चेति नीललोहितादिवत् विशेषणसमासः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य तिलकशब्दे ज्ञातव्यम् ॥)
मृतण्डः, पुं, (मृतः अण्डः कारणत्वेन यस्य शकन्ध्वादित्वात् पररूपम् ।) सूर्य्यपिता । इति मार्कण्डशब्दटीकायां भरतः ॥
मृतमत्तः, पुं, (मृतेन शवेन मत्तः । भक्ष्यलाभात् ।) शृगालः । इति त्रिकाण्डशेषः ॥
मृतमत्तकः, पु, (मृतमत्त+स्वार्थे कन् ।) शृगालः । इति शब्दरत्नावली ॥
मृतवत्सा, स्त्री, (मृता वत्सा यस्याः ।) मृतापत्या । अजीवत्सन्ताना । गर्भावधिवर्षत्रयं यावत् पुनःपुनर्मृतसन्ताना । अस्या दोषशान्तिर्यथा —
"सप्तमीस्नपनं वक्ष्ये सर्व्वलोकहिताय वै ।
जातस्य मृतवत्सायाः सप्तमे मासि नारद ! ।
अथवा शुक्लसप्तम्यामेतत् सर्व्वञ्च प्रशस्यते ॥
ग्रहतारावलं लब्ध्वा कृत्वा वा विप्रवाचनम् ।
बालस्य जन्मनक्षत्रतिथिदेवान् यजेद्बुधः ॥
तद्वद्रुद्रहुताशाभ्यां कृत्यं स्यादितरेषु च ।
गोमयेनानुलिप्तायां भूमावेकाग्निवत्तदा ॥
तण्डुलै रक्तशालीयैश्चरुं गोक्षीरसंयुतम् ।
निर्व्वपेत् सूर्य्यरुद्राभ्यां तन्मन्त्राभ्यां विधानतः ॥
कौमेयेत् सूर्य्यदेवत्यं सप्तर्च्चेषु घृताहुतीः ।
जुहुयाद्रुद्रसूक्तेन तद्वद्रुद्राय नारद ! ॥
होतव्याः समिधस्तद्वत्तथैवार्कपलाशयोः ।
यवकृष्णतिलैर्होमः कर्त्तव्योऽष्टशतं पुनः ॥
व्याहृतिभिरथाज्येन तथैवाष्टशतं द्विज ! ।
हुत्वा स्नानञ्च कर्त्तव्यमङ्गराज्ञेन च धीमता ॥
विप्रेण वेदविदुषा विधिवद्दर्भपाणिना ।
स्नापयित्वा तु चतुरः कुम्भान् कोणेषु शोभनान् ॥
पञ्चमञ्च पुनर्मध्ये दध्यक्षतविभूषितम् ।
स्थापयेदव्रणं कुम्भं सप्तर्द्देनाभिमन्त्रितम् ।
सौरेण तीर्थतोयेन पञ्चरत्नसमन्वितम् ॥
सर्व्वान् सर्व्वौषधैर्युक्तान् पञ्चगव्यसमन्वितान् ।
पञ्चरत्नफलैर्युक्तान् वासोभिरभिवेष्टयेत् ॥
गजाश्वरथ्यावल्मीकसङ्गमात् ह्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निःक्षिपेत् ॥
चतुर्ष्वपि च कुम्भेषु रत्नगर्भेषु मध्यमम् ।
गृहीत्वा ब्राह्मणस्तन्तु सौरान्मन्त्रानुदीरयेत् ॥
सप्तभिरपि नारीभिरव्यङ्गाभिरथाप्लवम् ।
पूजिताभिर्यथाशक्त्या माल्यवस्त्रविभूषणैः ।
सविप्राभिश्च कर्त्तव्यं मृतवत्साभिषेचनम् ।
दीर्घायुरस्तु बालोऽयं जीवपुत्रा च भाविनी ॥
आदित्यचन्द्रमाः सार्द्धं ग्रहनक्षत्रमण्डलैः ।
शक्रः सलोकपालो वै ब्रह्मविष्णुमहेश्वराः ।
एते चान्ये च देवौघाः सदा पान्तु कुमारकम् ॥
मित्रोऽथ शनिर्वा हुतभुक् या च बालग्रहाः क्वचित् ।
पीडां कुर्व्वन्तु बालस्य मा मातुर्जनकस्य वै ॥
ततः शुक्लाम्बरधरा कुमारी पतिसंयुता ।
सप्तकं पूजयेद्भक्त्या स्त्रीणामथ गुरुं पुनः ॥
काञ्चनीञ्च ततः कृत्वा तिलपात्रोपरिस्थिताम् ।
प्रतिमां कूर्म्मराजस्य गुरवे विनिवेदयेत् ॥
वस्त्रकाञ्चनरत्नौघैर्भक्ष्यैः सघृतपायसैः ।
पूजयेद्ब्राह्मणं तद्वद्वित्तशाठ्यविवर्ज्जितः ॥
भुक्त्वा च गुरुणा चेयमुच्चार्य्या मन्त्रसन्ततिः ।
दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं समम् ।
यत्किञ्चिदस्य दुरितं निःक्षिप्तं वडवानले ॥
ब्रह्मा रुद्रो वसुः स्कन्दो विष्णुर्देवो हुताशनः ।
रक्षन्तु सर्व्वदुष्टेभ्यो वरदाः सन्तु सर्व्वदा ॥
एवमादीनि वाक्यानि वदन्तं पूजयेद्गुरुम् ।
शक्तितः कपिलां दद्यात् प्रणिपत्य विसर्ज्जयेत् ॥
गुरुश्च पुत्रसहिता प्रणम्य रविशङ्करौ ।
हुतशेषं तदाश्नीयादादित्याय नमोऽस्तु ते ॥
इदमेवाद्भुतोद्वेगदुःस्वप्नेषु प्रशस्यते ।
कर्म्मजन्मदिनर्क्षाणां देवान् संपूजयेत् सदा ॥
शान्त्यर्थं शुक्लसप्तम्यामेतत् कुर्व्वन्न सीदति ॥
स चानेन विधानेन दीर्घायुरभवत्ततः ।
सप्ततिसहस्राणामयुतं प्रशशास पृथिवीमिमाम् ॥"
इति मात्स्ये ६४ अध्यायः ॥
तल्लक्षणशान्त्यौषधानि यथा,—
"गर्भः संजातमात्राद्वा पश्चात् मासाच्च वत्सरात ।
म्रियते द्विस्त्रिवर्षाद्वा यस्याः सा मृतवत्सिका ॥
तस्य योगं प्रकर्त्तव्यं यथा शङ्करभाषितम् ॥
मार्गशीर्षे तथा ज्यैष्ठे पूर्णिमायामिते गृहे ।
नूतनं कलसं पूर्णं पूजयेन्मातृका: सुधीः ॥
शाखाफलसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णसूत्रिकायुक्तं षट्कोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीं एकान्तीनामनिन्दिताम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपनैवेद्यसंयुतैः ।
पूजयेद्भक्तिभावेन मद्यमांसैः समत्स्यकैः ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री षट्पञ्चैषु च मातरः ॥
पूजयेन्मन्त्रपूतेन षैकारे नाम विश्रुते ।

दधिभक्तानि पिण्डानि सप्तसङ्ख्यानि कारयेत् ॥
षट्सङ्ख्येषु च पत्रेषु मातृभ्यः कल्पयेत् पृथक् ।
पिशाचेभ्यः सप्तमं पिण्डं शुचिस्थाने बहिः क्षिपेत् ।
तेर्भुक्ते गृहमागच्छेदेकान्ते यागमारभेत् ॥
कन्यकां योगिनीं वापि भोजयेत् सकुटुम्बकैः ।
दक्षिणां दापयेत्तासां देवताग्रे न चान्यथा ॥
विसृज्य देवतांश्चाथ मध्यां ततुकजलोदकम् ।
शकुनं वीक्षयेद्धीमान् शुभेन शुभमादिशेत् ॥
विपरीते पुनः कार्य्यं यागं तत्तु सुसिद्धिदम् ।
प्रतिवर्षमिदं कार्य्यं दीर्घजीविसुतं लभेत् ॥”
ॐ ह्रीं पिं एकान्तीदेवतायै नमः । अनेन मन्त्रेण पूजा जपश्च कार्य्यः ॥ * ॥
“प्राङ्मुखः कृत्तिकाऋक्षे बन्ध्याकर्कोटकीं हरेत् ।
तत्कन्दं पेषयेत्तोयैः कर्षमात्रं सदा पिबेत् ॥
या बीजपूरं द्रवमूलमेकं
क्षीरेण पक्वं प्रपिबेत् विमिश्रम् ।
ऋतौ निजं या तु पतिं प्रयाति
दीर्घायुषं सा तनयं प्रसूते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला ।
मेदा पयस्या काकोली मूलञ्चैवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे हिङ्गुः कटुकरोहिणी ।
उत्पलं कुमुदं द्राक्षा काकोल्यौ मूलकद्वयम् ।
एतेषां कर्षकैर्भागैर्घृतप्रस्थं विभावयेत् ॥
शतावरीरसं क्षीरं घृतस्येदं चतुर्गुणम् ।
संपिबेन्नियतं नारी नित्यं क्षौद्रं च प्रसूयते ।
पुत्रान् जनयते नारी मेधाव्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् या नारी जनयेन् मृतम् ।
अल्पायुषञ्च जनयेत् या च कन्याः प्रसूयते ॥
योनिदोषे रजोदोषे गर्भस्रावे च प्रसूयते ।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम् ॥
नाम्ना फलघृतं ख्यातदायुष्यं परिकीर्त्तितम् ।
नोक्तञ्च लक्ष्मणामूलं वदन्त्यत्र चिकित्सकाः ॥
जीववत्साशुक्लवर्णा घृतमत्र तु दीयते ।
अरण्यगोमयेनात्र वह्निर्ज्वाला प्रदीयते ॥”
अत्र पयस्या क्षीरयुक्तभूमिकुष्माण्डम् । उत्पलं नीलम् । इति इन्द्रजालतन्त्रे मृतवत्साचिकित्सा ॥ * ॥ अन्यच्च । अथ मृतवत्सासुतजीवनोपायः ।

ईश्वर उवाच ।
“गर्भः संजातमात्रेण पश्चात् मासाच्च वत्सरात् ।
म्रियते द्विविवर्षादिर्यस्याः सा मृतवत्सका ॥
गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकम् ।
गृहीत्वा लक्ष्मणामूलं एकवर्णागवां पयः ।
पीत्वा सा लभते गर्भं दीर्घजीविसुता भवेत् ॥
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम् ॥
बन्ध्याकर्कोटिकाकन्दं मोचारसेन पेषयेत् ।
ऋतुकाले तु सप्ताहं दीर्घजीविसुता भवेत् ।
सत्यं सत्यं प्रकर्त्तव्यं यथा शङ्करभाषितम् ॥ * ॥
मार्गशीर्षेऽथवा ज्येष्ठे पूर्णायां लेपित गृहे ।
नूतनं कलसं पूर्णं गन्धतोयेन कारयेत् ॥
शाखापल्लवसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णमुद्रिकायुक्तं षट्कोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीमेकान्तीनामविश्रुताम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसंयुतैः ।
अर्च्चयेद्भक्तिभावेन दुग्धं माषं तथा मधु ॥
वाराही च तथा चैन्द्री ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी देवी षट्सु कोणेषु मातरः ।
पूजयेद्भक्तिभावेन दधिपिण्डानि कारयेत् ॥
सप्तसङ्ख्याप्रमाणानि षट्सङ्ख्या षट्सु पात्रतः ।
सप्तमन्तु पृथक् कृत्वा शुचिस्थाने विशेषतः ॥
तद्भुक्तं गृहमागच्छेत् कन्यका वटुकस्त्रियः ।
भोजयेद्दक्षिणां दत्त्वा प्रणामं कारयेत्ततः ॥
विसृज्य खेटदेवीञ्च आद्यां तल्लकवेष्टदाम् ।
शकुनं वीक्षयेद्धीमान् शुभेन शुभमादिशेत् ॥
विपरीते पुनः कार्य्यं यागं तावत् सुसिद्धिदम् ।
प्रतिवर्षमिदं कुर्य्यात् दीर्घजीविसुतं लभेत् ।
सिद्धियोगमिदं ख्यातं नान्यथा शङ्करोदितम् ॥”
अथ मन्त्रः । ॐ परं ब्रह्म परमात्मने अमुकीगृहे दीर्घजीविसुतं कुरु कुरु स्वाहा ॥ * ॥
अथ काकबन्ध्या । ईश्वर उवाच ।
“पूर्व्वं पुत्त्रवती या सा कश्चिद्वन्ध्या भवेद्यदि ।
काकबन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ॥
विष्णुक्रान्तां समूलान्तु पिष्ट्वा माहिषदुग्धके ।
महिषीनवनीतेन ऋतुकाले तु भक्षयेत् ॥
एवं सप्तदिनं कुर्य्यान पथ्ययुक्तिश्च पूर्व्ववत् ।
गर्भं सा लभते नारी काकबन्ध्या सुशोभनम् ॥
अश्वगन्धीयमूलन्तु ग्राहयेत् पुष्यभास्करे ।
पेषयेन्माहिषीक्षीरे पलार्द्धं भक्षयेत् सदा ॥
सप्ताहाल्लभते गर्भं काकबन्ध्या चिरायुषम् ।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम् ॥”
अथ मन्त्रः । ॐ नमः शक्तिरूपाय अमुका गृहे पुत्त्रं कुरु कुरु स्वाहा । १०००० जपात सिद्धिः । इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे जन्मबन्ध्यादीनां पुत्त्रकरणं नाम सप्तदशपटलः ॥ क्वचिद्ग्रन्थे २० पटलः ॥

मृतसञ्जीवनी, स्त्री, (मृतं मृतप्रायम् जीवयतीति । जीव + ल्युट् + ङीप् च ।) गोरक्षदुग्धा । इति राजनिर्घण्टः ॥ मृतजीवनाधिका विद्या । यथा । अथ मृतसञ्जीवनी विद्या ।
“आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतीश्च
प्रोच्चार्य्य त्र्यम्बकं यो जपति च सततं संपुटं चानुलोमम् ।”
मृतिहरं त्र्यक्षरमृत्युञ्जयमन्त्रम् । संपुटितमिति अनुलोमक्रमेणैव संपुटमित्यर्थः । तेन हौं ततः प्रणवः ततो जूं सः ततः सप्रणवव्याहृतिः । मध्ये त्र्यम्बकमन्त्रः । ततो हौं प्रणवः जूं सः ततः सप्रणवव्याहृतिः । अस्य जपात् सर्व्वसिद्धिर्भवति ॥ * ॥ अथ शुक्रोपासिता मृतसञ्जीवनी विद्या । गायत्त्र्या एकैकपादानन्तरं त्र्यम्बकमन्त्रस्य एकैकपादश्च । ततश्च गायत्त्र्याः प्रथमपादानन्तरं सुगन्धिं पुष्टिवर्द्धनम् ।
द्वितीयपादानन्तरं उर्व्वारुकमिव बन्धनात् ।
तृतीयपादानन्तरं मृत्योर्मुक्षीयमामृतात् ॥
अस्य ध्यानम् ।
“अच्छं स्वच्छारविन्दस्थितमुभयकरे संस्थितौ पूर्णकुम्भौ
द्वाभ्यामेणाक्षमाले निजकरकमले द्वौ घटौ नित्यपूर्णौ ।
द्वाभ्यां तौ च स्रवन्तौ शिरसि शशिकलां चामृतैः प्लावयन्तं
देहं देवो दधानः प्रदिशतु विशदाकल्पजालः श्रियं वः ॥”
एवं ध्यात्वावाह्य प्रणवादित्र्यम्बकाय रुद्राय नमः । इत्यनेन पूजयेत् । अस्य जपात् सर्व्वसिद्धिः । इत्यागमतत्त्वविलासः ॥ (तथा च ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे ४५ । ११ ।
“महाज्ञानञ्च गोप्यञ्च मृतसञ्जीवनीं पराम् ।
महाज्ञानयुतां ताञ्च प्रवदन्ति मनीषिणः ॥”
(क्ली । यथा, मार्कण्डेये । २४ । ४२ ।
“ततः कुवलयाश्वं तं समाश्वास्य भुजङ्गमः ।
कथयामास तत्सर्व्वं मृतसञ्जीवनादिकम् ॥)

मृतस्नातः, त्रि, (ज्ञातिबन्ध्वादीनामन्यतमस्मिन् मृते सति मृतमुद्दिश्य विधिना स्नातः ।) मृतोद्देशेन स्नातः । तत्पर्य्यायः । अपस्नातः २ । इत्यमरः । ३ । १ । १६ ॥ मृतमुद्दिश्य कृतस्नाने जने । संस्कारार्थं स्नापिते मृते । इति स्वामी । इति तट्टीकायां भरतः ॥

मृतस्नानं, क्ली, (मृतमुद्दिश्य स्नानम् ।) मृतोद्देशेन स्नानम् । तत्पर्य्यायः । अपस्नानम् २ । इति हेमचन्द्रः । ३ । ३६ ॥

मृतस्वमोक्ता, [ऋ] पु, (मृतवत् स्वराज्यधनादिकं मुञ्चतीति । मुच् + वासरूपोऽस्त्रियाम् । ३ । १ । ९४ । इति पक्षे तृच् ।) राजर्षिः । इति हेमचन्द्रः । ३ । ३७७ ॥

मृतामदं, क्ली, (मृतः नष्टः आमदः अस्मात् ।) तुत्थम् । इति शब्दचन्द्रिका ॥

मृतालकं, क्ली, (मृतमालयति भूषयतीति । अल् + णिच् + ण्वुल् ।) आढकी । इत्यमरः । २ । ४ । १३१ ॥ (तथास्य पर्य्यायः ।
“सौराष्ट्री तुवरी काङ्क्षी मृतालकसुराष्ट्रजे ।
आढकी चापि सा ख्याता मृत्स्ना च सुरमृत्तिका ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मृतिः, स्त्री, (मृ + क्तिन् ।) मरणम् । इति हेमचन्द्रः । २ । २३६ । (यथा, श्रीमद्भागवते । ६ । १४ । ५४ ।
“परे तु जीवत्यपरस्य या मृति-
र्विपर्य्ययश्चेत्त्वमसि ध्रुवः परः ॥”
यथास्या विषयः ।
“यो गौरवर्णो विदधाति कार्य्यं
लघ्वोऽपि गौरत्वमुपैति यत्र ।
तथा मृतिं याति नरप्रसक्त्या
शौर्यं विहाय जडतोऽपि यो वै ॥

यो वैपरीत्यं श्रवणेन शब्दं
गृह्णाति वा यो न शृणोति च घोषं ।
स वै मृतिं पश्यति यो न पश्येत्
छायां स्वकीयां धरणीप्रपन्नाम् ॥”
इति हारीते द्वितीयस्थाने तृतीयेऽध्याये ॥)

मृत्करः, पुं, (करोतीति कृ+अच् । मृदां करः । घटादिनिर्म्माणत्वादस्य तथात्वम् ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥

मृत्कांस्यं, क्ली, शरावः । इति त्रिकाण्डशेषः ॥

मृत्किरा, स्त्री, (मृदं किरतीति । कॄ+“इगुपधज्ञाप्रीकिरः कः ।” ३।१।१३५ । इति कः । “ऋत इद्धातोः ।” ७ । १ । १०० ॥ इति इत् ।) घुर्घुरी । इति त्रिकाण्डशेषः । झुँझुरिया इति भाषा ॥

मृत्खनिनी, स्त्री, चर्म्मकपादपः । इति शब्दचन्द्रिका ॥

मृत्तालं, क्ली, (मृदं तालयति प्रतिष्ठापयतीति । तल्+णिच्+“कर्म्मण्यण् ।” ३ । २ । १ । इति अण् ।) आढ़की । इति शब्दरत्नावली ॥

मृत्तालकं, क्ली, (मृत्ताल+संज्ञायां कन् ।) तुवरिका । तुवरिकलाय इति अड़र इति च ख्यातम् । इत्यमरटीकायां भरतः । सौराष्ट्रमृत्तिका । इति राजनिर्घण्टः ॥

मृत्तिका, स्त्री, (मृदेव इति । मृद्+“मृदस्तिकन् ।” ५।४।३९ । इति स्वार्थे तिकन् । स्त्रियां टाप् ।) तुवरी । इति राजनिर्घण्टः ॥ मृत् । इत्यमरः । २ । १ । ४ ॥ माटी । इति भाषा । तत्पर्य्यायः । मृदा २ मृत्सः ३ । इति भरतः ॥ (अस्या भक्षणात् पाण्डुरोगोत्पत्तिः । तद्यथा,
“मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ॥
कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥”
इति माधवकरसंगृहीतरुग्विनिश्चये पाण्डुरोगाधिकारे । अन्यत् मृत्शब्दे द्रष्टव्यम् ।)
स्नानकाले मृत्तिकालेपनविधिर्यथा,—
“मृदा प्रक्षाल्य लिङ्गन्तु द्वाभ्यां नाभेस्तथोपरि ।
अधश्च तिसृभिः कार्यं षड्भिः पादौ तथैव च ॥
कटिश्च तिसृभिश्चापि हस्तयोर्दश मृत्तिकाः ।
प्रक्षाल्य कार्यं हस्तौ च द्विराचम्य यथाविधि ।
ततः संमार्जनं कृत्वा मृदमेवाभिमन्त्रयेत् ॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ! ।
उद्धृतासि वराहेण कृष्णेनामितबाहुना ॥
मृत्तिके हर मे पापं यन्मया पूर्ब्बसञ्चितम् ।
मृत्तिके ब्रह्मदत्तासि प्रजया च धनेन च ॥
मृत्तिके त्वाञ्च गृह्णामि काश्यपेनाभिमन्त्रिताम् ।
मृत्तिके जहि मे पापं यन्मया दुष्कृतं कृतम् ।
त्वया हृतेन पापेन ब्रह्मलोकं व्रजाम्यहम् ॥”
इति वह्निपुराणम् ॥*॥
शौचार्थंमृत्तिकाग्रहणविधिर्यथा,—
“आहृत्य मृत्तिकां कूलात् सगन्धापकर्षणम् ।
कुर्य्यादतन्द्रितः शौचं विशुद्धैरुद्धृतोदकैः ॥
नाहरेत् मृत्तिकां विप्रः पांशुलाञ्च च कर्द्दमात् ।
न मार्गान्नोषराद्देशाच्छौचोच्छिष्टां परस्य च ॥
न देवायतनात् कूपात् गेहान्न च जलात्तथा ।
उपस्पृशेत्ततो नित्यं पूर्ब्बोक्तेन विधानतः ॥”
इति कौर्म्मे उपविभागे १२ अध्यायः ॥
तस्याः परीक्षा मन्दिरशब्दे द्रष्टव्या ॥

मृत्फली, स्त्री, (मृदि फलनमस्याः । ङीष् ।) कुष्ठौषधम् । इति हारावली ॥

मृत्युः, पुं, (म्रियते अस्मादिति मृ+“भुजिमृङ्भ्यां युक् त्युकौ ।” उणा० । ३ । २१ । इति त्युक् ।) यमः । इति हेमचन्द्रः ॥ कंसः । यथा,—
“प्रत्यर्प्ये मृत्यवे पुत्त्रान् मोचये कृपणामिमाम् ।
सुता मे यदि जायेरन् मृत्युर्व्वा न म्रियेत
चेत् ॥”
इति श्रीभागवते १० स्कन्धे १ । ४९ ॥

मृत्युः, पुं, स्त्री, प्राणवियोगः । तत्पर्य्यायः । पञ्चता २ कालधर्म्मः ३ दिष्टान्तः ४ प्रलयः ५ अत्ययः ६ अन्तः ७ नाशः ८ मरणम् ९ निधनः १० । इत्यमरः ॥ पञ्चत्वम् ११ मृतम् १२ मृतिः १३ । इति तट्टीकायां रमानाथः ॥ नैधनम् १४ । इति तट्टीकासारसुन्दरी ॥ संस्था १५ कालः १६ परलोकगमः १७ दीर्घनिद्रा १८ निमीलनम् १९ अस्तम् २० अवसानम् २१ । इति हेमचन्द्रः ॥ भूमिलाभः २२ निपातः २३ विलयः २४ आत्ययिकम् २५ । इति शब्दरत्नावली ॥ अप्ययः २६ । (मरणार्थे यथा,—
“क्षीणस्य यस्य क्षुत्तृष्णे हृद्यैर्मिष्टैर्हितैस्तथा ।
न शाम्यतोऽन्नपानैश्च तस्य मृत्युरुपस्थितः ॥
प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥”
इति सुश्रुते सूत्रस्थाने ३१ अः ॥
“एकोत्तरं मृत्युशतमथर्व्वाणः प्रचक्षते ।
तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः ॥
दोषागन्तुजमृत्युभ्यो रसमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥”
इति च तत्र तत्स्थाने । ३४ अः ॥)
तत्प्रमाणं यथा,—
“अहमात्मोद्भवामीषां भूतानां सुहृदीश्वरः ।
अहं सर्व्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥”
इति श्रीमद्भागवते ११ स्कन्धे । १६ । १० ॥
स तु ब्रह्मणो गुदतो जातः । यथा,—
“पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ! ।
हिंसाया निरृतेर्मृत्योर्निरयस्य गुदं स्मृतम् ॥”
इति श्रीभागवते २ स्कन्धे ५ अध्यायः ॥
कल्पान्तरे भयात् मायायां जातः । यथा,—
“हिंसा भार्य्या त्वधर्म्मस्य तयोर्जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥
माया च वेदना चैव मिथुनं त्विदमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥
वेदना च सुतञ्चापि दुःखं जज्ञेऽथ रौरवात् ॥*॥
अस्यापत्यादि यथा,—
“मृत्योर्व्याधिर्जराशोकतृष्णाक्रोधाश्च जज्ञिरे ।
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ।
नैषां भार्य्यास्ति पुत्त्रो वा सर्व्वे ते ह्यूर्द्ध्वरेतसः ॥
निर्ऋतिश्च तथा चान्या मृत्योर्भार्य्याभवन्मुने ।।
अलक्ष्मीर्नाम तस्याश्च मृत्योः पुत्त्राश्चतुर्द्दश ॥
अलक्ष्मीपुत्त्रका ह्येते मृत्योरादेशकारिणः ।
विनाशकाले च नरान् भजन्त्येते शृणुष्व तान् ॥
इन्द्रियेषु दशस्वेते तथा मनसि च स्थिताः ।
स्वं स्वं नरं स्त्रियं वापि विषये योजयन्ति च ॥
तथेन्द्रियाणि चाक्रम्य रागलोभादिभिर्नरान् ।
योजयन्ति तथा हानिं यान्ति धर्म्मादिभिर्द्विज ! ॥
अहङ्कारगताश्चान्ये तथान्ये बुद्धिसंस्थिताः ।
विनाशाय नरस्त्रीणां यतन्ते मोहसंश्रयाः ।
एवं त्वधर्म्मेणोत्पन्नाः सर्व्वे चापि भयङ्कराः ॥”
इति मार्कण्डेयपुराणे दुःसहाशुभाख्यं नामाध्यायः ॥ विष्णुपुराणे प्रथमेऽंशे सप्तमोऽध्यायश्च ॥
मृत्युज्ञापकारिष्टानि यथा,—
दत्तात्रेय उवाच ।
“अरिष्टानि महाराज ! शृणु वक्ष्यामि तानि ते ।
येषामालोकनान्मृत्युं निजं जानाति योगवित् ॥
देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुन्धतीम् ।
यो न पश्येन्न जीवेत् स नरः संवत्सरात् परम् ॥
अरश्मि बिम्बं सूर्य्यस्य वह्निञ्चैवांशुमालिनम् ।
दृष्ट्वैकादशमासेभ्यो नरो नोर्द्ध्वं स जीवति ॥
वान्त्यां मूत्रे पुरीषे वा सुवर्णं रजतं यथा ।
प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकम् ॥
दृष्ट्वा प्रेतपिशाचादीन् गन्धर्व्वनगराणि च ।
सुवर्णवर्णान् वृक्षांश्च नव मासान् स जीवति ॥
स्थूलः कृशः कृशः स्थूलो योऽकस्मादेव जायते ।
प्रकृतेश्च निवर्त्तेत तस्यायुश्चाष्टमासिकम् ॥
खण्डं यस्य पदं पार्ष्ण्योः पादस्याग्रेऽथवा भवेत् ।
पांशुकर्द्दमयोर्म्मध्ये सप्त मासान् स जीवति ॥
कपोतगृध्रकाकोला वायसो वापि मूर्द्धनि ।
क्रव्यादो वा खगो नीलः षण्मासायुःप्रदर्शकः ॥
हन्यते काकपङ्क्तीभिः पांशुवर्षेण वा पुनः ।
स्वच्छायाञ्चान्यथा दृष्ट्वा पञ्च मासान् स जीवति ॥
अनभ्रे विद्युतं दृष्ट्वा दक्षिणां दिशमाश्रिताम् ।
पयसीन्द्रधनुर्व्वापि जीवितं द्वित्रिमासिकम् ॥
घृते तैले तथादर्शे तोये वा चात्मनस्तनुम् ।
यः पश्येदशिरस्कां वा मासादूर्द्ध्वं न जीवति ॥
यस्य,वस्तसमो गन्धो गात्रे शवसमोऽपि वा ।
तस्यार्द्धमासिकं ज्ञेयं योगिनो नृप ! जीवितम् ॥
यस्य वै स्नातमात्रस्य हृत्पादमवशुष्यति ।
पिवतश्च जलं शोषो दशाहं सोऽपि जीवति ॥
सम्भिन्नो मारुतो यस्य मर्म्मस्थानानि कृन्तति ।
न हृष्यत्यम्बुसंस्पर्शात्तस्य मृत्युरुपस्थितः ॥
ऋक्षवानरयुग्मस्थो गायन् यो दक्षिणां दिशम् ।
स्वप्ने प्रयाति तस्यापि न मृत्युः कालमिच्छति ॥
रक्तकृष्णाम्बरधरा गायन्ती हसती च यम् ।
दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥
नग्नं क्षपणकं स्वप्ने हसमानं प्रहस्य वै ।
एणं वा वीक्ष्य वल्गन्तं विद्यान्मृत्युमुपस्थितम् ॥
आमस्तकतलाद्यस्तु निमग्नं पङ्कसागरे ।
स्वप्ने पश्येत्तथात्मानं नरः सद्यो म्रियेत सः ॥

केशाङ्गारांस्तथा भस्म भुजगं निर्जलां महीम् ।
दृष्ट्वा स्वप्ने दशाहन्तु मृत्युरेकादशेऽहनि ॥
करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः ।
पाषाणैस्ताडितः स्वप्ने सद्यो मृत्युं समाप्नुयात् ॥
सूर्य्योदये यस्य शिवा क्रोशन्ती याति सम्मुखम् ।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति ॥
यस्य वै भुक्तमात्रेऽपि हृदयं पीड्यते क्षुधा ।
जायते दन्तसंघर्षः स गतायुरसंशयम् ॥
दीपादिगन्धं नो वेत्ति त्रसत्यग्निं तथा निशि ।
नात्मानं परनेत्रस्थं वीक्षते न स जीवति ॥
शक्रायुधञ्चार्द्धरात्रे दिवा ग्रहगणं तथा ।
दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवान् ॥
नासिका वक्रतामेति कर्णयोर्नमनोन्नती ।
नेत्रञ्च वामं स्रवति यस्य तस्यायुरुद्गतम् ॥
आरक्ततामेति मुखं जिह्वा वापि सिता तथा ।
तदा प्राज्ञो विजानीयान्मृत्युमासन्नमात्मनः ॥
उष्ट्ररासभयानेन यः स्वप्ने दक्षिणां दिशम् ।
प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वर ! ॥
पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम् ।
नश्यते चक्षुषोर्ज्योतिर्यस्य सोऽपि न जीवति ॥
पततो यस्य वै गर्त्ते स्वप्ने द्वारं पिधीयते ।
न चोत्तिष्ठति यः श्वभ्रात्तदन्तं तस्य जीवितम् ॥

ऊर्द्ध्वा च दृष्टिर्न च संप्रतिष्ठा
रक्ता पुनः संपरिवर्त्तमाना ।
मुखस्य चोष्मा शुषिरा च नाभिः
शंसन्ति पुंसामपरं शरीरम् ॥

स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते नरः ।
जलप्रवेशादपिवा तदन्तं तस्य जीवितम् ॥
यश्चाभिहन्यते दुष्टैर्भूतै रात्रावथो दिवा ।
स मृत्युं सप्तरात्रान्तात् पुमानाप्नोत्यसंशयम् ॥
स्ववस्त्रममलं शुक्लं रक्तं पश्यत्यथोऽसितम् ।
यः पुमान् मृत्युमापन्नं तस्यापि हि विनिर्द्दिशेत् ॥
स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्य्ययः ।
कथयन्ति मनुष्याणां समासन्नौ यमान्तकौ ॥
येषां विनीतः सततं यस्य पूज्यतमा मताः ।
तानेव योऽवजानाति तानेव च विनिन्दति ॥
देवता नार्च्चयेद्वृद्धान् गुरून् विप्रांश्च निन्दति ।
मातापित्रोरसत्कारं जामातॄणां करोति यः ॥
योगिनां ज्ञानविदुषामन्येषाञ्च महात्मनाम् ।
प्राप्तेऽन्तकाले पुरुषस्तद्विज्ञेयं विचक्षणैः ॥
योगिना सततं यत्नादरिष्टान्यवनीपते ! ।
संवत्सरान्ते तज्ज्ञेन फलदानि दिवानिशम् ।
विलोक्यानि सदा चैव फलपङ्क्तिषु भीरुणा ॥”
इति मार्कण्डेयपुराणे अलर्कोपाख्याने ४३ अः ॥
कर्म्मविशेषान्मृत्युविशेषो यथा,—
“येनाकृतानि नीचानि प्रीतिभेदः कृतो न च ।
आस्तिकः श्रद्दधानश्च स सुखं मृत्युमृच्छति ॥
आगारदाहिनो दाहं क्षुधं चान्नप्रदायिनः ।
प्राप्नुवन्ति नराः काले तस्मिन् मृत्यावुपस्थिते ॥
देवब्राह्मणपूजायां ये रताश्चानसूयवः ।
शक्ला वदान्या ह्रीमन्तस्ते नराः सुखमृत्यवः ॥
यो न कामान्न संरम्भान्न द्वेषाद् धर्म्ममुत्सृजेत् ।
यथोक्तकारी सौम्यश्च स सुखं मृत्युमृच्छति ॥
शीतं जयन्तीन्धनदास्तापं चोदकदायिनः ।
प्राणान्तीं वेदनां कष्टां ये चान्ये द्वेषकारिणः ॥
मोहाज्ञानप्रदातारः प्राप्नुवन्ति महद्भयम् ।
कूटसाक्षी मृषावादी यश्चासद्गुरुशास्ति वै ।
ते मोहमृत्यवः सर्व्वे तथान्ये वेदनिन्दकाः ॥”
इति मार्कण्डेयपुराणे पितापुत्त्रसम्वादे १० अध्यायः ॥ * ॥
मृत्युकालकर्त्तव्यक्षुद्रजन्तुवधप्रायश्चित्तं यथा,—
“वधेऽपि क्षुद्रजन्तूनां हिंसकानाञ्च पक्षिणः ।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते ॥
अहिंसकानां क्षुद्राणां वधे शतगुणं ध्रुवम् ।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
मृत्युसमये गङ्गागमनमावश्यकं यथा,—
“अहो सगरवंशेभ्यो निर्व्वाणमुक्तिदायिनी ।
वैकुण्ठगामिनां मार्गसोपानरूपिणी वरा ॥
अतोऽपि मृत्युसमये सतां पुण्यस्वरूपिणाम् ।
आदौ पादौ च विन्यस्य मुखे तोयं प्रदीयते ॥
गङ्गासोपानमारुह्य सन्तो यान्ति ममालयम् ॥”
इति तत्रैव ३४ अध्यायः ॥ * ॥
जन्मवतां मृत्योरपरिहार्य्यत्वं यथा,—
“मृत्युर्जन्मवतां वीर ! देहेन सह जायते ।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥”
इति श्रीभागवते १० स्कन्धे १ अध्यायः ॥
अपि च ।
“जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥”
इति श्रीभगवद्गीता ॥ * ॥
अकालमृत्युप्रशमनं स्तोत्रं यथा,—

सूत उवाच ।

“स्तोत्रं ततः प्रवक्ष्यामि मार्कण्डेयेन भाषितम् ।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति ॥१॥
गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥२॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥३॥
शङ्खचक्रधरं देवं छन्नरूपिणमव्ययम् ।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥४॥
वाराहं वामनं विष्णुं नारसिंहं जनार्द्दनम् ।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥५॥
पुरुषं पुष्करं पुण्यं क्षेमबीजं जगत्पतिम् ।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥६॥
सहस्रशीर्षं देवेशं व्यक्ताव्यक्तं सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥७॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥८॥
इत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः ।
अपयातस्ततो मृत्युर्विष्णुदूतैः प्रपीडितः ॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम् ॥
मृत्य्वष्टकमिदं पुण्यं मृत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥
य इदं पठति स्तोत्रं त्रिकालं नियतः शुचिः ।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥

हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
विचिन्त्य सूर्य्यादतिराजमानं
मृत्युं स योगी जितवांस्तदैव ॥”

इति गारुडे २३८ अध्यायः ॥ * ॥
शुभकर्म्मप्रतिबन्धकमृत्युदा योगा यथा,—
“आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः ।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा ॥”
अपि च ।
“रव्यादिदिवसैर्युक्ता विशाखादिचतुष्टयुः ।
उत्पाटा मृत्यवः काणा अमृतानि यथाक्रमम् ॥”
इति ज्योतिस्तत्त्वम् ॥

मृत्युञ्जयः, पुं, (मृत्युं जितवान् । जि + खच् + मुम् च ।) शिवः । इत्यमरः ॥ तन्नामकारणं यथा,—

सुयज्ञ उवाच ।

“शिवो लीनो निर्गुणे चेत् श्रीकृष्णे प्राकृते लये ।
कथं तव गुरोर्नाम मृत्युञ्जय इति श्रुतौ ॥”

सुतपा उवाच ।

“ब्रह्मणोऽन्ते मृत्युकन्या प्रनष्टा जलबिन्दुवत् ।
संहर्त्री सर्व्वलोकानां ब्रह्मादीनां नराधिप ! ॥
कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशो लयं ।
कालेन लीनः शम्भुश्च सत्त्वरूपी च निर्गुणे ॥
मृत्युकन्या जिता शश्वत् शिवेन गुरुणा मम ।
न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
रोगशान्त्यर्थं तस्य पूजाविधिर्यथा,—
“मृत्युञ्जयं समापूज्य लिङ्गं त्रिभुवनेश्वरम् ।
रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥
यस्तु संपूजयेद्भक्त्या लिङ्गं मृत्युञ्जयाभिधम् ।
यमोऽपि प्रणमेद्भक्त्या किं करिष्यति चामयः ॥
तस्य पूजाविधिं वक्ष्ये शृणु मत्प्राणवल्लभे ! ।
जातिभेदं मृत्तिकान्तु गृहीत्वाशीतितोलकम् ॥
निर्म्माय पार्थिवं लिङ्गं कांस्याधारे निवेशयेत् ।
पौराणिकेन मन्त्रेण कुर्य्याच्च गठनं बुधः ॥
स्नापयेत् पञ्चगव्येन प्रत्येकस्याष्टतोलकम् ।
सप्तसमन्त्रेण प्रत्येकद्रव्येण स्नापयेत् सुधीः ॥
रोगक्षयकामनया नामगोत्रादिपूर्व्वकम् ।
उपविश्यासने विप्रो धृत्वा धौते च वाससी ॥
रुद्राक्षमालां कण्ठे वै धृत्वा भस्मत्रिपुण्ड्रकम् ।
उपचारं षोड़शकं देयं भक्त्या प्रयत्नतः ॥
सुवर्णस्यासनं देयं तथैवाभरणानि च ।
वस्त्रयुग्मं प्रदद्यात्तु परिधेयं यथा भवेत् ॥
मधुपर्कं कांस्यपात्रे दद्याद्भोजनयोग्यकम् ।
बिल्वपत्रसहस्रञ्च अभग्नं विनिवेदयेत् ॥
एवं संपूज्य लिङ्गैकं जपेन्मन्त्रं सहस्रकम् ।
ततो होमं प्रकुर्य्याच्च दक्षिणां ब्राह्मणे ददेत् ॥

सुवर्णं वा मदर्हं वा देवि । विभवमानतः ।
अङ्गहीना न कर्त्तव्या पूजा चापलदा यतः ॥
एकलिङ्गं समाराध्य फलं स्यादन्यके युगे ।
तत् फलं लभते देवि ! कलौ संख्या चतुर्गुणा ॥
ताम्रपात्रे तु संस्थाप्य अशीतिनीलकं जलम् ।
तज्जलेनैव देवेशि । कुशैः संमार्ज्य रोगिणम् ॥
क्षिपेद्दीपशिखायाञ्च मन्त्रमुच्चार्य मामकम् ।
एवंविधिविधानेन पूजयेन्मम लिङ्गकम् ॥
यादृग्यादृग्भवेद्रोगो नाशमेति मयोदितः ।
साङ्गेन पूजयित्वा च लभते वाञ्छितं फलम् ॥
अङ्गव्यतिक्रमेणैव वृथा भवति वासना ।
रोगी प्रमुच्यते सद्यो भोगीव कञ्चुकोज्झितः ।
यदि मत्पूजने भक्तिस्तदा मुक्तो भवेन्नरः ॥”

इति मृत्युञ्जयतन्त्रम् ॥

(ज्वरनाशकौषधविशेषः । तद्यथा,—
“व्यक्तः विहितः शुद्धो रोगघ्नः कीर्त्तिवर्द्धनः ।
यशःप्रदः शिवः साक्षात् मृत्युञ्जयरसः स्मृतः ॥
विषस्यैकस्तथा भागो मरीचं पिप्पली कणा ।
गन्धकस्य तथा भागो भागः स्याट्टङ्कणस्य वै ॥
सर्व्वत्र समभागः स्याद्धिङ्गुलन्तु द्विभागकम् ।
चूर्णयेत् खल्लमध्ये तु मुद्गमानां वटीञ्चरेत् ॥
रसर्क्षात् समभागः स्याद्धिङ्गुलं नेष्यते तदा ।
मृत्युरूपं ज्वरं हन्ति मृत्युञ्जयरसः स्मृतः ॥
मृत्युर्विनिर्ज्जितो यस्मात्तस्मान्मृत्युञ्जयः स्मृतः ।
मधुना लेहनं प्रोक्तं सर्व्वज्वरनिवृत्तये ॥
दध्योदकानुपानेन वातज्वरनिवर्हणः ।
आर्द्रकस्य रसैः पानं दारुणे सान्निपातिके ॥
जम्बीररसयोगेन सर्व्वज्वरविनाशनः ।
अजाजीगुडसंयुक्तो विषमज्वरनाशनः ॥
तीव्रज्वरे महाघोरे पुरुषे यौवनान्विते ।
पूर्णमात्रा प्रदातव्या पूर्णं वटीचतुष्टयम् ॥
स्त्रीबालवृद्धक्षीणे च अर्द्धमात्राः प्रकीर्त्तिताः ।
नवज्वरे महाघोरे यामैकान्नाशयेद्ध्रुवम् ॥
मध्यज्वरे तथाजीर्णे त्रिरात्रान्नाशयेद्ध्रुवम् ।
सप्ताहात् सन्निपातोत्थं ज्वराजीर्णकसंज्ञ-
कम् ॥”

इति मृत्युञ्जयो रसः ॥ इति वैद्यकरसेन्द्रसार-संग्रहे ज्वराधिकारे ॥ क्ली, ज्ञानविशेषः । यथा, ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे । ४६ । ६५ ।
“शम्भुश्च चतुरो वेदान् वेदाङ्गानितरांस्तथा ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥”)

मृत्युनाशकः, पु, (नाशयतीति । नश् + णिच् + ण्वुल् । मृत्योर्नाशकः ।) पारदः । इति राजनिर्घण्टः ॥ मरणहारके, त्रि ॥

मृत्युपुष्पः, पुं, (मृत्यवे निजनाशाय पुष्पमस्य । सति पुष्पोद्गमे अस्य नाशात्तथात्वम् ।) इक्षुः । इति रत्नमाला ॥

मृत्युफलः, पुं, (मृत्यवे स्वनाशाय फलमस्य ।) महाकालफलम् । इति मेदिनी । ले, १६२ ॥

मृत्युफला, स्त्री, (मृत्यवे फलमस्याः ।) कदली । इति मेदिनी । ले, १६२ ॥ (कदलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

मृत्युबीजः, पुं, (मृत्यवे स्वनाशाय बीजमस्य ।) वंशः । इति त्रिकाण्डशेषः ॥

मृत्युभङ्गुरकः, पुं, मरणकालवादनीयपटहः । यथा,
“भवन्तु प्रेतपटहो मृत्युभङ्गुरकश्च सः ।”

इति त्रिकाण्डशेषः ॥

मृत्युभृत्यः, पु, (मृत्योर्भृत्यः किङ्कर इव । मरणहेतुत्वात् ।) रोगः । इति राजनिर्घण्टः ॥

मृत्युवञ्चनः, पुं, (मृत्युं वञ्चयतीति । वञ्चि + ल्युः ।) शिवः । बिल्ववृक्षः । द्रोणकाकः । इति मेदिनी । ने, २४५ ॥

मृत्युसूतिः, स्त्री, मृत्यवे सूतिः प्रसवो यस्याः सा । कर्कटी । यथा,—
“यथा कर्कटकी गर्भमाधत्ते मृत्युमात्मनः ।”

इति महाभारते विराटपर्व्वे ॥

मृत्स्ना, स्त्री, (प्रशस्ता मृत् इति । मृत् + “सस्नौ प्रशंसायाम् ।” ५ । ४ । ४० । इति स्नः । टाप् ।) प्रशस्तमृत्तिका । इत्यमरः । २ । १ । ४ ॥

मृत्स्ना, स्त्री, (प्रशस्ता मृत् इति । मृत् + स्नः । टाप् ।) प्रशस्तमृत्तिका । (यथा, श्रीमद्भागवते । ८ । ६ । १० ।
“त्वमादिरन्तो जगतोऽस्य मध्यम्
घटस्य मृत्स्नेव परः परस्मात् ॥”)
काची । इत्यमरः । २।१।४॥ (अस्याः पर्य्यायो यथा —
“सौराष्ट्री पार्व्वती मृत्स्ना काची च पङ्क-
पर्पटी ।”

इति वैद्यकरत्नमालायाम् ॥)

मृत्स्नाभाण्डक', पुं, (मृत्स्नानिर्म्मितं भाण्डम् । ततः कन् । अभिधानात् पुंस्त्वम् ।) भाण्डविशेषः । तत्पर्य्यायः । सुदिका २ । इति त्रिकाण्डशेषः ॥

मृद, श क्षुदि । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) श, मृद्नाति ममर्द । क्षुदि चूर्णीकरणे । इति दुर्गादासः ॥

मृद्, [त्] स्त्री, (मृद्यते चूर्णीक्रियते इति । मृद् + कर्म्मणि क्विप् ।) मृत् । मृत्तिका । इत्यमरः । २ । १ । ४ ॥ (यथा, मनौ । ४ । ३६ ।
“मृदं गां दैवतं विप्रं घृतं मधुचतुष्पथम् ॥”)

मृदकुरः, पु, हारीतपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

मृदङ्गः, पु, (मृद्यते आहन्यते असौ इति । मृद् + “विडादिभ्यः कित् ।” उणा० १ । १२० । इति अङ्गच् । स च कित् । यद्वा, मृत् अङ्गमस्येत्यमरटीकायां रघुनाथः ।) स्वनामख्यातवाद्यम् । तत्पर्य्यायः । मुरज. २ । इत्यमरः । १ । ७ ।५॥ (यथा, शिशुपालवधे । ११ । २ ।
“रजनिविरतिशंसी कामिनीनां भविष्यद्-
विरहविहितनिद्राभङ्गमुच्चैर्मृदङ्गः ॥”)
पटहः । घोषः । इति मेदिनी । गे, ४७ ॥ वंशः । इति शब्दमाला ॥ (मृदङ्गदर्शनं मङ्गलजनकत्वमाह स्मृतिः ।
“रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् ।
गुरुमग्निं तथा सूर्य्यं प्रातः पश्येत् सदा बुधः ॥”)

अथ मृदङ्गादिविवरणम् ।
“मर्द्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः ।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्चकैः ॥
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते ।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ॥
दक्षिणञ्च भवेद्धीनमेकेनार्द्धाङ्गुलेन वा ।
करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ॥
वल्लासीयो भवेद्वस्तचर्म्मकरणं मतम् ।
मृत्तिकानिर्म्मितश्चैव मृदङ्गः परिकीर्त्तितः ॥
पातयेन स्वरतिं वाद्यवादनार्थञ्च मर्द्दले ।
विभूतिर्गैरिकं भक्तं कैन्दुकेन च संयुतम् ॥
यद्वा चिपीटकं देयं जीवनीसत्त्वमिश्रितम् ।
सर्व्वमेकत्र पिष्टन्तल्लेपः स्वरतिरुच्यते ॥
वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे ।
एव मर्द्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥
अस्य संयोगमासाद्य सर्व्वं वाद्यञ्च शोभते ।
एतदङ्गे बीजकाष्ठं दलमर्द्धाङ्गुलं विदुः ॥ * ॥
तधि धीतिमिनि त्रयाः पाठवर्णा मृदङ्गजाः ।
थों दं ठ धिकटस्तद्वी ताकं दं दं थोगं धिधि ॥
खर्भ्भिं नं गटं दं था कुटपाटा मता अमी ।
तथिं थो ठि तकधी दो दं दं धिगणा ततं तधि ॥
तक तं धं धि दों ताधि पाठखण्डे त्वयं क्रमः ।”
तथा च यतिमाने पाठखण्डः । द्रगतथेनां द्रगतथेनां धों धों धिकता धिका थोनां थोनां तक तता धिका थोता द्रग तता धि धि धिधि कड ताकड़ नाथोधिक थोनां धोताद्रगत ताद्रगत ताद्रगत ताधि । इति यतिमाने पाठखण्डः ॥ * ॥
“यतिरोढ़ोऽप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गलपः सारिगोणी च नादश्च कथितं तथा ।
प्रहरणं द्वन्द्वनञ्च प्रबन्धा द्वादश स्मृताः ॥”
यथा । दं थान इत्येकताल्यां यतिः ॥ * ॥ ओढ़वाद्यं यथा । दां नथो नधिक नधिक दं थादं था थोधि थोधि तत्त ततथ थिथ विदिशां दिशां टट् न कि टट् नकि नद टङ्ग नद टङ्ग खवटङ्ग खवटङ्ग नगि नगि नगि नगि दां दां दं दं दीं दां दं ता तथा । इत्योढ़वाद्यम् ॥ * ॥ अवच्छेदवाद्यं यथा । द थानः दं थानः धिक्कि धिक्कि दिगणं दं थानः । इत्यवच्छेदवाद्यम् ॥*॥ गजरवाद्यं यथा । थोक टेन नेन टेके गथो गथोक्क टक्क थोगनकि धिक नकि धिक टेङ्गन धि धि कट तक थोक नधिकट तक्कक नथोंग तद्धीम् । इत्येकताल्यां गजरः ॥ * ॥ रूपकवाद्यं यथा । तकधिक् तकधिक्क थवितकि थवितक्कि धिक्क दं थानः । इति रूपकवाद्यम् ॥*॥ ध्रुवकवाद्यं यथा । तक्क तक्कट धिक्क धिक्कट । इति निःसारताले ध्रुवकः ॥ * ॥ गलपो यथा । नधिद्धि धिक तक नधि गलगं था था द तथा ठच्चन । इत्येकताल्यां गलपः ॥ * ॥ सारिगोणी यथा । थोङ्गटेन तक्क धिक्क तकधिक् तकथो हटङ्गन हटङ्गन थोगक्क थोः । इति प्रथमखण्डः ॥ * ॥ टेन थोः धि खोहः टेन टेन

दक्क नगदक्क धिक्क नदिदक्क दं गदं गखो गखोक नक नक धिक नधिक् नधो टेन्न घोटेन्न घटे गज खोगगज खोग खोदट गें टगें खोट-टन्न। इत्यस्य छन्दनम्। इति सारिगोष्ठी ॥ नादो यथा,—

"दांकारत्रितयं पूर्व्वं दां धिगिति ततस्त्रयम्।
दां दां धिकत्रयं यत्र इति नादः प्रकीर्त्तितः ॥"

इति नादः ॥

"द्रुतं मानसमारब्धं शुद्धं कूटविनिर्म्मितम्।
सप्तघक्कमयं वाद्यं कथितं तद्विहोच्यते ॥" * ॥

द्रुतमानत्वात् प्रतिताले यथा। ततत ततत तक्कि तक्कि दिदं धिगनधो धिगनधो धिक्क धिक् धिक्क धिक्क धिक नगि नगनि धो धो धि धिं धि: दां दां धिक्क धो धो धो द्वधो द्वनन्नि धो नन्निधो धोद्व धोद्व डेंटि डेंटि धोद्व धोद्व नटि नटि नटुक गीं गीं धगि धगि तत तधे तत तधे ततत गिडी जडी धोग धोग धीं धोगग धोगधो तत्ततो।

"इति सप्तपदान्याहुः कथितं वाद्यपण्डिताः।
प्रतितालेन तालेन पादवर्णसमासतः ॥
गन्धर्व्वपतिना पूर्व्वमुर्व्वशीलास्यनर्त्तने।
सुधर्म्मारङ्गनार्थञ्च कथितं प्रकटीकृतम् ॥"

प्रहरणं यथा। धोगक्का तह्निका धाग कट गगों दं धोग दिह्निक धिक्क धिकटेन्न। इत्येकतालां प्रहरणम् ॥ * ॥

"वाद्यं विमुच्यते येन छन्दनं तन्निगद्यते।"

यथा, तह्निधोऽदिन्न टेन्न नन्नः। इति छन्दनम् ॥ * ॥

मर्द्दलक्वयोदशाङ्गुलवाममुखो द्वादशाङ्गुलदक्षिणमुखः। मुरजस्त्वष्टादशाङ्गुलवाममुखः सप्तदशाङ्गुलदक्षिणमुखः मर्द्दलमुरजयोरयं भेदः। इति सङ्गीतदामोदरः ॥

मृदङ्गफलः, पुं, (मृदङ्गस्तदाकृति फलमस्य।) पनसवृक्षः। इति शब्दरत्नावली ॥

मृदङ्गफलिनी, स्त्री, (मृदङ्गवत् फलमस्त्यस्याः। इनिः ङीप् च।) कोषातकी। इति राजनिर्घण्टः ॥ (विषयोऽस्याः कोषातकीशब्दे ज्ञेयः ॥)

मृदङ्गी, स्त्री, (मृदङ्गः तदाकारफलमस्त्यस्या इति। मृदङ्ग + अर्शआद्यच् ङीष् च।) घोषातकी। इति रत्नमाला ॥ श्वेतघोषा इति भाषा ॥

मृदा, स्त्री, (मृद् + टाप्।) मृत्तिका। इति द्विरूपकोषः ॥

मृदाकरः, पुं, वज्रम्। इति शब्दमाला ॥

मृदितः, त्रि, मृदधातोः कर्म्मणि क्तः। चूर्णीकृतः। (यथा,—

"त्रिमूत्रिपालीये मृदितः फाएट इत्यभिधीयते ॥"

इति वैद्यकपरिभाषायाम् ॥)

मृदिनी, स्त्री, (मृद् + भावे कः। मृदः चूर्णीकरणमस्त्यस्याः। मृद + इनिः। स्त्रियां ङीप्।) प्रशस्तमृत्तिका। इति शब्दचन्द्रिका ॥

मृदुः, त्रि, (म्रद्यते म्रदितुं शक्यते इति। म्रद् + "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च।" उणा० १। २८। इति कुः।) अतीक्ष्णः। कोमलः। इत्यमरः। ३। १। ७८॥ (यथा,—

"मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

गृहकन्यायां स्त्री। इति राजनिर्घण्टः ॥ (पुं, नृपश्वफल्कराजपुत्रः। इति विष्णुपुराणे। ४। २१। ३ ॥)

मृदुकृष्णायसं, क्ली, (मृदु च तत् कृष्णायसं चेति।) सीसकम्। इति राजनिर्घण्टः ॥

मृदुगणः, पुं, (मृदूनां गणः।) चित्रानुराधामृगशिरोरेवतीनक्षत्राणि। यथा। चित्रामित्रमृगान्त्यभं मृदुगणः। इति ज्योतिस्तत्त्वम् ॥

मृदुगमना, स्त्री, (मृदु गमनमस्याः।) हंसी। इति राजनिर्घण्टः ॥ मन्दगमना स्त्री च ॥

मृदुचर्म्मी, [न्] पुं, (मृदु कोमलं चर्म्म त्वक्। तदस्त्यस्य। चर्म्म + "व्रीह्यादिभ्यश्च।" ५।२।१२। इति इनिः।) भूर्ज्जवृक्षः। इति राजनिर्घण्टः ॥ कोमलत्वग्विशिष्टे, त्रि ॥

मृदुच्छदः, पुं, (मृदुः छदः पत्रमस्य।) भूर्जवृक्षः। इति हेमचन्द्रः। ४।२१०॥ गिरिजपीलुवृक्षः। इति जटाधरः ॥ कुक्कुरद्रुः। शीतालः। इति राजनिर्घण्टः ॥

मृदुता, स्त्री, (मृदु + तल् + टाप्।) मृदुत्वम्। मृदोर्भावः। इति व्याकरणम् ॥ (यथा, रघौ। ५। ५४ ॥

"स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत् ॥")

मृदुतालः, पुं, (मृदूनि तालफलान्यस्य।) शीतालवृक्षः। इति राजनिर्घण्टः ॥ कोमलतालश्च ॥

मृदुत्वक्, [च्] } पुं, भूर्जवृक्षः। इत्यमरः।२।४।४६॥
मृदुत्वचः, } मृदवस्त्वचोऽस्य मृदुत्वक् चान्तः। भूर्ज्जोऽथ भूर्जपत्रः स्यात् मृदुत्वक् पत्रपुष्पकः। इति कोषान्तरमिति मधुः। अदन्तनपुंसकत्वचशब्देन आवन्तत्वचाशब्देन वा विग्रहे मृदुत्वचोऽदन्तोऽपि भूर्जो भुजो बहुपटो बहुत्वक्को मृदुत्वचः। इति स्वामी। इत्यमरटीकायां भरतः ॥

मृदुत्तकं, क्ली, (मृदा मृत्परिणामेन उत् ऊर्द्ध्वं नीयते यत् इति। उत् + नी + डप्रकरणे "अन्येष्वपि दृश्यते।" ३। २। ४८। इत्यत्र काशिकोक्त्या डः। ततः स्वार्थे कन्।) सुवर्णम्। इति शब्दचन्द्रिका ॥

मृदुपत्रः, पुं, (मृदूनि पत्राण्यस्य।) नलः। इति राजनिर्घण्टः ॥ कोमलपर्णे, क्ली। तद्वति, त्रि ॥

मृदुपत्री, स्त्री, (मृदूनि पत्राणि यस्याः।) चिल्लीशाकम्। इति राजनिर्घण्टः ॥

मृदुपर्व्वकः, पुं, (मृदूनि पर्व्वाण्यस्य कप्।) वेत्रः। इति राजनिर्घण्टः ॥ कोमलपर्व्वविशिष्टे, त्रि ॥

मृदुपुष्पः, पुं, (मृदूनि कोमलानि पुष्पाण्यस्य।) शिरीषवृक्षः। इति रत्नमाला ॥ कोमलकुसुमयुक्ते, त्रि ॥

मृदुफलः, पुं, (मृदूनि फलान्यस्य।) विकङ्कतः। मधुनारिकेरिकः। विकण्टकवृक्षः। इति राजनिर्घण्टः ॥ कोमलफलवति, त्रि ॥

मृदुलं, क्ली, (मृदु मृदुत्वमस्त्यस्य। मृदु + "सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) जलम्। इति शब्दचन्द्रिका ॥ कोमले, त्रि। इत्यमरः। ३। १। ७८ ॥ (यथा, शिशुपालवधे। ६। २।

"मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः ॥")

मृदुलोमकः, पुं, (मृदूनि अश्लक्ष्णानि लोमानि यस्य सः। स्वार्थे कन्।) शशकः। इति हेमचन्द्रः। ४। ३६१ ॥ कोमलरोमविशिष्टे, त्रि ॥

मृदूत्पलं, क्ली, (मृदु कोमलं उत्पलम्।) नीलपद्मम्। इति शब्दचन्द्रिका ॥

मृद्गः, पुं, (मृदं पङ्कं गच्छति कारणत्वेन प्राप्नोतीति। गम् + डः।) मत्स्यभेदः। इति संक्षिप्तसारोणादिवृत्तिः ॥

मृद्वङ्गं, क्ली, (मृदु कोमलं अङ्गं यस्य।) वङ्गम्। इति हेमचन्द्रः ॥ (मृदु च तदङ्गञ्चेति।) कोमलावयवश्च ॥

मृद्वी, स्त्री, (मृदु + "वोतोगुणवचनात्।" ४। १। ४४। इति ङीष्।) कोमलाङ्गी। इति मुग्धबोधव्याकरणम् ॥ अपि च।

"सद्यः पुरीपरिसरेषु शिरीषमृद्वी
सीता जवात्रिचतुराणि पदानि गत्वा।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥"

इति महानाटकम् ॥

कपिलद्राक्षा। इति राजनिर्घण्टः ॥

मृद्वीका, स्त्री, (मृदु + बाहुलकात् ईकन् टाप् च।) द्राक्षा। इत्यमरः। २। ४। १०७॥ (यथा, बृहत्संहितायाम्। ५५। १०।

"जम्बूवेतसवानीरकदम्बोदुम्बरार्ज्जुनाः।
बीजपूरकमृद्वीकालकुचाश्च सदाडिमाः ॥")

कपिलद्राक्षा। इति राजनिर्घण्टः ॥

मृध, उ ञ क्लिदि। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सेट्। क्त्वावेट्।) उ, मर्द्धित्वा मृद्धा। ञ, मर्धति मर्धते। क्लिदि आर्द्रीभावे। इति दुर्गादासः ॥

मृधं, क्ली, (मर्धन्ते क्लिद्यन्तेऽत्र। मृध् + कः।) युद्धम्। इत्यमरः। २। ८। १०४ ॥ (यथा, हरिवंशे। १८९। १।

"अपयाते ततो देवे लक्ष्मे चैव महात्मनि।
पुनश्चावर्त्तत मृधं परेषां लोमहर्षणम् ॥")

मृधा, व्य, मृषा। इत्यमरटीकासारसुन्दरी ॥

मृन्मरुः, पुं, (मृत्सु मरुः।) पाषाणः। इति त्रिकाण्डशेषः ॥

मृश, श औ मृशि। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट्।) श, मृशति। औ, अमार्क्षीत् अम्राक्षीत् अमृक्षत्। मृशि इति तालव्यान्तस्यैव क्किपि रूपम्। तेन आवि-

दिं दादित्वात् अर्थने प्रणिधाने च अस्यार्थः । अर्थने । यथा, रघौ । ३ । ६८ ।

"परामृशन् हर्षजडेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम् ।"

प्रणिधाने ।

"रामप्रवासे व्यमृशन्न दोषं
जनापवादं सनरेन्द्रमृत्युम् ।"

कैकयीति भट्टिः । ३ । ७ ॥

विमर्षो परामर्षः । मृषि इति मूर्द्धन्यान्तपाठो ज्ञेयः । तर्हि क्षमेवार्थः स्यात् । इति, दुर्गादासः ॥

मृष, तृ क } क्षान्तौ । इति कविकल्पद्रुमः ॥
मृष, तृ ञ } (अदन्त चुरा०-पर०-सक०-सेट् । अन्यत्र, अदन्त भ्वा०-उभ०-सक०-सेट् ।) मूर्द्धन्योपधौ । क, मृषयति । ञ, मृषति मृषते । इति दुर्गादासः ॥

मृष, उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, मर्षित्वा मृष्ट्वा । इति दुर्गादासः ॥

मृष, क क्षान्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, मर्षयति । अयमात्मनेपदीत्येके । इति दुर्गादासः ॥

मृष, ञ ङ उ क्षान्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-आत्म०-च-सक०-सेट् । क्त्वावेट् ।) ञ, मर्षति मर्षते । ङ, मर्षते । उ, मर्षित्वा मृष्ट्वा । अपि गुरुमपराधं मर्षति ब्राह्मणाना मिति हलायुधः । इति दुर्गादासः ॥

मृष, य ञ क्षान्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-उभ०-सक०-सेट् ।) य ञ, मृष्यति मृष्यते ममर्ष । इति दुर्गादासः ॥

मृषा, व्य, (मृष्यत इति । मृष् + का ।) मिथ्या । इत्यमरः । ३ । ४ । १५ ॥ (यथा, नैषधचरिते । १ । ६८ ।

"मृषान्वधं सादितवान् कुतूहला-
न्नलस्य नासीरगत वितनतुः ।")

वृथा । इति तट्टीकासारसुन्दरी ॥

मृषार्थकं, क्ली, (मृषा अर्थोऽस्य । बहुव्रीहौ कप् ।) अत्यन्तासम्भवार्थवाक्यम् । तत्पर्य्यायः । आहतम् २ । इत्यमरः । १ । ६ । २१ । अत्यन्तासम्भवार्थे वचसि । आहन्यते स्म आहतं क्तः । मृषा मिथ्या अर्थोऽस्य मृषार्थकं इह मृषार्थ यत् सर्व्वथा न घटते । यथा,—

"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
कूर्म्मलोमतनूत्राणः शशशृङ्गधनुर्द्धर इति ॥
यावज्जीवमहं मौनी ब्रह्मचारी पिता ममेति ।

अस्य चायं भेदः मौनित्वं ब्रह्मचारित्वं अन्यत्र सिद्धमेव वन्ध्यासुतत्वं खपुष्पत्वञ्चान्यत्रासिद्ध मिति । इति भरतः ॥

मृषाध्यायी, [न्] पु, (मृषा ध्यायति चिन्तयतीति । ध्यै + णिनिः ।) वकः । यथा,—

"कङ्को बको वकोटश्च तीर्थसेवी च तापसः ।
मीनघाती मृषाध्यायी निश्चलाङ्गश्च दाम्भिकः ॥"

इति राजनिर्घण्टः ॥

मृषालकः, पुं, (मृषा मिथ्या अचिरस्थायित्वेन सकुलीनमकाल एवेत्यर्थः । अलं अलङ्करणं, कायति प्रकाशयतीति । कै + कः ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मृषावादः, पुं, (मृषा मिथ्या वादः कथनम् ।) मिथ्यावाक्यम् । तत्पर्य्यायः । चक्रूरी २ । इति जटाधरः ॥ (यथा, महाभारते । ३ । १८८ । ३३ ।

"बहवो म्लेच्छराजानः पृथिव्यां मनुजाधिप । ।
मृषानुशासिनः पापा मृषावादपरायणाः ॥")

मृषावादी, [न्] त्रि, (मृषा वदतीति । वद + णिनिः ।) मिथ्यावादकः । तत्पर्य्यायः । मृषोद्यः । इति शब्दमाला ॥ मिथ्याभियोक्ता, च ॥

मृषोद्यं, क्ली, (मृषा + वद + "राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ।" ३ । १ । ११४ । इति कर्म्मणि क्यप् । निपातितश्च ।) मिथ्यावाक्यम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिकाव्ये । ५ । ६० ।

"मृषोद्यं प्रवदन्तीं तां सत्यवादी रघूत्तमः ॥")

मृषोद्यः, त्रि, मिथ्यावादी । इति शब्दमाला ॥

मृष्टं, क्ली, (मृज + क्तः ।) मरिचम् । इति राजनिर्घण्टः ॥

मृष्टः, त्रि, (मृज + क्त ।) शोधितम् । इत्यमरः । ३ । ४ । ५६ ॥ (यथा, बृहत्संहितायाम् । ८५ । ६ ।

"अशुभकरमतोऽन्यथाप्रदिष्टं
स्थितपतितं च करोति मृष्टमन्नम् ॥")

मृष्टेरुकः, पु, वदान्यः । मिष्टाशी । अतिथिद्विट् । इति मेदिनी । के, २०६ ॥

मॄ, शि वधे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) शि, मृणाति । मूर्णः । मूर्त्तिः । इति दुर्गादासः ॥

मे, ङ प्रतीदाने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) प्रतीदानं परिवर्त्तः । ङ, मयते धान्येन माषं लोकः । इति दुर्गादासः ॥

मे, त्रि, मह्यम् । आमाके इति भाषा । मम आमार इतिभाषा । एत अस्मच्छब्दस्य चतुर्थीषष्ठ्येकवचनाभ्यां निष्पन्नं । इति व्याकरणम् ॥

मेकः, पु, (मे इति कायति शब्दं करोतीति । कै शब्दे + कः ।) छागः । इति राजनिर्घण्टः ॥

मेक(ख)लकन्यका, स्त्री, (मेक(ख)लः मेखलायुक्तः विन्ध्यपर्व्वतः तस्य कन्यका । तस्य नितम्बदेशात् निःसृतेत्यर्थः ।) नर्म्मदानदी । इत्यमरः । १ । १० । ३२ ॥

मेक(ख)लाद्रिजा, स्त्री, (मेक(ख)लात् नितम्बदेशोपलक्षितात् अद्रेर्जाता । जन + डः + स्त्रियां टाप् ।) नर्म्मदानदी । यथा,—

"रेवेन्दुजा पूर्व्वगङ्गा नर्म्मदा मेकलाद्रिजा ।"

इति हेमचन्द्रः ॥

मेक्षणं, क्ली, यज्ञीयपात्रविशेषः । (यथा, आश्वलायनश्रौतसूत्रे । २ । ६ । १० ।

"मेक्षणेनादायावदानसम्पदा जुहुयात् ॥")

यथा, मेक्षणादीनाह छन्दोगपरिशिष्टम् ।

"इध्मजातीयमिध्माद्धप्रमाणं मेक्षणं भवेत् ।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् ।

एषाद्धप्रमाणम् ।

प्रादेशद्वयमिध्मस्य प्रमाणं परिकल्पितमिति ।

तदर्द्धम् । एषैव दर्व्वी । विशेषस्तु महाब्रुवे ।

"दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयेण तु मेक्षणम् ।
मुषलोदूखले वार्क्षे स्वायते सुदृढे तथा ॥"

इति संस्कारतत्त्वम् ॥

मेखला, स्त्री, (मीयते प्रक्षिप्यते कायमध्यभागे इति । मि + संज्ञायां खलः गुणश्च स्त्रियां टाप् । इत्यमरटीकायां भरतमतम् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा ॥ (यथा, रघुवंशे । ८ । ६४ ।

"असमाप्य विलासमेखलां
किमिदं किन्नरकण्ठि ! सुप्यते ॥")

तत्पर्य्यायः । काञ्ची २ सप्तकी ३ रसना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चिः ६ रशना ७ कक्षा ८ रसनम् ९ रशनम् १० कक्ष्या ११ सप्तका १२ सारशनम् १३ । इति शब्दरत्नावली ॥ कलापः १४ । इति जटाधरः ॥ सारसनं स्त्रीकट्यां वस्त्रग्रन्थनम् । इति स्वामी ॥ केचित्तु ।

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका ।
रसना षोडश ज्ञेया कलापः पञ्चविंशकः ॥"

इति पठन्ति । इह त्वभेदात् पर्य्यायता । इति भरतः ॥ खड्गादिनिबन्धनम् । इत्यमरः । २ । ८ । ६० ॥ शृङ्खलिका । चर्म्मरज्ज्वादि । सूचिदार्ढ्यार्थं उपर्य्यधो लौहबन्धः । इत्येके । इत्यपि भरतः ॥ * ॥ शैलनितम्बः । इति मेदिनी । ले, १२५ ॥ नर्म्मदानदी । इति शब्दरत्नावली ॥ पृश्निपर्णी । इति राजनिर्घण्टः ॥ * ॥ उपनयनकाले धारणीयमुञ्जनिर्म्मितसूत्रत्रयम् । यथा । अथैनं माणवकमाचार्य्यः प्रदक्षिणं त्रिवृन्मुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति । इति भवदेवभट्टः ॥ अपि च । गोभिलः । मुञ्जकाशतान्वो रसनाः । मुञ्जः शरः । तान्वः शणस्तद्भवा तान्वी । रसना मेखला । तथा च मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य
मेखला ।
क्षत्त्रियस्य च मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
मुञ्जालाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

अन्यच्च ।

"गर्भाष्टमेऽष्टमे वाब्दे स्वसूत्रोक्तविधानतः ।
दण्डी च मेखली सूत्री कृष्णाजिनधरो मुनिः ॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य
मेखला ।
मौञ्ज्यभावे कुशेनाहुर्ग्रन्थिनैकेन च त्रिभिः ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

होमकुण्डोपरिस्थहट्टितवेष्टनविशेषः । यथा, वशिष्ठपञ्चरात्रे ।

"यावान् कुशस्य विस्तारः खननं तावदिष्यते ।
हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः ॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः ।
चतुर्हस्ते तु कुण्डे ता वसुतर्कयुगाङ्गुलाः ॥"
मेखला ब्रह्मचारिमेखलावत् कुण्डवेष्टिता वप्र-घटिता ताश्च खातदेशाद्वाह्ये एकाङ्गुलिरूपं कण्ठं परित्यज्य उच्छ्रायेण विस्तारेण चेत्यादि क्रमेण वेदाद्यङ्गुलाः एतद्विपरीतास्तन्त्रान्तरोक्ता व्यवहारविरुद्धाः । वेदाश्चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः । वसुतर्कयुगानि अष्टषट्चत्वारि । पिङ्गलामतेऽपि । खाता-देकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत् । इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥ (यज्ञवेदन-सूत्रम् । यथा, श्रीमद्भागवते । ४ । ५ । १५ ।
"ऋत्विजयज्ञपात्राणि तथैकेऽग्नीननाशयन् ।
कुण्डेष्वमूत्रयन् केचिद्बिभिदुर्वेदिमेखलाः ॥"
"मेखलाः सीमासूत्राणि ।" इति तट्टीकायां श्रीधरस्वामी ॥)

मेखलकन्यका, स्त्री, (मेखलस्य मेखलोपलक्षितस्य विन्ध्यगिरेः कन्येव प्रसूता ।) नर्म्मदानदी । इत्यमरटीकायां भरतः ॥

मेघः, पुं, (मेहतीति । मिह् + अच् । "न्यङ्क्वा-दीनाञ्च ।" ७ । ३ । ५३ । इति कुत्वम् ।) मुस्तकः । राक्षसः । इति शब्दरत्नावली ॥ स्वनामख्यातनभस्थपदार्थः । मेहति सिञ्चति यः । तत्पर्य्यायः । अभ्रम् २ वारिवाहः ३ स्तनयित्नुः ४ बलाहकः ५ धाराधरः ६ जल-धरः ७ तडित्वान् ८ वारिदः ९ अम्बुभृत् १० घनः ११ जीमूतः १२ मुदिरः १३ जलमुक् १४ धूमयोनिः १५ । इत्यमरः । १ । ३ । ७ ॥ अभ्रम् १६ पयोधरः १७ अम्भोधरः १८ व्योमधूमः १९ घनाघनः २० वायुदारः २१ नभश्चरः २२ कन्धरः २३ कन्धः २४ नीरदः २५ गगनध्वजः २६ वारिमुक् २७ वार्म्मुक् २८ वनमुक् २९ अब्दः ३० पर्ज्जन्यः ३१ नभोगजः ३२ मदयित्नुः ३३ कदः ३४ कन्दः ३५ गवेडुः ३६ गदामरः ३७ खतमालः ३८ वातरथः ३९ श्वेतनीलः ४० नागः ४१ जलकरङ्कः ४२ पेचकः ४३ भेकः ४४ दर्दुरः ४५ । इति शब्द-रत्नावली ॥ अम्बुदः ४६ तोयदः ४७ अम्बुवाहः ४८ । इति रत्नमाला ॥ पाथोदः ४९ गदाम्बरः ५० गाडवः ५१ वारिमसिः ५२ । इति त्रिकाण्ड-शेषः ॥ तद्वैदिकपर्य्यायाः । अद्रिः १ ग्रावा २ गोत्रः ३ वलः ४ अश्नः ५ पुरुभोजाः ६ वलि-शानः ७ अश्मा ८ पर्व्वतः ९ गिरिः १० व्रजः ११ चरुः १२ वराहः १३ शम्बरः १४ रौहिणः १५ रैवतः १६ फलिगः १७ उपरः १८ उपलः १९ चमसः २० अहिः २१ अभ्रम् २२ बलाहकः २३ मेघः २४ दृतिः २५ ओदनः २६ वृषन्धिः २७ वृत्रः २८ असुरः २९ कोशः ३० । इति त्रिंशन्मेघनामानि । इति वेदनिघण्टौ ।१।१०॥ (यथा, उत्तररामचरिते । २ ।
"मेघमालेव यश्चायमारादपि विभाव्यते ॥")
मेघनायका यथा,—
"त्रियुते शाकवर्षे तु चतुर्भिः शोधिते क्रमात् ।
आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम् ॥"
एषां फलानि ।
"आवर्त्तो निर्ज्जलो मेघः संवर्त्तश्च बहूदकः ।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
त्रेतायुगे तस्योत्पत्तिर्यथा,—
"अपां सिद्धे प्रतिगते तदा मेघात्मना तु वै ।
मेघेभ्यस्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्ज्जनम् ॥
सकृदेव तया वृष्ट्या संयुक्ते पृथिवीतले ।
प्रादुरासंस्तदा तासां वृक्षा वै गृहसंज्ञिताः ॥
सर्व्वप्रत्युपभोगस्तु तासां तेभ्यः प्रजायते ।
वर्त्तयिष्यन्ति ते तस्मात्त्रेतायुगमुखे प्रजाः ॥"
इति कौर्म्मे २९ अध्यायः ॥ * ॥
प्रलयकालीनमेघा यथा,—
"ततो गजकुलोन्नादास्तडितैः समलङ्कृताः ।
उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः ॥
केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः ।
धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः ॥
केचिद्रक्ताभवर्णाश्च स्थूलाः चारणिभास्तथा ।
शङ्खकुन्दनिभाश्चान्ये जात्याञ्जननिभाः परे ॥
मनःशिलानिभास्त्वन्ये कपोतसदृशाः परे ।
केचिद्धरिद्रावर्णाभास्तथान्ये चौरसन्निभाः ॥
तथा कर्व्वुरवर्णाभा भिन्नाञ्जननिभास्तथा ।
इन्द्रगोपनिभाः केचित् हरितालनिभास्तथा ॥
काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि ।
केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः ॥
कूटागारनिभाश्चान्ये केचिन्मीनकुलोद्वहाः ।
बहुरूपा घोररूपा घोरस्वरनिनादिनः ।
तदा जलधराः सर्व्वे पूरयन्ति नभस्थलम् ॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः ।
सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥
ततस्ते जलदा वर्षं वर्षन्तीह महौघवत् ।
सुघोरमशिवं सर्व्वं नाशयन्ति च पावकम् ॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल ।
अद्भिस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपि ॥
नष्टे चाग्नौ वर्षशतैः पयोदाः क्षयसम्भवाः ।
प्लावयन्तोऽथ भुवनं महाजलपरिस्रवैः ॥
धाराभिः पूरयन्तीदं चोद्यमानाः स्वयम्भुवा ।
उद्यन्तं सलिलौघेन वेला इव महोदधेः ॥
साद्रिद्वीपा तथा पृथ्वी जलैः संछाद्यते शनैः ।
आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति ॥
पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः ॥"
इति कौर्म्मे उपविभागे ४२ अध्यायः ॥ * ॥
मेघस्य उत्पत्तिर्यथा,—
"ततो ह सर्व्वभूतेभ्य आदत्ते रश्मिभिर्ज्जलम् ।
समुद्राच्चाम्भसां योगादक्षयः प्रवहन्तपः ॥
ततोऽयनवशात् काले परिवृत्तो दिवाकरः ।
नियच्छति पयो मेघे शुक्लाशुक्लैर्गभस्तिभिः ॥
अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः ।
सर्व्वभूतहितार्थाय वायुभूताः समन्ततः ॥
ततो वर्षति सोऽम्भांसि सर्व्वभूतविवृद्धये ।
वायव्यं स्तनितञ्चैव विद्युदग्निसमप्रभम् ॥
मेहनाच्च मिहेर्धातोर्मेघत्वं व्यञ्जयन्ति च ।
अभिष्यन्ति यथा चापस्तदभ्रं कवयो विदुः ॥"
अपि च ।
"मेघानां पुनरुत्पत्तौ त्रिविधा योनिरुच्यते ।
आग्नेया ब्रह्मजाश्चैव पक्षजाश्च पृथग्विधाः ।
त्रिधा त्रिधायनास्तेषां वक्ष्यामि विस्तसम्भवम् ॥
आग्नेयाः खल्वजाः प्रोक्तास्तेषां धूमः प्रवर्त्तनम् ।
जाता दुर्द्दिनवातादये सगुणास्ते व्यवस्थिताः ॥
महिषाश्च वराहाश्च मत्तमातङ्गरूपिणः ।
भूत्वा धरणिमभ्येत्य रमन्ते विचरन्ति च ॥
जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः ।
विद्युद्गुणविहीनाश्च जलधारावलम्बिनः ॥
मृदुसंका महाकाया आवहस्य च सानुगाः ।
क्रोशमात्राच्च वर्षन्ति क्रोशार्द्धादपि वा पुनः ।
पर्व्वताग्रनितम्बेषु वर्षन्ति विपिनेषु च ॥
बलाका गर्द्दभाश्चैव बलाकागर्भधारिणः ।
ब्रह्मजा नाम ते मेघा ब्रह्मनिश्वाससम्भवाः ॥
द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः ।
इतो योजनमात्राच्च सार्द्धार्द्धात् विकृतादपि ।
वृष्टिसर्गाद्विवस्तेषां धारासाराः प्रकीर्त्तिताः ॥
पक्षेण पश्चा यच्छिन्नाः पर्व्वतानां महौजसाम् ।
कामगानां प्रवृत्तानां प्रजानां शिवमिच्छता ।
पुष्करावर्त्तकास्तेन कारणेनेह विश्रुताः ॥
नानारूपधराश्चैव महाघोरस्वनाश्च ते ।
कल्पान्तवृष्टेः स्रष्टारः संवर्त्ताग्नेर्नियामकाः ।
वर्षन्ति ते युगान्तेषु तृतीयास्ते प्रकीर्त्तिताः ॥
अनेकरूपसंस्थानाः पूरयन्तो महीं जलैः ।
वायुं परिवहन्तं स्वराश्रिताः कल्पसाधकाः ॥
योऽन्यस्याण्डस्य भिन्नस्य प्राकृतप्रभवस्तदा ॥
यस्माद्ब्रह्मा समुत्पन्नश्चतुर्व्वक्त्रः स्वयम्भुवः ।
तस्यैवाण्डस्य पाला हि सर्व्वे मेघाः प्रकीर्त्तिताः ॥
तेषामप्यायनं धूमः सर्व्वेषामविशेषतः ।
तेषां श्रेष्ठस्तु पर्ज्जन्यश्चत्वारश्चैव दिग्गजाः ॥
गजानां पर्व्वतानाञ्च मेघानां भोगिभिः सह ।
कुलमेकं पृथग्भूतं योनिरेका जलं स्मृतम् ॥
पर्ज्जन्यो दिग्गजाश्चैव हेमन्ते शीतसम्भवाम् ।
तुषारवृष्टिं वर्षन्ति हिमशस्यविवृद्धये ॥"
इति ब्रह्माण्डे ५८ अध्यायः ॥ * ॥
षड्रागान्तर्गतरागविशेषः । यथा,—
"भैरवोऽथ वसन्तश्च नटो नारायणस्तथा ।
श्रीरागो मेघरागश्च षडेते पुरुषाह्वयाः ॥"
तस्य रागिण्यो यथा,—
"ललिता मालसी गौडी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"
अयं हनूमन्मते षड्रागो ब्रह्मणो मस्तकात् निर्गतः । आकाशात्जात इति च वदन्ति । अस्य जातिः औडवः । अर्थात् ध न स ऋ ग इति पञ्चस्वरमिलितः । अस्य ग्रहं धैवतस्वरः ।

वर्षर्त्तौ रात्रिशेषे गानसमयः। अस्याकारः। सुन्दरपुरुषः। श्यामवर्णः। उष्णीषबद्धकेशः। शाणितखड्गहस्तः। हनूमन्मते अस्य पञ्च रागिण्यो यथा। टङ्का १ मल्लारी २ गुर्ज्जरी ३ भूपाली ४ देशकारी च ५। अस्याष्टपुत्रा यथा। जालन्धरः १ सारः २ नटनारायणः ३ शङ्कराभरणः ४ कल्याणः ५ गजधरः ६ गान्धारः ७ सहाना ८॥ कल्लिनाथमते। अस्य रागिण्यः षट् यथा। बङ्गाली १ मधुरा २ कामोदा ३ धनाश्रीः ४ तीर्थकी ५ देवाली ६। एतन्मतेऽपि अष्टौ पुत्राः किन्तु नटनारायण-शङ्कराभरणकल्याणस्थाने केदारामारुजलभरता ज्ञेयाः॥ सोमेश्वरमते अस्य पञ्चरागिण्यो यथा। मल्लारी १ सौरटी २ सावेरी ३ कौशिकी ४ गान्धारी ५ हरशृङ्गारी ६। एतन्मतेऽपि पुत्राः पूर्व्ववत्। रागिणीसहितस्यैतद्रागस्य वर्षर्त्तौ गानसमयः॥ भरतमते तस्य पञ्च रागिण्यो यथा। मल्लारः १ मूलतानी २ देशी ३ रतिवल्लभा ४ कावेरी ५। तन्मते अष्टौ पुत्रा यथा। कलायरः १ वागेश्वरी २ सहाना ३ पुरीया ४ कानरा ५ तिलकः ६ स्तम्भः ७ शङ्कराभरणः ८। तन्मते अष्टपुत्राणां भार्य्या यथा। करणाटी १ कादवी २ कदमनाटः ३ पाहारी ४ झाँझः ५ परजः ६ नटमञ्जरी ७ शुद्धनटः ८। इति सङ्गीतशास्त्रम्॥

मेघकफः, पु, (मेघानां कफ इव।) करका। इति हारावली। ५८॥

मेघकालः, पुं, (मेघानां कालः समयः।) वर्षर्त्तुः। इति जटाधरः॥ (यथा, बृहत्संहितायाम्। ६५। ५८।
"स्थलसलिलचराणां व्यत्ययो मेघकाले।
प्रचुरसलिलवृष्ट्यै ग्रीष्मकाले भयाय॥")

मेघचिन्तकः, पु, (चिन्तयतीति। चिन्ति+ण्वुल्। मेघानां चिन्तकः तस्यैव जलपायित्वात्।) चातकपक्षी। इति शब्दचन्द्रिका॥ (मेघचिन्तनविशिष्टे, त्रि॥)

मेघजं, त्रि, मेघभववस्तु। मेघाज्जायते इति व्युत्पत्त्या जनधातोः डप्रत्ययेन निष्पन्नम्॥

मेघजालं, क्ली, (मेघानां जालम्।) अभ्रियम्। इति शब्दचन्द्रिका॥

मेघजीवनः पुं, (मेघो जीवनं जीवनोपायो यस्य।) चातकपक्षी। इति राजनिर्घण्टः॥

मेघज्योतिः, [स्] पुं, (मेघस्य ज्योतिरग्निर्मेघादुत्पन्नो ज्योतिर्वा।) वज्राग्निः। तत्पर्य्यायः। इरम्मदः २। इत्यमरः।१।३।१०॥ मेघस्य ज्योतिरग्निर्मेघज्योतिः। ज्योतिरग्नौ समाख्यातं ज्योतिश्चक्रो निगद्यते। इति रन्तिः॥ इरया जलेन माद्यति दीप्यते इति इरम्मदः। मेघाग्निर्हि जलेनैव दीप्यते। नदीभिर्यम्निर्वर्षैर्हृ भृ हृ द्यौति खः खित्वर्याणिति मनुक्ते। अन्योन्यसंघट्टेन मेघाग्निःखल्व यज्ज्योतिर्वृत्याद्यौ पतति स इरम्मदः। मेघ इतुश्पचक्यां तेन चातणोऽपीरम्मदः सोऽपि हि इरया जलेन माद्यतीति कौमुदी। मेघाग्न्यादिरिरम्मद इति शब्दार्णवः इति तट्टीकायां भरतः॥

मेघडम्बरः, पुं, मेघस्याडम्बरः। मेघगर्जनम्। यथा,—
"अजायुद्धे ऋषिश्राद्धे प्रभाते मेघडम्बरे।
दम्पत्योः कलहे चैव बह्वारम्भे लघुक्रिया॥"
इत्युद्भटः॥

मेघतिमिरं, क्ली, (मेघेन तिमिरं अन्धकारो यत्र।) मेघाच्छन्नदिनम्। इति हलायुधः॥

मेघदीपः, पुं, (मेघजनितो दीप इव।) विद्युत्। इति शब्दमाला॥

मेघनादः, पुं, (मेघं नादयतीति। नद्+णिच्+अण्।) वरुणः। (मेघस्य नाद इव नादो यस्य।) रावणपुत्रः। इति मेदिनी। दे, ५२॥ (यथा, रघौ। १२। ७६।
"गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः॥"
मेघस्य नादः।) मेघशब्दः। इति हेमचन्द्रः॥ (यथा, महाभारते। ३। ७३। ७।
"ते श्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा।
प्रणेदुरुन्मुखा राजन्। मेघनाद इवोत्सुकाः॥")
पलाशवृक्षः। इति शब्दचन्द्रिका॥ तण्डुलीयशाकः। इति राजनिर्घण्टः॥ (यथा, भावप्रकाशे।
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः॥"
अस्य गुणादिकं तण्डुलीयशब्दे द्रष्टव्यम्॥ दानवभेदः। यथा, हरिवंशे। २३२। ३०।
"सुबाहुर्मेघनादश्च भीमगर्भश्च वीर्य्यवान्॥"
मेघसदृशशब्दविशिष्टे, त्रि। यथा, रामायणे। २। १६। २८।
"मेघनादमसम्बाधं मणिहेमविभूषितम्॥")

मेघनादजित्, पुं, (मेघनादं जितवानिति। जि+क्विप्।) लक्ष्मणः। इति त्रिकाण्डशेषः॥

मेघनादानुलासकः, पुं, (मेघनादं अनु लक्ष्यीकृत्य लसति क्रीडतीति। लस+ण्वुल्।) मयूरः। इति राजनिर्घण्टः॥

मेघनादानुलासी, [न्] पुं, (मेघनादमनुलसतीति। लस+णिनिः।) मयूरः। इत्यमरः।२।५।३०॥

मेघनामा, [न्] पुं, (मेघस्य नाम नाम यस्य।) मुस्तकः। इत्यमरः। २। ४। १५६॥ (पर्य्यायोऽस्य यथा,—
"मुस्तको मेघनामा स्यात्।"
इति गारुडे २०८ अध्यायः॥)

मेघनिर्घोषः, पुं, (मेघस्य निर्घोषः।) मेघशब्दः। तत्पर्य्यायः। स्तनितम् २ गर्जितम् ३ रसितम् ४। इत्यमरः। १।३।८॥ ध्वनितम् ५ ह्रादितम् ६। इति भरतः॥ (मेघस्य निर्घोष इव निर्घोषो यस्य। मेघतुल्यशब्दविशिष्टे, त्रि। यथा, महाभारते। ३। ७३। ११।
"यदि मां मेघनिर्घोषो नोपगच्छति नैषधः।
अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम्॥")

मेघपुष्पं, क्ली, (मेघस्य पुष्पमिव।) जलम्। इत्यमरः। १। १०। ५॥ पिण्डाभ्रम्। नदीजलम्। इति मेदिनी। पे, २८॥
पुष्पः, पुं, (मेघ इव पुष्यति प्रकाशते इति। पुष्प विकाशने+अच्।) शक्रहयः। इति शब्दरत्नावली॥ श्रीकृष्णाश्वश्च॥ (यथा, महाभारते। ४। ४३। २१।
"तं मन्ये मेघपुष्पस्य जवेन सदृशं हयम्॥")

मेघप्रसवः, पुं, (मेघः प्रसवः उत्पत्तिस्थानमस्य इति।) जलम्। इति राजनिर्घण्टः॥ मेघजाते, त्रि॥

मेघभूतिः, पुं, (मेघात् भूतिर्जन्मास्य।) वज्रम्। इति शब्दरत्नावली॥

मेघमालः, पुं, (मेघमाला वर्णसादृश्येन अस्त्यस्य। अर्श आद्यच्।) रमागर्भजातकल्किदेवपुत्रः। यथा। "तथा रमा सितं पक्षे।" इत्युपक्रम्य।
"सा पुत्रं सुषुवे साध्वी मेघमालबलाहकौ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥"
इति कल्किपुराणे ३१ अध्यायः॥
(प्लक्षद्वीपस्थपर्व्वतविशेषः। यथा, भागवते।५।२०।४। "सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः॥" राक्षसविशेषः। इति रामायणे। ३। २६। ३१॥)

मेघमाला, स्त्री, (मेघानां माला।) मेघश्रेणी। तत्पर्य्यायः। कादम्बिनी २। इत्यमरः।१।२।८॥ (यथा, उत्तररामचरिते। २।
"मेघमालेव यश्चायमारादपि विभाव्यते।"
स्कन्दमातृगणानामन्यतमा। यथा, महाभारते। ९। ४६। २९।
"एकचक्रा मेघरवा मेघमाला विरोचना॥")

मेघयोनिः, पु (मेघस्य योनिः उत्पत्तिकारणम्।) धूमः। इति शब्दरत्नावली॥

मेघरागः, पु, (मेघनामको रागः।) षड्रागान्तर्गतरागविशेषः। इति हलायुधः॥ (यथा, संगीतदर्पणे रागाध्याये। ३१।
"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।
श्रीरागो मेघरागश्च षडेते पुरुषाह्वयाः॥")
अस्य विवरणं मेघशब्दे द्रष्टव्यम्॥

मेघवर्णा, स्त्री, (मेघस्यैव वर्णोऽस्याः। स्त्रियां टाप्।) नीलीवृक्षः। इति शब्दचन्द्रिका॥ (मेघतुल्यवर्णे, त्रि। यथा, महाभारते। ३। ४६। १५।
"शुक्लमणोत्तरीयेण मेघवर्णेन राजता॥")

मेघवर्त्म, [न्] क्ली, (मेघानां वर्त्म पन्थाः।) आकाशम्। इति त्रिकाण्डशेषः॥

मेघवह्निः, पुं, (मेघस्य मेघजन्यो वा वह्निः।) वज्राग्निः। तत्पर्य्यायः। इरम्मदः २। इति हेमचन्द्रः। ४। १६७॥

मेघवाहनः, पु, (मेघो वाहनमस्य।) इन्द्रः। इत्यमरः।१।१।४७॥ (यथा, शिशुपालवधे।१३।१८।
"अविलम्बितैर्लविलपाणिपल्लवः
अयति स्म मेघमिव मेघवाहनः॥")

मेघवेश्म, [न्] क्ली, (मेघानां वेश्म भवनम् ।) आकाशम् । इति जटाधरः ॥

मेघसारः, पुं, (मेघस्य सार इव ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

मेघसुहृत्, [द्] पुं, (मेघाः सुहृदो मित्राणि यस्य ।) मयूरः । इति हेमचन्द्रः ॥

मेघस्तनितोद्भवः, पु, (मेघस्य स्तनितादुद्भवं उत्पत्तिरस्य । नवमेघशब्देनास्य अङ्कुरोत्पत्तेस्तथात्वम् ।) विकण्टकवृक्षः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य विकण्टकशब्दे ज्ञेयः ॥)

मेघाख्यं, क्ली, (मेघस्य आख्या नामास्य ।) मुस्तकम् । इति रत्नमाला ॥

मेघागमः, पुं, (मेघानां आगमोऽत्र ।) वर्षाकालः । इति शब्दरत्नावली ॥ (यथा, घटकर्परकाव्ये ।२।

"नवाम्बुमत्ताः शिखिनो नदन्ति
मेघागमे कुन्दसमानदन्ति ! ॥")

मेघस्यागमनञ्च ॥

मेघानन्दा, स्त्री, (मेघेन आनन्दोऽस्याः ।) बलाका । इति राजनिर्घण्टः ॥

मेघानन्दी, [न्] पु, (मेघेन आनन्दतीति । आ+नन्द+णिनिः ।) मयूरः । इति राजनिर्घण्टः ॥

मेघान्तः, पुं, (मेघानां अन्तोऽवसानमत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

मेघास्थि, क्ली, (मेघानां अस्थीव ।) करका । इति त्रिकाण्डशेषः ॥

मेघास्पदं, क्ली, (मेघानां आस्पदं स्थानम् ।) आकाशम् । इति धनञ्जयः ॥

मेघोदरः, पु, (मेघस्येव उदरमस्य ।) अर्हत्पिता । इति हेमचन्द्रः ॥

मेचकं, क्ली, (मचति वर्णान्तरेण मिश्रीभवतीति । मच्+"क्वुनादिभ्यः संज्ञायां वुन् ।" उणा० ५। ३५। इति वुन् । ततः "पचिमच्योरिच्च ।"उणा० ५।३७। इति इत्वे लघूपधगुणः । यद्वा, मच मचि कल्कने+अकन् । मचि परिसुचां नान्तोऽत्वम् । मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः । इति शब्दार्णवः । व्युत्पत्तिस्तु मचति मिश्रीभवति वर्णान्तरेण इति भरतः । इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।) स्रोतोऽञ्जनम् । अन्धकारः । इति मेदिनी । के, १४० ॥ नीलाञ्जनम् । इति राजनिर्घण्टः ॥ (यथा,—

"मेचकं मर्द्दनाञ्जनपिण्डवदीषत्कृष्णरूक्षम् ।"

इति माधवकरकृतरुग्विनिश्चयव्याख्यानेऽतीसाराधिकारे विजयरक्षितः ॥)

मेचकः, पुं, मयूरचन्द्रकः । श्यामलः । इति मेदिनी । के,१४०॥ (यथा, "मेचकाभं आगारधूमाभञ्च ससारगन्धकादिमणिमरकतौकृतकृष्णवर्णस्येव वर्णा मेचक इति जेज्जड़ादयः प्राहुः चिक्कणकृष्ण इत्यर्थः ।" इति रुग्विनिश्चयस्य रक्तपित्तव्याख्याने विजयेनोक्तम् ॥) धूमः । मेघः । शोभाञ्जनः । इति शब्दरत्नावली ॥ श्यामलगुणयुक्ते, त्रि । इत्यमरः । १ । ५ । १४ ॥ (यथा, शिशुपालवधे । ६ । २६ ।

"गजकदम्बकमेचकमुच्चकै-
र्नभसि वीक्ष्य नवाम्बुदमम्बरे ॥")

मेचकाभिधा, स्त्री, (मेचकस्याभिधा नामास्याः ।) पातालगरुड़ीलता । इति राजनिर्घण्टः ॥

मेट्, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० अक०-सेट् ।) ऋ, अमिमेटत् । मेटति लोकः । उन्माद्यतीत्यर्थः । इति दुर्गादासः ॥

मेटुला, स्त्री, (मेटतीति । मेट् बाहुलकात् उलच् । टाप् च ।) आमलकी । इति शब्दचन्द्रिका ॥

मेठः, पुं, (मेटति उन्माद्यतीति । मेट्+अच् । पृषोदरादित्वात् साधुः ।) हस्तिपकः । इति त्रिकाण्डशेषः ॥

मेड, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० अक०-सेट् ।) ऋ, अमिमेड़त् । मेड़ति उन्माद्यतीत्यर्थः । इति दुर्गादासः ॥

मेढ्रः, पुं, (मेहत्यनेनेति । मिह सेचने+"दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ।" ३।२।१८२ । इति ष्ट्रन् । ।) शिश्नः । (यथा, मनौ । ८ । २८२ ।

"अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम् ॥")

स तु गर्भस्थस्य सप्तमे मासे भवति । इति सुखबोधः ॥ (यथा, "श्रवणनयनवदनघ्राणगुदमेढ्राणि नवस्रोतांसि नराणां बहिर्मुखान्येतान्येव ॥"इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥ शिरः पर्य्यन्तं गताया वज्रनाड्या मूलस्थानम् । यथा, पूर्णानन्दकृतषट्चक्रनिरूपणे । "वज्राख्या मेढ्रदेशाच्छिरसि परिगता मध्यमे स्यात्सुषुम्णा ।" मेढ्रस्याप्राकृतत्वं जन्मान्तरे कृतस्य महापापस्य चिह्नं कुष्ठविशेषः । यथा, भविष्यपुराणीयमध्यमखण्डषष्ठाध्याये ।

"इदृग् कुष्ठगणं विप्र ! उत्तरोत्तरतो गुरुम् ।
विचर्च्चिका तु दुश्चर्म्मा चर्म्मरोगस्तृतीयकः ॥
विकर्णुन्नगनाम्नौ च कृष्णश्वेते तथाष्टकम् ।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु ॥
अपावनः सर्व्वगात्रेषु गर्ह्ये भावे तथा नसि ॥"

दुश्चर्म्मा अप्राकृतमेढ्रः इति स्मृतिसंग्रहितारः ॥ पञ्चभूतानां मध्ये पृथिव्या रजोगुणांशत उत्पन्नो मेढ्रः तथाच वेदान्तपञ्चदश्याम् ।

"रजोऽशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु ।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥"

उपस्थेन्द्रियं नाम उपस्थव्यतिरिक्तं उपस्थाश्रयं मूत्रशुक्रोत्सर्गशक्तिमदिन्द्रियं इत्यात्मानात्मविवेके शङ्कराचार्य्यः । अस्य लक्षणादिकं लिङ्गशब्दे उपस्थशब्दे च द्रष्टव्यम् ॥) मेषः । इत्यमरः । २ । ६ । ६६ ॥ (यथास्य पर्य्यायः ।

"मेढ्रो भेड़ो हुड़ो मेष उरभ्र उरणोऽपि च ।
अविर्वृष्णिस्तथोर्णायुःकथ्यन्ते तद्गुणा अथ ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

मेढ्रश्रृङ्गी, स्त्री, (मेढ्रस्य श्रृङ्गमिव श्रृङ्गमस्याः । गौरादित्वात् ङीष् ।) मेषश्रृङ्गीवृक्षः । इति रत्नमाला ॥

मेण्ठः, पुं, हस्तिपकः । इति हारावली ॥

मेण्डः, पुं, हस्तिपकः । इति त्रिकाण्डशेषः ॥

मेण्डः, पुं, मेषः । इति शब्दरत्नावली ॥

मेथ, ञ ऋ सङ्गे । वधे । मेधायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सङ्गे अक०-वधे-मेधायाञ्च सक०-सेट् ।) ञ, मेथति मेथते धीरो गुणिना सङ्गत इत्यर्थः । ऋ, अमिमेथत् । मिमेथ । इति दुर्गादासः ॥

मेथिः, पुं, (मेथन्ते पशवोऽत्रेति । मेथ सङ्गे+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) खले पशुबन्धनार्थस्तम्भदारु । मेह काठ इति भाषा । यथा,—

"मेधिर्मेथिः खलेवाली खले गोबन्धदारु यत् ।"
इति हेमचन्द्रः ।३।५५८॥

(स्त्री, मेथिका । तत्पर्य्यायो यथा,—

"मेथिका मेथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

क्वचित् मेथीति पाठो दृश्यते ॥)

मेथिका, स्त्री, (मेथतीति । मेथ्+ण्वुल् । टापि अत इत्वम् ।) क्षुपविशेषः । मेथिशाक इति भाषा । तत्पर्य्यायः । मेथिनी २ मेथी ३ दीपनी ४ बहुपुत्रिका ५ बोधिनी ६ गन्धबीजा ७ ज्योतिः ८ गन्धफला ९ वल्लरी १० चन्द्रिका ११ मन्था १२ मिश्रपुष्पा १३ कैरवी १४ कुञ्चिका १५ बहुपर्णी १६ पीतबीजा १७ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रक्तपित्तप्रकोपणत्वम् । अरोचकहरत्वम् । दीप्तिकारित्वम् । वातघ्नत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अथ मेथी वनमेथी । तयोर्नामगुणाः ।

"मेथिका मेथिनी मेथी दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥
मेथिका वातशमनी श्लेष्मघ्नी ज्वरनाशिनी ।
ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता ॥"
इति भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ॥

मेथिनी, स्त्री, (मेथतीति । मेथ्+णिनिः । ङीप् ।) मेथिका । इति राजनिर्घण्टः ॥

मेथी, स्त्री, (मेथिः+कृदिकारादिति पक्षे ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (स्तम्भः । यथा, शतपथब्राह्मणे । ३ । ५ । ३ । २१ ।

"विशावे त्वेति मेथीमुपनिहन्तीतरतस्ततो
यद्व च मानुषे ॥"

"मेथीं स्तम्भम् ।" इति तद्भाष्यम् ॥)

मेद, ऋ ञ वधमेधयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अमिमेदत् । ञ, मेदति मेदते शास्त्रार्थं शिष्यः धारयतीत्यर्थः । मिमेदुः । इति दुर्गादासः ॥

मेदः, [स्] क्ली, (मेद्यति स्निह्यतीति । मिद्+"सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति

वसुम् ।) मांसप्रभवधातुविशेषः । तत्पर्य्यायः । वपा २ वसा ३ । इत्यमरः ।२।६।६४॥ मेदः ४ । अकारान्त इति भरतः ॥ अस्य गुणाः । वात-नाशित्वम् । बलपित्तकफदाहत्वञ्च । इति राज-वल्लभः ॥ अथ मेदसः स्वरूपमाह ।

"यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते ।
तदतीव गुरु स्निग्धं बलकार्य्यतिबृंहणम् ॥"

अथ मेदसः स्थानमाह ।

"मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

इति भावप्रकाशः ॥

रोगविशेषः । तत्र मेदसो विप्रकृष्टं निदान-माह ।

"अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः ।
मधुरोऽन्नरसः प्रायः स्नेहान्मेदो विवर्द्धयेत् ॥"

अन्नरसः आमरसः । तथा च सुश्रुतः ।
आमद्रवान्नरसो मधुरश्च भवतीति । मेदसो-ऽतिप्रवृद्धौ वैगुण्यमाह ।

"मेदसावृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः ।
मेदस्तु चीयते तस्मादशक्तः सर्व्वकर्म्मसु ॥"

अन्ये धातवः अस्थ्यादयः शुक्रान्ताः । न पुष्यन्ति न पुष्टा भवन्ति । चीयते सञ्चितं भवति वर्द्धते इति यावत् । तस्मात् मेदस्वी सर्व्वकर्म्मसु अशक्तः स्यात् । मेदसः सौकुमार्य्यात् । अपरा-नपि दोषानाह ।

"क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः ।
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः ।
मेदसः स्वेददौर्गन्ध्याज्जायन्ते जन्तवो नरः ॥"

क्रथनं उच्छ्वासावरोधः । कण्ठेन घुर्घुर इत्यन्ये । जन्तवः क्रिमयः । मेदसः स्थानमाह ।

"मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

मेदस्विनोऽपि वृद्धौ हेतुमाह ।

"मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः ।
चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि ॥
तस्मात् शीघ्रन्तु जरयत्याहारञ्चापि काङ्क्षति ।
विकारान् सोऽश्नुते घोरान् काञ्चित् काल-
व्यतिक्रमात् ॥"

सन्धुक्षयति प्रदीपयति । स मेदस्वी आहारं शीघ्रं जरयति पुनर्भोक्तुं काङ्क्षति स दीप्ताग्निः कालव्यतिक्रमात् भोजनकालातिक्रमात् । का-ञ्चिद्विकारान् वातपित्तकरान् घोरान् अश्नुते प्राप्नोति । एते वातपित्ते मेदसावरुद्धे विशेषा-दुपद्रवकरे इत्याह ।

"एतावुपद्रवकरौ विशेषात् पित्तमारुतौ ।
एतौ हि दहतः स्थूलं वनं दावानलो यथा ॥"

एतौ पित्तमारुतौ मेदसा रुद्धमार्गत्वात् कोष्ठ-मध्ये प्रवृद्धौ सन्तौ विशेषादुपद्रवकरौ दहतः नाशयेताम् । मेदसोऽतिवृद्धेर्विनाशहेतुत्वमाह ।

"मेदस्यतीवसंवृद्धे सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवि-
तम् ॥"

विकारान् प्रमेहपिडकज्वरभगन्दरविद्रधिवात-रोगाणामन्यतमान् । अतिस्थूलतया वैगुण्य-माह ।

"अतिस्थूलेषु संदृष्टा विसर्पाः सभगन्दराः ।
ज्वरातीसारमेहार्शःश्लीपदा यपिकादयः ॥"

अतिस्थूलस्य लक्षणमाह ।

"मेदो मांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥"

अयथोपचयोत्साहः न यथा उपचयो मांसोप-चयः उत्साहो बलञ्च यस्य सः ॥*॥ अथ मेदस्य चिकित्सा ।

"पुराणाः शालयो मुद्गाः कुलत्थोद्दालकोद्रवाः ।
लेखना वस्तयश्चापि सेव्या मेदस्विना सदा ॥
श्रमचिन्ताव्यवायाध्वचौद्रजागरणप्रियः ।
हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनः ॥
चारं वातारिपत्रस्य हिङ्गुयुक्तं पिबेन्नरः ।
सहितं भक्तमण्डेन मेदोवृद्धिनिवृत्तये ॥
गुडूचीत्रिफलाक्वाथः पीतो मेदोहरः स्मृतः ।
गुडूचीत्रिफलाक्वाथस्तथा लोहरजोयुतम् ।
चौद्रेण त्रिफलाक्वाथः पीतो मेदोहरः परः ॥
प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।
उष्णमन्नस्य मण्डं वा पिबेन् कृशतनुर्भवेत् ॥
व्योषाग्नित्रिफलामुस्तविडङ्गैर्गुग्गुलुं समम् ।
खादेत् सर्व्वान् जयेद्रोगान्मेदःश्लेष्मामवातजान् ॥
पिप्पली मधुना सेव्या मेदःकफविनाशिनी ॥
धत्तूरपत्रस्वरसेन गाढ-
मुद्वर्त्तनं स्थौल्यहरं प्रदिष्टम् ॥
वासादलरसो लेपाच्छङ्खचूर्णेन संयुतः ।
विल्वपत्ररसो वापि देहदौर्गन्ध्यनाशनः ॥
निम्बपत्रस्वरसः प्रचितकक्षादियोजितं जयति ।
दग्धहरिद्रोद्वर्त्तनमचिराच्चिरदेहदौर्गन्ध्यम् ॥
शिरीषलामज्जकहेमलोध्र-
त्वग्दोषसंस्वेदहरः प्रघर्षः ।
शरीरदौर्गन्ध्यहरः प्रदेहः
पत्राम्बुलोध्राभयचन्दनानाम् ॥"

शिरीषस्यात्र पत्रं ग्राह्यं व्यवहारात् । लाम-ज्जकं सुगन्धितृणविशेषस्तदलाभे उशीरं ग्राह्यम् । हेम नागकेशरम् । अम्बु बालकम् । अभयं उशीरम् ।

"हरीतकीं तु संपिष्य देहमुद्वर्त्तनं नरः ।
पश्चात् स्नानं प्रकुर्व्वीत देहस्वेदोपशान्तये ॥
वकुलस्य दलैः सम्यग्वारिणा परिपेषितैः ।
देहमुद्वर्त्तयेन पश्चाद्धरीतक्या सुपिष्टया ॥
भूय उद्वर्त्तनं कुर्य्यात् पश्चात स्नानं समाचरेत् ।
प्रस्वेदान् मुच्यते शीघ्रं मेदोवृद्धिसमुद्भवात् ॥"

इति मेदोऽधिकारः ॥ इति भावप्रकाशः ॥

(तथास्य विशेषः । यथा,—

"मेदः स्नेहस्वेदौ दृढत्वं पुष्टिमस्थ्नाञ्च ॥"

अस्य चीणलक्षणं यथा,—

"मेदः क्षये श्लीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च ।" अस्यातिवृद्धिलक्षणं यथा,—

"मेदः स्निग्धाङ्गतामुदरपार्श्ववृद्धिं कासश्वासा-दीन् दौर्गन्ध्यञ्च ।"

"पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परम् ।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम् ॥"

"चपयेद्बृंहयेच्चापि दोषधातुमलान् भिषक् ।
तावद्यावदरोगः स्यान्नरो रोगसमन्वितः ॥"

इति सुश्रुते सूत्रस्थाने १५ अध्यायः ॥

"तृतीया मेदोधरा नाम मेदो हि सर्व्वभूताना-मुदरस्थमण्वस्थिषु च महत्सु च मज्जा भवति ॥"

इति तत्रैव शारीरस्थाने ४ अध्याये ॥)

मेदः, पुं, (मेद्यति स्निह्यतीति । मिद् + अच् ।) वपा । इति शब्दचन्द्रिका ॥

"कुष्माण्डकुलमिन्दरो मलज्ञो मेदकुलञ्च ॥"

इति भरतधृतशाश्वितकोषः ॥)

म्लेच्छजातिविशेषः । इति जटाधरः ॥ अल-म्बुषा । इति राजनिर्घण्टः ॥ (ऐरावतकुलजो नागविशेषः । यथा, महाभारते ।१।५७।११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥")

मेदकः, पुं, (मिद् + ण्वुल् ।) जगलः । इत्यमरः । २ । १० । ४२ ॥ मेया इति भाषा ॥

मेदजः, पुं, (मेदात् जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ मेदो-भवञ्च ॥

मेदःसारा, स्त्री, (मेदः सारोऽस्याः ।) मेदा । इति राजनिर्घण्टः ॥ (विवृतिरस्या मेदाशब्दे द्रष्टव्या ॥)

मेदस्कृत्, क्ली, (मेदः करोतीति । मेदस् + कृ + क्विप् ।) मांसम् । इति हेमचन्द्रः ॥

मेदा, स्त्री, (मेदो अस्याः अस्तीति । मेद + अच् । टाप् ।) अष्टवर्गप्रसिद्धौषधिविशेषः । तत्पर्य्यायः । मेदोद्भवा २ जीवनी ३ श्रेष्ठा ४ मणिच्छिद्रा ५ विभावरी ६ । इति रत्नमाला ॥ वसा ७ स्वल्पपर्णिका ८ मेदःसारा ९ स्नेह-वती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेधा १४ द्रवा १५ साध्वी १६ शल्यदा १७ बहुरन्ध्रिका १८ पुरुषदन्तिका १९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहार्त्ति-कासराजयक्ष्मज्वरनाशित्वम् । वातदोषकारि-त्वञ्च । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथा,

"शुक्लकन्दो नखच्छेद्यो मेदो धातुमिव स्रवेन् ।
यः स मेदेति विज्ञेयो जिज्ञासातत्परैर्ज्जनैः ॥"

मेदामहामेदास्थाने शतावरी मूली । इति भावप्रकाशः ॥ अस्या विवरणं महामेदाशब्दे द्रष्टव्यम् ॥ (अनुकल्पोऽस्या यथा । "मेदाभावे चाश्वगन्धा ।" इति वैद्यकपरिभाषायाम् ॥)

मेदिनी, स्त्री, (मेदोऽस्या अस्तीति । मेद + इनिः । ङीष् ।) मेदा । काश्मरी । इति राज-निर्घण्टः ॥ पृथिवी । इत्यमरः । २ । १ । ३ ॥ मेदो विद्यतेऽस्या मेदिनी नान्तान्मेदःशब्दादिन् सलोपश्च निपात्यते इति परे । स्वमते मेदः समानार्थोऽदन्तो मेदशब्दोऽस्ति । कुष्माण्ड-

कर्म्मिष्ठरो मलश्नो मेदकुष्ठहेति शालिहोत्रः मेकाजादिति दन्। यथा चोक्तम्।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः॥"
मेद्यतीति वा मेदिनी इत्यिद्या क्विहि ग्रहादित्वाविन्। इति तट्टीकायां भरतः॥ (एतन्नामनिरुक्तिर्यथा, देवीभागवते। १। ६। ८६-८४।
"गतप्राणौ तदा जातौ दानवौ मधुकैटभौ।
सागरः सकलो व्याप्तस्तदा वै मेदसा तयोः॥
मेदिनीति ततो जातं नाम पृथ्व्याः समन्ततः।
अभक्ष्या मृत्तिका तेन कारणेन सुनीश्वराः॥"
अपि च। तत्रैव। ३। १३। ८।
"मधुकैटभयोर्मेदःसंयोगान्मेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
तस्या उत्पत्तिर्यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्वदन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी पाथसा संवृतेति च॥
तयोर्जीवनकालेन प्रत्यक्षा सा भवेत् स्फुटम्।
ततो बभूव मेदश्च मरणस्यान्तरं तयोः।
मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु॥
जलधौता कृता पूर्व्वं वर्द्धिता मेदसा यतः।
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्॥
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे।
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्॥
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्।
स च प्रविष्टः सर्व्वेषां तल्लोम्नां विवरेषु च॥
कालेन महता तस्माद्बभूव वसुधा मुने।।
प्रत्येकं प्रतिलोम्नाच्च कूपेषु सा स्थिरा स्थिता॥
आविर्भूता तिरोभूता सा जले च पुनः पुनः।
आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणनारदसंवादे पृथिव्युपाख्याने ७ अध्यायः॥
मेदिनीद्रवः, त्रि, (मेदिन्याः द्रवः।) धूलिः। इति त्रिकाण्डशेषः॥
मेदुरः, त्रि, (मेद्यति स्निह्यतीति। मिद्+"भञ्जभासमिदो घुरच्।" ३। २। १६१। इति घुरच्।) अतिशयस्निग्धः। तत्पर्य्यायः। सान्द्रस्निग्धः २। इत्यमरः। ३।१।३०॥ (यथा, गीतगोविन्दे।१।१।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे। गृहं प्रापय॥")
मेदुरा, स्त्री (मेदुर+टाप्।) काकोली। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः काकोलीशब्दे ज्ञेयाः॥)
मेदोजं, क्ली, (मेदसो जायते इति। जन्+डः।) अस्थि। इति राजनिर्घण्टः॥
मेदोद्भवा, स्त्री, (मेदादुद्भवोऽस्याः।) मेदा। इति राजनिर्घण्टः॥
मेदोन्धिः पुं, (मेदोबहुलः अन्धुः।) वर्णसङ्करजातिभेदः। इति जटाधरः॥ (यथा, मनुः।१०।४८।
"मेदोन्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्॥"
क्वचित् मेदान्ध्र इत्यपि पाठः॥)
मेदोवती, स्त्री, (मेदोऽस्याः अस्तीति। मेदस्+मतुप्। मस्य वः।) मेदा। इति राजनिर्घण्टः॥ (मेदोविशिष्टे, त्रि॥)
मेध, ऋ ञ वधमेधासङ्गेषु। इति कविकल्पद्रुमः॥ (भ्वा० उभ०-वधे सक०-अन्यत्र अक०-सेट्।) ऋ, अमिमेधत्। ञ, मेधति मेधते। इति दुर्गादासः॥
मेधः, पुं, (मेध्यते वध्यते पश्वादिरत्रेति। मेध+घञ्।) यज्ञः। इति जटाधरः॥ (यथा, महाभारते। १। १२३। ३६।
"ग्रामणीश्च महीपालानेष जित्वा महाबलः।
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति॥"
हविः। इति ऋग्वेदे। १०। १००। ६। मन्त्रभाष्ये सायणः॥)
मेधा, स्त्री, (मेधते सङ्गच्छते अस्यामिति। मेध+"षिद्भिदादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। टाप्।) धारणावती बुद्धिः। इत्यमरः।१।५।२॥ धारणाशक्तियुक्ता धीर्मेधा मेधते सङ्गच्छतेऽस्यां सर्व्वं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ ञ सङ्गे मेधायां सेमक्तात् सर्व्वादित्वः आपबहुश्रुतविषयीकरणं धारणा यदुक्तं धारणा बुद्धेर्गुणविशेषः इति॥ इति भरतः॥ *॥ (यथा, मुण्डकोपनिषदि। ३। २। ३।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")
मेधाकरं औषधं यथा,—
"शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला।
अभया च गुडूची च अटरूषकवाकुची।
एतैरक्षसमैर्भागैर्घृतं प्रस्थं विपाचयेत्॥
कण्टकार्य्या रस प्रस्थं दुग्धा च समन्वितम्।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १९८ अध्यायः॥ *॥
मेधाकरणानि यथा। सतताध्ययनम्। तत्त्वज्ञानकथा। श्रेष्ठतन्त्रशास्त्रावलोकनम्। सद्गुर्वाचार्य्यसेवा च। इति पुराणम्॥ (दक्षप्रजापतिकन्याविशेषः। यथा,—
"कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥"
इति वह्निपुराणे गणभेदनामाध्याये॥
धनम्। इति निघण्टुः। २। १०॥ "मिधृ मेधृ सङ्गमे च। चकारात् हिंसामेधयोश्च। मिधिः सङ्गत्यर्थः। इति माधवः। घञ्। सङ्गच्छतेऽनेन सर्व्वं तद्धता हिंस्यते वा तद्वान् चौरादिभिः शक्ति चेवार्थकारणात् इति महाभारतम्॥ यद्वा, मतौ धीयते अर्जयितव्यं रक्षितव्यं दातव्यमिति धनवता बुद्धौ धनं धार्य्यते। तत्र मतिशब्द उपपदे धातोः घञर्थे कविधानम् इति कः। पृषोदरादित्वात् मतिशब्दस्य मेभावः।" इति तद्भाष्ये देवराजयज्वा॥)
मेधाः, [स्] पुं, (मेधते इति। मेध्+असुन्।) स्वायम्भुवमनुपुत्रः। यथा,—
"अग्निध्राग्निबाहुश्च सहः सवन एव च।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्वसुः।
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः॥"
इति मात्स्ये ९ अध्यायः॥
मेधाकृत्, स्त्री, (मेधां करोतीति। कृ+क्विप्।) सितावरशाकम्। इति राजनिर्घण्टः॥ मेधाकारके, त्रि॥
मेधाजित्, पुं, (मेधां जितवानिति। जि+क्विप्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥
मेधातिथिः, पुं, (मेधायाः धारणावद्बुद्धेरतिथिरिव।) मनुसंहिताटीकाकृत्। मुनिविशेषः। यथा, श्रीभागवते। १। १९। १०।
"मेधातिथिर्देवल आर्ष्टिषेणो
भरद्वाजो गौतमः पिप्पलादः॥"
(प्रियव्रतपुत्रः स च शाकद्वीपाधिपतिः। यथा, श्रीमद्भागवते। ५। २०। २४—२५।
"यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य ह महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः॥" *॥ सप्तदश द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। ३०।
"मेधातिथिः सप्तदशे व्रती ह्यष्टादशे तथा॥"
प्रजापतेः कर्द्दमस्य पुत्रः। यथा, मार्कण्डेये। ५३। १५।
"अग्निध्रो मेधातिथिश्च वपुष्मांश्च तथापरः॥"
दक्षसावर्णिमन्वन्तरे सप्तर्षीणामेकतमः। यथा, मार्कण्डेये। ९४। ८।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सबलस्तथान्यो हव्यवाहनः॥"
नदीविशेषे, स्त्री। यथा, महाभारते। ३। २२१। २३।
"चर्म्मण्वती मही चैव मेध्या मेधातिथिस्तथा।
ताम्रावती वेत्रवती नद्यस्तिस्रोऽथ कौशिकी॥")
मेधारुद्रः, पुं, (मेधया रुद्र इव।) कालिदासः। इति त्रिकाण्डशेषः॥
मेधावती, स्त्री, (मेधा दैयत्वेन अस्ति अस्याः इति। मेधा+मतुप्। मस्य वः। ङीप्। मेधावर्द्धकत्वादस्यास्तथात्वम्।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ मेधाविशिष्टा च॥
मेधाविनी, स्त्री, (मेधास्याः अस्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति विनिः। ततो ङीप्।) ब्रह्मणः पत्नी। इति मेदिनी। ने, २०४॥
मेधावी, [न्] पुं, (मेधास्यास्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति

विनि:) शुक्लपक्षी । इति मेदिनी । ये, २०४ ॥ मदिरा । इति राजनिर्घण्ट: ॥ पण्डित: । इति हेमचन्द्र: ।३।६॥ वाडि: । इति त्रिकाण्डशेष: ॥ (कस्यचित् ब्राह्मणस्य पुत्र: । यथा, महाभारते, १२ । १७५ । ३ ।
"द्विजाते: कस्यचित् पार्थ ! स्वाध्यायनिरतस्य वै ।
बभूव पुत्रो मेधावी मेधावी नाम नामत: ॥")
मेधायुक्ते, त्रि । इति मेदिनी । ये, २०४ ॥ (यथा, रामायणे । १ । ४ । ६ ।
"स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभु: ॥")
तद्वैदिकपर्य्याय: । विप्र: १ विग्र: २ गृत्स: ३ धीर: ४ वेन: ५ वेधा: ६ कण्व: ७ ऋभु: ८ नवेदा: ९ कवि: १० मनीषी ११ मन्धाता १२ विधाता १३ विप: १४ मनश्चित् १५ विपश्चित् १६ विपन्यव: १७ आकेनिप: १८ उशिज: १९ कीस्तास: २० अद्धातय: २१ मतय: २२ मतुथा: २३ वाघत: २४ । इति चतुर्व्विंशतिर्म्मेधाविनामानि । इति वेदनिघण्टौ । ३ । १५ ॥

मेधि:, पु, (मेध्यते खले स्थाप्यते इति । मेध + "सर्व्वधातुभ्य इन् ।" उणा० ४।११३। इति इन् ।) खले पशुबन्धनार्थन्यस्तदारु । इत्यमर: । २ । ९ । १५ ॥ खले धान्यमर्द्दनस्थानमध्ये पशुबन्धननिमित्तं निहितं यद्दारु स मेधि: । मेढ़ इति ख्याते । इति भरत: ॥ तत्पर्य्याय: । मेथि: ३ खलेवाली ३ । इति हेमचन्द्र: ॥ अस्य स्थापनदिनं तत्र वारौ शुक्रबृहस्पती । नक्षत्राणि रेवती स्वाती हस्ता मूलं त्र्यग्निरश्व । तत्र लग्नं स्थिरम् । इति ज्योतिस्तत्त्वम् ॥

मेधिर:, त्रि, (मेधास्यास्तीति । मेधा + "मेधारथाभ्यामिरन्निरचौ वक्तव्यौ ।" ५ । २ । १०९ । इति काशिकोक्त्या इरन् ।) मेधावी । इति त्रिकाण्डशेष: ॥ (यथा, ऋग्वेदे । १ । २५ । २० ।
"त्वं विश्वस्य मेधिर । दिवश्च ग्मश्च राजसि ।"
"हे मेधिर ! मेधाविन् ! वरुण ।" इति तद्भाष्ये सायण: ॥ यज्ञवान् । हविष्मान् । यथा, ऋग्वेदे । १० । १०० । ६ ।
"इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिर: कवि: ।"
"मेधो यज्ञ: हविर्वा तद्वान् ।" इति तद्भाष्ये सायण: ॥)

मेधिष्ठ:, त्रि, (अयमेषामतिशयेन मेधावीति । मेधाविन् + "अतिशायने तमबिष्ठनौ ।" ५।३।५५ । इति इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६५ । इति विनो लुक् ।) अतिशयमेधायुक्त: । इति व्याकरणम् ॥

मेध्यं, त्रि, (मेध्यते इति । मेध् + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । यद्वा, मेधामर्हतीति । मेधा + दण्डादित्वात् यत् ।) पवित्रम् । इत्यमर: । ३ । १ । ५५ ॥ (यथा,—
"ज्ञानेन मेध्यमखिलममेध्यं ज्ञानतो भवेत् ।
ब्रह्मज्ञाने समुत्पन्ने मेध्यामेध्यं न विद्यते ॥"
इति चिन्तामणिधृतवचनम्
"पवित्र: प्रयत: पूत इति त्रयवर्गौ प्राणिविषयमात्र उक्तं इह त्वप्राणिद्रव्ये ।" इति भरत: ॥
"पूतं मेध्यं पवित्रं स्यात्शौचं प्रयतनिर्म्मलम् ।
निशोध्यं शोधितं मृष्टं निर्णिक्तमनवस्करम् ॥"
इति शब्दरत्नावली ॥
(नित्यमेध्यम् । यथा, मनु: । ५ । १२९ ।
"नित्यं शुद्ध: कारुहस्त: पण्ये यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं नित्यमेध्यमिति स्थिति: ॥")
शुचि: । इति मेदिनी । ये, ४७ ॥ (यथा, अनर्घराघवे । २ । १४ ।
"तत्तादृक् तृणपूलकोपनयनक्लेशाच्चिरद्वेषिभिर्मेध्या वत्सतरी विहस्य बटुभि: सोत्प्रासमालभ्यते ॥"
मेधाजनक: । यथा,—
"मण्डूकपर्ण्या: स्वरस: प्रयोज्य:
क्षीरेण यष्टीमधुकस्य चूर्णम् ।
रसो गुडूच्यास्तु समूलपुष्प्या:
कल्क: प्रयोज्य: खलु शङ्खपुष्प्या: ॥
आयु: प्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्या विशेषेण च शङ्खपुष्पी ॥"
इति चरके चिकित्सास्थाने प्रथमेऽध्याये ॥)

मेध्य:, पुं, (मेधायै हित: । मेधा + "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् ।) खदिर: । यव: । छाग: । इति राजनिर्घण्ट: ॥

मेध्या, स्त्री, (मेधायै हिता । मेधा + यत् । टाप् ।) रक्तवचा । रोचना । इति मेदिनी । ये ४७ ॥ केतकी । ज्योतिष्मती । शङ्खपुष्पी । ब्राह्मी । श्वेतवचा । शमी । मण्डूकी । इति राजनिर्घण्ट: ॥ (नदीविशेष: । यथा, महाभारते । ३ । २२१ । २३ ।
"चर्म्मण्वती मही चैव मेध्या मेधातिथिस्तथा ॥")

मेनका, स्त्री, (मन्यते इति । मन् + "मनेराशिषि च ।" इति वुन् । तत: "नशिमन्योरलिट्येत्वं वक्तव्यम् ।" ६ । ४ । १२० । इत्यत्र काशिकोक्त्या अकारस्य एत्वम् ।) सर्व्वश्या । इति शब्दरत्नावली ॥ तस्या: कन्या शकुन्तला । यथा,—
"विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद्भगवान् कण्वो वीर ! किं करवाम ते ॥"
इति श्रीभागवते । ९ । २० । १३ ॥
(मेनैव । मेना + स्वार्थे कन् ।) उमामाता । यथा,
"तत: प्रीतास्तु पितरस्ता ददुस्तनयां निजाम् ।
मेनां देवाश्च शैलाय हिमयुक्ताय वै ददु: ॥
तां मेनां हिमवाँल्लब्ध्वा प्रसादाद्दैवतेष्वथ ।
प्रीतिमानभवच्चासौ रराम च यथेच्छया ॥
ततो हिमाद्रि: पितृकन्यया समं
सुखं सिषेवे विषयं यथेप्सितम् ।
अजीजनत् सा तनयास्तु मेना
रूपाभियुक्ता: सुरयोषितोपमा: ॥
पुलस्त्य उवाच ।
मेनायां कन्यकास्तिस्रो जाता रूपगुणान्विता: ।
सुनाभ इति विख्यातश्चतुर्थस्तनयोऽभवत् ॥
नीलाञ्जनचयप्रख्या नीलेन्दीवरलोचना ।
रूपेणानुपमा काली जघन्या मेनकासुता ॥
जातास्ता: कन्यकास्तिस्र: षड्ब्दात् परतो मुने ।
कर्त्तुं तप: प्रयातास्ता देवास्ता ददृशु: शुभा: ॥
ततो गते कन्यके द्वे माता मेना तपस्विनी ।
तपसो वारयामास उमे त्येवाब्रवीच्च सा ॥
तदेव माता नामास्याश्चक्रे पितृसुता शुभा ।
उमेत्येव हि कन्याया: सा जगाम तपोवनम् ॥"
इति वामने ७४—७५ अध्याय: ॥ * ॥
अपि च ।
"कथं गिरिसुता काली बभूव जगतां प्रभु: ।
दाक्षायणी त्यक्ततनु: कथमाप हरं पतिम् ॥"
मार्कण्डेय उवाच ।
यदात्यजत्तनुं देवी पूर्व्वं दाक्षायणी सती ।
तदैव मनसागच्छन्मेनकां हिमवद्गिरिम् ।
त्यक्तप्राणा यदा देवी भूता हिमवत: सुता ॥
शिवाविन्यस्तमनसा सप्तविंशतिवत्सरान् ।
निनाय मेनका देवी परमाम्बतिमिच्छती ॥
सप्तविंशतिवर्षान्ते जगन्माता जगन्मयी ।
सुप्रीता भवदर्थं प्राह प्रत्यक्षतां गता ॥
श्रीदेव्युवाच ।
यत् प्रार्थितं त्वया देवि । मत्तस्तत् प्रार्थयाधुना ।
तत: सा प्रथमं पुत्रशतं वव्रे यशस्विनी ॥
पश्चात् तनयामेकां स्वरूपगुणशालिनीम् ।
कुलद्वयानन्दकरीं भुवनत्रयदुर्लभाम् ॥
ततो भगवती प्राह मेनकां मुनिसन्निभाम् ॥
श्रीदेव्युवाच ।
शतं पुत्रा: संभवन्तु भवत्या वीर्य्यसंयुता: ।
सुता च तव देवानां मानुषाणाञ्च रक्षसाम् ॥
हिताय सर्व्वजगतां भविष्याम्यहमेव ते ।
एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत ॥
तत: सा कालिका देवी योगनिद्रा जगन्मयी ।
पूर्व्वत्यक्तसतीरूपा जन्मार्थं मेनकां ययौ ॥
समयस्यानुरूपेण मेनकाजठरं शिवा ।
समुद्भूय समुत्पन्ना सा लक्ष्मीरिव सागरात् ॥
वसन्तसमये देवी नवम्यां मृगयोगत: ।
अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात् ॥"
इति कालिकापुराणे ४० अध्याय: ॥

मेनकात्मजा, स्त्री, (मेनकाया आत्मजा ।) दुर्गा । इति हलायुध: ॥ (शकुन्तला । यथा, महाभारते । १ । ७२ । ११ ।
"नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिन: ।
पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ॥")

मेनकाप्राणेश:, पुं, (मेनकाया: प्राणेश: पति: ।) हिमालय: । इति हेमचन्द्र: । ४ । ९३ ॥

ना, स्त्री, (मान्यते पूज्यते इति । मान पूजायाम् "बहुलमन्यत्रापि ।" उणा० २ । ४६ । इति इनच् प्रत्ययेन निपातनात् साधु: ।) मेनका । इति भरतद्विरूपकोष: ॥ सा पितृकन्या । यथा,

"तां मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे ॥"

इति कुमारसम्भवे । १ । १८ ॥ * ॥

यथा च, कौर्म्मे १२ अध्याये ।

"अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः ।
तेभ्यः स्वाहा स्वधा जज्ञे मेना वैतरणी तथा ॥"

(स्त्री । यथा, ऋग्वेदे । १ । ६२ । ७ ।

"भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदं-
साः ।"

"मेनेति स्त्रीनाम । मेने स्त्रीरूपमापन्ने रोदसी ।"
इति तद्भाष्ये सायणः ॥ * ॥ वृषणश्वकन्या ।
यथा, ऋग्वेदे । १ । ५१ । १३ ।

"मेना भवो वृषणश्वस्य ।"

"हे इन्द्र । त्वं वृषणश्वस्य एतदाख्यस्य राज्ञो
मेना भवः मेनानाम कन्यका भूः ।" इति तद्भाष्ये
सायणः ॥*॥ वाक् । इति निघण्टुः । १ । ११ ॥
"मानपूजायां इत्यस्मात् 'बहुलमन्यत्रापि इनच्
भवति ।' इति वचनादिनच् । बहुलग्रहणात्
नलोपः । पूज्यतेऽनया गुर्व्वादिरुपदेशवाक्येन
पूज्या वा देवतात्वात् ।" इति तट्टीकायां देव-
राजयज्वा ॥ * ॥ नदीविशेषः । यथा, महा-
भारते । ६ । ९ । २३ ।

"कारिषिणीमसिक्नीञ्च कुशचीरां महानदीम् ।
मरुद्वीं प्रवरां मेनां हेमां घृतवतीं तथा ॥")

मेनाजा, स्त्री, (मेनायाः जायते इति । जन् + डः ।
स्त्रियां टाप् ।) पार्व्वती । इति हेमचन्द्रः ॥

मेनादः, पुं, (मे इति नादोऽस्य ।) विड़ालः ।
छागः । मयूरः । इति मेदिनी । दे, ३९ ॥

मेनाधवः, पुं, (मेनाया धवः स्वामी ।) हिमालयः ।
इति त्रिकाण्डशेषः ॥

मेन्धिका, स्त्री, (मां शोभामिन्धयति प्रकाशयतीति ।
इन्ध + णिच् + ण्वुल् । टापि अत इत्वम् ।)
क्षुपविशेषः । इति केचित् । मेहदी इति
भाषा ॥

मेन्धी, स्त्री, (मां शोभामिन्धयतीति । इन्ध +
णिच् + अण् । गौरादित्वात् ङीष् ।) क्षुप-
विशेषः । इति केचित् । मेहदी इति भाषा ॥

मेप, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) ङ, मेपते । ऋ, अमि-
मेपत् । इति दुर्गादासः ॥

मेरकः, पुं, विष्णुशत्रुभेदः । इति हेमचन्द्रः ॥

मेरुः, पुं, (मि + "मिपीभ्यां रुः ।" उणा० ४ ।
१०१ । इति रुः ।) पर्व्वतविशेषः । तत्पर्य्यायः ।
सुमेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरा-
लयः ५ । इत्यमरः ॥ मिनोति क्षिपति ज्योतींषि
उच्चत्वात् मेरुः । डुमि ञ् क्षेपे मान्मीति
रुः । इति भरतः ॥*॥ (यथा, मात्स्ये ।१२१।८
"देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः सर्व्ववर्णां उदयो नाम पर्व्वतः ॥")
जपमालाग्रवर्त्तिन्येका माला । यथा,—

"मालामेकैकमादाय सूत्रे सम्पातयेत् सुधीः ।
मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत् ॥
गोपुच्छसदृशी कार्य्याथवा सर्पाकृतिर्भवेत् ।
तत्सजातीयमेकाक्षं मेरुत्वेनाग्रतो न्यसेत् ॥"

इत्युत्पत्तितन्त्रे ६० पटलः ॥ * ॥

करमालायां मेरुर्यथा,—

"निस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वे नोपकल्पयेत् ॥"

इदन्तु शक्तिभिन्नविषयम् ॥ * ॥

शक्तिविषये मेरुर्यथा,—

"पर्व्वत्रयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत् ।
पर्व्वद्वयन्तु तर्ज्जन्या मेरु तद्विद्धि पार्व्वति ! ॥"

श्रीविद्याविषये मेरुर्यथा,—

"अनामामध्यमायाश्च मूलाग्रन्तु द्वयं द्वयम् ।
कनिष्ठायाश्च तर्ज्जन्याश्चयं पर्व्व सुरेश्वरि ! ।
अनामामध्यमायाश्च मेरुः स्याद्धितयं शुभम् ॥"

तल्लङ्घितजपे दोषो यथा,—

"अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ॥"

इति तन्त्रसारः ॥

मेरुकः, पुं, (मिनोति क्षिपति गन्धानिति । मि +
रुः । संज्ञायां कन् ।) यक्षधूपः । इति शब्द-
चन्द्रिका ॥ धुना इति भाषा । (मध्यदेशस्य
प्रदेशभेदः । यथा, बृहत्संहितायाम् ।१४।२९।
"ऐशान्यां मेरुकनष्टराज्यपशुपालकीरकाश्मी-
राः ।
अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः ॥")

मेरुसावर्णः, पु, एकादशमनुः । यथा,—
"ततस्तु मेरुसावर्णा ब्रह्मसूनुर्मनुः स्मृतः ।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा ॥"

इति मात्स्ये ९ अध्यायः ॥

मेलकः, पुं, (मिल् + भावे घञ् । स्वार्थे कन् ।)
सङ्गः । इत्यमरः । ३ । २ । २९ ॥ ("बहुमान्य
मेलकं बलाबलमुक्तम् ।" इति । २ । १३६ ।
मनुटीकायां कुल्लूकभट्टः ॥)

मेलकलवणं, क्ली, (मिलतीति । मिल + ण्वुल् ।)
मेलकं लवणम् ।) औषरलवणम् । इति राज-
निर्घण्टः ॥

मेला, स्त्री, (मिल् + णिच् + अङ् । टाप् ।)
मेलकः । मसिः । इति मेदिनी । ले, ४६ ॥
अञ्जनम् । इति हेमचन्द्रः ॥ महानीली । इति
राजनिर्घण्टः ॥

मेलानन्दा, स्त्री, (मेलया मस्या आनन्दो यस्याः ।)
मस्याधारः । इति हारावली ॥

मेलान्धुः, स्त्री, (मेलानां अन्धुः कूपिका ।) मस्या-
धारः । इति जटाधरः ॥

मेलाम्बुः, पुं, (मेलैव अम्बु अत्र ।) मस्याधारः ।
इति शब्दरत्नावली ॥

मेव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) ऋ, अमिमेवत् । ङ,
मेवते । इति दुर्गादासः ॥

मेषः, पुं, (मिषति अन्योन्यं स्पर्द्धते इति । मिष्
स्पर्द्धायाम् + अच् ।) पशुविशेषः । भेड़ा इति
भेड़ा इति च भाषा ॥ (यथा, पञ्चतन्त्रे ।५।६२।
"मेषेण सूपकाराणां कलहो यत्र वर्त्तते ।
स भविष्यत्यसन्दिग्धं वानराणां भयावहः ॥")
तत्पर्य्यायः । मेढ्रः २ उरभ्रः ३ उरणः ४
ऊर्णायुः ५ वृष्णिः ६ एड़कः ७ । इत्यमरः ।२।
९ । ७६ ॥ भेड़ः ८ हुड़ः ९ अजिनः १०
अविः ११ लोमशः १२ बली १३ रोमशः १४
भेडुः १५ भेड़कः १६ मेढ़ः १७ हुडुः १८ ।
इति शब्दरत्नावली ॥ मेढ़कः १९ हुड़ः २०
संफलः २१ । इति हेमचन्द्रः । ४ । ३४१ ॥
अस्य मांसगुणाः । मधुरत्वम् । शीतत्वम् ।
गुरुत्वम् । विष्टम्भित्वम् । बृंहणत्वञ्च । इति
राजनिर्घण्टः ॥ अपि च । पित्तश्लेष्मकरत्वम् ।
कुसुम्भशाकेन सह त्याज्यत्वञ्च । इति राज-
वल्लभः ॥ * ॥ लग्नविशेषः । औषधविशेषः ।
इति मेदिनी । षे, १२१ ॥ (यथा, सुश्रुते
उत्तरतन्त्रे । १७ अध्याये ।

"मेषस्य पुष्पैर्मधुकेन संयुतं
तदञ्जनं सर्व्वकृते प्रयोजयेत् ।
क्रियाश्च सर्व्वाः पवनोद्भवे हिताः
क्रमः परिम्लायिनि चापि पित्तहृत् ॥")

राशिविशेषः ॥ तत्पर्य्यायः । क्रियः २ । (यथा,
श्रीमद्भागवते ।५।२१।४। "यदा मेषतुलयोर्व्वर्त्तते
तदाहोरात्राणि समानानि भवन्ति । यदा
वृषभादिषु पञ्चसु च राशिषु चरति तदाहा-
न्येव वर्द्धन्ते ह्रसति च मासि मासि एकैका
घटिका रात्रिषु ॥") अस्याधिष्ठात्री देवता
पुंमेषः । अश्विनीभरणीकृत्तिकापादैकेन मेष-
राशिर्भवति । अत्र जात ईदृशो भवति ।
शेषदशायां नेत्रदुःखी दयालुः धनी गानसुखी
धार्म्मिकः धीरः मत्स्यमांसाशी च । स तु
पृष्ठोदयः । अस्य वर्णः । आरक्तः पीतश्च ।
अयं क्रूरः । पित्तोष्णस्वभावः । कान्तिरहितः ।
समानाङ्गः । पर्व्वतचारी । पूर्व्वदिगधिपतिः ।
वैश्यवर्णः । अल्पस्त्रीसङ्गः । अल्पसन्तानः ।
सुदृढ़ः । अतिरवश्च । इति ज्योतिषम् ॥ * ॥
रव्याश्रिततद्राशिजातफलं यथा,—

"मेषे दिनेशे पुरुषः सुवेशः
सत्साहसः स्यान्नृपतेः समानः ।
क्षुद्रा युतः पित्तकृता च पीड़ा
वक्रोद्भवा वा सततं महौजाः ॥" * ॥

चन्द्राश्रिततद्राशिजातफलं यथा,—

"स्थिरजनो रहितः स्वजनैर्नरः
सुतयुतः प्रमदाविजितो भवेत् ।
अजगते द्विजराज इतीरितं
विधुतयाद्भुतया सहितः श्रिया ॥" * ॥

तल्लग्नजातफलं यथा,—
"मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः ।
क्रोधी स्वजनहन्ता च विक्रमी परवत्सलः ॥"

इति काशीप्रदीपः ॥

तज्जयस्य सूलमानम् । १ । ४० । इति ज्योतिस्तत्त्वम् ॥ * ॥ त्रितारकधराकृतिश्रवणानक्षत्रस्य गगनमध्योदये मेषलग्नस्य अष्टादशपलाधिकदण्डैको गतो भवेत् । यथा,—

"तारकात्रयमिते धराकृतौ
वैष्णवे गगनमध्यवर्त्तिनि ।
मत्तवारणगतिर्जलग्नतो
निर्ययुर्गजमहीभृल्लिप्तिका: ॥"

महेन्द्राकृतिपञ्चतारकधनिष्ठानक्षत्रस्य मस्तकोपर्य्युदये मेषलग्नस्य षट्त्रिंशत्पलाधिकदण्डद्वयं गतं स्यात् । यथा,—

"मस्तकोपरि समागते धने
महेन्द्राकृतिनि पञ्चतारके ।
यान्ति कान्तिमति मेषलग्नत:
सारसाश्च रसषट्कलिप्तिका: ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

मेषक:, पुं, (मिषतीति । मिष् + ण्वुल् । संज्ञायां कन् ।) जीवशाक: । राजनिर्घण्ट: ॥

मेषकम्बल:, पुं, (मेषलोमनिर्म्मित: कम्बल: । मध्यपदलोपी कर्म्मधारय: ।) मेषलोमनिर्म्मितवस्त्रम् । तत्पर्य्याय: । ऊर्णायु: २ । इत्यमर: । २ । ६ । १०७ ॥

मेषलोचन:, पुं, (मेषस्य लोचनमिव पुष्पमस्य ।) चक्रमर्द्द: । इति भावप्रकाश: ॥ मेषचक्षुस्तुल्यचक्षुषि, त्रि ॥

मेषवल्ली, स्त्री, (मेषप्रिया वल्ली ।) अजशृङ्गी । इति भावप्रकाश: ॥

मेषविषाणिका, स्त्री, (मेषस्य विषाणं शृङ्गमिव प्रतिकृतिरस्या: । विषाण + प्रतिकृतौ कन् । टापि अत इत्वम् ।) मेषशृङ्गी । इति रत्नमाला ॥

मेषशृङ्ग:, पुं, (मेषस्य शृङ्गमिव । तदाकृतित्वात् ।) स्थावरविषभेद: । इति हेमचन्द्र: । ४ । २६३ ॥ (यथा, सुश्रुते उत्तरतन्त्रे । १७ अध्याये ।
"मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि ॥")

मेषशृङ्गी, स्त्री, (मेषशृङ्ग + गौरादित्वात् ङीष् ।) अजशृङ्गीवृक्ष: । मेढ़ाशृङ्गी इति भाषा । (यथा, सुश्रुते । १ । ३६ ।
"मेषशृङ्गी मातुलुङ्गी सुवहेत्यादि ॥")
तत्पर्य्याय: । मन्दौषध: २ मेषविषाणिका ३ चक्षु: ४ चक्षुर्व्विहनम् ५ मेढ़शृङ्गी ६ स्वादुद्रुमा ७ । इति रत्नमाला ॥ (तथास्या: पर्य्यायो गुणाश्च ।
"मेषशृङ्गी विषाणी स्यान्मेषवल्ल्यजशृङ्गिका ॥
मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत् ।
रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माक्षिशूलनुत् ॥
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत् ।
दीपनं स्रंसनं कासकृमिव्रणविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मेषा, स्त्री, (मिष्यतेऽसौ । मिष् + कर्म्मणि घञ् । टाप् ।) त्रुटि: । इति शब्दचन्द्रिका । गुजराटी एलाइच इति भाषा ॥

मेषाक्षिकुसुम:, पुं, (मेषाक्षी अक्षिवत् कुसुममस्य ।) चक्रमर्द्द: । इति रत्नमाला ॥

मेषाण्ड:, पुं, (मेषस्याण्डमिवाण्डमस्य ।) इन्द्र: इति पुराणम् ॥

मेषान्त्री, स्त्री, (मेषस्य अन्त्रमिव अन्त्रं यस्या लताया: ।) वस्तान्त्रीवृक्ष: । इति राजनिर्घण्ट: ॥

मेषालु:, पुं, (मेषप्रिय: आलु: ।) वर्व्वराह्वय: । इति शब्दचन्द्रिका ॥

मेषाह्वय:, पुं, (मेषस्याह्वय: आह्वास्य ।) चक्रमर्द्द: । इति राजनिर्घण्ट: ॥ (विवरणमस्य चक्रमर्द्दशब्दे ज्ञातव्यम् ॥)

मेषिका, स्त्री, (मेषी + स्वार्थे कन् । टाप् । ह्रस्व: ।) मेषी । इति शब्दरत्नावली ॥

मेषी, स्त्री, (मिष्यते गृह्यते असौ इति । मिष + घञ् । ङीष् ।) तिनिशवृक्ष: । जटामांसी । इति राजनिर्घण्ट: ॥ मेषजातीया स्त्री । भेड़ी । (यथा, वाजसनेयसंहितायाम् । ३ । ५६ ।
"भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजं सुखं मेषाय मेष्यै ॥")
तत्पर्य्याय: । जालकिनी २ अवि: ३ । इति त्रिकाण्डशेष: ॥ एडका ४ मेषिका ५ इति शब्दरत्नावली । करटी ६ रजा ७ अविला ८ वेणी ९ । इति हेमचन्द्र: । ४ । ३४३ । अस्या दुग्धगुणा: । मधुरत्वम् । गाढ़त्वम् । स्निग्धत्वम् । कफापहत्वम् । वातामयकरत्वम् । स्थौल्यत्वम् । लोमशायाश्चेत् गुरुत्वम् । वृद्धिदत्वञ्च । इति राजनिर्घण्ट: ॥ * ॥ अपि च ।

"आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत् ।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम् ।
गुरुकासेऽनिलोद्भूते केवले वानिले वरम् ॥"
इति भावप्रकाश: ॥

अस्या दधिगुणा: । सुस्निग्धत्वम् । कफपित्तकरत्वम् । गुरुत्वम् । वाते रक्तवाते च पथ्यत्वम् । शोफव्रणनाशित्वञ्च ॥ * ॥ अस्या नवनीतगुणा: । क्लिष्टगन्धत्वम् । शीतलत्वम् । मेधाहरत्वम् । पुष्टिदत्वम् । स्थौल्यत्वम् । मन्दाग्निदीपनत्वम् । सारकत्वम् । पाके हिमत्वम् । लघुत्वम् । योनिशूले कफे वाते दुर्नाम्नि च हितत्वञ्च । दुर्नाम्नि स्थाने गुदशूले इति पुस्तकान्तरे पाठ: ॥ * ॥ तस्या घृतगुणा: । अतीवगौरवात् सुकुमारदेहिनां वर्ज्यत्वम् । बुद्धिपाटवहरत्वम् । बलावहत्वम् । वपुषो विस्रगन्धिकारित्वञ्च । इति राजनिर्घण्ट: ॥ तन्मांसगुणा: । यथा, भावप्रकाशे ।

"छागमेषवृषाश्वाद्या: ग्राम्या: प्रोक्ता महर्षिभि: ।
ग्राम्या वातहरा: सर्व्वे दीपना: कफपित्तला: ।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धना: ॥"

मेषूरणं, क्ली, दशमलग्नम् । यथा,—
"कर्म्मस्थानञ्च दशमं खं मेषूरणमास्पदम् ।"
इति ज्योतिस्तत्त्वम् ॥

मेह:, पुं, (मेहति क्षरति शुक्रादिरनेनेति । मिह + घञ् ।) प्रमेहरोग: । इत्यमर: । २ । ६ । ५६ ॥ (अस्यौषधं यथा,—
"वङ्गभस्म हरिद्रा च तेजपत्रैकमधुना सह ।
ततो गुडसमं शस्तं भक्षयेत् कर्षमात्रकम् ॥
गुडूचीसत्त्वमथवा शर्करासहितं तथा ।
सर्व्वमेहहरो श्रेयो वङ्गावलेह उत्तम: ॥"
इति वङ्गावलेह: ॥

"भस्मसूतं समं कान्तमभ्रकञ्च शिलाजतु ।
शुद्धताप्यं शिलाव्योषं त्रिफलाङ्कोटबीजकम् ॥
कार्पाससम्भारजनी समं भावञ्च भृङ्गिणा ।
विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्तदा ॥
माषमात्रं हरेन्मेहं मेघनादरसो महान् ॥"
इति मेघनादरस: ॥

"रसभस्म समायुक्तं वङ्गभस्म प्रकल्पयेत् ।
अस्य माषद्वयं हन्ति मेहान् वीढसमन्वितम् ॥"
इति वङ्गेश्वररस: ॥

इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥ अन्यत् प्रमेहशब्दे द्रष्टव्यम् ॥ * ॥ मिहतीति । मिह + अच् ।) मेष: । इति शब्दचन्द्रिका ॥ मूत्राव: । इति हेमचन्द्र: । ३ । २९७ ॥ (अन्यादभिमुखं तत्करणे दोषो यथा, मनौ । ४ । ५२ ।
"प्रत्यग्निं प्रतिसूर्य्यञ्च प्रतिसोमोदकद्विजान् ।
प्रतिगां प्रतिवातञ्च प्रज्ञा नश्यति मेहत: ॥"
"अग्निसूर्य्यचन्द्रजलब्राह्मणगोवातानामभिमुखं मूत्रपुरीषे कुर्व्वत: प्रज्ञा नश्यति ।" इति तट्टीकायां कुल्लूकभट्ट: ॥)

मेहघ्नी, स्त्री, (मेहं हन्तीति । हन् + टक् । ङीप् ।) हरिद्रा । इति रत्नमाला ॥

मेहनं, क्ली, (मेहति सिञ्चति मूत्ररेतसीति । मिह सेचने + ल्युट् ।) शिश्न: । इत्यमर: । २ । ६ । ७६ ॥ (यथा, ऋग्वेदे । १० । १६३ । ५ ।
"मेहनाद्वं कारणाल्लोम ।"
"मेहनात् मेढ्रात् ।" इति तद्भाष्ये सायण: ॥ यथा, च सुश्रुते । १ । ३५ ।
"ह्रस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनम् ।
तथोरस्यवलीढ़ानि न च स्यात् पृष्ठमायतम् ॥
ऊर्द्धञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिण: ।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते ।
प्रेक्षते यश्च विभ्रान्तं स जीवेत् पञ्चविंशतिम् ॥")
मूत्रम् । इति मेदिनी । ने, ११० ॥ (यथा सुश्रुते । १ । ३२ ।
"यस्तर्वाहितपन् यच्च भूमौ पतति यस्य सुष्कसम्भ्रमेढ्रो भग्नग्रीव: प्रणष्टमेहनश्च मनुष्य: ॥")
भावेऽनट् प्रत्यये मूत्रोत्सर्गश्च ॥

मेहन:, पुं, (मेहति सिञ्चति रसमिति । मिह + ल्यु: ।) मुष्ककवृक्ष: । इति राजनिर्घण्ट: ॥

मेहना, स्त्री, (मेह्यते चाल्यते शुक्रमस्यामिति । मिह चरणे + णिच् + अधिकरणे युच् । स्त्रियां टाप् ।) महिला । इति केचित् ॥ (मेहनीयम् । यथा, ऋग्वेदे । ५ । ३६ । २ ।
"यदिन्द्रचित्रमेहनास्ति त्वादातमद्रिव: ॥")

मैत्रं, क्ली, (मित्रादागतमिति । यद्वा, मित्रस्येदमिति । मित्र+"तस्येदम् ।" ४।३।१२०। इति अण् ।) अनुराधानक्षत्रम् १७ । यथा,—
"मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णवमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
इति तिथ्यादितत्त्वम् ॥*॥
(मित्रः सूर्य्यो देवतास्येति । आदित्यलोकः । यथा, महाभारते । १२ । ३१७ । ३ ।
"पायुनोत्क्रममाणस्तु मैत्रं स्थानमवाप्नुयात् । पृथिवीं जघनेनाथ ऊरुभ्याञ्च प्रजापतिम् ॥"
यद्वा, मनुः । १२ । ७२ ।
"मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् ॥")
पुरीषोत्सर्गः । यथा,—
"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
कल्यं उषःकालम् । मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गः ।" इत्याह्निकाचारतत्त्वम् ॥
अपि च ।
"ब्राह्मे मुहूर्त्ते चोत्तिष्ठेत् सुस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत् ॥"
मैत्रं मलमूत्रोत्सर्गः । इति राजवल्लभः ॥*॥
तत्र निषिद्धस्थानादि यथा,—
"छायाकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु ।
अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥
न गोमये न कृष्टे वा महावृक्षे च शाड्वले ।
न तिष्ठन् वा न निर्व्वासा न च पर्व्वतमस्तके ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन् वा समाचरेत् ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वापि न तीर्थे न चतुष्पथे ॥
नद्यां नदसमीपे वा नोषरे न पराशुचौ ।
न सोपानत्पादुको हि छत्री वा नान्तरीक्षके ॥
न चैवाभिमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरपामपि कदाचन ॥
न ज्योतींषि निरीक्षन् वा न वायुभिमुखो-
ऽपि वा ।
प्रत्यादित्यं प्रत्यनलं प्रतिसोमं तथैव च ॥"
इति कौर्म्मे उपविभागे १२ अध्यायः ॥
अस्य विस्तारस्तु पाद्मे उत्तरखण्डे १६० अध्याये द्रष्टव्यः ॥ * ॥ (मित्रस्य भावः । मित्र + अण् । मित्रता । यथा, मनुः । ८ । ११८ ।
"लोभात् मोहात् भयात् मैत्रात् कामात्
क्रोधात् तथैव च ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥")
त्रि, मित्रसम्बन्धी ॥ (यथा, महाभारते । १२ । १४४ । २३ ।
"पिशुनां ये न भाषन्ते मित्रभेदकरीं गिरम् । ऋतं मैत्रञ्च भाषन्ते ते नराः स्वर्गगामिनः ॥'
मित्रताप्रापी । यथा, श्रीमद्भगवद्गीतायाम् । १२ । १३ ।
"अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्म्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"
"मित्रभावो मैत्री मित्रतया वर्त्तते ।" इति श्रीशङ्करभाष्यम् ॥ "मैत्रः स्निग्धः कृपालुः ।" इति श्रीधरस्वामी ॥ "मैत्री मित्रता तद्वान् मैत्रः ।" इति श्रीमधुसूदनसरस्वती ॥)
मैत्रः, पुं, ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, मनुसंहितायाम् । २ । ८७ ।
"जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्य्यादन्यन्न वा कुर्य्यात् मैत्रो ब्राह्मण उच्यते ॥"
"मित्रमेव मैत्रः स्वार्थे अण् ।" इति तट्टीकायां मेधातिथिकुल्लूकौ ॥ (उदयमुहूर्त्तात् तृतीयमुहूर्त्तः । तथा च हरिवंशे ।
"आर्द्रः सार्द्रस्तथा मैत्रः शुभो वासव एव
च ॥'
यथा, कुमारे । ७ । ६ ।
"मैत्रे मुहूर्त्ते शशलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु ॥"
वर्णसङ्करविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥")
मैत्रभं, क्ली, (मैत्रञ्च तत् भञ्चेति ।) अनुराधानक्षत्रम् । इति जटाधरः ॥
मैत्रावरुणः, पुं, (मित्रश्च वरुणश्चेति । "देवताद्वन्द्वे च ।" ६।३।२६ । इत्यानङ् । ततः "देवताद्वन्द्वे च ।"७।३।२१ । इति मित्रस्य वृद्धिः । "दीर्घाच्च वरुणस्य ।" ७ । ३ । २३ । इति वरुणस्य न वृद्धिः । तयोरपत्यमिति । मित्रावरुण+अण् ।) अगस्त्यः । इति शब्दरत्नावली ॥ (यथा, अथर्व्ववेदे । ५ । १९ । १५ ।
"न वर्षं मैत्रावरुणं ब्रह्मज्यमभिवर्षति ॥"
अस्य विवरणं यथा, ऋग्वेदे । ७ । ३३ । ११ ।
"उतासि मैत्रावरुणो वसिष्ठोर्व्वश्या ब्रह्मन्
मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवा पुष्करे
त्वाददन्त ॥"
"उतापि च हे वसिष्ठ । मैत्रावरुणः । मित्रावरुणयोः पुत्रोऽसि ब्रह्मन् वसिष्ठ ! उर्व्वश्या अप्सरसो मनसो ममायं पुत्रः स्यादिति ईदृशात् संकल्पात् द्रप्सं रेतः मित्रावरुणयोरुर्व्वशीदर्शनात् स्कन्नमासीत् । तस्मादधिजातोऽसि । तथा च वक्ष्यति । सत्रेहजातावित्यृचि । एवं जातं त्वा त्वां दैव्येन देवसम्बन्धिना ब्रह्मणा वेदराशिना स्वयम्भुवा युक्तं पुष्करे विश्वेदेवा अददन्त अधारयन्त । तथाचादित्यैर्मैत्रावरुणौ जज्ञाते इति प्रकृत्य पठ्यते ।
तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधापतितं रेतः कलशे च जले स्थले ।
स्थले वसिष्ठस्तु मुनिः सम्भूत ऋषिसत्तमः ॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भाद्दषिर्जातः कुम्भेनापि हि मीयते ॥
कुम्भ इत्यभिधानञ्च परिमाणस्य लक्ष्यते ।
ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ।
सर्व्वतः पुष्करे तं हि विश्वे देवा अधारयन् ॥"
इति तद्भाष्ये सायणः ॥)
मैत्रावरुणिः, पुं, (मैत्रावरुणयोरपत्यमिति । मैत्रावरुण+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) अगस्त्यः । इत्यमरः । १ । ३ । २०- (यथा, महाभारते । ३ । १०३ । १४ ।
"तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।
आश्रमस्थं तपोराशिं कर्म्मभिः स्वैरभिष्टुवन् ॥")
मैत्री, स्त्री, (मैत्र+ङीप् । यद्वा, मित्र+भावे ष्यञ् +ङीष् । ततः "हलस्तद्धितस्य ।" ६ । ४ । १५० ।" इति यलोपः ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ ॥ अस्त्रिविशेषे-मैत्रीकरणनिषेधो यथा,—
"विद्विट्पतितोन्मत्तबहुवैरातिकीटकैः ।
बन्धकीबन्धकीभर्त्तृक्षुद्रानृतकथैः सह ॥
तथातिव्ययशीलैश्च परीवादरतैः शठैः ।
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ॥"
इति विष्णुपुराणे तृतीयेंऽशे ११ अध्यायः ॥
"विद्विडादिभिर्मैत्रीं न कुर्व्वीत । बहुभिर्वैरं यस्य । अतिकीटकः अत्यन्तं कीटवत् पीडकः । कराटकैरिति पाठेऽपि स एवार्थः । बन्धकी असती ।" इति तट्टीका ॥
मैत्रीबलः, पुं, (मैत्री मित्रता बलमस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥
मैत्रेयः, पुं, (मैत्रे मित्रतायां साधुरिति । मैत्र+ढञ् ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ (मित्रयोः अपत्यमिति । मित्रयु+"गृष्ट्यादिभ्यश्च ।" ४ । १ । १३६ । इति ढञ् । ततः "केकयमित्रयुप्रलयानां यादेरियः ।"७ । ३ । २ । इति युस्थाने इयादेशे प्राप्ते । "दाक्षिनायन-दाक्षिनायन ।" ६ । ४ । १७४ । इति युलोपो निपातितः ।) मुनिविशेषः । यथा,—
"एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ।
प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥"
इति श्रीभागवते । ३ । ७ । १ ।
(सूर्य्यः । यथा, महाभारते । ३ । ३ । २७ ।
"देहकर्त्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।
चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः ॥"
वर्णसंकरजातिविशेषः । यथा, मनुसंहितायाम् । १० । ३३ ।
"मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये ॥"
"मैत्रेयकं नाम्ना वर्णम् ।"इति तत्र मेधातिथिः ॥
स्त्री । मैत्रेयेण उच्चारिता मैत्रेयी उपनिषद् ॥
याज्ञवल्क्यस्य पत्नी च ॥) मित्रसम्बन्धिनि, त्रि ॥

(मित्रयुवंशोद्भवादौ च। यथा, हरिवंशे। ३२। ७७—७८।

"अत ऊर्द्ध्वं प्रवक्ष्यामि दिवोदासस्य सन्ततिम्।
दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृप:।
मैत्रायणी तत: शाखा मैत्रेयास्तु तत: स्मृता:॥"

मैत्रेयिका, स्त्री, मित्रयुद्धम्। इति त्रिकाण्डशेष:॥ (मित्रयूनां भाव: कर्म्म वा। मित्रयु+"गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु।" ५।१।१३४। इति वुञ्। तत: "केकयमित्रयुप्रलयानां यादेरिय:।" ७।३।२। इति इयादेश:। यथा, "मैत्रेयिकया श्लाघते।" इति काशिका। ७।३।२॥)

मैत्रं, क्ली, स्त्री, (मित्र+अण्।) मित्रस्य भाव:। मित्रस्य कर्म्म। इत्यमरभरतौ। ३।५।३६॥ (यथा, पञ्चतन्त्रे। ४।७०।

"प्राहु: साप्तपदं मैत्रं जना: शास्त्रविचक्षणा:।
मित्रताञ्च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु॥")

मैथिली, स्त्री, (मिथिला निवासोऽस्येति। मिथिला+"सोऽस्य निवास:।" ४।३।८९। इति अण्। मैथिलस्तन्नामा राजा तस्यापत्यं स्त्री। मैथिल+इञ्। ङीष्।) सीता। इति हेमचन्द्र:॥ (यथा, भट्टिकाव्ये। २।४७।

"हिरण्मयी शाललतेव जङ्गमा
च्युता दिव: स्थास्नुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृति:
सुता ददे तस्य सुताय मैथिली॥"

मिथिलापतिमात्रे, पुं। यथा, महाभारते। १२।६६।३।

"जनको मैथिलो राजा महात्मा सर्व्वतत्त्ववित्।
योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च॥")

मैथुनं, क्ली, (मिथुने सम्भवतीति। मिथुन+"संभूते।" ४।३।४१। इति अण्। मिथुनस्येदमित्यण् वा।) अग्न्याधानम्। यथा, मनुशातातपौ।

"असपिण्डा च या मातुरसगोत्रा च या पितु:।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने।

मैथुने मिथुनशब्दवाच्ये स्त्रीपुंससाध्ये अग्न्याधानपुत्रोत्पत्त्यादौ।" इत्युद्वाहतत्त्वम्॥*॥ सङ्गतम्। रतम्। इत्यमर:।३।३।१२१॥ "सङ्गति: सङ्गमो दारसंयोग: विवाह इति कलिङ्ग:॥ रतं सुरतम्। अनयोर्मैथुनम्। मिथुनात् सङ्गमे इदमर्थे स्वार्थे रतौ निष्पाद्यार्थे वा ण्य:। सम्बन्धे सुरते युग्मे राशौ मिथुनमिष्यते। इति व्याडि:।" इति तट्टीकायां भरत:॥*॥ तस्य पर्य्याय:। सुरतम् २ अभिमानितम् ३ धर्षितम् ४ संप्रयोग: ५ अनारतम् ६ अब्रह्मचर्य्यकम् ७ उपसृष्टम् ८ त्रिभद्रम् ९ क्रीडारत्नम् १० महासुखम् ११। इति त्रिकाण्डशेष:॥ व्यवाय: १२ ग्राम्यधर्म्म: १३ रतम् १४ निधुवनम् १५। इत्यमर:। २।७।५७॥ अस्य गुणा:। धातुक्षयकारित्वम्। रतिसन्तानदातृत्वञ्च। अतिशयमैथुनस्य श्वासकासज्वरकारित्वम्। अमैथुनस्य प्रमेहमेदग्रन्थिरोगाग्निमान्द्यकारित्वम्। स्त्रीसंसर्गे तस्य आयुर्जराशरीरबलवर्णाः स्थिरोपचितमांसानि भवन्ति। पूज्यस्थानाशुचिस्थानसेकस्थानलोकसमीपप्रात:कालसन्ध्याकालपर्व्वकालेषु तस्य त्याज्यत्वम्। एतत्कर्म्मणि रजस्वलाकामा मलिना बन्ध्या वर्णज्येष्ठा वयोज्येष्ठा व्याधियुक्ताङ्गहीनासती वेश्या योनिदोषयुक्ता सगोत्रा गुरुपत्नी भिक्षुकी कपटव्रतधारिणी वृद्धा च त्याज्या॥ रजस्वलागमने दृष्ट्यायुस्तेज:क्षयोऽधर्म्मश्च भवति। कपटव्रतयुक्तागुरुपत्नी सगोत्रावृद्धागमने एवं पर्व्वकाले सन्ध्याकाले च स्त्रीमैथुने पापमायु:क्षयश्च भवति। वयोरूपगुणोपेतां कुलशीलसमन्विताम्। अधिकामां हृष्टामलङ्कृतां वाजीकरणपीडिताञ्च प्रमदां हृष्टोऽधिकामश्च पुरुष: सेवेत। शुक्रवर्द्धकद्रव्यं सशर्करं शीतलजलं वा पीत्वा कामबाणचञ्चलां सुरूपामनिन्द्यां हृष्टां प्रमदामाद्यप्रहरे हृष्ट: कामुको गत्वा तदनु सुखं स्वपेत्। असकृद्गमने तु नरो धातुवैषम्यमेति। रतान्ते स्नानं सशर्करक्षीरपानं निद्रा शौहिकरसभोजनञ्च हितम्। इति राजवल्लभ:॥*॥ ("तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति। यश्च तत्राधीयते गर्भ: स प्रसवमानो विमुच्यते। द्वितीयेऽप्येवं सूतिकागृहे वा। तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति। न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं गुणकरं भवति यथा नद्यां प्रतिस्रोत: प्लाविद्रव्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्ध्वं गच्छति तद्वदेव द्रष्टव्यम्। तस्मान्नियमवतीं त्रिरात्रं परिहरेत्। अत:परं मासादुपेयात्।"

"ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत्।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम्।
कललं जायते तस्या वर्ज्जितं पैतृकैर्गुणै:॥"

इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥)

व्रतदिवसे अष्टाङ्गमैथुनस्य त्याज्यत्वं यथा,—

"स्मरणं कीर्त्तनं केलि: प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च।
मैथुनं विविधं त्याज्यं व्रते क्रीडाविवृद्धये॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४ अध्याय:॥

अस्य विधिनिषेधौ यथा,—

"ऋतावुपगम: शस्त: स्वपत्न्यामवनीपते।।
पुन्नामर्क्षे शुभे काले ज्येष्ठयुग्मासु रात्रिषु॥
नास्नातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम्।
नानिष्टां न प्रकुपितां नाप्रशस्तां न गुर्व्विणीम्॥
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम्।
क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युत:॥
स्नात: स्रग्गन्धधृक् प्रीतो नाध्मात: क्षुधितोऽपि वा।
सकाम: सानुरागश्च व्यवायं पुरुषो व्रजेत्॥
चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा।
पर्व्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च॥
तैलस्त्रीमांससंभोगी पर्व्वस्वेतेषु वै पुमान्।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृत:॥
अशेषपर्व्वस्वेतेषु तस्मात् संयमिभिर्बुधै:।
भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरै:॥
नान्ययोनावयोनौ वा नोपयुक्तौषधस्तथा।
देवद्विजगुरूणाञ्च व्यवायी नाश्रमे भवेत्॥
चैत्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे।
नैव श्मशानोपवने सलिलेषु महीपते।॥
प्रोक्तपर्व्वस्वशेषेषु नैव भूपाल! सन्ध्ययो:।
गच्छेद्व्यवायं मतिमान्न मूत्रोच्चारपीडित:॥
पर्व्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप!।
भुवि रोगावहो नृणामप्रशस्तो जलाशये॥
परदारान्न गच्छेत मनसापि कदाचन।
किमु वाचास्थिबन्धोऽपि नास्ति तेषु व्यवायिनाम्॥
मृतो नरकमभ्येति हीयतेऽत्रापि चायुष:।
परदाररति: पुंसामुभयत्रापि भीतिदा॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि॥"

इति विष्णुपुराणे। ३।११।१११-१२४॥*॥

परस्त्र्यादिगमने दण्डो यथा,—

"ब्राह्मण: क्षत्रियो वैश्य: क्षत्रविट्शूद्रयोषित:।
व्रजन्दाप्यो भवेद्राज्ञा दण्डमुत्तमसाहसम्॥
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे।
मध्यमं प्रथमं वैश्यां दण्ड्य: शूद्रागमाद्भवेत्॥
शूद्र: सवर्णागमने शतं दण्ड्यो महीभुजा।
वैश्यश्च द्विगुणं राजन्! क्षत्रियस्त्रिगुणं तथा॥
ब्राह्मणश्च भवेद्दण्ड्यस्तथा राजंश्चतुर्गुणम्।
अगुप्तासु भवेद्दण्ड: सगुप्तास्वधिको भवेत्॥
माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा॥
भागिनेयी तथा चैव राजपत्नी तथैव च।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च॥
इत्यगम्यास्तु निर्द्दिष्टास्तासान्तु गमने नर:।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति॥
भ्रातृभार्य्यागमे पूर्व्वाद्दण्डस्तु द्विगुणो भवेत्।
चाण्डालीञ्च श्वपाकीं वा गच्छन् वधमवाप्नुयात्॥
तिर्य्यग्योनौ च गोवर्ज्यं मैथुनं योऽभिसेवते।
स पणं प्राप्नुयाद्दण्डं तस्याश्च यवसोदकम्॥
सुवर्णञ्च भवेद्दण्ड्यो गां व्रजन् मनुजोत्तम।।
वेश्यागामी द्विजो दण्ड्यो वेश्याशुल्कसमं पणम्॥
गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति।
वेतनं द्विगुणं दद्याद्दण्डञ्च द्विगुणन्तथा॥
अन्यमुद्दिश्य यो दद्यात् नयेदन्यस्य कारणात्।
तस्य दण्डं भवेद्राजन्। सुवर्णस्य च माषकम्॥
नीत्वा भोगान्न यो दद्याद्दाप्यो द्विगुणवेतनम्।
राज्ञश्च द्विगुणं दण्डन्तथा धर्म्मो न हीयते॥
बहूनां व्रजतामेकां सर्व्वे ते द्विगुणं दमम्।
दद्यु: पृथक् पृथक् सर्व्वे दण्डञ्च द्विगुणं परम्॥"

इति मात्स्ये २०१ अध्याय:॥

मैनाक:, पु, (मेनकाया अपत्यं पुमान्। मेनकाया भव इति वा। मेनका+अण्। पृषोदरादित्वात्

साधुः ।) पर्व्वतविशेषः । तत्पर्य्यायः । हिरण्यनाभः २ सुनाभः ३ हिमवत्सुतः ४ । इति जटाधरः ॥ स तु हिमालयस्य ज्येष्ठपुत्त्रः । यथा,—
"ततो भगवती प्राह मेनकां सुनिसन्निभाम् ।
स्मितपूर्व्वं तदा तस्याः पूरयन्ती मनोरथम् ॥
श्रीदेव्युवाच ।
शतं पुत्त्राः संभवन्तु भवत्या वीर्य्यसंयुताः ।
तत्रैको बलवान् मुख्यः प्रथमं संभविष्यति ॥
एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत ।
मेनका च सुदं लब्ध्वा स्वस्थानं प्रविवेश ह ॥
ततः काले तु सम्प्राप्ते मैनाकमचलोत्तमम् ।
पक्षेण सह योऽद्यापि सिन्धुमध्ये प्रवर्त्तते ॥
मेनका सुषुवे देवी देवेन्द्रं साह्वया गतम् ।
अन्यानूनशतं पुत्त्रान् क्रमात् सा सुषुवे च ह ॥"
इति कालिकापुराणे ४० अध्यायः ॥
(दानवविशेषः । इति हरिवंशे भविष्यपर्व्वणि । २३२ । ३ ॥)

मैनाकस्वसा, [ऋ] स्त्री, (मैनाकस्य स्वसा ।) पार्व्वती । इति हेमचन्द्रः । २ । ११८ ॥

मैनिकः, पुं, (मीनं हन्तीति । मीन+"पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् ।) जालिकः । इति सिद्धान्तकौमुदी ॥

मैन्दः, पु, विष्णुवध्यासुरविशेषः । इति हेमचन्द्रः । २ । १३४ ॥ (यथा, हरिवंशे ।४१।१५८—१६०।
"अपरः केशवस्यायं प्रादुर्भावो महात्मनः ।
विख्यातो माथुरे कल्पे सर्व्वलोकहिताय वै ॥
यत्र शाल्वश्च मैन्दश्च द्विविदं कंसमेव च ।
दैत्यान् मानुषदेहस्थान् सूदयामास वीर्य्यवान् ॥"
वानरविशेषः । इति रामायणम् ॥ (यथा, महाभारते । २ । ३१ । १८ ।
"तत्र वानरराजाभ्यां मैन्देन द्विविदेन च ।
युयुधे दिवसान् सप्त न च तौ विकृतिं गतौ ॥")

मैन्दहा, [न्] पुं, (मैन्दं हतवानिति । हन्+क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

मैरेयं, क्ली, (मारं कामं जनयतीति । मार+ढक् । निपातनात् साधुः ।) मद्यविशेषः । इत्यमरः । २ । १० । ४२ ॥ "यद्यपि ।
'सीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधानाम्लसंहितम् ॥'
इति माधवेन भेदः कृतः । तथापि स्वल्पमनादृत्येदमुक्तम् । मारं कामं जनयति मैरेयं ण्यः । निपातनादात् ऐत्वम् ।" इति भरतः ॥ (यथा,
"मद्यन्तु सीधुर्म्मैरेयमिरा च मदिरा सुरा ।
कादम्बरी वारुणी च हालापि बलवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
क्वचित्, पुलिङ्गेऽपि दृश्यते । यथा,—
"तीक्ष्णः कषायो मदकृत् दुर्नामकफगुल्महृत् ।
कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

मैलन्दः, पुं, भ्रमरः । यथा । "श्रीमत्सुरहरपदपाथोरुहनिःसरन्मकरन्दसन्दोहास्वादनतुन्दिलमनोमैलन्द इत्यादि ।" इति वरवर्णिलतपञ्चकौमुद्यां राजप्रशस्तिः ॥

मोक्ष, कि क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) कि, मोक्षयति मोक्षति । इति दुर्गादासः ॥

मोक्षः, पुं, (मोक्ष+भावे घञ् । मोक्ष्यते दुःखमनेन मोक्ष+करणे घञ् । इति भरतः ।) मुक्तिः ॥ (यथा, सांख्यसारे । २ । ७ । २५ ।
"न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
सर्व्वाशासंक्षये चेतःक्षयो मोक्ष इति श्रुतिः ॥")
मोक्षधर्म्मस्तु महाभारते शान्तिपर्व्वणि द्रष्टव्यः ॥ पाटलिवृक्षः । मोचनम् ॥ इति मेदिनी । षे २५ ॥ (यथा, मेघदूते । ६३ ।
"ताभ्यो मोक्षस्तव यदि सखे ! घर्म्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्ज्जितैर्भापयेस्ताः ॥")
मृत्युः । इति हेमचन्द्रः । १ । ७५ ॥ (विश्लेषः । यथा, श्रीमद्भगवद्गीतायाम् । ७ । २९ ।
"जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलम् ॥"
"मोक्षाय विश्लेषणार्थम् ।" इत्यानन्दगिरिः ॥ आत्मस्वरूपदर्शनम् । इति रामानुजः ॥ निरसनम् । इति श्रीधरस्वामी ॥ पतनम् । यथा, कुमारसम्भवे । ३ । ३१ ।
"मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्म्मर्म्मरपत्रमोक्षाः ।"
"मर्म्मरपत्रमोक्षाः जीर्णपर्णपाताः ।" इति तट्टीकायां मल्लिनाथः ॥)

मोक्षकः, पुं, (मोक्षतीति । मोक्ष+ण्वुल् ।) मुष्ककवृक्षः । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ५४ । ११३ ।
"तोयं शृतं मोक्षकभस्मना वा
यत्सप्तकृत्वः परिषेचनं तत् ॥"
त्रि, मोचनकर्त्ता । यथा, मनुसंहितायाम् । ४ । ३४२ ।
"असन्धितानां सन्धाता सन्धितानाञ्च मोक्षकः ॥")

मोक्षोपायः, पुं, (मोक्षस्य मुक्तेरुपायः ।) मुक्तिसाधनम् ॥ तत्तु तपः । शमादिः । योगः । ज्ञानञ्च । इति हेमचन्द्रः । १ । ७७ ॥ (यथा, हरिवंशे । २५५ । ६३ ।
"स तं शक्रगतं दृष्ट्वा कृपयाभिपरिप्लुतः ।
उवाच दानवश्रेष्ठं मोक्षोपायं ददामि ते ॥")

मोघं, त्रि, (मुह्यतेऽस्मिन्निति । मुह+घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) निरर्थकम् । इत्यमरः । ३ । १ । ८१ ॥ (यथा, मनौ । ९ । ५० ।
"यद्वन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥"
यथा च ।
"प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च ।
मरणाभिमुखं नित्यमुपसर्पन्ति मानवम् ॥
तानि भेषजवीर्य्याणि प्रतिघ्नन्ति जिघांसया ।
तस्मान्मोघाः क्रियाः सर्व्वा भवन्त्येव गतायुषः ॥"
इति सुश्रुते सूत्रस्थाने ३१ अध्याये ॥)
हीनम् । इति मेदिनी । घे, ४ ॥ (यथा, आर्य्यासप्तशत्याम् । ६७० ।
"सज्जन एव हि विद्या शोभायै भवति दुर्ज्जने मोघा ॥")

मोघः, पुं, (मुह्यत्यस्मिन् । मुह+घञ् । कुत्वम् ।) प्राचीरम् । इति शब्दमाला ॥

मोघपुष्पा, स्त्री, (मोघं पुष्पं रजो यस्याः ।) बन्ध्या । इति राजनिर्घण्टः ॥

मोघा, स्त्री, पुं, (मुह्यत्यनया । मुह+घञ् । कुत्वम् । स्त्रियां टाप् ।) पाटला । इति मेदिनी । घे, ४ ॥ (अस्याः पर्य्यायो यथा,—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
विडङ्गम् । इति शब्दमाला ॥

मोघोलिः, पुं, प्राचीरम् । इति हारावली ।९८॥

मोचं, क्ली,(मुञ्चति त्वगादिकमिति । मुच्+अच् ।) कदलीफलम् । इत्यमरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ।३१ अः। "तालनारिकेरपनसमोचप्रियालविल्वमधुकश्लेष्मातकाम्रफलस्नेहाः पित्तसंसृष्टे वायौ ॥" विवरणमस्य कदलीफलशब्दे ज्ञातव्यम् ॥)

मोचः, पुं, (मुञ्चति त्वचमिति । मुच्+अच् ।) शोभाञ्जनवृक्षः । इति मेदिनी । चे, ८ ॥ (यथा, महाभारते । ३ । १५८ । ४३ ।
"पनसांल्लिकुचान् मोचान् खर्ज्जूरानम्लवेतसान् ॥")

मोचकः, पुं, (मोचयति संसारादिति । मुच्+णिच्+ण्वुल् ।) मोक्षः । (मुञ्चति गन्धं त्वचमिति वा । मुच्+ण्वुल् ।) कदली । शिग्रुः । (मुञ्चति विषयानिति ।) विरागी । इति हेमचन्द्रः । ४ । २०० ॥ मुष्ककवृक्षः । इति राजनिर्घण्टः ॥ (मुक्तिकारके, त्रि । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे ।२।५१।
"असक्तो मोचकश्चायमकालः कालचोदकः ॥")

मोचनं, क्ली, (मुच्+ल्युट् ।) मोक्षः । (यथा, महाभारते । ५ । ८४ । २१ ।
"अवतीर्य्य रथात्तूर्णं कृत्वा शौचं यथाविधि ।
रथमोचनमादिश्य सन्ध्यामुपविवेश ह ॥")
खण्डनम् । दम्भः । शाठ्यम् । इति मुचधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥ (मोचयतीति । मोचि+ल्युः । मोचनकर्त्तरि, त्रि । यथा, भागवते । ६ । १३ । २३ ।
"धन्यं यशस्यं निखिलाघमोचनं
रिपुञ्जयं स्वस्त्ययनं तथायुषम् ॥")

मोचनी, स्त्री, (मोचयति रोगादिति । मुच्+णिच्+ल्युः । स्त्रियां ङीप् ।) कण्टकारी । इति जटाधरः ॥ मोचकर्णी च ॥

मोचरसः, पु, (मोचस्य रसः ।) शाल्मलिनिर्यासः । तत्पर्य्यायः । मोचस्रुत् २ मोचस्रावः ३ मोच-

निर्यास: ४ पिच्छिलसार: ५ सुरस: ६ शाल्मलीवेष्ट: ७ मोचसार: ८। अस्य गुणा:। कषायत्वम्। कफवातहरत्वम्। रसायनत्वम्। बलपुष्टिवर्णवीर्य्यप्रमायुर्द्देहसिद्धिदत्वम्। ग्राहित्वञ्च। इति राजनिर्घण्ट:॥ (यथा, सुश्रुते। उत्तरतन्त्रे। ४० अध्याये।
"तिलमोचरसौ लोध्रं तथैव मधुकोत्पलम्।
कच्छुरातिलकल्कश्च योगाश्चत्वार एव तु॥
आजेन पयसा पेया: सरक्ते मधुसंयुता:॥")

मोचा, स्त्री, (मुञ्चति त्वचमिति। मुच्+अच्। टाप्।) शाल्मलिवृक्ष:। (यथा,—
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥)
कदलीवृक्ष:। इत्यमर:। २।४।११३॥
(यथास्या: पर्य्याय:।
"कदली वारणा मोचाम्बुसाराशुमतीफला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
नीलीवृक्ष:। इति राजनिर्घण्ट:॥

मोचाट:, पुं, लघुजीर:। रम्भास्थि। मलयोद्भव:। इति मेदिनी। टे, ५४॥

मोची, स्त्री, (मुच्यते रोगी ययेति। मुच्+घञ्। ङीष्।) हिलमोचिका। इति रत्नमाला॥ (विवृतिरस्या हिलमोचिकाशब्दे ज्ञातव्या॥)

मोटकं, क्ली, (मुच्यते मुष्टीक्रियते इति। मुट्+घञ्। तत: कन्।) पितृदानार्थद्विगुणभुग्नकुशपत्रम्। यथा। "इति द्विगुणभुग्नदर्भमोटकं पितृश्राद्धवामपार्श्वे दद्यात्।" इति श्राद्धप्रयोगतत्त्वम्॥

मोटकी, स्त्री, (मोटक+ङीष्।) रागिणीविशेष:। इति हलायुध:॥

मोटनं, क्ली, (मुट्+ल्युट्।) चूर्णीकरणम्। आक्षेप:। इति मुटधात्वर्थदर्शनात्॥

मोटन:, पुं, (मोटतीति। मुट्+ल्यु:।) वायु:। इति राजनिर्घण्ट:॥

मोटनकं, क्ली, (मोटनेन कायतीति। कै+क:।) एकादशाक्षरच्छन्दोविशेष:। यथा,—
"स्यान्मोटनकं तजजाश्च लगौ॥"
"रङ्गे खलु मल्लकलाकुशल-
श्चाणूरमहाभटमोटनकम्।
य: केलिलवेन चकार स मे
संसाररिपुं प्रति मोटयतु॥"
इति छन्दोमञ्जरी॥

मोटा, स्त्री, (मुट्+अच्। टाप्।) बला। इति राजनिर्घण्ट:॥

मोट्टायितं, क्ली, (मुट्+भावे घञ्। बाहुलकात् घञस्तुट्। ततो भृशादित्वात् क्यङ्। ततो भावे क्त:।) स्त्रीणां स्वाभाविकदशविधालङ्कारान्तर्गतालङ्कारविशेष:। इति हेमचन्द्र:॥ तल्लक्षणं यथा, उज्ज्वलनीलमणि:॥
"कान्तस्मरणवार्त्तादौ हृदि तद्भावभावत:।
प्राकट्यमभिलाषस्य मोट्टायितमुदीर्य्यते॥"

मोण:, पुं, (मुण+अच्।) शुष्कफलम्। मक्षिका। सर्पकरण्ड:। इति मेदिनी। णे, २४।

मोद:, पुं, (मुद+भावे घञ्।) हर्ष:। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे।९।११३।११।
"यत्रानन्दाश्च मोदश्च मुद: प्रमुद आसते॥")

मोदक:, पुं, क्ली, (मोदयति बालादीनिति। मुद+णिच्+ण्वुल्।) खाद्यविशेष:। इत्यमर:। २।५।३३॥ मोया इति भाषा। अस्य दानमन्त्रो यथा,—
"मोदकं स्वादुसंयुक्तं शर्करादिविनिर्म्मितम्।
मया निवेदितं भक्त्या गृहाण परमेश्वरि॥"
इति दुर्गोत्सवपद्धति:॥
गुड:। यवासशर्करा। इति राजनिर्घण्ट:॥ शर्करादिद्रावकौषधविशेष:। अस्य पूर्णवीर्य्यं षण्मासं तिष्ठति। इति सुखबोध:॥ (यथा,—
"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते॥
द्रवस्तु द्विगुणं देयं मोदकेषु भिषग्वरै:॥
द्रव द्रवरूपद्रव्यं कर्षप्रमाणं तन्मात्रा बलं दृष्ट्वा प्रयुज्यते। बलमिति कालादेरप्युपलक्षणम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) हर्षके, त्रि। इति मेदिनी। के, १४१॥ (यथा, महाभारते। ७। ३५। ३८।
"हतारोहांश्छिन्नघण्टान् क्रव्यादगणमोदकान्॥")

मोदक:, पुं, (मोदयति मिष्टान्ननिर्म्माणेनेति। मुद+णिच्+ण्वुल्।) वर्णसङ्करजातिविशेष:। मयरा इति भाषा। स च शूद्रायां क्षत्रियाज्जात:। इति स्मृति:॥

मोदनं, क्ली, (मोदयतीति। मुद+णिच्+ल्यु:।) शिक्थकम्। इति राजनिर्घण्ट:॥ (मुद+भावे ल्युट्।) हर्ष:। मुदधात्वर्थदर्शनात्॥ (हर्षजनके, त्रि। यथा, महाभारते। ९।७३।७६।
"हृकरशब्दशालानां सुसुखे मोदनेऽहनि।
आसीद्धलचयो घोरस्तव पुत्त्रस्य पश्यत:॥")

मोदमोदिनी, स्त्री, (मोदात् मोदो महान् हर्ष: सोऽस्त्यस्या अस्तीति। मोदमोद+इनि। ङीप्।) जम्बू:। इति राजनिर्घण्ट:॥

मोदयन्ती, स्त्री, (मोदयतीति। मुद+णिच्+शतृ। ङीप्।) वनमल्लिका। काठमल्लिका इति भाषा॥ यथा,—
"मदयन्ती गन्धवती मोदयन्ती सरस्वरा।"
इति रत्नमाला॥
अपि च।
"तृणशून्या मोदयन्ती भूपदी मदयन्तिका॥"
इति शब्दरत्नावली॥
(यथा च सुश्रुते। २। २५।
"पिष्ट्वाथ सर्व्वं सह मोदयन्त्या
मारात्मसा बीजकसम्भवेन॥")

मोदा, स्त्री, (मोदयति गन्धेन तोषयतीति। मुद+णिच्+अच्। टाप्।) अजमोदा। इति राजनिर्घण्ट:॥

मोदाख्य:, पुं, (मोदमाख्याति रसपल्लवादिना विस्तारयतीति। आ+ख्या+क:।) आम्रवृक्ष:। इति राजनिर्घण्ट:॥

मोदाढ्या, स्त्री, (मोदेन आमोदगन्धेन आढ्या प्रचुरा।) अजमोदा। इति राजनिर्घण्ट:॥ मोदेन आढ्या। हर्षयुक्ता च॥

मोदित:, त्रि, (मोदो हर्षोऽस्य जात:। मोद+तारकादित्वात् इतच्।) हर्षयुक्त:। इति व्याकरणम्॥

मोदिनी, स्त्री, (मोदयति गन्धेनेति। मुद+णिच्+णिनि:। ङीप्।) अजमोदा। मल्लिका। यूथिका। कस्तूरी। मदिरा। मल्लिकापुष्पविशेष:। तत्पर्य्याय:। १ वटपत्री २ कुमारिका ३ तृणमल्लिका ४। अस्या गुणा:। नेत्ररोगप्रशमनत्वम्। कटुत्वम्। उष्णत्वम्। व्रणघ्नत्वम्। गन्धबहुलत्वम्। आस्यजरोगनाशित्वञ्च। इति राजनिर्घण्ट:॥ (हर्षदायके, त्रि। यथा, महाभारते। ९। ५६। १३।
"वराश्वनरनागानां शरीरप्रभवा नदी।
परलोकार्णवमुखा गृध्रगोमायुमोदिनी॥")

मोरटं, क्ली, (मुर वेष्टने+"शकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) इक्षुमूलम्। अङ्कोटपुष्पम्॥ सप्तरात्रात् परक्षीरम्। इति मेदिनी। टे, ५४॥ (यथा, वैद्यकरत्नमालायाम्।
"परतो मोरटं विद्यात्प्रासवं कफालकम्॥"
यथा च।
"सद्दुग्धभवक्षीरं मोरटश्छिन्नछोऽवयीत।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मोरट:, पुं, (मुर+अटन्।) लताप्रभेद:। क्षीरमोरटा इति भाषा। तत्पर्य्याय:। कर्णपुष्प: २ पीलुपत्र: ३ मधुस्रव: ४ घनमूल: ५ दीर्घमूल: ६ पुरुष: ७ क्षीरमोरट: ८। क्वचित् पुस्तके कर्णपुष्पस्थाने क्षीरपुष्प इति पीलुपत्रस्थाने पीलुपुष्प इति च पाठ:॥ (तथास्य पर्य्यायान्तरम्।
"पीलुपर्णी घनरसो हस्तिपर्णी च मोरट:॥"
इति वैद्यकरत्नमालायाम्॥)
अस्य गुणा:। क्षीरबहुलत्वम्। मधुरत्वम्। कषायत्वम्। पित्तदाहज्वरनाशित्वम्। वृष्यत्वम्। बलविवर्द्धनत्वञ्च। इति राजनिर्घण्ट:॥ (यथा, सुश्रुते। १। ४५ अध्याये।
"गुरु: किलाटोऽनिलहा पुंस्त्वनिद्राप्रद:
स्मृत:।
मधुरौ बृंहणौ वृष्यौ तद्वत्पीयूषमोरटौ॥")

मोरटकं, क्ली, (मोरट+स्वार्थे कन्।) इक्षुमूलम्। इति राजनिर्घण्ट:॥

मोरटा, स्त्री, (मोरट+टाप्।) मूर्व्वा। इत्यमर:।२।४।८३॥ (यथा, सुश्रुते।१।३८ अ:।
"वीरतरुसहचरद्वयदर्भवृक्षादनी गुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटावसुकवसिरमल्लूक कुरण्टकेन्दीवरकपोतवङ्का:॥" तथास्या: पर्य्यायो यथा,—

"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मोषकः, पुं, (मुष्णातीति । मुष् + ण्वुल् ।) तस्करः । इत्यमरः । २ । १० । २४ ॥

मोषणं, क्ली, लुण्ठनम् । छेदनम् । वधः । इति मुषधातोर्भावेऽनट् । (ल्युट् ॥*॥ मुष्णातीति । मुष् + ल्युः । अपहारके, त्रि । यथा, भागवते । ५।१४।२२। "न वै भगवान् नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयं भोगैश्वर्य्यमेवातनुतेति ॥")

मोषिता, [ऋ] त्रि, मोषणकर्त्ता । चौरः । इति मुषधातोस्तृन्प्रत्ययेन निष्पन्नः ॥

मोहः, पुं, (मोहनमिति । मुह् + भावे घञ् ।) मूर्च्छा । इत्यमरः । १ । ८ । १०६ ॥ (यथा उत्तररामचरिते ३ अङ्के ।

"वीचिवातैः शीकरक्षोदशीते-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेषितैस्तर्पयेति ॥"

अस्य विषयो यथा,—
"मलावहासु नाडीषु पित्तश्लेष्मानिलादिभिः ।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥"
इति सुश्रुते उत्तरतन्त्रे ४६ अध्याये ॥)

अविद्या । इति मेदिनी । हे, ७ ॥ दुःखम् । इति शब्दरत्नावली ॥ देहादिषु आत्मबुद्धिः । इति गीतासुबोधिन्यां श्रीधरस्वामी ॥ असौ अज्ञानी बुद्धितो जातः । यथा,—
"बुद्धेर्मोहः समभवदहङ्कारादभून्मदः ।
प्रमोदश्चाभवत् कण्ठान्मृत्युर्लोचनतो नृप ! ॥"
इति मात्स्ये २ अध्याय. ॥

मोहस्वरूपं यथा,—
"मम माता मम पिता ममेयं गृहिणी गृहम् ।
एतदन्यं ममत्वं यत् स मोह इति कीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥

धर्म्मविमूढत्वम् । यथा,—
"अकामतः कृतं पापं वेदाभ्यासेन नश्यति ।
कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधै-रिति ॥"

अत्र मोहादिति को मोहः । अत्र ।
"मोहशब्देन देवेन्द्र ! बुद्धिपूर्व्वो व्यतिक्रमः ।
उच्यते पण्डितैर्नित्यं पुराणे सांशपायन ॥"
इति भविष्यपुराणवचनात् ज्ञातबुद्धिपूर्व्वो व्यतिक्रमो मोहः । इति जिकनः । तन्न कामतः सामर्थ्यादेव बुद्धेर्लब्धत्वात् । उच्यते । मूढस्य अज्ञानी मोहादुगच्छत इत्यादौ मुह वैचित्त्य इति धात्वर्थानुसारात् अज्ञानमात्रं मोहः । यत्र तु कामनाशब्दोऽस्ति तत्र भविष्यपुराणसङ्केतितमोहशब्दो न ग्राह्यः । किन्तु धर्म्मविमूढत्वं मोहः स चाधर्म्मबुद्धौ सत्यामप्यकर्त्तव्ये रागात् कर्त्तव्यताभ्रमः । यथा, व्यासः ।
"मोहो धर्म्मविमूढत्वं मानस्त्वात्माभिमानिता ।"
एवञ्च भविष्यपुराणीयबुद्धिशब्दोऽप्यधर्म्मज्ञानमेवाभिधत्ते सत्यधर्म्मज्ञाने पापगौरवार्थमिदमुक्तं मोहादिति । इति प्रायश्चित्तविवेकः ॥*॥

मोहवृक्षो यथा,—
सुमनोवाच ।
"श्रूयतामभिधास्यामि सर्व्वसन्देहनाशनम् ।
स्वरूपमुपदेशस्य सर्व्वविज्ञानदर्शनम् ॥
लोभः पापस्य बीजोऽयं मोहो मूलन्तु तस्य हि ।
असत्यं तस्य च स्कन्धो माया शाखासुविस्तरः ॥
दम्भकौटिल्यपत्राणि कुत्सया पुष्पितः सदा ।
पैशुन्यं तस्य सौगन्ध्यमज्ञानं फलमेव हि ॥
छद्मपाषण्डचौराश्च क्रूटाः क्रूराश्च पापिनः ।
पक्षिणो मोहवृक्षस्य मायाशाखाः समाश्रिताः ॥
अज्ञानन्तु फलं तस्य रसोऽधर्म्मफलस्य हि ।
भावोदकेन संवृद्धस्तस्य सत्त्वात् स तु प्रियः ॥
अधर्म्मस्तस्य सुरभिः क्लेदश्च मधुरायते ।
तादृशैश्च फलैश्चैव सुफलो लोभपादपः ॥
तस्य च्छायां समाश्रित्य यो नरः परिवर्त्तते ।
फलानि तस्य योऽश्नाति सुपक्वानि दिने दिने ॥
फलानान्तु रसेनैव अधर्म्मेण तु पोषितः ।
सुसंपुष्टो भवेन्मर्त्यः पतनाय प्रयच्छति ॥"
इति पाद्मे भूमिखण्डे ११ अध्यायः ॥

मोहनं, क्ली, (मुह्यतेऽनेनेति । मुह् + ल्युट् ।) सुरतम् । इति हेमचन्द्रः । ३ । २०० ॥ यथा, मार्कण्डेये । ५१ । ७७ ।
"प्रविश्य गर्भमन्त्रका भुक्त्वा मोहयतेऽपरा ।
जायन्ते मोहनात्तस्याः सर्व्वमण्डककच्छपाः ॥")

होममन्त्रौषध्यादिद्वारा सुग्धताकरणम् । तत्र होमेऽङ्गुलिनियमो यथा,—
"मोहने वश्यकामश्च प्रीतिसंवर्द्धनं तथा ।
प्रदेशिनीकनिष्ठाभ्यां सर्व्वमेतत् प्रसिध्यति ॥
मोहनाकर्षणञ्चैव क्षोभणोच्चाटनं तथा ।
कनिष्ठामध्यमाङ्गुष्ठसंयोगेन तु लीलया ॥
विधियुक्तेन होमेन तथा ध्यानुयोगतः ।
सर्व्वे मन्त्राः प्रसिध्यन्ति मुद्रामन्त्रप्रयोगतः ॥"
इति तन्त्रसारः ॥

(नगरभेदः । यथा, महाभारते ।२।२५३।६।
"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा ।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")

मोहनः, पुं, (मोहयतीति । मुह + णिच् + ल्युः ।) धुस्तूरवृक्षः । इति राजनिर्घण्टः ॥ कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ७१ । १३२ ।
"कामस्येव जगज्जैत्रमोहनास्त्राधिदैवतम् ।
तद्रूपहृतचित्ताभूत समाधिस्थेव तत्क्षणम् ॥"
नृपविशेषः । यथा, कथासरित्सागरे ।४७।६१।
"वीक्ष्य प्रसन्नं निहतं मोहनो नाम भूपतिः ।
सन्निपत्याहृवासं तं ताडयामास सायकैः ॥"

मोहकारके, त्रि ॥ यथा, गीतायाम् । १८।३९ ।
"यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥"
"अत्र मोहनं मोहकरम् ।" इति आनन्दगिरिः ॥)

मोहनभोगः, पुं, (मोहनश्चासौ भोगश्चेति ।) समिताशर्कराघृतादियुक्तमिष्टान्नविशेषः । इति पाकराजेश्वरः ॥

मोहना, स्त्री, (मोहयति पुष्पेणेति । मुह + ल्युः । टाप् ।) त्रिपुरमालीपुष्पम् । इति रत्नमाला ॥ मतल्लाला । इति शब्दमाला ॥

मोहनी, स्त्री, (मुह्यत्यनयेति । मुह + ल्युट् । स्त्रियां ङीप् ।) उपोदकी । इति राजनिर्घण्टः ॥ वटपत्री । इति भावप्रकाशः ॥ (तथास्याः पर्य्यायः ।
"मोहनी मल्लिकाख्या तु वटपत्रा च मोहना ।"
इति वैद्यकरत्नमालायाम् ॥)

माया । यथा, महाभारते । १४ । ८० । ४५ ।
"मया तु मोहनी नाम मायैषा संप्रदर्शिता ॥")

मोहरात्रिः, स्त्री, (मोहस्य रात्रिः ।) दैनन्दिनप्रलयः । यथा,—
"एवं पञ्चाशदब्दे च गते तु ब्रह्मणो नृप ! ।
दैनन्दिनन्तु प्रलयं वेदेषु परिकीर्त्तितम् ॥
मोहरात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः ।
तत्र सर्व्वे प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः ॥
आदित्या वसवो रुद्रा मनवेन्द्रा मानवादयः ।
ऋषयो मुनयश्चैव गन्धर्व्वा राक्षसादयः ॥
मार्कण्डेयो लोमशश्च पेचकश्चिरजीविनः ।
इन्द्रद्युम्नश्च नृपतिश्चाकूपारश्च कच्छपः ।
नाडीजङ्घो बकश्चैव सर्व्वे नष्टाश्च तत्र वै ॥
ब्रह्मलोकादधः सर्व्वे लोका नागालयास्तथा ।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादधस्तथा ॥
गत दैनन्दिने ब्रह्मा लोकांश्च ससृजे पुनः ।
एवं शताब्दपर्य्यन्तं परमायुश्च ब्रह्मणः ॥
ब्रह्मणश्च निपातेन महाकल्पो भवेन्नृप ! ।
प्रकीर्त्तिता महारात्रिः सा एव च पुरातनैः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।५४।६२—७९ ॥*॥

मोहः कर्त्तव्यानवबोधः स एव रात्रिरिव रात्रिर्बुद्धिमोहकत्वान्निद्रारूपा । इदानीन्तनजनानां रात्रिरिति वा । इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥*॥ जन्माष्टमीरात्रिः । यथा,—
"दीपोत्सवचतुर्द्दश्याममया योग एव चेत् ।
कालरात्रिर्महेशानि ! ताराकालीप्रियङ्करी ।
जन्माष्टमी महेशानि ! मोहरात्रिः प्रकीर्त्तिता ॥
तृतीया माधवे शुक्ला बुधवारेण संयुता ।
दारुणा कीर्त्तिता देवि ! सर्व्वसिद्धेश्वरी परा ॥"
इति शक्तिसङ्गमतन्त्रम् ॥

मोहशास्त्रं, क्ली, (मोहोत्पादकं शास्त्रमिति मध्यपदलोपिकर्म्मधारयः ।) अविद्याजनकग्रन्थः । यथा,—
"गोपतिं प्राह विप्रेन्द्रानालोक्य भगवान् हरिः ।

न वेदबाह्यपुरुषैः पुण्यलेशोऽपि शङ्कर ! ॥
सम्प्रच्छति महादेव । धर्म्मौ वेदाद्वि निर्ब्बभौ ।
तथापि भक्तवात्सल्याद्रक्षितव्या महेश्वर ! ॥
अस्माभिः सर्व्व एवैमे गन्तारो नरकानपि ।
अस्मात् वेदबाह्यानां रक्षणाय च पापिनाम् ।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ! ॥
एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"

इति कौर्म्मे १४ अध्यायः ॥

मोहिनी, स्त्री, (मोहयति सौन्दर्य्यादिनेति । मुह + णिच् + णिनिः । स्त्रियां ङीप् ।) त्रिपुरमालीपुष्पम् । इति रत्नमाला ॥ (वटपत्री । तत्पर्य्यायो यथा,—

"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) समुद्रमन्थनकाले देवानाममृतपानायासुराणां मोहनाय च भगवदवतारविशेषः । यथा,—

"धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

स्वर्व्वेश्याविशेषः । यस्याः शापात् ब्रह्मणोऽपूज्यत्वं जातम् । यथा,—

"यतो हससि गर्व्वेण ततोऽपूज्यो भवाचिरम् ।
अचिराद्दर्पभङ्गं ते करिष्यति हरिः स्वयम् ॥
निषेध शरणं ब्रह्मन् ! स्वर्व्वेश्यायाश्च साम्प्रतम् ॥
तवैव कवचं स्तोत्रं मन्त्रं गृह्णाति यो नरः ।
भविता तस्य विघ्नश्च स यास्यत्युपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघस्य संक्रान्त्यां न भविष्यति सा पुनः ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ।
तेन सार्द्धं रतिं कृत्वा बभूव विज्वरा पुनः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३३ अध्यायः ॥

विस्तरस्तु ब्रह्मनुशब्दे द्रष्टव्यः ॥ (मोहकर्त्तरि त्रि । यथा, भागवते । ३ । ६ । ३५ ।

"अतो भागवती माया मायिनामपि मोहिनी ।
यत् स्वयञ्चात्मवर्त्मात्मा न वेद किमुतापरे ॥")

मौकुलिः, पुं, काकः । इति हेमचन्द्रः । ४ । ३८८ ॥ (यथा, उत्तररामचरिते २ अङ्के ।

"कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥")

मौक्तिकं, क्ली, (मुक्तैव । मुक्ता + "विनयादिभ्यष्ठक् ।" ५ । ४ । ३४ । इति ठक् ।) मुक्ता । इत्यमरः ।२।९।९२॥ (यथा, चाणक्यशतके ।५५।

"शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्व्वत्र चन्दनं न वने वने ॥"

तथास्य पर्य्यायः ।

"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।
अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मौक्तिकतण्डुलः, पुं, (मौक्तिकमिव शुक्लः तण्डुलोऽस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥

मौक्तिकप्रसवा, स्त्री, (मौक्तिकस्य प्रसवा ।) शुक्तिः । इति राजनिर्घण्टः ॥

मौक्तिकशुक्तिः, स्त्री, (मौक्तिकानां शुक्तिः ।) शुक्तिः । इति राजनिर्घण्टः ॥ मुक्तार झिनुक् इति भाषा ॥

मौखं, क्ली, (मुखस्येदमिति । मुख + अण् ।) मुखसम्बन्धीनपापम् । तत्तु अभक्ष्यभक्षणरूपं तच्च क्लीवम् । संसर्गरूपस्य तस्य प्रायश्चित्तं यथा । सुमन्तुः । यस्तैर्योनमौखस्रौवाणां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात् । इयात् कुर्य्यात् । एतदेवेति द्वादशवार्षिकमित्यर्थः । अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते । इति शूलपाणिकृतप्रायश्चित्तविवेकः ॥ मुखसम्बन्धिनि, त्रि ॥

मौखर्य्यं, क्ली, मुखरत्वम् । मुखरस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

मौखिकं, त्रि, मुखसम्बन्धि । मुखस्येदमित्यर्थे ष्णिक् (ठक्) प्रत्ययेन निष्पन्नम् ॥

मौञ्जी, स्त्री, (मुञ्जस्येयमिति । मुञ्ज + अण् । स्त्रियां ङीप् ।) मुञ्जनिर्म्मितमेखला ॥ (यथा, शिशुपालवधे । १ । ६ ।

"पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताम्बराधरां
विडम्बयन्तं शितिवाससस्तनुम् ॥"

"मुञ्जतृणविशेषसम्बन्धिमेखला मौञ्जी ।" इति तट्टीकायां मल्लिनाथः ॥) यथा,—

"विप्रस्य क्षत्त्रियस्यापि मौञ्जी स्यादक्षिणायने ।
दक्षिणे च विशां कार्य्यं नानध्याये न संक्रमे ॥"

मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्त्रियस्य च मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
मुञ्जालाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

मौञ्जीतृणाख्यः, पुं, (मौञ्जीतृणमित्याख्यास्य ।) मुञ्जः । इति राजनिर्घण्टः ॥

मौञ्जीपत्रा, स्त्री, (मौञ्जीपत्त्रमिव पत्त्रमस्याः ।) वल्वजा । इति राजनिर्घण्टः ॥

मौञ्जीबन्धः, पुं, (मौञ्ज्या बन्धः बन्धनम् ।) मुञ्जमेखलाबन्धनम् । उपनयनमिति यावत् । यथा,

"जन्मभादष्टमे सिंहे नीचस्थे शशुभे गुरौ ।
मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवौ ॥"

इति ज्योतिर्निबन्धे नारदवचनम् ॥

मौढ्यं, क्ली, (मूढस्य भावः कर्म्म वा । मूढ + "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५।१।१२४ । इति ष्यञ् ।) मोहः । इति हेमचन्द्रः ।२।२३४॥ (यथा, श्रीमद्भागवते । ३ । २९ । २२ ।

"यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्च्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥"

पुं, मूढस्यापत्यम् । मूढ + "कुर्व्वादिभ्यो ण्यः ।" ४ । १ । १५१ । इति ण्यः । मूढपुत्रः । इति व्याकरणम् ॥)

मौद्गलिः, पुं, काकः । इति त्रिकाण्डशेषः ॥

मौद्गल्यः, पुं, (मुद्गलस्यापत्यमिति । मुद्गल + ण्यः ।) मुद्गलमुनिपुत्रः । स च गोत्रकारकः । अस्य पञ्च प्रवराः यथा । और्व्वच्यवनभार्गवजामदग्न्याप्नुवन्तः । इति कुलदीपिका ॥ (यथा, हरिवंशे । ३२ । ७० ।

"मुद्गलस्य तु दायादो मौद्गल्यः सुमहायशाः ॥)

मौद्गीनं, क्ली, (मुद्गानां भवनं क्षेत्रमिति । मुद्ग + "धान्यानां भवने क्षेत्रे खञ् ।" ५ । २ । १ । इति खञ् ।) मुद्गभवोचितक्षेत्रम् । इत्यमरः । २ । ९ । ८ ॥

मौनं, क्ली, (मुनेर्भाव इति । मुनि + अण् ।) शब्दप्रयोगराहित्यम् ॥ तत्पर्य्यायः । अभाषणम् २ । तूष्णीम् ३ तूष्णीकाम् ४ । इत्यमरः ।२।७।३६ ॥ (यथा, रघुवंशे । १ । २२ ।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥")

कर्म्मविशेषे मौनाचरणं यथा,—

"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ॥"

इति तिथ्यादितत्त्वम् ॥

मौनी, [न्] पुं, (मौनमस्यास्तीति । मौन + "अत इनिठनौ ।" ५।२।११५ । इति इनिः ।) मुनिः । इति जटाधरः ॥ (यथा, मार्कण्डेये ।७५।३९ ।

"ततः स चिन्तयामास राजा नामाह्वकारणम् ।
विवेद च न तन्मौनी जग्रहेऽर्थञ्च तं नृपः ॥")

मौनयुक्ते, त्रि । यथा,—

"त्रिमौनी कुरुते यस्तु यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥
एतच्च मौनमरुणोदयमारभ्य स्नानपर्य्यन्तं कार्य्यं न तु स्नानकालमात्रे ।" इति तिथ्यादितत्त्वम् ॥

मौनेयः, पुं, (मुनेरपत्यं पुमान् । मुनि + "इतश्चानिञः ।" ४।१।१२२ । इति ढक् ।) गन्धर्व्वगणविशेषः । यथा,—

"गन्धर्व्वाप्सरसः पुण्या मौनेयांस्तु निबोधत ।
चित्रसेनोग्रसेनौ तु ऊर्णायुरनघस्तथा ॥
धृतराष्ट्रस्तथोमाश्च सूर्य्यवर्च्चास्तथैव च ।
युगस्तृणपल्काश्चौ निर्दिश्चरथस्तथा ॥
त्रयोदशः शालिशिराः पर्य्यन्यश्च चतुर्द्दशः ।
इत्येते देवगन्धर्व्वाश्चतुर्द्दश प्रकीर्त्तिताः ॥"

इति वह्निपुराणम् ॥

(जनदरोमभेदे, स्त्री । यथा, हरिवंशे ।२१८।४७।
"काश्मा शारदती चैव मौनेयाश्चरत: स्मृता: ।")
मौरजिक:, त्रि, (मुरजवादनं शिल्पमस्य । मुरज+"शिल्पम् ।"४।४।५५। इति ठक् ।)
मुरजवादक: । इत्यमर: ।२।१०।१३॥
मौर्ख्यं, क्ली, (मूर्खस्य भाव: । मूर्ख+"वर्णदृढ़ादिभ्य: ष्यञ् च ।"५।१।१२३। इति ष्यञ् ।)
जाड्यम् । इति हेमचन्द्र: । ३ । २२६ ॥ (यथा, सुश्रुते शारीरस्थाने ४ अ: ।
"अनवस्थितता मौर्ख्यं भीरुत्वं जलिकाप्रियता ।")
मौर्वी, स्त्री, (मूर्वाया विकार: । मूर्वा+"अवयवे च प्राण्यौषधिवृक्षेभ्य: ।" ४ । ३ । १३५ । इति अण् । ङीप् ।) धनुर्गुण: । इत्यमर: । २ । ८ । ८५ । (यथा, रघु: । १ । १९ ।
"श्वाजेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ।"
ज्याधनुर्गुणी । इति रत्नमाला ॥ कोंगा इति भाषा ॥ (मूर्वामयी । यथा, मनौ ।२।४२ ।
"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥")
मौल:, पुं, (मूलं वेत्तीति । मूल+अण् ।) भूम्यादेर्मूलज्ञाता । मोड़ल् इति भाषा । यथा,—
"यत् परम्परया मौला: सामन्ता: स्वामिनं विदु: ।
तदन्वयस्यागतस्य दातव्या गोचरैर्मही ॥"
इति दायतत्त्वम् ॥
तस्य लक्षणं यथा,—
"ये तत्र पूर्व्वं सामन्ता: पश्चाद्देशान्तरं गता: ।
तन्मूलत्वात्तु ते मौला ऋषिभि: परिकीर्त्तिता: ॥"
इति मिताक्षरा ॥
(विजिगीषोररिमध्योदासीन: । यथा, कामन्दकीये । ८ । ३४ ।
"चत्वार: पार्थिवा मौला: पृथङ्मित्रै: सहाष्टकम् ॥"
मूलभूते, त्रि । यथा, तत्रैव ।८।२५ । [या: ।
"मौला द्वादश याश्चैता क्षमाद्याद्यास्तथा च सप्ततिश्चाधिका ज्ञाता: सर्व्वं प्रकृतिमण्डलम् ॥")
मौलि:, पुं, स्त्री, (मूल+सुतङ्गमादित्वात् इञ् ।)
चूड़ा । (यथा, महाभारते । ९ । ५९ । ५ ।
"एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत् ।
शिरश्च राजसिंहस्य पादेन समलोड़यत् ॥")
किरीटम् । (यथा, हरिवंशे । ९७ । ३० ।
"इयञ्च सा मया मौलिरहृता वत्सलालयात् ॥")
संयतकेश: । इत्यमर: । ३ । ३ । १९२ । (यथा, रघौ । ७ । ६६ ।
"स चापकोटीनिहितैकबाहु:
शिरस्त्रनिष्कर्षणभिन्नमौलि: ।
ललाटबद्धश्रमवारिबिन्दु:
भीतां प्रियामेत्य वचो बभाषे ॥")
मस्तकम् । इति हेमचन्द्र: । ३ । २ । २३० ॥
(यथा, आर्य्यासप्तशत्याम् । ४२४ ।
"भालनयनेऽग्निरिन्दुर्मौलौ गाङ्गे भुजङ्गमणिदीपा: ॥"
प्रधान: । यथा, मार्कण्डेये । ५९ । १४ ।
"मौलयस्ते महाकाया: शालपोतकरम्भका: ॥")
मौलि:, पुं, (मूलस्यादूरभव: । मूल+सुतङ्गमादित्वादिञ् ।) अशोकवृक्ष: । इति मेदिनी ॥
मौलि:, स्त्री, (मूले जाता । मूल+इञ् ।)
भूमि: । इति मेदिनी ॥
मौलिक:, पुं, (मूले आद्ये जात: । मूल+ठञ् ।)
कुलीनभिन्न: । यथा राढ़ीयवारेन्द्रब्राह्मणस्य श्रोत्रिय: तथा कायस्थस्य मौलिक: । एवं दाक्षिणात्यवैदिकब्राह्मणस्य अन्यपूर्ब्बापरिणीतापि तत्पदवाच्य: । वङ्गजकायस्थस्य स च मध्यल्यशब्दवाच्य: । यथा । अथ मध्यल्यलक्षणमाह ।
मध्यल्यशब्दो रूढ़ इत्यन्य: । विल्वकपित्थवत् ।
मध्यल्य: कुलमध्यस्थकुलीनस्य विश्रामस्थलमित्यर्थ: । मध्यल्यशब्दस्य लक्षणान्तरम् । कुलीनेतरविशुद्धवंशजातकत्वे सति दशपुरुषावधि अनवच्छिन्नकुलार्च्चनत्वं मध्यल्यत्वम् । स च द्विविध: । सिद्ध: साध्यश्च । सिद्धत्वं प्रकृतमध्यल्यत्वम् । प्रकृतविशुद्धवंशजातत्वे सति दशपुरुषावधिकुलार्च्चकत्वं सिद्धत्वम् । सिद्धपदाकाङ्क्षित्वे सति दशपुरुषावधिकुलार्च्चकत्वं साध्यत्वम् । अस्य प्रशंसामाह ।
"कुलीनकुलरक्षार्थं विवादेषु मीमांसका ।
एतेषां गुणमाश्रित्य मध्यल्य: कुलमुत्तमम् ॥"
इति कुलदीपिका ॥*॥
दक्षिणराढ़ीयकायस्थस्याष्टसन्मौलिका यथा,—
"गौड़ेऽष्टौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धाः
स्ते दत्ता: सेनदासा: करगुहसहिता:पालिता: सिंहदेवा: ।
ये वा पश्चाभियुक्ता: क्षितिविनयगुण: सप्ततिस्ते द्विपूर्ब्बा
मिश्राद्या शेष राशा चरणगुणयुता मौलिकत्वेन साध्या: ॥"
अपि च ।
"सेनो दत्त: करो शेषो दासो देव: प्रतिष्ठित: ।
पालित: सिंहधर्म्मज्ञो गुह: सन्मौलिका: स्मृता: ॥"*॥
द्विसप्ततिसाध्यमौलिका यथा,—
"होड़: सरधरधरश्री चाख
आयिच सोम: पैसुर नाम: ।
भञ्जो बिन्दो गुह बल लोध:
शर्म्मा वर्म्मा कुर भूँयि चन्द्र: ॥
नन्दी रक्षित राजादित्यौ
विष्णुर्नाग: खिल पिल गून: ।
दत्तो गुप्त: पालो भद्र
सोमचाकुर कुन्दुर नाथ: ॥
धाँयिर्हैश्यो मानो नन्दो
दाहा दाना राहुत नाना ।
दाहा दाना मल्ल उपमाना ॥
ज्ञाम: श्योमो बर वै श्रोष
सेदल्लिंचश्चांश आश: ।
शक्तिर्भूतो नन्दो श्याम:
श्येमो हेमो वर्द्धन रङ्ग: ।
शूर: कीर्त्तिवंश: कुण्डो
नन्दी शीलो धनुर्गुण: ॥"
इति द्विसप्ततिमौलिका: ॥*॥
अन्यच्च ।
"देवो भूदेवभक्तो गुहवरगुणयो दास ईशानदास:
सेनो दत्त: सुदत्तामहितजनचय: पालितो धर्म्मपाल: ।
सिंह: सिंहप्रताप: क्षितिनिकरकरादानदक्ष: करोऽष्टौ
गौड़ेऽष्टौ संस्थितास्ते गुणगणनिपुणा मौलिकत्वेन सिद्धा: ॥*॥
होड़चाधरश्रीखिलसोमा
भञ्जविन्दगुहराजराहुता: ।
चन्द्रपालबलनामरक्षिता
लोधशर्म्मभुँयिवर्म्मचन्धरा: ॥
कुन्दधाँयिगुयिभद्रपैसुरा
नन्दगुप्तचरकीर्त्तिवर्द्धना: ।
श्येमहेमगणनाथविष्णवो
श्नरङ्गपिलकुरधनुर्गुणा: ॥
तेजोऽर्णवसरधरायिच शक्तिभूता:
श्योमौष श्याम विदशील यशोम नन्दी ।
दाहाकुरेन्द्रशुभकुण्डमनोपमाना
दानाशगूतविदिता भुवि कीर्त्तिमन्त: ॥
हैशादित्यौ राय राहा नागा च ज्ञामकस्तथा ।
द्विसप्ततिमिता: साध्या मौलिका विदिता: क्षितौ ॥"
इति कुलाचार्य्यकारिका ॥*॥
(देशविशेष: । यथा, मार्कण्डेये । ५७ । ४८ ।
"मौरिका मौलिकाश्चैव अश्मका भोगवर्द्धना: ॥")
त्रि, मूलसम्बन्धिनि मौलसम्बन्धिनि च ॥ (भारभूतं मूलं हरति वहत्यावहति वा । मूल+
"तद्धरति वहत्यावहति भाराद् वंशादिभ्य: ।"
५।१।५० । इति ठञ् । मूलभारहारके मूलभारवाहके मूलभारानेतरि च । इति व्याकरणम् ॥)
मौषलं, क्ली, (मुषलमिव । मुषलस्येदमिति वा । मुषल+अण् ।) मुषलवत् । यथा,—
"गङ्गायां मौषलं स्नानं महापातकनाशनम् ।"
इति प्रायश्चित्ततत्त्वधृतभविष्यपुराणवचनम् ॥
महाभारतस्याष्टादशपर्व्वान्तर्गतपर्व्वविशेष: ।
यथा,—
"मौषलं पर्व्व चोद्दिष्टं ततो घोरं सुदारुणम् ।
महाप्रस्थानिकं पर्व्व स्वर्गारोहणिकं तत: ॥"
इति महाभारते आदिपर्व्व ॥
मुषलसम्बन्धिनि, त्रि ॥

मोटा, स्त्री, मुष्टिप्रहरणक्रीडा। इत्यमरः।३।५।५॥
"मुष्टिप्रहरणं यस्यां क्रीडायां मोटा सः(सा) स्त्रियां क्तिन्ति वृद्धिः यवीलोपः इति इकारलोपः। स्त्रियामत इत्याप्।" इति तट्टीकायां भरतः॥

मौहूर्त्तः, पुं, (मुहूर्त्तं अधीते वेद वा। मुहूर्त्त+"तदधीते तद्वेद।" ४।२।५०। इत्यण्।) ज्योतिर्वित्। इत्यमरः।२।८।१४॥ (यथा, महाभारते।१२।१२१।४६।
"भिक्षुकाः प्राड्विवाकाश्च मौहूर्त्ता दैवचिन्तकाः॥")

मौहूर्त्तिकः, पुं, (मुहूर्त्तं तद्बोधकं शास्त्रमधीते वेद वा। मुहूर्त्त+"क्रतूक्थादिसूत्रान्ताट्ठक्।" ४।२।६०। इति ठक्।) ज्योतिर्वित्। इत्यमरः।२।८।१४॥ (यथा, कथासरित्सागरे।२२।१३३।
"ततो मौहूर्त्तिकादेशात्दत्तवेदूर्य्यरत्नका।
सा मया परिणीता भूमिजिताखिलबन्धुना॥"
इत्येकस्यामुहूर्त्तोद्भवदेवगणविशेषः। यथा, भागवते।६।६।८।
"मौहूर्त्तिका देवगणा मुहूर्त्तायाश्च जज्ञिरे॥"
मुहूर्त्तोद्भवे, त्रि। यथा, भागवते।५।१३।२२।
"मौहूर्त्तिकादृश्यस्य समागमाच्चमे
दुःसङ्गमङ्क्तोऽपहतोऽविवेकः॥")

म्ना, अभ्यासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) अभ्यासः पौनःपुन्येनानुशीलनम्। मनति सन्ध्यां ब्राह्मणः। इति दुर्गादासः॥

म्रक्ष, संघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षति पयसा शक्तून् लोकः। इति दुर्गादासः॥

म्रक्ष, क म्लक्षणे। म्लेहने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षणं द्रव्यस्य द्रव्यान्तरेण योजनम्। क, म्रक्षयति घृतेनान्नं लोकः। इति दुर्गादासः॥

म्रक्षः, पुं, (म्रक्ष+घञ्।) स्वदोषगूहनम्। इति त्रिकाण्डशेषः॥ म्रक्षणम्॥ (वधः। यथा, ऋग्वेदे।८।५०।१०।
"उग्रबाहुर्म्रक्षकृत्वा पुरन्दरो यदिमे शृणवद्धवम्।"
"म्रक्षकृत्वा वधकर्त्ता।" इति तद्भाष्ये सायणः॥)

म्रक्षणं, क्ली, (म्रक्ष+कर्म्मणि ल्युट्।) तैलम्। इति हेमचन्द्रः।३।८६॥ द्रव्यस्य द्रव्यान्तरेण संयोजनम्। म्लेहनम्। राशीकरणम्। इति म्रक्षधातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥

म्रद, म ष ङ चोदे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) रेफयुक्तः। चोदश्चूर्णीकरणम्। म, म्रदयति। ष, म्रदा। ङ, म्रदते काननं दन्ती। इति दुर्गादासः॥

म्रदिमा, [न्] पुं, (म्रदोर्भावः। म्रदु+"पृथ्वादिभ्य इमनिज्वा।" ५।१।१२२। इति इमनिच्। "र ऋतो हलादेर्लघोः।" ६।४।१६१।
इति ऋकारस्य रादेशः। "टेः।" ६।४।१५५। इति टेर्लोपः।) मृदुता। यथा, राजतरङ्गिण्याम्।८।५६६।
"म्रदिम्ना पापिनस्तस्य नाज्ञायि क्रूरता जनैः।
मधुरिम्णो विषस्येव शक्तिः प्राणापहारिणी॥")

म्रदिष्ठः, त्रि, अतिशयमृदुः। मृदुशब्दादिष्ठन्प्रत्ययेन निष्पन्नः॥

म्रदीयान् [स्] त्रि, अतिशयमृदुः। मृदुशब्दादीयसुप्रत्ययेन निष्पन्नः॥

म्लातनं, क्ली, कैवर्त्तीमुस्तकम्। इति शब्दचन्द्रिका॥

म्लुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक० सेट्। क्त्वावेट्।) उ,म्लोचित्वा म्लुक्त्वा। इर्, अम्लुचत् अम्लोचीत्। इति दुर्गादासः॥

म्लुञ्च, उ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्लुञ्चित्वा म्लुक्त्वा। इति दुर्गादासः॥

म्लेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेटत्। म्लेटति लोकः उन्मादयतीत्यर्थः। इति दुर्गादासः॥

म्लेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेडत्। म्लेडति लोक उन्मादयतीत्यर्थः। इति दुर्गादासः॥

म्लक्तं, क्ली, (म्लक्+क्तः।) चोरितम्। यथा,—
"चोरितं मुषितं म्लक्तं प्रतीतम्बु प्रतीक्षितम्॥"
इति भूरिप्रयोगः॥

म्लानं, त्रि, (म्लै हर्षक्षये+क्तः। "संयोगादेरातो धातोर्यण्वतः।" ८।२।४३। इति निष्ठातस्य नः।) मलिनम्। यथा,—
"मलिनं कच्चरं म्लानं कश्मलञ्च मलीमसम्॥"
इति हेमचन्द्रः॥
(यथा, मार्कण्डेये।६२।१६।
"स चिन्तयामास तदा किं म्लाना गजगामिनी।
निश्वासपवनम्लाना गिरावच वक्ष्यति॥")
दुर्बलम्। (यथा,—
"सर्व्वेषु भूमं परिहीनमध्यं
म्लानन्तथान्तेषु च मध्यभूयम्॥"
इति माधवकृतरुग्विनिश्चयस्य पाण्डुरोगव्याख्याने विजयरक्षितोक्तम्॥) (म्लै+भावे क्तः।) म्लानिः। यथा, मार्कण्डेये।३५।२४।
"द्रव्यावयवधानाच्च म्लानतापानलाभकर्म्मसु।
आचामेव यथाप्रायं वाची विपरिधाय च॥")

म्लानिः, स्त्री, (म्लै+निः। स च नित्। इत्युणादिसूत्रेः।४।५१।) कान्तिक्षयः। यथा, देवीभागवते।१।८।१८।
"प्रेषितस्तु तदा ब्रह्मा देवी चैवान्तरीयगा।
न मत्स्यतुलदा तौ तु विष्णुस्तु म्लानिमाप्तवान्॥")

म्लिष्टं, क्ली, (म्लेच्छ+क्तः+"क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्ट।" ७।२।१८। इति निपातितम्।) अस्पष्टवाक्यम्। तत्पर्य्यायः। अविस्पष्टम् २। इत्यमरः।१।६।२१॥

म्लिष्टः, त्रि, (म्लेच्छ+क्तः।) अव्यक्तवाक्। म्लानः। इति मेदिनी। टे, २५॥

म्लुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्लोचित्वा म्लुक्त्वा। इर्, अम्लुचत् अम्लोचीत्। इति दुर्गादासः॥

म्लेच्छ,कि देश्योक्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-अक०-सक० च-सेट्।) देश्या ग्राम्या उक्तिर्देश्योक्तिरसंस्कृतकथनमित्यर्थः। कि, म्लेच्छयति म्लेच्छति मूढः। अपशब्दमसौ विद्वान् म्लेच्छति घृतमत इति हलायुधः॥ अनेकार्थत्वाद्धातूनामस्फुटेऽपि। तथा चामरः। अथ म्लिष्टमविस्पष्टमिति। म्लेच्छ अव्यक्तायां वाचि इति प्राञ्चः। तत्र रमानाथस्तु। म्लेच्छति वटुर्म्लेच्छं वदतीत्यर्थः। अव्यक्तायामिति पाठे कृतस्वितायां वाचीत्यर्थः।
'तत्काज्ञानमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥'
इति भाष्यवचनेन नञोऽप्राशस्त्यार्थत्वात् इति वाक्यान्नाथ हलायुधोक्तमुदाहृतवान्। इति दुर्गादासः॥

म्लेच्छं, क्ली, (म्लेच्छदेशः उत्पत्तिस्थानत्वेनास्त्यस्य। अर्शआद्यच्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"हिङ्गुलन्दरदं म्लेच्छमिङ्गुलं चूर्णपारदम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

म्लेच्छः, पुं, (म्लेच्छयति वा म्लेच्छति असंस्कृतं वदतीति। म्लेच्छ+अच्।) किरातशबरपुलिन्दादिजातिः। इत्यमरः॥ पामरभेदः। पापरक्तः। अपभाषणम्। इति मेदिनी। छे, ६॥ म्लेच्छादीनां सर्व्वधर्म्मराहित्यमुक्तं यथा, हरिवंशे।१४।१५—१८।
"सगरः स्वां प्रतिज्ञाञ्च गुरोर्व्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः।
सर्व्वे ते क्षत्रियास्तात धर्म्मस्तेषां निराकृतः॥
वशिष्ठवचनाद्राजन् सगरेण महात्मना॥"
शकानां शकदेशोद्भवानां क्षत्रियाणाम्। एवं यवनादीनामिति। अत्र यवनशब्दस्तद्देशोद्भवाची यवनंकृतीयादिः। यवनो देशवेगिनोरिति त्रिकाण्डशेषाभिधानदर्शनात्॥ * ॥ तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथात्रतान् यवनादीनुपक्रम्य ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति। बौधायनः।
"गोमांसखादको यश्च विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वम्॥ * ॥
अपिच। देवयान्यां ययातेर्द्वौ पुत्रौ यदुः तुर्व्वसुश्च।

शर्म्मिष्ठायां त्रयः पुत्राः द्रुह्युः अनुः पुरुश्च। तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाविवर्त्तनं कृतवन्तः पित्रा शप्ताः। ज्येष्ठपुत्रं यदुं शशाप तव वंशे राजा चक्रवर्त्ती मा भूदिति। तुर्व्वसुं द्रुह्युमनुं शशाप युष्माकं वंश्या वेदबाह्या म्लेच्छा भविष्यन्ति। इति श्रीभागवतमतम्॥ *॥

(“असृजत् पह्लवान् पुच्छात् प्रस्रावाद्द्राविडान् शकान्।
योनिदेशाच्च यवनान् शकृतः शवरान् बहून्॥
मूत्रतश्चासृजत् काञ्चीञ्छरभांश्चैव पार्श्वतः।
पौण्ड्रान् किरातान् यवनान् सिंहलान् वर्व्वरान् खशान्॥
चिवुकांश्च पुलिन्दांश्च चीनान् हूणान् सकेरलान्।
ससर्ज्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥”
सा वशिष्ठस्य धेनुः। इति महाभारते।१।१७५। ३५—३७॥) अन्यच्च। “शकयवनकाम्बोजपारदपह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः। अथैतान् वशिष्ठो जीवन्मृतकान् कृत्वा सगरमाह। वत्स वत्सालमेभिर्जीवन्मृतकैरनुसृतैः। एते च मयैव त्वत्प्रतिज्ञापालनाय निजधर्म्मद्विजसङ्गपरित्यागं कारिताः। स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेशान्यत्वमकारयत्। यवनान्मुण्डितशिरसोऽर्द्धमुण्डान् शकान् प्रलम्बकेशान् पारदान् पह्लवांश्च श्मश्रुधरान् निःस्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार। ते चात्मधर्म्मपरित्यागाद्ब्राह्मणैश्च परित्यक्ता म्लेच्छतां ययुः।” इति विष्णुपुराणे।४।३।१८—२१॥ *॥ प्रकारान्तरेण तस्योत्पत्तिर्यथा,—

सूत उवाच।
“वंशे स्वायम्भुवस्यासीदङ्गो नाम प्रजापतिः।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्मुखी॥
सुनीथा नाम तस्यास्तु वेनो नाम सुतः पुरा।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः।
लोकेऽप्यधर्म्मकृज्जातः परभार्य्यापहारकः॥
धर्म्माचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः।
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः॥
शापेन मारयित्वैनमराजकभयार्दिताः।
ममन्थुर्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः॥
तत्कायान्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः।
शरीरे मातुरंशेन कृष्णाञ्जनसमप्रभाः॥”
इति मत्स्यपुराणे।१०।३—८॥ *॥
म्लेच्छभाषाभ्यासनिषेधो यथा,—
“न चालयेद्दिष्टकाभिः फलानि वै फलेन तु।
न म्लेच्छभाषां शिक्षेत नाकर्षेच्च पदासनम्॥”
इति कौर्म्मे उपविभागे १५ अध्यायः॥*॥

तेषु मध्यमा तामसी गतिर्यथा, मानवे।१२।४३।
“हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः॥”
(मन्त्रकाले म्लेच्छापचारव्यवहृतं यथा, मनुसंहितायाम्।७।१४९।
“जडमूकान्धवधिरांस्तैर्य्यग्योनान् वयोऽतिगान्।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकालेऽपसारयेत्॥”
“अथवा एवंविधा मन्त्रिणो न कर्त्तव्याः। बुद्धिविभ्रमसम्भवात्।” इति तट्टीकायां मेधातिथिः॥
म्लेच्छानां पशुधर्म्मित्वम्। यथा, महाभारते।१।८४।१५।
“गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च।
पशुधर्म्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि॥”)
म्लेच्छकन्दः, पुं, (म्लेच्छप्रियः कन्द इति मध्यपदलोपी कर्म्मधारयः।) लशुनम्। इति राजनिर्घण्टः॥ (तस्य पर्य्यायो यथा,—
“लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
म्लेच्छजातिः, स्त्री, (म्लेच्छस्य जातिरिति षष्ठीतत्पुरुषः म्लेच्छरूपा जातिरिति कर्म्मधारयो वा।) गोमांसखादकबहुविरुद्धभाषकसर्व्वाचारविहीनवर्णः। यथा,—
“गोमांसखादको यस्तु विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥”
इति प्रायश्चित्ततत्त्वधृतबौधायनवचनम्॥
अपि च।
“भेदाः किरातशवरपुलिन्दा म्लेच्छजातयः॥”
इत्यमरः।२।१०।२०॥
अन्यच्च।
“पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराताः दरदाः खशाः॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः॥”
इति मानवे १० अध्यायः॥
म्लेच्छदेशः, पुं, (म्लेच्छानां देशः म्लेच्छप्रधानो देशो वा।) चातुर्व्वर्ण्यव्यवस्थादिरहितस्थानम्। तत्पर्य्यायः। प्रत्यन्तः २। इत्यमरः।२।१।७॥ भारतवर्षस्यान्तं प्रतिगतः प्रत्यन्तः। म्लेच्छति शिष्टाचारहीनो भवत्यत्र म्लेच्छः अल्। स चासौ देशश्चेति म्लेच्छदेशः। किंवा म्लेच्छयन्ति असंस्कृतं वदन्ति शिष्टाचारहीना भवन्तीति वा पचाद्यचि म्लेच्छा मौचजातयः तेषां देशो म्लेच्छदेशः। भारतवर्षस्यान्तः शिष्टाचाररहितः कामरूपवङ्गादिः। उक्तञ्च।
“चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।
म्लेच्छदेशः स विज्ञेय आर्य्यावर्त्तस्ततः परमिति॥”
इति भरतः॥
(अपि च, मनुः।२।२३।
“कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततःपरम्॥”)
म्लेच्छभोजनं, क्ली, (भुज्यते यदिति। भुज्+कर्म्मणि ल्युट्। ततो म्लेच्छानां भोजनम्।) यावकः। इति शब्दरत्नावली॥
म्लेच्छभोजनः, पुं, (भुज्यतेऽसौ इति। भुज्+ल्युट्। म्लेच्छानां भोजनः।) गोधूमः। इति त्रिकाण्डशेषः॥
म्लेच्छमण्डलं, क्ली, (म्लेच्छानां मण्डलं समूहोऽत्र।) म्लेच्छदेशः। इति हेमचन्द्रः॥
म्लेच्छमुखं, क्ली, (म्लेच्छे म्लेच्छदेशे मुखमुत्पत्तिरस्य। इत्यमरटीकायां रघुनाथः।) ताम्रम्। इत्यमरः।२।९।९७॥ (तथास्य पर्य्यायः।
“ताम्रमौडुम्बरं शुल्वमुडुम्बरमपि स्मृतम्।
रविप्रियं म्लेच्छमुखं सूर्य्यपर्य्यायनामकम्॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
“ताम्रमौडुम्बरं शुल्वं विद्यात् म्लेच्छमुखं तथा॥”
इति गारुडे २०८ अध्याये॥)
म्लेच्छाशः, पुं, (म्लेच्छैरश्यते इति। अश्+कर्म्मणि+घञ्।) म्लेच्छभोजनः। गोधूमः। इति केचित्॥
म्लेच्छास्यं, क्ली, (म्लेच्छे म्लेच्छदेशे आस्यमुत्पत्तिरस्य।) ताम्रम्। इति हारावली॥
म्लेच्छितं, क्ली, (म्लेच्छ् इत्यौतौ+क्तः।) म्लेच्छभाषा। अपशब्दः। तत्पर्य्यायः। परभाषा २। इति हारावली॥
म्लेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेटत्। म्लेटति लोकः उन्माद्यतीत्यर्थः। इति दुर्गादासः॥
म्लेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेडत्। म्लेडति। उन्माद्यतीत्यर्थः। इति दुर्गादासः॥
म्लेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अमिम्लेवत्। ङ, म्लेवते। इति दुर्गादासः॥
म्लै, कान्तिसंक्षये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) म्लायति चन्द्रो दिवसे। इति दुर्गादासः॥